

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

292
3I2.

Anis B[illegible] Binding House
Karachh Mohalla, D.H.E.L. Road,
JAWALAPUR

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

292
2 I (3)

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ऋग्वेदसंहितायाः प्रथमद्वितीययोर्भागयोः या अक्षराशुद्धयः अनन्तरमुपलक्षितास्ता
अत्र संगृह्यन्ते—

## प्रथमभागे

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १०३ | १९ | °त्यनृवृत्ते° | °त्यनुवृत्ते° |
| १३५ | २३ | शृण्विरे | शुण्विरे |
| १५० | २५ | आदंध्नोति | आदंध्नोति |
| १७० | २२ | धारयन् | धारयंन् |
| १७२ | १२ | सोमासः | सोमास् |
| १७३ | ९ | सहस्राक्षा | सहस्राक्षा |
| १८६ | २२ | ऊम् | ऊँ |
| १८७ | २७ | व्रतानि | व्रतानिं |
| २०० | ३ | होतरस्य | होतरस्य |
| २०० | १५ | देवंदेवं | देवंदेवं |
| २३४ | ११ | अस्मे | अस्मै |
| २४५ | १६ | एकश्चरन्तु° | एकश्चरंन्तु° |
| २४६ | २८ | अनवद्यस्य | अनवद्यस्य |
| २५७ | १५ | त्रिरश्विना | त्रिरंश्विना |
| २७८ | १३ | रथेऽशुभम् | रथेऽशुभंम् |
| ३०३ | १६ | दुःऽशेव | दुःशेवं |
| ३५५ | २४ | मायिनः | मायिनंः |
| ३६६ | २ | अनु | अनुं |
| ३६६ | ४ | अंहुतऽप्सवः | अहुंतऽप्सवः |
| ३७० | २४ | परि | पारे |
| ३७५ | २५ | वाजेऽभिः | वाजेभिः |
| ३८१ | १४ | मन्दिना | मन्दिनां |
| ३८१ | २८ | रोरुवन् | रोरुवत् |
| ३८३ | २४ | स्थविरं | स्थविरं |
| ४४१ | ९ | वदत | वदत |
| ४४४ | २५ | गन्तणां | गन्तृणां |
| ४५४ | १२ | ईम् | ईम् |
| ४९० | २० | द्यम्नं | द्युम्नं |
| ५५४ | २३ | नः | नः |
| ५७८ | २ | °र्यश्नवत् | °र्यैश्नवः |
| ५७८ | १५ | अव | अवं |
| ६१८ | १२ | °ञ्छिम्यूंश्च | °ञ्छिम्यूँ |
| ६५६ | २५ | परिषक्ते° | परिषिक्ते |
| ६५९ | १४ | °मवयस्यामुत | °मवमस्य |
| ६६९ | १९ | नवीयाम् | नवीयान |
| ६७२ | १८ | जेत्रां | जैत्रीं |
| ६८२ | ८ | दुवस्यथः | दुवस्यथं |
| ६८६ | १९ | तुर्वितिम् | तुर्वीतिं |
| ७०१ | २६ | °द्विपदे | °द्विपदे |
| ७०८ | १२ | अग्नेः | अग्नेः |
| ७१९ | ६ | निधिम्ऽइव | निधिम् |
| ७५७ | ७ | नँः | नृँः |
| ७८५ | २१ | उपमा | उपऽमा |
| ८०८ | ६ | श्रुष्टीऽवानः | श्रुष्टीऽव |
| ८१० | १२ | सखिऽयते | सखिऽ |
| ८२२ | १५ | तरुषसा | तरूषस |
| ८४३ | १५ | °वृङ्गरैपावपः | °वृङ्गैरप |
| ८४६ | २२ | ब्रुतव | ब्रुवत |
| ८७१ | २ | त्वा | त्वां |

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ७३ | ११ | जषनुम् | जनुषम् |
| ३९ | ९ | माययोर्ध्वा | मायोर्ध्वा |
| ० | १ | अभी मृतस्य | अभीमृतस्य |
| ६ | १७ | °स्तथावित° | °स्तस्थावित° |
| ६ | ३ | चुतुर्भिः | चतुःऽभिः |
| ९ | ८ | वियार्य | विवार्य |
| ० | २३ | वक्षद्विपदे | वक्षद्विपदे |
| ७ | २ | अब्रवीदृता | अब्रवीदृता |
| ७ | १८ | मांसमेकः | मांसमेकः |

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १०४१ | २४ | तथा | यथा |
| १०४९ | १४ | सूरींश्चिद्यदि | सूरींश्चिद्यदि |
| १०७२ | १ | स्यन्द्रा | स्पन्द्रा |
| १०७२ | ३ | स्यन्द्रा | स्पन्द्रा |
| १०७४ | २१ | वाजैर्मध्ना | वाजैर्मथ्रा |
| १०७४ | २३ | मध्ना | मथ्रा |
| १११० | ५ | वैरिणाः | बैरिणाः |
| १११० | ७ | वैरिणाः | बैरिणाः |
| १११३ | १७ | पुष्य° | पुष्प° |
| १११३ | २० | पुष्यम् | पुष्पम् |

CCO. Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तिलक-महाराष्ट्र-विद्यापीठ-शाखाभूत-

वैदिक-संशोधन-मण्डलेन

प्रकाशिता

# ॥ ऋग्वेदसंहिता ॥

COMPILED

श्रीमत्सायणाचार्यविरचितभाष्यसमेता

CHECKED 1973

प्रथममण्डलात्मकः

## प्रथमो भागः

पुस्तकालय
गुरुकुल कांगड़ी

मूल्यं १२ रूप्यकाणि

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

*Printed by* **S. R. Sardesai**, B. A., LL. B., Manager, Navin Samarth Vidyālaya's
Samarth Bhārat Press, Poona 2

❀ ओ३म् ❀

पुस्तक-संख्या .....

पंजिका-संख्या .....

पुस्तक पर सर्व प्रकार की निशानियां लगाना वर्जित है । कोई महाशय १५ दिन से अधिक देर तक पुस्तक अपने पास नहीं रख सकते। अधिक देर तक रखने के लिये पुनः आज्ञा प्राप्त करनी चाहिये।

*All Rights Reserved*

19728

*Published by* **N. S. Sontakke**, B. A., (T. U.), Secretary, Vaidic Samshodhan Mandal
Tilak Smarak Mandir, Poona 2

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Tilak Maharashtra University
VAIDIC SAMSHODHAN MANDAL
(*Vedic Research Institute*)

19728

# RGVEDA-SAMHITĀ

WITH THE

## COMMENTARY OF SĀYAṆĀCHĀRYA

Vol. I

MANDAL I

Price Rs. 12

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

## Members of the Executive Committee

*President*

Prin. V. K. Rajwade. M. A.

*Vice-President*

Mr. C. V. Vaidya, M. A., LL. B.
Vice-Chancellor, Tilak University.

*Members of the Committee*

Mr. N. C. Kelkar, B. A., LL. B.

Āyurvedāchārya P. G. Nanal

Mr. J. S. Karandikar, B. A., LL. B.

Āchārya V. P. Limaye, B. A., (T. U.)

,, S. J. Bhagwat, B. A., (T. U.)

Vidyā-nidhi Sidheshwarshastri Chitrāv

Mr. R. D. Desai, B. A.

Pandit S. D. Satwalekar

Mr. N. B. Pavagi, B. A.

,, Y. R. Date, B. A., LL. B.

,, V. V. Ranade, B. A., LL. B.

,, R. V. Patwardhan, B. A., LL. B.

Mr. S. K. Bhave, B. A., (T. U.)
Registrar, Tilak University.

*Treasurer*

Mr. H. V. Tulpule, B. A., LL. B.

*Secretary*

Mr. N. S. Sontakke, B. A., (T. U.)

Kanya Collection. Haridwar. Digitized by eGangotri

THE PERSONNEL

of the

# EDITORIAL BOARD

1 **Prin. V. K. Rajwade,** M.A.

2 **M. M. Vāsudeoshāstri Abhyankar.**

3 **Mr. N. S. Sontakke,** Vāngmaya-Vishārad,
(*Managing Editor*).

4 **Pandit T. S. Varadarājasharmā,**
Vedānta-Vidyā-Praveena.

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Dedicated to
The Late
Lok. Bal Gangadhar Tilak



THE GREAT VEDIC SCHOLAR

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

*Dedicated to*

The Late

**Lok. Bal Gangadhar Tilak**

**THE GREAT VEDIC SCHOLAR**

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CC0; Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

# FOREWORD

The work of publication undertaken by this institute is by no means new. Excellent editions have appeared in the past and will do so in the future. Vedic works excellently edited, concordances and other helps are only a means to an end and that end is interpretation and discovery of the past through interpretation. European scholars have certainly shown the way but even their work has not been what it ought to be. My experience of the last twenty years has convinced me that every word in Ṛgveda must be exhaustively dealt with; inter-comparison on a limited scale is not sufficient; a word may not yield its real sense or senses by comparing its occurrences in only a few *Ṛks*. Any one who cares to dip into my "Words in Ṛgveda" Vol. I, and particularly reads the introduction will understand and appreciate my meaning. It is dangerous to follow tradition, even the tradition established by European scholars, as these latter have based their interpretations often on the authority of Ancient Indian commentators. What is wanted is a mind free from prejudice and prepossession and a persistent desire to work independently. Pitfalls there must be; yet we must persist. We have to deal with a document which on all hands is acknowledged to be the oldest in the world. Its language, grammar, idiom, everything has no parallel in modern Sanskrit; words modern in look have often not their modern senses. Exhaustive word-hunting leads to the discovery of unexpected senses; even the particle न yields more senses than the usual ones of negation and comparison. Unless the mystery lying enveloped in every word, howsoever insignificant in look, is laid bare, it is not possible to arrive at the true meaning in the minds of the composers. My work hitherto has been altogether small; yet even this small and limited acquaintance has borne in upon me a strong conviction that Ṛgveda is a work of real art and not a mere conglomerate of popular ballads, homely in style and homely in thought. The composers were clever learned men; they indulged in wit and humour; they were not inaccessible to woman's charm; they were men, had the feelings and passions of men and expressed them as poets like Kālidās have done. Readers will be surprised, if told, that numbers of *Ṛks* carry a double import; what is called "double entente" occurs very frequently and shows how Ṛgvedic



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

poets had cultivated the art of poetic expression. Such highly artistic literature could never have been the first piece of the literature of the world; such a fruit appears last in the poetic season. Simpler, less artistic, bald literature must have preceded. Would any one dare to say in the distant future that Kalidās was the first poet? Kālidās and Tennyson are the ripest fruits of two literatures; these two artists could not have done such excellent work if they had not had a long long past behind them; they worked on the past, availed themselves of the achievements of the past and then improved upon the past. This same seems to be the case with Ṛgveda; an extensive literature must have preceded. Through Ṛgveda we have to form an idea of what this preceding literature may have been; it would no doubt be a guess-work, but all the same even that guess-work would have an importance of its own. The Ṛgveda is a mine of valuable information and it is the duty of every genuine scholar to bring it into light. The task is vast; no single mind would be sufficient. Large numbers of devout scholars must work independently and patiently and then compare notes; the process is one of centuries; yet one must not lose heart. Some one will discover the truth though none of us may live to see it. The work has to be done and I hope will be done.

Vijayā Dashamī 1855.
28th Sept. 1933.
Vedic Research Institute,
Tilak Smarak Mandir,
Poona 2.

**V. K. Rajwade,**
*President.*

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

## INTRODUCTION

We have great pleasure in presenting to students and devout admirers of Ancient Indian Culture, the first volume of the Ṛgveda which contains the first Mandal and the commentary of Sayaṇāchārya thereon.

The Vaidic Samshodhan Mandal (The Vedic Research Institute) under whose auspices the work is being published, was founded in memory of the late Lokamānya B. G. Tilak on the 1st of August 1928, under the auspices of the Tilak Mahārāshtra University, Poona, with the following objects:—

(1) To provide facilities for higher studies in Vedic literature.

(2) To collect books and *Mss.* concerning Vedic literature.

(3) To publish original Vedic Texts with commentaries.

(4) To publish such other literature as would help the study of Vedic literature, *e. g.* Indices, Lexicons, Notes, Original contributions etc.

(5) To carry on research in general.

An authoritative edition of Ṛgveda with Sāyaṇa's commentary has been a desideratum for a number of years. Prof. Max Müller's edition is out of print as also the Bombay edition. It is a truism to say that a copy of Ṛgveda with Sāyana's commentary is essential for the study of Vedic literature; for Vedic studies must begin with Ṛgveda which is the source and foundation of all the other Samhitās, Brāhmanas etc. To remove the long-felt want of a reliable edition we had to do the preliminary work necessary for the publication of this Volume.

We have procured *Mss.* of Sāyaṇa's commentary from various parts of India and from outside India also, in Devanāgari, Grantha and Malyālam characters. The following gives a detailed account.

*The Bhāndārkar Oriental Research Institute, Poona.*

| | | | |
|---|---|---|---|
| क | $\frac{18b}{1870-71}$ | 2nd Ashtaka, | Samvat 1609. |
| ख | $\frac{No\ 5}{1916-18}$ | 2, 3 & 4 Ashtakas, | Shaka 1739. |
| ग | $\frac{No\ 18\ a}{1870-71}$ | 1st Ashtaka, | Samvat 1609. |
| घ | $\frac{No\ 3}{of\ Vishram\ (1)}$ | 1st Ashtaka. | |



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

*The Royal Asiatic Society, Bombay.*

च Ashtakas 1 & 2.

छ 1st Ashtaka.

ज 2nd Ashtaka.

*The Central Library, Baroda.*

य Acc. No. 200. 1st Ashtaka. ( Begins from the middle of the preface ( उपोद्घात ) and ends at the commentary of the first Mantra of the 18th Varga of the 8th Adhyāya ).

र Acc. No. 12233. Ashtaka 1. (Adyhāyās 1 & 2) Samvat 1879.

ल Acc. No. 12232. Ashtaka 1. Samvat 1879.

व Acc. No. 12231. Ashtaka 2. Leaves missing at frequent intervals. Shaka 1877.

*The India Office Library, London.*

प 2992 to 2999 Ashtakas 1 to 8 complete.

फ 3126 to 3129 ,, 1 to 8 ,,

These last two appear to be recent.

*The Saraswati Mahāl Library, Tanjore.*

त 597. Burnell's catalogue No. 2360 A. Ashtakas 1 to 8 complete.

थ 598. Burnell's Catalogue No. 2361. 1st Ashtaka; ending with the 15th Varga of the first Adhyāya.

द J. L. Collection No. 23. Ashtaka 1. (Adhyāyas 4 to 8). The *Ms.* is extremely worn out and moth-eaten.

ध J. L. Collection. Ashtaka 1. Adhyāyas 2 to 8. The manuscript omits the grammatical portion of the commentary. A very old but well-preserved manuscript.

*The Theosophical Society, Adyar.*

झ Ashtakas 1, 2, 3, 5 and 8.

झ१ Second Ashtaka; from the 2nd Adhyāya to the end of the Ashtaka.

*The Sanskrit College Library, Benares.*

ञ Second Ashtaka. Samvat 1851.

*The Palace Library, Trivandrum.*

ड़ Second Ashtaka. Begins from the 12th Varga of the first Adhyāya to the end of third Adhyāya.

*The Palace Library, Mysore.*

ष Ashtaka 1. Second Adhyāya only.

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

*The Govt. Mss. Library, Madras.*

ह First Ashtaka. Second Adhyāya only.

*Ms.* extremely worn out with some leaves missing.

*The Ānandāshram, Poona 2.*

ण Ashtakas 1 to 4.

The following *Mss.* were secured from private sources —

न Ashtakas 1 to 8 complete. From Veda-Shāstra-Sampanna Digambar-Shastri Nene, Gīrvāṇa Chchātra Samiti, Indore.

म Ashtakas 2, 5 & 7. Shaka 1596. *Ms.* very old and well-written. From Mr. Chidambar Dixit of Badli, Dist. Belgaum.

भ Ashtakas 3 to 8 complete and some portion from 164 Sukta of the first Mandal. Procured from Mr. Krishṇāchārya Malgi of Bagalkot, Dist. Bijapur.

श 1st Ashtaka. This remarkably correct *Ms.* is from Veda-Shāstra-Sampanna Raghunātha Shāstri Vedabhāshya of Gwalior.

स Ashtaka 1. Shaka 1606.

The following *Mss.* are solely in Grantha and Malyālam.

ट Ashtakas 1 & 2. (Introduction and full commentary on the 1st Hymn, and from the 23rd Varga of the fifth Adhyāya to the first 3 Adhayas of the 2nd Ashtaka.)

ठ 1st Ashtaka. (Adhyāyas 1, 7 and 8 complete).

ढ 1st Ashtaka. (Adhyāyas 2 to 6 complete).

The above *Mss.* were procured for us by Mr. T. R. Chintāmani, M. A., Senior Lecturer in the Oriental Research Institute of the Madras University.

क्ष Ashtaka 1 & 2 ( from the 29th Varga of the fifth Adhyāya to the end of the third Adhyāya of the 2nd Ashtaka ).

ञ 2nd Ashtaka. First 3 Adhyāyas complete.

We procured these *Mss.* from Brahmashri Brahmadatta Nambudri-pāda of Koodaloor Manakkal-Malabar.

*Mss.* in Grantha and Malyālam differ only in character; the mistakes, blank places, explanatory notes, grammatical additions etc. in the one appear in the other. This leads us to think that both were copied from an older *Ms.* These *Mss.* form one group. Those in Devanāgari fall into two groups :—(1) Old and (2) New. Space does not permit us to dilate upon the similarities and differences in the *Mss.* with examples though the disquisition would be useful to scholars. We hope to do that work later on. In incorporating better readings we have thoroughly considered both the relative

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

authenticity and the mutual support of all the *Mss.* Though there are good readings in the Grantha and Malyālam *Mss.*, we have adopted only such as find support in the Devanāgari. In a few places, however, we have adopted readings from these though they have no such warrant, as the readings which they displaced were clearly wrong. Had we succeeded in obtaining Devanāgari and non-Devanāgari *Mss.* complete and older than those in our possession, perhaps we would have been able to present to the public a more authentic edition. The oldest *Ms.* obtained by us is 450 years old and belongs to the Devanāgari group; but unfortunately it contains only one Ashtaka, namely the fourth.

In preparing this edition we have taken all care that is humanly possible. It is superfluous to say that we shall feel obliged to readers who draw our attention to any defect or defects that may still remain. Notwithstanding persistent close scrutiny misprints have occurred; a full list of these will be found at the end.

In conclusion, we feel it a duty to thank all those that have so kindly and so readily lent us or procured for us valuable *Mss.* from the libraries in their custody. We cannot conclude without offering our sincere thanks to those who have assisted us pecuniarily. Mr S. R. Sardesai, B. A., LL. B., proprietor of the Samarth Bhārat Press has been exceedingly helpful in making this edition as accurate as possible. We hope this edition will prove a great help to scholars in and out of India.

Vijayā Dashami, 1855.
28th Sept. 1933.
Vedic Research Institute,
Tilak Smarak Mandir,
Poona 2.

**N. S. Sontakke,**
*Managing Editor.*

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

# प्रास्ताविकम्

॥ श्रीगणेशाय नमः ॥

अथेदं सप्रश्रयं सामोदं च विद्वज्जनसमक्षं निवेदयामो यदधुना श्रीमत्सायणाचार्यविरचितभाष्य-समेताया ऋग्वेदसंहितायाः प्रथममण्डलात्मकोऽयं प्रथमो भागः संशोध्य मुद्राप्य प्राकाश्यं नीयते इति ॥

वेदस्य लक्षणं, प्रमाणं, तत्प्रामाण्यनित्यत्वादिकं तदर्थज्ञानविचारादीनामत्यावश्यकत्वमित्यादयो बहवो विषयाः श्रीमत्सायणाचार्यैरेव ऋग्वेदभाष्योपोद्घाते सविस्तरं प्रपञ्चिता इति अपरोपोद्घात-लेखने प्रयत्नः केवलं पिष्टपेषणकल्प एव स्यादिति न तत्र लेखनीं व्यापारयामः ॥

यया संस्थया अयं ग्रन्थः प्रकाश्यतां नीयते सेयं वैदिक-संशोधन-मण्डलनाम्नी संस्था स्वर्गत-श्रीमत्परमपूज्य-लोकमान्य-बाल-गङ्गाधर-तिलकविद्वद्वरेण्यस्य सदातनसंस्मृतये १८५० शकवत्सरे आषाढ-शुद्धपूर्णिमायां ( ख्रिस्तसंवत्सरे १-८-१९२८ ) अधोनिर्दिष्टोद्देशसंसिद्धये तिलक-महाराष्ट्र-विद्यापीठस्य शाखात्वेन पुण्यपत्तने स्थापिता । तत्रैते मुख्योद्देशाः—

१. वेदवाङ्मयस्य साङ्गोपाङ्गाध्ययनाध्यापनव्यवस्थासंपादनम् ।
२. संहिताब्राह्मणादिवेदग्रन्थानां तथा तद्भाष्यादीनां च संग्रहः ।
३. एतेषामेव ग्रन्थानां सम्यक्संशोधनपूर्वकं मुद्राप्य प्रकाशनम् ।
४. वेदार्थज्ञानोपयोगि-निबन्ध-कोश-सूची-टिप्पण्यादिग्रन्थनिर्मितिः ।
५. वेदार्थविषयककूलंकषचर्चापूर्वकसंशोधनमित्यादि ।

तत्रादौ तावत् श्रीमत्सायणाचार्यभाष्यस्य अत्यावश्यकतामवलोक्य प्रथमतः तस्य संशोधन-पूर्वकमुद्रापणे प्रावर्तिष्टेयं संस्था । पाश्चात्यदेशे मॅक्समुल्लर–महोदयेन मुम्बापुर्यां बोडसोपाह्व-महा-महोपाध्याय-राजरामशास्त्रि-गोरेइत्युपाभिध-शिवरामशास्त्रिभ्यां च यद्यप्ययं ग्रन्थः संशोध्य पूर्वं मुद्रा-पितः तथापि तत्पुस्तकस्याधुना दुर्लभत्वादेतन्मुद्रापणमावश्यकमभूदिति विद्वज्जनानामेतत् विदितमेवेति विश्वसिमः ॥

तत्र तावत्सायणभाष्यसंशोधनार्थं यानि प्राचीनलिखितपुस्तकान्युपयुक्तानि तेषां नामनिर्देशा-दिकमधुना क्रियते—

**पुण्यपत्तनस्थ-भाण्डारकर-प्राच्यविद्या-संशोधन-मन्दिरादानीतानि—**

क. $\frac{18b}{1870-71}$ द्वितीयाष्टकभाष्यम् । लेखनकालः संवत् १६०९. समीचीनाः पाठा उपलभ्यन्ते ।

ख. $\frac{No.\ 5}{1916-18}$ द्वितीयतृतीयचतुर्थाष्टकानां भाष्यम् । लेखनकालः शके १७३९. समीचीनाः पाठा उपलभ्यन्ते ।

ग. $\frac{No.\ 18a}{1870-71}$ प्रथमाष्टकभाष्यस्य प्रथमद्वितीयाध्यायौ । लेखनकालः संवत् १६०९.

घ. $\frac{No.\ 3}{of\ Vishram\ (i)}$ प्रथमाष्टकभाष्यम् । लेखनकालो न ज्ञायते ।

**मुम्बापुरीस्थ-' रॉयल एशियाटिक सोसाएटी '-नामकग्रन्थसंग्रहालयादानीतानि—**

च. प्रथमद्वितीयाष्टकभाष्यम् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

छ. प्रथमाष्टकभाष्यम् ।

ज. द्वितीयाष्टकभाष्यम् । लेखनकालः संवत् १७३०.
बडोदानगरस्थित–' सेंट्रल लायब्ररी '–नामकग्रन्थसंग्रहालयादानीतानि —

य. Acc. No. 200 प्रथमाष्टकभाष्यम् ( उपोद्घातप्रकरणमध्यभागादारभ्य अष्टमाध्यायस्य अष्टादशवर्गपर्यन्तम् ) ।

र. Acc. No. 12233 प्रथमाष्टकभाष्यस्य प्रथमद्वितीयाध्यायौ । लेखनकालः संवत् १८७९.

ल. Acc. No. 12332 प्रथमाष्टकभाष्यम् । लेखनकालः संवत् १८७९.

व. Acc. No. 12331 द्वितीयाष्टकभाष्यम् । लेखनकालः संवत् १८७७. क्वचित्क्वचित् पत्राणि नष्टानि ।

लण्डन-नगरस्थित–' इण्डिया ऑफिस लायब्ररी '-नामकग्रन्थसंग्रहालयादानीतानि —

प. २९९२–२९९९ } प्रथमाष्टकादारभ्य अष्टमाष्टकपर्यन्तः समग्रो भाष्यग्रन्थः ।
फ. ३१२६–३१२९ }

तंजावरपुरस्थ–' सरस्वती महाल लायब्ररी '–नामकग्रन्थसंग्रहालये स्थितानि —

त. ५९७. Burnell's Catalogue No. 2360 a. प्रथमाष्टकादारभ्य अष्टमाष्टकपर्यन्तः समग्रो भाष्यग्रन्थः ।

थ. ५९८. Burnell's catalogue No.2361. प्रथमाष्टके प्रथमाध्याये पञ्चदशवर्गपर्यन्तं भाष्यम् ।

द. J. L. Collection No. 23 प्रथमाष्टके चतुर्थाध्यायादारभ्य अष्टमाध्यायस्य समाप्तिपर्यन्तं भाष्यम् । इदं पुस्तकमतिजीर्णं मध्ये मध्ये कीटकभक्षितं च क्वचित् पत्राणि गतानि ।

ध. J. L. Collection. प्रथमाष्टके द्वितीयाध्यायादारभ्य अष्टमाध्यायसमाप्तिपर्यन्तं भाष्यम् । अस्मिन् पुस्तके व्याकरणप्रक्रिया न वर्तते । केवलं संक्षेपेण अर्थमात्रं दत्तम् । पुस्तकं पुरातनं तथापि न जीर्णम् ।
' अडयार '-स्थित-' थिऑसॉफिकल् सोसायटी '–ग्रन्थसंग्रहालयादानीतानि —

न. प्रथम-द्वितीय-तृतीय-पञ्चमाष्टमाष्टकानां भाष्यम् ।

न१. द्वितीयाष्टकस्य द्वितीयाध्यायादारभ्य द्वितीयाष्टकसमाप्तिपर्यन्तं भाष्यम् । इदं ग्रन्थलिपि-लिखितं तालपत्रपुस्तकम् ।
पूर्वोक्तं पुस्तकद्वयं डॉ. कुन्हन्राजा, एम्. ए., डी. फिल्.(Reader, Madras University, Oriental Research Institute ) इत्येतैः महोदयैः दापितम् ।
वाराणसीस्थ–' संस्कृत कॉलेज '–ग्रन्थसंग्रहालयादानीतम् –

प. द्वितीयाष्टकभाष्यम् । लेखनकालः संवत् १८५१.
अनन्तशयन-( Trivandrum ) राजकीय-ग्रंथसंग्रहालयस्थम्–

ब. द्वितीयाष्टकप्रथमाध्यायस्य द्वादशवर्गादारभ्य तृतीयाध्यायसमाप्तिपर्यन्तं भाष्यम् ।
महिषपुर-( Mysore ) राजकीय-ग्रन्थसंग्रहालयस्थम्–

भ. प्रथमाष्टकस्य द्वितीयाध्यायभाष्यम् । लेखनकालः संवत् १८९५.
मद्रपुरीस्थ-' गव्हर्मेंट मॅन्युस्क्रिप्ट लायब्ररी '-नामकग्रन्थसंग्रहालयस्थम् —

म. प्रथमाष्टकस्य द्वितीयाध्यायभाष्यम् । पुस्तकमतिजीर्णम् । मध्ये क्वचित्क्वचित् पत्राणि गतानि ।
पुण्यपत्तनस्थ-'आनन्दाश्रम'-ग्रन्थसंग्रहालयस्थम्–

य. प्रथमाष्टकादारभ्य चतुर्थाष्टकपर्यन्तं भाष्यम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

न. प्रथमाष्टकादारभ्य अष्टमाष्टकपर्यन्तं समग्रं भाष्यम् । इन्दूरनगरवास्तव्य–वे. शा. सं. नेने-इत्युपनामक-दिगम्बरशास्त्रिभिर्दत्तम् ।

म. द्वितीय-पञ्चम-सप्तमाष्टकानां भाष्यम् । लेखनकालः शके १५९६. समीचीनान्यक्षराणि । इदं पुस्तकं बेळगांवप्रान्तीय-बडलीग्रामवास्तव्य-चिदम्बरदीक्षितमहोदयैर्दत्तम् ।

भ. अस्यवामीयसूक्ते ( म.१. सू. १६४ ) केषांचिन्मन्त्राणां तथा तृतीयाष्टकादारभ्य अष्टमाष्टक-पर्यन्तभागस्य च भाष्यम् । समीचीनान्यक्षराणि । इदं पुस्तकं विजापूरप्रान्तीय-बागलकोट-पत्तनवास्तव्य-कृष्णाचार्य-मळगीमहोदयैर्दत्तम् ।

श. प्रथमाष्टकभाष्यम् । ' ग्वालियार '-नगरवासिभिः वे. शा. सं. वेदभाष्योपनामकरघुनाथ-शास्त्रिभिः दत्तं सम्यक् शुद्धम् । समीचीनाः पाठा उपलभ्यन्ते ।

स. प्रथमाष्टकभाष्यम् । पुण्यपत्तनवास्तव्य वे. शा. सं. खाडिलकरोपाह्व-दत्तात्रेयशास्त्रिभिर्दत्तम् । समीचीनान्यक्षराणि लेखनकालः शके १६०६. प्रायेण शुद्धम् । इदमध्यायद्वयमुद्रापणानन्तरमुपलब्धम् । तस्मात् पाठभेदाः तदनन्तरमेव संगृहीताः ।

अधोनिर्दिष्टग्रन्थलिपिलिखितानि पुस्तकानि तालपत्रात्मकानि —

ट. प्रथमाष्टके उपोद्घातः प्रथमसूक्तभाष्यं च । तथा प्रथमाष्टकस्य पञ्चमाध्यायत्रयोविंशवर्गादारभ्य द्वितीयाष्टकस्य तृतीयाध्यायसमाप्तिपर्यन्तभाष्यम् ।

ठ. प्रथमाष्टके प्रथमसप्तमाष्टमाध्यायानां भाष्यम् ।

ढ. प्रथमाष्टके द्वितीयाध्यायादारभ्य षष्ठाध्यायसमाप्तिपर्यन्तं भाष्यम् । एतत्पुस्तकत्रयम् प्रो.टी.आर. चिंतामणी, एम्.ए., ( Senior lecturer, Madras University, Oriental Research Institute ) इत्येतैर्महोदयैः संपाद्य दत्तम् । तथा इतराष्टकानां ग्रन्थलिपिलिखितभाष्यपुस्तकान्यपि तैः संपाद्य दत्तानि सन्ति ।

अधोनिर्दिष्टे उभे अपि केरललिपिलिखिततालपत्रपुस्तके—

क्ष. प्रथमाष्टकपञ्चमाध्यायस्य एकोनत्रिंशवर्गादारभ्य द्वितीयाष्टके तृतीयाध्यायसमाप्तिपर्यन्त-भाष्यम् ।

ज्ञ. द्वितीयाष्टकस्य प्रथमद्वितीयतृतीयाध्यायानां भाष्यम् । एतद्द्वयं केरलदेशीय-कूडलूर-ब्रह्मदत्तनम्बुद्रिपादैर्दत्तम् ।

सामान्यतः ग्रन्थलिपिलिखितानि पुस्तकानि केरललिपिलिखित 'क्ष'-संज्ञितपुस्तकं च द्विशतवत्सरभ्योऽर्वाचीनानि इति प्रतिभान्ति । पूर्वोक्तनम्बुद्रिपादप्रेषितस्यैकस्य केरललिपिलिखितपुस्तकस्यान्ते ' वेदोऽग्निहोत्रसंपत् ' ( १७२८०८४ ) एतत्पुस्तकलेखने कलिदिनम् ' इति लिखितमस्ति । अनेन एतत् त्रिशतवत्सरेभ्यः पूर्वं लिखितमिति विज्ञायते । ज-संज्ञं पुस्तकमपि एतस्मादपि जीर्णतरमिति ततोऽपि प्राचीनमिति अनुमीयते ।

एवमुपरिनिर्दिष्टानि सर्वाण्यपि हस्तलिखितान्यवलोक्य पाठान्तराणि संगृहीतानि । तत्र दक्षिणदेशोपलब्धेषु ग्रन्थकेरललिपिलिखितेषु तालपत्रपुस्तकेषु पाठाः प्रायेणैकरूपा एव दृश्यन्ते । एतेषां सर्वेषामपि मातृकापुस्तकमेकमेवेति निःसंशयं शक्यमनुमातुम् । एकत्रोपलभ्यमानाः पाठभेदाः अशुद्धपाठाः अधिकपाठाः अक्षराशुद्धिरित्यादि सर्वं तथैव इतरपुस्तकेष्वपि दृश्यते । किं बहुना । मातृकापुस्तके अक्षराव्यक्तत्वादिहेतुना लेखकैर्यत्र क्वचित् लिखितुं न पारितं लेखनार्थमवकाशो दत्तः पुनर्न पूरितश्च सोऽपि सर्वत्र एकरूप एव दरीदृश्यते । एतेषु हस्तलिखितेषु क्वचित्क्वचित् अधिकविवरणम्, अधिका व्याकरणप्रक्रिया, क्वचिद्विभिन्नविवरणम्, क्वचिदर्थभेदाभावेऽपि विभिन्नैः शब्दैः प्रतिपादनमित्यादयो विशेषा उपलभ्यन्ते । एतेषु यद्यपि क्वचित्क्वचित् समीचीनाः शुद्धाश्च पाठा उपलभ्यन्ते तथापि क्वचिदप्रसक्तविवरणं, क्वचिदक्षु अविद्यमानानामेव पदानां व्याकरणप्रक्रिया, इत्यादि-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दोषाणामुपलभ्यमानत्वात् पुस्तकान्तरसंवादं विना एतत्पुस्तकमात्रोपलब्धाः पाठाः प्रायेण मूले न निवेशिताः। यत्र क्वचित् पुस्तकान्तरेषु लेखकप्रमादजमशुद्धमिति स्फुटं विज्ञायते तत्र एतत्पुस्तकमात्रोपलब्धा अपि पाठाः क्वचित् गृहीता एव। प्रायःशुद्धबहुलिखितपुस्तकानुसारेण मूलपाठं कल्पयित्वा अत्यन्ताशुद्धान् पाठान्वर्जयित्वा एतत्पुस्तकोपलब्धा इतरपुस्तकोपलब्धाश्च अन्ये पाठाः तत्र तत्र तत्तत्पृष्ठाधः पाठान्तरत्वेन निवेशिताः। अस्मिन् पुस्तके प्राचीनहस्तलिखितपुस्तकेषु कस्मिंश्चिदपि अनुपलभ्यमानाः पाठा मूले स्वमत्यनुसारेण क्वापि न निवेशिताः। अस्मिन् मुद्रितपुस्तके मुख्यस्थलेषु इतरमुद्रितपुस्तकापेक्षया यत्र यत्र विभिन्नपाठाः स्वीकृताः, यत्र यत्र च समीचीना अपि पाठाः केवलं दाक्षिणात्यतालपत्रपुस्तकेष्वेव उपलब्धा इति पाठान्तरत्वेन दत्ताः, भाष्यसंशोधनसमये च यत्र यत्र अशुद्धाः पाठा इति स्फुटं विज्ञाताः तथापि लिखितपुस्तकसंवादाभावात् शुद्धीकर्तुं न पारितमस्माभिः, एतादृशविषयकविचारः संक्षेपेणात्र समनन्तरं क्रियते एव।

एवमस्य पुस्तकस्य संशोधनविषये यावच्छक्यमवधानं दत्तमस्माभिः। अक्षराशुद्ध्यादिदोषः परिहार्य इति यथाशक्ति प्रयतितम्। तथापि दृष्टिदोषात् क्वचित्क्वचिदशुद्धं संजातमिति तदर्थमन्ते शुद्धिपत्रं च निवेशितम्। एवं संशोधितेऽप्यस्मिन् ग्रन्थे यदि केचित् मानुषमात्रसुलभा दोषा भवेयुस्ते विद्वद्भिः सदयं क्षन्तव्या इति साञ्जलिबन्धमभ्यर्थयामः।

इदमिदानीं निवेदयामो यैस्तावदुदारहृदयैः सायणभाष्यसंशोधनार्थं हस्तलिखितानि संपाद्य दत्तानि यैश्च मुद्रापणार्थं द्रविणदानेन महानुपकारः कृतः तेषां सर्वेषामपीयं संस्था अत्यन्तमधमर्णेवेति। अपरं चास्य ग्रन्थस्य यावच्छक्यमन्तरेण कालविलम्बं मुद्रणकृत्यं निर्व्यूढवतां पुण्यपत्तनस्थ-समर्थ-भारत-मुद्रणालयाधिकृतानां श्रीयुत सदाशिव रामचन्द्र सरदेसाई, बी. ए., एल्एल्. बी., महोदयानामपि कृतज्ञताप्रकटनमवश्यकरणीयमिति मन्यामहे।

अन्ते चैतद्विज्ञापयामो यदेतावतायासेन संशोध्य मुद्रापितोऽयं ग्रंथो यदि विपश्चिज्जनानामादरविषयः स्यात् तर्हि कृतकृत्या एव वयं भवेमेति।

१८५५ शकवत्सरे
आश्विनशुद्धदशम्याम्

विद्वज्जनविधेयः वै. सं. मण्डलकार्यवाहः
सोनटक्के इत्युपाह्वो नारायणशर्मा.

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

# ॥ पाठभेदादिविषयकविचारः ॥

अस्मिन् पुस्तके मॅक्समुल्लर-संशोधित-पुस्तकस्थपाठापेक्षया तथा मुम्बापुरीमुद्रितपुस्तकस्थ-पाठापेक्षया च यत्र विभिन्नाः पाठाः स्वीकृताः तेषु प्रधानानां केषांचिन्निर्देशोऽत्र क्रियते । इतरत्र प्रायेण अस्मदुपलब्धबहुलिखितपुस्तकानुसारेण विभिन्नपाठाः स्वीकृता इति बोध्यम् । केचन लिखितपुस्तकोप-लब्धाः समीचीना अपि पाठाः बहुपुस्तकविसंवादात् मूले न गृहीताः । अन्यच्च भाष्ये क्वचित् अशुद्धाः संदिग्धार्थाश्च पाठा उपलभ्यन्ते यत्र च पुस्तकेषु शुद्धपाठा नोपलभ्यन्ते, एतादृशविषयकविचारः संक्षेपेणात्र क्रियते ।

मॅ= मॅक्समुल्लरसंशोधितपुस्तकम्। मु= मुम्बापुरीमुद्रितपुस्तकम्।

| पृष्ठम् | पङ्क्तिः | | |
|---|---|---|---|
| ३ | ३१ | स्वप्रकाशकत्वाभावेऽपि । | ट-त-मु. |
| ४ | १ | स्वप्रकाशकत्वमविरुद्धम् । | |

अत्र उभयत्र मॅ-पुस्तके ' स्वप्रकाशत्वाभावेऽपि', ' स्वप्रकाशत्वमविरुद्धम् ' इति क्रमेण पाठः । अत्र उभयत्र प्रथमनिर्दिष्टपाठो युक्तः प्रतिभाति ।

४·३ भूतं भवन्तं भविष्यन्तम्–ग-घ-च-छ-झ-ट-ठ-ण-त-फ-मु. । ' भूतं भविष्यन्तम् '–मॅ. । अत्र शाबरभाष्ये भवन्तमिति पदस्य विद्यमानत्वात् बहुषु पुस्तकेषु तथैवोपलभ्यमानत्वाच्च ' भूतं भवन्तं भविष्यन्तम् ' इत्ययं पाठः मूले निवेशितः ।

४·२९ दुर्बोधत्वम्–ग-घ-च-छ-ट-ण-त-प-फ-य-मु. । ' दुर्बोध्यत्वम् '-मॅ. । अत्र ईषदुःसुष्वि-त्यादिसूत्रेण खलप्रत्ययान्तात् दुर्बोधशब्दात् भावे त्वप्रत्यये दुर्बोधत्वमित्येव रूपसिद्धेः प्रथमनिर्दिष्ट-पाठ एव समीचीन इति बहुपुस्तकानुसारेण मूले निवेशितः । एवमेव पृ. १० प. १४ दुष्परिहरः इत्यत्रापि बोध्यम् । मॅ-पुस्तके 'दुष्परिहारः' इति पाठः ।

७·१ मन्त्राभिधानात्। नेदं जैमिनिसूत्रं किंतु ' अर्थवादो वा ' इत्यस्मिन् सूत्रे शाबरभाष्यगतं वचनम् ।

७·९ संप्रैषकर्मणो गर्हानुपलम्भः संस्कारत्वात् । पूर्वमीमांसादर्शने एतत्सूत्रमन्यथैवोप-लभ्यते–' संप्रैषे कर्मगर्हानुपालम्भः संस्कारत्वात् ' इति। तन्त्रवार्तिके इदं सूत्रमेवं व्याख्यातं–' येयं संप्रैषे अग्नीदग्नीनित्यत्र बुद्धबोधनासंभवात् अभिधानकर्मगर्हाभिहिता साप्यनुपालम्भः स्मरणसंस्कारा-र्थत्वात् ' इति ।

१०·६ तद्वदुत्तरमीमांसायाम्–त-थ-मु. । तदुत्तरमीमांसायाम्–मॅ. । अत्र तद्वदुत्तरमीमांसाया-मिति युक्ततरः पाठ इति मूले निवेशितः ।

१०·८ आरम्भणाधिकरणे–ट-मु.। स-संज्ञितपुस्तकेऽप्ययमेव पाठ उपलभ्यते। एतत्पुस्तकमध्या-यद्वयमुद्रापणानन्तरमुपलब्धमिति तावत्पर्यन्तं तत्रोपलभ्यमानाः विभिन्नपाठा अत्र निर्दिष्टा इति बोध्यम्। आरम्भाधिकरणे–मॅ. । यद्यप्येष एव पाठो बहुषु हस्तलिखितपुस्तकेषूपलभ्यते तथापि सोऽशुद्ध इति स्फुटमेव ।

१२·१२ यथोक्तरीत्या–ग-घ-च-छ-ट-ठ-ण-त-थ-फ-य. । मु-पुस्तकेऽपि ' यथोक्तरीत्या ' इत्येव पाठः । ' यथोक्तनीत्या'-मॅ. । अत्र यथोक्तरीत्या इत्येव पाठः युक्ततरः बहुपुस्तकेषूपलभ्यमानश्च ।

१४·१ पूर्णाहुतेरङ्गत्वात् – ट-ठ. । अङ्गभावत्वात्-मॅ. । अङ्गस्वभावस्वात्-मु. । अङ्गभाव-त्वादिति पाठो यद्यपि बहुषु पुस्तकेषूपलभ्यते तथापि अशुद्ध इति प्रतिभाति । ' अङ्गभावात् ' इति वा ' अङ्गत्वात् ' इति वा भाव्यम् । 'अङ्गस्वभावस्वात् ' इति पाठोऽपि न युक्त इति प्रतिभाति ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

१५·५ **विमतं वेदवाक्यं पौरुषेयं वाक्यत्वात् कालिदासादिवाक्यवत्**। 'पौरुषेयं वाक्यत्वात्' इत्यस्य स्थाने 'पौरुषेयवाक्यत्वात्' इति मॅ-पुस्तके। यद्यपि पौरुषेयवाक्यत्वादिति केषुचित् लिखितपुस्तकेषु उपलभ्यते तथापि स केवलं लेखकप्रमादजनित एवेति स्पष्टमेव।

१५·१९ **कृते चाविनियोगः स्यात्कर्मणः समत्वात्**। मीमांसादर्शने तु 'कृते वा विनियोगः स्यात्कर्मणः संबन्धात्' इति पाठः। तच्च सूत्रमेवं व्याख्यातं– 'वाकारः पूर्वपक्षनिवृत्यर्थकः। कृते=कर्मणि सत्रादिरूपे वनस्पतयः सत्रमासत इत्यादीनां प्रशंसाद्वारा विनियोगः=अन्वयः स्यात् कर्मणः=सत्रादेः कर्मणः प्रशंसासापेक्षस्य संनिधिपठितत्वसंबन्धसत्त्वात्' इति।

१५·२० **स्वर्गसाधनत्वे ज्योतिष्टोमस्य विनियोगो न स्यात्**। ट-ठ-स-पुस्तकेषु 'स्वर्गसाधनत्वे' इत्यस्य स्थाने 'स्वर्गसाधनत्वेन' इति पाठः। अत्र स्वर्गसाधनत्वेन इति तृतीयान्त एव पाठः शुद्धः। सप्तम्यन्तत्वे अन्वयो न भवतीति स्फुटमेव। मॅ-मु-पुस्तकयोस्तु 'स्वर्गसाधनत्वे' इत्येव पाठः।

१८·११ **संप्रतिपन्नयजुषाम्**–ट-ठ-स-मु.। संप्रतिपन्नो यजुषाम् मॅ-पुस्तके। अत्र संप्रतिपन्नयजुषामित्येव युक्तः पाठः। जैमिनीयन्यायमालाविस्तरेऽपि तथैव दृश्यते।

१८·२२ **'वेदानधीत्य.....यथाक्रमम्'** (मनु. ३·२)। नायं याज्ञवल्क्यस्मृतावुपलभ्यते।

१९·४ **पश्चादध्ययनविध्यर्थं ज्ञानम्**। अत्र 'पश्चादध्ययनविध्यर्थज्ञानम्' इति पाठः ट-ठ-स-पुस्तकेषु। एष एव पाठः साधीयानिति प्रतिभाति। 'स्वाध्यायोऽध्येतव्यः' इत्यध्ययनविधेः अर्थज्ञानं वेदाध्ययनानन्तरं भवति। अध्ययनविधिवाक्यार्थज्ञानानन्तरं पश्चादध्ययने प्रवृत्तिः इत्येवमन्योन्याश्रयः। 'अध्ययनविध्यर्थं ज्ञानम्' इति पाठे अध्ययनविधिविषयकं ज्ञानमिति अर्थः कल्पनीयः।

२५·१८ **शंभुमते मताः**–च-त-थ-फ। 'संभवतो मताः' इति मॅ-मु-पुस्तकयोः। पाणिनीयशिक्षायां 'शम्भुमते मताः' इत्येव पाठ उपलभ्यते।

४१·२८ **सुत्यादिने**–च-छ-ठ-त-थ-फ-मु.। 'स्तुत्यादिने' मॅ-पुस्तके। अत्र सुत्यादिने इत्येव शुद्धः पाठः। यस्मिन् दिने सोमाभिषवः क्रियते तस्मिन्नहनीति तस्यार्थः।

४८·१५ **प्रत्ययद्वयस्य** च-त-थ-फ-स-पुस्तकेषु तथा मु-पुस्तकेऽपि। मॅ-पुस्तके प्रत्ययत्रयस्य। अत्र 'प्रत्ययत्रयस्य' इति भाव्यमिति प्रतिभाति। ङ्रनिप्-ङीप्-शस्-प्रत्ययानामित्यर्थः।

५१·२८ **त्वद्यव इति प्राप्तौ**–ग-ठ-स.। मॅ-पुस्तके 'त्वत्यव इति प्राप्तौ' इति पाठः। अत्र त्यद्यव इति शुद्धः पाठः दकारस्थाने तकारस्याप्रसक्तेः।

५४·१० **आदेशप्रत्यययोः इति षत्वम्**। मॅ-पुस्तकेऽपि अयमेव पाठः। झ-ढ-ण-स-मु-पुस्तकेषु 'शासिवसिघसीनां च इति षत्वम्' इति दृश्यते। अत्र वस्तुतः यद्यपि 'आदेशप्रत्यययोः' इति सूत्रेणैव षत्वं तथापि एतादृशेषु स्थलेषु 'शासिवसिघसीनां च इति षत्वम्' इत्युत्तरत्र सर्वत्रोपलम्भात् स एव पाठः सायणाचार्यानुमत इत्यनुमीयते। शासिवसीति सूत्रे वसीत्यनेन वसधातुर्विवक्षित इति स्फुटमेव। सायणाचार्यैस्तु क्सुप्रत्ययान्तेषु एतादृशशब्देषु शासिवसीति षत्वमिति प्रतिपाद्यते।

७६·१६ **परिज्मन्.....इत्यशनुदात्तः**। अनन्वितार्थकमिदं वाक्यमिति प्रतिभाति।

९९·१९ **'बृहेरम् नलोपश्च'**। उणादिषु तु 'बृंहेर्नोच्च' इति सूत्रेण ब्रह्मशब्दो व्युत्पादितः।

१०२·१ **परादिश्छन्दसि बहुलमित्येवं नास्ति विस्तारः**। मॅ-पुस्तकेऽपि एवमेव पाठः। मु-पुस्तके 'विस्तारः' इत्यस्य स्थाने 'विस्तरः' इति पाठः। ठ-स-पुस्तकयोः 'इत्येवं नास्ति विस्तारः' इत्यस्य स्थाने 'इत्येव निस्तारः' इति पाठः। एष एव पाठः साधीयानिति प्रतिभाति।

१०२·४ **इत्यत्र क्तानुवृत्तेः**–च-छ-फ-श-स-मु.। मॅ-पुस्तके 'इत्यत्रानुवृत्तेः' इति पाठः। अत्र क्तानुवृत्तेरित्येव पाठः शुद्ध इति स्फुटमेव।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

१३६·१४ पोत्रशब्दे यदुक्तम् । मॅ-पुस्तके–' पोत्रशब्देन यदुक्तम् ' इति पाठः । परंतु पोत्रशब्दे यदुक्तमित्येव पाठः साधुः अस्मदुपलब्धलिखितपुस्तकेषूपलभ्यमानश्च ।

१४०·२२ गुणनिष्ठद्रव्ये संक्रान्तत्वात् । इदमनन्वितार्थमिति प्रतिभाति । अत्र ' गुणिनि द्रव्ये संक्रान्तत्वात् ' इति भाव्यम् । झ-पुस्तके ' गुणनिष्ठद्रव्ये ' इत्यस्य स्थाने ' गुणिनिष्ठद्रव्ये ' तथा स-पुस्तके ' गुणिनिष्ठद्रव्येण ' इत्येवं पाठौ उपलभ्येते ।

१४८·१ प्राग्दीव्यतोऽण् । । अत्र प्राग्दीव्यतीयोऽण् इति भाव्यम् ।

१४८·१३ न च निरवकाशत्वेन वत्वस्य अनवकाशत्वम् । अत्र अनवकाशत्वमित्यस्य अनवकाशत्वमूलकं बाधकत्वमित्यर्थोऽवगन्तव्यः ।

१४८·१८ आरेशब्दात् मतुप इत्युदात्तत्वं वक्तव्यम् । ' मतुवुदात्तत्वे रेग्रहणम् ' इति महाभाष्ये वार्तिकं पठ्यते । काशिकायां च ' रेशब्दाच्च मतुप उदात्तत्वं वक्तव्यम् ' इत्येवं पाठो दृश्यते ।

१५८·३२-३३ इत्येतस्याः प्राप्तेः । अत्र ' इत्येतस्य अप्राप्तेः ' इति भाव्यम् ।

१६८·१६ गवि गन् धृञो वः । उणादिषु एतत्सूत्रं नोपलभ्यते । ३ मण्डले ३८ सूक्ते ६ ऋचि गन्धर्वशब्दप्रक्रियायामेतदेव सूत्रमुपन्यस्तम् ।

१७७.१५ धारेर्णिलुक् च । मॅ-मु-पुस्तकयोस्तु ' अर्जेर्णिलुक् च ' इति पाठः । अत्र अर्जेर्णिलुक् च इति सूत्रेण धरुणशब्दसिद्धिर्न भवतीति स्फुटमेव । इतरत्र धरुणशब्दप्रक्रियायां ' धारेर्णिलुक् च ' इति सूत्रमेव सायणभाष्ये उपन्यस्तं दृश्यते । दशपाद्युणादिसूत्रे इदमुपलभ्यते ।

१८५·५ भूयास्मेत्यर्थः । ढ-पुस्तके भूयास्मेति । अत्र भूयास्मेति व्याकरणशुद्धः पाठः ।

१८६·१० स्त्यः संप्रसारणमूच्च । इदं सूत्रम् उणादिषु नोपलभ्यते । ' स्तुवो दीर्घश्च '( उ. सू. ३. ३०५ ) इति सूत्रेण उणादिषु स्तूपशब्दो व्युत्पादितः ।

१८७·१६ शतं भिषजः बन्धनिवारकाणि शतसंख्याकान्यौषधानि । अत्र स-पुस्तके ' शतं सहस्रं भिषजः बन्धनिवारकाणि शतसहस्रसंख्याकान्यौषधानि ' इति पाठः । ऋचि सहस्रमिति पदस्य विद्यमानत्वादयमेव पाठः साधीयानिति प्रतिभाति ।

१९८·५ आतो लोप इति प्रतिषेधेऽपि व्यत्ययेन आकारलोपः । अस्फुटोऽत्र वाक्यार्थः । 'आतो लोपः' इत्यस्य स्थाने ' आतोऽनापः ' इति भाव्यम् । 'आतो धातोः' इति सूत्रे ' आतोऽनापः ' इति वार्तिकं पठ्यते । तेन आबन्तस्य आकारलोपप्रतिषेधेऽपि ग्मः इत्यत्र व्यत्ययेन आकारलोपः इत्यर्थः इति प्रतिभाति ।

२१९·१४ विकरणस्वरेणान्तोदात्तत्वम् इति पाठः च-छ-झ-ण-न-फ-र-श-ष-स-मु–पुस्तकेषु । अयमेव पाठः शुद्धः । मॅ-पुस्तके विकरणस्वरेणोदात्तत्वमिति पाठः ।

२२७·२० मातृपितृरूपयोः । मॅ-मु-पुस्तकयोरपि एवमेव । अत्र मातापितृरूपयोरिति भाव्यम् ।

२३५·२ अदुपदेशाद्धातोरन्तोदात्तत्वे क्यङन्ताद्धातोरन्तोदात्तत्वम् । अस्फुटोऽत्र वाक्यार्थः ।

२४७·२ नवनीयगतयः । अत्र ' नवनीतगतयः ' इति बहुषु लिखितपुस्तकेषु मु-पुस्तके च पाठ उपलभ्यते । परंतु स्तोतव्यचरित्रा इति तस्य विवरणात् नवनीयगतय इत्येव सायणचार्यानुमतपाठ इति सुव्यक्तमेव । यास्केन तु ' नवगतयो नवनीतगतयो वा ' ( निरु. ११. १९ ) इति व्याख्यातम् ।

२४७·७ प्रवणैः पलायितुं सुशकैर्मार्गैः च-फ-श-मु-। मॅ-पुस्तके ' पलायितुम् ' इत्यस्य स्थाने ' पालयितुम् ' इति पाठः । अत्र पलायितुमित्येव युक्तः पाठः ।

२७०·३ श्वः परश्व इत्यादिकमुत्तरं कालम् । मॅ-पुस्तके ' श्वोऽपरं श्व इत्यादिकमुत्तरं कालम् ' इति पाठः । मु-पुस्तके तु ' अपरं श्व इत्यादिकमुत्तरं कालम् ' इति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

२८३·२३ **यजमानाय**। अत्र 'यजनाय' इति पाठः शुद्ध इति प्रतिभाति।

२८५·१७ **दुःशक्या**। अत्र 'दुःशका' इति युक्ततरः पाठः।

२८६·१४ **प्रस्नुतस्तनवती**। मु-पुस्तकेऽपि अयमेव पाठः। मॅ-पुस्तके 'प्रस्तुतस्तनवती' इति पाठः। प्रस्नुतस्तनवतीति शुद्धः पाठः बहुपुस्तकानुसारेण मूले निवेशितः।

३०९·२९ **इकारस्यापि उत्वम्**। अत्र 'ऋकारस्यापि उत्वम्' इति भाव्यमिति प्रतिभाति।

३१४·१६ **उषःकालेषु सवित्रादीन् देवानावह इत्यनुवर्तते**। अत्र 'उषःकालेषु' इत्यस्यानन्तरं 'श्रवोऽन्नमाहुतिरूपमभिलक्ष्य' इत्यधिकः पाठः मॅ-मु-पुस्तकयोर्दृश्यते। यद्यपि केषुचित् लिखितपुस्तकेष्वपि दृश्यते एवायं पाठः तथापि ऋचि श्रवःशब्दस्याभावात् तद्व्याख्यानरूपोऽयं भागः कदाचित्प्रमादपतितः स्यादिति मूले न निवेशितः।

३१८·८-९ **भावे क्तिच्**। अत्र 'भावे क्तिन्' इत्येव पाठः शुद्ध इति द्रष्टव्यम्।

३४४·२१ **न च परत्वेनास्य असिद्धत्वात्**। अत्र 'न च परत्वेनास्य विद्धत्वात्' इति पाठः मॅ-पुस्तके दृश्यते। परंतु विद्धत्वादिति पाठोऽशुद्धः बहुपुस्तकेषु न दृश्यते।

३५६·२८ **हिंसां प्रापयः**–च-छ-ण-ध-न-फ-ल-स.। मॅ-मु-पुस्तकयोः 'हिंसां प्रापितः' इति पाठो दृश्यते। किंतु स पाठोऽशुद्ध इति स्फुटमेव।

३६१·९ **कर्तुं न शक्नोतीति**–ढ-ण-ध-न-स.। मॅ-मु-पुस्तकयोः 'कुर्वन् न शक्नोतीति' इति पाठः। परंतु कर्तुं न शक्नोतीति इति युक्ततरः पाठः।

३६१·१५ **तरुणीं योषितम्**–च-छ-ढ-ण-न-फ-श-स–पुस्तकेषु। मॅ-मु-पुस्तकयोः 'तरुणां योषितम्' इति पाठो दृश्यते। तरुणशब्दात् स्त्रियाम् 'नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम्' इति वार्तिकेन ङीपि तरुणीमित्येव भाव्यमिति स्फुटमेव।

३६४·२८ **शानच आर्धधातुकत्वात् अतोलोपयलोपौ** इत्यत्र 'शानच्। आर्धधातुकत्वात् अतोलोपयलोपौ' इति मॅ-पुस्तके पाठो दृश्यते। किं तु सोऽशुद्ध इति स्फुटमेव।

२८०·२२<br>३९३·२९ } धृङ् अवस्थाने। धातुपाठे तु 'धृङ् अवस्थाने' इति पठ्यते।

४०७·४ **तन्निरोधकारिणम्**-छ-त-ध-न-फ-ल-श-स.। मॅ-पुस्तके तु 'तं निरोधकारिणम्' इति पाठः। अत्र तन्निरोधकारिणमिति पाठो युक्ततर इति मूले निवेशितः।

४०७·१८ **तत्र पृथिवीस्थानमग्निम्**। अत्र मु-पुस्तके 'ततः पृथिवीस्थानमग्निम्' इति पाठो दृश्यते। स समीचीन इति प्रतिभाति। परंतु स पाठः अस्मदुपलब्धलिखितपुस्तकेषु न दृष्टः।

४०७·२२ **विश्वान्सर्वान्प्राणिनः प्रत्यृतो गच्छत इति विश्वानरौ मध्यमोत्तमौ**। अत्र ऋधातोः भ्वादेः प्रथमपुरुषद्विवचने ऋच्छत इत्येव रूपं भवतीति ऋतः इति ग्रामादिकं प्रतिभाति। एवम् ६१६·४ 'सुष्ठु अर्तिं गच्छति' इत्यत्रापि द्रष्टव्यम्।

४०८·९ **'इन्सर्वधातुभ्यः' इति इन्प्रत्ययः शतवनिशब्दः**। अत्र 'इन्प्रत्ययः' इत्यस्य स्थाने 'इन्प्रत्ययान्तः' इति भाव्यम्।

४१७·१ **ते द्यावापृथिव्यौ अस्य इन्द्रस्य महिमानं न परिष्टः न परिभवतः**–ढ-स.। एतत् मॅ-मु-पुस्तकयोर्न दृश्यते। 'नास्य ते महिमानं परिष्टः' इत्यस्य व्याख्यानरूपोऽयं भागः आवश्यक इत्यस्माभिः स्वीकृतः। ४१७·७ **स्तः**। **अस्तेर्लिटि रूपम्**। **उपसर्गप्रादुर्भ्यामिति षत्वं सांहितिकम्**-ढ-स.। एतदपि मॅ-मु-पुस्तकयोर्न दृश्यते।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

४१७·३२ ढत्वकत्वषत्वानि-ढ-न-स-मु-। मॅ-पुस्तके 'ढत्वषत्वकत्वानि' इति पाठः। 'हो ढः' इति प्रथमतो ढत्वं तदनन्तरं 'षढोः कः सि' इति कत्वं तदनन्तरं 'आदेशप्रत्यययोः' इति षत्वम् इति क्रमानुरोधात् ढत्वकत्वषत्वानीति पाठः मूले स्वीकृतः।

४२५·१४ अद्यतेऽस्मिन् पटलादिकमिति। अत्र 'पटलादिकम्' इत्यत्र 'फलादिकम्' इति पाठः साधीयान्।

४२८·१६ प्रतिदिवसं जायमाने। अयमेव पाठः अस्मदुपलब्धेषु सर्वेष्वपि लिखितपुस्तकेषु उपलभ्यते मु-पुस्तके च। मॅ-पुस्तके 'प्रतिदिवं संजायमाने'।

४३७·२४ अतिशयितबलपराक्रमाः—च-छ-न-फ। मॅ-मु-पुस्तकयोः 'अतिशयेन बल-पराक्रमाः' इति पाठो दृश्यते। प्रथमपाठ एव शुद्ध इति व्यक्तमेव।

५१०·२७; २९ भूवादौ पढ्यते, भूवादौ पाठो नास्तीति गम्यते। अत्र उभयत्र 'भूवादौ' इत्यस्य स्थाने श्वादौ इति भाव्यम्।

५४६·१९ यथा असन् भवेयुस्तथा आगच्छन्तु इति संबन्धः-क्ष-ट-ढ-स.। अयमेव पाठः साधीयान्। मॅ-पुस्तके 'असन् भवन्तु' इति पाठः।

५६२·२५ वर्धस्व-क्ष-छ-ट-ढ-ण-त-द-ध-न-श-झ-मु.। मॅ-पुस्तके 'वर्धयस्व' इति पाठः।

५७८·१८ वृसिर्वेष्टनार्थः। धातुपाठे अयं न दृश्यते।

६१४·९ 'व्यचोऽतस्तिङः' इति दीर्घः। अत्र संगृभीता कृतानीति संहितायामनेन सूत्रेण दीर्घ इति प्रतिपाद्यते। परंतु संगृभीता इत्यस्य व्यच्त्वाभावात् नानेन सूत्रेण दीर्घः सिध्यति। अन्यच्च संगृभीता इति दीर्घान्त एव पदपाठः। भाष्ये तु ह्रस्वान्त इति मत्वा प्रक्रिया दत्ता।

६१५·१ युद्धार्थं मरुद्भिः सह। अत्र 'युद्धार्थं गच्छद्भिः सह' इत्येव पाठः समीचीनः।

६२५·९ कीर्तितेन बलेन-क्ष-च-छ-ट-ठ-ण-न-फ-स.। मॅ-पुस्तके 'कीर्तनबलेन' इति पाठः मु-पुस्तके 'कीर्तनेन बलेन' इति च। अत्र कीर्तितेन बलेनेति युक्तः पाठः मूले निवेशितः।

६४०·६ विनियोगः। अत्र 'विनियोगो लैङ्गिकः' इति युक्तः पाठः।

६४७·९ व्रश्चादिषत्वे कुत्वषत्वे। अयं पाठः—क्ष-ट-त-फ-श-स-मु-पुस्तकेषु। मॅ-पुस्तके 'व्रश्चादिषत्वे कुत्वम्' इति पाठः। अत्र कुत्वषत्वे इत्यावश्यकमिति अयं पाठो मूले निवेशितः।

६५२·७-८ अतो गुणे इति पररूपत्वे-त-श-स.। मॅ-पुस्तके 'पररूपत्वे' इत्यस्य स्थाने 'परपूर्वत्वे' मु-पुस्तके 'परपूर्वरूपत्वे' इति च। अत्र पररूपत्वे इति शुद्धः पाठ इति सुव्यक्तमेव।

६६३·८ तस्मिन्नभिषवात् तस्याभिषवकर्तृत्वम्। अत्र 'स्वस्मिन्नभिषवात्...कर्तृत्वम्' इति मॅ-मु-पुस्तकयोः पाठः। प्रथमपाठ एव साधीयानिति क्ष-ट-ढ-स-पुस्तकानुसारेण अस्माभिः स्वीकृतः।

७१३-२-३ तदेतत् पदकृतः शाकल्यस्याभिमतम्। अत्र 'अभिमतम्' इत्यत्र 'अनभि-मतम्' इत्येव भवितव्यमिति प्रतिभाति। अत्र अर्भगाय इति पदे अवग्रहो न दृश्यते। अर्भमल्पं गायती-त्यर्भगः इतीयं व्याख्या यदि पदकृतः अभिमता स्यात् तदा अवग्रहो दृश्येत।

७२९-१४ दुरेवैः। दुरुपसृष्टात् एतेः 'ईषद्दुःसुषु०' इति खल्। अत्र खलन्तत्वे दुरयैः इति रूपेण भाव्यमिति नेयं प्रक्रिया संगच्छते।

७३३·६ विप्रायेत्यस्य भुरणेत्यनेन असामर्थ्यान्न पराङ्गवत्त्वम्-त-श.। मॅ-मु-पुस्तकयोः 'विप्रायेत्यस्य रदन्तेत्यनेन असामर्थ्यान्न पराङ्गवत्त्वम्' इति पाठो दृश्यते। अत्र 'विप्राय भुरणा रदन्ता' इति संहितायां विप्राय इति शब्दात्परत्वेन भुरणा इत्यामन्त्रितस्य विद्यमानत्वात् विप्रायेत्यस्य पराङ्गवद्भावेन 'आमन्त्रितस्य च' इत्याद्युदात्तनिघाते प्राप्ते भुरणेत्यनेन विप्रायेत्यस्य असामर्थ्यात् पराङ्गवत्त्वाभावात् निघातो न भवति। तथा च 'भुरणेत्यनेन असामर्थ्यात्' इत्ययमेव पाठो युक्त इति मूले निवेशितः॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

७५२·१० **एतदन्तात्परस्या विभक्तेर्व्यत्ययेन 'सुपां सुलुक्' इति विभक्तेर्डादेशः।** अत्र 'विभक्तेर्डादेशः' इत्यस्य स्थाने 'डादेशः' इति मु-पुस्तके। यद्यपि विभक्तेरिति उभयत्र अनावश्यकं तथापि हस्तलिखितपुस्तकेषु दृश्यते।

७७७·१२-१३ **सिचि वृद्धिः परस्मैपदेषु**। अत्र 'वदव्रजेति वृद्धिः' इति पाठः शुद्धः। सिचि वृद्धिरित्यादिसूत्रेण इगन्ताङ्गस्य परस्मैपदे परे सिचि वृद्धिर्विधीयते। अत्र द्युतधातोः इगन्ताङ्गत्वाभावात् अनेन सूत्रेण वृद्धिर्न भवतीति स्फुटमेव। तस्मात् 'वदव्रजहलन्तस्याचः' इति सूत्रेणैव वृद्धिः।

७८३·२४ **अत्र विशेषस्याभावात्**। अत्र 'अर्थविशेषस्याभावात्' इति पाठः समीचीनः।

७८४·१३ **रश्मिदेवताः अपि प्रकाशिकाः इत्यर्थः**। अत्र 'रश्मिवदेव ता अपि प्रकाशिका इत्यर्थः' इति पाठः युक्ततरः।

८१७·९ **संग्राममयस्य**। अत्र 'संग्रामजयस्य' इति पाठः साधीयान्।

८१७·१३ **संराधन्ति**। राधधातोर्भ्वादावपठितत्वात् संराधन्तीति रूपं न शुद्धमिति प्रतिभाति। मु-पुस्तके संराधयन्तीति पाठः।

८२५·३-४ **कोशेनेति लक्षणेन सिक्तं स्वोचितजलेन पूरितम्**। अत्र 'कोशेन इतिलक्षणेन सिक्तं प्लावितं जलेन पूरितम्' इति झ-पुस्तकस्थपाठः समीचीन इति प्रतिभाति। मु-पुस्तके तु कोशेन इति मेघलक्षणोदकेन सिक्तं स्वोचितजलेन पूरितम्' इति पाठो दृश्यते।

८३३·२५ **किं हि वचनेन कुर्यात्**। अयमेव पाठः मॅ-मु-पुस्तकयोर्दृश्यते। परंतु 'किं हि वचनं न कुर्यात्' इति पाठः शुद्धः।

८५०·९ **कर्मकर्तरि 'न दुहस्नुनमाम्' इति यगभावः**। मॅ-मु-पुस्तकयोः 'कर्मकर्तरि' इत्यस्य स्थाने 'कर्तरि' इत्येवं दृश्यते। परंतु कर्मकर्तरि इत्येव युक्तः पाठः क्ष-ङ-ञ-ट-पुस्तकानुसारेण मूले निवेशितः।

८५१·१०-११ **ह्रस्वादङ्गादिति सिचो लोपः**—क-ख-क्ष-ङ-च-ज-ञ-झ-ञ-ट-ण-फ-व.। मॅ-मु-पुस्तकयोः 'सिलोपः' इति पाठः।

८५८·२६ **धारयत्क्षितिम्**। अत्र सायणः पदद्वयं मन्यते शाकल्यस्तु एकमेव।

८६२·२७ **उदकैर्मिश्रिताः**-ख-ज-फ-व-मु.। मॅ-पुस्तके 'उदकैः' इत्यस्य स्थाने 'उदकेभिः' इति दृश्यते। किंतु तदशुद्धमिति स्फुटमेव।

८६३·१४ **न केवलमुषस एव बोधे अपि तु**। मॅ-मु-पुस्तकयोः 'बोधे' इत्यस्य स्थाने 'बोधः' इति पाठः। परंतु सोऽशुद्ध इति स्फुटमेव।

८६८·१५ **आत्मीयैरनन्यैश्चक्षुरादीन्द्रियैः**। अत्र क्ष-झ१-ञ-ट-पुस्तकेषु 'आत्मीयैरन्यैश्चक्षुरादीन्द्रियैः' इति पाठः। स एव साधीयान्।

९०४·३ **वाचा वाच्यं विचार्य**। अत्र 'वाच्याऽवाच्यं विचार्य' इति पाठः साधुः।

९०८·६ **नृनित्यत्र वचनव्यत्ययः**। क-मु-पुस्तकयोः 'वचनव्यत्ययः' इत्यत्र 'विभक्तिव्यत्ययः' इति पाठः स एव शुद्धः।

९१५·६ **यद्यग्निर्न पचेत् पूरयेदेव नोत्पद्यते**। अत्र 'पूरयेदेव' इत्यस्य स्थाने 'पूयेदेव' इति दाक्षिणात्यपुस्तकेषु पाठो दृश्यते। परंतु स लेखकप्रमादज इति प्रतिभाति। 'पूयेतैव' इति भाव्यम्। यद्यग्निः योनौ निषिक्तं रेतः न पचेत् तर्हि तत्पूयेतैव विशीर्णं दुर्गन्धि वा सत् विनश्येदेव नृपश्वादिदेहाकारेण नोत्पद्यते इत्यर्थः। पूरयेदेवेति पाठे अर्थोऽस्पष्टः।

९३३·२४ **सर्वलोके इत्यर्थः**। अत्र 'सत्यलोके इत्यर्थः' इति पाठः साधुः। **पर्वतशब्दो मेघनामसूक्तत्वात्**। अपूर्णमिदं वाक्यम्। 'पर्वतशब्दो मेघनामा, पर्वतो गिरिरिति तन्नामसूक्तत्वात्' इति पाठः साधुः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

९४०·६ आयुक्षाताम् आभिमुख्येन युञ्जाताम्। 'आयुक्षातामश्विना' इति संहितायाम् सायणः 'आ अयुक्षाताम्' इति पदद्वयं मन्यते। शाकल्यस्तु अयुक्षातामिति एकमेव पदम्।

९६८·५ सादे सदने अगमने। अत्र 'गमने' इति युक्तः पाठः। मु-पुस्तकेऽपि तथैव दृश्यते।

९६८·६ अर्थतो गमनं कुर्वन् शूत्कारं कुर्वतः। अत्र 'कुर्वन्' इति प्रथमान्तं पदमन्वितमिति प्रतिभाति।

९७२·१७ स्थानत्रयेष्वपि। अत्र 'स्थानत्रयेऽपि' इति पाठः साधुः।

९९३·३ यदा चर्मवदाकाशमित्यादिश्रुतिः ज्ञानादन्योपायस्य अमृतत्वप्राप्तिं निवारयति। ब्रह्म वेद ब्रह्मैव भवति इत्यादिका तु ज्ञानात् प्राप्तिमाह-क्ष-ज्ञ१-ज-ट। अत्र मॅ-मु-पुस्तकयोः 'यद्वा चर्मवदाकाशमित्यादि श्रुतेः ज्ञानादन्योपायस्य अमृतत्वप्राप्तिं निवारयति। ब्रह्मवेद ब्रह्मैव भवति इत्यादिकानुज्ञाप्राप्तिमाह' इति पाठो दृश्यते। अस्मिन् पाठे तु अत्र अर्थान्तरस्य कस्याप्यप्रतिपाद्यमानत्वात् पक्षान्तरद्योतकस्य 'यद्वा' इति शब्दस्य 'इत्यादिश्रुतेः' इति षष्ठ्यन्तस्य 'अनुज्ञाप्राप्तिम्' इत्यस्य च अन्वयो न भवतीति स्फुटमेव।

१००३·१२-१३ 'नामरूपांशम् अपरमार्थं (परमार्थं-क-ख-ग-फ-भ.) त्यक्त्वा सर्वत्र अनुगतोऽस्ति भाति प्रियमिति योऽयं सच्चिदानन्दाकारोऽस्ति' इत्यादि—क-ख-क्ष-ण-ज्ञ१-ज-ट-फ-भ-पुस्तकेषु। मॅ-मु-पुस्तकयोः 'नामरूपांशं परमार्थं (मु-अपरमार्थं) त्यक्त्वा सर्वत्रानुगतोऽस्मि। योऽयं सच्चिदानन्दाकारोऽस्ति' इत्यादि। 'अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्। आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्' इत्युक्तरीत्या सर्वेष्वपि प्रापञ्चिकपदार्थेषु अंशपञ्चकं प्रतिभासते। तत्र घटोऽस्ति घटो भाति घटः प्रियः इति घटादिषु योऽयं सच्चिदानन्दांशो भासते सोऽधिष्ठानभूतब्रह्मरूपत्वात् परमार्थः। घट इति नाम कम्बुग्रीवादिमत्त्वाकार इत्युभयमध्यस्तजगद्रूपम् अत एव अपरमार्थभूतम्। तत्र नामरूपयोः प्रतिपदार्थं भिन्नत्वेऽपि सच्चिदानन्दाकारस्य सर्वत्रानुगतत्वेन अभिन्नत्वात् नामरूपांशं मुक्त्वा अधिष्ठानब्रह्मरूपसच्चिदानन्दाकारेण कृत्स्नप्रपञ्चः अहमेवास्मीति यदिदं तत्त्वं तन्न विजानामीति अत्रार्थो विवक्षितः। तथा च परमार्थमिति पाठोऽशुद्ध एव। 'सर्वत्र अनुगतोऽस्मि योऽयम्' इत्यादिपाठापेक्षया मूले निवेशितः पाठः साधीयान्।

१००३·१९ यदापरोक्ष्यज्ञानं सर्वैकात्म्यरूपमानुभविकमस्ति क्ष-ज्ञ-ज्ञ१-ज्ञ-ज। मॅ-मु-पुस्तकयोः 'यत्परोक्षज्ञानम्' इत्यादि पाठः। अत्र आनुभविकमिति विशेषणात् आपरोक्ष्यज्ञानम् इति पाठो युक्त इति स्फुटमेव।

१००४·६ अदुःसंपादा। अत्र 'दुःसंपादा' इत्येव शुद्धः पाठः।

१००४·१५ सहवासेन स्वास्मिन्नप्युत्पत्तिरुपचर्यते। अत्र 'उत्पत्तिमत्सहवासेन' इत्यादिपाठः साधीयान्।

१००४·२१ शश्वन्ता अविभागेन। अयमेव अस्मदुपलब्धेषु सर्वलिखितपुस्तकेषु मु-पुस्तके च पाठः। मॅ-पुस्तके 'अविभागेन' इत्यत्र 'विभागेन' इति पाठः। सोऽशुद्ध इति स्फुटमेव।

१००५·१५ बुद्धिशुद्ध्युत्पादनद्वारा वेदनसाधनत्वेन ब्रह्मविषयत्वं भविष्यति—क्ष-ज्ञ-ज-ट। ण-मु-पुस्तकयोः 'बुद्धिशुद्ध्युत्पादनद्वारा.....ब्रह्मविषया भविष्यन्ति' इति पाठः। अत्र मॅ-पुस्तके बुद्धिः श्रुत्युत्पादनद्वारा वेदनसाधनत्वेन ब्रह्मविषया भविष्यति इति पाठः। अस्मिन् पाठे सम्यक् पदार्थान्वयो न भवतीति व्यक्तमेव।

१००५·१८-१९ निरधिष्ठा न कस्यचिदस्ति स्वाध्यस्तस्य सर्वस्य अधिष्ठानत्वेन रक्षकत्वात्। अत्र 'निरधिष्ठा न कस्यचिदस्ति' इत्येतावान् भागः अशुद्धः प्रतिभाति। अत्र 'निरधिष्ठानकस्य चितः' इति भाव्यम्। मु-पुस्तके निरधिष्ठानः भ्रमः कस्यचिदस्ति साध्यस्तस्य सर्वस्याधिष्ठानत्वेनाक्षकत्वात्' इति दृश्यते। परंतु सोऽशुद्ध इति स्फुटमेव।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

१००५·२२ **कृत्स्नवेदतात्पर्यप्रतिपाद्यं यद्वस्तु**-क्ष-झ-झ१-ज-ट. । मॅ-पुस्तके 'कृत्स्नवेदैस्तात्पर्यं प्रतिपाद्यं यद्वस्तु ' इति पाठः । मु-पुस्तके च ' कृत्स्नं वेदैस्तात्पर्यं प्रतिपाद्यं यद्वस्तु ' इति पाठो दृश्यते । अन्तिमपाठद्वयेऽपि पदानां परस्परान्वयो न भवतीति स्फुटमेव ।

१००७·२५ **प्रसिद्धार्थे धातुः** । इदमनन्वितार्थं प्रतिभाति । ण-पुस्तके ' सलिः प्रथिथार्थे धातुः ' इति पाठो दृश्यते । अत्र ' सलिः प्रतिष्ठार्थे धातुः ' इति स्यादित्यनुमीयते । ' सलिलानि ' इत्यस्य इदं विवरणं प्रतिभाति । मु-पुस्तके ' मिमतिः प्रतिष्ठार्थे धातुः ' इति पाठः ।

१००९·१० **संवत्सरं वपते** । अत्र ' यद्वा प्रतिसंवत्सरम् ' इति पाठः क्ष-झ१-ज-ट-पुस्तकेषु दृश्यते । अयमेव पाठः युक्ततरः । मु-पुस्तके ' संवत्सरं ' नास्ति ।

१०१२·८ **क उ कोऽपि**-ख-झ-झ१-ज-ट-मु. । मॅ-पुस्तके ' क उक्तोऽपि ' इति पाठः ।

१०१७·२१ **शत्रुरेवायम्** । **कर्मणि षष्ठी** । अत्र ' शत्रुरेवायम् ' इति अनन्वितं दृश्यते । ' विश्वस्य शत्रोरिति कर्मणि षष्ठी ' इति पाठः युक्तः प्रतिभाति । ण-पुस्तके ' शत्रोरेव । अयं कर्मणि षष्ठी ' इति दृश्यते ।

१०२५·८ **उदके निमित्तभूते सति**–ज-क-झ-झ१. । मॅ-मु-पुस्तकयोः ' उदकनिमित्तभूते सति ' इति पाठः ।

१०४०·५ **शब्दाभिमानानाम्** । अत्र ' शब्दायमानानाम् ' इति पाठः युक्तः प्रतिभाति । मु-पुस्तकेऽपि तथैव दृश्यते ।

१०४२·११ **अमरणलक्षणस्य वेदत्वस्य** । अत्र 'वेदत्वस्य' इत्यस्य स्थाने ' देवत्वस्य ' इति पाठः मु-पुस्तकेऽपि दृश्यते ।

१०६९·२१ **तप्तघर्मसकाशात् भक्षितवान् इत्यर्थः** । ' अत्र तप्तघर्मसकाशात् रक्षितवन्तौ ' इति पाठः साधुः ।

१०७३·१ **कदु कदा भविष्यति** । अत्र ' भविष्यति ' इति पदमनन्वितं प्रतिभाति । मु-पुस्तके इदं न दृश्यते ।

१०८९·११–१२ **अत्र सर्वत्र प्रकारान्तरेण मन्त्रमन्तरेण रक्षतं रक्षतामिति प्रार्थनं तयोः अश्विन्यादिवद्बहुमननासंभवात् उचितमेव** । अत्र वाक्यार्थो न स्फुटः ।

१०९४·१५ **मरुत्सेना वृष्ट्या** । अत्र अवृष्ट्या इति पाठः युक्ततरः । ण-मु-पुस्तकयोरपि तथैव दृश्यते ।

---

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

# संकेतविवरणम्

अनु. .....ऋग्वेदसर्वानुक्रमणीपरिभाषा ( मॅकडोनेल् )
अम. .....अमरकोशः
अ. सं. ...अथर्ववेदसंहिता (बॉ. सं. सीरीज् )
आप. गृ....आपस्तम्बगृह्यसूत्राणि
आप. परि....आपस्तम्बपरिभाषासूत्राणि
आप. श्रौ. ...आपस्तम्बश्रौतसूत्राणि
आप. गृ. ...आश्वलायनगृह्यसूत्राणि ( गणपत कृष्णाजी )
आश्व. श्रौ. ...आश्वलायनश्रौतसूत्राणि ( आनन्दाश्रम )
आर्षे. ब्रा. ...आर्षेयब्राह्मणम् ( कलकत्ता )
उ. सू. ...उणादिसूत्राणि ( बालमनोरमा )
ऋग्वि. .....ऋग्विधानम् ( निर्णयसागर )
ऋ. प्रा. ...ऋग्वेदप्रातिशाख्यम् ( मॅ. मुल्लर )
ऐ. आ. ...ऐतरेयारण्यकम् ( आनन्दाश्रम )
ऐ. उ.....ऐतरेयोपनिषत् ( आनन्दाश्रम )
ऐ. ब्रा. ...ऐतरेयब्राह्मणम् ( आनन्दाश्रम )
का. .....काशिका ( चौखाम्बासीरीज् )
कौ. उ. ...कौषीतक्युपनिषत् ( आनन्दाश्रम )
छा. उ. ...छान्दोग्योपनिषत् ( आनन्दाश्रम )
जै. न्या. ...जैमिनीयन्यायमालाविस्तरः ( आनन्दाश्रम )
ता. ब्रा. ...ताण्ड्यब्राह्मणम् ( कलकत्ता )
तै. आ. ...तैत्तिरीयारण्यकम् ( आनन्दाश्रम )
तै. प्रा. ...तैत्तिरीयप्रातिशाख्यम् ( कलकत्ता )
तै. ब्रा. ...तैत्तिरीयब्राह्मणम् ( आनन्दाश्रम )
तै. सं. ...तैत्तिरीयसंहिता ( आनन्दाश्रम )
दश. पा....दशपादुणादिसूत्राणि
नि. .....निघण्टुः ( निर्णयसागर )
निरु. .....निरुक्तम् ( आनन्दाश्रम )
नृ. ता. ...नृसिंहतापनीयोपनिषत् ( आनन्दाश्रम )
परिभा. ...परिभाषेन्दुशेखरः ( कीलहॉर्न )
पा. शि. ...पाणिनीयशिक्षा ( निर्णयसागर )
पा. सू. ...पाणिनीयसूत्राणि ( निर्णयसागर )
पा. म. ...पातञ्जलमहाभाष्यम् ( कीलहॉर्न )
पि. सू. ...पिङ्गलसूत्राणि ( कलकत्ता )
जै. सू. ...जैमिनीयसूत्राणि ( आनन्दाश्रम )
फि. सू. ...फिट्सूत्राणि ( निर्णयसागर )
बृ. उ. ...बृहदारण्यकोपनिषत् (आनन्दाश्रम)
बृ. सं. वा. बृहदारण्यकोपनिषद्भाष्यसंबन्ध-वार्तिकम् ( आनन्दाश्रम )
बृहद्दे. .....बृहद्देवता ( मॅकडोनेल् )
मनु. .....मनुस्मृतिः ( निर्णयसागर )
म. भा. ...महाभारतम्
मुं. उ. ...मुण्डकोपनिषत् ( आनन्दाश्रम )
मै. उ. ...मैत्रायणीयोपनिषत् ( निर्णयसागर )
मै. सं. ...मैत्रायणीयसंहिता ( श्रेडेर )
वा. सं. ...वाजसनेयिसंहिता ( सातवळेकर )
वे. सू. ...वेदान्तसूत्राणि ( निर्णयसागर )
श. ब्रा. ...शतपथब्राह्मणम् ( वेबर )
श्वे. उ.....श्वेताश्वतरोपनिषत् ( आनन्दाश्रम )
शा. भा....शाबरभाष्यम् ( आनन्दाश्रम )

---



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ॐ

# ऋग्वेदसंहिता

## श्रीमत्सायणाचार्यविरचितभाष्यसमेता

### उपोद्घातप्रकरणम्

॥ श्रीगणेशाय नमः ॥

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ २ ॥
यत्कटाक्षेण[1] तद्रूपं दधद्बुक्कमहीपतिः ।
आदिशन्माधवाचार्यं[2] वेदार्थस्य प्रकाशने* ॥ ३ ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात् ।
कृपालुर्माधवाचार्यो[3] वेदार्थं वक्तुमुद्यतः ॥ ४ ॥
आध्वर्यवस्य यज्ञेषु प्राधान्याद्व्याकृतः पुरा ।
यजुर्वेदोऽथ हौत्रार्थमृग्वेदो व्याकरिष्यते ॥ ५ ॥
एतस्मिन् प्रथमोऽध्यायः[4] श्रोतव्यः संप्रदायतः ।
व्युत्पन्नस्तावता सर्वं बोद्धुं शक्नोति बुद्धिमान् ॥ ६ ॥

अत्रँ केचिदाहुः । ऋग्वेदस्य प्राथम्येन सर्वत्राम्नातत्वात् ' अभ्यर्हितं पूर्वम् ' इति न्यायेनाभ्यर्हितत्वात् तद्व्याख्यानमादौ युक्तम् । प्राथम्यं च पुरुषसूक्ते विस्पष्टं–' तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे । छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ' (ऋ. सं. १०. ९०. ९) इति । तस्मात्[5] ' सहस्रशीर्षा पुरुषः ' (ऋ.सं.१०.९०.१) इत्युक्तात् परमेश्वरात् यज्ञात्[6] यजनीयात् पूजनीयात् सर्वहुतः सर्वैर्हूयमानात् । यद्यपीन्द्रादयस्तत्र तत्र हूयन्ते तथापि परमेश्वरस्यैव[7] इन्द्रादिरूपेणावस्थानादविरोधः । तथा च मन्त्रवर्णः– ' इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् । एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ' ( ऋ. सं. १. १६४. ४६ ) इति । वाजसनेयिनश्चामनन्ति–' तद्यदिदमाहुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवाः ' ( बृ. उ. १. ४. ६ ) इति । तस्मात् सर्वैरपि परमेश्वर एव हूयते ॥ न केवलमृचां पाठःप्राथम्येनाभ्यर्हितत्वं किंतु यज्ञाङ्गदार्ढ्यहेतुत्वादपि ।

---

१. ट-ठ–तत्कटाक्षेण । २. ट-ठ–सायणाचार्यम् । ३. ट-ठ–सायणाचार्यो । ४. च-फ–प्रथमाध्यायः ।

* च-त-थ-फ–' स प्राह नृपतिं राजन् सायणार्यो ममानुजः । सर्वं वेत्त्येष वेदानां व्याख्यातृत्वेन युज्यताम् ॥ इत्युक्तो माधवार्येण वीरबुक्कमहीपतिः । अन्वगात् (त–अन्वशात्) सायणाचार्यं वेदार्थस्य प्रकाशने ' ॥ इमौ श्लोकौ तृतीयश्लोकानन्तरमधिकौ दृश्येते ।

५. ट-ठ- ' अत्र ' नास्ति । ६. त-थ–' तस्मात् ' नास्ति । ७. च-छ-झ–' यज्ञात् ' नास्ति । ८. ठ-' पूजनीयात् ' नास्ति । ९. ठ–परमेश्वरस्य । १०.ट-ठ–प्राथम्यमात्रेण ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तथा च तैत्तिरीया आमनन्ति–'यद्वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तद्यदृचा तद्दृढम्' (तै. सं. ६. ५. १०. ३) इति। तथा च सर्ववेदगतानि ब्राह्मणानि स्वाभिहितेऽर्थे विश्वासदार्ढ्याय 'तदेतदृचाभ्युक्तम्' इति ऋचमेवोदाहरन्ति॥ सन्त्रकाण्डेष्वपि यजुर्वेदगतेषु तत्र तत्राध्वर्युणा प्रयोज्या ऋचो बहव आम्नाताः। साम्नां तु सर्वषामृगाश्रितत्वं प्रसिद्धम्। आथर्वणिकैरपि स्वकीयसंहितायामृच एव बाहुल्येनाधीयन्ते। अतोऽन्यैः सर्वैर्वेदैरादृतत्वादभ्यर्हितत्वं प्रसिद्धम्। छन्दोगाश्च प्राथम्ये सनत्कुमारं प्रति नारदवाक्यमेवमामनन्ति–'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम् (छां. उ. ७. १. २) इति। मुण्डकोपनिषद्यप्येवमाम्नायते–'ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः' (मुं. उ. १. १. ५) इति। तापनीयोपनिषद्यपि मन्त्राराजपादेषु क्रमेणाध्ययनमेवमामनन्ति–'ऋग्यजुः सामाथर्वाणश्चत्वारो वेदाः साङ्गाः सशाखाश्चत्वारः पादा भवन्ति' (नृ. ता. उ. १. २) इति। एवं सर्वत्रोदाहरणीयम्। तस्मात् ऋग्वेदस्याभ्यर्हितस्यादौ व्याख्यानमुचितमिति तान् प्रत्येतदुच्यते—

अस्त्वेवं सर्ववेदाध्ययनतत्पारायणब्रह्मयज्ञजपादौ ऋग्वेदस्यैव प्राथम्यम्। अर्थज्ञानस्य तु यज्ञानुष्ठानार्थत्वात् तत्र तु यजुर्वेदस्यैव प्रधानत्वात् तद्व्याख्यानमेवादौ युक्तम्। तत्प्राधान्यं च काचिदृगेवाह–'ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शकरीषु। ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां विमिमीत उ त्वः' (ऋ. सं. १०. ७१. ११) इति। एतस्या ऋचस्तात्पर्यं निरुक्तकारो यास्कः संक्षिप्य दर्शयति–'इत्यृत्विक्कर्मणां विनियोगमाचष्टे' इति। पुनरपि स एव प्रथमं पादं विवृणोति–'ऋचामेकः पोषमास्ते पुपुष्वान् होतर्गर्चनी' (निरु. १. ८) इति। अस्यायमर्थः। त्वशब्द एकशब्दपर्यायो होतृविशेषणम्। होतृनामक एक ऋत्विक् यज्ञकाले स्वकीयवेदगतानामृचां पुष्टिं कुर्वन्नास्ते। भिन्नप्रदेशेष्वाम्नातानामृचां संघमेकत्र संपाद्यैतावदिदं शस्त्रमिति कल्पिं करोति। सेयं पुष्टिः। अर्चनीत्यसुमर्थमृक्शब्द आचष्टे। अर्च्यते प्रशस्यतेऽनया देवविशेषः क्रियाविशेषस्तत्साधनविशेषो वा इति ऋक्शब्दव्युत्पत्तिरिति। अथ द्वितीयं पादं विवृणोति–'गायत्रमेको गायति शकरीष्वृद्गाता। गायत्रं गायतेः स्तुतिकर्मणः शक्वर्य ऋचः शक्नोतेस्तद्यदाभिर्वृत्रमशकद्धन्तुं तच्छक्करीणां शक्करीत्वमिति विज्ञायते' इति। अस्यायमर्थः। उद्गातृनामकः एकः ऋत्विक् गायत्रशब्दाभिधेयं स्तोत्रं शक्करीशब्दाभिधेयासु ऋक्षु गायति। धातूनामनेकार्थत्वेन स्तुतिक्रियावाचिनो गायतिधातोरुत्पन्नोऽर्थ गायत्रशब्दः। शक्करीशब्दस्तु शक्नोतिधातोरुत्पन्नः। वृत्रं शत्रुं हन्तुं शक्नोत्याभिः ऋग्भिरित्येषा व्युत्पत्तिः कस्मिंश्चित् ब्राह्मणे विज्ञायते इति। अथ तृतीयं पादं विवृणोति–'ब्रह्मैको जाते जाते विद्यां वदति। ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हति' इति। अस्यायमर्थः। ब्रह्मनामकः एकः ऋत्विक् जाते जाते तदा तदोत्पन्ने यज्ञे प्रस्तुते प्रणयनादिकर्मणि विद्याम् अनुज्ञां वदति, 'ब्रह्मन्नपः प्रणेष्यामि' इत्येवं संबोधितः सन् 'ॐ प्रणय' इत्यनुजानाति। स च ब्रह्मा वेदत्रयोक्तसर्वकर्माभिज्ञः। तस्मात् योग्यतां दृष्ट्वा तत्तदनुज्ञातुं सति प्रमादे समाधातुं च समर्थः इति। तच्च सामर्थ्यं छन्दोगा आमनन्ति–'एष एव यज्ञस्तस्य मनश्च वाक् च वर्तनी तयोरन्यतरां मनसा संस्करोति ब्रह्मा वाचा होताध्वर्युरुद्गातान्यतराम्' (छां. उ. ४. १६. १-२) इति। कृत्स्नो यज्ञः प्रमादराहित्याय मनसा सम्यगनुसंधेयो वाचा च वेदत्रयोक्तमन्त्राः पठनीयाः। तत्र होत्रादयस्त्रयो मिलित्वा वाग्रूपं यज्ञमार्गं संस्कुर्वन्ति। ब्रह्मा तु एक एव मनोरूपं यज्ञमार्गं कृत्स्नमपि संस्करोति। तस्मादस्यास्ति सामर्थ्यमिति। अथ चतुर्थं पादं

---

१. च-छ-ट-ण-य-°नाभिधीयन्ते। २. ट-ठ–'वेदैरादृतत्वात्' नास्ति। ३. च-छ-झ-फ-श–'प्रसिद्धम्' नास्ति। ४. ट-ठ–वर्जमितरेषु– छन्दोगास्तु। ५. ट–वर्जमितरेषु–प्राथम्येन। ६. ट-ठ-°र्हितत्वात् तस्य आदौ। ७. ट-°त्येवमुच्यते; ठ-°प्रत्युच्यते। ८. ट-ठ-अस्त्येव। ९. ट-°ब्रह्मवादादौ; ठ-°ब्रह्मजपादौ। १०. ठ-'तु' नास्ति। ११. ठ-तस्य। १२. ट-ठ- च। १३. ट-प्राधान्यम्। १४. घ-च-छ-ण-त-थ-प-फ-श-संघात°। १५. ग-घ-च-ट-फ-श-व्युत्पत्तेरिति। १६. ठ-साम। १७. च-त-प-'अयम्' नास्ति। १८. ट-ठ-'शत्रुम्' नास्ति। १९. ट-ठ-'जाते जाते' नास्ति। २०. ट-ठ- 'यज्ञे' नास्ति। २१. ट-तदनुष्ठातुः... संधातुम्। २२. घ-छ-ण-त-थ-न-य–वाङ्मयम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

विवृणोति–'यज्ञस्य मात्रां विमिमीत एकोऽध्वर्युरध्वर्युरध्वरयुरध्वरं युनक्त्यध्वरस्य नेता' इति। अस्यायमर्थः। अध्वर्युनामकः एकः[1] ऋत्विक् यज्ञस्य मात्रां स्वरूपं[2] विमिमीते विशेषेण निष्पादयति। मीयते निर्मीयते इति मात्रा स्वरूपम्। तन्निष्पादकत्वं च अध्वर्योर्नामनिर्वचनादवगम्यते। 'अध्वर्युः' इत्यत्र छान्दस्या प्रक्रियया लुप्तम् अकारं पुनः प्रक्षिप्य 'अध्वरयुः' इति नाम संपादनीयम्। अध्वरं युनक्तीत्यवयवार्थः। अध्वरस्य नेतेति तात्पर्यार्थ इति। एतदेवाभिप्रेत्य अध्वर्युवेदस्य यागनिष्पादकत्वद्योतकं[3] निर्वचनं यास्को दर्शयति–'मन्त्रा मननाच्छन्दांसि छादनात् स्तोमः स्तवनाद्यजुर्यजतेः' (निरु. ७. १२) इति। एवं सति अध्वर्युसंबन्धिनि यजुर्वेदे निष्पन्नं यज्ञशरीरमुपजीव्य तदपेक्षितौ स्तोत्रशस्त्ररूपावयवौ इतरेण वेदद्वयेन पूर्येते इत्युपजीव्यस्य यजुर्वेदस्य प्रथमतो व्याख्यानं युक्तम्। तत ऊर्ध्वं साम्नामृगाश्रितत्वादुभयोर्मध्ये प्रथमत ऋग्व्याख्यानं युक्तमिति ऋग्वेद इदानीं व्याख्यायते॥

ननु वेद एव तावन्नास्ति कुतस्तदवान्तरविशेष ऋग्वेदः। तथा हि। कोऽयं वेदो नाम। न हि तत्र लक्षणं प्रमाणं वास्ति। न च तदुभयव्यतिरेकेण किंचिद्वस्तु प्रसिध्यति[4]। 'लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः' इति न्यायविदां मतम्॥

प्रत्यक्षानुमानागमेषु प्रमाणविशेषेषु[5] अन्तिमो वेद इति तल्लक्षणमिति चेत्। न। मन्वादिस्मृतिष्वतिव्याप्तेः। समयबलेन 'सम्यक्परोक्षानुभवसाधनम्' इत्येतस्यागमलक्षणस्य तास्वपि सद्भावात्। 'अपौरुषेयत्वे सति' इति विशेषणात् अदोषः इति चेत्। न। वेदस्यापि परमेश्वरनिर्मितत्वेन पौरुषेयत्वात्। शरीरधारिपुरुषनिर्मितत्वाभावादपौरुषेयत्वमिति[6] चेत्। न। 'सहस्रशीर्षा पुरुषः' (ऋ. सं. १०. ९०. १) इत्यादिश्रुतिभिरीश्वरस्यापि शरीरित्वात्। कर्मफलरूपशरीरधारिजीवनिर्मितत्वाभावमात्रेण अपौरुषेयत्वं विवक्षितमिति चेत्। न। जीवविशेषैरग्निवाय्वादित्यैर्वेदानामुत्पादितत्वात्। 'ऋग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात्' (ऐ. ब्रा. ५. ३२) इति। श्रुतेः ईश्वरस्य अग्न्यादिप्रेरकत्वेन निर्मातृत्वं द्रष्टव्यम्। मन्त्रब्राह्मणात्मकः शब्दराशिर्वेद इति चेत्। न। ईदृशो मन्त्रः ईदृशं ब्राह्मणम् इत्यनयोरद्याप्यनिर्णीतत्वात्। तस्मान्नास्ति किंचित् वेदस्य लक्षणम्॥

नापि तत्सद्भावे प्रमाणं पश्यामः। 'ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थम्' (छां. उ. ७. १. २) इत्यादिवाक्यं प्रमाणमिति चेत्। न। तस्यापि[7] वाक्यस्य वेदान्तःपातित्वेन आत्माश्रयत्वप्रसङ्गात्। न खलु निपुणोऽपि[8] स्वस्कन्धमारोढुं प्रभवति॥ 'वेद एव द्विजातीनां निःश्रेयसकरः परः' (याज्ञ. १. ४०) इत्यादिस्मृतिवाक्यं प्रमाणमिति चेत्। न। तस्याप्युक्तश्रुतिमूलत्वेन निराकृतत्वात्। प्रत्यक्षादिकं तु[9] शङ्कितुमप्ययोग्यम्। वेदविषया तु लोकप्रसिद्धिः सार्वजनीनापि 'नीलं नभः' इत्यादिवत् भ्रान्ता। तस्मात् लक्षणप्रमाणरहितस्य वेदस्य सद्भावो नाङ्गीकर्तुं[10] शक्यते[11] इति पूर्वः पक्षः॥

अत्रोच्यते—मन्त्रब्राह्मणात्मकत्वं तावददुष्टं लक्षणम्। अत एव आपस्तम्बो यज्ञपरिभाषायामेवमाह–'मन्त्रब्राह्मणयोर्वेदनामधेयम्' (आप.परि.१.३२) इति। तयोस्तु स्वरूपमुपरिष्टान्निर्णेष्यते। अपौरुषेयवाक्यत्वमितीदमपि यादृशमस्माभिर्विवक्षितं तादृशमुत्तरत्र स्पष्टीभविष्यति। प्रमाणान्यपि यथोक्तश्रुतिस्मृतिलोकप्रसिद्धिरूपाणि वेदसद्भावे द्रष्टव्यानि। यथा घटपटादिद्रव्याणां स्वप्रकाशकत्वाभावेऽपि[12] सूर्यचन्द्रादीनां

---

१. ट– 'एकः' नास्ति। २. ट-ठ–'स्वरूपम्' नास्ति। ३. य–°दकद्योतनम्; त–°दकद्योतकम्। ४. ठ-सिध्यति। ५. ट– 'प्रमाणविशेषेषु' नास्ति। ६. च-फ-°धारिजीवपुरुषानिर्मितत्वाभावा°; क-ख-ग-ण-न-प–शरीरधारिजीवनिर्मित°। ७. ट–शरीरधारित्वश्रवणात्। ८. च-प-फ–कर्मफलशरीररूपधारि°; ट-ठ–'कर्मफलरूप.....विवक्षितमिति चेत् न' इत्यस्य स्थाने 'शरीरधारित्वं न विवक्षितमिति चेत् न' इति पाठः। ९. ट-ठ–'तस्यापि वाक्यस्य.....प्रसङ्गात्' इत्यस्य स्थाने 'स्ववाक्ये स्वस्य प्रामाण्यादर्शनात्'। १०. ट-निपुणोऽपि वटुः; ठ–निपुणोऽपि नटवटुः। ११. च-छ-त-प-फ–'तु' नास्ति। १२. ट-ठ–नाङ्गीक्रियते। १३. च-छ-प-फ–°त्वमिदमपि। १४. ट-त–वर्जमितरेषु–स्वप्रकाशत्वाभावे।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्वप्रकाशकत्वमविरुद्धं, तथा मनुष्यादीनां स्वस्कन्धारोहासंभवेऽपि अकुण्ठितशक्तेर्वेदस्य इतरवस्तुप्रतिपादकत्ववत् स्वप्रतिपादकत्वमप्यस्तु। अत एव संप्रदायविदः अकुण्ठितां शक्तिं वेदस्य दर्शयन्ति–'चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थं शक्नोत्यवगमयितुम्' (शाब. भा. १. १. २) इति। तथा सति वेदमूलायाः स्मृतेस्तदुभयमूलाया लोकप्रसिद्धेश्च प्रामाण्यं दुर्वारम्। तस्मात् लक्षणप्रमाणसिद्धो[१] वेदो न केनापि चार्वाकादिना अपोढुं शक्यते[२] इति स्थितम्॥

नन्वस्तु नाम वेदाख्यः कश्चित् पदार्थः। तथापि नासौ व्याख्यानमर्हति। अप्रमाणत्वेनानुपयुक्तत्वात्। न हि वेदः प्रमाणम्। तल्लक्षणस्य तत्र दुःसंपादत्वात्। तथा हि 'सम्यगनुभवसाधनं प्रमाणम्' इति केचिल्लक्षणमाहुः। अपरे तु 'अनधिगतार्थगन्तृ प्रमाणम्' इत्याचक्षते। न चैतदुभयं वेदे संभवति। मन्त्रब्राह्मणात्मको हि वेदः। तत्र मन्त्राः केचिदबोधकाः। 'अम्यक्सा त इन्द्र ऋष्टिः' (ऋ. सं. १. १६९. ३) इत्येको मन्त्रः। 'यादृश्मिन्धायि तमपस्यया विदत्' (ऋ. सं. ५. ४४. ८) इत्यन्यः। 'सृण्येव जर्भरी तुर्फरीतू' (ऋ. सं. १०. १०६. ६) इत्यपरः। एवम् 'आपान्तमन्युस्तृपलप्रभर्मा' (ऋ. सं. १०. ८९. ५) इत्यादय उदाहार्याः। न ह्येतैर्मन्त्रैः कश्चिदप्यर्थोऽवबुध्यते। एतेष्वनुभव एव यदा नास्ति तदा तत्सम्यक्त्वं तदीयसाधनत्वं च दूरापेतम्। 'अधः स्विदासी३दुपरि स्विदासी३त्' (ऋ. सं. १०. १२९. ५) इति मन्त्रस्य बोधकत्वेऽपि स्थाणुर्वा पुरुषो वा इत्यादिवाक्यवत् संदिग्धार्थबोधकत्वान्नास्ति प्रामाण्यम्। 'ओषधे त्रायस्वैनम्' (तै. सं. १. २. १. १) इति मन्त्रो दर्भविषयः (आश्व. गृ. १. १७. ८)। 'स्वधिते मैनं हिंसीः' (तै. सं. १. २. १. १) इति क्षुरविषयः (आश्व. गृ. १. १७. ९)। 'शृणोत ग्रावाणः' (तै. सं. १. ३. १३. १) इति पाषाणविषयः। एतेष्वचेतनानां दर्भक्षुरपाषाणानां चेतनवत् संबोधनं श्रूयते। ततो 'द्वौ चन्द्रमसौ' इति वाक्यवद्विपरीतार्थबोधकत्वादप्रामाण्यम्। 'एक एव रुद्रो न द्वितीयाय तस्थे' (तै. सं. १. ८. ६. १), 'सहस्राणि सहस्रशो ये रुद्रा अधि भूम्याम्' (तै. सं. ४. ५. ११. १) इत्यनयोस्तु[४] मन्त्रयोः 'यावज्जीवमहं मौनी' इति वाक्यवत् व्याघातबोधकत्वादप्रामाण्यम्। 'आप उन्दन्तु' (तै. सं. १. २. १. १) इति मन्त्रो यजमानस्य क्षौरकाले जलेन[५] शिरसः क्लेदनं ब्रूते। 'शुभिके शिर आरोह शोभयन्ती मुखं मम' इति मन्त्रो विवाहकाले मङ्गलाचरणार्थं पुष्पनिर्मितायाः शुभिकाया वरवध्वोः शिरस्यवस्थानं ब्रूते। तयोश्च मन्त्रयोर्लोकप्रसिद्धार्थानुवादित्वात् अनधिगतार्थगन्तृत्वं नास्ति। तस्मात् मन्त्रभागो न प्रमाणम्॥

अत्रोच्यते—अम्यगादिमन्त्राणामर्थो यास्केन निरुक्तग्रन्थेऽवबोधितः। तत्परिचयरहितानामनवबोधो[६] न मन्त्राणां दोषमावहति। अत एवात्र लोकन्यायमुदाहरन्ति–'नैष स्थाणोरपराधो यदेनमन्धो न पश्यति पुरुषापराधः स भवति' (निरु. १. १६) इति। 'अधः स्विदासीत्' इति मन्त्रश्च न सन्देहप्रबोधनायं[७] प्रवृत्तः। किं तर्हि जगत्कारणस्य परवस्तुनोऽतिगम्भीरत्वं निश्चेतुमेव प्रवृत्तः। तदर्थमेव हि गुरुशास्त्रसंप्रदायरहितैर्दुर्बोधत्वम्[८] 'अधः स्वित्' इत्यनया वचोभङ्ग्योपन्यस्यति। स एवाभिप्राय उपरितनेषु 'को अद्धा वेद' (ऋ. सं. १०. १२९. ६) इत्यादिमन्त्रेषु स्पष्टीकृतः। ओषध्यादिमन्त्रेष्वपि चेतना एव तत्तदभिमानिदेवताः तेन तेन नाम्ना संबोध्यन्ते। ताश्चदेवता भगवता बादरायणेन 'अभिमानिव्यपदेशस्तु' (ब्र. सू. २. १. ५) इति सूत्रे सूचिताः। एकस्यापि रुद्रस्य स्वमहिम्ना सहस्रमूर्तिस्वीकारान्नास्ति परस्परव्याघातः। जलादिद्रव्येण[९] शिरःक्लेदनादेर्लोकप्रसिद्धत्वेऽपि[१०] तदभिमानिदेवतानुग्रहस्याप्रसिद्धत्वात् तद्विषयत्वेनाज्ञातार्थज्ञापकत्वम्। ततो लक्षणसद्भावादस्ति मन्त्रभागस्य प्रामाण्यम्॥

---

१. ट-त-वर्जमितरेषु–स्वप्रकाशत्वम्। २. ट-ठ-लक्षणसिद्धौ। ३. ग-घ-च-छ-ण-त-थ-प-य–शक्यः। ४. त-थ–इत्येतयोस्तु; ठ–इति वाक्ययोः। ५. ट–'शिरसः' नास्ति। ठ–'जलेन शिरसः' नास्ति। ६. च-ट-ठ-फ– °नामबोधो। ७. ट-त-थ–संदेहबोधनाय। ८. क-झ-श–°दुर्बोध्यत्वम्। ९. ट-जलद्रव्येण। १०. त-°लोकासिद्धत्वेपि; ट-'अपि' नास्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

एतदेवाभिप्रेत्य भगवान् जैमिनिः मन्त्राधिकरणे मन्त्राणां विवक्षितार्थत्वमसूत्रयत् ( जै. सू. १. २. ३१-४५ )। तानि च सूत्राणि क्रमेणोदाहृत्य व्याख्यास्यामः। तत्र पूर्वपक्षं सूत्रयति—

' तदर्थशास्त्रात्° ' इति। यस्यार्थस्याभिधाने समर्थो मन्त्रः स एवाभिधेयो यस्य शास्त्रस्य ब्राह्मणवाक्यस्य तदिदं वाक्यं तदर्थशास्त्रम्। तस्मात् शास्त्रादविवक्षितार्थो मन्त्रः इत्यवगम्यते। तथा हि ' उरु प्रथस्व ' ( तै. सं. १. १. ८; वा. सं. १·२२ ) इति मन्त्रेण पुरोडाशप्रथनमभिधीयते। ' पुरोडाशं प्रथयति ' ( तै. ब्रा. ३. २. ८. ४; श. ब्रा. १. २. २. ८ ) इति ब्राह्मणेनापि तदेवाभिधीयते। तथा सति मन्त्रेणैव प्रतीतत्वात् तदर्थबोधनाय प्रवृत्तं ब्राह्मणमनर्थकं स्यात्। मन्त्रस्याविवक्षितार्थत्वे तु विनियोगबोधनाय ब्राह्मणमुपयुक्तम्। तस्मात् मन्त्रा उच्चारणेनैवानुष्ठाने उपकुर्वन्ति॥ ननु उच्चारणार्थत्वे सति अदृष्टं प्रयोजनं परिकल्प्येत। अर्थाभिधायकत्वे तु दृष्टं लभ्यते। तस्मात् ब्राह्मणस्यानुवादैकत्वमभ्युपेत्यापि मन्त्रस्याभिधानार्थत्वमेव इत्याशङ्क्य उत्तरं सूत्रयति—

'° वाक्यनियमात् °' इति। ' अग्निर्मूर्धा दिवः ककुत् ' ( ऋ. सं. ८. ४४. १६ ) इत्येवमेव वाक्यं पठितव्यमिति मन्त्रे नियम उपलभ्यते। अर्थप्रत्यायनं तु मूर्धाग्निरित्येवं व्युत्क्रमपाठेऽपि भवत्येव। तस्मात् नियतपाठक्रमसाफल्याय उच्चारणमेव मन्त्रप्रयोजनम्॥ ननु पाठक्रमनियममात्रस्य अदृष्टार्थत्वेऽपि मन्त्रपाठोऽर्थबोधार्थ एव इत्याशङ्क्य तत्र दोषान्तरं सूत्रयति—

'° बुद्धशास्त्रात्° ' इति। ' अग्नीदग्नीन्विहर ' ( तै. सं. ६. ३. १. २ ) इति प्रैषमन्त्रः प्रयोगकाले पठ्यते। तच्च अग्निविहरणादिकम् आग्नीध्रेण अध्ययनकाले एव स्वकर्तव्यत्वेन बुद्धम्। तस्य च बुद्धस्यार्थस्य पुनर्मन्त्रोच्चारणेन शासनमनर्थकम्। न हि सोपानत्के पादे पुनरप्युपानहं प्रतिमुञ्चति॥ ननु बुद्धस्यापि अर्थस्य प्रमादिकविस्मरणपरिहाराय मन्त्रेण स्मारणमस्तु इत्याशङ्क्य दोषान्तरं सूत्रयति—

' °अविद्यमानवचनात् °' इति। ' चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ' ( ऋ. सं. ४. ५८. ३ ) इति मन्त्र आम्नायते। न खलु चतुःशृङ्गत्वाद्युपेतं किंचित् यज्ञसाधनं विद्यते यन्मन्त्रपाठेनानुस्मर्येत॥ ननु ईदृशी काचिद्देवता स्यात् इत्याशङ्क्य अन्यं दोषं सूचयति—

'° अचेतनेऽर्थबन्धनात् °' इति। ' ओषधे त्रायस्वैनम् ', ' शृणोत ग्रावाणः ' इत्यादौ अचेतने द्रव्ये चेतनोचितरक्षणश्रवणाद्यर्थं बध्नाति। स चायुक्तः॥ ननु ' अभिमानिव्यपदेश° ' इति वैयासिकशास्त्रे सूचितत्वात् ओषध्याद्यभिमानिचेतनदेवतात्र विवक्ष्यतामित्याशङ्क्य दोषान्तरं सूत्रयति—

' °अर्थविप्रतिषेधात° ' इति। ' अदितिर्द्यौरदितिरन्तरिक्षम्' ( ऋ. सं. १. ८९.१० ) इति मन्त्रः आम्नायते। यदेव द्यौस्तदेवान्तरिक्षमित्ययमर्थो विप्रतिषिद्धः। एवम् ' एक एव रुद्रः ' ( तै. सं. १. ८. ६. १ ), ' सहस्राणि सहस्रशो ये रुद्राः ' ( तै. सं. ४. ५. ११. १ ) इत्यादिकमप्युदाहर्तव्यम्॥ ननु ' त्वमेव माता च पिता त्वमेव ' इत्यादिवत् अन्तरिक्षादिरूपत्वेन अदितिः स्तूयते। एवमेकस्यापि रुद्रस्य योगसामर्थ्यात् बहुमूर्तिस्वीकारोऽस्तु। ततो नार्थविप्रतिषेधः इत्याशङ्क्य दोषान्तरं सूत्रयति—

' °स्वाध्यायवदवचनात्° ' इति। पूर्णिका नाम काचित् योषित् अवघातं करोति। तत्समीपे माणवकः स्वाध्यायग्रहणार्थं कदाचित् अवघातमन्त्रमधीते। न च तस्यार्थप्रकाशनविवक्षाऽस्ति, प्रतिमुसलप्रहारं तस्य मन्त्रस्यापठ्यमानत्वात्। अक्षरग्रहणायैव तं मन्त्रम् अन्यांश्च मन्त्रानभ्यस्यति। तत्र स्वाध्यायकाले पठितोऽप्यवघातमन्त्रो यथा पूर्णिकां प्रति स्वार्थं न ब्रूते तथा कर्मकालेऽपि स्वार्थं न वक्ष्यति॥ ननु तत्र माणव-

---

१. ट-ठ-°मसूचयत्। २. ट-ठ-' शास्त्रस्य ' नास्ति। ३. ट-ठ-तथापि। ४. च-ट-ब्राह्मणवाक्यमनर्थकम्। ५. ट-ठ-दृष्टं प्रयोजनं लभ्यते। ६. त-°वादत्व°। ७. च-छ-प-फ-°पाठार्थ°। ८. झ-ण-न-श–बुद्धार्थस्य। ९. ट-ठ-इच्छन्ति; ग-घ-फ-प्रतिमुञ्चन्ति। १०. च-छ-ट-प-फ–°स्यार्थस्य। ११. त-अन्यं दोषम्। १२. ग-घ-च-छ-त-ण-प-फ-य–°नुस्मर्यते। १३. त-°चितं रक्षण°। १४. थ-' तच्चायुक्तम् '। १५. ठ-प्रतिपाद्यता°। १६. च-छ-त-थ-प-फ–' एवम् ' नास्ति। १७. ट-ठ–नास्ति विरोधः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कस्य अर्थे विवक्षा नास्ति। पूर्णिकाप्यवबोद्धुमक्षमा। कर्मणि तु अध्वर्योरर्थविवक्षा विद्यते, बोधश्च संभवति इत्याशङ्क्य दोषान्तरं सूत्रयति—

'°अविज्ञेयात्' इति। केषांचिन्मन्त्राणामर्थो विज्ञातुं न शक्यते। तद्यथा—'अभ्यक्सा त इन्द्र ऋष्टिरस्मे' इत्येको मन्त्रः। 'सृण्येव जर्भरी तुर्फरीतू' इत्यपरो मन्त्रः॥ ननु ईदृशमन्त्रार्थबोधायैव निगम-निरुक्त-व्याकरणानि प्रवृत्तानीत्याशङ्क्य दोषान्तरं सूत्रयति—

'°अनित्यसंयोगान्मन्त्रानर्थक्यम्' इति। 'किं ते कृण्वन्ति कीकटेषु' (ऋ. सं. ३. ५३. १४) इति मन्त्रे कीकटो नाम जनपद आम्नातः। तथा नैचाशाखं नाम नगरं प्रमगन्दो नाम राजा इत्येतेऽर्था अनित्या आम्नाताः। तथा च सति प्राक् प्रमगन्दात् नायं मन्त्रो भूतपूर्व इति गम्यते। तदेवमेतैः तदर्थशास्त्रादिभिर्हेतुभिर्मन्त्राणामर्थप्रत्यायनार्थत्वं नास्ति। किंतु उच्चारणादृष्टार्था एवेति पूर्वपक्षः॥

तत्र सिद्धान्तं सूत्रयति—'अविशिष्टस्तु वाक्यार्थः' इति। तु शब्देन मन्त्राणामदृष्टार्थमुच्चारणमात्रं वारयति। क्रियाकारकसंबन्धेन प्रतीयमानो वाक्यार्थो लोकवेदयोरविशिष्टः। तथा सति यथा लोकेऽर्थप्रत्यायनायैव वाक्यमुच्चार्यते तथा वैदिकेयागप्रयोगेऽपि द्रष्टव्यम्। मन्त्रेण प्रकाशितस्त्वर्थोऽनुष्ठातुं शक्यते न त्वप्रकाशितः। तस्मात् मन्त्रोच्चारणस्यार्थप्रकाशनरूपं दृष्टमेव प्रयोजनम्॥ ननु 'अभ्रिरसि नारिरसि' इत्यारभ्य 'त्रैष्टुभेन त्वा छन्दसा ददे' (तै. सं. ४. १. १. ३-४) इति मन्त्र आम्नातः। तेनैव मन्त्रेण प्रतीतेऽपि अभ्र्यादाने पुनर्ब्राह्मणे 'तां चतुर्भिरभ्रिमादत्ते' (तै. सं. ५. १. १. ४) इति विधीयते। तदेतद्विधानं त्वत्पक्षे व्यर्थं स्यादित्याशङ्क्योत्तरं सूत्रयति—

'गुणार्थेन पुनःश्रुतिः' इति। मन्त्रेण प्रतीतस्यैवार्थस्य ब्राह्मणे यत्पुनःश्रवणं तदेतच्चतुःसंख्यालक्षण-गुणविधानार्थत्वेनोपयुज्यते। एतस्य विधानस्याभावे चतुर्णां मन्त्राणां मध्ये येन केनाप्येकेन अभ्रिरादीयेत॥ ननु 'इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते (तै. सं. ५. १. २. १) इत्यत्र मन्त्रसामर्थ्यादेव प्राप्तस्य रशनादानस्य पुनर्ब्राह्मणवाक्यं विनियोजकमाम्नायते। तदेतत् त्वन्मते व्यर्थमित्याशङ्क्योत्तरं सूत्रयति—

'परिसंख्या' इति। 'गर्दभाभिधानीं नादत्ते' इति निषेधः परिसंख्या। तदर्थमिदं ब्राह्मण-वाक्यम्॥ ननु परिसंख्यायां त्रयो दोषाः प्राप्नुयुः। 'आदत्ते' इति शब्दो रशनादानलक्षणं स्वार्थं जह्यात्। निषेधलक्षणः परार्थोऽस्य शब्दस्य कल्प्येत। रशनात्वसामान्येन च प्राप्तं गर्दभरशनाया आदानं बाध्येत इति त्रयो दोषाः। मैवम्। गर्दभरशनाया अप्राप्तत्वात्। तथाहि। त्वत्पक्षे प्रकरणपाठान्यथानुपपत्त्या मन्त्रेणानेन आदानं कुर्यात् इति वाक्यं परिकल्प्यते। तेन च वाक्येन मन्त्रादानयोः संबन्धे सिद्धे सति पश्चात् किं विषयकमादानमिति वीक्षायां लिङ्गात् रशनामात्रस्यादानमुपेत्य गर्दभरशनायाः प्राप्तिर्वक्तव्या। सा च विलम्ब्यते। 'इत्यश्वाभिधानीम्' इति प्रत्यक्षेण वाक्येन मन्त्रादानयोः संबन्धे सति लिङ्गात् रशनामात्रे प्राप्तमादानम् 'अश्वाभिधानीम्' इति श्रुत्या विशेषे व्यवस्थाप्यते। ततो मन्त्रस्य निराकाङ्क्षत्वात् गर्दभरशनाया अप्राप्तत्वान्नास्ति प्राप्तबाधः। अत एव निषेधार्थो न कल्प्यते। विध्यर्थश्च न त्यज्यते। तत्र कुतो दोषत्रयम्। ईदृशमप्राप्तिरूपमेव गर्दभरशनाया निवारणमभिप्रेत्य 'परिसंख्या' इति सूत्रितम्॥ ननु 'उरु प्रथस्वेति प्रथयति' इति ब्राह्मणस्य वैयर्थ्यं तदवस्थमेव इत्याशङ्क्य उत्तरं सूत्रयति—

'अर्थवादो वा' इति। वाशब्दो वैयर्थ्यं वारयति। अस्त्यत्रार्थवादः 'यज्ञपतिमेव तत्प्रथयति' इति। तेनार्थवादेन संबन्धाय ब्राह्मणे विधिः पठ्यते॥ ननु प्रथयतीत्यनेनैव विधिशब्देन प्रथनमनूद्य 'यज्ञपतिमेव' इत्यादिनार्थवादेन स्तोतव्यम्। तदेव तु प्रथनं कुतः प्राप्तमित्याशङ्क्य उत्तरं सूत्रयति—

---

१. त—अर्थविवक्षा। २. च-प-फ—निघण्टुनि°। ३. ट-ठ—'च' नास्ति। ४. ट-ठ-°भात्रत्वम्। ५. ठ-वाक्यं प्रयुज्यते। ६. त-वैदिके याग°। ७. च-त-थ-फ—°ब्राह्मणेन। ८. क-ज्ञ-ण-न-श—'शब्दो' नास्ति। ९. ट-ठ-आदान°। १०. ट-ठ-त-थ-तन्नि०। ११. क-ज्ञ-न-श—'सिद्धे' नास्ति। १२. ट—विषयमा°। १३. ट—ठ—सिद्धे सति। १४. ट—अवस्थाप्यते। १५. ठ—°त्यनेन।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'मन्त्राभिधानात्' इति। अध्वर्युः पुरोडाशमुद्दिश्य मन्त्रे 'प्रथस्व' इत्येवमभिधत्ते। तस्मादभिधानादध्वर्युकर्तृकं प्रथनं प्राप्तम्। यथा लोके यः कुरु इति ब्रूते स कारयत्येव, तथात्रापि यः प्रथस्व इति ब्रूते स प्रथयत्येव॥ यदुक्तम् 'अग्निर्मूर्धादिवः' (ऋ. सं. ८. ४४. १६) इति पाठक्रमनियमात् अदृष्टार्थो मन्त्र इति तत्रोत्तरं सूत्रयति—

'अविरुद्धं परम्' इति। परं द्वितीयसूत्रोक्तम् अस्मत्पक्षेऽप्यविरुद्धम्। न हि वयं पाठक्रमनियमादृष्टं निवारयामः। किं तर्हि। मन्त्रोच्चारणेन जायमानमर्थप्रत्यायनं दृष्टप्रयोजनत्वान्नोपेक्षितव्यम् इत्येतावदेव ब्रूमः॥ ननु 'प्रोक्षणीरासादय' (वा. सं. १. २८) इति मन्त्रो बुद्धमेवार्थं शास्ति तदयुक्तम्। सोपानत्कस्य उपानदन्तरासंभवात् इत्युक्तमिति चेत् तस्य परिहारं सूत्रयति—

'संप्रैषकर्मणो गर्हानुपलम्भः संस्कारत्वात्' इति। संप्रैषकर्मणो गर्हा त्वदुक्तदोषो नोपलभ्यते। बुद्धस्याप्यर्थस्य मन्त्रेणैवानुस्मरणे सति नियमादृष्टलक्षणस्य संस्कारस्य सद्भावात्॥ यच्चोक्तं 'चत्वारि शृङ्गाः' (ऋ. सं. ४. ५८. ३) इति मन्त्रोऽसन्तमेवार्थमभिधत्ते इति तस्योत्तरं सूत्रयति—

'अभिधानेऽर्थवादः' इति। असतोऽर्थस्याभिधायके वाक्ये गौणस्यार्थस्योक्तिर्द्रष्टव्या। तद्यथा। चत्वारो होत्रध्वर्यूद्गातृब्रह्माणोऽस्य कर्मणः शृङ्गाणि। प्रातःसवनादयस्त्रयः पादाः। पत्नीयजमानौ द्वे शीर्षे। गायत्र्यादीनि सप्त छन्दांसि हस्ताः। ऋग्वेदादिभिस्त्रिभिर्वेदैस्त्रेधा बन्धनम्। कामान् वर्षतीति वृषभः। रोरवीति स्तोत्रशस्त्रादिशब्दान् पुनः पुनः करोति। महो देवः सोऽयं प्रौढो यज्ञरूपो देवो मर्त्यानाविवेश इति मनुष्या एवात्राधिकारिणः। लोकेऽप्येवं गौणप्रयोगा दृश्यन्ते। 'चक्रवाकस्तनी हंसदन्तावली काशवस्त्रा शैवलकेशिनी' इत्येवं नद्याः स्तूयमानत्वात्। एवं 'ओषधे त्रायस्व', 'शृणोत ग्रावाणः' इत्याद्यचेतनसंबोधनानि स्तुतिपरत्वेन योजनीयानि। यस्मिन् वपने ओषधिरपि त्रायते तत्र वपनकर्ता त्रायते इति किमु वक्तव्यम्। तथा ग्रावाणोऽपि प्रातरनुवाकं शृण्वन्ति किमुत विद्वांसो ब्राह्मणा इत्यमन्त्रणाभिप्रायः॥ योऽपि 'अदितिर्द्यौरदितिरन्तरिक्षम्' (ऋ. सं. १. ८९. १०) इति विप्रतिषेध उक्तः तस्योत्तरं सूत्रयति—

'गुणादविप्रतिषेधः स्यात्' इति। यथा 'त्वमेव पिता त्वमेव माता' इत्यत्र गौणप्रयोगादविरोधः तद्वत्। एवम् एकरुद्रदेवत्ये कर्मण्येको रुद्रः शतरुद्रदेवत्ये शतं रुद्रा इत्यविरोधः॥ यदप्युक्तं स्वाध्यायमधीयानो माणवकः पूर्णिकाया अवहतिं न प्रकाशयितुमिच्छतीति तत्रोत्तरं सूत्रयति—

'विद्यावचनमसंयोगात्' इति। वेदविद्याग्रहणकालेऽर्थस्य यदवचनं तदयज्ञसंयोगादुपपद्यते। न हि पूर्णिकाया अवघातो यज्ञसंयुक्तः। नापि माणवको यज्ञमनुतिष्ठति। अतो यज्ञानुपकारात् न तत्रार्थविवक्षा। यदप्युक्तम् 'अभ्यक्सा त इन्द्र,' 'सृण्येव जर्भरी तुर्फरीतू' इत्यादावर्थस्य ज्ञातुमशक्यत्वात् नास्त्येवार्थः इति तत्रोत्तरं सूत्रयति—

'सतः परमविज्ञानम्' इति। विद्यमान एवार्थः प्रमादालस्यादिभिर्न विज्ञायते। तेषां निगमनिरुक्त-व्याकरणवशेन धातुतोऽर्थः परिकल्पयितव्यः। तद्यथा 'जर्भरी तुर्फरीतू' इत्येवमादीनि अश्विनोरभिधानानि। तेषु हि द्विवचनान्तत्वं लक्ष्यते। आश्विनं चेदं सूक्तम् 'अश्विनोः काममप्राः' (ऋ. सं. १०. १०६. ११) इति दर्शनात्। एतदेवाभिप्रेत्य निरुक्तकारो व्याचष्टे—'जर्भरी भर्तारावित्यर्थस्तुर्फरीतू हन्तारावित्यर्थः' (निरु. १३. ५) इति। एवम् 'अभ्यक्सा ते' इत्यादावप्युन्नेयम्। यदप्युक्तं प्रमगन्दाद्यनित्यार्थसंयोगात् मन्त्रस्य अनादित्वं न स्यात् इति तत्रोत्तरं सूत्रयति—

'उक्तश्चानित्यसंयोगः' इति। प्रथमपादस्यान्तिमाधिकरणे सोऽयमनित्यसंयोगदोष उक्तः परिहृतः। तथा हि तत्र पूर्वपक्षे वेदानां पौरुषेयत्वं वक्तुं काठकं कालापकमित्यादिपुरुषसंबन्धाभिधानं हेतूकृत्य

---

१. थ—°स्य पादस्य। २. च-य-संभवात्। ३. च-य-वर्जमितरेषु-°भिधानं। ४. ठ—°शस्त्रादीन्। ५. ग-घ-चु-त-थ-य—इत्यादिमन्त्राणामभि°। ६. ठ-तत्रोत्तरम्। ७. ठ-अप्यर्थः। ८. त-थ—ज्ञायते। ९. य-एवमेव। १०. ठ-मन्त्राणाम्। ११. ठ-'तत्र' नास्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'अनित्यदर्शनाच्च' (जै. सू. १. १. २८) इति हेत्वन्तरं सूत्रितम्। तस्यायमर्थः। 'बबरः प्रावाहणिरकामयत' (तै. सं. ७. १. १०. २) इत्यनित्यानां बबरादीनामर्थानां दर्शनात् ततः पूर्वमसत्त्वात् पौरुषेयो वेद इति तस्योत्तरमेवं सङ्गतिं—'परं तु श्रुतिसामान्यमात्रम्' (जै. सू. १. १. ३१) इति। तस्यायमर्थः। यत्काठकादिसमाख्यानं तत्प्रवचननिमित्तम्। यत्तु परं बबराद्यनित्यदर्शनं तच्छब्दसामान्यमात्रम्। न तु तत्र अनित्यो बबराख्यः कश्चित्पुरुषो विवक्षितः। किंतु बबरः इति शब्दानुकृतिः। तथा सति बंबरेति शब्दं कुर्वन् वायुरभिधीयते। स च प्रावाहणिः प्रकर्षेण वहनशीलः। एवमन्यत्राप्यूहनीयम्। तदेवं कस्यचिदपि दोषस्यासंभवात् विवक्षितार्था मन्त्राः स्वार्थप्रकाशनायैव प्रयोक्तव्याः॥ ननु अर्थप्रकाशनार्थत्वे सति दृष्टं प्रयोजनं लभ्यते इति युक्तिमात्रमिदमुच्यते। न त्वेतदुपोद्बलकं किंचित् श्रौतं लिङ्गं पश्यामः इत्याशङ्क्य उत्तरं सूत्रयति—

'लिङ्गोपदेशश्च तदर्थवत्' इति। 'आग्नेय्याग्नीध्रमुपतिष्ठेत' इति श्रूयते। तस्यायमर्थः। अग्निर्देवता यस्या ऋचः सेयमाग्नेयी। तया आग्नीध्रस्थानमुपतिष्ठेत इति। अत्र ह्युपस्थानमुपदिशद्ब्राह्मणम् 'अग्ने नय' (ऋ. सं. १. १८९. १) इत्यनया 'उपतिष्ठेत' इति मन्त्रप्रतीकं पठित्वा नोपदिशति; किंतु आग्नेयीत्वलिङ्गेन उपदिशति। यदा तस्यामृचि अग्निः प्राधान्येन प्रतिपाद्यते तदा तस्या ऋचः अग्निर्देवता भवति। तथा सति आग्नेय्या इति देवतावाचितद्धितान्तनिर्देश उपपद्यते। तस्मात् अयमुपदेशः तन्मन्त्रवाक्यमर्थवत् इति बोधयति। अतो विवक्षितार्थत्वात् अर्थप्रत्यायनार्थं प्रयोगकाले मन्त्रोच्चारणम्। तस्मिन्नेव विवक्षितार्थत्वे लिङ्गान्तरं सूत्रयति—

'ऊहः' इति। प्रकृतावाम्नातस्य मन्त्रस्य विकृतौ समवेतार्थत्वाय तदुचितपदान्तरस्य प्रक्षेपेण पाठः ऊहः। तद्यथा 'अन्वेनं माता मन्यताम् अनु पिता अनु भ्राता' (तै. ब्रा. ३. ६. ६. १) इति प्राकृतः पशुविषयो मन्त्रपाठः। तस्य च मन्त्रस्य विकृतौ पशुद्वये सति 'अन्वेनौ माता मन्यताम्' इत्यूहः। पशुबहुत्वे सति 'अन्वेनान् माता मन्यताम्' इत्यूहः कर्तव्यः। एतन्मन्त्रव्याख्यानरूपं ब्राह्मणमेवमाम्नायते–'न माता वर्धते न पिता' इति। तत्रेदं चिन्तनीयम्। किमत्र शरीरवृद्धिर्निषिध्यते आहोस्वित् शब्दवृद्धिरिति। एकवचनान्तस्य मातृशब्दस्य मातरौ इति द्विवचनान्तत्वेन वा मातरः इति बहुवचनान्तत्वेन वा प्रयोगः शब्दवृद्धिः। तत्र न तावत् शरीरवृद्धिर्निषेद्धुं शक्यते, बाल्यकौमारयौवनादिवयोऽनुसारेण तद्वृद्धेः प्रत्यक्षत्वात्। अतः शब्दवृद्धिनिषेध एव परिशिष्यते। मातृशब्दपितृशब्दयोर्विशेषाकारेण वृद्धिनिषेधात् इतरस्य एनम् इति शब्दस्य अर्थानुसारिणी वृद्धिः सूचिता भवति। तत्र यद्यर्थो न विवक्ष्येत तदा पशुद्वित्वे द्विवचनं पशुबहुत्वे बहुवचनं च कथमूह्येत। तस्मात विवक्षितार्था मन्त्राः। तस्मिन्नेवार्थे लिङ्गान्तरं सूत्रयति—

'विधिशब्दाच्च' इति। मन्त्रव्याख्यानरूपो ब्राह्मणगतः शब्दो विधिशब्दः इत्युच्यते। स चैवमाम्नायते–'शतं हिमाः शतं वर्षाणि जीव्यास्मेत्येवैतदाह' (श. ब्रा. २. ३. ४. २१) इति। तत्र 'शतं हिमाः' इत्येतत् व्याख्येयमन्त्रस्य प्रतीकम्। अवशिष्टं तु तस्य तात्पर्यव्याख्यानम्। मन्त्रस्याविवक्षितार्थत्वे तु किं नाम तात्पर्यं मन्त्रे व्याख्यायेत। तस्मात् विवक्षितार्था मन्त्राः प्रयोगकाले स्वार्थप्रकाशनायवोच्चारयितव्याः। तत्र संग्रहश्लोकौ—

मन्त्रा उरु प्रथस्वेति किमदृष्टैकहेतवः।
यागेषूत पुरोडाशप्रथनादेश्च भासकाः॥

---

१. त-बबर इति। २. च-छ-प-फ-°न्वेतदु°। ३. ठ-°तिष्ठते। ४. च-प-फ-प्रकृतिप°; त-थ-प्रकृतप°; ठ-'प्राकृत.....पशुद्वये सति' इत्यस्य स्थाने 'प्राकृतपशुविषयमन्त्रस्य विकृतौ पशुद्वये सति' इति। ५. ट-मन्त्रः। ६. ट-अत्रेदम्। ७. ग-घ-च-छ-ण-न-प-फ-य-'वा' नास्ति। ८. ग-छ-ण-न-प-फ-य-व्याख्यायते।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ब्राह्मणेनापि तद्ज्ञानान्मन्त्राः पुण्यैकहेतवः ।
न तद्ज्ञानस्य दृष्टत्वादृष्टं वरमदृष्टतः ॥ ( जै. न्या. १. २. ४ ) इति ॥

नन्वस्तु मन्त्रभागस्य प्रामाण्यम् । ब्राह्मणभागस्य तु न तद्युज्यते । तथा हि । द्विविधं ब्राह्मणं विधिरर्थवादश्चेति । तथा च आपस्तम्बः–' कर्मचोदना ब्राह्मणानि । ब्राह्मणशेषोऽर्थवादः ' ( आप. परि. ३४-३५ ) इति । विधिरपि द्विविधः अप्रवृत्तप्रवर्तनम् अज्ञातार्थज्ञापनं चेति । ' आग्नावैष्णवं पुरोडाशं निर्वपन्ति दीक्षणीयम् ' ( ऐ. ब्रा. १. १ ) इत्याद्याः कर्मकाण्डगतविधयोऽप्रवृत्तप्रवर्तकाः । ' आत्मा वा इदमेक एवाग्र आसीत् ' ( ऐ. आ. २. ४. १ ) इत्यादयो ब्रह्मकाण्डगता अज्ञातज्ञापकाः । तत्र कर्मकाण्डगतानां ' जर्तिलयवाग्वा वा जुहुयाद्गवीधुकयवाग्वा वा ' ( तै. सं. ५. ४. ३. २ ) इत्यादिविधीनां नास्ति प्रामाण्यम् , प्रवृत्त्ययोग्यद्रव्यविधानेन सम्यगनुभवसाधनत्वाभावात् । अयोग्यत्वं च वाक्यशेषे समाम्नातम्–' अनाहुतिर्वै जर्तिलाश्च गवीधुकाश्च ' ( तै. सं. ५. ४. ३. २ ) इति । तत्र हि आरण्यतिलानाम् आरण्यगोधूमानां चाहुतिद्रव्यत्वं निषिद्धम् । तस्मात् बाधितो जर्तिलादिविधिरप्रमाणम् । एवम् ऐतरेयतैत्तिरीयादिब्राह्मणेषु ' तत्तन्नादृत्यम् ' ( ऐ. ब्रा. २. २३ ), ' तत्तथा न कार्यम् ' ( तै. ब्रा. १. १. ८. ६ ) इति वाक्याभ्यां बहवो विधयो निषिद्धाः । अपि च ऐतरेयब्राह्मणे अनुदितहोमं बहुधा निन्दित्वा ' तस्मादुदिते होतव्यम् ' ( ऐ. ब्रा. ५. ३१ ) इत्यसकृन्निगमितम् । तैत्तिरीयाश्च तथैवामनन्ति– ' यदनुदिते सूर्ये प्रातर्जुहुयात् । उभयमेवाऽऽप्नेयꣳ स्यात् । उदिते सूर्ये प्रातर्जुहोति ' ( तै. ब्रा. २. १. २. ७ ) इति । पुनरपि त एव उदितहोमे दोषमामनन्ति– ' यदुदिते सूर्ये प्रातर्जुहुयात् । यथाऽतिथये प्रदुताय शून्यायाऽऽवसथायाऽऽहार्यꣳहरन्ति । तादृगेव तत् ' ( तै. ब्रा. २. १. २. १२ ) इति । तथैव ' अतिरात्रे षोडशिनं गृह्णाति ' इति विधिः ' नातिरात्रे षोडशिनं गृह्णाति ' इति निषेधेन बाध्यते । ज्योतिष्टोमादिष्वपि अनुष्ठानानन्तरमेव स्वर्गादिफलं नोपलभ्यते । न हि भोजनानन्तरं तृप्तेरनुपलम्भोऽस्ति । तस्मात् कर्मविधिषु प्रामाण्यं दुःसंपादम् ॥

अज्ञातज्ञापकेषु ब्रह्मविधिष्वपि परस्परविरोधान्नास्ति प्रामाण्यम् । ' आत्मा वा इदमेक एवाग्र आसीत् ' इति ऐतरेयिण आमनन्ति । ' असद्वा इदमग्र आसीत् ' ( तै. आ. ८. ७ ) इति तैत्तिरीयाः । सोऽयं विरोधः । तस्मात् वेदे विधिभागः सर्वोऽप्यप्रमाणमिति प्राप्ते ब्रूमः–

अस्त्वेव जर्तिलादिविधेरप्रामाण्यं तदर्थस्यानुष्ठेयत्वात् । अनुष्ठेयस्त्वर्थः उपरितने ' अजाक्षीरेण जुहोति ' ( तै. सं. ५. ४. ३. २ ) इति वाक्ये विधीयते । तत्प्रशंसार्थमत्र जर्तिलादिकमनूद्य निन्द्यते । यथा गवामश्वानां च प्रशंसार्थम् ' अपशवो वा अन्ये गोअश्वेभ्यः ' ( तै. सं. ५. २. ९. ४ ) इति वाक्येनार्थवादरूपेण अजादीनां पशुत्वं निन्द्यते तद्वत् । एवं तर्हि अजादेर्यथा वस्तुतः पशुत्वमस्ति तथा जर्तिलादिविधिरत्र निन्द्यमानोऽपि क्वचित् शाखान्तरे भवेदिति चेत्, भवतु नाम । प्रामाण्यमपि तच्छाखाध्यायिनं प्रति भविष्यति । यथा गृहस्थाश्रमे निषिद्धमपि परान्नभोजनमाश्रमान्तरेषु प्रामाणिकं तद्वत् । अनेन न्यायेन सर्वत्र परस्परविरुद्धौ विधिनिषेधौ पुरुषभेदेन व्यवस्थापनीयौ । यथा मन्त्रेषु पाठभेदः शाखाभेदेन व्यवस्थितः तद्वत् । तैत्तिरीयाः ' वायवः स्थोपायवः स्थ ' ( तै. सं. १. १. १ ) इति मन्त्रमामनन्ति । वाजसनेयिनस्तु ' उपायवः स्थ ' इत्येतं भागं नामनन्ति ( वा. सं. १. १ ) । प्रत्युत शतपथब्राह्मणे स भागोऽनूद्य निराकृतः ( श. ब्रा. १. ७. १. ३ ) । तथा सूक्तवाकमन्त्रे

---

१. च-छ-त-थ-फ–' तु ' नास्ति । २. ग-घ-च-छ-ण-त-थ-प-फ-य–°काण्डगता विध°; ट– °काण्डविध° । ३. च-थ-प-फ–°गता विधयः । ४. ट-ठ–इत्यादीनाम् । ५. ट-ठ-चाहुतिप्रख्यत्वम् । ६. च-प-फ–°न्निगदितम् । ७. त-थ–एवमेव । ८. च-त-थ-फ–दुःसंपादनीयम् । ९. न-ञ-र-ल–तैत्तिरीयकाः । १०. ट–अस्त्वेवम् । ११. न–°र्थमात्रम्; ण–°मात्रजर्ति° । १२. छ-त-थ-फ–' तद्वत् ' नास्ति । १३. ग-य–इत्येनम्; ण-न–इत्येवम्; घ–इत्यन्तम् । १४. च-प-फ–न समामनन्ति ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

शाखान्तरपाठं निराकृत्य पाठान्तरं तैत्तिरीयाः आमनन्ति–'यद्यास्सूपावसाना च स्वध्यवसाना चेति प्रमायुको यजमानः स्यात्' (तै. सं. २. ६. ९. ६) इति निराकरणम्। 'सूपचरणा च स्वधिचरणा चेत्येव ब्रूयात्' इति पाठान्तरोपदेशः। तत्रानुष्ठातृपुरुषभेदेन व्यवस्था। तद्वत् विधिषु द्रष्टव्यम्। षोडशिग्रहणादिदूषणं तु अश्रुतमीमांसावृत्तान्तस्य तवैव शोभते। पूर्वमीमांसायां दशमाध्यायस्याष्टमपादे षोडशिनो ग्रहणाग्रहणविकल्पो निर्णीतः (जै. सू. १०. ८. ६)। द्वितीयस्याध्यायस्य प्रथमपादे कालान्तरभाविफलसिध्यर्थमपूर्वं निर्णीतम् (जै. सू. २. १. ५)। तद्वदुत्तरमीमांसायां प्रथमाध्यायस्य चतुर्थपादे 'कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः' (ब्र. सू. १. ४. १४) इत्यस्मिन् सूत्रे जगत्कारणे परमात्मनि श्रुतिविप्रतिपत्तिर्निराकृता। द्वितीयस्याध्यायस्य प्रथमपादे आरम्भणाधिकरणे तु 'असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात्' (ब्र. सू. २. १. १७) इति सूत्रे तैत्तिरीय-वाक्यगतस्य असच्छब्दस्य न शून्यपरत्वं किंतु अव्यक्तावस्थापरत्वम् इति निर्णीतम्। तथा जैमिनिः चोदनासूत्रे विधिवाक्यं धर्मे प्रमाणमिति प्रतिज्ञाय औत्पत्तिकसूत्रे तत्प्रामाण्यं समर्थयामास (जै. सू. १. १. २; ५)। व्यासोऽपि 'शास्त्रयोनित्वात्' (ब्र. सू. १. १. ३) इति सूत्रे वेदान्तानां ब्रह्मणि प्रामाण्यं प्रतिज्ञाय 'तत्तु समन्वयात्' (ब्र. सू. १. १. ४) इत्यादिसूत्रैः समर्थयामास। तस्मात् अमीमांसकस्य तव पूर्वोक्तस्थाण्वन्धन्यायो दुष्परिहरः। अतो विधिभागस्य प्रामाण्यं सुस्थितम्॥

अर्थवादभागस्य प्रामाण्यं महता प्रयत्नेन जैमिनिः समर्थयामास। तत्सूत्राणि व्याख्यास्यन्ते (जै. सू. १. २. १-१८)। तत्र पूर्वपक्षं सूत्रयति––

'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते' इति। आम्नायस्य सर्वस्य क्रियाप्रतिपादनाय प्रवृत्तत्वादक्रियाप्रतिपादकानामर्थवादानां नास्ति कश्चित् विवक्षितः स्वार्थः। ते चार्थवादा एवमाम्नायन्ते–'सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्' (तै. सं. १. ५. १. १), 'स आत्मनो वपामुदखिदत्' (तै. सं. २. १. १. ४), 'देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्' (तै. सं. ६. १. ५. १) इति। यस्मादीदृशस्य वाक्यस्य विवक्षितोऽर्थः कश्चिदपि नास्ति तस्मादिदं वाक्यमनित्यमुच्यते। यद्यप्यनादित्वात् स्वरूपेणानित्यत्वं नास्ति तथापि धर्मावबोधनलक्षणस्य नित्यकार्यस्याभावात् अनित्यैः काव्यालापैः समानत्वात् अप्रमाणमित्यर्थः॥ ननु उदाहृतानामर्थवादानामनुष्ठेये धर्मे प्रामाण्याभावेऽपि स्वार्थे प्रामाण्यमस्तु। तत्प्रत्यायकत्वेन स्वतः प्रामाण्यस्य अपवदितुमशक्यत्वात् इत्याशङ्क्य अन्येषु केषुचिदर्थवादेषु मानान्तरविरोधदर्शनादप्रामाण्ये सति तदृष्टान्तेन सर्वेषामप्यर्थवादानामप्रामाण्यमित्यभिप्रेत्य सूत्रयति—

'शास्त्रदृष्टविरोधाच्च' इति। शास्त्रविरोधो दृष्टविरोधः शास्त्रदृष्टविरोधः इति त्रिविधो विरोधोऽर्थवादेषूपलभ्यते। तथा हि 'स्तेनं मनोऽनृतवादिनी वाक्' इत्यत्र श्रूयमाणं मानसं चौर्यं वाचिकमनृतवदनं च प्रतिषेधशास्त्रेण विरुद्धम्। 'तस्माद्धूम एवाग्नेर्दिवा दृदृशे नार्चिस्तस्मादर्चिरेवाग्नेर्नक्तं ददृशे न धूमः' इत्यत्र दृष्टविरोधः। तथा 'न चैतद्विद्मो वयं ब्राह्मणा वा स्मोऽब्राह्मणा वा' इत्यत्रापि प्रत्यक्षविरोधः। 'को हि तद्वेद यद्यमुष्मिँल्लोकेऽस्ति वा न वा' (तै. सं. ६. १. १. १)

---

१. ठ–निरस्य। २. ठ–पाठोपदेशः। ३. च-फ–तद्विधिषु; प–तत् विधिवत्। ४. ट-ठ–तवैव परम्। ५. ट-ठ–'तद्वत्' नास्ति; त-थ–वर्जमितेरेषु–तदुत्तर। ६. ग-च-छ-ण-फ-य–श्रुतेर्वि°। ७. ट–द्वितीयाध्यायस्य। ८. ट–वर्जमितरेषु–'आरम्भाधि°'। ९. क-ख- ट-ठ-न–°योनित्वसूत्रे। १०. ट-ठ–°न्वयादिभिः सूत्रैः। ११. क-ख-च-छ-ण-न–दुष्परिहारः। १२. ट-ठ–सिद्धम्। १३. ट-ठ–प्रयासेन। १४. ट-ठ–व्याख्यायन्ते। १५. च-फ–प्रवृत्तित्वा°। १६. ट–'अर्थवादानाम्' नास्ति। १७. ट–°त्वर्थः; ठ–अर्थः। १८. ट-ठ–विवक्षितोऽर्थः। १९. ठ–'अपि' नास्ति। २०. ठ–°विरोधादप्रामाण्यदर्शने। २१. च-छ-प-फ–'इति' नास्ति। २२. ट-ठ –°नृतवचनम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इत्यत्र शास्त्रदृष्टविरोधः । 'स्वर्गकामो यजेत' इत्यादिशास्त्रे ह्यामुष्मिकं फलं दृश्यते । तस्मात् विरोधाद्-अर्थवादानामप्रामाण्यम् ॥ ननु 'सोऽरोदीत्' इत्यादीनां निष्प्रयोजनत्वात् 'स्तेनं मनः' इत्यादीनां च विरोधादप्रामाण्येऽपि फलप्रतिपादकानामर्थवादानां तदुभयवैलक्षण्यात् अस्तु प्रामाण्यमित्याशङ्क्य उत्तरं सूत्रयति—

'तथा फलाभावात्' इति । यथा मानान्तरविरुद्धमर्थवादैरुक्तं तथा फलमप्यविद्यमानमेव तैरुच्यते। तथा हि गर्गत्रिरात्रं प्रकृत्य श्रूयते—'शोभतेऽस्य मुखं य एवं वेद' (ताण्ड्य. ब्रा. २०. १६. ६) इति। दर्शपूर्णमासयोर्वेदाभिमर्शनं प्रकृत्य श्रूयते—'अस्य प्रजायां वाजी जायते य एवं वेद' (तै. सं. १. ७. ४. ६) इति। न च वयं वेदितॄणां तत्फलमुपलभामहे ॥ ननु ऐहिकफलवाक्यानां विसंवादात् अप्रामाण्येऽपि आमुष्मिकफलवाक्यानामस्तु प्रामाण्यमित्याशङ्क्य उत्तरं सूत्रयति—

'अन्यानर्थक्यात्' इति । एवं हि श्रूयते—'पूर्णाहुत्या सर्वान्कामानवाप्नोति', 'पशुबन्धयाजी सर्वाँल्लोकानभिजयति', 'तरति मृत्युं तरति पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद' इति। तत्र अग्न्याधेयगतया पूर्णाहुत्या सर्वकामप्राप्तेरन्यानि अग्निहोत्रादीन्युत्तरकालीनान्यनर्थकानि स्युः। तथा निरूढपशुबन्धानुष्ठानेन सर्वलोकाभिजयात् ज्योतिष्टोमादीनामानर्थक्यम्। अध्ययनकालीनेनैव अश्वमेधवेदनेन ब्रह्महत्यादितरणात् तदनुष्ठानं च व्यर्थं स्यात्। तस्मात् आमुष्मिकफलवाक्यानामप्यप्रामाण्यम्॥ ननु मा भूत् फलवाक्यानां प्रामाण्यम्। तथापि निषेधवाक्येषु विरोधानुपलम्भादस्तु प्रामाण्यमित्याशङ्क्य उत्तरं सूत्रयति—

'अभागिप्रतिषेधात्' इति। 'न पृथिव्यामग्निश्चेतव्यो नान्तरिक्षे न दिवि' (तै.सं. ५. २.७. १) इत्यत्र अन्तरिक्षस्य च दिवश्च प्रतिषेधभागित्वं नास्ति तत्र चयनप्रसंगस्यैवाभावात्॥ मा भूत्तर्हि निषेधानां प्रामाण्यम्। 'बबरः प्रावाहणिरकामयत' (तै. सं. ७. १. १०. २) इत्यादीनां पूर्वपुरुषवृत्तान्ताभिधायिनां विरोधानुपलम्भादस्तु प्रामाण्यमित्याशङ्क्य उत्तरं सूत्रयति—

'अनित्यसंयोगात्' इति। बबरादिरूपेण अनित्येनार्थेन संयोगे सति अस्य वाक्यस्य ततः पूर्वमभावात् कालिदासादिवाक्यवत् पौरुषेयत्वं प्रसज्येत। किं बहुना। सर्वथापि नास्त्येवार्थवादानां प्रामाण्यमिति पूर्वः पक्षः॥

सिद्धान्तं सूत्रयति—'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः' इति। तुशब्दोऽर्थवादानामप्रामाण्यं वारयति। 'वायुर्वै क्षेपिष्ठा' इत्येवमादीनामर्थवादानां 'वायव्यꣳ श्वेतमालभेत' (तै. सं. २. १. १. १) इत्यादिना विधिना सहैकवाक्यत्वादस्ति धर्मे प्रामाण्यम्। न च विधिवाक्यस्य अर्थवादनैरपेक्ष्येण पदान्वयसंपूर्तेस्तत्रार्थवादानां नास्त्युपयोगः इति शङ्कनीयम्। ते ह्यर्थवादाः पुरुषप्रवृत्तिमाकाङ्क्षतां विधीनां स्तुत्यर्थत्वेनोपयुक्ताः स्युः। स्तुत्या च प्रलोभितः पुरुषः तत्र प्रवर्तते॥ ननु अर्थवादानां प्रमादपठितत्वेन उपेक्षणीयत्वात् किमनेन एकवाक्यताप्रयासेन इत्याशङ्क्याह—

'तुल्यं च सांप्रदायिकम्' इति। अनध्यायवर्जनादिनियमपुरःसरं गुरुसंप्रदायादध्ययनं यत्तत् सांप्रदायिकम्। तच्च विधीनामर्थवादानां समानम्। तस्मात् विधिवदेतेषामपि प्रमादपाठो न भवति॥ ननु 'शास्त्रदृष्टविरोधाच्च' इत्येवमर्थवादेष्वनुपपत्तिरुक्तेत्याशङ्क्याह—

'अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधः स्याच्छब्दार्थस्वप्रयोगभूतस्तस्मादुपपद्येत' ॐइति। 'स्तेनं मनः' इत्यादौ शास्त्रविरोधाद्यनुपपत्तिरप्राप्ता प्रयोगस्यानुक्तत्वात्। प्रयोगे हि स्तेयादीनामुच्यमाने शास्त्रविरोधः स्यात्। न चात्र स्तेयं कर्तव्यमिति प्रयोग उच्यते। किंतु स्तेयशब्दार्थः एवोच्यते।

---

१. ग-घ-च-छ-ण-त-थ-य—शास्त्रदृष्टेन विरोधः। २. ठ—पूर्ववृत्ता°। ३. त-थ—बबरादिस्वरूपेण। ॐ. छ-फ—'इति' इत्यस्यानन्तरं 'तन्त्रवार्तिके तु एतत्सूत्रमध्याहृत्य त्रिधा व्याख्यातम्। अप्राप्तां चानुपपत्तिम्। अप्राप्ता चानुपपत्तिः अप्राप्तं चानुपपत्तिम् इति' इत्यधिकः पाठो दृश्यते। ४. ण- न—स्तैन्यादी°।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

न च शब्दार्थः प्रयोगभूतः। तस्मात् शब्दार्थवचनमात्रेण शास्त्रविरोधाभावादयमर्थवादः उपपन्नः एव॥ ननु "स्तुत्यर्थेन विधीनां स्युः' इति यदुक्तं तत् असत् वैयधिकरण्यात्। 'वेतसशाखया चावकाभिश्च विकर्षत्यापो वै शान्ताः' (तै. सं. ५. ४. ४. ३) इत्यत्र वेतसावके विधीयेते आपश्च स्तूयन्ते इति वैयधिकरण्यमित्याशङ्क्याह—

'गुणवादस्तु' इति। तु शब्दो वैयधिकरण्यदोषं वारयति। गुणवादो ह्यत्र विवक्षितः। यथा लोके कश्मीराभिजनो देवदत्तः कश्मीरदेशेषु स्तूयमानेषु स्तुतमात्मानं मन्यते एवमत्रापि अभ्यो जाते वेतसावके अप्सु स्तुतासु स्तुते एव भवतः। शान्ताभ्योऽद्भ्यो जातत्वात् वेतसावके स्वयमपि शान्ते सत्यौ यजमानस्यानिष्टं शमयतः इत्येतादृशस्य गुणस्य वादोऽत्राभिप्रेतः। 'सोऽरोदीत्' इत्यत्रापि रजतस्य पतिताश्रुरूपत्वात् रजतदाने गृहेऽपि रोदनप्रसंगात् 'बर्हिषि रजतं न देयम्' इति तन्निषेधेन विधेयेनार्थवादस्यैकवाक्यत्वम्। तत्र रजतदानाभावे रोदनाभावरूपो गुणोऽत्र विवक्षितः। तेन च गुणेन रजतदाननिवारणरूपो विधिः स्तूयते। यद्यपि रजतस्य अश्रुप्रभवत्वमत्यन्तमसत् तथापि यथोक्तरीत्या विधेः स्तुतिः संपद्यते। 'यः प्रजाकामः पशुकामः स्यात्स एतं प्राजापत्यमजं तूपरमा लभेत' (तै. सं. २. १. १. ४-५) इत्ययं विधिः प्रजापतिवपोत्खेदेन स्तूयते। यस्मात् प्रजापतिः स्ववपामपि उत्खिद्य अग्नौ प्रहृत्य ततो जातं तूपरम् अजम् आत्मार्थमालभ्य प्रजाः पशूंश्च लब्धवान्, तस्मात् प्रजादिसंपादकोऽयं तूपरः इति तूपरगुणस्य वादोऽत्र विवक्षितः। 'आदित्यः प्रायणीयश्चरुः' इत्येष विधिः 'दिशो न प्राजानन्' इत्यनेन दिङ्मोहेन स्तूयते। यदियमदितिर्देवता दिङ्मोहमप्यपनीय दिग्विशेषं ज्ञापयति तदा बहुविधकर्मसमुदायरूपे सोमयागेऽनुष्ठानविषयं भ्रममपनयतीति किमु वक्तव्यमित्येवम् अदितिदेवतागतस्य गुणस्य वादोऽत्र विवक्षितः। स्वकीयवपोत्खेदो देवयजनाध्यवसानमात्रेण दिङ्मोहश्चेत्युभयमस्तु वा मा वा। सर्वथापि स्तुतिपरत्वमभ्युपगच्छतामस्माकं न किंचिद्धीयते। 'शिखा ते वर्धते वत्स गुडूचीं श्रद्धया पिब' इत्यादावविद्यमानेनाप्यर्थेन लोके स्तुतिदर्शनात्॥ अथ पूर्वपक्षिणा शास्त्रविरोधं दर्शयितुं यदुदाहृतं 'स्तेनं मनोऽनृतवादिनी वाक्' इति तत्रोत्तरं सूत्रयति—

'रूपात्प्रायात्' इति। 'हिरण्यं हस्ते भवत्यथ गृह्णाति' इत्येतं विधिं स्तोतुमयमर्थवाद उच्यते। यथा लोके किमृषिणा देवदत्त एव पूजयितव्य इत्यत्र देवदत्तपूजां स्तोतुमेव औदासीन्यमृषावुपन्यस्यते, न तु पूज्यत्वमृषेर्वारयितुम्; एवमत्रापि हस्ते हिरण्यग्रहणं प्रशंसितुं मनसः स्तेनरूपत्वं वाचोऽनृतवादित्वं चोपन्यस्यते। तत्र गुणवादेन शब्दार्थो योजनीयः। यथा स्तेनाः प्रच्छन्नरूपा एवं मनोऽपीति प्रच्छन्नरूपत्वमत्रगुणः। प्रायेण वागनृतं वक्तीति प्रायिकत्वं तत्र गुणः। हस्तस्तु न प्रच्छन्नो नाप्यनृतबहुलः। अतो हस्ते हिरण्यधारणं प्रशस्तमिति स्तूयते। यदपि दृष्टविरोधाय 'धूम एवाग्नेर्दिवा ददृशे' इत्यादिकमुदाहृतं तत्रोत्तरं सूत्रयति—

'दूरभूयस्त्वात्' इति। 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति', 'सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः' इत्येतौ विधी स्तोतुं सोऽर्थवादः। यस्मात् अर्चिर्दिवा न दृश्यते तस्मात् सूर्यमन्त्र एव प्रातः प्रयोक्तव्यः। यस्मात् रात्रावर्चिरेव दृश्यते तस्मात् अग्निमन्त्रो रात्रौ प्रयोक्तव्यः इत्येवं तयोर्मन्त्रयोः स्तुतिः। धूमार्चिषोरदर्शनोपन्यासस्तु दूरभूयस्त्वगुणनिमित्तः। भूयसि हि दूरे पर्वताग्रे वृक्षादयोऽपि न विस्पष्टं दृश्यन्ते, किंतु तृणसादृश्येन तेषां दर्शनाभास एव।

---

१. च-छ-त-थ-प-फ—स्तेयशब्दार्थः; ग-घ-ण-य—स्तेनशब्दार्थः। २. ग-घ-च-छ-ण-त-थ-प-फ—काश्मीराभि°। ३. त—'एव' नास्ति; थ—'स्तुते एव' इत्यस्य स्थाने 'ते एव स्तुते'। ४. झ-ञ-श—°नीत्या। ५. च-ग-प-फ—'अपि' नास्ति। ६. ग-घ—यथेय°; ट-ठ—यदेय°। ७. च-त-थ-प-फ—तथा। ८. ट-ठ-झ-श—गृभ्णाति। ९. घ-च-छ-ण-ञ-प-फ—लोकेऽपि। १०. च-छ-त-प-फ—प्रयोक्तव्यः सूर्यमन्त्रश्च दिवा इत्येवम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तद्वदत्रापि ॥ यदप्यन्यदृष्टविरोधायैवोदाहृतं ' न चैतद्विद्मो वयं ब्राह्मणा वा स्मोऽब्राह्मणा वा ' इति तत्रोत्तरं सूत्रयति—

' स्व्यपराधात्कर्तुश्च पुत्रदर्शनात् ' इति । ' प्रवरे प्रक्रियमाणे ब्रूयादेवाः पितरः ' इत्यस्य विधेः स्तावकोऽयमर्थवादः । यदि यजमानो ' देवाः पितरः ' ( तै. ब्रा. ३. ७. ५. ४ ) इत्यादिमन्त्रेण प्रवरमनुमन्त्रयेत् तदानीम् अब्राह्मणोऽपि ब्राह्मणो भवेत् इत्यनुमन्त्रणस्य स्तुतिः। 'न चैतद्विद्मः' इत्येतदज्ञानवचनं दुर्ज्ञानत्वगुणेन तत्र प्रयुज्यते । यत्र स्त्रिया अपराधो भवति तत्र कर्तुरुत्पादयितुर्जारस्यापि पुत्रो दृश्यते । अतः पत्युपपत्योरुभयोः पुत्रदर्शनात् स्वकीयजन्म कीदृशमिति दुर्ज्ञानम् । अनेनाभिप्रायेण प्रयुक्तत्वात् नास्ति तत्र दृष्टविरोधः । न हि तत्र दृश्यमानं स्वब्राह्मण्यमपवदितुं ' न चैतद्विद्मः ' इत्युपन्यस्तम् ॥ यदपि शाखीयदर्शनविरोधायोदाहृतं ' को हि तद्वेद यद्यमुष्मिँल्लोकेऽस्ति वा न वा ' इति तत्रोत्तरं सूत्रयति—

' आकालिकेप्सा ' इति। ' दिक्षवतीकाशान्करोति' इति प्राचीनवंशस्य द्वारविधिः । तस्य शेषोऽयं ' को हि तद्वेद ' इति। धूमाद्युपद्रवपरिहारेण प्रत्यक्षेण फलेन द्वारविधिः स्तूयते । स्वर्गप्राप्तिरूपं तु फलमाकालिकम्। अकाले भवमाकालिकं विप्रकृष्टकालीनं न त्विदानींतनमित्यर्थः । तस्येप्सा प्राप्तुमिच्छा । सा च ' को हि तद्वेद ' इत्यनिश्चयोपन्यासे कारणम् । यथा भाविकालीनः पौत्रप्रपौत्रादिवृत्तान्तो निश्चेतुं न शक्यते, तद्वत् स्वर्गप्राप्तिर्भाविकालीनेति गुणयोगादनिश्चयोपन्यासः । धूमादिपरिहारस्तु प्रत्यक्षत्वात् निश्चितेति इत्यभिप्रायः ॥ यदप्यन्यदृष्टविरोधायोदाहृतं 'शोभतेऽस्य मुखं य एवं वेद ' इति तत्रोत्तरं सूत्रयति—

' विद्याप्रशंसा ' इति । सोऽयं गर्गत्रिरात्रविधेः शेषः । तद्विषयं वेदनमपि मुखशोभाहेतुः किमुतानुष्ठानमिति स्तूयते। यथा कर्णाभरणादिना मुखं शोभितं भवति एवं वेदितुरुत्साहेनैव विकसितं वदनं शोभितमिव शिष्यैरुद्वीक्ष्यते । अतः शोभासादृश्यगुणयोगात् शोभते इत्युच्यते। यदप्यन्यद्विरोधायोदाहृतम् ' आस्य प्रजायां वाजी जायते य एवं वेद ' इति सोऽपि वेदानुमन्त्रणविधेः शेषः । अत्रापि कैमुतिकन्यायेन स्तुतिः पूर्ववद्योजनीया । वेदितुः पुत्रः पितृशिक्षया स्वयमपि विद्वान् भवति। ततः प्रतिग्रहेणान्नं प्राप्नोति। तस्मात् ईदृशं गुणमभिप्रेत्य ' वाजी जायते ' इत्युक्तम् ॥ यदप्यन्यानर्थक्यायोदाहृतं ' पूर्णाहुत्या सर्वान्कामानवाप्नोति ' इति तत्रोत्तरं सूत्रयति—

' सर्वत्वमाधिकारिकम् ' इति । ' पूर्णाहुतिं जुहुयात् ' इत्यस्य विधेः शेषोऽयम्। सर्वकामावाप्तिहेतुत्वात् प्रशस्तेयमाहुतिरिति स्तूयते । यथा सर्वे ब्राह्मणा भोजयितव्या इत्यत्र सर्वत्वं स्वगृहागतब्राह्मणविषयम्, एवं पूर्णाहुत्या कर्मसाङ्गत्वे यत्फलं तस्मिन्नधिकारे प्रस्तावे संभावितं तद्विषयमेव सर्वत्वं द्रष्टव्यम्। पूर्णाहुतेरभावे सति आधानरूपं कर्म अङ्गविकलं भवति । तच्च वैकल्यं पूर्णाहुत्या समाधीयते इत्येकः कामः । तस्मिन् समाहिते सति आहवनीयाद्यग्नयोऽग्निहोत्रादिकर्मसु योग्या भवन्तीत्ययमन्यः कामः । तैश्च कर्मभिः तत्फलं प्राप्यते इति कामान्तरम्। ईदृशी सर्वकामावाप्तिः आहुत्यन्तरेष्वपि विद्यते इति चेत्, विद्यतां नाम । किं नश्छिन्नम् । न खल्वेतावता पूर्णाहुतिस्तुतेः

---

१ च-ण-न-प-फ–' अपि ' नास्ति । २. च-छ-त-थ-प-फ–तस्य प्राप्तु° । ३. ठ–पुत्रपौत्रवृत्तान्तो; च-छ-प-फ–पुत्रपौत्रादिवृत्तान्तो; थ–पौत्रादिवृत्तान्तो । ४. ट-ठ–निश्चीयते । ५. ट-ठ–तस्य मुख° । ६. ग-ट-ठ-थ-य–' एव ' नास्ति । ७. ग-घ-च-छ-ण-त-थ-फ-य–कर्मसाङ्गत्वं यत्फलम् ; ठ–कर्मसाङ्गत्वादिकं यत्कृतम्। ८. ग-घ-प-फ-य–अङ्गविफलम् ; छ-ण–अङ्गे विफलम् । ९. च-छ-प-फ– सर्वकामप्राप्तिः । १०. ट-ठ–आहुत्यन्तरे ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

काचित् हानिरस्ति ॥ ननु पूर्णाहुतेरङ्गत्वात् तदीयफलश्रुतेरर्थवादत्वेन स्तावकत्वं भवतु, 'द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः' (जै. सू. ४. ३. १) इति सूत्रेण निर्णीतत्वात्। पशुबन्धवाक्यस्य तु कर्मविधायकत्वात् सर्वलोकाभिजयस्य मुख्यफलत्वादन्यानर्थक्यं दुर्वारमित्याशङ्क्य उत्तरं सूत्रयति—

'फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः सारतो वा फलविशेषः स्यात्' इति। पृथिव्यन्तरिक्षद्युलोकेष्वन्यतमलोकाभिजयरूपं फलं पशुबन्धकर्मणा निष्पाद्यते। तेषां च पृथिव्यादीनां फलानां कर्मान्तरेण परिमाणाधिक्यं सारत्वं वा संपद्यते। ततः फलविशेषः स्यादिति नास्त्यानर्थक्यम्। लोकवत् इति उक्तार्थे दृष्टान्तः। यथा लोके निष्केण खारीपरिमितान् व्रीहीन् विक्रीय निष्कान्तरेण पुनः क्रये सति परिमाणाधिक्यं भवति। यथा वा निष्केण वस्त्रमात्रं लभ्यते निष्कद्वयेन तु सारभूतं दुकूलम्। तथा भोगाधिक्यं भोगसारत्वं वा कर्मान्तरेण द्रष्टव्यम्। ब्रह्महत्याया अपि मानस्याः स्वल्पाया वेदनमात्रेण तरणं, कायिक्यास्तु महत्या अश्वमेधेनेति नास्त्यन्यानर्थक्यम्॥ योऽपि 'नान्तरिक्षे न दिवि' इत्यप्रसक्तप्रतिषेध उदाहृतः तथा 'बबरः प्रावाहणिः' इत्यनित्यसंयोग उदाहृतस्तत्तोभयत्रोत्तरं सूत्रयति—

'अन्त्ययोर्यथोक्तम्' इति। अन्त्ययोरुदाहरणयोरुत्तरं पूर्वोक्तमेव द्रष्टव्यम्। अन्तरिक्षादौ चयननिन्दारूपोऽर्थवादो 'हिरण्यं निधाय चेतव्यम्' इत्यस्य विधेः शेषः। अतोऽत्र 'स्तुत्यर्थेन विधीनां स्युः' इत्युक्तमेवोत्तरम्। अन्तरिक्षे चयनप्रसक्त्यभावात् तन्निन्दा नित्यानुवादोऽस्तु। तेनापि विधिः स्तोतुं शक्यते। नित्यसिद्धार्थानुवादिना वायोः क्षेपिष्ठत्वेन पशुविधेः स्तुतत्वात्। 'बबरः प्रावाहणिरकामयत' इत्यत्रापि बबरनामकः कश्चिदनित्यः पुरुषो मनुष्यो न विवक्षितः, किंतु बबरध्वनियुक्तः प्रकर्षेण वहनशीलो वायुर्व्यवहारदशायां नित्य एवार्थो विवक्षितः इत्येतदुत्तरं प्रथमपादस्यान्तिमाधिकरणे प्रोक्तम्। तस्मात् संभावितदोषाणां परिहृतत्वादर्थवादानामस्ति प्रामाण्यम्।

तत्र संग्रहश्लोकाः—

वायुर्वा इत्येवमादेरर्थवादस्य मानता।
न विधेयेऽस्ति धर्मे किं किं वाऽसौ तत्र विद्यते॥
विध्यर्थवादशङ्कानां मिथोऽपेक्षापरिक्षयात्।
नास्त्येकवाक्यता धर्मे प्रामाण्यं संभवेत्कुतः॥
विध्यर्थवादौ साकाङ्क्षौ प्राशस्त्यपुरुषार्थयोः।
तेनैकवाक्यता तस्माद्वादानां धर्ममानता॥ (जै. न्या. १. २. १) इति॥

तदेवं वेदे विद्यमानानां त्रयाणां मन्त्रविध्यर्थवादभागानामप्रामाण्यकारणाभावात् बोधकानां तेषां प्रामाण्यस्य स्वतस्त्वाङ्गीकारात् कृत्स्नस्यापि वेदस्य प्रामाण्यं सिद्धम्॥

ननु एवमपि वेदस्य पौरुषेयत्वेन विप्रलम्भकवाक्यवदप्रामाण्यं स्यात्। पौरुषेयत्वं च प्रथमपादे पूर्वपक्षत्वेन जैमिनिः सूत्रयामास—(जै. सू. १. १. २७-३२)

'वेदांश्चैके संनिकर्षं पुरुषाख्याः' इति। एके वादिनो वेदान् प्रति संनिकर्षं मन्यन्ते। कालिदासादिभिर्निर्मितानां रघुवंशादिग्रन्थानां समुच्चयार्थश्चकारः। ते ह्यत्र दृष्टान्ततया समुच्चीयन्ते। यथा रघुवंशादय इदानींतनास्तथा वेदा अपि। न तु वेदा अनादयः। अत एव वेदकर्तृत्वेन पुरुषा आख्यायन्ते। वैयासिकं भारतं वाल्मीकीयं रामायणमित्यत्र यथा भारतादिकर्तृत्वेन व्यासादय आख्यायन्ते, तथा काठकं कौथुमं तैत्तिरीयमित्येवं तत्तद्वेदशाखाकर्तृत्वेन कठादीनामाख्यातत्वात् वेदाः

---

१. ट-ठ-वर्जमितरेषु-°रङ्गभावत्वात्। २. ट-ठ-सूत्रे। ३. च-छ-ट-ठ-त-थ-फ-निष्पद्यते। ४. त-थ-विक्रीणाति। ५. ट-ठ-'दुकूलम्' नास्ति। ६. ग-घ-च-छ-ण-त-थ-न-प-फ-य-नास्त्यानर्थक्यम्। ७. च-छ-त-प-फ-अनयोरुदाहरणयो°।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पौरुषेयाः ॥ ननु नित्यानामेव सतां वेदानामुपाध्यायवत् संप्रदायप्रवर्तकत्वेन काठकादिसमाख्या स्यादित्याशङ्क्य युक्त्यन्तरं सूत्रयति—

'अनित्यदर्शनाच्च' इति । अनित्या जननमरणवन्तो बबरादयो वेदे श्रूयन्ते–'बबरः प्रावाहणिरकामयत', 'कुसुरुबिन्द औद्दालकिरकामयत' (तै. सं. ७. २. २. १) इति । तथा सति बबरादिभ्यः पूर्वमभावादनित्या वेदाः । विमतं वेदवाक्यं पौरुषेयं, वाक्यत्वात्, कालिदासादिवाक्यवत् इत्याद्यनुमानसमुच्चयार्थश्चकारः ॥

सिद्धान्तं सूत्रयति–'उक्तं तु शब्दपूर्वत्वम्' इति । तु शब्दो वेदानामनित्यत्वं वारयति । शब्दस्य वेदरूपस्य कठादिपुरुषेभ्यः पूर्वत्वमनादित्वं प्राचीनैरेव सूत्रैरुक्तम् । 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः' (जै. सू. १. १. ५) इत्यस्मिन् सूत्रे औत्पत्तिकशब्देन सर्वेषां शब्दानां वेदानां तदर्थानां तदुभयसंबन्धानां च नित्यत्वं प्रतिज्ञायोत्तराभ्यां शब्दाधिकरणवाक्याधिकरणाभ्यामुपपादितत्वात् । का तर्हि काठकाद्याख्याया गतिरित्याशङ्क्य संप्रदायप्रवर्तनात् सेयमुपपद्यते इत्युत्तरं सूत्रयति—

'आख्या प्रवचनात्' इति । अस्त्वियमाख्याया गतिः । ततः परं बबराद्यनित्यदर्शनं यदुक्तं तस्य किमुत्तरमित्याशङ्क्य उत्तरं सूत्रयति—

'परं तु श्रुतिसामान्यमात्रम्' इति । यत् परं बबरादिकं तत् शब्दसामान्यमेव न तु मनुष्यो बबरनामकोऽत्र विवक्षितः । बबरध्वनियुक्तस्य प्रवहणस्वभावस्य वायोरत्र वक्तुं शक्यत्वात् ॥ ननु वेदे क्वचिदेवं श्रूयते–'वनस्पतयः सत्रमासत', 'सर्पाः सत्रमासत' इति । तत्र वनस्पतीनामचेतनत्वात् सर्पाणां चेतनत्वेऽपि विद्यारहितत्वात् न तदनुष्ठानं संभवति । अतो 'जरद्वबो गायति मद्रकाणि' इत्याद्युन्मत्तबालवाक्यसदृशत्वात् केनचित् कृतो वेद इत्याशङ्क्य उत्तरं सूत्रयति—

'कृते चाविनियोगः स्यात्कर्मणः समत्वात्' इति । यदि ज्योतिष्टोमादि वाक्यं केनचित् पुरुषेण क्रियेत तदानीं कृते तस्मिन् वाक्ये स्वर्गसाधनत्वे ज्योतिष्टोमस्य विनियोगो न स्यात्, साध्यसाधनभावस्य पुरुषेण ज्ञातुमशक्यत्वात् । श्रूयते तु विनियोगः 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति । न चैतदुन्मत्तवाक्यसदृशं लौकिकविधिवाक्यवत् भाव्यकरणेतिकर्तव्यतारूपैस्त्रिभिरंशैरुपेताया भावनाया अवगमात् । लोके हि ब्राह्मणान् भोजयेदिति विधौ किं केन कथमित्याकाङ्क्षायां तृप्तिमुद्दिश्यौदनेन द्रव्येण शाकसूपादिपरिवेषणप्रकारेणेति यथोच्यते तथा ज्योतिष्टोमविधावपि स्वर्गमुद्दिश्य सोमेन द्रव्येण दीक्षणीयाद्यङ्गोपकारप्रकारेणेत्युक्ते कथमुन्मत्तवाक्यसदृशं भवेत् । वनस्पत्यादिसत्रवाक्यमपि न तत्सदृशं, तस्य सत्रकर्मणो ज्योतिष्टोमादिना समत्वात् । 'यत्परो हि शब्दः स शब्दार्थः' इति न्यायविद आहुः । ज्योतिष्टोमादिवाक्यस्य विधायकत्वादनुष्ठाने तात्पर्यम् । वनस्पत्यादिसत्रवाक्यस्यार्थवादत्वात् प्रशंसायां तात्पर्यम् । सा चाविद्यमानेनापि कर्तुं शक्यते । अचेतना अविद्वांसोऽपि सत्रमनुष्ठितवन्तः, किं पुनश्चेतना विद्वांसो ब्राह्मणा इति सत्रस्तुतिः । चकारः पूर्वपक्षोक्तस्य वाक्यत्वहेतोः कर्त्रनुपलम्भेन परामर्शं समुच्चिनोति । तस्मात् नास्ति वेदस्य पौरुषेयत्वम् ॥

अत्रैतौ संग्रहश्लोकौ—

पौरुषेयं न वा वेदवाक्यं स्यात्पौरुषेयता ।
काठकादिसमाख्यानाद्वाक्यत्वाच्चान्यवाक्यवत् ॥

---

१ ट-ठ-वर्जमितरेषु–'पौरुषेयं वाक्यत्वात्' इत्यस्य स्थाने 'पौरुषेयवाक्यत्वात्' । २. ट-ठ–'वेदानाम्' नास्ति । ३. ट–बबरादिनामको° । ४. ट-ठ–सत्रानुष्ठानम् । ५. त-थ–'जरद्वबः कम्बलपादुकाभ्यां द्वारि स्थितो गायति मद्रकाणि । तं ब्राह्मणी पृच्छति पुत्रकामा राजन् रुमायां लशुनस्य कोऽर्थः' इत्याद्य° । ६. ट-ठ–स्वर्गसाधनत्वेन । ७. ट-ठ–ज्योतिष्टोमेन ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

समाख्यानं प्रवचनाद्वाक्यत्वं तु पराहतम् ।
तत्कर्त्रनुपलम्भेन स्यात्ततोऽपौरुषेयता ॥ ( जै. न्या. १. १. ८ ) इति ॥

ननु भगवता बादरायणेन वेदस्य ब्रह्मकार्यत्वं सूत्रितं—' शास्त्रयोनित्वात् ' इति । ऋग्वेदादिशास्त्रकारणत्वात् ब्रह्म सर्वज्ञमिति सूत्रार्थः । बाढम् । नैतावता पौरुषेयत्वं भवति मनुष्यनिर्मितत्वाभावात् । ईदृशमपौरुषेयत्वमभिप्रेत्य व्यवहारदशायामाकाशादिवत् नित्यत्वं बादरायणेनैव देवताधिकरणे सूत्रितम्–' अत एव च नित्यत्वम् ' ( ब्र. सू. १. ३. २९ ) इति । श्रुतिस्मृती चात्र भवतः । ' वाचा विरूप नित्यया ' ( ऋ. सं. ८. ७५. ६ ) इति श्रुतिः । ' अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ' ( म. शां. २३२. २४ ) इति स्मृतिः । तस्मात् कर्तृदोषशङ्काया अनुदयात् मन्त्रब्राह्मणात्मकस्य वेदस्य निर्विघ्नं प्रामाण्यं सिद्धम् ॥

ननु मन्त्रब्राह्मणात्मकत्वं वेदस्य न युक्तं, तयोः स्वरूपस्य निर्णेतुमशक्यत्वात् । मैवम् । द्वितीयाध्यायस्य प्रथमपादे सप्तमाष्टमयोरधिकरणयोर्निर्णीतत्वात् । सप्तमाधिकरणमारचयति—

अहे बुध्निय मन्त्रं म इति मन्त्रस्य लक्षणम् ।
नास्यस्ति वाऽस्य नास्येतदव्याप्त्यादेरवारणात् ॥
याज्ञिकानां समाख्यानं लक्षणं दोषवर्जितम् ।
तेऽनुष्ठानस्मारकादौ मन्त्रशब्दं प्रयुञ्जते ॥ ( जै. न्या. २. १. ७ ) ॥

आधाने इदमाम्नायते–' अहे बुध्निय मन्त्रं मे गोपाय ' ( तै. ब्रा. १. २. १. २६ ) इति । तत्र मन्त्रस्य लक्षणं नास्ति । अव्याप्त्यतिव्याप्त्योर्वारयितुमशक्यत्वात् । विहितार्थाभिधायको मन्त्रः इत्युक्ते ' वसन्ताय कपिञ्जलानालभते ' ( वा. सं. २४. २० ) इत्यस्य मन्त्रस्य विधिरूपत्वादव्याप्तिः । मननहेतुर्मन्त्रः इत्युक्ते ब्राह्मणेऽतिव्याप्तिः । एवम् असिपदान्तो मन्त्रः, उत्तमपुरुषान्तो मन्त्रः, इत्यादिलक्षणानां परस्परमव्याप्तिरिति[1] चेत्, मैवम् । याज्ञिकसमाख्यानस्य निर्दोषलक्षणत्वात् । तच्च समाख्यानमनुष्ठानस्मारकादीनां मन्त्रत्वं गमयति । ' उरु प्रथस्व ' ( तै. सं. १. १. ८. १ ) इत्यादयोऽनुष्ठानस्मारकाः । ' अग्निमीळे पुरोहितम् ' ( ऋ. सं. १. १. १ ) इत्यादयः स्तुतिरूपाः । ' इषे त्वा ' ( तै. सं. १. १. १. १ ) इत्यादयस्त्वान्ताः । ' अग्न आ याहि वीतये ' ( तै. ब्रा. ३. ५. २. १ ) इत्यादय आमन्त्रणोपेताः । ' अग्नीदग्नीन्वि हर ' ( तै. सं. ६. ३. १. २ ) इत्यादयः प्रैषरूपाः । ' अधः स्विदासी३दुपरि स्विदासी३त् ' ( ऋ. सं. १०. १२९. ५ ) इत्यादयो विचाररूपाः । ' अम्बे अम्बाल्यम्बिके न मा नयति कश्चन ' ( तै. सं. ७. ४. १९. १ ) इत्यादयः परिदेवनरूपाः । 'पृच्छामि त्वा परमन्तं पृथिव्याः' ( तै. सं. ७. ४. १८. २ ) इत्यादयः प्रश्नरूपाः । ' वेदिमाहुः परमन्तं पृथिव्याः ' ( तै. सं. ७. ४. १८. २ ) इत्यादय उत्तररूपाः । एवमन्यदप्युदाहार्यम् । ईदृशेष्वत्यन्तविजातीयेषु समाख्यानमन्तरेण नान्यः कश्चिदनुगतो धर्मोऽस्ति यस्य लक्षणत्वमुच्येत । लक्षणस्य चोपयोगः पूर्वाचार्यैर्दर्शितः—

ऋषयोऽपि पदार्थानां नान्तं यान्ति पृथक्त्वशः ।
लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः ॥

इति । तस्मात् अभियुक्तानां मन्त्रोऽयमिति समाख्यानं लक्षणम् ॥

अष्टमाधिकरणमारचयति—

नास्येतद्ब्राह्मणेत्यत्र लक्षणं विद्यतेऽथ वा ।
नास्तीयन्तो वेदभागा इति क्लृप्तेरभावतः ॥
मन्त्रश्च ब्राह्मणं चेति द्वौ भागौ तेन मन्त्रतः ।
अन्यद्ब्राह्मणमित्येतद्धवेद्ब्राह्मणलक्षणम् ॥ ( जै. न्या. २. १. ८ ) ॥

---

१. ठ-°मतिव्याप्तिरिति । २. च-छ-प-फ–तत्र ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

चातुर्मास्येष्विदमाम्नायते–'एतद्ब्राह्मणान्येव पञ्च हवींषि' (तै. ब्रा. १. ७. १. १) इति। तत्र ब्राह्मणस्य लक्षणं नास्ति। कुतः। वेदभागानामियत्तानवधारणेन ब्राह्मणभागेष्वन्यभागेषु च लक्षणस्याव्याप्त्यतिव्याप्त्योः शोधयितुमशक्यत्वात्। पूर्वोक्तो मन्त्रभाग एकः। भागान्तराणि च कानिचित् पूर्वैरुदाहर्तुं संगृहीतानि —

हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।
परक्रिया पुराकल्पो व्यवधारणकल्पना॥

इति। 'तेन ह्यन्नं क्रियते' इति हेतुः। 'तद्ध्नो दधित्वम्' (तै. सं. २. ५. ३. ४) इति निर्वचनम्। 'अमेध्या वै माषाः' (तै. सं. ५. १. ८. १) इति निन्दा। 'वायुर्वै क्षेपिष्ठा देवता' (तै. सं. २. १. १. १) इति प्रशंसा। 'तं व्यचिकित्सञ्जुहवानी ३ मा हौषा ३ म्' (तै. सं. ६. ५. ९. १) इति संशयः। 'यजमानेन संमितौदुम्बरी भवति' (तै. सं. ६. २. १०. ३) इति विधिः। 'माषानेव मह्यं पचन्ति' इति परकृतिः। 'पुरा ब्राह्मणा अभैषुः' (तै. सं. १. ५. ७. ५) इति पुराकल्पः। 'यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणाञ्चतुष्कपालान्निर्वपेत्' (तै. सं. २. ३. १२. १) इति विशेषावधारणकल्पना। एवमन्यदप्युदाहार्यम्। न च हेत्वादीनामन्यतमं ब्राह्मणमिति लक्षणं, मन्त्रेष्वपि हेत्वादिसद्भावात्। 'इन्दवो वामुशन्ति हि' (ऋ. सं. १. २. ४) इति हेतुः। 'उदानिषुर्महीरिति तस्मादुदकमुच्यते' (तै. सं. ५. ६. १. ३; अथर्व. ३. १३. ४) इति निर्वचनम्। 'मोघमन्नं विन्दते अप्रचेताः' (ऋ. सं. १०. ११७. ६) इति निन्दा। 'अग्निर्मूर्धा दिवः ककुत्' (ऋ. सं. ८. ४४. १६) इति प्रशंसा। 'अधः स्विदासी३दुपरि स्विदासी३त्' इति संशयः। 'वसन्ताय कपिञ्जलानालभते' इति विधिः। 'सहस्रमयुता ददत्' (ऋ. सं. ८. २१. १८) इति परकृतिः। 'यज्ञेन यज्ञमयजन्त देवाः' (ऋ. सं. १. १६४. ५०) इति पुराकल्पः। इति करणबहुलं ब्राह्मणमिति चेत्, न। 'इत्यददा इत्ययजथा इत्यपच इति ब्राह्मणो गायेत्' (तै. ब्रा. ३. ९. १४. ३) इत्यस्मिन् ब्राह्मणेन गातव्ये मन्त्रेऽतिव्याप्तेः। 'इत्याह' इत्यनेन वाक्येनोपनिबद्धं ब्राह्मणमिति चेत्, न। 'राजा चिद्यं भगं भक्षीत्याह' (ऋ. सं. ७. ४१. २), 'यो मायातुं यातुधानेत्याह यो वा रक्षाः शुचिरस्मीत्याह' (ऋ. सं. ७. १०४. १६) इत्यनयोर्मन्त्रयोरतिव्याप्तेः। आख्यायिकारूपं ब्राह्मणमिति चेत्, न। यमयमीसंवादसूक्तादावतिव्याप्तेः। तस्मात् नास्ति ब्राह्मणस्य लक्षणमिति प्राप्ते[2] ब्रूमः। मन्त्रब्राह्मणरूपौ द्वावेव वेदभागौ इत्यङ्गीकारात् मन्त्रलक्षणस्य पूर्वमभिहितत्वादवशिष्टो वेदभागो ब्राह्मणमित्येतल्लक्षणं भविष्यति। तदेतल्लक्षणद्वयं जैमिनिः सूत्रयामास–'तच्चोदकेषु मन्त्राख्या', 'शेषे ब्राह्मणशब्दः' (जै. सू २. १. ३२-३३) इति। तच्चोदकेषु[3] तदभिधायकेषु वाक्येषु मन्त्र इति समाख्या संप्रदायविद्भिर्व्यवह्रियते–'मन्त्रानधीमहे' इति। मन्त्रव्यतिरिक्तभागे तु ब्राह्मणशब्दस्तैर्व्यवहृत इत्यर्थः॥

ननु ब्रह्मयज्ञप्रकरणे मन्त्रब्राह्मणव्यतिरिक्ता इतिहासादयो भागा आम्नायन्ते–'यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान् गाथा नाराशंसीः' (तै. आ. २. ९) इति। मैवम्। विप्रपरिव्राजकन्यायेन ब्राह्मणाद्यवान्तरभेदानामेवेतिहासादीनां पृथगभिधानात्। 'देवासुराः संयत्ता आसन्' (तै. सं. ५. ३. ११. १) इत्यादय इतिहासाः। 'इदं वा अग्रे नैव किंचनासीत्' (तै. ब्रा. २. २. ९. १) इत्यादिकं जगतः प्रागवस्थामुपक्रम्य सर्गप्रतिपादकं वाक्यजातं पुराणम्। कल्पस्तु आरुणकेतुकचयनप्रकरणे समाम्नायते—'इति मन्त्राः। कल्पोऽत ऊर्ध्वम्। यदि बलिं हरेत्' (तै. आ. १. ३१. २) इति। अग्निचयने 'यमगाथाभिः परि गायति' (तै. सं. ५. १. ८. २) इति विहिता मन्त्रविशेषा

---

१. ट–पचति। २. ठ–एवं प्राप्ते। ३. ग-घ-च-छ-ट-ठ-ण-थ-प-फ-य–तस्मिन् वेदे केषुचिदभिधायकेषु।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

गाथाः। मनुष्यवृत्तान्तप्रतिपादिका ऋचो नाराशंस्यः। तस्मात् मन्त्रब्राह्मणव्यतिरिक्तभागाभावात् मन्त्रब्राह्मणस्वरूपस्य लक्षितत्वात् तदुभयात्मकत्वं वेदस्य सुस्थितम्॥

मन्त्रावान्तरविशेषश्च तस्मिन्नेव पादे इत्थं विचारितः—

नर्क्सामयजुषां लक्ष्म सांकर्यादिति शङ्किते।
पादश्च गीतिः प्रश्लिष्टपाठ इत्यस्वसंकरः (जै. न्या. २. १. १०)॥

इदमाम्नायते—'अहे बुध्निय मन्त्रं मे गोपाय यमृषयस्त्रैविदा विदुः। ऋचः सामानि यजूंषि' (तै. ब्रा. १.२. १. २६) इति। त्रीन् वेदान् विदन्तीति त्रिविदः। त्रिविदां संबन्धिनोऽध्येतारस्त्रैविदाः। ते च यं मन्त्रभागम् ऋगादिरूपेण त्रिविधमाहुस्तं गोपाय इति योजना। तत्र त्रिविधानामृक्सामयजुषां व्यवस्थितं लक्षणं नास्ति। कुतः। सांकर्यस्य दुष्परिहरत्वात्। अध्यापकप्रसिद्धेषु ऋग्वेदादिषु पठितो मन्त्र इति लक्षणं वक्तव्यम्। तच्च संकीर्णम्। 'देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः' (तै. सं. १. १. ५. १) इत्ययं मन्त्रो यजुर्वेदे संप्रतिपन्नयजुषां मध्ये पठितः। न च तस्य यजुष्ट्वमस्ति तद्ब्राह्मणे 'सावित्र्यर्चा' (तै. ब्रा. ३. २. ५. ३) इति ऋक्त्वेन व्यवहृतत्वात्। 'एतत्साम गायन्नास्ते' (तै. आ. ९.१०.५) इति प्रतिज्ञाय किंचित् साम यजुर्वेदे गीतम्। 'अक्षितमस्यच्युतमसि प्राणसंशितमसि' (छां. उ.३. १७. ६) इति त्रीणि यजूंषि सामवेदे समाम्नातानि। तथा गीयमानस्य साम्न आश्रयभूता ऋचः सामवेदे समाम्नायन्ते। तस्मात् नास्ति लक्षणमिति चेत्, न, पादादीनामसंकीर्णलक्षणत्वात्। पादेनार्थेन चोपेता वृत्तबद्धा मन्त्रा ऋचः, गीतिरूपा मन्त्राः सामानि, वृत्तगीतिवर्जितत्वेन प्रश्लिष्टपठिता मन्त्रा यजूंषि इत्युक्ते न क्वापि संकरः। तदेतत् त्रैविध्यं जैमिनिना सूत्रत्रयेण लक्षितं—'तेषामृग्यत्रार्थवशेन पादव्यवस्था', 'गीतिषु सामाख्या', 'शेषे यजुःशब्दः' (जै.सू. २. १. ३५–३७) इति। एतमेव मन्त्रावान्तरविशेषमुपजीव्य वेदानाम् ऋग्वेदो यजुर्वेदः सामवेद इति त्रैविध्यं संपन्नम्॥

तेषां च वेदानां सर्वेषामन्यतमस्य वा स्वप्रज्ञानुसारेणाध्ययनमुपनीतेन कर्तव्यम्। तथा च याज्ञवल्क्यः स्मरति—'वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्' इति। एकवेदपक्षे पितृपितामहादिपरंपराप्राप्त एव वेदोऽध्येतव्य इत्यभिप्रेत्य 'स्वाध्यायोऽध्येतव्यः' (तै. आ. २. १५) इति स्वशब्द आम्नातः। तच्चाध्ययनं न काम्यं किंतु नित्यम्। अत एव पुरुषार्थानुशासने सूत्रितम्—

'वेदस्याध्ययनं नित्यमनध्ययने पातात्' इति। पातित्यं चैवमाम्नायते—'अपहतपाप्मा स्वाध्यायो देवपवित्रं वा एतत्तं योऽनूत्सृजत्यभागो वाचि भवत्यभागो नाके तदेषाभ्युक्ता यस्तित्याज सखिविदं सखायं न तस्य वाच्यपि भागो अस्ति। यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पन्थामिति। तस्मात्स्वाध्यायोऽध्येतव्यः' (तै. आ. २. १५) इति। अध्येतारं पुरुषं तदीयप्रयासाभिज्ञानेन सखिवत् पालयतीति सखिविद्वेदः। बहुद्रव्यप्रयाससाध्यक्रतुफलस्याध्ययनमात्रेण संपादनं तत्पालनम्। तदप्याम्नायते—'यं यं क्रतुमधीते तेन तेनास्येष्टं भवत्यग्नेर्वायोरादित्यस्य सायुज्यं गच्छति' (तै. आ. २. १५) इति। यद्यप्येतत् ब्रह्मयज्ञस्वाध्यायफलं तथापि ग्रहणार्थाध्ययनमन्तरेण ब्रह्मयज्ञासंभवात् तदीयफलमपि संपद्यते। ईदृशं सखिविदं वेदरूपं सखायं यः पुमानध्ययनमकृत्वा परित्यजति तस्य वाच्यपि भाग्यं नास्ति। फले भाग्यं नास्तीति किमुवक्तव्यम्। सकलदेवतानां धर्मस्य परब्रह्मतत्त्वस्य च प्रतिपादकं वेदमनुच्चार्य परनिन्दानृतकलहहेतुं लौकिकीं वार्तां सर्वत्रोच्चारयतः स्पष्ट एव वाचि भाग्याभावः। अत एवाम्नायते—'नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तत्' (बृ. उ. ४. ४. २१)

---

१. ट–°पादकाः। २. ट–ऋभुभ्य इत्यादयो नारा°। ३. ट–पठिता मन्त्राः। ४. ट-ठ–वर्जमितरेषु–संप्रतिपन्नो यजुषाम्। ५. घ-च-छ-ण-प-फ–गीयते। ६. च-छ-त-थ-प-फ–समाम्नाताः। ७. च-छ-थ-प-फ–°नार्धर्चेन; ट-ठ–°नार्धेन। ८. ठ–°मपनुद्य। ९. ट-ठ सर्वदोच्चा°।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति । यद्यप्यसौ काव्यनाटकादिकं शृणोति तथापि निरर्थकमेव तच्छ्रवणम् । तेन सुकृतमार्गज्ञानाभावादित्यर्थः । स्मृतिरपि ' योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम् । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ' ( मनु. २. १६८ ) इति । एवमन्यान्यपि बहूनि वचनान्यत्रोदाहर्तव्यानि ॥

ननु अधीते वेदे पश्चादध्ययनविध्यर्थं ज्ञानं, ज्ञाने सति पश्चादध्ययनप्रवृत्तिः, इत्यन्योन्याश्रय इति चेत्, बाढम् । अत एव गुरुमतानुसारिणः आचार्यकर्तृकाध्यापनेन प्रवृत्तिं माणवकाध्ययनस्य महता प्रयासेन संपादयन्ति । मतान्तरानुसारिणस्तु प्रकाशात्मादयोऽध्ययनात् प्रागेव संध्यावन्दनादिविधिज्ञानवत् पित्रादिभ्योऽध्ययनविधिज्ञानं वर्णयन्ति । यद्यध्यापनविधिप्रयुक्तिर्यदि वा स्वविधिप्रयुक्तिः सर्वथाप्युपनीतैरध्येतव्य एव वेदः । तस्य च अध्ययनस्य दृष्टार्थत्वमक्षरग्रहणान्तत्वं च पुरुषार्थानुशासने सूत्रितम् । तानि सूत्राणि तद्वृत्तिं चोदाहरामः । अध्ययनस्य दृष्टार्थत्वं साधयितुं पूर्वपक्षयति—

' अदृष्टार्थो स्वधीतिर्विहितत्वात् ' इति । दृष्टफलसाधने भोजनादौ विध्यदर्शनात् विहितमध्ययनमदृष्टार्थमवगन्तव्यम् ॥ अदृष्टविशेषो न श्रुत इति चेत्, तत्राह—

' घृतकुल्याद्यतिदेशः स्वर्गकल्पनं वा ' इति । ब्रह्मयज्ञजपाध्ययनार्थवादं नित्याध्ययनेऽतिदिश्य तत्रत्यं घृतकुल्यादिकं रात्रिसत्रन्यायेन फलत्वेन कल्पनीयम् । ये स्वर्थवादातिदेशं नेच्छन्ति तैर्विश्वजिन्न्यायेन स्वर्गः कल्पनीयः ॥ दृष्टफलयोः संस्कारप्राप्त्योः संभवे कथमदृष्टकल्पनेत्यत आह—

' अयुक्ते संस्कारप्राप्तौ ' इति ॥ संस्कृतस्वाध्यायस्य क्वचित् क्रतौ विनियोगादर्शनात् प्राप्तेः स्वयमपुरुषार्थत्वाच्चेत्यर्थः । स्वाध्यायप्राप्तिरर्थप्रमितिहेतुतया पुरुषार्थ इत्याशङ्क्य विषनिर्हरणादिकार्यविनियुक्तमन्त्रवदध्ययनाङ्गतया विनियुक्तानां ज्योतिष्टोमादिवाक्यानां न स्वार्थे प्रामाण्यमित्याह —

'अन्याङ्गं नार्थप्रमापकम् ' इति । अध्ययनविधायकं तु वाक्यं स्वविहिताध्ययनस्यैवाङ्गमिति कृत्वा स्वार्थे प्रमाणमित्याह—

' अध्ययनवाक्यमनन्याङ्गम् ' इति ॥ ननु एवमदृष्टार्थत्वे कर्मकारकभूतस्वाध्यायगतफलाभावादध्येतव्य इति कर्मवाची तव्यप्रत्ययो विरुध्येत इत्यत आह—

' सक्तुवत्करणपरिणामः' इति । ' सक्तून्जुहोति ' इत्यत्र कर्मत्वेन प्रधानभूतान् सक्तूनुद्दिश्य होमसंस्कारविधाने प्रतीयमानेऽपि होमसंस्कृतानां भस्मीभूतानां सक्तूनामन्यत्र विनियोगाभावात् कर्मप्राधान्यं हित्वा सक्तुभिर्जुहोतीति करणपरिणामः कृतः । एवमत्रापि कर्मगतयोः संस्कारप्राप्त्योरसंभवात् स्वाध्यायेनाधीयीत इति वाक्यपरिणामः कर्तव्यः ॥ इदानीं दृष्टफले सति अदृष्टफलं न कल्प्यमिति सिद्धान्तयति—

' दृष्टे तु नादृष्टम् ' इति ॥ किं तत् दृष्टफलमिति तदाह—

' दृष्टौ प्राप्तिसंस्कारौ ' इति ॥ अक्षरप्राप्तेः परंपरया पुरुषार्थत्वमाह—

' प्राप्त्यर्थबोधः ' इति । जायते इति शेषः ॥ न च भोजनादिवदन्वयव्यतिरेकसिद्धत्वात् विधिवैयर्थ्यमिति शङ्कनीयम् । अवघातादिवन्नियमादृष्टाय विध्युपपत्तेरित्याह—

'विधिर्नियत्यर्थः' इति ॥ यत्तूक्तं संस्कृतस्य स्वाध्यायस्य विनियोगादर्शनात् न संस्कार इति तत्राह—

' संस्कारसिद्धिः क्रत्वध्ययनविधिद्वयोपादानात् ' इति । क्रतुविधयो हि विषयावबोधमपेक्षमाणास्तदवबोधे स्वाध्यायं विनियुञ्जते । अध्ययनविधिश्च लिखितपाठादिव्यावृत्त्याध्ययनसंस्कृतत्वं स्वाध्यायस्य गमयति । अत उभयोपादानात् तत्सिद्धिः ॥ ननु संस्कारो नाम अदृष्टातिशयः । स च न

---

१. ट-ठ-° विध्यर्थज्ञानम् । २. ट-ठ-°यनविधिप्रवृत्तिः । ३. घ-च-फ-प्रवृत्तियुक्तिम्; त-थ-प्रयुक्तिम् । ४. ठ-तत्र । ५. ट-ठ-०ग्रहणार्थत्वम् । ६. ते-अर्थे । ७. ट-ठ-दृष्टं फलं° । ८. ट-ठ-तत्राह । ९. ट-ठ-' इति ' नास्ति । १०. च-छ-प-फ-°र्निष्पत्त्या । ११. ग-घ-च-छ-ण-त-थ-प-फ-य-' स्वाध्यायस्य 'नास्ति । १२. च-छ-त-थ-प-फ-' हि ' नास्ति । १३. च-प-फ-°व्यावृताध्ययन° ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्वाध्यायगतः। तव्यप्रत्ययेन स्वपदोपात्तप्रकृत्यर्थभूताध्ययनोपरक्तापूर्वाभिधानात्। ततः कथं स्वाध्यायस्य संस्कृतत्वमिति तत्राह—

'तव्यः कर्मगादृष्टवाची' इति। अत्र तव्यप्रत्ययस्य कर्माभिधायितया कर्मकारकस्य तव्यप्रत्ययं प्रति प्रकृत्यर्थाद्ध्ययनादपि प्रत्यासन्नत्वात् स्वाध्यायगतमेवापूर्वं तव्यप्रत्ययो वक्ति। अपूर्वस्य धात्वर्थजन्यत्व-नियमेऽपि तदुपरक्तत्वानियमादिति भावः। यच्चोक्तम् 'अन्याङ्गं नार्थप्रमापकम्' इति तदसत्; यतो मन्त्राणां स्वतन्त्रादृष्टशेषाणां तथात्वं युज्यते। इह तु स्वाध्यायाश्रितमदृष्टम्। तस्य च स्वाध्यायगताक्षर-सामर्थ्यसिद्धार्थावबोधे फले सति फलान्तरकल्पनायोगात् प्रामाण्यस्योपबृंहकमेवादृष्टम्, न तु प्रतिबन्धक-मित्याह—

'स्वतन्त्रादृष्टाशेषत्वान्न स्वार्थप्रमा प्रतिबध्यते' इति। सक्तुन्यायेन कर्मकारकप्राधान्ये परित्यक्ते स्वतन्त्रादृष्टमेवात्रापि स्यादित्यत आह—

'यथाश्रुतोपपत्तेर्न सक्तुन्यायः' इति। सक्तुषु गत्यभावात् श्रुतं परित्यज्य अश्रुतं कल्प्यतां नाम। नेह तत् युक्तं प्रदर्शितत्वादित्यर्थः।

इत्थमध्ययनविधेर्दृष्टार्थत्वं प्रसाध्य अर्थावबोधपर्यन्ततां निराकर्तुं पूर्वपक्षयति—

'वैधमर्थनिर्णयं भट्टगुरू विधेः पुमर्थावसानात्' इति। सर्वत्र विधेः पुरुषार्थपर्यवसायित्व-नियमादत्रापि पुरुषार्थभूतं फलवदर्थनिश्चयमध्ययनविधिप्रयुक्तं भट्टगुरू मन्येते॥ ननु सकृदध्ययनादावृत्ति-सहितात् वा अर्थनिश्चयो नोपलभ्यते इत्याशङ्क्य, तथा सति तत्सिद्धये सोऽध्ययनविधिरर्थनिश्चयहेतुं विचारं कल्पयिष्यतीत्याह—

'स विचारमाक्षिपेत्' इति॥ ननु स्वविधेयतदुपकारिणोरेव विधिः प्रयोजक इति सर्वत्र नियमः। तथा सति अतादृशं कथमत्राध्ययनविधिराक्षेप्स्यतीत्यत आह—

'अविधेयानुपकार्याक्षेपोऽवघातावृत्तिवत्' इति। 'व्रीहीनवहन्ति' इत्यत्र अवघातमात्रं विधेयं न तु तदावृत्तिः। तस्या अवात्वर्थत्वात्। नापि सा विधेयोपकारिणी। अन्तरेणावृत्तिं सकृन्मुसल-घातमात्रादवघातसिद्धेः। तथापि तण्डुलनिष्पत्तिफलसिद्धये स विधिरावृत्तिं यद्वदाक्षिपेत् तद्वत् प्रकृतेऽप्य-वगन्तव्यम्॥ ननु वेदमात्राध्यायिनोऽर्थावबोधानुदयेऽपि व्याकरणाद्यङ्गसहितवेदाध्यायिनस्तदुदयसद्भावात् तं प्रति व्यर्थं विचारं विधिर्न कल्पयेदित्याशङ्क्य अर्थगतविरोधपरिहारायापेक्षित एव विचार इत्याह—

'साङ्गाध्ययनात्तद्भावे विचारो विरोधापनुत्' इति॥ सिद्धान्तयति—

'प्राप्तेस्तु गवादिवत् पुमर्थत्वाद्विधिस्तदन्तः' इति॥ यथा फलभूतस्य क्षीरादेर्हेतवो गवादयोऽपि पुरुषैरर्थ्यन्ते, तथा फलवदर्थावबोधहेतोरक्षरप्राप्तेरपि पुरुषार्थत्वात् अध्ययनविधिरक्षरप्राप्त्यवसानोऽव-गन्तव्यः॥ ननु अक्षरप्राप्तेः पुरुषार्थत्वं फलवदर्थावबोधप्रयुक्तं चेत्, तर्हि तद्बोधस्य मुख्यपुरुषार्थत्वात् बोधान्त एव विधिः किं न स्यात् इत्यत आह—

'फलवद्बोधान्तत्वेऽध्ययनाकार्त्स्न्यम्' इति। बोधस्य हि फलं कर्मानुष्ठानम्। तथा सति यस्य ब्राह्मणादेर्यस्मिन् बृहस्पतिसवादावधिकारस्तस्य तद्वाक्यमात्राध्ययनं स्यात्। न तु राजसूयादिवाक्या-ध्ययनम्। तत्र प्रवृत्त्यादिफलाभावात्। स्वपक्षे तु नायं दोष इत्याह—

'कृत्स्नप्राप्तिर्जपार्था' इति। न च अबोधकेत्वेऽर्थावबोध एव न सिध्येदिति शङ्कनीयम्। प्रमाणस्य प्रमेयबोधकत्वस्वाभाव्यात्। लौकिकाप्तवाक्यानामन्तरेणैव विधिं बोधकत्वदर्शनादित्याह—

---

१. ठ–कर्मवाचितया। २. ट-ठ–स्वाध्यायस्य तव्यप्रत्ययम्। ३. ठ–प्रकृत्यर्थत्वाद°। ४. ग-घ-च-छ-ण-प-फ–अदृष्टान्तरं तदसत्। ५. ग-घ-च-छ-ण-प-फ-य–एतादृशम्। ६. ग-घ-च-छ-ण-त-प-फ-य-अर्थविरोधापनुत्। ७. च-छ-प-फ–तद्बोधकस्य। ८. घ-च-छ-ण-थ-प-फ–राजसूयादिप्रकरणवाक्या° ९. ट-ठ– विधेर्बोधान्तत्वाभावेऽर्थावबोधः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'लोकवन्नैजो बोधः' इति ॥ ननु बोधस्य विधिफलत्वे बोधकाममुद्दिश्य विधातुं शक्यत्वात् सुलभोऽधिकारी स्यादित्याशङ्क्य प्राप्तिपक्षेऽपि प्राप्तिकाम उपनीताष्टवर्षब्राह्मणोऽत्राधिकारी सुलभ एव इति परिहारं स्पष्टत्वादुपेक्ष्य बोधस्य काम्यत्वं दूषयति—

'सोऽकाम्यः प्राग्बोध्यभानाभानयोः' इति । बोध्यस्याग्निहोत्रादिलक्षणवेदार्थस्य अध्ययनात् प्राक् संध्योपासनादिवत् पित्राद्युपदेशत एव भाने सिद्धत्वादेव सोऽर्थबोधो न काम्यः । अभाने कामयितुमशक्यः । ज्ञाते एव विषये कामनानियमात् ॥ ननु सामान्यतो ज्ञाते विशेषतो बुभुत्सा संभवति । यद्वा विशेषतोऽपि पित्राद्युपदेशादवगते सति औपदेशिकज्ञानस्य प्रामाण्यनिर्णयाय पुनर्बोधकामना युक्तैव इत्याशङ्क्य एवमप्यर्थावबोधमुद्दिश्याध्ययनविधानं न संभवतीत्याह—

'उद्देश्यायोगात्' इति । अग्निहोत्रादिविशेषज्ञानानां न तावदेकबुद्ध्या विशेषाकारेणोद्देशः संभवति, अनन्तत्वात् । सामान्याकारेणोद्देशे सामान्यमेव विधिफलं स्यात्, न तु ज्ञानविशेषः । ततो नोद्देशो युक्तः ॥ ननु अर्थावबोधमुद्दिश्योच्चारणाभावे वेदस्य स्वार्थे तात्पर्यं न स्यात्, इत्याशङ्क्य उपक्रमादिलिङ्गगम्यं तात्पर्यं शब्दबलादेव सिध्यतीत्याह—

'तात्पर्यशब्दात्' इति ॥ तर्ह्यर्थज्ञानमुद्दिश्य शब्दोच्चारणं लोके व्यर्थं स्यादिति चेत्, न । पुरुषसंबन्धकृतदोषाख्यप्रतिबन्धपरिहारार्थत्वादित्याह—

'उद्दिश्योच्चारणं दोषः लोके' इति ॥ ननु अध्ययनविधेर्बोधान्तत्वाभावे विचारशास्त्रं न प्रवर्तेत प्रयोजकाभावादित्याशङ्क्याह—

'विचार उत्तरविधिप्रयुक्त उपपद्यते' इति । क्रतुबोधविधयः साङ्गवेदाध्ययनादापातप्रतिपन्ना विरोधपरिहारेण प्रतिष्ठितं निर्णयज्ञानमन्तरेण अनुष्ठापयितुमशक्नुवन्तस्तन्निर्णयाय क्रतुविचारं प्रयोजयन्ति। श्रवणविधिस्तु साक्षादेव ब्रह्मविचारं विधत्ते । एवं च सति श्रवणविधेः स्वविधेयप्रयोजकत्वं क्रतुविधीनां च विधेयोपकारिप्रयोजकत्वमित्युपपद्यतेतराम् । अध्ययनविधिप्रयुक्तिपक्षे तु तद्विधेः क्रतुद्वारा स्वर्गसिद्धिपर्यन्तत्वात् क्रत्वनुष्ठानस्यापि तत्प्रयुक्तौ क्रतुविधिवैयर्थ्यमापद्येत ॥ ननु अध्ययनविधेस्त्रैवर्णिकमात्रं प्रति नित्यत्वात् तत्प्रयुक्तौ विचारस्यापि तल्लभ्येत नान्यथेति चेत्, क्रतुविचारस्य त्रैवर्णिकमात्रेऽपि नित्यत्वसिद्धिः किं वा ब्रह्मविचारस्य । तत्राद्योऽस्मन्मतेऽपि सम इत्याह—

'अतो नित्यः क्रतुविचारस्त्रैवर्णिकमात्रस्य' इति । यतोऽकरणे प्रत्यवायश्रवणात् क्रतवः त्रैवर्णिकानां नित्या अत इत्यर्थः ॥ द्वितीयोऽनिष्ट इत्याह—

'ब्रह्मविचारः पुनः परमहंसस्यैव' इति । नित्य इत्यनुषङ्ग इति ॥

ननु उक्तनीत्या अध्ययनस्याक्षरग्रहणान्तत्वेऽर्थज्ञानमविहितं स्यात् । मैवम् । वाक्यान्तरेण तद्विधानात् । 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति तद्विधिः । तत्र निष्कारणशब्देनाध्ययनज्ञानयोः काम्यत्वं निवार्यते । अर्थज्ञाने पुरुषप्रवृत्तिकरं वचनद्वयं शाखान्तरगतं निरुक्तकारो यास्क एवमुदाजहार—'अथापि ज्ञानप्रशंसा भवत्यज्ञाननिन्दा च—

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥
यद्गृहीतेमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्' (निरु. १. १८) इति ॥

अस्मिन् मन्त्रद्वये 'योऽर्थज्ञः' इत्यनेनैवार्धेन वेदार्थज्ञानं प्रशस्यते । इतरेणार्धत्रयेण ज्ञानराहित्यं निन्द्यते। यो वेदार्थं जानाति सोऽयमिह लोके सकलं श्रेयः प्राप्नोति । तथा तेन ज्ञानेन पापक्षये सति मृतः

---

१. च-फ- तद्विधेरर्थज्ञानस्य । २. ट–यदधीत° । ३. ट-ठ– इत्यनेनार्धेन । ४. ट–अर्थज्ञानराहित्यम् । ५. फ–अनेन ।

पुस्तकालय
CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्वर्गं प्राप्नोति। तदेतत् ऐहिकामुष्मिकं च ज्ञानफलं तैत्तिरीया मन्त्रोदाहरणेन तदीयतात्पर्याभिधायिब्राह्मणेन च स्पष्टीचक्रुः–'तदेषाभ्युक्ता ये अर्वाङुत वा पुराणे वेदं विद्वांसमभितो वदन्त्यादित्यमेव ते परिवदन्ति। सर्वे अग्निं द्वितीयं तृतीयं च हंसमिति। यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति। तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यान्नाश्लीलं कीर्तयेदेता एव देवताः प्रीणाति' (तै. आ. २. १५) इति। वेदं विद्वान् अर्थाभिज्ञः पुरुषः। स च द्विविधः। अर्वाचीनकाले समुत्पन्नः चतुर्दशविद्यास्थानकुशलः कश्चिदुपाध्यायः पुरातनकाले समुत्पन्नो व्यासादिश्च। तमेतमुभयविधं विद्वांसं विद्यामदधनमदकुलमदापेताः पण्डितंमन्या ये पुरुषा अभितो विद्यादिषु दूषयन्ति ते सर्वेऽपि आदित्यमेव प्रथमं सर्वतो दूषयन्ति। आदित्यापेक्षया द्वितीयमग्निं दूषयन्ति। तदुभयापेक्षया तृतीयं हंसं दूषयन्ति। हन्ति सदा गच्छतीति हंसो वायुः। अग्न्यादिरूपत्वं च वेदविद आम्नातम्– 'अग्नेर्वायोरादित्यस्य सायुज्यं गच्छति' (तै. आ. २. १५) इति। न केवलमेतद्देवतात्रयं किंतु सर्वा अपि देवता वेदविदि वसन्ति। तस्मात् ब्राह्मणान् वेदविदो दृष्ट्वा स्मृत्वा वा प्रतिदिनं नमस्कुर्यात्, न तु तस्मिन् विद्यमानमपि दोषं कीर्तयेत्। एवं सति तत्तन्मन्त्रार्थभूताः सर्वा अपि देवता वेदार्थविदा स्मर्यमाणतया तदीयहृदयेऽवस्थिता अयं नमस्कर्ता तोषयति। न चैतदध्ययनस्यैव फलमिति शङ्कनीयं 'विद्वांसम्' (तै. आ. २. १५) इत्याम्नातत्वात्। अन्यथा वेदमधीयानमित्याम्नायेत। तस्मात् सर्वदेवताबुद्ध्या प्राणिभिः पूज्यस्य वेदार्थविदो लोकद्वयेऽपि श्रेयःप्राप्तिरुपपद्यते। यस्तु वेदमधीत्यापि अर्थं न विजानाति सोऽयं पुमान् भारमेव हरति धारयति। स्थाणुरिति दृष्टान्तः। छिन्नशाखं शुष्कं वृक्षमूलं स्थाणुशब्देनोच्यते। स च यथेन्धनार्थमेवोपयुज्यते न तु पुष्पफलार्थं, तथा केवलपाठकस्य व्रात्यत्वं न भवतीत्येतावदेव न ह्यनुष्ठानं स्वर्गादिफलसिद्धिर्वास्ति। किल इत्यनेन लोकप्रसिद्धिर्द्योत्यते। लोकेऽपि पाठकस्य यावती धनादिपूजा ततोऽप्यधिका विदुषि दृश्यते। किंच यद्वेदवाक्यमाचार्यात् गृहीतमर्थज्ञानरहितं पाठरूपेणैव पुनःपुनरुच्चार्यते, तत् कदाचिदपि न ज्वलति स्वार्थं न प्रकाशयति। यथाग्निरहितप्रदेशे प्रक्षिप्तं शुष्ककाष्ठं न ज्वलति तद्वत्। तथा सति तस्य वाक्यस्य वेदत्वमेव मुख्यं न स्यात्। अलौकिकं पुरुषार्थोपायं वेत्त्यनेनेति वेदशब्दनिर्वचनम्। तथा चोक्तम्–'प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते। एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता' इति। अतो मुख्यवेदत्वसिद्धये ज्ञातव्य एव तदर्थः। किंचात्र यास्केन (निरु. १.१९) काचिदन्याप्यृगुदाहृता—

'उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्।
उतो त्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः (ऋ. सं. १० ७१. ४) इति॥

तत्र पूर्वार्धस्य तात्पर्यं स एव दर्शयति—'अप्येकः पश्यन्न पश्यति वाचमपि च शृण्वन्न शृणोत्येनामित्यविद्वांसमाहार्धम्' इति। अस्यायमर्थः। यः पुमानर्थं न वेत्ति तं प्रति पूर्वार्धेन मन्त्रो ब्रूते। एकः पुरुषः पाठमात्रपर्यवसितो वेदरूपां वाचं पश्यन्नपि न सम्यक् पश्यति। एकवचनबहुवचनादिविवेकाभावे पाठशुद्धेरपि कर्तुमशक्यत्वात्। 'वायुमेव स्वेन भागधेयेनोप धावति स एवैनं भूतिं गमयति' (तै. सं. २. १. १. १), 'आदित्यानेव स्वेन भागधेयेनोप धावति त एवैनं भूतिं गमयन्ति' इत्यादौ अव्युत्पन्नः कथं पाठं निश्चिनुयात्। अन्यः कश्चिदर्थज्ञानाय व्याकरणाद्यङ्गानि शृण्वन्नपि मीमांसाराहित्यादेनां वेदरूपां वाचं न सम्यक् शृणोति। 'यावतोऽश्वान्प्रतिगृह्णीयात्तावतो वारुणाञ्चतुष्कपालान्निर्वपेत्' (तै. सं. २. ३. १२. १) इत्यत्र व्याकरणमात्रेण प्रतिग्रहीतुरिष्टिः प्रतीयते। मीमांसायां तु न्यायेन दातुरिति निर्णीतम् (जै. सू. ३.४. ३०)। तस्मात् उभयविधमप्यविद्वांसं प्रति एवमाहेति। तृतीयपादतात्पर्यं दर्शयति–'अप्येकस्मै तन्वं विसस्रे इति स्वमात्मानं विवृणुते ज्ञानं प्रकाशनमर्थस्याहानया वाचा' इति। अस्यायमर्थः। अपिशब्दपर्यायं उतोशब्दः। स च पूर्वोक्तानभिज्ञवैलक्षण्यायात्र प्रयुक्तो निपातानाः

---

१. च-छ-थ-फ–'सर्वतो' नास्ति। २. च-छ-थ–तत्र मन्त्रार्थ°। ३. ग-घ-य–त्वनुष्ठानम्। ४. ठ–तात्पर्यार्थम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मनेकार्थत्वात्। यः पुमान् व्याकरणाद्यङ्गैः स्वशब्दार्थं मीमांसया तात्पर्यं च शोधयितुं प्रवृत्तः, तस्मै एकस्मै वेदः स्वकीयां तनुं विसस्रे। स्वमित्यादिकं पदव्याख्यानम्। ज्ञानमित्यादिकं तात्पर्यव्याख्यानम्। वेदार्थप्रकाशनक्षमं सम्यग्ज्ञानमनया तृतीयपादरूपया वाचा मन्त्र आहेति। चतुर्थपादतात्पर्यं दर्शयति– ' उपमोत्तमया वाचा जायेव पत्ये कामयमाना सुवासा ऋतुकालेषु सुवासाः कल्याणवासाः कामयमाना ऋतुकालेषु यथा स एनां पश्यति स शृणोतीत्यर्थज्ञप्रशंसा ' इति। अस्यायमर्थः। उत्तमया चतुर्थपादरूपया वाचा तृतीयपादार्थस्योपमा उच्यते। उशतीत्येतस्य व्याख्यानं कामयमानेति। यद्यपि अह्नि गृहकृत्यवेलायां मलिनवासास्तथापि संभोगकालेषु कल्याणवासा भवति। तत्र हेतुः। कामयमाना ऋतुकालेष्विति। यथा स पतिरेनां जायां साकल्येनादरयुक्तः पश्यति, किंच तयोक्तमर्थं हितबुद्धया शृणोति, तथायं चतुर्दशविद्यास्थानपरिशीलनोपेतः पुरुषो वेदार्थरहस्यं सम्यक् पश्यति, वेदोक्तं च धर्मब्रह्मरूपमर्थं हितबुद्धया स्वीकरोति। सेयमुक्ता वेदार्थाभिज्ञस्य प्रशंसेति ॥पुनरप्युगन्तरं यास्कः ( निरु० १. २० ) उदाजहार– ' तस्योत्तरा भूयसे निर्वचनाय

उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु।
अधेन्वा चरति मायया एष वाचं शुश्रुवाँ अफलामपुष्पाम् (ऋ. सं. १०.७१. ५) इति ॥

अयमर्थः। पूर्वोदाहृतायाः ' उत त्वः पश्यन्' इत्यादिकाया ऋचोऽनन्तरमेवाम्नाता काचित् ऋक् तस्य पूर्वोक्तमन्त्रार्थस्य भूयसे निर्वचनाय संपद्यते। तमर्थमतिशयेन प्रतिपादयितुं प्रभवति। कथमिति चेत्, तदुच्यते। अपि चैकं चतुर्दशविद्यास्थानकुशलं पुरुषं वेदरूपाया वाचः सख्ये स्थित्वा स्थैर्येण[1] वेदोक्तार्थामृतपानयुक्तमाहुः[2], अभिज्ञाः कथयन्ति। ' सखिविदं सखायम् ' ( तै. आ. २. १५ ) इति मन्त्रे वेदस्य सखित्वमुदाहृतम्। यद्वा स्वर्गलोके देवानां सख्ये स्थित्वातिशयेन पीतामृतमाहुः। वाचाम् इना ईश्वराः सभासु प्रगल्भा वा[3] वाजिनाः। तेषु मध्येऽप्येनं वेदार्थकुशलं चोदयितुं[4] न हिन्वन्ति। न केऽपि प्राप्नुवन्ति। तेन[5] सह विवदितुमसमर्थत्वात्। यस्तु अन्यः पाठमात्रपरः पुष्पफलरहितां वाचं शुश्रुवान् भवति। पूर्वकाण्डोक्तस्य धर्मस्य ज्ञानं पुष्पम्। उत्तरकाण्डोक्तस्य ब्रह्मणो ज्ञानं फलम्। यथा लोके पुष्पं फलस्योत्पादकं तथा वेदानुवचनादिधर्मज्ञानमनुष्ठानद्वारा फलात्मकब्रह्मज्ञानेच्छां जनयति। ' तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन ' ( बृ. उ. ४. ४. २२ ) इति श्रुतेः। यथा च फलं तृप्तिहेतुस्तथा ब्रह्मज्ञानं कृतकृत्यत्वहेतुः ' यत्पूर्णानन्दैकबोधस्तद्ब्रह्माहमस्मीति कृतकृत्यो भवति ' इति श्रुतेः। तादृशपुष्पफलरहितवेदपाठकः स एष पुमान् अधेन्वा मायया सह चरति। नवप्रसूतिका क्षीरदोग्ध्री गौः प्रीतिहेतुत्वात् धिनोतीति व्युत्पत्त्या धेनुरित्युच्यते। पाठमात्रपरं प्रति वेदरूपा वाग्धर्मज्ञानरूपं क्षीरं न दोग्धीत्यधेनुः। अत एवासौ माया कपटरूपा ऐन्द्रजालिकनिर्मितगोसदृशरूपत्वात्[6]। तया मायया सह चरन्नयं परमपुरुषार्थं न लभते इत्यर्थः। इत्थं यास्केन ज्ञानस्तुत्यज्ञाननिन्दोदाहरणस्य प्रपञ्चितत्वात् यच्च[7] स्तूयते तद्विधीयते इति न्यायेन अध्ययनवदर्थस्यापि विधिरभ्युपगन्तव्यः ॥

किंच नक्षत्रेष्टिकाण्डे प्रतीष्टि फलवाक्यं यागतद्वेदनयोः समानमेवाम्नायते–' यथा ह वा अग्निर्देवानामन्नाद एवं ह वा एष मनुष्याणां भवति य एतेन हविषा यजते य उ चैनदेवं वेद ' ( तै. ब्रा. ३. १. ४. १ ) इति। अतो यागवत् फलाय स्ववेदनमपि विधीयते। अनेन न्यायेन सर्वेष्वपि ब्राह्मणेषु वेदनविधयो द्रष्टव्याः ॥ ननु ' विद्याप्रशंसा ' ( जै. सू. १. २. १५ ) इति सूत्रे वेदनफलानां प्रशंसारूपत्वं जैमिनिना सूत्रितमिति चेत्, अस्तु नाम। विद्यमानेनापि फलेन प्रशंसितुं शक्यत्वात्। दर्शयागस्य पूर्णमासयागस्य च अतिपाते सति प्रायश्चित्तरूपां वैश्वानरेष्टिं विधातुं विद्यमानेनैव स्वर्गफलेन स्तुतिः क्रियते

---

१. ट–शब्दार्थम्। २. ठ–अतिशयेन पीतामृतमाहुः। ३. ट-ठ– ' वा ' नास्ति। ४. ठ–वेदयितुम्। ५. ठ–अनेन। ६. ठ–ऐन्द्रजालिकगो°। ७. ठ–यत्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'सुवर्गाय हि लोकाय दर्शपूर्णमासाविज्येते' (तै. सं. २. २. ५. ४) इति। एतच्चाचार्यैर्ब्रह्मज्ञानफलवाक्यस्य स्वार्थेऽपि तात्पर्यं दर्शयितुमुदाहृतम्—

इच्छाम्येवार्थवादत्वं वचसोऽन्यपरत्वतः।
यथावस्त्वभिधायित्वान्न त्वभूतार्थवादता॥
इज्येते स्वर्गलोकाय दर्शादर्शौ यथा तथा।
न त्वभूतार्थवादत्वं पापश्लोका श्रुतिर्यथा (बृ. उ. वा. १२७-१२८)॥

इति। न च वेदनमात्रेण फलसिद्धावनुष्ठानवैयर्थ्यमिति शङ्कनीयम्; फलभूयस्त्वेन परिहृतत्वात्। उदाहृतं चात्र जैमिनिसूत्रं–'फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः सारतो वा फलविशेषः स्यात्' (जै.सू. १. २. १७) इति। एतच्चास्माभिः 'तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद' (तै. सं. ५. ३. १२. २) इत्युदाहरणेन व्याख्यातम्। छन्दोगाश्च केवलादनुष्ठानात् विद्यासहितेऽनुष्ठाने फलातिशयमामनन्ति–'तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद। नाना तु विद्या चाविद्या च। यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' (छां. उ. १. १. १०) इति। यद्यप्यङ्गावबद्धोपास्तिरत्र विद्याशब्देन विवक्षिता तथापि न्यायः सर्वास्वपि विद्यासु समानः॥

कुतस्तवैतावती वेदने भक्तिरिति चेत्। कुतो वा तवैतावान् प्रद्वेषः। प्रशंसा त्वस्माभिर्भूयसी दर्शिता। निन्दां तु न क्वाप्युपलभामहे। किंतु कर्मजन्यमपूर्वं यथा मरणादूर्ध्वं जीवेन सह गच्छति तथा विद्याजन्यमप्यपूर्वं गच्छति। तथा च वाजसनेयिन आमनन्ति–'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च' (बृ. उ. ४. ४. २) इति। तस्मात् अध्ययनवदर्थज्ञानस्यापि विहितत्वादर्थज्ञानाय वेदो व्याख्यातव्यः॥

विषयप्रयोजनसंबन्धाधिकारिज्ञानमन्तरेण श्रोतृप्रवृत्त्यभावात् विषयादयो निरूप्यन्ते। व्याख्यानस्य व्याख्येयो वेदो विषयः। तदर्थज्ञानं प्रयोजनम्। व्याख्यानव्याख्येयभावः संबन्धः। ज्ञानार्थी चाधिकारी। यद्यप्येतावत् प्रसिद्धं तथापि वेदस्य विषयाद्यभावे व्याख्यानस्यापि परमविषयादिकं न स्यात्। अतो वेदस्य तच्चतुष्टयमुच्यते। वेदे पूर्वोत्तरकाण्डयोः क्रमेण धर्मब्रह्मणी विषयः, तयोरनन्यलभ्यत्वात्। तथा च पुरुषार्थानुशासने सूत्रितं–'धर्मब्रह्मणी वेदैकवेद्ये' इति। जैमिनीये च द्वितीयसूत्रे 'चोदनैव धर्मे प्रमाणम्', 'चोदना प्रमाणमेव' इति नियमद्वयं संप्रदायविद्भिरभिहितम्। चोदनैवेत्यसुमर्थमुपपादयितुं चतुर्थसूत्रे प्रत्यक्षविषयत्वं धर्मस्य निराकृतम्–'प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात्' (जै. सू. १. १. ४) इति। अनुष्ठानादूर्ध्वमुत्पत्स्यमानस्य धर्मस्य पूर्वमविद्यमानत्वात् न प्रत्यक्षयोग्यतास्ति। उत्तरकालेऽपि रूपादिराहित्यात् नेन्द्रियैरवगम्यते। अत एव अदृष्टमिति सर्वैरभिधीयते। लिङ्गराहित्यात् नानुमानविषयत्वमप्यस्ति। सुखदुःखे धर्माधर्मयोर्लिङ्गमिति चेत्, बाढम्। अयमपि लिङ्गलिङ्गिभावो वेदेनैव गम्यते। ततश्चोदनैव धर्मे प्रमाणम्॥ वैयासिकस्य तृतीयसूत्रस्य द्वितीयवर्णके ब्रह्मणः सिद्धवस्तुनोऽपि शास्त्रैकविषयत्वं भाष्यकृद्भिर्व्याख्यातं–'शास्त्रादेव प्रमाणाज्जगतो जन्मादिकारणं ब्रह्माधिगम्यत इत्यभिप्रायः' (ब्र. सू. शां. भा. १. १. ३) इति। श्रुतिश्च भवति–'नावेदविन्मनुते तं बृहन्तम्' (तै. ब्रा. ३. १२. ९. ७) इति। तत्रोपपत्तिः पूर्वाचार्यैरेवमुदीरिता–'रूपलिङ्गादिराहित्यान्न मान्तरयोग्यता' (वै. न्या. १. १. ३. १८) इति। तस्मात् अनन्यलभ्यत्वादस्ति धर्मब्रह्मणोर्वेदविषयत्वम्। तदुभयज्ञानं वेदस्य साक्षात् प्रयोजनम्। न च तस्य ज्ञानस्य 'सप्तद्वीपा वसुमती', 'राजासौ गच्छति' इत्यादिज्ञानवत् अपुरुषार्थपर्यवसायित्वं शङ्कनीयम्। धर्मप्रयुक्तस्य पुरुषार्थस्य स्तूयमानत्वात् 'धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति धर्मेण पापमपनुदति धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदन्ति' (तै. आ. १०. ६३) इति। उद्दण्डस्य राज्ञो नियामकत्वात्

---

१. ट–इत्याद्युदाहरणेन। २. च-छ-थ-फ–तवैषोत्र। ३. ट–किंच। ४. च-छ-ट-फ–अवगम्यते; ट–अवगन्तुं शक्यते। ५. ट-ठ–सिद्धात्मनोऽपि। ६. ट–श्रूयमाणत्वात्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

विवदमानयोः पुरुषयोर्मध्ये दुर्बलस्यापि राजसाहाय्यवत् जयहेतुत्वाच्च धर्मः पुरुषार्थः । तथा च वाजसनेयिनः सृष्टिप्रकरणे समामनन्ति–' तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत्क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्त्यथो अबलीयान्बलीयांसमाशंसते धर्मेण यथा राज्ञैवम् ' ( बृ. उ. १. ४. १४ ) इति । ' ब्रह्मविदाप्नोति परम् ' ( तै. आ. ८. २ ), ' ब्रह्म वेद ब्रह्मैव भवति ' ( मुं. उ. ३. २. ९ ), ' तरति शोकमात्मवित् ' ( छां. उ. ७. १. ३ ) इत्यादिश्रुतिषु ब्रह्मज्ञानप्रयुक्तः पुरुषार्थः प्रसिद्धः । तदुभयज्ञानार्थी वेदेऽधिकारी । स च त्रैवर्णिकः पुरुषः । स्त्रीशूद्रयोस्तु सत्यामपि ज्ञानापेक्षायामुपनयनाभावेन अध्ययनराहित्यात् वेदेऽधिकारः प्रतिबद्धः । धर्मब्रह्मज्ञानं तु पुराणादिमुखेनोत्पद्यते । तस्मात् त्रैवर्णिकपुरुषाणां वेदमुखेनार्थज्ञानेऽधिकारः ॥ संबन्धस्तु वेदस्य धर्मब्रह्मभ्यां सह प्रतिपाद्यप्रतिपादकभावः । तदीयज्ञानेन सह जन्यजनकभावः । त्रैवर्णिकपुरुषैः सहोपकार्योपकारकभावः । तदेवं विषयाद्यनुबन्धचतुष्टयमवगत्य समाहितधियः श्रोतारो वेदव्याख्याने प्रवर्तन्ताम् ॥

अतिगम्भीरस्य वेदस्यार्थमवबोधयितुं शिक्षादीनि षडङ्गानि प्रवृत्तानि। अत एव तेषामपरविद्यारूपत्वं मुण्डकोपनिषद्यथर्ववैणिका आमनन्ति–' द्वे विद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते ' ( मुं. उ. १. १. ४-५ ) इति । साधनभूतधर्मज्ञानहेतुत्वात् षडङ्गसहितानां कर्मकाण्डानामपरविद्यात्वम् । परमपुरुषार्थभूतब्रह्मज्ञानहेतुत्वात् उपनिषदां परविद्यात्वम् ॥

वर्णस्वराद्युच्चारणप्रकारो यत्रोपदिश्यते सा शिक्षा । तथा च तैत्तिरीया उपनिषदारम्भे समामनन्ति– 'शीक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम्। साम संतानः। इत्युक्तः शीक्षाध्यायः' ( तै. उ. १. १) इति ॥ वर्णोऽकारादिः । स चाङ्गभूतशिक्षाग्रन्थे स्पष्टमुदीरितः–' त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः। प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा ' ( पा. शि. ३ ) इत्यादिना॥ स्वर उदात्तादिः । सोऽपि तत्रोक्तः[3]–' उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ' ( पा. शि. ११ ) इति ॥ मात्रा ह्रस्वादिः । सापि तत्रोक्ता–' ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ' (पा. शि. ११) इति ॥ बलं स्थानप्रयत्नौ । तत्र ' अष्टौ स्थानानि वर्णानाम् ' (पा. शि. १३) इत्यादिना स्थानमुक्तम् । ' अचोऽस्पृष्टा यणस्वीषत् ' ( पा. शि. ३८ ) इत्यादिना प्रयत्न उक्तः ॥ सामशब्देन साम्यमुक्तम् । अतिद्रुतातिविलम्बितगीत्यादिदोषराहित्येन माधुर्यादिगुणयुक्तत्वेनोच्चारणं साम्यम् । ' गीती शीघ्री शिरःकम्पी ' ( पा. शि. ३२ ) इत्यादिना ' उपांशुदृष्टं त्वरितम् ' ( पा. शि. ३५ ) इत्यादिना च दोषा उक्ताः । ' माधुर्यमक्षरव्यक्तिः ' ( पा. शि. ३३ ) इत्यादिना गुणा उक्ताः ॥ संतानः संहिता । ' वायवा याहि ' ( ऋ. सं. १. २. १ ) इत्यत्र अवादेशः । ' इन्द्राग्नी आ गतम् ' ( ऋ. सं. ३. १२. १) इत्यत्र प्रकृतिभावः । एतच्च व्याकरणेऽभिहितत्वात् शिक्षायामुपेक्षितम् । शिक्ष्यमाणवर्णादिवैकल्ये बाधस्तत्रोदाहृतः–' मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ' ( पा. शि. ५२ ) इति । ' इन्द्रशत्रुर्वर्धस्व ' ( तै. सं. २. ४. १२. १ ) इत्यस्मिन्मन्त्रे इन्द्रस्य शत्रुर्घातकः इत्यस्मिन् विवक्षितेऽर्थे तत्पुरुषसमासे ' समासस्य ' ( पा. सू. ६. १. २२३ ) इति सूत्रेण तत्पुरुषत्वात् अन्तोदात्तेन भवितव्यम् । आद्युदात्तस्तु प्रयुक्तः । तथा सति पूर्वपदप्रकृतिस्वरत्वेन बहुव्रीहित्वात् इन्द्रो घातको यस्य इत्यर्थः संपन्नः । तस्मात् स्वरवर्णाद्यपराधपरिहाराय शिक्षाग्रन्थोऽपेक्षितः॥

कल्पस्तु[5] आश्वलायनापस्तम्बबोधायनादिसूत्रम्। कल्प्यते समर्थ्यते यागप्रयोगोऽत्रेति व्युत्पत्तेः ॥ ननु आश्वलायनः किं मन्त्रकाण्डमनुसृत्य प्रवृत्तः किं वा ब्राह्मणमनुसृत्य । नाद्यः । ' दर्शपूर्णमासौ तु पूर्वं व्याख्यास्यामः ' ( आश्व. श्रौ. १. १: ) इत्येवं तेनोपक्रान्तत्वात् । न हि ' अग्निमीळे ' ( ऋ. सं.

---

१. ग-घ-च-छ-ण-त-न-फ-य–प्रतिषिद्धः। २. ट–° विद्यात्वम् । ३. ट-ठ–तत्रैवोक्तः । ४. ट–युक्तत्वेन चोच्चारणम् । ५. ट-ठ–स्वाहेन्द्रशत्रुं । ६. छ-ट-ठ–' तु ' नास्ति ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

१. १. १ ) इत्यादयो मन्त्रा दर्शपूर्णमासयोः क्वचिद्विनियुक्ताः। न द्वितीयः 'आग्नावैष्णवं पुरोडाशं निर्वपन्ति दीक्षणीयमेकादशकपालम्' ( ऐ. ब्रा. १. १ ) इत्येवं दीक्षणीयेष्टेः ब्राह्मणे प्रक्रान्तत्वात्। अत्रोच्यते–मन्त्रकाण्डो ब्रह्मयज्ञादिजपक्रमेण प्रवृत्तो न तु यागानुष्ठानक्रमेण। ब्रह्मयज्ञश्चैवं विहितः। 'यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः साम वा तद्ब्रह्मयज्ञः' ( तै. आ. २. १० ) इति। सोऽयं ब्रह्मयज्ञजपः 'अग्निमीळे' इत्याम्नायक्रमेणैवानुष्ठेयः। तथा 'सर्वा ऋचः सर्वाणि यजूंषि सर्वाणि सामानि वाचः स्तोमे पारिप्लवं शंसति' इति विधीयते। तथाश्विने शस्यमाने 'सूर्यो नोदियादपि सर्वा दाशतयीरनुब्रूयात्' इति विधीयते। तथा 'रिच्यत इव वा एष ग्रेव रिच्यते यो याजयति प्रति वा गृह्णाति याजयित्वा प्रतिगृह्य वानश्नन् त्रिः स्वाध्यायं वेदमधीयीत' ( तै. आ. २. १६ ) इति प्रायश्चित्तरूपं वेदपारायणं विहितम्। इत्यादिषु कृत्स्नमन्त्रकाण्डविनियोगेषु संप्रदायपारंपर्यागत एव क्रम आदरणीयः। विशेषविनियोगांस्तु मन्त्रविशेषाणां श्रुतिलिङ्गवाक्यादिप्रमाणान्युपजीव्य आश्वलायनो दर्शयति। अतो मन्त्रकाण्डक्रमाभावेऽपि न कश्चिद्विरोधः। 'इषे त्वा' इत्यादिमन्त्रास्तु क्रत्वनुष्ठानक्रमेणैवाम्नाता इत्यापस्तम्बादयस्तेनैव क्रमेण सूत्रनिर्माणे प्रवृत्ताः। आम्नातत्वादेव जपादिष्वपि स एव क्रमः। यद्यपि ब्राह्मणे दीक्षणीयेष्टिः उपक्रान्ता, तथापि तस्या इष्टेर्दर्शपूर्णमासविकृतित्वेन तदपेक्षत्वात् आश्वलायनस्य आदौ तद्व्याख्यानं युक्तम्। अतः कल्पसूत्रं मन्त्रविनियोगेन क्रत्वनुष्ठानमुपदिश्य उपकरोति। तर्हि 'प्र वो वाजा' ( ऋ. सं. ३. २७. १ ) इत्यादीनां सामिधेनीनामृचामेव विनियोगमाश्वलायनो ब्रवीतु। 'नमः प्रवक्त्रे' ( आश्व. श्रौ. १. २ ) इत्यादयस्त्वनाम्नाताः कुतो विनियुज्यन्ते इति चेत्, नायं दोषः। शाखान्तरसमाम्नातानां ब्राह्मणान्तरसिद्धस्य विनियोगस्य गुणोपसंहारन्यायेनात्र वक्तव्यत्वात्। 'सर्वशाखाप्रत्ययमेकं कर्म' इति न्यायविदः। तस्मात् शिक्षेव कल्पोऽप्यपेक्षितः॥

व्याकरणमपि प्रकृतिप्रत्ययाद्युपदेशेन पदस्वरूपतदर्थनिश्चयायोपयुज्यते। तथा च ऐन्द्रवायवग्रहब्राह्मणे समाम्नायते–'वाग्वै पराच्यव्याकृतावदत्ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्विति। सोऽब्रवीद्वरं वृणै मह्यं चैवैष वायवे च सह गृह्याता इति तस्मादैन्द्रवायवः सह गृह्यते। तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्। तस्मादियं व्याकृता वागुद्यते' ( तै. सं. ६. ४. ७. ३ ) इति। 'अग्निमीळे पुरोहितम्' ( ऋ. सं. १. १. १ ) इत्यादिवाक् पूर्वस्मिन् काले पराची समुद्रादिध्वनिवदेकात्मिका सती अव्याकृता प्रकृतिः प्रत्ययः पदं वाक्यमित्यादिविभागकारिग्रन्थरहिता[1] आसीत्। तदानीं देवैः प्रार्थितः इन्द्रः एकस्मिन्नेव पात्रे वायोः स्वस्य च सोमरसग्रहणरूपेण वरेण तुष्टः तामखण्डां वाचं मध्ये विच्छिद्य प्रकृतिप्रत्ययादिविभागं सर्वत्राकरोत्। तस्मात् इयं वाक् इदानीमपि पाणिन्यादिमहर्षिभिर्व्याकृता सर्वैः पठ्यते इत्यर्थः। तस्यैतस्य व्याकरणस्य प्रयोजनविशेषो वररुचिना वार्तिके दर्शितः–'रक्षोहागमलघ्वसंदेहाः प्रयोजनम्' इति। एतानि रक्षादिप्रयोजनानि प्रयोजनान्तराणि च महाभाष्ये पतञ्जलिना स्पष्टीकृतानि*। रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यक् वेदान् परिपालयिष्यति वेदार्थं चाध्यवस्यति। ऊहः खल्वपि न सर्वैर्लिङ्गैर्न सर्वाभिर्विभक्तिभिर्वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञगतेन यथायथं विपरिणमयितव्याः। तान् नावैयाकरणः शक्नोति विपरिणमयितुम्। तस्मादध्येयं व्याकरणम्। आगमः खल्वपि 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति। प्रधानं च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति। लघ्वर्थं चाध्येयं व्याकरणम्। बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम। बृहस्पतिश्च वक्ता। इन्द्रश्च अध्येता। दिव्यं वर्षसहस्रमध्ययनकालः। अन्तं च न जगाम। अद्य तु पुनर्यदि परमायुर्भवति स वर्षशतं जीवति। तत्र कुतः प्रतिपद-

---

१. ग-घ-च-छ-ण-फ-य–ग्रन्थसंघरहिता। * महाभाष्ये पस्पशाह्निके द्रष्टव्यम्। २. च-छ-थ-फ–यज्ञाङ्गत्वेन।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पाठेन सकलपदावगमः। कुतस्तरां प्रयोगेण। असंदेहार्थं चाध्येयं व्याकरणम्। याज्ञिकाः पठन्ति–'स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत' इति। तत्र न ज्ञायते किं स्थूलानि पृषन्ति यस्याः सा स्थूलपृषती किंवा स्थूला चासौ पृषती च स्थूलपृषतीति। तां नावैयाकरणः स्वरतोऽध्यवस्यति। यदि समासान्तोदात्तत्वं तदा कर्मधारयः। अथ पूर्वपदप्रकृतिस्वरत्वं, ततो बहुव्रीहिरिति। इमानि च भूयः शब्दानुशासनस्य प्रयोजनानि। तेऽसुराः। दुष्टः शब्दः। यदधीतम्। यस्तु प्रयुङ्क्ते। अविद्वांसः। विभक्तिं कुर्वन्ति। यो वा इमाम्। चत्वारि। उत त्वः। सक्तुमिव। सारस्वतीम्। दशम्यां पुत्रस्य। सुदेवो असि वरुण इति। तेऽसुराः। तेऽसुरा हेऽलयो हेऽलय इति कुर्वन्तः पराबभूवुः। तस्मात् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै। म्लेच्छो ह वा एष यदपशब्दः। म्लेच्छा मा भूमेत्यध्येयं व्याकरणम्॥ दुष्टः शब्दः। 'दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह। सवाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्' इति। दुष्टाञ्छब्दान् मा प्रयुक्ष्महीत्यध्येयं व्याकरणम्॥ यदधीतम्। यदधीतमविज्ञातं निगदेनैव शब्द्यते। अनग्नावि शुष्कैधो न तज्ज्वलति कर्हिचित्। अविज्ञातमनर्थकं माधिगीष्महीत्यध्येयं व्याकरणम्॥ यस्तु प्रयुङ्क्ते। 'यस्तु प्रयुङ्क्ते कुशलो विशेषे शब्दान्यथावद्व्यवहारकाले। सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैः'॥ कः। वाग्योगविदेव। यो हि शब्दान् जानाति अपशब्दानप्यसौ जानाति। यथैव शब्दज्ञाने धर्म एवमपशब्दज्ञानेऽप्यधर्मः प्राप्नोति। अथवा भूयानधर्मः प्राप्नोति। भूयांसो ह्यपशब्दा अल्पीयांसः शब्दाः। एकैकस्य हि शब्दस्य बहवोऽपभ्रंशाः। यथा गौरित्येतस्य शब्दस्य गावी गोणी गोपोतलिका इत्येवमादयः। अथ योऽवाग्योगविदज्ञानं तस्य शरणम्। विषम उपन्यासः। नात्यन्तायाज्ञानं शरणं भवितुमर्हति। यो ह्यजानन्वै ब्राह्मणं हन्यात् सुरां वा पिबेत् सोऽपि मन्ये पतितः स्यात्। एवं तर्हि कः। अवाग्योगविदेव। अथ यो वाग्योगवित् ज्ञानं तस्य शरणम्॥ अविद्वांसः। 'अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः। कामं तेषु तु विप्रोष्य स्त्रीष्विवायमहं वदेत्' इति। स्त्रीवन्मा भूमेत्यध्येयं व्याकरणम्॥ विभक्तिं कुर्वन्ति। याज्ञिकाः पठन्ति–'प्रयाजाः सविभक्तिकाः कर्तव्याः' इति। न चान्तरेण व्याकरणं प्रयाजाः सविभक्तिकाः शक्याः कर्तुम्। तस्मात् अध्येयं व्याकरणम्॥ यो वा इमाम्। यो वा इमां पदशः स्वरशोऽक्षरशो वर्णशो वाचं विदधाति स आर्त्विजीनो भवति। आर्त्विजीनाः स्यामेत्यध्येयं व्याकरणम्॥ चत्वारि। 'चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश' (ऋ. सं. ४. ५८. ३) इति। चत्वारि शृङ्गा चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। त्रयो अस्य पादाः। त्रयः कालाः भूतभविष्यद्वर्तमानाः। द्वे शीर्षे सुप्तिङश्च। सप्त हस्तासो अस्य सप्त विभक्तयः। त्रिधा बद्धः त्रिषु स्थानेषु बद्ध उरसि कण्ठे शिरसि च। वृषभो वर्षणात् कामानाम्। रोरवीति। रौतिः शब्दकर्मा। महो देवो मर्त्याँ आ विवेश। महता देवेन नस्तादात्म्यं यथा स्यादित्यध्येयं व्याकरणम्॥ अथवा चत्वारि। 'चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति' (ऋ. सं. १. १६४, ४५)। ये मनीषिणः मनस ईषिणो मनीषिणः। गुहायां त्रीणि निहितानि नेङ्गयन्ति। न चेष्टन्ते न निमिषन्ति। तुरीयं वाचो मनुष्या वदन्ति। 'तुरीयं ह वा एतद्वाचो यन्मनुष्येषु वर्तते'॥ उत त्वः। 'उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम्। उतो त्वस्मै तन्वं वि सस्रे जायेव पत्य उशती सुवासाः' (ऋ. सं. १०. ७१.४)॥ अपि खल्वेकः पश्यन्नपि न पश्यति। अपि खल्वेकः शृण्वन्नपि न शृणोत्येनाम्। अविद्वांसमाहार्धम्। त्वस्मै अन्यस्मै तन्वं विसस्रे तनुं विवृणुते। जायेव पत्य उशती सुवासाः। यथा जाया पत्ये कामयमाना सुवासाः स्वमात्मानं विवृणुते एवं वाक् वाग्विदे स्वमात्मानं विवृणुते। वाङ्मे विवृणुयात् इत्यध्येयं व्याकरणम्॥ सक्तुमिव। 'सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत। अत्रा सखायः

---

१. च-छ-फ–प्रयुङ्क्ते कुशलः। २. ग-घ-छ-ण–'अपि खलु' नास्ति; थ–'एकः' नास्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि' (ऋ. सं. १०. ७१. २) ॥ सक्तुः सचतेर्दुर्धावो भवति। कसतेर्वा स्याद्विपरीतस्य विकसितो भवति। ततउ परिपवनं भवति ततवद्वा तुन्नवद्वा। धीरा ध्यानवन्तो मनसा प्रज्ञानेन वाचमक्रत वाचमकृषत। अत्रा सखायः सख्यानि जानते। अत्र सखायः सख्यानि संजानते सायुज्यानि जानते। क एष दुर्गो मार्ग एकगम्यो वाग्विषयः। के पुनस्ते। वैयाकरणाः। कुत एतत्। भद्रैषां लक्ष्मीर्निहिताधि वाचि। एषां वाचि भद्रा लक्ष्मीर्निहिता भवति। लक्ष्मीर्लक्षणाद्वासनात् परिवृढा भवति॥ सारस्वतीम्। याज्ञिकाः पठन्ति–'आहिताग्निरपशब्दं प्रयुञ्जानः प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्वपेत्' इति। प्रायश्चित्तीया मा भूम इत्यध्येयं व्याकरणम्॥ दशम्यां पुत्रस्य। 'दशम्यां पुत्रस्य जातस्य नाम विदध्याद्घोषवदाद्यन्तरन्तस्थमभिनिष्ठानान्तं द्व्यक्षरं चतुरक्षरं वा कृतं नाम कुर्यान्न तद्धितम्' इति। न चान्तरेण व्याकरणं कृतस्तद्धिता वा शक्या विज्ञातुम्। तस्मादध्येयं व्याकरणम्॥ सुदेवो असि। 'सुदेवो असि वरुण यस्य ते सप्त सिन्धवः। अनुक्षरन्ति काकुदं सूर्यं सुषिरामिव' (ऋ. सं. ८. ६९. १२)॥ सप्त सिन्धवः सप्त विभक्तयः। काकुज्जिह्वा। सास्मिन् विद्यते इति काकुदं तालु। सूर्मिः स्थूला लोहप्रतिमेति॥ एवं 'सिद्धे शब्दार्थसंबन्धे' इत्यादिवार्तिकोक्तान्यत्रापि प्रयोजनान्यनुसंधेयानि॥

अथ निरुक्तप्रयोजनमुच्यते। अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्। 'गौः ग्मा ज्मा क्ष्मा क्षा क्षमा' इत्यारभ्य 'वसवः वाजिनः देवपत्न्यो देवपत्न्यः' इत्यन्तो यः पदानां समाम्नायः समाम्नातस्तस्मिन् ग्रन्थे पदार्थावबोधाय परापेक्षा न विद्यते। एतावन्ति पृथिवीनामानि एतावन्ति हिरण्यनामानि इत्येवं तत्र तत्र विस्पष्टमभिहितत्वात्। तदेतन्निरुक्तं त्रिकाण्डम्। तच्चानुक्रमणिकाभाष्ये दर्शितम्—

आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा।
तृतीयं दैवतं चेति समाम्नायस्त्रिधा स्थितः॥
गौराद्यपारपर्यन्तमाद्यं नैघण्टुकं मतम्।
जहाद्युल्बमृबीसान्तं नैगमं संप्रचक्षते॥
अग्न्यादिदेवपत्न्यन्तं देवताकाण्डमुच्यते।
अग्न्यादिदेवीऊर्जाहुत्यन्तः क्षितिगतो गणः॥
वाय्वादयो भगान्ताः स्युरन्तरिक्षस्थदेवताः।
सूर्यादिदेवपत्न्यन्ता द्युस्थाना देवता इति॥
गवादिदेवपत्न्यन्तं समाम्नायमधीयते॥ इति॥

एकार्थवाचिनां[2] पर्यायशब्दानां संघो यत्र प्रायेणोपदिश्यते तत्र निघण्टुशब्दः प्रसिद्धः। तादृशेषु अमरसिंहवैजयन्तीहलायुधादिषु दश[3] निघण्टव इति व्यवहारात्। एवमत्रापि पर्यायशब्दसंघोपदेशादाद्यकाण्डस्य नैघण्टुकत्वम्। तस्मिन् काण्डे त्रयोऽध्यायाः। तेषु प्रथमे पृथिव्यादिलोकदिक्कालादिद्रव्यविषयाणि नामानि। द्वितीये मनुष्यतदवयवादिद्रव्यविषयाणि। तृतीये तदुभयद्रव्यगततनुबहुत्वह्रस्वत्वादिधर्मविषयाणि॥ निगमशब्दो वेदवाची। यास्केन तत्र तत्र 'अपि निगमो भवति' इत्येवं वेदवाक्यानामवतारितत्वात्, तस्मिन्निगमे एव प्रायेण वर्तमानानां शब्दानां चतुर्थाध्यायरूपे द्वितीयस्मिन् काण्डे उपदिष्टत्वात्तस्य काण्डस्य नैगमत्वम्॥ पञ्चमाध्यायरूपस्य तृतीयकाण्डस्य दैवतत्वं विस्पष्टम्। पञ्चाध्यायरूपकाण्डत्रयात्मके एतस्मिन् ग्रन्थे परनिरपेक्षतया[4] पदार्थस्योक्तत्वात् तस्य ग्रन्थस्य निरुक्तत्वम्। तद्व्याख्यानं च 'समाम्नायः समाम्नातः' इत्यारभ्य 'तस्यास्तस्यास्ताद्भाव्यमनुभवत्यनुभवति' इत्यन्तैः

---

१. च-फ–°स्त्रिधा मतः; छ-ण-य–त्रिधान्वितः। २. च-छ-फ–एकार्थवादिनाम्। ३. त-थ–'दश' नास्ति। ४. ग-घ-च-छ-प-फ-य–दैवत्वम्। ५. ट–निरपे°।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

द्वादशभिरध्यायैर्यास्को निर्ममे । तदपि निरुक्तमित्युच्यते । एकैकस्य पदस्य संभाविता अवयवार्थास्तत्र निःशेषेणोच्यन्ते इति व्युत्पत्तेः तत्र हि ' चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च ' इति प्रतिज्ञाय ' उच्चावचेष्वर्थेषु निपतन्ति ' इति निपातस्वरूपं निरुच्य एवमुदाहृतं–' नेति प्रतिषेधार्थीयो भाषायामुभयमन्वध्यायं नेन्द्रं देवममंसतेति प्रतिषेधार्थीयः ' इति; ' दुर्मदासो न सुरायामित्युपमार्थीयः ' (निरु. १. १; ४) इति च। तच्च लोके केवलप्रतिषेधार्थीयस्यापि नकारस्य वेदे प्रतिषेधोपमालक्षणोभयार्थोदाहरणमस्मिन् ग्रन्थेऽवगम्यते । एवं ग्रन्थकारेणोक्ताः तत्तत्पदनिर्वचनविशेषाः तत्तन्मन्त्रव्याख्यानावसरे एवास्माभिरुदाहरिष्यन्ते । न च निर्वचनानां निर्मूलत्वं शङ्कनीयम् । एतद्व्युत्पत्त्यर्थमेव ब्राह्मणेषु पदनिर्वचनानां केषांचिदुक्तत्वात् । ' तदाहुतीनामाहुतित्वम् ' इति । ' तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते ' ( ऐ. आ. २. ४. ३ ) इति । ' यदप्रथयत्तत्पृथिव्यै पृथिवित्वम् ' ( तै. ब्रा. १. १. ३. ६-७ ) इति च। ग्रन्थकारोऽपि तत्र तत्र स्वोक्तनिर्वचनमूलभूतब्राह्मणान्युदाहरिष्यति । केषांचिन्निर्वचनानां व्याकरणबलेन सिद्धावपि न सर्वेषां सिद्धिरस्ति । अत एव ग्रन्थकार आह–' तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकं च ' ( निरु. १. १५ ) इति । तस्मात् वेदार्थावबोधायोपयुक्तं निरुक्तम् ॥

तथा छन्दोग्रन्थोऽप्युपयुज्यते । छन्दोविशेषाणां तत्र तत्र विहितत्वात् । तस्मात् सप्त चतुरुत्तराणि छन्दांसि प्रातरनुवाकेऽनूच्यन्ते ' इति ह्याम्नातम् । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीत्येतानि सप्त छन्दांसि । चतुर्विंशत्यक्षरा गायत्री । ततोऽपि चतुर्भिरक्षरैरधिकाष्टाविंशत्यक्षरोष्णिक् । एवमुत्तरोत्तराधिका अनुष्टुबादयोऽवगन्तव्याः । तथान्यत्रापि श्रूयते–'गायत्रीभिर्ब्राह्मणस्यादध्यात् । त्रिष्टुब्भी राजन्यस्य जगतीभिर्वैश्यस्य ' ( तै. ब्रा. १. १. ९. ६-७ ) इति । तत्र गणयगणादिसाध्यो गायत्र्यादिविवेकश्छन्दोग्रन्थमन्तरेण न सुविज्ञेयः । किंच ' यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यति प्र वा मीयते पापीयान् भवति । तस्मादेतानि मन्त्रे मन्त्रे विद्यात् ' ( आर्ष. ब्रा. १. १ ) इति श्रूयते । तस्मात् तद्वेदनाय छन्दोग्रन्थ उपयुज्यते ॥

ज्योतिषस्य प्रयोजनं तस्मिन्नेव ग्रन्थेऽभिहितं–' यज्ञकालार्थसिद्धये ' ( वेदाङ्गज्यो. ३ ) इति । कालविशेषविधयश्च श्रूयन्ते । ' संवत्सरमेतव्रतं चरेत् ' ( तै. आ. १. ३२. १ ), ' संवत्सरमुख्यं भूत्वा ' ( तै. सं. ५. ६. ५. १ ) इत्येवमादयः संवत्सरविधयः । ' वसन्ते ब्राह्मणोऽग्निमादधीत । ग्रीष्मे राजन्य आदधीत । शरदि वैश्य आदधीत ' ( तै. ब्रा. १. १. २. ६-७ ) इत्याद्या ऋतुविधयः । ' मासि मासि पृष्ठान्युपयन्ति । मासि मास्यतिग्राह्या गृह्यन्ते ' इत्याद्या मासविधयः । ' यं कामयेत वसीयान्स्यादिति तं पूर्वपक्षे याजयेत् ' इत्याद्याः पक्षविधयः । ' एकाष्टकायां दीक्षेरन् ', ' फल्गुनीपूर्णमासे दीक्षेरन् ' (तै. सं. ७. ४. ८. १ ) इत्याद्यास्तिथिविधयः । ' प्रातर्जुहोति सायं जुहोति ' इत्याद्याः प्रातःकालादिविधयः । ' कृत्तिकास्वग्निमादधीत ' ( तै. ब्रा. १. १. २. १ ) इत्याद्या नक्षत्रविधयः । अतः कालविशेषानवगमयितुं ज्योतिषमुपयुज्यते ॥

एतेषां च वेदार्थोपकारिणां षण्णां ग्रन्थानां वेदाङ्गत्वं शिक्षायामेवमुदीरितम्—

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ( पा. शि. ४१–४२ ) इति ॥

षडङ्गवत् पुराणादीनामपि वेदार्थज्ञानोपयोगो[1] याज्ञवल्क्येन स्मर्यते–' पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः । वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ' ( याज्ञ. १. ३ ) इति ॥

---

१, ट–°योगं दृष्ट्वा विद्यास्थानत्वं याज्ञ° ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरेदिति ॥

इत्यन्यत्रापि स्मर्यते । ऐतरेयतैत्तिरीयकाठकादिशाखासूक्तानि हरिश्चन्द्रनाचिकेताद्युपाख्यानानि धर्मब्रह्मावबोधोपयुक्तानि तेषु तेष्वितिहासग्रन्थेषु स्पष्टीकृतानि । उपनिषदुक्ताः सृष्टिस्थितिलयादयो ब्राह्मपाद्मवैष्णवादिपुराणेषु स्पष्टीकृताः ।

सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ॥

इति सृष्ट्यादेः पुराणप्रतिपाद्यत्वावगमात्[1] । न्यायशास्त्रे प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तादीनां षोडशपदार्थानां निरूपणात् तदनुसारेणेदं वाक्यमस्मिन्नर्थे प्रमाणं भवति, नेतरदिति निर्णयः कर्तुं शक्यते । पूर्वोत्तरमीमांसयोर्वेदार्थोपयोगोऽतिस्पष्ट[3] एव । मन्वत्रिविष्णुहारीतादिप्रोक्तासु स्मृतिषु वेदोक्तसंध्यावन्दनादिविधयः प्रपञ्चिताः । ' तदु ह वा एते ब्रह्मवादिनः पूर्वाभिमुखाः संध्यायां गायत्र्याभिमन्त्रिता आप ऊर्ध्वं विक्षिपन्ति (तै. आ. २. २ ) इत्यादिकः संध्यावन्दनविधिः । ' पञ्च वा एते महायज्ञाः सतति प्रतायन्ते ' ( तै. आ. २. १० ) इत्यादिको महायज्ञविधिः । एवं विध्यन्तराणि द्रष्टव्यानि । उक्तप्रकारेण पुराणादीनां वेदार्थज्ञानोपयोगात् विद्यास्थानत्वं युक्तम् । एतैः पुराणादिभिः चतुर्दशभिर्विद्यास्थानैरुपबृंहिताया विद्याया ग्रहणेऽधिकारिविशेषः शाखान्तरगतैश्चतुर्भिर्मन्त्रैरुपदर्शितः । तांश्च मन्त्रान् यास्क उदाजहार ( निरु. २. ४ ) ॥ तत्रायं प्रथमो मन्त्रः—

विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि ।
असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम् ॥ इति ॥

विद्याभिमानिनी देवता ब्राह्मणमुपदेष्टारमाचार्यमाजगाम । आगत्य चैवं[4] प्रार्थयामास । हे ब्राह्मण मामनधिकारिणेऽनुपदिश्य पालय । तवाहं निधिवत् पुरुषार्थहेतुरस्मि । तादृश्यां मयि तदुपदेष्टरि त्वयि च योऽसूयां करोति । यश्चार्जवेन विद्यां नाभ्यस्यति । योऽपि स्नानाचमनाद्याचारनियतो न भवति । तादृशेभ्यः शिष्याभासेभ्यो मां न ब्रूयाः । तथा सति त्वद्धृदये स्थित्वा फलप्रदा भवेयम् ॥ अथ द्वितीयो मन्त्रः—

य आतृणत्त्यवितथेन कर्णावदुःखं कुर्वन्नमृतं संप्रयच्छन् ।
तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत्कतमच्चनाह ॥ इति ॥

पूर्वस्मिन् मन्त्रे आचार्यस्य नियममभिधाय अस्मिन् मन्त्रे शिष्यस्य नियमोऽभिधीयते । वितथमनृतमपुरुषार्थभूतं लौकिकं वाक्यम् । तद्विपरीतं सत्यं वेदवाक्यमवितथम् । तादृशेन वाक्येन य आचार्यः शिष्यस्य कर्णौ आतृणत्ति सर्वतस्तर्दनं पूरणं करोति । उपसर्गवशादौचित्याच्च तृणत्तिधातोरर्थान्तरे वृत्तिः । सर्वदा वेदं यः श्रावयति इत्यर्थः । किं कुर्वन् । अदुःखं कुर्वन् । मन्दप्रज्ञस्य माणवकस्य आदौ[5] अर्धर्चमृचं वा ग्रहीतुमशक्तस्य यथा दुःखं न भवति, तथा पादं पादैकदेशं वा ग्राहयन् । किंच अमृतं संप्रयच्छन् । अमृतत्वस्य[6] देवजन्मनो मोक्षस्य वा प्रापकत्वादमृतं वेदार्थः । तस्य प्रदानं कुर्वन् । तं तादृशमाचार्यं सच्छिष्यो मुख्यमातापितृरूपं मन्येत । पूर्वसिद्धौ तु मातापितरौ अधमस्य मनुष्यस्य[7] शरीरस्य प्रदानादमुख्यौ । तस्मै मुख्यमातापितृरूपायाचार्यायैकमपि द्रोहं न कुर्यात् ॥ अथ तृतीयो मन्त्रः—

---

१. ग-घ-छ-ण-य-°त्वावगमनात् । २. ट-वेदवाक्य° । ३. ट-°गो विस्पष्ट एव । ४. च-छ-थ-फ-एवम् । ५. ट-आदावेव । ६. छ-अमृतस्य । ७. ट-ठ-त-थ-मनुष्यशरी° ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा ।
यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत् ॥ इति ॥

ये तु अधमा विप्रा गुरुणाध्यापिताः सन्तो विनयोक्त्या तदीयहितचिन्तनेन शुश्रूषया वा गुरुं नाद्रियन्ते । आदररहितास्ते शिष्याभासा गुरोर्न भोजनीयाः, अनुभवयोग्या न भवन्ति । न हि तेषु गुरुः कृपां करोति । यथैव गुरुणा ते न पालनीयास्तथैव तान् अधमान् शिष्यान् तच्छ्रुतं गुरूपदिष्टं वेदवाक्यं न पालयति, फलप्रदं न भवतीत्यर्थः ॥ अथ चतुर्थो मन्त्रः—

यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम् ।
यस्ते न द्रुह्येत्कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन् ॥ इति ॥

हे आचार्य यमेव मुख्यशिष्यं शुचित्वादिगुणोपेतं जानीयाः । किंच यो मुख्यशिष्यस्तुभ्यं कदाचिदपि न द्रुह्येत् । तस्मै तु मुख्यशिष्याय स्वदीयनिधिपालकाय ब्रह्मन् वेदरूपां मां विद्यां ब्रूयाः । इत्थं विद्यादेवतया प्रार्थितत्वादाचार्येण मुख्यशिष्याय वेदविद्योपदेष्टव्या ॥

तदर्थमृग्वेदोऽस्माभिः षडङ्गानुसारेण व्याख्यायते । मन्त्रब्राह्मणात्मके वेदे ब्राह्मणस्य मन्त्रव्याख्यानोपयोगित्वादादौ ब्राह्मणमारण्यकाण्डसहितं व्याख्यातम् । अथ तत्र तत्र ब्राह्मणोदाहरणेन मन्त्रात्मकः संहिताग्रन्थो व्याख्यातव्यः ॥

स च 'अग्निमीळे' इत्यारभ्य 'यथा वः सुसहासति' इत्यन्तोऽष्टकाण्डैर्दशमण्डलैश्चतुःषष्टयध्यायैः पञ्चाशीत्यनुवाकैः ईषदधिकसहस्रसूक्तैः ईषदधिकद्विसहस्रवर्गैः ईषदधिकाभिर्दशसहस्रसंख्याभिर्ऋग्भिश्चोपेतः । तस्य च ग्रन्थस्य कृत्स्नस्याप्याम्नातक्रमेणैव सामान्यविनियोगो ब्रह्मयज्ञजपादौ पूर्वमेवाभिहितः । विशेषविनियोगस्तु तत्तत्कर्तौ सूत्रकारेण प्रदर्शितः । स च त्रिविधः सूक्तविनियोगस्तृचादिविनियोग एकैकस्या ऋचो विनियोगश्चेति ॥

तत्र 'अग्निमीळे' इति सूक्तं प्रातरनुवाके आग्नेये क्रतौ विनियुक्तम् । स विनियोग आश्वलायनेन चतुर्थाध्यायस्य त्रयोदशे खण्डे सूत्रितः—'अवा नो अग्न इति षळग्निमीळेऽग्निं दूतम्' इति । तत्र हीनपादग्रहणात् सूक्तनिश्चयः । 'सूक्तं सूक्तादौ हीने पादे' (आश्व. श्रौ. १. १) इति परिभाषितत्वात्। तस्मिन्सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोगः । स च द्वितीयाध्यायस्य प्रथमखण्डे सूत्रितः—'साह्वान्विश्वा अभियुजोऽग्निमीळे पुरोहितमिति संयाज्ये' इति । तत्र कृत्स्नपादग्रहणात् ऋगित्यवगम्यते । 'ऋचं पादग्रहणे' (आश्व. श्रौ १. १) इति परिभाषितत्वात् । तथा 'संयाज्ये इत्युक्ते सौविष्टकृती प्रतीयात्' (आश्व. श्रौ. २.१) इति परिभाषितत्वात् स्विष्टकृत्संबन्धनिश्चयः। तत्रापि द्वितीयमन्त्रत्वेनोदाहृतत्वात् याज्यात्वम् । यद्यपि साह्वानित्यनया पुरोनुवाक्ययैव देवताया अनुस्मरणरूपसंस्कारः सिद्धस्तथापि याज्यानुवाक्ययोः समुच्चयो द्वादशेऽध्याये चतुर्थपादे मीमांसितः—

पुरोनुवाक्यया याज्या विकल्प्या वा समुच्चिता ।
विकल्प्यान्यतरेणैव देवतायाः प्रकाशनात् ॥

पुरोनुवाक्यासमाख्यानाद्वचनाच्च समुच्चयः । देवताप्रकाशनकार्यस्यैकत्वात् । युग्मयोर्यथा विकल्पस्तथैवैकयुग्मगतयोरिति चेत्, मैवम् । पुरोनुवाक्येति समाख्याया उत्तरकालीनयाज्यामन्तरेणानुपपत्तेः । किंच 'पुरोनुवाक्यामनूच्य याज्यया जुहोति' इति प्रत्यक्षवचनेन देवतोपलक्षणहविष्प्रदानकार्ये भेदोक्तिपुरःसरं साहित्यं विधीयते । तस्मात् समुच्चय इति ॥

---

१. च—यजति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

एतच्चाग्निमित्यादिसूक्तं नवर्चम् 'अग्निं नव मधुच्छन्दा वैश्वामित्रः' इत्यनुक्रमणिकायामुक्तत्वात्। विश्वामित्रपुत्रो मधुच्छन्दोनामकस्तस्य सूक्तस्य द्रष्टृत्वात् तदीय ऋषिः। 'ऋष गतौ' इति धातुः। 'सर्वधातुभ्य इन्' (उ. सू. ४. ५५७) 'इगुपधात्किः' (उ. सू. ४. ५५९)। वेदप्राप्त्यर्थं तपोऽनुतिष्ठतः पुरुषान् स्वयंभूर्वेदपुरुषः प्राप्नोत्। तथा च श्रूयते–'अजान्ह वै पृश्नींस्तपस्यमानान्ब्रह्म स्वयंभ्वभ्यानर्षत्तद्दृषयोऽभवन्' (तै. आ. २. ९) इति। तथातीन्द्रियस्य वेदस्य परमेश्वरानुग्रहेण प्रथमतो दर्शनात् ऋषित्वमित्यभिप्रेत्य स्मर्यते—

युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा॥

इति॥ ऋष्यादिज्ञानाभावे प्रत्यवायः स्मर्यते—

अविदित्वा ऋषिं छन्दो दैवतं योगमेव च।
योऽध्यापयेज्जपेद्वापि पापीयाञ्जायते तु सः॥
ऋषिच्छन्दोदैवतानि ब्राह्मणार्थं स्वराद्यपि।
अविदित्वा प्रयुञ्जानो मन्त्रकण्टक उच्यते॥

इति॥ वेदनविधिश्च स्मर्यते—

स्वरो वर्णोऽक्षरं मात्रा विनियोगोऽर्थ एव च।
मन्त्रं जिज्ञासमानेन वेदितव्यं पदे पदे॥

इति॥ अग्निमित्यादिसूक्तस्य छन्दोऽनुक्रमणिकायां यद्यप्यत्र नोक्तं तथापि 'परिभाषाग्रामेऽनुक्तम्। 'आदौ गायत्रं प्राग्धिरण्यस्तूपात्' (अनु. १२. १४) इति। हिरण्यस्तूपं ऋषिर्येषां सन्त्राणां वक्ष्यते ततः प्राचीनेषु मन्त्रेषु सामान्येन गायत्रं छन्द इत्यर्थः। पुरुषस्य पापसंबन्धं वारयितुमाच्छादकत्वाच्छन्द इत्युच्यते। तच्चास्यकाण्डे समाम्नायते–'छादयन्ति ह वा एनं छन्दांसि पापात्कर्मणः' (ऐ. आ. २.५) इति। अथवा चीयमानाग्निसंतापस्याच्छादकत्वाच्छन्दः। तच्च तैत्तिरीया आमनन्ति–'प्रजापतिरग्निमचिनुत स क्षुरपविर्भूत्वाऽतिष्ठत्तं देवा बिभ्यतो नोपायन्ते छन्दोभिरात्मानं छादयित्वोपायन्तच्छन्दसां छन्दस्त्वम्' (तै. सं. ५. ६. ६. १) इति। यद्वा अपमृत्युं वारयितुमाच्छादयतीति छन्दः। तदपि छान्दोग्योपनिषद्याम्नातं–'देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशंस्ते छन्दोभिरात्मानमच्छादयन्यदेभिरच्छादयंस्तच्छन्दसां छन्दस्त्वम्' (छां. उ. १. ४. २) इति। तथा द्योतनार्थदीव्यतिधातुनिमित्तो देवशब्द इँत्येतदाम्नायते–'दिवा वै नोऽभूदिति तद्देवानां देवत्वम्' इति। अतो दीव्यतीति देवः। मन्त्रेण द्योतते इत्यर्थः। अस्मिन् सूक्ते स्तूयमानत्वादग्निर्देवः। तथा चानुक्रमणिकायामुक्तं–'मण्डलादिष्वाग्नेयमैन्द्रात्' (अनु. १२. १२) इति। तस्य सूक्तस्य प्रथममृचं भगवान् वेदपुरुष आह—

---

१. ग-घ-च-छ-ण-त-थ-फ-य–'सर्वधातुभ्य इन्', 'इगुपधात्कित्' इत्येतन्नास्ति। २. च-छ-ण-थ-फ-य–°मनुज्ञातान्। ३. ग-घ-च-छ-ण-फ-य–स्वरवर्णाक्षरम् ४. ग-च-छ-ण-फ–वा। ५. च-छ-ण-थ-फ–प्राग्धैरण्यस्तूपात्। ६. ग–च–फ–हिरण्यस्तूपाख्यः; थ–हिरण्यस्तूपानाम। ७. च-छ-थ-फ–'इति' नास्ति। ८. त–अग्न नव मधुच्छन्दा वैश्वामित्र इत्यस्मिन्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥ १ ॥

ॐ अग्निम् । ईळे । पुरःऽहितम् । यज्ञस्य । देवम् । ऋत्विजम् । होतारम् । रत्नऽधातमम् ॥१॥

अग्निनामकं देवम् [V]ईळे स्तौमि । 'ईड स्तुतौ' इति धातुः । डकारस्य ळकारो बह्वृचाध्येतृसंप्रदायप्राप्तः । तथा च पठ्यते–'अज्मध्यस्थडकारस्य ळकारं बह्वृचा जगुः । अज्मध्यस्थढकारस्य ळहकारं वै यथाक्रमम्' इति ॥ मन्त्रस्य होत्रा प्रयोज्यत्वादहं होता स्तौमीति लभ्यते । कीदृशमग्निम् । [V]यज्ञस्य [V]पुरोहितम् । यथा राज्ञः पुरोहितस्तदभीष्टं संपादयति, तथाग्निरपि यज्ञस्यापेक्षितं होमं संपादयति । यद्वा । यज्ञस्य संबन्धिनि पूर्वभागे आवहनीयरूपेणावस्थितम्* । पुनः कीदृशम् । [V]देवं दानादिगुणयुक्तम् । पुनः कीदृशम् । [V]होतारम् [V]ऋत्विजम् । देवानां यज्ञेषु होतृनामक ऋत्विगग्निरेव । तथा च श्रूयते–'+ अग्निर्वै देवानां होता' (ऐ. ब्रा. ३. १४) इति । पुनरपि कीदृशम् । [V]रत्नधातमं यागफलरूपाणां रत्नानामतिशयेन धारयितारं पोषयितारं वा । अत्राग्निशब्दस्य यास्को बहुधा निर्वचनं दर्शयति–'अथातोऽनुक्रमिष्यामोऽग्निः पृथिवीस्थानस्तं प्रथमं व्याख्यास्यामोऽग्निः कस्मादग्रणीर्भवत्यग्रं यज्ञेषु प्रणीयतेऽङ्गं नयति संनममानोऽक्नोपनो भवतीति स्थौलाष्ठीविर्न क्नोपयति न स्नेहयति त्रिभ्य आख्यातेभ्यो जायत इति शाकपूणिरितादक्ताद्दग्धाद्वा नीतात्स खल्वेतेरकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परस्तस्यैषा भवत्यग्निमीळे' (निरु. ७. १४) इति । अस्यायमर्थः । सामान्येन सर्वदेवतानां लक्षणस्याभिहितत्वादनन्तरं यतः प्रतिपदं विशेषेण वक्तव्यत्वमाकाङ्क्षितम् अतोऽनुक्रमेण वक्ष्यामः । तत्र पृथिवीलोके स्थितोऽग्निः प्रथमं व्याख्यास्यते । कस्मात् प्रवृत्तिनिमित्तादग्निशब्देन देवताभिधीयत इति प्रश्नस्य 'अग्रणीः' इत्यादिकमुत्तरम् । देवसेनामग्रे स्वयं नयतीत्यग्रणीः । एतदेकमग्निशब्दस्य प्रवृत्तिनिमित्तम् । तथा च ब्राह्मणान्तरम्–'अग्निर्देवानां सेनानीः' इति । एतदेवाभिप्रेत्य बह्वृचा मन्त्रब्राह्मणे आमनन्ति–'अग्निर्मुखं प्रथमो देवतानाम्' (ऐ. ब्रा. १. ४) इति मन्त्रः । 'अग्निर्वै देवानामवमः' (ऐ. ब्रा. १. १) इति ब्राह्मणम् । तथा तैत्तिरीयाश्चामनन्ति–'अग्निरग्रे प्रथमो देवतानाम्' (तै. ब्रा. २. ४. ३. ३) इति । 'अग्निरवमो देवतानाम्' इति च । वाजसनेयिनस्त्वेवमामनन्ति–'स वा एषोऽग्रे देवतानामजायत तस्मादग्निर्नाम' इति । यज्ञेषु अग्निहोत्रेष्टिपशुसोमरूपेषु अग्रं पूर्वदिग्वर्त्याहवनीयदेशं प्रति गार्हपत्यात् प्रणीयते इति द्वितीयं प्रवृत्तिनिमित्तम् । संनममानः सम्यक् स्वयमेव प्रह्वीभवन् अङ्गं स्वकीयं शरीरं नयति काष्ठदाहे हविष्पाके च प्रेरयतीति तृतीयं प्रवृत्तिनिमित्तम् । स्थूलाष्ठीवनामकस्य महर्षेः पुत्रो निरुक्तकारः कश्चित् 'अक्नोपनः' इति अग्निशब्दं निर्वक्ति । तत्र न क्नोपयतीत्युक्ते न स्नेहयति, किंतु काष्ठादिकं रूक्षयतीत्युक्तं भवति । शाकपूणिनामको निरुक्तकारो धातुत्रयादग्निशब्दनिष्पत्तिं मन्यते । इतः 'इण् गतौ' इति धातुः । अक्तः 'अञ्जूव्यक्तिम्रक्षणकान्तिगतिषु' इति धातुः । दग्धः 'दह भस्मीकरणे' इति धातुः । नीतः 'णीञ् प्रापणे' इति धातुः । अग्निशब्दो हि अकारगकारनिशब्दानपेक्षमाणः एतिधातोरुत्पन्नात् अयनशब्दात् अकारमादत्ते । अनक्तिधातुगतस्य ककारस्य गकारादेशं कृत्वा तमादत्ते । यद्वा । दहतिधातुजन्यात् दग्धशब्दात् गकारमादत्ते । नीः इति नयति धातुः । स च ह्रस्वो भूत्वा परो भवति । ततो

---

* ठ–'अथवा यज्ञस्य देवमिति संबन्धः । यज्ञस्य प्रकाशकमित्यर्थः । पुरोहितमिति पृथग्विशेषणम्' इत्यधिकं 'अवस्थितम्' इत्यस्यानन्तरम् । + ठ–'अग्निर्वै देवानां ..... धारयितारं पोषयितारं वा' इत्यस्य स्थाने–'अग्निर्वै देवानां होतासीत् इति । अथवा ऋत्विजं ऋत्विग्वत् यज्ञनिर्वाहकम् । होतारं देवानामाह्वातारम् । तथा रत्नधातमं यागफलरूपाणां रत्नानां रमणीयानां धनानां वा अतिशयेन दातारं धारयितारं वा' इत्यधिकम् । १. ग-घ-ट-ठ-य–ततोऽनुक्रमेण । २. ट-ठ–पृथ्वीलोकावस्थितोऽग्निः ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

धातुत्रयं मिलित्वा अग्निशब्दो भवति । यज्ञभूमिं गत्वा स्वकीयमङ्गं नयति काष्ठदाहे हविष्पाके च प्रेरयतीति समुदायार्थः । तस्य अग्निशब्दार्थस्य देवताविशेषस्य प्राधान्येन स्तुतिप्रदर्शनायैषा 'अग्निमीळे' इति ऋक् भवतीति । तामेतां ऋचं यास्क एवं व्याख्यातवान्—'अग्निमीळेऽग्निं याचामीळिरध्येषणाकर्मा पूजाकर्मा वा पुरोहितो व्याख्यातो यज्ञस्य देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देवः सा देवता होतारं ह्वातारं जुहोतेर्होतेत्यौर्णवाभो रत्नधातमं रमणीयानां धनानां दातृतमम्' (निरु. ७. १५) इति । अस्यायमर्थः—ईडतिधातोः स्तुत्यर्थत्वं प्रसिद्धम् । धातूनामनेकार्थत्वमिति न्यायमाश्रित्य याच्ञाध्येषणापूजाः अप्यत्रोचितत्वात् तदर्थतया व्याख्याताः । पुरोहितशब्दो द्वितीयेऽध्याये 'यद्देवापिः शंतनवे पुरोहितः' इत्येतां ऋचमुदाहृत्य 'पुर एनं दधति' (निरु. २. १२) इति व्याख्यातः । तैत्तिरीयाश्च पौरोहित्ये स्पर्धमानस्य पश्चनुष्ठानं विधाय तत्फलत्वेन 'पुर एनं दधते' (तै. सं. २. १. २. ९) इत्यामनन्ति । देवशब्दो दानदीपनद्योतनानामन्यतममर्थमाचष्टे । यज्ञस्य दाता दीपयिता द्योतयितायमग्निरित्युक्तं भवति । दीपनद्योतनयोरेकार्थत्वेऽप्यस्ति धातुभेदः । यद्यप्यग्निः पृथिवीस्थानस्तथापि देवान् प्रति हविर्वहनात् द्युस्थानो भवति । देवशब्ददेवताशब्दयोः पर्यायत्वान्मन्त्रप्रतिपाद्या काचिदग्निव्यतिरिक्ता देवता नान्वेषणीया । होतृशब्दस्य ह्वयतिधातोरुत्पन्नत्वेन देवानामाह्वातारमिति । और्णवाभनामकस्तु मुनिः जुहोतिधातोरुत्पन्नो होतृशब्द इति मन्यते । अग्नेश्च होतृत्वं होमाधिकरणत्वेन द्रष्टव्यम् । रत्नशब्दो द्वितीयाध्याये 'मघम्' इत्यादिष्वष्टाविंशतौ धननामसु (नि.२. १०.७.) पठितः । रमणीयत्वात् रत्नत्वम् । दधातिधात्वन्तरत्र दानार्थवाचीति । तदिदं निरुक्तकारस्य यास्कस्य मन्त्रव्याख्यानम् ॥ अथ व्याकरणप्रक्रियोच्यते । अगिधातोर्गत्यर्थात् 'अङ्गेर्नलोपश्च' (उ. सू. ४. ४९०) इति औणादिकसूत्रेण[2] निप्रत्ययः । इदित्त्वान्नुमागेन प्राप्तस्य नकारस्य (पा. सू. ७. १. ५८) लोपश्च भवति । अङ्गति स्वर्गं गच्छति हविर्नेतुमित्यग्निः । तत्र 'धातोः' (पा. सू. ६. १. १६२) इति अकार उदात्तः । 'आद्युदात्तश्च' (पा. सू. ३. १. ३) इति प्रत्ययगत इकारोऽप्युदात्तः । 'अनुदात्तं पदमेकवर्जम्' (पा. सू. ६. १. १५८) इति द्वयोरन्यतरमुदात्तमवशेष्येतरस्यानुदात्तत्वं प्राप्तम्[3] । तत्र धातुस्वरे प्रथमतोऽवस्थिते सति पश्चादुपदिश्यमानः प्रत्ययस्वरोऽवशिष्यते । 'सति शिष्टस्वरो बलीयान्' (पा. सू. ६. १. १५८. ९) इति हि न्यायः । ततोऽन्तोदात्तमग्निप्रातिपदिकम् । 'अनुदात्तौ सुप्पितौ' (पा. सू. ३. १. ४) इति अम् इत्येतत् द्वितीयैकवचनमनुदात्तम् । तस्य 'अमि पूर्वः' (पा. सू. ६. १. १०७) इति यत् पूर्वरूपं तदुदात्तम् 'एकादेश उदात्तेनोदात्तः' (पा. सू. ८. २. ५) इति सूत्रितत्वात् । अग्निशब्दो धातुजन्मेति[4] मते सेयं प्रक्रिया सर्वापि द्रष्टव्या । मतद्वयं यास्केन प्रदर्शितं—'नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च न सर्वाणीति गार्ग्यो वैयाकरणानां चैके' (निरु. १. १२) इति । गार्ग्यस्य मतेऽग्निशब्दस्याखण्डप्रातिपदिकत्वात् 'फिषोऽन्त उदात्तः' (फि. सू. १) इत्यन्तोदात्तत्वम् । पूर्वोक्तेष्वग्रणीरित्यादिनिर्वचनेषु[5] प्रकृतिप्रत्ययाद्यशेषप्रक्रिया यथोचितं कल्पनीया । एतदेवाभिप्रेत्य यास्क आह—'अथ निर्वचनं तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां तथा तानि निर्ब्रूयादथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद्वृत्तिसामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयान्नत्वेव न निर्ब्रूयात्' (निरु. २. १) इति । अस्यायमर्थः—तत्तत्र[6] निर्वचनीयपदसमूहमध्ये येष्वग्न्यादिपदेषु पूर्वोक्तरीत्या स्वरसंस्कारौ समर्थौ व्याकरणसिद्धौ स्याताम् । स्वर उदात्तादिः । संस्कारो निप्रत्ययादिः । किंच तौ स्वरसंस्कारौ प्रादेशिकेन गुणेनान्वितौ स्याताम् । शब्दस्यैकदेशः पूर्वोक्तोऽगिधातुः प्रदेशः । तत्र भवो गुणो गतिरूपोऽर्थः । तेनान्वितौ । तान्यग्न्यादिपदानि तथा व्याकरणानुसारेण निर्ब्रूयात् । तच्च निर्वचनमस्माभिः प्रदर्शितम् । अथ पूर्वोक्त-

---

१. ग-य-हविर्वहन् । २. त- उणादिसूत्रेण । ३. ठ-तयोरन्यतरदुदात्तमव शिष्टेतरदनुदात्तम् । ४. ठ-धातुजन्य इति । ५. ग-घ-छ-ण-य-°ष्वग्रणीत्यादिनि° । ६. च-छ-ठ-त-थ-फ-तत्र ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वैलक्षण्येन कश्चित् स्वेन विवक्षितोऽर्थो नान्वितः तस्मिन् शब्देऽनुगतो न भवेत्। तस्यैव व्याख्यानम् ' अग्रादेशिके विकारे ' इति। अग्रनयनादिरूपः क्रियाविशेषो विकारः। स च प्रदेशेनाग्निशब्दैकदेशेनात्र नाभिधीयते इत्यग्रादेशिकः। एवं सति यः पुमानर्थनित्यः स्वविवक्षितेऽर्थे नियतो निर्बन्धवान्। ब्राह्मणानुसारेण वा देवतान्तरविशेषणत्वेन योजयितुं वा स निर्बन्धः। तदानीं स पुमान् केनचित् वृत्तिसामान्येन स्वविवक्षितमर्थं परीक्षेत, तस्मिन् शब्दे योजयेत्। वृत्तिः क्रिया। तद्रूपेण सामान्यं सादृश्यम्। अस्माभिश्च अग्रनयनादिरूपं क्रियात्वसामान्यमुपजीव्यं अग्रणीत्वाद्यर्थो योजितः। तदिदं यास्काभिमतं निर्वचनम्। स्थौलाष्ठीविः अक्षरसाम्यान्निर्वक्ति। अक्नोपनशब्दस्यादौ निषेधार्थम् अकाररूपमक्षरं विद्यते। अग्निशब्दस्याप्यादौ अकारोऽस्ति। तदिदमक्षरसाम्यम्। शाकपूणिस्तु वर्णसाम्यान्निर्ब्रूते—दग्धशब्दाग्निशब्दयोर्गकारवर्णेन साम्यम्। सर्वथापि निर्वचनं न त्याज्यमिति। ईळे इत्येतत्पदं कृत्स्नमप्यनुदात्तम्। ' तिङुतिङः ' ( पा. सू. ८. १. २८ ) इति अतिङन्तादग्निशब्दात् परस्य ईळे इत्यस्य तिङन्तस्य निघातविधानात्। पदद्वयसंहिताकाले तु ईकारस्य धातुगतस्य ' उदात्तादनुदात्तस्य स्वरितः ' ( पा. सू. ८. ४. ६६ ) इति स्वरितत्वम्। तस्मात् ऊर्ध्वभाविन एकारस्य तिङ्प्रत्ययरूपस्य 'स्वरितात्संहितायामनुदात्तानाम्' (पा.सू.१. २.३९) इति ऐकश्रुत्यं प्रचयनामकं भवति। पुरःशब्दोऽन्तोदात्तः। ' अयं पुरो भुवः ' (तै. सं.४.३.२. १) इत्यत्र तथैवाम्नातत्वात्। ' पूर्वाधरावराणामसि पुरधवश्चैषाम् ' ( पा. सू. ५. ३. ३९ ) इति पूर्वशब्दात् असिप्रत्ययः पुरादेशश्च। ततोऽत्र प्रत्ययस्वरः ( पा. सू. ३. १. ३ )। धाञो निष्ठायां ' दधातेर्हिः ' ( पा. सू. ७. ४. ४२ ) इत्यादेशे सति प्रत्ययस्वरेणान्तोदात्तो हितशब्दः। तत्र समासान्तोदात्तत्वे ( पा. सू. ६. १. २२३ ) प्राप्ते तदपवादत्वेन ' तत्पुरुषे तुल्यार्थ° ' ( पा. सू. ६. २. २ ) इत्यादिना अव्ययपूर्वपदप्रकृतिस्वरत्वम्। यद्वा। ' पुरोऽव्ययम् ' ( पा. सू. १. ४. ६७ ) इति गतिसंज्ञायां ' गतिरनन्तरः ' ( पा. सू. ६. २. ४९ ) इति पूर्वपदप्रकृतिस्वरत्वम्। तत ओकार उदात्तः। अवशिष्टानामनुदात्तस्वरितप्रचयाः पूर्ववत् द्रष्टव्याः। आद्याक्षरस्य संहितायां प्रचयप्राप्तौ ( पा. सू. १. २. ३९ ) ' उदात्तस्वरितपरस्य सन्नतरः ' (पा. सू. १. २. ४० ) इत्यतिनीचोऽनुदात्तः। ' यजयाच° ' ( पा. सू. ३. ३. ९० ) इत्यादिना यजतेः नङ्प्रत्यये सति अन्तोदात्तो यज्ञशब्दः। विभक्तेः सुप्स्वरेणानुदात्तत्वे सति ( पा. सू. ३. १. ४ ) पश्चात् स्वरितत्वम्। देवशब्दः पचाद्यजन्तः ( पा. सू. ३. १. १३४ )। स च फिट्स्वरेण ( फि. सू. १ ) प्रत्ययस्वरेण ( पा. सू. ३. १. ३ ) चित्स्वरेण ( पा. सू. ६. १. १६३ ) वा अन्तोदात्तः। ऋत्विक्शब्दः ' ऋतौ यजति ' इति विग्रहे सति ' ऋत्विग्दधृक्° ' ( पा. सू. ३. २. ५९ ) इति निपातितः। ' गतिकारकोपपदात्कृत् ' ( पा. सू. ६. २. १३९ ) इति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः। विभक्तिस्वरः पूर्ववत्। होतृशब्दस्तृन्प्रत्ययान्तः (पा. सू. ३. २. १३५)। तित्स्वरेणाद्युदात्तः ( पा. सू. ६. १. १९७ )। स्वरितप्रचयौ पूर्ववत्। रत्नशब्दो ' नञ्विषयस्यानिसन्तस्य ' ( फि. सू. २६) इत्याद्युदात्तः। तथा चाम्नायते—' रत्नं धाता ' इति। रत्नानि दधातीति विग्रहः। समासत्वादन्तोदात्तो रत्नधाशब्दः। यद्वा कृदुत्तरपदप्रकृतिस्वरः। तमप्प्रत्ययस्य ( पा. सू. ५. ३. ५५ ) पित्स्वरेणानुदात्ते सति ( पा. सू. ३. १. ४ ) स्वरितप्रचयौ। संहितायामाद्याक्षरस्य प्रचयो द्वितीयाक्षरस्य सन्नतरत्वम्। 'वेदावतार आद्याया ऋचोऽर्थश्च प्रपञ्चितः। विज्ञातं वेदगाम्भीर्यमथ संक्षिप्य वर्ण्यते'॥

**अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत। स देवाँ एह वक्षति॥ २॥**

अग्निः। पूर्वेभिः। ऋषिऽभिः। ईड्यः। नूतनैः। उत। सः। देवान्। आ। इह। वक्षति॥२॥

---

१. ठ–निर्णयः। २. ग-थ-य–वृत्तिसाम्येन। ३. च-ठ-थ-फ–क्रियात्वसाम्यमुपजीव्य। ४. ठ–अक्नोपन इति तस्यादौ। ५. ठ–' अपि ' नास्ति। ६. ठ–सति प्रत्ययस्वरेण अन्तोदात्तः। ७, त-थ–°णानुदात्तत्वे। ८. क-ख-ञ-ण-न-श–स्वरितप्रचितौ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अयम् Vअग्निः Vपूर्वेभिः पुरातनैर्भृग्वङ्गिरःप्रभृतिभिः VऋषिभिःVईड्यः स्तुत्यः, VनूतनैःVउत इदानींतनैरस्माभिरपि स्तुत्यः। Vसः अग्निः स्तुतः सन् Vइह यज्ञे Vदेवान् हविर्भुजः Vआ Vवक्षति। 'वह प्रापणे' इति धातुः। आवहतु इत्यर्थः॥ पूर्वेभिरित्यत्र 'बहुलं छन्दसि' (पा. सू. ७. १. १०) इति भिस ऐसादेशाभावः। 'पूर्व पर्व अर्व पूरणे' इति धातुः। पूर्वतिधातोः अनुप्रत्यय औणादिकः। इनुप्रत्ययान्त ऋषिशब्दः 'ऋष्यन्धक०' (पा. सू. ४. १. ११४) इति निपातनात् लघूपधगुणाभावः (पा. सू. ७. ३. ८६)। कित्प्रत्ययो वात्र ज्ञेयः (उ. सू. ४. ५५९)। तौ शब्दौ निस्स्वरेणाद्युदात्तौ। ईड्यशब्दस्य ण्यत्प्रत्ययान्तत्वात् (पा. सू. ३. १. १२४) 'तित्स्वरितम्' (पा. सू. ६. १. १८५) इति स्वरिते शेषानुदात्तत्वे च प्राप्ते तदपवादत्वेन 'ईडवन्द०' (पा. सू. ६. १. २१४) इत्यादिनाद्युदात्तत्वम्। 'नवस्य नू स्नसनखाश्च' (पा. सू. ५. ४. ३०. ६) इति वार्तिकेन नवशब्दस्य नू इत्यादेशः तनन्प्रत्ययश्च महावार्तिके विहितः। ततो निस्स्वरेणाद्युदात्तः। अवशिष्टस्वरा अग्न्यादिषु नूतनान्तेषु पूर्ववदुन्नेयाः। उतशब्दो यद्यपि विकल्पार्थे प्रसिद्धस्तथापि निपातत्वेनानेकार्थत्वादौचित्येनात्र समुच्चयार्थो द्रष्टव्यः। 'उच्चावचेष्वर्थेषु निपतन्ति' इति निपातत्वम्। तर्हि 'निपाता आद्युदात्ताः' (फि. सू. ८०) इत्युकारस्योदात्तः प्राप्त इति चेत्, न। प्रातःशब्दवदन्तोदात्तत्वात्। यथा प्रातःशब्दोऽन्तोदात्तत्वेनैव स्वरादिषु (पा. सू. १. १. ३७) पठितः, एवमुतशब्दस्यापि पाठो द्रष्टव्यः, स्वरादेराकृतिगणत्वात्। यद्वा 'एवादीनामन्तः' (फि. सू. ८२) इत्यन्तोदात्तः। स इत्यत्र फिट्स्वरः। देवशब्दः पूर्ववत्। देवान् इत्यस्य नकारस्य संहितायां 'दीर्घादटि०' (पा. सू. ८. ३. ९) इति रुत्वम्। 'अत्रानुनासिकः०' (पा. सू. ८. ३. २) इत्यनुवृत्तौ 'आतोऽटि नित्यम्' (पा. सू. ८. ३. ३) इत्याकारः सानुनासिकः। 'भोभगो०' (पा. सू. ८. ३. १७) इति रोर्यकारः। स च 'लोपः शाकल्यस्य' (पा. सू. ८. ३. १९) इति लुप्यते। तस्यासिद्धत्वात् (पा. सू. ८. २. १) न पुनः संधिकार्यम्। आङो निपातत्वादाद्युदात्तत्वम्। इदमो हप्रत्यये सति निष्पन्नत्वात् (पा. सू. ५. ३. ११) इहशब्दे प्रत्ययस्वरः। वहति धातोर्लोऽर्थे छान्दसो लृट्। तस्य स्यप्रत्ययगतस्य यकारस्य लोपोऽपि छान्दसः। यद्वा। लेटि 'सिब्बहुलम्०' (पा. सू. ३. १. ३४) इति सिप्प्रत्ययः। 'लेटोऽडाटौ' (पा. सू. ३. ४. ९४) इत्यडागमश्च। ततो वक्षतीति संपद्यते। तस्य तिङन्तत्वान्निघातः। संहितास्वराः पूर्ववत्॥

आधाने तृतीयेष्टौ प्रथमाज्यभागस्यानुवाक्या (आश्व. श्रौ. २. १)। सूक्तगता तृतीया॥

**अग्निना रयिमश्नवत्पोषमेव दिवेदिवे। यशसं वीरवत्तमम्॥ ३॥**

अग्निना। रयिम्। अश्नवत्। पोषम्। एव। दिवेऽदिवे। यशसम्। वीरवत्ऽतमम्॥ ३॥

योऽयं होत्रा स्तुत्योऽग्निस्तेन Vअग्निना निमित्तभूतेन यजमानः Vरयिं धनम् Vअश्नवत् प्राप्नोति। कीदृशं रयिम्। Vदिवेदिवे Vपोषम् Vएव प्रतिदिनं पुष्यमाणतया वर्धमानमेव, न तु कदाचिदपि क्षीयमाणम्। Vयशसं दानादिना यशोयुक्तं Vवीरवत्तमम् अतिशयेन पुत्रभृत्यादिवीरपुरुषोपेतम्। सति हि धने पुरुषाः संपद्यन्ते। रयिशब्दो 'मघम्' इत्यादिधननामसु (नि. २. १०. ८) पठितः। तत्र फिट्स्वरः। अश्नोतेर्धातोर्लेटि व्यत्ययेन तिप्। 'इतश्च लोपः०' (पा. सू. ३. ४. ९७) इति इकारलोपः। 'लेटोऽडाटौ' (पा. सू. ३. ४. ९४) इत्यडागमः। ततः 'अश्नवत्' इति भवति। तस्य निघातः। घजन्त-

---

१. ग-घ-छ-ण-य-'यद्वा..... इत्यन्तोदात्तः' नास्ति; त-थ-'अन्तोदात्तः' इत्यस्य स्थाने 'अन्तोदात्तत्वम्'। २. ठ-संधिः। ३. त-थ- ह इति हप्रत्यये। ४. ठ-त-थ-'तस्य' नास्ति। ५. त-थ-तस्य तिङ्स्तिङः इति तिङन्तत्वान्निघातः। ६. ग-य-संपाद्यन्ते।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्वात् ( पा. सू. ६. १. १९७ ) पोषशब्द आद्युदात्तः। एवशब्दस्य निपातत्वेऽपि ' एवादीनामन्तः ' ( फि. सू. ८२ ) इत्यन्तोदात्तत्वम्। वकारान्तात् दिव्शब्दात् परस्याः सप्तम्याः ' सुपां सुलुक्° ' ( पा. सू. ७. १. ३९ ) इत्यादिना शेभावे सति ' सावेकाचः° ' ( पा. सू. ६. १. १६८ ) इत्यादिना ' ऊडिदंपदाद्° ' ( पा. सू. ६. १. १७१ ) इत्यादिना वा तस्योदात्तत्वम्। ' नित्यवीप्सयोः ' ( पा. सू. ८. १. ४ ) इति द्विर्भावे सति उत्तरभागस्य ' अनुदात्तं च ' ( पा. सू. ८. १. ३ ) इत्यनुदात्तत्वम्। यशोऽस्यास्तीति विग्रहे सति ' अर्शआदिभ्योऽच् ' ( पा. सू. ५. २. १२७ ) इति अच्प्रत्ययः। चित्स्वरं व्यत्ययेन बाधित्वा मध्योदात्तत्वम्। फिट्स्वरेणान्तोदात्तात् वीरशब्दात् उत्तरयोर्मतुपूतमपोः पित्त्वादनुदात्तत्वम्। ' ह्रस्वनुड्भ्याम्° ' ( पा. सू. ६. १. १७६ ) इति तु न सावर्णान्तत्वात्। ' न गोश्वन्° ' ( पा. सू. ६. १. १८२ ) इति प्रतिषेधः॥

अभिप्लवषडहस्य मध्यवर्तिषूक्थेषु तृतीयसवने मैत्रावरुणस्य ' अग्ने यं यज्ञम् ' इत्यादिको वैकल्पिकोऽनुरूपस्तृचः। एतच्च सप्तमाध्याये ' एह्यूषु ' इत्यादिखण्डे सूत्रितम्—' अग्निं वो वृधन्तमग्ने यं यज्ञमध्वरम् ' ( आश्व. श्रौ. ७. ८ ) इति॥

**अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि। स इद्देवेषु गच्छति॥ ४॥**

अग्ने। यम्। यज्ञम्। अध्वरम्। विश्वतः। परिऽभूः। असि। सः। इत्। देवेषु। गच्छति॥४॥

हे [v]अग्ने त्वं [v]यं [v]यज्ञं [v]विश्वतः सर्वासु दिक्षु [v]परिभूः परितः प्राप्तवान् [v]असि [v]सः [v]इत् स एव यज्ञो [v]देवेषु तृप्तिं प्रणेतुं[3] स्वर्गे [v]गच्छति। प्राच्यादिचतुर्दिगन्तेषु[4] आहवनीयमार्जालीयगार्हपत्याग्नीध्रीयस्थानेषु अग्निरस्ति। परिशब्देन होत्रीयादिधिष्ण्यव्याप्तिर्विवक्षिता। कीदृशं यज्ञम्। [v]अध्वरं हिंसारहितम्। न ह्यग्निना सर्वतः पालितं यज्ञं राक्षसादयो हिंसितुं प्रभवन्ति॥ अग्निशब्दस्य षाष्टिकम् ( पा. सू. ६. १. १९८ ) आमन्त्रिताद्युदात्तत्वम्। न विद्यते ध्वरोऽस्येति बहुव्रीहौ ' नञ्सुभ्याम् ' ( पा. सू. ६. २. १७२ ) इत्यन्तोदात्तत्वम्। विश्वतः इत्यत्र तसिलः प्रत्ययस्वरत्वं बाधित्वा पूर्ववर्णस्य ' लिति ' ( पा. सू. ६. १. १९३ ) इत्युदात्तत्वम्। परिभूरित्यत्र अव्ययपूर्वपदप्रकृतिस्वरत्वे प्राप्ते ( पा. सू. ६. २. २ ) तदपवादत्वेन कृदुत्तरपदप्रकृतिस्वरत्वम् ( पा. सू. ६. २. १३९ )। असि इति तिङन्तस्य ' यट्टृत्तान्नित्यम् ' ( पा. सू. ८. १. ६६ ) इति निघाताभावः॥

**अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः। देवो देवेभिरा गमत्॥ ५॥**

अग्निः। होता। कविऽक्रतुः। सत्यः। चित्रश्रवःऽतमः। देवः। देवेभिः। आ। गमत्॥ ५॥

अयम् [v]अग्निः [v]देवः अन्यैर्देवैर्हविर्भोजिभिः सह [v]आ [v]गमत् अस्मिन् यज्ञे समागच्छतु। कीदृशोऽग्निः। [v]होता होमनिष्पादकः [v]कविक्रतुः। कविशब्दोऽत्र क्रान्तवचनो न तु मेधाविनाम। क्रतुः प्रज्ञानस्य कर्मणो वा नाम। ततः क्रान्तप्रज्ञः क्रान्तकर्मा वा। [v]सत्यः अनृतरहितः फलमवश्यं प्रयच्छतीत्यर्थः। [v]चित्रश्रवस्तमः। श्रूयते इति श्रवः कीर्तिः। अतिशयेन विविधकीर्तियुक्तः[5]॥ कविक्रतुः चित्रश्रवस्तमः इत्यत्रोभयत्र बहुव्रीहित्वात् पूर्वपदप्रकृतिस्वरत्वम् ( पा. सू. ६. २. १ )। सत्सु[6] साधुः सत्यः ' सत्यादशपथे ' ( पा. सू. ५. ४. ६६ ) इत्यत्रान्तोदात्तो हरदत्तेन निपातितः[7]।

---

१. ग-घ-च-छ-ठ-ण-त-थ-फ-य-' ह्रस्वनुड्भ्यां.....प्रतिषेधः ' नास्ति। २. ठ-' तास्मिन् तृचे या प्रथमा सा सूक्ते चतुर्थी ' इत्यधिकं इतीत्यस्यानन्तरम्। ३. च-छ-ठ-ण-त-थ-फ-जनयितुम्। ४. ठ-प्रागादिचतुर्षु देशेषु। ५. ठ-प्रत्ययस्वरम्। ६. च-छ-त-थ-फ-चित्रकीर्तिः°। ७. ग-घ-च-छ-ण-त-थ-फ-य-' सत्सु साधुः....., निपातितः ' नास्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

लोडन्तस्य गच्छतु इति शब्दस्य छत्वाभावः। उकारलोपश्छान्दसः। ततो रूपं गमत् इति भवति। स्पष्टमन्यत्॥ ॥ १ ॥

**यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि। तवेत्तत्सत्यमङ्गिरः ॥ ६ ॥**

यत्। अङ्ग। दाशुषे। त्वम्। अग्ने। भद्रम्। करिष्यसि। तव। इत्। तत्। सत्यम्। अङ्गिरः ॥६॥

अङ्ग इत्यभिमुखीकरणार्थो निपातः। vअङ्ग vअग्ने हे अग्ने त्वं vदाशुषे हविर्दत्तवते यजमानाय तत्प्रीत्यर्थं vयत् भद्रं वित्तगृहप्रजापशुरूपं कल्याणं vकरिष्यसि vतत् भद्रं vतव vइत् तवैव। सुखहेतुरिति शेषः। हे vअङ्गिरः अग्ने एतच्च vसत्यं न त्वत्र विसंवादोऽस्ति[1]। यजमानस्य वित्तादिलंपत्तौ सत्यामुत्तरक्रत्वनुष्ठानेनाग्नेरेव सुखं भवति। भद्रशब्दार्थं शाट्यायनिनः समामनन्ति—'यद्वै पुरुषस्य वित्तं तद्भद्रं गृहा भद्रं प्रजा भद्रं पशवो भद्रम्' इति॥ अङ्गशब्दस्य निपातत्वेऽपि अभ्यादित्वात् (फि. सू. ८१) अन्तोदात्तत्वम्। 'दाश्वान्साह्वान्°' (पा. सू. ६. १. १२) इति सूत्रेण 'दाशृ दाने' इति धातोः क्वसुप्रत्ययो निपातितः। तत्र[2] प्रत्ययस्वरः (पा. सू. ३. १. ३)। आमन्त्रितस्य अग्निशब्दस्य पदात्परत्वेन आष्टमिकानुदात्तत्वं (पा. सू. ८. १. १९) न शङ्कनीयम्, '°अपादादौ' (पा. सू. ८. १. १८) इति पर्युदस्तत्वात्। ततः षाष्ठिकम् (पा. सू. ६. १. १९८) आद्युदात्तत्वमेव। भद्रशब्दस्य नञ्विषयत्वेन (फि. सू. २६) आद्युदात्तत्वप्रसक्तावपि 'भदि कल्याणे' इति धातोरुपरि रक्प्रत्ययेन निपातनादन्तोदात्तत्वम्। अस्मिन् वाक्ये यच्छब्दप्रयोगात् 'निपातैर्यद्यदिहन्त°' (पा. सू. ८. १. ३०) इति निघाते प्रतिषिद्धे स्यप्रत्ययस्वरेण सति शिष्टेन करिष्यसिशब्द उपान्त्योदात्तः। तवेत्यत्र 'युष्मदस्मदोर्ङसि' (पा. सू. ६. १. २११) इत्याद्युदात्तत्वम्। 'अङ्गिरा अङ्गाराः' (निरु० ३. १७) इति यास्कः। ऐतरेयिणोऽपि प्रजापतिदुहितृध्यानोपाख्याने समामनन्ति—'येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन्' (ऐ. ब्रा. ३. ३४) इति। तस्मात् अङ्गिरोनामकमुनिकारणत्वात् अङ्गाररूपस्याग्नेरङ्गिरस्त्वम्। अत्र पदात्परत्वेनाष्टमिकानुदात्तत्वम्॥

अग्नीषोमप्रणयने 'उप त्वाग्ने' इत्यादिकोऽनुवचनीयस्तृचः। एतच्च ब्राह्मणे समाम्नातम्—'उप त्वाग्ने दिवेदिव उप प्रियं पनिप्नतमिति तिस्रश्चैकां चान्वाह' (ऐ. ब्रा. १. ३०) इति॥

**उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि ॥ ७ ॥**

उप। त्वा। अग्ने। दिवेऽदिवे। दोषाऽवस्तः। धिया। वयम्। नमः। भरन्तः। आ। इमसि ॥७॥

हे vअग्ने वयम् अनुष्ठातारः vदिवेदिवे प्रतिदिनं vदोषावस्तः रात्रावहनि च vधिया बुद्धया vनमः vभरन्तः नमस्कारं संपादयन्तः vउप समीपे vत्वा vएमसि त्वामागच्छामः॥ उपशब्दस्य निपातस्वरः (फि. सू. ८०)। 'त्वामौ द्वितीयायाः' (पा. सू. ८. १. २३) इति युष्मच्छब्दस्यानुदात्तस्वादेशः। दोषाशब्दो रात्रिवाची। वस्तर् इति अहर्वाची। द्वन्द्वसमासे कार्तकौजपादित्वात् (पा. सू. ६. २. ३७) आद्युदात्तः। 'सावेकाचः°' (पा. सू. ६. १. १६८) इति धियो विभक्तिरुदात्ता। नम इति निपातः। भरन्त इत्यत्र शपः (पा. सू. ३. १. ६८) पित्त्वात् शतुर्लसार्वधातुकत्वाच्च अनुदात्तत्वे सति (पा. सू. ६. १. १८६) धातुस्वरः शिष्यते। इमसि इत्यत्र 'इदन्तो मसिः' (पा. सू. ७. १. ४६) इत्यादेशो निघातश्च।

---

१. ठ–विवादोऽस्ति। २. ठ–दाशुष इति शब्दो दाश्वान्साह्वान्; फ–दाशुषे। दाश्वान्साह्वान्। ३. ठ–ततः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

राजन्तमध्वराणां गोपामृतस्य दीदिविम् । वर्धमानं स्वे दमे ॥ ८ ॥

राजन्तम् । अध्वराणाम् । गोपाम् । ऋतस्य । दीदिविम् । वर्धमानम् । स्वे । दमे ॥ ८ ॥

पूर्वमन्त्रे त्वामुपैम इत्यग्निमुद्दिश्योक्तम् । कीदृशं त्वाम् । [v]राजन्तं दीप्यमानम् [v]अध्वराणां राक्षसकृतहिंसारहितानां यज्ञानां [v]गोपां रक्षकम् [v]ऋतस्य सत्यस्यावश्यंभाविनः कर्मफलस्य [v]दीदिविं पौनःपुन्येन भृशं वा द्योतकम् । आहुत्याधारमग्निं दृष्ट्वा शास्त्रप्रसिद्धं कर्मफलं स्मर्यते । [v]स्वे [v]दमे स्वकीयगृहे यज्ञशालायां हविर्भिः [v]वर्धमानम् ॥ राजन्तं वर्धमानमित्यत्रोभयत्र पूर्ववत् धातुस्वरः शिष्यते । दीदिविशब्दस्य 'अभ्यस्तानामादिः' ( पा. सू. ६. १. १८९ ) इत्याद्युदात्तत्वम् । दमशब्दो वृषादित्वात् ( पा. सू. ६. १. २०३ ) आद्युदात्तः ॥

स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ॥ ९ ॥

सः । नः । पिताऽइव । सूनवे । अग्ने । सुऽउपायनः । भव । सचस्व । नः । स्वस्तये ॥ ९ ॥

हे [v]अग्ने सः[v] त्वं [v]नः अस्मदर्थं सूपायनः शोभनप्राप्तियुक्तः [v]भव । तथा नः अस्माकं [v]स्वस्तये विनाशराहित्यार्थं [v]सचस्व समवेतो भव । तत्रोभयत्र दृष्टान्तः । यथा [v]सूनवे पुत्रार्थं पिता सुप्रापः प्रायेण समवेतो भवति तद्वत् ॥ अस्मच्छब्दादेशस्य न इत्येतस्य 'अनुदात्तं सर्वम्०' ( पा. सू. ८. १. १८ ) इत्यनुदात्तत्वम् । 'चादयोऽनुदात्ताः' ( फि. सू. ८४ ) इति इवशब्देऽनुदात्तः । 'इवेन नित्यसमासः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम्' ( पा. सू. २. १. ४. २ ) इति समस्तः पितेवेति शब्दो मध्योदात्तः । शोभनमुपायनं यस्येति बहुव्रीहौ 'नञ्सुभ्याम्' ( पा. सू. ६. २. १७२ ) इत्यन्तोदात्तत्वम् । सचस्वेत्यत्र पदात्परत्वं नास्तीति न निघातः । लसार्वधातुकानुदात्तत्वे सति धातुस्वरावशेषः ॥ ॥ २ ॥

'अग्निमीळे' इत्यादिसूक्तमग्निष्टोमस्य प्रातरनुवाके यथा विनियुक्तं तथा 'वायवा याहि' इत्यादयस्तृचाः प्रउगशस्त्रे विनियुक्ताः । तत्रेदं चिन्त्यते, शस्त्रं किं देवतास्मरणरूपसंस्कारकर्म किं वा अदृष्टफलं प्रधानकर्मेति । तत्र पूर्वपक्षं जैमिनिः ( जै. सू. २. १. १३–२९ ) सूत्रयामास—

'स्तुतशस्त्रयोस्तु संस्कारो याज्यावदेवताभिधानत्वात्' इति ॥ 'आज्यैः स्तुवते पृष्ठैः स्तुवते प्रउगं शंसति निष्केवल्यं शंसति' इति श्रूयते । तत्र स्तुतिः शंसनं च गुणनिष्ठगुणाभिधानम् 'इन्द्रस्य नु वीर्याणि प्र वोचम् ( ऋ. सं. १. ३२. १ ) इत्यत्र दृष्टत्वात् । एवं सति याज्यान्यायेन गुणिन्या देवताया अभिधायकत्वेन स्तुतशस्त्रयोः संस्काररूपत्वमभ्युपेयम् । याज्यायास्तद्रूपत्वं दशमाध्यायस्य चतुर्थपादे ( जै. सू. १०. ४. ३९–४१ ) दृष्टार्थलाभेन निर्णीतम् । तद्वदत्रापि । तुशब्दः प्रधानकर्मत्वं व्यावर्तयति ॥ सिद्धान्ती तं पक्षं दूषयति—

'अर्थेन त्वपकृष्येत देवतानाम्नश्चोदनार्थस्य गुणभूतत्वात्' इति । तुशब्देन संस्कारत्वं वारयति संस्कारपक्षे प्रयोजनवशेन मन्त्रः स्वस्थानादपकृष्येत । कुतः । मन्त्रगतं देवतावाचकं यदिन्द्रादिनामास्ति तच्चोदनया मन्त्ररूपया प्रतिपाद्यस्य देवतारूपस्यार्थस्य गुणभूतम् । तस्मात् यत्र प्रधानभूतदेवतास्ति तत्र गुणभूतो मन्त्रो नेतव्यः । तद्यथा माहेन्द्रग्रहसंनिधौ 'अभि त्वा शूर' ( ऋ. सं. ७. ३२. २२ ) इत्ययं प्रगाथ आम्नातः । स चेन्द्रं प्रकाशयति न तु महेन्द्रम् । ततो यत्रैन्द्रं कर्म तत्रायं प्रगाथोऽपकर्षणीयः । तथा सति क्रमसंनिधी बाध्येयाताम् ॥ तदेतत् सिद्धान्तिनाभिहितं दूषणं पूर्वपक्षी समाधत्ते—

'वशावद्वा गुणार्थं स्यात्' इति । वाशब्दः प्रगाथस्यान्यत्रनयनं वारयति । मन्त्रे यदेतदिन्द्रशब्दाभिधानं तदेतन्महत्त्वगुणोपलक्षणार्थं स्यात् । यथा 'सा वा एषा सर्वदेवत्या यदजा वशा

---

१. ख-ग-घ-छ-ण-त-थ-फ–'अदृष्टफलम्' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वायव्यामा लभेत ' ( तै. सं. ३. ४. ३. २ ) इत्यत्र अजावशाशब्देन चोदिते कर्मणि छागशब्देन केवलेन युक्ता निगमा वशात्वगुणमप्युपलक्षयन्ति तद्वत् । तस्मात् महत्त्वगुणयुक्ते चोदिते कर्मणि निर्गुणेनेन्द्रशब्देधाननाभिमविरुद्धम् । लोकेऽपि महाराजे केवलराजशब्दप्रयोगमपि पश्यामः । तदेतत् समाधानं सिद्धान्ती दूषयति—

' न श्रुतिसमवायित्वात् ' इति । यदुक्तं वशान्यायेन राजन्यायेन वास्य ग्रहस्येन्द्रो देवता युज्यते इति तन्न । देवतात्वस्य तद्धितश्रुतिसमवायित्वात् । माहेन्द्रग्रह इत्यत्र सास्य देवतेत्यस्मिन्नर्थे ' महेन्द्राद्धाणौ च ' ( पा. सू. ४. २. २९ ) इति महेन्द्रशब्दात् अण्प्रत्ययो विहितः । तस्मात् महेन्द्र एव देवता न त्विन्द्रः ॥ विपक्षे बाधमाह—

' गुणश्चानर्थकः ' इति । यदीन्द्रो देवता स्यात् तदानीम् ऐन्द्रग्रह इत्येतावतैव अर्थावगतौ माहेन्द्र इति महत्त्वगुणोऽनर्थकः स्यात् । चकारः पूर्वहेतुना[1] समुच्चयार्थः ॥ हेत्वन्तरमाह—

' तथा याज्यापुरोरुचोः ' इति । इन्द्रमहेन्द्रयोर्देवतयोर्भेदे यथा महत्त्वगुणः सार्थकस्तथा याज्यापुरोनुवाक्ययोर्भेदोऽप्यस्मिन्नेव पक्षे उपपद्यते । ' एन्द्र सानसिम् ' ( ऋ. सं. १. ८. १ ) इत्यादिके इन्द्रस्य याज्यापुरोनुवाक्ये । ' महाँ इन्द्रो य ओजसा ' ( ऋ. सं. ८. ६. १ ) इत्यादिके महेन्द्रस्य ॥ पूर्वपक्षिणोक्ते वशादृष्टान्ते वैषम्यमाह—

' वशायामर्थसमवायात् ' इति । या वशा विधिवाक्ये श्रुता तस्या एव निगमेषु छागशब्देन व्यवहारो न विरुद्धः । छागत्वलक्षणस्यार्थस्य वशायां समवेतत्वात् । तच्च प्रत्यक्षेणोपलभ्यते । इन्द्रमहेन्द्रयोस्तु भेद उपपादितः । तस्मात् विषमो दृष्टान्तः । एवं संस्कारपक्षे प्रगाथस्यैन्द्रकर्मण्यपकर्षप्रसङ्गात् तद्वारयितुं स्तोत्रशस्त्रयोः प्रधानकर्मत्वमिति सिद्धान्तिनो मतम् ॥ पुनरपि पूर्वपक्षी तदेतन्मतं निराचष्टे—

' यत्रेति वार्थवत्त्वात्स्यात् ' इति । वाशब्दः सिद्धान्तिमतव्यावृत्त्यर्थम्[2] । यत्रैन्द्रं कर्म तत्र प्रगाथो नेतव्य इत्ययमेव पक्षः स्यात् । कुतः, अर्थवत्त्वात् । ऐन्द्रो मन्त्र इन्द्रं प्रकाशयितुं समर्थ इत्यर्थवान् स्यात् । महेन्द्रं तु प्रकाशयितुमसमर्थत्वादानर्थक्यं प्रगाथस्य प्रसज्येत । तस्मात् देवताप्रकाशनरूपसंस्कारकर्मत्वमेव स्तोत्रशस्त्रयोर्युक्तमिति स्थितः पूर्वपक्षः ॥ अथ सिद्धान्तमाह—

' अपि वा श्रुतिसंयोगात्प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदध्याताम्[3] ' इति । ' अपि वा ' इत्यनेन संस्कारकर्मत्वं व्यावर्त्यते । स्तौतिधातुः शंसतिधातुश्चेत्येतावुभावपि स्वप्रकरणे एव कस्याश्चित् प्रधानक्रियाया उत्पत्तिं विदध्याताम् । कुतः, श्रुतिसंयोगात् । तयोर्धात्वोर्वाच्योऽर्थः श्रुतिरित्युच्यते । तत्संयोगः प्रधानकर्मत्वे सिध्यति । तथा हि गुणिनमुपसर्जनीकृत्य तन्निष्ठानां गुणानां प्राधान्येन कथनं स्तुतिः । यो देवदत्तः स चतुर्वेदाभिज्ञ इत्युक्ते सर्वे जनाः स्तुतिमवगच्छन्ति । गुणस्योपसर्जनत्वे तु न स्तुतिः प्रतीयते[4] । ' यश्चतुर्वेदाभिज्ञस्तमाकारय ' इत्युक्ते स्तुतिं न मन्यन्ते किंत्वाह्वानप्राधान्यमेव बुध्यन्ते । एवं मन्त्रेष्वपि[5] या देवता सेयमीदृशैर्गुणैरुपेतेति गुणप्राधान्यविवक्षायां मुख्यः स्तौतिधात्वर्थो विधीयते[6] । त्वत्पक्षे तु येयमीदृग्गुणयुक्ता सेयं देवतेति देवतास्मरणस्य प्राधान्यादियं स्तुतिर्न स्यात् । ततः श्रुतिवशादेते प्रधानकर्मणी । तथा सति देवताप्रकाशने तात्पर्याभावात् ऐन्द्रोऽपि प्रगाथः स्वप्रकरणगते माहेन्द्रकर्मण्येवावतिष्ठते[7] । यदि देवतास्मरणरूपं दृष्टं प्रयोजनं न लभ्येत तर्ह्यदृष्टमस्तु ॥ प्रधानकर्मत्वे हेत्वन्तरमाह—

---

१. त-थ–पूर्वहेतुसमुच्चयार्थः । २. ग-घ-च-छ-ण-त-थ-फ-य–°व्यावृत्त्यर्थः । ३. ग-घ-च-छ-ण-य–प्रतीयेत । ४. ठ–मन्त्रेऽपि । ५. ग-घ-छ-ण-य–विधीयेत । ६. ठ–महेन्द्रकर्मण्येषा° । ७. ग-घ-च-छ-ठ-ण-फ-य–देवतानुस्मरण° ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'शब्दपृथक्त्वाच्च' इति। 'द्वादशाग्निष्टोमस्य स्तोत्राणि द्वादश शस्त्राणि' इत्यत्र द्वादशशब्देन स्तोत्राणां पृथक्त्वमवगम्यते। देवताप्रकाशनपक्षे सर्वैरपि मन्त्रसंघैः कृतस्य प्रकाशनस्यैकत्वेन द्वादशसंख्या न स्यात्। प्रधानकर्मणां तु आज्यस्तोत्रपृष्टस्तोत्रादिनामकानां भिन्नत्वात् द्वादशत्वसंख्योपपद्यते। एवं शस्त्रवाक्येऽपि योज्यम्॥ विपक्षे बाधमाह—

'अनर्थकं च तद्वचनम्' इति। अग्निष्टुति श्रूयते–'आग्नेया ग्रहा भवन्ति' इति। तत्रैव पुनरप्यन्यदुच्यते–'आग्नेयीषु स्तुवते। आग्नेयीः शंसन्ति' इति। त्वत्पक्षे तद्वचनमनर्थकं स्यात्। चोदकप्राप्तेषु स्तोत्रशस्त्रमन्त्रेष्वाग्नेयग्रहानुसारेण देवतापदस्य ऊहे सति आग्नेयत्वसिद्धेः। प्रधानकर्मपक्षे तु देवताप्रकाशनरूपत्वाभावेन ऊहाभावात् आग्नेयमन्त्रान्तरविधिवचनमर्थवद्भवति॥ पुनरपि हेत्वन्तरमाह—

'अन्यश्चार्थः प्रतीयते' इति। 'संबद्धे वै स्तोत्रशस्त्रे' इति ह्याम्नातम्। संबन्धश्च द्वयोर्भवति न त्वेकस्य। तस्मात् स्तोत्रशस्त्रयोरर्थभेदः प्रतीयते। स च संस्कारपक्षे न संभवति। देवताप्रकाशनरूपस्यार्थस्यैकत्वात्। प्रधानकर्मपक्षे तु स्तोत्रकर्म शस्त्रकर्म चेत्यर्थभेद उपपद्यते। यद्यपि 'ष्टुञ् स्तुतौ', 'शंसु स्तुतौ' इत्येकार्थौ, तथापि 'प्रगीतमन्त्रसाध्यं स्तोत्रम्', 'अप्रगीतमन्त्रसाध्यं शस्त्रम्' इति तयोर्विवेकः॥ हेत्वन्तरमाह—

'अभिधानं च कर्मवत्' इति। यथा प्रधानकर्म 'अग्निहोत्रं जुहोति' इति द्वितीयासंयोगेनाभिहितं, तथा 'प्रउगं शंसति' इत्यभिधीयते। अतस्तत्साद्दश्यात् प्रधानकर्मत्वम्॥ हेत्वन्तरमाह—

'फलनिर्वृत्तिश्च' इति। 'स्तुतस्य स्तुतमसि' (तै. सं. ३. २. ७. १) इति स्तोत्रानुमन्त्रणमाम्नाय वाक्यशेषे स्तोत्रफलमेवाम्नातम्–'इन्द्रियावन्तो वनामहे धुक्षीमहि प्रजामिषम्' (तै. सं. ३. २. ७. २) इति। न तु देवताप्रयुक्तं फलमाम्नातम्। अतो न देवतासंस्कारः किंतु प्रधानकर्मेति स्थितम्। अनेन तु निर्णयेन प्रयोजनं विकृतिषु ऊहाभावः। संस्कारपक्षे तु यस्यां विकृतौ देवतान्तरं तत्र तद्वाचकं पदमूहनीयं स्यात्। तन्मा भूदिति प्रधानकर्मत्वमुक्तम्। एतच्च दशमाध्याये सूत्रितं–'ग्रहाणां देवतान्यत्वे स्तुतशस्त्रयोः कर्मत्वादविकारः स्यात्' (जै. सू. १०. ४. ४९) इति। अत्र संग्रहश्लोकौ—

प्रउगं शंसतीत्यादौ गुणतोत प्रधानता।
दृष्टा देवस्मृतिस्तेन गुणता स्तोत्रशस्त्रयोः॥
स्मृत्यर्थत्वे स्तौतिशंस्योर्धात्वोः श्रौतार्थबाधनम्।
तेनादृष्टमुपेत्यापि प्राधान्यं श्रुतये मतम् (जै. न्या. २. १. ५) इति॥

अग्निष्टोमे सुत्यादिने[7] सूर्योदयात् पूर्वं प्रेषितो होता प्रातरनुवाकमनुब्रूयात्। एतच्चैतरेयब्राह्मणे प्रपञ्चितं–'देवेभ्यः प्रातर्यावभ्यो होतरनुब्रूहीत्याहाध्वर्युः' (ऐ. ब्रा. २. १५) इत्यादि ब्राह्मणम्। तस्मिंश्च प्रातरनुवाके 'अग्निमीळे' इत्यादिसूक्तमन्तर्भूतम्। तच्च व्याख्यातम्। प्रातःसवने वैश्वदेवग्रहणादूर्ध्वं प्रउगशस्त्रं होत्रा शंसनीयम्। तच्च शस्त्रं 'वायवा याहि' इत्यादिसप्तर्चात्मकम्। एतच्च ब्राह्मणे 'ग्रहोक्थम्' (ऐ. ब्रा. ३. १) इत्यादिखण्डे प्रपञ्चितम्। तथा पञ्चमाध्याये 'स्तोत्रमग्रे शस्त्रात्' (आश्व. श्रौ. ५. १०) इत्यादिखण्डे सूत्रितं च। अत्रेयमनुक्रमणिका–'वायो वायव्यैन्द्रवायवमैत्रावरुणास्तृचा अश्विना द्वादशाश्विनैन्द्रवैश्वदेवसारस्वतास्तृचाः सप्तैताः प्रउगदेवताः'

---

१. ठ–द्वादशसंख्यो°। २. च-छ-फ–अग्निस्तुतिः। ३. ठ–शंसति। ४. ठ–°नपरत्वाभावेन। ५. ठ–स्तोत्रशस्त्रशब्दयो°। ६. घ-छ–स्तोत्रात् फलमेवाम्नातम्; ग-ठ-भ–स्तोत्रात् फलमेवमाम्नातम्। ७. क-ग-घ-ण-त-न-य–स्तुत्यादिने। ८. च-फ–एतच्च।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति। अस्यायमर्थः। 'वायवा याहि' इत्यादिकं नवर्चं सूक्तम्। 'अग्निं नव' इत्यतो नवशब्दस्यानुवृत्तेः। तत्राद्यस्तृचो वायुदेवताकः। द्वितीय इन्द्रवायुदेवताकः। तृतीयो मित्रावरुणदेवताकः। 'अश्विना' इत्यादिकं द्वादशर्चं सूक्तम्। तत्राद्यस्तृच आश्विनः। द्वितीय ऐन्द्रः। तृतीयो वैश्वदेवः। चतुर्थः सारस्वतः। तेषु तृचेषु प्रतिपाद्या वाय्वादयः सरस्वत्यन्ताः सप्तसंख्याकाः प्रउगशस्त्रस्य देवता इति। मधुच्छन्दसोऽनुवर्तनात् स एवर्षिः। तथैवानुवृत्त्या गायत्रं छन्दः। वायव्ये तृचे प्रथमा ग्रहस्य ऐन्द्रवायवस्यैका पुरोनुवाक्या। एतच्च ब्राह्मणे समाम्नातं–'वायव्या पूर्वा पुरोनुवाक्यैन्द्रवायव्युत्तरा' (ऐ. ब्रा. २. २६) इति। तथा सूत्रितं च–'वायवा याहि दर्शतेन्द्रवायू इमे सुता इत्यनुवाक्ये' (आश्व. श्रौ. ५. ५) इति॥

**वायवा याहि दर्शतेमे सोमा अरंकृताः। तेषां पाहि श्रुधी हवम्॥ १॥**

वायो इति। आ। याहि। दर्शत। इमे। सोमाः। अरंऽकृताः। तेषाम्। पाहि। श्रुधि। हवम्॥१॥

[v]दर्शत हे दर्शनीय [v]वायो कर्मण्येतस्मिन् [v]आ [v]याहि आगच्छ। त्वदर्थम् [v]इमे [v]सोमा [v]अरंकृताः अलंकृताः। अभिषवादिसंस्कारोऽलंकारः। [v]तेषां तान् सोमान्। यद्वा। तेषामेकदेशमित्यध्याहारः। [v]पाहि स्वकीयं भागं पिबेत्यर्थः। तत्पानार्थं [v]हवम् अस्मदीयमाह्वानं [v]श्रुधि शृणु। अत्र यास्कः—'वायवा याहि दर्शनीयेमे सोमा अरंकृता अलंकृतास्तेषां पिब शृणु नो ह्वानम्' (निरु. १०. २) इति॥ दर्शतेत्यत्र 'भृमृदृशि°' (उ. सू. ३. ३९०) इत्यादिसूत्रेण अतच्प्रत्यय औणादिकः। चित्त्वादन्तोदात्तस्य आमन्त्रितानुदात्तत्वम्। 'अर्तिस्तुसु°' (उ. सू. १. १३७) इत्यादिना मन्प्रत्ययान्तस्य सोमशब्दस्य नित्स्वरः। अलमित्यत्र छान्दसो रेफादेशः। अरंकृतशब्दे समासान्तोदात्तत्वम् (पा. सू. ६. १. २२३) बाधित्वा अव्ययपूर्वपदप्रकृतिस्वरप्राप्तौ (पा. सू. ६. २. २) 'भूषणेऽलम्' (पा. सू. १. ४. ६४) इत्यलंशब्दस्य गतिसंज्ञायां 'गतिकारक°' (पा. सू. ६. २. १३९) इत्यादिना कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते तदपवादत्वेन 'गतिरनन्तरः' (पा. सू. ६. २. ४९) इति पूर्वपदप्रकृतिस्वरत्वम्। निपातत्वादलंशब्द आद्युदात्तः। पाहीत्यत्र पिबादेशाभावश्छान्दसः। श्रुधीत्यत्र 'श्रुशृणु°' (पा. सू. ६. ४. १०२) इत्यादिना हेर्धिभावः। तिङन्तादुत्तरस्य निघातो नास्ति। 'सेर्ह्यपिच्च' (पा. सू. ३. ४. ८७) इति पित्त्वनिषेधादनुदात्ते निवारिते प्रत्ययस्वरः। हवमित्यत्र ह्वयतिधातोः 'बहुलं छन्दसि' (पा. सू. ६. १. ३४) इति संप्रसारणे सति उकारान्तत्वात् 'ऋदोरप्' (पा. सू. ३. ३. ५७) इति अप्प्रत्ययः। तस्य पित्त्वादनुदात्ते सति धातुस्वरः शिष्यते। संहितायां श्रुधीत्यस्य 'अन्येषामपि दृश्यते' (पा. सू. ६. ३. १३७) इति दीर्घः।

**वाय उक्थेभिर्जरन्ते त्वामच्छा जरितारः। सुतसोमा अहर्विदः॥ २॥**

वायो इति। उक्थेभिः। जरन्ते। त्वाम्। अच्छ। जरितारः। सुतऽसोमाः। अहःऽविदः॥ २॥

हे [v]वायो [v]जरितारः स्तोतार ऋत्विग्यजमानाः [v]त्वामच्छ त्वामभिलक्ष्य [v]उक्थेभिः आज्यप्रउगादिशस्त्रैः [v]जरन्ते स्तुवन्ति। कीदृशाः। [v]सुतसोमाः अभिषुतेन सोमेनोपेताः। [v]अहर्विदः। अहःशब्द एकेनाह्ना

---

१. ठ–इत्यत्र। २. ग-घ-च-छ-ण-फ-भ–एन्द्रवायुदेवताकः। ३. ग-घ-च-छ-ण-फ-भ–मैत्रावरुण° ४. ग-घ-च-छ-ण-फ-भ–'अलंकृताः' नास्ति। ५. च-फ–सोमानाम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

निष्पाद्येऽग्निष्टोमादिक्रतौ वैदिकव्यवहारेण प्रसिद्धः। ऋत्वभिज्ञा इत्यर्थः। ' अर्चति गायति ' इत्यादिषु चतुश्चत्वारिंशत्स्वर्चतिकर्मसु धातुषु ' जरते ह्वयति ' ( नि. ३. १४. ८ ) इति पठितम्। स्तुतेरपि अर्चनाविशेषत्वात् औचित्येनात्र स्तुत्यर्थो जरतिधातुः। अच्छशब्दस्य संहितायां ' निपातस्य च ' ( पा. सू. ६. ३. १३६ ) इति दीर्घः। सुतसोमा इत्यत्र बहुव्रीहित्वात् पूर्वपदप्रकृतिस्वरः ( पा. सू. ६. २. १ )। अहर्विद इत्यत्र समासस्वरं ( पा. सू. ६. १. २२३ ) बाधित्वा ' तत्पुरुषे तुल्यार्थ०' ( पा. सु. ६. २. २ ) इत्यादिना द्वितीयापूर्वपदप्रकृतिस्वरे प्राप्ते तदपवादत्वेन ' गतिकारकोपपदात्कृत् ' ( पा. सू. ६. २. १३९ ) इति कृदुत्तरपदप्रकृतिस्वरः॥

वायो तव प्रपृञ्चती धेना जिगाति दाशुषे। उरूची सोमपीतये ॥ ३ ॥

वायो इति। तव। प्रऽपृञ्चती। धेना। जिगाति। दाशुषे। उरूची। सोमऽपीतये ॥ ३ ॥

हे ᵛवायो ᵛतव ᵛधेना वाक् ᵛसोमपीतये सोमपानार्थं ᵛदाशुषे दाश्वांसं दत्तवन्तं यजमानं ᵛजिगाति गच्छति। हे यजमान त्वया दत्तं सोमं पास्यामीत्येवं वायुर्ब्रूते इत्यर्थः। कीदृशी धेना। ᵛप्रपृञ्चती प्रकर्षेण सोमसंपर्कं कुर्वती सोमगुणं वर्णयन्तीत्यर्थः। ᵛउरूची उरून् बहून् यजमानान् गच्छन्ती। ये ये सोमयाजिनस्तान् सर्वान् वर्णयन्तीत्यर्थः॥ प्रपृञ्चतीत्यत्र ' शतुरनुमः०' ( पा. सू. ६. १. १७३ ) इति ङीप् उदात्तः। ' श्लोकः धारा ' इत्यादिषु सप्तपञ्चाशत्सु वाङ्नामसु ' गणः धेना ग्नाः ' ( नि. १. ११. ३९ ) इति पठितम्। ' वर्तते अयते ' इत्यादिषु द्वाविंशाधिकशतसंख्येषु गतिकर्मसु ' गाति जिगाति ' ( नि. २. १४. ११३ ) इति पठितम्। दाशुषे इत्यत्र ' गत्यर्थकर्मणि० ' ( पा. सू. २. ३. १२ ) इति चतुर्थी। उरूचीत्यत्र गौरादित्वेन ( पा. सू. ४. १. ४१ ) ङीषि कृते प्रत्ययस्वरः। सोमपीतये इत्यत्र बहुव्रीहित्वाभावेऽपि व्यत्ययेन पूर्वपदप्रकृतिस्वरः॥

इन्द्रवायू इमे सुता उप प्रयोभिरा गतम्। इन्दवो वामुशन्ति हि ॥ ४ ॥

इन्द्रवायू इति। इमे। सुताः। उप। प्रयःऽभिः। आ। गतम्। इन्दवः। वाम्। उशन्ति। हि ॥४॥

एतस्या ऋच ऐन्द्रवायवग्रहे द्वितीयपुरोनुवाक्यारूपेण विशेषविनियोगः पूर्वमेवोक्तः। हे ᵛइन्द्रवायू भवदर्थम् ᵛइमे सोमाः ᵛसुताः अभिषुताः। तस्मात् युवां ᵛप्रयोभिः अन्नैरस्मभ्यं दातव्यैः सह ᵛउप ᵛआ ᵛगतम्, अस्मत्समीपं प्रति आगच्छतम्। ᵛहि यस्मात् ᵛइन्दवः सोमाः ᵛवां युवाम् ᵛउशन्ति कामयन्ते तस्मात् आगमनमुचितम्॥ इन्द्रवायूशब्दस्यामन्त्रिताद्युदात्तत्वम्। प्रीणयन्ति भोक्तॄनिति प्रयांस्यन्नानि। प्रीञ्धातोरन्तर्भावितण्यर्थात् ( पा. सू. ३. १. २६ ) असुन्प्रत्यये सति निस्स्वरः। गमिधातोर्लोण्मध्यमपुरुषद्विवचने ' बहुलं छन्दसि ' ( पा. सू. २. ४. ७३ ) इति शपो लुकि सति ' अनुदात्तोपदेश०' ( पा. सू. ६. ४. ३७ ) इत्यादिना मकारलोपः। ततो गतमिति भवति। ' उन्दी क्लेदने ' इति धातोः ' उन्देरिच्चादेः ' (उ. सू. १. १२) इति उन्प्रत्ययः। आद्यक्षरस्य इकारादेशः। तत इन्दुशब्दस्य निस्स्वरः। सोमरसस्य द्रवत्वात् क्लेदनं संभवति। युष्मच्छब्दादेशस्य वामित्येतस्य 'अनुदात्तं सर्वमपादादौ' (पा. सू. ८. १. १८ ) इत्यनुदात्तः। उशन्तीत्यस्य निघाते ' हि च ' ( पा. सू. ८. १. ३४ ) इति सूत्रेण प्रतिषिद्धे सति प्रत्ययस्वरः। हिशब्दस्य निपातस्वरः॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वायविन्द्रश्च चेतथः सुतानां वाजिनीवसू। तावा यातमुप द्रवत् ॥ ५ ॥

वायो इति। इन्द्रः। च। चेतथः। सुतानाम्। वाजिनीवसू इति वाजिनीऽवसू। तौ। आ। यातम्। उप। द्रवत्॥ ५ ॥

अत्र चकारेणान्यः समुच्चीयते। संनिहितत्वाद्वायुरेव। हे [v]वायो त्वम् [v]इन्द्रश्च युवामुभौ [v]सुतानाम् अभिषुतान् सोमान् [v]चेतथः जानीथः। यद्वा। अभिषुतानां सोमानां विशेषमित्यध्याहारः। कीदृशौ युवाम्। [v]वाजिनीवसू। वाजिनीशब्दो यद्यप्युषोनामसु पठितस्तथाप्यन्नासंभवान्न गृह्यते। वाजोऽन्नम्। तद्यस्यां हविः संततावस्ति सा वाजिनी। तस्यां वसत इति तौ[2] वाजिनीवसू। आमन्त्रितत्वादनुदात्तः। [v]तौ तथाविधौ युवां [v]द्रवत् क्षिप्रम् [v]उप समीपे [v]आ [v]यातम् आगच्छतम्। षड्विंशतिसंख्याकेषु क्षिप्रनामसु 'नु क्षिप्रं मक्षु द्रवत्' (नि. २. १५. ३) इति पठितम्। तत्र फिट्स्वरः॥ ॥ ३ ॥

वायविन्द्रश्च सुन्वत आ यातमुप निष्कृतम्। मक्षिवित्था धिया नरा ॥ ६ ॥

वायो इति। इन्द्रः। च। सुन्वतः। आ। यातम्। उप। निःऽकृतम्। मक्षु। इत्था। धिया। नरा॥ ६ ॥

हे [v]वायो त्वम् [v]इन्द्रश्च [v]सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य [v]निष्कृतं संस्कृतं संस्कर्तारं वा सोमम् [v]उप [v]आ [v]यातम् आगच्छतम्। [v]नरा हे नरौ पुरुषौ पौरुषेण सामर्थ्येनोपेतौ युवयोरागतयोश्च सतोः [v]धिया अमुना कर्मणा [v]मक्षु त्वरया संस्कारः संपत्स्यते। [v]इत्था सत्यम्॥ वायो इत्यस्य 'आमन्त्रितस्य०' (पा. सू. ६. १. १९८) इति पाष्टिकमाद्युदात्तत्वम्। इन्द्रशब्दः 'ऋज्रेन्द्रा०' (उ. सू. २. १८६) इत्यादिना रन्प्रत्ययान्तत्वेन निपातितो 'ञ्नित्यादिर्नित्यम्' (पा. सू. ६. १. १९७) इत्याद्युदात्तः। चशब्दः 'चादयोऽनुदात्ताः' (फि. सू. ८४) इत्यनुदात्तः। सुन्वत इत्यत्र 'शतुरनुमो नद्यजादी' (पा. सू. ६. १. १७३) इति विभक्तेरुदात्तत्वम्। 'निरित्येष समित्येतस्य स्थाने' (निरु. १२. ७) इति यास्कः। कृतशब्द आदिकर्मणि कर्तरि क्तः (पा. सू. ३. ४. ७१)। संस्कर्तुं प्रवृत्त इत्यर्थः। 'कुगतिप्रादयः' (पा. सू. २. २. १८) इति समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वे प्राप्ते 'थाथघञ्क्ताजबित्रकाणाम्' (पा. सू. ६. २. १४४) इत्यन्तोदात्तः। 'गतिरनन्तरः' (पा. सू. ६. २. ४९)। इति तु निसः उदात्तत्वं न भवति। तद्धि कर्मणि क्ते विहितम् (पा. सू. ६. २. ४८)। निष्करोतीति निष्कृदिति क्विबन्तव्याख्याने तु 'गतिकारकोपपदात्कृत्' (पा. सू. ६. २. १३९) इति ऋकार उदात्तः स्यात्। धिया। 'सावेकाचस्तृतीयादिः०' (पा. सू. ६. १. १६८) इति विभक्तिरुदात्ता। नरा। 'सुपां सुलुक्०' (पा. सू. ७. १. ३९) इत्यादिना संबोधनद्विवचनस्य डादेशः। पदात्परत्वात् 'आमन्त्रितस्य०' (पा. सू. ८. १. १९) इत्याष्टमिको निघातः॥

---

१. ठ–त्वं च इन्द्रश्च। २. च-छ-ण-फ-भ–'तौ' नास्ति। ३. ग-च-फ-भ–निष्कृतं संस्कर्तारम्; छ-ण–निष्कृतं संस्कृतम्। ४. ठ–मक्षु मङ्क्षु त्वरया। ५. च-छ-फ–'स्यात्' इत्यस्यानन्तरं 'धीरिति अप इत्यादि षड्विंशतौ कर्मसु पठितः' इत्यधिकम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'मित्रं हुवे' इति मैत्रावरुणस्तृचो गवामयने आरम्भणीये चतुर्विंशेऽहनि प्रातःसवने मैत्रावरुणस्य स्तोत्रियः। तत्रैव अभिप्लवषडहेऽपि विनियुक्तः। तथा चाश्वलायनेन 'चतुर्विंशे होताऽजनिष्ट' इत्यादिखण्डे 'मित्रं वयं हवामहे मित्रं हुवे पूतदक्षम्' (आश्व. श्रौ. ७. २) इत्यादि सूत्रितम्। तथाह 'अभिप्लवपृष्ठ्याहानि' इति खण्डे परिशिष्टानावापानुद्धृत्य 'मित्रं वयं हवामहे मित्रं हुवे पूतदक्षम्' (आश्व. श्रौ. ७. ५) इति च ॥

मित्रं हुवे पूतदक्षं वरुणं च रिशादसम्। धियं घृताचीं साधन्ता ॥ ७॥

मित्रम्। हुवे। पूतऽदक्षम्। वरुणम्। च। रिशादसम्। धियम्। घृताचीम्। साधन्ता ॥७॥

अहमस्मिन् कर्मणि हविष्प्रदानाय [V]पूतदक्षं पवित्रबलं [V]मित्रं [V]हुवे। तथा [V]रिशादसं रिशानां हिंसकानाम् अदसम् अत्तारं [V]वरुणं च हुवे आह्वयामि। कीदृशौ मित्रावरुणौ। घृतमुदकमञ्चति भूमिं प्रापयति या धीर्वर्षणकर्म तां [V]घृताचीं [V]धियं [V]साधन्ता साधयन्तौ कुर्वन्तौ ॥ मित्रशब्दः पुँल्लिङ्गः प्रातिपदिकस्वरेणान्तोदात्तः। हुवे इति हूयतेः 'बहुलं छन्दसि' (पा. सू. २. ४. ७३) इति शपो लुकि सति 'ह्वः संप्रसारणम्' (पा. सू. ६. १. ३२) इत्यनुवृत्तौ 'बहुलं छन्दसि' (पा. सू. ६.१. ३४) इति संप्रसारणे उवङादेशः। 'तिङ्तिङः' (पा. सू ८. १. २८) इति निघातः। पूतशब्दः प्रत्ययस्वरेणान्तोदात्तः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। वरुणशब्दः 'कृवृदारिभ्य उनन्' (उ. सू.३. ३३३) इति उनन्प्रत्ययान्तो निस्वादाद्युदात्तः। रिशन्ति हिंसन्तीति रिशाः शत्रवः। 'इगुपधज्ञाप्रीकिरः कः' (पा. सू. ३. १. १३५) इति कः। प्रत्ययस्वरेणोदात्तः। तानत्तीति रिशादाः, तम्। 'सर्वधातुभ्योऽसुन्' (उ. सू. ४. ६२८) इत्यसुन्प्रत्यये नित्स्वरेणोत्तरपदमाद्युदात्तम्। कृदुत्तरपदप्रकृतिस्वरेण स एवावशिष्यते। शेषनिघाते सति 'एकादेश उदात्तेनोदात्तः' (पा. सू. ८. २. ५) इति सवर्णदीर्घोऽप्युदात्त एव। 'धीः' इति 'अपः' इत्यादिषड्[1]विंशतौ कर्मनामसु (नि. २.१.२१)पठितः। प्रातिपदिकस्वरेणान्तोदात्तः। घृतमञ्चतीति घृताची। 'ऋत्विग्दधृक्°' (पा. सू. ३. २. ५९) इत्यादिना क्विनि 'अनिदिताम्°' (पा. सू. ६. ४. २४) इति नकारलोपः। 'अञ्चतेश्चोपसंख्यानम्' (पा. सू. ४. १. ६. २) इति ङीप्। 'अचः' (पा. सू. ६. ४. १३८) इत्यकारलोपे 'चौ' (पा. सू. ६. ३. १३८) इति दीर्घत्वम्। घृतशब्दः 'नञ्विषयस्यानिसन्तस्य' (फि. सू. २६) इत्याद्युदात्तं बाधित्वा 'घृतादीनां च' (फि. सू. २१) इत्यन्तोदात्तः। 'समासस्य' (पा. सू. ६. १. २२३) इत्यन्तोदात्तस्यापवादकं 'तत्पुरुषे तुल्यार्थ°' (पा. सू. ६. २. २) इतिपूर्वपदप्रकृतिस्वरं बाधित्वा 'गतिकारकोपपदात्°' (पा. सू. ६. २. १३९) इति उत्तरपदप्रकृतिस्वरेणोदात्तस्य धात्वकारस्य लोपे सति 'अनुदात्तस्य च यत्रोदात्तलोपः' (पा. सू. ६. १. १६१) इति ङीप उदात्तत्वे प्राप्ते 'चौ' (पा. सू. ६. १. २२२) इति पूर्वपदान्तोदात्तत्वम्। साधन्ता। 'राध साध संसिद्धौ' इत्यस्मादन्तर्भावितण्यर्थात् लटः शत्रादेशे (पा. सू. ३. २. १२४) श्लुं बाधित्वा व्यत्ययेन शप्। अदुपदेशत्वादुपरि शतृप्रत्ययस्य लसार्वधातुकानुदात्तत्वम् (पा. सू. ६. १. १८६)। द्वितीयाद्विवचनस्य शपश्च 'अनुदात्तौ सुप्पितौ' (पा. सू. ३. १. ४) इत्यनुदात्तत्वे[3] 'धातोः' (पा. सू. ६. १. १६२) इति धातुस्वर एव शिष्यते। 'सुपां सुलुक्°' (पा. सू. ७. १. ३९) इत्यादिना विभक्तेराकारादेशः ॥

---

१. ठ-तथा २. त-थ–षड्विंशति। ३. ग-घ-छ-ण-भ–इत्यनुदात्तत्वम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ऋतेन मित्रावरुणावृतावृधावृतस्पृशा । क्रतुं बृहन्तमाशाथे ॥ ८ ॥

ऋतेन । मित्रावरुणौ । ऋतऽवृधौ । ऋतऽस्पृशा । क्रतुम् । बृहन्तम् । आशाथे इति ॥ ८ ॥

हे [v]मित्रावरुणौ युवां [v]क्रतुं प्रवर्तमानमिमं सोमयागम् [v]आशाथे आनशाथे व्याप्तवन्तौ । केन निमित्तेन । [v]ऋतेन अवश्यंभावितया सत्येन फलेन । अस्मभ्यं फलं दातुमित्यर्थः । कीदृशौ युवाम् । [v]ऋतावृधौ । ' ऋतमित्युदकनाम ' ( निरु. २. २५ ), ' सत्यं वा यज्ञं वा ' ( निरु. ४. १९ ) इति यास्कः । उदकादीनामन्यतमस्य वर्धयितारौ । अत एव [v]ऋतस्पृशा उदकादीन् स्पृशन्तौ । कीदृशं क्रतुम् । [v]बृहन्तम् अङ्गैरुपाङ्गैश्च अतिप्रौढम् ॥ ऋतशब्दो घृतादित्वादन्तोदात्तः । मित्रावरुणावित्यत्र मित्रश्च वरुणश्चेति मित्रावरुणौ । ' देवताद्वन्द्वे च ' ( पा. सू. ६. ३. २६ ) इति पूर्वपदस्य आनङादेशः । ऋतस्य वर्धयितारौ इत्यर्थेऽन्तर्भावितण्यर्थात् वृधेः क्विप् । ' अन्येषामपि दृश्यते ' ( पा. सू. ६. ३. १३७ ) इति पूर्वपदस्य दीर्घः । ऋतस्पृशा । ' सुपां सुलुक्° ' ( पा. सू. ७. १. ३९ ) इति डादेशः । मित्रावरुणावित्याद्यामन्त्रितत्रयस्य स्वस्वपूर्वपदात् परत्वात् ' आमन्त्रितस्य° ' ( पा. सू. ८. १. १९ ) इति आष्टमिको निघातः । ननु ऋतेन इत्येतस्य ' सुबामन्त्रिते पराङ्गवत्स्वरे ' ( पा. सू. २. १. २ ) इति पराङ्गवद्भावेन आमन्त्रितानुप्रवेशात्[1] पादादित्वेन पदादपरत्वेन वा आष्टमिकनिघाताभावात् ' आमन्त्रितस्य च ' ( पा. सू. ६. १. १९८ ) इत्याद्युदात्तेन भवितव्यमिति चेत्, न । पराङ्गवद्भावस्य सुबामन्त्रिताश्रयत्वेन पदविधित्वात् ' समर्थः पदविधिः ' ( पा. सू. २. १. १ ) इति नियमात् । इह च ऋतेन मित्रावरुणौ इत्यनयोः आशाथे इति आख्यातेनैवान्वयेन परस्परमसामर्थ्यात् । यत्र पुनः परस्परान्वयेन सामर्थ्यं तत्र पराङ्गवद्भावात्[2] पादादेः[3] आद्युदात्तत्वं भवत्येव । यथा ' मरुतां पितस्तदहं गृणामि ' इति । ' मृग्रोरुतिः ' ( उ. सू. १. ९४ ) इति उतिप्रत्ययान्तत्वेन ' पृश्नियै वै पयसो मरुतो जाताः ' ( तै. सं. २. २. ११. ४ ) इत्यादौ अन्तोदात्तोऽपि हि मरुच्छब्दो ' मरुतां पितः ' इत्यत्र सामर्थ्यात् पराङ्गवद्भावादेव आद्युदात्तो जातः । प्रकृते तु ऋतेन इत्यस्यासामर्थ्यादेव न पराङ्गवद्भाव इति । ऋतावृधावित्यत्र द्वितीयामन्त्रितस्य निघाते कर्तव्ये ' आमन्त्रितं पूर्वमविद्यमानवत् ' ( पा. सू. ८. १. ७२ ) इति प्रथमामन्त्रितेन अविद्यमानवद्भवितव्यमिति चेत्, भवतु । अत एव तस्याव्यवधायकत्वात् ऋतेन इति प्रथमपदात् परत्वेनैव द्वितीयामन्त्रितं निहनिष्यते । यथा ' इमं मे गङ्गे यमुने ' ( ऋ. सं. १०. ७५. ५ ) इत्यादौ गङ्गेशब्दस्याविद्यमानवद्भावेऽपि तस्याव्यवधायकत्वादेव मे इत्येतदेव पदमुपजीव्य यमुनेशब्दस्य निघातः । किं च प्रकृते मित्रावरुणौ इत्यामन्त्रितं सामान्यवचनम् । तस्य विशेषणतया विशेषवचनम् ऋतावृधाविति[4] । अतः ' नामन्त्रिते समानाधिकरणे सामान्यवचनम् ' ( पा. सू. ८. १. ७३ ) इति पूर्वस्याविद्यमानवद्भावप्रतिषेधादपि निरन्तरायो द्वितीयस्य निघातः ॥ ननु एवमपि ' °अपादादौ ' ( पा. सू. ८. १. १८ ) इत्यनुवृत्तेर्ऋतावृधेत्यस्य द्वितीयपादादित्वान्न भवितव्यं निघातेन । अत एव हि ' इमं मे गङ्गे ' इत्यत्र शुतुद्रिपदस्य पदात् परस्य आमन्त्रितस्यापि पादादित्वादेव अनिघातादाद्युदात्तत्वं जातम् । तद्वदत्रापि भवितव्यं वक्तव्यो वा[5] विशेष इति ॥ उच्यते—मित्रावरुणपदस्य ' सुबामन्त्रिते° ' ( पा. सू. २. १. २ ) इति पराङ्गवद्भावेन परानुप्रवेशादेव ऋतावृधेत्यस्य न पादादित्वम् । शुतुद्रिपदमपि तर्ह्येवमेव पूर्वस्य सरस्वतिपदस्य पराङ्गवद्भावेन न पादादिरिति निहन्येत इति चेत्, न ।

---

१. ठ–उपेतम् । २. छ-ण-भ–°नुवेशात् । ३. च-छ-फ–च । ४. च-छ-ण-फ-भ–पदादेः । ५. ग-घ-च-छ-ण-त-फ-भ–ऋतावृधेति । ६. च-ण-भ–' आमन्त्रितस्य ' नास्ति । ७. छ-ण–' वा ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पराङ्गवद्भावस्तावत् सुबन्तमामन्त्रितं चाश्रित्य प्रवृत्तेः[1] पदविधिः । अतस्तयोः सत्येव परस्परान्वये पराङ्गवद्भावेन भवितव्यं ' समर्थः पदविधिः ' ( पा. सू. २. १. १ ) इति नियमात् । श्रुतुद्रिसरस्वतिपदयोश्च न परस्परेणान्वयः किंतु सचत इत्यनेन इत्यसामर्थ्यात् न पराङ्गवद्भावः । प्रकृते तु मित्रावरुणौ ऋताबृधौ इति द्वयोरपि सामानाधिकरण्येन परस्परान्वयादस्तिसामर्थ्यमिति भवितव्यं पराङ्गवद्भावेन । यथा ' मरुतां पितः' इत्यत्रेति विशेषः ॥ ननु अत एव तर्हि मित्रावरुणपदस्य पराङ्गवद्भावेन पादादित्वात् ' अपादादौ ' इति पर्युदासादामन्त्रितनिघातो न स्यादिति चेत्, न । पूर्वं सुबन्तं परं चामन्त्रितमाश्रित्य यः स्वरः प्रवर्तते तत्र ' सुबामन्त्रिते° ' इति पराङ्गवद्भावः । भवति चैवंविध ऋताबृधपदनिघात इति । तत्र पूर्वस्य पराङ्गवद्भावेनापादादित्वात् स प्रवर्तते । मित्रावरुणपदनिघातस्तु पूर्वमेव पदमुपजीवति न परमामन्त्रितमिति न पराङ्गवद्भावः ॥ ननु पराङ्गवद्भाववन्निघातोऽपि पदविधिरिति ऋतेन इत्यनेनासामर्थ्यात् ततः पदात्परस्य मित्रावरुणपदस्य न स्यात् इति चेत्, न। 'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः' ( पा. सू. २. १. १. ११) इति निघाते पदविधावपि समानवाक्यत्वमेव पर्याप्तं, न पराङ्गवद्भाववत् परस्परान्वयोऽपीत्यलम् । ऋतुम् । ' कृजः कतुः ' ( उ. सू. १. ७७ )। प्रत्ययस्वरेणादिरुदात्तः । आशाथे आनशाथे । ' छन्दसि लुङ्लङ्लिटः ' ( पा. सू. ३. ४. ६ ) इति वर्तमाने लिट् । नुडभावश्छान्दसः ॥

कवी नो मित्रावरुणा तुविजाता उरुक्षया । दक्षं दधाते अपसम् ॥ ९ ॥

कवी इति । नः । मित्रावरुणा । तुविऽजातौ । उरुऽक्षया । दक्षम् । दधाते इति । अपसम् ॥९॥

active Intellect

मित्रावरुणावेतौ देवौ [V]नः अस्माकं [V]दक्षं बलम् [V]अपसं कर्म च [V]दधाते पोषयतः । कीदृशौ । [V]कवी मेधाविनौ । [V]तुविजातौ बहूनामुपकारकतया समुत्पन्नौ । [V]उरुक्षया बहुनिवासौ । 'विप्रः धीरः' इत्यादिषु चतुर्विंशतिसंख्याकेषु मेधाविनामसु ' कविः मनीषी ' ( नि. ३. १५. १० ) इति पठितम् । ' उरु तुवि ' (नि. ३. १. १, २) इत्येतौ शब्दौ द्वादशसु बहुनामसु पठितौ । ' ओजः पाजः ' इत्यादिषु अष्टाविंशतिसंख्याकेषु बलनामसु ' दक्षः वीळु ' ( नि. २. ९. १३ ) इति पठितम् । अपःशब्दः षड्विंशतिसंख्याकेषु कर्मनामसु पठितः ( नि. २. १. १ ) ॥ मित्रावरुणा । मित्रशब्दः प्रातिपदिकस्वरेणान्तोदात्तः । वरुणशब्दो नित्स्वरेणाद्युदात्तः । द्वन्द्वे ' देवताद्वन्द्वे च ' ( पा. सू. ६. २. १४१ ) इत्युभौ अवशिष्येते । तुविजातौ । बहूनामुपकारकतया तत्संबन्धित्वेन जाताविति षष्ठीसमासे समासान्तोदात्तत्वम् । चतुर्थी समासे हि ' क्ते च ' ( पा. सू. ६. २. ४५ ) इति पूर्वपदप्रकृतिस्वरः स्यात् । उरूणां बहूनां क्षयौ उरुक्षयौ । ' क्षि निवासगत्योः' इति धातोः क्षियन्त्यस्मिन्निति क्षयः । अधिकरणे ' एरच् ' ( पा. सू. ३. ३. ५६ ) इत्यच्प्रत्ययान्तस्य ' चितः ' ( पा. सू. ६. १. १६३ ) इत्यन्तोदात्तत्वे प्राप्ते ' क्षयो निवासे ' ( पा. सू. ६. १. २०१ ) इत्याद्युदात्तत्वं विहितम् । समासे तु ' समासस्य ' ( पा. सू. ६. १. २२३ ) इत्यन्तोदात्तत्वं बाधित्वा कृदुत्तरपदप्रकृतिस्वरेण प्राप्तमुत्तरपदाद्युदात्तत्वं यद्यपि थाथादिस्वरेणान्तोदात्तेन[2] बाध्यते, तथापि ' परादिश्छन्दसि बहुलम् ' ( पा. सू. ६. २. १९९ ) इत्युत्तरपदाद्युदात्तत्वं द्रष्टव्यम् । दक्षो दक्षतेरुत्साहकर्मणो घञ् । ञित्वादाद्युदात्तः । आप्यते फलमनेन इति अपः कर्म । ' आपः कर्माख्यायां ह्रस्वो नुट्च वा ' ( उ. सू. ४. ६४७ ) इत्यसुनन्तस्य ' अपसस्पारे ' ( ऋ. सं. ६. ६९. १ ) इत्यादौ नित्त्वादाद्युदात्तस्यापि अपःशब्दस्य अत्र व्यत्ययेन प्रत्ययाद्युदात्तत्वम् ॥ ॥ ४ ॥

---

१. च-त-थ-फ–प्रवृत्तः । २. ठ–अन्तोदात्तत्वेन ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' अश्विना ' इति द्वादशर्चं तृतीयं सूक्तम् । तत्र आश्विनस्तृचः प्रातरनुवाकस्य आश्विने क्रतौ विनियुक्तः । तथा च सूत्रितम्–' अथाश्विन एषो उषाः प्रातर्युजेति चतस्रोऽश्विना यज्वरीरिषः ' ( आश्व. श्रौ. ४. १५ ) इति ।

**अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती । पुरुभुजा चनस्यतम् ॥ १ ॥**

अश्विना । यज्वरीः । इषः । द्रवत्पाणी इति द्रवत्ऽपाणी । शुभः । पती इति । पुरुऽभुजा । चनस्यतम् ॥ १ ॥

हे अश्विनौ युवाम् [v]इषः हविर्लक्षणान्यन्नानि [v]चनस्यतम् इच्छतं भुञ्जाथामित्यर्थः । यद्यपि चनः-शब्दोऽन्नवाची तथापि इषः इत्यनेन सह नास्ति पुनरुक्तिदोषः, इच्छामुपलक्षयितुं प्रयुक्तत्वात् । ' वक्तव्यमुवाच', ' समूलकाषं कषति ' इत्यादौ यथा पुनरुक्तत्यभावस्तद्वत् । कीदृशीरिषः । [v]यज्वरीः यागनिष्पादिकाः । कीदृशावश्विनौ । [v]द्रवत्पाणी हविर्ग्रहणाय द्रवद्भ्यां धावद्भ्यां पाणिभ्यामुपेतौ । [v]शुभस्पती शोभनस्य कर्मणः पालकौ । [v]पुरुभुजा विस्तीर्णभुजौ[1] बहुभोजिनौ वा[2] ॥ अश्विना । ' आमन्त्रितस्य° ' ( पा. सू. ६. १. १९८ ) इति षाष्टिकमाद्युदात्तत्वम् । यज्वरीः । यागकरणानामप्यन्नानाम् ' असिश्छिनत्ति ' इतिवत् स्वव्यापारे कर्तृत्वविवक्षया ' सुयजोर्ङ्वनिप् ' ( पा. सू. ३. २. १०३ ) इति ङ्वनिप्प्रत्ययः । ' वनो र च ' ( पा. सू. ४. १. ७ ) इति ङीप् । तत्संनियोगेन रेफादेशः । प्रत्ययद्वयस्य ' अनुदात्तौ सुप्पितौ ' ( पा. सू. ३. १. ४ ) इत्यनुदात्तत्वात् धातुस्वर एवावशिष्यते । इषःशब्दे शसोऽनुदात्तत्वात् प्रातिपदिकस्वर एव शिष्यते । द्रवन्तौ धावन्तौ पाणी ययोस्तयोः संबोधनं द्रवत्पाणी इति । तस्यामन्त्रिताद्युदात्तत्वं न पुनराष्टमिको निघातः ' °अपादादौ ' इति प्रतिषेधात् । इषः इति पूर्वपदस्य ' सुबामन्त्रिते° ' ( पा. सू. २. १. २ ) इति पराङ्गवद्भावेन ' मित्रावरुणावृतावृधौ ' इतिवत् अपादादित्वमिति चेत्, न । तत्र सामानाधिकरण्येन परस्परान्वयात् । इह तु इषः द्रवत्पाणी इत्यनयोः सरस्वतिश्रुतुद्रिपदवत् असामर्थ्येन प्रयुक्तत्वात् । शुभः इति ' शुभ शुम्भ दीप्तौ ' इत्यस्य संपदादित्वात् भावे क्विबन्तस्य षष्ठ्येकवचनम् । ' षष्ठ्याः पतिपुत्र° ' ( पा. सू. ८. ३. ५३ ) इति विसर्जनीयस्य सत्वम् । तस्य पती इत्यामन्त्रिते परतः पराङ्गवद्भावात् आमन्त्रिताद्युदात्तत्वम् । न पुनराष्टमिको निघातः । तस्मिन् कर्तव्ये द्रवत्पाणी इति पूर्वस्यामन्त्रितस्य ' आमन्त्रितं पूर्वमविद्यमानवत् ' ( पा. सू. ८. १. ७२ ) इत्यविद्यमानवद्भावेन पादादित्वात् ' °अपादादौ ' इति प्रतिषेधात् ॥ ननु ' मित्रावरुणावृतावृधौ ' इतिवत् ' नामन्त्रिते समानाधिकरणे° ' ( पा. सू. ८. १. ७३ ) इत्यविद्यमानवद्भाव-प्रतिषेधेन भवितव्यमिति चेत्, न । मित्रावरुणपदं हि सामान्यवचनमिति युक्तः तस्याविद्यमान-वत्त्वप्रतिषेधः । द्रवत्पाणी पदं तु न तथेति वैषम्यात् । पुरुभुजा पुरू विस्तीर्णौ भुजौ ययोस्तौ । आमन्त्रिताद्युदात्तत्वम् । ' सुपां सुलुक्° ' ( पा. सू. ७. १. ३९ ) इति डादेशः । पुरु बहु भुञ्जाते इति वा । चनस्यतम् इत्यत्र ' चायतेरन्ने ह्रस्वश्च ' (उ. सू. ४.६३९) इति ' चायृ पूजानिशामनयोः' इत्यस्य असुन्प्रत्यये आकारस्य ह्रस्वे चानुकृष्टे नुडागमे च ( उ. सू. ४. ६३६) ' लोपो व्योर्वलि ' ( पा. सू. ६. १. ६६ ) इति यकारलोपे चनःशब्दोऽन्ननामसु पठितः ( निरु० ६. १६ )। तत् आत्मनः इच्छतीति ' सुप आत्मनः क्यच् ' (पा. सू. ३. १. ८ )। ' सनाद्यन्ताः° ' ( पा. सू. ३. १. ३२ )

---

१. ग-य–बहुभोजिनौ । २. ग-घ-छ-ण-य–प्रत्ययत्रयस्य ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति धातुत्वात् लोण्मध्यमद्विवचनम्। क्यचः प्रत्ययस्वरेणोदात्तत्वम्। शपा एकादेशे कृते 'एकादेश उदात्तेनोदात्तः' (पा. सू. ८. २. ५) इत्युदात्तः। उपर्याख्यातस्य लसार्वधातुकानुदात्तत्वे स्वरितत्वम्। न च 'तिङ्ङतिङः' (पा. सू. ८. १. २८) इति निघातः। पूर्वस्यामन्त्रितस्याविद्यमानवद्भावेन पदादपरत्वात् पादादित्वाद्वा तदप्राप्तेः॥

अश्विना पुरुदंससा नरा शवीरया धिया। धिष्ण्या वनतं गिरः॥ २॥

अश्विना। पुरुऽदंससा। नरा। शवीरया। धिया। धिष्ण्या। वनतम्। गिरः॥ २॥

vअश्विना हे अश्विनौ युवां vगिरः अस्मदीयाः स्तुतीः vधिया आदरयुक्तया बुद्ध्या vवनतं संभजतं स्वीकुरुतम्। कीदृशावश्विनौ। vपुरुदंससा बहुकर्माणौ। षड्विंशतिसंख्याकेषु कर्मनामसु 'दंसः' (नि. २. १. ३) इति पठितम्। vनरा नेतारौ। vधिष्ण्या धार्ष्ट्ययुक्तौ बुद्धिमन्तौ वा। कीदृश्या धिया। vशवीरया गतियुक्तया अप्रतिहतप्रसरयेत्यर्थः॥ अश्विना इत्याद्यामन्त्रितचतुष्टयस्य षाष्ठिकमामन्त्रिताद्युदात्तत्वम्। पादादित्वात् न आष्टमिको निघातः। पुरुदंससा इत्यपि हि पादादिरेव 'आमन्त्रितं पूर्वमविद्यमानवत्' (पा. सू. ८. १. ७२) इति पूर्वस्याविद्यमानवत्त्वात्। 'नामन्त्रिते समानाधिकरणे०' (पा. सू. ८. १. ७३) इति पूर्वस्य सामान्यवचनत्वेन अस्य विशेषवचनत्वेन नाविद्यमानवत्त्वमिति चेत्, न। अश्विशब्दवत् पुरुदंसःशब्दस्यापि अश्विनोरेव रूढ्या प्रयुज्यमानतया सामान्यशब्दत्वात्। सामान्यवचनं नाविद्यमानवदित्युक्तेऽर्थात् परस्य विशेषवचनत्वावगमात्। उभयोः सामान्यवचनत्वे पर्यायत्वेन पौनरुक्त्यात् सहाप्रयोग इति चेत्, न। गुणविशेषसंकीर्तनवत् प्रसिद्धानेकनामविशेषसंबन्धसंकीर्तनस्यापि स्तुत्युपयोगेन सप्रयोजनत्वात्; निष्प्रयोजनपुनर्वचनस्यैव पुनरुक्तत्वात्। अश्विपुरुदंसःशब्दयोरेकार्थवृत्तित्वेऽपि पर्यायत्वादेव प्रवृत्तिनिमित्तभेदाभावेन असामानाधिकरण्यादपि नाविद्यमानवत्त्वप्रतिषेधः। भिन्नप्रवृत्तिनिमित्तानामेव ह्येकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम्। अश्विशब्दस्याश्वसंबन्धो निमित्तं पुरुदंसःशब्दस्य तु बहुकर्मसंबन्ध इति प्रवृत्तिनिमित्तभेद इति चेत्, न। तद्धि द्वयं व्युत्पत्तिमात्रनिमित्तं न प्रवृत्तिनिमित्तम्। व्युत्पत्तिनिमित्तभेदमात्रेणापि सामानाधिकरण्याभिधाने वृक्षमहीरुहशब्दयोरपि तथात्वप्रसङ्गः। अत एव हि 'इडे रन्तेऽदिते सरस्वति प्रिये प्रेयसि महि विश्रुत्येतानि ते अग्नये नामानि' (तै. सं. ७. १. ६. ८) इत्यत्र सहस्रतमीप्रशंसोपयोगित्वेन इडादिशब्दानाम् 'एतानि ते अग्नये नामानि' इति वचनेन पर्यायाणामपि अनेकविशिष्टनामसंबन्धनिबन्धनस्तुत्यर्थत्वेनैव सहप्रयोगः। स्तुत्युपयोगेनैव व्युत्पत्तिनिमित्तभेदविवक्षायामपि पर्यायत्वेनासामानाधिकरण्यादेव 'नामन्त्रिते०' इति निषेधाभावात् 'आमन्त्रितं पूर्वमविद्यमानवत्' इति पूर्वपूर्वस्याविद्यमानवत्त्वात् सर्वेषां षाष्ठिकमाद्युदात्तत्वम्। तद्वत् प्रकृतेऽपि। 'कृशपृकटिपटिशौटिभ्य ईरन्' (उ. सू. ४. ४७०) इत्यतः 'ईरन्' इत्यनुवृत्तौ 'बहुलवचनादन्यत्रापि' इत्यनेन 'शु गतौ' इति धातोरीरन्प्रत्यये कृते सति नित्त्वात् शवीरयाशब्द आद्युदात्तः। धियेत्यत्र 'सावेकाचः०' (पा. सू. ६. १. १६८) इति विभक्तिरुदात्ता। वनतमित्यत्र शपः पित्त्वात् लोण्मध्यमद्विवचनस्य लसार्वधातुकत्वाच्च 'वन षण संभक्तौ' इति धातूदात्तत्वमेव शिष्यते। न च 'तिङ्ङतिङः' (पा. सू. ८. १. २८) इति निघातः, पूर्वामन्त्रितस्याविद्यमानवत्त्वेन पादादित्वात्। गिरः। सुपोऽनुदात्तत्वे प्रातिपदिकस्वरः शिष्यते॥

---

१. च-छ-फ–पूर्वस्या०।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः । आ यातं रुद्रवर्तनी ॥ ३ ॥

दस्रा । युवाकवः । सुताः । नासत्या । वृक्तऽबर्हिषः । आ । यातम् । रुद्रवर्तनी इति रुद्रऽवर्तनी ॥ ३ ॥

अत्र अश्विना इत्यनुवर्तते। हे अश्विनौ [v]आ [v]यातम् अस्मिन् कर्मण्यागच्छतम्। किमर्थमिति तदुच्यते। [v]सुताः युष्मदर्थं सोमा अभिषुताः तान् स्वीकर्तुमिति शेषः। कीदृशावश्विनौ। [v]दस्रा दस्रौ शत्रूणामुपक्षपयितारौ। यद्वा। देववैद्यत्वेन रोगाणामुपक्षपयितारौ। ' अश्विनौ वै देवानां भिषजौ ' (ऐ.ब्रा. १. १८) इति श्रुतेः। [v]नासत्या असत्यमनृतभाषणं तद्रहितौ। अत्र यास्कः—' सत्यावेव नासत्यावित्यौर्णवाभः। सत्यस्य प्रणेतारावित्याग्रायणः ' ( निरु. ६. १३ ) इति। [v]रुद्रवर्तनी। रुद्रशब्दस्य रौद्रं प्रवृत्तिनिमित्तं ' यदरोदीत्तद्रुद्रस्य रुद्रत्वम् ' ( तै. सं. १. ५. १. १ ) इति तैत्तिरीयाः। ' तद्यद्रोदयन्ति तस्माद्रुद्राः ' इति वाजसनेयिनः। रुद्राणां शत्रुरोदनकारिणां शूरभटानां वर्तनिर्मार्गो धाटीरूपो ययोस्तौ रुद्रवर्तनी। यथा शूरा धाटीमुखेन शत्रून् रोदयन्ति तद्वदेतावित्यर्थः। [v]युवाकवः इत्यभिषुतसोमानां विशेषणम्। वसतीवरीभिरेकधनाभिश्चाद्भिर्मिश्रिता इत्यर्थः। [v]वृक्तबर्हिषः। वृक्तानि मूलैर्वर्जितानि बर्हींष्यास्तरणरूपाणि येषां सोमानां ते वृक्तबर्हिषः। यद्वा। ' भरताः ' इत्यादिष्वष्टसु ऋत्विङ्नामसु ' वृक्तबर्हिषः ' ( नि. ३. १८. ४ ) इति। तदानीं तृतीयार्थे प्रथमा। ऋत्विग्भिरभिषुता इत्यन्वयः॥ दस्रा। ' आमन्त्रितस्य° ' ( पा. सू. ६. १. १९८ ) इत्याद्युदात्तः। युवाकवः। ' यु मिश्रणे '। युवन्ति मिश्रीभवन्ति वसतीवरीप्रभृतिभिः श्रयणद्रव्यैरिति युवाकवः। कटिकुट्यादिषु ( उ. सू. ३. ३५७ ) अगणितस्यापि यौतेः बहुलग्रहणात् काकुप्रत्ययः। तस्य कित्त्वेन गुणाभावादुवङादेशः। प्रत्ययस्वरेण आकार उदात्तः। न विद्यतेऽसत्यमनयोरिति नासत्यौ। ' नञ्राण्नपान्नवेदानासत्या° ' ( पा. सू. ६. ३. ७५ ) इत्यादिना प्रकृतिवद्भावात् नञो नलोपाभावः। पादादित्वेनानिघातादामन्त्रिताद्युदात्तत्वम्। वृक्तबर्हिषः। वृक्तं मूलैर्वर्जितं बर्हिरास्तीर्णं येषां सोमानां ते वृक्तबर्हिषः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण क्तप्रत्ययस्वर एव शिष्यते। आ इत्यत्र ' उपसर्गाश्चाभिवर्जम् ' ( फि. सू. ८१ ) इत्युदात्तः। रुद्रवर्तनी। ' आमन्त्रितस्य च ' ( पा. सू. ८.१.१९ ) इत्यामन्त्रितनिघातः॥

इन्द्रा याहि चित्रभानो सुता इमे त्वायवः । अण्वीभिस्तना पूतासः ॥ ४ ॥

इन्द्र । आ । याहि । चित्रभानो इति चित्रऽभानो । सुताः । इमे । त्वाऽयवः । अण्वीभिः । तना । पूतासः ॥ ४ ॥

[v]चित्रभानो चिलदीप्ते हे [v]इन्द्र अस्मिन् कर्मणि [v]आ [v]याहि आगच्छ। [v]सुताः अभिषुताः [v]इमे सोमाः [v]त्वायवः त्वां कामयमाना वर्तन्ते। [v]अण्वीभिः। ' अयुवः ' इत्यादिषु द्वाविंशतिसंख्याकेष्वङ्गुलिनामसु ' अण्व्यः ' ( नि. २. ५. २ ) इति पठितम्। ऋत्विजामङ्गुलिभिः सुता इत्यन्वयः। किंच एते सोमाः [v]तना नित्यं [v]पूतासः पूताः शुद्धा दशापवित्रेण बहुधा शोधितत्वात्। इन्द्रशब्दं यास्को बहुधा निर्वक्ति—' इन्द्र इरां दृणातीति वेरां ददातीति वेरां दधातीति वेरां दारयतीति वेरां धारयतीति वेन्दवे

---

१. च-छ-त-थ–°मुपक्षायितारौ। २. च-छ-त-फ–°मुपक्षयितारौ। ३. च-छ-त-फ–' बहुव्रीहौ ' नास्ति। ४. ठ–विचित्रदीप्ते। ५. ठ-प–' बहुधा ' नास्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

द्रवतीति वेन्दौ रमत इति वेन्धे भूतानीति वा तद्यदेनं प्राणैः समैन्धंस्तदिंद्रस्येन्द्रत्वमिति विज्ञायत इदंकरणादिंद्रयाग्रायण इदंदर्शनादिंद्र्यौपमन्यव इन्दतेर्वैश्वर्यकर्मण इन्धेर्भूतानां दारयिता वा द्रावयिता वादरयिता च यज्वनाम्' (निरु. १०. ८) इति। अस्यायमर्थः। 'दृ विदारणे' इति धातुः। इरामन्नमुद्दिश्य तन्निष्पादकजलसिद्ध्यर्थं द्दणाति मेघं विदीर्णं करोतीतीन्द्रः। 'डुदाञ् दाने' इति धातुः। इरामन्नं वृष्टिनिष्पादनेन ददातीतीन्द्रः। 'धाञ् पोषणार्थः'। इरामन्नं[1] तृप्तिकारणं[1] सस्यं दधाति जलप्रदानेन पुष्णातीतीन्द्रः। इरामुत्पादयितुं कर्षकमुखेन भूमिं विदारयतीतीन्द्रः। पूर्वोक्तपोषणमुखेनेरां धारयति विनाशराहित्येन स्थापयतीतीन्द्रः। इन्दुः सोमो[2] वल्लीरसः[2]। तदर्थं यागभूमौ द्रवति धावतीतीन्द्रः। इन्दौ यथोक्ते सोमे रमते क्रीडतीतीन्द्रः। 'ञिइन्धी दीप्तौ' इति धातुः। भूतानि प्राणिदेहान् इन्धे जीवचैतन्यरूपेणान्तः प्रविश्य दीपयतीतीन्द्रः। एतदेवाभिप्रेत्य वाजसनेयिन आमनन्ति—'इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन्पुरुषः। तं वा एतमिन्धं सन्तमिन्द्र इत्याचक्षते। परोक्षेण परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः' (बृ. उ. ४. २. २) इति। 'तद्यत्' इत्यादिकं ब्राह्मणान्तरवाक्यम्। तत्तत्र[3] इन्द्रविषये निर्वचनमुच्यते इति शेषः। यद्यस्मात् कारणादेनं परमात्मरूपमिन्द्रं देवं प्राणैः वाक्चक्षुरादीन्द्रियैः प्राणापानादिवायुभिश्च सहितं समैन्धन् उपासका ध्यानेन सम्यक् प्रकाशितवन्तः, तत् तस्मात् कारणात् इन्द्रनाम संपन्नम्। अस्मिन् पक्षे इध्यते दीप्यते इति कर्मणि व्युत्पत्तिः। आग्रायणनामको मुनिः 'इदंकरणादिन्द्रः' इति निर्वचनं मन्यते। इन्द्रो हि परमात्मरूपेणेदं जगत्करोति। औपमन्यवनामको मुनिरिदंदर्शनादिन्द्र इति निर्वचनमाह। इदम् इत्यापरोक्ष्यमुच्यते विवेकेन हि परमात्मानमापरोक्ष्येण पश्यति। एतदेवाभिप्रेत्य आरण्यकाण्डे समाम्नायते—'स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमितीदँ[4]। तस्मादिदन्द्रो नामेदन्द्रो ह वै नाम तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः' (ऐ. आ. २. ४. ३) इति। 'इदि परमैश्वर्ये' इति धातुः। स्वमायया जगद्रूपत्वं परमैश्वर्यम्। तद्योगादिन्द्रः। अनेनाभिप्रायेण श्रूयते—'इन्द्रो मायाभिः पुरुरूप ईयते' (ऋ. सं. ६. ४७. १८) इति। इनशब्दस्येश्वरवाचकस्य अकारलोप सति नकारान्तम् इन् इति पदं भवति। 'दृ भये' इति धातुः। स च परमेश्वरः शत्रूणां दारयिता भीषयितेतीन्द्रः। 'द्रु गतौ' इति धातुः। शत्रूणां द्रावयिता पलायनं प्रापयितेतीन्द्रः। यज्वनां यागानुष्ठायिनामादरयिता भयस्य परिहर्ता। एवमेतानि निर्वचनानि द्रष्टव्यानीति॥ इन्द्र इत्यत्र आमन्त्रिताद्युदात्तत्वम्। आ इत्यत्र निपातत्वेनाद्युदात्तः[4]। चित्रभानो। पदात् परत्वादामन्त्रितनिघातः। त्वामिच्छन्तीत्यर्थे युष्मच्छब्दात् 'सुप आत्मनः क्यच्' (पा. सू. ३.१. ८)। 'प्रत्ययोत्तरपदयोश्च' (पा. सू. ७. २. ९८) इति मपर्यन्तस्यत्वादेशः। 'क्याच्छन्दसि' (पा. सू. ३. २. १७०) इति क्यजन्तात् उप्रत्ययः। त्वद्यवे इति प्राप्ते 'युष्मदस्मदोरनादेशे' (पा. सू. ७. २. ८६) इत्यविभक्तावपि हलादौ व्यत्ययेन आत्वम्। उकारः प्रत्ययस्वरेणाद्युदात्तः। अणुशब्दः सौक्ष्म्यवाचकः तद्योगात् प्रकृतेऽङ्गुलीषु वर्तते। 'वोतो गुणवचनात्' (पा. सू. ४. १. ४४) इति ङीषि प्राप्ते व्यत्ययेन ङीन्। नित्त्वादाद्युदात्तः। तना इत्ययं निपातो नित्यमित्यर्थे निपातत्वादाद्युदात्तः। पूतासः। 'आज्ञसेरसुक्' (पा. सू. ७. १. ५०) इत्यसुक्॥

---

१. ठ—इरामन्नकारणम्। २. त—सोमवल्लीरसः। ३. ठ—तच्च। ४. च-छ-त-थ-फ-°द्युदात्तत्वम्। ५. घ-च-ञ-त-थ—त्वत्यव; छ-ण-य—त्वंयव।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः । उप ब्रह्माणि वाघतः ॥ ५ ॥

इन्द्र । आ । याहि । धिया । इषितः । विप्रऽजूतः । सुतऽवतः ।
उप । ब्रह्माणि । वाघतः ॥ ५ ॥

हे [V]इन्द्र त्वम् [V]आ [V]याहि अस्मिन् कर्मण्यागच्छ । किमर्थम् । [V]वाघतः ऋत्विजः [V]ब्रह्माणि वेदरूपाणि स्तोत्राण्युपैतुम् । कीदृशस्त्वम् । [V]धिया अस्मदीयया प्रज्ञया [V]इषितः प्राप्तः अस्मद्भक्त्या प्रेरित इत्यर्थः । [V]विप्रजूतः । यथा यजमानभक्त्या प्रेरितस्तथान्यैरपि विप्रैर्मेधाविभिर्ऋत्विग्भिः प्रेरितः । कीदृशस्य वाघतः । [V]सुतावतः अभिषुतसोमयुक्तस्य ॥ 'केतः' इत्यादिष्वेकादशसु प्रज्ञानामसु 'धीः' ( नि. ३. ९. ७ ) इति पठितम् । चतुर्विंशतिसंख्याकेषु मेधाविनामसु 'विप्रः धीरः' ( नि. ३. १५. १ ) इति पठितम् । 'भरताः' इत्यादिष्वष्टसु ऋत्विङ्नामसु 'वाघतः' ( नि. ३. १८. ३ ) इति पठितम् । इषित इत्यत्र 'इष गतौ' इत्यस्यानिष्ठायामिडागमः । 'आगमा अनुदात्ताः' ( पा. म. ३. १. ३. ७ ) इति इटः अनुदात्तत्वात् क्तस्वरः शिष्यते । विप्रजूतः । 'डुवप् बीजसंताने' इति धातोः 'ऋत्रेन्द्राग्रवज्रविप्र०' ( उ. सू. २. १८६ ) इत्यादिना रन्प्रत्ययान्तो विप्रशब्दो निपातितः । निपातनादुपधाया इकारो लघूपधगुणाभावश्च । नित्त्वादाद्युदात्तः । तैर्जूतः प्राप्तः । 'जू'(?) इति सौत्रो धातुर्गत्यर्थः ( पा. सू. ३. २. १५० ) । 'क्युकः किति' (पा. सू. ७. २. ११) इति इट्प्रतिषेधः । 'तृतीया कर्मणि' ( पा. सू. ६. २. ४८ ) इति पूर्वपदप्रकृतिस्वरत्वम् । सुतावतः । छान्दसं दीर्घत्वम् । मतुरोऽनुदात्तत्वात् क्तप्रत्ययस्वर एव शिष्यते । ब्रह्माणि । 'नञ्विषयस्थानिसन्तस्य' ( फि. सू. २६ ) इत्याद्युदात्तः । वाघच्छब्द ऋत्विङ्नामसु पठितः । प्रातिपदिकस्वरः ॥

इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः । सुते दधिष्व नश्चनः ॥ ६ ॥

इन्द्र । आ । याहि । तूतुजानः । उप । ब्रह्माणि । हरिऽवः । सुते । दधिष्व । नः । चनः ॥ ६ ॥

हरिशब्दः इन्द्रसंबन्धिनोरश्वयोर्नामधेयं 'हरी इन्द्रस्य रोहितोऽग्नेः' ( नि. १. १५. १ ) इति तदीयाश्वनामत्वेन पठितत्वात् । हे [V]हरिवः अश्वयुक्त [V]इन्द्र त्वं [V]ब्रह्माणि उपैतुम् [V]आ [V]याहि । कीदृशस्त्वम् । [V]तूतुजानः त्वरमाणः । आगत्य च अस्मिन् [V]सुते सोमाभिषवयुक्ते कर्मणि [V]नः अस्मदीयं [V]चनः अन्नं हविर्लक्षणं [V]दधिष्व धारय स्वीकुर्विष्वेत्यर्थः ॥ तूतुजानः । तुजेर्लिटि 'लिटः कानज्वा' (पा.सू. ३. २. १०६ ) इति कानजादेशः । 'तुजादीनां दीर्घोऽभ्यासस्य' ( पा. सू. ६. १. ७ ) इत्यभ्यासस्य दीर्घत्वम् । 'अभ्यस्तानामादिः' ( पा. सू. ६. १. १८९ ) इत्याद्युदात्तत्वम् । हरिव इत्यत्र हरयोऽस्य सन्तीति मतुपि 'छन्दसीरः' ( पा. सू. ८. २. १५ ) इति मकारस्य वत्वम् । संबुद्धौ 'उगिदचाम्०' ( पा. सू. ७. १. ७० ) इति नुम् । संयोगान्तलोपे ( पा. सू. ८. २. २३ ) नकारस्य 'मतुवसो रु संबुद्धौ छन्दसि' ( पा. सू. ८. ३. १ ) इति रुत्वम् । आष्टमिको निघातः । ब्रह्माणीत्यस्य हरिव इत्यनेनासामर्थ्यात् 'समर्थः पदविधिः' ( पा. सू. २. १. १ ) इति नियमात् सुबामन्त्रितपराङ्गवद्भावाभावेन आमन्त्रितनिघाताभावात् आद्युदात्तत्वे सति उप इति अकारस्य सन्नतरः ।

---

१. ठ–'वेदरूपाणि' नास्ति । २. च–°स्तथा तैरपि । ३. ठ–°न्निष्ठाया इडा° । ४, ग-घ-च-ण-फ- य–°मन्त्रिते पराङ्गवद्भा°; य–°मन्त्रित इति पराङ्गवद्भा° ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दधिध्व इत्यत्र दधातेर्लोटि थास्। 'थासः से' (पा. सू. ३. ४. ८०)। 'सवाभ्यां वामौ' (पा. सू. ३. ४. ९१) इत्येकारस्य वादेशः। 'छन्दस्युभयथा' (पा. सू. ३. ४. ११७) इति सार्वधातुकार्धधातुकसंज्ञयोः सत्योः सार्वधातुकत्वेन शपि (पा. सू. ३. १.६८) तस्य श्लौ च द्विर्भावः (पा. सू. ६. १. १०), आर्धधातुकत्वेन इडागमश्च (पा. सू. ७. २. ३५)। 'आतो लोप इटि च' (पा. सू. ६ ४. ६४) इत्याकारलोपः। चनः। 'चायतेरन्ने ह्रस्वश्च' (उ. सू. ४. ६३९) इत्यसुनन्तः। चकारात् नुडागमे यलोपः॥ ॥ ५ ॥

ओमासश्चर्षणीधृतो विश्वे देवास आ गत। दाश्वांसो दाशुषः सुतम् ॥ ७ ॥

ओमासः। चर्षणिऽधृतः। विश्वे। देवासः। आ। गत। दाश्वांसः। दाशुषः। सुतम् ॥७॥

हे [V]विश्वे [V]देवासः एतन्नामका देवविशेषाः [V]दाशुषः हविर्दत्तवतो यजमानस्य [V]सुतम् अभिषुतं सोमं प्रति [V]आ [V]गत आगच्छत। ते च देवाः [V]ओमासः रक्षकाः [V]चर्षणीधृतः मनुष्याणां धारकाः [V]दाश्वांसः फलस्य दातारः। 'मनुष्याः' इत्यादिषु पञ्चविंशतिसंख्याकेषु मनुष्यनामसु चर्षणिशब्दः (नि. २. ३. ८) पठितः। 'अश्विनौ' इत्यादिष्वेकत्रिंशत्संख्याकेषु देवविशेषनामसु 'विश्वेदेवाः साध्याः' (नि. ५. ६. २७) इति पठितम्। एतामृचं यास्क एवं व्याख्यातवान्–'अवितारो वावनीया वा मनुष्यधृतः सर्वे च देवा इहागच्छत दत्तवन्तो दत्तवतः सुतमिति तदेतदेकमेव[2] वैश्वदेवं गायत्रं तृचं दशतयीषु विद्यते यत्तु किंचिद्बहुदैवतं तद्वैश्वदेवानां स्थाने युज्यते यदेव विश्वलिङ्गमिति शाकपूणिः' (निरु. १२. ४०) इति। अत्र विश्वशब्दः सर्वशब्दपर्याय इति यास्कस्य मतम्। देवविशेषस्यैवासाधारणं लिङ्गमिति शाकपूणेर्मतम्। अवन्ति इति ओमासः देवाः। 'मन्' इत्यनुवृत्तौ 'अविसिवि सिशुषिभ्यः कित्' (उ. सू. १. १४१) इति मन्प्रत्ययः। 'ज्वरत्वरस्रिव्यविमवामुपधायाश्च' (पा. सू. ६. ४. २०) इति ऊठ्। मनः किरवेऽपि बाहुलकत्वाद्दुणः। 'आज्जसेरसुक्' (पा. सू. ७. १. ५०) इति जसेः असुगागमः। आमन्त्रिताद्युदात्तत्वम्। चर्षणयो मनुष्याः। तान् वृष्टिदानादिना धारयन्तीति चर्षणीधृतः देवाः। पूर्वस्यामन्त्रितस्य सामान्यवचनस्य 'विभाषितं विशेषवचने बहुवचनम्' (पा. सू. ८. १. ७४) इति अविद्यमानवत्त्वप्रतिषेधात् अपादादित्वेन निघातः। ननु अत एव विद्यमानवत्त्वात् 'सुबामन्त्रिते०' (पा. सू. २. १. २) इति पराङ्गवत्त्वेनैकपदीभावात् पदादपरत्वेन कथं निघात इति चेत्, न। 'वत्करणं स्वाश्रयमपि यथा स्यात्' (पा. म. ८. १. ७२) इति वचनात् पदभेदप्रयुक्तस्य निघातस्याप्युपपत्तेः। ऐकपद्येऽप्याद्युदात्तत्वे 'अनुदात्तं पदमेकवर्जम्' (पा. सू. ६. १. १५८) इति सुतरामेव निघातो भविष्यति। इत्थमेव तर्हि 'द्रवत्पाणी शुभस्पती' इत्यत्रापि पराङ्गवत्त्वेनैकपद्यादुत्तरस्य शेषनिघातप्रसङ्ग इति चेत्, न। तत्र पराङ्गवद्भावस्य परेण 'आमन्त्रितं पूर्वमविद्यमानवत्' (पा. सू. ८. १. ७२) इत्यविद्यमानवद्भावेन बाधितत्वात्। इह पुनः 'विभाषितं विशेषवचने बहुवचनम्' इत्यविद्यमानवत्त्वस्य निषेधात्। पूर्वस्याप्यामन्त्रितस्य विद्यमानवत्त्वात् पराङ्गवत्त्वं स्वीकृतमिति वैषम्यम्। विश्वे। पादादित्वादाद्युदात्तः। गणदेवतावचनश्चात्र विश्वशब्दो न सर्व शब्दपर्याय इति विशेष्यपरतया सामान्यवचनत्वात् ओमासः इत्यनेन न सामानाधिकरण्यम्। सामानाधिकरण्ये हि पूर्वस्य पादस्य पराङ्गवद्भावे सति 'मित्रावरुणावृतावृधौ' इत्यादाविव अत्राप्यामन्त्रिताद्युदात्तता न स्यात्। विश्वे इत्यस्य विशेषणं देवासः इति। दीव्यन्तीति देवाः प्रकाशवन्तः। ननु 'अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी' (परिभा० ९८) इति रूढ एवार्थो देवशब्दस्य ग्राह्यो न यौगिकः।

---

१, ठ–'च' नास्ति। २, छ-त-थ–°देकमिव।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यौगिकत्वे ह्यवयवार्थानुसंधानव्यवधानेन प्रतिपत्तिर्विक्षिप्ता स्यात्। समुदायप्रसिद्धौ तु न विक्षेप इति चेन्न, न। समुदायप्रसिद्धौ हि देवशब्दस्य सामान्यपरतया विशेषवचनत्वाभावात् 'विभाषितं विशेषवचने बहुवचनम्' इत्यनेनानिषिद्धत्वात् विश्वे इत्यस्याविद्यमानवत्त्वेन शुभस्पती इति पदवत् देवासः इत्यस्यापि आद्युदात्तत्वं स्यात्। स्वरानुसारेण च रूढित्यागेनापि देवशब्दस्य योगस्वीकारो युक्त एव। आ गत आगच्छत। 'बहुलं छन्दसि' (पा. सू. २. ४. ७३) इति शपो लुकि सति 'अनुदात्तोपदेश०' (पा. सू. ६. ४. ३७) इत्यादिना मकारलोपः। आडः पदात्परत्वात् निघातः। दाश्वांसः। 'दाशृ दाने' इत्यस्य क्वसौ 'दाश्वान् साह्वान् मीढ्वांश्च' (पा. सू. ६. १. १२) इति निपातनात् क्रादिनियमप्राप्तः इडागमो (पा. सू. ७. २. १३) द्विर्वचनं च न भवति। प्रत्ययस्वरेण क्वसोरुदात्तत्वम्। दाशुष इत्यत्र 'वसोः संप्रसारणम्' (पा. सू. ६. ४. १३१) इति संप्रसारणम्। 'संप्रसारणाच्च' (पा. सू. ६ १. १०८) इति पूर्वरूपत्वम्। 'आदेशप्रत्यययोः' (पा. सू. ८. ३. ५९) इति षत्वम्॥

विश्वे देवासो अप्तुरः सुतमा गन्त तूर्णयः। उस्रा इव स्वसराणि॥ ८॥

विश्वे। देवासः। अप्ऽतुरः। सुतम्। आ। गन्त। तूर्णयः। उस्राःऽइव। स्वसराणि॥ ८॥

[v]विश्वे [v]देवासः एतन्नामकगणरूपा देवविशेषाः [v]सुतं सोमम् [v]आ [v]गन्त आगच्छन्तु। कीदृशाः। [v]अप्तुरः तत्तत्काले वृष्टिप्रदा इत्यर्थः। [v]तूर्णयः त्वरायुक्ताः यजमानमनुग्रहीतुमालस्यरहिता इत्यर्थः। विश्वेषां देवानां सोमं प्रति आगमने उस्रा इत्यादिर्दृष्टान्तः। [v]उस्राः सूर्यरश्मयः [v]स्वसराणि अहानि प्रति आलस्यरहिता यथा समागच्छन्ति तद्वत्। 'खेदयः' इत्यादिषु पञ्चदशसु रश्मिनामसु 'उस्रा वसवः' (नि. १. ५. ९) इति पठितम्। 'वस्तोः' इत्यादिषु द्वादशस्वहर्नामसु 'स्वसराणि ध्रंसः घर्मः' (नि. १. ९. ५) इति पठितम्। तच्च पदं यास्केन व्याख्यातं—'स्वसराण्यहानि भवन्ति स्वयंसारीण्यपि वा स्वरादित्यो भवति स एनानि सारयति। उस्रा इव स्वसराणीत्यपि निगमो भवति' (निरु. ५. ४) इति॥ देवासः। पचाद्यजन्तः (पा. सू. ३. १. १३४) चित्स्वादन्तोदात्तः। अप्तुरः 'तुर त्वरणे' श्लुविकरणी। तुतुरति त्वरयन्तीत्यर्थे 'क्विप् च' (पा. सू. ३. २. ७६) इति क्विप्। 'गतिकारकोपपदात्कृत्' (पा. सू. ६. २. १३९) इत्युत्तरपदप्रकृतिस्वरत्वम्। आ गन्त। आगच्छन्तु इत्यर्थे व्यत्ययेन मध्यमपुरुषबहुवचनम्। 'बहुलं छन्दसि' (पा. सू. २. ४. ७३) इति शपो लुक्। तस्य 'तप्तनप्तनथनाश्च' (पा. सू. ७. १. ४५) इति तबादेशे '°अपित्' (पा. सू. १. २. ४) इति प्रतिषेधात् ङित्त्वात् अनुनासिकलोपाभावः। 'तिङ्ङतिङः' इति निघातः। 'जित्वरा संभ्रमे' इति धातोः त्वरन्ते इति तूर्णयः। 'निः' इत्यनुवृत्तौ 'वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' (उ.सू.४.४९१) इति निप्रत्ययः। नित्त्वादाद्युदात्तः। उस्रा इव इत्यत्र 'इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च' (पा. सू. २. १. ४. २) इति समासे पूर्वपदप्रकृतिस्वरत्वं नित्यम्। सरतीति सरः सूर्यः। पचाद्यच्। स्वः सरो येषां तानि स्वसराणि अहानि। 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (पा. सू. ६. २. १) इति स्वशब्द आद्युदात्तः॥

---

१. ठ-°नुसंधानेन। २. त-स-एतन्नामग°। ३. छ-फ-आगच्छन्त आगच्छन्तु ४. ठ-असुरः अपां त्वरयितारः ५. च-छ-त-फ-इवेन नित्यसमासः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

विश्वे देवासो अस्रिध एहिमायासो अद्रुहः । मेधं जुषन्त वह्नयः ॥ ९ ॥

विश्वे । देवासः । अस्रिधः । एहिऽमायासः । अद्रुहः । मेधम् । जुषन्त । वह्नयः ॥ ९ ॥

Vविश्वे Vदेवासः एतन्नामका देवविशेषाः Vमेधं हविर्यज्ञसंबद्धं Vजुषन्त सेवन्ताम् । कीदृशाः । Vअस्रिधः क्षयरहिताः शोषरहिता वा । Vएहिमायासः सर्वतो व्याप्तप्रज्ञाः । यद्वा । सौचीकमग्निमप्सु प्रविष्टम् 'एहि मा यासीः' इति यदवोचन् तदनुकरणहेतुकोऽयं विश्वेषां देवानां व्यपदेश एहिमायास इति । Vअद्रुहः द्रोहरहिताः Vवह्नयः वोढारो धनानां प्रापयितारः ॥ अस्रिधः । स्रिधेः क्षयार्थस्य शोषणार्थस्य वा संपदादिभ्यो भावे क्विप ( पा. सू. ३. ३. १०८. ९) नञा बहुव्रीहिः पूर्वपदप्रकृतिस्वरं बाधित्वा 'नञ्सुभ्याम्' ( पा. सू. ६. २. १७२ ) इत्युत्तरपदान्तोदात्तत्वम् । एहिमायासः । 'ईह चेष्टायाम्' । आ समन्तात् ईहते इति एहिः । 'इन्' ( उ. सू. ४. ५५७ ) इति सर्वधातुसाधारण इन्प्रत्ययो नित्त्वादाद्युदात्तः । एहिः माया प्रज्ञा येषामिति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । अथवा । आङ उदात्तादुत्तरस्य इहीति लोप्सध्यमैकवचनस्य 'तिङ्तिङः' इति निघातः । 'एकादेश उदात्तेनोदात्तः' ( पा. सू. ८. २. ५ ) इत्येकार उदात्तः । एहीत्येतत् पदयुक्तं 'मा यासीः' इत्यत्र 'माया' इत्यक्षरद्वयं येषां ते एहिमायासः । पूर्वपदप्रकृतिस्वरः । अद्रुहः । 'द्रुह जिघांसायाम्' । संपदादित्वाद्भावे क्विपि बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । मेधम् । 'मेधृ संगमे च' । मेध्यते देवैः संगम्यते इति मेधं हविः । कर्मणि घञ् । नित्त्वादाद्युदात्तः । जुषन्त । सेवन्तामित्यर्थे 'छन्दसि लुङ्लङ्लिटः' ( पा. सू. ३. ४. ६ ) इति धातुसंबन्धे लङ् । यत उक्तरूपा विश्वे देवा अतो जुषन्त इति द्रुहादिधात्वर्थैः संबन्धात् 'बहुलं छन्दस्यमाङ्योगेऽपि' ( पा. सू. ६. ४. ७५ ) इत्यडागमाभावः । वह्नयः । 'निः' इत्यनुवृत्तौ 'वहिश्रि०' इत्यादिना विहितस्य निप्रत्ययस्य नित्त्वादाद्युदात्तत्वम् ॥

सारस्वते तृचे या प्रथमा सा अन्वारम्भणीयेष्टौ सरस्वत्याः पुरोनुवाक्या । तथा 'दर्शपूर्णमासावारभ्यमाणः' इत्यस्मिन् खण्डे 'पावका नः सरस्वती पावीरवी कन्या चित्रायुः' ( आश्व. श्रौ. २. ८ ) इति सूत्रितम् ॥

पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥ १० ॥

पावका । नः । सरस्वती । वाजेभिः । वाजिनीऽवती । यज्ञम् । वष्टु । धियाऽवसुः ॥ १० ॥

Vसरस्वती देवी Vवाजेभिः हविर्लक्षणैरन्नैर्निमित्तभूतैः । यद्वा । यजमानेभ्यो दातव्यैरन्नैर्निमित्तभूतैः । Vनः अस्मदीयं Vयज्ञं Vवष्टु कामयताम् । कामयित्वा च निर्वहत्वित्यर्थः । तथा चारण्यककाण्डे श्रुत्यैव व्याख्यातं—'यज्ञं वष्ट्वित्ति यदाह यज्ञं वहत्वित्येव तदाह' ( ऐ. आ. १. १. ४ ) इति । कीदृशी सरस्वती । Vपावका शोधयित्री Vवाजिनीवती अन्नवत्क्रियावती Vधियावसुः कर्मप्राप्यधननिमित्तभूता । वाग्देवतायास्तथाविधं धननिमित्तत्वमारण्यककाण्डे श्रुत्या व्याख्यातं—'यज्ञं वष्टु धियावसुरिति वाग्वै धियावसुः' ( ऐ. आ. १. १. ४ ) इति । 'श्येनः सोमः' इत्यादिषु पञ्चत्रिंशत्संख्याकेषु देवताविशेषवाचिषु पदेषु 'सरमा सरस्वती' ( नि. ५. ५. १८ ) इति पठितम् । एतामृचं यास्क एवं व्याचष्टे—'पावका नः सरस्वत्यन्नैरन्नवती यज्ञं वष्टु धियावसुः कर्मवसुः' ( निरु. ११. २६ ) इति ॥ पवनं पावः शुद्धिः । पावं कायतीति पावका । 'कै गै रै शब्दे' । 'आतोऽनुपसर्गे कः' ( पा. सू. ३. २. ३ ) इति कप्रत्ययः ।

---

१. च-छ-फ-'इति कप्रत्ययः' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कृदुत्तरपदप्रकृतिस्वरत्वेनान्तोदात्तत्वम् । यद्वा । पुनातीत्यर्थे ण्वुलि ' प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः ' (पा. सू. ७. ३. ४४ ) इति इत्वस्याभावोऽन्तोदात्तत्वं च छान्दसं द्रष्टव्यम् । सरःशब्दः सर्तेः असुनन्तत्वादाद्युदात्तः । मतुप्ङीपोः पित्त्वादनुदात्तत्वम् । वाजेभिः । वाजशब्दो वृषादित्वात् ( पा. सू. ६. १. २०३ ) आद्युदात्तः । स हि अवृत्कृतत्वात् आकृतिगणः । वाजोऽन्नमास्तीति वाजिन्यः क्रियाः । ' अत इनिठनौ ' ( पा. सू. ५. २. ११५ ) इति इनिप्रत्ययः । ताः क्रिया यस्याः सन्ति सा सरस्वती वाजिनीवती । ' छन्दसीरः ' ( पा. सू. ८. २. १५ ) इति मतुपो वत्वम् । मतुप्ङीपोः पित्त्वेनानुदात्तत्वात् इनेः प्रत्ययाद्युदात्तत्वमेव शिष्यते । यज्ञम् । ' यजयाच° ' ( पा. सू. ३. ३. ९० ) इत्यादिना नङ्प्रत्ययः । प्रत्ययस्वरेणान्तोदात्तः । वष्टु । ' वश कान्तौ ' । कान्तिरभिलाषः । 'अदिप्रभृतिभ्यः शपः' ( पा. सू. २. ४. ७२ ) इति शपो लुक् । निघातः । धियावसुः । धिया कर्मणा वसु यस्याः सकाशाद्भवति सा धियावसुः । ' सावेकाचः° ' ( पा. सू. ६. १. १६८ ) इति विभक्तिरुदात्ता । ' बहुव्रीहौ प्रकृत्या पूर्वपदम् ' (पा. सू. ६. २. १) इति विभक्तिस्वर एव शिष्यते । छान्दसस्तृतीयाया अलुक् ॥

चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् । यज्ञं दधे सरस्वती ॥ ११ ॥

चोदयित्री । सूनृतानाम् । चेतन्ती । सुऽमतीनाम् । यज्ञम् । दधे । सरस्वती ॥ ११ ॥

या Vसरस्वती सेयमिमं Vयज्ञं Vदधे धारितवती । कीदृशी । Vसूनृतानां प्रियाणां सत्यवाक्यानां Vचोदयित्री प्रेरयित्री । Vसुमतीनां शोभनबुद्धियुक्तानामनुष्ठातॄणां Vचेतन्ती तदीयमनुष्ठेयं ज्ञापयन्ती ॥ चोदयित्री । ' चुद प्रेरणे ' । ण्यन्तात् तृच् । चित्त्वादन्तोदात्तः । ' ऋन्नेभ्यो ङीप् ' ( पा. सू. ४. १. ५ ) इति ङीप् । तस्य ' उदात्तयणो हल्पूर्वात् ' ( पा. सू. ६. १. १७४ ) इत्युदात्तत्वम् । सूनृतानाम् । ' ऊन परिहाणे ' इत्यतः ' क्विप् च ' ( पा. सू. ३. २. ७६ ) इति क्विपि सुतराम् ऊनयति अप्रियम् इति सून् इति प्रियमुच्यते । तच्च तदतं सत्यं चेति सूनृतम् । ' परादिश्छन्दसि बहुलम् ' ( पा. सू. ६. २. १९९ ) इत्युत्तरपदाद्युदात्तत्वम् । चेतन्ती । ' चिती संज्ञाने ' । अत्र शपो ङीपश्च पित्त्वादनुदात्तत्वम् । शतुश्च अदुपदेशात् लसार्वधातुकस्वरेणानुदात्तत्वम् । धात्वन्तस्वर एव शिष्यते । सुमतिशब्दस्य मतुपि ह्रस्वत्वात् ' नामन्यतरस्याम् ' ( पा. सू. ६. १. १७७ ) इति विभक्तेरुदात्तत्वम् ॥

महो अर्णः सरस्वती प्र चेतयति केतुना । धियो विश्वा वि राजति ॥ १२ ॥

महः । अर्णः । सरस्वती । प्र । चेतयति । केतुना । धियः । विश्वाः । वि । राजति ॥ १२ ॥

द्विविधा हि सरस्वती विग्रहवद्देवता नदीरूपा च । तत्र पूर्वाभ्यामृग्भ्यां विग्रहवती प्रतिपादिता । अनया तु नदीरूपा प्रतिपाद्यते । तादृशी Vसरस्वती Vकेतुना कर्मणा प्रवाहरूपेण Vमहो Vअर्णः प्रभूतमुदकं Vप्र Vचेतयति प्रकर्षेण ज्ञापयति । किं च स्वकीयेन देवतारूपेण Vविश्वाः Vधियः सर्वाप्यनुष्ठातृप्रज्ञानानि Vवि Vराजति विशेषेण दीपयति । अनुष्ठानविषया बुद्धीः सर्वदोत्पादयतीत्यर्थः । सरस्वत्या द्विरूपत्वं यास्को दर्शयति—' तत्र सरस्वतीत्येतस्य नदीवद्देवतावच्च निगमा भवन्ति ' ( निरु. २. २३ ) इति । एकशतसंख्याकेषूदकनामसु ' अर्णः क्षोदः ' ( नि. १. १२. १ ) इति पठितम् । एतामृचं यास्को व्याचष्ट—' महदर्णः सरस्वती प्रचेतयति प्रज्ञापयति केतुना कर्मणा प्रज्ञया वेमानि च सर्वाणि प्रज्ञानान्यभिवि-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

राजति' (निरु. ११. २७) इति॥ महो अर्णः। महदिति तकारस्य व्यत्ययेन सकारः। तस्य रुत्वोत्व-गुणाः। प्रातिपदिकस्वरेणान्तोदात्तः। 'एङः पदान्तादति' (पा. सू. ६. १. १०९) इति पूर्वरूपे प्राप्ते 'प्रकृत्यान्तःपादमव्यपरे' (पा. सू. ६. १. ११५) इति प्रकृतिभावः। अति इत्यर्णः। 'उदके नुट् च' (उ. सू. ४. ६३६) इत्यसुन्प्रत्ययो नुडागमश्च। केतुना। प्रातिपदिकस्वरेणान्तोदात्तः। विश्वाः। विश्वशब्दः क्नूप्रत्ययान्त आद्युदात्तः॥ ॥ ६ ॥ ॥ १ ॥

प्रथमे मण्डले द्वितीयानुवाके चत्वारि सूक्तानि। तत्र 'सुरूप' इत्यादिकं दशर्चं प्रथमं सूक्तं, 'सुरूपकृत्नुं दश' इत्यनुक्रान्तत्वात्। पूर्ववन्मधुच्छन्दसो गायत्रस्य चानुवृत्तेः ते एव ऋषिच्छन्दसी। 'इन्द्रं पृच्छा' इति चतुर्थ्यास्तृचि लिङ्गदर्शनादिन्द्रो देवता। अभिप्लवषडहे ब्राह्मणाच्छंसिनः प्रातःसवने स्तोमवृद्धौ आवापार्थानि 'सुरूपकृत्नुमूतये' इत्यादीनि षट् सूक्तानि। सूत्रितं च 'अभिप्लवपृष्ठ्याहानि' इति खण्डे–'ब्राह्मणाच्छंसिनः सुरूपकृत्नुमूतय इति षट् सूक्तानि' (आश्व. श्रौ. ७. ५) इति। आद्यानि त्रीणि सूक्तानि महाव्रते निष्केवल्ये औष्णिहतृचाशीतौ शस्तव्यानि। उक्तं च शौनकेन–'सुरूप-कृत्नुमूतय इति त्रीण्येन्द्र सानसिं रयिमिति सूक्ते' (ऐ. आ. ५. २. ५) इति। चतुर्विंशेऽहनि माध्यंदिने सवने ब्राह्मणाच्छंसिनः 'सुरूपकृत्नुमूतये' इति वैकल्पिकः स्तोत्रियस्तृचः। 'होत्रकाणाम्' इति खण्डे 'मदे मदे हि नो ददिः सुरूपकृत्नुमूतये' (आश्व. श्रौ. ७. ४) इति सूत्रितत्वात्। अग्निष्टोमे वैश्वदेवशस्त्रे 'सुरूपकृत्नुमूतये' इति धाय्या, 'सुरूपकृत्नुमूतये तक्षन्रथम्' (आश्व. श्रौ. ५. १८) इति सूत्रितत्वात्॥

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे। जुहूमसि द्यविद्यवि ॥ १ ॥

सुरूपऽकृत्नुम्। ऊतये। सुदुघाम्ऽइव। गोऽदुहे। जुहूमसि। द्यविऽद्यवि ॥ १ ॥

[v]सुरूपकृत्नुं शोभनरूपोपेतस्य कर्मणः कर्तारमिन्द्रम् [v]ऊतये अस्मद्रक्षार्थं [v]द्यविद्यवि प्रतिदिनं [v]जुहू-मसि आह्वयामः। आह्वाने दृष्टान्तः। [v]गोदुहे गोधुगर्थं [v]सुदुघामिव सुष्ठु दोग्ध्रीं गामिव। यथा लोके गोः यो दोग्धा तदर्थं तस्याभिमुख्येन दोहनीयां गामाह्वयति तद्वत्। 'वस्तोः' इत्यादिषु द्वादशसु अहर्नामसु 'द्यविद्यवि' (नि. १. ९. १२) इति पठितम्॥ सुरूपकृत्नुम्। करोतीति कृत्नुः। 'कृहनिभ्यां क्नुः' (उ. सू. ३. ३१०)। किरवाद्गुणाभावः। तकारोपजनश्छान्दसः। समासान्तोदात्तः। ऊतये। अवतेर्धातोः 'उदात्तः' इत्यनुवृत्तौ 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' (पा. सू. ३. ३. ९७) इति क्तिन् उदात्तो निपातितः। सुदुघाम्। सुष्ठु दुग्धे इति सुदुघा। 'दुहः कब्घश्च' (पा. सू. ३. २. ७०) इति कप्प्रत्ययो हकारस्य च घकारः। किरवाद्गुणाभावः। कपः पित्त्वादनुदात्तत्वे धातुस्वरेण उकार उदात्तः। सुशब्देन गतिसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन स एव स्वरः। 'इवेन विभक्त्यलोपः पूर्वपद-प्रकृतिस्वरत्वं च' इति इवसमासे स एव स्वरः। गां दोग्धीति गोधुक्। 'सत्सूद्विष°' (पा. सू. ३. २. ६१) इत्यादिना क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वम्। जुहूमसि। ह्वयतेर्लङुत्तमपुरुषबहुवचने 'बहुलं छन्दसि' (पा. सू. २. ४. ७६) इति शपः श्लुः। 'अभ्यस्तस्य च' (पा. सू. ६. १. ३३) इत्यभ्यस्तकारणस्य ह्वयतेः प्रागेव द्विर्वचनात् संप्रसारणम्। 'संप्रसारणाच्च' (पा. सू. ६. १. १०८) इति परपूर्वत्वम्। 'हलः' (पा. सू. ६. ४. २) इति दीर्घः। ततः 'श्लौ' (पा. सू. ६. १. १०) इति द्विर्वचनम्। अभ्यासस्य ह्रस्वः (पा. सू. ७. ४. ५९), चुरवजश्त्वे (पा. सू. ७. ४. ६२; ८. ४. ५३)। 'इदन्तो मसिः' (पा. सू. ७. १. ४६) इति इकारागमः। प्रत्ययस्वरेण मकार-

१. ग-च-ण-य–उष्णिहतृचाशीतौ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्योदात्तत्वम्। द्यविद्यवि। द्योशब्दः प्रातिपदिकस्वरेणान्तोदात्तः। 'नित्यवीप्सयोः' (पा. सू. ८. १. ४) इति द्विर्भावः। 'तस्य परमाम्रेडितम्' (पा. सू. ८. १. २) 'अनुदात्तं च' (पा. सू. ८. १. ३) इति द्वितीयस्यानुदात्तत्वम्॥

**उप नः सवना गहि सोमस्य सोमपाः पिब। गोदा इद्रेवतो मदः॥ २॥**

उप। नः। सवना। आ। गहि। सोमस्य। सोमऽपाः। पिब।
गोऽदाः। इत्। रेवतः। मदः॥ २॥

हे [v]सोमपाः सोमस्य पातरिन्द्र सोमं पातुं [v]नः अस्मदीयानि [v]सवना त्रीणि सवनानि प्रति [v]उप समीपे [v]आ [v]गहि आगच्छ। आगत्य च [v]सोमस्य सोमं [v]पिब। [v]रेवतः धनवतस्तव [v]मदः हर्षः [v]गोदा [v]इत् गोप्रद एव। त्वयि हृष्टे सति अस्माभिर्गावो लभ्यन्ते इत्यर्थः॥ उप। निपातत्वादाद्युदात्तः। सवना। सूयते सोम एष्विति सवनानि। अधिकरणे ल्युट् (पा. सू. ३. ३. ११७)। सुपो डादेशः टिलोपश्च। 'लिति' (पा. सू. ६. १. १९३) इति प्रत्ययात् पूर्वस्य अकारस्योदात्तत्वम्। गहि। गमेः 'बहुलं छन्दसि' (पा. सू. २. ४. ७३) इति शपो लुक्। हेर्डित्त्वात् 'अनुदात्तोपदेश°' (पा. सू. ६. ४. ३७) इत्यादिना मकारलोपः। 'अतो हेः' (पा. सू. ६. ४. १०५) इति आभाच्छास्त्रीये लुकि कर्तव्ये 'असिद्धवदत्रा भात्' (पा. सू. ६. ४. २२) इति आभाच्छास्त्रीयो मकारलोपोऽसिद्धवद्भवति। सोमपाः। 'आमन्त्रितस्य च' (पा. सू. ८. १. १९) इति निघातः। तस्याविद्यमानवत्त्वेऽपि पूर्वापेक्षया 'तिङ्ङतिङः' इति पिबेत्यस्य निघातः। न च पूर्वस्यापि पराङ्गवद्भावेनाविद्यमानवत्त्वम्, असामर्थ्यन तदभावात्। गां ददातीति गोदाः। 'क्विप् च' (पा. सू. ३. २. ७६) इति क्विपं परमपि सरूपं बाधित्वा प्रतिपदविधित्वात् 'आतो मनिन्क्वनिब्वनिपश्च' (पा. सू. ३. २. ७४) इति विच्। क्विपि हि 'घुमास्था°' (पा. सू. ६. ४. ६६) इत्यादिना धातोः आकारस्य ईत्वं स्यात्। रेवान्। रयिर्धनमस्यास्तीति मतुप्। 'ह्रस्वनुड्भ्यां मतुप्' (पा. सू. ६. १. १७६) इति मतुप् उदात्तः। 'छन्दसीरः' (पा. सू. ८. २. १५) इति वत्वम्। 'रयेर्मतौ बहुलं छन्दसि' (पा. सू. ६. १. ३७. ६) इति संप्रसारणपरपूर्वत्वे गुणश्च। मदः। 'मदोऽनुपसर्गे' (पा. सू. ३. ३. ६७) इति अप्। पित्त्वादनुदात्तः॥

**अथा ते अन्तमानां विद्याम सुमतीनाम्। मा नो अति ख्य आ गहि॥ ३॥**

अथ। ते। अन्तमानाम्। विद्याम। सुऽमतीनाम्। मा। नः। अति। ख्यः। आ। गहि॥३॥

[v]अथ सोमपानानन्तरं हे इन्द्र [v]ते तव [v]अन्तमानाम् अन्तिकतमानामतिशयेन समीपवर्तिनां [v]सुमतीनां शोभनमतियुक्तानां शोभनप्रज्ञानां पुरुषाणां मध्ये स्थित्वा [v]विद्याम वयं त्वां जानीयाम। यद्वा। सुमतीनां शोभनबुद्धीनां कर्मानुष्ठानविषयाणां लाभार्थमित्यध्याहारः। बुद्धिलाभाय त्वां स्मरेमेत्यर्थः। त्वमपि [v]नः [v]अति [v]मा [v]ख्यः अस्मानतिक्रम्य अन्येषां त्वत्स्वरूपं मा प्रकथय। किंतु [v]आ [v]गहि अस्मानेवागच्छ॥ अथ इति निपात आद्युदात्तः। 'निपातस्य च' (पा. सू. ६. ३. १३६)

---

१. ठ–'सरूपम्' नास्ति। २. ठ–रेवतः। ३. ठ–'शोभनप्रज्ञानाम्' नास्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति दीर्घत्वम्। अन्तमानाम्। अतिशयेनान्तिका इति अतिशायने तमप् (पा. सू. ५. ३. ५५)। 'तमे तादेश्च' (पा. सू. ६. ४. १४९. ९) इति तादिलोपः। अन्तोऽस्यास्तीति अन्तिकः समीपः। 'अत इनिठनौ' (पा. सू. ५. २. ११५) इति ठन्। निरवादाद्युदात्तः। दूरोत्कर्षस्य ह्यवसानं नास्ति। सामीप्योत्कर्षस्य पुनर्यो यस्य समीपः स एव तस्यान्त इत्यन्तवत्त्वात् समीपमन्तिकमुच्यते। विद्याम। वेत्तेर्लिङि 'यासुट् परस्मैपदेषूदात्तो ङिच्च' (पा. सू. ३. ४. १०३) इति यासुट् उदात्तः। पादादित्वात् 'तिङ्ङतिङः' इति न निघातः। सुमतीनाम्। मतिशब्दे क्तिनन्तेऽपि[1] 'मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः' (पा. सू. ३. ३. ९६) इति इकार उदात्तः। शोभना मतिर्येषां ते सुमतय इति बहुव्रीहौ पूर्वपदप्रकृतिस्वरापवादेन 'नञ्सुभ्याम्' (पा. सू. ६. २. १७२) इत्युत्तरपदान्तोदात्तः। शोभना मतयः सुमतय इति कर्मधारयेऽप्यव्ययपूर्वपदप्रकृतिस्वरापवादः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्ततैव। अतो मतुपि ह्रस्वादन्तोदात्ताच्च सुमतिशब्दात् परस्य नामो 'नामन्यतरस्याम्' (पा. सू. ६. १. १७७) इत्युदात्तत्वम्। ख्यः। 'ख्या प्रकथने' इत्यस्य लुङि सिपि 'अस्तिवक्तिख्यातिभ्योऽङ्' (पा. सू. ३. १. ५२) इति च्लेरङादेशः। 'आतो लोप इटि च' (पा. सू. ६. ४. ६४) इत्याकारलोपः। 'इतश्च' (पा. सू. ३. ४. १००) इति इकारलोपो रुत्वविसर्गौ। 'न माङ्योगे' (पा. सू. ६. ४. ७४) इत्यडभावः। गहि। गमेः 'बहुलं छन्दसि' (पा. सू. २. ४. ७३) इति शपो लुकि हेर्ङित्त्वात् 'अनुदात्तोपदेश०' (पा. सू. ६. ४. ३७) इति मकारलोपस्य 'असिद्धवदत्राभात्' (पा. सू. ६. ४. २२) इति असिद्धत्वात् 'अतो हेः' (पा. सू. ६. ४. १०५) इति लुक् न भवति॥

परेहि विग्रमस्तृतमिन्द्रं पृच्छा विपश्चितम्। यस्ते सखिभ्य आ वरम्॥ ४॥

परा। इहि। विग्रम्। अस्तृतम्। इन्द्रम्। पृच्छ। विपःऽचितम्।

यः। ते। सखिऽभ्यः। आ। वरम्॥ ४॥

अत्र यजमानं प्रति होता ब्रूते। हे यजमान त्वम् [v]इन्द्रं [v]परेहि इन्द्रस्य समीपे गच्छ। गत्वा च [v]विपश्चितं मेधाविनं होतारं मां [v]पृच्छ। असौ होता सम्यक् स्तुतवान् न वा इत्येवं प्रश्नं कुरु। [v]यः इन्द्रः [v]ते तव यजमानस्य [v]सखिभ्यः ऋत्विग्भ्यः [v]वरं श्रेष्ठं धनपुत्रादिकम् [v]आ समन्तात् प्रयच्छतीति शेषः। तादृशमिन्द्रमिति पूर्वत्रान्वयः। पुनरपि कीदृशम्। [v]विग्रं मेधाविनम् [v]अस्तृतम् अहिंसितम्। 'विप्रः' इत्यादिषु चतुर्विंशतिसंख्याकेषु मेधाविनामसु विग्रविपश्चिच्छब्दौ पठितौ (नि. ३. १५. २, १६)॥ विग्रम्। वृषादित्वादाद्युदात्तः। अस्तृतम्। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। इन्द्रशब्दे 'ऋन्नेन्द्राग्र०' (उ. सू. २. १८६) इत्यादिना रन्। निरवादाद्युदात्तः। सखिभ्यः। 'समाने ख्यश्चोदात्तः' (उ. सू. ४. ५७६) इति समाने उपपदे ख्यातेरिण्। 'डित्' इत्यनुवृत्तेस्तस्य डित्त्वात् टिलोपश्च (पा. सू. ६. ४. १४३)। तत्संनियोगेन यलोपः। उपपदस्योदात्तत्वम्। 'समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु' (पा. सू. ६. ३. ८४) इति सभावः। अतः सखिशब्द आद्युदात्तः। व्रियते इति वरः। 'ग्रहवृदृनिश्चिगमश्च' (पा. सू. ३. ३. ५८) इति अप्। तस्य पित्त्वात् धातुस्वर एव॥

---

१. ठ–क्तिनन्ते नित्त्वे। २. ठ–°स्वरापवादकृदुत्तरपद°।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत । दधाना इन्द्र इद्दुवः ॥ ५ ॥

उत । ब्रुवन्तु । नः । निदः । निः । अन्यतः । चित् । आरत । दधानाः । इन्द्रे । इत् । दुवः ॥५॥

[v]नः अस्माकं संबन्धिन ऋत्विज इति शेषः । ते [v]ब्रुवन्तु इन्द्रं स्तुवन्तु । [v]उत अपि च हे [v]निदः निन्दितारः पुरुषाः [v]निः [v]आरत इतो देशान्निर्गच्छत । [v]अन्यतश्चित् अन्यस्मादपि देशान्निर्गच्छत । कीदृशा ऋत्विजः । [v]इन्द्रे [v]दुवः परिचर्यां [v]दधानाः कुर्वाणाः । इच्छब्दोऽवधारणे । सर्वदा परिचर्यां कुर्वन्त एव तिष्ठन्त्वित्यर्थः ॥ निन्दन्तीति निदः । ' णिदि कुत्सायाम् ' । क्विप नुमभावश्छान्दसः । सुपोऽनुदात्तत्वात् धातुस्वरः । आमन्त्रितत्वेऽपि वाक्यान्तरत्वेन स्ववाक्यगतपदादपरत्वात् न निघात इत्याद्युदात्तत्वमेव । अन्यतः । ' लिति ' इति प्रत्ययात्पूर्वस्योदात्तत्वम् । चित् इति अपिशब्दार्थे । तेन न केवलमितः, इतो निर्गत्यान्यतोऽपि निर्गच्छतेति गम्यते । स एष धात्वर्थयोः संबन्धः आरत इति लुङा द्योत्यते । स हि धातुसंबन्धाधिकारे विधीयते । आरत । अर्तेः ' छन्दसि लुङ्लङ्लिटः ' ( पा. सू. ३. ४. ६ ) इति लोडर्थे लुङ् । मध्यमबहुवचनस्य तादेशः । ' सर्तिशास्त्यर्तिभ्यश्च ' ( पा. सू. ३. १. ५६ ) इति च्लेरङादेशः । ' ऋदृशोऽङि गुणः ' ( पा. सू. ७. ४. १६ ) इति गुणः । आडागमः । दधानाः । शानचश्चित्त्वात् प्राप्तमन्तोदात्तं बाधित्वा परत्वात् ' अभ्यस्तानामादिः ' ( पा. सू. ६. १. १८९ ) इत्याद्युदात्तत्वम् । दुवः । ' नञ्विषयस्यानिसन्तस्य ' ( फि. सू. २६ ) इत्याद्युदात्तः ॥ ॥ ७ ॥

उत नः सुभगाँ अरिर्वोचेयुर्दस्म कृष्टयः । स्यामेदिन्द्रस्य शर्मणि ॥ ६ ॥

उत । नः । सुऽभगान् । अरिः । वोचेयुः । दस्म । कृष्टयः । स्याम । इत् । इन्द्रस्य । शर्मणि ॥६॥

हे [v]दस्म शत्रूणामुपक्षपयितरिन्द्र त्वदनुग्रहात् [v]अरिः [v]उत शत्रवोऽपि [v]नः अस्मान् [v]सुभगान् शोभनधनोपेतान् [v]वोचेयुः उच्यासुः । [v]कृष्टयः मनुष्या अस्मन्मित्रभूता वदन्तीति किमु वक्तव्यमिति शेषः । ततो धनसंपन्ना वयम् [v]इन्द्रस्य [v]शर्मणि इन्द्रप्रसादलब्धे सुखे [v]स्यामेत् भवेमैव । ' मघम् ' इत्यादिष्वष्टाविंशतिसंख्याकेषु धननामसु ' रयिः क्षत्रं भगः ' ( नि. २. १०. १० ) इति पठितम् । ' मनुष्याः ' इत्यादिषु पञ्चविंशतिसंख्याकेषु मनुष्यनामसु ' कृष्टयः ' ( नि. २. ३. ७ ) इति पठितम् ॥ उत । ' एवमादीनामन्तः ' ( फि. सू. ८२ ) इत्यन्तोदात्तः । सुभगान् । भगशब्दस्य क्त्वादिषु पाठात् ' नञ्सुभ्याम् ' (पा. सू. ६.२. १७२ ) इत्युत्तरपदान्तोदात्तत्वं बाधित्वा ' क्त्वादयश्च ' ( पा. सू. ६. २. ११८ ) इत्युत्तरपदाद्युदात्तत्वम् । संहितायां ' दीर्घादटि समानपादे ' ( पा. सू. ८. ३. ९ ) इति नकारस्य रुत्वम् । ' भोभगो° ' ( पा. सू. ८. ३. १७ ) इति यत्वम् । ' लोपः शाकल्यस्य ' ( पा. सू. ८. ३. १९ ) इति यलोपः । तस्यासिद्धवत्त्वात् न पुनः संधिकार्यम् । ' आतोऽटि नित्यम् ' ( पा. सू. ८. ३. ३ ) इत्याकारस्य सानुनासिकता । अरिः । वचनव्यत्ययः । ' अच इः ' ( उ. सू. ४. ५७८ ) इति इप्रत्ययान्तः । प्रत्ययस्वरेणान्तोदात्तः । वोचेयुः उच्यासुः । ' वच परिभाषणे ' इत्यस्मात् आशीर्लिङि झेर्जुसादेशे ( पा. सू. ३. ४. १०८ ) ' लिङ्याशिष्यङ् ' ( पा. सू. ३. १. ८६ ) इति अङ्प्रत्यये ' वच उम् '

---

१. ठ–°दात्तत्वम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

( पा. सू. ७. ४. २० ) इत्युमागमः । गुणः । ' किदाशिषि ' ( पा. सू. ३. ४. १०४ ) इति यासुट् । ' छन्दस्युभयथा ' ( पा. सू. ३. ४. ११७ ) इति लिङादेशस्य सार्वधातुकत्वात् ' लिङः सलोपोऽनन्त्यस्य ' ( पा. सू. ७. २. ७९ ) इति सकारलोपः । ' अतो येयः ' ( पा. सू. ७. २. ८० ) । ' आद्गुणः ' ( पा. सू. ६. १. ८७ ) । अङोऽदुपदेशाल्लसार्वधातुकस्वरेण लिङोऽनुदात्तत्वम् । अङ्-प्रत्ययस्वर एव शिष्यते । तेन सह इकारस्य गुणः ' एकादेश उदात्तेनोदात्तः ' ( पा. ८. २. ५ ) इत्युदात्तः । दस्म । ' दसु उपक्षये ' इत्यस्मात् अन्तर्भावितण्यर्थात् ' इषियुधीन्धिदसिश्याधूसूभ्यो मक् ' ( उ. सू. १. १४२ ) । पदात्परत्वादामन्त्रितनिघातः । कृष्टयः । ' क्तिच्क्तौ च संज्ञायाम् ' ( पा. सू. ३. ३. १७४ ) इति क्तिचि मनुष्यनामत्वात् ' चितः ' ( पा. सू. ६. १. १६३ ) इत्यन्तोदात्तः । स्याम । ' अस भुवि ' । ' असोरल्लोपः ' ( पा. सू. ६. ४. १११ ) । यासुट उदात्तत्वम् । पादादित्वादनिघातः । शर्मणि । ' शॄ हिंसायाम् ' । हिनस्ति दुःखमिति शर्म । ' अन्येभ्योऽपि दृश्यन्ते ' ( पा. सू. ३. २. ७५ ) इति मनिन् । ' नेड्वशि कृति ' ( पा. सू. ७.२. ८ ) इति इट्प्रतिषेधः । नित्त्वादाद्युदात्तत्वम् ।

एमाशुमाशवे भर यज्ञश्रियं नृमादनम् । पतयन्मन्दयत्सखम् ॥ ७ ॥

आ । ईम् । आशुम् । आशवे । भर । यज्ञऽश्रियम् । नृऽमादनम् । पतयत् । मन्दयत्ऽसखम् ॥७॥

ईम् इति निपात इदंशब्दार्थे वर्तते । हे यजमान [v]आशवे कृत्स्नसोमयागव्याप्तायेन्द्राय [v]ईम् [v]आ [v]भर इमं सोममाहर । कीदृशं सोमम् । [v]आशुं सवनत्रयव्याप्तं [v]यज्ञश्रियं यज्ञस्य संपद्रूपं [v]नृमादनं नृणामृत्विग्यजमानानां हर्षहेतुं [v]पतयत् पतयन्तं कर्माणि[1] प्राप्नुवन्तं [v]मन्दयत्सखम् । य इन्द्रो मन्दयति यजमानान् हर्षयति तस्मिन्निन्द्रे सखिभूतोऽयं सोमः । तत्प्रीतिहेतुत्वात् तृप्तिहेतुत्वाद्वा ॥ आशुम् । ' कृवापाजिमिस्वदिसाध्यशूभ्य उण् ( उ. सू. १. १ ) इति उण् । प्रत्ययस्वरः । आशवे । पूर्ववत् । यज्ञश्रियम् । ' समासस्य ' ( पा. सू. ६. १. २२३ ) इत्यन्तोदात्तः । माद्यन्तेऽनेनेति मादनः । ' करणाधिकरणयोश्च ' ( पा. सू. ३. ३. ११७ ) इति ल्युट् । तस्य लित्त्वात् पूर्व आकार उदात्तः । ' गतिकारकोपपदात्कृत् ' ( पा. सू. ६. २. १३९ ) इति स एव शिष्यते । पतयत् । पतेरदन्तस्य चौरादिको णिच् ( पा. सू. ३. १. २५ ) । अतो लोपः ( पा. सू. ६. ४. ४८. ) । तस्य स्थानिवत्त्वात् ( पा. सू. १. १. ५६ ) उपधाया वृद्ध्यभावः ( पा. सू. ७. २. ११६ ) । लटः शत्रादेशः । तस्य ' छन्दस्युभयथा ' ( पा. सू. ३. ४. ११७ ) इत्यार्धधातुकत्वेन शबभावात् ' °अदुपदेशात्° ' ( पा. सू. ६. १. १८६ ) इति निघाताभावेन प्रत्ययाद्युदात्तत्वमेव भवति । आर्धधातुकत्वेऽपि ' सर्वे विधयश्छन्दसि विकल्प्यन्ते ' ( परिभा. ३५ ) इति ' णेरनिटि ' ( पा. सू. ६. ४. ५१ ) इति णिलोपाभावः । ' सुपां सुलुक्° ' ( पा. सू. ७. १. ३९ ) इत्यमो लुक् । ' न लुमता° ' ( पा. सू. १. १. ६३ ) इति प्रत्ययलक्षणनिषेधात् ' उगिदचाम्° ' ( पा. सू. ७. १. ७० ) इति न नुम् । एवं मन्दयच्छब्दोऽन्तोदात्तः । मन्दयतीन्द्रे सखा । ' सप्तमी° ' ( पा. सू. २. १. ४० ) इति योगविभागात् समासः । ' तत्पुरुषे तुल्यार्थ° ' ( पा. सू. ६. २. २ ) इति सप्तमीपूर्वपदप्रकृतिस्वरत्वम् ॥

---

१. ठ–कर्मणि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः । प्रावो वाजेषु वाजिनम् ॥ ८ ॥

अस्य । पीत्वा । शतक्रतो इति शतऽक्रतो । घनः । वृत्राणाम् । अभवः ।
प्र । आवः । वाजेषु । वाजिनम् ॥ ८ ॥

हे Vशतक्रतो बहुकर्मयुक्तेन्द्र त्वम् Vअस्य सोमस्य संबन्धिनमंशं Vपीत्वा Vवृत्राणां वृत्रनामकासुरप्रमुखाणां शत्रूणां Vघनः Vअभवः हन्ताऽभूः । ततो Vवाजेषु संग्रामेषु Vवाजिनं संग्रामवन्तं स्वभक्तं Vप्रावः प्रकर्षेण रक्षितवानसि ॥ अस्य इति इदंशब्देन प्रयोगसमये पुरोदेशस्थः सोमो निर्दिश्यते न तु पूर्वप्रकृतः सोमः परामृश्यते । अतोऽनन्वादेशत्वात् नात्र ' इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ' ( पा. सू. २. ४. ३२) इत्यशादेशः । अतो न सर्वानुदात्तत्वं, किंतु त्यदाद्यत्वे ( पा. सू. ७. २. १०२ ) हलि लोपे ( पा. सू. ७. २. ११३ ) अकारः प्रातिपदिकस्वरेणोदात्त इति ' अन्तोदात्तात् ' इत्यनुवृत्तौ ' ऊडिदंपदाद्यप्पुम्रैद्युभ्यः ' (पा. सू. ६. १. १७१) इति विभक्तिरुदात्ता । पीत्वा । पिबतेः क्त्वाप्रत्यये घुमास्थादिना ( पा. सू. ६.४. ६६ ) ईत्वम् । प्रत्ययस्वरेणान्तोदात्तः । असामर्थ्यान्न परामन्त्रिताङ्गवद्भावः । घनः । ' मूर्तौ घनः ' ( पा. सू. ३. ३. ७७ ) इति हन्तेर्धातोः काठिन्ये अप्प्रत्ययः । तदस्यास्तीति अर्शआदित्वात् ( पा. सू. ५. २. १२७ ) अजन्तः । चित्त्वादन्तोदात्तः । वाजेषु । वृषादित्वादाद्युदात्तः । वाजिनम् । इनिप्रत्ययस्वरः ॥

तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो । धनानामिन्द्र सातये ॥ ९ ॥

तम् । त्वा । वाजेषु । वाजिनम् । वाजयामः । शतक्रतो इति शतऽक्रतो ।
धनानाम् । इन्द्र । सातये ॥ ९ ॥

हे Vशतक्रतो बहुकर्मयुक्त यद्वा बहुप्रज्ञानयुक्त Vइन्द्र Vधनानां Vसातये संभजनार्थं Vवाजेषु युद्धेषु Vवाजिनं बलवन्तं Vत्वा पूर्वमन्त्रोक्तगुणयुक्तं त्वां Vवाजयामः अन्नवन्तं कुर्मः । ' रणः ' इत्यादिषु षट्चत्वारिंशत्सु संग्रामनामसु ' पौंस्ये महाधने वाजे अग्मन् ' ( नि. २. १७. ४२ ) इति पठितम् । अष्टाविंशतिसंख्याकेष्वन्ननामसु ' अन्धः वाजः पाजः ' ( नि. २. ७. २ ) इति पठितम् । ' उरु तुवि ' इत्यादिषु द्वादशसु बहुनामसु ' शतं सहस्रम् ' ( नि. ३. १. ९ ) इति पठितम् । ' अपः अप्नः ' इत्यादिषु षड्विंशतिसंख्याकेषु कर्मनामसु ' शक्म क्रतुः ' ( नि. २. १. ११ ) इति पठितम् । ' केतः केतुः ' इत्यादिष्वेकादशसु प्रज्ञानामसु ' क्रतुः असुः ' (नि. ३. ९. ५) इति पठितम् ॥ त्वा । ' अनुदात्तं सर्वम्° ' ( पा. सू. ८. १. १८ ) इत्यनुवृत्तौ ' त्वामौ द्वितीयायाः ' ( पा. सू. ८. १. २३ ) इति त्वादेशः । वाजेषु । ' वज व्रज गतौ ' । वाजयति गमयति शरीरनिर्वाहम् अनेनेति वाजो बलमन्नं वा । ण्यन्तात् करणे घञ् । तत्र जित्स्वरस्यापवादे ' कर्षात्वतः° ' ( पा. सू. ६. १. १५९ ) इत्यन्तोदात्तत्वे प्राप्ते तस्याप्यपवादत्वेन ' वृषादीनां च ' ( पा. सू. ६. १. २०३ ) इत्याद्युदात्तत्वम् । वाजयामः । वाजोऽस्यास्तीति वाजवान् । तं कुर्म इत्यर्थे ' तत्करोति तदाचष्टे ' ( पा. सू. ३. १. २६. ५-६ ) इति णिच् । ' इष्टवर्णौ प्रातिपदिकस्य ' ( पा. सू. ६. ४. १५५. १ ) इति तस्मिन् परत इष्टवद्भावात् ' विन्मतोर्लुक् ' ( पा. सू. ५. ३. ६५ ) इति मतुपो लुक् । ' टेः ' ( पा. सू. ६. ४. १५५ ) इत्यकारलोपः । णिचश्चित्स्वादन्तोदात्तत्वम् । शपः पित्त्वेनानुदात्तत्वम् । लसार्वधातुकस्वरेणा -

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ख्यातस्याप्यनुदात्तत्वम्। पादादित्वात् 'तिङ्ङतिङः' इति न निघातः। शतक्रतो। आमन्त्रितनिघातः। धनानाम्। 'नञ्विषयस्यानिसन्तस्य' (फि. सू. २६) इत्याद्युदात्तः। सातये। 'उदात्तः' इत्यनुवृत्तौ 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च' (पा. सू. ३. ३. ९७) इति क्तिन् उदात्तः॥

**यो रायोऽवनिर्महान्त्सुपारः सुन्वतः सखा। तस्मा इन्द्राय गायत॥ १०॥**

यः। रायः। अवनिः। महान्। सुऽपारः। सुन्वतः। सखा। तस्मै। इन्द्राय। गायत॥ १०॥

Vयः इन्द्रः Vरायः धनस्य Vअवनिः रक्षकः स्वामी वा Vतस्मा Vइन्द्राय Vगायत हे ऋत्विजस्तत्प्रीत्यर्थं स्तुतिं कुरुत। कीदृश इन्द्रः। Vमहान् गुणैरधिकः Vसुपारः सुष्ठु कर्मणः पूरयिता Vसुन्वतः यजमानस्य Vसखा सखिवत् प्रियः॥ रायः। 'ऊडिदंपदाद्यप्पुभ्रैर्युभ्यः' (पा. सू. ६. १. १७१) इति विभक्तेरुदात्तत्वम्। अवनिः। 'अव रक्षणगतिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभावबृद्धिषु च' इत्यस्मात् 'अर्तिसृधम्यम्यश्यवितॄभ्योऽनिः' (उ. सू. २. २५९) इत्यनिः। प्रत्ययाद्युदात्तत्वम्। सुपारः। 'पॄ पालनपूरणयोः' इत्यस्मात् णिजन्तात् 'कर्तरि' इत्यनुवृत्तौ पचाद्यच् (पा. सू. ३. १. १३४)। 'चितः' (पा. सू. ६. १. १६३) इत्यन्तोदात्तः। सुन्वतः। 'शतुरनुमो नद्यजादी' (पा. सू. ६. १. १७३) इति विभक्तिरुदात्ता। सखा। 'समाने ख्यश्चोदात्तः' (उ. सू. ४. ५७६) इति इण्प्रत्ययान्तः। तत्संनियोगेन यलोपः; सशब्दस्य चोदात्तः। डित्त्वात् टिलोपः। तस्मै। 'अदिः' इत्यनुवृत्तौ 'त्यजितनियजिभ्यो डित्' (उ. सू. १. १२९) इति तनोतेः अदिप्रत्ययः। डित्त्वात् टिलोपे प्रत्ययस्वरेण तच्छब्द उदात्तः। त्यदाद्यत्वम्। 'एकादेश उदात्तेनोदात्तः' (पा. सू. ८. २. ५) इत्युदात्तः। 'सावेकाचस्तृतीयादिर्विभक्तिः' (पा.सू. ६. १. १६८) इति विभक्तेरुदात्तत्वे प्राप्ते प्रथमैकवचनेऽवर्णान्तत्वात् 'न गोश्वन्साववर्ण°' (पा. सू. ६. १. १८२) इति निषेधः। इन्द्राय। इन्द्रशब्दो रन्प्रत्ययान्तो निपातितः। नित्त्वादाद्युदात्तः। 'कर्मणा यमभिप्रैति स संप्रदानम्' (पा. सू. १. ४. ३२) इत्यत्र 'क्रियाग्रहणं कर्तव्यम्' (पा. म. १. ४. ३२) इति वचनात् गानक्रियया प्राप्यत्वात् संप्रदानत्वेन चतुर्थी॥ ॥ ८॥

'आ तु' इति द्वितीयं सूक्तं दशर्चम्। 'सुरूपकृत्नुं दश' इत्यनुवृत्तौ 'आ तु युञ्जन्ति' इत्येवमनुक्रान्तत्वात्। ऋषिच्छन्दोदेवताविनियोगाः पूर्ववत्। विशेषविनियोगस्तु—अतिरात्रे तृतीयपर्याये मैत्रावरुणशस्त्रे स्तोत्रियोऽयं तृचः। 'अतिरात्रे पर्यायाणाम्' इति खण्डे 'आ त्वेता नि षीदत' (आश्व. श्रौ. ६. ४) इत्युक्तत्वात्॥

**आ त्वेता नि षीदतेन्द्रमभि प्र गायत। सखायः स्तोमवाहसः॥ १॥**

आ। तु। आ। इत। नि। सीदत। इन्द्रम्। अभि। प्र। गायत। सखायः। स्तोमऽवाहसः॥१॥

तुशब्दः क्षिप्रार्थो निपातः। द्वाभ्यामाङ्भ्यामन्वेतुम् इतशब्दोऽभ्यसनीयः। हे Vसखायः ऋत्विजः क्षिप्रमस्मिन् कर्मणि आगच्छतागच्छत। आदरार्थोऽभ्यासः। आगत्य च Vनि Vषीदत उपविशत। उपविश्य च Vइन्द्रमभि Vप्र Vगायत। सर्वतः प्रकर्षेण स्तुत। कीदृशाः सखायः। Vस्तोमवाहसः।

---

१. छ-झ-ण-थ-श—°हिंसादहनभाव°।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्रिवृत्पञ्चदशादिस्तोमानस्मिन् कर्मणि वहन्ति प्रापयन्तीति ॥ आ तु आ । निपातत्वादाद्युदात्ताः । इत । ' इण् गतौ ' । ' ब्रुवोऽतस्तिङः ' (पा. सू. ६. ३. १३५) इति संहितायां दीर्घत्वम् । नि । निपातत्वादाद्युदात्तः । सीदत । ' पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ' (पा. सू. ७. ३. ७८) इत्यादिना सदेः सीदादेशः । ' सदिरप्रतेः ' (पा. सू. ८. ३. ६६) इति संहितायां षत्वम् । अभि । ' उपसर्गाश्चाभिवर्जम् ' (फि. सू. ८१) इति वचनात् प्रातिपदिकान्तोदात्तत्वम् । स्तोमवाहसः । ' अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन् ' (उ. सू. १. १३७) इति स्तौतेर्मन्प्रत्ययान्तः स्तोमशब्दो निरवादाद्युदात्तः । स्तोमं वहन्तीति स्तोमवाहसः । ' वहिहाधाञ्भ्यश्छन्दसि ' (उ. सू. ४. ६६०) इत्यसुन् प्रत्ययः । तत्र ' णित् ' इत्यनुवृत्तेः ' अत उपधायाः ' (पा. सू. ७. २. ११६) इत्युपधाया वृद्धिः । कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते ' गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च ' (उ. सू. ४. ६६६) इत्यौणादिकसूत्रात् समास आद्युदात्तः ॥

पुरूतमं पुरूणामीशानं वार्याणाम् । इन्द्रं सोमे सचा सुते ॥ २ ॥

पुरुऽतमम् । पुरूणाम् । ईशानम् । वार्याणाम् । इन्द्रम् । सोमे । सचा । सुते ॥ २ ॥

' सखायोऽभिप्रगायत ' इति पदद्वयमत्रानुवर्तते । हे सखायः ऋत्विजः [v]सचा यूयं सर्वैः सह । यद्वा । सचा परस्परसमवायेन [v]सुते अभिषुते [v]सोमे प्रवृत्ते सति [v]इन्द्रम् अभिप्रगायत । कीदृशमिन्द्रम् । [v]पुरूतमम् । पुरून् बहून् शत्रून्[3] तमयति[4] ग्लापयतीति पुरूतमः । [v]पुरूणां बहूनां [v]वार्याणां वरणीयानां धनानाम् [v]ईशानं स्वामिनम् ॥ पुरूतमम् । ' तमु ग्लाने ' इति धातोरन्तर्भावितण्यर्थात् पचाद्यचि चिरवादन्तोदात्तेऽपि कृदुत्तरपदप्रकृतिस्वरत्वं बाधित्वा ' परादिश्छन्दसि बहुलम् ' (पा. सू. ६. २. १९९) इत्युत्तरपदाद्युदात्तत्वम् । पुरूणाम् । ' पॄ पालनपूरणयोः ' इत्यस्मात् ' कुः ' इत्यनुवृत्तौ ' पॄभिदिव्यधिगृधिधृषिभ्यः ' (उ. सू. १. २३) इति कुप्रत्ययः । कित्त्वाद्गुणनिषेधे (पा. सू. १. १. ५) ' उदोष्ठ्यपूर्वस्य ' (पा. सू. ७. १. १०२) इत्युकारः ' उरण् रपरः ' (पा. सू. १. १. ५१) । प्रत्ययस्वरेणान्तोदात्तः पुरुशब्दः । अतो मतुपि ह्रस्वादन्तोदात्तात् पुरुशब्दात् परस्य नामो ' नामन्यतरस्याम् ' (पा. सू. ६. १. १७७) इत्यन्तोदात्तत्वम् । ईशानम् । ' ईश ऐश्वर्ये ' इति धातोरनुदात्तेत्त्वात् परस्य शानचो लसार्वधातुकानुदात्तत्वम् । वार्याणाम् । ' वृङ् संभक्तौ ' इत्यस्मात् ' ऋहलोर्ण्यत् ' (पा. सू. ३. १. १२४) । क्यब्विधौ हि वृञः एव ग्रहणं न वृङः (पा. सू. ३. १. १०९. १) । ' तित्स्वरितम् ' (पा. सू. ६. १. १८५) इति प्रत्ययस्वरितं बाधित्वा ' ईडवन्दवृशंसदुहां ण्यतः ' (पा. सू. ६. १. २१४) इति ण्यदन्तस्याद्युदात्तत्वम् । ' यतोऽनावः ' (पा. सू. ६. १. २१३) इत्यत्र तु ण्यतो ग्रहणं न भवति तस्य ङ्यनुबन्धकत्वात् । एकानुबन्धग्रहणे न ङ्यनुबन्धकस्येति नियमात् । सचा । ' षच समवाये ' । ' धात्वादेः षः सः ' (पा. सू. ६. १. ६४) । संपदादित्वाद्भावे क्विप् (पा. सू. ३. ३. १०८. ९) इति क्विप् । तृतीयैकवचनम् । धातुस्वरेणाद्युदात्तः । ' सर्वे विधयश्छन्दसि विकल्प्यन्ते ' (परिभा. ३५) इति न्यायेन ' सावेकाचः° ' इति सूत्रं न प्रवर्तते । सचा इत्यस्य निपातत्वपक्षे स्पष्टमाद्युदात्तत्वम् ॥

---

१. च-फ-°पञ्चदशैकविंशादिस्तोमा° । २. च-छ-थ-फ-प्रापयन्ति । ३. ठ-' शत्रून् ' नास्ति । ४. च-ठ-फ-तामयति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स घा नो योग आ भुवत्स राये स पुरंध्याम् । गमद्वाजेभिरा स नः ॥ ३ ॥

सः । घ । नः । योगे । आ । भुवत् । सः । राये । सः । पुरम्ऽध्याम् । गमत् । वाजेभिः । आ । सः । नः ॥ ३ ॥

घशब्दोऽवधारणार्थो निपातः । सर्वैस्तच्छब्दैः संबध्यते । [v]स [v]घ स एवेन्द्रः पूर्वमन्त्रोक्तगुणविशिष्टः [v]नः अस्माकं [v]योगे पूर्वमप्राप्तस्य पुरुषार्थस्य संबन्धे [v]आ [v]भुवत् आभवतु । पुरुषार्थं साधयत्वित्यर्थः । [v]सः एव [v]राये धनार्थम् आ भुवत् आभवतु । [v]सः एव [v]पुरंध्यां योषिति आ भुवत् । यद्वा । बहुविधायां बुद्धौ आ भुवत् । ' पुरंधिर्बहुधीः ' ( निरु. ६. १३ ) इति यास्कः । [v]सः एव [v]वाजेभिः देयैरन्नैः सह [v]नः अस्मान् [v]आ [v]गमत् आगच्छतु ॥ घ । ' चादयोऽनुदात्ताः ' ( फि. सू. ८४ ) इत्यनुदात्तः । संहितायाम् ' ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम् ' ( पा. सू. ६. ३. १३३ ) इति दीर्घः । योगे । घञो जित्त्वादाद्युदात्तत्वम् । भुवत् भूयात् । भवतेः आशीर्लिङि परतः ' लिङ्याशिष्यङ् ' ( पा. सू. ३. १. ८६ ) इति अङ्प्रत्ययः । तस्य ङित्त्वेन गुणाभावादुवङादेशः । ' किदाशिषि ' ( पा. सू. ३. ४. १०४ ) इति यासुट् न भवति ' अनित्यमागमशासनम् ' ( परिभा. ९३. २ ) इति वचनात् । ' तिङ्ङतिङः ' इति निघातः । ' ऊडिदंपदाद्यप्पुभ्रैद्युभ्यः ' ( पा. सू. ६. १. १७१ ) इति राये इत्येतस्य विभक्तेरुदात्तत्वम् । पुरंध्याम् । पुरंधिः पुरुधीः । पृषोदरादित्वात् ( पा. सू. ६. ३. १०९ ) उकारस्य अमादेशः ईकारस्य ह्रस्वश्च । ' आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम् ' ( पा. सू. ६. २. ९१. १ ) इत्याद्युदात्तत्वम् । अथवा पुरं शरीरं धीयतेऽस्यामिति ' कर्मण्यधिकरणे च ' ( पा. सू. ३. ३. ९३ ) इति किप्रत्ययः । अलुक् छान्दसः । ' नञ्विषयस्यानिसन्तस्य ' ( फि. सू. २६ ) इति पुरशब्द आद्युदात्तः । दासीभारादित्वात् ( पा. सू. ६. २. ४२ ) पूर्वपदप्रकृतिस्वरत्वम् । गमत् । गमेर्लेटः तिप् । ' इतश्च लोपः परस्मैपदेषु ' ( पा. सू. ३. ४. ९७ ) इति इकारलोपः । ' बहुलं छन्दसि ' ( पा. सू. २. ४. ७३ ) इति शपो लुक् । ' लेटोऽडाटौ ' ( पा. सू. ३. ४. ९४ ) इत्यडागमः । ' आगमा अनुदात्ताः ' ( पा. म. ३. १. ३. ७ ) इति तस्यानुदात्तत्वे धातुस्वर एव शिष्यते । वाजेभिः । वृषादित्वादाद्युदात्तः ॥

यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः । तस्मा इन्द्राय गायत ॥ ४ ॥

यस्य । सम्ऽस्थे । न । वृण्वते । हरी इति । समत्ऽसु । शत्रवः । तस्मै । इन्द्राय । गायत ॥ ४ ॥

[v]समत्सु युद्धेषु [v]यस्य इन्द्रस्य [v]संस्थे रथे युक्तौ [v]हरी द्वावश्वौ [v]शत्रवः [v]न [v]वृण्वते न संभजन्ते रथमश्वौ च दृष्ट्वा पलायन्ते इत्यर्थः । [v]तस्मा [v]इन्द्राय तत्संतोषार्थं हे ऋत्विजः [v]गायत स्तुतिं कुरुत । ' रणः ' इत्यादिषु षट्चत्वारिंशत्सु संग्रामनामसु ' समत्सु समरणे ' ( नि. २. १७. २२ ) इति पठितम् ॥ संस्थे । सम्यक् तिष्ठतीति संस्थो रथः । ' आतश्चोपसर्गे ' ( पा. सू. ३. १. १३६ ) इति कप्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वम् । वृण्वते । प्रत्ययस्वरेण अकार उदात्तः । सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः ( पा. सू. ६. १. १५८. ९-११ ) । ' तिङ्ङतिङः ' इति निघातो न भवति, ' यद्वृत्तान्नित्यम् ' ( पा. सू. ८. १. ६६ ) इति प्रतिषेधात् । पञ्चमीनिर्देशेऽपि ( पा. सू. १. १. ६७ ) अत्र व्यवहितेऽपि कार्यमिष्यते । हरतो रथमिति हरी अश्वौ । ' इन् ' इत्यनुवृत्तौ ( उ. सू. ४. ५५७ ) ' हृपिषिरुहिवृतिविदिच्छिदिकीर्तिभ्यश्च ' ( उ. सू. ४. ५५८ ) इति इन्-



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रत्ययः । निस्वादाद्युदात्तत्वम् । समत्सु । संपूर्वात् अत्तेः क्विप् । शत्रवः । शतिः सौत्रो धातुर्हिंसार्थः । ' रुशतिभ्यां क्रुन् ' ( उ. सू. ४. ५४३ ) । निस्वादाद्युदात्तत्वम् । तस्मै । ' सावेकाचः° ' ( पा. सू. ६. १. १६८ ) इति विभक्त्युदात्तस्य ' न गोश्वन्साववर्ण° ' ( पा. सू. ६. १. १८२ ) इति प्रतिषेधात् प्रातिपदिकस्वर एव ॥

सुतपात्रे सुता इमे शुचयो यन्ति वीतये । सोमासो दध्याशिरः ॥ ५ ॥

सुतऽपात्रे । सुताः । इमे । शुचयः । यन्ति । वीतये । सोमासः । दधिऽआशिरः ॥ ५ ॥

Vइमे Vसोमासः अस्मिन् कर्मणि संपादिताः सोमाः Vसुतपात्रे अभिषुतस्य सोमस्य पानकर्त्रे । षष्ठ्यर्थे चतुर्थी । तस्य पातुः Vवीतये भक्षणार्थं Vयन्ति तमेव प्राप्नुवन्ति । कीदृशाः सोमाः । Vसुताः अभिषुताः । Vशुचयः दशापवित्रेण शोधितत्वात् शुद्धाः । Vदध्याशिरः अवनीयमानं दधि आशीर्दोषघातकं येषां सोमानां ते दध्याशिरः ॥ सुतपात्रे । सुतं पिबतीति सुतपावा । वनिपः पित्त्वात् धातुस्वर एव शिष्यते । समासे द्वितीयापूर्वपदप्रकृतिस्वरं बाधित्वा कृदुत्तरपदप्रकृतिस्वरत्वम् । शुचयः । ' शुच दीप्तौ ' । ' इन् ' इत्यनुवृत्तौ ' इगुपधाज्ञित् ' ( उ. सू. ४. ५५९ ) इति इन् । कित्त्वाल्लघूपधगुणाभावः । निस्वादाद्युदात्तत्वम् । वीतये । ' वि गतिप्रजनकान्त्यशनखादनेषु ' इत्यस्मात् ' मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः ' ( पा. सू. ३. ३. ९६ ) इति क्तिन् उदात्तः । सोमासः । ' षुञ् अभिषवे ' । ' अर्तिस्तुसुहुसृधृक्षि° ' ( उ. सू. १. १३७ ) इत्यादिना मन् । निस्वादाद्युदात्तः । ' आज्जसेरसुक् ' ( पा. सू. ७. १. ५० ) इत्यसुगागमः । दध्याशिरः । दधाति पुष्णातीति दधि । ' डुधाञ् धारणपोषणयोः ' । ' आदृगमहनजनः किकिनौ लिट् च ' ( पा. सू. ३. २. १७१ ) इति किन् । लिड्वद्भावात् द्विर्भावः । कित्त्वादाकारलोपः । निस्वादाद्युदात्तत्वम् । ' शॄ हिंसायाम् ' । शृणाति हिनस्ति सोमेऽवनीयमानं सत् सोमस्य स्वाभाविकं रसम् ऋजीषत्वप्रयुक्तं नीरसं दोषं वा इत्याशीः । क्विपि ' ऋत इद्धातोः ' ( पा. सू. ७. १. १०० ) इति इत्वं रपरत्वं च । दध्येव आशीर्येषां सोमानां ते दध्याशिरः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥ ॥ ९ ॥

त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः । इन्द्र ज्यैष्ठ्याय सुक्रतो ॥ ६ ॥

त्वम् । सुतस्य । पीतये । सद्यः । वृद्धः । अजायथाः । इन्द्र । ज्यैष्ठ्याय । सुक्रतो इति सुऽक्रतो ॥६॥

Vसुक्रतो शोभनकर्मन् शोभनप्रज्ञ वा हे Vइन्द्र Vत्वं Vसुतस्य अभिषुतस्य सोमस्य Vपीतये पानार्थं Vज्यैष्ठ्याय देवेषु ज्येष्ठत्वार्थं च Vसद्यः तस्मिन्नेव क्षणे Vवृद्धो Vअजायथाः अभिवृद्धोत्साहेन युक्तोऽभूः ॥ पीतये । ' पा पाने ' इत्यस्मात् ' स्थागापापचो भावे ' ( पा. सू. ३. ३. ९५ ) इति क्तिन् । ' घुमास्था° ' ( पा. सू. ६. ४. ६६ ) इत्यादिना ईत्वम् । तस्य नित्त्वेऽपि व्यत्ययेन प्रत्ययोदात्तत्वम् । उत्तरसूत्रगतमुदात्तपदमत्रापि वा योजनीयम् । सद्यः । ' सद्यः परुत्परारि° ' ( पा. सू. ५. ३. २२ ) इति सूत्रेण समानेऽहनीत्यर्थे समानस्य सभावो द्यश्च प्रत्ययो निपात्यते । प्रत्ययस्वरेणोदात्तः । वृद्धः ।

---

१. ग-घ-च-छ-ण-त-फ-य-' समत्सु । संपूर्वात् अत्तेः क्विप् ' नास्ति । २. ठ-°द्युदात्तः । ३. ठ-अभिवृद्ध उत्साहयुक्तोऽभूः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'वृधु वृद्धौ'। 'उदितो वा' (पा. सू. ७. २. ५६) इति क्त्वाप्रत्यये इटो विकल्पितत्वात् 'यस्य विभाषा' (पा. सू. ७. २. १५) इति निष्ठायामिट्प्रतिषेधः। प्रत्ययस्वरेणोदात्तः। ज्यैष्ठ्याय। ज्येष्ठस्य भावो ज्यैष्ठ्यम्। 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (पा. सू. ५. १. १२४) इति ष्यञ्। जित्वादाद्युदात्तः॥

आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः। शं ते सन्तु प्रचेतसे॥ ७॥

आ। त्वा। विशन्तु। आशवः। सोमासः। इन्द्र। गिर्वणः। शम्। ते। सन्तु। प्रऽचेतसे॥७॥

हे [V]इन्द्र त्वां [V]सोमासः सोमाः [V]आ [V]विशन्तु आभिमुख्येन प्रविशन्तु। कीदृशाः सोमाः। [V]आशवः सवनत्रये प्रकृतिविकृत्योर्वा व्याप्तिमन्तः। कीदृशेन्द्र। [V]गिर्वणः गीर्भिः स्तुतिभिः संभजनीय देवविशेष। 'गिर्वणा देवो भवति गीर्भिरेनं वनयन्ति' (निरु. ६. १४) इति यास्कः। तथाविध हे इन्द्र [V]ते तव [V]प्रचेतसे प्रकृष्टज्ञानाय [V]शं सुखरूपाः सोमाः [V]सन्तु॥ गिर्वणः। गृणन्तीति गिरः स्तुतयः। 'गृ शब्दे'। क्विपि 'ऋत इद्धातोः' (पा. सू. ७. १. १००) इति इत्वं रपरत्वं च। गीर्भिर्वन्यते सेव्यते इति गिर्वणाः। 'वन षण संभक्तौ'। संभक्तिः सेवा। 'सर्वधातुभ्योऽसुन्' (उ. सू. ४. ६२८) इत्यसुन्प्रत्ययः। प्रचेतसे। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्॥

त्वां स्तोमा अवीवृधन्त्वामुक्था शतक्रतो। त्वां वर्धन्तु नो गिरः॥ ८॥

त्वाम्। स्तोमाः। अवीवृधन्। त्वाम्। उक्था। शतक्रतो इति शतऽक्रतो। त्वाम्। वर्धन्तु। नः। गिरः॥ ८॥

हे [V]शतक्रतो बहुकर्मन् बहुप्रज्ञ वा इन्द्र [V]त्वां [V]स्तोमाः सामगानां स्तोत्राणि [V]अवीवृधन् वर्धितवन्ति। [1]तथा बह्वृचानाम् [V]उक्था शस्त्राणि [V]त्वाम् अवीवृधन्। यस्मात् पूर्वमेवमासीत् तस्मादिदानीमपि [V]नः अस्माकं [V]गिरः स्तुतयः [V]त्वां [V]वर्धन्तु वर्धयन्तु अतिवृद्धं[2] कुर्वन्तु॥ स्तोमाः। [3]मनो नित्त्वादाद्युदात्तः। अवीवृधन्। 'वृधु वृद्धौ'। ण्यन्तात् लुङि चङि (पा. सू. ३. १. ४८) 'उर्ऋत्' (पा. सू. ७. ४. ७) इति वृधेरुपधाया ऋकारस्य ऋकारविधानादन्तरङ्गोऽपि गुणो बाध्यते। द्विर्भाव-(पा. सू. ६. १. ११) हलादिशेष-(पा. सू. ७. ४. ६०) सन्वद्भाव-(पा. सू. ७. ४. ९३) इत्व-(पा. सू. ७. ४. ७९) दीर्घत्व-(पा. सू. ७. ४. ९४) अडागमाः (पा. सू. ६. ४. ७१)। उक्था उक्थानि। 'पातृतुदिवचिरिचिसिचिभ्यस्थक्' (उ. सू. २. १६४) इति वचेः थक्प्रत्ययः। तस्य कित्त्वात् संप्रसारणम्। 'शेश्छन्दसि बहुलम्' (पा. सू. ६. १. ७०) इति शिलोपो नलोपश्च। प्रत्ययस्वरेणान्तोदात्तः। असामर्थ्यादामन्त्रितपरस्यापि न पराङ्गवद्भाव इति नानुदात्तत्वम्। वर्धन्तु। अन्तर्भावितण्यर्थात् वृधेः व्यत्ययेन परस्मैपदम्॥

---

१. ठ-व्याप्तिं गताः। २. ठ-वर्धयन्ति। ३. ठ-वृद्धम्। ४. ठ-स्तोर्मन्। ५. ठ-नाद्युदात्तत्वम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

**अक्षितोतिः सनेदिमं वाजमिन्द्रः सहस्रिणम्। यस्मिन्विश्वानि पौंस्या ॥ ९ ॥**

अक्षितऽऊतिः। सनेत्। इमम्। वाजम्। इन्द्रः। सहस्रिणम्। यस्मिन्। विश्वानि। पौंस्या॥९॥

Vइन्द्रः Vइमं Vवाजं सोमरूपमन्नं Vसनेत् संभजेत्। कीदृश इन्द्रः। Vअक्षितोतिः Vअहिंसितरक्षणः। कदाचिदपि रक्षां न विमुञ्चतीत्यर्थः। कीदृशं वाजम्। Vसहस्रिणं प्रकृतौ विकृतिषु च प्रवर्तमानत्वेन सहस्रसंख्यायुक्तम्। Vयस्मिन् वाजे Vविश्वानि सर्वाणि Vपौंस्या पौंस्यानि पुंस्त्वानि बलानि वर्तन्ते तादृशं वाजमिति पूर्वत्रान्वयः॥ अक्षितोतिः। ननु 'क्षि क्षये' इत्ययं धातुरकर्मकः। तस्य च कर्माभावात् अधिकरणे भावे कर्तरि वा क्तप्रत्ययेन भवितव्यम्। तदिह यदि कर्तर्यधिकरणे वा स्यात् तदा तयोरर्थयोः ण्यत्प्रत्ययस्याविधानात् 'क्षियः' इत्यनुवृत्तौ (पा. सू. ६. ४. ५९) 'निष्ठायामण्यदर्थे' (पा. सू. ६. ४. ६०) इति दीर्घेण भवितव्यम्। तथा च 'क्षियो दीर्घात्' (पा. सू. ८. २. ४६) इति निष्ठानत्वे अक्षीण इति स्यात् न तु अक्षित इति। अथ 'नपुंसके भावे क्तः' (पा. सू. ३. ३. ११४) इति भावपरः क्षितशब्दो गृह्यते। तदा तस्य ण्यदर्थत्वेन '°अण्यदर्थे' इति निषेधात् दीर्घनत्वयोरभावात् क्षितमिति सिध्यति। तदा तु नञ्तत्पुरुषः प्रकृतेन नान्वेतीति न विद्यते क्षितमत्रेति बहुव्रीहिणैव भवितव्यम्। तथा च 'नञ्सुभ्याम्' (पा. सू. ६. २. १७२) इत्युत्तरपदान्तोदात्तत्वं स्यात्। पुनः ऊतिशब्देन बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन स एव स्वरस्तिष्ठेदिति अभिमतमाद्युदात्तत्वं न सिध्येदिति। सत्यम्। अत एवात्र क्षिधातुरन्तर्भावितण्यर्थो गृह्यते। तेन सकर्मकत्वात् कर्मण्येषा निष्ठा। ततश्च '°अण्यदर्थे' इति निषेधात् दीर्घो निष्ठानत्वं च न भविष्यति। तथा च नञ्तत्पुरुषे न क्षिता अक्षिता अक्षयिता इत्यर्थः। तत्र चाव्ययपूर्वपदप्रकृतिस्वरत्वेन नञ उदात्तत्वम्। पुनः ऊतिपदेन बहुव्रीहौ स एव स्वरः स्थास्यतीति न कोऽपि दोषः। 'रि क्षि चिरि जिरि दाश ह जिघांसायाम्' इति क्षिणोतेर्हिंसार्थस्य वा कर्मणि निष्ठा। तथा चाहिंसितोतिरित्यर्थे उक्तक्रमेण स्वरः सिध्यतीति न दोषः। सनेत्। 'वन षण संभक्तौ'। भौवादिकः। वाजम्। वृषादित्वादाद्युदात्तः। इन्द्रः। रनो निरित्वादाद्युदात्तः। सहस्रिणम्। सहस्रमस्यास्ति। 'अत इनिठनौ' (पा. सू. ५. २. ११५)। प्रत्ययस्वरः। विश्वानि। विशेः क्वनि (उ. सू. १. १४९) निरित्वादाद्युदात्तः। पुंसः कर्माणि पौंस्यानि। ब्राह्मणादेराकृतिगणत्वात् 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' (पा. सू. ५. १. १२४) इति ष्यञ्। जित्वादाद्युदात्तः। प्रथमाबहुवचनस्य 'सुपां सुलुक्°' (पा. सू. ७. १. ३९) इत्यादिना डादेशः। ननु 'स्त्रीपुंसाभ्यां नञ्स्नञौ भवनात्' (पा. सू. ४. १. ८७) इत्यनेन 'धान्यानां भवने क्षेत्रे खञ्' (पा. सू. ५. २. १) इत्येतत्पर्यन्तेष्वपत्याद्यर्थेषु नञ्स्नञोर्विधानात्, यथा पुंसोऽपत्यं पौंस्नः पुंस आगतः पौंस्नः इत्यादि, तद्वत् पुंसो भावः कर्म वेत्यस्मिन्नप्यर्थे ष्यञं बाधित्वा पौंस्नानि इत्येव भवितव्यम्। कथमुच्यते पौंस्यानीति। उच्यते—'आ च त्वात्' (पा. सू. ५. १. १२०) इति सूत्रे त्वात् इत्यवधिनिर्देशात् 'ब्रह्मणस्त्वः' (पा. सू. ५. १. १३६) इत्येतत्पर्यन्तैः इमनिजादिभिः प्रत्ययैः सह त्वतलोः समावेशः। एवं तत्रैव चशब्दात् नञ्स्नञोरपि ष्यञादिभिः समावेश एव, न बाध्यबाधकभावः॥

---

१. ठ–मुञ्चतीति। २. च-छ-फ–वर्तमानत्वेन। ३. ग-घ-छ-ण-त-य–पौंस्या पुंस्त्वानि। ४. ठ–सेत्स्यतीति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

**मा नो मर्ता अभि द्रुहन्तनूनामिन्द्र गिर्वणः । ईशानो यवया वधम् ॥ १० ॥**

मा । नः । मर्ताः । अभि । द्रुहन् । तनूनाम् । इन्द्र । गिर्वणः । ईशानः । यवय । वधम् ॥ १० ॥

हे [v]गिर्वणः [v]इन्द्र [v]मर्ताः विरोधिनो मनुष्याः [v]नः अस्मदीयानां [v]तनूनां शरीराणां [v]मा [v]अभि [v]द्रुहन् अभितो द्रोहं मा कुर्युः । [v]ईशानः समर्थस्त्वं [v]वधं वैरिभिः संपाद्यमानं [v]यवय अस्मत्तः पृथक्कुरु । 'मनुष्याः' इत्यादिषु पञ्चविंशतिसंख्याकेषु मनुष्यनामसु 'मर्ताः भ्राताः' ( नि. २. ३. १३ ) इति पठितम् ॥ मर्ताः । 'असिहसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन्' ( उ. सू. ३. ३६६ ) इति तन् । नित्त्वादाद्युदात्तः । अभि । 'एवमादीनामन्तः' ( फि. सू. ८२ ) । द्रुहन् । 'द्रुह जिघांसायाम्' । 'लिङर्थे लेट्' ( पा. सू. ३. ४. ७ ) इति प्रार्थनायां लेट् । तस्य झि । 'झोऽन्तः' ( पा. सू. ७. १. ३ ) । 'इतश्च लोपः परस्मैपदेषु' ( पा. सू. ३. ४. ९७ ) इति इकारलोपः । शपो लुक् । 'सार्वधातुकमपित्' ( पा. सू. १. २. ४ ) इति तिङो ङित्त्वाल्लघूपधगुणाभावः ( पा. सू. १. १. ५ ) । तनूनाम् । असामर्थ्यान्न पराङ्गवद्भावः । इन्द्र गिर्वणः । गतम् । ईशानः । धातोरनुदात्तेत्त्वात् शपो लुकि लसार्वधातुकानुदात्तत्वे धातुस्वर एव शिष्यते । यवय । यौतेर्णिचि 'संज्ञापूर्वको विधिरनित्यः' (परिभा. ९३. १) इति वृद्धिर्न क्रियते । अथवा यौतीति यवः । पचाद्यच् ( पा. सू. ३. १. १३४ ) । यवं करोतीत्यर्थे 'तत्करोति तदाचष्टे' ( पा. सू. ३. १. २६. ५-६ ) इति णिच् । इष्टवद्भावात् टिलोपः ( पा. सू. ६. ४. १५५. १ ) । तस्य स्थानिवद्भावात् ( पा. सू. १. १. ५६ ) वृद्ध्यभावः । वधम् । 'हनश्च वधः' (पा. सू. ३. ३. ७६ ) इति भावे अप् । तत्संनियोगशिष्टः स्थानिवद्भावेनान्तोदात्तो वधादेशः । उदात्तनिवृत्तिस्वरेण अपः उदात्तत्वम् ॥ ॥ १० ॥

'सुरूप' इत्यादिषु षट्सूक्तेषु तृतीयस्य 'युञ्जन्ति' इति सूक्तस्य मन्त्रसंख्या ऋषिच्छन्दोदैवतानि विनियोगश्चेत्येते पूर्ववदवगन्तव्याः । दशर्चे तस्मिन् सूक्ते आद्यास्तिस्रोऽन्तिमा चेत्येताश्चतस्र ऐन्द्र्यः । 'आदह' इत्येतां चतुर्थीमारभ्य षड्चो मारुत्यः । तासु मध्ये 'वीळु चित्', 'इन्द्रेण' इत्येते द्वे ऋचौ मारुत्यौ सत्यावैन्द्र्यावपि भवतः । तदेतत् सर्वमनुक्रमणिकायामुक्तं—'सुरूपकृत्नुं दशेन्द्रमा तु युञ्जन्त्यादहेत्येताः षण्मारुत्यो वीळु चिदिन्द्रेणेत्यैन्द्र्यौ च' इति । एतस्मिन् सूक्ते 'युञ्जन्ति' इत्यसौ तृचस्तृतीये रात्रिपर्याये ब्राह्मणाच्छंसिनोऽनुरूपः । तथा च 'अतिरात्रे पर्यायाणाम्' इति खण्डे 'योगे योगे तवस्तरं युञ्जन्ति ब्रध्नमरुषम्' ( आश्व. श्रौ. ६. ४ ) इति सूत्रितम् ॥

**युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः । रोचन्ते रोचना दिवि ॥ १ ॥**

युञ्जन्ति । ब्रध्नम् । अरुषम् । चरन्तम् । परि । तस्थुषः । रोचन्ते । रोचना । दिवि ॥ १ ॥

इन्द्रो हि परमैश्वर्ययुक्तः । परमैश्वर्यं च अग्निवाय्वादित्यनक्षत्ररूपेणावस्थानादुपपद्यते । [v]ब्रध्नम् आदित्यरूपेणावस्थितम् [v]अरुषं हिंसकरहितताग्निरूपेणावस्थितं [v]चरन्तं वायुरूपेण सर्वतः प्रसरन्तमिन्द्रं [v]परि [v]तस्थुषः परितोऽवस्थिता लोकत्रयवर्तिनः प्राणिनः [v]युञ्जन्ति स्वकीये कर्मणि देवतात्वेन संबद्धं कुर्वन्ति । तस्यैवेन्द्रस्य मूर्तिविशेषभूतानि [v]रोचना रोचनानि नक्षत्राणि [v]दिवि द्युलोके [v]रोचन्ते प्रकाशन्ते । अस्य मन्त्रस्योक्तार्थपरत्वं ब्राह्मणान्तरे व्याख्यातं—'युञ्जन्ति ब्रध्नमित्याह । असौ वा आदित्यो

---

१. ठ–तत्संनियोगेनान्तोदात्तः; च-फ–तत्संनियोगशिष्टः स्थानिवद्भावेन संनियोगेनान्तोदात्तः; त–तत्संनियोगशिष्टः तत्संनियोगेनान्तोदात्तः । २. ठ–'नक्षत्र' नास्ति । ३. ठ–अहिंसकाग्नि° ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ब्रध्नः। आदित्यमेवास्मै युनक्ति। अरुषमित्याह। अग्निर्वा अरुषः। अग्निमेवास्मै युनक्ति। चरन्तमित्याह। वायुर्वै चरन्। वायुमेवास्मै युनक्ति। परि तस्थुष इत्याह। इमे वै लोकाः परि तस्थुषः। इमानेवास्मै लोकान्युनक्ति। रोचन्ते रोचना दिवीत्याह। नक्षत्राणि वै रोचना दिवि। नक्षत्राण्येवास्मै रोचयति ' (तै. ब्रा. ३. ९. ४. १-२ ) इति। पञ्चविंशतिसंख्याकेषु महन्नामसु ' महः ब्रध्नः ' (नि. ३. ३. २) इति पठितम्। आदित्यस्यापि महत्त्वादेव ब्रध्नत्वम्॥ युञ्जन्ति। अन्तेः प्रत्ययस्वरेणाद्युदात्तत्वम्। ब्रध्नम्। प्रातिपदिकान्तोदात्तः। अरुषम्। 'उप रुष रिष हिंसार्थाः'। रोषन्तीति रुषा हिंसकाः। 'इगुपधज्ञाप्रीकिरः कः ' (पा. सू. ३. १. १३५ ) इति कः। प्रत्ययस्वरेणोदात्तः। न सन्ति रुषा यस्य असौ अरुषः। ' नञ्सुभ्याम् ' (पा. सू. ६. २. १७२ ) इत्युत्तरपदान्तोदात्तत्वम्। ' अमि पूर्वः ' (पा. सू. ६. १. १०७ ) इति पूर्वरूपे ' एकादेश उदात्तेनोदात्तः ' (पा. सू. ८. २. ५ ) इत्युदात्तत्वम्। चरन्तम्। शपः पित्त्वादनुदात्तत्वम्। शतुश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते। तस्थुषः। तिष्ठतेर्लिटः क्वसुरादेशः (पा. सू. ३. २. १०७ )। ' वस्वेकाजाद्घसाम् ' (पा. सू. ७. २. ६७ ) इति इटमन्तरङ्गमपि बाधित्वा ' संप्रसारणं संप्रसारणाश्रयं च बलीयः ' (पा. म. ६. १. १७. २ ) इति शसि परतो भस्वात् (पा. सू. १. ४. १८ ) ' वसोः संप्रसारणम् ' (पा. सू. ६. ४. १३१ )। परपूर्वत्वम्। ' आदेशप्रत्यययोः ' (पा. सू. ८. ३. ५९ ) इति षत्वम्। वसोः प्रत्ययस्वरेणोदात्तत्वम्। रोचन्ते। तिङो लसार्वधातुकानुदात्तत्वम्। शपः पित्त्वादनुदात्तत्वम्। धातुस्वर एव। रोचना। ' अनुदात्तेतश्च हलादेः ' (पा. सू. ३. २. १४९ ) इति युच्। ' युवोरनाकौ ' (पा. सू. ७. १. १ ) इत्यनादेशः। ' चितः ' (पा. सू. ६. १. १६३ ) इत्यन्तोदात्तत्वम्। दिवि। ' ऊडिदम्° ' (पा. सू. ६. १. १७१ ) इत्यादिना विभक्तेरुदात्तत्वम्॥

युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे। शोणा धृष्णू नृवाहसा ॥ २ ॥

युञ्जन्ति। अस्य। काम्या। हरी इति। विऽपक्षसा। रथे। शोणा। धृष्णू इति। नृऽवाहसा॥२॥

[v]अस्य ब्रध्नादिशब्दप्रतिपाद्यस्य आदित्यादिमूर्तिभिस्तत्र तत्रावस्थितस्येन्द्रस्य [v]रथे [v]हरी एतन्नामानौ द्वावश्वौ सारथयः [v]युञ्जन्ति। इन्द्रसंबन्धिनोरश्वयोर्हरिनामत्वं ' हरी इन्द्रस्य रोहितोऽग्नेः ' (नि. १. १५. १ ) इति पठितत्वात्। कीदृशौ हरी। [v]काम्या कामयितव्यौ। [v]विपक्षसा विविधे पक्षसी रथस्य पार्श्वौ ययोरश्वयोस्तौ विपक्षसौ। रथस्य द्वयोः पार्श्वयोर्योजितावित्यर्थः। [v]शोणा रक्तवर्णौ [v]धृष्णू प्रगल्भौ [v]नृवाहसा नृणां पुरुषाणाम् इन्द्रतत्सारथिप्रमुखाणां वोढारौ॥ अस्य। ब्रध्नम् इत्युक्तस्य परामर्शात् ' इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ' (पा. सू. २. ४. ३२ ) इति अश्। शित्त्वात् (पा. सू. १. १. ५५ ) सर्वादेशोऽनुदात्तः। विभक्तिरनुदात्तैव इति सर्वानुदात्तत्वम्। काम्या। ' कमु कान्तौ '। ' कमेर्णिङ् ' (पा. सू. ३. १. ३० )। कामयतेः ' अचो यत् ' (पा. सू. ३. १. ९७ )। तित्स्वरितापवादत्वेन ' यतोऽनावः ' (पा. सू. ६. १. २१३ ) इत्याद्युदात्तत्वम्। ' सुपां सुलुक्° ' (पा. सू. ७. १. ३९ ) इति द्विवचनस्य डादेशः। हरतो रथमिति हरी। ' हृषिषि° ' (उ. सू. ४. ५५८ ) इत्यादिना इन्। नित्त्वादाद्युदात्तः। विपक्षसा। ' पचिवचिभ्यां सुट् च ' (उ. सू. ४. ६५९ ) इति पचेः असुन् सुडागमश्च। विभिन्ने पक्षसी पार्श्वौ ययोस्तौ। विशब्दो निपातत्वादुदात्तः। पूर्वपदप्रकृतिस्वरेण स एव शिष्यते। द्विवचनस्य डादेशः। रथे। रमन्तेऽस्मिन्निति रथः। ' रमु क्रीडायाम् '। ' हनिकुषिनीरमिकाशिभ्यः क्थन् ' (उ. सू. २. १५९ ) इति क्थन्। कित्त्वात् ' अनुदात्तोपदेश° '

---

१. च-छ-ण-त-फ–प्रत्ययस्वरेणान्तोदात्तः। २. क-ञ-ठ-ण-न-य–शासिवसिघसीनां च।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

( पा. सू. ६. ४. ३७ ) इत्यादिना मकारलोपः । नित्स्वरेणाद्युदात्तः । शोणा । ' शोणृ वर्णगत्योः ' गमनकरणत्वात् करणे घञ् । ञित्वादाद्युदात्तः । ' सुपां सुलुक्° ' इति डादेशः । धृष्णू । ' जिधृषा प्रागल्भ्ये ' । ' ऋसिगृधिधृषिक्षिपेः क्नुः ' ( पा. सू. ३. २. १४० ) । कित्त्वाद्गुणाभावः । प्रत्ययस्वरः । नृवाहसा । नॄन् वहतः इति वहेः ' वहिहाधाभ्यश्छन्दसि ' ( उ. सू. ४. ६६० ) इत्यसुन् । ' णित् ' ( उ. सू. ४. ६५७ ) इत्यनुवृत्तेर्वृद्धिः । ञित्वादाद्युदात्तः । कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते ॥

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे । समुषद्भिरजायथाः ॥ ३ ॥

केतुम् । कृण्वन् । अकेतवे । पेशः । मर्याः । अपेशसे । सम् । उषत्ऽभिः । अजायथाः ॥३॥

हे [V]मर्याः मनुष्या इदमाश्चर्यं पश्यतेत्यध्याहारः । किमाश्चर्यमिति तदुच्यते । आदित्यरूपोऽयमिन्द्रः [V]उषद्भिः दाहकैः रश्मिभिः प्रतिदिनमुषःकालैर्वा संभूय [V]अजायथाः उदपद्यत । अथवा सूर्यस्यैवास्तमये मरणमुपचर्य व्यत्ययेन बहुवचनं कृत्वा संबोधनं क्रियते । हे मर्य प्रतिदिनं त्वम् अजायथाः इति योज्यम् । किं कुर्वन् । [V]अकेतवे रात्रौ निद्राभिभूतत्वेन प्रज्ञानरहिताय [V]प्राणिने [V]केतुं [V]कृण्वन् प्रातः प्रज्ञानं कुर्वन् । [V]अपेशसे रात्रौ अन्धकारावृतत्वेन अनभिव्यक्तत्वात् रूपरहिताय पदार्थाय प्रातरन्धकारनिवारणेन [V]पेशः रूपमभिव्यज्यमानं कुर्वन् । ' पेश इति रूपनाम पिंशतेः ' ( निरु. ८. ११ ) इति यास्कः । ' अकेतवे ', ' अपेशसे ' इति चतुर्थ्यौ षष्ठ्यर्थे द्रष्टव्यौ ॥ केतुम् । प्रातिपदिकस्वरः । कृण्वन् । ' कृवि हिंसाकरणयोश्च ' । लटः शत्रादेशः । ' इदितो नुम् धातोः ' ( पा. सू. ७. १. ५८ ) इति नुमागमः । कर्तरि शपि प्राप्ते ' धिन्विकृण्व्योर च ' ( पा. सू. ३. १. ८० ) इति उप्रत्ययः ; तत्संनियोगेन वकारस्य च अकारः । ' अतो लोपः ' ( पा. सू. ६. ४. ४८ ) इति अकारलोपः । तस्य स्थानिवद्भावात् पूर्वस्य लघूपधगुणो ( पा. सू. ७. ३. ८६ ) न भवति । अकारस्य प्रत्ययस्वरेणोदात्तत्वम् । अकेतवे । बहुव्रीहौ ' नञ्सुभ्याम् ' ( पा. सू. ६. २. १७२ ) इत्युत्तरपदान्तोदात्तत्वम् । पेशः । ' नञ्विषयस्यानिसन्तस्य ' ( फि. सू. २६ ) इत्याद्युदात्तः । मर्याः । ' छन्दसि निष्टर्क्य° ' ( पा. सू. ३. १. १२३ ) इत्यादौ म्रियतेर्निपातेः । आमन्त्रितनिघातः ( पा. सू. ८. १. १९ ) । असामर्थ्यात् पूर्वस्य न पराङ्गवद्भावः । अपेशसे । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । सम् । निपात आद्युदात्तः । उषद्भिः । ' उष प्लुष दाहे ' । ज्वलद्भिः रश्मिभिः । लटः शत्रादेशे शपि प्राप्ते व्यत्ययेन शः । ' सार्वधातुकमपित् ' ( पा. सू. १. २. ४ ) इति तस्य ङित्त्वात् लघूपधगुणो न भवति । शस्य प्रत्ययस्वरेणोदात्तत्वम् । उपरि शतुरनुदेशाल्लसार्वधातुकानुदात्तत्वम् । ' एकादेश उदात्तेनोदात्तः ' ( पा. सू. ८. २. ५ ) । अजायथाः । अजायत इत्यर्थे पुरुषव्यत्यये [२] निघातः ॥

आदह स्वधामनु पुनर्गर्भत्वमेरिरे । दधाना नाम यज्ञियम् ॥ ४ ॥

आत् । अह । स्वधाम् । अनु । पुनः । गर्भऽत्वम् । आऽईरिरे । दधानाः । नाम । यज्ञियम् ॥ ४ ॥

अत्रास्ति विशेषविनियोगः । चतुर्विंशेऽहनि प्रातःसवने ब्राह्मणाच्छंसिशस्त्रे ' आदह स्वधामनु ' इति द्वे ऋचौ । ' इन्द्रेण, सं हि दृक्षसे ' इत्येका । अयं तृचः षळहस्तोत्रियसंज्ञकः । तथा च सूत्रितं

---

१. प–°र्निपातितः । २. त–पुरुषव्यत्ययः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'चतुर्विंशे होताजनिष्ट' इति खण्डे–'इन्द्रेण सं हि दृक्षस आदह स्वधामन्वित्येका द्वे च' (आश्व. श्रौ. ७. २) इति। यद्यप्येतदैन्द्रं सूक्तं तथापि 'आदह' इत्यादिषु षट्सु मरुतो वर्ण्यन्ते। 'प्रायेणैन्द्रे मरुतः' इति अनुक्रमणिकायामुक्तत्वात् (अनु. २. २२)। आत् इत्ययम् आनन्तर्यार्थो निपातः[1]। अह इत्यवधारणार्थः। [v]आदह वर्षतोरनन्तरमेव। [v]स्वधामनु। इतः परं जनिष्यमाणमन्नमुदकं वा अनुलक्ष्य मरुतो देवाः [v]गर्भत्वम् [v]एरिरे मेघमध्ये जलस्य गर्भाकारं प्रेरितवन्तः। जलस्य कर्तारं पर्जन्यं प्रेरितवन्तः। प्रतिसंवत्सरमेवं कुर्वन्तीति दर्शयितुं पुनःशब्दः प्रयुक्तः। कीदृशा मरुतः। [v]यज्ञियं यज्ञार्हं [v]नाम [v]दधानाः धारयन्तः। सप्तसु गणेषु मरुताम् 'ईदृङ्चान्यादृङ्च' इत्यादीनि यज्ञयोग्यानि नामानि अन्यत्राम्नातानि। 'अन्धः' इत्यादिष्वष्टाविंशतिसंख्याकेष्वन्ननामसु 'ऊर्क् रसः स्वधा' (नि. २. ७. १७) इति पठितम्। 'अर्णः' इत्यादिष्वेकशतसंख्याकेषूदकनामसु 'तेजः स्वधा अक्षरम्' (नि. १. १२. ९७) इति पठितम्॥ आदह निपातावाद्युदात्तौ। स्वधाम्। स्वं लोकं दधाति पुष्णातीति स्वधा। 'आतोऽनुपसर्गे कः' (पा. सू. ३. २. ३)। कृदुत्तरपदप्रकृतिस्वरत्वम्। अनुपुनःशब्दौ निपातावाद्युदात्तौ। गर्भस्य भावो गर्भत्वम्। प्रत्ययस्वरः। एरिरे। अन्तर्भावितण्यर्थात् 'ईर गतौ' इत्यस्मात् अनुदात्तेतः परस्य लिटो झस्य इरेच् (पा. सू. ३. ४. ८१)। चित्त्वादन्तोदात्तः। 'सह सुपा' (पा. सू. २. १. ४) इत्यत्र सुपेति योगविभागात् आङा सह तिङः समासेऽपि 'समासस्य' (पा. सू. ६. १. २२३) इत्यन्तोदात्तत्वम्। 'इजादेश्च गुरुमतोऽनृच्छः' (पा. सू. ३. १. ३६) इति आम् न भवति मन्त्रत्वात्। अहशब्दयोगात् निघाताभावः, 'तुपश्यपश्यताहैः पूजायाम्' (पा. सू. ८.१.३९) इति निषेधात्। दधानाः। शानचश्चित्त्वादन्तोदात्तत्वे प्राप्ते 'अभ्यस्तानामादिः' (पा. सू. ६.१.१८९) इत्याद्युदात्तत्वम्। यज्ञमर्हति यज्ञियम्। 'यज्ञर्त्विग्भ्यां घखञौ' (पा. सू. ५. १. ७१) इति घप्रत्ययः। 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' (पा. सू. ७. १. २) इति इयादेशः। प्रत्ययस्वरेण इकार उदात्तः॥

**वीळु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः। अविन्द उस्रिया अनु॥ ५॥**

वीळु। चित्। आरुजत्नुऽभिः। गुहा। चित्। इन्द्र। वह्निऽभिः। अविन्दः। उस्रियाः। अनु॥ ५॥

अस्ति किंचिदुपाख्यानम्। पणिभिर्देवलोकात् गावोऽपहृता अन्धकारे प्रक्षिप्ताः। ताश्चेन्द्रो मरुद्भिः सहाजयदिति। एतच्चानुक्रमणिकायां सूचितं—'पणिभिरसुरैर्निगूळहा गा अन्वेष्टुं सरमां देवशुनीमिन्द्रेण प्रहितामयुग्भिः पणयो मित्रीयन्तः प्रोचुः' (अनु.ऋ.सं.१०.१०८) इति। मन्त्रान्तरे च दृष्टान्ततया सूचितं–'निरुद्धा आपः पणिनेव गावः' (ऋ. सं. १. ३२. ११) इति। तदेतदुपाख्यानमभिप्रेत्योच्यते। हे [v]इन्द्र [v]वीळु [v]चित् दृढमपि दुर्गमस्थानम् [v]आरुजत्नुभिः भञ्जद्भिः [v]वह्निभिः वोढृभिरन्यत्र नेतुं समर्थैर्मरुद्भिः सहितस्त्वं [v]गुहा [v]चित् गुहायामपि स्थापिता [v]उस्रियाः गाः [v]अनु [v]अविन्दः अन्विष्य लब्धवानसि। 'ओजः पाजः' इत्यादिष्वष्टाविंशतिसंख्याकेषु बलनामसु 'दक्षः वीळु स्थौल्यम्' (नि. २. ९. १४) इति पठितम्। नवसंख्याकेषु गोनामसु 'अघ्न्या उस्रा उस्रिया' (नि. २. ११. ३) इति पठितम्॥ वीळु। प्रातिपदिकस्वरः। चित्। चादिरनुदात्तः। आरुजत्नुभिः। 'रुजो भङ्गे' इति औणादिकः कत्नुच्प्रत्ययः। किस्वाद्गुणाभावः। चित्त्वादन्तोदात्तत्वम्। समासे कृदुत्तरपदप्रकृतिस्वरत्वम्।

---

१. त–आनन्तर्यार्थे। २. च-श–सूत्रितम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

गुहा। सप्तम्या डादेशः। 'ग्रामादीनां च' (फि. सू. ३८) इत्याद्युदात्तः। वह्निभिः। 'वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' (उ. सू. ४. ४९१) इति वहेः निप्रत्ययः। नित्त्वादाद्युदात्तः। अविन्दः। 'शे मुचादीनाम्' (पा. सू. ७. १. ५९) इति नुमागमः। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' (पा. सू. ६. ४. ७१)। वसन्तीति उस्रियाः। वसेः कर्तरि रियक्प्रत्ययः षत्वाभावश्च बाहुलकादूहनीयः। उक्तं हि–'यत्र पदार्थविशेषसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम्' (पा. सू. ३. ३. १. २) इति। इकारः प्रत्ययस्वरेणोदात्तः॥ ॥ ११ ॥

देवयन्तो यथा मतिमच्छा विदद्वसुं गिरः। महामनूषत श्रुतम् ॥ ६ ॥

देवऽयन्तः। यथा। मतिम्। अच्छ। विदत्ऽवसुम्। गिरः। महाम्। अनूषत। श्रुतम् ॥६॥

[v]देवयन्तः मरुत्संज्ञकान् देवानिच्छन्तः [v]गिरः स्तोतारः ऋत्विजः [v]महां प्रौढं मरुद्गणम् [v]अच्छ प्राप्तुम् [v]अनूषत स्तुतवन्तः। कीदृशं मरुद्गणम्। [v]विदद्वसुं वेदयद्भिः स्वमहिमप्रख्यापकैर्वसुभिर्धनैर्युक्तं [v]श्रुतं विख्यातम्। मरुद्गणस्य दृष्टान्तः। [v]यथा [v]मतिम्। मन्तारमिन्द्रं यथा स्तुवन्ति तथेत्यर्थः॥ देवयन्तः देवानात्मन इच्छन्तः। 'सुप आत्मनः क्यच्' (पा. सू. ३. १. ८)। 'क्यचि च' (पा. सू. ७. ४. ३३) इति ईत्वम्, 'अकृत्सार्वधातुकयोर्दीर्घः' (पा. सू. ७. ४. २५) इति दीर्घत्वं च न भवति; 'न च्छन्दस्यपुत्रस्य' (पा. सू. ७. ४. ३५) इत्यनेन क्यचि यत् प्राप्तम् ईत्वं दीर्घत्वं वा तस्य सर्वस्य प्रतिषेधात्। यद्यपि ईत्वमेव प्रकृतं तथापि व्यवहितस्यापि दीर्घत्वस्य स प्रतिषेध इति विज्ञायते; 'अश्वायन्तः' इत्यादौ 'अश्वाघस्यात्' (पा. सू. ७. ४. ३७) इति आत्वविधानात् इति ह्युक्तम्। क्यजन्तात् शतृप्रत्ययः। क्यचश्चित्त्वात् 'चितः' (पा. सू. ६. १. १६३) इत्यन्तोदात्तत्वम्। शपः पित्त्वेन शतुश्च लसार्वधातुकस्वरेणानुदात्तत्वे 'एकादेश उदात्तेनोदात्तः' (पा. सू. ८. २. ५) इत्युदात्तः। यथा। 'प्रकारवचने थाल्' (पा. सू. ५. ३. २३)। 'लिति' (पा. सू. ६. १. १९३) इति प्रत्ययात् पूर्वमुदात्तत्वम्। मतिम्। 'मन्त्रे वृषेषपचमन°' (पा. सू. ३. ३. ९६) इत्यादिना क्तिन् उदात्तः। मतिशब्दो ज्ञानपरोऽप्युपचारात् ज्ञातरि इन्द्रे वर्तते। अथवा पदान्तरे विशेष्यानुपादानात् इन्द्रस्यैषा संज्ञा। ततश्च 'क्तिच्क्तौ च संज्ञायाम्' (पा. सू. ३. ३. १७४) इति मन्यतेः कर्तरि क्तिच्। तस्य उपदेशेऽनुदात्तत्वात् इट्प्रतिषेधः (पा. सू. ७.२.१०)। चित्त्वादन्तोदात्तत्वम्। अच्छ। अध्याहृतगच्छत्यर्थयोगात् 'अच्छ गत्यर्थवदेषु' (पा. सू. १. ४. ६९) इति गतिसंज्ञया सह निपातसंज्ञाया अपि समावेशात् (पा. सू. १. ४. ६०) 'निपाता आद्युदात्ताः' (फि. सू. ८०) इत्याद्युदात्तत्वम्। विदद्वसुम्। 'विद ज्ञाने' इत्यस्मादन्तर्भावितण्यर्थात् शतृप्रत्यये विदन्ति औदार्यातिशयवत्तया ज्ञापयन्ति वसूनि धनानि यं स विदद्वसुः। विदेः शतृप्रत्यये 'अदिप्रभृतिभ्यः शपः' (पा. सू. २. ४. ७२) इति शपो लुकि प्रत्ययस्वरेण शतुरुदात्तत्वम्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन तदेव शिष्यते। गृणन्ति स्तुवन्तीति गिरः। गृणातेः क्विप 'ऋत इद्धातोः' (पा. सू. ७. १. १००) इति इत्वं रपरत्वम्। धातुस्वरेणोदात्तत्वम्। महां महान्तम्। नकारतकारयोर्लोपः छान्दसः। प्रातिपदिकस्वरेणोदात्तत्वम्। अनूषत। 'णु स्तुतौ'। व्यत्ययेनात्मनेपदम्। लुङि झस्य अदादेशः (पा. सू. ७. १. ५)। सिचि कुटादित्वेन ङित्त्वात् (पा. सू. १. २. १) गुणाभावः। इडभाव उकारदीर्घत्वं च छान्दसम्। निघातः। श्रुतम्। प्रत्ययस्वरः॥

---

१. ठ–देवानात्मन इच्छन्तः। २. ग-फ-य–°मुदात्तम्। ३. च-छ-त-फ-श–इन्द्रस्यैवेषा।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा । मन्दू समानवर्चसा ॥ ७ ॥

इन्द्रेण । सम् । हि । दृक्षसे । सम्ऽजग्मानः । अबिभ्युषा । मन्दू इति । समानऽवर्चसा ॥ ७ ॥

हे मरुद्गण त्वम् [v]इन्द्रेण [v]संजग्मानः संगच्छमानः [v]सं [v]दृक्षसे [v]हि सम्यग्दृश्येथाः खलु। अवश्यमस्माभिर्द्रष्टव्य इत्यर्थः । कीदृशेनेन्द्रेण । [v]अबिभ्युषा भीतिरहितेन । कीदृशाविन्द्रमरुद्गणौ । [v]मन्दू नित्यप्रमुदितौ । [v]समानवर्चसा तुल्यदीप्ती । पुरा कदाचित् वृत्रवधदशायामिन्द्रस्य सखायः सर्वे देवा वृत्रश्वासेन अपसारिताः । तदानीमिन्द्रस्य वृत्रसंबन्धिसकलसेनाजयार्थं मरुद्भिः संगमोऽभूत्। सोऽयमर्थो ' वृत्रस्य त्वा श्वसथात् ' ( ऋ. सं. ८. ९६. ७ ) इति मन्त्रे संगृहीतः, ' इन्द्रो वै वृत्रं हनिष्यन् ' ( ऐ. ब्रा. ३. २० ) इति ब्राह्मणे प्रपञ्चितश्च । इन्द्रशब्दः परमैश्वर्यवन्तं मरुद्गणं वाऽभिधत्ते । तदानीमिन्द्रस्य संबोधनं बहिरेवाध्याहर्तव्यम् । तथा चेयस्मृक् यास्केन व्याख्याता—'इन्द्रेण हि संदृश्यसे संगच्छमानोऽबिभ्युषा गणेन मन्दू मदिष्णू युवां स्थोऽपि वा मन्दुना तेनेति स्यात्समानवर्चसेत्येतेन व्याख्यातम् ' ( निरु. ४. १२ ) इति ॥ सं दृक्षसे संपश्येथाः । ' दृशेश्चेति वक्तव्यम् ' ( का. १. ३. २९. ) इत्यात्मनेपदम् । दृशेः ' लिङर्थे लेट् ' ( पा. सू. ३. ४. ७ ) इति प्रार्थनायां लेट्। ' थासः से ' ( पा. सू. ३. ४. ८० )। ' लेटोऽडाटौ ' ( पा. सू. ३. ४. ९४ ) इत्यडागमः। ' सिब्बहुलं लेटि ' (पा. सू. ३. १. ३४) इति सिप्। 'संज्ञापूर्वको विधिरनित्यः' ( परिभा० ९३.१ ) इति गुणाभावः । व्रश्चादिना (पा. सू. ८. २. ३६) षत्वम् । ' षढोः कः सि ' (पा. सू. ८.२.४१) इति कत्वम् । ' आदेशप्रत्यययोः ' ( पा. सू. ८. ३. ५९ ) इति सिपः षत्वम् । बहुलग्रहणात् सिपः परस्तात् शबपि भवति ( पा. सू. २. ४. ७३ )। सिपा व्यवधानात् पश्यादेशो न भवति ( पा. सू. ७. ३. ७८ )। शपः पित्त्वादनुदात्तत्वम् । उत्तरस्य लसार्वधातुकानुदात्तत्वम् । धातुस्वर एव शिष्यते। हिशब्दयोगात् ' तिङ्ङतिङः ' इति निघातो न भवति ' हि च ' ( पा. सू. ८. १. ३४ ) इति प्रतिषेधात्। संजग्मानः । गमेः संपूर्वात् ' छन्दसि लुङ्लङ्लिटः ' ( पा. सू. ३. ४. ६ ) इति वर्तमाने लिट्। ' समोगम्यृच्छिभ्याम् ' ( पा. सू. १. ३. २९ ) इत्यात्मनेपदविधानात् लिटः कानजादेशः ( पा. सू. ३. २. १०६ )। द्विर्भावः ( पा. सू. ६. १. ८ )। हलादिशेषः ( पा. सू. ७. ४. ६० )। अभ्यासस्य चुत्वम् ( पा. सू. ७. ४. ६२ )। ' गमहन° ' ( पा. सू. ६. ४. ९८ ) इत्युपधालोपः । कानचश्चित्त्वादन्तोदात्तत्वम् । गतिसमासे कृदुत्तरपदप्रकृतिस्वरत्वम् । अबिभ्युषा । ' जिभी भये ' । पूर्ववल्लिट्। ' शेषात्कर्तरि परस्मैपदम् ' (पा. सू. १. ३. ७८) इति परस्मैपदम् । ' क्वसुश्च ' ( पा. सू. ३. २. १०७ ) इति लिटः क्वसुरादेशः । तस्य कित्त्वाद्गुणाभावः । द्विर्भावः । अभ्यासस्य ह्रस्वजश्त्वे ( पा. सू. ७. ४. ५९, ८. ४. ५४ )। क्रादिनियमात् (पा. सू. ७. २. १३) प्राप्त इट् ' वस्वेकाजाद्घसाम् ' ( पा. सू. ७. २. ६७ ) इति नियमान्निवर्तते। नञ्समासे तृतीयैकवचने भत्वात् ' वसोः संप्रसारणम् ' ( पा. सू. ६. ४. १३१ ) इति वकारस्य उकारः । ' संप्रसारणाच्च ' ( पा. सू. ६. १. १०८ ) इति पूर्वरूपत्वम् । ' शासिवसिघसीनां च ' ( पा. सू. ८. ३. ६० ) इति षत्वम् । इयङादेशं बाधित्वा ' एरनेकाचोऽसंयोगपूर्वस्य ' ( पा. सू. ६. ४. ८२ ) इति यणादेशः । अव्ययपूर्वपदप्रकृतिस्वरत्वम्। पूर्वेण सह संहितायामोकारस्य ' एङः पदान्तादति ' ( पा. सू. ६. १. १०९ ) इति परपूर्वत्वे प्राप्ते ' प्रकृत्यान्तःपादमव्यपरे ' ( पा. सू. ६. १. ११५ ) इति प्रकृतिभावः । मन्दू । ' मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु ' । ' इदितो नुम् धातोः ' ( पा. सू. ७. १. ५८ ) इति नुमागमः । ' कुः ' इत्यनुवृत्तौ ' खरु शङ्कु पीयु नीलङ्गु लिगु '

---

१. च-फ-श—परपूर्वरूपत्वे ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

( उ. सू. १. ३६ ) इत्यत्र अविभक्तिकनिर्देशात् हन्तेः हिगुरितिवत् धात्वन्तरादपि कुः इत्युक्तम् । प्रत्ययस्वरेणान्तोदात्तः । द्विवचनम् औ ( पा. सू. ४. १. २ ) । 'प्रथमयोः पूर्वसवर्णः' ( पा. सू. ६. १. १०२ ) । तृतीयैकवचने चेत् 'सुपां सुलुक्०' (पा. सू. ७. १. ३९) इत्यादिना पूर्वसवर्णदीर्घत्वम् । समानवर्चसा । समानं वर्चो ययोरिति वा यस्येति वा बहुव्रीहिः । द्विवचने 'सुपां सुलुक्०' इत्यादिना आकारादेशः । समानपदस्य प्रातिपदिकान्तोदात्तत्वम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण तदेवावशिष्यते ॥

अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति । गणैरिन्द्रस्य काम्यैः ॥ ८ ॥

अनवद्यैः । अभिद्युऽभिः । मखः । सहस्वत् । अर्चति । गणैः । इन्द्रस्य । काम्यैः ॥ ८ ॥

vमखः प्रवर्तमानोऽयं यज्ञः vअनवद्यैः दोषरहितैः vअभिद्युभिः द्युलोकमभिगतैः vकाम्यैः फलप्रदत्वेन कामयितव्यैः vगणैः मरुत्समूहैः सहितम् vइन्द्रस्य इन्द्रं vसहस्वत् बलोपेतं यथा भवति तथा vअर्चति पूजयति। अयं यज्ञो मरुत इन्द्रं चातिशयेन प्रीणयतीत्यर्थः । 'यज्ञः' इत्यादिषु पञ्चदशसु यज्ञनामसु 'मखः विष्णुः' ( नि. ३. १७. ११ ) इति पठितम् । चतुश्चत्वारिंशत्सु अर्चतिकर्मसु 'अर्चति गायति' ( नि. ३. १४. १ ) इति पठितम् ॥ न विद्यतेऽवद्यं येषां तेऽनवद्याः । 'नञ्सुभ्याम्' ( पा. सू. ६. २. १७२ ) इत्युत्तरपदान्तोदात्तत्वम् । अभिगता द्यौर्यैस्तेऽभिद्यवः । तैरभिद्युभिः । अभिशब्दः प्रातिपदिकस्वरेणान्तोदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण स एव शिष्यते । मखः । प्रातिपदिकस्वरः । सहो बलमस्मिन्नर्चनकर्मण्यस्तीति सहस्वत् । 'तसौ मत्वर्थे' ( पा. सू. १. ४. १९ ) इति भसंज्ञया पदसंज्ञाया बाधितत्वात् सकारस्य रुत्वाभावः । 'मादुपधायाश्च मतोर्वोऽयवादिभ्यः' ( पा. सू. ८. २. ९ ) इति मतुपो मस्य वत्वम् । सहस्शब्दो 'नड्विषयस्यानिसन्तस्य' ( फि. सू. २६) इत्याद्युदात्तः । मतुपः पित्त्वात् स एव शिष्यते । काम्यैः । 'कमेर्णिङ्' ( पा. सू. ३. १. ३० ) । 'अत उपधायाः' ( पा. सू. ७. २. ११६ ) इति वृद्धिः । 'जनीजृष्क्नसुरञ्जोऽमन्ताश्च' (भ्वा. ग. सू.) इति असन्तत्वेन प्राप्तस्य मित्त्वस्य 'न कम्यमिचमाम्' (भ्वा. ग. सू.) इति प्रतिषेधात् 'मितां ह्रस्वः' ( पा. सू. ६. ४. ९२ ) इति उपधाह्रस्वत्वं न भवति । ण्यन्तात् 'अचो यत्' ( पा. सू. ३. १. ९७ ) । णिलोपः ( पा. सू. ६. ४. ५१ ) । 'तित्स्वरितम्' (पा. सू. ६. १. १८५ ) इति प्राप्ते 'यतोऽनावः' ( पा. सू. ६. १. २१३ ) इत्याद्युदात्तत्वम् ॥

अतः परिज्मन्ना गहि दिवो वा रोचनादधि । सम्मस्मिन्नृञ्जते गिरः ॥ ९ ॥

अतः । परिऽज्मन् । आ । गहि । दिवः । वा । रोचनात् । अधि । सम् । अस्मिन् । ऋञ्जते । गिरः ॥ ९ ॥

हे vपरिज्मन् परितो व्यापिन् मरुद्गण vअतः अस्मात् मरुद्गणस्थानादन्तरिक्षात् vआ vगहि अस्मिन् कर्मण्यागच्छ । vदिवो vवा द्युलोकाद्वा समागच्छ । vरोचनादधि दीप्यमानादादित्यमण्डलाद्वा समागच्छ। अस्मदीयकर्मकाले यत्र यत्र तिष्ठसि ततः सर्वस्मादागच्छ इत्यर्थः। किमर्थमागमनमिति तदुच्यते। vअस्मिन् कर्मणि वर्तमान ऋत्विक् vगिरः स्तुतीः vसम् vऋञ्जते सम्यक् प्रसाधयति । 'ऋञ्जतिः प्रसाधनकर्मा' ( निरु० ६. २१ ) इति यास्कः । एताः स्तुतीः श्रोतुमागच्छ इत्यर्थः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यद्यपि ऋत्विजा मन्त्रस्य प्रयुज्यमानत्वात् ऋञ्जतिधातोः उत्तमपुरुषेण भवितव्यं तथापि परोक्षकृतत्वेन निर्देशात् प्रथमपुरुषप्रयोगः । परोक्षकृतलक्षणं च यास्क आह—' तास्त्रिविधा ऋचः परोक्षकृताः प्रत्यक्षकृता आध्यात्मिक्यश्च । तत्र परोक्षकृताः सर्वाभिर्नामविभक्तिभिर्युज्यन्ते प्रथमपुरुषैश्चाख्यातस्य ' ( निरु. ७. १ ) इति । अतः । ' पञ्चम्यास्तसिल् ' ( पा. सू. ५. ३. ७ ) । ' *एतदोऽश् ' ( पा. सू. ५. ३. ५ ) । शित्त्वात् सर्वादेशः ( पा. सू. १. १. ५५ ) । ' लिति ' ( पा. सू. ६. १. १९३ ) इति प्रत्ययात् पूर्वस्योदात्तत्वम् । परिज्मन् । ' अज गतिक्षेपणयोः ' । ' अन्येभ्योऽपि दृश्यन्ते ' ( पा. सू. ३. २. ७५ ) इति मनिन् । अकारलोपः छान्दसः । आमन्त्रितनिघातः । गहि । गमेः ' बहुलं छन्दसि ' ( पा. सू. २. ४. ७३ ) इति शपो लुक् । हेर्ङित्त्वात् ( पा. सू. ३. ४. ८७ ) ' अनुदात्तोपदेश° ' ( पा. सू. ६. ४. ३७ ) इत्यादिना मलोपः । ' अतो हेः ' ( पा. सू. ६. ४. १०५ ) इति हिलोपो न भवति, तस्मिन् कर्तव्ये ' असिद्धवदत्रा भात् ' ( पा. सू. ६. ४. २२ ) इति मलोपस्य असिद्धत्वेन अनकारान्तत्वात् । दिवः । ' ऊडिदम्° ' ( पा. सू. ६. १. १७१ ) इत्यादिना विभक्तेरुदात्तत्वम् । वा । ' चादयोऽनुदात्ताः ' ( फि. सू. ८४ ) इत्यनुदात्तः । रोचनात् । ' रुच दीप्तौ ' । ' अनुदात्तेतश्च हलादेः ' ( पा. सू. ३. २. १४९ ) इति युच् । ' युवोरनाकौ ' ( पा. सू. ७. १. १ ) इति अनादेशः । चिदित्यन्तोदात्तः । अधि । ' अधिपरी अनर्थकौ ' ( पा. सू. १. ४. ९३ ) इति कर्मप्रवचनीयत्वेन सह निपातसंज्ञायाः समावेशात् ' निपाता आद्युदात्ताः ' ( फि. सू. ८० ) इत्याद्युदात्तः । अस्मिन् । परिज्मन् इति आदिष्टस्यैव अन्वादेशात् ' इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ' ( पा. सू. २. ४. ३२ ) इति अश् अनुदात्तः । शित्त्वात् सर्वादेशः । विभक्तिः ' अनुदात्तौ सुप्पितौ ' ( पा. सू. ३. १. ४ ) इत्यनुदात्ता इति सर्वानुदात्तत्वम् । ऋञ्जते । ' ऋजि भृजी भर्जने ' । सम् इत्युपसर्गयोगात् प्रसाधने वर्तते । निघातः । गिरः । प्रातिपदिकस्वरः ॥

इतो वा सातिमीमहे दिवो वा पार्थिवादधि । इन्द्रं महो वा रजसः ॥ १० ॥

इतः । वा । सातिम् । ईमहे । दिवः । वा । पार्थिवात् । अधि । इन्द्रम् । महः । वा । रजसः ॥ १० ॥

vइन्द्रं देवं प्रति vसातिं धनदानम् vअधि vईमहे आधिक्येन याचामहे । कस्माल्लोकादिति तदुच्यते। vइतः अस्मादभिदृश्यमानात् vपार्थिवात् पृथिवीलोकाद्वा vदिवो vवा द्युलोकाद्वा vमहः महतः प्रौढात् vरजसः vवा पक्ष्यादीनां रञ्जकादन्तरिक्षलोकाद्वा । अयमिन्द्रो यतः कुतश्चिदानीय अस्मभ्यं धनं प्रयच्छत्वित्यर्थः । सप्तदशसु याच्ञाकर्मसु ' ईमहे यामि ' ( नि. ३. १९. १ ) इति पठितम् ॥ इतः । इदंशब्दात् पञ्चम्याः तसिल् । ' इदम इश् ' ( पा. सू. ५. ३. ३ ) इति इश् । शित्त्वात् सर्वादेशः । अत्र ' ऊडिदम्° ' ( पा. सू. ६. १. १७१ ) इत्यस्यावकाशः आभ्याम् एभिः । ' लिति ' ( पा. सू. ६. १. १९३ ) इत्यस्यावकाशः पचनं पाचकः । उभावपि नित्यौ । तत्र परत्वात् ' विप्रतिषेधे परं कार्यम् ' ( पा. सू. १. ४. २ ) इति ' लिति ' इति इकारस्य उदात्तत्वम् । पश्चात् तसेः ' प्राग्दिशो विभक्तिः ' ( पा. सू. ५. ३. १ ) इति विभक्तिसंज्ञकत्वात् ' ऊडिदम्° ' इत्यादिना असर्वनामस्थानविभक्तेरुच्यमानम् उदात्तत्वं भवति । ' सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव ' ( परिभा. ४० ) इति ' ऊडिदम्° ' इत्यस्य पुनरप्रवृत्तिरेव इति चेत्, न । लक्ष्यानुरोधेन पुनः प्रसङ्गविज्ञानं चेति स्वीकारात् ( परिभा. ३९ ) । ननु एवं यतस्तत इत्यादावपि परेण लित्स्वरेण बाधितमपि ' सावेकाचः° ' ( पा. सू. ६. १. १६८ ) इति तसिलः उदात्तत्वं स्यादिति चेत्, न । यत्तच्छब्दयोः सावव्यञ्जनान्तत्वे

---

* काशिकानुसारेणायं पाठः । १. ठ–सावव्यञ्जनान्तत्वेन ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' न गोश्वन्सावर्वर्ण° ' ( पा. सू. ६. १. १८२ ) इति निषेधात् । न च पुनः प्रसङ्गविज्ञानं चेत्येतत् सार्वत्रिकं लक्ष्यानुरोधेन क्वचिदेव तदाश्रयणादिति । सातिम् । ' षणु दाने ' । ' धात्वादेः षः सः ' ( पा. सू. ६. १. ६४ ) । भावे क्तिन् । ' जनसनखनां सञ्झलोः ' ( पा. सू. ६. ४. ४२ ) इति नकारस्य आत्वम् । ' तितुत्रतथसिसुसरकसेषु च ' (पा. सू. ७. २. ९) इति निषेधात् इण् न भवति । नित्स्वरे प्राप्ते ' उदात्तः ' इत्यनुवृत्तौ ' ऊतियूतिजूतिसातिहेतिकीर्तयश्च ' ( पा. सू. ३. ३. ९७ ) इति निपातनादन्तोदात्तत्वम् । ईमहे । ' ईङ् गतौ ' । श्यनोऽपि ' बहुलं छन्दसि ' ( पा. सू. २. ४. ७३ ) इति लुक् । अस्य धातोर्ङित्त्वात् ' तास्यनुदात्तेन्ङिदुपदेशात् ' ( पा. सू. ६. १. १८६ ) इति लसार्वधातुकस्य अनुदात्तत्वे धातुस्वर एव शिष्यते । न च ' तिङ्ङतिङः ' इति निघातः, ' चवायोगे प्रथमा ' ( पा. सू. ८. १. ५९ ) इति निषेधात् । उत्तरवाक्ययोरपि हि वाशब्दयोगात् अन्यथा वाक्यापरिपूर्तेः तिङ्विभक्तेः अवश्यमध्याहारात् तदपेक्षया एषा प्रथमा तिङ्विभक्तिरिति । दिवः । ' ऊडिदम्° ' इत्यादिना विभक्तेरुदात्तत्वम् । पार्थिवात् । ' प्रथ प्रख्याने ' । प्रथते इति पृथिवी । ' प्रथेः पिवन् संप्रसारणं च ' ( उ. सू. १. १४८ ) इति पिवन्प्रत्ययः । ' षिद्गौरादिभ्यश्च ' ( पा. सू. ४. १. ४१ ) इति ङीष् । प्रत्ययस्वरेणोदात्तः । शेषनिघातेन अनुदात्तादिः पृथिवीशब्दः । पृथिव्या विकार इत्यर्थे ' ओरञ् ' (पा. सू. ४. ३. १३९ ) इत्यनुवृत्तौ ' अनुदात्तादेश्च ' ( पा. सू. ४. ३. १४० ) इति अञ् । ' यस्येति च ' (पा. सू. ६. ४. १४८ ) इति ईकारलोपः । ' तद्धितेष्वचामादेः ' ( पा. सू. ७. २. ११७ ) इति आदिवृद्धिः । रपरत्वम् (पा. सू. १. १. ५१) । ' ञ्नित्यादिर्नित्यम् ' ( पा. सू. ६. १. १९७ ) इत्याद्युदात्तः । अधि । निपातत्वादाद्युदात्तः । इन्द्रम् । रनूप्रत्ययान्त आद्युदात्तः । महः । महतः इत्यस्य अकारतकारयोर्लोपश्छान्दसः । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । रजसः । ' नञ्विषयस्यानिसन्तस्य ' इत्याद्युदात्तत्वम् ॥ ॥ १२ ॥

' इन्द्रम् ' इत्यादिकं दशर्चं यत् सूक्तं तत् ' सुरूपकृत्नुम् ' इत्यादिषु चतुर्थम् । ऋषिच्छन्दोदेवता विनियोगश्च पूर्ववत् । विशेषविनियोगस्तूच्यते[1] । महाव्रते निष्केवल्यशस्त्रे ' इन्द्रमिद्गाथिनः ' इति सूक्तम् । तथा च पञ्चमारण्यके सूत्रितं—' शिरो गायत्रमिन्द्रमिद्गाथिनः ' ( ऐ. आ. ५. २. १ ) इति । तथा चतुर्विंशेऽहनि ब्राह्मणाच्छंसिनः शस्त्रे ' इन्द्रमिद्गाथिनः ' इति षळहस्तोत्रियस्तृचः । ' चतुर्विंशे होताजनिष्ट ' इत्युपक्रम्य ' आ याहि सुषुमा हि त इन्द्रमिद्गाथिनो बृहत् ' (आश्व. श्रौ. ७. २) इति सूत्रितत्वात् । अतिरात्रे प्रथमे पर्यायेऽच्छावाकशस्त्रेऽयमेव तृचोऽनुरूपः[2] । सूत्रितं च—' इन्द्राय मद्वने सुतमिन्द्रमिद्गाथिनो बृहत् ' ( आश्व. श्रौ. ६. ४ ) इति ॥

**इन्द्रमिद्गाथिनो बृहदिन्द्रमर्केभिरर्किणः । इन्द्रं वाणीरनूषत ॥ १ ॥**

इन्द्रम् । इत् । गाथिनः । बृहत् । इन्द्रम् । अर्केभिः । अर्किणः । इन्द्रम् । वाणीः । अनूषत ॥१॥

vगाथिनः गीयमानसामयुक्ता उद्गातारः vइन्द्रमित् इन्द्रमेव vबृहत् ' त्वामिद्धि हवामहे ' ( ऋ. सं. ६. ४६. १ ) इत्यस्यामृचि उत्पन्नेन बृहन्नामकेन साम्ना vअनूषत स्तुतवन्तः । vअर्किणः अर्चनहेतुमन्त्रोपेता होतारः vअर्केभिः ऋग्रूपैर्मन्त्रैः vइन्द्रम् एव अनूषत । ये त्ववशिष्टा अध्वर्यवस्ते vवाणीः वाग्भिर्यजूरूपाभिः vइन्द्रम् एव अनूषत । अर्कशब्दस्य मन्त्रपरत्वं यास्केनोक्तम्—' अर्को मन्त्रो भवति

---

१. ग-य—विशेषस्तूच्यते । २. च-छ-फ-य—तृचोऽनुरूपितः; ण—तृचो निरूपितः । ३. ग-घ-च-छ-ण-य-श—इन्द्रम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यदेनेनार्चन्ति ' ( निरु. ५. ४ ) इति। ' श्लोकः' इत्यादिषु सप्तपञ्चाशत्सु वाङ्नामसु 'वाशी वाणी' ( नि. १. ११. १२ ) इति पठितम्॥ गाथिनः। ' उषिकुषिगार्तिभ्यस्थन् ' ( उ. सू. २. १६१ ) इति गायतेः थन्प्रत्ययः। निस्वादाद्युदात्तः। गाथा एषां सन्तीति गाथिनः। ' व्रीह्यादिभ्यश्च ' (पा. सू. ५. २. ११६) इति इनिः। प्रत्ययस्वरेण इकार उदात्तः। स च सति शिष्टः। बृहत् बृहता। तृतीयैकवचनस्य ' सुपां सुलुक्° ' इति लुक्। ' °तृषद्बृहन्महज्जगच्छतृवच्च ' ( उ. सू. २. २४१ ) इत्यन्तोदात्तो निपातितः। अर्केभिः। ' अर्च पूजायाम् '। अर्च्यते एभिः इति अर्का मन्त्राः। ' पुंसि संज्ञायां घः प्रायेण ' ( पा. सू. ३. ३. ११८ ) इति घः। ' चजोः कु घिण्यतोः ' ( पा. सू. ७. ३. ५२ ) इति कुत्वम्। प्रत्ययस्वरेणान्तोदात्तः। ' बहुलं छन्दसि ' ( पा. सू. ७. १. १० ) इति भिस ऐसादेशो न भवति। अर्काः स्तुतिसाधनभूता मन्त्रा एषां सन्तीति अर्किणः। वाणीः। 'वृषादीनां च ' ( पा. सू. ६. १. २०३ ) इत्याद्युदात्तः। ' दीर्घाज्जसि च ' ( पा. सू. ६. १. १०५ ) इति पूर्वसवर्णदीर्घनिषेधस्य ' वा छन्दसि ' ( पा. सू. ६. १. १०६ ) इति विकल्पितत्वात् दीर्घत्वम्। तृतीयार्थे प्रथमा। अनूषत। ' णु स्तुतौ '। ' णो नः ' ( पा. सू. ६. १. ६५ ) इति नत्वम्। लुङि व्यत्ययेनात्मनेपदम्। झस्य अदादेशः (पा. सू. ७. १. ५)। सिचः इडभावः उकारस्य दीर्घत्वं च छान्दसम्। धातोः कुटादित्वात् सिचो ङित्त्वेन (पा. सू. १.२.१) गुणाभावः (पा. सू. १. १. ५)॥

**इन्द्र इद्धर्योः सचा संमिश्ल आ वचोयुजा। इन्द्रो वज्री हिरण्ययः॥ २॥**

इन्द्रः। इत्। हर्योः। सचा। सम्ऽमिश्लः। आ। वचःऽयुजा। इन्द्रः। वज्री। हिरण्ययः॥२॥

[v]इन्द्र [v]इत् इन्द्र एव [v]हर्योः हरिनामकयोरश्वयोः [v]सचा सह युगपत् [v]आ [v]संमिश्लः सर्वतः सम्यग्मिश्रयिता। कीदृशोर्हर्योः। [v]वचोयुजा। इन्द्रस्य वचनमात्रेण रथे युज्यमानयोः सुशिक्षितयोरित्यर्थः। अयम् [v]इन्द्रः [v]वज्री वज्रयुक्तः [v]हिरण्ययः हिरण्मयः[3] सर्वाभरणभूषित इत्यर्थः॥ हर्योः। हरतः इति हरी। इन्। निस्वादाद्युदात्तः। ' सचा सह ' ( निरु. ५. ५ ) इत्युक्तम्। संमिश्लः। मिश्रणं मिश्रः। मिश्रयतेर्घञ् ( पा. सू. ३. ३. १८ )। सम्यक् मिश्रो यस्यासौ संमिश्रः। लत्वं छान्दसम्। सम्यक् मिश्रयितेत्यर्थः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। वचोयुजा।। वचसा युज्येते इति वचोयुजौ। तयोः षष्ठीद्विवचनस्य ' सुपां सुलुक्° ' इति आकारादेशः। युज्शब्दो धातुस्वरेणान्तोदात्तः। कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते। वज्री। वज्रमस्यास्ति। ' अत इनिठनौ ' ( पा. सू. ५. २. ११५ ) प्रत्ययस्वरः। हिरण्ययः। ' ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि च्छन्दसि ' ( पा. सू. ६. ४. १७५ ) इति हिरण्मयशब्दस्य[3] मकारलोपो निपात्यते। अकारः प्रत्ययस्वरेण उदात्तः। पूर्वेण अनुदात्तेन सह ' एकादेश उदात्तेनोदात्तः ' इत्युदात्तः॥

**इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद्दिवि। वि गोभिरद्रिमैरयत्॥ ३॥**

इन्द्रः। दीर्घाय। चक्षसे। आ। सूर्यम्। रोहयत्। दिवि। वि। गोभिः। अद्रिम्। ऐरयत्॥३॥

---

१. च-छ-अर्चन्ते; त-फ-श-अर्च्यन्ते। २. ग-घ-ण-थ-य-श-हिरण्यमयः। ३. च-हिरण्मयशब्दस्य; छ-फ-हिरण्मयशब्दे।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अयम् Vइन्द्रः Vदीर्घाय प्रौढाय निरन्तराय Vचक्षसे दर्शनाय Vदिवि द्युलोके Vसूर्यम् Vआ Vरोहयत्। पुरा वृत्रासुरेण जगति यत् आपातितं तमस्तन्निवारणेन प्राणिनां दृष्टिसिद्ध्यर्थमादित्यं द्युलोके स्थापितवानित्यर्थः। स च सूर्यः Vगोभिः स्वकीयरश्मिभिः Vअद्रिं पर्वतप्रमुखं सर्वं जगत् Vवि Vऐरयत् विशेषेण दर्शनार्थं प्रेरितवान् प्रकाशितवानित्यर्थः। अथवा इन्द्रः एव गोभिः जलैर्निमित्तभूतैः अद्रिं मेघं व्यैरयत् विशेषेण प्रेरितवान्। पञ्चदशसंख्याकेषु रश्मिनामसु ' खेदयः किरणाः गावः ' ( नि. १. ५. ३ ) इति पठितम्। त्रिंशत्संख्याकेषु मेघनामसु ' अद्रिः ग्रावा ' ( नि. १. १०. १ ) इति पठितम्॥ दीर्घाय। प्रातिपदिकस्वरेणान्तोदात्तः। चक्षसे। चक्षेः ' सर्वधातुभ्योऽसुन् ' ( उ. सू. ४. ६२८ ) इति असुन्। बहुलग्रहणात् ख्याजादेशाभावः। नित्त्वादाद्युदात्तः। सूर्यम्। सुवति प्रेरयतीति सूर्यः। ' षू प्रेरणे '। 'धात्वादेः षः सः'। ' राजसूयसूर्य° ' (पा. सू. ३. १. ११४) इत्यादिना क्यप्प्रत्ययः, तस्य रुडागमश्च निपात्यते। स्यापः किस्वाद्गुणाभावः। पित्त्वादनुदात्तत्वम्। धातुस्वर एव शिष्यते। रोहयत्। रुहेः ण्यन्तात् लङि 'बहुलं छन्दस्यमाङ्योगेऽपि' ( पा. सू. ६. ४. ७५ ) इत्यडभावो निघातश्च। दिवि। ' ऊडिदम्° ' इत्यादिना विभक्तेरुदात्तत्वम्। अद्रिम्। ' अदिशदिभूशुभिभ्यः क्रिन् ' (उ. सू. ४. ५०५) इति क्रिन्प्रत्ययः। अदन्ति पशवस्तृणादिकमत्र इति अद्रिः। नित्त्वादाद्युदात्तत्वम्। ऐरयत्। ' ईर गतौ '। ण्यन्तात् लङ्। निघातः॥

**इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च। उग्र उग्राभिरूतिभिः॥ ४॥**

इन्द्र। वाजेषु। नः। अव। सहस्रऽप्रधनेषु। च। उग्रः। उग्राभिः। ऊतिऽभिः॥ ४॥

हे Vइन्द्र Vउग्रः शत्रुभिरप्रधृष्यस्त्वम् Vउग्राभिः अप्रधृष्याभिः Vऊतिभिः अस्मद्विषयरक्षाभिः Vवाजेषु युद्धेषु Vनः अस्मान् Vअव रक्ष। तथा Vसहस्रप्रधनेषु Vच। सहस्रसंख्याकगजाश्वादिलाभयुक्तेषु महायुद्धेष्वपि रक्ष॥ वाजेषु। ' वृषादीनां च ' (पा. सू. ६. १. २०३) इत्याद्युदात्तत्वम्। नोऽव। नसः सकारस्य रुत्वोत्वगुणेषु ' प्रकृत्यान्तःपादम्° ' ( पा. सू. ६. १. ११५ ) इति प्रकृतिभावो न भवति '°अव्यपरे ' इति निषेधात्। अव। ' अव रक्षणे '। 'तिङ्ङतिङः' इति निघातः। यद्यपि सहस्रप्रधनेषु च अव इति अध्याहृतां क्रियामपेक्ष्य प्रथमायाः श्रूयमाणाया अव इति क्रियायाः ' चवायोगे प्रथमा ' (पा. सू. ८. १. ५९) इति निघातनिषेधः प्राप्तः, तथापि वाजेषु इत्यत्र चकारस्य लुप्तत्वात् ' चादिलोपे विभाषा ' ( पा. सू. ८. १. ६३ ) इति निषेधस्य विकल्पितत्वादत्र निघातः प्रवर्तते। सहस्रशब्दः ' कर्दमादीनां च ' ( फि. सू. ५९ ) इति मध्योदात्तः। सहस्रप्रधनेषु वाजेषु। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। उग्रः। ' उच समवाये '। चस्य गः। ' ऋज्रेन्द्रा° ' ( उ. सू. २. १८६ ) इति रन्। व्यत्ययेनान्तोदात्तः। ऊतिभिः। ' ऊतियूति° ' इत्यादिना क्तिन् उदात्तः॥

**इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे। युजं वृत्रेषु वज्रिणम्॥ ५॥**

इन्द्रम्। वयम्। महाऽधने। इन्द्रम्। अर्भे। हवामहे। युजम्। वृत्रेषु। वज्रिणम्॥ ५॥

Vवयम् अनुष्ठातारः Vमहाधने प्रभूतधननिमित्तम् Vइन्द्रं Vहवामहे आह्वयामः। Vअर्भे अर्भके स्वल्पेऽपि धने निमित्तभूते सति Vइन्द्रं हवामहे। कीदृशमिन्द्रम्। Vयुजं सहकारिणं समाहितं वा Vवृत्रेषु शत्रुषु धनलाभविरोधिषु प्राप्तेषु तन्निवारणाय Vवज्रिणं वज्रोपेतम्॥ महाधनशब्दो यद्यपि

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

संग्रामनामसु पठितस्तथापि महत् धनम् अत्र संग्रामे इति बहुव्रीहित्वे सति अन्तोदात्तत्वासिद्धेः नात्र तत् गृहीतम्। महाधने। महच्च तद्धनं चेति 'समासस्य' (पा. सू. ६. १. २२३) इत्यन्तोदात्तः। अर्भे। 'अर्तिगृभ्यां भन्' (उ. सू. ३. ४३२)। नित्त्वादाद्युदात्तः। हवामहे। 'ह्वेञ् स्पर्धायां शब्दे च'। जित्त्वात् कर्त्रभिप्राये (पा. सू. १. ३. ७२) आत्मनेपदम्। लटः स्थाने महिङ् (पा. सू. ३. ४. ७८)। 'टित आत्मनेपदानाम्°' (पा. सू. ३. ४. ७९) इति टेः एत्वम्। कर्तरि शप् (पा. सू. ३. १. ६८)। 'ह्वः संप्रसारणम्' (पा. सू. ६. १. ३२) इत्यनुवृत्तौ 'बहुलं छन्दसि' (पा. सू. ६. १. ३४) इति संप्रसारणं वकारस्य उकारः। परपूर्वत्वम्। गुणावादेशौ। 'अतो दीर्घो यञि' (पा. सू. ७. ३. १०१) इति दीर्घत्वम्। 'तिङ्ङतिङः' इति निघातः। युजम्। 'युज समाधौ' इत्यस्य क्विप्। 'युजेरसमासे' (पा. सू. ७. १. ७१) इति नुम् न भवति! स हि युजेः इति निर्देशात् इकाररहितस्य न भवति। 'अनित्यमागमशासनम्' (परिभा. ९३. २) इति वा 'युजिर् योगे' इत्यस्यापि नुम् न भवति। वृत्रेषु। 'वृतु वर्तने'। प्रतिकूलतया वर्तन्ते इति वृत्राणि शत्रुकुलानि। 'स्फायितञ्चि°' (उ. सू. २. १७०) इत्यादिना रक्प्रत्ययः। कित्त्वाद्गुणाभावः। प्रत्ययस्वरः। वज्रिणम्। 'अत इनिठनौ' (पा. सू. ५. २. ११५) इति इनिः। प्रत्ययस्वरः॥ ॥ १३ ॥

**स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि। अस्मभ्यमप्रतिष्कुतः॥ ६॥**

सः। नः। वृषन्। अमुम्। चरुम्। सत्रादावन्। अप। वृधि। अस्मभ्यम्। अप्रतिष्कुतः॥६॥

हे [V]सत्रादावन् अस्मदभीष्टानां सर्वेषां फलानां सह प्रदातः अतो व्रीह्यादिनिष्पत्त्यर्थं हे [V]वृषन् वृष्टिप्रदेन्द्र [V]नः अस्मदर्थम् [V]अमुं दृश्यमानं [V]चरुं मेघम् [V]अपा [V]वृधि उद्घाटय। तथैव [V]अस्मभ्यम् अस्मदर्थम् [V]अप्रतिष्कुतः प्रतिशब्दरहितः। यद्यत् अस्माभिर्याच्यते तत्र सर्वत्र नेति प्रतिशब्दं नोच्चारयति। अतोऽस्मद्विषये कदाचिदपि अप्रतिस्खलितः। एतदेवाभिप्रेत्य यास्क आह—'अप्रतिष्कुतोऽप्रतिष्कृतोऽप्रतिस्खलितो वा' (निरु. ६. १६) इति॥ वृषन्। आमन्त्रितनिघातः। अमुम्। प्रातिपदिकस्वरेणान्तोदात्तः। चरुम्। चरतीति चरुः। 'भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः' (उ. सू. १. ७) इति उप्रत्ययः। प्रत्ययस्वरेणान्तोदात्तः। सत्रादावन्। सत्राशब्दः सहार्थे। अभिमतफलजातं सकलं सह ददातीति सत्रादावा। 'आतो मनिन्क्वनिब्वनिपश्च' (पा. सू. ३. २. ७४) इति वनिप्। 'आमन्त्रितस्य च' (पा. सू. ६. १. १९८) इत्याद्युदात्तत्वम्। पादादित्वान्न निघातः। अप। 'निपातस्य च' (पा. सू. ६. ३. १३६) इति दीर्घः। निपात आद्युदात्तः। वृधि। 'वृञ् वरणे'। लोटः सिप्। तस्य 'सेर्ह्यपिच्च' (पा. सू. ३. ४. ८७) इति हिः। 'स्वादिभ्यः श्नुः' (पा. सू. ३. १. ७३)। तस्य 'बहुलं छन्दसि' (पा. सू. २. ४. ७३) इति लुक्। 'श्रुशृणुपृकृवृभ्यश्छन्दसि' (पा. सू. ६. ४. १०२) इति हेर्धिरादेशः। तस्य ङित्त्वात् पूर्वस्य गुणाभावः। निघातः। अस्मभ्यम्। अस्मच्छब्दात् 'भ्यसो भ्यम्' (पा. सू. ७. १. ३०) इति भ्यमादेशः। 'शेषे लोपः' (पा. सू. ७. २.९०) इति दकारलोपः। 'बहुवचने झल्येत्' (पा. सू. ७. ३. १०३) इति एत्वं न भवति। 'अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य' (पा. म. ७.१. ३०) इत्युक्तम्। प्रातिपदिकस्वरेण स्म इत्यकार उदात्तः। 'भ्यसोऽभ्यम्' इति अभ्यमादेशपक्षे 'शेषे लोपः' इति मपर्यन्तशेषस्य अद्शब्दस्य लोपः। तदा उदात्तनिवृत्तिस्वरेण अभ्यमः आदेः अकारस्योदात्तत्वम् (पा. सू. ६. १. १६१)। अप्रतिष्कुतः केनचिदप्रतिशब्दितः। 'कुङ् शब्दे'। 'निष्ठा' (पा. सू. ३. २. १०२) इति कर्मणि क्तप्रत्ययः। प्रतेः प्राक्प्रयोगः। पारस्करादेराकृतिगणत्वात् सुडागमः (पा. सू. ६. १. १५७)। सुषामादेराकृतिगणत्वात् षत्वम् (पा. सू. ८. ३. ९८)। नञ्समासेऽञ्ययपूर्वपदप्रकृतिस्वरत्वम्॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तुञ्जेतुञ्जे य उत्तरे स्तोमा इन्द्रस्य वज्रिणः । न विन्धे अस्य सुष्टुतिम् ॥७॥

तुञ्जेऽतुञ्जे । ये । उत्ऽतरे । स्तोमाः । इन्द्रस्य । वज्रिणः । न । विन्धे । अस्य । सुऽस्तुतिम् ॥७॥

[v]तुञ्जेतुञ्जे तस्मिंस्तस्मिन् फलदातरि देवान्तरे [v]ये [v]स्तोमाः स्तोत्रविशेषाः [v]उत्तरे उत्कृष्टाः सन्ति तैः स्तोमैः सर्वैरपि [v]वज्रिणः वज्रयुक्तस्य [v]अस्य [v]इन्द्रस्य [v]सुष्टुतिं योग्यां शोभनस्तुतिं [v]न [v]विन्धे न विन्दामि । इन्द्रस्यात्यन्तगुणबाहुल्येन देवान्तरेषूत्तमत्वेन प्रसिद्धान्यपि स्तोत्राणि न पर्याप्तानीत्यर्थः । एतामृचं यास्क एवं व्याचष्टे—' तुञ्जस्तुञ्जतेर्दानकर्मणः । दाने दाने य उत्तरे स्तोमा इन्द्रस्य वज्रिणो नास्य तैर्विन्दामि समाप्तिं स्तुतेः ' ( निरु. ६. १७-१८ ) इति ॥ तुञ्जेतुञ्जे । तुञ्जतिर्दानकर्मा इत्युक्तम् । ततः कर्तरि पचाद्यच् ( पा. सू. ३. १. १३४ )। ' चितः ' ( पा. सू. ६. १.१६३ ) इत्यन्तोदात्तत्वम् । ' नित्यवीप्सयोः ' ( पा. सू. ८. १. ४ ) इति द्विर्भावः । ' तस्य परमाम्रेडितम् ' ( पा. सू. ८. १. २ ) इति द्वितीयस्याम्रेडितसंज्ञा । ' अनुदात्तं च ' ( पा. सू. ८. १. ३ ) इत्यनुदात्तत्वम् । दातरि दातरीत्यर्थः । निरुक्ते तु ' दाने दाने ' इत्यर्थतो व्याख्यानम्[1] । उत्तरे । ' तॄ प्लवनतरणयोः ' । भावे 'ऋदोरप्' (पा. सू. ३. ३. ५७)। उच्छब्द उत्कृष्टवचनः । उत्कृष्टः तरो यस्येति बहुव्रीहिः । उच्छब्दो ' निपाता आद्युदात्ताः ' ( फि. सू. ८० ) इत्याद्युदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । स्तोमाः । ' अर्तिस्तुसु° ' (उ. सू. १. १३७) इत्यादिना स्तोमशब्दो मनन्तो निस्वादाद्युदात्तः । विन्धे । ' विदॢ लाभे ' । लट् । स्वरितेत्त्वादात्मनेपदम् । उत्तमैकवचनमिट् (पा. सू. ३. ४. ७८ ) । ' तुदादिभ्यः शः ' (पा. सू. ३. १. ७७)। ' शे मुचादीनाम् ' ( पा. सू. ७. १. ५९ ) इति नुम् । दकारस्य व्यत्ययेन धकारः । अस्य । प्रकृतस्येन्द्रस्य परामर्शादन्वादेशे इदमोऽश् (पा. सू. २. ४. ३२)। शित्त्वात् सर्वादेशोऽनुदात्तः । सुष्टुतिम् । ' ष्टुञ् स्तुतौ ' । ' धात्वादेः षः सः ' इति सत्वम् । ' स्त्रियां क्तिन् ' ( पा. सू. ३. ३. ९४ ) इति भावे क्तिन् । सु इति उदात्तेनोपसर्गेण प्रादिसमासः ( पा. सू. २. २. १८ )। ' उपसर्गात्सुनोति° ' ( पा. सू. ८. ३. ६५ ) इत्यादिना षत्वम् । अत्र अव्ययपूर्वपदप्रकृतिस्वरत्वेन सोः प्राप्तमुदात्तत्वं बाधित्वा ' गतिकारकोपपदात्कृत् ' इत्युत्तरपदप्रकृतिस्वरेण[2] धातोरुदात्तत्वे प्राप्ते तदपवादत्वेन[3] ' तादौ च निति कृत्यतौ ' ( पा. सू. ६. २. ५० ) इत्यनन्तरस्य गतिसंज्ञकस्य सोः एव उदात्तत्वेन भवितव्यम् । तत्तु ' मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः ' ( पा. सू. ६. २. १५१ ) इत्युत्तरपदान्तोदात्तत्वेन[4] बाध्यते । तथा च ' सुहवां सुष्टुती हुवे ' ( ऋ. सं. २. ३२. ४ ), ' वृष्णे चोदस्व सुष्टुतिम् ' ( ऋ. सं. ८. ७५. ६ ), ' यास्ते राके सुमतयः ' ( ऋ. सं. २. ३२. ५ ) इत्यादौ अन्तोदात्तत्वमित्याहुः । यथा तु ' मन्क्तिन्° ' इत्यादौ वृत्तौ उक्तं तथैव तन्न घटते इति लक्ष्यते । तत्र हि ' कारकाद्दत्तश्रुतयोरेवाशिषि ' ( पा. सू. ६. २. १४८ ) इत्यतः ' कारकात् ' इत्यनुवृत्तेः ' पाणिनिकृतिः ' इत्यादावेव 'मन्क्तिन्°' इत्यादिसूत्रमित्युक्तम् । ' कारकादित्येव । प्रकृतिः प्रहृतिः' (का. ६. २. १५१) इति च प्रत्युदाहृतम् । स्यादेतत् । स्तूयतेऽनयेति स्तुतिरिति क्तिना करणभूता ऋक् अभिधीयते । सुशब्देन च करणमेव विशेष्यते न धात्वर्थः । तथा[5] च सुष्टुतिरित्यत्र सुशब्दः कारकपर एव भविष्यति । प्रकृतिः प्रहृतिरित्यादौ तु प्रशब्दो धात्वर्थे विशेषणमेवेति[6] तत्प्रत्युदाहरणोपपत्तिरिति । न । एवं सति सुशब्दस्य क्रियायोगाभावात् ' उपसर्गाः क्रियायोगे ' ( पा. सू. १. ४. ५९ ) इत्युक्ता उपसर्गसंज्ञा

---

१. च-छ-थ-फ-श—व्याख्यातम् । २. त—°प्रकृतिस्वरत्वेन । ३. ग-घ-च-छ-ण-य-श—तदपवादेन । ४. ग-घ-च-छ-ण-त-फ-य—°दात्तेन । ५. छ-ण-य—' तथा च ' नास्ति । ६. त—धात्वर्थविशेषण° ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

न स्यात् । तथा च ' उपसर्गात्सुनोति सुवति° ' इत्यादिना षत्वं न स्यात् । ननु क्तिना करणमभिधीयते । क्रियासाधनं च करणम् । तथा च करणविशेषणस्यापि सुशब्दस्य करणान्तर्गत-क्रियायोगादुपसर्गता भविष्यतीति । न । तथा सति[1] यत्क्रियायुक्ताः तं प्रति उपसर्गसंज्ञकाः ( पा. सू. १. ४. ६०. ३ ) इति. करोत्यर्थमेव प्रति सोरुपसर्गता, न तु स्तुधात्वर्थं प्रतीत्यस्य षत्वं न स्यादेव । ननु स्तुधात्वर्थद्वारैव तत्करणस्य सुशब्दो विशेषणं भविष्यति। या हि शोभना स्तुतिस्तत्करण-मपि शोभनमेवेति । एवं च स्तुधात्वर्थसंबन्धात्[2] तं प्रति उपसर्गत्वेन षत्वमपि भविष्यति । तद्वारा करण-विशेषणत्वात् कारकवचनोऽपि सुशब्दो भविष्यतीति वृत्यविरोधेनैव मन्क्तिनादिसूत्रस्य सुष्टुतिशब्दो विषयो भविष्यति। प्रकृतिः प्रहृतिरित्यत्र भावे क्तिन् प्रत्युदाहृतेति। न । तत्र प्रशब्दस्य करणपरत्वम्। करणे क्तिन्नुदाहरणेऽपि धात्वर्थमात्रविशेषणतैव विवक्षिता न तद्वारा प्रत्ययार्थविशेषणतापि इति तत्प्रत्युदाहर-णोपपत्तिरिति । सुष्टुतिरित्यत्र पुनः क्तिनभिधेयकरणपर्यन्तं सुशब्दस्य व्यापार इत्युदाहरणतैव न प्रत्यु-दाहरणतेति । न । किमत्र सुशब्दः श्रुत्यैव प्रकृतिप्रत्ययार्थोभयविशेषणपरः, उत श्रुत्या एकं विशिनष्टि अर्थादितरदिति[3] । यदाप्युभयपरत्वं तदापि किं यौगपद्येन उत क्रमेणेति । आद्ये प्रतिविशेष्यं विशेषण-पदावृत्तिरिति[4] प्रसङ्गः । द्वितीये विरम्यव्यापारापातः । न च शब्दबुद्धिकर्मणां विरम्यव्यापारः कस्यचित्[5] दृष्टः इष्टो वा । अतो न श्रुत्या उभयपरत्वम् । अथैकत्र श्रुत्या तात्पर्यम्, अपरत्र तु अर्थादिति । तत्र धात्वर्थसंबन्धस्य आर्थिकत्वे षत्वासिद्धिः । प्रत्ययार्थसंबन्धस्य आर्थिकत्वे 'मन्क्तिन्°' इत्यादिस्वरासिद्धिः। आर्थिकेनापि कारकसंबन्धेबोदाहरणत्वाभिधाने प्रकृतिः प्रहृतिरित्यादिप्रत्युदाहरणं न स्यात्। श्रुत्या धात्वर्थमात्रसंबन्धस्यापि प्रशब्दस्वार्थात् तत्करणसंबन्धः[6] केन वारयितुं शक्यते इत्येषा दिक्। अत इह प्रत्ययार्थमात्रसंबन्धपरत्वाङ्गीकारेण स्वरः सिध्यतु षत्वं तु छान्दसमस्तु । शोभना स्तुतिर्यस्यामिति बहुव्री-हिर्वा भवतु । एवं च ' नञ्सुभ्याम् ' इत्यन्तोदात्तं भविष्यति । अथवा सुष्टु स्तुवन्तीति सुष्टुतय इति करणभूता ऋचः स्तुतिशब्देनोच्यन्ते । ' क्तिच्क्तौ च संज्ञायाम् ' ( पा. सू. ३. ३. १७४ ) इति क्तिच्प्रत्यये सति चिस्वादन्तोदात्तता भविष्यति । न च करणीभूतानामृचां कर्तृप्रत्ययेन क्तिचा कथमभि-धानमिति वाच्यम् । काष्ठानि पचन्तीतिवत् तासामपि स्वव्यापारप्राधान्यविवक्षया करणत्वोपपत्तेरिति॥

**वृषा यूथेव वंसगः कृष्टीरियर्त्योजसा । ईशानो अप्रतिष्कुतः ॥ ८ ॥**

वृषा । यूथाऽइव । वंसगः । कृष्टीः । इयर्ति । ओजसा । ईशानः । अप्रतिऽस्कुतः ॥ ८ ॥

[v]वृषा कामानां वर्षितेन्द्रः [v]ओजसा स्वकीयबलेनानुग्रहीतुं [v]कृष्टीः मनुष्यान् [v]इयर्ति प्राप्नोति। कीदृश इन्द्रः। [v]ईशानः समर्थः [v]अप्रतिष्कुतः प्रतिशब्दरहितः। याच्यमानं न परिहरतीत्यर्थः। इन्द्रस्य दृष्टान्तः। [v]वंसगः वननीयगतिर्वृषभः [v]यूथेव गोयूथानि यथा प्राप्नोति तद्वत् ॥ वृषा। ' कनिन्युवृषि-तक्षिधन्विराजिद्युप्रतिदिवः ' ( उ. सू. १. १५४ ) इति वर्षतेः कनिन्प्रत्ययः । कित्त्वादुणाभावः। नित्त्वादाद्युदात्तः । यूथा इव । युवन्ति मिश्रीभवन्तीति यूथानि। ' यु मिश्रणामिश्रणयोः'। ' तिथपृष्ठगूथयूथप्रोथाः ' ( उ. सू. २. १६९ ) इति थक्प्रत्ययान्तो निपातितः। निपातनाद्दीर्घत्वम्। प्रत्ययस्वरेण आकार उदात्तः। ' शेश्छन्दसि बहुलम् ' ( पा. सू. ६. १. ७० ) इति लुक्। ' इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च वक्तव्यम् ' ( पा. सू. २. १. ४. २ ) इति समासेऽपि स एव

---

१. श–तथा च सति । २. छ-ण-य–धात्वर्थसंबन्धात् । ३. च-फ–अपरमर्थादिति । ४. च-छ-थ-फ-श–°वृत्तिप्रसङ्गः । ५. च-छ-ण-थ-फ-श–कथंचित् । ६. च-छ-ण-फ–करणसंबन्धः । ७. च-फ–याचमानम्

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्वरः । वंसगः । पृषोदरादित्वात् अभिमतरूपस्वरसिद्धिः ( पा. सू. ६. ३. १०९ ) । कर्षन्तीति कृष्टयः । ' क्तिच्क्तौ च संज्ञायाम् ' इति क्तिच् । चित्वादन्तोदात्तः । इयर्ति । ' ऋ सृ गतौ ' । तिप् । शपः श्लुः । ' श्लौ ' ( पा. सू. ६. १. १० ) इति द्विर्भावः । अभ्यासस्य उरदत्वहलादिशेषौ ( पा. सू. ७. ४. ६६; ६० ) । ' अर्तिपिपर्त्योश्च ' ( पा. सू. ७. ४. ७७ ) इति अकारस्य इकारः । ' अभ्यासस्यासवर्णे ' ( पा. सू. ६. ४. ७८ ) इति इयङादेशः । अङ्गस्य गुणो रपरत्वम् । ओजसा । ' उब्जेर्बलोपश्च ' ( उ. सू. ४. ६३१ ) इत्यसुन् तत्संनियोगेन बकारलोपः । लघूपधगुणः ( पा. सू. ७. ३. ८६ ) । निरवादाद्युदात्तः । ईशानः । ' ईश ऐश्वर्ये ' । लटः शानच् । ' अदिप्रभृतिभ्यः शपः ' ( पा. सू. २. ४. ७२ ) इति शपो लुक् । ' चितः ' इत्यन्तोदात्तं बाधित्वा अनुदात्तेत्त्वात् लसार्वधातुकानुदात्तत्वेन धातुस्वर एव शिष्यते । अप्रतिष्कुतः अप्रतिशब्दितः । ' कु शब्दे ' । कर्मणि क्तः । पारस्करादित्वात् सुडागमः ( पा. सू. ६. १. १५७ ) । सुषामादित्वात् षत्वम् ( पा. सू. ८. ३. ९८ ) । नञ्समासः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

**य एकश्चर्षणीनां वसूनामिरज्यति । इन्द्रः पञ्च क्षितीनाम् ॥ ९ ॥**

यः । एकः । चर्षणीनाम् । वसूनाम् । इरज्यति । इन्द्रः । पञ्च । क्षितीनाम् ॥९॥

[v]यः इन्द्रः स्वयम् [v]एकः एव [v]चर्षणीनां मनुष्याणाम् [v]इरज्यति ईष्टे; तथा [v]वसूनां धनानाम् इरज्यति स [v]इन्द्रः [v]पञ्च निषादपञ्चमानां [v]क्षितीनां निवासार्हाणां वर्णानामनुग्रहीतेति शेषः ॥ एकः । ' इण् गतौ ' । ' इण्भीकापाशल्यतिमर्चिभ्यः कन् ' ( उ. सू. ३. ३२३ ) इति कन् । बाहुलकात् ककारोपाभावः । निरवादाद्युदात्तत्वम् । चर्षणीनाम् । प्रातिपदिकस्वरेणान्तोदात्तः । ' अन्तोदात्तात् ' इत्यनुवृत्तौ ' नामन्यतरस्याम् ' ( पा. सू. ६. १. १७७ ) इति विभक्तेरुदात्तत्वम् । वसूनाम् । ' नित् ' इत्यनुवृत्तौ ' शृस्वृस्निहित्रप्यसिवसिहनिक्रिदिवन्धिमनिभ्यश्च ' ( उ. सू. १. १० ) इति उप्रत्ययः । निरवादाद्युदात्तः । इरज्यति । कण्ड्वादिषु ' इरज् ईर्ष्यायाम् ' । अत्र ऐश्वर्यार्थः । ' कण्ड्वादिभ्यो यक् ' ( पा. सू. ३. १. २७ ) । प्रत्ययस्वरणोदात्तः । पञ्च । ' पचि व्यक्तीकरणे ' । ' पञ्चेश्च ' इति कनिन् । निरवादाद्युदात्तः । क्षितीनाम् । प्रातिपदिकस्वरेणान्तोदात्तः । ' नामन्यतरस्याम् ' इति विभक्तेरुदात्तत्वम् ॥

आश्विनं शंसिष्यन् ' इन्द्रं वो विश्वतस्परि ' इति जुहुयात् । ' संस्थितेष्वाश्विनाय स्तुवते ' इति खण्डे ' बण्महाँ असि सूर्येति द्वाभ्यामिन्द्रं वो विश्वतस्परि ' ( आश्व. श्रौ. ६. ५ ) इति सूत्रितम् । चतुर्विंशेऽहनि प्रातःसवने ब्राह्मणाच्छंसिन ' इन्द्रं वो विश्वतस्परि ' इत्यारम्भणीया । ' चतुर्विंशे ' इत्युपक्रम्य ' ऋजुनीती नो वरुण इन्द्रं वो विश्वतस्परि ' ( आश्व. श्रौ. ७. २ ) इति सूत्रितम् ॥

**इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः । अस्माकमस्तु केवलः ॥ १० ॥**

इन्द्रम् । वः । विश्वतः । परि । हवामहे । जनेभ्यः । अस्माकम् । अस्तु । केवलः ॥ १० ॥

हे ऋत्विग्यजमानाः [v]विश्वतः सर्वेभ्यो [v]जनेभ्यः [v]परि उपरि अवस्थितम् [v]इन्द्रं [v]वः युष्मदर्थं [v]हवामहे आह्वयामः । अतः स इन्द्रः [v]अस्माकं [v]केवलः असाधारणः [v]अस्तु । इतरेभ्योऽप्यधिकमनु-

---

१. छ-ठ-ण-त-थ-पञ्चेश्च ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ग्रहमस्मासु करोत्वित्यर्थः ॥ इन्द्रम् । रन्प्रत्ययान्तो नित्त्वादाद्युदात्तः । वः । 'अनुदात्तं सर्वम्०' इत्यनुवृत्तौ 'बहुवचनस्य वस्नसौ' ( पा. सू. ८. १. २१ ) इति वस् । विश्वतः । 'लिति' ( पा. सू. ६. १. १९३ ) इति प्रत्ययात् पूर्वमुदात्तम् । परि । निपातत्त्वादाद्युदात्तः । संहितायां 'पञ्चम्याः परावध्यर्थे' ( पा. सू. ८. ३. ५१ ) इति विसर्जनीयस्य सत्वम् । हवामहे । ह्वेञः शपि 'बहुलं छन्दसि' ( पा. सू. ६. १. ३४ ) इति संप्रसारणपरपूर्वत्वे । गुणावादेशौ । जनेभ्यः । जन्यन्ते इति जनाः । जनयतेः कर्मणि घञ् । 'जनिवध्योश्च' (पा. सू. ७. ३. ३५) इति उपधाया वृद्ध्यभावः । नित्त्वादाद्युदात्तत्वम् । अस्माकम् । अस्मच्छब्दोऽन्तोदात्तः । 'शेषे लोपः' ( पा. सू. ७. २. ९० ) इत्यन्तलोपपक्षे 'साम आकम्' ( पा. सू. ७. १. ३३ ) इति आकारेण एकादश उदात्तः । टिलोपपक्षे उदात्तनिवृत्तिस्वरेण आकार उदात्तः । केवलः । वृषादेराकृतिगणत्वादाद्युदात्तः ॥ ॥ १४ ॥ ॥ २ ॥

तृतीयेऽनुवाके चत्वारि सूक्तानि । तत्र 'एन्द्र सानसिम्' इत्यादिकं प्रथमं दशर्चं सूक्तं 'सुरूपकृत्नुम्' इत्यादिषु षट्सु पञ्चमम् । ऋष्यादयस्तु पूर्ववत् । विशेषविनियोगस्तु – महाव्रते निष्केवल्ये औष्णिहतृचाशीतौ 'एन्द्र सानसिं रयिम्' इत्यादिके द्वे सूक्ते । पञ्चमारण्यके 'औष्णिही तृचाशीतिः' इति खण्डे शौनकेन सूत्रितं—'सुरूपकृत्नुमूतय इति त्रीण्येन्द्र सानसिं रयिमिति सूक्ते' ( ऐ. आ. ५. २. ५ ) इति । अतिरात्रे प्रथमपर्यायेऽच्छावाकशस्त्रे 'एन्द्र सानसिम्' इति सूक्तम् । सूत्रितं च—'इन्द्रमिद्राथिनो बृहदेन्द्र सानसिम्' ( आश्व. श्रौ. ६. ४ ) इति । दर्शयागे इन्द्रयाजिनः सांनाय्यस्य अनुवाक्या 'एन्द्र सानसिं रयिम्' इति । 'उक्ता देवताः' इत्यस्मिन् खण्डे 'एन्द्र सानसिं रयिं प्र ससाहिषे पुरुहूत शत्रून्' ( आश्व. श्रौ. १. ६ ) इति सूत्रितम् ॥

एन्द्र सानसिं रयिं सजित्वानं सदासहम् । वर्षिष्ठमूतये भर ॥ १ ॥

आ । इन्द्र । सानसिम् । रयिम् । सऽजित्वानम् । सदाऽसहम् । वर्षिष्ठम् । ऊतये । भर ॥१॥

हे vइन्द्र vऊतये अस्मद्रक्षार्थं vरयिं धनम् vआ vभर आहर । कीदृशं रयिम् । vसानसिं संभजनीयम् । vसजित्वानं समानशत्रुजयशीलम् । धनेन हि शूरान् भृत्यान् संपाद्य शत्रवो जीयन्ते । vसदासहं सर्वदा शत्रूणामभिभवहेतुम् । vवर्षिष्ठम् अतिशयेन वृद्धं प्रभूतमित्यर्थः ॥ सानसिम् । 'वन षण संभक्तौ' इत्यस्मात् असिप्रत्ययो वृद्धिः अन्तोदात्तत्वं च 'सानसिवर्णसि०' ( उ. सू. ४. ५४७ ) इत्यादिना निपात्यते । रयिम् । प्रातिपदिकस्वरेणान्तोदात्तः । सजित्वानम् । समानान् अरीन् जेतुं शीलमस्य । 'अन्येभ्योऽपि दृश्यन्ते' ( पा. सू. ३. २. ७५ ) इति क्वनिप् । उपपदसमासः । 'समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केषु' ( पा. सू. ६. ३. ८४ ) इति समानस्य सभावः । कृदुत्तरपदप्रकृतिस्वरेण धातुस्वर एव शिष्यते । वर्षिष्ठम् । वृद्धशब्दात् 'अतिशायने तमबिष्ठनौ' ( पा. सू. ५. ३. ५५ ) इति इष्ठन् । 'प्रियस्थिर०' ( पा. सू. ६. ४. १५७ ) इत्यादिना वृद्धशब्दस्य वर्षादेशः । इष्ठनो नित्त्वादाद्युदात्तत्वम् । ऊतये । 'उदात्तः' इत्यनुवृत्तौ 'ऊतियूतिजूतिसाति०' इत्यादिना क्तिन् उदात्तो निपातितः । भर । 'हृग्रहोर्भश्छन्दसि०' ( पा. सू. ८. २. ३२. १ ) इति हकारस्य भकारः । 'ते प्राग्धातोः' ( पा. सू. १. ४. ८० ) इति धातोः प्राक् प्रयोक्तव्यस्य आङः 'व्यवहिताश्च' ( पा. सू. १. ४. ८२ ) इति छन्दसि व्यवहितप्रयोगः ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नि येन॑ मुष्टिहत्यया॒ नि वृ॒त्रा रु॒णधा॑महै । त्वोता॑सो॒ न्यर्व॑ता ॥ २ ॥

नि । येन॑ । मु॒ष्टिऽहत्यया॑ । नि । वृ॒त्रा । रु॒णधा॑महै । त्वाऽऊ॑तासः । नि । अर्व॑ता ॥ २ ॥

[v]येन धनेन संपादितानां भटानां [v]नि [v]मुष्टिहत्यया नितरां मुष्टिप्रहारेण [v]वृत्रा शत्रून् [v]नि [v]रुणधामहै निरुद्धान् करवाम तादृशं धनमाहरेत्यर्थः । [v]त्वोतासः त्वया रक्षिता वयम् [v]अर्वता अस्मदीयेनाश्वेन [v]नि रुणधामहै इत्यनुषङ्गः । पदातियुद्धेनाश्वयुद्धेन च शत्रून् विनाशयाम इत्यर्थः ॥ मुष्टिहत्यया । 'हनस्त च' ( पा. सू. ३. १. १०८ ) इति सुबन्ते उपपदे क्यप्; तत्संनियोगेन नकारस्य तकारः । कृदुत्तरपदप्रकृतिस्वरे प्राप्ते 'परादिश्छन्दसि बहुलम्' ( पा. सू. ६. २. १९९ ) इति बहुलग्रहणेन त्रिचक्रादीनां छन्दस्यन्तोदात्तत्वाभिधानात् (पा. सू. ६. २. १९९.१) अन्तोदात्तत्वम् । नि । आख्यातसंबन्धस्यापि नेरुपसर्गस्य 'व्यवहिताश्च' ( पा. सू. १. ४. ८२ ) इति व्यवहितप्रयोगः । वृत्रा । 'शेश्छन्दसि बहुलम्' ( पा. सू. ६. १. ७० ) इति शेर्लोपः । नलोपः । रुणधामहै । आट्संयोगेन पित्त्वात् ( पा. सू. ३. ४. ९२ ) 'ऋसोरल्लोपः' ( पा. सू. ६. ४. १११ ) इति अकारलोपो न भवति । पित्त्वादेव च आख्यातस्यानुदात्तत्वेन विकरणस्य श्नम एव उदात्तत्वं शिष्यते । ननु 'तिङ्ङतिङः' इति निघातेन भवितव्यम् । न । द्वे ह्यत्र तिङ्विभक्ती । निबिडया मुष्टया निरुणधामहै इत्यत्र श्रुतैका । अर्वता निरुणधामहै इत्यत्रानुपक्ता द्वितीया । तयोः समुच्चयार्थश्चकारो लुप्यते । तेन 'चादिलोपे विभाषा' ( पा. सू. ८. १. ६३ ) इति प्रथमेयं तिङ्विभक्तिर्न निहन्यते । यथा 'नात्मना तृप्यति नान्यस्मै ददाति' ( तै. सं. २. ५. ४. ३ ) इत्यत्र हि समुच्चयार्थस्य चशब्दस्य लोपात् तृप्यतीति प्रथमा तिङ्विभक्तिर्न निहन्यते, ददातीति द्वितीया तु निहन्यते एव । ननु तत्र द्वे तिङ्विभक्ती श्रूयेते । इह पुनरेकैव श्रुता । सैवोत्तरत्रानुषज्यते नान्या श्रूयते इति द्वितीयाभावात् कथमियं प्रथमा । न । अनुषङ्गलब्धद्वितीयापेक्षमपि प्राथम्यमुपजीव्य निघातनिषेधदर्शनात् । 'पुरोडाशं चाधिश्रयत्याज्यं च' ( तै. सं. १. ६. ९. ३-४ ), 'प्रोक्षणीश्चासादयत्याज्यं च' ( तै. सं. १. ६. ९. ४ ) इत्यत्र हि अधिश्रयति आसादयति इति आख्यातयोः प्रथमवाक्यद्वयश्रुतयोः उत्तरवाक्यद्वयेऽनुषङ्गमपेक्ष्यैव प्राथम्यस्वीकारेण 'चवायोगे प्रथमा' ( पा. सू. ८. १. ५९ ) इति निघातनिषेधो दृष्ट इति । त्वया ऊता रक्षिताः त्वोतासः । 'प्रत्ययोत्तरपदयोश्च' ( पा. सू. ७. २. ९८ ) इति मपर्यन्तस्य त्वादेशे दकारलोपश्छान्दसः, अवतेः निष्ठायामिडभावश्च । 'ज्वरत्वरस्त्रिव्यविमवामुपधायाश्च' ( पा. सू. ६. ४. २० ) इति ऊठ् । 'एत्येधत्यूठ्सु' ( पा. सू. ६. १. ८९ ) इति वृद्ध्यभावश्छान्दसः । 'तृतीया कर्मणि' ( पा. सू. ६. २. ४८ ) इति पूर्वपदप्रकृतिस्वरेणाकार उदात्तः । 'एकादेश उदात्तेनोदात्तः' इत्युदात्त ओकारः । अर्वता । अर्वति गच्छति इति अर्वा । 'अर्व गतौ' । 'अन्येभ्योऽपि दृश्यन्ते' ( पा. सू. ३. २. ७५ ) इति वनिप्प्रत्ययः । 'नेड्वशि कृति' ( पा. सू. ७. २. ८ ) इति इट्प्रतिषेधः । 'लोपो व्योर्वलि' ( पा. सू. ६. १. ६६ ) इति वकारलोपः । 'अर्वणस्त्रसावनञः' ( पा. सू. ६. ४. १२७ ) इति तकारः । वनिपः पित्त्वात् धातुस्वर एव ॥

इन्द्र॒ त्वोता॑स॒ आ व॒यं वज्रं॑ घ॒ना द॑दीमहि । जये॑म॒ सं यु॒धि स्पृ॒धः ॥ ३ ॥

इन्द्र॑ । त्वाऽऊ॑तासः । आ । व॒यम् । वज्र॑म् । घ॒ना । द॒दी॒म॒हि॒ । जये॑म । सम् । यु॒धि । स्पृ॒धः ॥ ३ ॥

---

१. च-फ–मुख्या श्रुतैका ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे Vइन्द्र Vत्वोतासः त्वया पालिताः Vवयं Vघना घनं शत्रुप्रहरणायात्यन्तदृढं Vवज्रम् आयुधम् Vआ Vददीमहि स्वीकुर्मः । तेन च वज्रेण Vयुधि युद्धे Vस्पृधः स्पर्धमानान् शत्रून् Vसं Vजयेम सम्यक् जयेम ॥ त्वोतासः । उक्तम् । वज्रम् । ' वज व्रज गतौ ' । ' ऋज्रेन्द्राग्र° ' ( उ. सू. २. १८६ ) इत्यादिना रन्प्रत्ययान्तो निपातः । घना । घनः काठिन्यम् । तदस्यातीति अर्शआदित्वात् अच् ( पा. सू. ५. २. १२७ ) । चित्त्वादन्तोदात्तः । ' सुपां सुलुक् ° ' इति डादेशः । ददीमहि । ' डुदाञ् दाने ' । प्रार्थनायां लिङ् । क्रियाफलस्य कर्तृगामित्वात् ' स्वरितञितः ° ' ( पा. सू. १. ३. ७२ ) इत्यात्मनेपदोत्तमपुरुषबहुवचनं महिङ्[2] । जुहोत्यादित्वात् शपः श्लुः ( पा. सू. २. ४. ७५ ) । ' श्लौ ' ( पा. सू. ६. १. १० ) इति द्विर्भावः । ' लिङः सलोपोऽनन्त्यस्य ' ( पा. सू. ७. २. ७९ ) इति सलोपः । ' श्नाभ्यस्तयोरातः ' ( पा. सू. ६. ४. ११२ ) इति आकारलोपः । जयेम[3] । शपः पित्त्वादनुदात्तत्वम् । तिङश्च लसार्वधातुकस्वरात् धातुस्वर एव शिष्यते । ' छन्दसि परेऽपि ' ( पा. सू १. ४. ८१ ) इति समः परः प्रयोगः । युधि । ' युध संप्रहारे ' । संषदादित्वात् भावे क्विप् ( पा. सू. ३. ३. १०८. ९ ) । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । स्पर्धन्ते इति स्पृधः । ' स्पर्ध संघर्षे ' । ' क्विप्च ' ( पा. सू. ३. २. ७६ ) इति क्विप् । ' बहुलं छन्दसि ' इति रेफस्य संप्रसारणम् ऋकारः । अकारलोपश्च ॥

**वयं शूरेभिरस्तृभिरिन्द्र त्वया युजा वयम् । सासह्याम पृतन्यतः ॥ ४ ॥**

**वयम् । शूरेभिः । अस्तृऽभिः । इन्द्र । त्वया । युजा । वयम् । ससह्याम[4] । पृतन्यतः ॥ ४ ॥**

Vवयं कर्मानुष्ठातारः Vशूरेभिः शौर्ययुक्तैः Vअस्तृभिः आयुधानां प्रक्षेप्तृभिर्भटैः संयुज्येमहीति शेषः । हे Vइन्द्र तादृशा[4] भटसहितां वयं Vयुजा सहायभूतेन Vत्वया Vपृतन्यतः सेनामिच्छतः Vशत्रून् Vसासह्याम अतिशयेनाभिभवेम ॥ शूरेभिः । ' शु श्रु गतौ ' । ' °ऋन् ' ( उ. सू. २. १८२ ) इत्यनुवृत्तौ ' शुसिचिमीनां दीर्घश्च ' ( उ. सू. २. १८३ ) इति ऋन् । कित्त्वाद्गुणाभावः । नित्त्वादाद्युदात्तत्वम् । ' बहुलं छन्दसि ' (पा. सू. ७. १. १० ) इति ऐसो निषिद्धत्वात् ' बहुवचने झल्येत् ' ( पा. सू. ७. ३. १०३ ) इति एत्वम् । सहयोगे तृतीयाबलात् ( पा. सू. २. ३. १९ ) वयमित्यस्मत्पदसमभिव्याहाराच्च वयं संयुज्येमहीति गम्यम्[5] । विनापि सहशब्देन 'वृद्धो यूना°' (पा. सू. १. २. ६५) इति निपातनादिति ह्युक्तम्। अस्तृभिः शस्त्रास्त्रप्रक्षेपणशीलैः तद्धर्मभिः तत्साधुकारिभिर्वा । ' असु क्षेपणे ' । ' तृन् ' ( पा. सू. ३. २. १३५ ) इति ताच्छील्यादिषु तृन् । नित्त्वादाद्युदात्तः । ' रधादिभ्यश्च ( पा. सू. ७. २. ४५ ) इति विकल्पविधानात् अयं पक्षे इडभाव[6]ः । त्वया । ' युष्मस्मिभ्यां मदिक् ' ( उ. सू. १. १३६ ) । कित्त्वाद्गुणाभावः । युष्मदः प्रत्ययस्वरेण अकार उदात्तः । तृतीयैकवचनं टा ( पा. सू. ४. १. २ ) । ' त्वमावेकवचने ' (पा. सू. ७. २. ९७ ) इति मपर्यन्तस्य त्वादेशः । ' अतो गुणे ' (पा. सू. ६. १. ९७) इति पररूपत्वम् । ' एकादेश उदात्तेनोदात्तः ' इत्युदात्तः। युजा । ' °अन्चुयुजिक्रुञ्चां च ' ( पा. सू. ३. २. ५९ ) इति क्विन् । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम्। सासह्याम भृशं पुनः पुनः सहेमहि । ' षह मर्षणे ' । ' धात्वादेः षः सः ' । ' धातोरेकाचो हलादेः

---

१. ठ–निपातितः । २. त–' महिङ् ' नास्ति । ३. त–जयेम । जि जये । ४. ठ–तादृशभटसहिताः । ५. च-छ-ठ-ण-थ-फ-श शुषिचिमीनाम् । ६. ठ–° त्यस्मदा समभि° । ७. च-त-फ–' इडभावः ' इत्यस्यानन्तरं 'वस्तुतस्तु रु(र)धादावभावात् तृन्तृचौ शंसिक्षदादिभ्य इत्यनेन अनिट् तृन् ।'

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

क्रियासमभिहारे यङ् ' ( पा. सू. ३. १. २२ )। ' यङोऽचि च ' (पा. सू. २. ४. ७४) इति लुक्। ' सन्यङोः ' ( पा. सू. ६. १. ९ ) इति द्विर्भावः। हलादिशेषः ( पा. सू. ७. ४. ६० )। ' दीर्घोऽकितः ' ( पा. सू. ७. ४. ८३) इति दीर्घः। प्रार्थनायां लिङ्। चर्करीतं परस्मैपदम् अदादिवच्च द्रष्टव्यमिति परस्मैपदोत्तमपुरुषबहुवचनं मस्। कर्तरि शप्। अदादिवद्भावात् लुक्। 'नित्यं ङितः ' ( पा. सू. ३. ४. ९९) इति अत्यसकारलोपः। ' यासुट् परस्मैपदेषूदात्तो ङिच्च ' ( पा. सू. ३. ४. १०३) इति यासुट्। 'लिङः सलोपोऽनन्त्यस्य' ( पा. सू. ७. २. ७९) इति सकारलोपः। सति शिष्टत्वात् यासुट एव उदात्तत्वं शिष्यते। पादादित्वात् न निघातः। पृतन्यतः। योद्धुं पृतनामात्मन इच्छतः। ' सुप आत्मनः क्यच् ' इति क्यच्। 'सनाद्यन्ता धातवः' (पा. सू. ३.१.३२) इति धातुसंज्ञायां 'सुपो धातुप्रातिपदिकयोः ' ( पा. सू. २. ४. ७१ ) इति सुपो लुक्। 'क्यचि च' ( पा. सू. ७. ४. ३३ ) इत्यनुवृत्तौ 'कव्यध्वरपृतनस्यर्चि लोपः ' ( पा. सू. ७. ४. ३९ ) इति आकारलोपः। पृतन्यधातुः चित्त्वादन्तोदात्तः। उपरि लटः शत्रादेशः। कर्तरि शप्। पित्त्वादनुदात्तत्वम्। शतुश्च लसार्वधातुकस्वरेण उदात्तेन सह ' एकादेश उदात्तेनोदात्तः ' इति पृतन्यच्छब्दोऽन्तोदात्तः। शसः सुप्स्वरेणानुदात्तस्य ' अन्तोदात्तात् ' (पा. सू. ६. १. १६९ ) इत्यनुवृत्तौ ' शतुरनुमो नद्यजादी ' (पा. सू. ६. १. १७३ ) इत्युदात्तत्वम्॥

**महाँ इन्द्रः परश्च नु महित्वमस्तु वज्रिणे। द्यौर्न प्रथिना शवः॥ ५॥**

महान्। इन्द्रः। परः। च। नु। महिऽत्वम्। अस्तु। वज्रिणे। द्यौः। न। प्रथिना। शवः॥५॥

अयम् [v]इन्द्रः [v]महान् शरीरेण प्रौढः [v]परश्च गुणैरुत्कृष्टोऽपि। [v]नु किंच [v]वज्रिणे वज्रयुक्तायेन्द्राय [v]महित्वं पूर्वोक्तं द्विविधमाधिक्यं सर्वदा [v]अस्तु। स्वभावसिद्धस्यापि भक्त्या प्रार्थनमेतत्। किंच। [v]द्यौर्न द्युलोक इव [v]शवः बलमिन्द्रस्य सेनारूपं [v]प्रथिना प्रथिम्ना पृथुत्वेन युज्यतामिति शेषः। यथा द्युलोकः प्रभूत एवमस्य सेना प्रभूता। नुशब्दो यद्यपि क्षिप्रनामसु ' नु मक्षु ' ( नि. २. १५. १ ) इति पठितस्तथाप्यत्र तस्यान्वयाभावात् निपातत्वेन अनेकार्थत्वसंभवाच्च समुच्चयार्थोऽत्र गृहीतः। नशब्दो लोके प्रतिषेधार्थ एव। स्वाध्याये तु प्रतिषेधार्थ उपमार्थश्चेति द्विविधः। येन पदेनान्वीयते तस्मात् पूर्वं प्रयुज्यमानः प्रतिषेधार्थ उपरिष्टात् प्रयुज्यमान उपमार्थः। तथा च यास्क उदाहरति— ' उभयमन्वध्यायं नेन्द्रं देवममंसतेति प्रतिषेधार्थीयः पुरस्तादुपाचारस्तस्य यत्प्रतिषेधति। दुर्मदासो न सुरायामियुपमार्थीय उपरिष्टादुपाचारस्तस्य येनोपमिमीते ' ( निरु. १. ४ ) इति। अत्रोपमेयवाचिनो द्युशब्दस्यापि प्रयुक्तत्वात् उपमार्थः स्वीकृतः। अष्टाविंशतिसंख्याकेषु बलनामसु ' ओजः पाजः शवः ' ( नि. २. ९. ३ ) इति पठितम्॥ महान् इति नकारस्य संहितायां ' दीर्घादटि समानपादे ' ( पा. सू. ८. ३. ९ ) इति रुत्वम्। ' आतोऽटि नित्यम् ' ( पा. सू. ८. ३. ३ ) इति पूर्वस्य आकारस्य अनुनासिकः। ' भोभगोअघोअपूर्वस्य योऽशि ' (पा. सू. ८. ३. १७) इति यकारः। तस्य लोपः ( पा. सू. ८. ३. १९ )। तस्यासिद्धत्वात् ( पा. सू. ८. २. १ ) स्वरसंधिर्न भवति। महेः ' इन् ' ( उ. सू. ४. ५५७ ) इति औणादिक इन्। महेर्भावो महित्वम्। त्व इति प्रत्ययस्वरेणोदात्तः। स एव शिष्यते। वज्रिणे। इकारः प्रत्ययस्वरेणोदात्तः। द्यौः। द्योशब्दः प्रातिपदिकस्वरेणान्तोदात्तः। ' गोतो णित् ' ( पा. सू. ७. १. ९० ) इति विभक्तेर्णित्वात् ' अचो ञ्णिति ' ( पा. सू. ७. २. ११५ )

---

१. च-फ-संयुज्यतामिति; छ-सुयुज्यतामिति। २. च-त-फ-श-उपमानार्थः। ३. ट-अतः अत्रोप°। ४. च-फ-उपमानार्थः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति वृद्धिः आन्तरतम्यात् उदात्तैव भवति । प्रथिना प्रथिम्ना । पृथोर्भाव इत्यर्थे ' पृथ्वादिभ्य इमनिज्वा ' ( पा. सू. ५. १. १२२ ) इति इमनिच् । ' र ऋतो हलादेर्लघोः ' ( पा. सू. ६. ४ १६१ ) इति ऋकारस्य रभावः । ' तुरिष्टेमेयःसु ' ( पा. सू. ६. ४. १५४ ) इत्यनुवृत्तौ ' टेः ' ( पा. सू. ६. ४. १५५ ) इति टिलोपः । प्रथिमन्शब्दः चित्त्वादन्तोदात्तः । तृतीयैकवचने भत्वात् ' अल्लोपोऽनः ' ( पा. सू. ६. ४. १३४ ) इति अकारलोपः । छान्दसो मकारलोपः । ' अनुदात्तस्य च यत्रोदात्तलोपः ' (पा. सू. ६. १: १६१) इति विभक्तेरुदात्तत्वम् । शवः । ' नञ्विषयस्यानिसन्तस्य ' ( फि. सू.२६ ) इत्याद्युदात्तत्वम् ॥ ॥ १५ ॥

समोहे वा य आशत नरस्तोकस्य सनितौ । विप्रासो वा धियायवः ॥ ६ ॥

समऽओहे । वा । ये । आशत । नरः । तोकस्य । सनितौ । विप्रासः । वा । धियाऽयवः ॥६॥

ये नरः पुरुषाः समोहे संग्रामे तोकस्य अपत्यस्य सनितौ वा लाभे वा आशत व्याप्तवन्तः । इन्द्रं स्तुत्येति शेषः । वा अथवा विप्रासः मेधाविनः धियायवः प्रज्ञाकामाः सन्तः आशत ते सर्वे लभन्ते इत्यध्याहारः । ' रणः ' इत्यादिषु षट्चत्वारिंशत्संग्रामनामसु ' समोहे समिथे ' ( नि. २. १७. २५ ) इति पठितम् । पञ्चदशस्वपत्यनामसु ' तुक् तोकम् ' ( नि. २. २. २ ) इति पठितम् ॥ समोहे । प्रातिपदिकान्तोदात्तत्वम् । वा । ' चादयोऽनुदात्ताः ' ( फि. सू. ८४ ) इत्यनुदात्तः । आशत । ' अशू व्याप्तौ ' । छान्दसः श्लेर्लोपः । आडागम उदात्तः ( पा. सू. ६. ४. ७२ ) । सति शिष्टत्वेन स एव शिष्यते । नरः । प्रातिपदिकस्वरः । सनितौ । स्त्रियां क्तिन् । 'तितुत्रेष्वग्रहादीनाम्' (पा. सू. ७.२. ९.१)। निगृहीतिः निपठिति[1]ः इतिवत् इडागमः । विप्रासः । 'ऋत्रेन्द्र°' (उ. सू. २. १८६) इत्यादिना विप्रशब्दो रन्प्रत्ययान्तो निपातितः । धियायवः । ' धि धारणे ' । धीयते धार्यतेऽवबुध्यते श्रुतमर्थजातम् अनया इति धिया प्रज्ञा । तामात्मन इच्छन्तीति क्यच् । ' क्याच्छन्दसि ' ( पा. सू. ३. २. १७० ) इति उप्रत्ययः । अतो लोपः । प्रत्ययस्वरेणान्तोदात्तः[2] ॥

यः कुक्षिः सोमपातमः समुद्रइव पिन्वते । उर्वीरापो न काकुदः ॥ ७ ॥

यः । कुक्षिः । सोमऽपातमः । समुद्रःऽइव । पिन्वते । उर्वीः । आपः । न । काकुदः ॥ ७ ॥

यः कुक्षिः अस्येन्द्रस्योदरप्रदेशः सोमपातमः अतिशयेन सोमस्य पाता स कुक्षिः समुद्र इव पिन्वते वर्धते । सेचनार्थो धातुः औचित्येन वृद्धिं लक्षयति । काकुदः मुखसंबन्धिन्यः उर्वीः बह्व्यः आपो न जलानीव । जिह्वासंबन्धमास्योदकं यथा कदाचिदपि न शुष्यति तथेन्द्रस्य कुक्षिः सोमपूरितो न शुष्यतीत्यर्थः । यद्यपि ' श्लोकः ' इत्यादिषु सप्तपञ्चाशत्सु वाङ्नामसु ' काकुत् जिह्वा ' ( नि. १. ११. २८ ) इति पठितं तथाप्युदकसंबन्धसिद्ध्यर्थमत्र काकुच्छब्देन मुखमुपलक्ष्यते । संबन्धवाचिनस्तद्धितस्यात्र छान्दसो लोपो द्रष्टव्यः ॥ सोमपातमः । सोमं पिबतीति सोमपाः । आकारो धातुस्वरेणोदात्तः । कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते । तमपः पित्त्वादनुदात्तत्वम् । समुद्रशब्दः प्रातिपदिकत्वादन्तोदात्तः । ' इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च '

---

१. ग-छ-ण-फ–निपचितिः । २. ठ-त–प्रत्ययस्वरेणोदात्तः । ३. त–जिह्वासंबद्धम्

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति प्रकृतिस्वरः। पिन्वते। 'पिवि सेचने'। 'इदितो नुम् धातोः' (पा. सू. ७. १. ५८) इति नुमागमः। शपः पित्त्वेनानुदात्तत्वम्। तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते। उर्वीः। उरुशब्दोऽन्तोदात्तः। 'वोतो गुणवचनात्' (पा. सू. ४. १. ४४) इति ङीप्। यणादेशः। 'उदात्तयणो हल्पूर्वात्' (पा. सू. ६. १. १७४) इति ईकार उदात्तः। जसा सह 'एकादेश उदात्तेनोदात्तः' इति एकादेश उदात्तः। आपः। प्रातिपदिकस्वरः। काकुदः। प्रातिपदिकस्वरेणान्तोदात्तः॥

अभिप्लवषडहगतेषु उक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिनः 'एवा ह्यस्य सूनृता' इति अनुरूपस्तृचः। 'एह्यू षु ब्रवाणि ते' इति खण्डे 'अथ ब्राह्मणाच्छंसिनः' इत्युपक्रम्य 'एवा ह्यसि वीरयुरेवा ह्यस्य सूनृता' (आश्व. श्रौ. ७. ८) इति सूत्रितम्॥

**एवा ह्यस्य सूनृता विरप्शी गोमती मही। पक्वा शाखा न दाशुषे॥ ८॥**

**एव। हि। अस्य। सूनृता। विऽरप्शी। गोऽमती। मही। पक्वा। शाखा। न। दाशुषे॥८॥**

अस्य इन्द्रस्य सूनृता प्रियसत्यरूपा वाक् दाशुषे हविर्दत्तवते यजमानाय तदर्थम् एवा हि एवं खलु अनन्तरपदवक्ष्यमाणगुणोपेता भवतीत्यर्थः। कीदृशी। विरप्शी विविधरूपणोपेतवाक्ययुक्ता बहुविधोपचारवादिनीत्यर्थः। गोमती बह्वीभिर्गोभिरुपेता गोप्रदेत्यर्थः। अत एव मही महती पूज्या। यथोक्तवाचो दृष्टान्तः। पक्वा शाखा न। यथा बहुभिः पक्वैः फलैरुपेता पनसवृक्षादिशाखा प्रीतिहेतुस्तद्वत्। यद्यपि महन्नामसु 'बाधन् विरप्शी' (नि. ३. ३. २२) इति पठितं, तथाप्यत्र मही इत्यनेन पुनरुक्तिप्रसङ्गात् अवयवार्थो गृहीतः॥ एव। 'एवमादीनामन्तः' (फि. सू. ८२) इत्यन्तोदात्तः। संहितायां 'निपातस्य च' (पा. सू. ६. ३. १३६) इति दीर्घः। हि। निपात आद्युदात्तः। अस्य। प्रकृतस्येन्द्रस्य परामर्शात् 'इदमोऽन्वादेशे' (पा. सू. २. ४. ३२) इत्यादिना अशादेशोऽनुदात्त इति सर्वानुदात्तः। सूनृता। 'ऊन परिहाणे'। सुतराम् ऊनयति अप्रियमिति सून्। सा चासौ ऋता सत्या चेति सूनृता प्रियसत्या वाक्। 'परादिश्छन्दसि बहुलम्' (पा. सू. ६.२.१९९) इति ऋकार उदात्तः। विरप्शी। विचित्रं रपणं विरप्। 'रप लप व्यक्तायां वाचि'। संपदादित्वात् भावे क्विप्। तदेषामस्तीति विरप्शानि वाक्यानि। तानि यस्यां वाचि सन्ति सा वाक् विरप्शिनी। 'अत इनिठनौ' (पा.सू. ५. २. ११५) इति इनिः। 'यस्येति च' (पा. सू. ६. ४. १४८) इति अकारलोपः। 'ऋन्नेभ्यो ङीप्' (पा. सू. ४. १. ५) इति ङीप्। इकारः प्रत्ययस्वरेणोदात्तः। नकारलोपश्छान्दसः। सवर्णदीर्घः 'एकादेश उदात्तेनोदात्तः' इत्युदात्तः। गावोऽस्यां सन्तीति गोमती। मतुब्ङीपौ पित्त्वादनुदात्तौ। प्रातिपदिकस्वर एव शिष्यते। मही महती। 'उगितश्च' (पा. सू. ४. १. ६) इति ङीप्। तस्य पित्त्वादनुदात्तत्वे प्राप्ते 'शतुरनुमो नद्यजादी' इत्यत्र 'बृहन्महतोरुपसंख्यानम्' (पा. सू. ६. १. १७३. १) इत्युदात्तत्वम्। अच्छन्दलोपश्छान्दसः। पक्वा। 'डुपचष् पाके'। 'निष्ठा' (पा. सू. ३. २. १०२) इति क्तप्रत्ययः। 'पचो वः' (पा. सू. ८. २. ५२) इति वत्वम्। 'चोः कुः' (पा. सू. ८. २. ३०) इति कुत्वम्। प्रत्ययस्वरेणान्तोदात्तः। टापा सह सवर्णदीर्घः 'एकादेश उदात्तेनोदात्तः' इत्युदात्तः। शाखा। 'शाखृ श्लाखृ व्याप्तौ'। पचाद्यच्। चित्त्वादन्तोदात्ते प्राप्ते वृषादेः आकृतिगणत्वात् वृषादित्वादाद्युदात्तत्वम्। दाशुषे। 'दाशृ दाने'। 'दाश्वान्साह्वान्मीढ्वांश्च' (पा. सू. ६. १. १२) इति निपातनात् क्वसौ इडभावो द्विर्वचनाभावश्च। चतुर्थ्येकवचने 'यचि

---

१. च-छ-त-फ-श–'प्रकृतिस्वरः' नास्ति। २. ग-घ-च-छ-ण-त-फ-य-श–'सह' नास्ति।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

भम् ' ( पा. सू. १. ४. १८ ) इति भसंज्ञायां ' वसोः संप्रसारणम् ' ( पा. सू. ६. ४. १३१ ) इति संप्रसारणं वकारस्य उकारः । परपूर्वत्वम् । ' शासिवसिघसीनां च ' ( पा. सू. ८. ३. ६० ) इति षत्वम् । प्रत्ययस्वरेण उकार उदात्तः ॥

एवा हि ते विभूतय ऊतय इन्द्र मावते । सद्यश्चित्सन्ति दाशुषे ॥ ९ ॥

एव । हि । ते । विऽभूतयः । ऊतयः । इन्द्र । माऽवते । सद्यः । चित् । सन्ति । दाशुषे ॥९॥

हे ᵛइन्द्र ᵛते तव ᵛविभूतयः ऐश्वर्यविशेषाः ᵛएवा ᵛहि एवंविधाः खलु । किंविधा इति तदुच्यते । ᵛमावते मत्सदृशाय ᵛदाशुषे हविर्दत्तवते यजमानाय ᵛऊतयः त्वदीयरक्षारूपाः ᵛसद्यश्चित् ᵛसन्ति । यदा कर्म अनुष्ठितं तदैव भवन्ति ॥ मावते मत्सदृशाय । ' वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम् ' ( पा. सू. ५. २. ३९. १ ) इति अस्मच्छब्दात् वतुप् । मपर्यन्तस्य ' प्रत्ययोत्तरपदयोश्च ' ( पा. सू. ७. २. ९८ ) इति मादेशः । अद्शब्देन सह ' अतो गुणे ' ( पा. सू. ६. १. ९७ ) इति पररूपत्वम् । ' दृग्दृशवतुषु ' ( पा. सू. ६. ३. ८९ ) इत्यनुवृत्तौ ' आ सर्वनाम्नः ' ( पा. सू. ६. ३. ९१ ) इति दकारस्य आकारः । सवर्णदीर्घत्वम् । वतुपः पित्त्वात् प्रातिपदिकस्वर एव शिष्यते । सद्यः । समाने ह्यहि इत्यर्थे ' सद्यः परुत्परार्यैषमः° ' ( पा. सू. ५. ३. २२ ) इत्यादिना निपातितम् । प्रत्ययस्वरेणान्तोदात्तत्वम् । चित् । ' चादयोऽनुदात्ताः ' ( फि. सू. ८४ ) इत्यनुदात्तः । सन्ति । ' अस भुवि ' । लटः स्थाने झि । ' झोऽन्तः ' ( पा. सू. ७. १. ३ ) । ' अदिप्रभृतिभ्यः शपः ' ( पा. सू. २. ४. ७२ ) इति शपो लुक् । तिङः प्रत्ययाद्युदात्तत्वम् । ' प्रत्ययलोपे प्रत्ययलक्षणम् ' ( पा. सू. १. १. ६२ ) इति शबकारमाश्रित्य लसार्वधातुकानुदात्तत्वं न भवति । ' वर्णाश्रयविधौ प्रत्ययलक्षणं नास्ति ' ( परिभा. २१ ) इति निषेधात् । दाशुषे । गतमन्त्रे गतम् ॥

एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या । इन्द्राय सोमपीतये ॥ १० ॥

एव । हि । अस्य । काम्या । स्तोमः । उक्थम् । च । शंस्या । इन्द्राय । सोमऽपीतये ॥१०॥

ᵛअस्य इन्द्रस्य ᵛस्तोमः सामसाध्यं स्तोत्रम् ᵛउक्थं ᵛच ऋक्साध्यं शस्त्रमपि ᵛएवा ᵛहि एते उभे एवंविधे खलु । किंविधे इति तदुच्यते । ᵛकाम्या कामयितव्ये ᵛशंस्या ऋत्विग्भिः शंसनीये । किमर्थं शंसनमिति तदुच्यते । ᵛइन्द्राय ᵛसोमपीतये इन्द्रस्य सोमपानार्थम् ॥ एवा ह्यस्य । व्यवहितमन्त्रे गतम् । काम्या । कमेर्णिङन्तात् ' अचो यत् ' ( पा. सू. ३. १. ९७ ) । ' णेरनिटि ' ( पा. सू. ६. ४. ५१ ) इति णिलोपः । ' तित्स्वरितम् ' ( पा. सू ६. १. १८५ ) इति स्वरिते प्राप्ते ' यतोऽनावः ' ( पा. सू. ६. १. २१३ ) इत्याद्युदात्तत्वम् । सुपो डादेशः । स्तोमः । ' अर्तिस्तुसु° ' ( उ. सू. १. १३७ ) इत्यादिना मन्प्रत्ययः । उक्थम् । ' वच परिभाषणे ' । ' पातृतुदिवचिरिचिसिचिभ्यस्थक् ' ( उ. सू. २. १६४ ) इति थक् । किस्वात् संप्रसारणम् । परपूर्वत्वगुणाभावौ । शंस्या । ' शंसु स्तुतौ ' । ण्यन्तात् ' अचो यत् ' । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । सुपो डादेशः । सोमस्य पीतिः सोमपीतिः । कृदुत्तरपदप्रकृतिस्वरे प्राप्ते व्यत्ययेनाद्युदात्तत्वम् । अथवा सोमस्य पीतिर्यस्येन्द्रस्य इति सोमपीतिरिन्द्रः । ' बहुव्रीहौ प्रकृत्या पूर्वपदम् ' (पा. सू. ६. २. १) इति पूर्वपदप्रकृतिस्वरत्वम् ॥ ॥ १६ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'इन्द्रेहि' इत्यादिकं दशर्चं सूक्तं 'सुरूपकृत्नुम्' इत्यादिषु षष्ठम्। ऋष्यादयस्तस्य पूर्ववत्। विशेषस्तु अतिरात्रे द्वितीयपर्यायेऽच्छावाकशस्त्रे 'इन्द्रेहि' इत्यनुरूपस्तृचः। 'अतिरात्रे पर्यायाणाम्' इति खण्डे 'इदं वसो सुतमन्ध इन्द्रेहि मत्स्यन्धसः' (आश्व. श्रौ. ६. ४) इति सूत्रितम्॥

इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः। महाँ अभिष्टिरोजसा॥ १॥

इन्द्र। आ। इहि। मत्सि। अन्धसः। विश्वेभिः। सोमपर्वऽभिः।

महान्। अभिष्टिः। ओजसा॥ १॥

हे vइन्द्र vएहि अस्मिन् कर्मण्यागच्छ। आगत्य च vविश्वेभिः सर्वैः vसोमपर्वभिः सोमरसरूपैः vअन्धसः अन्धोभिः अन्नैः vमत्सि माद्य हृष्टो भव। तत ऊर्ध्वम् vओजसा बलेन vमहान् भूत्वा vअभिष्टिः शत्रूणामभिभविता भव इति शेषः। अष्टाविंशतिसंख्याकेषु बलनामसु 'ओजः पाजः' (नि. २. ९. १) इति पठितम्॥ आ इहि। 'आद्गुणः' (पा. सू. ६. १. ८७)। इन्द्र एहि। यो ह्युभयोः स्थाने लभतेऽसावन्यतरव्यपदेशमिति आङ्माङोः एकादेशस्य आङ्व्यपदेशात् 'ओमाङोश्च' (पा.सू. ६. १. ९५) इति पररूपम्। मत्सि माद्य। 'मदी हर्षग्लेपनयोः'। लोटः सिप्। 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' (परिभा. ३५) इति सेर्हिरादेशः (पा. सू. ३. ४. ८७) न भवति। 'दिवादिभ्यः श्यन्' (पा. सू. ३. १. ६९) इति श्यन्। 'बहुलं छन्दसि' (पा. सू. २. ४. ७३) इति श्यनो लुक्। 'न लुमताङ्गस्य' (पा. सू. १. १. ६३) इति प्रत्ययलक्षणप्रतिषेधात् 'शमामष्टानां दीर्घः श्यनि' (पा. सू. ७. ३. ७४) इति उपधादीर्घो न भवति। सिपः पित्त्वात् धातुस्वर एव। अन्धसः। 'अदेर्नुम् धश्च' (उ. सू. ४. ६४५) इति असुन्। व्यत्ययेन तृतीयाबहुवचनं कर्तव्यम्। नित्त्वादाद्युदात्तः। विश्वेभिः। 'अशिश्रुधि०' (उ. सू. १. १४९) इत्यादिना क्कन्। नित्त्वादाद्युदात्तत्वम्। ऐसादेशः 'बहुलं छन्दसि' (पा. सू. ७. १. १०) इति न भवति। सोमपर्वभिः। लतारूपं सोमं पृणन्ति पूरयन्तीति सोमपर्वाणः सोमरसाः। 'पॄ पालनपूरणयोः'। 'अन्येभ्योऽपि दृश्यन्ते' (पा. सू. ३. २. ७५) इति वनिप्। गुणो रपरत्वम्। वनिपः पित्त्वात् धातुस्वर एव। उपपदसमासे कृदुत्तरपदप्रकृतिस्वरेण पुनः स एव भवति। अभिष्टिः अभिगन्ता। 'इष गतौ'। 'मन्त्रे वृष०' (पा. सू. ३. ३. ९६) इत्यादिना क्तिन् उदात्तः। स हि भावपरोऽपि भवितारं लक्षयति। कित्त्वात् लघूपधगुणाभावः। 'तितुत्रतथसिसुसरकसेषु च' (पा. सू. ७. २. ९) इति इडागमो न भवति। अभिशब्दस्य इकारे 'एमन्नादिषु पररूपं वक्तव्यम्' (पा. सू. ६. १. ९४. ६) इति पररूपत्वम्। प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वम्। ओजसा। 'उब्जेर्बलोपश्च' (उ. सू. ४. ६३१) इति असुन्। नित्त्वादाद्युदात्तः॥

एमेनं सृजता सुते मन्दिमिन्द्राय मन्दिने। चक्रिं विश्वानि चक्रये॥ २॥

आ। ईम्। एनम्। सृजत। सुते। मन्दिम्। इन्द्राय। मन्दिने। चक्रिम्। विश्वानि। चक्रये॥२॥

vईम् इत्यनर्थकः पादपूरणाय प्रयुक्तः। हे अध्वर्यवः vसुते अभिषुते चमसस्थे सोमे vएनं सोमम् vइन्द्राय इन्द्रार्थम् vआ vसृजत पुनरभ्युन्नयत। शुक्रामन्थिचमसगणे पुनरभ्युन्नयनम् आपस्तम्बेनोक्तं—

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'होत्रकाणां चमसाध्वर्यवः सकृत्सकृद्धुत्वा शुक्रस्याभ्युन्नीयोपावर्तध्वमिति' (आप. श्रौ. १२. २३.४) इति। कीदृशम् एनम्। Vमन्दि हर्षहेतुं Vचक्रिं साधुकरणशीलम्। कीदृशाय इन्द्राय। Vमन्दिने हर्षयुक्ताय Vविश्वानि सर्वाणि कर्माणि Vचक्रये कृतवते। सर्वकर्मनिष्पादनशीलायेत्यर्थः। ईम् इत्यस्य पादपूरणार्थत्वं यास्क आह—'अथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्धिति' (निरु. १. ९) इति। अस्यायमर्थः। अन्यैरेव पदैर्विवक्षितेऽर्थे समाप्ते सति ये शब्दा ईमित्यादयः प्रयुक्तास्ते शब्दा अमिताक्षरेषु छन्दोराहित्येन परिमिताक्षररहितेषु ब्राह्मणादिवाक्येषु वाक्यपूरणार्था द्रष्टव्याः। मिताक्षरेषु छन्दोयुक्तेषु ग्रन्थेषु पादपूरणार्थाः। ते च कमीमित्यादय इति। ईमित्यस्य शब्दस्यानर्थक्याय एतामृचमुदाजहार—'एमेनं सृजता सुते। आसृजतैनं सुते' (निरु. १. १०) इति॥ एनम्। इदमो द्वितीयायां 'द्वितीयाटौःस्वेनः' (पा. सू. २. ४. ३४) इति एनादेशः 'अनुदात्तः' (पा. सू. २. ४. ३२) इत्यनुवृत्तेः सर्वानुदात्तः। सृजत। संहितायाम् 'अन्येषामपि दृश्यते' (पा. सू. ६. ३. १३७) इति दीर्घः। मन्दि प्रमोदहेतुम्। 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु'। 'इदितो नुम् धातोः' (पा. सू. ७. १. ५८) इति नुम्। मन्दमानं प्रयुङ्क्ते इत्यर्थे 'हेतुमति च' (पा. सू. ३. १. २६) इति णिच्। ण्यन्तस्य अजन्तत्वात् 'अच इः' (उ. सू. ४. ५७८) इति इकारप्रत्ययः। 'णेरनिटि' (पा. सू. ६. ४. ५१) इति णिलोपः। प्रत्ययस्वरेणान्तोदात्तत्वम्। मन्दिने। मन्देः पूर्ववत्। चतुर्थ्येकवचनेऽनपुंसकस्यापि व्यत्ययेन नुमागमः (पा. सू. ७. १. ७३)। चक्रिम्। 'डुकृञ् करणे'। 'आदृगमहनजनः किकिनौ लिट् च' (पा. सू. ३. २. १७१) इति तच्छीलतद्धर्मतत्साधुकारिषु कर्तृषु किन्प्रत्ययः। तस्य कित्त्वात् गुणाभावः। यणादेशः। लिड्वद्भावात् द्विर्वचनम्। 'द्विर्वचनेऽचि' (पा. सू. १. १. ५९) इति यणादेशस्य स्थानिवद्भावात् कृशब्दो द्विरुच्यते। अभ्यासस्य उरत्व-रपरत्व-श्चुत्व-हलादिशेषाः। किनो नित्त्वादाद्युदात्तः। विश्वानि। विशेः क्नन्। नित्त्वादाद्युदात्तः। अस्य चक्रये इति कृदन्तेन योगेऽपि 'कर्तृकर्मणोः कृति' (पा. सू. २. ३. ६५) इति षष्ठी न भवति। 'किकिनौ लिट् च' इति किनो लिड्वद्भावेन 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' (पा. सू. २. ३. ६९) इति निषेधात्॥

**मत्स्वा सुशिप्र मन्दिभिः स्तोमेभिर्विश्वचर्षणे। सचैषु सवनेष्वा॥ ३॥**

मत्स्व। सुऽशिप्र। मन्दिऽभिः। स्तोमेभिः। विश्वऽचर्षणे। सचा। एषु। सवनेषु। आ॥३॥

हे Vसुशिप्र हे शोभनहनो शोभननासिक वा। 'शिप्रे हनू नासिके वा' (निरु. ६. १७) इति यास्केनोक्तत्वात्। तादृशेन्द्र Vमन्दिभिः हर्षहेतुभिः Vस्तोमेभिः स्तोत्रैः Vमत्स्व हृष्टो भव। हे Vविश्वचर्षणे सर्वमनुष्ययुक्त सर्वैर्यजमानैः पूज्य इत्यर्थः। तादृशेन्द्र त्वम् Vएषु यागगतेषु त्रिषु Vसवनेषु Vसचा देवैरन्यैः सह Vआ गच्छेति शेषः॥ 'मदि स्तुति°' इत्यस्य लोटि 'अनित्यमागमशासनम्' (परिभा. ९३. २) इति कृत्वा 'इदितो नुम् धातोः' (पा. सू. ७. १. ५८) इति नुम् न भवति। अनुदात्तेत्त्वात् 'तास्यनुदात्तेन्ङिददुपदेशात्°' (पा. सू. ६. १. १८६) इति लसार्वधातुकानुदात्तत्वम्। धातुस्वर एव। संहितायां 'ब्रुवोऽतस्तिङः' (पा. सू. ६. ३. १३५) इति दीर्घत्वम्। सुशिप्रेत्यामन्त्रितनिघातः। मन्दिभिः। गतमन्त्रे व्याख्यातम्। स्तोमेभिः। मन्प्रत्ययस्य नित्त्वादाद्युदात्तत्वम्। 'बहुलं छन्दसि' (पा. सू. ७. १. १०) इति भिस ऐसादेशो न भवति। विश्वचर्षणे। निघातः। सचा। उक्तम्। एषु। 'ऊडिदम्°' इत्यादिना विभक्तेरुदात्तत्वम्॥

---

१. ठ-त-स्तोमैः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत । अजोषा वृषभं पतिम् ॥ ४ ॥

असृग्रम् । इन्द्र । ते । गिरः । प्रति । त्वाम् । उत् । अहासत । अजोषाः । वृषभम् । पतिम् ॥४॥

हे Vइन्द्र Vते Vगिरः त्वदीयाः स्तुतीः Vअसृग्रं सृष्टवानस्मि । ताश्च गिरः स्वर्गेऽवस्थितं Vत्वां Vप्रति Vउदहासत उद्गत्य प्राप्नुवन् । तादृशीर्गिरः त्वम् Vअजोषाः सेवितवानसि । कीदृशं त्वाम् । Vवृषभं कामानां वर्षितारं Vपतिं सोमस्य पातारं यजमानानां पालयितारं वा । 'पाता वा पालयिता वा' ( निरु. ४. २६ ) इति यास्केनोक्तत्वात् ॥ असृग्रम् असृजम् । 'सृज विसर्गे' । लङो मिप् । 'तुदादिभ्यः शः' ( पा. सू. ३. १. ७७ ) । 'बहुलं छन्दसि' ( पा. सू. ७. १. ८ ) इत्यत्र विकरणस्य रुडागमः । जकारस्य गकारः । 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' ( पा. सू. ६. ४. ७१ ) इति अडागम उदात्तः । सति शिष्टत्वात् स एव शिष्यते । गिरः । प्रातिपदिकस्वरः । अहासत । 'ओहाङ् गतौ' । लुङ् । झस्य अदादेशः ( पा. सू. ७. १. ५ ) । 'च्लेः सिच्' ( पा. सू. ३. १. ४४ ) । अडागमो निघातश्च । अजोषाः । 'जुषी प्रीतिसेवनयोः' । लङस्थास् । तुदादिभ्यः शः । तस्य 'छन्दस्युभयथा' ( पा. सू. ३. ४. ११७ ) इत्यार्धधातुकत्वेन ङित्त्वाभावात् लघूपधगुणः । थासः थकारलोपश्छान्दसः । सवर्णदीर्घः । अडागमः । सति शिष्टत्वात् उदात्तः शिष्यते । वृषभम् । 'पृषु वृषु सृषु सेचने' । 'ºअभच्' ( उ. सू. ३. ४०२ ) इत्यनुवृत्तौ 'ऋषिवृषिभ्यां कित्' ( उ. सू. ३. ४०३ ) इति अभच्प्रत्ययः । कित्त्वाद्गुणाभावः । चित्त्वादन्तोदात्तः । पतिम् । 'पा रक्षणे' । 'पातेर्डतिः' ( उ. सू. ४. ४९७ ) । डित्त्वात् टिलोपः । प्रत्ययाद्युदात्तत्वम् ॥

सं चोदय चित्रमर्वाग्राध इन्द्र वरेण्यम् । असदित्ते विभु प्रभु ॥ ५ ॥

सम् । चोदय । चित्रम् । अर्वाक् । राधः । इन्द्र । वरेण्यम् । असत् । इत् । ते । विऽभु । प्रऽभु ॥५॥

हे Vइन्द्र Vवरेण्यं श्रेष्ठं Vराधः धनं Vचित्रं मणिमुक्तादिरूपेण बहुविधम् Vअर्वाक् अस्मदभिमुखं यथा भवति तथा Vसं Vचोदय सम्यक् प्रेरय । भोगाय यावत् पर्याप्तं तावत् विभुशब्देनोच्यते । ततोऽप्यधिकं प्रभुशब्देन । तादृशं धनं Vते तवैव Vअसदित् अस्त्येव । तस्मादस्मभ्यं प्रयच्छेत्यर्थः । 'मघम्' इत्यादिषु अष्टाविंशतिधननामसु 'रायः राधः' ( नि. २. १०. १७ ) इति पठितम् ॥ चोदय । 'चुद प्रेरणे' । ण्यन्तात् लोट् । 'तिङ्ङतिङः' इति निघातः । राधः । राध्नुवन्ति अनेनेति राधो धनम् । 'सर्वधातुभ्योऽसुन्' ( उ. सू. ४. ६२८ ) । नित्त्वादाद्युदात्तः । वरेण्यम् । वृञ एण्यः । वृषादित्वादाद्युदात्तः । असत् । 'अस भुवि' । लेट् । तिप् । 'इतश्च लोपः°' ( पा. सू. ३. ४. ९७ ) इति इकारलोपः । 'लेटोऽडाटौ' ( पा. सू. ३. ४. ९४ ) इति अडागमः । 'अदिप्रभृतिभ्यः शपः' ( पा. सू. २. ४. ७२ ) इति शपो लुक् । 'आगमा अनुदात्ताः' ( पा. म. ३. १. ३. ७. ) इति अटोऽनुदात्तत्वात् धातुस्वर एव । विभु । विभवतीति विभु । 'भुवः°' ( पा. सू. ३. २. १७९ ) इत्यनुवृत्तौ 'विप्रसंभ्यो डुसंज्ञायाम्' ( पा. सू. ३. २. १८० ) इति डुप्रत्ययः । डित्त्वात् टिलोपः । प्रत्ययस्वरेण उकार उदात्तः । कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते । एवं प्रभु ॥ ॥ १७ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अस्मान्त्सु तत्र चोदयेन्द्र राये रभस्वतः । तुविद्युम्न यशस्वतः ॥ ६ ॥

अस्मान् । सु । तत्र । चोदय । इन्द्र । राये । रभस्वतः । तुविऽद्युम्न । यशस्वतः ॥ ६ ॥

हे [v]तुविद्युम्न प्रभूतधन [v]इन्द्र [v]राये धनसिद्ध्यर्थम् [v]अस्मान् अनुष्ठातॄन् [v]तत्र कर्मणि [v]सु [v]चोदय सुष्ठु प्रेरय । कीदृशानस्मान् । [v]रभस्वतः उद्योगवतः [v]यशस्वतः कीर्तिमतः ॥ तत्र । तच्छब्दात् 'सप्तम्यास्त्रल्' ( पा. सू. ५. ३. १० ) । 'लिति' ( पा. सू. ६. १. १९३ ) इति प्रत्ययात् पूर्वस्योदात्तत्वम् । इन्द्र । आमन्त्रिताद्युदात्तत्वम् । पादादित्वान्न निघातः । राये । 'ऊडिदम्०' इत्यादिना विभक्तेरुदात्तत्वम् । रभस्वतः । 'रभ राभस्ये' । राभस्यं कार्योपक्रमः । 'सर्वधातुभ्योऽसुन्' ( उ. सू. ४. ६२८ ) । नित्त्वादाद्युदात्तः । मतुपः पित्त्वादनुदात्तत्वम् । 'स्वादिष्वसर्वनामस्थाने' (पा. सू. १. ४. १७) इति न पदत्वं 'तसौ मत्वर्थे' (पा. सू. १. ४. १९) इति भसंज्ञया बाधितत्वात् ; 'आ कडारादेका संज्ञा' (पा. सू. १. ४. १) इति नियमात् । तुविद्युम्न । तुवि बहु द्युम्नं धनं यस्य । षाष्ठिकम् आमन्त्रिताद्युदात्तत्वम् । यशस्वतः । यशोऽस्यास्तीति मतुप् । 'अस्मायामेधास्रजो विनिः' ( पा. सू. ५. २. १२१ ) इति विनिना न बाध्यते, मतुपः सर्वत्र समुच्चयात् । यशसूशब्दो 'नड्विषयस्यानिसन्तस्य' इत्याद्युदात्तः । मतुपः पित्त्वात् स एव शिष्यते ॥

सं गोमदिन्द्र वाजवदस्मे पृथु श्रवो बृहत् । विश्वायुर्धेह्यक्षितम् ॥ ७ ॥

सम् । गोऽमत् । इन्द्र । वाजऽवत् । अस्मे इति । पृथु । श्रवः । बृहत् ।
विश्वऽआयुः । धेहि । अक्षितम् ॥ ७ ॥

हे [v]इन्द्र [v]श्रवः धनम् [v]अस्मे [v]सं [v]धेहि अस्मभ्यं सम्यक् प्रयच्छ । कीदृशं श्रवः । [v]गोमत् बह्वीभिर्गोभिरुपेतं [v]वाजवत् प्रभूतेनान्नेनोपेतं[1] [v]पृथु परिमाणेनाधिकं [v]बृहत् गुणैरधिकं [v]विश्वायुः कृत्स्नायुष्यकारणम् [v]अक्षितं विनाशरहितम् ॥ गोमत् । वाजवत् । उभयत्र मतुपोऽनुदात्तत्वात् प्रातिपदिकस्वर एव । वाजशब्दो वृषादिः आद्युदात्तः । अस्मे । अस्मच्छब्दात् चतुर्थीबहुवचनस्य 'सुपां सुलुक्०' इत्यादिना शे आदेशः । शित्त्वात् सर्वादेशः । प्रातिपदिकस्वरेण[2] अन्तोदात्तत्वम् । 'शेषे लोपः' ( पा. सू. ७. २. ९० ) टिलोप इति पक्षे उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । अन्त्यलोपपक्षे 'अतो गुणे' इति पररूपे 'एकादेश उदात्तेनोदात्तः' इत्युदात्तत्वम् । पृथु । 'प्रथ प्रख्याने' । 'प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च' ( उ. सू. १. २८ ) इति कुप्रत्ययः । रेफस्य संप्रसारणम् ऋकारः । परपूर्वत्वम् । कोः कित्त्वात् न लघूपधगुणः । श्रूयते इति श्रवो धनम् । असुन्प्रत्ययः । नित्त्वादाद्युदात्तः । बृहत् । प्रातिपदिकस्वरः । विश्वायुः । विश्वमायुर्यस्मिन् धने । विश्वशब्दः क्नूप्रत्ययान्तः । तस्य बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे प्राप्ते 'परादिश्छन्दसि बहुलम्' ( पा. सू. ६. २. १९९ ) इति पूर्वपदान्तोदात्तत्वम् । 'एकादेश उदात्तेनोदात्तः' इत्युदात्तः । अक्षितम् । 'क्षि क्षये' इत्यस्मात् अन्तर्णीतण्यर्थात् कर्मणि निष्ठा । तेन ण्यदर्थत्वात् 'निष्ठायामण्यदर्थे' ( पा. सू. ६.४.६० ) इति न दीर्घत्वम् । अत एव 'क्षियो दीर्घात्' ( पा. सू. ८. २. ४६ ) इति न निष्ठानत्वम् । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

---

१. च-छ-फ-प्रभूतेन धान्येनोपेतम् । २. फ-प्रातिपदिकस्य च ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अस्मे धेहि श्रवो बृहद्द्युम्नं सहस्रसातमम् । इन्द्र ता रथिनीरिषः ॥ ८ ॥

अस्मे इति । धेहि । श्रवः । बृहत् । द्युम्नम् । सहस्रऽसातमम् । इन्द्र । ताः । रथिनीः । इषः ॥ ८ ॥

हे Vइन्द्र Vबृहत् Vश्रवः महतीं कीर्तिम् Vअस्मे Vधेहि अस्मभ्यं प्रयच्छ । तथा Vसहस्रसातमम् अतिशयेन सहस्रसंख्यादानोपेतं Vद्युम्नं धनम् अस्मे धेहि । तथा Vताः व्रीहियवादिरूपेण प्रसिद्धाः Vरथिनीः बहुरथोपेताः Vइषः अन्नानि अस्मे धेहि ॥ अस्मे । ' सुपां सुलुक्° ' इत्यादिना शे आदेशः । धेहि[1] । ' ध्वसोरेद्धावभ्यासलोपश्च ' ( पा. सू. ६. ४. ११९ ) इति एत्वाभ्यासलोपौ । श्रूयते इति श्रवः । असुनो नित्त्वादाद्युदात्तत्वम् । सहस्रं सनुते ददातीति सहस्रसाः । ' षणु दाने ' । ' जनसनखन-क्रमगमो विट् ' ( पा. सू. ३. २. ६७ ) । ' विड्वनोरनुनासिकस्यात् ' ( पा. सू. ६. ४. ४१ ) इति आकारादेशः । धातुस्वरेणान्तोदात्तः । पुनः कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते । रथा आसां सन्तीति रथिन्य इति प्रत्ययस्याद्युदात्तत्वम् । ' ऋन्नेभ्यो ङीप् ' ( पा. सू. ४. १. ५ ) । स च पित्त्वा-दनुदात्तः । इषः । यौगिकत्वे धातुस्वरः; रूढत्वे प्रातिपदिकस्वरः[2] ॥

वसोरिन्द्रं वसुपतिं गीर्भिर्गृणन्त ऋग्मियम् । होम गन्तारमूतये ॥ ९ ॥

वसोः । इन्द्रम् । वसुऽपतिम् । गीःऽभिः । गृणन्तः । ऋग्मियम् । होम । गन्तारम् । ऊतये ॥ ९ ॥

Vवसोः वसुनोऽस्मदीयस्य धनस्य Vऊतये रक्षार्थम् Vइन्द्रं Vहोम वयमाह्वयामः । किं कुर्वन्तः । Vगीर्भिः स्तुतिभिः Vगृणन्तः स्तुवन्तः । कीदृशमिन्द्रम् । Vवसुपतिं धनपालकं Vऋग्मियं ऋचां मातारं Vगन्तारं यागदेशे गमनशीलम् ॥ वसोः । ' वस निवासे ' । ' श्रृस्वृस्निहि ' ( उ. सू. १. १० ) इत्यादिना उप्रत्ययः । ' नित् ' इत्यनुवृत्तेः नित्त्वादाद्युदात्तः । वसुपतिम् । समासान्तोदात्तत्वे प्राप्ते ' पत्यावैश्वर्ये ' ( पा. सू. ६. २. १८ ) इति पूर्वपदप्रकृतिस्वरत्वम् । गीर्भिः । ' सावेकाचः° ' ( पा. सू. ६. १. १६८ ) इति विभक्तेरुदात्तत्वम् । गृणन्तः । ' गॄ शब्दे ' । लटः शतृ । ' ऋयादिभ्यः श्ना ' ( पा. सू. ३. १. ८१ ) । शतुः ' सार्वधातुकमपित् ' ( पा. सू. १. २. ४ ) इति ङित्त्वात् ' श्नाभ्यस्तयोरातः ' ( पा. सू. ६. ४. ११२ ) इति आकारलोपः । शतुः अकारस्य प्रत्ययस्वरेणोदा-त्तत्वम् । ऋग्मियम् । ऋचो मिमीते इति ऋग्मीः, तमृग्मियम् । ' माङ् माने शब्दे च ' । ' क्विप् च ' ( पा. सू. ३. २. ७६ ) इति क्विप् । ' घुमास्था° ' ( पा. सू. ६. ४. ६६ ) इत्यादिना ईत्वम् । चका-रस्य ' चोः कुः ' । ' झलां जशोऽन्ते ' ( पा. सू. ८. २. ३९ ) इति जश्त्वं गकारः । द्वितीयैकवचने ' अचिश्नुधातु° ' ( पा. सू. ६. ४. ७७ ) इत्यादिना इयङादेशः । ' एरनेकाचः° ' ( पा. सू. ६. ४. ८२ ) इति यणादेशः ' सर्वे विधयश्छन्दसि विकल्प्यन्ते ' ( परिभा. ३५ ) इति न भवति । कृदुत्तरपदप्रकृतिस्वरेण इकार उदात्तः । होम आह्वयामः । ' ह्वेञ् स्पर्धायां शब्दे च ' । लट् । तस्य अस्मदो बहुत्वेऽपि व्यत्ययेन मिप् । इकारस्य व्यत्ययेन अकारः । शपः ' बहुलं छन्दसि ' इति लुक् । ' बहुलं छन्दसि ' ( पा. सू. ६. १. ३४ ) इति ह्वः संप्रसारणं परपूर्वत्वं गुणः । ' धातोः ' ( पा. सू. ६. १. १६२ ) इति ओकार उदात्तः । मिपः पित्स्वरेणानुदात्तत्वम् । गन्तारम् । ' गमॢ सृप्लॢ गतौ ' । ताच्छील्ये तृन् । नित्त्वादाद्युदात्तः । ऊतये । ' ऊतियूति° ' ( पा. सू. ३. ३. ९७ ) इत्यादिना क्तिन् उदात्तो निपातितः ॥

---

१. ठ–धेहि । धाञो लोट् । २. ठ–प्रकृतिस्वरः । ३. ठ–ऋग्भिः स्तुतम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सुतेसुते न्योकसे बृहद्बृहत एदरिः । इन्द्राय शूषमर्चति ॥ १० ॥

सुतेऽसुते । निऽओकसे । बृहत् । बृहते । आ । इत् । अरिः । इन्द्राय । शूषम् । अर्चति ॥१०॥

आकार इच्छब्दश्च पादपूरणौ । यद्वा । व्याप्तिवचन आकारः । ' आङीषदर्थेऽभिव्याप्तौ ' ( अमर. ३. २३८ ) इत्यभिधानात् । इच्छब्दोऽपिशब्दार्थः । इयर्ति गच्छति अनुष्ठेयं कर्म प्राप्नोति इति अरिर्यजमानः । [v]एदरिः सर्वोऽपि यजमानः [v]इन्द्राय [v]सुतेसुते इन्द्रार्थमभिषुते तत्तत्सोमे [v]शूषं बलम् [v]अर्चति स्तौति । इन्द्रस्य पराक्रमं प्रशंसतीत्यर्थः । कीदृशं शूषम् । [v]बृहत् प्रौढम् । कीदृशायेन्द्राय[1] । [v]न्योकसे नियतस्थानाय [v]बृहते प्रौढाय ॥ सुतेसुते । ' षुञ् अभिषवे ' । क्तप्रत्ययः प्रत्ययस्वरेणोदात्तः । ' नित्यवीप्सयोः ' ( पा. सू. ८. १. ४ ) इति वीप्सायां द्विर्भावः । ' तस्य परमाम्रेडितम् ' ( पा. सू. ८. १. २ ) इति द्वितीयस्य आम्रेडितत्वेन ' अनुदात्तं च ' ( पा. सू. ८. १. ३ ) इत्यनुदात्तत्वम् । न्योकसे । नियतमोको यस्य[2] तस्मै । निशब्दो ' निपाता आद्युदात्ताः ' ( फि. सू. ८० ) इत्युदात्तः । तस्य यणादेशे ' उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ' ( पा. सू. ८. २. ४ ) इति ओकारः स्वरितः । बृहते । ' बृहन्महतोरुपसंख्यानम् ' ( पा. सू. ६. १. १७३. १ ) इति अजादिर्विभक्तेरुदात्तत्वम् । अरिः । ' ऋ गतौ ' । ' अच इः ' ( उ. सू. ४.५७८ ) इति इकारप्रत्ययः । गुणो रपरत्वम् । प्रत्ययस्वरेण इकार उदात्तः । इन्द्राय । ' ऋज्रेन्द्र° ' ( उ. सू. २. १८६ ) इत्यादिना रन्प्रत्यय इकार उदात्तः । शूषम् । प्रातिपदिकस्वरः[3] । अर्चति । निघातस्वरः ॥ ॥ १८ ॥

' गायन्ति ' इति सूक्तस्य मन्त्रसंख्या छन्दोविशेषश्चैवमनुक्रम्यते–' गायन्ति द्वादशानुष्टुभं तु ' इति । ' तुहिहवै° ' ( अनु. १२. ३ ) इत्यादिपरिभाषायां तुशब्दस्य सूक्तद्वये परिभाषितत्वात् अस्य सूक्तस्य वक्ष्यमाणस्य च आनुष्टुभत्वं द्रष्टव्यम् । ऋषिदेवते पूर्ववत् । अभिप्लवषडहस्य उक्थ्येषु तृतीयसवनेऽच्छावाकस्य ' गायन्ति ' इति स्तोत्रियस्तृचः । ' एह्यू षु ' इति खण्डे ' गायन्ति त्वा गायत्रिण आ त्वा गिरो रथीरिव ' ( आश्व. श्रौ. ७. ८ ) इति सूत्रितम् ।

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः । ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे ॥ १ ॥

गायन्ति । त्वा । गायत्रिणः । अर्चन्ति । अर्कम् । आर्किणः ।

ब्रह्माणः । त्वा । शतक्रतो इति शतऽक्रतो । उत् । वंशम्ऽइव । येमिरे ॥ १ ॥

हे [v]शतक्रतो बहुकर्मन् बहुप्रज्ञ वा इन्द्र त्वां [v]गायत्रिणः उद्गातारः [v]गायन्ति स्तुवन्ति । [v]अर्किणः अर्चनहेतुमन्त्रयुक्ता होतारः [v]अर्कम् अर्चनीयमिन्द्रम् [v]अर्चन्ति शस्त्रगतैर्मन्त्रैः प्रशंसन्ति । [v]ब्रह्माणः ब्रह्मप्रभृतय इतरे ब्राह्मणाः त्वाम् [v]उत् [v]येमिरे उन्नतिं प्रापयन्ति । तत्र दृष्टान्तः । [v]वंशमिव । यथा वंशाग्रे नृत्यन्तः शिल्पिनः प्रौढं वंशमुन्नतं कुर्वन्ति । यथा वा सन्मार्गवर्तिनः स्वकीयं कुलमुन्नतं कुर्वन्ति तद्वत् । एतामृचं यास्क एवं व्याचष्ट–' गायन्ति त्वा गायत्रिणः प्रार्चन्ति तेऽर्कमर्किणो ब्राह्मणास्त्वा शतक्रत उद्येमिरे वंशमिव । वंशो वनशयो भवति वननाच्छूयत इति वा ' ( निरु. ५. ५ ) इति ।

---

१. ठ–कीदृशाय । २. ग-घ-छ-ण-य–यस्मै । ३. च-छ-फ–' प्रातिपदिकस्वरः ' इत्यस्यानन्तरम् ' अष्टाविंशतिसंख्याकेषु बलनामसु शुषं सह (हो) यह इति पठितम् ' इत्यधिकम् । ४. ठ–त्वा त्वाम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अर्कशब्दं च बहुधा व्याचष्टे—' अर्को देवो भवति यदेनमर्चन्त्यर्को मन्त्रो भवति यदेनेनार्चन्त्यर्कमन्नं भवत्यर्चति भूतान्यर्को वृक्षो भवति स वृतः कटुकिम्ना ' ( निरु. ५. ४ ) इति ॥ गायन्ति । शप्शिडौ[1] पित्त्वात् लसार्वधातुकत्वाच्च[2] अनुदात्तौ । धातुरुदात्तः । गायत्रिणः । गायत्रं साम येषामुद्गातृणामस्ति ते । ' अत इनिठनौ ' । प्रत्ययस्वरेण इकार उदात्तः । अर्चन्ति । 'अर्च पूजायाम्' । भौवादिकः । शप्शिडौ अनुदात्तौ । धातुस्वर एव । पादादित्वात् न निघातः । अर्कम् । अर्चन्त्येभिरिति अर्का मन्त्राः । तैरर्चनीयतया तदात्मक इन्द्रोऽपि लक्षणया अर्कः । ' पुंसि संज्ञायां घः प्रायेण ' ( पा. सू. ३. ३. ११८ ) इति करणे घः । ' चजोः कु घिण्यतोः ' ( पा. सू. ७. ३. ५२ ) इति चकारस्य कुत्वं ककारः । प्रत्ययस्वरेणान्तोदात्तः । अर्का मन्त्रा एषां सन्तीत्यर्किणो होतारः । ' एकाक्षरात्कृतो जातेः सप्तम्यां च न तौ स्मृतौ ' ( पा. म. ५. २. ११५. १ ) इति कृदन्तात् इनिठनौ यद्यपि प्रतिषिद्धौ तथाप्यत्र व्यत्ययात् इनिः । प्रत्ययस्वरेण इकार उदात्तः । ब्रह्माणः । प्रातिपदिकस्वरेणान्तोदात्तः । शतक्रतो । निघातः । संहितायाम् अवादेशे ' लोपः शाकल्यस्य ' ( पा. सू. ८. ३. १९ ) इति वकारलोपः । वंशशब्दः प्रातिपदिकस्वरेणान्तोदात्तः । ' इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च ' इति स एव शिष्यते । येमिरे । ' यम उपरमे ' । ' तिङ्ङतिङः ' इति निघातः ॥

**यत्सानोः सानुमारुहद्भूर्यस्पष्ट कर्त्वम् । तदिन्द्रो अर्थं चेतति यूथेन वृष्णिरेजति ॥२॥**

यत् । सानोः । सानुम् । आ । अरुहत् । भूरि । अस्पष्ट । कर्त्वम् ।
तत् । इन्द्रः । अर्थम् । चेतति । यूथेन । वृष्णिः । एजति ॥ २ ॥

[v]यत् यदा [v]सानोः [v]सानुम् [v]आरुहत् यजमानः सोमवल्लीसमिदाद्याहरणाय एकस्मात् पर्वतभागात्[3] अपरं पर्वतभागम्[3] आरूढवान् तथा [v]भूरि प्रभूतं [v]कर्त्वं कर्म सोमयागरूपम् [v]अस्पष्ट स्पृष्टवान् । उपक्रान्तवानित्यर्थः । [v]तत् तदानीम् [v]इन्द्रः [v]अर्थं यजमानस्य प्रयोजनं [v]चेतति जानाति । ज्ञात्वा च [v]वृष्णिः कामानां वर्षिता सन् [v]यूथेन मरुद्गणेन सह [v]एजति कम्पते । स्वस्थानात् यज्ञभूमिमागन्तुमुद्युङ्क्ते इत्यर्थः ॥ सानोः । 'षणु दाने' । सनोति ददाति निवसतामवकाशमिति सानुः । ' दृसनिजनिचरिचटिरहिभ्यो ञुण् ' ( उ. सू. १. ३ ) । णित्त्वात् उपधाया वृद्धिः ; ञित्त्वादाद्युदात्तत्वं च । अरुहत् । रुहेर्लङि तिपि शपि 'संज्ञापूर्वको विधिरनित्यः' (परिभा. ९३.१) इति लघूपधगुणो न भवति । 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' । सति शिष्टत्वात् स एव शिष्यते । ' निपातैर्यद्यदिहन्त° ' ( पा. सू. ८. १. ३० ) इति निषेधात् निघातो न भवति । भूरि । ' अदिशदिभूशुभिभ्यः क्रिन् ' ( उ. सू. ४. ५०५ ) । कित्त्वाद्गुणाभावः । नित्त्वादाद्युदात्तः । अस्पष्ट । ' स्पश बाधनस्पर्शनयोः ' । ' स्वरितञितः° ' ( पा. सू. १. ३. ७२ ) इत्यात्मनेपदम् । लङः प्रथमपुरुषैकवचनं त । ' बहुलं छन्दसि ' इति शपो लुक् । ष्वश्रादिषत्वष्टुत्वे ( पा. सू. ८. २. ३६; ८. ४. ४१ ) । ' लुङ्लङ्लृङ्क्ष्वडुदात्तः ' इति अडागम उदात्तः । स एव शिष्यते । अनुषङ्गेण यच्छब्दयोगात् निघाताभावः । कर्त्वम् । ' डुकृञ् करणे ' । ' अन्येभ्योऽपि दृश्यन्ते ' ( पा. सू. ३. २. ७५ ) इति क्विप् । गुणो रपरत्वम् । क्विपः सर्वापहारी लोपः । करो भावः कर्त्वम् । अर्थम् । अर्तेः ' उषिकुषिगार्तिभ्यस्थन् ' ( उ. सू. २. १६१ ) । नित्त्वादाद्युदात्तः । यूथेन । ' तिथपृष्ठगूथयूथप्रोथाः ' ( उ. सू. २. १६९ ) इति थक्प्रत्ययान्तो निपातितः । वृष्णिः । 'निः' इत्यनुवृत्तौ

---

१. ग-घ-च-छ-ण-त-फ-य-श—शप्शिपौ । २. ग-घ-च-छ-ण-त-फ-य-श—'सार्वधातुकत्वाच्च' नास्ति ।
३. ठ-त—पर्वतादपरं पर्वतम् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'सृवृषिभ्यां कित्' ( उ. सू. ४. ४८९ ) इति निप्रत्ययान्तः । कित्त्वाद्गुणाभावः । प्रत्ययस्वरेणान्तोदात्तः । एजति । 'एजृ कम्पने' । 'तिङ्ङतिङः' इति निघातः ॥

**युक्ष्वा हि केशिना हरी वृषणा कक्ष्यप्रा । अथा न इन्द्र सोमपा गिरामुपश्रुतिं चर ॥ ३ ॥**

युक्ष्व । हि । केशिना । हरी इति । वृषणा । कक्ष्यऽप्रा ।

अथ । नः । इन्द्र । सोमऽपाः । गिराम् । उपऽश्रुतिम् । चर ॥ ३ ॥

हे [v]सोमपाः सोमपानयुक्त [v]इन्द्र [v]हरी त्वदीयावश्वौ [v]युक्ष्वा [v]हि सर्वथा संयोजय । [v]अथ अनन्तरं [v]नः अस्मदीयानां [v]गिरां स्तुतीनाम् [v]उपश्रुतिं समीपे श्रवणमुद्दिश्य [v]चर तत्प्रदेशं गच्छ । कीदृशौ हरी । [v]केशिना स्कन्धप्रदेशे लम्बमानकेशयुक्तौ [v]वृषणा सेचनसमर्थौ युवानौ । [v]कक्ष्यप्रा । अश्वस्योदरबन्धनरज्जुः कक्ष्या तस्याः पूरकौ पुष्टाङ्गावित्यर्थः ॥ युक्ष्व । श्नसो लोपश्छान्दसः । सति शिष्टत्वेन प्रत्ययस्वरः शिष्यते । 'व्यचोऽतस्तिङः' ( पा. सू. ६. ३. १३५ ) इति संहितायां दीर्घत्वम् । केशिना । प्रशस्ताः केशा अनयोः सन्तीति मत्वर्थीय इनिः[3] । प्रत्ययस्वरः । 'सुपां सुलुक्०' ( पा. सू. ७. १. ३९ ) इत्यादिना द्विवचनस्य आकारादेशः । वृषणा । 'पृषु वृषु सृषु सेचने' । 'कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः' ( उ. सू. १. १५४ ) इति कनिन् । 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तः । 'वा षपूर्वस्य निगमे' ( पा. सू. ६. ४. ९ ) इति उपधायाः पक्षे दीर्घाभावः । पूर्ववदाकारः । कक्ष्यप्रा । कक्षयोर्भवं कक्ष्यं सूत्रम् । तत् प्रातः पूरयतः पुष्टावादिति कक्ष्यप्रौ । 'प्रा पूरणे' । 'आतोऽनुपसर्गे कः' ( पा. सू. ३. २. ३ ) इति कप्रत्ययः । कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तत्वम् । आकारः पूर्ववत् । अथ । 'निपातस्य०' ( पा. सू. ६. ३. १३६ ) इति संहितायां दीर्घः । नः । 'अनुदात्तं सर्वमपादादौ' ( पा. सू. ८. १. १८ ) इत्यनुवृत्तौ 'बहुवचनस्य वस्नसौ' ( पा. सू. ८. १. २१ ) इति नसादेशोऽनुदात्तः । इन्द्र सोमपाः । उभौ 'आमन्त्रितस्य च' ( पा. सू. ८. १. १९ ) इति सर्वानुदात्तौ । गिराम् । 'सावेकाचस्तृतीयादिर्विभक्तिः' ( पा. सू. ६. १. १६८ ) इति विभक्तिरुदात्ता । उपशब्दो निपातत्वादाद्युदात्तः । श्रुतिशब्देन प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते 'तादौ च निति कृत्यतौ' ( पा. सू. ६. २. ५० ) इति तुवर्जिततादिपरत्वात् गतेः प्रकृतिस्वरः । चर । निघातः ॥

विशेषविनियोगस्तु यत्र श्रौतो न सूत्रितः । स्मार्तं तत्र विजानीयादग्निधानादिसूत्रतः ॥ 'एहि स्तोमान्' इति ऋगेषा सूत्रे विशेषाकारेण न विनियुक्ता । साधारणविनियोगस्तु ब्रह्मयज्ञादौ सर्वत्रानुसंधेयः ॥

**एहि स्तोमाँ अभि स्वराभि गृणीह्या रुव । ब्रह्म च नो वसो सचेन्द्र यज्ञं च वर्धय ॥ ४ ॥**

आ । इहि । स्तोमान् । अभि । स्वर । अभि । गृणीहि । आ । रुव ।

ब्रह्म । च । नः । वसो इति । सचा । इन्द्र । यज्ञम् । च । वर्धय ॥ ४ ॥

---

१. ठ–समीपश्रवणमुद्दिश्य । २. ठ–स्कन्धप्रदेशलम्बमान° । ३. ठ–प्रशंसायां केशशब्दस्य इनिप्रत्ययः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]वसो निवासकारणभूत [v]इन्द्र [v]एहि अस्मिन् कर्मण्यागच्छ । आगत्य च [v]स्तोमान् उद्गातृप्रयुक्तानि स्तोत्राणि [v]अभि [v]स्वर अभिलक्ष्य प्रशंसारूपं शब्दं कुरु । तथा आध्वर्यवमभिलक्ष्य [v]गृणीहि शब्दं कुरु । तथा होतृप्रयुक्तानि शस्त्राण्यालक्ष्य [v]रुव शब्दं कुरु । परितोषेण सर्वानृत्विजः प्रशंसेत्यर्थः । तत ऊर्ध्वं [v]नः अस्माकं [v]ब्रह्म [v]च अन्नं च [v]यज्ञं [v]च अनुष्ठीयमानं कर्म च [v]सचा सह [v]वर्धय । साङ्गत्वसंपादनेन यज्ञं वर्धयित्वा तत्फलमन्नं च प्रवृद्धं कुरु । ' अन्धः ' इत्यादिष्वष्टाविंशत्यन्ननामसु ' ब्रह्म वर्चः ' ( नि. २. ७. २५) इति पठितम् ॥ इहि । ' इण् गतौ ' । सेर्हिः । हेरपित्त्वेन ङित्त्वात् गुणाभावः । निघातः । आङा सह गुणः ' एकादेश उदात्तेनोदात्तः ' इत्युदात्तः । स्तोमान् । ' अर्तिस्तुसु° ' ( उ. सू. १. १३७ ) इत्यादिना मन् । नित्त्वादाद्युदात्तः । उत्तरपदेन संहितायां नकारस्य ' दीर्घादटि समानपादे ' ( पा. सू. ८. ४. ९ ) इति रुत्वम् । ' आतोऽटि नित्यम् ' ( पा. सू. ८. ३. ३ ) इति आकारस्यानुनासिकः । ' भोभगोअघोअपूर्वस्य योऽशि ' ( पा. सू. ८. ३. १७ ) इति यत्वम् । तस्य ' लोपः शाकल्यस्य ' ( पा. सू. ८. ३. १९ ) इति लोपः । तस्यासिद्धत्वात् स्वरसंधिर्न भवति । अभि । ' एवमादीनामन्तः ' ( फि. सू. ८२ ) इत्यन्तोदात्तः । स्वर । ' स्वृ शब्दोपतापयोः ' । निघातः । अभि । गतम् । गृणीहि । ' गृ शब्दे ' । ' सेर्ह्यपिच्च ' ( पा. सू. ३. ४. ८७ ) इति हिः । 'क्र्यादिभ्यः श्ना ' । ' ई हल्यघोः ' ( पा. सू. ६. ४. ११३ ) इति ईत्वम् । ' ष्वादीनां ह्रस्वः ' ( पा. सू. ७. ३. ८० ) इति ऋकारस्य ऋकारः । ' ऋवर्णाच्चेति वक्तव्यम् ' ( का. ८. ४. १. १ ) इति णत्वम् । ' तिङ्ङतिङः ' इति निघातः । रुव । ' रु शब्दे ' । सेर्ह्यपिच्च । शपि प्राप्ते व्यत्ययेन शः । तस्य ङित्त्वेन गुणाभावात् उवङादेशः । ' अतो हेः ' ( पा. सू. ६. ४. १०५ ) इति हेर्लुक् । ' तिङ्ङतिङः ' इति निघातः । ब्रह्म । ' तृहि वृहि वृद्धौ ' । ' मनिन् ' इत्यनुवृत्तौ ' बृहेरम् नलोपश्च ' ? ( उ. सू. ४. ५८५ ) इति मनिन्; तत्संनियोगेन नलोपः अमागमश्च । ' सिदचोऽन्त्यात्परः ' ( पा. सू. १. १. ४७ ) इति ऋकारात्परः । यणादेशः । मनिनो नित्त्वादाद्युदात्तत्वम् । वसो । आमन्त्रितनिघातः । यज्ञम् । ' यजयाच° ' ( पा. सू. ३. ३. ९० ) इत्यादिना नङ् । प्रत्ययस्वरः । वर्धय । निघातः । अत्र चकारद्वयश्रवणात् इयमेव तिङ्विभक्तिः पूर्ववाक्येष्वनुपज्यते । अतोऽनुपक्तैव प्रथमा न श्रुता इति अश्रुतायाः ' चवायोगे प्रथमा ' ( पा. सू. ८. १. ५९ ) इति निघातनिषेधो न भवति ॥

अभिप्लवषडहगतोक्थ्येषु अच्छावाकस्य तृतीयसवने ' उक्थमिन्द्राय शंस्यम् ' इत्यनुरूपस्तृचः । ' एह्यू षु ' इति खण्डे 'इन्द्रं विश्वा अवीवृधन्नुक्थमिन्द्राय शंस्यम्' (आश्व. श्रौ. ७. ८) इति सूत्रितम्॥

उक्थमिन्द्राय शंस्यं वर्धनं पुरुनिष्षिधे । शक्रो यथा सुतेषु णो ररणत्सख्येषु च॥५॥

उक्थम् । इन्द्राय । शंस्यम् । वर्धनम् । पुरुनिःऽसिधे । शक्रः । यथा । सुतेषु । नः । ररणत् । सख्येषु । च ॥ ५ ॥

[v]इन्द्राय इन्द्रार्थं [v]वर्धनं वृद्धिसाधनम् [v]उक्थं शस्त्रं [v]शंस्यम् अस्माभिः शंसनीयम्। कीदृशायेन्द्राय। [v]पुरुनिष्षिधे बहूनां शत्रूणां निषेधकारिणे । [v]शक्रः इन्द्रः [v]नः अस्मदीयेषु [v]सुतेषु पुत्रेषु [v]सख्येषु [v]च सखित्वेष्वपि [v]यथा येन प्रकारेण [v]ररणत् अतिशयेन शब्दं कुर्यात् तथा शंस्यमिति पूर्वत्रान्वयः । अस्मदीयेन शस्त्रेण परितुष्ट इन्द्रोऽस्माकं पुत्रान् अस्मत्सख्यानि च बहुधा प्रशंसत्वित्यर्थः॥ उक्थम्। वचेस्थक्प्रत्यय उक्तः ( उ. सू. २. १६४ ) । प्रत्ययस्वरः । शंस्यम् । ' शंसु स्तुतौ' । ण्यन्तात् 'अचो यत्' । ' णेरनिटि ' ( पा. सू. ६. ४. ५१ ) इति णिलोपः । तित्स्वरिते प्राप्ते ' यतोऽनावः ' इत्याद्यु-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दात्तत्वम्। वर्धनम्। ' करणाधिकरणयोश्च ' ( पा. सू. ३. ३. ११७ ) इति करणे ल्युट्। ' लिति ' इति प्रत्ययपूर्वस्य उदात्तत्वम्। पुरुनिष्पिधे बहूनां शत्रूणां निषेधकाय। ' षिध गत्याम् '। ' धात्वादेः षः सः '। अत्र निरित्युपसर्गस्य निशब्दसमानार्थस्य प्राक्प्रयोगः। 'क्विप् च ' इति क्विप्। क्विपः सर्वापहारी लोपः। ' कुगतिप्रादयः ' ( पा. सू. २. २. १८ ) इति समासः। निसः सकारेण इणो व्यवधानं छान्दसत्वादनादृत्य ' उपसर्गात्सुनोति° ' ( पा. सू. ८. ३. ६५ ) इत्यादिना धातुसकारस्य षत्वम्। निसः सकारस्य ' ष्टुना ष्टुः ' ( पा. सू. ८. ४. ४१ ) इति षत्वम्। पुरुशब्देन कर्मणि षष्ठ्यन्तेन समासः। षिधो धातुस्वरेणोदात्तत्वम्। निष्पिधे इति प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वम्। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् पुनः कारकसमासेऽपि स एव स्वरः। शक्नोतीति शक्रः। ' स्फायितञ्चिवञ्चिशकि° ' ( उ. सू. २. १७० ) इत्यादिना रक्। प्रत्ययस्वरः। यथा। ' प्रकारवचने थाल् ' ( पा. सू. ५. ३. २३ )। लित्स्वरेण प्रत्ययात् पूर्वोऽकार उदात्तः। सुतेषु। क्तः प्रत्ययस्वरेणोदात्तः। नसो नकारस्य ' नश्च धातुस्थोरुषुभ्यः ' ( पा. सू. ८. ४. २७ ) इति संहितायां णत्वम्। रारणत्। ' रण शब्दार्थः '। ' धातोरेकाचः ' ( पा. सू. ३. १. २२ ) इति यङ्। ' यङोऽचि च ' ( पा. सू. २. ४. ७४ ) इति लुक्। प्रत्ययलक्षणेन द्विर्भावः (पा. सू. ६. १. ९)। हलादिशेषः। ' दीर्घोऽकितः ' (पा. सू. ७.४.८३) इति दीर्घः। प्रत्ययलक्षणेन 'सनाद्यन्ता धातवः' ( पा. सू. ३. १. ३२ ) इति धातुसंज्ञायां ' लिङर्थे लेट् ' ( पा. सू. ३. ४. ७ ) इति हेतुहेतुमद्भावलक्षणे लिङर्थे ( पा. सू. ३. ३. १५६ ) लेट्। अत्र हि इन्द्रकर्तृकं रारणनम् उक्थशंसनस्य कर्तव्यत्वे हेतुः। लेटस्तिप्। ' इतश्च लोपः परस्मैपदेषु ' ( पा. सू. ३. ४. ९७ ) इति इकारलोपः। ' लेटोऽडाटौ ' ( पा. सू. ३. ४. ९४ ) इति अडागमः। कर्तरि शप्। तस्य चर्करीतं परस्मैपदम् अदादिवच्च द्रष्टव्यम् इति अदादिवद्भावात् ' अदिप्रभृतिभ्यः शपः ' इति प्राप्तो लुक् ' बहुलं छन्दसि ' इति निषिध्यते। शपोऽनुदात्तत्वात् धातोः अन्तोदात्त एव शिष्यते। शपा लसार्वधातुकस्य व्यवधानात् तत्र परतो विधीयमानम् ' अभ्यस्तानामादिः ' ( पा. सू. ६. १. १८९ ) इत्याद्युदात्तत्वं न भवति। न च ' तिङ्ङतिङः ' इति निघातः। अत्र यथाशब्दयोगेन ' यावद्यथाभ्याम् ' (पा. सू. ८. १. ३६) इति निषेधात्। ' चवायोगे प्रथमा ' इति वात्र निघातो न भविष्यति। अत्र ह्युत्तरवाक्ये सख्येषु च इति चानुकृष्टविभक्त्यपेक्षया इयं प्रथमा तिङ्विभक्तिः। सख्येषु। सख्युः कर्माणि सख्यानि तेषु। 'कर्मणि च ' ( पा. सू. ५. १. १२४ ) इत्यनुवृत्तौ ' सख्युर्यः ' ( पा. सू. ५. १. १२६ ) इति सखिशब्दात् यप्रत्ययः। तत्र भसंज्ञायां ' यस्येति च ' ( पा. सू. ६. ४. १४८ ) इति इकारलोपः। प्रत्ययस्वरः॥

**तमित्सखित्व ईमहे तं राये तं सुवीर्ये। स शक्र उत नः शकदिन्द्रो वसु दयमानः॥६॥**

तम्। इत्। सखिऽत्वे। ईमहे। तम्। राये। तम्। सुऽवीर्ये।

सः। शक्रः। उत। नः। शकत्। इन्द्रः। वसु। दयमानः॥ ६॥

[v]सखित्वे निमित्तभूते सति [v]तमित् तमेवेन्द्रम् [v]ईमहे प्राप्नुमः। तथा [v]राये धनार्थं [v]तम् ईमहे। तथा [v]सुवीर्ये शोभनसामर्थ्यनिमित्तं [v]तम् ईमहे। [v]उत अपि च [v]शक्रः शक्तिमान् [v]सः [v]इन्द्रः [v]नः अस्मभ्यं [v]वसु धनं [v]दयमानः प्रयच्छन् [v]शकत् अस्मदीयरक्षणे शक्तोऽभूत्। सप्तदश-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

याच्ञाकर्मसु 'ईमहे यामि' (नि.३.१९.१) इति पठितम्। तदनुसारेण इन्द्रं याचामहे इति व्याख्येयम्॥ सख्युर्भावः सखित्वम्। 'तस्य भावस्त्वतलौ' (पा. सू. ५. १. ११९) इति त्वः। प्रत्ययस्वरेणोदात्तः। ईमहे। 'ईड् गतौ'। ङित्त्वात् आत्मनेपदम् (पा. सू. १. ३. १२)। 'दिवादिभ्यः श्यन्'। 'बहुलं छन्दसि' इति श्यनो लुक्। 'तिङ्ङतिङः' इति निघातः। राये। 'ऊडिदम्°' इति विभक्तेरुदात्तत्वम्। सुवीर्ये। शोभनं वीर्यं यस्यासौ सुवीर्यः। भवितृवाचिनानेन भावो लक्ष्यते। सुवीर्यत्वे इत्यर्थः। 'बहुव्रीहौ°' (पा. सू. ६. २. १०६) इत्यनुवृत्तौ 'वीरवीर्यौ च' (पा. सू. ६. २. १२०) इत्युत्तरपदाद्युदात्तत्वम्। शक्नोतीति शक्रः। 'स्फायितञ्चिवञ्चिशकि°' (उ. सू. २. १७०) इत्यादिना रक्। प्रत्ययस्वरः। शकत्। 'शकॢ शक्तौ'। धातुसंबन्धाधिकारे 'छन्दसि लुङ्-लङ्लिटः' (पा. सू. ३. ४. ६) इति लुङ्। यतः शक्नोति अतस्तमीमहे इति धातुसंबन्धः। लुङ-स्तिप्। 'पुषादिद्युताद्यॢदितः परस्मैपदेषु' (पा. सू. ३. १. ५५) इति च्लेरङादेशः। 'बहुलं छन्दसि°' (पा. सू. ६. ४. ७५) इत्यडागमाभावः। 'तिङ्ङतिङः' इति निघातः। वसु। 'नित्' इत्यनुवृत्तौ (उ. सू. १. ९) वसेः उप्रत्ययः (उ. सू. १. १०)। नित्त्वादाद्युदात्तत्वम्। दयमानः। 'दय दानगतिरक्षणहिंसादानेषु'। अनुदात्तेत्त्वात् आत्मनेपदम्। लटः शानजादेशः (पा.सू.३.२. १२४)। शपः पित्त्वादनुदात्तत्वम्। शानचः 'चितः' इत्यन्तोदात्तत्वं बाधित्वा अदुपदेशात् शप उत्तरत्वेन परत्वात् लसार्वधातुकत्वानुदात्तत्वम्। धातुस्वर एव शिष्यते॥ ॥ १९॥

**सुविवृतं सुनिरजमिन्द्र त्वादातमिद्यशः। गवामप व्रजं वृधि कृणुष्व राधो अद्रिवः॥७॥**

सुऽविवृतम्। सुनिःऽअजम्। इन्द्र। त्वाऽदातम्। इत्। यशः।

गवाम्। अप। व्रजम्। वृधि। कृणुष्व। राधः। अद्रिऽवः॥ ७॥

हे [v]इन्द्र [v]यशः अन्नं कर्मफलभूतं [v]सुविवृतं सुष्ठु सर्वत्र प्रसृतं [v]सुनिरजं सुखेन निःशेषं प्राप्तुं शक्यं [v]त्वादातमित् त्वया शोधितं च संपन्नमिति शेषः। इतः परं क्षीरादिरसलाभार्थं [v]गवां [v]व्रजं निवासस्थानम् [v]अप [v]वृधि अपावृतमुद्घाटितद्वारं कुरु। हे [v]अद्रिवः पर्वतोपलक्षितवज्रयुक्तेन्द्र [v]राधः धनं [v]कृणुष्व संपादय॥ सुविवृतम्। 'वृञ् वरणे'। कर्मणि क्तप्रत्ययः। विशब्देन प्रादिसमासः। विवृतमित्यत्र कृदुत्तरपदप्रकृतिस्वरं बाधित्वा कर्मवाचिनि क्तान्ते परतः 'गतिरनन्तरः' (पा. सू. ६. २. ४९) इति पूर्वपदप्रकृतिस्वरे प्राप्ते 'परादिश्छन्दसि बहुलम्' (पा. सू. ६. २. १९९) इति ऋकार उदात्तः। पुनः सुशब्देन समासे कृदुत्तरपदप्रकृतिस्वरेण स एव ऋकार उदात्तः। ननु वृतमित्येव कृदन्तं न तु विवृतमिति, 'प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्' (परिभा. २३) इति वचनात्। सुविवृतमित्यत्र च समासे वृतमित्येतावन्मात्रं नोत्तरपदं किंतु विवृतमिति। तत् कथं कृदुत्तरपदप्रकृतिस्वरत्वमिति चेत् उच्यते—प्रत्ययग्रहणपरिभाषापवादेन 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' (परिभा. २८) इत्यनेन विवृतमित्यस्यापि कृदन्तव्यपदेशोपपत्तेः। ननु विवृतमित्यस्य यथा कृदन्तव्यपदेशः एवं क्तान्तव्यपदेशोऽप्यस्ति तयैव परिभाषया। तथा च कर्मणि क्तान्ते उत्तरपदे परतः 'गतिरनन्तरः' इति सुशब्दस्य प्रकृतिस्वरः प्राप्नोति। न चात्रापि

---

१. छ-त-इति वा। २. ठ-अपावृतमु°। ३. त-'प्रादिसमासः' इत्यस्यानन्तरम् 'विवृतशब्दस्य पुनः सुशब्देन प्रादिसमासः' इत्याधिकम्। ४. श-गतिस्वरे। ५. ठ-इत्युत्तरपदादिरुदात्तः। ६. ठ-चात्र।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'परादिश्छन्दसि बहुलम्' इत्येवं नास्ति विस्तारः। तथा हि सति सुविवृतमित्यत्र विवृतमित्येवोत्तरपदमिति तदादिः इकार एव उदात्तः स्यात्। विवृतमिति समासे यद्यपि ऋकारः पदादिर्भवति तथापि सुविवृतमिति समासस्य सति शिष्टत्वेन बलीयस्त्वात् तत्रत्ये एव उत्तरपदादौ इकारे एव उदात्तस्वरेण भवितव्यमिति। उच्यते 'गतिरनन्तरः' इत्यत्र क्त्वानुवृत्तेः क्त्वग्रहणे कृद्ग्रहणपरिभाषा नाश्रीयते। तदाश्रयणे व्यवहितगतावपि प्रकृतिस्वरे सति अनन्तरग्रहणमनर्थकं स्यात्। अनेनैव चाभिप्रायेण अनन्तरग्रहणस्य प्रयोजनम् 'अभ्युद्धृतम्' इत्यत्र व्यवहितस्य अभिशब्दस्य मा भूदिति प्रत्युदाहृतम्। तस्मात् सुविवृतमिति ऋकार एव उदात्त इति स्थितम्। सुनिरजम्। अनायासेन निरवशेषं प्राप्यम्। 'अज गतिक्षेपणयोः'। सुनिसोरुपसर्गयोः प्राक्प्रयोगः। 'ईषदुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' (पा. सू. ३. ३. १२६)। न चात्र सुशब्दस्य निसा व्यवधानं शङ्कनीयम्। सुशब्दस्य ह्युपपदमात्रं खलो निमित्तं नानन्तर्यम्। अत एव सुपरिहरं दुष्परिहरमित्यादयः प्रयोगा इति। पूर्ववत् गतिसमासे 'लिति' इति प्रत्ययात् पूर्वमुदात्तमिति धात्वकार उदात्तः। निसा समासे कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते। पुनः सुशब्देन समासे 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' (परिभा. २८) इति परिभाषया कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते। त्वादातम्। त्वया शोधनेन विशदीकृतम्। 'दैप् शोधने'। 'आदेच उपदेशेऽशिति' (पा. सू. ६. १. ४५) इति आत्वम्। सत्यपि हि पकारे 'नानुबन्धकृतमनेजन्तत्वम्' (परिभा. ७) इति एजन्त एवायम्। 'निष्ठा' (पा. सू. ३.२.१०२) इति कर्मणि क्तः। 'दाधा घ्वदाप्' (पा. सू. १. १. २०) इत्यत्र अदाप् इति प्रतिषेधेन घुसंज्ञाया अभावात् 'दो दद्घोः' (पा. सू. ७. ४. ४६) इति ददादेशो न भवति। ननु 'दाप् लवने' इति प्रतिपदोक्तस्यैव दापः तत्र 'अदाप्' इति निषेधः, न पुनर्लाक्षणिकस्य दैपः। लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणं न तु लाक्षणिकस्य (परिभा. १०५) इति नियमात् इति चेत्, न। 'गामादाग्रहणेष्वविशेषः' (परिभा. १०६) इति प्रतिप्रसवात्। युष्मच्छब्दात् तृतीयैकवचनस्य 'सुपां सुलुक्०' (पा. सू. ७. १. ३९) इति डादेशः। 'त्वमावेकवचने' (पा. सू. ७. २. ९७) इति मपर्यन्तस्य त्वादेशः। 'अतो गुणे' (पा. सू. ६. १. ९७) इति पररूपत्वेन्। भसंज्ञायां 'टेः' (पा. सू. ६. ४. १४३) इति अद्शब्दस्य लोपः। उदात्तनिवृत्तिस्वरेण आकार उदात्तः। 'कर्तृकरणे कृता बहुलम्' (पा. सू. २. १. ३२) इति तृतीयासमासः। 'तत्पुरुषे कृति बहुलम्' (पा. सू. ६. ३. १४) इति तृतीयाया अपि अलुक्। कृदुत्तरपदप्रकृतिस्वरे प्राप्ते 'तृतीया कर्मणि' (पा. सू. ६. २. ४८) इति पूर्वपदप्रकृतिस्वरत्वम्। यशः। 'अशू व्याप्तौ'। 'अशेर्युट् च' (उ. सू. ४. ६. ३०) इति असुन्। तत्संनियोगेन धातोर्युडागमः। नित्त्वादाद्युदात्तत्वम्। गवाम्। प्रातिपदिकस्वरः। 'सावेकाचः०' इति विभक्तेरुदात्तत्वं प्राप्तं 'न गोश्वन्सावर्व०' (पा. सू. ६. १. १८२) इति निषिध्यते। वृधि। 'वृञ् वरणे'। 'श्रुशृणुपृकृवृभ्यश्छन्दसि' (पा. सू. ६. ४. १०२) इति हेर्धिरादेशः। 'बहुलं छन्दसि' इति श्नोरपि लुक्। निघातः। कृणुष्व। 'कृवि हिंसाकरणयोश्च'। इदितो नुम्। व्यत्ययेनात्मनेपदम्। लोटस्थास् (पा. सू. ३. ४. ७८)। 'थासः से' (पा. सू. ३. ४. ८०)। 'सवाभ्यां वामौ' (पा. सू. ३. ४. ९१)। कर्तरि शपि (पा. सू. ३. १. ६८) प्राप्ते 'धिन्विकृण्व्योर च' (पा. सू. ३. १. ८०) इति उप्रत्ययः। तत्संनियोगेन वकारस्य च अकारः। तस्य 'अतो लोपः' (पा. सू. ६. ४. ४८) इति लोपः। 'अचः परस्मिन्पूर्वविधौ' (पा. सू. १. १. ५७) इति अकारलोपस्य स्थानिवद्भावात् लघूपधगुणो न भवति। अत्र 'सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः' इति सति शिष्टमपि विकरणस्वरं बाधित्वा तिङ एव प्रत्ययाद्युदात्तत्वम्।

---

१. ठ–इत्येव निस्तारः। २. ग-घ-ण-त-न-य–इत्यत्रानुवृत्तेः। ३. ठ-त-श–एव हि। ४. श–पररूपम्। ५. श–इदितो नुम् धातोरिति नुम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

राधः । असुनन्तो निरवादाद्युदात्तः । अद्रिवः । अद्रिर्वज्रम् । तदस्यास्तीति मतुप् । ' छन्दसीरः ' ( पा. सू. ८. २. १५ ) इति वत्वम् । संबुद्धौ ' उगिदचां° ' ( पा. सू. ७. १. ७० ) इति नुम् । हल्ङ्यादिसंयोगान्तलोपौ ( पा. सू. ६. १. ६८; ८. २. २३ ) । ' मतुवसो रु संबुद्धौ छन्दसि ' ( पा. सू. ८. ३. १ ) इति रुत्वम् । विसर्जनीयः । आमन्त्रितस्य च निघातः ॥

**नहि त्वा रोदसी उभे ऋघायमाणमिन्वतः । जेषः स्वर्वतीरपः सं गा अस्मभ्यं धूनुहि ॥८॥**

नहि । त्वा । रोदसी इति । उभे इति । ऋघायमाणम् । इन्वतः ।

जेषः । स्वःऽवतीः । अपः । सम् । गाः । अस्मभ्यम् । धूनुहि ॥ ८ ॥

हे इन्द्र [V]ऋघायमाणं शत्रुवधं कुर्वाणं त्वां [V]रोदसी [V]उभे[1] द्यावापृथिव्यावपि त्वदीयं महिमानं [V]नहि [V]इन्वतः व्याप्तुं न समर्थे इत्यर्थः । तादृशस्त्वं [V]स्वर्वतीः स्वर्लोकयुक्ता [V]अपः वृष्टिरूपाः [V]जेषः जयेः प्रेरय इत्यर्थः । अपां स्वर्गसंबन्धश्चान्यत्र ' दिवो वृष्टिं च्यावयति ' ( तै. सं. ३. ३. ४. १ ) इति श्रुतम् । किं च वृष्टिप्रदानात् अन्नसंपत्तेरूर्ध्वम् [V]अस्मभ्यं क्षीरादिरसप्रदाः [V]गाः [V]सं [V]धूनुहि सम्यक् प्रेरय ॥ नहि । नञो हिशब्देन ' सहेह सुपा ' ( पा. सू. २. १. ४ ) इति समासः[2] । समासत्वादन्तोदात्तत्वम् । त्वा । ' अनुदात्तं सर्वम्[3]° ' इत्येनुवृत्तौ ' त्वामौ द्वितीयायाः ' ( पा. सू. ८. १. २३ ) इति त्वादेशः । रोदसी । रुदेः असुन् । निरवादाद्युदात्तः । ' उगितश्च ' ( पा. सू. ४.१. ६ ) इति ङीप् । उभे । प्रातिपदिकस्वरेणान्तोदात्तः । इया सहैकादेश उदात्तः । ऋघायमाणम् । नॄन् हन्तीति ऋघा । ' अन्येभ्योऽपि दृश्यन्ते ' ( पा. सू. ३. २. ७५ ) इति विच् । दृशिग्रहणस्य विध्यन्तरोपसंग्रहणार्थत्वात् नकारलोपो हकारस्य च घकारः । अनृघा ऋघा भवतीत्यभूततद्भावे ' लोहितादिडाज्भ्यः क्यष् ' ( पा. सू. ३. १. १३ ) इति क्यष्प्रत्ययो भवति । स ह्याकृतिगणः । ' °लोपश्च हलः ' ( पा. ३. १. १२ ) इत्यनुवृत्तेर्नकारलोपश्च । ' वा क्यषः ' ( पा. सू. १. ३. ९० ) इत्यात्मनेपदम् । लटः शानच् । शपोऽदुपदेशात् परात् शानचो लसार्वधातुकानुदात्तत्वम् । शपः पित्त्वादनुदात्तत्वम् । क्यषः प्रत्ययस्वरः । एकादेशस्योदात्तत्वम् । इन्वतः । 'इवि व्याप्तौ' । 'इदितो नुम् धातोः' इति नुम् । शपः पित्त्वादनुदात्तत्वम् । लडादेशस्य तसश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते । ' हि च ' ( पा. सू. ८. १. ३४ ) इति निषेधात् ' तिङ्ङतिङः ' इति निघातो न भवति । जेषः[4] । जेः प्रार्थनायां लिङर्थे लेट् । तस्य मध्यमपुरुषैकवचनं सिप् । ' इतश्चलोपः परस्मैपदेषु ' ( पा. सू. ३. ४. ९७ ) इति इकारलोपः । कर्तरि शपि प्राप्ते तदपवादः ' सिब्बहुलं लेटि ' ( पा. सू. ३. १. ३४ ) इति सिप् । अडागमस्य अनुदात्तत्वात् धातुस्वर एव शिष्यते । स्वरासामस्तीति स्वर्वत्यः । ' न्यङ्स्वरौ स्वरितौ ' ( फि. सू. ७४ ) इति स्वरशब्दः स्वरितः । मतुब्ङीपौ पित्त्वादनुदात्तौ । संहितायां ' स्वरितात्संहितायामनुदात्तानाम् ' ( पा. सू. १. २. ३९ ) इत्येकश्रुतिः । स्वरित एव शिष्यते । अपः । 'ऊडिदम्°' इत्यादिना विभक्तेरुदात्तत्वम् । धूनुहि । ' धूञ् कम्पने ' । लोट् । ' सेर्ह्यपिच्च ' । ' स्वादिभ्यः श्नुः ' । ' उतश्च प्रत्ययादसंयोगपूर्वात् ' ( पा. सू. ६. ४. १०६ ) इति प्राप्तस्य लुकः छान्दसत्वादभावः ॥

---

१. त-श–' उभे ' नास्ति । २. ग-घ-च-छ-ण-त-फ-श-य–सह सुप्सुपेति समासः । ३. ठ–सर्वमपादादौ इत्यनुवृत्तौ । ४. ठ–जेषः । जि जये । ५. ठ–लेटोऽडाटौ इत्यडागमस्य ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अभिप्लवषडहस्योक्थ्येषु तृतीयसवनेऽच्छावाकस्य षट्स्तोत्रियानुरूपयुगलेषु द्वितीयस्मिन् युगले 'आश्रुत्कर्ण' इति तृचोऽनुरूपः। 'एह्यू षु' इति खण्डे 'श्रुधी हवं तिरश्च्या आश्रुत्कर्ण श्रुधी हवम्' (आश्व. श्रौ. ७. ८) इति सूत्रितम्॥

आश्रुत्कर्ण श्रुधी हवं नू चिद्दधिष्व मे गिरः। इन्द्र स्तोममिमं मम कृष्वा युजश्चिदन्तरम्॥९

आश्रुत्ऽकर्ण। श्रुधि। हवम्। नु। चित्। दधिष्व। मे। गिरः।
इन्द्र। स्तोमम्। इमम्। मम। कृष्व। युजः। चित्। अन्तरम्॥ ९॥

हे vआश्रुत्कर्ण सर्वतः श्रोतारौ कर्णौ यस्य तादृक् vइन्द्र vहवम् अस्मदीयमाह्वानं vनु क्षिप्रं vश्रुधि शृणु। vमे मम होतुः vगिरः vचित् स्तुतीरपि vदधिष्व चित्ते धारय। किंच vमम मदीयं vइमं vस्तोमं स्तोत्ररूपं वाक्समूहं vयुजश्चित् स्वकीयेसख्युरपि vअन्तरं vकृष्व आसन्नं कुरु। यथा वचनं तस्य प्रियं मन्यसे तद्वदस्मदीयस्तुतिष्वपि प्रीतिं कुरु इत्यर्थः॥ आश्रुत्कर्ण। आ समन्तात् शृणुत इति आश्रुत्। क्विप्। ह्रस्वस्य तुक् (पा. सू. ६. १. ७१)। तादृशौ कर्णौ यस्य। 'आमन्त्रितस्य च' (पा. सू. ६. १. १९८) इत्याद्युदात्तत्वम्। श्रुधी। 'श्रु श्रवणे'। लोटो हिः। 'श्रुवः शृ च' (पा. सू. ३. १. ७४) इति विहितश्नोः 'बहुलं छन्दसि' (पा. सू. २. ४. ७३) इति लुक्। तत्संनियोगशिष्टत्वात् शृभावोऽपि निवर्तते। 'श्रुशृणुपृकृवृभ्यश्छन्दसि' (पा. सू. ६. ४. १०२) इति हेर्धिरादेशः। सति शिष्टत्वात् प्रत्ययस्वरः। 'आमन्त्रितं पूर्वमविद्यमानवत्' (पा. सू. ८. १. ७२) इत्यविद्यमानवत्त्वेन पदादपरत्वात् 'तिङ्ङतिङः' इति निघातो न भवति। संहितायाम् 'अन्येषामपि दृश्यते' (पा. सू. ६. ३. १३७) इति दीर्घः। हवम्। 'ह्वेञ् स्पर्धायां शब्दे च'। 'बहुलं छन्दसि'। (पा. सू. ६. १. ३४) इति अनैमित्तिके संप्रसारणे कृते पश्चात् उकारान्तत्वेन 'ऋदोरप्' (पा. सू. ३. ३. ५७) इति अप्प्रत्ययः। अपः पित्त्वात् धातुस्वरः। नु। संहितायाम् 'ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्' (पा. सू. ६. ३. १३३) इति दीर्घः। चित्। चादिः अनुदात्तः। दधिष्व। दधातेर्लोट्। 'थासः से'। 'सवाभ्यां वामौ' (पा. सू. ३. ४. ९१)। शपः श्लुः। अभ्यासस्य ह्रस्वत्वादि। 'छन्दस्युभयथा' (पा. सू. ३. ४. ११७) इति आर्धधातुकस्यापि स्वीकारात् इडागमः। आकारलोपः। निघातः। मम। 'तवममौ ङसि' (पा. सू. ७. २. ९६) इत्यनेन मपर्यन्तस्य ममादेशः। प्रातिपदिकस्वरेणान्तोदात्तत्वे प्राप्ते 'युष्मदस्मदोर्ङसि' (पा. सू. ६. १. २११) इत्याद्युदात्तत्वम्। कृष्व। 'डुकृञ् करणे'। लोट्। 'थासः से'। 'सवाभ्यां वामौ'। शपो 'बहुलं छन्दसि' इति लुक्। सति शिष्टत्वात् प्रत्ययस्वरः। पादादित्वात् न निघातः। युजः। 'सावेकाचः०' (पा. सू. ६. १. १६८) इति विभक्तेरुदात्तत्वम्। अन्तरम्। वृषादित्वादाद्युदात्तः॥

विद्मा हि त्वा वृषन्तमं वाजेषु हवनश्रुतम्। वृषन्तमस्य हूमह ऊतिं सहस्रसातमाम्॥१०॥

विद्म। हि। त्वा। वृषन्ऽतमम्। वाजेषु। हवनऽश्रुतम्।
वृषन्ऽतमस्य। हूमहे। ऊतिम्। सहस्रऽसातमाम्॥ १०॥

---

१. ठ–सख्युरिव। २. ठ–यथा सख्युर्मरुद्गणस्य वचनं स्वस्य प्रियं मन्यते (से)।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे इन्द्र त्वां [v]विद्म जानीमः। कीदृशं त्वाम्। [v]वृषन्तमं कामानामतिशयेन वर्षितारं [v]वाजेषु संग्रामेषु [v]हवनश्रुतम् अस्मदीयस्याह्वानस्य श्रोतारम्। [v]वृषन्तमस्य अतिशयेन कामादीनां वर्षितुस्तव [v]ऊतिं रक्षामस्मद्विषयामुद्दिश्य [v]हूमहे त्वामाह्वयामः। कीदृशीमूतिम्। [v]सहस्रसातमाम् अतिशयेन धनसहस्राणां दात्रीम्॥ विद्म। 'विदो लटो वा' (पा. सू. ३. ४. ८३) इति मसो मादेशः। प्रत्ययस्वरेणान्तोदात्तः। 'ब्यचोऽतस्तिङः' (पा. सू. ६. ३. १३५) इति संहितायां दीर्घः। वृषन्तमम्। 'पृषु वृषु मृषु सेचने'। 'कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः' (उ. सू. १. १५४) इति कनिन्। नित्त्वादाद्युदात्तः। तमपः पित्त्वात् स एव शिष्यते। 'अयस्मयादीनि छन्दसि' (पा. सू. १. ४. २०) इति भत्वेन पदत्वाभावात् नलोपाभावः (पा. सू. ८. २. ७)। वाजेषु। वाजशब्दो वृषादिः आद्युदात्तः। हवनश्रुतम्। 'ह्वः' इत्यनुवृत्तौ 'बहुलं छन्दसि' (पा. सू. ६. १. ३४) इति ल्युटि संप्रसारणम्। हवनं शृणोतीति क्विप्। तुगागमः। वृषन्तमस्य। उक्तम्। हूमहे। 'बहुलं छन्दसि' इति संप्रसारणम्। 'शपः' इत्यनुवृत्तौ 'बहुलं छन्दसि' (पा. सू. २. ४. ७३) इति शपो लुक्। ऊतिम्। 'ऊतियूति०' (पा. सू. ३. ३. ९७) इत्यादिना अन्तोदात्तो निपातितः। सहस्रसातमाम्। सहस्रं सनोतीति सहस्रसाः। 'षणु दाने'। 'जनसनखनक्रमगमो विट्' (पा. सू. ३.२. ६७)। 'विड्वनोरनुनासिकस्यात्' (पा. सू. ६. ४. ४१) इति आकारादेशः। कृदुत्तरपदप्रकृतिस्वरत्वं तमपः पित्त्वादेव शिष्यते॥

आ तू न इन्द्र कौशिक मन्दसानः सुतं पिब।
नव्यमायुः प्र सू तिर कृधी सहस्रसामृषिम्॥ ११॥

आ। तु। नः। इन्द्र। कौशिक। मन्दसानः। सुतम्। पिब।
नव्यम्। आयुः। प्र। सु। तिर। कृधि। सहस्रऽसाम्। ऋषिम्॥ ११॥

हे [v]इन्द्र [v]तु क्षिप्रं [v]नः अस्मान् प्रति [v]आ गच्छेतिशेषः। हे [v]कौशिक कुशिकस्य पुत्र इन्द्र [v]मन्दसानः हृष्टो भूत्वा [v]सुतम् अभिषुतं सोमं [v]पिब। यद्यपि विश्वामित्रः कुशिकस्य पुत्रस्तथापि तद्रूपेणेन्द्रस्यैवोत्पन्नत्वात् कुशिकपुत्रत्वमविरुद्धम्। अयं वृत्तान्तोऽनुक्रमणिकायामुक्तः—'कुशिकस्यैषीरथिरिन्द्रतुल्यं पुत्रमिच्छन् ब्रह्मचर्यं चचार। तस्येन्द्र एव गाथी पुत्रो जज्ञे' (अनु. ऋ. सं. ३. १) इति। हे इन्द्र [v]नव्यं सर्वैर्देवैः स्तुत्यं कर्मानुष्ठानपरम् [v]आयुः जीवितं [v]प्र [v]सू [v]तिर प्रकर्षेण सुष्ठु वर्धय। ततो मां [v]सहस्रसां सहस्रसंख्याकलाभोपेतम् [v]ऋषिम् अतीन्द्रियद्रष्टारं [v]कृधि कुरु॥ तु। संहितायाम् 'ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्' (पा. सू. ६. ३. १३३) इति दीर्घः। नः। संहितायाम् 'उदात्तादनुदात्तस्य स्वरितः'। इन्द्र। आमन्त्रितनिघातः। कौशिक। निघातः। मन्दसानः हृष्यन्। 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु'। 'असानच्' (उ. सू. २. २४३) इत्यनुवृत्तौ 'ऋज्रिवृधिमन्दिसहिभ्यः कित्' (उ. सू. २. २४४) इति असानच् प्रत्ययः। चित्त्वादन्तोदात्तः। सुतम्। प्रत्ययस्वरः। नव्यम्। 'णु स्तुतौ'। 'अचो यत्' (पा. सू. ३. १. ९७)। गुणः। 'वान्तो यि प्रत्यये' (पा.सू. ६. १. ७९) इति अवादेशः। 'यतोऽनावः' इत्याद्युदात्तत्वम्। आयुः। 'उसि, नित्' इत्यनुवृत्तौ 'एतेर्णिच्च' (उ. सू. २. २७५) इति उसिप्रत्ययः। णित्त्वात् वृद्ध्यायादेशौ। नित्त्वादाद्युदात्तत्वम्। सु। 'निपातस्य च' इति संहितायां दीर्घत्वम्। तिर। तरतेर्व्यत्ययेन शः। 'ऋत इद्धातोः' (पा. सू.

---

१. ठ—विजानीमः २. त—पित्त्वात् तदेव शिष्यते; ठ-पित्त्वात् स एव शिष्यते।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

७. १. १०० ) इति इत्वम्। 'अतो हेः' (पा. सू. ६. ४. १०५) इति हेर्लुक्। कृधि। 'डुकृञ् करणे'। 'बहुलं छन्दसि' इति शपो लुक्। 'श्रुशृणुपृकृवृभ्यश्छन्दसि' इति हेर्धिरादेशः। सहस्रसाम्। उक्तम्। ऋषिम्। 'ऋषी गतौ'। 'इन्' इत्यनुवृत्तौ 'इगुपधात्किच्च' ( उ. सू. ४. ५५९)। किरवाद्गुणाभावः। निरवादाद्युदात्तत्वम्॥

प्रवर्ग्ये 'परि त्वा' इत्यभिष्टुयात्। 'स्पृष्ट्वोदकम्' इति खण्डे 'परि त्वा गिर्वणो गिरोऽधि द्वयोरदधा उक्थ्यं वचः' ( आश्व. श्रौ. ४. ६ ) इति सूत्रितम्। तथा हविर्धानप्रवर्तने सेयं परिधानीया। 'हविर्धाने प्रवर्तयन्ति' इति खण्डे 'परि त्वा गिर्वणो गिर इति परिदध्यात्' ( आश्व. श्रौ. ४. ९ ) इति सूत्रितम्। तथा ब्राह्मणं च—'परि त्वा गिर्वणो गिर इत्युत्तमया परिदधाति' ( ऐ. ब्रा. १. २९ ) इति॥

परि॑ त्वा गिर्वणो॒ गिर॑ इ॒मा भ॑वन्तु वि॒श्वतः॑।
वृ॒द्धायु॒मनु॒ वृद्ध॑यो॒ जुष्टा॑ भवन्तु जु॒ष्टयः॑॥ १२॥

परि॑। त्वा॒। गि॒र्व॒णः॒। गिरः॑। इ॒माः। भ॒व॒न्तु॒। वि॒श्वतः॑।
वृ॒द्धऽआ॑युम्। अनु॑। वृद्ध॑यः। जुष्टाः॑। भ॒व॒न्तु॒। जु॒ष्टयः॑॥ १२॥

हे [V]गिर्वणः अस्मदीयस्तुतिभागिन्द्र [V]विश्वतः सर्वेषु कर्मसु प्रयुज्यमानाः [V]इमाः [V]गिरः अस्मदीयाः स्तुतयः [V]त्वा त्वां [V]परि [V]भवन्तु सर्वतः प्राप्नुवन्तु। कीदृश्यो गिरः। [V]वृद्धायुमनु प्रवृद्धेनायुष्येणोपेतं त्वामनुसृत्य [V]वृद्धयः वर्धमानाः। किं च एता गिरः [V]जुष्टाः त्वया सेविताः सत्यः [V]जुष्टयः अस्माकं प्रीतिहेतवः [V]भवन्तु॥ गिर्वणः। गीर्भिर्वन्यत इति गिर्वणाः। 'वन षण संभक्तौ'। 'सर्वधातुभ्योऽसुन्'। गिरः। उपधाया दीर्घाभावश्छान्दसः। आमन्त्रितनिघातः। विश्वतः। 'लिति' ( पा. सू. ६. १. १९३ ) इति प्रत्ययात्पूर्वस्योदात्तत्वम्। वृद्धायुम्। 'वृधु वृद्धौ'। क्तप्रत्ययः। 'उदितो वा' ( पा. सू. ७. २. ५६ ) इति इटः वत्वाप्रत्यये विकल्पितत्वात् 'यस्य विभाषा' ( पा. सू. ७. २. १५ ) इति निष्ठायाम् इडभावः। प्रत्ययस्वरः। 'इण् गतौ'। 'छन्दसीणः' ( उ. सू. १. २ ) इति उण्। णिश्वात् वृद्धिः आयादेशश्च। वृद्धमायुर्यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। वृद्धयः। वृधेः क्तिनि 'तितुत्रतथसिसुसरकसेषु च' ( पा. सू. ७. २. ९ ) इति इडभावः। निरवादाद्युदात्तत्वम्। जुष्टाः। 'श्वीदितो निष्ठायाम्' ( पा. सू. ७. २. १४) इति इडभावः। 'जुष्टार्पिते' इत्यनुवृत्तौ 'नित्यं मन्त्रे' ( पा. सू. ६. १. २१० ) इत्याद्युदात्तत्वम्। जुष्टयः। 'जुषी प्रीतिसेवनयोः'। क्तिन्। 'तितुत्र०' इति इडभावः। निरवादाद्युदात्तः॥ ॥ २०॥

'इन्द्रं विश्वा' इत्यष्टर्चस्य सूक्तस्य मधुच्छन्दसः पुत्रो जेतृनामक ऋषिः। तथा चानुक्रान्तम्—'इन्द्रमष्टौ जेता माधुच्छन्दसः' इति। छन्दस्त्वानुष्टुभमिति पूर्वसूक्तोक्तम्। इन्द्रो देवतानुवर्तते। विनियोगस्तु—महाव्रते निष्केवल्ये कृत्स्नसूक्तं शसनीयम्। 'ऊरू' इति खण्डे शौनकेन सूत्रितम्—'इन्द्रं विश्वा अवीवृधन्नित्यानुष्टुभं तस्य प्रथमायाः पूर्वमर्धर्चं शस्त्वोत्तरेणार्धर्चेनोत्तरस्याः पूर्वमर्धर्चं व्यतिषजति पादैः पादाननुष्टुप्कारं प्रागुत्तमायाः' ( ऐ. आ. ५. ३. १ ) इति। ब्राह्मणं च प्रथमारण्यके पठ्यते 'प्र वो महे' इति खण्डे—'इन्द्रं विश्वा अवीवृधन्निति पदानुषङ्गाः' ( ऐ. आ. १. ५. २ ) इति। तथा पृष्ठ्यस्य पञ्चमेऽहनि निष्केवल्ये शस्त्रे 'इन्द्रं विश्वा अवीवृधन्' इत्यनुरूपस्तृचः। 'स्तोमे वर्धमाने' इति खण्डे सूत्रितम्—'उप नो हरिभिः सुतमिन्द्रं विश्वा अवीवृधन्' ( आश्व. श्रौ. ७. १२ ) इति॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसं गिरः। रथीतमं रथीनां वाजानां सत्पतिं पतिम् ॥१॥

इन्द्रम् । विश्वाः । अवीवृधन् । समुद्रऽव्यचसम् । गिरः ।
रथिऽतमम् । रथिनाम् । वाजानाम् । सत्ऽपतिम् । पतिम् ॥ १ ॥

[v]विश्वाः सर्वाः [v]गिरः अस्मदीयाः स्तुतयः [v]इन्द्रम् [v]अवीवृधन् वर्धितवत्यः। कीदृशमिन्द्रम्। [v]समुद्रव्यचसं समुद्रवत् व्याप्तवन्तं [v]रथीनां रथयुक्तानां योद्धृणां मध्ये [v]रथीतमम् अतिशयेन रथयुक्तं [v]वाजानाम् अन्नानां [v]पतिं स्वामिनं [v]सत्पतिं सतां सन्मार्गवर्तिनां पालकम् ॥ विश्वाः । विशेः क्वन् । निस्वरः । अवीवृधन् । वृधेर्णिचि चङि ' उर्ऋत् ' ( पा. सू. ७. ४. ७ ) इत्यनुवृत्तौ ' नित्यं छन्दसि ' ( पा. सू. ७. ४. ८ ) इति ऋकारस्य ऋकारविधानात् लघूपधगुणाभावः । निघातस्वरः । समुद्रव्यचसम् । व्यचेः असुन् । ' गाङ्कुटादिभ्योऽञ्णिन्ङित् ' (पा. सू. १. २. १) इति ङित्त्वस्य प्राप्तस्य ' व्यचेः कुटादित्वमनसि ' ( का. १. २. १. १ ) इति असिनिषेधात् ' ग्रहिज्या° ' ( पा. सू. ६. १. १६ ) इत्यादिना ङिति विधीयमानं संप्रसारणं न भवति । समुद्रव्यच इव व्यचो यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । रथीतमं रथीनाम् । रथशब्दादुत्पन्नस्य इनः छान्दसं दीर्घत्वम् । प्रत्ययस्वरेणोदात्तत्वं च । वाजानाम् । वृषादित्वादाद्युदात्तत्वम् । सत्पतिम् । ' पत्यावैश्वर्ये ' ( पा. सू. ६. २. १८ ) इति पूर्वपदप्रकृतिस्वरत्वम् ॥

सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते। त्वामभि प्र णोनुमो जेतारमपराजितम् ॥२॥

सख्ये । ते । इन्द्र । वाजिनः । मा । भेम । शवसः । पते ।
त्वाम् । अभि । प्र । नोनुमः । जेतारम् । अपराऽजितम् ॥ २ ॥

हे [v]शवसस्पते बलस्य पालक [v]इन्द्र [v]ते तव [v]सख्ये अनुग्रहप्रयुक्ते सखित्वे वर्तमाना वयं [v]वाजिनः अन्नवन्तो[1] भूत्वा [v]मा [v]भेम शत्रुभ्यो भीतिं प्राप्ता मा भूम । अतः [v]त्वाम् अभयहेतुम् [v]अभि [v]प्र [v]णोनुमः सर्वतः प्रकर्षेण स्तुमः । कीदृशं त्वाम्। [v]जेतारं युद्धेषु जयशीलम् [v]अपराजितं क्वापि पराजयरहितम् ॥ सख्ये । सख्युः कर्म सख्यम् । ' सख्युर्यः ' ( पा. सू. ५. १. १२६ )। प्रत्ययस्वरः । वाजिनः । वाजोऽन्नमेषामस्तीति वाजिनः । प्रत्ययस्वरः । भेम । ' जिभी भये '। लुङुत्तमबहुवचनं मस् । ' नित्यं ङितः ' ( पा. सू. ३. ४. ९९ ) इति सलोपः । ' बहुलं छन्दसि ' इति च्लेर्लुक् । ' छन्दस्युभयथा ' ( पा. सू. ३. ४. ११७ ) इति तिङः आर्धधातुकत्वेन ङित्त्वाभावाद्गुणः । ' न माङ्योगे ' ( पा. सू. ६. ४. ७४ ) इति अडागमप्रतिषेधः । शवसस्पते । शवसः ' षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु ' ( पा. सू. ८. ३. ५३ ) इति विसर्जनीयस्य संहितायां सत्वम्। सुबामन्त्रितपराङ्गवद्भावेन[2] ( पा. सू. २. १. २ ) पदद्वयनिघातः । नोनुमः । 'णु स्तुतौ' । ' णो नः ' ( पा. सू. ६. १. ६५ ) इति नत्वम् । यङो लुक् । प्रत्ययलक्षणेन ' सन्यङोः ' (पा. सू. ६. १. ९) इति द्विर्भावः । ' गुणो यङ्लुकोः ' ( पा. सू. ७. ४. ८२ ) इत्यभ्यासस्य गुणः । प्रत्ययलक्षणेन धातुसंज्ञायां

---

१. छ-ण-फ-य-अनसिनिषेधात्; ग-च-निषेधात् । २. ठ-बलवन्तः । ३. य-श–सुबामन्त्रिते इति पराङ्गवद्भावेन; च-छ-ण-फ-सुबामन्त्रिते पराङ्गवद्भावेन ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

लटो मस् । अदादिवद्भावात् शपो लुक् । ' उपसर्गादसमासेऽपि णोपदेशस्य ' ( पा. सू. ८. ४. १४ ) इति संहितायां णत्वम् । जेतारम् । ' जि जये ' । ताच्छील्यादिषु तृन् । ' ञ्नित्यादिर्नित्यम् ' ( पा. सू. ६. १. १९७ ) इत्याद्युदात्तत्वम् । अपराजितम् । अव्ययपूर्वपदप्रकृतिस्वरत्वेन नञ उदात्तत्वम् ॥

पूर्वीरिन्द्रस्य रातयो न वि दस्यन्त्यूतयः ।
यदी वाजस्य गोमतः स्तोतृभ्यो मंहते मघम् ॥ ३ ॥

पूर्वीः । इन्द्रस्य । रातयः । न । वि । दस्यन्ति । ऊतयः ।
यदि । वाजस्य । गोऽमतः । स्तोतृऽभ्यः । मंहते । मघम् ॥ ३ ॥

Vइन्द्रस्य संबन्धिन्यः Vरातयः धनदानानि Vपूर्वीः अनादिकालसिद्धाः प्रभूता वा । अस्येन्द्रस्य सर्वदा यष्टृभ्यो धनदानमेव स्वभाव इत्यर्थः । एवं सति इदानींतनोऽपि यजमानः Vस्तोतृभ्यः ऋत्विग्भ्यः Vगोमतः गोसहितस्य Vवाजस्य अन्नस्य पर्याप्तं Vमघं धनं Vयदि Vमंहते दक्षिणारूपेण ददाति तदानीम् Vऊतयः बहुधनदानपूर्वकाणि इन्द्रस्य अस्मद्विषयाणि रक्षणानि Vन Vवि Vदस्यन्ति विशेषेण नोपक्षीयन्ते । ' मघं रेक्णः ' इत्यादिष्वष्टाविंशतिसंख्याकेषु धननामसु मघशब्दः (नि. २.१०.१) पठितः । ' दाति दाशति ' इत्यादिषु दशसु दानकर्मसु ' मंहते ' ( नि. ३. २०. १० ) इति पठितम् ॥ पूर्वीः । पुरुशब्दस्य 'वोतो गुणवचनात्' (पा. सू. ४. १. ४४) इति ङीष् । आद्यस्य उकारस्य दीर्घश्छान्दसः । जसि 'दीर्घाज्जसि च ' ( पा. सू. ६. १. १०५ ) इति निषेधं बाधित्वा ' वा छन्दसि' ( पा. सू. ६. १. १०६ ) इति पूर्वसवर्णदीर्घत्वम् । ङीपः प्रत्ययस्वरेणोदात्तत्वम् । रातयः । 'मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः ' इति क्तिन उदात्तत्वम् । दस्यन्ति । ' दसु उपक्षये' । 'दिवादिभ्यः श्यन्' । निघातः । ऊतयः । ' ऊतियूति° ' ( पा. सू. ३. ३. ९७ ) इत्यादिना क्तिन् उदात्तः । यदि । निपातत्वादाद्युदात्तः । संहितायां ' निपातस्य च ' ( पा. सू. ६. ३. १३६ ) इति दीर्घत्वम् । स्तोतृभ्यः । 'ष्टुञ् स्तुतौ ' । ' धात्वादेः षः सः ' ( पा. सू. ६. १. ६४ ) । तृचश्चिरवादन्तोदात्तत्वम् । मंहते । शपः पित्त्वादनुदात्तत्वम् । तिङश्च लसार्वधातुकस्वरेण ' तिङ्ङतिङः ' इति निघातो न भवति, ' निपातैर्यद्यदिहन्त° ' ( पा. सू. ८. १. ३० ) इति निषेधात् ॥

अभिप्लवषडहस्य उक्थ्येषु तृतीयसवनेऽच्छावाकस्य ' पुरां भिन्दुर्युवा कविः ' इति स्तोत्रियस्तृचः । तथा च सूत्रितम्—' एह्यू षु ' इत्युपक्रम्य ' पुरां भिन्दुर्युवा कविर्वृषा ह्यसि राधसे ' ( आश्व. श्रौ. ७. ८ ) इति ॥

पुरां भिन्दुर्युवा कविरमितौजा अजायत । इन्द्रो विश्वस्य कर्मणो धर्ता वज्री पुरुष्टुतः ॥४॥

पुराम् । भिन्दुः । युवा । कविः । अमितऽओजाः । अजायत ।
इन्द्रः । विश्वस्य । कर्मणः । धर्ता । वज्री । पुरुऽस्तुतः ॥ ४ ॥

अयम् Vइन्द्रः उच्यमानगुणयुक्तः Vअजायत संपन्नः । कीदृग्गुणक इति तदुच्यते । Vपुराम् असुरपुराणां Vभिन्दुः भेत्ता Vयुवा कदाचिदपि वलीपलितादिवार्धकरहितः Vकविः मेधावी Vअमितौजाः प्रभूतबलः Vविश्वस्य Vकर्मणः कृत्स्नस्य ज्योतिष्टोमादेः Vधर्ता पोषकः Vवज्री यजमानरक्षणार्थं सर्वदा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वज्रयुक्तः [v]पुरुष्टुतः बहुविधे तत्तत्कर्मणि[1] स्तुतः ॥ भिन्दुः । ' भिदिर् विदारणे ' । ' कुः ' इत्यनुवृत्तौ ' पृभिदिव्यधिगृधिधृषिद्दशिभ्यः ' ( उ. सू. १. २३ ) इति कुप्रत्ययः । तस्य ' छन्दस्युभयथा ' ( पा. सू. ३. ४. ११७ ) इति सार्वधातुकसंज्ञायां ' रुधादिभ्यः श्नम् ' ( पा. सू. ३. १. ७८ ) । मित्त्वात् अन्त्यात् अचः परो भवति ( पा. सू. १. १. ४७ ) । ' श्नसोरल्लोपः' । अनुस्वारपरसवर्णौ ( पा. सू. ८. ३. २४; ८. ४. ५८ ) । ' अचः परस्मिन्पूर्वविधौ ' ( पा. सू. १. १. ५७ ) इति प्राप्तस्य स्थानिवद्भावस्य ' न पदान्त° ' ( पा. सू. १. १. ५८ ) इत्यादिना निषेधः । युवा । ' यु मिश्रणामिश्रणयोः ' । ' कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः ' ( उ. सू. १. १५४ ) इति कनिन् । नित्त्वादाद्युदात्तः । कविः । ' कु शब्दे ' । ' अच इः ' ( उ. सू. ४. ५७८ ) इति इः । प्रत्ययस्वरः । अमितौजाः । अमितशब्दस्य अव्ययपूर्वपदप्रकृतिस्वरत्वम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन[2] तदेव शिष्यते । विश्वस्य । ' अशिप्रुषि° ' ( उ. सू. १. १४९ ) इत्यादिना कन् । नित्त्वादाद्युदात्तः । कर्मणः । ' अन्येभ्योऽपि दृश्यन्ते ' ( पा. सू. ३. २. ७५ ) इति मनिन् । नित्स्वरः[3] । धर्ता । तृच् । चित्त्वादन्तोदात्तः । वज्री । मत्वर्थीय इनिः । प्रत्ययस्वरः । पुरुष्टुतः । ' स्तुतस्तोमयोश्छन्दसि ' ( पा. सू. ८. ३. १०५ ) इति षत्वम् । बहुषु प्रदेशेषु स्तुतः । ' अथ-घञ्क्ताजबित्रकाणाम् ' ( पा. सू. ६. २. १४४ ) इत्यन्तोदात्तत्वम् । तृतीयासमासे हि थाथादिस्वरापवादः ' तृतीया कर्मणि ' ( पा. सू. ६. २. ४८ ) इति पूर्वपदप्रकृतिस्वरः स्यात् ॥

**त्वं वलस्य गोमतोऽपावरद्रिवो बिलम् । त्वां देवा अबिभ्युषस्तुज्यमानास आविषुः ॥५॥**

त्वम् । वलस्य । गोऽमतः । अप । अवः । अद्रिऽवः । बिलम् ।

त्वाम् । देवाः । अबिभ्युषः । तुज्यमानासः । आविषुः ॥ ५ ॥

वलनामकः कश्चिदसुरो देवसंबन्धिनीर्गा अपहृत्य कस्मिंश्चिद्बिले गोपितवान् । तदानीमिन्द्रः तद्बिलं स्वसैन्येन समावृत्य तस्माद्बिलात् गा निःसारयामास । तदिदमुपाख्यानम् ' इन्द्रो वलस्य बिलमपौर्णोत् ' ( तै. सं. २. १. ५. १ ) इत्यादिब्राह्मणेषु मन्त्रान्तरेषु[4] च प्रसिद्धम् । तदेतत् हृदि निधाय अयं मन्त्रः प्रवर्तते । हे [v]अद्रिवः वज्रयुक्तेन्द्र [v]त्वं [v]गोमतः [v]वलस्य गोभिर्युक्तस्य वलनामकस्यासुरस्य संबन्धि [v]बिलम् [v]अपावः स्वसैन्यमुखेन अपावृतवानसि । तदानीं [v]तुज्यमानासः वलेन हिंस्यमानाः [v]देवाः [v]अबिभ्युषः त्वदीयरक्षया वलादभीताः सन्तः [v]त्वाम् [v]आविषुः प्राप्तवन्तः ॥ अप । निपातत्वादाद्युदात्तः । अवः । ' वृञ् वरणे ' । लङ् । सिप् । 'इतश्च लोपः° ' (पा. सू. ३. ४. ९७) । ' स्वादिभ्यः श्नुः ' ( पा. सू. ३. १. ७३ ) । तस्य ' बहुलं छन्दसि ' ( पा. सू. २. ४. ७३ ) इति लुक् । गुणो रपरत्वं हल्ङ्यादिलोपः । विसर्जनीयः । अडागमः । अद्रिवः । अद्रिरस्यास्तीति मतुप् । ' छन्दसीरः ' ( पा. सू. ८. २. १५ ) इति वत्वम् । संबोधने ' उगिदचां° ' ( पा. सू. ७. १. ७० ) इति नुम् । हल्ङ्यादिसंयोगान्तलोपौ । ' मतुवसो रु संबुद्धौ छन्दसि ' (पा. सू. ८. ३. १) इति रुत्वम् । बिलम् । ' नञ्विषयस्यानिसन्तस्य ' ( फि. सू. २६ ) इत्याद्युदात्तत्वम् । अबिभ्युषः । ' जिभी भये ' । लिट् । द्विर्भावः । अभ्यासस्य ह्रस्वजश्त्वे । ' क्वसुश्च ' ( पा. सू. ३. २. १०७) इति लिटः क्वसुरादेशः । क्रादिनियमात् प्राप्त इट् ' वस्वेकाजाद्घसाम् ' ( पा. सू. ७. २. ६७ ) इति

---

१. ठ–बहुविधस्तोत्रैः कर्मणि । २. ठ– °प्रकृतिस्वरेण । ३. ठ–नित्त्वादाद्युदात्तः ४, ठ–' मन्त्रातरेषु च ' नास्ति । ५. ठ–°रक्षाबला° ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नियमात् निवर्तते । जसि सर्वनामस्थानेऽपि व्यत्ययेन भत्वात् वसोः संप्रसारणम् । परपूर्वत्वम् । ' शासिवसिघसीनां च ' ( पा. सू. ८. ३. ६० ) इति षत्वम् । ' अचि श्नुधातु° ' ( पा. सू. ६. ४. ७७ ) इत्यादिना प्राप्तम् इयङादेशं बाधित्वा ' एरनेकाचः ° ' ( पा. सू. ६. ४. ८२ ) इति यणादेशः । नञ्समासः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । तुज्यमानासः । तुजेर्हिंसार्थात् परस्य कर्मणि लटः स्थाने शानच् । ' सार्वधातुके यक् ' (पा. सू. ३. १. ६७) इति यक् । तस्मात् अदुपदेशादुत्तरस्य लसार्वधातुकस्यानुदात्तत्वम् । यक एव प्रत्ययस्वरः शिष्यते । आविषुः । अव रक्षणादिषु । अस्मादृत्यर्थात् लुङो झिः । तस्य ' सिजभ्यस्तविदिभ्यश्च ' ( पा. सू. ३. ४. १०९ ) इति जुस् । सिच इडागमः । ' आडजादीनाम् ' ( पा. सू. ६. ४. ७२ ) इति आडागमः । ' आदेशप्रत्यययोः ' ( पा. सू. ८. ३. ५९ ) इति षत्वम् ॥

**तवाहं शूर रातिभिः प्रत्यायं सिन्धुमावदन् । उपातिष्ठन्त गिर्वणो विदुष्टे तस्य कारवः ॥६॥**

तव । अहम् । शूर । रातिऽभिः । प्रति । आयम् । सिन्धुम् । आऽवदन् ।
उप । अतिष्ठन्त । गिर्वणः । विदुः । ते । तस्य । कारवः ॥६॥

हे ᵛशूर संग्रामे शौर्ययुक्तेन्द्र ᵛतव ᵛरातिभिः कर्मसु[1] त्वदीयैर्धनदानैर्निमित्तभूतैः ᵛअहं होता ᵛप्रत्यायं त्वां पुनरागंतोऽस्मि[2] । पुरा बहुषु कर्मसु त्वत्तो धनस्य लब्धत्वादस्मिन् कर्मणि प्रत्यागमनमित्युच्यते । किं कुर्वन् । ᵛसिंधुं स्यन्दमानं सोमम् ᵛआवदन् सर्वतः कथयन् । अस्मिन् सोमयागे त्वदीयां धनदानकीर्तिं प्रकटयन्नित्यर्थः । हे ᵛगिर्वणः गीर्भिर्वननीयेन्द्र ᵛकारवः कर्तार ऋत्विग्यजमानाः ᵛउपातिष्ठन्त पुरा धनलाभार्थं त्वामुपस्थितवन्तः । उपस्थाय च ᵛतस्य तादृशस्यौदार्योपेतस्य ᵛते तव धनदानं ᵛविदुः जानन्ति । गिर्वणस्शब्दं यास्क इत्थं निर्ब्रूते—' गिर्वणा देवो भवति गीर्भिरेनं वनयन्ति' ( नि. ६. १४ ) इति । ' रेभो जरिता ' इत्यादिषु त्रयोदशसु स्तोतृनामसु कारुशब्दः ( नि. ३. १६. ३ ) पठितः । तव । ' युष्मदस्मदोर्ङसि ' (पा. सू. ६. १. २११ ) इत्याद्युदात्तत्वम् । रातिभिः । ' मन्त्रे वृष° ' इत्यादिना क्तिन् उदात्तः । आयम् । इणो लङ् । ' तस्थस्थमिपां तांतंतामः ' ( पा. सू. ३. ४. १०१ ) इति अमादेशः । ' अदिप्रभृतिभ्यः शपः ' ( पा. सू. २. ४. ७२ ) इति शपो लुक् । आडागमः । वृद्ध्यायादेशौ । ' तिङ्ङतिङः ' इति निघातः । सिन्धुम् । ' स्यन्दू प्रस्रवणे ' । ' °नित् ' ( उ. सू. १. ९ ) इत्यनुवृत्तौ ' स्यन्देः संप्रसारणं धश्च ' ( उ. सू. १. ११ ) इति उप्रत्ययो धकारश्च अन्तादेशः । नित्त्वादाद्युदात्तः । आवदन् । ' वद व्यक्तायां वाचि ' । लटः शतृ । शपः पित्त्वादनुदात्तत्वम् । शतुश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते । आङा सह ' कुगतिप्रादयः ' ( पा. सू. २. २. १८ ) इति समासः । कृदुत्तरपदप्रकृतिस्वरत्वम् । अतिष्ठन्त । ' उपान्मन्त्रकरणे ' ( पा. सू. १. ३. २५ ) इत्यात्मनेपदम् । गिर्वणः । ' वन षण संभक्तौ ' । असुन् । ' आमन्त्रितस्य च ' इति निघातः । विदुः । ' विद ज्ञाने ' । लट् । ' अदिप्रभृतिभ्यः शपः ' इति शपो लुक् । ' विदो लटो वा ' ( पा. सू. ३. ४. ८३ ) इति झेः उस् । पादादित्वात् न निघातः । संहितायां ' युष्मत्तत्ततक्षुःष्वन्तःपादम् ' ( पा. सू. ८. ३. १०३ ) इति षत्वम् । ' ष्टुना ष्टुः ' ( पा. सू. ८. ४. ४१ ) इत्युत्तरस्य तकारस्य ष्टुत्वम् । तस्य । ' सावेकाचः° ' ( पा. सू. ६. १. १६८ ) इति विभक्तेरुदात्तत्वं प्राप्तं ' न गोश्वन्सावर्वर्ण° '

---

१, च–' कर्मसु ' नास्ति । २, ठ–पुनरप्याग° ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

( पा. सू. ६. १. १८२ ) इति निषिध्यते । कारवः । ' कृवापाजि° ' ( उ. सू. १. १ ) इत्यादिना उण् । प्रत्ययस्वरः ॥

**मायाभिरिन्द्र मायिनं त्वं शुष्णमवातिरः । विदुष्टे तस्य मेधिरास्तेषां श्रवांस्युत्तिर ॥७॥**

मायाभिः । इन्द्र । मायिनम् । त्वम् । शुष्णम् । अव । अतिरः ।
विदुः । ते । तस्य । मेधिराः । तेषाम् । श्रवांसि । उत् । तिर ॥ ७ ॥

हे vइन्द्र vत्वंvमायिनं नानाविधकपटोपेतं vशुष्णं भूतानां शोषणहेतुम् एतन्नामकमसुरं vमायाभिः तत्प्रतिकूलैः कपटविशेषैः । यद्वा । तद्वधोपायगोचरप्रज्ञाभिःvअवातिरः हिंसितवानसि। एतच्च यास्केनोक्तम्– ' इन्द्रः शुष्णं जघान ' ( निरु. ३. ११ ) इति । ' शुष्णं पिप्रुम् ' ( ऋ. सं. १. १०३. ८ ) इत्यादिमन्त्रे चायमर्थो विस्पष्टः । vमेधिराः मेधावन्तोऽनुष्ठातारः vतस्य तादृशस्य vते तव महिमानं vविदुः जानन्ति । vतेषां जानतामनुष्ठातॄणां vश्रवांसि अन्नानि vउत्तिर वर्धय । ' केतः केतुः ' इत्यादिष्वेकादशसु प्रज्ञानामसु ' माया वयुनम् ' (नि. ३. ९.९) इति पठितम् । श्रवःशब्दं यास्को निर्वक्ति– ' श्रव इत्यन्ननाम श्रूयत इति सतः ' ( निरु. १०. ३ ) इति ॥ मायाभिः । ' माङ् माने ' । ' माच्छाससिसिसूभ्यो यः ' ( उ. सू. ४. ५४९ ) इति यप्रत्ययः । प्रत्ययस्वरः । मायिनम् । मायास्यास्तीति मायी । व्रीह्यादित्वात् इनिप्रत्ययः ( पा. सू. ५. २. ११६ ) । प्रत्ययस्वरः । शुष्णम् । ' शुष शोषणे ' । अस्मादन्तर्भावितण्यर्थात् ' नित् ' इत्यनुवृत्तौ ' तृषिशुषिरसिभ्यः किच्च ' ( उ. सू. ३. २९२ ) इति नप्रत्ययः । नित्त्वादाद्युदात्तः । अतिरः । तरतेर्लङि व्यत्ययेन शः । तस्य ङित्त्वेन गुणाभावात् ' ऋत इद्धातोः ' इति इत्वम् । रपरत्वम् । विदुष्टे तस्य । गतमन्त्रे गतम् । मेधिराः । ' मिधृ मेधृ मेधाहिंसनयोः ' । औणादिक इरन् । नित्त्वादाद्युदात्तः । श्रवांसि । नब्विषयत्वादाद्युदात्तः ॥

**इन्द्रमीशानमोजसाभि स्तोमा अनूषत । सहस्रं यस्य रातय उत वा सन्ति भूयसीः ॥८॥**

इन्द्रम् । ईशानम् । ओजसा । अभि । स्तोमाः । अनूषत ।
सहस्रम् । यस्य । रातयः । उत । वा । सन्ति । भूयसीः ॥ ८ ॥

vस्तोमाः स्तोतार ऋत्विजः vओजसा बलेन vईशानं जगतो नियामकं vइन्द्रं vअभि vअनूषत सर्वत्र स्तुतवन्तः । vयस्य इन्द्रस्य vरातयः धनदानानि vसहस्रं सहस्रसंख्योपेतानि vसन्ति । vउत vवा अथवा vभूयसीः सहस्रसंख्याया अप्यधिकाः सन्ति । तमिन्द्रमिति पूर्वत्रान्वयः ॥ इन्द्रम् । ' ऋज्रेन्द्र° ' ( उ. सू. २. १८६ ) इत्यादिना रन् । नित्त्वादाद्युदात्तः । ईशानम् । लटः शानच् । ' अदिप्रभृतिभ्यः शपः ' इति शपो लुक् । धातोरनुदात्तेत्त्वात् ' तास्यनुदात्त° ' ( पा. सू. ६. १. १८६ ) इत्यादिना शानचोऽनुदात्तत्वम् । ओजसा । नब्विषयत्वादाद्युदात्तः । स्तोमाः । ' अर्तिस्तुसु° ' ( उ. सू. १. १३७ ) इत्यादिना मन्प्रत्ययः । नित्त्वादाद्युदात्तः । अनूषत । ' णु स्तुतौ ' । ' णो नः ' । लुङ् ।

---

१. ठ–तत्प्रतिमल्लैः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

व्यत्ययेन झः । तस्य अदादेशः ( पा. सू. ७. १. ५ ) । च्लेः सिच् । अस्य धातोः कुटादित्वेन सिचो ङित्त्वाद्गुणाभावः । इडभावश्छान्दसः दीर्घत्वं च । अडागमः । सहस्रम् । ' कर्दमादीनां च ' (फि. सू. ५९ ) इति द्वितीयाक्षरमुदात्तम् । रातयः । ' मन्त्रे वृष° ' इत्यादिना क्तिन् उदात्तः । उत। प्रातिपदिकस्वरः । वा । चादिरनुदात्तः । सन्ति । प्रत्ययाद्युदात्तत्वम् । ' तिङ्ङतिङः ' इति निघातो न भवति ' यद्वृत्तान्नित्यम् ' ( पा. सू. ८. १. ६६ ) इति प्रतिषेधात् । स हि व्यवहितेऽपि भवतीत्युक्तम् । भूयसीः । सहस्रादतिशयेन बह्व्यो भूयस्यः । अत्र विभक्तव्यस्य सहस्रस्य संनिधिबलादुपपदत्वप्रतीतेः ' द्विवचनविभज्योपपदे तरबीयसुनौ ' ( पा. सू. ५. ३. ५७ ) इति बहुशब्दात् ईयसुन् । ' बहोर्लोपो भू च बहोः ' (पा. सू. ६. ४. १५८ ) इति ईकारलोपः प्रकृतेः भू इति आदेशश्च । ईयसुनो नित्त्वादाद्युदात्तत्वम् । ' उगितश्च ' ( पा. सू. ४. १. ६ ) इति ङीप् ॥ २१ ॥ ॥ ३ ॥

चतुर्थानुवाके षट्सूक्तानि । तत्र ' अग्निं दूतम् ' इत्यादिकस्य द्वादशर्चस्य प्रथमस्य सूक्तस्य कण्वपुत्रो मेधातिथिर्ऋषिः । अपवादाभावादनुवर्तमानं ' प्राग्घिरण्यस्तूपात् ' ( अनु. १२. १४ ) इत्युक्तं गायत्रमेव छन्दः । अग्निदेवताकत्वं विस्पष्टम् । अत एवानुक्रम्यते–' अग्निं द्वादश मेधातिथिः काण्व आग्नेयमग्निनेति पादो द्व्यग्निदैवतो निर्मथ्य आहवनीयश्च ' इति । विनियोगस्तु प्रातरनुवाके आग्नेये क्रतौ गायत्रे छन्दसि ' अग्निं दूतम् ' इति सूक्तम् । ' अथैतस्या रात्रेर्विवासकाले ' इति खण्डे ' अग्निमीळेऽग्निं दूतम् ' ( आश्व. श्रौ. ४. १३ ) इति सूत्रितम् । तथा पृष्ठ्यषडहस्य द्वितीयेऽहनि इदमेव सूक्तमाज्यशस्त्रम् । ' पृष्ठ्यस्याभिप्लवेनोक्ते अहनी ' इति खण्डे सूत्रितम्–' अग्निं दूतमिति द्वितीये ' (आश्व. श्रौ. ७. १० ) इति । दर्शपूर्णमासयोः सामिधेनीषु ' अग्निं दूतम् ' इत्येका । ' नमः प्रवक्त्रे ' इति खण्डे सूत्रितम्–' ईळेन्यो नमस्यस्तिरोऽग्निं दूतं वृणीमहे ' ( आश्व. श्रौ. १. २ ) इति ॥

**अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् । अस्य यज्ञस्य सुक्रतुम् ॥ १ ॥**

**अग्निम् । दूतम् । वृणीमहे । होतारम् । विश्वऽवेदसम् । अस्य । यज्ञस्य । सुऽक्रतुम् ॥ १ ॥**

अग्नेर्दूतत्वम् एतन्मन्त्रव्याख्यानेन तैत्तिरीयब्राह्मणे समाम्नायते–' अग्निर्देवानां दूत आसीदुशनाः काव्योऽसुराणाम् ' ( तै. सं. २. ५. ८. ५ ) इति । तादृशं देवदूतम् Vअग्निम् अस्मिन् कर्मणि Vवृणीमहे संभजामः । कीदृशम् । Vहोतारं देवानामाह्वातारं Vविश्ववेदसं सर्वधनोपेतम् Vअस्य प्रवर्तमानस्य Vयज्ञस्य निष्पादकत्वेन Vसुक्रतुं शोभनकर्माणं शोभनप्रज्ञं वा । ' मघम् ' इत्यादिष्वष्टाविंशतिसंख्याकेषु धननामसु वेदस्शब्दः ( नि. २. १०. ४ ) पठितः । होतारम् । ' ह्वेञ् स्पर्धायां शब्दे च ' । ताच्छील्यादिषु तृन् । ' बहुलं छन्दसि ' ( पा. सू. ६. १. ३४ ) इति संप्रसारणे परपूर्वत्वे गुणः । नित्त्वादाद्युदात्तः । विश्ववेदसम् । ' बहुव्रीहौ विश्वं संज्ञायाम् ' ( पा. सू. ६. २. १०६ ) इति पूर्वपदान्तोदात्तत्वम् । अस्य । ' ऊडिदम्° ' ( पा. सू. ६. १. १७१ ) इत्यादिना विभक्तेरुदात्तत्वम् । सुक्रतुम् । ' क्रत्वादयश्च ' ( पा. सू. ६. २. ११८ ) इत्याद्युदात्तत्वम् ॥

**अग्निमग्निं हवीमभिः सदा हवन्त विश्पतिम् । हव्यवाहं पुरुप्रियम् ॥ २ ॥**

**अग्निम्ऽअग्निम् । हवीमऽभिः । सदा । हवन्त । विश्पतिम् । हव्यऽवाहम् । पुरुऽप्रियम् ॥२॥**

---

१. ठ–सहस्रादप्यतिशयेन । २. ठ–मन्त्रब्राह्मणे तैत्तिरीये ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यद्यप्यग्निः स्वरूपेणैक एव तथापि प्रयोगभेदात् आहवनीयादिस्थानभेदात् पावकादिविशेषणभेदाद्वा बहुविधत्वमभिप्रेत्य ' अग्निमग्निम् ' इति वीप्सा। तं Vहवीमभिः आह्वानकरणैर्मन्त्रैः Vसदा Vहवन्त निरन्तरमनुष्ठातार आह्वयन्ति। कीदृशम्। Vविश्पतिं विशां प्रजानां होत्रादीनां पालकं Vहव्यवाहं यजमानसमर्पितस्य हविषो देवान् प्रति वोढारम्। अत एव Vपुरुप्रियं बहूनां प्रीत्यास्पदम्॥ अग्निमग्निम्। ' नित्यवीप्सयोः ' ( पा. सू. ८. १. ४ ) इति वीप्सायां द्विर्भावः। ' तस्य परमाम्रेडितम् ' ( पा. सू. ८. १. २ ) इत्युत्तरस्य आम्रेडितसंज्ञायाम् ' अनुदात्तं च ' ( पा. सू. ८. १. ३ ) इत्यनुदात्तत्वम्। हवीमभिः। 'ह्वेञ् स्पर्धायां शब्दे च '। आह्वानकरणभूतेषु मन्त्रेषु स्वव्यापारस्वातन्त्र्यात् कर्तृत्वविवक्षया ' अन्येभ्योऽपि दृश्यन्ते ' ( पा. सू. ३. २. ७५ ) इति कर्तरि मनिन्। तस्य छान्दस ईडागमः। ' बहुलं छन्दसि ' ( पा. सू. ६. १. ३४ ) इति धातोः संप्रसारणं परपूर्वत्वं गुणावादेशौ। नित्त्वादाद्युदात्तत्वम्। सदा। 'सर्वैकान्य०' (पा. सू. ५. ३. १५ ) इत्यादिना सर्वशब्दात् दाप्रत्ययः। 'सर्वस्य सोऽन्यतरस्यां दि ' ( पा. सू. ५. ३. ६ ) इति सभावः। व्यत्ययेनाद्युदात्तत्वम्। हवन्त। ह्वेञो लट्। झस्य अन्तादेशः। टेः एत्वाभावश्छान्दसः। शपि ' बहुलं छन्दसि ' इति संप्रसारणम्। ' तिङ्ङतिङः ' इति निघातः। विश्पतिम्। ' पत्यावैश्वर्ये ' ( पा. सू. ६. २. १८ ) इति पूर्वपदप्रकृतिस्वरे प्राप्ते ' पराद्यिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम्। हव्यवाहम्। ' वह प्रापणे '। ' वहश्च ' ( पा. सू. ३. २. ६४ ) इति ण्विप्रत्ययः। कृदुत्तरपदप्रकृतिस्वरत्वम्। पुरुप्रियम्। पुरूणां प्रियम्। समासान्तोदात्तत्वम्॥

**अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे। असि होता न ईड्यः॥ ३॥**

अग्ने। देवान्। इह। आ। वह। जज्ञानः। वृक्तऽबर्हिषे। असि। होता। नः। ईड्यः॥३॥

हे Vअग्ने Vजज्ञानः अरण्योरुत्पन्नस्त्वं Vवृक्तबर्हिषे आस्तरणार्थं छिन्नेन बर्हिषा युक्ताय तं यजमानमनुग्रहीतुम् Vइह कर्मणि हविर्भुजः Vदेवान् Vआ Vवह। Vनः अस्मदर्थं Vहोता देवानामाह्वाता त्वम् Vईड्यः स्तुत्यः Vअसि॥ देवान् इत्यत्र संहितायां ' दीर्घादटि समानपादे ' (पा. सू. ८. ३. ९) इति रुत्वम्। ' आतोऽटि नित्यम् ' ( पा. सू. ८. ३. ३ ) इत्यनुनासिकभावः। जज्ञानः। ' जनी प्रादुर्भावे '। लिटः कानच्। ' गमहन० ' ( पा. सू. ६. ४.९८ ) इत्युपधालोपः। ' द्विर्वचनेऽचि ' ( पा. सू. १. १. ५९ ) इति तस्य स्थानिवद्भावात् द्विर्वचनम्। चित्त्वादन्तोदात्तः। वृक्तबर्हिषे। ' ओव्रश्चू छेदने '। ' निष्ठा ' ( पा. सू. ३. २. १०२ ) इति क्तप्रत्ययः। ' यस्य विभाषा ' ( पा. सू. ७. २. १५ ) इति इट्प्रतिषेधः। वृक्तं बर्हिर्यस्मै[1] यजमानाय येन वा ऋत्विजा। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। असि। अस्तेः सिप्। ' अदिप्रभृतिभ्यः शपः ' इति शपो लुक्। ' तासस्त्योर्लोपः ' ( पा. सू. ७. ४. ५० ) इति सकारस्य लोपः। पादादित्वात् न निघातः। होता। ह्वयतेस्ताच्छील्यादिषु तृन्। ' बहुलं छन्दसि ' ( पा. सू. ६. १. ३४ ) इति संप्रसारणम्। नित्त्वादाद्युदात्तः। ईड्यः। ' ईड स्तुतौ '। ' ऋहलोर्ण्यत् ' ( पा. सू. ३. १. १२४ )। तित्स्वरिते प्राप्ते ' ईडवन्दवृशंसदुहां ण्यतः ' ( पा. सू. ६. १. २१४ ) इत्याद्युदात्तत्वम्॥

**ताँ उशतो वि बोधय यदग्ने यासि दूत्यम्। देवैरा सत्सि बर्हिषि॥ ४॥**

तान्। उशतः। वि। बोधय। यत्। अग्ने। यासि। दूत्यम्। देवैः। आ। सत्सि। बर्हिषि॥४॥

---

१. च-त-प-फ–' यस्मै ' नास्ति।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [V]अग्ने [V]यत् यस्मात् कारणात् [V]दूत्यं [V]यासि देवानां दूतकर्म प्राप्नोषि तस्मात् कारणात् [V]उशतः हविः कामयमानान् [V]तान् देवान् हविःस्वीकारार्थं [V]वि [V]बोधय। विबोध्य च [V]बर्हिषि अस्मिन् कर्मणि तैः [V]देवैः सह [V]आ [V]सत्सि आसीद आगत्योपविश ॥ तान्। ' दीर्घादटि समानपादे ' इति संहितायां रुत्वम्। ' आतोऽटि नित्यम् ' इत्यनुनासिकभावः। उशतः। ' वश कान्तौ '। लटः शतृ। ' अदिप्रभृतिभ्यः शपः ' इति शपो लुक्। ' ग्रहिज्या° ' ( पा. सू. ६. १. १६ ) इत्यादिना संप्रसारणम्। ' शतुरनुमो नद्यजादी ' ( पा. सू. ६. १. १७३ ) इति विभक्तेरुदात्तत्वम्। यासि। ' यद्वृत्तान्नित्यम् ' ( पा. सू. ८. १. ६६ ) इति निघातप्रतिषेधः। दूतस्य भागः कर्म वा दूत्यम्। ' दूतस्य भागकर्मणी ' ( पा. सू. ४. ४. १२० ) इति यत्। तस्य तित्स्वरितापवादत्वेन ' यतोऽनावः ' इति प्राप्तमाद्युदात्तत्वं ' सर्वे विधयश्छन्दसि विकल्प्यन्ते ' इति निवर्तते। अतः ' तित्स्वरितम् ' ( पा. सू. ६. १. १८५ ) इत्येव भवति। शेषनिघातः। सत्सि सीदसि। ' षदॢ विशरणगत्यवसादनेषु '। लटः सिपि शपो ' बहुलं छन्दसि ' इति लुक्। ' न लुमताङ्गस्य ' ( पा. सू. १. १. ६३ ) इति प्रत्ययलक्षणप्रतिषेधात् ' पाघ्रा° ' ( पा. सू. ७. ३. ७८ ) इत्यादिना सीदादेशो न भवति। बर्हिषि। ' बृह बृहि वृद्धौ '। ' बृंहेर्नलोपश्च ' ( उ. सू. २. २६६ ) इति इसिप्रत्ययः। प्रत्ययस्वरेण इकार उदात्तः ॥

घृताहवन दीदिवः प्रति ष्म रिषतो दह। अग्ने त्वं रक्षस्विनः ॥ ५ ॥

घृतऽआहवन। दीदिऽवः। प्रति। स्म। रिषतः। दह। अग्ने। त्वम्। रक्षस्विनः ॥ ५ ॥

हे [V]घृताहवन घृतेनाहूयमान [V]दीदिवः दीप्यमान [V]अग्ने [V]त्वं [V]रक्षस्विनः रक्षोयुक्तान् [V]रिषतः हिंसकान् शत्रून् [V]प्रति अस्माकं प्रतिकूलान् [V]दह [V]स्म सर्वथा भस्मीकुरु ॥ घृतेनाहूयतेऽस्मिन्निति ' करणाधिकरणयोश्च ' ( पा. सू. ३. ३. ११७ ) इत्यधिकरणे ल्युट्। अत्र जुहोतेः अविवक्षितकर्मत्वेन अकर्मकत्वात् घृतस्य करणत्वमेव न तु कर्मत्वम्। अतो नैषा ' तृतीया च होश्छन्दसि ' ( पा. सू. २. ३. ३ ) इति कर्मणि तृतीया। किंतु ' कर्तृकरणयोस्तृतीया ' ( पा. सू. २. ३. १८ ) इति करणवाचिन्येव। अतः ' कर्तृकरणे कृता बहुलम् ' ( पा. सू. २. १. ३२ ) इति समासः। तत्र पूर्वपदप्रकृतिस्वरापवादे कृदुत्तरपदप्रकृतिस्वरे प्रातिपदिकावस्थायामेव कृते सति पश्चात् विभक्तावुत्पन्नायाम् ' आमन्त्रितस्य च ' ( पा. सू. ६. १. १९८ ) इत्याद्युदात्तत्वम्। दीदिवः। दीव्यतेर्लिटः क्वसुः। तस्य ' वस्वेकाजाद्घसाम् ' ( पा. सू. ७. २. ६७ ) इति नियमात् इडभावः। द्विर्वचनम्। हलादिशेषः। उत्तरवकारस्य ' लोपो व्योर्वलि ' ( पा. सू. ६. १. ६६) इति लोपः। क्वसुः। कित्त्वात् गुणाभावः। ' तुजादीनां दीर्घोऽभ्यासस्य ' ( पा. सू. ६. १. ७ ) इति दीर्घत्वमभ्यासस्य। संबुद्धौ ' उगिदचाम्° ' ( पा. सू. ७. १. ७० ) इति नुम्। ' संयोगान्तस्य लोपः ' ( पा. सू. ८. २. २३ ) इति सकारलोपे नकारस्य ' मतुवसो रु संबुद्धौ छन्दसि ' ( पा. सू. ८. ३. १ ) इति रुत्वम्। विसर्गः। पदात् परत्वात् आमन्त्रितनिघातः। ननु पूर्वामन्त्रितस्य अविद्यमानवत्त्वात् पादादित्वेन न निघातोपपत्तिः। न च ' नामन्त्रिते समानाधिकरणे सामान्यवचनम् ' ( पा. सू. ८. १. ७३ ) इत्यविद्यमानवत्त्वप्रतिषेधः; उभयोरग्निपदविशेषणत्वेन विशेषवचनत्वात्। अत एव परस्परमनन्वयेन असामर्थ्यात् ' समर्थः पदविधिः ' ( पा. सू. २. १. १ ) इति च नियमात् पूर्वस्य न पराङ्गवद्भावो येन ऐकपद्येन निघातः स्यात्। अत एव हि ' इडे रन्तेऽदिते सरस्वति ' ( तै. सं. ७. १. ६. ८ ) इत्यादौ पृथक् पृथक् आद्युदात्तत्वमिति। उच्यते—अत्र ' दीदिवः ' इति नाग्निपदस्य विशेषणं किंतु

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

घृताहवनपदस्यैव द्योतनार्थम्; घृताहवन इति विशेष्यत्वेन विवक्षितत्वात्। विशिष्टस्य तु पश्चादग्नि-विशेषणता। तत्र दीदिवःपदं प्रति घृताहवनपदस्य विशेष्यत्वात् ' नामन्त्रिते समानाधिकरणे° ' ( पा. सू. ८. १. ७३ ) इत्यविद्यमानवत्त्वप्रतिषेधात् निघातोपपत्तिः। अत एव परस्परविशेषणविशेष्य-भावेन सामर्थ्यात् ' सुब्रामन्त्रिते° ' ( पा. सू. २. १. २ ) इति पराङ्गवद्भावे शेषनिघातेनापि स्वरोप-पत्तिरिति। ' इडे रन्ते ' इत्यादौ तु नैवं परस्परान्वय इति वैषम्यम्। रिषतः। ' रुष रिष हिंसार्थाः ' इति। भौवादिकस्य लटः शत्रादेशे शपि छान्दसो गुणाभावः। तौदादिकस्य वा ' रुश रिश हिंसायाम् ' इत्यस्य छान्दसं षत्वम्। विकरणस्य शस्य ङित्त्वाद्गुणाभावः। रक्षस्शब्दात् ' अस्मायामेधास्रजो विनिः ' ( पा. सू. ५. २. १२१ ) इति मत्वर्थीयो विनिः। तस्य प्रत्ययाद्युदात्तत्वम्॥

अग्निमन्थने ' अग्निनाग्निः समिध्यते ' इत्येषानुवचनीया। ' प्रातर्वैश्वदेव्यां प्रेषितः ' इति खण्डे सूत्रितम्–' अग्निनाग्निः समिध्यते त्वं ह्यग्ने अग्निना ' ( आश्व. श्रौ. २. १६ ) इति। एषैव अग्निमत इत्यस्य अनुवाक्या। ' अथाग्नेय्यः ' इति खण्डे ' अग्नावग्निप्रणयने ' इत्युपक्रम्य सूत्रितं–' यद्वो वयं प्रमिनाम व्रतान्यग्निनाग्निः समिध्यते ' ( आश्व. श्रौ. ३. १३ ) इति॥

**अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा। हव्यवाड् जुह्वास्यः॥ ६॥**

**अग्निना। अग्निः। सम्। इध्यते। कविः। गृहऽपतिः। युवा। हव्यऽवाट्। जुहुऽआस्यः॥६॥**

Vअग्निः आहवनीयाख्यः तस्मिन् प्रक्षिप्यमाणेन Vअग्निना निर्मथ्येन प्रणीतेन वा सह Vसमिध्यते सम्यक् दीप्यते। कीदृशोऽग्निः। Vकविः मेधावी Vगृहपतिः यजमानगृहस्य पालकः Vयुवा नित्यतरुणः Vहव्यवाट् हविषो वोढा Vजुह्वास्यः जुहूरूपेण मुखेन युक्तः॥ गृहपतिः। ' पत्यावैश्वर्ये ' ( पा. सू. ६. २. १८ ) इति पूर्वपदप्रकृतिस्वरत्वम्। युवा। ' यु मिश्रणे '। ' कनिन्युवृषितक्षिराजिधन्विद्युप्रति-दिवः ' ( उ. सू. १. १५४ ) इति कनिन्। नित्त्वादाद्युदात्तः। हव्यं वहतीति हव्यवाट्। 'वहश्च' ( पा. सू. ३. २. ६४ ) इति ण्विप्रत्ययः। णित्त्वादुपधावृद्धिः। गतिकारकोपपदात् कृदुत्तरपदप्रकृति-स्वरत्वम्। जुह्वास्यः। हूयतेऽनयेति जुहूः। ' हुवः श्लुवच्च ' ( उ. सू. २. २१८ ) इति क्विप्। तत्सं-नियोगात् दीर्घः। श्लुवद्भावात् द्विर्भावः। चुत्वजश्त्वे। प्रातिपदिकस्वरेणान्तोदात्तः। जुहूः आस्यं यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन स एव शिष्यते। शेषनिघातः। यणादेशे ' उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ' ( पा. सू. ८. २. ४ ) इति आकारः स्वरितः॥ ॥ २२ ॥

**कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे। देवममीवचातनम्॥ ७॥**

**कविम्। अग्निम्। उप। स्तुहि। सत्यऽधर्माणम्। अध्वरे। देवम्। अमीवऽचातनम्॥७॥**

हे स्तोतृसंघ Vअध्वरे क्रतौ Vअग्निम् Vउप Vस्तुहि उपेत्य स्तुतिं कुरु। कीदृशम्। Vकविं मेधाविनं Vसत्यधर्माणं सत्यवदनरूपेण धर्मेणोपेतं Vदेवं द्योतमानम् Vअमीवचातनम् अमीवानां हिंसकानां शत्रूणां रोगाणां वा घातकम्॥ सत्यं धर्मो यस्येति सत्यधर्मा। ' धर्मादनिच् केवलात् ' ( पा. सू. ५. ४. १२४ ) इति अनिच् समासान्तः। अन्तःपदेन तस्य समासत्वाभिधानात् बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे शेषनिघातेनानुदात्तत्वम्। अमीवशब्दः ' अम रोगे ' इत्यस्मात् ' शेवयह्वजिह्वाग्रीवाप्वामीवाः ' ( उ. सू. १. १५२ ) इति वन्प्रत्यये ईडागमे च निपातितः। नित्त्वादाद्युदात्तः। ' चते चदे याचने च '

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इत्यस्मात् हिंसार्थात् णिजन्तात् नन्द्यादित्वात् ल्युः ( पा. सू. ३. १. १३४ ) । योरनादेशः (पा. सू. ७. १. १ ) । ' णेरनिटि ' ( पा. ६. ४. ५१ ) इति णेर्लोपः । ' लिति ' ( पा. सू. ६. १. १९३ ) इति धातोः अकारस्योदात्तत्वम् । न च स्वरे कर्तव्ये णिलोपस्य स्थानिवद्भावः; ' न पदान्तद्विर्वचन° ' ( पा. सू. १. १. ५८ ) इत्यादिना प्रतिषेधात् । अग्नीवानां चातनः इति समासे कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते ॥

**यस्त्वामग्ने हविष्पतिर्दूतं देव सपर्यति । तस्य स्म प्राविता भव ॥ ८ ॥**

यः । त्वाम् । अग्ने । हविःऽपतिः । दूतम् । देव । सपर्यति । तस्य । स्म । प्रऽअविता । भव ॥८॥

हे [v]अग्ने [v]देव [v]यः [v]हविष्पतिः यजमानः देवदूतं [v]त्वां [v]सपर्यति परिचरति [v]तस्य यजमानस्य [v]प्राविता [v]भव [v]स्म अवश्यं रक्षको भव ॥ हूयते इति हविः । ' अर्चिशुचि° ' ( उ. सू. २. २६५ ) इत्यादिना इसिः । प्रत्ययस्वरेण इकार उदात्तः । हविषः पतिर्हविष्पतिः । ' नित्यं समासेऽनुत्तरपदस्थस्य ' ( पा. सू. ८. ३. ४५ ) इति षत्वम् । ' पत्यावैश्वर्ये ' ( पा. सू. ६. २. १८ ) इति पूर्वपदप्रकृतिस्वरत्वम् । सपरशब्दात्[1] ' कण्ड्वादिभ्यो यक् ' ( पा. सू. ३. १. २७ ) इति यक् । धातुप्रकरणात् गुणप्रतिषेधाद्यर्थात् यकः कित्त्वाच्च सपरशब्दस्य धातुत्वात् ततो विहितस्य यकः आर्धधातुकत्वे सति ' अतो लोपः ' ( पा. सू. ६. ४. ४८ ) इति लोपः । ' सनाद्यन्ता धातवः ' ( पा. सू. ३. १. ३२ ) इति धातुसंज्ञायां तिप् । कर्तरि शप् । तस्मिन् पूर्वस्य ' अतो गुणे ' ( पा. सू. ६. १. ९७ ) इति परपूर्वत्वम् । यकः प्रत्ययस्वरेणोदात्तत्वम् । शपा सह एकादेशस्य ' एकादेश उदात्तेनोदात्तः ' ( पा. सू. ८. २. ५ ) इत्युदात्तत्वम् । ' तिङ्ङतिङः ' इति निघातो न भवति ' यद्वृत्तान्नित्यम् ' ( पा. सू. ८. १. ६६ ) इति प्रतिषेधात् ॥

गार्हपत्याहवनीययोः परस्परसंसर्गे विहितस्य हविषो याज्या ' यो अग्निं देववीतये ' इत्येषा । ' अथाग्नेय्य इष्टयः ' इति खण्डे सूत्रितं–' यो अग्निं देववीतये कुविस्सु नो गविष्टये ' ( आश्व. श्रौ. ३. १३ ) इति ॥

**यो अग्निं देववीतये हविष्माँ आविवासति । तस्मै पावक मृळय ॥ ९ ॥**

यः । अग्निम् । देवऽवीतये । हविष्मान् । आऽविवासति । तस्मै । पावक । मृळय ॥ ९ ॥

[v]हविष्मान् हविर्युक्तः [v]यः यजमानः [v]देववीतये देवानां हविर्भक्षणहेतुयागार्थम् [v]अग्निम् [v]आविवासति अग्नेः समीपे विशेषेणागत्य परिचर्यां करोति । हे [v]पावक अग्ने [v]तस्मै [v]मृळय तं यजमानं सुखय ॥ देववीतये । ' वी गतिप्रजनकान्त्यशनखादनेषु ' इत्यस्मात् अशनार्थात् क्तिन् । देवानां वीतिर्यस्मिन् यागे स देववीतिः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । हविष्मान् । ' नञ्विषयस्यानिसन्तस्य ' ( फि. सू. २६ ) इति पर्युदासात् हविःशब्दोऽन्तोदात्तः । मतुपः सर्वानुदात्तत्वात् स एव शिष्यते । आविवासति । ' वा गतिगन्धनयोः ' । अस्मात् अन्तर्भावितण्यर्थात् आगमयितुमिच्छतीत्यर्थे सन् । आह्वानेच्छा परिचर्यायां पर्यवस्यतीति विवासतिशब्दः परिचर्यार्थे निघण्टौ (नि.३.५.१०)

---

१. ठ–दूतम् । २. श–सपर पूजायाम् । सपरशब्दात् । ३. च-फ–पुरोनुवाक्या ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पठितः। द्विर्भावः। अभ्यासस्य ह्रस्वः। 'सन्यतः '(पा. सू. ७. ४. ७९) इति इत्वम्। 'ञ्नित्यादिर्नित्यम्' (पा. सू. ६. १. १९७) इत्याद्युदात्तत्वम्। 'तिङ्ङतिङः' इति निघातो न भवति 'यद्वृत्तान्नित्यम्' (पा. सू. ८. १. ६६) इति प्रतिषेधात्। 'तिङि चोदात्तवति' (पा. सू. ८. १. ७१) इति आङो निघातः। 'सह सुपा' (पा. सू. २. १. ४) इत्यत्र सहेति योगविभागात् आङस्तिङा-सह समासे समासान्तोदात्तत्वे प्राप्ते 'परादिश्छन्दसि बहुलम्' (पा. सू. ६. २. १९९) इत्युत्तरपदाद्युदात्तत्वम्। तस्मै। 'क्रियाग्रहणं कर्तव्यम्' (पा. म. १. ४. ३२. १) इति संप्रदाने चतुर्थी॥

पवमानेष्टौ अग्नेः पावकस्यानुवाक्या 'स नः पावक दीदिवः' इति। 'पौर्णमासेनेष्टिपशुसोमा उपदिष्टाः' इति खण्डे सूत्रितं–'स नः पावक दीदिवोऽग्ने पावक रोचिषा' (आश्व. श्रौ. २. १) इति॥

**स नः पावक दीदिवोऽग्ने देवाँ इहा वह। उप यज्ञं हविश्च नः॥ १०॥**

सः। नः। पावक। दीदिवः। अग्ने। देवान्। इह। आ। वह। उप। यज्ञम्। हविः। च। नः॥१०॥

हे [v]दीदिवः दीप्यमान [v]पावक शोधक [v]अग्ने [v]सः त्वं [v]नः अस्मदर्थम् [v]इह देवयजनदेशे [v]देवान् [v]आ [v]वह। ततः [v]नः अस्मदीयं [v]यज्ञं तत्रत्यं [v]हविश्च [v]उप देवसमीपे प्रापयेति शेषः॥ दीदिवः। 'दिवु क्रीडादौ'। 'छन्दसि लुङ्लङ्लिटः' (पा. सू. ३. ४. ६) इति वर्तमाने लिट्। क्वसुः। द्विर्भावो हलादिशेषः। 'तुजादीनां दीर्घोऽभ्यासस्य' (पा. सू. ६. १. ७) इत्यभ्यासस्य दीर्घत्वम्। 'वस्वेकाजाद्धसाम्' (पा. सू. ७. २. ६७) इति नियमात् वसोः इट्प्रतिषेधः। 'लोपो व्योर्वलि' (पा. सू. ६. १. ६६) इति वकारलोपः। संबुद्धौ 'उगिदचां°' (पा. सू. ७. १. ७०) इत्यादिना नुम्। हल्ङ्यादिलोपः संयोगान्तलोपः। 'मतुवसोः°' इति रुत्वम्। विसर्गः। अग्ने। पादादित्वात् न निघातः। देवाँ इहेत्यत्र 'दीर्घादटि समानपादे' (पा. सू. ८. ३. ९) इति रुत्वम्। 'आतोऽटि नित्यम्' इति आकारस्यानुनासिकः। 'भोभगोअघोअपूर्वस्य योऽशि' (पा. सू. ८. ३. १७) इति रोर्यकारः। 'लोपः शाकल्यस्य' (पा. सू. ८. ३. १९) इति यकारलोपः। तस्यासिद्धत्वात् आद्गुणो न भवति। इह। 'इदमो हः' (पा. सू. ५. ३. ११) इति सप्तम्यन्तात् हप्रत्ययः। 'इदम इश्' (पा. सू. ५. ३. ३)। तद्धितान्तत्वात् प्रातिपदिकत्वे 'सुपो धातुप्रातिपदिकयोः' (पा. सू. २. ४. ७१) इति सप्तम्या लुक्। 'तद्धितश्चासर्वविभक्तिः' (पा. सू. १. १. ३८) इत्यव्ययसंज्ञायाम् 'अव्ययादाप्सुपः' (पा. सू. २. ४. ८२) इत्युत्तरस्याः सप्तम्या लुक्। अकारः प्रत्ययस्वरेणोदात्तः॥

**स नः स्तवान आ भर गायत्रेण नवीयसा। रयिं वीरवतीमिषम्॥ ११॥**

सः। नः। स्तवानः। आ। भर। गायत्रेण। नवीयसा। रयिम्। वीरऽवतीम्। इषम्॥११॥

हे अग्ने [v]नवीयसा नवतरेण पूर्वकैरप्यसंपादितेन [v]गायत्रेण गायत्रीच्छन्दस्केनानेन सूक्तेन [v]स्तवानः स्तूयमानः [v]सः त्वं [v]नः अस्मदर्थं [v]रयिं धनं [v]वीरवतीं शूरपुत्रप्रभृत्यपत्ययुक्ताम्[3] [v]इषम् अन्नं च [v]आ [v]भर संपादय॥ स्तवानः। 'ष्टुञ् स्तुतौ'। 'धात्वादेः षः सः'। 'स्वरितञितः°' (पा. सू. १. ३.

---

१. ठ–संप्रदानत्वात्। २. च-त-फ-श–इति। ३. ठ–वीरपुत्रभृत्ययुक्ताम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

७२ ) इत्यात्मनेपदम् । लटः शानच् । कर्तरि शप् । ' बहुलं छन्दसि ' ( पा. सू. २. ४. ७३ ) इति लुगभावः । गुणावादेशौ । ' आने मुक् ' ( पा. सू. ७. २. ८२ ) इति मुक् न भवति, ' अनित्यमागमशासनम् ' ( परिभा. ९६ ) इत्यागमानुशासनस्य अनित्यत्वात् । शपः पित्त्वादनुदात्तत्वम् । शानचश्चित्त्वादन्तोदात्तस्य अदुपदेशात् शपः परत्वात् लसार्वधातुकानुदात्तत्वम् । धातुस्वर एव शिष्यते । भर । ' हग्रहोर्भश्छन्दसि ' ( पा. सू. ८. २. ३२. १ ) इति भत्वम् । गायत्रेण । गायत्र्याः संबन्धि गायत्रम् । ' तस्येदम् ' ( पा. सू. ४. ३. १२० ) इति अण्प्रत्ययः । प्रत्ययस्वरः । नवीयसा । नवशब्दात् आतिशायनिकः ईयसुन्प्रत्ययः । नित्त्वादाद्युदात्तः । वीरवतीम् । मतुड्ङीपोः पित्त्वादनुदात्तत्वम् । अकारः प्रातिपदिकस्वरेणोदात्तः ॥

**अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिः । इमं स्तोमं जुषस्व नः ॥ १२ ॥**

अग्ने । शुक्रेण । शोचिषा । विश्वाभिः । देवहूतिऽभिः । इमम् । स्तोमम् । जुषस्व । नः ॥१२॥

हे [v]अग्ने [v]शुक्रेण [v]शोचिषा त्वदीयश्वेतवर्णदीप्त्या [v]विश्वाभिर्देवहूतिभिः त्वत्कृतसर्वदेवताह्वानसाधनस्तोत्रैश्च युक्तस्त्वं [v]नः अस्मदीयम् [v]इमं [v]स्तोमं स्तोत्रविशेषं [v]जुषस्व सेवस्व ॥ विश्वशब्दो विशेः क्वनन्तो नित्त्वादाद्युदात्तः । देवहूतिभिः । देवशब्दः पचाद्यजन्तः । चित्त्वादन्तोदात्तः । देवानां हूतय आह्वानान्यासु स्तुतिष्विति देवहूतयः स्तुतयः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । स्तूयतेऽनेनेति स्तोमः । ' अर्तिस्तुसु° ' ( उ. सू. १. १३७ ) इत्यादिना मन् । नित्त्वादाद्युदात्तः ॥ ॥ २३ ॥

' सुसमिद्धः ' इत्यादिकं द्वादशर्चं द्वितीयसाप्रीसूक्तम् । तस्य काण्वो मेधातिथिर्ऋषिः । गायत्रं छन्दः । प्रत्यृचं प्रतीयमानाः समिद्धेतनूनपादादिका द्वादश देवताः । तथा च अनुक्रमणिकायाम् ऋक्संख्यामृषिं छन्दश्च अनुवृत्तिबलात् सिद्धवत्कृत्य देवता उदाहृताः–' सुसमिद्ध इतीध्मः समिद्धो वाग्निस्तनूनपान्नराशंस इळो बर्हिर्देवीर्द्वार उषासानक्ता दैव्यौ होतारौ प्रचेतसौ तिस्रो देव्यः सरस्वतीळभारत्यस्त्वष्टा वनस्पतिः स्वाहाकृतय इति प्रत्यृचं देवता एतदाप्रीसूक्तम् ' इति । विनियोगस्तु–पशौ ' सुसमिद्धो न आ वह ' इति काण्वमाप्रीसूक्तम् । ' एकादश प्रयाजाः ' इति खण्डे सूत्रितं–' समिद्धो अद्येति सर्वेषां यथर्षि वा ' ( आश्व. श्रौ. ३. २ ) इति ॥

**सुसमिद्धो न आ वह देवाँ अग्ने हविष्मते । होतः पावक यक्षि च ॥ १ ॥**

सुऽसमिद्धः । नः । आ । वह । देवान् । अग्ने । हविष्मते । होतरिति । पावक । यक्षि । च॥१॥

हे [v]अग्ने सुसमिद्धनामकस्त्वं [v]नः अस्मदीयाय [v]हविष्मते यजमानाय तदनुग्रहार्थं [v]देवान् [v]आ [v]वह । हे [v]पावक शोधक [v]होतः होमनिष्पादकाग्ने [v]यक्षि [v]च यज च ॥ सुसमिद्धः । समः क्रियाविशेषणत्वेन गतिसंज्ञकत्वात् प्रादिसमासः । शोभनवाचिनः सुशब्दस्य तु ' विशेषणं विशेष्येण बहुलम् ' ( पा. सू. २. १. ५७ ) इति समिद्धपदेन कर्मधारयसमासः । सुशब्दः प्रातिपदिकस्वरेणोदात्तः । ' कर्मधारयेऽनिष्ठा ' ( पा. सू. ६. २. ४६ ) इति पूर्वपदप्रकृतिस्वरत्वम् । क्रियाविशेषणत्वे हि सुशब्दस्य गतित्वात् प्रादिसमासे ' गतिरनन्तरः ' ( पा. सू. ६. २. ४९ ) इति समो यदु-

---

१. च-छ-त-फ-श–अण् । २. च-छ-फ-श–सुसमिद्ध° । ३. ठ–सुसमिद्धः सुसमिद्ध° ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दात्तत्वं तदेव कृदुत्तरपदप्रकृतिस्वरत्वेन स्थास्यतीति सुशब्दोऽनुदात्तः स्यात्। देवाँ अग्ने। पूर्ववत् रुत्वानुनासिके। हविष्मते। हविरस्यास्तीति मतुप्। 'तसौ मत्वर्थे' (पा. सू. १. ४. १९) इति भत्वेन पदत्वस्य बाधितत्वात् न रुत्वम्। होतःपावकशब्दयोः आमन्त्रितयोः पृथक्पृथगेव क्रियान्वये परस्परसामर्थ्यात् पराङ्गवद्भावाभावात् न तन्निबन्धनम् ऐकस्वर्यम्। न च द्वितीयस्य आमन्त्रितस्य आष्टमिकनिघातेन ऐकस्वर्यम्; 'आमन्त्रितं पूर्वमविद्यमानवत्' (पा. सू. ८. १. ७२) इति पूर्वस्य अविद्यमानवत्त्वेन पदात् परत्वाभावात् पादादित्वाच्च। परस्परसामानाधिकरण्येऽपि होतरित्यस्य विशेषणत्वे समानमेव अविद्यमानवत्त्वम्। अत एव अविद्यमानवत्त्वात् सामर्थ्येऽपि न पराङ्गवद्भावः इति नैकस्वर्यसिद्धिः। अतो होतरिति विशेष्यम्। अतः पुनातीति पावक इत्यवयवप्रसिद्धिस्वीकारेण विशेषणत्वात् होतरिति विशेष्यम्। तच्च सामान्यवचनमिति 'नामन्त्रिते समानाधिकरणे[3]०' (पा. सू. ८. १. ७३) इत्यविद्यमानवत्त्वप्रतिषेधात् पदात्परत्वात् अपादादित्वाच्च द्वितीयामन्त्रितस्य आष्टमिकनिघातेन वा पराङ्गवद्भावे सति शेषनिघातेन वा सर्वानुदात्तत्वसिद्धिः। यक्षि। यजेर्लोटः सिपि 'बहुलं छन्दसि' इति शपो लुक्। ष्वश्चादिना षत्वम्। 'षढोः कः सि'(पा. सू. ८. २. ४१) इति कत्वम्। सेर्हिरादेशः छान्दसत्वात् न भवति। सिपः पित्त्वेन अनुदात्तत्वात् धातुस्वर एव शिष्यते। न च 'तिङ्ङतिङः' इति निघातः, पूर्वस्य पावक इति आमन्त्रितस्य अविद्यमानवत्त्वेन पदादपरत्वात्। अत एव तस्य अव्यवधायकत्वेन होतरित्यपेक्ष्य निघातः स्यात् इति चेत्, न। यक्षिपदापेक्षया होतरित्यस्यापि पूर्वत्वेन अविद्यमानवत्त्वात्। ननु 'नामन्त्रिते समानाधिकरणे' इति तस्य निषिद्धम् अविद्यमानवत्त्वम्। न च पावकपदस्य अविद्यमानवत्त्वेन समानाधिकरणपरत्वाभावः। यक्षिपदस्यैव हि कार्यं प्रति पावकपदं पूर्वत्वात् अविद्यमानवत् स्यात्। होतःपदकार्यम् अविद्यमानवत्त्वप्रतिषेधं प्रति तु परत्वात् विद्यमानवदेव इति भवत्येव होतरित्यस्य अविद्यमानवत्त्वप्रतिषेधः। अतस्तस्य विद्यमानवत्त्वात् तदपेक्षया यक्षीत्यस्य निघातः प्राप्नोत्येव। सत्यम्। अत्र यक्षीत्यस्य चशब्दपरत्वात् 'चादिषु च' (पा. सू. ८. १. ५८) इति निघातप्रतिषेधो भविष्यतीत्यदोषः॥

मधुमन्तं तनूनपाद्यज्ञं देवेषु नः कवे। अद्या कृणुहि वीतये॥ २॥

मधुऽमन्तम्। तनूऽनपात्। यज्ञम्। देवेषु। नः। कवे। अद्य। कृणुहि। वीतये॥ २॥

हे [v]कवे मेधाविन् अग्ने [v]तनूनपात् एतन्नामकस्त्वम् [v]अद्य अस्मिन् दिने [v]नः अस्मदीयं [v]मधुमन्तं रसवन्तं [v]यज्ञं हविः [v]वीतये भक्षणार्थं [v]देवेषु [v]कृणुहि कुरु प्रापय इत्यर्थः॥ मधुमन्तम्। 'फल्गुपाटिनमिमनिजनां गुक्पटिनाकिधतश्च' (उ. सू. १. १८) इति मन्यतेः उप्रत्ययो धकारश्चान्तादेशः। 'नित्' इत्यनुवृत्तेः प्रत्ययस्य नित्त्वादाद्युदात्तो मधुशब्दः। तनूनपात्। आमन्त्रितनिघातः। अद्य। 'सद्यः परुत्०' (पा. सू. ५. ३. २२) इत्यादिना अस्मिन् काले इत्यर्थे द्यप्रत्ययान्तो निपातितः। प्रत्ययस्वरेणान्तोदात्तः। 'तद्धितश्चासर्वविभक्तिः' (पा. सू. १. १. ३८) इति अव्ययत्वात् 'अव्ययादाप्सुपः' (पा. सू. २. ४. ८२) इत्युपरि सप्तम्या लुक्। संहितायाम् 'अन्येषामपि दृश्यते' (पा. सू. ६. ३. १३७) इति दीर्घत्वम्। कृणुहि। 'कृवि हिंसाकरणयोश्च'। 'इदितो नुम् धातोः' (पा. सू. ७. १. ५८) इति नुम्। लोटः सेर्हिरादेशः। 'धिन्विकृण्व्योर च' (पा.

---

१. च-छ-°नासिकौ। २. ठ-वहिनान्वये। ३. ठ-समानाधिकरणे सामान्यवचनम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सू. ३. १. ८० ) इति शपोऽपवादो विकरण उप्रत्ययः; तत्संनियोगेन[1] वकारस्य अकारः। तस्य ' अतो लोपः ' ( पा. सू. ६. ४. ४८ ) इति लोपः। तस्य स्थानिवद्भावात् लघूपधगुणो न भवति। ' उतश्च प्रत्ययादसंयोगपूर्वात् ' ( पा. सू. ६. ४. १०६ ) इति हेर्लुक् न भवति, ' उतश्च प्रत्ययाच्छन्दो वावचनम् ' ( पा. सू. ६. ४. १०६. १ ) इति वचनात्। ' तिङ्ङतिङः ' इति निघातः। वीतये। ' मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः ' ( पा. सू. ३. ३. ९६ ) इति क्तिन् उदात्तः॥

**नराशंसमिह प्रियमास्मिन्यज्ञ उप ह्वये। मधुजिह्वं हविष्कृतम् ॥ ३ ॥**

नराशंसम्। इह। प्रियम्। अस्मिन्। यज्ञे। उप। ह्वये। मधुऽजिह्वम्। हविःऽकृतम् ॥३॥

Vइह देवयजनदेशे Vअस्मिन् प्रवर्तमाने Vयज्ञे Vनराशंसम् एतन्नामकमग्निम् Vउप Vह्वये आह्वयामि। कीदृशम्। Vप्रियं देवानां प्रीतिहेतुं Vमधुजिह्वं मधुरभाषिजिह्वोपेतं माधुर्यरसास्वादकजिह्वोपेतं वा। Vहविष्कृतं हविषो निष्पादकम्॥ नरशब्दो ' नृ नये ' इत्यस्मात् अबन्तः। प्रत्ययस्य पित्त्वात् धातुस्वर एव शिष्यते। शंसन्त्यस्मिन्निति शंसः। ' हलश्च ' ( पा. सू. ३. ३. १२१ ) इत्यधिकरणे घञ्। नराणां शंसः इति समासे कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते ' उभे वनस्पत्यादिषु युगपत् ' ( पा. सू. ६. २. १४० ) इति पूर्वोत्तरपदे प्रकृतिस्वरे भवतः। अत एव वनस्पत्यादिषु पाठात् नरशब्दस्य दीर्घत्वम्। इह। ' इदमो हः ' ( पा. सू. ५. ३. ११ ) इति हप्रत्ययः। ' इदम इश् ' ( पा. सू. ५. ३. ३ ) इति इशादेशः। प्रत्ययस्वरः। प्रियम्। प्रीणातीति प्रियः। ' इगुपधज्ञाप्रीकिरः कः ' ( पा. सू. ३. १. १३५ ) इति कः। प्रत्ययस्वरः। अस्मिन्। ' ऊडिदम्° ' इत्यादिना विभक्तेरुदात्तत्वम्। ह्वये। निघातः। मधुजिह्वम्। मधुशब्दस्याद्युदात्तत्वमुक्तम्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण स एव शिष्यते। हविष्कृतम्। हविष्करोतीति हविष्कृत्। क्विपि ह्रस्वस्य तुक्। 'नित्यं समासेऽनुत्तरपदस्थस्य' ( पा. सू. ८. ३. ४५ ) इति षत्वम्। कृदुत्तरपदप्रकृतिस्वरत्वम्॥

**अग्ने सुखतमे रथे देवाँ ईळित आ वह। असि होता मनुर्हितः ॥ ४ ॥**

अग्ने। सुखऽतमे। रथे। देवान्। ईळितः। आ। वह। असि। होता। मनुःऽहितः ॥ ४ ॥

इट्शब्दाभिधेय हे Vअग्ने Vईळितः अस्माभिः स्तुतः सन् Vसुखतमे अतिशयेन सुखहेतौ कस्मिंश्चित् Vरथे Vदेवान् स्थापयित्वा कर्मभूम्यां Vआ Vवह। इट्शब्दाभिधेयत्वमत्र सूचयितुम् ईळित इति विशेषणम्। Vमनुर्हितः मनुना मन्त्रेण मनुष्येण वा यजमानादिरूपेण हितोऽत्र स्थापितस्त्वं Vहोता देवानामाह्वाता Vअसि॥ सुखतमे। सुखमस्मिन्नस्तीति मतुप्। तस्य ' गुणवचनेभ्यो मतुपो लुग्वक्तव्यः ' ( पा. सू. ५. २. ९४. ३ ) इति लुक्। अतिशयेन सुखः सुखतमः। तमपोऽनुदात्तत्वात् प्रातिपदिकस्वरः। रथे। ' रमु क्रीडायाम् '। रमन्तेऽस्मिन्निति रथः। ' हनिकुषिनीरमिकाशिभ्यः क्थन् ' ( उ. सू. २. १५९ ) इति क्थन्। ' एकाच उपदेशेऽनुदात्तात् ' ( पा. सू. ७. २ १० ) इति इट्प्रतिषेधः। ' अनुदात्तोपदेश° ' ( पा. सू. ६. ४. ३७) इत्यादिना मकारलोपः। निरवादाद्युदात्तत्वम्। ईळितः। ' ईड स्तुतौ '। 'निष्ठा' ( पा. सू. ३. २. १०२ ) इति क्तः। इडागमः। तस्य ' आगमा अनुदात्ताः '

---

१. ग-च-ठ-त-फ-र-श—तत्संनियोगेन च।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

(पा. म.३.१.३.७) इत्यनुदात्तः। प्रत्ययस्वरः। देवान् इति नकारस्य संहितायां 'दीर्घादटि समानपादे' (पा. सू. ८. ३. ९) इति रुत्वम्। 'आतोऽटि नित्यम्' (पा. सू. ८. ३. ३) इति आकारस्य अनुनासिकभावः। 'भोभगो°' (पा. सू. ८. ३. १७) इत्यादिना रोर्यत्वम्। तस्य 'लोपः शाकल्यस्य' (पा. सू. ८. ३. १९) इति लोपः। तस्यासिद्धत्वात् 'आद्गुणः' न भवति। आ। निपातत्वादाद्युदात्तः। असि। 'अस भुवि'। लटः सिप्। 'अदिप्रभृतिभ्यः शपः' (पा. सू. २. ४. ७२) इति शपो लुक्। 'तासस्त्योर्लोपः' (पा. सू. ७. ४. ५०) इति सकारस्य लोपः। होता। ताच्छील्ये तृन्। सौ 'ऋदुशन°' (पा. सू. ७. १. ९४) इत्यादिना अनङ्। ङित्त्वादन्तादेशः। 'अप्तृन्°' (पा. सू. ६. ४. ११) इत्यादिना उपधादीर्घः। हल्ङ्यादिलोपनलोपौ। नित्त्वादाद्युदात्तः। मनुर्हितः। मन्यते इति मनुः। 'मन ज्ञाने'। शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च' (उ. सू. १. १०) इति उप्रत्ययः। तत्र 'नित्' इत्यनुवृत्तेः नित्त्वादाद्युदात्तः। हितः। दधातेः 'निष्ठा' इति कर्मणि क्तः। 'दधातेर्हिः' (पा. सू. ७. ४. ४२) इति हिरादेशः। मनुना हितः इति समासे तृतीयायाः स्थाने 'सुपां सुलुक्°' (पा. सू. ७. १. ३९) इत्यादिना सु इति आदेशः। तस्य रुत्वम्। लुगभावश्छान्दसः। 'तृतीया कर्मणि' (पा. सू. ६. २. ४८) इति पूर्वपदप्रकृतिस्वरत्वम्॥

स्तृ॒णी॒त ब॒र्हिरा॑नु॒षग्घृ॒तपृ॑ष्ठं मनीषिणः। यत्रा॒मृत॑स्य॒ चक्ष॑णम्॥ ५॥

स्तृ॒णी॒त। ब॒र्हिः। आ॒नु॒षक्। घृ॒तऽपृ॑ष्ठम्। म॒नी॒षि॒णः॒। यत्र॑। अ॒मृत॑स्य। चक्ष॑णम्॥ ५॥

हे ᵛमनीषिणः बुद्धिमन्त ऋत्विजः ᵛबर्हिः दर्भं ᵛस्तृणीत वेदेरुपरि आच्छादयत। अत्रापि बर्हिर्नामकोऽग्निः सूच्यते। कीदृशं बर्हिरास्तरणीयम्। ᵛआनुषक् अनुक्रमेण सक्तं परस्परं संबद्धं ᵛघृतपृष्ठं घृतपूर्णानां स्रुचां बर्हिषि आसादितत्वात् घृतं पृष्ठे उपरिभागे यस्य बर्हिषः तत् घृतपृष्ठम्। ᵛयत्र यस्मिन् बर्हिषि ᵛअमृतस्य अमृतसमानस्य घृतस्य ᵛचक्षणं दर्शनं भवति। यद्वा। मरणरहितस्य देवस्य बर्हिर्नामकस्य अग्नेर्दर्शनं भवति तद्बर्हिः स्तृणीत इति पूर्वत्रान्वयः॥ स्तृणीत। 'स्तॄञ् आच्छादने'। लोण्मध्यमपुरुषस्य बहुवचनम्। 'लोटो लङ्वत्' (पा. सू. ३. ४. ८५)। 'तस्थस्थमिपाम्°' (पा. सू. ३. ४. १०१) इति थस्य तादेशः। 'क्र्यादिभ्यः श्ना'। 'ई हल्यघोः' (पा. सू. ६. ४. ११३) इति ईत्वम्। 'ऋवर्णाच्चेति वक्तव्यम्' (पा. सू. ८. ४. १. १) इति णत्वम्। 'प्वादीनां ह्रस्वः' (पा. सू. ७. ३. ८०) इति धातोर्ह्रस्वत्वम्। सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः। अतः तिङ एव प्रत्ययस्वरेणोदात्तत्वम्। बर्हिः। 'बृंहेर्नलोपश्च' (उ. सू. २. २६६) इति इस्प्रत्ययनलोपौ। प्रत्ययस्वरः। आनुषक्। आ समन्तात् अनुषजति इति आनुषक्। 'षञ्ज सङ्गे'। 'धात्वादेः षः सः'। 'क्विप् च' (पा. सू. ३. २. ७६) इति क्विप्। 'अनिदिताम्°' (पा. सू. ६. ४. २४) इति लोपः। आङन्वोरुपसर्गयोः प्राक्प्रयोगः। गतिसमासः। 'उपसर्गात्सुनोति°' इत्यादिना षत्वम्। घृतपृष्ठम्। 'घृ क्षरणदीप्त्योः'। 'निष्ठा' (पा. सू. ३. २. १०२) इति क्तः। प्रत्ययस्वरेणोदात्तः। घृतयुक्तं पृष्ठम् अस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। मनीषिणः। आमन्त्रितनिघातः। अमृतस्य। न विद्यते मृतं मरणम् अस्मिन्निति अमृतम्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं बाधित्वा 'नञ्सुभ्यां' (पा. सू. ६. २. १७२) इत्युत्तरपदान्तोदात्तत्वे प्राप्ते 'नञो जरमरमित्रमृताः' (पा. सू. [illegible] ११६) इत्युत्तरपदाद्युदात्तत्वम्। चक्षणम्। 'चक्षिङ् व्यक्तायां

---

दाख्याय

१. च-छ-फ-श—नलेण ङीष उदो लोपः।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वाचि '। वागभिव्यक्तिवाची धातुः इह अभिव्यक्तिमात्रं लक्षयति। ' ल्युट् च ' ( पा. सू. ३. ३. ११५ ) इति भावे ल्युट्। योरनादेशः। तस्य आर्धधातुकत्वात् ' चक्षिङः ख्याञ् ' ( पा. सू. २. ४. ५४ ) इति ख्याजादेशे प्राप्ते ' असनयोश्च ' ( पा. सू. २. ४. ५४. १० ) इति प्रतिषेधः ॥

**वि श्रयन्तामृतावृधो द्वारो देवीरसश्चतः। अद्या नूनं च यष्टवे ॥ ६ ॥**

वि। श्रयन्ताम्। ऋतऽवृधः। द्वारः। देवीः। असश्चतः। अद्य। नूनम्। च। यष्टवे ॥६॥

[v]द्वारः यज्ञशालाद्वाराणि [v]वि [v]श्रयन्तां कपाटोद्घाटनेन विघ्रियन्ताम्। कीदृश्यः। [v]ऋतावृधः ऋतस्य सत्यस्य यज्ञस्य वा वर्धयित्र्यः [v]देवीः द्योतमानाः [v]असश्चतः असश्चन्त्यः उद्घाटनेन प्रवेष्टृपुरुषसङ्ग-रहिताः। यद्वा। असश्चतः प्रवेष्ट्रपुरुषरहितान् यज्ञगृहान् तत्पुरुषप्रवेशाय द्वाराभिमानिन्य एतत्संज्ञिका अग्निविशेषमूर्तयः वि श्रयन्तां विशेषेण सेवन्ताम्। द्वारसेवया तत्र पुरुषप्रवेशेन वा किं प्रयोजन-मिति तदुच्यते। [v]अद्य अस्मिन् दिने [v]नूनम् अवश्यं [v]यष्टवे यष्टुम्। चकारात् दिनान्तरेष्वपि इति द्रष्टव्यम् ॥ ऋतावृधः। ऋतं वर्धयन्तीत्यर्थे वृधेः अन्तर्भावितण्यर्थात् ' क्विप् च ' इति क्विप्। उपपद-समासः। ' अन्येषामपि दृश्यते ' ( पा. सू. ६. ३. १३७ ) इति पूर्वपदस्य दीर्घत्वम्। वृधिः धातु-स्वरेणोदात्तः। समासे कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते। देवीः। ' वा छन्दसि ' ( पा. सू. ३. ४. ८८ ) इति पूर्वसवर्णदीर्घत्वम्। देवशब्दात् पचाद्यजन्तात् ' पुंयोगादाख्यायाम् ' ( पा. सू. ४. १. ४८ ) इति ङीप्। प्रत्ययस्वरेणोदात्तः। विभक्त्या सह ' एकादेश उदात्तेनोदात्तः ' ( पा. सू. ८. २. ५ ) इत्युदात्तः। असश्चतः। ' ग्लुञ्चु पस्ज गतौ '। जकारस्य व्यत्ययेन चकारः। लटः शत्रादेशः। द्वाराभावे न विद्यन्ते सश्चन्तो गच्छन्तो येषु प्राग्वंशादिषु तान् असश्चतः। अद्य। ' सद्यः-परुत्° ' ( पा. सू. ५. ३. २२ ) इत्यादिना द्यप्रत्ययान्तो निपातितः। ' तद्धितश्चासर्वविभक्तिः ' ( पा. सू. १. १. ३८ ) इति अव्ययसंज्ञकत्वात् परस्या विभक्तेर्लुक्। प्रत्ययस्वरेणान्तोदात्तः। संहितायाम् ' अन्येषामपि दृश्यते ' इति दीर्घत्वम्। नूनम्। ' एवमादीनामन्तः ' ( फि. सू. ८२ ) इत्यन्तोदात्त-त्वम्। यष्टवे। यजेः ' तुमर्थे सेसेन्° ' ( पा. सू. ३. ४. ९ ) इत्यादिना तवेन्प्रत्ययः। वश्चादिना षत्वम्। नित्त्वादाद्युदात्तः ॥ ॥ २४ ॥

**नक्तोषासा सुपेशसास्मिन्यज्ञ उप ह्वये। इदं नो बर्हिरासदे ॥ ७ ॥**

नक्तोषसा। सुऽपेशसा। अस्मिन्। यज्ञे। उप। ह्वये। इदम्। नः। बर्हिः। आऽसदे ॥७॥

नक्तशब्द उषःशब्दश्च लोके कालविशेषवाचिनौ। इह तु तत्कालाभिमानिवह्निमूर्तिद्वये प्रयुज्येते। [v]नक्तोषासा नक्तोषोनामिके वह्निमूर्ती [v]अस्मिन् प्रवर्तमाने यज्ञकर्मणि [v]उप [v]ह्वये आह्वयामि। किमर्थम्। [v]नः अस्मदीयम् [v]इदं वेद्यामास्तीर्णं [v]बर्हिः दर्भम् [v]आसदे आसत्तुं प्रासुम्। कीदृश्यौ। [v]सुपेशसा शोभनरूपयुक्ते ॥ नक्तं च उषाश्च नक्तोषसा। द्वितीयाद्विवचनस्य ' सुपां सुलुक्° ' ( पा. सू. ७. १. ३९ ) इति आकारः। मलोप उपधादीर्घश्छान्दसौ। ' देवताद्वन्द्वे च ' ( पा. सू. ६. २. १४१ ) इति पूर्वोत्तरपदयोः युगपत् प्रकृतिस्वरत्वम्। सुपेशसा। शोभनं पेशो रूपं ययोस्ते। पूर्ववत् आकारः। पेशः-शब्दो नब्विषयत्वादाद्युदात्तः। बहुव्रीहौ ' नञ्सुभ्याम् ' ( पा. सू. [1] ' . २. १७२ ) इत्युत्तरपदा-

---

१. त-र-श–प्रविष्टपुरुष° ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

न्तोदात्तत्वस्य अपवादत्वेन ' आद्युदात्तं द्यच्छन्दसि ' ( पा. सू. ६. २. ११९ ) इत्युत्तरपदाद्युदात्तत्वम् । अस्मिन् । ' ऊडिदम्° ' ( पा. सू. ६. १. १७१ ) इत्यादिना विभक्तिरुदात्ता । आसदे । ' षद्लृ विशरणगत्यवसादनेषु ' । ' धात्वादेः षः सः ' । आङ्पूर्वात् अस्मात् संपदादिभ्यो भावे क्विप् ( पा. सू. ३. ३. १०८. ९ ) । प्रादिसमासः । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

ता सुजिह्वा उप ह्वये होतारा दैव्या कवी । यज्ञं नो यक्षतामिमम् ॥ ८ ॥

ता । सुऽजिह्वौ । उप । ह्वये । होतारा । दैव्या । कवी इति । यज्ञम् । नः । यक्षताम् । इमम् ॥८॥

तच्छब्दोऽत्र सर्वनामत्वात् प्रसिद्धार्थवाची । Vता तौ याज्ञिकानां प्रसिद्धौ द्वावग्नी Vउप Vह्वये आह्वयामि । Vनः अस्मदीयम् Vइमं Vयज्ञं Vयक्षतां तौ उभौ यजताम् अनुतिष्ठताम् । कीदृशौ । Vसुजिह्वौ शोभनजिह्वोपेतौ प्रियवचनौ शोभनज्वालौ वा इत्यर्थः । Vहोतारा होमनिष्पादकौ Vदैव्या देव्यौ देवसंबन्धिनौ । अत एव इमौ अग्नी दैव्यहोतृनामकौ Vकवी मेधाविनौ ॥ ता तौ । द्वितीयाद्विवचनस्य ' सुपां सुलुक्° ' इति आकारः । ' एकादेश उदात्तेनोदात्तः ' इत्युदात्तः । सुजिह्वौ । शोभना जिह्वा ययोस्तौ । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । पूर्ववत् एकादेशस्वरः । संहितायाम् आवादेशः । वस्य ' लोपः शाकल्यस्य ' ( पा. सू. ८. ३. १९ ) इति लोपः । होतारा । जुहोतेस्तृन् । द्विवचने ' ऋतो ङि° ' ( पा. सू. ७. ३. ११० ) इति गुणः । असृन् इति उपधादीर्घः । पूर्ववत् आकारः । निस्वादाद्युदात्तः । दैव्या । देवानामिमौ । ' देवाद्यञञौ ' ( पा. सू. ४. १. ८५. ३ ) इति यञ् । ' यस्येति च ' ( पा. सू. ६. ४. १४८ ) इति अकारलोपः । ' ञ्नित्यादिर्नित्यम् ' ( पा. सू. ६. १. १९७ ) इत्याद्युदात्तः । पूर्ववत् आकारः । यक्षतां यजताम् । लोटि शपि परतः ' सिब्बहुलं लेटि ' ( पा. सू. ३. १. ३४ ) इति बहुलग्रहणात् सिप् । कुत्वचर्त्वषत्वानि ।

इळा सरस्वती मही तिस्रो देवीर्मयोभुवः । बर्हिः सीदन्त्वस्रिधः ॥ ९ ॥

इळा । सरस्वती । मही । तिस्रः । देवीः । मयःऽभुवः । बर्हिः । सीदन्तु । अस्रिधः ॥९॥

अत्र महीशब्दो महत्त्वगुणयुक्तां भारतीमाचष्टे; अन्येषु आप्रीसूक्तेषु सदृशेषु इळा सरस्वती भारती इति आम्नातत्वात् । इळादिशब्दाभिधेया वह्निमूर्तयः Vतिस्रः Vदेवीः दीप्यमानाः Vबर्हिः वेद्यामास्तीर्णं Vसीदन्तु प्राप्नुवन्तु । कीदृश्यः । Vमयोभुवः सुखोत्पादिकाः Vअस्रिधः शोषेण क्षयेण वा रहिताः ॥ इळा । ' ईड स्तुतौ ' । छान्दसं ह्रस्वत्वम् । क्विप् । धातुस्वरः । ' टापं चापि हलन्तानां यथा वाचा दिशा निशा ' ( कौ. २. ४. ८२ ) इति टाप् । सरस्वती । सरः असुनन्तो निस्वादाद्युदात्तः । तदस्यास्तीति मतुप् । अदुपधत्वात् वत्वम् । ' तसौ मत्वर्थे ' ( पा. सू. १. ४. १९ ) इति भत्वेन पदत्वस्य बाधितत्वात् रुत्वाद्यभावः । ' उगितश्च ' ( पा. सू. ६. ३. ४५ ) इति ङीप् । मतुङ्ङीपौ पित्त्वादनुदात्तौ । मही । महतीशब्दे तकारलोपः छान्दसः । 'यस्येति च' ( पा. सू. ६. ४. १४८ ) इति अकारलोपः । उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वम् । तिस्रः । त्रिशब्दात् जसि ' त्रिचतुरोः स्त्रियां तिसृचतसृ ' ( पा. सू. ७. २. ९९ ) इति तिस्रादेशः । ' अचि र ऋतः ' ( पा. सू. ७. २. १०० ) इति रेफादेशः । ' तिसृभ्यो जसः ' ( पा. सू. ६. १. १६६ ) इति जस उदात्तत्वम् । देवीः । देवानां पत्न्यो देव्यः । ' पुंयोगादाख्यायाम् ' ( पा. सू. ४. १. ४८ ) इति ङीष् । ' यस्येति च ' इति अकारलोपः । प्रत्ययस्वरेण ङीप उदात्तत्वम् । जसि ' दीर्घाज्जसि च ' ( पा. सू. ६. १. १०५ ) इति

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

निषिद्धं दीर्घत्वं ' वा छन्दसि ' ( पा. सू. ६. १. १०६ ) इति पक्षेऽभ्यनुज्ञायते । मयोभुवः । ' मीञ् हिंसायाम् ' । हिनस्ति दुःखमिति सुखं मयः । तद्भावयन्तीति मयोभुवः । अन्तर्भावितण्यर्थात् भुवः क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वम् । बर्हिः । ' बृंहेर्नलोपश्च ' ( उ. सू. २. २६६ ) इति इसिप्रत्ययः । प्रत्ययस्वरः । सीदन्तु । ' षदॢ विशरणादौ ' । ' पाघ्रा° ' ( पा. सू. ७. ३. ७८ ) इत्यादिना सीदादेशः । अस्रिधः । स्रिधेः हिंसार्थस्य शोषणार्थस्य वा संपदादिभ्यो भावे क्विपि नञा बहुव्रीहिः । पूर्वपदप्रकृतिस्वरं बाधित्वा ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् ॥

पत्नीसंयाजे त्वष्टुः पुरोनुवाक्या ' इह त्वष्टारमग्रियम् ' इति । ' शं युवाकाय संप्रेषितः ' इति खण्डे सूत्रितं—' सं ते पयांसि समु यन्तु वाजा इह त्वष्टारमग्रियम् ' ( आश्व. श्रौ. १. १० ) इति ॥

इह त्वष्टारमग्रियं विश्वरूपमुप ह्वये । अस्माकमस्तु केवलः ॥ १० ॥

इह । त्वष्टारम् । अग्रियम् । विश्वऽरूपम् । उप । ह्वये । अस्माकम् । अस्तु । केवलः ॥१०॥

Vत्वष्टारं त्वष्टृनामकमग्निम् Vइह कर्मणि Vउप Vह्वये । कीदृशम् । Vअग्रियं श्रेष्ठं Vविश्वरूपं बहुविधरूपोपेतम् । सः Vअस्माकं Vकेवलः असाधारणः Vअस्तु । इतरयजमानेभ्योऽप्यधिकमनुग्रहं करोत्वित्यर्थः ॥ त्वष्टारम् । ' तक्षू त्वक्षू तनूकरणे ' । तृन् । ' स्वरतिसूतिसूयतिधूञूदितो वा ' (पा. सू. ७. २. ४४ ) इति इडभावपक्षे ' स्कोः संयोगाद्योरन्ते च ' ( पा. सू. ८. २. २९ ) इति ककारलोपः । ष्टुत्वम् । द्वितीयैकवचने ' ऋतो ङिसर्वनामस्थानयोः ' ( पा. सू. ७. ३. ११० ) इति गुणे ' अक्तॄन् ' ( पा. सू. ६. ४. ११ ) इत्यादिना उपधाया दीर्घः । तृनो नित्त्वादाद्युदात्तत्वम् । अग्रियम् । ' अग्रात् ' ( पा. सू. ४. ४. ११६ ) इत्यनुवृत्तौ ' घच्छौ च ' ( पा. सू. ४. ४. ११७ ) इति घच् । ' आयनेयी° ' ( पा. सू. ७. १. २ ) इत्यादिना घकारस्य इयादेशः । ' यस्येति° ' ( पा. सू. ६. ४. १४८ ) इति लोपः[1] । ' आयनादिषूपदेशिवद्वचनं स्वरसिद्ध्यर्थम् ' ( पा. सू. ७. १. २. १ ) इति उपदेशिवद्भावात् प्रत्ययाद्युदात्तत्वात् घचश्चित्त्वादन्तोदात्तत्वम् । विश्वरूपम् । विश्वानि रूपाणि त्वष्टुत्पन्नत्वेन यस्य । ' त्वष्टा वै पशूनां मिथुनानां रूपकृत् ' ( तै. सं. ६. १. ८. ५ ) इति श्रुतेः । विश्वशब्दस्याद्युदात्तत्वात् पूर्वपदप्रकृतिस्वरत्वे प्राप्ते ' बहुव्रीहौ विश्वं संज्ञायाम् ' ( पा. सू. ६. २. १०६ ) इति पूर्वपदान्तोदात्तत्वम् । अस्माकम् । ' असु क्षेपणे ' । ' युष्यसिभ्यां मक्किन् ' ( उ. सू. १. १३६ ) । प्रत्ययस्वरेणान्तोदात्तः । षष्ठीबहुवचनम् आम् । अत्र परमपि ' योऽचि ' ( पा. सू. ७. २. ८९ ) इति यत्वं बाधित्वा नित्यत्वात् प्रतिपदविधित्वाच्च आँस आकमादेशे[2] (पा. सू. ७. १. ३३ ) कृते ' °अनादेशे ' ( पा. सू. ७. २. ८६ ) इति निषेधेन यत्वाभावात् ' शेषे लोपः ' ( पा. सू. ७. २. ९० ) इति दकारलोपे अकारान्तत्वेन पश्चात् प्राप्तस्यापि सुटः ( पा. सू. ७. १. ५२ ) साम इति निर्देशे स्थानिन्यन्तर्भावेन निवृत्तिः । एवमर्थ एव हि साम इति ससुट्कनिर्देशः । केवलः । वृषादेराकृतिगणत्वादाद्युदात्तः ॥

अव सृजा वनस्पते देव देवेभ्यो हविः । प्र दातुरस्तु चेतनम् ॥ ११ ॥

अव । सृज । वनस्पते । देव । देवेभ्यः । हविः । प्र । दातुः । अस्तु । चेतनम् ॥ ११ ॥

---

१. त-श–यस्येति च । इति अलोपः । २. त-फ-श–साम आकमादेशे ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे ᵛवनस्पते एतन्नामकाग्ने ᵛदेव हविर्भुग्भ्यः ᵛदेवेभ्यः अस्मदीयं ᵛहविः ᵛअव ᵛसृज समर्पय इत्यर्थः । ᵛप्र ᵛदातुः यजमानस्य ᵛचेतनं परलोकविषयं विज्ञानं त्वत्प्रसादात् ᵛअस्तु ॥ वनस्पते । आमन्त्रितनिघातः । देव । पादादित्वात् न निघातः । पाष्टिकम् आमन्त्रिताद्युदात्तत्वम् । हविः । इसः प्रत्ययस्वरः । दातुः । ददातेः तृच् । ' चितः ' इत्यन्तोदात्तः । ङसि ' ऋत उत् ' ( पा. सू. ६. १. १११ ) इति उत्वम् एकादेशो रपरत्वं च । ' रात्सस्य ' ( पा. सू. ८. २. २४ ) इति सलोपः । एकादेशस्वरेण उकार उदात्तः । चेतनम् । ' चिती संज्ञाने ' । करणे ल्युट् । योरनादेशः लघूपधगुणः । ' लिति ' ( पा. सू. ६. १. १९३ ) इति प्रत्ययात्पूर्वस्योदात्तत्वम् ॥

**स्वाहा॑ य॒ज्ञं कृ॑णोतनेन्द्रा॑य॒ यज्व॑नो गृ॒हे । तत्रं॑ दे॒वाँ उप॑ ह्वये ॥ १२ ॥**

स्वाहा॑ । य॒ज्ञम् । कृ॒णो॒त॒न॒ । इन्द्रा॑य । यज्व॑नः । गृ॒हे । तत्र॑ । दे॒वान् । उप॑ । ह्व॒ये ॥ १२ ॥

स्वाहाशब्दो हविष्प्रदानवाची सन् एतन्नामकमग्निविशेषं लक्षयति । तदग्निसंपादितं ᵛयज्ञम् ᵛइन्द्राय इन्द्रतुष्ट्यर्थं ᵛयज्वनः यजमानस्य ᵛगृहे ऋत्विजः ᵛकृणोतन कुरुत । ᵛतत्र यज्ञे ᵛदेवान् ᵛउप ᵛह्वये ॥ कृणोतन । ' कृवि हिंसाकरणयोश्च ' । इदित्त्वात् नुम् । लोण्मध्यमबहुवचनस्य 'तस्थस्थमिपाम्° ' ( पा. सू. ३. ४. १०१ ) इति तादेशः । ' तप्तनप्तनथनाश्च ' ( पा. सू. ७. १. ४५ ) इति तनबादेशः । शपि प्राप्ते ' धिन्विकृण्व्योर च ' ( पा. सू. ३. १. ८० ) इति उप्रत्ययः; तत्संनियोगेन वकारस्य च अकारः । तस्य ' अतो लोपः ' ( पा. सू. ६. ४. ४८ ) इति लोपः । तस्य ' अचः परस्मिन्° ' ( पा. सू. १. १. ५७ ) इति स्थानिवद्भावात् ऋकारस्य लघूपधगुणो न भवति । तनपः पित्त्वेन अङित्त्वात् उकारस्य गुणः । इन्द्राय । ' ऋज्रेन्द्र° ' ( उ. सू. २. १८६ ) इत्यादिना रन् । नित्त्वादाद्युदात्तः । यज्वनः । ' यज देवपूजासंगतिकरणदानेषु ' । ' सुयजोर्ङ्वनिप् ' ( पा. सू. ३. २. १०३ ) । ङसि भसंज्ञायाम् अल्लोपे प्राप्ते ' न संयोगाद्वमन्तात् ' ( पा. सू. ६. ४. १३७ ) इति निषेधः । वनिपः पित्त्वेन धातुस्वर एव शिष्यते । गृहे । ' ग्रह उपादाने ' । ' गेहे कः ' ( पा. सू. ३. १. १४४ ) इति कप्रत्ययः । ' ग्रहिज्या° ' ( पा. सू. ६. १. १६ ) इत्यादिना संप्रसारणम् । परपूर्वत्वम् । प्रत्ययस्वरः । तत्र । त्रल् । ' लिति ' ( पा. सू. ६. १. १९३ ) इति प्रत्ययात्पूर्वस्योदात्तत्वम् । ' देवाँ उप ' इत्यत्र संहितायां ' दीर्घादटि° ' ( पा. सू. ८. ३. ९ ) इति नकारस्य रुत्वम् । ' आतोऽटि नित्यम् ' ( पा. सू. ८. ३. ३ ) इति आकारस्य अनुनासिकादेशः । ' भोभगो° ' ( पा. सू. ८. ३. १७ ) इति यत्वम् । तस्य ' लोपः शाकल्यस्य ' ( पा. सू. ८. ३. १९ ) इति लोपः ॥ ॥ २५ ॥

' ऐभिरग्ने ' इत्यादिकस्य द्वादशर्चस्य तृतीयसूक्तस्य ऋषिच्छन्दसी पूर्ववत् । तच्च सूक्तं बहुदेवताकम् । अत एवानुक्रम्यते–' ऐभिर्वैश्वदेवम् ' इति । विनियोगस्तु–व्यूढद्वादशाहस्य प्रथमे छन्दोमे तृतीयसवने वैश्वदेवशस्त्रे ' ऐभिरग्ने दुवो गिरः ' इति सूक्तम् । तथा च सूत्रितम्–' अथ छन्दोमाः समुद्रादूर्मिः ' इत्युपक्रम्य ' ऐभिरग्ने दुवो गिर इति वैश्वदेवम् ' ( आश्व. श्रौ. ८. ९ ) इति ॥

**ऐभि॑रग्ने दु॒वो॒ गिरो॒ विश्वे॑भिः सोम॒पीत॑ये । दे॒वेभि॑र्याहि॒ यक्षि॑ च ॥ १ ॥**

आ । ए॒भिः॑ । अग्ने॒ । दु॒वः॑ । गिरः॑ । विश्वे॑भिः । सोम॑ऽपीतये । दे॒वेभिः॑ । या॒हि॒ । यक्षि॑ । च॒ ॥ १ ॥

हे ᵛअग्ने ᵛएभिः अस्मिन् यज्ञे संभावितैः ᵛविश्वेभिः ᵛदेवेभिः सर्वैर्देवैः सह ᵛसोमपीतये सोमपानोपेतयागार्थं ᵛदुवः अस्मदीयां परिचर्यां ᵛगिरः अस्मदीयाः स्तुतीश्च प्रति ᵛआ ᵛयाहि आगच्छ । ᵛयक्षि

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vच आगत्य यज च ॥ एभिः । पूर्वनिर्दिष्टानां देवानाम् इदमा परामर्शात् ' इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ' इति अश् अनुदात्तः । शित्त्वात् सर्वादेशः । ' नेदमदसोरकोः ' ( पा. सू. ७. १. ११ ) इति भिस ऐसादेशाभावः । विभक्तिरनुदात्तैव । न च ' ऊडिदम् ° ' इत्यादिना विभक्तेरुदात्तत्वं तत्र ' अन्तोदात्तात् ' ( पा. सू. ६. १. १६९ ) इत्यधिकारात् । दुवः । ' नञ्विषयस्यानिसन्तस्य ' ( फि. सू. २६ ) इत्याद्युदात्तत्वम् । विश्वेभिः । विश्वशब्दो विशेः क्वनन्तः नित्त्वादाद्युदात्तः । ' बहुलं छन्दसि ' ( पा. सू. ७. १. १० ) इति भिस ऐस् न भवति । ' बहुवचने झल्येत् ' ( पा. सू. ७. ३. १०३ ) इति एत्वम् । सोमपीतये । सोमशब्दः ' अर्तिस्तुसु° ' (उ. सू. १. १३७) इत्यादिना मनन्तो नित्त्वादाद्युदात्तः । सोमस्य पीतिर्यस्मिन् यागे स सोमपीतिः । तस्मै । तादर्थ्ये चतुर्थी । देवेभिः । ' बहुलं छन्दसि ' इति भिस ऐसादेशाभावः । ' बहुवचने झल्येत् ' इति एत्वम् । यक्षि । यजेर्लोटः सिप् । ' बहुलं छन्दसि ' ( पा. सू. २. ४. ७३ ) इति शपो लुक् । ग्रश्चादिना षत्वम् । ' षढोः कः सि ' ( पा. सू. ८. २. ४१ ) इति कत्वम् । सेर्हिरादेशश्छान्दसत्वात् न भवति । सिपः पित्त्वेनानुदात्तत्वात् धातुस्वर एव ॥

आ त्वा कण्वा अहूषत गृणन्ति विप्र ते धियः । देवेभिरग्न आ गहि ॥ २ ॥

आ । त्वा । कण्वाः । अहूषत । गृणन्ति । विप्र । ते । धियः । देवेभिः । अग्ने । आ । गहि ॥२॥

हे Vविप्र मेधाविन् अग्ने Vकण्वाः मेधाविन ऋत्विजः Vत्वा यज्ञनिष्पादकं त्वाम् Vआ Vअहूषत आह्वयन्ति । तथा Vते Vधियः त्वदीयानि कर्माणि Vगृणन्ति कथयन्ति । ततो हे Vअग्ने Vदेवेभिः देवैः सह Vआ Vगहि आगच्छ । ' विप्रः ' इत्यादिषु चतुर्विंशतिसंख्याकेषु मेधाविनामसु ' कण्वः ऋभुः ' (नि. ३. १५. ७ ) इति पठितम् ॥ त्वा । ' त्वामौ द्वितीयायाः ' ( पा. सू. ८. १. २३ ) इति त्वादेशः सर्वानुदात्तः । कण्वाः । कण शब्दार्थः । ' अशिप्रुषिलटिकणिखटि ' ( उ. सू. १. १४९ ) इत्यादिना क्वन् । नित्त्वादाद्युदात्तः । अहूषत । ' ह्वेञ् स्पर्धायां शब्दे च ' । ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लुङ् । झित्त्वादात्मनेपदं झेः । ' आत्मनेपदेष्वनतः ' ( पा. सू. ७. १. ५ ) इति अदादेशः । च्लेः सिच् । ' एकाचः° ' ( पा. सू. ७. २. १० ) इति इट्प्रतिषेधः । ' बहुलं छन्दसि ' इति संप्रसारणं परपूर्वत्वम् । ' हलः ' ( पा. सू. ६. ४. २ ) इति दीर्घत्वम् । ' आदेशप्रत्यययोः ' ( पा. सू. ८. ३. ५९ ) इति षत्वम् । छान्दसत्वात् ऊकारस्य न गुणः । अडागमः । गृणन्ति । ' गृ शब्दे ' । लट् । झि । ' झोऽन्तः ' । ' क्र्यादिभ्यः श्ना ' । ' प्वादीनां ह्रस्वः ' ( पा. सू. ७. ३. ८० ) इति धातोर्ह्रस्वत्वम् । ' श्नाभ्यस्तयोरातः ' ( पा. सू. ६. ४. ११२ ) इति आकारलोपः । ' ऋवर्णाच्चेति वक्तव्यम् ' ( का. ८. ४. १. १ ) इति णत्वम् । तिङः स्वर एव शिष्यते । विप्र । आमन्त्रितनिघातः । ते । ' अनुदात्तम् ' इत्यनुवृत्तौ ' तेमयावेकवचनस्य ' ( पा. सू. ८. १. २२ ) इति षष्ठ्याः ते इति आदेशः । देवेभिः । छान्दस ऐसभावः । गहि । ' गम्लृ सृप्लृ गतौ ' । लोटः सिप् । ' सेर्ह्यपिच्च ' । ' कर्तरि शप् ' । तस्य ' बहुलं छन्दसि ' इति लुक् । ' अनुदात्तोपदेश° ' ( पा. सू. ६. ४. ३७ ) इत्यादिना मकारलोपः । तस्य ' असिद्धवदत्रा भात् ' ( पा. सू. ६. ४. २२ ) इति असिद्धत्वात् ' अतो हेः ' ( पा. सू. ६. ४. १०५ ) इति हेर्लुक् न भवति ॥

---

१. त.श—झस्य.

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इन्द्रवायू बृहस्पतिं मित्राग्निं पूषणं भगम् । आदित्यान्मारुतं गणम् ॥ ३ ॥

इन्द्रवायू इति । बृहस्पतिम् । मित्रा । अग्निम् । पूषणम् । भगम् । आदित्यान् । मारुतम् । गणम् ॥ ३ ॥

इन्द्रादिदेवान् Vमारुतं मरुतां वायूनां संबन्धिनं Vगणं च हे अग्ने यक्षि इति पदद्वयमनुवर्तते ॥ इन्द्रश्च वायुश्च इन्द्रवायू । ' देवताद्वन्द्वे च ' ( पा. सू. ६. ३. २६ ) इति प्राप्तस्य आनङः ' उभयत्र वायोः प्रतिषेधो वक्तव्यः ' ( पा. सू. ६. ३. २६. १ ) इति प्रतिषेधः । ' देवताद्वन्द्वे च ' ( पा. सू. ६. २. १४१ ) इति प्राप्तस्योभयपदप्रकृतिस्वरस्य ' नोत्तरपदेऽनुदात्तादौ° ' ( पा. सू. ६. २. १४२ ) इति निषेधः । समासान्तोदात्तत्वमेव । बृहस्पतिम् । ' तद्धृतोः करपत्योश्चोरदेवतयोरभिधेययोः सुट् तलोपो वक्तव्यः ' ( पा. भ. ६. १. १५७ ) इति तलोपः सुडागमश्च । बृहच्छब्दमाद्युदात्तं केचित् वर्णयन्तीति वामनः । ' पा रक्षणे ' । पातीति पतिः । ' पातेर्डतिः ' ( उ. सू. ४. ४९७ ) । प्रत्ययस्वरेणाद्युदात्तः । समासे ' उभे वनस्पत्यादिषु युगपत् ' ( पा. सू. ६. २. १४० ) इति उभयपदप्रकृतिस्वरत्वम् । मित्रा । द्वितीयायाः ' सुपां सुलुक्° ' ( पा. सू. ७. १. ३९ ) इत्यादिना विभक्तेः आजादेशः । आदित्यान् । अदितेरपत्यानि आदित्याः । 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' ( पा. सू. ४. १. ८५ ) । प्रत्ययस्वरः । मारुतम् । मरुतां विकारः । 'अनुदात्तादेश्च ' ( पा. सू. ४. ३. १४० ) इति अञ् । जित्त्वादाद्युदात्तः ॥

प्र वो भ्रियन्त इन्दवो मत्सरा मादयिष्णवः । द्रप्सा मध्वश्चमूषदः ॥ ४ ॥

प्र । वः । भ्रियन्ते । इन्दवः । मत्सराः । मादयिष्णवः । द्रप्साः । मध्वः । चमूऽसदः ॥ ४ ॥

हे इन्द्रादिदेवाः Vवः युष्मदर्थम् Vइन्दवः सोमाः Vप्र Vभ्रियन्ते प्रकर्षेण संपाद्यन्ते । कीदृशाः । Vमत्सराः तृप्तिकराः । ' मत्सरः सोमो मन्दतेस्तृप्तिकर्मणः ' ( निरु. २. ५ ) इति यास्कः । Vमादयिष्णवः हर्षहेतवः Vद्रप्साः बिन्दुरूपाः Vमध्वः मधुराः Vचमूषदः चमूषु चमसादिपात्रेष्ववस्थिताः ॥ प्र । ' व्यवहिताश्च ' ( पा. सू. १. ४. ८२ ) इति व्यवहितप्रयोगः । भ्रियन्ते । भृञो यकि ' रिङ्शयग्लिङ्क्षु ' ( पा. सू. ७. ४. २८ ) इति रिङादेशः । हृञो वा । ' हृग्रहोर्भश्छन्दसि ' ( पा. सू. ८. २. ३२. १ ) इति हकारस्य भकारः । इन्दवः । ' उन्दी क्लेदने ' । उन्दन्ति पात्राणीति । ' नित् ' इत्यनुवृत्तौ ' उन्देरिच्चादेः ' ( उ. सू. १. १२ ) इति उप्रत्ययः आदेः इकारश्च । नित्त्वादाद्युदात्तः । मत्सराः । ' मद तृप्तियोगे ' । ' चित् ' इत्यनुवृत्तौ ' कृधूमदिभ्यः कित् ' ( उ. सू. ३. ३५३ ) इति सरप्रत्ययः । ' तितुत्रतथसिसुसरकसेषु च ' ( पा. सू. ७. २. ९ ) इति इट्प्रतिषेधः । चित्त्वादन्तोदात्तः । मादयिष्णवः । ' मदी हर्षग्लेपनयोः ' । मदेर्ण्यन्तात् ' णेश्छन्दसि ' ( पा. सू. ३. २. १३७ ) इति इष्णुच् । ' णेरनिटि ' ( पा. सू. ६. ४. ५१ ) इति णिलोपे प्राप्ते ' अयामन्ताल्वाय्येत्न्विष्णुषु ' ( पा. सू. ६. ४. ५५ ) इति अयादेशः । चित्त्वादन्तोदात्तः । मध्वः । मधुशब्द आद्युदात्त उक्तः । मधुशब्दस्य व्यत्ययेन पुंलिङ्गत्वम् । 'संज्ञापूर्वको विधिरनित्यः' इति ' जसि च ' (पा. सू. ७. ३.१०९) इति गुणो न भवति । चमूषदः । ' चमु छमु जमु झमु अदने ' । चम्यते भक्ष्यते येषु चमसेषु ते चम्वः । ' कृषिचमि° ' ( उ. सू. १. ८१ ) इत्यादिना ऊः । तत्र सीदन्तीति चमूषदः । ' सत्सूद्विष° ' (पा. सू. ३. २. ६१) इत्यादिना क्विप् । सुषामादेः आकृतिगणत्वात् षत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ईळते त्वामवस्यवः कण्वासो वृक्तबर्हिषः । हविष्मन्तो अरंकृतः ॥ ५ ॥

ईळते । त्वाम् । अवस्यवः । कण्वासः । वृक्तऽबर्हिषः । हविष्मन्तः । अरम्ऽकृतः ॥ ५ ॥

हे अग्ने Vत्वाम् Vईळतेऋत्विजः स्तुवन्ति । कीदृशाः । Vअवस्यवः । अवनं रक्षणं तद्धेतून् देवानिच्छन्तः । Vकण्वासः मेधाविनः Vवृक्तबर्हिषः आस्तरणार्थं छिन्नदर्भाः Vहविष्मन्तः हविर्युक्ताः Vअरंकृतः अलंकर्तारः ॥ ईळते । ' ईड स्तुतौ ' । अनुदात्तेत्त्वात् लटो झः । ' अदिप्रभृतिभ्यः शपः ' इति शपो लुक् । झस्य अदादेशः । टेः एत्वम् । ' तास्यनुदात्तेत् ° ' ( पा. सू. ६. १. १८६ ) इत्यादिना लसार्वधातुकस्यानुदात्तत्वात् धातुस्वर एव शिष्यते । अवस्यवः । अवन्तीत्यवा देवाः । तानतिशयेनेच्छन्ति । 'सुप आत्मनः क्यच्' । ' क्यचि च ' ( पा. सू. ७. ४. ३३ ) इति ईत्वं न भवति । ' न च्छन्दस्यपुत्रस्य ' ( पा. सू. ७. ४. ३५ ) इति निषेधात् । ' सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्यः ' ( पा. म. ७. १. ५१. २ ) इति सुक् । ' क्याच्छन्दसि ' ( पा. सू. ३. २. १७० ) इति उप्रत्ययः । अतो लोपः । प्रत्ययस्वरेणान्तोदात्तत्वम् । कण्वासः । कण शब्दार्थः । कणन्ति ध्वनन्ति स्तोत्रादिपाठेनेति कण्वा ऋत्विजः । ' अशिप्रुषि° ' ( उ. सू. १. १४९ ) इत्यादिना क्वन् । नित्वादाद्युदात्तः । ' आज्जसेरसुक् ' ( पा. सू. ७. १. ५० ) इति असुक् । वृक्तबर्हिषः । वृक्तम् उक्तम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । हविष्मन्तः । हविरेषामस्तीति हविष्मन्तः । ' तसौ मत्वर्थे ' ( पा. सू. १. ४. १९ ) इति भत्वेन अपदत्वात् न रुत्वम् । अरंकृतः । अलंकुर्वन्तीत्यरंकृतः । ' क्विप् च ' इति क्विप् । ह्रस्वस्य तुक् । ' कपिलकादीनां संज्ञाच्छन्दसोर्वा लो रत्वमापद्यते ' ( पा. म. ८. २. १८ ) इति लकारस्य रेफादेशः ॥

घृतपृष्ठा मनोयुजो ये त्वा वहन्ति वह्नयः । आ देवान्त्सोमपीतये ॥ ६ ॥

घृतऽपृष्ठाः । मनःऽयुजः । ये । त्वा । वहन्ति । वह्नयः । आ । देवान् । सोमऽपीतये ॥ ६ ॥

हे अग्ने Vत्वा त्वां Vये अश्वाः रथेन Vवहन्ति । कीदृशाः । Vघृतपृष्ठाः पुष्टाङ्गत्वेन दीप्तपृष्ठाः Vमनोयुजः मनःसंकल्पमात्रेण रथे युज्यमानाः Vवह्नयः वोढारः तैरश्वैः[1] Vसोमपीतये सोमपानहेतुयागार्थं Vदेवान् Vआ वह[2] इति शेषः ॥ घृतपृष्ठाः । ' घृ क्षरणदीप्त्योः ' । घृतं दीप्तं पृष्ठं येषां ते घृतपृष्ठाः । घृतशब्दः प्रत्ययस्वरेणान्तोदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । मनसा युज्यन्ते इति मनोयुजः । ' ऋत्विग्दधृक् ° ' ( पा. सू. ३. २. ५९ ) इत्यादिना क्विन् । कृदुत्तरपदप्रकृतिस्वरत्वम् । त्वा । 'त्वामौ द्वितीयायाः ' इत्यनुदात्तः त्वादेशः । वहन्ति । शपिडोरनुदात्तत्वात् धातुस्वरः । यद्वृत्तयोगात् निघाताभावः । वह्नयः । ' निः ' ( उ. सू. ४. ४८८ ) इत्यनुवृत्तौ ' वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् ' ( उ. सू. ४. ४९१ ) इति निप्रत्ययः । तस्य नित्त्वादाद्युदात्तत्वम् । सोमपीतये । उक्तम् । सकारे परतो नकारस्य संहितायां ' नश्च ' ( पा. सू. ८. ३. ३० ) इति धुडागमः । ' खरि च ' ( पा. सू. ८. ४. ५५ ) इति चर्त्वम् । ' चयो द्वितीयाः शरि पौष्करसादेः ' ( पा. सू. ८. ४. ४८. ३ ) इति द्वितीयस्थकारः ॥ ॥ २६ ॥

---

१. श–ते अश्वाः । २. श–आवहन्तु

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तान्यजत्राँ ऋतावृधोऽग्ने पत्नीवतस्कृधि । मध्वः सुजिह्व पायय ॥ ७ ॥

तान् । यजत्रान् । ऋतऽवृधः । अग्ने । पत्नीऽवतः । कृधि । मध्वः । सुऽजिह्व । पायय ॥७॥

हे vअग्ने vतान् इन्द्रादीन् देवान् vयजत्रान् यजनीयान् vऋतावृधः सत्यस्य यज्ञस्य वा वर्धकान् vपत्नीवतः पत्नीयुक्तान् vकृधि कुरु । हे vसुजिह्व शोभनजिह्वोपेत vमध्वः मधुरस्य सोमस्य भागं देवान् vपायय ॥ यजत्रान् । ' अमिनक्षियजिबन्धिपतिभ्योऽत्रन् ' ( उ. सू. ३. ३८५ ) इति यजेः अत्रन् प्रत्ययः । ऋतावृधः । ' वृधु वृद्धौ ' । अन्तर्भावितण्यर्थात् ' क्विप् च ' ( पा. सू. ३. २. ७६ ) इति क्विप् । ' अन्येषामपि दृश्यते ' ( पा. सू. ६. ३. १३७ ) इति पूर्वपदस्य दीर्घत्वम् । वृधेर्धातुस्वरः । समासे कृदुत्तरपदप्रकृतिस्वरत्वम् । अग्ने । पादादित्वात् नामन्त्रितनिघातः । पाष्टिकमाद्युदात्तत्वम् । पत्नीवतः । ' पत्युर्नो यज्ञसंयोगे ' ( पा. सू. ४. १. ३३ ) इति ङीप्; इकारस्य च नकारः । ता एषां सन्तीति मतुप् । ' छन्दसीरः ' ( पा. सू. ८. २. १५ ) इति वत्वम् । पतिशब्दो ऽतिप्रत्ययान्तत्वादाद्युदात्तः । ङीम्मतुपोरनुदात्तत्वात् स एव शिष्यते । कृधि । कृजो लोटः सिः । ' सेर्ह्यपिच्च ' ( पा. सू. ३. ४. ८७ ) इति हिः । ' बहुलं छन्दसि ' इति विकरणलुक् । ' श्रुशृणुपृकृवृभ्यश्छन्दसि ' ( पा. सू. ६. ४. १०२ ) इति हेर्धिरादेशः । ङित्त्वाद्गुणाभावः । मध्वः । उक्तम् । सुजिह्व । आमन्त्रितनिघातः । पायय । ' पा पाने ' । पिबन्तं प्रयुङ्क्ते इति ' हेतुमति च ' ( पा. सू. ३. १. २६ ) इति णिच् । ' शाच्छासाह्वाव्यावेपां युक् ' ( पा. सू. ७. ३. ३७ ) इति युक् । पूर्वस्यामन्त्रितस्य अविद्यमानवत्त्वम् । अत एव अव्यवधायकत्वात् मध्व इत्यपेक्ष्य ' तिङ्ङतिङः ' इति निघातः ॥

ये यजत्रा य ईड्यास्ते तं पिबन्तु जिह्वया । मधोरग्ने वषट्कृति ॥ ८ ॥

ये । यजत्राः । ये । ईड्याः । ते । ते । पिबन्तु । जिह्वया । मधोः । अग्ने । वषट्ऽकृति ॥८॥

vये देवाः vयजत्राः यष्टव्याः तथा vये देवाः vईड्याः स्तुत्याः vते सर्वेऽपि vवषट्कृति वषट्कारकाले वषट्कारयुक्ते यागे वा हे vअग्ने vते त्वदीयया vजिह्वया vमधोः मधुरस्य सोमस्य भागं vपिबन्तु ॥ यजत्राः । गतम् । ईड्याः । ' ईड स्तुतौ ' । ' ऋहलोर्ण्यत् ' । तित्स्वरिते प्राप्ते ' ईडवन्दवृशंसदुहां ण्यतः ' ( पा. सू. ६. १. २१४ ) इत्याद्युदात्तत्वम् । द्वितीयस्य तेशब्दस्य युष्मदादेशस्य सर्वानुदात्तत्वम् । मधोः । उप्रत्ययस्य नित्वादाद्युदात्तत्वमुक्तम् । अग्ने । आमन्त्रितनिघातः । वषट्कृति । करोतेः संपदादिभ्यो भावे क्विप् । वषट् इत्यस्य करणं यस्मिन् यागे इति बहुव्रीहिः । वषट् इत्यस्य निपातत्वादाद्युदात्तत्वम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

आकीं सूर्यस्य रोचनाद्विश्वान्देवाँ उषर्बुधः । विप्रो होतेह वक्षति ॥ ९ ॥

आकीम् । सूर्यस्य । रोचनात् । विश्वान् । देवान् । उषःऽबुधः । विप्रः । होता । इह । वक्षति ॥९॥

vविप्रः मेधावी vहोता होमनिष्पादकोऽग्निः vउषर्बुधः उषःकाले यागगमनाय प्रबुध्यमानान् vविश्वान् vदेवान् vसूर्यस्य संबन्धिनः vरोचनात् स्वर्गलोकात् vइह कर्मणि vआकीं vवक्षति आवहतु ॥ आकीम् । निपात आद्युदात्तः । सूर्यस्य । सूर्यशब्दो ' राजसूयसूर्य° ' ( पा. सू. ३. १. ११४ ) इत्यादिना क्यप्प्रत्ययान्तो निपातितः । क्यपः पित्त्वात् धातुस्वरेणाद्युदात्तः । रोचनात् रोचमानात् । ' रुच



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दीक्षौ '। ' अनुदात्तेतश्च हलादेः ' ( पा. सू. ३. २. १४९ ) इति कर्तरि युच्। ' चितः ' इत्यन्तोदात्तत्वम्। विश्वान्। विशेः क्वनन्तो नित्त्वादाद्युदात्तः। उषर्बुधः। उषर्बुध्यन्ते इत्युषर्बुधः। ' क्विप् च ' ( पा. सू. ३. २. ७६ ) इति क्विप्। धातुस्वरेण उकार उदात्तः। समासे कृदुत्तरपदप्रकृतिस्वरत्वम्। विप्रः। ' ऋज्रेन्द्र° ' ( उ. सू. २. १८६ ) इत्यादिना रन्। नित्त्वादाद्युदात्तः। होता। ह्वयतेस्तच्छील्ये तृन्। ' बहुलं छन्दसि ' इति संप्रसारणम्। परपूर्वत्वम्। गुणः। नित्त्वादाद्युदात्तः। इह। ' इदमो हः ' ( पा. सू. ५. ३. ११ ) इति हप्रत्ययः। ' इदम इश् ' ( पा. सू. ५. ३. ३ ) इति इश्। शित्त्वात् सर्वादेशः। प्रत्ययस्वरः। वक्षति। वहेः प्रार्थनायां लिङर्थे लेट्। तस्य तिप्। कर्तरि शप्। शपि परतः ' सिब्बहुलं लेटि ' ( पा. सू. ३. १. ३४ ) इति सिप्। ढत्वकत्वपत्वानि। ' तिङ्ङतिङः ' इति निघातः ॥

अग्निष्टोमे प्रउगशस्त्रस्य याज्या ' विश्वेभिः सोम्यं मधु ' इति। ' स्तोत्रमग्ने शस्त्रात् ' इति खण्डे सूत्रितं–' विश्वेभिः सोम्यं मध्वित्ति याज्या ' ( आश्व. श्रौ. ५. १० ) इति ॥

**विश्वेभिः सोम्यं मध्वग्न इन्द्रेण वायुना। पिबा मित्रस्य धामभिः ॥ १० ॥**

विश्वेभिः। सोम्यम्। मधु। अग्ने। इन्द्रेण। वायुना। पिब। मित्रस्य। धामऽभिः ॥१०॥

हे Vअग्ने त्वं Vविश्वेभिः सर्वैः पूषभगादिभिर्देवैः Vइन्द्रेण Vवायुना Vमित्रस्य संबन्धिभिः Vधामभिः तेजोभिर्मूर्तिविशेषरूपैश्च सह Vसोम्यं सोमसंबन्धि Vमधु मधुरं भागं Vपिब ॥ विश्वेभिः। ' बहुलं छन्दसि ' ( पा. सू. ७. १. १० ) इति भिस ऐसादेशाभावः। सोम्यम्। ' सोममर्हति यः ' ( पा. सू. ४. ४. १३७ ) इत्यनुवृत्तौ ' मये च ' ( पा. सू. ४. ४. १३८ ) इति यप्रत्ययः सोमस्य विकार इत्यर्थे। ' यस्येति च ' ( पा. सू. ६. ४. १४८ ) इति अकारलोपः। प्रत्ययस्वरः। मधु। ' फलिपाटिनमिमनि° ' ( उ. सू. १. १८ ) इत्यादिना उप्रत्ययः। ' नित् ' इत्यनुवृत्तेः नित्त्वादाद्युदात्तः। वायुना। ' कृवापाजि° ' ( उ. सू. १. १ ) इत्यादिना उण्। ' आतो युक् चिण्कृतोः ' ( पा. सू. ७. ३. ३३ ) इति युक्। प्रत्ययस्वरः। पिब। ' पा पाने '। लोटः सेर्हिरादेशः। शपि ' पाघ्रा° ' ( पा. सू. ७. ३. ७८ ) इत्यादिना पिबादेशः। ' अतो हेः ' ( पा. सू. ६. ४. १०५ ) इति हेर्लुक्। शपः पित्त्वात् धातुस्वरः। पादादित्वात् न निघातः। ' ब्यचोऽतस्तिङः ' ( पा. सू. ६. ३. १३५ ) इति संहितायां दीर्घः। धामभिः। धाञ्। ' आतो मनिन्° ' ( पा. सू. ३. २. ७४ ) इति मनिन्। नित्स्वरः॥

**त्वं होता मनुर्हितोऽग्ने यज्ञेषु सीदसि। सेमं नो अध्वरं यज ॥ ११ ॥**

त्वम्। होता। मनुःऽहितः। अग्ने। यज्ञेषु। सीदसि। सः। इमम्। नः। अध्वरम्। यज॥११॥

हे Vअग्ने Vमनुर्हितः मनुषा होत्रादिरूपेण मनुष्येण हितः संपादितः Vहोता होमनिष्पादको यः Vत्वं Vयज्ञेषु Vसीदसि तिष्ठसि Vसः त्वं Vनः अस्मदीयम् Vइमम् Vअध्वरं यज्ञं Vयज निष्पादय ॥ मनुर्हितः। मन्यते इति मनुः। ' निञ ' ( उ. सू. २. २७४ ) इत्यनुवृत्तौ ' बहुलमन्यत्रापि ' ( उ. सू. २. २७८ ) उस्। नित्स्वादाद्युदात्तः। हितः। धाञो धातोः ' निष्ठा ' इति क्तप्रत्ययः। ' दधातेर्हिः '

---

१. र–उषसि बुध्यन्ते।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

( पा. सू. ७. ४. ४२ ) इति हिरादेशः । मनुषा हितो मनुहितः । ' कर्तृकरणे कृता बहुलम् ' ( पा. सू. २. १. ३२ ) इति समासः । कृत्स्वरापवादेन ' तृतीया कर्मणि ' ( पा. सू. ६. २. ४८ ) इति पूर्वपदप्रकृतिस्वरत्वम् । सीदसि । ' षदॢ विशरणगत्यवसादनेषु ' । लटः सिप् । शपि ' पाघ्राध्मा° ' ( पा. सू. ७. ३. ७८ ) इत्यादिना सीदादेशः । निघातः । सेममित्यत्र संहितायां ' सोऽचि लोपे चेत्पादपूरणम् ' ( पा. सू. ६. १. १३४ ) इति सोर्लोपे गुणः । अध्वरम् । न विद्यते ध्वरो हिंसा यस्मिन् सोऽध्वरः । ' नञ्सुभ्याम् ' ( पा. सू. ६. २. १७२ ) इत्युत्तरपदान्तोदात्तत्वम् । ' मो अध्वरम् ' इत्यत्र संहितायाम् ' एङः पदान्तादति ' ( पा. सू. ६. १. १०९ ) इति पूर्वरूपं प्राप्तं ' प्रकृत्यान्तःपादमव्यपरे ' ( पा. सू. ६. १. ११५ ) इति प्रकृतिभावात् निवर्तते ।

युक्ष्वा ह्यरुषी रथे हरितो देव रोहितः । ताभिर्देवाँ इहा वह ॥ १२ ॥

युक्ष्व । हि । अरुषीः । रथे । हरितः । देव । रोहितः । ताभिः । देवान् । इह । आ । वह ॥१२॥

हे Vदेव अग्ने Vरोहितः रोहिच्छब्दाभिधेयास्त्वदीया वडवाः Vरथे Vयुक्ष्व योजय। हिशब्दः पादपूरणार्थः । कीदृशीः । Vअरुषीः गतिमतीः Vहरितः हर्तुं रथारूढान् पुरुषान् नेतुं समर्थाः । Vताभिः वडवाभिः Vइह अस्मिन् कर्मणि Vदेवान् Vआ Vवह ॥ युक्ष्व । ' युजिर् योगे ' । लोट् । स्वरितेत्त्वादात्मनेपदम् । ' थासः से ' । ' सवाभ्यां वामौ ' । ' रुवादिभ्यः श्नम् ' । तस्य बाहुलकात् लुक् । कुत्वषत्वे । प्रत्ययस्वरेणान्तोदात्तः । संहितायां ' ह्यचोऽतस्तिङः ' ( पा. सू. ६. ३. १३५ ) इति दीर्घः । अरुषीः । ' ऋ गतौ ' । रन्ति (?) गच्छन्तीत्यरुष्यो वडवाः । ' ऋहलिभ्यामुषन् ' (उ. सू. ४. ५१३)। धातोर्गुणो रपरत्वम् । नित्त्वादाद्युदात्तोऽरुषशब्दः । तस्मात् स्त्रियां छान्दसो ङीप् । शसि ' प्रथमयोः पूर्वसवर्णः ' ( पा. सू. ६. १. १०२ ) इति दीर्घः । रथे । रमेः औणादिकः कथन्प्रत्ययः । नित्त्वादाद्युदात्तः । हरितः । ' हसृरुहियुषिभ्य इतिः ' ( उ. सू. १. ९७ ) इति हरतेः इतिप्रत्ययः । इकारः प्रत्ययस्वरेणोदात्तः । रोहितः । रुहेरपि तेनैव सूत्रेण इतिः । इकारः प्रत्ययस्वरेणोदात्तः । ताभिः । ' सावेकाचः° ' ( पा. सू. ६. १. १६८ ) इति विभक्तेः प्राप्तमुदात्तत्वं ' °सावनर्° ' ( पा. सू. ६. १. १८२ ) इति निषिध्यते । देवान् इत्यत्र पूर्ववत् स्त्वानुनासिकौ ॥ ॥ २७ ॥

' इन्द्र सोमम् ' इत्यादिकस्य द्वादशर्चस्य चतुर्थस्य सूक्तस्य ऋषिच्छन्दसी पूर्ववत् । यद्यप्येतत्सूक्तं कृत्स्नम् ऋतुदेवताकं तथापि प्रत्यृचम् इन्द्रादिदेवतान्तराणि मिलितानि । तथा च अनुक्रम्यते—' इन्द्र सोममृतव्यं तत्रैन्द्री मारुती त्वाष्ट्र्याग्नेय्यैन्द्री मैत्रावरुणी चतस्रो द्विणोदस आश्विन्याग्नेय्यृतुदेवताः सर्वत्र ' इति । विनियोगस्तु स्मार्तो द्रष्टव्यः ॥

इन्द्र सोमं पिब ऋतुना त्वा विशन्त्विन्दवः । मत्सरासस्तदोकसः ॥ १ ॥

इन्द्र । सोमम् । पिब । ऋतुना । आ । त्वा । विशन्तु । इन्दवः । मत्सरासः । तत्ऽओकसः॥१॥

हे Vइन्द्र Vऋतुना सह Vसोमं Vपिब । Vइन्दवः पीयमानाः सोमाः Vत्वा त्वाम् Vआ Vविशन्तु । कीदृशाः । Vमत्सरासः तृप्तिकराः Vतदोकसः तन्निवासाः । सर्वदा त्वदुदरस्थायिन इत्यर्थः ॥ इन्द्र । पाष्ठिकम् आमन्त्रिताद्युदात्तत्वम् । सोमम् । ' अर्तिस्तुसु° ' ( उ. सू. १. १३७ ) इत्यादिना मन् । नित्त्वादाद्युदात्तः । पिब ' पिबा मित्रस्य ' (ऋ. सं. १. १४. १०) इत्यत्रोक्तम् । अस्य आ त्वा विशन्तु

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इत्युत्तरवाक्यगताख्यातार्थेन सह समुच्चयार्थश्चशब्दो लुप्तः । अतः ' चादिलोपे विभाषा ' ( पा. सू. ८. १. ६३ ) इतीयं प्रथमा तिङ्विभक्तिर्न निहन्यते । विशन्त्विति चलोपसाम्येऽपि द्वितीयत्वात् निहन्यते एव । संहितायाम् ' आद्गुणः ' इति प्राप्तस्य गुणस्य ' ऋत्यकः ' ( पा. सू. ६. १. १२८ ) इति शाकल्यमते प्रकृतिभावादभावः । इन्दवः । ' प्र वो भ्रियन्ते ' ( ऋ. सं. १. १४. ४ ) इत्यत्रोक्तम् । मत्सरासः । तत्रैवोक्तम् । ' आज्जसेरसुक् ' ( पा. सू. ७. १. ५० ) इति असुक् । तदोकसः । तदेव ओकः स्थानं येषां ते तथोक्ताः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

**मरुतः पिबत ऋतुना पोत्राद्यज्ञं पुनीतन । यूयं हि ष्ठा सुदानवः ॥ २ ॥**

मरुतः । पिबत । ऋतुना । पोत्रात् । यज्ञम् । पुनीतन । यूयम् । हि । स्थ । सुऽदानवः ॥ २ ॥

हे [V]मरुतः [V]ऋतुना सह [V]पोत्रात् पोतृनामकस्य ऋत्विजः पात्रात् सोमं [V]पिबत । ततोऽस्मदीयं [V]यज्ञं [V]पुनीतन शोधयत । हे[V]सुदानवः शोभनदातारो मरुतः [V]हि यस्मात् [V]यूयं [V]स्थ युष्माकं शोधयितृत्वं प्रसिद्धं तस्मात् शोधयतेत्यर्थः ॥ पिबत । अत्र तिङोऽनुपदेशात् शपः परत्वात् लसार्वधातुकानुदात्तत्वम् । धातुस्वरः । पूर्वामन्त्रितस्य अविद्यमानवत्त्वेन पदादपरत्वात् निघाताभावः । पूर्ववत् प्रकृतिभावः । पोत्रात् । पोतुः संबन्धि पात्रं पोत्रम् । ' तस्येदम् ' ( पा. सू. ४. ३. १२० ) इति अण् । ' तद्धितेष्वचामादेः ' ( पा. सू. ७. २. ११७ ) इति प्राप्ता वृद्धिः ' सर्वे विधयश्छन्दसि विकल्प्यन्ते ' (परिभा. ३५) इति न भवति । ननु एवमन्त्यस्य ऋकारस्य ' अचो ञ्णिति ' ( पा. सू. ७. २. ११५) इति वृद्धिः प्राप्नोति । त्वाष्ट्रो जागत इत्यत्र हि ' विप्रतिषेधे परं कार्यम् ' ( पा. सू. १. ४. २ ) इति परया आदिवृद्ध्यान्त्योपधालक्षणा वृद्धिर्बाध्यते इत्युक्तम् । इह तु परस्या आदिवृद्धेश्छान्दसत्वेन निवृत्तत्वात् अन्त्यवृद्धिः प्राप्नोत्येवेति । एवं तर्हि अत्रापि आदिवृद्धिः औकारः क्रियताम् । तस्य तु छान्दसः ओकारो भविष्यति । पुनीतन । ' पूञ् पवने ' । लोट् । ' लोटो लङ्वत् ' ( पा. सू. ३. ४. ८५ ) इति लङ्वद्भावात् तस्य ' तस्थस्थमिपाम्° ' ( पा. सू. ३. ४. १०१ ) इति तादेशः । ' क्र्यादिभ्यः श्ना ' । ' ई हल्यघोः ' ( पा. सू. ६. ४. ११३ ) इति ईकारः । ' तप्तनप्तनथनाश्च ' ( पा. सू. ७. १. ४५ ) इति तनादेशः । ' प्वादीनां ह्रस्वः ' ( पा. सू. ७. ३. ८० ) इति ह्रस्वः । प्रत्ययद्वयस्यापि ' सार्वधातुकमपित् ' ( पा. सू. १. २. ४ ) इति ङित्त्वात् स्वस्वपूर्वयोः इकोर्गुणाभावः । यूयम् । युष्मदः परस्य जसः ' डेप्रथमयोरम् ' ( पा. सू. ७. १. २८ ) इति अमादेशः । ' न विभक्तौ तुस्माः ' ( पा. सू. १. ३. ४ ) इति मकारस्य इत्संज्ञाप्रतिषेधः । ' यूयवयौ जसि ' ( पा. सू. ७. २. ९३ ) इति मपर्यन्तस्य यूयादेशः । ' शेषे लोपः ' । अत्र यूयादेशात् प्रागेव अन्तरङ्गत्वात् प्रातिपदिकस्यान्तोदात्तत्वम् । शेषनिघातः । ततो यूयादेशः ' स्थानेऽन्तरतमः ' ( पा. सू. १. १. ५० ) इति सर्वानुदात्तः । तत्र ' शेषे लोपः ' ( पा. सू. ७. २. ९० ) अन्त्यलोप इति पक्षे पूर्वसवर्णदीर्घत्वं बाधित्वा योऽयम् ' अमि पूर्वः ' ( पा. सू. ६. १. १०७ ) इति प्रातिपदिकान्तेनोदात्तेन सह अनुदात्तस्य सुप एकादेशः सः ' एकादेश उदात्तेनोदात्तः ' इत्युदात्तः । टिलोपपक्षे तु उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । स्थ । ' अस भुवि ' । लटो मध्यमबहुवचनं थ । ' अदिप्रभृतिभ्यः शपः ' इति शपो लुक् । ' श्नसोरल्लोपः ' इति अकारलोपः । व्यत्ययेन षत्वम् । ' हि च ' इति निषेधात् ' तिङ्ङतिङः ' इति निघातो न भवति । संहितायाम् ' अन्येषामपि दृश्यते ' इति दीर्घत्वम् । अत्र हे सुदानवो यूयं हि स्थ इति विवक्षितम् । सुदानवः । ' दाभाभ्यां नुः ' ( उ. सू. ३. ३१२ ) । सोः प्रादिसमासः । आमन्त्रितनिघातः । अत्र यूयमित्युद्दिश्य सुदानवः स्थ इति न विधीयते येन अनामन्त्रितत्वात् निघातो न स्यात् । किंतु सुदानव इति सिद्धवद्दातृत्वेन संबोध्य तेषु तेषु मारुतसूक्तेषु

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मरुतां प्रसिद्धात् प्रभावातिशयात् यूयं स्थ इति युष्मच्छब्देन प्रतिनिर्दिश्य पुनीतन इति प्रार्थने पवने तेषां हेतुत्वं हिशब्देनोच्यते ॥

**अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना । त्वं हि रत्नधा असि ॥ ३ ॥**

अभि । यज्ञम् । गृणीहि । नः । ग्नावः । नेष्टरिति । पिब । ऋतुना । त्वम् । हि । रत्नऽधाः । असि ॥३॥

ग्नाशब्दः स्त्रीवाची । तथा च यास्क आह–' मेना ग्ना इति स्त्रीणां मेना मानयन्त्येना ग्ना गच्छन्त्येनाः ' ( निरु. ३. २१ ) इति । ग्ना अस्य सन्तीति ग्नावान् । नेष्टृशब्दोऽत्र त्वष्टारं देवमाह; कस्मिंश्चित् देवसत्रे नेष्टृत्वेन त्वष्टुर्वृत्तत्वात् । हे ᵛग्नावः पत्नीयुक्त ᵛनेष्टः त्वष्टः ᵛनः अस्मदीयं ᵛयज्ञम् ᵛअभि ᵛगृणीहि अभितो देवानां समीपे स्तुहि । ᵛऋतुना सह त्वं सोमं ᵛपिब । ᵛहि यस्मात् ᵛत्वं ᵛरत्नधाः ᵛअसि रत्नानां दातासि दाता भवसि तस्मात् सोमं पातुमर्हसीत्यर्थः ॥ अभि । ' उपसर्गाश्चाभिवर्जम् ' ( फि. सू. ८१ ) इति पर्युदासात् अभेः अन्तोदात्तत्वम् । गृणीहि । ' गृ शब्दे ' । लोटि सिपो हिः । ' क्र्यादिभ्यः श्ना ' । हेर्ङित्त्वात् ' ई हल्यघोः ' इति ईत्वम् । श्नाप्रत्ययस्य ङित्त्वाद्गुणाभावः । 'प्वादीनां ह्रस्वः' । ' तिङ्ङतिङः ' इति निघातः । ग्ना अस्य सन्तीति मतुप् । व्यत्ययेन वत्वम् । संबुद्धौ ' मतुवसो रुः ' इति रुत्वम् । विसर्गः । पादादित्वेन आमन्त्रितनिघाताभावात् षाष्ठिकम् आमन्त्रिताद्युदात्तत्वम् । ग्नाव इत्यस्य विशेषणतया विशेषवचनत्वात् ' नामन्त्रिते समानाधिकरणे° ' इति निषेधाभावात् अविद्यमानवत्त्वेन उत्तरस्य नेष्टृशब्दस्य षाष्ठिकमाद्युदात्तत्वम् । पिब । शपः पित्त्वात् धातुस्वरः । पूर्वयोरामन्त्रितयोरविद्यमानवत्त्वेन निघाताभावः । रत्नानि दधातीति रत्नधाः । ' क्विप् च ' इति क्विप् । धातुस्वरः । समासे कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । असि । सिपः पित्त्वात् धातुस्वरः । ' तिङ्ङतिङः ' इति निघातो न भवति ' हि च ' इति प्रतिषेधात् ॥

**अग्ने देवाँ इहा वह सादया योनिषु त्रिषु । परि भूष पिब ऋतुना ॥ ४ ॥**

अग्ने । देवान् । इह । आ । वह । सादय । योनिषु । त्रिषु । परि । भूष । पिब । ऋतुना ॥४॥

हे ᵛअग्ने ᵛदेवान् ᵛइह अस्मिन् कर्मणि ᵛआ ᵛवह । ततः ᵛयोनिषु स्थानेषु ᵛत्रिषु सवनेषु ᵛसादय देवानुपवेशय । ततस्तान् ᵛपरि ᵛभूष अलंकुरु । ᵛऋतुना सह त्वं सोमं ᵛपिब ॥ ' अग्ने देवान् ' इत्ययं पादो गतः । योनिषु । ' यु मिश्रणे ' । ' वहिश्रि° ' ( उ. सू. ४. ४९१ ) इत्यादिना निप्रत्ययः । नित्त्वादाद्युदात्तः । त्रिषु । ' षट्त्रिचतुर्भ्यो हलादिः ' ( पा. सू. ६. १. १७९ ) इति विभक्तेरुदात्तत्वम् । ' भूष अलंकारे ' । ' तिङ्ङतिङः ' इति निघातः । पिब ऋतुना । गतौ ॥

**ब्राह्मणादिन्द्र राधसः पिबा सोममृतूँरनु । तवेद्धि सख्यमस्तृतम् ॥ ५ ॥**

ब्राह्मणात् । इन्द्र । राधसः । पिब । सोमम् । ऋतून् । अनु ।
तव । इत् । हि । सख्यम् । अस्तृतम् ॥ ५ ॥

हे ᵛइन्द्र ᵛब्राह्मणात् ब्राह्मणाच्छंसिसंबद्धात् ᵛराधसः धनभूतात् पात्रात् ᵛसोमं ᵛपिब । किं कृत्वा । ᵛऋतूननु ऋतुदेवाननुसृत्य । ऋतवोऽपि पिबन्त्विवत्यर्थः । ᵛहि यस्मात् ᵛतवेत् तव

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]सख्यम् [V]अस्तृतम् ऋतूनामविच्छिन्नं तस्मात् ऋतुभिः सह पानं युक्तम् ॥ ब्राह्मणात् । ब्रह्मशब्देनात्र ब्रह्मवर्गे द्वितीयो ब्राह्मणाच्छंसी कथ्यते । स च पुंलिङ्गे शेषनिवातेन अनुदात्तादिः । तस्य संबन्ध्युत्तरश्चमसः । स च तस्यैव अवयववत् नियत इत्यवयवविवक्षायाम् ' अनुदात्तादेरञ् ' ( पा. सू. ४. २. ४४ ) । तेन जित्वादाद्युदात्तः चमसपरोऽत्र ब्राह्मणशब्दः । राधसः । ' सर्वधातुभ्योऽसुन् ' । नित्वादाद्युदात्तः । पिब । पादादित्वादाद्युदात्तत्वम् । ' व्यचोऽतस्तिङः ' इति दीर्घत्वम् । ऋतूँरनु इत्यत्र ' दीर्घादटि समानपादे ' इति नकारस्य रुत्वम् । ' अत्रानुनासिकः पूर्वस्य तु वा ' ( पा. सू. ८. ३. २ ) इति ऊकारस्य अनुनासिकत्वम् । तव । ' युष्मदस्मद्भ्यां ङसोऽश् ' (पा. सू. ७. १. २७) । शित्वात् सर्वादेशः । ' तवममौ ङसि ' इति तवादेशः । ' युष्मदस्मदोर्ङसि ' इत्याद्युदात्तत्वम् । सख्यम् । सख्युः कर्म सख्यम् । ' सख्युर्यः ' । ' यस्य° ' इति लोपः[1] । प्रत्ययस्वरः । अस्तृतम् । स्तृणातेः[2] हिंसार्थस्य क्तः । नञ्समासः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

**युवं दक्षं धृतव्रत मित्रावरुण दूळभम् । ऋतुना यज्ञमाशाथे ॥ ६ ॥**

युवम् । दक्षम् । धृतऽव्रता । मित्रावरुणा । दुःऽदभम् ।

ऋतुना । यज्ञम् । आशाथे इति ॥ ६ ॥

हे [V]धृतव्रता स्वीकृतकर्माणौ [V]मित्रावरुणा हे मित्रनामकवरुणनामकौ देवौ [V]युवम् उभौ युवाम् [V]ऋतुना सहास्मदीयं [V]यज्ञम् [V]आशाथे व्याप्नुथः। कीदृशं यज्ञम् । [V]दक्षं प्रवृद्धं [V]दूळभं दुर्दहं शत्रुभिर्दग्धुं विनाशयितुमशक्यमित्यर्थः ॥ युवम् । प्रथमाद्विवचनस्य ' डेप्रथमयोरम् ' ( पा. सू. ७. १. २८) इति अमादेशः । ' युवावौ द्विवचने ' (पा. सू. ७. २. ९२) इति सपर्यन्तस्य युवादेशः । ' शेषे लोपः ' इति टिलोपः अन्त्यलोपो वा । अमि पूर्वत्वम् । भाषायामेव हि आत्वम् । टिलोपपक्षे उदात्तनिवृत्तिस्वरेण अम उदात्तत्वम् । अन्त्यलोपपक्षे एकादेश उदात्तः[3] । दक्षम् । 'दक्ष वृद्धौ' । दक्षन्त्यनेनेति करणे घञ् । एवं हि पुंलिङ्गत्वनियमः अन्यस्यानियम इति नपुंसकत्वम् । धृतव्रता मित्रावरुणा । धृतानि व्रतानि याभ्यां तौ धृतव्रतौ । मित्रश्च वरुणश्च मित्रावरुणौ । उभयत्र 'सुपां सुलुक्°' इत्यादिना विभक्तेः आकारः। मित्रशब्दस्य ' देवताद्वन्द्वे च ' इति आनङादेशः । प्रथमस्य आमन्त्रितनिघातः । द्वितीयस्य पादादित्वादाद्युदात्तत्वम् । संहितायां छान्दसं ह्रस्वत्वम् । दूळभम् । ' दह भस्मीकरणे ' । दुःखेन दह्यते इति दुर्दहम् । ' ईषद्दुः-सुषु° ' ( पा. सू. ३. ३. १२६ ) इत्यादिना दुर्युपपदे दहेः खल् । 'व्यत्ययो बहुलम्' इति उकारस्य ऊकारो रेफस्य लोपो दकारस्य डकारो हकारस्य च भकारः । ' लिति ' इति प्रत्ययात्पूर्वमुदात्तत्वम् । कृदुत्तरपदत्वेन स एव शिष्यते । आशाथे । ' अशू व्याप्तौ ' । ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लिट् । मध्यमद्विवचनम् आथाम् । टेः एत्वम् । ' अत आदेः ' ( पा. सू. ७. ४. ७० ) इत्यभ्यासस्य दीर्घः । ' अश्नोतेश्च ' ( पा. सू. ७. ४. ७२ ) इति प्राप्तो नुडागमः ' अनित्यमागमशासनम् ' इति निवर्तते ॥ ॥ २८ ॥

**द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे । यज्ञेषु देवमीळते ॥ ७ ॥**

द्रविणःऽदाः । द्रविणसः । ग्रावऽहस्तासः । अध्वरे । यज्ञेषु । देवम् । ईळते ॥ ७ ॥

---

१. श–इकारलोपः । २. त-फ–स्तृणोतेः । ३. श–उदात्त इत्युदात्तत्वम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vअध्वरे अग्निष्टोमे प्रकृतिरूपे vयज्ञेषु विकृतिरूपेषु उक्थ्यादिषु च vदेवम् अग्निम् vईळते ऋत्विजः स्तुवन्ति । कीदृशा ऋत्विजः । vद्रविणसः धनार्थिनः vआवहस्तासः अभिषवसाधनपाषाणधारिणः । कीदृशं देवम् । vद्रविणोदाः धनप्रदम् । यद्वा । धनप्रदोऽग्निः सोमं पिबत्विति शेषः । तमेतं मन्त्रं यास्क एवं निर्वक्ति—'द्रविणोदाः कस्माद्धनं द्रविणमुच्यते यदेनदभिद्रवन्ति बलं वा द्रविणं यदेनेनाभिद्रवन्ति तस्य दाता द्रविणोदास्तस्यैषा भवति । द्रविणोदा द्रविणसः ' ( निरु. ८. १२ ) इत्यादि । सोऽयं यास्कोक्तो निर्वचनप्रपञ्चः तस्मिन्नेव ग्रन्थेऽवगन्तव्यः ॥ द्रविणोदाः । ' दुदक्षिभ्यामिनन् ' ( उ. सू. २. २०८ ) । नित्त्वादाद्युदात्तो द्रविणशब्दः । तद्दातीति द्रविणोदाः । ' क्विप् च ' इति क्विप् । पूर्वपदस्य सकारोपजनश्छान्दसः । रुत्वोत्वे । कृदुत्तरपदप्रकृतिस्वरत्वम् । देवविशेषणत्वेन एकवाक्यतापक्षे द्वितीयायाः स्वादेशः । अथवा द्रविणमात्मन इच्छन्ति द्रविणस्यन्ति । ' सुप आत्मनः क्यच् ' । ' सर्वप्रातिपदिकेभ्यो लालसायां सुग्वक्तव्यः ' ( पा. म. ७. १. ५१. २ ) इति क्यचि परतः सुगागमः । द्रविणस्यतेः संपदादित्वात् भावे क्विप् । 'अतो लोपः' । ' कौ लुप्तं न स्थानिवद्भवति ' (पा. म. १. १. ५८. २) इति तस्य स्थानिवत्त्वप्रतिषेधात् यलोपः । एवं द्रविणस्शब्दो धनेच्छावचनः । द्रविणेच्छां दस्यति यथेष्टधनप्रदानेन उपक्षपयतीत्यर्थे ' दसु उपक्षये ' इत्यस्मात् अन्तर्भावितण्यर्थात् ' क्विप् च ' इति क्विप् । एवं द्रविणोदःशब्दः सकारान्तो भवति । तथा ' द्रविणोदसाः प्रवादा भवन्ति' (निरु. ८. २) इति नैरुक्तो व्यवहार उपपद्यते । अतो द्रविणोदस्शब्दो भिन्नवाक्यत्वे स्वार्थे प्रथमा; एकवाक्यत्वे तु व्यत्ययेन द्वितीयार्थो भवति । द्रविणस इत्यत्रापि वाक्यभेदपक्षे द्रविणसः सोमस्य इत्यर्थे सकारोपजनश्छान्दसः । आद्युदात्तत्वं तु नियमेन स्थितम् । ऋत्विग्विशेषणत्वेन एकवाक्यत्वपक्षे तु क्यजन्तात् क्विप् । अतो लोपादि पूर्ववत् । अत्र तु पक्षे क्यचः चित्त्वेन अन्तोदात्तत्वे प्राप्ते व्यत्ययेनाद्युदात्तत्वम् । आवयुक्ता हस्ता येषां ते आवहस्तासः । ' आज्ञसेरसुक् ' । आवशब्दो वृषादित्वादाद्युदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । अध्वरे । न विद्यते ध्वरो हिंसा यस्मिन् । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । ईळते । अनुदात्तेत्त्वात् आत्मनेपदम् । ' अदिप्रभृतिभ्यः° ' इति शपो लुक् । झस्य अदादेशः ॥

द्रविणोदा ददातु नो वसूनि यानि शृण्विरे । देवेषु ता वनामहे ॥ ८ ॥

द्रविणःऽदाः । ददातु । नः । वसूनि । यानि । शृण्विरे । देवेषु । ता । वनामहे ॥ ८ ॥

vद्रविणोदाः देवः vनः अस्मभ्यं vवसूनि धनानि vददातु vयानि धनानि vशृण्विरे हविरुपयुक्तत्वेन श्रूयन्ते । vता तानि च सर्वाणि धनानि vदेवेषु निमित्तभूतेषु vवनामहे संभजामः । धनैर्देवान् यष्टुं तानि स्वीकुर्म इत्यर्थः ॥ द्रविणोदाः । गतम् । वसूनि । ' शृस्वृस्निहि° ' ( उ. सू. १. १० ) इत्यादिना उप्रत्ययः । ' नित् ' इत्यनुवृत्तेः आद्युदात्तः । शृण्विरे । ' श्रु श्रवणे ' । ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लिट् । झ इरेच् ( पा. सू. ३. ४. ८१ ) । ' छन्दस्युभयथा ' इति सार्वधातुकत्वे व्यत्ययेन श्नुः; तत्संनियोगेन श्रभावश्च । उवङि प्राप्ते ' हुश्नुवोः सार्वधातुके ' ( पा. सू. ६. ४. ८७ ) इति यणादेशः । ' चितः ' इत्यन्तोदात्तत्वम् । ' यद्वृत्तान्नित्यम् ' इति निघातप्रतिषेधः । ता । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । ' नलोपः प्रातिपदिकान्तस्य ' ( पा. सू. ८. २. ७ ) इति नलोपः । वनामहे । ' वन षण संभक्तौ ' । व्यत्ययेनात्मनेपदम् ॥

द्रविणोदाः पिपीषति जुहोत प्र च तिष्ठत । नेष्टादृतुभिरिष्यत ॥ ९ ॥

द्रविणःऽदाः । पिपीषति । जुहोत । प्र । च । तिष्ठत । नेष्टात् । ऋतुऽभिः । इष्यत ॥ ९ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vद्रविणोदाः देवः Vऋतुभिः सह Vनेष्टात् नेष्टृसंबन्धिपात्रात् Vपिपीषति सोमं पातुमिच्छति । ततो हे ऋत्विजः Vइष्यत होमस्थाने गच्छत। गत्वा च Vजुहोत होमं कुरुत। हुत्वा Vप्र Vतिष्ठत Vच होमस्थानात् स्थानान्तरं प्रति प्रस्थानमपि कुरुत ॥ द्रविणोदाः । गतम् । पिपीषति । ' पा पाने ' । पातुमिच्छतीति सन् । छान्दस ईकारः । 'तिङ्ङतिङः' इति निघातः । जुहोत । लोण्मध्यमबहुवचनम् । तस्य लङ्वद्भावात् तादेशः । तस्य ' तप्तनप्तनथनाश्च ' इति तबादेशः । तस्य पित्त्वादुणः । ' अभ्यस्तानामादिः ' इत्यनुवृत्तौ ' अनुदात्ते च ' ( पा. सू. ६. १. १९० ) इत्याद्युदात्तत्वे प्राप्ते ' भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति ' ( पा. सू. ६. १. १९२ ) इति ओकार उदात्तः । तिष्ठत । ' ष्ठा गतिनिवृत्तौ ' । लोण्मध्यमबहुवचनस्य थस्य लङ्वद्भावात् तादेशः । शपि ' पाघ्राध्मा ° ' इत्यादिना तिष्ठादेशः । ' समवप्रविभ्यः स्थः ' ( पा. सू. १. ३. २२ ) इत्यात्मनेपदं न भवति; तत्रानुवृत्तस्य निर्दिष्टग्रहणस्य आनन्तर्यार्थत्वात् अत्र चशब्देन व्यवधानात् । ' ते प्राग्धातोः ' (पा. सू. १. ४. ८० ) इत्युपसर्गत्वेन प्राक्प्रयोक्तव्यस्यापि प्रशब्दस्य ' व्यवहिताश्च ' ( पा. सू. १. ४. ८२. ) इति छन्दसि व्यवहितप्रयोगः । अत्र चशब्दो जुहोत इति पूर्वेण सह समुच्चयार्थः, न पुनः इष्यत इत्युत्तरेण । तेन अप्रथमत्वात् ' चवायोगे प्रथमा ' ( पा. सू. ८. १. ५९ ) इति निषेधाभावात् ' तिङ्ङतिङः ' इति निघातः । नेष्टात् । ' पोत्राद्यङ्गं पुनीतन ' ( ऋ. सं. १. १५. २ ) इत्यत्र पोत्रशब्दे यदुक्तं तदत्र द्रष्टव्यम् । इष्यत । ' इष गतौ ' । लोण्मध्यमबहुवचनम् ॥

यत्त्वा तुरीयमृतुभिर्द्रविणोदो यजामहे । अध स्मा नो ददिर्भव ॥ १० ॥

यत् । त्वा । तुरीयम् । ऋतुऽभिः । द्रविणःऽदः । यजामहे । अध । स्म । नः । ददिः । भव ॥१०॥

हे Vद्रविणोदः देव Vयत् यस्मात् कारणात् Vऋतुभिः सह Vत्वां Vयजामहे । अध इत्ययं निपातस्तच्छब्दार्थः । तस्मात् कारणात् Vनः अस्मभ्यं Vददिः धनस्य दाता Vभव Vस्म अवश्यं भव । Vतुरीयं चतुर्णां पूरणम् ॥ तुरीयम् । ' चतुरश्छयतावाद्यक्षरलोपश्च ' ( पा. सू. ५. २. ५१. १ ) इति छप्रत्ययः । तस्य प्रत्ययस्वरेणोदात्तात् प्रागेव ' आयनेयी° ' ( पा. सू. ७. १. २ ) इत्यादिना ईयादेशः । ' आयनादिवूपदेशिवद्वचनं स्वरसिद्ध्यर्थम् ' ( पा. सू. ७. १. २. १ ) इति वचनात् कृते आदेशे प्रत्ययस्वरेण इकार उदात्तः । द्रविणोदः । उक्तम् । पादादित्वात् आमन्त्रिताद्युदात्तत्वम् । यजामहे । अत्र शपः पित्त्वेन तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव । पूर्वस्य आमन्त्रितस्य अविद्यमानवत्त्वात् यद्वृत्तयोगाद्वा न निघातः । व्यवहितयोगेऽपि स निषेध इत्युक्तम् । अध । छान्दसो धकारः । स्म । चादिरनुदात्तः । संहितायां ' निपातस्य च ' ( पा. सू. ६. ३. १३६ ) इति दीर्घः । ददिः । ' डुदाञ् दाने ' । 'आदृगमहनजनः किकिनौ लिट् च ' ( पा. सू. ३. २. १७१ ) इति किप्रत्ययः । लिद्वद्भावात् द्विर्वचनादि । ' आतो लोप इटि च ' ( पा. सू. ६. ४. ६४ ) इति आकारलोपः । प्रत्ययस्वरः ॥

अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता । ऋतुना यज्ञवाहसा ॥११ ॥

अश्विना । पिबतम् । मधु । दीद्यग्नी इति दीदिऽअग्नी । शुचिऽव्रता ।

ऋतुना । यज्ञऽवाहसा ॥ ११ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे अश्विनौ [v]मधु माधुर्योपेतं सोमं [v]पिबतम्। कीदृशौ। [v]दीद्यग्नी द्योतमानाहवनीयाद्यग्नियुक्तौ [v]शुचिव्रता शुद्धकर्माणौ [v]ऋतुना ऋतुदेवतया सह [v]यज्ञवाहसा यज्ञस्य निर्वाहकौ॥ अश्विना। संबोधनद्विवचनस्य ' सुपां सुलुक्° ' इति आकारः। आमन्त्रताद्युदात्तः। पिबतम्। शपः पित्त्वादनुदात्तत्वम्। तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते। मधु। ' फलिपाटि° ' ( उ. सू. १. १८ ) इत्यादिना उप्रत्ययः। ' नित् ' इत्यनुवृत्तेः नित्त्वादाद्युदात्तः। दीद्यग्नी। ' दिवु क्रीडादौ '। ' अन्येभ्योऽपि दृश्यन्ते ' ( पा. सू. ३. २. ७५ ) इति विच्। वेरपृक्तलोपात् वलि लोपो बलीयानिति प्रथमवकारस्य लोपः ( पा. सू. ६. १. ६६-६७ )। प्रथमं प्रत्ययलोपे हि ' वर्णाश्रयविधौ प्रत्ययलक्षणं नास्ति ' ( परिभा. २१ ) इति निषेधात् वलि लोपो न स्यात्। छान्दसं द्विर्वचनम्। तुजादित्वात् अभ्यासस्य दीर्घत्वम्। यङ्लुगन्ताद्वा ' संज्ञापूर्वको विधिरनित्यः ' (परिभा. ९३. १.) इत्यभ्यासस्य गुणाभावः। दीदिरग्निर्ययोस्तौ दीद्यग्नी। आमन्त्रताद्युदात्तत्वम्। पादादित्वात् न निघातः। शुचिव्रता। शुचि व्रतं ययोस्तौ। ' सुपां सुलुक्° ' इति आकारः। दीद्यग्निशब्दस्य सामान्यवचनत्वेन ' नामन्त्रिते° ' इति अविद्यमानवत्त्वप्रतिषेधात् आष्टमिकनिघातत्वम्। पूर्वस्य पराङ्गवद्भावाद्वा ऐकस्वर्यम्। यज्ञवाहसा। ' वह प्रापणे '। यज्ञं वहतः इति यज्ञवाहसौ। ' वहिहाधाभ्यश्छन्दसि ' ( उ. सू. ४. ६६० ) इति असुन्। तत्र हि ' गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च ' ( उ. सू. ४. ६६६ ) इति वचनात् सोपपदानामपि भवति इत्युक्तम्। ' णित् ' इत्यनुवृत्तेः उपधावृद्धिः। ' सुपां सुलुक्° ' इत्यादिना विभक्तेः आकारः। आमन्त्रतनिघातः। असामर्थ्यात् पूर्वस्य न पराङ्गवद्भावः॥

**गार्हपत्येन सन्त्य ऋतुना यज्ञनीरसि। देवान्देवयते यज॥ १२॥**

गार्हऽपत्येन। सन्त्य। ऋतुना। यज्ञऽनीः। असि। देवान्। देवऽयते। यज॥ १२॥

हे [v]सन्त्य फलप्रदाग्निदेव [v]गार्हपत्येन गृहपतिसंबन्धिना रूपेण युक्तः सन् [v]ऋतुना ऋतुदेवेन सह [v]यज्ञनीः यज्ञस्य निर्वाहकः [v]असि। तस्मात् त्वं [v]देवयते देवविषयकामनायुक्ताय यजमानाय [v]देवान् [v]यज॥ गार्हपत्येन। ' गृहपतिना संयुक्ते ञ्यः ' (पा. सू. ४. ४. ९०)। ' यस्य° ' इति लोपः। ञित्वात् आदिवृद्धिः आद्युदात्तत्वं च। गृहपतित्वमित्यर्थे ' पत्यन्तपुरोहितादिभ्यः° ' ( पा. सू. ५. १. १२८ ) इति यकि तु अन्तोदात्तत्वं स्यात्। सन्त्य सनने भव। ' षणु दाने '। ' क्तिच्क्तौ च° ' इति क्तिच्। ' न क्तिचि दीर्घश्च ' ( पा. सू. ६. ४. ३९ ) इति दीर्घनलोपाभावः। ' भवे छन्दसि ' ( पा. सू. ४ ४. ११० ) इति यत्; ' तत्र साधुः ' ( पा. सू. ४. ४. ९८ ) इति वा। निघातः। यज्ञं नयतीति यज्ञनीः। ' सत्सूद्विष° ' इत्यादिना क्विप्। कृदुत्तरपदप्रकृतिस्वरः। देवयते। देवानात्मन इच्छतीति देवयन्। तस्मै। ' क्यचि च ' इति ईत्वं न भवति ' न च्छन्दस्यपुत्रस्य ' इति निषेधात्। ' अश्वाघस्य° ' ( पा. सू. ७. ४. ३७ ) इति आत्वविधानात् ईत्वनिषेधे प्राप्तस्य दीर्घस्याप्येष निषेध इत्युक्तम्। ' शतुरनुमो नद्यजादी ' इति विभक्तेरुदात्तत्वम्। अत्र क्यचश्चित्त्वादन्तोदात्तत्वम्। शपः पित्त्वादनुदात्तत्वम्। शतुश्च लसार्वधातुकस्वरेण उभयोः क्यचा सह एकादेशे ' एकादेश उदात्तेनोदात्तः ' इत्युदात्तः। तस्मादन्तोदात्तत्वात् परस्या विभक्तेः ' शतुरनुमो नद्यजादी ' इत्युदात्तत्वम्॥ ॥ २९॥

' आ त्वा वहन्तु ' इति पञ्चमं नवर्चं सूक्तम्। ऋषिच्छन्दसी पूर्ववदनुवर्तेते। विशेषादेशाभावात् इन्द्रो देवता। विनियोगस्तु—प्रातःसवने मैत्रावरुणस्योन्नीयमाने सूक्तम् ' आ त्वा वहन्तु हरयः ' इति।

---

१. र—' देवता ' इत्यस्यानन्तरं ' तथा च अनुक्रान्तं आ त्वा नवेति ' इत्यधिकम्।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तथा च 'द्विदेवत्यैश्चरन्ति' इति खण्डे सूत्रितम्–'उन्नीयमानेभ्योऽन्वाहा त्वा वहन्तु' (आश्व. श्रौ. ५. ५) इति। तथा षोडशिशस्त्रे 'आ त्वा वहन्तु हरयः' इति तिस्रः। तथा सूत्रितम् 'अथ षोडशी' इति खण्डे–'आ त्वा वहन्तु हरय इति तिस्रो गायत्र्यः' (आश्व. श्रौ. ६. २) इति॥

**आ त्वा वहन्तु हरयो वृषणं सोमपीतये। इन्द्र त्वा सूरचक्षसः॥ १॥**

आ। त्वा। वहन्तु। हरयः। वृषणम्। सोमऽपीतये। इन्द्र। त्वा। सूरऽचक्षसः॥ १॥

हे vइन्द्र vवृषणं कामानां वर्षितारं त्वां vसोमपीतये सोमपानार्थं vहरयः त्वदीया अश्वाः vआ vवहन्तु अस्मिन् कर्मण्यानयन्तु। तथा vसूरचक्षसः सूर्यसमानप्रकाशयुक्ता ऋत्विजस्त्वां मन्त्रैः प्रकाशयन्त्विति शेषः॥ हरन्तीति हरयः। 'इन् सर्वधातुभ्यः' (उ. सू. ४. ५५७) इति इन्। नित्त्वादाद्युदात्तः। वृषणम्। 'कनिन्युवृषितक्षि°' (उ. सू. १. १५४) इत्यादिना कनिन्। कित्त्वात् लघूपधगुणाभावः। 'वा षपूर्वस्य निगमे' (पा. सू. ६. ४. ९) इति विकल्पितसुपधादीर्घत्वम्। सोमपीतये। 'ऐभिरग्ने' (ऋ. सं. १. १४. १) इत्यत्रोक्तम्। सूरचक्षसः। 'चक्षिङ् व्यक्तायां वाचि'। 'सर्वधातुभ्योऽसुन्'। 'चक्षिङः ख्याञ्' (पा. सू. २. ४. ५४) इति न भवति 'अनसोः प्रतिषेधो वक्तव्यः' (पा. सू. २. ४. ५४. १०) इति निषेधात्। 'षू प्रेरणे'। सुवतीति सूरः। 'सुसूधागृधिभ्यः क्रन्' (उ. सू. २. १८२) इति क्रन्। कित्त्वाद्गुणाभावः। नित्त्वादाद्युदात्तः। सूरवत् ख्यानं प्रकाशो येषाम्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्॥

**इमा धाना घृतस्नुवो हरी इहोप वक्षतः। इन्द्रं सुखतमे रथे॥ २॥**

इमाः। धानाः। घृतऽस्नुवः। हरी इति। इह। उप। वक्षतः। इन्द्रम्। सुखऽतमे। रथे॥२॥

हरिशब्द इन्द्ररथस्य वोढारौ अश्वौ आचष्टे। तथा च श्रुत्यन्तरं–'हर्योः स्थाता' इति, 'हरिभ्यां त्वेन्द्रो देवतां गमयतु' (तै. सं. १. ४. २८. १; १. ६. ४. ३.) इति च। एतदेवाभिप्रेत्य निघण्टुकार आह–'हरी इन्द्रस्य' (नि. १. १५.१) इति। तादृशौ vहरी vइमाः यागार्थं वेद्याम् आसादितत्वेन पुरोवर्तिनीः vधानाः भ्रष्ट्यवतण्डुलानुद्दिश्य vसुखतमे vरथे vइन्द्रम् अवस्थाप्य vइह अस्मिन् कर्मणि vउप vवक्षतः वेदिसमीपे वहताम्। कीदृशीर्धानाः vघृतस्नुवः अलंकरणोपस्तरणाभिघारणेन घृतस्राविणीः॥ धीयन्ते इति धानाः। 'धापृवस्यजतिभ्यो नः' (उ. सू. ३. २८६) इति नः। प्रत्ययस्वरः। घृतस्नुवः। घृतं स्नुवन्तीति घृतस्नुवः। क्विपि तुगभावश्छान्दसः। धातुस्वरः। समासे कृदुत्तरपदप्रकृतिस्वरत्वम्। स्नोः संयोगपूर्वत्वेन यणभावात् उवङादेशः। हरी। 'हृञ् हरणे'। 'सर्वधातुभ्य इन्'। नित्त्वादाद्युदात्तः। प्रगृह्यत्वात् संहितायां प्रकृतिभावः। वक्षतः। प्रार्थनाख्ये लिङर्थे लेट्। तस्य प्रथमपुरुषद्विवचनं तस्। 'लेटोऽडाटौ' (पा. सू. ३. ४.९४) इति अडागमः। शपि प्राप्ते 'सिब्बहुलं लेटि' (पा. सू. ३. १. ३४) इति सिप्। ढ्रवकस्वषत्वानि। 'तिङ्ङतिङः' इति निघातः। सुखतमे। गतम्॥

**इन्द्रं प्रातर्हवामहे इन्द्रं प्रयत्यध्वरे। इन्द्रं सोमस्य पीतये॥ ३॥**

इन्द्रम्। प्रातः। हवामहे। इन्द्रम्। प्रऽयति। अध्वरे। इन्द्रम्। सोमस्य। पीतये॥३॥

---

१. ग-ण-र– भृष्ट°। २. च-छ-फ–प्रार्थनायाम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]प्रातः कर्मारम्भे प्रातःसवने [v]इन्द्रं [v]हवामहे आह्वयामः । तथैव [v]अध्वरे सोमयागे [v]प्रयति प्रगच्छति प्रारभ्ये वर्तमाने सति माध्यंदिने सवने तम् [v]इन्द्रं हवामहे । तथा यज्ञसमाह्यवसरे तृतीयसवने [v]सोमस्य [v]पीतये सोमपानार्थं हवामहे ॥ प्रातः । स्वरादिषु अन्तोदात्तो निपातितः । हवामहे । ह्वेञो लटि शपि परतो ' ह्वः संप्रसारणम् ' इत्यनुवृत्तौ ' बहुलं छन्दसि ' इति संप्रसारणं परपूर्वत्वं गुणावादेशौ । प्रयति । ' इण् गतौ ' । लटः शतृ । ' अदिप्रभृतिभ्यः शपः ' इति शपो लुक् । शतुर्ङित्त्वादुणाभावः । प्रादिसमासः । ' कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम् ' ( परिभा. २८ ) इति वचनात् ' प्रत्ययग्रहणे° ' इति नियमाभावात् ' शतुरनुमो नद्यजादी ' ( पा. सू. ६. १. १७३ ) इति विभक्तेरुदात्तत्वम् । अध्वरे । उक्तम् । संहितायाम् ' उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ' ( पा. सू. ८. २. ४ ) इति अकारस्य स्वरितत्वम् । पीतये । ' पा पाने ' । क्तिनि छान्दसमन्तोदात्तत्वम् ॥

उप॑ नः सु॒तमा ग॑हि॒ हरि॑भिरिन्द्र के॒शिभिः॑ । सु॒ते हि त्वा॒ हवा॑महे ॥ ४ ॥

उप॑ । नः॒ । सु॒तम् । आ । ग॒हि॒ । हरि॑ऽभिः । इ॒न्द्र॒ । के॒शिऽभिः॑ । सु॒ते । हि । त्वा॒ । हवा॑महे ॥ ४ ॥

हे [v]इन्द्र [v]केशिभिः केसरयुक्तैः [v]हरिभिः अश्वैस्त्वं [v]नः अस्मदीयं [v]सुतम् अभिषुतं सोमं प्रति [v]उप समीपे [v]आ [v]गहि आगच्छ । [v]सुते अभिषुते सोमे निमित्तभूते सति यस्मात् कारणात् [v]त्वा [v]हवामहे त्वामाह्वयामः तस्मादागच्छेति पूर्वत्रान्वयः ॥ गहि । गमेर्लोटः सेर्हिः । ' शपः ' इत्यनुवृत्तौ ' बहुलं छन्दसि ' इति शपो लुक् । ' इषुगमियमां छः ' ( पा. सू. ७. ३. ७७ ) इति छत्वं न भवति ; ' न लुमताङ्गस्य ' इति प्रतिषेधात् । ' अनुदात्तोपदेश° ' ( पा. सू. ६. ४. ३७ ) इत्यादिना अनुनासिकलोपः । तस्य ' असिद्धवदत्राभात् ' ( पा. सू. ६. ४. २२ ) इत्यसिद्धत्वात् ' अतो हेः ' इति हेर्लुक् न भवति । केशिभिः । ' क्लिशेरन् लो लोपश्च ' ( उ. सू. ५. ७११ ) इति अन् । मत्वर्थीय इनिः । प्रत्ययस्वरः । हवामहे । ' ह्वः ' इत्यनुवृत्तौ ' बहुलं छन्दसि ' इति संप्रसारणम् । शपः पित्त्वादनुदात्तत्वम् । तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव । ' तिङ्ङतिङः ' इति न निघातः ; ' हि च ' इति प्रतिषेधात् ॥

सेमं नः॑ स्तो॒मम॒ा ग॑ह्युपे॒दं सव॑नं सु॒तम् । गौरो न तृ॑षि॒तः पि॑ब ॥ ५ ॥

सः । इ॒मम् । नः॒ । स्तोम॑म् । आ । ग॒हि॒ । उप॑ । इ॒दम् । सव॑नम् । सु॒तम् ।

गौरः॑ । न । तृ॒षि॒तः । पि॒ब॒ ॥ ५ ॥

हे इन्द्र [v]स त्वं [v]नः अस्मदीयम् [v]इमं [v]स्तोमं स्तुतिं प्रति [v]आ [v]गहि आगच्छ । आगमने हेतुरुच्यते । [v]उप देवयजनसमीपे [v]सुतम् अभिषुतसोमयुक्तम् [v]इदम् इदानीमनुष्ठीयमानं [v]सवनं प्रातःसवनादिरूपं कर्म वर्तते । तस्मात् [v]गौरो [v]न गौरमृग इव [v]तृषितः सन् इमं सोमं [v]पिब ॥ सः इमम् इत्यत्र संहितायां ' सोऽचि लोपे चेत्पादपूरणम् ' ( पा. सू. ६. १. १३४ ) इति सुलोपः । गहि । गतम् । सवनम् । सूयतेऽस्मिन् सोम इत्यधिकरणे ल्युट् । ' लिति ' इति प्रत्ययात्पूर्वस्योदात्तत्वम् । ल्युडन्तात् सप्तम्याः ' सुपां सुपो भवन्तीति वक्तव्यम् ' ( पा. म. ७. १. ३९ ) इति वचनात्

---

१. र–प्रातरारभ्य । २. ग-च-छ-ण-र–' क्लिशेरन् लो लोपश्च इति अन् ' इति नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

द्वितीया । अभिषुतसोमयुक्तमिदं सवनमिति कर्मण्येव वा द्वितीया । तदा सुतशब्दात् अर्शआदित्वादच् ( पा. सू. ५. २. १२७ ) । तृषितः । ' जितृष पिपासायाम् ' । ' निष्ठा ' इति क्तः । प्रत्ययस्वरेणोदात्तः । पश्चात् इटः ' आगमा अनुदात्ताः ' इत्यनुदात्तत्वम् ॥ ॥ ३० ॥

**इमे सोमास इन्दवः सुतासो अधि बर्हिषि । ताँ इन्द्र सहसे पिब ॥ ६ ॥**

इमे । सोमासः । इन्दवः । सुतासः । अधि । बर्हिषि । तान् । इन्द्र । सहसे । पिब ॥६॥

इन्दुशब्दः ' उन्दी क्लेदने ' इति धातोरुत्पन्नः । vइन्दवः क्लेदनयुक्ताः vइमे वेद्यामवस्थिताः vसोमासः तत्तत्पात्रगताः सोमाः vबर्हिषि यज्ञे vअधि आधिक्येन vसुतासः अभिषुताः । हे vइन्द्र vसहसे बलार्थं vतान् सोमान् vपिब ॥ सोमासः । ' आज्जसेरसुक् ' ( पा. सू. ७. १. ५० ) इति जसोऽसुगागमः । इन्दवः । उक्तम् । सुतासः । पूर्ववत् असुक् । संहितायां ' प्रकृत्यान्तःपादमव्यपरे ' इति प्रकृतिभावात् परपूर्वत्वं न भवति । बर्हिषि । ' बृंहेर्नलोपश्च ' ( उ. सू. २. २६६ ) इति इस् । प्रत्ययस्वरः । ' ताँ इन्द्र ' इत्यत्र ' दीर्घादटि समानपादे ' इति रुत्वम् । यत्वयलोपौ । अनुनासिकः । सहसे । ' षह मर्षणे ' । असुनन्तो निस्वादाद्युदात्तः ॥

**अयं ते स्तोमो अग्रियो हृदिस्पृगस्तु शंतमः । अथा सोमं सुतं पिब ॥ ७ ॥**

अयम् । ते । स्तोमः । अग्रियः । हृदिऽस्पृक् । अस्तु । शम्ऽतमः ।
अथ । सोमम् । सुतम् । पिब ॥ ७ ॥

हे इन्द्र vअयम् अस्माभिः क्रियमाणः vस्तोमः स्तोत्रविशेषः vअग्रियः श्रेष्ठः सन् vते तव vहृदिस्पृक् मनस्यङ्गीकृतः vशंतमः सुखतमः vअस्तु । vअथ स्तुतेरनन्तरं vसुतम् अभिषुतं vसोमं vपिब ॥ अग्रियः । ' अग्रात् ' इत्यनुवृत्तौ ' घच्छौ च ' (पा. सू. ४. ४. ११७) इति घच् । चित्त्वादन्तोदात्तः । हृदि स्पृशतीति हृदिस्पृक् । ' स्पृशोऽनुदके क्विन् ' (पा. सू. ३. २. ५८) । ' तत्पुरुषे कृति बहुलम् ' ( पा. सू. ६. ३. १४ ) इति अलुक् । ' क्विन्प्रत्ययस्य कुः ' ( पा. सू. ८. २. ६२ ) इति शकारस्य कुत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् । शंतमः । सुखकरद्रव्यवचनोऽत्र शंशब्दः । ततस्तमप् । अत्र सुखप्रकर्षस्य गुणद्वारा गुणनिष्ठद्रव्ये संक्रान्तत्वात् ' अद्रव्यप्रकर्षे ' इति निषेधात् ' किमेत्तिङव्ययघ° ' ( पा. सू. ५. ४. ११ ) इत्यादिना आम् न भवति, द्रव्यस्य स्वतः प्रकर्षाभावात् । ईदृगर्थ एव हि स निषेधः । अथा सोमम् । संहितायां ' निपातस्य° ' इति दीर्घः ॥

**विश्वमित्सवनं सुतमिन्द्रो मदाय गच्छति । वृत्रहा सोमपीतये ॥ ८ ॥**

विश्वम् । इत् । सवनम् । सुतम् । इन्द्रः । मदाय । गच्छति । वृत्रऽहा । सोमऽपीतये ॥८॥

vवृत्रहा शत्रुघातकः vइन्द्रः vसोमपीतये सोमपानाय vमदाय तत्पानजन्यहर्षाय च vविश्वमित् सर्वमपि vसुतम् अभिषुतसोमयुक्तं vसवनं प्रातःसवनादिरूपं कर्म vगच्छति ॥ विश्वम् । ' अशिप्रुषि° ' इत्यादिना क्वन् । निस्वादाद्युदात्तः । सवनं सुतम् । पूर्ववत् । मदाय । ' मदोऽनुपसर्गे ' ( पा. सू. ३. ३. ६७ ) इति अप्प्रत्ययः । पित्त्वात् धातुस्वरः । गच्छति । ' इषुगमियमां छः ' ( पा. सू. ७. ३. ७७ ) ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वृत्रहा । वृत्रं हतवान् । ' ब्रह्मभ्रूणवृत्रेषु क्विप् ' ( पा. सू. ३. २. ८७ ) । ' इन्हन्° ' इत्यादिना निवृत्तं दीर्घत्वं ' सौ च ' ( पा. सू. ६. ४. १२–१३ ) इति प्रतिप्रसवात् भवति । कृदुत्तरपदप्रकृतिस्वरत्वम् । सोमपीतये । व्यधिकरणबहुव्रीहिः इत्युक्तम् । तत्पुरुषे वा दासीभारादित्वात् ( पा. सू. ६. २. ४२ ) पूर्वपदप्रकृतिस्वरत्वम् ॥

**सेमं नः कामम॒ा पृ॑ण गोभि॒रश्वैः॑ शतक्रतो । स्तवा॑म त्वा स्वा॒ध्यः॑ ॥ ९ ॥**

सः । इमम् । नः । कामम् । आ । पृण । गोभिः । अश्वैः ।

शतक्रतो इति॑ शतऽक्रतो । स्तवाम । त्वा । सुऽआ॒ध्यः॑ ॥ ९ ॥

हे [V]शतक्रतो [V]सः त्वं [V]नः अस्मदीयम् [V]इमं [V]कामं काम्यमानं फलं [V]गोभिरश्वैः च सह [V]आ [V]पृण सर्वतः पूरय । वयमपि [V]स्वाध्यः सुष्ठु सर्वतो ध्यानयुक्ताः सन्तः [V]त्वा त्वां [V]स्तवाम ॥ सेमम् । संहितायां ' सोऽचि लोपे चेत्पादपूरणम् ' इति सुलोपः । कामम् । कमेर्घञि ' कर्षात्वतो घञोऽन्त उदात्तः ' ( पा. सू. ६. १. १५९ ) इत्यन्तोदात्तत्वे प्राप्ते वृषादिषु पाठादाद्युदात्तत्वम् । पृण । ' पृण प्रीणने ' । लोटः सेर्हिः । ' तुदादिभ्यः शः ' । तस्य ङित्त्वाद्गुणाभावः । ' अतो हेः ' इति हेर्लुक् । गोभिः । ' सावेकाचः° ' इति प्राप्तं विभक्तेरुदात्तत्वं ' न गोश्वन्साववर्ण° ' इति प्रतिषिध्यते । अश्वैः । क्ननन्त इत्युक्तम् । असामर्थ्यात् न पराङ्गवद्भावः । स्तवाम । ' ष्टुञ् स्तुतौ ' । 'धात्वादेः षः सः' । लोडुत्तमबहुवचनस्य ' लोटो लङ्वत् ' इति लङ्वद्भावात् ' नित्यं ङितः ' ( पा. सू. ३. ४. ९९ ) इति सकारस्य लोपः । ' आडुत्तमस्य पिच्च ' ( पा. सू. ३. ४. ९२ ) इति आडागमः । प्रत्ययस्य पित्त्वादनुदात्तत्वम् । धातुस्वर एव । स्वाध्यः । 'ध्यै चिन्तायाम्' । स्वाङोरुपसर्गयोः प्राक्प्रयोगः । ' अन्येभ्योऽपि दृश्यते ' ( पा. सू. ३. २. १७८ ) इति क्विप् । दृशिग्रहणस्य विध्यन्तरोपसंग्रहणार्थत्वात् अत्र संप्रसारणे सति परपूर्वत्वम् । ' हलः ' ( पा. सू. ६. ४. २ ) इति दीर्घः । जसि ' एरनेकाचः° ' ( पा. सू. ६. ४. ८२ ) इति यणादेशः । ' गतिकारकोपपदात्कृत् ' इत्युत्तरपदप्रकृतिस्वरत्वम् । ' उदात्तयणो हल्पूर्वात् ' ( पा. सू. ६. १. १७४ ) इति जस उदात्तत्वं न भवति, तत्र ' असर्वनामस्थानम् ' इत्यनुवृत्तेः । अतः ' उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ' ( पा. सू. ८. २. ४ ) इति स्वरितत्वमेव भवति ॥ ॥ ३१ ॥

' इन्द्रावरुणयोः ' इत्यादिकं नवर्चं षष्ठं सूक्तम् । अत एव नवशब्दानुवृत्तावनुक्रम्यते—' इन्द्रावरुणयोरैन्द्रावरुणं युवाकु पादनिचृतौ ' इति । अत्र देवता विस्पष्टा । ऋषिच्छन्दसी तु पूर्ववदनुवर्तेते । अयं तु विशेषः । ' युवाकु हि ' इत्यादिके द्वे ऋचौ पादनिचृन्नामकच्छन्दोयुक्ते । विनियोगस्तु स्मार्तो लैङ्गिको वा कश्चिदवगन्तव्यः ॥

**इन्द्रावरु॑णयो॒रह॑ꣳ स॒म्राजो॒रव॒ आ वृ॑णे । ता नो॑ मृळात ई॒दृशे॑ ॥ १ ॥**

इन्द्रावरु॑णयोः । अ॒हम् । स॒म्ऽराजोः॑ । अव॑ः । आ । वृ॒णे॒ । ता । नः॒ । मृ॒ळा॒तः॒ । ई॒दृशे॑ ॥ १ ॥

[V]अहम् अनुष्ठाता [V]सम्राजोः समीचीनराज्योपेतयोः सम्यग्दीप्यमानयोर्वा [V]इन्द्रावरुणयोः देवयोः संबन्धि [V]अवः रक्षणम् [V]आ [V]वृणे सर्वतः प्रार्थये । [V]ता तौ देवौ [V]ईदृशे एवंविधे अस्मदीयवरणे निमित्त-

---

१. च-फ–तत्पुरुषो वा । २. च-ण-फ-र–अस्मदीयरक्षणे ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

भूते सति [v]मृळातः अस्मान् सुखयतः ॥ इन्द्रशब्दो रन्प्रत्ययान्तः । वरुणशब्द उनन्प्रत्ययान्तः । उभौ नित्त्वादाद्युदात्तौ । समासे ' देवताद्वन्द्वे च ' इति पूर्वपदस्य आनङादेशः । ' उभे युगपत् ' इत्यनुवृत्तौ ' देवताद्वन्द्वे च ' इति युगपत् उभयपदप्रकृतिस्वरत्वम् । सम्राजोः । ' राजृ दीप्तौ ' । ' सत्सूद्विष° ' ( पा. सू. ३. २. ६१ ) इत्यादिना क्विप् । समो ' मोऽनुस्वारः ' ( पा. सू. ८. ३. २३ ) इत्यनुस्वारे प्राप्ते ' मो राजि समः क्वौ ' ( पा. सू. ८. ३. २५ ) इति सकारादेशः । कृदुत्तरपदप्रकृतिस्वरत्वम् । ' कर्तृकर्मणोः कृति ' ( पा. सू. २. ३. ६५ ) इति कर्तरि षष्ठी । अवः । अव रक्षणादिषु । भावेऽसुन् । नित्त्वादाद्युदात्तः । ता । ' सुपां सुलुक्° ' इत्यादिना द्विवचनस्य डादेशः । टिलोपे विभक्तेरुदात्तनिवृत्तिस्वरः । मृळातः । ' मृड सुखने ' । प्रार्थनायां लिङर्थे लेट् । द्विवचनं तस् । ' लेटोऽडाटौ ' ( पा. सू. ३. ४. ९४ ) इति आडागमः । 'तुदादिभ्यः शः' । ङित्त्वात् लघूपधगुणाभावः । ईदृशे । ' त्यदादिषु दृशोऽनालोचने कञ् च ' ( पा. सू. ३. २. ६० ) इति इदंशब्दे उपपदे दृशेः कञ् । उपपदसमासे ' इदंकिमोरीश्की ' ( पा. सू. ६. ३. ९० ) इति इदम ईश् । शित्त्वात् सर्वादेशः । कञः कित्त्वाद्गुणाभावः । शित्त्वादुत्तरपदस्याद्युदात्तत्वम् । उपपदसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते ॥

**गन्तारा हि स्थोऽवसे हवं विप्रस्य मावतः । धर्तारा चर्षणीनाम् ॥ २ ॥**

गन्तारा । हि । स्थः । अवसे । हवम् । विप्रस्य । माऽवतः । धर्तारा । चर्षणीनाम् ॥२॥

हे इन्द्रावरुणौ [v]अवसे अवितुमनुष्ठातारं रक्षितुं [v]मावतः मद्विधस्य [v]विप्रस्य ब्राह्मणर्त्विजः [v]हवम् आह्वानं गन्तारौ [v]स्थः [v]हि प्राप्तिशीलौ भवथः खलु । कीदृशौ । [v]चर्षणीनां मनुष्याणां [v]धर्तारौ योगक्षेमसंपादनेन धारयितारौ ॥ गन्तारा । गमेस्ताच्छील्ये तृन् । द्विवचनस्य ' सुपां सुलुक्° ' ( पा. सू. ७. १. ३९ ) इत्यादिना आकारादेशः । ' ऋदृशोऽङि गुणः ' ( पा. सू. ७. ४. १६ ) । ' असृन्° ' ( पा. सू. ६. ४. ११ ) इत्यादिना उपधादीर्घत्वम् । तृनो नित्त्वादाद्युदात्तत्वम् । स्थः । 'अस भुवि ' । लङ्मध्यमपुरुषद्विवचनं थस् । ' अदिप्रभृतिभ्यः शपः ' इति शपो लुक् । ' हि च ' इति निघातप्रतिषेधः । अवसे । ' अव रक्षणे ' । ' तुमर्थे सेसेन्° ' ( पा. सू. ३. ४. ९ ) इति असेन् । नित्त्वादाद्युदात्तः । हवम् । ह्वेञो ' बहुलं छन्दसि ' इत्यनैमित्तिके संप्रसारणे परपूर्वत्वे च ' ऋदोरप् ' इति अप् । गुणावादेशौ । अपः पित्त्वादनुदात्तत्वम् । धातुस्वर एव । विप्रस्य । डुवप् बीजसंताने ' । अस्य ' ऋज्रेन्द्र° ' इत्यादिना रन् निपातितः । नित्त्वादाद्युदात्तः । मावतः । ' वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम् ' ( पा. सू. ५. २. ३९. १ ) वतुप् । प्रत्ययोत्तरपदयोः अस्मदो मपर्यन्तस्य मादेशः ( पा. सू. ७. २. ९८ ) । ' आ सर्वनाम्नः ' ( पा. सू. ६. ३. ९१ ) इति दकारस्य आकारः । सवर्णदीर्घः । मतुपः पित्त्वादनुदात्तत्वम् । प्रातिपदिकान्तोदात्तत्वे स एव शिष्यते । धर्तारा । ' धृङ् धारणे ' । ' ण्वुल्तृचौ ' ( पा. सू. ३. १. १३३ ) इति तृच् । ' एकाच उपदेशे° ' इति इट्प्रतिषेधः । गुणो रपरत्वम् । ' असृन्° ' इत्यादिना उपधादीर्घः । ' सुपां सुलुक्° ' इति आकारः । तृचश्चित्त्वादन्तोदात्तत्वम् । चर्षणीनाम् । ' कृषेरादेश्च चः ' ( उ. सू. २. २६१ ) इति अनिप्रत्ययः; तत्संनियोगेन ककारस्य चकारः । प्रत्ययाद्युदात्तत्वं बाधित्वा छान्दसमन्तोदात्तत्वम् । अत एव ' नामन्यतरस्याम् ' इति विभक्तेरुदात्तत्वम् । तत्र हि मतुपि यो ह्रस्वान्तः तत उत्तरस्य नाम उदात्तत्वमिति व्याख्यातम् ॥

---

१. च-छ-फ-श—उभे वनस्पत्यादिषु युगपत् । २. च-छ-त-फ-श—ह्रस्वान्तः अन्तोदात्तः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अनुकामं तर्पयेथामिन्द्रावरुण राय आ । ता वां नेदिष्ठमीमहे ॥ ३ ॥

अनुऽकामम् । तर्पयेथाम् । इन्द्रावरुणा । रायः । आ । ता । वाम् । नेदिष्ठम् । ईमहे ॥३॥

Vइन्द्रावरुणा हे इन्द्रावरुणौ Vअनुकामम् अस्मदीयाभिलाषमनु Vरायः धनस्य प्रदानेन Vआ Vतर्पयेथां सर्वतोऽस्मांस्तृप्तान् कुरुतम् । वयं यदा यदा धनं कामयामहे तदा तदा प्रयच्छतमित्यर्थः । Vता Vवां तादृशौ युवां Vनेदिष्ठम् अतिशयेन सामीप्यं यथा भवति तथा Vईमहे याचामहे । कालविलम्बमन्तरेण धनं दातव्यमित्यर्थः । सप्तदशसु याच्ञाकर्मसु ' ईमहे ' ( नि. ३. १९. १ ) इति पठितम् ॥ अनुकामम् । कामस्य पश्चादनुकामम् । अथवा कामे कामेऽनुकामम् । अनुः इह पश्चादर्थे अथवा वीप्सालक्षणे यथार्थे । योग्यता वीप्सा पदार्थानतिवृत्तिः सादृश्यं चेति चत्वारो हि यथार्था गृहीताः । ' अव्ययं विभक्ति° ' ( पा. सू. २. १. ६ ) इत्यादिना अव्ययीभावसमासः । ' अव्ययीभावश्च ' ( पा. सू. १. १. ४१ ) इति अव्ययसंज्ञायाम् ' अव्ययादाप्सुपः ' ( पा. सू. २. ४. ८२ ) इति प्राप्तस्य लुकोऽपवादो ' नाव्ययीभावादतोऽम् त्वपञ्चम्याः ' ( पा. सू. २. ४. ८३ ) इति विभक्तेः अमादेशः । ' समासस्य ' इत्यन्तोदात्तत्वम् । तर्पयेथाम् । तृपेर्ण्यन्तात् लोटो ' णिचश्च ' ( पा. सू. १. ३. ७४ ) इत्यात्मनेपदम् । मध्यमद्विवचनम् आथाम् । टेः एत्वे ' आमेतः ' ( पा. सू. ३. ४. ९० ) इति आमादेशः । शपि सति ' अतो येयः ' ( पा. सू. ७. २. ८० ) इति आकारस्य इयादेशः* । आद्गुणो यलोपश्च । इन्द्रावरुणा । ' सुपां सुलुक्° ' इति द्विवचनस्य आकारः । आमन्त्रिताद्युदात्तत्वम् । संहितायाम् आकारस्य ह्रस्वत्वम् । रायः । ' ऊडिदम्° ' इत्यादिना विभक्तेरुदात्तत्वम् । ता । ' सुपां सुलुक्° ' इति विभक्तेः आकारः । पदात्परत्वात् युवामित्यस्य वामादेशोऽनुदात्तः । नेदिष्ठम् । अतिशयेन अन्तिकम् । अतिशायने इष्टन् । ' अन्तिकबाढयोर्नेदसाधौ ' ( पा. सू. ५. ३. ६३ ) इति नेदादेशः । ' यस्य° ' इति लोपः । इष्टनो नित्त्वादाद्युदात्तत्वम् । ईमहे । ' ईङ् गतौ ' । ङित्त्वादात्मनेपदम् । ' बहुलं छन्दसि ' इति श्यनो लुक् । निघातः ॥

युवाकु हि शचीनां युवाकु सुमतीनाम् । भूयाम वाजदान्नाम् ॥ ४ ॥

युवाकु । हि । शचीनाम् । युवाकु । सुऽमतीनाम् । भूयाम । वाजऽदान्नाम् ॥ ४ ॥

Vहि यस्मात् कारणात् Vशचीनाम् अस्मदीयकर्मणां संबन्धि सोमरूपं हविः Vयुवाकु वसतीवर्येकधनात्मकैरुदकैः पयःसक्त्वादिद्रव्यान्तरैश्च मिश्रितम् । तथा Vसुमतीनां शोभनबुद्धियुक्तानामृत्विजां स्तोत्ररूपं वचनमपि Vयुवाकु नानाविधैः स्तुत्यगुणैर्मिश्रितम् । तस्मात् कारणात् हे इन्द्रावरुणौ तथाविधं हविः स्वीकुर्वतोर्युवयोः प्रसादाद्वयं Vवाजदान्नाम् अन्नप्रदानां पुरुषाणां मध्ये मुख्या Vभूयाम भवेम । ' अपः अप्नः ' इत्यादिषु षड्विंशतिसंख्याकेषु कर्मनामसु ' शची शमी ' ( नि. २. १. २२ ) इति पठितम् ॥ युवाकु । ' यु मिश्रणे ' । ' कटिकुषिभ्यां काकुः ' ( उ. सू. ३. ३५७ ) इत्यत्र बाहुलकात् यौतेरपि काकुः प्रत्ययः । कित्त्वेन गुणाभावात् उकारस्य उवङादेशः । प्रत्ययस्वरेण मध्योदात्तत्वम् । शचीशब्दः केषांचिन्मते शार्ङ्गरवादिः । ङीनन्तो ( पा. सू. ४. १. ७३ ) नित्त्वादाद्युदात्तः इति ' उभे वनस्पत्यादिषु युगपत् ' इत्यत्र वृत्तिकृतोक्तम् ( का. ६. २. १४० ) । सुमतीनाम् । ' विद्याम सुमतीनाम् ' ( ऋ. सं. १. ४. ३ ) इत्यत्रोक्तम् । भूयाम । प्रार्थनायां लिङ् । उत्तमबहुवचने ' नित्यं

* वस्तुतस्तु ' आतो ङितः ' ( पा. सू. ७. २. ८१ ) इत्यनेनैव इयादेशो भवति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ङितः ' इति सकारलोपः । ' यासुट् परस्मैपदेषूदात्तो ङिच्च ' ( पा. सू. ३. ४. १०३ ) इति उदात्तो यासुडागमः । ' लिङः सलोपोऽनन्त्यस्य ' ( पा. सू. ७. २. ७९ ) इति सकारलोपः । ' बहुलं छन्दसि ' इति शपो लुक् । सति शिष्टत्वात् यासुडुदात्त एव शिष्यते । वाजदाम्नाम् । वाजं ददतीति वाजदावानः । ' आतो मनिन्° ' ( पा. सू. ३. २. ७४ ) इत्यादिना वनिप् । तस्य पित्त्वात् धातुस्वर एव शिष्यते । समासे कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । आमि ' अल्लोपोऽनः ' ( पा. सू. ६. ४. १३४ ) इति अकारलोपः । तस्य ' अचः परस्मिन्° ' (पा. सू. १. १. ५७) इति स्थानिवद्भावात् ' लोपो व्योर्वलि ' ( पा. सू. ६. १. ६६ ) इति वकारलोपो न भवति ॥

**इन्द्रः सहस्रदान्नां वरुणः शंस्यानाम् । क्रतुर्भवत्युक्थ्यः ॥ ५ ॥**

इन्द्रः । सहस्रऽदान्नाम् । वरुणः । शंस्यानाम् । क्रतुः । भवति । उक्थ्यः ॥ ५ ॥

अयम् [v]इन्द्रः [v]सहस्रदान्नां सहस्रसंख्याकधनप्रदानां मध्ये [v]क्रतुः धनदानस्य कर्ता भवति प्रभूतं ददातीत्यर्थः । तथा [v]वरुणः [v]शंस्यानां स्तुत्यानां मध्ये [v]उक्थ्यः स्तुत्यो [v]भवति अतिशयेन स्तुत्य इत्यर्थः ॥ वरुणः । उनन्प्रत्ययो नित्त्वादाद्युदात्तः । शंस्यानाम् । ' शंसु स्तुतौ ' । ' ऋहलोर्ण्यत् ' । ' तित्स्वरितम् ' इति प्राप्ते ' ईडवन्दवृशंसदुहां ण्यतः ' ( पा. सू. ६. १. २१४ ) इत्याद्युदात्तः । क्रतुः । ' कृजः कतुः ' ( उ. सू. १. ७७ ) इति कतुः । कित्त्वादुणाभावे यणादेशः । प्रत्ययस्वरेणाद्युदात्तः । उक्थ्यः । उक्थं शस्त्रम् । तेन स्तुत्यत्वेन तत्र भव उक्थ्यः । ' भवे छन्दसि ' (पा. सू. ४. ४. ११० ) इति यत् । ' यस्य° ' इति लोपः । अत्र ' तित्स्वरितम् ' इत्येतद्बाधित्वा ' तीर्थ्याय कूप्याय ' इत्यादिवत् ब्यच्त्वात् ' यतोऽनावः ' इति प्राप्तमाद्युदात्तत्वं ' सर्वे विधयश्छन्दसि विकल्प्यन्ते ' ( परिभा. ३५ ) इति न क्रियते । ननु ' यस्य° ' इति लोपात् प्रागेव तित्स्वरितत्वमस्तु । न हि तदा ' यतोऽनावः ' इत्येतदस्ति, ब्यच्त्वाभावात् । अत एव हि ' ऊर्म्याय च सूर्म्याय च ' इत्यादौ स्वरितत्वं दृश्यते । न च परत्वान्नित्यत्वाच्च ' यस्य° ' इति लोपेन प्रथमतो भाव्यमिति वाच्यम् । प्रकृतिप्रत्ययाश्रयात् बहिरङ्गात् ' यस्य° ' इति लोपात् प्रत्ययमात्राश्रयतया अन्तरङ्गत्वेन ' तित्स्वरितम् ' इत्येतस्य प्राबल्यात् । अतः ' ऊर्म्याय ' इत्यादिवत् ' उक्थ्यः ' इत्यत्रापि लक्षणत एव स्वरितत्वं भविष्यतीति किं छान्दस्येन । यत्र हि लोपमन्तरेणैव ब्यच्त्वं तत्र ' यतोऽनावः ' इत्येतद्भवति । यथा चेयं येयमिति । लोपनिबन्धनब्यच्त्वप्रदेशेषु तु स्वरितेनैव भवितव्यमिति । एवं तर्हि ' तीर्थ्याय कूप्याय ' इत्यादौ यत् आद्युदात्तत्वं तदेव च्छान्दसमस्तु । अथात्र तु ' वार्णादाङ्गं बलीयः ' ( परिभा. ५५ ) इत्यन्तरङ्गत्वेऽपि स्वरितत्वं बाधित्वा लोप एव भविष्यति । तर्हि ' उक्थ्यः, ऊर्म्याय सूर्म्याय ' इत्यादौ च च्छान्दस्यमस्तु । सर्वथैकत्र च्छान्दस्यान्न मुच्यते ॥ ॥ ३२ ॥

**तयोरिदवसा वयं सनेम नि च धीमहि । स्यादुत प्ररेचनम् ॥ ६ ॥**

तयोः । इत् । अवसा । वयम् । सनेम । नि । च । धीमहि । स्यात् । उत । प्रऽरेचनम् ॥६॥

[v]तयोरित् पूर्वोक्तयोरिन्द्रावरुणयोरेव [v]अवसा रक्षणेन [v]वयम् अनुष्ठातारः [v]सनेम संभजेम धनमिति शेषः । [v]नि [v]धीमहि [v]च । प्राप्ते धने यावदपेक्षितं तावदुक्त्वा ततोऽवशिष्टं धनं

---

१. च-छ-ण-र—तथा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

क्वचिन्निधिरूपेण स्थापयामश्च । [V]उत अपि च [V]प्रेरेचनं भुक्तान्निहिताच्च प्रकर्षेणाधिकं धनं [V]स्यात् संपद्यताम् ॥ अवसा । असुन् । नित्त्वादाद्युदात्तः । वयम् । 'यूयं हि ष्ठा' ( ऋ. सं. १. १५. २ ) इत्यत्र यदुक्तं तदत्र द्रष्टव्यम् । सनेम । आशिषि लिङ् । तस्य मस् । 'नित्यं ङितः' इति सकारलोपः । 'किदाशिषि' ( पा. सू. ३. ४. १०४ ) इति यासुट् । 'छन्दस्युभयथा' इति सार्वधातुकत्वमप्यस्तीति 'लिङः सलोपोऽनन्त्यस्य' ( पा. सू. ७. २. ७९ ) इति सकारलोपः । 'अतो येयः' (पा. सू. ७. २. ८०) इति इयादेशः । 'लोपो व्योर्वलि' (पा. सू. ६. १.६६) इति यलोपः । 'लिङ्याशिष्यङ्' (पा. सू. ३ १. ८६) इति अङ् । 'आद्गुणः' । पादादित्वात् न निघातः । धीमहि । 'डुधाञ् धारणपोषणयोः' । आशिषि लिङो महिङ् । तस्य 'छन्दस्युभयथा' इति सार्वधातुकार्धधातुकसंज्ञे । तत्र सार्वधातुकत्वेन 'लिङः सलोपोऽनन्त्यस्य' इति सकारलोपः । 'सार्वधातुकमपित्' इति ङित्त्वं शप् च । 'बहुलं छन्दसि' इति जुहोत्यादेरपि शपो लुक् । आर्धधातुकत्वात् 'आतो लोप इटि च' ( पा. सू. ६. ४. ६४ ) इति आकारलोपः । निघातः । सनेम इत्यपेक्षया द्वितीयत्वादत्र 'चवायोगे प्रथमा' इति न निषेधः । स्यात् । अस्तेः प्रार्थनायां लिङ् । तिप् । 'इतश्च' ( पा. सू. ३. ४. १०० ) इति इकारलोपः । 'यासुट् परस्मैपदेषूदात्तो ङिच्च' ( पा. सू. ३. ४. १०३ ) इति यासुडुदात्तत्वे । 'अदिप्रभृतिभ्यः शपः' इति शपो लुक् । 'श्नसोरल्लोपः' इति अकारलोपः । पादादित्वात् अनिघातः । उत । 'एवमादीनामन्तः' इत्यन्तोदात्तः । प्रेरेचनम् । 'रिचिर् विरेचने' । भावे ल्युट् । योरनादेशः । 'लिति' इति प्रत्ययात्पूर्वस्योदात्तत्वम् । प्रादिसमासः । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

**इन्द्रावरुण वामहं हुवे चित्राय राधसे । अस्मान्त्सु जिग्युषस्कृतम् ॥ ७ ॥**

इन्द्रावरुणा । वाम् । अहम् । हुवे । चित्राय । राधसे । अस्मान् । सु । जिग्युषः । कृतम् ॥७॥

[V]इन्द्रावरुणा हे इन्द्रावरुणौ [V]वां युवामुभौ [V]अहं [V]हुवे आह्वयामि । किमर्थम् । [V]चित्राय मणिमुक्तादिरूपेण विविधाय [V]राधसे धनाय ! तत आहूतौ युवाम् [V]अस्मान् अनुष्ठातॄन् [V]सु [V]जिग्युषः शत्रुविषये सुष्ठु जययुक्तान् [V]कृतं कुरुतम् ॥ इन्द्रावरुणा । 'सुपां सुलुक्°' इत्यादिना संबोधनस्य आकारः । 'देवताद्वन्द्वे च' इति पूर्वपदस्य आनङ् । आमन्त्रिताद्युदात्तत्वम् । संहितायां छान्दसं ह्रस्वत्वम् । हुवे । ह्वयतेः लडुत्तमैकवचनम् इट् । 'शपः' इत्यनुवृत्तौ 'बहुलं छन्दसि' इति लुक् । 'ह्वः' इत्यनुवृत्तौ 'बहुलं छन्दसि' इति संप्रसारणं परपूर्वत्वम् । 'अचि श्नुधातु°' ( पा. सू. ६. ४. ७७ ) इत्यादिना उवङ् । न च 'हुश्नुवोः°' ( पा. सू. ६. ४. ८७ ) इत्यादिना यणादेशः । जुहोतेरेव हि प्रतिपदोक्तस्य तत्, न पुनरस्य लाक्षणिकत्वात् । इटः प्रत्ययस्वरेणोदात्तत्वम् । पादादित्वात् न निघातः । राधसे । असुन् । नित्त्वादाद्युदात्तत्वम् । अस्मान् । शसि 'द्वितीयायां च' ( पा. सू. ७. २. ८७ ) इति आत्वम् । 'शसो न' ( पा. सू. ७. १. २९ ) इति नत्वम् । जिग्युषः । 'जि जये' । लिटः 'क्वसुश्च' (पा. सू. ३. २. १०७) इति क्वसुः । द्विर्भावः । 'सन्लिटोर्जेः' ( पा. सू. ७. ३. ५७ ) इति द्वितीयस्य कुत्वम् । क्वसोः कित्त्वाद्गुणाभावः । क्रादिनियमात् प्राप्तस्य इटः 'वस्वेकाजाद्घसाम्' इति नियमेन निवृत्तिः । द्वितीयाबहुवचनं शस् । भसंज्ञायां 'वसोः संप्रसारणम्' इति संप्रसारणम् । परपूर्वत्वम् । 'एरनेकाचः' इति यणादेशः । 'शासिवसिघसीनां च' इति षत्वम् । प्रत्ययस्वरेण उकार उदात्तः । कृतम् । 'डुकृञ् करणे' । लोण्मध्यमद्विवचनस्य लङ्वद्भावात् तमादेशः । शपः 'बहुलं छन्दसि' इति लुक् । 'तिङ्ङतिङः' इति निघातः ॥



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इन्द्रावरुण नू नु वां सिषासन्तीषु धीष्वा । अस्मभ्यं शर्म यच्छतम् ॥ ८ ॥

इन्द्रावरुणा । नु । नु । वाम् । सिसासन्तीषु । धीषु । आ । अस्मभ्यम् । शर्म । यच्छतम्॥८॥

vइन्द्रावरुणा हे इन्द्रावरुणौ vधीषु अस्मदीयबुद्धिषु vवां युवां vसिषासन्तीषु सनितुं संभक्तुं सम्यक् सेवितुमिच्छन्तीषु तदानीम् vआ समन्तात् vअस्मभ्यं vशर्म सुखं vनू vनु अतिशयेन क्षिप्रं vयच्छतं दत्तम्। षड्विंशतिसंख्याकेषु क्षिप्रनामसु ' नु मक्षु ' ( नि. २. १५. १ ) इति पठितम्। तस्य द्विरावृत्तिबलादतिशयो लभ्यते ॥ इन्द्रावरुणा । उक्तम्। नू नु। ' ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्' इति पूर्वस्य दीर्घत्वम्। सिषासन्तीषु । ' वन षण संभक्तौ ' । ' धात्वादेः षः सः ' । इच्छायां सन्। द्विर्भावो हलादिशेषः । ' सन्यतः ' इति इत्वम्। ' आदेशप्रत्यययोः ' (पा. सू. ८. ३. ५९) इति षत्वम्। ' सनीवन्त° ' ( पा. सू. ७. २. ४९ ) इत्यादिना विकल्पात् इडभावः । ' जनसनखनां सञ्झलोः ' ( पा. सू. ६. ४. ४२ ) इति नकारस्य आकारः । उपरि लटः शतृ । कर्तरि शप् । ' उगितश्च ' ( पा. सू. ४. १. ६ ) इति ङीप् । ' शप्श्यनोर्नित्यम् ' ( पा. सू. ७. १. ८१ ) इति नुम् । ङीपः शपश्च पित्त्वात् शतुश्च लसार्वधातुकत्वेनानुदात्तत्वम् । सनो निघ्वादाद्युदात्तत्वम् । तदेव शिष्यते । धीषु । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । अस्मभ्यम् । ' अस्मभ्यमप्रतिष्कुतः ' ( ऋ. सं. १. ७. ६ ) इत्यत्रोक्तम्। यच्छतम् । ' दाण् दाने ' । शपि ' पाघ्रा° ' इत्यादिना यच्छादेशः ॥

प्र वामश्नोतु सुष्टुतिरिन्द्रावरुण यां हुवे । यामृधाथे सधस्तुतिम् ॥ ९ ॥

प्र । वाम् । अश्नोतु । सुऽस्तुतिः । इन्द्रावरुणा । याम् । हुवे ।

याम् । ऋधाथे इति । सधऽस्तुतिम् ॥ ९ ॥

vइन्द्रावरुणा हे इन्द्रावरुणौ vयाम् अस्मत्कर्तृकां शोभनस्तुतिं प्रति vहुवे युवामुभौ आह्वयामि। किंच vसधस्तुतिं युवयोरुभयोः साहित्येन क्रियमाणायाः[1] स्तवक्रियायाः vयां सुष्टुतिं प्रतिलभ्य vऋधाथे युवां वर्धाथे तादृशी vसुष्टुतिः शोभनस्तुतिहेतुभूत ऋक्समूहः vवामश्नोतु युवां व्याप्नोतु ॥ अश्नोतु । 'अशू व्याप्तौ'। लोटो व्यत्ययेन तिप् । ' स्वादिभ्यः श्नुः'। सुष्टुतिः। ' न विन्धे अस्य सुष्टुतिम् ' ( ऋ. सं. १. ७. ७ ) इत्यत्रोक्तम् । इन्द्रावरुणा हुवे । उक्ते। अत्र तु यद्वृत्तयोगात् निघातः । ऋधाथे। ' ऋधु वृद्धौ ' । लट् । व्यत्ययेनात्मनेपदम् । मध्यमद्विवचने श्नोः ' बहुलं छन्दसि ' इति लुक्। प्रत्ययस्वरेण आकार उदात्तः । यच्छब्दयोगात् न निघातः । सधस्तुतिम्। सह स्तुतिर्यस्यां सुष्टुतौ सा सधस्तुतिः। अत्र सुष्टुतिरित्यन्यपदार्थे स्तुतिशब्दस्य स्तूयतेऽनयेति करणसाधनत्वेन ऋक्परत्वे अयं स्तुतिशब्दो भावसाधनतया स्तवनक्रियापरः । तस्मिन् भावसाधनत्वेन क्रियापरे अयं करणसाधनतया ऋक्पर इति समस्यमानपदार्थादन्यः । सहेत्यत्र हकारस्य व्यत्ययेन धकारः । सहशब्दः एवमादित्वादन्तोदात्तः । बहुव्रीहित्वेन पूर्वपदप्रकृतिस्वरत्वम् ॥ ॥ ३३ ॥ ॥ ४ ॥

पञ्चमेऽनुवाके षट् सूक्तानि । तत्र ' सोमानम् ' इत्यादिकं नवर्चं प्रथमं सूक्तम् । ऋषिच्छन्दसी पूर्ववत् । देवताविशेषस्त्वेवमनुक्रम्यते–' सोमानमिति पञ्च ब्राह्मणस्पत्याश्चतुर्थ्यामिन्द्रश्च सोमश्च पञ्चम्यां

---

१. त-फ–क्रियमाणया स्तवक्रियया युक्ताम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दक्षिणा चान्याः सादसस्पत्या नाराशंसी वान्त्या ' इति । सूक्तगता आद्याः पञ्चर्चो ब्रह्मणस्पतिदेवताकाः । तासां मध्ये ' स घा वीरः ' इत्येतस्याश्चतुर्थ्या ऋचो ब्रह्मणस्पतिरिन्द्रश्च सोमश्चेति तिस्रो देवताः । ' त्वं तम् ' इत्येतस्याः पञ्चम्या दक्षिणया सह पूर्वोक्तास्तिस्रो देवताः । षष्ठीमारभ्य तिसृणां सदसस्पतिर्देवता । ' नाराशंसम् ' इत्येतस्या नवम्याः सदसस्पतिर्नराशंसो वा विकल्प्यते । विनियोगस्तु पूर्ववत् ॥

सो॒मानं॒ स्वर॑णं कृणुहि ब्रह्मणस्पते । क॒क्षीव॑न्तं य औ॒शिजः ॥ १ ॥

सो॒मान॑म् । स्वर॑णम् । कृ॒णु॒हि । ब्र॒ह्म॒णः॒ । प॒ते॒ । क॒क्षीव॑न्तम् । यः । औ॒शिजः ॥ १ ॥

हे ᵛब्रह्मणस्पते एतन्नामकदेव ᵛसोमानम् अभिषवस्य कर्तारं ᵛस्वरणं देवेषु प्रकाशनवन्तं ᵛकृणुहि कुरु । अत्र दृष्टान्तः । ᵛकक्षीवन्तम् एतन्नामकमृषिम् । इवशब्दोऽत्राध्याहर्तव्यः । कक्षीवान् यथा देवेषु प्रसिद्धस्तद्वदित्यर्थः । ᵛयः कक्षीवानृषिः ᵛऔशिजः उशिजः पुत्रः । तमिवेति पूर्वत्र योजना । कक्षीवतोऽनुष्ठातृषु मुनिषु प्रसिद्धिस्तैत्तिरीयैराम्नायते–' एतं वै पर आट्णारः कक्षीवाँ औशिजो वीतहव्यः श्रायसत्रसदस्युः पौरुकुत्स्यः प्रजाकामा अचिन्वत ' ( तै. सं. ५. ६. ५. ३ ) इति । ऋगन्तरेऽपि ऋषित्वकथनेनानुष्ठातृत्वप्रसिद्धिः सूच्यते–' अहं कक्षीवाँ ऋषिरस्मि विप्रः ' ( ऋ. सं. ४. २६. १ ) इति । तस्मात् अस्यानुष्ठातारं प्रति दृष्टान्तत्वं युक्तम् । सोऽयं मन्त्रो यास्केनैवं व्याख्यातः—' सोमानं सोतारं प्रकाशनवन्तं कुरु ब्रह्मणस्पते कक्षीवन्तमिव य औशिजः । कक्षीवान् कक्ष्यावानौशिज उशिजः पुत्र उशिग्वष्टेः कान्तिकर्मणोऽपि त्वयं मनुष्यकक्ष एवाभिप्रेतः स्यात्तं सोमानं सोतारं मा प्रकाशनवन्तं कुरु ब्रह्मणस्पते ' ( निरु. ६. १० ) इति । अस्मिन् मन्त्रे सोमानमिति पादेन कृणुहि ब्रह्मण इति पादेन सूचितं तात्पर्यं तैत्तिरीया आमनन्ति—' सोमानं स्वरणमित्याह सोमपीथमेवाव रुन्धे । कृणुहि ब्रह्मणस्पत इत्याह ब्रह्मवर्चसमेवाव रुन्धे ' ( तै. सं. १. ५. ८. ४ ) इति ॥ सोमानम् । सुनोतीति । ' षुञ् अभिषवे ' । ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन् । दृशिग्रहणस्य विध्यन्तरोपसंग्रहणार्थत्वात् निरवेऽपि नाद्युदात्तत्वं किंतु प्रत्ययस्वर एव । उञ्छादिषु ( पा. सू. ६. १. १६० ) वा सोमञ्शब्दो द्रष्टव्यः बहुलग्रहणात् औणादिको वा मनिर्द्रष्टव्यः । स्वरणं प्रख्यातम् । ' स्वृ शब्दोपतापयोः ' । ' कृत्यल्युटो बहुलम् ' ( पा. सू. ३. ३. ११३ ) इति कर्मणि ल्युट् । ' लिति ' इति अकार उदात्तः । कृणुहि । ' कृवि हिंसाकरणयोश्च ' । ' इदितो नुम् धातोः ' ( पा. सू. ७. १. ५८ ) इति नुम् । लोटः सिपो हिः । शपि प्राप्ते ' धिन्विकृण्व्योर च ' इति उप्रत्ययः; तत्संनियोगेन वकारस्य च अकारः । तस्य ' अतो लोपः ' इति लोपः । तस्य स्थानिवद्भावात् न पूर्वस्य लघूपधगुणः । हेर्डित्वात् उकारस्य न गुणः । ' उतश्च प्रत्ययाच्छन्दोवावचनम् ' ( पा. सू. ६. ४. १०६. १ ) इति हेर्लुक् न । ' सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः ' इति वचनात् हेरेव प्रत्ययस्वरेणोदात्तत्वम् । पादादित्वात् न निघातः । ब्रह्मणः । ' षष्ठ्याः पतिपुत्र° ' ( पा. सू. ८. ३. ५३ ) इत्यादिना संहितायां विसर्जनीयस्य सकारः । सुबामन्त्रितपराङ्गवद्भावात् पदद्वयस्य आमन्त्रितनिघातः । कक्षीवन्तम् । कक्षे भवा कक्ष्या अश्वोदरसंबन्धिनी रज्जुः । ' भवे छन्दसि ' ( पा. सू. ४. ४. ११० ) इति यप्रत्ययः । सा अस्यास्तीत्यर्थे ' आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवत् ° ' ( पा. सू. ८. २. १२ ) इति ऋषिविशेषनाम कक्षीवच्छब्दो निपातितः । ' छन्दसीरः ' इति वत्वम् । यप्रत्ययस्वरेण तदादेशो निपातित ईकार उदात्तः । मतुप्सुपौ पित्त्वादनुदात्तौ । औशिजः । ' वश कान्तौ ' । ' इजि ' ( उ. सू. २. २२८ ) इत्यनुवृत्तौ ' वशेः किच्च ' ( उ. सू. २. २२९ ) इति इजिप्रत्ययः । तस्य कित्त्वात् ' ग्रहिज्या° ' ( पा. सू. ६. १. १६ ) इत्यादिना संप्रसारणं,

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

परपूर्वत्वे गुणाभावः । ' तस्यापत्यम् ' ( पा. सू. ४. १. ९२ ) इति ' प्राग्दीव्यतोऽण् ' ( पा. सू. ४. १. ८३ ) । आदिवृद्धिः । प्रत्ययस्वरेणान्तोदात्तत्वम् ॥

**यो रेवान्यो अमीवहा वसुवित्पुष्टिवर्धनः । स नः सिषक्तु यस्तुरः ॥ २ ॥**

यः । रेवान् । यः । अमीवऽहा । वसुऽवित् । पुष्टिऽवर्धनः । सः । नः । सिसक्तु । यः । तुरः ॥२॥

[v]यः ब्रह्मणस्पतिः [v]रेवान् धनवान् [v]यः च [v]अमीवहा रोगाणां हन्ता [v]वसुवित् धनलब्धा [v]पुष्टिवर्धनः पुष्टेर्वर्धयिता [v]यः च [v]तुरः त्वरोपेतः शीघ्रफलदः [v]सः ब्रह्मणस्पतिः [v]नः अस्मान् [v]सिषक्तु सेवताम् । परिगृह्यानुगृह्णात्वित्यर्थः । अत्र सिषक्तुशब्दस्य सेवार्थत्वं यास्क आह–' सिषक्तु सचत इति सेवमानस्य ' ( निरु. ३. २१ ) इति । प्रत्ययौ शब्दाविति शेषः ॥ रेवान् । रयिरस्यास्तीति मतुप् । ' रयेर्मतौ बहुलम् ' ( पा. सू. ६. १. ३७. ६ ) इति यकारस्य संप्रसारणं परपूर्वत्वम् । ' छन्दसीरः ' इति वत्वम् । 'आद्गुणः'। ननु वत्वस्य असिद्धत्वात् बहिरङ्गत्वाच्च प्रागेव गुणे कृते इवर्णाभावान्न वत्वम् । न च ' अन्तादिवच्च ' ( पा. सू. ६. १. ८५ ) इति आदिवद्भावेन इवर्णसंपादनं, वर्णाश्रयविधौ तत्प्रतिषेधात् । अन्यथा खट्वाभिः इत्यत्र सवर्णदीर्घस्य अन्तवद्भावेन अकारत्वात् ' अतो भिस ऐस् ' ( पा. सू. ७. १. ९ ) इति ऐसादेशः स्यात् । न च निरवकाशत्वेन वत्वस्य अनवकाशत्वम् । ' अग्निवान्वै दर्भस्तम्बः ' ( तै. ब्रा. २. २. १. ५ ), ' उप ब्रह्माणि हरिवः ' ( ऋ. सं. १०. १०४. ६ ) इत्यादौ अवकाशलाभात् । सत्यम् । अत्र गुणप्रवृत्तेः प्राक् इकारात्परो मतुप् । कदाचित् इवर्णात्परस्य मतुपः पश्चात् एकारादेशेन इवर्णाभावेऽपि भवति वत्वमिति ' छन्दसीरः ' इति सूत्रकृता विवक्षितम् । अमुनैवाभिप्रायेण ' हरिवः ' इत्यादिकमुदाहृत्यापि अन्ते वृत्तिकृता ' आरेवान् ' ( का. ८. २. १५ ) इत्यप्युदाहृतम् । ' ह्रस्वनुड्भ्याम्° ' इत्यत्र आरेशब्दात् मतुप इत्युदात्तत्वं वक्तव्यम् ? ( पा. सू. ६. १. १७६. १ ) इत्यत्र आरेशब्दो रेशब्दस्याप्युपलक्षणम् । अत एव हि ' रेवाँ इन्द्र ' इत्यादौ मतुप उदात्तत्वं दृष्टम् । अथवा ' ह्रस्वनुड्भ्याम् ' इत्यत्रापि कदाचित् ह्रस्वात्परस्य मतुप उदात्तत्वमिस्येव व्याख्येयम् । एवं च संप्रसारणपरपूर्वत्वयोः कृतयोर्गुणात् प्राक् ह्रस्वात्परो मतुप् इति रेवान् आरेवान् इत्यादौ सर्वत्रोदात्तत्वं सिध्यति । अयमेव सूत्रकृतोऽभिप्रायो वार्तिककृता व्याख्यात इति । अमीवहा । ' अम रोगे ' इत्येतस्मात् वन्प्रत्ययेन अमीवशब्दो निपातितः । तं हन्तीति ' बहुलं छन्दसि ' ( पा. सू. ३. २. ८८ ) इति क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वम् । वसुवित् । वसु विन्दतीति वसुवित् । ' क्विप् च ' इति क्विप् । उत्तरपदप्रकृतिस्वरत्वम् । पुष्टिवर्धनः । वर्धयतेः नन्द्यादित्वात् ( पा. सू. ३. १. १३४ ) ल्युः । ' लिति ' इति प्रत्ययात्पूर्वस्योदात्तत्वम् । पुष्टेर्वर्धन इति कर्मणि षष्ठ्या समासः । कृदुत्तरपदप्रकृतिस्वरत्वम् । सिषक्तु । ' षच समवाये ' । लोटि ' बहुलं छन्दसि ' ( पा. सू. २. ४. ७६ ) इति शपः श्लुः । ' श्लौ ' इति द्वित्वे हलादिशेषे ' बहुलं छन्दसि ' (पा. सू. ७. ४. ७८) इत्यभ्यासस्य अकारस्य इकारः । तुरः । ' तुर त्वरणे ' । ' इगुपधज्ञाप्रीकिरः कः ' । प्रत्ययस्वरः ॥

**मा नः शंसो अररुषो धूर्तिः प्रणङ्मर्त्यस्य । रक्षा णो ब्रह्मणस्पते ॥ ३ ॥**

मा । नः । शंसः । अररुषः । धूर्तिः । प्रणक् । मर्त्यस्य । रक्षा । नः । ब्रह्मणः । पते ॥३॥

---

१. ८–धनस्य लब्धा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]अररुषः [v]मर्त्यस्य उपद्रवं कर्तुमस्मत्समीपं प्राप्तस्य शत्रुरूपस्य मनुष्यस्य [v]धूर्तिः हिंसकः [v]शंसः शंसनम्। अधिक्षेप इत्यर्थः। तादृशो वाग्विशेषः [v]नः अस्मान् [v]मा [v]प्रणक् मा संपृणक्तु। शत्रुणा प्रयुक्तोऽधिक्षेपः कदाचिदस्मान्मा प्राप्नोत्वित्यर्थः। तदर्थं हे [v]ब्रह्मणस्पते [v]नः अस्मान् [v]रक्ष पालय॥ मा। निपातः। शंसनं शंसः। भावे घञ्। जित्त्वादाद्युदात्तः। अररुषः। 'अर्तेररुः' (उ. सू. ४. ५१९) इति अन्तर्भावितण्यर्थात् 'ऋ गतौ' इत्यस्मात् अरुस्। गुणो रपरत्वम्। प्रत्ययस्वरे प्राप्ते वृषादित्वादाद्युदात्तः। धूर्तिः। धुर्वी हिंसार्थः। 'क्तिच्क्तौ च संज्ञायाम्' इति क्तिच्। 'तितुत्रतथसिसुसरकसेषु च' (पा. सू. ७. २. ९) इति इट्प्रतिषेधः। 'उपधायाश्च' (पा. सू. ७. १. १०१) इति उपधादीर्घत्वम्। वलि लोपं बाधित्वा ऊठि प्राप्ते (पा. सू. ६. ४. १९) 'राल्लोपः' (पा. सू. ६. ४. २१) इति वकारलोपः। प्रणक्। 'पृची संपर्के'। लङस्तिप्। 'इतश्च' इति इकारलोपः। हल्ङ्यादिलोपः। क्रुत्वम्। 'रुधादिभ्यः श्नम्'। तस्य 'व्यत्ययो बहुलम्' (पा. सू. ३. १. ८५) इति अडागमः। यणादेशः। अकारस्य आगमानुदात्तत्वं बाधित्वा व्यत्ययेनोदात्तत्वम्। 'चादिलोपे विभाषा' (पा. सू. ८. १. ६३) इति निघाताभावः। मर्त्यस्य। 'मृङ् प्राणत्यागे'। 'असिहसिमृ°' (उ. सू. ३. ३६६) इत्यादिना औणादिकः तन्प्रत्ययः। मर्तेषु भव इत्यर्थे 'भवे छन्दसि' (पा. सू. ४. ४. ११०) इति यत्। 'यतोऽनावः' इत्याद्युदात्तत्वम्। रक्ष। 'रक्ष पालने'। शपः पित्त्वादनुदात्तत्वम्। धातुस्वर एव शिष्यते। पादादित्वात् न निघातः। रक्षा णः। 'व्यचोऽतस्तिङः' (पा. सू. ६. ३. १३५) इति दीर्घः। 'उपसर्गाद्बहुलम्' (पा. सू. ८. ४. २८) इति बहुलग्रहणात् अनुपसर्गादपि नसो णत्वम्। ब्रह्मणस्पते। 'षष्ठ्याः पतिपुत्र°' (पा. सू. ८. ३. ५३) इति संहितायां विसर्गस्य सकारः। सुबामन्त्रिते पराङ्गवद्भावात् पदद्वयस्य आमन्त्रितनिघातः॥

**स घा वीरो न रिष्यति यमिन्द्रो ब्रह्मणस्पतिः। सोमो हिनोति मर्त्यम् ॥४॥**

सः। घ। वीरः। न। रिष्यति। यम्। इन्द्रः। ब्रह्मणः। पतिः। सोमः। हिनोति। मर्त्यम्॥४॥

[v]इन्द्रः देवः [v]यं [v]मर्त्यं यक्ष्यमाणं [v]हिनोति प्राप्नोति वर्धयति वा। तथा [v]ब्रह्मणस्पतिः देवो हिनोति। तथा [v]सोमः हिनोति। [v]सः [v]घ स एव यजमानः [v]वीरः वीर्ययुक्तः सन् [v]न [v]रिष्यति न विनश्यति॥ घ। चादिरनुदात्तः। संहितायाम् 'ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्' इति दीर्घः। ब्रह्मणस्पतिः। उक्तम्। हिनोति। 'हि गतौ वृद्धौ च'। 'स्वादिभ्यः श्नुः'। तिपः पित्त्वात् श्नुप्रत्ययस्वर एव शिष्यते॥

**त्वं तं ब्रह्मणस्पते सोम इन्द्रश्च मर्त्यम्। दक्षिणा पात्वंहसः ॥ ५ ॥**

त्वम्। तम्। ब्रह्मणः। पते। सोमः। इन्द्रः। च। मर्त्यम्। दक्षिणा। पातु। अंहसः॥५॥

हे [v]ब्रह्मणस्पते [v]त्वं [v]तं [v]मर्त्यम् अनुष्ठातारं मनुष्यम् [v]अंहसः पापात् पाहीति शेषः। तथा [v]सोमः [v]पातु [v]इन्द्रश्च पातु दक्षिणाख्या देवता च पातु॥ दक्षिणा। 'दक्ष वृद्धौ'। 'दुदक्षिभ्यामिनन्' (उ. सू. २. २०८)। नित्त्वादाद्युदात्तः। अंहसः। 'नञ्विषयस्य°' इत्यादिनाद्युदात्तः॥ ॥ ३४ ॥

---

१, ठ–यजमानम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अनुप्रवचनीयचरोर्होमे ' सदसस्पतिम् ' इत्येषा विनियुक्ता । तथा च गृह्ये ' मेखलामाबध्य ' इति खण्डे पठ्यते—' आचार्यः समन्वारब्धे जुहुयात् सदसस्पतिमद्भुतम् ' ( आश्व. गृ. १. २२. ११ ) इति ॥

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषम् ॥ ६ ॥

सदसः । पतिम् । अद्भुतम् । प्रियम् । इन्द्रस्य । काम्यम् । सनिम् । मेधाम् । अयासिषम् ॥६॥

Vमेधां लब्धुं Vसदसस्पतिम् एतन्नामकं देवम् Vअयासिषं प्राप्तवानस्मि । कीदृशम् । Vअद्भुतम् आश्चर्यकरं Vइन्द्रस्य Vप्रियं सोमपाने सहचारित्वात्[1] Vकाम्यं कमनीयं Vसनिं धनस्य दातारम् ॥ सदसः । षद्लृ विशरणादौ । ' सर्वधातुभ्योऽसुन् ' । नित्त्वादाद्युदात्तः । पतिम् । पातेर्डतिः ( उ. सू. ४. ४९७ ) । टिलोपः । प्रत्ययस्वरः । प्रियम् । ' इगुपधज्ञाप्रीकिरः कः ' । इयङादेशः । प्रत्ययस्वरः । काम्यम् । कामयतेः ' अचो यत् ' । ' णेरनिटि ' इति णिलोपः । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । सनिम् । ' षणु दाने ' । ' धात्वादेः षः सः ' । ' अच इः ' ( उ. सू. ४. ५७८ ) इत्यनुवृत्तौ ' खनिकष्यज्यसिवसिवनिसनिध्वनिग्रन्थिचरिभ्यश्च ' ( उ. सू. ४. ५७९ ) इति इप्रत्ययः । प्रत्ययस्वरः । अयासिषम् । ' या प्रापणे ' । लुङ् । सिपोऽमादेशः । ' यमरमनमातां सक् च ' ( पा. सू. ७. २. ७३ ) इति सिच इडागमः; धातोः सगागमः । निघातः ॥

यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन । स धीनां योगमिन्वति ॥ ७ ॥

यस्मात् । ऋते । न । सिध्यति । यज्ञः । विपः । चितः । चन । सः । धीनाम् । योगम् । इन्वति ॥७॥

Vयज्ञः अयमनुष्ठातव्यः Vविपश्चितश्चन विदुषोऽपि यजमानस्य Vयस्मात् सदसस्पतिदेवात् Vऋते Vन Vसिध्यति Vसः अयं सदसस्पतिर्देवः Vधीनां मनोऽनुष्ठानविषयाणामस्मद्बुद्धीनामनुष्ठेयकर्मणां वा Vयोगं संबन्धम् Vइन्वति व्याप्नोति । यजमानमनुगृह्य तदीयं यज्ञं निष्पादयतीत्यर्थः ॥ यस्मात् । ' अन्याराद्° ' ( पा. सू. २. ३. २९ ) इत्यादिना ऋतेयोगात् पञ्चमी । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वे प्राप्ते ' न गोश्वन्साववर्ण° ' इति प्रतिषेधः । सिध्यति । ' षिधु संराद्धौ ' । श्यनो नित्त्वादाद्युदात्तत्वम् । ' यङ्वृत्तान्नित्यम्° ' इति निघातप्रतिषेधः । धीनाम् । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । योगम् । ' युजिर् योगे ' । घञो नित्त्वादाद्युदात्तत्वम् । इन्वति । ' इवि व्याप्तौ ' । शप् । ' इदितो नुम् धातोः ' इति नुम् । निघातः ॥

आदध्नोति हविष्कृतिं प्राञ्चं कृणोत्यध्वरम् । होत्रा देवेषु गच्छति ॥ ८ ॥

आत् । ऋध्नोति । हविःऽकृतिम् । प्राञ्चम् । कृणोति । अध्वरम् । होत्रा । देवेषु । गच्छति ॥८॥

Vआत् अनन्तरमेव Vहविष्कृतिं हविःसंपादनयुक्तं यजमानम् Vऋध्नोति सदसस्पतिर्देवो वर्धयति । हविर्दानानन्तरमेव फलं प्रयच्छतीत्यर्थः । तथाविधफलसिद्धये Vअध्वरं यजमानेनानुष्ठीयमानं

---

१, ठ–सहकारित्वात् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यज्ञं [v]प्राञ्चं प्रकर्षेण गच्छन्तमविघ्नेन परिसमाप्तियुक्तं [v]कृणोति करोति । [v]होत्रा हूयमाना देवता तुष्टा सती यजमानं प्रख्यापयितुं [v]देवेषु [v]गच्छति । यद्वा । होत्रा अस्मदीयस्तुतिरूपा वाक् देवान् परितोषयितुं देवेषु गच्छति । ' श्लोकः धारा ' इत्यादिषु सप्तपञ्चाशत्सु वाङ्नामसु ' होत्रा गीः ' ( नि. १. ११. ३५ ) इति पठितम् ॥ हविष्कृतिम् । हविषः कृतिः संपादनं यस्य यजमानस्य सोऽयं हविष्कृतिः । ' बहुव्रीहौ प्रकृत्या° ' इति पूर्वपदप्रकृतिस्वरत्वम् । प्राञ्चम् । ' अनिगन्तोऽञ्चतौ वप्रत्यये ' ( पा. सू. ६. २. ५२ ) इति गतेः प्रकृतिस्वरत्वम् । पश्चात् एकादेशस्वरः । अध्वरम् । न विद्यते ध्वरो हिंसा यस्मिन् । ' नञ्सुभ्याम् ° ' इत्युत्तरपदान्तोदात्तत्वम् । हूयतेऽस्यामिति होत्रा देवता । ' हुयामाश्रुभसिभ्यस्त्रन् ' ( उ. सू. ४. ६०७ ) इति त्रन् । नित्त्वादाद्युदात्तः ॥

**नराशंसं सुधृष्टममपश्यं सप्रथस्तमम् । दिवो न सद्ममखसम् ॥ ९ ॥**

नराशंसम् । सुऽधृष्टमम् । अपश्यम् । सुप्रथःऽतमम् । दिवः । न । सद्मऽअखसम् ॥ ९ ॥

[v]नराशंसम् एतन्नामकं देवविशेषम् । यद्वा । अवयवार्थव्युत्पत्त्या सदसस्पतिदेवतापरोऽयं शब्दः । व्युत्पत्तिं च यास्को दर्शयति–' नराशंसो यज्ञ इति कात्थक्यो नरा अस्मिन्नासीनाः शंसन्त्यग्निरिति शाकपूणिर्नरैः प्रशस्यो भवति ' ( निरु. ८. ६ ) इति । अत्र अग्निवत् सदसस्पतेरपि नरैः शस्यमानत्वात् नराशंसत्वम् । एतमेवाभिप्रायं हृदि निधाय ब्राह्मणमेवमाम्नायते–' प्रजा वै नरो वाक् शंसः ' ( ऐ. ब्रा. ६. २७ ) इति । अतो मनुष्यैः शस्यमानो यः सदसस्पतिर्यो वा नराशंसनामको देवः तम् [v]अपश्यम् शास्त्रदृष्ट्या दृष्टवानस्मि । कीदृशम् । [v]सुधृष्टमम् अत्याधिक्येन धार्ष्ट्ययुक्तं [v]सप्रथस्तमम् अतिशयेन प्रख्यातं [v]सद्ममखसं प्राप्ततेजस्कम् । तत्र दृष्टान्तः । [v]दिवो [v]न द्युलोकानिव । आदित्यचन्द्रादिभिरधिष्ठिता द्युलोकविशेषा यथा तेजस्विनः तद्वदयं नराशंसस्तेजस्वीत्यर्थः ॥ सुधृष्टमम् । शोभनं धृष्णोतीति सुधृक् । ' क्विप् च ' इति क्विप् । आतिशायनिकस्तमप् । षकारस्य जश्त्वाभावश्छान्दसः । कृदुत्तरपदप्रकृतिस्वरत्वेन ऋकार उदात्तः । अपश्यम् । ' पाघ्राध्मा° ' इत्यादिना पश्यादेशः । ' लुङ्लङ्लृङ्क्ष्वडुदात्तः ' इति अट उदात्तत्वम् । पादादित्वात् न निघातः । सप्रथस्तमम् । ' प्रथ प्रख्याने ' । प्रथनं प्रथः । ' सर्वधातुभ्योऽसुन् ' । नित्त्वादाद्युदात्तत्वम् । सह प्रथसा वर्तते इति ' तेन सहेति तुल्ययोगे ' ( पा. सू. २. २. २८ ) इति बहुव्रीहिसमासः । ' बोपसर्जनस्य ' ( पा. सू. ६. ३. ८२ ) इति सादेशः । पूर्वपदप्रकृतिस्वरत्वे प्राप्ते ' पराद्यिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम् । दिवः । ' ऊडिदम् ° ' इत्यादिना विभक्तेरुदात्तत्वम् । सद्ममखसम् । सीदतीति सद्म । षदॢ विशरणादौ । ' अन्येभ्योऽपि दृश्यन्ते ' ( पा. सू. ३. २. ७५ ) इति मनिन् । नित्त्वादाद्युदात्तः । सद्म महो यस्येति बहुव्रीहौ हकारस्य व्यत्ययेन खकारः ॥ ॥ ३५ ॥

' प्रति त्यम् ' इति नवर्चं द्वितीयं सूक्तम् । ऋषिच्छन्दसी पूर्ववत् । देवता त्वनुक्रम्यते—' प्रति त्यमाग्निमारुतम् ' इति । कारीरीष्टौ ' प्रति त्यम् ' इत्येषा धाय्या । तथा च सूत्रितं–' वर्षकामेष्टिः कारीरी तस्यां प्रति त्यं चारुमध्वरमीळे अग्निं स्ववसं नमोभिरिति धाय्ये ' ( आश्व. श्रौ. २. १३ ) इति ॥

**प्रति त्यं चारुमध्वरं गोपीथाय प्र हूयसे । मरुद्भिरग्न आ गहि ॥ १ ॥**

प्रति । त्यम् । चारुम् । अध्वरम् । गोऽपीथाय । प्र । हूयसे । मरुत्ऽभिः । अग्ने । आ । गहि ॥ १ ॥

---

१. क-ख-य-र-ल–एवमेवा° ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्यच्छब्दः सर्वनाम तच्छब्दपर्यायः। हे ᵛअग्ने यो यज्ञः चारुः अङ्गवैकल्यरहितः ᵛत्यं तथाविधं ᵛचारुमध्वरं प्रतिलभ्य ᵛगोपीथाय सोमपानाय ᵛप्र ᵛहूयसे प्रकर्षेण त्वं हूयसे तस्मात् अस्मिन्नध्वरे त्वं ᵛमरुद्भिः देवविशेषैः सह ᵛआ ᵛगहि आगच्छ। सेयमृक् यास्केनैवं व्याख्याता–' तं प्रति चारुमध्वरं सोमपानाय प्रहूयसे सोऽग्ने मरुद्भिः सहागच्छ ' ( निरु. १०. ३६ ) इति ॥ प्रति । निपात आद्युदात्तः । त्यम् । ' त्यदादीनामः ' ( पा. सू. ७. २. १०२ ) । प्रातिपदिकस्वरः । चारुम् । ' दृसनिजनिचरि° ' ( उ. सू. १. ३ ) इत्यादिना ञुण् । ' अत उपधायाः ' ( पा. सू. ७. २. ११६ ) इति वृद्धिः । जित्वादाद्युदात्तः । गोपीथाय । ' निशीथगोपीथावगाथाः ' ( उ. सू. २. १६६ ) इति थक्प्रत्ययान्तो निपातितः । प्र । निपातस्वरः ॥

**नहि देवो न मर्त्यो महस्तव क्रतुं परः । मरुद्भिरग्न आ गहि ॥ २ ॥**

नहि । देवः । न । मर्त्यः । महः । तव । क्रतुम् । परः । मरुत्ऽभिः । अग्ने । आ । गहि ॥२॥

हे ᵛअग्ने ᵛमहः महतः ᵛतव संबन्धिनं ᵛक्रतुं कर्मविशेषमुल्लङ्घ्य ᵛपरः ᵛनहि उत्कृष्टः ᵛदेवः न भवति खलु । तथा ᵛमर्त्यः मनुष्यश्च परः ᵛन भवति । ये मनुष्यास्त्वदीयं क्रतुमनुतिष्ठन्ति ये च देवास्त्वदीये क्रतौ इज्यन्ते ते एवोत्कृष्टा इत्यर्थः । मरुद्भिरित्यादि पूर्ववत् ॥ नहि । ' एवमादीनामन्तः ' इत्यन्तोदात्तः । देवः । पचाद्यजन्तः चित्वादन्तोदात्तः । महः । महतस्तलोपश्छान्दसः । ' बृहन्महतोरुपसंख्यानम् ' ( पा. सू. ६. १. १७३. १ ) इति विभक्तेरुदात्तत्वम् । तव । ' युष्मदस्मदोर्ङसि ' ( पा. सू. ६. १. २११ ) इत्याद्युदात्तत्वम् । क्रतुम् ।। ' कृञः कतुः ' ( उ. सू. १. ७७ ) । प्रत्ययाद्युदात्तत्वम् । गहि । ' गम्लृ सृप्लृ गतौ ' । लोटः सेर्हिः । ' बहुलं छन्दसि ' इति शपो लुक् । ' अनुदात्तोपदेश° ' ( पा. सू. ६. ४. ३७ ) इत्यादिना अनुनासिकलोपः । तस्य ' असिद्धवदत्रा भात् ' ( पा. सू. ६. ४. २२ ) इति असिद्धत्वात् ' अतो हेः ' इति लुक् न भवति । निघातः ॥

**ये महो रजसो विदुर्विश्वे देवासो अद्रुहः । मरुद्भिरग्न आ गहि ॥ ३ ॥**

ये । महः । रजसः । विदुः । विश्वे । देवासः । अद्रुहः । मरुत्ऽभिः । अग्ने । आ । गहि ॥३॥

हे अग्ने ᵛये मरुतः ᵛमहो ᵛरजसः महत उदकस्य वर्षणप्रकारं ᵛविदुः तैः मरुद्भिः इत्यन्वयः । कीदृशा मरुतः । ᵛविश्वे सर्वे सप्तविधगणोपेताः । ' सप्तगणा वै मरुतः ' ( तै. सं. २. २. ११. १ ) इति श्रुतेः । ᵛदेवासः द्योतमानाः ᵛअद्रुहः द्रोहरहिता वर्षणेन सर्वभूतोपकारित्वात् । तथा च उपरिष्टादाम्नायते—' उदीरयथा मरुतः समुद्रतो यूयं वृष्टिं वर्षयथा पुरीषिणः ' (ऋ. सं. ५. ५५.५ ) इति । शाखान्तरेऽपि मन्त्रान्तरस्य ब्राह्मणमेवमाम्नायते–'मरुतां पृषतयः स्थेत्याह मरुतो वै वृष्ट्या ईशते ' (तै. ब्रा.३. ३. ९. ४) इति । रजःशब्दो यास्केन बहुधा व्याख्यातः–' रजो रजतेर्ज्योती रज उच्यत उदकं रज उच्यते लोका रजांस्युच्यन्तेऽसृगहनी रजसी उच्येते ' (निरु. ४. १९ ) इति॥ रजसः । ' नञ्विषयस्यानिसन्तस्य ' इत्याद्युदात्तः । विदुः । ' विद ज्ञाने ' । ' विदो लटो वा ' ( पा. सू. ३. ४. ८३ ) इति झेः उसादेशः । प्रत्ययस्वरः । यद्वृत्तयोगात् निघाताभावः । विश्वे । विशेः क्वनन्तस्य निखादा-

---

१. ग-ण-त-र-श–महत्त्वम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

द्युदात्तत्वम्। देवासः। 'आज्जसेरसुक्' । देवशब्दः पचाद्यजन्तः । चिरवादन्तोदात्तः । अद्रुहः । संपदादित्वात् भावे क्विपि बहुव्रीहौ 'नञ्सुभ्याम्°' इत्यन्तोदात्तत्वम् । कर्तरि वा क्विप्। तत्पुरुषे हि अव्ययपूर्वपदप्रकृतिस्वरत्वं स्यात्। न च कृदुत्तरपदप्रकृतिस्वरत्वम् ( पा. सू. ६. २. १३९ ), यतो नञ् न गतिर्न च कारक इति ॥

य उग्रा अर्कमानृचुरनाधृष्टास ओजसा। मरुद्भिरग्न आ गहि ॥ ४ ॥

ये। उग्राः। अर्कम्। आनृचुः। अनाधृष्टासः। ओजसा। मरुत्ऽभिः। अग्ने। आ। गहि ॥४॥

Vये मरुतः Vउग्राः तीव्राः सन्तः Vअर्कम् उदकम् Vआनृचुः अर्चितवन्तः वर्षणेन संपादितवन्त इत्यर्थः। तैः मरुद्भिः इत्यन्वयः । कीदृशा मरुतः । Vओजसा बलेन Vअनाधृष्टासः अतिरस्कृताः सर्वेभ्योऽपि प्रबला इत्यर्थः। अर्कशब्दस्योदकवाचित्वं वाजसनेयिन आमनन्ति—'आपो वा अर्कः' (श. ब्रा. १०. ६. ५. २) इति। तन्निर्वचनं च त एवामनन्ति–'सोऽर्चन्नचरत्तस्यार्चत आपोऽजायन्तार्चते वै मे कमभूदिति तदेवार्कस्यार्कत्वम्' ( श. ब्रा. १०. ६. ५. १ ) इति। स जगत् सृष्ट्वा हिरण्यगर्भ उदकं स्रष्टुमुद्युक्तोऽर्चन् सत्यसंकल्पमहिमप्रख्यापनेन स्वात्मानं पूजयन्नचरत्। तथा पूजयतो हिरण्यगर्भस्य सकाशादुदकमुत्पन्नम्। तदानीमर्चतो मत्तः कमभूदित्यवोचत्। तेनोदकस्य अर्कनाम निष्पन्नमित्यर्थः ॥ आनृचुः। अर्चतेः 'अपस्पृधेथाम्°' ( पा. सू. ६. १. ३६ ) इत्यादिना निपातितः। प्रत्ययस्वरः। यद्वृत्तयोगात् न निघातः। अनाधृष्टासः। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। ओजसा।। 'उब्जेर्बलोपश्च' ( उ. सू. ४. ६३१ ) इति असुन्। नित्त्वादाद्युदात्तः ॥

ये शुभ्रा घोरवर्पसः सुक्षत्रासो रिशादसः। मरुद्भिरग्न आ गहि ॥ ५ ॥

ये। शुभ्राः। घोरऽवर्पसः। सुऽक्षत्रासः। रिशादसः। मरुत्ऽभिः। अग्ने। आ। गहि ॥५॥

Vये मरुतः शुभ्रत्वादिगुणोपेताः तैः मरुद्भिः इत्यन्वयः । Vशुभ्राः शोभनाः Vघोरवर्पसः उग्ररूपधराः Vसुक्षत्रासः शोभनधनोपेताः Vरिशादसः हिंसकानां भक्षकाः। 'मघम्' इत्यादिष्वष्टाविंशतिसंख्याकेषु धननामसु 'क्षत्रं भगः' ( नि. २. १०. ९ ) इति पठितम्। शुभ्राः। 'स्फायितञ्चि°' इत्यादिना शुभेः औणादिको रक्प्रत्ययः। प्रत्ययस्वरः । घोरवर्पसः। घोरं वर्पो येषाम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। सुक्षत्रासः। बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। 'आद्युदात्तं द्व्यच्छन्दसि' ( पा. सू. ६. २. ११९ ) इत्येव तु न भवति, क्षत्रशब्दस्यान्तोदात्तत्वात्। रिशन्ति हिंसन्तीति रिशाः। तान् अदन्तीति रिशादसः । सर्वधातुभ्योऽसुन्प्रत्ययः । नित्स्वरेण उत्तरपदमाद्युदात्तम्। कृदुत्तरपदप्रकृतिस्वरेण स एव शिष्यते ॥ ॥ ३६ ॥

ये नाकस्याधि रोचने दिवि देवास आसते। मरुद्भिरग्न आ गहि ॥ ६ ॥

ये। नाकस्य। अधि। रोचने। दिवि। देवासः। आसते। मरुत्ऽभिः। अग्ने। आ। गहि॥६॥

---

१. ग-छ–उदकसत्यसंकल्प° ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]ये मरुतः [v]नाकस्याधि दुःखरहितस्य सूर्यस्योपरि [v]दिवि द्युलोके [v]रोचने दीप्यमाने [v]ये [v]देवासः स्वयमपि दीप्यमानाः [v]आसते तैः मरुद्भिः इत्यन्वयः ॥ नाकस्य । कं सुखम् । तत् यस्मिन्नास्ति असौ अकः इति बहुव्रीहिं कृत्वा पश्चात् नञ् । न अको नाक इति नञ्तत्पुरुषः । ' नलोपो नञः ' ( पा. सू. ६. ३. ७३ ) इति लोपो न भवति, ' नभ्राण्नपात्° ' ( पा. सू. ६. ३. ७५ ) इत्यादिना प्रकृतिभावात् । ' तत्पुरुषे तुल्यार्थ° ' ( पा. सू. ६. २. २ ) इत्यादिना अव्ययपूर्वपदप्रकृतिस्वरत्वेनोदात्तत्वम् । प्रथमतस्तत्पुरुषं कृत्वा पश्चात् बहुव्रीहौ उत्तरपदान्तोदात्तत्वं स्यात् । अधिशब्द उपर्यर्थे । उपसर्गप्रतिरूपको निपातः । रोचने । ' रुच दीप्तौ ' । ' अनुदात्तेतश्च हलादेः ' ( पा. सू. ३. २. १४९ ) इति युच् । ' चितः ' इत्यन्तोदात्तत्वम् । दिवि । ' ऊडिदम्° ' इत्यादिना विभक्तेरुदात्तत्वम् । देवासः । ' आज्जसेरसुक् ' इति असुक् । आसते । ' आस उपवेशने ' । अनुदात्तेत्त्वात् आत्मनेपदम् । झस्य अदादेशः । ' अदिप्रभृतिभ्यः शपः ' इति शपो लुक् । अनुदात्तेत्त्वात् लसार्वधातुकानुदात्तत्वम् । यद्वृत्तयोगात् न निघातः ॥

य ईङ्खयन्ति पर्वतान् तिरः समुद्रमर्णवम् । मरुद्भिरग्न आ गहि ॥ ७ ॥

ये । ईङ्खयन्ति । पर्वतान् । तिरः । समुद्रम् । अर्णवम् । मरुत्ऽभिः । अग्ने । आ । गहि ॥७॥

[v]ये मरुतः [v]पर्वतान् मेघान् [v]ईङ्खयन्ति चालयन्ति तथा [v]अर्णवं उदकयुक्तं [v]समुद्रं [v]तिरः कुर्वन्तीति शेषः । निश्चलस्य जलस्य तरङ्गाद्युत्पत्तये चालनं तिरस्कारः । तैः मरुद्भिः इत्यन्वयः ॥ ईङ्खयन्ति । ' उख उखि ' इत्यादौ ईखिर्गत्यर्थः । ' हेतुमति च ' ( पा. सू. ३. १. २६ ) इति णिच् । ' इदितो नुम् धातोः ' इति नुम् । णिजन्तधातोः ' चितः ' इत्यन्तोदात्तत्वम् । शपः पित्त्वादनुदात्तत्वम् । तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते । पर्वतान् । ' पूर्व पर्व मर्व पूरणे ' । औणादिकोऽतन् । प्रत्ययस्वरः ॥

आ ये तन्वन्ति रश्मिभिस्तिरः समुद्रमोजसा । मरुद्भिरग्न आ गहि ॥ ८ ॥

आ । ये । तन्वन्ति । रश्मिऽभिः । तिरः । समुद्रम् । ओजसा । मरुत्ऽभिः । अग्ने । आ । गहि ॥८॥

[v]ये मरुतः [v]रश्मिभिः सूर्यकिरणैः सह [v]आ [v]तन्वन्ति आप्नुवन्ति आकाशमिति शेषः । किंच [v]ओजसा स्वकीयबलेन [v]समुद्रं तिरस्कुर्वन्ति तैः मरुद्भिः इत्यन्वयः ॥ तन्वन्ति । ' तनु विस्तारे ' । लटो 'झोऽन्तः' । ' तनादिकृञ्भ्य उः ' ( पा. सू. ३. १. ७९ ) । ' सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः ' इति तिङ एव आद्युदात्तत्वम् । समुद्रम् । ' उन्दी क्लेदने ' । ' स्फायितञ्चि° ' इति रक् । समासे कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

अभि त्वा पूर्वपीतये सृजामि सोम्यं मधु । मरुद्भिरग्न आ गहि ॥ ९ ॥

अभि । त्वा । पूर्वऽपीतये । सृजामि । सोम्यम् । मधु । मरुत्ऽभिः । अग्ने । आ । गहि ॥९॥

---

१. श–'आद्युदात्तत्वम्' इत्यस्यानन्तरं ' रश्मिभिः । नियो मिः इत्यनुवृत्तौ अश्नोतेरश च इति मिः । प्रत्ययस्वरः ' इत्यधिकम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे vअग्ने vपूर्वपीतये पूर्वकाले प्रवृत्ताय पानाय त्वां प्रति vसोम्यं vमधु सोमसंबन्धिनं मधुररसम् vअभि vसृजामि सर्वतः संपादयामि। अतस्त्वं vमरुद्भिः सह अत्र आगच्छ॥ अभि। 'एवमादीनामन्तः' इत्यन्तोदात्तत्वम्। 'त्वामौ द्वितीयायाः' (पा. सू. ८. १. २३) इति त्वादेशः सर्वानुदात्तः। पूर्वपीतये। पूर्वा चासौ पीतिश्च। 'पुंवत्कर्मधारय०' (पा. सू. ६. ३. ४२) इत्यादिना पुंवद्भावः। सृजामि। 'सृज विसर्गे'। मिपः पित्त्वादनुदात्तत्वम्। विकरणस्वरः। सोम्यम्। 'सोममर्हति यः'। प्रत्ययस्वरेणान्तोदात्तः। मधु। 'फलिपाटिनमि०' (उ. सू. १. १८) इत्यादिना उप्रत्ययः। 'नित्' इत्यनुवृत्तेराद्युदात्तत्वम्। अन्यद्वृतम्॥ ॥ ३७ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे
ऋक्संहिताभाष्ये प्रथमाष्टके
प्रथमोऽध्यायः
समाप्तः॥

---

१. च-श-'अन्यद्वृतम्' इत्यस्यानन्तरं 'अत्र यास्कः—अभिसृजामि त्वा पूर्वपीतये पूर्वपानाय सोम्यं मधु सोममयं सोऽग्ने मरुद्भिः सहागच्छेति' इत्यधिकम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ प्रथमाष्टके द्वितीयोऽध्याय आरभ्यते । तत्र ' अयं देवाय ' इत्यष्टर्चं सूक्तम् । तस्य ऋषिच्छन्दसी पूर्ववत् । ऋभुदेवताकत्वमनुक्रम्यते–' अयमष्टावार्भवम् ' इति । विनियोगस्तु सूक्तस्य लैङ्गिकः स्मार्तो वा द्रष्टव्यः । व्यूढस्य प्रथमे छन्दोमे वैश्वदेवशस्त्रे ' अयं देवाय जन्मने ' इति आर्भवस्तृचः । ' अथ च्छन्दोमाः ' इति खण्डे सूत्रितम्–' अभि त्वा देव सवितः प्रेतां यज्ञस्य शंभुवायं देवाय जन्मन इति तृचाः ' ( आश्व. श्रौ. ८. ९ ) इति ॥

अयं देवाय जन्मने स्तोमो विप्रेभिरासया । अकारि रत्नधातमः ॥ १ ॥

अयम् । देवाय । जन्मने । स्तोमः । विप्रेभिः । आसया । अकारि । रत्नऽधातमः ॥ १ ॥

ऋभवो हि मनुष्याः सन्तस्तपसा देवत्वं प्राप्ताः । ते चात्र सूक्ते देवताः । तत्संघो जायमानवाचिना जन्मशब्देन एकवचनान्तेन अत्र निर्दिश्यते । vजन्मने जायमानाय ऋभुसंघरूपाय vदेवाय तत्प्रीत्यर्थम् vअयं vस्तोमः स्तोत्रविशेषः vविप्रेभिः मेधाविभिः ऋत्विग्भिः vआसया स्वकीयेनास्येन vअकारि निष्पादितः । कीदृशः स्तोमः । vरत्नधातमः अतिशयेन रमणीयमणिमुक्तादिधनप्रदः । स्तोत्रेण तुष्टा ऋभवो धनं प्रयच्छन्तीत्यर्थः ॥ आसया । आस्यशब्दात् तृतीयैकवचनस्य ' सुपां सुलुक्° ' इत्यादिना याजादेशः । व्यत्ययेन प्रकृतियकारस्य लोपः । ' चितः ' इत्यन्तोदात्तः । रत्नधातमः । रत्नानि दधातीति रत्नधाः । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

य इन्द्राय वचोयुजा ततक्षुर्मनसा हरी । शमीभिर्यज्ञमाशत ॥ २ ॥

ये । इन्द्राय । वचःऽयुजा । ततक्षुः । मनसा । हरी इति । शमीभिः । यज्ञम् । आशत ॥२॥

vये ऋभवः vइन्द्राय इन्द्रप्रीत्यर्थं vवचोयुजा ताडनादिकं विना वाङ्मात्रेण रथे युज्यमानौ सुशिक्षितौ vहरी एतन्नामकावश्वौ vमनसा vततक्षुः संपादितवन्तः । ऋभूणां सत्यसंकल्पत्वात् तत्संकल्पमात्रेण इन्द्रस्याश्वौ संपन्नावित्यर्थः । ते ऋभवः vशमीभिः ग्रहचमसादिनिष्पादनरूपैः कर्मभिः vयज्ञम् अस्मदीयम् vआशत व्याप्तवन्तः । ' अपः अग्रः ' इत्यादिषु षड्विंशतिसंख्याकेषु कर्मनामसु ' शमी शिमी ' ( नि. २. १. २३ ) इति पठितम् ॥ वचोयुजा । वचसा युज्येते । ' सप्तम्यूद्विप° ' इत्यादिना क्विप् । ' सुपां सुलुक्° ' इत्यादिना विभक्तेः आकारः । कृदुत्तरपदप्रकृतिस्वरः । ततक्षुः । ' तक्षू त्वक्षू तनूकरणे ' । लिटि झेः उसादेशः । पादादित्वादनिघातः । शमीभिः । शमयन्ति पापानीति शम्यः कर्माणि । औणादिकः इन् । ' कृदिकारादक्तिनः ' ( पा. सू. ४. १. ४५ ग. ) इति ङीप् । वृषादित्वादाद्युदात्तः । आशत । ' अशू व्याप्तौ ' । लङि झस्य अदादेशः । ' स्वादिभ्यः श्नुः ' । तस्य ' बहुलं छन्दसि ' इति लुक् । आडागमः । ' तिङ्ङतिङः ' इति निघातः ॥

---

१. च-छ-फ–इत्यष्टर्चं तृतीयम् । २. ढ–युज्येते ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तक्षन्नासत्याभ्यां परिज्मानं सुखं रथम् । तक्षन्धेनुं सबर्दुघाम् ॥ ३ ॥

तक्षन्। नासत्याभ्याम्। परिऽज्मानम्। सुऽखम्। रथम्। तक्षन्। धेनुम्। सबःऽदुघाम्॥३॥

vनासत्याभ्याम् अश्विदेवप्रीत्यर्थं vरथं vतक्षन् ऋभवो देवाः कंचिद्रथमतक्षन् तक्षणेन संपादितवन्तः। कीदृशम्। vपरिज्मानं परितो गन्तारं vसुखं उपर्युपवेशने सुखकरम्। किंच vधेनुं कांचिद्गां vतक्षन्। धातूनामनेकार्थत्वात् तक्षतिरत्र संपादनवाची। कीदृशीं धेनुम्। vसबर्दुघां सबरः क्षीरस्य दोग्ध्रीम्॥ तक्षन्। 'बहुलं छन्दसि०' (पा. सू. ६. ४. ७५) इति अडभावः। नासत्याभ्याम्। न विद्यते सत्यं ययोस्तौ असत्यौ। न असत्यौ नासत्यौ। 'नभ्राण्नपात्०' (पा. सू. ६. ३. ७५) इत्यादिना नलोपाभावः। परिज्मानम्। अजेः परिपूर्वस्य 'श्वन्नुक्षन्०' (उ. सू. १. १५७) इत्यादिना मन्प्रत्यये अकारलोपः आद्युदात्तत्वं च निपातनात्। सबर्दुघाम्। सबः पयः दोग्धीति सबर्दुघा। 'दुहः कब्घश्च' (पा. सू. ३. २. ७०) इति कप्। सबर् इति रेफान्तं प्रातिपदिकं क्षीरवाची इति संप्रदायविदः। कपः पित्त्वादनुदात्तत्वम्। धातुस्वर एव शिष्यते। समासे कृदुत्तरपदप्रकृतिस्वरः॥

द्वितीये छन्दोमे वैश्वदेवशस्त्रे 'युवाना पितरा पुनः' इति आर्भवस्तृचः। द्वितीयस्य 'अग्निं वो देवम्' इति खण्डे सूत्रितं—'महीं द्यौः पृथिवीं च नो युवाना पितरा पुनरिति तृचौ' (आश्व. श्रौ. ८. १०) इति॥

युवाना पितरा पुनः सत्यमन्त्रा ऋजूयवः । ऋभवो विष्ट्यक्रत ॥ ४ ॥

युवाना। पितरा। पुनरिति। सत्यऽमन्त्राः। ऋजुऽयवः। ऋभवः। विष्टी। अक्रत ॥ ४ ॥

vऋभव एतन्नामका देवाः पितरौ स्वकीयौ मातापितरौ पूर्वं वृद्धावपि vपुनः vयुवाना तरुणौ vअक्रत कृतवन्तः। कीदृशाः। vसत्यमन्त्राः अवितथमन्त्रसामर्थ्योपेताः। पुरश्चरणाद्यनुष्ठानेन सिद्धमन्त्रत्वात् यद्यत्फलमुद्दिश्य मन्त्राः प्रयुज्यन्ते तत्तत्फलं तथैव संपद्यते। तस्मात् जीर्णयोः पित्रोर्युवत्वं संपादयितुं समर्था इत्यर्थः। vऋजूयवः ऋजुतामात्मन इच्छन्तः छलरहिता इत्यर्थः। अत एव एतेषामनुष्ठिता मन्त्राः सिध्यन्ति। vविष्टी विष्टयो व्याप्तियुक्ताः। सर्वेषु कार्येषु एतदीयस्य मन्त्रसामर्थ्यस्याप्रतिघातोऽत्र व्याप्तिरुच्यते। ऋभुशब्दं यास्क एवं निर्वक्ति—'ऋभव उरु भान्तीति वर्तेन भान्तीति वर्तेन भवन्तीति वा' (निरु. ११. १५) इति॥ युवाना। युवन्शब्दो यौतेः कनिनन्तो नित्त्वादाद्युदात्तः। 'सुपां सुलुक्०' इत्यादिना विभक्तेः आकारः। पितरा। पूर्ववदाकारः। सत्यमन्त्राः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः। ऋजुशब्दो भावपरः। ऋजुत्वमात्मन इच्छन्ति। क्यच्। 'अकृत्सार्वधातुकयोर्दीर्घः' (पा. सू. ७. ४. २५) इति दीर्घः। 'क्याच्छन्दसि' (पा. सू. ३. २. १७०) इति उप्रत्ययः। प्रत्ययस्वरः। विष्टी। 'विषू व्याप्तौ'। 'क्तिच्क्तौ च संज्ञायाम्' (पा. सू. ३. ३. १७४) इति क्तिच्। 'तितुत्र०' इत्यादिना इट्प्रतिबन्धः। तस्मात् जसः 'इयाडियाजीकाराणामुपसंख्यानम्' (पा. सू. ७. १. ३९. १) इति तस्य ईकारादेशः। स च 'अलोऽन्त्यस्य' (पा. सू. १. १. ५२) इति सकारस्य भवति। ततः 'आद्गुणः' इति गुणे कृते 'प्रथमयोः पूर्वसवर्णः' (पा. सू. ६. १. १०२) इति पूर्वसवर्णदीर्घः। तं बाधित्वा परत्वात् 'जसि च' (पा. सू. ७. ३. १०९) इति ह्रस्वस्य गुणेन भवितव्यमिति चेत्, न। संज्ञापूर्वकस्य विधेरनित्यत्वात्। अक्रत। कृञो लुङ्। आत्मनेपदम्। झस्य अदादेशः। 'मन्त्रे घस०' (पा. सू. २. ४. ८०) इत्यादिना च्लेर्लुक्। यणादेशः। अडागमः। निघातः॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सं वो मदासो अग्मतेन्द्रेण च मरुत्वता आदित्येभिश्च राजभिः ॥ ५ ॥

सम् । वः । मदासः । अग्मत । इन्द्रेण । च । मरुत्वता । आदित्येभिः । च । राजऽभिः ॥५॥

हे ऋभवः [v]वः युष्माकं संबन्धिनः [v]मदासः मदहेतवः सोमाः [v]इन्द्रेण [v]च [v]आदित्येभिः आदित्यैः [v]च [v]सम् [v]अग्मत संगताः । ऋभूणामिन्द्रादित्यैः सह सोमपानं तृतीयसवनेऽस्ति । अत एव आवाहननिगदः आश्वलायनेनैवं पठितः–' इन्द्रमादित्यवन्तमृभुमन्तं विभुमन्तं वाजवन्तं बृहस्पतिवन्तं विश्वदेव्यावन्तमावह ' ( आश्व. श्रौ. ५. ३ ) इति । कीदृशेनेन्द्रेण [v]मरुत्वता मरुद्भिर्युक्तेन । अत एव मन्त्रान्तरमेवमाम्नायते–' मरुद्भिरिन्द्र सख्यं ते अस्तु ' ( ऋ. सं. ८. ९६. ७ ) इति । कीदृशैरादित्येभिः । [v]राजभिः दीप्यमानैः ॥ मदासः । माद्यति एभिरिति मदाः सोमाः । ' मदोऽनुपसर्गे ' ( पा. सू. ३. ३. ६७ ) इत्यप् । तस्य पित्त्वादनुदात्तत्वम् । धातुस्वर एव शिष्यते । ' आज्जसेरसुक् ' इति जसः असुगागमः । अग्मत । गमेः संपूर्वात् लुङ् । ' समो गम्यृच्छि° ' ( पा. सू. १. ३. २९ ) इत्यादिना आत्मनेपदम् । झस्य अदादेशः । ' सन्ज्ञे घस° ' इत्यादिना च्लेर्लुक् । ' गमहन° ' ( पा. सू. ६. ४. ९८ ) इत्यादिना उपधालोपः । ' व्यवहिताश्च ' इति समो व्यवहितप्रयोगः । निघातः । मरुत्वता । मरुतोऽस्य सन्तीति मरुत्वान् । ' तसौ मत्वर्थे ' ( पा. सू. १. ४. १९ ) इति भसंज्ञया पदसंज्ञाया बाधितत्वात् जश्त्वाभावः । ' झयः ' ( पा. सू. ८. २. १० ) इति मतुपो वत्वम् । आदित्येभिः । ' बहुलं छन्दसि ' ( पा. सू. ७. १. १० ) इति भिस ऐसादेशाभावे ' बहुवचने झल्येत् ' इति एत्वम् । राजभिः । राजन्शब्दस्य कनिनन्तत्वेन निस्वादाद्युदात्तत्वम् ॥ ॥ १ ॥

उत त्यं चमसं नवं त्वष्टुर्देवस्य निष्कृतम् । अकर्त चतुरः पुनः ॥ ६ ॥

उत । त्यम् । चमसम् । नवम् । त्वष्टुः । देवस्य । निःऽकृतम् । अकर्त । चतुरः । पुनरिति ॥६॥

[v]उत अपि च [v]त्वष्टुः एतन्नामकस्य [v]देवस्य संबन्धी तक्षणव्यापारः [v]नवं नूतनं [v]त्यं [v]चमसं तं सोमधारणक्षमं[1] काष्ठपात्रविशेषं [v]निष्कृतं निःशेषेण संपादितमकरोदिति शेषः । तक्षणव्यापारकुशलस्य त्वष्टुः[2] शिष्याः ऋभवः तेन निर्मितं तमेकं चमसं पुनरपि [v]चतुरः [v]अकर्त चतुर्धा विभक्तांश्चमसान् कृतवन्तः । एकस्य चतुर्विधत्वकरणरूपोऽयमर्थो मन्त्रान्तरेऽपि विस्पष्टः–' एकं चमसं चतुरः कृणोतन ' ( ऋ. सं. १. १६१. २ ) इति ॥ नवम् । ' णु स्तुतौ ' । नूयत इति नवम् । कर्मणि अप्प्रत्ययः । स हि घञोऽपवादत्वात् घञर्थे सर्वत्र भवति । घञ्प्रत्ययश्च ' अकर्तरि च कारके संज्ञायाम् ' ( पा. सू. ३. ३. १९ ) इति कर्तृव्यतिरिक्ते सर्वत्र कारके भवति । यद्यपि तत्र संज्ञायां इत्युक्तं तथापि चकारस्य संज्ञाव्यभिचारार्थत्वात् असंज्ञायामपि भवत्येव । संबध्यते इति संबन्धः । कर्मणि घञ् इत्युक्तम् । त्वष्टुः । ' तक्षू त्वक्षू तनूकरणे ' । औणादिकस्तृन् । ऊदित्वात्पक्षे इडभावः ( पा. सू. ७. २. ४४ ) । ' स्कोः संयोगाद्योरन्ते च ' ( पा. सू. ८. २. २९ ) इति ककारलोपः । निष्कृतम् । कृञो निरुपसृष्टात् कर्मणि क्तः । प्रादिसमासे ' नित्यं समासेऽनुत्तरपदस्थस्य ' ( पा. सू. ८. ३. ४५ ) इति षत्वम् । अत्र ' कर्तृकर्मणोः कृति ' ( पा. सू. २. ३. ६५ ) इति प्राप्ता षष्ठी यद्यपि ' न लोकाव्यय° ' ( पा. सू. २. ३. ६९ ) इति निषिद्धा तथापि कर्तुः शेषत्वेन विवक्षितत्वात् 'कर्तृकरणयोस्तृतीया' ( पा. सू. २. ३. १८ ) इत्येतस्याः प्राप्तेः शैषिकी षष्ठी ( पा. सू. २. ३. ५० ) । यथा कर्मणि शेषत्वेन विवक्षिते माषाणामश्नीयात्

---

१. ढ–माद्यते । २. ढ–सोमाधारणलक्षणम् । ६. ग-छ-झ-ढ-ण-र–तस्य त्वष्टुः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति। ' गतिरनन्तरः ' इति निस उदात्तत्वम्। अकर्त अकृपत। कृपो लुङि झस्य व्यत्ययेन तादेशः। ' मन्त्रे घस° ' इत्यादिना च्लेर्लुक्। ' छन्दस्युभयथा ' इति तिङ आर्धधातुकत्वात् डित्त्वाभावेन गुणः। चतुरः। ' चतुरः शसि ' ( पा. सू. ६. १. १६७ ) इत्युकार उदात्तः। पुनः। स्वरादिष्वाद्युदात्तः पठितः॥

तृतीये छन्दोमे वैश्वदेवशस्त्रे ' ते नो रत्नानि धत्तन ' इति द्वे ऋचावार्भव्यौ। 'तृतीयस्यागन्म सह' इति खण्डे सूत्रितम्–'इन्द्र इषे ददातु नस्ते नो रत्नानि धत्तनेत्येका द्वे च' ( आश्व. श्रौ. ८. ११ ) इति॥

ते नो रत्नानि धत्तन त्रिरा साप्तानि सुन्वते। एकमेकं सुशस्तिभिः॥ ७॥

ते। नः। रत्नानि। धत्तन। त्रिः। आ। साप्तानि। सुन्वते। एकम्ऽएकम्। सुशस्तिऽभिः॥७॥

पूर्वास्वृक्षु ये प्रतिपादिता ऋभवः [V]ते यूयं [V]सुशस्तिभिः शोभनैरस्मदीयशंसनैर्युक्ताः सन्तः [V]नः अस्माकं सबन्धिने [V]सुन्वते सोमाभिषवं कुर्वते यजमानाय [V]रत्नानि रमणीयानि सुवर्णमणिमुक्तादीनि धनानि [V]एकमेकं क्रमेण प्रत्येकं [V]धत्तन प्रयच्छत। सुवर्णादीनां मध्ये प्रतिद्रव्यं यावदपेक्षितं तावदिति विवक्षया एकमेकमित्युक्तम्। कीदृशानि रत्नानि। [V]त्रिरा त्रिवारम् आवृत्तानि। उत्तमानि मध्यमान्यधमानि च इत्येवं रत्नानां त्रिरावृत्तिः। किंच [V]साप्तानि सप्तसंख्यानिष्पन्नवर्गरूपाणि कर्माणि च धत्तन संपादयत। कीदृशानि साप्तानि। त्रिरा त्रिवारम् आवृत्तानि। अग्न्याधेयदर्शपूर्णमासादीनां सप्तानां हविर्यज्ञानामेको वर्गः। औपासनहोमो वैश्वदेवमित्यादीनां सप्तानां पाकयज्ञानां वर्गो द्वितीयः। अग्निष्टोमोऽत्यग्निष्टोम इत्यादीनां सप्तानां सोमसंस्थानां वर्गस्तृतीयः॥ रत्नानि। ' रमु क्रीडायाम् '। ' नित् ' इत्यनुवृत्तौ ' रमेस्त च ' (उ. सू. ३. २९४) इति नप्रत्ययः; तत्संनियोगेन मकारस्य तकारः। नित्त्वादाद्युदात्तः। धत्तन धत्त। ' तप्तनप्तनथनाश्च ' इति तशब्दस्य तनादेशः। सप्तानां वर्गः साप्तम्। ' सप्तनोऽञ् छन्दसि ' ( पा. सू. ५. १. ६१ ) इति वर्गे अञ्प्रत्ययः। ' नस्तद्धिते ' ( पा. सू. ६. ४. १४४ ) इति टिलोपः। ञित्त्वादादिवृद्धिः आद्युदात्तत्वं च। अत्र वर्गवचनेनानेन वर्गिणो लक्ष्यन्ते तेन बहुवचनम्। अन्यथा ह्येक एव वर्गस्त्रिरावृत्त इत्येकवचनमेव स्यात्। सुन्वते। ' शतुरनुमः° ' इति विभक्तेरुदात्तत्वम्। एकमेकम्। ' नित्यवीप्सयोः ' इति वीप्सायां द्विर्भावः। एकशब्द इणः कनन्तो नित्त्वादाद्युदात्तः। द्वितीयस्यैकशब्दस्य ' तस्य परमाम्रेडितम् ' इति आम्रेडितसंज्ञायाम् ' अनुदात्तं च ' ( पा. सू. ८. १. ३ ) इत्यनुदात्तत्वम्। सुशस्तिभिः। शस्यते आभिरिति शस्तयः ऋचः। ' शंसु स्तुतौ '। करणे क्तिन्। तस्य कित्त्वात् लोपः। शोभनाः शस्तयः इति प्रादिसमासे यद्यपि च क्तिनो नित्त्वादाद्युदात्तत्वेन कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव प्राप्तं, तत्तु परेण ' मन्क्तिन्व्याख्यान° ' ( पा. सू. ६. २. १५१ ) इत्यादिना उत्तरपदान्तोदात्तत्वेन बाध्यते॥

अधारयन्त वह्नयोऽभजन्त सुकृत्यया। भागं देवेषु यज्ञियम्॥ ८॥

अधारयन्त। वह्नयः। अभजन्त। सुऽकृत्यया। भागम्। देवेषु। यज्ञियम्॥ ८॥

[V]वह्नयः चमसादिसाधननिष्पादनेन यज्ञस्य वोढारः ऋभवः [V]अधारयन्त पूर्वं मनुष्यत्वेन मरणयोग्या अपि अमृतत्वलाभेन प्राणान् धारितवन्तः। तथा च मन्त्रान्तरमाम्नायते–' मर्तासः सन्तो

---

१. च-छ-त-फ-श-ष–वैश्वदेव इत्यादीनाम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अमृतत्वमानशुः ' ( ऋ. सं. १. ११०. ४ ) इति । किंचैते [V]सुकृत्यया यज्ञसाधनद्रव्यसंपादन-रूपेण-शोभनव्यापारेण [V]देवेषु मध्ये स्थिताः [V]यज्ञियं यज्ञार्हं [V]भागं हविर्लक्षणम् [V]अभजन्त सेवितवन्तः। अयमर्थः ' सौधन्वना यज्ञियं भागमानश ' ( ऋ. सं. ३. ६०. १ ) इत्यादिमन्त्रान्तरे विस्पष्टः। ब्राह्मणेऽपि ' ऋभवो वै देवेषु तपसा सोमपीथमभ्यजयन् ' ( ऐ. ब्रा. ३. ३० ) इत्याद्युपाख्यानं विस्पष्टम् ॥ वह्नयः । नित् ' इत्यनुवृत्तौ ' वहिश्रि° ' इत्यादिना निप्रत्ययः । अभजन्त । पादादित्वादनिघातः । सुकृत्यया । ' विभाषा कृवृषोः ' ( पा. सू. ३. १. १२० ) इति कृञः कर्मणि क्यप् । शोभनं कृत्यं यस्या भजनक्रियायाः सा सुकृत्या । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं बाधित्वा ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । ननु कृत्यशब्दे क्यपः पित्त्वेनानुदात्तत्वात् धातुस्वरेणादिरुदात्तः । ततश्च ' आद्युदात्तं द्व्यच्छन्दसि ' ( पा. सू. ६. २. ११९ ) इत्यनेनाद्युदात्तत्वेन भवितव्यम् । तेन हि पुरस्तादपवादेन परमपि 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वं बाध्यते इत्युक्तम् । एवं तर्हि ' कृञः श च ' ( पा. सू. ३. ३. १०० ) इति स्त्रियां भावे क्यप्प्रत्ययान्तः कृत्याशब्दः । क्यपः पित्त्वेऽपि व्यत्ययेनोदात्तत्वम् । प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते । भागम् । ' कर्षात्वतः° ' ( पा. सू. ६. १. १५९ ) इत्यन्तोदात्तः । यज्ञियम् । यज्ञमर्हतीत्यर्थे ' यज्ञर्त्विग्भ्यां घखञौ ' (पा. सू. ५. १. ७१) इति घः । तस्य इयादेशः । प्रत्ययस्वरः ॥ ॥ २ ॥

'इहेन्द्राग्नी' इत्यादिकं षड्चं चतुर्थं सूक्तम् । तस्य ऋषिच्छन्दसी पूर्ववत् । देवता त्वनुक्रम्यते–' इह षळैन्द्राग्नम् ' इति । विनियोगस्तु–अग्निष्टोमे अच्छावाकशस्त्रे ' इहेन्द्राग्नी उप ह्वये ' इति सूक्तम् । ' स्तोत्रमग्रे शस्त्रात् ' इति खण्डे ' इहेन्द्राग्नी उपेयं वामस्य मन्मन इति नव ' ( आश्व. श्रौ. ५. १० ) इति सूत्रितत्वात् । तथा अभिप्लवषडहे प्रातःसवने अच्छावाकशस्त्रे स्तोमातिशंसनार्थमेतदेव सूक्तम् । तथा च सूत्रितम् 'अभिप्लवपृष्ठ्याहानि ' इत्युपक्रम्य–' इहेन्द्राग्नी इन्द्राग्नी आ गतम् ' ( आश्व. श्रौ. ७. ५ ) इति ॥

**इहेन्द्राग्नी उप ह्वये तयोरित्स्तोममुश्मसि । ता सोमं सोमपातमा ॥ १ ॥**

इह । इन्द्राग्नी इति । उप । ह्वये । तयोः । इत् । स्तोमम् । उश्मसि । ता । सोमम् । सोमऽपातमा ॥१॥

[V]इह अस्मिन्कर्मणि [V]इन्द्राग्नी देवौ [V]उप [V]ह्वये आह्वयामि [V]तयोरित् इन्द्राग्न्योरेव [V]स्तोमं स्तोत्रं [V]उश्मसि कामयामहे । [V]सोमपातमा अतिशयेन सोमं पातुं क्षमौ तौ द्वौ देवौ [V]सोमं पिबताम् इति शेषः ॥ इन्द्राग्नी । अत्र देवताद्वन्द्वेऽपि पूर्वपदस्य आनङ् न भवति । तत्र हि द्वन्द्वे इत्यनुवृत्तौ पुनर्द्वन्द्वग्रहणात् लोकप्रसिद्धसाहचर्याणामेव द्वन्द्वे आनङ् इत्युक्तम् ( का. ६. ३. २६ ) । तस्मात् अत्र अवग्रहे ह्रस्व इन्द्रशब्दः । ' समासस्य ' इत्यन्तोदात्तत्वम् । ' देवताद्वन्द्वे च ' ( पा. सू. ६. २. १४१ ) इति उभयपदप्रकृतिस्वरत्वं तु न भवति । अग्निशब्दस्यानुदात्तादित्वेन ' नोत्तरपदेऽनुदात्तादौ ' ( पा. सू. ६. २. १४२ ) इति प्रतिषेधात् । उश्मसि । ' वश कान्तौ ' । लटो मस् । ' इदन्तो मसि ' (पा. सू. ७. १. ४६ ) इति इकारोपजनः । अदादित्वात् शपो लुक् । मसेर्ङित्त्वात् ' ग्रहिज्या° ' इत्यादिना संप्रसारणम् । ता सोमपातमा । उभयत्र ' सुपां सुलुक्° ' इति आकारः ॥

**ता यज्ञेषु प्र शंसतेन्द्राग्नी शुम्भता नरः । ता गायत्रेषु गायत ॥ २ ॥**

ता । यज्ञेषु । प्र । शंसत । इन्द्राग्नी इति । शुम्भत । नरः । ता । गायत्रेषु । गायत ॥२॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [V]नरः मनुष्याः ऋत्विजः [V]ता पूर्वोक्तौ तौ [V]इन्द्राग्नी [V]यज्ञेषु अनुष्ठीयमानकर्मसु [V]प्र [V]शंसत शस्त्रैः। तथा [V]शुम्भत नानाविधैरलंकारैः शोभितौ कुरुत। तथा [V]ता पूर्वोक्तौ ताविन्द्राग्नी [V]गायत्रेषु गायत्रीच्छन्दस्केषु मन्त्रेषु सामरूपेण [V]गायत ॥ ता । 'सुपां सुलुक्०' इति आकारः। शुम्भत । अस्य संहितायाम् 'अन्येषामपि दृश्यते' (पा. सू. ६. ३. १३७) इति दीर्घः ॥

ता मित्रस्य प्रशस्तय इन्द्राग्नी ता हवामहे। सोमपा सोमपीतये ॥ ३ ॥

ता। मित्रस्य। प्रऽशस्तये। इन्द्राग्नी इति। ता। हवामहे। सोमऽपा। सोमऽपीतये ॥ ३ ॥

[V]मित्रस्य स्नेहविषयस्य मम अनुष्ठातुः [V]प्रशस्तये [V]ता पूर्वोक्तौ देवौ संपद्येताम् इति शेषः। यद्वा। मित्रस्य मम संबन्धिनौ ताविन्द्राग्नी प्रशस्तये प्रशंसितुमिच्छामः इति शेषः। [V]सोमपा सोमपानक्षमौ [V]ता पूर्वोक्तौ [V]इन्द्राग्नी [V]सोमपीतये सोमपानार्थं [V]हवामहे आह्वयामः ॥ प्रशस्तये। 'तुमर्थाच्च भाववचनात्' (पा. सू. २. ३. १५) इति चतुर्थी। कृदुत्तरपदप्रकृतिस्वरत्वं बाधित्वा 'तादौ च निति कृत्यतौ' (पा. सू. ६. २. ५०) इति गतेः प्रकृतिस्वरत्वम्। सोमपीतये। सोमस्य पीतिर्यस्मिन्कर्मणि तस्मै। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। सोमस्य पीतिः इति तत्पुरुषे वा दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् ॥

उग्रा सन्ता हवामह उपेदं सवनं सुतम्। इन्द्राग्नी एह गच्छताम् ॥ ४ ॥

उग्रा। सन्ता। हवामहे। उप। इदम्। सवनम्। सुतम्। इन्द्राग्नी इति। आ। इह। गच्छताम् ॥४॥

[V]सुतम् अभिषवोपेतम् [V]इदम् अनुष्ठीयमानं [V]सवनं प्रातःसवनादिरूपं कर्म [V]उप सामीप्येन प्राप्तुम् [V]उग्रा [V]सन्ता वैरिवधादिषु क्रूरौ सन्तौ देवौ [V]हवामहे आह्वयामः। [V]इन्द्राग्नी देवौ [V]इह कर्मणि [V]आ [V]गच्छताम् ॥ सन्ता। अस्तेः शतरि 'श्नसोरल्लोपः'। सवनं सुतम् इति द्वयं 'सेमं नः स्तोममा गहि' (ऋ. सं. १. १६. ५) इत्यत्रोक्तम् ॥

ता महान्ता सदस्पती इन्द्राग्नी रक्ष उब्जतम्। अप्रजाः सन्त्वत्रिणः ॥ ५ ॥

ता। महान्ता। सदस्पती इति। इन्द्राग्नी इति। रक्षः। उब्जतम्। अप्रजाः। सन्तु। अत्रिणः ॥५॥

तौ पूर्वोक्तौ [V]इन्द्राग्नी [V]रक्षः राक्षसजातिम् [V]उब्जतम् ऋजु कुरुतं क्रौर्यं परित्याजयतमित्यर्थः। कीदृशौ। [V]महान्ता महान्तौ गुणैरधिकौ [V]सदस्पती सभापालकौ। तयोः प्रसादात् [V]अत्रिणः भक्षकाः राक्षसाः [V]अप्रजाः अनुत्पन्नाः [V]सन्तु ॥ महान्ता। 'सान्तमहतः संयोगस्य' (पा. सू. ६. ४. १०) इति दीर्घः। सदस्पती। सदसः पती इति समासे षष्ठ्या लुकि प्रातिपदिकसकारस्य रुत्वाभावश्छान्दसः। 'उभे वनस्पत्यादिषु युगपत्' (पा. सू. ६. २. १४०) इति उभयपदप्रकृतिस्वरत्वम्। इन्द्राग्नी। आमन्त्रिताद्युदात्तत्वम्। अप्रजाः। प्रजायन्ते इति प्रजाः। 'अन्येष्वपि दृश्यते' (पा. सू. ३. २. १०१) इति जनेः डप्रत्ययः। न प्रजाः अप्रजाः। प्रजाशब्दस्य बहुव्रीहौ हि 'नित्यमसिच् प्रजामेधयोः' (पा. सू. ५. ४. १२२) इति असिजादेशः स्यात्। अव्ययपूर्वपदप्रकृतिस्वरः। अत्रिणः। तृजन्तस्य अत्तृशब्दस्य जसश्छान्दसः इनुडागमः। 'चितः' इति ऋकार उदात्तः। तस्य यणादेशे 'उदात्तयणो हल्पूर्वात्' (पा. सू. ६. १. १७४) इति इकार उदात्तः ॥



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तेन॑ स॒त्येन॑ जागृ॒तमधि॑ प्रचे॒तुने॑ प॒दे । इन्द्रा॑ग्नी॒ शर्म॑ यच्छतम् ॥ ६ ॥

तेन॑ । स॒त्येन॑ । जा॒गृ॒तम् । अधि॑ । प्र॒ऽचे॒तुने॑ । प॒दे । इन्द्रा॑ग्नी॒ इति॑ । शर्म॑ । य॒च्छ॒त॒म् ॥६॥

हे [V]इन्द्राग्नी [V]सत्येन अवश्यफलप्रदानादवितथेन [V]तेन अस्माभिरनुष्ठितेन कर्मणा [V]प्रचेतुने प्रकर्षेण फलभोगज्ञापके [V]पदे स्वर्गलोकादिस्थाने [V]अधि [V]जागृतं आधिक्येन सावधानौ भवतम् । ततः अस्मभ्यं [V]शर्म [V]यच्छतं सुखं गृहं वा दत्तम् । 'गयः कृदरः' इत्यादिषु द्वाविंशतिसंख्याकेषु गृहनामसु 'शर्म वर्म' (नि. ३. ४. २१) इत्युक्तम् ॥ जागृतम् । 'जागृ निद्राक्षये' । 'अदिप्रभृतिभ्यः शपः' इति शपो लुक् । 'तिङ्ङतिङः' इति निघातः । प्रचेतुने । 'चिती संज्ञाने' इत्यस्मात् ण्यन्तात् बाहुलकादौणादिक उनप्रत्ययः । समासे कृदुत्तरपदप्रकृतिस्वरत्वम् । इन्द्राग्नी । 'इहेन्द्राग्नी' इत्यत्रोक्तम् । आमन्त्रितत्वादाद्युदात्तत्वमत्र विशेषः । शृणाति हिनस्ति दुःखमिति शर्म । 'शॄ हिंसायाम्' । 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन् । यच्छतम् । 'इषुगमियमां छः' (पा. सू. ७. ३. ७७) इति छः ॥ ॥ ३ ॥

'प्रातर्युजा' इत्यादिकमेकविंशत्यृचं पञ्चमं सूक्तम् । तस्य ऋषिच्छन्दसी पूर्ववत् । देवताविशेषस्वनुक्रम्यते—'प्रातर्युजा सैका चतस्र आश्विन्यस्तथा सावित्र्य आग्नेय्यौ द्वे देवीनामेकैकेन्द्राणीवरुणान्यग्नायीनां द्यावापृथिव्ये पार्थिवी षड्वैष्णव्योऽतो देवा दैवी वा' इति । 'सूक्तसंख्यानुवर्तते' इत्यस्मिन् खण्डे 'अनिरुक्ता संख्या विंशतिः' (अनु. १२. ४) इति परिभाषितत्वात् 'प्रातर्युजा' इति सूक्ते संख्याविशेषस्यानिरुक्ता संख्या विंशतिसंख्या द्रष्टव्या । सा च विंशतिः एकयाधिकया सह वर्तते इति सैका । तत्रादौ चतस्र ऋचः अश्विदेवताकाः । पञ्चमीमारभ्य अष्टम्यन्ताः चतस्रः सवितृदेवताकाः । नवमी दशमी चोभे अग्निदेवताके । एकादश्या ऋचो देवसंबन्धिन्यो देव्यो देवताः । द्वादश्या इन्द्रवरुणाग्निपत्न्य इन्द्राणीवरुणान्यग्नाय्यो देवताः । त्रयोदशीचतुर्दश्यौ द्यावापृथिवीदेवताके । पञ्चदशी पार्थिवी । षोडश्याद्याः षट् विष्णुदेवत्याः । षोडशी कृत्स्नदेवत्या[2] वा । अत्र सूक्तविनियोगो लैङ्गिकः । प्रातरनुवाके आश्विने क्रतौ 'प्रातर्युजा वि बोधय' इति चतस्र ऋचः । सूत्रितं च—'अथाश्विन एषो उषाः प्रातर्युजेति चतस्रः' (आश्व. श्रौ. ४. १५) इति । आश्विनग्रहस्य 'प्रातर्युजा' इत्येका पुरोनुवाक्या । 'द्विदेवत्यैश्चरन्ति' इति खण्डे सूत्रितम्—'आश्विनस्य प्रातर्युजा वि बोधय' (आश्व. श्रौ. ५. ५) इति ॥

प्रा॒तर्यु॒जा वि बो॑धया॒श्विना॒वेह ग॑च्छताम् । अ॒स्य सोम॑स्य पी॒तये॑ ॥ १ ॥

प्रा॒तः॒ऽयु॒जा॑ । वि । बो॒ध॒य॒ । अ॒श्विनौ॑ । आ । इ॒ह । ग॒च्छ॒ता॒म् । अ॒स्य । सोम॑स्य । पी॒तये॑ ॥१॥

अत्र होता अध्वर्युमुद्दिश्य ब्रूते । हे अध्वर्यो [V]प्रातर्युजा प्रातःसवनग्रहेण[3] संयुक्तावश्विनौ देवौ [V]वि [V]बोधय विशेषेण प्रबुद्धौ कुरु । [V]अश्विनौ[4] प्रबुद्धौ चाश्विनौ[4] देवौ [V]अस्य अभिषवसंस्कारयुक्तस्य [V]सोमस्य [V]पीतये पानाय [V]इह कर्मणि [V]आ [V]गच्छताम् ॥ प्रातर्युञ्जाते गृह्यमाणेन ग्रहेण सहेति प्रातर्युजा । 'सत्सूद्विष०' इत्यादिना क्विप् । 'सुपां सुलुक्०' इति आकारः । कृदुत्तरपदप्रकृतिस्वरत्वम् । अस्य । 'ऊडिदम्०' इत्यादिना विभक्तेरुदात्तत्वम् । पीतये । व्यत्ययेन क्तिन उदात्तत्वम् ॥

---

१. ढ—देवताविशेषास्त्वनुक्रम्यन्ते । २. त-ष—कृत्स्नदेवदेवत्या । ३. ढ—प्रातःसवने ग्रहेण । ४. छ-त-श-ष-ह—प्रबुद्धौ तौ अश्विनौ ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

या सुरथा रथीतमोभा देवा दिविस्पृशा । अश्विना ता हवामहे ॥ २ ॥

या । सुऽरथा । रथिऽतमा । उभा । देवा । दिविऽस्पृशा । अश्विना । ता । हवामहे ॥२॥

[V]या [V]उभा [V]अश्विना [V]देवा यावुभावश्विनौ देवौ [V]सुरथा शोभनरथयुक्तौ [V]रथीतमा रथिनां मध्ये अतिशयेन रथिनौ [V]दिविस्पृशा द्युलोकनिवासिनौ [V]ता [V]हवामहे तादृशावश्विनावाह्वयामहे ॥ या इत्यादिष्वष्टसु पदेषु 'सुपां सुलुक्०' इति द्विवचनस्य आकारः । सुरथा । शोभनो रथो ययोस्तौ सुरथौ । समासान्तोदात्तत्वापवादं बहुव्रीहौ पूर्वपदप्रकृतिस्वरं बाधित्वा 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वे प्राप्ते 'आद्युदात्तं द्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् । रथीतमा । 'अन्येषामपि दृश्यते' (पा. सू. ६. ३. १३७) इति संहितायाम् इकारस्य दीर्घत्वम् । दिविस्पृशा । दिवि स्पृशतः इति दिविस्पृशौ । 'क्विप् च' इति क्विप् । 'तत्पुरुषे कृति बहुलम्' (पा. सू. ६. ३. १४) इति अलुक् । 'गतिकारकोपपदात्कृत्' इति कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

या वां कशा मधुमत्यश्विना सूनृतावती । तया यज्ञं मिमिक्षतम् ॥ ३ ॥

या । वाम् । कशा । मधुऽमती । अश्विना । सूनृताऽवती । तया । यज्ञम् । मिमिक्षतम् ॥३॥

[V]अश्विना हे अश्विनौ देवौ [V]वां युवयोः संबन्धिनी [V]या [V]कशा अश्वताडनी विद्यते [V]तया सहागत्य [V]यज्ञम् अस्मदीयं [V]मिमिक्षतं सोमरसेन सेक्तुमिच्छतम् । कशयाश्वान् दृढं ताडयित्वा सहसा समागत्य भवद्विषयां सोमरसाहुतिं निष्पादयितुमुद्युक्तौ भवतमित्यर्थः । कीदृशी कशा । [V]मधुमती । 'अर्णः क्षोदः' इत्यादिषु एकशतसंख्याकेषु उदकनामसु 'मधु पुरीषम्' (नि. १. १२. ११) इति पठितम् । तस्मात् उदकवतीत्युक्तं भवति । अश्वस्य शीघ्रगत्या यत् स्वेदोदकं स्रवति तेनेयं कशा क्लिन्नेत्यर्थः । [V]सूनृतावती प्रियसत्यवाग्युक्ता । तीव्रेण कशाताडनेन यो ध्वनिर्निष्पद्यते ताडनवेलायाम् अश्वारूढेन च य आक्रोशः क्रियते तदुभयं शीघ्रगमनहेतुत्वेन यजमानस्य प्रियम् । यद्वा । 'श्लोकः धारा' इत्यादिषु सप्तपञ्चाशद्वाङ्नामसु 'कशा धिषणा' (नि. १. ११. ४३) इति पठितम् । अश्विनोर्या वाक् मधुमती माधुर्योपेता पारुष्यरहिता सूनृतावती प्रियत्वसत्यत्वोपेता फलप्रदानविषयेत्यर्थः । तया वाचा युक्तौ यज्ञं मिमिक्षतमिति योजनीयम् ॥ कशा । 'कश गतिशातनयोः' । पचाद्यच् । वृषादित्वादाद्युदात्तः । सूनृतावती । 'ऊन परिहाणे' । सुष्ठु ऊनयति अप्रियम् इति सून् । तथाविधम् ऋतं सत्यं यस्यां वाचि सा सूनृता । 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वं बाधित्वा 'परादिश्छन्दसि बहुलम्' इति ऋकार उदात्तः । सा यस्या अस्ति सा कशा सूनृतावतीति कशायाः संज्ञा । एवंनामा या कशेत्यर्थः । 'संज्ञायाम्' (पा. सू. ८. २. ११) इति मतुपो वत्वम् । मिमिक्षतम् । मिहेः सन् । 'हलन्ताच्च' (पा. सू. १. २. १०) इति कित्त्वाद्गुणाभावः । ढत्वकत्वषत्वानि ॥

नहि वामस्ति दूरके यत्रा रथेन गच्छथः । अश्विना सोमिनो गृहम् ॥ ४ ॥

नहि । वाम् । अस्ति । दूरके । यत्र । रथेन । गच्छथः । अश्विना । सोमिनः । गृहम् ॥ ४ ॥

---

१. ढ- एतन्नामका । २. ढ-मिमिक्षतम् । मिह सेचने ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ᵛअश्विना हे अश्विनौ देवौ युवां ᵛसोमिनः सोमवतो यजमानस्य ᵛगृहं प्रति ᵛरथेन ᵛगच्छथः स मार्गो ᵛवां युवयोः ᵛदूरके दूरदेशे ᵛनहि ᵛअस्ति न वर्तते खलु । यद्वा । ᵛयत्र गृहे गच्छथः तच्च गृहं दूरे न भवति ॥ नहि । 'एवमादीनामन्तः' इत्यन्तोदात्तः । अस्ति । 'चादिलोपे विभाषा' इति निघाताभावः । अत्र हि गृहं दूरे च नास्ति युवां च रथेन गच्छथः इति समुच्चयश्चार्थो गम्यते, चशब्दो न प्रयुज्यते इति चलोपे प्रथमा तिङ्विभक्तिरस्तीति । यत्र । 'निपातस्य च' इति संहितायां दीर्घत्वम्। गच्छथः । इयं यद्यपि न प्रथमा तथापि यत्र इति यद्वृत्तयोगात् न निघातः ॥

व्यूढस्य द्वितीये छन्दोमे वैश्वदेवशस्त्रे 'हिरण्यपाणिमूतये' इति सावित्र्यश्चतस्रः । 'द्वितीयस्य' इति खण्डे सूत्रितं–'हिरण्यपाणिमूतय इति चतस्रो मही द्यौः पृथिवी च नः' ( आश्व. श्रौ. ८. १० ) इति ॥

हिर॑ण्यपाणिमू॒तये॑ सवि॒तार॒मुप॑ ह्वये । स चेत्ता॑ दे॒वता॑ प॒दम् ॥ ५ ॥

हिर॑ण्यऽपाणिम् । ऊ॒तये॑ । स॒वि॒तार॑म् । उप॑ । ह्व॒ये॒ । सः । चेत्ता॑ । दे॒वता॑ । प॒दम् ॥ ५ ॥

ᵛऊतये अस्मद्रक्षणार्थं ᵛसवितारं देवम् ᵛउप ᵛह्वये आह्वयामि । ᵛसः च सविता देवः एतन्मन्त्रप्रतिपाद्यदेवता भूत्वा ᵛपदं यजमानेन प्राप्यं स्थानं ᵛचेत्ता ज्ञापयिता भवति । कीदृशं सवितारम् । ᵛहिरण्यपाणिं यजमानाय दातुं हस्ते सुवर्णधारिणम् । यद्वा । देवकर्तृके यागे सविता स्वयमृत्विग्भूत्वा ब्रह्मत्वेन अवस्थितः । तदानीं कस्यांचिदिष्टौ अध्वर्यवः तस्मै सवित्रे ब्रह्मणे प्राशित्रनामकं पुरोडाशभागं दत्तवन्तः । तच्च प्राशित्रं हस्ते सवित्रा गृहीतं सत् तदीयपाणिं चिच्छेद । ततः प्राशित्रस्य दातारोऽध्वर्यवः सुवर्णमयं पाणिं निर्माय प्रक्षिप्तवन्तः । सोऽयमर्थः कौषीतकिब्राह्मणे समाम्नातः—'सवित्रे प्राशित्रं प्रतिजह्रुस्तत्तस्य पाणी प्रचिच्छेद तस्मै हिरण्मयौ प्रतिदधुस्तस्माद्धिरण्यपाणिरिति स्तुतः' इति । हिरण्यशब्दं पाणिशब्दं च यास्क एवं निर्वक्ति—'हिरण्यं कस्माद्ध्रियत आयम्यमानमिति वा ह्रियते जनाज्जनमिति वा हितरमणं भवतीति वा हृदयरमणं भवतीति वा हर्यतेर्वा स्यात्प्रेप्साकर्मणः' ( निरु. २. १० ) इति । तथा 'पाणिः पणायतेः पूजाकर्मणः' ( नि. २. २६ ) इति ॥ हिरण्यशब्दो नब्विषयत्वादाद्युदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरः । ऊतये । 'उदात्तः' इत्यनुवृत्तौ 'ऊतियूतिजूतिसाति°' इत्यादिना क्तिनन्तः अन्तोदात्तो निपातितः । सवितारम् । तृचश्चित्त्वादन्तोदात्तत्वम् । चेत्ता । 'चिती संज्ञाने' । अस्मादन्तर्भावितण्यर्थात्ताच्छील्ये तृन् । 'अनित्यमागमशासनम्' इति इडभावः । नित्त्वादाद्युदात्तः । देवता । 'देवात्तल्' ( पा. सू. ५. ४.२७ ) इति स्वार्थे तल् । 'लिति' इति प्रत्ययात्पूर्वमुदात्तत्वम् । पदशब्दः पचाद्यजन्तः । 'चितः' इत्यन्तोदात्तः ॥ ॥ ४ ॥

अ॒पां नपा॑त॒मव॑से सवि॒तार॒मुप॑ स्तुहि । तस्य॑ व्र॒तान्यु॑श्मसि ॥ ६ ॥

अ॒पाम् । नपा॑तम् । अव॑से । स॒वि॒तार॑म् । उप॑ । स्तु॒हि॒ । तस्य॑ । व्र॒तानि॑ । उ॒श्म॒सि॒ ॥ ६ ॥

अत्र होता सामगमृत्विजम् अन्यं वा शस्त्रिणं ब्रूते । ᵛअवसे अस्मान् रक्षितुं ᵛसवितारम् ᵛउप ᵛस्तुहि । ᵛतस्य सवितुः संबन्धीनि ᵛव्रतानि कर्माणि सोमयागादिरूपाणि ᵛउश्मसि कामयामहे ।

---

१. ढ–वां युवाम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कीदृशं सवितारम्। [v]अपां [v]नपातं जलस्य न पालकम्। संतापेन शोषकमित्यर्थः॥ अपाम्। 'ऊडिदम्°' इत्यादिना विभक्तेरुदात्तत्वम्। नपातम्। 'पा रक्षणे'। अस्य शत्रन्तः पाच्छब्दः। तस्य नञा समासे 'नभ्राण्नपात्°' इत्यादिना नलोपप्रतिषेध इति वृत्तिकारः। अग्निर्ह्यपो न पाति तच्छोषकत्वात्। तर्हि कथम् अपाम् इति षष्ठी 'न लोकाव्ययनिष्ठाखलर्थ°' (पा. सू. २. ३. ६९) इति कर्मणि षष्ठ्याः प्रतिषेधात् इति चेत्, तर्ह्येषा शेषलक्षणास्तु। अग्न्यादित्यौ अपां कारणतया संबन्धिनौ 'अग्नेरापः' (तै. आ. ८. २) इति श्रुतेः। 'आदित्याज्जायते वृष्टिः' (मनु. ३. ७६) इति स्मृतेश्च। अस्मिन्पक्षे 'उगिदचाम्°' इति नुमभावोऽपि निपातनादेवेति मन्तव्यम्। पातेः क्विबन्तस्य तुग्वा निपातनात् द्रष्टव्यः। अथवा न पातयति इति नपात्। 'पतृ गतौ' इति धातोर्ण्यन्तात्क्विप्। अग्न्यादित्यौ ह्यपां न प्रापकौ प्रत्युत तच्छोषकौ। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। अवसे। 'तुमर्थे सेसेन्°' इत्यादिना असेन्। निरवादाद्युदात्तः। उक्षसि। 'वश कान्तौ'। 'अदिप्रभृतिभ्यः°' इति शपो लुक्। 'इदन्तो मसि' इति इकारोपजनः॥

**विभक्तारं हवामहे वसोश्चित्रस्य राधसः। सवितारं नृचक्षसम्॥ ७॥**

विऽभक्तारम्। हवामहे। वसोः। चित्रस्य। राधसः। सवितारम्। नृऽचक्षसम्॥ ७॥

[v]वसोः निवासहेतोः [v]चित्रस्य सुवर्णरजतादिरूपेण बहुविधस्य [v]राधसः धनस्य [v]विभक्तारम् अस्य यजमानस्य एतावद्धनदानम् उचितमिति विभागकारिणं [v]नृचक्षसं मनुष्याणां प्रकाशकारिणं [v]सवितारं [v]हवामहे। कौषीतकिन एतस्या ऋचो व्याख्यानरूपे ब्राह्मणे सवितुर्विभागहेतुत्वम् एवं समामनन्ति[1]– 'यदेतद्वसोश्चित्रं राधस्तदेष सविता विभक्ताभ्यः प्रजाभ्यो विभजति' इति॥ विभक्तारम्। तृचश्चित्रवादन्तोदात्तत्वम्। कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते। हवामहे। ह्वयतेः 'बहुलं छन्दसि' इति संप्रसारणम्। वसोः। 'वस निवासे'। 'शॄस्वृस्निहि°' (उ. सू. १. १०) इत्यादिना उः। 'नित्' इत्यनुवृत्तेः निरवादाद्युदात्तः। राधसः। असुनन्तः निरवादाद्युदात्तः। नृचक्षसम्। नॄन् चष्टे इति नृचक्षाः तं नृचक्षसम्। 'चक्षेर्बहुलं शिच्च' (उ. सू. ४. ६७२) इति असुन्। शित्वात् अनार्धधातुकत्वेन[2] ख्याजादेशाभावः। कृदुत्तरपदप्रकृतिस्वरत्वम्॥

**सखाय आ नि षीदत सविता स्तोम्यो नु नः। दाता राधांसि शुम्भति॥८॥**

सखायः। आ। नि। सीदत। सविता। स्तोम्यः। नु। नः। दाता। राधांसि। शुम्भति॥८॥

सखिभूता हे ऋत्विजः [v]आ [v]नि [v]षीदत सर्वत्रोपविशत। [v]नः अस्माकम् अयं [v]सविता [v]नु क्षिप्रं [v]स्तोम्यः स्तुतियोग्यः [v]राधांसि धनानि [v]दाता प्रदातुमुद्युक्तः एष सविता [v]शुम्भति शोभते॥ समानाः सन्तः ख्यान्ति प्रकाशन्ते इति सखायः। 'ख्या प्रकथने'। 'समाने ख्यश्चोदात्तः' (उ. सू. ४. ५७६) इति इण्प्रत्ययः; तत्संनियोगेन ङित्त्वं यलोपश्च। ङित्त्वात् आकारलोपः। 'समानस्य च्छन्दसि' (पा. सू. ६. ३. ८४) इत्यादिना समानशब्दस्य सादेशः। इण्संनियोगेनोदात्तत्वम्। जसि 'सख्युरसंबुद्धौ' (पा. सू. ७. १. ९२) इति णित्त्वात् वृद्धिः आयादेशश्च। नि षीदत। 'सदिरप्रतेः' (पा. सू. ८. ३. ६६) इति षत्वम्। स्तोमेषु प्रतिपाद्यत्वेन भवः स्तोम्यः। 'भवे छन्दसि' (पा. सू. ४. ४. ११०) इति यत्। 'यतोऽनावः' (पा. सू. ६. १. २१३) इत्याद्यु-

---

१. ढ-ष–एवमामनन्ति। २. श–विभक्ता। ३. ढ–सार्वधातुकत्वेन।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दात्तत्वम् दाता दानशीलः। ताच्छील्ये तृन्। नित्त्वादाद्युदात्तः। राधांसि। गतम्। 'कर्तृकर्मणोः कृति' ( पा. सू. २. ३. ६५ ) इति प्राप्तायाः षष्ठ्याः 'न लोकाव्यय°' ( पा. सू. २. ३. ६९ ) इति प्रतिषेधः ॥

अग्निष्टोमे प्रातःसवने 'अग्ने पत्नीरिहा वह' इति नेष्टुः प्रस्थितयाज्या। 'प्रशास्ता ब्राह्मणाच्छंसी' इति खण्डे सूत्रितम्–'अग्ने पत्नीरिहा वहोक्षान्नाय वशान्नाय' ( आश्व. श्रौ. ५. ५ ) इति॥

अग्ने॒ पत्नी॒रिहा व॑ह दे॒वानामु॒शतीरुप॑। त्वष्टा॑रं सोम॑पीतये ॥ ९ ॥

अग्ने॑। पत्नीः॑। इ॒ह। आ। व॒ह॒। दे॒वाना॑म्। उ॒श॒तीः॑। उप॑। त्वष्टा॑रम्। सोम॑ऽपीतये ॥९॥

हे ᵛअग्ने ᵛउशतीः कामयमानाः ᵛदेवानां ᵛपत्नीः इन्द्राण्याद्याः ᵛइह देवयजनदेशे ᵛआ ᵛवह। तथा ᵛत्वष्टारं देवं ᵛसोमपीतये सोमपानार्थम् ᵛउप समीपे आ वह ॥ पत्नीः। डत्यन्तः पतिशब्द आद्युदात्तः। 'पत्युर्नो यज्ञसंयोगे' ( पा. सू. ४. १. ३३ ) इति ङीप्; तत्संनियोगेन नकारश्च। ङीपः पित्त्वात् ङतिस्वर एव। उशतीः। 'वश कान्तौ'। लटः शतृ। 'अदिप्रभृतिभ्यः शपः' इति शपो लुक्। शतुर्ङित्त्वात् ग्रहिज्यादिना सम्प्रसारणम्। 'उगितश्च' इति ङीप्। 'शतुरनुमः°' इति ङीप् उदात्तः ॥

आ ग्ना अ॑ग्न इ॒हाव॑से॒ होत्रा॑ं यविष्ठ भार॑तीम्। वरू॒त्रीं धि॒षणा॑ं वह ॥ १० ॥

आ। ग्नाः। अ॒ग्ने॒। इ॒ह। अव॑से। होत्रा॑म्। य॒वि॒ष्ठ॒। भार॑तीम्। वरू॒त्रीम्। धि॒षणा॑म्। व॒ह॒ ॥१०॥

हे ᵛअग्ने ᵛअवसे अस्मानवितुं ᵛग्नाः देवपत्नीः ᵛइह ᵛआ ᵛवह। तथा हे ᵛयविष्ठ युवतमाग्ने ᵛहोत्रां होमनिष्पादकाग्निपत्नीं ᵛभारतीं भरतनामकस्य आदित्यस्य पत्नीं ᵛवरूत्रीं वरणीयां ᵛधिषणां वाग्देवीं च आ वह। 'वाग्वै धिषणा' इति वाजसनेयकम्। 'भरत आदित्यः' ( निरु. ८. १३ ) इति यास्केन उक्तत्वात् तस्य पत्नी भारती इत्युच्यते ॥ गम्यन्त इति ग्नाः। 'गमॢ सृप्लृ गतौ'। औणादिको डप्रत्ययः। डित्त्वात् टिलोपः। प्रत्ययस्वरः। होत्राम्। 'हुयामाश्रुभसिभ्यस्त्रन्' ( उ. सू. ४. ६०७ ) इति त्रनन्तो नित्त्वादाद्युदात्तः। अतिशयेन युवा यविष्ठः। 'अतिशायने तमबिष्ठनौ' ( पा. सू. ५. ३. ५५ )। 'स्थूलदूर°' ( पा. सू. ६. ४. १५६ ) इत्यादिना यणादिपरस्य लोपः पूर्वस्य च गुणः। भारतीम्। शार्ङ्गरवादेः अवृत्कृतत्वात् ङीनन्तो नित्त्वादाद्युदात्तः। वरूत्रीम्। 'ग्रसितस्कभित°' ( पा. सू. ७. २. ३४ ) इत्यादौ यद्यपि वरूतृशब्दः तृजन्त इत्युक्तं तथापि अन्ते इतिकरणस्य प्रदर्शनार्थत्वात् वरूतृशब्दः तृनन्तोऽपि द्रष्टव्यः। तेन नित्त्वादाद्युदात्तत्वम्। शेषनिघातेन ऋकारस्य अनुदात्तत्वात् 'उदात्तयणो हल्पूर्वात्' इत्यपि न ङीप उदात्तत्वम्। धिषणाम्। क्युप्रत्ययानुवृत्तौ 'धृषेर्धिष च संज्ञायाम्' ( उ. सू. २. २४० ) इति क्युः ॥ ॥ ५ ॥

अ॒भि नो॑ दे॒वीर॑वसा म॒हः शर्म॑णा नृप॒त्नीः। अच्छि॑न्नपत्राः सचन्ताम् ॥११॥

अ॒भि। नः॒। दे॒वीः। अव॑सा। म॒हः। शर्म॑णा। नृ॒ऽप॒त्नीः॑। अच्छि॑न्नऽपत्राः। स॒च॒न्ता॒म् ॥११॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vदेवीः देव्यः देवपत्न्यः vअवसा रक्षणेन vमहः महता vशर्मणा च सुखेन च सह vनः अस्मान् vअभि vसचन्ताम् आभिमुख्येन सेवन्ताम्। कीदृश्यो देव्यः। vनृपत्नीः मनुष्याणां पालयित्र्यः vअच्छिन्नपत्राः अच्छिन्नपक्षाः। न हि पक्षिरूपाणां देवपत्नीनां पक्षाः केनचित् छिद्यन्ते॥ देवीः। 'पुंयोगादाख्यायाम्' (पा. सू. ४. १. ४८) इति ङीपन्तः प्रत्ययस्वरेणान्तोदात्तः। 'दीर्घाज्जसि च' (पा. सू. ६. १. १०५) इति प्रतिषेधस्य 'वा छन्दसि' (पा. सू. ६. १. १०६) इति पाक्षिकस्योक्तेः पूर्वसवर्णदीर्घत्वम्। अवसा। 'अव रक्षणे'। असुन्। नित्त्वादाद्युदात्तः। महः। 'मह पूजायाम्'। क्विप्। 'सुपां सुपो भवन्ति' (पा. म. ७. १. ३९) इति तृतीयैकवचनस्य ङसादेशः। 'सावेकाचः°' इति विभक्तेरुदात्तत्वम्। नृपत्नीः। समासान्तोदात्तत्वे प्राप्ते 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वम्। अच्छिन्नपत्राः। न च्छिन्नानि अच्छिन्नानि। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। अच्छिन्नानि पत्राणि यासां ताः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्॥

**इहेन्द्राणीमुप ह्वये वरुणानीं स्वस्तये। अग्नायीं सोमपीतये॥ १२॥**

इह। इन्द्राणीम्। उप। ह्वये। वरुणानीम्। स्वस्तये। अग्नायीम्। सोमऽपीतये॥ १२॥

vइह अस्मिन्कर्मणि vस्वस्तये अस्माकमविनाशाय vसोमपीतये सोमपानाय च इन्द्रवरुणाग्नीनां पत्नीः आह्वयामि॥ इन्द्राणीम्। वरुणानीम्। 'इन्द्रवरुण°' (पा. सू. ४. १. ४९) इत्यादिना पुंयोगे ङीप्प्रत्ययः आनुगागमश्च। प्रत्ययस्वरः। अग्नायीम्। 'वृषाकप्यग्निकुसितकुसिदानामुदात्तः' (पा. सू. ४. १. ३७) इति ङीप्; तत्संनियोगेन इकारस्य ऐकार उदात्तः। सोमपीतये। असकृत् पूर्वोक्तम्॥

द्वितीये छन्दोमे वैश्वदेवशस्त्रे 'मही द्यौः पृथिवी च नः' इति द्यावापृथिव्यनिविद्धानीयस्तृचः। 'द्वितीयस्याग्निं वः' इति खण्डे सूत्रितं—'मही द्यौः पृथिवी च नो युवाना पितरा पुनः' (आश्व. श्रौ. ८. १०) इति। आग्रयणेष्टौ 'मही द्यौः' इत्येषा द्यावापृथिव्यैककपालस्य अनुवाक्या। 'आग्रयणं व्रीहिश्यामाक°' इति खण्डे सूत्रितं—'ये के च ज्मा महिनो अहिमाया मही द्यौः पृथिवी च नः' (आश्व. श्रौ. २. ९) इति। अग्निमन्थनेऽप्येषा विनियुक्ता। 'प्रातर्वैश्वदेव्याम्' इति खण्डे सूत्रितम्—'अभि त्वा देव सवितर्मही द्यौः पृथिवी च नः' (आश्व. श्रौ. २. १६) इति। विष्यन्दमानं सांनाय्यमनयैव आहवनीयदेशे निनयेत्। 'विध्यपराधे' इति खण्डे तथैव सूत्रितं—'विष्यन्दमानं मही द्यौः पृथिवी च न इत्यन्तःपरिधिदेशे निनयेयुः' (आश्व. श्रौ. ३. १०) इति। आश्विनशस्त्रेऽप्येषा 'संस्थितेष्वाश्विनाय' इति खण्डे सूत्रितं—'मही द्यौः पृथिवी च नस्ते हि द्यावापृथिवी विश्वशंभुवा' (आश्व. श्रौ. ६. ५) इति॥

**मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम्। पिपृतां नो भरीमभिः॥ १३॥**

मही। द्यौः। पृथिवी। च। नः। इमम्। यज्ञम्। मिमिक्षताम्। पिपृताम्। नः। भरीमऽभिः॥ १३॥

vमही महती vद्यौः द्युलोकदेवता vपृथिवी भूमिदेवता vच vनः अस्मदीयम् vइमं vयज्ञं vमिमिक्षतां स्वकीयसारभूतेन रसेन मिमिक्षतां सेक्तुमिच्छताम्। तथा vभरीमभिः भरणैः पोषणैः vनः अस्मान्

---

१. ढ—उप ह्वये आह्वयामि।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]पिपृताम् उभे देव्यौ पूरयताम् ॥ मही । महच्छब्दात् ' उगितश्च ' ( पा. सू. ४. १: ६) इति ङीप्। अच्छब्दलोपश्छान्दसः। ' बृहन्महतोरुपसंख्यानम् ' (पा. सू. ६. १. १७३. १ ) इति ङीप उदात्तत्वम्। द्यौः । दिव्शब्दः प्रातिपदिकस्वरेणान्तोदात्तः । ' गोतो णित् ' ( पा. सू. ७. १. ९०) इति ततः परस्य सोः णिद्वद्भावात् भवन्ती वृद्धिरपि स्थानिवद्भावेनोदात्ता । पृथिवी। ' प्रथ प्रख्याने '। ' प्रथेः पिवन्संप्रसारणं च ' ( उ. सू. १. १४८ ) इति पिवन्प्रत्ययः । ' पिद्गौरादिभ्यश्च ' ( पा. सू. ४. १. ४१ ) इति ङीष् । प्रत्ययस्वरः । मिमिक्षताम् । ' मिह सेचने '। सनि द्विर्भावहलादिशेषौ। ढत्वकत्वषत्वानि। पिपृताम् । ' पॄ पालनपूरणयोः ' । ह्रस्व इत्येके । शपः श्लुः । ' अर्तिपिपर्त्योश्च ' ( पा. सू. ७. ४. ७७ ) इति अभ्यासस्य अकारस्य इकारः । तिङः प्रत्ययस्वरः । भरीभृषि: । 'डुभृञ् धारणपोषणयोः '। 'हुस्तृभृधृस्वृसृभ्य ईमन् ' ( दश. पा. ६ ) इति ईमन् । नित्त्वादाद्युदात्तः ॥

**तयोरिद्घृतवत्पयो विप्रा रिहन्ति धीतिभिः । गन्धर्वस्य ध्रुवे पदे ॥ १४ ॥**

तयोः । इत् । घृतऽवत् । पयः । विप्राः । रिहन्ति । धीतिऽभिः । गन्धर्वस्य । ध्रुवे । पदे ॥१४॥

गन्धर्वस्य ध्रुवं पदम् अन्तरिक्षम् । तथा च तापनीयशाखायां समाम्नायते–' यक्षगन्धर्वाप्सरोगणसेवितमन्तरिक्षम् ' ( नृ. ता. १. २ ) इति। तेनान्तरिक्षेण उपलक्षिते आकाशे वर्तमानयोः [V]तयोरित् द्यावापृथिव्योरेव संबन्धि [V]पयः जलं [V]घृतवत् घृतसदृशं [V]विप्राः मेधाविनः प्राणिनः [V]धीतिभिः कर्मभिः [V]रिहन्ति लिहन्ति। यद्वा । घृतवत् घृतं सारं तेनोपेतं रिहन्ति॥ लिहेर्व्यत्ययेन रेफः। गन्धर्वस्य। ' धृञ् धारणे '। ' गैवि गन् धृञो वैः ' इति वप्रत्ययः; तत्संनियोगेन गोशब्दस्य च गन्नादेशः ॥

'स्योना पृथिवि ' इत्येषा महानाम्नीव्रते भूमिस्पर्शने विनियुक्ता। ' एतद्विदं ब्रह्मचारिणम् ' इति खण्डे सूत्रितं–' स्योना पृथिवि भवेति समाप्य ' ( आश्व. श्रौ. ८. १४ ) इति । स्मार्ते हेमन्तप्रत्यवरोहणेऽपि एषा जप्या[4] । ' मार्गशीर्ष्यां प्रत्यवरोहणम् ' इति खण्डे सूत्रितं–' तस्मिन्नुपविश्य स्योना पृथिवि भवेति जपित्वा ' ( आश्व. गृ. २. ३. ६ ) इति ॥

**स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथः ॥ १५ ॥**

स्योना । पृथिवि । भव । अनृक्षरा । निऽवेशनी । यच्छ । नः । शर्म । सऽप्रथः ॥ १५॥

हे [V]पृथिवि स्योनत्वादिगुणयुक्ता[5] [V]भव । स्योनशब्दो विस्तीर्णवाची । तथा च वाजसनेयब्राह्मणे स्योनशब्दोपेतं कंचिन्मन्त्रमुदाहृत्य व्याख्यातम्–' इन्द्रस्योरुमाविश स्योनः स्योनमिति विस्तीर्णो विस्तीर्णमित्येव तदाह ' इति। यद्वा । स्योनशब्दः सुखवाची (नि. ३. ६. १५)। तथा च यास्कवाक्यमुदाहरिष्यते । [V]अनृक्षरा कण्टकरहिता [V]निवेशनी निवेशस्थानभूता[6] [V]सप्रथः विस्तारयुक्तं [V]शर्म शरणं [V]नः अस्मभ्यं [V]यच्छ हे पृथिवि देहि । तामेतामृचमुदाहृत्य यास्क एवं व्याचष्टे– ' सुखा नः पृथिवि भवानृक्षरा निवेशन्यृक्षरः कण्टक ऋच्छतेः कण्टकः कन्तपो वा कृन्ततेर्वा कण्टतेर्वा स्याद्गतिकर्मण उद्गततमो भवति यच्छ नः शर्म शरणं सर्वतः पृथु ' ( निरु. ९. ३२ ) इति ॥ स्योना । ' षिवु

---

१. छ-त-श-ष–इत्येके । लोटस्तसस्ताम्। २. ढ–सारः । ३. त-ष–गवि धृञो गम् च। ४. च-छ-त-फ-श-ष–ऋक् जप्या। ५. ढ–स्योना स्योनत्वादिगुणयुक्ता । ६. छ-ढ-र-ह–निवासस्थानभूता।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तन्तुसन्ताने '। ' सिवेष्टेर्यो च ' ( उ. सू. ३. २८९ ) इति नप्रत्ययः। टेश्च यो इत्यादेशः। प्रत्यय-स्वरः। स्योना पृथिवि इत्यनयोः भव इत्याख्यातेनैवान्वयो न परस्परम्। अतः असामर्थ्येनैव पराङ्ग-वद्भावाभावात् ओकारस्य न आमन्त्रिताद्युदात्तत्वम्। अनृक्षरा। ' ऋषी गतौ '। गच्छति अन्तः इति ऋक्षरः कण्टकः। ' तन्यृषिभ्यां क्सरन् ' ( उ. सू. ३. ३५५ )। ' षढोः कः सि ' ( पा. सू. ८. २. ४१ ) इति कत्वम्। ' आदेशप्रत्यययोः ' इति षत्वम्। नञा बहुव्रीहिः। ' तस्मान्नुडचि ' ( पा. सू. ६. ३. ७४ ) इति नुडागमः। ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम्। निविशन्ति अस्याम् इति निवेशनी। ' करणाधिकरणयोश्च ' ( पा. सू. ३. ३. ११७ ) इति ल्युट्। ' लिति ' इति प्रत्ययात्पूर्वस्योदात्तत्वम्। यच्छ। ' दाण् दाने '। ' पाघ्रा° ' ( पा. सू. ७. ३. ७८ ) इत्या-दिना यच्छादेशः। ' ह्यचोऽतस्तिङः ' इति दीर्घः। सप्रथः। ' प्रथ प्रख्याने '। असुन्। प्रथसा सह वर्तते इति ' तेन सहेति तुल्ययोगे ' (पा. सू. २. २. २८) इति समासः। ' वोपसर्जनस्य ' ( पा. सू. ६. ३. ८२ ) इति सभावः। कृत्स्वरः ॥ ॥ ६ ॥

प्रातःसवने सोमातिरेके एकं शस्त्रं शंसनीयम्। अत्र ' अतो देवाः ' इत्याद्याः षड्ऋचः। ' सोमा-तिरेके ' इति खण्डे सूत्रितं–' महाँ इन्द्रो य ओजसातो देवा अवन्तु न इत्यैन्द्रीभिर्वैष्णवीभिश्च ' ( आश्व. श्रौ. ६. ७ ) इति। अग्नेर्यामे अच्छावाकातिरिक्तोक्थेऽपि एताः षड्ऋचः स्तोत्रियानुरूपार्थाः। तथा च ' यस्य पशवः ' इति खण्डे सूत्रितम्– ' अतो देवा अवन्तु न इति स्तोत्रियानुरूपौ ' ( आश्व. श्रौ. ९. ११ ) इति। दर्शपूर्णमासयोः प्रायश्चित्तहोमेऽपि आद्ये विनियुक्ते। तथैव ' वेदं पन्थै ' इति खण्डे सूत्रितम्–' अतो देवा अवन्तु न इति द्वाभ्यां व्याहृतिभिश्च ' ( आश्व. श्रौ. १. ११ ) इति। याज्यानुवाक्ययोर्मध्ये लौकिकभाषणे ' अतो देवाः ' इत्येषा जप्या। सूत्रितं हि–' आपद्यातो देवा अवन्तु न इति जपेत् ' ( आश्व. श्रौ. १. ५ ) इति ॥

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे। पृथिव्याः सप्त धामभिः ॥१६॥

अतः। देवाः। अवन्तु। नः। यतः। विष्णुः। विऽचक्रमे। पृथिव्याः। सप्त। धामऽभिः॥१६॥

vविष्णुः परमेश्वरः vसप्त vधामभिः सप्तभिर्गायत्र्यादिभिश्छन्दोभिः साधनभूतैः vयतः vपृथिव्याः यस्माद्भूप्रदेशात् vविचक्रमे विविधं पादक्रमणं कृतवान्, vअतः अस्मात् पृथिवीप्रदेशात् vनः अस्मान् vदेवाः vअवन्तु। विष्णोः पृथिव्यादिलोकेषु च्छन्दोभिः साधनैर्जयं तैत्तिरिया आसनन्ति—' विष्णुमुखा वै देवाश्छन्दोभिरिमाँल्लोकाननपजय्यमभ्यजयन् ' ( तै. सं. ५. २. १. १ ) इति। विष्णोस्त्रिविक्रमाव-तारे पादत्रयक्रमणस्य पृथिव्यपादानम्। पृथिवीप्रदेशाद्रक्षणं नाम भूलोके वर्तमानानां पापनिवारणम्॥ अतः। एतच्छब्दात् ' पञ्चम्यास्तसिल् ' ( पा. सू. ५. ३. ७ ) इति तसिल्। ' एतदोऽश् ' ( पा. सू. ५. ३. ५ ) इति अशादेशः। लित्स्वरेण अकार उदात्तः। यतः। तसिलः ' प्राग्दिशो विभक्तिः ' ( पा. सू. ५. ३. १ ) इति विभक्तिसंज्ञायां त्यदाद्यत्वम्। लित्स्वरः। विष्णुः। ' विषेः किच्च ' (उ. सू. ३. ३१९) इति नुप्रत्ययः। कित्त्वात् न गुणः। ' नित् ' इत्यनुवृत्तेः आद्युदात्तत्वम्। विचक्रमे। ' सुप् ' इति योगविभागात् विशब्दस्य समासः। समासान्तोदात्तत्वम्। यद्वृत्तयोगात् न निघातः। सप्त। ' सुपां सुलुक्° ' इति भिसो लुक्। धामभिः। दधातेः ' आतो मनिन्° ' ( पा. सू. ३. २. ७४ ) इति मनिन्। नित्स्वरः॥

वैष्णवोपांशुयाजस्य ' इदं विष्णुः ' इत्येषा अनुवाक्या। ' उक्ता देवताः ' इति खण्डे सूत्रितम्– ' इदं विष्णुर्वि चक्रमे त्रिर्देवः पृथिवीमेष एताम् ' (आश्व. श्रौ. १. ६) इति। गार्हपत्याहवनीययोर्मध्ये



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

श्वातिक्रमणे अनयैव श्वपदेषु भस्म प्रक्षिपेत् । ' विध्यपराधे ' इति खण्डे सूत्रितं—' भस्मना शुनः पदं प्रतिवपेदिदं विष्णुर्वि चक्रमे ' ( आश्व. श्रौ. ३. १० ) इति । आतिथ्यायां प्रधानस्य हविषः एषैवानुवाक्या । ' अथातिथ्येळान्ता ' इति खण्डे सूत्रितम्—' इदं विष्णुर्वि चक्रमे तदस्य प्रियमभिपाथो अश्याम् ' ( आश्व. श्रौ. ४. ५ ) इति । उपसत्सु वैष्णवस्य एषैवानुवाक्या । ' अथोपसत् ' इति खण्डे सूत्रितं—' गयस्फानो अमीवहेदं विष्णुर्वि चक्रमे ' ( आश्व. श्रौ. ४. ८ ) इति ॥

**इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् । समूळहमस्य पांसुरे ॥ १७ ॥**

इदम् । विष्णुः । वि । चक्रमे । त्रेधा । नि । दधे । पदम् । समऽऊळहम् । अस्य । पांसुरे ॥१७॥

vविष्णुः त्रिविक्रमावतारधारी vइदं प्रतीयमानं सर्वं जगदुद्दिश्य vवि vचक्रमे विशेषेण क्रमणं कृतवान् । तदा vत्रेधा त्रिभिः प्रकारैः vपदं vनि vदधे स्वकीयं पादं प्रक्षिप्तवान् । vअस्य विष्णोः vपांसुरे धूलियुक्ते पादस्थाने vसमूळहम् इदं सर्वं जगत् सम्यगन्तर्भूतम् । सेयमृक् यास्केनैवं व्याख्याता—' विष्णुर्विशतेर्वा व्यश्नोतेर्वा यदिदं किंच तद्विक्रमते विष्णुस्त्रिधा निधत्ते पदं त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवीति शाकपूणिः समारोहणे विष्णुपदे गयशिरसीत्यौर्णवाभः समूळहमस्य पांसुरे प्यायनेऽन्तरिक्षे पदं न दृश्यतेऽपि वोपमार्थे स्यात् पांसुर इव पदं न दृश्यत इति पांसवः पादैः सूयन्त इति वा पन्नाः शेरत इति वा पंसनीया भवन्तीति वा ' ( निरु. १२. १८–१९ ) इति ॥ त्रेधा । ' एधाच्च ' ( पा. सू. ५. ३. ४६ ) इति एधाच्प्रत्ययः । चितोऽन्तोदात्तः । समूळहम् । ' वह प्रापणे ' । ' निष्ठा ' इति क्तः । ' वचिस्वपि° ' ( पा. सू. ६. १. १५ ) इत्यादिना संप्रसारणम् । ढत्वधत्वष्टुत्वढलोपदीर्घत्वानि । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । अस्य । ' इदमोऽन्वादेशे° ' इति अश् अनुदात्तः, प्रत्ययश्च सुप्स्वरेण । पांसुरे । ' नगपांसुपाण्डुभ्यश्चेति वक्तव्यम् ' ( का. ५. २. १०७. २ ) इति मत्वर्थीयो रः । प्रत्ययस्वरः ।

उपसदि वैष्णवयागस्य प्रातःकाले याज्या सायंकालेऽनुवाक्या ' त्रीणि पदा ' इत्येषा । सूत्रितं च—' त्रीणि पदा वि चक्रम इति स्विष्टकृदादि लुप्यते ' ( आश्व. श्रौ. ४. ८ ) इति ॥

**त्रीणि पदा वि चक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ॥ १८ ॥**

त्रीणि । पदा । वि । चक्रमे । विष्णुः । गोपाः । अदाभ्यः । अतः । धर्माणि । धारयन्॥१८॥

vअदाभ्यः केनापि हिंसितुमशक्यः vगोपाः सर्वस्य जगतः रक्षकः vविष्णुः पृथिव्यादिस्थानेषु vअतः एतेषु vत्रीणि पदानि vवि vचक्रमे । किं कुर्वन् । vधर्माणि अग्निहोत्रादीनि vधारयन् पोषयन् ॥ पदा । ' सुपां सुलुक्° ' इत्यादिना विभक्तेः डादेशः । तस्य स्थानिवद्भावेन अनुदात्तत्वे प्राप्ते उदात्तनिवृत्तिस्वरेणोदात्तत्वम् । गोपाः । ' गोपामृतस्य ' ( ऋ. सं. १. १. ८ ) इत्यत्रोक्तम् । अदाभ्यः । दभेः ' ऋहलोर्ण्यत् ' ( पा. सू. ३. १. १२४ ) इति ण्यत् । नञ्समासः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । धारयन् । शपः पित्त्वादनुदात्तत्वम् । शतुश्च लसार्वधातुकस्वरेण णिच एव स्वरः शिष्यते ॥

---

१. च-छ-फ-श-ह-स्थानेषु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥ १९ ॥

विष्णोः । कर्माणि । पश्यत । यतः । व्रतानि । पस्पशे । इन्द्रस्य । युज्यः । सखा ॥ १९ ॥

हे ऋत्विगादयः [v]विष्णोः [v]कर्माणि पालनादीनि [v]पश्यत । [v]यतः यैः कर्मभिः [v]व्रतानि अग्निहोत्रादीनि [v]पस्पशे सर्वो यजमानः स्पृष्टवान् विष्णोरनुग्रहात् अनुतिष्ठति इत्यर्थः । तादृशो विष्णुः [v]इन्द्रस्य [v]युज्यः योज्यः अनुकूलः [v]सखा भवति । विष्णोः इन्द्रानुकूल्यं ' त्वष्टा हतपुत्रः ' इत्यनुवाके ' अथ वै तर्हि विष्णुः ' ( तै. सं. २. ४. १२. २ ) इत्यादिना प्रपञ्चेन तैत्तिरीया आमनन्ति ॥ पस्पशे । ' स्पश बाधनस्पर्शनयोः '। लिट् । द्विर्भावे ' शर्पूर्वाः खयः ' ( पा. सू. ७. ४. ६१ ) इति पकारः शिष्यते सकारो लुप्यते । यद्वृत्तयोगादनिघातः । युज्यः । युजेः बाहुलकात् क्यप् । कित्त्वाद्गुणाभावः । क्यपः पित्त्वादनुदात्तत्वम् । धातुस्वरः ॥

तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ २० ॥

तत् । विष्णोः । परमम् । पदम् । सदा । पश्यन्ति । सूरयः । दिविऽइव । चक्षुः । आऽततम् ॥ २० ॥

[v]सूरयः विद्वांस ऋत्विगादयः [v]विष्णोः संबन्धि [v]परमम् उत्कृष्टं [v]तत् शास्त्रप्रसिद्धं [v]पदं स्वर्गस्थानं शास्त्रदृष्ट्या सर्वदा [v]पश्यन्ति । तत्र दृष्टान्तः । [v]दिवीव । आकाशे यथा [v]आततं सर्वतः प्रसृतं [v]चक्षुः निरोधाभावेन विशदं पश्यति तद्वत् ॥ सदा । ' सर्वैकान्य° ' ( पा. सू. ५. ३. १५ ) इति दाप्रत्ययः । ' सर्वस्य सोऽन्यतरस्यां दि ' ( पा. सू. ५. ३. ६ ) इति सर्वशब्दस्य सभावः । व्यत्ययेनाद्युदात्तत्वम् । दिवि । ' ऊडिदम्° ' इत्यादिना विभक्तेरुदात्तत्वम् । ' इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च ' इति तदेव शिष्यते । चक्षुः । ' नञ्विषयस्य° ' इत्याद्युदात्तत्वम् । आततम् । तनोतेः कर्मणि क्तः । ' यस्य विभाषा ' इति इट्प्रतिषेधः । ' अनुदात्तोपदेश° ' इत्यादिना नलोपः । कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते ' गतिरनन्तरः ' इति गतेरुदात्तत्वम् ॥

तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत्परमं पदम् ॥ २१ ॥

तत् । विप्रासः । विपन्यवः । जागृऽवांसः । सम् । इन्धते । विष्णोः । यत् । परमम् । पदम् ॥ २१ ॥

पूर्वोक्तं [v]विष्णोः [v]यत् [v]परमं [v]पदम् अस्ति [v]तत् पदं [v]विप्रासः मेधाविनः [v]समिन्धते सम्यक् दीपयन्ति। कीदृशाः। [v]विपन्यवः विशेषेण स्तोतारः [v]जागृवांसः शब्दार्थयोः प्रमादराहित्येन जागरूकाः॥ विप्रासः । ' आज्जसेरसुक् ' । विपन्यवः । स्तुत्यर्थस्य पनेः बाहुलक औणादिको युप्रत्ययः । तत्र प्रत्ययस्वरः । जागृवांसः । ' जागृ निद्राक्षये ' । लिटः क्वसुः । क्रादिनियमात्प्राप्तस्य इटः ' वस्वेकाजाद्घसाम् ' ( पा. सू. ७. २. ६७ ) इति नियमात् निवृत्तिः ॥ ॥ ७ ॥

' तीव्राः ' इति चतुर्विंशत्यृचं षष्ठं सूक्तम् । अत्रेयमनुक्रमणिका—' तीव्राश्चतुर्विंशतिर्वायव्यैकैन्द्रवायव्यौ मैत्रावरुणमरुत्वतीयवैश्वदेवपौष्णास्तृचाः शेषा आप्योऽन्त्याध्यर्धाग्नेयप्स्वन्तः पुरउष्णिक् परानुष्टु-

---

१. ग-त-र-श-ष–शिष्टा आप्यो° ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सित्रश्चान्त्या एकविंशी प्रतिष्ठा ' इति । ' ऋषिश्चान्यस्मात् ' ( अनु. १२. २ ) इति परिभाषया अनुवर्तनात् मेधातिथिः काण्व ऋषिः । ' अप्स्वन्तः ' इत्येषा पुरउष्णिक् । प्रथमपादस्य द्वादशाक्षरेण ' आद्यश्चेत्पुरउष्णिक् ' ( अनु. ५. २ ) इति लक्षणसद्भावात् । ' अप्सु मे सोमः ' इत्येषा अनुष्टुप् । ' इदमापः ' इत्याद्यास्तिस्रः अनुष्टुभः । शिष्टा एकोनविंशतिसंख्याका ऋचो गायत्र्यः । ' आद्यौ गायत्रम् ' ( अनु. १२. १४ ) इति परिभाषितत्वात् आद्या वायुदेवताका । ततो द्वे ऋचौ इन्द्रवायुदेवताके । तत एकस्तृचो मित्रावरुणदेवत्यः । तत उत्तरतृचस्य मरुद्गणविशिष्टेन्द्रो देवता । तत एकस्तृचो वैश्वदेवः । तदनन्तरभावी पौष्णः । शिष्टा ऋचोऽग्निदेवताकाः । ' पयस्वानग्ने ' इत्यर्धर्चयुक्ता ' सं माग्ने ' इत्येषा तु अग्निदेवताका । सूक्तविनियोगो लिङ्गादवगन्तव्यः । अभिप्लवषडहस्य द्वितीयेऽहनि प्रउगशस्त्रे वायव्यतृचस्य ' तीव्राः सोमासः ' इत्येषा तृतीया । ' द्वितीयस्य चतुर्विंशेन ' इति खण्डे सूत्रितं—' तीव्राः सोमास आ गहीत्येका ' ( आश्व. श्रौ. ७. ६ ) इति । पृष्ठ्यषडहेऽपि द्वितीयेऽहनि प्रउगे एषा ॥

**तीव्राः सोमासः आ गह्याशीर्वन्तः सुता इमे । वायो तान्प्रस्थितान्पिब ॥ १ ॥**

तीव्राः । सोमासः । आ । गहि । आशीःऽवन्तः । सुताः । इमे । वायो इति । तान् । प्रऽस्थितान् । पिब ॥१॥

हे [V]वायो [V]इमे [V]सोमासः ऐन्द्रवायवग्रहादिरूपाः सोमाः [V]सुताः अभिषुताः । ते च [V]तीव्राः प्रभूतत्वात् तर्पयितुं समर्थाः [V]आशीर्वन्तः आशीर्युक्ताः[2] अतस्त्वम् [V]आ [V]गहि अस्मिन् कर्मणि आगच्छ । [V]प्रस्थितान् उत्तरवेदिं प्रति आनीतान् [V]तान् सोमान् [V]पिब ॥ सोमासः । ' अर्तिस्तु° ' ( उ. सू. १. १३७ ) इत्यादिना मन् । नित्त्वादाद्युदात्तः । ' आज्जसेरसुक् ' । गहि । ' मरुद्भिरग्न आ गहि ' ( ऋ. सं. १. १९. २ ) इत्यत्रोक्तम् । आशीर्वन्तः । ' श्रीञ् पाके ' । ' अपस्पृधेथाम्° ' ( पा. सू. ६. १. ३६ ) इत्यादिसूत्रे आङ्पूर्वस्य क्विपि शिरादेशो निपातितः । करणस्यापि श्रयणद्रव्यस्य स्वव्यापारे कर्तृत्वविवक्षया कर्तरि क्विप् न विरुध्यते । आशीः एषाम् अस्तीति आशीर्वन्तः । ' छन्दसीरः ' इति वत्वम् । वायो । आमन्त्रिताद्युदात्तत्वम् । प्रस्थितान् । प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वं बाधित्वा व्यत्ययेन अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

पूर्वोक्ते एव शस्त्रे ' उभा देवा दिविस्पृशा ' इति द्वे ऐन्द्रवायवतृचस्य प्रथमाद्वितीये । तथा च ' द्वितीयस्य ' इति खण्डे सूत्रितम्—' उभा देवा दिविस्पृशेति द्वे ' ( आश्व. श्रौ. ७. ६ ) इति ॥

**उभा देवा दिविस्पृशेन्द्रवायू हवामहे । अस्य सोमस्य पीतये ॥ २ ॥**

उभा । देवा । दिविऽस्पृशा । इन्द्रवायू इति । हवामहे । अस्य । सोमस्य । पीतये ॥ २ ॥

[V]दिविस्पृशा द्युलोकवर्तिनौ [V]उभा [V]देवा द्वौ देवौ [V]इन्द्रवायू [V]हवामहे आह्वयामः । किमर्थम् । [V]अस्य [V]सोमस्य [V]पीतये । असकृत् व्याख्यातम् ॥ उभा देवा । ' सुपां सुलुक्° ' इति आकारः । दिविस्पृशा । ' हृद्द्युभ्यां ङेरुपसंख्यानम् ' ( पा. सू. ६. ३. ९. १ ) इति सप्तम्या अलुक् । कृदुत्तरपद-

---

१. र–' गायत्र्यः ' इत्यस्यानन्तरं ' आदित आरभ्य अष्टादश ऋचः गायत्र्यः एकविंशी आपः पृणीत इति ऋक् गायत्र्यवान्तरभेदप्रतिष्ठाछन्दस्का । एवं समुदितैकोनविंशतिसंख्याका ऋचः गायत्र्य इति गूढाभिसंधिः ' इत्यधिकम् । २. च-छ-व–आशीर्भिर्युक्ताः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रकृतिस्वरत्वम्। इन्द्रवायू। इन्द्रश्च वायुश्च इति द्वन्द्वः। 'उभयत्र वायोः प्रतिषेधो वक्तव्यः' (पा. सू. ६. ३. २६. १) इति आनङो निषेधः। 'देवताद्वन्द्वे च' इति प्राप्तस्य उभयपदप्रकृतिस्वरत्वस्य 'नोत्तरपदेऽनुदात्तादौ०' (पा. सू. ६. २. १४२) इति निषेधात् समासान्तोदात्तत्वमेव शिष्यते। हवामहे। 'ह्वेञ् स्पर्धायां शब्दे च'। 'बहुलं छन्दसि' इति संप्रसारणम्। 'संप्रसारणाच्च' इति परपूर्वत्वम्। शप्। गुणावादेशौ। शपः पित्त्वादनुदात्तत्वम्। तिङश्च लसार्वधातुकस्वरेण पदस्य आद्युदात्तत्वे प्राप्ते 'तिङ्ङतिङः' इति आष्टमिको निघातः। अस्य। 'ऊडिदम्०' इत्यादिना षष्ठ्या उदात्तत्वम्। पीतये। 'पा पाने'। 'स्थागापापचः०' (पा. सू. ३. ३. ९५) इति भावे क्तिन्। 'घुमास्था०' इति ईत्वम्। व्यत्ययेनान्तोदात्तत्वम्॥

**इन्द्रवायू मनोजुवा विप्रा हवन्त ऊतये। सहस्राक्षा धियस्पती॥ ३॥**

इन्द्रवायू इति। मनःऽजुवा। विप्राः। हवन्ते। ऊतये। सहस्रऽअक्षा। धियः। पती इति॥३॥

[v]विप्राः मेधाविनः ऋत्विग्यजमानाः [v]ऊतये रक्षणार्थम् [v]इन्द्रवायू [v]हवन्ते आह्वयन्ति। कीदृशौ मनोजुवौ मन इव वेगवत्तरौ [v]सहस्राक्षा सहस्रनयनयुक्तौ। यद्यपि इन्द्र एव सहस्राक्षः तथापि च्छत्रिन्यायेन वायुरपि तथोच्यते। [v]धियस्पती कर्मणः बुद्धेर्वा पालकौ॥ मनोजुवा। जवतिर्गतिकर्मा। मनोवत् जवतः इति मनोजुवा मन इव वेगयुक्तौ। कृदुत्तरपदप्रकृतिस्वरत्वम्। 'सुपां सुलुक्०' इति आकारः। विप्राः। औणादिको रन्। रन्प्रत्ययान्तः आद्युदात्तः। ऊतये। 'ऊतियूति०' इत्यादिना क्तिनः उदात्तत्वम्। सहस्राक्षा। सहस्रम् अक्षीणि ययोस्तौ। 'बहुव्रीहौ सक्थ्यक्ष्णोः०' (पा. सू. ५. ४. ११३) इति षच् समासान्तः। बहुव्रीहिस्वरे प्राप्ते समासान्तप्रत्ययस्य सतिशिष्टत्वात् 'चितः' इत्यन्तोदात्तत्वम्। धियः। 'सावेकाचः०' इति ङस उदात्तत्वम्। 'षष्ठ्याः पतिपुत्र०' इति संहितायां विसर्जनीयस्य सकारः। पती। ङत्यन्तः आद्युदात्तः॥

चतुर्विंशकेऽहनि प्रातःसवने मैत्रावरुणशस्त्रे 'मित्रं वयं हवामहे' इति तृचः षडहस्तोत्रियः। 'चतुर्विंशे' इति खण्डे सूत्रितम्–'आ नो मित्रावरुणा मित्रं वयं हवामहे' (आश्व. श्रौ. ७. २) इति। अभिप्लवषडहेऽपि प्रातःसवने मैत्रावरुणस्यायं तृचः आवापार्थः। 'अभिप्लवपृष्ठ्याहानि' इति खण्डे सूत्रितम्–'परिशिष्टानावापानुद्धृत्य मित्रं वयं हवामहे' (आश्व. श्रौ. ७. ५) इति। मैत्रावरुणस्य 'मित्रं वयं हवामहे' इत्येषा प्रातःसवने प्रस्थितयाज्या। 'प्रशास्ता ब्राह्मणाच्छंसी' इत्युपक्रम्य 'इदं ते सोम्यं मधु मित्रं वयं हवामहे' (आश्व. श्रौ. ५. ५) इति सूत्रितम्॥

**मित्रं वयं हवामहे वरुणं सोमपीतये। जज्ञाना पूतदक्षसा॥ ४॥**

मित्रम्। वयम्। हवामहे। वरुणम्। सोमऽपीतये। जज्ञाना। पूतऽदक्षसा॥ ४॥

[v]वयम् अनुष्ठातारः [v]सोमपीतये सोमपानार्थं [v]मित्रं [v]वरुणं च उभौ आह्वयामः। कीदृशावुभौ। [v]जज्ञाना कर्मप्रदेशे प्रादुर्भवन्तौ [v]पूतदक्षसा शुद्धबलौ॥ वरुणम्। 'वृञ् वरणे'। 'कृवृतृदारिभ्य उनन्' (उ. सू. ३. ३३३)। नित्त्वादाद्युदात्तः। सोमपीतये। दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम्।

---

१. ढ–वेगयुक्तौ। २. ढ–जुवतिर्गतिकर्मा। ३. ढ–जुवतः। ४. ढ–'मन इव वेगयुक्तौ' इति नास्ति। ५. झ–औणादिको रन्प्रत्ययान्तः आद्युदात्तः; न–औणादिकरन्प्रत्ययान्त आद्युदात्तः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

जज्ञाना । ' जनी प्रादुर्भावे ' । ' छन्दसि लिट् ' ( पा. सू. ३. २. १०५ ) । तस्य ' लिटः कानज्वा ' ( पा. सू. ३. २. १०६ ) इति कानजादेशः । ' गमहन° ' इत्यादिना उपधालोपः । तस्य ' अचः परस्मिन्° ' इति स्थानिवद्भावात् जनशब्दस्य द्विर्वचनम् । ' स्तोः श्चुना श्चुः ' ( पा. सू. ८. ४.४० ) इति नकारस्य जकारः । ' चितः ' इत्यन्तोदात्तत्वम् । पूर्ववत् आकारः । पूतदक्षसा । ' पूञ् पवने ' । ' निष्ठा ' इति क्तः । ' श्र्युकः किति ' ( पा. सू. ७. २. ११ ) इति इट्प्रतिषेधः । पूतं दक्षो ययोस्तौ । ' बहुव्रीहौ प्रकृत्या° ' इति पूर्वपदप्रकृतिस्वरत्वम् ॥

ऋतेन यावृतावृधावृतस्य ज्योतिषस्पती । ता मित्रावरुणा हुवे ॥ ५ ॥

ऋतेन । यौ । ऋतऽवृधौ । ऋतस्य । ज्योतिषः । पती इति । ता । मित्रावरुणा । हुवे ॥५॥

Vयौ मित्रावरुणौ Vऋतेन सत्यवचनेन यजमानानुग्रहकारिणा[1] Vऋतावृधौ ऋतम् अवश्यंभावितया सत्यं कर्मफलं तस्य वर्धकौ Vऋतस्य सत्यस्य प्रशस्तस्य Vज्योतिषः प्रकाशस्य Vपती पालकौ । श्रुत्यन्तरे मित्रावरुणयोः अदितिपुत्रत्वेन श्रुतत्वात् द्वादशादित्येष्वन्तर्भूतत्वेन ज्योतिष्पालकत्वं युक्तम् । श्रुत्यन्तरे च ' अष्टौ पुत्रासो अदितेः ' इत्युपक्रम्य ' मित्रश्च वरुणश्च ' ( तै. आ. १. १३. २–३ ) इत्यादिकमाम्नातम्[2] । Vता Vमित्रावरुणा तथाविधौ मित्रावरुणौ Vहुवे आह्वयामि ॥ ऋतावृधौ । ' वृधु वृद्धौ ' । ' क्विप् च ' इति क्विप् । ' अन्येषामपि दृश्यते ' इति दीर्घः । कृदुत्तरपदप्रकृतिस्वरत्वम् । ज्योतिषः । ' द्युत दीप्तौ ' । ' द्युतेरिसिन्नादेश्च जः ' ( उ. सू. २. २६७ ) इति इसिन्प्रत्ययः । नित्त्वादाद्युदात्तः । ' षष्ठ्याः पतिपुत्र° ' इति संहितायां विसर्जनीयस्य सत्वम् । मित्रावरुणा । ' देवताद्वन्द्वे च ' ( पा. सू. ६. ३. २६ ) इति आनङ् । ' देवताद्वन्द्वे च ' ( पा. सू. ६. २. १४१ ) इति उभयपदप्रकृतिस्वरत्वम् । ' सुपां सुलुक्° ' इति पूर्वसवर्णदीर्घ आकारः । हुवे । ह्वेञ् । आत्मनेपदोत्तमपुरुषैकवचने संप्रसारणे परपूर्वत्वे च कृते ' बहुलं छन्दसि ' इति शपो लुक् । टेः एत्वम् । गुणे प्राप्ते ' क्ङिति च ' ( पा. सू. १. १. ५ ) इति प्रतिषेधः । उवङादेशः । ' तिङ्ङतिङः ' इति निघातः ॥ ॥ ८ ॥

वरुणः प्राविता भुवन्मित्रो विश्वाभिरूतिभिः । करतां नः सुराधसः ॥ ६ ॥

वरुणः । प्रऽअविता । भुवत् । मित्रः । विश्वाभिः । ऊतिऽभिः । करताम् । नः । सुऽराधसः ॥६॥

अयं Vवरुणः अस्माकं Vप्राविता Vभुवत् प्रकर्षेण रक्षको भवतु । Vमित्रः च Vविश्वाभिरूतिभिः सर्वाभिः रक्षाभिः प्राविता भुवत् । तावुभावपि Vनः अस्मान् Vसुराधसः प्रभूतधनयुक्तान् Vकरतां कुरुताम् ॥ अविता । तृचश्चित्स्वादन्तोदात्तत्वम् । प्रादिसमासे कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते । भुवत् । ' भू सत्तायाम् ' । लेटस्तिप् । ' लेटोऽडाटौ ' इति अडागमः । ' इतश्च लोपः° ' इति इकारलोपः । ' बहुलं छन्दसि ' इति शपो लुक् । गुणे प्राप्ते ' भूसुवोस्तिङि ' ( पा. सू. ७. ३. ८८ ) इति प्रतिषेधः । उवङादेशः । ' तिङ्ङतिङः ' इति निघातः । विश्वाभिः । ' अशिप्रुषि° ' इत्यादिना क्वनन्तो विश्वशब्द आद्युदात्तः । टाप्सुपोः अनुदात्तत्वात् तदेव शिष्यते । ऊतिभिः । ' ऊतियूति° ' इत्यादिना क्तिन् उदात्तः । करताम् । ' कृञ् करणे ' । भौवादिकः । लोटस्तस् । तसस्ताम् । कर्तरि

---

१. ग-च-छ-ण-फ–अनुग्रहकारिणा । २. ढ–' श्रुत्यन्तरे च.....आम्नातम् ' इति नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

शप् । गुणो रपरत्वम् । शपः पित्त्वादनुदात्तत्वम् । तिङश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते । सुराधसः । ' राध साध संसिद्धौ ' । राध्नोति अनेन इति राधः धनम् । शोभनं राधः येषां ते । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे प्राप्ते ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वं प्राप्तं ' सोर्मनसी अलोमोषसी ' ( पा. सू. ६. २. ११७ ) इत्युत्तरपदाद्युदात्तत्वेन बाध्यते ॥

मरुत्वन्तं हवामह इन्द्रमा सोमपीतये । सजूर्गणेन तृम्पतु ॥ ७ ॥

मरुत्वन्तम् । हवामहे । इन्द्रम् । आ । सोमऽपीतये । सऽजूः । गणेन । तृम्पतु ॥ ७ ॥

[V]मरुत्वन्तं मरुद्भिर्युक्तम् [V]इन्द्रं [V]सोमपीतये सोमपानाय [V]आ [V]हवामहे आह्वयामः । स च इन्द्रः [V]गणेन मरुत्समूहेन [V]सजूः सह [V]तृम्पतु तृप्तो भवतु ॥ मरुत्वन्तम् । मरुतः अस्य सन्तीति मरुत्वान् । ' झयः ' ( पा. सू. ८. २. १० ) इति मतुपो वत्वम् । ' तसौ मत्वर्थे ' ( पा. सू. १. ४. १९ ) इति भसंज्ञायां पदसंज्ञाया बाधितत्वात् जश्त्वाभावः । मतुप्सुपौ पित्त्वादनुदात्तौ । ननु ' ह्रस्वनुड्भ्यां मतुप् ' ( पा. सू. ६. १. १७६ ) इति मतुप उदात्तत्वेन भवितव्यं, ' स्वरविधौ व्यञ्जनमविद्यमानवत् ' ( परिभा० ७९ ) इति तकारस्य अविद्यमानवत्त्वेन ह्रस्वात् परत्वात् । न । ' ह्रस्वनुड्भ्याम्° ' इत्यत्र नुड्ग्रहणसामर्थ्यात् अविद्यमानपरिभाषा नाश्रीयते इति वृत्तावुक्तम् ( का. ६. १. १७६ ) । अतो मरुच्छब्दस्य स्वर एव शिष्यते । सजूः । ' जुषी प्रीतिसेवनयोः ' । संपदादिलक्षणः क्विप् । समाना प्रीतिः यस्य इति बहुव्रीहिः । ' समानस्य च्छन्दसि° ' इति सभावः । ' ससजुषो रुः ' ( पा. सू. ८. २. ६६ ) इति रुत्वम् । ' वोरुपधायाः° ' ( पा. सू. ८. २. ७६ ) इत्युपधादीर्घः । बहुव्रीहिस्वरे प्राप्ते ' त्रिचक्रादीनां छन्दसि ' ( पा. सू. ६. २. १९९. १ ) इत्युत्तरपदान्तोदात्तत्वम् । तृम्पतु । ' तृपँ तृम्प तृप्तौ ' । ' तुदादिभ्यः शः ' । ' शे तृम्पादीनाम् ' ( पा. सू. ७. १. ५९. १ ) इति नुमागमः ॥

इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः । विश्वे मम श्रुता हवम् ॥ ८ ॥

इन्द्रऽज्येष्ठाः । मरुत्ऽगणाः । देवासः । पूषऽरातयः । विश्वे । मम । श्रुत । हवम् ॥ ८ ॥

हे [V]देवासः इन्द्रमरुद्रूपाः [V]विश्वे सर्वे यूयं [V]मम [V]हवम् आह्वानं [V]श्रुत शृणुत । कीदृशाः । [V]इन्द्रज्येष्ठाः । इन्द्रो ज्येष्ठो मुख्यो येषु ते तथाविधाः [V]मरुद्गणाः मरुत्समूहरूपाः । [V]पूषरातयः । पूषाख्यो देवो रातिः दाता[2] येषाम् इन्द्रमरुतां ते पूषरातयः ॥ इन्द्रज्येष्ठाः । आमन्त्रिताद्युदात्तत्वम् । पादादित्वादनिघातः । मरुद्गणाः । ' विभाषितं विशेषवचने बहुवचनम् ' ( पा. सू. ८. १. ७४ ) इति पूर्वस्याविद्यमानवत्त्वादनिघातः । देवासः पूषरातयः । पूर्ववत् । श्रुत । ' श्रु श्रवणे ' । लोण्मध्यमबहुवचनं थ । ' तस्थस्थमिपाम्° ' ( पा. सू. ३. ४. १०१ ) इति तादेशः । व्यत्ययेन शप् । ' बहुलं छन्दसि ' इति शपो लुक् । ' सार्वधातुकार्धधातुकयोः ' इति गुणे प्राप्ते ' क्ङिति च ' इति प्रतिषेधः । ' ह्यचोऽतस्तिङः ' इति दीर्घः । हवम् । ' ह्वेञ् स्पर्धायां शब्दे च ' । ' भावेऽनुपसर्गस्य ' ( पा. सू. ३. ३. ७५ ) इति अप् । संप्रसारणं परपूर्वत्वं गुणावादेशौ । पित्त्वादनुदात्तत्वम् । धातुस्वरः शिष्यते ॥

---

१. ढ–भसंज्ञया । २. ढ– ' तृप ' नास्ति । ३. ढ–ज्ञातिः ।

CC0, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हत वृत्रं सुदानव इन्द्रेण सहसा युजा। मा नो दुःशंस ईशत ॥ ९ ॥

हत। वृत्रम्। सुऽदानवः। इन्द्रेण। सहसा। युजा। मा। नः। दुःऽशंसः। ईशत ॥९॥

हे [v]सुदानवः शोभनदानयुक्ताः मरुद्गणाः [v]सहसा बलवता [v]युजा योग्येन [v]इन्द्रेण सह [v]वृत्रं शत्रुं [v]हत नाशयत। [v]दुःशंसः दुष्टेन शंसनेन कीर्तनेन युक्तो वृत्रो [v]नः अस्मान् प्रति [v]मा [v]ईशत समर्थो मा भूत्॥ हत। 'हन हिंसागत्योः'। लोटः थ। तस्य त। 'अदिप्रभृतिभ्यः शपः' इति शपो लुक्। 'अनुदात्तोपदेश०' (पा. सू. ६. ४. ३७) इत्यादिना अनुनासिकलोपः। सुदानवः 'डुदाञ् दाने'। 'दाभाभ्यां नुः' (उ. सू. ३. ३१२) इति औणादिको नुप्रत्ययः। प्रादिसमासे आमन्त्रितनिघातः। युजा। 'युजिर् योगे'। 'ऋत्विक्०' इत्यादिना किन्। 'सावेकाचः०' इति तृतीयैकवचनस्योदात्तत्वम्। दुःशंसः। 'ईषद्दुःसुषु०' (पा. सू. ३. ३. १२६) इति खल्। 'लिति' इति प्रत्ययात् पूर्वस्योदात्तत्वम्। ईशत। 'ईश ऐश्वर्ये'। माङि लुङि प्राप्ते 'छन्दसि लुङ्लङ्लिटः' इति व्यत्ययेन लङ्। तस्य 'बहुलं छन्दसि' इति शपो लुगभावः। 'न माङ्योगे' इति आडागमाभावः। 'तिङ्ङतिङः' इति निघातः॥

विश्वान्देवान्हवामहे मरुतः सोमपीतये। उग्रा हि पृश्निमातरः ॥ १० ॥

विश्वान्। देवान्। हवामहे। मरुतः। सोमऽपीतये। उग्राः। हि। पृश्निऽमातरः ॥ १० ॥

[v]मरुतः मरुत्संज्ञकान् [v]विश्वान् सर्वान् [v]देवान् [v]सोमपीतये [v]हवामहे सोमपानार्थम् आह्वयामः। ते च मरुतः [v]उग्राः शत्रुभिरसह्यबलाः [v]पृश्निमातरः पृश्नेः नानावर्णयुक्तायाः भूमेः[2] पुत्राः। हिशब्दः प्रसिद्ध्यर्थः। सा च प्रसिद्धिः 'पृश्नेः पुत्राः' (ऋ. सं. ५. ५८. ५) इति मन्त्रान्तरादवगन्तव्या॥ पृश्निमातरः। पृश्निः माता येषां ते। पृश्निशब्दः 'घृणिपृश्नि०' (उ. सू. ४. ४९२) इति उणादावाद्युदात्तो निपातितः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्॥ ॥ ९ ॥

जयतामिव तन्यतुर्मरुतामेति धृष्णुया। यच्छुभं याथना नरः ॥ ११ ॥

जयताम्ऽइव। तन्यतुः। मरुताम्। एति। धृष्णुऽया। यत्। शुभम्। याथन। नरः ॥११॥

[v]मरुतां देवानां [v]तन्यतुः शब्दः [v]धृष्णुया धार्ष्ट्ययुक्तः सन् [v]एति गच्छति। केषामिव। [v]जयतां विजययुक्तानां शूराणां भटानाम् [v]इव। हे [v]नरः नेतारः मरुतः यूयं [v]यत् यदा [v]शुभं शोभनं देवयजनं[3] [v]याथन प्राप्नुथ। तदा त्वदीयः शब्दो गच्छतीति पूर्वत्रान्वयः॥ तन्यतुः। 'तनु विस्तारे'। 'ऋतन्यञ्जि०' (उ. सू. ४. ४४२) इत्यादिना यतुच्प्रत्ययः। धृष्णुया। 'जिधृषा प्रागल्भ्ये'। 'त्रसिगृधिधृषिक्षिपेः क्नुः' (पा. सू. ३. २. १४०)। 'सुपां सुलुक्०' इति सोः याजादेशः। चित्त्वादन्तोदात्तः। याथन। 'तप्तनप्तनथनाश्च' इति थनादेशः। यच्छब्दयोगात् निघाताभावः॥

---

१. त-श-ष-उग्राः युद्धादौ घोराः। २. श-गोः। ३. ढ-देवयजनदेशम्। ४. च-छ-त-थ-ष-क्नुः इति क्नुः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हस्काराद्विद्युतस्पर्यतो जाता अवन्तु नः । मरुतो मृळयन्तु नः ॥ १२ ॥

हस्कारात् । विऽद्युतः । परि । अतः । जाताः । अवन्तु । नः । मरुतः । मृळयन्तु । नः ॥ १२ ॥

vहस्कारात् दीप्तिकरात् vविद्युतः विशेषेण दीप्यमानात् vअतः अन्तरिक्षात् vपरि vजाताः सर्वत उत्पन्ना मरुतः vनः अस्मान् vअवन्तु रक्षन्तु। तथाविधाः vमरुतः vनः अस्मान् vमृळयन्तु सुखयन्तु ॥ हस्कारात् । ' हसे हसने ' । अत्र तु प्रकाशमात्रे वर्तते । अस्मात् संपदादिलक्षणः क्विप् । अस्मिन् उपपदे ' डुकृञ् करणे ' इत्यस्मात् ' कर्मण्यण् ' (पा. सू. ३. २. १) इति अण्प्रत्ययः । ' तत्पुरुषे तुल्यार्थ° ' इत्यादिना पूर्वपदप्रकृतिस्वरत्वे प्राप्ते ' गतिकारक° ' इत्यादिना कृदुत्तरपदप्रकृतिस्वरत्वम् । ' अतः कृकमि° ' ( पा. सू. ८. ३. ४६ ) इत्यादिना विसर्जनीयस्य सत्वम् ॥

आ पूषञ्चित्रबर्हिषमाघृणे धरुणं दिवः । आजा नष्टं यथा पशुम् ॥ १३ ॥

आ । पूषन् । चित्रऽबर्हिषम् । आघृणे । धरुणम् । दिवः । आ । अज । नष्टम् । यथा । पशुम् ॥ १३ ॥

हे vपूषन् vचित्रबर्हिषं विचित्रैर्दर्भैर्युक्तं vधरुणं यागस्य धारकं सोमं vदिवः vआ द्युलोकात् आहर इति शेषः । पूषा विशेष्यते । vआघृणे आगतदीप्तियुक्त । तत्र दृष्टान्तः । हे vअज गमनशील vयथा लोके vनष्टं vपशुं महारण्यादौ अन्वीक्ष्य[1] कश्चिदाहरति तद्वत् ॥ आघृणे । 'घृ क्षरणदीप्त्योः' इत्यस्मात् 'घृणि-पृश्नि° ' इति निप्रत्ययो निपातितः । ' ऋवर्णाच्चेति वक्तव्यम् ' इति णत्वम् । प्रादिसमासः । आमन्त्रिताद्युदात्तत्वम् । धरुणम् । ' धृञ् धारणे ' । अस्मात् ण्यन्ताद्धातोः ' धारेर्णिलुक्च ' ( दश. पा. ५ ) इति उनन्प्रत्ययः । व्यत्ययेन नित्स्वराभावे प्रत्ययस्वरः । दिवः । ' ऊडिदम्° ' इत्यादिना षष्ठ्या उदात्तत्वम् । अज । ' अज गतिक्षेपणयोः ' ॥

पूषा राजानमाघृणिरपगूळ्हं गुहा हितम् । अविन्दच्चित्रबर्हिषम् ॥ १४ ॥

पूषा । राजानम् । आघृणिः । अपऽगूळ्हम् । गुहा । हितम् । अविन्दत् । चित्रऽबर्हिषम् ॥ १४ ॥

vआघृणिः vपूषा vराजानं सोमम् vअविन्दत् अलभत । कीदृशम् । vअपगूळ्हम् अत्यन्तगूढम् । तत्र हेतुः । vगुहा vहितं गुहासदृशे दुर्गमे द्युलोके स्थितं तथा vचित्रबर्हिषम् ॥ अपगूळ्हम् । ' गुहू संवरणे ' । ' निष्ठा ' इति कर्मणि क्तः । ' हो ढः ' ( पा. सू. ८. २. ३१ ) इति ढत्वम् । ' झषस्तथोर्धोऽधः ' ( पा. सू. ८. २. ४० ) इति धकारः । ष्टुत्वढलोपदीर्घाः । समासे ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । गुहा । ' सुपां सुलुक्° ' इति सप्तम्या लुक् । हितम् । निष्ठायां दधातेर्हिः ॥

उतो स मह्यमिन्दुभिः षड्युक्ताँ अनुसेषिधत् । गोभिर्यवं न चर्कृषत् ॥ १५ ॥

उतो इति । सः । मह्यम् । इन्दुऽभिः । षट् । युक्तान् । अनुऽसेसिधत् । गोभिः । यवम् । न । चर्कृषत् ॥ १५ ॥

---

१. ढ–अन्विष्य; र–अन्वेष्य ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vउतो अपि च vसः पूषा vमह्यं यजमानाय vइन्दुभिः यागहेतुभिः सोमैः vयुक्तान् vषट् वसन्तादीन् ऋतून् vअनुसेषिधत् अनुक्रमेण पुनःपुनर्नयन् वर्तते इति शेषः । तत्र दृष्टान्तः । vगोभिः बलीवर्दैः vयवं vन vचर्कृषत् । नशब्द उपमार्थः । यथा यवमुद्दिश्य भूमिं प्रतिसंवत्सरं पुनःपुनः कृषति तद्वत् ॥ मह्यम् । ' ङयि च ' ( पा. सू. ६. १. २१२ ) इत्याद्युदात्तत्वम् । इन्दुभिः । ' उन्दी क्लेदने ' । ' उन्देरिच्चादेः ' ( उ. सू. १. १२ ) इति उप्रत्ययः, उकारस्य इकारादेशश्च । ' नित् ' इति अनुवृत्तेराद्युदात्तत्वम् । युक्तान् । ' दीर्घादटि समानपादे ' इति संहितायां नकारस्य रुत्वम् । ' आतोऽटि नित्यम् ' इति सानुनासिक आकारः । अनुसेषिधत् । ' षिधु गत्याम् ' । ' धातोरेकाचः° ' ( पा. सू. ३. १. २२ ) इति यङ् । ' यङोऽचि च ' ( पा. सू. २. ४. ७४ ) इति तस्य लुक् । प्रत्ययलक्षणेन ' सन्यङोः ' ( पा. सू. ६. १. ९ ) इति द्विर्भावः । हलादिशेषः । ' गुणो यङ्लुकोः ' ( पा. सू. ७. ४. ८२ ) इति अभ्यासस्य गुणः । ' इण्कोः ' ( पा. सू. ८. ३. ५७ ) इति षत्वम् । सनादित्वात् धातुसंज्ञायां लटः शतृ । कर्तरि शप् । ' अदादिभ्यश्च ' इति वचनात् तस्य लुक् । ' नाभ्यस्ताच्छतुः ' ( पा. सू. ७. १. ७८ ) इति नुम्प्रतिषेधः । प्रत्ययस्वरे प्राप्ते ' अभ्यस्तानामादिः ' ( पा. सू. ६. १. १८९ ) इत्याद्युदात्तत्वम् । गोभिः । ' सावेकाचः° ' इति भिस उदात्तत्वे प्राप्ते ' न गोश्वन्° ' इति प्रतिषेधः । चर्कृषत् । ' कृष विलेखने ' । यङ्लुकि द्विर्भावहलादिशेषचर्त्वानि । ' रुग्रिकौ च लुकि ' ( पा. सू. ७. ४. ९१ ) इति अभ्यासस्य रुगागमः । अस्मात् यङ्लुगन्तात् लेटस्तिप् । 'इतश्च लोपः' । ' लेटोऽडाटौ ' इति अडागमः । ' अदिप्रभृतिभ्यः शपः ' इति शपो लुक् । लघूपधगुणे प्राप्ते ' नाभ्यस्तस्याचि पिति° ' ( पा. सू. ७. ३. ८७ ) इति निषेधः । ' तिङ्ङतिङः ' इति निघातः ॥ ॥ १० ॥

अपोनप्त्रीये एकधनासूपानीतासु स्वयमनुगच्छन् ' अम्बयः ' इति द्वे अनुब्रूयात् । तृतीयया ' अपो देवीः ' इत्यनया एकधनासु हविर्धानं प्रविष्टासु स्वयमनुप्रविशेत् । तथैव सूत्रितम्—'अम्बयो यन्त्यध्वभिरिति तिस्र उत्तमयानुप्रपद्येत ' ( आश्व. श्रौ. ५. १ ) इति ॥

अम्बयो यन्त्यध्वभिर्जामयो अध्वरीयताम् । पृञ्चतीर्मधुना पयः ॥ १६ ॥

अम्बयः । यन्ति । अध्वऽभिः । जामयः । अध्वरिऽयताम् । पृञ्चतीः । मधुना । पयः ॥१६॥

vअध्वरीयताम् अध्वरमात्मन इच्छताम् अस्माकम् vअम्बयः मातृस्थानीया आपः । तथा च कौषीतकिब्राह्मणे समाम्नायते— ' अम्बयो यन्त्यध्वभिरित्यापो वा अम्बयः ' इति । ता आपः vअध्वभिः देवयजनमार्गैः vयन्ति गच्छन्ति । कीदृश्य आपः । vजामयः हितकारिण्यो बन्धवः । तथा vमधुना माधुर्यरसेन युक्तं vपयः vपृञ्चतीः गवादिषु योजयन्त्यः ॥ अम्बयः । ' रबि लबि अबि शब्दे ' । एतस्मात् ' अच इः ' ( उ. सू. ४. ५७८ ) इति प्रकरणे बाहुलकात् इः । प्रत्ययस्वरः । अध्वभिः । ' अदेर्घ च ' ( उ. सू. ४. ५५५ ) इति क्वनिप् । पित्त्वात् प्रत्ययस्यानुदात्तत्वे धातुस्वरः । जामयः । ' जमु अदने ' । बाहुलकात् इः । अध्वरीयताम् । अध्वरशब्दात् ' सुप आत्मनः क्यच् ' इति क्यच् । ' क्यचि च ' इति ईत्वम् । ' अपुत्रादीनामिति वक्तव्यम् ' ( पा. म. ७. ४. ३५ ) इति वचनात् ' न च्छन्दस्यपुत्रस्य ' इति ईत्वनिषेधाभावः । ' सर्वे विधयश्छन्दसि विकल्प्यन्ते ' इति ' कव्यध्वरपृतनस्य° ' ( पा. सू. ७. ४. ३९ ) इति अकारलोपोऽपि न भवति । क्यच्प्रत्ययान्तधातोः लटः शतृ । शपः पित्त्वादनुदात्तत्वम् । शतुश्च लसार्वधातुकस्वरेण तयोः क्यचा सहैकादेशः । ' एकादेश उदात्तेनोदात्तः ' इत्यन्तोदात्तत्वे सति ' शतुरनुमो नद्यजादी ' इति षष्ठ्या उदात्तत्वम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पृञ्चतीः । ' पृची संपर्के ' । लटः शतृ । ' रुधादिभ्यः श्नम् ' । ' श्नसोरल्लोपः ' । अनुस्वारपरसवर्णौ । ' उगितश्च ' इति ङीप् । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घत्वम् । ' शतुरनुमः° ' इति ङीप उदात्तत्वम् ॥

अमूर्या उप सूर्ये याभिर्वा सूर्यः सह । ता नो हिन्वन्त्वध्वरम् ॥ १७ ॥

अमूः । याः । उप । सूर्ये । याभिः । वा । सूर्यः । सह । ताः । नः । हिन्वन्तु । अध्वरम् ॥ १७ ॥

[v]याः [v]अमूः आपः [v]सूर्ये [v]उप समीपेन[1] अवस्थिताः । ' आपः सूर्ये समाहिताः ' ( तै. आ. १. ८. १ ) इति श्रुत्यन्तरात् । [v]वा अथवा [v]सूर्यः [v]याभिः अद्भिः [v]सह वर्तते । पूर्वत्रापां प्राधान्यम् उतरत्र सूर्यस्येति विशेषः । [v]ताः तादृश्य आपो [v]नः अस्मदीयम् [v]अध्वरं यागं [v]हिन्वन्तु प्रीणयन्तु ॥ याभिः । ' सावेकाचः° ' इति विभक्त्युदात्तस्य ' न गोश्वन्साववर्ण° ' इति प्रतिषेधः । शेषा तु प्रक्रिया स्पष्टा ॥

अपो देवीरुप ह्वये यत्र गावः पिबन्ति नः । सिन्धुभ्यः कर्त्वं हविः ॥ १८ ॥

अपः । देवीः । उप । ह्वये । यत्र । गावः । पिबन्ति । नः । सिन्धुऽभ्यः । कर्त्वम् । हविः ॥ १८ ॥

[v]नः अस्मदीयाः [v]गावः [v]यत्र यासवप्सु [v]पिबन्ति पानं कुर्वन्ति ताः [v]अपो [v]देवीः [v]उप [v]ह्वये आह्वयामि । [v]सिन्धुभ्यः स्यन्दनशीलाभ्योऽद्भ्यो देवताभ्यो [v]हविः [v]कर्त्वं अस्माभिः कर्तव्यम् ॥ अपः । ' ऊडिदम्° ' इत्यादिना शस उदात्तत्वम् । पिबन्ति । ' पाघ्रा° ' इत्यादिना पिबादेशः । शपः पित्त्वादनुदात्तत्वम् । तिङश्च ललार्वधातुकस्वरेण धातुस्वरेणाद्युदात्तत्वम् । ' निपातैर्यद्यदि° ' इत्यादिना निघाताभावः । कर्त्वम् । ' डुकृञ् करणे ' । ' कृत्यार्थे तवैकेन्केन्यत्वनः ' ( पा. सू. ३. ४. १४ ) इति कर्मणि त्वन्प्रत्ययः । गुणः । नित्स्वरेणाद्युदात्तत्वम् ॥

अप्स्वन्तरमृतमप्सु भेषजमपामुत प्रशस्तये । देवा भवत वाजिनः ॥ १९ ॥

अप्ऽसु । अन्तः । अमृतम् । अप्ऽसु । भेषजम् । अपाम् । उत । प्रऽशस्तये ।
देवाः । भवत । वाजिनः ॥ १९ ॥

[v]अप्सु जलेषु [v]अन्तः मध्ये [v]अमृतं पीयूषं वर्तते । तस्य अब्विकारत्वात् । ' अमृतं वा आपः ' ( तै. सं. ५. ६. २. १–२ ) इति श्रुत्यन्तराच्च । तथैव [v]अप्सु [v]भेषजम् औषधं वर्तते । क्षुद्रोगनिवर्तकस्य अन्नस्य अप्कार्यत्वात् । [v]उत अपि च तादृशीनाम् [v]अपां देवतानां [v]प्रशस्तये प्रशंसार्थं हे [v]देवाः ऋत्विजादयो ब्राह्मणाः । ' एते वै देवाः प्रत्यक्षं यद्ब्राह्मणाः ' ( तै. सं. १. ७. ३. १ ) इति श्रुत्यन्तरात् । [v]वाजिनः वेगवन्तः [v]भवत । शीघ्रं स्तुतिं कुरुतेत्यर्थः ॥ अप्सु । ' ऊडिदम्° ' इत्यादिना सप्तम्या उदात्तत्वम् । संहितायाम् ' उदात्तस्वरितयोर्यणः स्वरितः° ' इति स्वरितत्वम् । अमृतम् । ' नञो जरमरमित्रमृताः ' ( पा. सू. ६. २. ११६ ) इत्युत्तरपदाद्युदात्तत्वम् । प्रशस्तये । ' तादौ च निति° '

---

१. ढ–समीपम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

( पा. सू. ६. २. ५० ) इति गतेः प्रकृतिस्वरत्वम् । भवत । ' आमन्त्रितं पूर्वमविद्यमानवत् ' इति पूर्वस्यामन्त्रितस्य अविद्यमानवत्त्वेन पादादित्वात् न निघातः ॥

कारीर्याम् उत्तरस्य आज्यभागस्य ' अप्सु मे ' इत्येषा अनुवाक्या । ' वर्षकामेष्टिः ' इति खण्डे ' अप्स्वग्ने सधिष्टवाप्सु मे सोमो अब्रवीत् ' ( आश्व. श्रौ. २. १३ ) इति सूत्रितम् ॥

**अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा ।**
**अग्निं च विश्वशंभुवमापश्च विश्वभेषजीः ॥ २० ॥**

अप्ऽसु । मे । सोमः । अब्रवीत् । अन्तः । विश्वानि । भेषजा ।
अग्निम् । च । विश्वऽशंभुवम् । आपः । च । विश्वऽभेषजीः ॥ २० ॥

[v]अप्सु जलेषु [v]अन्तः मध्ये [v]विश्वानि [v]भेषजा सर्वाणि औषधानि सन्तीति [v]मे मह्यं मन्त्रदर्शिने मुनये [v]सोमः देवः [v]अब्रवीत् । तथा [v]विश्वशंभुवं सर्वस्य जगतः सुखकरम् एतन्नामकं च [v]अग्निं [v]च अप्सु वर्तमानं सोमोऽब्रवीत् । तथा च तैत्तिरीयाः ' अग्नेस्त्रयो ज्यायांसः ' इत्यनुवाके ' सोऽपः प्राविशत् ' ( तै. सं. २. ६. ६. १ ) इति अग्नेः अप्सु प्रवेशमामनन्ति । लतागुल्मवृक्षमूलादीनाम् औषधानां[2] वृष्टिजन्यत्वेन जलवर्तित्वं प्रसिद्धम् । [v]विश्वभेषजीः विश्वानि भेषजानि यासु तथाविधाः अपः अपि अब्रवीत् ॥ भेषजा । ' सुपां सुलुक्° ' इति आकारः । विश्वशंभुवम् । भवतेरन्तर्भावितण्यर्थात् क्विप् । व्यत्ययेन पूर्वपदप्रकृतिस्वरत्वम् । यद्वा । विश्वे सर्वेऽपि व्यापाराः सुखकरा यस्य । ' बहुव्रीहौ विश्वं संज्ञायाम् ' ( पा. सू. ६. २. १०६ ) इति पूर्वपदान्तोदात्तत्वम् । आपः । कर्मणि शसि प्राप्ते व्यत्ययेन जस् । ' अमृन्° ' ( पा. सू. ६. ४. ११ ) इत्यादिना उपधादीर्घः । विश्वभेषजीः । विश्वशंभुवमितिवत्[3] ॥ ॥ ११ ॥

**आपः पृणीत भेषजं वरूथं तन्वे मम । ज्योक् च सूर्यं दृशे ॥ २१ ॥**

आपः । पृणीत । भेषजम् । वरूथम् । तन्वे । मम । ज्योक् । च । सूर्यम् । दृशे ॥२१॥

हे [v]आपः [v]मम [v]तन्वे शरीरार्थं [v]वरूथं रोगनिवारकं [v]भेषजम् औषधं [v]पृणीत पूरयत । किंच [v]ज्योक् चिरं [v]सूर्यं [v]दृशे द्रष्टुं नीरोगा वयं शक्नुवाम इति शेषः ॥ पृणीत । ' पृ पालनपूरणयोः ' । लोण्मध्यमबहुवचनं थ । तस्य ' तस्थस्थमिपाम्° ' इति तादेशः । ' क्र्यादिभ्यः श्ना ' । ' प्वादीनां ह्रस्वः ' इति ह्रस्वः । ' ई हल्यघोः ' इति ईत्वम् । ' ऋवर्णाच्च° ' इति णत्वम् । ' सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः ' इति तिङः स्वरः शिष्यते । आपः इत्यस्य ' आमन्त्रितं पूर्वमविद्यमानवत् ' इति अविद्यमानवत्त्वे पादादित्वात् निघाताभावः । वरूथम् । ' वृञ् वरणे ' । ' जृवृञ्भ्यामूथन् ' ( उ. सू. २. १६३ ) । नित्त्वादाद्युदात्तः । तन्वे । ' ङिति ह्रस्वश्च ' ( पा. सू. १. ४. ६ ) इति नदीसंज्ञा पाक्षिकी इति आडागमाभावः । ' उदात्तयणो हल्पूर्वात् ' इति विभक्त्युदात्तत्वे प्राप्ते

---

१. ढ-न-वाग्निम् । २. च-फ-श-ष-ओषधीनाम्; ढ-औषधीनाम् । ३. च-छ-ण-त-फ-श-ष-विश्वशंभुरितिवत् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

व्यत्ययेन ' उदात्तस्वरितयोः° ' इति स्वरितत्वम् । दृशे । ' दृशे विख्ये च ' ( पा. सू. ३. ४. ११ ) इति तुमर्थे निपात्यते ॥

पशौ मार्जने ' इदमापः प्र वहत ' इत्येषा विनियुक्ता । ' हुतायां वपायाम् ' इति खण्डे सूत्रितम्—' इदमापः प्र वहत ' ( आश्व. श्रौ. ३. ५ ) इति । एषैव अवभृथेष्टौ स्नाने विनियुक्ता । ' पत्नीसंयाजैश्चरित्वा ' इति खण्डे ' इदमापः प्र वहत सुमित्र्या न आप ओषधयः सन्तु ' ( आश्व. श्रौ. ६. १३ ) इति सूत्रितम् ॥

इदमापः प्र वहत यत्किं च दुरितं मयि ।
यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम् ॥ २२ ॥

इदम् । आपः । प्र । वहत । यत् । किम् । च । दुःऽइतम् । मयि ।
यत् । वा । अहम् । अभिऽदुद्रोह । यत् । वा । शेपे । उत । अनृतम् ॥ २२ ॥

[V]मयि यजमाने [V]यत् [V]किं [V]च [V]दुरितम् अज्ञानात् निष्पन्नं [V]वा अथवा [V]अहं यजमानः [V]अभिदुद्रोह सर्वतो बुद्धिपूर्वकं द्रोहं कृतवानस्मि [V]वा अथवा [V]शेपे साधुजनं शप्तवानस्मीति [V]यत् अस्ति [V]उत अपि च [V]अनृतम् उक्तवान् इति [V]यत् अस्ति तत् [V]इदं सर्वमपराधजातं [V]प्र [V]वहत मत्तोऽपनीय प्रवाहेणान्यतो नयत ॥ मयि । सप्तम्यन्तस्य ' त्वमावेकवचने ' इति मादेशे कृते ' अतो गुणे ' इति पररूपे च सति ' योऽचि ' इति दकारस्य यकारादेशः । एकादेशस्वरेण मकारात् परस्य अकारस्योदात्तत्वम् । दुद्रोह । ' द्रुह जिघांसायाम् ' । णलि गुणे द्विर्वचनह्रस्वहलादिशेषाः । ' लिति ' इति प्रत्ययात् पूर्वस्योदात्तत्वम् । यङ्लुक्तयोगात् निघाताभावः । शेपे । ' शप आक्रोशे ' । लिटि व्यत्ययेन तङ् । उत्तमैकवचनम् इट् । टेः एत्वम् । ' अत एकहल्मध्ये° ' ( पा. सू. ६. ४. १२० ) इति एत्वाभ्यासलोपौ । प्रत्ययस्वरेणान्तोदात्तत्वम् । पूर्ववत् निघाताभावः ॥

पशौ आहवनीयोपस्थाने ' आपो अद्यान्वचारिषम् ' इत्येषा । ' मनोतायै संप्रेषित ' इति खण्डे सूत्रितम्—' एत्योपतिष्ठन्त आपो अद्यान्वचारिषम् ' ( आश्व. श्रौ. ३. ६ ) इति ॥

आपो अद्यान्वचारिषं रसेन समगस्महि ।
पयस्वानग्न आ गहि तं मा सं सृज वर्चसा ॥ २३ ॥

आपः । अद्य । अनु । अचारिषम् । रसेन । सम् । अगस्महि ।
पयस्वान् । अग्ने । आ । गहि । तम् । मा । सम् । सृज । वर्चसा ॥ २३ ॥

[V]अद्य अस्मिन् दिने अवभृथार्थम् [V]आपः [V]अन्वचारिषं जलान्यनुप्रविष्टोऽस्मि । प्रविश्य च [V]रसेन जलसारेण [V]समगस्महि संगताः स्मः । हे [V]अग्ने [V]पयस्वान् जले वर्तमानत्वेन पयोयुक्तः त्वम् [V]आ

---

१. ढ–सर्वमपराधजातं मम; श–सर्वमपराधजातं हे आपः; ष–सर्वमपराधजातं हि आपः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vगहि । अस्मिन् कर्मण्यागच्छ । Vतं Vमा तादृशं स्नातं मां Vवर्चसा तेजसा Vसं Vसृज संयोजय॥ आपः । कर्मणि शसि प्राप्ते व्यत्ययेन जस् । अचारिषम् । चर गत्यर्थः । लुङि च्लेः सिच् । ' आर्धधातुकस्येड्वलादेः ' ( पा. सू. ७. २. ३५ ) इति इट् । ' नेटि ' ( पा. सू. ७. २. ४ ) इति वृद्धिप्रतिषेधे प्राप्ते तदपवादतया ' अतो ल्रान्तस्य ' ( पा. सू. ७. २. २ ) इति उपधाया वृद्धिः । अगस्महि । ' समो गम्यृच्छि° ' ( पा. सू. १. ३. २९ ) इति आत्मनेपदम् । च्लेः सिच् । 'मन्त्रे घस° ' इत्यादिना च्लेर्लुगभावश्छान्दसः । ' एकाच उपदेशेऽनुदात्तात् ' ( पा. सू. ७. २. १० ) इति इट्प्रतिषेधः । ' वा गमः ' ( पा. सू. १. २. १३ ) इति सिचः कित्त्वात् ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपः । गहि । लोटि गमेः सिपो हिः । अपित्त्वेन ङित्त्वात् ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपः । ' अतो हेः ' इति लुक् न भवति ; ' असिद्धवदत्रा भात् ' इति सलोपस्यासिद्धत्वात् ॥

सं मा॑ अग्ने॒ वर्च॑सा सृ॒ज॒ सं प्र॒जया॒ समायु॑षा ।
वि॒द्युर्मे॑ अस्य दे॒वा इन्द्रो॑ विद्यात्स॒ह ऋषि॑भिः ॥ २४ ॥

सम् । मा॒ । अग्ने॑ । वर्च॑सा । सृ॒ज॒ । सम् । प्र॒ऽजया॑ । सम् । आयु॑षा ।
वि॒द्युः । मे॒ । अ॒स्य॒ । दे॒वाः । इन्द्रः॑ । वि॒द्या॒त् । स॒ह । ऋषि॑ऽभिः ॥ २४ ॥

हे Vअग्ने वर्चःप्रजायुर्भिः मां संयोजय । Vदेवाः सोमपातारः Vअस्य Vमे यजमानस्य Vविद्युः अनुष्ठानं जानीयुः । किंच Vइन्द्रः च ऋषिगणैः Vसह ममानुष्ठानं Vविद्यात् जानीयात् ॥ विद्युः । ' विद ज्ञाने ' । लिङि ' झेर्जुस् ' ( पा सू. ३. ४. १०८ ) । यासुट् । ' लिङः सलोपः° ' इति सकारलोपः । ' उस्यपदान्तात् ' ( पा. सू. ६. १. ९६ ) इति पररूपत्वम् । यासुट उदात्तत्वेन एकादेश उकारोऽपि उदात्तः । अस्य । ' इदमोऽन्वादेशे° ' इति अशनुदात्तः । विभक्तिरपि सुप्त्वेन अनुदात्ता । सह ऋषिभिः इत्यत्र ' ऋत्यकः ' ( पा. सू. ६. १. १२८ ) इति प्रकृतिभावः ॥ ॥१२॥ ॥५॥

प्रथममण्डलस्य षष्ठे अनुवाके सप्त सूक्तानि । तत्र ' कस्य नूनम् ' इति पञ्चदशर्चं प्रथमं सूक्तम् । अजीगर्तपुत्रस्य शुनःशेपस्य आर्षं त्रैष्टुभम् । ' अभि त्वा देव ' इति तृचो गायत्रः । आद्याया अनिरुक्तत्वात् प्रजापतिर्देवता । ' अग्नेर्वयम् ' इत्यस्य अग्निः । ' अभि त्वा देव ' इत्यस्य तृचस्य सविता । ' भगभक्तस्य ' इत्येषा भगदेवताका वा । शेषा वारुण्यः । तथा च अनुक्रान्तं–' कस्य पञ्चोनाजीगर्तिः शुनःशेपः स कृत्रिमो वैश्वामित्रो देवरातो वारुणं तु त्रैष्टुभमादौ काय्याग्नेय्यौ सावित्रस्तृचो गायत्रोऽस्यान्त्या भागी वा ' इति । राजसूये अभिषेचनीयेऽहनि मरुत्वतीये परिसमाप्ते सति एतदादिकं सूक्तसप्तकम् अभिषिक्तस्य पुत्रादिभिः परिवृतस्य राज्ञः पुरस्तात् होत्राख्यातव्यम् । तथा च सूत्रेऽभिहितम्–' संस्थिते मरुत्वतीये दक्षिणत आहवनीयस्य हिरण्यकशिपावासीनोऽभिषिक्ताय पुत्रामात्यपरिवृताय राज्ञे शौनःशेपमाचक्षीत ' ( आश्व. श्रौ. ९. ३ ) इति । ब्राह्मणं च भवति–' तदेतत्परुरुक्शतगाथं शौनःशेपमाख्यानं तद्धोता राज्ञेऽभिषिक्तायाचष्टे हिरण्यकशिपावासीन आचष्टे हिरण्यकशिपावासीनः प्रतिगृणाति ' ( ऐ. ब्रा. ७. १८ ) इति ॥

---

१. ढ–वर्चसा मावसृज संयोजय प्रजया आयुषा मां संसृज; श-ष–' संयोजय ' इत्यस्य स्थाने ' संसृज संयोजय ' ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कस्य नूनं कतमस्यामृतानां मनामहे चारु देवस्य नाम ।
को नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं च ॥ १ ॥

कस्य । नूनम् । कतमस्य । अमृतानाम् । मनामहे । चारु । देवस्य । नाम ।
कः । नः । मह्यै । अदितये । पुनः । दात् । पितरम् । च । दृशेयम् । मातरम् । च ॥१॥

'कस्य' इत्यनयर्चा शुनःशेपो यूपे बद्धः कांदिशीकः कं देवम् उपधावानि इति विचिकित्सति। तथा च आम्नायते–'हन्ताहं देवता उपधावानीति स प्रजापतिमेव प्रथमं देवतानामुपससार' (ऐ. ब्रा. ७. १६) इति। वयं शुनःशेपनामकाः Vअमृतानां देवतानां मध्ये Vकतमस्य किंजातीयस्य Vकस्य Vदेवस्य Vचारु शोभनं Vनाम Vमनामहे उच्चारयामः। Vकः देवो मां मुमूर्षुं Vपुनः अपि Vमह्यै महत्यै Vअदितये पृथिव्यै Vदात् दद्यात्। तेन दानेन अहममृतः सन् Vपितरं Vमातरं Vच Vदृशेयं पश्येयम्। 'को[1] वै नाम प्रजापतिः' (ऐ. ब्रा. ३.२१) इति श्रुतेः कस्य इति शब्दसामान्यात् अनया प्रजापतिरेव उपसृतः इति गम्यते[1] ॥ कतमस्य। किंशब्दात् 'वा बहूनां जातिपरिप्रश्ने डतमच्' (पा. सू. ५. ३. ९३)। 'चितः' इत्यन्तोदात्तत्वम्। अमृतानाम्। 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वे प्राप्ते 'नञो जरमरमित्रमृताः' इत्युत्तरपदाद्युदात्तत्वम्। मनामहे। 'मन ज्ञाने'। व्यत्ययेन शप्। पादादित्वादनिघातः। मह्यै। 'उदात्तयणो हल्पूर्वात्' इति विभक्तेरुदात्तत्वम्। दात्। 'गातिस्था०' (पा. सू. २. ४. ७७) इति सिचो लुक्। 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडागमाभावः। दृशेयम्। 'दृशिर् प्रेक्षणे'। आशीर्लिङि मिपः अम्। 'दृशेरग्वक्तव्यः' (पा. म. ३. १. ८६. २) इति अक्प्रत्ययः शपोऽपवादः। कित्त्वात् लघूपधगुणाभावः। 'लिङ्याशिष्यङ्' (पा. सू. ३. १. ८६) इति अङि हि सति 'ऋदृशोऽङि गुणः' (पा. सू. ७. ४. १६) इति गुणः स्यात्। यासुट्। सलोपः। 'अतो येयः'। 'आद्गुणः'। यासुटः स्वरेण एकार उदात्तः। मातरं च इत्यत्र चशब्दात् दृशेयम् इति अनुषज्यते। अतः तदपेक्षयैषा तिङ्विभक्तिः प्रथमा इति 'चवायोगे प्रथमा' इति न निहन्यते।

अग्नेर्वयं प्रथमस्यामृतानां मनामहे चारु देवस्य नाम ।
स नो मह्या अदितये पुनर्दात्पितरं च दृशेयं मातरं च ॥ २ ॥

अग्नेः । वयम् । प्रथमस्य । अमृतानाम् । मनामहे । चारु । देवस्य । नाम ।
सः । नः । मह्यै । अदितये । पुनः । दात् । पितरम् । च । दृशेयम् । मातरम् । च ॥२॥

इत्थं प्रथमया ऋचा विचिकित्सां कृत्वा प्रजापतेः सकाशात् तं देवम् अग्निं निश्चित्य अनया तुष्टाव। तथा च श्रूयते–'तं प्रजापतिरुवाचाग्निर्वै देवानां नेदिष्ठस्तमेवोपधावेति सोऽग्निमुपससाराग्नेर्वयं प्रथमस्यामृतानामित्येतयर्चा' (ऐ. ब्रा. ७. १६) इति। पूर्ववत् योजना। Vदात् ददातु Vदृशेयं पश्यानि इत्येवम् आशीःपरत्वेन पदद्वयं योज्यम् ॥

---

१. झ-ढ–'को ह वै...गम्यते' इति नास्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रथमे छन्दोमे वैश्वदेवशस्त्रे ' अभि त्वा देव सवितः ' इति सावित्रस्तृचः सूक्तस्थानीयः । ' अथ च्छन्दोमाः ' इति खण्डे ' अभि त्वा देव सवितः प्रेतां यज्ञस्य शंभुवा ' ( आश्व. श्रौ. ८. ९ ) इति सूत्रितम् । ' अभि त्वा ' इत्येषा अग्निमन्थनेऽपि विनियुक्ता । ' प्रातर्वैश्वदेव्याम् ' इति खण्डे ' अभि त्वा देव सवितर्महो द्यौः पृथिवी च नः ' ( आश्व. श्रौ. २. १६ ) इति सूत्रितम् । श्रूयते च—' अभि त्वा देव सवितरिति सावित्रीमन्वाह ' ( ऐ. ब्रा. १. १६ ) इति । तथा प्रवर्ग्येऽपि एषैव विनियुक्ता । ' अथोत्तरम् ' इति खण्डे ' अभि त्वा देव सवितः समी वत्सं न मातृभिः ' ( आश्व. श्रौ. ४. ७ ) इति सूत्रितम् । तथा ग्रावस्तोत्रेऽपि । ' एतस्मिन् काले ग्रावस्तुत् ' इति खण्डे ' मध्यमस्वरेणेदं सवनमभि त्वा देव सवितः ' ( आश्व. श्रौ. ५. १२ ) इति सूत्रितम् ॥

**अभि त्वा देव सवितरीशानं वार्याणाम् । सदावन्भागमीमहे ॥ ३ ॥**

अभि । त्वा । देव । सवितः । ईशानम् । वार्याणाम् । सदा । अवन् । भागम् । ईमहे ॥३॥

अथ अग्निना प्रेरितः सन् सवितारम् ' अभि त्वा ' इत्यनेन तृचेन प्रार्थयते । तथैव श्रूयते— तमग्निरुवाच सविता वै प्रसवानामीशे तमेवोपधावेति स सवितारमुपससाराभि त्वा देव सवितरित्येतेन तृचेन ' ( ऐ. ब्रा. ७. १६ ) इति । हे Vसदावन् सदा सर्वदा रक्षक हे Vसवितः Vदेव Vवार्याणां वरणीयानां धनानाम् Vईशानं स्वामिनं त्वां प्रति Vभागं भजनीयं धनम् Vअभि सर्वतः Vईमहे याचामहे ॥ ईशानम् । ' ईश ऐश्वर्ये ' । लटः शानच् । ' तास्यनुदात्तेत्° ' इति लसार्वधातुकानुदात्तत्वे धातुस्वरः । वार्याणाम् । ' वृङ् संभक्तौ ' । ' ऋहलोर्ण्यत् ' । ' ईडवन्द° ' इत्यादिनाद्युदात्तत्वम् । अवन् । आमन्त्रितनिघातः । भागम् । ' कर्षात्वतः° ' इति घञोऽन्तः उदात्तः ॥

**याश्चिद्धि त इत्था भगः शशमानः पुरा निदः । अद्वेषो हस्तयोर्दधे ॥ ४ ॥**

यः । चित् । हि । ते । इत्था । भगः । शशमानः । पुरा । निदः । अद्वेषः । हस्तयोः । दधे ॥४॥

हे सवितः Vयः Vभगः भजनीयो धनविशेषः Vते तव Vहस्तयोर्दधे धृतोऽभूत् तं धनविशेषम् ईमहे इति पूर्वत्रान्वयः । चिच्छब्दः पूजार्थे हिशब्दः प्रसिद्धौ । धनस्य पूज्यत्वं सर्वत्र प्रसिद्धम् । तामेव पूज्यत्वप्रसिद्धिं विशदयति । Vइत्था Vशशमानः अनेन प्रकारेण शस्यमानः स्तूयमानः । धनस्तुतिप्रकारं च सर्वे जानन्ति । ननु स्वकीये धने वैरिभिः अपहृते सति वैरिगृहीतं धनं सर्वो लोको निन्दति द्वेष्टि च । अतो धनस्तुतिः न नियता इत्याशङ्क्याह । Vनिदः Vपुरा Vअद्वेषः निन्दायाः पूर्वं स्वकीयत्वेन व्यवस्थिते सति तदानीं द्वेषरहितः । तस्मात् स्वकीयत्वाभिप्रायेण स्तूयमानत्वमुक्तमित्यर्थः ॥ इत्था । प्रकारवचने ' इदमस्थमुः ' ( पा. सू. ५. ३. २४ ) । ' सुपां सुलुक्° ' इति व्यत्ययेन विभक्तेः डादेशः । टिलोपे उदात्तनिवृत्तिस्वरेण आकार उदात्तः । शशमानः । ' शश प्लुतगतौ ' । इह तु स्तुत्यर्थः । ' ताच्छील्यवयोवचन° ' ( पा. सू. ३. २. १२९ ) इति ताच्छीलिकश्चानश् । कर्तरि शप् । ' चितः ' इत्यन्तोदात्तत्वम् । निदः । ' णिदि कुत्सायाम् ' । संपदादिलक्षणः क्विप् । ' सावेकाचः° ' इति पञ्चम्या उदात्तत्वम् । अद्वेषः । न विद्यते द्वेषोऽस्य इति बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । दधे । कर्मणि लिट् । तस्य आर्धधातुकत्वेन ' अभ्यस्तानामादिः ' इत्याद्युदात्तो न भवति । प्रत्ययस्वर एव शिष्यते । यद्वृत्तयोगात् निघाताभावः ॥

---

१. ढ—द्वेषोऽत्र ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

भगभक्तस्य ते वयमुदशेम तवावसा । मूर्धानं राय आरभे ॥ ५ ॥

भगऽभक्तस्य । ते । वयम् । उत् । अशेम । तव । अवसा । मूर्धानम् । रायः । आऽरभे ॥५॥

हे सवितः Vते त्वदीयाः Vवयं शुनःशेपनामानः Vभगभक्तस्य धनेन संयुक्तस्य Vतवावसा रक्षणेन Vउदशेम उत्कर्षेण व्याप्नुमः । किं कर्तुम् । Vरायः धनस्य Vमूर्धानम् उत्कर्षम् Vआरभे प्रारब्धुम् । धनिकत्वप्रसिद्ध्या व्याप्ता भूयामेत्यर्थः ? ॥ भगशब्दो वृषादित्वादाद्युदात्तः । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् । अशेम । ' अशू व्याप्तौ ' । लिङि सिप्रत्ययेन परस्मैपदम् । शप् । रायः । ' ऊडिदम् ° ' इति षष्ठ्या उदात्तत्वम् । आरभे । ' कृत्यार्थे तवैकेन्° ' इति तुमर्थे केन्प्रत्ययः । नित्स्वरेणाद्युदात्तत्वम् ॥ ॥ १३ ॥

नहि ते क्षत्रं न सहो न मन्युं वयश्चनामी पतयन्त आपुः ।
नेमा आपो अनिमिषं चरन्तीर्न ये वातस्य प्रमिनन्त्यभ्वम् ॥ ६ ॥

नहि । ते । क्षत्रम् । न । सहः । न । मन्युम् । वयः । चन । अमी इति । पतयन्तः । आपुः ।
न । इमाः । आपः । अनिऽमिषम् । चरन्तीः । न । ये । वातस्य । प्रऽमिनन्ति । अभ्वम् ॥६॥

अथ सवित्रा प्रेरितः शुनःशेपः एतदादिसूक्तशेषेण उत्तरेण च सूक्तेन वरुणं तुष्टाव । तथा च श्रूयते–' तं सवितोवाच वरुणाय वै राज्ञे नियुक्तोऽसि तमेवोपधावेति स वरुणं राजानमुपससार तत उत्तराभिरेकत्रिंशता ' ( ऐ. ब्रा. ७. १६ ) इति । हे वरुण Vपतयन्तः प्रौढे वियत्युत्पतन्तः Vअमी दृश्यमानाः Vवयश्चन श्येनादयः पक्षिणोऽपि Vते Vक्षत्रं त्वदीयं शरीरबलं Vनहि Vआपुः नैव प्राप्ताः । त्वत्सदृशं शरीरबलं पक्षिणामपि नास्तीत्यर्थः । तथा Vसहः त्वदीयं पराक्रमं तव सामर्थ्यमपि Vन प्रापुः । तथा Vमन्युं त्वदीयं कोपमपि Vन प्रापुः । त्वयि क्रुद्धे सति सोढुमशक्ता इत्यर्थः । Vअनिमिषं सर्वदा Vचरन्तीः प्रवाहरूपेण गच्छन्त्यः Vआपः त्वदीयं बलं Vन प्रापुः । Vवातस्य वायोः Vये गतिविशेषाः त्वदीयम् Vअभ्वं वेगं Vन Vप्रमिनन्ति न हिंसन्ति । अतिक्रमं कर्तुं न शक्ता इत्यर्थः । तेऽपि न प्रापुरिति पूर्वत्रान्वयः ॥ पतयन्तः । ' पत गतौ ' । चुरादिरदन्तः । लटः शतृ । शप् । गुणायादेशौ । अदुपदेशात् लसार्वधातुकानुदात्तत्वे णिचः स्वरः । आपुः । ' आप्लृ व्याप्तौ ' । लिट्युसि द्विर्भावहलादिशेषौ । ' अत आदेः ' ( पा. सू. ७. ४. ७० ) इति आत्वम् । अत्र न सहो न मन्युम् इत्यादिभिः आपुः इत्यस्य संबन्धात् तदपेक्षया प्राथम्यात् ' चादिलोपे विभाषा ' इति प्रथमा तिङ्विभक्तिर्न निहन्यते । चरन्तीः । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घः । प्रमिनन्ति । ' मीञ् हिंसायाम् ' । ' ऋयादिभ्यः श्ना ' । ' श्नाभ्यस्तयोरातः ' इति आकारलोपः । ' मीनातेर्निगमे ' ( पा. सू. ७. ३. ८१ ) इति ह्रस्वत्वम् । प्रत्ययस्वरः । ' तिङि चोदात्तवति ' ( पा. सू. ८. १. ७१ ) इति गतिरनुदात्तः । यद्वृत्तयोगादनिघातः ॥

---

१. ढ–भूयास्मेति । २. ढ–योद्धुमशक्ताः ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अबुध्ने राजा वरुणो वनस्योर्ध्वं स्तूपं ददते पूतदक्षः ।
नीचीनाः स्थुरुपरि बुध्न एषामस्मे अन्तर्निहिताः केतवः स्युः ॥ ७ ॥

अबुध्ने । राजा । वरुणः । वनस्य । ऊर्ध्वम् । स्तूपम् । ददते । पूतऽदक्षः । नीचीनाः । स्थुः । उपरि । बुध्नः । एषाम् । अस्मे इति । अन्तः । निऽहिताः । केतवः । स्युरिति स्युः ॥७॥

[v]पूतदक्षः शुद्धबलः [v]वरुणः [v]राजा [v]अबुध्ने मूलरहिते अन्तरिक्षे तिष्ठन् [v]वनस्य वननीयस्य तेजसः [v]स्तूपं संघम् [v]ऊर्ध्वम् उपरिदेशे [v]ददते धारयति । [v]नीचीनाः [v]स्थुः । ऊर्ध्वदेशे वर्तमानस्य वरुणस्य रश्मय इत्यध्याहार्यम् । ते ह्यधोमुखास्तिष्ठन्ति । [v]एषां रश्मीनां [v]बुध्नः मूलम् [v]उपरि तिष्ठतीति शेषः । तथा सति [v]केतवः प्रज्ञापकाः प्राणाः [v]अस्मे अस्मासु [v]अन्तर्निहिताः स्थापिताः स्युः मरणं न भविष्यतीत्यर्थः ॥ अबुध्ने । न विद्यते बुध्नः मूलम् अस्य इति बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । स्तूपम् । ' स्त्यै शब्दसंघातयोः ' । ' स्त्यः संप्रसारणमूच्च ' इति पप्रत्ययः ; तत्संनियोगेन यकारस्य संप्रसारणं परपूर्वत्वे ऊकारादेशश्च । ' नित् ' इत्यनुवृत्तेराद्युदात्तत्वम् । ददते । भौवादिकः । नीचीनाः । निपूर्वात् अञ्चतेः ' ऋत्विक्० ' इत्यादिना क्विन् । ' अनिदिताम् ' इति नलोपः । न्यच्शब्दात्स्वार्थे ' विभाषाञ्चेरदिक्स्त्रियाम् ' ( पा. सू. ५. ४. ८ ) इति खः । ' आयन्० ' इत्यादिना तस्य ईनादेशः । ' आयनादिषूपदेशिवद्वचनं स्वरसिध्यर्थम् ' ( पा. सू. ७. १. २. १ ) इति वचनात् ईकार उदात्तः । ' अचः ' इति अकारलोपे ' चौ ' इति दीर्घत्वम् । स्थुः । ' गातिस्था० ' ( पा. सू. २. ४. ७७ ) इत्यादिना सिचो लुक् । ' आतः ' ( पा. सू. ३. ४. ११० ) इति झेः जुसादेशः । ' उस्यपदान्तात् ' ( पा. सू. ६. १. ९६ ) इति पररूपत्वम् । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडागमाभावः । अस्मे । ' सुपां सुलुक् ' इति सप्तम्याः शेआदेशः । निहिताः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । स्युः । अस्तेर्लिङि ' श्नसोरल्लोपः ' ॥

उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ ।
अपदे पादा प्रतिधातवेऽकरुतापवक्ता हृदयाविधश्चित् ॥ ८ ॥

उरुम् । हि । राजा । वरुणः । चकार । सूर्याय । पन्थाम् । अनुऽएतवै । ऊम् इति । अपदे । पादा । प्रतिऽधातवे । अकः । उत । अपऽवक्ता । हृदयऽविधः । चित् ॥ ८ ॥

[v]वरुणः [v]राजा [v]सूर्याय सूर्यस्य [v]पन्थां मार्गम् [v]उरुं विस्तीर्णं [v]चकार । हिशब्दः प्रसिद्धौ । उत्तरायणदक्षिणायनमार्गस्य विस्तारः प्रसिद्धः । किमर्थमेवं कृतवान् इति तदुच्यते । [v]अन्वेतवा [v]उ अनुक्रमेण उदयास्तमयौ गन्तुमेव । तथा [v]अपदे पादरहिते अन्तरिक्षे [v]पादा [v]प्रतिधातवे पादौ प्रक्षेप्तुम् [v]अकः मार्गं कृतवान् । पूर्वत्र रथस्य मार्गः अत्र पादयोरिति विशेषः । यद्वा । अपदे यूपे बद्धेन मया गन्तुमशक्ये भूप्रदेशे पादौ प्रक्षेप्तुम् उपायं बन्धविमोचनरूपं करोत्वित्यर्थः । [v]उत अपि च [v]हृदयाविधश्चित् अस्मदीयवेधकस्य[1] शत्रोरपि [v]अपवक्ता अपवदिता निराकर्ता भवतु ॥ चकार । लिस्स्वरेण आकार

१. ढ–' अस्मदीयवेधकस्य ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उदात्तः। ' हि च ' इति निघातप्रतिषेधः। पन्थाम्। ' पथिमथ्यृभुक्षामात् ' (पा. सू. ७. १. ८५) इति द्वितीयायामपि व्यत्ययेन आत्वम्। पथिन्शब्दस्य ' पतेस्थ च ' ( उ. सू. ४. ४५२ ) इति प्रत्ययान्तत्वेन अन्तोदात्तत्वे प्राप्ते ' पथिमथोः सर्वनामस्थाने ' ( पा. सू. ६. १. १९९ ) इत्याद्युदात्तत्वम्। अन्वेतवै। अनुपूर्वात् एतेः ' तुमर्थे सेसेन्° ' इनि तवैप्रत्ययः। ' तवै चान्तश्च युगपत् ' (पा. सू. ६. २. ५१ ) इति आद्यन्तयोरुदात्तत्वम्। पादा। ' सुपां सुलुक्° ' इति आकारः। प्रतिधातवे। दधातेः ' तुमर्थ° ' इति सूत्रेणैव तवेन्प्रत्ययः। ' तादौ च निति° ' ( पा. सू. ६. २. ५० ) इति गतेः प्रकृतिस्वरत्वम्। अकः। करोतेः ' छन्दसि लुङ्लङ्लिटः ' इति लोडर्थे लुङ्। तस्य तिप्। ' मन्त्रे घस° ' ( पा. सू. २. ४. ८० ) इत्यादिना च्लेर्लुक्। गुणो रपरत्वम्। ' हल्ङ्याब्भ्यः ' (पा. सू. ६. १. ६८) इति तिपो लोपः। अडागमः। हृदयाविधः। ' हृञ् हरणे '। ' वृहोः पुग्दुकौ च ' ( उ. सू.४. ५४० ) इति कयन्। ' व्यध ताडने '। क्विप्। ' नहिवृति° ' ( पा. सू. ६. ३. ११६ ) इत्यादिना पूर्वपदस्य दीर्घत्वम्। कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

शतं ते राजन्भिषजः सहस्रमुर्वी गभीरा सुमतिष्टे अस्तु।
बाधस्व दूरे निर्ऋतिं पराचैः कृतं चिदेनः प्र मुमुग्ध्यस्मत् ॥ ९ ॥

शतम्। ते। राजन्। भिषजः। सहस्रम्। उर्वी। गभीरा। सुऽमतिः। ते। अस्तु।
बाधस्व। दूरे। निःऽऋतिम्। पराचैः। कृतम्। चित्। एनः। प्र। मुमुग्धि। अस्मत् ॥९॥

हे [V]राजन् वरुण [V]ते तव [V]शतं[1] [V]भिषजः बन्धनिवारकाणि शतसंख्याकानि[1] औषधानि वैद्या वा सन्ति। [V]ते तव [V]सुमतिः अस्मदनुग्रहबुद्धिः [V]उर्वी विस्तीर्णा [V]गभीरा गाम्भीर्योपेता स्थिरा [V]अस्तु। [V]निर्ऋतिम् अस्मदनिष्टकारिणीं[2] निर्ऋतिं[2] पापदेवतां [V]पराचैः पराङ्मुखां कृत्वा [V]दूरे अस्मत्तो व्यवहिते देशे स्थापयित्वा तां [V]बाधस्व। [V]कृतं [V]चित् अस्माभिरनुष्ठितमपि [V]एनः पापम् [V]अस्मत् [V]प्र [V]मुमुग्धि प्रकर्षेण मुक्तं नष्टं कुरु॥ सुमतिः। ' तादौ च° ' इति पूर्वपदप्रकृतिस्वरत्वे प्राप्ते ' मन्क्तिन्° ' इत्यादिनोत्तरपदान्तोदात्तत्वम्। संहितायां विसर्जनीयसकारस्य ' युष्मत्तत्ततक्षुःष्वन्तःपादम् ' ( पा. सू. ८. ३. १०३ ) इति षत्वम्। बाधस्व। ' बाधृ विलोडने '। शपः पित्त्वादनुदात्तत्वम्। तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते। निर्ऋतिम्। ' तादौ च° ' इति गतेः प्रकृतिस्वरत्वम्। मुमुग्धि। ' मुग्लृ मोक्षणे '। ' बहुलं छन्दसि ' इति श्लुः। ' हुझल्भ्यो हेर्धिः ' ( पा. सू. ६. ४. १०१ )। तस्य अपित्त्वेन ङित्त्वाद्गुणाभावः। ' चोः कुः ' (पा. सू. ८. २. ३०) इति कुत्वम्॥

अमी य ऋक्षा निहितास उच्चा नक्तं ददृश्रे कुह चिद्दिवेयुः।
अदब्धानि वरुणस्य व्रतानि विचाकशच्चन्द्रमा नक्तमेति ॥ १० ॥

अमी इति। ये। ऋक्षाः। निऽहितासः। उच्चा। नक्तम्। ददृश्रे। कुह। चित्। दिवा। ईयुः।
अदब्धानि। वरुणस्य। व्रतानि। विऽचाकशत्। चन्द्रमाः। नक्तम्। एति ॥ १० ॥

---

१. श–शतं भिषजः सहस्रं गदनिवारकाणि शतसहस्रसंख्यानि; ष–शतं भिषजः सहस्रं बन्धनिवारकाणि शतसहस्रसंख्याकानि। २. ढ–°कारिणी ( णीं )।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]अमी रात्रावस्माभिर्दृश्यमानाः [V]ऋक्षाः सप्त ऋषयः । तथा च वाजसनेयिन आमनन्ति— ' ऋक्षा इति ह स्म वै पुरा सप्त ऋषीनाचक्षते ' इति । यद्वा । ऋक्षाः सर्वेऽपि नक्षत्रविशेषाः । ' ऋक्षाः स्तुभिरिति नक्षत्राणाम् ' ( निरु. ३. २० ) इति यास्केन उक्तत्वात् । [V]उच्चा उच्चैः उपरि द्युप्रदेशे [V]निहितासः स्थापिताः [V]ये सन्ति ते ऋक्षाः [V]नक्तं रात्रौ [V]ददृश्रे सर्वैरपि दृश्यन्ते । [V]दिवा अहनि [V]कुह [V]चित् [V]ईयुः क्वापि गच्छेयुः । न दृश्यन्ते इत्यर्थः । [V]वरुणस्य राज्ञः [V]व्रतानि कर्माणि नक्षत्रदर्शनादिरूपाणि [V]अदब्धानि केनापि अहिंसितानि । किंच वरुणस्य आज्ञयैव [V]चन्द्रमाः [V]नक्तं रात्रौ [V]विचाकशत् विशेषेण दीप्यमानः [V]एति गच्छति ॥ निहितासः । ' आज्जसेरसुक् ' । थाथादिस्वरेणोत्तरपदान्तोदात्तत्वे प्राप्ते ( पा. सू. ६. २. १४४ ) ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । ददृश्रे । दृशेर्लिटि ' इरयो रे ' ( पा. सू. ६. ४. ७६ ) इति रेआदेशः । व्यत्ययेनाद्युदात्तत्वम् । यद्वृत्तयोगादनिघातः । कुह । ' वा ह च च्छन्दसि ' ( पा. सू. ५. ३. १३ ) इति किंशब्दादुत्तरस्य त्रलो हादेशः । ' कु तिहोः ' ( पा. सू. ७. २. १०४ ) इति किंशब्दस्य कुआदेशः । स्थानिवद्भावात् लित्स्वरेणाद्युदात्तत्वम् । विचाकशत् । कशेर्दीप्त्यर्थात् यङ्लुगन्तात् शतृप्रत्ययः । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । समासे कृत्स्वरः । यद्वा । काशतेर्वा व्यत्ययेन उपधाह्रस्वत्वम् । चन्द्रमाः । ' चन्द्रे माडो डित् ' ( उ. सू. ४. ६६७ ) इति असिप्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् ॥ ॥ १४ ॥

एकादशिनस्य वारुणस्य पशोर्वपापुरोडाशयोः ' तत्त्वा यामि ' इति द्वे ऋचौ याज्ये । सूत्रितं च— ' तत्त्वा यामि ब्रह्मणा वन्दमान इति द्वे अस्तश्चाद्याम् ' ( आश्व. श्रौ. ३. ७ ) इति । वरुणप्रघासेषु वारुणस्य हविषो याज्या ' तत्त्वा यामि ' इत्येषा ' पञ्चम्यां पौर्णमास्याम् ' इत्यत्र सूत्रितम्–' इमं मे वरुण श्रुधि तत्त्वा यामि ब्रह्मणा वन्दमानः ' ( आश्व. श्रौ. २. १७ ) इति ॥

**तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।**
**अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्र मोषीः ॥ ११ ॥**

तत् । त्वा । यामि । ब्रह्मणा । वन्दमानः । तत् । आ । शास्ते । यजमानः । हविःऽभिः ।
अहेळमानः । वरुण । इह । बोधि । उरुऽशंस । मा । नः । आयुः । प्र । मोषीः ॥११॥

हे [V]वरुण मुमूर्षुरहं त्वां प्रति [V]तत् आयुः [V]यामि याचे । कीदृशः । [V]ब्रह्मणा प्रौढेन स्तोत्रेण [V]वन्दमानः स्तुवन् । सर्वत्र [V]यजमानः अपि [V]हविर्भिः [V]तत् आयुः [V]आ [V]शास्ते प्रार्थयते । त्वं च [V]इह कर्मणि [V]अहेळमानः अनादरमकुर्वन् [V]बोधि अस्मदपेक्षितं बुध्यस्व । हे [V]उरुशंस बहुभिः स्तुत्य [V]नः अस्मदीयम् [V]आयुः [V]मा [V]प्र [V]मोषीः प्रमुषितं मा कुरु । सप्तदशसंख्याकेषु याच्याकर्मसु ' ईमहे यामि ' ( नि. ३. १९. १ ) इति पठितम् । चाशब्दलोपश्छान्दसः ॥ अहेळमानः । ' हेडृ अनादरे ' । अदुपदेशात् लसार्वधातुकानुदात्तत्वे शपश्च पित्त्वादनुदात्तत्वे सति धातुस्वरः शिष्यते । ततो नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । बोधि । ' बुध अवगमने ' । लोटः सेर्हिः । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । ' वा छन्दसि ' ( पा. सू. ३. ४. ८८ ) इति अपित्त्वाभावेन ङित्त्वाभावात् लघूपधगुणः । ' हुझल्भ्यो हेर्धिः ' इति हेर्धिरादेशः । धातोरन्त्यलोपश्छान्दसः । मोषीः । ' मुष स्तेये ' । लोडर्थे छान्दसो लुङ् । ' वदव्रज° ' ( पा. सू. ७. २. ३ ) इति प्राप्ताया वृद्धेः ' नेटि ' ( पा. सू. ७. २. ४ ) इति प्रतिषेधे सति लघूपधगुणः । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तदिन्नक्तं तदिवा मह्यमाहुस्तदयं केतो हृद आ वि चष्टे ।
शुनःशेपो यमह्वद्गृभीतः सो अस्मान्राजा वरुणो मुमोक्तु ॥ १२ ॥

तत् । इत् । नक्तम् । तत् । दिवा । मह्यम् । आहुः । तत् । अयम् । केतः । हृदः । आ ।
वि । चष्टे । शुनःशेपः । यम् । अह्वत् । गृभीतः । सः । अस्मान् । राजा । वरुणः । मुमोक्तु ॥१२॥

vतदित् तदेव वरुणविषयं स्तोत्रं vनक्तं रात्रौ vमह्यं शुनःशेपाय vआहुः कर्तव्यत्वेनाभिज्ञाः कथयन्ति। तथा vदिवा अपि vतत् एव आहुः। vहृदः मदीयमनसो निष्पन्नः vअयं vकेतः प्रज्ञाविशेषोऽपि vतत् एव कर्तव्यत्वेन vआ vवि vचष्टे सर्वतो विशेषेण प्रकाशयति। vगृभीतः गृहीतः यूपे बद्धः vशुनःशेपः एतन्नामको जनः vयं वरुणम् vअह्वत् आहूतवान् vसः vवरुणः vराजा vअस्मान् शुनःशेपान् vमुमोक्तु बन्धात् मुक्तं करोतु ॥ मह्यम् । ' ङयि च ' इत्याद्युदात्तत्वम् । आहुः । ' ब्रुवः पञ्चानाम्° ' ( पा. सू. ३. ४. ८४ ) इति ब्रूञो लटि झेः उसादेशः, धातोः आहादेशश्च । हृदः । ' पद्दन्° ' ( पा. सू. ६. १. ६३ ) इत्यादिना हृदयशब्दस्य हृदादेशः । ' ऊडिदंपदादि° ' इति पञ्चम्या उदात्तत्वम् । शुनःशेपः । शुन इव शेपो यस्य इति समासे ' शुनः शेपपुच्छलाङ्गूलेषु संज्ञायां षष्ठ्या अलुग्वक्तव्यः ' ( पा. सू. ६. ३. २१. ४ ) इति अलुक् । पूर्वपदप्रकृतिस्वरत्वे प्राप्ते ' उभे वनस्पत्यादिषु° ' (पा. सू. ६. २. १४०) इति पूर्वोत्तरपदयोः युगपत् प्रकृतिस्वरत्वम् । अह्वत् । ह्वेञो लुङि ' लिपिसिचिह्वश्च ' ( पा. सू. ३. १. ५३ ) इति च्लेः अङादेशः । ' आतो लोप इटि च ' ( पा. सू. ६. ४. ६४ ) इति आकारलोपः । अडागम उदात्तः । यद्वृत्तयोगादनिघातः । गृभीतः । ' हृग्रहोर्भः° ' इति भत्वम् । सो अस्मान् । ' प्रकृत्यान्तःपादम्° ' इति प्रकृतिभावः । मुमोक्तु । ' बहुलं छन्दसि ' इति विकरणस्य श्लुः ॥

शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः ।
अवैनं राजा वरुणः ससृज्याद्विद्वाँ अदब्धो वि मुमोक्तु पाशान् ॥ १३ ॥

शुनःशेपः । हि । अह्वत् । गृभीतः । त्रिषु । आदित्यम् । द्रुऽपदेषु । बद्धः ।
अव । एनम् । राजा । वरुणः । ससृज्यात् । विद्वान् । अदब्धः । वि । मुमोक्तु । पाशान् ॥१३॥

vगृभीतः बन्धनाय गृहीतः त्रिसंख्याकेषु[3] vद्रुपदेषु द्रोः काष्ठस्य यूपस्य पदेषु प्रदेशविशेषेषु vबद्धः vशुनःशेपः vआदित्यम् अदितेः पुत्रं यं[3] वरुणम् vअह्वत् आहूतवान् vहि यस्मादेवं तस्मात् सः vवरुणः vराजा vएनं शुनःशेपम् vअव vससृज्यात् अवसृष्टं बन्धनात् विमुक्तं करोतु । विमोकप्रकार एव स्पष्टीक्रियते । vविद्वान् विमोकप्रकाराभिज्ञः vअदब्धः केनाप्यहिंसितः[4] वरुणः vपाशान् बन्धनरज्जुविशेषान् vवि vमुमोक्तु विच्छिद्यैनं मुक्तं करोतु ॥ त्रिषु । ' षट्त्रिचतुर्भ्यो हलादिः ' ( पा. सू. ६. १. १७९ ) इति विभक्तेरुदात्तत्वं । संहितायाम् ' उदात्तस्वरितयोर्यणः° ' इति परः आकारः स्वर्यते । ससृज्यात् । ' सृज विसर्गे ' । प्रार्थनायां लिङ् । ' बहुलं छन्दसि ' इति विकरणस्य श्लुः । विद्वान् ।

---

१. ढ–बन्धनात् । २. त-श-ष-ह–त्रिषु त्रिसंख्याकेषु । ३. श-ह–' यं ' नास्ति । ४. ढ–दम्भरहितः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'विद ज्ञाने'। 'विदेः शतुर्वसुः' (पा. सू. ७. १. ३६)। 'उगिदचाम्°' इति नुम्। हल्ङ्यादि-संयोगान्तलोपौ। संहितायां 'दीर्घादटि समानपादे' इति नकारस्य रुत्वम्। 'आतोऽटि नित्यम्' इति सानुनासिक आकारः। अदब्धः। 'दम्भु दम्भे'। निष्ठायाम् 'अनिदिताम्°' इति नलोपे 'झषस्तथोर्धोऽधः' (पा. सू. ८. २. ४०) इति धत्वम्। अव्ययपूर्वपदप्रकृतिस्वरत्वम्॥

अवभृथे 'अव ते हेळः' इति द्वे ऋचौ वारुणस्य हविषो याज्यानुवाक्ये। 'पत्नीसंयाजैश्चरित्वा' इति खण्डे सूत्रितम्–'अव ते हेळो वरुण नमोभिरिति द्वे' (आश्व. श्रौ. ६. १३) इति॥

**अव॑ ते हे॒ळो॑ वरुण॒ नमो॑भि॒रव॑ य॒ज्ञेभि॑रीमहे ह॒विर्भिः॑।**
**क्षय॑न्न॒स्मभ्य॑मसुर प्रचेता॒ राज॒न्नेनां॑सि शिश्रथः कृ॒तानि॑॥ १४॥**

अव॑। ते॒। हे॒ळः॑। व॒रु॒ण॒। नमः॑ऽभिः। अव॑। य॒ज्ञेभिः॑। ई॒म॒हे॒। ह॒विःऽभिः॑। क्षय॑न्। अ॒स्मभ्य॑म्। अ॒सु॒र॒। प्र॒चे॒त॒ इति॑ प्रऽचेतः। राज॑न्। एनां॑सि। शि॒श्र॒थः॒। कृ॒तानि॑॥१४॥

हे [V]वरुण [V]ते तव [V]हेळः क्रोधं [V]नमोभिः नमस्कारैः [V]अव [V]ईमहे अवनयामः। तथा यज्ञैः साङ्गानुष्ठानेन पूज्यैः [V]हविर्भिः [V]अव ईमहे वरुणं परितोष्य क्रोधमपनयामः। हे [V]असुर अनिष्टक्षेपणशील [V]प्रचेतः प्रकर्षेण प्रज्ञायुक्त [V]राजन् दीप्यमान वरुण [V]अस्मभ्यम् अस्मदर्थं [V]क्षयन् अस्मिन् कर्मणि निवसन् [V]कृतानि अस्माभिरनुष्ठितानि [V]एनांसि पापानि [V]शिश्रथः श्रथितानि शिथिलानि कुरु॥ हेळः। असुनो नित्त्वादाद्युदात्तत्वम्। यज्ञेभिः। 'बहुलं छन्दसि' इति ऐसभावः। ईमहे। 'ईङ् गतौ'। विकरणस्य लुक्। क्षयन्। 'क्षि निवासगत्योः'। लटः शतृ। व्यत्ययेन शपू। आमन्त्रिताद्युदात्तत्वम्। असुर। 'असेरुरन्' (उ. सू. १. ४२)। आमन्त्रितनिघातः। शिश्रथः। 'श्रथ दौर्बल्ये'। चुरादिः अदन्तः। छान्दसे लुङि 'णिश्रिद्रुस्रुभ्यः°' (पा. सू. ३. १. ४८) इति च्लेः चङ्। द्विर्भावहलादिशेषौ। अग्लोपित्वात् सन्वद्भावाभावेऽपि (पा. सू. ७. ४. ९३) 'बहुलं छन्दसि' (पा. सू. ७. ४. ७८) इति अभ्यासस्य इत्वम्। पूर्ववत् अडभावः॥

**उद्उ॑त्त॒मं व॑रुण पाश॒मस्मदवा॑धमं॒ वि म॑ध्य॒मं श्र॑थाय।**
**अथा॑ व॒यमा॑दित्य व्र॒ते तवानाग॑सो॒ अदि॑तये स्याम॥ १५॥**

उत्। उ॒त्ऽत॒मम्। व॒रु॒ण॒। पा॒श॑म्। अ॒स्मत्। अव॑। अ॒ध॒मम्। वि। म॒ध्य॒मम्। श्र॒थ॒य॒। अथ॑। व॒यम्। आ॒दि॒त्य॒। व्र॒ते। तव॑। अना॑गसः। अदि॑तये। स्या॒म॒॥ १५॥

हे [V]वरुण [V]उत्तमम् उत्कृष्टं शिरसि बद्धं [V]पाशम् [V]अस्मत् अस्मत्तः [V]उत् [V]श्रथाय[1] उत्कृष्य शिथिलं कुरु। [V]अधमं निकृष्टं पादेऽवस्थितं पाशम् [V]अव श्रथाय[2] अधस्तादवकृष्य शिथिलीकुरु। [V]मध्यमं नाभिप्रदेशगतं पाशं [V]वि श्रथाय[3] वियुज्य शिथिलीकुरु। [V]अथ अनन्तरं हे [V]आदित्य अदितेः

---

१. ढ–ज्ञानयुक्त। २. ढ–श्रथय। ३. च-छ-फ-श-ष–श्रथाय अवज्ञाय; ढ–श्रथय अवज्ञाय। ४. ढ–श्रथय।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पुत्र वरुण Vवयं शुनःशेपाः Vतव Vव्रते त्वदीये कर्मणि Vअदितये खण्डनराहित्याय Vअनागसः अपराधरहिताः Vस्याम भवेम ॥ उत्तमम्। तमपः पित्त्वादनुदात्तत्वेन आद्युदात्तत्वे प्राप्ते 'उत्तमशश्वत्तमौ सर्वत्र' (पा. सू. ६. १. १६० ग. ) इति उञ्छादिषु पाठादन्तोदात्तत्वम्। अधमम्। 'अवद्यावमाधमार्वरेफाः कुत्सिते' ( उ. सू. ५. ७३२ ) इति अवतेः अमच्; वस्य धः। अथाय। 'अथ दौर्बल्ये'। संहितायां छान्दसो दीर्घः। तव। 'युष्मदस्मदोर्ङसि' इत्याद्युदात्तत्वम्। अनागसः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। 'नञ्सुभ्याम्' इति तु व्यत्ययेन प्रवर्तते। यद्वा। आगस्शब्दात् 'अस्मायामेधा०' ( पा. सू. ५. २. १२१ ) इति मत्वर्थीयो विनिः। तस्य 'विन्मतोर्लुक्' ( पा. सू. ५. ३. ६५ ) इति लुक्। नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ ॥ १५ ॥

'यच्चित्' इति एकविंशत्यृचं द्वितीयं सूक्तम्। तथा चानुक्रान्तम्—'यच्चित्सैका' इति। 'ऋषिश्चान्यस्मात्' इति परिभाषया शुनःशेप एव ऋषिः। 'आदौ गायत्रम्' इति परिभाषितत्वात् गायत्री छन्दः। 'वारुणं तु' इति पूर्वोक्तत्वात् तुल्यादिपरिभाषया ( अनु. १२. ३ ) वरुणो देवता। विनियोग उक्तः शौनःशेपाख्याने। विशेषविनियोगस्तु—अभिप्लवषडहे इदं सूक्तं होत्रकशस्त्रे स्तोमनिमित्तमावापार्थम्। 'अभिप्लवषडहानि' इति खण्डे तथैव सूत्रितं—'यच्चिद्धि ते विशो इति वारुणमेतस्य तृचमावपेत मैत्रावरुणः' ( आश्व. श्रौ. ७. ५ ) इति ॥

यच्चिद्धि ते विशो यथा प्र देव वरुण व्रतम्। मिनीमसि द्यविद्यवि ॥ १ ॥

यत्। चित्। हि। ते। विशः। यथा। प्र। देव। वरुण। व्रतम्। मिनीमसि। द्यविऽद्यवि ॥ १ ॥

हे Vवरुण Vयथा लोके Vविशः प्रजाः कदाचित् प्रमादं कुर्वन्ति तथा वयमपि Vते तव संबन्धि Vयच्चिद्धि यदेव किंचित् Vव्रतं कर्म Vद्यविद्यवि प्रतिदिनं Vप्र Vमिनीमसि प्रमादेन हिंसितवन्तः। तदपि व्रतं प्रमादपरिहारेण साङ्गं कुरु इति शेषः ॥ यथा। लित्स्वरेण आद्युदात्तत्वे प्राप्ते 'यथेति पादान्ते' ( फि. सू. ८५ ) इति सर्वानुदात्तत्वम्। मिनीमसि। 'मीञ् हिंसायाम्'। 'इदन्तो मसि'। 'क्र्यादिभ्यः श्ना'। 'मीनातेर्निगमे' ( पा. सू. ७. ३. ८१ ) इति ह्रस्वत्वम्। 'ई हल्यघोः' ( पा. सू. ६. ४. ११३ ) इति ईकारः। 'सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः' इति वचनात् तिङ एव स्वरः शिष्यते। यङ्लुक्त्वयोगात् निघाताभावः ॥

मा नो वधाय हत्नवे जिहीळानस्य रीरधः। मा हृणानस्य मन्यवे ॥ २ ॥

मा। नः। वधाय। हत्नवे। जिहीळानस्य। रीरधः। मा। हृणानस्य। मन्यवे ॥ २ ॥

हे वरुण Vजिहीळानस्य अनादरं कृतवतः Vहत्नवे हन्तुः पापिहननशीलस्य[1] तव संबन्धिने त्वत्कर्तृकाय Vवधाय Vनः अस्मान् Vमा Vरीरधः संसिद्धान् विषयभूतान् मा कुरु। Vहृणानस्य हृणीयमानस्य क्रुद्धस्य तव Vमन्यवे क्रोधाय Vमा अस्मान् रीरधः ॥ वधाय। 'हनश्च वधः' ( पा. सू. ३. ३. ७६ ) इति अबन्तो वधशब्दः। उञ्छादिषु पाठादन्तोदात्तः। हत्नवे। 'हन हिंसागत्योः'। 'कृहनिभ्यां क्नुः' ( उ. सू. ३. ३१० ) इति क्नुप्रत्ययः; धातोर्नकारस्य तकारः। जिहीळानस्य। 'हेडृ

---

१. ढ—पापहननशीलस्य।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अनादरे'। अस्मात् लिटः कानच्। द्विर्भावहलादिशेषहस्वचुत्वजश्त्वानि। एकारस्य ईकारादेशश्छान्दसः। 'चितः' इत्यन्तोदात्तत्वम्। रीरधः। 'राध साध संसिद्धौ'। चङि णिलोपे उपधाहस्वत्वम्। द्विर्वचनहलादिशेषहस्वत्वसन्वद्भावेत्वाभ्यासदीर्घाः। 'न माङ्योगे' इति अडभावः। हृणानस्य। 'हृणीङ् लज्जायाम्'। अस्मात् शानचि पृषोदरादित्वात् अभिमतरूपसिद्धिः॥

**वि मृळीकाय ते मनो रथीरश्वं न संदितम्। गीर्भिर्वरुण सीमहि ॥ ३ ॥**

वि। मृळीकाय। ते। मनः। रथीः। अश्वम्। न। सम्ऽदितम्। गीःऽभिः। वरुण। सीमहि ॥३॥

हे [V]वरुण [V]मृळीकाय अस्मत्सुखाय [V]ते तव [V]मनः [V]गीर्भिः स्तुतिभिः [V]वि [V]सीमहि विशेषेण बध्नीमः प्रसादयाम इत्यर्थः। तत्र दृष्टान्तः। [V]रथीः रथस्वामी [V]संदितं सम्यक् खण्डितं दूरगमनेन श्रान्तम् [V]अश्वं [V]न अश्वमिव। यथा स्वामी श्रान्तमश्वं घासप्रदानादिना प्रसादयति तद्वत्॥ रथीः। मत्वर्थीय ईकारः। संदितम्। 'दो अवखण्डने'। 'निष्ठा' इति क्तः। 'द्यतिस्यतिमास्थाम्°' (पा. सू. ७. ४. ४०) इति इकारान्तादेशः। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। गीर्भिः। 'सावेकाचः°' इति भिस उदात्तत्वम्। सीमहि। 'षिवु तन्तुसताने'। व्यत्ययेनात्मनेपदम्। 'बहुलं छन्दसि' इति विकरणस्य लुक्। वलि लोपः (पा. सू. ६. १. ६६)। यद्वा। 'षिञ् बन्धने' इत्यस्मात् विकरणस्य लुक्। दीर्घश्छान्दसः॥

**परा हि मे विमन्यवः पतन्ति वस्यइष्टये। वयो न वसतीरुप ॥ ४ ॥**

परा। हि। मे। विऽमन्यवः। पतन्ति। वस्यःऽइष्टये। वयः। न। वसतीः। उप ॥ ४ ॥

हे वरुण [V]मे मम शुनःशेफस्य [V]विमन्यवः क्रोधरहिता बुद्धयः [V]वस्यइष्टये वसीयसः अतिशयेन वसुमतो जीवनस्य प्राप्तये [V]परा [V]पतन्ति पराङ्मुखाः पुनरावृत्तिरहिताः प्रसरन्ति। हिशब्दः अस्मिन्नर्थे सर्वजनप्रसिद्धिमाह। परापतने दृष्टान्तः। [V]वयो [V]न। पक्षिणो यथा [V]वसतीः निवासस्थानानि [V]उप सामीप्येन प्राप्नुवन्ति तद्वत्॥ पतन्ति। पादादित्वात् निघाताभावः। वस्यइष्टये। वसुमच्छब्दात् 'विन्मतोर्लुक्' इति मतुपो लुकि टिलोपे ईयसुनो यकारलोपश्छान्दसः। वसतीः। 'शतुरनुमः°' इति ङीप उदात्तत्वम्॥

**कदा क्षत्रश्रियं नरमा वरुणं करामहे। मृळीकायोरुचक्षसम् ॥ ५ ॥**

कदा। क्षत्रऽश्रियम्। नरम्। आ। वरुणम्। करामहे। मृळीकाय। उरुऽचक्षसम् ॥ ५ ॥

[V]मृळीकाय अस्मत्सुखाय [V]वरुणं [V]कदा कस्मिन् काले [V]आ [V]करामहे अस्मिन् कर्मणि आगतं करवाम। कीदृशम्। [V]क्षत्रश्रियं बलसेवितं[1] [V]नरं नेतारं [V]उरुचक्षसं बहूनां द्रष्टारम्। क्षत्रश्रियम्। क्षत्राणि श्रयतीति क्षत्रश्रीः। 'क्विब्वचि°' (पा. ३. २. १७८. २) इत्यादिना क्विप् दीर्घश्च। कृदुत्तरपदप्रकृतिस्वरत्वम्। नरम्। 'ऋदोरप्' इति अबन्तः आद्युदात्तः। करामहे। करोतेः व्यत्ययेन शप्। उरुचक्षसम्। 'चक्षेर्बहुलं शिच्च' (उ. सू. ४.६७२) इत्यसुन्। शिद्भावात् ख्याजादेशाभावः॥ ॥१६॥

---

१. ढ–अनुमतम्। २. ढ–बलसेवितम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तदित्समानमाशाते वेनन्ता न प्र युच्छतः । धृतव्रताय दाशुषे ॥ ६ ॥

तत् । इत् । समानम् । आशाते इति । वेनन्ता । न । प्र । युच्छतः । धृतऽव्रताय । दाशुषे ॥६॥

vधृतव्रताय अनुष्ठितकर्मणे vदाशुषे हविर्दत्तवते यजमानाय वेनन्तौ कामयमानौ मित्रावरुणाविति शेषः । तावुभौ vसमानं साधारणं vतदित् अस्माभिर्दत्तं तदेव हविः vआशाते अश्नुवाते । vन vप्र vयुच्छतः कदाचिदपि प्रमादं न कुरुतः ॥ आशाते । अश्नोतेर्लिटि द्विर्भावहलादिशेषौ । ' अत आदेः ' ( पा. सू. ७. ४. ७० ) इति आत्वम् । ' अनित्यमागमशासनम् ' इति वचनात् ' अश्नोतेश्च ' ( पा. सू. ७. ४. ७२ ) इति नुडभावः । वेनन्ता । वेनतिः कान्तिकर्मा । ' सुपां सुलुक्° ' इति आकारः । प्र युच्छतः । ' युच्छ प्रमादे ' । दाशुषे । ' दाशृ दाने ' इत्यस्मात् ' दाश्वान् साह्वान्° ' इति क्वसुप्रत्ययो निपातितः । ' वसोः संप्रसारणम् ' इति संप्रसारणम् । ' शासिवसिघसीनां च ' इति षत्वम् ॥

वेदा यो वीनां पदमन्तरिक्षेण पतताम् । वेद नावः समुद्रियः ॥ ७ ॥

वेद । यः । वीनाम् । पदम् । अन्तरिक्षेण । पतताम् । वेद । नावः । समुद्रियः ॥ ७ ॥

vअन्तरिक्षेण vपतताम् आकाशमार्गेण गच्छतां vवीनां पक्षिणां vपदं vयः वरुणः vवेद । तथा vसमुद्रियः समुद्रेऽवस्थितः वरुणः vनावः जले गच्छन्त्याः पदं vवेद जानाति सोऽस्मान् बन्धनान्मोचयत्विति शेषः ॥ वेद । ' विद ज्ञाने ' । ' विदो लटो वा ' ( पा. सू. ३. ४. ८३ ) इति तिपो णल् । लित्स्वरेणाद्युदात्तत्वम् । ' व्यचोऽतस्तिङः ' इति संहितायां दीर्घः । वीनाम् । ' नामन्यतरस्याम् ' इति नाम उदात्तत्वम् । पतताम् । शपः पित्त्वादनुदात्तत्वम् । शतुश्च लसार्वधातुकस्वरेण धातुस्वरः । नावः । ' सावेकाचः° ' इति षष्ठ्या उदात्तत्वम् । समुद्रियः । भवार्थे ' समुद्राभ्राद्घः ' ( पा. सू. ४. ४. ११८ ) इति घप्रत्ययः ॥

वेद मासो धृतव्रतो द्वादश प्रजावतः । वेदा य उपजायते ॥ ८ ॥

वेद । मासः । धृतऽव्रतः । द्वादश । प्रजाऽवतः । वेद । यः । उपऽजायते ॥ ८ ॥

vधृतव्रतः स्वीकृतकर्मविशेषो यथोक्तमहिमोपेतो वरुणः vप्रजावतः तदा तदोत्पद्यमानप्रजायुक्तान् vद्वादश vमासः चैत्रादीन् फाल्गुनान्तान् vवेद जानाति । vयः त्रयोदशोऽधिकमासः vउपजायते संवत्सरसमीपे स्वयमेवोत्पद्यते तमपि vवेद । वाक्यशेषः पूर्ववत् ॥ मासः । ' पदन्° ' (पा. सू. ६. १. ६३) इत्यादिना मासशब्दस्य मास् इति आदेशः । ' ऊडिदम्° ' इत्यादिना शस उदात्तत्वम् । द्वादश । द्वौ च दश च इति द्वन्द्वः । ' द्व्यष्टनः संख्यायाम्° ' (पा. सू. ६. ३. ४७) इति आत्वम् । ' संख्या ' (पा. सू. ६. २. ३५) इति सूत्रेण पूर्वपदप्रकृतिस्वरत्वम् । प्रजावतः । ' जनी प्रादुर्भावे ' । प्रपूर्वात् जनसनखनक्रमगमो विट्प्रत्ययः ( पा. सू. ३. २. ६७ ) । ' विड्वनोः° ' ( पा. सू. ६. ४. ४१ ) इति आत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् । प्रजा एषां सन्तीति ' तदस्यास्त्यस्मिन्निति मतुप् ' ( पा. सू. ५. २. ९४ ) । ' मादुपधायाः° ' ( पा. सू. ८. २. ९ ) इति मतुपो वत्वम् । उपजायते । जनेः कर्मकर्तरि लट् । कर्मवद्भावात् आत्मनेपदं यक् ( पा. सू. ३. १. ८७ ) । ' जनादीनामुपदेश एवात्वं वक्तव्यम् ' ( पा. सू. ६. १. १९५. ३ ) इति



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वचनात् ' अचः कर्तृयकि ' ( पा. सू. ६. १. १९५ ) इत्याद्युदात्तत्वम् । ' तिङि चोदात्तवति ' ( पा. सू. ८. १. ७१ ) इति उपसर्गस्य निघातः । न च ' तिङ्ङतिङः ' इति निघातः, ' यद्वृत्तान्नित्यम् ' इति प्रतिषेधात् ॥

**वेद॒ वात॑स्य वर्त॒निमु॒रोर्ऋ॒ष्वस्य॑ बृह॒तः । वेदा॒ ये अ॒ध्यास॑ते ॥ ९ ॥**

वेद॑ । वात॑स्य । व॒र्त॒निम् । उ॒रोः । ऋ॒ष्वस्य॑ । बृ॒ह॒तः । वेद॑ । ये । अ॒धि॒ऽआस॑ते ॥ ९ ॥

[v]उरोः विस्तीर्णस्य [v]ऋष्वस्य दर्शनीयस्य [v]बृहतः गुणैरधिकस्य [v]वातस्य वायोः [v]वर्तनिं मार्गं [v]वेद वरुणो जानाति । [v]ये देवाः [v]अध्यासते उपरि तिष्ठन्ति तानपि [v]वेद जानाति ॥ वातस्य । ' असिहसि° ' इत्यादिना तन्प्रत्ययान्तो वातशब्दो नित्त्वादाद्युदात्तः । वर्तनिम् । वर्ततेऽनेनेति । ' वर्तनिः स्तोत्रे ' (पा. सू. ६.१.१६०.ग.) इति स्तोत्रवाचकस्य वर्तनिशब्दस्य अन्तोदात्तत्वसिद्ध्यर्थम् उञ्छादिषु पाठात् अस्य प्रत्ययस्वरेण मध्योदात्तत्वे प्राप्ते व्यत्ययेनान्तोदात्तत्वम् । बृहतः । ' बृहन्महतो-रुपसंख्यानम् ' इति ङस उदात्तत्वम् । अध्यासते । लसार्वधातुकानुदात्तत्वे सति धातुस्वरः ॥

**नि ष॑साद धृ॒तव्र॑तो॒ वरु॑णः प॒स्त्या३॒॑स्वा । साम्रा॑ज्याय सु॒क्रतुः॑ ॥ १० ॥**

नि । स॒सा॒द । धृ॒तऽव्र॑तः । वरु॑णः । प॒स्त्या॑सु । आ । साम्ऽरा॑ज्याय । सु॒ऽक्रतुः॑ ॥ १० ॥

[v]धृतव्रतः पूर्वोक्तः [v]वरुणः [v]पस्त्यासु दैवीषु प्रजासु [v]आ [v]नि [v]ससाद आगत्य निषण्णवान् । किमर्थम् । प्रजा॑नां साम्राज्यसिद्ध्यर्थं [v]सुक्रतुः शोभनकर्मा ॥ नि ससाद । ' सदिरप्रतेः ' ( पा. सू. ८. ३. ६६ ) इति षत्वम् । साम्राज्याय । सम्राजो भावः साम्राज्यम् । ' गुणवचनब्राह्मणादिभ्यः° ' ( पा. सू. ५. १. १२४ ) इति ष्यञ् । ' ञ्नित्यादिर्नित्यम् ' इत्याद्युदात्तत्वम् । सुक्रतुः । ' क्रत्वादयश्च ' इत्युत्तरपदाद्युदात्तत्वम् ॥ ॥ १७ ॥

**अतो॒ विश्वा॒न्यद्भु॒ता चि॑कि॒त्वाँ अ॒भि प॑श्यति । कृ॒तानि॒ या च॒ कर्त्वा॑ ॥ ११ ॥**

अत॑ः । विश्वा॑नि । अद्भु॑ता । चि॒कि॒त्वान् । अ॒भि । प॒श्य॒ति॒ । कृ॒ता॑नि । या । च॒ । कर्त्वा॑ ॥ ११ ॥

[v]अतः अस्मात् वरुणात् [v]विश्वानि [v]अद्भुता सर्वाण्याश्चर्याणि [v]चिकित्वान् प्रज्ञावान् [v]अभि [v]पश्यति सर्वतोऽवलोकयति [v]या [v]कृतानि यान्याश्चर्याणि पूर्वं वरुणेन संपादितानि । चकारात् अन्यानि यान्याश्चर्याणि [v]कर्त्वा इतः परं कर्तव्यानि तानि सर्वाण्यभिपश्यतीति पूर्वत्रान्वयः ॥ अद्भुता । ' शेश्छन्दसि बहुलम् ' ( पा. सू. ६. १. ७० ) इति शेर्लोपः । प्रत्ययलक्षणेन ' नपुंसकस्य झलचः ' ( पा. सू. ७. १. ७२ ) इति नुम् । नलोपः । चिकित्वान् । ' कित ज्ञाने ' । लिटः क्वसुः । अभ्यास-हलादिशेषचुत्वानि । ' वस्वेकाजाद्घसाम् ' इति नियमात् इडभावः । रुत्वानुनासिकावुक्तौ संहितायाम् । पश्यति । ' पाघ्रा° ' इत्यादिना दृशेः पश्यादेशः । कर्त्वा । ' कृत्यार्थे तवैकेन्केन्यत्वनः ' ( पा. सू. ३. ४. १४ ) इति करोतेः त्वन् । नित्त्वादाद्युदात्तत्वम् । पूर्ववत् शेर्लोपः ॥

---

१. ढ–वेदाः । २. ढ–साम्राज्याय । प्रजानां साम्राज्यसिद्ध्यर्थम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

**स नो विश्वाहा सुक्रतुरादित्यः सुपथा करत् । प्र ण आयूंषि तारिषत् ॥ १२ ॥**

सः । नः । विश्वाहा । सुऽक्रतुः । आदित्यः । सुऽपथा । करत् । प्र । नः । आयूंषि । तारिषत् ॥ १२ ॥

[V]सुक्रतुः शोभनप्रज्ञः [V]सः [V]आदित्यः वरुणः [V]विश्वाहा सर्वेष्वहःसु [V]नः अस्मान् [V]सुपथा शोभनमार्गेण सहितान् [V]करत् करोतु । किं च [V]नः अस्माकम् [V]आयूंषि [V]प्र [V]तारिषत् प्रवर्धयतु ॥ सुपथा । 'स्वती पूजायाम्' (पा. म. २. २. १८. ४) इति समासे 'न पूजनात्' (पा. सू. ५. ४. ६९) इति समासान्तप्रतिषेधः । अव्ययपूर्वपदप्रकृतिस्वरे प्राप्ते 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वम्[1] । 'ऋत्वादयश्च' (पा.सू.६.२.११८) इत्येतन्न भवति अबहुव्रीहित्वात्। बहुव्रीहौ हि तद्विधीयते ।'आद्युदात्तं द्यच्छन्दसि' (पा. सू. ६. २. ११९) इत्येतदपि न भवति, पथिन्शब्दस्य अन्तोदात्तत्वात्। करत्। करोतेर्लेटि व्यत्ययेन शप्[2]। शपो लुकि 'लेटोऽडाटौ' इति अडागमः । 'इतश्च लोपः०' इति इकारलोपः । यद्वा । छान्दसे लुङि 'कृमृदरुहिभ्यः०' (पा. सू. ३. १. ५९) इति च्लेः अङ् । 'ऋदृशोऽङि गुणः' (पा. सू. ७. ४. १६) इति गुणः । 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः । प्र णः । 'उपसर्गाद्बहुलम्' (पा. सू. ८. ४. २८) इति नसो णत्वम्। तारिषत् । तारयतेः लेटि अडागमः । 'सिब्बहुलं लेटि' इति सिप् । 'आदेशप्रत्यययोः' इति षत्वम् ॥

**बिभ्रद्द्रापिं हिरण्ययं वरुणो वस्त निर्णिजम् । परि स्पशो नि षेदिरे ॥ १३ ॥**

बिभ्रत् । द्रापिम् । हिरण्ययम् । वरुणः । वस्त । निःऽनिजम् । परि । स्पशः । नि । सेदिरे ॥ १३ ॥

[V]हिरण्ययं सुवर्णमयं [V]द्रापिं कवचं [V]बिभ्रत् धारयन् [V]वरुणः [V]निर्णिजं पुष्टं स्वशरीरं [V]वस्त आच्छादयति । [V]स्पशः हिरण्यस्पर्शिनो रश्मयः [V]परि [V]नि [V]षेदिरे सर्वतो निषण्णाः ॥ बिभ्रत् । बिभर्तेः शतरि 'नाभ्यस्ताच्छतुः' (पा. सू. ७. १. ७८) इति नुमभावः । 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम्। द्रापिम् । 'द्रा कुत्सायां[3] गतौ' । द्रापयति इषून् कुत्सितां गतिं प्रापयतीति द्रापिः कवचम् । 'अर्तिह्री०'(पा. सू. ७. ३. ३६) इत्यादिना पुगागमः । औणादिके इप्रत्यये णिलोपः । हिरण्ययम् । 'ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानि च्छन्दसि' (पा. सू. ६. ४. १७५) इति हिरण्यशब्दात् विकारार्थे विहितस्य मयटो मशब्दलोपो निपातितः । वस्त । 'वस आच्छादने' । लङि अदादित्वात् शपो लुक् । पूर्ववत् अडभावः । निर्णिजम् । 'णिजिर् शौचपोषणयोः' । स्पशः । 'स्पश बाधनस्पर्शनयोः' । 'क्विप् च' इति क्विप् । नि षेदिरे । 'षदॢ विशरणगत्यवसादनेषु' । अस्मात् गत्यर्थात् कर्मणि लिटि एत्वाभ्यासलोपौ । 'सदिरप्रतेः' इति षत्वम् ॥

**न यं दिप्सन्ति दिप्सवो न द्रुह्वाणो जनानाम् । न देवमभिमातयः ॥ १४ ॥**

न । यम् । दिप्सन्ति । दिप्सवः । न । द्रुह्वाणः । जनानाम् । न । देवम् । अभिऽमातयः ॥ १४ ॥

---

१. च-फ–'उत्तरपदाद्युदात्तत्वम्' इत्यस्यानन्तरं 'यद्वा तृतीयाया आलादेशः । अव्ययपूर्वपदप्रकृतिस्वरत्वं लित्स्वरेण बाध्यते' इत्यधिकम्; स–'यद्वा...'प्रकृतिस्वरत्वं निषिध्यते' इत्याधिकम् । २. च-छ-झ-त-न-फ-श-ष-ह–शपो वा । ३. ढ–कुत्सितायाम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]दिप्सवः हिंसितुमिच्छन्तो वैरिणः [v]यं वरुणं [v]न [v]दिप्सन्ति भीताः सन्तो हिंसितुमिच्छां परित्यजन्ति । [v]जनानां प्राणिनां [v]दुह्वाणः द्रोग्धारोऽपि यं वरुणं प्रति [v]न दुह्यन्ति । [v]अभिमातयः पाप्मानः । ' पाप्मा वा अभिमातिः ' ( तै. सं. २. १. ३. ५ ) इति श्रुत्यन्तरात् । [v]देवं तं वरुणं [v]न स्पृशन्ति ॥ दिप्सन्ति । ' दम्भु दम्भे ' । अस्मात् सनि ' सनीवन्तर्ध° ' ( पा. सू. ७. २. ४९ ) इत्यादिना इडभावः । ' हलन्ताच्च ' ( पा. सू. १. २. १० ) इत्यत्र हल्ग्रहणस्य जातिवाचित्वात् सनः कित्त्वात् ' दम्भ इच्च ' ( पा. सू. ७. ४. ५६ ) इति दकारात् परस्य अकारस्य इकारः । ' अनिदिताम्° ' इति नलोपः । भप्भावाभावश्छान्दसः ( पा. सू. ८. २. ३७ ) । ' अत्र लोपोऽभ्यासस्य ' ( पा. सू. ७. ४. ५८ ) इति अभ्यासलोपः । शपः पित्त्वादनुदात्तत्वम् । तिङश्च लसार्वधातुकस्वरेण सनो नित्त्वात् नित्स्वरेणाद्युदात्तत्वम् । यद्वृत्तयोगात् अनिघातः । दिप्सवः । सनन्तात् दम्भेः ' सनाशंसभिक्ष उः ' ( पा. सू. ३. २. १६८ ) इति उप्रत्ययः । प्रत्ययस्वरः । दुह्वाणः । ' दुह जिघांसायाम् ' । ' अन्येभ्योऽपि दृश्यन्ते ' इति क्वनिप् । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तत्वम् ॥

**उत यो मानुषेष्वा यशश्चक्रे असाम्या । अस्माकमुदरेष्वा ॥ १५ ॥**

उत । यः । मानुषेषु । आ । यशः । चक्रे । असामि । आ । अस्माकम् । उदरेषु । आ ॥१५॥

[v]उत अपि च [v]यः वरुणः [v]मानुषेषु [v]यशः अन्नम् [v]आ [v]चक्रे सर्वतः कृतवान् स वरुणः कुर्वन्नपि [v]आ सर्वतः [v]असामि संपूर्णं चक्रे न तु न्यूनं कृतवान् । विशेषतः [v]अस्माकम् [v]उदरेषु [v]आ सर्वतः चक्रे ॥ मानुषेषु । ' मनोर्जाताववन्यतौ पुक् च ' ( पा. सू. ४. १. १६१ ) इति अञ् । ' ञ्नित्यादिर्नित्यम् ' इत्याद्युदात्तत्वम् । चक्रे । प्रत्ययस्वरः । असामि । ' अव्यये नञ्कुनिपातानामिति वक्तव्यम् ' ( पा. सू. ६. २. २. ३ ) इति अव्ययपूर्वपदप्रकृतिस्वरत्वम् । यशः । ' अशेर्युट् च ' ( उ. सू. ४. ६३० ) इति असुन् । उदरेषु । ' उदि इणातेरजलौ पूर्वपदान्त्यलोपश्च ' ( उ. सू. ५. ६९७ ) इति अल् । लित्स्वरः । ' गतिकारकोपपदात्° ' इत्युत्तरपदप्रकृतिस्वरत्वम् ॥ ॥ १८ ॥

**परा मे यन्ति धीतयो गावो न गव्यूतीरनु । इच्छन्तीरुरुचक्षसम् ॥ १६ ॥**

परा । मे । यन्ति । धीतयः । गावः । न । गव्यूतीः । अनु । इच्छन्तीः । उरुऽचक्षसम् ॥१६॥

[v]उरुचक्षसं बहुभिर्द्रष्टव्यं वरुणम् [v]इच्छन्तीः [v]मे [v]धीतयः शुनःशेपस्य बुद्धयः [v]परा [v]यन्ति पराङ्मुखा निवृत्तिरहिता गच्छन्ति । तत्र दृष्टान्तः । [v]गावो [v]न । यथा गावः [v]गव्यूतीरनु गोष्ठानि अनुलक्ष्य गच्छन्ति तद्वत् ॥ गव्यूतीः । गावोऽत्र यूयन्ते इति अधिकरणे क्तिन् । ' गोर्यूतौ छन्दसि ' ( पा. सू. ६. १. ७९. २ ) इति अवादेशः । दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् । यद्वा । यूतिः यवनम् । गवां यवनमत्रेति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । इच्छन्तीः । ' इषु इच्छायाम् ' । लटः शतृ । ' तुदादिभ्यः शः ' । ' इषुगमियमां छः ' ( पा. सू. ७. ३. ७७ ) इति छत्वम् । अदुपदेशात् लसार्वधातुकानुदात्तत्वे विकरणस्वरः शिष्यते ॥

**सं नु वोचावहै पुनर्यतो मे मध्वाभृतम् । होतेव क्षदसे प्रियम् ॥ १७ ॥**

सम् । नु । वोचावहै । पुनः । यतः । मे । मधु । आऽभृतम् । होता ऽइव । क्षदसे । प्रियम् ॥१७॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]यतः यस्मात् कारणात् [v]मे मज्जीवनार्थं मधुरं हविः [v]आभृतं अज्ञःसवाख्ये[1] कर्मणि संपादितं अतः कारणात् [v]होतेव होमकर्तेव त्वमपि [v]प्रियं हविः [v]क्षदसे अश्नासि । [v]पुनः हविःस्वीकारादूर्ध्वं तृप्तस्त्वं जीवन्नहं च [v]नु अवश्यं [v]सं [v]वोचावहै संभूय प्रियवार्तां करवावहै ॥ वोचावहै । लोडर्थे छान्दसे लुङि ब्रुवो वचिः । 'अस्यतिवक्ति°' इति च्लेः अङादेशः । ' वच उम् ' इति उमागमे गुणः । व्यत्ययेन टेः ऐत्वम् । यद्वा । लोट एव लुङादेशः । स्थानिवद्भावात् ऐत्वम् । आभृतम् । 'ह्मग्रहोर्भः°' । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् ॥

**दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि । एता जुषत मे गिरः ॥ १८ ॥**

दर्शम् । नु । विश्वऽदर्शतम् । दर्शम् । रथम् । अधि । क्षमि । एताः । जुषत । मे । गिरः ॥१८॥

[v]विश्वदर्शतं सर्वैर्दर्शनीयम् अस्मदनुग्रहार्थमत्राविर्भूतं वरुणं [v]दर्शं [v]नु अहं दृष्टवान् खलु । [v]क्षमि क्षमायां भूमौ [v]रथं वरुणसंबन्धिनम् [v]अधि [v]दर्शम् आधिक्येन दृष्टवानस्मि । [v]एताः उच्यमानाः [v]मे [v]गिरः मदीयाः स्तुतीः [v]जुषत वरुणः सेवितवान् ॥ दर्शम् । दृशेः ' इरितो वा ' ( पा. सू. ३. १. ५७ ) इति च्लेः अङादेशः । ' ऋदृशोऽङि गुणः ' ( पा. सू. ७. ४. १६ ) इति गुणः । विश्वदर्शतम् । दृशेः ' भृमृदृशि° ' ( उ. सू. ३. ३९० ) इत्यादिना अतच्प्रत्ययान्तो दर्शतशब्दः । मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् ( पा. सू. ६. २. १०६. २ ) । यद्वा । विश्वं दर्शनीयमस्येति बहुव्रीहिः । ' बहुव्रीहौ विश्वं संज्ञायाम् ' इति पूर्वपदान्तोदात्तत्वम् । क्षमि । ' आतो धातोः ' (पा. सू. ६. ४. १४०) इत्यत्र आतः इति योगविभागात् आकारलोपः ॥

वरुणप्रघासेषु ' इमं मे वरुण ' इति वारुणस्य हविषः अनुवाक्या । ' पञ्चम्यां पौर्णमास्याम् ' इति खण्डे सूत्रितम्—' इमं मे वरुण श्रुधि तत्त्वा यामि ब्रह्मणा वन्दमानः ' ( आश्व. श्रौ. २. १७ ) इति ॥

**इमं मे वरुण श्रुधी हवमद्या च मृळय । त्वामवस्युरा चके ॥ १९ ॥**

इमम् । मे । वरुण । श्रुधि । हवम् । अद्य । च । मृळय । त्वाम् । अवस्युः । आ । चके ॥१९॥

हे [v]वरुण [v]मे मदीयम् [v]इमं [v]हवम् आह्वानं [v]श्रुधि शृणु । किं च [v]अद्य अस्मिन् दिने [v]मृळय अस्मान् सुखय । [v]अवस्युः रक्षणेच्छुः अहं [v]त्वां वरुणम् आभिमुख्येन [v]चके शब्दयामि स्तौमीत्यर्थः ॥ श्रुधि । ' श्रु श्रवणे ' । लोटो हिः । ' श्रुशृणुपृकृवृभ्यश्छन्दसि ' इति हेर्धिरादेशः । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । ' अन्येषामपि दृश्यते ' इति संहितायां दीर्घः । अवस्युः । अवस्शब्दात् 'सुप आत्मनः क्यच्' । 'क्याच्छन्दसि' इति उप्रत्ययः । आ चके । ' कै गै शब्दे ' । अस्मात् लिटि ' आदेचः ' ( पा. सू. ६. १. ४५ ) इति आत्वम् । द्विर्भावचुत्वे । ' आतो लोप इटि च ' ( पा. सू. ६. ४. ६४ ) इति आकारलोपः । ' तिङ्ङतिङः ' इति निघातः ॥

**त्वं विश्वस्य मेधिर दिवश्च ग्मश्च राजसि । स यामनि प्रति श्रुधि ॥ २० ॥**

त्वम् । विश्वस्य । मेधिर । दिवः । च । ग्मः । च । राजसि । सः । यामनि । प्रति । श्रुधि ॥२०॥

---

१. ढ–' अज्ञःसवाख्ये ' नास्ति । २. च-छ-फ–हविःस्वाहाकारादूर्ध्वम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]मेधिर मेधाविन् वरुण [v]त्वं [v]दिवश्च द्युलोकस्यापि [v]ग्मश्च भूलोकस्यापि एवमात्मकस्य [v]विश्वस्य सर्वस्य जगतो मध्ये [v]राजसि दीप्यसे । [v]सः तादृशः त्वं [v]यामनि क्षेमप्रापणे अस्मदीये [v]प्रति [v]श्रुधि प्रतिश्रवणम् आज्ञापनं कुरु । रक्षिष्यामि इति प्रत्युत्तरं देहीत्यर्थः ॥ दिवः । ' ऊडिदम्° ' इत्यादिना षष्ठ्या उदात्तत्वम् । ग्मः । ' ग्मा ' ( नि. १. १. २ ) इत्येतत् भूनामसु पठितम् । 'आतो धातोः ' इत्यत्र आतः इति योगविभागात् ' आतो लोपः ' इति प्रतिषेधेऽपि ( ? ) व्यत्ययेन आकारलोपः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । यामनि । ' या प्रापणे ' । ' आतो मनिन्क्वनिब्वनिपश्च ' इति मनिन् । नित्त्वादाद्युदात्तत्वम् । श्रुधि । उक्तम् ॥

उदुत्तमं मुमुग्धि नो वि पाशं मध्यमं चृत । अवाधमानि जीवसे ॥ २१ ॥

उत् । उत्ऽतमम् । मुमुग्धि । नः । वि । पाशम् । मध्यमम् । चृत । अव । अधमानि । जीवसे ॥२१॥

[v]नः अस्माकम् [v]उत्तमं शिरोगतं [v]पाशम् [v]उत् [v]मुमुग्धि उत्कृष्य मोचय । [v]मध्यमम् उदरगतं पाशं [v]वि [v]चृत वियुज्य नाशय । [v]जीवसे जीवितुम् [v]अधमानि मदीयान् पादगतान् पाशान् [v]अव चृत अवकृष्य नाशय ॥ उत्तमम् । उञ्छादिषु पाठादन्तोदात्तत्वम् । मुमुग्धि । ' मुच्लृ मोक्षणे ' । ' बहुलं छन्दसि ' इति विकरणस्य श्लुः । द्विर्भावः । हलादिशेषः । ' हुझल्भ्यो हेर्धिः ' ( पा. सू. ६. ४. १०१ ) इति हेर्धिरादेशः । ' तिङ्ङतिङः ' इति निघातः । चृत । ' चृती हिंसाग्रन्थनयोः ' । लोटो हिः । ' तुदादिभ्यः शः ' । ' अतो हेः ' इति हेर्लुक् । जीवसे । ' जीव प्राणधारणे ' । ' तुमर्थे सेसेन्° ' इति असेप्रत्ययः । प्रत्ययस्वरः ॥ ॥ १९ ॥

' वसिष्व ' इति दशर्चं तृतीयं सूक्तम् । अत्रानुक्रम्यते–' वसिष्व दशाग्नेयं तु ' इति । शुनःशेपः ऋषिः । गायत्री छन्दः । इदमुत्तरं च सूक्तम् आग्नेयम् । प्रातरनुवाके आग्नेये क्रतौ गायत्रे छन्दसि एतदादिसूक्तद्वयमनुवक्तव्यम् । तथा च सूत्रितं–' वसिष्वा हीति सूक्तयोरुत्तमामुद्धरेत् ' ( आश्व. श्रौ. ४. १३ ) इति ॥

वसिष्वा हि मियेध्य वस्त्राण्यूर्जां पते । सेमं नो अध्वरं यज ॥ १ ॥

वसिष्व । हि । मियेध्य । वस्त्राणि । ऊर्जाम् । पते । सः । इमम् । नः । अध्वरम् । यज ॥१॥

वरुणेन अग्निस्तुतौ प्रेरितः शुनःशेपः एतदादिसूक्तद्वयेन अग्निमस्तौत् । तया च आम्नायते–' तं वरुण उवाचाग्निर्वै देवानां मुखं सुहृदयतमस्तं नु स्तुह्यथ त्वोत्स्रक्ष्याम इति सोऽग्निं तुष्टावात उत्तराभिर्द्वाविंशत्या ' ( ऐ. ब्रा. ७.१६ ) इति । हे [v]मियेध्य मेधस्य यज्ञस्य योग्य [v]ऊर्जां [v]पते अन्नानां पालकाग्ने [v]वस्त्राणि आच्छादकानि तेजांसि [v]वसिष्व आच्छादय । प्रज्वलितस्तेजसा भवेत्यर्थः । [v]हि यस्मात् प्रज्वलितः तस्मात् [v]सः तादृशस्त्वं [v]नः अस्मदीयम् [v]इमम् [v]अध्वरं [v]यज निष्पादय ॥ वसिष्व । ' वस आच्छादने ' । लोटि ' थासः से ' । ' सवाभ्यां वामौ ' । ' छन्दस्युभयथा ' इति आर्धधातुकत्वात् ' आर्धधातुकस्येड्वलादेः ' ( पा. सू. ७. २. ३५ ) इति इडागमः । लसार्वधातुकानुदात्तत्वे धातुस्वरः । ' अन्येषामपि दृश्यते ' इति संहितायां दीर्घः । मियेध्य । मकारैकारयोर्मध्ये इयागमश्छान्दसः । ऊर्जां पते । ' सुबामन्त्रिते° ' इति पराङ्गवद्भावात् षष्ठ्यामन्त्रितस्य समुदायस्य आष्टमिको निघातः । सेमम् । ' सोऽचि लोपे चेत्पादपूरणम् ' इति सोर्लोपः ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नि नो होता वरेण्यः सदा यविष्ठ मन्मभिः । अग्ने दिवित्मता वचः ॥ २ ॥

नि । नः । होता । वरेण्यः । सदा । यविष्ठ । मन्मऽभिः । अग्ने । दिवित्मता । वचः ॥ २ ॥

vसदा vयविष्ठ सर्वदा युवतम हे vअग्ने vवरेण्यः वरणीयस्त्वं vनः अस्माकं vहोता होमनिष्पादको भूत्वा vदिवित्मता दीप्तिमता vवचः वचसा स्तूयमानः सन् vनि षीद इति शेषः । कीदृशस्त्वम् । vमन्मभिः ज्ञापकैः तेजोभिर्युक्त इति शेषः ॥ यविष्ठ । युवशब्दात् इष्ठनि ' स्थूलदूर° ' ( पा. सू. ६. ४. १५६ ) इत्यादिना यणादिपरस्य लोपः; पूर्वस्य उकारस्य गुणश्च । अवादेशः । आमन्त्रितनिघातः । मन्मभिः । ' मन ज्ञाने ' । ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । दिवित्मता । ' दिवु क्रीडादौ ' । ' इक्ऽस्तिपौ धातुनिर्देशे ' ( पा. सू. ३. ३. १०८. २ ) इति इक्प्रत्ययः । तेन च धातुवाचिना दिविशब्देन धात्वर्थो दीप्तिर्लक्ष्यते । यद्वा । औणादिको भावे किप्रत्ययः । दिविशब्दात् मतुपि तकारोपजनश्छान्दसः । यद्वा । बाहुलकात् दिवेर्भावे इतक् । मतुपि ' तसौ मत्वर्थे ' इति भत्वात् जश्त्वाभावः । वचः । ' सुपां सुलुक्° ' इति तृतीयैकवचनस्य लुक् ॥

आ हि ष्मा सूनवे पितापिर्यजत्यापये । सखा सख्ये वरेण्यः ॥ ३ ॥

आ । हि । स्म । सूनवे । पिता । आपिः । यजति । आपये । सखा । सख्ये । वरेण्यः ॥ ३ ॥

हे अग्ने vवरेण्यः वरणीयः vपिता पितृस्थानीयः त्वं vसूनवे पुत्रस्थानीयाय मह्यम् अभीष्टं देहीति शेषः । हि ष्म इति निपातद्वयं सर्वथेत्यसुमर्थमाचष्टे । अभीष्टदाने दृष्टान्तद्वयमुच्यते । यथा vआपिः बन्धुः vआपये बन्धवे vआ vयजति vहि vस्म । सर्वथा ददातीति शेषः । vसखा प्रियः vसख्ये प्रियाय अभीष्टं सर्वथा ददाति तथा त्वमपि देहि ॥ स्मा सूनवे । ' निपातस्य च ' इति दीर्घः । यजतीत्यस्य सखा सख्ये इत्यत्राप्यनुषङ्गात् तदपेक्षयेयं प्रथमा इति ' चादिलोपे विभाषा ' इति न निहन्यते । यद्वा । ' हि च ' इति निघातप्रतिषेधः । सख्ये । ' समाने ख्यश्रोदात्तः ' इति सखिशब्दः इण्प्रत्ययान्त आद्युदात्तः । सुपः पित्त्वादनुदात्तत्वे स एव शिष्यते ॥

आ नो बर्ही रिशादसो वरुणो मित्रो अर्यमा । सीदन्तु मनुषो यथा ॥ ४ ॥

आ । नः । बर्हिः । रिशादसः । वरुणः । मित्रः । अर्यमा । सीदन्तु । मनुषः । यथा ॥ ४ ॥

हे अग्ने वरुणादयो देवाः त्वद्बन्धवः त्वया प्रेरिताः vरिशादसः हिंसकानदन्तः vनः अस्मदीयं vबर्हिः यज्ञम् vआ vसीदन्तु । तत्र दृष्टान्तः । vयथा vमनुषः प्रजापतेर्यज्ञमासीदन्ति तद्वत् ॥ बर्ही रिशादसः । विसर्जनीयस्य रुत्वे कृते ' रो रि ' ( पा. सू. ८. ३. १४ ) इति रेफलोपः । ' ढ्रलोपे पूर्वस्य दीर्घोऽणः ' ( पा. सू. ६. ३. १११ ) इति इकारस्य दीर्घत्वम् । रिशादसः । ' रिश हिंसायाम् ' । रिशन्ति हिंसन्तीति रिशाः शत्रवः । ' इगुपधज्ञाप्रीकिरः कः ' । तानदन्तीति रिशादसः । ' सर्वधातुभ्योऽसुन् ' कृदुत्तरपदप्रकृतिस्वरत्वम् । सीदन्तु । ' षदॢ विशरणगत्यवसादनेषु ' । ' पाघ्रा° ' इत्यादिना सीदादेशः । शपः पित्त्वादनुदात्तत्वम् । शतुश्च लसावधातुकस्वरेण धातुस्वरः शिष्यते । मनुषः । ' मन ज्ञाने ' । मन्यते जानातीति मनुः प्रजापतिः । ' जनेरुसिः, निच्च ' इत्यनुवृत्तौ ' बहुल-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मन्यत्रापि ' ( उ. सू. २. २७८ ) इति औणादिकः उसिप्रत्ययः । नित्त्वादाद्युदात्तत्वम् । यथा । ' यथेति पादान्ते ' ( फि. सू. ८५ ) इति सर्वानुदात्तत्वम् ॥

**पूर्व्यं होतरस्य नो मन्दस्व सख्यस्य च । इमा उ षु श्रुधी गिरः ॥ ५ ॥**

पूर्व्य । होतः । अस्य । नः । मन्दस्व । सख्यस्य । च । इमाः । ऊँ इति । सु । श्रुधि । गिरः ॥५॥

हे Vपूर्व्य अस्मदादेः पूर्वमुत्पन्न Vहोतः होमनिष्पादकाग्ने Vनः अस्मदीयस्य Vअस्य प्रवर्तमानस्य यज्ञस्य Vसख्यस्य Vच अस्मदनुग्रहस्य च सिद्ध्यर्थं Vमन्दस्व त्वं हृष्टो भव । Vइमाः अस्माभिः प्रयुज्यमानाः Vगिरः Vउ Vषु स्तुतिरूपा वाचोऽपि Vश्रुधि श्रृणु ॥ पूर्व्य । आमन्त्रिताद्युदात्तत्वम् । होतः इत्यस्य ' नामन्त्रिते समानाधिकरणे ' इति पूर्वस्य विद्यमानत्वात् आष्टमिको निघातः । अस्य । 'ऊडिदम्° ' इति षष्ठ्या उदात्तत्वम् । मन्दस्व । ' मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु ' । शपः पित्त्वादनुदात्तत्वम् । तिङश्च लसार्वधातुकस्वरेण धातुस्वरः । ' °अपादादौ ' इति पर्युदासात् आष्टमिकनिघाताभावः । सख्यस्य । सख्युः कर्म सख्यम् । ' सख्युर्यः ' (पा. सू. ५. १. १२६) इति यप्रत्ययः । ' यस्य° ' इति लोपे प्रत्ययस्वरः । उ षु । ' सुञः ' ( पा. सू. ८. ३. १०७ ) इति षत्वम् । श्रुधि । ' श्रु श्रवणे ' । ' श्रुश्रृणुपृकृवृभ्यश्छन्दसि ' इति हेर्धिरादेशः । ' बहुलं छन्दसि ' इति शपो लुक् ॥ ॥ २० ॥

**यच्चिद्धि शश्वता तना देवंदेवं यजामहे । त्वे इद्धूयते हविः ॥ ६ ॥**

यत् । चित् । हि । शश्वता । तना । देवम्ऽदेवम् । यजामहे । त्वे इति । इत् । हूयते । हविः ॥६॥

हे अग्ने Vयच्चिद्धि यद्यपि Vशश्वता शाश्वतेन नित्येन Vतना विस्तृतेन हविषा Vदेवंदेवम् अन्यमन्यं वरुणेन्द्रादिरूपं नानाविधं देवताविशेषं Vयजामहे तथापि तत् Vहविः सर्वं Vत्वे Vइत् त्वय्येव Vहूयते । अतो देवतान्तरविषयो यागोऽपि त्वदीयैव सेवेत्यर्थः ॥ तना । ' तनु विस्तारे ' । ' क्विप् च ' इति क्विप् । यद्वा । पचाद्यच् । ' सुपां सुलुक्° ' इति तृतीयाया आकारः । देवंदेवम् । ' नित्यवीप्सयोः ' इति द्विर्भावः । ' तस्य परमाम्रेडितम् ' इत्युत्तरस्य आम्रेडितसंज्ञायाम् ' अनुदात्तं च ' इति सर्वानुदात्तत्वम् । यजामहे । ' निपातैर्यद्यदिहन्त° ' इति निघातप्रतिषेधः । त्वे । युष्मच्छब्दात् सप्तम्येकवचनस्य ' सुपां सुलुक्° ' इति शेआदेशः । ' त्वमावेकवचने ' इति मपर्यन्तस्य त्वादेशः । शेषलोपे ' अतो गुणे ' इति परपूर्वत्वम् । ' शे ' ( पा. सू. १. १. १३ ) इति प्रगृह्यसंज्ञायां ' प्लुतप्रगृह्या अचि° ' ( पा. सू. ६. १. १२५ ) इति प्रकृतिभावः । हूयते । ' अकृत्सार्वधातुकयोः° ' ( पा. सू. ७. ४. २५ ) इति दीर्घः ॥

**प्रियो नो अस्तु विश्पतिर्होता मन्द्रो वरेण्यः । प्रियाः स्वग्नयो वयम् ॥ ७ ॥**

प्रियः । नः । अस्तु । विश्पतिः । होता । मन्द्रः । वरेण्यः । प्रियाः । सुऽअग्नयः । वयम् ॥७॥

---

१. च-फ–देवान्तरविषयः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]विश्पतिः विशां प्रजानां पालकः [V]होता होमनिष्पादकः [V]मन्द्रः हृष्टः [V]वरेण्यः वरणीयोऽग्निः [V]नः अस्माकं [V]प्रियः [V]अस्तु । [V]वयम् अपि [V]स्वग्नयः शोभनाग्नियुक्ताः सन्तः तव [V]प्रियाः भूयास्मेति शेषः ॥ विश्पतिः । ' पत्यावैश्वर्ये ' इति पूर्वपदप्रकृतिस्वरे प्राप्ते ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम् । वरेण्यः । ' वृञ एण्यः ' ( उ. सू. ३. ३७८ ) । वृषादित्वादाद्युदात्तत्वम् । स्वग्नयः । बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् ॥

**स्वग्नयो हि वार्यं देवासो दधिरे च नः । स्वग्नयो मनामहे ॥ ८ ॥**

सुऽअग्नयः । हि । वार्यम् । देवासः । दधिरे । च । नः । सुऽअग्नयः । मनामहे ॥ ८ ॥

[V]स्वग्नयः शोभनाग्नियुक्ताः [V]देवासः दीप्यमाना ऋत्विजः [V]नः अस्मदीयं [V]वार्यं वरणीयं हविः [V]हि यस्मात् [V]दधिरे धृतवन्तः तस्माद्वयं [V]स्वग्नयः शोभनाग्नियुक्ताः सन्तः [V]मनामहे त्वां याचामहे ॥ वार्यम् । ' वृञ् वरणे ' । ' वृङ् संभक्तौ ' । ' ऋहलोर्ण्यत् ' । ' ईडवन्द° ' इत्यादिनाद्युदात्तत्वम् । दधिरे । इरेचः चित्त्वादन्तोदात्तत्वम् । ' हि च ' इति निघातप्रतिषेधः । मनामहे । ' मन ज्ञाने ' । व्यत्ययेन शप् ॥

**अथा न उभयेषाममृत मर्त्यानाम् । मिथः सन्तु प्रशस्तयः ॥ ९ ॥**

अथ । नः । उभयेषाम् । अमृत । मर्त्यानाम् । मिथः । सन्तु । प्रऽशस्तयः ॥ ९ ॥

हे अग्ने [V]अमृत मरणरहिताग्ने [V]अथ कर्मानुष्ठानानन्तरं [V]मर्त्यानां मनुष्याणां [V]नः अस्माकम् अस्मत्स्वामिनस्तव च [V]उभयेषां [V]मिथः परस्परं [V]प्रशस्तयः प्रशंसारूपा वाचः [V]सन्तु । सम्यगनुष्ठितमिति यजमानविषया प्रशंसा सम्यगनुगृहीतमित्यग्निविषया ॥ अथ । ' निपातस्य च ' इति संहितायां दीर्घः । अमृत । '°अपादादौ' इति पर्युदासात् षाष्ठिकमाद्युदात्तत्वम् । मर्त्यानाम् । 'मृङ् प्राणत्यागे' । ' असिहसि° ' ( उ. सू. ३. ३६६ ) इत्यादिना तन्प्रत्ययान्तो मर्तशब्दः । तस्मात् ' भवे छन्दसि ' ( पा. सू. ४. ४. ११० ) इति यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । सन्तु । ' श्नसोरल्लोपः ' । प्रशस्तयः । ' तादौ च° ' इति गतेः प्रकृतिस्वरत्वम् ॥

**विश्वेभिरग्ने अग्निभिरिमं यज्ञमिदं वचः । चनो धाः सहसो यहो ॥ १० ॥**

विश्वेभिः । अग्ने । अग्निऽभिः । इमम् । यज्ञम् । इदम् । वचः । चनः । धाः । सहसः । यहो इति ॥ १० ॥

[V]सहसः बलस्य [V]यहो पुत्र हे देवतारूप [V]अग्ने [V]विश्वेभिः [V]अग्निभिः सर्वैराहवनीयादिभिर्युक्तस्त्वम् [V]इमम् अस्मदीयं [V]यज्ञम् [V]इदम् अस्मदीयं [V]वचः स्तोत्रं च सेवमानः [V]चनः अन्नं [V]धाः अस्मभ्यं धेहि ॥ विश्वेभिः । ' बहुलं छन्दसि ' इति भिस ऐसादेशाभावः । चनः । ' चायृ पूजानिशामनयोः ' । ' चायेरन्ने ह्रस्वश्च ' ( उ. सू. ४. ६३९ ) इति असुन्; तत्संनियोगेन नुडागमश्च । नित्त्वादाद्युदात्तत्वम् । धाः । लुङि ' गातिस्था° ' इति सिचो लुक् । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । सहसो यहो इति ' सुबामन्त्रिते° ' इति पराङ्गवद्भावात् ' आमन्त्रितस्य च ' इति षष्ठ्यामन्त्रितसमुदायो निहन्यते ॥ ॥ २१ ॥



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'अश्वं न त्वा' इति त्रयोदशर्चं चतुर्थं सूक्तम्। पूर्ववत् ऋष्यादयः। त्रयोदश्याः 'नमो महद्भ्यः' इत्यस्याः त्रिष्टुप् छन्दः। विश्वेदेवा देवता। तथा चानुक्रान्तम्—'अश्वं सप्तोना गायत्रेऽन्त्या दैवी त्रिष्टुप्' इति ॥ प्रातरनुवाकाश्विनशस्त्रयोः उत्तमावर्जितस्य सूक्तस्य विनियोग उक्तः ॥

**अश्वं न त्वा वारवन्तं वन्दध्या अग्निं नमोभिः। सम्राजन्तमध्वराणाम् ॥ १ ॥**

अश्वम्। न। त्वा। वारऽवन्तम्। वन्दध्यै। अग्निम्। नमःऽभिः। सम्ऽराजन्तम्। अध्वराणाम्॥१॥

[v]अध्वराणां यज्ञानां [v]सम्राजन्तं सम्राट्स्वरूपं स्वामिनम् [v]अग्निं त्वां [v]नमोभिः स्तुतिभिः [v]वन्दध्यै वन्दितुं प्रवृत्ता इति शेषः। अत्र दृष्टान्तः। [v]वारवन्तं वालयुक्तम् [v]अश्वं [v]न अश्वमिव। अश्वो यथा वालैर्बाधकान् मशकमक्षिकादीन् परिहरति तथा त्वमपि ज्वालाभिरस्मद्विरोधिनः परिहरसीत्यर्थः ॥ वारवन्तम्। मतुपः पित्त्वादनुदात्तत्वम्। घञो जित्त्वात् आद्युदात्तो वारशब्दः। 'कर्षात्वतः०' इति अन्तोदात्तत्वं व्यत्ययेन न प्रवर्तते। वन्दध्यै। 'वदि अभिवादनस्तुत्योः'। 'इदितो नुम् धातोः' इति नुम्। 'तुमर्थे सेसेन्०' इति अध्यैप्रत्ययः। प्रत्ययस्वरः। सम्राजन्तम्। शपः पित्त्वादनुदात्तत्वम्। शतुश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। समासे कृदुत्तरपदप्रकृतिस्वरेण स एव। अध्वराणाम्। 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् ॥

**स घा नः सूनुः शवसा पृथुप्रगामा सुशेवः। मीढ्वाँ अस्माकं बभूयात् ॥ २ ॥**

सः। घ। नः। सूनुः। शवसा। पृथुऽप्रगामा। सुऽशेवः। मीढ्वान्। अस्माकम्। बभूयात्॥२॥

[v]सः [v]घ स एवाग्निः [v]नः अस्माकं [v]सुशेवः सुसुखो भवत्विति शेषः। कीदृशः। [v]शवसा बलस्य [v]सूनुः पुत्रः [v]पृथुप्रगामा पृथुप्रगमनः किंच [v]अस्माकं [v]मीढ्वान् कामानां वर्षिता [v]बभूयात् भवतु ॥ घा नः। 'ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्' (पा. सू. ६. ३. १३३) इति दीर्घः। शवसा। 'सुपां सुपो भवन्ति' इति ङसः टादेशः। पृथुप्रगामा। प्रकर्षेण गमनं प्रगामः। 'हलश्च' इति घञ्। पृथुः प्रगामा यस्यासौ पृथुप्रगामा। 'सुपां सुलुक्०' इति पूर्वसवर्ण आकारः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। सुशेवः। 'इण्शीङ्भ्यां वन्' (उ. सू. १. १५०) इति शेवशब्दो वन्प्रत्ययान्त आद्युदात्तः। ततो बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वे प्राप्ते 'आद्युदात्तं द्व्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम्। मीढ्वान्। 'मिह सेचने' इत्यस्मात् क्वसुप्रत्ययान्तो 'दाश्वान् साह्वान् मीढ्वांश्च' इति निपातितः। बभूयात्। भवतेश्छान्दसस्य लिटः 'तिङां तिङो भवन्ति' (पा. म. ७. १. ३९) इति लिङादेशः। यासुट्स्थानिवद्भावात् आर्धधातुकत्वात् शबभावः। द्विर्वचने 'भवतेरः' (पा. सू. ७. ४. ७३) इति अत्वम्। 'तिङ्ङतिङः' इति निघातः ॥

**स नो दूराच्चासाच्च नि मर्त्यादघायोः। पाहि सदमिद्विश्वायुः ॥ ३ ॥**

सः। नः। दूरात्। च। आसात्। च। नि। मर्त्यात्।
अघऽयोः। पाहि। सदम्। इत्। विश्वऽआयुः ॥ ३ ॥

---

१. च-फ-स—वारवन्तम्। वारयति दंशकानिति वारः। पचाद्यच्। कापिलकादित्वात् (स—कपिलकादित्वात्) लत्वविकल्पः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे अग्ने Vविश्वायुः व्याप्तगमनः Vसः त्वं Vदूराच्च दूरेऽपि Vआसाच्च आसन्नदेशेऽपि Vअघायोः अघं पापमनिष्टं कर्तुमिच्छतः Vमर्त्यात् मनुष्यात् वैरिणः Vनः अस्मान् Vसदमित् सर्वदैव Vनि Vपाहि नितरां पालय ॥ अघायोः । ' सुप आत्मनः क्यच् ' । ' अश्वाघस्यात् ' ( पा. सू. ७. ४. ३७ ) इति आत्वम् । पाहि । पादादित्वादनिघातः । विश्वायुः । ' इण् गतौ ' इत्यस्माद्भावे ' एतेर्णिच्च ' ( उ. सू. २. २७५ ) इति उसिः । विश्वमयनं गमनं यस्येति बहुव्रीहिः । ' बहुव्रीहौ विश्वं संज्ञायाम् ' इति पूर्वपदान्तोदात्तत्वम् ॥

**इममू षु त्वमस्माकं सनिं गायत्रं नव्यांसम् । अग्ने देवेषु प्र वोचः ॥ ४ ॥**

इमम् । ऊँ इति । सु । त्वम् । अस्माकम् । सनिम् । गायत्रम् । नव्यांसम् । अग्ने । देवेषु । प्र । वोचः ॥ ४ ॥

हे Vअग्ने Vत्वम् Vअस्माकम् अस्मत्संबन्धिनम् Vइममू Vषु पुरोदेशे अनुष्ठीयमानमपि Vसनिं हविर्दानं Vनव्यांसं नवतरं Vगायत्रं स्तुतिरूपं वचोऽपि Vदेवेषु देवानामग्रे Vप्र Vवोचः प्रब्रूहि ॥ ऊ षु । ' निपातस्य च ' इति संहितायां दीर्घत्वं । ' सुजः ' इति षत्वम् । नव्यांसम् । नवशब्दात् ईयसुनि ईकारलोपश्छान्दसः । ईयसुनो नित्त्वादाद्युदात्तत्वम् । वोचः । ' छन्दसि लुङ्लङ्लिटः ' इति लोडर्थे प्रार्थनायां लुडि ' अस्यतिवक्ति° ' ( पा. सू. ३. १. ५२ ) इति च्लेः अङादेशः । ' वच उम् ' ( पा. सू. ७. ४. २० ) ॥

**आ नो भज परमेष्वा वाजेषु मध्यमेषु । शिक्षा वस्वो अन्तमस्य ॥ ५ ॥**

आ । नः । भज । परमेषु । आ । वाजेषु । मध्यमेषु । शिक्ष । वस्वः । अन्तमस्य ॥ ५ ॥

हे अग्ने Vपरमेषु उत्कृष्टेषु द्युलोकवर्तिषु Vवाजेषु अन्नेषु Vनः अस्मान् Vआ Vभज सर्वतः प्रापय । Vमध्यमेषु अन्तरिक्षलोकवर्तिषु Vवाजेषु Vआ भज । Vअन्तमस्य अन्तिकतमस्य भूलोकस्य संबन्धीनि Vवस्वः वसूनि Vशिक्ष देहि ॥ शिक्ष । ' शिक्ष विद्योपादाने ' । शपः पित्त्वात् धातुस्वरः । ' ह्यचोऽतस्तिङः ' इति संहितायां दीर्घः । अन्तमस्य अन्तिकतमस्य । ' तमे तादेश्च ' (पा.सू. ६.४.१४९. ९) इति तिकशब्दलोपः ॥ ॥ २२ ॥

**विभक्तासि चित्रभानो सिन्धोरूर्मा उपाक आ । सद्यो दाशुषे क्षरसि ॥ ६ ॥**

विऽभक्ता । असि । चित्रभानो इति चित्रऽभानो । सिन्धोः । ऊर्मौ । उपाके । आ । सद्यः । दाशुषे । क्षरसि ॥ ६ ॥

हे Vचित्रभानो विचित्ररश्मियुक्ताग्ने Vविभक्ता विशिष्टस्य धनस्य प्रापयिता Vअसि । तत्र दृष्टान्त उच्यते । आकार उपमार्थः । यथा Vसिन्धोः नद्याः Vउपाके समीपे Vऊर्मौ ऊर्मिं तरङ्गोपलक्षितं कुल्यादिप्रवाहं[1] विभजन्ति तद्वत् । Vदाशुषे हविर्दत्तवते यजमानाय Vसद्यः तदानीमेव Vक्षरसि कर्मफलभूतां

---

१. च-छ-फ-श–कुल्यादिरूपप्रवाहम्; झ-ष–कुल्यादिरूपं प्रवाहम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वृष्टिं करोषि ॥ सिन्धोः । ' स्यन्दू प्रस्रवणे ' । ' स्यन्देः संप्रसारणं धश्च ' ( उ. सू. १. ११ ) इति उप्रत्ययः । ' नित् ' इत्यनुवृत्तेः आद्युदात्तत्वम् । ऊर्मिः । ' अर्तेरूच्च ' (उ. सू. ४. ४८४) इति मिः । प्रत्ययस्वरः । दाशुषे । ' धृतव्रताय दाशुषे ' ( ऋ. सं. १. २५. ६ ) इत्यत्रोक्तम् ॥

**यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः । स यन्ता शश्वतीरिषः ॥ ७ ॥**

यम् । अग्ने । पृत्ऽसु । मर्त्यम् । अवाः । वाजेषु । यम् । जुनाः । सः । यन्ता । शश्वतीः । इषः ॥७॥

हे ᵛअग्ने ᵛपृत्सु संग्रामेषु ᵛयं ᵛमर्त्यं यजमानम् ᵛअवाः अवसि रक्षसि । ᵛयं पुरुषं ᵛवाजेषु संग्रामेषु ᵛजुनाः प्रेरयसि । ᵛसः नरो यजमानः ᵛशश्वतीरिषः नित्यान्यन्नानि ᵛयन्ता नियन्तुं समर्थो भवति ॥ पृत्सु । ' पदादिषु मांस्पृत्स्नूनामुपसंख्यानम् ' ( पा. सू. ६. १. ६३. १ ) इति पृतनाशब्दस्य पृदादेशः । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । अवाः आवः । अकाराकारयोर्विपर्ययः । यद्वा । लेटि आडागमः । ' इतश्च° ' इति सिप इकारस्य लोपः । जुनाः । जू इति गत्यर्थः सौत्रो धातुः । लङः सिप् । ' क्र्यादिभ्यः श्ना ' । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडागमाभावः । यद्वृत्तयोगादनिघातः । यन्ता । तृनो नित्त्वादाद्युदात्तत्वम् । शश्वतीः । ' उगितश्च ' इति ङीप् ॥

**नकिरस्य सहन्त्य पर्येता कयस्य चित् । वाजो अस्ति श्रवाय्यः ॥ ८ ॥**

नकिः । अस्य । सहन्त्य । परिऽएता । कयस्य । चित् । वाजः । अस्ति । श्रवाय्यः ॥८॥

हे ᵛसहन्त्य शत्रूणामभिभवनशीलाग्ने ᵛअस्य स्वद्भक्तस्य यजमानस्य ᵛकयस्य ᵛचित् कस्यापि ᵛपर्येता ᵛनकिः आक्रमिता नास्ति । किंच अस्य यजमानस्य ᵛश्रवाय्यः श्रवणीयः ᵛवाजः ᵛअस्ति बलविशेषोऽस्ति ॥ कयस्य । यकारोपजनश्छान्दसः । श्रवाय्यः । ' श्रुदक्षिस्पृहिगृहिभ्य आय्यः ' ( उ. सू. ३. ३७६ ) इति आय्यप्रत्ययः ॥

**स वाजं विश्वचर्षणिरर्वद्भिरस्तु तरुता । विप्रेभिरस्तु सनिता ॥ ९ ॥**

सः । वाजम् । विश्वऽचर्षणिः । अर्वत्ऽभिः । अस्तु । तरुता । विप्रेभिः । अस्तु । सनिता ॥९॥

ᵛविश्वचर्षणिः सर्वैर्मनुष्यैरुपेतः ᵛसः अग्निः ᵛअर्वद्भिः अश्वैः ᵛवाजं संग्रामं ᵛतरुता तारयिता ᵛअस्तु । ᵛविप्रेभिः मेधाविभिः ऋत्विग्भिः सहितः तुष्टोऽग्निः ᵛसनिता फलस्य दाता ᵛअस्तु ॥ विश्वचर्षणिः । विश्वे चर्षणयो यस्य । ' बहुव्रीहौ विश्वं संज्ञायाम् ' इति पूर्वपदान्तोदात्तत्वम् । अर्वद्भिः । ' ऋ गतौ ' । ' अन्येभ्योऽपि दृश्यन्ते ' इति वनिप् । भिसि ' अर्वणस्त्रसावनञः ' ( पा. सू. ६. ४. १२७ ) इति नकारस्य तृ इत्ययमादेशः । तरुता । ' तॄ प्लवनतरणयोः ' । अस्मात् ' ग्रसितस्कभित° ' ( पा. सू. ७. २. ३४ ) इत्यादौ तृनन्तो निपातितः । निपातनादेव इकारस्य उत्वम् ॥

अग्नेर्याम्ये होतुरतिरिक्तोक्थे ' जराबोध तद्विविड्ढि ' इति स्तोत्रियस्तृचः । ' यस्य पशवो नोपधरेरन् ' इति खण्डे सूत्रितम्—' अतिरिक्तोक्थानि जराबोध तद्विविड्ढि ' ( आश्व. श्रौ. ९. ११ ) इति ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

जरांबोध तद्विविड्ढि विशेविशे यज्ञियाय । स्तोमं रुद्राय दृशीकम् ॥ १० ॥

जरांऽबोध । तत् । विविड्ढि । विशेऽविशे । यज्ञियाय । स्तोमम् । रुद्राय । दृशीकम् ॥१०॥

हे [v]जराबोध जरया स्तुत्या बोधमानाग्ने [v]विशेविशे तत्तद्यजमानरूपप्रजानुग्रहार्थं [v]यज्ञियाय यज्ञसंबन्ध्यनुष्ठानसिद्ध्यर्थं [v]तत् देवयजन [v]विविड्ढि[2] प्रविश । यजमानोऽपि [v]रुद्राय क्रूरायाग्नये तुभ्यं [v]दृशीकं दर्शनीयं समीचीनं [v]स्तोमं स्तोत्रं करोतीति शेषः । अत्र यास्क एवं व्याख्यातवान्—' जरा स्तुतिर्जरतेः स्तुतिकर्मणस्तां बोध तया बोधयितरिति वा तद्विविड्ढि तत्कुरु मनुष्यस्य मनुष्यस्य यजनाय स्तोमं रुद्राय दर्शनीयम् ' ( निरु. १०. ८ ) इति ॥ जराबोध । ' जृष् वयोहानौ ' । अत्र तु स्तुत्यर्थः । ' षिद्भिदादिभ्योऽङ् ' ( पा. सू. ३. ३. १०४ ) इति अङ्प्रत्ययः । ततः टाप् । जरया स्तुत्या बोधो यस्यासौ जराबोधः । यद्वा । जरया बोध्यते इति जराबोधः । कर्मणि घञ् । आमन्त्रिताद्युदात्तत्वम् । विविड्ढि । ' विश प्रवेशने ' । लोटो हि । ' बहुलं छन्दसि ' इति शपः श्लुः । अभ्यासहलादिशेषौ । ' हुझल्भ्यो हेर्धिः ' इति हेर्धिरादेशः । षत्वष्टुत्वे । यद्वा । ' विषॢ व्याप्तौ ' इत्यस्मात् लोण्मध्यमैकवचने अभ्यासस्य गुणाभावः । विशेविशे । ' सावेकाचः° ' इति चतुर्थ्या उदात्तत्वम् । ' अनुदात्तं च ' इति आम्रेडितानुदात्तत्वम् । यज्ञियाय । ' यज्ञर्त्विग्भ्यां घखञौ ' ( पा. सू. ५. १. ७१ ) इति घः । दृशीकम् । ' अनिदृशिभ्यां च ' ( दश. पा. ३ ) इति कीकन्प्रत्ययः । नित्त्वादाद्युदात्तः ॥ ॥ २३ ॥

स नो महाँ अनिमानो धूमकेतुः पुरुश्चन्द्रः । धिये वाजाय हिन्वतु ॥ ११ ॥

सः । नः । महान् । अनिऽमानः । धूमऽकेतुः । पुरुऽचन्द्रः । धिये । वाजाय । हिन्वतु ॥११॥

[v]सः अग्निः [v]नः अस्मान् [v]धिये कर्मणे [v]वाजाय अन्नाय च [v]हिन्वतु प्रीणयतु । कीदृशः । [v]महान् गुणाधिकः [v]अनिमानः निमानवर्जितः अपरिच्छिन्न इत्यर्थः । [v]धूमकेतुः धूमेन ज्ञाप्यमानः [v]पुरुश्चन्द्रः बहुदीप्तिः ॥ महाँ अनि इत्यत्र संहितायां नकारस्य रुत्वानुनासिकावुक्तौ । अनिमानः । न विद्यते निमानोऽस्येति बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । धूमकेतुः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । पुरुश्चन्द्रः । ' चदि आह्लादने दीप्तौ च ' । अस्मात् ' स्फायितञ्चि° ' इत्यादिना कर्तरि रक् । पुरुश्चासौ चन्द्रश्चेति समासान्तोदात्तत्वम् । ' ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे ' ( पा. सू. ६. १. १५१ ) इति सुट् । तस्य श्चुत्वेन शकारः । धिये । ' सावेकाचः° ' इति चतुर्थ्या उदात्तत्वम् । हिन्वतु । हिवि प्रीणनार्थः । ' इदितो नुम् धातोः ' इति नुम् ॥

स रेवाँइव विश्पतिर्दैव्यः केतुः शृणोतु नः । उक्थैरग्निर्बृहद्भानुः ॥ १२ ॥

सः । रेवान्ऽइव । विश्पतिः । दैव्यः । केतुः । शृणोतु । नः । उक्थैः । अग्निः । बृहत्ऽभानुः ॥१२॥

[v]सः [v]अग्निः [v]उक्थैः स्तोत्रैर्युक्तान् [v]नः अस्मान् [v]शृणोतु । तत्र दृष्टान्तः । [v]रेवानिव । यथा लोके धनवान् राजा वन्दिनां स्तोत्रं शृणोति तद्वत् । कीदृशः । [v]विश्पतिः प्रजापालकः [v]दैव्यः देवानां संबन्धी । ' अग्निर्वै देवानां होता ' ( ऐ. ब्रा. ३. १४ ) इति श्रुत्यन्तरात् । [v]केतुः दूतवत् ज्ञापकः ।

---

१. झ-ढ-ध-ह–बोध्यमानाग्ने । २. च-फ–त्वं विविड्ढि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'अग्निर्वै देवानां दूत आसीत्' (तै. सं. २. ५. ८. ५) इति श्रुतेः। ᵛबृहद्भानुः प्रौढरश्मिः॥ स रेवान्। 'एतत्तदोः०' (पा. सू. ६. १. १३२) इति सोर्लोपः। 'रयेर्मतौ बहुलम्' इति संप्रसारणम्। परपूर्वत्वम्। 'आद्गुणः'। 'छन्दसीरः' इति मतुपो वत्वम्। 'आरेशब्दाच्च मतुप उदात्तत्वं वक्तव्यम्' (पा. सू. ६. १. १७६. १) इति मतुप उदात्तत्वम्। विश्पतिः। 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वम्। बृहद्भानुः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्॥

दर्शपूर्णमासयोः स्रुगादापनात् पूर्वभाविनि जपे 'नमो महद्भ्यः' इत्येषा। 'ब्रह्मौदने प्राशित्यमाणे' इति खण्डे 'सूर्यो नो दिवस्पातु नमो महद्भयो नमो अर्भकेभ्यः' (आश्व. श्रौ. १. ४) इति सूत्रितम्॥

**नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः।**
**यजाम देवान्यदि शक्नवाम मा ज्यायसः शंसमा वृक्षि देवाः॥ १३॥**

नमः। महत्ऽभ्यः। नमः। अर्भकेभ्यः। नमः। युवऽभ्यः। नमः। आशिनेभ्यः।
यजाम। देवान्। यदि। शक्नवाम। मा। ज्यायसः। शंसम्। आ। वृक्षि। देवाः॥१३॥

अग्निना प्रेरितः शुनःशेपो विश्वान् देवान् अनया तुष्टाव। तथा च आम्नायते–'तमग्निरुवाच विश्वान्नु देवान् स्तुह्यथ त्वोत्स्रक्ष्याम इति स विश्वान्देवांस्तुष्टाव नमो महद्भयो नमो अर्भकेभ्य इत्येतयर्चा' (ऐ. ब्रा. ७. १६) इति। महान्तो गुणैरधिकाः। अर्भका गुणैर्न्यूनाः। युवानः तरुणाः। आशिनाः वयसा व्याप्ता वृद्धाः। यथोक्तचतुर्विधदेहयुक्तेभ्यो देवेभ्यो नमोऽस्तु। ᵛयदि ᵛशक्नवाम कथंचित् धनादिसंपत्त्या शक्ताश्चेत् तदानीं ᵛदेवान् ᵛयजाम। हे ᵛदेवाः ᵛज्यायसः ज्येष्ठस्य देवताविशेषस्य ᵛआ सर्वतः प्रसृतं ᵛशंसं स्तोत्रं ᵛमा ᵛवृक्षि अहं विच्छिन्नं मा कार्षम्॥ आशिनेभ्यः। 'अशू व्याप्तौ'। 'बहुलमन्यत्रापि' (उ. सू. २. २०७) इति औणादिकः इनच्प्रत्ययः। 'चितः' इत्यन्तोदात्तत्वम्। यजाम। शपः पित्त्वादनुदात्तत्वम्। तिङश्च लसार्वधातुकस्वरेण धातुस्वरः। शक्नवाम। 'शक्लृ शक्तौ'। 'आडुत्तमस्य पिच्च' इति तिङः पिद्भावात् अनुदात्तत्वे सति विकरणस्वरः। 'निपातैर्यद्यदिहन्त०' इति निघातप्रतिषेधः। ज्यायसः। प्रशस्यशब्दात् ईयसुनि 'ज्य च' (पा. सू. ५. ३. ६१) इति ज्यादेशः। 'ज्यादादीयसः' (पा. सू. ६. ४. १६०) इति ईयसुन ईकारस्य आत्वम्। नित्त्वादाद्युदात्तत्वम्। शंसम्। 'हलश्च' इति घञ्। वृक्षि। 'ओव्रश्चू छेदने'। व्यत्ययेन आत्मनेपदोत्तमपुरुषैकवचनम् इट्। च्लेः सिच्। 'स्वरतिसूति०' इत्यादिना इडभावः। 'स्कोः संयोगाद्योः०' इति उपधासकारलोपः। व्रश्चादिना षत्वम्। 'षढोः कः सि' इति कत्वम्। 'आदेशप्रत्यययोः' इति षत्वम्। 'न माङ्योगे' इति अडभावः॥ ॥ २४ ॥

'यत्र ग्रावा' इति पञ्चमं सूक्तं नवर्चम्। आदितः षडनुष्टुभः। 'आयजी' इत्याद्यास्तिस्रो गायत्र्यः। आदितश्चतसृणाम् इन्द्रो देवता। ततो द्वे उलूखलदेवत्ये। तदनन्तरभाविन्यौ उलूखलमुसलोभयदेवताके। अन्त्यायाः 'उच्छिष्टम्' इत्यस्याः हरिश्चन्द्राधिषवणचर्मसोमानामन्यतमो देवता। तथा च बृहद्देवतायामुक्तम्–'चर्माधिषवणीयं वा सोमं वान्त्या प्रशंसति' (बृहद्दे. ३. १०१) इति। तदुक्तमनुक्रमण्याम्–'यत्र ग्रावा नव षळनुष्टुबादि यच्चिद्धयौलूखल्यौ परे मौसल्यौ च प्रजापतेर्हरिश्चन्द्रस्यान्त्या

---

१. ढ–रेवान्। रयेर्मतौ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

चर्मप्रशंसा वा ' इति । आद्याश्चतस्रः अज्ञःसवे होमे विनियुक्ताः । पञ्चम्याद्याश्चतस्रः अभिषवे । अन्त्या द्रोणकलशे सोमावनयने । तथा च ब्राह्मणम्–' अथ हैतं शुनःशेपोऽज्ञःसवं ददर्श तमेताभिश्चतसृभिरभिसुषाव यच्चिद्धि त्वं गृहेगृह इत्यथैनं द्रोणकलशमभ्यवनिनायोच्छिष्टं चम्वोर्भरेत्येतयर्चाथ हास्मिन्नन्वारब्धे पूर्वाभिश्चतसृभिः सस्वाहाकाराभिर्जुहवांचकार ' ( ऐ. ब्रा. ७. १७ ) इति ॥

**यत्र ग्रावा पृथुबुध्न ऊर्ध्वो भवति सोतवे । उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥१॥**

यत्र । ग्रावा । पृथुऽबुध्नः । ऊर्ध्वः । भवति । सोतवे ।

उलूखलऽसुतानाम् । अव । इत् । ऊँ इति । इन्द्र । जल्गुलः ॥ १ ॥

हे [V]इन्द्र [V]यत्र यस्मिन् अज्ञःसवे कर्मणि [V]सोतवे अभिषवार्थं [V]ग्रावा पाषाणः [V]पृथुबुध्नः स्थूलमूलः [V]ऊर्ध्वः उन्नतः [V]भवति तस्मिन् कर्मणि [V]उलूखलसुतानाम् उलूखलेनाभिषुतानां [2]रसम् [V]अवेत् स्वकीयत्वेनावगत्यैव [V]जल्गुलः भक्षय ॥ पृथुबुध्नः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । भवति । ' निपातैर्यद्यदिहन्त° ' इति निघातप्रतिषेधः । सोतवे । ' षुञ् अभिषवे ' । ' तुमर्थे सेसेन्° ' इति तवेन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । उलूखलसुतानाम् उलूखलेन सुतानाम् । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् । जल्गुलः । ' गल अदने ' । अस्मात् यङो लुकि लोण्मध्यमैकवचने लेटोऽडाटौ ' इति अडागमः । ' इतश्च लोपः° ' इति इकारलोपः । उपधाया उत्वं च हलादिशेषाभावश्च [3]पृषोदरादित्वात् ॥

**यत्र द्वाविव जघनाधिषवण्या कृता । उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥ २ ॥**

यत्र । द्वौऽइव । जघना । अधिऽसवन्या । कृता ।

उलूखलऽसुतानाम् । अव । इत् । ऊँ इति । इन्द्र । जल्गुलः ॥ २ ॥

[V]यत्र यस्मिन् कर्मणि [V]अधिषवण्या उभे अधिषवणफलके [V]द्वाविव [V]जघना द्वौ जघनप्रदेशाविव । ' जघनं जङ्घन्यतेः ' ( निरु. ९. २० ) इति यास्कः । [V]कृता विस्तीर्णे कृते संपादिते । अन्यत् पूर्ववत् ॥ जघना । ' हन्तेः शरीरावयवे द्वे च ' ( उ. सू. ५. ७१० ) इति हन्धातोः अच् । द्वित्वम् । कर्दमादित्वात् मध्योदात्तः ( फि. सू. ५९ ) । ' सुपां सुलुक्° ' इति आकारः । अधिषवण्या । ' षुञ् अभिषवे ' । ल्युट् । ' भवे छन्दसि ' इति यत् । ' उपसर्गात्सुनोति° ' इति षत्वम् । ' तिस्वरितम् ' इति स्वरितः । न च ' यतोऽनावः ' इत्याद्युदात्तत्वम् ; तत्र हि ' निष्ठा च द्यजनात् ' (पा. सू. ६. १. २०५ ) इत्यस्य अनुवृत्तेः द्यच्कस्यैव तदिति । कृता । पूर्ववत् आकारः ॥

---

१. ग-छ-ण-फ–यत्र ग्रावा पृथुबुध्न इत्याद्याश्चतस्रः । २. च-ध-फ-ह–सोमानां रसम् । ३. ढ–पृषोदरादित्वात् भवति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यत्र नार्यपच्यवमुपच्यवं च शिक्षते । उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥ ३ ॥

यत्र । नारी । अपऽच्यवम् । उपऽच्यवम् । च । शिक्षते ।

उलूखलऽसुतानाम् । अव । इत् । ऊँ इति । इन्द्र । जल्गुलः ॥ ३ ॥

Vयत्र यस्मिन् कर्मणि Vनारी पत्नी Vअपच्यवं शालायाः निर्गमनम् Vउपच्यवं Vच शालाप्राप्तिं च Vशिक्षते अभ्यासं करोति । अन्यत्पूर्ववत् ॥ अपच्यवम् । ' च्युङ् गतौ ' । ' ऋदोरप् ' इति अप् । गुणावादेशौ । थाथादिना ( पा. सू. ६. २. १४४ ) उत्तरपदान्तोदात्तत्वम् । एवम् उपच्यवम् । शिक्षते । ' शिक्ष विद्योपादाने ' । अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरः । ' निपातैर्यद्यदिहन्त° ' इति निघातप्रतिषेधः ॥

यत्र मन्थां विबध्नते रश्मीन्यमितवाइव

उलूखलसुतानामवेद्विन्द्र जल्गुलः ॥ ४ ॥

यत्र । मन्थाम् । विऽबध्नते । रश्मीन् । यमितवैऽइव ।

उलूखलऽसुतानाम् । अव । इत् । ऊँ इति । इन्द्र । जल्गुलः ॥ ४ ॥

Vयत्र यस्मिन् कर्मणि Vमन्थाम् आशिरमथनहेतुं मन्थानं विबध्नन्ति । तत्र दृष्टान्तः । Vरश्मीन् अश्वबन्धनार्थान् प्रग्रहान् Vयमितवाइव नियन्तुमिव । अन्यत् पूर्ववत् ॥ मन्थाम् । ' पथिमथ्यृभुक्षामात् ' ( पा. सू. ७. १. ८५ ) इति द्वितीयायामपि व्यत्ययेन आत्वम् । प्रातिपदिकस्वरेणान्तोदात्तत्वे प्राप्ते ' पथिमथोः सर्वनामस्थाने ' ( पा. सू. ६. १. १९९ ) इत्याद्युदात्तत्वम् । यद्वा । मथ्यतेऽनयेति मन्था । ' मिथि विलोडने ' इत्यस्मात् ' हलश्च ' इति करणे घञ् । ततः टाप् । ञित्त्वादाद्युदात्तत्वम् । विबध्नते । ' बन्ध बन्धने ' । ' क्र्यादिभ्यः श्ना ' । ' अनिदिताम्° ' इति नलोपे ' श्नाभ्यस्तयोरातः ' इति आकारलोपः । प्रत्ययस्वरः । ' तिङि चोदात्तवति ' इति गतेर्निघातः । यमितवै । ' यम उपरमे ' । ' तुमर्थे सेसेन्° ' इति तवैप्रत्ययः । इडागमश्छान्दसः । यद्वा । ण्यन्तात् तवैप्रत्ययस्य इडागमे सति णिलोपश्छान्दसः । ' अन्तश्च तवै युगपत् ' ( पा. सू. ६. १. २०० ) इत्याद्यन्तयोरुदात्तत्वम् ॥

यच्चिद्धि त्वं गृहेगृह उलूखलक युज्यसे ।

इह द्युमत्तमं वद जयतामिव दुन्दुभिः ॥ ५ ॥

यत् । चित् । हि । त्वम् । गृहेऽगृहे । उलूखलक । युज्यसे ।

इह । द्युमत्ऽतमम् । वद । जयताम्ऽइव । दुन्दुभिः ॥ ५ ॥

---

१. ढ–' अन्यत् पूर्ववत् ' नास्ति । २. च-फ-ह–विबध्नते विबध्नन्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]उलूखलक [v]यच्चिद्धि यद्यपि त्वमवघातार्थं [v]गृहेगृहे [v]युज्यसे तथापि [v]इह वैदिके कर्मणि तीव्रमुसलप्रहारेण [v]द्युमत्तमम् अतिशयेन दीप्तं प्रभूतध्वनियुक्तं शब्दं [v]वद । तत्र दृष्टान्तः । [v]जयतामिव [v]दुन्दुभिः । यथा युद्धे जयं प्राप्नुवतां राज्ञां दुन्दुभिः महान्तं ध्वनिं करोति तद्वत् । उलूखलशब्दं यास्क एवं व्याख्यातवान्–' उलूखलमुरुकरं वोर्ध्वखं वोर्ङ्करं वोरु मे कुर्वित्यब्रवीत्तदुलूखलमभवदुरुकरं वै तत्तदुलूखलमित्याचक्षते परोक्षेणेति च ब्राह्मणम् ' ( निरु. ९. २० ) इति ॥ उलूखलक । ' °अपादादौ ' इति पर्युदासात् आष्टमिकनिघाताभावे पाष्ठिकमाद्युदात्तत्वम् । युज्यसे । अदुपदेशात् लसार्वधातुकानुदात्तत्वे यक्स्वरः शिष्यते । न च ' तिङ्ङतिङः ' इति निघातः । ' निपातैर्यद्यदिहन्त° ' इति प्रतिषेधात् । द्युमत्तमम् । दीव्यतेर्दीप्त्यर्थस्य संपदादिलक्षणः क्विप् । ' दिव उत् ' ( पा. सू. ६. १. १३१ ) इति उत्वम् । यणादेशे ' ह्रस्वनुड्भ्यां मतुप् ' इति मतुप उदात्तत्वम् । ननु ' दिव उत् ' इत्यत्र प्रातिपदिकं गृह्यते न धातुरित्युक्तत्वात् अक्षद्यूः इत्यादाविव अत्रापि ऊठा भवितव्यम् ( पा. सू. ६. ४. १९ ) । एवं तर्हि दीप्तिमत्स्वर्गवाचकेन दिव्प्रातिपदिकेन दीप्तिर्लक्ष्यते इत्युत्वं भविष्यति ॥ ॥ २५ ॥

उत स्म ते वनस्पते वातो वि वात्यग्रमित् ।
अथो इन्द्राय पातवे सुनु सोममुलूखल ॥ ६ ॥

उत । स्म । ते । वनस्पते । वातः । वि । वाति । अग्रम् । इत् ।
अथो इति । इन्द्राय । पातवे । सुनु । सोमम् । उलूखल ॥ ६ ॥

[v]उत अपि च हे [v]वनस्पते उलूखलरूप वृक्ष [v]ते [v]अग्रमित् तव पुरत एव [v]वातो [v]वि [v]वाति [v]स्म । त्वरोपेतमुसलप्रहारैर्वायुर्विशेषेण प्रसरति खलु । [v]अथो अनन्तरं हे [v]उलूखल [v]इन्द्राय इन्द्रोपकारार्थं [v]पातवे पातुं [v]सोमं [v]सुनु सोमाभिषवं कुरु ॥ वनस्पते । पारस्करादित्वात् सुट् । कार्ये कारणशब्दः । पातवे । ' पा पाने ' । ' तुमर्थे सेसेन्° ' इति तवेन्प्रत्ययः । ' ञ्नित्यादिर्नित्यम् ' इत्याद्युदात्तत्वम् । सुनु । ' उतश्च प्रत्ययादसंयोगपूर्वात् ' इति हेर्लुक् । विकरणस्वरेणान्तोदात्तत्वम् । पादादित्वादनिघातः । उलूखल । उर्ध्वं खम् अस्य इति उलूखलः । पृषोदरादिः ॥

आयजी वाजसातमा ता ह्युच्चा विजर्भृतः । हरीइवान्धांसि बप्सता ॥ ७ ॥

आयजी इत्याऽयजी । वाजऽसातमा । ता । हि । उच्चा । विऽजर्भृतः ।
हरी इवेति हरीऽइव । अन्धांसि । बप्सता ॥ ७ ॥

ये उलूखलमुसले [v]आयजी सर्वतो यज्ञसाधने [v]वाजसातमा अतिशयेन अन्नप्रदे [v]ता [v]हि ते खलु [v]उच्चा प्रौढध्वनिर्यथा भवति तथा [v]विजर्भृतः विशेषेण पुनःपुनर्विहारं कुरुतः । तत्र दृष्टान्तः । [v]अन्धांसि अन्नानि चणकादीनि खाद्यानि [v]बप्सता भक्षयन्तौ [v]हरीइव इन्द्रस्याश्वाविव । अत्र यास्क एवं व्याचख्यौ—' आयजी आयष्टव्ये अन्नानां संभक्तृतमे[1] ते ह्युच्चैर्विहियेते हरी इवान्नानि भुञ्जाने ' (निरु. ९. ३६ ) इति ॥ आयजी । यजेः औणादिकः करणे इप्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वम् । वाजसातमा । वाजं सनोतीति वाजसाः । ' षणु दाने ' । ' जनसन° ' इत्यादिना विट्प्रत्ययः । ' विड्नोरनुनासिक-

१. ग-च-छ-झ-ण-त-ध-फ-र-श-ष-ह–संभक्ततमे ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्यात् ' इति आत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् । आतिशायनिकस्तमप् । ' सुपां सुलुक्° ' इति पूर्वसवर्णदीर्घः । विजभृतः । ' हृञ् हरणे ' । अस्मात् यङ्लुकि अभ्यासहल्लादिशेषोरत्जश्चेषु कृतेषु ' रुग्रिकौ च लुकि ' ( पा. सू. ७. ४. ९१ ) इति रुगागमः । ततः प्रत्ययलक्षणेन धातुसंज्ञायां लिटि द्विवचनं तस् । ' अदादिवच्च ' इति वचनात् शपो लुक् । गुणे प्राप्ते ' क्ङिति च ' इति प्रतिषेधः । ' हृग्रहोर्भश्छन्दसि ' इति भत्वम् । प्रत्ययस्वरः । ' हि च ' इति निघातप्रतिषेधः । बप्सता । ' भस भक्षणदीप्त्योः ' । लटः शतृ । ' जुहोत्यादिभ्यः श्लुः ' । ' घसिभसोर्हलि च ' ( पा. सू. ६. ४. १०० ) इति उपधालोपः । ' नाभ्यस्ताच्छतुः ' ( पा. सू. ७. १. ७८ ) इति नुम्प्रतिषेधः । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् ।

**ता नो अद्य वनस्पती ऋष्वावृष्वेभिः सोतृभिः । इन्द्राय मधुमत्सुतम् ॥ ८ ॥**

ता । नः । अद्य । वनस्पती इति । ऋष्वौ । ऋष्वेभिः । सोतृऽभिः । इन्द्राय । मधुऽमत् । सुतम् ॥८॥

[V]अद्य अस्मिन् कर्मणि हे [V]वनस्पती उलूखलमुसलरूपौ तौ युवाम् [V]ऋष्वेभिः दर्शनीयैः [V]सोतृभिः अभिषवहेतुभिः सह [V]ऋष्वौ दर्शनीयौ भूत्वा [V]इन्द्राय इन्द्रार्थं [V]मधुमत् माधुर्योपेतं सोमद्रव्यं [V]नः अस्मदीयं [V]सुतं अभिषुणुतम् ॥ ता । ' सुपां सुलुक्° ' इति आकारः । नो अद्य । ' प्रकृत्यान्तःपादम्° ' इति प्रकृतिभावः । वनस्पती । उभयपदप्रकृतिस्वरे प्राप्ते ' आमन्त्रितस्य° ' इति सर्वानुदात्तत्वम् । ' प्लुतप्रगृह्या अचि° ' ( पा. सू. ६. १. १२५ ) इति प्रकृतिभावः । सुतम् । ' षुञ् अभिषवे ' । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । निघातः ॥

**उच्छिष्टं चम्वोर्भर सोमं पवित्र आ सृज । नि धेहि गोरधि त्वचि ॥ ९ ॥**

उत् । शिष्टम् । चम्वोः । भर । सोमम् । पवित्रे । आ । सृज । नि । धेहि । गोः । अधि । त्वचि ॥९॥

हे ऋत्विग्विशेष हरिश्चन्द्रदेवतापक्षे हे हरिश्चन्द्र इति वा [V]चम्वोः सोमस्य भक्षत्वसंपादकयोः अभिषवणफलकयोः [V]शिष्टम् अभिषवराहित्येन अवशिष्टं सोमम् [V]उत् [V]भर शकटस्योपरि हर । [V]सोमम् अभिषुतं सोमं [V]पवित्रे दशापवित्रे [V]आ [V]सृज आनीय प्रक्षिप। प्रक्षेपे सति अवशिष्टं सोमं [V]गोः [V]त्वचि आनडुहे चर्मणि [V]अधि [V]नि [V]धेहि अध्यारोप्य स्थापय ॥ चम्वोः । ' चमु अदने ' । चम्यते भक्ष्यतेऽत्रेति चमूः । ' कृषिचमि° ' ( उ. सू. १. ८१ ) इत्यादिना औणादिक ऊप्रत्ययः । प्रत्ययस्वरः । सप्तमीद्विवचनस्य ' उदात्तस्वरितयोर्यणः स्वरितः° ' इति स्वरितत्वम् । ' उदात्तयणो हल्पूर्वात् ' इति व्यत्ययेन न भवति । भर । ' हृग्रहोर्भः° ' । धेहि । ' ध्वसोरेद्धावभ्यासलोपश्च ' ( पा. सू. ६. ४. ११९ ) इति एत्वाभ्यासलोपौ । निघातः । त्वचि । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् ॥ ॥ २६ ॥

' यच्चिद्धि सत्य सोमपाः ' इति षष्ठं सूक्तं सप्तर्चं शुनःशेपस्यार्षं पाङ्क्तमैन्द्रम् । अनुक्रमणिका च- ' यच्चिद्धि सप्त पाङ्क्तम् ' इति ॥ पृष्ठ्यषडहस्य पञ्चमेऽहनि माध्यंदिने सवने होत्रकाः ' यच्चिद्धि ' इति सप्तर्चं सूक्तं त्रींस्तृचान्कृत्वा स्वस्वशस्त्रे एकैकं तृचमावपेरन् । ' चतुर्थेऽहनि ' इति खण्डे ' यच्चिद्धि सत्य सोमपा इत्येकैकमेवमेव ' ( आश्व. श्रौ. ७. ११ ) इति सूत्रितम् ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यच्चिद्धि सत्य सोमपा अनाशस्ताइव स्मसि ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ १ ॥

यत् । चित् । हि । सत्य । सोमऽपाः । अनाशस्ताःऽइव । स्मसि ।
आ । तु । नः । इन्द्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ १ ॥

विश्वैर्देवैः प्रेरितः शुनःशेपः एतदादिकाभिः द्वाविंशतिसंख्याकाभिः ऋग्भिः इन्द्रं तुष्टाव । तथा च ब्राह्मणं–' तं विश्वे देवा ऊचुरिन्द्रो वै देवानामोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतमस्तं नु स्तुह्यथ स्वोत्स्रक्ष्याम इति स इन्द्रं तुष्टाव यच्चिद्धि सत्य सोमपा इत्येतेन सूक्तेनोत्तरस्य च पञ्चदशभिः' (ऐ. ब्रा. ७. १६) इति । हे [V]सोमपाः सोमस्य पातः [V]सत्य सत्यवादिन् इन्द्र [V]यच्चिद्धि यद्यपि वयम् [V]अनाशस्ता-इव [V]स्मसि अप्रशस्ता इव भवामः, तथापि हे [V]तुवीमघ बहुधन [V]इन्द्र त्वं [V]गोषु [V]अश्वेषु [V]शुभ्रिषु शोभनेषु [V]सहस्रेषु सहस्रसंख्याकेषु च निमित्तभूतेषु [V]नः अस्मान् [V]आ [V]शंसय सर्वतः प्रशस्तान् कुरु । अस्मद्दोषमनपेक्ष्य गवादीन् प्रयच्छेत्यर्थः ॥ सोमपाः । विजन्तः । आमन्त्रितनिघातः । अनाशस्ताइव । ' शंसु स्तुतौ ' । ' निष्ठा ' इति भावे क्तः । ' यस्य विभाषा ' इति इट्प्रतिषेधः । नञा बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । स्मसि । ' इदन्तो मसि ' । तू नः । ' ऋचि तुनुघ° ' इत्यादिना दीर्घः । गोषु । ' सावेकाचः° ' इति प्राप्तस्य विभक्त्युदात्तत्वस्य ' न गोश्वन्सा-ववर्ण° ' इति प्रतिषेधः । अश्वेषु । अश्नुतेऽध्वानमित्यश्वः । ' अशिप्रुषि° ' इत्यादिना क्वन्प्रत्ययः । नित्त्वादा-द्युदात्तत्वम् । शुभ्रिषु । ' शुभ दीप्तौ ' । ' अदिशदिभूशुभिभ्यः क्रिन् ' ( उ. सू. ४. ५०५ ) इति क्रिन्प्रत्ययः । व्यत्ययेनान्तोदात्तत्वम् ॥

शिप्रिन्वाजानां पते शचीवस्तव दंसना ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ २ ॥

शिप्रिन् । वाजानाम् । पते । शचीऽवः । तव । दंसना ।
आ । तु । नः । इन्द्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ २ ॥

हे [V]शचीवः शक्तिमन् शिप्रिन् शोभनहनूयुक्त [V]वाजानां [V]पते अन्नानां पालक [V]तव दंसना कर्म-विशेषोऽनुग्रहरूपः सर्वदा वर्तते । अन्यत् पूर्ववत् ॥ शिप्रिन् । ' शिप्रे हनू नासिके वा ' (निरु. ६. १७) इति यास्कः । ' अत इनिठनौ ' इति मत्वर्थीय इनिः । आमन्त्रिताद्युदात्तत्वम् । वाजानां पते । ' सुबा-मन्त्रिते° ' इति पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायनिघातः । न च ' आमन्त्रितं पूर्वमविद्यमानवत् ' इति शिप्रिन् इत्यस्य अविद्यमानवत्त्वेन पदादपरत्वात् पादादित्वाच्च न निघातः; ' नामन्त्रिते समाना-धिकरणे सामान्यवचनम् ' इति अविद्यमानवत्त्वप्रतिषेधात् । शचीवः । ' छन्दसीरः ' इति मतुपो वत्वम् । ' मतुवसो रुः° ' इति रुत्वे ' खरवसानयोर्विसर्जनीयः ' ( पा. सू. ८. ३. १५ ) । पादादित्वात् आमन्त्रितनिघाताभावः ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नि ष्वापया मिथूदृशा सस्तामबुध्यमाने ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ३ ॥

नि । स्वापय । मिथुऽदृशा । सस्ताम् । अबुध्यमाने इति ।
आ । तु । नः । इन्द्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ ३ ॥

ᵛमिथूदृशा परस्परं संगतत्वेन दृश्यमाने यमदूत्यौ ᵛनि ᵛष्वापय नितरां सुप्ते कुरु । ते च अस्मान् मारयितुम् ᵛअबुध्यमाने सत्यौ ᵛसस्तां निद्रां प्राप्नुताम् । अन्यत् पूर्ववत् ॥ नि ष्वापय । सुपामादिवात् षत्वम् ( पा. सू. ८. ३. ९८ ) । ' अन्येषामपि दृश्यते ' इति दीर्घः । मिथुनतया युगलरूपेण पश्यतः इति मिथूदृशा । ' क्विप् च ' इति दृशेः कर्तरि क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वम् । पूर्ववत् पूर्वपदस्य दीर्घः । ' सुपां सुलुक्° ' इति विभक्तेः आकारः । सस्ताम् । ' षस स्वप्ने ' । लोटि तसस्ताम् । ' अदिप्रभृतिभ्यः° ' इति शपो लुक् । प्रत्ययस्वरः । पादादित्वात् निघाताभावः । अबुध्यमाने । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

सुसन्तु त्या अरातयो बोधन्तु शूर रातयः ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ४ ॥

सुसन्तु । त्याः । अरातयः । बोधन्तु । शूर । रातयः ।
आ । तु । नः । इन्द्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ ४ ॥

ᵛत्याः अस्माभिरदृश्यमानाः परोक्षास्ताः ᵛअरातयः अदानशीलाः शत्रवः ᵛससन्तु निद्रां कुर्वन्तु । हे ᵛशूर शौर्ययुक्तेन्द्र ᵛरातयः दानशीलाः बन्धवः ᵛबोधन्तु अस्मान् बुध्यन्ताम् । अन्यत् पूर्ववत् ॥ ससन्तु । प्रत्ययस्वरः । अरातयः । ' रा दाने ' । ' मन्त्रे वृष° ' इत्यादिना भावे क्तिन् । न विद्यते रातिः एष्विति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । ' नञ्सुभ्याम् ' इति तु ' सर्वे विधयश्छन्दसि विकल्प्यन्ते ' इति न भवति । यद्वा । ' क्तिच्क्तौ च संज्ञायाम् ' इति कर्तरि क्तिच् । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । बोधन्तु । पादादित्वात् ' तिङ्ङतिङः ' इति निघाताभावः ॥

समिन्द्र गर्दभं मृण नुवन्तं पापयामुया ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ५ ॥

सम् । इन्द्र । गर्दभम् । मृण । नुवन्तम् । पापया । अमुया ।
आ । तु । नः । इन्द्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ ५ ॥

हे ᵛइन्द्र ᵛअमुया अनया अस्माभिः श्रूयमाणया ᵛपापया निन्दारूपया वाचा ᵛनुवन्तं स्तुवन्तम् अपकीर्तिं प्रकटयन्तमित्यर्थः । तादृशं ᵛगर्दभं गर्दभसमानवैरिणं ᵛसं ᵛमृण सम्यक् मारय । यथा गर्दभः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

श्रोतुमशक्यं परुषं शब्दं करोति तथा शत्रुरपि । अन्यत् पूर्ववत् ॥ गर्दभम् । ' नर्द गर्द शब्दे ' । ' कृगृ-शृशलिगर्दिभ्योऽभच् ' ( उ. सू. ३. ४०२ ) । ' चितः ' इत्यन्तोदात्तत्वम् । मृण । ' मृण हिंसायाम् ' । तौदादिकः । शस्य ङित्त्वात् गुणाभावः । नुवन्तम् । ' णु स्तुतौ ' । शतरि अदिप्रभृतित्वात् शपो लुक् । शतुर्ङित्त्वात् गुणाभावे उवङादेशः । प्रत्ययाद्युदात्तत्वम् ॥

पतांति कुण्डृणाच्या दूरं वातो वनादधि ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ६ ॥

पतांति । कुण्डृणाच्या । दूरम् । वातः । वनात् । अधि ।
आ । तु । नः । इन्द्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ ६ ॥

[v]वातः अस्मत्प्रतिकूलो वायुः [v]कुण्डृणाच्या कुटिलगत्या स त्वस्मान्परित्यज्य [v]वनादधि अरण्यादप्यधिकं [v]दूरं देशं [v]पतांति पततु । अन्यत् पूर्ववत् ॥ पतांति । लेटि आडागमः । कुण्डृणाच्या । ' कुडि दाहे ' । अस्मात् ल्युडन्ते कुण्डनशब्दे डकारात् परस्य अकारस्य ऋकारश्छान्दसः । ' ऋवर्णाच्चेति वक्तव्यम् ' इति णत्वम् । तत् अञ्चतीति कुण्डृणाची । ' ऋत्विक्° ' इत्यादिना क्विन् । ' अनिदिताम्° ' इति नलोपे ' अञ्चतेश्चेति वक्तव्यम् ' ( पा. सू. ४. १. ६. २ ) इति ङीप् । ' अचः ' ( पा. सू. ६. ४. १३८ ) इति अकारलोपः । ' चौ ' ( पा. सू. ६. ३. १३८ ) इति पूर्वपदस्य दीर्घत्वम् । ' चौ ' ( पा. सू. ६. १. २२२ ) इति आकारस्योदात्तत्वम् ॥

सर्वं परिक्रोशं जहि जम्भया कृकदाश्वम् ।
आ तू न इन्द्र शंसय गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥ ७ ॥

सर्वम् । परिऽक्रोशम् । जहि । जम्भय । कृकदाश्वम् ।
आ । तु । नः । इन्द्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥ ७ ॥

[v]परिक्रोशम् अस्मद्विषये सर्वतः आक्रोशकर्तारं [v]सर्वं पुरुषं [v]जहि मारय । [v]कृकदाश्वम् अस्मद्विषये हिंसाप्रदं शत्रुं [v]जम्भय मारय । अन्यत् पूर्ववत् ॥ परिक्रोशम् । ' क्रुश आह्वाने ' । परितः क्रोशयतीति परिक्रोशः । पचाद्यच् । कृदुत्तरपदप्रकृतिस्वरत्वम् । जहि । ' हन हिंसागत्योः ' । ' हन्तेर्जः ' ( पा. सू. ६. ४. ३६ ) इति जादेशः । तस्य ' असिद्धवदत्रा भात् ' इति असिद्धत्वात् ' अतो हेः ' इति हेर्लुक् न भवति । जम्भय । ' जभि नाशने ' । चुरादित्वात् स्वार्थिको णिच् । शपः पित्त्वादनुदात्तत्वे णिच एव स्वरः शिष्यते । कृकदाश्वम् । ' कृञ् हिंसायाम् ' । ' कृदाधारार्चिकलिभ्यः कन् ' ( उ. सू. ३. ३२० ) इति भावे कन्प्रत्ययः । ' कित् ' इत्यनुवृत्तेः गुणाभावः । तथा च कृको हिंसा तां दाशति प्रयच्छतीति कृकदाशुः । बहुलग्रहणात् दाशतेरपि कृके उपपदे ' कृके वचः कश्च ' ( उ. सू. १. ६ ) इति उण् । प्रत्ययस्वरेणोदात्तः । द्वितीयायाम् अमिपूर्वत्वे प्राप्ते ' वा छन्दसि ' इति तस्य बाधितत्वात् यणादेशः । ' उदात्तस्वरितयोर्यणः° ' इति विभक्तेः स्वरितत्वम् ॥ ॥ २७ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'आ व इन्द्रम्' इति द्वाविंशत्यृचं सप्तमं सूक्तं शुनःशेपस्यार्षं गायत्रम्। 'अस्माकम्' इत्येषा पादनिचृद्गायत्री। 'त्रयः सप्तकाः पादनिचृत्' (अनु. ४. ४) इति उक्तत्वात्। 'शश्वदिन्द्रः' इत्येषा त्रिष्टुप्। आदितः षोडशर्चं ऐन्द्र्यः। 'आश्विनावश्वावत्या' इत्याद्यास्तिस्र आश्विन्यः। 'कस्त उषः' इत्याद्यास्तिस्र उषोदेवताकाः। तथा च अनुक्रमणिका—'आ वो द्व्यधिकास्माकं पादनिचृच्छश्वत्त्रिष्टुप्परौ तृचावाश्विनोषस्यौ' इति॥

आ व इन्द्रं क्रिविं यथा वाजयन्तः शतक्रतुम्। मंहिष्ठं सिञ्च इन्दुभिः॥ १॥

आ। वः। इन्द्रम्। क्रिविम्। यथा। वाजऽयन्तः। शतऽक्रतुम्।

मंहिष्ठम्। सिञ्चे। इन्दुऽभिः॥ १॥

[v]वाजयन्तः अन्नमिच्छन्तो वयं शुनःशेपाः हे ऋत्विग्यजमानाः [v]वः युष्माकं संबन्धिनमिमम् [v]इन्द्रम् [v]इन्दुभिः सोमैः [v]आ [v]सिञ्चे सर्वतः सिञ्चामहे तर्पयामः। कीदृशम्। [v]शतक्रतुं शतसंख्याककर्मोपेतं [v]मंहिष्ठम् अतिशयेन प्रवृद्धम्। सेचने दृष्टान्तः। [v]यथा येन प्रकारेण [v]क्रिविम् अवटं जलेन पूरयन्ति तद्वत्। क्रिविशब्दः 'वेव्रिः काटुः' इत्यादिषु चतुर्दशसु कूपनामसु 'क्रिविः कूपः सूदः' (नि. ३. २३. ८) इति पठितम्॥ क्रिविम्। 'कृती छेदने'। कृत्यते इति क्रित्विः। 'क्रिविघृष्विच्छविस्थवि०' (उ. सू. ४. ४९६) इत्यादौ क्रिन्प्रत्ययान्तो निपातितः। अत एव तशब्दलोपः। नित्त्वादाद्युदात्तत्वम्। यथा। 'यथेति पादान्ते' इति सर्वानुदात्तत्वम्। वाजयन्तः। वाजमात्मन इच्छन्तः। 'सुप आत्मनः क्यच्'। 'न च्छन्दस्यपुत्रस्य०' इति ईस्वदीर्घत्वयोर्निषेधः, 'अश्वाघस्यात्' इति पुनर्दीर्घविधानात् ज्ञापकात्। मंहिष्ठम्। 'महि वृद्धौ'। अतिशयेन मंहिता मंहिष्ठः। 'तुश्छन्दसि' (पा. सू. ५. ३. ५९) इति तृजन्तात् इष्ठन्प्रत्ययः। 'तुरिष्ठेमेयःसु' (पा. सू. ६. ४. १५४) इति तृलोपः। इष्ठनो नित्त्वादाद्युदात्तत्वम्। सिञ्चे। 'षिचिर् क्षरणे'। व्यत्ययेन एकवचनम्। 'शे मुचादीनाम्' इति नुमागमः॥

शतं वा यः शुचीनां सहस्रं वा समाशिराम्। एदु निम्नं न रीयते॥ २॥

शतम्। वा। यः। शुचीनाम्। सहस्रम्। वा। सम्ऽआशिराम्।

आ। इत्। ऊँ इति। निम्नम्। न। रीयते॥ २॥

[v]यः इन्द्रः [v]शुचीनां शुद्धानां सोमानां [v]शतं [v]वा शतसंख्याकं समूहं वा [v]समाशिरां समीचीनेन आशिराख्येन श्रपणद्रव्येणोपेतानां सोमानां [v]सहस्रं [v]वा सहस्रसंख्याकं समूहं वा [v]एदु [v]रीयते आगच्छत्येव। सोऽस्माननुगृह्णात्विति शेषः। सोमप्राप्तौ दृष्टान्तः। [v]निम्नं [v]न। यथा निम्नप्रदेशम् आपः आप्नुवन्ति तद्वत्॥ समाशिराम्। 'श्रीञ् पाके' इत्यस्य समाङ्पूर्वस्य क्विपि 'अपस्पृधेथाम्०' इत्यादौ आशीरादेशो[२] निपातितः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। रीयते। 'रीङ् श्रवणे'। 'दिवादिभ्यः श्यन्'॥

---

१. ढ—'वव्रिः खातः काटः' इत्यादिषु। २. झ—आशिरादेशः; ढ—शिरादेशः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सं यन्मदाय शुष्मिणं एना ह्यस्योदरे। समुद्रो न व्यचो दधे ॥ ३ ॥

सम्। यत्। मदाय। शुष्मिणे। एना। हि। अस्य। उदरे। समुद्रः। न। व्यचः। दधे ॥ ३ ॥

[v]यत् पूर्वोक्तं शतं सहस्रं वा [v]शुष्मिणे बलवत इन्द्रस्य [v]मदाय मदार्थं संगतं भवति। [v]एना [v]हि अनेनैव शतेन सहस्रेण च [v]अस्य इन्द्रस्य [v]उदरे [v]व्यचः व्याप्तिः [v]दधे धृता भवति। तत्र दृष्टान्तः। [v]समुद्रो [v]न समुद्र इव। यथा समुद्रमध्ये जलं व्याप्तं तद्वत्॥ एना। 'सुपां सुलुक्°' इति तृतीयायाः डादेशः। व्यचः। 'व्यचेः कुटादित्वमनसि' (का. १. २. १. १) इति ङिद्वद्भावस्य प्रतिषिद्धत्वात् 'ग्रहिज्या°' इत्यादिना संप्रसारणं न भवति। असुनो नित्त्वादाद्युदात्तत्वम्। दधे। दधातेः कर्मणि अभ्यासहस्वजश्त्वेषु कृतेषु 'आतो लोप इटि च' इति आकारलोपः। प्रत्ययस्वरेणान्तोदात्तत्वम्। 'हि च' इति प्रतिषेधात् निघाताभावः॥

अयमु ते समतसि कपोतइव गर्भधिम्। वचस्तच्चिन्न ओहसे ॥ ४ ॥

अयम्। ऊँ इति। ते। सम्। अतसि। कपोतःऽइव। गर्भऽधिम्।

वचः। तत्। चित्। नः। ओहसे ॥ ४ ॥

हे इन्द्र [v]अयमु अयमपि दृश्यमानः सोमः [v]ते त्वदर्थं संपादितः। यं सोमं [v]समतसि सम्यक् सातत्येन प्राप्नोषि। तत्र दृष्टान्तः। [v]कपोतइव। यथा कपोताख्यः पक्षी [v]गर्भधिं गर्भधारिणीं कपोतीं प्राप्नोति तद्वत्। [v]तच्चित् तस्मादेव कारणात् [v]नः अस्मदीयं [v]वचः [v]ओहसे प्राप्नोषि॥ अतसि। 'अत सातत्यगमने'। कपोतइव। 'कबेरोतच् पश्च' (उ. सू. १. ६२) इति ओतच्। व्यत्ययेन मध्योदात्तः। गर्भधिम्। गर्भोऽस्यां धीयते इति गर्भधिः। 'कर्मण्यधिकरणे च' (पा. सू. ३. ३. ३९) इति किप्रत्ययः। कृदुत्तरपदप्रकृतिस्वरत्वम्। ओहसे। 'तुहिर् दुहिर् उहिर् अर्दने'। व्यत्ययेन आत्मनेपदम्॥

स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते। विभूतिरस्तु सूनृता ॥ ५ ॥

स्तोत्रम्। राधानाम्। पते। गिर्वाहः। वीर। यस्य। ते। विऽभूतिः। अस्तु। सूनृता ॥ ५ ॥

हे इन्द्र [v]राधानां [v]पते धनानां पालक [v]गिर्वाहः गीर्भिरुह्यमान [v]वीर शौर्योपेत [v]यस्य [v]ते तव [v]स्तोत्रम् ईदृशं भवति तस्य तव [v]विभूतिः लक्ष्मीः [v]सूनृता प्रियसत्यरूपा [v]अस्तु॥ स्तोत्रम्। 'दाम्नीशस°' (पा. सू. ३. २. १८२) इति ष्ट्रन्। पश्चात् अर्शआद्यच्। अथवा स्तोतुरिदमित्यर्थे अण्। 'संज्ञापूर्वको विधिरनित्यः' इति वृद्धिर्न। राधानां पते। राध्नुवन्ति एभिरिति राधानि धनानि। 'सुबामन्त्रिते°' इति पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य निघातः। गिर्वाहः। 'वह प्रापणे'। 'वहिहाधाभ्यश्छन्दसि' इति कास्यकपूर्वस्यापि वहतेः असुन्प्रत्ययः, 'गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं' च इति उक्तत्वात्। 'णित्' इत्यनुवृत्तेः उपधावृद्धिः। पूर्वपदस्य 'वोरुपधायाः°' (पा. सू. ८.

---

१. झ-ढ-तम्। २. श-ष-'सातत्यगमने' इत्यस्यानन्तरं 'लटि सिप्। शप्। तिङ्ङतिङः इति निघातः' इत्यधिकम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

२. ७६ ) इति दीर्घस्याभावश्छान्दसः । पाष्टिकम् आमन्त्रिताद्युदात्तत्वम् । विभूतिः । ' तादौ च निति° ' इति गतेः प्रकृतिस्वरत्वम् ॥ ॥ २८ ॥

ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन्वाजे शतक्रतो । समन्येषु ब्रवावहै ॥ ६ ॥

ऊर्ध्वः । तिष्ठ । नः । ऊतये । अस्मिन् । वाजे । शतक्रतो इति शतऽक्रतो । सम् । अन्येषु । ब्रवावहै ॥ ६ ॥

हे ᵛशतक्रतो शतसंख्याककर्मोपेत ᵛअस्मिन् प्रसक्ते ᵛवाजे संग्रामे ᵛनः अस्माकम् ᵛऊतये रक्षणाय ᵛऊर्ध्वः उन्नतः उत्सुकः ᵛतिष्ठ भव । त्वं च अहं च मिलित्वा ᵛअन्येषु कार्यान्तरेषु ᵛसं ᵛब्रवावहै सम्यक् विचारयावः ॥ तिष्ठ । ' ह्यचोऽतस्तिङः ' इति संहितायां दीर्घः । ऊतये । ' ऊतियूति° ' इत्यादिना क्तिन उदात्तत्वम् । अस्मिन् । ' ऊडिदम्° ' इत्यादिना सप्तम्या उदात्तत्वम् ॥

योगेयोगे तवस्तरं वाजेवाजे हवामहे । सखाय इन्द्रमूतये ॥ ७ ॥

योगेऽयोगे । तवःऽतरम् । वाजेऽवाजे । हवामहे । सखायः । इन्द्रम् । ऊतये ॥ ७ ॥

ᵛयोगेयोगे प्रवेशेप्रवेशे तत्तत्कर्मोपक्रमे ᵛवाजेवाजे कर्मविघातिनि तस्मिंस्तस्मिन् संग्रामे ᵛतवस्तरम् अतिशयेन बलिनम् ᵛइन्द्रमूतये रक्षार्थं ᵛसखायः सखिवत् प्रिया वयं ᵛहवामहे आह्वयामः ॥ योगेयोगे । ' युजिर् योगे ' । ' हलश्च ' इति घञ् । ' चजोः कु घिण्यतोः ' ( पा. सू. ७. ३. ५२ ) इति कुत्वम् । घञो ञित्त्वादाद्युदात्तत्वम् । ' नित्यवीप्सयोः ' इति वीप्सायां द्विर्भावे सति आम्रेडितानुदात्तत्वम् । तवस्तरम् । तवसः शब्दात् ' अस्मायामेधा° ' ( पा. सू. ५. २. १२१ ) इति मत्वर्थीयो विनिः । तस्य च्छान्दसो लोपः ॥

आ घा गमद्यदि श्रवत्सहस्रिणीभिरूतिभिः । वाजेभिरुप नो हवम् ॥ ८ ॥

आ । घ । गमत् । यदि । श्रवत् । सहस्रिणीभिः । ऊतिऽभिः । वाजेभिः । उप । नः । हवम् ॥ ८ ॥

ᵛयदि ᵛश्रवत् यद्ययम् इन्द्रः ᵛनः अस्मदीयं ᵛहवम् आह्वानं शृणुयात् तदानीं स्वयमेव ᵛसहस्रिणीभिरूतिभिः बहुभिः पालनैः ᵛवाजेभिः अन्नैश्च सह ᵛउप समीपे ᵛआ ᵛघ अवश्यम् ᵛआगमत् आगच्छेत् ॥ घ । ' ऋचि तुनुघ° ' इत्यादिना संहितायां दीर्घः । गमत् । ' लिङर्थे लेट् ' । ' लेटोऽडाटौ ' इति अडागमः । ' इतश्च लोपः° ' इति इकारलोपः । यद्वा । छान्दसे लुङि ' पुषादिद्युताद्लृदितः परस्मैपदेषु ' ( पा. सू. ३. १. ५५ ) इति च्लेः अङादेशः । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । श्रवत् । ' श्रु श्रवणे ' । पूर्ववत् लेटि अडागमः । वाजेभिः । ' बहुलं छन्दसि ' इति भिस ऐसादेशाभावः । हवम् । ' भावेऽनुपसर्गस्य ' इति ह्वयतेः अप् संप्रसारणं च । अपः पित्त्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तत्वम् ॥

---

१. झ-स-घा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अनु॑ प्र॒त्नस्यौक॑सो हुवे तु॑विप्र॒तिं नर॑म्। यं ते॒ पूर्वं॑ पि॒ता हु॒वे ॥ ९ ॥

अनु॑। प्र॒त्नस्य॑। ओक॑सः। हु॒वे। तु॒वि॒ऽप्र॒तिम्। नर॑म्। यम्। ते॒। पूर्व॑म्। पि॒ता। हु॒वे ॥९॥

[v]प्रत्नस्य पुरातनस्य [v]ओकसः स्थानस्य स्वर्गरूपस्य सकाशात् [v]तुविप्रतिं बहून् यजमानान् प्रतिगन्तारं [v]नरं पुरुषम् इन्द्रम् [v]अनु [v]हुवे अनुक्रमेण कर्मसु आह्वयामि। [v]यं [v]ते त्वाम् इन्द्रं [v]पिता अस्मदीयो जनकः [v]पूर्वं पुरा स्वकीयानुष्ठानकाले [v]हुवे आहूतवान्। तम् आह्वयामीति पूर्वत्रान्वयः॥ ओकसः। 'नञ्विषयस्य०' इत्याद्युदात्तत्वम्। हुवे। 'ह्वेञ् स्पर्धायां शब्दे च'। इटि 'बहुलं छन्दसि' इति संप्रसारणं परपूर्वत्वम्। गुणे प्राप्ते 'क्ङिति च' इति प्रतिषेधः। उवङादेशः। प्रत्ययस्वरेणान्तोदात्तत्वम्। पादादित्वादनिघातः। तुविप्रतिम्। तुवीनां बहूनां प्रतिगन्तारम्। अत्र प्रतिशब्दो भीमसेनो भीम इतिवत् प्रतिगन्तृशब्दं लक्षयित्वा तद्द्वारा तदर्थं लक्षयति। अतः 'प्रतिः प्रतिनिधिप्रतिदानयोः' (पा. सू. १. ४. ९२) इतिवत् सत्ववचनत्वेन अनिपातत्वात् अनव्ययत्वे 'पूरणगुण०' (पा. सू. २. २. ११) इत्यादिना न षष्ठीसमासनिषेधः। हुवे। ह्वेञो लिटि 'बहुलं छन्दसि' इति पूर्ववत् संप्रसारणपरपूर्वत्वे। 'द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम्' (पा. सू. ६. १. ८. २) इति द्विर्वचनाभावः। यद्वृत्तयोगादनिघातः॥

तं त्वा॑ व॒यं वि॑श्ववारा शास्महे पुरुहूत। सखे॑ वसो जरि॒तृभ्यः॥ १० ॥

तम्। त्वा॒। व॒यम्। वि॒श्व॒ऽवा॒र॒। आ। शा॒स्म॒हे॒। पु॒रु॒ऽहू॒त॒। सखे॑। व॒सो॒ इति॑। ज॒रि॒तृऽभ्यः॥१०॥

हे [v]विश्ववार सर्वैर्वरणीय [v]पुरुहूत बहुभिः स्वस्वकर्मण्याहूत [v]सखे सखिवत् प्रिय [v]वसो निवासहेतो इन्द्र [v]तं पूर्वोक्तगुणयुक्तं त्वां [v]जरितृभ्यः स्तोतृणामनुग्रहार्थम् [v]आ [v]शास्महे प्रार्थयामहे॥ आ शास्महे। 'आङः शासु इच्छायाम्'। 'अदिप्रभृतिभ्यः शपः' इति शपो लुक्। वसो। 'नामन्त्रिते समानाधिकरणे०' इति पूर्वस्य अविद्यमानवत्त्वनिषेधात् पराङ्गवद्भावे सति शेषनिघातेन वा 'आमन्त्रितस्य च' इति वा सर्वानुदात्तत्वम्। जरितृभ्यः। जरतिः स्तुतिकर्मा। तृचश्चित्त्वादन्तोदात्तत्वम्॥ ॥ २९ ॥

अस्माकं॑ शि॒प्रिणी॑नां सोम॒पाः सो॑म॒पाव्ना॑म्। सखे॑ वज्रि॒न्त्सखी॑नाम् ॥ ११ ॥

अस्माक॑म्। शि॒प्रिणी॑नाम्। सोम॑ऽपाः। सो॒म॒ऽपाव्ना॑म्। सखे॑। व॒ज्रि॒न्। सखी॑नाम् ॥ ११ ॥

हे [v]सोमपाः सोमस्य पातः [v]सखे सखिवत् प्रिय [v]वज्रिन् वज्रयुक्तेन्द्र [v]सखीनां सखिवत् प्रियाणां [v]सोमपाव्नां सोमस्य पातृणाम् [v]अस्माकं [v]शिप्रिणीनां दीर्घाभ्यां हनूभ्यां नासिकाभ्यां वा युक्तानां गवां समूहः त्वत्प्रसादादस्त्विति शेषः॥ शिप्रिणीनाम्। 'ऋन्नेभ्यो ङीप्' इति ङीप्। तस्य पित्त्वादनुदात्तत्वे सति प्रत्ययस्वरः शिष्यते। सोमपाः। आमन्त्रितस्य सतिशिष्टत्वात् आमन्त्रिताद्युदात्तत्वम्। सोमपाव्नाम्। 'आतो मनिन्०' इत्यादिना वनिप्। 'अल्लोपोऽनः' (पा. सू. ६. ४. १३४) इति अनः अकारस्य लोपः॥

---

१. ग-च-छ-झ-फ-र—प्रतिगच्छन्तम्।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तथा तदस्तु सोमपाः सखे वज्रिन्तथा कृणु । यथा त उश्मसीष्टये ॥ १२ ॥

तथा । तत् । अस्तु । सोमऽपाः । सखे । वज्रिन् । तथा । कृणु । यथा । ते । उश्मसि । इष्टये ॥१२॥

हे [v]सोमपाः [v]सखे [v]वज्रिन् [v]इष्टये अभिलषितार्थं [v]ते तव अनुग्रहं [v]यथा येन प्रकारेण [v]उश्मसि वयं कामयामहे त्वं [v]तथा कुरु । त्वत्प्रसादात् [v]तत् अभीष्टं [v]तथा [v]अस्तु ॥ कृणु । ' कृवि हिंसाकरणयोश्च ' । इदित्त्वात् नुम् । ' धिन्विकृण्व्योर च ' इति उप्रत्ययः; तत्संनियोगेन वकारस्य च अकारः । ' अतो लोपः ' इति तस्य लोपः । तस्य स्थानिवद्भावात् लघूपधगुणाभावः । ' उतश्च प्रत्ययादसंयोगपूर्वात् ' इति हेर्लुक् । उश्मसि । ' वश कान्तौ ' । ' इदन्तो मसि ' । अदादित्वात् शपो लुक् । ग्रहिज्यादिना संप्रसारणम् । प्रत्ययस्वरः । यद्वृत्तयोगादनिघातः । इष्टये । ' इषु इच्छायाम् ' । क्तिनि ' तितुत्र° ' इत्यादिना इट्प्रतिषेधः । यद्वा । यजतेः क्तिनि ' वचिस्वपि° ' ( पा. सू. ६. १. १५ ) इत्यादिना संप्रसारणम् । व्रश्चादिना षत्वे ष्टुत्वम् । पूर्वस्मिन् पक्षे ' मन्त्रे वृष° ' इति क्तिन उदात्तत्वम् । द्वितीये तु व्यत्ययेन ॥

रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम ॥ १३ ॥

रेवतीः । नः । सधऽमादे । इन्द्रे । सन्तु । तुविऽवाजाः । क्षुऽमन्तः । याभिः । मदेम ॥ १३ ॥

[v]क्षुमन्तः अन्नवन्तो वयं [v]याभिः गोभिः सह [v]मदेम हृष्येम [v]इन्द्र [v]सधमादे अस्माभिः सह हर्षयुक्ते सति [v]नः अस्माकं ता गावः [v]रेवतीः क्षीराज्यादिधनवत्यः [v]तुविवाजाः प्रभूतबलाश्च [v]सन्तु ॥ रेवतीः । रयिशब्दात् मतुपि ' रयेर्मतौ बहुलम् ' इति संप्रसारणं परपूर्वत्वम् । ' छन्दसीरः ' इति मतुपो वत्वम् । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घः । ' आरेशब्दाच्च मतुप उदात्तत्वं वक्तव्यम् ' इति रेशब्दात् उत्तरस्यापि भवतीति पूर्वमेवोक्तम् । सधमादे । ' मद तृप्तियोगे ' । चौरादिकः । सह मादयतीति सधमादः । पचाद्यच् । ' सध मादस्थयोश्छन्दसि ' ( पा. सू. ६. ३. ९६ ) इति सहशब्दस्य सधादेशः । थाथादिना उत्तरपदान्तोदात्तत्वे प्राप्ते ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम् । तुविवाजाः । ' तु ' इति सौत्रो धातुर्वृद्ध्यर्थः । ' अच इः ' इति इः । संज्ञापूर्वकत्वात् गुणो न भवति । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । क्षुमन्तः । ' टुक्षु शब्दे ' । अस्मात् क्विपि तुगभावश्छान्दसः । ' ह्रस्वनुड्भ्यां मतुप् ' इति मतुप उदात्तत्वम् । मदेम । ' मदी हर्षे ' । व्यत्ययेन शप् । अदुपदेशात् लसार्वधातुकानुदात्तत्वे शपः पित्त्वादनुदात्तत्वम् । ततो धातुस्वरः शिष्यते ॥

आ घ त्वावान्त्मनाप्तः स्तोतृभ्यो धृष्णवियानः । ऋणोरक्षं न चक्र्योः ॥१४॥

आ । घ । त्वाऽवान् । त्मना । आप्तः । स्तोतृऽभ्यः । धृष्णो इति । इयानः ।

ऋणोः । अक्षम् । न । चक्र्योः ॥ १४ ॥

---

१. ढ–अस्मदभिलषितार्थम् । २. च-फ–अन्नवन्तः शब्दवन्तः; ढ–नुवन्तः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे Vधृष्णो धार्ष्ट्ययुक्त इन्द्र Vत्वावान् त्वत्सदृशो देवताविशेषः Vत्मनाप्तः त्वदनुग्रहवशात्[1] स्वयमेव आप्तः सन् Vइयानः अस्माभिर्याच्यमानः Vस्तोतृभ्यः स्तोतॄणामनुग्रहाय तदभीष्टमर्थं Vघ अवश्यम् Vआ Vऋणोः आनीय प्रक्षिपतु । तत्र दृष्टान्तः । Vचक्र्योः रथस्य चक्रयोः Vअक्षं Vन । यथा अक्षं प्रक्षिपन्ति तद्वत् ॥ त्वावान् । ' वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम् ' ( पा. सू. ५. २. ३९. १ ) इति वतुप् । ' प्रत्ययोत्तरपदयोश्च ' इति मपर्यन्तस्य त्वादेशः । ' आ सर्वनाम्नः ' ( पा. सू. ६. ३. ९१ ) इति दकारस्य आत्वम् । वतुपः पित्त्वादनुदात्तत्वे प्रातिपदिकस्वरः शिष्यते। त्मना । ' मन्त्रेष्वाङ्यादेरात्मनः ' ( पा. सू. ६. ४. १४१) इति आकारलोपः । धृष्णो । ' जिधृषा प्रागल्भ्ये ' । ' त्रसिगृधिधृषिक्षिपेः क्नुः ' (पा. सू. ३. २. १४०)। आमन्त्रितानुदात्तत्वम्। इयानः। ' ईङ् गतौ ' । ' छन्दसि लिट् ' ( पा. सू. ३. २. १०५ ) । तस्य ' लिटः कानज्वा ' ( पा. सू. ३. २. १०६ ) इति कानजादेशः । ' अचि श्नुधातु° ' ( पा. सू. ६. ४. ७७ ) इत्यादिना इयङादेशः । ' द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम् ' इति वचनात् अभ्यासो न क्रियते । ' चितः ' इत्यन्तोदात्तत्वम् । ऋणोः । ' ऋण गतौ ' । लङि व्यत्ययेन तिपः सिपि ' इतश्च ' ( पा. सू. ३. ४. १०० ) इति इकारलोपः । ' तनादिकृञ्भ्य उः ' ( पा. सू. ३. १. ७९ ) । सार्वधातुकगुणः । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडागमाभावः । विकरणस्वरेणान्तोदात्तत्वम् । अक्षम्। ' अक्षस्यादेवनस्य ' ( फि. सू. ३५ ) इत्याद्युदात्तत्वम् । चक्र्योः । अकारस्य इकारश्छान्दसः ॥

आ यद्दुवः शतक्रत्वा कामं जरितॄणाम् । ऋणोरक्षं न शचीभिः ॥ १५ ॥

आ । यत् । दुवः । शतक्रतो इति शतऽक्रतो । आ । कामम् । जरितॄणाम् ।

ऋणोः । अक्षम् । न । शचीभिः ॥ १५ ॥

हे Vशतक्रतो इन्द्र Vयद्दुवः धनं कामितार्थरूपम् Vआ स्तोतृभिराप्तव्यमस्ति तं Vकामं Vजरितॄणां स्तोतॄणामनुग्रहाय Vआ Vऋणोः आनीय प्रक्षिपसि । तत्र दृष्टान्तः । Vशचीभिः कर्मभिः शकटोचितव्यापारविशेषैः Vअक्षं Vन यथा अक्षं प्रक्षिपन्ति तद्वत् ॥ शचीभिः । शचीशब्दः शार्ङ्गरवादिङीनन्तः ( पा. सू. ४. १. ७३ ) आद्युदात्तः ॥ ॥ ३० ॥

शश्वदिन्द्रः पोप्रुथद्भिर्जिगाय नानदद्भिः शाश्वसद्भिर्धनानि ।
स नो हिरण्यरथं दंसनावान्त्स नः सनिता सनये स नोऽदात् ॥ १६ ॥

शश्वत् । इन्द्रः । पोप्रुथत्ऽभिः । जिगाय । नानदत्ऽभिः । शाश्वसत्ऽभिः । धनानि ।

सः । नः । हिरण्यऽरथम् । दंसनाऽवान् । सः । नः । सनिता । सनये । सः । नः । अदात् ॥ १६ ॥

तुष्टेन इन्द्रेण दत्तं हिरण्यरथम् अनया प्रतिजग्राह । तथा च ब्राह्मणं—' तस्मा इन्द्रः स्तूयमानः प्रीतो मनसा हिरण्यरथं ददौ तमेतया प्रतीयाय शश्वदिन्द्र इति ' ( ऐ. ब्रा. ७. १६ ) इति । Vइन्द्रः Vशश्वत् सर्वदा Vधनानि वैरिसंबन्धीनि Vजिगाय जितवान् अश्वैरिति शेषः । कीदृशैः । Vपोप्रुथद्भिः

---

१. ढ–अस्मदनुग्रहवशात् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

घासभक्षणानन्तरभाविनम् ओष्ठशब्दं कुर्वद्भिः ᵛनानदद्भिः नादम् आस्यगतं हेषाशब्दं कुर्वद्भिः ᵛशाश्वसद्भिः पुनःपुनर्भृशं वा श्वसद्भिः । ᵛदंसनावान् कर्मवान् ᵛसनिता दाता ᵛसः इन्द्रः ᵛनः अस्माकं ᵛसनये संभजनार्थं ᵛहिरण्यरथं सुवर्णेन निर्मितं रथम् ᵛअदात् दत्तवान् । ' स नः स नः ' इति द्विरुक्तिरादरार्थम् ॥ पोप्रुथद्भिः । ' प्रोथृ पर्याप्तौ ' । अस्मात् यङ्लुकि अभ्यासहलादिशेषौ । ' हस्वः ' ( पा. सू. ७. ४. ५९ ) इति ह्रस्वत्वे कृते ' गुणो यङ्लुकोः ' ( पा. सू. ७. ४. ८२ ) इति गुणः । धातोरुपधाया उत्वं छान्दसम् । अस्मात् यङ्लुगन्तात् शतरि ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । जिगाय । ' जि जये ' । लिटो णलि वृद्धिः । ' द्विर्वचनेऽचि ' इति स्थानिवद्भावात् जि इत्यस्य द्विर्वचनम् । ' सन्लिटोर्जेः ' ( पा. सू. ७. ३. ५७ ) इति अभ्यासादुत्तरस्य कुत्वम् । नानदद्भिः । ' णद अव्यक्ते शब्दे ' । पूर्ववत् यङ्लुकि ' दीर्घोऽकितः ' इति अभ्यासस्य दीर्घः । पूर्ववदाद्युदात्तत्वम् । शाश्वसद्भिः । ' श्वस प्राणने ' । अन्यत् सर्वं पूर्ववत् । हिरण्यरथम् । ' समासस्य ' इत्यन्तोदात्तत्वम् । अदात् । ' गातिस्था° ' इति सिचो लुक् । दंसनावान् । दंसशब्दः ' अन्नः दंसः वेषः ' ( नि. २. १. ३ ) इति कर्मनामसु पठितः । दंस एव दंसना । ' तदस्यास्ति° ' इति मतुप् । दश्यते अनेनेति दंसना ॥

प्रातरनुवाके आश्विने क्रतौ गायत्रे छन्दसि ' आश्विनावश्वावत्या ' इति तृचः । ' अथाश्विनः ' इति खण्डे ' अश्विना यज्वरीरिष आश्विनावश्वावत्या ' ( आश्व. श्रौ. ४. १५ ) इति सूत्रितम् ॥

**आश्विनावश्वावत्येषा यातं शवीरया । गोमद्दस्रा हिरण्यवत् ॥ १७ ॥**

**आ । अश्विनौ । अश्वऽवत्या । इषा । यातम् । शवीरया । गोऽमत् । दस्रा । हिरण्यऽवत् ॥१७॥**

इन्द्रेण प्रेरितः शुनःशेपः अश्विनौ तुष्टाव । तथा च ब्राह्मणं–' तमिन्द्र उवाचाश्विनौ नु स्तुह्यथ स्वोत्स्वक्ष्याम इति सोऽश्विनौ तुष्टावात उत्तरेण तृचेन ' ( ऐ. ब्रा. ७. १६ ) इति ॥ हे ᵛअश्विनौ ᵛअश्वावत्या बहुभिरश्वैर्युक्तया ᵛशवीरया प्रेर्यमाणया ᵛइषा अन्नेन सह ᵛआ ᵛयातम् अस्मिन् कर्मणि आगच्छतम् । हे ᵛदस्रा अश्विनौ युवयोः प्रसादात् ᵛगोमत् बहुभिर्गोभिर्युक्तं ᵛहिरण्यवत् बहुना हिरण्येन युक्तम् अस्मदीयं गृहमस्त्विति शेषः ॥ अश्वावत्या । ' मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ ' ( पा. सू. ६. ३. १३१ ) इति दीर्घत्वम् । इषा । ' सावेकाचः° ' इति तृतीयाया उदात्तत्वम् । यातम् । ' या प्रापणे ' । लोटि तसः तम् । अदादित्वात् शपो लुक् । शवीरया । ' शु गतौ ' । कृशृपृकटिपटिशौटिभ्य ईरन् ' ( उ. सू. ४. ४७० ) इति ईरन्प्रत्ययो बहुलवचनात् अस्मादपि भवति । नित्त्वादाद्युदात्तत्वम् ॥

**समानयोजनो हि वां रथो दस्रावमर्त्यः । समुद्रे अश्विनेयते ॥ १८ ॥**

**समानऽयोजनः । हि । वाम् । रथः । दस्रौ । अमर्त्यः । समुद्रे । अश्विना । ईयते ॥ १८ ॥**

हे ᵛदस्रौ अश्विनौ ᵛवां युवयोः संबन्धी ᵛरथः ᵛसमानयोजनः तुल्ययोजनः युवयोर्द्वयोरेकरथारूढत्वात् उभयार्थं सकृदेव युज्यते । युक्तः स रथः ᵛअमर्त्यः विनाशरहितः अप्रतिहतगतिरित्यर्थः । अत एव हे अश्विनौ ᵛहि यस्मात् ᵛसमुद्रे अन्तरिक्षे ᵛईयते गच्छति । अन्तरिक्षनामसु[2] पठितं समुद्रशब्दं यास्क एवं व्याचख्यौ–'समुद्रः कस्मात्समुद्द्रवन्त्यस्मादापः समभिद्रवन्त्येनमापः संमोदन्तेऽस्मिन्भूतानि

---

१. ग-छ-झ-ण-ध-न-र-श-ष-स-ह–प्रेषितः । २. फ-श–' सगरः समुद्रः ' इति अन्तरिक्षनामसु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

समुद्को भवति समुनत्तीति वा ' ( निरु. २. १० ) इति । समानयोजनः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । अमर्त्यः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । ईयते । ' ईङ् गतौ ' । अदुपदेशात् लसार्वधातुकानुदात्तत्वे श्यनो नित्त्वादाद्युदात्तत्वम् । ' हि च ' इति निघातप्रतिषेधः ॥

न्य१घ्न्यस्य मूर्धनि चक्रं रथस्य येमथुः । परि द्यामन्यदीयते ॥ १९ ॥

नि । अघ्न्यस्य । मूर्धनि । चक्रम् । रथस्य । येमथुः । परि । द्याम् । अन्यत् । ईयते ॥१९॥

हे अश्विनौ युवाम् Vअघ्न्यस्य हन्तुं विनाशयितुमशक्यस्य दृढस्य पर्वतस्य Vमूर्धनि उपरि Vचक्रं भवदीयरथसंबन्ध्येकं चक्रं Vनि Vयेमथुः नियमितवन्तौ । Vअन्यत् चक्रं Vपरि[1] Vद्यां द्युलोकस्य परितः Vईयते गच्छति ॥ अघ्न्यस्य । अहननम् अघ्नः । ' घञर्थे कविधानं स्थास्त्रापाव्यधिहनियुध्यर्थम् ' ( पा. सू. ३. ३. ५८. ४ ) इति हन्तेः कप्रत्ययः । अघ्नमर्हति अघ्न्यः । ' छन्दसि च ' ( पा. सू. ५. १. ६७ ) इति यप्रत्ययः । क्रियास्वरेणान्तोदात्तत्वम् । येमथुः । ' यम उपरमे ' । किति लिटि ' अत एकहल्मध्ये° ' ( पा. सू. ६. ४. १२० ) इति एत्वाभ्यासलोपौ ॥

प्रातरनुवाके आश्विनशस्त्रे उपस्थे क्रतौ गायत्रे छन्दसि ' कस्त उषः ' इति तृचः । ' अथोषस्यः ' इति खण्डे ' कस्त उष इति तिस्रः ' ( आश्व. श्रौ. ४. १४ ) इति सूत्रितम् ॥

कस्त उषः कधप्रिये भुजे मर्तो अमर्त्ये । कं नक्षसे विभावरि ॥ २० ॥

कः । ते । उषः । कधऽप्रिये । भुजे । मर्तः । अमर्त्ये । कम् । नक्षसे । विभाऽवरि ॥ २० ॥

अश्विभ्यां प्रेरितः शुनःशेपः उषसं तुष्टाव । तथा च ब्राह्मणं—' तमश्विना ऊचतुरुषसं नु स्तुह्यथ खोत्स्यक्ष्याम इति स उषसं तुष्टावात उत्तरेण तृचेन तस्य ह स्मर्च्यृच्युक्तायां वि पाशो मुमुचे कनीय ऐक्ष्वाकस्योदरं भवत्युत्तमस्यामेवर्च्युक्तायां वि पाशो मुमुचेऽगद ऐक्ष्वाक आस ' ( ऐ. ब्रा. ७. १६ ) इति । हे Vकधप्रिये स्तुतिप्रिये Vअमर्त्ये मरणरहिते Vउषः एतच्छब्दाभिधेये उषःकालाभिमानिनि देवते Vभुजे तव भोगाय Vमर्तः मनुष्यः Vकः विद्यते । हे Vविभावरि विशेषप्रभावयुक्ते उषो देवि Vकं पुरुषं Vनक्षसे प्राप्नोषि तवोचितं भोगं दातुं न कोऽपि मनुष्यः समर्थः । अत एव त्वं कमपि पुरुषं भोगापेक्षया न प्राप्नोषि । ईदृशस्तव महिमेत्यर्थः ॥ ते । ' तेमयावेकवचनस्य ' ( पा. सू. ८. १. २२ ) इति युष्मच्छब्दस्य तेआदेशः सर्वानुदात्तः । कधप्रिये । ' कथ वाक्यप्रबन्धे ' । चुरादिरदन्तः । णौ अतो लोपस्य स्थानिवद्भावात् उपधावृद्ध्यभावः । ' चिन्तिपूजिकथिकुम्बिचर्चश्च ' ( पा. सू. ३. ३. १०५ ) इति अङ्प्रत्ययः । ' णेरनिटि ' इति णिलोपः । ततः टाप् । षष्ठीसमासे ' ङ्यापोः संज्ञाच्छन्दसोर्बहुलम् ' ( पा. सू. ६. ३. ६३ ) इति ह्रस्वत्वम् । थकारस्य धकारश्छान्दसः । आमन्त्रितानुदात्तत्वम् । भुजे । ' भुज पालनाभ्यवहारयोः ' । संपदादिलक्षणः क्विप् । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । मर्तः । ' आसिहस्ति° ' इत्यादिना तन्प्रत्ययान्त आद्युदात्तः । नक्षसे । ' तृक्ष ष्टृक्ष णक्ष गतौ ' । विभावरि । ' भा दीप्तौ ' । विपूर्वात् अस्मात् ' आतो मनिन्क्वनिब्वनिपश्च ' इति वनिप् । ' वनो र च ' ( पा. सू. ४. १. ७ ) इति ङीप्; तत्संनियोगेन नकारस्य रेफादेशः । ' अम्बार्थनद्योर्ह्रस्वः ' ( पा. सू. ७. ३. १०७ ) इति ह्रस्वत्वम् ॥

---

१. ढ–द्यां परि । २. श–भोगकाङ्क्षया ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वयं हि ते अमन्मह्यान्तादा पराकात्। अश्वे न चित्रे अरुषि ॥ २१ ॥

वयम्। हि। ते। अमन्महि। आ। अन्तात्। आ। पराकात्। अश्वे। न। चित्रे। अरुषि ॥२१॥

vअश्वे व्यापनशीले vचित्रे चायनीये vअरुषि आरोचमाने उषःकालाभिमानिनि देवते तव स्वरूपम् vआन्तात् समीपपर्यन्तम् vआ vपराकात् दूरपर्यन्तं vवयं मनुष्याः vन vअमन्महि न बोद्धुं समर्थाः। हिशब्दः प्रसिद्धौ। देवतामहिम्नः पारावारयोरज्ञानमस्मासु प्रसिद्धमित्यर्थः ॥ अमन्महि। 'मन ज्ञाने'। 'बहुलं छन्दसि' इति बहुलवचनात् श्यनो लुक्। 'लुङ्लङ्लृङ्क्ष्वडुदात्तः'। 'हि च' इति निघातप्रतिषेधः। अश्वे। 'अशू व्याप्तौ'। 'अशिमुषि०' इत्यादिना क्वन्प्रत्ययः। आमन्त्रिताद्युदात्तत्वम्॥

त्वं त्येभिरा गहि वाजेभिर्दुहितर्दिवः। अस्मे रयिं नि धारय ॥ २२ ॥

त्वम्। त्येभिः। आ। गहि। वाजेभिः। दुहितः। दिवः। अस्मे इति। रयिम्। नि। धारय ॥२२॥

हे vदिवः vदुहितः द्युदेवतायाः पुत्रि उषो देवि vत्येभिः vवाजेभिः तैरन्नैः सह vत्वम् vआ vगहि अत्रागच्छ। vअस्मे अस्मासु vरयिं धनं vनि vधारय नितरां स्थापय ॥ त्येभिः। 'बहुलं छन्दसि' इति त्यद्शब्दात् भिस ऐसादेशाभावः। गहि। असकृदुक्तम्। दुहितर्दिवः। परस्यापि दिव इत्यस्य दिवः दुहितः इत्यन्वये सति पूर्वत्वात् 'सुबामन्त्रिते०' इति पराङ्गवद्भावेन षष्ठ्यामन्त्रितसमुदायस्य सर्वानुदात्तत्वम्। यद्वा। 'कार्यकालं हि संज्ञापरिभाषम्' (परिभा. ३) इति न्यायेन 'सुबामन्त्रिते०' इत्यस्य 'आमन्त्रिस्य च' इति आष्टमिकेन योगेनैकवाक्यत्वे सति परत्वात् पराङ्गवद्भावे सति सर्वानुदात्तत्वम्। कृतस्वरयोः षष्ठ्यामन्त्रितयोः पश्चात् 'व्यत्ययो बहुलम्' इति व्यत्यस्तप्रयोगः। अस्मे। 'सुपां सुलुक्०' इति सप्तम्याः शेआदेशः ॥ ३१ ॥ ॥ ६ ॥

सप्तमेऽनुवाके पञ्च सूक्तानि। तत्र 'त्वमग्ने प्रथमः' इति प्रथमं सूक्तमष्टादशर्चम्। आङ्गिरसो हिरण्यस्तूप ऋषिः। अष्टमीषोडश्यष्टादश्यः त्रिष्टुभः। शिष्टाः त्रिष्टुबन्तपरिभाषया जगत्यः। अग्निर्देवता। तथा च अनुक्रमणिका—'त्वमग्ने द्यूना हिरण्यस्तूप आग्नेयं त्रिष्टुबन्त्याष्टमीषोळश्यौ च' इति। प्रातरनुवाके आग्नेये क्रतौ आश्विनशस्त्रे च 'त्वमग्ने प्रथमः' इति सूक्तम्। 'अथैतस्या रात्रेः' इति खण्डे 'त्वमग्ने प्रथमो अङ्गिरा ऋषिर्नू चित्सहोजा अमृतो नि तुन्दते' (आश्व. श्रौ. ४. १३) इति सूत्रितम्। अभिप्लवषडहस्य तृतीयेऽहनि आग्निमारुते शस्त्रे इदं सूक्तं जातवेदस्यनिविद्धानीयम्। तथा च 'तृतीयस्य त्र्यर्यमा' इति खण्डे सूत्रितं—'त्वमग्ने प्रथमो अङ्गिरा इत्याग्निमारुतम्' (आश्व. श्रौ. ७. ७) इति। वाजपेये आग्निमारुते एतत्सूक्तं जातवेदस्यं निविद्धानीयं, 'तृतीयेनाभिप्लविकेनोक्तं तृतीयसवनम्' (आश्व. श्रौ. ९. ९) इत्यतिदिष्टत्वात्॥

त्वमग्ने प्रथमो अङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा।
तव व्रते कवयो विद्मनापसोऽजायन्त मरुतो भ्राजदृष्टयः ॥ १ ॥

त्वम्। अग्ने। प्रथमः। अङ्गिराः। ऋषिः। देवः। देवानाम्। अभवः। शिवः। सखा।
तव। व्रते। कवयः। विद्मनाऽअपसः। अजायन्त। मरुतः। भ्राजत्ऽऋष्टयः ॥ १ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे Vअग्ने Vत्वं Vप्रथमः आद्यः आङ्गिरसानामृषीणां सर्वेषां जनकत्वात्। तादृशः अङ्गिरोनामक Vऋषिः Vअभवः। तथा च ब्राह्मणं —' येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन् ' (ऐ. ब्रा. ३. ३४ ) इति। तथा स्वयं Vदेवः भूत्वा Vदेवानाम् अन्येषां Vशिवः शोभनः Vसखा अभवः। Vतव Vव्रते स्वदीये कर्मणि Vकवयः मेधाविनः Vविद्मनापसः ज्ञानेन व्याप्नुवानाः ज्ञातकर्माणो वा Vआजदृष्टयः दीप्यमानायुधाः Vमरुतः मरुत्संज्ञकाः देवाः Vअजायन्त ॥ विद्मनापसः। 'विद ज्ञाने'। विद्मो वेदनम्। बहुलग्रहणात् औणादिको मक्प्रत्ययः। तदस्यास्तीति पामादिलक्षणो नः ( पा. सू. ५. २. १०० )। प्रत्ययस्वरेणान्तोदात्तत्वम्। विद्मनानि अपांसि येषां ते विद्मनापसः। पूर्वपदस्य ' अन्येषामपि दृश्यते ' इति दृशिग्रहणात् अवग्रहसमयेऽपि दीर्घत्वम्। अजायन्त। ' जनी प्रादुर्भावे '। तस्य श्यनि ' ज्ञाजनोर्जा ' ( पा. सू. ७. ३. ७९ ) इति जादेशः। आजदृष्टयः। ' अजृ दीप्तौ ' । व्यत्ययेन शतृ। तस्य लसार्वधातुकानुदात्तत्वे धातुस्वरः। ' ऋषी गतौ ' इत्यस्मात् ' क्तिच्क्तौ च संज्ञायाम् ' इति क्तिजन्त ऋष्टिशब्दः। ततो बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

त्वमग्ने प्रथमो अङ्गिरस्तमः कविर्देवानां परि भूषसि व्रतम्।
विभुर्विश्वस्मै भुवनाय मेधिरो द्विमाता शयुः कतिधा चिदायवे ॥ २ ॥

त्वम्। अग्ने। प्रथमः। अङ्गिरःऽतमः। कविः। देवानाम्। परि। भूषसि। व्रतम्।
विऽभुः। विश्वस्मै। भुवनाय। मेधिरः। द्विऽमाता। शयुः। कतिधा। चित्। आयवे ॥ २ ॥

हे Vअग्ने Vत्वं Vप्रथमः आद्यः Vअङ्गिरस्तमः अतिशयेन अङ्गिराः भूत्वा Vकविः मेधावी सन् Vदेवानाम् अन्येषां Vव्रतं कर्म Vपरि Vभूषसि परितः अलंकरोषि। कीदृशस्त्वम्। Vविश्वस्मै Vभुवनाय समस्तलोकानुग्रहार्थं Vविभुः बहुविधः। आहवनीयाद्यनेकरूपधारीत्यर्थः। Vमेधिरः मेधावान् Vद्विमाता द्वयोः अरण्योः उत्पन्नः। यद्वा। द्वयोर्लोकयोः निर्माता। Vआयवे मनुष्यार्थं Vकतिधा Vचित् कतिभिः प्रकारैः सर्वत्र Vशयुः शयानः। तत्तन्मनुष्यगृहेऽवस्थितस्य तव प्रकारा इयन्त इति न केनापि ज्ञायते इत्यर्थः ॥ भूषसि। ' भूष अलंकारे '। भौवादिकः। विभुः। ' विप्रसंभ्यो डुसंज्ञायाम् ' ( पा. सू. ३. २. १८० ) इति विपूर्वात् भवतेः डुप्रत्ययः। कृदुत्तरपदप्रकृतिस्वरत्वम्। भुवनाय। ' भूदृसूभ्रस्जिभ्यश्छन्दसि ' ( उ. सू. २. २३८ ) इति क्युन्। योः अनादेशे नित्स्वरेणाद्युदात्तत्वम्। मेधिरः। ' मेधृ संगमे च '। अस्माद्बाहुलक इरन्प्रत्ययः। नित्स्वरः। द्विमाता। द्वे मातरौ यस्यासौ द्विमाता। ' नद्यृतश्च ' ( पा. सू. ५. ४. १५३ ) इति कप्प्रत्ययो न भवति, मातृमातृकयोः भेदेनोपादानात्[1] ' नद्यृतश्च ' इति कबपि विभाष्यते इति तस्य मातृशब्दविषये पाक्षिकत्वोक्तेः। त्रिचक्रादित्वात् उत्तरपदान्तोदात्तत्वम्। यद्वा। द्वयोर्माता द्विमाता। ' समासस्य ' इत्यन्तोदात्तत्वम्। शयुः। ' शीङ् स्वप्ने '। ' भृमृशी° ' ( उ. सू. १. ७ ) इत्यादिना उप्रत्ययः। कतिधा। डत्यन्तस्य किंशब्दस्य ' बहुगणवतुडति संख्या ' ( पा. सू. १. १. २३ ) इति संख्यासंज्ञायां ' संख्याया विधार्थे धा ' ( पा. सू. ५. ३. ४२ ) इति धाप्रत्ययः। आयवे। ' छन्दसीणः ' ( उ. सू. १. २ ) इति एतेः उण्प्रत्ययः ॥

---

१. झ—पाक्षिकत्वोक्तेः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्वमग्ने प्रथमो मातरिश्वन आविर्भव सुक्रतूया विवस्वते ।
अरेजेतां रोदसी होतृवूर्येऽसघ्नोर्भारमयजो महो वसो ॥ ३ ॥

त्वम् । अग्ने । प्रथमः । मातरिश्वने । आविः । भव । सुक्रतुऽया । विवस्वते ।
अरेजेताम् । रोदसी इति । होतृऽवूर्ये । असघ्नोः । भारम् । अयजः । महः । वसो इति ॥३॥

हे [V]अग्ने [V]त्वं [V]मातरिश्वने [V]प्रथमः मुख्यो भूत्वा वर्तसे । 'अग्निर्वायुरादित्यः' (निरु. ७.७) इति वाय्वपेक्षया सर्वत्र मुख्यत्वावगमात् । तादृशस्त्वं [V]सुक्रतूया शोभनकर्मेच्छया [V]विवस्वते परिचरते यजमानाय [V]आविर्भव प्रकटो भव । तव सामर्थ्यं दृष्ट्वा [V]रोदसी द्यावापृथिव्यौ [V]अरेजेताम् अकम्पेताम् । 'भ्यसते रेजत इति भयवेपनयोः' ( निरु. ३. २१ ) इति यास्कः । [V]होतृवूर्ये होतृवरणयुक्ते कर्मणि [V]भारं भरणम् [V]असघ्नोः ऊढवानसि । हे [V]वसो निवासहेतो वह्ने [V]महः पूज्यान् देवान् [V]अयजः इष्टवानसि ॥ मातरिश्वने । निर्माणहेतुत्वात् माता अन्तरिक्षम् । तत्र श्वसिति प्राणितीति मातरिश्वा वायुः । 'श्वन्नुक्षन्०' ( उ. सू. १. १५७ ) इत्यादौ मातरिश्वन्शब्दः कन्प्रत्ययान्तो निपातितः । सुक्रतूया । सुक्रतुमात्मन इच्छति । 'सुप आत्मनः क्यच्' । 'अकृत्सार्वधातुकयोः०' ( पा. सू. ७. ४. २५ ) इति दीर्घः । क्यजन्तस्य धातुसंज्ञायाम् 'अ प्रत्ययात्' ( पा. सू. ३. ३. १०२ ) इति भावे अकारप्रत्ययः । ततः टाप् । 'सुपां सुलुक्०' इति तृतीयैकवचनस्य डादेशः । टिलोपे उदात्तनिवृत्तिस्वरेण तस्य उदात्तत्वम् । संहितायाम् 'अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घः । विवस्वते । विवासतिः परिचरणकर्मा । अस्मात् संपदादिलक्षणः क्विप् । व्यत्ययेन उपधाह्रस्वत्वम् । 'तदस्यास्ति०' इति मतुप् । 'मादुपधायाः०' इति मतोः वत्वम् । 'तसौ मत्वर्थे' इति भत्वेन पदत्वाभावात् रुत्वाभावः । मतुपः पित्त्वादनुदात्तत्वम् । धातुस्वरः शिष्यते । रोदसी । 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम् । होतृवूर्ये । होत्रा व्रियते इति होतृवूर्यो यज्ञः । 'वज् वरणे' । बहुलग्रहणात् औणादिकः क्यप् । 'उदोष्ठ्यपूर्वस्य' इति उत्वम् । 'हलि च' इति दीर्घः । यद्वा । 'वृञ् वरणे' इत्यस्मात् एतिस्तुशास्वित्यादिना ( पा. सू. ३. १. १०९ ) क्यप् । 'अनित्यमागमशासनम्' इति तुगभावः । 'अकृत्सार्वधातुकयोः०' इति दीर्घत्वे पूर्ववत् उत्वदीर्घौ । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । असघ्नोः । 'षघ हिंसायाम्' । अत्र तु वहनार्थः । 'स्वादिभ्यः श्नुः' । पादादित्वादनिघातः । अयजः । भारम् इत्यस्य पूर्वपदस्य वाक्यान्तरगतत्वात् तदपेक्षया अस्य निघातो न भवति, 'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः' ( पा. सू. ८. १. १८. ५ ) इति वचनात् । महः । 'मह पूजायाम्' । 'क्विप् च' इति क्विप् । 'सुपां सुपो भवन्ति' इति शसो ङसादेशः । 'सावेकाचः०' इति तस्य उदात्तत्वम् । यद्वा । शसि महच्छब्दस्य अच्छब्दलोपश्छान्दसः । 'बृहन्महतोरुपसंख्यानम्' इति शस उदात्तत्वम् ॥

त्वमग्ने मनवे द्यामवाशयः पुरूरवसे सुकृते सुकृत्तरः ।
श्वात्रेण यत्पित्रोर्मुच्यसे पर्या त्वा पूर्वमनयन्नापरं पुनः ॥ ४ ॥

त्वम् । अग्ने । मनवे । द्याम् । अवाशयः । पुरूरवसे । सुऽकृते । सुकृत्ऽतरः ।
श्वात्रेण । यत् । पित्रोः । मुच्यसे । परि । आ । त्वा । पूर्वम् । अनयन् । आ । अपरम् । पुनरिति ॥४॥

---

१. श–सोऽग्निर्वायुरादित्यः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [V]अग्ने [V]त्वं [V]मनवे मनोरनुग्रहार्थं [V]द्यां द्युलोकम् [V]अवाशयः शब्दितवानसि । पुण्यकर्मभिः साध्यो द्युलोक इति प्रकटितवानसि । [V]सुकृते तव परिचरणं कुर्वते [V]पुरूरवसे एतन्नामकस्य राज्ञोऽनुग्रहार्थं [V]सुकृत्तरः अतिशयेन शोभनफलकार्यभूः । [V]यत् यदा [V]पित्रोः अरण्योः [V]श्वात्रेण क्षिप्रमथनेन [V]परि [V]मुच्यसे परितो मुक्तो भवसि उत्पद्यसे इत्यर्थः । तदानीं [V]त्वा अरण्योरुत्पन्नं त्वां [V]पूर्वं वेदेः पूर्वदेशम् [V]आ [V]अनयन् आहवनीयत्वेन स्थापितवन्तः । [V]पुनः पश्चात् [V]अपरं पश्चिमदेशम् [V]आ अनयन् गार्हपत्यरूपेण प्रापितवन्तः । आहवनीयकर्मानुष्ठानादूर्ध्वं गार्हपत्यरूपेण धारितवन्त इत्यर्थः ॥ अवाशयः । ' वाश्र शब्दे ' । पुरूरवसे । पुरु रौतीति पुरूरवाः । ' रु शब्दे ' । अस्मात् औणादिके असुनि ' पुरसि च पुरूरवाः ' (उ. सू. ४. ६७१) इति पूर्वपदस्य दीर्घो निपात्यते । सुकृते । ' सुकर्मपापमन्त्रपुण्येषु कृञः ' (पा. सू. ३. २. ८९) इति क्विप् । ततः तुक् । पित्रोः । ' उदात्तयणो हल्पूर्वात् ' इति विभक्तेरुदात्तत्वम् । मुच्यसे । अदुपदेशात् लसार्वधातुकानुदात्तत्वम् । यद्यपि ' सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः ' इति वचनात् विकरणस्वरः सतिशिष्टोऽपि लसार्वधातुकस्वरस्य बाधको न भवति तथापि धातुस्वरं बाधते एव, ' धातुस्वरं श्नास्वरः ' इत्युक्तत्वात् । अतो यक एव स्वरे प्राप्ते व्यत्ययेनाद्युदात्तत्वम् ॥

त्वमग्ने वृषभः पुष्टिवर्धन उद्यतस्रुचे भवसि श्रवाय्यः ।
य आहुतिं परि वेदा वषट्कृतिमेकायुरग्रे विश आविवाससि ॥ ५ ॥

त्वम् । अग्ने । वृषभः । पुष्टिऽवर्धनः । उद्यतऽस्रुचे । भवसि । श्रवाय्यः ।
यः । आऽहुतिम् । परि । वेद । वषट्ऽकृतिम् । एकऽआयुः । अग्रे । विशः । आऽविवाससि ॥५॥

हे [V]अग्ने [V]त्वं [V]वृषभः कामानां वर्षिता [V]पुष्टिवर्धनः यजमानस्य धनादिपोषाभिवृद्धिहेतुः [V]उद्यतस्रुचे उद्धृतया स्रुचा युक्ताय यजमानाय तदनुग्रहार्थं [V]श्रवाय्यः मन्त्रैः श्रवणीयः [V]भवसि । [V]यः यजमानः [V]वषट्कृतिं वषट्कारयुक्ताम् [V]आहुतिं [V]परि [V]वेद परितो जानाति समर्पयतीत्यर्थः । [V]एकायुः मुख्यान्नेः[1] त्वम् [V]अग्ने प्रथमं तं यजमानं [V]विशः तदनुकूलाः प्रजाः [V]आविवाससि सर्वतः प्रकाशयसि ॥ पुष्टिवर्धनः । ' वृधु वृद्धौ ' । अस्मात् णिजन्तात् नन्द्यादित्वात् ल्युः । ल्यिस्वरेणोत्तरपदस्याद्युदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । उद्यतस्रुचे । ' यम उपरमे ' । अस्मात् उत्पूर्वात् ' निष्ठा ' इति क्तप्रत्यये ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । उद्यता स्रुक् येनेति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । वेद । ' व्यचोऽतस्तिङः ' इति संहितायां दीर्घत्वम् ॥ ॥ ३२ ॥

त्वमग्ने वृजिनवर्तनिं नरं सक्मन्पिपर्षि विदथे विचर्षणे ।
यः शूरसाता परितक्म्ये धने दभ्रेभिश्चित्समृता हंसि भूयसः ॥ ६ ॥

त्वम् । अग्ने । वृजिनऽवर्तनिम् । नरम् । सक्मन् । पिपर्षि । विदथे । विऽचर्षणे ।
यः । शूरऽसाता । परिऽतक्म्ये । धने । दभ्रेभिः । चित् । सम्ऽऋता । हंसि । भूयसः ॥६॥

---

१. च-फ–मुख्यायुः ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [V]विचर्षणे विशिष्टज्ञानयुक्त [V]अग्ने [V]त्वं [V]वृजिनवर्तनिं विप्लुतमार्गं सदाचाररहितं [V]नरं पुरुषं [V]सक्मन् सचनीये समवेतुं योग्ये [V]विदथे कर्मणि [V]पिपर्षि पालयसि पूरयसि वा। सत्कर्मानुष्ठानयुक्तं करोषीत्यर्थः। [V]यः त्वं [V]परितक्म्ये परितो गन्तव्ये [V]धने धनवत् शूराणां प्रियतमे [V]शूरसाता शूरैः संभजनीये युद्धे [V]दभ्रेभिश्चित् अल्पैरपि शौर्यरहितैः पुरुषैः। 'दभ्रमर्भकमित्यल्पस्य' (निरु. ३. २०) इति यास्कः। [V]समृता सम्यक् योद्धुं प्राप्ते सति तदनुग्रहार्थं [V]भूयसः प्रौढान् प्रतिपक्षिणः शत्रून् [V]हंसि मारयसि। ईदृशस्तव महिमेत्यर्थः॥ वृजिनवर्तनिम्। वृजिना वर्तनिर्यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। सक्मन्। 'षच समवाये'। 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन्। 'नेड्वशि कृति' इति इट्प्रतिषेधः। न्यङ्क्वादित्वात् (पा. सू. ७. ३. ५३) कुत्वम्। 'सुपां सुलुक्°' इति सप्तम्या लुक्। पिपर्षि। 'पॄ पालनपूरणयोः'। सिपि श्लौ द्विर्भावहस्वोरदत्वहलादिशेषाः। 'अर्तिपिपर्त्योश्च' इति अभ्यासस्य इत्वम्। शूरसाता। 'शु गतौ'। 'शुषिचिमीनां दीर्घश्च' (उ. सू. २. १८३) इति शूरशब्दो रन्प्रत्ययान्त आद्युदात्तः। 'वन षण संभक्तौ' इत्यस्मात् क्तिनन्तः सातिशब्दः। 'जनसनखनां सञ्झलोः' इति आत्वम्। शूराणां सातिः संभजनमत्रेति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। 'सुपां सुलुक्°' इति सप्तम्या डादेशः। परितक्म्ये। 'तक हसने'। अस्मात् औणादिको भावे मक्। तदर्हतीति 'छन्दसि च' (पा. सू. ५. १. ६७) इति यः। 'प्रादयो गताद्यर्थे प्रथमया' (पा. स. २. २. १८. ४) इति समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम्। दभ्रेभिः। 'दम्भु दम्भे'। 'स्फायितञ्चि°' इत्यादिना रक्। 'बहुलं छन्दसि' इति भिस ऐसादेशाभावः। समृता। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। पूर्ववत् आकारः। हंसि। हन्तेः सिपि 'नश्चापदान्तस्य झलि' (पा. सू. ८. ३. २४) इति अनुस्वारः। यद्वृत्तयोगादनिघातः। भूयसः। 'बहोर्लोपो भू च बहोः' (पा. सू. ६. ४. १५८) इति बहुशब्दात् उत्तरस्य ईयसुनः ईकारलोपो बहोः भूभावश्च। नित्त्वादाद्युदात्तत्वम्॥

त्वं तमग्ने अमृतत्व उत्तमे मर्तं दधासि श्रवसे दिवेदिवे।
यस्तातृषाण उभयाय जन्मने मयः कृणोषि प्रय आ च सूरये॥ ७॥

त्वम्। तम्। अग्ने। अमृतऽत्वे। उत्ऽतमे। मर्तम्। दधासि। श्रवसे। दिवेऽदिवे।
यः। ततृषाणः। उभयाय। जन्मने। मयः। कृणोषि। प्रयः। आ। च। सूरये॥ ७॥

हे [V]अग्ने [V]त्वं [V]तं [V]मर्तं तथाविधं त्वत्सेविनं मनुष्यं [V]दिवेदिवे प्रतिदिनं [V]श्रवसे अन्नार्थम् [V]उत्तमे [V]अमृतत्वे उत्कृष्टमरणरहिते पदे [V]दधासि धारयसि। [V]यः यजमानः [V]उभयाय [V]जन्मने द्विविधजन्मार्थं द्विपदां चतुष्पदां च लाभायेत्यर्थः। [V]ततृषाणः अतिशयेन तृष्णायुक्तो भवति तस्मै [V]सूरये अभिज्ञाय यजमानाय [V]मयः सुखं, 'यद्वै सुखं तन्मयः' इति श्रुत्यन्तरात्। [V]प्रयः [V]च अन्नमपि [V]आ [V]कृणोषि सर्वतः करोषि॥ ततृषाणः। 'जितृषा पिपासायाम्'। लिटः कानच्। चित्त्वादन्तोदात्तत्वम्। संहितायां दीर्घश्छान्दसः। कृणोषि। 'कृवि हिंसाकरणयोश्च'। 'धिन्विकृण्व्योर च' इति उप्रत्ययः। 'चादिलोपे विभाषा' इति निघातप्रतिषेधः॥

---

१. च-छ-झ-ण-फ-'च' नास्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्वं नो अग्ने सनये धनानां यशसं कारुं कृणुहि स्तवानः ।
ऋध्याम कर्मापसा नवेन देवैर्द्यावापृथिवी प्रावतं नः ॥ ८ ॥

त्वम् । नः । अग्ने । सनये । धनानाम् । यशसम् । कारुम् । कृणुहि । स्तवानः ।
ऋध्याम । कर्म । अपसा । नवेन । देवैः । द्यावापृथिवी इति । प्र । अवतम् । नः ॥ ८ ॥

हे [V]अग्ने [V]स्तवानः स्तूयमानः [V]त्वं [V]नः अस्माकं [V]धनानां [V]सनये दानार्थं [V]यशसं यशोयुक्तं [V]कारुं कर्मणां कर्तारं पुत्रं [V]कृणुहि कुरु । [V]नवेन नूतनेन [V]अपसा प्राप्तेन त्वदत्तेन पुत्रेण [V]कर्म यागदानादिरूपम् [V]ऋध्याम वर्धयाम । हे [V]द्यावापृथिवी उभे देवते [V]देवैः अन्यैः सह [V]नः अस्मान् [V]प्रावतं प्रकर्षेण रक्षतम् ॥ यशसम् । अर्शआदित्वात् अच्प्रत्ययः । व्यत्ययेन प्रत्ययात् पूर्वस्योदात्तत्वम् । यद्वा । ' सर्वप्रातिपदिकेभ्यः क्विब्वक्तव्यः ' ( पा. म. ३. १. ११. ३ ) इति यशस्शब्दात् क्विप् । तस्य प्रत्ययान्तस्य सनाद्यन्तत्वात् धातुसंज्ञायां ' क्विप् च ' इति क्विप्प्रत्ययान्तधातोः सतिशिष्टत्वात् ' धातोः ' इत्यन्तोदात्तत्वम् । कृणुहि । ' उतश्च प्रत्ययाच्छन्दोवावचनम् ' ( पा. सू. ६. ४. १०६. १ ) इति हेर्लुगभावः । स्तवानः । ' सम्यानच् स्तुवः ' ( उ. सू. २. २४६ ) इति बहुलवचनात् केवलस्यापि स्तौतेः आनच्प्रत्ययः । वृषादित्वादाद्युदात्तत्वम् । ऋध्याम । ' ऋधु वृद्धौ ' । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । यासुट उदात्तत्वम् । द्यावापृथिवी । ' दिवो द्यावा ' ( पा. सू. ६. ३. २९ ) इति द्यावादेशः । आमन्त्रितानुदात्तत्वम् ॥

त्वं नो अग्ने पित्रोरुपस्थ आ देवो देवेष्वनवद्य जागृविः ।
तनूकृद्बोधि प्रमतिश्च कारवे त्वं कल्याण वसु विश्वमोपिषे ॥ ९ ॥

त्वम् । नः । अग्ने । पित्रोः । उपऽस्थे । आ । देवः । देवेषु । अनवद्य । जागृविः ।
तनूऽकृत् । बोधि । प्रऽमतिः । च । कारवे । त्वम् । कल्याण । वसु । विश्वम् । आ । ऊपिषे ॥ ९ ॥

हे [V]अनवद्य दोषरहित [V]अग्ने [V]देवेषु सर्वेषु मध्ये [V]जागृविः जागरूकः [V]त्वं [V]पित्रोः मातृपितृरूपयोः(?) द्यावापृथिव्योः [V]उपस्थे समीपस्थाने वर्तमानः सन् [V]नः अस्माकं [V]तनूकृत् पुत्ररूपशरीरकारी भूत्वा [V]बोधि बुध्यस्व । अनुगृहाणेत्यर्थः । तथा [V]कारवे कर्मकर्त्रे यजमानाय [V]प्रमतिश्च अनुग्रहरूपप्रकृष्टमतियुक्तश्च भवेति शेषः । हे [V]कल्याण मङ्गलरूप अग्ने [V]त्वं [V]विश्वं [V]वसु सर्वमपि धनम् [V]ओपिषे यजमानार्थमावपसि ॥ उपस्थे । ' सुपि स्थः ' ( पा. सू. ३. २. ४ ) इति तिष्ठतेः कः[1] प्रत्ययः[2] । ' आतो लोप इटि च ' इति आकारलोपः । ' मरुद्भ्यादीनां छन्दस्युपसंख्यानम् ' ( पा. सू. ६. २. १०६. २ ) इति पूर्वपदान्तोदात्तत्वम् । जागृविः । ' जागृ निद्राक्षये ' । ' जृशृस्तजागृभ्यः क्विन् ' ( उ. सू. ४. ४९४ ) इति क्विन् । नित्त्वादाद्युदात्तत्वम् । बोधि । ' बुध अवगमने ' । ' बहुलं छन्दसि ' इति शपो लुक् । ' वा छन्दसि ' इति हेः अपित्त्वस्य विकल्पितत्वेन पित्त्वात् अङित्त्वे सति ' अङितश्च ' ( पा. सू. ६. ४. १०३ ) इति हेर्धिरादेशः । लघूपधगुणः । धातोरन्त्यलोप-

---

१. न–पितृरूपयोः । २. ढ–कप्रत्ययः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

श्छान्दसः । प्रमतिः । ' मन ज्ञाने ' । क्तिनि ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपः । प्रकृष्टा मतिः यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । ऊषिषे । ' डुवप् बीजसन्ताने ' । छान्दसे लिटि ' थासः से ' । ' वचिस्वपि° ' इत्यादिना संप्रसारणपरपूर्वत्वे । द्विर्भावहलादिशेषौ । क्रादिनियमात् इट् ॥

त्वमग्ने प्रमतिस्त्वं पितासि नस्त्वं वयस्कृत्तव जामयो वयम् ।
सं त्वा रायः शतिनः सं सहस्रिणः सुवीरं यन्ति व्रतपामदाभ्य ॥ १० ॥

त्वम् । अग्ने । प्रऽमतिः । त्वम् । पिता । असि । नः । त्वम् । वयःऽकृत् । तव । जामयः । वयम् ।
सम् । त्वा । रायः । शतिनः । सम् । सहस्रिणः । सुऽवीरम् । यन्ति । व्रतऽपाम् । अदाभ्य ॥ १० ॥

हे vअग्ने vत्वं vप्रमतिः अस्मदनुग्रहरूपप्रकृष्टमतियुक्तोऽसि । तथा vत्वं vनः अस्माकं vपिता पालकः vअसि । तथा vत्वं vवयस्कृत् आयुष्यप्रदोऽसि । vवयम् अनुष्ठातारः vतव vजामयः बन्धवः । हे vअदाभ्य केनापि अहिंसनीय अग्ने vसुवीरं शोभनपुरुषयुक्तं vव्रतपां कर्मणः पालकं त्वां vशतिनः शतसंख्यायुक्ताः vरायः धनानि vसं vयन्ति सम्यक् प्राप्नुवन्ति । तथा vसहस्रिणः सहस्रसंख्याकाः रायः vसं यन्ति ॥ सुवीरम् । बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वे प्राप्ते ' वीरवीर्यौ च ' ( पा. सू. ६. २. १२० ) इत्युत्तरपदाद्युदात्तत्वम् । अदाभ्य । दभिः प्रकृत्यन्तरमस्तीति केचिदाहुः । ' दभेश्चेति वक्तव्यम् ' ( पा. सू. ३. १. १२४. ३ ) इति ण्यत् ॥ ॥ ३३ ॥

त्वामग्ने प्रथममायुमायवे देवा अकृण्वन्नहुषस्य विश्पतिम् ।
इळामकृण्वन्मनुषस्य शासनीं पितुर्यत्पुत्रो ममकस्य जायते ॥ ११ ॥

त्वाम् । अग्ने । प्रथमम् । आयुम् । आयवे । देवाः । अकृण्वन् । नहुषस्य । विश्पतिम् ।
इळाम् । अकृण्वन् । मनुषस्य । शासनीम् । पितुः । यत् । पुत्रः । ममकस्य । जायते ॥ ११ ॥

हे vअग्ने vत्वां vप्रथमं पुरा vदेवाः vआयवे आयोः मनुष्यरूपस्य vनहुषस्य एतन्नामकराजविशेषस्य vआयुं मनुष्यरूपं vविश्पतिं सेनापतिम् vअकृण्वन् कृतवन्तः । तथा vमनुषस्य मनोः vइळाम् एतन्नामधेयां पुत्रीं vशासनीं धर्मोपदेशकर्त्रीम् vअकृण्वन् कृतवन्तः । तथा च तैत्तिरीयैराम्नायते–' इडा वै मानवी यज्ञानूकाशिन्यासीत् ' ( तै. ब्रा. १. १. ४. ४ ) इति । वाजसनेयिनोऽप्येवमामनन्ति— ' प्रयाजानुयाजानां मध्ये मामवकल्पय मया सर्वानवाप्स्यसि कामानिति सा मनुमन्वशादिति यत्[1] शात् ' इति[1] । vयत् यदा vममकस्य मदीयस्य हिरण्यस्तूपसंबन्धिनः यः पिता अङ्गिराः तस्य vपितुः vपुत्रः vजायते । तदानीं हे अग्ने त्वमेव पुत्ररूप आसीरिति शेषः ॥ आयवे । ' षष्ठ्यर्थे चतुर्थी वक्तव्या ' ( पा. सू. २. ३. ६२. १ ) इति चतुर्थी । नहुषस्य । ' णह बन्धने[2] ' । ' नहिकलिहन्यर्तिलसिभ्य उषच् ' ( उ. सू. ४. ५१५ ) । वृषादित्वादाद्युदात्तत्वम् । विश्पतिम् । ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम् । मनुषस्य । ' मनेर्नित् ' इति उषच् । नित्त्वादाद्युदात्तत्वम्[3] । शासनीम् ।

---

१. झ-स–' यत् शात् इति ' नास्ति । २. ढ–बन्धने । तस्मात् । ३. च-छ-झ-न-फ-श-ष-स-ह–बाहुलकाद्वृद्ध्यभावः । पूर्वपदाद्युदात्तत्वम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

शिष्यतेऽनयेति शासनी । ' करणाधिकरणयोश्च ' इति ल्युट् । ' टिड्ढाणञ्° ' ( पा. सू. ४. १. १५ ) इत्यादिना ङीप् । लित्स्वरेणाद्युदात्तत्वम् । ममकस्य । ममेदमित्यर्थे ' तस्येदम् ' ( पा. सू. ४. ३. १२० ) इति अणि ' तवकममकावेकवचने ' ( पा. सू. ४. ३. ३ ) इति अस्मच्छब्दस्य ममकादेशः । ' संज्ञापूर्वको विधिरनित्यः ' इति वृद्ध्यभावः । व्यत्ययेनाद्युदात्तत्वम् ॥

त्वं नो अग्ने तव देव पायुभिर्मघोनो रक्ष तन्वश्च वन्द्य ।
त्राता तोकस्य तनये गवामस्यनिमेषं रक्षमाणस्तव व्रते ॥ १२ ॥

त्वम् । नः । अग्ने । तव । देव । पायुऽभिः । मघोनः । रक्ष । तन्वः । च । वन्द्य ।
त्राता । तोकस्य । तनये । गवाम् । असि । अनिऽमेषम् । रक्षमाणः । तव । व्रते ॥ १२ ॥

हे ᵛवन्द्य वन्दनीय ᵛअग्ने ᵛदेव ᵛत्वं ᵛतव ᵛपायुभिः त्वदीयैः पालनैः ᵛमघोनः धनयुक्तान् ᵛनः अस्मान् ᵛरक्ष । तथा ᵛतन्वश्च तनूः पुत्रदेहानपि रक्ष । ᵛतोकस्य अस्मदीयस्य पुत्रस्य यः तनयोऽस्मत्पौत्रादिः ᵛतव ᵛव्रते त्वदीये कर्मणि ᵛअनिमेषं निरन्तरं ᵛरक्षमाणः सावधानो वर्तते तस्मिन् या गावः सन्ति तासां ᵛगवां ᵛत्राता रक्षकः ᵛअसि । ईदृशस्य तव अस्मद्रक्षणे किमु वक्तव्यमित्यर्थः ॥ मघोनः । शसि ' श्वयुवमघोनामतद्धिते ' ( पा. सू. ६. ४. १३३ ) इति संप्रसारणम् । तन्वः । ' सुपां सुपो भवन्ति ' इति शसो जसादेशः । पूर्वसवर्णदीर्घस्य ' दीर्घाज्जसि च ' इति प्रतिषेधः । ' उदात्तस्वरितयोर्यणः° ' इति स्वरितत्वम् । शसि हि ' उदात्तयणो हल्पूर्वात् ' इति विभक्त्युदात्तत्वं स्यात् ॥

त्वमग्ने यज्यवे पायुरन्तरोऽनिषङ्गाय चतुरक्ष इध्यसे ।
यो रातहव्योऽवृकाय धायसे कीरेश्चिन्मन्त्रं मनसा वनोषि तम् ॥ १३ ॥

त्वम् । अग्ने । यज्यवे । पायुः । अन्तरः । अनिषङ्गाय । चतुःऽअक्षः । इध्यसे ।
यः । रातऽहव्यः । अवृकाय । धायसे । कीरेः । चित् । मन्त्रम् । मनसा । वनोषि । तम् ॥ १३ ॥

हे ᵛअग्ने ᵛत्वं ᵛयज्यवे यज्योः[2] यजमानस्य ᵛपायुः पालकः ᵛअन्तरः समीपवर्ती सन् ᵛअनिषङ्गाय रक्षोभिरसंबद्धाय यज्ञाय ᵛचतुरक्षः दिक्चतुष्टयेऽपि इन्द्रियस्थानीयज्वालायुक्तः ᵛइध्यसे दीप्यसे । ᵛअवृकाय अहिंसकाय ᵛधायसे पोषकाय तुभ्यं ᵛरातहव्यः दत्तहविष्कः ᵛयः यजमानोऽस्ति ᵛकीरेश्चित् स्तोतुरेव सतः तस्य संबन्धिनं ᵛमन्त्रं त्वदीयस्तोत्ररूपं ᵛमनसा त्वदीयेन चित्तेन ᵛवनोषि याचसि ॥ यज्यवे । ' यजिमनिशुन्धि° ' ( उ. सू. ३. ३०० ) इत्यादिना यजतेः युप्रत्ययः[3] । पायुः । ' कृवापाजि° ' इत्यादिना उण् । ' आतो युक् चिण्कृतोः ' ( पा. सू. ७. ३. ३३ ) इति युगागमः । अनिषङ्गाय । ' षञ्ज संगे ' । न विद्यते निषङ्गोऽस्येति बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । चतुरक्षः । चत्वार्यक्षीणि ज्वालारूपाणि यस्यासौ चतुरक्षः । ' बहुव्रीहौ सक्थ्यक्ष्णोः° ' ( पा. सू. ५. ४. ११३ ) इति समासान्तः षच्प्रत्ययः । ' चितः ' इत्यन्तोदात्तत्वम् । धायसे । ' वहि-

---

१. च-फ-तस्मिन् तनये । २. ढ-यज्वनः । ३. त-श-ष-युप्रत्ययः । वृषादित्वादाद्युदात्तः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हाधाभ्यश्छन्दसि ' इति असुन् । ' णित् ' इत्यनुवृत्तेः ' आतो युक् चिण्कृतोः ' इति युगागमः । कीरेः । ' कृत संशब्दने ' । अस्मात् ण्यन्तात् ' अच इः ' इति इप्रत्यये णिलोपे धातोरन्त्यलोपश्छान्दसः । मन्त्रम् । ' मन्त्रि गुप्तभाषणे ' । पचाद्यचि वृषादिषु पाठादाद्युदात्तत्वम् । वनोषि । ' वनु याचने ' । ' तनादिकृञ्भ्य उः ' । प्रत्ययस्वरः ॥

त्वमग्न उरुशंसाय वाघते स्पार्हं यद्रेक्णः परमं वनोषि तत् ।
आध्रस्य चित्प्रमतिरुच्यसे पिता प्र पाकं शास्सि प्र दिशो विदुष्टरः ॥१४॥

त्वम् । अग्ने । उरुऽशंसाय । वाघते । स्पार्हम् । यत् । रेक्णः । परमम् । वनोषि । तत् । आध्रस्य । चित् । प्रऽमतिः । उच्यसे । पिता । प्र । पाकम् । शास्सि । प्र । दिशः । विदुःऽतरः ॥१४॥

हे [v]अग्ने [v]त्वम् [v]ऊरुशंसाय बहुभिः स्तोतव्याय [v]वाघते ऋत्विजे तदुपकारार्थं [v]स्पार्हं स्पृहणीयं [v]परमम् उत्तमं [v]यद्रेक्णः धनमस्ति[1] [v]तत् धनं [v]वनोषि अनुष्ठाता लभताम् इति कामयसे । तथा त्वम् [v]आध्रस्य [v]चित् सर्वतो धारणीयस्य पोषणीयस्य दुर्बलस्य यजमानस्यापि [v]प्रमतिः प्रकृष्टबुद्धियुक्तः [v]पिता पालकः इत्यभिज्ञैः [v]उच्यसे । तथा [v]विदुष्टरः अतिशयेनाभिज्ञस्त्वं [v]पाकं शिशुम् । ' पोतः पाकोऽर्भको डिम्भः ' (अम. २. ५. ३८) इत्यभिधानात् । यास्कोऽप्येवमाह–' पाकः पक्तव्यो भवति ' (निरु. ३. १२) । तथाविधं यजमानं [v]प्र [v]शास्सि प्रकर्षेण अनुशिष्टं करोषि । तथा [v]दिशः प्राच्यादिकाः [v]प्रशास्सि । त्वदीयशासनाभावे अनुष्ठातॄणां विभ्रमः[2] स्यात् । तथा च श्रूयते—' देवा वै देवयजनमध्यवसाय दिशो न प्राजानन् ' इति । स भ्रमो दक्षिणादिग्गत[3] अग्निना निवर्तते[4] । तदपि तत्रैवाम्नातं—' पथ्यां स्वस्तिमयजन् प्राचीमेव तया दिशं प्राजानन्नग्निना दक्षिणा ' (तै. सं. ६. १. ५. १–२) इति । ऐतरेयिणापि तथैवाम्नातम्–' अथो एतं वरमवृणीत मयैव प्राचीं दिशं प्रजानाथाग्निना दक्षिणाम् ' (ऐ. ब्रा. १. ७) इति ॥ उरुशंसाय । ' शंसु स्तुतौ ' । शस्यते इति शंसः । कर्मणि घञ् । ञिस्वरेणाद्युदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । स्पार्हम् । स्पृहासंबन्धि । ' तस्येदम् ' इति अण् । रेक्णः । ' रिचिर् विरेचने ' । ' रिचेर्धने घिच्च ' (उ. सू. ४. ६३८) इति असुन् । चकारात् नुडागमः । ' चजोः कु घिण्ण्यतोः ' (पा. सू. ७. ३. ५२) इति कुत्वम् । आध्रस्य । ' ध्रे तृप्तौ ' । ' आदेच उपदेशेऽशिति ' (पा. सू. ६. १. ४५) इति आत्वम् । ' आतश्चोपसर्गे ' (पा. सू. ३. १. १३६) इति कप्रत्ययः । शास्सि । ' शासु अनुशिष्टौ ' । अदादित्वात् शपो लुक् । सिपः पित्त्वादनुदात्तत्वे धातुस्वरः । पाकं च प्रशास्सि दिशश्च प्रशास्सि इत्यत्र चार्थो गम्यते । अतः ' चादिलोपे विभाषा ' इति प्रथमा तिङ्विभक्तिर्न निहन्यते । विदुष्टरः । विद्वच्छब्दात् तरपि ' अयस्मयादीनि च्छन्दसि ' (पा. सू. १. ४. २०) इति भसंज्ञायां ' वसोः संप्रसारणम् ' इति संप्रसारणं परपूर्वत्वम् । ' शासिवसि° ' इति षत्वम् । तरपः पित्त्वादनुदात्तत्वे वसोः स्वरेण उकार उदात्तः ॥

---

१, च-फ–गोधनमस्ति । २. ढ–दिग्भ्रमः; न–भ्रमः । ३. झ-ढ–दक्षिणदिशातः । ४. ढ-न–निवर्त्यते

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्वमग्ने प्रयतदक्षिणं नरं वर्मेव स्यूतं परि पासि विश्वतः ।
स्वादुक्षद्मा यो वसतौ स्योनकृज्जीवयाजं यजते सोपमा दिवः ॥ १५ ॥

त्वम् । अग्ने । प्रयतऽदक्षिणम् । नरम् । वर्मऽइव । स्यूतम् । परि । पासि । विश्वतः ।
स्वादुऽक्षद्मा । यः । वसतौ । स्योनऽकृत् । जीवऽयाजम् । यजते । सः । उपऽमा । दिवः ॥१५॥

हे [v]अग्ने [v]त्वं [v]प्रयतदक्षिणं येन यजमानेन ऋत्विग्भ्यो दक्षिणा दत्ता तादृशं [v]नरं पुरुषं यजमानं [v]विश्वतः सर्वतः [v]परि [v]पासि सम्यक् पालयसि । तत्र दृष्टान्तः । [v]स्यूतं निश्छिद्रत्वेन सूचीभिः सम्यक् निष्पादितं [v]वर्मेव यथा कवचं युद्धे पालयति तद्वत् । [v]स्वादुक्षद्मा स्वाद्वन्नः [v]वसतौ निवासभूते स्वगृहे [v]स्योनकृत् अतिथीनां सुखकारी [v]यः यजमानः [v]जीवयाजं जीवयजनसहितं यज्ञं यद्वा जीवनिष्पाद्यं [v]यजते अनुतिष्ठति [v]सः यजमानः [v]दिवः स्वर्गस्य [v]उपमा दृष्टान्तो भवति । यथा स्वर्गोऽनुष्ठातॄन् सुखयति तथा त्वमपि ऋत्विगादीनित्यर्थः ॥ स्यूतम् । ' षिवु तन्तुसंताने ' । ' निष्ठा ' इति क्तः । ' यस्य विभाषा ' इति इट्प्रतिषेधः । ' छ्वोः शूडनुनासिके च ' ( पा. सू. ६. ४. १९ ) इति वकारस्य ऊडादेशः । स्वादून् क्षदतीति स्वादुक्षद्मा । क्षदतिः अत्तिकर्मा । ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन् । निरुक्तादाद्युदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वम् । बहुव्रीहौ तु व्यत्ययेन । जीवयाजम् । जीवाः ऋत्विजः इज्यन्ते दक्षिणाभिः पूज्यन्ते अत्रेति अधिकरणे घञ् । कुत्वाभावश्छान्दसः । यद्वा । जीवैः पशुभिः याजनं जीवयाजः । याजयतेर्वञ् । ' णेरनिटि ' इति णिलोपस्य ' अचः परस्मिन्° ' इति स्थानिवद्भावात् ' चजोः कु घिण्ण्यतोः ' इति कुत्वाभावः । थाथादिस्वरेणोत्तरपदान्तोदात्तत्वम् । सोपमा । ' सोऽचि लोपे चेत्पादपूरणम् ' इति संहितायां सोर्लोपः । दिवः । ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम् ॥ ॥ ३४ ॥

' इमामग्ने ' इत्यनया अनाहिताग्निः आर्त्विज्यं कृत्वा स्वाम्नावाहुतिं जुहुयात् । ' ऋत्विजो वृणीते ' इति खण्डे ' एवमनाहिताग्निर्गृह्य इमामग्ने शरणिं मीमृषो नः ' ( आश्व. गृ. १. २३. २३ ) इति सूत्रितम् ॥

इमामग्ने शरणिं मीमृषो न इममध्वानं यमगाम दूरात् ।
आपिः पिता प्रमतिः सोम्यानां भृमिरस्यृषिकृन्मर्त्यानाम् ॥ १६ ॥

इमाम् । अग्ने । शरणिम् । मीमृषः । नः । इमम् । अध्वानम् । यम् । अगाम । दूरात् ।
आपिः । पिता । प्रऽमतिः । सोम्यानाम् । भृमिः । असि । ऋषिऽकृत् । मर्त्यानाम् ॥१६॥

हे [v]अग्ने त्वं [v]नः अस्मत्संबन्धिनीम् [v]इमाम् इदानीम् संपादितां [v]शरणिं हिंसां व्रतलोपरूपां [v]मीमृषः क्षमस्व । तथा त्वदीयसेवाम् अग्निहोत्रादिरूपां परित्यज्य [v]दूरात् दूरदेशं[1] [v]यम् [v]इममध्वानम् [v]अगाम वयं गतवन्तः तमपि क्षमस्वेति शेषः । [v]सोम्यानां सोमार्हाणामनुष्ठातॄणां [v]मर्त्यानां त्वम्

---

१. ढ–दूरदेशनिमित्तम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आप्यादिगुणयुक्तः ᵛअसि । ᵛआपिः प्रापणीयः ᵛपिता पालकः ᵛप्रमतिः प्रकृष्टमननयुक्तः ᵛभृमिः भ्रामकः कर्मनिर्वाहक इत्यर्थः । ᵛऋषिकृत् दर्शनकारी । अनुजिघृक्षया प्रत्यक्षो भवसीत्यर्थः ॥ शरणिम् । ' शॄ हिंसायाम् ' इत्यस्मात् औणादिकः अनिप्रत्ययः । मीमृषः । ' मृष तितिक्षायाम् ' । अस्मात् णौ चङि गुणे प्राप्ते ' नित्यं छन्दसि ' ( पा. सू. ७. ४. ८ ) इति उपधर्कारस्य ऋकारादेशः । णिलोप-द्विर्भावहलादिशेषोरदत्वसन्वद्भावेत्वदीर्घत्वानि । ' तिङ्ङतिङः ' इति निघातः । अगाम । ' इण् गतौ ' । ' इणो गा लुङि ' ( पा. सू. २. ४. ४५ ) इति गादेशः । ' गातिस्था° ' इति सिचो लुक् । अडागम उदात्तः । भृमिः । ' भ्रमु अनवस्थाने ' । ' भ्रमेः संप्रसारणं च ' (उ. सू. ४. ५६०) इति इन्प्रत्ययः । संप्रसारणे परपूर्वत्वम् । ' इगुपधात्कित् ' इत्यनुवृत्तेः कित्त्वाद्गुणप्रतिषेधः । नित्त्वादाद्युदात्तत्वम् ॥

मनुष्वदग्ने अङ्गिरस्वदङ्गिरो ययातिवत्सदने पूर्ववच्छुचे ।
अच्छ याह्या वहा दैव्यं जनमा सादय बर्हिषि यक्षि च प्रियम् ॥ १७ ॥

मनुष्वत् । अग्ने । अङ्गिरस्वत् । अङ्गिरः । ययातिऽवत् । सदने । पूर्वऽवत् । शुचे ।
अच्छ । याहि । आ । वह । दैव्यम् । जनम् । आ । सादय । बर्हिषि । यक्षि । च । प्रियम् ॥१७॥

हे ᵛशुचे शुद्धियुक्त ᵛअङ्गिरः अङ्गनशील हविरादानाय तत्र तत्र गमनशील ᵛअग्ने ᵛअच्छ आभिमुख्येन ᵛसदने देवयजनदेशे ᵛयाहि गच्छ । तत्र चत्वारो दृष्टान्ताः । ᵛमनुष्वत् यथा मनुः अनुष्ठानदेशे गच्छति, ᵛअङ्गिरस्वत् यथा च अङ्गिराः गच्छति, ᵛययातिवत् यथा ययातिर्नाम राजा गच्छति, ᵛपूर्ववत् अन्ये च पूर्वपुरुषाः यथा गच्छन्ति । यथा मन्वादयो यज्ञे गच्छन्ति तद्वत् । अथवा मन्वादीनां यज्ञे यथा वं गच्छसि तद्वत् । गत्वा च ᵛदैव्यं देवतासमूहरूपं ᵛजनम् ᵛआ ᵛवह अस्मिन् कर्मणि आनय । आनीय च ᵛबर्हिषि आस्तीर्णे[1] दर्भे[1] ᵛआ ᵛसादय तान् देवान् उपवेशय । उपवेश्य च ᵛप्रियम् अभीष्टं हविः ᵛयक्षि ᵛच देहि ॥ मनुष्वत् । ' तेन तुल्यम्° ' इति प्रथमार्थे वा ' तत्र तस्येव ' इति षष्ठ्यर्थे वतिः ( पा. सू. ५. १. ११५-११६ ) । अयस्मयादित्वेन भत्वात् रुत्वाद्यभावः । प्रत्ययस्वरः । एवम् अङ्गिरस्वत् इत्यादिषु । वह । ' ब्यचोऽतस्तिङः ' इति संहितायां दीर्घः । यक्षि । लोटि ' बहुलं छन्दसि ' इति शपो लुक् । ' सेर्ह्यपिच्च ' इति हेः अभावश्छान्दसः । षत्वकत्वे ॥

साग्निचयने क्रतौ उखासंभरणीयायाम् इष्टौ अग्नेर्ब्रह्मण्वतः पुरोनुवाक्या ' एतेनाग्ने ' इत्येषा । ' दर्शपूर्णमासाभ्यामिष्ट्वा ' इति खण्डे ' एतेनाग्ने ब्रह्मणा वावृधस्व ब्रह्म च ते जातवेदो नमश्च ' ( आश्व. श्रौ. ४. १ ) इति सूत्रितम् ॥

एतेनाग्ने ब्रह्मणा वावृधस्व शक्ती वा यत्ते चकृमा विदा वा ।
उत प्र णेष्यभि वस्यो अस्मान्त्सं नः सृज सुमत्या वाजवत्या ॥ १८ ॥

एतेन । अग्ने । ब्रह्मणा । ववृधस्व । शक्ती । वा । यत् । ते । चकृम । विदा । वा ।
उत । प्र । नेषि । अभि । वस्यः । अस्मान् । सम् । नः । सृज । सुऽमत्या । वाजऽवत्या ॥१८॥

---

१, ढ–अस्मिन् कर्मणि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]अग्ने [v]एतेन अस्मत्प्रयुक्तेन [v]ब्रह्मणा मन्त्रेण [v]ववृधस्व अभिवृद्धो भव । [v]शक्ती [v]वा [v]विदा [v]वा अस्मदीयशक्त्या च अस्मदीयज्ञानेन च [v]ते तव [v]यत् स्तोत्रं [v]चकृम वयं कृतवन्तः । एतेन ब्रह्मणा इति पूर्वत्रान्वयः । [v]उत अपि च [v]अस्मान् अनुष्ठातॄन् [v]वस्यः वसुमत्तरत्वलक्षणं[1] श्रेयः [v]प्र [v]णेषि प्रकर्षेण प्रापय । [v]नः अस्मान् [v]वाजवत्या प्रभूतान्नयुक्तया [v]सुमत्या अनुष्ठानविषयया शोभनबुद्ध्या [v]सं [v]सृज संयोजय ॥ ववृधस्व । ' वृधु वृद्धौ ' । लेटि अडागमः । ' बहुलं छन्दसि ' इति शपः श्लुः । द्विर्भावहलादिशेषोरदत्वानि । अभ्यासस्य संहितायां दीर्घश्छान्दसः । शक्ती । ' सुपां सुलुक्° ' इति तृतीयायाः पूर्वसवर्णदीर्घत्वम् । क्तिनो नित्त्वादाद्युदात्तत्वम् । विदा । ' सावेकाचः° ' इति तृतीयाया उदात्तत्वम् । नेषि । ' णीञ् प्रापणे ' । ' बहुलं छन्दसि ' इति शपो लुक् । ' उपसर्गादसमासे° ' इति णत्वम् । सुमत्या । ' मनूक्तिन्° ' इत्यादिनोत्तरपदान्तोदात्तत्वं प्रथमाध्याये प्रपञ्चितम् ( ऋ. सं. १. ७. ७ ) । ' उदात्तयणो हल्पूर्वात् ' इति विभक्तेरुदात्तत्वम् ॥ ॥ ३५ ॥

' इन्द्रस्य नु वीर्याणि ' इति पञ्चदशर्चं द्वितीयं सूक्तम् । आङ्गिरसो हिरण्यस्तूप ऋषिः । त्रिष्टुप् छन्दः । इन्द्रो देवता । ' इन्द्रस्य पञ्चोना ' इत्यनुक्रमणिका । अग्निष्टोमे माध्यंदिने सवने निष्केवल्यशस्त्रे ' इन्द्रस्य नु वीर्याणि ' इति निविद्धानीयं सूक्तम् । ' निष्केवल्यस्य ' इति खण्डे ' इन्द्रस्य नु वीर्याणीत्येतस्मिन्नैन्द्रीं निविदं दध्यात् ' ( आश्व. श्रौ. ५. १५ ) इति । विषुवत्यपि तस्मिन् शस्त्रे एतत् विनियुक्तम् । ' विषुवान्दिवा कीर्त्यः ' इति खण्डे सूत्रितम्—' इन्द्रस्य नु वीर्याणीति एतस्मिन्नैन्द्रीं निविदं शस्त्वा ' ( आश्व. श्रौ. ८. ६ ) इति । महाव्रते निष्केवल्येऽप्येतदेव विनियुक्तम् । ' राथन्तरो दक्षिणः पक्षः ' इति खण्डे ' चतस्रः सतीः षड् बृहतीः करोतीन्द्रस्य नु वीर्याणि प्र वोचम् ' ( ऐ. आ. ५. २. २ ) इति ॥

इन्द्रस्य नु वीर्याणि प्र वोचं यानि चकार प्रथमानि वज्री ।
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत्पर्वतानाम् ॥ १ ॥

इन्द्रस्य । नु । वीर्याणि । प्र । वोचम् । यानि । चकार । प्रथमानि । वज्री ।
अहन् । अहिम् । अनु । अपः । ततर्द । प्र । वक्षणाः । अभिनत् । पर्वतानाम् ॥ १ ॥

[v]वज्री वज्रयुक्तः इन्द्रः [v]प्रथमानि पूर्वसिद्धानि मुख्यानि वा [v]यानि [v]वीर्याणि पराक्रमयुक्तानि कर्माणि [v]चकार तस्य [v]इन्द्रस्य तानि [v]वीर्याणि [v]नु क्षिप्रं[2] प्रब्रवीमि । कानि[3] वीर्याणीति[3] तदुच्यते । [v]अहिं मेघम् [v]अहन् हतवान् । तदेतदेकं वीर्यम् । [v]अनु पश्चात् [v]अपः जलानि [v]ततर्द हिंसितवान् भूमौ पातितवानित्यर्थः । इदं द्वितीयं वीर्यम् । [v]पर्वतानां संबन्धिनीः [v]वक्षणाः प्रवहणशीलाः नदीः [v]प्र [v]अभिनत् भिन्नवान् कूलद्वयकर्षणेन प्रवाहितवानित्यर्थः । इदं तृतीयं वीर्यम् । एवमुत्तरत्रापि द्रष्टव्यम् ॥ वीर्याणि । ' शूर वीर विक्रान्तौ ' । ण्यन्तात् ' अचो यत् ' इति यत् । ' णेरनिटि ' इति णिलोपः । ' तित्स्वरितम् ' इति स्वरितत्वम् । ' यतोऽनावः ' इत्याद्युदात्तत्वं न भवति । आद्युदात्तत्वे हि सुशब्देन बहुव्रीहौ ' आद्युदात्तं द्व्यच्छन्दसि ' इत्यनेनैवोत्तरपदाद्युदात्तत्वस्य सिद्धत्वात् ' वीरवीर्यौ च ' इति पुनस्तद्विधानमनर्थकं स्यात् । अतोऽवगम्यते ' यतोऽनावः ' इत्याद्युदात्तत्वं वीरशब्दे न प्रवर्तते

---

१. श–वसुमत्तरो बललक्षणम् । २. ढ–क्षिप्रं प्रवोचं । ३. न–कानि वीर्याणि; च-फ–कानि तानि वीर्याणीति ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति । अतः परिशेषात् ' तित्स्वरितम् ' इति प्रत्ययस्य स्वरितत्वमेव । वोचम् । ' अस्यतिवक्तिख्यातिभ्योऽङ् ' इति च्लेः अङादेशः । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । चकार । णलि लित्स्वरेण प्रत्ययात् पूर्वस्योदात्तत्वम् । यद्वृत्तयोगादनिघातः । अहन् । लङि ' इतश्च ' इति इकारलोपे ' हल्ङ्याब्भ्यः० ' इति तकारलोपः । अहिम् । आङ्पूर्वात् हन्तेः ' आङि श्रिहनिभ्यां ह्रस्वश्च ' ( उ. सू. ४. ५७७ ) इति इप्रत्ययः; आङो ह्रस्वत्वं च । चशब्देन ' वेजो डित्, समाने ख्यश्चोदात्तः ' इति डित्त्वं पूर्वपदोदात्तत्वं चानुकृष्यते । ततः टिलोपे पूर्वपदस्योदात्तत्वम् । ततर्द । ' उतृदिर् हिंसानादरयोः ' । ' तिङ्ङतिङः ' इति निघातः । वक्षणाः । ' वक्ष रोषे ' । ' क्रुधमण्डार्थेभ्यश्च ' (पा. सू. ३. २. १५१) इति युच् । चित्स्वरं बाधित्वा व्यत्ययेन प्रत्ययस्वरः ॥

अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष ।
वाश्राइव धेनवः स्यन्दमाना अञ्जः समुद्रमव जग्मुरापः ॥ २ ॥

अहन् । अहिम् । पर्वते । शिश्रियाणम् । त्वष्टा । अस्मै । वज्रम् । स्वर्यम् । ततक्ष ।
वाश्राःइव । धेनवः । स्यन्दमानाः । अञ्जः । समुद्रम् । अव । जग्मुः । आपः ॥ २ ॥

vपर्वते vशिश्रियाणम् आश्रितम् vअहिं मेघम् vअहन् हतवान् । vअस्मै इन्द्राय vस्वर्यं सुष्ठु प्रेरणीयं यद्वा शब्दनीयं स्तुत्यं vत्वष्टा विश्वकर्मा vवज्रं vततक्ष तनूकृतवान् । तेन वज्रेण मेघे भिन्ने सति vस्यन्दमानाः प्रस्रवणयुक्ताः vआपः vसमुद्रम् vअञ्जः सम्यक् vअव vजग्मुः प्राप्ताः । तत्र दृष्टान्तः । vवाश्राः वत्सान्प्रति हम्भारवोपेताः vधेनवः vइव । यथा धेनवः सहसा वत्सगृहे गच्छन्ति तद्वत् ॥ शिश्रियाणम् । ' श्रिञ् सेवायाम् ' । लिटः कानच् । द्विर्भावहलादिशेषेयङादेशाः । ' चितः ' इत्यन्तोदात्तत्वम् । स्वर्यम् । ' ऋ गतौ ' । अस्मात् सुपूर्वात् ' ऋहलोर्ण्यत् ' इति ण्यत् । ' संज्ञापूर्वको विधिरनित्यः ' इति वृद्ध्यभावः । यद्वा । ' स्वृ शब्दोपतापयोः ' इत्यस्मात् ण्यति पूर्ववत् वृद्ध्यभावः । ' तित्स्वरितम् ' इति स्वरितत्वम् । वाश्यन्ते इति वाश्राः । ' वाश्र शब्दे ' । ' स्फायितञ्चि० ' इत्यादिना रक् । जग्मुः । उसि ' गमहन० ' इति उपधालोपः ॥

वृषायमाणोऽवृणीत सोमं त्रिकद्रुकेष्वपिबत्सुतस्य ।
आ सायकं मघवादत्त वज्रमहन्नेनं प्रथमजामहीनाम् ॥ ३ ॥

वृषऽयमाणः । अवृणीत । सोमम् । त्रिऽकद्रुकेषु । अपिबत् । सुतस्य ।
आ । सायकम् । मघऽवा । अदत्त । वज्रम् । अहन् । एनम् । प्रथमऽजाम् । अहीनाम् ॥३॥

vवृषायमाणः वृष इवाचरन् इन्द्रः vसोमम् vअवृणीत वृतवान् । vत्रिकद्रुकेषु ज्योतिः गौः आयुः इत्येतन्नामकाः त्रयो यागाः त्रिकद्रुकाः उच्यन्ते । तेषु vसुतस्य अभिषुतस्य सोमस्यांशम् vअपिबत् पीतवान् । vमघवा धनवान् इन्द्रः vसायकं बन्धकं वज्रम् vआ vअदत्त स्वीकृतवान् । तेन च वज्रेण vअहीनां vमेघानां मध्ये vप्रथमजां प्रथमोत्पन्नं मेघम् vअहन् हतवान् ॥ वृषायमाणः । वृष इवाचरन् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' कर्तुः क्यङ् सलोपश्च ' ( पा. सू. ३. १. ११ ) इति क्यङ्। ' अकृत्सार्वधातुकयोः ' इति दीर्घः। अदुपदेशात् धातोः अन्तोदात्तत्वे क्यङन्तात् धातोः अन्तोदात्तत्वम् (?)। सायकम्। ' षिञ् बन्धने '। सिनोतीति सायकः। ण्वुल्। लित्स्वरेणाद्युदात्तत्वम्। प्रथमजाम्। प्रथमं जायते इति प्रथमजाः। ' जनसनखनक्रमगमो विट् '। ' विड्वनोः ' इति आत्वम्॥

यदिन्द्राहन्प्रथमजामहीनामान्मायिनामामिनाः प्रोत मायाः।
आत्सूर्यं जनयन्द्यामुषासं तादीत्ना शत्रुं न किला विवित्से ॥ ४ ॥

यत्। इन्द्र। अहन्। प्रथमऽजाम्। अहीनाम्। आत्। मायिनाम्। अमिनाः। प्र। उत। मायाः।
आत्। सूर्यम्। जनयन्। द्याम्। उषसम्। तादीत्ना। शत्रुम्। न। किल। विवित्से ॥४॥

उत अपि च हे इन्द्र यत् यदा अहीनां मेघानां मध्ये प्रथमजां प्रथमोत्पन्नं मेघम् अहन् हतवानसि आत् तदनन्तरं मायिनां मायोपेतानामसुराणां संबन्धिनीः मायाः प्र अमिनाः प्रकर्षेण नाशितवानसि। अनन्तरं सूर्यम् उषसम् उषःकालं द्याम् आकाशं च जनयन् उत्पादयन् आवरकमेघनिवारणेन प्रकाशयन् वर्तसे। तादीत्ना तदानीम् आवरकान्धकाराभावात् शत्रुं घातकं वैरिणं न विवित्से किल त्वं न लब्धवान् खलु॥ अहन्। हन्तेः लङि ' हल्ङ्याब्भ्यः ' इति सिलोपः। अडागम उदात्तः। यङ्लुक्तथोगादनिघातः। मायिनाम्। मायाशब्दस्य व्रीह्यादिषु पाठात् ' व्रीह्यादिभ्यश्च ' ( पा. सू. ५. २. ११६ ) इति मत्वर्थीय इनिः। अमिनाः। ' मीञ् हिंसायाम् '। क्रैयादिकः। ' मीनातेर्निगमे ' ( पा. सू. ७. ३. ८१ ) इति ह्रस्वत्वम्। तादीत्ना। तदानीम् इत्यस्य पृषोदरादित्वात् वर्णविपर्ययः। किल। ' निपातस्य ' इति दीर्घत्वम्। विवित्से। ' विदॢ लाभे '। क्रादिनियमात् प्राप्तः इट् व्यत्ययेन न भवति॥

अहन्वृत्रं वृत्रतरं व्यंसमिन्द्रो वज्रेण महता वधेन।
स्कन्धांसीव कुलिशेना विवृक्णाहिः शयत उपपृक्पृथिव्याः ॥ ५ ॥

अहन्। वृत्रम्। वृत्रऽतरम्। विऽअंसम्। इन्द्रः। वज्रेण। महता। वधेन।
स्कन्धांसिऽइव। कुलिशेन। विऽवृक्णा। अहिः। शयते। उपऽपृक्। पृथिव्याः ॥ ५ ॥

अयम् इन्द्रः वज्रेण संपादितो यो महान् वधः तेन वज्रेण वृत्रतरम् अतिशयेन लोकानाम् आवरकम् अन्धकाररूपम्। यद्वा। वृत्रैः आवरणैः सर्वान् शत्रून् तरति तं वृत्रम् एतन्नामकमसुरं व्यंसं विगतांसं छिन्नबाहुः यथा भवति तथा अहन् हतवान्। अंसच्छेदे दृष्टान्तः। कुलिशेन कुठारेण विवृक्णा विशेषतश्छिन्नानि स्कन्धांसीव। यथा वृक्षस्कन्धाश्छिन्ना भवन्ति तद्वत्। तथा सति अहिः वृत्रः पृथिव्याः उपरि उपपृक् सामीप्येन संपृक्तः शयते शयनं करोति छिन्नकाष्ठवत् भूमौ पततीत्यर्थः॥ वृत्रतरम्। ' वृतु वर्तने '। ' स्फायितञ्चि° ' इत्यादिना भावे रक्प्रत्ययान्तो वृत्रशब्दः। वृत्रेण आवरणेन सर्वं तरतीति

---

१. झ–अदुपदेशात् धातोरन्तोदात्तत्वम्। २. ढ–आत् तदनन्तरम्। ३. ढ–वधेन। ४. ढ–आवारकम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वृत्रतरः । तरतेः पचाद्यच् । ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम् । तरपि तु व्यत्ययेन व्यंसम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे ' उदात्तस्वरितयोर्यणः° ' इति स्वरितत्वम् । वधेन । ' हनश्च वधः ' इति भावे अप्; तत्संनियोगेन धातोः वधादेशः । स च अन्तोदात्तः । अन्त्यस्य अकारस्य ' अतो लोपः ' इति लोपः । उदात्तनिवृत्तिस्वरेण प्रत्ययस्योदात्तत्वम् । विवृक्णा । ' ओव्रश्चू छेदने ' । कर्मणि निष्ठा । ' यस्य विभाषा ' इति इट्प्रतिषेधः । ' ओदितश्च ' ( पा. सू. ८. २. ४५ ) इति परत्वात् निष्ठानत्वम् । ततो 'व्रश्चभ्रस्ज° ' इति षत्वे प्राप्ते ' निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वक्तव्यः ' (पा. सू. ८. २. ६. ७) इति नत्वस्य सिद्धत्वेन झल्परत्वाभावात् षत्वं न भवति । कुत्वे तु कर्तव्ये तदसिद्धमेव ( पा. सू. ८. २. १ ) इति ' चोः कुः ' इति कुत्वम् । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । शयते । ' बहुलं छन्दसि ' इति शपो लुगभावः । पृथिव्याः । 'उदात्तयणो हल्पूर्वात् ' इति विभक्तेरुदात्तत्वम् ॥ ॥ ३६ ॥

अयोद्धेव दुर्मद आ हि जुह्वे महावीरं तुविबाधमृजीषम् ।
नातारीदस्य समृतिं वधानां सं रुजानाः पिपिष इन्द्रशत्रुः ॥ ६ ॥

अयोद्धाऽइव । दुःऽमदः । आ । हि । जुह्वे । महाऽवीरम् । तुविऽबाधम् । ऋजीषम् ।
न । अतारीत् । अस्य । सम्ऽऋतिम् । वधानाम् । सम् । रुजानाः । पिपिषे । इन्द्रऽशत्रुः ॥६॥

[v]दुर्मदः दुष्टमदोपेतो दर्पयुक्तो वृत्रः [v]अयोद्धेव योद्धृरहित इव इन्द्रम् [v]आ [v]जुह्वे [v]हि आहूतवान् खलु । कीदृशमिन्द्रम् । [v]महावीरं गुणैः महान् भूत्वा शौर्योपेतं [v]तुविबाधं बहूनां बाधकं [v]ऋजीषं शत्रूणामपार्जकम् । [v]अस्य ईदृशस्य[1] इन्द्रस्य संबन्धिनो ये शत्रुवधाः सन्ति [v]तेषां [v]वधानां [v]समृतिं संगमं [v]नातारीत् पूर्वोक्तो दुर्मदः तरीतुं नाशक्नोत् । [v]इन्द्रशत्रुः इन्द्रः शत्रुर्घातको यस्य वृत्रस्य तादृशो वृत्रः इन्द्रेण हतो नदीषु पतितः[2] सन् [v]रुजानाः नदीः [v]सं [v]पिपिषे सम्यक् पिष्टवान् । सर्वान् लोकानावृण्वतो वृत्रदेहस्य पातेन नदीनां कूलानि तत्रत्यपाषाणादिकं च चूर्णीभूतमित्यर्थः ॥ अयोद्धा इव । न विद्यते योद्धास्येति बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । समासान्तविधेरनित्यत्वात् ( परिभा. ८४ ) ' नद्यृतश्च ' ( पा. सू. ५. ४. १५३ ) इति कबभावः । जुह्वे । ' ह्वेञ् स्पर्धायां शब्दे च ' । ' अभ्यस्तस्य च ' ( पा. सू. ६. १. ३३ ) इति संप्रसारणम् । उवङादेशाभावश्छान्दसः । यद्वा । ' छन्दस्युभयथा ' इति सार्वधातुकसंज्ञायां ' हुश्नुवोः सार्वधातुके ' ( पा. सू. ६. ४. ८७ ) इति यणादेशः । अत्र लक्षणप्रतिपदोक्तपरिभाषा ( परिभा. १०५ ) लक्ष्यानुरोधान्नाश्रीयते । इतरथा हि आजुह्वानः इत्यादिषु यणादेशो न स्यात् । न चैवं सति ' सातये हुवे वाम् ' ( ऋ. सं. ६. ६०. १३ ) इत्यादावपि तथा[3] स्यादिति वाच्यं अनेकाच्त्वाभावात् । अनेकाच इति हि तत्रानुवर्तते । प्रत्ययस्वरेणान्तोदात्तत्वम् । ' हि च ' इति निघातप्रतिषेधः । महावीरम् । महांश्चासौ वीरश्च महावीरः । ' आन्महतः° ' ( पा. सू. ६. ३. ४६ ) इति आत्वम् । तुविबाधम् । ' बाधृ विलोडने ' । तुवीन् प्रभूतान् बाधते इति तुविबाधः । पचाद्यच् । कृदुत्तरपदप्रकृतिस्वरत्वम् । समृतिम् । ' तादौ च° ' इति गतेः प्रकृतिस्वरत्वम् । रुजानाः । ' रुजो भङ्गे ' । रुजन्ति कूलानीति रुजाना नद्यः । ' रुजाना नद्यो भवन्ति रुजन्ति

---

१. च-फ-श-ष–' ईदृशस्य ' नास्ति । २. च-ढ-फ–पातितः । ३. च-फ–यणादेशः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कूलानि ' ( निरु. ६. ४ ) इति यास्कः । व्यत्ययेन शानच् । ' तुदादिभ्यः शः ' । नुमभावश्छान्दसः । अदुपदेशात् लसार्वधातुकानुदात्तत्वे विकरणस्वरः । पिपिषे । ' पिष्लृ संचूर्णने ' । व्यत्ययेन लिट् । इन्द्रशत्रुः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

अपादहस्तो अपृतन्यादिन्द्रमास्य वज्रमधि सानौ जघान ।
वृष्णो वध्रिः प्रतिमानं बुभूषन्पुरुत्रा वृत्रो अशयद्व्यस्तः ॥ ७ ॥

अपात् । अहस्तः । अपृतन्यत् । इन्द्रम् । आ । अस्य । वज्रम् । अधि । सानौ । जघान ।
वृष्णः । वध्रिः । प्रतिऽमानम् । बुभूषन् । पुरुऽत्रा । वृत्रः । अशयत् । विऽअस्तः ॥ ७ ॥

[v]अपात् वज्रेण च्छिन्नत्वात्[1] पादरहितः [v]अहस्तः हस्तरहितः वृत्रः [v]इन्द्रम् उद्दिश्य [v]अपृतन्यत् पृतनां युद्धम् ऐच्छत् । द्वेषाधिक्येन बहुधा विद्धोऽपि युद्धं न परित्यक्तवानित्यर्थः । [v]अस्य हस्तपादहीनस्य[2] वृत्रस्य [v]सानौ पर्वतसानुसदृशे प्रौढस्कन्धे [v]अधि उपरि [v]वज्रम् [v]आ [v]जघान इन्द्रः आभिमुख्येन प्रक्षिप्तवान् । अशक्तस्यापि युद्धेच्छायां दृष्टान्तः । [v]वध्रिः छिन्नमुष्कः पुरुषः [v]वृष्णः रेतःसेचनसमर्थस्य पुरुषान्तरस्य [v]प्रतिमानं सादृश्यं [v]बुभूषन् प्राप्तुमिच्छन् यथा न शक्नोति तद्वदयमिति शेषः । सः [v]वृत्रः [v]पुरुत्रा बहुष्ववयवेषु [v]व्यस्तः विविधं क्षिप्तः ताडितः सन् [v]अशयत् भूमौ पतितवान् ॥ अपात् । बहुव्रीहौ पादशब्दस्य अन्त्यलोपश्छान्दसः । अहस्तः । बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । अपृतन्यत् । ' सुप आत्मनः क्यच् ' । ' कव्यध्वरपृतनस्य° ' इति अन्त्यलोपः । बुभूषन् । ' सनि ग्रहगुहोश्च ' ( पा. सू. ७. २. १२ ) इति इट्प्रतिषेधः । पुरुत्रा । ' देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ' ( पा. सू. ५. ४. ५६ ) इति सप्तम्यर्थे त्राप्रत्ययः । अशयत् । व्यत्ययेन परस्मैपदम् । ' बहुलं छन्दसि ' इति शपो लुगभावः । व्यस्तः । ' असु क्षेपणे ' इत्यस्मात् कर्मणि क्तः । ' यस्य विभाषा ' इति इट्प्रतिषेधः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । संहितायाम् ' उदात्तस्वरितयोर्यणः° ' इति परस्यानुदात्तस्य स्वरितत्वम् ॥

नदं न भिन्नममुया शयानं मनो रुहाणा अति यन्त्यापः ।
याश्चिद्वृत्रो महिना पर्यतिष्ठत्तासामहिः पत्सुतःशीर्बभूव ॥ ८ ॥

नदम् । न । भिन्नम् । अमुया । शयानम् । मनः । रुहाणाः । अति । यन्ति । आपः ।
याः । चित् । वृत्रः । महिना । परिऽअतिष्ठत् । तासाम् । अहिः । पत्सुतःऽशीः । बभूव ॥ ८ ॥

[v]अमुया अमुष्यां पृथिव्यां [v]शयानं पतितं मृतं वृत्रम् [v]आपः जलानि [v]अति [v]यन्ति अतिक्रम्य गच्छन्ति । तत्र दृष्टान्तः । [v]भिन्नं बहुधाभिन्नकूलं [v]नदं [v]न सिन्धुमिव । यथा वृष्टिकाले प्रभूता आपो नद्याः कूलं भित्त्वा अतिक्रम्य गच्छन्ति तद्वत् । कीदृश्य आपः । [v]मनो [v]रुहाणाः नृणां चित्तमारोहन्त्यः ।

---

१. ढ–च्छिन्नाङ्गत्वात् ; झ-स–छित्त्वा । २. ढ–हस्तपादरहितस्य ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पुरा वृत्रे जीवति सति तेन निरुद्धा मेघस्थिता आपो भूमौ वृष्टा न भवन्ति तदानीं नृणां मनः खिद्यते। मृते तु वृत्रे निरोधरहिता आपो वृत्रशरीरमुल्लङ्घ्य प्रवहन्ति। तदा वृष्टिलाभेन मनुष्यास्तुष्यन्तीत्यर्थः। तदेतदुत्तरार्धेन स्पष्टीक्रियते। [v]वृत्रः जीवनदशायां [v]महिना स्वकीयेन महिम्ना [v]याश्चित् या एव मेघगताः अपः [v]पर्यतिष्ठत् परिवृत्य स्थितवान्, [v]अहिः वृत्रो मेघः [v]तासाम् अपां [v]पत्सुतःशीः पादस्याधःशयानः [v]बभूव। यद्यप्यपां पादो नास्ति तथाप्यद्रिर्वृत्रस्य अभिलङ्घितत्वात् पादस्याधःशयनमुपपद्यते॥ भिन्नम्। ' रदाभ्यां निष्टातो नः° ' ( पा. सू. ८. २. ४२ ) इति नत्वम्। असुया। ' सुपां सुलुक्° ' इति सप्तम्या याजादेशः। शयानम्। ' शीङः सार्वधातुके गुणः ' ( पा. सू. ७. ४. २१ )। धातोर्ङित्त्वात् लसार्वधातुकानुदात्तत्वे धातुस्वरः। रुहाणाः। 'रुह बीजजन्मनि प्रादुर्भावे'। व्यत्ययेन शानच्। कर्तरि शपि प्राप्ते व्यत्ययेन शः। ' अनित्यसागमशासनम् ' इति वचनात् मुगभावः। अदुपदेशात् लसार्वधातुकानुदात्तत्वे विकरणस्वरे प्राप्ते व्यत्ययेन धातुस्वरः। महिना। ' मह पूजायाम् '। ' इन्सर्वधातुभ्यः ' इति इन्प्रत्ययः। व्यत्ययेन विभक्तेरुदात्तत्वम्। यद्वा। महिना महिम्ना। महच्छब्दस्य पृथ्वादिषु पाठात् ' तस्य भावः° ' इत्येतस्मिन्नर्थे ' पृथ्वादिभ्य इमनिज्वा ' (पा. सू. ५. १.१२२) इति इमनिच्प्रत्ययः। ' टेः ' इति टिलोपः। ' चितः ' इत्यन्तोदात्तत्वम्। तृतीयैकवचने अल्लोपे सति उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वम्। मकारलोपश्छान्दसः। पत्सुतःशीः। पादस्याधः शेते इति पत्सुतःशीः। ' क्विप् च ' इति क्विप्। तसि ' पद्दन्° ' इत्यादिना पादशब्दस्य पदादेशः। ' शस्प्रभृतिषु ' इति प्रभृतिशब्दः प्रकारवचनः इति शलादोषणी इत्यत्रापि दोषन्नादेशो भवति इत्युक्तत्वात् ( का. ६. १. ६३ )। मध्ये सु इति शब्दोपजनश्छान्दसः। यद्वा। पादशब्दस्य सप्तमीबहुवचने पदादेशे कृते ' इतराभ्योऽपि दृश्यन्ते ' ( पा. सू. ५. ३. १४ ) इति सप्तम्यर्थे तसिल्। लुगभावश्छान्दसः॥

नीचावया अभवद्वृत्रपुत्रेन्द्रो अस्या अव वधर्जभार।
उत्तरा सूरधरः पुत्र आसीदानुः शये सहवत्सा न धेनुः॥ ९॥

नीचाऽवयाः। अभवत्। वृत्रऽपुत्रा। इन्द्रः। अस्याः। अव। वधः। जभार।
उत्ऽतरा। सूः। अधरः। पुत्रः। आसीत्। दानुः। शये। सहऽवत्सा। न। धेनुः॥ ९॥

[v]वृत्रपुत्रा वृत्रः पुत्रो यस्या मातुः सेयं माता वृत्रपुत्रा [v]नीचावयाः न्यग्भावं प्राप्ता हता [v]अभवत् पुत्रं प्रहाराद्रक्षितुं पुत्रदेहस्योपरि तिरश्ची पतितवतीत्यर्थः। तदानीम् अयम् [v]इन्द्रः [v]अस्याः मातुः [v]अव अधोभागे वृत्रस्योपरि [v]वधः हननसाधनमायुधं [v]जभार प्रहृतवान्। तदानीं [v]सूः माता [v]उत्तरा उपरिस्थिता आसीत्। [v]पुत्रः तु अधोभागस्थितः [v]आसीत्। सा च [v]दानुः दानवी वृत्रमाता [v]शये मृता शयनं कृतवती। तत्र दृष्टान्तः। [v]धेनुः लोकप्रसिद्धा गौः [v]सहवत्सा [v]न यथा वत्ससहिता शयनं करोति तद्वत्॥ नीचावयाः। वेति खादतीति वयो बाहुः। औणादिकः असिप्रत्ययः। न्यञ्चौ वयसौ यस्याः सा नीचावयाः। न्यच्शब्दादुत्तरस्या विभक्तेः ' सुपां सुपो भवन्ति ' इति तृतीयैकवचनादेशः। ' अचः ' इति अकारलोपे ' चौ ' इति दीर्घत्वम्। ' अञ्चेश्छन्दस्यसर्वनामस्थानम् ' ( पा. सू. ६. १. १७० )

---

१. झ-स-वृष्टिलाभेन तु। २. च-छ-झ-फ-उल्लङ्घितत्वात्; ष-अतिलङ्घितत्वात्। ३. च-छ-फ-व-' महिम्ना ' नास्ति। ४. झ-सहसा; ढ-' हता ' नास्ति। ५. ग-ण-र-ह-अधरः अधोभागस्थितः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति तस्योदात्तत्वम् । समासे लुगभावश्छान्दसः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । यद्वा । नीचौ निकृष्टौ वयसौ यस्याः सा । पूर्वपदस्य दीर्घश्छान्दसः । वधः । हन्यतेऽनेनेति वधः । असुनि हन्तेर्वधादेशः । नित्त्वादाद्युदात्तत्वम् । जभार । ' हृग्रहोर्भः° ' इति भत्वम् । सूः । ' षूङ् प्राणिगर्भविमोचने ' । सूते गर्भं विमुञ्चतीति सूः माता । ' क्विप् च ' इति क्विप् । दानुः । ' दो अवखण्डने ' । ' दाभाभ्यां नुः ' ( उ. सू. ३. ३१२ ) । शये । लटि ' लोपस्त आत्मनेपदेषु ' ( पा. सू. ७. १. ४१ ) इति तलोपः । ' शीङः सार्वधातुके° ' इति गुणे अयादेशः ॥

अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम् ।
वृत्रस्य निण्यं वि चरन्त्यापो दीर्घं तम आशयदिन्द्रशत्रुः ॥ १० ॥

अतिष्ठन्तीनाम् । अनिऽवेशनानाम् । काष्ठानाम् । मध्ये । निऽहितम् । शरीरम् ।
वृत्रस्य । निण्यम् । वि । चरन्ति । आपः । दीर्घम् । तमः । आ । अशयत् । इन्द्रऽशत्रुः ॥ १० ॥

[v]वृत्रस्य [v]शरीरम् [v]आपः [v]वि [v]चरन्ति विशेषेण उपरि आक्रम्य प्रवहन्ति । कीदृशं शरीरम् । [v]निण्यं निर्नामधेयम् । अप्सु सङ्गत्वेन गूढत्वात् तदीयं नाम न केनापि ज्ञायते । एतदेव स्पष्टीक्रियते । [v]काष्ठानाम् अपां [v]मध्ये [v]निहितं निक्षिप्तम् । कीदृशानां काष्ठानाम् । [v]अतिष्ठन्तीनां स्थितिरहितानां [v]अनिवेशनानाम् उपवेशनरहितानां प्रवहणस्वभावत्वात् एतासां मनुष्यवन्न क्वापि स्थितिः संभवति । [v]इन्द्रशत्रुः वृत्रः जलमध्ये शरीरे प्रक्षिप्ते सति [v]दीर्घं [v]तमः दीर्घं[1] निद्रात्मकं[1] मरणं यथा भवति तथा [v]आशयत् सर्वतः पतितवान् ॥ अतिष्ठन्तीनाम् । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । अनिवेशनानाम् । निविशन्तेऽस्मिन्निति निवेशनं स्थानम् । ' करणाधिकरणयोश्च ' इति अधिकरणे ल्युट् । तद्रहितानाम् । बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । क्रान्त्वा[2] स्थिताः काष्ठाः । पृषोदरादि । निहितम् । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । अत्र यास्कः—' अतिष्ठन्तीनामनिविशमानानामित्यस्थावराणां काष्ठानां मध्ये निहितं शरीरं मेघः । शरीरं श्रृणातेः शम्नातेर्वा । वृत्रस्य निण्यं निर्णामं विचरन्ति विजानन्त्याप इति दीर्घं द्राघतेस्तमस्तनोतेराशयदाशेतेरिन्द्रशत्रुरिन्द्रोऽस्य शमयिता वा शातयिता वा तस्मादिन्द्रशत्रुः । तत्को वृत्रो मेघ इति नैरुक्तास्त्वाष्ट्रोऽसुर इत्यैतिहासिकाः ' ( निरु. २. १६ ) इति ॥ ॥ ३७ ॥

दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः ।
अपां बिलमपिहितं यदासीद्वृत्रं जघन्वाँ अप तद्ववार ॥ ११ ॥

दासऽपत्नीः । अहिऽगोपाः । अतिष्ठन् । निऽरुद्धाः । आपः । पणिनाऽइव । गावः ।
अपाम् । बिलम् । अपिऽहितम् । यत् । आसीत् । वृत्रम् । जघन्वान् । अप । तत् । ववार ॥ ११ ॥

---

१. ढ-न–दीर्घनिद्रात्मकम् ; झ–' दीर्घं तमः.....पतितवान् ' इत्यस्य स्थाने ' दीर्घं तमः मरणं आशयत् प्रापेत्यर्थः ' इति । २. ढ–काष्ठानाम् । क्रान्त्वा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vदासपत्नीः दासः विश्वोपक्षपणहेतुः[1] वृत्रः पतिः स्वामी यासाम् अपां ताः दासपत्नीः । अत एव vअहिगोपाः । अहिर्वृत्रो गोपा रक्षको यासां ताः । गोपनं नाम स्वच्छन्देन यथा न प्रवहन्ति तथा निरोधनम् । एतदेव स्पष्टीक्रियते । vआपः vनिरुद्धाः vअतिष्ठन् इति । तत्र दृष्टान्तः । vपणिनेव vगावः । पणिनामकोऽसुरो गा अपहृत्य बिले स्थापयित्वा बिलद्वारमाच्छाद्य यथा निरुद्धवांस्तथेत्यर्थः । vअपां vयत् vबिलं प्रवहणद्वारम् vअपिहितं वृत्रेण निरुद्धम् vआसीत् vतत् बिलं प्रवहणद्वारं vवृत्रं vजघन्वान् हतवान् इन्द्रः vअप vववार अपवृतमकरोत् वृत्रकृतमपां निरोधं परिहृतवान् । अत्र यास्कः– ' दासपत्नीर्दासाधिपत्न्यो दासो दस्यतेरुपदासयति कर्माण्यहिगोपा अतिष्ठन्नहिना गुप्ताः । अहिरयनादेत्यन्तरिक्षेऽयमपीतरोऽहिरेतस्मादेव निर्हंसितोपसर्ग आहन्तीति । निरुद्धा आपः पणिनेव गावः । पणिर्वणिग्भवति पणिः पणनाद्वणिक् पण्यं नेनेक्ति । अपां बिलमपिहितं यदासीत् । बिलं भरं भवति बिभर्तेर्वृत्रं जघ्निवानपववार तद्वृत्रो वृणोतेर्वा वर्ततेर्वा वर्धतेर्वा । यदवृणोत्तद्वृत्रस्य वृत्रत्वमिति विज्ञायते । यदवर्तत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते । यदवर्धत तद्वृत्रस्य वृत्रत्वमिति विज्ञायते ' (निरु. २. १७ ) इति ॥ दासपत्नीः । ' दसु उपक्षये ' । दासयतीति दासो वृत्रः । पचाद्यच् । ' चितः ' इत्यन्तोदात्तत्वम् । दासः पतिर्यासाम् । ' विभाषा सपूर्वस्य ' ( पा. सू. ४. १. ३४ ) इति ङीप् ; तत्संनियोगेन इकारस्य नकारः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । यद्वा । दासस्य पालयित्र्यः । ' पत्यावैश्वर्ये ' इति पूर्वपदप्रकृतिस्वरत्वम् । अहिगोपाः । ' गुपू रक्षणे ' । गोपायतीति गोपाः । ' आयादय आर्धधातुके वा ' ( पा. सू. ३. १. ३१) इति आयप्रत्ययः । ततः क्विप् । ' अतो लोपः '। ' वेरपृक्तलोपाद्वलि लोपो बलीयान् ' इति पूर्वं यकारलोपः (पा.सू. ६. १. ६६-६७)। न च ' अचः परस्मिन्° ' इति अतो लोपस्य स्थानिवत्त्वं ' न पदान्तद्विर्वचन° ' इति प्रतिषेधात् । अहिर्गोपा यासाम् । पूर्ववत् स्वरः । निरुद्धाः । ' रुधिर् आवरणे ' । ' झषस्तथोर्धोऽधः ' ( पा. सू. ८. २. ४० ) इति निष्ठातकारस्य धकारः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । जघन्वान् । हन्तेर्लिटः क्वसुः । ' अभ्यासाच्च ' ( पा. सू. ७. ३. ५५ ) इति अभ्यासादुत्तरस्य हकारस्य कुत्वम् । क्रादिनियमप्राप्तस्य इटः ' विभाषा गमहन° ' ( पा. सू. ७. २. ६८ ) इत्यादिना विकल्पविधानादभावः । संहितायां नकारस्य रुत्वानुनासिकावुक्तौ ॥

**अश्व्यो वारो अभवस्तदिन्द्र सृके यत्त्वा प्रत्यहन्देव एकः ।**
**अजयो गा अजयः शूर सोममवासृजः सर्तवे सप्त सिन्धून् ॥ १२ ॥**

अश्व्यः । वारः । अभवः । तत् । इन्द्र । सृके । यत् । त्वा । प्रतिऽअहन् । देवः । एकः ।
अजयः । गाः । अजयः । शूर । सोमम् । अव । असृजः । सर्तवे । सप्त । सिन्धून् ॥ १२ ॥

vसृके वज्रे । ' सृकः वृकः ' ( नि. २. २०. ६ ) इति वज्रनामसु पठितत्वात् । vदेवः दीप्यमानः सर्वायुधकुशलः vएकः अद्वितीयः वृत्रः vयत् यदा vत्वा त्वां vप्रत्यहन् प्रतिकूलत्वेन प्रहृतवान् vतत् तदानीं त्वम् vअश्व्यो vवारः अश्वसंबन्धी वालः vअभवः । यथाश्वस्य वालोऽनायासेन मक्षिकादीन्निवारयति तद्वत् वृत्रमगणयित्वा निराकृतवानित्यर्थः । किं च vगाः पणिनापहृताः त्वम् vअजयः जितवान् । हे vशूर शौर्ययुक्त vइन्द्र vसोमम् vअजयः जितवान् । तथा च तैत्तिरीयाः—'त्वष्टा हतपुत्रः'

---

१. झ–विश्वोपक्षयणहेतुः ; न–विश्वापक्षेपणहेतुः; ढ– विश्वोपद्रवहेतुः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इत्यस्मिन्नुपाख्याने समामनन्ति—' स यज्ञवेशसं कृत्वा प्रासहा सोममपिबत् ' (तै. सं. २. ४. १२. १ ) इति । Vसप्त Vसिन्धून् ' इमं मे गङ्गे ' ( ऋ. सं. १०. ७५. ५ ) इत्यस्यामृच्याम्नाता गङ्गाद्याः सप्तसंख्याका नदीः Vसर्तवे सर्तुं प्रवाहरूपेण गन्तुम् Vअवासृजः त्यक्तवान्। वृत्रकृतं प्रवाहनिरोधं निराकृतवानित्यर्थः ॥ अश्व्यः । अश्वे भवः। ' भवे छन्दसि ' इति यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम्। वारयति दंशमशकानिति वारः । पचाद्यच् । कपिलकादित्वात् लत्वविकल्पः ( पा. म. ८. २. १८ )। वृषादित्वादाद्युदात्तत्वम् । प्रत्यहन् । ' यद्वृत्तान्नित्यम् ' इति निघातप्रतिषेधः । ' तिङि चोदात्तवति ' इति गतेरनुदात्तत्वम् । अजयः । गाः इत्यस्य वाक्यान्तरगतत्वात् तदपेक्षयास्य ' तिङ्ङतिङः इति निघातो न भवति, ' समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः ' (पा. सू. ८. १. १८. ५) इति वचनात् । सर्तवे । ' तुमर्थे सेसेन्° ' इति तवेन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् ॥

**नास्मै विद्युन्न तन्यतुः सिषेध न यां मिहमकिरद्ध्रादुनिं च ।**
**इन्द्रश्च यद्युयुधाते अहिश्चोतापरीभ्यो मघवा वि जिग्ये ॥ १३ ॥**

न । अस्मै । विऽद्युत् । न । तन्यतुः । सिसेध । न । याम् । मिहम् । अकिरत् । ह्रादुनिम् । च । इन्द्रः । च । यत् । युयुधाते इति । अहिः । च । उत । अपरीभ्यः । मघऽवा । वि । जिग्ये ॥१३॥

इन्द्रं निषेद्धुं वृत्रो यान् विद्युदादीन् मायया निर्मितवान् ते सर्वेऽप्येनं निषेद्धुमशक्ताः । सोऽयमर्थोऽनेन मन्त्रेणोच्यते । Vअस्मै इन्द्रार्थं निर्मिता Vविद्युत् Vन Vसिषेध इन्द्रं न प्राप्नोत् । तथा Vतन्यतुः गर्जनं Vयां Vमिहं सेचनं[1] यां[1] वृष्टिम् Vअकिरत् वृत्रो विक्षिप्तवान् सापि वृष्टिः Vन सिषेध । Vह्रादुनिं Vच अशनिमपि यां वृत्रः प्रयुक्तवान् सापि न सिषेध । Vइन्द्रश्च Vअहिश्च इन्द्रवृत्रावुभावपि Vयत् यदा Vयुयुधाते युद्धं कृतवन्तौ । तदानीं विद्युदादयो न प्राप्ता इति पूर्वत्रान्वयः । Vउत अपि च Vमघवा धनवानिन्द्रः Vअपरीभ्यः अपराभ्यः अन्यासामपि वृत्रनिर्मितानां मायानां सकाशात् Vवि Vजिग्ये विशेषेण जितवान् ॥ सिषेध । ' षिधु गत्याम् ' । मिहम् । ' मिह सेचने ' । मेहति सिञ्चतीति मिट् वृष्टिः । ' क्विप् च ' इति क्विप् । अकिरत् । ' कॄ विक्षेपे ' । ' तुदादिभ्यः शः ' । ' ऋत इद्धातोः ' इति इत्वम् । अडागम उदात्तः । यद्वृत्तयोगादनिघातः । युयुधाते । ' युध संप्रहारे ' । लिटि प्रत्ययस्वरः । जिग्ये । ' सन्लिटोर्जेः ' ( पा. सू. ७. ३. ५७ ) इति अभ्यासादुत्तरस्य जकारस्य कुत्वम् ॥

**अहेर्यातारं कमपश्य इन्द्र हृदि यत्ते जघ्नुषो भीरगच्छत् ।**
**नव च यन्नवतिं च स्रवन्तीः श्येनो न भीतो अतरो रजांसि ॥ १४ ॥**

अहेः । यातारम् । कम् । अपश्यः । इन्द्र । हृदि । यत् । ते । जघ्नुषः । भीः । अगच्छत् । नव । च । यत् । नवतिम् । च । स्रवन्तीः । श्येनः । न । भीतः । अतरः । रजांसि ॥१४॥

हे Vइन्द्र Vजघ्नुषः वृत्रं हतवतः तव Vहृदि चित्ते Vयत् यदि Vभीरगच्छत् न हतवानस्मीति बुद्ध्या भयं प्राप्नुयात् तर्हि Vअहेः वृत्रस्य Vयातारं हन्तारं Vकमपश्यः त्वत्तोऽन्यंV कं पुरुषं दृष्टवानसि ।

---

१. ढ—सेचनकाम् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तादृशस्य पुरुषान्तरस्याभावात् मा भूत् तव भयमित्यर्थः । [v]यत् यस्मात् कारणात् त्वं [v]नव [v]च [v]नवतिं [v]च [v]स्रवन्तीः एकोनशतसंख्याकाः प्रवहन्तीर्नदीः प्राप्य [v]रजांसि तत्रत्यान्युदकानि [v]अतरः तीर्णवानसि । तत्र दृष्टान्तः । [v]श्येनो [v]न । श्येननामको बलवान् पक्षीव दूरगमनात्तव भयमासीदिति गम्यते । तद्भयं मा भूदित्यभिप्रायः । तच्च दूरगमनं ब्राह्मणे समाम्नातम्–'इन्द्रो वै वृत्रं हत्वा नास्तृषीति मन्यमानः पराः परावतोऽगच्छत्' (ऐ. ब्रा. ३. १५) इति । तैत्तिरीयाश्चामनन्ति—'इन्द्रो वृत्रं हत्वा परां परावतमगच्छदपाराधमिति मन्यमानः' (तै. सं. २. ५. ३. ६) इति ॥ हृदि । 'पद्दन्०' इत्यादिना हृदयशब्दस्य हृदादेशः । 'ऊडिदम्०' इत्यादिना विभक्तेरुदात्तत्वम् । जघ्नुषः । हन्तेर्लिटः क्वसुः । षष्ठ्येकवचने 'वसोः संप्रसारणम्' इति संप्रसारणपरपूर्वत्वे । 'शासिवसिघसीनां च' इति षत्वम् । न च 'षत्वतुकोरसिद्धः' (पा. सू. ६. १. ८६) इत्येकादेशस्यासिद्धत्वात् षत्वं न प्राप्नुयादिति वाच्यं, 'संप्रसारणङीट्सु प्रतिषेधो वक्तव्यः' (का. ६. १. ८६. १) इति असिद्धवद्भावस्य प्रतिषिद्धत्वात् । 'गमहन०' इत्यादिना उपधालोपः । न च 'असिद्धवदत्रा भात्' इति संप्रसारणस्यासिद्धवद्भावः, भिन्नाश्रयत्वात् । संप्रसारणं हि षष्ठ्येकवचने उपधालोपस्तु वसाविति भिन्नाश्रयत्वम् । स्रवन्तीः । 'स्रु गतौ' । 'शप्श्यनोर्नित्यम्' (पा. सू. ७. १. ८१) इति नुमागमः । शपः पित्त्वादनुदात्तत्वम् । शतुश्च लसार्वधातुकस्वरेणाद्युदात्तत्वम् । अतरः । यद्वृत्तयोगादनिघातः ॥

इन्द्रो यातोऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः ।
सेदु राजा क्षयति चर्षणीनामरान्न नेमिः परि ता बभूव ॥ १५ ॥

इन्द्रः । यातः । अवऽसितस्य । राजा । शमस्य । च । शृङ्गिणः । वज्रऽबाहुः ।
सः । इत् । ऊँ इति । राजा । क्षयति । चर्षणीनाम् । अरान् । न । नेमिः । परि । ता । बभूव ॥ १५ ॥

[v]वज्रबाहुः [v]इन्द्रः शत्रौ हते सति निःसपत्नो भूत्वा [v]यातः गच्छतो जङ्गमस्य [v]अवसितस्य एकत्रैव स्थितस्य स्थावरस्य [v]शमस्य शान्तस्य शृङ्गराहित्येन प्रहरणादावप्रवृत्तस्याश्वगर्दभादेः [v]शृङ्गिणः शृङ्गोपेतस्योग्रस्य महिषबलीवर्दादेश्च [v]राजा अभूत् । [v]सेदु स एवेन्द्रः [v]चर्षणीनां मनुष्याणां [v]राजा भूत्वा [v]क्षयति निवसति । [v]ता तानि पूर्वोक्तानि जङ्गमादीनि सर्वाणि [v]परि [v]बभूव व्याप्तवान् । तत्र दृष्टान्तः । [v]अरान् [v]न [v]नेमिः । यथा रथचक्रस्य परितो वर्तमाना नेमिः अरान् नाभौ कीलितान् काष्ठविशेषान् व्याप्नोति तद्वत् ॥ यातः । 'या प्रापणे' । याति गच्छतीति यात् । लटः शतृ । 'सावेकाचः०' इति विभक्तेरुदात्तत्वम् । सः । 'सोऽचि लोपे चेत्०' इति संहितायां सोर्लोपः । ता । 'शेश्छन्दसि बहुलम्' इति शेर्लोपः । बभूव । भवतेर्लिटो णलि 'भवतेरः' (पा. सू. ७. ४. ७३) इति अभ्यासस्य अत्वम् । कृताकृतप्रसङ्गितया वुगागमस्य नित्यत्वात् वृद्धेः पूर्वं वुगागमः । यद्वा । 'इन्धिभवतिभ्यां च' (पा. सू. १. २. ६) इति लिटः कित्त्वात् वृद्ध्यभावः । न च 'असिद्धवदत्रा भात्' इति तस्यासिद्धत्वात् उवङादेशः शङ्कनीयः, 'वुग्युटावुवङ्यणोः सिद्धौ भवतः' (पा. सू. ६. ४. २२. १४) इति तस्य सिद्धत्वात् । 'तिङ्ङतिङः' इति निघातः ॥ ॥ ३८ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणामात्येन विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके द्वितीयोऽध्यायः समाप्तः ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ तृतीयाध्याय आरभ्यते । 'त्वमग्ने प्रथमः' इति सप्तमानुवाके पञ्च सूक्तानि । तत्र 'एतायाम' इति तृतीयं सूक्तं पञ्चदशर्चम् । 'ऋषिश्चान्यस्मात्' इति परिभाषया आङ्गिरसो हिरण्यस्तूप ऋषिः । अनुक्तत्वात् इन्द्रो देवता । त्रिष्टुप् छन्दः । 'एत' इत्यनुक्रमणिका । गोसववीवधयोर्निष्केवल्ये 'एतायाम' इति सूक्तं विनियुक्तम् । तथा च सूत्रितम् 'अतिमूर्तिना यक्ष्यमाणः' इति खण्डे— 'गोसवीववधौ पशुकाम इन्द्र सोममेतायामेति मध्यंदिनः' ( आश्व. श्रौ. ९. ८ ) इति ॥

एतायामोप गव्यन्त इन्द्रमस्माकं सु प्रमतिं वावृधाति ।
अनामृणः कुविदादस्य रायो गवां केतं परमावर्जते नः ॥ १ ॥

आ । इत । अयाम । उप । गव्यन्तः । इन्द्रम् । अस्माकम् । सु । प्रऽमतिम् । ववृधाति ।
अनामृणः । कुवित् । आत् । अस्य । रायः । गवाम् । केतम् । परम् । आऽवर्जते । नः ॥ १ ॥

देवाः परस्परमेवं कथयन्ति । हे देवाः vगव्यन्तः पणिनामकेनासुरेणापहृता अस्मदीया गाः प्राप्तुमिच्छन्तो यूयं vएत आगच्छत । युष्माभिः सहिता वयम् vइन्द्रं गवानयनक्षमम् vउप vअयाम प्राप्नवाम । स चेन्द्रः vअनामृणः हिंसकरहितः सन् vअस्माकं देवानां vप्रमतिं गोलाभेन हर्षयित्वा प्रकृष्टां बुद्धिं vसु vववृधाति सुष्ठु वर्धयति । vआत् अनन्तरं स इन्द्रः vअस्य vरायः धनस्य vगवां गोरूपस्य संबन्धि vपरं vकेतं उत्कृष्टं ज्ञानं vनः अस्माकं vकुवित् vआवर्जते अधिकं प्रापयति ॥ इत । 'इण् गतौ' । अदादित्वात् शपो लुक् । अयाम । एतेर्लोडुत्तमबहुवचने 'आडुत्तमस्य पिच्च' इति आडागमः । पिद्वद्भावात् सार्वधातुकलक्षणे गुणे अयादेशः । न च 'इणो यण्' (पा. सू. ६. ४. ८१ ) इति यणादेशः । 'मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते' (परिभा. ६० ) इति वचनात् तस्य इयङादेशापवादत्वात् । अतः परत्वात् गुणेन यणादेशो बाध्यते । पिद्वद्भावात् प्रत्ययस्यानुदात्तत्वे धातुस्वरेणाद्युदात्तत्वम् । गव्यन्तः । गा आत्मनः इच्छन्तः । 'सुप आत्मनः क्यच्' इति गोशब्दात् कर्मणः क्यच् । 'वान्तो यि प्रत्यये' ( पा. सू. ६. १. ७९ ) इति अवादेशः । प्रत्ययान्तात् धातोर्लटः शतृ । तस्य अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरः । प्रमतिम् । मन्यतेः क्तिनि 'अनुदात्तोपदेश०' इत्यादिना अनुनासिकलोपः । 'तादौ च०' ( पा. सू. ६. २. ५० ) इति गतेः प्रकृतिस्वरत्वम् । ववृधाति । 'वृधु वृद्धौ' । लेटि आडागमः । 'बहुलं छन्दसि' इति शपः श्लुः । संहितायामभ्यासस्य दीर्घश्छान्दसः । अनामृणः । 'मृण हिंसायाम्' । मृणन्ति हिंसन्तीति मृणाः । इगुपधलक्षणः कः । न सन्ति अमृणाः अस्य इति बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । अस्य रायः । 'ऊडिदम्०' इत्युभयत्र विभक्तेरुदात्तत्वम् । गवाम् । 'सावेकाचः०' इति प्राप्तस्य विभक्त्युदात्तस्य 'न गोश्वन्सावव्रर्ण०' इति प्रतिषेधः । केतम् । 'कित ज्ञाने' । घञन्त आद्युदात्तः । आवर्जते । 'वृजी वर्जने' । अदादित्वात् शपो लुकि प्राप्ते 'बहुलं छन्दसि' इति तदभावः । शपः पित्त्वादनु-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दात्तत्वम्। तिङश्च लसार्वधातुकत्वेन धातुस्वरः। 'तिङि चोदात्तवति' (पा. सू. ८. १. ७१) इति गतेरनुदात्तत्वम्। कुविद्योगात् 'निपातैर्यद्यदिहन्त०' (पा. सू. ८. १. ३०) इत्याद्विना निघातप्रतिषेधः॥

उपेदहं धनदामप्रतीतं जुष्टां न श्येनो वसतिं पतामि।
इन्द्रं नमस्यन्नुपमेभिरर्कैर्यः स्तोतृभ्यो हव्यो अस्ति यामन्॥ २॥

उप। इत्। अहम्। धनऽदाम्। अप्रतिऽइतम्। जुष्टाम्। न। श्येनः। वसतिम्। पतामि।
इन्द्रम्। नमस्यन्। उपऽमेभिः। अर्कैः। यः। स्तोतृऽभ्यः। हव्यः। अस्ति। यामन्॥ २॥

[v]यः इन्द्रः [v]स्तोतृभ्यः स्तोतृणामनुष्ठातृणामनुग्रहार्थं [v]यामन् तदीयशत्रुभिः सह प्रवृत्ते युद्धे [v]हव्यः [v]अस्ति तैराह्वातव्यो भवति तम् [v]इन्द्रम् [v]अहम् अनुष्ठाता [v]उपेत् [v]पतामि उपाप्नोम्येव। किं कुर्वन्। [v]उपमेभिः उपमानस्थानीयैरुत्तमैः [v]अर्कैः स्तोत्रैः सह [v]नमस्यन् पूजयन्। कीदृशमिन्द्रम्। [v]धनदां धनप्रदम् [v]अप्रतीतम् अप्रतिगतं बलिभिरतिरस्कृतमित्यर्थः। इन्द्रप्राप्तौ दृष्टान्तः। [v]जुष्टां पूर्वैः सेवितां [v]वसतिं स्वकीयनीडरूपां निवासभूमिं [v]श्येनः [v]न। यथा श्येननामको वेगवान् पक्षी स्वकीयस्थानं प्रति आदरेण धावति तद्वत् अहम् इन्द्रं त्वरया प्राप्नोमि॥ धनदाम्। धनं ददातीति धनदाः। 'आतो मनिन्०' इत्यादिना विच्। अप्रतीतम् शत्रुभिर्न प्रतिगतम्। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। जुष्टाम्। 'जुषी प्रीतिसेवनयोः'। 'श्वीदितो निष्ठायाम्' (पा. सू. ७. २. १४) इति इट्प्रतिषेधः। 'नित्यं मन्त्रे' (पा. सू. ६. १. २१०) इत्याद्युदात्तत्वम्। पतामि। लेटि आडागमः। नमस्यन्। नमस्शब्दात् पूजार्थे 'नमोवरिवः०' (पा. सू. ३. १. १९) इति क्यच्। प्रत्ययस्वरः। अदुपदेशात् लसार्वधातुकानुदात्तस्य एकादेशस्वरेणोदात्तत्वम्। उपमीयन्ते एभिरित्युपमाः। 'माङ् माने'। 'घञर्थे कविधानम्०' (पा. सू. ३. ३. ५८. ४) इति कः। 'बहुलं छन्दसि' इति भिस ऐसादेशाभावः। कृदुत्तरपदप्रकृतिस्वरत्वम्। हव्यः। ह्वेञो 'बहुलं छन्दसि' इति संप्रसारणम्। 'अचो यत्' इति यत्। गुणः। 'धातोस्तन्निमित्तस्यैव' (पा. सू. ६. १. ८०) इति अवादेशः। 'यतोऽनावः' इत्याद्युदात्तत्वम्। यामन्। 'या प्रापणे'। मनिनो नित्त्वादाद्युदात्तत्वम्। 'सुपां सुलुक्०' इति सप्तम्या लुक्॥

नि सर्वसेन इषुधीँरसक्त समर्यो गा अजति यस्य वष्टि।
चोष्कूयमाण इन्द्र भूरि वामं मा पणिर्भूरस्मदधि प्रवृद्ध॥ ३॥

नि। सर्वऽसेनः। इषुऽधीन्। असक्त। सम्। अर्यः। गाः। अजति। यस्य। वष्टि।
चोष्कूयमाणः। इन्द्र। भूरि। वामम्। मा। पणिः। भूः। अस्मत्। अधि। प्रऽवृद्ध॥ ३॥

[v]सर्वसेनः कृत्स्नसेनायुक्तः [v]इषुधीन् बाणानामाधारभूतान् निषङ्गान् [v]नि [v]असक्त नितरां पृष्ठभागे संयोजितवान्। [v]अर्यः स्वामिरूप इन्द्रः [v]यस्य देवस्य [v]वष्टि असुरेणापहृता गाः प्रदातुं कामयते तस्य देवस्य गृहे ताः [v]गाः [v]सम् [v]अजति सम्यक् प्रापयति। हे [v]प्रवृद्ध प्रकृष्टवृद्धियुक्त [v]इन्द्र

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]भूरि [V]वामं प्रभूतं गोरूपं धनं [V]चोष्कूयमाणः अस्मभ्यं प्रयच्छन् [V]अस्मदधि अस्मासु [V]पणिः [V]मा [V]भूः व्यवहारी मा भूयाः । गवां मूल्यं मा याचस्वेत्यर्थः ॥ सर्वसेनः । इनेन सह वर्तते इति सेना । ' वोपसर्जनस्य ' ( पा. सू. ६. ३. ८२ ) इति सभावः । सर्वा सरणशीला सेना यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । ' प्रत्ययलक्षणेनाप्ययं स्वर इष्यते ' ( का. ६. १. १९१ ) इति वचनात् प्रत्ययलक्षणेन ' सर्वस्य सुपि ' ( पा. सू. ६. १. १९१ ) इति सर्वशब्द आद्युदात्तः । इषुधीन् । इषव एषु धीयन्ते इति इषुधयः । ' कर्मण्यधिकरणे च ' (पा. सू. ३. ३. ९३) इति किप्रत्ययः । संहितायां ' दीर्घादटि° ' इत्यादिना नकारस्य रुत्वम् । ' अत्रानुनासिकः पूर्वस्य तु वा ' (पा. सू. ८. ३. २) इति पूर्वस्वरोऽनुनासिकः । असक्त । ' षच समवाये ' । ' बहुलं छन्दसि ' इति शपो लुक् । अर्यः । ' अर्यः स्वामिवैश्ययोः '( पा. सू. ३. १. १०३ ) इति यत्प्रत्ययान्तो निपातितः । ' अर्यस्य स्वाम्याख्या चेत् ' ( फि. सू. १७) इत्यन्तोदात्तत्वम् । अजति । ' अज गतिक्षेपणयोः ' । वष्टि । ' वश कान्तौ ' । अदादित्वात् शपो लुक् । व्रश्चादिषत्वे ष्टुत्वम् । चोष्कूयमाणः । ' स्कुञ् आप्रवणे ' । ' धातोरेकाचः° ' इति यङ् । अकृत्सार्वधातुकयोर्दीर्घः । द्विर्वचने ' शर्पूर्वाः खयः ' (पा. सू. ७. ४. ६१) इति ककारः शिष्यते सकारो लुप्यते । ' कुहोश्चुः ' (पा. सू. ७. ४. ६२ ) इति चुत्वे ' गुणो यङ्लुकोः ' ( पा. सू. ७. ४. ८२ ) इति गुणः । सुषामादित्वात् षत्वम् । यङन्तात् लटः शानच् । अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरः । भूः । ' गातिस्था° ' इति सिचो लुक् ॥

वधीर्हि दस्युं धनिनं घनेनँ एकश्चरन्नुपशाकेभिरिन्द्र ।
धनोरधि विषुणक्ते व्यायन्नयज्वानः सनकाः प्रेतिमीयुः ॥ ४ ॥

वधीः । हि । दस्युम् । धनिनम् । घनेन । एकः । चरन् । उपऽशाकेभिः । इन्द्र ।
धनोः । अधि । विषुणक् । ते । वि । आयन् । अयज्वानः । सनकाः । प्रऽइतिम् । ईयुः ॥४॥

हे [V]इन्द्र [V]धनिनं बहुधनोपेतं [V]दस्युं चोरं वृत्रं [V]घनेन कठिनेन वज्रेण [V]वधीर्हि त्वं हतवान् खलु। धनित्वं वाजसनेयिनोऽपि स्पष्टमामनन्ति– ' वृत्रस्यान्तः सर्वे देवाः सर्वाश्च विद्याः सर्वाणि हवींषि चासन् ' इति । [V]उपशाकेभिः समीपवर्तिभिः शक्तियुक्तैर्मरुद्भिः सहितो भूत्वा [V]एकश्चरन् । प्रहर्तुं स्वयमेक एव गच्छन् । यद्यपि मरुतः समीपे वर्तन्ते तथापि ते प्रोत्साहयन्त्येव न तु वृत्रं प्रहरन्ति । प्रहर्ता तु स्वयमेक एव । तथा च ब्राह्मणे समाम्नातं–' मरुतो हैनं नाजहुः प्रहर भगवो वीरयस्वेत्येवैनमेतां वाचं वदन्त उपातिष्ठन्त ' ( ऐ. ब्रा. ३. २० ) इति । [V]धनोरधि इन्द्रसंबन्धिनो धनुष उपरि [V]विषुणक् विविधं नाशमुद्दिश्य यद्वा विष्वक् सर्वतः[1] [V]ते वृत्रानुचराः [V]व्यायन् विविधमागच्छन् । आगत्य च [V]अयज्वानः यज्ञविरोधिनः सन्तः [V]सनकाः एतन्नामका वृत्रानुचराः [V]प्रेतिमीयुः मरणं प्राप्ताः ॥ वधीः । ' हन हिंसागत्योः ' । ' लुङि च ' ( पा. सू. २. ४. ४३ ) इति वधादेशः । स च अदन्तः । तस्य ' आतो लोपः° ' इति लोपे सति स्थानिवद्भावात् ' अतो हलादेः° ' ( पा. सू. ७. २. ७ ) इति वृद्ध्यभावः । ' इट ईटि ' ( पा. सू. ८. २. २८ ) इति सिचो लोपः । आगमानुदात्तत्वे धात्वकारस्योदात्तत्वम् । घनेनँ एकः । ' ईषा अक्षादिषु च्छन्दसि प्रकृतिभावमात्रं वक्तव्यम् ' ( पा. सू. ६. १. १२७. २ ) इति संहितायां प्रकृतिभावः । अनुनासिकश्छान्दसः ।

---

१, च-छ-झ-ण-न-फ–समन्ततः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उपशाकेभिः। उपशक्तं कुर्वन्तीति उपशाकाः। 'शक्लृ शक्तौ'। अस्मात् हेतुमण्ण्यन्तात् पचाद्यच्। थाथादिस्वरेणोत्तरपदान्तोदात्तत्वम्। विषुणक्। विषुपूर्वात् नशेः संपदादिलक्षणः क्विप्। 'नशेर्वा' (पा. सू. ८. २. ६३) इति कुत्वम्। यद्वा। विषुपूर्वस्य अञ्चतेर्नुडागमः। सनका इत्यसुराणां नाम। 'षणु दाने'। सन्वन्ति ददतीति सना दातारः। पचाद्यच्। सनान् कायन्ति शब्दयन्तीति सनकाः। 'आतोऽनुपसर्गे कः'। 'आतो लोप इटि च' इति आकारलोपः। कृदुत्तरपदप्रकृतिस्वरत्वम्। प्रेतिम्। 'तादौ च निति°' इति गतेः प्रकृतिस्वरत्वम्। ईयुः। एतेः उसिपरत्वात् 'इणो यण्' इति यणादेशे 'द्विर्वचनेऽचि' इति स्थानिवद्भावात् इकारस्य द्विर्वचनम्। 'दीर्घ इणः किति' (पा. सू. ७. ४. ६९) इत्यभ्यासस्य दीर्घत्वम्॥

परा चिच्छीर्षा ववृजुस्त इन्द्रायज्वानो यज्वभिः स्पर्धमानाः।
प्र यद्दिवो हरिवः स्थातरुग्र निरव्रताँ अधमो रोदस्योः॥ ५॥

परा। चित्। शीर्षा। ववृजुः। ते। इन्द्र। अयज्वानः। यज्वऽभिः। स्पर्धमानाः।
प्र। यत्। दिवः। हरिऽवः। स्थातः। उग्र। निः। अव्रतान्। अधमः। रोदस्योः॥ ५॥

हे vइन्द्र vते वृत्रानुचराः vशीर्षा स्वकीयानि शिरांसि vपरा vचित् पराङ्मुखान्येव कृत्वा vववृजुः गतवन्तः। कीदृशास्ते। vअयज्वानः स्वयं यागरहिताः प्रत्युत vयज्वभिः यागानुष्ठातृभिः सह vस्पर्धमानाः। हे vहरिवः हरिनामकाश्वयुक्त vस्थातः स्थितियुक्त युद्धे पलायनरहित vउग्र शौर्ययुक्तेन्द्र vयत् यदा vदिवः अन्तरिक्षात् vरोदस्योः द्यावापृथिव्योः सकाशाच्च vअव्रतान् व्रतरहितान् वृत्रानुचरान् vनिः vप्र vअधमः निःशेषेण धमनं कृतवानसि तदानीं त्वदीयमुखवायुना नुन्नाः सन्तो ववृजुरिति पूर्वत्रान्वयः॥ शीर्षा। 'शेश्छन्दसि बहुलम्' (पा. सू. ६. १. ७०) इति शेर्लोपः। ववृजुः। 'वृजी वर्जने'। 'असंयोगाल्लिट् कित्' (पा. सू. १. २. ५) इति कित्त्वाद्गुणाभावः। अयज्वानः। यजतेः 'सुयजोर्ङ्वनिप्' (पा. सू. ३. २. १०३) इति भूते ङ्वनिप्प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तत्वम्। नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम्। दिवः। 'ऊडिदम्°' इति विभक्तेरुदात्तत्वम्। हरिवः। हरी अस्य स्त इति हरिवान्। 'छन्दसीरः' इति मतुपो वत्वम्। संबुद्धौ 'मतुवसोः°' इति रुत्वम्। अव्रतान्। बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। 'दीर्घादटि°' इति संहितायां नकारस्य रुत्वम्। 'आतोऽटि नित्यम्' इति सानुनासिक आकारः। अधमः। 'ध्मा शब्दाग्निसंयोगयोः'। लङि सिपि शपि 'पाघ्रा°' इत्यादिना धमादेशः॥ ॥ १॥

अयुयुत्सन्ननवद्यस्य सेनामयातयन्त क्षितयो नवग्वाः।
वृषायुधो न वध्रयो निरष्टाः प्रवद्भिरिन्द्राच्चितयन्त आयन्॥ ६॥

अयुयुत्सन्। अनवद्यस्य। सेनाम्। अयातयन्त। क्षितयः। नवऽग्वाः।
वृषऽयुधः। न। वध्रयः। निःऽअष्टाः। प्रवत्ऽभिः। इन्द्रात्। चितयन्तः। आयन्॥ ६॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]अनवद्यस्य गर्हणीयदोषरहितस्येन्द्रस्य [v]सेनां प्रति [v]अयुयुत्सन् वृत्रस्यानुचरा योद्धुमैच्छन्। तदानीं [v]नवग्वाः नवनीयगतयः[1] स्तोतव्यचरित्राः। यद्वा। अङ्गिरसां सत्रमासीनानां मध्ये ये नवभिर्मासैरवाप्तफला उत्थितास्तेषां नवग्वा इति संज्ञा। 'नवग्वासः सुतसोमास इन्द्रम्' (ऋ.सं. ५. २९. १२) इत्यादिषु तथाभिहितत्वात्। [v]क्षितयः मनुष्या अङ्गिरःप्रभृतयः। 'क्षितयः कृष्टयः' (नि. २. ३. ६) इति तन्नामसु पाठात्। [v]अयातयन्त। युद्धार्थमिन्द्रं नानाविधैर्मन्त्रैः प्रोत्साहितवन्तः। इन्द्रे योद्धुं गते सति [v]निरष्टाः तेनेन्द्रेण निराकृता वृत्रानुचराः [v]चितयन्तः स्वकीयामशक्तिं ज्ञापयन्तः [v]इन्द्रात् इन्द्रस्य सकाशात् [v]प्रवद्भिः प्रवणैः पलायितुं[2] सुशक्तैर्मार्गैः [v]आयन् दूरे गतवन्तः। तत्र दृष्टान्तः। [v]वृषायुधः वृषेण सेचनसमर्थेन पुंस्त्वयुक्तेन शूरेण सह युद्धं कुर्वन्तः [v]वध्रयः [v]न नपुंसका इव। 'निसर्गपण्डो वध्रिश्च' इत्यादिस्मृतिषु[3] प्रयोगात्[3]। ते यथा प्रबलेन दूरे निराकृता भवन्ति तद्वत्॥ अयुयुत्सन्। 'युध संप्रहारे'। सनि 'हलन्ताच्च' (पा. सू. १. २. १०) इति सनः कित्त्वाद्गुणाभावः। 'एकाच उपदेशेऽनुदात्तात्' (पा. सू. ७. २. १०) इति इट्प्रतिषेधः। व्यत्ययेन परस्मैपदम्। सेनाम्। इनेन सह वर्तते इति सेना। 'वोपसर्जनस्य' इति सहशब्दस्य सभावः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। अयातयन्त। 'यती प्रयत्ने'। 'हेतुमति च' इति णिच्। क्षितयः। 'क्षि निवासगत्योः'। क्षियन्ति गच्छन्तीति क्षितयो मनुष्याः। 'क्तिच्क्तौ च संज्ञायाम्' इति क्तिच्। नवग्वाः। नवभिर्मासैर्गच्छन्तीति नवग्वाः। गमेः औणादिको डुप्रत्ययः। यद्वा। क्विपि 'गमः क्वौ' (पा. सू. ६. ४. ४०) इत्यनुनासिकलोपे 'ऊ च गमादीनामिति वक्तव्यम्' (पा. सू. ६. ४. ४०. २) इति अकारस्य ऊकारः। जसि 'ओः सुपि' (पा. सू. ६. ४. ८३) इति यणादेशः। दीर्घश्छान्दसः। वृषायुधः। 'क्विप् च' इति क्विप्। 'क्विप् च' इत्यत्र 'सोपपदेभ्यो निरुपपदेभ्यः' (का. ३. २. ७६) इत्युक्तत्वादत्र सोपपदेभ्यः क्विप्। 'अन्येषामपि दृश्यते' इति पूर्वपदस्य संहितायां दीर्घः। निरष्टाः। 'अशू व्याप्तौ'। भावे निष्ठा। 'यस्य विभाषा' (पा. सू. ७. २. १५) इति इट्प्रतिषेधः। व्रश्चादिना षत्वे ष्टुत्वम्। निसा च बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। यद्वा। निरस्ता इत्यत्र सकारस्य षत्वं छान्दसम्। तदानीम् अस्ता इत्येतत् कर्मणि निष्ठेति 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। प्रवद्भिः। 'वन षण संभक्तौ'। अस्मात् प्रपूर्वात् क्विप्। 'गमादीनामिति वक्तव्यम्' (पा. सू. ६. ४. ४०. १) इत्यनुनासिकलोपः। ततः तुक्। कृदुत्तरपदप्रकृतिस्वरत्वम्। चितयन्तः। 'चिती संज्ञाने'। अस्मात् ण्यन्तात् लटः शतृ। शप्। 'अनित्यमागमशासनम्' इति वचनात् लघूपधगुणाभावः॥

**त्वमेतान्रुदतो जक्षतश्चायोधयो रजस इन्द्र पारे।**
**अवादहो दिव आ दस्युमुच्चा प्र सुन्वतः स्तुवतः शंसमावः॥ ७॥**

त्वम्। एतान्। रुदतः। जक्षतः। च। अयोधयः। रजसः। इन्द्र। पारे।
अव। अदहः। दिवः। आ। दस्युम्। उच्चा। प्र। सुन्वतः। स्तुवतः। शंसम्। आवः॥७॥

हे [v]इन्द्र [v]त्वं [v]रुदतः रोदनं कुर्वतः [v]जक्षतः भक्षणं हसनं वा कुर्वतः [v]च [v]एतान् द्विविधानपि वृत्रानुचरान् [v]रजसः [v]पारे अन्तरिक्षस्य परभागे। रजःशब्दोऽन्तरिक्षवाची, 'लोका रजांस्युच्यन्ते'

---

१. च-छ-ण-त-ध-न-फ-श-स–नवनीतगतयः। २. छ-ण-त-ध-न–पालयितुम्। ३. ढ–इति स्मरणात्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

(निरु. ४. १९) इत्युक्तत्वात्। vअयोधयः युद्धमकरोः युद्धेन मारितवानित्यर्थः। vदस्युम् उपक्षयितारं[1] वृत्रं vदिवः vआ द्युलोकादानीय vउच्चा उत्कर्षेण vअवादहः दग्धवानसि। वृत्रं सपरिवारं विनाश्य तत ऊर्ध्वं vसुन्वतः सोमाभिषवं कुर्वतः vस्तुवतः स्तोत्रं कुर्वतो यजमानस्य vशंसं स्तुतिं vप्र vआवः प्रकर्षेण रक्षितवानसि॥ रुदतः। 'रुदिर् अश्रुविमोचने'। लटः शतृ। अदादित्वात् शपो लुक्। प्रत्ययस्वरेणान्तोदात्तत्वम्। 'शतुरनुमः०' इति शस उदात्तत्वम्। जक्षतः। 'जक्ष भक्षहसनयोः'। पूर्ववत् शपो लुक्। 'जक्षित्यादयः षट्' (पा. सू. ६. १. ६) इति अभ्यस्तसंज्ञा। अतः 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम्। सुन्वतः। सुनोतेः शतरि 'स्वादिभ्यः श्नुः'। 'हुश्नुवोः०' इत्यादिना यणादेशः। 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम्। स्तुवतः। 'ष्टुञ् स्तुतौ'। अदादित्वात् शपो लुक्। उवङादेशः। पूर्ववत्स्वरः॥

चक्राणासः परीणहं पृथिव्या हिरण्येन मणिना शुम्भमानाः।
न हिन्वानासस्तितिरुस्त इन्द्रं परि स्पशो अदधात्सूर्येण॥ ८॥

चक्राणासः। परिऽनहम्। पृथिव्याः। हिरण्येन। मणिना। शुम्भमानाः।
न। हिन्वानासः। तितिरुः। ते। इन्द्रम्। परि। स्पशः। अदधात्। सूर्येण॥ ८॥

ये वृत्रानुचराः vपृथिव्याः भूमेः vपरीणहम् आच्छादनं सर्वतो व्याप्तिं vचक्राणासः कुर्वाणाः vहिरण्येन हिरण्ययुक्तेन vमणिना कण्ठबाह्वादिगतेन मण्याद्याभरणेन vशुम्भमानाः शोभमानाः vहिन्वानासः वर्धमानाः सन्तो वर्तन्ते vते तथाविधा वृत्रानुचराः vइन्द्रं युद्धायोद्यन्तं[2] vन vतितिरुः जेतुं न समर्था आसन्। तदानीं स इन्द्रः vस्पशः बाधकान् वृत्रानुचरान् vसूर्येण आदित्येन vपरि vअदधात् परिहितान् व्यवहितानकरोत्। तथा च ब्राह्मणम्—'आदित्यो ह्येवोद्यन् पुरस्ताद्रक्षांस्यपहन्ति' (तै. सं. २. ६. ६. ३) इति॥ चक्राणासः। करोतेः 'छन्दसि लिट्' इति वर्तमाने लिटः कानच्। ततोऽसुक्। 'चितः' इत्यन्तोदात्तत्वम्। परीणहम्। परिणहनं परीणत्। परिपूर्वात् नह्यतेर्भावे क्विपि 'नहिवृति०' (पा. सू. ६. ३. ११६) इत्यादिना पूर्वपदस्य दीर्घः। पृथिव्याः। 'उदात्तयणः०' इति विभक्तेरुदात्तत्वम्। हिन्वानासः। 'हि गतौ वृद्धौ च'। ताच्छीलिकः चानश्। तितिरुः। तिरतिर्गत्यर्थः॥

परि यदिन्द्र रोदसी उभे अबुभोजीर्महिना विश्वतः सीम्।
अमन्यमानाँ अभि मन्यमानैर्निर्ब्रह्मभिरधमो दस्युमिन्द्र॥ ९॥

परि। यत्। इन्द्र। रोदसी इति। उभे इति। अबुभोजीः। महिना। विश्वतः। सीम्।
अमन्यमानान्। अभि। मन्यमानैः। निः। ब्रह्मऽभिः। अधमः। दस्युम्। इन्द्र॥ ९॥

हे vइन्द्र vयत् यदा vरोदसी vउभे द्युलोकभूलोकावुभौ vमहिना त्वदीयेन महिम्ना vविश्वतः vसीं सर्वतः परिगृह्य vपरि vअबुभोजीः परितो भुक्तवानसि तदानीं त्वम् vअमन्यमानान् मन्त्रार्थमनुध्यातुमशक्तानपि[3] केवलपाठकान् यजमानान् vअभि vमन्यमानैः अस्मदीया एते यजमाना रक्षणीया

---

१. ढ-स—उपक्षपयितारम्। २. ढ—युद्धायोद्यतम्। ३. ढ—मन्त्रार्थं मन्तुं ध्यातुमशक्तानपि।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इत्यभिमानं[1] कुर्वद्भिः[1] [V]ब्रह्मभिः मन्त्रैः [V]दस्युं चोरं वृत्रादिरूपमसुरं [V]निः [V]अधमः निःसारितवानसि। 'धमतिर्गतिकर्मा' ( निरु. ६. २ ) इति यास्कः ॥ अबुभोजीः । 'भुज पालनाभ्यवहारयोः'। लङि सिपि 'बहुलं छन्दसि' ( पा. सू. २. ४. ७६ ) इति विकरणस्य श्लुः । 'बहुलं छन्दसि' ( पा. सू. ७. ३. ९७ ) इति ईडागमः । अडुदात्तः । यद्वृत्तयोगादनिघातः । महिना महिम्ना । महच्छब्दात् पृथ्वादिलक्षणो भावे इमनिच् । 'टेः' इति टिलोपः । तृतीयैकवचने अल्लोपे सति उदात्तनिवृत्तिस्वरेणोदात्तत्वम् । मलोपश्छान्दसः । अमन्यमानान् । मन्यन्ते जानन्तीति मन्यमानाः । 'मन ज्ञाने'। 'दिवादिभ्यः श्यन्'। श्यनो नित्त्वादाद्युदात्तत्वम् । समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । संहितायां रुत्वानुनासिकावुक्तौ ॥

न ये दिवः पृथिव्या अन्तमापुर्न मायाभिर्धनदां पर्यभूवन् ।
युजं वज्रं वृषभश्चक्र इन्द्रो निर्ज्योतिषा तमसो गा अदुक्षत् ॥ १० ॥

न । ये । दिवः । पृथिव्याः । अन्तम् । आपुः । न । मायाभिः । धनऽदाम् । परिऽअभूवन् ।
युजम् । वज्रम् । वृषभः । चक्रे । इन्द्रः । निः । ज्योतिषा । तमसः । गाः । अधुक्षत् ॥ १० ॥

[V]ये जलविशेषाः [V]दिवः द्युलोकात् [V]पृथिव्याः [V]अन्तं भूमेः स्थानं [V]न [V]आपुः न प्राप्ताः । मेघरूपमापन्नेन वृत्रेण निरुद्धत्वात् । अत एव भूमिप्राप्त्यभावात् [V]धनदां धनप्रदां भूमिं [V]मायाभिः सस्योपकारादिभिः कर्मभिः [V]न [V]पर्यभूवन् परितो न व्याप्ताः । जलपानसस्याभिवृद्ध्याद्युपकारं न चक्रुरित्यर्थः । तदानीमयम् [V]इन्द्रः मेघभेदनाय [V]वज्रं [V]युजं स्वहस्तयुक्तं [V]चक्रे । ततः [V]ज्योतिषा द्योतमानेन वज्रेण [V]तमसः अन्धकाररूपान्मेघात् [V]गाः गमनशीलान्युदकानि [V]निः [V]अधुक्षत् निःशेषेण दुग्धवान् । मेघं भित्त्वा जलं वृष्टवानित्यर्थः ॥ दिवः । 'ऊडिदम्°' इति षष्ठ्या उदात्तत्वम् । आपुः । 'आप्लृ व्याप्तौ'। लिटि उसि रूपम् । यद्वृत्तयोगादनिघातः । पर्यभूवन् । अत्रापि यच्छब्दस्यानुषङ्गात् निघाताभावः । युजम् । 'युजिर् योगे'। 'ऋत्विक्°' इत्यादिना क्विन् । 'अनित्यमागमशासनम्' इति वचनात् नुमभावः । अधुक्षत् । 'दुह प्रपूरणे'। लुङि 'शल इगुपधादनिटः क्सः' ( पा. सू. ३. १. ४५ ) इति च्लेः क्सादेशः । 'दादेर्धातोर्घः' ( पा. सू. ८. २. ३२ ) इति घत्वम् । 'एकाचो बशः°' ( पा. सू. ८. २. ३७ ) इत्यादिना भष्भावः । संहितायां भष्भावाभावश्छान्दसः ॥ ॥ २ ॥

अनु स्वधामक्षरन्नापो अस्यार्वर्धत मध्य आ नाव्यानाम् ।
सध्रीचीनेन मनसा तमिन्द्र ओजिष्ठेन हन्मनाहन्नभि द्यून् ॥ ११ ॥

अनु । स्वधाम् । अक्षरन् । आपः । अस्य । अवर्धत । मध्ये । आ । नाव्यानाम् ।
सधऽरीचीनेन । मनसा । तम् । इन्द्रः । ओजिष्ठेन । हन्मना । अहन् । अभि । द्यून् ॥ ११ ॥

[V]आपः जलानि [V]अस्य इन्द्रस्य [V]स्वधाम् अन्नं व्रीह्यादिरूपमनुलक्ष्य [V]अक्षरन् मेघाद्वृष्टा अभवन् । तदानीमयं वृत्रः [V]नाव्यानां नावा तरणयोग्यानां बह्वीनामपां [V]मध्ये [V]आ समन्तात् [V]अवर्धत वृद्धिं

---

१. च-छ-ण-न-फ–इत्यभिमानवद्भिः ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्राप्तः । प्रभूतजले वर्तमानोऽपि न ममार किंतु अभिवृद्ध एव । तदानीम् Vइन्द्रः Vसध्रीचीनेन सहगच्छता Vमनसा युक्तं Vतं वृत्रम् Vओजिष्ठेन अतिबलयुक्तेन Vहन्मना हननसाधनेन वज्रेण Vअभि Vद्यून् कतिचिद्दिवसानभिलक्ष्य Vअहन् तेषु दिवसेषु हतवान् । जलमध्ये पतितस्यापि वृत्रस्य मनो यत्रेन्द्रस्तिष्ठति तत्रैव सह गच्छति तादृशमभिज्ञाय स[1] हतवानित्यर्थः ॥ अक्षरन् । 'क्षर संचलने'। नाव्यानाम् नावा तार्याणाम् । 'नौवयोधर्म°' (पा. सू. ४. ४. ९१) इत्यादिना यत् । 'वान्तो यि प्रत्यये' (पा. सू. ६. १. ७९) इति आवादेशः । '°अनावः' (पा. सू. ६. १. २१३) इति पर्युदासात् 'तिस्वरितम्' इति प्रत्ययस्वरितत्वम् । सध्रीचीनेन । सहाञ्चतीति सध्यङ् । 'सहस्य सध्रिः' (पा. सू. ६. ३. ९५) इति सध्र्यादेशः । 'विभाषाञ्चेरदिक्स्त्रियाम्' (पा. सू. ५. ४. ८) इति स्वार्थे खप्रत्ययः । तस्य 'आयन्°' इत्यादिना ईनादेशः । 'अचः' इति अकारलोपे 'चौ' इति दीर्घत्वम् । खादेशस्य उपदेशिवद्वचनात् ईकार उदात्तः । ओजिष्ठेन । ओजोऽस्यास्तीति ओजस्वी । 'अस्मायामेधा°' (पा. सू. ५. २. १२१) इति विनिः । तत आतिशायनिकः इष्ठन् । 'विन्मतोर्लुक्' (पा. सू. ५. ३. ६५) इति विनो लुक् । 'टेः' इति टिलोपः । नित्त्वादाद्युदात्तत्वम् । हन्मना । हन्यतेऽनेनेति हन्म । 'अन्येभ्योऽपि दृश्यन्ते' इति दृशिग्रहणात् करणेऽपि मनिन् । नित्त्वादाद्युदात्तत्वम् । तृतीयैकवचने अलोपे प्राप्ते 'न संयोगाद्वमन्तात्' (पा. सू. ६. ४. १३७) इति प्रतिषेधः ॥

न्यविध्यदिलीबिशस्य दृळ्हा वि शृङ्गिणमभिनच्छुष्णमिन्द्रः ।
यावत्तरो मघवन्यावदोजो वज्रेण शत्रुमवधीः पृतन्युम् ॥ १२ ॥

नि । अविध्यत् । इलीबिशस्य । दृळ्हा । वि । शृङ्गिणम् । अभिनत् । शुष्णम् । इन्द्रः ।
यावत् । तरः । मघऽवन् । यावत् । ओजः । वज्रेण । शत्रुम् । अवधीः । पृतन्युम् ॥ १२ ॥

Vइलीबिशस्य इलाया भूमेर्बिले शयानस्य वृत्रस्य संबन्धीनि । 'इलाबिलशयस्य' (निरु. ६.१९) इति यास्कः । Vदृळ्हा दृंहितानि असुरेण निरुद्धानि प्रभूतान्युदकानि Vइन्द्रः Vन्यविध्यत् नितरां विद्धवान् । यद्वा । दृळ्हानि प्रबलानि सैन्यानि नितरां विद्धवान् । तत ऊर्ध्वं Vशृङ्गिणं गोमहिषादिशृङ्गसमानैरायुधैरुपेतं Vशुष्णं जगतः शोषकं वृत्रं Vवि Vअभिनत् विविधं ताडितवान् । हे Vमघवन् धनयुक्तेन्द्र तव Vयावत्तरः यावान्[2] वेगोऽस्ति[2] Vयावदोजः यावद्बलमस्ति तेन सर्वेण युक्तस्त्वं Vपृतन्युं पृतनां युद्धमिच्छन्तं Vशत्रुं वृत्रं Vवज्रेण Vअवधीः हतवानसि ॥ अविध्यत् । 'व्यध ताडने'। श्यनि 'ग्रहिज्या°' इत्यादिना संप्रसारणम् । 'तिङ्ङतिङः' इति निघाते 'उदात्तस्वरितयोर्यणः°' इति संहितायाम् अडागमस्य स्वरितत्वम् । इलीबिशस्य । पृषोदरादित्वात् अभिमतरूपस्वरसिद्धिः । दृळ्हा । दृंहेर्निष्ठायां 'दृढः स्थूलबलयोः' (पा. सू. ७. २. २०) इति निपात्यते । 'शेश्छन्दसि बहुलम्' इति शेर्लोपः । अभिनत् । 'भिदिर् विदारणे'। लङि 'रुधादिभ्यः श्नम्' । 'इतश्च' (पा. सू. ३. ४. १००) इति इकारलोपे 'हल्ङ्याब्भ्यः°' इति तिलोपः । शुष्णम् । 'शुष शोषणे'। शोषयतीति शुष्णः । 'तृषिशुषिरसिभ्यः किच्च' (उ. सू. ३. ३९२) इति नप्रत्ययः । 'नित्' इत्यनुवृत्तेराद्युदात्तत्वम् । अवधीः । 'लुङि च' (पा. सू. २. ४. ४३) इति हन्तेर्वधादेशः । पृतन्युम् । पृतनाशब्दात् क्यचि 'कव्यध्वरपृतनस्य°' इति अन्त्यलोपः । 'क्याच्छन्दसि' इति उप्रत्ययः ॥

---

१. च-छ-त-ध-न-फ-'सः' नास्ति । २. च-छ-ण-न-फ-र-श-स-यावत्तेजोऽस्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अभि सिध्मो अजिगादस्य शत्रून्वि तिग्मेन वृषभेणा पुरोऽभेत् ।
सं वज्रेणासृजद्वृत्रमिन्द्रः प्र स्वां मतिमतिरच्छाशदानः ॥ १३ ॥

अभि । सिध्मः । अजिगात् । अस्य । शत्रून् । वि । तिग्मेन । वृषभेण । पुरः । अभेत् ।
सम् । वज्रेण । असृजत् । वृत्रम् । इन्द्रः । प्र । स्वाम् । मतिम् । अतिरत् । शाशदानः ॥ १३ ॥

vअस्य इन्द्रस्य vसिध्मः साधको वज्रः vशत्रून् vअभि इन्द्रवैरिणोऽभिलक्ष्य vअजिगात् गतवान् । जिगातिर्गतिकर्मा । 'गाति जिगाति' (नि. २. १४. ११३) इति गतिकर्मसु पाठात् । स च इन्द्रः vतिग्मेन तीक्ष्णेन vवृषभेण श्रेष्ठेनायुधेन तेन vवज्रेण vपुरः वृत्रस्य पुराणि vवि vअभेत् विविधं भिन्नवान् । ततः सः vइन्द्रः vवज्रेण स्वकीयेन वृत्रं vसम् vअसृजत् संयोजितवान् । संयोज्य च vशाशदानः वृत्रं हिंसन् vस्वां vमतिं स्वकीयां हर्षोपेतां बुद्धिं vप्र vअतिरत् प्रकर्षेण वर्धितवान् ॥ सिध्मः । 'षिधु संराद्धौ' । अस्मात् औणादिको मक् । कित्त्वादगुणः । प्रत्ययस्वरः । अजिगात् । 'गा स्तुतौ' । अत्र तु गत्यर्थः । जुहोत्यादित्वात् श्लुः । द्विर्भावे 'बहुलं छन्दसि' इत्यभ्यासस्य इत्वम् । तिग्मेन । 'युजिरुचितिजां कुश्च' (उ. सू. १. १४३) इति मक् । कुत्वम् । वृषभेण । 'ऋषिवृषिभ्यां कित्' (उ. सू. ३. ४०३) इत्यनेन अभच् । अभेत् । 'भिदिर् विदारणे' । श्नमि प्राप्ते व्यत्ययेन शप् । तस्य 'बहुलं छन्दसि' इति लुक् । लघूपधगुणे 'हल्ङ्याब्भ्यः०' इति लोपः[1] । यद्वा । लुङि च्लेर्लुक् । अतिरत् । प्रपूर्वस्तिरतिर्वर्धनार्थः । यद्वा । तरतेर्व्यत्ययेन शः । 'ऋत इद्धातोः' इति इत्वम् । शाशदानः । 'शदॢ शातने' । अस्मात् यङन्तात् शानच् । तस्य 'छन्दस्युभयथा' इति आर्धधातुकत्वात् अतोलोपयलोपौ । सार्वधातुकत्वात् 'अभ्यस्तानामादिः' (पा. सू. ६. १. १८९) इत्याद्युदात्तत्वम् ॥

आवः कुत्समिन्द्र यस्मिञ्चाकन्प्रावो युध्यन्तं वृषभं दशद्युम् ।
शफच्युतो रेणुर्नक्षत द्यामुच्छ्वैत्रेयो नृषाह्याय तस्थौ ॥ १४ ॥

आवः । कुत्सम् । इन्द्र । यस्मिन् । चाकन् । प्र । आवः । युध्यन्तम् । वृषभम् । दशद्युम् ।
शफऽच्युतः । रेणुः । नक्षत । द्याम् । उत् । श्वैत्रेयः । नृऽसह्याय । तस्थौ ॥ १४ ॥

हे vइन्द्र vकुत्सम् एतन्नामकं गोत्रप्रवर्तकमृषिम् vआवः रक्षितवानसि । vयस्मिन् कुत्से vचाकन् स्तुतिं कामयमानो वर्तसे । तं कुत्समिति पूर्वत्रान्वयः । तथा vदशद्युम् एतन्नामकं दशसु दिक्षु दीप्यमानमृषिं vप्रावः प्रकर्षेण रक्षितवानसि । कीदृशम् । vयुध्यन्तं स्वकीयैः शत्रुभिः सह युद्धं कुर्वन्तं vवृषभं गुणैः श्रेष्ठम् । vशफच्युतः त्वदीयाश्वस्य शफात् पतितः vरेणुः धूलिः vद्यां द्युलोकं vनक्षत प्राप्नोति । vश्वैत्रेयः श्वित्राख्याया योषितः पुत्रः पुरा शत्रुभयाज्जले मग्नः सन् त्वदनुग्रहात् vनृसह्याय नृभिः पुरुषैः सोढव्याय vउत् vतस्थौ जलादुत्थितवान् ॥ चाकन् । 'चक तृप्तौ' । अस्मात् ण्यन्तात् शतृ । 'छन्दस्युभयथा' इति आर्धधातुकत्वात् णिलोपः शबभावश्च । प्रत्ययस्वरेणान्तोदात्तत्वम् । यद्वा ।

---

१. ण-त-न-ल-श-स–तिलोपः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'कमु कान्तौ' इत्यस्मात् यङ्लुगन्तात् लङि सिपि अभ्यासस्य नुगभावश्छान्दसः। 'दीर्घोऽकितः' इति दीर्घत्वम्। सिलोपे 'मो नो धातोः' (पा. सू. ८. २. ६४) इति मकारस्य नकारः। धातुस्वरः। यङ्लुक्त्ययोगादनिघातः। युध्यन्तम्। व्यत्ययेन परस्मैपदम्। दशद्युम्। दीव्यतेः प्रकाशार्थात् संपदादिलक्षणः क्विप्। 'च्छ्वोः शूड्०' (पा. सू. ६. ४. १९) इति ऊड्। दशसु दिक्षु द्यूः यस्यासौ दशद्युः। छान्दसं ह्रस्वत्वम्। यद्वा। द्युशब्दः अहर्नामसु पठितः (नि. १. ९. २)। तेन प्रवृत्तिनिमित्तभूतः प्रकाशो लक्ष्यते। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। शफच्युतः। शफेन च्युतः। 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम्। नक्षत। 'नक्ष गतौ'। व्यत्ययेनात्मनेपदम्। श्वैत्रेयः। श्वित्राया अपत्यम्। 'स्त्रीभ्यो ढक्' (पा. सू. ४. १. १२०)। नृसद्याय। 'शकिसहोश्च' (पा. सू. ३. १. ९९) इति कर्मणि यत्। 'यतोऽनावः' इत्याद्युदात्तत्वम्। समासे कृदुत्तरपदप्रकृतिस्वरत्वम्। 'पूर्वपदात्' (पा. सू. ८. ३. १०६) इति षत्वम्। संहितायां दीर्घश्छान्दसः॥

आवः शमं वृषभं तुग्र्यासु क्षेत्रजेषे मघवञ्छ्वित्र्यं गाम्।
ज्योक् चिदत्र तस्थिवांसो अक्रञ्छत्रूयतामधरा वेदनाकः॥ १५॥

आवः। शमम्। वृषभम्। तुग्र्यासु। क्षेत्रऽजेषे। मघऽवन्। श्वित्र्यम्। गाम्।
ज्योक्। चित्। अत्र। तस्थिऽवांसः। अक्रन्। शत्रुऽयताम्। अधरा। वेदना। अकरित्यकः॥१५॥

हे [v]मघवन् धनवन्निन्द्र [v]श्वित्र्यं श्वित्रायाः पुत्रं पूर्वोक्तं पुरुषम् [v]आवः रक्षितवानसि। किमर्थम्। [v]क्षेत्रजेषे शत्रुभिः सह युद्धवेलायां क्षेत्रप्राप्त्यर्थम्। कीदृशम्। [v]शमं स्वदीयपरिपालनेन चित्तव्याकुलतां परित्यज्य शान्तं [v]वृषभं गुणैः श्रेष्ठं [v]तुग्र्यासु [v]गां जलेषु गतं मग्नमित्यर्थः। 'तुग्र्या बुर्बुरम्[1]' (नि. १. १२. २१) इति उदकनामसु पठितत्वात्। [v]अत्र अस्माभिः सह युद्धे[2] [v]ज्योक् [v]चित् चिरकालमपि [v]तस्थिवांसः अवस्थिताः सन्तः [v]अक्रन् ये वैरिणः शत्रुत्वमकुर्वन्। [v]शत्रूयतां शत्रूनात्मन इच्छतां तेषाम् [v]अधरा [v]वेदना निकृष्टानि दुःखानि त्वम् [v]अकः कुरु[3]॥ तुग्रशब्दोऽन्तरिक्षवचनः। तत्र भवास्तुग्रियाः। 'तुग्राद्धन्' (पा. सू. ४. ४. ११५) इति घन्। तस्य इयादेशः। इकारलोपश्छान्दसः। नित्त्वादाद्युदात्तत्वम्। क्षेत्रजेषे। 'जेषृ णेषृ एषृ प्रेषृ गतौ'। अस्मात् संपदादिलक्षणः क्विप्। क्षेत्रस्य जेट् क्षेत्रजेट्। समासान्तोदात्तत्वम्। 'अन्तोदात्तादुत्तरपदात्०' (पा. सू. ६. १. १६९) इत्यादिना विभक्तेरुदात्तत्वम्। श्वित्र्यम्। श्वित्रायां भवः। 'भवे छन्दसि' इति यत्। 'यतोऽनावः' इत्याद्युदात्तत्वम्। तस्थिवांसः। तिष्ठतेः क्वसुः। 'वस्वेकाजाद्घसाम्' इति इडागमः। अक्रन्। करोतेर्लुङि 'मन्त्रे घस०' इत्यादिना च्लेर्लुक्। शत्रूयताम्। शत्रूनात्मन इच्छन्तीति शत्रूयन्तः। 'सुप आत्मनः क्यच्' इति क्यच्। तदन्तात् शतृ। तस्य लसार्वधातुकानुदात्तत्वे एकादेशस्वरेणोदात्तत्वम्। तस्य च पूर्वत्रासिद्धत्वं नेष्यते (पा. सू. ८. २. ६. १) इत्युक्तत्वात् शत्रन्तमन्तोदात्तत्वमिति 'शतुरनुमो नद्यजादी' इति विभक्तेरुदात्तत्वम्। अधरा वेदना इत्युभयत्र 'शेश्छन्दसि बहुलम्' इति शेर्लोपः। अकः। करोतेर्लुङि 'मन्त्रे घस०' इत्यादिना च्लेर्लुक्। गुणः॥ ॥ ३॥

---

१. च-फ-श- बर्बुरम्। २. छ-ण-न-ल-युक्ते युद्धे; च-फ-युक्तयुद्धे ; स-युक्ते। ३. श-कृतवानसि।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' त्रिश्चिन्नो अद्य ' इति चतुर्थं सूक्तं द्वादशर्चम्। ' ऋषिश्चान्यस्मादृषेः ' इति परिभाषया आङ्गिरसो हिरण्यस्तूप ऋषिः। अश्विनौ देवता। ' क त्री चक्रा ' इति नवमी ' आ नो अश्विना ' इति द्वादशी च त्रिष्टुभौ। शिष्टाः त्रिष्टुबन्तपरिभाषया जगत्यः। ' त्रिश्चिद्द्वादशाश्विनं नवम्यन्ये त्रिष्टुभौ ' इत्यनुक्रमणिका। प्रातरनुवाके आश्विने क्रतौ जागते छन्दसि इदं सूक्तम्। ' अथाश्विनः ' इति खण्डे सूत्रितं— ' त्रिश्चिन्नो अद्येळे द्यावापृथिवी इति जागतम् ' ( आश्व. श्रौ. ४. १५ ) इति। आश्विने शस्त्रेऽप्येतत् सूक्तं, ' प्रातरनुवाकन्यायेन ' ( आश्व. श्रौ. ६. ५ ) इत्यतिदिष्टत्वात्॥

त्रिश्चिन्नो अद्या भवतं नवेदसा विभुर्वां याम उत रातिरश्विना।
युवोर्हि यन्त्रं हिम्येव वाससोऽभ्यायंसेन्या भवतं मनीषिभिः॥ १॥

त्रिः। चित्। नः। अद्य। भवतम्। नवेदसा। विऽभुः। वाम्। यामः। उत। रातिः। अश्विना
युवोः। हि। यन्त्रम्। हिम्याऽइव। वाससः। अभिऽआयंसेन्या। भवतम्। मनीषिऽभिः॥ १॥

हे ᵛनवेदसा ᵛअश्विना मेधाविनौ अश्विदेवौ[1]। नवेदा इति मेधाविनाम, ' नवेदाः कविः मनीषी ' ( नि. ३. १५. ९ ) इति तन्नामसु पठितत्वात्। तादृशौ युवां ᵛत्रिश्चित् त्रिवारमपि ᵛअद्य अस्मिन् कर्मणि ᵛनः अस्मदर्थं ᵛभवतम् आगतौ[2] भवतम्[2]। अत्र त्रिः इति वचनं सवनत्रयापेक्षम् आदरातिशयद्योतनार्थं वा। ' त्रिषत्या हि देवाः ' (तै. ब्रा. ३. २. ३. ८) इति श्रुत्यन्तरात्। ᵛवां युवयोः ᵛयामः गमनसाधनभूतो रथः ᵛविभुः व्याप्तः। ᵛउत अपि च ᵛरातिः दानं विभुरिति शेषः। ᵛयुवोः युवयोरुभयोः ᵛयन्त्रं ᵛहि परस्परनियमरूपः संबन्धविशेषोऽस्ति खलु। तत्र दृष्टान्तः। ᵛवाससः सूर्यरश्म्याच्छादनयुक्तस्य वासरस्य ᵛहिम्येव हिमयुक्तया रात्र्येव। यथा रात्र्या सह दिवसस्य संबन्धः कदाचिदपि नापैति तद्वत्। युवामुभौ ᵛमनीषिभिः मेधाविभिर्ऋत्विग्भिः। मनीषीति मेधाविनाम, ' मनीषी मन्धाता ' (नि. ३. १५. ११) इति तन्नामसु पठितत्वात्। ᵛअभ्यायंसेन्या अभितो नियन्तव्यौ अनुग्रहवशात् तदधीनौ ᵛभवतम्॥ अद्य। ' निपातस्य च ' इति संहितायां दीर्घः। नवेदसा। विपरीतं न वित्तः इति नवेदसौ। ' विद ज्ञाने ' इत्यस्मात् औणादिकोऽसुन्। नञ्समासे ' नभ्राण्नपात्° ' इत्यादिना नकारस्य प्रकृतिभावः। ' सुपां सुलुक्° ' इति आकारः। आमन्त्रितनिघातः। यामः। यायते गम्यतेऽनेनेति यामो रथः। ' अर्तिस्तुसु° ' इत्यादिना मन्। निच्वादाद्युदात्तत्वम्। यद्वा। ' यम उपरमे ' इत्यस्मात् कर्मणि घञ्। वृषादिषु पाठादाद्युदात्तत्वम्। रातिः। ' रा दाने ' इत्यस्मात् भावे क्तिन्। ' मन्त्रे वृष° ' इत्यादिना तस्योदात्तत्वम्। युवोः। ' सुपां सुपो भवन्ति ' इति षष्ठीद्विवचनस्य षष्ठीद्विवचनादेशः। अत आदेशविषयत्वात् ' योऽचि ' ( पा. सू. ७. २. ८९ ) इति यत्वं न भवति। ' शेषे लोपः ' इति टिलोपे उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम्। अन्त्यलोपपक्षे तु एकादेशस्वरेण। हिम्या इव। हिमेति रात्रिनाम, ' ऊधः पयः हिमा ' ( नि. १. ७. २२ ) इति तन्नामसु पठितत्वात्। ' हनेर्हि च ' ( उ. सू. १. १४४) इति मक्। हन्ति पद्मानीति हिमम्। अर्शआद्यच्। हिमा रात्रिः। तत उत्तरस्य तृतीयैकवचनस्य ' सुपां सुलुक्° ' इति ङ्यादेशः। ततः टिलोपे उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वम्। वाससः। ' वस आच्छादने '। वासयति प्रकाशेनाच्छादयति इति अहर्वासः। अभ्यायंसेन्या। अभ्याङ् इत्युपसर्गद्वयोपसृष्टात् ' यम उपरमे ' इत्यस्मात् औणादिकः सेन्यप्रत्ययः। ' सुपां सुलुक्° ' इति आकारः॥

---

१. ढ–अश्विनौ। २. च-छ-न–आगच्छतम्; स–आगतम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्रयः पवयो मधुवाहने रथे सोमस्य वेनामनु विश्व इद्विदुः ।
त्रयः स्कम्भासः स्कभितास आरभे त्रिर्नक्तं याथस्त्रिर्वीश्विना दिवा ॥ २ ॥

त्रयः । पवयः । मधुऽवाहने । रथे । सोमस्य । वेनाम् । अनु । विश्वे । इत् । विदुः ।
त्रयः । स्कम्भासः । स्कभितासः । आऽरभे । त्रिः । नक्तम् । याथः । त्रिः । ऊँ इति । अश्विना । दिवा ॥२॥

vमधुवाहने मधुरद्रव्याणां नानाविधखाद्यादीनां वहनेन युक्तेऽश्विनोः संबन्धिनि vरथे vपवयः वज्रसमाना दृढाश्चक्रविशेषाः vत्रयः त्रिसंख्याकाः सन्ति । vइत् इत्थं चक्रत्रयसद्भावप्रकारं vविश्वे सर्वे देवाः vसोमस्य चन्द्रस्य vवेनां कमनीयां भार्यामभिलक्ष्य यात्रायां vविदुः जानन्ति । यदा सोमस्य वेनया सह विवाहस्तदानीं नानाविधखाद्ययुक्तं चक्रत्रयोपेतं प्रौढं रथमारुह्य अश्विनौ गच्छत इति सर्वे देवा जानन्तीत्यर्थः । तस्य रथस्योपरि vस्कम्भासः स्तम्भविशेषाः vत्रयः त्रिसंख्याकाः vस्कभितासः स्थापिताः । किमर्थम् । vआरभे आरब्धुम् अवलम्बितुम् । यदा रथस्त्वरया याति तदानीं पतनभीतिनिवृत्त्यर्थं हस्तालम्बनभूताः स्तम्भा इत्यर्थः । हे vअश्विना युवां तादृशेन रथेन vनक्तं रात्रौ vत्रिः vयाथः त्रिवारं गच्छथः । तथा vदिवा दिवसेऽपि vत्रिः याथः । रात्रावहनि च रथमारुह्य पुनःपुनः क्रीडथ इत्यर्थः ॥ मधुवाहने । मधु वाह्यतेऽनेनेति मधुवाहनः । करणे ल्युट् । विदुः । वेत्तेर्लटि ' विदो लटो वा ' इति झेः उसादेशः । स्कम्भासः । ' ष्टभि स्कभि गतिप्रतिबन्धे ' । स्कम्भन्ते प्रतिबद्धा भवन्तीति स्कम्भाः । पचाद्यच् । स्कभितासः । स्कम्भुः सौत्रो धातुः । अस्मात् निष्ठायां ' यस्य विभाषा ' इति इट्प्रतिषेधे प्राप्ते ' प्रसितस्कभित° ' इत्यादिना इडागमो निपातितः । आरभे । ' रभ राभस्ये ' । अस्मात् आङ्पूर्वात् संपदादिलक्षणो भावे क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

समाने अहन्त्रिरवद्यगोहना त्रिरद्य यज्ञं मधुना मिमिक्षतम् ।
त्रिर्वाजवतीरिषो अश्विना युवं दोषा अस्मभ्यमुषसश्च पिन्वतम् ॥ ३ ॥

समाने । अहन् । त्रिः । अवद्यऽगोहना । त्रिः । अद्य । यज्ञम् । मधुना । मिमिक्षतम् ।
त्रिः । वाजऽवतीः । इषः । अश्विना । युवम् । दोषाः । अस्मभ्यम् । उषसः । च । पिन्वतम् ॥३॥

हे vअश्विना अश्विनौ देवौ vयुवं युवामुभौ vसमाने vअहन् एकस्मिन्ननुष्ठानदिने vत्रिरवद्यगोहना त्रिवारमनुष्ठानगतानां दोषाणां संवरणकारिणौ भवतम् । vअद्य अस्मिन् दिने vयज्ञं यज्ञगतं हविः vमधुना मधुररसेन vत्रिः vमिमिक्षतं त्रिवारं सिञ्चतम् । किं च vदोषाः vउषसश्च रात्रीर्दिवसांश्च रात्रिषु दिवसेषु च नैरन्तर्येण vवाजवतीः बलकारिणीः vइषः अन्नानि vअस्मभ्यं vपिन्वतं सिञ्चतं प्रयच्छतमित्यर्थः ॥ अहन् । ' सुपां सुलुक् ° ' इति सप्तम्या लुक् । अवद्यगोहना । ' गुहू संवरणे ' । अवद्यस्य गूहयितारौ । नन्द्यादित्वात् ल्युः । ' ऊदुपधाया गोहः ' ( पा. सू. ६. ४. ८९ ) इति प्राप्तस्य ऊत्वस्य अभावश्छान्दसः । मिमिक्षतम् । ' मिह सेचने ' । सनि 'एकाच उपदेशेऽनुदात्तात्' इति इट्प्रतिषेधः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' हलन्ताच्च ' इति सनः कित्त्वात् लघूपधगुणाभावः । द्विर्भावहलादिशेषौ । ढत्वकत्वषत्वानि । वाजवतीः । " उगितश्च " इति ङीप् । पिन्वतम् । ' पिवि मिवि णिवि सेचने ' । इदित्त्वात् नुम् । कर्तरि शप् ॥

त्रिर्वर्तिर्यातं त्रिरनुव्रते जने त्रिः सुप्राव्ये त्रेधेव शिक्षतम् ।
त्रिर्नान्द्यं वहतमश्विना युवं त्रिः पृक्षो अस्मे अक्षरेव पिन्वतम् ॥ ४ ॥

त्रिः । वर्तिः । यातम् । त्रिः । अनुऽव्रते । जने । त्रिः । सुप्रऽअव्ये । त्रेधाऽइव । शिक्षतम् ।
त्रिः । नान्द्यम् । वहतम् । अश्विना । युवम् । त्रिः । पृक्षः । अस्मे इति । अक्षराऽइव । पिन्वतम् ॥४॥

हे [v]अश्विना [v]युवं [v]त्रिर्वर्तिर्यातम् अस्मदीयवर्तनसाधनं गृहं त्रिर्यातं त्रिवारं प्राप्नुतम् । तथा [v]अनुव्रते अस्मदनुकूलव्यापारयुक्ते [v]जने [v]त्रिः यातं त्रिवारं तदनुग्रहाय गच्छतम् । [v]त्रिः [v]सुप्राव्ये त्रिवारं सुष्ठु प्रकर्षेण भवद्भ्यां रक्षणीये प्रवर्तमानानस्मान् [v]त्रेधेव त्रिभिरेव प्रकारैः [v]शिक्षतम् । पुनःपुनरनुष्ठानमुपदेष्टव्यमित्यर्थः । तथा [v]नान्द्यं नन्दनीयं संतोषकरं फलं [v]त्रिः [v]वहतं प्रापयतम् । [v]अस्मे अस्मासु [v]पृक्षः अन्नं [v]त्रिः [v]पिन्वतं त्रिवारं प्रयच्छतम् । तत्र दृष्टान्तः । [v]अक्षरेव । अक्षराण्युदकानि । ' अक्षरा स्रोतः तृषिः ' (नि. १.२.३२) इति तन्नामसु पाठात् । तानि पर्जन्यो यथा प्रयच्छति तद्वत् ॥ वर्तिः । वर्ततेऽत्रेति वर्तिर्गृहम् । ' हृपिषिरुहिवृति° ' ( उ. सू. ४. ५५८ ) इत्यादिना इप्रत्ययः । ' सुपां सुलुक्° ' इति द्वितीयैकवचनस्य सुआदेशः । सुप्राव्ये । उपसर्गद्वयोपसृष्टात् अवतेः कर्मणि ण्यत् । ' संज्ञापूर्वको विधिरनित्यः ' इति वृद्ध्यभावः । ' तित्स्वरितम् ' इति स्वरितत्वम् । शिक्षतम् । ' शिक्ष विद्योपादाने ' । नान्द्यम् । ण्यदन्तः । पृक्षः । ' पृची संपर्के ' । असुनि सुडागमः । अस्मे । ' सुपां सुलुक्° ' इति शेआदेशः । अक्षरा इव । अश्नुवते व्याप्नुवन्तीति अक्षराण्युदकानि । औणादिकः क्सरप्रत्ययः । शेर्लोपः ॥

त्रिर्नो रयिं वहतमश्विना युवं त्रिर्देवताता त्रिरुतावतं धियः ।
त्रिः सौभगत्वं त्रिरुत श्रवांसि नस्त्रिष्ठं वां सूरे दुहिता रुहद्रथम् ॥ ५ ॥

त्रिः । नः । रयिम् । वहतम् । अश्विना । युवम् । त्रिः । देवऽताता । त्रिः । उत । अवतम् । धियः ।
त्रिः । सौभगऽत्वम् । त्रिः । उत । श्रवांसि । नः । त्रिऽस्थम् । वाम् । सूरे । दुहिता । आ । रुहत् । रथम् ॥५॥

हे [v]अश्विना [v]युवं[1] [v]नः अस्मान् [v]रयिं धनं [v]त्रिः [v]वहतं त्रिवारं प्रापयतम् । [v]देवताता देवतातौ देवैर्युक्ते कर्मणि [v]त्रिः त्रिवारमागच्छतमिति शेषः । [v]उत अपि च [v]धियः अस्मद्बुद्धीः [v]त्रिः त्रिवारं रक्षतम् । [v]सौभगत्वं सौभाग्यं [v]त्रिः वहतमिति शेषः । [v]उत अपि च [v]श्रवांसि अन्नानि [v]नः अस्मभ्यं [v]त्रिः वहतम् । [v]वां युवयोः संबन्धिनं [v]त्रिष्ठं चक्रत्रयेऽवस्थितं [v]रथं [v]सूरे सूर्यस्य [v]दुहिता पुत्री । ' दुहिता दुर्हिता दूरे हिता ' ( निरु. ३. ४ ) इति यास्कः । सा आरूढवती ॥ देवताता । ' सर्वदेवात्तातिल् ' (पा. सू. ४. ४. १४२ ) इति स्वार्थिकः तातिल्प्रत्ययः । तेन देवतातिशब्देन देवसंबद्धो यज्ञो लक्ष्यते ।

---

१. त-ध-ल-स–युवं युवाम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'देवताता मखः' (नि.३. १७. १०) इति तन्नामसु पठितत्वात्। 'लिति' इति प्रत्ययात्पूर्वस्योदात्तत्वम्। 'सुपां सुलुक्०' इति सप्तम्या डादेशः। त्रिष्ठम्। त्रिषु चक्रेषु तिष्ठतीति त्रिष्ठः। 'सुपि स्थः' (पा. सू. ३. २. ४) इति कः। 'अम्बाम्ब०' (पा. सू. ८. ३. ९७) इत्यादिना सकारस्य षत्वम्। सूरे। 'पू प्रेरणे'। 'सुसूधागृधिभ्यः क्रन्' (उ. सू. २. १८२) इति क्रन्। नित्त्वादाद्युदात्तः। विभक्तिव्यत्ययः। आ रुहत्। 'कृमृदृरुहिभ्यश्छन्दसि' (पा. सू. ३. १. ५९) इति श्लेः अङादेशः॥

त्रिर्नो अश्विना दिव्यानि भेषजा त्रिः पार्थिवानि त्रिरु दत्तमद्भ्यः।
ओमानं शंयोर्ममकाय सूनवे त्रिधातु शर्म वहतं शुभस्पती॥ ६॥

त्रिः। नः। अश्विना। दिव्यानि। भेषजा। त्रिः। पार्थिवानि। त्रिः। ऊँ इति। दत्तम्। अत्ऽभ्यः। ओमानम्। शम्ऽयोः। ममकाय। सूनवे। त्रिऽधातु। शर्म। वहतम्। शुभः। पती इति॥ ६॥

हे [v]अश्विना [v]नः अस्मभ्यं [v]दिव्यानि द्युलोकवर्तीनि [v]भेषजा औषधानि [v]त्रिः [v]दत्तम्। तथा [v]पार्थिवानि पृथिव्यामुत्पन्नान्यौषधानि [v]त्रिः दत्तम्। [v]अद्भ्यः [v]उ अन्तरिक्षसकाशादप्यौषधानि [v]त्रिः दत्तम्। आपः इत्यन्तरिक्षनाम, 'आपः पृथिवी भूः' (नि. १. ३. ८) इति तन्नामसु पाठात्। [v]शंयोः एतन्नामकस्य बृहस्पतिपुत्रस्य। 'ते शंयुं बार्हस्पत्यमब्रुवन्' (तै. सं. २. ६. १०. १) इति ब्राह्मणान्तरात्। तस्य संबन्धिनम् [v]ओमानं सुखविशेषं [v]ममकाय [v]सूनवे मदीयाय पुत्राय [v]दत्तम्। हे [v]शुभस्पती शोभनस्यौषधजातस्य पालकौ युवां [v]त्रिधातु वातपित्तश्लेष्मधातुत्रयशमनविषयं[1] सुखं[1] [v]वहतं प्रापयतम्॥ दिव्यानि। दण्डादित्वात् (पा. सू. ५. १. ६६) यप्रत्ययः। भेषजा। 'भिषज् चिकित्सायाम्'। 'पुंसि संज्ञायाम्०' इति घः। शंयोः। 'शमु उपशमे'। क्विप्। शम्। 'यु अमिश्रणे'। अस्मात् विच्। कृदुत्तरपदप्रकृतिस्वरः। त्रिधातु। 'सितनिगमिमसिसच्यविधाञ्कुशिभ्यस्तुन्' (उ. सू. १. ६९)। अद्भ्यः। 'ऊडिदम्०' इत्यादिना विभक्तेरुदात्तत्वम्। ओमानम्। अवतेः 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन्। 'ज्वरत्वर०' इत्यादिना अकारवकारयोः ऊठ्। सार्वधातुकार्धधातुकलक्षणो गुणः। यदि 'ज्वरत्वर०' इत्यत्र '०अनुनासिके च' (पा. सू. ६. ४. १९) इति नानुवर्तते तर्हि पूर्वेणैव सूत्रेण वकारस्य ऊडादेशो भविष्यति। शुभस्पती। 'शुभ दीप्तौ'। संपदादिलक्षणः क्विप्। 'षष्ठ्याः पतिपुत्र०' इति संहितायां विसर्जनीयस्य सत्वम्। 'सुबामन्त्रिते०' इति पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य आष्टमिकं सर्वानुदात्तत्वम्॥ ॥ ४॥

त्रिर्नो अश्विना यजता दिवेदिवे परि त्रिधातु पृथिवीमशायतम्।
तिस्रो नासत्या रथ्या परावत आत्मेव वातः स्वसराणि गच्छतम्॥ ७॥

त्रिः। नः। अश्विना। यजता। दिवेऽदिवे। परि। त्रिऽधातु। पृथिवीम्। अशायतम्।
तिस्रः। नासत्या। रथ्या। पराऽवतः। आत्माऽइव। वातः। स्वसराणि। गच्छतम्॥ ७॥

---

१. च-फ-°शमनविषयं शर्म सुखम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे Vअश्विना Vदिवेदिवे प्रतिदिनम्। 'दिवेदिवे द्यविद्यवि' (नि. १. ९. ११) इति अहर्नामसु पठितत्वात्। Vयजता यष्टव्यौ युवां Vनः अस्मदीयां Vपृथिवीं वेदिरूपां भूमिं Vपरि सर्वतः प्राप्य Vत्रिधातु कक्ष्यात्रययुक्ते आस्तीर्णे बर्हिषि Vत्रिः त्रिवारम् Vअशायतं शयनं कुरुतम्। हे Vरथ्या रथ्यौ रथस्वामिनौ Vतिस्रः त्रिसंख्याकाः ऐष्टिकपाशुकसौमिकरूपा वेदीः Vगच्छतम्। तत्र दृष्टान्तः। Vस्वसराणि शरीराणि Vआत्मेव Vवातः। यथा प्राणिनामात्मभूतः प्राणवायुस्तदीयानि शरीराणि गच्छति तद्वत्॥ यजता। यजतेः 'भृमृदृशि०' (उ. सू. ३. ३९०) इत्यादिना अतच्। 'चितः' इत्यन्तोदात्तत्वम्। त्रिधातु। त्रेधा धीयते निधीयते इति त्रिधातु। 'सितनिगमि०' (उ. सू. १. ६९) इत्यादिना धाञः तुन्। नित्त्वादाद्युदात्तत्वम्। समासे कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते। 'सुपां सुलुक्०' इति सप्तम्या लुक्। अशायतम्। अदादित्वात् शपो लुक्। अशयातामित्यस्य ह्रस्वदीर्घयोर्व्यत्यासः। नासत्या। सत्सु साधू सत्यौ। न सत्यौ असत्यौ। न असत्यौ नासत्यौ। 'सत्यावेव नासत्यावित्यौर्णवाभः' (निरु. ६. १३) इति यास्कः। 'नभ्राण्नपात्०' इत्यादिना नञः प्रकृतिभावः। रथ्या। रथाहौं स्वामिनावित्यर्थः। 'छन्दसि च' (पा. सू. ५. १. ६७) इति यप्रत्ययः। स्वसराणि। सरन्ति गच्छन्तीति सरा इन्द्रियाणि। स्वकीयाः सरा येषां शरीराणाम्[1]। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्॥

त्रिरश्विना सिन्धुभिः सप्तमातृभिस्त्रयं आहावास्त्रेधा हविष्कृतम्।
तिस्रः पृथिवीरुपरि प्रवा दिवो नाकं रक्षेथे द्युभिरक्तुभिर्हितम्॥ ८॥

त्रिः। अश्विना। सिन्धुऽभिः। सप्तमातृऽभिः। त्रयः। आऽहावाः। त्रेधा। हविः। कृतम्।
तिस्रः। पृथिवीः। उपरि। प्रवा। दिवः। नाकम्। रक्षेथे इति। द्युऽभिः। अक्तुऽभिः। हितम्॥८॥

हे Vअश्विना Vसप्तमातृभिः। 'इमं मे गङ्गे' (ऋ. सं. १०. ७५. ५) इत्यादिमन्त्रोक्ताः सप्तसंख्याका गङ्गाद्या नद्यो मातर उत्पादिका येषां जलविशेषाणां ते सप्तमातरः। तैः Vसिन्धुभिः स्यन्दनस्वभावैर्जलैर्वसतीवरीनामभिः Vत्रिः सोमाभिषवः कृत इति शेषः। तथा चान्यत्र ब्राह्मणे समाम्नातम्–'अष्टौ कृत्वोऽभिषुणोति एकादश कृत्वो द्वितीयं द्वादश कृत्वस्तृतीयम्' (तै. सं. ६. ४. ५. १–२) इति। Vआहावाः यथोक्तजलयुक्तस्य सोमस्याधारभूताः कूपसदृशाः Vत्रयः त्रिसंख्याका द्रोणकलशाधवनीयपूतभृदाख्या निष्पन्ना इति शेषः। तेषु त्रिषु पात्रविशेषेषु Vत्रेधा त्रिभिः प्रकारैः सवनत्रयगतैः Vहविष्कृतं सोमाख्यं हविः संपादितं द्रव्यं वर्तते इति शेषः। Vतिस्रः Vपृथिवीरुपरि त्रिभ्यः पृथिव्यादिलोकेभ्य ऊर्ध्वं Vप्रवा प्रवन्तौ गच्छन्तौ युवां Vदिवो Vनाकं द्युलोकसंबन्धिनमादित्यं Vरक्षेथे। कीदृशं नाकम्। Vद्युभिः अहोभिः Vअक्तुभिः रात्रिभिश्च Vहितं स्थापितम्। अहनि सूर्य उदेति रात्रावस्तं गच्छतीत्येवमहोरात्राभ्यां सूर्यो व्यवस्थाप्यते इत्यर्थः॥ सप्तमातृभिः। बहुव्रीहिस्वरः। आहावाः। 'निपानमाहावः' (पा. सू. ३. ३. ७४) इति आङ्पूर्वात् ह्वयतेः अप्प्रत्ययः संप्रसारणं वृद्धिश्च निपातनात्। थाथादिना उत्तरपदान्तोदात्तत्वम्। प्रवा। 'च्युङ् प्रुङ् गतौ'। प्रवेते गच्छतः इति प्रवौ। पचाद्यच्। 'सुपां सुलुक्०' इति आकारः। नाकम्। न अस्मिन् अकम् अस्तीति नाकः। 'नभ्राण्नपात्०' इत्यादिना नञः प्रकृतिभावः। द्युभिः। 'ऊडिदम्०' इत्यादिना प्राप्तस्य विभक्त्युदात्तस्य 'दिवो झल्' (पा. सू. ६. १. १८३) इति प्रतिषेधः॥

---

१. ढ–इन्द्रियाणाम्।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

क॒ त्री च॒क्रा त्रि॒वृतो॒ रथ॑स्य॒ क॒ त्रयो॑ व॒न्धुरो॒ ये स॒नी॑ळाः ।
क॒दा योगो॑ वा॒जिनो॒ रास॑भस्य॒ येन॑ य॒ज्ञं ना॑सत्योप॒याथः॑ ॥ ९ ॥

क॑ । त्री । च॒क्रा । त्रि॒ऽवृ॑तः । रथ॑स्य । क॑ । त्रयः॑ । व॒न्धुरः॑ । ये । स॒ऽनी॑ळाः ।
क॒दा । योगः॑ । वा॒जिनः॑ । रास॑भस्य । येन॑ । य॒ज्ञम् । ना॒स॒त्या॒ । उ॒प॒ऽया॒थः॒ ॥ ९ ॥

हे नासत्यौ अश्विनौ [v]त्रिवृत्रः त्रिसंख्याकैरश्रिभिरुपेतस्य भवदीयस्य [v]रथस्य ईषाद्वयं पूर्वभागे संयुज्यते[1]। सेयम् एका अश्रिः। पृष्ठभागे वियुज्यते। तत्र कोणद्वयं संपद्यते। ईदृशस्य रथस्य संबन्धीनि [v]त्री [v]चक्रा त्रीणि चक्राणि [v]क । कुत्र स्थितानीत्यस्माभिर्न दृश्यते । [v]ये काष्ठविशेषाः [v]सनीळाः । नीळं गृहसदृशं रथस्योपरि उपवेशस्थानम् । तेन सह वर्तन्ते इति सनीळाः । ते काष्ठविशेषाः [v]वन्धुरः नीडबन्धनाधारभूताः [v]त्रयः अक्षेण सहिते द्वे ईषे इत्येवं त्रिसंख्याकाः [v]क । कुत्र स्थिता इत्यस्माभिर्न ज्ञायते । [v]वाजिनः बलवतः [v]रासभस्य भवदीयाश्वस्थानीयस्य गर्दभस्य [v]योगः रथे योजनं [v]कदा । कस्मिन् काले निष्पन्नम्[2] इत्यस्माभिर्न दृश्यते । [v]येन चक्रत्रयनीडकाष्ठत्रयरासभयोजनसहितेन रथेन [v]यज्ञम् अस्मदीयं यागस्थानम् [v]उपयाथः युवां प्राप्नुथः । तादृशस्य रथस्येति पूर्वत्रान्वयः ॥ त्री चक्रा । उभयत्रापि ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । वन्धुरः । बन्धेः औणादिकः उरप्रत्ययः । वत्वं छान्दसम् । सनीळाः। ' वोपसर्जनस्य ' इति सभावः ॥

आ ना॑सत्या॒ गच्छ॑तं हू॒यते॑ ह॒विर्मध्वः॑ पिबतं मधु॒पेभि॑रा॒सभिः॑ ।
यु॒वोर्हि पूर्वं॑ सवि॒तोष॑सो॒ रथ॑मृ॒ताय॑ चि॒त्रं घृ॒तव॑न्तमिष्यति ॥ १० ॥

आ । ना॒स॒त्या॒ । गच्छ॑तम् । हू॒यते॑ । ह॒विः । मध्वः॑ । पि॒ब॒त॒म् । म॒धु॒ऽपेभिः॑ । आ॒सऽभिः॑ ।
यु॒वोः॑ । हि । पूर्व॑म् । स॒वि॒ता । उ॒षसः॑ । रथ॑म् । ऋ॒ताय॑ । चि॒त्रम् । घृ॒तऽव॑न्तम् । इ॒ष्य॒ति ॥ १० ॥

हे नासत्यौ अश्विनौ इह कर्मणि [v]आ [v]गच्छतम् । अत्रास्माभिः [v]हविः [v]हूयते । युवां च [v]मधुपेभिः मधुरद्रव्यपानयुक्तैः [v]आसभिः भवदीयैरास्यैः [v]मध्वः मधुरद्रव्याणि हवींषि [v]पिबतम् । [v]सविता सूर्यः [v]उषसः [v]पूर्वम् उषःकालात्पुरा युवयोरश्विनोः संबन्धिनं [v]रथम् [v]ऋताय अस्मद्यज्ञार्थम् [v]इष्यति [v]हि प्रेरयति खलु । कीदृशम् । [v]चित्रं पूर्वोक्तैश्चित्रत्रयादिभिः विचित्रं [v]घृतवन्तम् अक्षाञ्जनसाधनेन घृतेनोपेतम् ॥ गच्छतम् । अदुपदेशात् लसार्वधातुकानुदात्तत्वे शपः पित्त्वादनुदात्तत्वम् । धातुस्वरः । अत्र गच्छतं पिबतं चेति चार्थप्रतीतेः ' चादिलोपे विभाषा ' इति प्रथमायाः तिङ्विभक्तेः निघातप्रतिषेधः । हूयते । लसार्वधातुकानुदात्तत्वे यकः स्वरः । मध्वः । लिङ्व्यत्ययः शसि यणादेशश्छान्दसः । मधुपेभिः । मधु पिबन्तीति मधुपानि[3]। ' आतोऽनुपसर्गे कः ' इति कप्रत्ययः । आसभिः । ' पदन्° ' इत्यादिना आस्यशब्दस्य आसन्नादेशः । युवोः । ' युवोर्हि यन्त्रम् ' इत्यत्रोक्तम् । इष्यति । ' इष गतौ ' । श्यनो नित्त्वादाद्युदात्तत्वम् । ' हि च ' इति निघातप्रतिषेधः ॥

---

१. च-फ-संयोज्यते । २. ढ-निष्पादितम् । ३. ढ-मधुपाः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना ।
प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥ ११ ॥

आ । नासत्या । त्रिऽभिः । एकादशैः । इह । देवेभिः । यातम् । मधुऽपेयम् । अश्विना ।
प्र । आयुः । तारिष्टम् । निः । रपांसि । मृक्षतम् । सेधतम् । द्वेषः । भवतम् । सचाऽभुवा ॥ ११ ॥

हे [V]नासत्या असत्येनानृतेन रहितौ [V]अश्विना अश्विदेवौ युवां [V]त्रिभिरेकादशैः ' ये देवासो दिव्येकादश स्थ ' ( ऋ. सं. १. १३९. ११ ) इत्यादिमन्त्रप्रतिपादितैस्त्रिसंख्याकैः एकादशात्मकवर्गत्रयगतैर्देवैः सह [V]मधुपेयं सोमात्मकं मधुरद्रव्यपानम्[4] अभिलक्ष्य [V]इह अस्मिन् देवयजनदेशे [V]आ [V]यातम् आगच्छतम्। [V]आयुः अस्मदीयमायुष्यं [V]प्र [V]तारिष्टं प्रवर्धयतम्। [V]रपांसि अस्मदीयानि पापानि [V]निः [V]मृक्षतं निःशेषेण शोधयतम्। [V]द्वेषः द्वेषकर्तॄन् [V]सेधतं प्रतिषेधतम्।[V]सचाभुवा अस्माभिः सहावस्थितौ [V]भवतम् ॥ त्रिभिः । ' षट्त्रिचतुर्भ्यः० ' इति विभक्तेरुदात्तत्वम्। एकादशैः । एकादशानां पूरणैः । ' तस्य पूरणे० ' ( पा. सू. ५. २. ४८ ) इति डट्। मधुपेयम्। ' पा पाने '। ' अचो यत् ' इति कर्मणि यत्। ' ईद्यति ' ( पा. सू. ६. ४. ६५ ) इति आकारस्य ईकारादेशः। ' यतोऽनावः ' इत्याद्युदात्तत्वम्। मधु च तत्पेयमिति समासे कृदुत्तरपदप्रकृतिस्वरत्वम्। तारिष्टम्। ' तॄ प्लवनतरणयोः '। छान्दसे प्रार्थनायां लुङि च्लेः सिच्। इडागमः। ' वृतो वा ' ( पा. सू. ७. २. ३८ ) इति प्राप्तस्य इटो दीर्घस्य ' सिचि च परस्मैपदेषु ' ( पा. सू. ७. २. ४० ) इति प्रतिषेधः। ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः। अत्र तारिष्टं मृक्षतं चेति चशब्दार्थप्रतीतेस्तस्य च अप्रयोगात् ' चादिलोपे विभाषा ' इति निघातप्रतिषेधः। ' आदिः सिचोऽन्यतरस्याम् ' ( पा. सू. ६. १. १८७ ) इत्याद्युदात्तत्वम्। मृक्षतम्। ' मृश आमर्शने '। ' छन्दसि लुङ्लङ्लिटः ' इति लोडर्थे लुङ्। ' शल इगुपधादनिटः क्सः ' ( पा. सू. ३. १. ४५ ) इति क्सादेशः। ' एकाच उपदेशेऽनुदात्तात् ' इति इट्प्रतिषेधः। षत्वकुत्वे। पूर्ववत् अडभावः। सेधतम्। ' षिधु गत्याम् '। अत्र केवलोऽपि षिधिः प्रतिपूर्वस्यार्थे वर्तते। प्रार्थनायां लोट्। शपः पित्त्वादनुदात्तत्वम्। तिङश्च लसार्वधातुकस्वरेण धातुस्वरः। पादादित्वात् तिङः परत्वात् वा निघाताभावः। द्वेषः। 'अन्येभ्योऽपि दृश्यन्ते' इति कर्तरि विच्। भवतम्। द्वेष इत्यस्य वाक्यान्तरगतत्वात् तदपेक्षयास्य निघातो न भवति, ' समानवाक्ये च निघातयुष्मदस्मदादेशा वक्तव्याः ' ( पा. सू. ८. १. १८. ५ ) इति वचनात्। सचाभुवा। सचा इत्ययं निपातः सहशब्दसमानार्थः। तथा च यास्कः—' सचा सहेत्यर्थः' (निरु. ५. ५) इति। सचा भवतः इति सचाभुवौ। क्विप्। ' ओः सुपि ' ( पा. सू. ६. ४. ८३ ) इति यणादेशस्य ' न भूसुधियोः ' ( पा. सू. ६. ४. ८५ ) इति प्रतिषेधः। ' सुपां सुलुक्० ' इति विभक्तेः आकारः ॥

आ नो अश्विना त्रिवृता रथेनार्वाञ्चं रयिं वहतं सुवीरम् ।
शृण्वन्ता वामवसे जोहवीमि वृधे च नो भवतं वाजसातौ ॥ १२ ॥

आ । नः । अश्विना । त्रिऽवृता । रथेन । अर्वाञ्चम् । रयिम् । वहतम् । सुऽवीरम् ।
शृण्वन्ता । वाम् । अवसे । जोहवीमि । वृधे । च । नः । भवतम् । वाजऽसातौ ॥ १२ ॥

---

४. ढ–मधुपानम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे vअश्विना vत्रिवृता vरथेन अप्रतिहतगतित्वात् त्रिषु लोकेषु वर्तमानेन रथेन सह vनः अस्माकम् vअर्वाञ्चम् अभिमुखं vसुवीरं शोभनैर्वीरैः पुत्रभृत्यादिभिरुपेतं vरयिं धनम् vआ vवहतम् आनीय प्रापयतम्। vशृण्वन्ता अस्मदीयस्तुतिं शृण्वन्तौ vवां युवाम् vअवसे अस्मद्रक्षणार्थं vजोहवीमि आह्वयामि। vनः अस्माकं vवाजसातौ संग्रामे। 'वाजसातौ महाधने' (नि. २. १७. ३६) इति संग्रामनामसु पाठात्। vवृधे वर्धनाय vच vभवतम्॥ सुवीरम्। शोभना वीरा यस्येति बहुव्रीहौ 'वीरवीर्यौ च' इत्युत्तरपदाद्युदात्तत्वम्। शृण्वन्ता। 'श्रु श्रवणे'। शतरि 'श्रुवः श्च च' (पा. सू. ३. १. ७४) इति श्रुः श्भावश्च। 'हुश्नुवोः सार्वधातुके' इति यणादेशः। 'सुपां सुलुक्०' इति आकारः। जोहवीमि। 'ह्वेञ् स्पर्धायां शब्दे च'। यङ्लुकि 'अभ्यस्तस्य च' (पा. सू. ६. १. ३३) इति कृतसंप्रसारणादस्मात् लडुत्तमैकवचने 'यङो वा' (पा. सू. ७. ३. ९४) इति ईडागमः। वृधे। 'वृधु वृद्धौ' इत्यस्मात् संपदादिलक्षणो भावे क्विप्। वाजसातौ। 'षणु दाने'। क्तिनि 'तितुत्र०' इत्यादिना इट्प्रतिषेधः। 'जनसन०' इत्यादिना आत्वम्। वाजानां सातिर्यस्मिन्निति पूर्वपदप्रकृतिस्वरत्वम्॥ ॥ ५ ॥

'ह्वाम्यग्निम्' इत्येकादशर्चं पञ्चमं सूक्तम्। हिरण्यस्तूप ऋषिः। आद्या नवमी च जगतीच्छन्दस्के। शिष्टास्त्रिष्टुभः। कृत्स्नस्य सूक्तस्य सविता देवता। आद्यायाः 'ह्वाम्यग्निम्' इत्यस्या अग्निमित्रावरुणरात्रिसवित्राख्या लिङ्गोक्तदेवताः। तथा चानुक्रान्तं—'ह्वाम्येकादश सावित्रं नवमी जगत्याद्या च लिङ्गोक्तदैवतपादास्त्रयः' इति। अभिप्लवषडहस्य चतुर्थेऽहनि वैश्वदेवशस्त्रे इदं सूक्तं सावित्रं निविद्धानम्। 'तृतीयस्य व्यर्यमा' इति खण्डे सूत्रितं—'ह्वाम्यग्निमस्य मे द्यावापृथिवी इति तिस्रः' (आश्व. श्रौ. ७. ७) इति॥

ह्वयाम्यग्निं प्रथमं स्वस्तये ह्वयामि मित्रावरुणाविहावसे।
ह्वयामि रात्रीं जगतो निवेशनीं ह्वयामि देवं सवितारमूतये॥ १॥

ह्वयामि। अग्निम्। प्रथमम्। स्वस्तये। ह्वयामि। मित्रावरुणौ। इह। अवसे।
ह्वयामि। रात्रीम्। जगतः। निऽवेशनीम्। ह्वयामि। देवम्। सवितारम्। ऊतये॥ १॥

vस्वस्तये अस्माकमविनाशाय। 'स्वस्तीत्यविनाशनाम' (निरु. ३. २१) इति यास्कः। vप्रथमम् आदौ vअग्निं vह्वयामि। vइह अस्मिन् कर्मणि vअवसे अस्मद्रक्षणाय vमित्रावरुणौ vह्वयामि। vजगतः जङ्गमस्य प्राणिजातस्य vनिवेशनीम् उपवेशनहेतुभूतां vरात्रीं रात्रिदेवतां vह्वयामि। जङ्गमाः सर्वे प्राणिनो दिवसे स्वस्वव्यापारान् कृत्वा स्वस्वगृहे रात्रौ उपविशन्तीति प्रसिद्धम्। vऊतये अस्मद्रक्षणार्थं vसवितारं vदेवं vह्वयामि॥ मित्रावरुणौ। 'देवताद्वन्द्वे च' इति पूर्वपदस्य आनङादेशः। 'देवताद्वन्द्वे च' इति उभयपदप्रकृतिस्वरत्वम्। रात्रीम्। 'रात्रेश्चाजसौ' (पा. सू. ४. १. ३१) इति ङीप्। निवेशनीम्। निविशन्त्यस्यामिति निवेशनी। 'करणाधिकरणयोश्च' इति ल्युट्। 'टिड्ढाणञ्०' (पा. सू. ४. १. १५) इत्यादिना ङीप्। ऊतये। अवतेः क्तिनि 'ज्वरत्वर०' इत्यादिना वकारस्य उपधायाश्च ऊठ्। 'ऊतियूति०' इत्यादिना क्तिन उदात्तत्वम्॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥ २ ॥

आ । कृष्णेन । रजसा । वर्तमानः । निऽवेशयन् । अमृतम् । मर्त्यम् । च ।
हिरण्ययेन । सविता । रथेन । आ । देवः । याति । भुवनानि । पश्यन् ॥ २ ॥

vसविता सूर्यः vकृष्णेन vरजसा कृष्णवर्णेन लोकेन । 'कृष्णं कृष्यतेर्निकृष्टो वर्णः' (निरु. २.२०) इति यास्कः । 'लोका रजांस्युच्यन्ते' (निरु. ४. १९) इति च । अन्तरिक्षलोको हि सूर्यागमनात् पुरा कृष्णवर्णो भवति । तेनान्तरिक्षमार्गेण vआ vवर्तमानः पुनःपुनरागच्छन् vअमृतं देवं vमर्त्यं मनुष्यं vच vनिवेशयन् स्वस्वस्थानेऽवस्थापयन् । यद्वा । अमृतं मरणरहितं प्राणं मर्त्यं मरणसहितं शरीरं च निवेशयन् । तथा चारण्यकाण्डे 'अमर्त्यो मर्त्येना सयोनिः' (ऋ.सं.१.१६४.३८) इत्येतस्य मन्त्रभागस्य व्याख्यानरूपे ब्राह्मणे यथोक्तोऽर्थोऽवगम्यते–'मर्त्यानि हीमानि शरीराणि अमृतैषा देवता' (ऐ. आ. २. १. ८) इति । यथोक्तगुणोपेतः सविता vदेवः vभुवनानि सर्वान् लोकान् vपश्यन् अवेक्षमाणः प्रकाशयन्नित्यर्थः । vहिरण्ययेन सुवर्णनिर्मितेन vरथेन vआ vयाति अस्मत्समीपमागच्छति॥ अमृतम् । मृतं मरणं नास्ति अस्येति बहुव्रीहौ 'नञो जरमरमित्रमृताः' इत्युत्तरपदाद्युदात्तत्वम् । मर्त्यम् । मर्ते भवम् । 'भवे छन्दसि' इति यत् । 'यतोऽनावः' इत्याद्युदात्तत्वम् । हिरण्ययेन । 'ऋत्व्यवास्त्व्य०' (पा. सू. ६. ४. १७५) इत्यादिना मयटो मकारलोपो निपातितः । यस्येति लोपे प्रत्ययस्वरः । भुवनानि । 'भू सत्तायाम्' । 'भूसूधूभ्रस्जिभ्यश्छन्दसि' (उ. सू. २. २३८) इति क्युन्प्रत्ययः । योरनादेशे उवङादेशः । नित्त्वादाद्युदात्तत्वम् ॥

यातिं देवः प्रवता यात्युद्वता यातिं शुभ्राभ्यां यजतो हरिभ्याम् ।
आ देवो याति सविता परावतोऽप विश्वा दुरिता बाधमानः ॥ ३ ॥

यातिं । देवः । प्रऽवता । यातिं । उत्ऽवता । यातिं । शुभ्राभ्याम् । यजतः । हरिऽभ्याम् ।
आ । देवः । याति । सविता । पराऽवतः । अप । विश्वा । दुःऽइता । बाधमानः ॥ ३ ॥

vदेवः दीप्यमानः सविता vप्रवता प्रवणवता मार्गेण vयाति गच्छति । तथा vउद्वता उत्कृष्टेनोर्ध्वदेशयुक्तेन मार्गेण vयाति । उदयानन्तरं आमध्याह्नमूर्ध्वो मार्गः; तत उपरि आसायं प्रवणो मार्ग इति विवेकः । तथा vयजतः यष्टव्यः स देवः vशुभ्राभ्यां श्वेताभ्यां vहरिभ्याम् अश्वाभ्यां vयाति देवयजनदेशे गच्छति । vसविता vदेवः vविश्वा vदुरिता सर्वाणि पापानि vअप vबाधमानः विनाशयन् vपरावतः दूरदेशात् । 'परावतः' (नि. ३. २६. ५) इति दूरनामसु पठितत्वात् । तादृशात् द्युलोकात् vआ vयाति यागदेशे आगच्छति[1] ॥ प्रवता । 'वन षण संभक्तौ' । अस्मात् प्रपूर्वात् क्विप् । 'गमादीनामिति वक्तव्यम्' (पा. सू. ६. ४. ४०. १) इत्यनुनासिकलोपः । ततः तुक् । कृदुत्तरपद-

---

१. ढ–समागच्छति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रकृतिस्वरत्वम्। उद्वता। उत्पूर्वात् वनतेः पूर्ववत्प्रक्रिया। यजतः। 'भृमृदृशि०' (उ. सू. ३. ३९०) इत्यादिना यजतेः[1] कर्मणि अतच्प्रत्ययः। विश्वा दुरिता। उभयत्र 'शेश्छन्दसि बहुलम्' इति शेर्लोपः॥

अभीवृतं कृशनैर्विश्वरूपं हिरण्यशम्यं यजतो बृहन्तम्।
आस्थाद्रथं सविता चित्रभानुः कृष्णा रजांसि तविषीं दधानः॥ ४॥

अभिऽवृतम्। कृशनैः। विश्वऽरूपम्। हिरण्यऽशम्यम्। यजतः। बृहन्तम्।
आ। अस्थात्। रथम्। सविता। चित्रऽभानुः। कृष्णा। रजांसि। तविषीम्। दधानः॥४॥

vसविता vरथम् vआस्थात् आस्थितवान् आरूढवानित्यर्थः। कीदृशम्। vअभीवृतम् अभितो वर्तमानम्। तथा vकृशनैर्विश्वरूपं सुवर्णेन नानारूपम्। 'कृशनं लोहम्' (नि. १. २. ७) इति सुवर्णनामसु पाठात्। क्वचित् सुवर्णनिर्मितगजपङ्क्तिः क्वचिदश्वपङ्क्तिः क्वचिन्मनुष्यपङ्क्तिरित्येवं बहुरूपत्वम्[2]। vहिरण्यशम्यम्। अश्वानां स्कन्धेषु रथयोजनवेलायां नियन्तुं प्रक्षेप्यमाणाः शङ्कवः शम्याः। ताः सुवर्णमय्यो रथे वर्तन्ते। vबृहतं प्रौढम्। कीदृशः सविता। vयजतः यष्टव्यः vचित्रभानुः विविधरश्मियुक्तः vकृष्णा vरजांसि अन्धकारयुक्ततया कृष्णवर्णान् लोकानुद्दिश्य तमोनिवारणार्थं vतविषीं बलं स्वकीयं प्रकाशरूपं vदधानः॥ अभीवृतम्। अभितो वर्तते इत्यभीवृत्। 'वृतु वर्तने'। क्विपि 'नहिवृति०' (पा. सू. ६. ३. ११६) इत्यादिना पूर्वपदस्य दीर्घत्वम्। विश्वरूपम्। विश्वानि रूपाणि यस्यासौ विश्वरूपः। 'बहुव्रीहौ विश्वं संज्ञायाम्' इति व्यत्ययेन असंज्ञायामपि पूर्वपदान्तोदात्तत्वम्। हिरण्यशम्यम्। 'हर्य गतिकान्त्योः'। 'हर्यतेः कन्यन् हिर च' (उ. सू. ५. ७२२) इति कन्यन्प्रत्ययो धातोर्हिरादेशश्च। नित्त्वादाद्युदात्तत्वम्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। आस्थात्। तिष्ठतेर्लुङि 'गातिस्था०' इति सिचो लुक्। कृष्णा। 'कृषेर्वर्णे' (उ. सू. ३. २८४) इति नक्प्रत्ययः। 'शेश्छन्दसि बहुलम्' इति शेर्लोपः। तविषीम्। तवतिः सौत्रो धातुः। 'तवतेर्णिद्वा' (उ. सू. १. ४८) इति टिषच्। टित्त्वात् 'टिड्ढाणञ्' इत्यादिना ङीप्। व्यत्ययेन आद्युदात्तत्वं वृषादित्वात् द्रष्टव्यम्। दधानः। शानचि 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम्॥

वि जनाञ्छ्यावाः शितिपादो अख्यन्रथं हिरण्यप्रउगं वहन्तः।
शश्वद्विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः॥ ५॥

वि। जनान्। श्यावाः। शितिऽपादः। अख्यन्। रथम्। हिरण्यऽप्रउगम्। वहन्तः।
शश्वत्। विशः। सवितुः। दैव्यस्य। उपऽस्थे। विश्वा। भुवनानि। तस्थुः॥ ५॥

vश्यावाः एतन्नामकाः सूर्यस्याश्वाः। 'श्यावाः सवितुः' (नि. १. १५. ८) इति निघण्टावुक्तत्वात्। ते च vशितिपादः श्वेतैः पादैरुपेताः vहिरण्यप्रउगम्। रथस्य मुखम् ईषयोरग्रं युगबन्धनस्थानं प्रउगमित्युच्यते। तच्चात्र सुवर्णमयम्। तद्युक्तं vरथं vवहन्तः vजनान् प्राणिनः vवि vअख्यन् विशेषेण

---

१. ढ–यजेः। २. ढ–बहुरूपम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रकाशितवन्त इत्यर्थः । [v]शश्वत् सर्वदा [v]विशः प्रजाः [v]दैव्यस्य इतरदेवसंबन्धिनः [v]सवितुः प्रेरकस्य सूर्यस्य [v]उपस्थे समीपस्थाने [v]तस्थुः स्थितवत्यः । न केवलं प्रजाः किं तर्हि [v]विश्वा [v]भुवनानि सर्वे च लोकाः प्रकाशाय सूर्यसमीपे तस्थुः॥ शितिपादः । शितयः श्वेतवर्णाः पादा येषां ते शितिपादाः । 'सुपां सुलुक्° ' इति जसः सुआदेशः । यद्वा । शितिः श्वेतवर्गः स्फाटिकादिः । स इव पादो येषां ते । 'पादस्य लोपोऽहस्त्यादिभ्यः ' ( पा. सू. ५. ४. १३८ ) इति समासान्तपादशब्दस्यान्त्यलोपः । उपमानात् इति हि तत्रानुवर्तते । पादशब्दस्य वृषादित्वादाद्युदात्तत्वम् । तस्य बहुव्रीहौ समासे ' शितेर्नित्याबह्वज्बहुव्रीहावभसत् ' ( पा. सू. ६. २. १३८ ) इत्युत्तरपदप्रकृतिस्वरत्वम् । अख्यन् । ख्यातेर्लुङि ' अस्यतिवक्ति° ' इत्यादिना च्लेः अङादेशः । हिरण्यप्रउगम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । वहन्तः । शपः पित्त्वादनुदात्तत्वम् । शतुश्च लसार्वधातुकस्वरेण धातुस्वरः[1] । दैव्यस्य । तस्येदमित्यर्थे ' देवाद्यञञौ ' (पा. सू.४. १.८५.३) इति देवशब्दात् प्राग्दीव्यतीयो यञ् । ' तद्धितेष्वचामादेः ' (पा.सू.७.२.११७) इति आदिवृद्धिः । ' ञ्नित्यादिर्नित्यम् ' इत्याद्युदात्तत्वम् । उपस्थे । ' आतश्चोपसर्गे ' इति कः । ' आतो लोप इटि च ' इति आकारलोपः । मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् ॥

तिस्रो द्यावः सवितुर्द्वा उपस्थाँ एका यमस्य भुवने विराषाट् ।
आणिं न रथ्यममृताधि तस्थुरिह ब्रवीतु य उ तच्चिकेतत् ॥ ६ ॥

तिस्रः । द्यावः । सवितुः । द्वौ । उपऽस्था । एका । यमस्य । भुवने । विराषाट् ।
आणिम् । न । रथ्यम् । अमृता । अधि । तस्थुः । इह । ब्रवीतु । यः । ऊँ इति । तत् । चिकेतत् ॥६॥

[v]द्यावः स्वर्गोपलक्षिताः प्रकाशमाना लोकाः [v]तिस्रः त्रिसंख्याकाः सन्ति । तत्र [v]द्वौ लोकौ [v]सवितुः सूर्यस्य [v]उपस्था समीपस्थाने वर्तेते; द्युलोकभूलोकयोः सूर्येण प्रकाशितत्वात् । [v]एका मध्यमा भूमिरन्तरिक्षलोकः [v]यमस्य [v]भुवने पितृपतेर्गृहे [v]विराषाट् विरान् गन्तॄन् सहते । प्रेताः पुरुषा अन्तरिक्षमार्गेण यमलोके गच्छन्तीत्यर्थः । [v]अमृता अमृतानि चन्द्रनक्षत्रादीनि ज्योतींषि जलानि वा [v]अधि [v]तस्थुः सवितारमधिगम्य स्थितानि । तत्र दृष्टान्तः । [v]रथ्यम् [v]आणिं [v]न । रथाद्बहिः अक्षच्छिद्रे प्रक्षिप्तः कीलविशेषः[2] आणिरित्युच्यते । रथसंबन्धिनम् आणिम् अधिगम्य यथा रथस्तिष्ठति तद्वत् । [v]यः तु मानवः [v]तत् सवितृरूपं [v]चिकेतत् जानाति स मानवः [v]इह अस्मिन् विषये [v]ब्रवीतु कथयतु । केनापि वक्तुमशक्यः सवितुर्महिमेत्यर्थः ॥ तिस्रः । ' तिसृभ्यो जसः ' (पा. सू. ६. १. १६६ ) इति विभक्तेरुदात्तत्वम् । द्वौ । संहितायामावादेशे ' लोपः शाकल्यस्य ' इति वकारलोपः । उपस्था । ' आङ्याजयारां चोपसंख्यानम् ' (पा. म. ७. १. ३९. १) इति सप्तम्या आङादेशः । ' आङोऽनुनासिकश्छन्दसि ' ( पा. सू. ६. १. १२६ ) इति प्रकृतिभावः । विराषाट् । ' वृञ् वरणे ' । ' घञर्थे कविधानम्° ' ( पा. सू. ३. ३. ५८. ४ ) इति कर्मणि कः । ' बहुलं छन्दसि ' ( पा. सू. ७. १. १०३ ) इति इत्वम् । तथा सति वूर्यन्ते इति विरा इत्युक्तं भवति । तान् सहते इति विराषाट् । ' छन्दसि सहः ' ( पा. सू. ३. २. ६३ ) इति सहेर्ण्विः । ' सहेः साडः° ' ( पा. सू. ८. ३. ५६ ) इति षत्वम् । ' अन्येषामपि दृश्यते ' इति पूर्वपदस्य दीर्घः । रथ्यम् । रथस्येदं रथ्यम् । ' रथाद्यत् ' ( पा. सू. ४.

---

१. च-छ-ण-त-फ-श–' धातुस्वरः ' इत्यस्यानन्तरं ' कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते ' इत्यधिकम् । २. ढ–काष्ठविशेषः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

३. १२१ ) इति यत्। ' यतोऽनावः ' इत्याद्युदात्तत्वम्। अमृता। ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः। चिकेतत्। ' कित ज्ञाने '। लेटि अडागमः। ' इतश्च लोपः° ' इति इकारलोपः। जुहोत्यादित्वात् श्लुः। लघूपधगुणः। ' अनुदात्ते च ' ( पा. सू. ६. १. १९० ) इति अभ्यस्तस्याद्युदात्तत्वम्। यद्वृत्तयोगादनिघातः॥ ॥ ६ ॥

**वि सुपर्णो अन्तरिक्षाण्यख्यद्गभीरवेपा असुरः सुनीथः।**
**क इदानीं सूर्यः कश्चिकेत कतमां द्यां रश्मिरस्या ततान ॥ ७ ॥**

वि। सुऽपर्णः। अन्तरिक्षाणि। अख्यत्। गभीरऽवेपाः। असुरः। सुऽनीथः।
क। इदानीम्। सूर्यः। कः। चिकेत। कतमाम्। द्याम्। रश्मिः। अस्य। आ। ततान ॥७॥

[v]सुपर्णः शोभनपतनः सूर्यस्य रश्मिः। ' सुपर्णा[1] इति पञ्चदश रश्मिनामानि ' (नि. १. ५. १५) इति तन्नामसु पठितत्वात्[1]। [v]अन्तरिक्षाणि अन्तरिक्षोपलक्षितानि लोकत्रयस्थानानि [v]वि [v]अख्यत् विशेषेण ख्यापितवान् प्रकाशितवान्। कीदृशो रश्मिः। [v]गभीरवेपाः गम्भीरकम्पनः। रश्मेः प्रकम्पनं[2] चलनं केनापि द्रष्टुमशक्यमित्यर्थः। [v]असुरः सर्वेषां प्राणदः। तथा चान्यत्र आम्नायते—' सर्वेषां भूतानां प्राणानादायोदेति ' ( तै. आ. १.१४.१ ) इति। [v]सुनीथः सुनयनः शोभनप्रापणः। मार्गप्रकाशनेन अभीष्टदेशं प्रापयतीत्यर्थः। तादृशरश्मियुक्तः [v]सूर्यः [v]इदानीं रात्रौ [v]क कुत्र वर्तते। तदेतद्रहस्यं [v]कश्चिकेत को जानाति। न कोऽपीत्यर्थः। [v]अस्य सूर्यस्य [v]रश्मिः [v]कतमां [v]द्याम् [v]आ [v]ततान कं द्युलोकं रात्रौ व्याप्तवान्। एतदपि को जानाति॥ सुपर्णः। ' नञ्सुभ्याम्° ' इत्युत्तरपदान्तोदात्तत्वम्। गभीरवेपाः। ' टुवेपृ कम्पने '। असुन्। गभीरं वेपो यस्य। पूर्वपदप्रकृतिस्वरत्वम्। असुरः। ' असु क्षेपणे '। अस्यति शत्रून् इत्यसुरः। ' असेरुरन् ' ( उ. सू. १. ४२ )। नित्त्वादाद्युदात्तत्वम्। यद्वा। असून् प्राणान् राति ददातीत्यसुरः। ' आतोऽनुपसर्गे कः ' इति कप्रत्ययः। सुनीथः। ' णीञ् प्रापणे '। ' हनिकुषिनीरमिकाशिभ्यः क्थन् ' ( उ. सू. २. १५९ ) इति क्थन्। प्रादिसमासे थाथादिना उत्तरपदान्तोदात्तत्वम्। इदानीम्। इदंशब्दात् सप्तम्यर्थे ' दानीं च ' (पा. सू. ५. ३. १८) इति दानींप्रत्ययः। ' इदम इश् ' इति इदंशब्दस्य इशादेशः। प्रत्ययाद्युदात्तत्वम्। सूर्यः। ' षू प्रेरणे '। सुवतीति सूर्यः। ' राजसूयसूर्य° ' इत्यादिना रुडागमसहितः क्यप्प्रत्ययो निपातितः। प्रत्ययस्यानुदात्तत्वे धातुस्वरेणाद्युदात्तत्वम्। चिकेत। ' कित ज्ञाने '। लिट्। कतमां किंजातीयाम्। ' वा बहूनां जातिपरिप्रश्ने डतमच् ' ( पा. सू. ५. ३. ९३ ) इति किंशब्दात् डतमच्। डित्त्वात् टिलोपः। ' चितः ' इत्यन्तोदात्तत्वम्॥

**अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून्।**
**हिरण्याक्षः सविता देव आगाद्दधद्रत्ना दाशुषे वार्याणि ॥ ८ ॥**

अष्टौ। वि। अख्यत्। ककुभः। पृथिव्याः। त्री। धन्व। योजना। सप्त। सिन्धून्।
हिरण्यऽअक्षः। सविता। देवः। आ। अगात्। दधत्। रत्ना। दाशुषे। वार्याणि ॥ ८ ॥

---

१. ढ—सुपर्णा इति रश्मिनामसु पठितत्वात्। २. ढ—कम्पनम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]पृथिव्याः संबन्धिनीः [v]अष्टौ [v]ककुभः प्राच्याद्याश्चतस्रो दिश आग्नेय्याद्याश्चतस्रो विदिश इत्येवमष्टौ दिशः [v]व्यख्यत् सविता प्रकाशितवान्। तथा [v]योजना प्राणिनः स्वस्वभोगेन[1] योजयितॄन् [v]धन्व अन्तरिक्षोपलक्षितान् [v]त्री त्रिसंख्याकान् पृथिव्यादिलोकान् [v]सप्त [v]सिन्धून् गङ्गादिनदीः समुद्रान्वा सविता व्यख्यत्। [v]हिरण्याक्षः। हितरमणीयचक्षुर्युक्तो हिरण्यमयाक्षो वा [v]सविता [v]देवः [v]आगात् इहागच्छतु। किं कुर्वन्। [v]दाशुषे हविर्दत्तवते यजमानाय [v]वार्याणि वरणीयानि रत्नानि [v]दधत् प्रयच्छन्॥ अख्यत्। ख्यातेर्लुङि 'अस्यतिवक्ति०' इत्यादिना च्लेः अङादेशः। त्री। 'शेश्छन्दसि बहुलम्' इति शेर्लोपः। धन्व। 'रिवि रवि धवि गत्यर्थाः'। 'इदितो नुम् धातोः' इति नुम्। अस्मात् 'कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः' इति कनिन्। 'सुपां सुलुक्०' इति विभक्तेर्लुक्। नलोपः। प्रत्ययस्य नित्त्वादाद्युदात्तत्वम्। योजना। योजयन्ति प्राणिन उपभोगेनेति योजनानि। नन्द्यादिलक्षणो ल्युः। 'णेरनिटि' इति णिलोपः। पूर्ववत् शेर्लोपः। हिरण्याक्षः। हिरण्यमयान्यक्षीणि यस्यासौ हिरण्याक्षः। 'बहुव्रीहौ सक्थ्यक्ष्णोः०' (पा. सू. ५. ४. ११३) इति समासान्तः षच्प्रत्ययः। अगात्। एतेर्लुङि 'इणो गा लुङि' (पा. सू. २. ४. ४५) इति गादेशः। 'गातिस्था०' इति सिचो लुक्। दधत्। शतरि 'नाभ्यस्ताच्छतुः' इति नुमागमप्रतिषेधः। 'श्नाभ्यस्तयोरातः' इति आकारलोपः। 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम्। दाशुषे। 'दाश्वान्साह्वान्०' इत्यादिना क्वसुप्रत्ययान्तो निपातितः। चतुर्थ्येकवचने 'वसोः संप्रसारणम्' इति संप्रसारणम्। परपूर्वत्वम्। 'शासिवसिघसीनां च' इति षत्वम्। वार्याणि। 'वृङ् संभक्तौ'। ऋहलोर्ण्यत्। 'ईडवन्द०' इत्यादिनाद्युदात्तत्वम्॥

हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते।
अपामीवां बाधते वेति सूर्यमभि कृष्णेन रजसा द्यामृणोति॥ ९॥

हिरण्यऽपाणिः। सविता। विऽचर्षणिः। उभे इति। द्यावापृथिवी इति। अन्तः। ईयते। अप। अमीवाम्। बाधते। वेति। सूर्यम्। अभि। कृष्णेन। रजसा। द्याम्। ऋणोति॥९॥

[v]हिरण्यपाणिः सुवर्णमयहस्तयुक्तः। यद्वा। यजमानेभ्यो दातुं हिरण्यं हस्ते धृतवान्। [v]विचर्षणिः विविधदर्शनयुक्तः। विचर्षणिः पश्यत्यर्थः। 'विचर्षणिः विश्वचर्षणिः' (नि. ३. ११. ६) इति तन्नामसु पाठात्। [v]सविता देवः [v]उभे [v]द्यावापृथिवी [v]अन्तः उभयोर्लोकयोर्मध्ये [v]ईयते गच्छति। [v]अमीवां रोगादिबाधाम्[2] [v]अप [v]बाधते सम्यक् निराकरोति। तथा [v]सूर्यं [v]वेति गच्छति। यद्यपि सवितृसूर्ययोरेकदेवतात्वं तथापि मूर्तिभेदेन गन्तृगन्तव्यभावः। [v]कृष्णेन तमसः कर्षकेण निवर्तकेन [v]रजसा तेजसा [v]द्याम् आकाशम् [v]अभि [v]ऋणोति सर्वतो व्याप्नोति॥ द्यावापृथिवी। 'दिवसश्च पृथिव्याम्' (पा. सू. ६. ३. ३०) इति चशब्दात् दिव्शब्दस्य द्यावादेशः। 'देवताद्वन्द्वे च' इत्युभयपदप्रकृतिस्वरत्वम्। 'नोत्तरपदेऽनुदात्तादौ०' (पा. सू. ६. २. १४२) इति न निषेधः, '०अपृथिवीरुद्रपूषमन्थिषु' इति पर्युदस्तत्वात्। ईयते। 'ईङ् गतौ'। 'तिङ्ङतिङः' इति निघातः। बाधते। बाधते च वेति चेति समुच्चयार्थप्रतीतेः चशब्दस्याप्रयोगात् 'चादिलोपे विभाषा' इति निघातप्रतिषेधः। वेति। 'वी गतिप्रजनकान्त्यशनखादनेषु'। अदादित्वात् शपो लुक्। तिपः पित्त्वादनुदात्तत्वे धातुस्वरः। यद्यप्येषा

---

१. ढ–स्वस्वभागेन। २. ढ–नैशं जगदान्ध्यम्।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

द्वितीया तथापि तिङः परत्वात् निघाताभावः। ऋगोति। 'ऋगु गतौ'। तनादित्वात् उः। तनादिषु करोतेरेव गुगो नान्येषामिति आपिशलिमतेन गुणाभावः ॥

हिरण्यहस्तो असुरः सुनीथः सुमृळीकः स्ववाँ यात्वर्वाङ् ।
अपसेधन्रक्षसो यातुधानानस्थाद्देवः प्रतिदोषं गृणानः ॥ १० ॥

हिरण्यऽहस्तः। असुरः। सुऽनीथः। सुऽमृळीकः। स्वऽवान्। यातु। अर्वाङ्।
अपऽसेधन्। रक्षसः। यातुऽधानान्। अस्थात्। देवः। प्रतिऽदोषम्। गृणानः ॥ १० ॥

[v]हिरण्यहस्तः [v]असुरः प्राणदाता [v]सुनीथः सुष्ठु नेता प्रशस्य इत्यर्थः। 'सुनीथः पाकः' (नि. ३. ८. ७) इति प्रशस्यनामसु पाठात्। [v]सुमृळीकः सुष्ठु सुखयिता [v]स्ववान् धनवान् [v]अर्वाङ् अभिमुखः[1] कर्मदेशे गच्छतु। किंचायं [v]देवः [v]प्रतिदोषं प्रतिरात्रि [v]गृणानः स्तूयमानः [v]अस्थात् स्थितवान्। किं कुर्वन्। [v]रक्षसः बाधकत्वेन रक्षणनिमित्तभूतान् 'रक्षो रक्षितव्यमस्मात्' (निरु. ४. १८) इति यास्कः। [v]यातुधानान् असुरान् [v]अपसेधन् निराकुर्वन्॥ हिरण्यहस्तादयो गताः। सुमृळीकः। सुष्ठु मृळीकं सुखं यस्यासौ तथोक्तः। 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। स्ववान्। स्वम् अस्यास्तीति स्ववान्। 'मादुपधायाः०' इति वत्वम्। संहितायां नकारस्य 'दीर्घादटि समानपादे' इति रुत्वम्। 'आतोऽटि नित्यम्' इति सानुनासिक आकारः। रोर्यत्वम्। यलोपश्च। अपसेधन्। 'षिधु गत्याम्'। शपः पित्त्वादनुदात्तत्वम्। शतुश्च लसार्वधातुकस्वरेण कृदुत्तरपदप्रकृतिस्वरत्वम्। रक्षसः। 'रक्ष पालने' इत्यस्मात् अपादाने औणादिकः असिप्रत्ययः। यद्वा। रक्षन्त्यनेनेति रक्षो बलम्। करणेऽसुन्। तदेषामस्तीति रक्षस्विनः। मत्वर्थप्रत्ययलोपश्छान्दसः। प्रत्ययस्वरः। यातुधानान्। 'यत निकारोपसंस्कारयोः'। तस्मात् ण्यन्तात् औणादिको भावे उप्रत्ययः। यातवो यातना एषु धीयन्ते इति यातुधानाः। अधिकरणे ल्युट्। 'लिति' इति प्रत्ययात्पूर्वस्योदात्तत्वम्। अस्थात्। 'गातिस्था०' इति सिचो लुक्। प्रतिदोषम्। दोषांदोषाम्। प्रति वीप्सालक्षणे यथार्थे। अव्ययीभावः। गृणानः। 'ग शब्दे'। कर्मणि लटः शानच्। व्यत्ययेन श्ना। 'प्वादीनां ह्रस्वः' इति ह्रस्वत्वम्। 'चितः' इत्यन्तोदात्तत्वम् ॥

ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे ।
तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव ॥ ११ ॥

ये। ते। पन्थाः। सवितरिति। पूर्व्यासः। अरेणवः। सुऽकृताः। अन्तरिक्षे।
तेभिः। नः। अद्य। पथिऽभिः। सुऽगेभिः। रक्ष। च। नः। अधि। च। ब्रूहि। देव ॥ ११ ॥

हे [v]सवितः [v]ते तव [v]पन्थाः मार्गाः [v]पूर्व्यासः पूर्वसिद्धाः [v]अरेणवः धूलिरहिताः [v]अन्तरिक्षे [v]सुकृताः सुष्ठु संपादिताः। [v]सुगेभिः सुष्ठु गन्तुं शक्यैः [v]तेभिः [v]पथिभिः तैर्मार्गैरागत्य [v]अद्य अस्मिन् दिने [v]नः अस्मान् [v]रक्ष [v]च पालनमपि कुरु। तथा हे [v]देव [v]नः अस्मान् अनुष्ठातॄन् [v]अधि [v]ब्रूहि [v]च

---

१. ढ–अस्मदभिमुखः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

देवानामग्रेऽधिकरत्वेन कथय च ॥ पन्थाः । ' सुपां सुलुक्° ' इति जसः सुः । ' पथिमथोः सर्वनामस्थाने ' इत्याद्युदात्तत्वम् । पूर्व्यासः । पूर्वैः कृताः पूर्व्याः । ' पूर्वैः कृतमिनियौ च ' (पा. सू. ४. ४. १३३ ) इति यः । प्रत्ययस्वरः । असुगागमः । अरेणवः । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । सुकृताः । कर्मणि क्तः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । सुगेभिः । सुष्ठु गच्छन्त्येष्विति सुगाः । ' सुदुरोरधिकरणे ' (पा. सू. ३. २. ४८. ३ ) इति गमेर्डप्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वम् । रक्ष । ' व्यचोऽतस्तिङः ' इति संहितायां दीर्घः ॥ ॥ ७ ॥ ॥ ७ ॥

अष्टमेऽनुवाकेऽष्टौ सूक्तानि । तत्र ' प्र वो यह्वम् ' इति विंशत्यृचं प्रथमं सूक्तम् । घोरपुत्रः कण्व ऋषिः । अयुजो बृहत्यः तृतीयपादस्य द्वादशाक्षरत्वात् । युजः सतोबृहत्यः प्रथमतृतीययोः पादयोर्द्वादशाक्षरत्वात् । अग्निर्देवता । ' ऊर्ध्व ऊ षु ' इत्यादिके यूपदेवत्ये । तथा चानुक्रान्तं–' प्र वो विंशतिः कण्वो घौर आग्नेयं प्रागाथमूर्ध्व ऊ षु यौप्यौ ' इति । ननु ' ऊर्ध्व ऊ षु ' इत्यादिकयोरप्यग्नेर्देवतात्वेन भवितव्यमाग्नेये क्रतौ अनयोरनुद्धारात् । तथा हि सूत्रे ' एना वो अग्निं प्र वो यह्वम् ' ( आश्व. श्रौ. ४. १३ ) इति प्रतीकमात्रस्यैवोपादानात् कृत्स्नसूक्तमाग्नेयमिति गम्यते । यद्येते अन्यदेवत्ये स्यातां ' वसिष्वा हीति सूक्तयोरुत्तमामुद्धरेत् ' ( आश्व. श्रौ. ४. १३ ) इतिवत् उद्धारं ब्रूयात् । न च ब्रूते । अतः कथं यौप्याविति । नैष दोषः । यूपाधिष्ठानस्याग्नेः स्तूयमानत्वात् अनयोरपि अग्निर्देवता इत्याग्नेये क्रतौ उद्धारो न कृतः । अधिष्ठानप्राधान्यविवक्षया यौप्यावित्येतदपि न विरुध्यते । प्रातरनुवाके आग्नेये क्रतौ बार्हते छन्दसि ' प्र वो यह्वम् ' इति सूक्तम् । ' अथैतस्या रात्रेर्विवासकाले ' इति खण्डे सूत्रितम्– ' एना वो अग्निं प्र वो यह्वम् ' इति ॥

प्र वो यह्वं पुरूणां विशां देवयतीनाम् ।
अग्निं सूक्तेभिर्वचोभिरीमहे यं सीमिदन्य ईळते ॥ १ ॥

प्र । वः । यह्वम् । पुरूणाम् । विशाम् । देवऽयतीनाम् ।
अग्निम् । सुऽउक्तेभिः । वचःऽभिः । ईमहे । यम् । सीम् । इत् । अन्ये । ईळते ॥ १ ॥

हे ऋत्विग्यजमानाः [v]देवयतीनां देवान् कामयमानानां [v]पुरूणां बहूनां [v]विशां प्रजारूपाणां [v]वः युष्माकमनुग्रहाय [v]यह्वं महान्तम् । ' यह्वः ववक्षिथ ' (नि. ३.३.१३) इति महन्नामसु पाठात् । [v]अग्निं [v]सूक्तेभिर्वचोभिः सूक्तरूपैर्वाक्यैः [v]प्र [v]ईमहे प्रकर्षेण याचामहे । ' ईमहे यामि ' ( नि. ३.१९.१ ) इति याच्ञाकर्मसु पाठात् । [v]अन्ये [v]इत् अन्येऽपि ऋषयः [v]यम् अग्निं [v]सीं सर्वतः [v]ईळते स्तुवन्ति । तमग्निमिति पूर्वत्रान्वयः ॥ पुरूणाम् । ' नामन्यतरस्याम् ' इति नाम उदात्तत्वम् । विशाम् । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । देवयतीनाम् । देवानात्मन इच्छन्त्यो देवयन्त्यः । ' सुप आत्मनः क्यच् ' । ' न च्छन्दस्यपुत्रस्य ' इति ईत्वस्येव दीर्घस्यापि प्रतिषेधः, ' अश्वाघस्यात् ' इति पुनः आत्वविधानात् ज्ञापकात् । क्यजन्तात् लटः शतृ । कर्तरि शप् । शपः पित्त्वादनुदात्तत्वम् । शतुश्च लसार्वधातुकस्वरेण क्यचा सह एकादेशे ' एकादेश उदात्तेनोदात्तः ' इति शतुरुदात्तत्वम् । ' उगितश्च ' इति ङीप् । ' अनित्यमागमशासनम् ' इति वचनात् नुमभावः; एकादेशस्वरस्य पूर्वत्रासिद्धत्वं नेष्यते इति वचनात् (पा. सू. ८. २. ६. १ ) । शतुरुदात्तत्वं सिद्धमेवेति ' शतुरनुमः° ' इति नद्या उदात्तत्वम् । सूक्तेभिः । वक्तेः ' क्तिच्क्तौ च संज्ञायाम् ' इति क्तः । थाथादिना उत्तरपदान्तोदात्तत्वम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ईळ्ते । 'ईड स्तुतौ' । अदादित्वात् शपो लुक् । अनुदात्तेत्त्वात् लसार्वधातुकानुदात्तत्वे धातुस्वरः । यद्वृत्तयोगादनिघातः ॥

जनासो अग्निं दधिरे सहोवृधं हविष्मन्तो विधेम ते ।
स त्वं नो अद्य सुमना इहाविता भवा वाजेषु सन्त्य ॥ २ ॥

जनासः । अग्निम् । दधिरे । सहःऽवृधम् । हविष्मन्तः । विधेम । ते ।
सः । त्वम् । नः । अद्य । सुऽमनाः । इह । अविता । भव । वाजेषु । सन्त्य ॥ २ ॥

vजनासः अनुष्ठातारो जनाः vसहोवृधं बलस्य वर्धयितारम् vअग्निं vदधिरे धृतवन्तः । vहविष्मन्तः हविर्युक्ता वयं हे अग्ने vते त्वां vविधेम परिचरेम । विधतिः परिचरणकर्मा । 'विधेम सपर्यति' (नि. ३.५.२) इति परिचरणकर्मसु पठितत्वात् । vवाजेषु अन्नेषु vसन्त्य दानशील हे अग्ने vस vत्वम् vअद्य अस्मिन् दिने vइह कर्मणि vनः अस्मान् प्रति vसुमनाः शोभनमनस्कः vअविता रक्षिता vभव ॥ सहोवृधम् । 'वृधु वृद्धौ' । अस्मात् अन्तर्भावितण्यर्थात् क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वम् । हविष्मन्तः । 'तसौ मत्वर्थे' इति भत्वेन पदत्वाभावात् रुत्वाद्यभावः । विधेम । 'विध विधाने' । तुदादित्वात् शः । सुमनाः । शोभनं मनो यस्यासौ सुमनाः । 'सोर्मनसी अलोमोषसी' इत्युत्तरपदाद्युदात्तत्वम् । भव । पादादित्वात् 'तिङ्ङतिङः' इति निघाताभावः । 'ह्यचोऽतस्तिङः' इति संहितायां दीर्घः । सन्त्य । 'षणु दाने' । क्तिचि 'तितुत्र०' इत्यादिना इट्प्रतिषेधः । 'न क्तिचि दीर्घश्च' (पा. सू. ६. ४. ३९) इत्यनुनासिकलोपदीर्घयोर्निषेधः । सन्तिर्दाता । तत्र भवः सन्त्यः । 'भवे छन्दसि' इति यत् ॥

प्र त्वा दूतं वृणीमहे होतारं विश्ववेदसम् ।
महस्ते सतो वि चरन्त्यर्चयो दिवि स्पृशन्ति भानवः ॥ ३ ॥

प्र । त्वा । दूतम् । वृणीमहे । होतारम् । विश्वऽवेदसम् ।
महः । ते । सतः । वि । चरन्ति । अर्चयः । दिवि । स्पृशन्ति । भानवः ॥ ३ ॥

हे अग्ने vहोतारं होमनिष्पादकमाह्वातारं वा vविश्ववेदसं सर्वज्ञं vदूतं देवानां दूत्ये प्रवृत्तम् । 'अग्निर्वै देवानां दूत आसीत्' इति श्रुत्यन्तरात् । तादृशं त्वां vप्र vवृणीमहे प्रकर्षेण वरणं कुर्मः । vमहः महतः vसतः नित्यं वर्तमानस्य vते तव vअर्चयः दीप्तयः vवि vचरन्ति विविधं प्रचरन्ति । vभानवः त्वदीया रश्मयः vदिवि द्युलोके vस्पृशन्ति तत्रत्यान् प्राणिनः प्रकाशयन्तीत्यर्थः ॥ विश्ववेदसम् । विश्वानि वेत्तीति विश्ववेदाः । असुन् । मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् । यद्वा । 'वेदः' इति धननाम (नि. २. १०. ४) । विश्वं वेदो धनं यस्य । 'बहुव्रीहौ विश्वं संज्ञायाम्' इति पूर्वपदान्तोदात्तत्वम् । महः । 'मह पूजायाम्' । 'क्विप् च' इति क्विप् । 'सावेकाचः०' इति ङस उदात्तत्वम् । यद्वा । महच्छब्दे अच्छब्दलोपश्छान्दसः । सतः । अस्तेः शतरि 'श्नसोरल्लोपः' इति अकारलोपः । 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम् । दिवि । 'ऊडिदम्०' इति विभक्तेरुदात्तत्वम् ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

देवासस्त्वा वरुणो मित्रो अर्यमा सं दूतं प्रत्नमिन्धते ।
विश्वं सो अग्ने जयति त्वया धनं यस्ते ददाश मर्त्यः ॥ ४ ॥

देवासः । त्वा । वरुणः । मित्रः । अर्यमा । सम् । दूतम् । प्रत्नम् । इन्धते ।
विश्वम् । सः । अग्ने । जयति । त्वया । धनम् । यः । ते । ददाश । मर्त्यः ॥ ४ ॥

हे Vअग्ने वरुणादयस्त्रयः Vदेवासः देवाः Vप्रत्नं पुरातनं Vदूतं त्वां Vसम् Vइन्धते सम्यक् दीपयन्ति Vयः Vमर्त्यः मनुष्यो यजमानः Vते तुभ्यं Vददाश हविर्दत्तवान् Vसः यजमानः Vत्वया सहायभूतेन Vविश्वं सर्वं Vधनं Vजयति ॥ अर्यमा । अर्यान्मिमीते इत्यर्यमा । ' श्वन्नुक्षन्° ' ( उ. सू. १. १५७ ) इत्यादिना कनिन्प्रत्ययान्तो निपातितः । इन्धते । ' जिइन्धी दीप्तौ ' । अस्मात् लटि झस्य अदादेशे श्नम् । ' श्नान्नलोपः ' ( पा. सू. ६. ४. २३ ) । ' श्नसोरल्लोपः ' इति अकारलोपः । ददाश । ' दाश्च दाने ' । लिटि णलि लित्स्वरेण प्रत्ययात्पूर्वस्य आकारस्योदात्तत्वम् । यद्वृत्तयोगादनिघातः ॥

मन्द्रो होता गृहपतिरग्ने दूतो विशामसि ।
त्वे विश्वा संगतानि व्रता ध्रुवा यानि देवा अक्रृण्वत ॥ ५ ॥

मन्द्रः । होता । गृहऽपतिः । अग्ने । दूतः । विशाम् । असि ।
त्वे इति । विश्वा । सम्ऽगतानि । व्रता । ध्रुवा । यानि । देवाः । अक्रृण्वत ॥ ५ ॥

हे Vअग्ने त्वं Vमन्द्रः हर्षहेतुः Vहोता देवानामाह्वाता Vविशां यजमानरूपाणां प्रजानां Vगृहपतिः गृहस्य पालकः Vदूतः देवदूतः Vअसि । Vत्वे त्वयि Vविश्वा Vव्रता सर्वाणि कर्माणि Vसंगतानि । ' व्रतं कर्वरम् ' ( नि. २. १. ७ ) इति कर्मनामसु व्रतशब्दः पठितः । पृथिव्यादयः Vदेवाः Vध्रुवा स्थिराणि Vयानि कर्माणि Vअकृण्वत कृतवन्तः । पृथिवी धारयति पर्जन्यो वर्षति सूर्यः प्रकाशयति । तान्येतानि त्वयि संगतानीति पूर्वत्रान्वयः ॥ गृहपतिः । ' पत्यावैश्वर्ये ' इति पूर्वपदप्रकृतिस्वरत्वम् । ' सुपां सुलुक्° ' इति ससम्येकवचनस्य शेआदेशः । ' त्वमावेकवचने ' इति मपर्यन्तस्य त्वादेशः । ' शेषे लोपः ' इति टिलोपपक्षे उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् ; अन्त्यलोपपक्षे तु एकादेशस्वरेण । संगतानि । गमेः कर्मणि निष्ठायाम् ' एकाचः° ' ( पा. सू. ७. २. १० ) इति इट्प्रतिषेधः । ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । व्रता ध्रुवा इत्युभयत्र शेर्लोपः । अकृण्वत । ' कृवि हिंसाकरणयोश्च ' । व्यत्ययेनात्मनेपदम् । इदित्त्वात् नुम् । ' धिन्विकृण्व्योर च ' इति उप्रत्ययः ॥ ॥ ८ ॥

त्वे इदग्ने सुभगे यविष्ठ्य विश्वमा हूयते हविः ।
स त्वं नो अद्य सुमना उतापरं यक्षि देवान्त्सुवीर्यं ॥ ६ ॥

त्वे इति । इत् । अग्ने । सुऽभगे । यविष्ठ्य । विश्वम् । आ । हूयते । हविः ।
सः । त्वम् । नः । अद्य । सुऽमनाः । उत । अपरम् । यक्षि । देवान् । सुऽवीर्यं ॥ ६ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे vयविष्ठ्य युवतम vअग्ने vसुभगे सौभाग्ययुक्ते vत्वे vइत् त्वय्येव vविश्वं सर्वं vहविः vआ vहूयते सर्वतः[1] प्रक्षिप्यते। vस vत्वं vनः अस्मान्प्रति vसुमनाः शोभनमनस्को भूत्वा vअद्य अस्मिन् दिने vउत अपि च vअपरं श्वः परश्व इत्यादिकमुत्तरं कालं सर्वस्मिन्नपि काले नैरन्तर्येण vसुवीर्या शोभनवीर्योपेतान् vदेवान् vयक्षि यज॥ सुभगे। शोभनो भगो यस्येति बहुव्रीहौ आद्युदात्तत्वम्। 'द्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम्। यविष्ठ्य। युवशब्दात् इष्ठन्। 'स्थूलदूर°' इत्यादिना यणादेः परस्य लोपः पूर्वस्य च गुणः। छान्दसो यकारोपजनः। यक्षि। 'बहुलं छन्दसि' इति शपो लुक्। सुवीर्या। शोभनं वीर्यं येषाम्। 'वीरवीर्यौ च' इत्युत्तरपदाद्युदात्तत्वम्। 'सुपां सुलुक्°' इति विभक्तेः आकारः॥

अभिष्टवे सायंकालीने उत्तरस्मिन् पटले 'तं घेमित्था नमस्विनः' इत्येषा विनियुक्ता। 'अथोत्तरम्' इति खण्डे सूत्रितं–'प्रागाथीं पूर्वाह्णे काण्वीमपराह्णे' (आश्व. श्रौ. ४. ७) इति॥

तं घेमित्था नमस्विन उप स्वराजमासते।
होत्राभिरग्निं मनुषः समिन्धते तितिर्वांसो अति स्रिधः॥ ७॥

तम्। घ। ईम्। इत्था। नमस्विनः। उप। स्वऽराजम्। आसते।
होत्राभिः। अग्निम्। मनुषः। सम्। इन्धते। तितिर्वांसः। अति। स्रिधः॥ ७॥

हे vअग्ने vनमस्विनः अन्नयुक्ता नमस्कारयुक्ता वा। 'नमः आयुः सूनृता' (नि. २. ७. २२) इति अन्ननामसु पाठात् नमःशब्दस्यान्नवाचित्वम्। तादृशा यजमानाःvस्वराजं स्वतो दीप्यमानं vतंvघें तमेव पूर्वोक्तसर्वगुणविशिष्टं त्वाम् vइत्था अनेन प्रकारेण हविष्प्रदानादिरूपेण vउप vआसते। vमनुषः मनुष्या यजमानाःvहोत्राभिः सप्तभिर्वषट्कर्तृभिः। 'सप्त होत्राः प्राचीर्वषट्कुर्वन्ति' (तै.ब्रा.२.३.६.४) इति श्रुत्यन्तरात्। vअग्निं त्वां vसमिन्धते सम्यग्दीपयन्ति। कीदृशा मनुष्याः। vस्रिधः शत्रून् vअति vतितिर्वांसः अतिशयेन तरन्तः॥ नमस्विनः। 'अस्मायामेधा°' इति मत्वर्थीयो विनिः। स्वराजम्। स्वभासा राजते इति स्वराट्। 'सत्सूद्विष°' इति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वम्। आसते। 'आस उपवेशने'। अदादित्वात् शपो लुक्। तितिर्वांसः। 'त प्लवनतरणयोः'। 'छन्दसि लिट्' इति वर्तमाने लिट्। तस्य 'क्वसुश्च' इति क्वसुः। 'वस्वेकाजाद्घसाम्' इति नियमात् इडभावः। 'ऋत इद्धातोः' इति इत्वम्। 'ऋच्छत्यृताम्' (पा. सू. ७. ४. ११) इति गुणः 'हलि च' (पा. सू. ८. २. ७७) इति दीर्घत्वं च न भवति, 'संज्ञापूर्वको विधिरनित्यः' इति तयोरनित्यत्वात्। यद्वा। तिरतिः प्रकृत्यन्तरं द्रष्टव्यम्। स्रिधः। 'स्रिधु शोषणे'। 'क्विप् च' इति क्विप्॥

घ्नन्तो वृत्रमतरन्रोदसी अप उरु क्षयाय चक्रिरे।
भुवत्कण्वे वृषा द्युम्न्याहुतः क्रन्ददश्वो गविष्टिषु॥ ८॥

घ्नन्तः। वृत्रम्। अतरन्। रोदसी इति। अपः। उरु। क्षयाय। चक्रिरे।
भुवत्। कण्वे। वृषा। द्युम्नी। आऽहुतः। क्रन्दत्। अश्वः। गोऽइष्टिषु॥ ८॥

---

१. ढ–आ सर्वतः।

CC0, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे अग्ने [V]घ्नन्तः स्वस्सहायेनेतरे देवाः प्रहरन्तः [V]वृत्रम् [V]अतरन् तीर्णवन्तः । तदनन्तरं [V]रोदसी द्यावापृथिव्यौ [V]अपः अन्तरिक्षं च [V]क्षयाय प्राणिनां निवासार्थम् [V]उरु विस्तारो यथा भवति तथा [V]चक्रिरे । अप्शब्दोऽन्तरिक्षवाची । ' आपः पृथिवी ' ( नि. १. ३. ८ ) इति तन्नामसु पठितत्वात् । भवांस्तु [V]कण्वे कण्वनामके महर्षौ [V]वृषा कामानां वर्षिता [V]द्युम्नी धनवान् [V]आहुतः सर्वतो होमयुक्तश्च [V]भुवत् भवतु । तत्र दृष्टान्तः । [V]गविष्टिषु गोविषयेच्छायुक्तेषु संग्रामेषु [V]अश्वः [V]क्रन्दत् शब्दं कुर्वन् यथाभीष्टप्रापकस्तथेति शेषः ॥ घ्नन्तः । हन्तेः शतरि ' गमहन° ' इत्यादिना उपधालोपः । ' हो हन्तेर्ञ्णिन्नेषु ' ( पा. सू. ७. ३. ५४ ) इति घत्वम् । अपः । ' ऊडिदम्° ' इति शस उदात्तत्वम् । क्षयाय । ' क्षि निवासगत्योः ' । क्षियन्ति निवसन्त्यस्मिन्निति क्षयो निवासस्थानम् । ' पुंसि संज्ञायां घः प्रायेण ' इति घः । ' क्षयो निवासे ' ( पा. सू. ६. १. २०१ ) इत्याद्युदात्तत्वम् । भुवत् । भवतेर्लेटि अडागमः । ' इतश्च लोपः° ' इति इकारलोपः । ' बहुलं छन्दसि ' इति शपो लुक् । ' भूसुवोस्तिङि ' ( पा. सू. ७. ३. ८८ ) इति गुणप्रतिषेधः । अडागमस्य अनुदात्तत्वे धातुस्वरः । आहुतः । आहूयते इति आहुतः । ' हु दानादनयोः ' । कर्मणि क्तः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । क्रन्दत् । ' कदि क्रदि क्लदि आह्वाने ' । शतरि नुमभावश्छान्दसः । अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरः । गविष्टिषु । ' इषु इच्छायाम् ' । एषणम् इष्टिः । गवामिष्टिर्येषु संग्रामेषु । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

प्रवर्ग्ये महावीरे खरे संसाद्यमाने ' सं सीदस्व महाँ असि ' इत्येषा । ' स्पृष्ट्वोदकम् ' इति खण्डे सूत्रितं–' सं सीदस्व महाँ असीति संसाद्यमाने ' ( आश्व. श्रौ. ४. ६ ) इति ॥

सं सीदस्व महाँ असि शोचस्व देववीतमः ।
वि धूममग्ने अरुषं मियेध्य सृज प्रशस्त दर्शतम् ॥ ९ ॥

सम् । सीदस्व । महान् । असि । शोचस्व । देवऽवीतमः ।
वि । धूमम् । अग्ने । अरुषम् । मियेध्य । सृज । प्रऽशस्त । दर्शतम् ॥ ९ ॥

हे अग्ने [V]सं [V]सीदस्व बर्हिष्युपविश । [V]महान् [V]असि गुणाधिको भवसि । [V]देववीतमः अतिशयेन देवान् कामयमानः [V]शोचस्व दीप्यस्व । हे [V]मियेध्य मेधार्ह [V]प्रशस्त उत्कृष्ट [V]अग्ने [V]अरुषं गमनशीलं [V]दर्शतं दर्शनीयं [V]धूमं [V]वि [V]सृज विशेषेण संपादय ॥ सीदस्व । ' षदॢ विशरणगत्यवसादनेषु ' । व्यत्ययेनात्मनेपदम् । प्रार्थनायां लोटि शपि ' पाघ्रा° ' इत्यादिना सीदादेशः । महान् । संहितायां नकाराकारयोः रुत्वानुनासिकौ उक्तौ । शोचस्व । ' शुच दीप्तौ ' । अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरः । तिङः परत्वात् निघाताभावः । देववीतमः । ' वी गतिप्रजनकान्त्यशनखादनेषु ' । देवान् वेति गच्छतीति देववीः । ' क्विप् च ' इति क्विप् । अतिशयेन देववीर्देववीतमः । तमपः पित्त्वादनुदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वम् । अरुषम् अरोषणम् । ' रिष रुष हिंसायाम् ' । ' घञर्थे कविधानम्° ' इति भावे कप्रत्ययः । नास्ति रुषोऽस्येति बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । मियेध्य । ' छन्दसि च ' इति अर्हार्थे यप्रत्ययः । मकारात्परः इयागमश्छान्दसः । सृज । ' सृज विसर्गे ' । तुदादित्वात् शः । विकरणस्वरः । पादादित्वादनिघातः । दर्शतम् । ' भृमृदृशि° ' इत्यादिना दृशेः कर्मणि अतच्प्रत्ययः ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यं त्वा देवासो मनवे दधुरिह यजिष्ठं हव्यवाहन ।
यं कण्वो मेध्यातिथिर्धनस्पृतं यं वृषा यमुपस्तुतः ॥ १० ॥

यम् । त्वा । देवासः । मनवे । दधुः । इह । यजिष्ठम् । हव्यऽवाहन ।
यम् । कण्वः । मेध्यऽअतिथिः । धनऽस्पृतम् । यम् । वृषा । यम् । उपऽस्तुतः ॥ १० ॥

हे [v]हव्यवाहन हविषो वाहकाग्ने [v]मनवे मनोरनुग्रहाय [v]देवासः सर्वे देवाः [v]यजिष्ठम् अतिशयेन पूज्यं यष्टृतमं वा [v]यं त्वाम् [v]इह देवयजनदेशे [v]दधुः धृतवन्तः । [v]मेध्यातिथिः मेधार्हैरतिथिभिर्युक्तः [v]कण्वः एतन्नामको महर्षिः [v]यं त्वां [v]धनस्पृतं धनेन प्रीणयितारं कृत्वा दधे इति शेषः । तथा [v]वृषा इन्द्रः [v]यं त्वां दधे । तथा [v]उपस्तुतः अन्योऽपि स्तोता यजमानो [v]यं त्वां दधे । स त्वं सं सीदस्वेति पूर्वत्रान्वयः ॥ दधुः । लिटि उसि कित्त्वे ' आतो लोप इटि च ' इति आकारलोपः । प्रत्ययस्वरः । यजिष्ठम् । यष्टृशब्दात् ' तुश्छन्दसि ' ( पा. सू. ५. ३. ५९ ) इति अगुणवचनादपि आतिशायनिक इष्ठन् । ' तुरिष्ठेमेयःसु ' ( पा. सू. ६. ४. १५४ ) इति तृलोपः । नित्त्वादाद्युदात्तत्वम् । हव्यवाहन । हव्यं वहतीति हव्यवाहनः । ' हव्येऽनन्तःपादम् ' ( पा. सू. ३. २. ६६ ) इति वहतेर्ल्युट् । मेध्यातिथिः । मेध्या अतिथयो यस्येति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । धनस्पृतम् । धनैरस्मान् स्पृणोति प्रीणयतीति धनस्पृत् । ' स्पृ प्रीतिबलयोः ' । ' क्विप् च ' इति क्विप् । ततः तुक् । कृदुत्तरपदप्रकृतिस्वरत्वम् । उपस्तुतः । ' क्तिच्क्तौ च संज्ञायाम् ' इति कर्तरि क्तः । थाथादिना उत्तरपदान्तोदात्तत्वम् ॥ ॥ ९ ॥

यमग्निं मेध्यातिथिः कण्व ईध ऋतादधि ।
तस्य प्रेषो दीदियुस्तमिमा ऋचस्तमग्निं वर्धयामसि ॥ ११ ॥

यम् । अग्निम् । मेध्यऽअतिथिः । कण्वः । ईधे । ऋतात् । अधि ।
तस्य । प्र । इषः । दीदियुः । तम् । इमाः । ऋचः । तम् । अग्निम् । वर्धयामसि ॥ ११ ॥

[v]मेध्यातिथिः[1] यागयोग्या अतिथय ऋत्विग्रूपा यस्य तादृशः[1] [v]कण्वः ऋषिः [v]ऋतादधि आदित्यादध्याहृत्य [v]यम् [v]अग्निम् [v]ईधे दीप्तवान् [v]तस्य अग्नेः [v]इषः गमनस्वभावा रश्मयः [v]प्र [v]दीदियुः प्रकर्षेण दीप्यन्ते । तथा [v]तम् अग्निम् [v]इमाः अस्माभिः प्रयुज्यमानाः [v]ऋचः वर्धयन्तीति शेषः । वयमपि [v]तमग्निं [v]वर्धयामसि स्तोत्रैर्वर्धयामः ॥ ईधे । ' जिइन्धी दीप्तौ ' । ' इन्धिभवतिभ्यां च ' ( पा. सू. १. २. ६ ) इति लिटः कित्त्वात् ' अनिदिताम् ' इति नकारलोपः । द्विर्भावहलादिशेषयोः कृतयोः सवर्णदीर्घः । प्रत्ययस्वरः । यद्वृत्तयोगादनिघातः । इषः । ' इष गतौ ' । इष्यन्ति गच्छन्तीति इषो रश्मयः । दीदियुः । दीदेतिश्छान्दसो धातुर्दीप्तिकर्मा । लिटि उसि इयङादेशः । ' एरनेकाचः° ' इति यणादेशाभावश्छान्दसः । वर्धयामसि । ' इदन्तो मसि ' इति मस इकारागमः ॥

---

१. ढ–मेध्या यागयोग्या अतिथयः यस्य इति तादृशः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

रायस्पूर्धि स्वधावोऽस्ति हि तेऽग्ने देवेष्वाप्यम् ।
त्वं वाजस्य श्रुत्यस्य राजसि स नो मृळ महाँ असि ॥ १२ ॥

रायः । पूर्धि । स्वधाऽवः । अस्ति । हि । ते । अग्ने । देवेषु । आप्यम् ।
त्वम् । वाजस्य । श्रुत्यस्य । राजसि । सः । नः । मृळ । महान् । असि ॥ १२ ॥

हे vस्वधावः अन्नवन् अग्ने। 'स्वधा अर्कः' (नि. २. ७. १७) इति तन्नामसु पाठात् । अस्माकं vरायः धनानि vपूर्धि पूरय देहि वा । 'पूर्धि पूरय देहीति वा' (निरु. ४. ३) इति यास्कः । हे vअग्ने vते तव vदेवेष्वाप्यं प्रापणीयं सख्यम् vअस्ति vहि विद्यते खलु । vत्वं vश्रुत्यस्य श्रवणीयस्य vवाजस्य अन्नस्य vराजसि ईश्वरो भवसि । vसः त्वं vनः अस्मान् vमृळ सुखय । vमहान् गुणैरधिकः vअसि ॥ रायः । 'ऊडिदम्०' इति विभक्तेरुदात्तत्वम् । पूर्धि । 'पॄ पालनपूरणयोः' । 'श्रुशृणुपृकृवृभ्यश्छन्दसि' इति हेर्धिरादेशः । 'बहुलं छन्दसि' इति शपो लुक् । हेरपित्त्वेन ङित्त्वाद्गुणाभावे 'उदोष्ठ्यपूर्वस्य' (पा. सू.७. १. १०२) इति उत्वम् । 'हलि च' इति दीर्घः । स्वधावः । 'संबुद्धौ मतुवसोः०' इति रुत्वम् । आप्यम् । अदुपधत्वाभावेऽपि व्यत्ययेन 'पोरदुपधात्' (पा. सू. ३. १. ९८) इति कर्मणि यत् । 'यतोऽनावः' इत्याद्युदात्तत्वम् । यद्वा । ण्यति छान्दसमाद्युदात्तत्वम् । श्रुत्यस्य । 'श्रु श्रवणे' । औणादिकः क्यप् । तुगागमः । यद्वा । श्रुतिशब्दात् 'भवे छन्दसि' इति यत् । मृळ । 'मृड सुखने' । शस्य ङित्त्वात् लघूपधगुणाभावः ॥

यूपोच्छ्रयणे 'ऊर्ध्व ऊ षु ण ऊतये' इति द्वे । 'पशाविष्टिः' इति खण्डे सूत्रितम्–'ऊर्ध्व ऊ षु ण ऊतय इति द्वे' (आश्व. श्रौ. ३. १) इति । एते एवाभिष्टवेऽपि विनियुक्ते । 'अथोत्तरम्' इति खण्डे सूत्रितं—'सखे सखायमभ्या ववृत्स्वोर्ध्व ऊ षु ण ऊतय इति द्वे' (आश्व. श्रौ. ४. ७) इति ॥

ऊर्ध्व ऊ षु णं ऊतये तिष्ठा देवो न सविता ।
ऊर्ध्वो वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥ १३ ॥

ऊर्ध्वः । ऊँ इति । सु । नः । ऊतये । तिष्ठ । देवः । न । सविता ।
ऊर्ध्वः । वाजस्य । सनिता । यत् । अञ्जिऽभिः । वाघत्ऽभिः । विऽह्वयामहे ॥ १३ ॥

हे यूप यद्वा यूपात्मकदारुनिष्ठाग्ने vनः अस्माकम् vऊतये रक्षणाय vऊर्ध्वः उन्नतः vतिष्ठ । तत्र दृष्टान्तः । vसविता vदेवो vन । यथा सूर्यो देव उन्नतस्तिष्ठति तद्वत् । vऊर्ध्वः उन्नतः सन् vवाजस्य अन्नस्य vसनिता दाता भविष्यसि । vयत् यस्मात् कारणात् vअञ्जिभिः आज्येन यूपम् अञ्जद्भिः vवाघद्भिः यज्ञं वहद्भिर्ऋत्विग्भिः सह vविह्वयामहे अन्नदानाय[1] त्वां विशेषेणाह्वयामः । तस्मादन्नस्य दाता भवेति पूर्वत्रान्वयः ॥ ऊ षु णः । 'इकः सुञि' (पा. सू. ६. ३. १३४) इति संहितायां दीर्घः । 'सुञः' (पा. सू. ८. ३. १०७) इति षत्वम् । 'नश्च धातुस्थोरुषुभ्यः' (पा. सू. ८.४. २७)

---

१. ढ–हविःसंपादनाय ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति णत्वम्। ऊतये। अवतेः क्तिनि ' ज्वरत्वर° ' इत्यादिना ऊठ्। ' ऊतियूति° ' इत्यादिना क्तिन् उदात्तत्वम्। तिष्ठ। शपि ' पाघ्रा° ' इत्यादिना तिष्ठादेशः। ' व्यचोऽतस्तिङः ' इति संहितायां दीर्घः। वाजस्य। ' क्रियाग्रहणं कर्तव्यम् ' ( पा. म. १. ४. ३२ ) इति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी। सनिता। ' षणु दाने '। लुटि तासिः। वलादिलक्षण इट् ( पा. सू. ७. २. ३५ )। तिपो डादेशः ( पा. सू. २. ४. ८५ )। टिलोपः। उदात्तनिवृत्तिस्वरेण तिबादेशस्य उदात्तत्वे प्राप्ते ' तास्यनुदात्तेत्° ' इति तस्यानुदात्तत्वम्। धातुस्वरः। ' न लुट् ' ( पा. सू. ८. १. २९ ) इति निघातप्रतिषेधः। अञ्जिभिः। ' अञ्जू व्यक्तिम्रक्षणगतिषु '। ' खनिकष्यञ्जि° ' ( उ. सू. ४. ५७९ ) इत्यादिना इप्रत्ययः। विह्वयामहे। ' निसमुपविभ्यो ह्वः ' ( पा. सू. १. ३. ३० ) इति अकर्त्रभिप्रायेऽप्यात्मनेपदम्। अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरः। ' तिङि चोदात्तवति ' इति गतेरनुदात्तत्वम् यद्वृत्तयोगादनिघातः॥

ऊर्ध्वो नः पाह्यंहसो नि केतुना विश्वं समत्रिणं दह।
कृधी न ऊर्ध्वाञ्चरथाय जीवसे विदा देवेषु नो दुवः॥ १४॥

ऊर्ध्वः। नः। पाहि। अंहसः। नि। केतुना। विश्वम्। सम्। अत्रिणम्। दह।
कृधि। नः। ऊर्ध्वान्। चरथाय। जीवसे। विदाः। देवेषु। नः। दुवः॥ १४॥

हे यूप यद्वा तन्निष्ठाग्ने ᵛऊर्ध्वः उन्नतः सन् ᵛनः अस्मान् ᵛकेतुना ज्ञानेन ᵛअंहसः पापात् ᵛनि ᵛपाहि नितरां पालय। ᵛविश्वम् ᵛअत्रिणम् सर्वमत्तारं भक्षकं राक्षसं ᵛसं ᵛदह सम्यग्भस्मीकुरु। ᵛनः अस्मान् ᵛऊर्ध्वान् उन्नतान् ᵛकृधि कुरु। किमर्थम्। ᵛचरथाय लोके चरणाय ᵛजीवसे जीवनाय च ᵛनः अस्माकं ᵛदुवः धनं[1] हविःस्वरूपं ᵛदेवेषु ᵛविदाः लम्भय॥ अत्रिणम्। ' अद भक्षणे '। ' अदेस्त्रिनि च ' ( उ. सू. ४. ५०८ ) इति औणादिकः त्रिनिप्रत्ययः। यद्वा। अदतस्त्रायन्ते इति अत्राः। ' आतोऽनुपसर्गे कः ' इति कः। अतो मत्वर्थीय इनिः। कृधि। ' श्रुश्रृणुपॄकृवृभ्यश्छन्दसि ' इति हेर्धिरादेशः। ' बहुलं छन्दसि ' इति विकरणस्य लुक्। ' अन्येषामपि दृश्यते ' इति संहितायां दीर्घः। ऊर्ध्वान्। ' उभयथर्क्षु ' ( पा. सू. ८. ३. ८ ) इति विकल्पविधानात् ' नश्छव्यप्रशान् ' ( पा. सू. ८. ३. ७) इति नकारस्य रुत्वाभावः। चरथाय। चरेः औणादिको भावे अथप्रत्ययः। जीवसे। ' जीव प्राणधारणे '। ' तुमर्थे सेसेन्° ' इति असेप्रत्ययः। विदाः। ' विदॢ लाभे '। अस्मादन्तर्भावितण्यर्थात् लेटि सिपि ' लेटोऽडाटौ ' इति आडागमः। तुदादित्वात् शः। ' शे मुचादीनाम् ' इति नुम् न भवति, ' अनित्यमागमशासनम् ' इति वचनेन तस्यानित्यत्वात्। ' इतश्च लोपः° ' इति इकारलोपः आगमानुदात्तत्वे विकरणस्वरः॥

---

१. च-छ-ण-त-ध-फ-ल-श—धनं च।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पाहि नो अग्ने रक्षसः पाहि धूर्तेरराव्णः ।
पाहि रीषत उत वा जिघांसतो बृहद्भानो यविष्ठ्य ॥ १५ ॥

पाहि । नः । अग्ने । रक्षसः । पाहि । धूर्तेः । अराव्णः ।
पाहि । रिषतः । उत । वा । जिघांसतः । बृहद्भानो इति बृहत्ऽभानो । यविष्ठ्य ॥ १५ ॥

हे [v]अग्ने हे[1] [v]बृहद्भानो बृहन्तो भानवो यस्य तादृश हे [v]यविष्ठ्य युवतम हे अग्ने [v]नः अस्मान्[1] [v]रक्षसः बाधकाद्राक्षसादेः [v]पाहि पालय। तथा [v]अराव्णः धनादीनामदातृरूपात् [v]धूर्तेः हिंसकात् [v]पाहि। तथा [v]रिषतः हिंसकाद्व्याघ्रादेः सकाशात् [v]पाहि। [v]उत [v]वा अथवा [v]जिघांसतः हन्तुमिच्छतः शत्रोः सकाशात् पाहि ॥ धूर्तेः । धुर्वी हिंसार्थः । ' क्तिच्क्तौ च संज्ञायाम् ' इति कर्तरि क्तिच् । ' तितुत्र° ' इत्यादिना इट्प्रतिषेधः । ' राल्लोपः ' ( पा. सू. ६. ४. २१ ) इति वकारलोपः । ' हलि च ' इति दीर्घत्वम् । अराव्णः । ' रा दाने ' । ' आतो मनिन्° ' इत्यादिना वनिप् । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । पञ्चम्येकवचने ' अल्लोपोऽनः ' इति अनः अकारस्य लोपः । रिषतः । ' रिष हिंसायाम् ' । लटः शतृ । ' बहुलं छन्दसि ' इति शपो लुक् । प्रत्ययस्वरे प्राप्ते व्यत्ययेनाद्युदात्तत्वम् । जिघांसतः । हन्तेरिच्छार्थे सनि ' अज्झनगमां सनि ' ( पा. सू. ६. ४. १६ ) इति उपधादीर्घत्वम् । ' अभ्यासाच्च ' ( पा. सू. ७. ३. ५५ ) इति अभ्यासादुत्तरस्य हकारस्य घत्वम् । ' सन्यतः ' इति इत्वम् । अदुपदेशात् लसार्वधातुकानुदात्तत्वे सनो नित्त्वात् नित्स्वरेण पदस्याद्युदात्तत्वम् । बृहद्भानो । ' आमन्त्रितस्य च ' इति षाष्ठिकमाद्युदात्तत्वम् । पादादित्वात् आष्टमिकनिघाताभावः । यविष्ठ्य । ' स्थूलदूर° ' इत्यादिना यणादिपरस्य लोपः, पूर्वस्य च गुणः । यकारोपजनश्छान्दसः ॥ ॥ १० ॥

घनेव विष्वग्वि जह्यराव्णस्तपुर्जम्भ यो अस्मध्रुक् ।
यो मर्त्यः शिशीते अत्यक्तुभिर्मा नः स रिपुरीशत ॥ १६ ॥

घनाऽइव । विष्वक् । वि । जहि । अराव्णः । तपुःऽजम्भ । यः । अस्मऽध्रुक् ।
यः । मर्त्यः । शिशीते । अति । अक्तुऽभिः । मा । नः । सः । रिपुः । ईशत ॥ १६ ॥

हे [v]तपुर्जम्भ तप्यमानरश्मियुक्ताग्ने [v]अराव्णः अस्मभ्यं देयस्य धनस्य अदातॄन् वैरिणः [v]विष्वक् सर्वतः [v]वि [v]जहि विशेषेण मारय[2]। तत्र दृष्टान्तः । [v]घनेव । यथा कठिनेन दण्डपाषाणादिना भाण्डादिभङ्गं करोति तद्वत् । [v]यः अन्योऽपि रिपुः [v]अस्मध्रुक् अस्मद्विषयद्रोहकारी भर्त्सनादिना बाधते। [v]यः च अन्यः [v]मर्त्यः मनुष्यः शत्रुः [v]अक्तुभिः आयुधैः [v]अति [v]शिशीते तनूकरोति अस्मान् प्रहरतीत्यर्थः। [v]स [v]रिपुः भर्त्सनप्रहारकारी द्विविधोऽपि शत्रुः [v]नः अस्मान् प्रति [v]मा [v]ईशत ईश्वरः शक्तो मा भूत्॥ घनाइव । ' सुपां सुलुक्° ' इति तृतीयाया डादेशः । जहि । हन्तेर्लोटि हौ ' हन्तेर्जः ' ( पा. सू. ६. ४. ३६ ) इति जादेशः । तस्य असिद्धत्वात् हेर्लुगभावः । तपुर्जम्भ । ' तप संतापे ' । औणादिकः

---

१. च-छ-ण-फ–हे बृहद्भानो बृहन्तो भानवो यस्य तादृश हे यविष्ठ्य युवतम नः अस्मान्; न–हे बृहद्भानो.....तादृश यविष्ठ्य युवतम नः अस्मान्; स–नः अस्मान् । २. ढ–हिंसय ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

करणे उसिन्प्रत्ययान्तः तपुस्शब्दो नित्त्वादाद्युदात्तः । ' जभि नाशने ' । जम्भ्यन्ते शत्रव एभिरिति जम्भान्यायुधानि । करणे घञ् । तपूंष्येव जम्भानि यस्यासौ तपुर्जम्भः । आमन्त्रिताद्युदात्तत्वम् । अस्मध्रुक् । ' द्रुह जिघांसायाम् ' । ' सत्सूद्विष° ' इत्यादिना क्विप् । ' वा द्रुहमुहष्णुहष्णिहाम् ' ( पा. सू. ८. २. ३३ ) इति हकारस्य घत्वम् । भष्भावः । शिशीते । ' शो तनूकरणे ' । व्यत्ययेनात्मनेपदम् । ' बहुलं छन्दसि ' इति विकरणस्य श्लुः । ' आदेचः° ' इति आत्वम् । ततो द्विर्वचने ' बहुलं छन्दसि ' ( पा. सू. ७. ४. ७८ ) इति अभ्यासस्य इत्वम् । ' ई हल्यघोः ' इति ईत्वम् । व्यत्ययेनाद्युदात्तत्वम् । यद्वृत्तयोगादनिघातः । ईशत । लङि ' बहुलं छन्दसि ' इति शपो लुगभावः । ' न माड्योगे ' इति अडागमाभावः ॥

अग्निर्वन्ने सुवीर्यमग्निः कण्वाय सौभगम् ।
अग्निः प्रावन्मित्रोत मेध्यातिथिमग्निः सातौ उपस्तुतम् ॥ १७ ॥

अग्निः । वन्ने । सुऽवीर्यम् । अग्निः । कण्वाय । सौभगम् ।

अग्निः । प्र । आवत् । मित्रा । उत । मेध्यऽअतिथिम् । अग्निः । सातौ । उपऽस्तुतम् ॥ १७ ॥

vअग्निः देवः vसुवीर्यं शोभनवीर्योपेतं धनमुद्दिश्य vवन्ने याचितः । सः vअग्निः vकण्वाय महर्षये vसौभगं शोभनधनादिरूपं भाग्यं प्रायच्छदिति शेषः । तथा vअग्निः vमित्रा अस्मन्मित्राणि vप्रावत् प्रकर्षेण रक्षितवान् । vउत अपि च vमेध्यातिथिं मेधयोग्यैरतिथिभिरुपेतमृषिं प्रावत् । तथा vउपस्तुतम् अन्यमपि स्तोतारं यजमानं vसातौ धनादिदाननिमित्तं प्रावदिति शेषः ॥ वन्ने । ' वनु याचने ' । कर्मणि लिट् । ' न शसददवादिगुणानाम् ' ( पा. सू. ६.४.१२६ ) इति एत्वाभ्यासलोपयोः प्रतिषेधः । उपधालोपश्छान्दसः । सौभगम् । ' सुभगान्मन्त्रे ' इति उद्गात्रादिषु पाठात् तस्य भावः इत्येतस्मिन्नर्थे अञ् ( पा. सू. ५. १. १२९ ) । जित्त्वादाद्युदात्तत्वम् । मित्रा । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । उपस्तुतम् । ' क्तिच्क्तौ च संज्ञायाम् ' इति स्तौतेः कर्तरि क्तः । थाथादिना उत्तरपदान्तोदात्तत्वम् ॥

अग्निना तुर्वशं यदुं परावत उग्रादेवं हवामहे ।
अग्निर्नयन्नववास्त्वं बृहद्रथं तुर्वीतिं दस्यवे सहः ॥ १८ ॥

अग्निना । तुर्वशम् । यदुम् । पराऽवतः । उग्रऽदेवम् । हवामहे ।

अग्निः । नयत् । नवऽवास्त्वम् । बृहत्ऽरथम् । तुर्वीतिम् । दस्यवे । सहः ॥ १८ ॥

vअग्निना सहावस्थितान् तुर्वशनामकं यदुनामकम् उग्रदेवनामकं च राजर्षीन् vपरावतः दूरदेशात् vहवामहे आह्वयामः । स च vअग्निः नववास्तुनामकं बृहद्रथनामकं तुर्वीतिनामकं च राजर्षीन् vनयत् इहानयतु । कीदृशोऽग्निः । vदस्यवे vसहः अस्मदुपद्रवहेतोश्चोरस्याभिभविता ॥ नयत् । ' णीञ् प्रापणे ' । लेटि अडागमः । ' इतश्च लोपः° ' इति इकारलोपः । नववास्त्वम् । नवं वास्तु यस्यासौ

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नववास्तुः । ' वा छन्दसि ' इत्यनुवृत्तेः अमि पूर्वत्वाभावे यणादेशः । बृहद्रथम् । बहुव्रीहौ पूर्वपद-प्रकृतिस्वरत्वम् ॥

नि त्वामग्ने मनुर्दधे ज्योतिर्जनाय शश्वते ।
दीदेथ कण्व ऋतजात उक्षितो यं नमस्यन्ति कृष्टयः ॥ १९ ॥

नि । त्वाम् । अग्ने । मनुः । दधे । ज्योतिः । जनाय । शश्वते ।
दीदेथ । कण्वे । ऋतऽजातः । उक्षितः । यम् । नमस्यन्ति । कृष्टयः ॥ १९ ॥

हे [v]अग्ने [v]ज्योतिः प्रकाशरूपं [v]त्वां [v]शश्वते बहुविधाय [v]जनाय [v]मनुः प्रजापतिः [v]नि [v]दधे देवयजनदेशे स्थापितवान् । हे अग्ने त्वम् [v]ऋतजातः ऋतेन यज्ञेन निमित्तभूतेनोत्पन्नः [v]उक्षितः हविर्भिस्तर्पितः सन् [v]कण्वे एतन्नामके महर्षौ [v]दीदेथ दीप्तवानसि । [v]यम् अग्निं [v]कृष्टयः मनुष्याः । ' कृष्टयः चर्षणयः ' ( नि. २. ३. ७ ) इति मनुष्यनामसु पठितत्वात् । [v]नमस्यन्ति नमस्कुर्वन्ति । स त्वमिति पूर्वत्रान्वयः ॥ दीदेथ । दीदेतिश्छान्दसो दीप्तिकर्मा । थलि ' द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम् ' ( का. ६. १. ८. १ ) इति द्विर्वचनाभावः । ' अनित्यमागमशासनम् ' इति वचनात् इडभावः । लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वम् । ऋतजातः । ऋते[1] जन्यते इति ऋतजातः । ' श्वीदितो निष्ठायाम् ' इति इट्-प्रतिषेधः । ' जनसन° ' इत्यादिना आत्वम् । तृतीयापूर्वपदप्रकृतिस्वरत्वम् । नमस्यन्ति । ' नमोवरिवः° ' ( पा. सू. ३. १. १९ ) इति पूजार्थे क्यच् । अदुपदेशात् लसार्वधातुकानुदात्तत्वे क्यजन्तधातुस्वरः । कृष्टयः । ' कृष विलेखने ' । ' क्तिच्क्तौ च संज्ञायाम् ' इति क्तिच् ॥

त्वेषासो अग्नेरमवन्तो अर्चयो भीमासो न प्रतीतये ।
रक्षस्विनः सदमिद्यातुमावतो विश्वं समत्रिणं दह ॥ २० ॥

त्वेषासः । अग्नेः । अमऽवन्तः । अर्चयः । भीमासः । न । प्रतिऽइतये ।
रक्षस्विनः । सदम् । इत् । यातुऽमावतः । विश्वम् । सम् । अत्रिणम् । दह ॥ २० ॥

[v]अग्नेः [v]अर्चयः ज्वालाः [v]त्वेषासः दीप्ताः [v]अमवन्तः बलवन्तः [v]भीमासः भयंकराः । अतः [v]प्रतीतये अस्माभिः प्रत्येतुं [v]न शक्या इति शेषः । हे अग्ने [v]रक्षस्विनः बलवतः [v]यातुमावतः यातुधानानसुरान् [v]सदमित् सर्वदैव [v]सं [v]दह सम्यग्भस्मीकुरु । तथा [v]विश्वं सर्वं [v]अत्रिणं भक्षकं अस्मद्बाधकं शत्रुं सं दह ॥ त्वेषासः । ' त्विष दीप्तौ ' । पचाद्यच् । ' चितः ' इत्यन्तोदात्तत्वम् । अमवन्तः । ' अम रोगे ' । अमति शत्रून् रुजतीति अमो बलम् । पचाद्यच् । वृषादित्वादाद्युदात्तत्वम् । तदेषामस्तीत्यमवन्तः । प्रतीतये । ' तादौ च निति° ' इति गतेः प्रकृतिस्वरत्वम् । रक्षस्विनः । रक्षन्त्यनेनेति रक्षो बलम् । करणेऽसुन् । ' अस्मायामेधा° ' इति मत्वर्थीयो विनिः । यातुमावतः । यातवो यातनाः । तान् मिमते निर्मिमते इति राक्षसव्यापारा यातुमाः । ' आतोऽनुपसर्गे

---

१. श—ऋतेन ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कः ' इति कः । तदेषामस्तीति मतुप् । ' मतौ बह्वचोऽनजिरादीनाम् ' ( पा. सू. ६. ३. ११९ ) इति दीर्घत्वम् । ' संज्ञायाम् ' ( पा. सू. ८. २. ११ ) इति वत्वम् । मतुपः पित्त्वादनुदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वम् । अत्रिणम् । ' अदेस्त्रिनि च ' इति कर्तरि त्रिनिप्रत्ययः ॥ ॥ ११ ॥

' क्रीळं वः ' इति द्वितीयं सूक्तं पञ्चदशर्चम् । अत्रेयमनुक्रमणिका—' क्रीळं पञ्चोना मारुतं हि गायत्रं तु ' इति । ' ऋषिश्चान्यस्मादपेरवाविशिष्टः ' इति परिभाषया घोरपुत्रः कण्व ऋषिः । इदमुत्तरं च गायत्रीच्छन्दस्के । इदमादिसूक्तत्रयं मरुद्देवताकं तुहिहवेति परिभाषितत्वात् । व्यूळ्हे द्वितीये छन्दोमे आग्निमारुतशस्त्रे एतत्सूक्तं निविद्धानीयम् । ' द्वितीयस्याग्निं वो देवम् ' इति खण्डे सूत्रितं—' क्रीळं वः शर्धोऽग्ने मृळेत्याग्निमारुतम् ' ( आश्व. श्रौ. ८. १० ) इति । ब्राह्मणं च—' क्रीळं वः शर्धो मारुतम् ' ( ऐ.ब्रा. ५. १९ ) इति । ' मरुद्भ्यः क्रीडिभ्यः पुरोडाशं सप्तकपालम् ' इत्यस्यामिष्टौ ' क्रीळं वः ' इत्येषा प्रधानस्यानुवाक्या । ' तथा ततः ' इति खण्डे सूत्रितं—' क्रीळं वः शर्धो मारुतमत्यासो न ये मरुतः स्वञ्चः ' ( आश्व. श्रौ. २. १८ ) इति ॥

क्रीळं वः शर्धो मारुतमनर्वाणं रथेशुभम् । कण्वा अभि प्र गायत ॥ १ ॥

क्रीळम् । वः । शर्धः । मारुतम् । अनर्वाणम् । रथेऽशुभम् । कण्वाः । अभि । प्र । गायत ॥१॥

हे Vकण्वाः कण्वगोत्रोत्पन्ना महर्षयः । यद्वा । मेधाविन ऋत्विजः । Vवः युष्मदर्थं Vमारुतं मरुत्समूहरूपं Vशर्धः बलम् Vअभि Vप्र Vगायत अभितः प्रकर्षेण स्तुध्वम् । कीदृशं शर्धः । Vक्रीळं विहरणशीलम् Vअनर्वाणं भ्रातृव्यरहितम् । अत एव श्रुत्यन्तरब्राह्मणेन मन्त्रान्तरमेवं व्याख्यातम्—'अनर्वा प्रेहीत्याह भ्रातृव्यो वा अर्वा भ्रातृव्यापनुत्त्यै' ( तै. सं. ६. ३. ८. ४ ) इति । Vरथेशुभं स्वकीये रथेऽवस्थाय शोभमानम् ॥ क्रीळम् । ' क्रीडृ विहारे ' । पचाद्यच् । शर्धः । ' शृधु प्रसहने ' । शर्धयत्यनेन शत्रूनिति शर्धो बलम् । असुन् । नित्त्वादाद्युदात्तत्वम् । मारुतं मरुतां संबन्धि । ' तस्येदम् ' इति अण् । व्यत्ययेनाद्युदात्तत्वम् । यद्वा । समूहार्थे ' अनुदात्तादेरञ् ' ( पा. सू. ४. २. ४४ ) इत्यनुदात्तादिलक्षणः अञ्प्रत्ययः । अनर्वाणम् । व्यत्ययेन पुंलिङ्गता । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । रथेशुभम् । ' शुभ दीप्तौ ' । रथे शोभते इति रथेशुप् । ' क्विप् च ' इति क्विप् । ' तत्पुरुषे कृति बहुलम् ' इति अलुक् । कृदुत्तरपदप्रकृतिस्वरत्वम् । गायत । ' कै गै रै शब्दे ' । ' तिङ्ङतिङः ' इति निघातः ॥

ये पृषतीभिर्ऋष्टिभिः साकं वाशीभिरञ्जिभिः । अजायन्त स्वभानवः ॥ २ ॥

ये । पृषतीभिः । ऋष्टिऽभिः । साकम् । वाशीभिः । अञ्जिऽभिः । अजायन्त । स्वऽभानवः ॥२॥

Vये मरुतः पृषत्यादिभिः Vसाकं Vस्वभानवः स्वकीयदीप्तियुक्ताः Vअजायन्त इति[1] संपन्नाः । पृषत्यो बिन्दुयुक्ता मृग्यो मरुद्वाहनभूताः । ' पृषत्यो मरुताम् ' ( नि. १. १५. ६ ) इति निघण्टावुक्तत्वात् । ऋष्टय आयुधानि । वाश्यः शब्दविशेषाः परकीयसेनाभीतिहेतवः[2] । ' वाशी वाणी ' ( नि. १. ११. ११ ) इति वाङ्नामसु पठितत्वात् । अञ्जयोऽलंकरणानि । तान् स्तुम इति शेषः ॥ अजायन्त । ' जनी प्रादुर्भावे ' । श्यनि ' ज्ञाजनोर्जा ' ( पा. सू. ७. ३. ७९ ) इति जादेशः । अडागम उदात्तः । स्वभानवः । स्वकीया भानवो येषाम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

---

१. ढ—' इति ' नास्ति । २. ढ—परकीयसेनाभ्रान्तिहेतवः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इहेव शृण्व एषां कशा हस्तेषु यद्वदान् । नि यामञ्चित्रमृञ्जते ॥ ३ ॥

इहऽइव । शृण्वे । एषाम् । कशाः । हस्तेषु । यत् । वदान् । नि । यामन् । चित्रम् । ऋञ्जते ॥३॥

Vएषां मरुतां Vहस्तेषु स्थिताः Vकशाः स्वस्ववाहनताडनहेतवः Vयद्वदान् यद्वदन्ति यं ध्वनिं कुर्वन्ति तं ध्वनिम् Vइहेव अत्रेव स्थित्वा Vशृण्वे शृणोमि । स ध्वनिविशेषः Vयामन् संग्रामे Vचित्रं विविधं शौर्यं Vनि Vऋञ्जते नितरामलंकरोति । ' ऋञ्जतिः प्रसाधनकर्मा ' ( निरु. ६. २१ ) इति यास्कः ॥ शृण्वे । ' श्रु श्रवणे ' । व्यत्ययेनात्मनेपदम् । ' श्रुवः श्च ' इति श्नुः । ' हुश्नुवोः सार्वधातुके ' इति यणादेशः । वदान् । ' वद व्यक्तायां वाचि ' । लेटि आडागमः । ' इतश्च लोपः० ' इति इकारलोपे संयोगान्तलोपः । आगमानुदात्तत्वे धातुस्वरः शिष्यते । यद्वृत्तयोगादनिघातः । यामन् । ' सुपां सुलुक्० ' इति सप्तम्या लुक् । ' न डिसंबुद्ध्योः ' ( पा. सू. ८. २. ८ ) इति नलोपप्रतिषेधः । ऋञ्जते । ' ऋजि भृजी भर्जने ' । अत्र प्रसाधनार्थः ॥

प्र वः शर्धाय घृष्वये त्वेषद्युम्नाय शुष्मिणे । देवत्तं ब्रह्म गायत ॥ ४ ॥

प्र । वः । शर्धाय । घृष्वये । त्वेषऽद्युम्नाय । शुष्मिणे । देवत्तम् । ब्रह्म । गायत ॥ ४ ॥

हे ऋत्विजः Vवः युष्माकं संबन्धिने Vशर्धाय प्रसहनशीलाय Vघृष्वये शत्रुघर्षणयुक्ताय Vत्वेषद्युम्नाय दीप्यमानयशसे । ' द्युम्नं द्योततेर्यशोवान्नं वा ' ( निरु. ५. ५ ) इति यास्कः । Vशुष्मिणे बलवते । ' शुष्मं शुष्णम् ' ( नि. २. ९. ११ ) इति बलनामसु पाठात् । एवंभूताय मरुद्गणाय Vब्रह्म हविर्लक्षणमन्नमुद्दिश्य Vप्र Vगायत स्तुध्वम् । कीदृशं ब्रह्म । Vदेवत्तं देवैर्दत्तं देवतानुग्रहालब्धम् ॥ शर्धाय । ' शर्धु प्रसहने ' । शर्धयत्यभिभवतीति शर्धो बलम् । पचाद्यच् । वृषादित्वादाद्युदात्तत्वम् । घृष्वये । ' घृष संघर्षे ' । ' कृविघृष्वि० ' ( उ. सू. ४. ४९६ ) इत्यादिना क्विन्प्रत्ययान्तो निपातितः । त्वेषद्युम्नाय । ' त्विष दीप्तौ ' । पचाद्यच् । त्वेषं दीप्तं द्युम्नं यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । देवत्तं देवैर्दत्तम् । छान्दसो वर्णलोपः । उक्तं च–' द्वौ चापरौ वर्णविकारनाशौ ' ( का. ६. ३. १०९ ) इति । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् ॥

प्र शंसा गोष्वघ्न्यं क्रीळं यच्छर्धो मारुतम् । जम्भे रसस्य वावृधे ॥ ५ ॥

प्र । शंस । गोषु । अघ्न्यम् । क्रीळम् । यत् । शर्धः । मारुतम् । जम्भे । रसस्य । ववृधे ॥५॥

Vगोषु मरुन्मातृभूतपृश्निप्रभृतिषु धेनुष्ववस्थितम् । ' पृश्नियै वै पयसो मरुतो जाताः ' ( तै. सं. २. २. ११. ४ ) इति श्रुत्यन्तरात् । Vअघ्न्यम् अहन्तव्यं Vक्रीळं विहारोपेतं Vमारुतं मरुत्संबन्धि Vशर्धः प्रसहनशीलं तेजो Vयत् अस्ति तत् Vप्र Vशंस हे ऋत्विक्समूह स्तुहि । Vरसस्य गोक्षीररूपस्य संबन्धि तत् तेजः Vजम्भे मुखे उदरे वा Vववृधे वृद्धमभूत् ॥ शंस । ' शंसु स्तुतौ ' । ' ह्यचोऽतस्तिङः ' इति संहितायां दीर्घः । गोषु । ' सावेकाचः० ' इति प्राप्तस्य विभक्त्युदात्तस्य ' न गोश्वन्सावर्वर्ण० ' इति प्रतिषेधः । अघ्न्यम् । ' घ्नो हननम् ' । ' घञर्थे कविधानम् ' । ( पा. सू. ३. ३. ५८. ४ ) इति कः । ' गमहन० ' इत्यादिना उपधालोपः । ' हो हन्तेः० ' ( पा. सू. ७. ३. ५४ ) इति घत्वम् । तदर्हतीति घ्न्यम् । ' छन्दसि च ' इति यः । न घ्न्यम् अघ्न्यम् । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । क्रीळादयो

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

गताः । जम्भे । ' जभि नाशने ' । जम्भ्यते भक्ष्यतेऽनेनेति जम्भमास्यम् । करणे घञ् । ववृधे । ' वृधु वृद्धौ ' । लिट् । छान्दसं संहितायामभ्यासदीर्घत्वम् ॥ ॥ १२ ॥

को वो वर्षिष्ठ आ नरो दिवश्च ग्मश्च धूतयः । यत्सीमन्तं न धूनुथ ॥ ६ ॥

कः । वः । वर्षिष्ठः । आ । नरः । दिवः । च । ग्मः । च । धूतयः । यत् । सीम् । अन्तम् । न । धूनुथ ॥ ६ ॥

vदिवश्च द्युलोकस्यापि vग्मश्च भूलोकस्यापि । ' गौः ग्मा ' ( नि. १. १. २ ) इति भूनामसु पठितत्वात् । vधूतयः कम्पनकारिणो हे vनरः नेतारो मरुतः vवः युष्माकं मध्ये vआ समन्तात् vवर्षिष्ठः वृद्धतमः vकः । vयत् यस्मात् कारणात् vसीं सर्वतः vअन्तं vन वृक्षाग्रमिव vधूनुथ चालयथ । तस्मात् कारणात् कम्पयितॄणां युष्माकं मध्ये कः प्रबल इति प्रश्नः ॥ वर्षिष्ठः । वृद्धशब्दात् इष्ठनि ' प्रियस्थिर° ' ( पा. सू. ६. ४. १५७ ) इत्यादिना वर्षादेशः । नित्त्वादाद्युदात्तः । ग्मः । ग्माशब्दात् षष्ठ्येकवचने ' आतो धातोः ' इत्यत्र ' आत इति योगविभागः कर्तव्यः ' ( का. ६. ४. १४० ) इत्युक्तत्वात् आकारलोपः उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । धूतयः । ' धूञ् कम्पने ' । ' क्तिच्क्तौ च संज्ञायाम् ' इति क्तिच् । ' तितुत्र° ' इत्यादिना इट्प्रतिषेधः । ' आमन्त्रितस्य च ' इति सर्वानुदात्तत्वम् । धूनुथ । ' स्वादिभ्यः श्नुः ' । ' सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः ' इति वचनात् सतिशिष्टोऽपि विकरणस्वरो लसार्वधातुकस्वरं न बाधते । अतस्तिङ एव स्वरः । यद्वृत्तयोगादनिघातः ॥

नि वो यामाय मानुषो दध्र उग्राय मन्यवे । जिहीत पर्वतो गिरिः ॥ ७ ॥

नि । वः । यामाय । मानुषः । दध्रे । उग्राय । मन्यवे । जिहीत । पर्वतः । गिरिः ॥ ७ ॥

हे मरुतः vवः युष्माकं vयामाय गमनार्थं vमानुषः गृहस्वामी कश्चिन्मनुजः vनि vदध्रे गृहदार्ढ्यार्थं दृढं स्तम्भं निक्षिप्तवान् । भवदीयगमनेन चालितं गृहं पतिष्यतीति भीत्या तन्निवारणाय दृढस्तम्भप्रक्षेपः । कीदृशाय यामाय । vउग्राय तीव्राय vमन्यवे चालनार्थमभिमन्यमानाय । युज्यते हि भवद्गमनाद्भीतिः । यतो भवद्भृत्या चालितः vपर्वतः बहुविधपर्वयुक्तः vगिरिः शिखरी vजिहीत गच्छेत् ॥ मानुषः । ' मनोर्जातावञ्यतौ षुक् च ' ( पा. सू. ४. १. १६१ ) इति मनुशब्दात् अपत्यार्थे अञ् षुगागमश्च । ' ञ्नित्यादिर्नित्यम् ' इत्याद्युदात्तत्वम् । दध्रे । ' धृङ् अवस्थाने ' इत्यस्य लिटि कित्त्वाद्गुणाभावे सति यणादेशः । प्रत्ययस्वरः । पादादित्वात् न निघातः । जिहीत । ' ओहाङ् गतौ ' । लिङि जुहोत्यादित्वात् शपः श्लुः । ' भृञामित् ' ( पा. सू. ७. ४. ७६ ) इति अभ्यासस्य इत्वम् । ' श्नाभ्यस्तयोरातः ' इति आकारलोपः । पर्ववान् पर्वतः । मत्वर्थीयः तप्रत्ययः ॥

येषामज्मेषु पृथिवी जुजुर्वाँइव विश्पतिः । भिया यामेषु रेजते ॥ ८ ॥

येषाम् । अज्मेषु । पृथिवी । जुजुर्वान्ऽइव । विश्पतिः । भिया । यामेषु । रेजते ॥ ८ ॥

हे मरुतः vयेषां युष्माकं vयामेषु गमनेषु vअज्मेषु क्षेपकेषु सत्सु vपृथिवी भूमिः vरेजते कम्पते । तत्र दृष्टान्तः । vजुजुर्वाँइव vविश्पतिः । यथा वयोहानिरोगादिना जीर्णः प्रजापालको राजा वैरिभयात् कम्पते तद्वत् ॥ अज्मेषु । ' अज गतिक्षेपणयोः ' । बहुलग्रहणात् औणादिको मन् । ' अजेर्व्यघञपोः '

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

( पा. सू. २. ४. ५६ ) इति वीभावो न भवति, 'वलादावार्धधातुके विकल्प इष्यते' ( का. २. ४. ५६. २ ) इति वचनात्। नित्त्वादाद्युदात्तत्वम्। जुजुर्वान्। 'जॄष् वयोहानौ'। लिटः क्वसुः। 'बहुलं छन्दसि' ( पा. सू. ७. १. १०३ ) इति उत्वम्। अभ्यासहलादिशेषौ। 'वस्वेकाजाद्घसाम्' इति नियमात् इडागमाभावः। 'ऋच्छत्यृताम्' ( पा. सू. ७. ४. ११ ) इति गुणः, 'हलि च' इति दीर्घत्वं च 'संज्ञापूर्वको विधिरनित्यः' इति वचनात् न भवति। विशां पतिर्विश्पतिः। 'पत्यावैश्वर्ये' इति पूर्वपदप्रकृतिस्वरे प्राप्ते 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वम्। भिया। 'सावेकाचः०' इति विभक्तेरुदात्तत्वम्। यामेषु। 'यम उपरमे'। भावे घञ्। 'कर्षात्वतो घञः०' इत्यन्तोदात्तत्वे प्राप्ते वृषादिषु पाठादाद्युदात्तत्वम्। रेजते। 'रेजृ कम्पने'। अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरः। यद्वृत्तयोगादनिघातः॥

स्थिरं हि जानमेषां वयो मातुर्निरेतवे। यत्सीमनु द्विता शवः॥ ९॥

स्थिरम्। हि। जानम्। एषाम्। वयः। मातुः। निःऽएतवे। यत्। सीम्। अनु। द्विता। शवः॥९॥

[V]एषां मरुतां [V]जानं जन्मस्थानमाकाशं [V]स्थिरं [V]हि चलनरहितं खलु। [V]मातुः मरुतां जननीस्थानीयादाकाशात् [V]वयः पक्षिणः [V]निरेतवे निर्गन्तुं समर्था भवन्तीति शेषः। तादृशादाकाशान्नवज्जन्मेति मरुतां स्तुतिः। [V]यत् यस्मात् कारणात् [V]शवः भवदीयं बलम् अनुक्रमेण [V]सीं सर्वतः [V]द्विता द्वित्वेन द्यावापृथिव्योर्विभज्य वर्तते। अतो भवदीयं जानं स्थिरं हि इति पूर्वत्रान्वयः॥ जानम्। जन्यतेऽस्मिन्निति जानमन्तरिक्षम्। अधिकरणे घञ्। एषाम्। 'इदमोऽन्वादेशे०' इति अशादेशोऽनुदात्तः। विभक्तिश्च सुप्त्वादनुदात्ता। न च 'ऊडिदम्०' इत्यादिना विभक्त्युदात्तत्वम्, अन्तोदात्तात् इदंशब्दात् तस्य विधानात्। निरेतवे। 'इण् गतौ'। 'तुमर्थे सेसेन्०' इति तवेन्प्रत्ययः। 'तादौ च०' इति गतेः प्रकृतिस्वरत्वम्॥

उदु त्ये सूनवो गिरः काष्ठा अज्मेष्वत्नत। वाश्रा अभिज्ञु यातवे॥ १०॥

उत्। ऊँ इति। त्ये। सूनवः। गिरः। काष्ठाः। अज्मेषु। अत्नत। वाश्राः। अभिऽज्ञु। यातवे॥१०॥

[V]त्ये पूर्वप्रकृताः[1] [V]गिरः [V]सूनवः वाच उत्पादका मरुतः। वायवो हि तालुओष्ठादिषु संचरन्तो वाचमुत्पादयन्ति। [V]अज्मेषु स्वकीयेषु गमनेषु सत्सु [V]काष्ठाः अपः। 'आपोऽपि काष्ठा उच्यन्ते क्रान्त्वा स्थिता भवन्ति' ( निरु. २. १५ ) इति यास्कः। [V]उदु उत्कर्षेणैव [V]अत्नत अतनिषत विस्तारितवन्तः। उदकं विस्तार्य तत्पानार्थं [V]वाश्राः हम्भारवोपेता गाः [V]अभिज्ञु जान्वाभिमुख्यं यथा भवति तथा [V]यातवे गन्तुं प्रेरितवन्त इति शेषः॥ सूनवः। 'षू प्रेरणे'। 'सुवः कित्' ( उ. सू. ३. ३१५ ) इति नुप्रत्ययः। कित्त्वाद्गुणाभावः। अत्नत। 'तनु विस्तारे'। लङि झस्य अदादेशे 'बहुलं छन्दसि' इति विकरणस्य लुक्। 'तनिपत्योश्छन्दसि' ( पा. सू. ६. ४. ९९ ) इति उपधालोपः। अडागमः। अभिज्ञु। अभिगते जानुनी यस्य तदभिज्ञु। 'प्रसंभ्यां जानुनोर्ज्ञुः' ( पा. सू. ५. ४. १२९ ) इति व्यत्ययेनाभिपूर्वस्यापि जानुशब्दस्य ज्ञुशब्दादेशः समासान्तः। यातवे। 'तुमर्थे सेसेन्०' इति तवेन्प्रत्ययः। नित्त्वादाद्युदात्तत्वम्॥ ॥ १३ ॥

---

१. च–पूर्ववृत्ताः; फ–पूर्वप्रवृत्ताः।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्यं चिद्घा दीर्घं पृथुं मिहो नपातममृध्रम् । प्र च्यावयन्ति यामभिः ॥ ११ ॥

त्यम् । चित् । घ । दीर्घम् । पृथुम् । मिहः । नपातम् । अमृध्रम् ।

प्र । च्यवयन्ति । यामऽभिः ॥ ११ ॥

vत्यं vचिद्घ प्रसिद्धो यो मेघस्तमपि मेघं vयामभिः स्वकीयगमनैः vप्र vच्यावयन्ति मरुतः प्रकर्षेण गमयन्ति । कीदृशम् । vदीर्घम् आयामोपेतं vपृथुं तिर्यग्विस्तृतं vमिहो vनपातं सेचनीयस्य जलस्य न पातयितारं वृष्टिमकुर्वन्तमित्यर्थः । vअमृध्रं केनाप्यहिंस्यम् ॥ घ । 'ऋचि तुनुघ०' इत्यादिना दीर्घः । मिहः । 'मिह सेचने' । मेहति सिञ्चतीति मिट् वृष्टिः । 'क्विप् च' इति क्विप् । 'सावेकाचः०' इति विभक्तेरुदात्तत्वम् । नपातम् । न पातयतीति नपात् । 'नञ्माण्नपात्०' इत्यादिना नञः प्रकृतिभावः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । अमृध्रम् । 'मृधु मृधु उन्दने' । मर्धति उदकेन उनत्तीति मृध्रः । बहुलवचनात् औणादिको रक्प्रत्ययः । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । यद्वा । संग्रामवाचिना मृधशब्देन हिंसा लक्ष्यते । मत्वर्थीयो रः । पूर्ववत् स्वरसमासौ । च्यावयन्ति । 'च्युङ् गतौ' । णिचि वृद्ध्यावादेशौ । पदकाले ह्रस्वश्छान्दसः ॥

मरुतो यद्ध वो बलं जनाँ अचुच्यवीतन । गिरींरचुच्यवीतन ॥ १२ ॥

मरुतः । यत् । ह । वः । बलम् । जनान् । अचुच्यवीतन । गिरीन् । अचुच्यवीतन ॥ १२ ॥

हे vमरुतः vयद्ध यस्मादेव कारणात् vवः युष्माकं vबलम् अस्ति अस्मादेव कारणात् vजनान् प्राणिनः vअचुच्यवीतन स्वस्वव्यापारेषु प्रेरयत । तथा vगिरीन् मेघान् vअचुच्यवीतन प्रेरयत ॥ मरुतः । आमन्त्रिताद्युदात्तत्वम् । अचुच्यवीतन । च्यवतेर्लङि व्यत्ययेन परस्मैपदम् । 'तप्तनप्तनथनाश्च' इति तस्य तनबादेशः । 'बहुलं छन्दसि' इति शपः श्लुः । 'बहुलं छन्दसि' (पा. सू. ७. ३. ९७) इति ईडागमः । गुणावादेशौ । 'तिङ्ङतिङः' इति निघातः । गिरीन् । 'दीर्घादटि समानपादे' इति संहितायां नकारस्य रुत्वम् । 'अत्रानुनासिकः' इति ईकारस्यानुनासिकः ॥

यद्ध यान्ति मरुतः सं ह ब्रुवतेऽध्वन्ना । शृणोति कश्चिदेषाम् ॥ १३ ॥

यत् । ह । यान्ति । मरुतः । सम् । ह । ब्रुवते । अध्वन् । आ । शृणोति । कः । चित् । एषाम् ॥ १३ ॥

vयद्ध यदा खलु vमरुतः vयान्ति गच्छन्ति तदानीम् vअध्वन्ना मार्गे सर्वतः vसं vब्रुवते vह संभूय ध्वनिमवश्यं कुर्वन्ति । vएषां मरुतां संबन्धिनं शब्दं vकश्चित् यः कोऽपि vशृणोति ॥ यान्ति । 'या प्रापणे' । अदादित्वात् शपो लुक् । 'झोऽन्तः' इति अन्तादेशस्य[1] उपदेशिवद्भावात् अन्तीत्येतदाद्युदात्तम् । धातुना सहैकादेश एकादेशस्वरः । यद्वृत्तयोगादनिघातः । ब्रुवते । 'ब्रूञ् व्यक्तायां वाचि' । झस्य अदादेशे कृते परत्वात् प्राप्तस्य गुणस्य ङित्त्वेन बाधितत्वात् उवङादेशः । अध्वन् । 'सुपां सुलुक्०' इति सप्तम्या लुक् । शृणोति । तिपः पित्त्वादनुदात्तत्वे विकरणस्वरः ॥

---

१. च-छ-त-न-स-झादेशस्य; श-लादेशस्य ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

**प्र यात शीभमाशुभिः सन्ति कण्वेषु वो दुवः । तत्रो षु मादयाध्वै ॥ १४ ॥**

प्र । यात । शीभम् । आशुऽभिः । सन्ति । कण्वेषु । वः । दुवः । तत्रो इति । सु । मादयाध्वै ॥१४॥

हे मरुतः ᵛआशुभिः वेगवद्भिः स्वकीयैर्वाहनैः ᵛशीभं शीघ्रम् । ' शीभं तृषु तूयम् ' ( नि. २. १५. ९ ) इति क्षिप्रनामसु पाठात् । ᵛप्र ᵛयात प्रकर्षण कर्मभूमिं गच्छत । ᵛकण्वेषु मेधाविष्वनुष्ठातृषु ᵛवः युष्माकं ᵛदुवः दुवांसि परिचरणानि ᵛसन्ति । ᵛतत्रो ᵛषु तेष्वेव[1] परिचारकेषु कण्वेषु ᵛमादयाध्वै तृप्ता भवत ॥ आशुभिः । ' अशू व्याप्तौ ' । ' कृवापाजि° ' इत्यादिना उण् । प्रत्ययस्वरः । सन्ति । ' श्नसोरल्लोपः ' इति अकारलोपः । मादयाध्वै । ' मद तृप्तियोगे ' । चुरादिः । आकुस्मीय आत्मनेपदी । लेटि आडागमः । टेः एत्वम् । ' वैतोऽन्यत्र ' ( पा. सू. ३. ४. ९६ ) इति एकारस्य ऐकारादेशः ॥

**अस्ति हि ष्मा मदाय वः स्मसि ष्मा वयमेषाम् । विश्वं चिदायुर्जीवसे ॥१५॥**

अस्ति । हि । स्म । मदाय । वः । स्मसि । स्म । वयम् । एषाम् ।
विश्वम् । चित् । आयुः । जीवसे ॥ १५ ॥

हे मरुतः ᵛवः युष्माकं ᵛमदाय तृप्तये ᵛअस्ति ᵛहि ᵛष्म अस्माभिः प्रयुज्यमानं हविर्वो विद्यते खलु । ᵛएषां युष्माकं भृत्यभूताः ᵛवयं ᵛस्मसि ᵛष्म विद्यामहे खलु । ᵛजीवसे जीवितुं ᵛविश्वं ᵛचिदायुः सर्वमप्यायुः प्रयच्छतेति शेषः । स्म ' निपातस्य च ' इति संहितायां दीर्घः । स्मसि । इदन्तो मसिः । जीवसे । ' तुमर्थे सेसेन्° ' इति असेप्रत्ययः ॥ ॥ १४ ॥

' कद्ध नूनम् ' इति पञ्चदशर्चं तृतीयं सूक्तम् । घोरपुत्रः कण्व ऋषिः, ' ऋषिश्चान्यस्मात् ' इति परिभाषितत्वात् । पूर्वसूक्ते ' मारुतं हि ' इत्युक्तत्वादिदमपि मरुद्वताकम् । ' गायत्रं तु ' इत्युक्तत्वात् गायत्रीच्छन्दस्कम् । ' कद्ध ' इत्यनुक्रमणिका । विनियोगो लैङ्गिकः ॥

**कद्ध नूनं कधप्रियः पिता पुत्रं न हस्तयोः । दधिध्वे वृक्तबर्हिषः ॥ १ ॥**

कत् । ह । नूनम् । कधऽप्रियः । पिता । पुत्रम् । न । हस्तयोः । दधिध्वे । वृक्तऽबर्हिषः ॥१॥

हे मरुतः ᵛकद्ध कदा खलु ᵛनूनम् अवश्यं हस्तयोः ᵛदधिध्वे यूयमस्मान् हस्ते धारयथ । तत्र दृष्टान्तः। ᵛपिता ᵛपुत्रं ᵛन ᵛहस्तयोः । यथा लोके पिता हस्तयोः[2] स्वकीयं पुत्रं धारयति तद्वत् । कीदृशा मरुतः । ᵛकधप्रियः स्तुतिप्रीताः ᵛवृक्तबर्हिषः । वृक्तं छिन्नं बर्हिर्दर्भो येषां[3] मरुतां यजमानाय[3] ते[4] मरुतः तथाविधाः॥ कत् कदा । ' द्वौ चापरौ वर्णविकारनाशौ ' (का.६.३.१०९ ) इत्युक्तत्वात् आकारलोपः । कधप्रियः । कथा स्तुतिः । तया प्रीणन्तीति कधप्रियः । ' प्रीञ् प्रीतौ ' । क्विप् । पूर्वपदस्य ' ड्यापोः संज्ञाच्छन्दसोर्बहुलम् ' ( पा. सू. ६. ३. ६३ ) इति ह्रस्वत्वम् । धकारश्छान्दसः । आमन्त्रितनिघातः । दधिध्वे । दधातेः ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लिट् । क्रादिनियमात् इट् । प्रत्ययस्वरः वृक्तबर्हिषः । आमन्त्रितनिघातः ॥

---

१. ढ–तेषु तेष्वेव । २. ढ–स्वहस्तयोः । ३. ढ–येषां ते मरुतां यजनाय । ४. ढ–न-स–हे ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

**क्व नूनं कद्वो अर्थं गन्ता दिवो न पृथिव्याः । क्व वो गावो न रण्यन्ति ॥ २ ॥**

क्व । नूनम् । कत् । वः । अर्थम् । गन्त । दिवः । न । पृथिव्याः । क्व । वः । गावः । न । रण्यन्ति ॥२॥

हे मरुतः Vनूनम् इदानीं Vक्व यूयं कुत्र स्थिताः । Vकत् कदा Vवः युष्माकम् Vअर्थम् अरणं[1] देवयजनदेशे गमनम्[2] । विलम्बं[2] मा कुरुतेत्यर्थः । Vदिवः Vगन्त द्युलोकाद्गच्छत । Vपृथिव्याः Vन गन्त भूलोकान्मा गच्छत । Vवः युष्मान् Vक्व Vरण्यन्ति । देवयजनरूपायाः पृथिव्या अन्यत्र कुत्र शब्दयन्ति । यजमानाः स्तुवन्ति । तत्र दृष्टान्तः । Vगावो Vन । यथा गावो रणन्ति शब्दयन्ति तद्वत् ॥ क्व । किंशब्दात् सप्तम्यन्तात् ' किमोऽत् ' ( पा. सू. ५. ३. १२ ) इति अत्प्रत्ययः । ' क्वाति ' ( पा. सू. ७. २. १०५ ) इति किमः क्वादेशः । ' तित्स्वरितः ' इति स्वरितत्वम् । अर्थम् । ' ऋ गतौ ' । ' उषिकुषिगार्तिभ्यस्थन् ' ( उ. सू. २. १६१ ) इति भावे थन् । नित्त्वादाद्युदात्तत्वम् । गन्त । गमेर्लोटि ' बहुलं छन्दसि ' इति शपो लुक् । थादेशस्य तस्य ' तप्तनप्तनथनाश्च ' इति तबादेशः । अत एव ङित्त्वाभावात् ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपो न भवति । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । ' व्यचोऽतस्तिङः ' इति संहितायां दीर्घत्वम् । दिवः । ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम् । पृथिव्याः । ' उदात्तयणो हल्पूर्वात् ' इति विभक्तेरुदात्तत्वम् । रण्यन्ति । रणतिः शब्दार्थः । व्यत्ययेन श्यन् ॥

**क्व वः सुम्ना नव्यांसि मरुतः क्व सुविता । को ह विश्वानि सौभगा ॥ ३ ॥**

क्व । वः । सुम्ना । नव्यांसि । मरुतः । क्व । सुविता । को ह इति । विश्वानि । सौभगा ॥ ३ ॥

हे Vमरुतः Vवः युष्माकं संबन्धीनि Vनव्यांसि नवतराणि Vसुम्ना प्रजापशुरूपाणि धनानि ' प्रजा वै पशवः सुम्नम् ' ( तै. सं. ५. ४. ६. ६ ) इति श्रुत्यन्तरात् । Vक्व कुत्र वर्तन्ते । तथा Vसुविता शोभनानि प्राप्याणि मणिमुक्तादीनि भवदीयानि Vक्व कुत्र वर्तन्ते । Vविश्वानि सर्वाणि Vसौभगा सौभाग्यरूपाणि गजाश्वादीनि Vको कुत्र वा वर्तन्ते । भवदीयैः सुम्नादिभिः सर्वैः सहागन्तव्यमित्यर्थः ॥ सुम्ना । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । नव्यांसि । नवशब्दात् ईयसुनि ईकारलोपश्छान्दसः । सुविता । सुष्ठु इतानि सुवितानि । ' तन्वादीनां छन्दसि बहुलमुपसंख्यानम् ' ( पा. सू. ६. ४. ७७. १ ) इति उवङादेशः । सौभगा । ' सुभगान्मन्त्रे ' ( पा. सू. ५. १. १२९ ग. ) इति तस्य भावः इत्यर्थे अञ् । पूर्ववत् शेर्लोपः ॥

**यद्यूयं पृश्निमातरो मर्तासः स्यातन । स्तोता वो अमृतः स्यात् ॥ ४ ॥**

यत् । यूयम् । पृश्निऽमातरः । मर्तासः । स्यातन । स्तोता । वः । अमृतः । स्यात् ॥ ४ ॥

हे पृश्निनामकधेनुपुत्राः[3] मरुतः Vयूयं यद्यपि Vमर्तासः मनुष्याः Vस्यातन भवेत तथापि Vवः युष्माकं Vस्तोता यजमानः Vअमृतः Vस्यात् देवो भवेत् ॥ पृश्निमातरः । पृश्निर्माता येषां ते । समासान्तविधेरनित्यत्वात् ' नद्यृतश्च ' ( पा. सू. ५. ४. १५३ ) इति कबभावः । मर्तासः । ' असि-

---

१. ढ–प्रयोजनम् । २. ढ–गमनविलम्बम् । ३. ढ–पृश्निमातरः पृश्निनामकधेनुपुत्राः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हसि° ' इत्यादिना म्रियतेः तन्प्रत्ययः । ' आज्जसेरसुक् '। स्यातन । अस्तेर्लिङि तस्य ' तसनसनथनाश्च ' इति तनादेशः । यासुट उदात्तत्वम् । अमृतः । ' नञो जरमरमित्रमृताः ' इत्युत्तरपदाद्युदात्तत्वम् ॥

**मा वो मृगो न यवसे जरिता भूदजोष्यः । पथा यमस्य गादुप ॥ ५ ॥**

मा । वः । मृगः । न । यवसे । जरिता । भूत् । अजोष्यः । पथा । यमस्य । गात् । उप ॥ ५ ॥

हे मरुतः ᵛवः युष्माकं ᵛजरिता स्तोता ᵛअजोष्यः असेव्यः ᵛमा ᵛभूत् । तत्र दृष्टान्तः । ᵛमृगो ᵛन ᵛयवसे । यथा तृणे भक्षणीये मृगः कदाचिदप्यसेव्यो न भवति किंतु सर्वदा तृणं भक्षयति तद्वत् । किं च स स्तोता ᵛयमस्य ᵛपथा यमलोकसंबन्धिमार्गेण मा ᵛउप ᵛगात् मा गच्छतु । तस्य मरणं मा भूदित्यर्थः ॥ जरिता । ' जृष् वयोहानौ '। स्तुतिकर्मेति ( निरु. १०. ८ ) यास्कः । तृचि इडागमः । चित्त्वादन्तोदात्तत्वम् । भूत् । लुङि ' गातिस्था° ' इति सिचो लुक् । ' न माङ्योगे ' इति अडभावः । अजोष्यः । ' जुषी प्रीतिसेवनयोः '। ' ऋहलोर्ण्यत् ' इति कर्मणि ण्यत् । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । पथा । तृतीयैकवचने ' भस्य टेर्लोपः ' ( पा. सू. ७. १. ८८ ) इति टिलोपः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । गात् । एतेर्लुङि ' इणो गा लुङि ' ( पा. सू. २. ४. ४५ ) इति गादेशः । ' गातिस्था° ' इति सिचो लुक् । पूर्ववत् अडभावः ॥ ॥ १५ ॥

**मो षु णः परापरा निर्ऋतिर्दुर्हणा वधीत् । पदीष्ट तृष्णया सह ॥ ६ ॥**

मो इति । सु । नः । परांऽपरा । निःऽऋतिः । दुःऽहना । वधीत् । पदीष्ट । तृष्णया । सह ॥ ६ ॥

हे मरुतः ᵛनः अस्मान् ᵛनिर्ऋतिः रक्षोजातिदेवता[1] ᵛमो ᵛषु ᵛवधीत् सर्वथा वधं मा कार्षीत् । कीदृशी । ᵛपरापरा उत्कृष्टादप्युत्कृष्टा अतिबलेत्यर्थः । अत एव ᵛदुर्हणा केनापि हन्तुं दुःशक्या[2] । सा निर्ऋतिः ᵛतृष्णया ᵛसह ᵛपदीष्ट पततु । अस्मदीया तृष्णा बाधिका निर्ऋतिश्च विनश्यत्वित्यर्थः ॥ मो षु णः । ' सुञः ' इति षत्वम् । ' नश्च धातुस्थोरुषुभ्यः ' इति णत्वम् । दुर्हणा । ' ईषदुःसुषु° ' इत्यादिना हन्तेः कर्मणि खल् । लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वम् । वधीत् । लुङि हन्तेः ' लुङि च ' ( पा.सू. २. ४. ४३ ) इति वधादेशः । सिचि इडागमः । वधादेशस्य अदन्तत्वात् ' एकाच उपदेशे° ' इति इट्प्रतिषेधो न भवति । अतो लोपे सति तस्य स्थानिवत्त्वात् ' अतो हलादेः° ' ( पा. सू. ७. २. ७ ) इति वृद्ध्यभावः । ' इट ईटि ' ( पा. सू. ८. २. २८ ) इति सिचो लोपः । पदीष्ट । ' पद गतौ '। आशीर्लिङि ' छन्दस्युभयथा ' इति सार्वधातुकत्वात् सलोपः । आर्धधातुकत्वात् सुडागमः । प्रत्ययस्वरः । तृष्णया । ' जितृषा पिपासायाम् '। ' तृषिशुषिरसिभ्यः किच्च ' ( उ. सू. ३. २९२ ) इति नप्रत्ययः । ' नित् ' इत्यनुवृत्तेराद्युदात्तत्वम् ॥

**सत्यं त्वेषा अमवन्तो धन्वञ्चिदा रुद्रियासः । मिहं कृण्वन्त्यवाताम् ॥ ७ ॥**

सत्यम् । त्वेषाः । अमऽवन्तः । धन्वन् । चित् । आ । रुद्रियासः । मिहम् । कृण्वन्ति । अवाताम् ॥ ७ ॥

---

१. ढ–रक्षः । २. ढ–दुःशका ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vधन्वञ्चित् मरुदेशेऽपि vरुद्रियासः रुद्रेण पालितत्वात् तदीया मरुतः vआ सर्वतः vअवातां वायुरहितां vमिहं वृष्टिं vकृण्वन्ति कुर्वन्ति तदेतत् vसत्यम्। कीदृशा रुद्रियासः। vत्वेषाः दीप्ताः vअमवन्तः बलवन्तः। मरुतां रुद्रपालनमाख्यानेषु प्रसिद्धम्॥ धन्वन्। 'रिवि रवि धवि गत्यर्थाः'। इदित्त्वात् नुम्। 'कनिन्युवृषितक्षि°' इत्यादिना कनिन्। नित्त्वादाद्युदात्तत्वम्। 'सुपां सुलुक्°' इति सप्तम्या लुक्। रुद्रियासः। रुद्रस्येमे रुद्रियाः। 'तस्येदम्' इत्यर्थे घः। 'आज्जसेरसुक्'। मिहम्। 'मिह सेचने'। 'क्विप् च' इति क्विप्। कृण्वन्ति। 'कृवि हिंसाकरणयोश्च'। 'धिन्विकृण्व्योर च' इति उप्रत्ययः; तत्संनियोगेन वकारस्य च अकारादेशः। अतो लोपेन लुप्तस्य स्थानिवद्भावात् लघूपधगुणाभावः॥

कारीर्यां 'मारुतं सप्तकपालम्' इत्यस्य हविषः 'वाश्रेव विद्युत्' इत्येषानुवाक्या। 'वर्षकामेष्टिः' इति खण्डे सूत्रितं–'वाश्रेव विद्युन्मिमाति पर्वतश्चिन्महि वृद्धो बिभाय' (आश्व. श्रौ. २. १३) इति॥

**वाश्रेव विद्युन्मिमाति वत्सं न माता सिषक्ति। यदेषां वृष्टिरसर्जि॥ ८॥**

वाश्राऽइव। विऽद्युत्। मिमाति। वत्सम्। न। माता। सिसक्ति।

यत्। एषाम्। वृष्टिः। असर्जि॥ ८॥

vवाश्रेव शब्दयुक्ता प्रस्नुतस्तनवती धेनुरिव vविद्युत् मेघस्था दृश्यमाना सती vमिमाति शब्दं करोति। विद्युद्वेलायां हि मेघगर्जनं प्रसिद्धम्। vमाता धेनुः vवत्सं vन वत्समिव vसिषक्ति इयं विद्युत् मरुतः सेवते। सिषक्तिः सेवनार्थः। 'सिषक्तु सचत इति सेवमानस्य' (निरु. ३. २१) इति यास्केनोक्तत्वात्। vयत् यस्मात् कारणात् vएषां मरुतां संबन्धिनी vवृष्टिरसर्जि गर्जनसहिते विद्युत्काले वृष्टा[1] भवति, तस्मात् विद्युतो मरुत्सेवनमुपपन्नम्॥ वाश्रेव। 'वाश्र शब्दे'। 'स्फायितञ्चि°' इत्यादिना रक्। मिमाति। 'माङ् माने शब्दे च'। व्यत्ययेन परस्मैपदम्। जुहोत्यादित्वात् श्लुः। 'भृञामित्' (पा. सू. ७. ४. ७६) इति अभ्यासस्य इत्वम्। सिषक्ति। 'षच समवाये'। लटि 'बहुलं छन्दसि' इति शपः श्लुः। 'बहुलं छन्दसि' इति अभ्यासस्य इत्वम्। असर्जि। 'सृज विसर्गे'। कर्मणि लुङ्। 'चिण् भावकर्मणोः' (पा. सू. ३. १. ६६) इति चिण्। 'चिणो लुक्' (पा. सू. ६. ४. १०४) इति तशब्दस्य लुक्। गुणः। अडागम उदात्तः। यद्वृत्तयोगादनिघातः॥

**दिवा चित्तमः कृण्वन्ति पर्जन्येनोदवाहेन। यत्पृथिवीं व्युन्दन्ति॥ ९॥**

दिवा। चित्। तमः। कृण्वन्ति। पर्जन्येन। उदऽवाहेन। यत्। पृथिवीम्। विऽउन्दन्ति॥९॥

ते मरुतः vउदवाहेन उदकधारिणा vपर्जन्येन मेघेन सूर्यमाच्छाद्य vदिवा vचित् अह्न्यपि vतमः vकृण्वन्ति अन्धकारं कुर्वन्ति। vयत् यदा vपृथिवीं भूमिं vव्युन्दन्ति विशेषेण क्लेदयन्ति तदानीमतिवृष्टिकाले तमः कुर्वन्तीति पूर्वत्रान्वयः॥ उदवाहेन। उदकानि वहतीति उदवाहः। 'कर्मण्यण्'। मेघविशेषस्येयं संज्ञा। 'उदकस्योदः संज्ञायाम्' (पा. सू. ६. ३. ५७) इति उदकशब्दस्य उदभावः।

---

१. य–दृष्टा।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कृदुत्तरपदप्रकृतिस्वरत्वम् । व्युन्दन्ति । ' उन्दी क्लेदने ' । रुधादित्वात् श्नम् । ' श्नान्नलोपः ' ( पा. सू. ६. ४. २३ ) इति नलोपः । यद्वृत्तयोगादनिघातः ॥

अध॑ स्व॒नान्म॒रुता॑ विश्व॒मा सद्म॒ पार्थि॑वम् । अरे॑जन्त॒ प्र मानु॑षाः ॥ १० ॥

अध॑ । स्व॒नात् । म॒रुता॑म् । विश्व॑म् । आ । सद्म॑ । पार्थि॑वम् । अरे॑जन्त । प्र । मानु॑षाः ॥१०॥

[V]मरुतां संबन्धिनः [V]स्वनात् [V]अध ध्वनेर्गर्जनरूपादनन्तरं [V]पार्थिवं पृथिवीसंबन्धि [V]विश्वं [V]सद्म सर्वं गृहम् [V]आ समन्तात् अरेजत इति शेषः । तथा [V]मानुषाः गृहवर्तिनो मनुष्या अपि [V]प्र [V]अरेजन्त प्रकर्षेण कम्पितवन्तः ॥ अध । छान्दसं धत्वम् । सद्म । ' षदॢ विशरणगत्यवसादनेषु ' । ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन् । पार्थिवम् । पृथिव्याः संबन्धि । ' पृथिव्या ञाञौ ' ( पा. सू. ४. १. ८५. २) इति ञाप्रत्ययीयः अञ्प्रत्ययः । जित्त्वादाद्युदात्तत्वम् । अरेजन्त । ' रेजृ कम्पने ' ॥ ॥१६॥

मरु॑तो वी॒ळुपा॑णिभि॒श्चित्रा॒ रोध॑स्वतीरनु । या॒तेमखि॑द्रयामभिः ॥ ११ ॥

मरु॑तः । वी॒ळुपा॑णिऽभिः । चि॒त्राः । रोध॑स्वतीः । अनु॑ । या॒त । ई॒म् । अखि॑द्रयामऽभिः ॥११॥

हे [V]मरुतः यूयं [V]वीळुपाणिभिः दृढहस्तैः सहिताः सन्तः [V]रोधस्वतीरनु कूलयुक्ता नदीरनुलक्ष्य [V]अखिद्रयामभिः अच्छिन्नगमनैः [V]यातें गच्छतैव ॥ मरुतः । आमन्त्रिताद्युदात्तत्वम् । वीळुपाणिभिः । वीडु इति बलनाम, ' वीळु च्यौत्नम् ' ( नि. २. ९. १४ ) इति तन्नामसु पाठात् । तेन च तद्वान् लक्ष्यते । वीळवश्च ते पाणयश्च । ' समासस्य ' इत्यन्तोदात्तत्वम् । रोधस्वतीः । ' रुधिर् आवरणे ' । रुणद्धि स्रोतः इति रोधः कूलम् । ' रोधः कूलं निरुणद्धि स्रोतः ' ( निरु. ६. १ ) इत्युक्तत्वात् । असुनो नित्त्वादाद्युदात्तत्वम् । तद्युक्ता रोधस्वत्यः । ' मादुपधायाः° ' इति मतुपो वत्वम् । ' उगितश्च ' इति ङीप् । मतुब्ङीपोः पित्त्वादनुदात्तत्वे असुनः स्वर एव शिष्यते । यात । ' या प्रापणे ' । अदादित्वात् शपो लुक् । ईम् । ' चादयोऽनुदात्ताः ' इत्यनुदात्तत्वम् । गुणे ' एकादेश उदात्तेनोदात्तः ' इत्युदात्तत्वम् । अखिद्रयामभिः । ' खिद दैन्ये ' । ' स्फायितञ्चि° ' इत्यादिना रक् । खिद्रं यान्तीति खिद्रयामानः । न खिद्रयामानः अखिद्रयामानः । तैः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

स्थि॒रा वः॑ सन्तु ने॒मयो॒ रथा॒ अश्वा॑स एषाम् । सुसं॑स्कृता अ॒भीश॑वः ॥१२॥

स्थि॒राः । वः॒ । स॒न्तु॒ । ने॒मयः॑ । रथाः॑ । अश्वा॑सः । ए॒षा॒म् । सुऽसं॑स्कृताः । अ॒भीश॑वः ॥१२॥

हे मरुतः [V]एषां [V]वः युष्माकं [V]नेमयः रथचक्रवलयाः [V]स्थिराः [V]सन्तु । तथा [V]रथा [V]अश्वासः अश्वाश्च स्थिराः सन्तु । [V]अभीशवः अङ्कुलयः, ' अभीशवः दीधितयः ' ( नि. २. ५. २० ) इति तन्नामसु पाठात् । [V]सुसंस्कृताः अश्वबन्धनरज्जुपरिग्रहणे[1] स्वलंकृताः सावधानाः सन्तु ॥ सुसंस्कृताः । संपूर्वात् करोतेः कर्मणि क्तः । ' संपर्युपेभ्यः° ' ( पा. सू. ६. १. १३७ ) इति सुट् । पुनः सुशब्देन प्रादिसमासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । अभीशवः । अभिपूर्वात् अशोतेः ' कृवापाजि° '

---

१. च-छ-ण-त-न-फ-य-ल-श-स–°परिग्रहेण ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इत्यादिना उण्। वर्णव्यत्ययेन आकारस्य इकारः। उक्तं च–' वर्णागमो वर्णविपर्ययश्च ' ( का. ६. ३. १०९ ) इति। ' अभीशवोऽभ्यश्नुवते कर्माणि ' ( निरु. ३. ९ ) इति निरुक्तम् ॥

**अच्छा वदा तना गिरा जरायै ब्रह्मणस्पतिम्। अग्निं मित्रं न दर्शतम् ॥१३॥**

अच्छ। वद। तना। गिरा। जरायै। ब्रह्मणः। पतिम्। अग्निम्। मित्रम्। न। दर्शतम् ॥१३॥

हे ऋत्विक्समूह Vतना तनया देवतास्वरूपं प्रकाशयन्त्या Vगिरा वाचा Vब्रह्मणस्पतिं मन्त्रस्य हविर्लक्षणस्यान्नस्य वा पालकं मरुद्गणम् Vअग्निं Vदर्शतं दर्शनीयं Vमित्रं Vन मित्रमपि Vजरायै स्तोतुम् Vअच्छ आभिमुख्येन Vवद ब्रूहि ॥ अच्छ। ' निपातस्य च ' इति संहितायां दीर्घत्वम्[1]। वद। ' व्यचोऽतस्तिङः ' इति संहितायां दीर्घः। तना। ' तनु विस्तारे '। तनोति देवतामाहात्म्यं विस्तारयतीति तना। पचाद्यच्। वृषादित्वादाद्युदात्तत्वम्। तृतीयाया डादेशः। गिरा। ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम्। ब्रह्मणः। ' षष्ठ्याः पतिपुत्र° ' इति संहितायां सत्वम् ॥

**मिमीहि श्लोकमास्ये पर्जन्यइव ततनः। गायं गायत्रमुक्थ्यम् ॥ १४ ॥**

मिमीहि। श्लोकम्। आस्ये। पर्जन्यःऽइव। ततनः। गायं। गायत्रम्। उक्थ्यम् ॥ १४ ॥

हे ऋत्विक्समूह Vआस्ये स्वकीयमुखे Vश्लोकं स्तोत्रं Vमिमीहि निर्मितं कुरु। तं च श्लोकं Vततनः विस्तारय। तत्र दृष्टान्तः। Vपर्जन्यइव। यथा मेघो वृष्टिं विस्तारयति तद्वत्। Vउक्थ्यं शस्त्रयोग्यं Vगायत्रं गायत्रीच्छन्दस्कं सूक्तं Vगाय पठ॥ मिमीहि। ' माङ् माने '। जौहोत्यादिकः। व्यत्ययेन परस्मैपदम्। ' भृञामित् ' इति अभ्यासस्य इत्वम्। आस्ये। ' असु क्षेपणे '। अस्यते क्षिप्यतेऽस्मिन्निति आस्यम्। ' कृत्यल्युटो बहुलम् ' ( पा. सू. ३. ३. ११३ ) इत्यधिकरणे ण्यत्। ' तित्स्वरितम् ' इति स्वरितत्वम्। ततनः। ' तनु विस्तारे '। लेटि सिपि ' बहुलं छन्दसि ' इति विकरणस्य श्लुः। ' लेटोऽडाटौ ' इति अडागमः। ' इतश्च लोपः° ' इति इकारलोपः। गायत्रम्। गायत्र्याः संबन्धि। ' तस्येदम् ' इति अण्। यद्वा। गायतस्त्रायते इति गायत्रम्। ' आतोऽनुपसर्गे कः ' ॥

**वन्दस्व मारुतं गणं त्वेषं पनस्युमर्किणम्। अस्मे वृद्धा असन्निह ॥ १५ ॥**

वन्दस्व। मारुतम्। गणम्। त्वेषम्। पनस्युम्। अर्किणम्। अस्मे इति। वृद्धाः। असन्। इह ॥१५॥

हे ऋत्विक्संघ Vमारुतं मरुत्संबन्धिनं Vगणं समूहं Vवन्दस्व नमस्कुरु स्तुहि वा। कीदृशं गणम्। Vत्वेषं दीप्तं Vपनस्युं स्तुतियोग्यम् Vअर्किणम् अर्चनोपेतम्। Vअस्मे अस्माकम् Vइह अस्मिन् कर्मणि Vवृद्धा Vअसन् मरुतः प्रवृद्धा भवन्तु ॥ वन्दस्व। ' वदि अभिवादनस्तुत्योः '। अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरः। पनस्युम्। ' पन[2] च[2] ' इति स्तुत्यर्थो धातुः। असुन्। पनः स्तोत्रमात्मन इच्छतीति पनस्युः। ' सुप आत्मनः क्यच् '। ' क्याच्छन्दसि ' इति उप्रत्ययः। अर्किणम्। ' ऋच स्तुतौ '।

---

१. ढ–दीर्घः । २. ढ–पनतिः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'पुंसि संज्ञायाम्०' इति घः। अर्कोऽस्यास्तीति अर्की। 'अत इनिठनौ'। असन्। 'बहुलं छन्दसि' इति शपो लुगभावः। 'इतश्च लोपः०' इति इकारलोपः। 'तिङ्ङतिङः' इति निघातः॥ ॥१७॥

'प्र यदित्था' इति दशर्चं चतुर्थं सूक्तम्। घोरपुत्रस्य कण्वस्यार्षं मरुद्देवताकम्। युजः ससो-बृहत्यः। अयुजो बृहत्यः। 'प्र यद्दश प्रागाथं तु' इत्यनुक्रमणिका। गतो विनियोगः॥

प्र यदित्था परावतः शोचिर्न मानमस्यथ।
कस्य क्रत्वा मरुतः कस्य वर्पसा कं याथ कं ह धूतयः॥ १॥

प्र। यत्। इत्था। पराऽवतः। शोचिः। न। मानम्। अस्यथ।
कस्य। क्रत्वा। मरुतः। कस्य। वर्पसा। कम्। याथ। कम्। ह। धूतयः॥ १॥

हे Vधूतयः स्थावरादीनां कम्पनकारिणः Vमरुतः Vयत् यदा Vमानं मननीयं युष्मद्बलं Vपरावतः दूरात्। 'आरे परावतः' (नि. ३. २६. ५) इति दूरनामसु पाठात्। Vइत्था अस्मादन्त-रिक्षात् Vप्र Vअस्यथ भूमौ प्रक्षिपथ। तत्र दृष्टान्तः। Vशोचिर्न तेज इव। यथा सूर्यस्य तेजोऽन्तरिक्षात् भूमौ प्रक्षिप्यते तद्वत्। तदानीं यूयं Vकस्य यजमानस्य Vक्रत्वा क्रतुना संगच्छध्वे इति शेषः। तथा Vकस्य यजमानस्य Vवर्पसा स्तोत्रेण संगच्छध्वे। Vकं यजमानमुद्दिश्य Vयाथ देवयजनदेशे गच्छथ। Vकं Vह कं खलु यजमानमनुगृह्णीथेति शेषः॥ इत्था। 'था हेतौ च च्छन्दसि' (पा. सू. ५. ३. २६) इति इदंशब्दात् प्रकारवचने थाप्रत्ययः। यदि तत्र इदंशब्दस्य नानुवृत्तिः तर्हि थमुप्रत्ययान्तात् इदं-शब्दादुत्तरस्या विभक्तेर्व्यत्ययेन 'सुपां सुलुक्०' इति डादेशः। प्रथमपक्षे प्रत्ययस्वरः। द्वितीयपक्षे तु उदात्तनिवृत्तिस्वरः। अस्यथ। 'असु क्षेपणे'। अदुपदेशात् लसार्वधातुकानुदात्तत्वे श्यनो नित्त्वा-दाद्युदात्तत्वम्। यद्वृत्तयोगादनिघातः। क्रत्वा। 'जसादिषु च्छन्दसि वावचनम्' (पा. सू. ७. ३. १०९. १) इति नाभावस्य विकल्पितत्वादभावः। वर्पसा। 'वृङ् संभक्तौ'। 'वृङ्-शीङ्भ्यां रूपस्वाङ्गयोः पुक्च' (उ. सू. ४. ६४०) इति असुन्; तत्संनियोगेन पुगागमश्च। नित्त्वादाद्युदात्तत्वम्। अत्र रूपाभिधायिना वर्पस्शब्देन देवतास्वरूपप्रकाशकं स्तोत्रं लक्ष्यते क्रतुना साहचर्यात्॥

स्थिरा वः सन्त्वायुधा पराणुदे वीळू उत प्रतिष्कभे।
युष्माकमस्तु तविषी पनीयसी मा मर्त्यस्य मायिनः॥ २॥

स्थिरा। वः। सन्तु। आयुधा। पराऽनुदे। वीळु। उत। प्रतिऽस्कभे।
युष्माकम्। अस्तु। तविषी। पनीयसी। मा। मर्त्यस्य। मायिनः॥ २॥

हे मरुतः Vवः Vआयुधा युष्माकमायुधानि Vपराणुदे शत्रूणामपनोदनाय Vस्थिरा Vसन्तु स्थिराणि भवन्तु। Vउत अपि च Vप्रतिष्कभे शत्रूणां प्रतिबन्धाय Vवीळु सन्तु दृढानि सन्तु। Vयुष्माकं Vतविषी बलं Vपनीयसी अतिशयेन स्तोतव्यं भवतु। Vमायिनः अस्मासु छद्मचारिणः Vमर्त्यस्य मनुष्यस्य शत्रोः



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]मा बलं मा भवतु ॥ स्थिरा आयुधा । उभयत्र ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । पराणुदे । ' णुद प्रेरणे ' । संपदादिलक्षणः क्विप् । ' उपसर्गादसमासेऽपि° ' ( पा. सू. ८. ४. १४ ) इति णत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् । वीळु । ' सुपां सुलुक्° ' इति विभक्तेर्लुक् । ईषाअक्षादिस्वात्प्रकृतिभावः (पा. सू. ६. १. १२७. २ ) । प्रतिष्कभे । स्कम्भुः सौत्रो धातुः । संपदादिलक्षणो भावे क्विप् । ' अनिदिताम्° ' इति नलोपः । पनीयसी । पनतिः स्तुत्यर्थः । अस्मात् औणादिकः कर्मणि असुन् । तत ईयसुनि ' टेः ' इति टिलोपः । ' उगितश्च ' इति ङीप् । ईयसुनो नित्त्वादाद्युदात्तत्वम् । मायिनः । मायाशब्दस्य व्रीह्यादिषु पाठात् ' व्रीह्यादिभ्यश्च ' इति मत्वर्थीय इनिः ॥

परा॑ ह॒ यत्स्थि॒रं ह॒थ नरो॑ व॒र्तय॑था गु॒रु ।
वि या॑थन व॒निनः॑ पृथि॒व्या व्याशा॒ः पर्व॑तानाम् ॥ ३ ॥

परा॑ । ह॒ । यत् । स्थि॒रम् । ह॒थ । नरः॑ । व॒र्तय॑थ । गु॒रु ।
वि । या॒थ॒न॒ । व॒निनः॑ । पृ॒थि॒व्याः । वि । आशा॑ः । पर्व॑तानाम् ॥ ३ ॥

हे [v]नरः नेतारो मरुतः [v]यत् यदा [v]स्थिरं वस्तु [v]परा [v]हथ वृक्षादिकं पराहतं भग्नं कुरुथ । [v]गुरु पाषाणादिकं गुरुत्वोपेतं [v]वर्तयथ प्रेरयथ । तदानीं [v]पृथिव्याः संबन्धिनः [v]वनिनः वनवतो वृक्षान् [v]वि [v]याथन वियुज्य मध्ये गच्छथ । अरण्यगतानां निबिडानां वृक्षाणां मध्ये यस्य कस्यापि वृक्षस्य भग्नत्वादितरवृक्षाणां परस्परवियोगेन प्रौढो मार्गो भवति । तथा [v]पर्वतानाम् [v]आशाः पर्वतपार्श्वदिशः [v]वि याथन वियुज्य गच्छथ ॥ हथ । ' हन हिंसागत्योः ' । ' अनुदात्तोपदेश°' इत्यादिना अनुनासिकलोपः । यद्वृत्तयोगादनिघातः । नरः । पादादित्वात् आमन्त्रितनिघाताभावः । वर्तयथ । अदुपदेशात् लसार्वधातुकानुदात्तत्वे णिचः स्वर एव शिष्यते । यच्छब्दानुषङ्गात् निघाताभावः । याथन । ' तप्तनप्तनथनाश्च ' इति थनादेशः ॥

न॒हि व॒ः शत्रु॑र्विविदे अधि॒ द्यवि॒ न भूम्यां॑ रिशादसः ।
यु॒ष्माक॑मस्तु॒ तवि॑षी॒ तना॑ यु॒जा रु॒द्रासो॒ नू चि॑दाधृषे ॥ ४ ॥

न॒हि । व॒ः । शत्रु॑ः । वि॒वि॒दे । अधि॑ । द्यवि॑ । न । भूम्या॑म् । रि॒शा॒द॒सः॒ ।
यु॒ष्माक॑म् । अ॒स्तु॒ । तवि॑षी । तना॑ । यु॒जा । रु॒द्रासः॑ । नु । चि॒त् । आ॒ऽधृ॒षे॒ ॥ ४ ॥

हे [v]रिशादसः शत्रुहिंसका मरुतः [v]अधि [v]द्यवि द्युलोकस्योपरि [v]वः युष्माकं [v]शत्रुः [v]नहि [v]विविदे न च बभूव । तथा [v]भूम्याम् अपि शत्रुः [v]न बभूव । हे [v]रुद्रासः रुद्रपुत्रा मरुतः [v]युष्माकम् एकोनपञ्चाशत्संख्यानां भवतां [v]युजा योगेन परस्परैकमत्येन [v]आधृषे वैरिणां सर्वतो धर्षणाय [v]तविषी बलं [v]नू [v]चित् क्षिप्रमेव [v]तना [v]अस्तु विस्तृता भवतु ॥ विविदे । ' विद सत्तायाम् ' । लिटि प्रत्ययस्वरः । द्यवि नहि विविदे भूम्यां च न विविदे इति चशब्दार्थप्रतीतेः ' चादिलोपे विभाषा ' इति प्रथमायाः तिङ्विभक्तेर्निघातप्रतिषेधः । प्राथम्यं च अनुषक्तक्रियापेक्षया । रिशादसः । ' रिश हिंसायाम् ' । रिशन्ति हिंसन्तीति रिशाः । इगुपधलक्षणः कः । तान् अदन्तीति रिशादसः । असुन् आमन्त्रित-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

निघातः । युजा । ' युजिर् योगे ' । ' ऋत्विक्° ' इत्यादिना क्विन् । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । रुद्रासः । रुद्रशब्देन तत्संबन्धिनो मरुतो लक्ष्यन्ते । ' आज्जसेरसुक् ' । नू चित् । ' ऋचि तुनुघ° ' इत्यादिना दीर्घः । आधृषे । ' जिधृषा प्रागल्भ्ये ' । संपदादिलक्षणो भावे क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

प्र वेपयन्ति पर्वतान्वि विञ्चन्ति वनस्पतीन् ।
प्रो आरत मरुतो दुर्मदाइव देवासः सर्वया विशा ॥ ५ ॥

प्र । वेपयन्ति । पर्वतान् । वि । विञ्चन्ति । वनस्पतीन् ।
प्रो इति । आरत । मरुतः । दुर्मदाःऽइव । देवासः । सर्वया । विशा ॥ ५ ॥

[v]पर्वतान् मेरुहिमवदादीन् [v]प्र [v]वेपयन्ति मरुतः प्रकर्षेण कम्पयन्ति । [v]वनस्पतीन् वटाश्वत्थादीन्[1] [v]वि [v]विञ्चन्ति परस्परवियुक्तान् कुर्वन्ति । हे [v]मरुतः [v]देवासः देवाः [v]सर्वया [v]विशा प्रजया सहिता यूयं [v]प्रो [v]आरत प्रकर्षेणैव सर्वतो गच्छथ । तत्र दृष्टान्तः । [v]दुर्मदाइव । यथा मदोन्मत्ताः स्वेच्छया सर्वतः क्रीडन्ति तद्वत् ॥ वेपयन्ति । ' टुवेपृ कम्पने ' । वेपमानान् प्रयुञ्जते । हेतुमण्णिच् । विञ्चन्ति । ' विचिर् पृथग्भावे ' । रुधादित्वात् श्नम् । ' श्नसोरल्लोपः ' इति अकारलोपः । वनस्पतीन् । वनानां पतयो वनस्पतयः । पारस्करादित्वात् सुट् । वनपतिशब्दावाद्युदात्तौ । ' उभे वनस्पत्यादिषु युगपत् ' इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् । आरत । ' ऋ गतौ ' । लङि मध्यमबहुवचने ' बहुलं छन्दसि ' इति शपो लुगभावः । यद्वा लुङ् । ' सर्तिशास्त्यर्तिभ्यश्च ' ( पा. सू. ३. १. ५६ ) इति अङ् । ' आडजादीनाम् ' इति आडागमः । ' आटश्च ' ( पा. सू. ६. १. ९० ) इति वृद्धिः । देवासः । आमन्त्रिताद्युदात्तत्वम् । सर्वया । ' सर्वस्य सुपि ' ( पा. सू. ६. १. १९१ ) इत्याद्युदात्तत्वम् । विशा । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् ॥ ॥ १८ ॥

उपो रथेषु पृषतीरयुग्ध्वं प्रष्टिर्वहति रोहितः ।
आ वो यामाय पृथिवी चिदश्रोदबीभयन्त मानुषाः ॥ ६ ॥

उपो इति । रथेषु । पृषतीः । अयुग्ध्वम् । प्रष्टिः । वहति । रोहितः ।
आ । वः । यामाय । पृथिवी । चित् । अश्रोत् । अबीभयन्त । मानुषाः ॥ ६ ॥

हे मरुतः [v]रथेषु भवदीयेषु [v]पृषतीः बिन्दुयुक्ता मृगीः [v]उपो सामीप्येनैव [v]अयुग्ध्वं योजितवन्तः । [v]प्रष्टिः एतत्संज्ञको वाहनत्रयमध्यवर्ती युगविशेषः[2] [v]रोहितः मृगावान्तरजातिर्लोहितवर्णः [v]वहति रथं नयति । [v]वः युष्माकं [v]यामाय गमनाय [v]पृथिवी [v]चित् अन्तरिक्षमपि [v]आ [v]अश्रोत् आभिमुख्येन अश्रृणोत् अनुजानातीत्यर्थः। पृथिवीत्यन्तरिक्षनाम, 'पृथिवी भूः स्वयंभु' ( नि. १. ३. ९ ) इति तन्नामसु पाठात् । [v]मानुषाः भूलोकवर्तिनः पुरुषाः [v]अबीभयन्त स्वयं भीताः सन्तोऽन्येषामपि भीतिमुत्पा-

---

१. ढ–वृक्षान् । २. ढ–मृगविशेषः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दितवन्तः॥ उपो[1] इति निपातद्वयसमुदायात्मकमन्यन्निपातान्तरम्। ' ओत् ' (पा. सू. १. १. १५) इति प्रगृह्यत्वम्। अयुग्ध्वम्। लुङि ' झलो झलि ' ( पा. सू. ८. २. २६ ) इति सकारस्य लोपः। ' चोः कुः ' इति कुत्वम्। रोहितः। ' रुहेः रश्च लो वा ' ( उ. सू. ३. ३७४ ) इति इतन्प्रत्ययान्तः। नित्त्वादाद्युदात्तः। यामाय। यमेर्भावे घञ्। 'कर्षात्वतः०' इत्यन्तोदात्तत्वे प्राप्ते वृषादिषु पाठादाद्युदात्तत्वम्। अश्रोत्। ' श्रु श्रवणे '। ' बहुलं छन्दसि ' इति विकरणस्य लुक्। अबीभयन्त। ' जिभी भये '। अस्मात् ण्यन्तात् लुङि ' भीस्म्योर्हेतुभये ' ( पा. सू. १. ३. ६८ ) इत्यात्मनेपदम्। ' बिभेतेर्हेतुभये ' ( पा. सू. ६. १. ५६ ) इति आत्वस्य विकल्पितत्वात् पक्षे ' भियो हेतुभये षुक् ' ( पा. सू. ७. ३. ४० ) इति षुक् प्राप्नोति। तन्न क्रियते, आगमानुशासनस्यानित्यत्वात्। णौ चङ्युपधाह्रस्वत्वादि ( पा. सू. ७. ४. १) ॥

**आ वो मक्षू तनाय कं रुद्रा अवो वृणीमहे ।**
**गन्ता नूनं नोऽवसा यथा पुरेत्था कण्वाय बिभ्युषे ॥ ७ ॥**

आ। वः। मक्षु। तनाय। कम्। रुद्राः। अवः। वृणीमहे।

गन्त। नूनम्। नः। अवसा। यथा। पुरा। इत्था। कण्वाय। बिभ्युषे ॥ ७ ॥

हे [V]रुद्राः रुद्रपुत्रा मरुतः [V]तनाय [V]कं अस्मदीयपुत्रार्थं [V]मक्षु शीघ्रं [V]वः युष्मदीयम् [V]अवः रक्षणम् [V]आ [V]वृणीमहे सर्वतः प्रार्थयामहे। मक्षु इति क्षिप्रनाम, 'नु मक्षु' ( नि. २. १५. २ ) इति तन्नामसु पठितत्वात्। [V]पुरा पूर्वस्मिन् काले कर्मान्तरेषु [V]नः [V]अवसा अस्मदीयरक्षणेन निमित्तेन यूयं [V]यथा[2] प्राप्तवन्तः [V]इत्था अनेन प्रकारेण [V]बिभ्युषे भीतियुक्ताय [V]कण्वाय मेधाविने यजमानाय[3] तदनुग्रहार्थं [V]नूनं क्षिप्रं [V]गन्त प्राप्नुत॥ मक्षु। 'ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्' इति दीर्घः। तनाय। तनोतीति तनः। पचाद्यच्। वृषादित्वादाद्युदात्तत्वम्। यद्वा। तनयशब्दे अय् इत्यस्य लोपश्छान्दसः। कम् इत्येतत् पादान्ते प्रयुज्यमानं पादपूरणं ' शिशिरं जीवनाय कम् ' इतिवत्। उक्तं च– ' अथापि पादपूरणाः कमीमिद्धिति ' ( निरु. १. ९ ) इति। रुद्राः। रोदयन्तीति रुद्राः। ' रोदेर्णिलुक्च ' ( उ. सू. २. १७९ ) इति रक्प्रत्ययः। आमन्त्रिताद्युदात्तत्वम्। पादादित्वात् निघाताभावः। गन्त। लोटि ' बहुलं छन्दसि ' इति शपो लुक्। ' तप्तनप्० ' इत्यादिना तबादेशः। अतः पित्त्वात् अनुनासिकलोपाभावः। बिभ्युषे। बिभेतेर्लिटः क्सुः। ' वस्वेकाजाद्धसाम् ' इति नियमात् इडभावः। चतुर्थ्येकवचने ' वसोः संप्रसारणम् ' इति संप्रसारणम्। परपूर्वत्वम्। ' शासिवसिघसीनां च ' इति षत्वम्॥

**युष्मेषितो मरुतो मर्त्येषित आ यो नो अभ्व ईषते ।**
**वि तं युयोत शवसा व्योजसा वि युष्माकाभिरूतिभिः ॥ ८ ॥**

युष्माऽईषितः। मरुतः। मर्त्यऽइषितः। आ। यः। नः। अभ्वः। ईषते।

वि। तम्। युयोत। शवसा। वि। ओजसा। वि। युष्माकाभिः। ऊतिऽभिः ॥८॥

---

१. त-फ-ल-उपो उप उ। २. च-छ-ढ-त-ध-न-फ-श-स-' यथा ' नास्ति। ३. ढ–यजमानाय वा।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [V]मरुतः [V]यः यः कश्चित् [V]अभ्वः शत्रुः [V]युष्मेषितः युष्माभिः प्रेषितः [V]मर्त्येषितः मारकैरन्यैर्वा प्रेषितः सन् [V]नः अस्मान् प्रति [V]आ [V]ईषते आभिमुख्येन प्राप्नोति, [V]तं शत्रुं [V]शवसा अन्नेन [V]वि [V]युयोत विभक्तं कुरुत। तथा [V]ओजसा बलेन [V]वि युयोत। [V]युष्माकाभिरूतिभिः युष्मत्संबन्धिभिः रक्षणैश्च [V]वि युयोत ॥ युष्मेषितः। युष्माभिरिषितः। सुब्लुकि प्रत्ययलक्षणेन 'युष्मदस्मदोरनादेशे' इति आत्वम्। न च 'न लुमताङ्गस्य' इति प्रतिषेधः, 'इकोऽचि विभक्तौ' (पा. सू. ७. १. ७३) इत्यत्र अज्ग्रहणेन तस्य पाक्षिकत्वोक्तेः। 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम्। मर्त्येषितः। पूर्ववत्। अभ्वः। आभवतीत्यभ्वः शत्रुः। पृषोदरादित्वादभिमतरूपस्वरसिद्धिः। ईषते। 'ईष गतिहिंसादर्शनेषु'। अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरः। युयोत। 'यु मिश्रणामिश्रणयोः'। लोण्मध्यमबहुवचने 'बहुलं छन्दसि' इति शपः श्लुः। 'तप्तनप्तनथनाश्च' इति तबादेशः। पित्त्वादुणः। युष्माकाभिः युष्मत्संबन्धिनीभिः। 'तस्मिन्नणि च युष्माकास्माकौ' (पा. सू. ४. ३. २) इति युष्मच्छब्दस्य युष्माकादेशः। ङीब्वृद्धी छान्दसत्वान्न क्रियेते। ऊतिभिः। अवतेः क्तिनि 'ज्वरत्वर०' इत्यादिना ऊठ्। 'ऊतियूति०' इत्यादिना क्तिन उदात्तत्वम् ॥

असामि हि प्रयज्यवः कण्वं ददप्रचेतसः।
असामिभिर्मरुत आ न ऊतिभिर्गन्ता वृष्टिं न विद्युतः ॥ ९ ॥

असामि। हि। प्रऽयज्यवः। कण्वम्। दद। प्रऽचेतसः।
असामिऽभिः। मरुतः। आ। नः। ऊतिऽभिः। गन्त। वृष्टिम्। न। विऽद्युतः ॥ ९ ॥

[V]असामि [V]हि संपूर्णमेव यथा भवति तथा [V]प्रयज्यवः प्रकर्षेण यष्टव्याः [V]प्रचेतसः प्रकृष्टज्ञानयुक्ता हे [V]मरुतः [V]कण्वं मेधाविनं यजमानमेतन्नामकमृषिं वा [V]दद धारयत। हि यस्मात् यूयं कण्वनामकमृषिं धारितवन्तस्तस्मात् कारणात् [V]असामिभिः [V]ऊतिभिः संपूर्णैः रक्षणैः [V]नः अस्मान् प्रति [V]आ [V]गन्त आगच्छत। तत्र दृष्टान्तः। [V]वृष्टिं [V]न [V]विद्युतः। यथा विद्युतो वृष्टिं गच्छन्ति तद्वत् ॥ असामि। सामि अर्धं न सामि असामि। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। प्रयज्यवः। प्रकर्षेण यष्टव्याः। 'यजिमनिशुन्धिदसिजनिभ्यो युः' (उ. सू. ३. ३००) इति कर्मणि युप्रत्ययः। आमन्त्रितनिघातः। दद। 'डुदाञ् दाने'। लोण्मध्यमबहुवचनस्य 'तिङां तिङो भवन्ति' (पा. म. ७. १. ३९) इति लङात्मनेपदप्रथमपुरुषबहुवचनादेशः। श्लौ द्विर्भावे सति 'श्नाभ्यस्तयोरातः' इति आकारलोपः। 'लोपस्त आत्मनेपदेषु' (पा. सू. ७. १. ४१) इति तलोपः। 'अतो गुणः' इति परपूर्वत्वम्। 'छन्दस्युभयथा' इति आर्धधातुकत्वात् 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वं न भवति, किंतु प्रत्ययस्वर एव। 'हि च' इति निघातप्रतिषेधः। प्रचेतसः। प्रकृष्टं चेतो येषाम्। आमन्त्रितनिघातः। गन्त। गमेर्लोण्मध्यमबहुवचनस्य तस्य तबादेशः। 'बहुलं छन्दसि' इति शपो लुक्। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः। पादादित्वात् निघाताभावः। 'व्यचोऽतस्तिङः' इति संहितायां दीर्घत्वम्। विद्युतः। विद्योतते इति विद्युत्। 'भ्राजभास०' (पा. सू. ३. २. १७७) इत्यादिना क्विप् ॥

CC0. Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

असाम्योजो बिभृथा सुदानवोऽसामि धूतयः शवः ।
ऋषिद्विषे मरुतः परिमन्यव इषुं न सृजत द्विषम् ॥ १० ॥

असामि । ओजः । बिभृथ । सुऽदानवः । असामि । धूतयः । शवः ।
ऋषिऽद्विषे । मरुतः । परिऽमन्यवे । इषुम् । न । सृजत । द्विषम् ॥ १० ॥

हे vसुदानवः शोभनदानोपेताः vमरुतः vअसामि संपूर्णम् vओजः बलं vबिभृथ धारयथ। हे vधूतयः कम्पनकारिणो मरुतः vअसामि संपूर्णं vशवः बलं vपरिमन्यवे कोपपरिवृताय vऋषिद्विषे ऋषीणां द्वेषं कुर्वते शत्रवे तद्विनाशार्थं vद्विषं द्वेषकारिणं हन्तारं vसृजत। तत्र दृष्टान्तः। vइषुं vन। यथा शत्रोरुपरि बाणं मुञ्चन्ति तद्वत्। अत्र निरुक्तम्–'असामि सामि प्रतिषिद्धं सामि स्यतेः। असाम्योजो बिभृथा सुदानवः। असुसमाप्तं बलं बिभृथ कल्याणदानाः' (निरु. ६. २३) इति ॥ बिभृथ। 'डुभृञ् धारणपोषणयोः'। जुहोत्यादित्वात् श्लुः। 'भृञामित्' इति अभ्यासस्य इत्वम्। ऋषिद्विषे। ऋषीन् द्वेष्टीति ऋषिद्विट्। 'सत्सूद्विष°' इत्यादिना क्विप्। परिमन्यवे। मन्युना परिवृतः परिमन्युः। प्रादिसमासे 'परेरभितोभावि मण्डलम्' (पा. सू. ६. २. १८२) इत्युत्तरपदान्तोदात्तत्वम्। इषुम्। 'इषु गतौ'। इष्यति गच्छतीति इषुः। 'इषेः किच्च' (उ. सू. १. १३) इति उप्रत्ययः। 'धान्ये नित्' इत्यनुवृत्तेः नित्त्वादाद्युदात्तत्वम्। सृजत। 'सृज विसर्गे'। विकरणस्य ङित्त्वात् गुणाभावः। द्विषम्। 'क्विप् च' इति क्विप् ॥ ॥ १९ ॥

'उत्तिष्ठ' इत्यष्टर्चं पञ्चमं सूक्तं कण्वस्य आर्षं बार्हतम्। युजः सतोबृहत्यः। अयुजो बृहत्यः। ब्रह्मणस्पतिदेवताकम्। अनुक्रम्यते च–'उत्तिष्ठाष्टौ ब्राह्मणस्पत्यम्' इति। सूक्तविनियोगो लैङ्गिकः। चतुर्विंशेऽहनि मरुत्वतीये प्राकृतात् ब्राह्मणस्पत्यात् प्रगाथात् पूर्वम् 'उत्तिष्ठ ब्रह्मणस्पते' इत्ययं प्रगाथः। 'मरुत्वतीये' इति खण्डे सूत्रितं–'प्रैतु ब्रह्मणस्पतिरुत्तिष्ठ ब्रह्मणस्पत इति ब्राह्मणस्पत्यावावपते पूर्वौ निस्यात्' (आश्व. श्रौ. ७. ३) इति। आद्या तु प्रवर्ग्येऽप्यभिष्टवे विनियुक्ता। 'उत्तिष्ठ ब्रह्मणस्पत इत्येतामुक्त्वावतिष्ठते' (आश्व. श्रौ. ४. ७) इति सूत्रितत्वात् ॥

उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ।
उप प्र यन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा ॥ १ ॥

उत् । तिष्ठ । ब्रह्मणः । पते । देवऽयन्तः । त्वा । ईमहे ।
उप । प्र । यन्तु । मरुतः । सुऽदानवः । इन्द्र । प्राशूः । भव । सचा ॥ १ ॥

हे vब्रह्मणस्पते एतन्नामक देव vउत्तिष्ठ अस्मदनुग्रहाय त्वदीयनिवासादुत्थानं कुरु। vदवयन्तः देवान् कामयमाना वयं vत्वा त्वाम् vईमहे याचामहे। vसुदानवः शोभनदानयुक्ताः vमरुतः vउप vप्र vयन्तु समीपे प्रकर्षेण गच्छन्तु। हे vइन्द्र त्वं vसचा ब्रह्मणस्पतिना सह vप्राशूः सोमस्य प्राशको vभव। यद्वा वृत्रस्य हिंसको भव ॥ उत्तिष्ठ। ऊर्ध्वकर्मत्वात् आत्मनेपदाभावः (पा. सू. १. ३. २४)। ब्रह्मणस्पते। 'सुबामन्त्रिते°' इति पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य आष्टमिकं सर्वानुदात्तत्वम्। देवयन्तः। देवानात्मन इच्छन्तः। 'सुप आत्मनः क्यच्'। 'न च्छन्दस्यपुत्रस्य' इति ईत्वस्येव दीर्घ-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्यापि निषेधः, 'अश्वावस्यात्' इति पुनरात्वविधानसामर्थ्यात्। ईमहे इत्यादयो गताः। प्राशूः। 'शॄ हिंसायाम्'। प्रकर्षेण आ समन्तात् शृणाति हिनस्तीति प्राशूः। 'बहुलं छन्दसि' (पा. सू. ७. १. १०३) इति उत्वम्। 'वोरुपधाया दीर्घः०'। कृदुत्तरपदप्रकृतिस्वरत्वम्। भव। 'ब्रुचोऽतस्तिङः' इति संहितायां दीर्घत्वम्॥

त्वामिद्धि सहसस्पुत्र मर्त्य उपब्रूते धने हिते।
सुवीर्यं मरुत आ स्वश्व्यं दधीत यो व आचके॥ २॥

त्वाम्। इत्। हि। सहसः। पुत्र। मर्त्यः। उपऽब्रूते। धने। हिते।
सुऽवीर्यम्। मरुतः। आ। सुऽअश्व्यम्। दधीत। यः। वः। आऽचके॥ २॥

हे Vसहसस्पुत्र बलस्य बहुपालक ब्रह्मणस्पते। 'पुत्रः पुरु त्रायते निपरणाद्वा' (निरु. २.११) इति निरुक्तम्। Vमर्त्यः मनुष्यः Vहिते शत्रुषु प्रक्षिप्ते Vधने निमित्तभूते सति Vत्वामित् त्वामेव Vउपब्रूते Vहि समीपं प्राप्य स्तौति खलु। तद्धनसंपादनाय प्रार्थयते इत्यर्थः। हे Vमरुतः Vयः धनार्थी मर्त्यः Vवः युष्मान् ब्रह्मणस्पतिसहितान् Vआचके स्तौति स मर्त्यः Vस्वश्व्यं शोभनाश्वयुक्तं Vसुवीर्यं शोभनवीर्ययुक्तं च धनं Vदधीत धारयेत्॥ सहसस्पुत्र। ब्रह्मणस्पते इतिवत् 'षष्ठ्याः पतिपुत्र०' इति विसर्जनीयस्य सत्वम्। उपब्रूते। 'हि च' इति निघातप्रतिषेधः। 'तिङि चोदात्तवति' इति गतेरनुदात्तत्वम्। हिते। निष्ठायां 'दधातेर्हिः' इति हिरादेशः। सुवीर्यम्। शोभनं वीर्यं यस्येति बहुव्रीहौ 'वीरवीर्यौ च' इत्युत्तरपदाद्युदात्तत्वम्। स्वश्व्यम्। अश्वानां समूहोऽश्वीयम्। 'केशाश्वाभ्यां यञ्छावन्यतरस्याम्' (पा. सू. ४.२.४८) इति समूहार्थे छप्रत्ययः। छस्य ईयादेशः। शोभनमश्वीयं यस्य तत् स्वश्व्यम्। ईकारलोपश्छान्दसः। 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वम्। दधीत। सीयुटः सकारलोपे सति 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम्। पादादित्वात् निघाताभावः। आचके। 'कै गै शब्दे'। 'आदेचः०' इति आत्वम्। लिटि द्विर्वचने अभ्यासस्य ह्रस्वचुत्वे। 'आतो लोप इटि च' इति आकारलोपः। प्रत्ययस्वरः। यद्वृत्तयोगादनिघातः॥

चतुर्विंशेऽहनि मरुत्वतीये 'उत्तिष्ठ ब्रह्मणस्पते' इत्यस्मात्प्रगाथात्पूर्वं 'प्रैतु ब्रह्मणस्पतिः' इत्ययं प्रगाथो विनियुक्तः। सूत्रं तु 'उत्तिष्ठ ब्रह्मणस्पते' इत्यत्रैवोदाहृतम्। महावीरमादाय शालां प्रतिगच्छत्सु 'प्रैतु ब्रह्मणस्पतिः' इत्येतां पठन् होतानुगच्छेत्। सूत्रं च–'प्रैतु ब्रह्मणस्पतिरित्यनुव्रजेत्' (आश्व. श्रौ ४. ७) इति। एषैव अग्निषोमीयप्रणयनेऽपि विनियुक्ता। सूत्रितं च–'प्रैतु ब्रह्मणस्पतिर्होता देवो अमर्त्यः' (आश्व. श्रौ. ४. १०) इति॥

प्रैतु ब्रह्मणस्पतिः प्र देव्येतु सूनृता।
अच्छा वीरं नर्यं पङ्क्तिराधसं देवा यज्ञं नयन्तु नः॥ ३॥

प्र। एतु। ब्रह्मणः। पतिः। प्र। देवी। एतु। सूनृता।
अच्छ। वीरम्। नर्यम्। पङ्क्तिऽराधसम्। देवाः। यज्ञम्। नयन्तु। नः॥ ३॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vब्रह्मणस्पतिः देवः Vप्रैतु अस्मान् प्राप्नोतु । Vसूनृता Vदेवी प्रियसत्यरूपा वाग्देवता Vप्र Vएतु अस्मान् प्राप्नोतु । Vदेवाः ब्रह्मणस्पत्यादयो देवताः Vवीरं शत्रुं निःशेषेण दूरे प्रेरयन्तु । तं Vनर्यं मनुष्येभ्यो हितं Vपङ्क्तिराधसं ब्राह्मणोक्तहविष्पङ्क्त्यादिभिः समृद्धं Vयज्ञं प्रति Vनः अस्मान् Vअच्छ आभिमुख्येन Vनयन्तु ॥ प्रैतु । ' एङि पररूपम् ' ( पा. सू. ६. १. ९४ ) इति पररूपे प्राप्ते ' एत्येधत्यूठ्सु ' ( पा. सू. ६. १. ८९ ) इति वृद्धिः । देव्येतु इत्यत्र ' उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ' इति स्वरितत्वम् । नर्यम् । नरेभ्यो हितम् । प्राक्क्रीतीय उगवादिलक्षणो यत्प्रत्ययो द्रष्टव्यः ( पा. सू. ५. १. २ ) । पङ्क्तिराधसम् । पङ्क्तिभी राध्नोतीति[1] पङ्क्तिराधाः । ' गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च ' इत्यसुन् पूर्वपदप्रकृतिस्वरत्वं च । यज्ञम् । ' यजयाच° ' इत्यादिना यजतेर्नङ् ॥

यो वाघते ददाति सूनरं वसु स धत्ते अक्षिति श्रवः ।
तस्मा इळां सुवीरामा यजामहे सुप्रतूर्तिमनेहसम् ॥ ४ ॥

यः । वाघते । ददाति । सूनरम् । वसु । सः । धत्ते । अक्षिति । श्रवः ।
तस्मै । इळाम् । सुऽवीराम् । आ । यजामहे । सुऽप्रतूर्तिम् । अनेहसम् ॥ ४ ॥

Vयः यजमानः Vवाघते ऋत्विजे Vसूनरं सुष्ठु नेतव्यं Vवसु धनं Vददाति Vसः यजमानो ब्रह्मणस्पतेः प्रसादात् Vअक्षिति क्षयरहितं Vश्रवः अन्नं Vधत्ते धारयति । Vतस्मै तादृशयजमानाय Vइळाम् एतन्नामधेयां मनोः पुत्रीं ' इळा वै मानवी यज्ञानूकाशिन्यासीत् ' ( तै. ब्रा. १.१.४.४ ) इति श्रुत्यन्तरात् । Vआ Vयजामहे वयं ऋत्विजः सर्वतो यजामः । कीदृशीमिळाम् । Vसुवीरां शोभनैर्वीरैर्भटैर्युक्तां Vसुप्रतूर्तिं सुष्ठु प्रकर्षेण हिंसाकारिणीम् Vअनेहसं केनाप्यहिंस्याम् ॥ ददाति । ' अनुदात्ते च ' ( पा. सू. ६. १. १९० ) इति अभ्यस्तस्याद्युदात्तत्वम् । यद्वृत्तयोगादनिघातः । सूनरम् । सुखेन नीयते इति सूनरम् । ' ईषद्दुःसुषु° ' इति खल् । ' निपातस्य च ' इति उपसर्गस्य दीर्घत्वम् । अक्षिति । क्षयो नास्त्यस्येति अक्षिति । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । ' नञ्सुभ्याम् ' इति तु ' सर्वे विधयश्छन्दसि विकल्प्यन्ते ' इति वचनात् न प्रवर्तते । श्रवः । श्रूयते इति श्रवः । ' श्रु श्रवणे ' । असुनो नित्त्वादाद्युदात्तत्वम् । सुवीराम् । शोभना वीरा यस्याः सा सुवीरा ताम् । ' वीरवीर्यौ च ' इत्युत्तरपदाद्युदात्तत्वम् । सुप्रतूर्तिम् । तुर्वी हिंसार्थः । प्रपूर्वादस्मात् भावे क्तिन् । शोभना प्रतूर्तिः शत्रूणां हिंसनं यस्याः सा ताम् । ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम् । ऋत्वादिर्वा द्रष्टव्यः । अनेहसम् । न हन्यते इति अनेहाः । ' नञि हन एह च ' ( उ. सू. ४. ६६३ ) इत्यसुन्प्रत्ययो धातोः एहादेशश्च । ' नलोपो नञः ' ( पा. सू. ६. ३. ७३ ) इति नकारस्य लोपः । ' तस्मान्नुडचि ' ( पा. सू. ६. ३. ७४ ) इति नुट् ॥

अग्निष्टोमे मरुत्वतीयशस्त्रे इन्द्रनिवहप्रगाथानन्तरं[2] ' प्र नूनम् ' इति प्रगाथः । ' मरुत्वतीयेन ' इति खण्डे सूत्रितं—' प्र नूनं ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यः ' ( आश्व. श्रौ. ५. १४ ) इति ॥

---

१. ध-न-फ–राध्नोति । २. ढ-इन्द्रनिहवप्रगाथानन्तरम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् ।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे ॥ ५ ॥

प्र । नूनम् । ब्रह्मणः । पतिः । मन्त्रम् । वदति । उक्थ्यम् ।
यस्मिन् । इन्द्रः । वरुणः । मित्रः । अर्यमा । देवाः । ओकांसि । चक्रिरे ॥ ५ ॥

[v]ब्रह्मणस्पतिः देवः [v]उक्थ्यं शस्त्रयोग्यं [v]मन्त्रं [v]नूनम् अवश्यं [v]प्र [v]वदति होतृमुखे स्थितः सन् प्रब्रूते । [v]यस्मिन् मन्त्रे इन्द्रादयश्च सर्वे [v]देवाः [v]ओकांसि स्थानानि [v]चक्रिरे । तादृशं सर्वदेवप्रतिपादकं मन्त्रमिति[1] पूर्वत्रान्वयः[1] ॥ मन्त्रम् । ' मत्रि गुप्तभाषणे ' । पचाद्यच् । वृषादिषु पाठादाद्युदात्तत्वम् । उक्थ्यम् उक्थार्हम् । ' छन्दसि च ' इत्यर्हार्थे यप्रत्ययः । यद्वा । ' भवे छन्दसि ' इति यत् । ' सर्वे विधयश्छन्दसि विकल्प्यन्ते ' इति वचनात् ' यतोऽनावः ' इत्याद्युदात्तत्वाभावे ' व्यत्ययेन तित्स्वरितम् ' इति स्वरितत्वम् । ओकांसि । ' उच समवाये ' । समवयन्त्यत्रेति अधिकरणे औणादिकोऽसुन् । बहुलग्रहणात् कुत्वं द्रष्टव्यमिति ' ओक उचः के ' इत्यत्र वृत्तौ इत्युक्तम् ( का. ७. ३. ६४ ) । चक्रिरे । इरेचः चित्त्वादन्तोदात्तत्वम् । यद्वृत्तयोगादनिघातः ॥ ॥ २० ॥

तमिद्वोचेमा विदथेषु शंभुवं मन्त्रं देवा अनेहसम् ।
इमां च वाचं प्रतिहर्यथा नरो विश्वेद्वामा वो अश्नवत् ॥ ६ ॥

तम् । इत् । वोचेम । विदथेषु । शम्ऽभुवम् । मन्त्रम् । देवाः । अनेहसम् ।
इमाम् । च । वाचम् । प्रतिऽहर्यथ । नरः । विश्वा । इत् । वामा । वः । अश्नवत् ॥ ६ ॥

हे [v]देवाः ब्रह्मणस्पतिप्रभृतयः [v]तमित् तमेव इन्द्रादिसर्वदेवताप्रतिपादकं [v]मन्त्रं [v]विदथेषु यज्ञेषु [v]वोचेम वयमृत्विजो ब्रवाम । कीदृशम् । [v]शंभुवं सुखस्य भावयितारम् [v]अनेहसम् अहिंसनीयं दोषरहितम् । हे [v]नरः नेतारो देवाः [v]इमाम् अस्माभिरुच्यमानां मन्त्ररूपां [v]वाचं [v]प्रतिहर्यथ [v]च । यूयं कामयध्वे चेत् तर्हि [v]विश्वेत् सर्वापि [v]वामा वननीया वाक् [v]वः युष्मान् [v]अश्नवत् व्याप्नुयात् ॥ वोचेम । ' वच परिभाषणे ' । आशीर्लिङि ' लिङ्याशिष्यङ् ' इति अङ् । ' वच उम् ' इत्युमागमः । ' छन्दस्युभयथा ' इति सार्वधातुकत्वात् ' लिङः सलोपोऽनन्त्यस्य ' इति यासुटः सकारस्य लोपः । ' अतो येयः ' इति इयादेशः । आद्गुणः । ' तिङ्ङतिङः ' इति निघातः । विदथेषु । ' विद ज्ञाने ' । विद्यते फलसाधनत्वेन ज्ञायते इति विदथो यज्ञः । ' रुविदिभ्यां कित् ' ( उ. सू. ३. ३९५ ) इति अथप्रत्ययः । शंभुवम् । भवतेः अन्तर्भावितण्यर्थात् ' क्विप् च ' इति क्विप् । ' ओः सुपि ' ( पा. सू. ६. ४. ८३ ) इति यणादेशस्य ' न भूसुधियोः ' ( पा. सू. ६. ४. ८५ ) इति प्रतिषेधः । मन्त्रादयो गताः । प्रतिहर्यथ । ' हर्य गतिकान्त्योः ' । शपः पित्त्वादनुदात्तत्वम् । तिङश्च लसार्वधातुकस्वरेण धातुस्वरेणाद्युदात्तत्वम् । इमां च इत्यत्र चशब्दश्चेदर्थः । चणिति निपातान्तरं न च समुच्चयाद्यर्थः । तेन ' निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण् ' ( पा. सू. ८. १. ३० ) इति निघातप्रतिषेधः । अश्नवत् ।

---

१. ढ–मन्त्रं प्रवदति ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' अशू व्याप्तौ ' । लेटि अडागमः । व्यत्ययेन परस्मैपदम् । ' इतश्च लोपः° ' इति इकारलोपः । ' इयङुवङ्भ्यां गुणवृद्धी भवतो विप्रतिषेधेन ' ( का. ६. ४. ७७ ) इति गुणः ॥

को देवयन्तमश्नवज्जनं को वृक्तबर्हिषम् ।
प्रप्र दाश्वान्पस्त्याभिरस्थितान्तर्वावत्क्षयं दधे ॥ ७ ॥

कः । देवऽयन्तम् । अश्नवत् । जनम् । कः । वृक्तऽबर्हिषम् ।
प्रऽप्र । दाश्वान् । पस्त्याभिः । अस्थित । अन्तःऽवावत् । क्षयम् । दधे ॥ ७ ॥

[v]देवयन्तं देवान्, कामयमानं [v]जनं [v]कः [v]अश्नवत् ब्रह्मणस्पतिव्यतिरिक्तः को नाम देवो व्याप्नुयात् । तथा [v]वृक्तबर्हिषम् अनुष्ठानाय छिन्नबर्हिषं यजमानं [v]कः नाम अन्यो देवोऽश्नवत् । [v]दाश्वान् हविर्दत्तवान् यजमानः [v]पस्त्याभिः मनुष्यैर्ऋत्विग्भिः सह [v]प्रप्र [v]अस्थित देवयजनदेशं प्रति प्रस्थितवान् । [v]अन्तर्वावत् अन्तःस्थितबहुधनोपेतम् । यद्वा । अन्तःस्थितपुत्रपौत्रादिप्रयुक्तबहुविधवागुपेतं [v]क्षयं निवासस्थानं गृहं [v]दधे धृतवान् भवति ॥ देवयन्तम् इत्यादयो गताः । प्रप्र । ' प्रसमुपोदः पादपूरणे ' ( पा. सू. ८. १. ६ ) इति प्रशब्दस्य द्विर्भावः । ' अनुदात्तं च ' इत्यामेडितानुदात्तत्वम् । अस्थित । ' ष्ठा गतिनिवृत्तौ ' । लुङि ' समवप्रविभ्यः स्थः ' ( पा. सू. १. ३. २२ ) इत्यात्मनेपदम् । ' स्थाघ्वोरिच्च ' ( पा. सू. १. २. १७ ) इति धातुसिचोः इत् । कित्त्वे ' हस्वादङ्गात् ' ( पा.सू. ८. २. २७ ) इति सलोपः । अन्तर्वावत् । ' वा गतिगन्धनयोः ' । अन्तर्वान्ति गच्छन्तीति अन्तर्वाः पुत्रपश्वादयः । ' आतो मनिन्° ' इत्यादिना विच् । ' तदस्यास्ति ' इति मतुप् । मतुपः पित्त्वादनुदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वम् । यद्वा । वावदीतेः क्विप् । क्षयम् । क्षियन्ति निवसन्त्यस्मिन्निति क्षयः । ' पुंसि संज्ञायाम्° ' इत्यधिकरणे घः । ' क्षयो निवासे ' इत्याद्युदात्तत्वम् ॥

उप क्षत्रं पृञ्चीत हन्ति राजभिर्भये चित्सुक्षितिं दधे ।
नास्य वर्ता न तरुता महाधने नार्भे अस्ति वाज्रिणः ॥ ८ ॥

उप । क्षत्रम् । पृञ्चीत । हन्ति । राजऽभिः । भये । चित् । सुऽक्षितिम् । दधे ।
न । अस्य । वर्ता । न । तरुता । महाऽधने । न । अर्भे । अस्ति । वाज्रिणः ॥ ८ ॥

ब्रह्मणस्पतिर्देवः [v]क्षत्रं बलम् [v]उप [v]पृञ्चीत स्वात्मनि संपृक्तं कुर्यात् । ततः [v]राजभिः वरुणादिभिः सह [v]हन्ति शत्रून् मारयति । [v]भये [v]चित् भीतिहेतौ युद्धेऽपि [v]सुक्षितिं [v]दधे सुष्ठु निवासस्थैर्यं[1] धारयति न तु पलायते । [v]वज्रिणः वज्राद्यायुधवतः [v]अस्य ब्रह्मणस्पतेः [v]महाधने प्रभूतधननिमित्ते युद्धे [v]वर्ता प्रवर्तयिता अन्यः कोऽपि [v]न [v]अस्ति स्वयमेव प्रवर्तते इत्यर्थः । महाधने इति संग्रामनाम, ' महाधने समीके ' ( नि.२. १७. ४१ ) इति तन्नामसु पाठात् । तथा [v]तरुता तरणस्योल्लङ्घनस्य कर्ता अन्यः कोऽपि[v]न अस्ति । तथैव [v]अर्भे स्वल्पे युद्धेऽप्यन्यः प्रवर्तयिता [v]न अस्ति ॥

---

१. ढ–निवासम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पृच्चीत। ' पृची संपर्के '। लिङि रुधादित्वात् श्नम्। ' श्नसोरल्लोपः ' इति अकारलोपः। प्रत्ययस्वरः। क्षत्रं पृच्चीत राजभिर्हन्ति चेति समुच्चयलक्षणस्य चार्थस्य दर्शनात् ' चादिलोपे विभाषा ' इति प्रथमायास्तिङ्विभक्तेर्निघातप्रतिषेधः। हन्तीत्येषा द्वितीयापि तिङः परत्वात् न निहन्यते। सुक्षितिम्। शोभना क्षितिः सुक्षितिः। ' मन्क्तिन्° ' इत्यादिना उत्तरपदान्तोदात्तत्वम्। वर्ता। वर्ततेर्वृणोतेर्वा तृचि आगमानुशासनस्यानित्यत्वात् इडभावः। तरुता। ' तॄ प्लवनतरणयोः '। ' ग्रसितस्कभित° ' (पा. सू. ७. २. ३४ ) इत्यादिना तृचि उडागमो निपातितः। ' चितः ' इत्यन्तोदात्तत्वम्। महाधने। महच्च तद्धनं च महाधनम्। ' आन्महतः° ' ( पा. सू. ६. ३. ४६ ) इति आत्वम्। तेन शब्देन तद्धेतुभूतः संग्रामो लक्ष्यते। अर्भे। ' ऋ गतौ '। ' अर्तिगृभ्यां भन् ' ( उ. सू. ३. ४३२ ) इति भन्प्रत्ययः। नित्त्वादाद्युदात्तत्वम्॥ ॥ २१ ॥

' यं रक्षन्ति ' इति नवर्चं षष्ठं सूक्तम्। तत्रानुक्रमणं–' यं रक्षन्ति नव वरुणमित्रार्यम्णां मध्ये तृच आदित्येभ्यो गायत्रं हि ' इति। घोरपुत्रः कण्व ऋषिः। इदमादित्रीणि सूक्तानि गायत्राणि। आद्यन्तयोस्तृचयोर्वरुणमित्रार्यमणो देवताः। मध्यतृचस्य ' सुगः पन्थाः ' इत्यस्य आदित्या देवताः। गतौ विनियोगः॥

यं रक्षन्ति प्रचेतसो वरुणो मित्रो अर्यमा। नू चित्स दभ्यते जनः॥ १॥

यम्। रक्षन्ति। प्रऽचेतसः। वरुणः। मित्रः। अर्यमा। नु। चित्। सः। दभ्यते। जनः॥१॥

vप्रचेतसः प्रकृष्टज्ञानयुक्ताः वरुणादयो देवाः vयं यजमानं vरक्षन्ति vसः vजनः यजमानः vनू vचित् क्षिप्रमेव vदभ्यते दभ्नोति शत्रून् हिनस्ति॥ प्रचेतसः। प्रकृष्टं चेतो येषाम्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। नू चित्। ' ऋचि तुनुघ° ' इत्यादिना दीर्घः। दभ्यते। दम्भु दम्भे। व्यत्ययेन श्यन् आत्मनेपदं च॥

यं बाहुतेव पिप्रति पान्ति मर्त्यं रिषः। अरिष्टः सर्व एधते॥ २॥

यम्। बाहुताऽइव। पिप्रति। पान्ति। मर्त्यम्। रिषः। अरिष्टः। सर्वः। एधते॥ २॥

vयं यजमानं vपिप्रति वरुणादयो देवा धनैः पूरयन्ति। तत्र दृष्टान्तः। vबाहुतेव। स्वकीयो बाहुवर्गोऽपेक्षितं धनमानीय यथा पूरयति तद्वत्। तथा यं vमर्त्यं मनुष्यं यजमानं vरिषः हिंसकात् vपान्ति रक्षन्ति सः vसर्वः यजमानः vअरिष्टः केनाप्यहिंसितः सन् vएधते वर्धते॥ बाहुतेव। बाहुता बाहुत्वम्। भाववाचिनानेन शब्देन बाहवस्तदाश्रया लक्ष्यन्ते। यद्वा। समूहार्थे तल्प्रत्ययो द्रष्टव्यः। ' लिति ' इति प्रत्ययात्पूर्वस्योदात्तत्वम्। पिप्रति। ' पॄ पालनपूरणयोः '। पॄ इत्येके। जुहोत्यादित्वात् श्लुः। ' अर्तिपिपर्त्योश्च ' इति अभ्यासस्य इत्वम्। ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम्। पान्ति। तिङः परत्वात् पादादित्वाद्वा निघाताभावः। रिषः। ' रिष हिंसायाम् '। ' क्विप् च ' इति क्विप्। ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम्। अरिष्टः। ' रिष हिंसायाम् '। ' एकाचः° ' इति इट्प्रतिषेधः। व्रश्चादिना षत्वम्। नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम्॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वि दुर्गा वि द्विषः पुरो घ्नन्ति राजान एषाम् । नयन्ति दुरिता तिरः॥३॥

वि । दुःऽगा । वि । द्विषः । पुरः । घ्नन्ति । राजानः । एषाम् । नयन्ति । दुःऽइता । तिरः॥३॥

[v]राजानः वरुणादयः [v]एषां स्वकीययजमानानां [v]पुरः पुरस्तात् [v]दुर्गा गन्तुं दुःशकानि शत्रुनगराणि [v]वि [v]घ्नन्ति विशेषेण नाशयन्ति । तथा [v]द्विषः शत्रूनपि [v]वि घ्नन्ति। तथा [v]दुरिता यजमानसंबन्धीनि दुरितानि [v]तिरः [v]नयन्ति विनाशं प्रापयन्ति ॥ दुर्गा । दुःखेन गच्छन्त्यत्रेति दुर्गाणि। 'सुदुरोरधिकरणे' (पा. सू. ३. २. ४८. ३) इति गमेर्डप्रत्ययः । 'शेश्छन्दसि बहुलम्' इति शेर्लोपः । पुरः । कालवाचिनः पूर्वशब्दात् सप्तम्यर्थे 'पूर्वाधरावराणाम्०' (पा. सू. ५. ३. ३९) इति असिप्रत्ययः, तत्संनियोगेन पूर्वशब्दस्य पुरादेशश्च । प्रत्ययस्वरः । घ्नन्ति । हन्तेर्लटि अदादित्वात् शपो लुक्। 'गमहन०' इत्यादिना उपधालोपः । 'हो हन्तेः०' (पा. सू. ७. ३. ५४) इति घत्वम्। अन्तादेशस्योपदेशवचनादाद्युदात्तत्वम्। पादादित्वादनिघातः ॥

सुगः पन्था अनृक्षर आदित्यास ऋतं यते । नात्रावखादो अस्ति वः ॥४॥

सुऽगः । पन्थाः । अनृक्षरः । आदित्यासः । ऋतम् । यते । न । अत्र । अवऽखादः । अस्ति । वः॥४॥

हे [v]आदित्यासः [v]ऋतं [v]यते यज्ञं गच्छते भवत्समूहाय [v]पन्थाः मार्गः [v]सुगः सुष्ठु गन्तुं शक्यः [v]अनृक्षरः कण्टकरहितश्च । [v]अत्र अस्मिन् कर्मणि [v]वः युष्माकम् [v]अवखादः अवमन्तव्यः खादो जुगुप्सितहविर्विशेषः [v]न [v]अस्ति । तस्मादिहागन्तव्यमित्यर्थः ॥ सुगः । 'सुदुरोरधिकरणे' इति गमेर्डप्रत्ययः । पन्थाः । 'पथिमथोः सर्वनामस्थाने' इत्याद्युदात्तत्वम् । अनृक्षरः । 'ऋषी गतौ' ऋषन्ति अन्तर्गच्छन्ति इति ऋक्षरा कण्टकाः । 'तन्यृषिभ्यां क्सरन्' (उ. सू. ३. ३५५) इति क्सरन्प्रत्ययः । कित्त्वाद्गुणाभावः । कत्वषत्वे । यास्कस्त्वाह—'ऋक्षरः कण्टक ऋच्छतेः' (निरु. ९. ३२) इति । न विद्यन्ते ऋक्षरा अस्मिन्निति अनृक्षरः। 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। आदित्यासः । अदितेः पुत्रा आदित्याः । 'दित्यदित्यादित्य०' (पा. सू. ४. १. ८५) इत्यादिना ण्यप्रत्ययः । 'आज्ज्सेरसुक्' । आमन्त्रिताद्युदात्तत्वम् । पादादित्वादाष्टमिकनिघाताभावः । यते । 'इण् गतौ' । लटः शतृ । अदादित्वात् शपो लुक् । 'इणो यण्' (पा. सू. ६. ४. ८१) इति यणादेशः । 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम् । अवखादः । 'खादृ भक्षणे' । भावे घञ् । अवमतः खादोऽवखादः । थाथादिना उत्तरपदान्तोदात्तत्वम् ॥

यं यज्ञं नयथा नर आदित्या ऋजुना पथा । प्र वः स धीतये नशत् ॥ ५ ॥

यम् । यज्ञम् । नयथ । नरः । आदित्याः । ऋजुना । पथा । प्र । वः । सः । धीतये । नशत्॥५॥

हे [v]नरः नेतारः [v]आदित्याः [v]यं [v]यज्ञम् [v]ऋजुना [v]पथा अविकलेन मार्गेण [v]नयथ पारं प्रापयथ [v]सः यज्ञः [v]वः [v]धीतये युष्मत्पानायोपभोगाय [v]प्र [v]नशत् प्राप्नोतु॥ नयथ । अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरः । यद्वृत्तयोगादनिघातः । 'अन्येषामपि दृश्यते' इति संहितायां दीर्घत्वम् । पथा । तृतीयैकवचने 'भस्य टेर्लोपः' (पा. सू. ७. १. ८८) इति टिलोपः । 'अनुदात्तस्य च यत्रोदात्तलोपः' (पा. सू. ६. १. १६१) इति विभक्तेरुदात्तत्वम् । धीयते । 'धेट् पाने' । 'आदेचः०

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति आत्वम्। क्तिचि 'घुमास्था०' इति ईत्वम्। नशत्। नशतिर्गत्यर्थः। लेटि अडागमः। 'इतश्च लोपः०' इति इकारलोपः॥ ॥ २२ ॥

स रत्नं मर्त्यो वसु विश्वं तोकमुत त्मना। अच्छा गच्छत्यस्तृतः ॥ ६ ॥

सः। रत्नम्। मर्त्यः। वसु। विश्वम्। तोकम्। उत। त्मना। अच्छ। गच्छति। अस्तृतः ॥६॥

हे आदित्याः [v]सः तादृशो भवद्भिरनुगृहीतः [v]मर्त्यः मनुष्यो यजमानः [v]अस्तृतः केनाप्यहिंसितः सन् [v]रत्नं रमणीयं [v]विश्वं [v]वसु सर्वं धनम् [v]अच्छ आभिमुख्येन [v]गच्छति प्राप्नोति। [v]उत अपि च [v]त्मना आत्मना स्वेन सदृशं [v]तोकम् अपत्यं गच्छति॥ त्मना। 'मन्त्रेष्वाङ्यादेरात्मनः' (पा. सू. ६. ४. १४१) इति आकारलोपः। अच्छ। 'निपातस्य च' इति दीर्घत्वम्। अस्तृतः। 'स्तृञ् हिंसायाम्'। न स्तृतोऽस्तृतः। अव्ययपूर्वपदप्रकृतिस्वरत्वम्॥

कथा राधाम सखायः स्तोमं मित्रस्यार्यम्णः। महि प्सरो वरुणस्य ॥ ७ ॥

कथा। राधाम। सखायः। स्तोमम्। मित्रस्य। अर्यम्णः। महि। प्सरः। वरुणस्य ॥ ७ ॥

हे [v]सखायः सखिभूता ऋत्विजः मित्रादीनां त्रयाणां [v]महि महत् [v]प्सरः रूपम्। अतस्तदनुरूपं [v]स्तोमं स्तोत्रं [v]कथा केन प्रकारेण [v]राधाम साधयामः॥ कथा। 'था हेतौ च च्छन्दसि' (पा. सू. ५. ३. २६) इति किंशब्दात् प्रकारवचनेषु प्राग्दिशो विभक्तिरिति विभक्तिसंज्ञायां 'किमः कः' (पा. सू. ७. २. १०३) इति कादेशः। प्रत्ययस्वरः। राधाम। 'राध साध संसिद्धौ'। लेटि 'बहुलं छन्दसि' इति विकरणस्य लुक्। 'तिङ्ङतिङः' इति निघातः। स्तोमम्। 'ष्टुञ् स्तुतौ'। 'अर्तिस्तुसु०' इत्यादिना भावे मन्। नित्त्वादाद्युदात्तत्वम्। अर्यम्णः। षष्ठ्येकवचने 'अल्लोपोऽनः' इति अकारलोपः। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम्। महि। 'मह पूजायाम्'। औणादिक इन्प्रत्ययः। प्सरः। 'प्सा भक्षणे'। प्साति भक्षयतीति प्सरो रूपम्। औणादिको डरप्रत्ययः॥

मा वो घ्नन्तं मा शपन्तं प्रति वोचे देवयन्तम्। सुम्नैरिद्व आ विवासे ॥ ८ ॥

मा। वः। घ्नन्तम्। मा। शपन्तम्। प्रति। वोचे। देवऽयन्तम्।

सुम्नैः। इत्। वः। आ। विवासे ॥ ८ ॥

हे मित्रादयो देवाः [v]देवयन्तं देवान् कामयमानं यजमानं यः शत्रुर्हन्ति [v]घ्नन्तं तादृशं शत्रुं [v]वः युष्मभ्यं [v]मा [v]प्रति [v]वोचे दुरुक्तकथनभीत्याहं न कथयामि। तथा यजमानं यः शत्रुः शपति तमपि [v]शपन्तं [v]मा प्रति वोचे भवद्भिरेव विचार्य शिक्षणीय इत्यर्थः। अहं तु [v]सुम्नैरित् धनैरेव [v]वः युष्मान् [v]आ [v]विवासे सर्वतः परिचरामि॥ घ्नन्तम्। हन्तीति घ्नन्। 'गमहन०' इत्यादिना उपधालोपः। 'हो हन्तेः०' इति कुत्वे प्रत्ययस्वरः। शपन्तम्। 'शप आक्रोशे'। अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरः। वोचे। 'ब्रूञ् व्यक्तायां वाचि'। माङि लुङि इटि 'ब्रुवो वचिः' (पा. सू. २.

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

४. ५३ ) इति वचिः । ' अस्यतिवक्ति° ' इत्यादिना च्लेः अङादेशः । ' वच उम् ' इत्युमागमः । ' न माङ्योगे ' इति अडभावः । देवयन्तम् । ' सुप आत्मनः क्यच् ' । ' न च्छन्दस्यपुत्रस्य ' इति ईत्वप्रतिषेधः । सुम्नैः । ' म्ना अभ्यासे ' । सुष्ठु म्नायतेऽभ्यस्यते इति सुम्नम् । ' आतश्चोपसर्गे ' ( पा. सू. ३. १. १३६ ) इति कप्रत्ययः । ' आतो लोप इटि च ' इति आकारलोपः । विवासे । विवासतिः परिचरणकर्मा ( नि. ३. ५. १० ) ॥

चतुरश्चिद्ददमानाद्बिभीयादा निधातोः । न दुरुक्ताय स्पृहयेत् ॥ ९ ॥

चतुरः । चित् । ददमानात् । बिभीयात् । आ । निऽधातोः । न । दुःऽउक्ताय । स्पृहयेत् ॥९॥

घ्नन्तं शपन्तं च मा प्रतिवोचे इति यदुक्तं तत्रोपपत्तिरुच्यते । Vदुरुक्ताय Vन Vस्पृहयेत् दुष्टं वाक्यं न कामयेत् किंतु दुरुक्तात् Vबिभीयात् । तत्रावशिष्टो मन्त्रभागः सर्वोऽपि दृष्टान्तः । चित् इत्युपमार्थे वर्तते । अक्षद्यूतं कुर्वतोरुभयोर्मध्ये यः पुमान् Vचतुरः चतुःसंख्याकान् कपर्दकान् Vददमानात् ददतो हस्ते धारयतः पुरुषात् Vआ Vनिधातोः कपर्दकनिपातपर्यन्तं बिभीयात् अस्य जयो भविष्यति न[1] भविष्यति[1] इत्यन्यो भीतिं प्राप्नुयात् । अत्र यथा भयं तथा दुरुक्ताद्भेतव्यमिति धर्मरहस्यम् । तस्मादहं घ्नन्तं शपन्तं मा प्रतिवोचे इत्यभिप्रायः । अत्र निरुक्तं—' चतुरोऽक्षान् धारयत इति तद्यथा कितवाद्बिभीयादेवमेव दुरुक्ताद्बिभीयान्न दुरुक्ताय स्पृहयेत् ' ( निरु. ३. १६ ) इति॥ चतुरः । ' चतुरः शसि ' ( पा. सू. ६. १. १६७ ) इति विभक्तेः पूर्वस्योदात्तत्वम् । ददमानात् । ' दद दाने ' । अत्र धारणार्थः । शपः पित्त्वादनुदात्तत्वम् । अदुपदेशात् लसार्वधातुकानुदात्तत्वेन शानजनुदात्तः । धातुस्वर एव शिष्यते । बिभीयात् । ' जिभी भये ' । लिङि जुहोत्यादित्वात् शपः श्लुः । यासुट उदात्तत्वम् । पादादित्वात् निघाताभावः । निधातोः । निपूर्वात् दधातेः ' सितनिगमि° ' ( उ. सू. १. ६९ ) इत्यादिना भावे तुन्प्रत्ययः । व्यत्ययेनाद्युदात्तत्वम् । ' तादौ च° ' इति गतिस्वरो न भवति ' अतौ ' इति पर्युदस्तत्वात् । दुरुक्ताय । ' स्पृहेरीप्सितः ' ( पा. सू. १. ४. ३६ ) इति संप्रदानसंज्ञायां ' चतुर्थी संप्रदाने ' ( पा. सू. २. ३. १३ ) इति चतुर्थी । स्पृहयेत् । ' स्पृह ईप्सायाम् ' । चुरादिरदन्तः । अतो लोपस्य स्थानिवद्भावात् लघूपधगुणाभावः ॥ ॥ २३ ॥

' सं पूषन् ' इति दशर्चं सप्तमं सूक्तं काण्वं गायत्रं पूषदेवताकम् । ' सं पूषन्दश पौष्णम् ' इत्यनुक्रान्तम् । स्मार्ते ' महान्तमध्वानमेष्यन् ' इदं सूक्तं जपेत्—' सं पूषन्नध्वन इति महान्तमध्वानमेष्यन् प्रतिभयं वा ' ( आश्व. गृ. ३. ७. १० ) इति सूत्रितत्वात् । तत्र जपेदित्यनुवर्तते ॥

सं पूषन्नध्वनस्तिर व्यंहो विमुचो नपात् । सक्ष्वा देव प्र णस्पुरः ॥ १ ॥

सम् । पूषन् । अध्वनः । तिर । वि । अंहः । विऽमुचः । नपात् ।

सक्ष्व । देव । प्र । नः । पुरः ॥ १ ॥

---

१. च-फ—' न भविष्यति ' इति नास्ति

CC0, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]पूषन् जगत्पोषक पृथिव्यभिमानिदेव [v]अध्वनः मार्गात् [v]सं [v]तिर अस्मानभीष्टस्थानं सम्यक् प्रापय। [v]अंहः विघ्नहेतुं पाप्मानं [v]वि तिर विनाशय। पूषा विशेष्यते। [v]विमुचो [v]नपात् जलविमोचकहेतोर्मेघस्य पुत्र। नपात् इति पुत्रनाम, 'नपात् प्रजा' (नि. २. २. १३) इति तन्नामसु पाठात्। श्रुत्यन्तरे 'अद्भ्यः पृथिवी' इति जलात् भूम्युत्पत्तिः श्रूयते। तथा अन्यत्रापि उदकसारत्वं पृथिव्याः श्रूयते–'तद्यदपां सार आसीत्तत्समहन्यत सा पृथिव्यभवत्' इति। मेघस्य जलधारित्वादुदकपुत्र एव मेघपुत्रो भवति। न च पृथिव्या मेघपुत्रत्वे पूष्णः किमायातमिति वाच्यं, पृथिव्या एव पूषत्वात्। तथा च श्रुत्यन्तरे कस्यचिन्मन्त्रस्य ब्राह्मणमेवमाम्नायते–'पूषाध्वनः पात्वित्याहेयं वै पूषा' इति। तन्निर्वचनं चान्यत्रैवमाम्नायते—'इयं वै पूषेयं हीदं सर्वं पुष्यति यदिदं किं च' (श. ब्रा. १४. ४. २. २५) इति। हे देव पूषन् [v]नः [v]पुरः अस्माकं पुरतः [v]प्र [v]सक्ष्व प्रसक्तो भव। पुरतो गच्छेत्यर्थः॥ विमुचो नपात्। उदकं विमुञ्चतीति विमुड् मेघः। 'क्विप् च' इति क्विप्। न पातयति कुलमिति नपात् पुत्रः। नञ्पूर्वात् पातयतेः क्विप्। 'नभ्राण्नपात्°' इत्यादिना नञः प्रकृतिभावः। 'सुबामन्त्रिते°' इति पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य आद्युदात्तत्वम्। सक्ष्व। 'षच सेवने'। अनुदात्तेत्त्वादात्मनेपदम्। लोटि 'बहुलं छन्दसि' इति शपो लुक्। 'तास्यनुदात्तेत्°' इति लसार्वधातुकानुदात्तत्वे धातुस्वरः। प्र णः। 'उपसर्गाद्बहुलम्' इति नसो णत्वम्। पुरः। उक्तम्॥

यो नः॑ पूषन्नघो वृको॑ दुःऽशेव॑ आदिदे॑शति। अप॑ स्म॒ तं प॒थो ज॑हि ॥२॥

यः। नः॒। पूषन्। अघः। वृकः॑। दुःऽशेवः॑। आऽदिदे॑शति। अप॑। स्म॒। तम्। प॒थः। ज॒हि॒ ॥२॥

हे [v]पूषन् [v]यः प्रतिपक्षी [v]नः अस्मान् [v]आदिदेशति अनेन मार्गेण गन्तव्यम्[1] इत्येवमाज्ञापयति। कीदृशः। [v]अघः आहन्ता [v]वृकः अस्मदीयस्य धनस्य आदाता अपहर्तेत्यर्थः। [v]दुःशेवः सेवितुं दुःशको दुष्टसुखो वा। [v]तं तादृशं प्रतिपक्षिणं [v]पथः मार्गात् [v]अप [v]जहि [v]स्म अवश्यमपाकुरु॥ वृकः। 'कृक वृक आदाने'। वर्कते इति वृकः। इगुपधलक्षणः कः। वृषादित्वादाद्युदात्तत्वम्। दुःशेवः। दुष्टं शेवं यस्यासौ दुःशेवः। 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वम्। यद्वा। दुःखेन सेव्यते इति दुःशेवः। वर्णव्यत्ययेन सकारस्य शकारः। 'ईषदुःसुषु°' इति खल्। लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वम्। कृदुत्तरपदप्रकृतिस्वरत्वम्। आदिदेशति। 'दिश अतिसर्जने'। लेटि अडागमः। 'बहुलं छन्दसि' इति शपः श्लुः। 'बहुलं छन्दसीति वक्तव्यम्' (पा. सू. ७. ३. ८७. २) इति वचनात् 'नाभ्यस्तस्याचि°' (पा. सू. ७. ३. ८७) इति लघूपधगुणप्रतिषेधाभावः। पथः। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम्॥

अप॒ त्यं प॑रिप॒न्थिनं॑ मुषी॒वाणं॑ हुर॒श्चित॑म्। दूरमधि॑ स्रु॒तेर॑ज ॥ ३ ॥

अप॑। त्यम्। प॒रि॒ऽप॒न्थिन॑म्। मु॒षी॒वाण॑म्। हु॒रः॒ऽचित॑म्। दूर॑म्। अधि॑। स्रु॒तेः॑। अ॒ज॒ ॥३॥

[v]त्यं तादृशं पूर्वोक्तगुणयुक्तं [v]स्रुतेः मार्गात् [v]अधि [v]दूरम् अत्यन्तदूरदेशं प्रति [v]अप [v]अज अपगमय। कीदृशम्। [v]परिपन्थिनं मार्गप्रतिबन्धकं [v]मुषीवाणं तस्कररूपम्। मुषीवा इति तस्करस्य

---

१. च-छ-ण-प-य-ल-श-स–न गन्तव्यम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नाम, ' मुषीवान् मलिम्लुचः ' ( नि. ३. २४. ११ ) इति तन्नामसु पाठात् । [v]हुरश्चितं कौटिल्यानां संचेतारम् ॥ परिपन्थिनम् । ' छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि ' ( पा. सू. ५. २. ८९ ) इति शत्रावभिधेये इनिप्रत्ययान्तो निपातितः । मुषीवाणम् । ' मुष स्तेये ' । मोषणं मुषिः । औणादिको भावे किप्रत्ययः । मुषिं वनति संभजते इति मुषीवा । ' वन षण संभक्तौ ' । ' अन्येभ्योऽपि दृश्यन्ते ' ( पा. सू. ३. २. ७५ ) इति विच्प्रत्ययः । ' सर्वनामस्थाने चासंबुद्धौ ' ( पा. सू. ६. ४. ८ ) इति दीर्घः । ' अन्येषामपि दृश्यते ' इति पूर्वपदस्य दीर्घत्वम् । हुरश्चितम् । ' हुर्छा कौटिल्ये ' । संपदादिलक्षणो भावे क्विप् । ' राल्लोपः ' इति छकारलोपः । हुरश्चिनोतीति हुरश्चित् । चिनोतेः क्विपि तुगागमः । ' तत्पुरुषे कृति बहुलम् ' इति अलुक् । कृदुत्तरपदप्रकृतिस्वरत्वम् । ष्टुतेः । ' ष्टु गतौ ' । ' क्तिच्क्तौ च संज्ञायाम् ' इति क्तिच् । ' चितः ' इत्यन्तोदात्तत्वम् । अज । ' अज गतिक्षेपणयोः ' ॥

त्वं तस्य द्वयाविनोऽघशंसस्य कस्य चित् । पदाभि तिष्ठ तपुषिम् ॥ ४ ॥

त्वम् । तस्य । द्वयाविनः । अघऽशंसस्य । कस्य । चित् । पदा । अभि । तिष्ठ । तपुषिम् ॥ ४ ॥

हे पूषन् [v]त्वं [v]तस्य चोरस्य [v]तपुषिं परसंतापकं देहं [v]पदाभि [v]तिष्ठ भवदीयेन पादेनाक्रम्य तिष्ठ । कीदृशस्य । [v]द्वयाविनः प्रत्यक्षापहारः परोक्षापहारश्चेति यद्द्वयं तद्युक्तस्य [v]अघशंसस्य अस्मास्वघमनिष्टं शंसतः । अघशंस इति तस्करनाम, ' मलिम्लुचः अघशंसः वृकः ' ( नि. ३. २४. १३ ) इति तन्नामसु पाठात् । [v]कस्य [v]चित् अनिर्दिष्टविशेषस्य कस्यापि ॥ द्वयाविनः । द्वयमस्यास्तीति द्वयावी । ' बहुलं छन्दसि ' ( पा. सू. ५. २. १२२ ) इति मत्वर्थीयो विनिः । ' अन्येषामपि दृश्यते ' इति दीर्घत्वम् । अघशंसस्य । अघे पापे शंसो मनस्यभिलाषो यस्य सोऽयमघशंसः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । तपुषिम् । तापयत्यनेन अन्यमिति तपुषिः । औणादिक उषिन्प्रत्ययः । बहुलवचनात् इकारस्य न इत् संज्ञा । नित्त्वादाद्युदात्तत्वम् ॥

आ तत्ते दस्र मन्तुमः पूषन्नवो वृणीमहे । येन पितॄनचोदयः ॥ ५ ॥

आ । तत् । ते । दस्र । मन्तुऽमः । पूषन् । अवः । वृणीमहे । येन । पितॄन् । अचोदयः ॥ ५ ॥

हे [v]मन्तुमः ज्ञानवन् [v]दस्र दर्शनीय यद्वा वैर्युपक्षयकारिन् [v]पूषन् [v]ते त्वदीयं [v]तत् [v]अवः तादृशं रक्षणम् [v]आ [v]वृणीमहे सर्वतः प्रार्थयामहे । [v]येन रक्षणेन [v]पितॄन् अङ्गिरःप्रभृतीन् पितृदेहान् [v]अचोदयः प्रेरितवानसि । तद्रक्षणमिति पूर्वत्रान्वयः ॥ दस्र । ' दसि दंसनदर्शनयोः ' । ' स्फायितञ्चि° ' इत्यादिना रक् । आगमानुशासनस्यानित्यत्वात् नुमभावः । यद्वा । ' दसु उपक्षये ' इत्यस्मादन्तर्भावितण्यर्थात् पूर्ववत् रक् । मन्तुमः । ' मन ज्ञाने ' । ' कमिमनिजनि° ' ( उ. सू. १. ७२ ) इत्यादिना भावे तुप्रत्ययः । मन्तुर्ज्ञानमस्यास्तीति मन्तुमान् । संबुद्धौ ' मतुवसो रुः ' इति रुत्वम् । अचोदयः । ' चुद संचोदने ' । चौरादिकः ॥ ॥ २४ ॥

अधा नो विश्वसौभग हिरण्यवाशीमत्तम । धनानि सुषणा कृधि ॥ ६ ॥

अध । नः । विश्वऽसौभग । हिरण्यवाशीमत्ऽतम । धनानि । सुऽसना । कृधि ॥ ६ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [V]विश्वसौभग कृत्स्नधनयुक्त यद्वा कृत्स्नसौभाग्ययुक्त [V]हिरण्यवाशीमत्तम अतिशयेन सुवर्णमयायुधवन् पूषन् [V]अध पूर्वोक्तास्मदीयप्रार्थनानन्तरं [V]नः अस्माकं [V]धनानि सुवर्णमणिमुक्तादीनि [V]सुषणा सुष्ठु दानयुक्तानि [V]कृधि कुरु ॥ अध । अथशब्दे धत्वं छान्दसम् । ' निपातस्य च ' इति संहितायां दीर्घत्वम् । विश्वसौभग । ' सुभगान्मत्रे ' इत्युद्गात्रादिषु पाठाद्भावे अञ् । ह्रद्भगसिन्ध्वन्ते पूर्वपदस्य च ' इत्युत्तरपदवृद्धौ प्राप्तायां सत्यां सर्वविधीनां छन्दसि विकल्पितत्वादुत्तरपदवृद्धिर्न भवतीति वृत्तावुक्तम् ( का. ७. २. १९ ) । विश्वानि सौभगानि यस्यासौ विश्वसौभगः । आमन्त्रितनिघातः । हिरण्यवाशीमत्तम । हिरण्यमयी वाशी । तदेषामस्तीति हिरण्यवाशीमन्तः । अतिशयेन हिरण्यवाशीमान् हिरण्यवाशीमत्तमः । आमन्त्रितनिघातः । सुषणा । ' वन षण संभक्तौ ' । सुखेन संभज्यन्ते इति सुषणानि । ' ईषद्दुःसुषु° ' इति खल् । ' शेश्छन्दसि ' इति शेर्लोपः । ' लिति ' इति प्रत्ययात्पूर्वस्योदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् । कृधि । ' डुकृञ् करणे ' । ' श्रुशृणुपृकृवृभ्यश्छन्दसि ' इति हेर्धिरादेशः । ' बहुलं छन्दसि ' इति विकरणस्य लुक् ॥

**अति नः सश्चतो नय सुगा नः सुपथा कृणु । पूषन्निह क्रतुं विदः ॥७॥**

अति । नः । सश्चतः । नय । सुऽगा । नः । सुऽपथा । कृणु । पूषन् । इह । क्रतुम् । विदः ॥७॥

[V]सश्चतः अस्मद्वाधनाय प्राप्नुवतः शत्रून् [V]नः [V]अति अस्मानतिक्रम्य [V]नय अन्यत्र प्रापय । [V]नः अस्मान् [V]सुगा सुष्ठु गन्तुं शक्येन [V]सुपथा शोभनमार्गेण [V]कृणु गन्तॄन् कुरु । हे [V]पूषन् [V]इह अध्वनि [V]क्रतुं प्रज्ञानमस्मद्रक्षणरूपं [V]विदः जानीहि ॥ सश्चतः । ' ग्लुञ्च स्रज्ज गतौ ' इत्यत्र सश्चिमप्येके पठन्तीति धातुवृत्तावुक्तम् । अस्मात् लटः शतृ । ' बहुलं छन्दसि ' इति शपो लुक् । प्रत्ययस्वरेण शतुरुदात्तत्वम् । ' शतुरनुमः° ' इति विभक्त्युदात्ताभावश्छान्दसः । सुगा । सुष्ठु गच्छन्त्यत्रेति सुगः । ' सुदुरोरधिकरणे ' इति गमेर्डप्रत्ययः । ' सुपां सुलुक् ° ' इति तृतीयाया आकारः । सुपथा । शोभनेन पथा । ' न पूजनात् ' ( पा. सू. ५. ४. ६९ ) इति समासान्तप्रतिषेधः । ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम् । ' ऋत्वादयश्च ' इत्युत्तरपदाद्युदात्तत्वं न भवति अबहुव्रीहित्वात् । तत्र हि बहुव्रीहौ इति वर्तते । कृणु । ' कृवि हिंसाकरणयोः ' । ' धिन्विकृण्व्योर च ' इति उप्रत्ययः । ' उतश्च प्रत्ययात् ° ' इति हेर्लुक् । विदः । ' विद ज्ञाने ' । लेटि अडागमः । ' इतश्च लोपः ° ' इति इकारलोपः ॥

**अभि सूयवसं नय न नवज्वारो अध्वने । पूषन्निह क्रतुं विदः ॥ ८ ॥**

अभि । सुऽयवसम् । नय । न । नवऽज्वारः । अध्वने । पूषन् । इह । क्रतुम् । विदः ॥८॥

हे [V]पूषन् [V]सुयवसं शोभनतृणोपलक्षितं सर्वौषधियुक्तं देशम् [V]अभि [V]नय अस्मानभितः प्रापय । [V]अध्वने मार्गाय [V]नवज्वारः नूतनः संतापः [V]न भवत्विति शेषः । मार्गे गच्छतामस्माकमिदानींतनः क्लेशः कोऽपि मा भूदित्यर्थः । गतार्थमन्यत् ॥ सूयवसम् । शोभनं यवसं यस्मिन् देशे स सूयवसो देशः । ' निपातस्य च ' इति पूर्वपदस्य दीर्घत्वम् । ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम् क्रत्वादिर्वा द्रष्टव्यः । नवज्वारः । ' ज्वर रोगे ' । भावे घञ् । नवश्चासौ ज्वारो नवज्वारः । थाथादिना उत्तरपदान्तोदात्तत्वम् ॥



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

शग्धि पूर्धि प्र यंसि च शिशीहि प्रास्युदरम् । पूषन्निह क्रतुं विदः ॥ ९ ॥

शग्धि । पूर्धि । प्र । यंसि । च । शिशीहि । प्रासि । उदरम् । पूषन् । इह । क्रतुम् । विदः ॥९॥

हे Vपूषन् Vशग्धि अस्माननुग्रहीतुं शक्तो भव। Vपूर्धि अस्मद्गृहं धनेन पूरय। किंच Vप्र Vयंसि अन्यदप्यपेक्षितं वस्तु[1] प्रयच्छ। Vशिशीहि अस्मान् सर्वेषु मध्ये तीक्ष्णीकुरु तेजस्विनः कुरु इत्यर्थः Vउदरम् अस्मदीयं Vप्रासि मृष्टान्नेन सोमरसेन वा पूरय। अन्यत् पूर्ववत् ॥ शग्धि । 'शकॢ शक्तौ'। लोटो हिः। 'बहुलं छन्दसि' इति विकरणस्य लुक्। 'हुझल्भ्यो हेर्धिः' इति धिरादेशः। हेरपित्त्वात् प्रत्ययस्वरेणोदात्तत्वम्। पूर्धि। 'पॄ पालनपूरणयोः'। 'श्रुशृणुपॄकृवृभ्यश्छन्दसि' इति हेर्धिरादेशः। पूर्ववद्विकरणस्य लुक्। 'उदोष्ठ्यपूर्वस्य' इति उत्वम्। 'हलि च' इति दीर्घः। तिङः परत्वात् निघाताभावः। यंसि। 'यम उपरमे'। लोडर्थे लटि पूर्ववद्विकरणस्य लुक्। निघातः। शिशीहि। 'शो तनूकरणे'। लोटि 'बहुलं छन्दसि' (पा. सू. ७. ४. ७८) इति अभ्यासस्य इत्वम्। 'ई हल्यघोः' इति ईत्वम्। प्रत्ययस्वरः। प्रासि। 'प्रा पूरणे'। अदादित्वात् शपो लुक्। सिपः पित्त्वादनुदात्तत्वे धातुस्वरः ॥

न पूषणं मेथामसि सूक्तैरभि गृणीमसि । वसूनि दस्ममीमहे ॥ १० ॥

न । पूषणम् । मेथामसि । सुऽउक्तैः । अभि । गृणीमसि । वसूनि । दस्मम् । ईमहे ॥१०॥

Vपूषणं देवं Vन Vमेथामसि वयं न तु निन्दामः। किंतु Vसूक्तैः वेदगतैः Vअभि Vगृणीमसि सर्वत्र स्तुमः। Vदस्मं दर्शनीयं पूषणं प्रति Vवसूनि धनानि Vईमहे याचामहे ॥ मेथामसि। 'मेथृ मेधाहिंसनयोः'। लटि 'इन्दतो मसि' इति मस इकारागमः। सूक्तैः। सुष्ठु स्तुवते[2] देवताः प्रकाशयन्तीति सूक्तानि। 'क्तिच्क्तौ च संज्ञायाम्' इति कर्तरि क्तः। 'वचिस्वपि०' इत्यादिना संप्रसारणम्। थाथादिस्वरः। यद्वा। कर्मणि निष्ठा। 'सूपमानात् क्तः' (पा. सू. ६. २. १४५) इत्युत्तरपदान्तोदात्तत्वम्। गृणीमसि। 'गॄ शब्दे'। 'प्वादीनां ह्रस्वः' इति ह्रस्वत्वम्। इदन्तो मसिः। दस्मम्। 'इषियुधीन्धिदसिश्याधूसूभ्यो मक्' (उ. सू. १. १४२) इति मक्प्रत्ययः ॥ ॥ २५ ॥

'कद्रुद्राय' इति नवर्चमष्टमं सूक्तम्। अत्रानुक्रम्यते–'कद्रुद्राय नव रौद्रं तृतीया मैत्रावरुणी चान्त्यस्तृचः सौम्योऽन्त्यानुष्टुप्' इति। घोरपुत्रः कण्व ऋषिः। गायत्री छन्दः। 'यास्ते प्रजाः' इत्यन्त्यानुष्टुप्। रुद्रो देवता। 'यथा नो मित्रः' इत्येषा मित्रावरुणदेवताका च। 'अस्मे सोम' इत्यादिरन्त्यस्तृचस्तु सौम्य एव। सर्वेषु रुद्रदेवताकेषु कर्मसु अनेन सूक्तेन दिगुपस्थानं कर्तव्यम्। तथा च सूत्रितं–'कद्रुद्रायेमा रुद्राया ते पितरिमा रुद्राय स्थिरधन्वन इति सर्वरुद्रयज्ञेषु दिशामुपस्थानम्' (आश्व. गृ. ४. ९. २१-२२) इति ॥

कद्रुद्राय प्रचेतसे मीळ्हुष्टमाय तव्यसे । वोचेम शंतमं हृदे ॥ १ ॥

कत् । रुद्राय । प्रऽचेतसे । मीळ्हुःऽतमाय । तव्यसे । वोचेम । शम्ऽतमम् । हृदे ॥ १ ॥

---

१. 'च-छ-श-स-वसु। २. च-न-श-स-ब्रुवते।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vकत् कदा Vरुद्राय एतन्नामकाय देवाय Vशंतमम् अतिशयेन सुखकरं स्तोत्रं Vवोचेम पठेम। कीदृशाय। Vप्रचेतसे प्रकृष्टज्ञानयुक्ताय Vमीळ्हुष्टमाय सेक्तृतमाय अभीष्टकामवर्षायेत्यर्थः[1]। Vतव्यसे अतिशयेन प्रवृद्धाय Vहृदे अस्मदीयहृन्निष्ठाय ॥ कत् कदा। अन्त्यलोपश्छान्दसः। रुद्राय। रोदयति सर्वमन्तकाले इति रुद्रः। 'रोदेर्णिलुक्च' (उ. सू. २. १७९) इति रक्प्रत्ययः। प्रचेतसे। 'चिती संज्ञाने'। प्रकृष्टं चेततीति प्रचेताः। गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च इति असुन् पूर्वपदप्रकृतिस्वरत्वं च। मीळ्हुष्टमाय। अतिशयेन मीढ्वान् मीळ्हुष्टमः। 'दाश्वान् साह्वान् मीढ्वांश्च' इति क्वसुप्रत्ययान्तो निपातितः। तमपि अयस्मयादित्वेन भत्वात् 'वसोः संप्रसारणम्' इति संप्रसारणम्। 'शासिवसिघसीनां च' इति षत्वम्। तव्यसे। तवतिर्वृद्ध्यर्थः सौत्रो धातुः। अतिशयेन तविता तवीयान्। 'तुश्छन्दसि' इति ईयसुन्प्रत्ययः। 'तुरिष्टेमेयःसु' इति तृलोपः। ईयसुन ईकारलोपश्छान्दसः। नित्त्वादाद्युदात्तत्वम्। वोचेम। 'वच परिभाषणे'। 'लिङ्याशिष्यङ्'। 'वच उम्' इति उमागमः। यासुटः स्वरेण एकार उदात्तः। हृदे। 'पदन्०' इत्यादिना हृदयशब्दस्य हृदादेशः। 'ऊडिदम्०' इत्यादिना विभक्तेरुदात्तत्वम् ॥

**यथा नो अदितिः करत्पश्वे नृभ्यो यथा गवे। यथा तोकाय रुद्रियम् ॥२॥**

यथा। नः। अदितिः। करत्। पश्वे। नृऽभ्यः। यथा। गवे। यथा। तोकाय। रुद्रियम् ॥२॥

Vअदितिः भूमिः Vनः अस्माकं Vरुद्रियं रुद्रसंबन्धि भेषजं Vयथा येन प्रकारेण सिध्यति Vकरत् तथा करोतु। किंच Vयथा येन प्रकारेण Vपश्वे अस्मदीयाश्वमहिषादिपशवे[2] Vनृभ्यः अस्मदीयपुरुषेभ्यो विशेषेण Vगवे गोजातये हितं रुद्रियं सिध्यति तथा करोतु। किंच Vतोकाय अस्मदीयापत्याय रुद्रियं Vयथा सिध्यति तथा करोतु। भेषजस्य रुद्रसंबन्धित्वं मन्त्रान्तरे समाम्नातं—'या ते रुद्र शिवा तनूः शिवा विश्वाहभेषजी। शिवा रुद्रस्य भेषजी' (तै. सं. ४. ५. १०. १) इति। गवादिविषयभेषजं चान्यत्र स्पष्टमाम्नातं—'भेषजं गवेऽश्वाय पुरुषाय भेषजमथो अस्मभ्यं भेषजं सुभेषजम्' (तै. सं. १. ८. ६. १) इति ॥ करत्। 'डुकृञ् करणे'। लङि व्यत्ययेन शप्। यद्वा। लेटि अडागमः। 'इतश्च लोपः०' इति इकारलोपः। यद्वा। लुङि 'कृमृदरुहिभ्यश्छन्दसि' इति च्लेः अङादेशः। 'ऋदृशोऽङि गुणः' इति गुणः। आद्ययोः पक्षयोः प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः। तृतीये तु व्यत्ययेन। यद्वृत्तयोगादनिघातः। पश्वे। संज्ञापूर्वकस्य विधेरनित्यत्वात् 'घेर्ङिति' (पा. सू. ७. ३. १११) इति गुणाभावः। यणादेशः। नृभ्यः। 'नृ चान्यतरस्याम्' (पा. सू. ६. १. १८४) इति विभक्त्युदात्तत्वाभावः। गवे। 'सावेकाचः०' इति प्राप्तस्य विभक्त्युदात्तस्य 'न गोश्वन्सावर्वण०' इति प्रतिषेधः। रुद्रियम्। रुद्रशब्दात् तस्येदमित्यर्थे घप्रत्ययः ॥

**यथा नो मित्रो वरुणो यथा रुद्रश्चिकेतति। यथा विश्वे सजोषसः ॥ ३ ॥**

यथा। नः। मित्रः। वरुणः। यथा। रुद्रः। चिकेतति। यथा। विश्वे। सऽजोषसः ॥३॥

Vमित्रो Vवरुणः च Vनः अस्मान् Vयथा येन प्रकारेण Vचिकेतति अनुग्राह्यत्वेन जानाति। Vरुद्रः अपि Vयथा चिकेतति। Vसजोषसः समानप्रीतयः Vविश्वे सर्वे देवाः Vयथा चिकेतन्ति तथा भवत्विति

---

१. च-छ-न-फ—अभीष्टकामवर्षकायेत्यर्थः। २. च-फ—अस्मदीयाश्वमहिष्यादिपशवे।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

शेषः। यद्वा। यथाशब्दोपेतमन्त्रद्वयस्य तथा कदा वोचेमेति पूर्वत्रान्वयः॥ चिकेतति। 'कित ज्ञाने'। लेटि अडागमः। 'नाभ्यस्तस्य०' (पा. सू. ७. ३. ८७) इति गुणनिषेधो न भवति, 'बहुलं छन्दसीति वक्तव्यम्' इति वचनात्। सार्वधातुकत्वाच्च 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम्। सजोषसः। 'जुषी प्रीतिसेवनयोः'। समानं जुषन्तीति सजोषसः। 'समानस्य च्छन्दसि' इति सभावः। असुनो नित्त्वादुत्तरपदस्याद्युदात्तत्वम्। तदेव कृदुत्तरपदप्रकृतिस्वरत्वेन शिष्यते॥

गाथपतिं मेधपतिं रुद्रं जलाषभेषजम्। तच्छंयोः सुम्नमीमहे॥ ४॥

गाथऽपतिम्। मेधऽपतिम्। रुद्रम्। जलाषऽभेषजम्। तत्। शम्ऽयोः। सुम्नम्। ईमहे॥४॥

Vरुद्रम् अभिलक्ष्य वयं Vशंयोः बृहस्पतिपुत्रस्य संबन्धि Vतत् प्रसिद्धं सर्वप्रजाभ्यो हितं Vसुम्नं सुखम् Vईमहे याचामहे। कीदृशं रुद्रम्। Vगाथपतिं स्तुतिपालकं Vमेधपतिं यज्ञपालकं Vजलाषभेषजं सुखरूपौषधोपेतम्। यद्वा। उदकरूपौषधोपेतम्। उदकं हि रुद्रनामाभिमन्त्रितं सत् औषधं भवति॥ गाथपतिम्। गाथा इति वाङ्नाम, 'गाथा गणः' (नि. १. ११. ३७) इति तन्नामसु पठितत्वात्। वाग्रूपायाः स्तुतेः पतिर्गाथपतिः। 'कै गै रै शब्दे'। 'आदेचः०' इति आत्वम्। 'उषिकुषिगार्तिभ्यस्थन्' इति थन्प्रत्ययः। नित्त्वादाद्युदात्तत्वम्। 'ङ्यापोः संज्ञाच्छन्दसोर्बहुलम्' इति पूर्वपदस्य ह्रस्वत्वम्। 'पत्यावैश्वर्ये' इति पूर्वपदप्रकृतिस्वरे प्राप्ते 'मरुद्वृधादीनां छन्दस्युपसंख्यानम्' इति पूर्वपदान्तोदात्तत्वम्। मेधपतिम्। पूर्ववत्। जलाषभेषजम्। 'जनी प्रादुर्भावे'। जायन्ते इति जाः। 'अन्येष्वपि दृश्यते' (पा. सू. ३. २. १०१) इति दृशिग्रहणात् केवलादपि डप्रत्ययः। लाषः। 'लष कान्तौ'। कान्तिरभिलाषः। भावे घञ्। जानां लाषो यस्मिन् तज्जलाषं सुखम्। जलाषरूपं भेषजं यस्मिन् रुद्रे स जलाषभेषजः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। शंयोः। 'कंशंभ्याम्०' (पा. सू. ५. २. १३८) इति मत्वर्थीयो युस्प्रत्ययः। 'सिति च' (पा. सू. १. ४. १६) इति पदसंज्ञायाम् अनुस्वारपरसवर्णौ। प्रत्ययस्वरः॥

यः शुक्रइव सूर्यो हिरण्यमिव रोचते। श्रेष्ठो देवानां वसुः॥ ५॥

यः। शुक्रःऽइव। सूर्यः। हिरण्यम्ऽइव। रोचते। श्रेष्ठः। देवानाम्। वसुः॥ ५॥

Vयः रुद्रः Vसूर्यः इव Vशुक्रः सूर्यवदीप्तिमान् Vहिरण्यमिव Vरोचते। यथा सर्वेषां प्राणिनां हिरण्यं प्रीतिकरं भवति तथा रुद्रोऽपि। स च Vदेवानां सर्वेषां मध्ये Vश्रेष्ठः Vवसुः निवासहेतुश्च॥ रोचते। 'रुच दीप्तावभिप्रीत्यां च'। अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरः। श्रेष्ठः। प्रशस्यतरः। प्रशस्यशब्दात् इष्ठनि 'प्रशस्यस्य श्रः' (पा. सू. ५. ३. ६०) इति श्रादेशः। नित्त्वादाद्युदात्तत्वम्। वसुः। वासयति सर्वमिति वसुः। 'वस निवासे'। अन्तर्भावितण्यर्थात् 'शृस्वृस्निहि०' इत्यादिना उप्रत्ययः। 'नित्' इत्यनुवृत्तेराद्युदात्तत्वम्॥ ॥ २६ ॥

आश्विमास्ते 'शं नः करति' इति भाष्या। 'अथ यथेतम्' इति खण्डे सूत्रितं—'वैश्वानराय पृथुपाजसे शं नः करत्यर्वते' (आश्व. श्रौ. ५. २०) इति॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

शं नः करत्यर्वते सुगं मेषाय मेष्यै । नृभ्यो नारिभ्यो गवे ॥ ६ ॥

शम् । नः । करति । अर्वते । सुऽगम् । मेषाय । मेष्यै । नृऽभ्यः । नारिऽभ्यः । गवे ॥६॥

vनः अस्माकं संबन्धिभ्यः अर्वदादिभ्यः vसुगं सुष्ठु गम्यं vशं सुखं vकरति देवः करोति । vअर्वते अश्वाय । अर्वन्शब्दोऽश्वनाम, 'अर्वा वाजी' (नि. १. १४. ३) इति तन्नामसु पाठात् । vमेषाय मेषजातिपुरुषाय vमेष्ये तज्जातीयस्त्रियै vनृभ्यः पुरुषेभ्यः vनारिभ्यः स्त्रीभ्यः vगवे गोजातये ॥ करति । 'डुकृञ् करणे' । व्यत्ययेन शप् । अर्वते । अति गच्छतीत्यर्वा । 'अन्येभ्योऽपि दृश्यन्ते' इति वनिप् । चतुर्थ्येकवचने 'अर्वणस्त्रसावनञः' इति नकारस्य तृआदेशः । वनिप्सुपौ पित्त्वादनुदात्तौ । धातुस्वरः । मेषाय । 'मिष स्पर्धायाम्' । पचाद्यच् 'देवसेनमेषादयः पचादिषु द्रष्टव्याः' इति वचनात् । मेष्ये । 'जातेरस्त्रीविषयादयोपधात्' (पा. सू. ४. १. ६३) इति ङीष्प्रत्ययः । प्रत्ययस्वरः । चतुर्थ्येकवचने आगमानुशासनस्यानित्यत्वात् आडागमाभावः । 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इति स्वरितत्वम् । 'उदात्तयणो हल्पूर्वात्' इति तु न भवति, 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति वचनात् । नृभ्यः । 'सावेकाचः°' इति प्राप्तस्य विभक्त्युदात्तत्वस्य 'नृ चान्यतरस्याम्' इति प्रतिषेधः । नारिभ्यः । 'नृनरयोर्वृद्धिश्च' (पा. सू. ४. १. ७३ ग.) इति शार्ङ्गरवादिषु पाठात् ङीन्प्रत्ययः । नित्त्वादाद्युदात्तः । गवे । 'न गोश्वन्सावर्व°' इति विभक्त्युदात्तस्य प्रतिषेधः ॥

अस्मे सोम श्रियमधि नि धेहि शतस्य नृणाम् । महि श्रवस्तुविनृम्णम् ॥७॥

अस्मे इति । सोम । श्रियम् । अधि । नि । धेहि । शतस्य । नृणाम् । महि । श्रवः । तुविऽनृम्णम् ॥७॥

हे vसोम देव vनृणां पुरुषाणां vशतस्य पर्याप्तां vश्रियम् vअस्मे अस्मासु vअधि vनि vधेहि आधिक्येन स्थापय । तथा vमहि महत् vतुविनृम्णं प्रभूतबलयुक्तं vश्रवः अन्नम् अधि नि धेहि ॥ अस्मे । 'सुपां सुलुक्°' इति सप्तम्याः शेआदेशः । नृणाम् । 'नृ च' (पा. सू. ६. ४. ६) इति दीर्घप्रतिषेधः । 'नामन्यतरस्याम्' इति नाम उदात्तत्वम् । महीत्यादयो गताः ॥

मा नः सोमपरिबाधो मारातयो जुहुरन्त । आ न इन्दो वाजे भज ॥ ८ ॥

मा । नः । सोमऽपरिबाधः । मा । अरातयः । जुहुरन्त । आ । नः । इन्दो इति । वाजे । भज ॥८॥

vसोमपरिबाधः सोमस्य परितो बाधका यागरहिताः vनः अस्मान् vमा vजुहुरन्त मा हिंसन्तु । तथा vअरातयः शत्रवः vमा जुहुरन्त । हे vइन्दो सोम vवाजे बलविषयेऽन्नविषये वा vनः अस्मान् vआ vभज सर्वतः सेवस्व ॥ सोमपरिबाधः । सोमं परिबाधन्ते ये ते तादृशाः । 'क्विप् च' इति क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वम् । अरातयः । 'रा दाने' । 'कृत्यल्युटो बहुलम्' इति बहुलवचनात् कर्तरि क्तिन् । यद्वा । 'क्तिच्क्तौ च संज्ञायाम्' इति क्तिच् । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । जुहुरन्त । 'हृ प्रसह्यकरणे' । व्यत्ययेनात्मनेपदम् । लङि जुहोत्यादित्वात् श्लुः । 'बहुलं छन्दसि' (पा. सू. ७. १. १०३) इति बहुलवचनात् इकारस्यापि ? उत्वम् । द्विर्भावहलादिशेषौ । 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति वचनात् 'अदभ्यस्तात्' (पा. सू. ७. १. ४) इति झादेशाभावे सति 'झोऽन्तः' इति अन्तादेशः । 'न माङ्योगे' इति अडभावः ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यास्ते प्रजा अमृतस्य परस्मिन्धामन्नृतस्य ।
मूर्धा नाभा सोम वेन आभूषन्तीः सोम वेदः ॥ ९ ॥

याः । ते । प्रऽजाः । अमृतस्य । परस्मिन् । धामन् । ऋतस्य ।
मूर्धा । नाभा । सोम । वेनः । आऽभूषन्तीः । सोम । वेदः ॥ ९ ॥

हे vसोम vते तव संबन्धिन्यः vयाः vप्रजाः सन्ति स्तोत्रं वा कुर्वन्ति ताः प्रजाः vमूर्धा शिरःस्थानीयस्त्वं vनाभा संनहनयुक्ते यज्ञगृहे vवेनः कामयस्व । कीदृशस्य ते । vअमृतस्य मरणरहितस्य vपरस्मिन्धामन्नृतस्य उत्तमे स्थाने प्राप्तस्य । हे vसोम vआभूषन्तीः सर्वतस्त्वामलंकुर्वन्तीः प्रजाः vवेदः जानीहि ॥ धामन् । 'सुपां सुलुक्०' इति सप्तम्या लुक् । नाभा । 'णह बन्धने' । 'नहो भश्च' (उ. सू. ४. ५६५) इति कर्मणि इञ्प्रत्ययः । ञित्त्वादाद्युदात्तत्वम् । 'सुपां सुलुक्०' इति सप्तम्या डादेशः । वेनः । 'वेनतिः कान्तिकर्मा' (नि. २.६.४) । लेटि सिपि अडागमः । 'तिङ्ङतिङः' इति निघातः । आभूषन्तीः । 'भूष अलंकारे' । भौवादिकः । शपः पित्त्वादनुदात्तत्वम्, शतुश्च लसार्वधातुकस्वरेण । धातुस्वरेण[1] आद्युदात्तत्वम् । समासे कृदुत्तरपदप्रकृतिस्वरत्वम् । वेदः । 'विद ज्ञाने' । लेटि सिपि अडागमः ॥ ॥ २७ ॥ ॥ ८ ॥

नवमेऽनुवाके सप्त सूक्तानि । तत्र 'अग्ने विवस्वत्' इति चतुर्दशर्चं प्रथमं सूक्तम् । अत्रानुक्रमणिका—'अग्ने षळूना प्रस्कण्वः काण्व आग्नेयं तु प्रागाथमाद्यो द्वृचोऽभ्युषसां च' इति । कण्वपुत्रः प्रस्कण्व ऋषिः । अत्र द्वितीयाचतुर्थ्याद्या युजः सतोबृहत्यः । प्रथमातृतीयाद्या अयुजो बृहत्यः । कृत्स्नं सूक्तमाग्नेयमुत्तरं च । आद्ये द्वे अश्विदेवताके उषोदेवताके च । प्रातरनुवाके आग्नेये क्रतौ बार्हते छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । 'अथैतस्या रात्रेः' इति खण्डे सूत्रितम्—'अग्ने विवस्वत्सखायस्त्वा' (आश्व. श्रौ. ४. १३) इति । वाजपेये आग्निमारुते आद्यः प्रगाथोऽनुरूपः । 'वाजपेयेन' इति खण्डे सूत्रितं—'चित्रवतीषु चेत् स्तुवीरंस्त्वं नश्चित्र ऊत्याग्ने विवस्वदुषस इत्यग्निष्टोमसाम्नः स्तोत्रियानुरूपौ' (आश्व. श्रौ. ९. ९) इति । पर्यायव्युष्टौ आश्विनशस्त्रस्यायमेव प्रगाथः स्तोत्रियः । 'यदि पर्यायानभिव्युच्छेत्' इति खण्डे 'आश्विनायकस्तोत्रियोऽग्ने विवस्वदुषसः' (आश्व. श्रौ. ६. ६) इति सूत्रितम् ॥

अग्ने विवस्वदुषसश्चित्रं राधो अमर्त्य ।
आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः ॥ १ ॥

अग्ने । विवस्वत् । उषसः । चित्रम् । राधः । अमर्त्य ।
आ । दाशुषे । जातऽवेदः । वह । त्वम् । अद्य । देवान् । उषःऽबुधः ॥ १ ॥

हे vअग्ने vत्वम् vउषसः उषोदेवतायाः सकाशात् vराधः धनं vदाशुषे हविर्दत्तवते यजमानाय vआ vवह आनीय प्रापय । सोऽग्निर्विशेष्यते । vअमर्त्य मरणरहित vजातवेदः जातानां वेदितः ।

---

१. च-छ-ण-त-न-फ-य-ल-श—'धातुस्वरेण' इति नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तमेतं शब्दं यास्को व्याचष्टे–' जातवेदाः कस्मात्। जातानि वेद जातानि वैनं विदुर्जाते जाते विद्यत इति वा जातवित्तो वा जातधनो जातविद्यो वा जातप्रज्ञानो यत्तज्जातः पशूनविन्दतेति तज्जातवेदसो जातवेदस्त्वमिति ब्राह्मणम्। तस्मात्सर्वानृतून्पशवोऽग्निमभिसर्पन्तीति च ' ( निरु. ७. १९ ) इति। कीदृशं राधः। vविवस्वत् विशिष्टनिवासोपेतं vचित्रं नानाविधम्। किंच vअद्य अस्मिन् दिने vउषर्बुधः उषःकाले प्रबुद्धान् vदेवान् आ वह ॥ विवस्वत्। विवासनं विवः तद्युक्तम्। ' वस निवासे '। विपूर्वात् अन्तर्भावितण्यर्थात् संपदादिलक्षणो भावे क्विप्। ' तदस्यास्ति° ' इति मतुप्। ' मादुपधायाः ' इति वत्वम्। ' तसौ मत्वर्थे ' इति भत्वेन पदत्वाभावात् रुत्वाद्यभावः। वृषादित्वादाद्युदात्तत्वम्। राधः। ' राध साध संसिद्धौ '। राध्नोत्यनेनेति राधो धनम्। करणेऽसुन्। नित्त्वादाद्युदात्तत्वम्। दाशुषे। ' दाश्र दाने '। ' दाश्वान् साह्वान्° ' इति क्वसुप्रत्ययान्तो निपातितः। चतुर्थ्येकवचने ' वसोः संप्रसारणम् ' इति संप्रसारणम्। ' शासिवसि° ' इति षत्वम्। जातवेदः। जातानि वेत्तीति जातवेदाः। ' गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च ' इति असुन्। यद्वा। वेद इति धननाम। जातं धनं यस्य स तादृशः। आमन्त्रितनिघातः। वह। ' व्यचोऽतस्तिङ् ' इति संहितायां दीर्घत्वम्। देवान्। ' दीर्घादटि समानपादे ' इति संहितायां नकारस्य रुत्वम्। ' आतोऽटि नित्यम् ' इति सानुनासिक आकारः। उषर्बुधः। उषसि बुध्यन्ते इत्युषर्बुधः। ' बुध अवगमने '। ' क्विप् च ' इति क्विप्। रोः उत्वाभावश्छान्दसः। कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

जुष्टो हि दूतो असि हव्यवाहनोऽग्ने रथीरध्वराणाम्।
सजूरश्विभ्यामुषसा सुवीर्यमस्मे धेहि श्रवो बृहत् ॥ २ ॥

जुष्टः। हि। दूतः। असि। हव्यऽवाहनः। अग्ने। रथीः। अध्वराणाम्।
सऽजूः। अश्विऽभ्याम्। उषसा। सुऽवीर्यम्। अस्मे इति। धेहि। श्रवः। बृहत् ॥ २ ॥

हे vअग्ने त्वं जुष्टत्वादिविशेषगुणयुक्तः vअसि। vजुष्टः सेवितः vदूतः देवानां वार्ताहारः vहव्यवाहनः हविषो वोढा vअध्वराणां क्रतूनां vरथीः रथस्थानीयः। तथा च मन्त्रान्तरं ब्राह्मणेनैव[1] व्याख्यातं– ' रथीरध्वराणामित्याहैष हि देवरथः ' ( तै. सं. २. ५. ९. २ ) इति। ब्राह्मणान्तरं च–' रथीरध्वराणामित्याह रथो ह वा एष भूतो देवेभ्यो हव्यं वहति ' इति। तादृशस्त्वम् vअश्विभ्यां देवताभ्यां vउषसा देवतया च vसजूः सहितो भूत्वा vसुवीर्यं शोभनवीर्योपेतं vबृहत् प्रभूतं vश्रवः अन्नम् vअस्मे vधेहि अस्मासु प्रक्षिप ॥ जुष्टः। ' जुषी प्रीतिसेवनयोः '। ' निष्यं मन्त्रे° ' ( पा.सू.६. १.२१० ) इत्याद्युदात्तत्वम्। असि। सिपि ' तासस्त्योर्लोपः ' ( पा. सू. ७. ४. ५० ) इति सलोपः। ' हि च ' इति निघातप्रतिषेधः। हव्यवाहनः। हव्यं वहतीति हव्यवाहनः। ' हव्येऽनन्तःपादम् ' ( पा. सू. ३. २. ६६ ) इति ण्युट्। योरनादेशः। जित्त्वादाद्युदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वम्। अग्ने। पादादित्वादाष्टमिकनिघाताभावः। रथीः। रथशब्दात् स्वार्थिक ईकारप्रत्ययः। अध्वराणाम्। ध्वरो नास्येष्विति बहुव्रीहौ ' नञ्सुभ्याम्° ' इत्युत्तरपदान्तोदात्तत्वम्। सुवीर्यम्। ' वीरवीर्यौ च ' इत्युत्तरपदाद्युदात्तत्वम्। अस्मे। ' सुपां सुलुक्° ' इति सप्तम्याः शेआदेशः ॥

---

१. च-फ–ब्राह्मणेनैवम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अद्या दूतं वृणीमहे वसुमग्निं पुरुप्रियम् ।
धूमकेतुं भाऋजीकं व्युष्टिषु यज्ञानामध्वरश्रियम् ॥ ३ ॥

अद्य । दूतम् । वृणीमहे । वसुम् । अग्निम् । पुरुऽप्रियम् ।
धूमऽकेतुम् । भाःऽऋजीकम् । विऽउष्टिषु । यज्ञानाम् । अध्वरऽश्रियम् ॥ ३ ॥

vअद्य अस्मिन् दिने vअग्निं vवृणीमहे प्रार्थयामहे । कीदृशम् । vदूतं वार्ताहारं vवसुं निवासहेतुं vपुरुप्रियं बहूनां प्रियं vधूमकेतुं धूमरूपध्वजयुक्तं vभाऋजीकं प्रसिद्धभासालंकृतम् । ' भाऋजीकः प्रसिद्धभाः ' ( निरु. ६.४ ) इति यास्कवचनम् । vव्युष्टिषु उषःकालेषु vयज्ञानां यजमानानाम् vअध्वरश्रियं यागसेविनम् ॥ अद्य । ' निपातस्य च ' इति दीर्घत्वम् । पुरूणां प्रियः पुरुप्रियः । ' समासस्य ' इत्यन्तोदात्तत्वम् । धूमकेतुम् । ' इषियुधीन्धि° ' ( उ. सू. १. १४२ ) इत्यादिना धूमशब्दो मक्प्रत्ययान्तः अन्तोदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । भाऋजीकम् । ' ऋज गतिस्थानार्जनोपार्जनेषु ' । ' ऋजेश्च ' ( उ. सू. ४. ४६२ ) इति ईकन्प्रत्ययः । कित्त्वस्यानुवर्तनात् गुणाभावः । भासः प्रकाशस्य ऋजीकः प्रार्जयिता । ' आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम् ' इति पूर्वपदाद्युदात्तत्वम् । यद्वा । भासोऽर्जनं यस्मिन् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । व्युष्टिषु । ' उछी विवासे ' । विवासो वर्जनम् । विशेषेणोच्छ्यन्ते तमसा वर्ज्यन्ते इति व्युष्टयः उषःकालाः । कर्मणि क्तिन् । ' तितुत्र° ' इत्यादिना इट्प्रतिषेधः । व्रश्चादिना षत्वे ष्टुत्वम् । ' तादौ च° ' इति पूर्वपदप्रकृतिस्वरत्वम् । यणादेशे ' उदात्तस्वरितयोर्यणः° ' इति परस्यानुदात्तस्य स्वरितत्वम् । अध्वरश्रियम् । अध्वरं श्रयते इत्यध्वरश्रीः । ' क्विब्वचि° ' ( उ. सू. २. २१५ ) इत्यादिना क्विप्प्रत्ययः; तस्सन्नियोगेन संप्रसारणाभावो दीर्घश्च । द्वितीयैकवचने ' अचि श्नुधातु° ' इत्यादिना इयङादेशः ॥

श्रेष्ठं यविष्ठमतिथिं स्वाहुतं जुष्टं जनाय दाशुषे ।
देवाँ अच्छा यातवे जातवेदसमग्निमीळे व्युष्टिषु ॥ ४ ॥

श्रेष्ठम् । यविष्ठम् । अतिथिम् । सुऽआहुतम् । जुष्टम् । जनाय । दाशुषे ।
देवान् । अच्छ । यातवे । जातऽवेदसम् । अग्निम् । ईळे । विऽउष्टिषु ॥ ४ ॥

vव्युष्टिषु उषःकालेषु vदेवान् इतरान् सर्वदेवान् vअच्छ आभिमुख्येन vयातवे गन्तुम् vअग्निं देवम् vईळे स्तौमि । कीदृशम् । vश्रेष्ठम् अतिशयेन प्रशस्तं vयविष्ठं युवतमम् vअतिथिं सततगमनक्षमं vस्वाहुतं सुष्टु आ समन्तात् होमाधिकरणं vदाशुषे हविर्दत्तवते vजनाय यजमानाय vजुष्टं प्रीतं vजातवेदसं जातानां वेदितारम् ॥ यविष्ठम् । युवशब्दात् इष्ठनि ' स्थूलदूर° ' इत्यादिना यणादेः परस्य लोपः । पूर्वस्य च गुणः । अवादेशः । नित्त्वादाद्युदात्तत्वम् । अतिथिम् । ' अत सातत्यगमने ' । ' ऋतन्यञ्जि° ' ( उ. सू. ४. ४४२ ) इत्यादिना इथिन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । स्वाहुतम् । ' हु दानादनयोः ' । आहूयतेऽस्मिन्निति आहूतः । ' सुः पूजायाम् ' ( पा. सू. १. ४. ९४ ) इति सुशब्दस्य कर्मप्रवचनीयसंज्ञायां ' स्वती पूजायाम् ' ( पा. म. २. २. १८. ४ ) इति समासः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । न च ' गतिकारकोपपदात्कृत् ' इति गतेः प्रकृतिस्वरत्वम्, अस्य सुशब्दस्य गतिसंज्ञाया बाधितत्वात् ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्तविष्यामि त्वामहं विश्वस्यामृत भोजन ।
अग्ने त्रातारममृतं मियेध्य यजिष्ठं हव्यवाहन ॥ ५ ॥

स्तविष्यामि । त्वाम् । अहम् । विश्वस्य । अमृत । भोजन ।
अग्ने । त्रातारम् । अमृतम् । मियेध्य । यजिष्ठम् । हव्यऽवाहन ॥ ५ ॥

हे Vअमृत मरणरहित Vविश्वस्य Vभोजन कृत्स्नस्य जगतः पालक Vहव्यवाहन हविषो वोढः Vमियेध्य यज्ञार्ह एवंविध हे Vअग्ने विश्वस्य Vत्रातारं सर्वस्य जगतो रक्षकम् Vअमृतं मरणरहितं Vयजिष्ठम् अतिशयेन यष्टारं Vत्वामहम् अनुष्ठाता Vस्तविष्यामि स्तुतिं करिष्यामि ॥ स्तविष्यामि । 'ष्टुञ् स्तुतौ' । व्यत्ययेन इडागमः । आगमानुदात्तत्वे प्रत्ययस्वरः । भोजन । कर्मफलं भोजयतीति भोजनः । नन्द्यादिलक्षणो ल्युः । त्रातारम् । 'त्रैङ् पालने' । 'आदेचः०' इति आत्वम् । तृचि 'एकाच उपदेशे०' इति इट्प्रतिषेधः । अमृतम् । 'नञो जरमरमित्रमृताः' इत्युत्तरपदाद्युदात्तत्वम् । मियेध्य । इयागमश्छान्दसः । यजिष्ठम् । यष्टृशब्दात् 'तुश्छन्दसि' इति इष्टन्प्रत्ययः । 'तुरिष्टेमेयःसु' इति तृलोपः ॥ ॥२८॥

सुशंसो बोधि गृणते यविष्ठ्य मधुजिह्वः स्वाहुतः ।
प्रस्कण्वस्य प्रतिरन्नायुर्जीवसे नमस्या दैव्यं जनम् ॥ ६ ॥

सुऽशंसः । बोधि । गृणते । यविष्ठ्य । मधुऽजिह्वः । सुऽआहुतः ।
प्रस्कण्वस्य । प्रऽतिरन् । आयुः । जीवसे । नमस्य । दैव्यम् । जनम् ॥ ६ ॥

हे Vयविष्ठ्य युवतमाग्ने त्वं Vगृणते स्तुवते यजमानार्थं Vसुशंसः सुष्टु शंसनीयः Vमधुजिह्वः मादयितृज्वालः Vस्वाहुतः सुष्टु आभिमुख्येन हुतः सन् Vबोधि अस्मदभिप्रायं बुध्यस्व । किंच Vप्रस्कण्वस्य एतन्नामकस्य कण्वपुत्रस्य महर्षेः । 'प्रस्कण्वः कण्वस्य पुत्रः कण्वप्रभवः' (निरु. ३. १७) इति यास्कवचनात् । तस्य Vजीवसे जीवनार्थम् Vआयुः Vप्रतिरन् प्रकर्षेण वर्धयन् Vदैव्यं देवसंबन्धिनं Vजनं Vनमस्य पूजय ॥ सुशंसः । 'शंसु स्तुतौ' । भावे घञ् । शोभनः शंसो यस्यासौ सुशंसः । 'आद्युदात्तं द्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् । बोधि । 'बुध अवगमने' । लोटो हिः । 'बहुलं छन्दसि' इति विकरणस्य लुक् । 'हुझल्भ्यो हेर्धिः' इति हेर्धिरादेशः । 'वा छन्दसि' इति अपित्त्वस्य विकल्पितत्वात् लघूपधगुणः । धातोरन्त्यलोपश्छान्दसः । गृणते । 'गृ शब्दे' । लटः शतृ । 'क्र्यादिभ्यः श्ना' । 'श्नाभ्यस्तयोरातः' इति आकारलोपः । 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम् । यविष्ठ्य । गतम् । प्रस्कण्वस्य । प्रभूतिरुत्पत्तिः कण्वाद्यस्य स प्रस्कण्वः । 'प्रस्कण्वहरिश्चन्द्रावृषी' (पा. सू. ६. १. १५३) इति सुडागमो निपातितः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । प्रतिरन् । प्रपूर्वस्तिरतिर्वर्धनार्थः । नमस्य । नमोवरिवश्चित्रङः क्यच्' (पा. सू. ३. १. १९) इति पूजार्थे क्यच् । प्रत्ययस्वरः । 'अन्येषामपि दृश्यते' इति संहितायां दीर्घत्वम् । दैव्यम् । 'देवाद्यञञौ' (पा. सू. ४. १. ८५. ३) इति तस्येदमित्यर्थे प्राग्दीव्यतीयो यञ्प्रत्ययः ॥



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

होतारं विश्ववेदसं सं हि त्वा विश इन्धते ।
स आ वह पुरुहूत प्रचेतसोऽग्ने देवाँ इह द्रवत् ॥ ७ ॥

होतारम् । विश्वऽवेदसम् । सम् । हि । त्वा । विशः । इन्धते ।
सः । आ । वह । पुरुऽहूत । प्रऽचेतसः । अग्ने । देवान् । इह । द्रवत् ॥ ७ ॥

Vहोतारं होमनिष्पादकं Vविश्ववेदसं सर्वज्ञं त्वामग्निं Vविशः प्रजाः Vसम् Vइन्धते Vहि सम्यग्दीपयन्ति खलु । हे Vपुरुहूत बहुभिराहूत Vअग्ने Vसः त्वं Vप्रचेतसः प्रकृष्टज्ञानयुक्तान् Vदेवान् Vइह कर्मणि Vद्रवत् क्षिप्रम् Vआ Vवह आभिमुख्येन प्रापय । द्रवत् इति क्षिप्रनाम, 'द्रवत् ओषम्' ( नि. २. १५. ३ ) इति तन्नामसु पाठात् ॥ विश्ववेदसम् । विश्वानि वेत्तीति विश्ववेदाः । असुन् । मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् । यद्वा । वेद इति धननाम । विश्वानि वेदांसि यस्यासौ विश्ववेदाः । 'बहुव्रीहौ विश्वं संज्ञायाम्' इति पूर्वपदान्तोदात्तत्वम् । इन्धते । 'जिइन्धी दीप्तौ' । 'श्नसोरल्लोपः' इति अकारलोपः । 'श्नान्नलोपः' । प्रत्ययस्वरः । 'हि च' इति निघातप्रतिषेधः ॥

सवितारमुषसमश्विना भगमग्निं व्युष्टिषु क्षपः ।
कण्वासस्त्वा सुतसोमास इन्धते हव्यवाहं स्वध्वर ॥ ८ ॥

सवितारम् । उषसम् । अश्विना । भगम् । अग्निम् । विऽउष्टिषु । क्षपः ।
कण्वासः । त्वा । सुतऽसोमासः । इन्धते । हव्यऽवाहम् । सुऽअध्वर ॥ ८ ॥

हे Vस्वध्वर शोभनयागयुक्ताग्ने Vव्युष्टिषु उषःकालेषु सवित्रादीन् देवान् आवह इत्यनुवर्तते । स्वध्वर इत्याहवनीयाग्नेः संबोधनम् । अग्निम् इति हविष उद्देश्यं देवतान्तरमुच्यते । Vसुतसोमासः अभिषुतसोमाः Vकण्वासः मेधाविन ऋत्विजः Vहव्यवाहं हविषः प्रापकमाहवनीयं त्वाम् Vइन्धते दीपयन्ति ॥ व्युष्टिषु । 'उछी विवासे' । विवासो वर्जनम् । व्युच्छ्यते तमसा वर्ज्यते इति व्युष्टिः उषःकालः । कर्मणि क्तिनि 'तादौ च निति०' इति गतेः प्रकृतिस्वरत्वम् । संहितायाम् 'उदात्तस्वरितयोर्यणः०' इति परस्यानुदात्तस्य स्वरितत्वम् । क्षपः । क्षपा इति रात्रिनाम । ङसि 'आतो धातोः' ( पा. सू. ६. ४. १४० ) इत्यत्र आत इति योगविभागात् आकारलोपः । सुतसोमासः । सुतः सोमो यैः । 'निष्ठा' (पा. सू. २. २. ३६) इति पूर्वनिपातः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । हव्यवाहम् । हव्यं वहतीति हव्यवाट् । 'वहश्च' इति ण्विप्रत्ययः ॥

पतिर्ह्यध्वराणामग्ने दूतो विशामसि ।
उषर्बुध आ वह सोमपीतये देवाँ अद्य स्वर्दृशः ॥ ९ ॥

पतिः । हि । अध्वराणाम् । अग्ने । दूतः । विशाम् । असि ।
उषःऽबुधः । आ । वह । सोमऽपीतये । देवान् । अद्य । स्वःऽदृशः ॥ ९ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे Vअग्ने Vविशां प्रजानां संबन्धिनो येऽध्वरा यागास्तेषां Vपतिः पालकस्त्वं Vदूतः Vअसि Vहि देवानां वार्ताहारो भवसि खलु । Vउपर्बुधः उपःकाले प्रबुद्धान् Vस्वर्दृशः सूर्यदर्शिनो Vदेवान् Vअद्य अस्मिन् दिने Vसोमपीतये सोमपानार्थम् Vआ Vवह आभिमुख्येन प्रापय ॥ असि । ' हि च ' इति निघातप्रतिषेधः । सोमपीतये । ' पा पाने ' । ' स्थागापापचो भावे ' (पा. सू. ३. ३. ९) इति भावे क्तिन् । ' घुमास्था° ' इति ईत्वम् । सोमस्य पीतिः । दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् । स्वर्दृशः । सुष्ठु अर्ति गच्छतीति स्वरादित्यः । अर्तेः ' अन्येभ्योऽपि दृश्यन्ते ' इति विच् । तं पश्यन्तीति स्वर्दृशः । ' क्विप् च ' इति क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

अग्ने पूर्वा अनूषसो विभावसो दीदेथ विश्वदर्शतः ।
असि ग्रामेष्वविता पुरोहितोऽसि यज्ञेषु मानुषः ॥ १० ॥

अग्ने । पूर्वाः । अनु । उषसः । विभावसो इति विभाऽवसो । दीदेथ । विश्वऽदर्शतः ।
असि । ग्रामेषु । अविता । पुरःऽहितः । असि । यज्ञेषु । मानुषः ॥ १० ॥

हे Vविभावसो विशिष्टप्रकाशनरूपधनवन् Vअग्ने Vविश्वदर्शतः सर्वैर्दर्शनीयस्त्वं Vपूर्वाः Vउषसः Vअनु अतीतानुषःकालाननुलक्ष्य Vदीदेथ दीप्तवानसि । तादृशस्त्वं Vग्रामेषु जननिवासस्थानेषु Vअविता Vअसि रक्षको भवसि । Vयज्ञेषु अनुष्ठेयकर्मसु Vपुरोहितः वेदैः पूर्वस्यां दिश्यवस्थितः Vमानुषः Vअसि ऋत्विग्यजमानानां मनुष्याणां हितोऽसि ॥ दीदेथ । दीदेतिश्छान्दसो दीप्तिकर्मा । आगमानुशासनस्य अनित्यत्वात् इडभावः । ' द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम् ' ( का. ६. १. ८. १ ) इति वचनात् द्विर्वचनाभावः । विश्वदर्शतः विश्वैर्दर्शनीयः । ' भृमृदृशि° ' इत्यादिना दृशेः अतच् । मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् ( पा. सू. ६. २. १०६. २ ) । पुरोहितः । ' पूर्वाधरावराणामसि पुरधवश्चैषाम् ' ( पा. सू. ५. ३. ३९ ) इति असिप्रत्ययान्तः पुरस्शब्दः । ' तद्धितश्चासर्वविभक्तिः ' ( पा. सू. १. १. ३८) इति अव्ययत्वात् ' पुरोऽव्ययम् ' ( पा. सू. १. ४. ६७ ) इति गतिसंज्ञायां सत्यां गतिसमासे ' गतिरनन्तरः ' इति पूर्वपदप्रकृतिस्वरत्वम् ॥ ॥ २९ ॥

नि त्वा यज्ञस्य साधनमग्ने होतारमृत्विजम् ।
मनुष्वदेव धीमहि प्रचेतसं जीरं दूतममर्त्यम् ॥ ११ ॥

नि । त्वा । यज्ञस्य । साधनम् । अग्ने । होतारम् । ऋत्विजम् ।
मनुष्वत् । देव । धीमहि । प्रऽचेतसम् । जीरम् । दूतम् । अमर्त्यम् ॥ ११ ॥

हे Vअग्ने Vदेव Vमनुष्वत् यथा मनुर्यागदेशे निदधाति तद्वद्वयं त्वां Vनि Vधीमहि अत्र स्थापयामः । कीदृशम् । Vयज्ञस्य Vसाधनं यज्ञनिष्पादकं Vहोतारमृत्विजं ऋतौ वसन्तादिके यष्टारं Vप्रचेतसं प्रकृष्टज्ञानयुक्तं Vजीरं शत्रूणां वयोहानिकरं Vदूतं देवानां दूतस्थानीयम् Vअमर्त्यं मरणरहितम् ॥ मनुष्वत् औणादिकोसिप्रत्ययान्तो मनुस्शब्दः । ' तेन तुल्यं क्रिया चेद्वतिः ' ( पा. सू. ५. १. ११५ ) इति वतिप्रत्ययः । अयस्मयादित्वेन भत्वात् रुत्वाद्यभावः । धीमहि । ' डुधाञ् धारणपोषणयोः ' । लिङि

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अभ्यासलोपश्छान्दसः। जीरम्। जु इति सौत्रो धातुः। 'जोरी च' ( उ. सू. २. १८१ ) इति रक्प्रत्ययः। कात्यायनस्त्वाह–रकि ज्यः संप्रसारणे जीरेति ( पा. सू. १. १. ४. ६ )॥

यद्देवानां मित्रमहः पुरोहितोऽन्तरो यासि दूत्यम्।
सिन्धोरिव प्रस्वनितास ऊर्मयोऽग्नेर्भ्राजन्ते अर्चयः॥ १२॥

यत्। देवानाम्। मित्रऽमहः। पुरःऽहितः। अन्तरः। यासि। दूत्यम्।
सिन्धोःऽइव। प्रऽस्वनितासः। ऊर्मयः। अग्नेः। भ्राजन्ते। अर्चयः॥ १२॥

हे [v]मित्रमहः मित्राणां पूजकाग्ने [v]यत् यदा [v]पुरोहितः त्वं वेदेः पूर्वस्यां दिशि स्थापितः [v]अन्तरः देवयजनमध्ये वर्तमानः सन् [v]देवानां [v]दूत्यं दूतकर्म [v]यासि प्राप्नोषि, तदानीम् [v]अग्नेः तव [v]अर्चयः दीप्तयः [v]भ्राजन्ते दीप्यन्ते। तत्र दृष्टान्तः। [v]सिन्धोरिव। यथा समुद्रस्य [v]प्रस्वनितासः प्रकृष्टध्वनियुक्ताः [v]ऊर्मयः तरङ्गा भ्राजन्ते तद्वत्॥ मित्रमहः। 'मह पूजायाम्'। मित्रैर्ऋत्विग्भिर्मह्यते पूज्यते इति मित्रमहाः। औणादिकोऽसुन्। यासि। यद्वृत्तयोगादनिघातः। दूत्यम्। दूतस्य कर्म दूत्यम्। 'दूतस्य भागकर्मणी' (पा. सू. ४. ४. १२०) इति यत्प्रत्ययः। 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति वचनात् 'यतोऽनावः' इत्याद्युदात्तत्वाभावे 'तित्स्वरितम्' इति स्वरितत्वम्। प्रस्वनितासः। 'स्यमु स्वन ध्वन शब्दे'। भावे निष्ठा। प्रकृष्टं स्वनितं येषां ते प्रस्वनिताः। असुगागमः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। ऊर्मयः। 'अर्तेरूच्च' ( उ. सू. ४. ४८४ ) इति मिप्रत्ययः॥

श्रुधि श्रुत्कर्ण वह्निभिर्देवैरग्ने सयावभिः।
आ सीदन्तु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरम्॥ १३॥

श्रुधि। श्रुत्ऽकर्ण। वह्निऽभिः। देवैः। अग्ने। सयावऽभिः।
आ। सीदन्तु। बर्हिषि। मित्रः। अर्यमा। प्रातःऽयावानः। अध्वरम्॥ १३॥

हे [v]श्रुत्कर्ण श्रवणसमर्थाभ्यां कर्णाभ्यां युक्त [v]अग्ने [v]श्रुधि अस्मदीयं वचनं शृणु। यः [v]मित्रः देवो यश्च [v]अर्यमा ये चान्ये [v]प्रातर्यावाणः प्रातःकाले[1] देवयजनं गच्छन्तो देवास्तैः सर्वैः [v]सयावभिः आहवनीयाग्निना स्वया समानगतिभिरन्यैः [v]वह्निभिर्देवैः सह [v]अध्वरं क्रतुमुद्दिश्य [v]बर्हिषि दर्भे [v]आ [v]सीदन्तु उपविशन्तु॥ श्रुधि। 'श्रु श्रवणे'। 'श्रुशृणु०' इत्यादिना हेर्धिरादेशः। 'बहुलं छन्दसि' इति विकरणस्य लुक्। श्रुत्कर्ण। शृणोतीति श्रुत्। क्विप तुगागमः। श्रुतौ कर्णौ यस्यासौ श्रुत्कर्णः। वह्निभिः। 'वह प्रापणे'। 'वहिश्रियुश्रुग्लाहात्वरिभ्यो नित्' इति निप्रत्ययः। नित्त्वादाद्युदात्तत्वम्। सयावभिः। समानं यान्तीति सयावानः। 'या प्रापणे'। 'आतो मनिन्०' इति वनिप्। कृदुत्तरपदप्रकृतिस्वरत्वम्। प्रातर्यावाणः। पूर्ववत् 'प्रातिपदिकान्तनुम्विभक्तिषु च' ( पा. सू. ८. ४. ११ ) इति णत्वम्॥

---

१. च-छ-न-फ-श-स–प्रातः प्रातःकाले।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

शृण्वन्तु स्तोमं मरुतः सुदानवोऽग्निजिह्वा ऋतावृधः ।
पिबतु सोमं वरुणो धृतव्रतोऽश्विभ्यामुषसा सजूः ॥ १४ ॥

शृण्वन्तु । स्तोमम् । मरुतः । सुऽदानवः । अग्निऽजिह्वाः । ऋतऽवृधः ।
पिबतु । सोमम् । वरुणः । धृतऽव्रतः । अश्विऽभ्याम् । उषसा । सऽजूः ॥ १४ ॥

[v]मरुतः देवाः [v]स्तोमम् अस्मदीयं स्तोत्रं [v]शृण्वन्तु । कीदृशाः । [v]सुदानवः सुष्ठु फलस्य दातारः [v]अग्निजिह्वाः अग्निर्जिह्वास्थानीयो मुख्यो येषु मरुत्सु तादृशाः [v]ऋतावृधः सत्यस्य यज्ञस्य वा वर्धकाः । तथा [v]धृतव्रतः गृहीतकर्मा [v]वरुणः देवः [v]अश्विभ्यां देवाभ्याम् [v]उषसा देवतया [v]सजूः सह [v]सोमं [v]पिबतु ॥ सुदानवः । ' डुदाञ् दाने ' । ' दाभाभ्यां नुः ' ( उ. सू. ३. ३१२ ) इति भावे नुप्रत्ययः । दानुशब्द आद्युदात्तः । शोभनं दानु येषाम् । ' आद्युदात्तं द्यच्छन्दसि ' इत्युत्तरपदाद्युदात्तत्वम् । अग्निजिह्वाः । अग्नेर्जिह्वायामवस्थिताः हविर्भाज इत्यर्थः । तात्स्थ्यात् ताच्छब्द्यम् । अग्निर्जिह्वास्थानीयो येषां ते । छान्दसमन्तोदात्तत्वम् । ऋतावृधः । ऋतस्य सत्यस्य यज्ञस्य वा वर्धयितारः । वृधेः अन्तर्भावितण्यर्थात् ' क्विप् च ' इति क्विप् । ' अन्येषामपि दृश्यते ' इति पूर्वपदस्य दीर्घत्वम् ॥ ॥ ३० ॥

' त्वमग्ने वसून् ' इति दशर्चं द्वितीयं सूक्तम् । अत्रानुक्रमणिका–' त्वमग्ने दशानुष्टुभमर्धर्चोऽन्त्यो दैवः ' इति । प्रस्कण्व ऋषिः । आनुष्टुभं छन्दः । इदं सूक्तमग्निदेवताकं, पूर्वत्र ' आग्नेयं तु ' इत्युक्तत्वात् । ' अयं सोमः ' इत्यर्धर्चो देवदेवत्यः । प्रातरनुवाके आग्नेये क्रतौ आश्विनशस्त्रे चैतत्सूक्तम् । ' अथैतस्या रात्रेः ' इति खण्डे सूत्रितं—' त्वमग्ने वसूंस्त्वं हि क्षैतवत् ' ( आश्व. श्रौ. ४. १३ ) इति । तथा गर्गत्रिरात्रस्यान्त्येऽहनि एतत्सूक्तमाज्यशस्त्रम् । ' आङ्गिरसं स्वर्गकामः ' इति खण्डे सूत्रितं–' वारवन्तीयमुत्तमे त्वमग्ने वसूँरिति चाज्यम् ' ( आश्व. श्रौ. १०. २ ) इति ॥

त्वमग्ने वसूँरिह रुद्राँ आदित्याँ उत ।
यजा स्वध्वरं जनं मनुजातं घृतप्रुषम् ॥ १ ॥

त्वम् । अग्ने । वसून् । इह । रुद्रान् । आदित्यान् । उत ।
यज । सुऽअध्वरम् । जनम् । मनुऽजातम् । घृतऽप्रुषम् ॥ १ ॥

हे [v]अग्ने [v]त्वम् [v]इह कर्मणि वस्वादीन् [v]यज[1] । [v]उत अपि च [v]जनम् अन्यमपि देवतारूपं प्राणिनं यज । कीदृशम् । [v]स्वध्वरं शोभनयागयुक्तं [v]मनुजातं मनुना प्रजापतिनोत्पादितं [v]घृतप्रुषम् उदकस्य सेक्तारम् ॥ यज । ' द्यचोऽतस्तिङः ' इति संहितायां दीर्घत्वम् । स्वध्वरम् । शोभनोऽध्वरो यस्यासौ स्वध्वरः । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । मनुजातम् । जनेः अन्तर्भावितण्यर्थात् कर्मणि क्तः । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् । घृतप्रुषम् । ' प्रुष प्लुष स्नेहनसेचनपूरणेषु ' । घृतेनोदकेन प्रुष्णाति पूरयतीति घृतप्रुट् । ' क्विप् च ' इति क्विप् ॥

---

१. श–' यज ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

श्रुष्टीवानो हि दाशुषे देवा अग्ने विचेतसः ।
तान्रोहिदश्व गिर्वणस्त्रयस्त्रिंशतमा वह ॥ २ ॥

श्रुष्टीऽवानः । हि । दाशुषे । देवाः । अग्ने । विऽचेतसः ।
तान् । रोहित्ऽअश्व । गिर्वणः । त्रयःऽत्रिंशतम् । आ । वह ॥ २ ॥

हे ᵛअग्ने ᵛविचेतसः विशिष्टप्रज्ञानाः ᵛदेवाः ᵛदाशुषे हविर्दत्तवते यजमानाय ᵛश्रुष्टीवानो ᵛहि । श्रुष्टिः फलस्य दानम् । तद्वाजः खलु । हे ᵛरोहिदश्व रोहिन्नामकैरश्वैरुपेत ᵛगिर्वणः गीर्भिः स्तुतिभिर्वननीयाग्ने । ' गिर्वणा देवो भवति गीर्भिरेनं वनयन्ति ' ( निरु. ६. १४ ) इति यास्कः । ᵛत्रयस्त्रिंशतम् अनया संख्यया संख्यातान् ᵛतान् देवान् ᵛआ ᵛवह इहानय ॥ श्रुष्टीवानः । श्रुष्टिः प्रेरणार्थः । भावे क्तिच्[1] । श्रुष्टिं वनन्ति संभजन्ते इति श्रुष्टीवानः । ' अन्येभ्योऽपि दृश्यन्ते ' इति विच् । छान्दसं दीर्घत्वम् । विचेतसः । विशिष्टं चेतो येषां ते । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । गिर्वणः । गीर्भिर्वननीयो गिर्वणाः । वनतेः असुन् । पूर्वपदस्य ह्रस्वत्वं छान्दसम् । त्रयश्च त्रिंशच्च त्रयस्त्रिंशत् । ' त्रेस्त्रयः ' ( पा. सू. ६. ३. ४८ ) इति त्रिशब्दस्य त्रयसादेशः । ' संख्या ' ( पा. सू. ६. २. ३५ ) इति पूर्वपदप्रकृतिस्वरत्वम् ॥

प्रियमेधवदत्रिवज्जातवेदो विरूपवत् ।
अङ्गिरस्वन्महिव्रत प्रस्कण्वस्य श्रुधी हवम् ॥ ३ ॥

प्रियमेधऽवत् । अत्रिऽवत् । जातऽवेदः । विरूपऽवत् ।
अङ्गिरस्वत् । महिऽव्रत । प्रस्कण्वस्य । श्रुधि । हवम् ॥ ३ ॥

हे ᵛमहिव्रत प्रभूतकर्मन् ᵛजातवेदः अग्ने ᵛप्रस्कण्वस्य कण्वपुत्रस्य महर्षेः ᵛहवम् आह्वानं ᵛश्रुधि शृणु । तत्र चत्वारो दृष्टान्ताः । प्रियमेधात्रिविरूपाङ्गिरोनामका एतेषामाह्वानं यथा शृणोषि तद्वत् । अत्र निरुक्तं–' प्रियमेधः प्रिया अस्य मेधा यथैतेषामृषीणामेवं प्रस्कण्वस्य शृणु ह्वानम् । प्रस्कण्वः कण्वस्य पुत्रः कण्वप्रभवो यथा प्राग्रम् ' इति, ' विरूपो नानारूपो महिव्रतो महाव्रतः ' ( निरु. ३. १७ ) इति च ॥ प्रियमेधवत् प्रियमेधस्येव । ' तत्र तस्येव ' ( पा. सू. ५. १. ११६ ) इति षष्ठ्यर्थे वतिः । एवम् अत्रिवत् इत्यादावपि । प्रस्कण्वादयो गताः ॥

महिकेरव ऊतये प्रियमेधा अहूषत ।
राजन्तमध्वराणामग्निं शुक्रेण शोचिषा ॥ ४ ॥

महिऽकेरवः । ऊतये । प्रियऽमेधाः । अहूषत ।
राजन्तम् । अध्वराणाम् । अग्निम् । शुक्रेण । शोचिषा ॥ ४ ॥

---

१. च-छ-ण-न-फ-य-ल-श-स-क्तिन् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]महिकेरवः प्रौढकर्माणः [V]प्रियमेधाः प्रियेण यज्ञेनोपेता ऋषयः [V]ऊतये रक्षार्थम् [V]अग्निम् [V]अहूषत आहूतवन्तः। कीदृशम्। [V]अध्वराणां यज्ञानां मध्ये [V]शुक्रेण [V]शोचिषा शुद्धेन प्रकाशेन [V]राजन्तं दीप्यमानम्॥ महिकेरवः। 'मह पूजायाम्'। औणादिक इन्प्रत्ययः। 'डुकृञ् करणे'। 'कृवापाजि°' इति उण्। महयो महान्तः कारवो येषां ते। तथोक्ताः। आकारस्य एकारादेशश्छान्दसः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। प्रियमेधाः। प्रियो मेधो येषां ते। अहूषत। 'ह्वेञ् स्पर्धायां शब्दे च'। लुङि सिचि 'बहुलं छन्दसि' इति संप्रसारणम्। परपूर्वत्वम्। 'हलः' (पा. सू. ६. ४. २) इति दीर्घत्वम्। 'आदेशप्रत्यययोः' इति षत्वम्॥

घृताहवन सन्त्येमा उ षु श्रुधी गिरः।
याभिः कण्वस्य सूनवो हवन्तेऽवसे त्वा॥ ५॥

घृतऽआहवन। सन्त्य। इमाः। ऊँ इति। सु। श्रुधि। गिरः।
याभिः। कण्वस्य। सूनवः। हवन्ते। अवसे। त्वा॥ ५॥

हे [V]घृताहवन घृतेनाहूयमान [V]सन्त्य फलप्रदाग्ने [V]इमा [V]उ [V]गिरः अस्माभिः प्रयुज्यमाना अपि स्तोत्ररूपा वाचः [V]सु [V]श्रुधि सुष्ठु शृणु। [V]कण्वस्य महर्षेः [V]सूनवः पुत्राः [V]याभिः गीर्भिः [V]अवसे स्वरक्षार्थं [V]त्वा [V]हवन्ते त्वामाह्वयन्ति॥ घृताहवन। घृतेनाहूयतेऽस्मिन्निति घृताहवनः। अधिकरणे ल्युट्। आमन्त्रिताद्युदात्तत्वम्। श्रुधि। 'श्रुशृणुपृकृवृभ्यश्छन्दसि' इति हेर्धिरादेशः। 'बहुलं छन्दसि' इति विकरणस्य लुक्॥ ॥ २१ ॥

अश्वमेधे पौष्ण्यामिष्टौ स्विष्टकृतोऽनुवाक्या 'त्वां चित्रश्रवस्तम' इत्येषा। 'सर्वान् कामानाप्स्यन्' इति खण्डे सूत्रितं–'त्वां चित्रश्रवस्तम यद्वाहिष्ठं तदग्नये' (आश्व. श्रौ. १०. ६) इति॥

त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः।
शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळ्हवे॥ ६॥

त्वाम्। चित्रश्रवःऽतम। हवन्ते। विक्षु। जन्तवः।
शोचिःऽकेशम्। पुरुऽप्रिय। अग्ने। हव्याय। वोळ्हवे॥ ६॥

हे [V]चित्रश्रवस्तम अतिशयेन विविधहवीरूपान्नयुक्त [V]पुरुप्रिय बहूनां यजमानानां प्रीतिकर [V]अग्ने [V]त्वां [V]हव्याय [V]वोळ्हवे हविर्वोढुं [V]विक्षु [V]जन्तवः प्रजासूत्पन्ना यजमानाः [V]हवन्ते आह्वयन्ति। कीदृशम्। [V]शोचिष्केशं दीप्तिरूपकेशोपेतम्। तथा च वाजसनेयिन आमनन्ति–'शोचन्त इव ह्येतस्य समिद्धस्य रश्मयः केशाः' इति॥ चित्रश्रवस्तम। श्रव इत्यन्ननाम। चित्रं श्रवो यस्यासौ चित्रश्रवाः। अतिशयेन चित्रश्रवाः चित्रश्रवस्तमः। आमन्त्रितानुदात्तत्वम्। शोचिष्केशम्। 'शुच दीप्तौ'। 'अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः' (उ. सू. २. २६५) इति इसिः। प्रत्ययस्वरः। बहु-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

व्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। हव्याय। हवनक्रियया[1] प्राप्यत्वात् 'क्रियाग्रहणं कर्तव्यम्' इति संप्रदानत्वाच्चतुर्थी। वोळ्हवे। 'वह प्रापणे'। 'तुमर्थे सेसेन्०' इति तवेन्प्रत्ययः। ढत्वधत्वष्टुत्वढलोपेषु कृतेषु 'सहिवहोरोदवर्णस्य' (पा. सू. ६.३.११२) इति अकारस्य ओकारः। नित्त्वादाद्युदात्तत्वम्॥

नि त्वा होतारमृत्विजं दधिरे वसुवित्तमम्।
श्रुत्कर्णं सप्रथस्तमं विप्रा अग्ने दिविष्टिषु ॥ ७ ॥

नि। त्वा। होतारम्। ऋत्विजम्। दधिरे। वसुवित्ऽतमम्।
श्रुत्ऽकर्णम्। सप्रथःऽतमम्। विप्राः। अग्ने। दिविष्टिषु ॥ ७ ॥

हे Vअग्ने Vविप्राः मेधाविनः Vदिविष्टिषु यागेषु त्वां Vनि Vदधिरे स्थापितवन्तः। कीदृशम्। Vहोतारम् आह्वातारम् Vऋत्विजम् ऋतुषु यजनशीलं Vवसुवित्तमम् अतिशयेन धनस्य लम्भयितारं Vश्रुत्कर्णं श्रवणयोग्यकर्णोपेतं Vसप्रथस्तमम् अतिशयेन प्रख्यातम्॥ दधिरे। इरेचः चित्त्वादन्तोदात्तत्वम्। पादादित्वात् निघाताभावः। दिविष्टिषु। इष्टय एषणानि। दिवः स्वर्गस्य एषणानि येषु यागेषु ते दिविष्टयः। 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति वचनात् 'दिव उत्' (पा. सू. ६. १. १३१) इति उत्वं न क्रियते। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्॥

आ त्वा विप्रा अचुच्यवुः सुतसोमा अभि प्रयः।
बृहद्भा बिभ्रतो हविरग्ने मर्ताय दाशुषे ॥ ८ ॥

आ। त्वा। विप्राः। अचुच्यवुः। सुतऽसोमाः। अभि। प्रयः।
बृहत्। भाः। बिभ्रतः। हविः। अग्ने। मर्ताय। दाशुषे ॥ ८ ॥

हे Vअग्ने Vसुतसोमाः अभिषुतसोमयुक्ताः Vविप्राः मेधाविन ऋत्विजः Vप्रयः Vअभि हविर्लक्षणमन्नमभिलक्ष्य Vत्वा Vआ Vअचुच्यवुः त्वामागमयन्ति। कीदृशं त्वाम्। Vबृहत् महान्तं Vभाः भासमानम्। कीदृशा विप्राः। Vदाशुषे Vमर्ताय हविष्प्रदस्य यजमानस्य संबन्धि Vहविः Vबिभ्रतः धारयन्तः॥ अचुच्यवुः। 'च्युङ् गतौ'। अस्मात् अन्तर्भावितण्यर्थात् लङि व्यत्ययेन परस्मैपदम्। 'बहुलं छन्दसि' इति शपः श्लुः। 'सिजभ्यस्तविदिभ्यश्च' (पा. सू. ३. ४. १०९) इति झेर्जुसादेशः 'जुसि च' (पा. सू. ७. ३. ८३) इति गुणः। बृहत्। भाः। उभयत्र 'सुपां सुलुक्०' इति विभक्तेर्लुक्। बिभ्रतः। 'डुभृञ् धारणपोषणयोः'। शतरि 'नाभ्यस्ताच्छतुः' इति नुमागमप्रतिषेधः। 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम्। मर्ताय दाशुषे। उभयत्र 'षष्ठ्यर्थे चतुर्थी वक्तव्या' (पा. सू. २. ३. ६२. १) इति चतुर्थी॥

---

१. च-छ-ण-त-न-फ-य-ल-श-स-हवनक्रियायाम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रातर्याव्णः सहस्कृत सोमपेयाय सन्त्य ।
इहाद्य दैव्यं जनं बर्हिरा सादया वसो ॥ ९ ॥

प्रातःऽयाव्णः । सहःऽकृत । सोमऽपेयाय । सन्त्य ।
इह । अद्य । दैव्यम् । जनम् । बर्हिः । आ । सादय । वसो इति ॥ ९ ॥

हे ᵛसहस्कृत बलेन मथित ᵛसन्त्य फलदातः ᵛवसो निवासहेतुभूताग्ने ᵛइह देवयजनदेशे ᵛअद्य अस्मिन् दिने ᵛसोमपेयाय सोमपानार्थं ᵛप्रातर्याव्णः प्रातरागच्छतो देवान् ᵛदैव्यं ᵛजनम् अन्यमपि देवताजनं ᵛबर्हिः ᵛआ ᵛसादय यज्ञं प्रापय ॥ प्रातर्याव्णः । शसि ' अल्लोपोऽनः ' इति अकारलोपः । सहस्कृत । सहतेऽभिभवत्यनेनेति सहो बलम् । तेन क्रियते इति सहस्कृतः । ' ओजःसहोऽम्भस्तमसस्तृतीयायाः ' ( पा. सू. ६. ३. ३ ) इति अलुगभावश्छान्दसः ॥

अर्वाञ्चं दैव्यं जनमग्ने यक्ष्व सहूतिभिः ।
अयं सोमः सुदानवस्तं पात तिरोअह्न्यम् ॥ १० ॥

अर्वाञ्चम् । दैव्यम् । जनम् । अग्ने । यक्ष्व । सहूतिऽभिः ।
अयम् । सोमः । सुऽदानवः । तम् । पात । तिरःऽअह्न्यम् ॥ १० ॥

हे ᵛअग्ने ᵛअर्वाञ्चम् अभिमुखं ᵛदैव्यं ᵛजनं देवतारूपं प्राणिनं ᵛसहूतिभिः समानाह्वानैर्देवान्तरैः सह ᵛयक्ष्व यज । हे ᵛसुदानवः सुष्ठु फलदातारो देवाः ᵛअयं ᵛसोमः युष्मदर्थं सोमः पुरतो वर्तते । ᵛतं सोमं ᵛपात पिबत । कीदृशम् । ᵛतिरोअह्न्यम् एतन्नामकम् । पूर्वस्मिन् अह्नि अभिषुतो यः सोमः उत्तरेऽहनि हूयते तस्यैतन्नामधेयम् ॥ दैव्यम् । ' देवाद्यञञौ ' इति प्राग्दीव्यतीयो यञ् । यक्ष्व । लोटि ' बहुलं छन्दसि ' इति शपो लुक् । प्रत्ययस्वराभावश्छान्दसः । अग्ने इत्यस्य पादादौ वर्तमानस्य ' आमन्त्रितं पूर्वमविद्यमानवत् ' इत्यविद्यमानवत्त्वात् ' तिङ्ङतिङः ' इति निघाताभावः । सहूतिभिः । समाना हूतिराह्वानं येषां ते सहूतयः । ' समानस्य च्छन्दसि° ' इति सभावः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । पात । ' पा पाने ' । ' बहुलं छन्दसि ' इति शपो लुक् । तिरोअह्न्यम् । अहनि भवम् अह्न्यम् । ' भवे छन्दसि ' इति यत् । ' नस्तद्धिते ' इति टिलोपो न भवति, ' अह्नष्टखोरेव ' ( पा. सू. ६. ४. १४५ ) इति नियमात् । भसंज्ञायाम् ' अल्लोपोऽनः ' इति अकारलोपः । ' ये चाभावकर्मणोः ' ( पा. सू. ६. ४. १६८ ) इति प्रकृतिभावस्तु सर्वविधीनां छन्दसि विकल्पितत्वात् न क्रियते । तिरोहितोऽह्न्यः तिरोअह्न्यः । ' प्रकृत्यान्तःपादम्° ' इति प्रकृतिभावः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ ॥ ३२ ॥

' एषो उषाः ' इति पञ्चदशर्चं तृतीयं सूक्तं प्रस्कण्वस्यार्षम् । इदमुत्तरं चाश्विनं गायत्रीच्छन्दस्कम् । अत्रानुक्रमणिका—' एषो पञ्चोनाश्विनं तु गायत्रम् ' इति । प्रातरनुवाके आश्विने क्रतौ गायत्रीच्छन्दस्याश्विनशस्त्रे चेदं सूक्तम् । ' अथाश्विन एषो उषाः ' ( आश्व. श्रौ. ४. १५ ) इति सूत्रितम् ॥



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

एषो उषा अपूर्व्या व्युच्छति प्रिया दिवः । स्तुषे वामश्विना बृहत् ॥ १ ॥

एषो इति । उषाः । अपूर्व्या । वि । उच्छति । प्रिया । दिवः । स्तुषे । वाम् । अश्विना । बृहत् ॥१॥

vएषो एषैवास्माभिः परिदृश्यमाना vप्रिया सर्वेषां प्रीतिहेतुः vअपूर्व्या पूर्वेषु मध्यरात्रादिकालेषु विद्यमाना न भवति, किंतु इदानींतनी vउषाः उषोदेवता vदिवः द्युलोकस्य सकाशादागत्य vव्युच्छति तमो वर्जयति । हे अश्विनौ vवां युवां vबृहत् प्रभूतं यथा भवति तथा vस्तुषे स्तौमि ॥ स्तुषे । 'ष्टुञ् स्तुतौ' । 'तिङां तिङो भवन्ति' इति उत्तमैकवचनस्य मध्यमैकवचनादेशः । यद्वा । लेटि उत्तमैकवचने 'सिब्बहुलं लेटि' इति सिप् ॥

या दस्रा सिन्धुमातरा मनोतरा रयीणाम् । धिया देवा वसुविदा ॥ २ ॥

या । दस्रा । सिन्धुऽमातरा । मनोतरा । रयीणाम् । धिया । देवा । वसुऽविदा ॥ २ ॥

vया vदेवा यावुभावश्विनौ वक्ष्यमाणगुणयुक्तौ तौ स्तुषे इति पूर्वत्रान्वयः । कीदृशौ । vदस्रा दस्रौ दर्शनीयौ vसिन्धुमातरा समुद्रमातृकौ । यद्यपि सूर्याचन्द्रमसावेव समुद्रजौ तथाप्यश्विनोः केषांचिन्मते तद्रूपत्वात् तथात्वम् । vरयीणां धनानां vमनोतरा मनसा तारयितारौ vधिया कर्मणा vवसुविदा निवासस्थानस्य लम्भयितारौ ॥ मनोतरा । मनसा तरतः इति मनोतरौ । तरतेः अन्तर्भावितण्यर्थात् 'ऋदोरप्' इति अप् । पूर्वपदान्तस्य सकारस्य रुत्वे सति छान्दसम् उत्वम् । रयीणाम् । 'नाम्न्यतरस्याम्' इति नाम उदात्तत्वम् । धिया । 'सावेकाचः०' इति विभक्तेरुदात्तत्वम् । वसुविदा । वसूनि निवासस्थानानि विन्देते इति वसुविदौ । 'क्विप् च' इति क्विप् ॥

वच्यन्ते वां ककुहासो जूर्णायामधि विष्टपि । यद्वां रथो विभिष्पतात् ॥ ३ ॥

वच्यन्ते । वाम् । ककुहासः । जूर्णायाम् । अधि । विष्टपि । यत् । वाम् । रथः । विऽभिः । पतात् ॥३॥

हे अश्विनौ vवां युवयोः संबन्धी vरथः vजूर्णायां नानाशास्त्रैः स्तुतायाम् vअधि vविष्टपि स्वर्गलोके vयत् यदा vविभिः अश्वैः vपतात् पतति गच्छति तदानीं vवां युवयोः vककुहासः स्तुतयः vवच्यन्ते अस्माभिरुच्यन्ते ॥ वच्यन्ते । ब्रवीतेर्यकि 'ब्रुवो वचिः' ( पा. सू. २. ४. ५३ ) इति वच्यादेशः । 'वचिस्वपि०' इत्यादिना संप्रसारणम् । 'संप्रसारणाच्च' इत्यत्र 'वा छन्दसि' इत्यनुवृत्तेः परपूर्वत्वस्य पाक्षिकत्वात् यणादेशः । प्रत्ययस्वरः । ककुहासः । 'ककुभं शृङ्गे विदुः प्रधाने च' इत्यभिधानात् प्राधान्याभिधायिना ककुप्शब्देन तत्प्रतिपादिकाः स्तुतयो लक्ष्यन्ते । हत्वं छान्दसम् । 'आज्जसेरसुक्' इति असुक् । जूर्णायाम् । 'जॄष् वयोहानौ' । अत्र स्तुत्यर्थो धातूनामनेकार्थत्वात् । निष्ठायां 'श्न्युकः किति' इति इट्प्रतिषेधः । 'बहुलं छन्दसि' इति उत्वम् । 'हलि च' इति दीर्घः । 'रदाभ्याम्०' ( पा. सू. ८. २. ४२ ) इति निष्ठानत्वम् । प्रत्ययस्वरः । विभिः । वी गत्यादौ । वियन्ति गच्छन्तीति वयः अश्वाः । औणादिको डिप्रत्ययः । पतात् । 'पॢ गतौ' । लेटि आडागमः । 'इतश्च लोपः०' इति इकारलोपः ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हविषा जारो अपां पिपर्ति पपुरिर्नरा । पिता कुटस्य चर्षणिः ॥ ४ ॥

हविषा । जारः । अपाम् । पिपर्ति । पपुरिः । नरा । पिता । कुटस्य । चर्षणिः ॥ ४ ॥

हे अश्विनौ देवौ vअपां vजारः स्वकीयतापेनोदकानां जरयिता सूर्यः vहविषा अस्मद्दत्तेन vपिपर्ति देवान् पूरयति । उदिते सूर्ये हविष्प्रदानात् सूर्यस्य पूरकत्वं द्रष्टव्यम् । अतः सूर्योदयकाले युवाभ्यामागन्तव्यमित्यर्थः । कीदृशो जारः । vपपुरिः उक्तक्रमेण पूरणस्वभावः vपिता पालकः vकुटस्य vचर्षणिः कर्मणो द्रष्टा । अत्र निरुक्तं–' हविषापां जरयिता पिपर्ति पपुरिरिति पृणातिनिगमौ वा प्रीणातिनिगमौ वा पिता कृतस्य कर्मणश्चायितादित्यः ' ( निरु. ५. २४ ) इति ॥ जारः । जरयतीति जारः आदित्यः । ' दारजारौ कर्तरि णिलुक् च ' ( पा. सू. ३. ३. २०. ४ ) इति घञन्तो निपातितः । ' कर्षात्वतः° ' इत्यन्तोदात्तत्वम् । अपाम् । ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम् । पिपर्ति । ' पॄ पालनपूरणयोः ' । तिपि जुहोत्यादित्वात् शपः श्लुः । ' अर्तिपिपर्त्योश्च ' इति अभ्यासस्य इत्वम् । ' अनुदात्ते च ' इति अभ्यस्तस्याद्युदात्तत्वम् । पपुरिः । ' आदृगमहन° ' इति किन्प्रत्ययः । लिङ्वद्भावात् कित्त्वे सिद्धेऽपि पुनः कित्करणसामर्थ्यात् ' ऋच्छत्यृताम् ' ( पा. सू. ७. ४. ११ ) इति गुणाभावः । ' उदोष्ठ्यपूर्वस्य ' इति उत्वम् । नित्त्वादाद्युदात्तत्वम् ॥

आदारो वां मतीनां नासत्या मतवचसा । पातं सोमस्य धृष्णुया ॥ ५ ॥

आऽदारः । वाम् । मतीनाम् । नासत्या । मतऽवचसा । पातम् । सोमस्य । धृष्णुऽया ॥५॥

हे vमतवचसा अभिमतस्तोत्रौ vनासत्या अश्विनौ vवां युवयोः vमतीनां बुद्धीनाम् vआदारः प्रेरको यः सोमोऽस्ति vसोमस्य तं सोमं vपातं युवां पिबतम् । कीदृशं सोमम् । vधृष्णुया धर्षणशीलम् । मदकरत्वेन तीव्रमित्यर्थः ॥ आदारः । ' दॄङ् आदरे ' । आदारयतीति आदारः । ' दारजारौ कर्तरि णिलुक्च ' इति घञ्प्रत्ययः । थाथादिना उत्तरपदान्तोदात्तत्वम् । मतीनाम् । ' नामन्यतरस्याम् ' इति नाम उदात्तत्वम् । मतवचसा । मतमभिमतं स्तोत्ररूपं वचो ययोस्तौ । ' सुपां सुलुक्° ' इति विभक्तेः आकारः । पातम् । ' पा पाने ' । ' बहुलं छन्दसि ' इति शपो लुकि सति ' पाघ्रा° ' इत्यादिना पिबादेशो न भवति । सोमस्य । ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी । धृष्णुया । ' सुपां सुलुक्° ' इति विभक्तेः याजादेशः ॥ ॥ ३३ ॥

या नः पीपरदश्विना ज्योतिष्मती तमस्तिरः । तामस्मे रासाथामिषम् ॥६॥

या । नः । पीपरत् । अश्विना । ज्योतिष्मती । तमः । तिरः ।

ताम् । अस्मे इति । रासाथाम् । इषम् ॥ ६ ॥

हे vअश्विना vज्योतिष्मती रसवीर्यादिरूपज्योतिर्युक्ता vया इट् अन्नं vनः अस्मान् vपीपरत् पारयेत् तृप्तिं प्रापयेत् । किं कृत्वा । vतमः दारिद्र्यरूपमन्धकारं vतिरः अन्तर्हितं विनष्टं कृत्वा vताम् vइषं तादृशमन्नम् vअस्मे अस्मभ्यं vरासाथां युवां दत्तम् ॥ पीपरत् । ' पॄ पालनपूरणयोः ' । ण्यन्तात् लुङि चङि णिलोपः । उपधाह्रस्वत्वद्विर्भावहलादिशेषसन्वद्भावेत्वदीर्घाः । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अडभावः। 'चडयन्यतरस्याम्' ( पा. सू. ६.१. २१८ ) इति उपोत्तमस्य धात्वकारस्योदात्तत्वे प्राप्ते व्यत्ययेन अभ्यासस्योदात्तत्वम्। 'यद्वृत्तान्नित्यम्' इति निघातप्रतिषेधः। अस्मे। 'सुपां सुलुक्°' इति चतुर्थीबहुवचनस्य शेआदेशः। रासाथाम्। 'रा दाने'। छान्दसे प्रार्थनायां लुङि व्यत्ययेनात्मनेपदम्। च्लेः सिच्। 'एकाचः°' इति इट्प्रतिषेधः। पूर्ववत् अडभावः। 'तिङ्ङतिङः' इति निघातः॥

**आ नो नावा मतीनां यातं पाराय गन्तवे। युञ्जाथामश्विना रथम् ॥ ७ ॥**

आ। नः। नावा। मतीनाम्। यातम्। पाराय। गन्तवे। युञ्जाथाम्। अश्विना। रथम् ॥ ७ ॥

हे vअश्विना vमतीनां स्तुतीनां vपाराय vगन्तवे पारं गन्तुं vनावा नौरूपेण गमनसाधनेन vनः अस्मान् प्रति vआ vयातं समुद्रमध्यादागच्छतम्। भूमावागन्तुं vरथं भवदीयं vयुञ्जाथां साधं कुरुतम्॥ नावा। 'सावेकाचः°' इति विभक्तेरुदात्तत्वम्। गन्तवे। 'तुमर्थे सेसेन्°' इति तवेन्प्रत्ययः। नित्त्वादाद्युदात्तत्वम्। युञ्जाथाम्। 'युजिर् योगे'। लोटि आथामि रुधादित्वात् श्नम्। 'श्नसोरल्लोपः' इति अकारलोपः। प्रत्ययस्वरः॥

**अरित्रं वां दिवस्पृथु तीर्थे सिन्धूनां रथः। धिया युयुज्र इन्दवः ॥ ८ ॥**

अरित्रम्। वाम्। दिवः। पृथु। तीर्थे। सिन्धूनाम्। रथः। धिया। युयुज्रे। इन्दवः ॥ ८ ॥

हे अश्विनौ vवां युवयोः vदिवस्पृथु द्युलोकादपि विस्तीर्णम् vअरित्रं गमनसाधनं नौरूपं vसिन्धूनां समुद्राणां vतीर्थे अवतरणप्रदेशे विद्यते इति शेषः। vरथः च भूमौ गन्तुं विद्यते। vइन्दवः सोमाः vधिया भवद्विषयेण कर्मणा vयुयुज्रे युक्ता बभूवुः॥ अरित्रम्। 'ऋ गतौ'। 'अर्तिलूधूसूखनसहचर इत्रः' ( पा. सू. ३. २. १८४ ) इति करणे इत्रप्रत्ययः। प्रत्ययस्वरः। दिवः। 'ऊडिदम्°' इति विभक्तेरुदात्तत्वम्। तीर्थे। 'तॄ प्लवनतरणयोः'। 'पातृतुदिवचिरिचिसिचिभ्यस्थक्' ( उ. सू. २. १६४ ) इति थक्। 'ऋत इद्धातोः' इति इत्वम्। 'हलि च' इति दीर्घः। युयुज्रे। लिटि 'इरयो रे' ( पा. सू. ६. ४. ७६ ) इति इरेचो रेआदेशः॥

**दिवस्कण्वास इन्दवो वसु सिन्धूनां पदे। स्वं व्रिं कुह धित्सथः ॥ ९ ॥**

दिवः। कण्वासः। इन्दवः। वसु। सिन्धूनाम्। पदे। स्वम्। व्रिम्। कुह। धित्सथः ॥ ९ ॥

हे vकण्वासः कण्वपुत्राः। यद्वा। मेधाविन ऋत्विजः। अश्विनावित्थं पृच्छतेति शेषः। कथमिति तदुच्यते। vदिवः द्युलोकसकाशात् vइन्दवः सूर्यरश्मयः प्रादुर्भूताः। vसिन्धूनाम् अपां वृष्टिरूपाणां स्यन्दनस्वभावानां vपदे स्थानेऽन्तरिक्षे vवसु अस्मदादिनिवासहेतुभूतमुषःकालीनं ज्योतिराविर्भूतमिति शेषः। अस्मिन्नवसरे युवां vस्वं vव्रिं स्वकीयं रूपं vकुह vधित्सथः कुत्र स्थापयितुमिच्छथः। अत्रागत्य प्रदर्शनीयमिति तात्पर्यार्थः॥ कुह। 'वा ह च च्छन्दसि' ( पा. सू. ५. ३. १३ ) इति किंशब्दात् सप्तम्यर्थे हप्रत्ययः। 'कु तिहोः' ( पा. सू. ७. २. १०४ ) इति किमः कुः। धित्सथः। 'डुधाञ् धारणपोषणयोः'। 'सनि मीमाघुरभलभशकपतपदामच इस्' ( पा. सू. ७. ४. ५४ ) इति आकारस्य इसादेशः। 'अत लोपोऽभ्यासस्य' ( पा. सू. ७. ४. ५८ ) इति अभ्यासलोपः। 'सः स्यार्धधातुके' ( पा. सू. ७. ४. ४९ ) इति सकारस्य तकारः॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अभूदु भा उ अंशवे हिरण्यं प्रति सूर्यः । व्यख्यज्जिह्वयासितः ॥ १० ॥

अभूत् । ऊँ इति । भाः । ऊँ इति । अंशवे । हिरण्यम् । प्रति । सूर्यः ।

वि । अख्यत् । जिह्वया । असितः ॥ १० ॥

Vभा Vउ सूर्यस्य दीप्तिस्तु Vअंशवे उषःकालीनरश्मिसिद्ध्यर्थम् Vअभूदु प्रादुर्भूतैव । Vसूर्यः च Vहिरण्यं Vप्रति स्वकीयोदयेन हिरण्यसदृशोऽभूत् । अग्निश्च Vअसितः स्वकीयदीप्तेः सूर्यप्रवेशेन स्वयं कृष्णो भूत्वा Vजिह्वया स्वकीयया ज्वालया Vव्यख्यत् प्रकाशितवान् । तस्मादयमश्विनोर्युवयोरागमनकाल इत्यर्थः ॥ अभूत् । ' भूसुवोस्तिङि ' इति गुणप्रतिषेधः । हिरण्यं प्रति । ' प्रतिः प्रतिनिधिप्रतिदानयोः ' ( पा. सू. १. ४. ९२ ) इति प्रतेः कर्मप्रवचनीयत्वम् । ' कर्मप्रवचनीययुक्ते द्वितीया ' ( पा. सू. २. ३. ८ ) इति द्वितीया । अख्यत् । ' चक्षिङ् व्यक्तायां वाचि ' । लुङि ' चक्षिङः ख्याञ् ' इति ख्याञादेशः ॥ ॥ ३४ ॥

अभूदु पारमेतवे पन्था ऋतस्य साधुया । अदर्शि वि स्रुतिर्दिवः ॥ ११ ॥

अभूत् । ऊँ इति । पारम् । एतवे । पन्थाः । ऋतस्य । साधुऽया ।

अदर्शि । वि । स्रुतिः । दिवः ॥ ११ ॥

Vऋतस्य सूर्यस्य Vपारमेतवे रात्रेः पारभूतमुदयाद्रिं गन्तुं Vपन्थाः मार्गः Vसाधुया समीचीनः Vअभूदु निष्पन्न एव । Vदिवः द्योतनात्मकस्य सूर्यस्य Vस्रुतिः प्रसृता दीप्तिः Vवि Vअदर्शि विशेषेण दृष्टा । तस्मादश्विनौ युवाभ्यामागन्तव्यम् ॥ एतवे । ' इण् गतौ ' । ' तुमर्थे सेसेन्° ' इति तवेन्प्रत्ययः । साधुया । ' सुपां सुलुक्° ' इति विभक्तेः याजादेशः । अदर्शि । कर्मणि लुङि च्लेः चिणादेशः । ' चिणो लुक् ' ( पा. सू. ६. ४. १०४ ) इति तशब्दस्य लुक् । स्रुतिः । ' स्रु गतौ ' । ' क्तिच्क्तौ च संज्ञायाम् ' इति क्तिच् ॥

तत्तदिदाश्विनोरवो जरिता प्रति भूषति । मदे सोमस्य पिप्रतोः ॥ १२ ॥

तत्ऽतत् । इत् । अश्विनोः । अवः । जरिता । प्रति । भूषति । मदे । सोमस्य । पिप्रतोः ॥ १२ ॥

Vजरिता स्तोता Vअश्विनोः संबन्धि Vतत्तदित् पुनःपुनः कृतं सर्वमपि Vअवः अस्मद्विषयं रक्षणं Vप्रति Vभूषति प्रत्येकमलंकरोति । तदा तदा प्रशंसतीत्यर्थः । कीदृशयोरश्विनोः । Vमदे हर्षे निमित्तभूते सति Vसोमस्य Vपिप्रतोः सोमं पूरयतोः ॥ भूषति । ' भूष अलंकारे ' । भौवादिकः । पिप्रतोः । ' पॄ पालनपूरणयोः ' । पॄ इत्येके । अस्माल्लटः शतृ । जुहोत्यादित्वात् शपः श्लुः । द्विर्भावोरदश्वहलादिशेषाः । ' अर्तिपिपर्त्योश्च ' इति अभ्यासस्य इत्वम् । शतुर्ङित्त्वात् गुणाभावे यणादेशः । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

**वावसाना विवस्वति सोमस्य पीत्या गिरा । मनुष्वच्छंभू आ गतम् ॥१३॥**

वावसाना । विवस्वति । सोमस्य । पीत्या । गिरा ।

मनुष्वत् । शंभू इति शम्ऽभू । आ । गतम् ॥ १३ ॥

हे vशंभू सुखस्य भावयितारावश्विनौ vमनुष्वत् मनाविव vविवस्वति परिचरणवति यजमाने vवसाना निवासशीलौ युवां vसोमस्य vपीत्या सोमस्य पाननिमित्तं vगिरा स्तुतिनिमित्तं च vआ vगतम् आगच्छतम् ॥ वसाना । ' वस निवासे '। ' ताच्छील्यवयोवचन° ' (पा. सू. ३. २. १२९) इति ताच्छीलिकः चानश् । ' बहुलं छन्दसि ' इति शपः श्लुः । ' अन्येषामपि दृश्यते ' इति संहितायामभ्यासस्य दीर्घत्वम् ॥ ' सुपां सुलुक्° ' इति विभक्तेः आकारः । ' चितः ' इत्यन्तोदात्तत्वम् । पीत्या । ' पा पाने ' । ' स्थागापापचो भावे ' इति भावे क्तिन् । ' घुमास्था° ' इति ईत्वम् । व्यत्ययेनान्तोदात्तत्वम् । तृतीयैकवचने यणादेशे ' उदात्तयणो हल्पूर्वात् ' इति विभक्तेरुदात्तत्वम् । मनुष्वत् । ' मन ज्ञाने ' । मन्यते जानातीति मनुः । बहुलवचनात् औणादिक उसिप्रत्ययः । ' तत्र तस्येव ' इति सप्तम्यर्थे वतिः । प्रत्ययस्वरः । गतम् । गमेर्लोटि ' बहुलं छन्दसि ' इति शपो लुक् । ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपः ॥

**युवोरुषा अनु श्रियं परिज्मनोरुपाचरत् । ऋता वनथो अक्तुभिः ॥ १४ ॥**

युवोः । उषाः । अनु । श्रियम् । परिऽज्मनोः । उपऽआचरत् । ऋता । वनथः । अक्तुऽभिः ॥१४॥

हे अश्विनौ vपरिज्मनोः परितो गन्त्रोः vयुवोः युवयोरुभयोः vश्रियम् vअनु आगमनरूपां शोभामनुसृत्य vउषाः vउपाचरत् उषःकालदेवता इहागच्छतु । युवयोरागतयोः सतोः पश्चादागतेत्यर्थः । युवां च vअक्तुभिः रात्रिभिः vऋता यज्ञगतानि हवींषि vवनथः कामयेथे संभजेथे ॥ युवोः । युष्मच्छब्दात् षष्ठीद्विवचनस्य ' सुपां सुपो भवन्ति ' इति षष्ठीद्विवचनादेशः । अत आदेशविषयत्वात् ' योऽचि ' इति यत्वाभावः । ' शेषे लोपः ' । परिज्मनोः । परितः अजतो गच्छत इति परिज्मानौ । ' श्वन्नुक्षन्° ' इत्यादिना अजतेः मनिन्प्रत्ययान्तो निपातितः । ऋता । ' शेश्छन्दसि° ' इति शेर्लोपः । वनथः । ' वन षण संभक्तौ ' । ' तिङ्ङतिङः ' इति निघातः ॥

प्रवर्ग्ये पौर्वाह्णिके घर्मस्य हविषो द्वितीया याज्या ' उभा पिबतम् ' इत्येषा । ' अथोत्तरम् ' इति खण्डे सूत्रितम्—' उभा पिबतमश्विनेति चोभाभ्यामनवानम् ' ( आश्व. श्रौ. ४. ७) इति । आश्विनशस्त्रेऽप्येषा द्वितीया याज्या । सूत्रितं च—' प्र वामन्धांसि मद्यान्यस्थुरुभा पिबतमश्विनेति याज्ये ' ( आश्व. श्रौ. ६. ५ ) इति ॥

**उभा पिबतमश्विनोभा नः शर्म यच्छतम् । अविद्रियाभिरूतिभिः ॥ १५ ॥**

उभा । पिबतम् । अश्विना । उभा । नः । शर्म । यच्छतम् । अविद्रियाभिः । ऊतिऽभिः ॥१५॥

हे vअश्विना vउभा युवामुभौ vपिबतं सोमपानं कुरुतम् । तत ऊर्ध्वम् vउभा युवामुभौ vअविद्रियाभिः प्रशस्ताभिः vऊतिभिः रक्षाभिः vनः अस्मभ्यं vशर्म सुखं vयच्छतम् ॥ पिबतम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'पा पाने'। लोटि शपि 'पाघ्रा०' इत्यादिना पिबादेशः। 'अङ्गवृत्ते पुनर्वृत्तावविधिर्निष्ठितस्य (पा. म. ७. ३. ७८. २; परिभा. ९२) इति वचनात् लघूपधगुणाभावः। यद्वा। आद्युदात्तोऽदन्तः पिबादेशः। 'तिङ्ङतिङः' इति निघातः। यच्छतम्। 'दाण् दाने'। लोटि शपि 'पाघ्रा०' इत्यादिना यच्छादेशः। अविद्रियाभिः। 'द्रा कुत्सायां गतौ'। विपूर्वादस्माद्भावे औणादिकः किः। 'आतो लोप इटि च' इति आकारलोपः। विद्रिर्निन्दा। तद्विरोधिनी अविद्रिः स्तुतिः। तां यान्तीत्यविद्रियाः। 'अन्येभ्योऽपि दृश्यन्ते' इति विच्। कृदुत्तरपदप्रकृतिस्वरत्वम्। ऊतिभिः। अवतेः क्तिनि 'ज्वरत्वर०' इत्यादिना ऊठ्। 'ऊतियूति०' इत्यादिना क्तिन उदात्तत्वम्॥ ॥ ३५ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाभाय्येन विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके तृतीयोऽध्यायः समाप्तः॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ प्रथमाष्टके चतुर्थोऽध्याय आरभ्यते । 'अयं वाम्' इति नवमानुवाकस्य चतुर्थं सूक्तं दशर्चम् । अत्रानुक्रान्तम्—'अयं दश प्रागाथं तु' इति । 'ऋषिश्चान्यस्मादृषेः' इति परिभाषितत्वात् कण्वपुत्रः प्रस्कण्व ऋषिः । तथा पूर्वत्र 'आश्विनं तु' इत्युक्तत्वात् तुह्यादिपरिभाषया इदमपि सूक्तमश्विदेवताकम् । अनयैव परिभाषया इदमुत्तरं च प्रागाथम् । अतः प्रथमातृतीयाद्या अयुजो बृहत्यः । द्वितीयाचतुर्थ्याद्या युजः सतोबृहत्यः । प्रातरनुवाके आश्विने क्रतौ बार्हते छन्दस्येतत्सूक्तम् । 'अथाश्विनः' इति खण्डे सूत्रितम्—'इमा उ वामयं वाम्' ( आश्व. श्रौ. ४. १५ ) इति । आश्विनशस्त्रेऽप्येतत्सूक्तं, 'प्रातरनुवाकन्यायेन' ( आश्व. श्रौ. ६. ५ ) इत्यतिदिष्टत्वात् ॥

अयं वां मधुमत्तमः सुतः सोम ऋतावृधा ।
तमश्विना पिबतं तिरोअह्न्यं धत्तं रत्नानि दाशुषे ॥ १ ॥

अयम् । वाम् । मधुमत्ऽतमः । सुतः । सोमः । ऋतऽवृधा ।
तम् । अश्विना । पिबतम् । तिरःऽअह्न्यम् । धत्तम् । रत्नानि । दाशुषे ॥ १ ॥

हे Vऋतावृधा ऋतस्य सत्यस्य यज्ञस्य वा वर्धयितारौ Vअश्विना अश्विनौ Vवां युवयोः Vअयं पुरोवर्ती Vसोमः Vसुतः अभिषुतः । कीदृशः । Vमधुमत्तमः अतिशयेन माधुर्यवान् । Vतिरोअह्न्यं तिरोभूते पूर्वस्मिन् दिने अभिषुतं Vतं सोमं Vपिबतम् । Vदाशुषे हविर्दत्तवते यजमानाय Vरत्नानि रमणीयानि धनानि Vधत्तं प्रयच्छतम् ॥ वाम् । 'युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ' ( पा. सू. ८. १. २० )इति षष्ठीद्विवचनस्य वामादेशः । स चानुदात्तः । मधुमत्तमः । 'मन ज्ञाने' । मन्यते इति मधु । 'फलिपाटिनमि°' इत्यादिना उप्रत्ययः । 'नित्' इत्यनुवृत्तेराद्युदात्तत्वम् । धकारश्चान्तादेशः । अतिशयेन मधुमान् मधुमत्तमः । मतुसमपोः पित्त्वादनुदात्तत्वे पदस्वर एव शिष्यते । ऋतावृधा । वृधेरन्तर्भावितण्यर्थात् 'क्विप् च' इति क्विप् । 'अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घत्वम् । तिरोअह्न्यम् । अह्नि भवः अह्न्यः । 'भवे छन्दसि' इति यत् । 'अह्नष्टखोरेव' ( पा. सू. ६. ४. १४५ ) इति नियमात् 'नस्तद्धिते' इति टिलोपाभावः । 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति वचनात् 'ये चाभावकर्मणोः' ( पा. सू. ६. ४. १६८ ) इति प्रकृतिभावाभावे 'अल्लोपोऽनः' इति अकारलोपः । तिरोहितः अह्न्यः तिरोअह्न्यः । 'तिरोऽन्तर्धौ' ( पा. सू. १. ४. ७१ ) इति गतित्वेन निपातत्वात् अव्ययत्वे प्रादिसमासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । दाशुषे । 'दाश्वान् साह्वान्°' इत्यादिना क्वसुप्रत्ययान्तो निपातितः । चतुर्थ्येकवचने 'वसोः संप्रसारणम्' इति संप्रसारणम् । 'शासिवसिघसीनां च' इति षत्वम् ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्रिवन्धुरेण त्रिवृता सुपेशसा रथेना यातमश्विना ।
कण्वासो वां ब्रह्म कृण्वन्त्यध्वरे तेषां सु शृणुतं हवम् ॥ २ ॥

त्रिऽवन्धुरेण । त्रिऽवृता । सुऽपेशसा । रथेन । आ । यातम् । अश्विना ।
कण्वासः । वाम् । ब्रह्म । कृण्वन्ति । अध्वरे । तेषाम् । सु । शृणुतम् । हवम् ॥ २ ॥

हे vअश्विना vत्रिवन्धुरेण उन्नतानतरूपत्रिविधबन्धनकाष्ठयुक्तेन vत्रिवृता अप्रतिहतगतितया लोकत्रये वर्तमानेन vसुपेशसा शोभनसुवर्णयुक्तेन vरथेन vआ vयातं इहागच्छतम् । vकण्वासः कण्वपुत्रा मेधाविन ऋत्विजो वा vवां युवयोः vअध्वरे यागे vब्रह्म स्तोत्ररूपं मन्त्रं हविर्लक्षणमन्नं वा vकृण्वन्ति कुर्वन्ति । vतेषां कण्वानां vहवम् आह्वानं vसु vशृणुतं सुष्ठ्वादरेण शृणुतम् ॥ त्रिवन्धुरेण । बध्नन्तीति बन्धुराः । बन्धेः औणादिक उरन्प्रत्ययः । त्रयो बन्धुरा यस्यासौ त्रिबन्धुरः । त्रिचक्रादिषु पाठात् 'त्रिचक्रादीनां छन्दस्युपसंख्यानम्' ( पा. सू. ६. २. १९९. १ ) इत्युत्तरपदान्तोदात्तत्वम् । त्रिवृता । त्रिषु लोकेषु वर्तते इति त्रिवृत् । 'क्विप् च' इति क्विप् । सुपेशसा । पेश इति हिरण्यनाम । शोभनं पेशो यस्यासौ सुपेशाः । 'आद्युदात्तं द्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् । शृणुतम् । 'श्रु श्रवणे' । 'श्रुवः श्रृ च' इति श्रुः; तत्संनियोगेन धातोः श्रृभावश्च । हवम् । ह्वयतेः 'भावेऽनुपसर्गस्य' ( पा. सू. ३. ३. ७५ ) इति अप् । संप्रसारणं च गुणावादेशौ । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः ॥

अश्विना मधुमत्तमं पातं सोममृतावृधा ।
अथाद्य दस्रा वसु बिभ्रता रथे दाश्वांसमुप गच्छतम् ॥ ३ ॥

आश्विना । मधुमत्ऽतमम् । पातम् । सोमम् । ऋतऽवृधा ।
अथ । अद्य । दस्रा । वसु । बिभ्रता । रथे । दाश्वांसम् । उप । गच्छतम् ॥ ३ ॥

हे vऋतावृधा यज्ञस्य वर्धकौ अश्विनौ vमधुमत्तमं vसोमं vपातं पिबतम् । हे vदस्रा अश्विनौ सोमपानार्थम् vअथ अस्मदाह्वानानन्तरम् vअद्य अस्मिन् दिने vरथे स्वकीये vवसु vबिभ्रता अस्मदुपयुक्तं धनं धारयन्तौ vदाश्वांसं हविष्प्रदं यजमानम् vउप vगच्छतं समीपे प्राप्नुतम् ॥ बिभ्रता । 'डुभृञ् धारणपोषणयोः' । शतरि जुहोत्यादित्वात् शपः श्लुः । 'भृञामित्' इति अभ्यासस्य इत्वम् । शतुर्ङित्त्वात् गुणाभावे यणादेशः । 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् ॥

त्रिषधस्थे बर्हिषि विश्ववेदसा मध्वा यज्ञं मिमिक्षतम् ।
कण्वासो वां सुतसोमा अभिद्यवो युवां हवन्ते अश्विना ॥ ४ ॥

त्रिऽसधस्थे । बर्हिषि । विश्वऽवेदसा । मध्वा । यज्ञम् । मिमिक्षतम् ।
कण्वासः । वाम् । सुतऽसोमाः । अभिऽद्यवः । युवाम् । हवन्ते । अश्विना ॥ ४ ॥



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे vविश्ववेदसा सर्वज्ञावश्विनौ vत्रिषधस्थे कक्ष्यात्रयरूपेणास्तीर्णतया त्रिषु स्थानेष्ववस्थिते vबर्हिषि दर्भे स्थित्वा vमध्वा मधुरेण रसेन vयज्ञं vमिमिक्षतं सेक्तुमिच्छतम् । हे vअश्विना vवां युष्मदर्थं vसुतसोमाः अभिषुतसोमयुक्ताः vअभिद्यवः अभिगतदीप्तयः vकण्वासः vयुवाम् उभौ vहवन्ते आह्वयन्ते ॥ त्रिषधस्थे । त्रिषु स्थानेषु सह तिष्ठतीति त्रिषधस्थं बर्हिः । ' सुपि स्थः ' इति कप्रत्ययः । ' आतो लोप इटि च ' इति आकारलोपः । ' सध मादस्थयोश्छन्दसि ' ( पा. सू. ६. ३. ९६ ) इति सहशब्दस्य सधादेशः । मध्वा । आगमानुशासनस्यानित्यत्वात् नुमभावः । ' जसि च ' इत्यत्र ' जसादिषु च्छन्दसि वावचनम् ' ( पा. सू. ७. ३. १०९. १ ) इति वचनात् नाभावाभावश्च । मिमिक्षतम् । ' मिह सेचने ' । सनि ' एकाचः° ' इति इट्प्रतिषेधः । ' हलन्ताच्च ' इति सनः कित्त्वात् लघूपधगुणाभावः । अभ्यासहलादिशेषौ । ढत्वकत्वषत्वानि । सुतसोमाः । सुतः सोमो यैः । बहुव्रीहिस्वरः । अभिद्यवः । द्युः इति अहर्नाम । तेन तत्संबन्धी प्रकाशो लक्ष्यते । अभिगता द्युम् । ' अत्यादयः क्रान्ताद्यर्थे द्वितीयया ' ( पा. म. २. २. १८. ४ ) इति समासः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

याभिः कण्वमभिष्टिभिः प्रावतं युवमश्विना ।
ताभिः ष्वस्माँ अवतं शुभस्पती पातं सोममृतावृधा ॥ ५ ॥

याभिः । कण्वम् । अभिष्टिऽभिः । प्र । आवतम् । युवम् । अश्विना ।
ताभिः । सु । अस्मान् । अवतम् । शुभः । पती इति । पातम् । सोमम् । ऋतऽवृधा ॥ ५ ॥

हे vअश्विना vयुवं युवामुभौ vयाभिः vअभिष्टिभिः अपेक्षिताभिः रक्षाभिः vकण्वं महर्षिं vप्रावतं रक्षितवन्तौ हे vशुभस्पती शोभनस्य कर्मणः पालकौ vताभिः रक्षाभिः vअस्मान् अनुष्ठातॄन् vसु vअवतं सुष्ठु रक्षतम् । स्पष्टमन्यत् ॥ अभिष्टिभिः । आभिमुख्येनेष्यन्ते इति अभिष्टयः फलानि । ' इषु इच्छायाम् ' । कर्मणि क्तिनि ' तितुत्र° ' इत्यादिना इट्प्रतिषेधः । ' एमन्नादिषु च्छन्दसि पररूपं वक्तव्यम् ' ( पा. सू. ६. १. ९४. ६ ) इति पररूपत्वम् । ' तादौ च° ' इति गतेः प्रकृतिस्वरत्वम् । ' उपसर्गाश्चाभिवर्ज्यम् ' ( फि. सू. ८१ ) इति अभिः अन्तोदात्तः । शुभस्पती । ' शुभ दीप्तौ ' । ' क्विप् च ' इति क्विप् । ' षष्ठ्याः पतिपुत्र° ' इति विसर्जनीयस्य सत्वम् । ' सुबामन्त्रिते° ' इति षष्ठ्यन्तस्य पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य आद्यन्तिकं सर्वानुदात्तत्वम् ॥ ॥ १ ॥

सुदासे दस्रा वसु बिभ्रता रथे पृक्षो वहतमश्विना ।
रयिं समुद्रादुत वा दिवस्पर्यस्मे धत्तं पुरुस्पृहम् ॥ ६ ॥

सुऽदासे । दस्रा । वसु । बिभ्रता । रथे । पृक्षः । वहतम् । अश्विना ।
रयिम् । समुद्रात् । उत । वा । दिवः । परि । अस्मे इति । धत्तम् । पुरुऽस्पृहम् ॥ ६ ॥

हे vदस्रा दर्शनीयावश्विनौ vसुदासे शोभनदानयुक्ताय राज्ञे पिजवनपुत्राय vरथे vवसु vबिभ्रता युवां vपृक्षः अन्नं vवहतं प्रापितवन्तौ । vसमुद्रात् अन्तरिक्षात् । समुद्रम् इति अन्तरिक्षनाम । ' समुद्रः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अध्वरम् ' ( नि. १. ३. १५ ) इति तन्नामसु[1] पाठात्। Vउत Vवा Vदिवस्परि अथवा स्वर्गात् पर्याहृत्य Vपुरुस्पृहं बहुभिः स्पृहणीयं Vरयिं धनम् Vअस्मे Vधत्तम् अस्मासु स्थापयतम्॥ सुष्ठु ददातीति सुदाः। असुनि कृदुत्तरपदप्रकृतिस्वरत्वम्। दिवस्परि। 'पञ्चम्याः परावध्यर्थे' (पा. सू. ८. ३. ५१) इति विसर्जनीयस्य सत्वम्। पुरुस्पृहम्। 'स्पृह ईप्सायाम्'। चुरादिरदन्तः। पुरुभिः स्पृह्यते इति पुरुस्पृहः। कर्मणि घञ्। अतो लोपस्य स्थानिवत्त्वात् लघूपधगुणाभावः। ञित्स्वरेण उत्तरपदस्याद्युदात्तत्वे कृदुत्तरपदप्रकृतिस्वरेण तदेव शिष्यते॥

यन्नासत्या परावति यद्वा स्थो अधि तुर्वशे।
अतो रथेन सुवृता न आ गतं साकं सूर्यस्य रश्मिभिः॥ ७॥

यत्। नासत्या। पराऽवति। यत्। वा। स्थः। अधि। तुर्वशे।
अतः। रथेन। सुऽवृता। नः। आ। गतम्। साकम्। सूर्यस्य। रश्मिऽभिः॥ ७॥

हे Vनासत्या असत्यरहितावश्विनौ Vयत् यदि युवां Vपरावति दूरदेशे Vस्थः वर्तेथे। Vयद्वा अथवा Vअधि Vतुर्वशे अधिके समीपे स्थः। Vअतः अस्माद्दूरात्समीपाद्वा Vसूर्यस्य Vरश्मिभिः Vसाकं सूर्योदयकाले Vसुवृता शोभनवर्तनयुक्तेन Vरथेन Vनः अस्मान् प्रति Vआ Vगतं आगच्छतम्॥ नासत्या। सत्सु भवौ सत्यौ। न सत्यौ असत्यौ। न असत्यौ नासत्यौ। 'नञ्राण्नपात्०' इत्यादिना नञः प्रकृतिभावः। स्थः। 'अस भुवि'। 'श्नसोरल्लोपः' इति अकारलोपः। यद्वृत्तयोगादनिघातः। गतम्। गमेर्लोटि 'बहुलं छन्दसि' इति शपो लुक्। 'अनुदात्तोपदेश०' इत्यादिना अनुनासिकलोपः॥

अर्वाञ्चा वां सप्तयोऽध्वरश्रियो वहन्तु सवनेदुप।
इषं पृञ्चन्ता सुकृते सुदानव आ बर्हिः सीदतं नरा॥ ८॥

अर्वाञ्चा। वाम्। सप्तयः। अध्वरऽश्रियः। वहन्तु। सवना। इत्। उप।
इषम्। पृञ्चन्ता। सुऽकृते। सुऽदानवे। आ। बर्हिः। सीदतम्। नरा॥ ८॥

हे अश्विनौ Vअध्वरश्रियः यागसेविनः Vसप्तयः अश्वाः Vसवनेदुप अस्मदनुष्ठेयानि त्रीणि सवनान्येवोपलक्ष्य Vअर्वाञ्चा अभिमुखौ Vवां युवां Vवहन्तु प्रापयन्तु। हे Vनरा अश्विनौ Vसुकृते सुष्ठु कर्मकारिणे Vसुदानवे शोभनदानयुक्ताय यजमानाय Vइषम् अन्नं Vपृञ्चन्ता संयोजयन्तौ युवां Vबर्हिः Vआ Vसीदतं दर्भं प्राप्नुतम्॥ अर्वाञ्चा। 'सुपां सुलुक्०' इति विभक्तेः आकारः। अध्वरश्रियः। अध्वरं श्रयन्तीति अध्वरश्रियः। 'क्विब्वचिप्रच्छि०' (उ. सू. २. २१५) इत्यादिना क्विप् दीर्घश्च। वहन्तु। 'वह प्रापणे'। शपः पित्त्वादनुदात्तत्वम्। तिङश्च लसार्वधातुकस्वरेण धातुस्वरेणाद्युदात्तत्वम्। पादादित्वात् निघाताभावः। सवना। 'षुञ् अभिषवे'। अभिषूयते सोम एष्विति सवनानि। अधिकरणे ल्युट्। योरनादेशः। गुणावादेशौ। 'लिति' इति प्रत्ययात् पूर्वस्योदात्तत्वम्। 'शेश्छन्दसि

---

१. च-छ-ण-त-ध-न-फ-ल-श-स-अन्तरिक्षनामसु।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

बहुलम् ' इति शेर्लोपः । पृञ्चन्ता । ' पृची संपर्के ' । शतरि रुधादित्वात् श्नम् । ' श्नसोरल्लोपः ' इति अकारलोपः । प्रत्ययस्वरः । सुकृते । ' सुकर्मपाप° ' ( पा. सू. ३. २. ८९ ) इत्यादिना करोतेः भूते काले क्विप् । ' ह्रस्वस्य पिति° ' ( पा. सू. ६. १. ७१ ) इति तुक् । सुदानवे । शोभनं दानु दानं यस्यासौ सुदानुः । दानुशब्दो नुप्रत्ययान्त आद्युदात्तः । ' आद्युदात्तं द्यच्छन्दसि ' इति बहुव्रीहौ उत्तरपदाद्युदात्तत्वम् । सीदतम् । ' षद्लृ विशरणगत्यवसादनेषु ' ॥

तेना नासत्या गतं रथेन सूर्यत्वचा ।
येन शश्वदूहथुर्दाशुषे वसु मध्वः सोमस्य पीतये ॥ ९ ॥

तेन । नासत्या । आ । गतम् । रथेन । सूर्यऽत्वचा ।
येन । शश्वत् । ऊहथुः । दाशुषे । वसु । मध्वः । सोमस्य । पीतये ॥ ९ ॥

हे ᵛनासत्या ᵛसूर्यत्वचा सूर्यसंवृतेन सूर्यरश्मिसदृशेन वा ᵛतेन प्रसिद्धेन ᵛरथेन ᵛआ ᵛगतं आगच्छतम् । ᵛदाशुषे हविर्दत्तवते यजमानाय ᵛवसु धनं ᵛशश्वत् सर्वदा ᵛयेन रथेन ᵛऊहथुः प्रापितवन्तौ । तेन रथेनेति पूर्वत्रान्वयः । किमर्थमागमनमिति तदुच्यते । ᵛमध्वः मधुरस्य ᵛसोमस्य ᵛपीतये सोमपानार्थम् ॥ सूर्यत्वचा । ' त्वच संवरणे ' । त्वचति संवृणोतीति त्वक् रश्मिः । सूर्यस्य त्वगिव त्वग्यस्य । ' सप्तम्युपमान° ' ( पा. सू. २. २. २४. १२ ) इत्यादिना बहुव्रीहिः उत्तरपदलोपश्च । सूर्यशब्दः ' षू प्रेरणे ' इत्यस्मात् क्यपि ' राजसूयसूर्य° ' इत्यादिना रुडागमसहितो निपातितः । ततः प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तः । स एव बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण शिष्यते । ऊहथुः । ' वह प्रापणे ' । लिटि ' असंयोगाल्लिट् कित् ' ( पा. सू. १. २. ५ ) इति लिटः कित्त्वे ' वचिस्वपि° ' इत्यादिना संप्रसारणम् । अभ्यासहलादिशेषौ सवर्णदीर्घः । प्रत्ययस्वरः । यद्वृत्तयोगादनिघातः ॥

उक्थेभिरर्वागवसे पुरूवसू अर्कैश्च नि ह्वयामहे ।
शश्वत्कण्वानां सदसि प्रिये हि कं सोमं पपथुराश्विना ॥ १० ॥

उक्थेभिः । अर्वाक् । अवसे । पुरुवसू इति पुरुऽवसू । अर्कैः । च । नि । ह्वयामहे ।
शश्वत् । कण्वानाम् । सदसि । प्रिये । हि । कम् । सोमम् । पपथुः । अश्विना ॥ १० ॥

ᵛपुरूवसू प्रभूतधनावश्विनौ ᵛअवसे अस्मद्रक्षणार्थम् ᵛउक्थेभिः उक्थैः शस्त्रैः ᵛअर्कैश्च अर्चनसाधनैः स्तोत्रैश्च ᵛअर्वाक् अस्मदाभिमुख्येन ᵛनि ᵛह्वयामहे नितरामाह्वयामः । हे ᵛअश्विना ᵛकण्वानां कण्वपुत्राणां मेधाविनां वा ᵛप्रिये ᵛसदसि यज्ञस्थाने ᵛशश्वत् सर्वदा ᵛसोमं ᵛपपथुः ᵛहि ᵛकं युवां पीतवन्तौ खलु ॥ उक्थेभिः । ' बहुलं छन्दसि ' इति भिसः ऐसादेशाभावः । ' बहुवचने झल्येत् ' इति एत्वम् । अर्कैः । ' ऋच स्तुतौ ' । ' पुंसि संज्ञायां घः प्रायेण ' इति करणे घः । ' चजोः कु घिण्ण्यतोः ' इति कुत्वम् । नि ह्वयामहे । ' निसमुपविभ्यो ह्वः ' ( पा. सू. १. ३. ३० ) इत्यात्मनेपदम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सदसि । सीदन्त्यस्मिन्निति सदः । असुनो नित्त्वादाद्युदात्तत्वम् । पपथुः । ' पा पाने ' । लिटि ' आतो लोप इटि च ' इति आकारलोपः । प्रत्ययस्वरः । ' हि च ' इति निघातप्रतिषेधः ॥ ॥२॥

' सह वामेन ' इति षोडशर्चं पञ्चमं सूक्तम् । प्रस्कण्व ऋषिः । बार्हतत्वात् अयुजो बृहत्यो युजः सतोबृहत्यः । उषा देवता । ' सह षोळशोपस्यं तु ' इति अनुक्रमणिका । प्रातरनुवाके उषस्ये क्रतौ बार्हते छन्दसीदं सूक्तम् । ' अथोपस्यः ' इति खण्डे सूत्रितं–' प्रत्यु अदर्शि सह वामेनेति बार्हतम् ' ( आश्व. श्रौ. ४. १४ ) इति । तथा आश्विनशस्त्रेऽप्येतत्सूक्तं, ' प्रातरनुवाकन्यायेन ' ( आश्व. श्रौ. ६. ५ ) इत्यतिदिष्टत्वात् ॥

सह॑ वा॒मेन॑ न उषो॒ व्यु॑च्छा दुहितर्दिवः ।
सह॒ द्युम्ने॑न बृह॒ता वि॑भावरि रा॒या दे॑वि॒ दास्व॑ती ॥ १ ॥

सह॑ । वा॒मेन॑ । नः॒ । उ॒षः॒ । वि । उ॒च्छ॒ । दु॒हि॒तः॒ । दि॒वः॒ ।
सह॑ । द्युम्ने॑न । बृ॒ह॒ता । वि॒भा॒ऽव॒रि॒ । रा॒या । दे॒वि॒ । दास्व॑ती ॥ १ ॥

हे [v]दुहितर्दिवः[1] द्युदेवतायाः पुत्रि [v]उषः उषःकालदेवते [v]नः अस्मदर्थं [v]वामेन धनेन [v]सह [v]व्युच्छ प्रभातं कुरु । हे [v]विभावरि उषोदेवते [v]बृहता प्रभूतेन [v]द्युम्नेन अन्नेन [v]सह व्युच्छ । हे [v]देवि त्वं [v]दास्वती दानयुक्ता सती [v]राया पशुलक्षणेन धनेन सह व्युच्छ ॥ उच्छ । ' उछी विवासे ' । दुहितर्दिवः । ' सुबामन्त्रिते पराङ्गवत्स्वरे ' इत्यत्र ' परमपि च्छन्दसि ' ( पा. सू. २. १. २. ६ ) इति वचनात् दिवः इत्यस्य पूर्वाङ्गवद्भावे सति ' आमन्त्रितस्य च ' इति षष्ठ्यामन्त्रितसमुदायस्य आष्टमिकं सर्वानुदात्तत्वम् । बृहता । ' बृहन्महतोरुपसंख्यानम् ' इति विभक्तेरुदात्तत्वम् । विभावरि । ' भा दीप्तौ ' । ' आतो मनिन्° ' इत्यादिना वनिप् । ' वनो र च ' इति ङीप्; तत्संनियोगेन नकारस्य रेफादेशः । संबुद्धौ ह्रस्वत्वम् । दास्वती । ' डुदाञ् दाने ' । भावे असुन्प्रत्ययः । तदस्यास्तीति दास्वती । ' मादुपधायाः° ' इति मतुपो वत्वम् । ' उगितश्च ' इति ङीप् ॥

अश्वा॑वतीर्गो॒मती॑र्विश्वसु॒विदो॒ भूरि॑ च्यवन्त वस्त॒वे ।
उदी॑रय॒ प्रति॑ मा सू॒नृता॑ उष॒श्चोद॒ राधो॑ म॒घोना॑म् ॥ २ ॥

अश्व॑ऽवतीः । गोऽम॑तीः । विश्व॑ऽसुविदः । भूरि॑ । च्यव॑न्त । वस्त॑वे ।
उत् । ई॒र॒य॒ । प्रति॑ । मा । सू॒नृता॑ः । उ॒षः॒ । चोद॑ । राधः॑ । म॒घोना॑म् ॥ २ ॥

[v]अश्वावतीः बह्वश्वोपेताः [v]गोमतीः बहुभिर्गोभिर्युक्ताः [v]विश्वसुविदः कृत्स्नस्य धनस्य सुष्ठु लम्भयित्र्यः उषोदेवताः [v]वस्तवे प्रजानां निवासाय [v]भूरि प्रभूतं यथा भवति तथा [v]च्यवन्त प्राप्ताः । हे

---

१. ढ–दिवः दुहितः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उषोदेवते[1] vमा vप्रति मामुद्दिश्य vसूनृताः प्रियहितवाचः[2] vउदीरय ब्रूहि। vमघोनां धनवतां संबन्धि vराधः धनं vचोद[3] अस्मदर्थं प्रेरय ॥ अश्वावतीः। 'मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ' (पा. सू. ६. ३. १३१) इति पूर्वपदस्य दीर्घत्वम्। 'वा छन्दसि' इति पूर्वसवर्णदीर्घनिषेधस्य पाक्षिकस्योक्तेः पूर्वसवर्णदीर्घत्वम्। च्यवन्त। 'च्युङ् गतौ'। लङि 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः। वस्तवे। 'वस निवासे'। 'तुमर्थे सेसेन्°' इति तवेन्प्रत्ययः। नित्त्वादाद्युदात्तत्वम्। ईरय। 'ईर गतौ कम्पने च'। हेतुमति णिच्। चोद। 'चुद संचोदने'। चौरादिकः। लोटि 'छन्दस्युभयथा' इति शपः आर्धधातुकत्वात् 'णेरनिटि' इति णिलोपः। शपः पित्त्वादनुदात्तत्वे धातुस्वरः। पादादित्वात् निघाताभावः। मघोनाम्। षष्ठीबहुवचने 'श्वयुवमघोनामतद्धिते' (पा. सू. ६. ४. १३३) इति संप्रसारणम्॥

उवासोषा उच्छाच्च नु देवी जीरा रथानाम्।
ये अस्या आचरणेषु दध्रिरे समुद्रे न श्रवस्यवः॥ ३॥

उवास। उषाः। उच्छात्। च। नु। देवी। जीरा। रथानाम्।
ये। अस्याः। आऽचरणेषु। दध्रिरे। समुद्रे। न। श्रवस्यवः॥ ३॥

vउषाः vदेवी vउवास पुरा[4] निवासमकरोत् प्रभातं कृतवतीत्यर्थः। vच vनु अद्यापि vउच्छात् व्युच्छति प्रभातं करोति[5]। कीदृशी देवी। vरथानां vजीरा प्रेरयित्री उषःकाले हि रथाः प्रेर्यन्ते। vअस्याः उषसः vआचरणेषु आगमनेषु vये रथाः vदध्रिरे धृताः सज्जीकृता भवन्ति तेषां रथानामिति पूर्वत्रान्वयः। रथप्रेरणे दृष्टान्तः। vश्रवस्यवः धनकामाः vसमुद्रे vन[6] यथा समुद्रमध्ये नावः सज्जीकृत्य प्रेरयन्ति तद्वत्॥ उवास। 'वस निवासे'। णलि 'लिड्यभ्यासस्योभयेषाम्' (पा. सू. ६. १. १७) इति अभ्यासस्य संप्रसारणम्। लित्स्वरेण प्रत्ययात् पूर्वस्योदात्तत्वम्। उच्छात्। लेटि आडागमः। 'इतश्च लोपः°' इति इकारलोपः। तुदादित्वात् शप्रत्ययः। आगमानुदात्तत्वे प्रत्ययस्वरः। उषाः इत्यस्य वाक्यान्तरगतत्वात् तदपेक्षयास्य निघातो न भवति, 'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः' (पा. सू. ८. १. १८. ५) इति वचनात्। जीरा। जु इति गत्यर्थः सौत्रो धातुः। 'जोरी च' (उ. सू. २. १८१) इति रक्प्रत्ययः। अस्याः। 'इदमोऽन्वादेशे°' इति अशादेशोऽनुदात्तः विभक्तिरपि सुत्वादनुदात्तेति सर्वानुदात्तत्वम्। आचरणेषु। चर गत्यर्थः। 'ल्युट् च' (पा. सू. ३. ३. ११५) इति भावे ल्युट्। लित्स्वरेण प्रत्ययात् पूर्वस्योदात्तत्वम्। कृदुत्तरपदप्रकृतिस्वरत्वम्। दध्रिरे। 'धृङ् अवस्थाने'। लिटः कित्त्वाद्गुणाभावे यणादेशः। चित्त्वादन्तोदात्तत्वम्। यच्छब्दयोगादनिघातः। श्रवस्यवः। श्रूयते इति श्रवो धनम्। असुन्। तदात्मन इच्छन्तीति श्रवस्यवः। 'सुप आत्मनः क्यच्'। 'क्याच्छन्दसि' इति उप्रत्ययः॥

---

१. ढ–उषः उषोदेवते। २. ढ–प्रियहिताः वाचः। ३. त-फ–चोदय; ल-स–चोद चोदय। ४. ढ–पुरस्तात्। ५. ढ–करोतीत्यर्थः। ६. ढ–न इव।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उषो ये ते प्र यामेषु युञ्जते मनो दानाय सूरयः ।
अत्राह तत्कण्व एषां कण्वतमो नाम गृणाति नृणाम् ॥ ४ ॥

उषः । ये । ते । प्र । यामेषु । युञ्जते । मनः । दानाय । सूरयः ।
अत्र । अह । तत् । कण्वः । एषाम् । कण्वऽतमः । नाम । गृणाति । नृणाम् ॥ ४ ॥

हे Vउषः Vते तव Vयामेषु गमनेषु सत्सु Vये Vसूरयः विद्वांसः दानाभिज्ञाः Vदानाय धनादिदानार्थं Vमनः स्वकीयं Vप्र Vयुञ्जते प्रेरयन्ति। दानशीला उदाराः प्रभवः प्रातःकाले दातुमिच्छन्तीत्यर्थः। Vएषां दातुमिच्छतां Vनृणां Vतत् Vनाम दानविषये लोकप्रसिद्धं नाम Vकण्वतमः अतिशयेन मेधावी Vकण्वः महर्षिः Vअत्राह अत्रैव उषःकाले Vगृणाति उच्चारयति। यो दातुमिच्छति यश्च नामग्रहणेन दातारं प्रशंसति तावुभावप्युषःकाले एव तथा कुरुत इत्युपसः स्तुतिः ॥ गृणाति । 'गृ शब्दे'। क्रैयादिकः। 'ष्वादीनां ह्रस्वः' इति ह्रस्वत्वम्। नृणाम्। नामि 'नृ च' (पा. सू. ६. ४. ६) इति दीर्घप्रतिषेधः। 'नृ चान्यतरस्याम्' (पा. सू. ६. १. १८४) इति विभक्तेरुदात्तत्वम् ॥

आ घा योषेव सूनर्युषा याति प्रभुञ्जती ।
जरयन्ती वृजनं पद्वदीयत उत्पातयति पक्षिणः ॥ ५ ॥

आ । घ । योषाऽइव । सूनरी । उषाः । याति । प्रऽभुञ्जती ।
जरयन्ती । वृजनम् । पत्ऽवत् । ईयते । उत् । पातयति । पक्षिणः ॥ ५ ॥

Vउषाः देवी Vप्रभुञ्जती प्रकर्षेण सर्वं पालयन्ती Vआ Vयाति Vघ प्रतिदिनमागच्छति खलु। तत्र दृष्टान्तः। Vसूनरी सुष्ठु गृहकृत्यस्य नेत्री Vयोषेव गृहिणीव। कीदृशी उषाः। Vवृजनं गमनशीलं जङ्गमं प्राणिजातं Vजरयन्ती जरां प्रापयन्ती। असकृदुषस्यावृत्तायां वयोहान्या प्राणिनो जीर्णा भवन्ति। किंच उषःकाले Vपद्वत् पादयुक्तं प्राणिजातम् Vईयते निद्रां परित्यज्य स्वस्वकृत्यार्थं[1] गच्छति। किं च इयमुषाः Vपक्षिणः Vउत्पातयति। पक्षिणो ह्युषःकाले समुत्थाय तत्र तत्र व्रजन्ति ॥ घ। 'ऋचि तुनुघ°' इत्यादिना संहितायां दीर्घः। सुष्ठु नयतीति सूनरी। 'नृ नये'। 'अच इः' इति इप्रत्ययः। गतिसमासे 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' (परिभा. २८) इति वचनात् 'कृदिकारादक्तिनः' (पा. सू. ४. १. ४५ ग.) इति ङीष्। 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वम्। 'निपातस्य च' इति पूर्वपदस्य दीर्घः। प्रभुञ्जती। 'भुज पालनाभ्यवहारयोः'। लटः शतृ। रुधादित्वात् श्नम्। 'श्नसोरल्लोपः' इति अकारलोपः। 'उगितश्च' इति ङीप्। 'शतुरनुमः°' इति नद्या उदात्तत्वम्। वृजनम्। 'वृजी वर्जने'। वर्ज्यते इति वृजनं प्राणिजातम्। 'कृपृवृजिमन्दिनिधाञ्भ्यः क्युः' (उ. सू. २. २३९) इति क्युप्रत्ययः। कित्त्वात् लघूपधगुणाभावः। योरनादेशे प्रत्ययस्वरः। पद्वत्। पत् पादः तदस्यातीति पद्वत्। 'मयः' इति मतुपो वत्वम्। व्यत्ययेन मतुप उदात्तत्वम्। न च 'स्वरविधौ व्यञ्जनमविद्यमानवत्' (परिभा. ७९) इति व्यञ्जनस्य

---

१. ढ–स्वकीयकृत्याय।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अविद्यमानवत्त्वे सति 'हस्वनुड्भ्यां मतुप्' इति मतुप उदात्तत्वमिति वाच्यम्। हस्वादिष्येव सिद्धे पुनर्नुड्ग्रहणसामर्थ्यादेषा परिभाषा नाश्रीयते इति वृत्तावुक्तम् ( का. ६. १. १७६ )। इतरथा हि मरुत्वान् इत्यत्रापि मतुप उदात्तत्वं स्यात्॥ ॥ ३ ॥

वि या सृजति समनं व्यर्थिनः पदं न वेत्योदती ।
वयो नकिष्टे पप्तिवांस आसते व्युष्टौ वाजिनीवति ॥ ६ ॥

वि। या। सृजति। समनम्। वि। अर्थिनः। पदम्। न। वेति। ओदती।
वयः। नकिः। ते। पप्तिऽवांसः। आसते। विऽउष्टौ। वाजिनीऽवति ॥ ६ ॥

[V]या देवता [V]समनं समीचीनचेष्टावन्तं पुरुषं [V]वि [V]सृजति प्रेरयति। गृहारामादिचेष्टाकुशलान् पुरुषान् उषःकालः शयनादुत्थाप्य स्वस्वव्यापारे प्रेरयतीति प्रसिद्धम्। किंच उषाः [V]अर्थिनः याचकान् [V]वि सृजति। तेऽपि ह्युषःकाले समुत्थाय स्वकीयदातृगृहे गच्छन्ति। [V]ओदती उषोदेवता [V]पदं स्थानं [V]न [V]वेति न कामयते। उषःकालः शीघ्रं गच्छतीत्यर्थः। हे [V]वाजिनीवति उषोदेवते [V]ते [V]व्युष्टौ त्वदीये प्रभातकाले [V]पाप्तिवांसः पतनयुक्ता [V]वयः पक्षिणः [V]नकिः [V]आसते न तिष्ठन्ति। किंतु स्वस्वनीडाद्विनिर्गत्य गच्छन्तीत्यर्थः॥ सृजति। 'सृज विसर्गे'। तुदादित्वात् शः। तस्य ङित्त्वात् लघूपधगुणाभावः। प्रत्ययस्य पित्त्वादनुदात्तत्वे विकरणस्वरः। यद्वृत्तयोगादनिघातः। ओदती। 'उन्दी क्लेदने'। उनत्ति सर्वं नीहारेण इति ओदती उषाः। शतरि व्यत्ययेन शप्। व्यत्ययेन अनुनासिकलोपे लघूपधगुणः। 'उगितश्च' इति ङीप्। आगमानुशासनस्यानित्यत्वात् नुमभावः। शपः पित्त्वादनुदात्तत्वम्। शतुः अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरेणाद्युदात्तत्वम्। न च 'शतुरनुमः०' इति नद्या उदात्तत्वम्, अन्तोदात्तात् शतुः परस्यास्तद्विधानात्। नकिष्टे। 'युष्मत्तत्ततक्षुःष्वन्तःपादम्' इति षत्वम्। पप्तिवांसः। 'पत्लृ गतौ'। लिटः क्वसुः। क्रादिनियमात् प्राप्त इट्। 'वस्वेकाजाद्घसाम्' इति नियमात् न प्राप्नोति। तत्क्रियते सर्वविधीनां छन्दसि विकल्पितत्वात्। 'तनिपत्योश्छन्दसि' (पा. सू. ६. ४. ९९ ) इति उपधालोपः। 'द्विर्वचनेऽचि' इति स्थानिवद्भावात् द्विर्भावः। प्रत्ययस्वरः। वाजिनीवति। वाजोऽन्नमस्या अस्तीति वाजिनी क्रिया। मत्वर्थीय इनिः। 'ऋन्नेभ्यः०' इति ङीप्। तादृशी क्रिया यस्याः सा। 'तदस्यास्ति०' इति मतुप्। 'संज्ञायाम्' इति मतुपो वत्वम्॥

एषायुक्त परावतः सूर्यस्योदयनादधि ।
शतं रथेभिः सुभगोषा इयं वि यात्यभि मानुषान् ॥ ७ ॥

एषा। अयुक्त। पराऽवतः। सूर्यस्य। उत्ऽअयनात्। अधि।
शतम्। रथेभिः। सुऽभगा। उषाः। इयम्। वि। याति। अभि। मानुषान् ॥ ७ ॥

[V]एषा उषोदेवी [V]शतम् [V]अयुक्त स्वकीयानां रथानां शतं योजितवती। [V]सुभगा सौभाग्ययुक्ता [V]इयम् [V]उषाः [V]परावतः दूरस्थात् [V]सूर्यस्योदयनादधि सूर्योदयस्थानादधिकात् द्युलोकात्

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मानुषान् vअभि मनुष्यानुद्दिश्य vरथेभिः शतसंख्याकैः युक्तैः[1] रथैः[1] vवि vयाति विशेषेण गच्छति ॥ अयुक्त। लुङि ' झलो झलि ' (पा. सू. ८. २. २६) इति सिचो लोपः। उदयनात्। उदेत्यत्रेति उदयनम्। ' इण् गतौ '। अधिकरणे ल्युट्। कृदुत्तरपदप्रकृतिस्वरत्वम्। सुभगा। शोभनो भगो यस्याः सा। ' आद्युदात्तं द्यच्छन्दसि ' इत्युत्तरपदाद्युदात्तत्वम्। मानुषान्। मनोः पुत्रा मानुषाः। ' मनोर्जातावञ्यतौ पुक् च ' इति अञ् पुगागमश्च। ञित्त्वादाद्युदात्तत्वम् ॥

विश्वमस्या नानाम चक्षसे जगज्ज्योतिष्कृणोति सूनरी ।
अप द्वेषो मघोनी दुहिता दिव उषा उच्छदप स्निधः ॥ ८ ॥

विश्वम्। अस्याः। ननाम। चक्षसे। जगत्। ज्योतिः। कृणोति। सूनरी।
अप। द्वेषः। मघोनी। दुहिता। दिवः। उषाः। उच्छत्। अप। स्निधः ॥ ८ ॥

vविश्वं सर्वं vजगत् जङ्गमं प्राणिजातम् vअस्याः उषसः vचक्षसे प्रकाशाय vननाम प्रह्वीभवति। रात्रौ तमसि निमग्नाः सर्वे जनास्तन्निवारयित्रीमुषसमुपलभ्य नमस्कुर्वन्तीत्यर्थः[2]। कुतः। यस्मादेषा vसूनरी सुष्ठु नेत्री अभिमतफलस्य प्रापयित्री उषाः vज्योतिष्कृणोति सर्वं प्रकाशयति। किंच vमघोनी मघवती धनवती vदिवः vदुहिता द्युलोकसकाशादुत्पन्ना vउषाः vद्वेषः द्वेष्टॄन् vअप vउच्छत् अपवर्जयति। तथा vस्निधः शोषयितॄन् vअप उच्छत् अपवर्जयति। तस्मादिष्टप्राप्त्यनिष्टपरिहारहेतुभूतामुषोदेवतां विश्वं जगन्नमस्करोतीत्यर्थः॥ अस्याः। ' इदमोऽन्वादेशे° ' इति अशादेशः अनुदात्तः विभक्तिश्च सुह्वादनुदात्तेति सर्वानुदात्तत्वम्। ननाम। संहितायाम् ' अन्येषामपि दृश्यते ' इति अभ्यासस्य दीर्घत्वम्। तुजादित्वे हि तूतुजानः इत्यादाविव पदकालेऽपि दीर्घः श्रूयते। ज्योतिः। ' इणः षः ' इत्यनुवृत्तौ ' इसुसोः सामर्थ्ये ' (पा. सू. ८. ३. ४४) इति विसर्जनीयस्य षत्वम्। द्वेषः। ' द्विष अप्रीतौ '। ' अन्येभ्योऽपि दृश्यन्ते ' इति विच्। लघूपधगुणः। मघोनी। मघं वनति संभजते इति मघोनी। ' श्वन्नुक्षन्° ' इत्यादिना मघवन्शब्दः कनिन्प्रत्ययान्तो निपातितः। स्त्रियाम् ' ऋन्नेभ्यो ङीप् ' इति ङीप्। भसंज्ञायां ' श्वयुवमघोनामतद्धिते ' इति संप्रसारणम्। उच्छत्। ' उछी विवासे '। विवासो वर्जनम्। ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लङ्। बहुलं ' छन्दस्यमाङ्योगेऽपि ' इति अडागमाभावः। स्निधः। ' स्निधु शोषणे '। ' क्विप् च ' इति क्विप्॥

उष आ भाहि भानुना चन्द्रेण दुहितर्दिवः ।
आवहन्ती भूर्यस्मभ्यं सौभगं व्युच्छन्ती दिविष्टिषु ॥ ९ ॥

उषः। आ। भाहि। भानुना। चन्द्रेण। दुहितः। दिवः।
आऽवहन्ती। भूरि। अस्मभ्यम्। सौभगम्। विऽउच्छन्ती। दिविष्टिषु ॥ ९ ॥

हे vदिवः vदुहितः द्युलोकस्य पुत्रि vउषः उषोदेवते vचन्द्रेण सर्वेषामाह्लादकेन[3] vभानुना प्रकाशेन vआ समन्तात् vभाहि प्रकाशस्व। किं कुर्वती। vदिविष्टिषु दिवसेषु vभूरि प्रभूतं vसौभगं सौभाग्यम्

---

१. ढ–' युक्तैः रथैः ' नास्ति। २. ढ–नमनं कुर्वन्तीत्यर्थः। ३. ढ–सर्वेषामाह्लादकरेण।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vअस्मभ्यम् Vआवहन्ती संपादयन्ती । तथा Vव्युच्छन्ती तमांसि वर्जयन्ती ॥ उषः । पाष्टिकमामन्त्रिताद्युदात्तत्वम् । दुहितर्दिवः । ' परमपि च्छन्दसि ' इति दिवः इत्यस्य परस्य षष्ठ्यन्तस्य पूर्वामन्त्रिताङ्गवद्भावे सति षष्ठ्यामन्त्रितसमुदायस्य आष्टमिकं सर्वानुदात्तत्वम् । आवहन्ती । ङीप्शपौ पित्त्वादनुदात्तौ । शतुश्च अदुपदेशात् लसार्वधातुकस्वरेणानुदात्तत्वम् । अतो धातुस्वरः शिष्यते । समासे कृदुत्तरपदप्रकृतिस्वरत्वम् । भूरि । प्रभवति न विनश्यतीति भूरि । ' अदिशदिभूशुभिभ्यः क्रिन् ' ( उ. सू. ४. ५०५ ) इति क्रिन् । नित्त्वादाद्युदात्तत्वम् । सुभगस्य भावः सौभगम् । ' सुभगान्मन्त्रे ' इति उद्गात्रादिषु पाठात् अञ्प्रत्ययः । ' हृद्भगसिन्ध्वन्ते पूर्वपदस्य च ' इति उभयपदवृद्धौ प्राप्तायां ' सर्वे विधयश्छन्दसि विकल्प्यन्ते ' इति वचनात् अत्रोत्तरपदवृद्धिर्न भवतीति वृत्तावुक्तम् ( का. ७. ३. १९ ) । व्युच्छन्ती । ' उछी विवासे ' । विवासो वर्जनम् । तौदादिकः । अदुपदेशात् लसार्वधातुकानुदात्तत्वे विकरणस्वरः । दिविष्टिषु । दिव्शब्देन दिविष्टः आदित्यो लक्ष्यते । तस्य इष्टयः एषणानि गमनानि येषु दिवसेषु ते दिविष्टयः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

विश्वस्य हि प्राणनं जीवनं त्वे वि यदुच्छसि सूनरि ।
सा नो रथेन बृहता विभावरि श्रुधि चित्रामघे हवम् ॥ १० ॥

विश्वस्य । हि । प्राणनम् । जीवनम् । त्वे इति । वि । यत् । उच्छसि । सूनरि ।
सा । नः । रथेन । बृहता । विभाऽवरि । श्रुधि । चित्रऽमघे । हवम् ॥ १० ॥

हे Vसूनरि उषोदेवि[1] Vविश्वस्य प्राणिजातस्य Vप्राणनं चेष्टनं Vजीवनं प्राणधारणं च Vत्वे Vहि त्वय्येव वर्तते । Vयत् यस्मात् त्वं Vवि Vउच्छसि तमो वर्जयसि । हे Vविभावरि विशिष्टप्रकाशयुक्ते Vसा तादृशी त्वं Vनः अस्मान्प्रति Vबृहता प्रौढेन Vरथेन आयाहीति शेषः । तथा हे Vचित्रामघे विचित्रधनयुक्ते उषोदेवि नः अस्मदीयं Vहवम् आह्वानं Vश्रुधि शृणु ॥ प्राणनम् । ' अन चेष्टायाम् ' । ' ल्युट् च ' इति भावे ल्युट् । योरनादेशः । समासे ' अनितेः ' ( पा. सू. ८. ४. १९ ) इति उपसर्गस्थात्[2] रकारात् निमित्तात्[2] उत्तरस्य नकारस्य णत्वम् । ननु ' अनितेः ' इति इटा निर्देशात् कथम् ' अन चेष्टायाम् ' इत्यस्य णत्वम् । तर्हि जीवनस्य पृथगुपादानात् तेनैव धातुना चेष्टा लक्ष्यते । समासे कृदुत्तरपदप्रकृतिस्वरत्वम् । संहितायाम् एकादेशस्वरेण एकादेशस्योदात्तत्वम् । त्वे । ' सुपां सुलुक् ° ' इति सप्तम्याः शेआदेशः । उच्छसि । ' उछी विवासे ' । तौदादिकः । सिपः पित्त्वादनुदात्तत्वे विकरणस्वरः । ' निपातैर्यद्यदिहन्त ° ' इति निघातप्रतिषेधः । सूनरि । सुष्ठु नयतीति सूनरी । ' नृ नये ' इत्यस्मात् ' अच इः ' इति औणादिक इप्रत्ययः । गतिसमासे कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् ' कृदिकारादक्तिनः ' इति ङीष् । ' निपातस्य च ' इति पूर्वपदस्य दीर्घत्वम् । ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वे प्राप्ते ' आमन्त्रितस्य च ' इति आष्टमिको निघातः । विभावरि । विशिष्टा भा यस्याः सा । ' छन्दसीवनिपौ ' ( पा. सू. ५. २. १०९. २ ) इति मत्वर्थीयो वनिप् । ' वनो र च ' इति ङीप्; तत्संनियोगेन नकारस्य रेफादेशश्च । श्रुधि । ' श्रुश्रृणुपॄकृवृभ्यश्छन्दसि ' इति हेर्धिरादेशः । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । हेरपित्त्वेन प्रत्ययस्वरेणान्तोदात्तत्वम् । पादादित्वात् निघाताभावः । मघम् इति धननाम । चित्रं मघं यस्याः सा चित्रमघा । ' अन्येषामपि दृश्यते ' इति

---

१. ढ–उषोदेवते । २ च-छ-ण-फ-ल-श-स-उपसर्गस्थात् निमित्तात्; त–उपसर्गस्थनिमित्तात् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

संहितायां पूर्वपदस्य दीर्घत्वम्। हवम्। 'ह्वेञ् स्पर्धायां शब्दे च'। 'भावेऽनुपसर्गस्य' इति अप्प्रत्ययः; तत्संनियोगेन संप्रसारणं च ॥ ॥ ४ ॥

उषो वाजं हि वंस्व यश्चित्रो मानुषे जने।
तेना वह सुकृतो अध्वराँ उप ये त्वा गृणन्ति वह्नयः ॥ ११ ॥

उषः। वाजम्। हि। वंस्व। यः। चित्रः। मानुषे। जने।
तेन। आ। वह। सुऽकृतः। अध्वरान्। उप। ये। त्वा। गृणन्ति। वह्नयः ॥ ११ ॥

हे [v]उषः [v]वाजं हविर्लक्षणमन्नं [v]हि श्रुतिषु प्रसिद्धं [v]वंस्व याचस्व स्वीकुर्वित्यर्थः। [v]यः वाजः [v]चित्रः चायनीयः [v]मानुषे मनुष्ये [v]जने जाते यजमाने वर्तते तं वाजमिति पूर्वत्रान्वयः। [v]तेन कारणेन [v]सुकृतः सुष्ठु कृतवतो यजमानान् [v]अध्वरान् हिंसारहितान् यागान् [v]उप [v]आ [v]वह प्रापय। [v]ये यजमानाः [v]वह्नयः यज्ञनिर्वाहकाः [v]त्वा त्वां [v]गृणन्ति स्तुवन्ति तान् सुकृत इति पूर्वेण संबन्धः। एतदुक्तं भवति। यजमानैः प्रत्तं हविः स्वीकृत्य पुनरपि तेषां यज्ञं संपादयेति ॥ वाजम्। 'वज व्रज गतौ'। कर्मणि घञ्। 'अजिव्रज्योश्च' (पा. सू. ७. ३. ६०) इत्यत्र चशब्दस्य अनुक्तसमुच्चयार्थत्वात् वाजो वाज्यमित्यत्रापि कुत्वाभाव इति वृत्तावुक्तत्वात् कुत्वाभावः। 'कर्षात्वतः०' इत्यन्तोदात्तत्वे प्राप्ते वृषादित्वादाद्युदात्तत्वम्। वंस्व। 'वनु याचने'। अत्र याचनवाचिना धातुना तदुत्तरभावी स्वीकारो लक्ष्यते। 'बहुलं छन्दसि' इति विकरणस्य लुक्। अनुदात्तेत्त्वात् लसार्वधातुकानुदात्तत्वे धातुस्वरः। 'हि च' इति निघातप्रतिषेधः। सुकृतः। 'सुकर्मपाप०' इत्यादिना करोतेः भूतार्थे क्विप्। तुगागमः। कृदुत्तरपदप्रकृतिस्वरत्वम्। अध्वरान्। ध्वरो हिंसा नास्त्यस्मिन्निति बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। अध्वरान् इत्यस्य ईप्सिततमत्वात् 'कर्तुरीप्सिततमम्०' (पा. सू. १. ४. ४९) इति कर्मसंज्ञा, सुकृत इत्यस्य तु 'अकथितं च' (पा. सू. १. ४. ५१) इति, 'नीवह्योर्हरतेश्च' (पा. म. १. ४. ५१) इति द्विकर्मकेषु वहतेः परिगणितत्वात्। अध्वरान् इत्यत्र नकारस्य संहितायां 'दीर्घादटि०' इति रुत्वम्। 'आतोऽटि नित्यम्' इति पूर्वस्य आकारस्य सानुनासिकता। गृणन्ति। 'गॄ शब्दे'। 'क्र्यादिभ्यः श्ना'। 'प्वादीनां ह्रस्वः' इति ह्रस्वत्वम्। 'श्नाभ्यस्तयोरातः' इति आकारलोपः। प्रत्ययस्वरः। यद्वृत्तयोगादनिघातः ॥

विश्वान्देवाँ आ वह सोमपीतयेऽन्तरिक्षादुषस्त्वम्।
सास्मासु धा गोमदश्वावदुक्थ्यमुषो वाजं सुवीर्यम् ॥ १२ ॥

विश्वान्। देवान्। आ। वह। सोमऽपीतये। अन्तरिक्षात्। उषः। त्वम्।
सा। अस्मासु। धाः। गोऽमत्। अश्वऽवत्। उक्थ्यम्। उषः। वाजम्। सुऽवीर्यम् ॥ १२ ॥

हे [v]उषः [v]त्वं [v]सोमपीतये सोमपानाय [v]अन्तरिक्षात् अन्तरिक्षलोकात् [v]विश्वान् सर्वान् [v]देवान् [v]आ [v]वह अस्मदीयं देवयजनदेशं प्रापय। हे [v]उषः [v]सा तादृशी त्वं [v]गोमत् गोमन्तं बहुभिर्गोभिर्युक्तं [v]अश्वावत् अश्वैरुपेतम् [v]उक्थ्यं प्रशस्यं [v]सुवीर्यं शोभनवीर्योपेतं [v]वाजम् अन्नम् [v]अस्मासु [v]धाः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

निधेहि स्थापयेत्यर्थः ॥ धाः । दधातेः ' छन्दसि लुङ्लङ्लिटः ' इति प्रार्थनायां लुङ् । ' गातिस्था° ' इति सिचो लुक् । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । गोमत् । अश्वावत् । ' मन्त्रे सोमाश्वेन्द्रिय° ' इति मतुपि दीर्घत्वम् । उभयत्र ' सुपां सुलुक्° ' इति विभक्तेर्लुक् । उक्थ्यम् । उक्थं स्तोत्रम् । तत्र भवमुक्थ्यम् । ' भवे छन्दसि ' इति यत् । ' सर्वे विधयश्छन्दसि विकल्प्यन्ते ' इति ' यतोऽनावः ' इत्याद्युदात्तत्वाभावे ' तित्स्वरितम् ' इति स्वरितत्वम् । उषः । आमन्त्रिताद्युदात्तत्वम् । पादादित्वात् निघाताभावः । सुवीर्यम् । शोभनं वीर्यं यस्य । ' वीरवीर्यौ च ' इत्युत्तरपदाद्युदात्तत्वम् ॥

यस्या रुशन्तो अर्चयः प्रति भद्रा अदृक्षत ।
सा नो रयिं विश्ववारं सुपेशसमुषा ददातु सुग्म्यम् ॥ १३ ॥

यस्याः । रुशन्तः । अर्चयः । प्रति । भद्राः । अदृक्षत ।
सा । नः । रयिम् । विश्वऽवारम् । सुऽपेशसम् । उषाः । ददातु । सुग्म्यम् ॥ १३ ॥

Vयस्याः उषसः Vअर्चयः प्रकाशाः Vरुशन्तः शत्रून् हिंसन्तः Vभद्राः कल्याणाः Vप्रति Vअदृक्षत प्रतिदृश्यन्ते, Vसा तथाभूता Vउषाः Vनः अस्मभ्यं Vरयिं Vददातु । कीदृशं रयिम् । Vविश्ववारं विश्वस्य वारकम् । यद्वा । विश्वैर्वरणीयम्[1] । Vसुपेशसम् । पेश इति रूपनाम । शोभनरूपोपेतं Vसुग्म्यं सुष्ठु गन्तव्यम् । यद्वा । सुग्म्यमिति सुखनाम । तद्धेतुत्वात् ताच्छब्द्यम् ॥ रुशन्तः । ' रुश रिश हिंसायाम् ' । शतरि तुदादित्वात् शः । अदुपदेशात् लसार्वधातुकानुदात्तत्वे सतिशिष्टत्वात् विकरणस्वरे प्राप्ते व्यत्ययेनाद्युदात्तत्वम् । अदृक्षत । दृशेः कर्मणि लुङि झस्य अदादेशः । च्लेः सिच् । ' न दृशः ' ( पा. सू. ३. १. ४७ ) इति क्सप्रतिषेधः । ' एकाचः° ' इति इट्प्रतिषेधः । ' लिङ्सिचावात्मनेपदेषु ' ( पा. सू. १. २. ११ ) इति सिचः कित्त्वात् लघूपधगुणाभावः । ' सृजिदृशोर्झल्यमकिति ' ( पा. सू. ६. १. ५८ ) इति अमागमाभावश्च कित्त्वादेव । षत्वकत्वषत्वानि । अडागम उदात्तः । यद्वृत्तयोगादनिघातः । विश्ववारम् । विश्वं वृणोतीति विश्ववारः । ' वृञ् वरणे ' । कर्मणि अण् । यद्वा । विश्वैर्व्रियते इति विश्ववारः । कर्मणि घञ् । मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् । सुग्म्यम् । सुष्ठु गन्तव्यः सुग्मः । गमेः ' घञर्थे कविधानम्° ' इति कप्रत्ययः । ' गमहन° ' इत्यादिना उपधालोपः । तत्र भवं सुग्म्यम् । ' भवे छन्दसि ' इति यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् ॥

ये चिद्धि त्वामृषयः पूर्व ऊतये जुहूरेऽवसे महि ।
सा नः स्तोमाँ अभि गृणीहि राधसोषः शुक्रेण शोचिषा ॥ १४ ॥

ये । चित् । हि । त्वाम् । ऋषयः । पूर्वे । ऊतये । जुहूरे । अवसे । महि ।
सा । नः । स्तोमान् । अभि । गृणीहि । राधसा । उषः । शुक्रेण । शोचिषा ॥ १४ ॥

---

१. सर्वैर्वरणीयम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [V]महि महिते[1] पूजनीये वा उषोदेवते [V]त्वां [V]ये [V]चिद्धि ये खलु प्रसिद्धाः [V]पूर्वे चिरंतनाः [V]ऋषयः मन्त्रद्रष्टारः [V]ऊतये रक्षणाय । अवः इति अन्ननाम । [V]अवसे अन्नाय च [V]जुहूरे जुह्विरे आहूतवन्तः सूक्तरूपैर्मन्त्रैः स्तुतवन्त इत्यर्थः । हे [V]उषः [V]सा तादृशी त्वं [V]राधसा अस्माभिर्दत्तेन हविर्लक्षणेन धनेन [V]शुक्रेण [V]शोचिषा दीप्तेन तमो निवारयितुं समर्थेन तेजसा चोपलक्षिता सती तेषामृषीणामिव [V]नः अस्माकं [V]स्तोमान् [V]अभि स्तुतीरभिलक्ष्य [V]गृणीहि सम्यक् स्तुतमिति शब्दय । अस्मदीयाभिः स्तुतिभिः संतुष्टा भवेत्यर्थः ॥ ऊतये । अवतेः क्तिनि ' ज्वरत्वर° ' इत्यादिना वकारस्य उपधायाश्च ऊठ् । ' ऊतियूति° ' इत्यादिना क्तिन् उदात्तो निपातितः । जुहूरे । ' ह्वेञ् स्पर्धायां शब्दे च ' । लिटि ' अभ्यस्तस्य च ' इति द्विर्वचनात् पूर्वमेव अभ्यस्तकारणभूतस्य ह्वयतेः संप्रसारणम् । ' अभ्यस्तस्य यो ह्वयतिः कश्चाभ्यस्तस्य ह्वयतिः यस्तस्य कारणम् ' ( का. ६. १. ३३ ) इति व्याख्यातत्वात् । परपूर्वत्वे ' हलः ' इति दीर्घत्वम् । द्विर्वचनादीनि । ' इरयो रे ' इति इरेचो रेआदेशः । ' चितः ' इत्यन्तोदात्तत्वम् । यद्वृत्तयोगादनिघातः । तत्र हि पञ्चमीनिर्देशेऽपि व्यवहितेऽपि कार्यं भवतीत्युक्तम् ( का. ८. १. ६६ ) । महि । ' मह पूजायाम् ' । औणादिकः इप्रत्ययः । ' कृदिकारादक्तिनः ' इति ङीष् । संबुद्धौ ' अम्बार्थ°[2] ' ( पा. सू. ७. ३. १०७ ) इति ह्रस्वत्वम् । स्तोमान् । संहितायां नकारस्य रुत्वाद्युक्तम् । नित्त्वादाद्युदात्तत्वम् । गृणीहि । ' गृ शब्दे ' । क्रैयादिकः । शिति ' प्वादीनां ह्रस्वः ' इति ह्रस्वत्वम् । राधसा । राध्नोत्यनेनेति राधः । असुनो नित्त्वादाद्युदात्तत्वम् । उषः । पादादित्वात् आष्टमिकनिघाताभावे पाष्टिकमामन्त्रिताद्युदात्तत्वम् ॥

उषो यद्ध भानुना वि द्वारावृणवो दिवः ।
प्र नो यच्छतादवृकं पृथु च्छर्दिः प्र देवि गोमतीरिषः ॥ १५ ॥

उषः । यत् । अद्य । भानुना । वि । द्वारौ । ऋणवः । दिवः ।
प्र । नः । यच्छतात् । अवृकम् । पृथु । छर्दिः । प्र । देवि । गोऽमतीः । इषः ॥ १५ ॥

हे [V]उषः त्वम् [V]अद्य अस्मिन् प्रभातसमये [V]यत् यस्मात् [V]भानुना प्रकाशेन [V]दिवः अन्तरिक्षस्य [V]द्वारौ द्वारभूतौ पूर्वापरदिग्भागावन्धकारेणाच्छादितौ [V]वि [V]ऋणवः विश्लिष्य प्रापोषि, तस्मात् त्वं [V]नः अस्मभ्यं [V]छर्दिः तेजस्वि गृहं [V]प्र [V]यच्छतात् देहि । कीदृशं छर्दिः । [V]अवृकं हिंसकरहितं [V]पृथु विस्तीर्णम् । अपि च हे [V]देवि देवनशीले [V]गोमतीः बहुभिर्गोभिर्युक्ताः[3] [V]इषः अन्नानि । प्र इत्युपसर्गस्य आवृत्तेः यच्छतात् इत्यनुषज्यते । [V]प्र यच्छतात् देहि । त्वदागमनस्यास्मद्रक्षणार्थत्वादस्मदभीष्टं गृहादिकं प्रयच्छेत्यर्थः । छर्दिः इति गृहनाम, ' छर्दिः छदिः ' ( नि. ३. ४. १८ ) इति तन्नामसु पाठात् ॥ ऋणवः । ' ऋणु गतौ ' । छान्दसे लङि सिपि तनादित्वात् उप्रत्ययः । ततो व्यत्ययेन शपि गुणावादेशौ । शपः पित्त्वादनुदात्तत्वे उप्रत्ययस्वरः शिष्यते । यद्वृत्तयोगादनिघातः । दिवः । ' ऊडिदम्° ' इत्यादिना विभक्तेरुदात्तत्वम् । प्र नः । ' उपसर्गाद्बहुलम् ' इति बहुलवचनात् नसो णत्वाभावः । यच्छतात् । ' दाण् दाने ' । शपि ' पाघ्रा° ' इत्यादिना यच्छादेशः । अवृकम् । नास्ति वृकोऽस्मिन्निति बहुव्रीहौ ' नञ्सुभ्याम् ' । इत्युत्तरपदान्तोदात्तत्वम् । पृथु । ' प्रथ प्रख्याने ' । ' प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च ' ( उ. सू. १. २८ ) इति कुप्रत्ययः संप्रसारणं च । छर्दिः इति गृहनाम । ' उच्छृदिर्

---

१. ढ–महति । २. श–अम्बार्थनद्योर्ह्रस्वः । ३. ढ–गोयुक्ताः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दीप्तिदेवनयोः' । 'अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्य इसिः' ( उ. सू. २. २६५ ) इति इसिप्रत्ययः । लघूपधगुणः । प्रत्ययस्वरः ॥

सं नो राया बृहता विश्वपेशसा मिमिक्ष्वा समिळाभिरा ।
सं द्युम्नेन विश्वतुरोषो महि सं वाजैर्वाजिनीवति ॥ १६ ॥

सम् । नः । राया । बृहता । विश्वऽपेशसा । मिमिक्ष्व । सम् । इळाभिः । आ ।
सम् । द्युम्नेन । विश्वऽतुरा । उषः । महि । सम् । वाजैः । वाजिनीऽवति ॥ १६ ॥

हे Vउषः Vनः अस्मान् Vराया धनेन Vसं Vमिमिक्ष्व संसिञ्च संयोजयेत्यर्थः । कीदृशेन धनेन । Vबृहता प्रभूतेन Vविश्वपेशसा । पेश इति रूपनाम । बहुविधरूपयुक्तेन । तथा Vइळाभिः Vआ गोभिश्च अस्मान् Vसं मिमिक्ष्व । इळा इति गोनाम । 'इळा जगती' ( नि. २. ११. ७ ) इति तन्नामसु पाठात् । आकारः समुच्चये पदान्ते वर्तमानत्वात् । उक्तं च—'एतस्मिन्नेवार्थे देवेभ्यश्च पितृभ्य एत्याकारः' ( निरु. १. ४ ) इति । किंच हे Vमहि महनीये उषोदेवते Vद्युम्नेन यशसा Vसं मिमिक्ष्व । 'द्युम्नं द्योततेर्यशो वान्नं वा' ( निरु. ५. ५ ) इति यास्कः । कीदृशेन द्युम्नेन । Vविश्वतुरा सर्वेषां शत्रूणां हिंसकेन । तथा हे Vवाजिनीवति अन्नसाधनभूतक्रियायुक्ते Vवाजैः अन्नैः अस्मान् Vसं मिमिक्ष्व । 'अन्नं वै वाजः' ( श. ब्रा. ९. ३. ४. १ ) इति श्रुत्यन्तरात् ॥ राया । 'ऊडिदम्°' इत्यादिना विभक्तेरुदात्तत्वम् । बृहता । 'बृहन्महतोरुपसंख्यानम्' इति विभक्तिरुदात्ता । विश्वपेशसा । विश्वानि पेशांसि यस्यासौ विश्वपेशाः । 'बहुव्रीहौ विश्वं संज्ञायाम्' इति व्यत्ययेन असंज्ञायामपि पूर्वपदान्तोदात्तत्वम् । यद्वा । मरुद्वृधादिर्द्रष्टव्यः । मिमिक्ष्व । 'मिह सेचने' । व्यत्ययेन आत्मनेपदम् । लोटि 'बहुलं छन्दसि' इति शपः श्लुः । द्विर्भावहलादिशेषौ । ढत्वकत्वषत्वानि । प्रत्ययस्वरस्य सतिशिष्टत्वात् स एव शिष्यते । पूर्वपदस्य असमानवाक्यस्थत्वात् 'तिङ्ङतिङः' इति निघातो न भवति, 'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः' इति वचनात् । विश्वतुरा । तूर्वतीति तूः । तुर्वी हिंसार्थः । 'क्विप् च' इति क्विप् । 'राल्लोपः' इति वलोपः । विश्वेषां तूः विश्वतूः । 'समासस्य' इत्यन्तोदात्तत्वम् । वाजिनीवति । वाजोऽन्नमस्या अस्तीति वाजिनी क्रिया । तादृशी क्रिया यस्याः सा तथोक्ता ॥ ॥ ५ ॥

'उषो भद्रेभिः' इति चतुर्ऋचं षष्ठं सूक्तम् । अत्रानुक्रम्यते—'उषश्चतुष्कमानुष्टुभं तु' इति । कण्वपुत्रः प्रस्कण्व ऋषिः । तुह्यादिपरिभाषया इदमुत्तरं चानुष्टुभम् । पूर्वत्र 'उषस्यं तु' इत्युक्तत्वात् इदमपि सूक्तम् उषस्यम् । प्रातरनुवाकस्योषस्ये क्रतावानुष्टुभे छन्दस्येतत्सूक्तम् । सूत्र्यते हि—'उषो भद्रेभिरित्यानुष्टुभम्' ( आश्व. श्रौ. ४. १४ ) इति । आश्विनशस्त्रेऽप्येतत्सूक्तं, 'प्रातरनुवाकन्यायेन' ( आश्व. श्रौ. ६. ५ ) इत्यतिदेशात् ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उषो भद्रेभिरा गहि दिवश्चिद्रोचनादधि ।
वहन्त्वरुणप्सव उप त्वा सोमिनो गृहम् ॥ १ ॥

उषः । भद्रेभिः । आ । गहि । दिवः । चित् । रोचनात् । अधि ।
वहन्तु । अरुणऽप्सवः । उप । त्वा । सोमिनः । गृहम् ॥ १ ॥

हे Vउषः उषोदेवते Vभद्रेभिः भन्दनीयैः[1] शोभनैर्मार्गैः Vदिवः अन्तरिक्षलोकात् । Vरोचनात् रोचमानात् दीप्यमानात् । अधिः उपर्यर्थः । उपरि वर्तमानात् । चित् इति पूजितार्थः[2] । पूजितात् एवंविधादन्तरिक्षलोकात् Vआ Vगहि आगच्छ । हे उषः Vअरुणप्सवः अरुणवर्णा गावः Vसोमिनः सोमयुक्तस्य यजमानस्य Vगृहं देवयजनरूपं यज्ञगृहं Vत्वा त्वाम् Vउप Vवहन्तु प्रापयन्तु ॥ गहि । गमेर्लोटि 'बहुलं छन्दसि' इति शपो लुक् । हेरपित्त्वेन ङित्त्वे 'अनुदात्तोपदेश०' इत्यादिना अनुनासिकलोपः । 'अतो हेः' इति लुक् न भवति, 'असिद्धवदत्रा भात्' इति अनुनासिकलोपस्यासिद्धत्वात् । रोचनात् । 'रुच दीप्तौ' । 'अनुदात्तेतश्च हलादेः' इति युच् । योरनादेशे 'चितः' इत्यन्तोदात्तत्वम् । अरुणप्सवः । 'प्सा भक्षणे' । प्सान्ति भक्षयन्ति स्तनं पिबन्तीति प्सवो वत्साः । औणादिकः कुप्रत्ययः । 'आतो लोप इटि च' इति आकारलोपः । अरुणाः प्सवो यासां तास्तथोक्ताः । अत्र वत्सानामारुण्यप्रतिपादनात् मातृणामपि तथात्वं गम्यते । 'पैतृकमश्वा अनुहरन्ते । मातृकं गावोऽनुहरन्ते' ( पा. म. १. ३. २१. ५ ) इति गोनर्दीयः । तासां च उषोवाहनत्वं निघण्टावुक्तम्–'अरुण्यो गाव उषसाम्' ( नि. १. १५. ७ ) इति । अरुणशब्दः 'अर्तेश्च' ( उ. सू. ५. ६८५ ) इति उनन्प्रत्ययान्तः । 'तृणाख्यायां चित्' ( उ. सू. ३. ३३९ ) इयतः 'चित्' इत्यनुवृत्तेरन्तोदात्तः । स एव बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन शिष्यते ॥

सुपेशसं सुखं रथं यमध्यस्था उषस्त्वम् ।
तेना सुश्रवसं जनं प्रावाद्य दुहितर्दिवः ॥ २ ॥

सुऽपेशसम् । सुऽखम् । रथम् । यम् । अधिऽअस्थाः । उषः । त्वम् ।
तेन । सुऽश्रवसम् । जनम् । प्र । अव । अद्य । दुहितः । दिवः ॥ २ ॥

हे Vउषः Vत्वं Vयं Vरथम् Vअध्यस्थाः अधितिष्ठसि । कीदृशं रथम् । Vसुपेशसं शोभनावयवं शोभनरूपयुक्तं वा । 'पेश इति रूपनाम' ( निरु. ८. ११ ) इति यास्कः । यद्वा । शोभनहिरण्ययुक्तम् । 'पेशः कृशनम्' ( नि. १. २. ६ ) इति तन्नामसु पाठात् । Vसुखं शोभनेन खेन आकाशेन युक्तं विस्तृतमित्यर्थः । यद्वा । सुखहेतुभूतम् । अथवा सुखमिति क्रियाविशेषणम् । सुखं यथा भवति तथेत्यर्थः । हे Vदिवः Vदुहितः द्युलोकसकाशात् उत्पन्ने उषोदेवते Vतेन रथेन Vअद्य अस्मिन् काले Vसुश्रवसं शोभनहविर्युक्तं Vजनं यजमानं Vप्राव प्रकर्षेण गच्छ[3] ॥ सुपेशसम् । 'पिश अवयवे' । अस्मात् असुन्प्रत्ययः । नित्त्वादाद्युदात्तः पेशस्शब्दः । शोभनं पेशो यस्यासौ सुपेशाः । 'आद्युदात्तं

१. ढ–भजनीयैः । २. ढ–पूजार्थीयः । ३. ढ–रक्ष ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ब्यच्छन्दसि ' इत्युत्तरपदाद्युदात्तत्वम् । अध्यस्थाः । तिष्ठतेः ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लुङि ' गातिस्था° ' इति सिचो लुक् । अडागम उदात्तः । यद्वृत्तयोगादनिघातः । ' तिङि चोदात्तवति ' इति गतेरनुदात्तत्वम् । तेन । ' अन्येषामपि दृश्यते ' इति संहितायां दीर्घः । सुश्रवसम् । 'श्रव इत्यन्ननाम श्रूयत इति सतः ' ( निरु. १०. ३ ) इति यास्कः । सुपेशसमितिवदुत्तरपदाद्युदात्तत्वम् । अव । ' अव रक्षणगतिप्रीतितृप्ति° ' इत्युक्तत्वात् अत्र अवतिर्गत्यर्थः । दुहितर्दिवः । ' परमपि च्छन्दसि ' इति षष्ठ्यन्तस्य पूर्वामन्त्रिताङ्गवद्भावे सति पदद्वयसमुदायस्य आष्टमिकं सर्वानुदात्तत्वम् ॥

वयश्चित्ते पतत्रिणो द्विपच्चतुष्पदर्जुनि ।
उषः प्रारन्नृतूँरनु दिवो अन्तेभ्यस्परि ॥ ३ ॥

वयः । चित् । ते । पतत्रिणः । द्विऽपत् । चतुःऽपत् । अर्जुनि ।
उषः । प्र । आरन् । ऋतून् । अनु । दिवः । अन्तेभ्यः । परि ॥ ३ ॥

हे vअर्जुनि शुभ्रवर्णे vउषः उषोदेवते vते तव vऋतूँरनु गमनान्यनुलक्ष्य vद्विपत् द्विपात् मनुष्यादिकं vचतुष्पत् गवादिकं तथा vपतत्रिणः पतत्रवन्तः पक्षोपेताः vवयश्चित् पक्षिणश्च vदिवः vअन्तेभ्यः आकाशप्रान्तेभ्यः vपरि उपरि vप्रारन् प्रकर्षेण गच्छन्ति । रात्रावन्धकारेणाभिभूताः सर्वे प्राणिनः त्वदागमानन्तरं चेष्टावन्तो भवन्तीत्यर्थः ॥ पतत्रिणः । ' पत्लृ गतौ ' । पतत्यनेनेति पतत्रम् । ' अमिनक्षि° ' ( उ. सू. ३. ३८५ ) इत्यादिना अत्रन्प्रत्ययः । ततो मत्वर्थीय इनिः । द्विपत् । द्वौ पादावस्येति ' संख्यासुपूर्वस्य ' ( पा. सू. ५. ४. १४० ) इति पादशब्दस्य अन्तलोपः समासान्तः । अयस्मयादित्वेन भत्वात् ' पादः पत् ' ( पा. सू. ६. ४. १३० ) इति पद्भावः । ' द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ' ( पा. सू. ६. २. १९७ ) इत्युत्तरपदान्तोदात्तत्वम् । चतुष्पत् । चत्वारः पादा अस्य । स्वरव्यतिरिक्तं पूर्ववत् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । ' इणः षः ' इत्यनुवृत्तौ ' इदुदुपधस्य चाप्रत्ययस्य ' ( पा. सू. ८. ३. ४१ ) इति विसर्जनीयस्य षत्वम् । न च परत्वेनास्य असिद्धत्वात् ' कुप्वोः ×क ×पौ च ' ( पा. सू. ८. ३. ३७ ) इति उपध्मानीयादेशः शङ्कनीयः, येन नाप्राप्तिन्यायेन तस्यापवादत्वात् । ' अपवादस्तु परमपि पूर्वं बाधते एव' इति वृत्तावुक्तम् । आरन् । ' ऋ गतौ ' । ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लुङि ' सर्तिशास्त्यर्तिभ्यश्च ' इति चेः अङादेशः । ' ऋदृशोऽङि गुणः ' इति गुणः । आडागमः । ऋतून् । ' ऋ गतौ ' । अस्मात् औणादिको भावे कुप्रत्ययः । अनु । ' अनुर्लक्षणे ' ( पा. सू. १. ४. ८४ ) इति अनोः कर्मप्रवचनीयत्वम् । ' कर्मप्रवचनीययुक्ते° ' ( पा. सू. २. ३. ८ ) इति द्वितीया । संहितायां ' दीर्घादटि समानपादे ' इति नकारस्य रुत्वम् । ' अत्रानुनासिकः पूर्वस्य तु वा ' इति रोः पूर्वस्य वर्णस्य सानुनासिकत्वम् । दिवः । ' ऊडिदम्° ' इति विभक्तिरुदात्ता । अन्तेभ्यः । ' पञ्चम्याः परावध्यर्थे ' इति विसर्जनीयस्य सत्वम् ॥

व्युच्छन्ती हि रश्मिभिर्विश्वमाभासि रोचनम् ।
तां त्वामुषर्वसूयवो गीर्भिः कण्वा अहूषत ॥ ४ ॥

विऽउच्छन्ती । हि । रश्मिऽभिः । विश्वम् । आऽभासि । रोचनम् ।
ताम् । त्वाम् । उषः । वसुऽयवः । गीःऽभिः । कण्वाः । अहूषत ॥ ४ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]उषः [v]द्युच्छन्ती तमो वर्जयन्ती त्वं [v]रश्मिभिः स्वकीयैस्तेजोभिः [v]विश्वं सर्वं भूतजातं [v]रोचनं रोचमानं प्रकाशयुक्तं यथा भवति तथा [v]आ भासि आ समन्तात् प्रकाशसे। [v]हि यस्मादेवं तस्मात् [v]तां तादृशीं [v]त्वां [v]वसूयवः वसुकामाः [v]कण्वाः मेधाविन ऋत्विजः कण्वगोत्रोत्पन्ना वा महर्षयः [v]गीर्भिः स्तुतिलक्षणैर्वचोभिः [v]अहूषत[1] स्तुतवन्तः[1] इत्यर्थः। कण्व इति मेधाविनाम, 'कण्वः ऋभुः' (नि. ३. १५. ७) इति तन्नामसु पाठात्॥ आभासि। 'भा दीप्तौ'। अदादित्वात् शपो लुक्। सिपः पित्त्वादनुदात्तत्वे धातुस्वरः। 'हि च' इति निघातप्रतिषेधः। 'तिङि चोदात्तवति' इति गतेरनुदात्तत्वम्। रोचनम्। 'रुच दीप्तौ'। 'अनुदात्तेतश्च हलादेः' इति युच्। 'चितः' इत्यन्तोदात्तत्वम्। वसूयवः। वसु धनमात्मन इच्छन्तः। 'सुप आत्मनः क्यच्'। 'अकृत्सार्वधातुकयोः०' इति दीर्घः। 'क्याच्छन्दसि' इति उप्रत्ययः। गीर्भिः। 'सावेकाचः०' इति विभक्तेरुदात्तत्वम्। कण्वाः। कण शब्दार्थः। 'अशिप्रुषिलटिकणि०' इत्यादिना क्वन्प्रत्ययः। नित्त्वादाद्युदात्तत्वम्। अहूषत। ह्वेञो लुङि 'ह्वः संप्रसारणम्' इत्यनुवृत्तौ 'बहुलं छन्दसि' इति संप्रसारणम्। परपूर्वत्वे 'हलः' इति दीर्घत्वम्। चेः सिच्। 'एकाचः०' इति इट्प्रतिषेधः। संज्ञापूर्वकस्य विधेरनित्यत्वात् गुणाभावः॥ ॥ ६ ॥

'उदु त्यम्' इति त्रयोदशर्चं सप्तमं सूक्तं प्रस्कण्वस्यार्षं सूर्यदेवत्यम्। आदौ नव गायत्र्यः शिष्टाश्चतस्रोऽनुष्टुभ इत्युक्तम्। तथा चानुक्रान्तम्—'उदु त्यं सप्तोना सौर्यं नवाद्या गायत्र्यः' इति। आश्विनशस्त्रे सौर्ये क्रतौ 'उदु त्यम्' इत्यादयो नवर्चः शंसनीयाः। 'संस्थितेष्वाश्विनाय' इति खण्डे सूत्रितं—'सूर्यो नो दिव उदु त्यं जातवेदसमिति नव' (आश्व. श्रौ. ६. ५) इति॥

**उदु त्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्॥ १॥**

उत्। ऊँ इति। त्यम्। जातऽवेदसम्। देवम्। वहन्ति। केतवः। दृशे। विश्वाय। सूर्यम्॥१॥

[v]केतवः प्रज्ञापकाः सूर्याश्वाः यद्वा सूर्यरश्मयः [v]सूर्यं सर्वस्य प्रेरकमादित्यम् [v]उदु [v]वहन्ति ऊर्ध्वं वहन्ति। उ इति पादपूरणः। उक्तं च—'मिताक्षरेष्वनर्थकाः कमीमिद्धिति' (निरु. १. ९)। किमर्थम्। [v]विश्वाय विश्वस्मै भुवनाय [v]दृशे द्रष्टुम्। यथा सर्वे जनाः सूर्यं पश्यन्ति तथोर्ध्वं वहन्तीत्यर्थः। कीदृशं सूर्यम्। [v]त्यं प्रसिद्धं [v]जातवेदसं जातानां प्राणिनां वेदितारं जातप्रज्ञं जातधनं वा [v]देवं द्योतमानम्। अत्र निरुक्तम्—'उद्वहन्ति तं जातवेदसं देवमश्वाः केतवो रश्मयो वा सर्वेषां भूतानां संदर्शनाय सूर्यम्' (निरु. १२. १५) इति॥ जातवेदसम्। जातानि वेत्तीति जातवेदाः। 'गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च' इति असुन् पूर्वपदप्रकृतिस्वरत्वं च। दृशे। 'दृशे विख्ये च' (पा. सू. ३. ४. ११) इति तुमर्थे निपातितः। सूर्यम्। 'राजसूयसूर्य०' इत्यादिना 'षू प्रेरणे' इत्यस्मात् क्यपि रुडागमसहितो निपातितः। अतः प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरेणाद्युदात्तत्वम्॥

**अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः। सूराय विश्वचक्षसे॥ २॥**

अप। त्ये। तायवः। यथा। नक्षत्रा। यन्ति। अक्तुऽभिः। सूराय। विश्वऽचक्षसे॥ २॥

---

१. ढ—अहूषत आहूतवन्तः स्तुतवन्तः।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]त्ये [v]तायवो [v]यथा प्रसिद्धास्तस्करा इव [v]नक्षत्रा नक्षत्राणि देवगृहरूपाणि । ' देवगृहा वै नक्षत्राणि ' ( तै. ब्रा. १. ५. २. ६ ) इति श्रुत्यन्तरात् । यद्वा । इह लोके कर्मानुष्ठाय[1] ये स्वर्गं प्राप्नुवन्ति ते नक्षत्ररूपेण दृश्यन्ते । तथा च श्रूयते–' यो वा इह यजतेऽमुँ स लोकं नक्षते तन्नक्षत्राणां नक्षत्रत्वम् ' ( तै. ब्रा. १. ५. २. ५ ) इति । यद्वा । तेषां सुकृतिनां ज्योतींषि नक्षत्राण्युच्यन्ते, ' सुकृतां वा एतानि ज्योतींषि यन्नक्षत्राणि ' ( तै. सं. ५. ४. १. ३ ) इत्याम्नानात् । यास्कस्त्वाह— ' नक्षत्राणि नक्षतेर्गतिकर्मणो नेमानि क्षत्राणीति च ब्राह्मणम् ' ( निरु. ३. २० ) इति । तथाविधानि नक्षत्राणि [v]अक्तुभिः रात्रिभिः सह [v]अप [v]यन्ति अपगच्छन्ति । [v]विश्वचक्षसे विश्वस्य सर्वस्य प्रकाशकस्य [v]सूराय सूर्यस्यागमनं दृष्ट्वेति शेषः। तस्करा नक्षत्राणि च रात्रिभिः सह सूर्य आगमिष्यतीति भीत्या पलायन्ते इत्यर्थः । तायुरिति स्तेननाम, ' तायुः तस्करः ' ( नि. ३. २४. ७ ) इति तन्नामसु पाठात् । अक्तुरिति रात्रिनाम, ' शर्वरी अक्तुः ' ( नि. १. ७. ४ ) इति तत्र पाठात् ॥ यथा । ' यथेति पादान्ते ' इति सर्वानुदात्तत्वम् । नक्षत्रा । ' नक्ष गतौ ' । ' अमिनक्षियजिबन्धिपतिभ्योऽत्रन् ' ( उ. सू. ३. ३८५ ) इति अत्रन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । ' नश्राप्नपात्° ' इत्यत्र वृत्तौ त्वेवमुक्तं–' न क्षरति न क्षीयत इति वा नक्षत्रम् । क्षीयतेः क्षरतेर्वा नक्षत्रमिति निपात्यते ' ( का. ६. ३. ७५ ) इति । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । यन्ति । ' इण् गतौ ' । ' इणो यण् ' इति यणादेशः । सूराय विश्वचक्षसे । विश्वं चष्टे प्रकाशयतीति विश्वचक्षाः । ' चक्षेर्बहुलं शिच्च ' ( उ. सू. ४. ६७२ ) इति असुन्प्रत्ययः । शित्त्वेन सार्वधातुकत्वात् ख्याजादेशाभावः । उभयत्र ' षष्ठ्यर्थे चतुर्थी वक्तव्या ' ( पा. म. २. ३. ६२. १ ) इति चतुर्थी ॥

अदृश्रमस्य केतवो वि रश्मयो जनाँ अनु । भ्राजन्तो अग्नयो यथा ॥ ३ ॥

अदृश्रम । अस्य । केतवः । वि । रश्मयः । जनान् । अनु । भ्राजन्तः । अग्नयः । यथा ॥ ३ ॥

[v]अस्य सूर्यस्य [v]केतवः प्रज्ञापकाः [v]रश्मयः दीप्तयः [v]जनान् [v]अनु [v]वि [v]अदृश्रं जातान् सर्वान् अनुक्रमेण प्रेक्षन्ते । सर्वं जगत्प्रकाशयन्तीत्यर्थः । तत्र दृष्टान्तः । [v]भ्राजन्तः दीप्यमानाः [v]अग्नयो [v]यथा अग्नय इव ॥ अदृश्रम् । ' दृशिर् प्रेक्षणे ' । वर्तमाने लुङ् । ' इरितो वा ' ( पा. सू. ३. १. ५७ ) इति च्लेः अङादेशः । ' रुट् ' इत्यनुवृत्तौ ' बहुलं छन्दसि ' ( पा. सू. ७. १. ८ ) इति रुडागमः । अत एव बहुलवचनात् ' ऋदृशोऽङि गुणः ' इति गुणाभावः इत्युक्तम् । ' तिङां तिङो भवन्ति ' इति प्रथमपुरुषबहुवचनस्योत्तमपुरुषैकवचनादेशः । प्रथमपुरुषान्त एव शाखान्तरे श्रूयते–' अदृश्रन्नस्य केतवः ' ( अ. सं. १३. २. १८ ) इति । जनान् इत्यस्य नकारस्य संहितायां रुत्वयत्वादि पूर्ववत् । भ्राजन्तः । शपः पित्त्वादनुदात्तत्वम् । शतुश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते ॥

चातुर्मास्येषु शुनासीर्ये पर्वण्यस्ति सौर्य एककपालः । तस्य ' तरणिः ' इत्येषा अनुवाक्या । तथा च सूत्रितं–' तरणिर्विश्वदर्शतश्चित्रं देवानामुदगादनीकमिति याज्यानुवाक्याः ' ( आश्व. श्रौ. २. २० ) इति । तथा अतिमूर्तिनाम्न्येकाहे कृष्णपक्षे सौरीष्टिः कर्तव्या । तस्यामप्येषा अनुवाक्या । ' अतिमूर्तिना ' इति खण्डे सूत्रितं–' नवो नवो भवति जायमानस्तरणिर्विश्वदर्शतः ' ( आश्व. श्रौ. ९. ८ ) इति ॥

---

१. च-छ-फ–कर्मानुष्ठानात् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमा भासि रोचनम् ॥ ४ ॥

तरणिः । विश्वऽदर्शतः । ज्योतिःऽकृत् । असि । सूर्य । विश्वम् । आ । भासि । रोचनम् ॥ ४ ॥

हे Vसूर्य त्वं Vतरणिः तरिता अन्येन गन्तुमशक्यस्य महतोऽध्वनो गन्ता Vअसि । तथा च स्मर्यते–' योजनानां सहस्रे द्वे द्वे शते द्वे च योजने । एकेन निमिषार्धेन क्रममाण नमोऽस्तु ते ' इति । यद्वा । उपासकानां रोगात् तारयितासि । ' आरोग्यं भास्करादिच्छेत् ' इति स्मरणात् । तथा Vविश्वदर्शतः विश्वैः सर्वैः प्राणिभिर्दर्शनीयः । आदित्यदर्शनस्य चण्डालादिदर्शनजनितपापनिर्हरणहेतुत्वात् । तथा च आपस्तम्बः–' दर्शने ज्योतिषां दर्शनम् ' इति । यद्वा । विश्वं सकलं भूतजातं दर्शतं द्रष्टव्यं प्रकाश्यं येन स तथोक्तः । तथा Vज्योतिष्कृत् ज्योतिषः प्रकाशस्य कर्ता । सर्वस्य वस्तुनः प्रकाशयितेत्यर्थः । यद्वा । चन्द्रादीनां रात्रौ प्रकाशयिता । रात्रौ हि अम्मयेषु चन्द्रादिबिम्बेषु सूर्यकिरणाः प्रतिफलिताः सन्तोऽन्धकारं निवारयन्ति यथा द्वारस्थदर्पणोपरि[1] निपतिताः[2] सूर्यरश्मयो गृहान्तर्गतं तमो निवारयन्ति तद्वदित्यर्थः । यस्मादेवं तस्मात् Vविश्वं व्याप्तं Vरोचनं रोचमानमन्तरिक्षम् Vआ समन्तात् Vभासि प्रकाशयसि । यद्वा । हे सूर्य अन्तर्यामितया सर्वस्य प्रेरक परमात्मन् तरणिः संसाराब्धेस्तारकः असि । यस्मात् त्वं विश्वदर्शतः विश्वैः सर्वैर्मुमुक्षुभिः दर्शतः द्रष्टव्यः साक्षात्कर्तव्यः इत्यर्थः । अधिष्ठानसाक्षात्कारे ह्यारोपितं निवर्तते । ज्योतिष्कृत् ज्योतिषः सूर्यादेः कर्ता । तथा चाम्नायते–' चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ' ( तै. आ. ३. १२.६ ) इति । ईदृशस्त्वं चिद्रूपतया विश्वं सर्वं दृश्यजातं रोचनं रोचमानं दीप्यमानं यथा भवति तथा आ भासि प्रकाशयसि । चैतन्यस्फुरणे हि सर्वं जगत् दृश्यते । तथा चाम्नायते–' तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ( क. उ. ५. १५ ) इति ॥ तरणिः । ' तॄ प्लवनतरणयोः ' । अस्मादन्तर्भावितण्यर्थात् ' अर्तिसृधृधम्यश्यवितृभ्योऽनिः ' इति अनिप्रत्ययः । प्रत्ययाद्युदात्तत्वम् । ज्योतिः करोतीति ज्योतिष्कृत् । ' क्विप् च ' इति क्विप् । ' नित्यं समासेऽनुत्तरपदस्थस्य ' इति विसर्जनीयस्य षत्वम् । भासि । ' भा दीप्तौ ' । अन्तर्भावितण्यर्थात् लटि अदादित्वात् शपो लुक् ॥

प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषान् । प्रत्यङ्विश्वं स्वर्दृशे ॥ ५ ॥

प्रत्यङ् । देवानाम् । विशः । प्रत्यङ् । उत् । एषि । मानुषान् ।

प्रत्यङ् । विश्वम् । स्वः । दृशे ॥ ५ ॥

हे सूर्य त्वं Vदेवानां Vविशः मरुन्नामकान् देवान् । ' मरुतो वै देवानां विशः ' ( तै. सं. २. २. ५. ७ ) इति श्रुत्यन्तरात् । तान् मरुत्संज्ञकान् देवान् Vप्रत्यङ् Vउदेषि तान्प्रतिगच्छन्नुदयं प्राप्नोषि । तेषामभिमुखं यथा भवति तथेत्यर्थः । तथा Vमानुषान् मनुष्यान् Vप्रत्यङ्ङुदेषि । तेऽपि यथा अस्मदभिमुख एव सूर्य उदेतीति मन्यन्ते । तथा Vविश्वं व्याप्तं Vस्वः स्वर्लोकं Vदृशे द्रष्टुं Vप्रत्यङ् उदेषि । यथा स्वर्लोकवासिनो जनाः स्वस्वाभिमुख्येन पश्यन्ति तथोदेषीत्यर्थः । एतदुक्तं भवति । लोकत्रयवर्तिनो जनाः सर्वेऽपि स्वस्वाभिमुख्येन सूर्यं पश्यन्तीति । तथा चाम्नायते—'तस्मात्सर्व एव मन्यते मां प्रत्युदगात् ' ( तै. सं. ६. ५. ४. २) इति ॥ प्रत्यङ् । प्रति अञ्चतीति प्रत्यङ् । ' अञ्चु गति-

---

१. ल–द्वारस्थदर्पणे । २. त-ध-श–निपातिताः; फ–पतिताः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पूजनयोः '। 'ऋत्विक्° ' इत्यादिना क्विन्। 'अनिदिताम्° ' इति नलोपः। 'उगिदचाम्° ' इति नुम्। हलङ्यादिसंयोगान्तलोपौ। संयोगान्तलोपस्यासिद्धत्वात् उपधादीर्घनलोपयोरभावः। 'क्विन्प्रत्ययस्य कुः' ( पा. सू. ८. २. ६२ ) इति कुत्वम्। 'अनिगन्तोऽञ्चतौ° ' ( पा. सू. ६. २. ५२ ) इति अनिगन्तः इति पर्युदासात् पूर्वपदप्रकृतिस्वराभावे कृदुत्तरपदप्रकृतिस्वरत्वम्। एषि। 'इण् गतौ '। सिपि अदादित्वात् शपो लुक्। 'आदेशप्रत्यययोः ' इति षत्वम्। स्वः। सुपूर्वात् अर्तेः विच्। गुणे यणादेशः। 'न्यङ्स्वरौ स्वरितौ च ' इति स्वरितत्वम्। दृशे। 'दृशिर् प्रेक्षणे ' इत्यस्मात् 'दृशे विख्ये च ' इति तुमर्थे निपातितः ॥ ॥ ७ ॥

**येना पावक चक्षसा भुरण्यन्तं जनाँ अनु । त्वं वरुण पश्यसि ॥ ६ ॥**

येन। पावक। चक्षसा। भुरण्यन्तम्। जनान्। अनु। त्वम्। वरुण। पश्यसि ॥ ६ ॥

हे ᵛपावक सर्वस्य शोधक ᵛवरुण अनिष्टनिवारक सूर्य ᵛत्वं ᵛजनान् जातान् प्राणिनः ᵛभुरण्यन्तं धारयन्तं पोषयन्तं वा इमं लोकं ᵛयेन ᵛचक्षसा प्रकाशेन ᵛअनु ᵛपश्यसि अनुक्रमेण प्रकाशयसि तं प्रकाशं[1] स्तुम इति शेषः। यद्वा। उत्तरस्यामृचि संबन्धः। तेन चक्षसा व्येषीति। तथा च यास्केनोक्तं—'तत्ते वयं स्तुम इति वाक्यशेषोऽपि वोत्तरस्यामन्वयस्तेन व्येषि ' ( निरु. १२. २२ ) इति॥ भुरण्यन्तम्। 'भुरण धारणपोषणयोः '। कण्ड्वादित्वात् यक्। ततः शतरि कर्तरि शप्। अदुपदेशात् लसार्वधातुकानुदात्तत्वे यक एव स्वरः शिष्यते। वरुण। 'वृञ् वरणे '। अस्मादन्तर्भावितण्यर्थात् 'कृवृदारिभ्य उनन् ' ( उ. सू. ३. ३३३ ) इति उनन्प्रत्ययः। अत्र वरुणशब्देनादित्य एवोच्यते। तथा चान्यत्राम्नातं—'तस्यै मित्रश्च वरुणश्चाजायेताम् ' ( तै. ब्रा. १. १. ९. २ ) इति। 'मित्रश्च वरुणश्च धाता चार्यमा च ' ( तै. आ. १. १३. ३ ) इति च॥

**वि द्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः । पश्यञ्जन्मानि सूर्य ॥ ७ ॥**

वि। द्याम्। एषि। रजः। पृथु। अहा। मिमानः। अक्तुऽभिः। पश्यन्। जन्मानि। सूर्य ॥ ७ ॥

हे ᵛसूर्य त्वं ᵛपृथु विस्तीर्णं ᵛरजः लोकम्। 'लोका रजांस्युच्यन्ते ' ( निरु. ४. १९ ) इति यास्कः। कं लोकम्। ᵛद्याम् अन्तरिक्षलोकं ᵛवि ᵛएषि विशेषेण गच्छसि। किं कुर्वन्। ᵛअहा अहानि ᵛअक्तुभिः रात्रिभिः सह ᵛमिमानः उत्पादयन्। आदित्यगत्यधीनत्वात् अहोरात्रविभागस्य। तथा ᵛजन्मानि जननवन्ति भूतजातानि[2] ᵛपश्यन् प्रकाशयन्॥ रजस्पृथु इत्यत्र 'छन्दसि वाप्राम्रेडितयोः ' ( पा. सू. ८. ३. ४९ ) इति विसर्जनीयस्य सत्वम्। अहा। 'शेश्छन्दसि बहुलम् ' इति शेर्लोपः। मिमानः। 'माङ् माने '। जौहोत्यादिकः। शानचि श्लौ द्विर्भावे 'शृजामित् ' इति अभ्यासस्य इत्वम्। 'श्नाभ्यस्तयोरातः ' इति आकारलोपः। 'अभ्यस्तानामादिः ' इति अभ्यस्तस्याद्युदात्तत्वम्। जन्मानि। 'जनी प्रादुर्भावे '। 'अन्येभ्योऽपि दृश्यन्ते ' इति मनिन्। नित्त्वादाद्युदात्तत्वम्॥

**सप्त त्वा हरितो रथे वहन्ति देव सूर्य । शोचिष्केशं विचक्षण ॥ ८ ॥**

सप्त। त्वा। हरितः। रथे। वहन्ति। देव। सूर्य। शोचिःऽकेशम्। विऽचक्षण ॥ ८ ॥

---

१. च-फ–प्रकाशरूपम्। २. च-फ–भूतानि।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [V]सूर्य [V]देव द्योतमान [V]विचक्षण सर्वस्य प्रकाशयितः [V]सप्त सप्तसंख्याकाः [V]हरितः अश्वाः रसहरणशीला रश्मयो वा [V]त्वा त्वां [V]वहन्ति प्रापयन्ति। कीदृशम्। [V]रथे अवस्थितमिति शेषः। तथा [V]शोचिष्केशम्। शोचींषि तेजांस्येव यस्मिन् केशा इव दृश्यन्ते स तथोक्तः तम्। हरितः इति आदित्याश्वानां संज्ञा, ' हरित आदित्यस्य ' ( नि. १. १५. ३ ) इति निघण्टावुक्तत्वात्॥ शोचिष्केशम्। ' शुच दीप्तौ '। ' अर्चिशुचिहुसृपि° ' इत्यादिना इसिप्रत्ययान्तः अन्तोदात्तः। स एव बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन शिष्यते। ' नित्यं समासेऽनुत्तरपदस्थस्य ' इति विसर्जनीयस्य षत्वम्॥

**अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः। ताभिर्याति स्वयुक्तिभिः॥ ९॥**

अयुक्त। सप्त। शुन्ध्युवः। सूरः। रथस्य। नप्त्यः। ताभिः। याति। स्वयुक्तिऽभिः॥९॥

[V]सूरः सर्वस्य प्रेरकः सूर्यः [V]शुन्ध्युवः शोधिका अश्वस्त्रियः तादृशीः [V]सप्त सप्तसंख्याकाः [V]अयुक्त स्वरथे योजितवान्। कीदृश्यः[1]। [V]रथस्य [V]नप्त्यः न पातयित्र्यः। याभिर्युक्ताभिः रथो याति न पतति तादृशीभिरित्यर्थः। एवंभूताभिः [V]ताभिः अश्वस्त्रीभिः [V]स्वयुक्तिभिः स्वकीययोजनेन रथे संबद्धाभिः [V]याति यज्ञगृहं प्रत्यागच्छति। अतस्तस्मै हविर्दातव्यमिति वाक्यशेषः॥ अयुक्त। ' युजिर् योगे '। स्वरितेत्त्वात् कर्त्रभिप्राये आत्मनेपदम्। लुङि च्लेः सिच्। ' एकाचः° ' इति इट्प्रतिषेधः। ' लिङ्सिचावात्मनेपदेषु ' ( पा. सू. १. २. ११ ) इति सिचः कित्त्वात् लघूपधगुणाभावः। ' झलो झलि ' इति सिचः सकारलोपः। ' चोः कुः ' इति कुत्वम्। शुन्ध्युवः। ' शुन्ध विशुद्धौ '। ' यजिमनिशुन्धिदसिजनिभ्यो युः ' ( उ. सू. ३. ३०० ) इति युप्रत्ययः। शसि ' तन्वादीनां छन्दसि बहुलमुपसंख्यानम् ' ( पा. सू. ६. ४. ७७. १ ) इति उवङादेशः। सूरः। ' षू प्रेरणे '। ' सुसूधागृधिभ्यः क्रन् ' ( उ. सू. २. १८२ ) इति क्रन्प्रत्ययः। नित्त्वादाद्युदात्तत्वम्। नप्त्यः। न पातयतीत्यर्थे ' नप्तृनेष्टृ° ' ( उ. सू. २. २५२ ) इत्यादिना उणादिषु नप्तृशब्दस्तृजन्तो निपातितः। ' ऋन्नेभ्यो ङीप् ' इति ङीप्। यणादेशे ' उदात्तयणो हल्पूर्वात् ' इति ङीप उदात्तत्वम्। ' सुपां सुपो भवन्ति ' इति शसो जसादेशः। ततो यणादेशे ' उदात्तस्वरितयोर्यणः° ' इति स्वरितत्वम्। रेफलोपश्छान्दसः। उक्तं च-' द्वौ चापरौ वर्णविकारनाशौ ' ( का. ६. ३. १०९ ) इति। ' शाखान्तरे तु नप्त्यः ' इत्येव पठ्यते। स्वयुक्तिभिः। स्वकीयाः सूर्यसंबन्धिन्यो युक्तयो योजनानि यासाम्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्॥

अवभृथेष्टौ होत्रकाः जलान्निष्क्रम्य 'उद्वयं तमसस्परि ' इति मन्त्रं ब्रूयुः। तथा च ' पत्नीसंयाजैश्चरित्वा ' इति खण्डे सूत्रितम्-' उद्वयं तमसस्परीत्युदेत्य ' ( आश्व. श्रौ. ६. १३ ) इति॥

**उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम्।**
**देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्॥ १०॥**

उत्। वयम्। तमसः। परि। ज्योतिः। पश्यन्तः। उत्ऽतरम्।
देवम्। देवऽत्रा। सूर्यम्। अगन्म। ज्योतिः। उत्ऽतमम्॥ १०॥

---

१. ढ-कीदृशीः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vवयम् अनुष्ठातारः vतमसस्परि तमस उपरि रात्रेरूर्ध्वं वर्तमानं तमसः पापात् परि उपरि वर्तमानं वा पापरहितमित्यर्थः । तथा चाम्नायते–' उद्वयं तमसस्परीत्याह पाप्मा वै तमः पाप्मानमेवास्मादप हन्ति ' ( तै. सं. ५. १. ८. ६ ) इति । vज्योतिः तेजस्विनम् vउत्तरम् उद्ततरमुत्कृष्टतरं वा vदेवत्रा देवेषु मध्ये vदेवं दानादिगुणयुक्तं vसूर्यं vपश्यन्तः स्तुतिभिर्हविर्भिश्चोपासीनाः सन्तः vउत्तमम् उत्कृष्टतमं vज्योतिः सूर्यरूपम् vअगन्म प्राप्नवाम। तथा च श्रूयते–' अगन्म ज्योतिरुत्तममित्याहासौ वा आदित्यो ज्योतिरुत्तममादित्यस्यैव सायुज्यं गच्छति ' (तै.सं.५.१.८.६ ) इति। युक्तं चैतत्, ' तं यथा यथोपासते तदेव भवन्ति ' इति श्रुत्यन्तरात् ॥ तमसस्परि। ' पञ्चम्याः परावध्यर्थे ' इति विसर्जनीयस्य सत्वम्। ज्योतिष्पश्यन्तः । ' इसुसोः सामर्थ्ये ' ( पा. सू. ८. ३. ४४ ) इति विसर्जनीयस्य षत्वम्। व्यपेक्षालक्षणं सामर्थ्यं तत्राङ्गीक्रियते । देवत्रा । ' देवमनुष्यपुरुषपुरुमर्त्येभ्यो द्वितीयासप्तम्योर्बहुलम् ' ( पा. सू. ५. ४. ५६ ) इति सप्तम्यर्थे त्राप्रत्ययः । प्रत्ययस्वरः । अगन्म । ' छन्दसि लुङ्लङ्लिटः ' इति प्रार्थनायां लङि ' बहुलं छन्दसि ' इति शपो लुक् । ' स्वोश्च ' ( पा. सू. ८. २. ६५ ) इति धातोः मकारस्य नकारः । अडागम उदात्तः । पादादित्वात् निघाताभावः । उत्तमम् । तमपः पित्त्वादनुदात्तत्वे प्राप्ते ' उत्तमशब्धत्तमौ सर्वत्र ' इति उञ्छादिषु पाठादन्तोदात्तत्वम् ॥

' उद्यन् ' इत्ययं तृचो रोगशान्त्यर्थः । तथा च अनुक्रमण्यामुक्तम्—' अन्त्यस्तृचो रोगघ्न उपनिषत् ' इति । युक्तं चैतत् । यस्मादनेन तृचेन त्वग्दोषशान्तये प्रस्कण्वः सूर्यमस्तौत् तेन तृचेन स्तुतः सूर्यस्तमृषिं रोगान्निरगमयत् तस्मादिदानीमपि रोगशान्तयेऽनेन तृचेन सूर्य उपासनीयः । तदुक्तं शौनकेन—' उद्यन्नद्येति मन्त्रोऽयं सौरः पापप्रणाशनः । रोगघ्नश्च विषघ्नश्च मुक्तिमुक्तिफलप्रदः ' इति ॥

**उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम् ।**
**हृद्रोगं मम सूर्य हरिमाणं च नाशय ॥ ११ ॥**

उत्ऽयन् । अद्य । मित्रऽमहः । आऽरोहन् । उत्ऽतराम । दिवम् ।
हृत्ऽरोगम । मम । सूर्य । हरिमाणम । च । नाशय ॥ ११ ॥

हे vसूर्य सर्वस्य प्रेरक vमित्रमहः सर्वेषामनुकूलदीप्तियुक्त vअद्य अस्मिन् काले vउद्यन् उदयं गच्छन् vउत्तराम् उद्ततरां vदिवम् अन्तरिक्षम् vआरोहन् आभिमुख्येन प्राप्नुवन् । यद्वा । दिवम् अन्तरिक्षम् उत्तराम् आरोहन् उत्कर्षेण प्राप्नुवन्। एवंविधस्त्वं vमम vहृद्रोगं हृदयगतमान्तरं रोगं vहरिमाणं शरीरगतकान्तिहरणशीलं बाह्यं रोगम्[1]। यद्वा। शरीरगतं हरिद्वर्णं रोगप्राप्तं वैवर्ण्यमित्यर्थः । तदुभयमपि vनाशय । मां स्तोतारमुभयविधाद्रोगान्मोचयेत्यर्थः ॥ मित्रमहः । मित्रमनुकूलं महस्तेजो यस्यासौ । आमन्त्रितनिघातः । उत्तराम् । उत् इत्यनेन उपसर्गेण स्वसंसृष्टधात्वर्थो लक्ष्यते । तस्मादातिशायनिकः तरप्प्रत्ययः । प्रथमपक्षेऽन्तरिक्षविशेषणत्वेन द्रव्यप्रकर्षप्रतीतेः आम् न भवति । द्वितीये त्वारोहणक्रियायाः प्रकर्षो गम्यते इति ' किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे ' ( पा. सू. ५. ४. ११ ) इति आमुः[2] । प्रथमपक्षे टाप्सरपोः पित्त्वादनुदात्तत्वे उपसर्गस्वर एव शिष्यते । द्वितीये तु आम्प्रत्ययस्य सतिशिष्टत्वात् तस्यैव स्वरे प्राप्ते व्यत्ययेनाद्युदात्तत्वम् । वृषादिर्वा द्रष्टव्यः । स ह्याकृतिगणः । हृद्रोगम् । ' वा शोकष्यञ्रोगेषु ' ( पा. सू. ६. ३. ५१ )

---

१. च-छ-न-फ–रोगं च । २. च-छ-त-न-फ-श-स–आम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति हृदयशब्दस्य हृदादेशः । मम । ' युष्मदस्मदोर्ङसि ' इत्याद्युदात्तत्वम् । हरिमाणम् । ' हृञ् हरणे ' । ' जनिहृभ्यामिमनिन् ' ( उ. सू. ४. ५८८ ) इति औणादिक इमनिन्प्रत्ययः । व्यत्ययेनान्तोदात्तत्वम् । यद्वा । हरिच्छब्दस्य वर्णवाचित्वात् ' वर्णदृढादिभ्यः ष्यञ् च ' ( पा. सू. ५. १. १२३ ) इति चकारात् इमनिन्प्रत्ययः । ' इष्ठेमेयःसु ' इत्यनुवृत्तौ ' टेः ' इति टिलोपः ॥

शुकेषु मे हरिमाणं रोपणाकासु दध्मसि ।
अथो हारिद्रवेषु मे हरिमाणं नि दध्मसि ॥ १२ ॥

शुकेषु । मे । हरिमाणम् । रोपणाकासु । दध्मसि ।
अथो इति । हारिद्रवेषु । मे । हरिमाणम । नि । दध्मसि ॥ १२ ॥

vमे मदीयं vहरिमाणं शरीरगतं हरिद्वर्णस्य भावं vशुकेषु तादृशं वर्णं कामयमानेषु पक्षिषु तथा vरोपणाकासु शारिकासु पक्षिविशेषेषु vदध्मसि स्थापयामः । vअथो अपि च vहारिद्रवेषु हरितालद्रुमेषु तादृग्वर्णवत्सु vमे मदीयं vहरिमाणं vनि vदध्मसि निदधीमहि । स च हरिमा तत्रैव सुखेनास्ताम् अस्मान् मा बाधिष्टेत्यर्थः ॥ दध्मसि । ' इदन्तो मसि ' इति मस इकारागमः ॥

उदगादयमादित्यो विश्वेन सहसा सह ।
द्विषन्तं मह्यं रन्धयन्मो अहं द्विषते रधम् ॥ १३ ॥

उत् । अगात् । अयम् । आदित्यः । विश्वेन । सहसा । सह ।
द्विषन्तम् । मह्यम् । रन्धयन् । मो इति । अहम् । द्विषते । रधम् ॥ १३ ॥

vअयं पुरोवर्ती vआदित्यः अदितेः पुत्रः सूर्यः vविश्वेन vसहसा सर्वेण बलेन vसह vउदगा उदयं प्राप्तवान् । किं कुर्वन् । vमह्यं vद्विषन्तं vरन्धयन् ममोपद्रवकारिणं[1] हिंसन्[1] अपि च vअहं vद्विषते अनिष्टकारिणे रोगाय vमो vरधं नैव हिंसां करोमि । सूर्य एव अस्मदनिष्टकारिणं रोगं विनाशयत्वित्यर्थः ॥ अगात् । एतेर्लुङि ' इणो गा लुङि ' इति गादेशः । ' गातिस्था° ' इति सिचो लुक् । आदित्यः । ' दित्यदित्यादित्य° ' इति अपत्यार्थे प्राग्दीव्यतीयो ण्यप्रत्ययः । रन्धयन् । ' रध हिंसासंराद्धयोः ' । ण्यन्तात् लटः शतृ । ' रधिजभोरचि ' ( पा. सू. ७. १. ६१ ) इति णौ धातोः नुमागमः । मो । मा उ निपातद्वयसमुदायो मैवेत्यस्यार्थे । ' ओत् ' ( पा. सू. १. १. १५ ) इति प्रगृह्यत्वे ' प्लुतप्रगृह्या अचि° ' इति प्रकृतिभावः । द्विषते । ' शतुरनुमः° ' इति विभक्तेरुदात्तत्वम् । रधम् । रधेर्लुङि पुषादित्वात् च्लेः अङादेशः । ' रधिजभोरचि ' इति धातोः नुम् । ' अनिदिताम् ° ' इति अनुषङ्गलोपः । ' न माङ्योगे ' इति अडभावः ॥ ॥ ८ ॥ ॥ ९ ॥

---

१. च-छ-ण-त-ध-न-फ-श–ममोपद्रवकारिणं रोगं हिंसन् ; ल–ममोपद्रवकारणं हिंसन् ; स–ममोपद्रवकारकं रोगं हिंसन् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दशमेऽनुवाके सप्त सूक्तानि। तत्र 'अभि त्यम्' इति पञ्चदशर्चं प्रथमं सूक्तम्। अत्रेतिहासमाचक्षते– अङ्गिरा इन्द्रसदृशं पुत्रमात्मनः कामयमानो देवता उपासांचक्रे। तस्य सव्याख्येन पुत्ररूपेणेन्द्र एव स्वयं जज्ञे जगति मत्तुल्यः कश्चिन्मा भूदिति। स सव्य आङ्गिरसोऽस्य सूक्तस्य ऋषिः। चतुर्दशीपञ्चदश्यौ त्रिष्टुभौ। 'त्रिष्टुबन्तस्य सूक्तस्य शिष्टा जगत्यः' इति परिभाषयावशिष्टास्त्रयोदशर्चो जगत्यः। इन्द्रो देवता। तदेतत्सर्वम् अनुक्रमण्यामुक्तम्–'अभि त्यं पञ्चोना सव्यो द्वित्रिष्टुबन्तमङ्गिरा इन्द्रतुल्यं पुत्रमिच्छन्नभ्यध्यायत्सव्य इतीन्द्र एवास्य पुत्रोऽजायत' इति। अतिरात्रे प्रथमे रात्रिपर्याये होतुः शस्त्रे इदं सूक्तं शंसनीयम्। 'अतिरात्रे पर्यायाणाम्' इति खण्डे सूत्रितम्–'अभि त्यं मेषमध्वर्यवो भरतेन्द्राय सोममिति याज्या' (आश्व. श्रौ. ६. ४) इति। गवामयनस्य मध्यभूते विषुवत्संज्ञकेऽहन्यपि निष्केवल्ये इदं सूक्तं शंसनीयम्। तथा च सूत्रितं—'यस्तिग्मशृङ्गोऽभि त्यं मेषमिन्द्रस्य नु वीर्याणीत्येतस्मिन्नैन्द्रीं निविदं शस्त्वा' (आश्व. श्रौ. ८. ६) इति॥

**अभि त्यं मेषं पुरुहूतमृग्मियमिन्द्रं गीर्भिर्मदता वस्वो अर्णवम्।**
**यस्य द्यावो न विचरन्ति मानुषा भुजे मंहिष्ठमभि विप्रमर्चत॥ १॥**

अभि। त्यम्। मेषम्। पुरुऽहूतम्। ऋग्मियम्। इन्द्रम्। गीःऽभिः। मदत। वस्वः। अर्णवम्। यस्य। द्यावः। न। विऽचरन्ति। मानुषा। भुजे। मंहिष्ठम्। अभि। विप्रम्। अर्चत॥ १॥

त्यं तं[1] प्रसिद्धं मेषं शत्रुभिः स्पर्धमानम्। यद्वा। कण्वपुत्रं मेधातिथिं यजमानमिन्द्रो मेषरूपेणागत्य तदीयं सोमं पपौ। स ऋषिस्तं मेष इत्यवोचत्। अत इदानीमपि मेष[2] इति इन्द्रः[2] अभिधीयते। 'मेधातिथेर्मेष' इति सुब्रह्मण्यमन्त्रैकदेशस्य व्याख्यानरूपं ब्राह्मणमेवमाम्नायते–'मेधातिथिं हि कण्वायनिं[3] मेषो भूत्वाजहार' इति। आगत्य सोममपहृतवानित्यर्थः। पुरुहूतं पुरुभिर्यजमानैराहूतं ऋग्मियम् ऋग्भिर्विक्रियमाणं स्तूयमानमित्यर्थः। स्तुत्या हि देवता विक्रियते। यद्वा। ऋग्भिर्मीयते शब्द्यते[4] इति ऋग्मीः। तम्। वस्वो अर्णवं धनानामावासभूमिं एवंगुणविशिष्टम् इन्द्रं हे स्तोतारः गीर्भिः स्तुतिभिः अभि मदत आभिमुख्येन हर्षं प्रापयत। यस्य इन्द्रस्य कर्माणि मानुषा मनुष्याणां हितानि विचरन्ति विशेषेण वर्तन्ते। तत्र दृष्टान्तः। द्यावो न। यथा सूर्यरश्मयः सर्वेषां हितकराः। भुजे भोगाय मंहिष्ठम् अतिशयेन प्रवृद्धं विप्रं मेधाविनं तथाविधम् इन्द्रम् अभि अर्चत अभिपूजयत॥ मेषम्। 'मिष स्पर्धायाम्'। इगुपधलक्षणे के प्राप्ते 'देवसेनमेषादयः पचादिषु द्रष्टव्याः' इति वचनात् अच्प्रत्ययः। ऋग्मियम्। 'तस्य विकारः' इत्यर्थे 'एकाचो नित्यं मयटमिच्छन्ति' (का. ४. ३. १४४) इति मयट्प्रत्ययः। अकारस्य इकारश्छान्दसः। प्रत्ययस्वरः। यद्वा। 'माङ् माने शब्दे च'। ऋग्भिर्मीयते इति ऋग्मीः। क्विपि वलि लोपात् पूर्वमेव परत्वात् 'घुमास्था०' इति ईत्वम्। 'अचि श्नुधातु०' इत्यादिना इयङादेशः। कृदुत्तरपदप्रकृतिस्वरत्वम्। मदत। 'मदी हर्षे'। हेतुमति णिच्। 'मदी हर्षग्लपनयोः' इति घटादिषु पाठात् हर्षार्थे वर्तमानस्य 'घटादयो मितः' इति मित्त्वे सति 'मितां ह्रस्वः' (पा. सू. ६. ४. ९२) इति ह्रस्वत्वम्। लोण्मध्यमपुरुषबहुवचने शपि 'छन्दस्युभयथा' इति आर्धधातुकत्वात् 'णेरनिटि' इति णिलोपः। तशब्दस्य 'सार्वधातुकमपित्' इति ङित्त्वे 'ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणाम्' इति दीर्घः। वस्वः। ङस्य आगमानुशासनस्यानित्यत्वात् नुमभावः। 'जसादिषु च्छन्दसि वावचनम्' (पा. सू. ७. ३. १०९. १) इति वचनात्

---

१. त-ध-श-स–'तं' नास्ति। २. ढ–इन्द्रो मेष इति। ३. छ-न-ल-श-स–काण्वायनिम्। ४. ढ-न–शस्यते।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'वेर्डिति' ( पा. सू. ७. ३. १११ ) इति गुणाभावे यणादेशः । अर्णवन् । अर्ण उदकमस्मिन्नस्तीति अर्णवः समुद्रः । 'अर्णसो लोपश्च' ( का. ५. २. १०९. २ ) इति मत्वर्थीयो वप्रत्ययः सलोपश्च । तेन शब्देन जलाश्रयवाचिना आश्रयमात्रं लक्ष्यते। प्रत्ययस्वरः । विचरन्ति । चर गत्यर्थः । अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरः । 'तिङि चोदात्तवति' इति गतिरनुदात्ता । यद्वृत्तयोगादनिघातः । मानुषा । 'शेश्छन्दसि बहुलम्' इति शेर्लोपः । भुजे । 'भुज पालनाभ्यवहारयोः' । संपदादिलक्षणो भावे क्विप् । 'सावेकाचः०' इति विभक्तेरुदात्तत्वम् । मंहिष्ठम् । 'महि वहि वृद्धौ' । अतिशयेन मंहिता मंहिष्ठः । 'तुश्छन्दसि' इति इष्टन्प्रत्ययः । 'तुरिष्ठेमेयःसु' इति तृलोपः । नित्त्वादाद्युदात्तत्वम् । अर्चत । 'अर्च पूजायाम्' । भौवादिकः ॥

अभीमवन्वन्त्स्वभिष्टिमूतयोऽन्तरिक्षप्रां तविषीभिरावृतम् ।
इन्द्रं दक्षासऋभवो मदच्युतं शतक्रतुं जवनी सूनृतारुहत् ॥ २ ॥

अभि । ईम् । अवन्वन् । सुऽअभिष्टिम् । ऊतयः । अन्तरिक्षऽप्राम् । तविषीभिः । आऽवृतम् । इन्द्रम् । दक्षासः । ऋभवः । मदऽच्युतम् । शतऽक्रतुम् । जवनी । सूनृता । आ । अरुहत् ॥२॥

vऊतयः अवितारो रक्षितारः vदक्षासः दक्षयितारः प्रवर्धयितारः vऋभवः । उरु भान्ति इति नैरुक्तव्युत्पत्त्या ऋभवोऽत्र मरुत उच्यन्ते । एवंभूता मरुतः vइन्द्रम् vअभीमवन्वन् आभिमुख्येन खलु अभजन्त । वृत्रेण सह युध्यमानमिन्द्रं सर्वे देवाः पर्यत्यजन्। मरुतस्तु तथा न पर्यत्याक्षुः। तथा चाम्नास्यते[1]–'विश्वे देवा अजहुर्ये सखायः । मरुद्भिरिन्द्र सख्यं ते अस्तु' ( ऋ. सं. ८. ९६. ७) इति। ब्राह्मणेऽप्याम्नातं–'मरुतो हैनं नाजहुः' ( ऐ. ब्रा. ३. २० ) इति । कीदृशमिन्द्रम् । vस्वभिष्टिं शोभनाभ्येषणवन्तं शोभनाभिगमनमित्यर्थः । vअन्तरिक्षप्राम् । अन्तरिक्षं द्युलोकं स्वतेजसा प्राति पूरयतीति अन्तरिक्षप्राः । द्वादशस्वादित्येषु इन्द्रस्य विद्यमानत्वात् । शाखान्तरेऽपि श्रूयते—'तस्या इन्द्रश्च विवस्वाँश्चाजायेताम्' ( तै. ब्रा. १. १. ९. ३ ) इति, 'इन्द्रश्च विवस्वांश्चेत्येते ( तै. आ. १. १३. ३ ) इति च । vतविषीभिरावृतम् । तविषीति बलनाम । 'तविषी शुष्मम्' ( नि. २. ९. १०) इति तन्नामसु पाठात् । बलैरावृतम् । अतिबलिनमित्यर्थः । अत एव vमदच्युतं शत्रूणां मदस्य गर्वस्य च्यावयितारम् । किंच vशतक्रतुं शतसंख्यानां क्रतूनामाहर्तारं बहुविधकर्माणं वा । पूर्वोक्तं तमिन्द्रं vजवनी वृत्रवधं प्रति प्रेरयित्री vसूनृता तैर्मरुद्भिः प्रयुक्ता 'प्रहर भगवो जहि वीरयस्व' ( ऐ. ब्रा. ३. २० ) इति ब्राह्मणोक्तरूपा प्रियसत्यात्मिका वागपि vआरुहत् आरूढवती । वृत्रवधं प्रति सापि वाक् इन्द्रस्योत्साहकारिण्यभूदित्यर्थः ॥ अवन्वन् । 'वन षण संभक्तौ' । लङि शपि प्राप्ते व्यत्ययेन उप्रत्ययः । स्वभिष्टिम् । 'इष गतौ' । भावे क्तिन्प्रत्ययः । 'तितुत्र०' इत्यादिना इट्प्रतिषेधः । एमन्नादित्वात् पररूपत्वम् ( पा. सू. ६. १. ९४. ६ ) । शोभना अभिष्टयो यस्येति बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । ऊतयः । अवतेः 'कृत्यल्युटो बहुलम्' इति कर्तरि क्तिन्प्रत्ययः । यद्वा । 'क्तिच्क्तौ च संज्ञायाम्' इति क्तिच् । 'ज्वरत्वर०' इत्यादिना ऊठ् । 'चितः' इत्यन्तोदात्तत्वम् । अन्तरिक्षप्राम् । 'प्रा पूरणे' । अन्तरिक्षं प्राति पूरयतीति अन्तरिक्षप्राः । 'आतो मनिन्०' इत्यत्र चशब्दात् विच् । आवृतम् । 'वृञ् वरणे' । आव्रियते इति आवृतः । कर्मणि निष्ठा । 'गतिरनन्तरः'

---

१. च-छ-न-फ-स–चाम्नायते ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति गतेः प्रकृतिस्वरत्वम्। दक्षासः। 'दक्ष वृद्धौ'। दक्षन्ते एभिरिति दक्षाः। करणे घञ्। ञित्त्वादाद्युदात्तत्वम्। 'आज्जसेरसुक्'। मदच्युतम्। 'च्युङ् गतौ'। अन्तर्भावितण्यर्थात् 'क्विप् च' इति क्विप्। 'ह्रस्वस्य पिति कृति०' इति तुक्। शतक्रतुम्। शतं क्रतवो यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। जवनी। जु इति सौत्रो धातुः। करणे ल्युट्। 'टिड्ढाणञ्०' इत्यादिना ङीप्। ल्यिस्वरेण जकारात् परस्योदात्तत्वम्। अरुहत्। रुहेर्लुङि 'कृमृदरुहिभ्यश्छन्दसि' इति च्लेः अङादेशः॥

त्वं गोत्रमङ्गिरोभ्योऽवृणोरपोतात्रये शतदुरेषु गातुवित्।
ससेनं चिद्विमदायावहो वस्वाजावद्रिं ववसानस्य नर्तयन्॥ ३॥

त्वम्। गोत्रम्। आङ्गिरःऽभ्यः। अवृणोः। अप। उत। अत्रये। शतऽदुरेषु। गातुऽवित्। ससेनम्। चित्। विऽमदाय। अवहः। वसु। आजौ। अद्रिम्। ववसानस्य। नर्तयन्॥ ३॥

हे इन्द्र Vत्वं Vगोत्रम् अव्यक्तशब्दवन्तं वृष्ट्युदकस्यावरकं[1] मेघम् Vअङ्गिरोभ्यः अङ्गिरसामृषीणामर्थाय Vअप Vअवृणोः अपवरणं कृतवानसि। वृष्टेरावरकं[2] मेघं वज्रेणोद्धाट्य वर्षणं कृतवानसीत्यर्थः। यद्वा। गोत्रं गोसमूहं पणिभिरपहृतं गुहासु निहितम् अङ्गिरोभ्यः ऋषिभ्यः अप अवृणोः गुहाद्वारोद्घाटनेन प्राकाशयः। Vउत अपि च Vअत्रये महर्षये। कीदृशाय। Vशतदुरेषु शतद्वारेषु यन्त्रेष्वसुरैः पीडार्थं प्रक्षिप्ताय Vगातुवित् मार्गस्य लम्भयिताभूः। तथा Vविमदाय Vचित् विमदनाम्ने महर्षयेऽपि Vससेन अन्नेन युक्तं Vवसु धनम् Vअवहः प्रापितवान्। तथा Vआजौ संग्रामे जयार्थं Vववसानस्य निवसतो वर्तमानस्यान्यस्यापि स्तोतुः Vअद्रिं वज्रं Vनर्तयन्[3] रक्षणं कृतवानसीति शेषः। अतस्तव महिमा केन वर्णयितुं शक्यते इति भावः॥ गोत्रम्। 'गुङ् अव्यक्ते शब्दे'। औणादिकः त्रप्रत्ययः। यद्वा। 'खलगोरथात्' इत्यनुवृत्तौ 'इनित्रकट्यचश्च' (पा. सू. ४. २. ५१) इति समूहार्थे त्रप्रत्ययः। शतदुरेषु। शतं दुरा द्वाराण्येषाम्। द्वृ इत्येके। द्वर्यन्ते संव्रियन्ते इति दुराः। 'घञर्थे कविधानम्०' इति कप्रत्ययः। छान्दसं संप्रसारणं परपूर्वत्वम्। तच्च योह्युभयोः स्थाने भवति स लभतेऽन्यतरेणापि व्यपदेशम् इति 'उरण् रपरः' (पा. सू. १. १. ५१) इति रपरं भवति। यद्वा। द्वारशब्दस्यैव छान्दसं संप्रसारणं द्रष्टव्यम्। गातुवित्। 'गाङ् गतौ'। अस्मात् 'कमिमनिजनिभागापायाहिभ्यश्च' (उ. सू. १. ७२) इति तुप्रत्ययः। तं वेदयति लम्भयतीति गातुवित्। 'विदॢ लाभे'। अन्तर्भावितण्यर्थात् क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वम्। ससेन। ससम् इति अन्ननाम। 'ससं नमः आयुः' (नि.२. ७. २१) इति तन्नामसु पाठात्। आजिः इति संग्रामनाम। 'आहवे आजौ' (नि. २. १७. ८) इति तत्र पाठात्। अद्रिम्। अत्ति भक्षयति वैरिणम् इति अद्रिर्वज्रः। 'अदिशदिभूशुभिभ्यः क्रिन्' इति क्रिन्प्रत्ययः। नित्त्वादाद्युदात्तत्वम्। यास्कस्त्वेवम् अद्रिशब्दं व्याचख्यौ—'अद्रिरादृणात्यनेनापि वात्तेः स्यात्' (निरु. ४. ४) इति। ववसानस्य। 'वस निवासे'। कर्तरि ताच्छीलिकः चानश्। 'बहुलं छन्दसि' इति शपः श्लुः। द्विर्भावहलादिशेषौ। चित्त्वादन्तोदात्तत्वम्॥

---

१. ढ–वृष्टयुदकावरकम्। २. ढ–वृष्टेरावारकम्। ३. ढ-स–नर्तयन् प्रेरयन्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्वमपामपिधानावृणोरपाधारयः पर्वते दानुमद्वसु ।
वृत्रं यदिन्द्र शवसावधीरहिमादित्सूर्यं दिव्यारोहयो दृशे ॥ ४ ॥

त्वम् । अपाम् । अपिऽधाना । अवृणोः । अप । अधारयः । पर्वते । दानुऽमत् । वसु ।
वृत्रम् । यत् । इन्द्र । शवसा । अवधीः । अहिम् । आत् । इत् । सूर्यम् ।
दिवि । आ । अरोहयः । दृशे ॥ ४ ॥

हे [v]इन्द्र [v]त्वम् [v]अपाम् उदकानाम् [v]अपिधाना अपिधानानि आच्छादकान् मेघान् [v]अप [v]अवृणोः अपावरीष्ठाः । तथा [v]पर्वते पर्ववति पूरयितव्यप्रदेशयुक्ते स्वकीयनिवासस्थाने [v]दानुमत् दानुमतो हिंसायुक्तस्य । यद्वा । दनुः असुरमाता सैव दानुः । तद्वतः । तादृशस्य वृत्रादेः [v]वसु धनम् [v]अधारयः । शत्रून् जित्वा तदीयं धनमपहृत्य स्वगृहे न्यचिक्षिपः इत्यर्थः । यद्वा । दानुमत् इति वसुविशेषणम् । शोभनदानयुक्तमित्यर्थः । हे इन्द्र त्वं [v]यत् यदा [v]शवसा बलेन [v]वृत्रं त्रयाणां[1] लोकानामावरीतारम्[1] । तथा च शाखान्तरे समाम्नातं–' यदिमान् लोकानवृणोत्तद्वृत्रस्य वृत्रत्वम् ' (तै. सं. २. ४. १२. २) इति । [v]अहिं आ समन्तात् हन्तारम् । तथा च वाजसनेयिनः समामनन्ति–' सोऽग्नीषोमावभिसंबभूव सर्वां विद्यां सर्वं यशः सर्वमन्नाद्यं सर्वां श्रियं स यत्सर्वमेतत्समभवत्तस्मादहिः ' इति । एवंभूतमसुरम् [v]अवधीः वधं प्रापयः । [v]आदित् अनन्तरमेव [v]दिवि द्युलोके [v]दृशे द्रष्टुं [v]सूर्यम् [v]आरोहयः । वृत्रेणावृतं सूर्यं तस्माद्वृत्रात् अमुमुचः इत्यर्थः ॥ अपाम् । ' ऊडिदम्° ' इत्यादिना विभक्तेरुदात्तत्वम् । अपिधाना । अपिधीयते आच्छाद्यते एभिरिति अपिधानानि । करणे ल्युट् । ' लिति ' इति प्रत्ययात् पूर्वस्य धात्वाकारस्योदात्तत्वम् । तत एकादेशस्वरः । कृदुत्तरपदप्रकृतिस्वरत्वम् । ' सुपां सुलुक्° ' इति विभक्तेः पूर्वसवर्णदीर्घत्वम् । अधारयः । पादादित्वात् निघाताभावः । पर्वते । पर्ववान् पर्वतः । ' पर्व पुनः पृणातेः प्रीणातेर्वा ' ( निरु. १. २० ) इति यास्कः । दानुमत् । ' दो अवखण्डने ' इत्यस्मात् वा ' दाण् दाने ' इत्यस्मात् वा ' दाभाभ्यां नुः ' इति औणादिको नुप्रत्ययः । असुरविशेषणत्वे ' सुपां सुलुक्° ' इति षष्ठ्या लुक् ॥

त्वं मायाभिरप मायिनोऽधमः स्वधाभिर्ये अधि शुभ्रावजुह्वत ।
त्वं पिप्रोर्नृमणः प्रारुजः पुरः प्र ऋजिश्वानं दस्युहत्येष्वाविथ ॥ ५ ॥

त्वम् । मायाभिः । अप । मायिनः । अधमः । स्वधाभिः । ये । अधि । शुभ्रौ । अजुह्वत ।
त्वम् । पिप्रोः । नृऽमनः । प्र । अरुजः । पुरः । प्र । ऋजिश्वानम् । दस्युऽहत्येषु । आविथ ॥ ५ ॥

हे इन्द्र [v]त्वं [v]मायाभिः जयोपायज्ञानैः । मायेति ज्ञाननाम, ' शची माया ' ( नि. ३. ९. ९ ) इति तन्नामसु पाठात् । यद्वा । मायाभिः लोकप्रसिद्धैः कपटैः । [v]मायिनः उक्तलक्षणमायोपेतान्

---

१. ढ–लोकत्रयावारकम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वृत्रादीनसुरान् Vअप Vअधमः अपाजीगमः । ' धमतिर्गतिकर्मा ' ( निरु. ६. २ ) इति यास्कः । Vये असुराः Vस्वधाभिः हविर्लक्षणैरन्नैः Vशुष्णौ Vअधि शोभमाने स्वकीये मुखे एव Vअजुह्वत अहौषुः नाम्नौ तानसुरानिति पूर्वेण संबन्धः[1] । तथा च कौषीतकिभिराम्नायते—' असुरा वा आत्मन्नजुहवुरुद्घातेऽग्नौ ते पराभवन् ' इति । वाजसनेयिभिरप्याम्नातं—' देवाश्च ह वा असुराश्चास्पर्धन्त ततो हासुरा अभिमानेन कस्मै च न जुहुम इति स्वेष्वेवास्येषु जुह्वतश्चेरुस्ते पराबभूवुः ' इति । तथा हे Vनृमणः नृषु यजमानेषु रक्षितव्येषु अनुग्रहबुद्धियुक्त Vत्वं Vपिप्रोः पूरयितुरेतन्नाम्नोऽसुरस्य Vपुरः पुराणि निवासस्थानानि Vप्र Vअरुजः प्राभाङ्क्षीः । एवं कृत्वा तेनासुरेणोपद्रुतम् Vऋजिश्वानम् ऋजुगमनमेतत्संज्ञकं स्तोतारं Vदस्युहत्येषु दस्यूनामुपक्षपयितॄणां हननेन युक्तेषु संग्रामेषु । यद्वा । दस्यूनां हनने निमित्तभूतेषु Vप्र Vआविथ प्रकर्षेण ररक्षिथ ॥ मायिनः । मायाशब्दस्य व्रीह्यादिषु पाठात् ' व्रीह्यादिभ्यश्च ' इति मत्वर्थीय इनिः । शुष्णौ । ' शुभ दीप्तौ ' । कर्मणि क्तिन् । ' तितुत्र° ' इत्यादिना इट्प्रतिषेधः । ' झषस्तथोः° ' इति धत्वाभावश्छान्दसः । ' खरि च ' ( पा. सू. ८. ४. ५५ ) इति चर्त्वम् । अजुह्वत । जुहोतेर्लङि व्यत्ययेन आत्मनेपदम् । ' अदभ्यस्तात् ' ( पा. सू. ७. १. ४ ) इति झस्य अदादेशः । ' हुश्नुवोः सार्वधातुके ' इति यणादेशः । पिप्रोः । ' पॄ पालनपूरणयोः ' । ' पॄभिदिव्यधि° ' ( उ. सू. १. २३ ) इत्यादिना कुप्रत्ययः । ' उदोष्ठ्यपूर्वस्य ' इत्यत्र ' बहुलं छन्दसि ' इत्युक्तत्वात् उत्वाभावः । छान्दसं द्विर्वचनम् । अभ्यासस्य उरदत्वहलादिशेषाः । ' अर्तिपिपर्त्योश्च, बहुलं छन्दसि ' इति अभ्यासस्य इत्वम् । यणादेशः । नृमणः । नृषु मनो यस्य । ' छन्दस्यृदवग्रहात् ' ( पा. सू. ८. ४. २६ ) इति णत्वम् । अरुजः । ' रुजो भङ्गे ' । शस्य ङित्त्वात् गुणाभावः । ऋजिश्वानम् । ऋजु अश्नुते प्राप्नोतीति ऋजिश्वा । पृषोदरादिः । दस्युहत्येषु । ' हन हिंसागत्योः ' । ' हनस्त च ' ( पा. सू. ३. १. १०८ ) इति भावे क्यप्प्रत्ययः तकारश्चान्तादेशः । दस्यूनां हत्या येषु संग्रामेषु । ' परादिश्छन्दसि बहुलम् ' इयुत्तरपदाद्युदात्तत्वम् । तत्पुरुषपक्षे तु कृदुत्तरपदप्रकृतिस्वरत्वम् । आविथ । ' अव रक्षणे ' ॥ ॥ ९ ॥

त्वं कुत्सं शुष्णहत्येष्वाविथारन्धयोऽतिथिग्वाय शम्बरम् ।
महान्तं चिदर्बुदं नि क्रमीः पदा सनादेव दस्युहत्याय जज्ञिषे ॥ ६ ॥

त्वम् । कुत्सम् । शुष्णऽहत्येषु । आविथ । अरन्धयः । अतिथिऽग्वाय । शम्बरम् ।
महान्तम् । चित् । अर्बुदम् । नि । क्रमीः । पदा । सनात् । एव । दस्युऽहत्याय । जज्ञिषे ॥६॥

हे इन्द्र Vत्वं Vकुत्सं कुत्ससंज्ञकमृषिं Vशुष्णहत्येषु । शुष्णः शोषयिता । एतन्नाम्नोऽसुरस्य हननयुक्तेषु संग्रामेषु Vआविथ ररक्षिथ । तथा Vअतिथिग्वाय अतिथिभिर्गन्तव्याय दिवोदासाय Vशम्बरम् एतन्नामानमसुरम् Vअरन्धयः हिंसां प्रापयः । तथा Vमहान्तं Vचित् अतिप्रवृद्धमपि Vअर्बुदम् एतत्संज्ञकमसुरं Vपदा पादेन Vनि Vक्रमीः नितरामाक्रमिताभूः । यस्मादेवं तस्मात् Vसनादेव चिरकालादेवारभ्य Vदस्युहत्याय उपक्षपयितॄणां हननाय Vजज्ञिषे । सर्वदा त्वं दस्युहननशीलो भवसीत्यर्थः ॥ अरन्धयः । ' रध हिंसासंराद्धयोः ' । ' रधिजभोरचि ' ( पा. सू. ७. १. ६१ ) इति धातोः नुम् । अतिथिग्वाय । गमेः औणादिको ड्वप्रत्ययः । क्रमीः । ' क्रमु पादविक्षेपे ' । ' ह्यन्तक्षण° ' ( पा. सू. ७. २. ५ ) इति वृद्धिप्रतिषेधः । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । पदा । ' सावेकाचः° ' इति वा

---

१. ढ—अन्वयः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'ऊडिदंपदादि०' इति वा विभक्तेरुदात्तत्वम्। जज्ञिषे। 'जनी प्रादुर्भावे'। लिटि 'गमहन०' इत्यादिना उपधालोपः ॥

त्वे विश्वा तविषी सध्र्यग्घिता तव राधः सोमपीथाय हर्षते ।
तव वज्रश्चिकिते बाह्वोर्हितो वृश्चा शत्रोरव विश्वानि वृष्ण्या ॥ ७ ॥

त्वे इति। विश्वा। तविषी। सध्र्यक्। हिता। तव। राधः। सोमऽपीथाय। हर्षते। तव। वज्रः। चिकिते। बाह्वोः। हितः। वृश्च। शत्रोः। अव। विश्वानि। वृष्ण्या ॥ ७ ॥

हे इन्द्र [v]त्वे त्वयि [v]विश्वा [v]तविषी सर्वं बलं [v]सध्र्यक् सध्रीचीनं अपराङ्मुखं यथा भवति तथा [v]हिता निहितम्। तथा [v]तव [v]राधः मनः [v]सोमपीथाय सोमपानाय [v]हर्षते हृष्यति। किंच [v]तव [v]बाह्वोः हस्तयोः [v]हितः अवस्थितः [v]वज्रः [v]चिकिते अस्माभिर्ज्ञायते। अतः [v]शत्रोः शातयितुर्वैरिणः [v]विश्वानि सर्वाणि [v]वृष्ण्या वृष्ण्यानि वीर्याणि [v]अव [v]वृश्च छेदनं कुरु ॥ सहाञ्चतीति सध्र्यक्। अञ्चतेः 'ऋत्विक्०' इत्यादिना क्विन्। 'अनिदिताम्०' इति नलोपः। समासे 'सहस्य सधिः' इति सहशब्दस्य सध्र्यादेशः। 'चोः कुः' इति कुत्वम्। कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते 'अद्रिसध्र्योरन्तोदात्तत्वनिपातनं कृत्स्वरनिवृत्त्यर्थम्' (पा. सू. ६. ३. ९५. १) इति वचनात् सध्र्यादेशः अन्तोदात्तः। तस्य यणादेशे 'उदात्तस्वरितयोर्यणः०' इति परस्यानुदात्तस्य स्वरितत्वम्। राधः। राध्नोति समृद्धो भवत्यनेन। राधोऽत्र मन उच्यते। असुनो नित्त्वादाद्युदात्तत्वम्। सोमपीथाय। 'पा पाने'। 'पातृतुदिवचि०' इत्यादिना थक्प्रत्ययः। 'घुमास्था०' इति ईत्वम्। हर्षते। 'हृष तुष्टौ'। श्यनि प्राप्ते व्यत्ययेन शप् आत्मनेपदं च। चिकिते। 'कित ज्ञाने'। 'छन्दसि लुङ्लङ्लिटः' इति वर्तमाने कर्मणि लिट्। बाह्वोः। 'उदात्तयणः०' इति विभक्तेरुदात्तत्वम्। वृश्च। 'ओव्रश्चू छेदने'। तौदादिकः। ग्रहिज्यादिना संप्रसारणम्। विकरणस्वरः। संहितायां 'व्यचोऽतस्तिङः' इति दीर्घत्वम्। वृष्ण्या। 'वृष सेचने'। औणादिको नक्प्रत्ययः। तत्र भवानि वृष्ण्यानि। 'भवे छन्दसि' इति यत्। 'यतोऽनावः' इत्याद्युदात्तत्वम्। 'शेश्छन्दसि०' इति शेर्लोपः ॥

वि जानीह्यार्यान्ये च दस्यवो बर्हिष्मते रन्धया शासदव्रतान् ।
शाकी भव यजमानस्य चोदिता विश्वेत्ता ते सधमादेषु चाकन ॥ ८ ॥

वि। जानीहि। आर्यान्। ये। च। दस्यवः। बर्हिष्मते। रन्धय। शासत्। अव्रतान्। शाकी। भव। यजमानस्य। चोदिता। विश्वा। इत्। ता। ते। सधऽमादेषु। चाकन ॥ ८ ॥

हे इन्द्र त्वं [v]आर्यान् विदुषः अनुष्ठातॄन् [v]वि [v]जानीहि विशेषेण बुध्यस्व। [v]ये [v]च [v]दस्यवः तेषामनुष्ठातॄणामुपक्षपयितारः शत्रवः तानपि वि जानीहीति शेषः। ज्ञात्वा च [v]बर्हिष्मते बर्हिषा यज्ञेन युक्ताय यजमानाय [v]अव्रतान्। व्रतमिति कर्मनाम। कर्मविरोधिनस्तान् दस्यून् [v]रन्धय हिंसां प्रापय। यद्वा यजमानस्य वशं गमय। 'रध्यतिर्वशगमने' (निरु. ६. ३२) इति यास्कः। किं कुर्वन्। [v]शासत् दुष्टानामनुशासनं निग्रहं कुर्वन्। अतः [v]शाकी शक्तियुक्तस्त्वं [v]यजमानस्य [v]चोदिता प्रेरको

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]भव । यज्ञविघातकानसुरांस्तिरस्कृत्य यज्ञान् यजमानैः सम्यगनुष्ठापय इति[1] भावः[1] । अहमपि स्तोता [V]ते तव [V]ता तानि पूर्वोक्तानि कर्माणि [V]विश्वेत् सर्वाण्येव [V]सधमादेषु सहमदनयुक्तेषु[2] यज्ञेषु स्तोतुं [V]चाकन कामये ॥ जानीहि । ' ज्ञा अवबोधने ' । क्रैयादिकः । ' ज्ञाजनोर्जा ' इति जादेशः । अत्र ' ष्ठा गतौ वृत् ' इति वृत्करणं ल्वादिपरिसमाप्त्यर्थमेव न प्वादिपरिसमाप्त्यर्थमिति येषां दर्शनं तेषां ' प्वादीनां ह्रस्वः ' इति ह्रस्वत्वेन भवितव्यम् । मैवम् । ' ज्ञाजनोर्जा ' इति दीर्घोच्चारणसामर्थ्यात् । ' जनी प्रादुर्भावे ' इत्यस्य तु दीर्घोच्चारणमन्तरेणापि ' अतो दीर्घो यञि ' ( पा. सू. ७. ३. १०१ ) इत्यनेनैव दीर्घः सिध्यति । तस्माद्दीर्घोच्चारणवैयर्थ्यप्रसंगादत्र ह्रस्वो न भवतीति सिद्धम् । बर्हिष्मते । ' तसौ मत्वर्थे ' इति भत्वात् रुत्वजश्त्वयोरभावः । रन्धय । ' रध हिंसासंराद्धयोः ' । शासत् । ' शासु अनुशिष्टौ ' । शतरि अदादित्वात् शपो लुक् । ' जक्षित्यादयः षट् ' ( पा. सू. ६. १. ६ ) इत्यभ्यस्तसंज्ञायां ' नाभ्यस्ताच्छतुः ' इति नुम्प्रतिषेधः । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । शाकी । ' शकॢ शक्तौ ' । भावे घञ् । ततो मत्वर्थीय इनिः । व्यत्ययेनाद्युदात्तत्वम् । यद्वा । वृषादिर्द्रष्टव्यः । विश्वा ता । उभयत्र ' शेश्छन्दसि° ' इति शेर्लोपः । सधमादेषु । सह माद्यन्त्येष्विति सधमादा यज्ञाः । अधिकरणे घञ्प्रत्ययः । ननु ' मदोऽनुपसर्गे ' इति अप्प्रत्ययेन भवितव्यम् । मैवम् । ' व्यधजपोरनुपसर्गे ' ( पा. सू. ३. ३. ६१ ) इत्यत्रैव मद इति वक्तव्ये यत् ' मदोऽनुपसर्गे ' इति पृथगुपादानं तत् घञपि पक्षे यथा स्यादिति न्यासकारेण प्रत्यपादीत्यस्माभिर्धातुवृत्तावुक्तम् । ' सध मादस्थयोश्छन्दसि ' इति सहशब्दस्य सधादेशः । चाकन । ' कन दीप्तिकान्तिगतिषु ' । अत्र कान्त्यर्थः । ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लिट् । ' णलुत्तमो वा ' ( पा. सू. ७. १. ९१ ) इति णित्त्वस्य विकल्पनात् वृद्ध्यभावः । तुजादित्वात् अभ्यासस्य दीर्घत्वम् ॥

**अनुव्रताय रन्धयन्नपव्रतानाभूभिरिन्द्रः श्नथयन्ननाभुवः ।**
**वृद्धस्य चिद्वर्धतो द्यामिनक्षतः स्तवानो वम्रो वि जघान संदिहः ॥ ९ ॥**

अनुऽव्रताय । रन्धयन् । अपऽव्रतान् । आऽभूभिः । इन्द्रः । श्नथयन् । अनाभुवः ।
वृद्धस्य । चित् । वर्धतः । द्याम् । इनक्षतः । स्तवानः । वम्रः । वि । जघान । सम्ऽदिहः ॥ ९ ॥

यः [V]इन्द्रः [V]अनुव्रताय अनुकूलकर्मणे यजमानाय [V]अपव्रतान् अपगतकर्मणः अयजमानान्[3] [V]रन्धयन् हिंसयन् वशीकुर्वन् वा तथा [V]आभूभिः । आभिमुख्येन भवन्तीति आभुवः स्तोतारः । तैः [V]अनाभुवः तद्विपरीतान् [V]श्नथयन् हिंसयन् वर्तते । [V]वृद्धस्य [V]चित् [V]वर्धतः पूर्वं वृद्धस्यापि पुनर्वर्धमानस्य [V]द्यामिनक्षतः स्वर्गं व्याप्नुवतः[4] तस्येन्द्रस्य [V]स्तवानः स्तुतिं कुर्वाणः [V]वम्रः स्तुत्युद्गिरणशील एतत्संज्ञक ऋषिः [V]संदिहः सम्यगुपचिता वल्मीकवपाः [V]वि [V]जघान । इन्द्रेण परिहृतान्तरायः सन् पृथिव्याः सारभूतं वल्मीकवपालक्षणं यज्ञसंभारमाहार्षीदित्यर्थः । तथा च शाखान्तरे समाम्नातं— ' यद्वल्मीकवपासंभारो भवति ऊर्जमेव रसं पृथिव्या अवरुन्धे ' ( तै. ब्रा. १. १. ३. ४ ) इति ॥ अनुव्रताय । अनुकूलं व्रतं यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । श्नथयन् । ' श्नथ हिंसायाम् ' । णिचि घटादित्वात् मित्त्वे ' मितां ह्रस्वः ' इति ह्रस्वत्वम् । वर्धतः । व्यत्ययेन परस्मैपदम् । इनक्षतः ।

---

१. ढ–इत्यर्थः । २. च-छ-फ-ल-श-स–सहमादनयुक्तेषु । ३. च-ण-न-फ–असुरान् । ४. न-स–प्राप्नुवतः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'नक्ष गतौ'। इकारोपजनश्छान्दसः। यद्वा। इनक्षतिर्गत्यर्थः प्रकृत्यन्तरमन्वेष्टव्यम्। स्तवानः। 'सभ्यानच् स्तुवः' (उ. सू. २. २४६) इति स्तौतेर्बहुलवचनात् निरुपपदादपि आनच्प्रत्ययः। व्यत्ययेनाद्युदात्तत्वम्। जघान। 'अभ्यासाच्च' इति अभ्यासादुत्तरस्य हन्तेर्हकारस्य कुत्वम्। संदिहः। 'दिह उपचये'। 'कृत्यल्युटो बहुलम्' इति बहुलवचनात् कर्मणि क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वम्॥

तक्षद्यत्ते उशना सहसा सहो वि रोदसी मज्मना बाधते शवः।
आ त्वा वातस्य नृमणो मनोयुज आ पूर्यमाणमवहन्नभि श्रवः॥ १०॥

तक्षत्। यत्। ते। उशना। सहसा। सहः। वि। रोदसी इति। मज्मना। बाधते। शवः।
आ। त्वा। वातस्य। नृऽमनः। मनःऽयुजः। आ। पूर्यमाणम्। अवहन्। अभि। श्रवः॥१०॥

हे इन्द्र vयत् यदा vउशना काव्यः vसहसा आत्मीयेन बलेन vते vसहः त्वदीयं बलं vतक्षत् तनूकृतवान्। सम्यक् तीक्ष्णमकार्षीदित्यर्थः। तदा vशवः त्वदीयं बलं vमज्मना सर्वस्य शोधकेन स्वतैक्ष्ण्येन vरोदसी द्यावापृथिव्यौ vवि vबाधते। ते बिभीतः इत्यर्थः। तथा चान्यत्राम्नातं—'यस्य शुष्माद्रोदसी अभ्यसेताम्' (ऋ. सं. २. १२. १) इति। यद्वा। रोदसी यस्माद्वृत्रादेः बिभीतः तं बाधते इत्यर्थः। हे vनृमणः नृषु रक्षितव्येषु यजमानेष्वनुग्रहबुद्धियुक्तेन्द्र vआ vपूर्यमाणं पूर्वोक्तेन बलेन आ समन्तात् पूर्यमाणं vत्वा त्वां vमनोयुजः मनोव्यापारमात्रेण युक्ताः vवातस्य वायोः संबन्धिनः। तद्वद्वेगेन गच्छन्त इत्यर्थः। एवंभूता अश्वाः vश्रवः vअभि हविर्लक्षणमन्नमभिलक्ष्य vआ vअवहन् आभिमुख्येन प्रापयन्तु॥ तक्षत्। 'तक्षू त्वक्षू तनूकरणे'। लङि 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः। शपः पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते। उशना। 'वश कान्तौ' 'वशेः कनसिः' (उ. सू. ४. ६७८) इति कनस्। 'ग्रहिज्या०' इत्यादिना संप्रसारणम् 'ऋदुशनस्पुरुदंसोऽनेहसां च' (पा. सू. ७. १. ९४) इति अनङादेशः। 'सर्वनामस्थाने च०' (पा. सू. ६. ४. ८) इति उपधादीर्घत्वम्। हल्ङ्यादिनलोपौ। मज्मना। 'दुमस्जो शुद्धौ'। औणादिको मनिप्रत्ययः। नृमणः। 'छन्दस्यृदवग्रहात्' इति णत्वम्। अवहन्। 'छन्दसि लुङ्लङ्लिटः' इति प्रार्थनायां लङ्॥ ॥ १०॥

मन्दिष्ट यदुशने काव्ये सचाँ इन्द्रो वङ्कू वङ्कुतराधि तिष्ठति।
उग्रो यायिं निरपः स्रोतसासृजद्वि शुष्णस्य दंहिता ऐरयत्पुरः॥ ११॥

मन्दिष्ट। यत्। उशने। काव्ये। सचा। इन्द्रः। वङ्कू इति। वङ्कुऽतरा। अधि। तिष्ठति।
उग्रः। यायिम्। निः। अपः। स्रोतसा। असृजत्। वि। शुष्णस्य। दंहिताः। ऐरयत्। पुरः॥११॥

vयत् यदा vइन्द्रः vउशने कामयमाने vकाव्ये vसचा सह vमन्दिष्ट स्तुतोऽभूत् तदानीं vवङ्कू vवङ्कुतरा अतिशयेन कुटिलं गच्छन्तावश्वौ vअधि vतिष्ठति। रथे संयोज्य तमारोहतीत्यर्थः। यद्वा। वङ्कुतरा अतिशयेन वक्रं गच्छति रथे वङ्कू वक्रगमनशीलावश्वौ संयोज्येति योजनीयम्। vउग्रः उद्गूर्णस्तादृशः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इन्द्रः Vययिं गमनयुक्तात् मेघात् Vस्रोतसा प्रवाहरूपेण Vअपः Vनिः Vअसृजत् जलानि निरगमयत्। तथा Vशुष्णस्य सर्वस्य शोषयितुरसुरस्य Vदंहिताः प्रवृद्धाः Vपुरः नगराणि निवासस्थानानि Vवि Vऐरयत् विविधं प्रेरितवान् ॥ मन्दिष्ट। 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु'। लुङि 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः। उशने। वशेः औणादिकः क्युप्रत्ययः। ग्रहिज्यादिना संप्रसारणम्। योरनादेशः। सचा। 'षच समवाये'। संपदादिलक्षणो भावे क्विप्। 'आङ्याजयारां चोपसंख्यानम्' (पा. म. ७. १. ३९. १) इति विभक्तेः आङादेशः। संहितायां 'आङोऽनुनासिकश्छन्दसि' (पा. सू. ६. १. १२६) इति तस्य सानुनासिकत्वम्। वङ्कू। 'वञ्चु गतौ'। औणादिक उप्रत्ययः। बहुलवचनात् कुत्वम्। वङ्कुतरा। अतिशयेन वङ्कू वङ्कुतरा। 'सुपां सुलुक्°' इति विभक्तेः आकारः। अत्र गतिसामान्यवाचिना गतिविशेषो लक्ष्यते। ययिम्। 'या प्रापणे'। 'आदृगमहनजनः°' इति किप्रत्ययः। लिङ्वद्भावात् द्विर्वचनहस्वत्वे। 'आतो लोप इटि च' इति आकारलोपः। प्रत्ययस्वरः। 'सुपां सुपो भवन्ति' इति पञ्चम्या अमादेशः। दंहिताः। 'दहि वृद्धौ'। इदित्त्वात् नुम्। ऐरयत्। 'ईर प्रेरणे'। चौरादिकः। लङि आडागमः। 'आटश्च' (पा. सू. ६. १. ९०) इति वृद्धिः॥

आ स्मा रथं वृषपाणेषु तिष्ठसि शार्यातस्य प्रभृता येषु मन्दसे।
इन्द्र यथा सुतसोमेषु चाकनोऽनर्वाणं श्लोकमा रोहसे दिवि ॥ १२ ॥

आ। स्म। रथम्। वृषऽपानेषु। तिष्ठसि। शार्यातस्य। प्रऽभृताः। येषु। मन्दसे।
इन्द्र। यथा। सुतऽसोमेषु। चाकनः। अनर्वाणम्। श्लोकम्। आ। रोहसे। दिवि ॥१२॥

अत्र कौषीतकिन इतिहासमाचक्षते—शार्यातनाम्नो राजर्षेर्यज्ञे भृगुगोत्रोत्पन्नश्च्यवनो महर्षिराश्विनं ग्रहमगृह्णात्। इन्द्रस्तं दृष्ट्वा क्रुद्धोऽभूत्। तमिन्द्रमनुनीय पुनः सोमं तस्मै प्रादादिति। अयमर्थोऽस्यां प्रतिपाद्यते। हे Vइन्द्र त्वं Vवृषपाणेषु। वृष्णः सेचनसमर्थस्य सोमस्य पानानि वृषपाणानि। तेषु निमित्तभूतेषु Vरथम् Vआ Vतिष्ठसि Vस्म स्वयमेव रथमारुह्य गच्छसि। न त्वन्यः कश्चित् प्रवर्तयितेति भावः। एवं च सति Vयेषु सोमेषु त्वं Vमन्दसे हर्षं प्राप्नोषि तादृशाः सोमाः Vशार्यातस्य एतन्नाम्नो राजर्षेः संबन्धिनः Vप्रभृताः प्रकर्षेण संपादिताः। अभिषवादिसंस्कारैः संस्कृता इत्यर्थः। अतः Vसुतसोमेषु अभिषुतसोमयुक्तेष्वन्यदीयेषु यज्ञेषु Vयथा Vचाकनः यथा कामयसे एवमस्यापि शार्यातस्य सोमान् कामयस्व। तथा सति Vदिवि द्युलोके Vअनर्वाणं गमनरहितं स्थिरं Vश्लोकं स्तोत्रलक्षणं वचो यशो वा Vआ Vरोहसे प्राप्नोषि। यद्वा। इमं यजमानं दिवि द्युलोके उक्तलक्षणं यशः प्रापयसि ॥ स्म। 'निपातस्य च' इति दीर्घत्वम्। वृषपाणेषु। 'पा पाने'। भावे ल्युट्। 'वा भावकरणयोः' (पा. सू. ८. ४. १०) इति पूर्वपदस्थान्निमित्तादुत्तरस्य पानशब्दनकारस्य णत्वम्। प्रभृताः। 'भृञ् भरणे'। कर्मणि निष्ठा। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। मन्दसे। 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु'। अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वरः। चाकनः। 'कन दीप्तिकान्तिगतिषु'। अत्र कान्त्यर्थः। कान्तिश्चाभिलाषः। लेटि सिपि अडागमः। 'बहुलं छन्दसि' इति शपः श्लुः। तुजादित्वात् अभ्यासस्य दीर्घत्वम्। 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति अभ्यस्तस्य आद्युदात्तत्वाभावे 'धातोः' इति धात्वन्तस्योदात्तत्वम्। अनर्वाणम्। अर्तेः 'अन्येभ्योऽपि दृश्यन्ते' इति दृशिग्रहणाद्भावे वनिप्। नञा बहुव्रीहौ अमि 'अर्वणस्त्रसावनञः' इति पर्युदासात् तृआदेशाभावे

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'सर्वनामस्थाने च०' इति उपधादीर्घत्वम्। 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। श्लोकम्। 'श्लोकृ संघाते'। श्लोक्यते इति श्लोकः। कर्मणि घञ्। जित्त्वादाद्युदात्तत्वम्। रोहसे। रुहेः व्यत्ययेन आत्मनेपदम्॥

अदद्रा अभीं महते वचस्यवे कक्षीवते वृचयामिन्द्र सुन्वते।
मेनाभवो वृषणश्वस्य सुक्रतो विश्वेत्ता ते सवनेषु प्रवाच्या॥ १३॥

अददाः। अभीम्। महते। वचस्यवे। कक्षीवते। वृचयाम्। इन्द्र। सुन्वते। मेना। अभवः। वृषणश्वस्य। सुक्रतो इति सुऽक्रतो। विश्वा। इत्। ता। ते। सवनेषु। प्रऽवाच्या॥१३॥

अत्रेयमाख्यायिका। अङ्गराजः कस्मिंश्चिद्दिवसे स्वकीयाभिर्योषिद्भिः सह गङ्गायां जलक्रीडां चक्रे। तस्मिन् समये दीर्घतमा नाम ऋषिः स्वभार्यया पुत्रभृत्यादिभिश्च दुर्बलत्वात् किमपि कर्तुं न शक्नोतीति द्वेषेण गङ्गामध्ये प्रचिक्षिपे। स च ऋषिः केनचित् प्लवेन अङ्गराजस्य क्रीडादेशं प्रति समाजगाम। स च राजा सर्वज्ञं तमृषिमवगत्य प्लवादवतार्यैवमवोचत्। हे भगवन् मम पुत्रो नास्ति एषा महिषी अस्यां कंचित्[1] पुत्रमुत्पादयेति। स च तथेत्यब्रवीत्। सा महिषी तु[2] राजानं प्रति तथेत्युक्त्वा[2] अयं वृद्धतरो जुगुप्सितो मम योग्यो न भवतीति बुद्ध्या[3] स्वकीयाम् उशिक्संज्ञां दासीं प्राहैषीत्। तेन च सर्वज्ञेन ऋषिणा मन्त्रपूतेन वारिणाभ्युक्षिता सती सैव ऋषिपत्नी बभूव। तस्यामुत्पन्नः कक्षीवान्नाम ऋषिः। स एव राज्ञः पुत्रोऽभूत्। स च बहुविधेन राजसूयादिनेजे। तस्मै राज्ञे तत्कृतैर्यज्ञैः परितुष्ट इन्द्रो वृचयाख्यां तरुणीं योषितं प्रादात्। अयमर्थः पूर्वार्धे प्रतिपाद्यते॥ हे [v]इन्द्र त्वं [v]महते प्रवृद्धाय [v]वचस्यवे त्वदीयस्तोत्रलक्षणं वच आत्मन इच्छते [v]सुन्वते त्वद्देवताकेषु यज्ञेषु सोमाभिषवं कुर्वते [v]कक्षीवते एतन्नाम्ने राज्ञे [v]वृचयां वृचयाख्याम् [v]अभीम् अल्पाम्। युवतिमित्यर्थः। एवंभूतां स्त्रियम् [v]अददाः। तथा [v]सुक्रतो शोभनकर्मन् शोभनप्रज्ञ वा हे इन्द्र त्वं [v]वृषणश्वस्य एतदाख्यस्य राज्ञः [v]मेनाभवः मेना नाम कन्यकाभूः। तथा च शाट्यायनिभिः सुब्रह्मण्यामन्त्रैकदेशव्याख्यानरूपं[4] ब्राह्मणमेवमाम्नायते–'वृषणश्वस्य मेन इति वृषणश्वस्य[5] मेना भूत्वा मघवा कुल उवास' इति। तां च प्राप्तयौवनां स्वयमेवेन्द्रश्चकमे। तथा च ताण्डिभिराम्नातं–'वृषणश्वस्य मेना नाम दुहितास। तामिन्द्रश्चकमे' इति। अत उक्तरूपाणि यानि कर्माणि त्वया कृतानि [v]ते [v]ता त्वदीयानि तानि [v]विश्वेत् सर्वाण्येव [v]सवनेषु यज्ञेषु [v]प्रवाच्या प्रकर्षेण वक्तव्यानि। स्तुतिभिः स्तोतव्यानीत्यर्थः॥ महते। 'बृहन्महतोरुपसंख्यानम्' इति विभक्तेरुदात्तत्वम्। वचस्यवे। 'सुप आत्मनः क्यच्'। 'क्याच्छन्दसि' इति उप्रत्ययः। कक्षीवते। अश्वबन्धनहेतवो रज्जवः कक्ष्याः। 'कक्षीवान् कक्ष्यावान्' (निरु. ६. १०) इति यास्कः। 'आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवत्०' (पा. सू. ८. २. १२) इति संप्रसारणं मतुपो वत्वं च संज्ञायां निपात्यते। मेनेति स्त्रीनाम। 'मेना म्नाः' (नि. रु. ३. २१) इति पाठात्। 'मन ज्ञाने'। मन्यते गृहकृत्यं जानातीति मेना। पचाद्यच्। 'नशिमन्योरलिटयेत्वं वक्तव्यम्' (पा. सू. ६. ४. १२०. ५) इति एत्वम्। वृषादिर्द्रष्टव्यः। 'मेना मानयन्त्येनाः' (निरु. ३. २१) इति यास्कः। सवनेषु। सवनमिति यज्ञनाम। सूयतेऽभिषूयते एष्विति अधिकरणे ल्युट्। प्रवाच्या। 'वच परिभाषणे'। ण्यति 'यजयाचरुच-

---

१. ढ–कमपि। २. ढ–'तु राजानं प्रति तथेत्युक्त्वा' इति नास्ति। ३. ढ–मत्वा।
४. ढ–सुब्रह्मण्योमिति मन्त्रैकदेशव्याख्यानरूपम्। ५. ढ-स–वृषणश्वस्य हि।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रवचर्चश्च' ( पा. सू. ७. ३. ६६ ) इति कुत्वाभावः । तिस्वरिते प्राप्ते व्यत्ययेनाद्युदात्तत्वम् । यद्वा। वाचयतेः ' अचो यत् ' इति यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

इन्द्रो अश्रायि सुध्यो निरेके पज्रेषु स्तोमो दुर्यो न यूपः ।
अश्वयुर्गव्यू रथयुर्वसूयुरिन्द्र इद्रायः क्षयति प्रयन्ता ॥ १४ ॥

इन्द्रः । अश्रायि । सुऽध्यः । निरेके । पज्रेषु । स्तोमः । दुर्यः । न । यूपः ।
अश्वऽयुः । गव्युः । रथऽयुः । वसुऽयुः । इन्द्रः । इत् । रायः । क्षयति । प्रऽयन्ता ॥१४॥

vइन्द्रः देवः vसुध्यः शोभनकर्मणो यजमानान् शोभनप्रज्ञान् वा vनिरेके नैर्धन्ये निमित्तभूते सति तान् रक्षितुम् vअश्रायि असेविष्ट । vपज्रेषु । पज्रा इत्यङ्गिरसामाख्या । तथा च शाट्यायनिभिराम्नातं–' पज्रा वा अङ्गिरसः पशुकामास्तपोऽतप्यन्त ' इति । येषु यजमानेष्वङ्गिरःसु vस्तोमः स्तोत्रं निश्चलं तिष्ठति vदुर्यो vन vयूपः द्वारि निखाता स्थूणेव । तान् सुध्यः इति पूर्वेणान्वयः । तस्मादिदानीमपि vरायः vप्रयन्ता धनस्य प्रदाता vइन्द्र vइत् इन्द्र एव यजमानानां दातुम् vअश्वयुः अश्वानिच्छन् । तथा vगव्युः गा इच्छन् vरथयुः रथानिच्छन् vवसूयुः एवमन्यदपि यद्धनमस्ति तदपीच्छन् vक्षयति वर्तते ॥ अश्रायि । ' श्रिञ् सेवायाम् ' । कर्तरि लुङि व्यत्ययेन च्लेः चिणादेशः । सुध्यः । धीरिति कर्मनाम । शोभना धीर्येषाम्। ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । शसि ' छन्दस्युभयथा ' इति यणादेशः । ' उदात्तस्वरितयोर्यणः° ' इति स्वरितत्वम् । निरेके । नितरां रेचनं निरेकः । ' रिचिर् विरेचने ' । भावे घञ् । थाथादिना उत्तरपदान्तोदात्तत्वम् । दुर्यः । दुरे भवो दुर्यः । ' भवे छन्दसि ' इति यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । यूपः । ' यु मिश्रणे ' । यूयते युज्यतेऽस्मिन्निति यूपः । ' कुयुभ्यां च ' ( उ. सू. ३. ३०७ ) इति पप्रत्ययः । दीर्घः इत्यनुवृत्तेः दीर्घत्वम् । अश्वयुः । यजमानेभ्योऽश्वानिच्छन् । ' छन्दसि परेच्छायाम् ' ( का. ३. १. ८. २ ) इति क्यच् । ' न च्छन्दस्यपुत्रस्य ' इति ईत्वदीर्घयोर्निषेधः । ' अश्वाघस्यात् ' इति आत्वं तु छान्दसत्वात् न भवति । ' क्याच्छन्दसि ' इति उप्रत्ययः । एवमुत्तरत्रापि । एतावांस्तु विशेषः । गव्युरित्यत्र ' वान्तो यि प्रत्यये ' इति अवादेशः । यास्कस्त्वेवं व्याचष्टे–' इदंयुरिदं कामयमानोऽथापि तद्वदर्थे भाष्यते । वसूयुरिन्द्रो वसुमानित्यर्थः । अश्वयुर्गव्यू रथयुर्वसूयुरित्यपि निगमो भवति '( निरु. ६. ३१ ) इति । क्षयति । ' क्षि क्षये ' । भौवादिकः । प्रयन्ता । ' यम उपरमे ' । तृचि ' एकाचः° ' इति इट्प्रतिषेधः । ' चितः ' इत्यन्तोदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

इदं नमो वृषभाय स्वराजे सत्यशुष्माय तवसेऽवाचि ।
अस्मिन्निन्द्र वृजने सर्ववीराः स्मत्सूरिभिस्तव शर्मन्त्स्याम ॥ १५ ॥

इदम् । नमः । वृषभाय । स्वऽराजे । सत्यऽशुष्माय । तवसे । अवाचि ।
अस्मिन् । इन्द्र । वृजने । सर्वऽवीराः । स्मत् । सूरिऽभिः । तव । शर्मन् । स्याम ॥ १५॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]इदं पुरोवर्ति [v]नमः स्तुतिलक्षणं वचो हे [v]इन्द्र तुभ्यम् [v]अवाचि अस्माभिः प्रायोजि। कीदृशाय। [v]वृषभाय वर्षणशीलाय [v]स्वराजे स्वकीयेन तेजसा राजमानाय [v]सत्यशुष्माय। शुष्ममिति बलनाम शत्रूणां शोषकत्वात्। अवितथबलयुक्ताय। [v]तवसे अत्यन्तं प्रवृद्धाय। यस्मादेवं तस्मात् [v]अस्मिन् [v]वृजने वर्जनवति संग्रामे [v]सर्ववीराः। विशेषेण ईरयन्त्यस्मित्रानिति वीरा भटाः। तादृशैः सर्वैर्भटैरुपेता वयम्। स्मत् इति निपातः सुशब्दार्थः। [v]तव [v]स्मत् [v]शर्मन् त्वया दत्ते शोभने गृहे [v]सूरिभिः विद्वद्भिः पुत्रादिभिः सह [v]स्याम भवेम निवसेमेत्यर्थः। यद्वा। त्वत्संबन्धिनि शोभने यज्ञगृहे सूरिभिः विद्वद्भिर्ऋत्विग्भिः सह स्याम। शर्मेति गृहनाम, 'शर्म वर्म' (नि. ३. ४. २१) इति पठितत्वात्॥ स्वराजे। 'राजृ दीप्तौ'। 'सत्सूद्विष॰' इति क्विप्। सत्यशुष्माय। सत्यं शुष्मं बलं यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। तवसे। तवतिः सौत्रो धातुः। अस्मात् औणादिकः असिप्रत्ययः। वृजने। 'वृजी वर्जने'। 'कृपृवृजिमन्दिनिधाञ्भ्यः क्युः' (उ. सू. २. २३९) इति क्युः[1] प्रत्ययः[1]। शर्मन्। 'सुपां सुलुक्॰' इति सप्तम्या लुक्। 'न ङिसंबुद्ध्योः' (पा. सू. ८. २. ८) इति नलोपप्रतिषेधः। स्याम। 'नश्च' (पा. सू. ८. ३. ३०) इति संहितायां सकारस्य धुडागमः। 'खरि च' इति चर्त्वम्। 'चयो द्वितीयाः शरि पौष्करसादेः' (पा. सू. ८. ४. ४८. ३) इति तकारस्य थकारः॥ ॥ ११ ॥

'त्यं सु मेषम्' इति पञ्चदशर्चं द्वितीयं सूक्तं सव्यस्यार्षमैन्द्रम्। त्रयोदशी[2] पञ्चदशी[2] त्रिष्टुभौ शिष्टा जगत्यः। तथा चानुक्रान्तं—'त्यं सु त्रयोदशन्त्ये त्रिष्टुभौ' इति। गवामयनस्य मध्यमेऽहनि विषुवत्संज्ञके मरुत्वतीयशस्त्रे इदं सूक्तम्। 'विषुवान्दिवाकीर्त्यः' इति खण्डे सूत्रितं—'त्यं सु मेषं कया शुभेति च मरुत्वतीयम्' (आश्व. श्रौ. ८. ६) इति॥

त्यं सु मेषं महया स्वर्विदं शतं यस्य सुभ्वः साकमीरते।
अत्यं न वाजं हवनस्यदं रथमेन्द्रं ववृत्यामवसे सुवृक्तिभिः॥ १॥

त्यम्। सु। मेषम्। महय। स्वःऽविदम्। शतम्। यस्य। सुऽभ्वः। साकम्। ईरते।
अत्यम्। न। वाजम्। हवनऽस्यदम्। रथम्। आ। इन्द्रम्। ववृत्याम्। अवसे। सुवृक्तिऽभिः॥१॥

[v]त्यं तं प्रसिद्धं [v]मेषं शत्रुभिः सह स्पर्धमानं [v]स्वर्विदम्। स्वरादित्यो द्यौर्वा। तस्य वेदितारं लब्धारं वा। यद्वा। स्वः सुष्ठुरणीयं धनं तस्य लम्भयितारम्। एवंगुणविशिष्टमिन्द्रं हे अध्वर्यो [v]सु [v]महय सम्यक् पूजय। [v]यस्य इन्द्रस्य [v]शतं शतसंख्याकाः [v]सुभ्वः स्तोतारः [v]साकं सहैव युगपदेव [v]ईरते स्तुतौ प्रवर्तन्ते। यद्वा। यस्येन्द्रस्य रथं शतं सुभ्वः शतसंख्याका अश्वाः साकं सह ईरते गमयन्ति। तम् [v]इन्द्रम् [v]अवसे अस्मद्रक्षणाय [v]सुवृक्तिभिः सुष्ठ्ववर्जकैः स्तोत्रैः [v]रथम् [v]आ [v]ववृत्यां रथं प्रत्यावर्तयामि। कीदृशं रथम्। [v]हवनस्यदं हवनमाह्वानं यागं वा प्रति वेगेन गच्छन्तम्। वेगगमने दृष्टान्तः। [v]अत्यं [v]न [v]वाजं गमनसाधनमश्वमिव॥ महय। 'मह पूजायाम्'। चुरादिरदन्तः। संहितायाम् 'अन्येषामपि दृश्यते' इति दीर्घत्वम्। सुभ्वः। सुष्ठु भवन्तीति सुभ्वः स्तोतारः। 'क्विप् च' इति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वम्। जसि 'ओः सुपि' इति यणादेशस्य 'न भूसुधियोः'

---

१. च-न-फ-स—क्युप्रत्ययः। २ छ-ण-न-फ—त्रयोदशीपञ्चदश्यौ; त-ल-श-स—त्रयोदशी पञ्चदशी च।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति प्रतिषेधे प्राप्ते ' छन्दस्युभयथा ' इति उभयथाभावात् यणादेशः । ' उदात्तस्वरितयोर्यणः° ' इति परस्य जसोऽनुदात्तस्य स्वरितत्वम् । ईरते । ' ईर गतौ कम्पने च ' । अदादित्वात् शपो लुक् । झस्य अदादेशः । टेः एत्वम् । अनुदात्तेत्त्वात् लसार्वधातुकानुदात्तत्वे धातुस्वरः शिष्यते । यद्वृत्तयोगादनिघातः । तत्र हि पञ्चमीनिर्देशेऽपि व्यवहितेऽपि कार्यमिष्यते (का. ८. १. ६६) इत्युक्तम् । अत्यम् । अत्य इत्यश्वनाम, ' अत्यः हयः ' ( नि. १. १४. १ ) इति पाठात् । वाजम् । वाज्यते गम्यतेऽनेनेति वाजः । ' वज व्रज गतौ ' । करणे घञ् । ' अजिव्रज्योश्च ' ( पा. सू. ७. ३. ६० ) इत्यत्र चशब्दस्य अनुक्तसमुच्चयार्थत्वात् वाजः वाज्यम् इत्यत्रापि कुत्वाभावः इत्युक्तम् । हवनस्यदम् । ' स्यन्दू प्रस्रवणे ' । ' स्यदो जवे ' ( पा. सू. ६. ४. २८ ) इति वेगे गम्यमाने घञन्तो निपातितः । अत एव नलोपो वृद्ध्यभावश्च । न च ' न धातुलोप आर्धधातुके ' ( पा. सू. १. १. ४ ) इति वृद्धेः प्रतिषेधः । इग्लक्षणा हि वृद्धिस्तत्र प्रतिषिध्यते । न चेयमिग्लक्षणा । घञो ञित्त्वात् उत्तरपदस्याद्युदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वेन तदेव शिष्यते । ववृत्याम् । ' वृतु वर्तने ' । लिङि व्यत्ययेन परस्मैपदम् । ' बहुलं छन्दसि ' इति शपः श्लुः । द्विर्वचनादि । यासुटो ङित्त्वात् लघूपधगुणाभावः । ' तिङ्ङतिङः ' इति निघातः ॥

स पर्व॑तो॒ न ध॒रुणे॒ष्वच्यु॑तः स॒हस्र॑मूति॒स्तवि॑षीषु वावृधे ।
इन्द्रो॒ यद्वृ॒त्रमव॑धीन्नदी॒वृत॑मु॒ब्जन्नर्णां॑सि॒ जर्हृ॑षाणो॒ अन्ध॑सा ॥ २ ॥

सः । पर्व॑तः । न । ध॒रुणे॑षु । अच्यु॑तः । स॒हस्र॑म्ऽऊतिः । तवि॑षीषु । व॒वृ॒धे॒ ।
इन्द्रः॑ । यत् । वृ॒त्रम् । अव॑धीत् । न॒दी॒ऽवृत॑म् । उ॒ब्जन् । अर्णां॑सि । जर्हृ॑षाणः । अन्ध॑सा ॥२॥

ᵛअन्धसा सोमलक्षणेनान्नेन ᵛजर्हृषाणः अत्यर्थं हृष्यन् ᵛइन्द्रो ᵛयत् यदा ᵛवृत्रं त्रयाणां लोकानामावरीतारमसुरम् ᵛअवधीत् हतवान् । कीदृशं वृत्रम् । ᵛनदीवृतम् । नदनात् नद्य आपः । तासामावरीतारम् । किं कुर्वन्निन्द्रः । ᵛअर्णांसि जलानि ᵛउब्जन् अधःपातयन् । तदानीं ᵛसः इन्द्रः ᵛपर्वतो ᵛन पर्ववान्[1] शिलोच्चय इव[1] ᵛधरुणेषु सर्वस्य धारकेषूदकेषु मध्ये ᵛअच्युतः चलनराहित्येन स्थितः ᵛसहस्रमूतिः बहुविधरक्षणवान् ᵛतविषीषु बलेषु ᵛवावृधे[2] प्रवृद्धो बभूव ॥ धरुणेषु । ' धारयतेर्णिलुक् च ' इति उनप्रत्ययः । प्रत्ययस्वरः । सहस्रमूतिः । सहस्रम् ऊतयो यस्यासौ । लुगभावश्छान्दसः । ववृधे । संहितायामभ्यासस्य ' अन्येषामपि दृश्यते ' इति दीर्घत्वम् । नदीवृतम् । नदीं वृणोतीति नदीवृत् । क्विप् । तुगागमः । उब्जन् । ' उब्ज आर्जवे ' । विकरणस्वरः । अर्णांसि । ' उदके नुट् च ' ( उ. सू. ४. ६३६ ) इति अर्तेः असुन्प्रत्ययः, तत्संनियोगेन नुडागमश्च । नित्त्वादाद्युदात्तत्वम् । जर्हृषाणः । ' हृष तुष्टौ ' । यङ्लुगन्तात् व्यत्ययेन शानच् । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । यद्वा । यङन्तादेव शानचि ' बहुलं छन्दसि ' इति शपो लुक् । ' छन्दस्युभयथा ' इति शानचः आर्धधातुकत्वात् अतोलोपयलोपौ । सार्वधातुकत्वाच्च अभ्यस्तस्याद्युदात्तत्वम् । अन्धसा । अद्यते इत्यन्धः । ' अदेर्नुम् धश्च ' ( उ. सू. ४. ६४५ ) इति असुन्, धातोः नुमागमो धकारान्तादेशश्च । नित्त्वादाद्युदात्तत्वम् ॥

---

१. ढ–पर्वत इव । २. ढ–ववृधे ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स हि द्वरो द्वरिषु वव्र ऊधनि चन्द्रबुध्नो मदवृद्धो मनीषिभिः ।
इन्द्रं तमह्वे स्वपस्यया धिया मंहिष्ठरातिं स हि पप्रिरन्धसः ॥ ३ ॥

सः । हि । द्वरः । द्वरिषु । वव्रः । ऊधनि । चन्द्रऽबुध्नः । मदऽवृद्धः । मनीषिऽभिः ।
इन्द्रम् । तम् । अह्वे । सुऽअपस्यया । धिया । मंहिष्ठऽरातिम् । सः । हि । पप्रिः । अन्धसः ॥३॥

[v]सः पूर्वोक्तगुणविशिष्टः[1] इन्द्रः [v]द्वरिषु आवरीतृषु शत्रुषु [v]द्वरः [v]हि अतिशयेनावरीता खलु । शत्रुजयशील इत्यर्थः । यस्मात् [v]ऊधनि उद्यृतजलवति अन्तरिक्षे [v]वव्रः संभक्तो व्याप्य वर्तते । अत एव [v]चन्द्रबुध्नः सर्वासां प्रजानामाह्लादकमूलः अन्तरिक्षस्य सर्वाह्लादकत्वात् । [v]मदवृद्धः । माद्यन्ति एभिरिति मदाः सोमाः तैर्वर्धितः । एवंभूतो य इन्द्रः [v]मंहिष्ठरातिं प्रवृद्धधनं प्रवृद्धदानं वा [v]तम् [v]इन्द्रं [v]मनीषिभिः मनस ईषितृभिः प्राज्ञैर्ऋत्विग्भिः सह [v]स्वपस्यया [v]धिया शोभनकर्मयोग्यया बुद्धया [v]अह्वे आह्वयामि । [v]हि यस्मात् [v]सः इन्द्रः [v]अन्धसः अन्नस्य अस्मदपेक्षितस्य [v]पप्रिः पूरयिता ॥ द्वरः । द्वृ इत्येके । द्वरति आवृणोतीति द्वरः । पचाद्यच् । चित्स्वरेणान्तोदात्तत्वम् । द्वरिषु । 'अच इः' इति कर्तरि इप्रत्ययः । वव्रः । 'वृङ् संभक्तौ' । व्रियते संभज्यते इति वव्रः । 'वर्जर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थम्' (पा. सू. ३. ३. ५८. ४) इति परिगणनस्य उपलक्षणार्थत्वात् कर्मणि कप्रत्ययः । द्वित्वाभावश्छान्दसः । ऊधनि । उत् ऊर्ध्वं ध्रियतेऽस्मिन् जलमिति ऊधः । सप्तम्येकवचने 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः, छन्दस्यपि दृश्यते' (पा. सू. ७. १. ७५–७६) इति दृशिग्रहणात् ऊधस्शब्दस्यापि अनङादेशः । यद्वा । 'ऊधसोऽनङ्' (पा. सू. ५. ४. १३१) इति समासे विधीयमानः अनङादेशः छान्दसत्वात् केवलादपि भवति । चन्द्रबुध्नः । 'चदि आह्लादने दीप्तौ च' । इदित्त्वात् नुम् । 'स्फायितञ्चि°' इत्यादिना रक् । प्रत्ययस्वरेणान्तोदात्तत्वम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन तदेव शिष्यते । मदवृद्धः । 'मदी हर्षे' । 'मदोऽनुपसर्गे' इति करणे अप् । तस्य पित्त्वादनुदात्तत्वे धातुस्वरः । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम् । अह्वे । 'ह्वेञ् स्पर्धायां शब्दे च' । 'छन्दसि लुङ्लङ्लिटः' इति वर्तमाने लुङि 'आत्मनेपदेष्वन्यतरस्याम्' (पा. सू. ३. १. ५४) इति च्लेः अङादेशः । 'आतो लोप इटि च' इति आकारलोपः । गुणः । स्वपस्यया । अप इति कर्मनाम । शोभनमपः स्वपः । तदर्हतीति स्वपस्यः । 'छन्दसि च' इति यप्रत्ययः । मंहिष्ठरातिम् । 'महि वृद्धौ' । अतिशयेन मंहित्री मंहिष्ठा । 'तुश्छन्दसि' इति इष्ठन्प्रत्ययः । 'तुरिष्ठेमेयःसु' इति तृलोपः । नित्त्वादाद्युदात्तत्वम् । मंहिष्ठा रातिर्यस्य । 'स्त्रियाः पुंवत्°' (पा. सू. ६. ३. ३४) इति पुंवद्भावात् ह्रस्वत्वम् । 'बहुव्रीहौ प्रकृत्या°' इति पूर्वपदप्रकृतिस्वरत्वम् । पप्रिः । 'पॄ पालनपूरणयोः' । 'आदृगमहनजनः°' इति किन्प्रत्ययः । 'उदोष्ठ्यपूर्वस्य' इति उत्वस्य 'बहुलं छन्दसि' इति वचनादभावे यणादेशः । लिङ्वद्भावात् 'द्विर्वचनेऽचि' इति स्थानिवद्भावे सति द्विर्भावोरदत्वहलादिशेषाः । नित्त्वादाद्युदात्तत्वम् ॥

---

१. ढ–तादृशः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आ यं पृणन्ति दिवि सद्मबर्हिषः समुद्रं न सुभ्वः स्वा अभिष्टयः ।
तं वृत्रहत्ये अनु तस्थुरूतयः शुष्मा इन्द्रमवाता अहुतप्सवः ॥ ४ ॥

आ । यम् । पृणन्ति । दिवि । सद्मऽबर्हिषः । समुद्रम् । न । सुऽभ्वः । स्वाः । अभिष्टयः ।
तम् । वृत्रऽहत्ये । अनु । तस्थुः । ऊतयः । शुष्माः । इन्द्रम् । अवाताः । अहुतऽप्सवः ॥४॥

सद्म सदनं स्थानं बर्हिःशब्दोपलक्षितो यज्ञो येषां सोमानां ते सोमाः [v]दिवि स्वर्गलोकेऽवस्थितं [v]यम् इन्द्रम् [v]आ [v]पृणन्ति आ समन्तात् पूरयन्ति । तत्र दृष्टान्तः । सुष्ठु भवन्तीति [v]सुभ्वः नद्यः [v]समुद्रं [v]न[1] । यथा नद्यः समुद्रं पूरयन्ति तद्वदित्यर्थः । कीदृश्यो नद्यः । [v]स्वाः समुद्रस्य स्वभूताः । तथा चाम्नायते—' समुद्राय वयुनाय सिन्धूनां पतये नमः ' ( तै. सं. ४. ६. २. ६ ) इति । [v]अभिष्टयः आभिमुख्येन गमनवत्यः [v]ऊतयः अवितारो मरुतः [v]वृत्रहत्ये वृत्रहनने निमित्तभूते सति [v]तम् [v]इन्द्रम् [v]अनु [v]तस्थुः अनुलक्ष्य स्थिता बभूवुः । कीदृशा मरुतः । [v]शुष्माः शत्रूणां शोषयितारः [v]अवाताः । वान्ति प्रातिकूल्येन गच्छन्तीति वाताः शत्रवः तद्रहिताः । [v]अहुतप्सवः अकुटिलरूपाः शोभनावयवा इत्यर्थः ॥ पृणन्ति । ' पृ पालनपूरणयोः ' । क्र्यादिकः । ' प्वादीनां ह्रस्वः ' इति ह्रस्वत्वम् । ' श्नाभ्यस्तयोरातः ' इति आकारलोपः । प्रत्ययस्वरः । यद्वृत्तयोगादनिघातः । सद्मबर्हिषः । ' षद्लृ विशरणगत्यवसादनेषु ' । सीदन्त्यस्मिन्निति सद्म । औणादिकोऽधिकरणे मनिन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन तदेव शिष्यते । सुभ्वः । भवतेः ' क्विप् च ' इति क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वम् । जसि ' ओः सुपि ' इति यणादेशस्य ' न भूसुधियोः ' इति प्रतिषेधे प्राप्ते ' छन्दस्युभयथा ' इति यणादेशः । ' उदात्तस्वरितयोर्यणः० ' इति अनुदात्तस्य जसः स्वरितत्वम् । अभिष्टयः । इष्टय एषणानि । ' उपसर्गाश्चाभिवर्जम् ' इति वचनात् अभिः अन्तोदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन स एव शिष्यते । एमन्नादित्वात् पररूपत्वम् । वृत्रहत्ये । ' हनस्त च ' इति हन्तेः भावे क्यप् तकारान्तादेशश्च । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते । अहुतप्सवः । ' हु कौटिल्ये ' । अस्मात् निष्ठायां ' हु ह्वरेश्छन्दसि ' ( पा. सू. ७. २. ३१ ) इति हुआदेशः । ' प्सा भक्षणे ' इत्यस्मात् औणादिको डुप्रत्ययः । न हुतप्सवः अहुतप्सवः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

अभि स्ववृष्टिं मदे अस्य युध्यतो रघ्वीरिव प्रवणे सस्रुरूतयः ।
इन्द्रो यद्वज्री धृषमाणो अन्धसा भिनद्वलस्य परिधीँरिव त्रितः ॥ ५ ॥

अभि । स्वऽवृष्टिम् । मदे । अस्य । युध्यतः । रघ्वीःऽइव । प्रवणे । सस्रुः । ऊतयः ।
इन्द्रः । यत् । वज्री । धृषमाणः । अन्धसा । भिनत् । वलस्य । परिधीन्ऽइव । त्रितः ॥५॥

[v]ऊतयः मरुतः [v]मदे सोमपानेन हर्षे सति [v]अस्य इन्द्रस्य [v]युध्यतः वृत्रेण सह युध्यमानस्य पुरतः [v]स्ववृष्टिं स्वभूतवृष्टिमन्तं वृत्रम् [v]अभि आभिमुख्येन [v]सस्रुः जग्मुः । [v]रघ्वीरिव [v]प्रवणे । यथा गमनस्वभावा आपो निम्नदेशे गच्छन्ति । [v]यत् यदा [v]अन्धसा सोमलक्षणेनान्नेन

---

१, ढ—न समुद्रमिव ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पीतेन [V]धृषमाणः प्रगल्भः सन् [V]वज्री वज्रवान् [V]इन्द्रः [V]वलस्य संवृण्वतः एतत्संज्ञकमसुरं [V]भिनत् व्यदारयत् अवधीदित्यर्थः । तत्र दृष्टान्तः । [V]त्रितः [V]परिधीनिव । देवानां हविर्लेपनिघर्षणाय अग्नेः सकाशात् अप्सु एकतो द्वितस्त्रित इति त्रयः पुरुषा जज्ञिरे । तथा च तैत्तिरीयैः समाम्नातं–'सोऽङ्गारेणापः । अभ्यपातयत् । तत एकतोऽजायत । स द्वितीयमभ्यपातयत् । ततो द्वितोऽजायत । स तृतीयमभ्यपातयत् । ततस्त्रितोऽजायत' ( तै. ब्रा. ३. २. ८. १०–११ ) इति । तत्रोदकपानार्थं प्रवृत्तस्य कूपे पतितस्य[1] प्रतिरोधाय असुरैः परिधयः परिधायकाः कूपस्याच्छादकाः स्थापिताः । तान्यथा स अभिनत् तद्वत् ॥ स्ववृष्टिम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । युध्यतः । 'युध संप्रहारे' । दैवादिकः । व्यत्ययेन शतृ । अदुपदेशात् लसार्वधातुकानुदात्तत्वे श्यनो नित्त्वादाद्युदात्तत्वम् । रध्वीः । रधि गत्यर्थः । 'रज्ञिबंह्योर्नलोपश्च' ( उ. सू. १. २९ ) इति उप्रत्ययः । 'वोतो गुणवचनात्' इति ङीष् । जसि 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम् । ङीष्स्वरः शिष्यते । धृषमाणः । 'जिधृषा प्रागल्भ्ये' । श्नुप्रत्यये प्राप्ते व्यत्ययेन शः आत्मनेपदं च । अदुपदेशात् लसार्वधातुकानुदात्तत्वे विकरणस्वरः शिष्यते । भिनत् । लङि 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः । विकरणस्वरः । यद्वृत्तयोगादनिघातः । वलस्य । 'वल संवरणे' । वलति संवृणोति सर्वमिति वलः । पचाद्यच् । 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी । परिधीन् । परिधीयन्ते इति परिधयः । 'उपसर्गे घोः किः' ( पा. सू. ३. ३. ९२ ) इति दधातेः कर्मणि किप्रत्ययः । 'आतो लोप इटि च' इति आकारलोपः । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ ॥ १२ ॥

परीं घृणा चरति तित्विषे शवोऽपो वृत्वी रजसो बुध्नमाशयत् ।
वृत्रस्य यत्प्रवणे दुर्गृभिश्वनो निजघन्थ हन्वोरिन्द्र तन्यतुम् ॥ ६ ॥

परि । ईम् । घृणा । चरति । तित्विषे । शवः । अपः । वृत्वी । रजसः । बुध्नम् । आ । अशयत् । वृत्रस्य । यत् । प्रवणे । दुःऽगृभिश्वनः । निऽजघन्थ । हन्वोः । इन्द्र । तन्यतुम् ॥ ६ ॥

यो वृत्रः [V]अपो [V]वृत्वी उदकान्यावृत्य [V]रजसः [V]बुध्नम् अन्तरिक्षस्योपरिप्रदेशम् [V]आशयत् आश्रित्याशेत तस्य [V]वृत्रस्य [V]प्रवणे प्रकर्षेण वननीयेऽन्तरिक्षे वर्तमानस्य [V]दुर्गृभिश्वनः दुर्ग्रहव्यापनस्य । तस्य हि व्यापनं न केनापि ग्रहीतुं शक्यते । 'स इमान् लोकानावृणोत्' इति श्रुतेः । एवंभूतस्य वृत्रस्य [V]हन्वोः मुखपार्श्वयोः हे [V]इन्द्र [V]यत् यदा [V]तन्यतुं प्रहारं विस्तारयन्तं यद्वा शब्दकारिणं वज्रम् । तृतीयार्थे द्वितीया । तन्यतुना वज्रेण [V]निजघन्थ नितरां प्रजहर्थ तदानीम् [V]ईम् एनं त्वाम् इन्द्रं [V]घृणा शत्रुजयलक्षणा दीप्तिः [V]परि [V]चरति परितो व्याप्नोति । स्वदीयं [V]शवः बलं च [V]तित्विषे प्रदिदीपे ॥ तित्विषे । 'त्विष दीप्तौ' । लिटि प्रत्ययस्वरः । तिङ्परत्वात् निघाताभावः । वृत्वी । 'वृञ् वरणे' । 'स्नात्व्यादयश्च' ( पा. सू. ७. १. ४९ ) इति आदिग्रहणात् क्त्वाप्रत्ययस्य ईकारः । रजसः । 'रञ्ज रागे' । रजन्त्यस्मिन्[2] गन्धर्वादयः इति रजोऽन्तरिक्षम् । असुनि 'रजकरजनरजःसूपसंख्यानम्' ( का. ६. ४. २४. ४ ) इति नलोपः । नित्त्वादाद्युदात्तत्वम् । अशयत् । शीङो व्यत्ययेन परस्मैपदम् । 'बहुलं छन्दसि' इति शपो लुगभावः । दुर्गृभिश्वनः । 'ग्रह उपादाने', 'अशू व्याप्तौ' इत्यनयोः दुःशब्दे उपपदे पृषोदरादित्वात् अभिमतरूपस्वरसिद्धिः । निजघन्थ । 'हन

---

१. ढ-स–पतितस्य त्रितस्य । २. ढ–रञ्जन्त्यस्मिन् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हिंसागत्योः '। लिटि थलि क्रादिनियमात्प्राप्तस्य इटः ' उपदेशेऽत्वतः ' ( पा. सू. ७. २. ६२ ) इति निषेधः। ' अभ्यासाच्च ' इति अभ्यासादुत्तरस्य हकारस्य घत्वम्। ' लिति ' इति प्रत्ययात् पूर्वस्योदात्तत्वम्। ' तिङि चोदात्तवति ' इति गतेः निघातः। यद्वृत्तयोगात् निघाताभावः। तन्यतुम्। ' तनु विस्तारे '। अस्मात् ' ऋतन्यञि° ' ( उ. सू. ४. ४४२ ) इत्यादिना यतुच्। यद्वा। ' स्तन शब्दे ' इत्यस्मात् बहुलवचनात् यतुच्प्रत्यये सकारलोपः ॥

हृदं न हि त्वा न्यृषन्त्यूर्मयो ब्रह्माणीन्द्र तव यानि वर्धना ।
त्वष्टा चित्ते युज्यं वावृधे शवस्ततक्ष वज्रमभिभूत्योजसम् ॥ ७ ॥

हृदम्। न। हि। त्वा। निऽऋषन्ति। ऊर्मयः। ब्रह्माणि। इन्द्र। तव। यानि। वर्धना। त्वष्टा। चित्। ते। युज्यम्। ववृधे। शवः। ततक्ष। वज्रम्। अभिभूतिऽओजसम् ॥ ७ ॥

हे [v]इन्द्र [v]यानि [v]ब्रह्माणि स्तोत्रशस्त्ररूपाणि मन्त्रजातानि [v]तव [v]वर्धना वर्धयितृणि तानि [v]त्वा त्वां [v]न्यृषन्ति [v]हि नितरां प्राप्नुवन्त्येव। तत्र दृष्टान्तः। [v]ऊर्मयः जलप्रवाहाः [v]हृदं [v]न। यथा जलाशयं प्राप्नुवन्ति तद्वत्। [v]त्वष्टा[1] [v]चित् स त्वष्टा च देवः[1] [v]ते तव [v]युज्यं योग्यं [v]शवः बलं [v]ववृधे प्रावर्धयत्। अपि च [v]अभिभूत्योजसं शत्रूणामभिभवित्रा ओजसा बलेन युक्तं [v]वज्रं [v]ततक्ष तीक्ष्णीचकार ॥ न्यृषन्ति। ' ऋषी गतौ '। तौदादिकः। अदुपदेशात् लसार्वधातुकानुदात्तत्वे विकरणस्वरः। ' हि च ' इति निघातप्रतिषेधः। ऊर्मयः। ' ऋ गतौ '। ऋच्छन्ति गच्छन्तीति ऊर्मयः। ' अर्तेरूच ' ( उ. सू. ४. ६३४ ) इति मिप्रत्ययः। गुणे सति अकारस्य ऊकारादेशश्च। प्रत्ययस्वरः। वर्धना। ' वृधु वृद्धौ '। वर्धते एभिरिति वर्धना। करणे ल्युट्। ' शेश्छन्दसि° ' इति शेर्लोपः। ततक्ष। ' तक्षू त्वक्षू तनूकरणे '। लिटि णलि लित्स्वरेण प्रत्ययात् पूर्वस्योदात्तत्वम्। पादादित्वात् निघाताभावः। अभिभूत्योजसम्। अभिभूयतेऽनेनेति अभिभूति। करणे क्तिन्। ' तादौ च निति° ' इति गतेः प्रकृतिस्वरत्वम्। अभिभूति ओजो यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

जघन्वाँ उ हरिभिः संभृतक्रतविन्द्रं वृत्रं मनुषे गातुयन्नपः ।
अयच्छथा बाह्वोर्वज्रमायसमधारयो दिव्या सूर्यं दृशे ॥ ८ ॥

जघन्वान्। ऊँ इति। हरिऽभिः। संभृतक्रतो इति संभृतऽक्रतो। इन्द्र। वृत्रम्। मनुषे। गातुऽयन्। अपः। अयच्छथाः। बाह्वोः। वज्रम्। आयसम्। अधारयः। दिवि। आ। सूर्यम्। दृशे ॥ ८ ॥

हे [v]संभृतक्रतो संपादितकर्मन् संपादितप्रज्ञ वा [v]इन्द्र [v]मनुषे जनाय [v]गातुयन् गातुं मार्गमिच्छन् [v]वृत्रं लोकानामावरकमसुरं [v]हरिभिः अश्वैर्युक्तस्त्वं [v]जघन्वान् [v]उ हतवान् खलु। तदनन्तरम् [v]अपः वृष्ट्युदकानि प्रावर्तय इत्यध्याहारः। [v]बाह्वोः त्वदीययोर्हस्तयोः [v]आयसम् अयोमयं [v]वज्रम् [v]अयच्छथाः अग्रहीः। आकारः समुच्चयार्थः। [v]सूर्यं च [v]दिवि द्युलोके [v]दृशे द्रष्टुं सर्वेषामस्माकं दर्शनाय

---

१. च-छ-त-फ-श-त्वष्टाचिदेव; ध-त्वष्टा चित् त्वष्टा च देवः; न-स- त्वष्टा चित् त्वष्टा चिदेव।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vअधारयः स्थापयांचकृषे ॥ जघन्वान् । हन्तेर्लिटः क्वसुः । ' विभाषा गमहनविदविशाम् ' ( पा. सू. ७. २. ६८ ) इति इडागमस्य विकल्पोक्तेरभावः । गातुयन् गातुमिच्छसि । ' छन्दसि परेच्छायामपि ' ( का. ३. १. ८. २ ) इति क्यच् । ' न च्छन्दस्यपुत्रस्य ' इति दीर्घप्रतिषेधः । क्यजन्तात् शतरि अदुपदेशात् लसार्वधातुकानुदात्तत्वे क्यच एव स्वरः शिष्यते । बाह्वोः । ' उदात्तयणो हल्पूर्वात् ' इति विभक्तेरुदात्तत्वम् ॥

बृहत्स्वश्चन्द्रममवद्यदुक्थ्यमकृण्वत भियसा रोहणं दिवः ।
यन्मानुषप्रधना इन्द्रमूतयः स्वर्नृषाचो मरुतोऽमदन्ननु ॥ ९ ॥

बृहत् । स्वऽर्चन्द्रम् । अमऽवत् । यत् । उक्थ्यम् । अकृण्वत । भियसा । रोहणम् । दिवः । यत् । मानुषऽप्रधनाः । इन्द्रम् । ऊतयः । स्वः । नृऽसाचः । मरुतः । अमदन् । अनु ॥९॥

vबृहत् बृहत्साम स्तोतारो यजमानाः vभियसा वृत्रभयेन vयत् यदा vउक्थ्यम् उक्थार्हं स्तोत्रयोग्यम् vअकृण्वत अकुर्वन् । कीदृशं बृहत्साम । vस्वश्चन्द्रं स्वकीयेन चन्द्रेणाह्लादकेन तेजसा युक्तं vअमवत् । अमति शत्रून् रुजत्यनेनेति अमो बलम् । तद्युक्तम् । vदिवः स्वर्गस्य vरोहणम् आरोहणहेतुभूतम् । एवंविधेन स्तोत्रेण वृत्राद्भीता इन्द्रमस्तोषतेत्यर्थः । vयत् यदा vमानुषप्रधनाः । ' प्रकीर्णान्यस्मिन्धनानि भवन्ति ' ( निरु. ९. २३ ) इति नैरुक्तव्युत्पत्त्या प्रधनमिति संग्रामनाम । मनुष्यहितसंग्रामाः vऊतयः vस्वः द्युलोकस्य[2] रक्षितारः vमरुतः vनृषाचः प्राणरूपेण नॄन् सेवमाना भूत्वा vइन्द्रम् अपि तेनैव रूपेण vअनु vअमदन् आनुपूर्व्येण हर्षं प्रापयन् । तदानीं स इन्द्रो वृत्रवधं प्रति उद्युक्तो बभूवेति शेषः ॥ स्वश्चन्द्रम् । स्वकीयं चन्द्रं यस्य । ' ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे ' ( पा. सू. ६. १. १५१ ) इति सुट् । श्चुत्वेन शकारः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । भियसा । भीशब्दस्य तृतीयैकवचने छान्दसः असुगागमः तस्य उदात्तत्वं च । नृषाचः । ' षच समवाये ' । अयं सेवनार्थ इति यास्कः । ' वहश्च ' ( पा. सू. ३. २. ६४ ) इत्यत्र चशब्दस्यानुक्तसमुच्चयार्थत्वादस्मादपि ण्विप्रत्ययः । अमदन् । ' मदी हर्षे ' । णिचि ' मदी हर्षग्लपनयोः ' इति घटादिषु पाठात् मित्त्वे सति ' मितां ह्रस्वः ' इति ह्रस्वत्वम् । लङि ' छन्दस्युभयथा ' इति शप आर्धधातुकत्वात् ' णेरनिटि ' इति णिलोपः ॥

द्यौश्चिदस्यामवाँ अहेः स्वनादयोयवीद्भियसा वज्र इन्द्र ते ।
वृत्रस्य यद्बद्बधानस्य रोदसी मदे सुतस्य शवसाभिनच्छिरः ॥ १० ॥

द्यौः । चित् । अस्य । अमऽवान् । अहेः । स्वनात् । अयोयवीत् । भियसा । वज्रः । इन्द्र । ते । वृत्रस्य । यत् । बद्बधानस्य । रोदसी इति । मदे । सुतस्य । शवसा । अभिनत् । शिरः ॥१०॥

vअमवान् बलवान् vद्यौश्चित् द्युलोकोऽपि vअस्य vअहेः वृत्रस्य vस्वनात् शब्दात् vभियसा भयेन vअयोयवीत् अत्यर्थं पृथग्भूत आसीत् । अकम्पतेत्यर्थः । हे vइन्द्र vते तव vसुतस्य

२. ढ–स्वर्गलोकस्य ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अभिषवादिभिः संस्कृतस्य सोमस्य पानेन vमदे हर्षे जाते सति त्वदीयः vवज्रः vरोदसी द्यावापृथिव्यौ vबद्धधानस्य बाधनशीलस्य vवृत्रस्य vशिरः vयत् यदा vशवसा बलेन vअभिनत् अच्छिनत्। तदानीं द्युलोको भयराहित्येन निश्चलो बभूवेति शेषः ॥ अयोयवीत्। ' यु मिश्रणामिश्रणयोः '। अस्मात् यङ्लुगन्तात् लङि ' यङो वा ' ( पा. सू. ७. ३. ९४ ) इति अपृक्तप्रत्ययस्य ईडागमः। अडागम उदात्तः। बद्धधानस्य। ' बाधृ विलोडने '। ताच्छीलिके चानशि ' बहुलं छन्दसि ' इति शपः श्लुः। हलादिशेषाभावो धातोर्ह्रस्वत्वं च छान्दसत्वात्। ' चितः ' इत्यन्तोदात्तत्वम् ॥ ॥ १३ ॥

यदिन्निवेन्द्र पृथिवी दशभुजिरहानि विश्वा ततनन्त कृष्टयः ।
अत्राह ते मघवन्विश्रुतं सहो द्यामनु शवसा बर्हणा भुवत् ॥ ११ ॥

यत्। इत्। नु। इन्द्र। पृथिवी। दशऽभुजिः। अहानि। विश्वा। ततनन्त। कृष्टयः।
अत्र। अह। ते। मघऽवन्। विऽश्रुतम्। सहः। द्याम्। अनु। शवसा। बर्हणा। भुवत्॥११॥

vयदिन्नु यदा खलु vपृथिवी vदशभुजिः दशगुणिता भवेत् यदि वा vकृष्टयः[1] सर्वे मनुष्याः[1] vविश्वा सर्वाणि vअहानि vततनन्त विस्तारयेयुः। हे vमघवन् धनवन् vइन्द्र vअत्राह अत्रैव पूर्वोक्तेष्वेव देशकालकर्तृकेषु vते त्वदीयं vसहः वृत्रवधादिकारणं बलं vविश्रुतं विख्यातं प्रसिद्धम्। vशवसा त्वदीयेन बलेन कृता vबर्हणा वृत्रादेर्वधरूपा क्रिया vद्यामनु vभुवत् अनुभवति। यथा द्यौर्महती तथा त्वत्कृतं वृत्रादेर्हिंसनमपि महदिति भावः ॥ ततनन्त। ' तनु विस्तारे '। स्वरितेत्त्वात् आत्मनेपदम्। लिङर्थे लङि उप्रत्यये प्राप्ते व्यत्ययेन शप्। छान्दसो द्विर्भावः। यद्वा। ' बहुलं छन्दसि ' इति उप्रत्ययस्य श्लौ सति पुनरपि व्यत्ययेन शप्। शपः पित्त्वादनुदात्तत्वम्। तिङश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः। यद्वृत्तयोगादनिघातः। विश्रुतम्। ' श्रु श्रवणे '। कर्मणि निष्ठा। ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम्। बर्हणा। ' वर्ह वल्ह परिभाषणहिंसाच्छादनेषु '। अस्मात् औणादिकः क्युप्रत्ययः। बवयोरभेद इति वकारस्य बत्वम्। प्रत्ययस्वरः। ' निबर्हयति ' ( नि. २. १९. ३० ) इति वधकर्मसु पठितं च। भुवत्। ' भू सत्तायाम् '। लेटि अडागमः। ' इतश्च लोपः० ' इति इकारलोपः। ' बहुलं छन्दसि ' इति शपो लुक्। ' भूसुवोस्तिङि ' इति गुणप्रतिषेधे उवङादेशः ॥

त्वमस्य पारे रजसो व्योमनः स्वभूत्योजा अवसे धृषन्मनः ।
चकृषे भूमिं प्रतिमानमोजसोऽपः स्वः परिभूरेष्या दिवम् ॥ १२ ॥

त्वम्। अस्य। पारे। रजसः। विऽओमनः। स्वभूतिऽओजाः। अवसे। धृषत्ऽमनः।
चकृषे। भूमिम्। प्रतिऽमानम्। ओजसः। अपः।
स्वरिति स्वः। परिऽभूः। एषि। आ। दिवम् ॥ १२ ॥

---

१. च-फ-कृष्टयः प्रजाः; न-स-कृष्टयः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [V]धृषन्मनः शत्रूणां धर्षकमनोयुक्तेन्द्र [V]अस्य अस्माभिः परिदृश्यमानस्य [V]व्योमनः व्याप्तस्य अन्तरिक्षस्य [V]रजसः लोकस्य [V]पारे उपरिप्रदेशे वर्तमानः [V]स्वभूत्योजाः स्वभूतबलः [V]त्वम् [V]अवसे अस्मद्रक्षणार्थं [V]भूमिं भूलोकं [V]चकृषे कृतवानसि । किंच [V]ओजसः बलवतां बलस्य [V]प्रतिमानं प्रतिनिधिरभूः । तथा [V]स्वः सुष्ठु अरणीयं गन्तव्यम् । आपः इति अन्तरिक्षनाम । [V]अपः अन्तरिक्षलोकं [V]आ [V]दिवं द्युलोकं च [V]परिभूः परिग्रहीता । परिपूर्वो भवतिः परिग्रहणार्थः । [V]एषि प्राप्नोषि ॥ अस्य । ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम् । व्योमनः । अवतिर्गत्यर्थः, ' अव रक्षणगतिकान्ति° ' इत्यभिधानात् । विशेषेण गच्छति व्याप्नोतीति व्योम । यद्वा । वृष्टिप्रदानेन विशेषेण प्राणिनोऽवति रक्षतीति व्योम । ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन् । ' ज्वरत्वर° ' इत्यादिना उपधाया वकारस्य च ऊठ् । गुणः । दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् । यद्वा । भावे मनिन् । विविधम् ओम रक्षणं यस्मिन् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । यणादेशे ' उदात्तस्वरितयोर्यणः° ' इति परस्यानुदात्तस्य स्वरितत्वम् । स्वः । सुपूर्वात् अर्तेः ' अन्येभ्योऽपि दृश्यन्ते ' इति विच् । ' अव्ययादाप्सुपः ' ( पा. सू. २. ४. ८२ ) इति सुपो लुक् । ' न्यङ्क्वरौ स्वरितौ ' ( फि. सू. ७४ ) इति स्वरितत्वम् ॥

भूनाम्न्येकाहे मरुत्वतीयशस्त्रे निविद्धानीयात् सूक्तात् पुरा 'त्वं भुवः प्रतिमानम्' इत्येषा शंसनीया । तथैवासूत्रयत्—' शस्यमुक्तं बृहस्पतिसवेन त्वं भुवः प्रतिमानं पृथिव्याः ' ( आश्व. श्रौ. ९. ५ ) इति ॥

त्वं भुवः प्रतिमानं पृथिव्या ऋष्ववीरस्य बृहतः पतिर्भूः ।
विश्वमाप्रा अन्तरिक्षं महित्वा सत्यमद्धा नकिरन्यस्त्वावान् ॥ १३ ॥

त्वम् । भुवः । प्रतिऽमानम् । पृथिव्याः । ऋष्वऽवीरस्य । बृहतः । पतिः । भूः ।
विश्वम् । आ । अप्राः । अन्तरिक्षम् । महिऽत्वा । सत्यम् । अद्धा । नकिः । अन्यः । त्वाऽवान् ॥ १३ ॥

हे इन्द्र [V]त्वं [V]पृथिव्याः प्रथिताया विस्तीर्णाया भूमेः । [V]प्रतिमानं [V]भुवः प्रतिनिधिर्भवसि । यथा भूर्लोको महानचिन्त्यशक्तिः एवं त्वमपीत्यर्थः । तथा [V]ऋष्ववीरस्य । वीरयन्ति विक्रान्ता भवन्तीति वीरा देवाः । ऋष्वा दर्शनीया वीरा यस्य स तथोक्तः । तस्य [V]बृहतः बृंहितस्य प्रवृद्धस्य स्वर्गलोकस्य [V]पतिर्भूः पालयितासि । तथा [V]अन्तरिक्षम् अन्तरा क्षान्तं द्यावापृथिव्योर्मध्ये वर्तमानमाकाशं [V]विश्वं सर्वमपि [V]महित्वा महत्त्वेन [V]सत्यम् [V]आप्राः निश्चयेन आ समन्तादपूरयः । अतः [V]त्वावान् त्वत्सदृशः [V]अन्यः कश्चित् [V]नकिः अस्ति नास्तीति यदेतत् तत् [V]अद्धा सत्यमेव ॥ भुवः । भवतेर्लेटि सिपि अडागमः । उवङादेशः । पृथिव्याः । ' उदात्तयणो हल्पूर्वात् ' इति विभक्तिरुदात्ता । बृहतः । ' बृहन्महतोरुपसंख्यानम् ' इति विभक्तेरुदात्तत्वम् । भूः । छान्दसे वर्तमाने लुङि ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । अप्राः । ' प्रा पूरणे ' । आदादिकः । लङि अडागमः । महित्वा । ' सुपां सुलुक्° ' इति तृतीयाया डादेशः । त्वावान् । ' वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम् ' ( पा. सू. ५. २. ३९. १ ) इति सादृश्यार्थे वतुप् । ' प्रत्ययोत्तरपदयोश्च ' इति मपर्यन्तस्य त्वादेशः । ' आ सर्वनाम्नः ' इति आत्वम् । प्रथयस्य पित्त्वादनुदात्तत्वे प्रातिपदिकस्वर एव शिष्यते ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

न यस्य द्यावापृथिवी अनु व्यचो न सिन्धवो रजसो अन्तमानशुः ।
नोत स्ववृष्टिं मदे अस्य युध्यत एको अन्यच्चकृषे विश्वमानुषक् ॥ १४ ॥

न। यस्य। द्यावापृथिवी इति। अनु। व्यचः। न। सिन्धवः। रजसः। अन्तम्। आनशुः।
न। उत। स्वऽवृष्टिम्। मदे। अस्य। युध्यतः। एकः। अन्यत्। चकृषे। विश्वम्। आनुषक्॥१४॥

[v]यस्य इन्द्रस्य [v]व्यचः व्यापनं [v]द्यावापृथिवी द्यावापृथिव्यौ [v]न [v]अनु आनशाते प्राप्तुमसमर्थे बभूवतुः। तथा[1] [v]रजसः अन्तरिक्षलोकस्योपरि [v]सिन्धवः स्यन्दनशीला आपो यस्य इन्द्रस्य तेजसः [v]अन्तम् अवसानं [v]न [v]आनशुः न प्रापुः। [v]उत अपि च सोमपानेन [v]मदे हर्षे सति [v]स्ववृष्टिं स्वीकृतवृष्टिं वृत्रादिं [v]युध्यतः युध्यमानस्य [v]अस्य इन्द्रस्य बलस्य अन्तं वृत्रादयः [v]न प्रापुः। अतो हे इन्द्र [v]एकः[2] त्वम् [v]अन्यत् स्वव्यतिरिक्तं [v]विश्वं सर्वं भूतजातम् [v]आनुषक् आनुषक्तं[3] [v]चकृषे। सकलमपि भूतजातं त्वदधीनमभूदिति भावः ॥ द्यावापृथिवी। द्यौश्च पृथिवी च। 'दिवो द्यावा' (पा. सू. ६. ३. २९) इति द्यावादेश आद्युदात्तो निपातितः। पृथिवीशब्दः 'पृद्भ्रौरादिभ्यश्च' इति ङीषन्तोऽन्तोदात्तः। 'देवताद्वन्द्वे च' इति उभयपदप्रकृतिस्वरत्वम्। 'ºअपृथिवीरुद्रपूषमन्थिषु' इति पर्युदासात् 'नोत्तरपदेऽनुदात्तादौ' इति निषेधाभावः। व्यचः। 'व्यचेः कुटादित्वमनसि' (का. १. २. १. १) इति वचनात् ङित्त्वाभावे संप्रसारणाभावः। आनशुः। अश्नोतेर्व्यत्ययेन परस्मैपदम्। 'अत आदेः' इति अभ्यासस्य आत्वम्। 'अश्नोतेश्च' इति नुडागमः ॥

आर्चन्नत्र मरुतः सस्मिन्नाजौ विश्वे देवासो अमदन्ननु त्वा ।
वृत्रस्य यद्भृष्टिमता वधेन नि त्वमिन्द्र प्रत्यानं जघन्थ ॥ १५ ॥

आर्चन्। अत्र। मरुतः। सस्मिन्। आजौ। विश्वे। देवासः। अमदन्। अनु। त्वा।
वृत्रस्य। यत्। भृष्टिऽमता। वधेन। नि। त्वम्। इन्द्र। प्रति। आनम्। जघन्थ ॥१५॥

हे इन्द्र त्वां [v]मरुतः [v]अत्र अस्मिन् संग्रामे [v]आर्चन्। 'प्रहर भगवो जहि वीरयस्व' (ऐ. ब्रा. ३. २०) इत्यनेन वचनेन अपूजयन्। [v]सस्मिन् तस्मिन् यद्वा सर्वस्मिन् [v]आजौ संग्रामे [v]विश्वे [v]देवासः ते सर्वे दानादिगुणयुक्ता मरुतः [v]त्वा त्वाम् [v]अनु [v]अमदन् अनुक्रमेण हर्षं प्रापयन्। यद्वा। त्वदीयमदानन्तरं तेऽपि मदं प्राप्ताः। हे [v]इन्द्र [v]त्वं [v]यत् यदा [v]भृष्टिमता। भ्रंशयति शत्रूनिति भृष्टिः अश्निः। तद्वता [v]वधेन हननसाधनेन वज्रेण। अश्निमत्त्वं च वज्रस्य ब्राह्मणे समाम्नातं—'वज्रो वा एष यद्यूपः सोऽष्टाश्रिः कर्तव्योऽष्टाश्रिर्वै वज्रः' (ऐ. ब्रा. २. १) इति। तेन वज्रेण [v]वृत्रस्य [v]आनं [v]प्रति आननं मुखं प्रति यद्वा श्वासहेतुं घ्राणं प्रति [v]नि [v]जघन्थ नितरां प्राहार्षीः॥ आर्चन्। 'अर्च पूजायाम्'। भौवादिकः। आडागम उदात्तः। सस्मिन्। 'तदोः सः सौ' (पा. सू. ७. २. १०६) इति विधीयमानं सत्वं व्यत्ययेन ससम्यामपि द्रष्टव्यम्। यद्वा। सर्वस्मिन्नित्यत्र वर्णलोपो द्रष्टव्यः। देवासः। 'आज्जसेरसुक्।' आनम् आननम्। वर्णलोपश्छान्दसः। यद्वा। 'अन प्राणने'। अन्यते

---

१. ड–तथा च। २. ढ–एक एव। ३. ढ- स–अनुषक्तम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अनेनेति आनं घ्राणम्। करणे घञ्। ' कर्षात्वतः° ' इत्यन्तोदात्तत्वम्। जघन्थ। ' हन हिंसागत्योः '। थलि ' उपदेशेऽत्वतः ' इति इट्प्रतिषेधः। ' अभ्यासाच्च ' इति अभ्यासादुत्तरस्य हकारस्य घत्वम्। लित्स्वरेण प्रत्ययात् पूर्वस्योदात्तत्वम्॥ ॥ १४ ॥

' न्यू षु ' इति एकादशर्चं तृतीयं सूक्तम्। दशम्येकादश्यौ त्रिष्टुभौ। शिष्टा नव जगत्यः। सव्य ऋषिः। इन्द्रो देवता। तथा चानुक्रान्तं—' न्यू ष्वेकादश्यन्त्ये त्रिष्टुभौ ' इति। अतिरात्रे प्रथमे पर्याये ब्राह्मणाच्छंसिनः शस्त्रे एतत्सूक्तम्। तथा चासूत्रयदाचार्यः—' न्यू षु वाचमप्सु धूतस्य हरिवः पिबेहेति याज्या ' ( आश्व. श्रौ. ६. ४ ) इति॥

न्यू३ षु वाचं प्र महे भरामहे गिर इन्द्राय सदने विवस्वतः।
नू चिद्धि रत्नं ससतामिवाविदन्न दुष्टुतिर्द्रविणोदेषु शस्यते॥ १॥

नि। ऊँ इति। सु। वाचम्। प्र। महे। भरामहे। गिरः। इन्द्राय। सदने। विवस्वतः।
नु। चित्। हि। रत्नम्। ससताम्ऽइव। अविदत्। न। दुःऽस्तुतिः। द्रविणःऽदेषु। शस्यते॥१॥

vमहे महते vइन्द्राय vसु vवाचं शोभनां स्तुतिं vनि vप्र vभरामहे नितरां प्रयुञ्ज्महे। vउ इति पादपूरणः। यतः vविवस्वतः परिचरतो यजमानस्य vसदने यज्ञगृहे इन्द्राय vगिरः स्तुतयः क्रियन्ते। vहि यस्मात् स इन्द्रः vनू vचित् क्षिप्रमेव vरत्नं रमणीयमसुराणां धनम् vअविदत् विन्दति। तत्र दृष्टान्तः। vससतामिव। यथा स्वपतां पुरुषाणां धनं चोरः क्षिप्रं लभते तद्वत्। अतोऽस्मभ्यं धनं दातुं शक्त इति भावः। vद्रविणोदेषु धनस्य दातृषु पुरुषेषु vदुष्टुतिः असमीचीना स्तुतिः vन vशस्यते नाभिधीयते। अतः सुवाचं प्र भरामहे इति पूर्वेण संबन्धः॥ न्यू षु इत्यस्य ' उदात्तस्वरितयोर्यणः° ' इति स्वरितत्वम्। तत्र उदात्तपरत्वात् संहितायां कम्प्यते। ' इकः सुञि ' ( पा. सू. ६. ३. १३४ ) इति दीर्घत्वम्। ' सुञः ' इति षत्वम्। महे। ' मह पूजायाम् ' इत्यस्मात् ' क्विप् च ' इति क्विप्। ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम्। यद्वा। महच्छब्दस्य अच्छब्दलोपश्छान्दसः। नू चित्। ' ऋचि तुनुघ° ' इत्यादिना दीर्घः। ससतामिव। ' षस स्वप्ने '। अस्मात् शत्रन्तादन्तोदात्तात्परस्या विभक्तेः ' शतुरनुमः° ' इत्युदात्तत्वम्। ' इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च ' ( पा. सू. २. १. ४. २ ) इति समासः। अविदत्। ' विदॢ लाभे '। ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लुङि ' पुषादिद्युतादि° ' इति च्लेः अङादेशः। अडागम उदात्तः। ' हि च ' इति निघातप्रतिषेधः। द्रविणोदेषु। द्रविणानि धनानि ददातीति द्रविणोदाः। ' दु गतौ ' इत्यस्मात् ' दुदक्षिभ्यामिनन् ' ( उ. सू. २. २०८ ) इति इनन्प्रत्ययान्तो द्रविणशब्दः। तस्मिन् कर्मण्युपपदे ' आतोऽनुपसर्गे कः ' इति कः। पूर्वपदस्य सुगागमश्छान्दसः। कृदुत्तरपदप्रकृतिस्वरत्वम्। शस्यते। ' शंसु स्तुतौ '। यकि ' अनिदिताम्° ' इति नलोपः॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दुरो अश्वस्य दुर इन्द्र गोरसि दुरो यवस्य वसुन इनस्पतिः ।
शिक्षानरः प्रदिवो अकामकर्शनः सखा सखिभ्यस्तमिदं गृणीमसि ॥ २ ॥

दुरः । अश्वस्य । दुरः । इन्द्र । गोः । असि । दुरः । यवस्य । वसुनः । इनः । पतिः ।
शिक्षाऽनरः । प्रऽदिवः । अकामऽकर्शनः । सखा । सखिऽभ्यः । तम् । इदम् । गृणीमसि ॥२॥

हे ᵛइन्द्र त्वम् ᵛअश्वस्य ᵛदुरः दाता ᵛअसि । तथा ᵛगोः पश्वादेः ᵛदुरः दातासि । तथा ᵛयवस्य यवादेर्धान्यजातस्य ᵛदुरः दाता असि । ᵛवसुनः निवासहेतोः धनस्य ᵛइनः स्वामी ᵛपतिः सर्वेषां पालयिता ᵛशिक्षानरः । शिक्षतिर्दानकर्मा ( नि. ३. १०. ८ ) । शिक्षायां दानस्य नेतासि । ᵛप्रदिवः पुराणः । प्रगता दिवो दिवसा यस्मिन् स तथोक्तः । ᵛअकामकर्शनः । कामान् कर्शयति नाशयतीति कामकर्शनः । न कामकर्शनोऽकामकर्शनः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । हविर्दत्तवतां यजमानानां कामानभिमतफलप्रदानेन पूरयतीत्यर्थः । ᵛसखिभ्यः समानख्यानेभ्य ऋत्विग्भ्यः ᵛसखा सखिवदत्यन्तं प्रियः एवंभूतो य इन्द्रः ᵛतं प्रति ᵛइदं स्तोत्रलक्षणं वचः ᵛगृणीमसि ब्रूमहे ॥ दुरः । 'डुदाञ् दाने' । 'मन्दिवाशिमतिचसिचङ्क्यङ्किभ्य उरच्' ( उ. सू. १. ३८ ) इति विधीयमान उरच्प्रत्ययो बहुलवचनादस्मादपि भवति । अत एव आकारलोपः । शिक्षानरः । 'शिक्ष विद्योपादाने' । 'गुरोश्च हलः' ( पा. सू. ३. ३. १०३ ) इति अकारप्रत्ययः । ततः टाप् । षष्ठीसमासः । 'समासस्य' इत्यन्तोदात्तत्वम् । गृणीमसि । 'गॄ शब्दे' । क्रैयादिकः । 'प्वादीनां ह्रस्वः' इति ह्रस्वत्वम् । 'इदन्तो मसि' इति मसेः इकारः ॥

शचीव इन्द्र पुरुकृद्द्युमत्तम तवेदिदमभितश्चेकिते वसु ।
अतः संगृभ्याभिभूत आ भर मा त्वायतो जरितुः कामंमूनयीः ॥ ३ ॥

शचीऽवः । इन्द्र । पुरुऽकृत् । द्युमत्ऽतम । तव । इत् । इदम् । अभितः । चेकिते । वसु ।
अतः । सम्ऽगृभ्य । अभिऽभूते । आ । भर । मा । त्वाऽयतः । जरितुः । कामम् । ऊनयीः ॥३॥

शचीवः । शची इति प्रज्ञानाम । हे ᵛइन्द्र ᵛशचीवः प्रज्ञावान् ᵛपुरुकृत् प्रभूतस्य वृत्रवधादेः कर्तः ᵛद्युमत्तम अतिशयेन दीप्तिमन् ᵛअभितः सर्वत्र वर्तमानं ᵛवसु धनं यदस्ति तत् ᵛइदं ᵛतवेत् तवैव स्वभूतमिति ᵛचेकिते भृशमस्माभिर्ज्ञायते । ᵛअतः कारणात् धनं ᵛसंगृभ्य सम्यक् गृहीत्वा ᵛअभिभूते शत्रूणामभिभवितः ᵛआ ᵛभर अस्मभ्यमाहर देहीत्यर्थः । ᵛत्वायतः त्वामात्मन इच्छतः ᵛजरितुः स्तोतुः ᵛकामम् अभिलाषं ᵛमा ᵛऊनयीः परिहीनं मा कार्षीः[1] । पूरयेत्यर्थः[1] ॥ शचीवः । 'मतुवसो रुः०' इति रुत्वम् । षाष्टिकमामन्त्रिताद्युदात्तत्वम् । इतरेषु आद्यमिकं सर्वानुदात्तत्वम् । न च 'आमन्त्रितं पूर्वमविद्यमानवत्' इति अविद्यमानवत्त्वम्, 'नामन्त्रिते समानाधिकरणे०' इति निषेधात् । चेकिते । 'कित ज्ञाने' । अस्मात् यङन्ताद्वर्तमाने लिटि '०अमन्त्रे०' ( पा. सू. ३. १. ३५ ) इति निषेधात् आम्प्रत्ययाभावे सति लिट आर्धधातुकत्वात् अतोलोपयलोपौ । संगृभ्य आभर इति उभयत्र 'ह्रग्रहोर्भ-

१. ढ–कार्षीरित्यर्थः पूरयेति भावः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

श्छन्दसि° ' इति भस्वम् । त्वायतः । त्वामात्मन इच्छति । ' सुप आत्मनः क्यच् ' । ' प्रत्ययोत्तरपदयोश्च ' इति मपर्यन्तस्य त्वादेशः । छान्दसम् आस्वम् । क्यजन्तात् लटः शतृ । तस्य अदुपदेशात् लसार्वधातुकस्वरेण अनुदात्तस्य एकादेशस्वरेणोदात्तत्वम् । ' एकादेशस्वरोऽन्तरङ्गः सिद्धो भवतीति वक्तव्यम् ' ( पा. सू. ८. २. ६. १ ) इति वचनात् तस्य सिद्धत्वे सति ' शतुरनुमः° ' इति अजादिविभक्तेरुदात्तत्वम् । कामम् । ' कमु कान्तौ ' इत्यस्मात् भावे घञ् । ' कर्षात्वतः° ' इत्यन्तोदात्तत्वे प्राप्ते वृषादिषु पाठादाद्युदात्तत्वम् । ऊनयीः । ' ऊन परिहाणे ' । चुरादिः । लुङि ' णिश्रिद्रुस्रुभ्यः° ' ( पा. सू. ३. १. ४८ ) इति च्लेः चङादेशस्य ' नोनयतिध्वनयति° ' ( पा. सू. ३. १. ५१ ) इत्यादिना प्रतिषेधः । ' ह्यन्तक्षण° ' ( पा. सू. ७. २. ५ ) इति सिचि वृद्धिप्रतिषेधः ॥

एभिर्द्युभिः सुमना एभिरिन्दुभिर्निरुन्धानो अमतिं गोभिरश्विना ।
इन्द्रेण दस्युं दरयन्त इन्दुभिर्युतद्वेषसः समिषा रभेमहि ॥ ४ ॥

एभिः । द्युऽभिः । सुऽमनाः । एभिः । इन्दुऽभिः । निऽरुन्धानः । अमतिम् । गोभिः । अश्विना । इन्द्रेण । दस्युम् । दरयन्तः । इन्दुऽभिः । युतऽद्वेषसः । सम् । इषा । रभेमहि ॥ ४ ॥

हे इन्द्र [v]एभिः अस्माभिर्दत्तैः [v]द्युभिः दीप्तैश्चरुपुरोडाशादिभिः [v]एभिरिन्दुभिः पुरोवर्तिभिः तुभ्यं दत्तैः सोमैश्च प्रीतस्त्वम् अस्माकम् [v]अमतिं दारिद्र्यं [v]गोभिः त्वया दत्तैः पशुभिः [v]अश्विना अश्वयुक्तेन धनेन च [v]निरुन्धानः निवर्तयन् [v]सुमनाः शोभनमना भव । वयम् [v]इन्दुभिः अस्माभिर्दत्तैः सोमैः प्रीतेन [v]इन्द्रेण [v]दस्युम् उपक्षपयितारं शत्रुं [v]दरयन्तः हिंसन्तः अत एव [v]युतद्वेषसः पृथग्भूतशत्रुका भूत्वा [v]इषा इन्द्रदत्तेन अन्नेन [v]सं [v]रभेमहि संरब्धा भवेम । संगच्छेमहीत्यर्थः ॥ सुमनाः । शोभनं मनो यस्य । ' सोर्मनसी अलोमोषसी ' इत्युत्तरपदाद्युदात्तत्वम् । निरुन्धानः । ' रुधिर् आवरणे ' । स्वरितेत्त्वात् आत्मनेपदम् । ' श्नसोरल्लोपः ' इति अकारलोपः । ' चितः ' इत्यन्तोदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् । अमतिम् । मन्तव्या मतिः ऐश्वर्यम् । न मतिः अमतिः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । ' न लोकाव्यय° ' इति षष्ठीप्रतिषेधः । अश्विना । अश्वोऽस्यातीति अश्वि धनम् । मत्वर्थीय इनिः ॥

सामिन्द्र राया समिषा रभेमहि सं वाजेभिः पुरुश्चन्द्रैरभिद्युभिः ।
सं देव्या प्रमत्या वीरशुष्मया गोअग्रयाश्वावत्या रभेमहि ॥ ५ ॥

सम् । इन्द्र । राया । सम् । इषा । रभेमहि । सम् । वाजेऽभिः । पुरुऽचन्द्रैः । अभिद्युऽभिः । सम् । देव्या । प्रऽमत्या । वीरऽशुष्मया । गोऽअग्रया । अश्वऽवत्या । रभेमहि ॥ ५ ॥

हे [v]इन्द्र [v]राया धनेन वयं [v]सं [v]रभेमहि संगच्छेमहि । तथा [v]इषा अन्नेन [v]सं रभेमहि । तथा [v]वाजेभिः बलैः [v]सं रभेमहि । कीदृशैः वाजैः । [v]पुरुश्चन्द्रैः पूरूणां बहूनामाह्लादकैः [v]अभिद्युभिः अभितो दीप्यमानैः । किंच [v]देव्या द्योतमानया [v]प्रमत्या त्वदीयया प्रकृष्टबुद्धया [v]सं [v]रभेमहि । कीदृश्या । [v]वीरशुष्मया । वीरं विशेषेण शत्रूणां क्षेपणसमर्थं शुष्मं बलं यस्याः सा तथोक्ता । [v]गोअग्रया ।

CC0. Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्तोतृभ्यो दानार्थमग्रे प्रमुखत एव गावो यस्याः सा तथोक्ता। vअश्वावत्या अश्वैरुपेतया ॥ राया। 'ऊडिदम्०' इत्यादिना विभक्तेरुदात्तत्वम्। पुरुश्चन्द्रैः। 'ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे' इति सुट्। श्चुत्वेन शकारः। समासस्वरः। अभिद्युभिः। अभिगता द्यौर्दीप्तिर्येषाम्। अत्र दिव्शब्दो दीप्तिं लक्षयति। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। देव्या। 'उदात्तयणः०' इति विभक्तेरुदात्तत्वम्। प्रसत्या। 'तादौ च निति०' इति गतेः प्रकृतिस्वरत्वम्। उत्तरयोर्बहुव्रीह्यो पूर्वपदप्रकृतिस्वरत्वम्। 'सर्वत्र विभाषा गोः' (पा. सू. ६. १. १२२) इति गोअग्रया इत्यत्र प्रकृतिभावः। अश्वावत्या। 'मन्त्रे सोमाश्वेन्द्रिय०' इति मतुपि दीर्घत्वम् ॥ ॥ १५ ॥

ते त्वा मदा अमदन्तानि वृष्ण्या ते सोमासो वृत्रहत्येषु सत्पते ।
यत्कारवे दश वृत्राण्यप्रति बर्हिष्मते नि सहस्राणि बर्हयः ॥ ६ ॥

ते। त्वा। मदाः। अमदन्। तानि। वृष्ण्या। ते। सोमासः। वृत्रऽहत्येषु। सत्ऽपते। यत्। कारवे। दश। वृत्राणि। अप्रति। बर्हिष्मते। नि। सहस्राणि। बर्हयः ॥ ६ ॥

हे vसत्पते सतां पालयितरिन्द्र vवृत्रहत्येषु वृत्रहननेषु निमित्तभूतेषु सत्सु vते पूर्वोक्ताः vमदाः मादका मरुतः vत्वा त्वाम् vअमदन् अमदयन् हर्षं प्रापयन्। vतानि पूर्वोक्तानि vवृष्ण्या वृष्णः सेचनसमर्थस्य तव संबन्धीनि चरुपुरोडाशादीनि हवींषि त्वाम् अमदन्। vते vसोमासः प्रसिद्धाः सोमाश्च त्वाम् अमदन्। vयत् यदा vकारवे स्तुतिकर्त्रे vबर्हिष्मते यज्ञवते यजमानाय vदश vसहस्राणि अपरिमितानि vवृत्राणि आवरकाण्युपद्रवजातानि vअप्रति शत्रुभिरप्रतिगतस्त्वं vनि vबर्हयः न्यवधीः। तदानीमिति पूर्वेण संबन्धः ॥ वृष्ण्या। 'शेश्छन्दसि बहुलम्' इति शेर्लोपः। बर्हयः। बर्हयतिर्हिंसाकर्मा (नि. २. १९. ३०)। लङि 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः। शपः पित्त्वादनुदात्तत्वे णिच एव स्वरः शिष्यते। यद्वृत्तयोगादनिघातः ॥

युधा युधमुप घेदेषि धृष्णुया पुरा पुरं समिदं हंस्योजसा ।
नम्या यदिन्द्र सख्या परावति निबर्हयो नमुचिं नाम मायिनम् ॥ ७ ॥

युधा। युधम्। उप। घ। इत्। एषि। धृष्णुऽया। पुरा। पुरम्। सम्। इदम्। हंसि। ओजसा। नम्या। यत्। इन्द्र। सख्या। पराऽवति। निऽबर्हयः। नमुचिम्। नाम। मायिनम् ॥ ७ ॥

हे इन्द्र vधृष्णुया शत्रूणां धर्षकस्त्वं vयुधा युद्धेन संबद्धं vयुधं युद्धम् vउप vघेदेषि उपैव गच्छसि। सर्वदा युद्धशीलो भवसीत्यर्थः। घ इति पादपूरणः। शत्रूणामसुराणां vपुरा पुरेण नगरेण सह vइदं पुरोवर्ति vपुरं शत्रुनगरम् vओजसा बलेन vसं vहंसि सम्यग्विनाशयसि। शत्रूणां पुराण्यभैत्सीरित्यर्थः। हे vइन्द्र त्वं vनम्या शत्रुषु नमनशीलेन vसख्या सहायभूतेन वज्रेण vपरावति दूरदेशे vनमुचिं vनाम अनया संज्ञया प्रसिद्धं vमायिनं मायाविनमसुरं vयत् यस्मात् vनिबर्हयः नितरामहिंसीः। अतस्त्वमेवं स्तूयसे इत्यर्थः ॥ युधा। 'युध संप्रहारे'। संपदादिलक्षणो भावे क्विप्। 'सावेकाचः०' इति विभक्तेरुदात्तत्वम्। एषि। 'इण् गतौ'। अदादित्वात् शपो लुक्। धृष्णुया।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'जिधृषा प्रागल्भ्ये'। 'त्रसिगृधिधृषिक्षिपेः क्नुः' इति क्नुप्रत्ययः। कित्त्वाद्गुणाभावः। 'सुपां सुलुक्०' इति सोः याजादेशः। 'चितः' इत्यन्तोदात्तत्वम्। पुरा। 'पॄ पालनपूरणयोः'। पूरयति राज्ञामभिमतानीति। 'क्विप् च' इति क्विप्। 'उदोष्ठ्यपूर्वस्य' इति उत्वम्। 'सावेकाचः०' इति विभक्तिरुदात्ता[1]। हंसि। हन्तेर्लटि सिपि अदादित्वात् शपो लुकि 'नश्चापदान्तस्य झलि' (पा. सू. ८. ३. २४) इति अनुस्वारः। नम्या। 'णमु प्रह्वत्वे'। औणादिक इन्प्रत्ययः। 'सुपां सुलुक्०' इति तृतीयाया ड्यादेशः। टिलोपः। सख्या। 'शेषो घ्यसखि' (पा. सू. १. ४. ७) इति घिसंज्ञाप्रतिषेधात् नाभावाभावे यणादेशः। नमुचिम्। इन्द्रेण सह युद्धं न मुञ्चतीति नमुचिः। औणादिकः किप्रत्ययः। 'नभ्राण्नपात्०' इत्यादिना नञः प्रकृतिभावः। नञ् न गतिर्न च कारकमिति कृदुत्तरपदप्रकृतिस्वरत्वाभावे अव्ययपूर्वपदप्रकृतिस्वरत्वम्। मायिनम्। मायाशब्दस्य व्रीह्यादिषु पाठात् मत्वर्थीय इनिः॥

त्वं करञ्जमुत पर्णयं वधीस्तेजिष्ठयातिथिग्वस्य वर्तनी।
त्वं शता वङ्गृदस्याभिनत्पुरोऽनानुदः परिषूता ऋजिश्वना॥ ८॥

त्वम्। करञ्जम्। उत। पर्णयम्। वधीः। तेजिष्ठया। अतिथिऽग्वस्य। वर्तनी।
त्वम्। शता। वङ्गृदस्य। अभिनत्। पुरः। अननुऽदः। परिऽसूताः। ऋजिश्वना॥ ८॥

हे इन्द्र [v]त्वं [v]करञ्जं एतत्संज्ञकमसुरम् [v]उत अपि च [v]पर्णयम् एतन्नामानमसुरं च [v]अतिथिग्वस्य एतत्संज्ञस्य राज्ञः प्रयोजनाय [v]तेजिष्ठया अतिशयेन तेजस्विन्या [v]वर्तनी वर्तन्या शत्रुप्रेरणकुशलया शक्त्या [v]वधीः हतवानसि। तथा [v]अननुदः। अनु पश्चात् द्यति खण्डयतीति अनुदः अनुचरः। तादृशोऽनुचररहित एक एव [v]त्वम् [v]ऋजिश्वना एतत्संज्ञकेन राज्ञा [v]परिषूताः परितोऽवष्टब्धाः [v]शता शतानि शतसंख्याकाः [v]वङ्गृदस्य एतत्संज्ञकस्यासुरस्य [v]पुरः पुराणि नगराणि [v]अभिनत् बिभिदिषे॥ वधीः। हन्तेर्लुङि सिपि 'लुङि च' इति वधादेशः। तस्य अदन्तत्वात् वृद्ध्यभावः (पा. सू. ७. ३. ३५)। अत एव अनेकाच्त्वात् इट्प्रतिषेधाभावः (पा. सू. ७. २. १०)। 'इट ईटि' इति सिचो लोपः। तेजिष्ठया। तेजस्शब्दात् 'अस्मायामेधा०' इति मत्वर्थीयो विनिः। तस्मात् आतिशायनिके इष्ठनि 'विन्मतोर्लुक्' इति विनो लुक्। 'टेः' इति टिलोपः। नित्त्वादाद्युदात्तत्वम्। वर्तनी। वृत्यते प्रेर्यतेऽनयेति वर्तनी। करणे ल्युट्। टित्त्वात् ङीप् (पा. सू. ४. १. १५)। 'सुपां सुलुक्०' इति विभक्तेः पूर्वसवर्णदीर्घत्वम्। व्यत्ययेनान्तोदात्तत्वम्। अभिनत्। 'भिदिर् विदारणे'। लङि सिपि रुधादित्वात् श्नम्। 'इतश्च' इति इकारलोपः। 'हल्ङ्याब्भ्यः०' इति सकारलोपः। अननुदः। 'दो अवखण्डने'। 'आदेचः०' इति आत्वम्। 'आतश्चोपसर्गे' इति कप्रत्ययः। नास्ति अनुदः अस्येति बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। संहितायां दीर्घश्छान्दसः। परिषूताः। 'षू प्रेरणे'। कर्मणि निष्ठा। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्॥

---

१. ढ-न–विभक्तेरुदात्तत्वम्।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्वमेताञ्जनराज्ञो द्विर्दशाबन्धुना सुश्रवसोपजग्मुषः ।
षष्टिं सहस्रा नवतिं नव श्रुतो नि चक्रेण रथ्या दुष्पदावृणक् ॥ ९ ॥

त्वम् । एतान् । जनऽराज्ञः । द्विः । दश । अबन्धुना । सुऽश्रवसा । उपऽजग्मुषः ।
षष्टिम् । सहस्रा । नवतिम् । नव । श्रुतः । नि । चक्रेण । रथ्या । दुःऽपदा । अवृणक् ॥९॥

हे इन्द्र [v]श्रुतः विश्रुतः प्रख्यातः [v]त्वं [v]द्विर्दश विंशतिसंख्याकान् [v]अबन्धुना बन्धुरहितेन सहायरहितेन [v]सुश्रवसा एतत्संज्ञकेन राज्ञा युद्धार्थम् [v]उपजग्मुषः उपगतवतः [v]एतान् एवंविधान् [v]जनराज्ञः जनपदानामधिपतीन् । षष्टिमित्यादिना तेषां राज्ञामनुचरसंख्योच्यते । [v]षष्टिं [v]सहस्रा सहस्राणां षष्टिं [v]नवतिं [v]नव नवसंख्योत्तरां नवतिम् । तान् राज्ञ ईदृक्संख्याकाननुचरांश्च [v]रथ्या रथसंबन्धिना [v]दुष्पदा दुष्प्रपदनेन । शत्रुभिः प्राप्तुमशक्येनेत्यर्थः । ईदृशेन [v]चक्रेण [v]नि [v]अवृणक् न्यवर्जयः । त्वां स्तुवतः सुश्रवसो जयार्थं त्वमागत्य तदीयान् शत्रूनजैषीरित्यर्थः ॥ जनराज्ञः । समासान्तविधेरनित्यत्वात् ( परिभा. ८४ ) टच्प्रत्ययाभावः ( पा. सू. ५. ४. ९१ ) । राजन्शब्दो ' राजृ दीप्तौ ' इत्यस्मात् कनिन्प्रत्ययान्त आद्युदात्तः । कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । अबन्धुना । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । सुश्रवसा । शोभनं श्रवोऽन्नं यस्य । ' आद्युदात्तं द्व्यच्छन्दसि ' इत्युत्तरपदाद्युदात्तत्वम् । उपजग्मुषः । गमेर्लिटः क्वसुः । शसि भसंज्ञायां ' वसोः संप्रसारणम् ' इति संप्रसारणम् । परपूर्वत्वम् । ' गमहन° ' इत्यादिना उपधालोपः । ' शासिवसिघसीनां च ' इति षत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वेन क्वसोरेव स्वरः शिष्यते । रथ्या । रथस्येदं रथ्यम् । ' रथाद्यत् ' ( पा. सू. ४. ३. १२१ ) इति यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । ' सुपां सुलुक्° ' इति विभक्तेः आकारः । दुष्पदा । ' पद गतौ ' । ' ईषदुःसुषु° ' इति खल् । ' लिति ' इति प्रत्ययात् पूर्वस्योदात्तत्वम् । पूर्ववत् विभक्तेः आकारः । अवृणक् । ' वृजी वर्जने ' । रौधादिकः । लङि मध्यमैकवचने ' हल्ङ्याब्भ्यः ' इति सिपो लोपः । ' चोः कुः ' इति कुत्वम् ॥

त्वमाविथ सुश्रवसं तवोतिभिस्तव त्रामभिरिन्द्र तूर्वयाणम् ।
त्वमस्मै कुत्समतिथिग्वमायुं महे राज्ञे यूने अरन्धनायः ॥ १० ॥

त्वम् । आविथ । सुऽश्रवसम् । तव । ऊतिऽभिः । तव । त्रामऽभिः । इन्द्र । तूर्वयाणम् ।
त्वम् । अस्मै । कुत्सम् । अतिथिऽग्वम् । आयुम् । महे । राज्ञे । यूने । अरन्धनायः ॥१०॥

हे [v]इन्द्र [v]त्वं [v]तवोतिभिः त्वदीयैः पालनैः [v]सुश्रवसं पूर्वोक्तं राजानम् [v]आविथ ररक्षिथ । तथा [v]तूर्वयाणम् एतन्नामानं राजानं [v]तव [v]त्रामभिः त्वदीयैस्त्रायकैः पालकैर्बलैः आविथेति शेषः । किंच [v]त्वं [v]महे महते [v]यूने तरुणाय [v]अस्मै सुश्रवसे [v]राज्ञे कुत्सादीन् त्रीन् राज्ञः [v]अरन्धनायः वशमनयः । ' रध्यतिर्वशगमने ' ( निरु. ६. ३२ ) इति यास्कः ॥ त्रामभिः । ' त्रैङ् पालने ' । ' आदेचः° ' इति आत्वम् । ' आतो मनिन्° ' इति मनिन् । नित्त्वादाद्युदात्तत्वम् । अरन्धनायः । रन्धनं वशीकरणं करोति रन्धनयति । ' तत्करोति° ' ( पा. सू. ३. १. २६. ५ ) इति णिच् । ' इष्ठवर्णौ प्रातिपदिकस्य ' ( पा. सू. ६. ४. १५५. १ ) इति इष्ठवद्भावात् टिलोपः । लङि सिपि दीर्घश्छान्दसः ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

य उदृचीन्द्र देवगोपाः सखायस्ते शिवतमा असाम ।
त्वां स्तोषाम त्वया सुवीरा द्राघीय आयुः प्रतरं दधानाः ॥ ११ ॥

ये । उत्ऽऋचि । इन्द्र । देवऽगोपाः । सखायः । ते । शिवऽतमाः । असाम ।
त्वाम् । स्तोषाम । त्वया । सुऽवीराः । द्राघीयः । आयुः । प्रऽतरम् । दधानाः ॥ ११ ॥

हे ᵛइन्द्र ᵛये वयम् ᵛउदृचि उदर्के यज्ञसमाप्तौ वर्तमानाः ᵛदेवगोपाः देवैः पालिताः ᵛते तव ᵛसखायः सखिवदत्यन्तं प्रिया अत एव ᵛशिवतमा ᵛअसाम अतिशयेन कल्याणा अभूम, ते वयं यज्ञसमाप्त्युत्तरकालमपि ᵛत्वां ᵛस्तोषाम स्तवाम । अस्माभिः स्तुतेन ᵛत्वया ᵛसुवीराः शोभनपुत्रवन्तः सन्तः ᵛद्राघीयः अतिशयेन दीर्घम् ᵛआयुः जीवनं ᵛप्रतरं प्रकृष्टतरं यथा भवति तथा ᵛदधानाः धारयन्तो भूयास्म ॥ देवगोपाः । देवा गोपा येषाम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । असाम । ' अस भुवि ' । लुङर्थे लोटि ' आडुत्तमस्य पिच्च ' इति पिद्वद्भावात् ' पिच्च ङिन्न ' इति ङित्त्वाभावे ' श्नसोरल्लोपः ' इति अकारलोपाभावः । पित्त्वादेव तिङोऽनुदात्तत्वे धातुस्वरः शिष्यते । स्तोषाम । स्तौतेर्लोटि ' सिब्बहुलं लेटि ' इति बहुलग्रहणात् लोट्यपि सिप् । तस्य पित्त्वात् गुणः । सुवीराः । ' वीरवीर्यौ च ' इति उत्तरपदाद्युदात्तत्वम् । द्राघीयः । दीर्घशब्दात् ईयसुनि ' प्रियस्थिर° ' ( पा. सू. ६. ४. १५७ ) इत्यादिना द्राघादेशः । नित्त्वादाद्युदात्तत्वम् । प्रतरम् । प्रशब्दात् तरपि ' अमु च च्छन्दसि ' ( पा. सू. ५. ४. १२ ) इति अद्रव्यप्रकर्षे अमुप्रत्ययः । प्रत्ययस्वरेणान्तोदात्तत्वम् । दधानाः । दधातेः शानचि ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् ॥ ॥ १६ ॥

' मा नः ' इति एकादशर्चं चतुर्थं सूक्तम् । षष्ठ्यष्टमीनवम्येकादश्यस्त्रिष्टुभः । शिष्टाः सप्त जगत्यः । सव्य ऋषिः । इन्द्रो देवता । तथा चानुक्रान्तम्–' मा नोऽन्त्या त्रिष्टुप् षष्ठ्यष्टमी नवमी च ' इति । अतिरात्रे प्रथमे पर्याये अच्छावाकशस्त्रे इदं सूक्तम् । तथा च सूत्रितम्–' मा नो अस्मिन्मघवन्निन्द्र पिब तुभ्यं सुतो मदायेति याज्या ' ( आश्व. श्रौ. ६. ४ ) इति ॥

मा नो अस्मिन्मघवन्पृत्स्वंहसि नहि ते अन्तः शवसः परीणशे ।
अक्रन्दयो नद्यो३ रोरुवद्वना क्था न क्षोणीर्भियसा समारत ॥ १ ॥

मा । नः । अस्मिन् । मघऽवन् । पृत्ऽसु । अंहसि । नहि । ते । अन्तः । शवसः । परिऽनशे ।
अक्रन्दयः । नद्यः । रोरुवत् । वना । कथा । न । क्षोणीः । भियसा । सम् । आरत ॥ १ ॥

हे ᵛमघवन् धनवन्निन्द्र ᵛअस्मिन् परिदृश्यमाने ᵛअंहसि पापे ᵛपृत्सु पृतनासु पापफलभूतेषु संग्रामेषु च ᵛनः अस्मान् ᵛमा प्रक्षैप्सीरिति शेषः । यस्मात् ᵛते तव ᵛशवसः बलस्य ᵛअन्तः अवसानं ᵛपरीणशे परितो व्याप्तुं ᵛनहि शक्यते । सर्वोऽपि जनस्त्वदीयं बलमतिक्रमितुं न शक्नोतीत्यर्थः । तस्मात् त्वमन्तरिक्षे वर्तमानः ᵛरोरुवत् अत्यर्थं शब्दं कुर्वन् ᵛनद्यः नदीः ᵛवना तत्संबन्धीन्युदकानि च ᵛअक्रन्दयः शब्दयसि । ᵛक्षोणीः क्षोण्यः । क्षोणीति पृथिवीनाम । तदुपलक्षितास्त्रयो लोकाः ᵛभियसा त्वद्भयेन ᵛकथा कथं ᵛन ᵛसमारत न संगच्छन्ते । त्वदीयं बलमवलोक्य त्रयोऽपि लोका बिभ्यतीति

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

भावः ॥ पृत्सु । ' पदादिषु मांस्पृत्स्नूनामुपसंख्यानम् ' ( पा. सू. ६. १. ६३. १ ) इति पृतना-शब्दस्य पृद्भावः । परीणशे । नशतिर्व्याप्तिकर्मा । ' कृत्यार्थे तवैकेन्° ' इति केन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । ' निपातस्य च ' इति पूर्वपदस्य दीर्घत्वम् । नद्यः । द्वितीयार्थे प्रथमा । रोरुवत् । ' रु शब्दे ' । यङ्लुगन्तात् लटः शतृ । ' अदादिवच्च ' इति वचनात् शपो लुक् । शतुर्ङित्त्वात् गुणाभावे उवङादेशः । ' नाभ्यस्ताच्छतुः ' इति नुम्प्रतिषेधः । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । कथा । ' था हेतौ च च्छन्दसि ' इति किंशब्दात् प्रकारवचने थाप्रत्ययः । तस्य विभक्तिसंज्ञायां ' किमः कः ' ( पा. सू. ७. २. १०३ ) इति कादेशः । आरत । ' ऋ गतौ ' । ' समो गम्यृच्छि° ' इत्यात्मनेपदम् । छान्दसे वर्तमाने लङि अदादित्वात् शपो लुक् । झस्य अदादेशः । आडागमो वृद्धिश्च ॥

अर्चा शक्राय शाकिने शचीवते शृण्वन्तमिन्द्रं महयन्नभि ष्टुहि ।
यो धृष्णुना शवसा रोदसी उभे वृषा वृषत्वा वृषभो न्यृञ्जते ॥ २ ॥

अर्च । शक्राय । शाकिने । शचीऽवते । शृण्वन्तम् । इन्द्रम् । महयन् । अभि । स्तुहि ।
यः । धृष्णुना । शवसा । रोदसी इति । उभे इति । वृषा । वृषऽत्वा । वृषभः । निऽऋञ्जते ॥२॥

हे अध्वर्यो [V]शाकिने शक्तियुक्ताय [V]शचीवते प्रज्ञावते [V]शक्राय इन्द्राय [V]अर्च एवंविधमिन्द्रं पूजय । किंच[1] स्तुतीः [V]शृण्वन्तं समीचीनेयं स्तुतिरिति जानन्तं तम् [V]इन्द्रं [V]महयन् पूजयन् [V]अभि [V]ष्टुहि आभिमुख्येन तस्य स्तोत्रं कुरु । [V]यः इन्द्रः [V]धृष्णुना शत्रूणां धर्षकेण [V]शवसा बलेन [V]उभे [V]रोदसी द्यावापृथिव्यौ [V]न्यृञ्जते नितरां प्रसाधयति । ' ऋञ्जतिः प्रसाधनकर्मा ' ( निरु. ६. २१ ) इति यास्कः । स इन्द्रः [V]वृषा सेचनसमर्थः [V]वृषत्वा वृषत्वेनानेनैव सेचनसामर्थ्येन [V]वृषभः वर्षिता कामानां यद्वा वृष्ट्युदकानाम् ॥ अर्च । शपः पित्त्वादनुदात्तत्वे धातुस्वरः । ' व्यचोऽतस्तिङः ' इति दीर्घत्वम् । शाकिने । शक्तिः शाकः । ' शक्लृ शक्तौ ' । भावे घञ् । मत्वर्थीय इनिः । ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वात् चतुर्थी । अभि ष्टुहि । स्तौतेः अदादित्वात् शपो लुक् । ' उपसर्गात्सुनोति° ' इति षत्वम् । ' ष्टुना ष्टुः ' इति ष्टुत्वम् । वृषत्वा । ' सुपां सुलुक्° ' इति विभक्तेः आकारः । न्यृञ्जते । ' ऋजि भृजी भर्जने ' । इदित्त्वात् नुम् । शपि प्राप्ते व्यत्ययेन शः ॥

अर्चा दिवे बृहते शूष्यं१ वचः स्वक्षत्रं यस्य धृषतो धृषन्मनः ।
बृहच्छ्रवा असुरो बर्हणा कृतः पुरो हरिभ्यां वृषभो रथो हि षः ॥ ३ ॥

अर्च । दिवे । बृहते । शूष्यम् । वचः । स्वऽक्षत्रम् । यस्य । धृषतः । धृषत् । मनः ।
बृहत्ऽश्रवाः । असुरः । बर्हणा । कृतः । पुरः । हरिऽभ्याम् । वृषभः । रथः । हि । सः ॥३॥

हे स्तोतः [V]दिवे दीप्ताय [V]बृहते महते इन्द्राय [V]शूष्यम् । शूषम् इति सुखनाम । तत्र साधु शूष्यम् । तादृशं स्तुतिलक्षणं [V]वचः [V]अर्च उच्चारय । [V]यस्य इन्द्रस्य [V]धृषतः शत्रून् धर्षयतः [V]स्वक्षत्रं स्वभूत-

---

१. च-छ-ण-न-फ-कीदृशम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

बलवत् Vमनः Vधृषत् धृष्टं भवति । Vहि Vषः स हि स खल्विन्द्रः Vबृहच्छ्रवाः प्रभूतयशाः Vअसुरः शत्रूणां निरसिता । यद्वा । असुः प्राणो बलं वा । तद्वान् । रो मत्वर्थीयः । अथवा । असवः प्राणाः तेन च आपो लक्ष्यन्ते, ' प्राणा वा आपः ' ( तै. ब्रा. ३. २. ५. २ ) इति श्रुतेः । तान् राति ददातीति असुरः । Vबर्हणा शत्रूणां निबर्हयिता Vहरिभ्याम् अश्वाभ्यां Vपुरः Vकृतः पूजितः Vवृषभः कामानां वर्षिता Vरथः रंहणशीलः ॥ शूष्यम् । ' तत्र साधुः ' इति यत् । ' सर्वे विधयश्छन्दसि विकल्प्यन्ते ' इति ' यतोऽनावः ' इत्याद्युदात्तत्वाभावे ' तित्स्वरितम् ' इति स्वरितत्वम् । धृषतः । ' जिधृषा प्रागल्भ्ये ' । व्यत्ययेन शः । ' शतुरनुमः° ' इति विभक्तेरुदात्तत्वम् । बृहच्छ्रवाः । बृहत् श्रवो यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । असुरः । ' असु क्षेपणे ' । ' असेरुरन् ' ( उ. सू. १. ४२ ) इति उरन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । बर्हणा । ' सुपां सुलुक्° ' इति विभक्तेः आकारः । पुरः । ' पूर्वाधर° ' इत्यादिना असिप्रत्ययान्तः अन्तोदात्तः ॥

त्वं दिवो बृहतः सानु कोपयोऽव त्मना धृषता शम्बरं भिनत् ।
यन्मायिनो वन्दिनो मन्दिना धृषच्छितां गभस्तिमशनिं पृतन्यसि ॥ ४ ॥

त्वम् । दिवः । बृहतः । सानु । कोपयः । अव । त्मना । धृषता । शम्बरम् । भिनत् ।
यत् । मायिनः । वन्दिनः । मन्दिना । धृषत् । शिताम् । गभस्तिम् । अशनिम् । पृतन्यसि ॥४॥

हे इन्द्र Vत्वं Vबृहतः महतः Vदिवः द्युलोकस्य Vसानु समुच्छ्रितमुपरिप्रदेशं Vकोपयः अकम्पयः । Vधृषता शत्रूणां धर्षयित्रा Vत्मना आत्मना स्वयमेव Vशम्बरम् एतत्संज्ञमसुरम् Vअवाभिनत् अवधीः । Vयत् यदा Vवन्दिनः शत्रून् जेतुं मृदुभावं प्राप्तान् । यद्वा । वृन्दं समूहः असुरसमूहवतः । Vमायिनः मायाविनोऽसुरान् Vमन्दिना हृष्टेन Vधृषत् Vधृषता प्रागल्भ्यं प्राप्नुवता मनसा युक्तस्त्वं Vशितां तीक्ष्णीकृतां Vगभस्तिं हस्तेन गृहीताम् । यद्वा । गभस्तिः इति रश्मिनाम । तद्वतीम् Vअशनिं वज्रं Vपृतन्यसि तानसुरान् जेतुं पृतनारूपेणेच्छसि । तान्प्रति प्रेरयसीत्यर्थः । तदानीं बृहतो दिवः सानु कोपयः इति पूर्वेणान्वयः ॥ कोपयः । कुप कोपे । ण्यन्तात् लङि ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । त्मना । ' मन्त्रेष्वाङ्यादेरात्मनः ' इति आकारलोपः । धृषत् । ' सुपां सुलुक्° ' इति तृतीयाया लुक् । शिताम् । ' शो तनूकरणे ' । निष्ठायां ' शाच्छोरन्यतरस्याम् ' (पा. सू. ७. ४. ४१ ) इति इकारादेशः । पृतन्यसि । पृतनाशब्दात् ' सुप आत्मनः क्यच् ' । ' कव्यध्वरपृतनस्य° ' इति अन्तलोपः । प्रत्ययस्वरः ॥

नि यद्वृणक्षि श्वसनस्य मूर्धनि शुष्णस्य चिद्वन्दिनो रोरुवद्वना ।
प्राचीनेन मनसा बर्हणावता यदद्या चित्कृणवः कस्त्वा परि ॥ ५ ॥

नि । यत् । वृणक्षि । श्वसनस्य । मूर्धनि । शुष्णस्य । चित् । वन्दिनः । रोरुवत् । वना ।
प्राचीनेन । मनसा । बर्हणावता । यत् । अद्य । चित् । कृणवः । कः । त्वा । परि ॥ ५ ॥

हे इन्द्र त्वं Vरोरुवत् मेघैरित्यर्थं शब्दयन् Vश्वसनस्य अन्तरिक्षे श्वसितीति श्वसनो वायुः । तस्य Vवन्दिनः स्वकिरणैराम्रफलादीन् मृदुभावं प्रापयतः Vशुष्णस्य Vचित् रसानां शोषयितुरादित्यस्यापि

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]मूर्धनि उपरिप्रदेशे [v]वना वनान्युदकानि [v]यत् यस्मात् [v]नि [v]वृणक्षि आवर्जयसि । प्रापयसीत्यर्थः । वायुना सूर्यकिरणैश्च वृष्टा आपः सूर्यस्योपरि पुनरवस्थाप्यन्ते । तदेवावस्थापनमिन्द्रः[1] करोतीत्युपचर्यते। [v]प्राचीनेन प्रकर्षेण गन्त्रा । अपराङ्मुखेनेत्यर्थः । [v]बर्हणावता । निबर्हयतीति वधकर्मसु पाठात् बर्हणा शत्रूणां हिंसा तद्वता । एवंभूतेन [v]मनसा युक्तस्त्वं [v]यत् यस्मात् [v]अद्या [v]चित् अद्यापि [v]कृणवः घर्मकाले सूर्यस्योपरि भौमान् रसानवस्थापयसि वर्षासु च वर्षयसीति[2]। यस्मादेतत्[3] कुरुषे तस्मात् कारणात् [v]त्वा 'त्वां [v]परि उपरि [v]कः वर्तते न कोऽपीत्यर्थः । अतस्त्वमेव सर्वाधिक इति भावः ॥ वृणक्षि । 'वृजी वर्जने' । रौधादिकः । सिपः पित्त्वादनुदात्तत्वे विकरणस्वरः । यद्वृत्तयोगादनिघातः । प्राचीनेन । प्रपूर्वात् अञ्चतेः 'ऋत्विक्०' इत्यादिना क्विन् । 'अनिदिताम्०' इति नलोपः । 'विभाषाञ्चेरदिक्स्त्रियाम्' इति स्वार्थे खः । खस्य ईनादेशः । 'अचः' इति अकारलोपे 'चौ' इति दीर्घत्वम् । खप्रत्ययस्य सतिशिष्टत्वात् तदादेशस्य उपदेशिवद्भावेन ईकार उदात्तः । अद्या चित् । 'निपातस्य च' इति दीर्घत्वम् । कृणवः । 'कृवि हिंसाकरणयोश्च' । इदित्त्वात् नुम् । लेटि सिपि अडागमः । 'धिन्विकृण्व्योर च' इति उप्रत्ययः, वकारस्य अकारादेशश्च । तस्य अतो लोपे सति स्थानिवद्भावात् लघूपधगुणाभावः । गुणावादेशौ । आगमानुदात्तत्वे विकरणस्वरः । अत्र[4] निरुक्तं—'व्रन्दी व्रन्दतेर्मृदूभावकर्मणः । निवृणक्षि यच्छ्वसनस्य मूर्धनि शब्दकारिणः शुष्णस्यादित्यस्य च शोषयितू रोरूयमाणो वनानीति वा धनानीति वा' ( निरु. ५. १५–१६ ) इति। धनानीति पक्षे मेघस्य धनानीति व्याख्येयम् ॥ ॥ १७ ॥

त्वमाविथ नर्यं तुर्वशं यदुं त्वं तुर्वीतिं वय्यं शतक्रतो ।
त्वं रथमेतशं कृत्व्ये धने त्वं पुरो नवतिं दम्भयो नव ॥ ६ ॥

त्वम् । आविथ । नर्यम् । तुर्वशम् । यदुम् । त्वम् । तुर्वीतिम् । वय्यम् । शतक्रतो इति शतऽक्रतो । त्वम् । रथम् । एतशम् । कृत्व्ये । धने । त्वम् । पुरः । नवतिम् । दम्भयः । नव ॥ ६ ॥

हे इन्द्र [v]त्वं नर्यादीन् त्रीन् राज्ञः [v]आविथ ररक्षिथ । तथा हे [v]शतक्रतो बहुविधकर्मन् बहुविधप्रज्ञ वा [v]त्वं [v]वय्यं वय्यकुलजं तुर्वीतिनामानं[5] राजानम् आविथ इत्येव । अपि च [v]त्वं [v]रथं रंहणस्वभावम्[6] एतत्संज्ञमृषिम् [v]एतशम् एतत्संज्ञकं[6] [v]धने धननिमित्ते संग्रामे [v]कृत्व्ये कर्तव्ये सति आविथेति शेषः । यद्वा पूर्वोक्तानां राज्ञां रथम् । एतशः इति अश्वनाम । एतशम् अश्वं च ररक्षिथेति योज्यम् । तथा [v]त्वं शम्बरस्य [v]नवतिं [v]नव नवोत्तरनवतिसंख्याकाः [v]पुरः पुराणि [v]दम्भयः व्यनीनशः ॥ एतशम् । एति गच्छतीति एतशः । 'इण् गतौ' । 'इणस्तशन्तशसुनौ' (उ. सू. ३. ४२९) इति तशन्प्रत्ययः । गुणः । कृत्व्ये । कर्तव्ये इत्यस्य शब्दस्य वर्णविकारः पृषोदरादित्वात् ॥

---

१. च–तदवस्थापनमिन्द्रः; न–तादृगवस्थापनमिन्द्रः; स–तदेव स्थापनमिन्द्रः । २. ढ–न-स–वर्षसीति । ३. ढ–यदेतत् । ४. श–व्रन्दिनः । अत्र । ५. त-थ-द-ध-स–तुर्वीतिं तुर्वीतिनामानम् । ६. च-छ-फ–रंहणस्वभावम् एतशम् एतत्संज्ञमृषिम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स घा राजा सत्पतिः शूशुवज्जनो रातहव्यः प्रति यः शासमिन्वति ।
उक्था वा यो अभिगृणाति राधसा दानुरस्मा उपरा पिन्वते दिवः ॥ ७ ॥

सः । घ । राजा । सत्ऽपतिः । शूशुवत् । जनः । रातऽहव्यः । प्रति । यः । शासम् । इन्वति ।
उक्था । वा । यः । अभिऽगृणाति । राधसा । दानुः । अस्मै । उपरा । पिन्वते । दिवः ॥७॥

[v]स [v]घ स खलु [v]जनः जातः [v]राजा राजमानः [v]सत्पतिः सतां पालयिता यजमानः [v]शूशुवत् आत्मानं वर्धयति । [v]यः इन्द्रं [v]प्रति [v]रातहव्यः दत्तहविष्कः सन् [v]शासम् इन्द्रकर्तृकमनुशासनं यद्वा तस्य स्तुतिम् [v]इन्वति व्याप्नोति । [v]उक्था [v]वा उक्थानि शस्त्राणि वा [v]यः स्तोता [v]राधसा हविर्लक्षणेनान्नेन सह [v]अभिगृणाति तस्याभिमुखीकरणाय शंसति [v]अस्मै स्तोत्रे [v]दानुः अभिमतफलप्रदातेन्द्रः [v]उपरा उपरान् मेघान् । उपरः इति मेघनाम । स च यास्केनैवं निरुक्तः–'उपर उपलो मेघो भवत्युपरमन्तेऽस्मिन्नभ्राण्युपरता आप इति वा' ( निरु. २. २१ ) इति । तान् मेघान् [v]दिवः सकाशात् [v]पिन्वते सेचयति दोग्धीति यावत् ॥ घ । 'ऋचि तुनुघ°' इत्यादिना दीर्घः । सत्पतिः । सतां पतिः सत्पतिः । 'पत्यावैश्वर्ये' इति पूर्वपदप्रकृतिस्वरत्वम् । शूशुवत् । 'टुओश्वि गतिवृद्ध्योः' । ण्यन्तात् वर्तमाने लुङि च्लेः चङादेशे 'संप्रसारणं संप्रसारणाश्रयं च बलीयः' ( पा. म. ६. १. १७. २ ) इति अन्तरङ्गमपि वृद्ध्यादिकं बाधित्वा 'णौ च संश्चङोः' ( पा. सू. ६. १. ३१ ) इति संप्रसारणम् । संज्ञापूर्वकस्य विधेरनित्यत्वात् वृद्ध्यभावे द्विर्वचनादि । उवङादेशः । रातहव्यः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । शासम् । 'शासु अनुशिष्टौ' इत्यस्मात् भावे घञि 'कर्षात्वतः°' इत्यन्तोदात्तत्वे प्राप्ते व्यत्ययेनाद्युदात्तत्वम् । वृषादिर्वा द्रष्टव्यः । स ह्याकृतिगण इत्युक्तम् । यद्वा । 'शंसु स्तुतौ' इत्यस्मात् घञि व्यत्ययेन नलोपः । इन्वति । 'इवि व्याप्तौ' । शपः पित्त्वादनुदात्तत्वे धातुस्वरः । यद्वृत्तयोगादनिघातः । अभिगृणाति । 'गॄ शब्दे' । क्र्यादिकः । 'प्वादीनां ह्रस्वः' इति ह्रस्वत्वम् । तिपः पित्त्वादनुदात्तत्वे विकरणस्वरः । पूर्ववत् निघाताभावः । उपरा । 'सुपां सुलुक्°' इति शसः पूर्वसवर्णदीर्घत्वम् । पिन्वते । 'पिवि मिवि णिवि सेचने' । व्यत्ययेन आत्मनेपदम् ॥

असमं क्षत्रमसमा मनीषा प्र सोमपा अपसा सन्तु नेमे ।
ये ते इन्द्र ददुषो वर्धयन्ति महि क्षत्रं स्थविरं वृष्ण्यं च ॥ ८ ॥

असमम् । क्षत्रम् । असमा । मनीषा । प्र । सोमऽपाः । अपसा । सन्तु । नेमे ।
ये । ते । इन्द्र । ददुषः । वर्धयन्ति । महि । क्षत्रम् । स्थविरम् वृष्ण्यम् । च ॥ ८ ॥

इन्द्रस्य [v]क्षत्रं बलम् [v]असमं न केनचित् समम् । सर्वाधिकमित्यर्थः । तथा [v]मनीषा बुद्धिश्च [v]असमा न कस्यापि बुद्ध्या समाना । सर्वं वस्तु विषयीकरोतीत्यर्थः । नेमे इति सर्वनामशब्दः एतच्छब्दसमानार्थः । [v]नेमे एते [v]सोमपाः सोमस्य पातारो यजमानाः [v]अपसा कर्मणा [v]प्र [v]सन्तु प्रवृद्धा भवन्तु । हे [v]इन्द्र [v]ते तव [v]ददुषः हविर्दत्तवन्तः [v]ये त्वदीयं [v]महि महत् [v]क्षत्रं बलं [v]स्थविरं स्थूलं प्रवृद्धं [v]वृष्ण्यं वृषत्वं पुंस्त्वं [v]च [v]वर्धयन्ति प्रवृद्धं कुर्वन्ति । यद्वा । ददुषो यजमानेभ्यो यागफलं दत्तवतः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तवेति योजनीयम् ॥ नेमे । सर्वनामत्वात् जसः शीभावे (पा. सू. ७. १. १७) गुणः । ' त्वसमसिम-नेमेत्यनुच्चानि ' ( फि. सू. ७८ ) इति सर्वानुदात्तत्वे प्राप्ते व्यत्ययेनाद्युदात्तत्वम् । ददुपः । ददातेर्लिटः क्वसुः । जसो व्यत्ययेन शसादेशः । ' संप्रसारणं संप्रसारणाश्रयं च बलीयः ' इति इडागमात् पूर्वमेव संप्रसारणम् । ' शासिवसिघसीनां च ' इति षत्वम् । प्रत्ययस्वरः । महि । महेरौणादिकः इन्प्रत्ययः । स्थविरम् । ' अजिरशिशिर° ' ( उ. सू. १. ५३ ) इत्यादिना तिष्ठतेः किरच्प्रत्ययान्तो निपातितः ॥

तुभ्येदेते बहुला अद्रिदुग्धाश्चमूषदश्चमसा इन्द्रपानाः ।
व्यश्नुहि तर्पया काममेषामथा मनो वसुदेयाय कृष्व ॥ ९ ॥

तुभ्य । इत् । एते । बहुलाः । अद्रिऽदुग्धाः । चमूऽसदः । चमसाः । इन्द्रऽपानाः ।
वि । अश्नुहि । तर्पय । कामम् । एषाम् । अथ । मनः । वसुऽदेयाय । कृष्व ॥ ९ ॥

हे इन्द्र [v]तुभ्येत् तुभ्यमेव [v]चमसाः । चम्यन्ते भक्ष्यन्ते इति चमसाः सोमाः । [v]एते सोमाः त्वदर्थं संपादिताः । कीदृशा इत्याह । [v]बहुलाः प्रभूताः [v]अद्रिदुग्धाः अद्रिभिर्ग्रावभिरभिषुताः [v]चमूषदः चमूषु चमसेष्ववस्थिताः [v]इन्द्रपानाः इन्द्रस्य पानेन सुखकराः । अतस्त्वं तान्[1] [v]व्यश्नुहि व्याप्नुहि । व्याप्य च [v]एषां त्वदीयानामिन्द्रियाणां [v]कामम् अभिलाषं तैः [v]तर्पय पूरयेति यावत् । [v]अथ अनन्तरं [v]वसुदेयाय अस्मभ्यमभिमतधनप्रदानाय त्वदीयं [v]मनः [v]कृष्व कुरुष्व ॥ तुभ्य । छान्दसो मलोपः । अद्रिदुग्धाः । दुहेः कर्मणि निष्ठा । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् । चमूषदः । ' चमु अदने ' । चमन्त्यनेनेति चमूः । ' कृषिचमितनि° ( उ. सू. १. ८१ ) इत्यादिना औणादिकः उप्रत्ययः । चमूषु सीदन्तीति चमूषदः ।' सत्सूद्विष° ' इत्यादिना क्विप् । ' पूर्वपदात् ' ( पा. सू. ८. ३. १०६ ) इति षत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् । इन्द्रपानाः । ' कर्मणि च येन संस्पर्शात्° ' ( पा. सू. ३. ३. ११६ ) इति पिबतेः कर्मणि ल्युट् । अश्नुहि । व्यत्ययेन परस्मैपदम् । वसुदेयाय । ' डुदाञ् दाने ' । अस्मात् ' अचो यत् ' इति भावे यत् । ' ईद्यति ' ( पा. सू. ६. ४. ६५ ) इति ईकारादेशः । गुणः । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् । कृष्व । ' डुकृञ् करणे ' । ' बहुलं छन्दसि ' इति विकरणस्य लुक् ॥

अपामतिष्ठद्धरुणं ह्वरं तमोऽन्तर्वृत्रस्य जठरेषु पर्वतः ।
अभीमिन्द्रो नद्यो वव्रिणा हिता विश्वा अनुष्ठाः प्रवणेषु जिघ्नते ॥ १० ॥

अपाम् । अतिष्ठत् । धरुणऽह्वरम् । तमः । अन्तः । वृत्रस्य । जठरेषु । पर्वतः ।
अभि । ईम् । इन्द्रः । नद्यः । वव्रिणा । हिताः । विश्वाः । अनुऽस्थाः । प्रवणेषु । जिघ्नते ॥ १० ॥

---

१. ढ-स-तान् सोमान् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]अपां वृष्ट्युदकानां [V]धरुणह्वरम्। धरुणशब्दो धारावचनः। धारानिरोधकं [V]तमः अन्धकारम् [V]अतिष्ठत्। अयमेवार्थः स्पष्टीक्रियते। [V]वृत्रस्य लोकत्रयावरितुरसुरस्य [V]जठरेषु उदरप्रदेशेषु [V]अन्तः मध्ये [V]पर्वतः पर्ववान् मेघोऽभूत्। अतस्तमोरूपेण वृत्रेण मेघस्यावृतत्वात् वृष्ट्युदकमप्यावृतमित्युच्यते। [V]ईम् इमाः पूर्वोक्ताः [V]नद्यः नदीः अपः। नदनात् नद्यः इति व्युत्पत्त्या नदीशब्देन आप उच्यन्ते। [V]वव्रिणा आवरकेण वृत्रेण [V]हिताः पिहिताः[1] [V]विश्वाः व्यापिनीः [V]अनुष्ठाः अनुक्रमेण तिष्ठन्तीः एवंविधा अपः [V]इन्द्रः [V]प्रवणेषु निम्नेषु भूप्रदेशेषु [V]अभि [V]जिघ्नते अभिगमयति॥ वव्रिणा। 'वृञ् वरणे' इत्यस्मात् 'आदृगमहनजनः०' इति किप्रत्ययः। लिङ्वद्भावात् द्विर्भावादि। यणादेशः। प्रत्ययस्वरः। अनुष्ठाः। 'आतश्चोपसर्गे' इति तिष्ठतेः कप्रत्ययः। 'उपसर्गात्सुनोति०' इति षत्वम्। जिघ्नते। हन्तेर्गत्यर्थात् व्यत्ययेनात्मनेपदम्। 'बहुलं छन्दसि' इति शपः श्लुः। 'अर्तिपिपर्त्योश्च, बहुलं छन्दसि' (पा. सू. ७. ४. ७७–७८) इति अभ्यासस्य इत्वम्॥

स शेवृधमधि धा द्युम्नमस्मे महि क्षत्रं जनाषाळिन्द्र तव्यम्।
रक्षा च नो मघोनः पाहि सूरीन्त्राये च नः स्वपत्या इषे धाः॥ ११॥

सः। शेऽवृधम्। अधि। धाः। द्युम्नम्। अस्मे इति। महि। क्षत्रम्। जनाषाट्। इन्द्र। तव्यम्। रक्ष। च। नः। मघोनः। पाहि। सूरीन्। राये। च। नः। सुऽअपत्यै। इषे। धाः॥११॥

हे [V]इन्द्र [V]सः त्वम् [V]अस्मे अस्मासु [V]द्युम्नं यशः [V]अधि [V]धाः अधिनिधेहि। कीदृशमित्याह। [V]शेवृधम्। शं शमनम्। रोगाणां शमने सति यत् वर्धते तादृशम्। तथा [V]महि महत् [V]जनाषाट् शत्रुजनानामभिभवितृ [V]तव्यं प्रवृद्धं [V]क्षत्रं बलं च अधि धा इति शेषः। किंच हे इन्द्र [V]नः अस्मान् [V]मघोनः धनवतः कृत्वा [V]रक्ष पालय। [V]सूरीन् विदुषोऽन्यानपि [V]पाहि पालय। तथा [V]राये धनाय [V]च [V]स्वपत्यै शोभनपुत्रयुक्ताय[2] [V]इषे अन्नाय [V]च [V]नः अस्मान् [V]धाः धेहि स्थापय॥ धाः। 'छन्दसि लुङ्लङ्लिटः' इति प्रार्थनायां लुङि 'गातिस्था०' इति सिचो लुक्। 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः। अस्मे। 'सुपां सुलुक्०' इति अस्मच्छब्दात् सप्तम्याः शेआदेशः। जनाषाट्। जनान् सहते इति जनाषाट्। 'छन्दसि सहः' (पा. सू. ३. २. ६३) इति ण्विः। 'अत उपधायाः' इति वृद्धिः। 'सहेः साडः सः' (पा. सू. ८. ३. ५६) इति षत्वम्। 'अन्येषामपि दृश्यते' इति पूर्वपददीर्घः। तव्यम्। तवतिर्वृद्ध्यर्थः सौत्रो धातुः। 'अचो यत्' इति यत्। गुणे 'धातोस्तन्निमित्तस्यैव' (पा. सू. ६. १. ८०) इति अवादेशः। 'यतोऽनावः' इत्याद्युदात्तत्वम्। रक्ष। 'रक्ष पालने'। शपः पित्त्वादनुदात्तत्वे धातुस्वरः। 'ह्यचोऽतस्तिङः' इति दीर्घत्वम्। मघोनः। 'श्वयुवमघोनामतद्धिते' इति शसि संप्रसारणम्। पाहि। अदादित्वात् शपो लुक्। हेः अपित्त्वात् तस्यैव स्वरः शिष्यते। मघोनः इत्यस्य वाक्यान्तरगतत्वात् निघाताभावः। स्वपत्यै। शोभनान्यपत्यानि यस्याः सा तथोक्ता। 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। 'जसादिषु च्छन्दसि वावचनम्' इति 'याडापः' (पा. सू. ७. ३. ११३) इति याडागमाभावे 'वृद्धिरेचि' (पा. सू. ६. १. ८८) इति वृद्धिः॥ ॥ १८॥

---

१. ढ–प्रहिताः। २. ढ–शोभनपुत्राय।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' दिवश्चिदस्य ' इति अष्टर्चं पञ्चमं सूक्तं सव्यस्यार्षमैन्द्रं जागतम्। तथा चानुक्रान्तम्–' दिवश्चिदष्टौ जागतं हि ' इति। हि इत्यभिधानात् तुह्यादिपरिभाषया उत्तरे द्वे[1] च[1] सूक्ते जागते। अतिरात्रे प्रथमे पर्याये मैत्रावरुणशस्त्रे इदं सूक्तम्। सूत्रितं च–' दिवश्चिदस्येति पर्यासः स नो नव्येभिरिति च ' ( आश्व. श्रौ. ६. ४ ) इति। विषुवति निष्केवल्येऽप्येतत्सूक्तम्। सूत्रितं च–' शंसेदेवोत्तराणि षड्दिवश्चिदस्य ' ( आश्व. श्रौ. ८. ६ ) इति। समूढस्य दशरात्रस्य द्वितीये छन्दोमेऽपि निष्केवल्ये एतत्सूत्रितम्–' त्वं महाँ इन्द्र यो ह दिवश्चिदस्य त्वं महाँ इन्द्र तुभ्यमिति निष्केवल्यम् ' ( आश्व. श्रौ. ८. ७ ) इति ॥

दिवश्चिदस्य वरिमा वि पप्रथ इन्द्रं न महा पृथिवी चन प्रति ।
भीमस्तुविष्माञ्चर्षणिभ्य आतपः शिशीते वज्रं तेजसे न वंसगः ॥ १ ॥

दिवः । चित् । अस्य । वरिमा । वि । पप्रथे । इन्द्रम् । न । महा । पृथिवी । चन । प्रति ।
भीमः । तुविष्मान् । चर्षणिऽभ्यः । आऽतपः । शिशीते । वज्रम् । तेजसे । न । वंसगः ॥१॥

[v]अस्य इन्द्रस्य [v]वरिमा उरुत्वं[2] प्राभवं[3] [v]दिवश्चित् द्युलोकादपि [v]वि [v]पप्रथे विस्तीर्णं बभूव। [v]पृथिवी [v]चन पृथिव्यपि च [v]महा महिम्ना महत्त्वेन [v]इन्द्रं [v]न [v]प्रति भवति। भूमिरपीन्द्रस्य प्रतिनिधिर्न भवति। ततोऽपि स गरीयानित्यर्थः। [v]भीमः शत्रूणां भयंकरः [v]तुविष्मान् प्रज्ञावान् बलवान् वा [v]चर्षणिभ्यः मनुष्येभ्यः स्तोतृभ्यस्तेषामर्थाय शत्रूणाम् [v]आतपः आ समन्तात् तापकारी। एवंविधः स इन्द्रः [v]वज्रं वर्जनशीलमायुधं [v]तेजसे तैक्ष्ण्याय [v]शिशीते तनूकरोति तीक्ष्णीकरोति। तत्र दृष्टान्तः। [v]वंसगः [v]न। वननीयगतिमान् वृषभो यथा स्वशृङ्गे युद्धार्थं तीक्ष्णीकरोति तद्वत् ॥ दिवः। 'ऊडिदम्०' इति विभक्तेरुदात्तत्वम्। वरिमा। उरुशब्दात् पृथ्वादिलक्षणः इमनिच्। ' प्रियस्थिर० ' । इत्यादिना उरुशब्दस्य वरादेशः। पप्रथे। ' प्रथ प्रख्याने'। महा महिम्ना। वर्णलोपश्छान्दसः। यद्वा। महेरौणादिकः कनिप्रत्ययः। प्रत्ययस्वरेणान्तोदात्तः। तृतीयैकवचने ' अल्लोपोऽनः ' इति अकारलोपः। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम्। प्रति। ' प्रतिः प्रतिनिधिप्रतिदानयोः ' इति प्रतिनिधौ कर्मप्रवचनीयत्वम्। ' कर्मप्रवचनीययुक्ते० ' ( पा. सू. २. ३. ८ ) इति इन्द्रशब्दात् द्वितीया। ' प्रतिनिधिप्रतिदाने च यस्मात् ' (पा. सू. २. ३. ११) इति पञ्चमी तु छान्दसत्वात् न भवति। भीमः। ' जिभी भये ' इत्यस्मात् ' भियः षुग्वा ' ( उ. सू. १. १४५ ) इति मक्प्रत्ययः। 'भीमो बिभ्यत्यस्मात्' ( निरु. १. २० ) इति यास्कः। आतपः। तपतीति तपः। पचाद्यच्। थाथादिना उत्तरपदान्तोदात्तत्वम्। शिशीते। ' शो तनूकरणे ' । व्यत्ययेनात्मनेपदम्। ' बहुलं छन्दसि ' इति विकरणस्य श्लुः। ' बहुलं छन्दसि ' इति अभ्यासस्य इत्वम्। ' ईहल्यघोः ' इति ईत्वम्। अनजादावपि लसार्वधातुके व्यत्ययेन अभ्यस्ताद्युदात्तत्वम् ( पा. सू. ६. १. १८९ )। वंसगः। ' वन षण संभक्तौ ' इत्यस्मात् कर्मणि औणादिकः सप्रत्ययः। वंसं वननीयं गच्छतीति वंसगः। ' डोऽन्यत्रापि दृश्यते ' ( पा. म. ३. २. ४८ ) इति गमेः डप्रत्ययः। दिवोदासादित्वात् पूर्वपदाद्युदात्तत्वम् ॥

---

१. ढ–च द्वे। २. स–महत्वम्। ३. ढ-स–प्रभावम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सो अर्णवो न नद्यः समुद्रियः प्रति गृभ्णाति विश्रिता वरीमभिः ।
इन्द्रः सोमस्य पीतये वृषायते सनात्स युध्म ओजसा पनस्यते ॥ २ ॥

सः । अर्णवः । न । नद्यः । समुद्रियः । प्रति । गृभ्णाति । विऽश्रिताः । वरीमऽभिः ।
इन्द्रः । सोमस्य । पीतये । वृषऽयते । सनात् । सः । युध्मः । ओजसा । पनस्यते ॥ २ ॥

Vसः इन्द्रः Vसमुद्रियः । समुद्रवन्त्यस्मादापः इति समुद्रमन्तरिक्षम् । तत्र भवः समुद्रियः । एवंभूतः सन् Vवरीमभिः स्वकीयैः संवरणैः यद्वा उरुत्वैः Vविश्रिताः व्याप्ताः Vनद्यः नदीः शब्दकारिणीः वृत्रेणावृता आपः Vअर्णवो Vन समुद्र इव Vप्रति Vगृभ्णाति । स्वीकृत्य ववर्षेति भावः । स च Vइन्द्रः Vसोमस्य Vपीतये पानाय Vवृषायते वृष इवाचरति । हर्षयुक्तो वर्तते इत्यर्थः । तथा Vसः इन्द्रः Vयुध्मः योद्धा Vसनात् चिरादेव यद्वा सनातनः Vओजसा बलकृतेन वृत्रवधादिरूपेण कर्मणा Vपनस्यते पनः स्तोत्रमिच्छति ॥ अर्णवः । 'अर्णसो लोपश्च' (का. ५. २. १०९. २) इति मत्वर्थीयो वप्रत्ययः सलोपश्च । प्रत्ययस्वरः । नद्यः । 'नद अव्यक्ते शब्दे' इत्यस्मात् कर्तरि पचाद्यच् । 'चितः' इत्यन्तोदात्तत्वम् । 'नदट्' (पा. सू. ३. १. १३४ ग.) इति टित्त्वेन पाठात् 'टिड्ढाणञ्०' इति ङीप् । 'यस्य०' इति लोपे उदात्तनिवृत्तिस्वरेण तस्य उदात्तत्वम् । जसि यणादेशे 'उदात्तस्वरितयोर्यणः०' इति स्वरितत्वम् । द्वितीयार्थे प्रथमा । अनया व्युत्पत्त्या नद्य इत्याप उच्यन्ते । तथा च श्रूयते–'अहावनदता हते । तस्मादा नद्यो नाम स्थ ता वो नामानि सिन्धवः' (तै. सं. ५. ६. १. २) इति । समुद्रियः । 'समुद्राभ्राद्घः' (पा. सू. ४. ४. ११८) इति भवार्थे घप्रत्ययः । घस्य इयादेशः । तस्योपदेशिवद्वचनात्[1] उदात्तत्वम् । गृभ्णाति । 'ह्म्ग्रहोर्भः०' इति भत्वम् । विश्रिताः । 'श्रिञ् सेवायाम्' । कर्मणि निष्ठा । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । वरीमभिः । 'वृञ् वरणे' इत्यस्मात् औणादिक ईमनिन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । यद्वा उरुशब्दात् इमनिचि दीर्घ आद्युदात्तत्वं च छान्दसत्वात् । वृषायते । 'कर्तुः क्यङ् सलोपश्च' (पा. सू. ३. १. ११) इति आचारार्थे क्यङ् । ङित्त्वात् आत्मनेपदम् । 'अकृत्सार्वधातुकयोः०' इति दीर्घः । युध्मः । 'युध संप्रहारे' इत्यस्मात् 'इषियुधीन्धिदसिश्याधूसूभ्यो मक्' इति मक् । पनस्यते । 'पन स्तुतौ' । पननं पनः तदिच्छति पनस्यति । व्यत्ययेनात्मनेपदम् ॥

त्वं तमिन्द्र पर्वतं न भोजसे महो नृम्णस्य धर्मणामिरज्यसि ।
प्र वीर्येण देवताति चेकिते विश्वस्मा उग्रः कर्मणे पुरोहितः ॥ ३ ॥

त्वम् । तम् । इन्द्र । पर्वतम् । न । भोजसे । महः । नृम्णस्य । धर्मणाम् । इरज्यसि ।
प्र । वीर्येण । देवता । अति । चेकिते । विश्वस्मै । उग्रः । कर्मणे । पुरःऽहितः ॥ ३ ॥

हे Vइन्द्र Vत्वं Vभोजसे भोजनाय Vपर्वतं पर्ववन्तं मेघं Vन अकार्षीः । न हि हतो भुङ्क्ते । इन्द्रो हि वर्षणार्थं मेघं वज्रेण हन्ति । तथा Vमहः महतः Vनृम्णस्य धनस्य Vधर्मणां धारयितॄणां कुबेरादीनाम्

---

१. ड–तस्योपदेशिवद्भावात्; स–तस्योपदेशवद्वचनात् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]इरज्यसि ईशिषे । इरज्यतिरैश्वर्यकर्मा । स इन्द्रः [V]देवता [V]वीर्येण [V]अति अतिशयित इति [V]प्र [V]चेकिते प्रकर्षेणास्माभिर्ज्ञातो बभूव । स च [V]उग्रः उद्गूर्ण इन्द्रः [V]विश्वस्मै सर्वस्मै वृत्रवधादिरूपाय [V]कर्मणे देवैः [V]पुरोहितः पुरस्तादवस्थापितः ॥ धर्मणाम् । ' धृङ् धारणे[1] ' । ' अन्येभ्योऽपि दृश्यन्ते ' इति कर्तरि मनिन् । नित्त्वादाद्युदात्तत्वम् । इरज्यसि । ' इरज् ईर्ष्यायाम् ' । ऐश्वर्ये इत्येके । कण्ड्वादिस्वात् यक् । वीर्येण । ' शूर वीर विक्रान्तौ ' । चुरादिः । ' अचो यत् ' इति यत् । णिलोपः । बहुव्रीहौ ' वीरवीर्यौ च ' इत्युत्तरपदाद्युदात्तत्वविधानसामर्थ्यात् ' यतोऽनावः ' इत्याद्युदात्तत्वाभावे ' तित्स्वरितम् ' इति स्वरितत्वम् । तस्मिन् हि सति ' आद्युदात्तं द्व्यच्छन्दसि ' इत्यनेनैव सिद्धत्वात् पुनर्वीर्यग्रहणमनर्थकं स्यादित्युक्तम् । देवता । देव एव देवता । ' देवात्तल् ' (पा. सू. ५. ४. २७) इति स्वार्थे तल्प्रत्ययः । ' लिति ' इति प्रत्ययात् पूर्वस्योदात्तत्वम् । चेकिते । ' कित ज्ञाने ' । अस्मात् यङन्तात् चेकित्यतेः कर्मणि लिटि अतोलोपयलोपौ । पुरोहितः । पुरस्शब्दस्य असिप्रत्ययान्तस्य ' तद्धितश्चासर्वविभक्तिः ' इति अव्ययत्वेन ' पुरोऽव्ययम् ' इति गतिसंज्ञायां ' गतिरनन्तरः ' इति पूर्वपदप्रकृतिस्वरत्वम् ॥

**स इद्वने नमस्युभिर्वचस्यते चारु जनेषु प्रब्रुवाण इन्द्रियम् ।**
**वृषा छन्दुर्भवति हर्यतो वृषा क्षेमेण धेनां मघवा यदिन्वति ॥ ४ ॥**

सः । इत् । वने । नमस्युऽभिः । वचस्यते । चारु । जनेषु । प्रऽब्रुवाणः । इन्द्रियम् ।
वृषा । छन्दुः । भवति । हर्यतः । वृषा । क्षेमेण । धेनाम् । मघऽवा । यत् । इन्वति ॥ ४ ॥

[V]स [V]इत् स एवेन्द्रः [V]वने अरण्ये [V]नमस्युभिः नमसा स्तोत्रेण पूजयितृभिर्ऋषिभिः [V]वचस्यते वच इच्छन् क्रियते स्तूयते इत्यर्थः । यद्वा वचः स्तोत्रमात्मन इच्छति । स चेन्द्र आत्मीयेषु [V]जनेषु [V]इन्द्रियं स्ववीर्यं [V]प्रब्रुवाणः प्रकटयन् [V]चारु वर्तते । किंच सः [V]वृषा कामानां वर्षकः [V]हर्यतः प्रेप्सावतो यियक्षतः [V]छन्दुः उपच्छन्दयिता [V]भवति । यियक्षतां पुरुषाणां यागे रुचिमुत्पादयतीति भावः । [V]वृषा हविषां वर्षयिता । हविष्प्रदातेत्यर्थः । [V]मघवा धनवान् । एवंभूतो यजमानः [V]क्षेमेण इन्द्रकृतेन रक्षणेन युक्तः सन् [V]यत् यदा [V]धेनां स्तुतिलक्षणां वाचम् [V]इन्वति प्रेरयति । तदानीं छन्दुर्भवतीति पूर्वेणान्वयः । यद्वा। मघवा वृषा इन्द्रः क्षेमेण क्षेमकरेण मनसा धेनां यजमानैः कृतां स्तुतिं यद्यस्मात् इन्वति व्याप्नोति । तस्मादिति योज्यम् ॥ नमस्युभिः । ' नमोवरिवः° ' इति पूजार्थे क्यच् । ' क्याच्छन्दसि ' इति उप्रत्ययः । वचस्यते । वच इच्छति वचस्यति । तं वचस्यन्तं कुर्वन्ति मुनयो वचस्ययन्ति । वचस्ययतेः कर्मणि यकि अतोलोपयलोपौ । यद्वा । वचस्यतेर्व्यत्ययेनात्मनेपदम् । प्रब्रुवाणः । ' ब्रूञ् व्यक्तायां वाचि ' । लटः शानच् । अदादिस्वात् शपो लुक् । शानचो ङित्त्वात् गुणाभावे उवङ् । चित्स्वरेणान्तोदात्तः । इन्द्रियम् । इन्द्रस्य लिङ्गमिन्द्रियम् । ' इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्टमिन्द्रजुष्टमिन्द्रदत्तमिति वा ' (पा. सू. ५. २. ९३) इति लिङ्गादिष्वर्थेषु इन्द्रशब्दात् घच्प्रत्ययो निपात्यते । अतः अन्तोदात्तत्वम् । इन्वति । ' इवि व्याप्तौ ' । शपः पित्त्वादनुदात्तत्वे धातुस्वरः । यद्वृत्तयोगादनिघातः ॥

---

१. ढ–धारणे । अस्मात् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स इन्महानि समिथानि मज्मना कृणोति युध्म ओजसा जनेभ्यः ।
अधा चन श्रद्दधति त्विषीमत इन्द्राय वज्रं निघनिघ्नते वधम् ॥ ५ ॥

सः । इत् । महानि । समऽइथानि । मज्मना । कृणोति । युध्मः । ओजसा । जनेभ्यः ।
अध । चन । श्रत् । दधति । त्विषिऽमते । इन्द्राय । वज्रम् । निऽघनिघ्नते । वधम् ॥ ५ ॥

vस vइत् स एवेन्द्रः vयुध्मः योद्धा vमहानि vसमिथानि महतः संग्रामान् vमज्मना सर्वस्य शोधकेन vओजसा बलेन vकृणोति करोति । किमर्थम् । vजनेभ्यः स्तोतृजनार्थम् । यदा इन्द्रः vवधं हननसाधनं vवज्रम् आयुधं मेघेषु vनिघनिघ्नते निहन्ति vअधा vचन अनन्तरमेव vत्विषीमते दीप्तिमते vइन्द्राय सर्वे जनाः vश्रद्दधति । श्रत् इति सत्यनाम । इन्द्रो बलवानिति यदुच्यते तत्सत्यमेवेति सर्वे प्रतिपद्यन्ते ॥ महानि । महान्तीत्यस्य तकारलोपश्छान्दसः । यद्वा । मह्यन्ते पूज्यन्ते इति महानि प्रवृद्धानि । ' घञर्थे कविधानम् ° ' इति कः । प्रत्ययस्वरः । समिथानि । ' इण् गतौ ' । संयन्ति संगच्छन्तेऽस्मिन्वीरा इति समिथानि संग्रामाः । ' सर्माणः ' ( उ. सू. ४. ५३२ ) इति थक्प्रत्ययः । कित्त्वाद्गुणाभावः । थाथादिना उत्तरपदान्तोदात्तत्वम् । मज्मना । ' टुमस्जो शुद्धौ ' । मनिप्रत्ययः[1] । ' झलां जश् झशि ' ( पा. सू. ८. ४. ५३ ) इति सकारस्य जश्त्वं दकारः । ततश्चुत्वं जकारः । प्रत्ययस्वरः । अध । छान्दसं धत्वम् । ' निपातस्य च ' इति सांहितिको दीर्घः । त्विषीमते । ' त्विष दीप्तौ ' । ' इन्सर्वधातुभ्यः ' इति इन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । मतुपः पित्त्वादनुदात्तत्वे तदेव शिष्यते । ' अन्येषामपि दृश्यते ' इति सांहितिको दीर्घः । निघनिघ्नते । हन्तेर्ब्यत्ययेनात्मनेपदं बहुवचनं च । ' बहुलं छन्दसि ' इति शपः श्लुः । ' गमहन° ' इत्यादिना उपधालोपः । अभ्यासस्य घत्वं निगागमश्च । ' °आगनीगन्तीति च ' ( पा. सू. ७. ४. ६५ ) इति इतिचशब्दः प्रकारार्थ इत्युक्तत्वात् दाधर्त्यादौ एतद्द्रष्टव्यम् ॥ ॥ १९ ॥

स हि श्रवस्युः सदनानि कृत्रिमा क्ष्मया वृधान ओजसा विनाशयन् ।
ज्योतींषि कृण्वन्नवृकाणि यज्यवेऽव सुक्रतुः सर्तवा अपः सृजत् ॥ ६ ॥

सः । हि । श्रवस्युः । सदनानि । कृत्रिमा । क्ष्मया । वृधानः । ओजसा । विऽनाशयन् ।
ज्योतींषि । कृण्वन् । अवृकाणि । यज्यवे । अव । सुऽक्रतुः । सर्तवै । अपः । सृजत् ॥६॥

vश्रवस्युः अन्नं यशो वात्मन इच्छन् vकृत्रिमा कृत्रिमाणि क्रियया निर्वृत्तानि vसदनानि असुरपुराणि vओजसा बलेन vविनाशयन्[2] vक्ष्मया भूम्या समानं vवृधानः वर्धनशीलः । यद्वा। क्ष्मया इति ओजोविशेषणम् । शत्रूणामभिभवित्रा बलेनेत्यर्थः । vज्योतींषि सूर्यादीनि वृत्रेणावृतानि vअवृकाणि वृकेणावरकेण तेन रहितानि vकृण्वन् कुर्वन् vसुक्रतुः शोभनकर्मसहितः[3] एवंविधः vसः खलु इन्द्रः vयज्यवे यष्ट्रे यजमानाय तदर्थं vसर्तवै सरणाय vअपः वृष्टिलक्षणान्युदकानि vअव vसृजत् । वृष्टिं

---

१. ढ–औणादिको मनिन्प्रत्ययः; न-स–मनिन्प्रत्ययः । २. ढ-स–विनाशयन् विनाशं प्रापयन् ।
३. ढ-स–शोभनकर्मा स हि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कृतवानित्यर्थः ॥ कृत्रिमा । ' डुकृञ् करणे ' । ' ड्वितः क्तिः ' ( पा. सू. ३. ३. ८८ ) इति भावे क्तिप्रत्ययः । ' त्रेर्मन्नित्यम् ' ( पा. सू. ४. ४. २० ) इति निर्वृत्तार्थे मप् । तस्य पित्त्वादनुदात्तत्वे क्तिप्रत्ययस्वर एव शिष्यते । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । क्ष्मया । ' क्षमूष् सहने ' । क्षमते प्राणिजातकृतमुपद्रवमिति क्ष्मा । ' षिद्भिदादिभ्योऽङ् ' ( पा. सू. ३. ३. १०४ ) इति अङ्-प्रत्ययः । ततः टाप् । व्यत्ययेन धातोः उपधालोपः । छान्दसं विभक्त्युदात्तत्वम् । यद्वा । अयं धातु-रभिभवार्थः, ' षह अभिभवे ' इति सहनस्याभिभवार्थत्वात् । अस्मात् औणादिको मनिन् । व्यत्य-येन स्त्रीलिङ्गता । ' मनः ' ( पा. सू. ४. १. ११ ) इति ङीपो निषेधे ' डाबुभाभ्यामन्यतरस्याम् ' ( पा. सू. ४. १. १३ ) इति डाप् । टिलोपः । वृधानः । ताच्छील्किकः चानश् । ' बहुलं छन्दसि ' इति शपो लुक् । ' चितः ' इत्यन्तोदात्तत्वम् । अवृकाणि । ' वृञ् वरणे ' । ' सृवृभूशुषिमुषिभ्यः कित् ' ( उ. सू. ३. ३२१ ) इति कन्प्रत्ययः । बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदा-त्तत्वम् । यज्यवे । ' यजिमनिशुन्धिदसिजनिभ्यो युः ' इति युप्रत्ययः । वृषादेराकृतिगणत्वादाद्युदा-त्तत्वम् । सुक्रतुः । बहुव्रीहौ ' ऋत्वादयश्च ' इत्युत्तरपदाद्युदात्तत्वम् । सर्तवै । ' सृ गतौ ' । ' कृत्यार्थे तवैकेन्° ' इति भावे तवैप्रत्ययः । गुणः । ' अन्तश्च तवै युगपत् ' ( पा. सू. ६. १. २०० ) इति आद्यन्तयोः युगपत् उदात्तत्वम् । अपः । ' ऊडिदम्° ' इति शस उदात्तत्वम् । सृजत् । लङि ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः ॥

दानाय मनः सोमपावन्नस्तु तेऽर्वाञ्चा हरी वन्दनश्रुदा कृधि ।
यमिष्ठासः सारथयो य इन्द्र ते न त्वा केता आ दभ्नुवन्ति भूर्णयः ॥ ७ ॥

दानाय । मनः । सोमऽपावन् । अस्तु । ते । अर्वाञ्चा । हरी इति । वन्दनऽश्रुत् । आ । कृधि ।
यमिष्ठासः । सारथयः । ये । इन्द्र । ते । न । त्वा । केताः । आ । दभ्नुवन्ति । भूर्णयः ॥ ७ ॥

हे Vसोमपावन् सोमस्य पातरिन्द्र Vते त्वदीयं Vमनः Vदानाय अस्मदभिमतफलप्रदानाय Vअस्तु भवतु । हे Vवन्दनश्रुत् वन्दनानां स्तुतीनां श्रोतः Vहरी त्वदीयावश्वौ Vअर्वाञ्चा अस्मद्यज्ञाभिमुखौ Vआ Vकृधि आभिमुख्येन कुरु । हे Vइन्द्र Vते तव स्वभूताः Vये Vसारथयः सन्ति ते Vयमिष्ठासः अतिशयेन यन्तारः अश्वनियमनकुशला इत्यर्थः । यस्मादेवं तस्मात् Vकेताः प्रातिकूल्यज्ञातारः[1] Vभूर्णयः स्वकीया-युधादीनां भर्तारः । यद्वा । भीतास्तीक्ष्णाः शत्रवः Vत्वा त्वां Vन Vआ Vदभ्नुवन्ति न हिंसन्ति ॥ सोमपावन् । ' आतो मनिन् ' इति वनिप् । ' °असंबुद्धौ ' इति पर्युदासात् दीर्घाभावः । अर्वाञ्चा । ' सुपां सुलुक्° ' इति विभक्तेः आकारः । वन्दनश्रुत् । ' वदि अभि-वादनस्तुत्योः ' । इदित्त्वात् नुम् । भावे ल्युट् । तेषां श्रोता । ' श्रु श्रवणे ' । क्विपि तुगागमः[2] । यमिष्ठासः । यन्तृशब्दात् ' तुश्छन्दसि ' इति इष्टन्प्रत्ययः । ' तुरिष्टेमेयःसु ' इति तृलोपः । नित्त्वादाद्युदात्तत्वम् । ' आज्जसेरसुक् ' इति असुक् । केताः । ' कित ज्ञाने ' । चिकेतति प्रतिकूलं जानन्तीति केताः । पचाद्यच् । वृषादेराकृतिगणत्वादाद्युदात्तत्वम् । यद्वा । प्रतिकूलतया ज्ञायन्ते इति

---

१. ढ-प्रतिकूलस्य ज्ञातारः । २. ढ-स-' तुगागमः ' इत्यस्यानन्तरं ' कृधि । करोतेर्लोटि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । ' श्रुशृणुपृकृवृभ्यश्छन्दसि ' इति हेर्धिरादेशः ' इत्यधिकम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

केताः । कर्मणि घञ् । जित्त्वादाद्युदात्तत्वम् । दम्भुवन्ति । ' दम्भु दम्भे ' । स्वादित्वात् श्नुः । तस्य ङित्त्वात् ' अनिदिताम्° ' इति नलोपः । संयोगपूर्वत्वेन ' हुश्नुवोः° ' इति यणादेशाभावे ' अचि श्नुधातु° ' इत्यादिना उवङादेशः । भूर्णयः । ' भृञ् भरणे ' । ' घृणिः पृश्निः ' इत्यादौ अस्मात् निप्रत्ययान्तो निपात्यते । ऋत उत्वं दीर्घश्च । यद्वा । ' भृ भये ' इत्यस्मात् ' कृत्यल्युटो बहुलम् ' इति कर्तरि क्तिनि ' उदोष्ठ्यपूर्वस्य ' इति उत्वम् । ' हलि च ' इति दीर्घः । ' ऋकारलवादिभ्यः क्तिन्निष्ठावद्भवति ' ( पा. सू. ८. २. ४४. १ ) इति निष्ठावद्भावात् नत्वम् । नित्त्वादाद्युदात्तत्वम् ॥

अप्रक्षितं वसु बिभर्षि हस्तयोरषाळ्हं सहस्तन्वि श्रुतो दधे ।
आवृतासोऽवतासो न कर्तृभिस्तनूषु ते क्रतव इन्द्र भूरयः ॥ ८ ॥

अप्रऽक्षितम् । वसु । बिभर्षि । हस्तयोः । अषाळ्हम् । सहः । तन्वि । श्रुतः । दधे ।
आऽवृतासः । अवतासः । न । कर्तृऽभिः । तनूषु । ते । क्रतवः । इन्द्र । भूरयः ॥ ८ ॥

हे इन्द्र त्वम् vअप्रक्षितम् प्रक्षयरहितं vवसु धनं vहस्तयोः vबिभर्षि स्तोतृभ्यो दातुं धारयसि । तथा vश्रुतः प्रख्यातो भवान् vतन्वि आत्मीये शरीरे vअषाळ्हं शत्रुभिरनभिभूतं vसहः बलं vदधे धारयति । त्वदीयास्तनवः vकर्तृभिः वृत्रादेरसुरस्य वधं कुर्वद्भिर्बलकृतैः कर्मभिः vआवृतासः आवृताः । बलकृतानि सर्वाणि कर्माणि एतस्य शरीरमावृत्यावतिष्ठन्ते । तत्र दृष्टान्तः । vअवतासो vन । अवतः इति कूपनाम । यथा कूपा जलोद्धरणाय प्रवृत्तैः प्राणिभिराव्रियन्ते तद्वत् । यस्मादेवं तस्मात् हे vइन्द्र vते तव शरीरेषु[1] vक्रतवः कर्माणि vभूरयः बहूनि विद्यन्ते ॥ अप्रक्षितम् । ' क्षि क्षये ' इत्यस्मात् भावे निष्ठा । ' °अण्यदर्थे ' ( पा. सू. ६. ४. ६० ) इति पर्युदासात् दीर्घाभावः । अत एव ' क्षियो दीर्घात् ' इति निष्ठानत्वाभावः । प्रकृष्टं क्षितं यस्य तत् प्रक्षितम् । न प्रक्षितम् अप्रक्षितम् । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । बिभर्षि । ' डुभृञ् धारणपोषणयोः ' । लटि सिपि शपः श्लुः । ' भृञामित् ' इत्यभ्यासस्य इत्वम् । अषाळ्हम् । ' षह अभिभवे ' इत्यस्मात् निष्ठायां तकारादौ प्रत्यये ' तीषसह° ' ( पा. सू. ७. २. ४८ ) इति इटः विकल्पितत्वात् ' यस्य विभाषा ' इति इट्प्रतिषेधः । ढत्वधत्वष्टुत्वढलोपेषु ' सहिवहोरोदवर्णस्य ' इति ओत्वे प्राप्ते ' साढ्यै साढ्वा साढेति निगमे ' ( पा. सू. ६. ३. ११३ ) इति निपातनात् आत्वम् । यदुक्तं साढेति तृजन्तमेतदिति तदुपलक्षणार्थं द्रष्टव्यम् । तन्वि । ' जसादिषु च्छन्दसि वावचनम् ' इति ' अच्च घेः ' ( पा. सू. ७. ३. ११९ ) इति अत्वौत्वयोरभावे यणादेशः । ' उदात्तस्वरितयोर्यणः° ' इति विभक्तेः स्वरितत्वम् । ' उदात्तयणो हल्पूर्वात् ' इति उदात्तत्वं तु छान्दसत्वात् न प्रवर्तते ॥ ॥२०॥

' एष प्र पूर्वीः ' इति षड्चं षष्ठं सूक्तं सव्यस्यार्षमैन्द्रं जागतमित्युक्तम् । अनुक्रान्तं च–' एष प्र षट् ' इति । विषुवति निष्केवल्ये एतत् सूक्तं शंसनीयम् । ' विषुवान्दिवाकीर्त्यः ' इति खण्डे सूत्रितम्– ' एष प्र पूर्वीर्वृषामदः प्र मंहिष्ठाय ' ( आश्व. श्रौ. ८. ६ ) इति ॥

---

१. ढ-स–तनूषु शरीरेषु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

एष प्र पूर्वीरव तस्य चम्रिषोऽत्यो न योषामुदयंस्त भुर्वणिः ।
दक्षं महे पाययते हिरण्ययं रथमावृत्या हरियोगमृभ्वसम् ॥ १ ॥

एषः । प्र । पूर्वीः । अव । तस्य । चम्रिषः । अत्यः । न । योषाम् । उत् । अयंस्त । भुर्वणिः । दक्षम् । महे । पाययते । हिरण्ययम् । रथम् । आऽवृत्य । हरिऽयोगम् । ऋभ्वसम् ॥ १ ॥

[v]भुर्वणिः अत्ता [v]एषः इन्द्रः [v]तस्य यजमानस्य [v]पूर्वीः प्रभूताः [v]चम्रिषः चमूषु चमसेष्ववस्थिताः सोमलक्षणा इषः [v]प्र [v]अव [v]उदयंस्त प्रकर्षेण पानार्थमुद्धरति । तत्र दृष्टान्तः । [v]अत्यो [v]न [v]योषाम् । यथाश्वो वडवां क्रीडार्थमुपयच्छति[1] । स चेन्द्रः [v]हिरण्ययं सुवर्णमयं [v]हरियोगं हरिभ्यां युक्तम् [v]ऋभ्वसम् उरुं भासमानं [v]रथम् [v]आवृत्य अवस्थाप्य [v]महे महते वृत्रवधादिरूपाय कर्मणे [v]दक्षं प्रवृद्धमात्मानं सोमं [v]पाययते पानं[2] कारयति ॥ पूर्वीः । ' पॄ पालनपूरणयोः ' । ' पॄभिदिव्यधि° ' ( उ. सू. १. २३ ) इत्यादिना कुप्रत्ययः । ' उदोष्ठ्यपूर्वस्य ' इति उत्वम् । पुरुशब्दात् ' वोतो गुणवचनात् ' इति ङीष् । यणादेशः । ' हलि च ' इति दीर्घत्वम् । प्रत्ययस्वरः । चम्रिषः । ' चमु अदने ' इत्यस्मात् ' कृषिचमितनिधनि° ' ( उ. सू. १. ८१ ) इत्यादिना ऊप्रत्ययान्तश्चमूशब्दः । तस्यां वर्तमाना इषः चम्विषः । वकारस्य रेफश्छान्दसः । कृदुत्तरपदप्रकृतिस्वरत्वम् । अयंस्त । छान्दसे वर्तमाने लुङि व्यत्ययेनात्मनेपदम् । ' एकाचः° ' इति इट्प्रतिषेधः । भुर्वणिः । ' भुर्वतिरत्तिकर्मा ' ( निरु. ९. २३ ) इति यास्कः । धातुपाठे तु ' भर्व हिंसायाम् ' इति पठ्यते । अस्मात् औणादिकः अनिप्रत्ययः । अकारस्य उकारश्छान्दसः । पाययते । ' पा पाने ' । ' शाच्छासाह्वाव्यावेपां युक् ' ( पा. सू. ७. ३. ३७ ) इति हेतुमति णिचि युगागमः । ' णिचश्च ' ( पा. सू. १. ३. ७४ ) इत्यात्मनेपदम् । हिरण्ययम् । ' ऋत्व्यवास्त्व्य° ' इत्यादिना हिरण्यशब्दात् उत्तरस्य मयटो मशब्दलोपो निपात्यते । हरियोगम् । हर्योर्योगो योजनं यस्मिन् । हरिशब्द इन्प्रत्ययान्त आद्युदात्तः । स एव बहुव्रीहिस्वरेण शिष्यते । ऋभ्वसम् । उरुभासम् इत्यस्य पृषोदरादित्वात् ऋभ्वसादेशः ॥

तं गूर्तयो नेमन्निषः परीणसः समुद्रं न संचरणे सनिष्यवः ।
पतिं दक्षस्य विदथस्य नू सहो गिरिं न वेना अधि रोह तेजसा ॥ २ ॥

तम् । गूर्तयः । नेमन्ऽइषः । परीणसः । समुद्रम् । न । सम्ऽचरणे । सनिष्यवः ।
पतिम् । दक्षस्य । विदथस्य । नु । सहः । गिरिम् । न । वेनाः । अधि । रोह । तेजसा ॥२॥

[v]गूर्तयः स्तोतारः [v]नेमन्निषः नमस्कारपूर्वं गच्छन्तः । यद्वा नीतहविष्काः [v]परीणसः परितो व्याप्नुवन्तः एवंगुणविशिष्टा यजमानाः [v]तम् इन्द्रं स्तुतिभिः अधिरोहन्ति स्तुवते इत्यर्थः । तत्र दृष्टान्तः । [v]सनिष्यवः सनिं धनमात्मन इच्छन्तो वणिजो धनार्थं [v]संचरणे संचारे निमित्तभूते सति [v]समुद्रं [v]न । यथा नावा समुद्रमधिरोहन्ति एवं स्तोतारोऽपि स्वाभिमतधनलाभायेन्द्रं स्तुवन्तीति भावः । हे स्तोतस्त्वं

---

१. च-छ-द-ध-फ–क्रीडार्थमुपगच्छति । २. ढ–सोमपानम् । ३. ढ–यथा वा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

च [v]दक्षस्य प्रवृद्धस्य [v]विदथस्य यज्ञस्य [v]पतिं पालयितारं [v]सहः सहस्वन्तं बलवन्तमिन्द्रं [v]तेजसा देवताप्रकाशकेन स्तोत्रेण [v]नु क्षिप्रम् [v]अधि [v]रोह स्तुहीति यावत्। तत्र दृष्टान्तः। [v]वेनाः कान्ताः स्त्रियः [v]गिरिं [v]न। यथा पर्वतं स्वाभिमतपुष्पोपचयार्थमधिरोहन्ति॥ गूर्तयः। 'गृ शब्दे'। गृणन्ति स्तुवन्तीति गूर्तयः। 'क्तिच्क्तौ च०' इति कर्तरि क्तिच्। 'बहुलं छन्दसि' इति उत्वम्। 'हलि च' इति दीर्घः। 'चितः' इत्यन्तोदात्तत्वम्। नेमन्निषः। 'णमु प्रह्वत्वे' इत्यस्मात् शतरि व्यत्ययेन एत्वम्, तकारस्य नकारादेशश्च। नमन्तः इष्यन्तीन्द्रं[1] प्राप्नुवन्तीति[1] नेमन्निषः। 'इषु गतौ' इत्यस्मात् 'क्विप् च' इति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वम्। यद्वा। 'णीञ् प्रापणे' इत्यस्मात् 'अर्तिस्तुसु०' इत्यादिना मन्प्रत्ययः। बहुलवचनात् नकारस्य इत्संज्ञाभावः। नीताः प्रत्ता इषो येषाम्। 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वम्। परीणसः। 'णस कौटिल्ये' इत्ययं धातुर्गत्यर्थो धातूनामनेकार्थत्वात्। परितो नसन्ति गच्छन्तीति परीणसः। 'क्विप् च' इति क्विप्। 'निपातस्य च' इति पूर्वपदस्य दीर्घत्वम्। 'उपसर्गादसमासेऽपि०' इति णत्वम्। व्यत्ययेनाद्युदात्तत्वम्। यद्वा। नशतिर्गतिकर्मा। अस्मात् पूर्ववत् क्विपि शकारस्य सकारः। सनिष्यवः। 'पणु दाने' इत्यस्मात् 'इन्सर्वधातुभ्यः' इति कर्मणि इन्प्रत्ययः। सनिमात्मन इच्छन्तीति क्यचि 'सर्वप्रातिपदिकेभ्यो लालसायामसुग्वक्तव्यः सुगागमोऽपि वक्तव्यः' (का. ७. १. ५१. ३) इति सुक्। 'क्याच्छन्दसि' इति उप्रत्ययः। नु। 'ऋचि तुनुव०' इति सांहितिको दीर्घः। सहः। अस्मादुत्तरस्य मतुपः छान्दसो लुक्॥

स तुर्वणिर्महाँ अरेणु पौंस्ये गिरेर्भृष्टिर्न भ्राजते तुजा शवः।
येन शुष्णं मायिनंमायसो मदे दुध्र आभूषु रमयन्नि दामनि॥ ३॥

सः। तुर्वणिः। महान्। अरेणु। पौंस्ये। गिरेः। भृष्टिः। न। भ्राजते। तुजा। शवः। येन। शुष्णम्। मायिनम्। आयसः। मदे। दुध्रः। आभूषु। रमयत्। नि। दामनि॥ ३॥

[v]सः इन्द्रः [v]तुर्वणिः शत्रूणां हिंसिता क्षिप्रकारी वा। 'तुर्वणिस्तूर्णवनिः' (निरु. ६. १४) इति यास्कः। तूर्णसंभजन इति तस्यार्थः। [v]महान् प्रवृद्धश्च भवति। तस्येन्द्रस्य [v]शवः बलं [v]पौंस्ये वीरैः पुरुषैः कर्तव्ये संग्रामे [v]अरेणु अनवद्यं [v]तुजा शत्रूणां हिंसकं सत् [v]भ्राजते दीप्यते। तत्र दृष्टान्तः। [v]गिरेः पर्वतस्य [v]भृष्टिर्न शृङ्गमिव। तद्यथोन्नतं सद्दीप्यते तद्वत्। [v]आयसः अयोमयकवचयुक्तदेहः [v]दुध्रः दुष्टानां शत्रूणां धर्तावस्थापयिता एवंभूत इन्द्रः [v]मदे सोमपानेन हर्षे सति [v]येन बलेन [v]शुष्णं सर्वस्य शोषकमसुरं [v]मायिनं मायाविनम् [v]आभूषु कारागृहेषु [v]दामनि बन्धके निगडे [v]नि [v]रमयत् न्यवासयत्। तद्बलमिति पूर्वेणान्वयः॥ तुर्वणिः। तुर्वी हिंसार्थः। अस्मात् औणादिकः अनिप्रत्ययः। अरेणु। रेणुवदाच्छादकत्वात् रेणुशब्देनावद्यमुच्यते। बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। तुजा। 'तुज हिंसायाम्'। इगुपधलक्षणः कः। 'सुपां सुलुक्०' इति विभक्तेः आकारः। दुध्रः। दुष्टान् ध्रियतेऽवस्थापयतीति दुध्रः। 'धृञ् अवस्थाने' इत्यस्मात् अन्तर्भावितण्यर्थात् मूलविभुजादित्वात् कप्रत्ययः (पा. सू. ३. २. ५. २)। यणादेशः। रेफलोपश्छान्दसः। रमयत्। अमन्तत्वात् मित्त्वे 'मितां ह्रस्वः' इति ह्रस्वत्वम्। छान्दसः संहितायां दीर्घः॥

---

१. च-छ-ण-द-न-फ-ल-स-इष्यन्ति प्राप्नुवन्तीति।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

देवी यदि तविषी त्वावृधोतय इन्द्रं सिषक्त्युषसं न सूर्यः ।
यो धृष्णुना शवसा बाधते तम इर्यर्ति रेणुं बृहदर्हरिष्वणिः ॥ ४ ॥

देवी । यदि । तविषी । त्वाऽवृधा । ऊतये । इन्द्रम् । सिसक्ति । उषसम् । न । सूर्यः ।
यः । धृष्णुना । शवसा । बाधते । तमः । इर्यर्ति । रेणुम् । बृहत् । अर्हरिऽस्वनिः ॥ ४ ॥

[v]यः इन्द्रः [v]धृष्णुना धर्षकेन [v]शवसा बलेन [v]तमः तमोरूपं वृत्रादिमसुरं [v]बाधते हिनस्ति [v]ऊतये रक्षणाय [v]त्वावृधा त्वया स्तोत्रा वर्धितं तम् [v]इन्द्रं [v]देवी [v]तविषी द्योतमानं बलं [v]यदि यदा [v]सिषक्ति समवैति। सेवते इति यास्कः (निरु. ३.२१)। [v]सूर्यः [v]उषसं [v]न यथोषोदेवतां सेवते नित्यं तत्संबद्धो भवतीत्यर्थः। तदानीम् [v]अर्हरिष्वणिः। गच्छन्तो हरन्तीति अर्हयः शत्रवः। तेषां व्यथोत्पादनेन स्वनयिता शब्दयिता इन्द्रः [v]रेणुं रेषणं हिंसनं [v]बृहत् प्रभूतम् [v]इर्यर्ति शत्रून् गमयति॥ त्वावृधा। त्वया वर्धते इति त्ववृत्। 'क्विप् च' इति क्विप्। 'प्रत्ययोत्तरपदयोश्च' इति मपर्यन्तस्य त्वादेशः। छान्दसं दकारस्य आत्वम्। 'सुपां सुलुक्°' इति द्वितीयाया आकारः। सिषक्ति। 'षच समवाये'। 'बहुलं छन्दसि' इति शपः श्लुः। 'बहुलं छन्दसि' इति अभ्यासस्य इत्वम्। इयर्ति। 'ऋ सृ गतौ'। जौहोत्यादिकः। अस्मात् अन्तर्भावितण्यर्थात् लट्। शपश्लुद्विर्भावोरदत्वहलादिशेषाः[1]। 'अर्तिपिपर्त्योश्च' इति अभ्यासस्य इत्वम्। 'अभ्यासस्यासवर्णे' (पा. सू. ६. ४. ७८) इति इयङादेशः। 'अनुदात्ते च' इति अभ्यासस्याद्युदात्तत्वम्। पूर्वपदस्य वाक्यान्तरगतत्वेन पदादपरत्वात् निघाताभावः। रेणुम्। 'री गतिरेषणयोः'। अस्मात् औणादिको नुप्रत्ययः। अर्हरिष्वणिः। अर्तेः 'अन्येभ्योऽपि दृश्यन्ते' इति विच्। अरो गच्छन्तश्चेमे हरयश्चेत्यर्हरयः। तेषां स्वनयिता। 'ष्यमु[2] स्वन ध्वन शब्दे'। अस्मात् ण्यन्तात् औणादिक इन्प्रत्ययः। 'णेरनिटि' इति णिलोपः। घटादित्वात् मित्त्वे 'मितां ह्रस्वः' इति ह्रस्वत्वम्। कुदुत्तरपदप्रकृतिस्वरत्वम्॥

वि यत्तिरो धरुणमच्युतं रजोऽतिष्ठिपो दिव आतासु बर्हणा ।
स्वर्मीळ्हे यन्मद इन्द्र हर्ष्याहन्वृत्रं निरपामौब्जो अर्णवम् ॥ ५ ॥

वि । यत् । तिरः । धरुणम् । अच्युतम् । रजः । अतिस्थिपः । दिवः । आतासु । बर्हणा ।
स्वःऽमीळ्हे । यत् । मदे । इन्द्र । हर्ष्या । अहन् । वृत्रम् । निः । अपाम् । औब्जः । अर्णवम् ॥५॥

[v]यत् यदा [v]तिरः वृत्रेण तिरोहितं [v]धरुणं सर्वस्य प्राणिजातस्य धारकम् [v]अच्युतं विनाशरहितं [v]रजः उदकं [v]दिवः द्युलोकात् [v]आतासु। आता इति दिङ्नाम। आतासु[3] विस्तृतासु दिक्षु हे [v]इन्द्र [v]बर्हणा हन्ता[4] त्वं [v]वि [v]अतिष्ठिपः विविधं स्थापयांचकृषे। तथा [v]यत् यदा [v]स्वर्मीळ्हे। मीळ्हम् इति धननाम। स्वः सुष्ठु गन्तव्यं मीळ्हं धनं यस्मिन् तस्मिन् संग्रामे [v]मदे तव सोमपानेन हर्षे सति [v]हर्ष्या हृष्टया शक्त्या [v]वृत्रम् आवरकमसुरम् [v]अहन् त्वमवधीः। तदानीम् [v]अपां पूर्णम् [v]अर्णवं मेघं [v]निः

---

१. छ-ण-न-ल-श-स-शपः श्लुः। द्विर्भावोरदत्वहलादिशेषाः। २. ढ-'स्यमु' नास्ति। ३. ढ-आततासु। ४. ढ--शत्रूणां हन्ता।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vऔब्जः वर्षणाभिमुखमधोमुखमकार्षीः । वृष्टेरावरकं वृत्रं हत्वा वृष्टिजलेन भूमिं न्यसैक्षीरिति तात्पर्यार्थः ॥ अतिष्ठिपः । तिष्ठतेः ण्यन्तात् लुङि च्लेः चङादेशः । णिलोपः । ' तिष्ठतेरित् ' ( पा. सू. ७. ४. ५ ) इति उपधाया इत्वम् । ' चङि ' ( पा. सू. ६. १. ११ ) इति द्विर्वचने ' शर्पूर्वाः खयः ' इति थकारः शिष्यते । चर्त्वेन तकारः । अडागम उदात्तः । यद्वृत्तयोगादनिघातः । बर्हणा । ' सुपां सुलुक्° ' इति सोः आकारः । स्वर्मीळ्हे । ' मिह सेचने ' । निष्ठा[1] । ' हो ढः ' ( पा. सू. ८. २. ३१ ) इति ढत्वम् । ' झषस्तथोर्धोऽधः ' इति तकारस्य धत्वम् । तस्य ष्टुत्वे ' ढो ढे लोपः ' ( पा. सू. ८. ३. १३ ) इति ढलोपः । ' ढ्रलोपे पूर्वस्य° ' ( पा. सू. ६. ३. १११ ) इति दीर्घत्वम् । स्वरितेत् ' न्यङ्स्वरौ स्वरितौ ' इति स्वर्यते । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन तदेव शिष्यते । अहन् । हन्तेर्लङि मध्यमैकवचने ' हल्ङ्याब्भ्यः° ' इति सेर्लोपः[2] । यद्वृत्तयोगादनिघातः । औब्जः । ' उब्ज आर्जवे ' । लङि आडागमो वृद्धिश्च ॥

त्वं दिवो धरुणं धिष ओजसा पृथिव्या इन्द्र सदनेषु माहिनः ।
त्वं सुतस्य मदे अरिणा अपो वि वृत्रस्य समया पाष्यारुजः ॥ ६ ॥

त्वम् । दिवः । धरुणम् । धिषे । ओजसा । पृथिव्याः । इन्द्र । सदनेषु । माहिनः ।
त्वम् । सुतस्य । मदे । अरिणाः । अपः । वि । वृत्रस्य । समया । पाष्या । अरुजः ॥ ६ ॥

हे vइन्द्र vमाहिनः प्रवृद्धः vत्वं vदिवः द्युलोकात् vपृथिव्याः vसदनेषु प्रदेशेषु vओजसा बलेन vधरुणं सर्वस्य जगतो धारकं वृष्टिजलं vधिषे दधिषे स्थापयसि । यस्मात् vत्वं vसुतस्य सोमस्य पानेन vमदे हर्षे सति vअपः जलानि vअरिणाः मेघात् निरगमयः । vवृत्रस्य आवरकं वृत्रं च vसमया धृष्टया vपाष्या शिलया यद्वा शक्त्या vवि vअरुजः विशेषेणाभाङ्क्षीः ॥ धिषे । दधातेश्छान्दसो वर्तमाने लिट् । ' द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम् ' ( का. ६. १. ८. १ ) इति वचनात् द्विर्वचनाभावः । क्रादिनियमात् इडागमे ' आतो लोप इटि च ' इति आकारलोपः । माहिनः । ' महेरिनण् च ' ( उ. सू. २. २१४ ) इति ' मह पूजायाम् ' इत्यस्मात् औणादिक इनण्प्रत्ययः । ' अत उपधायाः ' इति वृद्धिः । अरिणाः । ' री गतिरेषणयोः ' । क्रैयादिकः । लङि सिपि ' प्वादीनां ह्रस्वः ' इति ह्रस्वत्वम् । समया । ' षम ष्टम अवैक्लव्ये ' । समतीति समा । पचाद्यच् । ' चितः ' इत्यन्तोदात्तत्वम् । पाष्या । ' पिष्लृ संचूर्णने ' इत्यस्मात् औणादिक इन्प्रत्ययः । बहुलवचनात् उपधाया आकारः । ' कृदिकारादक्तिनः ' ( पा. सू. ४. १. ४५ ग. ) इति ङीष् । प्रत्ययस्वरेणान्तोदात्तः । तृतीयैकवचने यणादेशे सति ' उदात्तस्वरितयोर्यणः° ' इति स्वरितत्वम् । अरुजः । ' रुजो भङ्गे ' । तौदादिकः । शस्य ङित्त्वात् गुणाभावः ॥ ॥ २१ ॥

' प्र मंहिष्ठाय ' इति षड्ऋचं सप्तमं सूक्तं सव्यस्यार्षमैन्द्रं जागतम् । तथा चानुक्रान्तं—' प्र मंहिष्ठाय ' इति । विषुवति निष्केवल्ये इदं सूक्तं शंसनीयम् । सूत्रितं च—' प्र मंहिष्ठाय त्यमू ष्वितीह तार्क्ष्यमन्ततः ' ( आश्व. श्रौ. ८. ६ ) इति । उक्थ्यसंस्थे क्रतौ तृतीयसवने ब्राह्मणाच्छंसिशस्त्रेऽपि एतत्सूक्तम् । सूत्रितं च—' सर्वाः ककुभः प्र मंहिष्ठायोदप्रुतः ' ( आश्व. श्रौ. ६. १ ) इति ॥

---

१. ढ–निष्ठायाम् । २. ढ–सलोपः ।

CC0. Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्र मंहिष्ठाय बृहते बृहद्रये सत्यशुष्माय तवसे मतिं भरे ।
अपामिव प्रवणे यस्य दुर्धरं राधो विश्वायु शवसे अपावृतम् ॥ १ ॥

प्र । मंहिष्ठाय । बृहते । बृहत्ऽरये । सत्यऽशुष्माय । तवसे । मतिम् । भरे ।
अपाम्ऽइव । प्रवणे । यस्य । दुःऽधरम् । राधः । विश्वऽआयु । शवसे । अपऽवृतम् ॥ १ ॥

[v]मंहिष्ठाय । मंहतिर्दानकर्मेति यास्कः ( निरु. १. ७ ) । दातृतमाय [v]बृहते गुणैर्महते [v]बृहद्रये महाधनाय [v]सत्यशुष्माय अवितथबलाय [v]तवसे आकारतः प्रवृद्धाय एवंगुणविशिष्टायेन्द्राय [v]मतिं मननीयां स्तुतिं [v]प्र [v]भरे प्रकर्षेण संपादयामि[1] । [v]यस्य इन्द्रस्य बलं [v]दुर्धरम् अन्यैर्धर्तुमशक्यम् । तत्र दृष्टान्तः । [v]प्रवणे निम्नप्रदेशे [v]अपामिव । यथा जलानां वेगः केनाप्यवस्थापयितुं न शक्यते तद्वत् । तथा [v]राधः धनं [v]विश्वायु सर्वेषु व्याप्तं [v]शवसे स्तोतॄणां बलाय येनेन्द्रेण [v]अपावृतं अपगतावरणं क्रियते, तस्येन्द्रस्येति पूर्वेण संबन्धः ॥ मंहिष्ठाय । अतिशयेन मंहिता मंहिष्ठः । ' तुश्छन्दसि ' इति इष्ठन्प्रत्ययः । ' तुरिष्ठेमेयःसु ' इति तृलोपः । बृहते । ' बृहन्महतोरुपसंख्यानम् ' इति विभक्तेरुदात्तत्वम् । उत्तरयोर्बहुव्रीहिस्वरः[2] । मतिम् । ' मन्त्रे वृष° ' इत्यादिना क्तिन्[3] उदात्तत्वम्[3] । ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपः । दुर्धरम् । ' धृञ् धारणे ' । ' ईषद्दुःसुषु° ' इति कर्मणि खल् । विश्वायु । विश्वस्मिन् सर्वस्मिन् आयु गमनं यस्य तत् विश्वायु । एतेः ' छन्दसीणः ' ( उ. सू. १. २ ) इति उण्प्रत्ययः । ' बहुव्रीहौ विश्वं संज्ञायाम् ' इति पूर्वपदान्तोदात्तत्वम् । अपावृतम् । कर्मणि निष्ठा । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् ॥

अध ते विश्वमनु हासदिष्टय आपो निम्नेव सवना हविष्मतः ।
यत्पर्वते न समशीत हर्यत इन्द्रस्य वज्रः श्नथिता हिरण्ययः ॥ २ ॥

अध । ते । विश्वम् । अनु । ह । असत् । इष्टये । आपः । निम्नाऽइव । सवना । हविष्मतः ।
यत् । पर्वते । न । सम्ऽअशीत । हर्यतः । इन्द्रस्य । वज्रः । श्नथिता । हिरण्ययः ॥ २ ॥

[v]अध [v]ह अनन्तरमेव हे इन्द्र [v]विश्वं सर्वमिदं जगत् [v]ते तव संबन्धिने [v]इष्टये यागाय [v]अनु [v]असत् अन्वभवत् । यद्वा । इष्टये हविरादिभिस्तव प्राप्तये इति योज्यम् । [v]हविष्मतः यजमानस्य [v]सवना सवनानि यज्ञजातानि [v]निम्नेव निम्नानि भूस्थलानि [v]आपः इव त्वां संभजन्ते इति शेषः । [v]हर्यतः शत्रुवधं प्रेप्सतः [v]इन्द्रस्य । ' हर्यतिः प्रेप्साकर्मा ' ( निरु. ७. १७ ) इति यास्कः । यद्वा । हर्यतः शोभनः । [v]हिरण्ययः हिरण्मयः [v]श्नथिता शत्रूणां हिंसनशीलः [v]वज्रः [v]पर्वते पर्ववति शिलोच्चये वृत्रे वा [v]यत् यदा [v]न [v]समशीत संसुप्तो नाभवत् । किंतु जागरितः सन्नवधीदित्यर्थः । यदेन्द्रेण प्रेरितो वज्रः अप्रतिहतः सन् वृत्रमवधीत्तदाप्रभृत्येव तं यष्टुं सर्वे यजमानाः प्रावर्तिषतेति भावः ॥ अध । छान्दसं धस्वम् । असत् । अस्तेर्लङि ' बहुलं छन्दसि ' इति शपो लुगभावः । इष्टये । यजतेर्भावे क्तिनि ' वचिस्वपि° ' इत्यादिना संप्रसारणम् । व्रश्चादिना षत्वम् । व्यत्ययेनान्तोदात्तत्वम् । यद्वा । ' इष गतौ '

---

१. ढ–उत्पादयामि । २. च-छ-ण-त-न-फ-ल-श–उत्तरयोश्च बहुव्रीहिस्वरः । ३. ढ-स–क्तिन उदात्तत्वम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इत्यस्मात् भावे क्तिनि ' मन्त्रे वृषेष° ' इति तस्योदात्तत्वम् । निङ्नेव सवना । ' शेश्छन्दसि° ' इति शेर्लोपः । समशीत । ' शीङ् स्वप्ने ' । लङि संज्ञापूर्वकस्य विधेरनित्यत्वात् ' शीङः सार्वधातुके° ' ( पा. सू. ७. ४. २१ ) इति गुणाभावः । हर्यतः । ' हर्य गतिकान्त्योः ' । ' भृमृदृशि° ' इत्यादिना अतच्प्रत्ययः । श्रथिता । ' श्रथ क्रथ क्रथ हिंसार्थाः ' । ताच्छीलिकः तृन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् ॥

अस्मै भीमाय नमसा समध्वर उषो न शुभ्र आ भरा पनीयसे ।
यस्य धाम श्रवसे नामेन्द्रियं ज्योतिरकारि हरितो नायसे ॥ ३ ॥

अस्मै । भीमाय । नमसा । सम् । अध्वरे । उषः । न । शुभ्रे । आ । भर । पनीयसे ।
यस्य । धाम । श्रवसे । नाम । इन्द्रियम् । ज्योतिः । अकारि । हरितः । न । अयसे ॥ ३ ॥

हे [V]उषः उषोदेवते [V]शुभ्रे शोभने त्वं [V]भीमाय शत्रूणां भयंकराय [V]पनीयसे अतिशयेन स्तोतव्याय [V]अस्मै इन्द्राय [V]अध्वरे हिंसारहितेऽस्मिन्यागे । [V]न इति संप्रत्यर्थे । तथा च यास्कः–' अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोग इहैव निधेहि ' ( निरु. ७. ३१ ) इति । संप्रतीदानीं [V]नमसा नमो हविर्लक्षणमन्नं [V]सम् [V]आ [V]भर सम्यक् संपादय । [V]धाम सर्वस्य धारकं [V]नाम स्तोतृषु नमनशीलं प्रसिद्धं वा [V]इन्द्रियम् इन्द्रत्वस्य[1] परमैश्वर्यस्य[1] लिङ्गं यस्य इन्द्रस्य एवंविधं [V]ज्योतिः [V]श्रवसे अन्नाय हविर्लक्षणान्नलाभार्थम् [V]अयसे इतस्ततो गमनाय [V]अकारि क्रियते । [V]हरितो [V]न । यथाश्वान्सादिनः स्वाभिलषितदेशं गमयन्ति तद्वदिन्द्रोऽपि स्वाभिमतहविर्लाभाय स्वकीयं तेजो गमयतीति भावः ॥ उषः । पादादित्वात् निघाताभावः । शुभ्रे । ' शुभ दीप्तौ ' । ' स्फायितञ्चि° ' इत्यादिना रक् । भर । ' हृग्रहोर्भः° ' इति भत्वम् । ' ह्यचोऽतस्तिङः ' इति दीर्घः । पनीयसे । पनतेः स्तुत्यर्थात् बहुलवचनात् कर्मणि असुन् । तस्मात् आतिशायनिके ईयसुनि ' टेः ' इति टिलोपः । अकारि । ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने कर्मणि लुङ् । यद्वृत्तयोगादनिघातः । अडागम उदात्तः । अयसे । ' अय गतौ ' इत्यस्मात् भावे असुन् ॥

इमे त इन्द्र ते वयं पुरुष्टुत ये त्वारभ्य चरामसि प्रभूवसो ।
नहि त्वदन्यो गिर्वणो गिरः सघत्क्षोणीरिव प्रति नो हर्य तद्वचः ॥ ४ ॥

इमे । ते । इन्द्र । ते । वयम् । पुरुऽस्तुत । ये । त्वा । आऽरभ्य । चरामसि । प्रभुवसो इति प्रभुऽवसो ।
नहि । त्वत् । अन्यः । गिर्वणः । गिरः । सघत् । क्षोणीःऽइव । प्रति । नः । हर्य । तत् । वचः ॥ ४ ॥

हे [V]इन्द्र [V]प्रभूवसो प्रभूतधन अत एव [V]पुरुष्टुत पुरुभिर्बहुभिर्यजमानैः स्तुत [V]ये च वयं [V]त्वा त्वाम् [V]आरभ्य आश्रयतयावलम्ब्य [V]चरामसि चरामो यागे वर्तामहे [V]ते [V]इमे [V]वयं [V]ते तव स्वभूताः । हे [V]गिर्वणः गीर्भिर्वननीयेन्द्र [V]त्वदन्यः त्वत्तोऽन्यः कश्चिदपि [V]गिरः स्तुतीः [V]नहि [V]सघत् न हि

---

१. ध-स–इन्द्रस्य परमेश्वरस्य ।

CC0. Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्राप्नोति । अतस्त्वं vनः अस्माकं vतत् स्तुतिलक्षणं vवचः vप्रति vहर्य कामयस्व । vक्षोणीरिव । यथा क्षोणी पृथिवी स्वकीयानि भूतजातानि कामयते ॥ चरामसि । इदन्तो मसिः । शपः पित्त्वादनुदात्तत्वे धातुस्वरः । यद्वृत्तयोगादनिघातः । सघत् । ' षघ हिंसायाम् ' । अत्र प्राप्त्यर्थो धातूनामनेकार्थत्वात् । लेटि अडागमः । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । पादादित्वात् निघाताभावः । क्षोणीरिव । ' हल्ङ्याब्भ्यः° ' इति सुलोपाभावश्छान्दसः ॥

भूरिं त इन्द्र वीर्यं१ तव स्मस्यस्य स्तोतुर्मघवन्कामुमा पृण ।
अनु ते द्यौर्बृहती वीर्यं मम इयं च ते पृथिवी नेम ओजसे ॥ ५ ॥

भूरि । ते । इन्द्र । वीर्यम् । तव । स्मसि । अस्य । स्तोतुः । मघऽवन् । कामम् । आ । पृण ।
अनु । ते । द्यौः । बृहती । वीर्यम् । ममे । इयम् । च । ते । पृथिवी । नेमे । ओजसे ॥ ५ ॥

हे vइन्द्र vते तव vवीर्यं सामर्थ्यं vभूरि बहु । न केनाप्यवच्छेत्तुं शक्यते । तादृशस्य vतव वयं vस्मसि स्वभूता भवामः । हे vमघवन् vअस्य vस्तोतुः त्वां स्तुवतो यजमानस्य vकामम् अभिलाषम् vआ vपृण आपूरय । vबृहती vद्यौः महान् द्युलोकोऽपि vते तव vवीर्यम् vअनु vममे अन्वमंस्त । इन्द्रेण सहावस्थानात् vइयं vच इयमपि vपृथिवी vते तव vओजसे बलाय vनेमे प्रह्वीबभूव । त्वद्बलाद्भीता सती अध एव वर्तते इति भावः ॥ स्मसि । ' अस भुवि ' । लटि ' श्नसोरल्लोपः ' इति अकारलोपः । इदन्तो मसिः । पृण । ' पृण प्रीणने ' । अत्र प्रीतिहेतुतया पूरणं लक्ष्यते । तुदादित्वात् शप्रत्ययः । तस्य ङित्त्वाद्गुणाभावः । ममे । ' माङ् माने शब्दे च ' । ङित्त्वात् आत्मनेपदम् । लिटि ' आतो लोप इटि च ' इति आकारलोपः । नेमे । ' णमु प्रह्वत्वे ' । लिटि ' अत एकहल्मध्ये° ' इति एत्वाभ्यासलोपौ । ' तिङ्ङतिङः ' इति निघातः ॥

त्वं तमिन्द्र पर्वतं महामुरुं वज्रेण वज्रिन्पर्वशश्चकर्तिथ ।
अवासृजो निवृताः सर्तवा अपः सत्रा विश्वं दधिषे केवलं सहः ॥ ६ ॥

त्वम् । तम् । इन्द्र । पर्वतम । महाम् । उरुम् । वज्रेण । वज्रिन् । पर्वऽशः । चकर्तिथ ।
अव । असृजः । निऽवृताः । सर्तवै । अपः । सत्रा । विश्वम् । दधिषे । केवलम् । सहः ॥ ६ ॥

हे vवज्रिन् वज्रवन् vइन्द्र vत्वं vतं प्रसिद्धं vमहाम् आयामतो महान्तम् vउरुं विस्तीर्णं पर्वतं vपर्ववन्तं मेघं वृत्रासुरं वा vवज्रेण आयुधेन vपर्वशः पर्वणि पर्वणि vचकर्तिथ शकलीचकृषे । तेन मेघेन vनिवृताः आवृताः vअपः vसर्तवै सरणाय गमनाय vअवासृजः अवाङ्मुखमस्राक्षीः । अतस्त्वमेव vकेवलं vविश्वं व्याप्तं vसहः बलं vदधिषे धारयसि नान्यः कश्चिदिति यदेतत् तत् vसत्रा सत्यमेव । सत्रा इति सत्यनाम, ' सत्रा इत्था ' ( नि. ३. १०. ३ ) इति तन्नामसु पाठात् ॥ महां महान्तम् । नकारतकारयोर्लोपश्छान्दसः । चकर्तिथ । ' कृती छेदने ' । लिटि थलि अभ्यासस्य उरदत्वहलादिशेषचुत्वानि । सर्तवै । ' कृत्यार्थे तवैकेन्° ' इति भावे तवैप्रत्ययः । ' कृन्मेजन्तः ' ( पा. सू. १. १. ३९ ) इति अव्ययत्वे ' अव्ययादाप्सुपः ' इति सुपो लुक् । ' अन्तश्च तवै युगपत् ' इति आद्यन्तयोर्युगपत् उदात्तत्वम् । दधिषे । लिटि क्रादिनियमात् इट् ॥ ॥ २२ ॥ ॥ १० ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

एकादशानुवाके सप्त सूक्तानि । तत्र ' नू चित् ' इति नवर्चं प्रथमं सूक्तं गौतमस्य नोधस आर्ष-माग्नेयम् । आद्याः पञ्च जगत्यः । शिष्टाश्चतस्त्रस्त्रिष्टुभः । तथा चानुक्रान्तम्–' नू चिन्नव नोधा गौतम आग्नेयं हि चतुस्त्रिष्टुबन्तम् ' इति । हि इति वचनात् उत्तरे च द्वे सूक्ते अग्निदेवताके । अभिप्लवषडहस्य पञ्चमेऽहनि आग्निमारुते[1] इदं[1] जातवेदस्यं निविद्धानम् । ' तृतीयस्य ' इति खण्डे सूत्रितं– ' पृक्षस्य वृष्णो वृष्णे शर्धाय नू चित्सहोजा इत्याग्निमारुतम् ' ( आश्व. श्रौ. ७. ७ ) इति । प्रात-रनुवाकस्याग्नेये क्रतावाश्विनशस्त्रे च जागते छन्दस्यादितः पञ्चर्चः । सूत्रितं च–' त्वमग्ने प्रथमो अङ्गिरा नू चित्सहोजा अमृतो नि तुन्दत इति पञ्च ' ( आश्व. श्रौ. ४. १३ ) इति ॥

नू चित्सहोजा अमृतो नि तुन्दते होता यद्दूतो अभवद्विवस्वतः ।
वि साधिष्ठेभिः पथिभी रजो मम आ देवताता हविषा विवासति ॥ १ ॥

नु । चित् । सहःऽजाः । अमृतः । नि । तुन्दते । होता । यत् । दूतः । अभवत् । विवस्वतः ।
वि । साधिष्ठेभिः । पथिऽभिः । रजः । ममे । आ । देवऽताता । हविषा । विवासति ॥ १ ॥

[v]सहोजाः सहसा बलेन जातः । अग्निर्हि बलेन मथ्यमानोऽरण्योः सकाशात् जायते । [v]अमृतः मरणरहितः । एवंभूतोऽग्निः [v]नू [v]चित् क्षिप्रमेव [v]नि [v]तुन्दते नितरां व्यथयति । उत्पन्नमात्रस्याग्नेः[2] स्पष्टुमशक्यत्वात् । यद्वा निर्गच्छति । तुन्दतिर्गत्यर्थः सौत्रो धातुः । [v]यत् यदा [v]होता देवानामाह्वाता होमनिष्पादको वायमग्निः [v]विवस्वतः परिचरतो यजमानस्य देवान्प्रति हविर्वहनाय [v]दूतः [v]अभवत् हविर्वहने नियुक्तो भवति तदानीं [v]साधिष्ठेभिः समीचीनैः [v]पथिभिः मार्गैर्गच्छन् [v]रजः अन्तरिक्ष-लोकं [v]वि [v]ममे निर्ममे । पूर्वं विद्यमानमप्यन्तरिक्षम् असत्कल्पमभूत् । इदानीं तस्य तेजसा प्रकाशमानं सत् उत्पन्नमिव दृश्यते । किंच । देवताता इति यज्ञनाम । [v]देवताता देवतातौ यज्ञे [v]हविषा चरुपुरो-डाशादिलक्षणेन देवान् [v]आ [v]विवासति परिचरति ॥ अमृतः । मृतं मरणमस्य नास्तीति बहुव्रीहौ ' नञो जरमरमित्रमृताः ' इत्युत्तरपदाद्युदात्तत्वम् । तुन्दते । ' तुद व्यथने ' । स्वरितेत्त्वात् आत्मनेपदम् । नकारोपजनश्छान्दसः । साधिष्ठेभिः । बाढशब्दात् आतिशायनिके इष्ठनि ' अन्तिकबाढयोर्नेदसाधौ ' ( पा. सू. ५. ३. ६३ ) इति साधादेशः । ' बहुलं छन्दसि ' इति भिसः ऐसभावः । नित्त्वादाद्युदा-त्तत्वम् । देवताता । ' सर्वदेवात्तातिल् ' ( पा. सू. ४. ४. १४२ ) इति स्वार्थिकः तातिल्प्रत्ययः । तेन च तत्संबन्धी यज्ञो लक्ष्यते । यद्वा । देवान्हविषा आ विवासति इति योज्यम् । ' सुपां सुलुक्° ' इति विभक्तेः डादेशः । ङित्स्वरेण प्रत्ययात् पूर्वस्योदात्तत्वम् ॥

आ स्वमद्म युवमानो अजरस्तृष्वविष्यन्नतसेषु तिष्ठति ।
अत्यो न पृष्ठं प्रुषितस्य रोचते दिवो न सानु स्तनयन्नचिक्रदत् ॥ २ ॥

आ । स्वम् । अद्म । युवमानः । अजरः । तृषु । अविष्यन् । अतसेषु । तिष्ठति ।
अत्यः । न । पृष्ठम् । प्रुषितस्य । रोचते । दिवः । न । सानु । स्तनयन् । अचिक्रदत् ॥ २ ॥

---

१. श–आग्निमारुतामिदम् । २. ढ–उत्पन्नमात्रस्याप्यग्नेः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]अजरः जरारहितोऽयमग्निः [V]स्वं स्वकीयम् [V]अन्न अदनीयं तृणगुल्मादिकं [V]युवमानः स्वकीयज्वालया संमिश्रयन् तदनन्तरं च [V]अविष्यन् भक्षयंश्च। अविष्यन् इत्येतत् अत्तिकर्मसु पठितम् ( नि. २. ८. ६)। एवंभूतोऽग्निः [V]तृषु क्षिप्रमेव [V]अतसेषु प्रभूतेषु काष्ठेषु [V]आ [V]तिष्ठति आरोहति। अत्र अतसशब्दः काष्ठवाची, ' अतसं न शुष्कम् ' ( ऋ. सं. ४. ४. ४ ) इति दर्शनात्। [V]म्रुषितस्य दग्धुमितस्ततः प्रवृत्तस्याग्नेः [V]पृष्ठम् उपर्यवस्थितं ज्वालाजालम् [V]अत्यो [V]न [V]रोचते। यथा सततगमनशीलः अश्वः[1] इतस्ततो गच्छन् शोभते एवमग्नेर्ज्वालापि सर्वत्र गच्छन्ती शोभते इति भावः। तदानीं [V]दिवः द्युलोकस्य संबन्धि [V]सानु समुच्छ्रितमभ्रं [V]स्तनयन् [V]न शब्दयन्निव [V]अचिक्रदत् गम्भीरं[2] शब्दम्[2] आत्मानमकरोत्॥ युवमानः। ' यु मिश्रणे '। व्यत्ययेन आत्मनेपदम्। शपि प्राप्ते व्यत्ययेन शः। तस्य ' बहुलं छन्दसि ' इति लुगभावः। अदुपदेशात् लसार्वधातुकानुदात्तत्वे विकरणस्वर एव शिष्यते। अजरः। बहुव्रीहौ ' नञो जरमरमित्रमृताः' इत्युत्तरपदाद्युदात्तत्वम्। अचिक्रदत्। ' क्रदि क्रदि क्लुदि आह्वाने रोदने च '। अस्मात् ण्यन्तात् लुङि च्लेश्चङि आगमानुशासनस्यानित्यत्वात् नुमभावः। द्विर्भावहलादिशेषसन्वद्भावेत्वानि॥

क्राणा रुद्रेभिर्वसुभिः पुरोहितो होता निषत्तो रयिषाळमर्त्यः ।
रथो न विक्ष्वृञ्जसान आयुषु व्यानुषग्वार्या देव ऋण्वति ॥ ३ ॥

क्राणा । रुद्रेभिः । वसुऽभिः । पुरःऽहितः । होता । निऽसत्तः । रयिषाट् । अमर्त्यः ।
रथः । न । विक्षु । ऋञ्जसानः । आयुषु । वि । आनुषक् । वार्या । देवः । ऋण्वति ॥ ३ ॥

[V]क्राणा हविर्वहनं कुर्वाणः [V]रुद्रेभिः रुद्रैः [V]वसुभिः च [V]पुरोहितः पुरस्कृतः [V]होता देवानामाह्वाता [V]निषत्तः हविःस्वीकरणाय देवयजने निषण्णः [V]रयिषाट् रयीणां शत्रुधनानामभिभविता [V]अमर्त्यः मरणरहितः। एवंभूतः [V]देवः द्योतमानोऽग्निः [V]विक्षु प्रजासु लौकिकजनेषु [V]रथो [V]न रथ इव [V]आयुषु यजमानलक्षणेषु मनुष्येषु [V]ऋञ्जसानः स्तूयमानः [V]वार्या वार्याणि संभजनीयानि धनानि [V]आनुषक् आनुषक्तं[3] यथा भवति तथा [V]वि [V]ऋण्वति विशेषेण प्रापयति। यद्वा। वार्याणि वरणीयानि हवींषि स्वयं प्राप्नोति॥ क्राणा। करोतेः शानचि ' बहुलं छन्दसि ' इति विकरणस्य लुक्। शानचो ङित्त्वात् गुणाभावे यणादेशः। ' चितः ' इत्यन्तोदात्तत्वम्। ' सुपां सुलुक्° ' इति सोः पूर्वसवर्णदीर्घत्वम्। निषत्तः। ' षदॢ विशरणगत्यवसादनेषु '। अस्मात् कर्मणि निष्ठा। ' नसत्तनिषत्त° ' ( पा. सू. ८. २. ६१ ) इत्यादिना निष्ठानत्वाभावो निपातितः। ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम्। रयिषाट्। ' षह अभिभवे '। ' छन्दसि सहः ' ( पा. सू. ३. २. ६३ ) इति ण्विः। ' सहेः साडः सः ' ( पा. सू. ८. ३. ५६ ) इति षत्वम्। ऋञ्जसानः। ऋञ्जतिः स्तुतिकर्मा। ' असानच् ' इत्यनुवृत्तौ ' ऋञ्जिवृधिमन्दिसहिभ्यः कित् ' ( उ. सू. २. २४४ ) इति कर्मणि असानच्प्रत्ययः। ' चितः ' इत्यन्तोदात्तत्वम्। आयुषु। आयवः इति मनुष्यनाम ( नि. २. ३. १७ )। ' इण् गतौ ' इत्यस्मात् ' छन्दसीणः ' इति उण्प्रत्ययः। वृद्ध्यायादेशौ। वार्या। ' वृङ् संभक्तौ '। ' ऋहलोर्ण्यत् '। तित्स्वरिते प्राप्ते ' ईडवन्दवृशंसदुहां ण्यतः ' इत्याद्युदात्तत्वम्। ' शेश्छन्दसि° ' इति शेर्लोपः। ऋण्वति। ' रिवि गतौ '। व्यत्ययेन संप्रसारणम्। इदित्त्वात् नुम्। कर्तरि शप्॥

---

१. छ-द-ध-न-श-स–अत्योऽश्वः; ढ–जात्यश्वः। २. ढ–गंभीरशब्दम्। ३. ढ–अनुषक्तम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वि वातजूतो अतसेषु तिष्ठते वृथा जुहूभिः सृण्या तुविष्वणिः ।
तृषु यदग्ने वनिनो वृषायसे कृष्णं त एम रुशदूर्मे अजर ॥ ४ ॥

वि । वातऽजूतः । अतसेषु । तिष्ठते । वृथा । जुहूभिः । सृण्या । तुविऽस्वनिः ।
तृषु । यत् । अग्ने । वनिनः । वृषऽयसे । कृष्णम् । ते । एम । रुशत्ऽऊर्मे । अजर ॥ ४ ॥

[v]वातजूतः वायुना प्रेरितः [v]तुविष्वणिः महास्वनः एवंभूतोऽग्निः [v]जुहूभिः स्वकीयाभिः जिह्वाभिः [v]सृण्या सरणशीलेन तेजःसमूहेन च युक्तः सन् । वृथा इति अनायासवचनः । [v]वृथा अनायासेनैव [v]अतसेषु उन्नतेषु वृक्षेषु [v]वि [v]तिष्ठते विशेषेण तिष्ठति । हे [v]अग्ने [v]यत् यदा [v]वनिनः वनसंबन्धान् वृक्षान् दग्धुं[1] [v]वृषायसे वृषवदाचरसि दहसीत्यर्थः । हे [v]रुशदूर्मे दीप्तज्वाल [v]अजर जरारहिताग्ने [v]ते तव [v]एम गमनमार्गः [v]कृष्णं कृष्णवर्णो भवति ॥ वातजूतः । जू इति सौत्रो धातुः । वातेन जूतो वातजूतः । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम् । वि तिष्ठते । 'समवप्रविभ्यः स्थः' इत्यात्मनेपदम् । जुहूभिः । 'हु दानादनयोः' । हूयते[2] आस्विति जुह्वः । 'हुवः श्लुवच्च' (उ. सू. २. २१८) इति क्विप्, चकारात् दीर्घः । श्लुवद्भावात् द्विर्भावादि । 'धातोः' इत्यन्तोदात्तत्वम् । सृण्या । 'सृ गतौ' । सरतीति सृणिः । 'सृवृषिभ्यां कित्' (उ. सू. ४. ४८९) इति निप्रत्ययः । एम । एत्यनेनेति एम मार्गः । 'इण् गतौ' इत्यस्मात् करणे औणादिको मनिन् । नित्त्वादाद्युदात्तत्वम् ॥

तपुर्जम्भो वन आ वातचोदितो यूथे न साह्वाँ अव वाति वंसगः ।
अभिव्रजन्नक्षितं पाजसा रजः स्थातुश्चरथं भयते पतत्रिणः ॥ ५ ॥

तपुःऽजम्भः । वने । आ । वातऽचोदितः । यूथे । न । सह्वान् । अव । वाति । वंसगः ।
अभिऽव्रजन् । अक्षितम् । पाजसा । रजः । स्थातुः । चरथम् । भयते । पतत्रिणः ॥ ५ ॥

[v]तपुर्जम्भः । तपूंषि ज्वाला एव जम्भा आयुधानि मुखानि वा यस्य स तथोक्तः । [v]वातचोदितः वायुना प्रेरितः । एवंभूतोऽग्निः [v]यूथे ज्वालासमूहे सति [v]अक्षितम् अक्षीणं [v]रजः आर्द्रवृक्षान्तर्गतमुदकं [v]पाजसा तेजोबलेन [v]अभिव्रजन् आभिमुख्येन गच्छन् [v]वने अरण्ये [v]साह्वान् सर्वमभिभवन् [v]आ आभिमुख्येन[3] [v]अव [v]वाति व्याप्नोति । तत्र दृष्टान्तः । [v]वंसगः [v]न । यथा वननीयगतिः वृषः[4] गोयूथे सर्वमभिभवन् वर्तते तद्वत् । यस्मादेवं तस्मात् [v]पतत्रिणः पतनवतोऽग्नेः सकाशात् [v]स्थातुः स्थावरं [v]चरथं च जङ्गमं च [v]भयते बिभेति ॥ साह्वान् । 'दाश्वान्साह्वान्°' इति क्वसुप्रत्ययान्तो निपातितः । 'दीर्घादटि समानपादे' इति संहितायां नकारस्य रुत्वम् । 'आतोऽटि नित्यम्' इति सानुनासिक आकारः । यत्वलोपौ । ह्रस्वत्वं छान्दसम् । स्थातुः । 'कमिमनिजनि°' (उ. सू. १.७२) इत्यादिना विहितः तुप्रत्ययो बहुलवचनात् तिष्ठतेरपि भवति । यद्वा । स्थातुरनन्तरं चरथं भयते । प्रथमं स्थातृ स्थावरं बिभेति पश्चाच्चरथमित्यर्थः । चरथम् । चर गत्यर्थः । अस्मात् औणादिकः अथ-

---

१. ड-स-दग्धुं तृषु क्षिप्रम् । २. ड-स-हूयन्ते । ३. ड-आभिमुख्येन गच्छन् । ४. ड-वृषभः ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रत्ययः । भयते । ' जिभी भये ' । व्यत्ययेनात्मनेपदम् । ' बहुलं छन्दसि ' इति श्लोरभावः । गुणावादेशौ ॥ ॥ २३ ॥

दधुष्ट्वा भृगवो मानुषेष्वा रयिं न चारुं सुहवं जनेभ्यः ।
होतारमग्ने अतिथिं वरेण्यं मित्रं न शेवं दिव्याय जन्मने ॥ ६ ॥

दधुः । त्वा । भृगवः । मानुषेषु । आ । रयिम् । न । चारुम् । सुऽहवम् । जनेभ्यः ।
होतारम् । अग्ने । अतिथिम् । वरेण्यम् । मित्रम् । न । शेवम् । दिव्याय । जन्मने ॥ ६ ॥

हे vअग्ने vत्वा त्वां vमानुषेषु मनुष्येषु मध्ये vभृगवः एतत्संज्ञा महर्षयः vदिव्याय vजन्मने देवत्वप्राप्तये vचारुं vरयिं vन शोभनं धनमिव vआ vदधुः आधानसंभारेषु मन्त्रैः स्थापनेन समस्कुर्वन् । कीदृशं त्वाम् । vजनेभ्यः vसुहवं यजमानार्थमाह्वातुं सुशकं vहोतारं देवानामाह्वातारं vअतिथिम् अतिथिवत्पूज्यम् । यद्वा । देवयजनदेशेषु सततं गन्तारम् । vवरेण्यं वरणीयं vमित्रं vन vशेवम् । यथा सखा सुखकरो भवति तद्वत् सुखकरमित्यर्थः ॥ दधुः । लिटि उसि ' आतो लोप इटि च ' इति आकारलोपः । 'युष्मत्तत्ततक्षुःष्वन्तःपादम् ' इति विसर्जनीयस्य षत्वम् । सुहवम् । ह्वयतेः ' ईषद्दुः-सुषु° ' इति खल् । ' बहुलं छन्दसि ' इति संप्रसारणम् । परपूर्वत्वम् । गुणावादेशौ । ' लिति ' इति प्रत्ययात् पूर्वस्योदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

होतारं सप्त जुह्वो३ यजिष्ठं यं वाघतो वृणते अध्वरेषु ।
अग्निं विश्वेषामरतिं वसूनां सपर्यामि प्रयसा यामि रत्नम् ॥ ७ ॥

होतारम् । सप्त । जुह्वः । यजिष्ठम् । यम् । वाघतः । वृणते । अध्वरेषु ।
अग्निम् । विश्वेषाम् । अरतिम् । वसूनाम् । सपर्यामि । प्रयसा । यामि । रत्नम् ॥ ७ ॥

vसप्त सप्तसंख्याकाः vजुह्वः होतारः vवाघतः ऋत्विजः vअध्वरेषु यागेषु vयजिष्ठं यष्टृतमं vहोतारं देवानामाह्वातारं vयम् अग्निं vवृणते संभजन्ते vविश्वेषां सर्वेषां vवसूनाम्[1] vअरतिं प्रापयितारं तम् vअग्निं vप्रयसा हविर्लक्षणेनान्नेन vसपर्यामि परिचरामि । vरत्नं रमणीयं कर्मफलं च vयामि याचामि ॥ वृणते । ' वृङ् संभक्तौ ' । क्र्यादिकः । प्रत्ययस्वरः । अरतिम् । ' ऋ गतिप्रापणयोः ' । अस्मात् औणादिकः ' वहिवस्यर्तिभ्यश्चित् ' ( उ. सू. ४. ५०० ) इति अतिप्रत्ययः । चित्त्वादन्तोदात्तत्वम् । सपर्यामि । सपर्यतिः परिचरणकर्मा । ' सपर पूजायाम् ' इति धातुः कण्ड्वादिः । अतो यक एव स्वरः शिष्यते । पादादित्वात् निघाताभावः । यामि । याचामीत्यस्य वर्णलोपश्छान्दसः ॥

---

१. ढ-स–वसूनां धनानाम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अच्छिद्रा सूनो सहसो नो अद्य स्तोतृभ्यो मित्रमहः शर्म यच्छ ।
अग्ने गृणन्तमंहस उरुष्योर्जो नपात्पूर्भिरायसीभिः ॥ ८ ॥

अच्छिद्रा । सूनो इति । सहसः । नः । अद्य । स्तोतृऽभ्यः । मित्रऽमहः । शर्म । यच्छ ।
अग्ने । गृणन्तम् । अंहसः । उरुष्य । ऊर्जः । नपात् । पूःऽभिः । आयसीभिः ॥ ८ ॥

हे Vसहसः Vसूनो बलस्य पुत्र । बलेन हि मथ्यमानोऽग्निर्जायते । Vमित्रमहः अनुकूलदीप्तिमन्नग्ने Vनः अस्मभ्यं Vस्तोतृभ्यः Vअद्य अस्मिन् कर्मणि Vअच्छिद्रा अच्छेद्यानि Vशर्म शर्माणि सुखानि Vयच्छ देहि । किंच हे Vऊर्जो Vनपात् अन्नस्य पुत्र । भुक्तेनान्नेन जठराग्नेः प्रवर्धनादग्नेरन्नपुत्रत्वम् । एवंविध Vअग्ने Vगृणन्तं त्वां स्तुवन्तम् Vआयसीभिः व्याप्तैः । यद्वा अयोवत् दृढतरैः । Vपूर्भिः पालनैः Vअंहसः पापात् Vउरुष्य रक्ष । ' उरुष्यती रक्षाकर्मा ' ( निरु. ५. २३ ) इति यास्कः ॥ अच्छिद्रा । ' शेश्छन्दसि° ' इति शेर्लोपः । सूनो सहसः । ' परमपिच्छन्दसि ' इति परस्य षष्ठ्यन्तस्य पूर्वामन्त्रिताङ्गवद्भावे सति पदद्वयसमुदायस्य आष्टमिकं सर्वानुदात्तत्वम् । शर्म । ' सुपां सुलुक्° ' इति विभक्तेः लुक्[1] । ऊर्जो नपात् । न पातयतीति नपात् । ' नञ्राण्नपात्° ' इति नञः प्रकृतिभावः । ' सुबामन्त्रिते° ' इति षष्ठ्यन्तस्य पराङ्गवद्भावे सति पादादित्वात् आष्टमिकनिघाताभावे पाष्ठिकमामन्त्रिताद्युदात्तत्वम् । पूर्भिः । ' पॄ पालनपूरणयोः ' इत्यस्मात् संपदादिलक्षणो भावे क्विप् । उत्वदीर्घौ । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् ॥

भवा वरूथं गृणते विभावो भवा मघवन्मघवद्भ्यः शर्म ।
उरुष्याग्ने अंहसो गृणन्तं प्रातर्मक्षू धियावसुर्जगम्यात् ॥ ९ ॥

भव । वरूथम् । गृणते । विभाऽवः । भव । मघऽवन् । मघवत्ऽभ्यः । शर्म ।
उरुष्य । अग्ने । अंहसः । गृणन्तम् । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥ ९ ॥

हे Vविभावः विशिष्टप्रकाशाग्ने Vगृणते त्वां स्तुवते यजमानाय । वरूथम् इति गृहनाम । Vवरूथम् अनिष्टनिवारकं[2] गृहं Vभव । हे Vमघवन् धनवन्नग्ने Vमघवद्भ्यः हविर्लक्षणधनयुक्तेभ्यो यजमानेभ्यः Vशर्म सुखं यथा भवति तथा Vभव । हे Vअग्ने Vगृणन्तं स्तुवन्तम् Vअंहसः पापकारिणः शत्रोः Vउरुष्य रक्ष । Vधियावसुः कर्मणा बुद्ध्या वा प्राप्तधनोऽग्निः Vप्रातः इदानीमिव परेद्युरपि Vमक्षु शीघ्रं Vजगम्यात् आगच्छतु ॥ वरूथम् । ' वृञ् वरणे ' । ' जृवृभ्यामूथन् ' ( उ. सू. २. १६३ ) इति Vऊथन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । गृणते । ' शतुरनुमः° ' इति विभक्तेरुदात्तत्वम् । विभावः । विशिष्टा भा विभाः । ' आतो मनिन्° ' इति विच् । ' तदस्यास्ति° ' इति मतुप् । ' मादुपधायाः° ' इति मतुपो वत्वम् । ' मतुवसो रुः° ' इति नकारस्य रुत्वम् । मघवद्भ्यः । ' मघवा बहुलम् ' ( पा. सू. ६. ४. १२८ ) इति मघवन्शब्दस्य तृआदेशः । स च ' नानुबन्धकृतमनेकाल्त्वम् '

---

१. ढ-स–' लुक् ' इत्यस्यानन्तरं ' यच्छ । दाण् दाने । पाघ्रेत्यादिना यच्छादेशः ' इत्यधिकम् ।
२. ढ–अरिष्टनिवारकम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

(परिभा. ६) इति वचनात् 'अलोऽन्त्यस्य' (पा. सू. १. १. ५२) इति अन्त्यस्य भवति। मक्षु। 'ऋचि तुनुघमक्षु°' इति दीर्घः। धियावसुः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। पूर्वपदस्य[1] 'सावेकाचः°' इति विभक्तिरुदात्ता। लुगभावश्छान्दसः। जगम्यात्। 'गमॢ सृप्लृ गतौ'। लिङि 'बहुलं छन्दसि' इति शपः श्लुः॥ ॥ २४ ॥

'वया इत्' इति सप्तर्चं द्वितीयं सूक्तं नोधस आर्षं त्रैष्टुभम्। वैश्वानरगुणकोऽग्निर्देवता। तथा चानुक्रान्तम् 'वया इत्सप्त वैश्वानरीयम्' इति। सूक्तविनियोगो लिङ्गादवगन्तव्यः॥

वया इदग्ने अग्नयस्ते अन्ये त्वे विश्वे अमृता मादयन्ते।
वैश्वानर नाभिरसि क्षितीनां स्थूणेव जनाँ उपमिद्ययन्थ॥ १॥

वयाः। इत्। अग्ने। अग्नयः। ते। अन्ये। त्वे इति। विश्वे। अमृताः। मादयन्ते।
वैश्वानर। नाभिः। असि। क्षितीनाम्। स्थूणाऽइव। जनान्। उपऽमित्। ययन्थ॥ १॥

'वयाः शाखा वेतेर्वातायना भवन्ति' (निरु. १. ४) इति यास्कः। हे ᵛअग्ने ये ᵛअन्ये ᵛअग्नयः सन्ति सर्वेऽपि ᵛते तव ᵛवया ᵛइत् शाखा एव। ततस्त्वत्तोऽन्ये न सन्तीति भावः। किंच ᵛत्वे त्वयि सति ᵛविश्वे सर्वे ᵛअमृताः अमरणधर्माणो देवाः ᵛमादयन्ते हृष्यन्ति। न हि त्वद्व्यतिरेकेण तैर्जीवितुं शक्यते। हे ᵛवैश्वानर विश्वेषां नराणां जाठररूपेण संबन्धिन्नग्ने ᵛक्षितीनां मनुष्याणां ᵛनाभिः संनद्धा ᵛअसि अवस्थापको भवसि। अतस्त्वम् ᵛउपमित् उपस्थापयिता सन्। यद्वा। उपमित् इत्येतत् दृष्टान्तविशेषणम्। ᵛजनान् ᵛययन्थ अधारयः। तत्र दृष्टान्तः। उपमित् उपनिखाता ᵛस्थूणेव। वंशधारणार्थं निखातः स्तम्भः यथा गृहोपरिस्थं वंशं धारयति तद्वत्॥ वैश्वानर। विश्वे चेमे नरा विश्वानराः। 'नरे संज्ञायाम्' (पा. सू. ६. ३. १२९) इति पूर्वपदस्य दीर्घः। तत्संबन्धी वैश्वानरः। 'तस्येदम्' इति अण्। नाभिः। 'नहो भश्च' (उ. सू. ४. ५६५) इति इञ्प्रत्ययो भकारश्चान्तादेशः। ञित्त्वादाद्युदात्तत्वम्। असि। 'तासस्त्योर्लोपः' इति सलोपः। क्षितीनाम्। 'क्षि निवासगत्योः'। अस्मात् 'क्तिच्क्तौ च संज्ञायाम्' इति क्तिच्। अन्तोदात्तात्क्षितिशब्दादुत्तरस्य नामः 'नामन्यतरस्याम्' इत्युदात्तत्वम्। उपमित्। 'डुमिञ् प्रक्षेपणे'। अस्मात् उपपूर्वात् बहुलवचनात् कर्मणि क्विप्। तुगागमः। ययन्थ। 'यम उपरमे'। लिटि थलि क्रादिनियमात् इटि प्राप्ते 'उपदेशेऽत्वतः' (पा. सू. ७. २. ६२) इति प्रतिषेधः॥

विषुवत्संज्ञेऽहनि[2] आग्निमारुते 'मूर्धा दिवो नाभिरग्निः पृथिव्याः' इति वैकल्पिकोऽनुरूपस्तृचः। 'विषुवान्दिवाकीर्त्यः' इति खण्डे सूत्रितं—'मूर्धानं दिवो अरतिं पृथिव्या मूर्धा दिवो नाभिरग्निः पृथिव्या इति वा' (आश्व. श्रौ. ८. ६) इति॥

---

१. ढ-न-स-पूर्वपदस्य च। २. ढ-स-विषुवत्संज्ञकेऽहनि।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मूर्धा दिवो नाभिरग्निः पृथिव्या अथाभवदरती रोदस्योः ।
तं त्वा देवासोऽजनयन्त देवं वैश्वानर ज्योतिरिदार्याय ॥ २ ॥

मूर्धा । दिवः । नाभिः । अग्निः । पृथिव्याः । अथ । अभवत् । अरतिः । रोदस्योः ।
तम् । त्वा । देवासः । अजनयन्त । देवम् । वैश्वानर । ज्योतिः । इत् । आर्याय ॥ २ ॥

अयम् [V]अग्निः [V]दिवः द्युलोकस्य [V]मूर्धा शिरोवत्प्रधानभूतो भवति । [V]पृथिव्याः भूमेश्च [V]नाभिः संनाहकः रक्षक इत्यर्थः । [V]अथ अनन्तरं [V]रोदस्योः द्यावापृथिव्योः अयम् [V]अरतिः अधिपतिः [V]अभवत् । हे [V]वैश्वानर [V]तं तादृशं [V]देवं दानादिगुणयुक्तं [V]त्वा त्वां [V]देवासः सर्वे देवाः [V]आर्याय विदुषे मनवे यजमानाय वा [V]ज्योतिरित् ज्योतीरूपमेव [V]अजनयन्त उदपादयन् ॥ मूर्तमस्मिन्धीयते इति मूर्धा ( निरु. ७. २७ ) । 'श्वन्नुक्षन्' इत्यादौ निपातनात् रूपसिद्धिः । पृथिव्याः । पृथिवीशब्दः 'षिद्गौरादिभ्यश्च' इति ङीष्प्रत्ययान्तः अन्तोदात्तः । अजनयन्त । 'जनीजृष्क्नसुरञ्जोऽमन्ताश्च' इति सित्त्वात् 'सितां ह्रस्वः' इति ह्रस्वत्वम् ॥

आ सूर्ये न रश्मयो ध्रुवासो वैश्वानरे दधिरेऽग्ना वसूनि ।
या पर्वतेष्वोषधीष्वप्सु या मानुषेष्वसि तस्य राजा ॥ ३ ॥

आ । सूर्ये । न । रश्मयः । ध्रुवासः । वैश्वानरे । दधिरे । अग्ना । वसूनि ।
या । पर्वतेषु । ओषधीषु । अप्ऽसु । या । मानुषेषु । असि । तस्य । राजा ॥ ३ ॥

[V]अग्ना [V]वैश्वानरे अग्नौ [V]वसूनि धनानि [V]आ [V]दधिरे आहितानि स्थापितानि बभूवुः । तत्र दृष्टान्तः । [V]ध्रुवासः निश्चलाः [V]रश्मयः किरणाः [V]सूर्ये [V]न यथा सूर्ये आधीयन्ते तद्वत् । अतस्त्वं पर्वतादिषु यानि धनानि विद्यन्ते [V]तस्य धनजातस्य [V]राजा [V]असि अधिपतिर्भवसि ॥ अग्ना । 'सुपां सुलुक्०' इति विभक्तेः डादेशः । या । 'शेश्छन्दसि बहुलम्' इति शेर्लोपः । ओषधीषु । 'उष दाहे' । ओषः पाकः । भावे घञ् । जित्त्वादाद्युदात्तत्वम् । ओष आसु धीयते इति ओषधयः । 'कर्मण्यधिकरणे च' इति किप्रत्ययः । दासीभारादिषु पठितत्वात् पूर्वपदप्रकृतिस्वरत्वम् । सप्तमीबहुवचने 'ओषधेश्च विभक्तावप्रथमायाम्' ( पा. सू. ६. ३. १३२ ) इति दीर्घः । अप्सु । 'ऊडिदम्०' इति विभक्तेरुदात्तत्वम् ॥

बृहतीइव सूनवे रोदसी गिरो होता मनुष्यो३ न दक्षः ।
स्वर्वते सत्यशुष्माय पूर्वीर्वैश्वानराय नृतमाय यह्वीः ॥ ४ ॥

बृहती इवेति बृहतीऽइव । सूनवे । रोदसी इति । गिरः । होता । मनुष्यः । न । दक्षः ।
स्वःऽवते । सत्यऽशुष्माय । पूर्वीः । वैश्वानराय । नृऽतमाय । यह्वीः ॥ ४ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vरोदसी द्यावापृथिव्यौ Vसूनवे स्वपुत्राय वैश्वानराय Vबृहतीइव प्रभूते इवाभूताम्। वैश्वानरस्य द्यावापृथिव्योः पुत्रत्वं मन्त्रान्तरे स्पष्टमवगम्यते–'उभा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसा' (ऋ. सं. ३. ३. ११) इति। महतो वैश्वानरस्य अवस्थानाय[1] द्यावापृथिव्यौ विस्तृते जाते इत्यर्थः। किंचायं Vहोता Vदक्षः समर्थः Vपूर्वीः बहुविधाः Vयह्वीः महतीः Vगिरः स्तुतीः Vवैश्वानराय अग्नये प्रायुङ्क्तेति शेषः। कीदृशाय। Vस्वर्वते शोभनगमनयुक्ताय Vसत्यशुष्माय अवितथबलाय Vनृतमाय अतिशयेन सर्वेषां नेत्रे। तत्र दृष्टान्तः। Vमनुष्यो Vन। यथा मनुष्यो लौकिको वन्दी दातारं प्रभुं बहुविधया स्तुत्या स्तौति तद्वत्॥ मनुष्यः। 'मनोर्जातावञ्यतौ षुक्च' इति जातौ गम्यमानायां मनुशब्दात् यत् षुगागमश्च। 'तित्स्वरितम्' इति स्वरितत्वम्। 'यतोऽनावः' इत्याद्युदात्तत्वं न भवति। तत्र हि ञ्यच् इति अनुवर्तते। स्वर्वते। सुपूर्वात् अर्तेः भावे विच्। ततो मतुप्। 'मादुपधायाः०' इति वत्वम्॥

दिवश्चित्ते बृहतो जातवेदो वैश्वानर प्र रिरिचे महित्वम्।
राजा कृष्टीनामसि मानुषीणां युधा देवेभ्यो वरिवश्चकर्थ॥ ५॥

दिवः। चित्। ते। बृहतः। जातऽवेदः। वैश्वानर। प्र। रिरिचे। महिऽत्वम्।
राजा। कृष्टीनाम्। असि। मानुषीणाम्। युधा। देवेभ्यः। वरिवः। चकर्थ॥ ५॥

हे Vजातवेदः जातानां वेदितः Vवैश्वानर अग्ने Vते तव Vमहित्वं माहात्म्यं Vबृहतः महतः Vदिवश्चित् द्युलोकादपि Vप्र Vरिरिचे प्रववृधे। किंच त्वं Vमानुषीणां मनोर्जातानां Vकृष्टीनां प्रजानां Vराजा Vअसि अधिपतिर्भवसि। तथा Vवरिवः असुरैरपहृतं धनं Vयुधा युद्धेन Vदेवेभ्यः Vचकर्थ देवाधीनमकार्षीः॥ वैश्वानर। पादादित्वात् आष्टमिकनिघाताभावः। रिरिचे। 'रिचिर् विरेचने'। अत्रोपसर्गवशात् तद्विपरीते आधिक्ये वर्तते। कृष्टीनाम्। 'नामन्यतरस्याम्' इति नाम उदात्तत्वम्। मानुषीणाम्। मानुषशब्दः 'मनोर्जातौ०' इति अञ्प्रत्ययान्तः। जातिलक्षणे ङीषि प्राप्ते तदपवादतया 'शार्ङ्गरवाद्यञः०' इति ङीन्। नित्त्वादाद्युदात्तत्वम्। 'ङ्याश्छन्दसि बहुलम्' (पा. सू. ६. १. १७८) इति बहुलवचनात् नाम उदात्तस्याभावः[2]। युधा। 'युध संप्रहारे' इत्यस्मात् संपदादिलक्षणो भावे क्विप्। वरिवः इति धननाम। 'नञ्विषयस्य०' इत्याद्युदात्तत्वम्॥

प्र नू महित्वं वृषभस्य वोचं यं पूरवो वृत्रहणं सचन्ते।
वैश्वानरो दस्युमग्निर्जघन्वाँ अधूनोत्काष्ठा अव शम्बरं भेत्॥ ६॥

प्र। नु। महिऽत्वम्। वृषभस्य। वोचम्। यम्। पूरवः। वृत्रऽहनम्। सचन्ते।
वैश्वानरः। दस्युम्। अग्निः। जघन्वान्। अधूनोत्। काष्ठाः। अव। शम्बरम्। भेत्॥६॥

अत्र वैश्वानरशब्देन मध्यमस्थानस्थो वैद्युतोऽग्निरभिधीयते। पूरवः इति मनुष्यनाम। Vपूरवः मनुष्याः Vवृत्रहणम् आवरकस्य मेघस्य हन्तारं Vयं वैश्वानरं Vसचन्ते वर्षार्थिन

१. ढ–अवस्थापनाय। २. ढ–उदात्तत्वाभावः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सेवन्ते तस्य [v]वृषभस्य अपां वर्षितुर्वैश्वानरस्य [v]महित्वं माहात्म्यं [v]नु क्षिप्रं [v]प्र [v]वोचं प्रब्रवीमि। किं तदित्यत आह। अयं [v]वैश्वानरः [v]अग्निः [v]दस्यु रसानां कर्मणां वा उपक्षयितारं[1] राक्षसादिकं [v]जघन्वान् हतवान्। तथा [v]काष्ठाः अपो वृष्ट्युदकानि [v]अधूनोत् अधोमुखान्यपातयत्। [v]शम्बरं तन्निरोधकारिणं मेघम् [v]अव [v]भेत् अवाभिनत् ॥ वोचम्। ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लुङि ' अस्यतिवक्ति° ' इत्यादिना च्लेः अङादेशः। ' वच उम् ' इति उमागमः। गुणः। ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः। जघन्वान्। हन्तेर्लिटः क्वसुः। ' अभ्यासाच्च ' इति अभ्यासादुत्तरस्य हकारस्य घत्वम्। ' विभाषा गमहन° ' इति विकल्पनात् इडभावः। भेत्। ' भिदिर् विदारणे '। लङि ' बहुलं छन्दसि ' इति विकरणस्य लुक्। ' हल्ङ्याब्भ्यः° ' इति तकारस्य लोपः। पूर्ववत् अडभावः। अत्र निरुक्तं—' प्र ब्रवीमि तन्महित्वं महाभाग्यं वृषभस्य वर्षितुरपां यं पूरवः पूरयितव्या मनुष्या वृत्रहणं मेघहनं सचन्ते सेवन्ते वर्षकामा दस्युर्दस्यतेः क्षयार्थादुपदस्यन्त्यस्मिन्नसा उपदासयति कर्माणि तमग्निर्वैश्वानरो जघन्वाधूनोदपः काष्ठा अभिनच्छम्बरं मेघम् ' ( निरु. ७. २३ ) इति ॥ अत्रेदं चिन्तनीयम्। कोऽसौ वैश्वानर इति। तत्र केचिदाहुः। मध्यमस्थानस्थो वायुरिन्द्रो वा वैश्वानरः। तस्य हि वर्षकर्मणा संस्तव उपपद्यते; न त्वग्नेः पृथिवीस्थानत्वादिति। अन्ये त्वेवं मन्यन्ते। द्युस्थानः सूर्यो वैश्वानर इति। युक्तिं चाहुः। प्रातःसवनादीनि त्रीणि सवनानि लोकत्रयात्मकानि। तत्र तृतीयसवनं प्राप्तो यजमानः स्वर्गं प्राप्त[2] इति[2] पृथिव्याः प्रच्युतो भवेत्। तत्प्रच्युतिपरिहाराय आग्निमारुतेऽन्तिमे शस्त्रे होता स्वर्गात् भूमिं प्रत्यवरोहति। कथमिति तदुच्यते। इतरशस्त्रवत् स्तोत्रियतृचेन प्रारम्भमुक्त्वा द्युस्थानसंबन्धिना वैश्वानरीयेण सूक्तेन शस्त्रं प्रारभते। ततो मध्यमस्थानसंबन्धिनं रुद्रं मरुतश्च प्रति तद्देवत्यसूक्तपाठेनावरोहति। तत्र पृथिवीस्थानमग्निम्। यद्यत्र वैश्वानरः सूर्यो न स्यात् तदानीमवरोहो नोपपद्यते। तदेतन्मतद्वयमप्यनुपपन्नम्। अयमेवाग्निर्वैश्वानरः। कुतः। वैश्वानरशब्दनिर्वचनानुरोधात्। विश्वेषां नराणां लोकान्तरं प्रति नेतृतया संबन्धी वैश्वानरः। तथा चाम्नातं—' वैश्वानर पुत्रः पित्रे लोककृज्जातवेदो वहेमं सुकृतां यत्र लोकाः ' इति। यद्वा। विश्वे सर्वे नरा एनमग्निं यज्ञादौ प्रीणयन्तीति तत्संबन्धाद्वैश्वानरः। यद्वा। विश्वान् सर्वान् प्राणिनः प्रत्यृतो गच्छतः इति विश्वानरौ मध्यमोत्तमौ। ' ऋ गतौ ' इत्यस्मात् पचाद्यच्। लुगभावश्छान्दसः। ताभ्यामुत्पन्नत्वादयमग्निर्वैश्वानरः। वैद्युतोऽग्निर्हि मध्यमसकाशात् जायते। अशनिपतनानन्तरमयमेव पार्थिवोऽग्निः संपद्यते। आदित्यसकाशादपि घर्मकाले सूर्यकान्तादिमणिष्वग्नेरुत्पत्तिः प्रसिद्धा। तस्मान्नामनिर्वचनानुरोधेनायमेवाग्निर्वैश्वानर इत्येतदुपपन्नम्। अस्यापि वर्षकर्मणा स्तुतिः संभवति। ' अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ' ( मनु. ३. ७६ ) इति स्मरणात्। प्रत्यवरोहोऽपि न कर्तव्यः। तृतीयसवनस्य भाक्तस्वर्गत्वात्[3]। एतत्सर्वं यास्केन ' वैश्वानरः कस्मात् ' ( निरु. ७. २१ ) इत्यादिना बहुधा प्रपञ्चितम्। अत्र यदनुक्तं तत्सर्वं तत्रैवानुसंधेयम् ॥

वैश्वानरो महिम्ना विश्वकृष्टिर्भरद्वाजेषु यजतो विभावा।
शातवनेये शतिनीभिरग्निः पुरुणीथे जरते सूनृतावान् ॥ ७ ॥

वैश्वानरः। महिम्ना। विश्वऽकृष्टिः। भरत्ऽवाजेषु। यजतः। विभाऽवा।
शातऽवनेये। शतिनीभिः। अग्निः। पुरुऽनीथे। जरते। सूनृताऽवान् ॥ ७ ॥

---

१. ढ-द-ध-न—उपक्षपयितारम्। २. ढ—प्राप्तुते इति। ३. स—व्याकृतस्वर्गत्वात्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vवैश्वानरः अग्निः Vमहिम्ना महत्त्वेन Vविश्वकृष्टिः। कृष्टिः इति मनुष्यनाम। विश्वे सर्वे मनुष्या यस्य स्वभूताः स तथोक्तः। Vभरद्वाजेषु पुष्टिकरहविर्लक्षणान्नवत्सु यागेषु यद्वा एतत्संज्ञेषु ऋषिषु Vयजतः यष्टव्यः Vविभावा विशेषेण प्रकाशयिता Vसूनृतावान्। सूनृता प्रिया[1] सत्या वाक्[1] तद्युक्तः। एवंभूतः Vअग्निः Vशातवनेये। शतसंख्याकान् क्रतून् वनति संभजते इति शतवनिः तस्य पुत्रः शातवनेयः। तस्मिन् Vपुरुणीथे बहूनां नेतरि एतत्संज्ञके राजनि च Vशतिनीभिः बहुभिः[2] स्तुतिभिः Vजरते स्तूयते॥ भरद्वाजेषु। भरन्ति पोषयन्ति भोक्तॄनिति भरन्तः। तादृशा वाजा येषु। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे प्राप्ते मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम्। यजतः। 'भृमृदृशियजिपर्वपच्यमितमिनमिहर्येभ्योऽतच्' (उ. सू. ३. ३९०) इति यजतेः अतच्प्रत्ययः। विभावा। 'आ दीप्तौ'। 'आतो मनिन्°' इति वनिप्। तस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते। शातवनेये। 'इन्सर्वधातुभ्यः' इति इन्प्रत्ययः शतवनिशब्दः। 'इतश्चानिजः' (पा. सू. ४. १. १२२) इति ढक्। 'कितः' (पा. सू. ६. १. १६५) इत्यन्तोदात्तत्वम्। शतिनीभिः। शतशब्दात् मत्वर्थीय इनिः। 'ऋन्नेभ्यः°' इति ङीप्। पुरुणीथे। 'पूर्वपदात्संज्ञायामगः' (पा. सू.८. ४. ३) इति णत्वम्। जरते। व्यत्ययेन कर्मणि कर्तृप्रत्ययः॥ ॥२५॥

'वह्निम्' इति पञ्चर्चं तृतीयं सूक्तं नोधस आर्षं त्रैष्टुभमाग्नेयम्। अनुक्रान्तं च–'वह्निं पञ्च' इति। प्रातरनुवाकस्याग्नेये क्रतौ त्रैष्टुभे छन्दसीदं सूक्तमाश्विने शस्त्रे च। तथा च सूत्रितं–'वह्निं यशसमुप प्र जिन्वन्निति त्रीणि' (आश्व. श्रौ. ४. १३) इति॥

वह्निं यशसं विदथस्य केतुं सुप्राव्यं दूतं सद्योअर्थम्।
द्विजन्मानं रयिमिव प्रशस्तं रातिं भरद्भृगवे मातरिश्वा॥ १॥

वह्निम्। यशसम्। विदथस्य। केतुम्। सुप्रऽअव्यम्। दूतम्। सद्यःऽअर्थम्।
द्विऽजन्मानम्। रयिम्ऽइव। प्रऽशस्तम्। रातिम्। भरत्। भृगवे। मातरिश्वा॥ १॥

Vवह्निं हविषां वोढारं Vयशसं यशस्विनं Vविदथस्य Vकेतुं यज्ञस्य प्रकाशयितारं Vसुप्राव्यं सुष्ठु प्रकर्षेण रक्षितारं Vदूतं देवैर्हविर्वहनलक्षणे दूत्ये नियुक्तं Vसद्योअर्थं यदा हवींषि जुह्वति सद्यस्तदानीमेव हविर्भिः सह देवान् गन्तारम्। यद्वा। सद्यः अर्थम् अरणं गमनं यस्य तम्। Vद्विजन्मानं द्वयोर्द्यावापृथिव्योरुरण्योर्वा जायमानं Vरयिमिव धनमिव Vप्रशस्तं प्रख्यातम् एवंभूतमग्निं Vमातरिश्वा वायुः Vभृगवे एतत्संज्ञकाय महर्षये Vरातिं Vभरत् मित्रमहरत्। अकरोदित्यर्थः। 'रातिना संभाव्य' (आप. गृ. १२. १४) इत्यत्र रातिर्मित्रमिति[3] कपर्दिनोक्तम्। रातिः पुत्र इत्येके। एतदर्थप्रतिपादकं मन्त्रान्तरं च भवति–'रातिं भृगूणामुशिजं कविक्रतुम्' (ऋ. सं. ३. २. ४) इति। वह्निम्। 'वहिश्रियुश्रुयुद्रुस्रुहाह्वरिभ्यो नित्' इति वहतेर्निप्रत्ययः। निद्वद्भावादाद्युदात्तत्वम्। यशसम्। यशस्शब्दात् उत्तरस्य विनो लुक्। व्यत्ययेनान्तोदात्तत्वम्। यद्वा। अर्शआदित्वात् अच्। स्वरः पूर्ववत्। सुप्राव्यम्। सुष्ठु प्रकर्षेणावति रक्षतीति सुप्रावीः। उपसर्गद्वयोपसृष्टात् अवतेः 'अवितृस्तृतन्त्रिभ्य ईः' (उ. सू. ३. ४३८) इति ईकारप्रत्ययः। 'वा छन्दसि' इति 'अमि पूर्वः' इत्यस्य विकल्पे सति यणादेशः। 'उदात्तस्वरितयोर्यणः°' इति स्वरितत्वम्। सद्योअर्थम्। 'उषिकुषिगार्तिभ्यस्थन्' इति

---

१. ढ–प्रियसत्यात्मिका वाक्; स–प्रियसत्या वाक्। २. ढ–बहुविधाभिः। ३. ढ–रातिर्मित्रमिति हि।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अर्तेः कर्तरि थन्प्रत्ययः । सद्य एवार्थो गन्ता सद्योऽर्थः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । यदि तु 'अव्यये नञ्कुनिपातानामिति वक्तव्यम्' (पा. सू. ६. २. २. ३) इति अव्ययग्रहणेन त्रितयं गृह्येत तर्हि बहुव्रीहिस्वरो भविष्यति । मातरिश्वा । सर्वनिर्माणहेतुत्वात् माता अन्तरिक्षम् । श्वसितिरत्र गतिकर्मा । मातरि अन्तरिक्षे श्वसिति गच्छतीति मातरिश्वा । 'श्वन्नुक्षन्०' इत्यादौ निपातनात् रूपसिद्धिः । यद्वा । मातरि अन्तरिक्षे शु आशु असति गच्छतीति मातरिश्वा । 'अस गतिदीप्त्यादानेषु' इत्यस्मात् औणादिको ड्वन्प्रत्ययः । एतच्च यास्केनोक्तम् (निरु. ७. २६) ॥

अस्य शासुरुभयासः सचन्ते हविष्मन्त उशिजो ये च मर्ताः ।
दिवश्चित्पूर्वो न्यसादि होतापृच्छ्यो विश्पतिर्विक्षु वेधाः ॥ २ ॥

अस्य । शासुः । उभयासः । सचन्ते । हविष्मन्तः । उशिजः । ये । च । मर्ताः ।
दिवः । चित् । पूर्वः । नि । असादि । होता । आऽपृच्छ्यः । विश्पतिः । विक्षु । वेधाः ॥२॥

vशासुः शासितुः vअस्य अग्नेः vउभयासः उभयेऽपि देवा मनुष्याश्च । यद्वा । स्तुतिभिः स्तोतारो यज्ञैर्यजमानाश्च इममग्निं शासितारं vसचन्ते सेवन्ते । vउशिजः कामयमाना देवाः vहविष्मन्तः हविषा युक्ताः vये vच vमर्ताः मरणधर्माणो यजमानाः । यद्वा । उशिजः इति मेधाविनाम । उशिजः मेधाविनः स्तोतारो हविष्मन्तः हविर्युक्ताः मर्ताः यजमानाः । किंच अयं vहोता होमनिष्पादकोऽग्निः vदिवश्चित् आदित्यादपि vपूर्वः उषःसु[1] वर्तमानो भूत्वा अग्निहोत्रहोमार्थं vविक्षु यजमानेषु vन्यसादि अध्वर्युणा अग्न्यायतने न्यधायि स्थाप्यते । कीदृशो होता । vआपृच्छ्यः आप्रष्टव्यः पूज्य इत्यर्थः । vविश्पतिः विशां प्रजानां पालयिता vवेधाः विधाताभिमतफलस्य कर्ता ॥ शासुः । 'शासु अनुशिष्टौ' । 'तृन्तृचौ शंसिशसिशासिक्षदादिभ्यः संज्ञायां चानिटौ' (उ. सू. २. २५०) इति तृन् इडागमाभावश्च । षष्ठ्येकवचने तकारलोपश्छान्दसः । नित्त्वादाद्युदात्तत्वम् । उशिजः । 'वशः कित्' (उ. सू. २. २२९) इति वष्टेः इजिप्रत्ययः । अहिज्यादिना संप्रसारणम् । मर्ताः । 'मृङ् प्राणत्यागे' । 'असिहसिमृग्रिण्वामि०' इत्यादिना तन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । आपृच्छ्यः । 'प्रच्छ ज्ञीप्सायाम्' । आङ्पूर्वात् अस्मात् 'छन्दसि निष्टर्क्य०' (पा. सू. ३. १. १२३) इत्यादौ[2] क्यप्प्रत्ययो निपातितः । अहिज्यादिना संप्रसारणम् । क्यपः पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते । विश्पतिः । 'पत्यावैश्वर्ये' इति पूर्वपदप्रकृतिस्वरत्वे प्राप्ते 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वम् ॥

तं नव्यसी हृद आ जायमानमस्मत्सुकीर्तिर्मधुजिह्वमश्याः ।
यमृत्विजो वृजने मानुषासः प्रयस्वन्त आयवो जीजनन्त ॥ ३ ॥

तम् । नव्यसी । हृदः । आ । जायमानम् । अस्मत् । सुऽकीर्तिः । मधुऽजिह्वम् । अश्याः ।
यम् । ऋत्विजः । वृजने । मानुषासः । प्रयस्वन्तः । आयवः । जीजनन्त ॥ ३ ॥

---

१. ढ–उषसि । २. ढ–इत्यादिना ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]नव्यसी नवतरा [V]सुकीर्तिः सुष्ठु कीर्तयित्री [V]अस्मत् अस्माकं स्तुतिः [V]हृदः हृद्यवस्थितात् प्राणात् [V]जायमानम् उत्पद्यमानम्। अग्निर्हि वायोरुत्पद्यते[1] वायुश्च प्राण एव। 'यः प्राणः स वायुः' इत्याम्नानात्। [V]मधुजिह्वं मादयितृज्वालम्। एवंभूतं [V]तम् अग्निम् [V]आ [V]अश्याः आभिमुख्येन व्याप्नोतु। [V]वृजने संग्रामे प्राप्ते सति [V]आयवः मनुष्याः [V]यम् अग्निं [V]जीजनन्त यज्ञार्थमुदपादयन्। कीदृशा मनुष्याः। [V]ऋत्विजः ऋतौ काले यष्टारः [V]मानुषासः मनोः पुत्राः [V]प्रयस्वन्तः हविर्लक्षणान्नोपेताः॥ नव्यसी। नवीयसीत्यत्र ईकारलोपश्छान्दसः। हृदः। अत्र हृदयशब्देन तत्स्थः प्राणो लक्ष्यते। 'पदन्०' इत्यादिना हृदयशब्दस्य हृदादेशः। जायमानम्। 'जनी प्रादुर्भावे'। श्यनि 'श्नाजनोर्झा' इति झादेशः। अदुपदेशात् लसार्वधातुकानुदात्तत्वे श्यनो नित्त्वादाद्युदात्तत्वम्। अस्मत्। 'सुपां सुलुक्०' इति विभक्तेर्लुक्। अश्याः। 'अशू व्याप्तौ'। लिङि 'बहुलं छन्दसि' इति विकरणस्य लुक्। व्यत्ययेन परस्मैपदमध्यमौ। जीजनन्त। 'जनी प्रादुर्भावे'। ण्यन्तात् लुङि च्लेः चङादेशः। द्विर्भावहलादिशेषसन्वद्भावेत्वदीर्घाः। अदुपदेशात् लसार्वधातुकानुदात्तत्वे चङ एव स्वरे प्राप्ते व्यत्ययेन अभ्यस्ताद्युदात्तत्वम्॥

उशिक्पावको वसुर्मानुषेषु वरेण्यो होताधायि विक्षु।
दमूना गृहपतिर्दम आँ अग्निर्भुवद्रयिपती रयीणाम्॥ ४॥

उशिक्। पावकः। वसुः। मानुषेषु। वरेण्यः। होता। अधायि। विक्षु।
दमूनाः। गृहऽपतिः। दमे। आ। अग्निः। भुवत्। रयिऽपतिः। रयीणाम्॥ ४॥

[V]उशिक् कामयमानः [V]पावकः शोधकः [V]वसुः निवासयिता [V]वरेण्यः वरणशीलः[2] एवंभूतः [V]होता अग्निः [V]विक्षु यज्ञगृहं प्रविष्टेषु [V]मानुषेषु यजमानेषु [V]अधायि स्थाप्यते। स च [V]अग्निः [V]दमूनाः रक्षसां दमनकरेण मनसा युक्तः [V]गृहपतिः गृहाणां पालयिता च सन् [V]दमे यज्ञगृहे [V]रयिपतिः धनाधिपतिः [V]आ [V]भुवत् आ समन्ताद्भवति। न केवलमेकस्य रयेरपि तु सर्वेषामित्याह [V]रयीणाम् इति। यद्वा। रयीणां मध्ये उत्कृष्टं यद्धनं तस्य पतिरित्यर्थः॥ अधायि। 'छन्दसि लुङ्लङ्लिटः' इति वर्तमाने कर्मणि लुङि च्लेः चिणादेशे 'आतो युक् चिण्कृतोः' इति युगागमः। दमयति राक्षसादिकमिति दमूनाः। 'दम उपशमे'। 'दमेरूनसिः (उ. सू. ४. ६७४) इति औणादिक ऊनसिप्रत्ययः। यास्कस्त्वाह—'दमूना दममना वा दानमना वा दान्तमना वापि वा दम इति गृहनाम तन्मनाः स्यात्' (निरु. ४. ४) इति। दम आँ अग्निः। 'आङोऽनुनासिकश्छन्दसि' इति आकारस्य सानुनासिकत्वं प्रकृतिभावश्च। भुवत्। लेटि अडागमः। 'इतश्च लोपः०' इति इकारलोपः। रयिपतिः। 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वम्। रयीणाम्। 'नामन्यतरस्याम्' इति नाम उदात्तत्वम्॥

---

१. ढ-स—वायोरुत्पद्यते। वायोरग्निरिति श्रुतेः। २. ढ—वरणीयः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तं त्वा वयं पतिमग्ने रयीणां प्र शंसामो मतिभिर्गोतमासः ।
आशुं न वाजंभरं मर्जयन्तः प्रातर्मक्षू धियावसुर्जगम्यात् ॥ ५ ॥

तम् । त्वा । वयम् । पतिम् । अग्ने । रयीणाम् । प्र । शंसामः । मतिऽभिः । गोतमासः ।
आशुम् । न । वाजम्ऽभरम् । मर्जयन्तः । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥ ५ ॥

[v]गोतमासः गोतमगोत्रोत्पन्नाः [v]वयम् । नोधसः स्तोतुरेकत्वेऽप्यात्मनि पूजार्थं बहुवचनम् । हे [v]अग्ने [v]रयीणां धनानां [v]पतिं रक्षितारं तादृशं [v]त्वा त्वां [v]मतिभिः मननीयैः स्तोत्रैः [v]प्र [v]शंसामः प्रकर्षेण स्तुमः । किं कुर्वन्तः । [v]वाजंभरं वाजस्य हविर्लक्षणान्नस्य भर्तारं त्वां [v]मर्जयन्तः मार्जयन्तः । तत्र दृष्टान्तः । [v]आशुं [v]न अश्वमिव । यथाश्वमारोहन्तः पुरुषास्तस्य वहनप्रदेशं हस्तैर्निमृजन्ति तद्वत् वयमपि अग्नेर्हविर्वहनप्रदेशं निमृजन्तः इत्यर्थः । तथा च अग्निसंमार्जनप्रकरणे वाजसनेयिभिराम्नातम्— 'अथ मध्ये[1] तूष्णीमेव त्रिः संमार्ष्टि यथा युक्त्वा प्रेहि वहेति व्रजेदेवमेतदग्निं युक्त्वोपक्षिपति प्रेहि देवेभ्यो हव्यं वह' इति । [v]धियावसुः कर्मणा बुद्ध्या वा प्राप्तधनः सोऽग्निः [v]प्रातः श्वोभूतस्य[2] अह्नः प्रातःकाले [v]मक्षु शीघ्रं [v]जगम्यात् आगच्छतु ॥ मतिभिः । 'मन ज्ञाने' इत्यस्मात् कर्मणि क्तिन् । 'मन्त्रे वृषेष०' इत्यादिना तस्योदात्तत्वम् । वाजंभरम् । अग्नेरेषा वैदिकी संज्ञा । 'संज्ञायां भृतृवृजि०' (पा. सू. ३. २. ४६) इति वाजशब्दे कर्मण्युपपदे खच्प्रत्ययः । 'अरुर्द्विषदजन्तस्य मुम्' (पा. सू. ६. ३. ६७) इति मुमागमः । 'चितः' इत्यन्तोदात्तत्वम् । मर्जयन्तः । संज्ञापूर्वकस्य विधेरनित्यत्वात् 'मृजेर्वृद्धिः' (पा. सू. ७. २. ११४) इति वृद्ध्यभावः । अदुपदेशात् लसार्वधातुकानुदात्तत्वे णिच एव स्वरः शिष्यते । जगम्यात् । लिङि 'बहुलं छन्दसि' इति शपः श्लुः ॥ ॥२६॥

'अस्मा इदु प्र तवसे' इति षोडशर्चं चतुर्थं सूक्तं नोधस आर्षमैन्द्रं त्रैष्टुभम् । अनुक्रान्तं च— 'अस्मा इदु षोळश' इति । अस्य सूक्तस्य नोधा द्रष्टा इत्येतद्ब्राह्मणे समाम्नायते—'अस्मा इदु प्र तवसे तुरायेति नोधास्त एते प्रातःसवने' (ऐ. ब्रा. ६. १८) इति । षळहस्तोत्रियावापवत्सु चतुर्विंशमहाव्रतादिष्वहःसु माध्यंदिने सवने ब्राह्मणाच्छंसिशस्त्रे 'ब्रह्मणा ते ब्रह्मयुजा' इत्यस्या आरम्भणीयाया ऊर्ध्वमहीनसूक्तसंज्ञमेतच्छंसनीयम् । तथा च सूत्रितम्– 'अस्मा इदु प्र तवसे शासद्वह्निरितीतरावहीनसूक्ते' (आश्व. श्रौ. ७. ४) इति । ब्राह्मणं च भवति–'त एते प्रातःसवने षळहस्तोत्रियाञ्छस्त्वा माध्यंदिनेऽहीनसूक्तानि शंसन्ति' इति ॥

अस्मा इदु प्र तवसे तुराय प्रयो न हर्मि स्तोमं माहिनाय ।
ऋचीषमायाध्रिगव ओहमिन्द्राय ब्रह्माणि रातमा ॥ १ ॥

अस्मै । इत् । ऊँ इति । प्र । तवसे । तुराय । प्रयः । न । हर्मि । स्तोमम् । माहिनाय ।
ऋचीषमाय । अध्रिऽगवे । ओहम् । इन्द्राय । ब्रह्माणि । रातऽतमा ॥ १ ॥

---

१. ढ–मध्यमे । २. ढ–सुत्यस्य ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]इत् [V]उ इति निपातद्वयं पादपूरणे[1]। 'अथापि पादपूरणाः[2] कर्मीमिद्धिति' इति यास्कः। यद्वा अवधारणार्थम्। [V]तवसे प्रवृद्धाय [V]तुराय त्वरमाणाय। यद्वा। तुर्वि हिंसायाम्। [V]माहिनाय गुणैर्महते [V]ऋचीषमाय ऋचा समाय। यादृशी स्तुतिः क्रियते तत्समायेत्यर्थः। [V]अधिगवे अधृतगमनाय। अप्रतिहतगमनायेत्यर्थः। तथा च यास्कः—'अधृतगमनकर्मवन्निन्द्रोऽप्यधिगुरुच्यते' (निरु. ५. ११) इति। एवंभूताय [V]अस्मै [V]इन्द्राय [V]स्तोमं स्तोत्रं [V]प्र [V]हर्मि प्रहरामि करोमीत्यर्थः। तत्र दृष्टान्तः। [V]प्रयो [V]न। प्रयः इति अन्ननाम। यथा बुभुक्षिताय पुरुषाय कश्चिदन्नं प्रहरति। कीदृशं स्तोमम्। [V]ओहं वहनीयं प्रापणीयं वा। अत्यन्तोत्कृष्टमित्यर्थः। न केवलं स्तोमं किं तर्हि [V]ब्रह्माणि हविर्लक्षणान्यन्नानि। कीदृशानि। [V]राततमा पूर्वैर्यजमानैरतिशयेन दत्तानि। इन्द्रं स्तुत्या हविषा च परिचरेमेति भावः॥ तुराय। 'तुर त्वरणे'। इगुपधलक्षणः कः। यद्वा। तुर्वी हिंसार्थः। तुर्वतीति तुरः। पचाद्यचि छान्दसो वलोपः। हर्मि। 'हृञ् हरणे'। 'बहुलं छन्दसि' इति शपो लुक्। माहिनाय। 'मह पूजायाम्' इत्यस्मात् 'महेरिनण् च' (उ. सू. २. २१४) इति इनण्प्रत्ययः उपधावृद्धिश्च। ऋचीषमाय। 'ऋचीषम ऋचा समः' (निरु. ६. २३) इति यास्कः। 'तृतीया तत्कृत°' (पा. सू. २. १. ३०) इति समासः। तृतीयापूर्वपदप्रकृतिस्वरत्वम्। पृषोदरादित्वात् ईकारोपजनः। सुपामादित्वात् षत्वम्। केचिदाहुः। 'ऋच स्तुतौ' इत्यस्मात् 'इगुपधात्कित्' इति इप्रत्ययः। 'कृदिकारादक्तिनः' इति ङीष्। ऋची स्तुतिः। तया समः। पूर्ववत् षत्वम्। अस्मिन् पक्षे तृतीयापूर्वपदप्रकृतिस्वरत्वे सति ङीषः उदात्तत्वेन भवितव्यम्। तथा च न दृश्यते। तस्मात् स्वरश्चिन्तनीयः। यद्वा। दिवोदासादिर्द्रष्टव्यः। अधिगवे। अधृतोऽन्येन अनिवारितो गौर्गमनं यस्य स तथोक्तः। 'गोस्त्रियोरुपसर्जनस्य' (पा.सू १.२.४८) इति ह्रस्वत्वम्। पृषोदरादित्वात् अधृतशब्दस्य अधिभावः। ओहम्। वहेतेः कर्मणि घञि छान्दसं संप्रसारणम्। यद्वा। 'तुहिर् दुहिर् उहिर् अर्दने' इत्यस्मात् ओहतेः पूर्ववत् घञ्। राततमा। 'रा दाने' इत्यस्मात् निष्ठान्तादातिशायनिकस्तमप्। 'शेश्छन्दसि°' इति शेर्लोपः॥

**अस्मा इदु प्रयइव प्र यंसि भरामि आङ्गूषं बाधे सुवृक्ति।**
**इन्द्राय हृदा मनसा मनीषा प्रत्नाय पत्ये धियो मर्जयन्त॥ २॥**

**अस्मै। इत्। ऊँ इति। प्रयःऽइव। प्र। यंसि। भरामि। आङ्गूषम्। बाधे। सुऽवृक्ति।**
**इन्द्राय। हृदा। मनसा। मनीषा। प्रत्नाय। पत्ये। धियः। मर्जयन्त॥ २॥**

[V]अस्मा [V]इदु अस्मै एव इन्द्राय। प्रयः इति अन्ननाम। [V]प्रयइव अन्नमिव [V]प्र [V]यंसि प्रयच्छामि। तदेव स्पष्टीक्रियते। [V]बाधे शत्रूणां बाधनाय समर्थं [V]सुवृक्ति सुष्ठ्ववर्जकम् [V]आङ्गूषं स्तोत्ररूपमाघोषं [V]भरामि संपादयामि। अन्येऽपि स्तोतारः [V]प्रत्नाय पुराणाय [V]पत्ये स्वामिने [V]इन्द्राय [V]हृदा हृदयेन [V]मनसा तदन्तर्वर्तिनान्तःकरणेन [V]मनीषा मनीषया तज्जन्येन ज्ञानेन च [V]धियः स्तुतीः कर्माणि वा [V]मर्जयन्त मार्जयन्ति संस्कुर्वन्ति॥ प्र यंसि। 'यम उपरमे' इत्यस्मात् लटि पुरुषव्यत्ययः। 'बहुलं छन्दसि' इति शपो लुक्। आङ्गूषम्। 'आङ्गूषः स्तोम आघोषः' (निरु. ५. ११) इति यास्कः। आङ्पूर्वात् घुषेः घञि पृषोदरादित्वात् घो इत्यस्य गूआदेशः आङो ङकारस्य लोपाभावश्च। थाथादिना उत्तरपदान्तोदात्तत्वम्। बाधे। 'बाधृ विलोडने' इत्यस्मात् 'कृत्यार्थे तवैकेन्°' इति भावे

---

१. ढ-न-स-पदपूरणे। २. ढ-न-स-पदपूरणाः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

केन्प्रत्ययः । एजन्तत्वात् अव्ययत्वेन सुपो लुक् । मनीषा । ' सुपां सुलुक्° ' इति तृतीयाया डादेशः । पत्ये । ' पतिः समास एव ' ( पा. सू. १. ४. ८ ) इति धिसंज्ञायाः समासविषयत्वात् ' घेर्ङिति ' इति गुणाभावे यणादेशः ॥

अस्मा इदु त्यमुपमं स्वर्षां भराम्याङ्गूषमास्येन ।
मंहिष्ठमच्छोक्तिभिर्मतीनां सुवृक्तिभिः सूरिं वावृधध्यै ॥ ३ ॥

अस्मै । इत् । ऊँ इति । त्यम् । उपऽमम् । स्वःऽसाम् । भरामि । आङ्गूषम् । आस्येन ।
मंहिष्ठम् । अच्छोक्तिऽभिः । मतीनाम् । सुवृक्तिऽभिः । सूरिम् । ववृधध्यै ॥ ३ ॥

vअस्मा vइदु अस्मै एव इन्द्राय vत्यं तं प्रसिद्धम् vउपमम् उपमानहेतुभूतं vस्वर्षां सुष्ठुरणीयस्य धनस्य दातारं vसूरिं विपश्चितमिन्द्रं vवावृधध्यै वर्धयितुं vसुवृक्तिभिः सुष्ठुवर्जकैः । समर्थैरित्यर्थः । vमतीनां स्तुतीनां संबन्धिभिः vअच्छोक्तिभिः स्वच्छैर्वचोभिः vमंहिष्ठम् अतिशयेन प्रवृद्धमेवंलक्षणम् vआङ्गूषम् आघोषम् vआस्येन मुखेन vभरामि करोमीत्यर्थः ॥ उपमम् । उपमीयतेऽनेनेति उपमः । ' घञर्थे कविधानम्° ' इति करणे कप्रत्ययः । ' आतो लोप इटि च ' इति आकारलोपः । स्वर्षाम् । सुपूर्वात् अर्तेः विजन्तः स्वर्शब्दः । ' षणु दाने ' । ' जनसनखनक्रमगमो विट् ' । ' विड्वनोरनुनासिकस्यात् ' इति आत्वम् । ' सनोतेरनः ' ( पा. सू. ८. ३. १०८ ) इति षत्वम् । भरामि । पादादित्वात् निघाताभावः । अच्छोक्तिभिः । अच्छा उक्तयो येषाम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । मतीनाम् । ' नामन्यतरस्याम् ' इति नाम उदात्तत्वम् । ववृधध्यै । ' वृधु वृद्धौ ' इत्यस्मात् अन्तर्भावितण्यर्थात् ' तुमर्थे सेसेन्° ' इति कध्यैप्रत्ययः । कित्त्वात् गुणाभावः । द्विर्भावश्छान्दसः । यद्वा यङ्लुगन्तादस्मिन्प्रत्यये आगमानुशासनस्यानित्यत्वात् रीगाद्यभावः[1] । ' अन्येषामपि दृश्यते ' इति सांहितिकम् अभ्यासस्य दीर्घत्वम् । प्रत्ययाद्युदात्तत्वम् ॥

अस्मा इदु स्तोमं सं हिनोमि रथं न तष्टेव तत्सिनाय ।
गिरश्च गिर्वाहसे सुवृक्तीन्द्राय विश्वमिन्वं मेधिराय ॥ ४ ॥

अस्मै । इत् । ऊँ इति । स्तोमम् । सम् । हिनोमि । रथम् । न । तष्टाऽइव । तत्ऽसिनाय ।
गिरः । च । गिर्वाहसे । सुऽवृक्ति । इन्द्राय । विश्वम्ऽइन्वम् । मेधिराय ॥ ४ ॥

अस्मै एव इन्द्राय vस्तोमं शस्त्ररूपं स्तोत्रं vसं vहिनोमि प्रेरयामि । तत्र दृष्टान्तः । vतत्सिनाय । सिनम् इति अन्ननाम । ' सिनमन्नं भवति सिनाति भूतानि ' ( निरु. ५. ५ ) इति यास्कः । तेन रथेन सिनमन्नं यस्य स तथोक्तः । तस्मै रथस्वामिने vतष्टेव तष्टा तक्षको रथनिर्माता vरथं vन यथा रथं प्रेरयति तद्वत् । इव इत्येतत् पादपूरणम् । तथा vगिर्वाहसे गीर्भिः स्तुतिभिरह्यमानाय vइन्द्राय vगिरश्च शस्त्रसंबन्धिनीः केवला ऋचश्च vसुवृक्ति शोभनमावर्जनं यथा भवति तथा प्रेरयामि । तथा vमेधिराय

---

१. ढ–रिगाद्यभावः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मेधाविने इन्द्राय ᵛविश्वमिन्वं विश्वव्यापकं विश्वैर्व्याप्तं[1] सर्वोत्कृष्टं हविश्च सं हिनोमीत्यनुषङ्गः ॥ हिनोमि । ' हि गतौ वृद्धौ च ' । स्वादिश्वात् श्नुः । तष्टेव । ' तक्षू त्वक्षू तनूकरणे ' । ताच्छीलिकस्तृन् । ऊदित्त्वात् पक्षे इडभावः । ' स्कोः संयोगाद्योरन्ते च ' इति ककारलोपः । नित्त्वादाद्युदात्तत्वम् । तत्सिनाय । सिनशब्दः ' षिञ् बन्धने ' इत्यस्मात् ' इण्षिञ्जिदृक्ष्यविभ्यो नक् ' ( उ. सू. ३. २८२ ) इति नक्प्रत्ययान्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । गिर्वाहसे । ' वहिहाधाभ्यश्छन्दसि ' इति वहतेः केवलाद्विहितः असुन्प्रत्ययः ' गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च ' इति वचनात् कारकपूर्वस्यापि भवति पूर्वपदप्रकृतिस्वरत्वं च । ' णित् ' इत्यनुवृत्तेः उपधावृद्धिः । ' हलि च ' इति दीर्घाभावश्छान्दसः । विश्वमिन्वम् । ' इवि व्याप्तौ ' । विश्वमिन्वति व्याप्नोतीति विश्वमिन्वम् । पचाद्यच् । लुगभावश्छान्दसः । यद्वा । खच्प्रत्ययो बहुलवचनादस्मादपि धातोर्द्रष्टव्यः । मेधिराय । मेधा अस्यास्तीति मेधिरः । ' मेधास्रथाभ्यामिरज्निरचौ वक्तव्यौ ' ( पा. सू. ५. २. १०९. ३ ) इति मत्वर्थीय इरन् । नित्त्वादाद्युदात्तत्वम् ॥

अस्मा इदु सप्तिमिव श्रवस्येन्द्रायार्कं जुह्वा३ समञ्जे ।
वीरं दानौकसं वन्दध्यै पुरां गूर्तश्रवसं दर्माणम् ॥ ५ ॥

अस्मै । इत् । ऊँ इति । सप्तिम्ऽइव । श्रवस्या । इन्द्राय । अर्कम् । जुह्वा । सम् । अञ्जे ।
वीरम् । दानऽओकसम् । वन्दध्यै । पुराम् । गूर्तऽश्रवसम् । दर्माणम् ॥ ५ ॥

अस्मै एव ᵛइन्द्राय ᵛअर्कं स्तुतिरूपं मन्त्रं ᵛश्रवस्या श्रवस्यया अन्नेच्छया । अन्नलाभायेत्यर्थः । ᵛजुह्वा आह्वानसाधनेन वागिन्द्रियेण ᵛसमञ्जे समक्तं करोमि । एकीकरोमीत्यर्थः । तत्र दृष्टान्तः । ᵛसप्तिमिव । यथा अन्नलाभाय गन्तुकामः पुमानश्वं रथेनैकीकरोति तद्वत् । एकीकृत्य च ᵛवीरं शत्रुक्षेपणकुशलं ᵛदानौकसं दानानामेकनिलयं ᵛगूर्तश्रवसं प्रशस्यान्नं ᵛपुराम् असुरपुराणां ᵛदर्माणं विदारयितारं एवंगुणविशिष्टमिन्द्रं ᵛवन्दध्यै वन्दितुं स्तोतुं प्रवृत्तोऽस्मीति शेषः ॥ सप्तिमिव । ' षप समवाये ' । समवैति रथेनैकीभवतीति सप्तिरश्वः । ' वसस्तिप् ' ( उ. सू. ४. ६१९ ) इति विधीयमानः तिप्प्रत्ययः बहुलवचनादस्मादपि धातोर्भवति । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः । इवेन समास उक्तः । श्रवस्या । श्रवस्शब्दात् ' सुप आत्मनः क्यच् ' । क्यजन्तात् धातोः भावे ' अ प्रत्ययात् ' ( पा. सू. ३. ३. १०२ ) इति अकारप्रत्ययः । ततः टाप् । ' सुपां सुलुक्° ' इति तृतीयाया डादेशः । उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वम् । अर्कम् । ' ऋच स्तुतौ ' । ऋच्यते स्तूयतेऽनेनेति अर्को मन्त्रः । ' पुंसि संज्ञायां घः प्रायेण ' इति करणे घप्रत्ययः । ' चजोः कु घिण्ण्यतोः ' इति कुत्वम् । लघूपधगुणः । प्रत्ययस्वरः । जुह्वा । ' बहुलं छन्दसि ' इति कृतसंप्रसारणस्य ह्वेञः ' हुवः श्लुवच्च ' ( उ. सू. २.२१८ ) इति क्विप् धातोर्दीर्घश्च । धातुस्वरेणान्तोदात्तत्वम् । तृतीयैकवचने ' उदात्तस्वरितयोर्यणः° ' इति स्वरितत्वम् । ' उदात्तयणो हल्पूर्वात् ' इत्यस्य विभक्त्युदात्तत्वस्य ' नोङ्धात्वोः ' (पा. सू. ६. १. १७५) इति प्रतिषेधः । अञ्जे । ' अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु ' । व्यत्ययेन आत्मनेपदम् । वन्दध्यै । ' वदि अभिवादनस्तुत्योः ' । ' तुमर्थे सेसेन्° ' इति कध्यैप्रत्ययः । गूर्तश्रवसम् । ' गृ शब्दे ' । निष्ठायां ' श्युकः किति ' इति इट्प्रतिषेधः । ' बहुलं छन्दसि ' इति उत्वम् । ' हलि च '

---

१. ढ–' विश्वैर्व्याप्तम् ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति दीर्घः । ' नसत्तनिवत्त° ' ( पा. सू. ८. २. ६१ ) इत्यादौ निपातनात् निष्ठानत्वाभावः । गूर्तं श्रवो यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । दर्माणम् । ' दृ विदारणे ' । ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन् । ' नेड्वशि कृति ' इति इट्प्रतिषेधः । व्यत्ययेन प्रत्ययाद्युदात्तत्वम् । यद्वा । औणादिको मनिप्रत्ययो द्रष्टव्यः ॥ ॥ २७ ॥

अस्मा इदु त्वष्टा तक्षद्वज्रं स्वपस्तमं स्वर्यं रणाय ।
वृत्रस्य चिद्विदद्येन मर्म तुजन्नीशानस्तुजता कियेधाः ॥ ६ ॥

अस्मै । इत् । ऊँ इति । त्वष्टा । तक्षत् । वज्रम् । स्वपःऽतमम् । स्वर्यम् । रणाय ।
वृत्रस्य । चित् । विदत् । येन । मर्म । तुजन् । ईशानः । तुजता । कियेधाः ॥ ६ ॥

[v]त्वष्टा विश्वकर्मा [v]अस्मा [v]इदु अस्मै एवेन्द्राय [v]वज्रं वर्जकमायुधं [v]रणाय युद्धार्थं [v]तक्षत् तीक्ष्णमकरोत् । कीदृशं वज्रम् । [v]स्वपस्तमम् अतिशयेन शोभनकर्माणं [v]स्वर्यं सुष्ठु शत्रुषु प्रेर्यं यद्वा स्तुत्यम् । [v]तुजन् शत्रून् हिंसन् [v]ईशानः ऐश्वर्यवान् [v]कियेधाः बलवान् एवंगुणविशिष्ट इन्द्रः [v]वृत्रस्य [v]चित् आवरकस्यासुरस्य[1] [v]मर्म मर्मस्थानं [v]तुजता हिंसता [v]येन वज्रेण [v]विदत् प्राहार्षीदित्यर्थः ॥ स्वपस्तमम् । शोभनमपः कर्म यस्यासौ । अतिशयेन स्वपाः स्वपस्तमः । तमपः पित्त्वादनुदात्तत्वम् । ' सोर्मनसी अलोमोपसी ' इत्युत्तरपदाद्युदात्तत्वम् । स्वर्यम् । ' स्वर्यं ततक्ष ' ( ऋ. सं. १. ३२. २ ) इत्यत्रोक्तम् । विदत् । ' विदृ लाभे ' । लृदित्वात् च्लेः अङादेशः । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । यद्वृत्तयोगादनिघातः । तुजन् । ' तुज हिंसायाम् ' । शपि प्राप्ते व्यत्ययेन शः । अदुपदेशात् लसार्वधातुकानुदात्तत्वे विकरणस्वरः । ईशानः । ' ईश ऐश्वर्ये ' । शानचि अदादित्वात् शपो लुक् । अनुदात्तेत्त्वात् लसार्वधातुकानुदात्तत्वे धातुस्वरः । तुजता । ' शतुरनुमः° ' इति विभक्तेरुदात्तत्वम् । कियेधाः । अत्र निरुक्तं–' कियेधाः कियद्धा इति वा क्रममाणधा इति वा ' ( निरु. ६. २० ) इति । अस्यायमभिप्रायः । कियत् किंपरिमाणमित्यस्य[2] बलस्य तादृशं बलं दधाति धारयतीति कियद्धाः । यः कोऽप्यस्य बलस्येयत्तां न जानातीत्यर्थः । यद्वा । क्रममाणमाक्रममाणं परेषां बलं धारयति निवारयतीति क्रममाणधाः । उभयत्रापि पृषोदरादित्वात् पूर्वपदस्य कियेभावः । दधातेर्विच् ॥

अस्येदु मातुः सवनेषु सद्यो महः पितुं पपिवाञ्चार्वन्ना ।
मुषायद्विष्णुः पचतं सहीयान्विध्यद्वराहं तिरो अद्रिमस्ता ॥ ७ ॥

अस्य । इत् । ऊँ इति । मातुः । सवनेषु । सद्यः । महः । पितुम् । पपिऽवान् । चारु । अन्ना ।
मुषायत् । विष्णुः । पचतम् । सहीयान् । विध्यत् । वराहम् । तिरः । अद्रिम् । अस्ता ॥ ७ ॥

[v]इत् [v]उ इत्येतत् निपातद्वयं पादपूरणम्[3] । यद्वा अवधारणार्थम् । [v]मातुः वृष्टिद्वारेण सकलस्य जगतो निर्मातुः [v]महः महतः [v]अस्य यज्ञस्य [v]सवनेषु अवयवभूतेषु प्रातःसवनादिषु त्रिषु सवनेषु

---

१. ढ–आवरकस्याप्यसुरस्य । २. ढ–किंपरिमाणमस्य । ३. ढ–न-स-पदपूरणम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]पितुं सोमलक्षणमन्नं [V]सद्यः [V]पपिवान्। यदाग्नौ हूयते तदानीमेव पानं कृतवानित्यर्थः। तथा [V]चार्वन्ना चारूणि शोभनानि धानाकरम्भादिहविर्लक्षणान्यन्नानि भक्षितवानिति शेषः। किंच [V]विष्णुः सर्वस्य जगतो व्यापकः [V]पचतं परिपक्वमसुराणां धनं यदस्ति तत् [V]मुषायत् अपहरन् [V]सहीयान् अतिशयेन शत्रूणामभिभविता [V]अद्रिमस्ता अद्रेर्वज्रस्य क्षेपकः। एवंभूत इन्द्रः 'तिरः[1] सत इति प्राप्तस्य' (निरु. ३. २०) इति यास्कः। [V]तिरः प्राप्तः सन् [V]वराहं मेघं [V]विध्यत् अताडयत्। यद्वा। विष्णुः सुत्यादिवसात्मकः[2] यज्ञः। 'यज्ञो देवेभ्यो निलायत विष्णू रूपं कृत्वा' (तै. सं. ६. २. ४. २) इत्याम्नानात्। स विष्णुः पचतं परिपक्वमसुरधनं यत्तत् मुषायत् अचूचुरत्। तदनन्तरं दीक्षोपसदात्मनां दुर्गरूपाणां सप्तानामह्नां परस्तादासीत्। अद्रिमस्ता सहीयानिन्द्रो दुर्गाण्यतीत्य तिरः प्राप्तः सन् वराहमुत्कृष्टदिवसरूपं तं यज्ञं विध्यत्। तथा च तैत्तिरीयकं—'वराहोऽयं वाममोषः सप्तानां गिरीणां परस्ताद्वित्तं वेद्यमसुराणां बिभर्ति' इति, 'स दर्भपुञ्जीलमुद्वृह्य सप्त गिरीन्भित्त्वा तमहन्' (तै. सं. ६. २. ४. २-३) इति च॥ महः महतः। अच्छन्दलोपश्छान्दसः। यद्वा। मह इत्येतत् पितुविशेषणम्। महः प्रशस्तं पितुमित्यर्थः। पपिवान्। पिबतेर्लिटः क्वसुः। 'वस्वेकाजाद्घसाम्' इति इडागमः। 'आतो लोप इटि च' इति आकारलोपः। प्रत्ययस्वरः। चारु। 'सुपां सुलुक्०' इति विभक्तेर्लुक्। मुषायत्। 'मुष स्तेये'। 'घञर्थे कविधानम्०' इति भावे कप्रत्ययः। मुषमात्मन इच्छति। 'सुप आत्मनः क्यच्'। 'न च्छन्दस्यपुत्रस्य' इति ईत्ववत् दीर्घस्यापि प्रतिषेधे व्यत्ययेन दीर्घः। अस्मात् क्यजन्तात् लटः शतृ। आगमानुशासनस्यानित्यत्वात् नुमभावः। द्वितीयपक्षे तु क्यजन्तात् लङि 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः। अत्र स्तेयेच्छया तदुत्तरभाविनी क्रिया लक्ष्यते। पचतम्। 'भृमृदृशि०' इत्यादिना पचतेः अतच्प्रत्ययः। चित्त्वादन्तोदात्तत्वम्। विध्यत्। 'व्यध ताडने'। लङि दिवादित्वात् श्यन्। तस्य ङित्त्वात् ग्रहिज्यादिना संप्रसारणम्। श्यनो नित्त्वादाद्युदात्तत्वम्। पादादित्वात् निघाताभावः। वराहम्। वरमुदकमाहारो यस्य। यद्वा। वरमाहरतीति वराहारः सन् पृषोदरादित्वात् वराह इत्युच्यते। अत्र निरुक्तं—'वराहो मेघो भवति वराहारः। वरमाहारमाहार्षीरिति च ब्राह्मणम्' (निरु. ५. ४) इति। यज्ञपक्षे तु वरं च तदहो वराहः। 'राजाहःसखिभ्यः०' (पा. सू. ५. ४. ९१) इति समासान्तः टच्प्रत्ययः। चित्त्वादन्तोदात्तत्वम्। अस्ता। 'असु क्षेपणे' इत्यस्मात् साधुकारिणि 'तृन्' (पा. सू. ३. २. १३५)। इडभावश्छान्दसः। 'न लोकाव्यय०' इति षष्ठीप्रतिषेधः॥

**अस्मा इदु ग्नाश्चिद्देवपत्नीरिन्द्रायार्कमहिहत्य ऊवुः।**
**परि द्यावापृथिवी जभ्र उर्वी नास्य ते महिमानं परिष्टः॥ ८॥**

अस्मै। इत्। ऊँ इति। ग्नाः। चित्। देवऽपत्नीः। इन्द्राय। अर्कम्। अहिऽहत्ये। ऊवुरित्यूवुः। परि। द्यावापृथिवी इति। जभ्रे। उर्वी इति। न। अस्य। ते इति। महिमानम्। परि। स्त इति स्तः॥८॥

अस्मै एव इन्द्राय [V]अहिहत्ये अहेर्वृत्रस्य हनने निमित्तभूते सति [V]ग्नाश्चित् गमनस्वभावा अपि स्थिताः [V]देवपत्नीः देवानां पालयित्र्यो गायत्र्याद्या देवताः [V]अर्कम् अर्चनसाधनं स्तोत्रम् [V]ऊवुः समतन्वत चक्रुरित्यर्थः। स च इन्द्रः [V]उर्वी विस्तृते [V]द्यावापृथिवी द्यावापृथिव्यौ [V]परि [V]जभ्रे

---

१. स–तिरः। तिरः। २. ढ–सुत्यादिदिवसात्मकः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्वतेजसा परिजहार अतिचक्रामेत्यर्थः । ते द्यावापृथिव्यौ Vअस्य इन्द्रस्य Vमहिमानं न Vपरि Vष्टः न परिभवतः ॥ ऊचुः । ' वेञ् तन्तुसंताने ' । लिटि ' वेञो वयिः ' ( पा. सू. २. ४. ४१ ) । लिटः कित्त्वात् यजादित्वेन संप्रसारणे क्रियमाणे यकारस्य ' लिटि वयो यः ' ( पा. सू. ६. १. ३८ ) इति प्रतिषेधात् वकारस्य संप्रसारणं परपूर्वत्वं द्विर्वचनादि । ' वश्चास्यान्यतरस्यां किति ' ( पा. सू. ६. १. ३९ ) इति यकारस्य वकारादेशः । जभ्रे । ' हृञ् हरणे ' । लिटि ञित्त्वात् कर्त्रभिप्राये आत्मनेपदम् । ' हृग्रहोर्भः० ' इति भत्वम् । उर्वी । उरुशब्दात् ' वोतो गुणवचनात् ' इति ङीष् । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घत्वम् । स्तः । अस्तेर्लटि रूपम् । उपसर्गप्रादुर्भ्यामिति षत्वं सांहितिकम् ॥

अस्येदेव प्र रिरिचे महित्वं दिवस्पृथिव्याः पर्यन्तरिक्षात् ।
स्वराळिन्द्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय ॥ ९ ॥

अस्य । इत् । एव । प्र । रिरिचे । महिऽत्वम् । दिवः । पृथिव्याः । परि । अन्तरिक्षात् ।
स्वऽराट् । इन्द्रः । दमे । आ । विश्वऽगूर्तः । सुऽअरिः । अमत्रः । ववक्षे । रणाय ॥ ९ ॥

Vअस्येदेव । इत् इति पादपूरणः । अस्यैवेन्द्रस्य Vमहित्वं माहात्म्यं Vप्र Vरिरिचे अतिरिच्यते । अधिकं भवतीत्यर्थः । अत्रोपसर्गो धात्वर्थस्य निवृत्तिमाचष्टे । यथा प्रस्मरणं प्रस्थानमिति । कुतः सकाशात् प्ररिरिचे इत्यत आह । Vदिवः द्युलोकात् Vपृथिव्याः भूलोकात् Vअन्तरिक्षात् द्यावापृथिव्योर्मध्ये वर्तमानादन्तरिक्षलोकाच्च । Vपरि उपर्यर्थः । त्रीन् लोकानतीत्योपरि प्ररिरिचे इत्यर्थः । Vदमे दमयितव्ये विषये Vस्वराट् स्वेनैव तेजसा राजमानः Vविश्वगूर्तः विश्वस्मिन् सर्वस्मिन् कार्ये उद्गूर्णः समर्थः । यद्वा विश्वं सर्वमायुधं गूर्तम् उद्यतं यस्य स तथोक्तः । Vस्वरिः शोभनशत्रुकः । शोभने शत्रौ हन्तव्ये सति हन्ता वीर्यवत्तम इति गम्यते । यथा ' अकवारिं दिव्यं शासमिन्द्रम् ' ( ऋ. सं. ३. ४७. ५) इति । अकुत्सितारिमिति हि तस्यार्थः । Vअमत्रः युद्धादिषु गमनकुशलः । मात्रया इयत्तया रहितो वा । ' अमत्रोऽमात्रो महान्भवत्यभ्यमितो वा ' ( निरु. ६. २३ ) इति यास्कः । एवंभूतः Vइन्द्रः Vरणाय रणं युद्धम् Vआ Vववक्षे आवहति मेघान् प्रापयति । मेघैः परस्परयुद्धं[1] कारयित्वा वृष्टिं चकारेति भावः । यद्वा । युद्धाय स्वकीयान् भटान् गमयति ॥ अस्य । ' ऊडिदम्० ' इति विभक्तेरुदात्तत्वम् । रिरिचे । ' रिचिर् विरेचने ' । ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने कर्मणि लिट् । पृथिव्याः । ' उदात्तयणः० ' इति विभक्तेरुदात्तत्वम् । स्वराट् । ' राजृ दीप्तौ ' इत्यस्मात् ' सत्सूद्विष० ' इति क्विप् । व्रश्चादिना षत्वे जश्त्वम् । दमे । ' दम उपशमे ' इत्यस्मात् कर्मणि घञि ' नोदात्तोपदेशस्य मान्तस्यानाचमेः ' ( पा. सू. ७. ३. ३४ ) इति वृद्धिप्रतिषेधः । घञो ञित्त्वादाद्युदात्तत्वम् । विश्वगूर्तः । ' गॄ निगरणे ' । अस्मात् निष्ठायां ' श्र्युकः किति ' इति इट्प्रतिषेधः । ' बहुलं छन्दसि ' इति उत्वम् । ' हलि च ' इति दीर्घः । यद्वा । ' गूरी उद्यमे ' । अस्मात् निष्ठा । ' नसत्तनिषत्त० ' इत्यादौ निपातनात् निष्ठानत्वाभावः । तत्पुरुषपक्षे मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् । बहुव्रीहिपक्षे तु ' बहुव्रीहौ विश्वं संज्ञायाम् ' इति असंज्ञायामपि पूर्वपदान्तोदात्तत्वम् । अमत्रः । ' अम गत्यादिषु ' । ' अमिनक्षियजिबन्धि० ' इत्यादिना औणादिकः अत्रन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । ववक्षे । वहेर्लेटि ' सिब्बहुलं लेटि ' इति सिप् । ' बहुलं छन्दसि ' इति शपः श्लुः । ढ्रवकत्वषत्वानि । ' लोपस्त

---

१. ढ–न–परस्परं युद्धम् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आत्मनेपदेषु ' इति तलोपः । रणाय । ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वाच्चतुर्थी । यद्वा । ' गत्यर्थकर्मणि° ' ( पा. सू. २. ३. १२ ) इति चतुर्थी ॥

अस्येदेव शवसा शुषन्तं वि वृश्चद्वज्रेण वृत्रमिन्द्रः ।
गा न व्राणा अवनीरमुञ्चदभि श्रवो दावने सचेताः ॥ १० ॥

अस्य । इत् । एव । शवसा । शुषन्तम् । वि । वृश्चत् । वज्रेण । वृत्रम् । इन्द्रः ।
गाः । न । व्राणाः । अवनीः । अमुञ्चत् । अभि । श्रवः । दावने । सऽचेताः ॥ १० ॥

अस्यैवेन्द्रस्य vशवसा बलेन vशुषन्तं शुष्यन्तं vवृत्रम् vइन्द्रः vवज्रेण vवि vवृश्चत् व्यच्छिनत् । तथा vगा vन चौरैरपहृताः[1] गाव इव vव्राणाः वृत्रेणावृताः vअवनीः रक्षणहेतुभूता अपः vअमुञ्चत् अवर्षीत् । तथा vदावने हविर्दात्रे यजमानाय vसचेताः तेन यजमानेन समानचित्तः सन् vश्रवः कर्मफलभूतमन्नम् vअभि आभिमुख्येन ददातीति शेषः ॥ शुषन्तम् । ' शुष शोषणे ' । श्यनि प्राप्ते व्यत्ययेन शः । अदुपदेशात् लसार्वधातुकानुदात्तत्वे विकरणस्वर एव शिष्यते । व्राणाः । ' वृञ् वरणे ' । कर्मणि लटः शानचि ' बहुलं छन्दसि ' इति श्यको लुक् । शानचो ङित्त्वादुणाभावे यणादेशः । अवनीः । अवतेः करणे ' अर्तिसृधृधमि° ' ( उ. सू. २. २५९ ) इत्यादिना अनिप्रत्ययः । प्रत्यया-द्युदात्तत्वम् । दावने । ' आतो मनिन् ° ' इति वनिप् । चतुर्थ्येकवचने अल्लोपाभावश्छान्दसः ॥ ॥ २८ ॥

अस्येदु त्वेषसा रन्त सिन्धवः परि यद्वज्रेण सीमयच्छत् ।
ईशानकृद्दाशुषे दशस्यन्तुर्वीतये गाधं तुर्वणिः कः ॥ ११ ॥

अस्य । इत् । ऊँ इति । त्वेषसा । रन्त । सिन्धवः । परि । यत् । वज्रेण । सीम् । अयच्छत् ।
ईशानऽकृत् । दाशुषे । दशस्यन् । तुर्वीतये । गाधम् । तुर्वणिः । करिति कः ॥ ११ ॥

अस्यैवेन्द्रस्य vत्वेषसा दीप्तेन बलेन vसिन्धवः समुद्राः । यद्वा । गङ्गाद्याः सप्त नद्यः vरन्त स्वे स्वे स्थाने रमन्ते । vयत् यस्मात् अयमिन्द्रः vवज्रेण vसीम् एनान् सिन्धून् वज्रेण vपरि vअयच्छत् परितो नियमितवान् । अपि च vईशानकृत् वृत्रादिशत्रुवधेनात्मानमैश्वर्यवन्तं कुर्वन् इन्द्रः vदाशुषे हविर्दत्तवते यजमानाय फलं vदशस्यन् प्रयच्छन् vतुर्वणिः तूर्णसंभजनः । ' तुर्वणिस्तूर्णवनिः ' ( निरु. ६. १४ ) इति यास्कः । यद्वा । तुर्विता शत्रूणां हिंसिता । एवंभूत इन्द्रः vतुर्वीतये एतत्संज्ञाय[2] उदके निमग्नाय ऋषये[3] vगाधम् अवस्थानयोग्यं धिष्ण्यप्रदेशं vकः अकार्षीत् ॥ रन्त । ' रमु क्रीडायाम् ' । छान्दसे लङि बहुवचने ' बहुलं छन्दसि ' इति शपो लुक् । धातोरन्त्यलोपश्छान्दसः । अयच्छत् । ' यम उपरमे ' । ' इषुगमियमां छः ' इति छत्वम् । कः । करोतेर्लुङि ' मन्त्रे घसह्वरणश° ' ( पा. सू. २. ४. ८० ) इत्यादिना च्लेर्लुक् । गुणः । हल्ङ्यादिना तलोपः । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः ॥

---

१. ढ.–चोरैरपहृताः । २. ढ–एतत्संज्ञकाय । ३. ढ–स–राज्ञे ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अस्मा इदु प्र भरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः ।
गोर्न पर्व वि रदा तिरश्चेष्यन्नर्णांस्यपां चरध्यै ॥ १२ ॥

अस्मै । इत् । ऊँ इति । प्र । भर । तूतुजानः । वृत्राय । वज्रम् । ईशानः । कियेधाः ।
गोः । न । पर्व । वि । रद । तिरश्चा । इष्यन् । अर्णांसि । अपाम् । चरध्यै ॥ १२ ॥

तूतुजानः इति क्षिप्रनाम । तूतुजानः त्वरमाणः । यद्वा । शत्रून् हिंसन् । ईशानः ईश्वरः सर्वेषां कियेधाः कियतोऽनवरतपरिमाणस्य बलस्य धाता । यद्वा । क्रममाणं शत्रुबलं दधात्यवस्थापयतीति कियेधाः । हे इन्द्र एवंभूतस्त्वम् अस्मै वृत्राय वज्रं प्र भर । इमं वृत्रं वज्रेण प्रहरेत्यर्थः । प्रहृत्य च अर्णांसि वृष्टिजलानि इष्यन् तस्मात् वृत्राद्भयंस्त्वम् अपां चरध्यै तासामपां चरणाय भूप्रदेशं प्रति गमनाय तस्य वृत्रस्य मेघरूपस्य पर्व पर्वाण्यवयवसंधीन् तिरश्चा तिर्यगवस्थितेन वज्रेण वि रद विलिख । छिन्द्धीत्यर्थः । तत्र दृष्टान्तः । गोर्न । यथा मांसस्य विकर्तारो लौकिकाः पुरुषाः पशोरवयवानितस्ततो विभजन्ति तद्वत् । अत्र निरुक्तम्–' अस्मै प्रहर तूर्णं त्वरमाणो वृत्राय वज्रमीशानः कियेधाः कियद्धा इति वा क्रममाणधा इति वा गोरिव पर्वाणि विरद मेघस्येष्यन्नर्णांस्यपां चरणाय ' ( निरु. ६. २० ) इति ॥ भर । ' हृग्रहोर्भः० ' इति भत्वम् । ' ह्यचोऽतस्तिङः० ' इति सांहितिको दीर्घः । तूतुजानः । ' तुज हिंसायाम् ' । कानचि ' तुजादीनां दीर्घोऽभ्यासस्य ' इति अभ्यासस्य दीर्घत्वम् । ' छन्दस्युभयथा ' इति कानचः सार्वधातुकत्वे सति ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । कियेधाः । ' तुजता कियेधाः ' ( ऋ. सं. १. ६१. ६ ) इत्यत्रोक्तम् । रद । ' रद विलेखने ' । ' तिङ्ङतिङः ' इति निघातः । तिरश्चा । तिरोऽञ्चतीति तिर्यङ् । ' ऋत्विक्० ' इत्यादिना क्विन् । ' अनिदिताम्० ' इति नलोपः । तृतीयैकवचने भसंज्ञायाम् ' अचः ' इति अकारलोपः । श्चुत्वेन सकारस्य शकारः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । इष्यन् । ' इष गतौ ' इत्यस्मात् अन्तर्भावितण्यर्थात् शतरि ' दिवादिभ्यः श्यन् ' । तस्य नित्त्वादाद्युदात्तत्वम् । चरध्यै । ' तुमर्थे सेसेन्० ' इति चरतेः अध्यैप्रत्ययः ॥

अस्येदु प्र ब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्य उक्थैः ।
युधे यदिष्णान आयुधान्यृघायमाणो निरिणाति शत्रून् ॥ १३ ॥

अस्य । इत् । ऊँ इति । प्र । ब्रूहि । पूर्व्याणि । तुरस्य । कर्माणि । नव्यः । उक्थैः ।
युधे । यत् । इष्णानः । आयुधानि । ऋघायमाणः । निऽरिणाति । शत्रून् ॥ १३ ॥

उक्थैः शस्त्रैः नव्यः स्तुत्यो य इन्द्रः अस्येदु अस्यैव तुरस्य युद्धार्थं त्वरमाणस्येन्द्रस्य पूर्व्याणि पुराणानि कर्माणि एतत्कृतानि बलकर्माणि हे स्तोतः प्र ब्रूहि प्रशंस । यत् यदा युधे योधनाय आयुधानि वज्रादीनि इष्णानः आभीक्ष्ण्येन प्रेरयन् शत्रून्[1] ऋघायमाणः हिंसंश्चेन्द्रः[2] निरिणाति अभिमुखं[3] गच्छति[3] । तदानीं प्र ब्रूहीति पूर्वेण संबन्धः । पूर्व्यम् इति पुराणनाम । ' पूर्व्यम् अह्नाय ' ( नि. ३. ७. ५ ) इति पुराणनामसु[4] पाठात् ॥ तुरस्य । ' तुर त्वरणे ' । इगुपधलक्षणः कः ।

---

१. ढ–' शत्रून् ' नास्ति । २. ढ-स–हिंसक इव आचरन् इन्द्रः शत्रून् । ३. ढ-स–नितराम् उपक्षपयति । ४. ढ–तन्नामसु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नव्यः । ' णु स्तुतौ ' । ' अचो यत् ' इति यत् । गुणः । ' धातोस्तन्निमित्तस्यैव ' इति अवादेशः । इष्णानः । ' इष आभीक्ष्ण्ये ' । क्रैयादिकः । व्यत्ययेन आत्मनेपदम् । शानचः चित्त्वादन्तोदात्तत्वम् । ऋघायमाणः[1] । ' नहि त्वा रोदसि उभे ऋघायमाणम् ' ( ऋ. सं. १. १०. ८ ) इत्यत्र व्युत्पादितम्[1] । निरिणाति । ' री गतिरेषणयोः' । ' ऋयादिभ्यः श्ना ' । ' प्वादीनां ह्रस्वः' इति ह्रस्वत्वम् । तिपः पित्त्वादनुदात्तत्वे विकरणस्वरः शिष्यते[2] । ' तिङि चोदात्तवति ' इति गतेः निघातः । यद्वृत्तयोगात् ' तिङ्ङतिङः ' इति निघाताभावः ॥

अस्येदु भिया गिरयश्च दृळ्हा द्यावा च भूमा जनुषस्तुजेते ।
उपो वेनस्य जोगुवान ओणिं सद्यो भुवद्वीर्याय नोधाः ॥ १४ ॥

अस्य । इत् । ऊँ इति । भिया । गिरयः । च । दृळ्हाः । द्यावा । च । भूमा । जनुषः । तुजेते इति । उपो इति । वेनस्य । जोगुवानः । ओणिम् । सद्यः । भुवत् । वीर्याय । नोधाः ॥ १४ ॥

अस्यैवेन्द्रस्य[3] Vभिया[3] पक्षच्छेदभयेन Vगिरयः पर्वता अपि Vदृळ्हाः निश्चलाः स्वस्वदेशेऽवतिष्ठन्ते । Vजनुषः प्रादुर्भूतादस्मादेवेन्द्रात् भीत्या Vद्यावा Vभूमा Vच द्यावापृथिव्यावपि Vतुजेते । तुजिर्हिंसार्थोऽप्यत्र कम्पने द्रष्टव्यः । कम्पेते इत्यर्थः । किंच Vवेनस्य कान्तस्यास्य Vओणिं दुःखस्यापनायकं रक्षणम् Vउपो Vजोगुवानः अनेकैः सूक्तैः पुनःपुनरुपशब्दयन् उपश्लोकयन्नित्यर्थः । एवंभूतः Vनोधाः ऋषिः Vसद्यः तदानीमेव Vवीर्याय Vभुवत् वीर्यवानभवत् ॥ द्यावा च भूमा । द्यावा भूमेत्यनयोर्मध्ये चशब्दस्य पाठश्छान्दसः । 'दिवो द्यावा' इति दिव्शब्दस्य द्यावादेशः । ' सुपां सुलुक्° ' इति विभक्तेः डादेशः । ' देवताद्वन्द्वे च ' इति उभयपदप्रकृतिस्वरत्वम् । पदद्वयप्रसिद्धिरपि सांप्रदायिकी । जनुषः । ' जनी प्रादुर्भावे ' । ' जनेरुसिः ' ( उ. सू. २. २७२. ) इति औणादिक उसिप्रत्ययः । जोगुवानः । ' गुङ् अव्यक्ते शब्दे ' । अस्मात् यङ्लुगन्तात् व्यत्ययेन शानच् । ' अदादिवच्च ' इति वचनात् शपो लुक् । उवङादेशः । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । ओणिम् । ' ओणृ अपनयने ' । अस्मात् औणादिक इप्रत्ययः । भुवत् । भवतेर्लेटि अडागमः । ' बहुलं छन्दसि ' इति शपो लुक् । ' भूसुवोस्तिङि ' इति गुणप्रतिषेधः । नोधाः । ' नोधा ऋषिर्भवति नवनं दधाति ' ( निरु. ४. १६ ) इति यास्कः । तस्मात् धाञः असुन् नवशब्दस्य नोभावश्च ॥

अस्मा इदु त्यदनु दाय्येषामेको यद्वन्ने भूरेरीशानः ।
प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिन्द्रः ॥ १५ ॥

अस्मै । इत् । ऊँ इति । त्यत् । अनु । दायि । एषाम् । एकः । यत् । वन्ने । भूरेः । ईशानः । प्र । एतशम् । सूर्ये । पस्पृधानम् । सौवश्व्ये । सुष्विम् । आवत् । इन्द्रः ॥ १५ ॥

---

१. ढ–ऋघायमाणः । ऋघ इव आचरति इत्यर्थे क्यच् । शानचो लसार्वधातुकानुदात्तत्वे क्यच्स्वरः ।
२. ढ–एव शिष्यते । ३. च·फ–अस्येषेन्द्रस्य ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]एकः एक एव शत्रून् जेतुं समर्थः [V]भूरेः बहुविधस्य धनस्य [V]ईशानः स्वामी [V]यत् स्तोत्रं [V]वन्ने ययाचे [V]एषां स्तोतृणां संबन्धि । यद्वा । विभक्तिव्यत्ययः । एतैः [V]स्यत् तत्प्रसिद्धं स्तोत्रम् अस्मै इन्द्राय [V]अनु [V]दायि अकारीत्यर्थः । उत्तरार्धस्येयमाख्यायिका । स्वश्वो नाम कश्चित् राजा । स च पुत्रकामः सूर्यमुपासांचक्रे । तस्य च सूर्य एव पुत्रो बभूव । तेन सह एतशनाम्नो महर्षेर्युद्धं जातमिति तदेतदिहोच्यते[1] । अयम् [V]इन्द्रः [V]सौवश्व्ये स्वश्वपुत्रे [V]सूर्ये [V]पस्पृधानं स्पर्धमानं [V]सुष्विं सोमानामभिषोतारम् [V]एतशम् एतत्संज्ञकमृषिं [V]प्र [V]आवत् प्रारक्षत्॥ दायि । 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः । वन्ने । 'वनु याचने' । लिटि व्यत्ययेन उपधालोपः । पस्पृधानम् । 'स्पर्ध संघर्षे' । अस्मात् लिटः कानच् । द्विर्वचने 'शर्पूर्वाः खयः' इति पकारः शिष्यते । धात्वकारस्य लोपो रेफस्य संप्रसारणं च पृषोदरादित्वात् । चित्त्वादन्तोदात्तत्वम् । सौवश्व्ये । स्वश्वः इति जनपदशब्दः क्षत्रिये संज्ञात्वेन वर्तते । 'वा नामधेयस्य वृद्धसंज्ञा वक्तव्या' ( पा. सू. १. १. ७३. ५ ) इति वृद्धसंज्ञायां 'वृद्धेत्कोसलाजादाञ्ञ्यङ्' ( पा. सू. ४. १. १७१ ) इति अपत्यार्थे ञ्यङ्प्रत्ययः । 'न य्वाभ्यां पदान्ताभ्याम्०' ( पा. सू. ७. ३. ३ ) इति वृद्धेः प्रतिषेधः ऐजागमश्च । जित्त्वादाद्युदात्तत्वम् । सुष्विम् । 'षुञ् अभिषवे' । 'उत्सर्गश्छन्दसि' ( पा. सू. ३. २. १७१. २ ) इति अस्मात् किन्प्रत्ययः । लिङ्वद्भावात् द्विर्भावः । यणादेशः । उवङादेशाभावश्छान्दसः ॥

एवा ते हारियोजना सुवृक्तीन्द्र ब्रह्माणि गोतमासो अक्रन् ।
एषु विश्वपेशसं धियं धाः प्रातर्मक्षू धियावसुर्जगम्यात् ॥ १६ ॥

एव । ते । हारिऽयोजन । सुऽवृक्ति । इन्द्र । ब्रह्माणि । गोतमासः । अक्रन् ।
आ । एषु । विश्वऽपेशसम् । धियम् । धाः । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥१६॥

हर्योरश्वयोर्योजनं यस्मिन् रथे स तथोक्तः । तस्य स्वामित्वेन संबन्धी हारियोजनः । हे [V]हारियोजन [V]इन्द्र [V]गोतमासः गोतमगोत्रोत्पन्ना ऋषयः [V]सुवृक्ति सुष्ठु आवर्जकान्यभिमुखीकरणकुशलानि [V]ब्रह्माणि स्तुतिरूपाणि मन्त्रजातानि [V]ते तव [V]एव [V]अक्रन् अकृषत । [V]एषु स्तोतृषु [V]विश्वपेशसं बहुविधरूपयुक्तं [V]धियं [V]धाः । धिया लभ्यत्वात् धीः धनमुच्यते । यद्वा । धीशब्दः कर्मवचनः । पश्वादिबहुविधरूपं धनम् अग्निष्टोमादिकं बहुविधरूपं कर्म वा [V]आ धाः । धेहि स्थापय । [V]प्रातः इदानीमिव परेद्युरपि प्रातःकाले [V]धियावसुः बुद्ध्या कर्मणा वा प्राप्तधन इन्द्रः [V]मक्षु शीघ्रं [V]जगम्यात् अस्मद्रक्षणार्थमागच्छतु ॥ एव[2] । 'निपातस्य च' इति संहितायां दीर्घः । सुवृक्ति । 'सुपां सुलुक्०' इति शसो लुक् । अक्रन् । करोतेर्लुङि 'मन्त्रे घसह्वर०' इत्यादिना च्लेर्लुक् । अन्तादेशः । तस्य ङित्त्वात् गुणाभावे यणादेशः । 'इतश्च' इति इकारलोपे संयोगान्तलोपे च अडागमः । धाः । 'छन्दसि लुङ्लङ्लिटः' इति लोडर्थे लुङि 'गातिस्था०' इति सिचो लुक् । 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः॥ ॥२९॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणामात्येन[3] विरचिते[3] माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके चतुर्थोऽध्यायः समाप्तः ॥

---

१. ढ–'तदेतदिहोच्यते' नास्ति । २. ढ–एवा ते; स–एवा । ३. च-श–सायणाचार्येण विरचिते; स–सायणाचार्यविरचिते ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ पञ्चमाध्याय आरभ्यते । प्रथमे मण्डले एकादशेऽनुवाके चत्वारि सूक्तानि गतानि । 'प्र मन्महे' इत्येतत् त्रयोदशर्चं पञ्चमं सूक्तम् । अत्रानुक्रम्यते[1]—'प्र सप्तोनेति । अनिरुक्ता संख्या विंशतिः' ( अनु. १२. ४ ) इत्युक्तत्वात् प्र[2] सप्तोनेत्युक्ते त्रयोदशेत्युक्तं भवति । 'ऋषिश्चान्यस्मात्' इति परिभाषया नोधा ऋषिः । अनादेशपरिभाषया त्रिष्टुप् छन्दः । इन्द्रो देवता । गतः सामान्यविनियोगः । विशेषविनियोगस्तु लिङ्गादवगन्तव्यः ॥

प्र मन्महे शवसानाय शूषमाङ्गूषं गिर्वणसे अङ्गिरस्वत् ।
सुवृक्तिभिः स्तुवत ऋग्मियायार्चामार्कं नरे विश्रुताय ॥ १ ॥

प्र । मन्महे । शवसानाय । शूषम् । आङ्गूषम् । गिर्वणसे । अङ्गिरस्वत् ।
सुवृक्तिऽभिः । स्तुवते । ऋग्मियाय । अर्चाम । अर्कम् । नरे । विऽश्रुताय ॥ १ ॥

vशवसानाय । शव इति बलनाम । तदिवाचरते । यथा बलं शत्रून् हन्ति तथा शत्रूणां हन्तेत्यर्थः । vगिर्वणसे । गीर्भिः स्तुतिलक्षणैर्वचोभिः संभजनीयाय । 'गिर्वणा देवो भवति गीर्भिरेनं वनयन्ति' ( निरु. ६. १४ ) इति यास्कः । एवंभूतायेन्द्राय । शूषमिति सुखनाम । vशूषं सुखहेतुभूतम् । 'आङ्गूषः[3] स्तोम आघोषः' ( निरु. ५. ११ ) इति यास्कः[3] । vआङ्गूषं स्तोत्रम् vअङ्गिरस्वत् अङ्गिरस इव vप्र vमन्महे वयं स्तोतारः प्रकर्षेणावगच्छामः । अवगत्य च vसुवृक्तिभिः सुष्ठ्वर्जकैः स्तुत्याभिमुखीकरणसमर्थैः स्तोत्रैः vस्तुवते स्तोत्रं कुर्वते ऋषये य इन्द्र ऋग्मियोऽर्चनीयो भवति । यद्वा । कर्मणि कर्तृप्रत्ययः । ऋषिणा स्तूयमानायेत्यर्थः । vनरे सर्वेषां नेत्रे । यद्वा । नरे यजमाने । vविश्रुताय यष्टव्यतया विशेषेण प्रख्याताय । एवंभूताय तस्मै vअर्कं मन्त्ररूपं स्तोत्रम् । 'अर्को मन्त्रो भवति यदेनेनार्चन्ति' ( निरु. ५. ४ ) इति यास्कः । vअर्चाम पूजयाम । उच्चारयामेत्यर्थः ॥ मन्महे । 'मनु अवबोधने' । तनादिखात् उप्रत्ययः । 'लोपश्चास्यान्यतरस्यां म्वोः' ( पा. सू. ६. ४. १०७ ) इति मकारादौ प्रत्यये उकारलोपः । शवसानाय । शव इवाचरति शवस्यते । अस्मात् लटः शानच् । 'बहुलं छन्दसि' इति शपो लुक् । शानचः 'छन्दस्युभयथा' इति आर्धधातुकत्वात् अतोलोपयलोपौ । 'चितः' इत्यन्तोदात्तत्वम् । ननु क्यङो ङित्त्वात् 'तास्यनुदात्तेत्°' इति शानचोऽनुदात्तेन भवितव्यम् । एवं तर्हि ताच्छीलिकः चानश् । तस्य सार्वधातुकत्वेऽपि लसार्वधातुकत्वाभावात् चितः स्वर एव शिष्यते । शूषम् । 'शूष प्रसवे' । पचाद्यच् । आङ्गूषम् । आङ्पूर्वात् घुषेः पचाद्यचि घो इत्यस्य गूआदेशः पृषोदरादित्वात् । आङो ङकारस्य इत्संज्ञाभावश्छान्दसः । चित्स्वरेणोत्तरपदस्यान्तोदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वम् । घञि वा थाथादिना उत्तरपदान्तोदात्तत्वम् । गिर्वणसे । 'गृ शब्दे' । संपदादिलक्षणो भावे क्विप् । 'ऋत इद्धातोः' इति इत्वम् । गीर्भिर्वन्यते संभज्यते इति गिर्वणाः । औणादिकः कर्मणि

---

१. च-छ-ण-द-फ-ल-श-स–तत्रानुक्रम्यते । २. ढ–'प्र' नास्ति । ३. ढ–'आङ्गूषः...यास्कः' इति नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

असुन्। संज्ञापूर्वकस्य विधेरनित्यत्वात् ' हलि च ' इति दीर्घाभावः। ' गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च ' इति वचनात् पूर्वपदप्रकृतिस्वरत्वम्। अङ्गिरस्वत्। ' तेन तुल्यम्° ' इति वतिः। ' नभोऽङ्गिरोमनुषां वत्युपसंख्यानम् ' ( पा. सू. १. ४. १८. ३ ) इति भसंज्ञायां रुत्वाद्यभावः। प्रत्ययस्वरः। सुवृक्तिभिः। ' वृजी वर्जने '। भावे क्तिन्। ' तितुत्र° ' इति इट्प्रतिषेधः। शोभनमावर्जनं येषाम्। ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम्। ननु क्तिनन्तस्योत्तरपदस्याद्युदात्तत्वात् ' आद्युदात्तं द्यच्छन्दसि ' इति वचनादुत्तरपदाद्युदात्तत्वं प्राप्नोति। एवं तर्हि तत्पुरुषोऽस्तु। शोभनमावर्जितो भवस्येभिरिति सुवृक्तयः स्तोत्राणि। करणे क्तिन्। ' तादौ च निति° ' इति गतेः प्रकृतिस्वरत्वे प्राप्ते ' मन्क्तिन्° ' इत्यादिना कारकादुत्तरस्य क्तिनो विहितमुत्तरपदान्तोदात्तत्वमकारकादपि व्यत्ययेन भवति। स्तुवते। ' शतुरनुमः° ' इति विभक्तेरुदात्तत्वम्। ऋग्मियाय। ' एकाचो नित्यं मयटमिच्छन्ति ' ( का. ४. ३. १४४ ) इति ऋक्शब्दात् विकारार्थे मयट्। ' स्वादिष्वसर्वनामस्थाने ' ( पा. सू. १. ४. १७ ) इति पदसंज्ञायां कुत्वजश्त्वे। व्यत्ययेन इत्वम्। यद्वा। ' ऋच स्तुतौ ' इत्यस्मात् भावे मक्। बहुलवचनात् कुत्वं जश्त्वं च। ऋग्मं स्तुतिमर्हतीति ऋग्मियः। अर्हार्थे घच्। ' चितः ' इत्यन्तोदात्तत्वम्। अर्चाम। ' अर्च पूजायाम् '। भौवादिकः। शपः पित्त्वादनुदात्तत्वम्। तिङश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। अर्कम्। अर्च्यतेऽनेनेत्यर्कः। ' पुंसि संज्ञायां घः प्रायेण ' इति घप्रत्ययः। ' चजोः कु घिण्ण्यतोः ' इति कुत्वम्। नरे। नृशब्दात् चतुर्थ्येकवचने गुणश्छान्दसः। विश्रुताय। ' श्रु श्रवणे '। कर्मणि निष्ठा। ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम्॥

प्र वो महे महि नमो भरध्वमाङ्गूष्यं शवसानाय साम।
येना नः पूर्वे पितरः पदज्ञा अर्चन्तो अङ्गिरसो गा अविन्दन् ॥ २ ॥

प्र। वः। महे। महि। नमः। भरध्वम्। आङ्गूष्यम्। शवसानाय। साम।
येन। नः। पूर्वे। पितरः। पदऽज्ञाः। अर्चन्तः। अङ्गिरसः। गाः। अविन्दन् ॥ २ ॥

हे ऋत्विजः [v]वः यूयं [v]महे महते [v]शवसानाय बलमिवाचरते। अतिबलायेत्यर्थः। उत्तरवाक्ये यच्छब्दश्रुतेः तच्छब्दाध्याहारः[1]। एवंभूताय तस्मै इन्द्राय [v]महि महत् प्रौढं [v]नमः स्तोत्रं [v]प्र [v]भरध्वं प्रकर्षेण संपादयत। किं तत् स्तोत्रमित्याह[2]। [v]आङ्गूष्यं [v]साम आघोषयोग्यं रथन्तरादिसाम। तन्निष्पाद्यतामित्यर्थः[3]। ' अभि त्वा शूर ' ( ऋ. सं. ७. ३२. २२ ) इत्यादिषु ऋक्षु यद्गानं तस्य सामेत्याख्या। तथा चोक्तं—' गीतिषु सामाख्या ' ( जै. सू. २. १. ३६ ) इति। [v]येन इन्द्रेण [v]नः अस्माकं [v]पितरः पितृविशेषाः [v]पूर्वे पूर्वपुरुषाः [v]अङ्गिरसः पणिनाम्नासुरेणापहृतानां गवां [v]पदज्ञाः मार्गज्ञाः सन्तोऽत एव [v]अर्चन्तः तं पूजयन्तः [v]गा [v]अविन्दन् अलभन्त॥ वः। प्रथमार्थे द्वितीया। पदज्ञाः। पदानि जानन्तीति। ' आतोऽनुपसर्गे कः ' इति कः। ' आतो लोप इटि च ' इति आकारलोपः। अविन्दन्। ' विदृ लाभे '। ' शे मुचादीनाम् ' इति नुमागमः॥

---

१. ढ—तच्छब्दोध्याहार्यः। २. च-छ-ण-त-न-फ—स्तोत्रमित्यत आह। ३. ढ-न—तन्निष्पाद्यमित्यर्थः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इन्द्रस्याङ्गिरसां चेष्टौ विदत्सरमा तनयाय धासिम् ।
बृहस्पतिर्भिनदद्रिं विदद्गाः समुस्रियाभिर्वावशन्त नरः ॥ ३ ॥

इन्द्रस्य । अङ्गिरसाम् । च । इष्टौ । विदत् । सरमा । तनयाय । धासिम् ।
बृहस्पतिः । भिनत् । अद्रिम् । विदत् । गाः । सम् । उस्रियाभिः । वावशन्त । नरः ॥३॥

अत्रेदमाख्यानम् । सरमा नाम देवशुनी । पणिभिर्गोष्वपहृतासु तद्वेषणाय तां सरमामिन्द्रः प्राहैषीत् । यथा लोके व्याधो वनान्तर्गतमृगान्वेषणाय श्वानं विसृजति तद्वत् । सा च सरमा एवमवोचत् । हे इन्द्र अस्मदीयाय शिशवे तद्गोसंबन्धि क्षीराद्यन्नं यदि प्रयच्छसि तर्हि गमिष्यामीति । स तथेत्यब्रवीत् । तथा च शाट्यायनकम्–अन्नादिनीं ते सरमे प्रजां करोमि या नो गा अन्वविन्दः ' इति ततो गत्वा गवां स्थानमज्ञासीत् । ज्ञात्वा चास्मै न्यवेदयत् । तथा निवेदितासु गोषु तमसुरं हत्वा ता गाः स इन्द्रोऽलभतेति । अयमर्थोऽस्यां प्रतिपाद्यते ॥ Vइन्द्रस्य Vअङ्गिरसाम् ऋषीणां Vच Vइष्टौ प्रेषणे सति Vसरमा देवशुनी Vतनयाय स्वपुत्राय Vधासिम् अन्नं Vविदत् अविन्दत् । धासिः इत्यन्ननाम, ' धासिः इरा ' ( नि. २.७. ११) इति तन्नामसु पाठात् । तथा गोषु निवेदितासु Vबृहस्पतिः बृहतां देवानामधिपतिरिन्द्रः Vअद्रिम् अत्तारमसुरं Vभिनत् अवधीत् । तेनापहृताः Vगाः Vविदत् अलभत । ततः Vनरः नेतारो देवाः Vउस्रियाभिः गोभिः सह । उस्रिया इति गोनाम । Vसं Vवावशन्त भृशं हर्षशब्दमकुर्वन् । यद्वा । गोभिः साधनभूताभिस्तदीयं क्षीरादिकमकामयन्त[1] समगच्छन्तेत्यर्थः ॥ इष्टौ । ' इष गतौ ' इत्यस्मात् भावे क्तिनि ' मन्त्रे वृष° ' इत्यादिना क्तिन उदात्तत्वम् । विदत् । ' विदृ लाभे ' । लुङि लृदित्त्वात् अङ् । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । अङ एव स्वरः शिष्यते । पादादित्वात् निघाताभावः । सरमा । ' सरमा सरणात् ' ( निरु. ११. २४ ) इति यास्कः । सर्तेः औणादिकः अमप्रत्ययः । धासिम् । ' धेट् पाने ' । धीयते पीयते इति धासिः । औणादिकः सिप्रत्ययः । यद्वा । दधातेः पोषणार्थात् सिप्रत्ययः । बृहस्पतिः । ' तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च ' ( पा. सू. ६. १. १५७. ग.) इति सुडागमस्तलोपश्च । बृहच्छब्दः अन्तोदात्तः । तस्य केचिदाद्युदात्तत्वं वर्णयन्तीत्युक्तम् । पतिशब्दो डतिप्रत्ययान्त आद्युदात्तः । अतः ' उभे वनस्पत्यादिषु° ' इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् । उस्रियाभिः । निवसत्यस्यां क्षीरादिकमिति[2] उस्रा गौः । ' वस निवासे ' इत्यस्मात् ' स्फायितञ्चि° ' इत्यादिना अधिकरणे रक् । ' वचिस्वपि° ' इत्यादिना संप्रसारणम् । ' उस्राशब्दात् स्वार्थे पृषोदरादित्वेन घप्रत्ययः ' इति निघण्टुभाष्यम् । घस्य इयादेशः । प्रत्ययस्वरः । वावशन्त । ' वाश्च शब्दे ' । अस्मात् यङन्तात् लङि झस्य अन्तादेशे सति तस्य ' छन्दस्युभयथा ' इति आर्धधातुकत्वात् अतोलोपयलोपौ । व्यत्ययेन धातोर्ह्रस्वत्वम् । यद्वा । ' वश कान्तौ ' इत्यस्मात् यङि ' न वशः ' ( पा. सू. ६. १. २० ) इति संप्रसारणे प्रतिषिद्धे[3] पूर्ववत् प्रक्रिया ॥

---

१. ल–क्षीरादिकमन्नमकामयन्त; स–क्षीरादिकमलभन्त । २. ढ–क्षीरमिति । ३. ढ–प्रतिषिद्धे लङि; स–प्रतिषिद्धे सति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स सुष्टुभा स स्तुभा सप्त विप्रैः स्वरेणाद्रिं स्वर्यो३ नवग्वैः ।
सरण्युभिः फलिगमिन्द्र शक्र वलं रवेण दरयो दशग्वैः ॥ ४ ॥

सः । सुऽस्तुभा । सः । स्तुभा । सप्त । विप्रैः । स्वरेण । अद्रिम् । स्वर्यः । नवऽग्वैः ।
सरण्युऽभिः । फलिऽगम् । इन्द्र । शक्र । वलम् । रवेण । दरयः । दशऽग्वैः ॥ ४ ॥

अङ्गिरसो द्विविधाः । सत्रयागमनुतिष्ठन्तो ये नवभिर्मासैः समाप्य गतास्ते नवग्वाः । ' नवग्वा नवनीतगतयः' (निरु. ११. १९) इति यास्को व्याचख्यौ । ये तु दशभिर्मासैः समाप्य जग्मुस्ते दशग्वाः । ताद्दशैरुभयविधैः Vविप्रैः मेधाविभिः Vसरण्युभिः सरणं शोभनां गतिमिच्छद्भिः Vसप्त सप्तसंख्याकैः । सप्त ह्यत्र मेधातिथिप्रभृतयोऽङ्गिरसो दृश्यन्ते । एवंभूतैरङ्गिरोभिः Vसुष्टुभा शोभनस्तोभयुक्तेन Vस्वरेण उदात्तादिश्रव्यस्वरोपेतेन । यद्वा । मन्द्रमध्यमादिस्वरेण Vस्तुभा स्तोत्रेण Vस्वर्यः सुष्ठु प्राप्यः । यद्वा । शब्दनीयः स्तुत्य इत्यर्थः । हे Vशक्र शक्तिमन् Vइन्द्र एवंभूतः Vसः त्वम् Vअद्रिम् आदरणीयं वज्रेण छेत्तव्यमित्यर्थः । Vफलिगम् । प्रतिफलं प्रतिबिम्बम् । तदस्मिन्नस्तीति फलि स्वच्छमुदकम् । तद्गच्छति आधारस्वेनेति फलिगः । यद्वा । व्रीह्यादि फलम् । तदस्मिन् सति भवतीति फलि वृष्टिजलम् । तद्गच्छतीति फलिगः । एवंभूतं Vवलं मेघं Vरवेण आत्मीयेन शब्देन Vदरयः अभाययः[1] । स्वदीयशब्दश्रवणमात्रेण मेघो बिभेतीत्यर्थः । यद्वा । अद्रिः पर्वतः । अद्यतेऽस्मिन् पटलादिकमिति[2] । फलिगो मेघः । ' फलिगः उपलः ' ( नि. १. १०. १७ ) इति तन्नामसु पाठात् । वलोऽसुरः । ' देवा वै वले गाः पर्यपश्यन् ' ( ऐ. ब्रा. ६. २४ ) इत्यादौ असुरे प्रयुक्तत्वात् । एते त्रयोऽपि स्वदीयशब्दश्रवणमात्रेणाबिभयुरित्यर्थः ॥ सः इत्येकः पादपूरणः । सुष्टुभा । स्तोभतिः स्तुतिकर्मा । संपदादिलक्षणो भावे क्विप् । शोभनः स्तुप् स्तोभो यस्य । ' नञ्सुभ्याम्° ' इत्युत्तरपदान्तोदात्तत्वम् । ' उपसर्गात्सुनोति° ' इति षत्वम् । स्तुभा । करणभूतस्यापि स्तोत्रस्य स्वव्यापारे कर्तृत्वात् स्तोभति स्तौतीति ' क्विप् च ' इति कर्तरि क्विप् । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । सप्त । ' सुपां सुलुक्° ' इति भिसो लुक् । स्वर्यः । ' स्वृ शब्दोपतापयोः ' । ' ऋहलोर्ण्यत् ' इति ण्यत् । वृद्ध्यभावश्छान्दसः । ' तित्स्वरितम् ' इति स्वरितत्वम् । नवग्वैः । नवशब्दे उपपदे गमेर्भावे क्विपि ' गमः क्वौ ' ( पा. सू. ६. ४. ४० ) इत्यनुनासिकलोपे ' ऊ च गमादीनामिति वक्तव्यम् ' ( पा. सू. ६. ४. ४०. २ ) इति ऊकारान्तादेशः । नवभिः गूः गमनं येषां ते नवग्वाः । अकारोपजनश्छान्दसः । यद्वा । गमेर्भावे ड्वप्रत्ययः । पूर्ववत् बहुव्रीहिः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । सरण्युभिः । सरणमात्मन इच्छन्तः सरण्यवः । क्यचि अन्त्यलोपश्छान्दसः । ' क्याच्छन्दसि ' इति उः । फलिगम् । फलि उदकं गच्छतीति फलिगः । ' डोऽन्यत्रापि दृश्यते ' ( पा. म. ३. २. ४८ ) इति गमेर्डः । वलम् । वृणोतीति वलः । पचाद्यच् । कपिलकादित्वात् लत्वम् ( पा. म. ८. २. १८ ) । दरयः । ' दृ विदारणे ' । वृद्धौ कृतायां दृ भये इति घटादिषु पाठात् मित्त्वे ' मितां ह्रस्वः ' इति ह्रस्वत्वम् ॥

---

१. ढ–अदारयः । २. ढ-स–फलादिकमिति ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

गृणानो अङ्गिरोभिर्दस्म वि वरुषसा सूर्येण गोभिरन्धः ।
वि भूम्या अप्रथय इन्द्र सानु दिवो रज उपरमस्तभायः ॥ ५ ॥

गृणानः । अङ्गिरःऽभिः । दस्म । वि । वः । उषसा । सूर्येण । गोभिः । अन्धः ।
वि । भूम्याः । अप्रथयः । इन्द्र । सानु । दिवः । रजः । उपरम् । अस्तभायः ॥ ५ ॥

हे [v]दस्म दर्शनीय शत्रूणामुपक्षयितर्वा[1] इन्द्र त्वम् [v]अङ्गिरोभिः ऋषिभिः [v]गृणानः स्तूयमानः सन् [v]उषसा [v]सूर्येण च सह [v]गोभिः किरणैः [v]अन्धः अन्धकारं [v]वि [v]वः व्यवृणोः व्यनाशय इत्यर्थः । तथा हे [v]इन्द्र त्वं [v]भूम्याः पृथिव्याः [v]सानु समुच्छ्रितप्रदेशं [v]वि [v]अप्रथयः विशेषेण विस्तीर्णमकरोः । विषमामिमां समीकृतवानित्यर्थः । तथा [v]दिवः अन्तरिक्षस्य [v]रजः रजसो लोकस्य [v]उपरम् उप्तं मूलप्रदेशम् [v]अस्तभायः अस्तभ्नाः । यथान्तरिक्षलोकस्य मूलं दृढं भवति तथाकार्षीरित्यर्थः ॥ गृणानः । कर्मणि लटः शानचि यकि प्राप्ते व्यत्ययेन श्ना । 'प्वादीनां ह्रस्वः' इति ह्रस्वत्वम् । चित्स्वरेणान्तोदात्तत्वम् । दस्म । 'दसु उपक्षये' । 'इषियुधीन्धिदसि°' ( उ. सू. १. १४२ ) इत्यादिना मक् । वः । 'वृञ् वरणे' । लुङि सिपि 'मन्त्रे घस°' इत्यादिना च्लेर्लुक् । गुणे 'हल्ङ्याब्भ्यः°' इति सलोपः । 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः । अन्धः । 'तमोऽप्यन्ध उच्यते नास्मिन् ध्यानं भवति' ( निरु. ५. १ ) इति यास्कः । रजः । 'लोका रजांस्युच्यन्ते' ( निरु. ४. १९ ) इत्युक्तत्वात् रजःशब्दो लोकवचनः । 'सुपां सुलुक्°' इति षष्ठ्या लुक् । अस्तभायः । लङि 'स्तम्भुस्तुम्भु°' ( पा. सू. ३. १. ८२ ) इत्यादिना श्नाप्रत्ययः । 'छन्दसि शायजपि' ( पा. सू. ३. १. ८४ ) इति अहावपि व्यत्ययेन श्नाप्रत्ययस्य शायजादेशः । 'अनिदिताम्°' इति नलोपः । अडागमः ॥ ॥ १ ॥

प्रवर्ग्येऽभिष्टवे 'तदु प्रयक्षतमम्' इत्येषा । 'अथोत्तरम्' इत्यत्र सूत्रितं—'तदु प्रयक्षतममस्य कर्मात्मन्वन्नभो दुह्यते घृतं पयः' ( आश्व. श्रौ. ४. ७ ) इति ॥

तदु प्रयक्षतममस्य कर्म दस्मस्य चारुतममस्ति दंसः ।
उपह्वरे यदुपरा अपिन्वन्मध्वर्णसो नद्यश्चतस्रः ॥ ६ ॥

तत् । ऊँ इति । प्रयक्षऽतमम् । अस्य । कर्म । दस्मस्य । चारुऽतमम् । अस्ति । दंसः ।
उपऽह्वरे । यत् । उपराः । अपिन्वत् । मधुऽअर्णसः । नद्यः । चतस्रः ॥ ६ ॥

[v]दस्मस्य दर्शनीयस्य [v]अस्य इन्द्रस्य [v]तदु तदेव [v]कर्म [v]प्रयक्षतमम् अतिशयेन पूज्यम् । दंसः इति कर्मनाम । [v]दंसः तदेव कर्म [v]चारुतमम् अतिशयेन शोभनम्[2] । किं तदित्यत आह । अयमिन्द्रः [v]उपह्वरे उपह्वर्तव्ये गन्तव्ये पृथिव्याः संबन्धिनि समीपदेशे [v]उपराः उप्ताः स्थापिताः [v]मधुर्वर्णसः मधुरोदकाः [v]चतस्रः [v]नद्यः प्रधानभूता गङ्गादिनदीः [v]अपिन्वत् असिञ्चदिति [v]यत् एतत् कर्म

---

१. ढ-स-शत्रूणामुपक्षपयितर्वा । २. ढ-स-शोभनमास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तदन्येन कर्तुमशक्यत्वात् पूज्यमित्यर्थः ॥ प्रयक्षतमम् । 'यक्ष पूजायाम् '। यक्ष्यते इति यक्षः । अतिशयेन यक्षो यक्षतमः । पुनः प्रादिसमासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । दंसः । 'दसि दंसनदर्शनयोः'। चुरादिरात्मनेपदी । दंस्यते कर्तव्यतया दृश्यते इति दंसः कर्म । औणादिकः कर्मणि असुन् । उपह्वरे । 'ह्वृ कौटिल्ये '। कौटिल्यलक्षणगतिवाचिनात्र गतिमात्रं लक्ष्यते । उपह्वरन्ति गच्छन्त्यस्मिन् नद्य इत्युपह्वरो भूप्रदेशः । 'पुंसि संज्ञायां घः प्रायेण ' ( पा. सू. ३. ३. ११८ ) इत्यधिकरणे घप्रत्ययः । गुणः । कृदुत्तरपदप्रकृतिस्वरत्वम् । अपिन्वत् । 'पिवि सेचने '। भौवादिकः । चतस्रः । शस्[1] । 'त्रिचतुरोः स्त्रियां तिसृचतसृ ' ( पा. सू. ७. २. ९९ ) इति चतुरशब्दस्य चतस्रादेश आद्युदात्तो निपातितः । पूर्वसवर्णदीर्घे प्राप्ते 'अचि र ऋतः ' ( पा. सू. ७. २. १०० ) इति रेफादेशः । चतुरशब्दस्य आद्युदात्तत्वात् स्थानिवद्भावेन चतस्रादेशस्य आद्युदात्तत्वे सिद्धेऽपि पुनराद्युदात्तनिपातनसामर्थ्यात् यणादेशस्य वा पूर्वविधौ स्थानिवद्भावात् 'चतुरः शसि ' इत्यन्तोदात्तत्वस्याभावः । न च 'न पदान्त° ' इति स्थानिवद्भावप्रतिषेधः, स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवत् अन्यत्तु स्थानिवदेव ( पा. सू. १. १. ५८.१ ) इति नियमात् ॥

द्विता वि वव्रे सनजा सनीळे अयास्यः स्तवमानेभिरर्कैः ।
भगो न मेने परमे व्योमन्नधारयद्रोदसी सुदंसाः ॥ ७ ॥

द्विता । वि । वव्रे । सनऽजा । सनीळे इति सऽनीळे । अयास्यः । स्तवमानेभिः । अर्कैः । भगः । न । मेने इति । परमे । विऽओमन् । अधारयत् । रोदसी इति । सुऽदंसाः ॥ ७ ॥

[v]अयास्यः । यासः प्रयत्नः । तत्साध्यो यास्यः । न यास्योऽयास्यः । युद्धरूपैः प्रयत्नैः साधयितुमशक्य इत्यर्थः । कथं साध्यते इत्यत आह । [v]स्तवमानेभिः स्तोत्रं कुर्वद्भिः पुरुषैः [v]अर्कैः स्तुतिरूपैर्मन्त्रैः स्तूयमानः सन्निन्द्रः सुसाध्यः[2] भवति । यद्वा । अयास्यः पञ्चवृत्तिर्मुख्यप्राणः । स हि आस्यात् मुखात् अयते गच्छति निष्क्रामति । तदुपासकोऽप्यङ्गिरा उपचारात् अयास्य उच्यते । तथा च छन्दोगैराम्नातं—' तं हायास्य उद्गीथमुपासांचक्रे एतमु एवायास्यं मन्यन्त आस्याद्यदयते तेन ' ( छा. उ. १. २. १२ ) इति । अथवा । अयमास्ये मुखे वर्तते इत्ययास्यः । तथा च वाजसनेयकं—' ते होचुः क नु सोऽभूद्यो न इत्थमसक्तेत्ययमास्येऽन्तरिति ' ( बृ. उ. १. ३. ८ ) इति । पूर्ववदुपासकोऽप्ययास्यः । तेन ऋषिणा स्तवमानेभिः गुणनिष्ठगुणाभिधानलक्षणां स्तुतिं कुर्वद्भिः अर्कैः मन्त्रैः करणभूतैः स्तूयमानः सन् [v]सनजा । सना इति निपातो नित्यार्थः । नित्यजाते सर्वदा विद्यमानस्वभावे इत्यर्थः । प्रथमभावविकारवाचिना जनिना द्वितीयो भावविकारः सत्ता लक्ष्यते । यथा 'औत्पत्तिकस्तु शब्दस्यार्थेन संबन्धः ' इति । 'औत्पत्तिकमिति[3] नित्यं ब्रूमः ' (शा. भा. १.१.५) इति हि तद्भाष्यम् । [v]सनीळे समानं नीळम् ओको निवासस्थानं ययोस्ते । संलग्ने इत्यर्थः । एवंविधे द्यावापृथिव्यौ [v]द्विता द्विधा [v]वि [v]वव्रे विवृते अकरोत् भेदेनास्थापयदित्यर्थः । [v]मेने मननीये [v]परमे उत्कृष्टे [v]व्योमन् विविधरक्षणे नभसि वर्तमानः [v]भगो [v]न सूर्य इव [v]सुदंसाः शोभनकर्मेन्द्रः [v]रोदसी द्यावापृथिव्यौ [v]अधारयत् अपोषयत् । यद्वा । मेना इति स्त्रीनाम । तथा च यास्कः—' मेना मा इति स्त्रीणां मेना मानयन्त्येनाः ' ( निरु. ३. २१ ) इति । स्त्रीरूपमापन्ने रोदसी इन्द्रोऽपुष्यदित्यर्थः[4] ॥ द्विता । द्विधा

---

१. ढ-न-स-शसि । २. ढ-सुसाधः । ३. ढ-औत्पत्तिक इति । ४. ढ-स-अपुषदित्यर्थः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इत्यस्य धकारस्य तकारश्छान्दसः । सनजा । ' जनी प्रादुर्भावे ' । अस्मात् भावे ' अन्येष्वपि दृश्यते ' इति दृशिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात् केवलादपि जनेर्डप्रत्ययः । सना नित्यं जो जननं ययोस्ते सनजे । पूर्वपदस्य ह्रस्वश्छान्दसः । एवमादित्वादन्तोदात्तत्वम् । तदेव बहुव्रीहिस्वरेण शिष्यते । ' सुपां सुलुक् ° ' इति विभक्तेः आकारः । अयास्यः । ' यसु प्रयत्ने ' । यासः प्रयत्नः । तत्र भवो यास्यः । ' भवे छन्दसि ' इति यत् । न यास्योऽयास्यः । ' पराद्यिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम् । श्रुत्युक्तनिर्वचने तु पृषोदरादित्वात् अभिमतरूपस्वरसिद्धिः । मेने । सप्तम्येकवचनस्य ' सुपां सुलुक् ° ' इति शेआदेशः । ' शे ' (पा. सू. १. १. १३) इति प्रगृह्यत्वम् । यद्वा । मन्यते इति मेना । पचाद्यच् । ' नशिमन्योरलिट्येत्वं वक्तव्यम् ' ( पा. सू. ६. ४. १२०. ५) इति एत्वम् । ततः टाप् । द्विर्वचने ' ईदूदेद्द्विवचनम् ° ' ( पा. सू. १. १. ११ ) इति प्रगृह्यत्वम् । सुदंसाः । दंस इति कर्मवाची । असुन्प्रत्ययान्तः आद्युदात्तः । बहुव्रीहौ ' आद्युदात्तं द्व्यच्छन्दसि ' इत्युत्तरपदाद्युदात्तत्वम् ॥

सनादिवं परि भूमा विरूपे पुनर्भुवा युवती स्वेभिरेवैः ।
कृष्णेभिरक्तोषा रुशद्भिर्वपुर्भिरा चरतो अन्यान्या ॥ ८ ॥

सनात् । दिवम् । परि । भूम । विरूपे इति विऽरूपे । पुनःऽभुवा । युवती इति । स्वेभिः । एवैः । कृष्णेभिः । अक्ता । उषाः । रुशत्ऽभिः । वपुःऽभिः । आ । चरतः । अन्याऽअन्या ॥ ८ ॥

[v]विरूपे शुक्लकृष्णतया विषमरूपे [v]पुनर्भुवा पुनःपुनः प्रतिदिवसं जायमाने [v]युवती तरुण्यौ रात्र्युषसोः सर्वदैकरूप्यात् । एवंभूते रात्र्युषसौ [v]दिवं द्युलोकं [v]भूम भूमिं च [v]सनात् चिरकालादारभ्य [v]स्वेभिरेवैः स्वकीयैर्गमनैः [v]परि चरतः पर्यावर्तेते । अयमेवार्थः स्पष्टीक्रियते । [v]अक्ता रात्रिः [v]कृष्णेभिः अन्धकाररूपैर्वर्णैरुपलक्षिता [v]उषाः च [v]रुशद्भिः दीप्यमानैः [v]वपुर्भिः स्वशरीरभूतैस्तेजोभिरुपलक्षिता [v]अन्यान्या परस्परव्यतिहारेण [v]आ [v]चरतः आवर्तेते । हे इन्द्र एतत्सर्वं त्वयैव कार्यते त्वदधीनत्वात् सर्वासां देवतानामित्यर्थः ॥ भूम । ' सुपां सुलुक् ° ' इति द्वितीयाया डादेशः । छान्दसो ह्रस्वः । एवैः । ' इण् गतौ ' । ' इण्शीङ्भ्यां वन् ' ( उ. सू. १. १५० ) इति भावे वन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । अक्ता । नक्ता इति रात्रिनाम । नलोपश्छान्दसः । वपुर्भिः । ' अर्तिपॄवपि ° ' ( उ. सू. २. २७४ ) इत्यादिना उस् । नित्त्वादाद्युदात्तः । अन्यान्या । ' कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यं समासवच्च बहुलम् ' ( पा. म. ८. १. १२. ११ ) इति द्विर्भावे ' तस्य परमाम्रेडितम् ' ( पा. सू. ८. १. २ ) इति आम्रेडितसंज्ञायाम् ' अनुदात्तं च ' ( पा. सू. ८. १. ३ ) इति आम्रेडितस्यानुदात्तत्वम् ॥

सनेमि सख्यं स्वपस्यमानः सूनुर्दीधार शवसा सुदंसाः ।
आमासु चिद्दधिषे पक्वमन्तः पयः कृष्णासु रुशद्रोहिणीषु ॥ ९ ॥

सनेमि । सख्यम् । सुऽअपस्यमानः । सूनुः । दाधार । शवसा । सुऽदंसाः ।
आमासु । चित् । दधिषे । पक्वम् । अन्तरिति । पयः । कृष्णासु । रुशत् । रोहिणीषु ॥ ९ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vस्वपस्यमानः । स्वपः शोभनं कर्म । तदिवाचरन् Vशवसा शवसो बलस्य Vसूनुः पुत्रः । अतिबलवानित्यर्थः । Vसुदंसाः शोभनयागादिकर्मयुक्तः । एवंभूत इन्द्रः Vसख्यं यजमानानां सखित्वं Vसनेमि पुराणं Vदाधार धारयति पोषयतीत्यर्थः । सनेमीति पुराणनाम । 'प्रवयाः सनेमि' (नि. ३. २७. ४ ) इति पाठात् । किंच Vआमासु Vचित् आर्द्रासु अपरिपक्वासु गोषु च Vअन्तः मध्ये Vपक्वं परिपक्वं Vपयः Vदधिषे धारयसि । तथा Vकृष्णासु कृष्णवर्णासु Vरोहिणीषु लोहितवर्णासु च गोषु तद्विपरीतं Vरुशत् दीप्यमानं श्वेतवर्णं पयः दधिषे ॥ सख्यम् । सख्युर्भावः सख्यम् । 'सख्युर्यः' इति यः[1] । प्रत्ययस्वरः । दाधार । 'धृञ् धारणे' । तुजादित्वात् अभ्यासस्य दीर्घत्वम् । पक्वम् । 'पचो वः' ( पा. सू. ८. २. ५२ ) इति निष्ठातकारस्य वत्वम् । रोहिणीषु । 'रुह बीजजन्मनि प्रादुर्भावे' । 'रुहे रश्च लो वा' ( उ. सू. ३. ३७४ ) इति इतन्प्रत्ययान्तो रोहितशब्द आद्युदात्तो वर्णवाची । 'वर्णादनुदात्तात्तोपधात्तो नः' ( पा. सू. ४. १. ३९ ) इति ङीप्; तत्संनियोगेन तकारस्य नकारादेशश्च । ङीपः पित्त्वादनुदात्तत्वे प्रातिपदिकस्वर एव शिष्यते ॥

सनात्सनीळा अवनीरवाता व्रता रक्षन्ते अमृताः सहोभिः ।
पुरू सहस्रा जनयो न पत्नीर्दुवस्यन्ति स्वसारो अह्रयाणम् ॥ १० ॥

सनात् । सऽनीळाः । अवनीः । अवाताः । व्रता । रक्षन्ते । अमृताः । सहःऽभिः ।
पुरु । सहस्रा । जनयः । न । पत्नीः । दुवस्यन्ति । स्वसारः । अह्रयाणम् ॥ १० ॥

Vसनात् चिरकालादारभ्य Vसनीळाः समाननिवासस्थानाः Vअवाताः । वातं गमनं तद्रहिताः एकपाण्यवस्थानात् । 'अवनयः' इति अङ्गुलिनाम । एवंभूताः Vअवनीः अङ्गुलयः Vपुरु पुरूणि बहूनि Vसहस्रा असंख्यातानि Vव्रता व्रतानि इन्द्रसंबन्धीनि कर्माणि Vअमृताः पुनःपुनःकरणेऽप्यालस्यरहिताः सत्यः Vसहोभिः आत्मीयैर्बलैः Vरक्षन्ते पालयन्ति । अपि च Vस्वसारः स्वयमेव सरन्त्योऽङ्गुलयः Vपत्नीः पालयित्र्यः Vअह्रयाणं लज्जारहितं प्रगल्भमित्यर्थः । यद्वा । अह्रीतयानं प्रशस्तगमनमिन्द्रं Vजनयो Vन । जनयः इति देवानां पत्न्य उच्यन्ते–'देवानां वै पत्नीर्जनयः' इति श्रुतेः । ता इव Vदुवस्यन्ति परिचरन्ति । अञ्जलिबन्धनेन इन्द्रं प्रीणयन्तीत्यर्थः ॥ अवनीः । 'अवनयोऽङ्गुलयो भवन्त्यवन्ति कर्माणि' ( निरु. ३. ९ ) इति यास्कः । 'सुपां सुलुक्०' इति जसः पूर्वसवर्णदीर्घत्वम् । अवाताः । 'वा गतिगन्धनयोः' । 'असिहसि०' इत्यादिना भावे तन्प्रत्ययः । बहुव्रीहौ 'नञ्सुभ्याम्०' इत्युत्तरपदान्तोदात्तत्वम् । व्रता । 'शेश्छन्दसि बहुलम्' । इति शेर्लोपः । दुवस्यन्ति । दुवस्यतिः परिचरणकर्मा । कण्ड्वादिः । अतो यक एव स्वरः शिष्यते । पादादित्वात् निघाताभावः । अह्रयाणम् । 'ह्री लज्जायाम्' । 'बहुलं छन्दसि' इति श्लोरभावः । व्यत्ययेन शानच् । मुगभावश्छान्दसः । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । यद्वा । 'बहुलं छन्दसि' इति शपो लुकि 'छन्दस्युभयथा' इति शानच आर्धधातुकत्वेन ङित्त्वाभावे गुणायादेशौ । पूर्ववत् समासस्वरौ । यास्कस्तु एवं व्याख्यत्–'अह्रयाणोऽह्रीतयानः' ( निरु. ५. १५ ) इति ॥ ॥ २ ॥

---

१. ढ–यप्रत्ययः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सनायुवो नमसा नव्यो अर्कैर्वसूयवो मतयो दस्म दद्रुः ।
पतिं न पत्नीरुशतीरुशन्तं स्पृशन्ति त्वा शवसावन्मनीषाः ॥ ११ ॥

सनाऽयुवः । नमसा । नव्यः । अर्कैः । वसुऽयवः । मतयः । दस्म । दद्रुः ।
पतिम् । न । पत्नीः । उशतीः । उशन्तम् । स्पृशन्ति । त्वा । शवसाऽवन् । मनीषाः ॥ ११ ॥

हे ᵛदस्म दर्शनीयेन्द्र ᵛअर्कैः शस्त्ररूपैर्मन्त्रैः ᵛनमसा नमस्कारेण यस्त्वं ᵛनव्यः स्तुत्यो भवसि । ᵛसनायुवः सनातनमग्निहोत्रादि नित्यं कर्म आत्मन इच्छन्तः ᵛवसूयवः वसु धनमात्मन इच्छन्तो धनकामा वा ᵛमतयः मेधाविनस्त्वां ᵛदद्रुः बहुना प्रयासेन जग्मुः । हे ᵛशवसावन् बलवन्निन्द्र तैः प्रयुक्ताः ᵛमनीषाः स्तुतयः ᵛत्वा त्वां ᵛस्पृशन्ति प्राप्नुवन्ति । तत्र दृष्टान्तः । ᵛउशतीः उशत्यः कामयमानाः ᵛपत्नीः पत्न्यः ᵛउशन्तं कामयमानं ᵛपतिं ᵛन । यथा पतिं संभजन्ते तद्वत् ॥ सनायुवः । सना इत्येतदव्ययं नित्यत्वमाचष्टे । तेन च तद्वान् लक्ष्यते । सना सनातनं कर्म आत्मन इच्छन्तीति सनायुवः । ' क्याच्छन्दसि ' इति उप्रत्ययः । जसि वर्णव्यत्ययेन उत्वम् । मतयः । ' मन ज्ञाने ' । मन्यन्ते इति मतयः स्तोतारः । ' क्तिच्क्तौ च संज्ञायाम् ' इति क्तिच् । ' न क्तिचि दीर्घश्च ' इति निषेधे प्राप्ते बाहुलकात् ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपः । चित्त्वादन्तोदात्तत्वम् । दद्रुः । ' द्रा कुत्सायां गतौ ' । लिटि उसि ' आतो लोप इटि च ' इति आकारलोपः । उशतीः । ' वश कान्तौ ' । लटः शतृ । अदादित्वात् शपो लुक् । शतुर्ङित्त्वात् ग्रहिज्यादिना संप्रसारणम् । ' उगितश्च ' इति ङीप् । ' शतुरनुमः° ' इति नद्या उदात्तत्वम् । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घः । शवसावन् । मतुपि आकारोपजनश्छान्दसः । यद्वा । मत्वर्थीय आवनिप् ॥

सनादेव तव रायो गभस्तौ न क्षीयन्ते नोप दस्यन्ति दस्म ।
द्युमाँ असि क्रतुमाँ इन्द्र धीरः शिक्षा शचीवस्तव नः शचीभिः ॥ १२ ॥

सनात् । एव । तव । रायः । गभस्तौ । न । क्षीयन्ते । न । उप । दस्यन्ति । दस्म ।
द्युऽमान् । असि । क्रतुऽमान् । इन्द्र । धीरः । शिक्ष । शचीऽवः । तव । नः । शचीभिः ॥ १२ ॥

हे ᵛदस्म दर्शनीयेन्द्र । गभस्तिरिति बाहुनाम । ᵛतव ᵛगभस्तौ हस्ते ᵛसनादेव चिरकालादारभ्य स्थितानि ᵛरायः धनानि ᵛन ᵛक्षीयन्ते न विनश्यन्ति । ᵛनोप ᵛदस्यन्ति च स्तोतृभ्यो दत्तेऽपि[1] त्वद्धस्तगतं धनमुपक्षयं न प्राप्नोति । अपि तु वर्धते । हे ᵛइन्द्र ᵛधीरः बुद्धिमान् धृष्टो वा त्वं ᵛद्युमान् दीप्तिमान् ᵛअसि । तथा ᵛक्रतुमान् लोकरक्षणहेतुभूतकर्मयुक्तोऽसि । हे ᵛशचीवः कर्मवन्निन्द्र ᵛतव ᵛशचीभिः त्वदीयैः कर्मभिः ᵛनः अस्मभ्यं धनं ᵛशिक्ष देहि । शिक्षतिर्दानकर्मा ॥ क्षीयन्ते । ' क्षीञ् हिंसायाम् ' । अस्मात् कर्मकर्तरि कर्मवद्भावात् यगात्मनेपदे । ' वत्करणं स्वाश्रयमपि यथा स्यात् ' (का. ३. १ ८७ ) इति कर्तृवद्भावात् ' अचः कर्तृयकि ' ( पा. सू. ६. १. १९५ ) इत्याद्युदात्तत्वम् । ' चादिलोपे विभाषा ' इति निघातप्रतिषेधः । शचीवः । शची अस्यास्तीति शचीवान् । ' छन्दसीरः ' इति मतुपो वत्वम् । संबुद्धौ ' मतुवसो रुः° ' इति नकारस्य रुत्वम् ॥

---

१. च-छ-ण-न-फ–दत्तमपि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सनायते गोतम इन्द्र नव्यमतक्षद्ब्रह्म हरियोजनाय ।
सुनीथाय नः शवसान नोधाः प्रातर्मक्षू धियावसुर्जगम्यात् ॥ १३ ॥

सनाऽयते । गोतमः । इन्द्र । नव्यम् । अतक्षत् । ब्रह्म । हरिऽयोजनाय ।
सुऽनीथाय । नः । शवसान । नोधाः । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥ १३ ॥

स इन्द्रः सनायते नित्य इवाचरति सर्वेषामाद्यो भवति । हे शवसान बलवन् इन्द्र हरियोजनाय । हरी अश्वौ रथे योजयतीति हरियोजनः । सुनीथाय सुष्ठु नेत्रे । एवंभूताय तस्मै तुभ्यं गोतमः गोतमस्य ऋषेः पुत्रः नोधाः ऋषिः नव्यं नूतनं ब्रह्म एतत्सूक्तरूपं स्तोत्रं नः अस्मदर्थम् अतक्षत् अकरोत् । अतोऽस्माभिरनेन स्तोत्रेण स्तुतः सन् धिया बुद्ध्या कर्मणा वा प्राप्तवसुरिन्द्रः प्रातःकाले मक्षु शीघ्रं जगम्यात् आगच्छतु ॥ सनायते । सना इति निपातो नित्यशब्दसमानार्थः । तस्मादाचारार्थे क्यङ्प्रत्ययः । सुनीथाय । ' णीञ् प्रापणे ' इत्यस्मात् औणादिकः थक्प्रत्ययः । थाथादिस्वरः ॥ ॥ ३ ॥

' त्वं महान् ' इति नवर्चं षष्ठं सूक्तं नोधस आर्षं त्रैष्टुभमैन्द्रम् । अनुक्रम्यते च—' त्वं नव ' इति । समूढहे दशरात्रे द्वितीये छन्दोमे मरुत्वतीयशस्त्रे एतत्सूक्तम् । ' विश्वजितोऽग्निं नरः ' इति खण्डे सूत्रितं—' तां सु ते कीर्तिं त्वं महाँ इन्द्र यो ह ' ( आश्व. श्रौ. ८. ७ ) इति ॥

त्वं महाँ इन्द्र यो ह शुष्मैर्द्यावा जज्ञानः पृथिवी अमे धाः ।
यद्ध ते विश्वा गिरयश्चिदभ्वा भिया दृळ्हासः किरणा नैजन् ॥ १ ॥

त्वम् । महान् । इन्द्र । यः । ह । शुष्मैः । द्यावा । जज्ञानः । पृथिवी इति । अमे । धाः ।
यत् । ह । ते । विश्वा । गिरयः । चित् । अभ्वा । भिया । दृळ्हासः । किरणाः । न । ऐजन् ॥ १ ॥

हे इन्द्र त्वं महान् गुणैः सर्वाधिको भवसि । यो ह यः खलु त्वम् अमे असुरकृते भये सति जज्ञानः तदानीमेव प्रादुर्भूतः सन् शुष्मैः शत्रूणां शोषकैरात्मीयैर्बलैः द्यावा पृथिवी द्यावापृथिव्यौ धाः अधारयः । तादृशाद्भयात् अमूमुचः इत्यर्थः । किंच । यद्ध ते यस्य खलु तव संबन्धिन्या भिया भीत्या विश्वा विश्वानि व्याप्तानि यानि भूतजातानि गिरयश्चित् ये च शिलोच्चयाः । अभ्वा । महन्नामैतत् । अन्यान्यपि महान्ति यानि सन्ति । तेऽपि सर्वे दृळ्हासः दृढा अपि ऐजन् अकम्पिषत । तत्र दृष्टान्तः । किरणा न । यथा सूर्यरश्मय इतस्ततो नभसि कम्पन्ते तद्वत् ॥ जज्ञानः । ' जनी प्रादुर्भावे ' । लिटः कानच् । ' गमहन° ' इत्यादिना उपधालोपः । स्थानिवद्भावात् द्विर्भावादि । ' चितः ' इत्यन्तोदात्तत्वम् । द्यावापृथिवी इत्यस्य समस्तपदस्य मध्ये जज्ञान इत्यस्य पाठश्छान्दसः । यत् । ' सुपां सुलुक् ° ' इति षष्ठ्या लुक् । अभ्वा । आ समन्ताद्भवन्ति सद्भावं प्राप्नुवन्तीति अभ्वा महान्तः । आङ्पूर्वात् भवतेः औणादिको डुनूप्रत्ययः । उपसर्गस्य ह्रस्वत्वं च । यद्वा । नञ्पूर्वात् भवतेः प्राप्त्यर्थात् ' नञि भुवो डित् ' इति क्नप्रत्ययः । महान्तो हि प्राप्तुं न शक्यन्ते । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । किरणाः । कीर्यन्ते विक्षिप्यन्ते

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति किरणाः । ' कॄ विक्षेपे ' । ' कृपॄवृजिमन्दिनिधाञ्भ्यः क्युः ' ( उ. सू. २. २३९ ) इति क्युप्रत्ययः । योरनादेशे प्रत्ययाद्युदात्तत्वम् । ' ऋत इद्धातोः ' इति इत्वम् । ऐजन् । ' एजृ कम्पने' । लङि आडागमः । स चोदात्तः । वृद्धिश्च ॥

आ यद्धरी इन्द्र विव्रता वेरा ते वज्रं जरिता बाह्वोर्धात् ।
येनाविहर्यतक्रतो अमित्रान्पुर इष्णासि पुरुहूत पूर्वीः ॥ २ ॥

आ । यत् । हरी इति । इन्द्र । विऽव्रता । वेः । आ । ते । वज्रम् । जरिता । बाह्वोः । धात् ।
येन । अविहर्यतक्रतो इत्यविहर्यतऽक्रतो । अमित्रान् । पुरः । इष्णासि । पुरुऽहूत । पूर्वीः ॥२॥

हे ᵛइन्द्र त्वं ᵛयत् यदा ᵛविव्रता विविधकर्माणौ ᵛहरी त्वदीयावश्वौ ᵛआ ᵛवेः रथे[1] आगमयसि[1] रथे योजयसीत्यर्थः । तदानीं ᵛते तव ᵛबाह्वोः हस्तयोः ᵛजरिता स्तोता ᵛवज्रम् ᵛआ ᵛधात् स्तोत्रेण स्थापयति । स्तोत्रा स्तुते प्रयत्नमन्तरेण वज्रं त्वद्धस्ते दृश्यते इत्यर्थः । हे ᵛअविहर्यतक्रतो प्रेप्सितकर्मन्निन्द्र ᵛअमित्रान् शत्रून् ᵛयेन वज्रेण ᵛइष्णासि अभिगच्छसि । हे ᵛपुरुहूत पुरुभिर्बहुभिर्यजमानैराहूत त्वं ᵛपूर्वीः बह्वीः ᵛपुरः असुरपुराणि भेत्तुमभिगच्छसीत्यर्थः ॥ विव्रता । व्रतमिति कर्मनाम । विविधं व्रतं ययोस्तौ । ' सुपां सुलुक्° ' इति पूर्वसवर्णदीर्घत्वम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । वेः । ' वी गतिप्रजनकान्त्यशनखादनेषु[2] ' । अन्तर्भावितण्यर्थात् छान्दसे लङि सिपि अदादित्वात् शपो लुक् । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । धात् । दधातेः छान्दसे लुङि ' गातिस्था° ' इति सिचो लुक् । पूर्ववत् अडभावः । अविहर्यतक्रतो । ' हर्यतिः प्रेप्साकर्मा ' ( निरु. ७. १७ ) इति यास्कः । ' हर्य गतिकान्त्योः ' । कान्तिरभिलाषः । विहर्यतोऽनभिलषितः । अविहर्यतोऽभिलषित इत्यर्थः । तादृशः क्रतुः कर्म यस्य स तथोक्तः । अमित्रान् । न सन्ति मित्राण्येषामिति बहुव्रीहौ ' नञो जरमरमित्रमृताः ' इत्युत्तरपदाद्युदात्तत्वम् । इष्णासि । ' इष आभीक्ष्ण्ये ' । अत्र गत्यर्थः । ' क्र्यादिभ्यः श्ना ' । सिपः पित्त्वादनुदात्तत्वे तस्यैव स्वरः शिष्यते । यद्वृत्तयोगादनिघातः ॥

त्वं सत्य इन्द्र धृष्णुरेतान्त्वमृभुक्षा नर्यस्त्वं षाट् ।
त्वं शुष्णं वृजने पृक्ष आणौ यूने कुत्साय द्युमते सचाहन् ॥ ३ ॥

त्वम् । सत्यः । इन्द्र । धृष्णुः । एतान् । त्वम् । ऋभुक्षाः । नर्यः । त्वम् । षाट् ।
त्वम् । शुष्णम् । वृजने । पृक्षे । आणौ । यूने । कुत्साय । द्युऽमते । सचा । अहन् ॥ ३ ॥

हे इन्द्र ᵛत्वं ᵛसत्यः सत्सु भवः सर्वोत्कृष्ट इत्यर्थः । ᵛएतान् शत्रूनभिगतः सन् ᵛधृष्णुः तेषां धर्षयिता तिरस्कर्ता । किंच ᵛत्वम् ᵛऋभुक्षाः ऋभूणामधिपतिः । तेषु कृतनिवासो वा । यद्वा । महन्नामैतत् । महान् प्रवृद्धोऽसि । ᵛनर्यः नृभ्यो हितः । तथा ᵛत्वं ᵛषाट् शत्रूणामभिभविता हन्तेत्यर्थः । किंच । वृजने इत्यादीनि त्रीणि संग्रामनामानि । अत्र पूर्वे विशेषणे । ᵛवृजने वर्जनयुक्ते । संग्रामे हि वीराः पुरुषा वर्ज्यन्ते हिंस्यन्ते । ᵛपृक्षे संपर्चनीये वीरैः[3] योद्धुं प्रासङ्गे । एवंविधे ᵛआणौ संग्रामे

---

१. ढ-न–आगमयसि; स–' रथे आगमयसि ' नास्ति । २. ढ– °क्रान्त्यसनखादनेषु । ३. च-छ-ण-न-फ–वीर्यैः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]द्युमते दीतिमते [V]यूने तरुणाय [V]कुत्साय [V]सचा [V]त्वं सहायो भूत्वा [V]शुष्णं शोषयितारमेतत्संज्ञमसुरम् [V]अहन् अवधीः ॥ ऋभुक्षाः । ऋभुरिति मेधाविनाम । उरु विस्तीर्णं भाति । यद्वा । ऋतेन यज्ञेन भाति भवतीति वा ऋभुः । उरुशब्दे ऋतशब्दे वोपपदे भातेर्भवतेर्वा 'मृगय्वादयश्च' (उ. सू. १. ३८) इति कुप्रत्ययः पूर्वपदस्य ऋभावश्च निपात्यते । क्षयतिरैश्वर्यकर्मा । तेषामीष्टे इति ऋभुक्षाः । यद्वा । 'क्षि निवासगत्योः' । तेषु निवसतीति 'पतेस्थ' (उ. सू. ४. ४५२) इति विधीयमान इनि-प्रत्ययो बहुलवचनादस्मादपि भवति । टिलोपश्च । सौ 'पथिमथ्यृभुक्षामात्' (पा.सू. ७. १. ८५) इति आत्वम् । प्रत्ययस्वरः । षाट् । 'सह[1] अभिभवे' । 'छन्दसि सहः' (पा. सू. ३. २. ६३) इति केवलादपि ण्विः । षत्वं छान्दसम् । द्युमते । द्यौर्दीप्तिरस्मिन्नस्तीति द्युमान् । 'स्वादिष्वसर्वनामस्थाने' इति पदसंज्ञायां 'दिव उत्' इति उत्वम् । 'ह्रस्वनुड्भ्यां मतुप्' इति मतुप उदात्तत्वम् ॥

त्वं ह॒ त्यदिन्द्र चोदीः सखा॑ वृ॒त्रं यद्वज्रि॑न्वृषकर्मन्नु॒ग्राः ।
यद्ध॑ शूर वृषमणः परा॒चैर्वि दस्यूँर्योना॒वकृ॑तो वृथा॒षाट् ॥ ४ ॥

त्वम् । ह॒ । त्यत् । इ॒न्द्र॒ । चो॒दीः॒ । सखा॑ । वृ॒त्रम् । यत् । वज्रि॑न् । वृ॒ष॒ऽक॒र्म॒न् । उ॒ग्राः । यत् । ह॒ । शू॒र॒ । वृ॒ष॒ऽम॒नः॒ । परा॒चैः । वि । दस्यू॑न् । योनौ॑ । अकृ॑तः । वृ॒था॒ऽसाट् ॥ ४ ॥

हे [V]इन्द्र [V]त्वं [V]ह त्वं खलु [V]सखा कुत्सस्य सहायः सन् [V]त्यत् तत् प्रसिद्धं धनं जयलक्षणं यशो वा [V]चोदीः प्रेरितवान् अकार्षीरित्यर्थः । हे [V]वृषकर्मन् वृष्ट्युदकसेचनरूपकर्मोपेत [V]वज्रिन् वज्रवन्निन्द्र [V]वृत्रं सर्वस्य धनस्यावरीतारं कुत्सस्य शत्रुं [V]यत् यदा [V]उग्राः अतुग्राः अहिंसीः । अपि च हे [V]शूर शत्रूणां प्रेरक [V]वृषमणः कामाभिवर्षकमनस्केन्द्र [V]वृथासाट् अनायासेन शत्रूणामभिभविता त्वं [V]यद्ध यदा खलु [V]योनौ वीरैर्मिश्रणीये संग्रामे [V]दस्यून् कुत्सस्योपक्षयितॄन् अन्यान् शत्रून् [V]पराचैः परागमनैः [V]वि [V]अकृतः पराङ्मुखा यथा भवन्ति तथा व्यच्छिनः । तदानीं कुत्सः सर्वं यशः प्राप्नो-दित्यर्थः ॥ चोदीः । 'चुद प्रेरणे' । लुङि 'नेटि' (पा. सू. ७. २. ४) इति सिचि वृद्धि-प्रतिषेधः । उग्राः । 'णभ तुभ हिंसायाम्' । क्र्यादिकः । लङि सिपि तलोपश्छान्दसः । 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः । पराचैः इत्येतदव्ययं नीचैरुच्चैरितिवत् इति भट्टभास्करमिश्रः[2] । 'पराचैः पराञ्चनैः' (निरु. ११. २५) इति निरुक्तम् । दस्यून् । 'दीर्घादटि समानपादे' इति नकारस्य रुत्वम् । 'अत्रानुनासिकः पूर्वस्य तु वा' इति ऊकारस्य सानुनासिकता । अकृतः । 'कृती छेदने' । लङि सिपि तुदादित्वात् शप्रत्ययः । आगमानुशासनस्यानित्यत्वात् 'शे मुचादीनाम्' इति नुमागमस्याभावः । शस्य ङित्त्वात् गुणाभावः ॥

त्वं ह॒ त्यदि॑न्द्रारि॑षण्यन्दृ॒ळ्हस्य॑ चि॒न्मर्ता॑नामजु॒ष्टौ ।
व्य१॑स्मदा काष्ठा॒ अर्व॑ते॒ वर्धनेव॑ वज्रि॒ञ्छ्नथि॑ह्यमित्रा॒न् ॥ ५ ॥

त्वम् । ह॒ । त्यत् । इ॒न्द्र॒ । अरि॑षण्यन् । दृ॒ळ्हस्य॑ । चि॒त् । मर्ता॑नाम् । अ॒जु॒ष्टौ ।
वि । अ॒स्मत् । आ । काष्ठाः॑ । अर्व॑ते । वः॒ । घ॒नाऽइ॑व । व॒ज्रि॒न् । श्नथि॑हि । अ॒मित्रा॑न् ॥५॥

---

१. ढ-न-षह । २. ढ-भट्टभास्करमिश्राः ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे Vइन्द्र Vत्वं Vह त्वं खलु Vत्यत् तस्य Vदृळहस्य Vचित् दृढस्य कस्यचिदपि Vअरिषण्यन् रेषणमनिच्छन् एवंस्वभावो भवसि । देवतात्वेनानुग्रहीतृत्वात् । तथापि Vमर्तानां स्तोतृणामस्माकं शत्रुभिः Vअजुष्टौ अप्रीतौ सत्याम् Vअस्मत् Vअर्वते अस्मदीयाश्वाय गन्तुं Vकाष्ठाः दिशः Vआ समन्तात् Vवि Vवः विवृताः कुरु । यथा सर्वासु दिक्षु अस्मदीया अश्वाः प्रतिरोधमन्तरेण गच्छन्ति तथा कुरु इत्यर्थः । किंच तत्रत्यान् Vअमित्रान्[1] हे Vवज्रिन् वज्रवन्निन्द्र Vघनेव घनेन कठिनेन पर्वतेनेव वज्रेण Vश्रथिहि श्रथय जहीत्यर्थः । यद्वा । मर्तानां मनुष्याणां मध्ये यस्मिन् कस्मिंश्चित्तव अप्रीतौ सत्यां तस्य शत्रोर्दृढस्यापि अरिषण्यन् रेषणं हिंसनमनिच्छन् वर्तसे । यस्मिंस्तु कुत्सादौ प्रीतिरस्ति तस्य शत्रुवधं चकृषे । अतस्तव प्रियाणामस्माकमर्वते इत्यादि पूर्ववत् ॥ त्यत् । ' सुपां सुलुक्° ' इति षष्ठ्या लुक् । अरिषण्यन् । रिष्टशब्दात् क्यचि ' दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति ' ( पा. सू. ७. ४. ३६ ) इति रिषण्भावो निपात्यते । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । अस्मत् । पूर्ववत् षष्ठ्या लुक् । अर्वते । ' अर्वणस्त्रसावनञः ' इति नकारस्य तकारादेशः । वनिप्सुपौ पित्त्वादनुदात्तौ । परिशेषात् धातुस्वरः । घनेव । ' मूर्तौ घनः ' ( पा. सू. ३. ३. ७७ ) इति काठिन्ये गम्यमाने हन्तेः अप्प्रत्ययान्तो निपात्यते । श्रथिहि । श्रथ हिंसार्थः । ण्यन्तात् लोटि ' बहुलं छन्दसि ' इति शपो लुक् ॥ ॥ ४ ॥

त्वां ह त्यदिन्द्रार्णसातौ स्वर्मीळ्हे नर आजा हवन्ते ।
तव स्वधाव इयमा समर्य ऊतिर्वाजेष्वतसाय्या भूत् ॥ ६ ॥

त्वाम् । ह । त्यत् । इन्द्र । अर्णऽसातौ । स्वः३मीळ्हे । नरः । आजा । हवन्ते ।
तव । स्वधाऽवः । इयम् । आ । सऽमर्ये । ऊतिः । वाजेषु । अतसाय्या । भूत् ॥ ६ ॥

हे Vइन्द्र Vअर्णसातौ अर्णानां गन्तॄणां युद्धे प्रवृत्तानां पुरुषाणां सातिर्लाभो यस्मिन् Vस्वर्मीळ्हे । मीळ्हमिति धननाम । सुष्ठु अरणीयं धनं यस्मिन् । एवंभूते Vआजा आजौ संग्रामे Vत्यत् तं प्रसिद्धं त्वामेव Vनरः योद्धुकामाः पुरुषाः सहायार्थं Vहवन्ते आह्वयन्ति । यद्वा । अर्णस उदकस्य सातिर्लाभो यस्मिन् वृत्रादियुद्धे तस्मिन्नित्यर्थः । वृष्टिनिरोधकेन वृत्रेण सह वर्षणार्थं Vतव यद्युद्धं तत्र स्तोतारस्त्वां प्रोत्साहयन्तीति भावः । यस्मादेवं तस्मात् हे Vस्वधावः हे[2] अन्नवन् बलवन् वा इन्द्र Vसमर्ये संग्रामे Vतव संबन्धिनी Vइयम् ऊतिः त्वदीयमिदं रक्षणम् Vआ अस्मदाभिमुख्येन Vभूत् भवतु । Vवाजेषु संग्रामेषु या एषा Vऊतिः Vअतसाय्या योद्धृभिः प्राप्तव्या भवति ॥ त्यत् । ' सुपां सुलुक्° ' इति द्वितीयाया लुक् । अर्णसातौ । ' ऋ गतौ ' । बहुलवचनात् औणादिको नप्रत्ययः । ' पणु दाने ' इत्यस्मात् भावे क्तिनि ' जनसनखनाम्° ' इत्यनुनासिकस्य आत्वम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । यद्वा । ' उदके नुट् च ' ( उ. सू. ४. ६३६ ) इति अर्तेः असुन्प्रत्ययो नुडागमश्च । ' पीवोपवसनादीनां छन्दसि लोपो वक्तव्यः ' ( पा. म. ६. ३. १०९. ६ ) इति सलोपः । नित्त्वादाद्युदात्तत्वम् । पूर्ववत् बहुव्रीहिस्वरः । स्वर्मीळ्हे । स्वरूशब्दः ' न्यङ्स्वरौ स्वरितौ ' ( फि. सू. ७४ ) इति स्वरितः । बहुव्रीहिस्वरेण स एव शिष्यते । आजा । ' सुपां सुलुक्° ' इति सप्तम्या डादेशः । स्वधावः । ' मतुवसो रुः° ' इति मतुपो रुत्वम् । अतसाय्या । ' अत सातत्यगमने ' । औणादिकः साय्यप्रत्ययः तस्य आडागमश्च । आगमानुदात्तत्वे प्रत्ययाद्युदात्तत्वम् । भूत् । ' छन्दसि लुङ्लङ्लिटः ' इति प्रार्थनायां लुङि ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः ॥

---

१. ढ-स-अमित्रान् शत्रून् । २. ढ-' हे ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्वं ह त्यदिन्द्र सप्त युध्यन्पुरो वज्रिन्पुरुकुत्साय दर्दः ।
बर्हिर्न यत्सुदासे वृथा वर्गहो राजन्वरिवः पूरवे कः ॥ ७ ॥

त्वम् । ह । त्यत् । इन्द्र । सप्त । युध्यन् । पुरः । वज्रिन् । पुरुऽकुत्साय । ददरितिं दर्दः । बर्हिः । न । यत् । सुऽदासे । वृथा । वर्क् । अंहोः । राजन् । वरिवः । पूरवे । करितिं कः ॥ ७ ॥

हे [V]वज्रिन् वज्रवन् [V]इन्द्र [V]पुरुकुत्साय एतत्संज्ञाय ऋषये [V]युध्यन् तदीयशत्रुभिः सह युद्धं कुर्वाणः [V]त्वम् एव [V]त्यत् ताः [V]सप्त [V]पुरः तदीयानि सप्तसंख्यानि नगराणि [V]ददः व्यदारयः अभैत्सीरित्यर्थः । अपि च [V]सुदासे एतत्संज्ञाय राज्ञे [V]अंहोः एतत्संज्ञस्यासुरस्य संबन्धि [V]यत् धनमस्ति तत् [V]वृथा अनायासेन [V]बर्हिर्न बर्हिरिव [V]वर्क् अवृणक् अच्छिनः इत्यर्थः । तदनन्तरं [V]पूरवे त्वां हविषा पूरयते तस्मै सुदासे हे [V]राजन् स्वामिन् इन्द्र [V]वरिवः धनं [V]कः अकार्षीः ॥ त्यत् । 'सुपां सुलुक्०' इति विभक्तेर्लुक् । ददः । 'दृ विदारणे' । अस्मात् यङ्लुगन्तात् लङि सिपि 'अदादिवच्च' इति वचनात् शपो लुक् । 'हल्ङ्याब्भ्यः०' इति सलोपः । 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः । सुदासे । शोभनं ददातीति सुदाः । असुन् । 'सुदाः कल्याणदानः' (निरु. २. २४) इति यास्कः । वर्क् । 'वृजी वर्जने' । लङि सिपि 'बहुलं छन्दसि' इति विकरणस्य लुक् । लघूपधगुणे पूर्ववत् सलोपः[1] । अडभावश्च । 'चोः कुः' इति कुत्वम् । कः । 'डुकृञ् करणे' । लुङि सिपि 'मन्त्रे घस०' इति च्लेर्लुक् । पूर्ववत् सलोपाडभावौ[2] ॥

त्वं त्यां नं इन्द्र देव चित्रामिषमापो न पीपयः परिज्मन् ।
यया शूर प्रत्यस्मभ्यं यांसि त्मनमूर्जं न विश्वध क्षरध्यै ॥ ८ ॥

त्वम् । त्याम् । नः । इन्द्र । देव । चित्राम् । इषम् । आपः । न । पीपयः । परिऽज्मन् । यया । शूर । प्रति । अस्मभ्यम् । यांसि । त्मनम् । ऊर्जम् । न । विश्वध । क्षरध्यै ॥ ८ ॥

हे [V]देव द्योतमान [V]इन्द्र [V]त्वं [V]नः अस्माकं [V]चित्रां चायनीयां [V]त्यां ताम् [V]इषम् अन्नं [V]परिज्मन् परितो व्याप्तायां भूमौ [V]पीपयः प्रावर्धयः । यथा सर्वा भूमिरन्नेन परिपूर्णा भवति तथा कुर्वित्यर्थः । तत्र दृष्टान्तः । [V]आपो [V]न । यथा अपो वृष्ट्युदकानि भूम्यां वर्षणेन प्रवर्धयसि तद्वत् । यद्वा । भूमौ वर्तमानानस्मान् यथा अपः पाययसि तद्वत् चित्रामिषमपि पाययेति भावः । हे [V]शूर इन्द्र [V]यया इषा [V]त्मनम् आत्मानं जीवम् [V]अस्मभ्यं [V]प्रति [V]यंसि प्रयच्छसि । तत्र दृष्टान्तः । [V]विश्वध विश्वतः सर्वतः [V]क्षरध्यै क्षरितुम् [V]ऊर्जं [V]न उदकमिव । यथास्मभ्यं बहुलमुदकं प्रयच्छसि तद्वत्प्राणधारणरूपं जीवनमपि प्रयच्छसीति भावः ॥ आपः । शसि प्राप्ते व्यत्ययेन जस् । 'अप्तृन्०' इत्यादिना दीर्घः । पीपयः । 'स्फायी ओप्यायी वृद्धौ' । ण्यन्तात् छान्दसे लुङि 'प्यायः पी' (पा. सू. ६. १. २८) इति व्यत्ययेन पीभावः । 'णिश्रिद्रुस्रुभ्यः'

---

१. ढ– सेर्लोपः । २. ढ–सेर्लोपाडभावौ ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति च्लेः चङादेशः । णिलोपादीनि । यद्वा । ' पीङ् पाने ' इत्यस्मात् लुङि चङि पूर्ववत् । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । परिज्मन् । जमतिर्गतिकर्मा । ' अज गतिक्षेपणयोः ' । आभ्यां परिपूर्वाभ्यां ' श्वन्नुक्षन्° ' इत्यादौ कनिन्प्रत्ययान्तौ निपातितः । ' सुपां सुलुक्° ' इति सप्तम्या लुक् । यंसि । ' यम उपरमे ' । ' बहुलं छन्दसि ' इति शपो लुक् । त्मनम् । ' आडोऽन्यत्रापि च्छन्दसि दृश्यते ' ( का. ६. ४. १४१. १ ) इत्यात्मनः आकारलोपः । संज्ञापूर्वकस्य विधेरनित्यत्वात् उपधादीर्घाभावः । विश्वध । विश्वशब्दात्तसिलः सकारलोपो धत्वं च पृषोदरादित्वात् । क्षरध्यै । ' क्षर संचलने ' । ' तुमर्थे सेसेन्° ' इति अध्यैन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् ॥

अकारि त इन्द्र गोतमेभिर्ब्रह्माण्योक्ता नमसा हरिभ्याम् ।
सुपेशसं वाजमा भरा नः प्रातर्मक्षू धियावसुर्जगम्यात् ॥ ९ ॥

अकारि । ते । इन्द्र । गोतमेभिः । ब्रह्माणि । आऽउक्ता । नमसा । हरिऽभ्याम् ।
सुऽपेशसम् । वाजम् । आ । भर । नः । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥ ९ ॥

हे [v]इन्द्र [v]ते तव [v]गोतमेभिः गन्तृतमैरेतत्संज्ञैर्ऋषिभिः [v]अकारि स्तोत्रं कृतमित्यर्थः । एतदेव स्पष्टीकरोति । [v]ब्रह्माणि मन्त्रजातानि [v]नमसा हविर्लक्षणेनान्नेन सह [v]हरिभ्याम् अश्वाभ्यां युक्ताय तुभ्यम् [v]ओक्ता आभिमुख्येन उक्तानि[1]। यद्वा । मर्यादायाम् आकारः । यथाशास्त्रं प्रयुक्तानि । स त्वं [v]सुपेशसम् । पेश इति रूपनाम । बहुविधरूपयुक्तं [v]वाजम् अन्नं [v]नः अस्मभ्यम् [v]आ [v]भर आहर देहीति यावत् । धिया बुद्ध्या कर्मणा वा प्राप्तधन इन्द्रः प्रातःकाले अस्मद्रक्षणार्थं [v]जगम्यात् आगच्छतु ॥ ओक्ता । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । सुपेशसम् । ' पिश अवयवे ' । असुन् । बहुव्रीहौ ' आद्युदात्तं द्यच्छन्दसि ' इत्युत्तरपदाद्युदात्तत्वम् । भर । ' ह्यग्रहोर्भः° ' इति भत्वम् । ' द्यचोतस्तिङः ' इति संहितायां दीर्घः ॥ ॥ ५ ॥

' वृष्णे शर्धाय ' इति पञ्चदशर्चं सप्तमं सूक्तम् । नोधस आर्षं मारुतम् । अन्त्या त्रिष्टुप् । शिष्टाश्चतुर्दश जगत्यः । तथा चानुक्रान्तं—' वृष्णे पञ्चोना मारुतं त्रिष्टुबन्तम् ' इति । चातुर्विंशिकेऽहनि आग्निमारुते इदं मारुतं निविद्धानीयम् । सूत्रितं च—' पृक्षस्य वृष्णो वृष्णे शर्धाय यज्ञेन वर्धतेत्याग्निमारुतम् ' ( आश्व. श्रौ. ७. ४ ) इति । आभिजुविके पञ्चमेऽहन्यपि एतत् आग्निमारुते मारुतनिविद्धानम् । सूत्रितं च—' पृक्षस्य वृष्णो वृष्णे शर्धाय नू चित्सहोजा इत्याग्निमारुतम् ' ( आश्व. श्रौ. ७. ७ ) इति ॥

वृष्णे शर्धाय सुमखाय वेधसे नोधः सुवृक्तिं प्र भरा मरुद्भ्यः ।
अपो न धीरो मनसा सुहस्त्यो गिरः समञ्जे विदथेष्वाभुवः ॥ १ ॥

वृष्णे । शर्धाय । सुऽमखाय । वेधसे । नोधः । सुऽवृक्तिम् । प्र । भर । मरुत्ऽभ्यः ।
अपः । न । धीरः । मनसा । सुऽहस्त्यः । गिरः । सम् । अञ्जे । विदथेषु । आऽभुवः ॥ १ ॥

---

१. ढ—उक्ता उक्तानि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अत्र पूर्वार्धेन स्तुतौ नोधाः प्रेर्यते । हे [v]नोधः [v]वृष्णे कामानां वर्षित्रे [v]सुमखाय शोभनयज्ञाय [v]वेधसे पुष्पफलादीनां कर्त्रे । वायौ सति हि पुष्पाणि फलानि चोत्पद्यन्ते । एवंविधाय [v]मरुद्भ्यः । विभक्तिव्यत्ययः । मरुतां मितराविणां [v]शर्धाय समूहाय [v]सुवृक्तिं सुष्ठु आवर्जकं सुष्ठु प्रवृत्तं वा स्तोत्रं [v]प्र [v]भर प्रेरय स्तुहीति यावत् । स्तुतौ प्रेरितो नोधा आह । [v]धीरः धीमान् [v]सुहस्त्यः शोभनाङ्गुलियुक्तः । कृताञ्जलिरित्यर्थः । एवंभूतोऽहं [v]मनसा [v]गिरः स्तुतिलक्षणा वाचः [v]समञ्जे सम्यग्व्यक्ताः[1] करोमि[1] । या गिरः [v]विदथेषु यज्ञेषु [v]आभुवः । आङ् मर्यादायाम् । यथाशास्त्रं प्रयुक्ता भवन्तीति आभुवः । देवताभिमुखीकरणाय समर्थाः । यज्ञयोग्यैः स्तोत्रैर्मनःपूर्वकं मरुद्गणं स्तौमीति भावः । तत्र दृष्टान्तः । [v]अपो [v]न । यथा पर्जन्यो युगपदेव बहुषु प्रदेशेषु बहुशो जलानि वर्षति तद्वत् ॥ वृष्णे । ' वृषु सेचने ' । ' कनिन्युवृषितक्षि° ' इत्यादिना कनिन्प्रत्ययः । कित्त्वाद्गुणाभावो नित्त्वादाद्युदात्तत्वम् । चतुर्थ्येकवचने ' अल्लोपोऽनः ' इति अकारलोपः । शर्धाय । ' शृधु प्रसहने ' । शर्ध्यते प्रसह्यते अनेन पर्वतादिकमिति शर्धो मरुत्संघः । करणे घञ् । जित्त्वादाद्युदात्तत्वम् । सुमखाय । शोभनो मखो यस्य । ' नञ्सुभ्याम् ' इति प्राप्ते व्यत्ययेन पूर्वपदप्रकृतिस्वरत्वम् । नोधः । पादादित्वात् षाष्ठिकमामन्त्रिताद्युदात्तत्वम् । सुहस्त्यः । हस्ते भवा हस्त्याः । ' भवे छन्दसि ' इति यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । ततः सुशब्देन बहुव्रीहौ ' आद्युदात्तं द्यच्छन्दसि ' इत्युत्तरपदाद्युदात्तत्वम् ॥

ते जज्ञिरे दिव ऋष्वास उक्षणो रुद्रस्य मर्या असुरा अरेपसः ।
पावकासः शुचयः सूर्याइव सत्वानो न द्रप्सिनो घोरवर्पसः ॥ २ ॥

ते । जज्ञिरे । दिवः । ऋष्वासः । उक्षणः । रुद्रस्य । मर्याः । असुराः । अरेपसः ।
पावकासः । शुचयः । सूर्याःऽइव । सत्वानः । न । द्रप्सिनः । घोरऽवर्पसः ॥ २ ॥

[v]ते मरुतः [v]दिवः अन्तरिक्षात् [v]जज्ञिरे प्रादुर्बभूवुः । कीदृशाः । [v]ऋष्वासः दर्शनीयाः [v]उक्षणः सेक्तारः । युवान इत्यर्थः । [v]रुद्रस्य [v]मर्याः । मर्यशब्दो मनुष्यवाची इह मरुतां मर्त्यत्वासंभवात्पुत्रा इत्यस्मिन्नर्थे पर्यवस्यति । मरुतां रुद्रपुत्रत्वं च मन्त्रान्तरे स्पष्टम्—' आ ते पितर्मरुतां सुम्नमेतु ' ( ऋ. सं. २. ३३. १ ) इति । [v]असुराः शत्रूणां निरसितारः [v]अरेपसः । रेप इति पापनाम । पापरहिताः [v]पावकासः सर्वेषां शोधकाः [v]सूर्याइव [v]शुचयः दीप्ताः [v]सत्वानो [v]न यथा परमेश्वरस्य भूतगणा अतिशयितबलपराक्रमाः तत्सदृशा इत्यर्थः । सत्वान इति भूतगणा उच्यन्ते—' अथो ये अस्य सत्वानः ' ( तै. सं. ४. ५. १. ३ ) इत्यादौ तथा दर्शनात् । [v]द्रप्सिनः वृष्ट्युदकबिन्दुभिर्युक्ताः । ' मरुतः सृष्टां वृष्टिं नयन्ति ' ( तै. सं. २. ४. १०. २ ) इति श्रुतेः । [v]घोरवर्पसः । वर्प इति रूपनाम । घोररूपाः । शत्रूणां भयंकररूपा इत्यर्थः । यद्वा । सत्वानो न घोरवर्पसः । यथा भूतगणा भयंकररूपास्तद्वदेतेऽपीत्यर्थः ॥ ऋष्वासः । ' ऋषी गतौ ' । गत्यर्था बुद्ध्यर्था इति अत्र ज्ञानार्थः । ' सर्वनिघृष्व° ' ( उ. सू. १. १५१ ) इत्यादौ वप्रत्ययान्तो निपातितः । ' आज्जसेरसुक् ' । उक्षणः । ' वा षपूर्वस्य निगमे ' इति उपधादीर्घाभावः । अरेपसः । बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । सत्वानः । ' षदॢ विशरणगत्यवसादनेषु ' । ' प्र ईरसद्योस्तुट्च ' ( उ. सू. ४. ५२६ ) इति विधीयमानः क्वनिप्प्रत्ययो बहुलवचनात् केवलादपि भवति । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते ॥

---

१. ढ—सम्यग्व्यक्तीकरोमि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

युवानो रुद्रा अजरा अभोग्घनो ववक्षुरध्रिगावः पर्वताइव ।
दृळ्हा चिद्विश्वा भुवनानि पार्थिवा प्र च्यावयन्ति दिव्यानि मज्मना ॥३॥

युवानः । रुद्राः । अजराः । अभोक्ऽहनः । ववक्षुः । अध्रिऽगावः । पर्वताःऽइव ।
दृळ्हा । चित् । विश्वा । भुवनानि । पार्थिवा । प्र । च्यवयन्ति । दिव्यानि । मज्मना ॥३॥

vयुवानः तरुणाः vरुद्राः रुद्रपुत्राः vअजराः जरारहिताः vअभोग्घनः ये देवान् हविर्भिर्न भोजयन्ति तेषां हन्तारः vअध्रिगावः अधृतगमनाः परैरनिवारितगतयः vपर्वताइव दृढाङ्गाः एवंभूता मरुतः vववक्षुः स्तोतॄणामभिमतं प्रापयितुमिच्छन्ति । अपि च vविश्वा सर्वाणि vभुवनानि सद्भावं प्राप्तानि vपार्थिवा पृथिव्यां भवानि vदिव्यानि दिवि भवानि च वसूनि[1] vदृळ्हा vचित् दृढान्यपि vमज्मना । मज्मनेति बलनाम । मज्मना शोधकेन बलेन vप्र vच्यावयन्ति प्रचालयन्ति ॥ अभोग्घनः । भोजयन्तीति भोजः । न भोजः अभोजः । तेषां हन्तारः । ' बहुलं छन्दसि ' इति हन्तेः क्विप् । ' झयो होऽन्यतरस्याम् ' ( पा. सू. ८. ४. ६२ ) इति हकारस्य घत्वम् । ' इन्हन्पूषार्यम्णां शौ ' ( पा. सू. ६. ४. १२ ) इति नियमात् दीर्घाभावः । ववक्षुः । ' वह प्रापणे ' । अस्मात् इच्छासनि ' एकाचः° ' इति इट्प्रतिषेधः । द्विर्भावः । ढत्वकत्वषत्वानि । ' सन्यतः ' इति इत्वाभावश्छान्दसः । लिटि उसि ' °अमन्त्रे° ' ( पा. सू. ३. १. ३५ ) इति निषेधात् आम्प्रत्ययाभावे ' अतो लोपः ' इति अकारलोपः । प्रत्ययस्वरः । पादादित्वात् निघाताभावः ॥

चित्रैरञ्जिभिर्वपुषे व्यञ्जते वक्षःसु रुक्माँ अधि येतिरे शुभे ।
अंसेष्वेषां नि मिमृक्षुरृष्टयः साकं जज्ञिरे स्वधया दिवो नरः ॥ ४ ॥

चित्रैः । अञ्जिऽभिः । वपुषे । वि । अञ्जते । वक्षःऽसु । रुक्मान् । अधि । येतिरे । शुभे ।
अंसेषु । एषाम् । नि । मिमृक्षुः । ऋष्टयः । साकम् । जज्ञिरे । स्वधया । दिवः । नरः ॥४॥

वपुरिति रूपनाम । vवपुषे रूपाय शोभार्थं मरुतः vचित्रैः नानाविधैः vअञ्जिभिः रूपाभिव्यञ्जनसमर्थैराभरणैः स्वशरीराणि vव्यञ्जते व्यक्तं कुर्वन्ति । अलंकुर्वन्तीत्यर्थः । vवक्षःसु[2] भुजान्तरेषु vरुक्मान् रोचमानान् हारान् vअधि vयेतिरे उपरि चक्रिरे । किमर्थम् । vशुभे शोभार्थम् । अपि च vएषां मरुताम् vअंसेषु vऋष्टयः आयुधानि vनि vमिमृक्षुः निमृष्टाः स्थिता बभूवुः । तैरायुधैः सहिताः vनरः नेतारो मरुतः vदिवः अन्तरिक्षात् vस्वधया स्वकीयेन बलेन vसाकं सह vजज्ञिरे प्रादुर्बभूवुः ॥ येतिरे । ' यती प्रयत्ने ' । लिटि ' अत एकहल्मध्ये° ' इति एत्वाभ्यासलोपौ । शुभे । ' शुभ दीप्तौ ' । संपदादिलक्षणो भावे क्विप् । ' सावेकाचः° ' इति चतुर्थ्या उदात्तत्वम् । मिमृक्षुः । ' मृजूष् शुद्धौ ' । सनि ऊदित्त्वात् इडभावः । ' हलन्ताच्च ' इति सनः कित्त्वाद्गुणाभावः । द्विर्वचनादि । ' सन्यतः ' इति इत्वम् । लिटि उसि ' अतो लोपः ' इति अकारलोपः । जज्ञिरे । ' जनी प्रादुर्भावे ' । लिटि ' गमहन° ' इत्यादिना उपधालोपः ॥

---

१. ढ-स-वस्तूनि । २. ढ-तथा वक्षःसु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ईशानकृतो धुनयो रिशादसो वातान्विद्युतस्तविषीभिरक्रत ।
दुहन्त्यूर्ध्वा दिव्यानि धूतयो भूमिं पिन्वन्ति पयसा परिज्रयः ॥ ५ ॥

ईशानऽकृतः । धुनयः । रिशादसः । वातान् । विऽद्युतः । तविषीभिः । अक्रत ।
दुहन्ति । ऊर्धाः । दिव्यानि । धूतयः । भूमिम् । पिन्वन्ति । पयसा । परिऽज्रयः ॥ ५ ॥

vईशानकृतः स्तोतारमीशानं धनाधिपतिं कुर्वाणाः vधुनयः मेघादीनां कम्पयितारः vरिशादसः रिशानां हिंसकानामत्तारः । यद्वा । रिशतां हिंसतामसितारो निरसितारः । एवंभूता मरुतः vतविषीभिः आत्मीयैर्बलैः vवातान् पुरोवातादीन् vविद्युतः विद्योतमानास्तडितश्च vअक्रत कुर्वन्ति । कृत्वा च vपरिज्रयः परितो गन्तारः vधूतयः कम्पयितारो मरुतः vदिव्यानि दिविभवानि vऊर्धाः ऊर्धःस्थानीयान्यभ्राणि vदुहन्ति रिक्तीकुर्वन्ति । जलरहितानि कुर्वन्तीत्यर्थः । तदनन्तरं vभूमिं vपयसा मेघान्निर्गतेनोदकेन जलेन vपिन्वन्ति सिञ्चन्ति ॥ रिशादसः । ' रिश हिंसायाम् ' । इगुपधलक्षणः कः । रिशन्ति हिंसन्तीति रिशाः शत्रवः । तानदन्तीति रिशादसः । असुन् । नित्त्वादाद्युदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् । यद्वा । रिशच्छब्दात् शत्रन्तात् ' असु क्षेपणे ' इत्यस्मात् क्विप् । व्यत्ययेन पूर्वपदस्य उपधादीर्घः अन्तोदात्तत्वं च । अक्रत । करोतेश्छान्दसो वर्तमाने लुङ् । ' मन्त्रे घस° ' इति च्लेर्लुक् । ऊर्धाः । ' सुपां सुलुक्° ' इति विभक्तेर्लुक् ॥ ॥ ६ ॥

मरुत्वतीयशस्त्रे ' पिन्वन्त्यपः ' इत्येषा धाय्या । सूत्रितं च–' अग्निर्नेता त्वं सोम क्रतुभिः पिन्वन्त्यप इति धाय्याः ' ( आश्व. श्रौ. ५. १४ ) इति ॥

पिन्वन्त्यपो मरुतः सुदानवः पयो घृतवद्विदथेष्वाभुवः ।
अत्यं न मिहे वि नयन्ति वाजिनमुत्सं दुहन्ति स्तनयन्तमक्षितम् ॥ ६ ॥

पिन्वन्ति । अपः । मरुतः । सुऽदानवः । पयः । घृतऽवत् । विदथेषु । आऽभुवः ।
अत्यम् । न । मिहे । वि । नयन्ति । वाजिनम् । उत्सम् । दुहन्ति । स्तनयन्तम् । अक्षितम् ॥ ६ ॥

vसुदानवः शोभनदानाः vमरुतः vपयः क्षीरवत् सारवतीः vअपः vपिन्वन्ति सिञ्चन्ति । vआभुवः । आभवन्तीत्याभुव ऋत्विजः । ते vविदथेषु यज्ञेषु vघृतवत् । यथा घृतं सिञ्चत्येवं मरुतोऽपि वृष्टिं कुर्वन्तीति भावः । तत्र हेतुमाह । vअत्यं vन यथा अश्वं सादिनो विनयन्ति युद्धार्थं शिक्षन्त्येवं[1] मरुतः vवाजिनं वेगवन्तं मेघं vमिहे वर्षणाय vवि vनयन्ति स्वाधीनं कुर्वन्तीति भावः । विनीय च vस्तनयन्तं गर्जन्तम् vअक्षितम् अक्षीणम् vउत्सम् । उत्सवन्त्यस्मादाप इत्युत्सो मेघः । तं vदुहन्ति रिक्तीकुर्वन्ति ॥ सुदानवः । नुप्रत्ययान्तो दानुशब्द आद्युदात्तः । बहुव्रीहौ ' आद्युदात्तं द्व्यच्छन्दसि ' इत्युत्तरपदाद्युदात्तत्वम् । मिहे । ' मिह सेचने ' । संपदादिलक्षणो भावे क्विप् । ' सावेकाचः° ' इति

---

१. च–शिक्षयन्त्येवम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

विभक्तिरुदात्ता । स्तनयन्तम् । ' स्तन शब्दे ' । चुरादिरदन्तः । अतो लोपस्य स्थानिवद्भावात् वृद्ध्याद्यभावः[1] ॥

महिषासो मायिनश्चित्रभानवो गिरयो न स्वतवसो रघुष्यदः ।
मृगाइव हस्तिनः खादथा वना यदारुणीषु तविषीरयुग्ध्वम् ॥ ७ ॥

महिषासः । मायिनः । चित्रऽभानवः । गिरयः । न । स्वऽतवसः । रघुऽस्यदः ।
मृगाःऽइव । हस्तिनः । खादथ । वना । यत् । आरुणीषु । तविषीः । अयुग्ध्वम् ॥ ७ ॥

महिष इति महन्नाम । महिषासः महान्तः । मायेति ज्ञाननाम । मायिनः प्राज्ञाः चित्रभानवः शोभनदीप्तयः गिरयो न स्वतवसः पर्वता इव स्वकीयेन बलेन युक्ताः रघुष्यदः शीघ्रगमना हे मरुत एवंभूतगुणविशिष्टाः[2] यूयं हस्तिनः हस्तवन्तः मृगाइव गजा इव वना वनानि वृक्षजातानि खादथ भक्षयथ । प्रभङ्क्थेति यावत् । यत् यस्मात् आरुणीषु अरुणवर्णासु वडवासु तविषीः बलानि अयुग्ध्वं संयोजितवन्तः । तस्माद्धवतामिव वाहनस्यापि प्रबलत्वात्तत्संयुक्ता भवन्तः सर्वं भञ्जन्तीत्यर्थः ॥ रघुष्यदः । ' स्यन्दू प्रस्रवणे ' । रघु शीघ्रं स्यन्दन्ते गच्छन्तीति रघुष्यदः । ' क्विप् च ' इति क्विप् । ' अनिदिताम्° ' इति नलोपः । ' वालमूललघ्वलम्° ' ( पा. म. ८. २. १८ ) इति लत्वविकल्पः । कृदुत्तरपदप्रकृतिस्वरत्वम् । खादथ । ' खाद भक्षणे ' । अयुग्ध्वम् । ' युजिर् योगे ' । लुङि च्लेः सिच् । ' एकाचः° ' इति इट्प्रतिषेधः । ' धि च ' ( पा. सू. ८. २. २५ ) इति सकारलोपः । ' चोः कुः ' इति कुत्वम् । अडागम उदात्तः । यद्वृत्तयोगादनिघातः ॥

सिंहाइव नानदति प्रचेतसः पिशाइव सुपिशो विश्ववेदसः ।
क्षपो जिन्वन्तः पृषतीभिर्ऋष्टिभिः समित्सबाधः शवसाहिमन्यवः ॥ ८ ॥

सिंहाःऽइव । नानदति । प्रऽचेतसः । पिशाःऽइव । सुऽपिशः । विश्वऽवेदसः ।
क्षपः । जिन्वन्तः । पृषतीभिः । ऋष्टिऽभिः । सम् । इत् । सऽबाधः । शवसा । अहिऽमन्यवः ॥ ८ ॥

प्रचेतसः प्रकृष्टज्ञाना मरुतः सिंहाइव नानदति भृशं शब्दं कुर्वन्ति । यथा सिंहा गिरिगह्वरेषु गम्भीरं शब्दं कुर्वन्ति एवं मरुत्सु अप्यागतेषु गम्भीरः शब्द उत्पद्यते इति भावः । तथा सुपिशः शोभनावयवाः शोभनालंकारा वा । तत्र दृष्टान्तः । पिशाइव । पिश इति रूपनाम । यथा रूपवः स्वशरीरगतैः श्वेतबिन्दुभिरलंकृतास्तद्वत् । विश्ववेदसः सर्वज्ञाः क्षपः शत्रूणां क्षपयितारः जिन्वन्तः स्तोतॄन् प्रीणयन्तः शवसा बलेन अहिमन्यवः आहननशीलमन्युयुक्ताः । यद्विषयः कोपो जायते तस्य हनने समर्था इत्यर्थः । यद्वा । मननं ज्ञानं मन्युः । अहीनज्ञानाः । उत्कृष्टबुद्धय इत्यर्थः । एवंभूता मरुतः पृषतीभिः । पृषत्य इति मरुतां वाहनस्याख्या । पृषत्यः श्वेतबिन्दुङ्किता मृग्य इत्यैतिहासिकाः । नानावर्णा मेघमाला इति नैरुक्ताः । ताभिः ऋष्टिभिः आयुधैश्च सहिताः सन्तः सबाधः शत्रुभिर्बाधितान्

---

१. ढ-स–वृद्ध्यभावः । २. ढ-न–एवंगुणविशिष्टाः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यजमानान् [v]समित् समानमेव युगपदेव रक्षितुमागच्छन्तीति शेषः ॥ नानदति । ' नद अव्यक्ते शब्दे ' । अस्मात् यङ्लुगन्तात् लट् । पिशाइव । ' पिश अवयवे ' । इगुपधलक्षणः कः । सुपिशः । सुपूर्वात् ' पिश अवयवे ' इत्यस्मात् ' क्विप् च ' इति क्विप् । पृषतीभिः । ' पृषु सेचने ' । ' वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च ' ( उ. सू. २. २४१ ) इति शतृवद्भावात् ' उगितश्च ' इति ङीप् । अत एव ' शतुरनुमः° ' इति नद्या उदात्तत्वे प्राप्ते ' बृहन्महतोरुपसंख्यानम् ' इति नियमात् तस्याभावः ॥

रोदसी आ वदता गणश्रियो नृषाचः शूराः शवसाहिमन्यवः ।
आ वन्धुरेष्वमतिर्न दर्शता विद्युन्न तस्थौ मरुतो रथेषु वः ॥ ९ ॥

रोदसी इति । आ । वदत । गणऽश्रियः । नृऽसाचः । शूराः । शवसा । अहिऽमन्यवः ।
आ । वन्धुरेषु । अमतिः । न । दर्शता । विऽद्युत् । न । तस्थौ । मरुतः । रथेषु । वः ॥९॥

हे [v]गणश्रियः गणशः श्रयमाणाः सङ्गणरूपेणावस्थिताः [v]नृषाचः नॄन् यजमानान् हविःस्वीकरणाय सेवमानाः [v]शूराः शौर्योपेता एवंभूता हे मरुतः [v]शवसा बलेन [v]अहिमन्यवः आहननस्वभावकोपयुक्ताः सन्तः [v]रोदसी द्यावापृथिव्यौ [v]आ [v]वदत आ समन्ताच्छब्दयत । युष्मदागमने सति भवदीयशब्देन द्यावापृथिव्यौ पूर्णे कुरुतेति भावः । किंच हे [v]मरुतः [v]वः युष्माकं तेजः [v]वन्धुरेषु । बन्धकाष्ठनिर्मितं[1] सारथेः स्थानं वन्धुरमित्युच्यते । तद्युक्तेषु [v]रथेषु [v]आ [v]तस्थौ आतिष्ठति । अवस्थितं सत्सर्वैर्दृश्यते । तत्र दृष्टान्तद्वयमुच्यते । [v]अमतिर्न । अमतिरिति रूपनाम । यथा निर्मलं रूपं सर्वैर्दृश्यते । [v]दर्शता [v]विद्युन्न । यथा वा दर्शनीया विद्युन्मेघस्था सर्वैर्दृश्यते एवं रथे[2] स्थितानां[2] युष्माकं ज्योतिरपि सर्वैर्दृश्यते इत्यर्थः ॥ वदत । ' ऋचि तुनुघ° ' इत्यादिना दीर्घः । नृषाचः । पादादित्वादामन्त्रिताद्युदात्तत्वम् । अमतिः । अम गत्यादिषु । ' अमेरतिः ' ( उ. सू. ४. ४९९ ) इति औणादिकः अतिप्रत्ययः । प्रत्ययाद्युदात्तत्वम् । दर्शता । ' भृमृदृशि° ' इत्यादिना अतच्प्रत्ययः । चित्त्वादन्तोदात्तत्वम् ॥

विश्ववेदसो रयिभिः समोकसः संमिश्लासस्तविषीभिर्विरप्शिनः ।
अस्तार इषुं दधिरे गभस्त्योरनन्तशुष्मा वृषखादयो नरः ॥ १० ॥

विश्वऽवेदसः । रयिऽभिः । सम्ऽओकसः । सम्ऽमिश्लासः । तविषीभिः । विऽरप्शिनः ।
अस्तारः । इषुम् । दधिरे । गभस्त्योः । अनन्तऽशुष्माः । वृषऽखादयः । नरः ॥ १० ॥

[v]विश्ववेदसः सर्वज्ञाः [v]रयिभिः धनैः [v]समोकसः समाननिवासाः समवेता वा । धनाधिपतय इत्यर्थः । [v]तविषीभिः बलैः [v]संमिश्लासः संमिश्राः । संयुक्ता इत्यर्थः । [v]विरप्शिनः । महन्नामैतत् । महान्तः । [v]अस्तारः शत्रूणां निरसितारः [v]अनन्तशुष्माः अनवच्छिन्नबलाः [v]वृषखादयः । वृषा इन्द्रः

---

१. ढ–बन्धनकाष्ठनिर्मितम् । २. ढ-द-ध-स–रथेऽवस्थितानाम् ; च-छ-न-फ–रथेष्ववस्थितानाम् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

खादिः आयुधस्थानीयो येषां ते तथोक्ताः । यद्वा । वृषा सोमः खादिः खाद्यः पेयो येषां ते । vनरः नेतारः । एवंभूता मरुतः । गभस्तिरिति बाहुनाम । vगभस्त्योः बाह्वोः vइषुं vदधिरे । शत्रूणां निरसनाय धनुर्बाणादिकमायुधं धारयन्ति ॥ समोकसः । ' उच समवाये ' । असुनि बहुलवचनात् कुत्वमिति ' ओक उचः के ' इत्यत्रोक्तम् ( का. ७. ३. ६४ ) । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । संमिश्लासः । कपिलकादित्वात् लत्वम् । विरप्शिनः । ' रप लप व्यक्तायां वाचि ' । विपूर्वादस्मात् बहुलवचनात् शक्प्रत्ययः । विविधं शब्दं रपन्तीति विरप्शाः स्तोतारः । ते एषां सन्तीति विरप्शिनः । यद्वा । विविधं रपणं विरप्शम् । तदेषामस्तीति । मरुतो हि विविधं शब्दं कुर्वते । इनिप्रत्ययस्वरः । अस्तारः । ताच्छीलिकः तृन् । इडभावश्छान्दसः । नित्त्वादाद्युदात्तत्वम् । अनन्तशुष्माः । नास्त्यन्तोऽस्येति अनन्तः । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । अनन्तः शुष्मो बलं येषाम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । वृषखादयः । ' खादृ भक्षणे ' । औणादिक इन्प्रत्ययः । वृषन्शब्दः कनिन्प्रत्ययान्त आद्युदात्तः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥ ॥ ७ ॥

हिरण्ययेभिः पविभिः पयोवृध उज्जिघ्नन्त आपथ्यो३ न पर्वतान् ।
मखा अयासः स्वसृतो ध्रुवच्युतो दुध्रकृतो मरुतो भ्राजदृष्टयः ॥ ११ ॥

हिरण्ययेभिः । पविऽभिः । पयःऽवृधः । उत् । जिघ्नन्ते । आऽपथ्यः । न । पर्वतान् ।
मखाः । अयासः । स्वऽसृतः । ध्रुवऽच्युतः । दुध्रऽकृतः । मरुतः । भ्राजत्ऽऋष्टयः ॥११॥

vमरुतः vहिरण्ययेभिः सुवर्णमयैः । यद्वा । हितरमणीयैः vपविभिः स्थानां चक्रैः vपर्वतान् पर्वतो मेघान् यद्वा शिलोच्चयान् vउज्जिघ्नन्ते ऊर्ध्वं गमयन्ति । स्थानात् प्रच्यावयन्तीत्यर्थः । तत्र दृष्टान्तः । पथ्यः vन । यथा पथि गच्छन् रथो मार्गे आस्थितं तृणवृक्षादिकं चूर्णीकृत्योर्ध्वं नयति गमयति । यद्वा । यथा संयुक्ता गजा मार्गस्थितं वृक्षादिकं भग्नं कुर्वन्ति । कीदृशा मरुतः । vपयोवृधः पयसो वृष्ट्युदकस्य वर्धयितारः । यद्वा पृश्नेः पयसा वर्धमानाः । ' पृश्निर्यै वै पयसो मरुतो जाताः ' ( तै. सं. २. २. ११. ४ ) । इति श्रूयते । vमखाः । मख इति यज्ञनाम । तद्वन्तः । vअयासः देवयजनदेशं प्रति गन्तारः vस्वसृतः शत्रून्प्रति स्वयमेव सरन्तो गच्छन्तः vध्रुवच्युतः ध्रुवाणां निश्चलानां पर्वतादीनामपि च्यावयितारः vदुध्रकृतः दुध्रं दुष्टानां[1] धारयितारमात्मानं कुर्वाणाः । यद्वा । दुर्धरमन्यैर्धर्तुमशक्यमात्मानं कुर्वाणाः । vभ्राजदृष्टयः दीप्यमानायुधाः ॥ उज्जिघ्नन्ते । हन्तेर्व्यत्ययेनात्मनेपदम् । ' बहुलं छन्दसि ' इति शपः श्लुः । ' बहुलं छन्दसि ' इति अभ्यासस्य इत्वम् । ' गमहन° ' इत्यादिना उपधालोपः । ' हो हन्तेः° ' इति घत्वम् । व्यत्ययेन अन्तादेशः । पथ्यः । पथि भवः । ' भवे छन्दसि ' इति यत् । ' नस्तद्धिते ' ( पा. सू. ६. ४. १४४ ) इति टिलोपः । व्यत्ययेनान्तस्वरितत्वम् । यद्वा । ' छन्दसीवनिपौ° ' इति मत्वर्थीय ईकारः । ' उदात्तस्वरितयोर्यणः° ' इति विभक्तेः स्वरितत्वम् । अयासः । ' अय पय गतौ ' । अयन्ते इत्ययाः । पचाद्यच् । ' आज्जसेरसुक् ' । दुध्रकृतः । अत्र दुःशब्देन दुष्टा लक्ष्यन्ते । ' धृञ् धारणे ' । दुष्टान् धारयतीति दुध्रः । मूलविभुजादित्वात् ( पा. सू. ३. २. ५. २ ) कप्रत्ययः । यद्वा । ' ईषद्दुःसुषु° ' इति दुःशब्दे उपपदे कर्मणि खल् । गुणाभावश्छान्दसः । तं कुर्वन्तीति दुध्रकृतः । करोतेः ' क्विप् च ' इति क्विप् । रेफलोपश्छान्दसः ॥

---

१. ढ-स-दुष्टानां शत्रूणाम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

घृषुं पावकं वनिनं विचर्षणिं रुद्रस्य सूनुं हवसा गृणीमसि ।
रजस्तुरं तवसं मारुतं गणमृजीषिणं वृषणं सश्चत श्रिये ॥ १२ ॥

घृषुम् । पावकम् । वनिनम् । विऽचर्षणिम् । रुद्रस्य । सूनुम् । हवसा । गृणीमसि ।
रजःऽतुरम् । तवसम् । मारुतम् । गणम् । ऋजीषिणम् । वृषणम् । सश्चत । श्रिये ॥१२॥

[v]घृषुं शत्रूणां बलस्य घर्षकं विनाशयितारं [v]पावकं सर्वेषां शोधकं [v]वनिनम्। वनमित्युदकनाम । उदकवन्तम् । वृष्टिप्रदमित्यर्थः । [v]विचर्षणिं विशेषेण सर्वस्य द्रष्टारं [v]रुद्रस्य महादेवस्य [v]सूनुं पुत्रभूतम्। एवंविधं मरुतां समूहं [v]हवसा आह्वानसाधनेन स्तोत्रेण [v]गृणीमसि शब्दयामः[1]। स्तुम इत्यर्थः । हे ऋत्विग्यजमानाः यूयमपि [v]श्रिये ऐश्वर्याय धनार्थं [v]मारुतं [v]गणं मरुतां संघं [v]सश्चत प्राप्नुत। कीदृशम् । [v]रजस्तुरं पार्थिवस्य पांसोस्वरयितारं प्रेरकमित्यर्थः। [v]तवसं प्रवृद्धं [v]ऋजीषिणम् । तृतीयसवने हि मरुतः स्तूयन्ते तत्र च ऋजीषमभिपुण्वन्तीति ऋजीषसंबन्धः श्रुतः । अतस्तद्वन्तं [v]वृषणं कामानां वर्षितारम् ॥ हवसा । ह्वेञः असिप्रत्यये 'बहुलं छन्दसि' इति संप्रसारणम् । गृणीमसि । 'गृ शब्दे' । इदन्तो मसिः । 'प्वादीनां ह्रस्वः' इति ह्रस्वत्वम् । रजस्तुरम् । रजांसि तुतोर्तीति रजस्तूः । 'तुर त्वरणे' । 'क्विप् च' इति क्विप् । वृषणम् । 'वा षपूर्वस्य निगमे' इति दीर्घाभावः । सश्चत । 'ग्लुञ्च ष्वञ्ज गतौ' इत्यत्र सश्चिमप्येके इति धातुवृत्तावुक्तम् । गतिकर्मसु च सश्चतीति पठितम् । श्रिये । 'सावेकाचः०' इति विभक्तेरुदात्तत्वम् ॥

प्र नू स मर्तः शवसा जनाँ अतिं तस्थौ व ऊती मरुतो यमावत ।
अर्वद्भिर्वाजं भरते धना नृभिरापृच्छ्यं क्रतुमा क्षेति पुष्यति ॥ १३ ॥

प्र । नु । सः । मर्तः । शवसा । जनान् । अति । तस्थौ । वः । ऊती । मरुतः । यम् । आवत ।
अर्वत्ऽभिः । वाजम् । भरते । धना । नृऽभिः । आऽपृच्छ्यम् । क्रतुम् । आ । क्षेति । पुष्यति ॥१३॥

[v]स [v]मर्तः मनुष्यः [v]शवसा बलेन [v]जनान् जातान् अन्यान् पुरुषान् [v]अति अतीत्य [v]नु क्षिप्रं [v]तस्थौ प्रतिष्ठितो भवति । हे [v]मरुतः [v]वः युष्माकम् [v]ऊती ऊत्या रक्षणेन [v]यं पुरुषम् [v]आवत अरक्षत । अपि च स पुरुषः [v]अर्वद्भिः अश्वैः साधनभूतैः [v]वाजम् अन्नं [v]नृभिः स्वकीयैर्मनुष्यैः [v]धना धनानि च [v]भरते संपादयति । तथा [v]आपृच्छ्यम् आप्रष्टव्यं शोभनं [v]क्रतुम् अग्निष्टोमादिकर्म[2] [v]आ [v]क्षेति आप्नोति । [v]पुष्यति प्रजया पशुभिः पुष्टो भवति च ॥ ऊती । तृतीयायाः पूर्वसवर्णदीर्घत्वम् । नृभिः । 'नृ चान्यतरस्याम्' इति विभक्त्युदात्तत्वप्रतिषेधः । आपृच्छ्यम् । 'छन्दसि निष्टर्क्य०' इत्यादौ आङ्पूर्वात् पृच्छतेः क्यच्प्रत्ययान्तो निपात्यते । ग्रहिज्यादिना संप्रसारणम् । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते । कृदुत्तरपदप्रकृतिस्वरत्वम् । क्षेति । 'क्षि निवासगत्योः' । 'बहुलं छन्दसि' इति विकरणस्य लुक् । पुष्यति । 'पुष पुष्टौ' । दिवादित्वात् श्यन् । नित्त्वादाद्युदात्तत्वम् । तिङः परत्वात् निघाताभावः ॥

---

१. ढ–गृणीमः । २. ढ–अग्निष्टोमादिकं कर्म ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

चर्कृत्यं मरुतः पृत्सु दुष्टरं द्युमन्तं शुष्मं मघवत्सु धत्तन ।
धनस्पृतमुक्थ्यं विश्वचर्षणिं तोकं पुष्येम तनयं शतं हिमाः ॥ १४ ॥

चर्कृत्यम् । मरुतः । पृत्ऽसु । दुस्तरम् । द्युऽमन्तम् । शुष्मम् । मघवत्ऽसु । धत्तन ।
धनऽस्पृतम् । उक्थ्यम् । विश्वऽचर्षणिम् । तोकम् । पुष्येम । तनयम् । शतम् । हिमाः ॥१४॥

हे [V]मरुतः [V]मघवत्सु हविर्लक्षणधनयुक्तेषु यजमानेषु पुत्रं [V]धत्तन स्थापयत । दत्तेति यावत् । कीदृशं पुत्रम् । [V]चर्कृत्यं कार्येषु[1] पुनःपुनः पुरस्कर्तव्यम् । सर्वकर्मकुशलमित्यर्थः । [V]पृत्सु संग्रामेषु [V]दुष्टरं दुःखेन तरितव्यम् । अजेयमित्यर्थः । [V]द्युमन्तं दीप्तिमन्तं [V]शुष्मं शत्रूणां शोषकं बलवन्तं [V]धनस्पृतं धनानां स्प्रष्टारं धनैः प्रीतं वा [V]उक्थ्यम् । उक्थं स्तोत्रम् । तदर्हम् । प्रशस्यमित्यर्थः । [V]विश्वचर्षणिं विशेषेण द्रष्टारं सर्वज्ञम् । एवंविधं [V]तोकं पुत्रं [V]तनयं पौत्रं च [V]शतं [V]हिमाः हेमन्तर्तूपलक्षितान् शतं संवत्सरान् जीवन्तः सन्तः [V]पुष्येम पोषयेम । अत्र हिमशब्देन तद्युक्ता हेमन्तर्तवोऽभिधीयन्ते । तथा च ब्राह्मणमेवमाम्नायते–' शतं हिमा इत्याह शतं त्वा हेमन्तानिन्धिषीयेति वावैतदाह ' ( तै. सं. १. ५. ८. ५ ) इति ॥ चर्कृत्यम् । ' प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम् ' ( परिभा. ९३. ९ ) इति न्यायेन करोतेर्यङ्लुगन्तात् ' विभाषा कृवृषोः ' ( पा. सू. ३. १. १२० ) इति क्यप् । तुगागमः । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते । पृत्सु । ' पदादिषु सांस्पृत्स्नूनामुपसंख्यानम् ' ( पा. सू. ६. १. ६३. १ ) इति पृतनाशब्दस्य पृदादेशः । दुष्टरम् । ' तॄ प्लवनतरणयोः ' । ' ईषदुःसुषु° ' इति खल् । सुषामादेराकृतिगणत्वात् षत्वम् । लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वम् । धत्तन । ' तप्तनप्तनथनाश्च ' इति तस्य तनादेशः ॥

ऐकादशिनस्य मारुतस्य पशोर्वपायागस्य ' नू ष्टिरम् ' इत्येषा याज्या । सूत्रितं च–' शुची वो हव्या मरुतः शुचीनां नू ष्टिरं मरुतो वीरवन्तम् ' ( आश्व. श्रौ. ३. ७ ) इति ॥

नू ष्टिरं मरुतो वीरवन्तमृतीषाहं रयिमस्मासु धत्त ।
सहस्रिणं शतिनं शूशुवांसं प्रातर्मक्षू धियावसुर्जगम्यात् ॥ १५ ॥

नु । स्थिरम् । मरुतः । वीरऽवन्तम् । ऋतिऽसहम् । रयिम् । अस्मासु । धत्त ।
सहस्रिणम् । शतिनम् । शूशुऽवांसम् । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥ १५ ॥

हे [V]मरुतः [V]स्थिरं स्थास्नुं [V]वीरवन्तं वीरैः पुत्रैस्तद्वन्तम् । यद्वा । वीर्योपेतम् । [V]ऋतीषाहं गन्तणां शत्रूणामभिभवितारं एवंविधं [V]रयिं पुत्रलक्षणं धनम् [V]अस्मासु[2] [V]धत्त[2] स्थापयत । [V]सहस्रिणं [V]शतिनम् एतत्संख्याकधनवन्तं अत एव [V]शूशुवांसं प्रवृद्धम् । अपि चास्माकं रक्षणाय धिया बुद्ध्या कर्मणा वा प्राप्तधनो मरुद्गणः प्रातःकाले [V]जगम्यात् आगच्छतु ॥ नू ष्टिरम् । ' ऋचि तुनुघ° ' इति दीर्घः । ' पूर्वपदात् ' इति षत्वम् । ऋतीषाहम् । ' ऋ गतौ ' । कर्तरि क्तिच् । ' षह अभिभवे ' ।

---

१. न–पुत्रकार्येषु । २. ढ–अस्मासु नु क्षिप्रं धत्त ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'छन्दसि सहः' इति ण्विप्रत्ययः। 'अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घत्वम्। सुषामादित्वात् षत्वम्। शूशुवांसम्। 'टुओश्वि गतिवृद्ध्योः'। लिटः क्वसुः। 'विभाषा श्वेः' (पा. सू. ६. १. ३०) इति संप्रसारणम्। द्विर्वचने तुजादित्वात् अभ्यासस्य दीर्घत्वम्। 'वस्वेकाजाद्घसाम्' इति नियमात् इडभावः। प्रत्ययस्वरः॥ ॥ ८ ॥ ॥ ११ ॥

द्वादशेऽनुवाके नव सूक्तानि। तत्र 'पश्वा' इत्यादीनि षट् सूक्तानि द्वैपदानि। तेष्वध्ययनसमये द्विपदे द्वे द्वे ऋचौ चतुष्पदामेकैकामृचं कृत्वा समाम्नायते। अयुक्संख्यासु तु या अन्त्या अतिरिच्यते सा तथैवाम्नायते। प्रायेणार्थोऽपि द्वयोर्द्विपदयोरेक एव। प्रयोगे तु ताः पृथक् पृथक् शंसनीयाः। सूत्र्यते हि–'पश्वा न तायुमिति द्वैपदम्' (आश्व. श्रौ. ८. १२) इति। तत्र 'पश्वा' इति दशर्चं प्रथमं सूक्तम्। अत्रानुक्रम्यते–'पश्वा दश पराशरः शाक्त्यो द्वैपदं तत्' इति। शक्तिपुत्रः पराशर ऋषिः। तत्पुत्रत्वं च स्मर्यते–'वसिष्ठस्य सुतः शक्तिः शक्तेः पुत्रः पराशरः' इति। द्विपदा विराट् छन्दः। 'विंशतिका द्विपदा विराजः' (अनु. १२. ८) इति हि तल्लक्षणम्। अग्निर्देवता। 'परमाग्नेयमैन्द्रात्' इति परिभाषितम्। 'पश्वा न तायुम्' इत्यारभ्य 'इत्था हि' इत्यतः प्राक् यत्सूक्तजातं तत्सर्वमाग्नेयमिति तस्यार्थः। 'द्वैपदं तत्' इत्युक्तत्वादिदमादीनि षट् सूक्तानि तुल्यादिपरिभाषया द्वैपदानि। दशमेऽहनि वैश्वदेवशस्त्रे वैश्वदेवसूक्तात् पूर्वमेतत् द्वैपदं सूक्तं शंसनीयम्। सूत्रमुदाहृतम्॥

पश्वा न तायुं गुहा चतन्तं नमो युजानं नमो वहन्तम्।
सजोषा धीराः पदैरनु ग्मन्नुप त्वा सीदन्विश्वे यजत्राः॥ १॥ २॥

पश्वा। न। तायुम्। गुहा। चतन्तम्। नमः। युजानम्। नमः। वहन्तम्।
सऽजोषाः। धीराः। पदैः। अनु। ग्मन्। उप। त्वा। सीदन्। विश्वे। यजत्राः॥ १॥ २॥

[v]धीराः मेधाविनो देवाः [v]सजोषाः समानप्रीतयः सन्तो हे अग्ने त्वां [v]पदैः मार्गे पादकृतैर्लाञ्छनैः [v]अनु [v]ग्मन् अन्वगमन्। कीदृशम्। [v]पश्वा अपहृतेन पशुना सह वर्तमानं [v]तायुं [v]न। तायुरिति स्तेननाम। यथा स्तेनः परकीयं पश्वादिधनमपहृत्य दुष्प्रवेशे गिरिगह्वरे वर्तते तद्वत्। [v]गुहा [v]चतन्तं अब्रूपायां गुहायां गच्छन्तं वर्तमानम्। चततिर्गतिकर्मा। तथा च तैत्तिरीयैरग्नेरप्सु प्रवेशः समाम्नायते—'स निलायत सोऽपः प्राविशत्' (तै. सं. २. ६. ६. १) इति। यद्वा। अश्वत्थगुहायां[1] वर्तमानम्[1]। श्रूयते च—'अग्निर्देवेभ्यो निलायत। अश्वो रूपं कृत्वा सोऽश्वत्थे संवत्सरमतिष्ठत्' (तै. ब्रा. १. १. ३. ९) इति। तथा [v]नमो [v]युजानं हविर्लक्षणमन्नमात्मना संयुजानं [v]नमो [v]वहन्तं देवेभ्यः प्रत्तं हविर्वहन्तम्। [v]यजत्राः यजनीयाः [v]विश्वे सर्वे देवा[2] हे अग्ने [v]त्वा[2] त्वाम् [v]उप [v]सीदन् समीपं प्राप्नुवन्। दद्भुरित्यर्थः॥ पश्वा। तृतीयैकवचनस्य 'जसादिषु च्छन्दसि वावचनम्' इति नाभावाभावः। 'उदात्तयणः०' इति विभक्तेरुदात्तत्वम्। गुहा। भिदादिषु पाठात् अङ्प्रत्ययान्तः। वृषादिषु पाठादाद्युदात्तत्वम्। 'सुपां सुलुक्०' इति सप्तम्या लुक्। युजानम्। शानचि 'बहुलं छन्दसि' इति विकरणस्य लुक्। सजोषाः। 'जुषी प्रीतिसेवनयोः'। समानं जुषन्त इति सजोषसः। 'समानस्य च्छन्दसि०' इति सभावः। कृदुत्तरपदप्रकृतिस्वरत्वम्। 'सुपां सुलुक्०' इति जसः सुः। ग्मन्।

---

१. च-न-फ–अश्वत्थगुहायां गच्छन्तं वर्तमानम्। २. च-छ-ण-न-फ-ल-श–देवा त्वा।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

गमेर्लुङि ' मन्त्रे घस° ' इति च्लेर्लुक् । ' गमहन° ' इत्यादिना उपधालोपः । ' बहुलं छन्दस्यमाङ्-योगेऽपि ' इति अडभावः । यजत्राः । ' अमिनक्षि°' इत्यादिना अत्रन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् ॥

ऋतस्य देवा अनु व्रता गुर्भुवत्परिष्टिर्द्यौर्न भूम ।
वर्धन्तीमापः पन्वा सुशिश्विमृतस्य योना गर्भे सुजातम् ॥ ३ ॥ ४ ॥

ऋतस्य । देवाः । अनु । व्रता । गुः । भुवत् । परिष्टिः । द्यौः । न । भूम ।
वर्धन्ति । ईम् । आपः । पन्वा । सुऽशिश्विम् । ऋतस्य । योना । गर्भे । सुऽजातम् ॥३॥४॥

उक्त एवार्थः स्पष्टीक्रियते । Vदेवाः Vऋतस्य गतस्य पलायितस्याग्नेः Vव्रता व्रतानि कर्माणि गमनावस्थानशयनादिरूपाणि Vअनु Vगुः अन्वेष्टुमगमन् । तदनन्तरं Vपरिष्टिः परितः सर्वतोऽन्वेषणं Vभुवत् अभवत् । Vभूम भूमिरप्यग्नेरन्वेष्टृभिर्देवैः Vद्यौर्न स्वर्ग इवाभूत् । इन्द्रादयः सर्वे देवा अग्नेर्गवेषणाय भूलोकं प्राप्ताः[1] इत्यर्थः । Vआपः अब्देवताः Vईम् एनमुदके प्रविष्टमग्निं Vवर्धन्ति प्रवर्धयन्ति[2] । यथा देवा न पश्यन्ति तथारक्षन्नित्यर्थः । कीदृशम् । Vपन्वा स्तोत्रेण Vसुशिश्विं सुष्ठु प्रवर्धितम् । Vऋतस्य Vयोना । योनिरित्युदकनाम । ऋतस्य यज्ञस्यान्नस्य वा कारणभूते जले Vगर्भे गर्भस्थाने मध्ये Vसुजातं सुष्ठु प्रादुर्भूतम् । एवमप्सु वर्तमानमग्निं देवेभ्यो मत्स्यः प्रावोचत् । तदनन्तरं देवास्तमज्ञासिषुरिति भावः । तथा च तैत्तिरीयकं—'स निलायत सोऽपः प्राविशत्तं देवताः प्रैषमैच्छन् तं मत्स्यः प्राब्रवीत् ' (तै. सं. २. ६. ६. १ ) इति ॥ व्रता । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । गुः । ' इण् गतौ ' । ' इणो गा लुङि ' इति गादेशः । ' गातिस्था° ' इति सिचो लुक् । ' आतः ' इति झेर्जुस् । ' उस्यपदान्तात् ' इति पररूपत्वम् । परिष्टिः । ' इषु इच्छायाम् ' । क्तिनि ' तितुत्र° ' इति इट्प्रतिषेधः । शकन्ध्वादित्वात्पररूपत्वम् (पा. सू. ६. १. ९४. ४) । ' तादौ च निति° ' इति गतेः प्रकृतिस्वरत्वम् । भूम । ' सुपां सुलुक्° ' इति सोः डादेशः । ह्रस्वश्छान्दसः । वर्धन्ति । ' छन्दस्युभयथा ' इति शप आर्धधातुकत्वात् ' णेरनिटि ' इति णिलोपः । शपः पित्त्वादनुदात्तत्वम् । तिङश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते । पन्वा । ' पन स्तुतौ ' । औणादिको भावे उप्रत्ययः । सुशिश्विम् । ' टुओश्वि गतिवृद्ध्योः ' । ' आदृगमहनजनः° ' इत्यत्र ' उत्सर्गश्छन्दसि ' ( पा. सू. ३. २. १७१. २ ) इति वचनात् किप्रत्ययः । ' वचिस्वपि° ' इत्यादिना संप्रसारणम् । लिङ्वद्भावात् द्विर्भावे 'बहुलं छन्दसि ' इति उकारस्य इत्वम् । छान्दसो यणादेशः । ' सुः पूजायाम् ' ( पा. सू. १. ४. ९४ ) इति सोः कर्मप्रवचनीयत्वम् । ' स्वती पूजायाम् ' ( पा. म. २. २. १८. ४ ) इति प्रादिसमासः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

पुष्टिर्न रण्वा क्षितिर्न पृथ्वी गिरिर्न भुज्म क्षोदो न शंभु ।
अत्यो नाज्मन्त्सर्गप्रतक्तः सिन्धुर्न क्षोदः क ईं वराते ॥ ५ ॥ ६ ॥

पुष्टिः । न । रण्वा । क्षितिः । न । पृथ्वी । गिरिः । न । भुज्म । क्षोदः । न । शम्ऽभु ।
अत्यः । न । अज्मन् । सर्गऽप्रतक्तः । सिन्धुः । न । क्षोदः । कः । ईम् । वराते ॥ ५ ॥ ६ ॥

---

१- ढ—प्रापुः । २. च-छ-ण-न-फ-ल—वर्धयन्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vरण्वा रमणीया सर्वेषां हृद्या Vपुष्टिर्न अभिमतफलानामभिवृद्धिरिव अग्निः सर्वेषां रमणीयः। ऐहिकामुष्मिकसकलव्यवहारस्य अग्न्यधीनत्वात्। यद्वा। पुष्टिरिव रण्वा गन्तव्यः शब्दनीयः स्तुत्यो वा। यथा पुष्टिः प्राप्यते तद्वदग्निर्यज्ञे हविर्भिः प्राप्यते इति भावः। Vपृथ्वी विस्तीर्णा Vक्षितिर्न भूमिरिव अग्निरपि विस्तीर्णः सर्वेषु भूतेषु जाठररूपेणावस्थानात्। Vगिरिर्न पर्वत इव Vभुज्म सर्वेषां भोजयिता। यथा गिरौ विद्यमानं फलमूलादिकमाहृत्य सर्वे भुञ्जते तद्वदग्नावपि पचन्तः सर्वे भुञ्जते। यद्वा। अग्नावाहुतिं हुत्वा यजमानाः स्वर्गफलं भुञ्जते। अथवा गिरिर्यथा दुर्भिक्षे सर्वान् प्राणिनो भुनक्ति स्वकीयफलमूलादिदानेन[1] पालयति तद्वदयमपि पापादनुष्ठातॄन् प्रमुञ्चति। तथा चाम्नायते—'अग्निर्मा तस्मादेनसः प्र मुञ्चतु' (तै. सं. १. ८. ५. ३) इति। Vशंभु सुखकरं Vक्षोदो Vन उदकमिव। यथोदकं सुखं करोति तद्वदग्निः सर्वेषां सुखकारीत्यर्थः। Vअज्मन्। संग्रामनामैतत्। अज्मनि संग्रामे Vअत्यो Vन सततगमनशीलो जात्यश्व इव Vसर्गप्रतक्तः सर्गेण विसर्जनेन प्रगमितः। यथा सादिना प्रेषितो जात्यश्वो हन्तव्यसमीपमाशु गच्छति तद्वदग्निरपि स्तोतृभिः प्रेषितः सन् शत्रून् हन्तुं शीघ्रं गच्छतीति भावः। अपि च Vसिन्धुर्न Vक्षोदः। स्यन्दनशीलमुदकमिव अयमपि शीघ्रगामी। यथा निम्नप्रदेशाभिमुखो जलप्रवाहो दुर्निवारः तद्वद्ग्धव्याभिमुखोऽग्निरपीत्यर्थः। अतो यस्मादेवं तस्मात् Vईम् एनमग्निं Vकः Vवराते को वारयेत्[2]। कोऽपि वारयितुं न शक्नोतीत्यर्थः॥ रण्वा। रविर्गत्यर्थः[3]। रण्यते[3] प्राप्यते इति रण्वः। 'कृत्यल्युटो बहुलम्' इति बहुलवचनात् कर्मणि पचाद्यच्। भुज्म। 'भुज पालनाभ्यवहारयोः'। 'इषियुधीन्धि०' इति विधीयमानो मक् बहुलवचनादस्मादपि भवति। 'सुपां सुलुक्०' इति सोर्लुक्। अज्मन्। 'अज गतिक्षेपणयोः'। मनिनि 'वलादावार्धधातुके विकल्प इष्यते' (का. २. ४. ५६. २) इति वचनात् वीभावाभावः। 'सुपां सुलुक्०' इति सप्तम्या लुक्। सर्गप्रतक्तः। 'सृज विसर्गे' इत्यस्मात् घञन्तः सर्गशब्द आद्युदात्तः। 'तञ्चु गतौ'। अस्मादन्तर्भावितण्यर्थात् निष्ठायां 'यस्य विभाषा' इति इट्प्रतिषेधः। 'अनिदिताम्०' इति नलोपः। सर्गेण प्रतक्तः। 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम्। वराते। 'वृञ् वरणे'। अन्तर्भावितण्यर्थात् लेटि 'लेटोऽडाटौ' इति आडागमः। व्यत्ययेन शप्। 'वैतोऽन्यत्र' (पा. सू. ३. ४. ९६) इति ऐत्वस्य विकल्पितत्वादभावः॥

जामिः सिन्धूनां भ्रातेव स्वस्रामिभ्यान्न राजा वनान्यत्ति।
यद्वातजूतो वना व्यस्थादग्निर्ह दाति रोमा पृथिव्याः॥ ७॥ ८॥

जामिः। सिन्धूनाम्। भ्रातऽइव। स्वस्राम्। इभ्यान्। न। राजा। वनानि। अत्ति।
यत्। वातऽजूतः। वना। वि। अस्थात्। अग्निः। ह। दाति। रोम। पृथिव्याः॥ ७॥ ८॥

Vसिन्धूनां स्यन्दनशीलानामपामयमग्निः Vजामिः बन्धुः। तासामुत्पादकत्वात्। तथा चाम्नातम्—'अग्नेरापः' (तै. आ. ८. १) इति। यद्वा। देवेभ्यः पलायितोऽप्सु वर्तमानः सन् तासामपां बन्धुर्बभूवेत्यर्थः। तत्र दृष्टान्तः[4]। Vस्वस्रां स्वसॄणां Vभ्रातेव। यथा भ्रातातिशयेन हितकरो भवति तद्वत्। तादृशोऽग्निः Vवनानि महान्त्यरण्यानि Vअत्ति भक्षयति। दहतीत्यर्थः। तत्र निदर्शनम्। Vराजा Vइभ्यान्न

---

१. ट-ण-ल-श—स्वकीयमूलफलादिदानेन। २. च-छ-ण-द-ध-न-फ-ल—वारयते। ३. ढ—रणिर्गत्यर्थः। रण्यते। ४. च-छ-त-द-ध-न-फ-श-स—निदर्शनम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

भियं यन्तीति नैरुक्तव्युत्पत्त्या इध्माः शत्रवः । तान् यथा समूलं हिनस्ति तद्वत् । यद्वा । इध्मा धनिनः । तान् यथा धनमपहरन् राजा हिनस्ति तद्वदित्यर्थः । अपि च ᵛयत् यदा ᵛवातजूतः वातेन प्रेरितः सन् ᵛवना वनान्यरण्यानि ᵛव्यस्थात् उक्तप्रकारेण विविधमातिष्ठति दग्धुं प्रवर्तते तदानीम् ᵛअग्निर्ह असावग्निरेव ᵛपृथिव्याः भूमेः संबन्धीनि ᵛरोम औषधिरूपाणि रोमाणि ᵛदाति छिनत्ति । भूम्यामोषधिवनस्पतिजातं यदस्ति तत्सर्वं दहतीति भावः ॥ स्वस्राम् । आमो नुडभावश्छान्दसः । अस्थात् । लुङि 'गातिस्था०' इति सिचो लुक् । दाति । 'दाप् लवने' । अदादित्वात् शपो लुक् ॥

श्वसित्यप्सु हंसो न सीदन् क्रत्वा चेतिष्ठो विशामुषर्भुत् ।
सोमो न वेधा ऋतप्रजातः पशुर्न शिश्वा विभुर्दूरेभाः ॥ ९ ॥ १० ॥

श्वसिति । अप्ऽसु । हंसः । न । सीदन् । क्रत्वा । चेतिष्ठः । विशाम । उषःऽभुत् ।
सोमः । न । वेधाः । ऋतऽप्रजातः । पशुः । न । शिश्वा । विऽभुः । दूरेऽभाः ॥ ९ ॥ १० ॥

अयमग्निर्देवेभ्यः पलायितः सन् ᵛअप्सु उदकेषु ᵛश्वसिति प्राणिति । निगूढो वर्तते इत्यर्थः । तत्र दृष्टान्तः । ᵛहंसो ᵛन ᵛसीदन् । उदकमध्ये उपविशन् हंस इव । कीदृशोऽग्निः । ᵛक्रत्वा क्रतुना ज्ञानहेतुनात्मीयेन प्रकाशेन ᵛविशां प्रजानां ᵛचेतिष्ठः अतिशयेन चेतयिता ज्ञापयिता । रात्रौ हि सर्वे जना अन्धकारावृतं सर्वमग्नेः प्रकाशाज्जानन्ति । ᵛउषर्भुत् उषस्युषःकालेऽग्निहोत्रादौ प्रबुद्धः[1] ᵛसोमो ᵛन ᵛवेधाः सोम इव विधाता स्रष्टा । सोमो यथा सकलमोषधिरूपं भोग्यजातं[2] सृजति । 'सोमो वा ओषधीनां राजा' ( तै. सं. ६. १. ९. १; तै. ब्रा. ३. ९. १७. १ ) इति श्रुतेः । तथा सकलं भोक्तृजातं सृजति । अग्नेरेव भोक्तृरूपेणावस्थानात् । तथा च तैत्तिरीयकम्—'अग्निरन्नादोऽन्नपतिः' ( तै. ब्रा. २. ५. ७. ३ ) इति । वाजसनेयकेऽपि भोक्तृभोग्ययोरग्नीषोमात्मकत्वमाम्नातम्—'एतावद्वा इदमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नादः' इति । ᵛऋतप्रजातः । ऋतमित्युदकनाम । ऋतादुदकात् प्रादुर्भूतः ᵛपशुर्न ᵛशिश्वा । उदकमध्ये वर्तमानोऽग्निः शयानः पशुरिव तनूकृतः संकुचितगात्रोऽभूत् । ततः प्रादुर्भूतः सन् ᵛविभुः प्रभूतः संपन्नः । यद्वा शिश्वा शिशुना गर्भस्थेन वत्सेन सहिता गौरिव विभुः प्रभूतावयवो जात इत्यर्थः । ᵛदूरेभाः । दूरे विप्रकृष्टदेशेऽपि भाः प्रकाशो यस्य स तथोक्तः । एवंभूतोऽग्निरप्सु श्वसितीति पूर्वेण संबन्धः ॥ श्वसिति । 'श्वस प्राणने' । अदादित्वात् शपो लुक् । 'रुदादिभ्यः सार्वधातुके' ( पा. सू. ७. २. ७६ ) इति इडागमः । तिपः पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते । क्रत्वा । 'जसादिषु छन्दसि वावचनम्' इति नाभावाभावः । उषसि बुध्यते इत्युषर्भुत् । 'बुध अवगमने' । 'क्विप् च' इति क्विप् । 'एकाचो बशः०' इति भष्भावः । 'अहरादीनां पत्यादिषूपसंख्यानम्' ( पा. म. ८. २. ७० ) इति सकारस्य रेफादेशः । शिश्वा । 'शो तनूकरणे' । 'आदेचः०' इति आत्वम् । 'शः किस्सन्वच्च' ( उ. सू. १. २० ) इति उप्रत्ययः । सन्वद्भावात् द्विर्भावेत्वे । अत एव नित्त्वादाद्युदात्तत्वम् । किद्वद्भावात् 'आतो लोप इटि च' इति आकारलोपः । प्रथमपक्षे 'सुपां सुलुक्०' इति सोः आकारः । द्वितीये तु पूर्ववत् नाभावाभावः । दूरेभाः । 'तत्पुरुषे कृति बहुलम्' इति बहुव्रीहावपि बहुलवचनात् अलुक् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥ ॥ ९ ॥

---

१. श-स–प्रबृद्धः । २. छ-त-श–भोज्यजातम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' रयिः ' इति दशर्चं द्वैपदमध्ययनतः पञ्चर्चं द्वितीयं सूक्तं पराशरस्यार्षमाग्नेयम्। अनुक्रान्तं च–' रयिः ' इति। विनियोगो लैङ्गिकः ॥

रयिर्न चित्रा सूरो न संदृगायुर्न प्राणो नित्यो न सूनुः ।
तक्वा न भूर्णिर्वना सिषक्ति पयो न धेनुः शुचिर्विभावा ॥ १ ॥ २ ॥

रयिः । न । चित्रा । सूरः । न । सम्ऽदृक् । आयुः । न । प्राणः । नित्यः । न । सूनुः ।
तक्वा । न । भूर्णिः । वना । सिसक्ति । पयः । न । धेनुः । शुचिः । विभाऽवा ॥ १ ॥ २ ॥

अयमग्निः ᵛरयिर्न धनमिव ᵛचित्रा चायनीयो विचित्ररूपो वा ᵛसूरो ᵛन सूर्य इव ᵛसंदृक् संद्रष्टा सर्वेषां वस्तूनां[1] दर्शयिता ᵛआयुर्न ᵛप्राणः आयुर्मुखे संचरन् प्राणः प्रश्वसन्वायुरिव[2] प्रियतमः । यद्वा। यथा प्राणवायुः आयुः जीवनमवस्थापयति । तथा चाम्नायते—' यावद्धयस्मिन् शरीरे प्राणो वसति तावदायुः ' (कौ.उ.३.२) इति। एवमग्निरपि जाठररूपेणायुषोऽवस्थापयिता। ᵛनित्यः[3] ᵛन ᵛसूनुः नित्यो ध्रुवः पुत्र इव प्रियकारी। यथौरसः पुत्रः पितुर्हितमेवाचरति तद्वदयमपि[4] हितस्य स्वर्गस्य प्रापयिता। तथा चाम्नायते—' पुत्रः पित्रे लोककृज्जातवेदः ' ( तै. ब्रा. ३. ७. ७. १०) इति । ᵛतक्वा ᵛन गतिमानश्च इव ᵛभूर्णिः भर्ता । यथाश्व उपर्यारूढं पुरुषं बिभर्ति धारयति पोषयति वा तद्वदयमपीत्यर्थः। ᵛपयो ᵛन ᵛधेनुः पय इव प्रीणयिता ᵛशुचिः दीप्तः ᵛविभावा विशिष्टप्रकाशयुक्तः । एवंगुणविशिष्टोऽग्निः ᵛवना वनान्यरण्यानि ᵛसिषक्ति दग्धुं समवैति सेवते वा ॥ चित्रा । ' सुपां सुलुक्° ' इति सोः पूर्वसवर्ण-दीर्घत्वम्। नित्यः । ' नेर्ध्रुवे ' ( पा. म. ४. २. १०४ ) इति त्यप्। प्रत्ययस्य पित्त्वादनुदात्तत्वे उपसर्गस्वर एव शिष्यते । तक्वा । ' तक हसने '। गतिकर्मसु पठितत्वादत्र गत्यर्थः । तकति गच्छतीति तक्वा । ' अन्येभ्योऽपि दृश्यन्ते ' इति वनिप्। भूर्णिः । ' घृणिः पृश्निः ' इत्यादौ भरतेर्निप्रत्ययान्तो निपातितः ॥

दाधार क्षेममोको न रण्वो यवो न पक्वो जेता जनानाम् ।
ऋषिर्न स्तुभ्वा विक्षु प्रशस्तो वाजी न प्रीतो वयो दधाति ॥ ३ ॥ ४ ॥

दाधारं । क्षेमम् । ओकः । न । रण्वः । यवः । न । पक्वः । जेता । जनानाम् ।
ऋषिः । न । स्तुभ्वा । विक्षु । प्रऽशस्तः । वाजी । न । प्रीतः । वयः । दधाति ॥ ३ ॥ ४ ॥

अयमग्निः ᵛक्षेमं लब्धस्य धनस्य रक्षणं ᵛदाधार धारयति। स्तोतृभ्यो दत्तस्य धनस्य रक्षणं कर्तुं शक्नोतीति भावः । ᵛओको ᵛन निवासस्थानं गृहमिव ᵛरण्वः रमणीयः । यद्वा । गन्तव्यः । गृहवत् सर्वैः प्राप्यते इत्यर्थः। ᵛयवो ᵛन यव इव ᵛपक्वः। यथा पक्वो यव उपभोगयोग्यः[5] भवति तद्वदग्नि-रपि पाकादिकार्यहेतुतया उपभोग्यः[6] इत्यर्थः । ᵛजनानां ᵛजेता शत्रुजनानां मध्येऽभिभविता ᵛऋषिर्न

---

१. स–वसूनाम्। २. त–श्वसनवायुरिव; न–फ–श्वसन्वायुरिव; श–प्रश्वसनवायुरिव ३. ढ–तथा नित्यः। ४. ढ–तद्वदयमग्निरपि। ५. ढ–उपयोगयोग्यः। ६. ढ–उपयोगयोग्यः।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मन्त्रद्रष्टा ऋषिरिव [v]स्तुभ्वा देवानां स्तोता [v]विक्षु यजमानलक्षणेषु मनुष्येषु [v]प्रशस्तः प्रख्यातः [v]वाजी [v]न अश्व इव [v]प्रीतः हर्षयुक्तः। यथाश्वो हर्षयुक्तो युद्धाभिमुखं गच्छति तद्वदयमपि देवानां हविर्वहने हर्षयुक्तो भवतीत्यर्थः। एवंभूतोऽग्निः [v]वयः अन्नं [v]दधाति दधातु। अस्मभ्यं ददात्वित्यर्थः। वय इत्यन्ननाम। 'वयः क्षय' इति तन्नामसु पाठात्॥ दाधार। 'तुजादीनाम्०' इति अभ्यासस्य दीर्घत्वम्। क्षेमम्। क्षियति निवसत्यनेनेति क्षेमः। 'अर्तिस्तुसु०' इत्यादिना मन्। नित्त्वादाद्युदात्तत्वम्। रण्वः। 'रवि धवि गत्यर्थाः'। अस्मात् कर्मणि कप्रत्ययः। इदित्त्वात् नुम्। जेता। तृनन्त आद्युदात्तः। जनानाम्। 'यतश्च निर्धारणम्' (पा. सू. २. ३. ४१) इति निर्धारणे षष्ठी, नेयं कर्मणि षष्ठी इति 'न लोकाव्ययनिष्ठा०' इति षष्ठीप्रतिषेधो न भवति। स्तुभ्वा। स्तोभतिः स्तुतिकर्मा। 'अन्येभ्योऽपि दृश्यन्ते' इति क्वनिप्॥

दुरोकशोचिः क्रतुर्न नित्यो जायेव योनावरं विश्वस्मै।
चित्रो यदभ्राट्छ्वेतो न विक्षु रथो न रुक्मी त्वेषः समत्सु॥ ५॥ ६॥

दुरोकऽशोचिः। क्रतुः। न। नित्यः। जायाऽइव। योनौ। अरम्। विश्वस्मै।
चित्रः। यत्। अभ्राट्। श्वेतः। न। विक्षु। रथः। न। रुक्मी। त्वेषः। समत्ऽसु॥५॥६॥

[v]दुरोकशोचिः दुष्प्रापतेजाः [v]क्रतुर्न [v]नित्यः। क्रतुः कर्मणां कर्ता। स इव ध्रुवः। यथा[1] सः[1] कर्मसु ध्रुवोऽप्रमत्तः सन् जागर्ति तद्वदयमप्यग्निः कर्मसु रक्षसां दहने[2] ध्रुवो जागर्तीत्यर्थः। [v]योनौ गृहे वर्तमाना [v]जायेव योषिदिव अग्निहोत्रादिगृहे वर्तमानो वह्निः [v]विश्वस्मै सर्वस्मै यष्टृजनाय[3] [v]अरम् अलं भूषणं भवति। यथा जायया गृहमलंकृतं भवति तद्वदग्निना यज्ञगृहमप्यलंकृतं सत्[4] दृश्यते[4] इत्यर्थः। [v]चित्रः चायनीयो विचित्रदीप्तिर्वा [v]यत् यदायमग्निः [v]अभ्राट् भ्राजते तदानीं [v]श्वेतो [v]न शुभ्रवर्ण आदित्य इव भवति। रात्रौ हि अहनि सूर्य[5] इवाग्निः[5] प्रकाशको भवति। [v]विक्षु प्रजासु [v]रथो [v]न रथ इव [v]रुक्मी सुवर्णवद्रोचमानदीप्तियुक्तः [v]समत्सु संग्रामेषु [v]त्वेषः दीप्तः। एवंभूतोऽग्निर्यदभ्राडिति पूर्वेणान्वयः॥ दुरोकशोचिः। 'उच समवाये'। 'ईषद्दुःसुषु०' इति कृच्छ्रार्थे खल्। बहुलवचनात् कुत्वम्। लित्स्वरेण प्रत्ययात् पूर्वस्योदात्तत्वम्। दुरोकं शोचिस्तेजो यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। अरम्। 'वालमूल०' (पा. म. ८. २. १८) इत्यादिना लकारस्य रेफादेशः। अभ्राट्। 'भ्राजृ दीप्तौ'। लङि व्यत्ययेन परस्मैपदम्। 'बहुलं छन्दसि' इति शपो लुक्। व्रश्चादिषत्वे जश्त्वम्। अडागम उदात्तः। यद्वृत्तयोगादनिघातः[6]। समत्सु। समानं माद्यन्त्येष्विति समदः संग्रामाः। औणादिकः अधिकरणे क्विप्। 'समानस्य च्छन्दसि०' इति सभावः। यद्वा। सम्यगत्ति भक्षयति वीरानिति समत्। संपूर्वादत्तेः 'क्विप् च' इति क्विप्॥

---

१. ढ-स- स यथा। २. च-छ-न-फ-हनने। ३. च-छ न-फ-ल-यजमानाय। ४. ढ-दृश्यते। ५. ढ-सूर्यवदग्निः। ६. ढ-यद्वृत्तान्नित्यमिति निघातप्रतिषेधः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत्त्वेषप्रतीका ।
यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनाम् ॥ ७ ॥ ८ ॥

सेनाऽइव । सृष्टा । अमम् । दधाति । अस्तुः । न । दिद्युत् । त्वेषऽप्रतीका ।
यमः । ह । जातः । यमः । जनिऽत्वम् । जारः । कनीनाम् । पतिः । जनीनाम् ॥ ७ ॥ ८ ॥

[v]सृष्टा प्रेरिता [v]सेनेव स्वामिना सह वर्तमाना भटसंहतिरिव[1] अयमग्निः [v]अमं शत्रूणां भयं दधाति विदधाति । करोतीत्यर्थः । यद्वा । सृष्टा सेनेव अमं बलं [v]दधाति । सा यथा बलवती तद्वदग्निरपि बलवानित्यर्थः । निदर्शनान्तरमुच्यते । दिद्युदिति वज्रनाम । तेन चात्रेषुर्लक्ष्यते[2] । [v]त्वेषप्रतीका दीप्तमुखा [v]अस्तुर्न [v]दिद्युत् क्षेप्तुः संबन्धिनी इषुरिव । सा यथा भीषयते तद्वदग्निरपि राक्षसादीन् भीषयते इत्यर्थः । अत्र निरुक्तं—' सेनेव सृष्टा भयं वा बलं वा दधात्यस्तुरिव दिद्युत्त्वेषप्रतीका ' ( निरु. १०. २१ ) इत्यादि । यच्छति ददाति स्तोतृभ्यः कामानिति यमोऽग्निरुच्यते । यद्वा । इन्द्राग्न्योर्युगपदुत्पन्नत्वादग्नेर्यमत्वम् । अस्मिन्नर्थे यास्केन मन्त्रब्राह्मणे दर्शिते–' यमो ह जात इन्द्रेण सह संगतः । यमाविहेह मातरेत्यपि निगमो भवति ' ( निरु. १०. २१ ) इति । यः [v]जातः उत्पन्नो भूतसंघो यच्च [v]जनित्वं जनयितव्यमुत्पत्स्यमानं भूतजातं तदुभयमपि [v]यमो [v]ह अग्निरेव । सर्वेषां भावानामाहुतिद्वारा अग्न्यधीनत्वात् । [v]कनीनां कन्यकानां [v]जारः जरयिता । यतो विवाहसमये अग्नौ लाजादिद्रव्यहोमे सति तासां कन्यात्वं निवर्तते । अतो जरयितेत्युच्यते । तथा [v]जनीनां जायानां कृतविवाहानां [v]पतिः भर्ता । तथा चाख्यायते—' अनुपजातपुरुषसंभोगेच्छावस्थां स्त्रियं सोमो लेभे । स च सोमः ईषदुपजातभोगेच्छां तां विश्वावसवे गन्धर्वाय प्रादात् । स च गन्धर्वो विवाहसमयेऽग्नये प्रददौ । अग्निश्च मनुजाय भर्त्रे धनपुत्रैः सहितामिमां प्रायच्छत् ' इति । इममर्थं काचिदृक् स्पष्टं ब्रूते—' सोमो ददद्गन्धर्वाय गन्धर्वो दददग्नये । रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् ' ( ऋ. सं. १०. ८५. ४१ ) इति । यास्कस्त्वाह—' तृतीयो अग्निष्टे पतिरित्यपि निगमो भवति ' ( निरु. १०. २१ ) इति । यद्वा । जनीनां पालयिता यतोऽयम् अनुष्ठितैर्यागैः फलं प्रयच्छति ॥ सेनेव । इनेन सह वर्तते इति सेना । ' वोपसर्जनस्य ' इति सभावः । बहुव्रीहिस्वरः । जनित्वम् । ' जनी प्रादुर्भावे ' । ' कृत्यार्थे तवैकेन्° ' इति कर्मणि ष्वन्प्रत्ययः । इडागमः । नित्त्वादाद्युदात्तत्वम् । जारः । जरयतीति जारः । ' दारजारौ कर्तरि णिलुक् च ' (पा. सू. ३. ३. २०. ४ ) इति निपात्यते । कनीनाम् । कन्याशब्दात् षष्ठ्येकवचने ' बहुलं छन्दसि ' इति बहुलग्रहणात् संप्रसारणम् । परपूर्वत्वम् । जनीनाम् । जन्यन्ते आसु इति जनयः स्त्रियः । ' इन्सर्वधातुभ्यः ' इति इन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् ॥

तं वश्चराथा वयं वसत्यास्तं न गावो नक्षन्त इद्धम् ।
सिन्धुर्न क्षोदः प्र नीचीरैनोन्नवन्त गावः स्वर्दृशीके ॥ ९ ॥ १० ॥

तम् । वः । चराथ । वयम् । वसत्या । अस्तम् । न । गावः । नक्षन्ते । इद्धम् ।
सिन्धुः । न । क्षोदः । प्र । नीचीः । ऐनोत् । नवन्त । गावः । स्वः । दृशीके ॥ ९ ॥ १० ॥

---

१. च-छ-ण-न-फ–वीरसंहतिरिव । २. ढ–अत्रेषुर्लक्ष्यते ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]वः इति व्यत्ययेन बहुवचनम्। हे अग्ने [v]तं त्वां [v]चराथा। चरतीति चरथः पशुः। तत्प्रभवैर्हृदयादिभिः साध्या आहुतिरपि चरथा इत्युच्यते। उपचारात् कार्ये कारणशब्दः। चराथा चरथया पशुप्रभवहृदयादिसाधनया आहुत्या। [v]वसत्या। वसति निवसतीति स्थावरो व्रीह्यादिर्वसतिः। पूर्ववत् तत्साध्याहुतिर्लक्ष्यते। वसत्या पुरोडाशाद्याहुत्या च [v]वयम् [v]इद्धं प्रदीप्तमग्निं [v]नक्षन्ते व्याप्नुयाम। पुरुषव्यत्ययः। तत्र दृष्टान्तः। [v]अस्तं [v]न [v]गावः। अस्तमिति गृहनाम। यथा गावो गृहं व्याप्नुवन्ति तद्वत्। अत्र यास्कः— 'तं वश्चराथा चरन्त्या पश्वाहुत्या वसत्या च निवसन्त्यौषधाहुत्यास्तं यथा गाव आप्नुवन्ति तथाप्नुयाम' (निरु. १०. २१) इति। अयमग्निः [v]सिन्धुर्न [v]क्षोदः स्यन्दनशीलसुदकमिव [v]नीचीः नितरामञ्चतीः इतस्ततो नितरामुद्गच्छन्तीर्ज्वालाः [v]प्र [v]ऐनोत् प्रेरयति। यथा जलप्रवाहो निम्नदेशे शीघ्रं गच्छति तद्वदग्नेर्ज्वालाः दग्धव्यं प्रति गच्छन्तीति भावः। [v]स्वः नभसि वर्तमाने [v]दशीके दर्शनीये तस्मिन्नग्नौ [v]गावः गमनस्वभावा रश्मयः [v]नवन्त संगच्छन्ते। नवतिर्गतिकर्मा॥ चराथा। चरेरौणादिकः अथक्प्रत्ययः। दीर्घश्छान्दसः। 'सुपां सुलुक्०' इति विभक्तेः आकारः। वसत्या। 'वहिवस्यर्तिभ्यश्चित्' (उ. सू. ४. ५००) इति अतिप्रत्ययः। 'उदात्तयणः०' इति विभक्तेरुदात्तत्वम्। अस्तम्। अस्यते अस्मिन् सर्वमित्यस्तं गृहम्। 'असिहसि०' इत्यादिना तन्। 'तितुत्र०' इति इट्प्रतिषेधः। नित्त्वादाद्युदात्तत्वम्। नक्षन्ते। नक्षतिर्व्याप्तिकर्मा। 'नक्ष गतौ'। व्यत्ययेनात्मनेपदम्। 'चादिलोपे विभाषा' इति निघाताभावः। नीचीः। निपूर्वात् 'अञ्चतेश्चोपसंख्यानम्' (पा. सू. ४. १. ६. २) इति ङीप्। 'अचः' इति अकारलोपे 'चौ' इति दीर्घत्वम्। 'न्यधी च' (पा. सू. ६. २. ५३) इति गतेः प्रकृतिस्वरत्वम्। ऐनोत्। 'इण् गतौ'। अन्तर्भावितण्यर्थात् 'छन्दसि लुङ्लङ्लिटः' इति वर्तमाने लङि व्यत्ययेन श्लुः। आडागमो वृद्धिश्च। दशीके। 'दृशिर् प्रेक्षणे'। 'अनिदृशिभ्यां च' इति कीकन्प्रत्ययः। नित्त्वादाद्युदात्तत्वम्॥ ॥ १० ॥

'वनेषु' इति द्वैपदं[1] दर्शचम्[1] अध्ययनतः पञ्चर्चं तृतीयं सूक्तं पराशरस्यार्षमाग्नेयम्। 'वनेषु' इत्यनुक्रान्तम्। विनियोगो लैङ्गिकः॥

**वनेषु जायुर्मर्तेषु मित्रो वृणीते श्रुष्टिं राजेवाजुर्यम्।**
**क्षेमो न साधुः क्रतुर्न भद्रो भुवत्स्वाधीर्होता हव्यवाट्॥ १॥ २॥**

वनेषु। जायुः। मर्तेषु। मित्रः। वृणीते। श्रुष्टिम्। राजाऽइव। अजुर्यम्।
क्षेमः। न। साधुः। क्रतुः। न। भद्रः। भुवत्। सुऽआधीः। होता। हव्यऽवाट्॥ १॥ २॥

[v]वनेषु [v]जायुः अरण्येषु जायमानः [v]मर्तेषु मनुष्येषु [v]मित्रः सखा सोऽयमग्निः [v]श्रुष्टिम्। शु आशु अश्नुते कर्माणि व्याप्नोतीति श्रुष्टिर्यजमानः। क्षिप्रेण कर्मणामनुष्ठातेत्यर्थः। तथा च यास्कः—'श्रुष्टीति क्षिप्रनामाशु अष्टीति' (निरु. ६.१२)। एवंभूतं यजमानं [v]वृणीते संभजते। अनेन प्रत्तं हविः स्वीकृत्य रक्षतीति भावः। तत्र दृष्टान्तः। [v]राजेव [v]अजुर्यम्। अजुर्यं जरारहितं दृढाङ्गं सर्वकार्येषु शक्तमित्यर्थः। एवंभूतं पुरुषं यथा राजा वृणीते तद्वत्। [v]क्षेमो [v]न रक्षक इव [v]साधुः साधयिता [v]क्रतुर्न। क्रतुः कर्मणां कर्ता। स इव [v]भद्रः भजनीयः कल्याणो वा [v]होता देवानामाह्वाता [v]हव्यवाट् हव्यवाहनो नाम देवानामग्निः।

---

१. ढ—दशर्चं द्वैपदम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तथा चाम्नायते– ' त्रयो वा अग्नयो हव्यवाहनो देवानां कव्यवाहनः पितृणां सहरक्षा असुराणाम् ' ( तै. सं. २. ५. ८. ६ ) इति। एवंभूतोऽग्निः Vस्वाधीः शोभनकर्मा शोभनाध्यानः[1] वा Vभुवत् भवतु ॥ जायुः। ' जि जये '। ' कृवापाजि° ' इति उण्। अजुर्यम्। ' जॄष् वयोहानौ '। भावे ण्यत्। वृद्धौ कृतायाम् आकारस्य व्यत्ययेन उकारः। जुर्यं जरा नास्त्यस्येति बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम्। भुवत्। भवतेर्लेटि अडागमः। ' बहुलं छन्दसि ' इति विकरणस्य लुक्। ' भूसुवोस्तिङि ' इति गुणप्रतिषेधः ॥

हस्ते दधानो नृम्णा विश्वान्यमे देवान्धाद्गुहा निषीदन्।
विदन्तीमत्र नरो धियंधा हृदा यत्तष्टान्मन्त्राँ अशंसन् ॥ ३ ॥ ४ ॥

हस्ते। दधानः। नृम्णा। विश्वानि। अमे। देवान्। धात्। गुहा। निऽसीदन्।
विदन्ति। ईम्। अत्र। नरः। धियम्ऽधाः। हृदा। यत्। तष्टान्। मन्त्रान्। अशंसन्॥३॥४॥

Vविश्वानि सर्वाणि Vनृम्णा नृम्णानि हविर्लक्षणानि धनानि Vहस्ते स्वकीये बाहौ Vदधानः धारयन्नयमग्निः Vगुहा गुहायामप्सु मध्येऽश्वत्थादौ वा संवृतप्रदेशे Vनिषीदन् निगूढो वर्तमानः सन् Vअमे अग्ने Vदेवान् Vधात् अस्थापयत्। अग्नौ हविर्भिः सह पलायिते सति सर्वे देवा अभैषुरित्यर्थः। Vनरः नेतारः Vधियंधाः कर्मणां बुद्धीनां वा धारयितारो देवाः Vअत्र अस्मिन् काले Vईम् एनमग्निं Vविदन्ति जानन्ति। Vयत् यदा Vहृदा हृदयावस्थितया बुद्ध्या Vतष्टान् निर्मितान् अग्निस्तुतिपरान् Vमन्त्रान् Vअशंसन् अस्तुवन् अवोचन्नित्यर्थः ॥ निषीदन्। ' सदिरप्रतेः ' इति षत्वम्। विदन्ति। ' विद ज्ञाने '। अदादित्वात् शपो लुक्। प्रत्ययस्वरः। धियंधाः। ' आतोऽनुपसर्गे कः ' इति कः। ' तत्पुरुषे कृति बहुलम् ' इति बहुलवचनात् द्वितीयाया अपि अलुक्। तष्टान्। ' तक्षू त्वक्षू तनूकरणे '। निष्ठा[2]। ' यस्य विभाषा ' इति इट्प्रतिषेधः। ' स्कोः संयोगाद्योः° ' इति कलोपः ॥

अजो न क्षां दाधार पृथिवीं तस्तम्भ द्यां मन्त्रेभिः सत्यैः।
प्रिया पदानि पश्वो नि पाहि विश्वायुरग्ने गुहा गुहं गाः ॥ ५ ॥ ६ ॥

अजः। न। क्षाम्। दाधार। पृथिवीम्। तस्तम्भ। द्याम्। मन्त्रेभिः। सत्यैः।
प्रिया। पदानि। पश्वः। नि। पाहि। विश्वऽआयुः। अग्ने। गुहा। गुहम्। गाः ॥ ५ ॥ ६ ॥

Vअजो Vन। अजति गच्छतीत्यजः सूर्यः। यद्वा। न जायते इत्यजः। जन्मरहित इत्यर्थः। स इव। क्षा इति पृथिवीनाम। Vक्षां भूमिं Vदाधार अयमग्निः प्रकाशकत्वेन धारयति। पृथिवीत्यन्तरिक्षनाम। Vपृथिवीम्[3] अन्तरिक्षं च धारयतीत्येव[4]। Vद्यां द्युलोकं Vसत्यैः अवितथार्थैः Vमन्त्रेभिः मन्त्रैः

---

१. च-छ-ण-न-फ-स–शोभनध्यानः। २. ढ-स–निष्ठायाम्। ३. ढ–' पृथिवीम् ' नास्ति। ४. च-त-फ–धारयतीत्येवम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vतस्तम्भ स्तभ्नाति । यथाधो न पतति उपर्येव तिष्ठति तथा करोतीत्यर्थः । मन्त्रैर्दिवो धारणं तैत्तिरीये समाम्नातं–' देवा वा आदित्यस्य सुवर्गस्य लोकस्य पराचोऽतिपादादबिभयुः । तं छन्दोभिरदंहन्दृंह्यै ' ( तै. ब्रा. १. २. ४. २ ) इति । यद्वा । सत्यैर्मन्त्रैः स्तूयमानोऽग्निर्द्यां तस्तम्भेति । हे vअग्ने vविश्वायुः विश्वं सर्वमायुरन्नं यस्य स त्वं vपश्वः पशोः vप्रिया प्रियाणि vपदानि शोभनतृणोदकोपेतानि स्थानानि vनि vपाहि नितरां पालय मा धाक्षीरित्यर्थः । तर्हि कुत्र निवसामीति चेत् तत्राह । vगुहा गुहाया अपि vगुहं गुहां गवां संचारायोग्यस्थानं vगाः गच्छ तत्रैव निवसेत्यर्थः ॥ पश्वः । ' जसादिषु च्छन्दसि वावचनम् ' इति ' धेर्डिति ' इति गुणाभावे यणादेशः । ' उदात्तयणः° ' इति विभक्तेरुदात्तत्वम् । गुहा । ' सुपां सुलुक्° ' इति पञ्चम्या आजादेशः । चित्त्वादन्तोदात्तत्वम् । गुहम् । व्यत्ययेन ह्रस्वत्वम् । गाः । छान्दसो लुङ् । ' इणो गा लुङि ' इति गादेशः ॥

य ईं चिकेत गुहा भवन्तमा यः ससाद धारामृतस्य ।
वि ये चृतन्त्यृता सपन्त आदिद्वसूनि प्र ववाचास्मै ॥ ७ ॥ ८ ॥

यः । ईम् । चिकेत । गुहा । भवन्तम् । आ । यः । ससाद । धाराम् । ऋतस्य ।
वि । ये । चृतन्ति । ऋता । सपन्तः । आत् । इत् । वसूनि । प्र । ववाच । अस्मै ॥ ७ ॥ ८ ॥

vयः पुमान् vईम् एनं vगुहा vभवन्तं गुहायां सन्तमग्निं vचिकेत जानाति । vयः च vऋतस्य सत्यस्य यज्ञस्य वा vधारां धारयितारमेनमग्निम् vआ vससाद आसीदति उपास्ते इत्यर्थः । vये च vऋता ऋतानि सत्यानि यज्ञान् वा vसपन्तः समवयन्तः स्पृशन्तो वा पुरुषा एतमग्निं vवि vचृतन्ति अग्निमुद्दिश्य स्तुतीर्ब्रध्नन्ति कुर्वन्तीत्यर्थः । vआदित् स्तुत्यनन्तरमेव vअस्मै सर्वस्मै स्तोतृजनाय vवसूनि धनानि vप्र vववाच प्रकथयति ॥ चिकेत । ' कित ज्ञाने ' । लिटि णलि लित्स्वरः । चृतन्ति । ' चृती हिंसाग्रन्थनयोः ' । तौदादिकः । लसार्वधातुकानुदात्तत्वे विकरणस्वरः शिष्यते । ववाच । लिटि ' ब्रुवो वचिः ' । ' लिट्यभ्यासस्योभयेषाम् ' ( पा. सू. ६. १. १७ ) इति अभ्यासस्य संप्रसारणम् । ' संप्रसारणाच्च ' इति परपूर्वत्वस्य ' वा छन्दसि ' ( पा. सू. ६. १. १०६ ) इति विकल्पनात् यणादेशः ॥

वि यो वीरुत्सु रोधन्महित्वोत प्रजा उत प्रसूष्वन्तः ।
चित्तिरपां दमे विश्वायुः सद्मेव धीराः समायं चक्रुः ॥ ९ ॥ १० ॥

वि । यः । वीरुत्ऽसु । रोधत् । महिऽत्वा । उत । प्रऽजाः । उत । प्रऽसूषु । अन्तरिति ।
चित्तिः । अपाम् । दमे । विश्वऽआयुः । सद्मऽइव । धीराः । सम्ऽमाय । चक्रुः ॥ ९ ॥ १० ॥

vयः अग्निः vवीरुत्सु ओषधीषु vमहित्वा यानि महत्त्वानि सन्ति तानि vवि vरोधत् विरुणद्धि विशेषेणावृणोति नावशेषयति । vउत अपि च vप्रजाः प्रकर्षेणोत्पन्नाः पुष्पफलादिलक्षणाः vप्रसूषु उत्पादयित्रीषु मातृस्थानीयास्वोषधीषु vअन्तः मध्ये विरुणद्धीत्येव। द्वितीयः उतशब्दः पादपूरणः । तथा vचित्तिः चेतयिता

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ज्ञापयिता [v]अपां [v]दमे जलानां मध्यभूते गृहे [v]विश्वायुः सर्वान्नो योऽग्निर्वर्तते इति शेषः । तमग्निं [v]धीराः मेधाविनः [v]संमाय संमाननं पूजनं कृत्वा । स्तुतिभिः स्तुत्वेत्यर्थः । [v]चक्रुः कर्माणि कुर्वन्ति । तत्र दृष्टान्तः । [v]सद्मेव । यथा सदनं गृहं प्रथमतः संपूज्य पश्चात्तत्र कर्माण्याचरन्ति तद्वत् ॥ वीरुत्सु । विपूर्वात् रोहतेः क्विप् । न्यङ्क्वादिषु ' वीरुध् ' ( पा. सू. ७. ३. ५३. ग. ) इति पठितत्वादुपसर्गस्य दीर्घो धकारश्चान्तादेशः । उक्तं च । ' वीरुध ओषधयो भवन्ति ' ( निरु. ६. ३ ) । रोधत् । ' रुधिर् आवरणे ' । लेटि अडागमः । ' इतश्च लोपः० ' इति इकारलोपः । संमाय । ' माङ् माने शब्दे च ' । ' समासेऽनञ्पूर्वे क्त्वो ल्यप् ' ( पा. सू. ७. १. ३७ ) । ' न ल्यपि ' ( पा. सू. ६. ४. ६९ ) इति ईत्वप्रतिषेधः ॥ ॥ ११ ॥

' श्रीणन् ' इति द्वैपदं दशर्चं चतुर्थं सूक्तम् । तत्राध्ययनतः[1] पञ्चर्चम् । ऋष्याद्याः पूर्ववत् । विनियोगो लैङ्गिकः ॥

श्रीणन्नुप स्थाद्दिवं भुरण्युः स्थातुश्चरथमक्तून्व्यूर्णोत् ।
परि यदेषामेको विश्वेषां भुवद्देवो देवानां महित्वा ॥ १ ॥ २ ॥

श्रीणन् । उप । स्थात् । दिवम् । भुरण्युः । स्थातुः । चरथम् । अक्तून् । वि । ऊर्णोत् । परि । यत् । एषाम् । एकः । विश्वेषाम् । भुवत् । देवः । देवानाम् । महित्वा ॥ १ ॥ २ ॥

[v]भुरण्युः हविषां भर्ता धारयिता पयःप्रभृतिना श्रयणद्रव्येण[2] सोममिव तैर्हविर्भिः [v]श्रीणन् मिश्रयन् [v]दिवम् [v]उप [v]स्थात् उपतिष्ठति प्राप्नोतीत्यर्थः । [v]स्थातुः स्थावरं [v]चरथं जङ्गमं तदुभयात्मकं जगत् [v]अक्तून् सर्वा रात्रीश्च [v]व्यूर्णोत् स्वतेजसा विशेषेणाच्छादयति । हविर्वहनं कुर्वन् सर्वमपि जगत् स्वभासा प्रकाशयति स्म इति भावः । [v]विश्वेषां सर्वेषां देवानां दानादिगुणयुक्तानां इन्द्रादीनां मध्ये [v]देवः द्योतमानः [v]एकः एव अयमग्निः [v]एषां पूर्वोक्तानां स्थावरादीनां [v]महित्वा महत्त्वानि माहात्म्यानि [v]यत् यस्मात् [v]परि [v]भुवत् परिभवति परिगृह्णाति परितो व्याप्य वर्तते । परिपूर्वो भवतिः परिग्रहार्थः । यद्वा । एषां विश्वेषां स्थावरादीनां मध्ये वर्तमानोऽयं देवोऽग्निर्देवानां महत्त्वानि यत् यदा परि भुवत् परितो व्याप्नोति । तदानीमिति पूर्वत्रान्वयः ॥ ऊर्णोत् । ' ऊर्णुञ् आच्छादने ' । ' ऊर्णोतेर्विभाषा ' ( पा. सू. ७. २. ६ ) इति वृद्धेर्विकल्पः ।

आदित्ते विश्वे क्रतुं जुषन्त शुष्काद्यद्देव जीवो जनिष्ठाः ।
भजन्त विश्वे देवत्वं नाम ऋतं सपन्तो अमृतमेवैः ॥ ३ ॥ ४ ॥

आत् । इत् । ते । विश्वे । क्रतुम् । जुषन्त । शुष्कात् । यत् । देव । जीवः । जनिष्ठाः । भजन्त । विश्वे । देवऽत्वम् । नाम । ऋतम् । सपन्तः । अमृतम् । एवैः ॥ ३ ॥ ४ ॥

---

१. ढ–तच्चाध्ययनतः । २. ढ-स–श्रपणद्रव्येण ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]देव द्योतमानाग्ने [v]जीवः जीवन् प्रज्वलन् [v]शुष्कात् नीरसात् अरणिरूपात् काष्ठात् [v]यत् यदा [v]जनिष्ठाः प्रादुर्भवसि मथनेनोत्पद्यसे [v]आदित् अनन्तरमेव [v]विश्वे सर्वे यजमानाः [v]ते तुभ्यं [v]क्रतुं कर्म [v]जुषन्त सेवन्ते अनुतिष्ठन्ति । तथा अनुष्ठाय च [v]विश्वे ते सर्वे [v]नाम नामकम् [v]ऋतम् अवितथं [v]देवत्वं देवतात्वं [v]भजन्त भजन्ते प्राप्नुवन्ति । किं कुर्वन्तः । [v]अमृतम् अमरणं त्वाम् [v]एवैः त्वां गन्तृभिः स्तोत्रैः [v]सपन्तः समवयन्तः प्राप्नुवन्तः इत्यर्थः ॥ जुषन्तेत्यादीनि त्रीण्याख्यातानि ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमानार्थानि । एवैः । यन्ति स्तोतव्याभिमुख्येन गच्छन्ति इति एवानि स्तोत्राणि । ' इण्शीङ्भ्यां वन् ' ( उ. सू. १. १५० ) ॥

ऋतस्य प्रेषा ऋतस्य धीतिर्विश्वायुर्विश्वे अपांसि चक्रुः ।
यस्तुभ्यं दाशाद्यो वा ते शिक्षात्तस्मै चिकित्वान्रयिं दयस्व ॥ ५ ॥ ६ ॥

ऋतस्य । प्रेषाः । ऋतस्य । धीतिः । विश्वऽआयुः । विश्वे । अपांसि । चक्रुः ।
यः । तुभ्यम् । दाशात् । यः । वा । ते । शिक्षात् । तस्मै । चिकित्वान् । रयिम् । दयस्व ॥ ५ ॥ ६ ॥

[v]ऋतस्य गतस्य[1] देवयजनं प्राप्तस्याग्नेः [v]प्रेषाः प्रकर्षेणेष्यमाणाः स्तुतयः क्रियन्ते । [v]धीतिः[2] । धीयते सोमः पीयतेऽस्मिन्निति धीतिर्यागः । सोऽपि [v]ऋतस्य देवयजनदेशं प्राप्तस्याग्नेरेव क्रियते । अतः सोऽग्निः [v]विश्वायुः । विश्वं सर्वमायुरन्नं यस्य स तथाविधो भवति । अपि चास्मै [v]विश्वे सर्वे यजमानाः [v]अपांसि दर्शपूर्णमासादीनि कर्माणि [v]चक्रुः कुर्वन्ति । हे अग्ने [v]तुभ्यं [v]यः [v]दाशात् चरुपुरोडाशादीनि हवींषि ददाति । [v]यो [v]वा अन्योऽपि यो यजमानः [v]ते [v]शिक्षात् त्वदीयं कर्म कर्तुं शक्तो भूयासम् इति इच्छति । उभयविधाय [v]तस्मै यजमानाय [v]चिकित्वान् तत्कृतमनुष्ठानं जानंस्त्वं [v]रयिं [v]दयस्व धनं देहि ॥ दाशात् । ' दाश्च दाने ' । लेटि आडागमः । शिक्षात् । ' शक्लृ शक्तौ ' । इच्छार्थे सन् । ' सनि मीमाघुरभलभशक° ' ( पा. सू. ७. ४. ५४ ) इति अकारस्य इसादेशः । ' अत्र लोपोऽभ्यासस्य ' इति अभ्यासलोपः । ' स्कोः संयोगाद्योः° ' इति सकारलोपः । पूर्ववत् लेटि आडागमः । चिकित्वान् । ' कित ज्ञाने ' । लिटः क्वसुः । दयस्व । ' दय दानगतिरक्षणहिंसादानेषु ' ॥

होता निषत्तो मनोरपत्ये स चिन्नु सां पतीं रयीणाम् ।
इच्छन्त रेतो मिथस्तनूषु सं जानत स्वैर्दक्षैरमूराः ॥ ७ ॥ ८ ॥

होता । निऽसत्तः । मनोः । अपत्ये । सः । चित् । नु । आसाम् । पतिः । रयीणाम् ।
इच्छन्त । रेतः । मिथः । तनूषु । सम् । जानत । स्वैः । दक्षैः । अमूराः ॥ ७ ॥ ८ ॥

हे अग्ने त्वं [v]मनोरपत्ये यजमानस्वरूपायां[3] प्रजायां [v]होता देवानामाह्वाता सन् [v]निषत्तः निषण्णः । ' मानव्यो हि प्रजाः ' ( तै. सं. ५. १. ५. ६ ) इति हि ब्राह्मणम् । [v]स [v]चिन्नु स एव त्वम् [v]आसां प्रजानां [v]रयीणां गवादीनां धनानामपि [v]पतिः स्वामी । अतस्ताः प्रजाः [v]तनूषु

---

१. फ–' गतस्य ' नास्ति । २. च-छ-न-फ–तथा धीतिः । ३. ढ–यजमानरूपायाम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आत्मीयेषु शरीरेषु Vमिथः संसृष्टमेकीभूतं पुत्ररूपेण परिणतं Vरेतः वीर्यम् Vइच्छन्त ऐच्छन् । त्वदनुग्रहेण पुत्रमलभन्तेति यावत् । लब्धपुत्राश्च ताः प्रजाः Vअमूराः अमूढाः सत्यः Vस्वैः स्वकीयैः Vदक्षैः समर्थैः पुत्रैः सह Vसं Vजानत सम्यगवगच्छन्ति चिरकालं जीवन्तीत्यर्थः । यद्वा । दक्षशब्दः प्राणवाची । ' प्राणो वै दक्षोऽपानः क्रतुः ' ( तै. सं. २. ५. २. ४ ) इति श्रुतेः । स्वैर्दक्षैः स्वकीयैः प्राणैः अमूराः संगतास्त्वयैव सर्वं जानन्ति॥ इच्छन्त । व्यत्ययेनात्मनेपदम्। जानत । छान्दसो लङ्। झस्य अदादेशे ' श्नाभ्यस्तयोरातः ' इति आकारलोपः । अमूराः । मूरा अमूरेत्यत्र यास्क एवं व्याचख्यौ–' मूढा वयं स्मोऽमूढस्त्वमसि ' ( निरु. ६. ८ ) इति । अतोऽत्रापि अमूरशब्देन अमूढत्वमुच्यते । वर्णव्यापत्त्या ढकारस्य रेफः । यद्वा । ' मुर्छा मोहसमुच्छ्राययोः '। अस्मात् संपदादिलक्षणो भावे क्विप् । ' राल्लोपः ' इति छलोपः । रो मत्वर्थीयः । न मूरा अमूराः । अथवा । ' अम गत्यादिषु '। अस्मादौणादिक ऊरन्प्रत्ययः ॥

**पितुर्न पुत्राः क्रतुं जुषन्त श्रोषन्ये अस्य शासं तुरासः ।**
**वि रायो और्णोद्दुरः पुरुक्षुः पिपेश नाकं स्तृभिर्दमूनाः ॥ ९ ॥ १० ॥**

पितुः । न । पुत्राः । क्रतुम् । जुषन्त । श्रोषन् । ये । अस्य । शासम् । तुरासः ।
वि । रायः । और्णोत् । दुरः । पुरुऽक्षुः । पिपेश । नाकम् । स्तृऽभिः । दमूनाः ॥ ९ ॥ १० ॥

Vअस्य अग्नेः Vशासं शासनं Vतुरासः त्वरमाणाः सन्तः Vये यजमानाः Vश्रोषन् शृण्वन्ति ते सर्वे तेनानुशिष्टं Vक्रतुं कर्म Vजुषन्त सेवन्ते । तत्र दृष्टान्तः । Vपितुर्न Vपुत्राः । यथा पुत्राः पुरु बहुलं त्रायकाः पुत्राश्चो नरकाद्वा रक्षकास्तनयाः पितुराज्ञां कुर्वन्ति तद्वत् । ' पुत्रः पुरु त्रायते निपरणाद्वा पुन्नरकं ततस्त्रायत इति वा ' ( निरु. २. ११ ) इति यास्कः । Vपुरुक्षुः । क्षु इत्यन्ननाम । बह्वन्नः सोऽग्निरेषां यजमानानां Vदुरः द्वाराणि यज्ञस्य द्वारभूतानि Vरायः धनानि Vवि Vऔर्णोत् विवृणोति प्रकाशयति । ददातीति यावत् । अपि च Vदमूनाः दमे यज्ञगृहे मनो यस्य सोऽग्निः । नास्मिन्नकं[1] दुःखमस्तीति नाको द्युलोकः । तम् । स्तृभिरिति नक्षत्रनाम । Vस्तृभिः नक्षत्रैः Vपिपेश अवयवीचकार नक्षत्रैर्युक्तमकरोदित्यर्थः ॥ श्रोषन् । ' श्रु श्रवणे ' । लेटि अडागमः । ' सिब्बहुलं लेटि ' इति सिप् । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । ' इतश्च लोपः० ' इति इकारलोपः । संयोगान्तस्य लोपः । पिपेश । ' पिश अवयवे ' ॥ ॥ १२ ॥

' शुक्रः ' इति द्वैपदं[2] दशर्चम्[2] अध्ययनतः पञ्चर्चं पञ्चमं सूक्तं पराशरस्यार्षमाग्नेयम् । ' शुक्रः ' इत्यनुक्रान्तम् । विनियोगो लैङ्गिकः ॥

**शुक्रः शुशुक्वाँ उषो न जारः पप्रा समीची दिवो न ज्योतिः ।**
**परि प्रजातः क्रत्वा बभूथ भुवो देवानां पिता पुत्रः सन् ॥ १ ॥ २ ॥**

शुक्रः । शुशुक्वान् । उषः । न । जारः । पप्रा । समीची इति सम्ऽईची । दिवः । न । ज्योतिः ।
परि । प्रऽजातः । क्रत्वा । बभूथ । भुवः । देवानाम् । पिता । पुत्रः । सन् ॥ १ ॥ २ ॥

---

१. ढ–नाकम् । नास्मिन्नकम् । २. ढ–दशर्चं द्वैपदम् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vशुक्रः शुभ्रवर्णोऽयमग्निः vउषो vन vजारः उषसो जरयिता सूर्य इव vशुशुक्वान् शोचयिता सर्वस्य प्रकाशयिता भवति । तथा vसमीची संगते द्यावापृथिव्यौ vदिवो vन vज्योतिः द्योतमानस्य सूर्यस्य ज्योतिरिव vपप्रा स्वतेजसा पूरयिता । हे अग्ने अतस्त्वं vप्रजातः प्रादुर्भूतः सन् vक्रत्वा कर्मणा यद्वा ज्ञानहेतुना प्रकाशेनोक्तप्रकारेण सर्वं जगत् vपरि vबभूथ परितो व्याप्नोषि । दीव्यन्तीति देवा ऋत्विजः । तेषां vपुत्रः vसन् पुन्नाम्नो नरकात् त्रायकः सन् vपिता vभुवः पालयिता भवसि । यद्वा । देवानाम् इन्द्रादीनामेव पुत्रः सन् पुत्र इव दूतो भूत्वा पिता हविर्भिः पालयिता भवसि ॥ शुशुक्वान् । ' शुच दीप्तौ ' । लिटः क्वसुः । व्यत्ययेन कुत्वम् । पप्रा । ' पॄ पालनपूरणयोः ' इत्यस्मात् ' आदृगमहनजनः० ' इति किप्रत्ययः । ' सुपां सुलुक्० ' इति सोः डादेशः । समीची । संपूर्वादञ्चतेः ' ऋत्विक्० ' इत्यादिना क्विन् । ' समः समि ' ( पा. सू. ६. ३. ९३ ) इति सम्यादेशः । ' अञ्चतेश्चेति वक्तव्यम् ' इति ङीप् । ' अचः ' इति अकारलोपे ' चौ ' इति दीर्घत्वम् । उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वम् । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घत्वम् । यदि तु समूऽईची इति पदविभागः क्रियते तर्हि ' उद ईत् ' ( पा. सू. ६. ४. १३९ ) इति विधीयमानमीत्वं सस उत्तरस्यापि द्रष्टव्यम् । बभूथ । ' बभूथा ततन्थ० ' ( पा. सू. ७. २. ६४ ) इति निपातनात् इडभावः ॥

**वेधा अदृप्तो अग्निर्विजानन्नूर्ध्वं गोनां स्वाद्मा पितूनाम् ।**
**जने न शेव आह्यः सन्मध्ये निषत्तो रण्वो दुरोणे ॥ ३ ॥ ४ ॥**

वेधाः । अदृप्तः । अग्निः । विऽजानन् । ऊर्ध्वः । न । गोनाम् । स्वाद्म । पितूनाम् ।
जने । न । शेवः । आऽह्यः । सन् । मध्ये । निऽसत्तः । रण्वः । दुरोणे ॥ ३ ॥ ४ ॥

vवेधाः । मेधाविनामैतत् । मेधावी । यद्वा । विधाता सर्वस्य कर्ता । vअदृप्तः दर्परहितः vविजानन् कर्तव्याकर्तव्यविभागं जानन् vअग्निः vगोनां गवाम् vऊर्ध्वं गोसंबन्धि पयस आश्रयभूतं स्थानमिव vपितूनाम् अन्नानां vस्वाद्म स्वादयिता रसयिता । यथा गोरूधः पयःप्रदानेन सर्वाण्यन्नानि स्वादूनि करोति तद्वदग्निरपि सम्यक् पाकेन सर्वाण्यन्नानि स्वादूनि करोतीत्यर्थः । अपि चैवंभूतोऽग्निः vजने vन vशेवः जनपदे लोकसुखकरः[1] पुरुष इव vमध्ये यज्ञेषु मध्ये vआह्यः आह्वातव्यः vसन् vदुरोणे यज्ञगृहे vनिषत्तः निषण्णः vरण्वः रमयिता स्तुत्यो वा भवति ॥ गोनाम् । ' गोः पादान्ते ' ( पा. सू. ७. १. ५७ ) इत्यपादान्तेऽपि नुट् । स्वाद्म । ' स्वाद आस्वादने ' । अन्तर्भावितण्यर्थात् ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन् । ' सुपां सुलुक्० ' इति सोर्लुक् । पितूनाम् । ' नामन्यतरस्याम् ' इति नाम उदात्तत्वम् । आह्यः । आङ्पूर्वात् ह्वयतेः ' अचो यत् ' इति यत् । ' बहुलं छन्दसि ' इति संप्रसारणम् । ' हलः ' इति दीर्घः । रेफोपजनश्छान्दसः । ' यतोऽनावः ' इत्याद्युदात्तत्वम् ॥

**पुत्रो न जातो रण्वो दुरोणे वाजी न प्रीतो विशो वि तारीत् ।**
**विशो यदह्वे नृभिः सनीळा अग्निर्देवत्वा विश्वान्यश्याः ॥ ५ ॥ ६ ॥**

पुत्रः । न । जातः । रण्वः । दुरोणे । वाजी । न । प्रीतः । विशः । वि । तारीत् ।
विशः । यत् । अह्वे । नृऽभिः । सऽनीळाः । अग्निः । देवऽत्वा । विश्वानि । अश्याः ॥५॥६॥

---

१. त-श-स–लोके सुखकरः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]पुत्रो [v]न पुत्र इव [v]जातः प्रादुर्भूतोऽग्निः [v]दुरोणे गृहे [v]रण्वः रमयिता भवति । [v]वाजी [v]न अश्व इव [v]प्रीतः हर्षयुक्तः सन् [v]विशः संग्रामे वर्तमानाः शत्रुभूताः प्रजाः [v]वि [v]तारीत् विशेषेण तरति अतिक्रामति । अपि च [v]नृभिः ऋत्विग्लक्षणैर्मनुष्यैः सहितोऽहं [v]सनीळाः समाननिवासस्थानाः [v]विशः दैवीः प्रजाः [v]यत् यदा [v]अह्वे आह्वयामि तदानीमयम् [v]अग्निः [v]विश्वानि सर्वाणि [v]देवत्वा देवत्वानि [v]अश्याः अश्नुते प्राप्नोति । स्वयमेव तत्तद्देवतारूपो भवतीत्यर्थः । तथा च मन्त्रान्तरमाम्नास्यते— 'त्वमग्ने वरुणो जायसे यत्त्वं मित्रो भवसि यत्समिद्धः' ( ऋ. सं. ५. ३. १ ) इत्यादि ॥ अश्याः । 'अशू व्याप्तौ' । लिङि व्यत्ययेन परस्मैपदसंज्ञयोर्मौ । 'बहुलं छन्दसि' इति विकरणस्य लुक् ॥

**नकिष्ट एता व्रता मिनन्ति नृभ्यो यदेभ्यः श्रुष्टिं चकर्थ ।**
**तत्तु ते दंसो यदहन्त्समानैर्नृभिर्यद्युक्तो विवे रपांसि ॥ ७ ॥ ८ ॥**

नकिः । ते । एता । व्रता । मिनन्ति । नृऽभ्यः । यत् । एभ्यः । श्रुष्टिम् । चकर्थ ।
तत् । तु । ते । दंसः । यत् । अहन् । समानैः । नृऽभिः । यत् । युक्तः । विवेः । रपांसि ॥७॥८॥

हे अग्ने [v]ते तव संबन्धीनि [v]एता [v]व्रता एतानि परिदृश्यमानानि दर्शपूर्णमासादीनि कर्माणि [v]नकिः [v]मिनन्ति राक्षसादयो बाधका न हिंसन्ति । [v]यत् यस्मात् त्वम् [v]एभ्यः कर्मसु वर्तमानेभ्यः [v]नृभ्यः यज्ञस्य नेतृभ्यो यजमानेभ्यः [v]श्रुष्टिम् । शु आशु अश्नुते व्याप्नोतीति श्रुष्टिर्यज्ञफलरूपं सुखम् । तत् [v]चकर्थ कृतवानसि । सति हि तव व्रतानां बाधके एतन्नोपपद्यते । अतोऽवगम्यते तव व्रतानां हिंसका न सन्तीति । हे अग्ने [v]ते त्वदीयं [v]तत्तु [v]दंसः तदेव कर्म [v]यत् यदि राक्षसादिः [v]अहन् हन्ति नाशयति तदानीं [v]समानैः सप्तगणरूपेण सदृशैः [v]नृभिः नेतृभिर्मरुद्भिः [v]युक्तः त्वं [v]रपांसि बाधकानि राक्षसादीनि [v]यत् यस्मात् त्वम् [v]विवेः गमयसि पलायनं प्रापयसि । तस्मात् तव व्रतानि न हिंसन्तीति योज्यम् ॥ मिनन्ति । 'मीञ् हिंसायाम्' । क्र्यादिकः । 'ष्वादीनां ह्रस्वः' इति ह्रस्वत्वम् । विवेः । 'छन्दसि लुङ्लङ्लिटः' इति वर्तमाने लङ् । वी गत्यादिषु । सिपि अदादित्वात् शपो लुकि प्राप्ते 'बहुलं छन्दसि' इति शपः श्लुः ॥

**उषो न जारो विभावोस्रः संज्ञातरूपश्चिकेतदस्मै ।**
**त्मना वहन्तो दुरो व्यृण्वन्नवन्त विश्वे स्वर्दृशीके ॥ ९ ॥ १० ॥**

उषः । न । जारः । विभाऽवा । उस्रः । संज्ञातऽरूपः । चिकेतत् । अस्मै ।
त्मना । वहन्तः । दुरः । वि । ऋण्वन् । नवन्त । विश्वे । स्वः । दृशीके ॥ ९ ॥ १० ॥

[v]उषो [v]न [v]जारः उषसो जरयिता आदित्य इव [v]विभावा विशिष्टप्रकाशयुक्तः [v]उस्रः निवासयिता [v]संज्ञातरूपः सर्वैः प्राणिभिरवगतस्वरूपः । देवतान्तरवदप्रत्यक्षो न भवतीत्यर्थः । एवंभूतोऽग्निः [v]अस्मै यजमानाय [v]चिकेतत् जानातु । अभिमतफलं ददात्वित्यर्थः । यद्वा । विभक्तिव्यत्ययः । अस्मै इदं सूक्तरूपं स्तोत्रं चिकेतत् जानातु । तथा अस्य रश्मयः [v]त्मना आत्मनैव स्वयमेव [v]वहन्तः हविर्वहनं कुर्वन्तः [v]दुरः यज्ञगृहद्वाराणि [v]व्यृण्वन् विशेषेण गच्छन्ति । व्याप्नुवन्तीत्यर्थः । तदनन्तरं [v]दृशीके

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दर्शनीये ᵛस्वः नभसि ᵛविश्वे सर्वे ते रश्मयः ᵛनवन्त गच्छन्ति । नवतिर्गतिकर्मा । देवान् प्राप्नुवन्तीत्यर्थः ॥ उस्रः । 'वस निवासे' । 'स्फायितञ्चि०' इत्यादिना रक् । यजादित्वात् संप्रसारणम् । चिकेतत् । 'कित ज्ञाने' । जौहोत्यादिकः । लेटि अडागमः । 'बहुलं छन्दसीति वक्तव्यम्' (का. ७. ३. ८७. १) इति वचनात् 'नाभ्यस्तस्याचि पिति०' इति लघूपधगुणप्रतिषेधाभावः । 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् । ऋण्वन् । 'इवि रिवि रवि धवि गत्यर्थाः' । इदित्त्वात् नुम् । छान्दसो लङ् । व्यत्ययेन रेफस्य संप्रसारणम् । यद्वा । 'ऋणु गतौ' । तनोत्यादिः ॥ ॥ १३ ॥

'वनेम' इति द्वैपदमेकादशर्चमध्ययनतः षड्चं षष्ठं सूक्तम् । ऋष्याद्याः पूर्ववत् । अनुक्रान्तं च—'वनेमैकादश' इति । विनियोगो लैङ्गिकः ॥

वनेम पूर्वीरर्यो मनीषा अग्निः सुशोको विश्वान्यश्याः ।
आ दैव्यानि व्रता चिकित्वाना मानुषस्य जनस्य जन्म ॥ १ ॥ २ ॥

वनेम । पूर्वीः । अर्यः । मनीषा । अग्निः । सुऽशोकः । विश्वानि । अश्याः ।
आ । दैव्यानि । व्रता । चिकित्वान् । आ । मानुषस्य । जनस्य । जन्म ॥ १ ॥ २ ॥

ᵛपूर्वीः प्रभूता इषोऽन्नानि ᵛवनेम संभजेमहि । अग्निस्तादृशान्यन्नानि ददात्वित्यर्थः । ᵛमनीषा मनीषया बुद्ध्या ᵛअर्यः गन्तव्यः प्राप्तव्यः । यद्वा । मनीषया अर्यः स्वामी । ᵛसुशोकः शोभनदीप्तिः । एवंभूतः ᵛअग्निः ᵛविश्वानि सर्वाणि कर्माणि ᵛअश्याः अश्नुते व्याप्नोति । किं कुर्वन् । ᵛदैव्यानि देवेषु भवानि ᵛव्रता व्रतानि कर्माणि ᵛचिकित्वान् ᵛआ समन्तात् जानन् । तथा ᵛमानुषस्य ᵛजनस्य मनुष्यजातस्य ᵛजन्म उत्पत्तिरूपं कर्म चिकित्वान् आभिमुख्येन जानन् । द्यावापृथिव्योः संबन्धीनि यानि कर्माणि तानि सर्वाण्यवगच्छन् । अवगत्य व्याप्नोतीत्यर्थः ॥ वनेम । 'वन षण संभक्तौ' । शपि प्राप्ते व्यत्ययेन शः[1] । अदुपदेशात् लसार्वधातुकानुदात्तत्वे विकरणस्वरः शिष्यते । पूर्वीः । पुरुशब्दात् 'वोतो गुणवचनात्' इति ङीष् । 'हलि च' इति दीर्घः । मनीषा । ईषाअक्षादित्वात्प्रकृतिभावः (पा. सू. ६. १. १२७. २) । सुशोकः । 'शुच दीप्तौ' । भावे घञ् । 'चजोः कु घिण्ण्यतोः' इति कुत्वम् । शोभनः शोको यस्य । 'आद्युदात्तं द्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् । अश्याः । 'देवत्वा विश्वान्यश्याः' (ऋ. सं. १. ६९. ६) इतिवत् । चिकित्वान् । 'कित ज्ञाने' । लिटः क्वसुः ॥

गर्भो यो अपां गर्भो वनानां गर्भश्च स्थातां गर्भश्चरथाम् ।
अद्रौ चिदस्मा अन्तर्दुरोणे विशां न विश्वो अमृतः स्वाधीः ॥ ३ ॥ ४ ॥

गर्भः । यः । अपाम् । गर्भः । वनानाम् । गर्भः । च । स्थाताम् । गर्भः । चरथाम् ।
अद्रौ । चित् । अस्मै । अन्तः । दुरोणे । विशाम् । न । विश्वः । अमृतः । सुऽआधीः ॥३॥४॥

---

१. ढ-न-स-शः आत्मनेपदं च ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]यः अग्निः [v]अपां [v]गर्भः गर्भवदन्तर्वर्ती अपांनपात्संज्ञः । यश्च [v]वनानाम् अरण्यानां [v]गर्भः दावाग्निरूपेण तन्मध्ये वर्तते । यः [v]च [v]स्थातां स्थावराणां[1] काष्ठादीनां [v]गर्भः अन्तरवस्थाता । [v]चरथां चरणवतां[2] जङ्गमानां [v]गर्भः जाठररूपेण देहमध्येऽवतिष्ठते। एवंभूताय [v]अस्मै अग्नये [v]दुरोणे दुस्तर्यगृहे [v]अद्रौ [v]चित् पर्वतेऽपि [v]अन्तः मध्ये हविः प्रयच्छन्तीति शेषः । सोऽयम् [v]अमृतः अमरणधर्माग्निः [v]स्वाधीः शोभनकर्मयुक्तः शोभनाध्यानः[3] वा अस्माकं भवत्विति शेषः। तत्र दृष्टान्तः । [v]विश्वः निवेशयिता सुखेनावस्थापयिता राजा [v]विशां [v]न । प्रजानां यथा रक्षणरूपशोभनकर्मयुक्तो भवति तद्वत् ॥ स्थाताम् । तिष्ठतेः क्विपि छान्दसः तुक् । यद्वा । औणादिकः तुप्रत्ययः । आमि अन्त्यलोपश्छान्दसः । चरथाम् । ' शीङ्शपिरुगमि° ' ( उ. सू. ३. ३९३ ) इति विधीयमानः अथप्रत्ययो बहुलवचनात् चरेरपि द्रष्टव्यः । आगमानुशासनस्यानित्यत्वात् आमो नुडभावे सवर्णदीर्घः । विश्वः । ' विश प्रवेशने ' । अस्मात् अन्तर्भावितण्यर्थात् ' अशिप्रुषि° ' इत्यादिना क्नप्रत्ययः । नित्त्वादाद्युदात्तत्वम् ॥

स हि क्षपावाँ अग्नी रयीणां दाशद्यो अस्मा अरं सूक्तैः ।
एता चिकित्वो भूमा नि पाहि देवानां जन्म मर्तांश्च विद्वान् ॥ ५ ॥ ६ ॥

सः । हि । क्षपाऽवान् । अग्निः । रयीणाम् । दाशत् । यः । अस्मै । अरम् । सुऽउक्तैः ।
एता । चिकित्वः । भूम । नि । पाहि । देवानाम् । जन्म । मर्तान् । च । विद्वान् ॥ ५ ॥६ ॥

[v]स [v]हि [v]अग्निः [v]क्षपावान् । क्षपा इति रात्रिनाम। रात्रिमान्। ' आग्नेयी वै रात्रिः ' (तै. ब्रा. २. १. २. ७ ) इति श्रुतेः । रात्रेरग्निसंबन्धोऽपि ' अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ' (तै. आ. ४. १०. ५) इति हूयमानत्वात् । यद्वा। राक्षसादीनां क्षपणेन नाशनेन युक्तः। एवंभूतोऽग्निः स्तोत्रे यजमानाय [v]रयीणां धनानि [v]दाशत् दाशति प्रयच्छति । [v]यः यजमानः [v]अस्मै अग्नये [v]सूक्तैः सुष्ठूक्तैर्यथाशास्त्रं प्रयुक्तैर्मन्त्रैः [v]अरम् अलं पर्याप्तं स्तोत्रं करोति तस्मै इत्यर्थः । हे [v]चिकित्वः । ' चिकित्वांश्चेतनावान् ' ( निरु. २. ११ ) इति यास्कः । हे चेतनावन् सर्वज्ञाग्ने त्वं [v]देवानाम् इन्द्रादीनां [v]जन्म जन्मानि [v]मर्तान् मनुष्यान् [v]च [v]विद्वान् जानन् [v]एता एतानि [v]भूम भूम्युपलक्षितानि भूतजातानि [v]नि [v]पाहि नितरां पालय । यतस्त्वं देवमनुष्यादीन् सर्वान् जानासि अत एवमुच्यसे इत्यर्थः ॥ रयीणाम् । ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी । दाशत् । ' दाश्च दाने ' । लेटि अडागमः । अरम् । ' वालमूल° ' इत्यादिना लत्वविकल्पः । सूक्तैः । ' सूपमानात् क्तः ' ( पा. सू. ६. २. १४५ ) इत्युत्तरपदान्तोदात्तत्वम् । चिकित्वः । ' मतुवसो रुः° ' इति नकारस्य रुत्वम् । भूम । ' सुपां सुलुक्° ' इति भूमिशब्दादुत्तरस्या द्वितीयाया डादेशः । पदकाले ह्रस्वश्छान्दसः ॥

वर्धान्यं पूर्वीः क्षपो विरूपाः स्थातुश्च रथमृतप्रवीतम् ।
अराधि होता स्वर्निषत्तः कृण्वन्विश्वान्यपांसि सत्या ॥ ७ ॥ ८ ॥

वर्धान् । यम् । पूर्वीः । क्षपः । विऽरूपाः । स्थातुः । च । रथम् । ऋतऽप्रवीतम् ।
अराधि । होता । स्वः । निऽसत्तः । कृण्वन् । विश्वानि । अपांसि । सत्या ॥ ७ ॥ ८ ॥

---

१. ध–स्थावरादीनाम् । २. च–चराणाम् । ३. च·ण-न-स–शोभनध्यानः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]पूर्वीः बह्वय उषसः [V]क्षपः निशाः च [V]विरूपाः शुक्लकृष्णतया विविधरूपाः सत्यः [V]यम् अग्निं [V]वर्धान् वर्धयन्ति । तथा [V]स्थातुः स्थावरं वृक्षादिकं [V]रथं रममाणं[1] जङ्गमं मनुष्यादिकं [V]च [V]ऋतप्रवीतम् ऋतेनोदकेन सत्येन यज्ञेन वा प्रकर्षेण वेष्टितं यमग्निं वर्धयन्ति । सोऽग्निः [V]स्वः सुष्ठु अरणीये देवयजने [V]निषत्तः निषण्ण उपविष्टः सन् [V]होता देवानामाह्वाता [V]अराधि संसिद्धोऽभूत् । यद्वा । ऋत्विग्भिरराधि आराधित इत्यर्थः । किं कुर्वन् । [V]विश्वानि सर्वाणि [V]सत्या सत्सु यजमानेषु भवानि यद्वा सत्यफलानि [V]अपांसि कर्माणि [V]कृण्वन् कुर्वन् ॥ वर्धान् । वृधेर्ण्यन्तात् लेटि आडागमः । ' छन्दस्युभयथा ' इति शप आर्धधातुकत्वात् णिलोपः । ' इतश्च लोपः० ' इति इकारलोपे संयोगान्तलोपः । ऋतप्रवीतम् । ' व्येञ् संवरणे ' । अस्मात् कर्मणि निष्ठा । ' वचिस्वपि० ' इत्यादिना संप्रसारणम् । कृद्ग्रहणे गतिकारकपूर्वस्य ग्रहणात् ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् । अराधि । ' राध साध संसिद्धौ ' । कर्तरि लुङि व्यत्ययेन च्लेः चिण् ॥

गोषु प्रशस्तिं वनेषु धिषे भरन्त विश्वे बलिं स्वर्णः ।
वि त्वा नरः पुरुत्रा सपर्यन्पितुर्न जित्रेर्वि वेदो भरन्त ॥ ९ ॥ १० ॥

गोषु । प्रऽशस्तिम् । वनेषु । धिषे । भरन्त । विश्वे । बलिम् । स्वः । नः ।
वि । त्वा । नरः । पुरुऽत्रा । सपर्यन् । पितुः । न । जित्रेः । वि । वेदः । भरन्त ॥९॥१०॥

हे अग्ने त्वं [V]वनेषु वननीयेषु संभजनीयेषु [V]गोषु अस्मदीयेषु [V]पशुषु [V]प्रशस्तिं प्रशंसां [V]धिषे दधिषे स्थापयसि । अस्माकं प्रशस्ता गवादिपशवो भवन्त्वित्यर्थः । [V]विश्वे सर्वे जनाः [V]नः अस्मभ्यं [V]स्वः सुष्ठु अरणीयं [V]बलिम् उपायनरूपं धनं [V]भरन्त आहरन्तु । हे अग्ने [V]त्वा त्वां [V]नरः मनुष्याः [V]पुरुत्रा बहुषु देवयजनदेशेषु [V]वि [V]सपर्यन् विविधं पूजयन्तः । पूजयित्वा च [V]वेदः धनं [V]वि [V]भरन्त त्वत्तो विशेषेण हरन्ति गृह्णन्तीत्यर्थः । तत्र दृष्टान्तः । [V]जित्रेः जीर्णात् वृद्धात् [V]पितुर्न पितुरिव । यथा पुत्रा वृद्धात् पितुः सकाशाद्धनं हरन्ति तद्वत् ॥ धिषे । छान्दसो वर्तमाने लिट् । ' द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम् ' ( का. ६. १.८. १ ) इति द्विर्वचनाभावः । भरन्त । ' हृञ् हरणे ' । केवलोऽपि सोपसर्गार्थो द्रष्टव्यः । छान्दसो लङ् । ' ह्यग्रहोर्भः० ' इति भत्वम् । पुरुत्रा । ' देवमनुष्यपुरुषपुरुमर्त्य० ' इत्यादिना सप्तम्यर्थे त्राप्रत्ययः । जित्रेः । ' जॄष् वयोहानौ ' । ' जॄशॄस्तृजागृभ्यः क्रिन् ' ( उ. सू. ४. ४९४ ) । ' ऋत इद्धातोः ' इति इत्वम् । ' उणादयोऽव्युत्पन्नानि प्रातिपदिकानीति जित्रिः क्रियोर्गिर्योरित्येवमादिषु दीर्घो न भवति ' ( का. ८. २. ७८ ) इत्युक्तत्वात् ' हलि च ' इति दीर्घस्याभावः । रेफवकारयोर्विपर्ययः । उक्तं च– ' वर्णागमो वर्णविपर्ययश्च ' ( का. ६. ३. १०९ ) इति । नित्त्वादाद्युदात्तत्वम् । वेद इति धननाम । विद्यते लभ्यते इति वेदः । ' विदॢ लाभे ' । कर्मणि असुन् ॥

द्विपदास्वयुक्संख्यासु या अन्त्या अतिरिच्यते सा तथैव पठितव्येत्युक्तम् । उत्तरा तादृशी द्विपदा ॥

साधुर्न गृध्नुरस्तेव शूरो यातेव भीमस्त्वेषः समत्सु ॥ ११ ॥

साधुः । न । गृध्नुः । अस्ताऽइव । शूरः । याताऽइव । भीमः । त्वेषः । समत्ऽसु ॥ ११ ॥

---

१. ढ–रंहमाणम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अयमग्निः [v]साधुर्न साधक इव गृभुः [v]गृहीता। यथा साधकः साध्यफलमाशु गृह्णाति तद्वदग्निरपि सर्वं स्वीकरोतीत्यर्थः। तथायमग्निः [v]अस्तेव [v]शूरः। यथा इषूणां क्षेप्ता धानुष्कः शत्रून् प्रेरयति तद्वदग्निरपि दहन् सर्वं[1] प्राणिजातं[2] प्रेरयति[2]। तथा [v]यातेव [v]भीमः। याता यातयिता हिंसको भीमः सर्वेषां भयंकरो भवति। तद्वदग्निरपि दृष्टमात्रेण[3] सर्वेषां भयमुत्पादयति। अत एवंविधोऽग्निः [v]समत्सु संग्रामेषु [v]त्वेषः दीप्तः सन् अस्माकं सहायो भवत्वित्यर्थः ॥ गृभुः। 'गृधु अभिकाङ्क्षायाम्'। 'त्रसिगृधिधृषिक्षिपेः क्नुः'। शूरः। 'शु गतौ'। अन्तर्भावितण्यर्थात् अस्मात् 'शुपिचिमीनां दीर्घश्च' (उ. सू. २. १८३) इति क्रन् ॥ ॥१४॥

'उप प्र' इति दशर्चं सप्तमं सूक्तम्। अत्रानुक्रम्यते–'उप प्र दश' इति। 'ऋषिश्चान्यस्मात्' इति परिभाषया शक्तिपुत्रः पराशर ऋषिः। अनादेशपरिभाषया त्रिष्टुप्। 'परमाग्नेयमैन्द्रात्' इति परिभाषितत्वादग्निर्देवता। प्रातरनुवाकस्याग्नेये क्रतौ त्रैष्टुभे छन्दसि इदमादीनि त्रीणि सूक्तानि। 'अथैतस्याः' इति खण्डे तथैव सूत्रितम्– 'उप प्र जिन्वन्निति त्रीणि का त उपेतिरिति सूक्ते' (आश्व. श्रौ. ४. १३) इति। आश्विनशस्त्रेऽपि प्रातरनुवाकातिदेशादिदमादीनि त्रीणि सूक्तानि। तथैव सूत्र्यते[4]– 'एतयाग्नेयं गायत्रमुपसंतनुयात् प्रातरनुवाकन्यायेन' (आश्व. श्रौ. ६. ५) इति ॥

उप॒ प्र जि॑न्वन्नु॒शती॑रुशन्तं॒ पति॒ न नित्यं॑ जन॒यः स॒नीळाः॑।
स्वसा॑रः॒ श्यावी॒मरु॑षीमजु॒ष्रञ्चि॒त्रमु॒च्छन्ती॑मु॒षस॑ं॒ न गावः॑ ॥ १ ॥

उप॑। प्र। जि॒न्व॒न्। उ॒श॒तीः। उ॒श॒न्त॒म्। पति॑म्। न। नित्य॑म्। जन॑यः। सऽनी॑ळाः।
स्वसा॑रः। श्यावी॑म्। अरु॑षीम्। अ॒जु॒ष्र॒न्। चि॒त्रम्। उ॒च्छन्ती॑म्। उ॒षस॑म्। न। गावः॑॥१॥

[v]उशतीः उशत्यः कामयमानाः [v]सनीळाः। नीळो निवासस्थानम्। समाननिवासस्थानाः एकपाण्यवस्थानात्। स्वसारः[5] इत्यङ्गुलिनाम। एवंभूता अङ्गुलयः [v]उशन्तं कामयमानमग्निं [v]जनयः जायाः [v]नित्यम् असाधारणं [v]पतिं [v]न भर्तारमिव [v]उप [v]प्र [v]जिन्वन्। उपेत्य हविष्प्रदानादिकर्मणा प्रीणयन्ति। प्रीणयित्वा च [v]चित्रं चायनीयं पूजनीयं तमग्निमञ्जलिबन्धनेन [v]अजुष्रन् असेवन्त। तत्र दृष्टान्तः। [v]श्यावीं श्यामवर्णां रात्रिसंबन्धात् कृष्णां ततः [v]उच्छन्तीं सूर्यकिरणसंबन्धात् तमो वर्जयन्तीं अत एव [v]अरुषीं आरोचमानां यद्वा शुभ्ररूपयुक्ताम् [v]उषसं [v]न उषोदेवतां [v]गावः रश्मयो यथा सेवन्ते तद्वत्। यथा रश्मय उषसा नित्यसंबद्धा एवं सर्वेषु यज्ञेष्वग्निपरिचरणेनाङ्गुलयो नित्यसंबद्धा इति तात्पर्यार्थः ॥ जिन्वन्। जिवि प्रीणनार्थः। इदित्त्वात् नुम्। लेटि अडागमः। उशतीः। 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम्। 'शतुरनुमः°' इति नद्या उदात्तत्वम्। स्वसारः। 'असु क्षेपणे' इत्यस्मात् 'सुञ्यसेर्ऋन्' (उ. सू. २. २५३) इति ऋन्। 'न षट्स्वस्रादिभ्यः' (पा. सू. ४. १. १०) इति ङीप्प्रतिषेधः। नित्त्वादाद्युदात्तत्वम्। अरुषीम्। अरुषमिति रूपनाम। 'ऋ गतौ'। 'ऋहनिभ्यामुषच्' (उ. सू. ४. ५१३)। 'छन्दसीवनिपौ' इति मत्वर्थीय ईकारः। व्यत्ययेनाद्युदात्तत्वम्। अजुष्रन्। 'जुषी प्रीतिसेवनयोः'। तौदादिकः। लङि व्यत्ययेन परस्मैपदम्। 'रुट्' इत्यनुवृत्तौ 'बहुलं छन्दसि' इत्यन्तादेशस्य रुडागमः ॥

---

१. स–'सर्वम्' नास्ति। २. ल–प्राणिजातं गृह्णाति। अस्ताइव क्षेपक इव देवान्प्रति हविः प्रेरयति। ३. च-छ-द-ध-न-फ–दृष्टिमात्रेण। ४. ढ–सूत्रितम्। ५. छ-त-श–स्वसारः। स्वसारः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वीळु चिद्दृळ्हा पितरो न उक्थैरद्रिं रुजन्नङ्गिरसो रवेण ।
चक्रुर्दिवो बृहतो गातुमस्मे अहः स्वर्विविदुः केतुमुस्राः ॥ २ ॥

वीळु । चित् । दृळ्हा । पितरः । नः । उक्थैः । अद्रिम् । रुजन् । अङ्गिरसः । रवेण ।
चक्रुः । दिवः । बृहतः । गातुम् । अस्मे इति । अहरिति । स्वः । विविदुः । केतुम् । उस्राः ॥२॥

Vनः अस्माकं Vपितरः Vअङ्गिरसः एतत्संज्ञा ऋषयः Vउक्थैः शस्त्रैरग्निं स्तुत्वा Vवीळु Vचिद्दृळ्हा। वीळु इति बलनाम। बलवन्तं दृढाङ्गमपि Vअद्रिम् अत्तारं पणिनामानमसुरं Vरवेण स्तुतिशब्दमात्रेणैव Vरुजन् अभञ्जन्। तैः स्तुतोऽग्निस्तमसुरं हतवानित्यर्थः[1]। किंच Vबृहतः महतः Vदिवः द्युलोकस्य Vगातुं मार्गम् Vअस्मे अस्माकं Vचक्रुः कृतवन्तः। आवरकस्यासुरस्याग्निना हतत्वात्। मार्गं कृत्वा च Vस्वः सुष्ठु अरणीयमसुरराहित्येन सुखेन प्राप्यम् Vअहः दिवसं Vविविदुः अजानन् लब्धवन्तो वा। तथा Vकेतुम् अह्नां केतयितारं ज्ञापयितारमादित्यम् Vउस्राः पणिनापहृता गाश्च विविदुरित्यनुषङ्गः ॥ वीळु । ' सुपां सुलुक्° ' इति विभक्तेर्लुक् । दृळ्हा । ' दृढः स्थूलबलयोः ' (पा. सू. ७. २. २०) इति निपातितः । ' सुपां सुलुक्° ' इति डादेशः । रुजन् । ' रुजो भङ्गे ' । तौदादिकः । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । विविदुः । ' विद ज्ञाने ', ' विदॢ लाभे ' इति वा । लिटि उसि रूपम् ॥

दधन्नृतं धनयन्नस्य धीतिमादिद्यो दिधिष्वो३ विभृत्राः ।
अतृष्यन्तीरपसो यन्त्यच्छा देवाञ्जन्म प्रयसा वर्धयन्तीः ॥ ३ ॥

दधन् । ऋतम् । धनयन् । अस्य । धीतिम् । आत् । इत् । अर्यः । दिधिष्वः । विऽभृत्राः ।
अतृष्यन्तीः । अपसः । यन्ति । अच्छ । देवान् । जन्म । प्रयसा । वर्धयन्तीः ॥ ३ ॥

Vऋतं देवयजनदेशं प्राप्तमग्निमङ्गिरसो महर्षयः Vदधन् गार्हपत्यादिरूपेणाधारयन्। धारयित्वा च Vअस्य अग्नेः Vधीतिं कर्म अग्निहोत्रादिलक्षणं Vधनयन् धनमकुर्वन्। यथा पुरुषा धनं संपादयन्ति तद्वदग्निदेवत्यं[2] कर्म अन्वतिष्ठन्नित्यर्थः । Vआदित् अङ्गिरसामनुष्ठानानन्तरमेव Vअर्यः अर्या धनस्य स्वामिन्यः Vदिधिष्वः तेन धनेन दिधिष्वोऽग्नीनां धारणं कुर्वत्यः । कृताग्न्याधाना इत्यर्थः । Vविभृत्राः आहितानग्नीन् अग्निहोत्रादिकर्मणि विहरन्त्यः Vअतृष्यन्तीः विषयान्तरतृष्णारहिताः अत एव Vअपसः अपसा कर्मणा युक्ताः एवंभूता यजमानलक्षणाः प्रजाः Vप्रयसा हविर्लक्षणेनान्नेन Vदेवान् इन्द्रादीन् Vजन्म जातान् मनुष्यांश्च Vवर्धयन्तीः वर्धयन्त्यः सत्यः एनमग्निम् Vअच्छ आभिमुख्येन Vयन्ति प्राप्नुवन्ति परिचरन्तीति यावत् ॥ दधन् । ' दध धारणे ' । लङि व्यत्ययेन परस्मैपदम् । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । धनयन् । धनशब्दात् ' तत्करोति° ' इति णिच् । ' इष्ठवर्णौ प्रातिपदिकस्य ' इति इष्ठवद्भावात् टिलोपः । लङि पूर्ववत् । अर्यः । 'अर्यः स्वामिवैश्ययोः' (पा. सू. ३. १. १०३) इति निपातितः । लिङ्गवचनव्यत्ययौ । ' अर्यः स्वाम्याख्या चेत् ' (फि. सू. १७) इत्यन्तोदात्तत्वम् । दिधिष्वः । ' डुधाञ् धारणपोषणयोः ', ' षो अन्तकर्मणि ' इत्याभ्याम् ' अन्दूदम्भूजम्बूकफेलूकर्कन्धूदिधिषूः '

---

१. ढ-स-हतवानिति यावत् । २. च-छ-त-न-फ-श-तद्वदग्निदैवत्यम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

( उ. सू. १. ९३ ) इति कूप्रत्ययान्तो निपातितः । प्रत्ययस्वरः । ' उदात्तस्वरितयोर्यणः० ' इति जसः स्वरितत्वम् । विभृत्राः । ' हृञ् हरणे ' । विपूर्वादस्मादौणादिकः क्त्रप्रत्ययः । ' हृग्रहोर्भः० ' इति भत्वम् । अतृष्यन्तीः । ' जितृषा पिपासायाम् ' । जसि ' वा छन्दसि ' इति पूर्वसवर्णदीर्घस्य विकल्पितत्वात् पूर्वसवर्णदीर्घः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । अपसः । अपस्शब्दादुत्पन्नस्य मत्वर्थीयस्य विनो ' बहुलं छन्दसि ' ( पा. सू. ५. २. १२२ ) इति बहुलवचनात् लुक् । विनन्तस्य त्रिलिङ्गत्वेन नञ्विषयत्वाभावात् प्रातिपदिकस्वरेणान्तोदात्तत्वम् । जन्म । जायन्ते इति जन्मानो मनुष्याः । ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन् । ' सुपां सुलुक्० ' इति शसो लुक् ॥

मथीद्यदीं विभृतो मातरिश्वा गृहेगृहे श्येतो जेन्यो भूत् ।
आदीं राज्ञे न सहीयसे सचा सन्ना दूत्यं भृगवाणो विवाय ॥ ४ ॥

मथीत् । यत् । ईम् । विऽभृतः । मातरिश्वा । गृहेऽगृहे । श्येतः । जेन्यः । भूत् ।
आत् । ईम् । राज्ञे । न । सहीयसे । सचा । सन् । आ । दूत्यम् । भृगवाणः । विवाय ॥४॥

Vमातरिश्वा व्यानवृत्तिरूपेणावस्थितो मुख्यप्राणः Vईम् एनमग्निं Vयत् यदा Vमथीत् अमन्थात् । अग्नेर्मन्थनस्य व्यानवायुसाध्यत्वम् 'अथ यः प्राणापानयोः संधिः स व्यानः' इत्युपक्रम्य छन्दोगैराम्नातम्—' अतो यान्यन्यानि वीर्यवन्ति कर्माणि यथाग्नेर्मन्थनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्नपानंस्तानि करोति ' (छा.उ.१.३.३; ५ ) इति। मन्त्रान्तरं च भवति—' आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेः ' ( ऋ. सं. १. ९३. ६ ) इति । कीदृशो मातरिश्वा । Vविभृतः प्राणिषु प्राणापानादिपञ्चवृत्तिरूपेण विहृतो विभज्य स्थितः । तदपि प्राणसंवादे तैरेवाम्नातं—' तान्वरिष्ठः प्राण उवाच । मा मोहमापद्यथाहमेवैतत् पञ्चधात्मानं प्रविभज्यैतद्बाणमवष्टभ्य विधारयामीति ' (प्र.उ. २. ३)। मन्थनेनोत्पन्नोऽयमग्निः Vश्येतः शुभ्रवर्णो भूत्वा Vगृहेगृहे सर्वस्मिन् यज्ञगृहे यदा Vजेन्यः प्रादुर्भूतः Vभूत् । यद्वा । रक्षसां जेन्यो जेताभिभविता भूत् । तथा च तैत्तिरीयकं— ' देवासुराः संयत्ता आसन् ते देवा बिभ्यतोऽग्निं प्राविशन् तस्मादाहुरग्निः सर्वा देवता इति तेऽग्निमेव वरूथं कृत्वासुरानभ्यभवन् ' (तै. सं. ६. २. २. ६-७) इति। ऐतरेयिणोऽप्यामनन्ति—' ते देवाः प्रतिबुध्याग्निं पुरस्तात्प्रातःसवने पर्यौहंस्तेऽग्निनैव पुरस्तात्प्रातःसवनेऽसुररक्षांस्यपाघ्नत ' ( ऐ. ब्रा. ६. ४ ) इति । Vआत् यज्ञगृहे प्रादुर्भावानन्तरम् Vईम् एनमग्निं Vभृगवाणः । भृगुर्ऋषिः । स इवाचरन् यजमानः Vदूत्यं दूतस्य कर्म Vआ Vविवाय शास्त्रमर्यादया प्रापयामास । तत्र दृष्टान्तः । Vसचा Vसन् । सखा भवन्नन्यो राजा Vसहीयसे अभिभवित्रे प्रबलाय Vराज्ञे Vन । यथा राज्ञे स्वपुरुषं दूतकर्म प्रापयति तद्वत् ॥ मथीत् । 'मथे विलोडने '। लुङि ' ह्यन्तक्षण० ' इति वृद्धिप्रतिषेधः । जेन्यः । ' जनी प्रादुर्भावे ' । अस्मादौणादिक एन्यप्रत्ययः टिलोपश्च इति भट्टभास्करमिश्रः। यद्वा। ' जि जये ' इत्यस्मात् ' कृत्यल्युटो बहुलम् ' इति बहुलवचनात् कर्तरि ' अचो यत् ' इति यत्, तस्य नुडागमश्च । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । दूत्यम् । दूतस्य कर्म दूत्यम् । ' दूतस्य भागकर्मणी ' इति यत् । ' तित्स्वरितम् ' इति स्वरितत्वम् । ' यतोऽनावः ' इत्याद्युदात्तत्वं तु अनित्यमिति ' वीरवीर्यौ च ' इत्यत्र ज्ञापितम् । भृगवाणः भृगुरिवाचरन् । ' सर्वप्रातिपदिकेभ्यः क्विब्वक्तव्यः ' ( पा. म. ३. १. ११. ३ ) इति वचनात् क्विप् । तदन्तात् लटो व्यत्ययेन शानच् । अदुपदेशात् लसार्वधातुकानुदात्तत्वे प्रत्ययान्तधातोरन्तोदात्तत्वे प्राप्ते वृषादेराकृतिगणत्वादाद्युदात्तत्वम् । विवाय । ' वी गत्यादिषु '। अस्मात् अन्तर्भावितण्यर्थात् लिट् ॥



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

महे यत्पित्र ईं रसं दिवे करव त्सरत्पृशन्यांश्चिकित्वान् ।
सृजदस्ता धृषता दिद्युमस्मै स्वायां देवो दुहितरि त्विषिं धात् ॥ ५ ॥

महे । यत् । पित्रे । ईम् । रसम् । दिवे । कः । अव । त्सरत् । पृशन्यः । चिकित्वान् ।
सृजत् । अस्ता । धृषता । दिद्युम् । अस्मै । स्वायाम् । देवः । दुहितरि । त्विषिम् । धात् ॥५॥

vमहे महते vपित्रे पालयित्रे vदिवे द्योतमानाय देवगणाय vईम् इमं vरसं पृथिव्याः सारभूतं हविः vयत् यदा यजमानः vकः करोति तदानीं vपृशन्यः स्पर्शनकुशलो राक्षसादिः vचिकित्वान् हवींषि वहन्तं हे अग्ने त्वां जानन् vअव vत्सरत् त्वद्भयात्पलायते। vअस्ता इषुक्षेपणशीलोऽग्निः vधृषता धर्षकेण धनुषा vअस्मै पलायमानाय राक्षसादये vदिद्युं दीप्यमानं बाणं vसृजत् विसृजति। vदेवः दीप्यमान उषःकालं प्राप्तोऽग्निः vस्वायां स्वकीयायां vदुहितरि दुहितृवत् समनन्तरभाविन्यामुषसि vत्विषिं स्वकीयां दीप्तिं vधात् स्थापयति। उषःकाले हि सूर्यकिरणाः प्रादुर्भवन्ति। तैः स्वकीयं प्रकाशमेकीकरोति। तथा च तैत्तिरीयकम्–' उद्यन्तं वावादित्यमग्निरनुसमारोहति तस्माद्धूम एवाग्नेर्दिवा दृदृशे ' ( तै. ब्रा. २. १. २. १० ) इति। अत उषसि दीप्तिं निदधातीत्युच्यते ॥ कः। करोतेर्लुङि ' मन्त्रे घस° ' इत्यादिना च्लेर्लुक्। त्सरत्। ' त्सर छद्मगतौ '। लेटि अडागमः। ' इतश्च ' इति इकारलोपः। पृशन्यः। ' स्पृश संस्पर्शने '। ' कृपृवृजि° ' ( उ. सू. २. २३९ ) इति विधीयमानः क्युप्रत्ययो बहुलवचनादस्मादपि भवति। स्पृशनं स्पर्शः। ' तत्र साधुः ' इति यत्। सलोपश्छान्दसः। ' तित्स्वरितम् ' इति स्वरितत्वम्। दिद्युम्। दिद्युदिति वज्रनाम। अन्यलोपश्छान्दसः। धात्। छान्दसो वर्तमाने लुङ् ॥ ॥ १५ ॥

स्व आ यस्तुभ्यं दम आ विभाति नमो वा दाशादुशतो अनु द्यून् ।
वर्धो अग्ने वयो अस्य द्विबर्हा यासद्राया सरथं यं जुनासि ॥ ६ ॥

स्वे । आ । यः । तुभ्यम् । दमे । आ । विऽभाति । नमः । वा । दाशात् । उशतः । अनु । द्यून् ।
वर्धो इति । अग्ने । वयः । अस्य । द्विऽबर्हाः । यासत् । राया । सऽरथम् । यम् । जुनासि ॥६॥

हे अग्ने vतुभ्यं त्वां vस्वे vदमे स्वकीये यज्ञगृहे vयः यजमानः। एक आकारो मर्यादायाम्। यथाशास्त्रम् vआ vविभाति आ समन्तात् समिदादिभिः काष्ठैः प्रज्वलयति। vअनु vद्यून् अनुदिवसम् vउशतः कामयमानाय तुभ्यं vनमो vवा vदाशात् हविर्लक्षणमन्नं वा दद्यात्। vअस्य यजमानस्य हे vअग्ने vद्विबर्हाः द्वयोर्मध्यमोत्तमस्थानयोर्बृंहितो वर्धितस्त्वं vवयः अन्नं vवर्धो वर्धयैव। vसरथं रथेन सहितं युयुत्सुं vयं पुरुषं vजुनासि युद्धे प्रेरयसि स पुरुषः vराया धनेन vयासत् संगच्छते ॥ तुभ्यम्। ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वात् चतुर्थी। दाशात्। ' दाश्र दाने '। लेटि आडागमः। उशतः। ' शतुरनुमः° ' इति विभक्तेरुदात्तत्वम्। ' चतुर्थ्यर्थे बहुलं छन्दसि ' इति षष्ठी। अनुद्यून्। द्युरित्यहर्नाम। लक्षणेऽनोः कर्मप्रवचनीयत्वम्। ' कर्मप्रवचनीययुक्ते° ' इति द्वितीया। वर्धो। वर्ध उ। वृधेर्ण्यन्तात् लोटि ' छन्दस्युभयथा ' इति शप आर्धधातुकत्वात् ' णेरनिटि ' इति णिलोपः। शपः पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते। उज्ञा सहैकादेशे ' उज्ञः '

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

( पा. सू. १. १. १७ ) इति प्रगृह्यत्वम् । यासत् । ' या प्रापणे ' । ' सिब्बहुलं लेटि ' इति सिप् । ' लेटोऽडाटौ ' इति अडागमः । जुनासि । जु इति गत्यर्थः सौत्रो धातुः । शपि प्राप्ते व्यत्ययेन श्ना ॥

अग्निं विश्वा अभि पृक्षः सचन्ते समुद्रं न स्रवतः सप्त यह्वीः ।
न जामिभिर्वि चिकिते वयो नो विदा देवेषु प्रमतिं चिकित्वान् ॥ ७ ॥

अग्निम् । विश्वाः । अभि । पृक्षः । सचन्ते । समुद्रम् । न । स्रवतः । सप्त । यह्वीः ।
न । जामिऽभिः । वि । चिकिते । वयः । नः । विदाः । देवेषु । प्रऽमतिम् । चिकित्वान् ॥७॥

[v]विश्वाः [v]पृक्षः चरुपुरोडाशादीनि सर्वाण्यन्नानि [v]अग्निम् अङ्गनादिगुणयुक्तमेनम् [v]अभि [v]सचन्ते आभिमुख्येन समवयन्ति प्राप्नुवन्ति । तत्र दृष्टान्तः । [v]स्रवतः [v]समुद्रं [v]न । यथा स्रवन्त्यो नद्यः समुद्रमभिगच्छन्ति तद्वत् । कीदृश्यो नद्यः । [v]सप्त सप्तसंख्याकाः । ' इमं मे गङ्गे ' इत्यस्यामृचि सप्त हि नद्यः प्राधान्येन श्रूयन्ते । [v]यह्वीः । महन्नामैतत् । महत्यः । [v]जामिभिः । जमन्त्येकस्मिन् पात्रे सह भुञ्जते इति जामयो ज्ञातयः । तैः [v]नः अस्मदीयं [v]वयः अन्नं [v]न [v]वि [v]चिकिते न ज्ञायते । तेभ्यो दातुमस्माकमन्नं प्रभूतं[1] नास्तीति भावः । अतो हे अग्ने त्वं [v]देवेषु । दीव्यन्तीति देवा धनपतयः । तेषु [v]प्रमतिं प्रकर्षेण मननीयं धनं [v]चिकित्वान् अवगच्छन् [v]विदाः अस्मभ्यं लम्भय । यद्वा । प्रमतिं प्रकृष्टं स्तोत्रं देवेषु विदाः वेदय ज्ञापय ॥ पृक्षः । अन्ननामैतत् । ' पृची संपर्के ' इत्यस्मात् औणादिकः कर्मणि क्विप् धातोः षुगागमश्च । यद्वा । असुनि ' सुपां सुलुक्° ' इति जसो लुक् । स्रवतः । ' सु गतौ ' । स्रवणं स्रवः । तत्कुर्वन्ति । ' सर्वप्रातिपदिकेभ्यः क्विब्वक्तव्यः ' इति क्विप् । एतदन्तात् धातोः ' क्विप् च ' इति क्विप् । ' ह्रस्वस्य पिति° ' इति तुक् । क्विबन्तात् धातोः सतिशिष्टत्वात् धातुस्वरेणान्तोदात्तत्वम् । यह्वीः । ' पिप्पल्यादिभ्यश्च ' ( पा. सू. ४. १. ४१ ग. ) इति गौरादिषु पठितत्वात् तस्य च आकृतिगणत्वादत्रापि ङीष् । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घत्वम् । चिकिते । छान्दसो वर्तमाने कर्मणि लिट् । विदाः । ' विदृ लाभे ' । अन्तर्भावितण्यर्थात् लेटि आडागमः । तुदादित्वात् शः । आगमानुशासनस्यानित्यत्वात् नुमभावः । विकरणस्वरः शिष्यते । यद्वा । विदेर्ज्ञानार्थस्य लेटि व्यत्ययेन शः ॥

आ यदिषे नृपतिं तेज आनट्छुचि रेतो निषिक्तं द्यौरभीके ।
अग्निः शर्धमनवद्यं युवानं स्वाध्यं जनयत्सूदयच्च ॥ ८ ॥

आ । यत् । इषे । नृऽपतिम् । तेजः । आनट् । शुचि । रेतः । निऽसिक्तम् । द्यौः । अभीके ।
अग्निः । शर्धम् । अनवद्यम् । युवानम् । सुऽआध्यम् । जनयत् । सूदयत् । च ॥ ८ ॥

अग्नेः [v]यत् [v]तेजः [v]नृपतिं नृणामृत्विजां पालकं यजमानम् [v]आनट् जाठररूपेण [v]आ समन्तात् व्याप्नोत्[2] । किमर्थम् । [v]इषे अन्नाय । कीदृशम्[3] । [v]शुचि शुद्धं [v]द्यौः दीप्तम् । तेन तेजसा परिपक्वमन्नं[4] रसरूपं[4] [v]रेतः वीर्यम् [v]अभीके अभ्यक्तेऽभिगतेऽभिप्राप्ते गर्भस्थाने [v]निषिक्तं नितरां सिक्तम् [v]अग्निः

---

१. च-छ-ण-न-फ–पूर्णम् । २. च-छ-त-न-फ-श–व्याप्नोति । ३. च-छ-न-फ–कीदृशं तेजः । ४. ढ–अन्नरसरूपम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वक्ष्यमाणगुणविशिष्टपुत्ररूपेण [V]जनयत् जनयतु । [V]शर्धं बलवन्तम् [V]अनवद्यम् अवद्यरहितं [V]युवानं तरुणं जरारहितमित्यर्थः । [V]स्वाध्यं शोभनकर्माणं शोभनप्रज्ञं वोत्पन्नं पुत्रं [V]सूदयच्च यागादिकर्मसु प्रेरयतु च । यद्वा । रेत इत्युदकनाम । निषिक्तं मेघेन वृष्टमुदकम् इषेऽन्नाय सस्यादिनिष्पत्तयेऽग्नेर्यत्तेज आनट् व्याप्नोत् वृष्ट्युदकेन[1] भौमाग्नेः संयोगे सति हि सस्यान्युत्पद्यन्ते । कीदृशं तेजः । नृपतिं नृणां रक्षकं शुचि दीप्तम् । तादृशेन तेजसा युक्तो द्यौर्दीप्तोऽग्निरभीके आसन्नकाले एव शर्धादिगुणविशिष्टं पुत्रं जनयतु तं च प्रेरयतु यज्ञादौ ॥ इषे । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । नृपतिम् । ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम् । आनट् । ' अशू व्याप्तौ ' । लङि व्यत्ययेन परस्मैपदक्ष्मौ । आडागमः । व्रश्चादिषत्वे ष्टुत्वम् । निषिक्तम् । ' षिचिर् क्षरणे ' । कर्मणि निष्ठा । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । ' उपसर्गात्सुनोति° ' इति षत्वम् । अभीके । अभिपूर्वादञ्चतेः पचाद्यचि पृषोदरादित्वात् रूपसिद्धिः । यद्वा । ' इण् गतौ ' इत्यस्मात् औणादिकः कवप्रत्ययः । उभयथापि दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् । स्वाध्यम् । ' एरनेकाचः° ' इति यणादेशः । ' उदात्तस्वरितयोर्यणः° ' इति स्वरितत्वम् । जनयत् । जनेर्ण्यन्तात् लेटि अडागमः । सूदयत् । ' षूद क्षरणे ' । पूर्ववत् लेटि अडागमः ॥

मनो॒ न योऽध्वनः॑ स॒द्य एत्येकः॑ स॒त्रा सूरो॒ वस्व॑ ईशे ।
राजा॑ना मि॒त्रावरु॑णा सु॒पा॒णी गोषु॑ प्रि॒यम॒मृतं॑ रक्ष॒माणा ॥ ९ ॥

मनः॑ । न । यः । अध्व॑नः । स॒द्यः । एति॑ । एकः॑ । स॒त्रा । सूरः॑ । वस्वः॑ । ईशे॑ ।
राजा॑ना । मि॒त्रावरु॑णा । सु॒पा॒णी इति॑ सु॒ऽपा॒णी । गोषु॑ । प्रि॒यम् । अ॒मृत॑म् । रक्ष॒माणा ॥९॥

[V]यः [V]सूरः सूर्यः [V]एकः एकाकी असहायः सन् [V]अध्वनः दिव्यान् मार्गान् [V]सद्यः [V]एति आशु गच्छति । असहायत्वं च श्रूयते–' सूर्य एकाकी चरतीत्याह । असौ वा आदित्य एकाकी चरति ' ( तै. ब्रा. ३. ९. ५. ४ ) इति । शीघ्रगमनं च स्मर्यते–' योजनानां सहस्रे द्वे द्वे शते द्वे च योजने । एकेन निमिषार्धेन क्रममाण नमोऽस्तु ते ' इति । शीघ्रगमने दृष्टान्तः । [V]मनो [V]न । यथा मनः शीघ्रं गच्छति तद्वत् । स च सूरः [V]वस्वः धनस्य [V]सत्रा सहैव युगपदेव [V]ईशे ईष्टे । यो हि शीघ्रं गच्छति स बहुदेशेष्ववस्थितानि धनानि प्राप्नोति । तथा [V]राजाना राजमानौ [V]सुपाणी शोभनबाहू [V]मित्रावरुणा मित्रावरुणौ अस्मदीयासु [V]गोषु [V]प्रियं सर्वेषां प्रीतिकरम् [V]अमृतम् अमृतवत्स्वादुभूतं पयः [V]रक्षमाणा रक्षन्तौ वर्तेते । हे अग्ने तत्तद्रूपेण त्वमेवैवं वर्तसे इति भावः ॥ वस्वः । लिङ्गव्यत्ययः । ' जसादिषु च्छन्दसि वावचनम् ' इति ' घेर्ङिति ' इति गुणाभावे यणादेशः । ईशे । ' ईश ऐश्वर्ये ' । ' लोपस्त आत्मनेपदेषु ' इति तलोपः । मित्रावरुणा । ' देवताद्वन्द्वे च ' इति पूर्वपदस्य आनङादेशः । ' देवताद्वन्द्वे च ' इति उभयपदप्रकृतिस्वरत्वम् ॥

---

१. त-द-ध-श-स–वृष्टेन उदकेन ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मा नो अग्ने सख्या पित्र्याणि प्र मर्षिष्ठा अभि विदुष्कविः सन् ।
नभो न रूपं जरिमा मिनाति पुरा तस्या अभिशस्तेरधीहि ॥ १० ॥

मा । नः । अग्ने । सख्या । पित्र्याणि । प्र । मर्षिष्ठाः । अभि । विदुः । कविः । सन् ।
नभः । न । रूपम् । जरिमा । मिनाति । पुरा । तस्याः । अभिऽशस्तेः । अधि । इहि ॥१०॥

हे vअग्ने vपित्र्याणि पितरं वसिष्ठमुपक्रम्यागतानि vसख्या सखित्वानि vमा vप्र vमर्षिष्ठाः मा विनाशय । अत्र मृष्यतेरुपसर्गवशादर्थान्तरे वृत्तिः । यतस्त्वं vकविः क्रान्तदर्शी vसन् vअभि आभिमुख्येन vविदुः सर्वं विद्वान् । vनभो vन vरूपम् । यथान्तरिक्षं रूपवन्तः सूर्यरश्मय आच्छादयन्ति तद्वदाच्छादयति । vजरिमा जरा vमिनाति मां सूक्तद्रष्टारं हिनस्ति । vअभिशस्तेः हिंसाहेतोः vतस्याः जरायाः vपुरा vअधीहि मां बुध्यस्व । सा यथा न प्राप्नोति तथा कुरु । अमृतत्वं प्रयच्छेति यावत् ॥ सख्या । सख्युर्भावः सख्यम् । ' सख्युर्यः ' इति यः । पित्र्याणि । पितृभ्य आगतानि । ' पितुर्यच्च ' ( पा. सू. ४. ३. ७९ ) इति यत्प्रत्ययः । ' रीङृतः ' ( पा. सू. ७. ४. २७ ) इति रीङादेशः । ' यस्येति च ' इति ईकारलोपः । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । मर्षिष्ठाः । ' मृष तितिक्षायाम् ' । प्रार्थनायां छान्दसो लुङ् । ' न माङ्योगे ' इति अडभावः । विदुः । ' विद ज्ञाने ' । ' बहुलमन्यत्रापि ' इति उसिप्रत्ययः । अत एव बहुलवचनादुणाभावः । ' छन्दसि वाप्राम्रेडितयोः ' ( पा. सू. ८. ३. ४९ ) इति विसर्जनीयस्य षत्वम् । नभः । ' नहेर्दिवि भश्च ' ( उ. सू. ४. ६५० ) इति असुन् । जरिमा । ' जॄष् वयोहानौ ' । औणादिको भावे इमनिच्प्रत्ययः । मिनाति । ' मीञ् हिंसायाम् ' । ' प्वादीनां ह्रस्वः ' इति ह्रस्वत्वम् । अभिशस्तेः । अभिशस्यते हिंस्यतेऽनयेत्यभिशस्तिः । करणे क्तिन् । ' तादौ च° ' इति गतेः प्रकृतिस्वरत्वम् । अधीहि । ' इक् स्मरणे ' । लोटि अदादित्वात् शपो लुक् । हेरपित्त्वेन ङित्त्वाद्गुणाभावः ॥ ॥ १६ ॥

' नि काव्या ' इति दशर्चमष्टमं सूक्तं त्रैष्टुभमाग्नेयं पराशरस्यार्षम् । अनुक्रान्तं च–' नि काव्या ' इति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

नि काव्या वेधसः शश्वतस्कर्हस्ते दधानो नर्या पुरूणि ।
अग्निर्भुवद्रयिपती रयीणां सत्रा चक्राणो अमृतानि विश्वा ॥ १ ॥

नि । काव्या । वेधसः । शश्वतः । कः । हस्ते । दधानः । नर्या । पुरूणि ।
अग्निः । भुवत् । रयिऽपतिः । रयीणाम् । सत्रा । चक्राणः । अमृतानि । विश्वा ॥ १ ॥

vशश्वतः शाश्वतस्य नित्यस्य vवेधसः विधातुर्ब्रह्मणः संबन्धीनि vकाव्या काव्यानि मन्त्ररूपाणि स्तोत्राण्ययमग्निः vनि vकः नियमेन स्वात्माभिमुखं करोति । किं कुर्वन् । vनर्या नृभ्यो हितानि नृषु साधूनि वा vपुरूणि बहूनि धनानि vहस्ते vदधानः हस्ते धारयन् । ईदृग्भूतमग्निमवलोक्य सर्वे जनाः स्तुवन्तीति भावः । स्तोतृभ्यो धनेषु दत्तेष्वप्यग्नेर्धनं न क्षीयते इत्याह अग्निरिति । अयम् vअग्निः vरयीणां vरयिपतिः vभुवत् धनानां मध्ये यानि धनान्युत्कृष्टानि तेषां स्वामी भवति । किं कुर्वन् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vविश्वा विश्वानि सर्वाणि vअमृतानि । हिरण्यनामैतत् । ' अमृतं हिरण्यम् ' ( अ. सं. ५. २८. ११ ) इति श्रुतेः । सर्वाणि हिरण्यानि स्तोतृभ्यः vसत्रा सहैव vचक्राणः कुर्वन् युगपत्प्रयच्छन्नित्यर्थः ॥ कः । करोतेश्छान्दसो लुङ् । ' मन्त्रे घस° ' इति च्लेर्लुक् । ' हलङ्याब्भ्यः° ' इति तकारलोपः । नर्या । नर-शब्दात् हितार्थे गवादिलक्षणो यत्प्रत्ययो द्रष्टव्यः ( पा. सू. ५. १. २ ) । यद्वा । ' तत्र साधुः ' इति यत् । चक्राणः । करोतेर्लटः शानच् । ' बहुलं छन्दसि ' इति विकरणस्य श्लुः । नन्वेवं सति ' अभ्य-स्तानामादिः ' इत्याद्युदात्तत्वं प्राप्नोति । एवम् । तर्हि लिटः कानजस्तु । तस्यार्धधातुकत्वेन अभ्यस्ताद्युदात्तत्वाभावे चित्स्वर एव शिष्यते ॥

अस्मे वत्सं परि षन्तं न विन्दन्निच्छन्तो विश्वे अमृता अमूराः ।
श्रमयुवः पदव्यो धियंधास्तस्थुः पदे परमे चार्वग्नेः ॥ २ ॥

अस्मे इति । वत्सम् । परि । सन्तम् । न । विन्दन् । इच्छन्तः । विश्वे । अमृताः । अमूराः ।
श्रमऽयुवः । पदऽव्यः । धियम्ऽधाः । तस्थुः । पदे । परमे । चारु । अग्नेः ॥ २ ॥

vअस्मे अस्माकं vवत्सं वत्सवदत्यन्तं प्रियम् । यद्वा । वत्सः पुत्रः पश्चादुत्पन्नत्वात् । तद्वदग्नि-रप्यस्माकं पुत्रः[1] । तथा चाम्नायते—' ममैव सन्वह हव्यान्यग्ने पुत्रः पित्रे लोककृज्जातवेदः ' ( तै. ब्रा. ३. ७. ७. १० ) इति । vपरि vषन्तं परितः सर्वत्र वर्तमानम् । देवेभ्यो निर्गत्याश्वत्थवेण्वादिषु निलीनं सन्तमित्यर्थः । एवंविधमग्निम् vइच्छन्तो vविश्वे vअमृताः सर्वेऽमरणधर्माणो देवाः vअमूराः अमूढा मरुतश्च vन vविन्दन् तमग्निं नालभन्त । अलभमानाश्च ते vश्रमयुवः हव्यवाहनस्याभावेन हविषामभावात्तज्जन्येन श्रमेण क्लेशेनैकीभूताः तस्य vअग्नेः अन्वेषणाय vपदव्यः पादैर्गच्छन्तः vधियंधाः धियामग्नेः शयनासनस्थानादिलक्षणानां कर्मणां धारयितारः । एवंविधाः सन्तः vचारु चारुणि शोभनेऽग्नेः vपरमे उत्तमेऽन्त्ये vपदे । यत्र ह्यग्निर्निलीनो वर्तते तत्रेत्यर्थः । तस्मिन्पदे vतस्थुः स्थितवन्तः । बहुविधेन प्रयासेनाग्निं ददृशुरित्यर्थः ॥ परि षन्तम् । ' उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ' ( पा. सू. ८. ३. ८७ ) इति षत्वम् । श्रमयुवः । ' यु मिश्रणे ' । श्रमेण यूयन्ते इति श्रमयुवः । ' क्विब्वचिप्रच्छि° ' ( उ. सू. २. २१५ ) इत्यादिना विधीयमानौ क्विब्दीर्घावस्मादपि धातोर्भवतः । तन्वादित्वात् उवङ् । पदव्यः । वी गत्यादिषु । पादेन वियन्ति गच्छन्तीति पदव्यः । ' क्विप् च ' इति क्विप् । धियंधाः । ' आतोऽनुपसर्गे कः ' इति कः । ' तत्पुरुषे कृति बहुलम् ' इति बहुलवचनात् द्वितीयाया अपि अलुक् । तस्थुः । पादादित्वात् निघाताभावः । चारु । ' सुपां सुलुक्° ' इति सप्तम्या लुक् ॥

तिस्रो यदग्ने शरदस्त्वामिच्छुचिं घृतेन शुचयः सपर्यान् ।
नामानि चिद्दधिरे यज्ञियान्यसूदयन्त तन्वः सुजाताः ॥ ३ ॥

तिस्रः । यत् । अग्ने । शरदः । त्वाम् । इत् । शुचिम् । घृतेन । शुचयः । सपर्यान् ।
नामानि । चित् । दधिरे । यज्ञियानि । असूदयन्त । तन्वः । सुऽजाताः ॥ ३ ॥

---

१. त-द-ध-श—पुत्रः पश्चादुत्पन्नत्वात् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]शुचयः शोधयितारो दीप्ता वा मरुतो हे [V]अग्ने [V]शुचिं शुद्धं दीप्यमानं वा [V]त्वामित् देवेभ्यो निर्गतं त्वामेवोद्दिश्य [V]तिस्रः [V]शरदः त्रीन् संवत्सरान् [V]घृतेन आज्येन [V]यत् यदा [V]सपर्यान् पूजां कुर्युः तदानीं त्वमाविरभूः । तदनन्तरं ते मरुतस्त्वयानुगृहीताः सन्तः [V]यज्ञियानि यज्ञार्हाणि यज्ञे प्रयोक्तुं योग्यानि [V]नामानि [V]चित् नामान्यपि [V]दधिरे अधारयन् । नामानि च तैत्तिरीयके समाम्नायन्ते— ' ईदृङ् चान्यादृङ् चैतादृङ् च प्रतिदृङ् च मितश्च संमितश्च सभराः ' ( तै. सं. ४. ६. ५. ५ ) इत्यादीनि । एतैश्चाग्निचयने मारुताः सप्तकपाला हूयन्ते । नामानि धारयित्वा च [V]सुजाताः पूर्वं रूपं परित्यज्य शोभनमभृतत्वं प्राप्ताः सन्तः [V]तन्वः स्वकीयानि शरीराणि [V]असूदयन्त स्वर्गं प्रापितवन्तः ॥ तिस्रः । शसि ' त्रिचतुरोः स्त्रियां तिसृचतसृ ' इति पूर्वसवर्णदीर्घत्वे प्राप्ते ' अचि र ऋतः ' इति रेफादेशः । त्रिशब्दः ' फिषः° ' ( फि. सू. १ ) इत्यन्तोदात्तः । तिस्रादेशस्यापि स्थानिवद्भावेनान्तोदात्तत्वे ' उदात्तयणो हल्पूर्वात् ' इति शस उदात्तत्वम् । शरदः । ' शॄ हिंसायाम् ' । शीर्यन्तेऽस्याम् ओषधयः इति शरत् संवत्सरः । ' शॄदभसोऽदिः ' ( उ. सू. १. १२७ ) इति अदिप्रत्ययः । उभयत्र ' कालाध्वनोरत्यन्तसंयोगे ' ( पा. सू. २. ३. ५ ) इति द्वितीया । सपर्यान् । ' सपर पूजायाम् ' । कण्ड्वादिः । लेटि आडागमः । ' इतश्च लोपः° ' इति इकारलोपः । यज्ञियानि । 'यज्ञर्त्विग्भ्यां घखञौ' इत्यर्हार्थे घप्रत्ययः ॥

आ रोदसी बृहती वेविदानाः प्र रुद्रिया जभ्रिरे यज्ञियासः ।
विदन्मर्तो नेमधिता चिकित्वानग्निं पदे परमे तस्थिवांसम् ॥ ४ ॥

आ । रोदसी इति । बृहती इति । वेविदानाः । प्र । रुद्रिया । जभ्रिरे । यज्ञियासः ।
विदत् । मर्तः । नेमऽधिता । चिकित्वान् । अग्निम् । पदे । परमे । तस्थिऽवांसम् ॥ ४ ॥

[V]बृहती महत्यौ [V]रोदसी द्यावापृथिव्यौ [V]आ [V]वेविदानाः अस्यर्थं ज्ञापयन्तः । कुत्राग्निर्वर्तते इति परस्परं वदन्तः[1] द्यावापृथिव्योर्मध्ये वर्तमाना इत्यर्थः । यद्वा । महत्योर्द्यावापृथिव्योर्मध्ये आ वेविदाना अग्निमुपलभमानाः । एवंभूताः [V]यज्ञियासः यज्ञार्हाः देवाः [V]रुद्रिया रुद्रोऽग्निः देवानामसुरैः सह युद्धसमये तैर्देवैः स्थापितं धनमपहृत्य गतवन्तमग्निं देवा आगत्य अग्निसकाशाद्बलेन तद्धनमगृह्णन् । तदानीं सोऽग्निररोदीत् । तस्मात् रुद्र इत्याख्यायते । तथा च तैत्तिरीयकं—' तदग्निर्न्यकामयत तेनापाक्रामत् तद्देवा विजित्यावरुरुत्समाना अन्वायन् तदस्य सहसादित्सन्त सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम् ' ( तै. सं. १. ५. १. १ ) इति । तस्य रुद्रस्यार्हाणि स्तोत्राणि [V]प्र [V]जभ्रिरे प्रजहिरे चक्रुः इत्यर्थः । [V]नेमधिता । नेमशब्दोऽर्धवचनः । तथा च यास्कः—' त्वो नेम इत्यर्धस्य " ( निरु. ३. २० ) इति । सर्वेषां देवानामर्धभागेन धीयते धार्यते इति नेमधित इन्द्रः । सर्वे देवा एकोऽर्धः इन्द्र एक एवापरोऽर्धः इति यावत् । तथा च तैत्तिरीयकं—' यत्सर्वेषामर्धमिन्द्रः प्रति तस्मादिन्द्रो देवतानां भूयिष्ठभाक्तमः ' ( तै. सं. ५. ४. ८. ३ ) इति । तेनेन्द्रेण सहितः [V]मर्तः मरुद्गणः [V]परमे उत्तमेऽन्ये [V]पदे स्थानेऽश्वत्थादौ [V]तस्थिवांसं स्थितवन्तम् [V]अग्निं [V]चिकित्वान् जानन् [V]विदत् अलभत ॥ वेविदानाः । विदेर्ज्ञानार्थात् लाभार्थाद्वा यङन्तात् लटः शानच् । ' बहुलं छन्दसि ' इति शपो लुक् । ' छन्दस्युभयथा ' इति शानच आर्धधातुकत्वात् अतोलोपयलोपौ । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् ।

---

१. ढ—पृच्छन्तः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

विदत् । ' विदृ लाभे ' । लुङि लृदित्त्वात् च्लेः अङादेशः । नेमधिता । दधातेः कर्मणि निष्ठा । ' सुधित वसुधित नेमधित° ' ( पा. सू. ७. ४. ४५ ) इति धिभावो निपात्यते । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् । ' सुपां सुलुक्° ' इति तृतीयाया आकारः । तस्थिवांसम् । तिष्ठतेर्लिटः क्वसुः । ' वस्वेकाजाद्घसाम् ' इति इडागमः ॥

घर्माभिष्टवे ' संजानानाः ' इत्येषा । ' अथोत्तरम् ' इति खण्डे सूत्रितं–' संजानाना उप सीदन्नभिज्ञ्वा दशभिर्विवस्वतः ' ( आश्व. श्रौ. ४. ७ ) इति ॥

संजानाना उप सीदन्नभिज्ञु पत्नीवन्तो नमस्यं नमस्यन् ।
रिरिक्वांसस्तन्वः कृण्वत स्वाः सखा सख्युर्निमिषि रक्षमाणाः ॥ ५ ॥

सम्ऽजानानाः । उप । सीदन् । अभिऽज्ञु । पत्नीऽवन्तः । नमस्यम् । नमस्यन्निति नमस्यन् । रिरिक्वांसः । तन्वः । कृण्वत । स्वाः । सखा । सख्युः । निऽमिषि । रक्षमाणाः ॥ ५ ॥

हे अग्ने त्वां [v]संजानानाः सम्यग्जानन्तो देवाः [v]उप [v]सीदन् उपसीदन्ति प्राप्नुवन्ति । उपसत्तिं कृत्वा च [v]पत्नीवन्तः सपत्नीकाः सन्तः [v]नमस्यं नमस्कारार्हम् [v]अभिज्ञु आभिमुख्येनावस्थितजानुयुक्तं त्वां [v]नमस्यन् अपूजयन् । पूजयित्वा च [v]सख्युः मित्रस्य तव [v]निमिषि दर्शने निमित्तभूते सति [v]रक्षमाणाः त्वया परिरक्ष्यमाणाः [v]सखा सखायो देवाः [v]स्वाः [v]तन्वः स्वकीयानि शरीराणि [v]रिरिक्वांसः अनशनादिरूपेण दीक्षानियमेन रिक्तीकुर्वन्तः शोषयन्तः [v]कृण्वत यागानकुर्वन् । ' देवा वै यज्ञमतन्वत ' ( ऐ. ब्रा. २. ११ ) इति श्रुतेः ॥ नमस्यन् । ' नमोवरिवश्चित्रङः° ' इति पूजार्थे क्यच् । लङि ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । रिरिक्वांसः । ' रिचिर् विरेचने ' । लिटः क्वसुः । निमिषि । ' मिष स्पर्धायाम् ' । अत्रोपसर्गवशाद्दर्शनार्थः । संपदादिलक्षणो भावे क्विप् । रक्षमाणाः । कर्मणि लटः शानच् । यकि प्राप्ते व्यत्ययेन शप् ॥ ॥ १७ ॥

त्रिः सप्त यद्गुह्यानि त्वे इत्पदाविदन्निहिता यज्ञियासः ।
तेभी रक्षन्ते अमृतं सजोषाः पशूश्च स्थातॄश्चरथं च पाहि ॥ ६ ॥

त्रिः । सप्त । यत् । गुह्यानि । त्वे इति । इत् । पदा । अविदन् । निऽहिता । यज्ञियासः । तेभिः । रक्षन्ते । अमृतम् । सऽजोषाः । पशून् । च । स्थातॄन् । चरथम् । च । पाहि ॥ ६ ॥

[v]त्रिः [v]सप्त एकविंशतिसंख्याकानि [v]गुह्यानि रहस्यानि वेदैकसमधिगम्यानि [v]यत् यानि [v]पदा पदानि । पद्यते गम्यते स्वर्गः एभिरिति व्युत्पत्त्या पदशब्देनात्र यज्ञा उच्यन्ते । ते चैकविंशतिसंख्याकाः । औपासनहोमवैश्वदेवादयः सप्त पाकयज्ञाः । अग्न्याधेयदर्शपूर्णमासादयः सप्त हविर्यज्ञाः । अग्निष्टोमात्यग्निष्टोमादयः सप्त सोमयज्ञाः । एवमेकविंशतिसंख्याकानि यज्ञलक्षणानि पदानि हे अग्ने [v]त्वे [v]इत् त्वय्येव [v]निहिता स्थापितानि । तेषां सर्वेषां त्वत्प्रधानत्वात् । न ह्यग्निमन्तरेण यागा अनुष्ठातुं शक्यन्ते ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]यज्ञियासः यज्ञार्हाः अर्थित्वसामर्थ्यवैदुष्यादिभिः[1] अधिकारहेतुभिर्युक्ताः। तथा चोक्तम्—'अर्थी समर्थो विद्वान् शास्त्रेणापर्युदस्तः कर्मण्यधिकारी[2]' इति। एवंविधलक्षणोपेता यजमानास्तानि पदानि [V]अविदन् अलभन्त। लब्ध्वा च [V]तेभिः यज्ञलक्षणैः पदैः [V]अमृतम् अमरणधर्माणं त्वां [V]रक्षन्ते पालयन्ति यजन्तीत्यर्थः। [V]सजोषाः। तैर्यजमानैः समानप्रीतिस्त्वं [V]पशून् गवाश्वादिपशून् [V]च [V]स्थातॄन् व्रीह्यादिस्थावराणि [V]चरथं पशुव्यतिरिक्तमन्यद्यत्प्राणिजातमस्ति तत् [V]च [V]पाहि रक्ष। तेषु हि रक्षितेषु त्वदीया यागाः कर्तुं शक्यन्ते नान्यथा। अतस्त्वमेवमुच्यसे इत्यर्थः॥ यत्। 'सुपां सुलुक्०' इति विभक्तेर्लुक्। गुह्यानि। गुहायां भवानि। 'भवे छन्दसि' इति यत्। 'यतोऽनावः' इत्याद्युदात्तत्वम्। त्वे। 'सुपां सुलुक्०' इति सप्तम्याः शेआदेशः। अविदन्। 'विदॢ लाभे'। लुङि लृदित्त्वात् अङ्। पशून् स्थातॄन्। उभयत्र 'उभयथर्क्षु' (पा. सू. ८. ३. ८) इत्युभयथाभावात् नकारस्य रुत्वाभावः॥

विद्वाँ अग्ने वयुनानि क्षितीनां व्यानुषक्छुरुधो जीवसे धाः।
अन्तर्विद्वाँ अध्वनो देवयानानतन्द्रो दूतो अभवो हविर्वाट् ॥ ७ ॥

विद्वान्। अग्ने। वयुनानि। क्षितीनाम्। वि। आनुषक्। शुरुधः। जीवसे। धाः।
अन्तःऽविद्वान्। अध्वनः। देवऽयानान्। अतन्द्रः। दूतः। अभवः। हविःऽवाट् ॥ ७ ॥

हे [V]अग्ने [V]वयुनानि। ज्ञाननामैतत् इह तु ज्ञातव्ये वर्तते। सर्वाणि ज्ञातव्यानि [V]विद्वान् जानंस्त्वं [V]क्षितीनां यजमानलक्षणानां प्रजानां [V]जीवसे जीवितुं [V]शुरुधः क्षुद्रूपस्य शोकस्य रोधयित्रीरिपोऽज्ञानि [V]आनुषक् अनुषक्तं संततं यथा भवति तथा [V]वि [V]धाः विधेहि कुर्वित्यर्थः। एवं यजमानान् अन्नसमृद्धान् कृत्वानन्तरं [V]हविर्वाट् तैर्देवेभ्यः प्रत्तं हविर्वहन् [V]दूतः [V]अभवः देवानां दूतो भवसि। कीदृशस्त्वम् [V]अन्तर्विद्वान् द्यावापृथिव्योर्मध्ये जानन्। किं जानन्। [V]अध्वनः मार्गान्। कीदृशान्। [V]देवयानान्। देवा यैर्मार्गैर्यान्ति गच्छन्ति ताञ्जानन्नित्यर्थः। [V]अतन्द्रः पुनःपुनर्हविर्वहनेऽप्यनलसः॥ वयुनानि। 'अज गतिक्षेपणयोः'। 'अजियमिशीङ्भ्यश्च' (उ. सू. ३. ३४१) इति कर्मणि उनन्प्रत्ययः[3]। 'अजेर्व्यघञपोः' (पा. सू. २. ४. ५६) इति वीभावः। क्षितीनाम्। क्षियन्ति निवसन्तीति क्षितयो मनुष्याः। 'क्तिच्क्तौ च संज्ञायाम्' इति कर्तरि क्तिच्। अन्तोदात्तात् ह्रस्वान्तात् क्षितिशब्दादुत्तरस्य नामः 'नामन्यतरस्याम्' इत्युदात्तत्वम्। शुरुधः। शुचं रुन्धन्तीति शुरुधः। 'क्विप् च' इति क्विप्। पूर्वपदस्यान्त्यलोपः पृषोदरादित्वात्॥

स्वाध्यो दिव आ सप्त यह्वी रायो दुरो व्यृतज्ञा अजानन्।
विदद्गव्यं सरमा दृळ्हमूर्वं येना नु कं मानुषी भोजते विट् ॥ ८ ॥

सुऽआध्यः। दिवः। आ। सप्त। यह्वीः। रायः। दुरः। वि। ऋतऽज्ञाः। अजानन्।
विदत्। गव्यम्। सरमा। दृळ्हम्। ऊर्वम्। येन। नु। कम्। मानुषी। भोजते। विट्॥८॥

---

१. ढ–अर्थित्वसामर्थ्यविद्वत्तादिभिः। २. ढ–कर्मस्वधिकारी। ३. न–उनन्प्रत्ययः।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]स्वाध्यः शोभनकर्मयुक्ताः [v]यह्वीः यह्व्यो महत्यः [v]सप्त गङ्गाद्याः सप्त नद्यः [v]दिवः द्युलोकादागत्य भूम्यां प्रवहन्तीति शेषः । हे अग्ने ईदृग्विधा नद्यस्त्वया स्थापिताः । अग्नौ होमे सति हि तेन तृप्तः सूर्यो वृष्टिं करोति । तस्मिन्नर्थे स्मृतिः पूर्वमुदाहृता । अतो वृष्टिद्वाराग्निरेव नदीः करोतीत्युच्यते । तथा [v]ऋतज्ञाः ऋतं यज्ञं जानन्तोऽङ्गिरसः [v]रायः वलनाम्नासुरेणापहृतस्य गोरूपस्य धनस्य [v]दुरः द्वाराणि गमनमार्गान् [v]अजानन् त्वया ज्ञातवन्तः । त्वत्साध्येन यागेन प्रीत इन्द्रो गवामन्वेषणाय सरमां नाम देवशुनीं प्रेषितवान् । सा च सरमा गवां स्थानमवगत्येन्द्रस्य न्यवेदयत् । इन्द्रश्च तानङ्गिरसो गाः प्रापयत् । अत एतत्सर्वं त्वमेव कृतवान् । अङ्गिरोभ्यः सकाशात् [v]गव्यं गवि भवं [v]दळ्हं स्थूलम् । बहुलमित्यर्थः[1] । एवंविधं पयोलक्षणम् [v]ऊर्वं अन्नं [v]सरमा देवशुनी [v]विदत् अलभत । [v]कम् इत्येतत्पादपूरणम् । [v]येन [v]नु येन हि गव्येन [v]मानुषी [v]विट् मनोः संबन्धिनी प्रजा [v]भोजते इदानीं भुङ्क्ते तद्व्यमपि परंपरयाग्निरेव करोति ॥ स्वाध्यः । सुआङ्पूर्वात् धीशब्दात् जसि ' एरनेकाचः० ' इति यणादेशः । यह्वीः । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घत्वम् । गव्यम् । सर्वत्र ' गोरजादिप्रत्ययप्रसंगे यद्वक्तव्यम्[2] ' इति भावार्थे यत् । ऊर्वम् । उर्वी हिंसार्थः । ऊर्वति क्षुधं हिनस्तीत्यूर्वमन्नम् । पचाद्यच् । भोजते । ' भुज पालनाभ्यवहारयोः ' । श्नमि प्राप्ते व्यत्ययेन शप् ॥

**आ ये विश्वा स्वपत्यानि तस्थुः कृण्वानासो अमृतत्वाय गातुम् ।**
**महा महद्भिः पृथिवी वि तस्थे माता पुत्रैरदितिर्धायसे वेः ॥ ९ ॥**

आ । ये । विश्वा । सुऽअपत्यानि । तस्थुः । कृण्वानासः । अमृतऽत्वाय । गातुम् ।
महा । महत्ऽभिः । पृथिवी । वि । तस्थे । माता । पुत्रैः । अदितिः । धायसे । वेरिति वेः ॥९॥

[v]ये आदित्याः [v]अमृतत्वाय अमरणत्वसिद्धये [v]गातुं मार्गमुपायं [v]कृण्वानासः कुर्वाणाः सन्तः [v]विश्वा विश्वानि सर्वाणि [v]स्वपत्यानि शोभनान्यपतनहेतुभूतानि[3] चतुर्दशरात्रषट्त्रिंशद्रात्रादित्यानामयनादीनि कर्माणि [v]आ [v]तस्थुः आस्थितवन्तः कृतवन्त इत्यर्थः । तथा च तैत्तिरीयकम्– ' आदित्या अकामयन्त सुवर्गं लोकमियामेति ' इति, ' त एतँ षट्त्रिंशद्रात्रमपश्यन् तमाहरन् तेनायजन्त ' ( तै. सं. ७. ४. ६. १ ) इति च । [v]महद्भिः अनुष्ठानेन महानुभावैस्तैः [v]पुत्रैः सहिता [v]माता जनयित्री [v]अदितिः अदीना [v]पृथिवी [v]धायसे सर्वस्य जगतो धारणाय [v]महा स्वकीयेन महत्त्वेन [v]वि [v]तस्थे विशेषेण तिष्ठति । हे अग्ने यतस्त्वं [v]वेः आदित्यैरनुष्ठितेषु यागेषु चरुपुरोडाशादीनि हवींष्यभक्षयः । अत एतत्सर्वं जातमित्यर्थः ॥ कृण्वानासः । ' कृवि हिंसाकरणयोश्च ' । व्यत्ययेनात्मनेपदम् । ' धिन्विकृण्व्योर च ' इति उप्रत्ययः; तत्संनियोगेन अकारान्तादेशश्च । तस्यातो लोपे सति स्थानिवद्भावादुणाभावः । शानचश्चित्त्वादन्तोदात्तत्वम् । ' आज्जसेरसुक् ' । महा । महिङ्नेत्यस्य वर्णलोपश्छान्दसः । धायसे । ' वहिहाधाभ्यश्छन्दसि ' इति दधातेर्भावे असुन् । ' णित् ' इत्यनुवृत्तेः ' आतो युक् चिण्कृतोः ' इति युक् । वेः । ' वी गतिप्रजनकान्त्यशनखादनेषु ' । लङि सिपि अदादित्वात् शपो लुक् । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । धायसे इत्यस्य वाक्यान्तरगतत्वादस्य निघाताभावः ॥

---

१. च-छ-ण-न-फ–बलप्रदमित्यर्थः । २. ढ-न-स–यद्वक्तव्यः । ३. च-छ-ध-न–शोभनापत्यहेतुभूतानि; श–शोभनान्यपत्यहेतुभूतानि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अधि श्रियं नि दधुश्चारुमस्मिन्दिवो यदक्षी अमृता अकृण्वन् ।
अध क्षरन्ति सिन्धवो न सृष्टाः प्र नीचीरग्ने अरुषीरजानन् ॥ १० ॥

अधि । श्रियम् । नि । दधुः । चारुम् । अस्मिन् । दिवः । यत् । अक्षी इति । अमृताः । अकृण्वन् ।
अध । क्षरन्ति । सिन्धवः । न । सृष्टाः । प्र । नीचीः । अग्ने । अरुषीः । अजानन् ॥ १० ॥

vअस्मिन् अग्नौ vचारुं शोभनां vश्रियं परिस्तरणपरिषेचनादिरूपां यज्ञसंपदम् vअधि vनि vदधुः यजमानाः स्थापितवन्तः । निधाय च vयत् यदा vअक्षी यज्ञस्याज्यभागलक्षणे चक्षुषी vअकृण्वन् कुर्वन्ति । ' चक्षुषी वा एते यज्ञस्य यदाज्यभागौ ' ( तै. सं. २. ६. २. १ ) इति श्रुतेः । तदानीं vदिवः द्युलोकात् vअमृताः अमरणधर्माणो देवाः यागसमयो जात इत्यवगम्यागच्छन्तीति शेषः । vअध आज्यभागानन्तरं vसृष्टाः अग्नेरुत्पन्नाः vसिन्धवो vन शिघ्रं गच्छन्त्यो नद्य इव vनीचीः नितरां सर्वासु दिक्षु गच्छन्तीः vअरुषीः आरोचमानाः[1] । यद्वा । निर्मलरूपाः । हे vअग्ने एवंभूतास्त्वदीया ज्वालाः vक्षरन्ति संचलन्ति । सर्वासु दिक्षु गच्छन्तीत्यर्थः । आगता देवाश्च vप्र॰vअजानन् अस्माकं होमायेदृश्यो ज्वाला उत्पन्ना इति हृष्टाः सन्तः प्रकर्षेण जानन्ति ॥ अक्षी । परत्वात् नुमं बाधित्वा ' ईं च द्विवचने ' ( पा. सू. ७. १. ७७ ) इति अक्षिशब्दस्य ईकारान्तादेशः । स चोदात्तः । ईत्वे कृते सकृद्गतपरिभाषया ( परिभा. ४० ) पुनर्नुम् न भवति । सवर्णदीर्घः । नीचीः । निपूर्वादञ्चतेः ' ऋत्विक्॰ ' इत्यादिना क्विन् । ' अनिदिताम्॰ ' इति नलोपः । ' अञ्चतेश्चोपसंख्यानम् ' इति ङीप् । ' अचः ' इति अकारलोपे ' चौ ' इति दीर्घत्वम् । ' न्यधी च ' ( पा. सू. ६. २. ५३ ) इति गतेः प्रकृतिस्वरत्वम् । अरुषीः । अरुषमिति रूपनाम । ' ऋहनिभ्यामुषच् ' इति अर्तेः उषच् । ' छन्दसीवनिपौ ' इति मत्वर्थीय ईकारः ॥ ॥ १८ ॥

' रयिर्न ' इति दशर्चं नवमं सूक्तं पराशरस्यार्षं त्रैष्टुभमाग्नेयम् । अनुक्रान्तं च–' रयिर्न ' इति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

रयिर्न यः पितृवित्तो वयोधाः सुप्रणीतिश्चिकितुषो न शासुः ।
स्योनशीरतिथिर्न प्रीणानो होतेव सद्म विधतो वि तारीत् ॥ १ ॥

रयिः । न । यः । पितृऽवित्तः । वयःऽधाः । सुऽप्रनीतिः । चिकितुषः । न । शासुः ।
स्योनऽशीः । अतिथिः । न । प्रीणानः । होताऽइव । सद्म । विधतः । वि । तारीत् ॥१॥

vपितृवित्तः पितुः सकाशाल्लब्धः vरयिः[2] धनमिव vयः अग्निः vवयोधाः अन्नस्य दाता । यथा पैतृकं धनं विश्रम्भेण व्यवह्रियमाणं सत् अन्नप्रदं भवति तद्वदग्निरपि सर्वेषु यज्ञेषु विश्रम्भेण व्यवहृतः सन् अन्नप्रदो भवतीत्यर्थः । vचिकितुषो vन विदुषो धर्मशास्त्राभिज्ञस्य vशासुः शासनमिव vसुप्रणीतिः

---

१. ढ–रोचमानाः । २. त-द-घ-ज्ञ-स–रयिर्न ।

CC0, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सुखेन प्रणेतव्यः । यथा विद्वच्छासनं सर्वेष्वनुष्ठेयेषु तत्तत्संशयनिर्णयाय नीयते तद्वदग्निरपि सर्वेषु यज्ञेषु प्रणीयते । यश्च vस्योनशीः सुखप्रदे गार्हपत्यायतनादौ शयानः vअतिथिर्न सुखासने उपवेशितः अर्घपाद्यादिभिः सत्कृतोऽतिथिरिव vप्रीणानः हविर्भिस्तर्पणीयः सोऽग्निः vविधतः परिचरतो यजमानस्य vसद्म गृहं vवि vतारीत् प्रवर्धयति ददाति वा । तत्र दृष्टान्तः । vहोतेव । होता होमकर्ताध्वर्युस्तत्तत्कर्मकरणेन फलैर्यजमानस्य गृहं यथा वर्धयति तद्वत् ॥ पितृवित्तः । ' विदॢ लाभे ' । कर्मणि निष्ठा । ' यस्य विभाषा ' इति इट्प्रतिषेधः । ' विभाषा गमहनविदविशाम् ' इति क्त्सौ अस्य धातोः इटः विकल्पितत्वात् तत्रापि विशिसाहचर्यात्तौदादिक एव विदिर्गृह्यते इत्युक्तम् (का. ७.२. ६८) । ' वित्तो भोगप्रत्यययोः ' ( पा. सू. ८. २. ५८ ) इति निष्ठानत्वाभावो निपातितः । वयोधाः । ' डुधाञ् धारणपोषणयोः ' । ' आतो मनिन्° ' इति विच् । सुप्रणीतिः । प्रणीयत इति प्रणीतिः । कर्मणि क्तिन् । ' तादौ च° ' इति गतेः प्रकृतिस्वरत्वम् । पुनः सुशब्देन समासे कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् कृदुत्तरपदप्रकृतिस्वरत्वम् । चिकितुषः । लिटः क्सुः । षष्ठ्येकवचने ' वसोः संप्रसारणम् ' इति संप्रसारणम् । ' शासिवसिघसीनां च ' इति षत्वम् । शास्वः । ' शासु अनुशिष्टौ ' । ' भृस्वृस्निहि° ' इत्यादिना विधीयमान उप्रत्ययो बहुलवचनादस्मादपि द्रष्टव्यः । तत्र ' नित् ' इत्यनुवृत्तेराद्युदात्तत्वम् । स्योनशीः । स्योनमिति सुखनाम । स्योने सुखकरे गार्हपत्यादिस्थाने शेते इति स्योनशीः । ' क्विप् च ' इति क्विप् । प्रीणानः । ' प्रीञ् तर्पणे ' । कर्मणि शानचि व्यत्ययेन श्ना । विधतः । ' विध विधाने ' । ' विधतिः परिचरणकर्मा ' इति नैरुक्ताः । तुदादित्वात् शप्रत्ययः । ' शतुरनुमः° ' इति विभक्तेरुदात्तत्वम् ॥

देवो न यः सविता सत्यमन्मा क्रत्वा निपाति वृजनानि विश्वा ।
पुरुप्रशस्तो अमतिर्न सत्य आत्मेव शेवो दिधिषाय्यो भूत् ॥ २ ॥

देवः । न । यः । सविता । सत्यऽमन्मा । क्रत्वा । निऽपाति । वृजनानि । विश्वा ।
पुरुऽप्रशस्तः । अमतिः । न । सत्यः । आत्माऽइव । शेवः । दिधिषाय्यः । भूत् ॥ २ ॥

vदेवो vन vसविता द्योतमानः सर्वस्य प्रेरकः सूर्य इव vयः अग्निः vसत्यमन्मा सत्यज्ञानो यथार्थदर्शी सोऽग्निः vक्रत्वा आत्मीयेन कर्मणा vविश्वा vवृजनानि । विभक्तिव्यत्ययः । सर्वेभ्यः संग्रामेभ्यः vनिपाति नितरां पालयति । वर्ज्यन्ते हिंस्यन्तेऽस्मिन्निति वृजनं संग्रामः । अपि च vपुरुप्रशस्तः पुरुभिर्यजमानैः स्तुतोऽग्निः vअमतिर्न । रूपनामैतत् । रूपमिव vसत्यः बाधरहितः । रूप्यत इति रूपं स्वरूपम् । यथा पृथिव्यादेः स्वरूपमागमापायिषु विशेषेषु सत्स्वपि स्वयमैकरूप्येण नित्यं भवति तद्वदग्निरप्युच्चावचेषु सर्वेषु कर्मसु स्वयमेक एव व्याप्य वर्तते । सोऽग्निः vशेवः सुखकरः । तत्र दृष्टान्तः । vआत्मेव । परमप्रेमास्पदतया निरतिशयानन्दस्वरूपः आत्मा यथा सर्वान् सुखयति । ' एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ' ( बृ. उ. ४. ३. ३२ ) ' एष ह्येवानन्दयाति ' (तै.आ. ८. ७ ) इति च श्रवणात् । तद्वदग्निरपि स्वर्गादिफलहेतुतया सुखयति । एवंभूतोऽग्निः vदिधिषाय्यो vभूत् सर्वैर्यजमानैर्धारणीयो भवति । परित्यागे हि वीरहत्यालक्षणो दोषो भवति । तथा च तैत्तिरीयकं—' वीरहा वा एष देवानां योऽग्निमुद्वासयते ' ( तै. सं. १.५. २. १ ) इति ॥ सत्यमन्मा । मननं मन्म । ' मन ज्ञाने ' । ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन् । सत्यमवितथं मन्म यस्य । बहुव्रीहिस्वरः । वृजनानि । ' वृजी वर्जने ' । ' कृपृवृजि° ' इत्यादिना क्युप्रत्ययः । पुरुप्रशस्तः । ' तृतीया कर्मणि ' इति

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पूर्वपदप्रकृतिस्वरत्वे प्राप्ते 'प्रवृद्धादीनां च' (पा. सू. ६. २. १४७) इत्युत्तरपदान्तोदात्तत्वम्। स ह्याकृतिगण इत्युक्तम्। अमतिः। 'अम गत्यादिषु'। 'अमेरतिः'। दिधिषाय्यः। दधातेः 'दिधिषाय्यः' (उ. सू. ३. ३७७) इति साय्यप्रत्ययान्तो निपात्यते॥

देवो न यः पृथिवीं विश्वधाया उपक्षेति हितमित्रो न राजा।
पुरःसदः शर्मसदो न वीरा अनवद्या पतिजुष्टेव नारी॥ ३॥

देवः। न। यः। पृथिवीम्। विश्वऽधायाः। उपऽक्षेति। हितऽमित्रः। न। राजा।
पुरःऽसदः। शर्मऽसदः। न। वीराः। अनवद्या। पतिजुष्टाऽइव। नारी॥ ३॥

[v]देवो [v]न द्योतमानः सूर्य इव [v]यः अग्निः [v]विश्वधायाः सर्वस्य जगतो धर्ता। यथा सूर्यो वृष्ट्यादिप्रदानेन सर्वं जगत् धत्ते एवमग्निरपि यज्ञादिसाधनेन कृत्स्नस्य जगतो धारयिता। सोऽग्निः [v]पृथिवीं पृथिव्याम् [v]उपक्षेति सर्वेषां प्रियः सन् यज्ञगृहादौ निवसति। तत्र दृष्टान्तः। [v]हितमित्रो [v]न [v]राजा। हितान्यनुकूलानि मित्राणि यस्य तादृशो राजा यथा सुखेन निवसति तद्वत्। यथा सर्वजनमित्रो राजा एवमग्निरपि सर्वजनमित्र इत्यर्थः। न ह्यग्निं कश्चन द्विष्टे। यस्याग्नेः [v]पुरःसदः पुरस्तात् सीदन्त उपविशन्तः पुरुषाः [v]शर्मसदो [v]न [v]वीराः पितृगृहे वर्तमानाः पुत्राः इव वर्तन्ते। पिता पुत्रानिव अग्निः स्वस्य परिचारकान् रक्षतीति भावः। सोऽयमग्निरतिशयेन शुद्धः कर्मयोग्यो भवति। तत्र दृष्टान्तः। [v]अनवद्या अनिन्दिता [v]पतिजुष्टेव [v]नारी स्वपतिना सेविता स्वीकृता योषिदिव। सा यथा पातिव्रत्येन शुद्धा सती सर्वकर्मयोग्या भवति एवमग्निरपि॥ विश्वधायाः। 'गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च' इति वचनात् कारकपूर्वादपि दधातेः 'वहिहाधाञ्भ्यश्छन्दसि' इति असुन्। 'णित्' इत्यनुवृत्तेः 'आतो युक् चिण्कृतोः' इति युक्। मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम्। उपक्षेति। 'क्षि निवासगत्योः'। 'बहुलं छन्दसि' इति विकरणस्य लुक्। अनवद्या। बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। पतिजुष्टेव। 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम्। नारी। 'नृनरयोर्वृद्धिश्च' (पा. सू. ४. १. ७३ ग.) इति शार्ङ्गरवादिषु पाठात् ङीनन्त आद्युदात्तः॥

तं त्वा नरो दम आ नित्यमिद्धमग्ने सचन्त क्षितिषु ध्रुवासु।
अधि द्युम्नं नि दधुर्भूर्यस्मिन्भवा विश्वायुर्धरुणो रयीणाम्॥ ४॥

तम्। त्वा। नरः। दमे। आ। नित्यम्। इद्धम्। अग्ने। सचन्त। क्षितिषु। ध्रुवासु।
अधि। द्युम्नम्। नि। दधुः। भूरि। अस्मिन्। भव। विश्वऽआयुः। धरुणः। रयीणाम्॥४॥

हे [v]अग्ने [v]तं [v]त्वा पूर्वोक्तगुणविशिष्टं त्वां नरः [v]यज्ञस्य नेतारो यजमानाः [v]ध्रुवासु [v]क्षितिषु निश्चलासु चलनरहितासु भूमिषु। निरुपद्रवेषु ग्रामेष्वित्यर्थः। [v]दमे स्वकीये यज्ञगृहे [v]नित्यम् [v]इद्धम् अनवरतं समिद्भिः प्रज्वलितं कृत्वा [v]आ [v]सचन्त आभिमुख्येन सेवन्ते। किंच [v]अस्मिन् अग्नौ [v]द्युम्नं हविर्लक्षणमन्नं [v]भूरि चरुपुरोडाशादिरूपेण बहुविधम् [v]अधि [v]नि [v]दधुः स्थापितवन्तः। एवंगुणविशिष्टो

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

योऽग्निः स त्वं ᵛविश्वायुः उक्तप्रकारेण सर्वान्नो भूत्वा ᵛरयीणां धनानां ᵛधरुणः धारयिता ᵛभव । अस्मभ्यं दातुं धनानि धारयेत्यर्थः ॥ सचन्त । ' षच समवाये ' । छान्दसो वर्तमाने लङ् । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । भव । ' ब्यचोऽतस्तिङः ' इति संहितायां दीर्घः । धरुणः । ' धारेर्णिलुक् च ' इति उनप्रत्ययः ॥

वि पृक्षो अग्ने मघवानो अश्युर्वि सूरयो ददतो विश्वमायुः ।
सनेम वाजं समिथेष्वर्यो भागं देवेषु श्रवसे दधानाः ॥ ५ ॥

वि । पृक्षः । अग्ने । मघऽवानः । अश्युः । वि । सूरयः । ददतः । विश्वम् । आयुः ।
सनेम । वाजम् । सम्ऽइथेषु । अर्यः । भागम् । देवेषु । श्रवसे । दधानाः ॥ ५ ॥

हे ᵛअग्ने ᵛमघवानः हविर्लक्षणेन धनेन युक्ता यजमानाः ᵛपृक्षः अन्नानि ᵛवि ᵛअश्युः व्याप्नुवन्तु । त्वयानुगृहीताः सर्वाण्यन्नानि लभन्ताम् । ये च ᵛसूरयः विद्वांसः त्वां स्तुवन्ति । ᵛददतः[1] ये च तुभ्यं हवींषि ददतः प्रयच्छन्तो वर्तन्ते ते सर्वे ᵛविश्वमायुः सर्वं जीवितं ᵛवि अश्युः व्याप्नुवन्तु । वयं च ᵛसमिथेषु संग्रामेषु ᵛअर्यः अरेः शत्रोः संबन्धिनं ᵛवाजं अन्नं ᵛसनेम त्वदनुग्रहात् संभजेमहि । तदनन्तरं ᵛदेवेषु त्वत्प्रमुखेष्विन्द्रादिषु ᵛश्रवसे यशसे[2] तदर्थं ᵛभागं हविर्भागं ᵛदधानाः स्थापयन्तो भूयास्मेति शेषः ॥ अश्युः । ' अशू व्याप्तौ ' । व्यत्ययेन परस्मैपदम् । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । ददतः । ' नाभ्यस्ताच्छतुः ' इति नुमागमप्रतिषेधः । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । सनेम । ' वन षण संभक्तौ ' । व्यत्ययेन शः । अर्यः । अरिशब्दात् षष्ठ्येकवचने ' जसादिषु च्छन्दसि वावचनम् ' इति ' घेर्ङिति ' इति गुणाभावे यणादेशः । अरिशब्दः ' अच इः ' इति इप्रत्ययान्तः अन्तोदात्तः । ' उदात्तयणः° ' इति विभक्तेरुदात्तत्वम् । भागम् । ' कर्षात्वतः° ' इत्यन्तोदात्तत्वम् ॥ ॥१९॥

ऋतस्य हि धेनवो वावशानाः स्मदूध्नीः पीपयन्त द्युभक्ताः ।
परावतः सुमतिं भिक्षमाणा वि सिन्धवः समया सस्रुरद्रिम् ॥ ६ ॥

ऋतस्य । हि । धेनवः । वावशानाः । स्मत्ऽऊध्नीः । पीपयन्त । द्युऽभक्ताः ।
पराऽवतः । सुऽमतिम् । भिक्षमाणाः । वि । सिन्धवः । समया । सस्रुः । अद्रिम् ॥ ६ ॥

ᵛऋतस्य ᵛहि ऋतं देवयजनदेशं प्राप्तमग्निमेव ᵛधेनवः अग्निहोत्रादिहविषां दोग्ध्र्यो गावः ᵛपीपयन्त क्षीरादिलक्षणं गव्यमपाययन् । कीदृश्यो गावः । ᵛवावशानाः अग्निं पुनःपुनः कामयमानाः ᵛस्मदूध्नीः । स्मच्छब्दो नित्यशब्दसमानार्थः । नित्यमूधसा युक्ताः । सर्वदा पयसः प्रदात्र्य इत्यर्थः । ᵛद्युभक्ताः दिवा प्रकाशेन संभक्ताः संश्लिष्टाः तेजस्विन्य इत्यर्थः । अपि च ᵛसिन्धवः स्यन्दनशीला नद्यः ᵛसुमतिम् अस्याग्नेः शोभनामनुग्रहात्मिकां बुद्धिं ᵛभिक्षमाणाः याचमानाः

---

१. ढ–' ददतः ' नास्ति । २. च-छ-ण-न-फ–श्रवः अन्नम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सत्यः ᵛअद्रिं ᵛसमया अद्रेः पर्वतस्य समीपे ᵛपरावतः दूरदेशात् ᵛवि ᵛसस्तुः विशेषेण गच्छन्ति प्रवहन्ति । अग्नये दातव्यानां हविषां निष्पत्तये प्रवहन्तीत्यर्थः ॥ ऋतस्य । ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी । वावशानाः । ' वश कान्तौ ' । यङन्तात् शानच् । ' न वशः ' ( पा. सू. ६. १. २० ) इति संप्रसारणप्रतिषेधः । ' बहुलं छन्दसि ' इति शपो लुक् । ' छन्दस्युभयथा ' इति शानच आर्धधातुकत्वात् अतोलोपयलोपौ । अत एव लसार्वधातुकानुदात्तत्वाभावे चित्स्वर एव शिष्यते । स्मदूधीः । स्मत् निस्यान्यूधांसि यासाम् । ' ऊधसोऽनङ् ' ( पा. सू. ५. ४. १३१ ) इति अनङादेशः समासान्तः । ' संख्याव्ययादेर्ङीप् ' ( पा. सू. ४. १. २६ ) इति ङीप् । भसंज्ञायाम् ' अल्लोपोऽनः ' इति अलोपः । ङीपः पित्त्वादनुदात्तत्वे बहुव्रीहिस्वर एव शिष्यते । पीपयन्त । ' पा पाने ' । अस्मात् हेतुमति णिच् । ' शाच्छासाह्वा° ' इति युक् । ण्यन्तात् लुङि च्लेः चङादेशादि । ' चङ्यन्यतरस्याम् ' इति चङः पूर्वस्योदात्तत्वम् । ' हि च ' इति निघातप्रतिषेधः । परावतः परागतात् । दूरं हि परागतं भवति । अस्मिन् धात्वर्थे गम्यमाने ' उपसर्गाच्छन्दसि धात्वर्थे ' ( पा. सू. ५. १. ११८ ) इति वतिः ॥

त्वे अग्ने सुमतिं भिक्षमाणा दिवि श्रवो दधिरे यज्ञियासः ।
नक्ता च चक्रुरुषसा विरूपे कृष्णं च वर्णमरुणं च सं धुः ॥ ७ ॥

त्वे इति । अग्ने । सुऽमतिम् । भिक्षमाणाः । दिवि । श्रवः । दधिरे । यज्ञियासः ।
नक्ता । च । चक्रुः । उषसा । विरूपे इति विऽरूपे । कृष्णम् । च । वर्णम् ।
अरुणम् । च । सम् । धुरिति धुः ॥ ७ ॥

हे ᵛअग्ने ᵛसुमतिं शोभनामनुग्रहात्मिकां बुद्धिं ᵛभिक्षमाणाः याचमानाः ᵛयज्ञियासः यज्ञार्हाः सर्वे देवाः ᵛदिवि द्योतमाने ᵛत्वे त्वयि ᵛश्रवः हविर्लक्षणमन्नं ᵛदधिरे अस्थापयन् । ' अग्निर्देवानामन्नादः ' ( तै. ब्रा. ३.१.४.१. ) इति श्रुतेः । तदनन्तरं तादृशे हविर्युक्तायानुष्ठानाय[1] ᵛविरूपे विविधरूपे ᵛउषसा उषःकालोपलक्षितमहः । ᵛनक्ता ᵛच नक्तं रात्रिं च ᵛचक्रुः अकुर्वन् । एतदेव स्पष्टयति । ᵛकृष्णं ᵛच ᵛवर्णं रात्र्यां श्यामलवर्णमन्धकारम् अह्नि ᵛअरुणम् आरोचनं श्वेतवर्णं तेजः ᵛच ᵛसं ᵛधुः सम्यक् स्थापितवन्तः ॥ त्वे । ' सुपां सुलुक्° ' इति सप्तम्याः शेआदेशः । नक्ता । तेनैव द्वितीयाया डादेशः । उषसा । तेनैव विभक्तेः आकारः । धुः । ' डुधाञ् धारणपोषणयोः ' । लुङि ' गातिस्था° ' इति सिचो लुक् । ' आतः ' इति झेः जुसादेशः । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः ॥

यान्राये मर्तान्त्सुषूदो अग्ने ते स्याम मघवानो वयं च ।
छायेव विश्वं भुवनं सिसक्ष्यापप्रिवान्रोदसी अन्तरिक्षम् ॥ ८ ॥

यान् । राये । मर्तान् । सुसूदः । अग्ने । ते । स्याम । मघऽवानः । वयम् । च ।
छायाऽइव । विश्वम् । भुवनम् । सिसक्षि । आपप्रिऽवान् । रोदसी इति । अन्तरिक्षम् ॥८॥

---

१. ढ- हविर्युक्तयागानुष्ठानाय ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]यान् [v]मर्तान् मनुष्यानस्मान् [v]राये धनाय [v]सुषूदः अग्निहोत्रादिकर्मसु प्रेरयसि [v]ते तादृशाः [v]वयं [v]च [v]मघवानः धनिनः [v]स्याम भवेम। [v]रोदसी द्यावापृथिव्यौ [v]अन्तरिक्षं च [v]आपप्रिवान् स्वतेजसा वृष्ट्युदकेन वा आपूरितवांस्त्वं च [v]विश्वं [v]भुवनं सर्वं जगत् [v]सिसक्षि सेवसे अनुगृह्य सर्वं रक्षसीत्यर्थः। तत्र दृष्टान्तः । [v]छायेव । यथा छत्रादेः छाया आतपादिजनितं क्लेशं निवार्य रक्षति तद्वत् ॥ राये। ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम्। सुषूदः। ' षूद प्रेरणे '। लेटि अडागमः । ' बहुलं छन्दसि ' इति शपः श्लुः। ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । ' यद्वृत्तान्नित्यम् ' इति निघातप्रतिषेधः। सिसक्षि। ' षच समवाये ' । ' बहुलं छन्दसि ' इति शपः श्लुः। ' इत् ' इत्यनुवृत्तौ ' बहुलं छन्दसि ' इति अभ्यासस्य इत्वम्। आपप्रिवान् । ' प्रा पूरणे '। लिटः क्वसुः। ' वस्वेकाजाद्घसाम् ' इति इडागमः। ' आतो लोप इटि च ' इति आकारलोपः । ' द्विर्वचनेऽचि ' इति स्थानिवद्भावात् द्विर्भावादि ॥

**अर्वद्भिरग्ने अर्वतो नृभिर्नॄन्वीरैर्वीरान्वनुयामा त्वोताः ।**
**ईशानासः पितृवित्तस्य रायो वि सूर्यः शतहिमा नो अश्युः ॥ ९ ॥**

अर्वत्ऽभिः। अग्ने। अर्वतः। नृऽभिः। नॄन्। वीरैः। वीरान्। वनुयाम। त्वाऽऊताः
ईशानासः। पितृऽवित्तस्य। रायः। वि। सूर्यः। शतऽहिमाः। नः। अश्युः ॥ ९ ॥

हे [v]अग्ने [v]त्वोताः त्वया रक्षिताः सन्तो वयम् [v]अर्वद्भिः अस्मदीयैरश्वैः [v]अर्वतः शत्रुसंबन्धिनः अश्वान् [v]नृभिः अस्मदीयैर्भटैः [v]नॄन् शत्रोर्भटान्। वीर्याज्जायन्ते इति वीराः पुत्राः। तैः [v]वीरान् शत्रुपुत्रांश्च [v]वनुयाम हन्याम। ' वनुष्यतिर्हन्तिकर्मानवगतसंस्कारो भवति ' ( निरु. ५. २ ) इति यास्कः। [v]पितृवित्तस्य पित्रादिपरंपरया लब्धस्य [v]रायः धनस्य [v]ईशानासः स्वामिनः [v]सूर्यः विद्वांसः [v]नः अस्माकं पुत्राः [v]शतहिमाः शतं संवत्सरान् जीवन्तः सन्तः [v]वि [v]अश्युः विशेषेण भुञ्जताम्। अस्मदीयानां पुत्राणामारोग्यं दीर्घमायुश्च भवत्वित्यर्थः ॥ त्वोताः त्वयोताः। ' प्रत्ययोत्तरपदयोश्च ' इति मपर्यन्तस्य त्वादेशः। व्यत्ययेन आत्वम्। ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम्। शतहिमाः। अत्र हिमशब्देन तद्वान् हेमन्तो लक्ष्यते। ब्राह्मणं च भवति–' शतं हिमा इत्याह शतं त्वा हेमन्तान्निन्धिषीयेति वावैतदाह ' ( तै. सं. १. ५. ८. ५ ) इति। शतं हिमाः शतं हेमन्ततवो येषां ते शतसंवत्सरजीविन इत्यर्थः। अश्युः। ' अश भोजने '। ' बहुलं छन्दसि ' इति विकरणस्य लुक् ॥

**एता ते अग्न उचथानि वेधो जुष्टानि सन्तु मनसे हृदे च ।**
**शकेम रायः सुधुरो यमं तेऽधि श्रवो देवभक्तं दधानाः ॥ १० ॥**

एता। ते। अग्ने। उचथानि। वेधः। जुष्टानि। सन्तु। मनसे। हृदे। च।
शकेम। रायः। सुऽधुरः। यमम्। ते। अधि। श्रवः। देवऽभक्तम्। दधानाः ॥ १० ॥

हे [v]वेधः। मेधाविनामैतत् । मेधाविन् [v]अग्ने [v]एता [v]उचथानि एतानि इदानीमस्माभिः प्रयुक्तानि स्तोत्राणि [v]ते तव [v]मनसे मनोवृत्तये [v]हृदे तद्वृत्तिमते अन्तःकरणाय [v]च [v]जुष्टानि [v]सन्तु

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रियाणि भवन्तु । ᵛते तव संबन्धिनः ᵛसुधुरः सुष्ठु निर्वाहकस्य । यद्वा । शोभनं धूर्वति दारिद्र्यं हिनस्तीति सुधूः । तादृशस्य ᵛरायः धनस्य ᵛयमं नियमनं कर्तुं ᵛशकेम शक्ता भूयास्म । किं कुर्वन्तः । ᵛदेवभक्तं देवैः संभजनीयं ᵛश्रवः हविर्लक्षणमन्नम् ᵛअधि ᵛदधानाः अग्नेरुपरि धारयन्तः । अग्नौ हविर्भिर्होमं कुर्वन्तः इत्यर्थः ॥ उचथानि । ' वच परिभाषणे ' । ' रुविदिभ्यां कित् ' ( उ. सू. ३. ३९५ ) इति विधीयमानः अथप्रत्ययः कित्त्वं च बहुलवचनादस्मादपि भवति । वच्यादिना संप्रसारणम् । जुष्टानि । ' जुष्टार्पिते च च्छन्दसि, नित्यं मन्त्रे ' ( पा. सू. ६. १. २०९ - २१० ) इत्याद्युदात्तत्वम् । हृदे । ' पदन्° ' इत्यादिना हृदयशब्दस्य हृदादेशः । शकेम । ' शकॢ शक्तौ ' । ' लिङ्याशिष्यङ् ' । सुधुरः । धुर्वी हिंसार्थः । ' क्विप् च ' इति क्विप् । ' राल्लोपः ' इति वकारलोपः । ' न पूजनात् ' इति समासान्तप्रतिषेधः । देवैर्भक्तं देवभक्तम् । ' तृतीया कर्मणि ' इति पूर्वपद-प्रकृतिस्वरत्वम् ॥ ॥ २० ॥ ॥ १२ ॥

त्रयोदशानुवाके एकादश सूक्तानि । तत्र ' उपप्रयन्तः ' इति नवर्चं प्रथमं सूक्तम् । अत्रानुक्रम्यते–' उपप्रयन्तो नव गोतमो राहूगणो गायत्रं तु ' इति । अस्यायमर्थः । रहूगणनामा कश्चिदृषिः । तस्य पुत्रो गोतमोऽस्य सूक्तस्य ऋषिः । ' गायत्रं तु ' इत्युक्तत्वादादिमुत्तरं च गायत्रीच्छन्दस्कम् । ' परमाग्नेयमैन्द्रात् ' इति परिभाषितत्वादग्निर्देवता । प्रातरनुवाकस्याग्नेये क्रतौ गायत्रे छन्दस्येतदादिके द्वे सूक्ते । सूत्रितं च– ' आपो रेवतीः क्षयथा हि वस्व उपप्रयन्त इति सूक्ते ' ( आश्व. श्रौ. ४. १३ ) इति । आश्विनशस्त्रेऽप्येते सूक्ते ' प्रातरनुवाकन्यायेन ' ( आश्व. श्रौ. ६. ५ ) इत्यतिदेशात् । पृष्ठ्यषडहस्य प्रथमेऽहनि एतदेव सूक्तमाज्यशस्त्रम् । सूत्रितं च– ' उपप्रयन्त इति तु प्रथमेऽहन्याज्यम् ' ( आश्व. श्रौ. ७. १० ) इति ॥

उपप्रयन्तो अध्वरं मन्त्रं वोचेमाग्नये । आरे अस्मे च शृण्वते ॥ १ ॥

उपऽप्रयन्तः । अध्वरम् । मन्त्रम् । वोचेम । अग्नये । आरे । अस्मे इति । च । शृण्वते ॥ १ ॥

ᵛअध्वरं हिंसाप्रत्यवायरहितमग्निष्टोमादियज्ञम् ᵛउपप्रयन्तः उपेत्य प्रकर्षेण यन्तो गच्छन्तः प्रारभ्य-विच्छेदेन सम्यगनुतिष्ठन्तः इत्यर्थः । तादृशा वयम् ᵛअग्नये अङ्गनादिगुणयुक्ताय देवाय ᵛमन्त्रं मनन-साधनमेतत्सूक्तरूपं स्तोत्रं ᵛवोचेम । वक्तारो भूयास्मेत्याशास्ते । कीदृशायाग्नये । ᵛआरे ᵛअस्मे ᵛच ᵛशृण्वते । चशब्दः अप्यर्थे आरेशब्दात्परो द्रष्टव्यः । आरे च दूरेऽपि स्थित्वास्माकं स्तुतीः शृण्वते । अस्मासु प्रीत्यतिशयेन सर्वत्र प्रवर्तमानोऽग्निरस्मदीयमेव स्तोत्रं शृणोतीति भावः ॥ वोचेम । ' ब्रुवो वचिः ' । ' लिङ्याशिष्यङ् ' । ' वच उम् ' इति उमागमः । शृण्वते । ' शतुरनुमः° ' इति विभक्तेरुदात्तत्वम् ॥

यः स्नीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु । अरक्षद्दाशुषे गयम् ॥ २ ॥

यः । स्नीहितीषु । पूर्व्यः । सम्ऽजग्मानासु । कृष्टिषु । अरक्षत् । दाशुषे । गयम् ॥ २ ॥

ᵛपूर्व्यः चिरंतनः ᵛयः अग्निः ᵛस्नीहितीषु वधकारिणीषु ᵛकृष्टिषु शत्रुभूतासु प्रजासु ᵛसंजग्मा-नासु संगतासु सतीषु ᵛदाशुषे हवींषि दत्तवते यजमानाय ᵛगयं धनम् ᵛअरक्षत् रक्षति तस्मै मन्त्रं वोचेमेति पूर्वेण संबन्धः ॥ स्नीहितीषु । ' ष्णिह स्नेहने ' । चुरादिः । ' स्नेहयति ' ( नि. २. १९. १३ )



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति वधकर्मसु पठितः । स्नेह्यन्ते हिंस्यन्ते प्रजा आभिरिति स्नेहितयः । करणे क्तिन् । ' तितुत्रेष्वग्रहादीनामिति वक्तव्यम् ' ( पा. म. ७. २. ९. १ ) इति वचनात् निगृहीतिर्निपठितिरितिवत् इडागमः । व्यत्ययेन एकारस्य ईकारादेशः क्तिनो दीर्घश्च । नित्त्वादाद्युदात्तत्वम् । संजग्मानासु । ' समो गम्यृच्छि° ' इति आत्मनेपदम् । लिटः कानच् । ' गमहन° ' इत्यादिना उपधालोपः । अरक्षत् । ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लङ् ॥

अग्निमन्थने ' जातायानुब्रूहि ' इत्युक्ते ' उत ब्रुवन्तु ' इत्येषानुवचनीया । ' प्रातर्वैश्वदेव्याम् ' इति खण्डे सूत्रितं–' शिष्टेनोत्तरामुत ब्रुवन्तु जन्तवः ' ( आश्व. श्रौ. २. १६ ) इति । तथा साकमेधेषु मरुद्भ्यः क्रीडिभ्यः पुरोडाशम् इत्यस्यामिष्टौ एषैव प्रथमाज्यभागानुवाक्या । सूत्रितं च–' मरुद्भ्यः क्रीडिभ्य उत्तरोत ब्रुवन्तु जन्तवः ' ( आश्व. श्रौ. २. १८ ) इति ॥

उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाजनि । धनंजयो रणेरणे ॥ ३ ॥

उत । ब्रुवन्तु । जन्तवः । उत् । अग्निः । वृत्रऽहा । अजनि । धनम्ऽजयः । रणेऽरणे ॥ ३ ॥

vअग्निः vउत् vअजनि अरण्योः सकाशादुत्पन्नः । vउत अनन्तरं vजन्तवः जाताः सर्वे ऋत्विजः vब्रुवन्तु तमग्निं स्तुवन्तु । कीदृशोऽग्निः । vवृत्रहा वृत्राणामावरकाणां शत्रूणां हन्ता vरणेरणे सर्वेषु संग्रामेषु vधनंजयः शत्रुधनानां जेता ॥ धनंजयः । ' संज्ञायां भृतृवृजि° ' ( पा. सू. ३. २. ४६ ) इति खच् । ' अरुर्द्विषदजन्तस्य° ' ( पा. सू. ६. ३. ६७ ) इति मुम् । चित्स्वरेणान्तोदात्तत्वम् । रणेरणे । ' रण शब्दार्थः ' । रणन्ति दुन्दुभयोऽस्मिन्निति रणः संग्रामः । ' वशिरण्योरुपसंख्यानम् ' ( पा. सू. ३. ३. ५८. ३ ) इति अप् । ' नित्यवीप्सयोः ' इति द्विर्वचनम् । आम्रेडितानुदात्तत्वम् ॥

यस्य दूतो असि क्षये वेषि हव्यानि वीतये । दस्मत्कृणोष्यध्वरम् ॥ ४ ॥

यस्य । दूतः । असि । क्षये । वेषि । हव्यानि । वीतये । दस्मत् । कृणोषि । अध्वरम् ॥ ४ ॥

हे अग्ने vयस्य यजमानस्य vक्षये देवयजनलक्षणे गृहे देवानां vदूतः त्वम् vअसि भवसि । यस्य च vहव्यानि चरुपुरोडाशादीनि हवींषि vवीतये देवानां भक्षणाय vवेषि गमयसि । यस्य च vअध्वरं यज्ञं vदस्मत् सर्वैर्दर्शनीयं vकृणोषि करोषि । ' तमित्सुहव्यम् ' इत्युत्तरया संबन्धः ॥ वेषि । वी गत्यादिषु । अन्तर्भावितण्यर्थात् लट् । अदादित्वात् शपो लुक् । पादादित्वात् निघाताभावः । दस्मत् । ' दसि दंसनदर्शनयोः ' । ' इषियुधीन्धि° ' इत्यादिना मक् । दस्ममित्यत्र मकारस्य वर्णव्यापत्त्या तकारः । कृणोषि । ' कृवि हिंसाकरणयोश्च ' । ' धिन्विकृण्व्योर च ' इति उप्रत्ययः; तत्संनियोगेन वकारस्य अकारः । तस्य अतो लोपे सति स्थानिवद्भावात् लघूपधगुणाभावः । यस्य इत्यनुषङ्गात् निघाताभावः ॥

तमित्सुहव्यमङ्गिरः सुदेवं सहसो यहो । जना आहुः सुबर्हिषम् ॥ ५ ॥

तम् । इत् । सुऽहव्यम् । अङ्गिरः । सुऽदेवम् । सहसः । यहो इति । जनाः । आहुः । सुऽबर्हिषम् ॥ ५ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]सहसो [v]यहो बलस्य पुत्र [v]अङ्गिरः अङ्गनादिगुणयुक्ताग्ने यो यजमानः पूर्वमुक्तः [v]तमित् तमेव यजमानं [v]सुहव्यं शोभनहविष्कं [v]सुदेवं शोभनदैवतं [v]सुबर्हिषम्। बर्हिरिति यज्ञनाम। शोभनयज्ञं च [v]जनाः सर्वे मनुष्याः [v]आहुः कथयन्ति ॥ सुहव्यमित्यादिषु 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। सहसो यहो। 'सुबामन्त्रिते०' इति पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य आष्टमिकमामन्त्रितानुदात्तत्वम् ॥ ॥ २१ ॥

आ च वहासि ताँ इह देवाँ उप प्रशस्तये । हव्या सुश्चन्द्र वीतये ॥ ६ ॥

आ। च। वहासि। तान्। इह। देवान्। उप। प्रऽशस्तये। हव्या। सुऽचन्द्र। वीतये ॥६॥

हे [v]सुश्चन्द्र शोभनाह्लादनाग्ने [v]तान् [v]देवान् [v]इह अस्मिन् कर्मणि [v]उप अस्मत्समीपं [v]प्रशस्तये स्तुतये [v]आ [v]वहासि [v]च आवह प्रापय च। आगतेभ्यस्तेभ्यः [v]हव्या हव्यानि चरुपुरोडाशादीनि हवींषि [v]वीतये भक्षणाय प्रापयेत्यर्थः ॥ वहासि। 'वह प्रापणे'। लेटि आडागमः। प्रशस्तये। 'शंसु स्तुतौ'। भावे क्तिन्। 'तितुत्र०' इति इट्प्रतिषेधः। 'अनिदिताम्०' इति नलोपः। 'तादौ च०' इति गतेः प्रकृतिस्वरत्वम्। सुश्चन्द्र। 'ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे' इति सुट् ॥

न योरुपब्दिरश्व्यः शृण्वे रथस्य कच्चन । यदग्ने यासि दूत्यम् ॥ ७ ॥

न। योः। उपब्दिः। अश्व्यः। शृण्वे। रथस्य। कत्। चन। यत्। अग्ने। यासि। दूत्यम् ॥७॥

हे [v]अग्ने [v]यत् यदा [v]दूत्यं देवानां दूतत्वं [v]यासि प्राप्नोषि [v]कच्चन कदाचन तदानीं सर्वदापि [v]योः गच्छतस्तव [v]रथस्य [v]अश्व्यः अश्वैरुत्पादितः [v]उपब्दिः श्रवणार्हः शब्दः [v]न [v]शृण्वे न श्रूयते। रथस्य शीघ्रगमनेनास्माभिः शब्दो नोपलभ्यते इत्यर्थः ॥ योः। 'या प्रापणे' इत्यस्मात् 'यो द्वे च' (उ. सू. १. २१) इति औणादिकः कुप्रत्ययः। बहुलवचनात् द्विर्भावाभावः। उपब्दिरित्येतत् श्रोतुमर्हस्य शब्दस्याख्या। तथा च तैत्तिरीयाणां प्रातिशाख्यं 'सशब्दमुपब्दिमत्' (तै. प्रा. २३. ९) इति। शृण्वे। 'श्रु श्रवणे'। कर्मणि लटि 'श्रुवः शृ च' इति व्यत्ययेन श्रुः शृभावश्च। 'लोपस्त आत्मनेपदेषु' इति तलोपः। 'हुश्नुवोः सार्वधातुके' इति यणादेशः ॥

त्वोतो वाज्यह्योऽभि पूर्वस्मादपरः । प्र दाश्वाँ अग्ने अस्थात् ॥ ८ ॥

त्वाऽऊतः। वाजी। अह्यः। अभि। पूर्वस्मात्। अपरः। प्र। दाश्वान्। अग्ने। अस्थात् ॥८॥

यः पुरुषः [v]पूर्वस्मात् स्वस्मादधिकारात् [v]अपरः निकृष्टो भवति हे [v]अग्ने स इदानीं [v]दाश्वान् तुभ्यं हवींषि दाता सन् [v]त्वोतः त्वया ऊतः रक्षितः [v]वाजी अन्नवान् [v]अह्यः लज्जारहितः एवंभूतः सन् [v]अभि [v]प्र [v]अस्थात् ऐश्वर्यमभिप्राप्य प्रतितिष्ठति सर्वोत्कृष्टो भवतीत्यर्थः ॥ अह्यः। 'ह्री लज्जायाम्'। जिह्रेतीति ह्यः। न ह्योऽह्यः। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। दाश्वान्। 'दाश्र दाने'। 'दाश्वान् साह्वान्०' इति क्वसुप्रत्ययान्तो निपातितः ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उत द्युमत्सुवीर्यं बृहदग्ने विवाससि । देवेभ्यो देव दाशुषे ॥ ९ ॥

उत । द्युऽमत् । सुऽवीर्यम् । बृहत् । अग्ने । विवाससि । देवेभ्यः । देव । दाशुषे ॥ ९ ॥

vउत अपि च हे vदेव द्योतमान vअग्ने vदेवेभ्यः vदाशुषे चरुपुरोडाशादीनि हवींषि दत्तवते तस्मै यजमानाय vबृहत् प्रौढं धनं vविवाससि गमयितुमिच्छसि प्रापयसीति यावत् । कीदृशम् । vद्युमत् अतिशयेन दीप्तं vसुवीर्यं शोभनवीर्योपेतम् ॥ सुवीर्यम् । ' वीरवीर्यौ च ' इत्युत्तरपदाद्युदात्तत्वम् । विवाससि । ' वा गतिगन्धनयोः ' । सनि द्विर्भावे ' सन्यतः ' इति इत्वम् । दाशुषे । चतुर्थ्येकवचने ' वसोः संप्रसारणम् ' इति संप्रसारणम् । 'शासिवसिघसीनां च' इति षत्वम् ॥ ॥२२॥

' जुषस्व ' इति पञ्चर्चं द्वितीयं सूक्तम् । अनुक्रान्तं च—' जुषस्व पञ्च ' इति । ऋष्याद्याः पूर्ववत् । प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तः सूक्तविनियोगः । पशौ स्तोकानुवचने आद्या विनियुक्ता । सूत्रितं च—' प्रेषितः स्तोकेभ्योऽन्वाह जुषस्व सप्रथस्तमम् ' (आश्व. श्रौ. ३. ४) इति ॥

जुषस्व सप्रथस्तमं वचो देवप्सरस्तमम् । हव्या जुह्वान आसनि ॥ १ ॥

जुषस्व । सप्रथःऽतमम् । वचः । देवप्सरःऽतमम् । हव्या । जुह्वानः । आसनि ॥ १ ॥

हे अग्ने vसप्रथस्तमम् अतिशयेन विस्तीर्णं vवचः स्तोत्रलक्षणमस्मदीयं वचनं vजुषस्व सेवस्व । कीदृशम् । vदेवप्सरस्तमं देवानां प्रीणयितृतमम् । किं कुर्वन् । vआसनि तवास्ये vहव्या हव्यानि स्तोकलक्षणानि हवींषि vजुह्वानः प्रक्षिपन् । इमानि स्तोकलक्षणानि हवींषि वृथा मा भूवन् तत्सर्वं त्वदीयेन मुखेन स्वीकुर्वित्यर्थः ॥ देवप्सरस्तमम् । ' स्पृ प्रीतिबलयोः ' । देवान् स्पृणोति प्रीणयतीति देवप्सराः । ' गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च ' इति असुन् पूर्वपदप्रकृतिस्वरत्वं च । सकारपकारयोः स्थानविपर्ययः । अतिशयेन देवप्सरा देवप्सरस्तमः । जुह्वानः । जुहोतेर्व्यत्ययेन शानच् । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । आसनि । ' पदन्० ' इत्यादिना आस्यशब्दस्य आसन्नादेशः ॥

अथा ते अङ्गिरस्तमाग्ने वेधस्तम प्रियम् । वोचेम ब्रह्म सानसि ॥ २ ॥

अथ । ते । अङ्गिरःऽतम । अग्ने । वेधःऽतम । प्रियम् । वोचेम । ब्रह्म । सानसि ॥ २ ॥

हे vअङ्गिरस्तम अतिशयेनाङ्गनादिगुणयुक्त । यद्वा । अङ्गिरसां वरिष्ठ । vवेधस्तम । वेधा इति मेधाविनाम । अतिशयेन मेधाविन् vअग्ने । vअथ अनन्तरं vते तुभ्यं vसानसि संभजनीयं vप्रियं प्रीतिकरं vब्रह्म स्तोत्रं vवोचेम वक्तारो भूयास्म ॥ वोचेम । ' लिङ्याशिष्यङ् ' । ' वच उम् ' इति उमागमः । सानसि । ' वन षण संभक्तौ ' । 'सानसिवर्णसि०' इत्यादौ असिच्प्रत्ययान्तो निपात्यते ॥

कस्ते जामिर्जनानामग्ने को दाश्वध्वरः । को ह कस्मिन्नसि श्रितः ॥ ३ ॥

कः । ते । जामिः । जनानाम् । अग्ने । कः । दाशुऽअध्वरः ।

कः । ह । कस्मिन् । असि । श्रितः ॥ ३ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]अग्ने [v]जनानां मनुष्याणां मध्ये [v]ते तव [v]कः [v]जामिः को बन्धुः । त्वं सर्वैर्गुणैरधिकोऽसि। तवानुरूपो बन्धुर्नास्तीति भावः । [v]को [v]दाश्वध्वरः । दाशुर्दत्तोऽध्वरो यज्ञो येन स तथोक्तः । त्वां यष्टुमपि समर्थः कोऽपि नास्तीत्यर्थः । [v]को [v]ह त्वं कथंभूतस्त्वम् । ईदृग्रूपः इति सर्वैर्न ज्ञायसे इत्यर्थः । [v]कस्मिन् स्थाने [v]श्रितः आश्रितः [v]असि वर्तसे । तत्स्थानमपि न केनचित् ज्ञायते । अतस्त्वमस्माभिः मांसदृष्टिभिः कथमुपलब्धव्यः इत्यग्निः प्रशस्यते ॥ दाश्वध्वरः । ' दाश्र दाने ' । ' उणादयो बहुलम् ' (पा. सू. ३. ३. १ ) इति बहुलवचनात् कर्मणि उण्प्रत्ययः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । यणादेशे ' उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ' इति स्वरितत्वम् ॥

त्वं जामिर्जनानामग्ने मित्रो असि प्रियः । सखा सखिभ्य ईड्यः ॥ ४ ॥

त्वम् । जामिः । जनानाम् । अग्ने । मित्रः । असि । प्रियः । सखा । सखिऽभ्यः । ईड्यः ॥४॥

हे [v]अग्ने [v]त्वम् उक्तप्रकारेण अचिन्त्यरूपोऽप्यनुग्रहीतृतया सर्वेषां [v]जनानां [v]जामिः बन्धुः [v]असि[1]। तथा [v]प्रियः प्रीणयिता त्वं यजमानानां [v]मित्रः प्रमीतेस्त्रायकोऽसि । [v]ईड्यः स्तुतिभिः स्तुत्यस्त्वं [v]सखिभ्यः समानख्यानेभ्य ऋत्विग्भ्यः [v]सखा सखिवदत्यन्तं प्रियः असि ॥ जामिः । ' जमु अदने ' । जमन्ति सहैकस्मिन्पात्रे अदन्तीति जामयो बन्धवः । ' जनिघसिभ्यामिण् ' ( उ. सू. ४-५६९ ) इति विधीयमानः इण् बहुलवचनादस्मादपि द्रष्टव्यः । ईड्यः । ' ईड स्तुतौ ' । ' ईडवन्दवृशंसदुहां ण्यतः ' इत्याद्युदात्तत्वम् ।

यजा नो मित्रावरुणा यजा देवाँ ऋतं बृहत् । अग्ने यक्षि स्वं दमम् ॥ ५ ॥

यज । नः । मित्रावरुणा । यज । देवान् । ऋतम् । बृहत् । अग्ने । यक्षि । स्वम् । दमम् ॥५॥

हे [v]अग्ने [v]नः अस्मदर्थं [v]मित्रावरुणा एतत्संज्ञौ देवौ [v]यज हविषा पूजय । तथा [v]देवान् इन्द्रादीन् [v]यज पूजय । [v]ऋतं सत्यं यथार्थफलं यज्ञं च यजेत्येव । तदर्थं [v]बृहत् प्रौढं [v]स्वं स्वकीयं [v]दमं यज्ञगृहं [v]यक्षि यज संगच्छस्व । त्वय्यन्तर्विद्यमाने सति हि यज्ञगृहं पूज्यते ॥ यज[2] । 'व्यचोऽतस्तिङः' इति संहितायां दीर्घत्वम् । देवान् । ' दीर्घादटि समानपादे ' इति संहितायां नकारस्य रुत्वम् । ' आतोऽटि नित्यम् ' इति अनुनासिकः[3] आकारः । यत्वलोपौ । यक्षि । यजेः ' बहुलं छन्दसि ' इति शपो लुक् ॥ ॥ २३ ॥

' का ते ' इति पञ्चर्चं तृतीयं सूक्तम् । ' का ते ' इत्यनुक्रान्तम् । राहूगणो गोतम ऋषिः । त्रिष्टुप् छन्दः । अग्निर्देवता । प्रातरनुवाकस्याग्नेये क्रतौ त्रैष्टुभे छन्दसि इदमादिके द्वे सूक्ते । सूत्रितं च– ' उप प्र जिन्वन्निति त्रीणि का त उपेतिरिति सूक्ते ' (आश्व. श्रौ. ४. १३) इति । आश्विनशस्त्रेऽप्येते प्रातरनुवाकातिदेशात् ॥

---

१. ट-ढ–असि भवसि । २. ट-ढ–यजा नः । ३. ट-ढ–सानुनासिकः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

का त उपेतिर्मनसो वराय भुवदग्ने शंतमा का मनीषा ।
को वा यज्ञैः परि दक्षं त आप केन वा ते मनसा दाशेम ॥ १ ॥

का । ते । उपऽइतिः । मनसः । वराय । भुवत् । अग्ने । शम्ऽतमा । का । मनीषा ।
कः । वा । यज्ञैः । परि । दक्षम् । ते । आप । केन । वा । ते । मनसा । दाशेम ॥ १ ॥

हे [v]अग्ने [v]ते तव [v]मनसो [v]वराय निवारणाय अस्मास्ववस्थापनाय [v]का [v]उपेतिः [v]भुवत् कीदृशमुपगमनं भवेत् । न काप्यस्ति । तवोचितमुपगमनं वयं कर्तुं न शक्नुमः इति भावः । [v]मनीषा स्तुतिः [v]शंतमा तवातिशयेन सुखकरी [v]का कीदृशी भवेत् तवोचिता स्तुतिरपि नास्तीत्यर्थः । [v]को [v]वा यजमानः [v]यज्ञैः तव संबन्धिभिर्यागैः [v]दक्षं वृद्धिं बलं वा [v]परि [v]आप पर्याप्नोत् । न कोऽपीत्यर्थः । तवोचितान् यागाननुष्ठाय तैः[1] फलं प्राप्यते इत्येतदपि दुर्घटमेवेति भावः । उपगमनादिकं तावदास्तां तस्य सर्वस्य साधनभूतं मन एवास्माकं दुर्लभमित्याह केनेति । हे अग्ने [v]ते तुभ्यं [v]केन [v]मनसा कीदृश्या बुद्ध्या [v]दाशेम हवींषि प्रयच्छाम । तवोपगमनाद्यनुरूपं मनोऽस्माकं नोत्पद्यते इत्यर्थः ॥ उपेतिः । ' तादौ च° ' इति गतेः प्रकृतिस्वरत्वम् । वराय । ' वृञ् वरणे ' । अस्मादन्तर्भावितण्यर्थात् ' ग्रहवृदृनिश्चिगमश्च ' ( पा. सू. ३. ३. ५८ ) इति अप् । तस्य पित्त्वादनुदात्तत्वे धातुस्वरः । भुवत् । लेटि अडागमः । ' बहुलं छन्दसि ' इति शपो लुक् । ' भूसुवोस्तिङि ' इति गुणप्रतिषेधः । दक्षम् । ' दक्ष वृद्धौ ' । भावे करणे वा घञ् । जित्त्वादाद्युदात्तत्वम् ॥

एह्यग्न इह होता नि षीदादब्धः सु पुरएता भवा नः ।
अवतां त्वा रोदसी विश्वमिन्वे यजा महे सौमनसाय देवान् ॥ २ ॥

आ । इहि । अग्ने । इह । होता । नि । सीद । अदब्धः । सु । पुरःऽएता । भव । नः ।
अवताम् । त्वा । रोदसी इति । विश्वमिन्वे इति विश्वम्ऽइन्वे । यज । महे । सौमनसाय । देवान् ॥२॥

हे [v]अग्ने [v]एहि आगच्छ । [v]इह अस्मिन् यज्ञे [v]होता देवानामाह्वाता सन् [v]नि [v]षीद उपविश[2] । [v]नः अस्माकं [v]पुरएता पुरतो गन्ता [v]सु [v]भव सुष्ठु भव । यस्मात्त्वम् [v]अदब्धः राक्षसादिभिः अहिंस्योऽसि । तादृशं त्वां [v]विश्वमिन्वे सर्वं व्याप्नुवत्यौ [v]रोदसी द्यावापृथिव्यौ [v]त्वा त्वाम् [v]अवतां रक्षतां । आगत्योपविश्य च द्यावापृथिवीभ्यां रक्षितश्च सन् [v]महे महते [v]सौमनसाय सौमनस्याय [v]देवान् दानादिगुणयुक्तान् इन्द्रादीन् [v]यज हविर्भिः पूजय ॥ नि षीद । ' सदिरप्रतेः ' इति षत्वम् । सौमनसाय । सुमनसो भावः सौमनसम् । ' तस्येदम् ' इति संबन्धसामान्ये इति[3] अण्प्रत्ययः[3] । स[4] चात्र भावलक्षणे[4] संबन्धविशेषे पर्यवस्यति । यद्वा । ' हायनान्तयुवादिभ्योऽण् ' ( पा. सू. ५. १. १३० ) इति भावे अण् । युवादिष्वस्य पाठो द्रष्टव्यः ॥

---

१. ट-ढ–' तैः ' नास्ति । २. त-द-ध-स–उपविश उपविश्य; श–उपविश उपविश्य च । ३. ट-ढ–अण् । ४. ट-ढ–स च समवायलक्षणे ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्र सु विश्वाँत्रक्षसो धक्ष्यग्ने भवा यज्ञानामभिशस्तिपावा ।
अथा वह सोमपतिं हरिभ्यामातिथ्यमस्मै चकृमा सुदान्वे ॥ ३ ॥

प्र । सु । विश्वान् । रक्षसः । धक्षि । अग्ने । भव । यज्ञानाम् । अभिशस्तिऽपावा ।
अथ । आ । वह । सोमऽपतिम् । हरिऽभ्याम् । आतिथ्यम् । अस्मै । चकृम । सुऽदान्वे ॥३॥

हे ᵛअग्ने ᵛविश्वान् सर्वान् ᵛरक्षसः राक्षसान् ᵛप्र ᵛसु ᵛधक्षि प्रकर्षेण दह । दग्ध्वा च ᵛयज्ञानाम् अस्माभिरनुष्ठेयानां यागानाम् ᵛअभिशस्तिपावा अभिशस्तेर्हिंसायाः पाता रक्षिता ᵛभव । ᵛअथ अनन्तरं ᵛसोमपतिं सर्वेषां सोमानां पालकमिन्द्रं ᵛहरिभ्यां तदीयाश्वाभ्याम् ᵛआ ᵛवह अस्मद्यज्ञं प्रापय । आगताय ᵛअस्मै ᵛसुदान्वे शोभनस्य फलस्य दात्रे इन्द्राय ᵛआतिथ्यम् अतिथ्यर्हं सत्कारं ᵛचकृम कुर्मः ॥ धक्षि । ' दह भस्मीकरणे ' । ' बहुलं छन्दसि ' इति शपो लुक् । ढत्वभष्भावकत्वषत्वानि । अभिशस्तिपावा । ' शसु हिंसायाम् ' । अस्मादभिपूर्वात् भावे क्तिन् । अभिशस्तेः पातीति अभिशस्तिपावा । ' पा रक्षणे ' । ' आतो मनिन्° ' इति वनिप् । सोमपतिम् । ' पत्यावैश्वर्ये ' इति पूर्वपदप्रकृतिस्वरत्वम् । सुदान्वे । पूर्ववद्ददातेर्वनिप् । ' अल्लोपोऽनः ' इति अकारलोपः ॥

प्रजावता वचसा वह्निरासा च हुवे नि च सत्सीह देवैः ।
वेषि होत्रमुत पोत्रं यजत्र बोधि प्रयन्तर्जनितर्वसूनाम् ॥ ४ ॥

प्रजाऽवता । वचसा । वह्निः । आसा । आ । च । हुवे । नि । च । सत्सि । इह । देवैः ।
वेषि । होत्रम् । उत । पोत्रम् । यजत्र । बोधि । प्रऽयन्तः । जनितः । वसूनाम् ॥ ४ ॥

ᵛप्रजावता यजमानेभ्यो दातव्यापत्यादिफलोपेतेन ᵛवचसा स्तोत्रेण स्तुतः सन् योऽग्निः ᵛआसा आस्यस्थानीयया ज्वालया ᵛवह्निः देवेभ्यो हविषां वोढा तमग्निम् ᵛआ ᵛच ᵛहुवे आह्वयामि । आहूतः सन् त्वम् ᵛइह अस्मिन् कर्मणि ᵛदेवैः अन्यैः सह ᵛनि ᵛसत्सि ᵛच निषीद च । निषद्य च हे ᵛयजत्र यजनीयाग्ने ᵛहोत्रं होत्रा क्रियमाणं कर्म ᵛउत अपि च ᵛपोत्रं पोत्रा कृतं कर्म च ᵛवेषि कामयस्व । ᵛवसूनां धनानां ᵛप्रयन्तः प्रकर्षेण नियन्तः वसून्यस्मदायत्तानि कुर्वन् ᵛजनितः आहुतिद्वारा सर्वस्य जनयितरग्ने ᵛबोधि अस्मान् बोधय ॥ आसा । ' पद्दन्° ' इत्यादिना आस्यशब्दस्य आसन्नादेशः । ' सुपां सुलुक्° ' इति तृतीयाया डादेशः । टिलोपे उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । हुवे । ह्वेञो लटि ' बहुलं छन्दसि ' इति संप्रसारणम् । ' बहुलं छन्दसि ' इति शपो लुक् । ' चवायोगे प्रथमा ' इति निघातप्रतिषेधः । बोधि । ' बुध अवगमने ' । अस्मात् ण्यन्तात् ' छन्दस्युभयथा ' इति हेः आर्धधातुकत्वात् ' णेरनिटि ' इति णिलोपः । ' हुझल्भ्यो हेर्धिः ' । धातोः अन्त्यलोपश्छान्दसः । हेरपित्त्वात् तस्यैव स्वरः शिष्यते ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

एकादशिनस्याग्नेयस्य पशोः ' यथा विप्रस्य ' इत्येषा पशुपुरोडाशस्य याज्या । सूत्रितं च ' प्रदानानाम् ' इति खण्डे–' यथा विप्रस्य मनुषो हविर्भिः प्र कारवो मनना वच्यमानाः ' ( आश्व. श्रौ. ३. ७ ) इति ॥

यथा विप्रस्य मनुषो हविर्भिर्देवाँ अयजः कविभिः कविः सन् ।
एवा होतः सत्यतर त्वमद्याग्ने मन्द्रया जुह्वा यजस्व ॥ ५ ॥

यथा । विप्रस्य । मनुषः । हविःऽभिः । देवान् । अयजः । कविऽभिः । कविः । सन् ।
एव । होतरिति । सत्यऽतर । त्वम् । अद्य । अग्ने । मन्द्रया । जुह्वा । यजस्व ॥ ५ ॥

[v]कविः क्रान्तदर्शी [v]सन् [v]कविभिः मेधाविभिर्ऋत्विग्भिः सह [v]विप्रस्य मेधाविनः [v]मनुषः मनोर्यज्ञे [v]हविर्भिः चरुपुरोडाशादिभिः हे अग्ने [v]यथा [v]देवान् [v]अयजः एवमेव [v]होतः होमनिष्पादक [v]सत्यतर अतिशयेन सत्सु साधो [v]अग्ने [v]त्वम् [v]अद्य अस्मिन् यज्ञे [v]मन्द्रया हर्षयित्र्या [v]जुह्वा होमसाधनभूतया स्रुचा [v]यजस्व देवान् हविर्भिः पूजय ॥ मनुषः । ' मन ज्ञाने ' । ' बहुलमन्यत्रापि ' इति मनेः उसिन्प्रत्ययः ॥ ॥ २४ ॥

' कथा ' इति पञ्चर्चं चतुर्थं सूक्तं त्रैष्टुभं गोतमस्यार्षमाग्नेयम् । अनुक्रान्तं च–' कथा ' इति । प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तः सूक्तविनियोगः ॥

कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः ।
यो मर्त्येष्वमृत ऋतावा होता यजिष्ठ इत्कृणोति देवान् ॥ १ ॥

कथा । दाशेम । अग्नये । का । अस्मै । देवऽजुष्टा । उच्यते । भामिने । गीः ।
यः । मर्त्येषु । अमृतः । ऋतऽवा । होता । यजिष्ठः । इत् । कृणोति । देवान् ॥ १ ॥

[v]अस्मै [v]अग्नये [v]कथा [v]दाशेम कथं हवींषि ददाम । अग्नेरनुरूपं यज्ञं कर्तुमशक्ता वयमित्यर्थः । अथवा[1] अस्मै [v]भामिने तेजस्विनेऽग्नये [v]देवजुष्टा सर्वैः देवैः सेवितव्या [v]गीः वाक् स्तुतिरपि [v]का कीदृशी [v]उच्यते । तादृशीं स्तुतिमपि कर्तुं न शक्ता इत्यर्थः । [v]अमृतः मरणरहितः [v]ऋतावा ऋतवान् सत्यवान् यज्ञवान् वा [v]होता देवानामाह्वाता होमनिष्पादको वा [v]यजिष्ठः अतिशयेन यष्टा एवंभूतः [v]यः अग्निः [v]मर्त्येषु मरणधर्मसु अस्मासु वर्तमानः सन् [v]देवान् [v]इत् [v]कृणोति हविर्भिर्युक्तान्करोत्येव । तादृशायाग्नये कथा दाशेमेति पूर्वेणान्वयः ॥ कथा । ' था हेतौ च च्छन्दसि ' इति थाप्रत्ययः । भामिने । ' भा दीप्तौ ' । ' अर्तिस्तुसु° ' इत्यादिना मन्प्रत्ययः । ततो मत्वर्थीय इनिः । ऋतावा । ' छन्दसीवनिपौ° ' इति मत्वर्थीयो वनिप् । ' अन्येषामपि दृश्यते ' इति दीर्घत्वम् ॥

---

१. ट-ढ–अपि च ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यो अध्वरेषु शंतम ऋतावा होता तमू नमोभिरा कृणुध्वम् ।
अग्निर्यद्वेर्मर्तीय देवान्त्स चा बोधाति मनसा यजाति ॥ २ ॥

यः । अध्वरेषु । शम्ऽतमः । ऋतऽवा । होता । तम् । ऊँ इति । नमःऽभिः । आ । कृणुध्वम् ।
अग्निः । यत् । वेः । मर्तीय । देवान् । सः । च । बोधाति । मनसा । यजाति ॥ २ ॥

[v]यः अग्निः [v]अध्वरेषु यागेषु [v]शंतमः अतिशयेन सुखकारी [v]ऋतावा सत्यवान् यथार्थदर्शीत्यर्थः । [v]होता देवानामाह्वाता भवति। हे ऋत्विग्यजमाना यूयं [v]तमु तमेवाग्निं [v]नमोभिः स्तोत्रैः [v]आ [v]कृणुध्वम् अभिमुखीकुरुत । [v]यत् यदा अयम् [v]अग्निः [v]मर्ताय मनुष्याय यजमानार्थं [v]देवान् [v]वेः वेति गच्छति तदानीं [v]सः अग्निर्यष्टव्यान् सर्वान् देवान् [v]बोधाति [v]च जानाति च । ज्ञात्वा च [v]मनसा नमसा तान् [v]यजाति हविर्भिः पूजयति[1] । अतस्तमेवाग्निम् आ कृणुध्वमिति योज्यम् ॥ वेः । वी गत्यादिषु । ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लङ् । ' तिङां तिङो भवन्ति ' इति प्रथमपुरुषैकवचनस्य मध्यमपुरुषैकवचनादेशः । बोधाति । ' बुध अवगमने ' । लेटि आडागमः । शपः पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते । ' चवायोगे प्रथमा ' इति निघातप्रतिषेधः । मनसा । मकारनकारयोः स्थानविपर्ययः ॥

स हि क्रतुः स मर्यः स साधुर्मित्रो न भूदद्भुतस्य रथीः ।
तं मेधेषु प्रथमं देवयन्तीर्विश उप ब्रुवते दस्ममारीः ॥ ३ ॥

सः । हि । क्रतुः । सः । मर्यः । सः । साधुः । मित्रः । न । भूत् । अद्भुतस्य । रथीः ।
तम् । मेधेषु । प्रथमम् । देवऽयन्तीः । विशः । उप । ब्रुवते । दस्मम् । आरीः ॥ ३ ॥

[v]स [v]हि अग्निः [v]क्रतुः कर्मणां कर्ता । [v]सः एव [v]मर्यः मारयिता विश्वस्योपसंहर्ता [v]साधुः साधयितोत्पादयितापि [v]सः एव [v]अद्भुतस्य अभूतस्यालब्धस्य धनस्य [v]रथीः रंहयिता प्रापयिता [v]भूत् भवति । तत्र दृष्टान्तः । [v]मित्रो [v]न । यथा सखा धनानि प्रापयति तद्वत् । एवंभूतो योऽग्निः [v]तम् एव [v]मेधेषु यज्ञेषु [v]देवयन्तीः देवयन्त्यो देवानात्मन इच्छन्त्यः [v]विशः प्रजाः [v]प्रथमम् [v]उप [v]ब्रुवते । स्तुतिभिरुपेत्य प्रधानभूतः इति कथयन्ति । कीदृश्यो विशः । [v]दस्मं दर्शनीयं तमग्निम् [v]आरीः गच्छन्त्यः भजन्त्यः इत्यर्थः ॥ मर्यः । ' मृङ् प्राणत्यागे ' । अस्मात् अन्तर्भावितण्यर्थात् ' छन्दसि निष्टर्क्य° ' इत्यादौ निपातनात् यत् ' कृत्यल्युटो बहुलम् ' इति बहुलवचनात् कर्तरि द्रष्टव्यः । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । देवयन्तीः । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घत्वम् । आरीः । ' ऋ गतौ ' । ' जनिघसिभ्यामिण् ' ( उ. सू. ४. ५६९ ) इति बहुलग्रहणादस्मादपि इण्प्रत्ययः । ' कृदिकारादक्तिनः ' इति ङीष् । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घत्वम् । व्यत्ययेनाद्युदात्तत्वम्[2] ॥

---

१. ट-ढ–पूजयति च । २. ट-ढ–' व्यत्ययेनाद्युदात्तत्वम् ' नास्ति ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स नो नृणां नृतमो रिशादा अग्निर्गिरोऽवसा वेतु धीतिम् ।
तना च ये मघवानः शविष्ठा वाजप्रसूता इषयन्त मन्म ॥ ४ ॥

सः । नः । नृणाम् । नृऽतमः । रिशादाः । अग्निः । गिरः । अवसा । वेतु । धीतिम् ।
तना । च । ये । मघऽवानः । शविष्ठाः । वाजऽप्रसूताः । इषयन्त । मन्म ॥ ४ ॥

[v]नृणां यज्ञस्य नेतॄणां मध्ये [v]नृतमः अतिशयेन नेता [v]रिशादाः रिशानां शत्रूणामत्ता भक्षयिता। यद्वा । रिशतां हिंसतामसिता निरसिता । एवंविधः [v]सः [v]अग्निः [v]नः अस्माकं [v]गिरः स्तुतीः [v]अवसा हविर्लक्षणेनान्नेन युक्तां [v]धीतिं कर्म च [v]वेतु कामयताम् । अपि [v]च [v]ये यजमानाः [v]तना । धननामैतत् । विस्तृतेन धनेन [v]मघवानः धनवन्तः [v]शविष्ठाः अतिशयेन बलिनश्च सन्तः [v]वाजप्रसूताः प्रसूतं प्रेरितं वाजो हविर्लक्षणमन्नं यैस्तादृशा भूत्वा [v]मन्म अग्नेर्मननरूपं स्तोत्रम् [v]इषयन्त एषयन्ति ऋत्विग्भिः कारयितुमिच्छन्ति । तेषामपि स्तुतिमग्निः कामयतामिति भावः ॥ नृणाम् । ' नृ च ' इति उभयथाभावात् दीर्घाभावः । ' नामन्यतरस्याम् ' इति नाम उदात्तस्वम् । तना । ' तनु विस्तारे '। पचाद्यच् । तृतीयैकवचनस्य ' सुपां सुलुक्° ' इति आकारः । वृषादेराकृतिगणत्वादाद्युदात्तत्वम् । शविष्ठाः । शव इति बलनाम । ' अस्मायामेधा° ' इति मत्वर्थीयो विनिः । ततः आतिशायनिकः इष्ठन् । ' विन्मतोर्लुक् ' इति विनो लुक् । ' टेः ' इति टिलोपः । इष्ठनो नित्त्वादाद्युदात्तत्वम्। इषयन्त । ' इषु इच्छायाम् ' । अस्मात् ण्यन्तात् छान्दसो लङ् । संज्ञापूर्वकस्य विधेरनित्यत्वात् णौ लघूपधगुणाभावः । अदुपदेशात् लसार्वधातुकानुदात्तत्वे णिच एव स्वरः शिष्यते ॥

एवाग्निर्गोतमेभिर्ऋतावा विप्रेभिरस्तोष्ट जातवेदाः ।
स एषु द्युम्नं पीपयत्स वाजं स पुष्टिं याति जोषमा चिकित्वान् ॥ ५ ॥

एव । अग्निः । गोतमेभिः । ऋतऽवा । विप्रेभिः । अस्तोष्ट । जातऽवेदाः ।
सः । एषु । द्युम्नम् । पीपयत् । सः । वाजम् । सः । पुष्टिम् । याति । जोषम् । आ । चिकित्वान् ॥५॥

[v]ऋतावा ऋतवान् यज्ञवान् [v]जातवेदाः जातधनो जातप्रज्ञो वा अयम् [v]अग्निः [v]विप्रेभिः मेधाविभिः [v]गोतमेभिः गोतमैर्ऋषिभिरेवमुक्तेन प्रकारेण [v]अस्तोष्ट स्तुतोऽभूत् । स्तुतश्च [v]सः अग्निः [v]एषु गोतमेषु [v]द्युम्नं द्योतमानं सोमं [v]पीपयत् अपिबत्। यद्वा । तानृषीन् अपाययत्[1]। तथा[2] [v]सः अग्निः [v]वाजं हविर्लक्षणमन्नं पीपयदित्येव । एवं सोमलक्षणं चरुपुरोडाशादिलक्षणं हविश्च स्वीकृत्य [v]सः अग्निः [v]जोषम् अस्माभिः कृतं सेवनम् [v]आ [v]चिकित्वान् आ समन्तात् जानन् [v]पुष्टिं [v]याति पोषं प्राप्नोतु । यद्वा । अस्माकं धनानि पोषं प्रापयतु ॥ गोतमेभिः । ' ऋष्यन्धकवृष्णिकुरुभ्यश्च ' ( पा. सू. ४. १. ११४ ) इति विहितस्य अणः ' अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च ' ( पा. सू. २. ४. ६५ ) इति बहुषु लुक् । अस्तोष्ट । स्तौतेः कर्मणि लुङि चिणभावश्छान्दसः । पीपयत् । ' पा पाने '।

---

१. ट-ढ–पीपयत्; स–अपीपयत् । २. च-फ–ततः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ण्यन्तात् लुङि च्लेश्चङादि । जोषम् । ' जुषी प्रीतिसेवनयोः ' । भावे घञ् । जित्त्वादाद्युदात्तत्वम् ॥ ॥ २५ ॥

' अभि त्वा ' इति पञ्चर्चं पञ्चमं सूक्तं गोतमस्यार्षमाग्नेयं गायत्रम् । तथा चानुक्रान्तम्—' अभि त्वा गायत्रं तु ' इति । विनियोगो लैङ्गिकः ॥

अभि त्वा गोतमा गिरा जातवेदो विचर्षणे । द्युम्नैराभि प्र णोनुमः ॥ १ ॥

अभि । त्वा । गोतमाः । गिरा । जातऽवेदः । विऽचर्षणे । द्युम्नैः । अभि । प्र । नोनुमः ॥१॥

हे [v]जातवेदः जातानां वेदितः [v]विचर्षणे विशेषेण सर्वस्य द्रष्टः एवंभूताग्ने [v]त्वा त्वां [v]गोतमाः अस्य सूक्तस्य द्रष्टा गोतम ऋषिः । ऋषेरेकत्वेऽपि पूजार्थं बहुवचनम् । [v]गिरा स्तोत्रलक्षणया वाचा [v]अभि आभिमुख्येन अस्तौदिति शेषः । तद्वद्वयमपि त्वां [v]द्युम्नैः त्वदीयगुणप्रकाशकैर्मन्त्रैः [v]अभि [v]प्र [v]णोनुमः आभिमुख्येन पुनःपुनः स्तुमः ॥ नोनुमः । ' णु स्तुतौ ' । अस्मात् यङ्लुगन्तात् लट् । ' उपसर्गादसमासेऽपि° ' इति णत्वम् ॥

तमु त्वा गोतमो गिरा रायस्कामो दुवस्यति । द्युम्नैराभि प्र णोनुमः ॥२॥

तम् । ऊँ इति । त्वा । गोतमः । गिरा । रायःऽकामः । दुवस्यति । द्युम्नैः । अभि । प्र । नोनुमः॥२॥

[v]रायस्कामः धनकामः [v]गोतमः यमग्निं [v]गिरा स्तुत्या [v]दुवस्यति परिचरति [v]तमु तमेव त्वां [v]द्युम्नैः द्योतमानैः स्तोत्रैराभिमुख्येन पुनःपुनः स्तुमः ॥ रायस्कामः । रायो धनानि कामयते इति रायस्कामः । ' कर्मण्यण् ' । ' तत्पुरुषे कृति बहुलम् ' इति बहुलवचनात् अलुक् । ' ऊडिदम्° ' इत्यादिना पूर्वपदस्य विभक्तेरुदात्तत्वम् । दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् । ' अतः कृकमिकंस-कुम्भ° ' ( पा. सू. ८. ३. ४६ ) इति विसर्जनीयस्य सत्वम् । दुवस्यति । ' दुवस उपतापे परिचरणे च ' । कण्ड्वादिः ॥

तमु त्वा वाजसातममङ्गिरस्वद्धवामहे । द्युम्नैराभि प्र णोनुमः ॥ ३ ॥

तम् । ऊँ इति । त्वा । वाजऽसातमम् । अङ्गिरस्वत् । हवामहे । द्युम्नैः । अभि । प्र । नोनुमः॥३॥

हे अग्ने [v]वाजसातमं वाजानामन्नानामतिशयेन सनितारं दातारं तमेव [v]त्वा त्वाम् [v]अङ्गिरस्वत् अङ्गिरस इव [v]हवामहे आह्वयामः । शिष्टं गतम् ॥ वाजसातमम् । ' षणु दाने ' । ' जनसनखनक्रमगमो विट् ' । ' विड्वनोरनुनासिकस्यात् ' इति आत्वम् । अतिशयेन वाजसा वाजसातमः । तमपः पित्त्वादनुदात्तत्वे कृदुत्तरपदप्रकृतिस्वर एव शिष्यते । अङ्गिरस्वत् । ' तेन तुल्यम्° ' इति वतिः । ' नभोऽङ्गिरोमनुषां वत्युपसंख्यानम् ' ( पा. सू. १. ४. १८. ३ ) इति भत्वेन पदत्वाभावात् रुत्वाद्यभावः ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तमु॑ त्वा वृत्रहन्तमं यो दस्यूँरवधूनुषे । द्युम्नैरभि प्र णोनुमः ॥ ४ ॥

तम् । ऊँ इति । त्वा । वृत्रहन्ऽतमम् । यः । दस्यून् । अवऽधूनुषे ।

द्युम्नैः । अभि । प्र । नोनुमः ॥ ४ ॥

हे अग्ने [v]दस्यून् उपक्षपयितॄन् राक्षसादीन् [v]यः त्वम् [v]अवधूनुषे अवचालयसि स्थानात् प्रच्यावयसि [v]वृत्रहन्तमं वृत्राणां पाप्मनाम्[1] अतिशयेन हन्तारं [v]तमु [v]त्वा तमेव त्वां द्युम्नैरित्यादि पूर्ववत् ॥ वृत्रहन्तमम् । अतिशयेन वृत्रहा वृत्रहन्तमः । पदसंज्ञायां नलोपे ' नाङ्गस्य ' ( पा. सू. ८. २. १७) इति तमपो नुट् । दस्यून् । ' दीर्घादटि समानपादे ' इति नकारस्य रुत्वम् । 'अत्रानुनासिकः पूर्वस्य तु वा ' इति ऊकारः सानुनासिकः ॥

अवोचाम रहूगणा अग्नये मधुमद्वचः । द्युम्नैरभि प्र णोनुमः ॥ ५ ॥

अवोचाम । रहूगणाः । अग्नये । मधुऽमत् । वचः । द्युम्नैः । अभि । प्र । नोनुमः ॥ ५ ॥

ऋषिः कृतं स्तोत्रमनयोपसंहरति । [v]रहूगणाः रहूगणस्य पुत्रा वयं गोतमाः [v]अग्नये अङ्गनादिगुणयुक्ताय देवाय [v]मधुमद्वचः माधुर्योपेतं वचनम् [v]अवोचाम प्रावादिष्म । तद्वचनरूपैः[2] [v]द्युम्नैः द्योतमानैः स्तोत्रैः पुनःपुनरग्निं वयम् [v]अभि [v]प्र [v]णोनुमः आभिमुख्येन प्रकर्षेण स्तुमः ॥ ॥ २६ ॥

' हिरण्यकेशः ' इति द्वादशर्चं षष्ठं सूक्तम् । रहूगणपुत्रस्य गोतमस्यार्षम् । अत्रानुक्रम्यते— ' हिरण्यकेशो द्वादशाद्यौ तृचौ त्रैष्टुभौष्णिहौ पूर्वोऽग्नये वा मध्यमाय ' इति । पूर्वत्र ' गायत्रं तु ' इत्युक्त्वादिदमपि गायत्रं[3] सूक्तम् । एतावांस्तु विशेषः । आद्यस्तृचस्त्रैष्टुभः । द्वितीयस्त्वौष्णिहः । प्रथमतृचस्य मध्यमस्थानो वैद्युतोऽग्निः शुद्धाग्निर्वा देवता । शिष्टा नवर्चः केवलाग्निदेवताकाः । प्रातरनुवाकस्याग्नेये क्रतौ त्रैष्टुभे छन्दस्याश्विनशस्त्रे चाद्यस्तृचः । सूत्रितं च—' हिरण्यकेश इति तिस्रोऽपश्यमस्य महत इति सूक्ते ' ( आश्व. श्रौ. ४. १३ ) इति । कारीर्यामग्नेर्धामच्छदो हिरण्यकेश इति द्वे ऋचौ याज्यानुवाक्ये । सूत्रितं च—' हिरण्यकेशो रजसो विसार इति द्वे त्वं त्या चिदच्युता धामन्ते विश्वं भुवनमधि श्रितमिति वा ' ( आश्व. श्रौ. २. १३ ) इति ॥

हिरण्यकेशो रजसो विसारेऽहिर्धुनिर्वातइव ध्रजीमान् ।

शुचिभ्राजा उषसो नवेदा यशस्वतीरपस्युवो न सत्याः ॥ १ ॥

हिरण्यऽकेशः । रजसः । विऽसारे । अहिः । धुनिः । वातःऽइव । ध्रजीमान् ।

शुचिऽभ्राजाः । उषसः । नवेदाः । यशस्वतीः । अपस्युवः । न । सत्याः ॥ १ ॥

---

१. ट-ढ—पापानाम् । २. ट-ढ—वचनानुरूपैः । ३. ट-ढ—सूक्तं गायत्रम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]हिरण्यकेशः हितरमणीयाः केशस्थानीया ज्वाला यस्य स तथोक्तः सुवर्णवद्रोचमानज्वालो वा [V]अहिः आगत्य हन्ता मेघानां [V]धुनिः तेषां कम्पयिता [V]वातइव वायुरिव [V]भ्रजीमान् शीघ्रगतियुक्तः एवंभूतो वैद्युतोऽग्निः [V]रजसः उदकस्य [V]विसारे विसरणे मेघान्निर्गमने निमित्तभूते सति [V]शुचिभ्राजाः शोभनदीप्तिः सन् मेघाज्जलानि निर्गमयितुं जानाति। [V]उषसः उषोदेवताः [V]नवेदाः। न विदन्ति इति नवेदाः। मेघादुदकस्य निःसारणमग्निरेव जानाति उषसस्तु न जानन्तीत्यर्थः। अज्ञाने दृष्टान्तः। [V]यशस्वतीः अन्नयुक्ता अन्नवत्यः [V]अपस्युवः अपः कर्म आत्मन इच्छन्त्यः [V]सत्याः अवितथारम्भाः [V]न एवंभूताः प्रजा इव। अत्र उषसामज्ञानेनाग्निः प्रशस्यते न तु ता निन्द्यन्ते, 'न हि निन्दा निन्द्यं निन्दितुं अपि तु स्तुत्यं स्तोतुम्' इति न्यायात्॥ भ्रजीमान्। 'भ्रज गतौ'। 'इन्सर्वधातुभ्यः' इति भावे इन्प्रत्ययः। ततो मतुप्। तस्य पित्त्वादनुदात्तत्वे इनो नित्त्वात् प्रातिपदिकस्याद्युदात्तत्वम्। नवेदाः। नञ्पूर्वात् वेत्तेः पचाद्यच्। 'नभ्राण्नपात्०' इत्यादिना नञः प्रकृतिभावः। अपस्युवः। अपस्शब्दात् 'सुप आत्मनः क्यच्'। 'क्याच्छन्दसि' इति उप्रत्ययः। 'तन्वादीनां छन्दसि बहुलमुपसंख्यानम्' (पा. सू. ६. ४. ७७. १) इति उवङ्॥

आ ते सुपर्णा अमिनन्तँ एवैः कृष्णो नोनाव वृषभो यदीदम्।
शिवाभिर्न स्मयमानाभिरागात्पतन्ति मिहः स्तनयन्त्यभ्रा॥ २॥

आ। ते। सुऽपर्णाः। अमिनन्त। एवैः। कृष्णः। नोनाव। वृषभः। यदि। इदम्।
शिवाभिः। न। स्मयमानाभिः। आ। अगात्। पतन्ति। मिहः। स्तनयन्ति। अभ्रा॥२॥

हे अग्ने [V]ते तव [V]सुपर्णाः शोभनपतना रश्मयः [V]एवैः गन्तृभिर्मरुद्भिः सह [V]अमिनन्त [V]आ समन्तात् मेघं हिंसन्ति। वर्षणार्थं ताडयन्ति। प्रहृतश्च [V]कृष्णः कृष्णवर्णः [V]वृषभः वर्षिता मेघः [V]नोनाव भृशं शब्दमकरोत्। [V]यदि यदा [V]इदं ईदृशं कर्म तदानीं [V]शिवाभिर्न सुखकारिणीभिः [V]स्मयमानाभिः हसनवतीभिः कान्ताभिरिव शुभ्रवर्णाभिः फेनयुक्ताभिरद्भिर्विद्युद्भिर्वा सह [V]आ [V]अगात् वैद्युताग्निप्रेरितः पर्जन्य आगच्छति। तदनन्तरं [V]मिहः आपः [V]पतन्ति दिवः सकाशात् प्रवृष्टा भवन्ति। [V]अभ्रा अभ्राण्यद्भिः पूर्णा मेघाः [V]स्तनयन्ति इतस्ततः शब्दं कुर्वन्ति॥ अमिनन्त। 'मीञ् हिंसायाम्'। क्र्यादिकः। व्यत्ययेन अन्तादेशः। ईषाअक्षादिस्वात् प्रकृतिभावः। 'अणोऽप्रगृह्यस्य०' (पा. सू. ८. ४. ५७) इति वैकल्पिकमवसाने विधीयमानमनुनासिकत्वं व्यत्ययेनात्र संहितायामपि द्रष्टव्यम्। नोनाव। नौतेर्यङ्लुगन्तात् लिटि '°अमन्त्रे०' (पा. सू. ३. १. ३५) इति निषेधात् आम्प्रत्ययाभावः। स्मयमानाभिः। 'स्मिङ् ईषद्धसने'। शपः पित्त्वादनुदात्तत्वम्। शानचो लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। स्तनयन्ति। 'स्तन शब्दे'। चुरादिरदन्तः। पतन्ति स्तनयन्तीत्यनयोः पादादित्वाद्वाक्यादित्वाच्च निघाताभावः॥

यदीमृतस्य पयसा पियानो नयन्नृतस्य पथिभी रजिष्ठैः।
अर्यमा मित्रो वरुणः परिज्मा त्वचं पृञ्चन्त्युपरस्य योनौ॥ ३॥

यत्। ईम्। ऋतस्य। पयसा। पियानः। नयन्। ऋतस्य। पथिऽभिः। रजिष्ठैः।
अर्यमा। मित्रः। वरुणः। परिऽज्मा। त्वचम्। पृञ्चन्ति। उपरस्य। योनौ॥ ३॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vयदीं यदायमग्निः vऋतस्य उदकस्य vपयसा पयोवत्सारभूतेन रसेन vपियानः जगदाप्यायनं कुर्वन् आप्यायितं च जगत् vऋतस्य उदकस्य संबन्धिभिः vरजिष्ठैः ऋजुतमैः vपथिभिः मार्गैः स्नानपानादिभिः vनयन् प्रापयन् वर्तते तदानीम् vअर्यमा vमित्रो vवरुणः च vपरिज्मा परितो गन्ता मरुद्गणश्च vउपरस्य मेघस्य vयोनौ वृष्टयुदकोत्पत्तिस्थाने vत्वचं vपृञ्चन्ति वृष्टयुदकस्याच्छादकं प्रदेशं स्वकीयैरायुधैः संयोजयन्ति उद्घाटयन्तीति यावत्॥ पियानः । ' स्फायी ओप्यायी वृद्धौ ' । ' बहुलं छन्दसि ' इति शपो लुक् । धातोर्व्यस्ययेन पीभावः । अनुदात्तेत्त्वात् लसार्वधातुकानुदात्तत्वे धातुस्वरः शिष्यते । रजिष्ठैः । ऋजुशब्दात् इष्ठनि ' विभाषर्जोश्छन्दसि ' ( पा. सू. ६. ४. १६२ ) इति ऋकारस्य रत्वम् । ' टेः ' इति टिलोपः । पृञ्चन्ति । ' पृची संपर्के ' । रौधादिकः ॥

प्रातरनुवाकस्याग्नेये क्रतौ औष्णिहे छन्दस्याश्विनशस्त्रे च ' अग्ने वाजस्य ' इत्याद्यास्तिस्र ऋचः । सूत्रितं च–' अग्ने वाजस्येति तिस्रः पुरु त्वा त्वामग्ने ' ( आश्व. श्रौ. ४. १३ ) इति ॥

अग्ने वाजस्य गोमत ईशानः सहसो यहो ।
अस्मे धेहि जातवेदो महि श्रवः ॥ ४ ॥

अग्ने । वाजस्य । गोऽमतः । ईशानः । सहसः । यहो इति ।
अस्मे इति । धेहि । जातऽवेदः । महि । श्रवः ॥ ४ ॥

हे vसहसो vयहो बलस्य पुत्र vअग्ने vगोमतः बहुभिर्गोभिर्युक्तस्य vवाजस्य अन्नस्य vईशानः ईश्वरस्त्वमसि । अतः vअस्मे अस्मासु हे vजातवेदः जातधन जातानां वेदितर्वाग्ने vमहि प्रभूतं vश्रवः अन्नं vधेहि स्थापय ॥ सहसो यहो । पराङ्गवद्भावात् ' आमन्त्रितस्य च ' इति षष्ठ्यामन्त्रितसमुदायो निहन्यते । अस्मे । ' सुपां सुलुक्° ' इति सप्तम्याः शेआदेशः ॥

स इधानो वसुष्कविरग्निरीळेन्यो गिरा । रेवदस्मभ्यं पुर्वणीक दीदिहि ॥५॥

सः । इधानः । वसुः । कविः । अग्निः । ईळेन्यः । गिरा ।
रेवत् । अस्मभ्यम् । पुरुऽअनीक । दीदिहि ॥ ५ ॥

vसः vअग्निः vइधानः दीपनशीलः vवसुः निवासयिता सर्वेषां vकविः क्रान्तदर्शनो मेधावी वा vगिरा स्तोत्ररूपया वाचा vईळेन्यः स्तोतव्यो भवति । हे vपुर्वणीक । अनीकं मुखम् । पुरुभिर्बह्वीभिरनीकस्थानीयाभिर्ज्वालाभिर्युक्ताग्ने vअस्मभ्यं vरेवत् धनयुक्तमन्नं यथा भवति तथा vदीदिहि दीप्यस्व ॥ इधानः । ' जिइन्धी दीप्तौ ' । ताच्छीलिकः चानश् । ' बहुलं छन्दसि ' इति शपो लुक् । ईळेन्यः । ' ईड स्तुतौ ' । औणादिक एन्यप्रत्ययः । रेवत् । ' रयेर्मतौ बहुलम् ' इति संप्रसारणम् । ' छन्दसीरः ' इति मतुपो वत्वम् । ' रेशब्दाच्च मतुप उदात्तत्वं वक्तव्यम् ' ( का. ६. १. १७६. १ ) इति मतुप उदात्तत्वम् । दीदिहि । दीदेतिश्छान्दसो दीप्तिकर्मा ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

क्षपो राजन्नुत त्मनाग्ने वस्तोरुतोषसः । स तिग्मजम्भ रक्षसो दह प्रति ॥६॥

क्षपः । राजन् । उत । त्मना । अग्ने । वस्तोः । उत । उषसः ।

सः । तिग्मऽजम्भ । रक्षसः । दह । प्रति ॥ ६ ॥

हे ᵛराजन् राजनशील ᵛअग्ने ᵛक्षपः क्षपय । राक्षसादीन् स्वकीयैः पुरुषैर्बाधस्व । ᵛउत अपि च ᵛत्मना न केवलमन्यैरेव आत्मना च तान् बाधस्व । कदेति चेत् उच्यते। ᵛवस्तोः सर्वाण्यहानि ᵛउत अपि च ᵛउषसः उषःकालोपलक्षिता रात्रीः । अत्यन्तसंयोगे द्वितीया । सर्वेष्वहःसु सर्वासु रात्रिषु चेत्यर्थः । हे ᵛतिग्मजम्भ तीक्ष्णमुखाग्ने ᵛरक्षसः राक्षसानुक्तप्रकारेण क्षपयित्वा ᵛसः एव त्वं ᵛप्रति ᵛदह प्रत्येकं दह । न किंचिदग्धव्यमित्युदास्वेत्यर्थः ॥ क्षपः । ' क्षप क्षान्त्याम् ' । लोडर्थे छान्दसो लङ् । ' छन्दस्युभयथा ' इति शप आर्धधातुकत्वात् ' णेरनिटि ' इति णिलोपः । उदात्तनिवृत्तिस्वरेण शप उदात्तत्वम् । त्मना । ' मन्त्रेष्वाङ्यादेरात्मनः ' इति आकारलोपः । रक्षसः । ' रक्ष पालने ' । रक्षितव्यमस्मादिति रक्षः । भीमादित्वात् ( पा. सू. ३. ४. ७४ ) अपादाने असिप्रत्ययः । क्षरतेर्वा ष्यन्तात् असिप्रत्यये णिलोपो वर्णविपर्ययश्च । अस्य च रक्षःशब्दस्य असिप्रत्ययान्तत्वात् प्रत्ययस्वर एव शिष्यते ॥ ॥ २७ ॥

प्रातरनुवाकस्याग्नेये क्रतौ गायत्रे छन्दसि ' अवा नो अग्ने ' इत्याद्याः षडृचः । सूत्रितं च–' अवा नो अग्न इति षळग्निमीळेऽग्निं दूतम् ' ( आश्व. श्रौ. ४. १३ ) इति ॥ आश्विनशस्त्रे चैताः शंसनीयाः प्रातरनुवाकातिदेशात् ॥

अवा नो अग्न ऊतिभिर्गायत्रस्य प्रभर्मणि । विश्वासु धीषु वन्द्य ॥ ७ ॥

अव । नः । अग्ने । ऊतिऽभिः । गायत्रस्य । प्रऽभर्मणि । विश्वासु । धीषु । वन्द्य ॥ ७ ॥

ᵛविश्वासु ᵛधीषु सर्वेषु कर्मसु ᵛवन्द्य स्तुत्य हे ᵛअग्ने ᵛगायत्रस्य गायत्रसाम्नो गायत्रीच्छन्दस्कस्य सूक्तस्य वा ᵛप्रभर्मणि प्रभरणे संपादने निमित्तभूते सति ᵛनः अस्मान् ᵛऊतिभिः त्वदीयैः पालनैः ᵛअव रक्ष ॥ अव । ' व्यचोऽतस्तिङः ' इति संहितायां दीर्घत्वम् ॥

आ नो अग्ने रयिं भर सत्रासाहं वरेण्यम् । विश्वासु पृत्सु दुष्टरम् ॥ ८ ॥

आ । नः । अग्ने । रयिम् । भर । सत्राऽसहम् । वरेण्यम् । विश्वासु । पृत्ऽसु । दुस्तरम् ॥८॥

हे ᵛअग्ने ᵛरयिं धनं ᵛनः अस्मभ्यम् ᵛआ ᵛभर प्रयच्छ । कीदृशम् । ᵛसत्रासाहं सत्रा सह युगपदेव दारिद्र्यस्य नाशकं ᵛवरेण्यं सर्वैर्वरणीयं ᵛविश्वासु ᵛपृत्सु सर्वेषु संग्रामेषु ᵛदुष्टरं शत्रुभिस्तरीतुमशक्यम् ॥ सत्रासाहम् । ' छन्दसि सहः ' इति ण्विः । वरेण्यम् । ' वृञ एण्यः ' । पृत्सु । ' पदादिषु मांस्पृत्स्नूनामुपसंख्यानम् ' इति पृतनाशब्दस्य पृद्भावः । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् ॥

आयुष्कामेष्टयां प्रथमस्याज्यभागस्यानुवाक्या ' आ नो अग्ने ' इति । सूत्रितं च–' आयुष्कामेष्टयां जीवातुमन्तावा नो अग्ने सुचेतुना ' ( आश्व. श्रौ. २. १० ) इति । महापितृयज्ञेऽप्येषैव प्रथमाज्यभागानुवाक्या । सूत्रितं च–' जीवातुमन्तौ सव्योत्तर्युपस्थाः ' ( आश्व. श्रौ. २. १९ ) इति ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसम् । मार्डीकं धेहि जीवसे ॥ ९ ॥

आ । नः । अग्ने । सुऽचेतुना । रयिम् । विश्वायुऽपोषसम् । मार्डीकम् । धेहि । जीवसे ॥९॥

हे vअग्ने vनः अस्माकं vजीवसे जीवनाय vसुचेतुना शोभनेन ज्ञानेन युक्तं vरयिं धनम् vआ vधेहि आस्थापय । कीदृशम् । vमार्डीकम् । मृडीकं सुखम् । तद्धेतुभूतम् । vविश्वायुपोषसं सर्वस्मिन्नायुषि देहादेः पोषकम् । यावज्जीवमस्मदुपभोगपर्याप्तमित्यर्थः ॥ सुचेतुना । ' चिती संज्ञाने ' । औणादिकः उप्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वम् । विश्वायुपोषसम् । विश्वमायुर्यस्मिन् शरीरादौ तद्विश्वायु । ' बहुव्रीहौ विश्वं संज्ञायाम् ' इति पूर्वपदान्तोदात्तत्वम् । तत्पुष्णातीति विश्वायुपोषः । ' गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च ' इति असुन् पूर्वपदप्रकृतिस्वरत्वं च । सकारलोपश्छान्दसः ' दीर्घायुत्वाय वर्चसे ' इति यथा ॥

प्र पूतास्तिग्मशोचिषे वाचो गोतमाग्नये । भरस्व सुम्नयुर्गिरः ॥ १० ॥

प्र । पूताः । तिग्मऽशोचिषे । वाचः । गोतम । अग्नये । भरस्व । सुम्नऽयुः । गिरः ॥१०॥

हे vगोतम सूक्तद्रष्टः vसुम्नयुः सुम्नं धनमात्मन इच्छंस्त्वं vतिग्मशोचिषे तीक्ष्णज्वालाय vअग्नये vपूताः शुद्धाः vवाचः अग्नेर्गुणान् सम्यगभिदधतीः vगिरः स्तुतीः vप्र vभरस्व प्रकर्षेण संपादय ॥ तिग्मशोचिषे । ' तिज निशाने ' । ' युजिरुचितिजां कुत्वं च ' ( उ. सू. १. १४३ ) इति मक् । तिग्मानि शोचींषि यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । सुम्नयुः । सुम्नशब्दात् क्यचि ' न च्छन्दस्यपुत्रस्य ' इति ईत्वदीर्घयोः प्रतिषेधः । ' क्याच्छन्दसि ' इति उप्रत्ययः ॥

यो नो अग्नेऽभिदासत्यन्ति दूरे पदीष्ट सः । अस्माकमित्तृधे भव ॥ ११ ॥

यः । नः । अग्ने । अभिऽदासति । अन्ति । दूरे । पदीष्ट । सः ।

अस्माकम् । इत् । तृधे । भव ॥ ११ ॥

हे vअग्ने vनः अस्मान् vअन्ति अन्तिके समीपे vदूरे विप्रकृष्टदेशे अवस्थितः[1] सन् vयः शत्रुः vअभिदासति उपक्षपयति vसः शत्रुः vपदीष्ट पततु नंश्यतु । त्वं च vअस्माकमित् अस्माकमेव vतृधे वर्धनाय vभव ॥ अभिदासति । ' दसु उपक्षये ' । अस्मात् ण्यन्तात् लटि ' छन्दस्युभयथा ' इति शप आर्धधातुकत्वात् ' णेरनिटि ' इति णिलोपः । अन्ति । ' कादिलोपो बहुलमिति वक्तव्यम् ' इति अन्तिकशब्दस्य ककारलोपः । तृधे । ' तृधु वृद्धौ ' । संपदादिलक्षणो भावे क्विप् । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् ॥

सहस्राक्षो विचर्षणिरग्नी रक्षांसि सेधति । होता गृणीत उक्थ्यः ॥ १२ ॥

सहस्रऽअक्षः । विऽचर्षणिः । अग्निः । रक्षांसि । सेधति । होता । गृणीते । उक्थ्यः ॥१२॥

---

१. ट-ढ–च स्थितः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]सहस्राक्षः असंख्यातज्वालः [v]विचर्षणिः विशेषेण सर्वस्य द्रष्टा अयम् [v]अग्निः [v]रक्षांसि [v]सेधति प्रतिषेधति । यज्ञान्निर्गमयति । स चाग्निः [v]उक्थ्यः उक्थैः शस्त्रैरस्माभिः स्तूयमानः सन् [v]होता देवानामाह्वाता भूत्वा [v]गृणीते तान् स्तौति ॥ सहस्राक्षः । ' बहुव्रीहौ सक्थ्यक्ष्णोः० ' इति षच् समासान्तः । सतिशिष्टत्वात्तस्यैव स्वरः शिष्यते । सेधति । ' षिधु गत्याम् ' । अत्र केवलोऽपि सोपसर्गार्थो द्रष्टव्यः । गृणीते । ' गृ शब्दे ' । ' ष्वादीनां ह्रस्वः ' इति ह्रस्वत्वम् ॥ ॥ २८ ॥

' इत्था ' इति षोडशर्चं सप्तमं सूक्तं गोतमस्यार्षमैन्द्रं पङ्क्तिच्छन्दस्कम् । अनुक्रान्तं च–' इत्था षोळशैन्द्रं पाङ्क्तं हि[1] ' । हिशब्दप्रयोगात् तुह्यादिपरिभाषया इदमुत्तरे च द्वे पङ्क्तिच्छन्दस्के । पृष्ठ्यषडहस्य पञ्चमेऽहनि मरुत्वतीये इदं सूक्तम् । सूत्रितं च–' अवितासीत्था हीन्द्र पिब तुभ्यमिति मरुत्वतीयम् ' (आश्व. श्रौ. ७. १२ ) इति । चतुर्विंशेऽहनि अच्छावाकस्याद्यस्तृचो वैकल्पिकोऽनुरूपः । ' होत्रकाणाम् ' इति खण्डे सूत्रितम्–' इत्था हि सोम इन्मद उभे यदिन्द्र रोदसी ' ( आश्व. श्रौ. ७. ४ ) इति । महाव्रते निष्केवल्यस्य दक्षिणपक्षे ' इत्था हि ' इत्येका । तथैव पञ्चमारण्यके सूत्रितम्–' इत्था हि सोम इन्मद इति पङ्क्तिः ' ( ऐ. आ. ५. २. २ ) इति ॥

इत्था हि सोम इन्मदे ब्रह्मा चकार वर्धनम् ।
शविष्ठ वज्रिन्नोजसा पृथिव्या निः शशा अहिमर्चन्ननु स्वराज्यम् ॥ १ ॥

इत्था । हि । सोमे । इत् । मदे । ब्रह्मा । चकार । वर्धनम् ।
शविष्ठ । वज्रिन् । ओजसा । पृथिव्याः । निः । शशाः । अहिम् । अर्चन् । अनु । स्वऽराज्यम् ॥१॥

हे [v]शविष्ठ अतिशयेन बलवन् [v]वज्रिन् वज्रवन्निन्द्र [v]इत्था [v]हि इत्थमेव अनेन शास्त्रोक्तप्रकारेणैव [v]मदे मदकरे हर्षकरे [v]सोमे त्वया पीते सति [v]ब्रह्मा ब्राह्मणः स्तोता [v]वर्धनं तव वृद्धिकरं स्तोत्रं [v]चकार अनेन सूक्तेन कृतवान् । [v]इत् इत्येतत् पादपूरणम्[2] । अतस्त्वम् [v]ओजसा बलेन [v]पृथिव्याः सकाशात् [v]अहिम् आगत्य हन्तारं वृत्रं [v]निः [v]शशाः निःशेषेण अशाः । मा बाधस्वेति शासनं कृत्वा पृथिव्याः सकाशात् निरगमयः इत्यर्थः । किं कुर्वन् । [v]स्वराज्यं स्वस्य राज्यं राजत्वम् [v]अनु अनुलक्ष्य [v]अर्चन् पूजयन् स्वस्य स्वामित्वं प्रकटयन्नित्यर्थः॥ शशाः । ' शासु अनुशिष्टौ ' । लङि लुकि प्राप्ते ' बहुलं छन्दसि ' इति शपः श्लुः । स्वराज्यम् । राज्ञो भावः कर्म वा राज्यम् । ' पत्यन्तपुरोहितादिभ्यो यक् ' इति यक् । तत्र हि ' राजासे ' ( पा. सू. ५. १. १२८ ग. ) इति पठ्यते । स्वस्य राज्यं स्वराज्यम् । ' अकर्मधारये राज्यम् ' ( पा. सू. ६. २. १३० ) इत्युत्तरपदाद्युदात्तत्वम् ॥

स त्वामदद्वृषा मदः सोमः श्येनाभृतः सुतः ।
येना वृत्रं निरद्भ्यो जघन्थ वज्रिन्नोजसार्चन्ननु स्वराज्यम् ॥ २ ॥

सः । त्वा । अमदत् । वृषा । मदः । सोमः । श्येनऽआभृतः । सुतः ।
येन । वृत्रम् । निः । अत्ऽभ्यः । जघन्थ । वज्रिन् । ओजसा । अर्चन् । अनु । स्वऽराज्यम् ॥२॥

---

१. क्ष–हि इति । २. क्ष-ट-ढ-न-स–पदपूरणम् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे इन्द्र Vत्वा त्वां Vसः Vसोमः Vअमदत् अमदयत् हर्षं प्रापयत्। कीदृशः सोमः। Vवृषा सेचनस्वभावः Vमदः मदकरो हर्षकारी Vश्येनाभृतः श्येनरूपमापन्नया पक्ष्याकारया गायत्र्या दिवः सकाशादाहृतः Vसुतः अभिषुतः। हे Vवज्रिन्[1] वज्रवन्निन्द्र[1] Vयेन पीतेन सोमेन Vओजसा बलकरेण Vअद्रयः अन्तरिक्षसकाशात् Vवृत्रं Vनिः Vजघन्थ हतवानसि। अन्यत् पूर्ववत्॥ अमदत्। 'मदी हर्षे'। अस्मात् णिचि 'मदी हर्षग्लपनयोः' इति घटादिषु पाठात् मित्त्वे सति 'मितां ह्रस्वः' इति ह्रस्वत्वम्। लङि 'छन्दस्युभयथा' इति शप आर्धधातुकत्वात् 'णेरनिटि' इति णिलोपः। अद्रयः। आप इत्यन्तरिक्षनाम। 'अपो भि' (पा. सू. ७. ४. ४८) इति पकारस्य तत्वम्। जघन्थ। क्रादिनियमप्राप्तस्य इटः 'उपदेशेऽत्वतः' इति प्रतिषेधः। 'अभ्यासाच्च' इति हकारस्य घत्वम्। 'लिति' इति प्रत्ययात्पूर्वस्योदात्तत्वम्। यद्वृत्तयोगादनिघातः[2]॥

प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यंसते।
इन्द्र नृम्णं हि ते शवो हनो वृत्रं जया अपोऽर्चन्ननु स्वराज्यम्॥ ३॥

प्र। इहि। अभि। इहि। धृष्णुहि। न। ते। वज्रः। नि। यंसते।
इन्द्र। नृम्णम्। हि। ते। शवः। हनः। वृत्रम्। जयाः। अपः। अर्चन्। अनु। स्वऽराज्यम्॥३॥

हे Vइन्द्र Vप्रेहि प्रकर्षेण गच्छ। Vअभीहि। हन्तव्यान् शत्रूनाभिमुख्येन प्राप्नुहि। प्राप्य च Vधृष्णुहि। तान् शत्रूनभिभव। Vते तव Vवज्रः Vन Vनि Vयंसते शत्रुभिर्न नियम्यते अप्रतिहतगतिरित्यर्थः। तथा Vते Vशवः स्वदीयं बलं Vनृम्णं नृणां पुरुषाणां नामकमभिभावकं Vहि यस्मादेवं तस्मात् Vवृत्रम् असुरं मेघं वा Vहनः जहि। ततोऽनन्तरं[3] तेन निरुद्धाः Vअपः उदकानि Vजयाः जय। वृत्रं हत्वा तेनावृतमुदकं लभस्वेत्यर्थः। अन्यत् समानम्॥ यंसते। यमेः कर्मणि लेटि 'सिब्बहुलम्' इति सिप्। 'लेटोऽडाटौ' इति अडागमः। हनः। लोडर्थे छान्दसो लङ्। 'बहुलं छन्दसि' इति शपो लुगभावः। शपः पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते। पूर्वपदस्यासमानवाक्यस्थत्वात् निघाताभावः। जयाः। जयतेर्लेटि आडागमः। पूर्ववत्स्वरः॥

निरिन्द्र भूम्या अधि वृत्रं जघन्थ निर्दिवः।
सृजा मरुत्वतीरव जीवधन्या इमा अपोऽर्चन्ननु स्वराज्यम्॥ ४॥

निः। इन्द्र। भूम्याः। अधि। वृत्रम्। जघन्थ। निः। दिवः।
सृज। मरुत्वतीः। अव। जीवऽधन्याः। इमाः। अपः। अर्चन्। अनु। स्वऽराज्यम्॥४॥

हे Vइन्द्र Vभूम्याः Vअधि भूलोकस्योपरि Vवृत्रं Vनिः Vजघन्थ निःशेषेण हतवानसि। तथा Vदिवः द्युलोकात् Vनिः जघन्थ। हत्वा च Vइमाः Vअपः वृष्ट्युदकानि Vअव Vसृज अधः पातय।

---

१. क्ष-ट-ढ-न-स–इन्द्र वज्रिन् वज्रवन्। २. क्ष-ट-ढ–यद्वृत्तयोगान्निघाताभावः। ३. क्ष-ट-ढ–तदनन्तरम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कीदृशीरपः[1] । vमरुत्वतीः मरुद्भिः संयुक्ताः vजीवधन्याः जीवाः प्राणिनो धन्यास्तृप्ता याभिस्ताः । अन्यत् समानम् ॥

इन्द्रो वृत्रस्य दोधतः सानुं वज्रेण हीळितः ।
अभिक्रम्यावं जिघ्नतेऽपः सर्माय चोदयन्नर्चन्ननु स्वराज्यम् ॥ ५ ॥

इन्द्रः । वृत्रस्य । दोधतः । सानुम् । वज्रेण । हीळितः ।
अभिऽक्रम्य । अव । जिघ्नते । अपः । सर्माय । चोदयन् । अर्चन् । अनु । स्वऽराज्यम् ॥५॥

vहीळितः क्रुद्धः vइन्द्रः vअभिक्रम्य आभिमुख्येन गत्वा vदोधतः भृशं कम्पमानस्य vवृत्रस्य vसानुं समुच्छ्रितं हनुप्रदेशं vवज्रेण vअव vजिघ्नते प्रहरति । किं कुर्वन् । vअपः वृष्ट्युदकानि vसर्माय सरणाय निर्गमनाय vचोदयन् प्रेरयन् ॥ दोधतः । 'धूञ् कम्पने' । अस्मात् यङ्लुगन्तात् शतरि अन्त्यलोपश्छान्दसः । 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् । हीळितः । 'हेडृ होडृ अनादरे' । 'हेळते' ( नि. २. १२. २ ) इत्येतत् क्रुध्यतिकर्मसु पठितम् । अस्मान्निष्ठायां वर्णव्यापत्त्या ईकारः । जिघ्नते । हन्तेर्लटि व्यत्ययेन आत्मनेपदं बहुवचनं च । 'बहुलं छन्दसि' इति शपः श्लुः । 'इत्' इत्यनुवृत्तौ 'बहुलं छन्दसि' इति अभ्यासस्य इत्वम् । 'गमहन०' इत्यादिना उपधालोपः । समाय । 'सृ गतौ' । 'अर्तिस्तुसु०' इत्यादिना भावे मन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् ॥ ॥ २९ ॥

अधि सानौ नि जिघ्नते वज्रेण शतपर्वणा ।
मन्दान इन्द्रो अन्धसः सखिभ्यो गातुमिच्छत्यर्चन्ननु स्वराज्यम् ॥ ६ ॥

अधि । सानौ । नि । जिघ्नते । वज्रेण । शतऽपर्वणा ।
मन्दानः । इन्द्रः । अन्धसः । सखिऽभ्यः । गातुम् । इच्छति । अर्चन् । अनु । स्वऽराज्यम् ॥६॥

इन्द्रः vशतपर्वणा शतसंख्याकधाराभिर्युक्तेन vवज्रेण vसानौ vअधि vनि vजिघ्नते । अधिः सप्तम्यर्थानुवादी । समुच्छ्रिते वृत्रस्य कपोलादौ स्थाने नितरां हिनस्ति । स च vइन्द्रः vमन्दानः मन्दमानः स्तूयमानः सन् vसखिभ्यः समानख्यानेभ्यः स्तोतृभ्यः vअन्धसः अन्नस्य vगातुं मार्गमुपायम् vइच्छति । अन्यत् पूर्ववत् ॥ मन्दानः । 'मदि स्तुतौ' । कर्मणि शानचि यक् । 'छन्दस्युभयथा' इति शानच आर्धधातुकत्वात् अतोलोपयलोपौ । अनुदात्तेतः परत्वात् शानचो लसार्वधातुकानुदात्तत्वे सति यक एवोदात्तत्वम् । अनुदात्ते शानचि तस्य यको लोपे सति उदात्तनिवृत्तिस्वरेण शानच उदात्तत्वं[2] प्राप्नोति[2] । एवं तर्हि शानच आर्धधातुकत्वादेव लसार्वधातुकानुदात्तत्वाभावे चित्स्वर एवावशिष्यते ॥

---

१. क्ष–कीदृश्य आपः । २. क्ष-ट-ढ–उदात्तत्वम् । नन्वेवमादेरनुदात्तस्य उदात्तत्वं प्राप्नोति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इन्द्र तुभ्यमिदद्रिवोऽनुत्तं वज्रिन्वीर्यम् ।
यद्ध त्यं मायिनं मृगं तमु त्वं माययावधीरर्चन्ननु स्वराज्यम् ॥ ७ ॥

इन्द्र । तुभ्यम् । इत् । अद्रिऽवः । अनुत्तम् । वज्रिन् । वीर्यम् ।
यत् । ह । त्यम् । मायिनम् । मृगम् । तम् । ऊँ इति । त्वम् । मायया ।
अवधीः । अर्चन् । अनु । स्वऽराज्यम् ॥ ७ ॥

अद्रिरिति मेघनाम । हे [v]अद्रिवः वाहनरूपमेघयुक्त [v]वज्रिन् वज्रवन् [v]इन्द्र [v]तुभ्यमित् षष्ठ्यर्थे[1] चतुर्थी[1] । तवैव [v]वीर्यं सामर्थ्यम् [v]अनुत्तं शत्रुभिरतिरस्कृतम् । [v]यद्ध यस्मात् खलु [v]मायिनं मायाविनं [v]त्यं[2] तं प्रसिद्धं वञ्चयितारम्[2] । लोकोपद्रवकारिणमित्यर्थः । [v]मृगं मृगरूपमापन्नं [v]तं वृत्रं [v]त्वम् अपि [v]मायया एव [v]अवधीः हतवानसि ॥ अनुत्तम् । ' नसत्तनिषत्त० ' इति निपातनात् निष्ठानत्वाभावः । अवधीः । हन्तेः ' लुङि च ' इति वधादेशः । स चादन्तः । तस्य अतो लोपे सति स्थानिवद्भावात् सिचि वृद्ध्यभावः ॥

वि ते वज्रासो अस्थिरन्नवतिं नाव्या३ अनु ।
महत्त इन्द्र वीर्यं बाह्वोस्ते बलं हितमर्चन्ननु स्वराज्यम् ॥ ८ ॥

वि । ते । वज्रासः । अस्थिरन् । नवतिम् । नाव्याः । अनु ।
महत् । ते । इन्द्र । वीर्यम् । बाह्वोः । ते । बलम् । हितम् । अर्चन् । अनु । स्वऽराज्यम् ॥ ८ ॥

हे इन्द्र [v]ते तव [v]वज्रासः वज्राः त्वत्सकाशान्निर्गतान्यायुधानि [v]नाव्याः नावा तार्याः [v]नवतिं नवतिसंख्याका वृत्रेण निरुद्धा नदीः [v]अनु उपलक्ष्य [v]वि [v]अस्थिरन् विविधम् अस्थिषत । सर्वत्र व्याप्य वर्तमानं वृत्रं हन्तुं तव वज्र एकोऽप्यनेक इवासीदित्यर्थः । किं च [v]इन्द्र [v]ते तव [v]वीर्यं [v]महत् प्रभूतम् । अन्यैरजेयमित्यर्थः । तथा [v]ते [v]बाह्वोः त्वदीययोर्हस्तयोः [v]बलं [v]हितं निहितम् । त्वदीयौ बाहू अप्यतिशयेन बलिनावित्यर्थः । अन्यत् पूर्ववत् ॥ अस्थिरन् । तिष्ठतेर्लुङि ' समवप्रविभ्यः स्थः ' इत्यात्मनेपदम् । ' मन्त्रे घस० ' इति च्लेर्लुक् । ' स्थाध्वोरिच्च ' ( पा. सू. १. २. १७ ) इति इत्वम् । व्यत्ययेन झस्य रनादेशः । नाव्याः । ' नौवयोधर्म० ' ( पा. सू. ४. ४. ९१ ) इत्यादिना यत् । ' यतोऽनावः ' इति पर्युदासात् ' तित्स्वरितम् ' इति स्वरितत्वम् । बाह्वोः । ' उदात्तयणः० ' इति विभक्त्युदात्तत्वम् ॥

---

१. क्ष–' षष्ठ्यर्थे चतुर्थी ' नास्ति । २. क्ष-ट-ढ–त्यं त्याजयितारम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सहस्रं साकमर्चत परि ष्टोभत विंशतिः ।
शतैनमन्वनोनवुरिन्द्राय ब्रह्मोद्यतमर्चन्ननु स्वराज्यम् ॥ ९ ॥

सहस्रम् । साकम् । अर्चत । परि । स्तोभत । विंशतिः ।
शता । एनम् । अनु । अनोनवुः । इन्द्राय । ब्रह्म । उत्ऽयतम् । अर्चन् । अनु । स्वऽराज्यम् ॥९॥

[v]सहस्रं सहस्रसंख्याका मनुष्याः [v]साकमर्चत एनमिन्द्रं युगपदेवापूजयन् । तथा[1] [v]विंशतिः । षोडशर्त्विजो यजमानः पत्नी च सदस्यः शमिता चेति विंशतिसंख्याकाः । तेषां या विंशतिसंख्या सा [v]परि [v]ष्टोभत परितः सर्वतोऽस्तौत् । तथा च[2] [v]शता शतसंख्याका ऋषयः [v]एनम् इन्द्रम् [v]अन्वनोनवुः पुनः पुनरस्तुवन् । अस्मा एव [v]इन्द्राय [v]ब्रह्म हविर्लक्षणमन्नम् [v]उद्यतं दातुमूर्ध्वं धृतम् । अत एवंविध इन्द्रो वृत्रमहन्नित्यर्थः । अन्यत् पूर्ववत् ॥ परि ष्टोभत । स्तोभतिः स्तुतिकर्मा । ' उपसर्गात्सुनोति° ' इति षत्वम् । अनोनवुः । ' णु स्तुतौ ' । अस्मात् यङ्लुगन्तात् लुङि ' सिजभ्यस्तविदिभ्यश्च ' इति झेः उसादेशः । उद्यतम् । ' यम उपरमे ' । उत्पूर्वादस्मात् कर्मणि निष्ठा । ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् ॥

इन्द्रो वृत्रस्य तविषीं निरहन्त्सहसा सहः ।
महत्तदस्य पौंस्यं वृत्रं जघन्वाँ असृजदर्चन्ननु स्वराज्यम् ॥ १० ॥

इन्द्रः । वृत्रस्य । तविषीम् । निः । अहन् । सहसा । सहः ।
महत् । तत् । अस्य । पौंस्यम् । वृत्रम् । जघन्वान् । असृजत् । अर्चन् । अनु । स्वऽराज्यम् ॥१०॥

[v]इन्द्रो [v]वृत्रस्य असुरस्य [v]तविषीं बलं स्वकीयेन बलेन [v]निरहन् हतवान् । [v]सहसा सहनेन अभिभवसाधनेनायुधेन [v]सहः अभिभवसाधनं वृत्रायुधं निरहन् । [v]अस्य इन्द्रस्य [v]तत् [v]पौंस्यं बलं [v]महत् अतिप्रौढम् । यस्मादयं [v]वृत्रं [v]जघन्वान् हतवान् हत्वा च तन्निरुद्धा अपः [v]असृजत् तस्मात् वृत्रान्निरगमयत् । अन्यत् पूर्ववत् ॥ पौंस्यम् । ' पुंस अभिवर्धने ' । चुरादिः । ' अचो यत् ' इति यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । जघन्वान् । हन्तेर्लिटः क्वसुः । ' विभाषा गमहनविद° ' इति इटः विकल्पादभावः । ' अभ्यासाच्च ' इति अभ्यासादुत्तरस्य हन्तेर्हकारस्य घत्वम् ॥ ॥ ३० ॥

इमे चित्तव मन्यवे वेपेते भियसा मही ।
यदिन्द्र वज्रिन्नोजसा वृत्रं मरुत्वाँ अवधीरर्चन्ननु स्वराज्यम् ॥ ११ ॥

इमे इति । चित् । तव । मन्यवे । वेपेते इति । भियसा । मही इति ।
यत् । इन्द्र । वज्रिन् । ओजसा । वृत्रम् । मरुत्वान् । अवधीः । अर्चन् । अनु । स्वऽराज्यम् ॥११॥

---

१. क्ष-ट-ढ-' तथा ' नास्ति । २. क्ष-स-' च ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vमही महत्यौ vइमे द्यावापृथिव्यावपि हे इन्द्र vतव vमन्यवे त्वदीयकोपात् vभियसा भीत्या vवेपेते कम्पेते । हे vवज्रिन् वज्रवन् vइन्द्र vमरुत्वान् मरुद्भिर्युक्तस्त्वम् vओजसा बलेन vयत् यदा vवृत्रं vअवधीः तदानीं द्यावापृथिव्यावपि भयेनाकम्पिषातामित्यर्थः ॥ वेपेते । ' टुवेपृ कम्पने '। भियसा । ' जिभी भये '। औणादिकः कसिप्रत्ययः ॥

न वेपसा न तन्यतेन्द्रं वृत्रो वि बीभयत् ।
अभ्येनं वज्र आयसः सहस्रभृष्टिरायतार्चन्ननु स्वराज्यम् ॥ १२ ॥

न । वेपसा । न । तन्यता । इन्द्रम् । वृत्रः । वि । बीभयत् ।
अभि । एनम् । वज्रः । आयसः । सहस्रऽभृष्टिः । आयत । अर्चन् । अनु । स्वऽराज्यम् ॥१२॥

vवृत्रः vइन्द्रं vवेपसा स्वकीयेन वेपनेन कम्पनेन vन vवि vबीभयत् भीतं नाकरोत् । तथा vतन्यता स्वकीयेन घोरेण गर्जनशब्देन vन वि बीभयत् । अपि च इन्द्रेण विसृष्टः vआयसः अयोमयः vसहस्रभृष्टिः अनेकाभिर्धाराभिर्युक्तः vवज्रः vएनं वृत्रम् vअभि vआयत हन्तुमाभिमुख्येनागच्छत् । अन्यत् पूर्ववत् ॥ तन्यता । ' स्तन शब्दे '। ' ऋतन्यञ्जि° ' इत्यादिना तनोतेर्विधीयमानो यतुच् बहुलवचनादस्मादपि भवति । अत एव सलोपश्च । ' सुपां सुलुक्° ' इति तृतीयाया डादेशः । उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वम् । बीभयत् । ' जिभी भये '। हेतुमति णिच् । अत्र वेपस्तन्यतुभ्यां भयं न हेतोर्वृत्रादिति हेतुभयाभावात् ' बिभेतेर्हेतुभये ' ( पा. सू. ६. १. ५६ ) इति आत्वाभावः। ण्यन्तात् लुङि च्लेश्चङादि । आयत । ' अय पय गतौ '। भौवादिरात्मनेपदी ॥

यद्वृत्रं तव चाशनिं वज्रेण समयोधयः ।
अहिमिन्द्र जिघांसतो दिवि ते बद्बधे शवोऽर्चन्ननु स्वराज्यम् ॥ १३ ॥

यत् । वृत्रम् । तव । च । अशनिम् । वज्रेण । सम्ऽअयोधयः ।
अहिम् । इन्द्र । जिघांसतः । दिवि । ते । बद्बधे । शवः । अर्चन् । अनु । स्वऽराज्यम् ॥१३॥

हे vइन्द्र vयत् यदा vवृत्रं vतव हननार्थं तेन सृष्टाम् vअशनिं vच त्वं vवज्रेण vसमयोधयः सम्यक् प्राहार्षीः तदानीम् vअहिम् आगत्य हन्तारं वृत्रं vजिघांसतः हन्तुमिच्छतः vते तव vशवः बलं vदिवि vबद्बधे बद्धमनुस्यूतं व्याप्तमासीत् । शिष्टं पूर्ववत् ॥ जिघांसतः । हन्तेरिच्छार्थे सनि 'अज्झनगमां सनि ' ( पा. सू. ६. ४. १६ ) इति उपधादीर्घत्वम् । बद्बधे । ' बध बन्धने '। कर्मणि लिटि व्यत्ययेन हलादिशेषाभावः ॥

अभिष्टने ते अद्रिवो यत्स्था जगच्च रेजते ।
त्वष्टा चित्ते मन्यव इन्द्र वेविज्यते भियार्चन्ननु स्वराज्यम् ॥ १४ ॥

अभिऽस्तने । ते । अद्रिऽवः । यत् । स्थाः । जगत् । च । रेजते ।
त्वष्टा । चित् । ते । मन्यवे । इन्द्र । वेविज्यते । भिया । अर्चन् । अनु । स्वऽराज्यम् ॥१४॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे vअद्रिवः वज्रवन् vइन्द्र vते तव vअभिष्टने सिंहनादे सति vस्थाः स्थावरं vजगत् जङ्गमं vच vयत् अस्ति तदुभयं vरेजते कम्पते। vत्वष्टा vचित् वज्रनिर्माता त्वष्टा च vतव vमन्यवे स्वदीयाय कोपाय vभिया भीत्या vवेविज्यते भृशं कम्पते। अन्यत् समानम्॥ स्थाः। तिष्ठतेः 'क्विप् च' इति क्विप्। वेविज्यते। 'ओविजी भयचलनयोः'। अस्मात् क्रियासमभिहारे यङ्। 'सन्यङोः' इति द्विर्भावः। अदुपदेशात् लसार्वधातुकानुदात्तत्वे यङ एव स्वरः शिष्यते। इन्द्रेत्यस्य पादादौ वर्तमानस्य 'आमन्त्रितं पूर्वमविद्यमानवत्' इति अविद्यमानवत्त्वे सति अस्य पादादित्वात् '°अपादादौ' इति पर्युदासात् निघाताभावः॥

नहि नु यादधीमसीन्द्रं को वीर्या परः।
तस्मिन्नृम्णमुत क्रतुं देवा ओजांसि सं दधुरर्चन्ननु स्वराज्यम्॥ १५॥

नहि। नु। यात्। अधिऽइमसि। इन्द्रम्। कः। वीर्या। परः।
तस्मिन्। नृम्णम्। उत। क्रतुम्। देवाः। ओजांसि। सम्। दधुः। अर्चन्। अनु। स्वऽराज्यम्॥१५॥

vयात् यान्तं सर्वत्र व्याप्य वर्तमानमिन्द्रं vनहि vनु vअधीमसि वयं न ह्यवगच्छामः। यतो वयमल्पाः। परः इत्येतत्सकारान्तमव्ययं वैदूर्यमाचष्टे। 'परो दिवा पर एना' (ऋ. सं. १०. ८२. ५) इति यथा। vपरः परस्तादतिदूरे मनुष्यैरनवगाह्ये स्थाने vवीर्या वीर्येण सामर्थ्येन वर्तमानम् vइन्द्रं vकः मनुष्यो जानीयात्। न कोऽपीत्यर्थः। कस्मादिति चेत् अत्राह[1] तस्मिन् इति। यस्मात् vतस्मिन् इन्द्रे vदेवाः vनृम्णं धनं vउत अपि च vक्रतुं वीर्यकर्म vओजांसि बलानि च vसं vदधुः स्थापयांचक्रुः तस्मादित्यर्थः॥ यात्। 'या प्रापणे'। अस्मात् लटः शतृ। 'सुपां सुलुक्°' इति द्वितीयाया लुक्। अधीमसि। 'इण् गतौ'। इदन्तो मसिः। वीर्या। 'सुपां सुलुक्°' इति तृतीयाया आकारः॥

यामथर्वा मनुष्पिता दध्यङ् धियमत्नत।
तस्मिन्ब्रह्माणि पूर्वथेन्द्र उक्था समग्मतार्चन्ननु स्वराज्यम्॥ १६॥

याम्। अथर्वा। मनुः। पिता। दध्यङ्। धियम्। अत्नत।
तस्मिन्। ब्रह्माणि। पूर्वऽथा। इन्द्रे। उक्था। सम्। अग्मत। अर्चन्। अनु। स्वऽराज्यम्॥१६॥

vअथर्वा एतत्संज्ञक ऋषिः vपिता सर्वासां प्रजानां पितृभूतः vमनुः च vदध्यङ् अथर्वणः पुत्र एतत्संज्ञक ऋषिश्च vयां vधियम् vअत्नत यत्कर्मातन्वत अकुर्वन् vतस्मिन् कर्मणि यानि vब्रह्माणि हविर्लक्षणान्यन्नानि vउक्था शस्त्ररूपाणि स्तोत्राणि च यानि सन्ति तानि सर्वाणि तस्मिन् vइन्द्रे vसमग्मत समगच्छन्त। तत्र दृष्टान्तः। vपूर्वथा पूर्वेषामन्येषां वसिष्ठादीनां यज्ञेषु यथा हवींषि स्तोत्राणि चेन्द्रेण संगच्छन्ते तद्वत्। य इन्द्रः vस्वराज्यं स्वस्य राजत्वम् vअनु vअर्चन् अनुपूजयन्। वृत्रवधादि-

---

१. क्ष–तत्राह।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

रूपेण कर्मणा स्वकीयमधिपतित्वं प्रकटयन्नित्यर्थः ॥ अतत । ' तनु विस्तारे ' । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । ' तनिपत्योश्छन्दसि ' इति उपधालोपः । पूर्वथा । ' प्रत्नपूर्वविश्वेमात्थाल् छन्दसि ' ( पा. सू. ५. ३. १११ ) इति इवार्थे पूर्वशब्दात् थाल्प्रत्ययः । लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वम् । उक्था । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । समग्मत । ' समो गम्यृच्छिभ्याम् ' इति आत्मनेपदम् । लुङि ' मन्त्रे घस० ' इति च्लेर्लुक् । ' गमहन० ' इत्यादिना उपधाया लोपः ॥ ॥३१॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्[1] । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीर-
बुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते
माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये
प्रथमाष्टके पञ्चमोऽध्यायः समाप्तः ॥

---

१. क्ष-विदारयन् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
*दशतय्याः[1] पञ्चमोऽयमध्यायो व्याकृतः पुरा* ।
धीमता सायणार्येण षष्ठोऽध्यायोऽथ वर्ण्यते ॥

प्रथमे मण्डले त्रयोदशानुवाके सप्त सूक्तानि व्याकृतानि । ' इन्द्रो मदाय ' इति नवर्चमष्टमं सूक्तम् । अत्रानुक्रम्यते—' इन्द्रो नव ' इति । ' ऋषिश्चान्यस्मादृषेः ' ( अनु. १२. २ ) इति परिभाषया रहूगणपुत्रस्य गोतमस्य अनुवृत्तेः अस्य[2] सूक्तस्य स ऋषिः । पूर्वसूक्ते ' पाङ्क्तं हि ' इत्युक्तत्वात् तुल्यादिपरिभाषयेदमुत्तरं च सूक्तं पाङ्क्तम् । अनादेशपरिभाषयेन्द्रो देवता ॥ पृष्ठ्यस्य पञ्चमेऽहनि निष्केवल्यशस्त्रे इदं सूक्तम् । सूत्रितं च—' प्रेदं ब्रह्मेन्द्रो मदाय सत्रा मदास इति निष्केवल्यम् ' ( आश्व. श्रौ. ७. १२ ) इति । आरम्भणीये चातुर्विंशिकेऽहनि माध्यंदिने सवने ब्राह्मणाच्छंसिनः शस्त्रे ' इन्द्रो मदाय ' इति आद्यस्तृचो वैकल्पिकः स्तोत्रियः । ' होत्रकाणाम् ' इति खण्डे सूत्रितम्—' इन्द्रो मदाय वावृधे मदे मदे हि नो ददिः ' ( आश्व. श्रौ. ७. ४ ) इति । महाव्रते निष्केवल्ये उत्तरपक्षे ' इन्द्रो मदाय ' इत्येका शंसनीया । तथैव पञ्चमारण्यके सूत्रितम्— ' इन्द्रो मदाय वावृध इति पङ्क्तिः सूढदोहाः ' ( ऐ. आ. ५. २. २ ) इति ॥

इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
तमिन्महत्स्वाजिषूतेमर्भे हवामहे स वाजेषु प्र नोऽविषत् ॥ १ ॥

इन्द्रः । मदाय । ववृधे । शवसे । वृत्रऽहा । नृऽभिः । तम् । इत् । महत्ऽसु । आजिषु ।
उत । ईम् । अर्भे । हवामहे । सः । वाजेषु । प्र । नः । अविषत् ॥ १ ॥

[v]वृत्रहा वृत्रस्यावरकस्य वृष्टिनिरोधकस्य मेघस्यासुरस्य वा हन्ता । यद्वा आवरकाणां शत्रूणां हन्ता [v]इन्द्रो [v]मदाय हर्षार्थं [v]शवसे । बलनामैतत् । बलार्थं च [v]नृभिः यज्ञस्य नेतृभिर्ऋत्विग्भिः [v]ववृधे स्तोत्रशस्त्ररूपाभिः स्तुतिभिः प्रवर्धितो बभूव । स्तुत्या हि देवता प्राप्तबला सती प्रवर्धते । [v]तमित् तमेवेन्द्रं [v]महत्सु प्रभूतेषु [v]आजिषु संग्रामेषु [v]हवामहे अस्माकं रक्षणायाह्वयामहे । [v]उत अपि च [v]ईम् एनम् [v]अर्भे अल्पे संग्रामे हवामहे । अस्माभिराहूतः [v]सः च इन्द्रः [v]वाजेषु संग्रामेषु [v]नः अस्मान् [v]प्र [v]अविषत् प्रावतु प्रकर्षेण रक्षतु ॥ ववृधे । वृधेः कर्मणि लिट्[3] । संहितायामभ्यासस्य 'अन्येषामपि दृश्यते' इति दीर्घत्वम् । तुजादित्वे हि तूतुजान इतिवत् पदकाले दीर्घः श्रूयेत[4] । नृभिः । 'सावेकाचः०' इति प्राप्तस्य विभक्त्युदात्तत्वस्य ' नृ चान्यतरस्याम् ' इति प्रतिषेधः । हवामहे । ह्वयतेर्लटि 'ह्वः' इति अनुवृत्तौ ' बहुलं छन्दसि ' इति संप्रसारणम् । शपि गुणावादेशौ । अविषत् । ' अव रक्षणे ' । लेटि

---

१. त-द-ध-ल-श-स—दाशतय्याः । * क्ष-ट-ढ—अष्टके प्रथमे दाशतय्यां पञ्चम ईरितः । २. क्ष-ट-ढ—स एव ऋषिः । ३. क्ष—लिटि । ४. च-न-श-स—श्रूयते ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अडागमः । 'इतश्च लोपः०' इति इकारलोपः । 'सिब्बहुलं लेटि' इति सिप् । तस्य आर्धधातुकत्वात् वलादिलक्षण इट् ॥

असि हि वीर सेन्योऽसि भूरि परादादिः ।
असि दभ्रस्य चिद्वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु ॥ २ ॥

असि । हि । वीर । सेन्यः । असि । भूरि । पराऽदादिः ।
असि । दभ्रस्य । चित् । वृधः । यजमानाय । शिक्षसि । सुन्वते । भूरि । ते । वसु ॥२॥

हे Vवीर शत्रुक्षेपणकुशलेन्द्र त्वं Vसेन्यः Vअसि सेनार्हो भवसि । त्वमेकोऽपि सेनासदृशो भवसीत्यर्थः । Vहि यस्मादेवं तस्मात् Vभूरि प्रभूतं शत्रूणां धनं Vपरादादिः पराता शत्रूणां पराङ्मुखं यथा भवति तथा आदाता Vअसि भवसि । Vदभ्रस्य Vचित् । अल्पनामैतत् । अल्पस्यापि तव स्तोतुः Vवृधः वर्धयिता Vअसि । तथा Vयजमानाय यागं कुर्वते Vसुन्वते सोमाभिषवं कुर्वते पुरुषाय Vशिक्षसि अपेक्षितं धनं ददासि । शिक्षतिर्दानकर्मा । यस्मात् Vते तव Vवसु धनं Vभूरि बहुलमक्षयं धनं विद्यते तस्मात् ददासीति भावः ॥ परादादिः । 'डुदाञ् दाने' । 'आदृगमहनजनः०' इति किप्रत्ययः । लिङ्वद्भावात् द्विर्वचने ह्रस्वत्वम् । 'आतो लोप इटि च' इति आकारलोपः । वृधः । वृधेरन्तर्भावितण्यर्थात् इगुपधलक्षणः कः । सुन्वते । 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम् ॥

यदुदीरत आजयो धृष्णवे धीयते धना ।
युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधोऽस्माँ इन्द्र वसौ दधः ॥३॥

यत् । उत्ऽईरते । आजयः । धृष्णवे । धीयते । धना ।
युक्ष्व । मदऽच्युता । हरी इति । कम् । हनः । कम् । वसौ । दधः । अस्मान् । इन्द्र । वसौ । दधः॥३॥

अत्रेदमाख्यानम्[1] । रहूगणपुत्रो गोतमः कुरुसृञ्जयानां राज्ञां पुरोहित आसीत् । तेषां राज्ञां परैः सह युद्धे सति स ऋषिरनेन सूक्तेनेन्द्रं स्तुत्वा स्वकीयानां जयं प्रार्थयामासेति । तस्य च तत्पुरोहितत्वं वाजसनेयिभिराम्नातम्—'गोतमो ह वै राहूगण उभयेषां कुरुसृञ्जयानां पुरोहित आसीत्' इति । Vयत् यदा Vआजयः संग्रामाः Vउदीरते उद्गच्छन्ति उत्पद्यन्ते तदानीं Vधना धनं Vधृष्णवे यो धृष्णुर्धर्षयिता शत्रूणां जेता भवति तस्मै Vधीयते निधीयते । जयतो धनं भवतीत्यर्थः । हे इन्द्र त्वं तादृशेषु युद्धेषु प्रवृत्तेषु[2] Vमदच्युता शत्रूणां मदस्य गर्वस्य च्यावयितारौ Vहरी त्वदीयावश्वौ Vयुक्ष्व रथे योजय । योजयित्वा च Vकं कंचित् राजानं तव परिचरणमकुर्वन्तं Vहनः हन्याः । कंचन त्वां परिचरन्तं Vवसौ वसुनि[3] धने Vदधः स्थापयसि । अतो जयपराजययोस्त्वमेव कारयितासि । तस्मात् हे Vइन्द्र Vअस्मान् अस्मदीयान् राज्ञः Vवसौ धने Vदधः स्थापय ॥ उदीरते । 'ईर गतौ' । आदादिकः । अनु

---

१. क्ष-ट-ढ–अत्रेदमुपाख्यानम् । २. क्ष–वृत्तेषु । ३. क्ष–'वसुनि' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दात्तेत्त्वात् लसार्वधातुकानुदात्तत्वे धातुस्वर एव शिष्यते। यद्वृत्तयोगादनिघातः[1]। धना। 'सुपां सुलुक्०' इति डादेशः। युक्ष्व। 'युजिर् योगे'। अन्तर्भावितण्यर्थात् लोटि 'बहुलं छन्दसि' इति विकरणस्य लुक्। 'ह्यचोऽतस्तिङः' इति संहितायां दीर्घत्वम्। हनः। हन्तेर्लेटि सिपि अडागमः। हनश्च दधश्चेति चार्थप्रतीतेः 'चादिलोपे विभाषा' इति प्रथमायास्तिङ्विभक्तेः निघातप्रतिषेधः। वसौ। लिङ्व्यत्ययः। दधः। 'दध धारणे'। लेटि व्यत्ययेन परस्मैपदम्॥

क॒र्त्वा म॒हाँ अ॑नु॒ष्व॒धं भी॒म आ व॑वृ॒धे श॒वः।
श्रि॒य ऋ॒ष्व उ॑पा॒कयो॑र्नि शि॒प्री ह॑रि॒वान्द॑धे हस्त॒योर्व॒ज्रमा॑य॒सम्॥ ४॥

क॒र्त्वा। म॒हान्। अ॒नु॒ऽस्व॒धम्। भी॒मः। आ। व॒वृ॒धे। श॒वः।
श्रि॒ये। ऋ॒ष्वः। उ॒पा॒कयोः। नि। शि॒प्री। ह॒रि॒ऽवान्। द॒धे। हस्त॑योः। व॒ज्रम्। आ॒य॒सम्॥४॥

[v]कृत्वा कर्मणा प्रज्ञया वा [v]महान् सर्वाधिकः [v]भीमः शत्रूणां भयंकरः इन्द्रः [v]अनुष्वधम्। स्वधा इति अन्ननाम। स्वधायाम्। विभक्त्यर्थे अव्ययीभावः। सोमलक्षणस्यान्नस्य पाने सतीत्यर्थः। [v]शवः आत्मीयं बलम् [v]आ [v]ववृधे[2] आभिमुख्येन प्रावर्धयत्। तदनन्तरम् [v]ऋष्वः दर्शनीयः [v]शिप्री। शिप्रे हनू नासिके वा। तद्युक्तः [v]हरिवान् हरिनामकाश्वोपेत इन्द्रः [v]उपाकयोः अन्तिकनामैतत्। समीपवर्तिनोः [v]हस्तयोः बाह्वोः [v]आयसम् अयोमयं [v]वज्रं [v]श्रिये संपदर्थं [v]नि [v]दधे निदधाति स्थापयति[3]। सोमपानेन हृष्टः प्रबल इन्द्रः शत्रूणां हननाय हस्ते वज्रं गृह्णातीति तात्पर्यार्थः॥ कृत्वा। 'जसादिषु च्छन्दसि वावचनम्' इति नाभावस्य विकल्पितत्वादभावः। आयसम्। 'तस्य विकारः' इति अण्प्रत्ययः॥

आ प॑प्रौ पार्थि॒वं रजो॑ बद्बधे रोच॒ना दि॒वि।
न त्वावाँ॑ इन्द्र॒ कश्च॒न न जा॒तो न ज॑नि॒ष्य॒तेऽति॒ विश्वं॑ ववक्षिथ॥ ५॥

आ। प॒प्रौ। पार्थि॑वम्। रजः॑। ब॒द्ब॒धे। रो॒च॒ना। दि॒वि।
न। त्वाऽवा॑न्। इ॒न्द्र॒। कः। च॒न। न। जा॒तः। न। ज॒नि॒ष्य॒ते। अति॑। विश्व॑म्। व॒व॒क्षि॒थ॥५॥

इन्द्रः स्वतेजसा [v]पार्थिवं पृथिव्याः संबन्धि वस्तुजातं[4] [v]रजः अन्तरिक्षलोकं च [v]आ [v]पप्रौ आपूरयति। तथा [v]दिवि द्युलोके [v]रोचना रोचमानानि दीप्तानि नक्षत्राणि [v]बद्बधे बबन्ध स्थापितवान्। अतो हे [v]इन्द्र [v]त्वावान् त्वत्सदृशः [v]कश्चन [v]न [v]जातः नोऽप्युत्पन्नोऽस्ति। [v]न च [v]जनिष्यते। उत्पत्स्यमानोऽपि नास्ति। तादृशस्त्वं [v]विश्वं सर्वं रक्षितव्यं जगत् [v]अति [v]ववक्षिथ अतिशयेन वोढुमिच्छसि। सर्वस्य जगतो निर्वाहको भवसीत्यर्थः॥ पप्रौ। 'प्रा पूरणे'। लिटि 'आत औ णलः' (पा. सू. ७. १. ३४) इति औकारादेशः। पार्थिवम्। 'पृथिव्या ञाञौ' (पा. सू. ४. १. ८५. २)

---

१. क्ष-ट-ढ–यद्वृत्तान्नित्यमिति निघातप्रतिषेधः; स–यद्वृत्तयोगान्न निघातः। २. क्ष-न–ववृधे। ३. क्ष–'स्थापयति' नास्ति। ४. क्ष-ट-ढ–वस्तु।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति अल्प्रत्ययः । जित्त्वादाद्युदात्तत्वम् । रजः । रजन्त्यस्मिन्[1] गन्धर्वादय इति रजः अन्तरिक्षम् । ' रञ्ज रागे ' । असुनि ' रजकरजनरजःसूपसंख्यानम् ' ( का. ६. ४. २४. ४ ) इति नलोपः । बद्धधे । ' बध बन्धने ' । लिटि व्यत्ययेन हलादिशेषाभावः । एकहल्मध्यगतत्वाभावात् एत्वाभ्यासलोपावपि न स्तः । पादादित्वात् निघाताभावः । त्वावान् । ' वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम् ' इति वतुप् । ' आ सर्वनाम्नः ' इति आत्वम् । ववक्षिथ । ' वह प्रापणे ' । अस्मात् इच्छासनि ' सन्यतः ' इति इत्वस्य ' सर्वे विधयश्छन्दसि विकल्प्यन्ते ' इति अभावः । सनन्तात् लिटि ' °अमन्त्रे° ' इति निषेधात् आम्प्रत्ययाभावः ॥ ॥ १ ॥

यो अर्यो मर्तभोजनं परादर्दाति दाशुषे ।
इन्द्रो अस्मभ्यं शिक्षतु वि भजा भूरिं ते वसु भक्षीय तव राधसः ॥ ६ ॥

यः । अर्यः । मर्तऽभोजनम् । पराऽददाति । दाशुषे ।
इन्द्रः । अस्मभ्यम् । शिक्षतु । वि । भज । भूरिं । ते । वसु । भक्षीय । तव । राधसः ॥ ६ ॥

Vअर्यः स्वामी पालयिता Vयः इन्द्रः Vमर्तभोजनं सर्वैर्मनुष्यैरुपभोज्यमन्नं Vदाशुषे चरुपुरोडाशादीनि दत्तवते यजमानाय Vपराददाति प्रयच्छति सः Vइन्द्रः Vअस्मभ्यं Vशिक्षतु तादृशमन्नं ददातु । अवशिष्टपादद्वयं प्रत्यक्षकृतम् । हे इन्द्र अस्मभ्यं दातुं धनं Vवि Vभज विभक्तं कुरु । यतः Vते तव Vवसु धनं Vभूरि बहुलमसंख्यातं अतः Vतव Vराधसः धनस्यैकदेशं Vभक्षीय भजेय प्राप्नुयाम् ॥ पराददाति । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । ' तिङि चोदात्तवति ' इति गतेः अनुदात्तत्वम् । दाशुषे । ' दाश्च दाने ' । ' दाश्वान् साह्वान्° ' इति क्वसुप्रत्ययान्तो निपात्यते । चतुर्थ्येकवचने ' वसोः संप्रसारणम् ' इति संप्रसारणम् । ' शासिवसिघसीनां च ' इति षत्वम् । भक्षीय । ' भज सेवायाम् ' । प्रार्थनायां लिङि तस्य ' छन्दस्युभयथा ' इति आर्धधातुकत्वात् शबभावः सलोपाभावश्च । ' एकाचः ' इति इट्प्रतिषेधः । आगमानुदात्तत्वे प्रत्ययस्वर एव[2] शिष्यते । पूर्वपदस्यासमानवाक्यगतत्वात् निघाताभावः ' समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः ' इति वचनात् ॥

चातुर्विंशिकेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिनो ' मदेमदे हि नो ददिः ' इति वैकल्पिकोऽनुरूपस्तृचः । ' होत्रकाणाम् ' इति खण्डे सूत्रितम्—' मदेमदे हि नो ददिः सुरूपकृत्नुमूतये ' ( आश्व. श्रौ. ७. ४ ) इति ॥

मदेमदे हि नो ददिर्यूथा गवामृजुक्रतुः ।
सं गृभाय पुरू शतोभयाहस्त्या वसु शिशीहि राय आ भर ॥ ७ ॥

मदेऽमदे । हि । नः । ददिः । यूथा । गवाम् । ऋजुऽक्रतुः ।
सम् । गृभाय । पुरु । शता । उभयाहस्त्या । वसु । शिशीहि । रायः । आ । भर ॥ ७ ॥

---

१. क्ष–रजन्तेऽस्मिन् । २. क्ष–' एव ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]मदेमदे सोमपानेन हर्षेहर्षे सति [v]ऋजुक्रतुः ऋजुकर्मा स इन्द्रः [v]नः अस्मभ्यं [v]गवां [v]यूथा यूथानि [v]ददिः [v]हि गोयूथानां दाता खलु। हे इन्द्र स त्वं [v]पुरु पुरूणि प्रभूतानि [v]शता शतसंख्याकानि अपरिमितानीत्यर्थः। [v]वसु वसूनि धनानि [v]उभयाहस्त्या उभाभ्यां हस्ताभ्यां [v]सं [v]गृभाय अस्मभ्यं दातुं सम्यग्गृहाण[1]। [v]शिशीहि अस्मांस्तीक्ष्णीकुरु। निशितबुद्धियुक्तान् कुर्वित्यर्थः। [v]रायः धनानि हस्तयोः स्थितानि [v]आ [v]भर आहर प्रयच्छ ॥ ददिः। 'डुदाञ् दाने'। 'आदृगमहनजनः०' इति किप्रत्ययः। यूथा। 'शेश्छन्दसि बहुलम्' इति शेर्लोपः। गवाम्। 'सावेकाचः०' इति प्राप्तस्य 'न गोश्वन्साववर्ण०' इति प्रतिषेधः। गृभाय। 'ग्रह उपादाने'। लोटि हौ 'छन्दसि शायजपि' (पा. सू. ३. १. ८४) इति श्नाप्रत्ययस्य शायजादेशः। 'हृग्रहोर्भः०' इति भत्वम्। उभयाहस्त्या। उभयहस्तशब्दादुत्तरस्य तृतीयाद्विवचनस्य 'सुपां सुलुक्०' इति डयादेशः। 'अन्येषामपि दृश्यते' इति पूर्वपदस्य दीर्घत्वम्। समासान्तोदात्तत्वे उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम्। वसु। 'सुपां सुलुक्०' इति विभक्तेर्लुक्। शिशीहि। 'शो तनूकरणे'। 'बहुलं छन्दसि' इति विकरणस्य श्लुः। 'आदेचः०' इति आत्वम्। 'इत्' इत्यनुवृत्तौ 'बहुलं छन्दसि' इति अभ्यासस्य इत्वम्। 'ई हल्यघोः' इति धातोः ईत्वम्। पादादित्वात् निघाताभावः। रायः। 'ऊडिदम्०' इति विभक्तेरुदात्तत्वम् ॥

मादयस्व सुते सचा शवसे शूर राधसे।
विद्मा हि त्वा पुरूवसुमुप कामान्त्ससृज्महेऽथा नोऽविता भव ॥ ८ ॥

मादयस्व। सुते। सचा। शवसे। शूर। राधसे।
विद्म। हि। त्वा। पुरुऽवसुम्। उप। कामान्। ससृज्महे। अथ। नः। अविता। भव ॥८॥

हे [v]शूर शौर्यवन्निन्द्र [v]सुते सोमेऽभिषुते सति आगत्य [v]सचा अस्माकं सखा सन् [v]मादयस्व तेन सोमेन तृप्तो भव। किमर्थम्। [v]शवसे बलार्थं [v]राधसे अस्माकं धनार्थं च। [v]त्वा त्वां [v]पुरूवसुं बहुधनं [v]विद्म [v]हि वयं जानीमः खलु। अतः अस्मदीयान् [v]कामान् मात्रा गवा वत्सानिव त्वया [v]उप [v]ससृज्महे हि त्वया खल्वेकीकुर्मः। [v]अथ अनन्तरं [v]नः अस्माकम् [v]अविता अभिलषितफलप्रदानेन रक्षिता [v]भव ॥ मादयस्व। 'मद तृप्तियोगे'। चुरादिरात्मनेपदी। अदुपदेशात् लसार्वधातुकानुदात्तत्वे णिच एव स्वरः शिष्यते। ससृज्महे। 'सृज विसर्गे'। 'बहुलं छन्दसि' इति विकरणस्य श्लुः। प्रत्ययाद्युदात्तत्वम्। अत्रापि हिशब्दानुषङ्गात् 'छन्दस्यनेकमपि साकाङ्क्षम्' (पा. सू. ८. १. ३५) इति निघातप्रतिषेधः ॥

एते त इन्द्र जन्तवो विश्वं पुष्यन्ति वार्यम्।
अन्तर्हि ख्यो जनानामर्यो वेदो अदाशुषां तेषां नो वेद आ भर ॥ ९ ॥

एते। ते। इन्द्र। जन्तवः। विश्वम्। पुष्यन्ति। वार्यम्।
अन्तः। हि। ख्यः। जनानाम्। अर्यः। वेदः। अदाशुषाम्। तेषाम्। नः। वेदः। आ। भर ॥९॥

---

१. क्ष-संगृहाण।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे Vइन्द्र Vते तव स्वभूताः Vएते Vजन्तवः यजमानलक्षणा जनाः Vविश्वं सर्वं Vवार्यं सर्वैः संभजनीयं हविः Vपुष्यन्ति वर्धयन्ति । Vअदाशुषां हविषामदातॄणां Vजनानाम् Vअन्तः मध्ये विद्यमानं Vवेदः धनम् Vअर्यः सर्वेषां स्वामी त्वं Vख्यः Vहि पश्यसि हि जानासीत्यर्थः । Vतेषाम् अयजमानानां Vवेदः धनं Vनः अस्मभ्यम् Vआ Vभर आहर प्रयच्छेति यावत् । अयजमानेषु विद्यमानं धनं यागानुपयुक्तत्वात् व्यर्थमेव भवेत् । अतस्तस्य धनस्य सार्थकत्वाय तदीयं धनमपहृत्य यजमानेभ्यः प्रयच्छेति तात्पर्यार्थः[1] ॥ ख्यः । ' ख्या प्रकथने ' । अयं दर्शनार्थोऽपि । वर्तमाने छान्दसो लुङ् । ' अस्यतिवक्ति° ' इत्यादिना च्लेः अङादेशः । ' आतोलोप इटि च ' इति आकारलोपः । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । ' हि च ' इति निघातप्रतिषेधः ॥ ॥ २ ॥

' उपो षु ' इति षड्चं नवमं सूक्तं गोतमस्यार्षमैन्द्रम् । अन्त्या जगती । आद्याः[2] षडुक्तयः । अनुक्रान्तं च –' उपो षु षड् जगत्यन्तम् ' इति । सूक्तविनियोगो लैङ्गिकः ॥ षोडशिशस्त्रे आद्या ' सुसंदृशम् ' इत्यादिके द्वे ऋचौ च विनियुज्यन्ते । ' अथ षोडशी ' इति खण्डे सूत्रितम्–' उपो षु शृणुही गिरः सुसंदृशं त्वा वयं मघवन्नित्येका द्वे च षड्क्तौ ' ( आश्व. श्रौ. ६. २ ) इति ॥

उपो षु शृणुही गिरो मघवन्मातथाइव ।
यदा नः सूनृतावतः कर आदर्थयास इद्योजा न्विन्द्र ते हरी ॥ १ ॥

उपो इति । सु । शृणुहि । गिरः । मघऽवन् । मा । अतथाःऽइव ।
यदा । नः । सूनृताऽवतः । करः । आत् । अर्थयासे । इत् । योज । नु । इन्द्र । ते । हरी इति ॥१॥

हे Vमघवन् धनवन्निन्द्र Vगिरः अस्मदीयाः स्तुतीः Vउपो उपैव Vसु Vशृणुहि उपगत्य सम्यक् शृणु । Vअतथाइव पूर्वं यथाविधस्त्वं तद्विपरीतः Vमा भूः । अस्मासु पूर्वं यथानुग्रहबुद्धियुक्तस्तथाविध एव भवेत्यर्थः । अपि च Vनः अस्मान् Vसूनृतावतः । प्रियसत्यात्मिका वाक् सूनृता । तया स्तुतिरूपया वाचा युक्तान् Vयदा Vकरः करोषि Vआत् अनन्तरं त्वमपि Vअर्थयासे Vइत् अर्थयसे एव याचयसे[3] एव न तूदास्से । अस्माभिः प्रयुक्ताः स्तुतीस्त्वमपि स्वीकरोषीत्यर्थः । अतो हे Vइन्द्र Vते Vहरी त्वदीयावश्वौ Vनु क्षिप्रं Vयोज रथे योजय ॥ शृणुहि । ' उतश्च प्रत्ययाच्छन्दसि वावचनम् ' इति वचनात् ' उतश्च प्रत्ययात्° ' इति हेः लुगभावः । अतथाइव । तथेवाचरति तथाति । ' सर्वप्रातिपदिकेभ्य इयेके ' (का. ३. १. ११. २) इति क्विप् । तथातेः अप्रत्ययः । न तथा इव अतथाइव । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । करः । ' डुकृञ् करणे ' । लुङि ' कृमृदरुहिभ्यश्छन्दसि ' इति च्लेः अङादेशः । ननु अङः सतिशिष्टत्वात् चित्स्वरेण[4] अन्तोदात्तेन भवितव्यम् । तर्हि लङि व्यत्ययेन शप् । ननु ' डुकृञ् करणे ' इति भूवादौ पठ्यते । अतो व्यत्ययः कस्मात् क्रियते इति चेत् नैवम् । यस्मादस्य धातोस्तत्र पाठः अनार्षः । तथा हि–' कः करत्करति° ' इत्यत्र यदाहतुः न्यासकारहरदत्तौ व्यत्ययेन शप् इति तस्मादस्य धातोर्भूवादौ पाठो नास्तीति गम्यते । किंच यद्ययं पठ्येत करत् इत्येवमादिरूपसिद्ध्यर्थं ' कृमृदरुहिभ्यश्छन्दसि ' इति करोतेः अङ्विधानमनर्थकं स्यात् । अस्मात् लङि शपि अस्य रूपस्य सिद्धिः[5] । लङ्लुङोरर्थभेदात् लुङि एतद्रूपसिद्ध्ये कर्तव्यम् अङ्विधानमिति चेन्न । ' छन्दसि लुङ्लङ्लिटः ' इति

---

१. क्ष–तात्पर्यम् । २. क्ष–अन्याः । ३. क्ष–न-स–याचसे । ४. क्ष–तत्स्वरेण । ५. क्ष-ट-ढ–सिद्धेः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

लुङादीनामेकत्र विधानेन अर्थभेदाभावात् इत्यनेन प्रकारेणास्माभिर्धातुवृत्तावयं धातुर्निराकृतः। अतो व्यत्ययेन इति सिद्धम्। अर्थयासे। 'अर्थ याच्ञायाम्'। चुरादिरात्मनेपदी। लेटि आडागमः। योज। 'युजिर् योगे'। ण्यन्तात् लोटि 'छन्दस्युभयथा' इति शप आर्धधातुकत्वात् 'णेरनिटि' इति णिलोपः। 'ब्यचोऽतस्तिङः' इति संहितायां दीर्घत्वम्॥

**अक्षन्नमीमदन्त ह्यव प्रिया अधूषत।**
**अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी॥ २॥**

अक्षन्। अमीमदन्त। हि। अव। प्रियाः। अधूषत।
अस्तोषत। स्वऽभानवः। विप्राः। नविष्ठया। मती। योज। नु। इन्द्र। ते। हरी इति॥२॥

हे [V]इन्द्र त्वया दत्तानि अन्नानि [V]अक्षन् यजमाना भुक्तवन्तः। भुक्त्वा च [V]अमीमदन्त [V]हि तृप्ताश्चासन्। [V]प्रियाः स्वकीयास्तनूः [V]अव [V]अधूषत अकम्पयन्। अतिशयितरसास्वादनेन वक्तुमशक्नुवन्तः शरीराण्यकम्पयन्। तदनन्तरं [V]स्वभानवः स्वायत्तदीप्तयः [V]विप्राः मेधाविनस्ते [V]नविष्ठया नवितृतमया [V]मती मत्या स्तुत्या [V]अस्तोषत अस्तुवन्। अन्यत्पूर्ववद्योज्यम्॥ अक्षन्। अदेर्लुङि 'लुङ्सनोर्घस्लृ' (पा. सू. २. ४. ३७) इति घस्लादेशः। 'मन्त्रे घस०' इत्यादिना च्लेर्लुक्। 'गमहन०' इत्यादिना उपधालोपः। 'खरि च' इति चर्त्वम्। 'शासिवसिघसीनां च' इति षत्वम्। अडागम उदात्तः। अमीमदन्त। 'मद तृप्तियोगे'। चुरादिरात्मनेपदी। लुङि च्लेः चङि णिलोपोपधाह्रस्वत्वद्विर्भावसन्वद्भावेत्वदीर्घाः। अधूषत। 'धूञ् कम्पने'। लुङि सिचि व्यत्ययेन गुणाभावः। यद्वा 'छन्दस्युभयथा' इति सिचः सार्वधातुकत्वेन ङित्त्वात् 'क्ङिति च' इति प्रतिषेधः। अथवा 'धू विधूनने'। तौदादिकः। कुटादिः। अस्मात् कर्मणि लुङि 'गाङ्कुटादिभ्यः०' इति सिचो ङित्त्वात् गुणाभावः। नविष्ठया। 'णु स्तुतौ'। करणभूताया अपि स्तुतेः स्वव्यापारे कर्तृत्वात् तृच्। तदन्तात् 'तुश्छन्दसि' इति इष्टन्प्रत्ययः। 'तुरिष्टेमेयःसु' इति तृलोपः। मती। 'सुपां सुलुक्०' इति तृतीयायाः पूर्वसवर्णदीर्घत्वम्। 'मन्त्रे वृषेषपचमन०' इति क्तिनः उदात्तत्वम्॥

महापितृयज्ञे 'सुसंदृशम्' इत्येषाहवनीयोपस्थाने विनियुक्ता। सूत्रितं च—'आहवनीयं सुसंदृशं त्वेति षड्क्त्या' (आश्व. श्रौ. २. १९) इति॥

**सुसंदृशं त्वा वयं मघवन्वन्दिषीमहि।**
**प्र नूनं पूर्णवन्धुरः स्तुतो याहि वशाँ अनु योजा न्विन्द्र ते हरी॥ ३॥**

सुऽसंदृशम्। त्वा। वयम्। मघऽवन्। वन्दिषीमहि।
प्र। नूनम्। पूर्णऽवन्धुरः। स्तुतः। याहि। वशान्। अनु। योज। नु। इन्द्र। ते। हरी इति॥३॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे vमघवन् vइन्द्र vसुसंदृशं सुष्ठु अनुग्रहदृष्ट्या सर्वस्य द्रष्टारं vत्वा त्वां vवयं vवन्दिषीमहि स्तवीमहि[1]। स्तुतिकर्तारो भूयास्मेत्याशास्यते। अस्माभिर्वन्दिभिः vस्तुतः स्वं vपूर्णवन्धुरः स्तोतृभ्यो देयैर्धनैः पूरितेन रथेन युक्तः सन् vवशान् कामयमानानन्यान् यजमानान्प्रति vनूनं vप्र vयाहि अवश्यं प्रतिष्ठस्व। योजेत्यादि पूर्ववत्॥ वन्दिषीमहि। 'वदि अभिवादनस्तुत्योः'। आशीर्लिङ्। 'लिङाशिषि' (पा. सू. ३. ४. ११६) इति तस्य आर्धधातुकत्वेन लसार्वधातुकस्वराभावे प्रत्ययाद्युदात्तत्वम्। मघवन् इत्यस्य 'आमन्त्रितं पूर्वमविद्यमानवत्' इति अविद्यमानवत्त्वे सति पादादित्वात् निघाताभावः॥

स घा॒ तं वृष॑णं॒ रथ॒मधि॑ तिष्ठाति गो॒विद॑म्।
यः पात्रं॑ हारियो॒जनं॑ पू॒र्णमि॑न्द्र॒ चिके॑तति॒ योजा॒ न्वि॑न्द्र॒ ते॒ हरी॑॥ ४॥

सः। घ॒। तम्। वृष॑णम्। रथ॑म्। अधि॑। तिष्ठा॒ति॒। गो॒ऽविद॑म्।
यः। पात्र॑म्। हा॒रि॒ऽयो॒ज॒नम्। पू॒र्णम्। इ॒न्द्र॒। चिके॑तति। योज॑। नु। इ॒न्द्र॒। ते॒। हरी॒ इति॑॥४॥

vस vघ स खल्विन्द्रः vवृषणं कामाभिवर्षकं vगोविदं गवां लम्भयितारं vतं vरथम् vअधि vतिष्ठाति ईदृशे रथेऽधितिष्ठतु आरूढो भवतु। हे vइन्द्र vयः रथः vहारियोजनम् एतत्संज्ञकं धानामिश्रितं vपूर्णं सोमेन पूर्णं vपात्रं vचिकेतति ज्ञापयति। तं रथमधितिष्ठेति पूर्वेणान्वयः। अधिष्ठाय च त्वदीयावश्वौ क्षिप्रं योजय॥ घ। 'ऋचि तुनुघ०' इति दीर्घः। रथम्। 'अधिशीङ्स्थासां कर्म' (पा. सू. १. ४. ४६) इति अधिकरणस्य कर्मसंज्ञा। तिष्ठाति। तिष्ठतेर्लेटि आडागमः। चिकेतति। 'कित ज्ञाने'। लेटि अडागमः। जुहोत्यादित्वात् शपः श्लुः। 'बहुलं छन्दसीति वक्तव्यम्' (का. ७. ३. ८७. १) इति वचनात् 'नाभ्यस्तस्याचि पिति०' इति लघूपधगुणप्रतिषेधो न भवति॥

यु॒क्तस्ते॑ अस्तु दक्षि॒ण उ॒त स॒व्यः श॑तक्रतो।
तेन॑ जा॒यामुप॑ प्रि॒यां म॑न्दा॒नो या॒ह्यन्ध॑सो॒ योजा॒ न्वि॑न्द्र॒ ते॒ हरी॑॥ ५॥

यु॒क्तः। ते॒। अ॒स्तु॒। द॒क्षि॒णः। उ॒त। स॒व्यः। श॒त॒क्र॒तो॒ इति॑ शतऽक्रतो।
तेन॑। जा॒याम्। उप॑। प्रि॒याम्। म॒न्दा॒नः। या॒हि॒। अन्ध॑सः। योज॑। नु। इ॒न्द्र॒। ते॒। हरी॒ इति॑॥५॥

हे vशतक्रतो बहुकर्मवन्निन्द्र[2] vते त्वदीये रथे vदक्षिणः दक्षिणपार्श्वस्थोऽश्वः vयुक्तः vअस्तु। vउत अपि च vसव्यः वामपार्श्वस्थोऽपि युक्तः अस्तु। vतेन रथेन vअन्धसः सोमलक्षणस्यान्नस्य पानेन vमन्दानः मत्तस्त्वं vप्रियां प्रीणयित्रीं vजायाम् vउप vयाहि। सा यत्र वर्तते तत्र गच्छेत्यर्थः। तदर्थं हे vइन्द्र त्वदीयावश्वौ रथे क्षिप्रं योजय। अनयोत्तरया च पीतसोमस्येन्द्रस्य स्वगृहं प्रति प्रस्थानं[3] प्रतिपाद्यते॥ मन्दानः। 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु'। लिटः कानच्। द्विर्वचनप्रकरणे

---

१. क्ष–स्तवाम;। २. क्ष-न-स–बहुकर्मन्निन्द्र। ३. क्ष–प्रस्थापनम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' छन्दसि वेति वक्तव्यम् ' इति द्विर्वचनाभावः । अन्धसः । ' अद भक्षणे ' । ' अदेर्नुम् धश्च ' ( उ. सू. ४.६४५ ) इति असुन्, धातोः नुमागमो धकारान्तादेशश्च ॥

अन्त्येष्वहःसु हारियोजनस्य ' युनज्मि ' इत्येषा याज्या । सूत्रितं च—' युनज्मि ते ब्रह्मणा केशिना हरी इति याज्यानुवाक्ये अन्त्येष्वहःसु ' ( आश्व. श्रौ. ६. ११ ) इति ॥

युनज्मि ते ब्रह्मणा केशिना हरी उप प्र याहि दधिषे गभस्त्योः ।
उत्त्वा सुतासो रभसा अमन्दिषुः पूषण्वान्वज्रिन्त्समु पत्न्यामदः ॥ ६ ॥

युनज्मि । ते । ब्रह्मणा । केशिना । हरी इति । उप । प्र । याहि । दधिषे । गभस्त्योः ।
उत् । त्वा । सुतासः । रभसाः । अमन्दिषुः । पूषण्ऽवान् ।
वज्रिन् । सम् । ऊँ इति । पत्न्या । अमदः ॥ ६ ॥

हे इन्द्र [v]केशिना केशयुक्तौ शिखावन्तौ [v]ते [v]हरी त्वदीयावश्वौ [v]ब्रह्मणा स्तोत्ररूपेण मन्त्रेण [v]युनज्मि रथे संयोजयामि । तेन रथेन [v]उप [v]प्र [v]याहि त्वद्गृहमुपगच्छ[3] । [v]गभस्त्योः । बाहुनामैतत् । बाह्वोरश्वबन्धकान् रश्मीन् [v]दधिषे धारयस्व । [v]त्वा त्वां [v]सुतासः यज्ञेऽभिषुताः सोमाः [v]रभसाः वेगवन्तः । तीव्राः क्षिप्रं मदकारिण इत्यर्थः । [v]उत् [v]अमन्दिषुः उत्कृष्टमदयुक्तमकार्षुः । हे [v]वज्रिन् अतस्त्वं स्वगृहं गत्वा [v]पूषण्वान् । अत्र पूषन्शब्दः पुष्टौ वर्तते । ' पुष्टिर्वै पूषा पुष्टिमेवावरुन्धे ' ( तै. ब्रा. २. ७. २. १ ) इति श्रुतेः । सोमपानजनितया पुष्ट्या युक्तः सन् [v]पत्न्या स्वभार्यया सह [v]समु [v]अमदः सम्यगेव तृप्तो भव ॥ केशिना । केशशब्दात् मत्वर्थीय इनिः । ' सुपां सुलुक्° ' इति विभक्तेः आकारः । [v]रभसाः । अर्शआदित्वात् अच् । अमन्दिषुः । व्ययत्ययेन परस्मैपदम् । पूषण्वान् । ' पुष पुष्टौ ' । ' श्वन्नुक्षन्° ' इत्यादौ पूषन्निति निपात्यते । तच्चात्र भावसाधनं द्रष्टव्यम् । पूषास्यास्तीति पूषण्वान् । ' मादुपधायाः° ' इति मतुपो वत्वम् । नलोपे ' अनो नुट् ' ( पा. सू. ८. २. १६ ) इति नुट् । ' ह्रस्वनुड्भ्यां मतुप् ' इति मतुप उदात्तत्वम् । अमदः । ' मदी हर्षे ' । ' छन्दसि लुङ्लङ्लिटः ' इति प्रार्थनायां लङ् । श्यनि प्राप्ते व्यत्ययेन शप् ॥ ॥ ३ ॥

' अश्वावति ' इति षड्ऋचं दशमं सूक्तं गोतमस्यार्षमैन्द्रं जागतम् । तथा चानुक्रान्तम्—' अश्वावति जागतम् ' इति । अतिरात्रे तृतीये पर्याये ब्राह्मणाच्छंसिशस्त्रे इदं सूक्तम् । सूत्रितं च—' अश्वावति प्रोग्रां पीतिं वृष्ण इयर्मि सत्यामिति याज्या ' ( आश्व. श्रौ. ६. ४ ) इति ॥

अश्वावति प्रथमो गोषु गच्छति सुप्रावीरिन्द्र मर्त्यस्तवोतिभिः ।
तमित्पृणक्षि वसुना भवीयसा सिन्धुमापो यथाभितो विचेतसः ॥ १ ॥

अश्वऽवति । प्रथमः । गोषु । गच्छति । सुप्रऽअवीः । इन्द्र । मर्त्यः । तव । ऊतिऽभिः ।
तम् । इत् । पृणक्षि । वसुना । भवीयसा । सिन्धुम् । आपः । यथा । अभितः । विऽचेतसः ॥ १ ॥

---

३. क्ष—त्वं गृहमुपगच्छ ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे vइन्द्र यः vमर्त्यः मनुष्यः vतवोतिभिः त्वदीयैः रक्षणैः vसुप्रावीः सुष्ठु प्ररक्षितो भवति स मर्त्यः vअश्वावति बहुभिरश्वैर्युक्ते गृहे वर्तमानः vगोषु प्राप्तव्येषु[1] vप्रथमः vगच्छति । सर्वेभ्यो यजमानेभ्यः पूर्वमेव गोमान् भवतीत्यर्थः । त्वं vतमित् तमेव पुरुषं vभवीयसा बहुतरेण भवितृतमेन वा शतसहस्रादिसंख्यायुक्तेन vवसुना धनेन vपृणक्षि संपृक्तं संपूर्णं करोषि । तत्र दृष्टान्तः । vविचेतसः विशिष्टज्ञानहेतुभूताः vआपः vयथा vअभितः सर्वासु दिक्षु vसिन्धुं समुद्रं पूरयन्ति तद्वत् ॥ अश्वावति । ' मन्त्रे सोमाश्व° ' इति मतौ दीर्घत्वम् । सुप्रावीः । ' अवितृस्तृतन्त्रिभ्य ईः '( उ. सू. ३. ४३८ ) इति अवतेः ईकारप्रत्ययः । ऊतिभिः । ' ऊतियूति° ' इत्यादिना क्तिनः उदात्तत्वम् । पृणक्षि । ' पृची संपर्के ' । रौधादिकः । भवीयसा । बहुशब्दात् ईयसुनि ' बहोर्लोपो भू च बहोः ' इति बहुशब्दस्य भूभावः ईयसुनः ईकारलोपश्च । अत्र तु छान्दसत्वात् ईकारलोपो न क्रियते भूभावश्च क्रियते । अथवा भवितृशब्दात् ' तुश्छन्दसि ' इति ईयसुन् । ' तुरिष्टेमेयःसु ' इति तृलोपः ॥

अपोनप्त्रीये होतृचमसेऽद्भिः पूर्यमाणे ' आपो न देवीः ' इत्येषानुवक्तव्या । सूत्रितं च—'आपो न देवीरुप यन्ति होत्रियमिति समाप्य' ( आश्व. श्रौ. ५. १ ) इति । ब्राह्मणं च भवति[2]–' आपो न देवीरुप यन्ति होत्रियमिति होतृचमसे समवनीयमानास्वन्वाह ' ( ऐ. ब्रा. २. २० ) इति ॥

आपो न देवीरुप यन्ति होत्रियमवः पश्यन्ति वितंतं यथा रजः ।
प्राचैर्देवासः प्र णयन्ति देवयुं ब्रह्मप्रियं जोषयन्ते वराइव ॥ २ ॥

आपः । न । देवीः । उप । यन्ति । होत्रियम् । अवः । पश्यन्ति । विऽततम् । यथा । रजः ।
प्राचैः । देवासः । प्र । नयन्ति । देवऽयुम् । ब्रह्मऽप्रियम् । जोषयन्ते । वराःऽइव ॥ २ ॥

vहोत्रियं होतुः स्वभूतं चमसं vदेवीः देव्यो द्योतमानाः vआपो vन यथा आपः vउप vयन्ति उपगच्छन्ति तद्वदुपरि वर्तमाना देवा एतमेव चमसम् vअवः अवस्तात् vपश्यन्ति । होतृचमसे अस्माकं सोमाभिषवाय आपः पूरिता इति तेषां दृष्टिरप्यस्मिन् संलग्नाभूत् । तत्र दृष्टान्तः । vविततं विस्तीर्णं vरजः ज्योतिः सूर्यसंबन्धि vयथा निरन्तरमवस्तात् पतति तद्वत् । vदेवयुं देवान् कामयमानमेतं चमसं vप्राचैः प्राचीनं यद्वा प्राञ्चनैः प्रगमनैः उत्तरवेद्यभिमुखं होमकाले vप्र vणयन्ति । होमार्थे[3] प्रणीतं vब्रह्मप्रियं ब्रह्मणा सोमलक्षणेनान्नेन प्रीतं संतृप्तं पूरितमित्यर्थः । vजोषयन्ते सर्वे देवास्तं चमसं सेवन्ते । vवराइव कन्यकाम् । यथा वरा ममेयं भविष्यति ममेयं भविष्यतीति कन्यकां सेवन्ते एवं देवा अपि ममायं सोमो ममायं सोम इत्यस्य पार्श्वे वर्तन्ते इत्यर्थः । एवम् अपोनप्त्रीयविनियोगानुसारेण योजितं मन्त्रस्यानुष्टेयार्थप्रकाशकत्वात् । यदा तु रात्रिपर्यायेऽस्या विनियोगः तदा[4] त्वेवं[4] व्याख्येयम् । हे इन्द्र देव्य आपो यथा निम्नदेशमुपगच्छन्ति एवं देवास्वदीयं स्तोत्रं शुश्रूषमाणाः होत्रियं होतृसंबन्धि धिष्ण्यस्थानमुपगच्छन्ति । उपगत्य च अवस्तात् पश्यन्ति विततं[5] ज्योतिरिव । देवयुं देवानात्मन इच्छन्तमेतं[6] शंसितारमागताः सर्वे देवाः प्राचीनं प्र णयन्ति अग्रतो धारयन्ति । ब्रह्मप्रियं स्तोत्रप्रियं त्वां शंसन्तं वराः कन्यका इव सेवन्ते ॥ होत्रियम् । होतृशब्दात् तस्येदमर्थे घप्रत्ययः । अवः । ' पूर्वाधरावराणामसि पुरधवश्चैषाम् ' इति

---

१. क्ष-ट-ढ-स–प्राप्तव्येषु पशुषु । २. च-छ-त-द-न-फ-श–' भवति ' नास्ति । ३. क्ष–होमार्थम् । ४. क्ष–तदैवम् । ५. क्ष–वितंतं विततम् । ६. क्ष-न-स–इच्छन्तमेनम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

असिप्रत्ययान्तोऽन्तोदात्तः । प्राचैः । उच्चैर्नीचैरितिवदव्ययम् । यद्वा प्रपूर्वात् अञ्चतेः ' घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थम् ' इति परिगणनस्योपलक्षणार्थत्वात् भावे कप्रत्ययः । ' अनिदिताम् ° ' इति नलोपः । जोषयन्ते । ' जुषी प्रीतिसेवनयोः ' । स्वात्मनः प्रयोज्यत्वात् हेतुमति णिच् ॥

प्रवर्ग्याभिष्टवे ' अधि द्वयोः ' इत्येषा । ' स्पृष्ट्वोदकम् ' इति खण्डे सूत्रितम्—' अधि द्वयोरदधा उक्थ्यं वचः शुक्रं ते अन्यद्यजतं ते अन्यत् ' ( आश्व. श्रौ. ४. ६ ) इति ॥ हविर्धान-प्रवर्तनेऽप्येषा । सूत्रितं च—' यमे इव यतमाने यदैतमधि द्वयोरदधा उक्थ्यं वच इत्यर्धर्चं आरमेत् ' ( आश्व. श्रौ. ४. ९ ) इति ॥

अधि द्वयोरदधा उक्थ्यं१ वचो यतस्रुचा मिथुना या सपर्यतः ।
असंयत्तो व्रते ते क्षेति पुष्यति भद्रा शक्तिर्यजमानाय सुन्वते ॥ ३ ॥

अधि । द्वयोः । अदधाः । उक्थ्यम् । वचः । यतऽस्रुचा । मिथुना । या । सपर्यतः । असम्ऽयत्तः । व्रते । ते । क्षेति । पुष्यति । भद्रा । शक्तिः । यजमानाय । सुन्वते ॥ ३ ॥

हे इन्द्र [V]द्वयोः हविर्धानयोः [V]उक्थ्यम् । उक्थं शस्त्रम् । तद्योग्यं [V]वचः ' युजे वाम् ' इत्यादिमन्त्ररूपं वचनम् [V]अधि [V]अदधाः निहितवानसि । ननु हविर्धानयोर्द्वयोः कथमेकमेव वचोऽधिनिधीयते इत्याशङ्क्य ब्राह्मणेनैवं व्याख्यातम्—' अधि द्वयोरदधा उक्थ्यं वच इति द्वयोर्ह्येतत्तृतीयं छदिरधिनिधीयत उक्थ्यं वच इति यदाह यज्ञियं वै कर्मोक्थ्यं वचो यज्ञमेवैतेन समर्धयति ' ( ऐ. ब्रा. १. २९ ) इति । तत्र यथा हविर्धानद्वये एकमेव तृतीयं छदिरधिनिधीयते एवं स्तोत्रमप्युभयोरेकं युक्तम् । उक्थं नाम यज्ञसंबन्धि शस्त्रं तद्योग्यं वचनमपि यज्ञियं कर्म । तस्य[1] यज्ञरूपयोर्हविर्धानयोर्यज्ञत्वसंपादनाय अधिनिधानात् यज्ञोऽपि समृद्धो भवति । कीदृशयोर्हविर्धानयोः । [V]यतस्रुचा । यताः संबद्धाः स्रुचो ग्रहचमसादिलक्षणानि पात्राणि ययोस्ते । [V]मिथुना युगलरूपेण वर्तमाने [V]या ये हविर्धाने त्वां [V]सपर्यतः पूजयतस्तयोरित्यर्थः । किंच ईदृग्रूपहविर्धानयुक्तो यजमानः [V]असंयत्तः शत्रुभिः सह युद्धार्थमनभिगतः सन् [V]ते [V]व्रते त्वदीये कर्मणि [V]क्षेति निवसति [V]पुष्यति च । प्रजया पशुभिश्च पुष्टो भवति च । [V]सुन्वते त्वद्देवत्ये यागे सोमाभिषवं कुर्वतो यजमानस्य [V]भद्रा कल्याणी [V]शक्तिः उत्कृष्टं बलं भवति । एतत्सर्वं हविर्धानयोरुक्थ्यस्य वचसोऽधिनिधानेन त्वया कृतमित्यर्थः ॥ यतस्रुचा । ' यम उपरमे ' । निष्ठायाम् ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । इदमादिषु त्रिषु पदेषु ' सुपां सुलुक्° ' इति विभक्तेः आकारः । सपर्यतः । ' सपर पूजायाम् ' । ' कण्ड्वादिभ्यो यक् ' । अदुपदेशात् लसार्वधातुकानुदात्तत्वे तस्यैव स्वरः शिष्यते । क्षेति । ' क्षि निवासगत्योः ' । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । सुन्वते । ' षष्ठ्यर्थे चतुर्थी वक्तव्या ' इति चतुर्थी । ' शतुरनुमः° ' इति विभक्तेरुदात्तत्वम् ॥

---

१. क्ष—तस्मात् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आदङ्गिराः प्रथमं दधिरे वय इद्धाग्नयः शम्या ये सुकृत्यया ।
सर्वं पणेः समविन्दन्त भोजनमश्वावन्तं गोमन्तमा पशुं नरः ॥ ४ ॥

आत् । अङ्गिराः । प्रथमम् । दधिरे । वयः । इद्धऽअग्नयः । शम्या । ये । सुऽकृत्यया ।
सर्वम् । पणेः । सम् । अविन्दन्त । भोजनम् । अश्वऽवन्तम् । गोऽमन्तम् । आ । पशुम् । नरः ॥४॥

यदा पणिभिर्गावोऽपहृतास्तदानीम् Vअङ्गिराः अङ्गिरसः Vप्रथमं पूर्वमग्रतः Vवयः हविर्लक्षणमन्नं Vदधिरे इन्द्रार्थं संपादितवन्तः । Vआत् अनन्तरं तादृशाः Vये अङ्गिरसः Vइद्धाग्नयः प्रज्वलिताग्नियुक्ताः सन्तः Vसुकृत्यया शोभनकरणोपेतया Vशम्या कर्मणा शोभनेन यागेनेन्द्रमयजन्निति शेषः । ते Vनरः यज्ञस्य नेतारोऽङ्गिरसः Vपणेः एतन्नाम्नोऽसुरस्य संबन्धि Vसर्वं Vभोजनं धनं Vसमविन्दन्त समलभन्त । कीदृशम् । Vअश्वावन्तं अश्वैर्युक्तं Vगोमन्तं गोभिर्युक्तम् । आकारः समुच्चये । गवाश्वव्यतिरिक्तमन्यत्पशुजातं च समविन्दन्त ॥ अङ्गिराः । ' सुपां सुलुक् ° ' इति जसः सुः । शम्या । शमी इति कर्मनाम । शाम्यत्यनया क्रियया दोषजातमिति शमी । करणे घञ् । ' नोदात्तोपदेशस्य मान्तस्यानाचमेः ' ( पा. सू. ७. ३. ३४ ) इति वृद्धिप्रतिषेधः । गौरादित्वात् ङीष् । व्यत्ययेनाद्युदात्तत्वम् । सुकृत्यया । शोभनं कृत्यं करणं यस्यां सा तथोक्ता । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् ॥

यज्ञैरथर्वा प्रथमः पथस्तते ततः सूर्यो व्रतपा वेन आजनि ।
आ गा आजदुशना काव्यः सचा यमस्य जातममृतं यजामहे ॥ ५ ॥

यज्ञैः । अथर्वा । प्रथमः । पथः । तते । ततः । सूर्यः । व्रतऽपाः । वेनः । आ । अजनि ।
आ । गाः । आजत् । उशना । काव्यः । सचा । यमस्य । जातम् । अमृतम् । यजामहे ॥५॥

पणिभिरपहृतासु गोषु Vअथर्वा एतत्संज्ञः ऋषिः Vयज्ञैः इन्द्रदेवत्यैरनुष्ठितैर्यागैः Vपथः गोसंबन्धिनो मार्गान् Vप्रथमः Vतते ततुते । सर्वेभ्य ऋषिभ्यः पूर्वमेव कृतवानित्यर्थः । Vततः तदनन्तरं Vव्रतपाः व्रतानां कर्मणां पालयिता Vवेनः कान्तः Vसूर्यः सूर्यरूप इन्द्रः Vआ Vअजनि गवां प्रदर्शनाय आविरभूत् । ततोऽथर्वा ताः Vगाः Vआ Vआजत् आभिमुख्येन प्राप्नोत् । तादृशस्येन्द्रस्य Vकाव्यः कवेः पुत्रः Vउशना भृगुः Vसचा असुरनिरसनाय सहायोऽभूत् । Vयमस्य असुराणां नियमनार्थं Vजातं प्रादुर्भूतम् Vअमृतं मरणरहितं तमिन्द्रं Vयजामहे हविर्भिः पूजयामः ॥ पथः । शसि ' भस्य टेर्लोपः ' इति टिलोपः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । तते । ' तनु विस्तारे ' । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपः । अजनि । ' जनी प्रादुर्भावे ' । ' दीपजनबुध° ' ( पा. सू. ३. १. ६१ ) इत्यादिना कर्तरि लुङि च्लेः चिण् । आजत् । ' अज गतिक्षेपणयोः ' ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

बर्हिर्वा यत्स्वपत्याय वृज्यतेऽर्को वा श्लोकमाघोषते दिवि ।
ग्रावा यत्र वदति कारुरुक्थ्य१स्तस्येदिन्द्रो अभिपित्वेषु रण्यति ॥ ६ ॥

बर्हिः । वा । यत् । सुऽअपत्याय । वृज्यते । अर्कः । वा । श्लोकम् । आऽघोषते । दिवि ।
ग्रावा । यत्र । वदति । कारुः । उक्थ्यः । तस्य । इत् । इन्द्रः । अभिऽपित्वेषु । रण्यति ॥६॥

Vस्वपत्याय शोभनापतनहेतुभूताय कर्मणे Vबर्हिर्वा Vयत् यदा Vवृज्यते छिद्यते अध्वर्युणा यागार्थमाहियते Vअर्को Vवा स्तोत्रनिष्पादको होता वा Vश्लोकं स्तुतिरूपां वाचं Vदिवि द्योतमाने यज्ञे यदा Vआघोषते उच्चारयति । Vयत्र यस्मिन् काले Vग्रावा अभिषवार्थं प्रवृत्तः उपलः Vवदति शब्दं करोति । तत्र दृष्टान्तः । Vकारुरुक्थ्यः । लुप्तोपममेतत् । उक्थ्यस्य शस्त्रस्य शंसिता कारुः स्तोता यथाभिमतशब्दं करोति तद्वत् । Vतस्य पूर्वोक्तस्य सर्वस्य Vअभिपित्वेषु अभिप्राप्तिषु Vइन्द्रः Vरण्यति रमते । यद्वा । पूर्वोक्तानां बर्हिरादीनामभिप्राप्तिषु सतीष्विन्द्रो रण्यति अस्मदीयो यागो भविष्यतीति हर्षशब्दं करोति ॥ वृज्यते । ' वृजी वर्जने ' । अदुपदेशात् लसार्वधातुकानुदात्तत्वे यक एव स्वरः शिष्यते । ' निपातैर्यद्यदिहन्त° ' इति निघातप्रतिषेधः । आघोषते । ' घुषिर् विशब्दने ' । भौवादिकः । अत्रापि ' यत् ' इत्यस्य निपातस्यानुषङ्गात् निघाताभावः । रण्यति । ' रमु क्रीडायाम् ' । व्यत्ययेन श्यन् परस्मैपदं च । अन्त्यविकारश्छान्दसः । यद्वा रण शब्दार्थः । व्यत्ययेन श्यन् ॥ ॥ ४ ॥

' असावि ' इति विंशत्यृचमेकादशं सूक्तम् । अत्रानुक्रम्यते—' असावि विंशतिः पळनुष्टुभ औष्णिहपाङ्क्तगायत्रत्रैष्टुभास्तृचाः प्रगाथः ' इति । आदितः षडनुष्टुभः सप्तम्याद्यास्तिस्र उष्णिहः । दशम्याद्यास्तिस्रः पङ्क्तयः त्रयोदश्याद्यास्तिस्रो गायत्र्यः । षोडशाद्यास्तिस्रस्त्रिष्टुभः । एकोनविंशी बृहती विंशी सतोबृहती । अनुवर्तनात् गोतम ऋषिः । अनादेशपरिभाषया इन्द्रो देवता । सूक्तविनियोगो लिङ्गादवगन्तव्यः । अविहृतषोडशिशस्त्रे आद्यौ तृचौ स्तोत्रियानुरूपौ । सूत्रितं च—' अथ षोडश्यसावि[1] सोम इन्द्र त इति स्तोत्रियानुरूपौ ' ( आश्व. श्रौ. ६. २ ) इति । आभिप्लविकेषूक्थ्येषु तृतीयसवनेऽच्छावाकस्येमावेव तृचौ वैकल्पिकौ स्तोत्रियानुरूपौ । ' एह्यू षु ' इति खण्डे सूत्रितम्—' असावि सोम इन्द्र त इममिन्द्र सुतं पिब ' ( आश्व. श्रौ. ७. ८ ) इति ॥

असावि सोम इन्द्र ते शविष्ठ धृष्णवा गहि ।
आ त्वा पृणक्त्विन्द्रियं रजः सूर्यो न रश्मिभिः ॥ १ ॥

असावि । सोमः । इन्द्र । ते । शविष्ठ । धृष्णो इति । आ । गहि ।
आ । त्वा । पृणक्तु । इन्द्रियम् । रजः । सूर्यः । न । रश्मिऽभिः ॥ १ ॥

हे Vइन्द्र Vते त्वदर्थं Vसोमः Vअसावि अभिषुतोऽभूत् । हे Vशविष्ठ अतिशयेन बलवन् अत एव Vधृष्णो शत्रूणां धर्षयितरिन्द्र Vआ Vगहि देवयजनदेशमागच्छ । आगतं च त्वाम् Vइन्द्रियं सोमपानेनोत्पन्नं प्रभूतं सामर्थ्यम् Vआ Vपृणक्तु आपूरयतु । Vरजः अन्तरिक्षं Vरश्मिभिः किरणैः Vसूर्यो Vन ।

---

१. क्ष-षोळश्यसावि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यथा सूर्यः पूरयति तद्वत् ॥ शविष्ठ । शवस्विन्शब्दात् इष्ठनि ' विन्मतोर्लुक् ' । ' टेः ' इति टिलोपः । पादादित्वात् निघाताभावः । गहि । गमेर्लोटि ' बहुलं छन्दसि ' इति शपो लुक् । ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपः । तस्य ' असिद्धवदत्रा भात् ' इति असिद्धवत्त्वात्[1] हेः लुगभावः ॥

इन्द्रमिद्धरी वहतोऽप्रतिधृष्टशवसम् ।
ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणाम् ॥ २ ॥

इन्द्रम् । इत् । हरी इति । वहतः । अप्रतिधृष्टऽशवसम् ।
ऋषीणाम् । च । स्तुतीः । उप । यज्ञम् । च । मानुषाणाम् ॥ २ ॥

vअप्रतिधृष्टशवसं केनाप्यप्रतिधर्षितबलम् । अहिंसितबलमित्यर्थः । vइन्द्रमित् इन्द्रमेव vऋषीणां वसिष्ठादीनां vमानुषाणाम् अन्येषां[2] मनुष्याणां[2] v च[3] vस्तुतीः vयज्ञं vच vहरी अश्वौ vउप vवहतः समीपं प्रापयतः । यत्र यत्र स्तुवन्ति यत्र यत्र यजन्ते तत्र सर्वत्रेन्द्रमश्वौ प्रापयतः इत्यर्थः ॥ मानुषाणाम् । ' मनोर्जातौ° ' इति मनुशब्दात् अञ् घुगागमश्च ॥

आ तिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी ।
अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ॥ ३ ॥

आ । तिष्ठ । वृत्रऽहन् । रथम् । युक्ता । ते । ब्रह्मणा । हरी इति ।
अर्वाचीनम् । सु । ते । मनः । ग्रावा । कृणोतु । वग्नुना ॥ ३ ॥

हे vवृत्रहन् शत्रूणां हन्तरिन्द्र vरथम् vआ vतिष्ठ आरोह । यस्मात् vते vहरी त्वदीयावश्वौ vब्रह्मणा स्तोत्रलक्षणेन मन्त्रेण vयुक्ता रथेऽस्माभिर्योजितौ तस्मात् त्वं[4] रथमातिष्ठ । vते vमनः त्वदीयं मनश्च vग्रावा अभिषवार्थं प्रवृत्तः पाषाणः vवग्नुना वचनीयेनाभिषवशब्देन vअर्वाचीनम् अस्मदभिमुखं vसु vकृणोतु सुष्ठु करोतु ॥ युक्ता । ' सुपां सुलुक् ° ' इति आकारः । वग्नुना । ' वचेर्गश्च ' ( उ. सू. ३. ३१३ ) इति नुप्रत्ययो गकारश्चान्तादेशः ॥

इमामिन्द्र सुतं पिब ज्येष्ठममर्त्यं मदम् ।
शुक्रस्य त्वाभ्यक्षरन्धारा ऋतस्य सादने ॥ ४ ॥

इमम् । इन्द्र । सुतम् । पिब । ज्येष्ठम् । अमर्त्यम् । मदम् ।
शुक्रस्य । त्वा । अभि । अक्षरन् । धाराः । ऋतस्य । सदने ॥ ४ ॥

---

१. श–असिद्धत्वात् । २. स–' अन्येषां मनुष्याणाम् ' नास्ति । ३. क्ष–' च ' नास्ति । ४. क्ष–तम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]इन्द्र [v]सुतम् अभिषुतम् [v]इमं सोमं [v]पिब । कीदृशम् । [v]ज्येष्ठम् अतिशयेन प्रशस्यं [v]मदं मदकरं [v]अमर्त्यम् अमारकम् । सोमपानजन्यो मदो मदान्तरवन्मारको न भवतीत्यर्थः । तथा [v]ऋतस्य यज्ञस्य संबन्धिनि [v]सदने गृहे वर्तमानाः [v]शुक्रस्य दीप्तस्यास्य सोमस्य [v]धाराः त्वाम् [v]अभ्यक्षरन् आभिमुख्येन संचलन्ति त्वां प्राप्नुवन्ति[1] स्वयमेवागच्छन्तीत्यर्थः ॥ ज्येष्ठम् । प्रशस्यशब्दात् इष्ठनि 'ज्य च' ( पा. सू. ५. ३. ६१ ) इति ज्यादेशः । अक्षरन् । 'क्षर संचलने' । छान्दसो लङ् ॥

इन्द्राय नूनमर्चतोक्थानि च ब्रवीतन ।
सुता अमत्सुरिन्दवो ज्येष्ठं नमस्यता सहः ॥ ५ ॥

इन्द्राय । नूनम् । अर्चत । उक्थानि । च । ब्रवीतन ।
सुताः । अमत्सुः । इन्दवः । ज्येष्ठम् । नमस्यत । सहः ॥ ५ ॥

हे ऋत्विजः [v]इन्द्राय [v]नूनं क्षिप्रम् [v]अर्चत पूजनं कुरुत । एतदेव स्पष्टीक्रियते । [v]उक्थानि अप्रगीतमन्त्रसाध्यानि स्तोत्राणि [v]च [v]ब्रवीतन ब्रूत । [v]सुताः अभिषुताः [v]इन्दवः सोमाः च [v]अमत्सुः आगतमेनमिन्द्रं मत्तं कुर्वन्तु । अनन्तरं [v]ज्येष्ठं प्रशस्यतमं [v]सहः सहस्विनं बलवन्तं तमिन्द्रं [v]नमस्यत नमस्कुरुत ॥ ब्रवीतन । ब्रवीतेर्लोटि 'तप्तनप्तनथनाश्च' इति तनबादेशः । अमत्सुः । 'मदी हर्षे' । छान्दसः प्रार्थनायां लुङ् । आगमानुशासनस्यानित्यत्वात् इडभावः । नमस्यत । 'नमोवरिवश्चित्रङः०' इति क्यच् । सहः । 'लुगकारेकाररेफाश्च वक्तव्याः' ( पा. सू. ४. ४. १२८. २ ) इति मत्वर्थीयस्य लुक् ॥ ॥ ५ ॥

नकिष्ट्वद्रथीतरो हरी यदिन्द्र यच्छसे ।
नकिष्ट्वानु मज्मना नकिः स्वश्व आनशे ॥ ६ ॥

नाकिः । त्वत् । रथिऽतरः । हरी इति । यत् । इन्द्र । यच्छसे ।
नकिः । त्वा । अनु । मज्मना । नकिः । सुऽअश्वः । आनशे ॥ ६ ॥

हे [v]इन्द्र [v]यत् यस्मात् त्वं [v]हरी एतत्संज्ञावश्वौ [v]यच्छसे रथे योजयसि तस्मात् त्वत्तोऽन्यः[2] कश्चित् [v]रथीतरः अतिशयेन रथवान् [v]नकिः नास्ति । अन्येषामीदृगश्वयुक्तस्थाभावात् । [v]त्वा त्वामनुलक्ष्य [v]मज्मना । बलनामैतत् । बलेन सदृशोऽपि [v]नकिः न ह्यस्ति । [v]स्वश्वः शोभनाश्वोऽन्यश्च त्वां [v]नकिः [v]आनशे न प्राप । इन्द्रस्य बलाश्वयोरसाधारणत्वादिन्द्रसदृशो बलवानश्ववान् लोके कश्चिदपि नास्तीत्यर्थः ॥ नकिष्ट्वत् । 'युष्मत्तत्ततक्षुःष्वन्तःपादम्' इति षत्वम् । रथीतरः । अतिशयेन रथी । तरपि 'ईद्रथिनः' ( पा. सू. ८. २. १७. १ ) इति ईकारान्तादेशः । अवग्रहसमये छान्दसं ह्रस्वत्वम् । यच्छसे । यमेर्व्यत्ययेन आत्मनेपदम् । स्वश्वः । बहुव्रीहौ 'आद्युदात्तं द्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् । आनशे । 'अश्नोतेश्च' इति अभ्यासादुत्तरस्य नुट् ॥

---

१. क्ष–प्राप्तुम् । २. क्ष–त्वत् त्वत्तोऽन्यः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आभिप्लविकेषूक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिनः ' य एक इद्विदयते ' इति वैकल्पिकः स्तोत्रिय-स्तृचः । ' एह्यू षु ' इति खण्डे सूत्रितम्–' सखाय आशिषामहि य एक इद्विदयते ' ( आश्व. श्रौ. ७. ८ ) इति । महाव्रतेऽपि निष्केवल्ये औष्णिहतृचाशीतावयं तृचो विनियुक्तः । तथैव पञ्चमारण्यके सूय्यते–' य एक इद्विदयत आ याह्यद्रिभिः सुतम् ' ( ऐ. आ. ५. २. ५ ) इति ॥

**य एक इद्विदयते वसु मर्ताय दाशुषे । ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ॥ ७ ॥**

यः । एकः । इत् । विऽदयते । वसु । मर्ताय । दाशुषे । ईशानः । अप्रतिऽस्कुतः । इन्द्रः । अङ्ग ॥ ७ ॥

Vयः इन्द्रः Vएकः Vइत् एक एव Vदाशुषे हविर्दत्तवते Vमर्ताय मनुष्याय यजमानाय Vवसु धनं Vविदयते विशेषेण ददाति । Vअङ्ग इति क्षिप्रनाम । Vअप्रतिष्कुतः परैरप्रतिशब्दितः प्रतिकूलशब्दरहित इत्यर्थः । एवंभूतः सः Vइन्द्रः क्षिप्रम् Vईशानः सर्वस्य जगतः स्वामी भवति ॥ विदयते । ' दय दानगतिरक्षणहिंसादानेषु ' । शपः पित्त्वात् अनुदात्तत्वम् । तिङश्च लसार्वधातुकस्वरेण धातुस्वरः एव शिष्यते । यद्वृत्तयोगादनिघातः[1] । अप्रतिष्कुतः । ' कु शब्दे ' । प्रतिकूलं कूयते शब्द्यते इति प्रतिष्कुतः । पारस्करादेराकृतिगणत्वात् सुट् । सुषामादित्वात् षत्वम् । नञ्समासे अव्ययपूर्व-पदप्रकृतिस्वरत्वम् ॥

**कदा मर्तमराधसं पदा क्षुम्पमिव स्फुरत् । कदा नः शुश्रवद्गिर इन्द्रो अङ्ग ॥ ८ ॥**

कदा । मर्तम् । अराधसम् । पदा । क्षुम्पम्ऽइव । स्फुरत् ।

कदा । नः । शुश्रवत् । गिरः । इन्द्रः । अङ्ग ॥ ८ ॥

Vअराधसं हविर्लक्षणेन राधसा धनेन रहितम् । अयष्टारमित्यर्थः । एवंविधं Vमर्तं मनुष्यम् इन्द्रः Vपदा पादेन Vक्षुम्पमिव अहिच्छत्रकमिव[2] Vकदा Vस्फुरत् स्फुरिष्यति वधिष्यति । यथा अहिच्छत्रं मण्डलाकारेण शयानं कञ्चिदनायासेन हन्ति एवमिन्द्रोऽपि कदा अस्मच्छत्रून् हनिष्यतीत्यर्थः । स्फुरतिर्वधकर्मा । ' स्फुरति स्फुलति ' ( नि. २. १९. १५ ) इति वधकर्मसु पठितत्वात् । Vनः अस्माकं यष्टॄणां Vगिरः स्तुतिलक्षणा वाचः Vइन्द्रः Vकदा कस्मिन्काले Vअङ्ग क्षिप्रं Vशुश्रवत् श्रोष्यतीति वितर्क्यते । अत्र निरुक्तम्–' क्षुम्पमहिच्छत्रकं भवति यत् क्षुभ्यते । कदा मर्तमनाराधयन्तं पादेन क्षुम्पमिवा-वस्फुरिष्यति । कदा नः श्रोष्यति गिर इन्द्रोऽङ्ग । अङ्गेति क्षिप्रनाम ' ( निरु. ५. १७ ) इति ॥ पदा । पादशब्दस्य ' पद्दन्० ' इत्यादिना पदादेशः । ' ऊडिदम् ' इति विभक्तेः उदात्तत्वम् । क्षुम्पमिव । ' क्षुभ संचलने ' । अस्मात् कर्मणि घञि बहुलवचनात् धातोर्नुमागमः । वर्णव्यापत्त्या भकारस्य पकारः । स्फुरत् । ' स्फुर संचलने ' । ' छन्दसि लुङ्लङ्लिटः ' इति लडर्थे लङ् । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । शुश्रवत् । ' श्रु श्रवणे ' । लेटि अडागमः । ' बहुलं छन्दसि ' इति शपः श्लुः ॥

---

१. क्ष–यद्वृत्तान्नित्यम् इति निघातप्रतिषेधः । २. क्ष-ट–अहिच्छत्रमिव ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यश्चिद्धि त्वा बहुभ्य आ सुतावाँ आविवासति। उग्रं तत्पत्यते शव इन्द्रो अङ्ग॥९॥

यः। चित्। हि। त्वा। बहुऽभ्यः। आ। सुतऽवान्। आऽविवासति।

उग्रम्। तत्। पत्यते। शवः। इन्द्रः। अङ्ग॥ ९॥

[V]बहुभ्यः मनुष्येभ्यः सकाशात् [V]यश्चिद्धि य एव खलु यजमानः [V]सुतावान् अभिषुतसोमयुक्तः सन् हे इन्द्र [V]त्वा त्वाम् [V]आविवासति परिचरति। विवासतिः परिचरणकर्मा। [V]तत् तस्मै यजमानाय यत् [V]उग्रम् उद्गूर्णं [V]शवः बलम् [V]इन्द्रः [V]अङ्ग क्षिप्रं [V]पत्यते पातयति प्रापयति॥ तत्। 'सुपां सुलुक्°' इति चतुर्थ्याः लुक्। पत्यते। 'पत्लृ गतौ'। अस्मात् अन्तर्भावितण्यर्थात् व्यत्ययेन श्यन्॥

चातुर्विंशिकेऽहनि माध्यंदिने[1] सवने[1] अच्छावाकस्य 'स्वादोरित्था विषूवतः' इति वैकल्पिकः स्तोत्रियस्तृचः। 'होत्रकाणाम्' इति खण्डे सूत्रितम्–'यः सत्राहा विचर्षणिः स्वादोरित्था विषूवतः' (आश्व. श्रौ. ७. ४.) इति। पृष्ठ्यस्य पञ्चमेऽहनि निष्केवल्येऽप्ययं तृचोऽनुरूपः। 'स्तोमे वर्धमाने' इति खण्डे सूत्रितम्–'स्वादोरित्था विषूवत उप नो हरिभिः सुतम्' (आश्व. श्रौ. ७. १२) इति॥

स्वादोरित्था विषूवतो मध्वः पिबन्ति गौर्यः।

या इन्द्रेण सयावरीर्वृष्णा मदन्ति शोभसे वस्वीरनु स्वराज्यम्॥ १०॥

स्वादोः। इत्था। विषुऽवतः। मध्वः। पिबन्ति। गौर्यः।

याः। इन्द्रेण। सऽयावरीः। वृष्णा। मदन्ति। शोभसे। वस्वीः। अनु। स्वऽराज्यम्॥१०॥

[V]स्वादोः स्वादुभूतस्य रसयुक्तस्य [V]इत्था [V]विषूवतः इत्थमनेन प्रकारेण सर्वयज्ञेषु व्याप्तियुक्तस्य [V]मध्वः मधुररसस्य सोमस्य। 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी। एवंविधं सोमं [V]गौर्यः गौरवर्णा गावः [V]पिबन्ति। [V]याः गावः [V]शोभसे शोभार्थं [V]वृष्णा कामाभिवर्षकेण [V]इन्द्रेण [V]सयावरीः सह यान्त्यो गच्छन्त्यः सत्यः [V]मदन्ति हृष्टा भवन्ति। ता इन्द्रपीतस्य सोमस्य शेषं पिबन्तीत्यर्थः। [V]वस्वीः पयःप्रदानेन निवासकारिण्यस्ता गावः [V]स्वराज्यं स्वस्य स्वकीयस्येन्द्रस्य यद्राज्यं राजत्वं तदनुलक्ष्यावस्थिता इति शेषः॥ विषूवतः। 'विषू व्याप्तौ'। अस्मात् औणादिकः कुप्रत्ययः। ततो मतुप्। 'ह्रस्वनुड्भ्यां मतुप्' इति मतुपः उदात्तत्वम्। 'अन्येषामपि दृश्यते' इति संहितायां[2] दीर्घः। व्यत्ययेन मतोर्वत्वम्। मध्वः। 'जसादिषु च्छन्दसि वावचनम्' इति 'घेर्ङिति' इति गुणाभावे यणादेशः। गौर्यः। 'षिद्गौरादिभ्यश्च' इति ङीष्। जसि यणादेशे 'उदात्तस्वरितयोर्यणः°' इति परस्यानुदात्तस्य स्वरितत्वम्। सयावरीः। 'या प्रापणे'। 'आतो मनिन्°' इति वनिप्। 'वनो र च' इति ङीब्रेफौ। मदन्ति। 'मदी हर्षे'। श्यनि प्राप्ते व्यत्ययेन शप्। वस्वीः। 'वस निवासे'। 'शृस्वृस्निहि°' इत्यादिना वसेः उप्रत्ययः। 'धान्ये नित्' इत्यनुवृत्तेः

---

१. क्ष–माध्यंदिनसवने। २. क्ष–सांहितिकः।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आद्युदात्तत्वम्। 'वोतो गुणवचनात्' इत्यत्र 'गुणवचनात् ङीबाद्युदात्तार्थम्' (का. ४. १. ४४. १) इति वचनात् वसुशब्दात् ङीपि यणादेशः। जसि 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम्। स्वस्य राज्यं स्वराज्यम्। 'अकर्मधारये राज्यम्' (पा. सू. ६. २. १३०) इत्युत्तरपदाद्युदात्तत्वम् ॥ ॥ ६ ॥

ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः।
प्रिया इन्द्रस्य धेनवो वज्रं हिन्वन्ति सायकं वस्वीरनु स्वराज्यम् ॥ ११ ॥

ताः। अस्य। पृशनऽयुवः। सोमम्। श्रीणन्ति। पृश्नयः।
प्रियाः। इन्द्रस्य। धेनवः। वज्रम्। हिन्वन्ति। सायकम्। वस्वीः। अनु। स्वऽराज्यम् ॥ ११ ॥

ताः पूर्वोक्ताः अस्य इन्द्रस्य पृशनायुवः स्पर्शनकामाः पृश्नयः नानावर्णा गावः इन्द्रेण पातव्यं सोमं पयसा श्रीणन्ति मिश्रीकुर्वन्ति। इन्द्रस्य प्रियाः प्रीतिहेतुभूतास्ताः धेनवः सायकं शत्रूणामन्तकारकं वज्रम् आयुधं हिन्वन्ति शत्रुषु प्रेरयन्ति। इन्द्रो यथा शत्रुषु वज्रं प्रेरयति तथेन्द्रस्य मदमुत्पादयन्तीत्यर्थः। अन्यत् पूर्ववत्॥ हिन्वन्ति। हिविः प्रीणनार्थः। इदित्त्वात् नुम्। सायकम्। 'षो अन्तकर्मणि'। ण्वुलि आत्वे युगागमः॥

ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः।
व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये वस्वीरनु स्वराज्यम् ॥ १२ ॥

ताः। अस्य। नमसा। सहः। सपर्यन्ति। प्रऽचेतसः।
व्रतानि। अस्य। सश्चिरे। पुरूणि। पूर्वऽचित्तये। वस्वीः। अनु। स्वऽराज्यम् ॥ १२ ॥

प्रचेतसः प्रकृष्टज्ञानाः ताः गावः अस्य इन्द्रस्य सहः बलं नमसा स्वकीयेन पयोरूपेणान्नेन सपर्यन्ति परिचरन्ति। पुरूणि बहूनि अस्य इन्द्रस्य व्रतानि शत्रुवधादिरूपाणि वीर्यकर्माणि सश्चिरे सिषेविरे ज्ञायन्ते[1] इत्यर्थः। किमर्थम्। पूर्वचित्तये युयुत्सूनां शत्रूणां पूर्वमेव प्रज्ञापनाय। अनेन युध्यमाना वृत्रादयः सर्वे मरणं प्राप्ताः किमर्थं भवद्भिः प्राणास्त्यज्यन्ते[2] इति तेषां बोधनायेत्यर्थः। अन्यत् पूर्ववत्॥ सश्चिरे। 'सश्च गतौ'। व्यत्ययेनात्मनेपदम्। पूर्वचित्तये। 'चिती संज्ञाने'। भावे क्तिन्। मस्जृवृधादित्वात् पूर्वपदान्तोदात्तत्वम्॥

चातुर्विंशिकेऽहनि प्रातःसवने ब्राह्मणाच्छंसिनः शस्त्रे 'इन्द्रो दधीचः' इति षडहस्तोत्रिय-संज्ञकस्तृचः। सूत्रितं च-'आदह स्वधामन्वित्येका द्वे चेन्द्रो दधीचो अस्थभिः' (आश्व. श्रौ. ७. २) इति॥

---

१. क्ष-ट-ज्ञातवत्यः। २. क्ष-ट-ढ-प्राणस्त्यज्यते।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः । जघान नवतीर्नव ॥ १३ ॥

इन्द्रः । दधीचः । अस्थऽभिः । वृत्राणि । अप्रतिऽस्कुतः । जघान । नवतीः । नव ॥१३॥

अत्र शाट्यायनिन इतिहासमाचक्षते–' आथर्वणस्य दधीचो जीवतो दर्शनेनासुराः पराबभूवुः । अथ तस्मिन् स्वर्गतेऽसुरैः पूर्णा पृथिव्यभवत् । अथेन्द्रः तैरसुरैः सह योद्धुमशक्नुवंस्तस्यर्षिमन्विच्छन् स्वर्गं गत इति शुश्राव । अथ पप्रच्छ तत्रत्यान् नेह किमस्य किंचित्परिशिष्टमङ्गमस्तीति । तस्मा अवोचन् अस्त्येतदाश्वं शीर्ष येन शिरसाश्विभ्यां मधुविद्यां प्राब्रवीत् । तत्तु न विद्म यत्राभवदिति । पुनरिन्द्रोऽब्रवीत् । तदन्विच्छतेति । तद्वान्वैषिषुः । तच्छर्यणावत्यनुविद्याजह्रुः । शर्यणावद्ध वै नाम कुरुक्षेत्रस्य जघनार्धे सरः स्यन्दते । तस्य शिरसोऽस्थिभिरिन्द्रोऽसुराञ्जघान ' इति । [v]अप्रतिष्कुतः परैरप्रतिशब्दितः प्रतिकूलशब्दरहितः [v]इन्द्रः आथर्वणस्य [v]दधीचः एतत्संज्ञकस्य ऋषेः [v]अस्थभिः अश्वशिरःसंबन्धिभिरस्थिभिः [v]नवतीर्नव नवसंख्याका नवतीर्दशोत्तराष्टशतसंख्याकाः । तथा हि । लोकत्रयवर्तिनो देवाञ्जेतुमादावासुरी माया त्रिधा संपद्यते । त्रिविधा[1] अतीतानागतवर्तमानकालभेदेन तत्कालवर्तिनो देवाञ्जेतुं पुनरपि प्रत्येकं त्रिगुणिता भवति। एवं नव संपद्यते[2]। पुनरप्युत्साहादिशक्तित्रयरूपेण त्रैगुण्ये सति सप्तविंशतिः संपद्यते[3] । पुनः सात्त्विकादिगुणत्रयभेदेन त्रैगुण्ये सत्येकोत्तराशीतिः संपद्यते[4] । एवं चतुर्भिस्त्रिकैर्गुणिताया मायाया दशसु दिक्षु प्रत्येकमवस्थाने सति नव नवतयः संपद्यन्ते । एवंविधमायारूपाणि [v]वृत्राणि आवरकाण्यसुरजातानि [v]जघान हतवान् ॥ दधीचः । दधि अञ्चतीति दध्यङ् । अञ्चतेः ' ऋत्विक्° ' इत्यादिना क्विन् । ' अनिदिताम्° ' इति नलोपः । षष्ठ्येकवचने ' अचः ' इति अकारलोपे ' चौ ' इति दीर्घत्वम् । उदात्तनिवृत्तिस्वरेण विभक्त्युदात्तत्वे प्राप्ते तदपवादतया ' चौ ' इति पूर्वपदस्य अन्तोदात्तत्वं प्राप्तम् ' अञ्चेश्छन्दस्यसर्वनामस्थानम् ' ( पा. सू. ६. १. १७० ) इति पुनर्विभक्त्युदात्तत्वविधानेन तद्बाध्यते । अस्थभिः । ' छन्दस्यपि दृश्यते ' ( पा. सू. ७. १. ७६ ) इति अनजादावपि अस्थिशब्दस्य अनङादेशः स चोदात्तः ॥

इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम् । तद्विदच्छर्यणावति ॥ १४ ॥

इच्छन् । अश्वस्य । यत् । शिरः । पर्वतेषु । अपऽश्रितम् । तत् । विदत् । शर्यणाऽवति ॥१४॥

[v]पर्वतेषु पर्ववत्सु गिरिषु [v]अपश्रितम् अपगत्य स्थितम् [v]अश्वस्य अश्वसंबन्धि दधीचः [v]यच्छिरः [v]इच्छन् इन्द्रो वर्तते [v]शर्यणावति एतत्संज्ञे[5] सरसि [v]तत् शिरः [v]विदत् अज्ञासीत् । ज्ञात्वा तदाहृत्य तदीयैरस्थिभिर्वृत्राणि जघानेति पूर्वस्यामृचि संबन्धः ॥ इच्छन् । ' इषु इच्छायाम् ' । तुदादित्वात् शप्रत्ययः । विदत् । वेत्तेर्लुङि व्यत्ययेन च्लेः अङादेशः । शर्यणावति। शर्यणा नाम देशाः। तेषामदूरभवं सरः शर्यणावत् । मध्वादिषु शर्यणशब्दस्य पाठात् ' मध्वादिभ्यश्च ' ( पा. सू. ४. २. ८६ ) इति चातुरर्थिको मतुप् । ' संज्ञायाम् ' इति मतुपो वत्वम् । ' मतौ बह्वचोऽनजिरादीनाम् ' ( पा. सू. ६. ३. ११९ ) इति दीर्घः ॥

---

१. क्ष-ट-ढ–त्रिविधा सा । २. क्ष–संपद्यन्ते । ३. क्ष-न–संपद्यन्ते । ४. क्ष–संपद्यन्ते । ५. क्ष-स–एतत्संज्ञके ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अतिमूर्तिनाम्न्येकाहे कर्तव्ये पूर्वमेवैकं मासं सौर्याचान्द्रमसीभ्यामिष्टिभ्यां यष्टव्यम् । तत्र पूर्वपक्षे चान्द्रमसीष्टिः । ' अत्राह गोः ' इति तस्यां प्रधानस्यानुवाक्या । ' अतिमूर्तिना ' इति खण्डे सूत्रितम्— ' अत्राह गोरमन्वत नवोनवो भवति जायमानः ' ( आश्व. श्रौ. ९. ८ ) इति ॥

**अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे ॥ १५ ॥**

अत्र । अह । गोः । अमन्वत । नाम । त्वष्टुः । अपीच्यम् । इत्था । चन्द्रमसः । गृहे ॥१५॥

Vअत्राह अस्मिन्नेव Vगोः गन्तुः Vचन्द्रमसो Vगृहे मण्डले Vत्वष्टुः दीप्तस्यादित्यस्य संबन्धि Vअपीच्यं रात्रावन्तर्हितं स्वकीयं यत् Vनाम तेजः तदादित्यस्य[1] रश्मयः[1] Vइत्था इत्थमनेन प्रकारेण Vअमन्वत अजानन् । उदकमये स्वच्छे चन्द्रबिम्बे सूर्यकिरणाः प्रतिफलन्ति । तत्र प्रतिफलिताः किरणाः सूर्ये यादृशीं संज्ञां लभन्ते तादृशीं चन्द्रेऽपि वर्तमाना लभन्ते इत्यर्थः । एतदुक्तं भवति । यद्रात्रावन्तर्हितं सौरं तेजस्तच्चन्द्रमण्डलं प्रविश्य अहनीव नैशं तमो निवार्य सर्वं प्रकाशयति । ईदृग्भूततेजसा युक्तः सूर्यश्च इन्द्र एव द्वादशस्वादित्येष्विन्द्रस्यापि परिगणितत्वात् । अतोऽहोरात्रयोः प्रकाशक इन्द्र एवेतीन्द्रस्तुतेः प्रतीयमानत्वादिन्द्रो देवतेत्येतदुपपन्नं भवति । ईदृग्भूतस्य तेजस आश्रयत्वेन चन्द्रमसः प्राधान्यविवक्षया चान्द्रमस्यामिष्टौ विनियोगोऽप्युपपद्यते । अत्र निरुक्तम्— ' अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते तदेतेनोपेक्षितव्यमादित्यतोऽस्य दीप्तिर्भवतीति । सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्व इत्यपि निगमो भवति । सोऽपि गौरुच्यते । अत्राह गौरमन्वतेति ' ( निरु. २. ६. ), ' अत्र ह गोः सममंसतादित्यरश्मयः स्वं नामापीच्यमपचितमपगतमपिहितमन्तर्हितं वा ' ( निरु. ४. २५ ) इति ॥ अमन्वत । ' मनु अवबोधने ' । अपीच्यम् । अपपूर्वात्[2] चिनोतेः ' अहयादयश्च ' ( उ. सू. ४. ५५१) इति निपातनात् यत् । अत एवाभिमतरूपसिद्धिः । यद्वा । अपिपूर्वात् अञ्चतेः ' ऋत्विक्° ' इत्यादिना क्विन् । ' अनिदिताम्° ' इति नलोपः । अपिगते[3] निगते[4] भवमपीच्यम् । ' भवे छन्दसि ' इति यत् । ' अचः ' इति अकारलोपे ' चौ ' इति दीर्घत्वम् । तित्स्वरितः । ' अपीच्योऽप्रकाशः ' इति भट्टभास्करमिश्रः । इत्था । इदंशब्दात् ' था हेतौ च च्छन्दसि ' इति प्रकारवचने थाप्रत्ययः । यदि तत्रेदंशब्दो नानुवर्तते[5] तदानीम् ' इदमस्थमुः ' ( पा. सू. ५. ३. २४ ) इति थमुप्रत्ययः । ' अव्ययादाप्सुपः ' ( पा. सू. २. ४. ८२ ) इति सुब्लुकं बाधित्वा ' सुपां सुलुक्° ' इति डादेशः । चन्द्रमसः । चन्द्रमाह्लादनं मिमीते निर्मिमीते इति चन्द्रमाः । ' चन्द्रे माङो डित् ' ( उ. सू. ४. ६६७ ) इति असिप्रत्ययः । दासीभारादिषु पठितत्वात् पूर्वपदप्रकृतिस्वरत्वम् । पूर्वपदं च ' स्फायितञ्चि° ' इत्यादिना रक्प्रत्ययान्तमन्तोदात्तम् ॥ ॥७॥

सर्वपृष्ठायामिष्टौ कायस्य हविषः ' को अद्य ' इति द्वे ऋचौ याज्यानुवाक्ये । सूत्रितं च— ' कायं दशमं को अद्य युङ्क्ते धुरि गा ऋतस्येति द्वे ' ( आश्व. श्रौ. ४. १२ ) इति ॥

---

१. क्ष-ट-ढ-न—तदादित्यरश्मयः । २. त-श—अपिपूर्वात् । ३. च-फ—अपगते । ४. क्ष-च-छ-ट-ढ-द-फ—निर्गते । ५. क्ष—नानुवर्तेत ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

को अद्य युङ्क्ते धुरि गा ऋतस्य शिमीवतो भामिनो दुर्हृणायून् ।
आसन्निषून्हृत्स्वसो मयोभून्य एषां भृत्यामृणधत्स जीवात् ॥ १६ ॥

कः । अद्य । युङ्क्ते । धुरि । गाः । ऋतस्य । शिमीऽवतः । भामिनः । दुःऽहृणायून् ।
आसन्ऽइषून् । हृत्सुऽअसः । मयःऽभून् । यः । एषाम् । भृत्याम् । ऋणधत् । सः । जीवात् ॥ १६ ॥

Vअद्य अस्मिन् कर्मणि Vऋतस्य गच्छतः इन्द्रसंबन्धिनो रथस्य Vधुरि अश्ववहनप्रदेशे Vगाः गतिमतोऽश्वान् Vकः Vयुङ्क्ते को नाम नियोक्तुं शक्नोति । न कोऽपीत्यर्थः । कीदृशानश्वान् । Vशिमीवतः वीर्यकर्मोपेतान् Vभामिनः तेजसा युक्तान् Vदुर्हृणायून् परैर्दुःसहेन क्रोधेन युक्तान् । हृणीयतिः क्रुध्यतिकर्मा । Vआसन्निषून् येषामासनि आस्ये मुखप्रदेशे शत्रूणां प्रहरणार्थमिषवो बाणा बद्धास्तान् Vहृत्स्वसः । हृत्सु शत्रूणां हृदयेष्वस्यन्ति स्वकीयं पादं क्षिपन्तीति हृत्स्वसः । Vमयोभून् मयसः सुखस्य भावयितॄन् । स्वकीयानां सुखप्रदानित्यर्थः । Vयः यजमानः Vएषाम् ईदृशानामश्वानां Vभृत्यां भरणक्रियां रथवाहनक्रियाम् Vऋणधत् समर्धयति स्तौतीति यावत् । Vसः यजमानः Vजीवात् जीवनवान्भवेत् ॥ यद्वा । क इति प्रजापतिरुच्यते । 'को वै नाम प्रजापतिः' इति श्रुतेः । ऋतस्य यज्ञस्य धुरि निर्वाहे गा वेदरूपान् वाग्विशेषान् अद्येदानीं युङ्क्ते संयोजयति । कीदृशान् । शिमीवतः प्रतिपाद्यैः कर्मभिर्युक्तान् भामिनः उज्ज्वलान् दुर्हृणायून् । हृणीयतिर्हानिकर्मा । हातुमशक्यान् वेदाध्ययनस्य नित्यत्वात् । आसन्निषून् आसनि आस्ये इषुरेषणं गमनमुच्चारणं येषां तान् हृत्स्वसो हृत्सु हृदयेषु दीप्यमानान् । प्रकाशमानानित्यर्थः । मयोभून् मयसोऽध्ययनप्रभवस्य सुखसाधनस्यादृष्टस्य भावयितॄन् । यो यजमान एषां वचसां भृत्यां भरणक्रियाम् ऋणधत् ऋद्धिमतीं करोति स जीवात् स एव[1] जीवति[2] । अन्ये जीवन्मृता इत्यर्थः ॥ दुर्हृणायून् । 'हृणीङ् लज्जायाम्' । कण्ड्वादित्वात् यक् । बहुलवचनात् अस्मात् उण्प्रत्ययः । अतो लोपे सति वर्णव्यापत्त्या[3] आकारः । मृगय्वादिर्वा द्रष्टव्यः । आसन्निषून् । 'पदन्०' इत्यादिना आस्यशब्दस्य आसन्नादेशः । 'इष गतौ' इत्यस्मात् 'इषेः किच्च' (उ. सू. १. १३) इति उप्रत्ययः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । हृत्स्वसः । 'असु क्षेपणे' । 'अस गतिदीप्त्यादानेषु' । 'क्विप् च' इति क्विप् । 'तत्पुरुषे कृति बहुलम्' इति अलुक् । कृदुत्तरपदप्रकृतिस्वरत्वम् । मयोभून् । व्यत्ययेन ह्रस्वत्वम् । यद्वा । 'मितद्वादिभ्य उपसंख्यानम्' (पा. सू. ३. २. १८०. १) इति डुप्रत्ययः । भृत्याम् । 'भृञ् भरणे' । 'संज्ञायां समजनिषद०' (पा. सू. ३. ३. ९९) इति क्यप् । 'उदात्तः' इत्यनुवृत्तेः प्रत्ययस्योदात्तत्वम् । ऋणधत् । 'ऋधु वृद्धौ' । लेटि व्यत्ययेन श्नम् । 'लेटोऽडाटौ' इति अडागमः । 'इतश्च लोपः०' इति इकारलोपः । जीवात् । 'जीव प्राणधारणे' । पूर्ववत् लेटि आडागमः ॥

क ईषते तुज्यते को बिभाय को मंसते सन्तमिन्द्रं को अन्ति ।
कस्तोकाय क इभायोत रायेऽधिं ब्रवत्तन्वे[4] को जनाय ॥ १७ ॥

कः । ईषते । तुज्यते । कः । बिभाय । कः । मंसते । सन्तम् । इन्द्रम् । कः । अन्ति ।
कः । तोकाय । कः । इभाय । उत । राये । अधिं । ब्रवत् । तन्वे । कः । जनाय ॥ १७ ॥

---

१. फ–'एव' नास्ति । २. च-छ-त-न-फ-श–जीवेत् । ३. च-छ-त-द-न-फ-श-स–वर्णव्यत्ययेन ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अनुग्रहीतरि इन्द्रे आगते सति [v]क [v]ईषते शत्रोर्भीतः सन् को निर्गच्छति न कोऽपीत्यर्थः। [v]कः [v]तुज्यते को हिंस्यते शत्रुभिर्हिंस्योऽपि कश्चिन्नास्तीत्यर्थः। [v]कः यजमानः [v]बिभाय बिभेति। इन्द्रे रक्षके सति भयमपि नोत्पद्यते दूरे तस्य शत्रुकृता हिंसा। [v]अन्ति अन्तिके समीपे [v]सन्तम् अस्माकं रक्षकत्वेन वर्तमानम् [v]इन्द्रं [v]कः पुरुषः [v]मंसते जानाति। वयमेव जानीमो नान्यः इत्यर्थः। एकः कः पूरकः। युद्धे सहायार्थमिन्द्रे आगते सति [v]कः यजमानः [v]तोकाय पुत्राय [v]अधि [v]ब्रवत्। हे इन्द्र अस्मदीयं पुत्रं रक्षेत्येवंरूपमधिवचनं पक्षपातेन वचनम्। 'ब्राह्मणायाधिब्रूयात्' इति यथा। एवंरूपमधिवचनं को यजमानः कुर्यात्। स्वयमेवेन्द्रो रक्षतीति भावः। [v]इभाय गजाय [v]कः अधि ब्रवत्। [v]उत अपि च [v]राये शत्रुभिरपह्रियमाणाय धनाय कः अधि ब्रवत्। अपह्रियमाणमस्मदीयं धनं रक्षेत्यधिवचनमपि को यजमानः कुर्यात्। न कोऽपीत्यर्थः। अपि च [v]तन्वे स्वकीयाय शरीराय [v]जनाय परिजनाय च [v]कः अधि ब्रवत्। स्वशरीररक्षार्थं परिजनरक्षार्थं चेन्द्रस्याधिवचनं नापेक्षितम्। स्तुत्या प्रीत इन्द्रः स्वयमेव रक्षतीत्यर्थः। यदा तु कशब्दाभिधेयस्य प्रजापतेः संबन्धिनि कर्मणि विनियोगः तदानीं परमैश्वर्ययोगादिन्द्रशब्देन प्रजापतिरेवाभिधीयते। यथा 'ऐन्द्रा गार्हपत्यमुपतिष्ठते' इति विनियोगानुसारेण 'कदाचन' इत्यस्यामृचि विद्यमान इन्द्रो गार्हपत्यपरतया नीयते तद्वत्॥ ईषते। 'ईष गतिहिंसादर्शनेषु'। भौवादिक आत्मनेपदी। तुज्यते। 'तुज हिंसायाम्'। कर्मणि यक्। अदुपदेशात् लसार्वधातुकानुदात्तत्वे यक एव स्वरः शिष्यते। 'अतिङः' इति पर्युदासात् निघाताभावः। मंसते। लेटि अडागमः। 'सिब्बहुलं लेटि' इति सिप्। अन्ति। अन्तिकस्य 'कादिलोपो बहुलम्' इति कलोपः। ब्रवत्। ब्रवीतेर्लेटि अडागमः। तन्वे। तनुशब्दाच्चतुर्थ्येकवचने 'जसादिषु च्छन्दसि वावचनम्' इति 'वेर्डिति' इति गुणाभावे यणादेशः। 'उदात्तस्वरितयोर्यणः०' इति विभक्तेः स्वरितत्वम्॥

को अग्निमीट्टे हविषा घृतेन स्रुचा यजाता ऋतुभिर्ध्रुवेभिः।
कस्मै देवा आ वहानाशु होम को मंसते वीतिहोत्रः सुदेवः॥ १८॥

कः। अग्निम्। ईट्टे। हविषा। घृतेन। स्रुचा। यजातै। ऋतुऽभिः। ध्रुवेभिः।
कस्मै। देवाः। आ। वहान्। आशु। होम। कः। मंसते। वीतिऽहोत्रः। सुऽदेवः॥१८॥

[v]कः यजमानः [v]अग्निम् [v]ईट्टे इन्द्रार्थं हविर्निरुप्याग्निं स्तौति। इन्द्राय हविर्निर्वापोऽपि सम्यक्कर्तुं न शक्यते। इन्द्रस्य दुर्विज्ञानत्वात्। को वा इन्द्रयागार्थमग्निं [v]स्रुचा जुह्वा [v]ध्रुवेभिः ध्रुवैर्नित्यैः [v]ऋतुभिः वसन्तादिकालैरुपलक्षितेन [v]घृतेन [v]हविषा [v]यजातै यजेत्। यद्वा। ऋतवः प्रयाजदेवताः। 'ऋतवो वै प्रयाजाः' (तै.सं.१.६.११.५) इति श्रुतेः। ताभिः ध्रुवैः प्रकृतौ विकृतौ[1] च[1] अनुष्ठेयतया निश्चलैर्ऋतुभिः सह अग्निमाज्यभागदेवतां घृतेन हविषा को यजेत्। न कोऽपीत्यर्थः। [v]कस्मै यजमानाय [v]होम ह्वातव्यं[2] प्रशस्यं धनम् [v]आशु शीघ्रं [v]देवाः [v]आ [v]वहान् आवहन्ति प्रयच्छन्ति। न कस्मा अपीत्यर्थः। इन्द्र एव धनस्य दाता नान्ये देवा इति इन्द्रः[3] स्तूयते। [v]वीतिहोत्रः प्राप्तयज्ञः [v]सुदेवः शोभनदेवताकः [v]कः यजमानः [v]मंसते इन्द्रं सम्यग्जानाति। न कोऽपीत्यर्थः। बहुविधेन स्तोत्रेण चिरकालोपासनेन चेन्द्रः प्रत्यक्षो भवति नान्येन प्रकारेणेति तात्पर्यार्थः॥ ईट्टे। 'ईड स्तुतौ'। अदादित्वात् शपो लुक्। स्रुचा। 'सावेकाचः०' इति विभक्तेरुदात्तत्वम्। यजातै। यजतेर्लेटि आडागमः। 'वैतोऽन्यत्र' इति

---

१. क्ष-ट-ढ-न-स-'विकृतौ च' नास्ति। २. क्ष-ह्वातव्यम्। ३. क्ष-ठ-ढ-इन्द्र एव।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ऐकारः । वहान् । वहतेर्लेटि आडागमः । ' इतश्च लोपः° ' इति इकारलोपः । ' संयोगान्तस्य° ' इति तकारलोपः । होम । ह्वयतेः कृतात्वस्य ' आतो मनिन्° ' इति मनिन् । ' ह्वः ' इत्यनुवृत्तौ ' बहुलं छन्दसि ' इति संप्रसारणम् । यद्वा । ' नामन्सीमन्° ' ( उ. सू. ४. ५९० ) इत्यादौ होमशब्दो मनिन्प्रत्ययान्तो निपात्यते । मंसते । ' मन ज्ञाने ' । लेटि अडागमः । ' सिब्बहुलं लेटि ' इति सिप् । वीतिहोत्रः । वी गत्यादिषु । अस्मात् कर्मणि ' मन्त्रे वृष° ' इत्यादिना क्तिन् स चोदात्तः । होत्रं होमः । ' हुयामाश्रुभसिभ्यस्त्रन् ' ( उ. सू. ४. ६०७ ) इति त्रन्प्रत्ययः । वीतिः प्राप्तो होमो येन । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । सुदेवः । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् ॥

त्वमङ्ग प्र शंसिषो देवः शविष्ठ मर्त्यम् ।
न त्वदन्यो मघवन्नस्ति मर्डितेन्द्र ब्रवीमि ते वचः ॥ १९ ॥

त्वम् । अङ्ग । प्र । शंसिषः । देवः । शविष्ठ । मर्त्यम् ।
न । त्वत् । अन्यः । मघऽवन् । अस्ति । मर्डिता । इन्द्र । ब्रवीमि । ते । वचः ॥ १९ ॥

अङ्ग इति अभिमुखीकरणे । vअङ्ग vशविष्ठ हे बलवत्तमेन्द्र vदेवः द्योतमानः vत्वं vमर्त्यं मरणधर्माणं त्वां स्तुतवन्तं पुरुषं vप्र vशंसिषः । सम्यगनेन स्तुतम् इति प्रशंस । हे vमघवन् धनवन् vइन्द्र vत्वदन्यः त्वत्तोऽन्यः कश्चित् vमर्डिता सुखयिता vन vअस्ति । अतः कारणात् vते तुभ्यमिदं स्तुतिलक्षणं vवचः vब्रवीमि उच्चारयामि ॥ शंसिषः । ' शंसु स्तुतौ ' । लेटि सिपि अडागमः । ' सिब्बहुलं लेटि ' इति विकरणश्च सिप् । तस्य आर्धधातुकत्वात् इडागमः । शविष्ठ । अतिशयेन शवस्वी शविष्ठः । इष्ठनि ' विन्मतोर्लुक् ' । ' टेः ' इति टिलोपः । मर्डिता । ' मृड सुखने ' । तृचः इडागमः ॥

मा ते राधांसि मा त ऊतयो वसोऽस्मान्कदा चना दभन् ।
विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ ॥ २० ॥

मा । ते । राधांसि । मा । ते । ऊतयः । वसो इति । अस्मान् । कदा । चन । दभन् ।
विश्वा । च । नः । उपऽमिमीहि । मानुष । वसूनि । चर्षणिऽभ्यः । आ ॥ २० ॥

हे vवसो निवासयितरिन्द्र vते तव संबन्धीनि राज्ञोत्येभिरिति vराधांसि भूतानि vअस्मान् vकदा vचन कदाचिदपि vमा vदभन् vमा विनाशयन्तु । तथा vऊतयः गन्तारः । यद्वा । धूतयः[1] इत्यत्र वर्णलोपः । धूतयः कम्पयितारः vते त्वदीया मरुतश्च मा दभन् । हे vमानुष मनुष्यहितेन्द्र vचर्षणिभ्यः मन्त्रद्रष्टृभ्यः vनः अस्मभ्यं vविश्वा विश्वानि सर्वाणि vवसूनि धनानि vच vआ vउपमिमीहि सर्वत आहृत्यास्मत्समीपे कुरु । सर्वत्र वर्तमानं धनमस्मभ्यं प्रयच्छेत्यर्थः ॥ कदा । किंशब्दात् ' सर्वैकान्यकिंयत्तदः काले दा ' (पा.सू.५.३.१५) इति दाप्रत्ययः । ' किमः कः ' इति कादेशः । व्यत्ययेन आद्युदात्तत्वम् ।

---

१. क्ष-ट-ढ—ऊतयः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दभन्। 'दम्भु दम्भे'। लोडर्थे छान्दसे लङि 'बहुलं छन्दसि' इति विकरणस्य लुक्। 'न माङ्योगे' इति अडभावः। मिमीहि। 'माङ् माने शब्दे च'। व्यत्ययेन परस्मैपदम्। जुहोत्यादित्वात् श्लुः। 'भृञामित्' इति अभ्यासस्य इत्वम्। हेर्ङित्त्वात् 'घुमास्था०' इति ईत्वम्॥ ८॥ ॥ १३॥

चतुर्दशेऽनुवाके नव सूक्तानि। तत्र 'प्र ये' इति द्वादशर्चं प्रथमं सूक्तं गोतमस्यार्षम्। पञ्चमीद्वादश्यौ त्रिष्टुभौ। शिष्टा जगत्यः। मरुतो देवता। तथा चानुक्रान्तम्–'प्र ये द्वादश मारुतं ह पञ्चम्यन्त्ये त्रिष्टुभौ' इति। हशब्दप्रयोगादिदमादीनि चत्वारि सूक्तानि मरुद्देवत्यानि॥ अभिप्लवषडहस्य चतुर्थेऽहनि आग्निमारुते एतत्सूक्तं मारुतनिविद्धानीयम्। सूत्रितं च–'प्र ये शुम्भन्ते जनस्य गोपा इत्याग्निमारुतम्' (आश्व. श्रौ. ७. ७) इति॥

प्र ये शुम्भन्ते जनयो न सप्तयो यामन्रुद्रस्य सूनवः सुदंससः।
रोदसी हि मरुतश्चक्रिरे वृधे मदन्ति वीरा विदथेषु घृष्वयः॥ १॥

प्र। ये। शुम्भन्ते। जनयः। न। सप्तयः। यामन्। रुद्रस्य। सूनवः। सुऽदंससः।
रोदसी इति। हि। मरुतः। चक्रिरे। वृधे। मदन्ति। वीराः। विदथेषु। घृष्वयः॥१॥

ये मरुतः यामन् यामनि गमने निमित्तभूते सति प्र शुम्भन्ते प्रकर्षेण स्वकीयान्यङ्गानि अलंकुर्वन्ति[1] जनयो न जाया इव। यथा योषितः स्वकीयान्यङ्गान्यलंकुर्वन्ति तद्वत्। कीदृशा मरुतः। सप्तयः सर्पणशीलाः रुद्रस्य सूनवः। रोदयति सर्वमन्तकाले इति रुद्रः परमेश्वरः। तस्य पुत्राः। सुदंससः शोभनकर्माणः। एतदेवोपपादयति। हि यस्मात् मरुतः रोदसी द्यावापृथिव्यौ वृधे वृष्टिप्रदानादिना वर्धनाय चक्रिरे कृतवन्तः। अतः सुदंसस इत्यर्थः। वीराः विशेषेण शत्रुक्षेपणशीलाः[2] घृष्वयः घर्षणशीलाः। महीरुहशिलोच्चयादेर्भञ्जका इत्यर्थः। एवंभूतास्ते मरुतः विदथेषु। विदन्त्येषु यष्टव्यतया देवानिति विदथा यज्ञाः। तेषु मदन्ति सोमपानेन हृष्यन्ति॥ शुम्भन्ते। 'शुभ शुम्भ दीप्तौ'। भौवादिकः। जनयः। जायन्ते आस्वपत्यानीति जनयो जायाः। 'इन्सर्वधातुभ्यः' इति इन्प्रत्ययः। यामन्। 'या प्रापणे'। 'कृत्यल्युटो बहुलम्' इति बहुलवचनात् 'आतो मनिन्०' इति भावे मनिन्। 'सुपां सुलुक्०' इति सप्तम्याः लुक्। सुदंससः। दंसः इति कर्मनाम। शोभनं दंसो येषाम्। 'सोर्मनसी अलोमोषसी' इत्युत्तरपदाद्युदात्तत्वम्। चक्रिरे। 'हि च' इति निघातप्रतिषेधः। वृधे। 'वृधु वृद्धौ'। संपदादिलक्षणो भावे क्विप्। 'सावेकाचः०' इति विभक्तेरुदात्तत्वम्। मदन्ति। 'मदी हर्षे'। श्यनि प्राप्ते व्यत्ययेन शप्। पादादित्वात् निघाताभावः। विदथेषु। 'विद ज्ञाने'। 'रुविदिभ्यां कित्' इति अथप्रत्ययः। घृष्वयः। 'घृषु संघर्षे'। 'कृविघृष्वि०' इत्यादिना विन्प्रत्ययान्तो निपात्यते॥

---

१. क्ष–अलंकुर्वते। २. क्ष-ट-ढ–शत्रुक्षेपणकुशलाः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त उक्षितासो महिमानमाशत दिवि रुद्रासो अधि चक्रिरे सदः ।
अर्चन्तो अर्कं जनयन्त इन्द्रियमधि श्रियो दधिरे पृश्निमातरः ॥ २ ॥

ते । उक्षितासः । महिमानम् । आशत । दिवि । रुद्रासः । अधि । चक्रिरे । सदः ।
अर्चन्तः । अर्कम् । जनयन्तः । इन्द्रियम् । अधि । श्रियः । दधिरे । पृश्निऽमातरः ॥२॥

ये पूर्वोक्तगुणविशिष्टाः [V]ते मरुतः [V]उक्षितासः देवैरभिषिक्ताः सन्तः [V]महिमानं महत्त्वम् [V]आशत आप्नुवन्[1] । [V]रुद्रासः रुद्रस्य पुत्राः । उपचाराज्जन्ये जनकशब्दः । ते रुद्रपुत्रा मरुतः [V]दिवि द्योतमाने नभसि [V]सदः सदनं स्थानम् [V]अधि [V]चक्रिरे अधिकं सर्वोत्कृष्टं कृतवन्तः । [V]अर्कम् अर्चनीयमिन्द्रम् [V]अर्चन्तः पूजयन्तः [V]इन्द्रियम् इन्द्रस्य लिङ्गं वीर्यं [V]जनयन्तः । ' प्रहर भगवो जहि वीरयस्व ' ( ऐ. ब्रा. ३. २० ) इत्येवंरूपेण वाक्येनोत्पादयन्तः । [V]पृश्निमातरः पृश्नेर्नानारूपाया भूमेः पुत्रा मरुतः [V]श्रियः ऐश्वर्याणि [V]अधि [V]दधिरे आधिक्येनाधारयन् ॥ उक्षितासः । ' उक्ष सेचने ' । कर्मणि निष्ठा । ' आज्जसेरसुक् ' । महिमानम् । महच्छब्दात् पृथ्वादिलक्षण इमनिच् । ' टेः ' इति टिलोपः । आशत । ' अशू व्याप्तौ ' । लङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । इन्द्रियम् । ' इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टम्° ' ( पा. सू. ५. २. ९३ ) इति घच्प्रत्ययान्तो निपात्यते । पृश्निमातरः । प्राश्नुते सर्वाणि रूपाणीति पृश्निर्भूमिः । श्रूयते च–' इयं वै पृश्निः ' ( तै. ब्रा. १. ४. १. ५ ) इति । ' घृणिः पृश्निः ' इत्यादौ निपातनात् अभिमतरूपसिद्धिः[2] । पृश्निर्माता येषां ते तथोक्ताः । ' ऋतश्छन्दसि ' ( पा. सू. ५. ४. १५८ ) इति समासान्तस्य कपः प्रतिषेधः ॥

गोमातरो यच्छुभयन्ते अञ्जिभिस्तनूषु शुभ्रा दधिरे विरुक्मतः ।
बाधन्ते विश्वमभिमातिनमप वर्त्मान्येषामनु रीयते घृतम् ॥ ३ ॥

गोऽमातरः । यत् । शुभयन्ते । अञ्जिऽभिः । तनूषु । शुभ्राः । दधिरे । विरुक्मतः ।
बाधन्ते । विश्वम् । अभिऽमातिनम् । अप । वर्त्मानि । एषाम् । अनु । रीयते । घृतम् ॥३॥

[V]गोमातरः गोरूपा भूमिर्माता येषां ते मरुतः [V]अञ्जिभिः रूपाभिव्यञ्जकैराभरणैः [V]यत् यदा [V]शुभयन्ते स्वकीयान्यङ्गानि शोभायुक्तानि कुर्वन्ति तदानीं [V]शुभ्राः दीप्ता मरुतः [V]तनूषु स्वकीयेषु शरीरेषु [V]विरुक्मतः विशेषेण रोचमानानलंकारान् [V]दधिरे धारयन्ति । अपि च [V]विश्वं सर्वम् [V]अभिमातिनं शत्रुम् [V]अप [V]बाधन्ते हिंसन्ति । [V]एषां मरुतां [V]वर्त्मानि मार्गाननुसृत्य [V]घृतं क्षरणशीलमुदकं [V]रीयते स्रवति । यत्र मरुतो गच्छन्ति वृष्ट्युदकमपि तदनुसारेण तत्र गच्छतीत्यर्थः ॥ शुभयन्ते। संज्ञापूर्वकस्य विधेरनित्यत्वात् लघूपधगुणाभावः । अञ्जिभिः । ' अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु ' । ' खनिकषिकस्यञ्यसिवसिध्वनिस्तनिवनिसनिग्रन्थिचरिभ्यश्च ' ( उ. सू. ४. ५७९ ) इति इप्रत्ययः । शुभ्राः । ' शुभदीप्तौ ' । ' स्फायितञ्चि° ' इत्यादिना रक् । विरुक्मतः । विशिष्टा रुक् विरुक् । तद्वन्तो विरुक्मन्तः । मतुपि अयस्मयादित्वेन पदत्वात् कुत्वम् । भत्वात् जश्त्वाभावः । रीयते । ' रीङ् स्रवणे ' । दैवादिकः ॥

---

१. क्ष-ट-ढ–प्राप्नुवन् । २. क्ष-ट-ढ–अभिमतरूपस्वरसिद्धिः ।



.CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वि ये भ्राजन्ते सुमखास ऋष्टिभिः प्रच्यावयन्तो अच्युता चिदोजसा ।
मनोजुवो यन्मरुतो रथेष्वा वृषव्रातासः पृषतीरयुग्ध्वम् ॥ ४ ॥

वि । ये । भ्राजन्ते । सुऽमखासः । ऋष्टिऽभिः । प्रऽच्यवयन्तः । अच्युता । चित् । ओजसा ।
मनःऽजुवः । यत् । मरुतः । रथेषु । आ । वृषऽव्रातासः । पृषतीः । अयुग्ध्वम् ॥ ४ ॥

[v]सुमखासः शोभनयज्ञाः [v]ये मरुतः [v]ऋष्टिभिः आयुधैः [v]वि [v]भ्राजन्ते विशेषेण दीप्यन्ते ते मरुतः [v]अच्युता [v]चित् च्यावयितुमशक्यानि दृढानि पर्वतादीन्यपि [v]ओजसा स्वकीयेन बलेन [v]प्रच्यावयन्तः प्रकर्षेण च्यावयितारः प्रेरयितारो भवन्ति । उत्तरार्धः प्रत्यक्षकृतः । हे [v]मरुतः [v]मनोजुवः मनोवद्वेगगतयः [v]वृषव्रातासः वृष्टयुदकसेचनसमर्थससंघात्मका यूयं [v]रथेषु आत्मीयेषु [v]पृषतीः । पृषत्यः इति मरुद्वाहनानां संज्ञा ' पृषत्यो मरुताम् ' ( नि. १. १५. ६ ) इत्युक्तत्वात् । पृषद्भिः श्वेतबिन्दुभिर्युक्ताः मृगीः [v]यत् यदा [v]आ [v]अयुग्ध्वं आभिमुख्येन नियुक्ता अकृढ्वम् । तदानीं पर्वतादिकं प्रच्यवते इत्यर्थः ॥ सुमखासः । ' सर्वे विधयश्छन्दसि विकल्प्यन्ते ' इति ' नञ्सुभ्याम् ' इत्यस्य प्रवृत्त्यभावे बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । अच्युता । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । मनोजुवः । जु इति सौत्रो धातुर्गत्यर्थः । ' क्विब्वचि° ' इत्यादिना क्विब्दीर्घौ । अयुग्ध्वम् । ' युजिर् योगे ' । लुङि ' धि च ' ( पा. सू. ८. २. २५ ) इति सकारलोपः ॥

प्र यद्रथेषु पृषतीरयुग्ध्वं वाजे अद्रिं मरुतो रंहयन्तः ।
उतारुषस्य वि ष्यन्ति धाराश्चर्मेवोदभिर्व्युन्दन्ति भूम ॥ ५ ॥

प्र । यत् । रथेषु । पृषतीः । अयुग्ध्वम् । वाजे । अद्रिम् । मरुतः । रंहयन्तः ।
उत । अरुषस्य । वि । स्यन्ति । धाराः । चर्मऽइव । उदऽभिः । वि । उन्दन्ति । भूम ॥५॥

हे [v]मरुतः [v]पृषतीः [v]यत् यदा [v]रथेषु[1] [v]प्र [v]अयुग्ध्वं प्रायुयुजत । किं कुर्वन्तः । [v]वाजे अन्ने निमित्तभूते सति [v]अद्रिं मेघं [v]रंहयन्तः वर्षणार्थं प्रेरयन्तः । [v]उत तदानीम् [v]अरुषस्य आरोचमानस्य सूर्यस्य वैद्युताग्नेर्वा सकाशात् वृष्टयुदकधाराः[2] भवन्तः [v]वि [v]ष्यन्ति विमुञ्चन्ति । विमुक्तास्ताश्च [v]धाराः [v]उदभिः उदकैः [v]चर्मेव परिमितमल्पं[3] चर्म यथा अप्रयत्नेन क्लेद्यते एवं [v]भूम सर्वां भूमिं [v]व्युन्दन्ति विशेषेणाद्रीं[4] कुर्वन्ति[4] ॥ रंहयन्तः । ' रहि गतौ ' । वि ष्यन्ति । ' षो अन्तकर्मणि ' । दैवादिकः । ' ओतः श्यनि ' ( पा. सू. ७. ३. ७१ ) इति ओकारलोपः । ' उपसर्गात्सुनोति° ' इति षत्वम् । उदभिः । ' पदन्° ' इत्यादिना उदकशब्दस्य उदन्नादेशः । व्युन्दन्ति । ' उन्दी क्लेदने ' । भूम । ' सुपां सुलुक्° ' इति भूमिशब्दात् उत्तरस्य अमः डादेशः । छान्दसं ह्रस्वत्वम् ॥

तृतीयसवने ' आ वो वहन्तु ' इति पोतुः प्रस्थितयाज्या । सूत्रितं च–' आ वो वहन्तु सप्तयो रघुष्यदोऽमेव नः सुहवा आ हि गन्तन ' ( आश्व. श्रौ. ५. ५ ) इति ॥

---

१. क्ष–रथे । २. क्ष-ट-ढ–वृष्टयुदकस्य धाराः । ३. क्ष–परिमितबलम् । ४. क्ष-ट-ढ-स–आर्द्रीकुर्वन्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आ वो॑ वहन्तु सप्तयो रघुष्यदो॑ रघुपत्वानः॒ प्र जि॑गात बा॒हुभिः॑ ।
सीद॒ता ब॒र्हिरु॒रु वः॑ सदस्कृतं मा॒दय॑ध्वं मरुतो॒ मध्वो॒ अन्ध॑सः ॥ ६ ॥

आ । वः॒ । व॒ह॒न्तु॒ । स॒प्तयः॑ । र॒घु॒ऽस्यदः॑ । र॒घु॒ऽप॒त्वानः॑ । प्र । जि॒गा॒त॒ । बा॒हुऽभिः॑ ।
सीद॑त । आ । ब॒र्हिः॑ । उ॒रु । वः॒ । सदः॑ । कृ॒त॒म् । मा॒दय॑ध्वम् । म॒रु॒तः॒ । मध्वः॑ । अन्ध॑सः ॥६॥

हे मरुतः ᵛवः युष्मान् ᵛसप्तयः सर्पणशीला अश्वाः ᵛआ ᵛवहन्तु अस्मद्यज्ञं प्रापयन्तु । कीदृशाः सप्तयः । ᵛरघुष्यदः लघु शीघ्रं स्यन्दमानाः । वेगेन गच्छन्त इत्यर्थः । ᵛरघुपत्वानः लघु शीघ्रं पतन्तो गच्छन्तो यूयं ᵛबाहुभिः स्वकीयैर्हस्तैः अस्मभ्यं दातव्यं धनमाहृत्य[1] ᵛप्र ᵛजिगात प्रकर्षेण गच्छत । हे ᵛमरुतः ᵛवः युष्माकं ᵛसदः सदनं वेदिलक्षणं स्थानम् ᵛउरु विस्तीर्णं ᵛकृतम् । तत्र यदास्तीर्णं ᵛबर्हिः तत् ᵛआ ᵛसीदत तस्मिन्बर्हिष्युपविशत । उपविश्य च ᵛमध्वः मधुरस्य ᵛअन्धसः सोमलक्षणस्यान्नस्य[2] पानेन ᵛमादयध्वं तृप्ता भवत॥ रघुष्यदः । रघु स्यन्दन्ते इति रघुष्यदः । ' स्यन्दू प्रस्रवणे ' । ' क्विप् च ' इति क्विप् । ' अनिदिताम्° ' इति नलोपः । कृदुत्तरपदप्रकृतिस्वरत्वम् । रघुपत्वानः । ' पत्लृ गतौ ' ' अन्येभ्योऽपि दृश्यन्ते ' इति वनिप् । जिगात । ' गा स्तुतौ ' । जौहोत्यादिकः । ' जिगाति ' ( नि. २.१४.११३ ) इति गतिकर्मसु पाठादत्र गत्यर्थः । लोण्मध्यमबहुवचनस्य ' तप्तनप्तनथनाश्च ' इति तबादेशः । तस्य पित्त्वेन ङित्त्वाभावात् ' ई हल्यघोः ' इति ईत्वाभावः । सदः । ' अतः कृकमि° ' ( पा. सू. ८. ३. ४६ ) इति विसर्जनीयस्य सत्वम् । मादयध्वम् । ' मद तृप्तियोगे ' । चुरादिरात्मनेपदी ॥ ॥ ९ ॥

तेऽव॑र्धन्त॒ स्वत॑वसो महित्व॒ना नाकं॑ तस्थु॒रु॒रु च॑क्रिरे॒ सदः॑ ।
विष्णु॒र्यद्धाव॒द्वृष॑णं मद॒च्युतं॒ वयो॒ न सी॑द॒न्नधि॑ ब॒र्हिषि॒ प्रिये ॥ ७ ॥

ते । अव॑र्धन्त । स्वऽत॑वसः । म॒हि॒ऽत्व॒ना । आ । नाक॑म् । त॒स्थुः॒ । उ॒रु । च॒क्रि॒रे॒ । सदः॑ ।
विष्णुः॑ । यत् । ह॒ । आव॑त् । वृष॑णम् । म॒द॒ऽच्युत॑म् । वयः॑ । न । सी॒द॒न् । अधि॑ । ब॒र्हिषि॑ । प्रि॒ये॥७॥

ᵛते मरुतः ᵛअवर्धन्त वृद्धिं गताः । कीदृशाः । ᵛस्वतवसः स्वाश्रयबलाः । नान्यस्य कस्यचिद्बलमपेक्षन्ते । वृद्धिं प्राप्य च ᵛमहित्वना महिम्ना महत्त्वेन ᵛनाकं स्वर्गम् ᵛआ ᵛतस्थुः आस्थितवन्तः । ᵛसदः सदनं नभोलक्षणं स्थानं च स्वकीयनिवासाय ᵛउरु विस्तीर्णं ᵛचक्रिरे । ᵛयत् येभ्यो मरुद्भ्यो यदर्थं ᵛवृषणं कामाभिवर्षकं ᵛमदच्युतं मदस्य हर्षस्य आसेक्तारं यज्ञं ᵛविष्णुः ᵛह ᵛआवत् विष्णुरेवागत्य रक्षति ते मरुतः ᵛवयो ᵛन पक्षिणो यथा शीघ्रमागच्छन्ति एवं शीघ्रमागत्य ᵛबर्हिषि ᵛअधि अस्मदीये यज्ञे ᵛप्रिये प्रीतिकरे ᵛसीदन् सीदन्तु उपविशन्तु ॥ तेऽवर्धन्त । ' स्वरितो वानुदात्ते पदादौ ' ( पा. सू. ८. २. ६ ) इति एकादेशस्य स्वरितत्वम् । महित्वना । भावप्रत्ययादुत्तरस्य आङः व्यत्ययेन नाभावः उदात्तत्वं च । यद्वा । ' सुपां सुलुक्° ' इति आजादेशो नकारोपजनश्च । तस्थुः । नाकमातस्थुश्च सदश्च विस्तीर्णं चक्रिरे इति चार्थप्रतीतेः ' चादिलोपे विभाषा ' इति प्रथमायास्तिङ्विभक्तेर्निघातप्रतिषेधः ।

---

१. क्ष-स–धनमाहृत्य बाहुभिरन्तरिक्षं भिन्दानाः । २. क्ष–सोमलक्षणान्नस्य

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यत्। 'सुपां सुलुक्०' इति चतुर्थ्या लुक्। आवत्। छान्दसो वर्तमाने लङ्। वृषणम्। 'वा षपूर्वस्य निगमे' इति उपधादीर्घाभावः। मदच्युतम्। मदं च्योततीति मदच्युत्। 'च्युतिर् आसेचने'। 'क्विप् च' इति क्विप्। सीदन्। लिङर्थे लेटि अडागमः॥

शूराइवेद्युयुधयो न जग्मयः श्रवस्यवो न पृतनासु येतिरे।
भयन्ते विश्वा भुवना मरुद्भ्यो राजानइव त्वेषसंदृशो नरः॥ ८॥

शूराःऽइव। इत्। युयुधयः। न। जग्मयः। श्रवस्यवः। न। पृतनासु। येतिरे।
भयन्ते। विश्वा। भुवना। मरुत्ऽभ्यः। राजानःऽइव। त्वेषऽसंदृशः। नरः॥ ८॥

इत् इत्येतत्समुच्चये। [v]शूराइवेत् शौर्योपेता युयुत्सवः पुरुषा इव च [v]युयुधयः शत्रुभिर्युध्यमानाः पुरुषा इव च [v]जग्मयः शीघ्रं गच्छन्तो मरुतः [v]श्रवस्यवो [v]न श्रवोऽन्नमात्मन इच्छन्तः पुरुषा इव [v]पृतनासु संग्रामेषु [v]येतिरे प्रयतन्ते वृत्रादिभिर्युद्धे व्याप्रियन्ते। तादृशेभ्यः [v]मरुद्भ्यः [v]विश्वा [v]भुवना सर्वाणि भूतजातानि[1] [v]भयन्ते बिभ्यति। ये [v]नरः वृष्ट्यादेर्नेतारो मरुतः [v]राजानइव राजमाना नृपतय इव [v]त्वेषसंदृशः दीप्तसंदर्शना उग्ररूपतया द्रष्टुमशक्या भवन्ति तेभ्य इत्यर्थः॥ युयुधयः। 'युध संप्रहारे'। 'आदृगमहनजनः०' इत्यत्र 'उत्सर्गश्छन्दसि' (पा. सू. ३. २. १७१. २) इति वचनात् किन्प्रत्ययः। लिङ्वद्भावात् द्विर्भावादि। कित्त्वात् गुणाभावः। नित्त्वादाद्युदात्तत्वम्। जग्मयः। तेनैव सूत्रेण किन्प्रत्ययः। 'गमहन०' इत्यादिना उपधालोपः। स्थानिवद्भावात् द्विर्भावादि। श्रवस्यवः। श्रव इच्छति श्रवस्यति। 'क्याच्छन्दसि' इति उप्रत्ययः। येतिरे। 'यती प्रयत्ने'। 'छन्दसि लुङ्लङ्लिटः' इति वर्तमाने लिट्। भयन्ते। 'जिभी भये'। 'बहुलं छन्दसि' इति शपः श्लोरभावः। त्वेषसंदृशः। 'त्विष दीप्तौ'। पचाद्यच्। 'दृशिर् प्रेक्षणे'। संपूर्वादस्मात् संपदादिलक्षणो भावे क्विप्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्॥

त्वष्टा यद्वज्रं सुकृतं हिरण्ययं सहस्रभृष्टिं स्वपा अवर्तयत्।
धत्त इन्द्रो नर्यपांसि कर्तवेऽहन्वृत्रं निरपामौब्जदर्णवम्॥ ९॥

त्वष्टा। यत्। वज्रम्। सुऽकृतम्। हिरण्ययम्। सहस्रऽभृष्टिम्। सुऽअपाः। अवर्तयत्।
धत्ते। इन्द्रः। नरि। अपांसि। कर्तवे। अहन्। वृत्रम्। निः। अपाम्। औब्जत्। अर्णवम्॥९॥

[v]स्वपाः शोभनकर्मा [v]त्वष्टा विश्वनिर्माता [v]यद्वज्रम् [v]अवर्तयत् इन्द्रं प्रत्यगमयत् दत्तवानित्यर्थः। कीदृशम्। [v]सुकृतं सम्यङ्निष्पादितं [v]हिरण्ययं सुवर्णमयं [v]सहस्रभृष्टिम् अनेकाभिर्धाराभिर्युक्तम्। तद्वज्रम् [v]इन्द्रः [v]धत्ते धारयति। किमर्थम्। [v]नरि। अत्र नृसंबन्धात् नृशब्देन संग्रामोऽभिधीयते। संग्रामे [v]अपांसि शत्रुहननादिलक्षणानि कर्माणि [v]कर्तवे कर्तुम्। एवं वज्रं धृत्वा तेन वज्रेण [v]वृत्रं वृष्ट्युदकस्यावरकम् [v]अर्णवम् अर्णसोदकेन युक्तं मेघम् [v]अहन् अवधीत्। [v]अपां तेन निरुद्धा अपश्च सः[2] [v]निः [v]औब्जत् निःशेषेणाधोमुखमपातयत् प्रवृष्टा अकरोदित्यर्थः॥ सुकृतम्। सुपूर्वात् करोतेः

---

१. क्ष–भूतानि। २. क्ष-न-स–'सः' नास्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कर्मणि निष्ठा । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । हिरण्ययम् । हिरण्यशब्दादुत्तरस्य मयटो मकारस्य लोपः ' ऋत्व्यवास्त्व्यवास्त्व° ' इत्यादौ निपात्यते । स्वपाः । ' सोर्मनसी अलोमोषसी ' इत्युत्तरपदाद्युदात्तत्वम् । कर्तवे । ' तुमर्थे सेसेन्° ' इति करोतेः तवेन्प्रत्ययः । अपाम् । ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी । ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम् । औब्जत् । ' उब्ज आर्जवे ' । अर्णवम् । ' अर्णसो लोपश्च ' ( का. ५. २. १०९. २ ) इति मत्वर्थीयो वः सलोपश्च[1] ॥

ऊर्ध्वं नुनुद्रेऽवतं त ओजसा दादृहाणं चिद्बिभिदुर्वि पर्वतम् ।
धमन्तो वाणं मरुतः सुदानवो मदे सोमस्य रण्यानि चक्रिरे ॥ १० ॥

ऊर्ध्वम् । नुनुद्रे । अवतम् । ते । ओजसा । ददृहाणम् । चित् । बिभिदुः । वि । पर्वतम् । धमन्तः । वाणम् । मरुतः । सुऽदानवः । मदे । सोमस्य । रण्यानि । चक्रिरे ॥ १० ॥

अत्रेयमाख्यायिका । गोतम ऋषिः पिपासया पीडितः सन् मरुत उदकं ययाचे । तदनन्तरं मरुतोऽदूरस्थं कूपमुद्धृत्य यत्र स गोतम ऋषिस्तिष्ठति तां दिशं[2] नीत्वा ऋषिसमीपे कूपमवस्थाप्य तत्पार्श्वे आहावं च कृत्वा तस्मिन्नाहावे कूपमुत्सिच्य तमृषिं तेनोदकेन तर्पयांचक्रुः । अयमर्थोऽनयोत्तरया च प्रतिपाद्यते ॥ Vते मरुतः Vअवतम् । अवस्तात्ततो भवतीति अवतः कूपः । कूपनामसु च ' अवतः अवटः ' ( नि. ३. २३. ७ ) इति पठितम् । तम् Vऊर्ध्वम् उपरि यथा भवति तथा Vओजसा स्वकीयेन बलेन Vनुनुद्रे प्रेरितवन्तः उत्खातवन्त इत्यर्थः । एवं कूपमुत्खाय ऋषेराश्रमं प्रति नयन्तः मरुतः मार्गमध्ये Vददृहाणं प्रवृद्धं गतिनिरोधकं Vपर्वतं Vचित् पर्ववन्तं शिलोच्चयमपि Vवि Vबिभिदुः विशेषेण बभञ्जुः । Vसुदानवः शोभनदानास्ते Vमरुतः Vवाणं शतसंख्याभिः[3] तन्त्रीभिर्युक्तं वीणाविशेषं Vधमन्तः वादयन्तः Vसोमस्य Vमदे सोमपानेन हर्षे सति Vरण्यानि स्तुत्यानि रमणीयानि धनानि Vचक्रिरे स्तोतृभ्यः कुर्वन्ति ॥ नुनुद्रे । ' णुद प्रेरणे ' । लिटि ' इरयो रे ' इति रेआदेशः । ददृहाणम् । ' दृह दृहि वृद्धौ ' । लिटः कानच् । धमन्तः । ' धमा शब्दाग्निसंयोगयोः ' । ' पाघ्रा° ' इत्यादिना धमादेशः । वाणम् । ' अण रण वण शब्दार्थाः ' । कर्मणि घञ् । ' कर्षात्वतः° ' इत्यन्तोदात्तत्वम् । रण्यानि । रणतेर्भावे ' वशिरण्योरुपसंख्यानम् ' ( पा. सू. ३. ३. ५८. ३ ) इति अप् । ततः ' भवे छन्दसि ' इति यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् ॥

जिह्मं नुनुद्रेऽवतं तया दिशासिञ्चन्नुत्सं गोतमाय तृष्णजे ।
आ गच्छन्तीमवसा चित्रभानवः कामं विप्रस्य तर्पयन्त धामभिः ॥ ११ ॥

जिह्मम् । नुनुद्रे । अवतम् । तया । दिशा । असिञ्चन् । उत्सम् । गोतमाय । तृष्णऽजे । आ । गच्छन्ति । ईम् । अवसा । चित्रऽभानवः । कामम् । विप्रस्य । तर्पयन्त । धामऽभिः ॥ ११ ॥

---

१. क्ष–सकारलोपश्च । २. क्ष-स–दिशं प्रति । ३. क्ष–शतसंख्याकाभिः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मरुतः ᵛअवतम् उद्धृतं कूपं यस्यां दिशि ऋषिर्वसति ᵛतया ᵛदिशा ᵛजिह्मं वक्रं तिर्यञ्चं ᵛनुनुद्रे प्रेरितवन्तः । एवं कूपं नीत्वा ऋष्याश्रमेऽवस्थाप्य ᵛतृष्णजे तृषिताय ᵛगोतमाय ऋषये तदर्थम् ᵛउत्सं जलप्रवाहं कूपादुद्धृत्य ᵛअसिञ्चन् आहावेऽवानयन् । एवं कृत्वा ᵛईम् एनं स्तोतारमृषिं ᵛचित्रभानवः विचित्रदीप्तयस्ते मरुतः ᵛअवसा ईदृशेन रक्षणेन सह ᵛआ ᵛगच्छन्ति तत्समीपं प्राप्नुवन्ति । प्राप्य च ᵛविप्रस्य मेधाविनो गोतमस्य ᵛकामम् अभिलाषं ᵛधामभिः आयुषो धारकैरुदकैः ᵛतर्पयन्त अतर्पयन् ॥ तया । ' न गोश्वन्सावव° ' इति ' सावेकाचः° ' इति प्राप्तस्य विभक्त्युदात्तस्य प्रतिषेधः । दिशा । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । तृष्णजे । ' जितृषा पिपासायाम् ' । ' स्वपितृषोर्नजिङ् ' ( पा. सू. ३. २. १७२ ) । प्रत्ययाद्युदात्तत्वम् । पदकारस्य शाकल्यस्य स्वयमभिप्रायः । ' अन्येष्वपि दृश्यते ' इति दृशिग्रहणात् केवलादपि जनेर्डप्रत्ययः । तृष्णा जाता यस्य स तथोक्तः । ' ङ्याप्पोः संज्ञाच्छन्दसोर्बहुलम् ' इति ह्रस्वत्वम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । धामभिः । दधातेः ' आतो मनिन्° ' इति मनिन् ॥

मारुते पशौ ' या वः शर्म ' इति हविषो याज्या । ' प्रदानानाम् ' इति खण्डे सूत्रितम्–' अरा इवेदचरमा अहेव या वः शर्म शशमानाय सन्ति ' ( आश्व. श्रौ. ३. ७ ) इति ॥

**या वः शर्म शशमानाय सन्ति त्रिधातूनि दाशुषे यच्छताधि ।**
**अस्मभ्यं तानि मरुतो वि यन्त रयिं नो धत्त वृषणः सुवीरम् ॥ १२ ॥**

या । वः । शर्म । शशमानाय । सन्ति । त्रिऽधातूनि । दाशुषे । यच्छत । अधि ।
अस्मभ्यम् । तानि । मरुतः । वि । यन्त । रयिम् । नः । धत्त । वृषणः । सुऽवीरम् ॥१२॥

हे मरुतः ᵛवः युष्माकं संबन्धीनि ᵛया यानि ᵛशर्म शर्माणि सुखानि गृहाणि वा । कीदृशानि । ᵛत्रिधातूनि पृथिव्यादिषु त्रिषु स्थानेष्ववस्थितानि ᵛशशमानाय युष्मान् स्तुतिभिर्भजमानाय दातुं संपादितानि । पूर्वोक्तलक्षणानि शर्माणि यानि ᵛसन्ति यानि च ᵛदाशुषे हविर्दत्तवते यजमानाय ᵛअधि ᵛयच्छत अधिकं प्रयच्छथ हे ᵛमरुतः ᵛतानि सर्वाणि शर्माणि ᵛअस्मभ्यं ᵛवि ᵛयन्त विशेषेण प्रयच्छत । किंच हे ᵛवृषणः कामानां वर्षितारो मरुतः ᵛनः अस्मभ्यं ᵛसुवीरं शोभनैर्वीरैः पुत्रादिभिर्युक्तं ᵛरयिं धनं ᵛधत्त दत्त ॥ या । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । शर्म । ' सुपां सुलुक्° ' इति जसो लुक् । शशमानाय । ' शश प्लुतगतौ ' । ताच्छील्किः चानश् । यच्छत । छान्दसे लङि ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । यन्त । यमेर्लेटि ' बहुलं छन्दसि ' इति शपो लुक् । ' तप्तनप्तनथनाश्च ' इति तस्य तबादेशः । अतस्तस्य पित्त्वेन ङित्त्वाभावात् ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपो न भवति । वृषणः । ' वा षपूर्वस्य निगमे ' इति उपधादीर्घाभावः । सुवीरम् । बहुव्रीहौ ' वीरवीर्यौ च ' इत्युत्तरपदाद्युदात्तत्वम् ॥ ॥ १० ॥

' मरुतो यस्य ' इति दशर्चं द्वितीयं सूक्तं गोतमस्यार्षं गायत्रं मरुद्देवताकम् । अनुक्रम्यते च– ' मरुतो दश गायत्रम् ' इति । व्यूळहे तृतीये छन्दोमे आग्निमारुते शस्त्रे एतत्सूक्तम् । ' तृतीयस्यागन्म महः ' इति खण्डे सूत्रितं—'मरुतो यस्य हि क्षये वाचमित्याग्निमारुतम् ' ( आश्व. श्रौ. ८. ११ )

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति । ऐन्द्रामारुत्यां प्रधानस्य[1] हविषो ' मरुतो यस्य ' इत्येषा अनुवाक्या । सूत्रितं च–' ऐन्द्रामारुतीं भेदकामा मरुतो यस्य हि क्षये ' ( आश्व. श्रौ. २. ११ ) इति । एवैव वरुणप्रघासेषु मारुत्याः आमिक्षाया अनुवाक्या । सूत्रितं च–' मरुतो यस्य हि क्षयेऽरा इवेदचरमा अहेव ' ( आश्व. श्रौ. २. १७ ) इति । तथा प्रातःसवने पोतुरेषा प्रस्थितयाज्या । सूत्रितं च–' मरुतो यस्य हि क्षयेऽग्ने पत्नीरिहा वह ' ( आश्व. श्रौ. ५. ५ ) इति ॥

मरुतो यस्य हि क्षये पाथा दिवो विमहसः । स सुगोपातमो जनः ॥ १ ॥

मरुतः । यस्य । हि । क्षये । पाथ । दिवः । विऽमहसः । सः । सुऽगोपातमः । जनः ॥ १ ॥

हे [v]विमहसः विशिष्टप्रकाशाः [v]मरुतः [v]दिवः अन्तरिक्षलोकादागत्य [v]यस्य [v]हि यस्य खलु यजमानस्य [v]क्षये यज्ञगृहे [v]पाथ सोमं पिबथ [v]सः [v]जनः जातो यजमानः [v]सुगोपातमः शोभनैः पालकैरस्यन्तं युक्तो भवति ॥ पाथ । ' पा पाने ' । लटि ' बहुलं छन्दसि ' इति शपो लुक् । यद्वृत्तयोगादनिघातः[2] । विमहसः । विशिष्टं महस्तेजो येषां ते तथोक्ताः । सुगोपातमः । शोभनो गोपा रक्षको यस्य स सुगोपाः । अतिशयेन सुगोपाः सुगोपातमः । तमपः पित्त्वादनुदात्तत्वे सति बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वमेव शिष्यते ॥

यज्ञैर्वा यज्ञवाहसो विप्रस्य वा मतीनाम् । मरुतः शृणुता हवम् ॥ २ ॥

यज्ञैः । वा । यज्ञऽवाहसः । विप्रस्य । वा । मतीनाम् । मरुतः । शृणुत । हवम् ॥ २ ॥

हे [v]यज्ञवाहसः यज्ञस्य वोढारः [v]मरुतः यूयं [v]यज्ञैर्वा । वाशब्दः समुच्चये । यज्ञैश्च यजमानस्य [v]मतीनां स्तुतीनां संबन्धिनः [v]विप्रस्य [v]वा अयजमानस्य मेधाविनश्च [v]हवम् आह्वानं [v]शृणुत । यज्ञवतो यजमानस्य यागरहितस्य स्तोतुश्चाह्वानमवश्यं भवद्भिः श्रोतव्यं यतः[3] भवन्तो यज्ञस्य वोढारः स्तुतिप्रियाश्चेति भावः ॥ यज्ञवाहसः । ' गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च ' इति वचनात् ' वहिहाधाञ्भ्यश्छन्दसि ' इति कारकपूर्वात् वहतेरसुन् । ' णित् ' इत्यनुवृत्तेः उपधावृद्धिः । मतीनाम् । ' मन ज्ञाने ' । अस्मात् करणे क्तिन् । ' नामन्यतरस्याम् ' इति नाम उदात्तत्वम् । शृणुत । ' श्रुवः शृ च ' इति शृुः । ' सतिशिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः ' इति वचनात् तिङ एव स्वरः शिष्यते । मरुत इत्यस्य आमन्त्रितस्य ' आमन्त्रितं पूर्वमविद्यमानवत् ' इति अविद्यमानवत्त्वेन पदादपरत्वात् निघाताभावः । हवम् । ' भावेनुपसर्गस्य ' इति ह्वयतेरप् संप्रसारणं च ॥

उत वा यस्य वाजिनोऽनु विप्रमतक्षत । स गन्ता गोमति व्रजे ॥ ३ ॥

उत । वा । यस्य । वाजिनः । अनु । विप्रम् । अतक्षत । सः । गन्ता । गोऽमति । व्रजे ॥ ३ ॥

[v]उत [v]वा अपि च [v]यस्य यजमानस्य [v]वाजिनः हविर्लक्षणान्नोपेता ऋत्विजः [v]विप्रं मेधाविनं मरुद्गणम् [v]अनु [v]अतक्षत हविष्प्रदानादिना तीक्ष्णीकुर्वन्ति [v]सः यजमानः [v]गोमति बहुभिर्गोभिर्युक्ते

---

१. स–प्रथमस्य । २. क्ष–यद्वृत्तान्नित्यमिति निघातप्रतिषेधः । ३. क्ष-स–अतः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]व्रजे गोष्ठे [v]गन्ता गमनशीलो भवति ॥ अतक्षत । ' तक्षू त्वक्षू तनूकरणे ' । छान्दसो लङ् । व्यत्ययेन मध्यमः । गन्ता । गमेस्ताच्छीलिकः तृन् ॥

**अस्य वीरस्य बर्हिषि सुतः सोमो दिविष्टिषु । उक्थं मदश्च शस्यते ॥ ४ ॥**

अस्य । वीरस्य । बर्हिषि । सुतः । सोमः । दिविष्टिषु । उक्थम् । मदः । च । शस्यते ॥४॥

[v]दिविष्टिषु यजनीयदिवसेषु [v]बर्हिषि यज्ञे [v]वीरस्य शत्रुक्षेपणकुशलस्य [v]अस्य मरुद्गणस्य यागाय[1] [v]सोमः [v]सुतः । ऋत्विग्भिरभिषुतो भवति । [v]उक्थं मरुद्देवताकं शस्त्रं [v]मदश्च मदिधातुना युक्ता ' मरुतो देवाः सोमस्य मत्सन् ' इत्यादिका मारुती निवित् च अस्य मरुद्गणस्य हर्षाय [v]शस्यते होत्रा पठ्यते ॥ अस्य । ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम् । दिविष्टिषु । इष्टय एषणानि गमनानि । दिवो द्योतमानस्य सूर्यस्येष्टयो येषु दिवसेषु ते तथोक्ताः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । व्यत्ययेन उत्वाभावः ॥

**अस्य श्रोषन्त्वा भुवो विश्वा यश्चर्षणीरभि । सूरं चित्सश्चुषीरिषः ॥ ५ ॥**

अस्य । श्रोषन्तु । आ । भुवः । विश्वाः । यः । चर्षणीः । अभि । सूरम् । चित् । सश्चुषीः । इषः ॥५॥

[v]अस्य यजमानस्य स्तुतिं मरुतः [v]आ आभिमुख्येन [v]श्रोषन्तु शृण्वन्तु । [v]यः मरुद्गणः [v]विश्वाः [v]चर्षणीः सर्वान् शत्रुभूतान्मनुष्यान् [v]अभि [v]भुवः अभिभवति । तादृग्गणाकारा मरुतः शृण्वन्त्वित्यर्थः । [v]सूरं [v]चित् स्तुतेः प्रेरयितारं यजमानमपि [v]इषः मरुद्भिः प्रत्तान्यन्नानि [v]सश्चुषीः प्राप्तानि भवन्तु ॥ श्रोषन्तु । ' श्रु श्रवणे ' । लोटि ' सिब्बहुलं लेटि ' इति बहुलवचनात् सिप् । भुवः । भवतेर्लेटि तिपः ' तिङां तिङो भवन्ति ' इति सिप् । ' लेटोऽडाटौ ' इति अडागमः । ' बहुलं छन्दसि ' इति शपो लुक् । ' भूसुवोस्तिङि ' इति गुणप्रतिषेधः । सूरम् । ' षू प्रेरणे ' । ' सुसूधागृधिभ्यः क्रन् ' इति क्रन्प्रत्ययः । सश्चुषीः । ' स्रु गतौ ' । अस्मात् लिटः क्वसुः । ' उगितश्च ' इति ङीप् । भसंज्ञायां ' वसोः संप्रसारणम् ' इति संप्रसारणम् । ' शासिवसिघसीनां च ' इति षत्वम् । जसि ' वा छन्दसि ' इति पूर्वसवर्णदीर्घत्वम् ॥ ॥ ११ ॥

**पूर्वीभिर्हि ददाशिम शरद्भिर्मरुतो वयम् । अवोभिश्चर्षणीनाम् ॥ ६ ॥**

पूर्वीभिः । हि । ददाशिम । शरत्ऽभिः । मरुतः । वयम् । अवःऽभिः । चर्षणीनाम् ॥६॥

हे [v]मरुतः [v]पूर्वीभिः बह्वीभिः [v]शरद्भिः संवत्सरैः [v]चर्षणीनां सर्वस्य द्रष्टॄणां सर्वज्ञानां भवतां संबन्धिभिः [v]अवोभिः रक्षणैर्युक्ताः सन्तः [v]वयं [v]ददाशिम युष्मभ्यं हवींषि दत्तवन्तः । [v]हि यस्मादर्थे । यस्मादेवं तस्मादिदानीमप्यस्मदीयहविःस्वीकरणायागच्छत इत्यर्थः ॥ पूर्वीभिः । पुरुशब्दात् ' वोतो गुणवचनात् ' इति ङीष् । यणादेशे ' हलि च ' इति दीर्घत्वम् । ददाशिम । ' दाश्र दाने ' । लिटि इडागमः । ' हि च ' इति निघातप्रतिषेधः । चर्षणीनाम् । ' नामन्यतरस्याम् ' इति नाम उदात्तत्वम् ॥

---

१. क्ष-ट-ढ-पानाय ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सुभगः स प्रयज्यवो मरुतो अस्तु मर्त्यः । यस्य प्रयांसि पर्षथ ॥ ७ ॥

सुऽभगः । सः । प्रऽयज्यवः । मरुतः । अस्तु । मर्त्यः । यस्य । प्रयांसि । पर्षथ ॥ ७ ॥

हे Vप्रयज्यवः प्रकर्षेण यष्टव्याः Vमरुतः Vसः Vमर्त्यः मनुष्यो यजमानः Vसुभगः Vअस्तु शोभनधनो भवतु । Vयस्य यजमानस्य Vप्रयांसि हविर्लक्षणान्यन्नानि Vपर्षथ आत्मनि सिञ्चथ स्वीकुरुथ इत्यर्थः ॥ सुभगः । भग इति धननाम । शोभनो भगो यस्य । 'कृत्वादयश्च' इत्युत्तरपदाद्युदात्तत्वम् । पर्षथ । 'पृषु वृषु सृषु सेचने' । भौवादिकः । 'यदवृत्तान्नित्यम्' इति निघातप्रतिषेधः ॥

शशमानस्य वा नरः स्वेदस्य सत्यशवसः । विदा कामस्य वेनतः ॥ ८ ॥

शशमानस्य । वा । नरः । स्वेदस्य । सत्यऽशवसः । विद । कामस्य । वेनतः ॥ ८ ॥

हे Vसत्यशवसः अवितथबलाः Vनरः नेतारो मरुतः Vशशमानस्य युष्मान् स्तुतिभिः संभजमानस्य Vस्वेदस्य स्तावकमन्त्रोच्चारणजनितेन श्रमेण स्विद्यमानगात्रस्य Vवेनतः । वेनतिः कान्तिकर्मा । कामयमानस्य । वाशब्दः समुच्चये । एवंभूतस्य स्तोतुश्च Vकामस्य काममभिलाषं Vविद लम्भयत प्रयच्छतेत्यर्थः ॥ शशमानस्य । 'शश प्लुतगतौ' । ताच्छीलिकः चानश् । स्वेदस्य । 'ञिष्विदा गात्रप्रक्षरणे' । अन्तर्भावितण्यर्थात् कर्मणि घञ् । जित्त्वादाद्युदात्तत्वम् । विद । 'विदृ लाभे' । लोटि मध्यमपुरुषबहुवचनस्य व्यत्ययेन झादेशः । 'बहुलं छन्दसि' इति विकरणस्य लुक् । झस्य अदादेशः । 'लोपस्त आत्मनेपदेषु' इति तलोपः । प्रत्ययाद्युदात्तत्वम् । पादादित्वात् निघाताभावः । 'ह्यचोऽतस्तिङः' इति संहितायां दीर्घः । कामस्य । वृषादिषु पाठादाद्युदात्तत्वम् । 'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी ॥

यूयं तत्सत्यशवस आविष्कर्त महित्वना । विध्यता विद्युता रक्षः ॥ ९ ॥

यूयम् । तत् । सत्यऽशवसः । आविः । कर्त । महिऽत्वना । विध्यत । विऽद्युता । रक्षः ॥ ९ ॥

हे Vसत्यशवसः सत्यबला अन्यैरप्रधृष्यबला मरुतः Vयूयं Vतत् वृत्रवधादिषु प्रसिद्धं युष्मदीयं माहात्म्यम् Vआविष्कर्त आविष्कुरुत प्रकाशयत । Vविद्युता विद्योतमानेन Vमहित्वना तेन महत्त्वेन माहात्म्येन Vरक्षः अस्माकमुपद्रवकारिणं राक्षसादिकं Vविध्यत ताडयत नाशयतेत्यर्थः ॥ कर्त । करोतेर्लोटि 'बहुलं छन्दसि' इति विकरणस्य लुक् । 'तसनसनथनाश्च' इति तबादेशः । गुणः । 'इदुदुपधस्य चाप्रत्ययस्य' ( पा. सू. ८. ३. ४१ ) इति आविःशब्दे विसर्जनीयस्य षत्वम् । महित्वना । भावप्रत्ययादुत्तरस्य आङः व्यत्ययेन नाभावः उदात्तत्वं च । यद्वा । 'सुपां सुलुक्०' इति तृतीयाया आजादेशो नकारोपजनश्च । विध्यत । 'व्यध ताडने' । श्यनि ग्रहिज्यादिना संप्रसारणम् । तशब्दस्य 'सार्वधातुकमपित्' इति ङित्त्वे सति 'ऋचि तुनुघमक्षुतङ्०' इति संहितायां दीर्घः ॥

गूहता गुह्यं तमो वि यात विश्वमत्रिणम् । ज्योतिष्कर्ता यदुश्मसि ॥ १० ॥

गूहत । गुह्यम् । तमः । वि । यात । विश्वम् । अत्रिणम् । ज्योतिः । कर्त । यत् । उश्मसि ॥ १० ॥



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे मरुतः Vगुह्यं गुहायां स्थितं सर्वत्र व्याप्य वर्तमानं Vतमः अन्धकारं Vगूहत संवृतं कुरुत। यथा अस्माभिर्न दृश्यते तथा अदर्शनं प्रापयत विनाशयतेत्यर्थः। Vविश्वं सर्वम् Vअत्रिणम् अत्तारं राक्षसादिकं Vवि Vयात विविधं यापयत अस्मत्सकाशात् निर्गमयत। Vयत् Vज्योतिः सूर्यादिकं वयम् Vउश्मसि कामयामहे तत् Vकर्त कुरुत। यद्वा। गुह्यं गुहायां शरीरान्तर्गतगुहारूपे हृदये भवं तमो भावरूपाज्ञानं तद्गूहत[1] विनाशयत। अत्रिणं पुरुषार्थस्यात्तारं कामक्रोधादिकं सर्वं विनिर्गमयत। यज्ज्योतिः परतत्त्वसाक्षात्काररूपं ज्ञानं कामयामहे प्राणापानादिपञ्चवृत्तिरूपा हे मरुतस्तत्कर्त कुरुत॥ गूहत। 'गुहू संवरणे'। शपि लघूपधगुणे 'ऊदुपधाया गोहः' (पा. सू. ६. ४. ८९) इति उपधाया ऊकारः। यात। 'या प्रापणे'। अस्मात् अन्तर्भावितण्यर्थात् लोट्। अत्रिणम्। 'अदेस्त्रिनि च' (उ. सू. ४. ५०८) इति त्रिनिप्रत्ययः। उश्मसि। 'वश कान्तौ'। इदन्तो मसिः। अदादित्वात् शपो लुक्। ग्रहिज्यादिना संप्रसारणम्॥ ॥ १२ ॥

'प्रत्वक्षसः' इति षड्चं तृतीयं सूक्तं गोतमस्यार्षं जागतं मारुतम्। तथा चानुक्रान्तं—'प्रत्वक्षसः षड् जागतम्' इति। अग्निष्टोमे आग्निमारुतशस्त्रे इदं सूक्तं मारुतनिविद्धानम्। 'अथ यथेतम्' इति खण्डे सूत्रितं—'प्रत्वक्षसः प्रतवसो यज्ञा यज्ञा वो अग्नये' (आश्व. श्रौ. ५. २०) इति॥

प्रत्वक्षसः प्रतवसो विरप्शिनोऽनानता अविथुरा ऋजीषिणः।
जुष्टतमासो नृतमासो अञ्जिभिर्व्यानञ्जे के चिदुस्राइव स्तृभिः॥ १॥

प्रऽत्वक्षसः। प्रऽतवसः। विऽरप्शिनः। अनानताः। अविथुराः। ऋजीषिणः।
जुष्टऽतमासः। नृऽतमासः। अञ्जिऽभिः। वि। आनञ्जे। के। चित्। उस्राःऽइव। स्तृऽभिः॥१॥

Vप्रत्वक्षसः शत्रूणां प्रकर्षेण तनूकर्तारः शत्रुघातिन इत्यर्थः। यतः Vप्रतवसः प्रकृष्टबलोपेताः अत एव Vविरप्शिनः विविधेन जयघोषेणोपेताः। यद्वा। महन्नामैतत्। महान्तो हि विविधैः शब्दैः प्रशस्यन्ते। अत एव Vअनानताः आनतिरहिताः सर्वोत्कृष्टा इत्यर्थः। Vअविथुराः अवियुक्ताः। सप्तगणरूपेण संघीभूता इत्यर्थः। Vऋजीषिणः। तृतीयसवने ऋजीषस्याभिषवात् तत्र च मरुतः स्तूयन्ते इति तेषामृजीषित्वम्। यद्वा। ऋजीषिणः प्रार्जयितारो रसानाम्। Vजुष्टतमासः अतिशयेन यष्टृभिः सेविताः Vनृतमासः अतिशयेन मेघादेर्नेतारः एवंभूता मरुतः Vस्तृभिः स्वशरीरस्याच्छादकैः Vअञ्जिभिः रूपाभिव्यञ्जकैराभरणैः Vव्यानञ्जे नभसि व्यक्ता दृश्यन्ते। तत्र दृष्टान्तः। Vके Vचित् Vउस्राइव। ये[2] केचन सूर्यरश्मयो यथा नभसि दीप्यन्ते तद्वत्॥ प्रत्वक्षसः। प्रकर्षेण त्वक्षन्ते तनूकुर्वन्तीति प्रत्वक्षसः। 'तक्षू त्वक्षू तनूकरणे'। 'गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च' इति असुन् पूर्वपदप्रकृतिस्वरत्वं च। प्रतवसः। तवः इति बलनाम। प्रकृष्टं तवो येषाम्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। विरप्शिनः। 'रप लप व्यक्तायां वाचि'। विरपणं विरप्शः। औणादिकः शक्प्रत्ययः। तद्वन्तो विरप्शिनः। अनानताः। आनता अव्रनताः ग्रह्वीभूताः। न आनता अनानताः। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। अविथुराः। 'व्यथ भयचलनयोः'। 'व्यथेः संप्रसारणं धः किच्च'

---

१. क्ष—गूहत। २. ट-ढ-स—'ये' नास्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

( उ. सू. १. ३९ ) इति उरच्प्रत्ययः । अत्र तु बहुलवचनात् धत्वं न क्रियते । पूर्ववत् समासस्वरौ । जुष्टतमासः । ' निश्यं मन्त्रे ' इति जुष्टशब्दः आद्युदात्तः । तत आतिशायनिकस्य तमपः पित्त्वादनुदात्तत्वे स एव स्वरः शिष्यते । आनञ्रे । ' अञ्चू व्यक्तिम्रक्षणकान्तिगतिषु ' । कर्मणि ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लिट् । ' अत आदेः ' इति अभ्यासस्य आत्वम् । ' तस्मान्नुड् द्विहलः ' ( पा. सू. ७. ४. ७१ ) इति नुट् । व्यत्ययेन उपधालोपः । ' इरयो रे ' । स्तृभिः । ' स्तृञ् आच्छादने ' । क्विप् । आगमानुशासनस्यानित्यत्वात् तुगभावः ॥

उपह्वरेषु यदचिध्वं यायिं वयइव मरुतः केन चित्पथा ।
श्रोतन्ति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्णमर्चते ॥ २ ॥

उपऽह्वरेषु । यत् । अचिध्वम् । यायिम् । वयःऽइव । मरुतः । केन । चित् । पथा ।
श्रोतन्ति । कोशाः । उप । वः । रथेषु । आ । घृतम् । उक्षत । मधुऽवर्णम् । अर्चते ॥२॥

हे ᵛमरुतः ᵛउपह्वरेषु उपह्वर्तव्येषु गन्तव्येष्वस्माकं संनिकृष्टेषु नभसः प्रदेशेषु ᵛयत् यदा ᵛयायिं गतिमन्तं मेघम् ᵛअचिध्वं वर्षणसामर्थ्येनोपचितं कुरुथ । किं कुर्वन्तः । ᵛवयइव पक्षिण इव ᵛकेन ᵛचित् ᵛपथा केनचिदाकाशमार्गेण शीघ्रं गच्छन्तः । नभसि शीघ्रं वर्षणार्थं प्रवर्तमानैर्मरुद्भिर्मेघा उपचीयन्ते इत्यर्थः । तदानीं ᵛकोशाः । मेघनामैतत् । ᵛवः युष्माकं ᵛरथेषु आसक्ता मेघाः ᵛश्रोतन्ति जलं मुञ्चन्ति । यस्मादेवं तस्मात् हे मरुतो यूयम् ᵛअर्चते युष्मान् हविर्भिः पूजयते मह्यं यजमानाय ᵛमधुवर्णं मधुसदृशरूपं स्वच्छं ᵛघृतं वृष्ट्युदकम् ᵛआ समन्तात् ᵛउक्षत सिञ्चत । अस्मदभिलषितां वृष्टिं कुरुतेत्यर्थः ॥ उपह्वरेषु । ' ह्वृ कौटिल्ये ' । उपह्वरन्ति कौटिल्येन तिर्यग्गच्छन्त्येष्विति उपह्वरा नभःप्रदेशाः । ' पुंसि संज्ञायां घः प्रायेण ' इति अधिकरणे घः । अचिध्वम् । चिनोतेः वर्तमाने लङ् । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । यायिम् । ' या प्रापणे ' । ' आदृगमहनजनः० ' इति किप्रत्ययः । पथा । आङि ' भस्य टेर्लोपः ' इति टिलोपः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । श्रोतन्ति । ' श्च्युतिर् क्षरणे ' । छान्दसो यलोपः । उक्षत । ' उक्ष सेचने ' । लोटि तशब्दस्य ङित्त्वे सति ' ऋचि तुनुघ० ' इत्यादिना सांहितिको दीर्घः ॥

प्रैषामज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युञ्जते शुभे ।
ते क्रीळयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयन्त धूतयः ॥ ३ ॥

प्र । एषाम् । अज्मेषु । विथुराऽइव । रेजते । भूमिः । यामेषु । यत् । ह । युञ्जते । शुभे ।
ते । क्रीळयः । धुनयः । भ्राजत्ऽऋष्टयः । स्वयम् । महिऽत्वम् । पनयन्त । धूतयः ॥ ३ ॥

ᵛयद्ध यदा खलु एते मरुतः ᵛशुभे शोभनाय वृष्ट्युदकाय ᵛयुञ्जते मेघान् सज्जीकुर्वन्ति तदानीम् ᵛअज्मेषु मेघानामुत्क्षेपकेषु ᵛएषां मरुतां संबन्धिषु ᵛयामेषु मेघानां नियमनेषु सत्सु ᵛभूमिः पृथिवी[1] ᵛप्र

१. क्ष-स-' पृथिवी ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vरेजते प्रकर्षेण कम्पते। यद्वा। यदा खलु मरुतः स्वकीयान् रथान् युञ्जते अश्वैर्योजयन्ति तदानीमेषां रथानां संबन्धिषु पर्वतादेरुत्क्षेपकेषु यामेषु गमनेषु[1] भूमिर्भीत्या कम्पते। तत्र दृष्टान्तः। Vविथुरेव। यथा भर्त्रा वियुक्ता जाया राजोपद्रवादिषु सत्सु निरालम्बा सती कम्पते तद्वत्। Vते तादृशाः Vक्रीळयः विहारशीलाः Vधुनयः चलनस्वभावाः Vभ्राजदृष्टयः दीप्यमानायुधाः एवंभूता मरुतः Vधूतयः पर्वतादीन् धुन्वन्तः सन्तः Vमहित्वं स्वकीयं महिमानं स्वयमेव Vपनयन्त व्यवहरन्ति प्रकटयन्तीत्यर्थः ॥ अज्मेषु। 'अज गतिक्षेपणयोः'। 'अर्तिस्तुसु०' इत्यादिना विधीयमानो मन् बहुलवचनादस्मादपि द्रष्टव्यः। 'वलादावार्धधातुके विकल्प इष्यते' ( का. २. ४. ५६. २ ) इति वचनात् 'अजेर्व्यघञपोः' इति वीभावाभावः। नित्त्वादाद्युदात्तत्वम्। रेजते। 'रेजृ कम्पने'। 'भ्यसते रेजत इति भयवेपनयोः' ( निरु. ३. २१ ) इति यास्कः। यामेषु। 'यम उपरमे'। भावे घञ्। 'कर्षात्वतः०' इत्यन्तोदात्तत्वे प्राप्ते वृषादिषु पाठादाद्युदात्तत्वम्। यद्वा। 'या प्रापणे' इत्यस्मात् 'अर्तिस्तुसु०' इत्यादिना मन्प्रत्ययः। शुभे। 'शुभ दीप्तौ'। संपदादिलक्षणः क्विप्। 'सावेकाचः०' इति विभक्तेरुदात्तत्वम्। पनयन्त। 'पन व्यवहारे'। 'गुपूधूपविच्छि०' ( पा. सू. ३. १. २८ ) इति आयः। अस्मात् छान्दसो लङ्। व्यत्ययेन ह्रस्वत्वम् ॥

स हि स्वसृत्पृषदश्वो युवा गणोऽया ईशानस्तविषीभिरावृतः।
असि सत्य ऋणयावानेद्योऽस्या धियः प्रावितार्था वृषा गणः ॥ ४ ॥

सः। हि। स्वऽसृत्। पृषत्ऽअश्वः। युवा। गणः। अया। ईशानः। तविषीभिः। आऽवृतः। असि। सत्यः। ऋणऽयावा। अनेद्यः। अस्याः। धियः। प्रऽअविता। अथ। वृषा। गणः ॥४॥

Vस Vहि स खलु मरुद्गणः Vअया अस्य सर्वस्य जगतः Vईशानः ईशनशीलः भवति। कीदृशः। Vस्वसृत् स्वयमेव सरन्। न ह्यन्यः कश्चिदस्य मरुद्गणस्य प्रेरकोऽस्ति। Vपृषदश्वः। पृषत्यः श्वेतबिन्दुङ्किताः मृग्यः अश्वस्थानीयाः यस्य स तथोक्तः। Vयुवा नित्यतरुणः Vतविषीभिः अन्येषामसाधारणैर्बलैः Vआवृतः परिवेष्टितः Vसत्यः सत्कर्मार्हः Vऋणयावा स्तोतृणामृणस्यापगमयिता बहुलस्य धनस्य दातेत्यर्थः। Vअनेद्यः। प्रशस्यनामैतत्। सर्वैरनिन्दितः Vवृषा जलानां वर्षिता। एवंभूतो मरुद्गणः Vअस्याः Vधियः अस्मदीयस्यास्य कर्मणः Vअथ अनन्तरं Vप्रावितार Vअसि प्रकर्षेण रक्षिता भवति ॥ अया। 'सुपां सुलुक्०' इति षष्ठ्याः याजादेशः। 'हलि लोपः' ( पा. सू. ७. २. ११३ ) इति इदम इद्रूपस्य लोपः। ईशानः। 'ईश ऐश्वर्ये' इत्यस्मात् ताच्छीलिकः चानश्। तस्य लसार्वधातुकत्वाभावेन[2] चित्स्वरेणान्तोदात्तत्वम्। अया ईशान इत्यत्र ईषाअक्षादित्वात् प्रकृतिभावः। असि। पुरुषव्यत्ययः। ऋणयावा। 'या प्रापणे' इत्यस्मात् अन्तर्भावितण्यर्थात् 'आतो मनिन्०' इति वनिप्। अनेद्यः। 'णिदि कुत्सायाम्'। 'ऋहलोर्ण्यत्' इति ण्यत्। आगमानुशासनस्यानित्यत्वात् नुमभावे लघूपधगुणः। नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

---

१. क्ष-न-स—गमनेषु सत्सु। २. क्ष-ढ—लसार्वधातुकत्वाभावेन लसार्वधातुकस्वराभावे।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पितुः प्रत्नस्य जन्मना वदामसि सोमस्य जिह्वा प्र जिगाति चक्षसा ।
यदीमिन्द्रं शम्यृक्वाण आशतादिन्नामानि यज्ञियानि दधिरे ॥ ५ ॥

पितुः । प्रत्नस्य । जन्मना । वदामसि । सोमस्य । जिह्वा । प्र । जिगाति । चक्षसा ।
यत् । ईम् । इन्द्रम् । शमि । ऋक्वाणः । आशत । आत् । इत् । नामानि । यज्ञियानि । दधिरे ॥५॥

vप्रत्नस्य चिरंतनस्य vपितुः अस्माकं जनकस्य रहूगणस्य सकाशात् यत् जन्म तेन वयं vवदामसि ब्रूमः । वक्ष्यमाणं वृत्तान्तम्[1] अस्माकं पितोपदिष्टवान् अतो वयं ब्रूम इत्यर्थः । कोऽसौ वृत्तान्तः इति चेत् उच्यते । vसोमस्य यज्ञेष्वभिषुतस्य सोमद्रव्यस्य vचक्षसा प्रकाशमानयाहुत्या सहिता vजिह्वा स्तुतिरूपा वाक् vप्र vजिगाति मरुद्गणं प्रकर्षेण गच्छति । यज्ञेषु सोमाहुतिः स्तुतिश्च मरुद्भ्यः क्रियते । यस्मात् vईम् एनम्[2] vइन्द्रं vशमि वृत्रवधादिरूपे कर्मणि vऋक्वाणः ' प्रहर भगवो जहि वीरयस्व ' इत्येवंरूपया स्तुत्या युक्ताः सन्तः vआशत प्राप्नुवन् न पर्यत्याक्षुः । vआदित् एवमिन्द्रप्राप्त्यनन्तरमेव vयज्ञियानि यज्ञार्हाणि ' ईदृङ् चान्यादृङ् च ' इत्येवमादीनि vनामानि इन्द्रसकाशात् लब्ध्वा vदधिरे धृतवन्तः तस्मादेषां यज्ञे सोमाहुतिः स्तुतिश्च क्रियते ॥ शमि । शमी इति कर्मनाम । सप्तम्येकवचने छान्दसः ईकारलोपः । ऋक्वाणः । ' ऋच स्तुतौ ' । संपदादिलक्षणो भावे क्विप् । ' छन्दसीवनिपौ ' इति मत्वर्थीयो वनिप् । अन्त्यविकारश्छान्दसः । यद्वा । अयस्मयादिषु क्वचिदुभयं भवति ( का. १. ४. २० ) इत्युक्तत्वात् ' स सुष्टुभा स ऋक्वता ' इत्यादाविव पदत्वात् कुत्वं भत्वात् जश्त्वाभावः । आशत । लङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । यज्ञियानि । ' यज्ञर्त्विग्भ्यां घखञौ ' इति अर्हार्थे घः ॥

श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः ।
ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः ॥ ६ ॥

श्रियसे । कम् । भानुऽभिः । सम् । मिमिक्षिरे । ते । रश्मिऽभिः । ते । ऋक्वऽभिः । सुऽखादयः ।
ते । वाशीऽमन्तः । इष्मिणः । अभीरवः । विद्रे । प्रियस्य । मारुतस्य । धाम्नः ॥ ६ ॥

vते पूर्वोक्ता मरुतः vभानुभिः भानुशीलैर्दीप्यमानैः सूर्यरश्मिभिः सह vकं वृष्ट्युदकं vश्रियसे श्रयितुं प्राणिभिः सेवितुं vसं vमिमिक्षिरे सम्यग्मेदुमिच्छन्ति । पृथिवीं वृष्ट्युदकेन सम्यक् सेक्तुमिच्छन्ति । एवं वृष्टिमुत्पाद्य vते मरुतः vऋक्वभिः स्तुतिमद्भिर्ऋत्विग्भिः सह vसुखादयः शोभनस्य हविषो भक्षयितारो भवन्ति । vवाशीमन्तः । वाशी इति वाङ्नाम । शोभनया स्तुतिलक्षणया वाचोपेताः vइष्मिणः गतिमन्तः vअभीरवः भयरहिताः vते मरुतः vप्रियस्य सर्वाभिमतस्य vमारुतस्य मरुत्संबन्धिनः vधाम्नः स्थानस्य सर्वाभिमतं मरुत्संबद्धं विशिष्टं स्थानं vविद्रे लब्धवन्तः ॥ श्रियसे । ' तुमर्थे सेसेन्° ' इति कसेन्प्रत्ययः । मिमिक्षिरे । ' मिह सेचने ' । अस्मात् इच्छासनन्तात् लिटि ' °अमन्त्रे ' इति निषेधात् आमभावः । व्यत्ययेन आत्मनेपदम् । सुखादयः । ' खादृ भक्षणे ' । औणादिकः[3] इप्रत्ययः ।

---

१. क्ष-ट-ढ–' वृत्तान्तम् ' नास्ति । २. त-श–एतम् । ३. ढ–अस्मादौणादिकः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

शोभना खादिर्भक्षणं येषाम्। ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम्। इष्मिणः। ' इष गतौ '। ' इषियुधीन्धि ' इत्यादिना मक्। ततो मत्वर्थीय इनिः। विद्रे। ' विद्लृ लाभे '। लिटि द्विर्वचनप्रकरणे ' छन्दसि वेति वक्तव्यम् ' इति द्विर्वचनाभावः। ' इरयो रे ' इति इरयो रेभावः ॥ ॥ १३ ॥

" ' आ विद्युन्मद्भिः ' इति षड्चं चतुर्थं सूक्तम्। अत्रानुक्रम्यते—' आ विद्युन्मद्भिराद्यान्त्ये प्रस्तारपङ्क्ती पञ्चमी विराड्रूपा ' इति। पूर्ववदृषिदेवते। आद्या षष्ठी च द्वे प्रस्तारपङ्क्ती। आद्यौ पादौ जागतौ तृतीयचतुर्थौ गायत्रौ यस्याः सा प्रस्तारपङ्क्तिः। सूत्रितं च—' प्रस्तारपङ्क्तिः पुरतः ' ( पि. सू. ३. ४० ) इति। अस्यायमर्थः। ' जागतौ गायत्रौ च ' इत्यनुवर्तते। यदि पुरतः पुरस्तात् द्वौ जागतौ पादौ स्याताम् अन्त्यौ गायत्रौ सा प्रस्तारपङ्क्तिरिति। ' एतत्त्यत् ' इत्येषा पञ्चमी विराड्रूपा। आदितस्त्रयः पादा एकादशका अन्त्योऽष्टकः सा विराड्रूपेत्युच्यते। विनियोगो लैङ्गिकः ॥

आ विद्युन्मद्भिर्मरुतः स्वर्कै रथेभिर्यात ऋष्टिमद्भिरश्वपर्णैः।
आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः ॥ १ ॥

आ। विद्युन्मत्ऽभिः। मरुतः। सुऽअर्कैः। रथेभिः। यात। ऋष्टिमत्ऽभिः। अश्वऽपर्णैः।
आ। वर्षिष्ठया। नः। इषा। वयः। न। पप्तत। सुऽमायाः ॥ १ ॥

हे मरुतः मितं निर्मितमन्तरिक्षं प्राप्य रुवन्ति शब्दं कुर्वन्तीति मरुतः। यद्वा। अमितं भृशं शब्दकारिणः। अथवा मितं स्वैर्निर्मितं मेघं प्राप्य विद्युदात्मना रोचमानाः। अथवा महत्यन्तरिक्षे द्रवन्तीति मरुतः। ये मध्यमस्थाने देवगणाः समाम्नातास्ते सर्वे मरुतः[1] आख्यायन्ते। तथा चाहुः—' सर्वा स्त्री मध्यमस्थाना पुमान् वायुश्च सर्वगः। गणाश्च सर्वे मरुत इति बृद्धानुशासनम् ' इति। पौराणिकास्त्वाचक्षते—' मारीचात्कश्यपात्सप्तगणात्मका एकोनपञ्चाशत्संख्याका मरुतो जज्ञिरे ' इति। एवंभूता हे ᵛमरुतः ᵛरथेभिः आत्मीयैः रथैः ᵛआ ᵛयात अस्मदीयं यज्ञमागच्छत। कीदृशैः रथैः। ᵛविद्युन्मद्भिः। विद्योतनं विद्युत्। विशिष्टदीप्तियुक्तैः ᵛस्वर्कैः स्वञ्चनैः शोभनगमनयुक्तैः। यद्वा। शोभनमर्कोऽर्चनं स्तुतिर्येषामस्ति तादृशैः। अथवा शोभनदीप्तियुक्तैः। ᵛऋष्टिमद्भिः। ऋष्टयः शक्तिरूपाण्यायुधानि। स्थूणा इत्यन्ये। तद्वद्भिः। ᵛअश्वपर्णैः। अश्वानां पतनं गमनं येषामस्ति तादृशैः। यद्वा। रंहणशीला मेघा रथाः। तैः सह अन्तरिक्षे वर्षणार्थमागच्छत। कीदृशैः। विद्युन्मद्भिः। विद्युता तडिता तद्वद्भिः स्वर्कैः शोभनगमनैः ऋष्टिमद्भिः। अर्षणं गमनम्। तत्स्वभावनीरयुक्तैः। अश्वपर्णैः। अश्वं व्याप्तं पर्ण पतनं गमनं येषाम्। अन्तरिक्षं व्याप्य वर्तमानैरित्यर्थः। हे ᵛसुमायाः। माया इति कर्मणो ज्ञानस्य च नामधेयम्। शोभनकर्माणः शोभनप्रज्ञा वा मरुतः ᵛवर्षिष्ठया प्रवृद्धतरया ᵛइषा अस्मभ्यं दातव्येनान्नेन सह ᵛनः अस्मान्प्रति ᵛवयो ᵛन पक्षिण इव शीघ्रम् ᵛआ ᵛपप्तत आपतत आगच्छतेत्यर्थः। अत्र निरुक्तम्—' अथातो मध्यस्थाना देवगणास्तेषां मरुतः प्रथमागामिनो भवन्ति। मरुतो मितराविणो वा मितरोचिनो वा महद्द्रवन्तीति वा ' इति, ' विद्युन्मद्भिर्मरुतः स्वर्कैः स्वञ्चनैरिति वा स्वर्चनैरिति वा स्वर्चिभिरिति वा रथैरायात ऋष्टिमद्भिरश्वपर्णैरश्वपतनैर्वर्षिष्ठेन च नोऽन्नेन वय इवापतत सुमायाः कल्याणकर्माणो वा कल्याणप्रज्ञा वा ' ( निरु. ११. १३-१४ )

---

१. क्ष-ट-ढ—मरुतः इति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति ॥ विद्युन्मद्भिः । यवादेराकृतिगणत्वेन विद्युच्छब्दस्य यवाद्यन्तर्भावात् ' °अयवादिभ्यः ' इत्यत्र अनुवृत्तेः ' झयः ' ( पा. सू. ८. २. १० ) इति मतुपो वत्वं न प्रवर्तते । ऋष्टिमद्भिः । ' ह्रस्वनुड्भ्यां मतुप् ' इति मतुप उदात्तत्वम् । अश्वपर्णैः । ' अशू व्याप्तौ ' । ' अशिप्रुषि° ' इत्यादिना क्नप्रत्ययः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । वर्षिष्ठया । वृद्धशब्दात् आतिशायनिके इष्ठनि ' प्रियस्थिर° ' इत्यादिना वर्षादेशः । पप्तत । ' पत्लृ गतौ ' । लङि लृदित्त्वात् च्लेः अडादेशः । ' पतः पुम् ' ( पा. सू. ७. ४. १९ ) इति पुमागमः ॥

तेऽरुणेभिर्वरमा पिशङ्गैः शुभे कं यान्ति रथतूभिरश्वैः ।
रुक्मो न चित्रः स्वधितीवान्पव्या रथस्य जङ्घनन्त भूमं ॥ २ ॥

ते । अरुणेभिः । वरम् । आ । पिशङ्गैः । शुभे । कम् । यान्ति । रथतूःऽभिः । अश्वैः ।
रुक्मः । न । चित्रः । स्वधितिऽवान् । पव्या । रथस्य । जङ्घनन्त । भूमं ॥ २ ॥

Vते पूर्वोक्ता मरुतः Vअरुणेभिः अरुणवर्णैः Vपिशङ्गैः पिङ्गलवर्णैरुभयवर्णोपेतैः Vरथतूभिः रथस्य प्रेरयितृभिः Vअश्वैः Vवरं देवानां वरीतारं Vकं शब्दयितारं स्तुवन्तं यजमानम् Vआ Vयान्ति आगच्छन्ति । किमर्थम् । Vशुभे तस्य शोभां कर्तुम् । अथवा शुभे उदकाय । वृष्ट्यर्थमित्यर्थः । तेषां मरुतां गणः Vरुक्मो Vन रोचमानं सुवर्णमिव Vचित्रः अतिशयेन दर्शनीयः Vस्वधितीवान् । स्वधितिः इति वज्रनाम । शत्रूणां खण्डकेनायुधेनोपेतः । एवंविधगणरूपास्ते मरुतः Vरथस्य Vपव्या चक्रधारया Vभूम भूमिं Vजङ्घनन्त अत्यर्थं घ्नन्ति । स्तोतृरक्षणार्थमागतानां तेषां मरुतां भारमसहमाना भूमिरतिपीडिता बभूवेत्यर्थः ॥ वरम् । व्रियन्ते देवाः अनेनेति वरः । ' ग्रहवृदनिश्चि° ' इति करणे अप् । कम् । ' कै गै शब्दे ' । कायतीति कः । बहुलवचनात् कप्रत्ययः । रथतूभिः । ' तुर त्वरणे ' । रथं तुतुरति त्वरायुक्तं कुर्वन्तीति रथतुरः । ' क्विप् च ' इति क्विप् । भिसि ' हलि च ' इति दीर्घत्वम् । पव्या । ' पवी रथनेमिर्भवति ' ( निरु. ५. ५ ) इति यास्कः । ' पूङ् पवने ' । अस्मात् ' अच इः ' इति इप्रत्ययः । ' उदात्तयणः° ' इति विभक्तेरुदात्तत्वम् । जङ्घनन्त । हन्तेर्यङन्तात् वर्तमाने छान्दसो लङ् । ' छन्दस्युभयथा ' इति शप आर्धधातुकत्वात् अतोलोपयलोपौ । भूम । भूमिशब्दादुत्तरस्य अमः ' सुपां सुलुक् ° ' इति डादेशः । छान्दसं ह्रस्वत्वम् ॥

श्रिये कं वो अधि तनूषु वाशीर्मेधा वना न कृणवन्त ऊर्ध्वा ।
युष्मभ्यं कं मरुतः सुजातास्तुविद्युम्नासो धनयन्ते अद्रिम् ॥ ३ ॥

श्रिये । कम् । वः । अधि । तनूषु । वाशीः । मेधा । वना । न । कृणवन्ते । ऊर्ध्वा ।
युष्मभ्यम् । कम् । मरुतः । सुऽजाताः । तुविऽद्युम्नासः । धनयन्ते । अद्रिम् ॥ ३ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे मरुतः Vवः युष्माकं Vतनूषु शरीरेष्वंसप्रदेशेषु Vवाशीः शत्रूणामाक्रोशकम् आराख्यमायुधं Vश्रिये Vकम् ऐश्वर्यार्थं वर्तते इति शेषः। कम् इत्येतत् पादपूरणम्[1]। तदुक्तम्–' अथापि पादपूरणाः[2] कमीमिद्धिति ' इति। तादृशा मरुतः Vवना Vन उच्छ्रितान् वृक्षसमूहानिव Vमेधा मेधान् यज्ञान् Vऊर्ध्वा ऊर्ध्वान् एकाहाहीनसत्ररूपेणोच्छ्रितान् Vकृणवन्ते यजमानैः कारयन्ति। हे Vसुजाताः शोभनजननयुक्ताः Vमरुतः Vयुष्मभ्यं युष्मदर्थं Vकं सुखकरम् Vअद्रिं सोमाभिषवे प्रवृत्तं ग्रावाणं Vतुविद्युम्नासः प्रभूतधना यजमानाः Vधनयन्ते धनं कुर्वन्ति युष्माकं यागाय ग्रावभिरभिषुण्वन्तीत्यर्थः॥ वाशीः। शत्रूणां भयोत्पादनेनाक्रोशशब्दकरणं वाशः। ततः ' छन्दसीवनिपौ° ' इति मत्वर्थीय ईकारः। व्यत्ययेनाद्युदात्तत्वम्। मेधा। ' सुपां सुलुक्° ' इति शसो डादेशः। वना। ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः। कृणवन्ते। ' कृवि हिंसाकरणयोश्च '। लटि व्यत्ययेन आत्मनेपदम्। ' धिन्विकृण्व्योर च ' इति उप्रत्ययः। पुनरपि व्यत्ययेन अन्तादेशः। ' छन्दस्युभयथा ' इति आर्धधातुकत्वेन झस्य अडित्त्वात् गुणे अवादेशः। ऊर्ध्वा। पूर्ववत् डादेशः। धनयन्ते। धनशब्दात् ' तत्करोति° ' इति णिच्॥

अहानि गृध्राः पर्या व आगुरिमां धियं वार्क्यां च देवीम्।
ब्रह्म कृण्वन्तो गोतमासो अर्केरूर्ध्वं नुनुद्र उत्सधिं पिबध्यै॥ ४॥

अहानि। गृध्राः। परि। आ। वः। आ। अगुः। इमाम्। धियम्। वार्क्यम्। च। देवीम्।
ब्रह्म। कृण्वन्तः। गोतमासः। अर्कैः। ऊर्ध्वम्। नुनुद्रे। उत्सऽधिम्। पिबध्यै॥ ४॥

तृषितैर्गोतमैः स्तुता मरुतस्तेभ्यो गोतमेभ्यो देशान्तरे वर्तमानं कूपमुत्खायानीय प्रददुः[3]। एतत् दृष्ट्वा कश्चिदृषिर्ब्रूते। हे गोतमाः Vगृध्राः जलाभिकाङ्क्षायुक्तान् Vवः युष्मान् Vअहानि शोभनोदकोपेतानि दिनानि Vपरि Vआ Vअगुः पर्यागतानि परितः आभिमुख्येन प्राप्तानि। प्राप्य च Vवार्क्यां वार्भिः उदकैर्निष्पाद्यां Vधियं ज्योतिष्टोमादिलक्षणं कर्म Vच Vदेवीं द्योतमानमकुर्वन्[4]। येष्वहःसु Vब्रह्म हविर्लक्षणमन्नम् Vअर्कैः मन्त्रसाध्यैः स्तोत्रैः सह Vकृण्वन्तः मरुद्गयः कुर्वन्तः Vगोतमासः गोतमा ऋषयः Vउत्सधिम्। उत्सो जलप्रवाहोऽस्मिन्धीयते इत्युत्सधिः कूपः तं Vपिबध्यै स्वकीयपानाय Vऊर्ध्वं Vनुनुद्रे नुनुदिरे देशान्तरे वर्तमानं कूपमुत्खातवन्तः। एतदीयस्तोत्रैः स्तुता मरुतः कूपमुत्खातवन्त इति यत् तदेतदीयस्तोत्रकारितमिति एतेषूपचर्यते॥ गृध्राः। ' गृधु अभिकाङ्क्षायाम् '। ' सुसूधागृधिभ्यः क्रन् ' इति क्रन्प्रत्ययः। ' सुपां सुपो भवन्ति ' इति शसो जस्। नित्त्वादाद्युदात्तत्वम्। अगुः। एतेर्लुङि ' इणो गा लुङि ' इति गादेशः। ' आतः ' इति झेः जुस्। वार्क्यम्। ' डुकृञ् करणे '। ' ऋहलोर्ण्यत् '। वार्भिः कार्या वार्क्या। त्रिचक्रादित्वात् उत्तरपदान्तोदात्तत्वम्। नुनुद्रे। ' णुद प्रेरणे '। ' इरयो रे ' इति रेआदेशः। उत्सधिम्। ' कर्मण्यधिकरणे च ' इति दधातेरधिकरणे किप्रत्ययः। पिबध्यै। ' पा पाने '। ' तुमर्थे सेसेन्° ' इति शध्यैन्प्रत्ययः। ' पाघ्रा° ' इत्यादिना पिबादेशः॥

---

१. क्ष–पदपूरणम्। २. क्ष-ट-न-स–पदपूरणाः। ३. स-जलं ददुः। ४. क्ष-स–द्योतमानामकुर्वन्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

एतत्त्यन्न योजनमचेति सस्वर्ह यन्मरुतो गोतमो वः ।
पश्यन्हिरण्यचक्रानयोदंष्ट्रान्विधावतो वराहून् ॥ ५ ॥

एतत् । त्यत् । न । योजनम् । अचेति । सस्वः । ह । यत् । मरुतः । गोतमः । वः ।
पश्यन् । हिरण्यऽचक्रान् । अयःऽदंष्ट्रान् । विऽधावतः । वराहून् ॥ ५ ॥

हे [v]मरुतः [v]एतत् [v]योजनं युज्यतेऽनेन देवतेति योजनम् एतत्सूक्तसाध्यं स्तोत्रम् । [v]त्यन्न[1] त्यत् प्रसिद्धमन्यदुत्कृष्टं स्तोत्रमिव [v]अचेति सर्वैर्ज्ञायते । [v]वः युष्मदर्थं [v]यत् यदेतत्सूक्तरूपं स्तोत्रं [v]गोतमः ऋषिः [v]सस्वर्ह उच्चारितवान् खलु । किं कुर्वन् । [v]हिरण्यचक्रान् हिरण्मयचक्ररथारूढान् हितरमणीयकर्मयुक्तान् वा [v]अयोदंष्ट्रान् । दशतीति दंष्ट्रा चक्रधारा । अयोमयीभिश्चक्रधाराभिर्युक्तान् । यद्वा दंशनसाधना ऋष्टयो दंष्ट्राः । अयोमया ऋष्टयो येषाम् । तान् [v]विधावतः विविधमितस्ततः प्रवर्तमानान् [v]वराहून् । वरस्योत्कृष्टस्य शत्रोर्हन्तॄन् । यद्वा उत्कृष्टस्य वृष्ट्युदकस्याहर्तॄन् । अथवा उत्कृष्टानां देवतानामाह्वातॄन्[2] वरस्य हविषो भक्षयितॄन् वा । एवंभूतान् मरुतः [v]पश्यन् सम्यग्जानन् गोतमः यत्स्तोत्रं कृतवान् तदेतत्सर्वोत्कृष्टं सत् अस्माभिः सर्वैरुपलभ्यते इत्यर्थः । अत्र निरुक्तम्—' अथाप्येते माध्यमका देवगणा वराहव उच्यन्ते । पश्यन्हिरण्यचक्रान् ' ( निरु. ५. ४ ) इति ॥ अचेति । ' चिती संज्ञाने ' । छान्दसो वर्तमाने कर्मणि लुङ् । सस्वः । ' स्वृ शब्दोपतापयोः ' । लङि तिपि ' बहुलं छन्दसि ' इति शपः श्लुः । गुणे ' हल्ङ्याब्भ्यः० ' इति तलोपः । धातुस्वरेण अन्तोदात्तत्वम् । वराहून् । वरशब्दोपपदात् आङ्पूर्वात् हन्तेर्वा हरतेर्वा ह्वयतेर्वा जुहोतेरदनार्थात् वा हु इत्येतस्य निष्पत्तिः इति स्कन्दस्वामी । अस्य पृषोदरादित्वात् अभिमतसिद्धिः॥

एषा स्या वो मरुतोऽनुभर्त्री प्रति ष्टोभति वाघतो न वाणी ।
अस्तोभयद्वृथासामनु स्वधां गभस्त्योः ॥ ६ ॥

एषा । स्या । वः । मरुतः । अनुऽभर्त्री । प्रति । स्तोभति । वाघतः । न । वाणी ।
अस्तोभयत् । वृथा । आसाम । अनु । स्वधाम् । गभस्त्योः ॥ ६ ॥

हे [v]मरुतः [v]स्या सा [v]एषा अस्मदीया स्तुतिः [v]वः युष्माकम् [v]अनुभर्त्री युष्माननुहरन्ती युष्मदुणसदृशी [v]प्रति [v]ष्टोभति प्रत्येकं स्तौति । स्तोभतिः स्तुतिकर्मा । तथा [v]वाघतो [v]न [v]वाणी । नशब्दः संप्रत्यर्थे । तदुक्तं यास्केन—' अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोगः ' ( निरु. ७. ३१ ) इति । इदानीम् ऋत्विक्संबन्धिनी वागपि [v]वृथा अनायासेन [v]आसाम् आभिः ऋग्भिः [v]अस्तोभयत् अस्तौत् । इदानीमित्युक्ते कदेत्याह । [v]गभस्त्योः अस्मदीययोर्बाह्वोः [v]स्वधाम् । अन्ननामैतत् । यदा बहुविधमन्नं मरुतः स्थापयन्ति । तामनुलक्ष्येत्यर्थः ॥ अनुभर्त्री । ' हृञ् हरणे ' । तृच् । ' ऋन्नेभ्यः० ' इति ङीप् । ' उदात्तयणो हल्पूर्वात् ' इति नद्या उदात्तत्वम् ॥ ॥ १४ ॥

---

१. क्ष-ट-ढ–तदेतत्स्तोत्रं त्यन्न । २. क्ष-न-स–देवानामाह्वातॄन् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' आ नो भद्राः ' इति दशर्चं पञ्चमं सूक्तम् । गोतमस्यार्षं वैश्वदेवम् । आदितः पञ्चर्चः सप्तमी च जगत्यः षष्ठी ' स्वस्ति न इन्द्रः ' इत्येषा विराट्स्थाना । ' नवकौ वैराजत्रैष्टुभश्च ' ( अनु. ९. ५ ) इत्युक्तलक्षणयोगात् । अष्टम्याद्यास्तिस्त्रस्त्रिष्टुभः । तथा चानुक्रान्तम्–' आ नो दश वैश्वदेवं तु पञ्चाद्याः सप्तमी च जगत्यः षष्ठी विराट्स्थाना ' इति । अग्निष्टोमे वैश्वदेवशस्त्रे उत्तमावर्जमेतत्सूक्तं वैश्वदेवनिविद्धानीयम् । सा तु प्रकृतौ विकृतौ च वैश्वदेवशस्त्रस्य परिधानीया । तथा च सूत्रितम्–' आ नो भद्राः क्रतवो यन्तु विश्वत इति नव वैश्वदेवम् ' इति, ' अदितिर्द्यौरदितिरन्तरिक्षमिति परिदध्यात्सर्वत्र वैश्वदेवे ' ( आश्व. श्रौ. ५. १८ ) इति च । ब्राह्मणं च भवति–' सदैव पञ्चजनीयया परिदध्यात् ' ( ऐ. ब्रा. ३. ३१ ) इति । महाव्रते निष्केवल्ये एतत्सूक्तम् । तथा[1] च[1] पञ्चारण्यके सूत्र्यते– ' आनोभद्रीयं च तस्य स्थाने ' ( ऐ. आ. ५. ३. २ ) इति ॥

आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे ॥ १ ॥

आ । नः । भद्राः । क्रतवः । यन्तु । विश्वतः । अदब्धासः । अपरिऽइतासः । उत्ऽभिदः ।
देवाः । नः । यथा । सदम् । इत् । वृधे । असन् । अप्रऽआयुवः । रक्षितारः । दिवेऽदिवे ॥१॥

नः अस्मान् क्रतवः अग्निष्टोमादयो महायज्ञाः विश्वतः सर्वस्मादपि दिग्भागात् आ यन्तु आगच्छन्तु । कीदृशाः क्रतवः । भद्राः समीचीनफलसाधनत्वेन कल्याणाः भजनीया वा अदब्धासः असुरैरहिंसिताः अपरीतासः शत्रुभिरपरिगताः अप्रतिरुद्धा इत्यर्थः । उद्भिदः शत्रूणामुद्भेत्तारः । ईदृशाः क्रतवः अस्मांस्तथा आगच्छन्तु । अप्रायुवः अप्रगच्छन्तः स्वकीयं रक्षितव्यमपरित्यजन्तः अत एव दिवेदिवे प्रतिदिवसं रक्षितारः रक्षां कुर्वन्तः एवंगुणविशिष्टाः सर्वे देवाः नः अस्माकं सदमित् सदैव वृधे वर्धनाय यथा असन् भवेयुस्तथा आगच्छन्तु इति संबन्धः ॥ अदब्धासः । ' दम्भु दम्भे ' । दम्भो हिंसा । निष्ठायां ' यस्य विभाषा ' इति इट्प्रतिषेधः । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । अपरीतासः । ' इण् गतौ ' । पूर्ववत् कर्मणि निष्ठा । उभयत्र ' आज्जसेरसुक् ' । वृधे । ' वृध वृद्धौ ' । संपदादिलक्षणो भावे क्विप् । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । असन् । ' अस भुवि ' । लेटि अडागमः । ' बहुलं छन्दसि ' इति शपो लुगभावः । तस्य अङित्त्वात् ' श्नसोरल्लोपः ' इति अकारलोपाभावः । अप्रायुवः । ' इण् गतौ ' । अस्मात् प्रपूर्वात् ' छन्दसीणः ' इति उण्प्रत्ययः । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । जसि ' जसादिषु च्छन्दसि वावचनम् ' इति गुणस्य विकल्पितत्वादभावे तन्वादित्वात् उवङ् ॥

देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो नि वर्तताम् ।
देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्र तिरन्तु जीवसे ॥ २ ॥

देवानाम् । भद्रा । सुऽमतिः । ऋजुऽयताम् । देवानाम् । रातिः । अभि । नः । नि । वर्तताम् ।
देवानाम । सख्यम् । उप । सेदिम । वयम् । देवाः । नः । आयुः । प्र । तिरन्तु । जीवसे ॥२॥

---

१. क्ष–तथैव; न-स–तथा ।

CC0, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]भद्रा सुखयित्री भजनीया वा [V]देवानां [V]सुमतिः शोभना मतिरनुग्रहात्मिका बुद्धिरस्माकमस्त्विति शेषः । कीदृशानाम्। [V]ऋजूयताम् ऋजुमार्जवयुक्तं सम्यगनुष्ठातारं यजमानमात्मन इच्छताम्। तथा [V]देवानां [V]रातिः दानं [V]नः अस्मानाभिमुख्येन नितरां [V]वर्तताम्। तदभिमतफलप्रदानमप्यस्माकं भवत्वित्यर्थः। [V]वयं च तेषां [V]देवानां [V]सख्यं सखित्वं सख्युः कर्म वा [V]उप [V]सेदिम प्राप्नुवाम। तादृशाः [V]देवाः [V]नः अस्माकम् [V]आयुः [V]जीवसे जीवितुं [V]प्र [V]तिरन्तु वर्धयन्तु ॥ भद्रा । 'भदि कल्याणे सुखे च' । 'ऋत्रेन्द्राग्र°' (उ. सू. २. १८६) इत्यादौ रन्प्रत्ययान्तो निपातितः । ऋजूयताम् । ऋजुमात्मन इच्छति ऋजूयति । 'सुप आत्मनः क्यच्' । तदन्तात् लटः शतृ। 'शतुरनुमः°' इति अजादिविभक्तेरुदात्तत्वम्। रातिः । 'रा दाने'। 'मन्त्रे वृष°' इति क्तिन उदात्तत्वम्। सख्यम्। 'सख्युर्यः' इति भावे कर्मणि वा यप्रत्ययः। सेदिम। 'षदॢ विशरणगत्यवसादनेषु'। 'छन्दसि लुङ्लङ्लिटः' इति प्रार्थनायां लिट्। सत्वस्यानैमित्तिकत्वेन लिटि परत आदेशादित्वाभावात् 'अत एकहल्मध्ये°' इति एत्वाभ्यासलोपौ। 'अन्येषामपि दृश्यते' इति संहितायां दीर्घत्वम्। प्र तिरन्तु। प्रपूर्वस्तिरतिर्वर्धनार्थः। तथा च यास्को व्याचख्यौ–'देवानां सख्यमुपसीदेम वयं देवा न आयुः प्रवर्धयन्तु चिरं जीवनाय' (निरु. १२. ३९) इति ॥

तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधम् ।
अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥ ३ ॥

तान्। पूर्वया। निऽविदा। हूमहे। वयम्। भगम्। मित्रम्। अदितिम्। दक्षम्। अस्रिधम्। अर्यमणम्। वरुणम्। सोमम्। अश्विना। सरस्वती। नः। सुऽभगा। मयः। करत् ॥३॥

[V]तान् विश्वान् देवान् [V]पूर्वया पूर्वकालीनया नित्यया [V]निविदा वेदात्मिकया वाचा। निविदिति वाङ्नाम। यद्वा निविदा 'विश्वे देवाः सोमस्य मत्सन्' इत्यादिकया वैश्वदेव्या निविदा [V]वयं [V]हूमहे आह्वयामः। देवानिति यत्सामान्येनोक्तं तदेव विव्रियते। [V]भगं भजनीयं द्वादशानामादित्यानामन्यतमं [V]मित्रं प्रमीतेस्त्रायकमहरभिमानिनं देवम्। 'मैत्रं वा अहः' (तै. ब्रा. १. ७. १०. १) इति श्रुतेः। [V]अदितिम् अखण्डनीयामदीनां वा देवमातरं [V]दक्षं सर्वस्य जगतो निर्माणे समर्थं प्रजापतिम्। यद्वा। प्राणरूपेण सर्वेषु प्राणिषु व्याप्य वर्तमानं हिरण्यगर्भम्। 'प्राणो वै दक्षः' (तै. सं. २. ५. २. ४) इति श्रुतेः। [V]अस्रिधं शोषणरहितं सर्वदैकरूपेण वर्तमानं मरुद्गणम्। [V]अर्यमणम्। अरीन् मन्देहादीनसुरान् यच्छति नियच्छतीति अर्यमा सूर्यः। 'असौ वा आदित्योऽर्यमा' (तै. सं. २. ३.४. १) इति श्रुतेः। तम्। [V]वरुणम्। वृणोति पापकृतः स्वकीयैः पाशैरावृणोतीति रात्र्यभिमानिदेवो वरुणः। श्रूयते च–'वारुणी रात्रिः' (तै. ब्रा. १. ७. १०. १) इति। [V]सोमं द्वेधा[2] आत्मानं विभज्य पृथिव्यां लतारूपेण दिवि च चन्द्रात्मना देवतारूपेण वर्तमानम्। [V]अश्विना अश्ववन्तौ। यद्वा सर्वं व्याप्नुवन्तौ। तथा च यास्कः–'अश्विनौ यद्व्यश्नुवाते सर्वं रसेनान्यो ज्योतिषान्योऽश्वैरश्विनावित्यौर्णवाभस्तत्कावश्विनौ द्यावापृथिव्यावित्येकेऽहोरात्रावित्येके सूर्याचन्द्रमसावित्येके राजानौ पुण्यकृतावित्यैतिहासिकाः' (निरु. १२. १) इति। एवंभूतान् सर्वान् देवान् अस्मद्रक्षणार्थमाह्वयामः इति पूर्वत्र संबन्धः। अस्माभिराहूता [V]सुभगा शोभनधनोपेता [V]सरस्वती [V]नः अस्मभ्यं [V]मयः सुखं [V]करत् करोतु ॥ हूमहे। ह्वेञो लटि 'ह्वः' इत्यनुवृत्तौ 'बहुलं छन्दसि' इति संप्रसारणम्। परपूर्वत्वे 'हलः'

---

१. क्ष–तदीयमभिमतफलप्रदानम्। २. क्ष–द्विधा।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति दीर्घत्वम् । ' बहुलं छन्दसि ' इति शपो लुक् । अस्त्रिधम् । ' स्त्रिधु शोषणे ' । संपदादिलक्षणो भावे क्विप् । बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । मयस्करत् । करोतेर्लेटि अडागमः । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । ' अतः कृकमि° ' इति विसर्जनीयस्य[1] सत्वम्[1] ॥

तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।
तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवम् ॥ ४ ॥

तत् । नः । वातः । मयः ऽभु । वातु । भेषजम् । तत् । माता । पृथिवी । तत् । पिता । द्यौः ।
तत् । ग्रावाणः । सोम ऽसुतः । मयः ऽभुवः । तत् । अश्विना । शृणुतम् । धिष्ण्या । युवम् ॥४॥

vवातः वायुः vतत् vभेषजम् औषधं vनः अस्मान् vवातु प्रापयतु । यद्भेषजं vमयोभु मयसः सुखस्य भावयितृ । vमाता सर्वेषां जननी vपृथिवी भूमिरपि vतत् भेषजम् अस्मान् प्रापयतु । vपिता वृष्टिप्रदानेन सर्वेषां रक्षिता vद्यौः द्युलोकोऽपि vतत् भेषजम् अस्मान् प्रापयतु । vसोमसुतः सोमाभिषवं कृतवन्तः vमयोभुवः मयसः यागफलभूतस्य सुखस्य भावयितारः vग्रावाणः अभिषवसाधनाः पाषाणाश्च vतत् भेषजम् अस्मान् प्रापयन्तु । हे vधिष्ण्या । धिषणा बुद्धिः । तदर्हावश्विनौ vयुवं युवां तत् भेषजं vश्रृणुतं आकर्णयतम् । यद्भेषजमस्माभिर्वाय्वादिषु प्रार्थ्यते तद्भेषजं देवानां भिषजौ युवामस्माकमनुकूलं यथा भवति तथा जानीतमित्यर्थः ॥ मयोभु । ' ह्रस्वो नपुंसके प्रातिपदिकस्य ' ( पा. सू. १. २. ४७ ) इति ह्रस्वत्वम् । वातु । ' वा गतिगन्धनयोः ' । अन्तर्भावितण्यर्थात् प्रार्थनायां लोट् । सोमसुतः । ' सोमे सुञः ' ( पा. सू. ३. २. ९० ) इति भूते क्विप् । धिष्ण्या । धिषणाशब्दात् अर्हार्थे ' छन्दसि च ' इति यः । वर्णलोपश्छान्दसः । ' सुपां सुलुक्° ' इति आकारः ॥

तमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ ५ ॥

तम् । ईशानम् । जगतः । तस्थुषः । पतिम् । धियम् ऽजिन्वम् । अवसे । हूमहे । वयम् ।
पूषा । नः । यथा । वेदसाम् । असत् । वृधे । रक्षिता । पायुः । अदब्धः । स्वस्तये ॥५॥

पूर्वार्धेनेन्द्रः स्तूयते अपरार्धेन पूषा । vईशानम् ऐश्वर्यवन्तं अत एव vजगतः जङ्गमस्य प्राणिजातस्य vतस्थुषः स्थावरस्य च vपतिं स्वामिनं vधियंजिन्वं धीभिः कर्मभिः प्रीणयितव्यं एवंभूतं vतम् इन्द्रम् vअवसे रक्षणाय vवयं vहूमहे आह्वयामः । vपूषा vनः अस्माकं vवेदसां धनानां vवृधे वर्धनाय vरक्षिता vयथा vअसत् येन प्रकारेण भवति[2] तेनैव प्रकारेण vअदब्धः केनाप्यहिंसितः पूषा vस्वस्तये अस्माकमविनाशाय vपायुः रक्षिता भवतु[2] ॥ तस्थुषः । तिष्ठतेर्लिटः क्वसुः । षष्ठ्येकवचने

---

१. क्ष–मयसो विसर्जनीयस्य सांहितिकं सत्वम् । २. क्ष-ट-ढ-स–भवति भवेत् तेनैव प्रकारेण रक्षिता पालयिता पायुः पाता प्रपिष्टभागस्य पाता अदब्धः केनापि अहिंसितः स एव पूषा स्वस्तये अस्माकमविनाशाय च भवतु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' वसोः संप्रसारणम् ' इति संप्रसारणम्। ' शासिवसिघसीनां च ' इति षत्वम्। ' षष्ठ्याः पति-पुत्र° ' इति विसर्जनीयस्य सत्वम्। धियंजिन्वम्। जिविः प्रीणनार्थः। ' कृत्यल्युटो बहुलम् ' इति बहुलवचनात् खच्। ' इच एकाचोऽम् प्रत्ययवच्च ' ( पा. सू. ६. ३. ६८ ) इति अमागमः। असत्। ' अस भुवि '। लेटि अडागमः। ' बहुलं छन्दसि ' इति शपो लुगभावः। पायुः। ' पा[1] रक्षणे[1] '। ' कृवापाजि° ' इति उण्। स्वस्तये। सुपूर्वात् अस्तेः भावे क्तिन्। ' छन्दस्युभयथा ' इति तस्य सार्वधातुकत्वात् ' अस्तेर्भूः[2] ' ( पा. सू. २. ४. ५२ ) इति भूभावाभावः[2] इति वृत्तावुक्तम्॥ १५॥

स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ ६ ॥

स्वस्ति। नः। इन्द्रः। वृद्धऽश्रवाः। स्वस्ति। नः। पूषा। विश्वऽवेदाः।
स्वस्ति। नः। तार्क्ष्यः। अरिष्टऽनेमिः। स्वस्ति। नः। बृहस्पतिः। दधातु ॥ ६ ॥

Vवृद्धश्रवाः वृद्धं प्रभूतं श्रवः श्रवणं स्तोत्रं हविर्लक्षणमन्नं वा यस्य तादृशः Vइन्द्रः Vनः अस्माकम्। ' स्वस्तीत्यविनाशनाम ' ( निरु. ३. २१ )। Vस्वस्ति अविनाशं Vदधातु विदधातु करोतु। Vविश्ववेदाः। विश्वानि वेत्तीति विश्ववेदाः। यद्वा विश्वानि सर्वाणि वेदांसि ज्ञानानि धनानि वा यस्य। तादृशः Vपूषा पोषको देवः Vनः अस्माकं Vस्वस्ति विदधातु। Vअरिष्टनेमिः। नेमिः इति आयुधनाम। अरिष्टोऽहिंसितो नेमिर्यस्य। यद्वा रथचक्रस्य धारा नेमिः। यत्संबन्धिनो रथस्य नेमिर्न हिंस्यते सोऽरिष्टनेमिः। एवंभूतः Vतार्क्ष्यः तृक्षस्य पुत्रो गरुत्मान् Vनः अस्माकं Vस्वस्ति अविनाशं विदधातु। तथा Vबृहस्पतिः बृहतां देवानां पालयिता Vनः अस्माकं Vस्वस्ति अविनाशं विदधातु॥ वृद्धश्रवाः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। विश्ववेदाः। ' विद ज्ञाने ', ' विदॢ लाभे '। आभ्यामसुन्प्रत्ययान्तो वेदस्शब्दः। ' बहुव्रीहौ विश्वं संज्ञायाम् ' इति पूर्वपदान्तोदात्तत्वम्। तार्क्ष्यः। तृक्षस्यापत्यम्। ' गर्गादिभ्यो यञ् ' ( पा. सू. ४. १. १०५ )। ञित्त्वादाद्युदात्तत्वम्। अरिष्टनेमिः। न रिष्टा अरिष्टा। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। अरिष्टा नेमिर्यस्य स तथोक्तः। बृहस्पतिः। ' तद्बृहतोः करपत्योः° ' ( पा. सू. ६. १. १५७. ग. ) इति सुट्तलोपौ। ' उभे वनस्पत्यादिषु° ' इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम्॥

पृषदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः।
अग्निजिह्वा मनवः सूरचक्षसो विश्वे नो देवा अवसा गमन्निह ॥ ७ ॥

पृषत्ऽअश्वाः। मरुतः। पृश्निऽमातरः। शुभम्ऽयावानः। विदथेषु। जग्मयः।
अग्निऽजिह्वाः। मनवः। सूरऽचक्षसः। विश्वे। नः। देवाः। अवसा। आ। गमन्। इह ॥७॥

Vपृषदश्वाः। पृषद्भिः श्वेतबिन्दुभिर्युक्ता अश्वा येषां ते तथोक्ताः। Vपृश्निमातरः। पृश्निर्नानावर्णा गौर्माता येषाम्। Vशुभंयावानः। शुभं शोभनं यान्ति गच्छन्तीति शुभंयावानः। शोभनगतय इत्यर्थः।

---

१. क्ष-स–' पा पाने '। २. ढ–अस्तेर्भूभावाभावः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]विदथेषु यज्ञेषु [V]जग्मयः गन्तारः [V]अग्निजिह्वाः अग्नेर्जिह्वायां वर्तमानाः । सर्वे हि देवा हविःस्वीकरणायाग्नेर्जिह्वायां वर्तन्ते । तात्स्थ्यात् ताच्छब्द्यम् । [V]मनवः सर्वस्य मन्तारः [V]सूरचक्षसः सूर्यप्रकाश इव चक्षः प्रकाशो येषां ते एवंभूताः [V]मरुतः मरुत्संज्ञकाः [V]विश्वे [V]देवाः[1] सर्वे देवाः [V]नः अस्मान् [V]इह अस्मिन्काले [V]अवसा रक्षणेन सह [V]आ [V]गमन् आगच्छन्तु ॥ शुभंयावानः । ' या प्रापणे '। ' आतो मनिन्° ' इति वनिप् । ' तत्पुरुषे कृति बहुलम् ' इति बहुलवचनात् द्वितीयाया अपि अलुक् । गमन् । गमेः प्रार्थनायां लेटि अडागमः । ' इतश्च लोपः° ' इति इकारलोपः । ' बहुलं छन्दसि ' इति शपो लुक् ॥

अस्ति सौम्यचरुस्तृतीयसवने । तेन चरुणा देवतामिष्ट्वा इष्टशेषे तस्मिन् बहु घृतमवनीय तस्मिन्वषट्कर्त्रा स्वकीया छाया द्रष्टव्या । सा यदि न दृश्येत तदानीं ' भद्रम् ' इत्येका[2] पठितव्या । ' त्वं सोम ' इति खण्डे तथैव सूत्र्यते[3]—' राज्ञा सोमेन तद्वयमस्मासु धारयामसि भद्रं कर्णेभिः शृणुयाम देवा इति च ' ( आश्व. श्रौ. ५. १९ ) इति । महानाम्न्यृतेऽप्येषा भूमिस्पर्शने[4] जप्या । सूत्रितं च ' एतद्विदम्' इति खण्डे—' भद्रं कर्णेभिः शृणुयाम देवाः शं न इन्द्राग्नी अवतामवोभिः ' ( आश्व. श्रौ. ८. १४ ) इति ॥

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥ ८ ॥

भद्रम् । कर्णेभिः । शृणुयाम । देवाः । भद्रम् । पश्येम । अक्षऽभिः । यजत्राः ।
स्थिरैः । अङ्गैः । तुस्तुऽवांसः । तनूभिः । वि । अशेम । देवऽहितम् । यत् । आयुः ॥८॥

हे [V]देवाः दानादिगुणयुक्ताः सर्वे[5] देवाः[5] [V]कर्णेभिः अस्मदीयैः श्रोत्रैः [V]भद्रं भजनीयं कल्याणं वचनं [V]शृणुयाम युष्मत्प्रसादाच्छ्रोतुं समर्थाः स्याम । अस्माकं बाधिर्यं कदाचिदपि मा भूत् । हे [V]यजत्राः यागेषु चरुपुरोडाशादिभिर्यष्टव्या देवाः [V]अक्षभिः अक्षिभिरात्मीयैश्चक्षुर्भिः [V]भद्रं शोभनं [V]पश्येम द्रष्टुं समर्थाः स्याम । अस्माकं दृष्टिप्रतिघातोऽपि मा भूत्[6] । [V]स्थिरैः दृढैः [V]अङ्गैः हस्तपादादिभिरवयवैः [V]तनूभिः शरीरैश्च युक्ता वयं [V]तुष्टुवांसः युष्मान् स्तुवन्तः [V]यत् [V]आयुः षोडशाधिकशतप्रमाणं विंशत्यधिकशतप्रमाणं वा [V]देवहितं देवेन प्रजापतिना स्थापितं तत् [V]व्यशेम प्राप्नुयाम ॥ कर्णेभिः ' बहुलं छन्दसि ' इति भिसः ऐसभावः । अक्षभिः । ' छन्दस्यपि दृश्यते ' इति अनङ् स च उदात्तः । यजत्राः । ' अमिनक्षि° ' इत्यादिना यजेः अत्रन्प्रत्ययः । तुष्टुवांसः । ' ष्टुञ् स्तुतौ ' । लिटः क्वसुः । ' शर्पूर्वाः खयः ' इति तकारः शिष्यते । अशेम । ' अशू व्याप्तौ ' । ' लिङ्याशिष्यङ् ' । यदि तु तत्र परिगणनमन्यव्यावृत्त्यर्थं तदानीं लिङि व्यत्ययेन शप् । देवहितम् । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् ॥

---

१. क्ष-ट-ढ–' देवाः ' नास्ति । २. क्ष-ट-ढ–इत्येषा । ३. न-स–सूत्रितम् । ४. क्ष–भूम्युपस्पर्शने । ५. क्ष-ट-ढ–' सर्वे देवाः ' नास्ति । ६. क्ष-ट-ढ-स–' भूत् ' इत्यस्यानन्तरं ' श्रोत्रचक्षुषोः भद्राभद्रविषयश्रवणदर्शने प्रतिनियते । अतो नित्यं भद्रविषयश्रवणदर्शने स्यातामिति प्रार्थ्यते ( स–प्रार्थ्यम् ) ' इत्यधिकम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः ॥ ९ ॥

शतम् । इत् । नु । शरदः । अन्ति । देवाः । यत्र । नः । चक्र । जरसम् । तनूनाम् ।
पुत्रासः । यत्र । पितरः । भवन्ति । मा । नः । मध्या । रिरिषत । आयुः । गन्तोः ॥ ९ ॥

हे [v]देवाः [v]अन्ति अन्तिके मनुष्याणां समीपे आयुष्ट्वेन भवद्भिः कल्पिताः [v]शरदः संवत्सराः [v]शतम् [v]इत् [v]नु शतं खलु । यस्मात् सृष्टिकाले मनुष्याणां शतं संवत्सरा आयुरिति युष्माभिः परिकल्पितं तस्मात् [v]नः अस्मान् [v]आयुर्गन्तोः कृत्स्नस्यायुषो गमनात्पूर्वं [v]मध्या मध्ये [v]मा [v]रीरिषत मा हिंसिष्ट । कीदृशान् । [v]नः अस्माकं [v]तनूनां शरीराणां [v]जरसं जरां [v]यत्र यस्यामवस्थायां [v]चक्र कृतवन्तो यूयं [v]यत्र[1] च [v]पुत्रासः पुत्राः [v]पितरः अस्माकं रक्षितारः[1] [v]भवन्ति[2] । ईदृग्दशापन्नानित्यर्थः ॥ अन्ति । अन्तिकशब्दस्य ' कादिलोपो बहुलमिति वक्तव्यम् ' इति कलोपः । यत्र । ' ऋचि तुनुघमक्षुतङ्कुत्र° ' इति संहितायां दीर्घः । चक्र । लिटि मध्यमबहुवचनस्य कित्त्वात् गुणाभावे यणादेशः । 'व्यचोऽतस्तिङः ' इति संहितायां दीर्घत्वम् । जरसम् । ' जराया जरसन्यतरस्याम् ' ( पा. सू. ७. २. १०१ ) इति जरसादेशः । मध्या । ' सुपां सुलुक्° ' इति सप्तम्या डादेशः । रीरिषत । ' रिष रुष हिंसायाम् ' अस्मात् ण्यन्तात् माङि लुङि मध्यमबहुवचने च्लेः चङि णिलोपोपधाह्रस्वद्विर्वचनहलादिशेषसन्वद्भावेत्वदीर्घाः[3] । छान्दसः पदकालीनो ह्रस्वः । गन्तोः । ' भावलक्षणे स्थेण्° ' ( पा. सू. ३. ४. १६ ) इति गमेः तोसुन्प्रत्ययः ॥

' अदितिर्द्यौरदितिः ' इत्येषा अदितिदेवताके पशौ हविषो याज्या । सूत्रितं च–' अदितिर्द्यौरदितिरन्तरिक्षं न ते विष्णो जायमानो न जातः ' ( आश्व. श्रौ. ३. ८ ) इति ॥

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्च जना अदितिर्जातमदितिर्जनित्वम् ॥ १० ॥

अदितिः । द्यौः । अदितिः । अन्तरिक्षम् । अदितिः । माता । सः । पिता । सः । पुत्रः ।
विश्वे । देवाः । अदितिः । पञ्च । जनाः । अदितिः । जातम् । अदितिः । जनित्वम् ॥ १० ॥

[v]अदितिः अदीना अखण्डनीया वा पृथिवी देवमाता वा सैव [v]द्यौः द्योतनशीलो नाकः । सैव [v]अन्तरिक्षम् अन्तरा द्यावापृथिव्योर्मध्ये ईक्ष्यमाणं व्योम । सैव [v]माता निर्मात्री जगतो जननी । सैव [v]पिता उत्पादकः । ततश्च[4] [v]सः [v]पुत्रः मातापित्रोर्जातः पुत्रोऽपि सैव । [v]विश्वे [v]देवाः सर्वेऽपि देवाः [v]अदितिः एव । [v]पञ्च [v]जनाः निषादपञ्चमाश्चत्वारो वर्णाः । यद्वा गन्धर्वाः पितरो देवा असुरा रक्षांसि ।

---

१. क्ष-ट-ढ–यत्र च यस्यामवस्थायां पुत्रासः पुत्राः स्वपुत्राणां पितरः । २. स–' भवन्ति ' इत्यस्यानन्तरं ' यद्वा । यत्र यस्यामवस्थायां पुत्रासः अस्माकं पुत्राः स्वपुत्राणां पितरो भवन्ति । अस्माकं यदा पौत्रा भवन्ति ' इत्यधिकम् ३. स– णिलोपोपधाह्रस्वचर्त्वद्विर्वचनहलादिशेषसन्वद्भावेत्वदीर्घाः । ४. क्ष-न-स–तातश्च ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तदुक्तं यास्केन–' गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवः ' ( निरु. ३. ८ ) इति । ब्राह्मणे त्वेवमाम्नातं–' सर्वेषां वा एतत्पञ्चजनानामुक्थं देवमनुष्याणां गन्धर्वाप्सरसां सर्पाणां च पितॄणां च ' ( ऐ. ब्रा. ३. ३१ ) इति । तत्र गन्धर्वाप्सरसामैक्यात्पञ्चजनत्वम् । एवंविधाः पञ्च जना अपि ᵛअदितिः एव । ᵛजातं जननं प्रजानामुत्पत्तिः सा अपि ᵛअदितिः एव । ᵛजनित्वं जन्माधिकरणं[1] तदपि ᵛअदितिः एव । एवं सकलजगदात्मनादितिः स्तूयते । उक्तं च यास्केन–' इत्यदितेर्विभूतिमाचष्टे ' ( निरु. ४. २३ ) इति ॥ अदितिः । ' दो अवखण्डने ' । अस्मात् कर्मणि क्तिनि ' द्यतिस्यतिमास्थाम् ° ' ( पा. सू. ७. ४. ४० ) इति इत्वम् । यास्कपक्षे तु ' दीङ् क्षये ' इत्यस्मात् क्तिनि व्यत्ययेन ह्रस्वत्वम् । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । स पिता । निर्दिश्यमानप्रतिनिर्दिश्यमानयोरेकतामापादयन्ति सर्वनामानि पर्यायेण तल्लिङ्गतामुपाददते इत्युद्देश्यलिङ्गतया पुंलिङ्गत्वम् । जनित्वम् । जनेरौणादिकः त्वन्प्रत्ययः[2] ॥ ॥ १६ ॥

' ऋजुनीती ' इति नवर्चं षष्ठं सूक्तं गोतमस्यार्षम् । अत्रानुक्रम्यते–' ऋजुनीती नव गायत्रमन्त्यानुष्टुप् ' इति । पूर्वत्र ' वैश्वदेवं तु ' इत्युक्तत्वात् तुल्यादिपरिभाषया इदमपि सूक्तं बहुदेवताकम् । सूक्तविनियोगो लैङ्गिकः । चातुर्विंशिकेऽहनि प्रातःसवने मैत्रावरुणस्य ' ऋजुनीती[3] नः[3] ' इत्येषा[4] आरम्भणीया । ' चतुर्विंशे ' इति खण्डे सूत्रितम्–' ऋजुनीती नो वरुण इन्द्रं वो विश्वतस्परि ' ( आश्व. श्रौ. ७. २ ) इति । अहर्गणेषु द्वितीयादिष्वहःस्वप्येषारम्भणीया शंसनीया । सूत्रितं च–' आरम्भणीयाः पर्यासान्कद्वतोऽहरहः शस्यानीति होत्रका द्वितीयादिष्वेव ' ( आश्व. श्रौ. ७. १ ) इति ॥

ऋजुनीती नो वरुणो मित्रो नयतु विद्वान् । अर्यमा देवैः सजोषाः ॥ १ ॥

ऋजुऽनीती । नः । वरुणः । मित्रः । नयतु । विद्वान् । अर्यमा । देवैः । सऽजोषाः ॥ १ ॥

अहरभिमानी देवः ᵛमित्रः, ᵛवरुणः रात्र्यभिमानी । मित्रश्च वरुणश्च ᵛविद्वान् नेतव्यमुत्तमं स्थानं जानन् ᵛनः अस्मान् ᵛऋजुनीती ऋजुनीत्या ऋजुनयनेन कौटिल्यरहितेन गमनेन ᵛनयतु अभिमतं फलं प्रापयतु । तथा ᵛदेवैः अन्यैरिन्द्रादिभिः ᵛसजोषाः समानप्रीतिः ᵛअर्यमा अहोरात्रविभागस्य[5] कर्ता[5] सूर्यश्चास्मानृजुगमनेनाभिमतं स्थानं प्रापयतु ॥ ऋजुनीती । ' सुपां सुलुक् ° ' इति तृतीयायाः पूर्वसवर्णदीर्घत्वम् ॥

ते हि वस्वो वसवानास्ते अप्रमूरा महोभिः । व्रता रक्षन्ते विश्वाहा ॥ २ ॥

ते । हि । वस्वः । वसवानाः । ते । अप्रऽमूराः । महःऽभिः । व्रता । रक्षन्ते । विश्वाहा ॥२॥

ᵛते ᵛहि पूर्वोक्ता मित्रादयः ᵛवस्वः वसुनो धनस्य ᵛवसवानाः वासका आच्छादयितारः सर्वं जगद्धनेनाच्छादयन्तीत्यर्थः । अतः ᵛते मित्रादयः ᵛअप्रमूराः अप्रमूर्च्छिता अमूढाः प्राज्ञाः सन्तः ᵛमहोभिः आत्मीयैस्तेजोभिः ᵛविश्वाहा सर्वाण्यहानि । अत्यन्तसंयोगे द्वितीया । सर्वेष्वप्यहःसु ᵛव्रता व्रतानि जगन्निर्वाहरूपाणि स्वकीयानि कर्माणि ᵛरक्षन्ते पालयन्ति ॥ वस्वः । आगमानुशासनस्य

---

१. क्ष–जन्माधिकरणं । यद्वा जातमुत्पन्नं जनित्वमुत्पत्स्यमानं वा यदस्ति । २. क्ष-ट-ढ-स–इत्वन्प्रत्ययः । ३. क्ष-ट-ढ–' ऋजुनीती नः ' इति नास्ति । ४. क्ष-ट-ढ–आद्या । ५. न-स–अहोरात्रस्य विभागकर्ता ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अनित्यत्वात् नुमभावे ' जसादिषु च्छन्दसि वावचनम् ' इति ' वेर्डिति ' इति गुणस्य विकल्पनादभावे यणादेशः । वसवानाः । ' वस आच्छादने ' । अस्मात् अन्तर्भावितण्यर्थात् लटः शानच् । ' बहुलं छन्दसि ' इति शपो लुगभावः । वर्णव्यापत्त्या मकारस्य वकारः । अप्रमूराः । ' मुर्छा मोहसमुच्छ्रा-ययोः ' । अस्मात् संपदादिलक्षणो भावे क्विप् । ' राल्लोपः ' इति छकारलोपः । प्रकृष्टा मूः प्रमूः । ततो मत्वर्थीयो रः । ' रो रि ' ( पा. सू. ८. ३. १४ ) इति रेफलोपः । न प्रमूरा अप्रमूराः । अव्यय-पूर्वपदप्रकृतिस्वरत्वम् । रक्षन्ते । ' रक्ष पालने ' । व्यत्ययेन तङ् ॥

ते अस्मभ्यं शर्म यंसन्नमृता मर्त्येभ्यः । बाधमाना अप द्विषः ॥ ३ ॥

ते । अस्मभ्यम् । शर्म । यंसन् । अमृताः । मर्त्येभ्यः । बाधमानाः । अप । द्विषः ॥ ३ ॥

Vअमृताः अमरणधर्माणः Vते विश्वे देवाः Vमर्त्येभ्यः मरणधर्मभ्यः Vअस्मभ्यम् अनुष्ठातृभ्यः Vशर्म अमृतलक्षणं सुखं Vयंसन् यच्छन्तु प्रयच्छन्तु । किं कुर्वन्तः । Vद्विषः अस्मदीयान् पापलक्षणान् शत्रून् Vअप Vबाधमानाः विनाशं प्रापयन्तः ॥ यंसन् । ' यम उपरमे ' । लेटि अडागमः । ' सिब्बहुलं लेटि ' इति सिप् । अमृताः । मृतं मरणं येषां नास्तीति अमृताः । ' नञो जरमरमित्रमृताः ' इत्युत्तरपदाद्युदात्तत्वम् ॥

वि नः पथः सुवितायं चियन्त्विन्द्रो मरुतः । पूषा भगो वन्द्यासः ॥४॥

वि । नः । पथः । सुवितायं । चियन्तु । इन्द्रः । मरुतः । पूषा । भगः । वन्द्यासः ॥ ४ ॥

Vवन्द्यासः सर्वैर्वन्दनीयाः स्तोतव्या नमस्कर्तव्या वा इन्द्रादयो देवाः Vनः अस्माकं Vपथः मार्गान् Vवि Vचियन्तु विचिन्वन्तु अशोभनेभ्यो मार्गेभ्यः सकाशात् पृथक्कुर्वन्तु । किमर्थम् । Vसुविताय सुष्ठु प्राप्तव्याय स्वर्गादिफलाय ॥ पथः । शसि ' भस्य टेर्लोपः ' इति टिलोपः । उदात्तनिवृत्तिस्वरेण शस उदात्तत्वम् । सुविताय । ' इण् गतौ ' इत्यस्मात् कर्मणि निष्ठा । ' तन्वादीनां छन्दसि बहुलमुप-संख्यानम् ' इति उवङ् । ' गतिरनन्तरः ' इति पूर्वपदप्रकृतिस्वरत्वे प्राप्ते ' सूपमानात् क्तः ' इति उत्तरपदान्तोदात्तत्वम् । चियन्तु । ' चिञ् चयने ' । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । इयङ् । पादादित्वात् निघाताभावः । वन्द्यासः । ' वदि अभिवादनस्तुत्योः ' । ' ऋहलोर्ण्यत् ' । ' ईडवन्दवृशंसदुहां ण्यतः ' इति आद्युदात्तत्वम् । ' आज्जसेरसुक् ' ॥

अष्टौर्यामे सन्ति चत्वार्यतिरिक्तोक्थानि । तत्र चतुर्थे अच्छावाकातिरिक्तोक्थे ' उत नो धियः ' इत्येषा अनुरूपतृचस्य वैकल्पिकी तृतीया । सूत्रितं च–' उत नो धियो गोअग्रा इति वानुरूपस्योत्तमा ' ( आश्व. श्रौ. ९. ११ ) इति ॥

उत नो धियो गोअग्राः पूषन्विष्णवेवयावः । कर्ता नः स्वस्तिमतः ॥५॥

उत । नः । धियः । गोऽअग्राः । पूषन् । विष्णो इति । एवऽयावः । कर्ता । नः । स्वस्तिऽमतः ॥५॥

हे Vपूषन् पोषक देव हे Vविष्णो व्यापनशील देव हे Vएवयावः । एवैर्गन्तृभिरश्वैर्याति गच्छतीति एवयावा मरुद्गणः । हे मरुद्गण ते सर्वे यूयं Vनः अस्माकं Vधियः अष्टौर्यामलक्षणानि



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कर्माणि ᵛगोअग्राः पश्वग्राणि पशुप्रमुखान्यस्मत्सकाशात् अष्टैः पशुभिर्युक्तानि ᵛकर्त कुरुत । अग्नीषोमीयकर्मणश्च पशुप्राप्तिहेतुत्वमाम्नायते–' यस्मात्पशवः प्रप्रेव भ्रंशेरन् स एतेन यजेत ' ( तै. ब्रा. २. ७. १४. २ ) इति । ᵛउत अपि च ᵛनः अस्मान् ᵛस्वस्तिमतः अविनाशिनः कुरुत[1] ॥ एवयावः । ' इण् गतौ ' । ' इण्शीङ्भ्यां वन् ' इति वन्प्रत्ययः । अस्मिन्नुपपदे ' या प्रापणे ' इत्यस्मात् ' आतो मनिन्° ' इति वनिप् । संबुद्धौ ' वन उपसंख्यानम् ' ( पा. सू. ८. ३. १. १ ) इति नकारस्य रुत्वम् ॥ ॥ १७ ॥

ऋत्विगाद्यर्थमाहृतं मधुपर्कं ' मधु वाताः ' इति तृचेन ऋत्विगादिः प्रतिग्रहीतावेक्षेत । तथा च सूत्र्यते—' मधु वाता ऋतायत इति तृचेनावेक्ष्य ' ( आश्व. गृ. १. २४. १४ ) इति ॥

**मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥६॥**

मधु । वाताः । ऋतऽयते । मधु । क्षरन्ति । सिन्धवः । माध्वीः । नः । सन्तु । ओषधीः ॥६॥

ᵛऋतायते ऋतं यज्ञमात्मन इच्छते यजमानाय ᵛवाताः वायवः ᵛमधु माधुर्योपेतं कर्मफलं ᵛक्षरन्ति वर्षन्ति प्रयच्छन्तीत्यर्थः । तथा ᵛसिन्धवः स्यन्दनशीला नद्यः समुद्रा वा ᵛमधु माधुर्योपेतं स्वकीयं रसं क्षरन्ति[2] । एवं[3] ᵛनः अस्मभ्यम् ᵛओषधीः फलपाकान्ता ओषधयस्ताश्च ᵛमाध्वीः माधुर्योपेताः ᵛसन्तु भवन्तु ॥ मधु । अस्मादुत्तरस्य मत्वर्थीयस्य ' लुगकारेकाररेफाश्च वक्तव्याः ' ( पा. सू. ४. ४. १२८. २ ) इति लुक् । ऋतायते । ऋतमात्मन इच्छति । ' सुप आत्मनः क्यच् ' । ' न च्छन्दस्यपुत्रस्य° ' इति ईत्वदीर्घयोर्निषेधः । अन्येषामपि[4] संहितायां दीर्घत्वम्[4] । क्यजन्तात् लटः शतृ । ' शतुरनुमः° ' इति विभक्तेरुदात्तत्वम् । माध्वीः । ' मधोरञ् च ' ( पा. सू. ४. ४. १२९ ) इति मत्वर्थीयः अञ्प्रत्ययः । ' ऋत्व्यवास्त्व्य° ' इत्यादौ अञि यणादेशो निपात्यते । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घत्वम् । ओषधीः । ओषः पाकः आसु धीयते इति ओषधयः । ' कर्मण्यधिकरणे च ' इति किप्रत्ययः । ' कृदिकारादक्तिनः ' इति ङीष् । जसि पूर्ववत् पूर्वसवर्णदीर्घः । दासीभारादिषु पठितत्वात् पूर्वपदप्रकृतिस्वरत्वम् । तच्च घजन्तमाद्युदात्तम् ॥

**मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः । मधु द्यौरस्तु नः पिता ॥ ७ ॥**

मधु । नक्तम् । उत । उषसः । मधुऽमत् । पार्थिवम् । रजः । मधु । द्यौः । अस्तु । नः । पिता ॥७॥

ᵛनक्तं रात्रिः ᵛनः अस्माकं ᵛमधु मधुमती माधुर्योपेतफलप्रदा भवतु । ᵛउत अपि च ᵛउषसः उषःकालोपलक्षितान्यहानि च मधुमन्ति भवन्तु । ᵛपार्थिवं ᵛरजः पृथिव्याः संबन्धी लोकोऽस्माकं ᵛमधुमत् माधुर्यविशिष्टफलयुक्तो भवतु । ᵛपिता वृष्टिप्रदानेन सर्वेषां पालयिता ᵛद्यौः द्युलोकोऽपि ᵛमधु मधुयुक्तः[5] भवतु ॥ पार्थिवम् । ' पृथिव्या ञौ ' ( पा. सू. ४. १. ८५. २ ) इति प्राग्दीव्यतीयः अञ्प्रत्ययः । रजः । रजःशब्दो लोकवाची । ' लोका रजांस्युच्यन्ते ' ( निरु. ४. १९ ) इति यास्कः । रजन्त्यस्मिन् जना इति रजः । असुनि ' रजकरजनरजःसूपसंख्यानम् ' ( का. ६. ४. २४. ४ ) इति रञ्जेर्नलोपः ॥

---

१ क्ष-ट-ढ–कर्त कुरुत । २. क्ष–प्रयच्छन्त्येव । ३. क्ष–' एवम् ' नास्ति । ४. क्ष–अन्येषामपि दृश्यते इति सांहितिकं दीर्घत्वम् ; स–अन्येषामपीति संहितायां दीर्घत्वम् । ५. क्ष-ट-ढ–माधुर्ययुक्तः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः ॥ ८ ॥

मधुऽमान्। नः। वनस्पतिः। मधुऽमान्। अस्तु। सूर्यः। माध्वीः। गावः। भवन्तु। नः ॥८॥

[v]नः अस्माकं [v]वनस्पतिः वनानां पालयिता यूपाभिमानी देवः [v]मधुमान् माधुर्योपेतफलवान् [v]अस्तु। तादृशं फलमस्मभ्यं प्रयच्छत्वित्यर्थः। [v]सूर्यः सर्वस्य प्रेरकः सविता च [v]मधुमान् अस्तु। [v]गावः अग्निहोत्राद्यर्था धेनवश्च [v]नः अस्माकं [v]माध्वीः माधुर्योपेतेन पयसा युक्ताः [v]भवन्तु ॥ वनस्पतिः। वनानां पतिर्वनस्पतिः। पारस्करादित्वात् सुट्। वनपतिशब्दावाद्युदात्तौ। 'उभे वनस्पत्यादिषु युगपत्' इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम् ॥

शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा ।

शं न इन्द्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥ ९ ॥

शम्। नः। मित्रः। शम्। वरुणः। शम्। नः। भवतु। अर्यमा ।

शम्। नः। इन्द्रः। बृहस्पतिः। शम्। नः। विष्णुः। उरुऽक्रमः ॥ ९ ॥

अहरभिमानी [v]मित्रः देवः [v]नः अस्माकं [v]शं सुखकरो भवतु। यद्वा। अस्मदीयानामुपद्रवाणां शमयिता भवतु। रात्र्यभिमानी [v]वरुणः च [v]शं सुखकरः [v]भवतु। [v]अर्यमा अहोरात्रयोः ख्यापयिता सूर्यश्च [v]नः अस्माकं [v]शं सुखकरो भवतु। [v]बृहस्पतिः बृहतां देवानां पालयिता [v]इन्द्रः च [v]नः अस्माकं [v]शं सुखकरो भवतु। [v]उरुक्रमः। उरु विस्तीर्णं क्रामति पादौ विक्षिपतीति उरुक्रमः। विष्णुर्हि वामनावतारे पृथिव्यादीन् लोकान्[1] पदत्रयरूपेणाक्रान्तवान्। अतः उरुक्रमः [v]विष्णुः च [v]नः अस्माकं [v]शं सुखकरः[2] उपद्रवाणां शमयिता वा भवतु[3] ॥ उरुक्रमः। 'क्रमु पादविक्षेपे'। पचाद्यच्। यद्वा। उरून् क्रामतीति उरुक्रमः। कर्मणि अण्। 'नोदात्तोपदेशस्य मान्तस्य०' इति वृद्धिप्रतिषेधः ॥ ॥१८॥

'त्वं सोम' इति त्रयोविंशत्यृचं सप्तमं सूक्तं गोतमस्यार्षं सोमदेवताकम्। पञ्चम्याद्याः षोडश्यन्ता द्वादशर्चो गायत्र्यः। सप्तदश्युष्णिक्। शिष्टा दश त्रिष्टुभः। तथा चानुक्रान्तं–'त्वं सोम त्र्यधिका सौम्यं पञ्चम्यादि गायत्र्यो द्वादशोष्णिक् च' इति। सूक्तविनियोगो लैङ्गिकः। एकादशिनस्य सौम्यस्य पशोर्वपापुरोडाशयोः 'त्वं सोम' इति द्वे ऋचावनुवाक्ये। सूत्रितं च–'त्वं सोम प्र चिकितो मनीषेति द्वे' (आश्व. श्रौ. ३. ७) इति। महापितृयज्ञे एकैकस्य हविषो द्वे द्वे अनुवाक्ये। तत्र सोमस्य पितृमतः 'त्वं सोम' इत्येषा प्रथमानुवाक्या। 'दक्षिणाग्नेरग्निम्' इति खण्डे सूत्रितं–'त्वं सोम प्र चिकितो मनीषा सोमो धेनुम्' (आश्व. श्रौ. २. १९) इति। एषैव प्रायणीयेष्टौ सौम्यस्यानुवाक्या। 'तदहः प्रायणीयेष्टिः' इत्यत्र सूत्रितं–'त्वं सोम प्र चिकितो मनीषा या ते धामानि दिवि या पृथिव्याम्' (आश्व. श्रौ. ४. ३) इति ॥

---

१. क्ष-ट-ढ-स–त्रीन् लोकान्। २. क्ष-ट-ढ–सुखकरो भवतु। ३. क्ष-ट-ढ-स–'भवतु' इत्यस्यानन्तरं 'बृहस्पतिः। तद्बृहतोः करपत्योरिति सुट्तलोपौ। वनस्पत्यादित्वादुभयपदप्रकृतिस्वरत्वम्' इत्यधिकम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्वं सोम प्र चिकितो मनीषा त्वं रजिष्ठमनु नेषि पन्थाम् ।
तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः ॥ १ ॥

त्वम् । सोम । प्र । चिकितः । मनीषा । त्वम् । रजिष्ठम् । अनु । नेषि । पन्थाम् ।
तव । प्रऽनीती । पितरः । नः । इन्दो इति । देवेषु । रत्नम् । अभजन्त । धीराः ॥ १ ॥

हे ᵛसोम ᵛत्वं ᵛमनीषा मनीषयास्मदीयया बुद्ध्या ᵛप्र ᵛचिकितः प्रकर्षेण ज्ञातोऽसि वयं त्वां स्तुतिभिरज्ञासिष्मेत्यर्थः । अतः ᵛत्वं ᵛरजिष्ठम् ऋजुतममकुटिलं ᵛपन्थां पन्थानं कर्मफलावाप्तिहेतुभूतं मार्गम् ᵛअनु ᵛनेषि अस्माननुक्रमेण प्रापयसि । किंच हे ᵛइन्दो उन्दनशील सर्वं जगदमृतेन क्लेदयितः सोम ᵛतव ᵛप्रणीती प्रणीत्या त्वत्कर्तृकेण प्रकृष्टनयनेन ᵛधीराः धीमन्तः कर्मवन्तः प्रज्ञावन्तो वा ᵛनः अस्माकं ᵛपितरः ᵛदेवेषु इन्द्रादिषु ᵛरत्नं रमणीयं धनम् ᵛअभजन्त असेवन्त प्रामुवन् । अतोऽस्मानपि तादृशं धनं प्रापयेत्यर्थः ॥ प्र चिकितः । ' कित ज्ञाने ' । अस्मात् कर्मणि निष्ठा । छान्दसं द्विर्वचनम् । यद्वा । यङ्लुगन्तात् निष्ठा । संज्ञापूर्वकस्य विधेरनित्यत्वात् ' गुणो यङ्लुकोः ' इति अभ्यासस्य गुणाभावः । यद्वा । ' छन्दस्युभयथा ' इति निष्ठायाः सार्वधातुकसंज्ञायां शप् । जुहोत्यादित्वात् तस्य श्लुः । ' श्लौ ' इति द्विर्वचनम् । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । मनीषा । ' सुपां सुलुक्° ' इति तृतीयाया डादेशः । रजिष्ठम् । ऋजुशब्दात् इष्ठनि ' विभाषर्जोश्छन्दसि ' ( पा. सू. ६. ४. १६२ ) इति रत्वम् । ' टेः ' इति टिलोपः । नेषि । नयतेर्लटि ' बहुलं छन्दसि ' इति शपो लुक् । पन्थाम् । ' पथिमथ्यृभुक्षामात् ' ( पा. सू. ७. १. ८५ ) इति असावपि व्यत्ययेन आत्वम् । ' पथिमथोः सर्वनामस्थाने ' इत्याद्युदात्तत्वम्[1] । प्रणीती । ' तादौ च ' इति गतेः प्रकृतिस्वरत्वम् । ' सुपां सुलुक्° ' इति तृतीयायाः पूर्वसवर्णदीर्घत्वम् ॥

अग्निष्टोमे मरुत्वतीये ' त्वं सोम क्रतुभिः ' इत्येषा धाय्या । सूत्रितं च—' अग्निर्नेता त्वं सोम क्रतुभिः पिन्वन्त्यप इति धाय्याः ' ( आश्व. श्रौ. ५. १४ ) इति ॥

त्वं सोम क्रतुभिः सुक्रतुर्भूस्त्वं दक्षैः सुदक्षो विश्ववेदाः ।
त्वं वृषा वृषत्वेभिर्महित्वा द्युम्नेभिर्द्युम्न्यभवो नृचक्षाः ॥ २ ॥

त्वम् । सोम । क्रतुऽभिः । सुऽक्रतुः । भूः । त्वम् । दक्षैः । सुऽदक्षः । विश्वऽवेदाः ।
त्वम् । वृषा । वृषऽत्वेभिः । महिऽत्वा । द्युम्नेभिः । द्युम्नी । अभवः । नृऽचक्षाः ॥ २ ॥

हे ᵛसोम ᵛत्वं ᵛक्रतुभिः त्वत्संबन्धिभिरग्निष्टोमादिकर्मभिः आत्मीयैर्ज्ञानैर्वा ᵛसुक्रतुः शोभनकर्मा शोभनप्रज्ञो वा ᵛभूः भवसि । तथा ᵛविश्ववेदाः सर्वधनः ᵛत्वं ᵛदक्षैः आत्मीयैर्बलैः ᵛसुदक्षः शोभनबलो भवसि । तथा ᵛत्वं ᵛवृषत्वेभिः वृषत्वैः कामाभिवर्षणैः ᵛमहित्वा महत्त्वेन माहात्म्येन च ᵛवृषा कामानां वर्षिता महांश्च भवसि । तथा त्वं ᵛनृचक्षाः नृणां यज्ञस्य नेतॄणां यजमानानामभिमतफलस्य दर्शयिता

---

१. क्ष-स—इत्याद्युदात्तत्वम् । तव । युष्मदस्मदोर्ङसीत्याद्युदात्तत्वम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सन् ᵛद्युम्नेभिः द्युम्नैः तैर्दत्तैर्हविर्लक्षणैरन्नैः ᵛद्युम्नी ᵛअभवः प्रभूतान्नो भवसि ॥ सुक्रतुः । बहुव्रीहौ 'ऋत्वादयश्च' इत्युत्तरपदाद्युदात्तत्वम् । सुदक्षः । 'दक्ष वृद्धौ' । दक्ष्यतेऽनेनेति दक्षो बलम् । करणे घञ् । ञित्त्वादाद्युदात्तत्वम् । सुशब्देन बहुव्रीहौ 'आद्युदात्तं द्व्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् । विश्ववेदाः । विश्वानि वेदांसि यस्यासौ । 'बहुव्रीहौ विश्वं संज्ञायाम्' इति पूर्वपदान्तोदात्तत्वम् । वृषत्वेभिः । वृष्णो भावो वृषत्वम् । 'बहुलं छन्दसि' इति भिसः ऐसभावः । महित्वा । महेरौणादिक इन्प्रत्ययः । भावप्रत्ययान्तात् 'सुपां सुलुक्०' इति विभक्तेः आकारः ॥

राज्ञो नु ते वरुणस्य व्रतानि बृहद्गभीरं तव सोम धाम ।
शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम ॥ ३ ॥

राज्ञः । नु । ते । वरुणस्य । व्रतानि । बृहत् । गभीरम् । तव । सोम । धाम ।
शुचिः । त्वम् । असि । प्रियः । न । मित्रः । दक्षाय्यः । अर्यमाऽइव । असि । सोम ॥३॥

हे ᵛसोम ᵛराज्ञः ब्राह्मणानां स्वामिनः । 'सोमोऽस्माकं ब्राह्मणानां राजा' ( तै. सं. १. ८. १०. २ ) इति श्रुतेः । ᵛवरुणस्य । यागार्थमाहृतः क्रीतो वरुणेनावृतः सोमो वरुणः । 'वरुणोऽसि धृतव्रतः' ( तै. सं. १. २. १०. २ ) इति मन्त्रलिङ्गात् । क्रीतस्य ᵛते ᵛनु तव संबन्धीनि हि ᵛव्रतानि सर्वाण्यग्निष्टोमादीनि कर्माणि । अतः सर्वेषु यागेषु त्वमेव करणभूतः[1] भवसीत्यर्थः । अतः ᵛतव ᵛधाम स्वदीयं तेजः ᵛबृहत् महत् विस्तीर्णं ᵛगभीरं गाम्भीर्योपेतं च । यद्वा । नु इत्येतदुपमार्थे । तदुक्तं यास्केन –'अथाप्युपमार्थे भवति वृक्षस्य नु ते पुरुहूत वयाः' ( निरु. १. ४ ) इति । राज्ञः राजमानस्य वरुणस्य नु वरुणस्येव हे सोम ते तव व्रतानि कर्माणि लोकहितकारीणि । शिष्टं समानम् । हे ᵛसोम ᵛत्वं ᵛशुचिः सर्वेषां शोधकः ᵛअसि । तत्र दृष्टान्तः । ᵛप्रियो ᵛन ᵛमित्रः । यथा सर्वेषामनुकूलोऽहरभिमानी मित्रो देवः शोधयिता भवति तद्वत् । तथा त्वम् ᵛअर्यमेव अस्माभिर्दृश्यमानः सूर्य इव ᵛदक्षाय्यः ᵛअसि सर्वेषां वर्धको भवसि । यथाहनि सूर्यः प्रकाशेन सर्वं वर्धयति एवं निशि अमृतमयैः सोमकिरणैराप्यायमानं सत् स्थावरजङ्गमात्मकं सर्वं जगद्वर्धते ॥ शुचिष्ट्वम् । 'युष्मत्तत्ततक्षुःष्वन्तःपादम्' इति विसर्जनीयस्य षत्वम् । दक्षाय्यः । 'दक्ष वृद्धौ' । 'शुदक्षिस्पृहिग्रहिभ्य आय्यः' ( उ. सू. ३. ३७६ ) इति आय्यप्रत्ययः ॥

आग्रयणेष्टौ सौम्यस्य हविषः 'या ते धामानि' इति याज्या । 'आग्रयणं व्रीहिश्यामाकयवानाम्' इति खण्डे सूत्रितम्–'सोम यास्ते मयोभुवो या ते धामानि दिवि या पृथिव्याम्' ( आश्व. श्रौ. २. ९ ) इति । एषैवैकादशिनस्य सौम्यस्य पशोर्वपायां याज्या । सूत्रितं च–'या ते धामानि दिवि या पृथिव्यामषाळ्हं युत्सु पृतनासु पप्रिम्' ( आश्व. श्रौ. ३. ७ ) इति । प्रायणीयेष्टावप्येषैव सौम्यस्य याज्या । सूत्रितं च–'त्वं सोम प्र चिकितो मनीषा या ते धामानि दिवि या पृथिव्याम् ( आश्व. श्रौ. ४. ३ ) इति ॥

---

१. क्ष-च-छ-ट-ढ-ण-द-ध-न-फ-ल-स–कारणभूतः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु ।
तेभिर्नो विश्वैः सुमना अहेळन्राजन्त्सोम प्रति हव्या गृभाय ॥ ४ ॥

या । ते । धामानि । दिवि । या । पृथिव्याम् । या । पर्वतेषु । ओषधीषु । अप्ऽसु ।
तेभिः । नः । विश्वैः । सुऽमनाः । अहेळन् । राजन् । सोम । प्रति । हव्या । गृभाय ॥ ४ ॥

हे सोम Vते तव Vदिवि द्युलोके Vया यानि Vधामानि तेजांसि वर्तन्ते । तथा Vपृथिव्यां भूमौ यानि वर्तन्ते । तथा Vपर्वतेषु पर्ववत्सु शिलोच्चयेषु यानि वर्तन्ते । तथा व्रीह्याद्योषधीषु Vअप्सु च यानि वर्तन्ते । Vतेभिः Vविश्वैः तैः सर्वैस्तेजोभिर्युक्तः Vसुमनाः शोभनमनाः Vअहेळन् अक्रुध्यन् हे Vराजन् Vसोम राजमान सोम एवंभूतस्त्वं Vहव्या अस्माभिः प्रत्तानि हवींषि Vप्रति Vगृभाय प्रतिगृहाण ॥ या । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । पृथिव्याम् । ' उदात्तयणः० ' इति विभक्तेरुदात्तत्वम् । ओषधीषु । ' ओषधेश्च विभक्तावप्रथमायाम् ' ( पा. सू. ६. ३. १३२ ) इति दीर्घः । अप्सु । 'ऊडिदम्० ' इत्यादिना विभक्तेरुदात्तत्वम् । सुमनाः । ' सोर्मनसी अलोमोषसी ' इत्युत्तरपदाद्युदात्तत्वम् । गृभाय । ' ग्रह उपादाने ' । ' छन्दसि शायजपि ' इति हौ श्नाप्रत्ययस्य शायजादेशः ॥

पौर्णमासेष्टौ सौम्यस्याज्यभागस्य ' त्वं सोम ' इत्येषानुवाक्या । सूत्रितं च–' अग्निर्वृत्राणि जङ्घनदिति पूर्वस्याज्यभागस्यानुवाक्या त्वं सोमासि सत्पतिरित्युत्तरस्य ' ( आश्व. श्रौ. १. ५ ) इति । एवं यत्र यत्र वार्त्रघ्नावाज्यभागौ तत्र सर्वत्रास्या विनियोगः । प्रातःकालीनायामुपसदि प्रधानस्य सौम्यस्यैषैवानुवाक्या । आपराह्णिक्यामुपसदि सैव याज्या । सूत्रितं च–' त्वं सोमासि सत्पतिर्गयस्फानो अमीवहा ' इति, ' विपर्यासो याज्यानुवाक्यानाम् ' ( आश्व. श्रौ. ४. ८ ) इति च ॥

त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा । त्वं भद्रो असि क्रतुः ॥ ५ ॥

त्वम् । सोम । असि । सत्ऽपतिः । त्वम् । राजा । उत । वृत्रऽहा । त्वम् । भद्रः । असि । क्रतुः ॥ ५ ॥

हे Vसोम Vत्वं Vसत्पतिः Vअसि सतां कर्मसु वर्तमानानां ब्राह्मणानामधिपतिर्भवसि । ' तस्मात्सोमराजानो ब्राह्मणाः ' ( तै. ब्रा. १. ७. ४. २ ) इति श्रुतेः । यद्वा । सन्तः स्वानादयः पतयः पालका यस्य सोमस्य तादृशो भवसि । तथा चाम्नायते–' स्वान भ्राजेत्याहैते वा अमुष्मिन् लोके सोममरक्षन् ' ( तै. सं. ६. १. १०. ५ ) इति । Vउत अपि च Vराजा राजमानः Vत्वं Vवृत्रहा वृत्रस्यासुरस्य[1] शत्रोर्वा हन्तासि । Vभद्रः शोभनः Vक्रतुः योऽयमग्निष्टोमादियागः[2] Vत्वम् एव तद्रूपो भवसि । त्वत्साध्यत्वाद्यागानाम् ॥ सत्पतिः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । तत्पुरुषपक्षे तु ' पत्यावैश्वर्ये ' इति पूर्वपदप्रकृतिस्वरत्वम् ॥ ॥ १९ ॥

साग्निचित्येषु क्रतावग्नीषोमीयस्य पशुपुरोडाशमनु अष्टौ देवसुवां हवींषि निरुप्यन्ते । तत्र सोमस्य वनस्पतेर्हविषः ' त्वं च सोम ' इत्येषानुवाक्या । ' अथाग्नीषोमीयेण ' इति खण्डे सूत्रितं—' त्वं च सोम नो वशो ब्रह्मा देवानां पदवीः कवीनाम् ' ( आश्व. श्रौ. ४. ११ ) इति ॥

---

१. क्ष- ट-ढ–वृत्रस्यावरकस्य असुरस्य । २. क्ष-ट-ढ–योऽप्यग्निष्टोमादियागः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्वं च सोम नो वशो जीवातुं न मरामहे । प्रियस्तोत्रो वनस्पतिः ॥ ६ ॥

त्वम् । च । सोम । नः । वशः । जीवातुम् । न । मरामहे । प्रियऽस्तोत्रः । वनस्पतिः ॥६॥

हे vसोम vनः अस्माकं स्तोतृणां vजीवातुं जीवनौषधं vत्वं vच त्वं चेत् vवशः कामयेथाः तदानीं वयं vन vमरामहे न म्रियामहे । कीदृशस्त्वम् । vप्रियस्तोत्रः । प्रियाणि स्तोत्राणि यस्य स तथोक्तः । बहुभिः स्तोतव्य इत्यर्थः । vवनस्पतिः वनानामोषधिवनस्पतिरूपाणां पतिः पालयितासि । ' सोमो वा ओषधीनां राजा ' ( तै. सं. ६. १. ९. १ ) इति श्रुतेः ॥ वशः । ' वश कान्तौ ' । लेटि सिपि अडागमः । आगमानुदात्तत्वे धातुस्वरः शिष्यते । त्वं चेति चशब्दश्चणिति निपातान्तरं चेदर्थम्[1] । तद्योगात् ' निपातैर्यद्यदिहन्त° ' इति निघातप्रतिषेधः । जीवातुम् । ' जीव प्राणधारणे ' । ' जीवेरातुः ' ( उ. सू. १. ७९ ) । मरामहे । ' मृङ् प्राणत्यागे ' । व्यत्ययेन शप् ॥

आयुष्कामेष्ट्यां द्वितीयस्याज्यभागस्य ' त्वं सोम महे भगम् ' इत्येषानुवाक्या । ' अथ काम्याः ' इति खण्डे सूत्रितम्–' आ नो अग्ने सुचेतुना त्वं सोम महे भगम् ' ( आश्व. श्रौ. २. १० ) इति ॥

त्वं सोम महे भगं त्वं यून ऋतायते । दक्षं दधासि जीवसे ॥ ७ ॥

त्वम् । सोम । महे । भगम् । त्वम् । यूने । ऋतऽयते । दक्षम् । दधासि । जीवसे ॥ ७ ॥

हे vसोम vत्वं vमहे महते वृद्धाय vऋतायते ऋतं यज्ञमात्मन इच्छते पुरुषाय vजीवसे जीवितुं vदक्षम् उपभोगसमर्थं vभगं धनं vदधासि विदधासि करोषि । तथा vत्वं vयूने तरुणाय च ऋतायते जीवितुं धनं करोषि ॥ महे । महते । अच्छन्दलोपश्छान्दसः । ' बृहन्महतोरुपसंख्यानम् ' इति विभक्तेरुदात्तत्वम् । यूने । ' श्वयुवमघोनामतद्धिते ' इति संप्रसारणम् । ऋतायते । ऋतमात्मन इच्छति । ' सुप आत्मनः क्यच् ' । ' न च्छन्दस्यपुत्रस्य ' इति ईत्वदीर्घयोर्निषेधः । ' अन्येषामपि दृश्यते ' इति सांहितिको दीर्घः । क्यजन्तात् लटः शतृ । ' शतुरनुमो नद्यजादी ' इति विभक्तेरुदात्तत्वम् । जीवसे । ' जीव प्राणधारणे ' । ' तुमर्थे सेसेन्° ' इति असेप्रत्ययः ॥

स्वस्त्ययन्यां द्वितीयस्याज्यभागस्य ' त्वं नः सोम ' इत्येषानुवाक्या । सूत्रितं च–' स्वस्त्ययन्यां रक्षितवन्तावग्ने रक्षा णो अंहसस्त्वं नः सोम विश्वतः ' ( आश्व. श्रौ. २. १० ) इति ॥

त्वं नः सोम विश्वतो रक्षा राजन्नघायतः । न रिष्येत्त्वावतः सखा ॥ ८ ॥

त्वम् । नः । सोम । विश्वतः । रक्ष । राजन् । अघऽयतः । न । रिष्येत् । त्वाऽवतः । सखा ॥८॥

हे vसोम vराजन् राजनशील vत्वम् vअघायतः । अघं पापम् । तद्धेतुकं दुःखमस्माकं कर्तुमिच्छतः vविश्वतः सर्वस्मादपि पुरुषात् vनः अस्मान् vरक्ष पालय । vत्वावतः त्वत्सदृशस्य vसखा सख्यं प्राप्तः पुरुषः vन vरिष्येत् नहि विनश्येत् किमु वक्तव्यं त्वत्सखा न विनश्यतीति ॥ अघायतः ।

---

१. क्ष–चेदर्थः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अघं पापं परेषामिच्छतीत्यघायन् । ' छन्दसि परेच्छायामपि ' इति क्यच् । ' अश्वावस्यात् ' इति आत्वम् । रिष्येत् । ' रुष रिष हिंसायाम् ' । त्वावतः । ' वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसंख्यानम् ' इति वतुप् । ' प्रत्ययोत्तरपदयोश्च ' इति मपर्यन्तस्य त्वादेशः । ' आ सर्वनाम्नः ' इति आत्वम् ॥

सोमप्रवहणे ' सोम यास्ते ' इति तृचोऽनुवक्तव्यः । सूत्रितं च–' सोम यास्ते मयोभुव इति तिस्रः ' ( आश्व. श्रौ. ४. ४ ) इति । आग्रयणे सौम्यस्य ' सोम यास्ते ' इत्येषानुवाक्या । सूत्रितं च–' सोम यास्ते मयोभुवो या ते धामानि दिवि या पृथिव्याम् ' ( आश्व. श्रौ. २. ९ ) इति । अश्वमेधेऽपि पौष्ण्यामिष्टौ द्वितीयस्याज्यभागस्यैषानुवाक्या । सूत्रितं च–' त्वमग्ने सप्रथा असि सोम यास्ते मयोभुव इति सद्वन्तौ ' ( आश्व. श्रौ. १०. ६ ) इति ॥

सोम॒ यास्ते॑ मयो॒भुव॑ ऊ॒तयः॑ सन्ति॑ दा॒शुषे॑ । ताभि॑र्नोऽवि॒ता भ॑व ॥ ९ ॥

सोम॑ । याः । ते॒ । म॒यः॒ऽभुव॑ः । ऊ॒तयः॑ । सन्ति॑ । दा॒शुषे॑ । ताभिः॑ । नः॒ । अ॒वि॒ता । भ॒व॒ ॥ ९ ॥

हे ᵛसोम ᵛते तव संबन्धिन्यः ᵛदाशुषे चरुपुरोडाशादीनि दत्तवते यजमानाय ᵛमयोभुवः मयसः सुखस्य भावयित्र्यः ᵛयाः ᵛऊतयः रक्षाः ᵛसन्ति विद्यन्ते ᵛताभिः रक्षाभिः ᵛनः अस्माकम् ᵛअविता रक्षिता ᵛभव ॥ मयोभुवः । अस्य ऊतिविशेषणत्वेन स्त्रीलिङ्गत्वे 'भुवश्च' (पा. सू. ४. १. ४७ ) इति ङीप् प्राप्नोति । तत् ' वोतो गुणवचनात् ' इत्यस्मात् उतः इति तपरकरणस्यानुवर्तनात् न भवति ॥

इ॒मं य॒ज्ञमि॒दं वचो॑ जुजुषा॒ण उपा॑गहि । सोम॒ त्वं नो॑ वृ॒धे भ॑व ॥ १० ॥

इ॒मम् । य॒ज्ञम् । इ॒दम् । वचः॑ । जु॒जु॒षा॒णः । उप॑ऽआ । ग॒हि॒ । सोम॑ । त्वम् । नः॒ । वृ॒धे । भ॒व॒ ॥ १० ॥

हे ᵛसोम ᵛत्वम् ᵛइमम् अस्माभिः क्रियमाणं ᵛयज्ञम् ᵛइदं ᵛवचः इदानीं क्रियमाणं स्तुतिलक्षणं वचनं ᵛजुजुषाणः सेवमानः सन् ᵛउपागहि उपागच्छ प्राचीनवंशलक्षणं गृहं प्रामुहि । प्राप्य च ᵛनः अस्माकं ᵛवृधे यज्ञस्य वर्धनाय ᵛभव ॥ जुजुषाणः । ' जुषी प्रीतिसेवनयोः । छन्दसि लिट् । लिटः कानच् । ' चितः ' इत्यन्तोदात्तत्वम् । उपागहि । गमेर्लोटि ' बहुलं छन्दसि ' इति शपो लुक् । ' अनुदात्तोपदेश° ' इत्यादिना मकारलोपः । ' असिद्धवदत्रा भात् ' इति अस्य[1] असिद्धत्वात् हेः लुगभावः । ' गतिर्गतौ ' ( पा. सू. ८. १. ७० ) इति पूर्वस्य गतेर्निघातः ॥ ॥ २० ॥

दर्शयागे सौम्यस्याज्यभागस्य ' सोम गीर्भिः ' इत्येषानुवाक्या । सूत्रितं च—' अग्निः प्रत्नेन मन्मना सोम गीर्भिष्ट्वा वयम् ' ( आश्व. श्रौ. १. ५ ) इति । अन्यत्रापि यत्र वृधन्वन्तावाज्यभागौ तत्रैषा द्वितीयाज्यभागानुवाक्या ॥

सोम॑ गी॒र्भिष्ट्वा॑ व॒यं व॒र्धया॑मो वचो॒विदः॑ । सु॒मृ॒ळीको॑ न॒ आ वि॑श ॥ ११ ॥

सोम॑ । गीः॒ऽभिः॑ । त्वा॒ । व॒यम् । व॒र्धया॑मः । व॒चः॒ऽविदः॑ । सु॒ऽमृ॒ळीकः॑ । नः॒ । आ । वि॒श॒ ॥ ११ ॥

---

१. क्ष—तस्य ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [V]सोम [V]त्वा त्वां [V]वचोविदः स्तुतिलक्षणानां वचसां वेदितारः [V]वयम् अनुष्ठातारः [V]गीर्भिः स्तुतिलक्षणैर्वचोभिः [V]वर्धयामः प्रवृद्धं कुर्मः । तादृशस्त्वं च [V]नः अस्माकं [V]सुमृळीकः शोभनं सुखं कुर्वन् सन् [V]आ [V]विश आगच्छ ॥ सुमृळीकः । ' मृड सुखने ' । ' मृडेः कीकन्ककनौ ' ( उ. सू. ४. ४६४ ) इति भावे कीकन्प्रत्ययः । शोभनं मृडीकं यस्येति बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् ॥

सन्ति पवमानेष्टयस्तिस्रः[1] । तत्र तृतीयस्यामिष्टावुत्तरस्याज्यभागस्य ' गयस्फानः ' इत्येषानुवाक्या । सूत्रितं च–' पुष्टिमन्तावग्निना रयिमश्नवद्गयस्फानो अमीवहा ' ( आश्व. श्रौ. २. १ ) इति । एषैव प्रातःकालीनोपसदि सौम्ययागस्य याज्या सायंकालीनायां त्वनुवाक्या । सूत्रितं च ' अथोपसत् ' इति खण्डे–' त्वं सोमासि सत्पतिर्गयस्फानो अमीवहा ' ( आश्व. श्रौ. ४. ८ ) इति ॥

**गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः । सुमित्रः सोम नो भव ॥ १२ ॥**

गयऽस्फानः । अमीवऽहा । वसुऽवित् । पुष्टिऽवर्धनः । सुऽमित्रः । सोम । नः । भव ॥१२॥

[V]गयस्फानः । गयः इति धननाम । धनस्य वर्धयिता [V]अमीवहा अमीवानां रोगाणां हन्ता [V]वसुवित् स्तोतॄणां धनस्य लम्भयिता प्रापयिता [V]पुष्टिवर्धनः पुष्टेः संपदो वर्धयिता [V]सुमित्रः । शोभनानि मित्राणि सखायो यस्य स तथोक्तः । हे [V]सोम त्वं [V]नः अस्माकम् एवंगुणविशिष्टः [V]भव ॥ गयस्फानः । ' स्फायी वृद्धौ ' । अन्तर्भावितण्यर्थात् ल्युटि व्यत्ययेन यलोपः । इदमादिषु चतुर्षु पदेषु कृदुत्तरपदप्रकृतिस्वरत्वम् । सुमित्रः । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् ॥

**सोम रारन्धि नो हृदि गावो न यवसेष्वा । मर्य इव स्व ओक्ये ॥ १३ ॥**

सोम । ररन्धि । नः । हृदि । गावः । न । यवसेषु । आ । मर्यःऽइव । स्वे । ओक्ये ॥१३॥

हे [V]सोम त्वं [V]नः अस्माकं [V]हृदि हृदये [V]ररन्धि रमस्व । तत्र निदर्शनद्वयमुच्यते । [V]गावो [V]न । यथा गावः [V]यवसेषु शोभनतृणेषु [V]आ आभिमुख्येन रमन्ते । [V]मर्यइव । यथा वा मर्यो मरणधर्मा मनुष्यः [V]स्वे [V]ओक्ये स्वकीये ओकसि गृहे पुत्रादिभिः सह रमते तद्वदस्माभिर्दत्तेन हविषा तृप्तः सन् अस्मास्वेवावतिष्ठस्व । नान्यत्र गच्छेति निदर्शनद्वयस्य तात्पर्यार्थः ॥ ररन्धि । ' रमु क्रीडायाम् ' । व्यत्ययेन परस्मैपदम् । ' बहुलं छन्दसि ' इति शपः श्लुः । ' छन्दस्युभयथा ' इति हेः आर्धधातुकत्वेन ङित्त्वाभावात् ' अङितश्च ' इति हेर्धिः । अत एव अङित्त्वात् अनुनासिकलोपाभावः । ' सेर्ह्यपिच्च ' इति हेः अपित्त्वात् तस्यैव स्वरः शिष्यते । छान्दसमभ्यासदीर्घत्वम् । ' आमन्त्रितं पूर्वमविद्यमानवत् ' इति पूर्वस्यामन्त्रितस्य अविद्यमानवत्त्वात् पदादिपरत्वेन[2] निघाताभावः[3] । मर्यइव । ' छन्दसि निष्टर्क्य° ' इत्यादौ मर्यशब्दो यत्प्रत्ययान्तो निपात्यते । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । ओक्ये । ' उच समवाये ' । उच्यते समवेयते प्राप्यते इति ओक्यं गृहम् । ' ऋहलोर्ण्यत् ' । ' चजोः कु घिण्ण्यतोः ' इति कुत्वम् । तित्स्वरितः ॥

---

१. क्ष-ट-ढ–पावमानेष्टयस्तिस्रः । २. स–पादादित्वेन । ३. स–न निघातः ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यः सोम सख्ये तव रारणदेव मर्त्यः । तं दक्षः सचते कविः ॥ १४ ॥

यः । सोम । सख्ये । तव । ररणत् । देव । मर्त्यः । तम् । दक्षः । सचते । कविः ॥१४॥

हे vदेव द्योतमान vसोम vतव vसख्ये त्वदीये सखित्वे निमित्तभूते सति vयः vमर्त्यः मरणधर्मा यजमानः vरारणत् रणति एतत्सूक्तरूपेण स्तोत्रेण त्वां स्तौति vतं यजमानं vकविः क्रान्तदर्शी vदक्षः सर्वकार्यसमर्थस्त्वं vसचते सेवसे । अनुगृह्णासीत्यर्थः[1] ॥ ररणत्[2] । रण शब्दार्थः । लेटि अडागमः । ' बहुलं छन्दसि ' इति शपः श्लुः । ' इतश्च लोपः० ' इति इकारलोपः । ' छन्दस्युभयथा ' इति आर्धधातुकत्वात् अचि अनिटि लसार्वधातुके विधीयमानस्य अभ्यस्ताद्युदात्तत्वस्याभावे धातुस्वरः शिष्यते । सचते । ' षच समवाये ' । पुरुषव्यत्ययः ॥

उरुष्या णो अभिशस्तेः सोम नि पाह्यंहसः । सखा सुशेव एधि नः ॥ १५ ॥

उरुष्य । नः । अभिऽशस्तेः । सोम । नि । पाहि । अंहसः । सखा । सुऽशेवः । एधि । नः ॥ १५॥

हे vसोम त्वं vनः अस्मान् vअभिशस्तेः अभिशंसनात् अभिशापरूपान्निन्दनात् vउरुष्य रक्ष । ' उरुष्यती रक्षाकर्मा ' ( निरु. ५. २३ ) इति यास्कः । तथा vअंहसः अस्मत्कृतात् पापाच्च vनि vपाहि नितरां पालय । एवमस्मदीयं पापं परिहृत्य vसुशेवः अस्मभ्यं दातव्येन शोभनेन सुखेन युक्तः सन् vसखा vएधि हितकारी भव ॥ अभिशस्तेः । ' शंसु स्तुतौ ' । अस्मात् भावे क्तिन् । ' तादौ च० ' इति गतेः प्रकृतिस्वरत्वम् । एधि । ' अस भुवि ' । लोटि सेर्हिः । तस्य ङित्त्वात् ' श्नसोरल्लोपः ' इति अकारलोपः । ' ध्वसोरेद्धावभ्यासलोपश्च ' इति सकारस्य एत्वम् । तस्य ' असिद्धवदत्रा भात् ' इति असिद्धत्वात् ' हुझल्भ्यो हेर्धिः ' इति हेर्धिरादेशः ॥ ॥ २१ ॥

ग्रावस्तोत्रे ' आ प्यायस्व समेतु ते ' इति तृचो विनियुक्तः । सूत्रितं च–' आ प्यायस्व समेतु त इति तिस्रो मृजन्ति त्वा दश क्षिपः ' ( आश्व. श्रौ. ५. १२ ) इति । पत्नीसंयाजेषु सौम्यस्य ' आ प्यायस्व ' इत्येषानुवाक्या । सूत्रितं च–' आ प्यायस्व समेतु ते सं ते पयांसि समु यन्तु वाजाः ' ( आश्व. श्रौ. १. १० ) इति ॥ चमसाप्यायनेऽप्येषा विनियुक्ता । सूत्रितं च—' आ प्यायस्व समेतु ते सं ते पयांसि समु यन्तु वाजा इति चमसानाद्योपाद्यान् ' ( आश्व. श्रौ. ५. ६ ) इति ॥

आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवा वाजस्य संगथे ॥ १६ ॥

आ । प्यायस्व । सम् । एतु । ते । विश्वतः । सोम । वृष्ण्यम् । भव । वाजस्य । सम्ऽगथे ॥१६॥

हे vसोम त्वम्[3] vआ vप्यायस्व वर्धस्व । vते तव vवृष्ण्यं वृषत्वं वीर्यं सामर्थ्यं vविश्वतः सर्वतः vसमेतु संगच्छतां त्वया संयुक्तं भवतु । एवंभूतस्त्वं vवाजस्य अन्नस्य vसंगथे संगमने vभव । अस्माकमन्नप्रदो भवेत्यर्थः ॥ वृष्ण्यम् । ' वृष सेचने ' । ' कनिन्युवृषि० ' इत्यादिना कनिन् । वृष्णि

---

१. क्ष-ट-ढ-स–' अनुगृह्णासीत्यर्थः ' इत्यस्यानन्तरं ' सख्ये । सख्युर्यः इति भावे यप्रत्ययः ' इत्यधिकम् । २. न-स–रारणत् । ३. ट-ढ–' त्वम् ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

भवं वृष्ण्यम् । ' भवे छन्दसि ' इति यत् । ' अलोपोऽनः ' इति अकारलोपः । ' ये चाभावकर्मणोः ' इति प्रकृतिभावस्तु व्यत्ययेन न प्रवर्तते । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । भव । ' व्यचोऽतस्तिङः ' इति संहितायां दीर्घत्वम् । संगथे । ' पातृतुदिवचि° ' इत्यादिना विधीयमानः थक्प्रत्ययो बहुलवचनात् गमेरपि भवति । थाथादिना उत्तरपदान्तोदात्तत्वम् ॥

आ प्यायस्व मदिन्तम सोम विश्वेभिरंशुभिः ।
भवा नः सुश्रवस्तमः सखा वृधे ॥ १७ ॥

आ । प्यायस्व । मदिन्ऽतम । सोम । विश्वेभिः । अंशुऽभिः ।
भव । नः । सुश्रवःऽतमः । सखा । वृधे ॥ १७ ॥

हे ᵛमदिन्तम अतिशयेन मदवन् ᵛसोम ᵛविश्वेभिः सर्वैः ᵛअंशुभिः लतावयवैः ᵛआ ᵛप्यायस्व आ समन्तात् वृद्धो भव । स त्वं ᵛसुश्रवस्तमः अतिशयेन शोभनान्नयुक्तः सन् ᵛनः अस्माकं ᵛवृधे वर्धनाय ᵛसखा ᵛभव मित्रीभव ॥ मदिन्तम । मदो हर्षः । तद्वान् मदी । अतिशयेन मदी मदिन्तमः । ' नाद्धस्य ' ( पा. सू. ८. २. १७ ) इति तमपो नुट् । सुश्रवस्तमः । ' श्रवः इत्यन्ननाम श्रूयत इति सतः ' ( निरु. १०. ३ ) इति यास्कः । शोभनं श्रवो यस्य स तथोक्तः । अतिशयेन सुश्रवाः सुश्रवस्तमः । तमपः पित्त्वादनुदात्तत्वे ' सोर्मनसी अलोमोषसी ' इत्युत्तरपदाद्युदात्तत्वमेव शिष्यते ॥

पत्नीसंयाजेषु सौम्यस्य ' सं ते पयांसि ' इति याज्या । सूत्रितं च–' सं ते पयांसि समु यन्तु वाजा इह त्वष्टारमग्रियम् ' ( आश्व. श्रौ. १. १० ) इति । चमसाप्यायनेऽप्येषा । सूत्रितं च– ' सं ते पयांसि समु यन्तु वाजा इति चमसानाद्योपाद्यान् ' ( आश्व. श्रौ. ५. ६ ) इति ॥

सं ते पयांसि समु यन्तु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि धिष्व ॥ १८ ॥

सम् । ते । पयांसि । सम् । ऊँ इति । यन्तु । वाजाः । सम् । वृष्ण्यानि । अभिमातिऽसहः ।
आऽप्यायमानः । अमृताय । सोम । दिवि । श्रवांसि । उत्ऽतमानि । धिष्व ॥ १८ ॥

हे सोम ᵛअभिमातिषाहः अभिमातीनां शत्रूणां हन्तुः ᵛते तव एवंभूतं त्वां ᵛपयांसि श्रयणार्थानि[1] क्षीराणि ᵛसं ᵛयन्तु संगच्छन्ताम् । तथा ᵛवाजाः ᵛउ हविर्लक्षणान्यन्नानि च त्वां संगच्छन्ताम् । ᵛवृष्ण्यानि वीर्याणि च संगच्छन्ताम् । हे ᵛसोम त्वम् ᵛअमृताय अस्माकममृतत्वाय अमरणत्वाय ᵛआप्यायमानः आ समन्तात् वर्धमानः सन् ᵛदिवि नभसि स्वर्गे ᵛउत्तमानि उद्गततमान्युत्कृष्टानि ᵛश्रवांसि अन्नानि अस्माभिर्भोक्तव्यानि हविर्लक्षणानि वा ᵛधिष्व धारय ॥ ते । ' क्रियाग्रहणं कर्तव्यम् ' इति

---

१. ट-स–श्रपणार्थानि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी । अभिमातिषाहः । ' षह अभिभवे ' । ' छन्दसि सहः ' इति ण्विप्रत्ययः । सुषामादित्वात् षत्वम् । अमृताय । ' नञो जरमरमित्रमृताः ' इत्युत्तरपदाद्युदात्तत्वम् । उत्तमानि । उच्चैर्दात् ससाधनक्रियावचनात् आतिशायनिकस्तमप् । ' उत्तमशश्वत्तमौ सर्वत्र ' ( पा. सू. ६. १. १६०. ग. ) इति उच्चादिषु पाठात् अन्तोदात्तत्वम् । धिष्व । ' सुधित वसुधित नेमधित धिष्व धिषीय च ' ( पा. सू. ७. ४. ४५ ) इति धिभावो निपात्यते ॥

सोमप्रवहणे ' या ते धामानि ' इत्येषा । सूत्रितं च–' या ते धामानि हविषा यजन्तीमां धियं शिक्षमाणस्य देवेति निहिते परिदध्यात् ' ( आश्व. श्रौ. ४. ४ ) इति । एकादशिनस्य सौम्यस्य पशोर्हविष एवैव याज्या । ' प्रदानानाम् ' इति खण्डे सूत्रितम्–अषाढं युत्सु पृतनासु पप्रिं या ते धामानि हविषा यजन्ति ' ( आश्व. श्रौ. ३. ७ ) इति ॥

या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् ।
गयस्फानः प्रतरणः सुवीरोऽवीरहा प्र चरा सोम दुर्यान् ॥ १९ ॥

या । ते । धामानि । हविषा । यजन्ति । ता । ते । विश्वा । परिऽभूः । अस्तु । यज्ञम् ।
गयऽस्फानः । प्रऽतरणः । सुऽवीरः । अवीरऽहा । प्र । चर । सोम । दुर्यान् ॥ १९ ॥

हे ᵛसोम ᵛते त्वदीयानि ᵛया यानि ᵛधामानि द्युप्रभृतिष्ववस्थितानि तेजांसि ᵛहविषा चरुपुरोडाशादिना ᵛयजन्ति यजमानाः पूजयन्ति ᵛता ᵛते ᵛविश्वा त्वदीयानि तानि सर्वाणि धामानि ᵛयज्ञम् अस्मदीयमध्वरं ᵛपरिभूरस्तु परितो भावयितृणि परितः प्राप्तानि सन्तु । यद्वा । त्वदीयानां तेषां सर्वेषां धाम्नामस्मदीयो यजमानः परिभूर्यज्ञं प्रति परिग्रहीता यागेन स्वीकर्ता अस्तु भवतु । परिपूर्वो भवतिः परिग्रहार्थः । तादृशैर्धामभिरुपेतस्त्वं ᵛदुर्यान् प्राचीनवंशादिलक्षणानस्मदीयान् गृहान् । ' गृहा वै दुर्याः ' ( तै. सं. ६. २. ९. १ ) इति श्रुतेः । ᵛप्र ᵛचर प्रकर्षेण गच्छ । कीदृशस्त्वम् । ᵛगयस्फानः गयस्य गृहस्य धनस्य वा वर्धयिता ᵛप्रतरणः प्रकर्षेण दुरितात् तारयिता ᵛसुवीरः शोभनैः वीरैरुपेतः[1] ᵛअवीरहा । वीर्यात् जायन्ते इति वीराः पुत्राः । तेषामहन्ता ॥ परिभूः । ' भू प्राप्तौ ' । अस्मात् ' क्विप् च ' इति क्विप् । ' व्यत्ययो बहुलम् ' ( पा. सू. ३. १. ८५ ) इति लिङ्गवचनव्यत्ययौ । अस्तु । व्यत्ययेन एकवचनम् । गयस्फानः । गय इति गृहस्य धनस्य च नामधेयम् । तेषां स्फायिता वर्धयिता । ' कृत्यल्युटो बहुलम् ' इति कर्तरि ल्युटि छान्दसो यलोपः । अवीरहा । वीराणां हन्ता वीरहा । न वीरहा अवीरहा ॥

महापितृयज्ञे सोमस्य पितृमतो यागे ' सोमो धेनुम् ' इत्येषा द्वितीयानुवाक्या । तत्र ह्येकैकस्य हविषो द्वे द्वे अनुवाक्ये समुच्चयेन विहिते । तथैव ' दक्षिणाग्नेः ' इति खण्डे सूत्रितम्–' सोमो धेनुं सोमो अर्वन्तमाशुं त्वं सोम पितृभिः संविदानः ' ( आश्व. श्रौ. २. १९ ) इति ॥

---

१. क्ष–वीरपुरुषैरुपेतः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सोमो धेनुं सोमो अर्वन्तमाशुं सोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै ॥ २० ॥

सोमः । धेनुम् । सोमः । अर्वन्तम् । आशुम् । सोमः । वीरम् । कर्मण्यम् । ददाति ।
सदन्यम् । विदथ्यम् । सभेयम् । पितृऽश्रवणम् । यः । ददाशत् । अस्मै ॥ २० ॥

[v]यः यजमानः [v]ददाशत् सोमाय हविर्लक्षणान्यन्नानि दद्यात् तस्मै[1] यजमानाय [v]सोमः [v]धेनुं सवत्सां दोग्ध्रीं गां [v]ददाति । तथा [v]आशुं शीघ्रगामिनम् [v]अर्वन्तम् अश्वं ददाति प्रयच्छति। तथा [v]वीरं पुत्रम् [v]अस्मै यजमानाय ददाति। कीदृशं पुत्रम्। [v]कर्मण्यं लौकिककर्मसु कुशलं [v]सदन्यम्। सदनं गृहम्। तदर्हम्। गृहकार्यकुशलमित्यर्थः । [v]विदथ्यम्। विदन्त्येषु देवानिति विदथाः यज्ञाः । तदर्हम्। दर्शपूर्णमासादियागानुष्ठानपरमित्यर्थः । [v]सभेयं सभायां साधुम्। सकलशास्त्राभिज्ञमित्यर्थः। [v]पितृश्रवणं पिता श्रूयते प्रख्यायते येन पुत्रेण तादृशम्॥ कर्मण्यम्। कर्मसु साधुः कर्मण्यः। 'तत्र साधुः' ( पा. सू. ४. ४. ९८ ) इति यत्। 'ये चाभावकर्मणोः' इति प्रकृतिभावः। 'तित्स्वरितम्' इति स्वरितत्वम्। एवमुत्तरत्रापि यत्प्रत्ययः। सभेयम्। 'ढश्छन्दसि' ( पा. सू. ४. ४. १०६ ) इति तत्र साधुः इत्यर्थे ढप्रत्ययः। ददाशत्। 'दाश्च दाने'। लेटि अडागमः। 'बहुलं छन्दसि' इति शपः श्लुः ॥ ॥ २२ ॥

एकादशिनस्य[2] सौम्यस्य पशोः पुरोडाशस्य 'अषाढं युत्सु' इत्येषा याज्या। 'प्रदानानाम्' इति खण्डे सूत्रितम्—'अषाढं युत्सु पृतनासु पप्रिं या ते धामानि हविषा यजन्ति' ( आश्व. श्रौ. ३. ७ ) इति ॥

अषाढं युत्सु पृतनासु पप्रिं स्वर्षामप्सां वृजनस्य गोपाम् ।
भरेषुजां सुक्षितिं सुश्रवसं जयन्तं त्वामनु मदेम सोम ॥ २१ ॥

अषाढम् । युत्ऽसु । पृतनासु । पप्रिम् । स्वःऽसाम् । अप्साम । वृजनस्य । गोपाम् ।
भरेषुऽजाम् । सुऽक्षितिम् । सुऽश्रवसम् । जयन्तम् । त्वाम् । अनु । मदेम । सोम ॥२१॥

[v]युत्सु युद्धेषु [v]अषाढंशत्रुभिरनभिभवनीयं तथा [v]पृतनासु सेनासु [v]पप्रिं जयस्य पूरयितारं [v]स्वर्षां स्वर्गस्य सनितारं दातारं [v]अप्साम् अपां वृष्टिलक्षणानामुदकानां दातारम्। यद्वा अप्साम् अप्सातृकं भक्षकरहितम्। सर्वेषामनुग्राहकमित्यर्थः। [v]वृजनस्य [v]गोपाम्। वृज्यतेऽनेनेति[3] वृजनं बलम्। तस्य गोपां गोपयितारं[4] रक्षितारं [v]भरेषुजाम्। भ्रियन्ते एषु हवींषीति भराः यागाः। तेषु प्रादुर्भवन्तं [v]सुक्षितिं शोभननिवासस्थानं [v]सुश्रवसं शोभनयशस्कं [v]जयन्तं शत्रूनभिभवन्तम्। हे [v]सोम ईदृग्भूतं [v]त्वाम् अनुलक्ष्य [v]मदेम हर्षयुक्ता भवेम ॥ अषाढम्। 'षह अभिभवे'। 'साढ्यै साढ्वा साढेति

---

१. क्ष-ट-ढ–अस्मै । २. क्ष-ट–ऐकादशिनस्य । ३. क्ष–वर्ज्यतेऽनेनेति । ४. क्ष–गोपायितारम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

निगमे ' ( पा. सू. ६. ३. ११३ ) इति निपातनात् ' सहिवहोरोदवर्णस्य ' ( पा. सू. ६. ३. ११२ ) इति ओत्वाभावः । ' सहेः साडः सः ' इति षत्वम् । पप्रिम् । ' पॄ पालनपूरणयोः ' । ' आदृगमहनजनः° ' इति किन्प्रत्ययः । स्वर्षाम् । स्वः स्वर्गं सनोतीति स्वर्षाः । ' षणु दाने ' । ' जनसनखन° ' इति विट् । ' विड्वनोरनुनासिकस्यात् ' इति आत्वम् । अप्साम् । अप्शब्दोपपदात् सनोतेः पूर्ववत् विट् । यद्वा । ' प्सा भक्षणे ' । प्साति भक्षयतीति प्साः । ' क्विप् च ' इति क्विप् । न विद्यते प्सा अस्येति बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । अरेपुजाम् । ' जनी प्रादुर्भावे ' । पूर्ववत् विट् आत्वं च । मदेम । ' मदी हर्षे ' । व्यत्ययेन शप् ॥

त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः ।
त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥ २२ ॥

त्वम् । इमाः । ओषधीः । सोम । विश्वाः । त्वम् । अपः । अजनयः । त्वम् । गाः ।
त्वम् । आ । ततन्थ । उरु । अन्तरिक्षम् । त्वम् । ज्योतिषा । वि । तमः । ववर्थ ॥२२॥

हे Vसोम Vत्वम् Vइमाः भूम्यां वर्तमानाः Vविश्वाः सर्वाः Vओषधीः Vअजनयः उत्पादितवानसि । तथा Vत्वम् Vअपः तासामोषधीनां कारणभूतानि वृष्ट्युदकानि अजनयः । तथा Vत्वं Vगाः सर्वान् पशूनुदपादयः । Vउरु विस्तीर्णम् Vअन्तरिक्षं Vत्वम् Vआ Vततन्थ विस्तारितवानसि । तस्मिन्नन्तरिक्षे यत् Vतमः अस्मद्दृष्टिनिरोधकमन्धकारं तदपि Vत्वं Vज्योतिषा आत्मीयेन प्रकाशेन Vवि Vववर्थ विवृतं विश्लिष्टं विनष्टं कृतवानसि ॥ ततन्थ । ' तनु विस्तारे ' । ववर्थ । ' वृञ् वरणे ' । उभयत्र लिटस्थलि ' बभूथा ततन्थ जगृभ्म ववर्थेति निगमे ' ( पा. सू. ७. २. ६४ ) इति निपात्यते ॥

देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य ।
मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा गविष्टौ ॥ २३ ॥

देवेन । नः । मनसा । देव । सोम । रायः । भागम् । सहसाऽवन् । अभि । युध्य ।
मा । त्वा । आ । तनत् । ईशिषे । वीर्यस्य । उभयेभ्यः । प्र । चिकित्स । गोऽईष्टौ ॥२३॥

हे Vदेव द्योतमान Vसहसावन् बलवन् Vसोम Vदेवेन Vमनसा द्योतमानया त्वदीयया बुद्ध्या Vरायो Vभागं धनस्यांशं Vनः अस्मानभिलक्ष्य Vयुध्य प्रेरय । यद्वा । नोऽस्माकं रायो धनस्य भागं भक्तारमपहर्तारं शत्रुम् अभि युध्य आभिमुख्येन सम्यक् प्रहर । Vत्वा तादृशं त्वां कश्चिदपि शत्रुः Vमा Vआ Vतनत् क्लेशेन आततं Vमा कार्षीत् । मा हिंसीदित्यर्थः । Vउभयेभ्यः उभयेषां युध्यमानानां संबन्धिनः Vवीर्यस्य बलस्य त्वम् Vईशिषे ईश्वरो भवसि । स त्वं Vगविष्टौ संग्रामे Vप्र Vचिकित्स अस्मदीयमुपद्रवं परिहर ॥ रायः । ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम् । भागम् । भजतेः कर्मणि घञ् ; ' कृत्यल्युटो बहुलम् ' इति बहुलवचनात् कर्तरि वा । ' कर्षात्वतः ' इत्यन्तोदात्तत्वम् । सहसावन् । सहःशब्दात् मतुपि छान्दस आकारोपजनः । युध्य । ' युध संप्रहारे ' । व्यत्ययेन परस्मैपदम् । तनत् । ' तनु विस्तारे ' । व्यत्ययेन शप् । ' न माङ्योगे ' इति अडभावः । ईशिषे । ' ईशः से '

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

( पा. सू. ७. २. ७७ ) इति इडागमः । चिकित्स । ' कित ज्ञाने ' । ' गुप्तिज्किद्भ्यः सन् ' ( पा. सू. ३. १. ५ ) । गविष्टौ । गवां बाणानामिष्टयः एषणानि गमनानि येष्विति बहुव्रीहौ पूर्वपद-प्रकृतिस्वरत्वम् ॥ ॥२३॥

' एता उ त्याः ' इति अष्टादशर्चमष्टमं सूक्तं गोतमस्यार्षम्। आदितश्चतस्रो जगत्यः । त्रयोदश्याद्याः षड्च उष्णिहः । शिष्टा अष्टौ त्रिष्टुभः । उषा देवता । ' अश्विना वर्तिः ' इति अन्त्यस्तृचोऽश्वि-देवताकः । तथा चानुक्रान्तम्–' एता उ त्या ह्यूनोषस्यं चतुर्जगत्यादि षळुष्णिगन्तं तृचोऽन्त्य आश्विनः ' इति । सूक्तविनियोगो लैङ्गिकः । प्रातरनुवाके उषस्ये क्रतौ जागते छन्दस्याश्विनशस्त्रे च ' एता उ त्याः ' इति चतस्रो विनियुक्ताः । सूत्रितं च–' एता उ त्या इति चतस्रो जागतम् ' ( आश्व. श्रौ. ४. १४ ) इति ॥

एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमञ्जते ।
निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यन्ति मातरः ॥ १ ॥

एताः । ऊँ इति । त्याः । उषसः । केतुम् । अक्रत । पूर्वे । अर्धे । रजसः । भानुम् । अञ्जते । निःऽकृण्वानाः । आयुधानिऽइव । धृष्णवः । प्रति । गावः । अरुषीः । यन्ति । मातरः ॥१॥

[v]उ इत्येतत् पादपूरणम्[1] । [v]त्याः ताः [v]एताः [v]उषसः प्रभातकालाभिमानिन्यो देवताः । [v]केतुम् अन्धकारावृतस्य सर्वस्य जगतः प्रज्ञापकं प्रकाशम् [v]अक्रत अकृपत कृतवत्यः । यस्मादेवं तस्मात् उषसः [v]रजसः अन्तरिक्षलोकस्य [v]पूर्वे [v]अर्धे प्राचीनदिग्भागे [v]भानुं प्रकाशम् [v]अञ्जते व्यक्तीकुर्वन्ति । [v]धृष्णवः धर्षणशीला योद्धारः [v]आयुधानीव यथा असिप्रभृतीन्यायुधानि संस्कुर्वन्ति एवं [v]निष्कृण्वानाः स्वभासा जगत्संस्कुर्वाणाः [v]गावः गमनस्वभावाः [v]अरुषीः आरोचमानाः [v]मातरः सूर्यप्रकाशस्य निर्मात्र्यो जगज्जनन्यो वा उषसः [v]प्रति [v]यन्ति प्रतिदिवसं गच्छन्ति । एवंविधा उषसोऽस्मान् रक्षन्त्वित्यर्थः । अत्र निरुक्तम्–' एतास्ता उषसः केतुमकृपत प्रज्ञानमेकस्या एव पूजनार्थं बहुवचनं स्यात् पूर्वेऽर्धेऽन्तरिक्षलोकस्य समञ्जते भानुना निष्कृण्वाना आयुधानीव धृष्णवः । निरिंस्येष समित्येतस्य स्थाने । एमीदेषां निष्कृतं जारिणीवेत्यपि निगमो भवति। प्रति यन्ति गावो गमनादरुषीरारोचनान्मातरो भासो निर्मात्र्यः ' ( निरु. १२. ७ ) इति ॥ अक्रत । करोतेर्लुङि ' मन्त्रे घस° ' इति च्लेः लुक्। निष्कृण्वानाः । ' कृवि हिंसाकरणयोश्च ' । अस्मात् ताच्छीलिकः चानश् । ' धिन्विकृण्व्योर च ' इति उप्रत्ययः । ' इदुदुपधस्य चाप्रत्ययस्य ' इति विसर्जनीयस्य षत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत ।
अक्रन्नुषासो वयुनानि पूर्वथा रुशन्तं भानुमरुषीरशिश्रयुः ॥ २ ॥

उत् । अपप्तन् । अरुणाः । भानवः । वृथा । सुऽआयुजः । अरुषीः । गाः । अयुक्षत ।
अक्रन् । उषसः । वयुनानि । पूर्वऽथा । रुशन्तम् । भानुम् । अरुषीः । अशिश्रयुः ॥२॥

---

१. क्ष-ट-न-स–पदपूरणम् ; ट–पादपूरणे ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vअरुणाः आरोचमानाः Vभानवः औषस्यो दीप्तयः Vवृथा अनायासेन स्वयमेव Vउदपप्तन् उदगमन्। तदनन्तरम् Vउषसः च Vस्वायुजः सुखेन रथे आयोक्तुं शक्याः Vअरुषीः शुभ्रवर्णाः Vगाः पूर्वमुत्थिताः रश्मीन् ईदृशीः स्ववाहनभूताश्चतुष्पदीर्गा एव वा Vअयुक्षत स्वरथेऽयोजयन्। उक्तं च- 'अरुण्यो गाव उषसाम्' ( नि. १. १५. ७ ) इति। एवं गोभिर्युक्तं रथमारुह्य उषसः Vपूर्वथा पूर्वेष्वतीतेष्वहःस्विव Vवयुनानि सर्वेषां प्राणिनां ज्ञानानि Vअक्रन् अकार्षुः। उषःकाले जाते हि सर्वे प्राणिनो ज्ञानयुक्ता भवन्ति। तदनन्तरम् Vअरुषीः आरोचमानास्ताः उषसः Vरुशन्तम्। 'रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः' ( निरु. २. २० ) इति यास्कः। शुभ्रवर्णं Vभानुं सूर्यम् Vअशिश्रयुः असेवन्त। तेन सह एकीभवन्तीत्यर्थः॥ अपप्तन्। 'पतॢ गतौ'। लुङि ऌदित्त्वात् च्लेः अङादेशः। 'पतः पुम्' ( पा. सू. ७. ४. १९ ) इति धातोः पुमागमः। अक्रन्। 'मन्त्रे घस°' इत्यादिना च्लेः लुक्। पूर्वथा। 'प्रत्नपूर्वविश्वेमात्थाल् छन्दसि' ( पा. सू. ५. ३. १११ ) इति इवार्थे थाल्प्रत्ययः। अशिश्रयुः। 'श्रिञ् सेवायाम्'। 'बहुलं छन्दसि' इति शपः श्लुः। 'सिजभ्यस्तविदिभ्यश्च' इति झेः जुस्। 'जुसि च' ( पा. सू. ७. ३. ८३ ) इति गुणः॥

**अर्चन्ति नारीरपसो न विष्टिभिः समानेन योजनेना परावतः।**
**इषं वहन्तीः सुकृते सुदानवे विश्वेदह यजमानाय सुन्वते॥ ३॥**

अर्चन्ति। नारीः। अपसः। न। विष्टिऽभिः। समानेन। योजनेन। आ। पराऽवतः। इषम्। वहन्तीः। सुऽकृते। सुऽदानवे। विश्वा। इत्। अह। यजमानाय। सुन्वते॥ ३॥

Vनारीः नेत्र्यः उषसः Vविष्टिभिः निवेशकैः स्वकीयैस्तेजोभिः Vसमानेन Vयोजनेन[1] एकेनैव योजनेनोद्योगेन[2] Vआ Vपरावतः आ दूरदेशात् आ पश्चिमदिग्भागात् Vअर्चन्ति नभःप्रदेशं पूजयन्ति। कृत्स्नं जगद्युगपदेव व्याप्नुवन्तीत्यर्थः। तत्र दृष्टान्तः। Vअपसो Vन। युद्धकर्मणोपेताः[3] पुरुषा यथा स्वकीयैरायुधैर्घाटीमुखेन सर्वं देशं व्याप्नुवन्ति तद्वत्। किं कुर्वत्यः। Vसुकृते शोभनस्य कर्मणः कर्त्रे Vसुन्वते सोमाभिषवं कुर्वते Vसुदानवे कल्याणीर्दक्षिणाः ऋत्विग्भ्यो ददते Vयजमानाय Vविश्वेदह सर्वमेव Vइषम् अन्नं Vवहन्तीः आवहन्त्यः प्रयच्छन्त्य इत्यर्थः॥ नारीः। 'नॄ नये'। 'ऋदोरप्'। 'नृनरयोर्वृद्धिश्च' ( पा. सू.४. १. ७३. ग. ) इति शार्ङ्गरवादिषु पाठात् ङीन्। जसि 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम्। अपसः। अपस्शब्दात् 'अर्शआदिभ्योऽच्' इति अच्। 'सुपां सुलुक्°' इति जसः सुः। व्यत्ययेन प्रत्ययात् पूर्वस्योदात्तत्वम्। विष्टिभिः। 'विश प्रवेशने'। विशन्ति प्रविशन्तीति विष्टयः किरणाः। 'क्तिच्क्तौ च संज्ञायाम्' इति क्तिच्। विश्वा। 'सुपां सुलुक्°' इति अमः डादेशः॥

**अधि पेशांसि वपते नृतूरिवापोर्णुते वक्ष उस्रेव बर्जहम्।**
**ज्योतिर्विश्वस्मै भुवनाय कृण्वती गावो न व्रजं व्युषा आवर्तमः॥ ४॥**

अधि। पेशांसि। वपते। नृतूःऽइव। अप। ऊर्णुते। वक्षः। उस्राऽइव। बर्जहम्। ज्योतिः। विश्वस्मै। भुवनाय। कृण्वती। गावः। न। व्रजम्। वि। उषाः। आवरित्यावः। तमः॥४॥

---

१. न-'योजनेन' नास्ति। २. क्ष-ट-ढ-उद्योगेन। ३. क्ष-ट-ढ-युद्धकर्मोपेताः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vउषाः Vपेशांसि जगत्स्वाश्लिष्टानि कृष्णवर्णानि तमांसि Vअधि आधिक्येन Vवपते छिनत्ति । तत्र दृष्टान्तः । Vनृतूरिव । नॄन् तूर्वति केशेन रिक्तीकरोतीति नृतूर्नापितः । स यथा केशान्निःशेषेण छिनत्ति एवमुषा अप्यन्धकारं समूलं हिनस्तीत्यर्थः । यद्वा नृतूरिव नृत्यन्ती योषिदिव । पेशांसि । रूपनामैतत् । सर्वैर्दर्शनीयानि रूपाण्युषा अधि वपते स्वात्मन्यधिकं धारयति । एवं प्रथमतोऽन्धकारं स्वकिरणैर्निरस्य Vवक्षः स्वकीयमुरःप्रदेशम्[1] Vअपोर्णुते तमसानाच्छादितं करोति । स्वयमाविर्भवतीत्यर्थः । Vबर्जहं[2] पयस उत्पत्तिस्थानं दोहनसमये Vउस्रा[3] गौर्यथा[3] आविष्करोति तद्वत् । किं कुर्वती । Vगावो Vन Vव्रजं यथा गावः स्वकीयं गोष्ठं स्वयमेव शीघ्रं व्याप्नुवन्ति[4] एवं स्वयमेव प्राचीं दिशं प्राप्य Vविश्वस्मै Vभुवनाय सर्वस्मै लोकाय Vज्योतिः Vकृण्वती प्रकाशं कुर्वती। एवमुक्तेन प्रकारेणोषाः Vतमः अन्धकारं Vवि Vआवः विवृतमपश्लिष्टमकरोत् ॥ नृतूरिव । तुर्वी हिंसार्थः । ' क्विप् च ' इति क्विप् । ' राल्लोपः ' इति वलोपः । ' वोरुपधायाः° ' इति दीर्घत्वम् । यद्वा । ' नृती गात्रविनामे ' । ' नृतिश्रध्योः कूः ' (उ. सू. १.९१) इति कूप्रत्ययः । बर्जहम् । ' बृह् संभक्तौ ' । बृणीते संभजते गामिति बः पयः । विच् । तज्जहातीति बर्जहः । ' ओहाक् त्यागे ' । ' खश्प्रकरणे वातशुनीतिलगर्धेष्वजधेट्तुदजहातिभ्य उपसंख्यानम् ' ( पा. सू. ३. २. २८. १ ) इति अगर्धशब्दोपपदादपि ' कृत्यल्युटो बहुलम् ' इति बहुलवचनात् खश् । तस्य सार्वधातुकत्वेन कर्तरि शपि जुहोत्यादित्वात् श्लुः । द्विर्वचनादि। ववयोरभेद इति बत्वम्। दिवोदासादित्वात् पूर्वपदाद्युदात्तत्वम् । आवः । ' वृञ् वरणे ' । लुङि ' मन्त्रे घस° ' इति च्लेः लुक् । गुणे ' हल्ङ्याब्भ्यः ' इति लोपः[5] । ' छन्दस्यपि दृश्यते ' ( पा. सू. ६. ४. ७३ ) इति आडागमः ॥

प्रातरनुवाकस्योषस्ये क्रतौ ' प्रत्यर्चिः ' इति अष्टावनुवक्तव्याः आश्विनशस्त्रे च । तथा च सूत्रितम्—' प्रत्यर्चिरित्यष्टौ व्युषा आ वो दिविजा इति पळिति त्रैष्टुभम् ( आश्व. श्रौ. ४. १४ ) इति ॥

**प्रत्यर्ची रुशदस्या अदर्शि वि तिष्ठते बाधते कृष्णमभ्वम् ।**
**स्वरुं न पेशो विदथेष्वञ्जञ्चित्रं दिवो दुहिता भानुमश्रेत् ॥ ५ ॥**

प्रति । अर्चिः । रुशत् । अस्याः । अदर्शि । वि । तिष्ठते । बाधते । कृष्णम् । अभ्वम् ।
स्वरुम् । न । पेशः । विदथेषु । अञ्जन् । चित्रम् । दिवः । दुहिता । भानुम् । अश्रेत् ॥५॥

Vअस्याः उषसः Vरुशत् दीप्यमानम् Vअर्चिः तेजः Vप्रति Vअदर्शि सर्वैः पूर्वस्यां दिशि प्रथमतो दृश्यते[6] । Vवि Vतिष्ठते सर्वासु दिक्षु विविधमवतिष्ठते व्याप्नोतीत्यर्थः । सर्वा दिशो व्याप्य च Vअभ्वम् । महन्नामैतत् । अतिशयेन विपुलं Vकृष्णं कृष्णवर्णमन्धकारं Vबाधते अपसारयति । Vविदथेषु यज्ञेषु Vस्वरुं Vन स्वरुनाम्ना शकलेन युक्तं यूपं यथा आज्येन आध्वर्यवः Vअञ्जन् अञ्जन्ति तद्वन्नभसि स्वकीयं Vपेशः रूपम् उषा अनक्ति संश्लिष्टं करोति । तदनन्तरं Vचित्रं चायनीयं Vभानुं सूर्यं Vदिवो Vदुहिता द्युलोकादुत्पन्नोषाः Vअश्रेत् असेवत ॥ वि तिष्ठते । ' समवप्रविभ्यः° ' इत्यात्मनेपदम् । अश्रेत् । ' श्रिञ् सेवायाम् ' । लङि ' बहुलं छन्दसि ' इति शपो लुक् ॥ ॥ २४ ॥

---

१. क्ष–स्वावयवमुरःप्रदेशम् । २. क्ष-स–उस्रेव । यथा गौः बर्जहम् । ३. क्ष–' उस्रा गौर्यथा ' नास्ति; स–यथा । ४. क्ष–प्राप्नुवन्ति । ५. क्ष-न–तिलोपः । ६. क्ष-दृश्यते । ततः । ७. क्ष–समवप्रविभ्यः स्थः ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अतारिष्म तमसस्पारमस्योषा उच्छन्ती वयुना कृणोति ।
श्रिये छन्दो न स्मयते विभाती सुप्रतीका सौमनसायाजीगः ॥ ६ ॥

अतारिष्म । तमसः । पारम् । अस्य । उषाः । उच्छन्ती । वयुना । कृणोति ।
श्रिये । छन्दः । न । स्मयते । विऽभाती । सुऽप्रतीका । सौमनसाय । अजीगरिति ॥६॥

vअस्य नैशस्य vतमसः अन्धकारस्य vपारं समाप्तिप्रदेशम् vअतारिष्म उत्तीर्णा अभूम। अनन्तरम् vउच्छन्ती नैशं तमो वर्जयन्ती vउषाः vवयुना वयुनानि सर्वेषां प्राणिनां ज्ञानानि vकृणोति निर्मिमीते । vश्रिये संपदर्थं vछन्दो vन vस्मयते । यथोपच्छन्दयिता वशीकरणे समर्थः पुरुषः आढ्यसमीपं प्राप्य तत्प्रीत्यर्थं स्मयते हसति एवं vविभाती विशिष्टप्रकाशं कुर्वत्युषाः स्वकीयया निर्मलदीप्त्या हसन्तीव दृश्यते । एवं vसुप्रतीका विशिष्टप्रकाशरूपत्वेन शोभनाङ्गी[1] सती vसौमनसाय सर्वेषां सौमनस्याय vअजीगः अन्धकारं भक्षितवती ॥ अतारिष्म । ' तॄ प्लवनतरणयोः ' । लुङि सिचि वृद्धिः । तमसः । ' षष्ठ्याः पतिपुत्र° ' इति विसर्जनीयस्य संहितायां सत्वम् । स्मयते । ' स्मिङ् ईषद्धसने ' । भौवादिकः । अजीगः । ' गॄ निगरणे ' । लङि ' बहुलं छन्दसि ' इति शपः श्लुः । ' बहुलं छन्दसि ' इति अभ्यासस्य इत्वम् । तुजादित्वात् दीर्घः ॥

भास्वती नेत्री सूनृतानां दिवः स्तवे दुहिता गोतमेभिः ।
प्रजावतो नृवतो अश्वबुध्यानुषो गोअग्राँ उप मासि वाजान् ॥ ७ ॥

भास्वती । नेत्री । सूनृतानाम् । दिवः । स्तवे । दुहिता । गोतमेभिः ।
प्रजाऽवतः । नृऽवतः । अश्वऽबुध्यान् । उषः । गोऽअग्रान् । उप । मासि । वाजान् ॥७॥

vभास्वती तेजस्विनी । सूनृता इति वाङ्नाम । vसूनृतानां प्रियसत्यात्मिकानां vनेत्री[2] प्रणेत्री कारयित्री । उषसि हि जातायां मनुष्यप्रमुखाः प्राणिनः स्वस्वव्यापाराय इतस्ततः शब्दं कुर्वन्ति । एवंभूता vदिवः vदुहिता द्युलोकसकाशादुत्पन्ना उषाः vगोतमेभिः ऋषिभिरस्माभिः vस्तवे स्तूयते । हे vउषः अस्माभिः स्तुता त्वं vवाजान् अन्नानि vउप vमासि प्रयच्छ । कीदृशान् वाजान् । vप्रजावतः प्रजाभिः पुत्रपौत्रादिभिर्युक्तान् vनृवतः दासलक्षणैर्नृभिरुपेतान् vअश्वबुध्यान् । अश्वाः बुध्या विद्यमानत्वेन बोद्धव्या येषु वाजेषु तान् । यद्वा अश्वबुध्नान्[3] । वर्णव्यापत्त्या यकारः[4] । अश्वमूलान् । अश्वैर्हि राजानो धनान्यन्नानि च लभन्ते । अतोऽन्नानां तन्मूलत्वम् । vगोअग्रान् । गावोऽग्रे प्रमुखे येषां तादृशान् ॥ भास्वती । ' भा दीप्तौ ' । असुन् । ततो मतुप् । ' मादुपधायाः° ' इति मतुपो[5] वत्वम्[5] । ' उगितश्च ' इति ङीप् । नेत्री । ' ऋन्नेभ्यो ङीप् ' । ' उदात्तयणो हल्पूर्वात् ' इति ङीप उदात्तत्वम् । स्तवे । ' ष्टुञ् स्तुतौ ' । कर्मणि लटि ' बहुलं छन्दसि ' इति बहुलग्रहणात् यकोऽपि लुक् । ' लोपस्त आत्मने-

---

१. च-छ-ण-त-ध-न-फ-ल-श-स-शोभमाना । २. क्ष-ट-ढ-शब्दानां नेत्री । ३. क्ष-त-स-अश्वबुध्यान् । ४. ल-नकारस्थाने यकारः । ५. क्ष-ट-ढ-मतोर्वत्वम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पदेषु ' इति तलोपः । ' छन्दस्युभयथा ' इति एकारस्य आर्धधातुकत्वेन ङित्त्वाभावात् गुणावादेशौ । नृवतः । व्यत्ययेन मतोर्वत्वम् । ' ह्रस्वनुड्भ्यां मतुप् ' इति मतुप उदात्तत्वम् । मासि । ' मा[1] माने '। आदादिकः[2] ॥

उषस्तमश्यां यशसं सुवीरं दासप्रवर्गं रयिमश्वबुध्यम् ।
सुदंससा श्रवसा या विभासि वाजप्रसूता सुभगे बृहन्तम् ॥ ८ ॥

उषः । तम् । अश्याम् । यशसम् । सुऽवीरम् । दासऽप्रवर्गम् । रयिम् । अश्वऽबुध्यम् ।
सुऽदंससा । श्रवसा । या । विऽभासि । वाजऽप्रसूता । सुऽभगे । बृहन्तम् ॥ ८ ॥

हे [v]उषः उषोदेवते [v]तं [v]रयिं धनम् [v]अश्यां प्राप्नुयाम् । कीदृशम् । [v]यशसं यशसा कीर्त्या युक्तम् । सर्वैः प्रशस्यमित्यर्थः । [v]सुवीरं शोभनैर्वीरैः पुत्रादिभिर्युक्तं [v]दासप्रवर्गम् । प्रकृष्टो वर्गः संघः प्रवर्गः । दासानां कर्मकराणां प्रवर्गो यस्मिन् तम् । अनेकैर्भृत्यैरुपेतमित्यर्थः । [v]अश्वबुध्यम् । अश्वा बुध्या बोद्धव्या येन धनेन तादृशम् । हे [v]सुभगे शोभनधने उषः [v]सुदंससा शोभनेन कर्मणा युक्तेन [v]श्रवसा श्रवणीयेन स्तोत्रेण प्रीता त्वं [v]वाजप्रसूता अस्मभ्यं दत्तान्ना सती [v]बृहन्तं प्रौढं [v]या यं[3] रयिं [v]विभासि विशेषेण प्रकाशयसि तमश्यामिति पूर्वेण संबन्धः ॥ अश्याम् । ' अशू व्याप्तौ ' । व्यत्ययेन परस्मैपदम् । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । यशसम् । अर्शआदित्वात् मत्वर्थीयोऽच् । व्यत्ययेन प्रत्ययात् पूर्वस्योदात्तत्वम् । दासप्रवर्गम् । दासयत्युपक्षपयति शत्रूनिति दासो भृत्यः । ' दसु उपक्षये ' । अस्मात् ण्यन्तात् पचाद्यच् । चित्त्वादन्तोदात्तत्वम् । तदेव बहुव्रीहिस्वरेण शिष्यते । सुदंससा । ' सोर्मनसी अलोमोषसी ' इति बहुव्रीहावुत्तरपदाद्युदात्तत्वम् । या । ' सुपां सुलुक्° ' इति असः डादेशः ॥

विश्वानि देवी भुवनाभिचक्ष्या प्रतीची चक्षुरुर्विया वि भाति ।
विश्वं जीवं चरसे बोधयन्ती विश्वस्य वाचमविदन्मनायोः ॥ ९ ॥

विश्वानि । देवी । भुवना । अभिऽचक्ष्य । प्रतीची । चक्षुः । उर्विया । वि । भाति ।
विश्वम् । जीवम् । चरसे । बोधयन्ती । विश्वस्य । वाचम् । अविदत् । मनायोः ॥ ९ ॥

[v]देवी द्योतमानोषाः [v]विश्वानि सर्वाणि [v]भुवना भुवनानि भूतजातानि [v]अभिचक्ष्य अभिप्रकाश्य प्रकाशवन्ति कृत्वा अनन्तरं [v]प्रतीची प्रत्यङ्मुखी सती [v]चक्षुः प्रकाशकेन तेजसा [v]उर्विया उर्वी विस्तीर्णा सती [v]वि [v]भाति प्रकाशते । अपि च [v]विश्वं [v]जीवं सर्वं प्राणिजातं [v]चरसे चरणाय स्वस्व-

---

१. क्ष-स-माङ् । २. क्ष-स-अदादिकः । ३. क्ष-त-स-याम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

व्यापारेषु प्रवर्तनाय [v]बोधयन्ती निद्रातः सकाशात् उद्बोधयन्त्युषाः [v]विश्वस्य सर्वस्य [v]मनायोः मनसा युक्तस्य वाग्व्यवहारसमर्थस्य प्राणिजातस्य या वागस्ति तां [v]वाचमविदत् अलभत। अत एवोषसः सूनृतावतीति संज्ञोपपन्ना भवति॥ अभिचक्ष्य। 'चक्षिङ् व्यक्तायां वाचि'। अयं प्रकाशनार्थोऽपि। 'समासेऽनञ्पूर्वे०' (पा. सू. ७. १. ३७) इति क्त्वाप्रत्ययस्य ल्यबादेशः। प्रतीची। प्रतिपूर्वात् अञ्चतेः 'ऋत्विक्०' इत्यादिना क्विन्। 'अनिदिताम्०' इति नलोपः। 'अञ्चतेश्चोपसंख्यानम्' इति ङीप्। 'अचः' इति अकारलोपे 'चौ' इति दीर्घत्वम्। उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वम्। उर्विया। उर्वीशब्दादुत्तरस्य सोः 'इयाडियाजीकाराणां चोपसंख्यानम्' (पा. सू. ७. १. ३९. १) इति डियाजादेशः[1]। आदेशसामर्थ्यात् तस्य लोपो न भवति। मनायोः। मन आत्मन इच्छति मनस्यति। 'सुप आत्मनः क्यच्'। 'क्याच्छन्दसि' इति उः। वर्णव्यापत्त्या सकारे आकारः। यद्वा। 'कर्तुः क्यङ् सलोपश्च' इति क्यङ् सकारलोपश्च। 'अकृत्सार्वधातुकयोः०' इति दीर्घः॥

पुनःपुनर्जायमाना पुराणी समानं वर्णमभि शुम्भमाना।
श्वघ्नीव कृत्नुर्विज आमिनाना मर्तस्य देवी जरयन्त्यायुः॥ १०॥

पुनःऽपुनः। जायमाना। पुराणी। समानम्। वर्णम्। अभि। शुम्भमाना।
श्वघ्नीऽइव। कृत्नुः। विजः। आऽमिनाना। मर्तस्य। देवी। जरयन्ती। आयुः॥ १०॥

[v]पुनःपुनर्जायमाना प्रतिदिवसं सूर्योदयात्पूर्वं प्रादुर्भवन्ती [v]पुराणी चिरंतनी नित्येत्यर्थः। यस्मात् [v]समानं [v]वर्णम् एकमेव रूपम् [v]अभि प्राप्य [v]शुम्भमाना शोभमाना। विभिन्नेष्वपि दिवसेष्वस्या ऐकरूप्येण[2] अवस्थानान्नित्यत्वमित्यर्थः। एवंगुणविशिष्टा [v]देवी देवनशीलोषाः [v]मर्तस्य मरणधर्मणः सर्वस्य प्राणिजातस्य [v]आयुः जीवनं [v]जरयन्ती ऊनयन्ती वर्तते। बह्वीषूषःसु अतीतासु हि सर्वेषामायुर्हीयते। उषाश्च पुनःपुनर्जायमानेत्युक्तं अतः सैवायुर्जरयति। तत्र दृष्टान्तः। [v]कृत्नुः कर्तनशीला [v]श्वघ्नीव व्याधस्त्रीव। सा यथा [v]विजः चलतः पक्षिणः [v]आमिनाना पक्षादिच्छेदनेन हिंसन्ती तेषामायुर्जरयति तद्वत्॥ पुराणी। पुरा इत्यस्मात् अव्ययात् 'सायंचिरंप्राह्णे०' (पा. सू. ४. ३. २३) इत्यादिना भवार्थे ट्युप्रत्ययः। 'पुराणप्रोक्तेषु ब्राह्मणकल्पेषु' (पा. सू. ४. ३. १०५) इति निपातनात् तुडभावः। योरनादेशः। टित्त्वात् ङीप्। व्यत्ययेन अन्तोदात्तत्वम्। शुम्भमाना। 'शुम्भ[3] दीप्तौ'। शपः पित्त्वादनुदात्तत्वम्। शानचो लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। श्वघ्नी। शुना मृगान् हतवान् श्वहा। 'बहुलं छन्दसि' (पा. सू. ३. २. ८८) इति वचनात् ब्रह्मादिव्यतिरिक्तेऽप्युपपदे हन्तेः क्विप्। 'ऋन्नेभ्यो ङीप्' इति ङीप्। 'अल्लोपोऽनः' इति अकारलोपः। 'हो हन्तेः०' इति घत्वम्। उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वम्। कृत्नुः। 'कृती छेदने'। औणादिकः क्नुप्रत्ययः। विजः। 'ओविजी भयचलनयोः'। विजन्ति चलन्तीति विजः पक्षिणः। आमिनाना। 'मीञ्[4] हिंसायाम्'। क्र्यादिकः। 'प्वादीनां ह्रस्वः' इति ह्रस्वत्वम्। शानचश्चित्त्वादन्तोदात्तत्वम्॥ ॥ २५॥

---

१. क्ष-ट-ढ–इयाजादेशः। २. च-छ-ण-न-फ-श-स–एकरूपेण। ३. क्ष-स–शुभ शुम्भ। ४. क्ष-न-स–मीङ्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

व्यूर्ण्वती दिवो अन्ताँ अबोध्यप स्वसारं सनुतर्युयोति ।
प्रमिनती मनुष्या युगानि योषा जारस्य चक्षसा वि भाति ॥ ११ ॥

विऽऊर्ण्वती । दिवः । अन्तान् । अबोधि । अप । स्वसारम् । सनुतः । युयोति ।
प्रऽमिनती । मनुष्या । युगानि । योषा । जारस्य । चक्षसा । वि । भाति ॥ ११ ॥

[v]दिवः नभसः [v]अन्तान् प्रान्तान् [v]व्यूर्ण्वती विवृतांस्तमसा वियुक्तान् कुर्वत्युषाः [v]अबोधि सर्वैः प्राणिभिरज्ञायि ज्ञाताभूत् । तदनन्तरं [v]स्वसारम् उषसः प्रादुर्भावे सति स्वयमेव सरन्तीं निशां [v]सनुतः । अन्तर्हितनामैतत् । अन्तर्हितप्रदेशे [v]अप [v]युयोति अपगमय्य पृथक्करोति । [v]मनुष्या मनुष्याणां संबन्धीनि [v]युगानि कृतत्रेतादीनि [v]प्रमिनती स्वगमनागमनाभ्यां प्रकर्षेण हिंसन्ती [v]जारस्य रात्रेर्जरयितुः सूर्यस्य [v]योषा जायोषाः [v]चक्षसा आत्मीयेन प्रकाशेन [v]वि [v]भाति विशेषेण प्रकाशते ॥ व्यूर्ण्वती । ' ऊर्णुञ् आच्छादने ' । विपूर्वात् अस्मात् लटः शतृ । ' उगितश्च ' इति ङीप् । ' शतुरनुमः° ' इति नद्या उदात्तत्वम् । सनुतः । एतदन्तोदात्तं स्वरादिषु निपातितम् । अतोऽव्ययसंज्ञायाम् ' अव्ययादाप्सुपः ' इति सप्तम्या लुक् । युयोति । ' यु मिश्रणामिश्रणयोः ' । ' बहुलं छन्दसि ' इति शपः श्लुः । मनुष्या । ' सुपां सुलुक्° ' इति षष्ठ्या डादेशः । युगानि । युजेः करणे कर्मणि वा घञ् । ' चजोः कु घिण्ण्यतोः ' इति कुत्वम् । उञ्छादिषु कालविशेषे रथाद्युपकरणे च युगशब्दपाठात् लघूपध-गुणाभावः ( पा. सू. ६. १. १६०. ग. ) । ' उञ्छादीनां च ' इत्यन्तोदात्तत्वम् । जारस्य । ' दारजारौ कर्तरि णिलुक्च ' ( पा. सू. ३. ३. २०. ४ ) इति घञन्तो निपात्यते ॥

पशून्न चित्रा सुभगा प्रथाना सिन्धुर्न क्षोदः उर्विया व्यश्वैत् ।
अमिनती दैव्यानि व्रतानि सूर्यस्य चेति रश्मिभिर्दृशाना ॥ १२ ॥

पशून् । न । चित्रा । सुऽभगा । प्रथाना । सिन्धुः । न । क्षोदः । उर्विया । वि । अश्वैत् ।
अमिनती । दैव्यानि । व्रतानि । सूर्यस्य । चेति । रश्मिऽभिः । दृशाना ॥ १२ ॥

[v]सुभगा शोभनधना [v]चित्रा चायनीया पूजनीयोषाः [v]पशून्न यथा पशून् गोपालकोऽरण्ये विस्तारयति तथा [v]प्रथाना तेजांसि विस्तारयन्ती [v]उर्विया उर्वी महती एवंभूता सा [v]व्यश्वैत् सर्वं जगत् व्याप्नोत् । तत्र दृष्टान्तः । [v]सिन्धुर्न [v]क्षोदः । यथा स्यन्दनशीलमुदकं निम्नदेशेऽचिरादेव व्याप्नोति तद्वत् । सैवोषाः[1] [v]सूर्यस्य [v]रश्मिभिः किरणैः सह [v]दृशाना दृश्यमाना सती [v]चेति प्रज्ञाता आसीत् । किं कुर्वती । [v]दैव्यानि देवसंबन्धीनि [v]व्रतानि दर्शपूर्णमासादीनि कर्माणि [v]अमिनती अहिंसती । अनुष्ठाने यजमानान् प्रवर्तयन्तीत्यर्थः । उषसः प्रादुर्भावानन्तरं हि अग्निहोत्रादीनि सर्वाणि कर्माण्यनुष्ठीयन्ते न रात्रौ । ' न सायमस्ति देवया अजुष्टम् ' ( ऋ. सं. ५. ७७. २ ) इति श्रुतेः ॥ प्रथाना । ' प्रथ प्रख्याने ' ।

---

१. क्ष-ट-ढ–सैषोषाः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अस्मात् अन्तर्भावितण्यर्थात् ताच्छीलिकः चानश् । ' बहुलं छन्दसि ' इति शपो लुक् । सिन्धुः । ' स्यन्दू प्रस्रवणे ' । ' स्यन्देः संप्रसारणं धश्च ' ( उ. सू. १. ११ ) इति उप्रत्ययः । ' नित् ' इत्यनुवृत्तेराद्युदात्तत्वम् । अश्वैत् । ' टुओश्वि गतिवृद्ध्योः ' । लुङि अङ्चङोर्विकल्पितत्वात् ( पा. सू. ३. १. ५८; ४९ ) च्लेः सिच् । आगमानुशासनस्यानित्यत्वात् इडभावः । ' सिचि वृद्धिः° ' ( पा. सू. ७. २. १ ) । अनिडादित्वात् ' ह्यन्तक्षण° ' इति वृद्धिप्रतिषेधाभावः । ' बहुलं छन्दसि ' ( पा. सू. ७. ३. ९७ ) इति ईडागमाभावः । ' स्कोः संयोगाद्योः° ' इति सलोपः । चेति । ' चिती संज्ञाने ' । कर्मणि लुङि ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । दृशाना । दृशेः कर्मणि लटः शानच् । ' बहुलं छन्दसि ' इति विकरणस्य लुक् ॥

प्रातरनुवाकस्योपस्ये ऋतावौष्णिहे छन्दसि ' उषस्तच्चित्रम् ' इति तृचो विनियुक्तः आश्विनशस्त्रे च । ' अथोषस्यः ' इति खण्डे सूत्रितम्–' उषस्तच्चित्रमा भरेति तिस्र औष्णिहम् ' ( आश्व. श्रौ. ४. १४ ) इति ॥

उषस्तच्चित्रमा भरास्मभ्यं वाजिनीवति ।
येन तोकं च तनयं च धामहे ॥ १३ ॥

उषः । तत् । चित्रम् । आ । भर । अस्मभ्यम् । वाजिनीऽवति ।
येन । तोकम् । च । तनयम् । च । धामहे ॥ १३ ॥

हे [V]वाजिनीवति। वाजो हविर्लक्षणमन्नम्। तद्युक्ता क्रिया वाजिनी। तया क्रियया युक्ते [V]उषः उषोदेवते [V]अस्मभ्यं [V]चित्रं चायनीयं [V]तत् धनम् [V]आ [V]भर आहर प्रयच्छ । [V]येन धनेन [V]तोकं पुत्रं [V]तनयं तत्पुत्रं [V]च [V]धामहे दधमहे धारयामः । अत्र निरुक्तम्–' उषस्तच्चित्रं चायनीयं धनमाह-रास्मभ्यमन्नवति येन पुत्रांश्च पौत्रांश्च दधीमहि ' ( निरु. १२. ६ ) इति ॥ धामहे। दधातेर्लटि ' बहुलं छन्दसि ' इति शपो लुक् । व्यत्ययेन आद्युदात्तत्वम् । यद्वा । लोटि ' आडुत्तमस्य पिच्च ' इति आडागमः प्रत्ययस्य पिद्वद्भावश्च । अतः प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते । अस्मिन् पक्षे ' एत ऐ ' ( पा. सू. ३. ४. ९३ ) इति ऐत्वाभावो व्यत्ययेन द्रष्टव्यः । यद्वृत्तयोगादनिघातः[1] ॥

उषो अद्येह गोमत्यश्वावति विभावरि । रेवदस्मे व्युच्छ सूनृतावति ॥ १४ ॥

उषः । अद्य । इह । गोऽमति । अश्वऽवति । विभाऽवरि ।
रेवत् । अस्मे इति । वि । उच्छ । सूनृताऽवति ॥ १४ ॥

हे [V]गोमति अस्मभ्यं दातव्यैर्गोभिर्युक्ते तथा [V]अश्वावति अश्वैर्युक्ते [V]विभावरि विशिष्टप्रकाशोपेते [V]सूनृतावति । प्रियसत्यात्मिका वाक् सूनृता । तादृश्या वाचा युक्ते एवंभूते हे [V]उषः उषोदेवते [V]अद्य

---

१. क्ष–यद्वृत्तान्नित्यमिति निघातप्रतिषेधः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इदानीं प्रभातसमये [V]इह अस्मिन् देशे [V]अस्मे अस्माकं [V]रेवत् धनयुक्तं कर्म यथा भवति तथा [V]व्युच्छ नैशं तमो निवारय ॥ अश्वावति । ' मन्त्रे सोमाश्वेन्द्रिय° ' इति मतौ दीर्घत्वम् । पादादित्वात् आमन्त्रितस्य आष्टमिकनिघाताभावः । रेवत् । ' रयेर्मतौ बहुलम् ' ( पा. सू. ६. १. ३७. ६ ) इति संप्रसारणम् । ' छन्दसीरः ' इति मतुपो वत्वम् । ' रेशब्दाच्च मतुप उदात्तत्वं वक्तव्यम् ' ( का. ६. १. १७६. १ ) इति मतुप उदात्तत्वम् । उच्छ । ' उछी विवासे ' । विवासो वर्जनम् ॥

युक्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः ।
अथा नो विश्वा सौभगान्या वह ॥ १५ ॥

युक्ष्व । हि । वाजिनीऽवति । अश्वान् । अद्य । अरुणान् । उषः ।
अथ । नः । विश्वा । सौभगानि । आ । वह ॥ १५ ॥

हे [V]वाजिनीवति हविर्लक्षणान्नवति [V]उषः उषोदेवते [V]अरुणान् अरुणवर्णान् [V]अश्वान् अश्वस्थानीयान् गोविशेषान् [V]अद्य अस्मिन् काले [V]युक्ष्वा [V]हि योजयैव । हिः अवधारणे । [V]अथ अनन्तरं रथमारुह्य [V]विश्वा [V]सौभगानि सर्वाणि सौभाग्यानि [V]नः अस्मभ्यम् [V]आ [V]वह आनय ॥ अश्वान् । ' दीर्घादटि समानपादे ' इति संहितायां नकारस्य रुत्वम् । ' आतोऽटि नित्यम् ' इति सानुनासिक आकारः । सौभगानि । ' सुभगान्मन्त्रे ' इति उद्गात्रादिषु पाठात् भावकर्मणोरर्थयोः ' प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् ' इति अञ्प्रत्ययः । ' हृद्भगसिन्ध्वन्ते पूर्वपदस्य च ' इति उभयपदवृद्धौ प्राप्तायां सर्वविधीनां छन्दसि विकल्पितत्वादत्रोत्तरपदवृद्धिर्न भवति ( का. ७. ३. १९ ) इत्युक्तम् ॥ ॥ २६ ॥

प्रातरनुवाकस्याश्विने क्रतावौष्णिहे छन्दसि ' अश्विना वर्तिः ' इत्ययं तृचः आश्विनशस्त्रे च । तथा च सूत्रितम्– ' अश्विना वर्तिरस्मदाश्विनावेह गच्छतमिति तृचौ ' ( आश्व. श्रौ. ४. १५ ) इति ॥

अश्विना वर्तिरस्मदा गोमद्दस्रा हिरण्यवत् ।
अर्वाग्रथं समनसा नि यच्छतम् ॥ १६ ॥

अश्विना । वर्तिः । अस्मत् । आ । गोऽमत् । दस्रा । हिरण्यऽवत् ।
अर्वाक् । रथम् । सऽमनसा । नि । यच्छतम् ॥ १६ ॥

उषःसाहचर्यात्[1] बुद्धिस्थौ अश्विनौ इदमादिकेन तृचेन स्तूयेते । हे [V]अश्विना अश्ववन्तौ व्यापनशीलौ वा देवौ [V]दस्रा शत्रूणामुपक्षपयितारौ [V]अस्मत् अस्माकं [V]वर्तिः वर्तनहेतुभूतं गृहम् [V]आ समन्तात्

---

१. क्ष-ट-ढ–उषसा साहचर्यात् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vगोमत् बहुभिर्गोभिर्युक्तं vहिरण्यवत् हितरमणीयधनयुक्तं च यथा भवति तथा vसमनसा समानमनस्कौ सन्तौ युवां युष्मदीयं vरथम् vअर्वाक् अर्वाचीनम् अस्मदीयगृहमभिमुखं[1] vनि vयच्छतम् आवर्तयतम् ॥ अश्विना । ' सुपां सुलुक्° ' इति आकारः । वर्तिः । वर्ततेऽस्मिन्निति वर्तिर्गृहम् । औणादिक इसिप्रत्ययः । अस्मत् । ' सुपां सुलुक्° ' इति षष्ठ्या लुक् । समनसा । समानं मनो ययोस्तौ । ' समानस्य च्छन्दसि° ' इति सभावः ॥

यावित्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः ।
आ न ऊर्जं वहतमश्विना युवम् ॥ १७ ॥

यौ । इत्था । श्लोकम् । आ । दिवः । ज्योतिः । जनाय । चक्रथुः ।
आ । नः । ऊर्जम् । वहतम् । अश्विना । युवम् ॥ १७ ॥

हे अश्विनौ vयौ युवां vदिवः द्युलोकात् vश्लोकम् उपश्लोकनीयं प्रशंसनीयं vज्योतिः तेजः vइत्था इत्थमस्माभिरनुभूयमानेन प्रकारेण vचक्रथुः कृतवन्तौ । केषांचिन्मतेन सूर्याचन्द्रमसावश्विनौ उच्येते । तदुक्तं यास्केन–' तत्कावश्विनौ द्यावापृथिव्यावित्येकेऽहोरात्रावित्येके सूर्याचन्द्रमसावित्येके ' ( निरु. १२. १ ) इति । तथा च प्रकाशकत्वं तयोरुपपन्नम् । तौ vयुवं युवां vनः अस्मभ्यम् vऊर्जं बलप्रदमन्नम् vआ vवहतं आनयतं प्रयच्छतम् ॥ श्लोकम् । ' श्लोकृ संघाते ' । अयं स्तुत्यर्थोऽपि । कर्मणि घञ् । जित्त्वादाद्युदात्तत्वम् ॥

एह देवा मयोभुवा दस्रा हिरण्यवर्तनी । उषर्बुधो वहन्तु सोमपीतये ॥ १८ ॥

आ । इह । देवा । मयःऽभुवा । दस्रा । हिरण्यवर्तनी इति हिरण्यऽवर्तनी ।
उषःऽबुधः । वहन्तु । सोमऽपीतये ॥ १८ ॥

vउषर्बुधः उषसि प्रबुद्धा अश्वाः vइह अस्मिन् यागे vसोमपीतये सोमपानाय vदस्रा शत्रूणामुपक्षपयितारावश्विनौ vआ vवहन्तु आनयन्तु । कीदृशौ । vदेवा देवनशीलौ दानादिगुणयुक्तौ वा vमयोभुवा मयस आरोग्यप्रदस्य सुखस्य भावयितारौ[2] । ' अश्विनौ वै देवानां भिषजौ ' ( ऐ. ब्रा. १. १८ ) इति श्रुतेः । vहिरण्यवर्तनी । वर्ततेऽनेनेति व्युत्पत्त्या वर्तनिशब्देन रथ उच्यते । सुवर्णमयौ वर्तनिर्ययोस्तौ ॥ देवेत्यादिषु त्रिषु[3] ' सुपां सुलुक्° ' इति आकारः । सोमपीतये । ' पा पाने ' । भावे क्तिनि ' घुमास्था° ' इति ईत्वम् । सोमस्य पीतिः सोमपीतिः । दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् ॥ ॥ २७ ॥

' अग्नीषोमौ ' इति द्वादशर्चं नवमं सूक्तं गोतमस्यार्षम् । आदितस्तिस्रोऽनुष्टुभः । नवम्याद्यास्तिस्रो गायत्र्यः । अष्टमी जगती त्रिष्टुब्वा । शिष्टाः पञ्च त्रिष्टुभः । अग्नीषोमौ देवता । तथा चानुक्रान्तम्–

---

१. क्ष–अस्मदाभिमुखम् । २. स–भावयितारौ अश्विनौ । ३. क्ष-न-स–' त्रिषु ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' अग्नीषोमौ द्वादशाग्नीषोमीयमाद्यास्तिस्रोऽनुष्टुभ उपान्त्यास्तिस्रो[1] गायत्र्योऽष्टमी[1] जगती वा ' इति । अग्नीषोमीयस्य पशोर्वपापुरोडाशहविषामादितस्तिस्र ऋचः क्रमेणानुवाक्याः । सूत्रितं च–' अग्नीषोमाविमं सु मे युवमेतानि दिवि रोचनानीति तृचौ ' ( आश्व. श्रौ. ३. ८ ) इति ॥

अग्नीषोमाविमं सु मे शृणुतं वृषणा हवम् ।
प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः ॥ १ ॥

अग्नीषोमौ । इमम् । सु । मे । शृणुतम् । वृषणा । हवम् ।
प्रति । सुऽउक्तानि । हर्यतम् । भवतम् । दाशुषे । मयः ॥ १ ॥

Vवृषणा वृषणौ कामानां वर्षितारौ हे Vअग्नीषोमौ Vइमम् इदानीं प्रयुज्यमानं Vमे मदीयं Vहवम् आह्वानं Vसु Vशृणुतं सम्यगवगच्छतम् । Vसूक्तानि शोभनानि स्तुतिलक्षणान्यस्माभिः कृतानि वचांसि Vप्रति Vहर्यतं प्रत्येकं कामयेथाम् । तदनन्तरं Vदाशुषे चरुपुरोडाशादीनि दत्तवते यजमानाय Vमयः मयसः सुखस्य दातारौ Vभवतम् ॥ अग्नीषोमौ । अग्निश्च सोमश्च । द्वन्द्वे ' ईदग्नेः सोमवरुणयोः ' ( पा. सू. ६. ३. २७ ) इति ईत्वम् । ' अग्नेः स्तुत्स्तोमसोमाः ' ( पा. सू. ८. ३. ८२ ) इति षत्वम् । ' देवताद्वन्द्वे च ' इत्युभयपदप्रकृतिस्वरे प्राप्ते ' आमन्त्रितस्य च ' इत्याद्युदात्तत्वम् । वृषणा । ' सुपां सुलुक्° ' इति आकारः । ' वा षपूर्वस्य° ' इति विकल्पनादुपधाया दीर्घाभावः । हवम् । ' भावेऽनुपसर्गस्य ' इति ह्वयतेः अप् संप्रसारणं च । सूक्तानि । सुपूर्वात् वक्तेः कर्मणि निष्ठा । ' सूपमानात् क्तः ' इत्युत्तरपदान्तोदात्तत्वम् । हर्यतम् । ' हर्य गतिकान्त्योः ' । भौवादिकः ॥

यदा पौर्णमास्यामग्नीषोमावुपांशुयाजस्य देवता तदानीम् ' अग्नीषोमा यो अद्य ' इति तस्यानुवाक्या । सूत्रितं च ' उक्ता देवताः ' इति खण्डे—' अग्नीषोमा यो अद्य वामान्यं दिवो मातरिश्वा जभार ' ( आश्व. श्रौ. १. ६ ) इति ॥

अग्नीषोमा यो अद्य वामिदं वचः सपर्यति ।
तस्मै धत्तं सुवीर्यं गवां पोषं स्वश्व्यम् ॥ २ ॥

अग्नीषोमा । यः । अद्य । वाम् । इदम् । वचः । सपर्यति ।
तस्मै । धत्तम् । सुऽवीर्यम् । गवाम् । पोषम् । सुऽअश्व्यम् ॥ २ ॥

हे Vअग्नीषोमौ Vयः यजमानः Vअद्य अस्मिन् कर्मणि Vवां युवाभ्यां युष्मदर्थम् Vइदं स्तुतिलक्षणं Vवचः वाक्यं Vसपर्यति पूजितं करोति Vतस्मै यजमानाय Vगवां पशूनां Vपोषम् अभिवृद्धिं Vधत्तं प्रयच्छतम् । कीदृशं पोषम् । Vसुवीर्यं शोभनेन वीर्येण सामर्थ्येनोपेतं Vस्वश्व्यं शोभनैरश्वैर्युक्तम् ॥ गवाम् । ' सावेकाचः° ' इति प्राप्तस्य विभक्त्युदात्तत्वस्य ' न गोश्वन्सावर्वर्ण° ' इति प्रतिषेधः ॥

---

१. क्ष–उपान्त्यस्तृचो गायत्रोऽष्टमी ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अग्नीषोमा य आहुतिं यो वां दाशाद्धविष्कृतिम् ।
स प्रजया सुवीर्यं विश्वमायुर्व्यश्नवत् ॥ ३ ॥

अग्नीषोमा । यः । आऽहुतिम् । यः । वाम् । दाशात् । हविःऽकृतिम् ।
सः । प्रऽजया । सुऽवीर्यम् । विश्वम् । आयुः । वि । अश्नवत् ॥ ३ ॥

हे अग्नीषोमौ [v]यः यजमानः [v]आहुतिम् आज्याहुतिं [v]वां युवाभ्यां [v]दाशात् दद्यात् । अथवा [v]हविष्कृतिं हविषा चरुपुरोडाशादिना कृताम्[1] आहुतिं [v]यः यजमानो दद्यात् । [v]सः यजमानः [v]प्रजया पुत्रपौत्रादिना युक्तं [v]सुवीर्यं शोभनवीर्ययुक्तं [v]विश्वं सर्वम् [v]आयुः जीवनं [v]व्यश्नवत् व्याप्नोतु ॥ आहुतिम् । जुहोतेः क्तिनि ' तादौ च° ' इति गतेः प्रकृतिस्वरत्वम् । दाशात् । ' दाश्च दाने ' । लेटि आडागमः । यद्वृत्तयोगादनिघातः । हविष्कृतिम् । हविषः कृतिः करणं यस्यामाहुतौ । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । ' नित्यं समासेऽनुत्तरपदस्थस्य ' इति विसर्जनीयस्य षत्वम् । अश्नवत् । अश्नोतेर्व्यत्ययेन परस्मैपदम् । लेटि अडागमः ॥

अग्नीषोमा चेति तद्वीर्यं वां यदमुष्णीतमवसं पणिं गाः ।
अवातिरतं बृसयस्य शेषोऽविन्दतं ज्योतिरेकं बहुभ्यः ॥ ४ ॥

अग्नीषोमा । चेति । तत् । वीर्यम् । वाम् । यत् । अमुष्णीतम् । अवसम् । पणिम् । गाः ।
अव । अतिरतम् । बृसयस्य । शेषः । अविन्दतम् । ज्योतिः । एकम् । बहुऽभ्यः ॥ ४ ॥

हे अग्नीषोमौ [v]वां युवयोः [v]तत् वक्ष्यमाणं [v]वीर्यं सामर्थ्यं [v]चेति अस्माभिर्ज्ञातमभूत् । [v]यत् येन वीर्येण [v]गाः [v]अवसं गोरूपमन्नं [v]पणिं पणेः । विभक्तिव्यत्ययः । एतन्नाम्नोऽसुरात् [v]अमुष्णीतं अपाहार्ष्टम् । तथा [v]बृसयस्य । बृसिः[2] वेष्टनार्थः । बृसयति[3] सर्वं वेष्टयतीति बृसयोऽसुरस्त्वष्टा । तस्यासुरस्य [v]शेषः अपत्यम् । ' शेष इत्यपत्यनाम शिष्यते प्रयतः ' ( निरु. ३. २ ) इति यास्कः । त्वष्टृसकाशादुत्पन्नं वृत्रम् [v]अवातिरतम् अवधिष्टम् । अवतिरतिर्वधकर्मा । प्राणापानरूपयोर्युवयोर्वृत्रेऽनवस्थानात् स मरणं प्राप्तः । तथा चाम्नायते–' तस्माज्जज्ञभ्यमानादग्नीषोमौ निरक्रामतां प्राणापानौ वा एनं तदजहिताम् ' ( तै. सं. २. ५. २. ४ ) इति । ततो वृत्रवधानन्तरं [v]ज्योतिः द्योतमानं सूर्यम् [v]एकं नभसि गच्छन्तं [v]बहुभ्यः जनेभ्यो बहूनामर्थाय [v]अविन्दतम् अलप्साथाम् । एतत् सर्वं येन वीर्येण क्रियते तदस्माभिर्ज्ञातमित्यर्थः ॥ चेति । ' चिती संज्ञाने ' । लुङि ' चिण् भावकर्मणोः ' ( पा. सू. ३. १. ६६ ) इति च्लेः चिणादेशः । ' चिणो लुक् ' इति तशब्दस्य लुक् । अमुष्णीतम् । ' मुष स्तेये ' । क्रैयादिकः । अवसम् । अवतेरौणादिकः असच् । शेषः । ' सुपां सुलुक्° ' इति द्वितीयायाः सुः । एकम् । ' इण् गतौ ' । ' इण्भीकापाशल्यतिमर्चिभ्यः कन् ' ( उ. सू. ३. ३२३ ) इति कन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् ॥

---

१. क्ष–कर्तव्याम् । २. क्ष–बृसिः । ३. क्ष·स–बृसयति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अग्नीषोमीयस्य पशोर्वपापुरोडाशहविषां ' युवमेतानि ' इति आद्यास्तिस्र ऋचः क्रमेण याज्याः। सूत्रं तु पूर्वमेवोदाहृतम् ( आश्व. श्रौ. ३. ८ )। पौर्णमासयागेऽग्नीषोमीयस्य पुरोडाशस्य 'युवमेतानि' इत्येषा याज्या। ' उक्ता देवताः ' इति खण्डे सूत्रितं–' युवमेतानि दिवि रोचनानीन्द्राग्नी अवसा गतम् ' ( आश्व. श्रौ. १. ६ ) इति ॥

युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम् ।
युवं सिन्धूँरभिशस्तेरवद्यादग्नीषोमावमुञ्चतं गृभीतान् ॥ ५ ॥

युवम्। एतानि। दिवि। रोचनानि। अग्निः। च। सोम। सक्रतू इति सऽक्रतू। अधत्तम्।
युवम्। सिन्धून्। अभिऽशस्तेः। अवद्यात्। अग्नीषोमौ। अमुञ्चतम्। गृभीतान् ॥ ५ ॥

हे [v]सोम त्वम् [v]अग्निश्च [v]सक्रतू समानकर्माणौ सन्तौ [v]युवं युवां [v]रोचनानि रोचमानानि दीप्यमानानि [v]एतानि अस्माभिर्निर्दिश्यमानानि ताराग्रहादीनि ज्योतींषि [v]दिवि द्युलोके [v]अधत्तम् अधारयतम्। उत्तरार्धस्येयमाख्यायिका। इन्द्रो वृत्रं हत्वा ब्रह्महत्याया भीतः सन् पृथिव्यां वृक्षेषु स्त्रीष्वप्सु च तां ब्रह्महत्यां न्यमार्क्षीत् तासामपां शुद्धिरग्नीषोमाभ्यां जातेति। ब्रह्महत्यांशेन पापेन [v]गृभीतान् गृहीतानाक्रान्तान् [v]सिन्धून् नदीविशेषान् हे [v]अग्नीषोमौ युवाम् [v]अभिशस्तेः अभिशस्यमानादभितः प्रकटितात् [v]अवद्यात् तस्मात् पापात् [v]अमुञ्चतं मुक्तवन्तौ। यद्वा। वृत्रः इन्द्रेण हतः सन् नदीषु पपात। ततो मृतेन वृत्रशरीरेण नद्यः सर्वा दुष्टा बभूवुः। तथा च तैत्तिरीयकम्–'इन्द्रो वृत्रमहन् सोऽपोऽभ्यत्रियत तासां यन्मेध्यं यज्ञियं सदेवमासीत्तदपोदक्रामत् ' ( तै. ब्रा. ३. २. ५. १ ) इति। तेन दोषेण गृहीता नदीस्तस्माद्दोषादग्नीषोमौ मुक्तवन्तौ ॥ रोचनानि। ' रुच दीप्तौ '। ' अनुदात्तेतश्च हलादेः ' इति युच्। सिन्धून्। ' दीर्घादटि समानपादे ' इति नकारस्य रुत्वम्। ' अत्रानुनासिकः° ' इति अनुनासिकः। गृभीतान्। ' ह्मग्रहोर्भः° ' इति भत्वम् ॥

अग्नीषोमीयस्योपांशुयाजस्य ' आन्यं दिवः ' इत्येषा याज्या। ' अग्नीषोमा यो अद्य वाम् ' इत्यत्र सूत्रमुदाहृतम् ॥

आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेः ।
अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकम् ॥ ६ ॥

आ। अन्यम्। दिवः। मातरिश्वा। जभार। अमथ्नात्। अन्यम्। परि। श्येनः। अद्रेः।
अग्नीषोमा। ब्रह्मणा। ववृधाना। उरुम्। यज्ञाय। चक्रथुः। ऊँ इति। लोकम् ॥ ६ ॥

हे अग्नीषोमौ युवयोर्मध्ये [v]अन्यम् एकमग्निं [v]मातरिश्वा वायुः [v]दिवः द्युलोकात् [v]आ [v]जभार भृगवे यजमानाय आजहार। तथा च मन्त्रान्तरम्–' द्विजन्मानं रयिमिव प्रशस्तं रातिं भरद्भृगवे मातरिश्वा ' ( ऋ. सं. १. ६०. १ ) इति। [v]श्येनः शंसनीयगतिमान्पक्षी पक्ष्याकारा गायत्री [v]अन्यं सोमम् [v]अद्रेः [v]परि मेरोरुपर्यवस्थितात् स्वर्गात् [v]अमथ्नात् बलादाहृतवती। एवं महानुभावौ युवां [v]ब्रह्मणा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्रष्टा मन्त्ररूपेण स्तोत्रेण हविर्लक्षणेनान्नेन वा Vववृधाना वर्धमानौ युवां Vयज्ञाय अन्येषां देवानां यागाय Vउरुं विस्तीर्णं Vलोकं स्थानं Vचक्रथुः कृतवन्तौ। Vउ इत्येतत् पादपूरणम्[1]। आज्यभागदेवतयोरग्नीषोमयोः उत्तरार्धदक्षिणार्धयोर्हूयते[2]। तन्मध्येऽन्यदेवत्यानि सर्वाणि हवींषि हूयन्ते। तन्मध्यमं स्थानमग्नीषोमकृतम्। तथा च तैत्तिरीयकम्–' राजानौ वा एतौ देवतानां यदग्नीषोमावन्तरा देवता इज्येते देवतानां विधृत्यै ' ( तै. सं. २. ६. २. १-२ ) इति ॥ ववृधाना। वृधेर्लिटः कानच्। छान्दसमभ्यासस्य दीर्घत्वम्। ' सुपां सुलुक्° ' इति आकारः ॥ ॥ २८ ॥

**अग्नीषोमा हविषः प्रस्थितस्य वीतं हर्यतं वृषणा जुषेथाम् ।**
**सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शं योः ॥ ७ ॥**

अग्नीषोमा। हविषः। प्रऽस्थितस्य। वीतम्। हर्यतम्। वृषणा। जुषेथाम्।
सुऽशर्माणा। सुऽअवसा। हि। भूतम्। अथ। धत्तम्। यजमानाय। शम्। योः ॥ ७ ॥

हे अग्नीषोमौ Vप्रस्थितस्य होमार्थमाहवनीयसमीपं प्राप्तं[3] Vहविषः इदं हविः Vवीतं भक्षयतम्। तदनन्तरं च Vहर्यतं अस्मान् कामयेथाम्। हे Vवृषणा कामानां वर्षितारौ Vजुषेथाम् अस्मदीयं परिचरणं सेवेथाम्। तदनन्तरं Vसुशर्माणा शोभनसुखौ Vस्ववसा Vहि शोभनरक्षणौ च Vभूतम् अस्माकं भवतम्। Vअथ अनन्तरं हविर्दत्तवते Vयजमानाय Vशं शमनीयानां रोगाणां शमनं Vयोः पृथक्कर्तव्यानां भयानां यावनं पृथक्करणं च Vधत्तं विधत्तं कुरुतम्। उक्तं च यास्केन–' शमनं च रोगाणां यावनं च भयानाम् ' ( निरु. ४. २१ ) इति ॥ हविषः। ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी। वीतम्। ' वी गतिप्रजनकान्त्यशनखादनेषु '। थसस्तम्। अदादित्वात् शपो लुक्। वीतं च हर्यतं चेति चार्थप्रतीतेः ' चादिलोपे विभाषा ' इति प्रथमायास्तिङ्विभक्तेर्निघातप्रतिषेधः। हर्यतम्। पादादित्वात् निघाताभावः। जुषेथाम्। वृषणा इत्यामन्त्रितस्य ' आमन्त्रितं पूर्वम्° ' इति अविद्यमानवत्त्वे सति तिङः परत्वात् निघाताभावः। सुशर्माणा स्ववसा। उभयत्र बहुव्रीहौ ' सोर्मनसी अलोमोषसी ' इत्युत्तरपदाद्युदात्तत्वम्। भूतम्। लोटि ' बहुलं छन्दसि ' इति शपो लुक् ॥

**यो अग्नीषोमा हविषा सपर्यादेवद्रीचा मनसा यो घृतेन ।**
**तस्य व्रतं रक्षतं पातमंहसो विशे जनाय महि शर्म यच्छतम् ॥ ८ ॥**

यः। अग्नीषोमा। हविषा। सपर्यात्। देवद्रीचा। मनसा। यः। घृतेन।
तस्य। व्रतम्। रक्षतम्। पातम्। अंहसः। विशे। जनाय। महि। शर्म। यच्छतम् ॥ ८ ॥

Vयः यजमानः Vअग्नीषोमा अग्नीषोमौ Vदेवद्रीचा देवानञ्चता देवतापरायणेन श्रद्धायुक्तेन Vमनसा अन्तःकरणेन[4] युक्तः सन् Vहविषा चरुपुरोडाशादिना Vसपर्यात् सपर्यति परिचरति। Vयः च यजमानः

---

१. क्ष-न-स–पदपूरणम्। २. क्ष–अग्नेरुत्तरार्धदक्षिणार्धयोर्हूयते। ३. क्ष-स–प्राप्तस्य।
४. क्ष-ट-ढ–' अन्तःकरणेन ' नास्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vघृतेन आज्येनाग्नीषोमौ परिचरति । Vतस्य यजमानस्य Vव्रतं कर्म Vरक्षतम् । Vअंहसः पापात् तं च यजमानं Vपातं रक्षतम् । Vविशे यागेषु प्रविशते तस्मै Vजनाय यजमानाय Vमहि महत् प्रभूतं Vशर्म सुखं Vयच्छतं दत्तम् ॥ अग्नीषोमा । ' देवताद्वन्द्वे च ' इति उभयपदप्रकृतिस्वरत्वम् । सपर्यात् । ' सपर पूजायाम् ' । कण्ड्वादिः । लेटि आडागमः । देवद्रीचा । देवानञ्चतीति देवद्रङ् । अञ्चतेः ' ऋत्विक्° ' इत्यादिना क्विन् । ' अनिदिताम्° ' इति नलोपः । ' विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये ' ( पा. सू. ६. ३. ९२ ) इति देवशब्दस्य टेः अद्र्यादेशः । तृतीयैकवचने ' अचः ' इति अकारलोपे ' चौ ' इति दीर्घत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्ते ' अद्रिसध्र्योरन्तोदात्तनिपातनं कृस्वरनिवृत्त्यर्थम् ' ( पा. सू. ६. ३. ९५. १ ) इति वचनात् अद्र्यादेशः अन्तोदात्तः[1] । विशे । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् ॥

पौर्णमासयागेऽग्नीषोमीयस्य यागस्य ' अग्नीषोमा ' इत्येषानुवाक्या । तथा च सूत्रितम् ' उक्ता देवताः ' इति खण्डे–' अग्नीषोमा सवेदसा युवमेतानि दिवि रोचनानि ( आश्व. श्रौ. १. ६ ) इति ॥

**अग्नीषोमा सवेदसा सहूती वनतं गिरः । सं देवत्रा बभूवथुः ॥ ९ ॥**

अग्नीषोमा । सऽवेदसा । सहूती इति सऽहूती । वनतम् । गिरः । सम् । देवऽत्रा । बभूवथुः ॥९॥

हे अग्नीषोमौ युवां Vसवेदसा समानेनैकेन वेदसा हविर्लक्षणेन धनेन युक्तौ Vसहूती समानह्वानौ[2] च सन्तौ Vगिरः अस्मदीयाः स्तुतीः Vवनतं संभजेथाम् । Vदेवत्रा देवेषु सर्वेषु यौ युवां Vसं Vबभूवथुः संभूतौ संभावितौ प्रशस्तौ स्थः । ' राजानौ वा एतौ देवतानां यदग्नीषोमौ ' ( तै. सं. २. ६. २. १-२ ) इति श्रुतेः ॥ सवेदसा । समानं वेदो ययोः । ' समानस्य च्छन्दसि ' इति सभावः । वनतम् । ' वन षण संभक्तौ ' । देवत्रा । ' देवमनुष्यपुरुषपुरुमर्त्य° ' इत्यादिना सप्तम्यर्थे त्राप्रत्ययः ॥

**अग्नीषोमावनेनं वां यो वां घृतेन दाशति । तस्मै दीदयतं बृहत् ॥ १० ॥**

अग्नीषोमौ । अनेनं । वाम् । यः । वाम् । घृतेनं । दाशति । तस्मै । दीदयतम् । बृहत् ॥१०॥

हे Vअग्नीषोमौ Vवां युवयोः संबन्धी Vयः यजमानः Vअनेन Vघृतेन उत्पवनादिभिः संस्कृतेनाज्येन युक्तं हविः Vवां युवाभ्यां Vदाशति प्रयच्छति Vतस्मै यजमानाय Vबृहत् प्रभूतं धनं Vदीदयतं प्रकाशयतं प्रयच्छतमित्यर्थः ॥ दाशति । ' दाश्र दाने ' । शप्तिपोः पित्त्वादनुदात्तत्वे धातुस्वरः । यद्वृत्तयोगादनिघातः । दीदयतम् । दीदयतिः[3] दीप्तिकर्मा ॥

**अग्नीषोमाविमानिं नो युवं हव्या जुजोषतम् । आ यातमुपं नः सचा ॥११॥**

अग्नीषोमौ । इमानिं । नः । युवम् । हव्या । जुजोषतम् । आ । यातम् । उपं । नः । सचा ॥११॥

---

१. च-छ-त-न-फ-श-स–अन्तोदात्तो निपातितः । २. ट-ढ-स–समानाह्वानौ । ३. क्ष–दीदेतिः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे vअग्नीषोमौ vयुवं युवां vनः अस्मदीयानि vइमानि vहव्या हवींषि vजुजोषतं सेवेथाम्। तदर्थं vनः अस्मान् vसचा सह युवाम् vउप vआ vयातं उपागच्छतम् ॥ जुजोषतम्। 'जुषी प्रीतिसेवनयोः। लोटि व्यत्ययेन शप्। छान्दसं द्विर्वचनम्। यद्वा। विकरणस्य 'बहुलं छन्दसि' इति श्लुः। ततो व्यत्ययेन शप्। 'बहुलं छन्दसीति वक्तव्यम्' इति वचनात् 'नाभ्यस्तस्याचि पिति०' इति लघूपधगुण-प्रतिषेधाभावः ॥

अग्नीषोमा पिपृतमर्वतो न आ प्यायन्तामुस्रिया हव्यसूदः ।
अस्मे बलानि मघवत्सु धत्तं कृणुतं नो अध्वरं श्रुष्टिमन्तम् ॥ १२ ॥

अग्नीषोमा । पिपृतम् । अर्वतः । नः । आ । प्यायन्ताम् । उस्रियाः । हव्यऽसूदः ।
अस्मे इति । बलानि । मघवत्ऽसु । धत्तम् । कृणुतम् । नः । अध्वरम् । श्रुष्टिऽमन्तम् ॥१२॥

हे अग्नीषोमौ vनः अस्माकम् vअर्वतः अश्वान् vपिपृतं पालयतम्। vहव्यसूदः क्षीरादिहविषा-मुत्पादयित्र्यः vउस्रियाः अस्मदीया गावश्च vआ vप्यायन्ताम् आप्यायिताः प्रवृद्धाः सन्तु। vमघ-वत्सु हविर्लक्षणधनयुक्तेषु vअस्मे अस्मासु vबलानि vधत्तं स्थापयतम्। तथा vनः अस्माकम् vअध्वरं यागं vश्रुष्टिमन्तं धनयुक्तं vकृणुतं कुरुतम् ॥ पिपृतम्। 'पॄ पालनपूरणयोः। पॄ इत्येके'। जुहोत्या-दित्वात् शपः श्लुः। 'अर्तिपिपर्त्योश्च' इति अभ्यासस्य इत्वम्। हव्यसूदः। हव्यं सूदन्ते क्षरन्तीति हव्यसूदः। 'षूद क्षरणे'। 'क्विप् च' इति क्विप्। अस्मे। 'सुपां सुलुक्०' इति सप्तम्याः शेआदेशः। श्रुष्टिमन्तम्। श्रुष्टीति धननाम। शु आशु अश्यते व्याप्यते इति श्रुष्टिः। पृषोदरादिः। 'ह्रस्वनुड्भ्यां मतुप्' इति मतुप उदात्तत्वम् ॥ ॥ २९ ॥ ॥ १४ ॥

पञ्चदशेऽनुवाके द्वादश सूक्तानि। तत्र 'इमं स्तोमम्' इति षोडशर्चं प्रथमं सूक्तम्। आङ्गिरसस्य कुत्सस्यार्षम्। पञ्चदशीषोडश्यौ त्रिष्टुभौ शिष्टा जगत्यः। अग्निर्देवता। 'पूर्वो देवा भवतु सुन्वतो रथः' इति त्रयः पादा देवदेवत्याः। 'तन्नो मित्रो वरुणः' इति अर्धर्चो लिङ्गोक्तमित्रावरुणादि-षड्देवत्यः। अथवा तस्याप्यग्निरेव देवता मित्रावरुणादयस्तु निपातभाक्त्वेनाप्रधानाः। एतत्सर्वमनुक्रा-न्तम्– 'इमं षोळश कुत्स आग्नेयं तद्द्वित्रिष्टुब्नन्तं पूर्वो देवास्त्रयः पादा दैवास्तन्नो मित्रोऽर्धर्चो लिङ्गोक्त-देवतो यद्देवत्यं वा सूक्तम्' इति। प्रातरनुवाकस्याग्नेये क्रतौ जागते छन्दस्येतत् सूक्तम् आश्विनशस्त्रे च। तथा च सूत्रितम्– 'इमं स्तोममर्हते सं जागृवद्भिः' (आश्व. श्रौ. ४. १२) इति। आभिप्लविके षष्ठे-हन्याग्निमारुतेऽप्येतत्सूक्तं जातवेदस्यनिविद्धानम्। सूत्रितं च–'प्रयज्यव इमं स्तोममित्याग्निमारुतम्' (आश्व. श्रौ. ७. ७) इति। तृतीयसवने 'इमं स्तोमम्' इत्येषा अग्नीधः[1] प्रस्थितयाज्या। सूत्रितं च–'इमं स्तोममर्हते जातवेदस इति तार्तीयसवनिक्यः' (आश्व. श्रौ. ५. ५.) इति ॥

---

१. क्ष-ट-ढ-स–आग्नीध्रस्य।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ॥ १ ॥

इमम् । स्तोमम् । अर्हते । जातऽवेदसे । रथम्ऽइव । सम् । महेम । मनीषया ।
भद्रा । हि । नः । प्रऽमतिः । अस्य । सम्ऽसदि । अग्ने । सख्ये । मा । रिषाम । वयम् । तव ॥१॥

vअर्हते पूज्याय vजातवेदसे जातानामुत्पन्नानां वेदित्रे जातप्रज्ञाय जातधनाय वाग्नये vमनीषया निशितया बुद्धया vइमम् एतत्सूक्तरूपं vस्तोमं स्तोत्रं vरथमिव यथा तक्षा रथं संस्करोति तथा vसं vमहेम सम्यक् पूजितं कुर्मः । vअस्य अग्नेः vसंसदि संभजने vनः अस्माकं vप्रमतिः प्रकृष्टा बुद्धिः vभद्रा vहि कल्याणी समर्था खलु । अतस्तया बुद्धया स्तुम इत्यर्थः । हे vअग्ने vतव vसख्ये अस्माकं त्वया सह सखित्वे सति vवयं vमा vरिषाम हिंसिता न भवाम । अस्मान् रक्षेत्यर्थः ॥ अर्हते । 'अर्ह पूजायाम्' । 'अर्हः प्रशंसायाम्' ( पा. सू. ३. २. १३३ ) इति लटः शत्रादेशः । शपः पित्त्वादनुदात्तत्वम् । शतुश्च अदुपदेशात् लसार्वधातुकस्वरेण[1] धातुस्वरः[2] शिष्यते[2] । महेम । 'मह पूजायाम्' । रिषाम । 'रिष हिंसायाम्' । व्यत्ययेन शः । तव । 'युष्मदस्मदोर्ङसि' इत्याद्युदात्तत्वम् ॥

यस्मै त्वमायजसे स साधत्यनर्वा क्षेति दधते सुवीर्यम् ।
स तूताव नैनमश्नोत्यंहतिरग्ने सख्ये मा रिषामा वयं तव ॥ २ ॥

यस्मै । त्वम् । आऽयजसे । सः । साधति । अनर्वा । क्षेति । दधते । सुऽवीर्यम् ।
सः । तूताव । न । एनम् । अश्नोति । अंहतिः । अग्ने । सख्ये । मा । रिषाम । वयम् । तव ॥२॥

vयस्मै यजमानाय हे vअग्ने vत्वम् vआयजसे देवानाभिमुख्येन यजसि vसः यजमानः vसाधति स्वाभिलषितं साधयति । प्राप्नोतीत्यर्थः । किंच स यजमानः vअनर्वा शत्रुभिरप्रस्यृतः[3] सन् vक्षेति निवसति । तथा vसुवीर्यं शोभनवीर्योपेतं धनं vदधते धारयति । प्राप्नोतीत्यर्थः[4] । धृत्वा च vसः यजमानः vतूताव वर्धते । vएनं यजमानम् vअंहतिः आर्तिर्दारिद्र्यं vन vअश्नोति न प्राप्नोति । अन्यत् पूर्ववत् ॥ साधति । 'षिधु संराद्धौ' । णिचि 'सिध्यतेरपारलौकिके' ( पा. सू. ६. १. ४९ ) इति आत्वम् । 'छन्दस्युभयथा' इति शप आर्धधातुकत्वात् 'णेरनिटि' इति णिलोपः । क्षेति । 'क्षि निवासगत्योः' । 'बहुलं छन्दसि' इति विकरणस्य लुक् । दधते । 'दध धारणे' । भौवादिकः । तूताव । तु इति वृद्ध्यर्थः सौत्रो धातुः । अस्मात् छान्दसो लिट् । तुजादित्वात् अभ्यासस्य दीर्घत्वम् । अश्नोति । व्यत्ययेन परस्मैपदम् । अंहतिः । 'हन्तेरंह च' ( उ. सू. ४. ५०२ ) इति अतिप्रत्ययः । 'चित्' इत्यनुवृत्तेः अन्तोदात्तत्वम् ॥

---

१. फ–लसार्वधातुकस्वरावशेषेण । २. क्ष-ट-ढ-न-फ-स–आद्युदात्तत्वम् । ३. च–शत्रुभिरप्राप्तः । ४. क्ष-स–'प्राप्नोतीत्यर्थः' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदन्त्याहुतम् ।
त्वमादित्याँ आ वह तान्ह्युश्मस्यग्ने सख्ये मा रिषामा वयं तव ॥ ३ ॥

शकेम । त्वा । समऽइधम् । साधय । धियः । त्वे इति । देवाः । हविः । अदन्ति । आऽहुतम् ।
त्वम् । आदित्यान् । आ । वह । तान् । हि । उश्मसि । अग्ने । सख्ये । मा । रिषाम । वयम् । तव ॥३॥

हे ᵛअग्ने ᵛत्वा त्वां ᵛसमिधं सम्यगिद्धं कर्तुं ᵛशकेम शक्ता भूयास्म । त्वं च ᵛधियः अस्मदीयानि दर्शपूर्णमासादीनि कर्माणि ᵛसाधय निष्पादय । त्वया हि सर्वे यागा निष्पाद्यन्ते । यस्मात् ᵛत्वे त्वय्यग्नौ ᵛआहुतम् ऋत्विग्भिः प्रक्षिप्तं चरुपुरोडाशादिकं[1] ᵛहविः[1] ᵛदेवाः ᵛअदन्ति भक्षयन्ति । तस्मात् त्वं साधयेत्यर्थः । अपि च ᵛत्वम् ᵛआदित्यान् अदितेः पुत्रान् सर्वान् देवान् ᵛआ ᵛवह अस्मद्यज्ञार्थमानय । ᵛतान् ᵛहि इदानीमेव वयम् ᵛउश्मसि कामयामहे । अन्यत् पूर्ववत् ॥ शकेम । 'शकॢ शक्तौ' । 'लिङ्याशिष्यङ्' । अदुपदेशात् लसार्वधातुकानुदात्तत्वेऽङ एव स्वरः शिष्यते । समिधम् । 'जिइन्धी दीप्तौ' । अस्मात् संपदादिलक्षणः कर्मणि क्विप् । त्वे । 'सुपां सुलुक्०' इति सप्तम्येकवचनस्य शेआदेशः । उश्मसि । 'वश कान्तौ' । इदन्तो मसिः । अदादित्वात् शपो लुक् । 'ग्रहिज्या०' इत्यादिना संप्रसारणम् ॥

भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्वणापर्वणा वयम् ।
जीवातवे प्रतरं साधया धियोऽग्ने सख्ये मा रिषामा वयं तव ॥ ४ ॥

भराम । इध्मम् । कृणवाम । हवींषि । ते । चितयन्तः । पर्वणाऽपर्वणा । वयम् ।
जीवातवे । प्रऽतरम् । साधय । धियः । अग्ने । सख्ये । मा । रिषाम । वयम् । तव ॥ ४ ॥

हे ᵛअग्ने त्वद्यागार्थम् ᵛइध्मम् इन्धनसाधनमेकविंशतिदार्वात्मकं समित्समूहं ᵛभराम[2] संपादयाम । तदनन्तरं ᵛते तुभ्यं ᵛहवींषि चरुपुरोडाशादिलक्षणान्यन्नानि[3] ᵛवयं ᵛकृणवाम करवाम । किं कुर्वन्तः । ᵛपर्वणापर्वणा प्रतिपक्षमावृत्ताभ्यां दर्शपूर्णमासाभ्यां ᵛचितयन्तः त्वां प्रज्ञापयन्तः । स त्वं ᵛजीवातवे अस्माकं जीवनौषधाय चिरकालावस्थानाय ᵛधियः कर्माण्यग्निहोत्रादीनि ᵛप्रतरं प्रकृष्टतरं ᵛसाधय निष्पादय । अन्यत् समानम् ॥ चितयन्तः ॥ 'चिती संज्ञाने' । संज्ञापूर्वकस्य विधेरनित्यत्वात् लघूपधगुणाभावः । पर्वणापर्वणा । 'नित्यवीप्सयोः' इति वीप्सायां द्विर्भावः । 'तस्य परमाम्रेडितम्' इति परस्याम्रेडितसंज्ञायाम् 'अनुदात्तं च' इत्यनुदात्तत्वम् । प्रतरम् । तरबन्तात् प्रशब्दात् क्रियाप्रकर्षे वर्तमानात् 'अमु च च्छन्दसि' ( पा. सू. ५. ४. १२ ) इति अमुप्रत्ययः ॥

---

१. क्ष-ट-ढ–हविश्चरुपुरोडाशादिकम् । २. क्ष-ट-ढ–भराम संभराम । ३. त-श–चरुपुरोडाशलक्षणान्यन्नानि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

विशां गोपा अस्य चरन्ति जन्तवो द्विपच्च यदुत चतुष्पदक्तुभिः ।
चित्रः प्रकेत उषसो महाँ असयग्ने सख्ये मा रिषामा वयं तव ॥ ५ ॥

विशाम्। गोपाः। अस्य। चरन्ति। जन्तवः। द्विऽपत्। च। यत्। उत। चतुःऽपत्। अक्तुऽभिः।
चित्रः। प्रऽकेतः। उषसः। महान्। असि। अग्ने। सख्ये। मा। रिषाम। वयम्। तव ॥५॥

[v]अस्य अग्नेः [v]जन्तवः जाता रश्मयः [v]विशां सर्वेषां प्राणिनां [v]गोपाः। गोपायितारो रक्षकाः सन्तः [v]चरन्ति उद्गच्छन्ति। तदनन्तरं [v]यत् [v]च [v]द्विपत् द्विपात् मनुष्यादिकमस्ति [v]उत अपि च [v]चतुष्पत् चतुष्पात् गवादिकं यदस्ति तदुभयम् [v]अक्तुभिः अञ्जकैः अस्य रश्मिभिरक्तम् आश्लिष्टमभूत्। हे [v]अग्ने [v]चित्रः विचित्रदीप्तियुक्तः [v]प्रकेतः रात्रावन्धकारावृतानां सर्वेषां प्रज्ञापयिता प्रदर्शयिता[1] [v]उषसः उषोदेवताया अपि [v]महान् गुणैरधिकः [v]असि भवसि। उषास्तु रात्रेश्चरमभागे प्रकाशयति अग्निस्तु सर्वस्यां रात्रौ प्रकाशयतीति तस्य गुणाधिक्यम्॥ गोपाः। 'गुपू रक्षणे'। 'गुपूधूपविच्छि°' (पा. सू. ३. १. २८) इति आयप्रत्ययः। अस्मात् क्विप्। अतो लोपः। 'वेरपृक्तलोपाद्वलि लोपो बलीयान्' इति पूर्वं वलि लोपः। न चातो लोपस्य स्थानिवत्त्वं, 'न पदान्त°' इत्यादिना यलोपं प्रति तन्निषेधात्। द्विपत्। द्वौ पादावस्येति बहुव्रीहौ 'संख्यासुपूर्वस्य' (पा. सू. ५. ४. १४०) इति पादशब्दस्य अन्त्यलोपः[2] समासान्तः। अयस्मयादित्वेन भत्वे 'पादः पत्' (पा. सू. ६. ४. १३०) इति पद्भावः। एकदेशविकृतस्यानन्यवत्त्वात्[3] (परिभा. ३७) 'द्वित्रिभ्यां पाद्दन्मूर्धसु°' (पा. सू. ६. २. १९७) इत्युत्तरपदान्तोदात्तत्वम्। चतुष्पत्। पूर्ववत् समासान्तः पद्भावश्च। 'इदुदुपधस्य चाप्रत्ययस्य' इति विसर्जनीयस्य षत्वम्। 'त्रेः संख्यायाः' (फि. सू. २८) इति चतुर्शब्द आद्युदात्तः। स एव बहुव्रीहिस्वरेण शिष्यते ॥ ॥ ३० ॥

त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः ।
विश्वा विद्वाँ आर्त्विज्या धीर पुष्यस्यग्ने सख्ये मा रिषामा वयं तव ॥ ६ ॥

त्वम्। अध्वर्युः। उत। होता। असि। पूर्व्यः। प्रऽशास्ता। पोता। जनुषा। पुरःऽहितः।
विश्वा। विद्वान्। आर्त्विज्या। धीर। पुष्यसि। अग्ने। सख्ये। मा। रिषाम। वयम्। तव ॥६॥

हे [v]अग्ने [v]त्वम् [v]अध्वर्युः अध्वरस्य यागस्य नेता देवान्प्रति प्रेरयिता यद्वा यागे आध्वर्यवस्य कर्ता भवसि[4]। अध्वर्यौ मनुष्ये जाठररूपेण[5] वागिन्द्रियाधिष्ठातृत्वेन वावस्थाय[5] यागनिष्पादकः असि। [v]उत अपि च [v]पूर्व्यः मुख्यः [v]होता देवानामाह्वाता पूर्ववद्धोतर्यवस्थाय हौत्रस्य कर्मणः कर्ता वा [v]असि भवसि। मानुषो होता अमुख्यः। तदपेक्षयास्य मुख्यत्वम्। तथा [v]प्रशास्ता प्रकर्षेण शास्ता सर्वेषां शिक्षकोऽसि। यद्वा। 'होतर्यज पोतर्यज' इत्यादिना प्रैषेण शास्तीति[6] मैत्रावरुणः प्रशास्ता। पूर्ववत्

---

१. क्ष-ट-ढ-स–प्रदर्शयिता त्वम्। २. क्ष–अन्तलोपः। ३. एकदेशविकृतस्यानन्यत्वात्। ४. क्ष-ट-ढ–असि भवसि। ५. क्ष-ट-ढ–जाठररूपो भवानिन्द्रियाधिष्ठातृत्वेनावस्थाय; न-स–जाठररूपेण वा त्वगिन्द्रियाधिष्ठातृत्वेन वावस्थाय। ६. क्ष–प्रशास्तीति।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तस्मिन्नवस्थाय यागनिष्पादकोऽसि। [v]पोता यज्ञस्य पावयिता शोधयितासि। यद्वा पोतृनामकस्य ऋत्विजः पूर्ववदधिष्ठाय यागनिष्पादकोऽसि। तथा [v]जनुषा जन्मना स्वाभाव्येन [v]पुरोहितः पुरस्तादागामिनि[1] स्वर्गादौ हितोऽनुकूलाचरणोऽसि। यद्वा। सर्वेषु कर्मसु पूर्वस्यां दिश्याहवनीये स्थापितोऽसि। अथवा पुरोहितो ब्रह्मा देवपुरोहितस्य बृहस्पतेः प्रतिनिधित्वात्। तथा च मन्त्रान्तरम्–' बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणाम् ' ( तै. ब्रा. ३. ७. ६. ३) इति। अतस्तस्मिन्ब्रह्मणि पूर्ववदवस्थाय तद्रूपः सन् [v]विश्वा सर्वाणि [v]आर्त्विज्या ऋत्विजः कर्माण्यध्वर्यवादीनि [v]विद्वान् जानंस्त्वं हे [v]धीर प्राज्ञ [v]अग्ने [v]पुष्यसि न्यूनाधिकभावराहित्येन संपूर्णानि करोषि। अन्यत् समानम्॥ जनुषा। जनेरुसिः। पुरोहितः। दधातेः कर्मणि निष्ठा। ' पूर्वाधर° ' इत्यादिना असिप्रत्ययान्तः पूरस्शब्दोऽन्तोदात्तः। ' तद्धितश्चासर्वविभक्तिः ' इति अव्ययसंज्ञायां ' पुरोऽव्ययम् ' इति गतित्वात् ' गतिरनन्तरः ' इति पूर्वपदप्रकृतिस्वरत्वम्। आर्त्विज्या। ब्राह्मणादित्वात् ष्यञ्। जित्त्वादाद्युदात्तत्वम्॥

**यो विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित्सन्तळिदिवाति रोचसे।**
**रात्र्याश्चिदन्धो अति देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव॥ ७॥**

यः। विश्वतः। सुऽप्रतीकः। सऽदृङ्। असि। दूरे। चित्। सन्। तळित्ऽइव। अति। रोचसे। रात्र्याः। चित्। अन्धः। अति। देव। पश्यसि। अग्ने। सख्ये। मा। रिषाम। वयम्। तव॥७॥

हे [v]अग्ने [v]यः त्वं [v]सुप्रतीकः शोभनाङ्गः सन् [v]विश्वतः सर्वस्मादपि [v]सदृङ्ङसि अन्यूनः सदृशो भवसि स त्वं [v]दूरे [v]चित् [v]सन् दूरेऽपि वर्तमानः सन् [v]तळिदिव। अन्तिकनामैतत्। अन्तिके वर्तमान इव [v]अति [v]रोचसे अतिशयेन दीप्यसे। तदुक्तं यास्केन–' दूरेऽपि सन्नन्तिक इव संदृश्यसे ' ( निरु. ३. ११ ) इति। [v]रात्र्याश्चित् रात्रेरपि रात्रेः संबन्धिनम् [v]अन्धः बहुलमन्धकारमपि हे [v]देव द्योतमान अग्ने [v]अति [v]पश्यसि अतीत्य प्रकाशसे। अन्यत् पूर्ववत्॥ सुप्रतीकः। शोभनं प्रतीकोऽङ्गं यस्य। ' ऋत्वादयश्च ' इत्युत्तरपदाद्युदात्तत्वम्। सदृङ्। ' समानान्ययोश्चेति वक्तव्यम् ' ( पा. सू. ३. २. ६०. १ ) इति समानोपपदात् दृशेः क्विन्। ' दृग्दृशवतुषु ' ( पा. सू. ६. ३. ८९ ) इति समानस्य सभावः। ' दृक्स्ववःस्वतवसां छन्दसि ' ( पा. सू. ७. १. ८३ ) इति नुम्। संयोगान्तलोपः। क्विन्प्रत्ययस्य ' कुः ' इति कुत्वम्। कृदुत्तरपदप्रकृतिस्वरत्वम्। रात्र्याः। ' रात्रेश्चाजसौ ' ( पा. सू. ४. १. ३१ ) इति ङीप्॥

**पूर्वो देवा भवतु सुन्वतो रथोऽस्माकं शंसो अभ्यस्तु दूढ्यः।**
**तदा जानीतोत पुष्यता वचोऽग्ने सख्ये मा रिषामा वयं तव॥ ८॥**

पूर्वः। देवाः। भवतु। सुन्वतः। रथः। अस्माकम्। शंसः। अभि। अस्तु। दुःऽध्यः। तत्। आ। जानीत। उत। पुष्यत। वचः। अग्ने। सख्ये। मा। रिषाम। वयम्। तव॥८॥

---

१. क्ष–पुरः पुरस्तादागामिनि।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]देवाः अग्न्यवयवभूताः सर्वे देवाः [v]सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य [v]रथः [v]पूर्वः अन्येषामयजमानानां रथेभ्यो मुख्यः [v]भवतु । अपि च [v]अस्माकं [v]शंसः शंसनीयमभिशापरूपं पापं [v]दूढ्यः दुर्धियः पापबुद्धीन् अस्मदनिष्टाचरणपरान्छत्रून् [v]अभ्यस्तु अभिभवतु तान् बाधताम् । [v]तत् इदं मद्वाक्यं हे देवाः [v]आ [v]जानीत आभिमुख्येनावगच्छत । [v]उत अपि च तत् [v]वचः अस्मदीयं वचनं तदर्थाचरणेन [v]पुष्यत प्रवर्धयत । हे सर्वदेवात्मक [v]अग्ने । सख्ये इत्यादि पूर्ववत् ॥ सुन्वतः । ' शतुरनुमः° ' इति विभक्तेरुदात्तत्वम् । शंसः । शंस्यते[1] कीर्त्यते इति शंसोऽभिशापः । कर्मणि घञ् । ञित्त्वादाद्युदात्तत्वम् । दूढ्यः । दुष्टं ध्यायन्तीति दुर्धियः । ' ध्यै चिन्तायाम् ' इत्यस्मात् ' क्विप् च ' इति क्विप् । दृशिग्रहणानुवृत्तेस्तस्य च विध्यन्तरोपसंग्रहार्थत्वात् संप्रसारणम् । पृषोदरादिषु ' ध्यै च ' इति पाठात् दुरो रेफस्योत्वं उत्तरपदादेः ष्टुत्वं च ॥

**वधैर्दुःशंसाँ अप दूढ्यो जहि दूरे वा ये अन्ति वा के चिदत्रिणः ।**
**अथा यज्ञाय गृणते सुगं कृध्यग्ने सख्ये मा रिषामा वयं तव ॥ ९ ॥**

वधैः । दुःऽशंसान् । अप । दुःऽध्यः । जहि । दूरे । वा । ये । अन्ति । वा । के । चित् । अत्रिणः । अथ । यज्ञाय । गृणते । सुऽगम् । कृधि । अग्ने । सख्ये । मा । रिषाम । वयम् । तव ॥ ९ ॥

हे [v]अग्ने त्वं [v]वधैः हननसाधनैरायुधैः [v]दुःशंसान् दुःखेन कीर्तनीयान् [v]दूढ्यः दुर्धियः पापबुद्धीन् [v]अप [v]जहि वधं प्रापय । [v]ये [v]के [v]चित् ये केचन [v]दूरे विप्रकृष्टदेशे [v]वा अन्तिके[2] समीपदेशे [v]वा वर्तमानाः [v]अत्रिणः अत्तारो राक्षसादयो विद्यन्ते तान् दुर्धियोऽप जहीत्यर्थः । [v]अथ अनन्तरं [v]यज्ञाय यज्ञपतये [v]गृणते त्वां स्तुवते यजमानाय [v]सुगं शोभनं मार्गं [v]कृधि कुरु । अन्यत् पूर्ववत् ॥ वधैः । ' हनश्च वधः ' इति हन्तेः करणेऽप् वधादेशश्च । स च अदन्तोऽन्तोदात्तः । तस्यातो लोपे सति उदात्तनिवृत्तिस्वरेण प्रत्ययस्योदात्तत्वम् । दुःशंसान् । ' ईषदुःसुषु ' इति कर्मणि खल् । ' लिति ' इति प्रत्ययात् पूर्वस्योदात्तत्वम् । जहि । लोटि[3] हिः । ' हन्तेर्जः ' इति जादेशः । तस्य ' असिद्धवदत्राभात् ' इति असिद्धत्वात् हेर्लुगभावः । अन्ति । अन्तिकस्य ' कादिलोपो बहुलम् ' इति कलोपः । अत्रिणः । ' अदेर्घिनि च ' इति त्रिनिप्रत्ययः । इकारो नकारपरित्राणार्थः । गृणते । ' शतुरनुमः ' इति विभक्तेरुदात्तत्वम् । सुगम् । ' सुदुरोरधिकरणे ' ( पा. सू. ३. २. ४८. ३ ) इति गमेर्डः । कृधि । ' श्रुशृणुपृकृवृभ्यश्छन्दसि ' इति हेर्धिः । ' बहुलं छन्दसि ' इति विकरणस्य लुक् ॥

**यदयुक्था अरुषा रोहिता रथे वातजूता वृषभस्येव ते रवः ।**
**आदिन्वसि वनिनो धूमकेतुनाग्ने सख्ये मा रिषामा वयं तव ॥ १० ॥**

यत् । अयुक्थाः । अरुषा । रोहिता । रथे । वातऽजूता । वृषभस्यऽइव । ते । रवः । आत् । इन्वसि । वनिनः । धूमऽकेतुना । अग्ने । सख्ये । मा । रिषाम । वयम् । तव ॥ १० ॥

---

१. क्ष–शस्यते । २. स–आन्ति अन्तिके । ३. क्ष–लोटः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे Vअग्ने Vअरुषा आरोचमानौ Vरोहिता लोहितवर्णौ। रोहित इत्यग्नेरश्वस्याख्या 'रोहितोऽग्नेः' (नि. १. १५. २) इति दर्शनात्। 'रोहितेन त्वाग्निर्देवतां गमयतु' (तै. सं. १. ७. ४. ३) इति मन्त्रवर्णाच्च। 'एते वै देवाश्वाः' (तै. सं. १. ७. ४. ३) इति हि तत्र व्याख्यातम्। Vवातजूता। वातस्य वायोर्जूतं जवो वेग इव वेगो ययोस्तौ। ईदृशावश्वौ Vरथे Vयत् यदा Vअयुक्थाः अयोजयः तदानीं वनानि दहतः Vते तव Vरवः शब्दः Vवृषभस्येव दृप्तस्य महोक्षस्य शब्द इव गम्भीरो भवति। Vआत् अनन्तरं Vवनिनः वनसंबद्धान् वृक्षान् Vधूमकेतुना धूमः केतुः प्रज्ञापको यस्य तादृशेन रश्मिना Vइन्वसि व्याप्नोषि। अन्यत् पूर्ववत्॥ अयुक्थाः। 'युजिर् योगे'। लुङि 'झलो झलि' इति सकारलोपः। अरुषेत्यादिद्विवचनेषु[1] 'सुपां सुलुक्०' इति आकारः। रवः। 'रु शब्दे'। 'ऋदोरप्' इति भावे अप्। इन्वसि। 'इवि व्याप्तौ'। भौवादिकः। इदित्त्वात् नुम्॥ ॥ ३१ ॥

**अध स्वनादुत बिभ्युः पतत्रिणो द्रप्सा यत्ते यवसादो व्यस्थिरन्।**
**सुगं तत्ते तावकेभ्यो रथेभ्योऽग्ने सख्ये मा रिषामा वयं तव ॥ ११ ॥**

अध। स्वनात्। उत। बिभ्युः। पतत्रिणः। द्रप्साः। यत्। ते। यवसऽअदः। वि। अस्थिरन्। सुऽगम्। तत्। ते। तावकेभ्यः। रथेभ्यः। अग्ने। सख्ये। मा। रिषाम। वयम्। तव ॥११॥

हे Vअग्ने Vअध दग्धुं वनप्रवेशानन्तरं Vस्वनात् त्वदीयात् पूर्वोक्तगम्भीरशब्दात्। उतशब्दोऽप्यर्थः। Vपतत्रिणः पक्षिणोऽपि Vबिभ्युः बिभ्यति भयं प्राप्नुवन्ति। उत्पतनेन देशान्तरं गन्तुं समर्थाः पक्षिणोऽपि यदा भयं प्राप्नुवन्ति किमु वक्तव्यमन्येषां तत्रत्यानां[2] वृकादीनां भीतिर्जायते इति। अतस्त्वयि वनं प्रविशति सर्वे प्राणिनो भयं प्राप्नुवन्तीत्यर्थः। तादृशस्य Vते तव Vद्रप्साः ज्वालैकदेशाः Vयवसादः यवसानामरण्ये वर्तमानानां तृणानामत्तारः सन्तः Vयत् यदा Vव्यस्थिरन् विविधमवतिष्ठन्ते Vतत् तदा Vते तव सर्वमरण्यं Vसुगं सुखेन गन्तुं शक्यम्। अतः Vतावकेभ्यः त्वदीयेभ्यः Vरथेभ्यः च तदरण्यं सुगं भवति। पूर्वं प्रवृत्तैर्ज्वालाग्रैः तृणादिषु[3] दग्धेषु सत्सु त्वदीया रथाः प्रतिबन्धमन्तरेण पश्चाद्गच्छन्तीति भावः। अन्यत् समानम्॥ बिभ्युः। 'जिभी भये'। छान्दसो लिट्। 'एरनेकाचः०' इति यण्। व्यस्थिरन्। 'समवप्रविभ्यः०' इति तिष्ठतेरात्मनेपदम्। लुङि व्यत्ययेन झस्य रन्। 'स्थाघ्वोरिच्च' इति इत्वम्। 'हस्वादङ्गात्' (पा. सू. ८. २. २७) इति सलोपः। तावकेभ्यः[4]। 'तवकममकावेकवचने' (पा. सू. ४. ३. ३) इति युष्मदस्तवकादेशः॥

**अयं मित्रस्य वरुणस्य धायसेऽवयातां मरुतां हेळो अद्भुतः।**
**मृळा सु नो भूत्वेषां मनः पुनरग्ने सख्ये मा रिषामा वयं तव ॥ १२ ॥**

अयम्। मित्रस्य। वरुणस्य। धायसे। अवऽयाताम्। मरुताम्। हेळः। अद्भुतः। मृळ। सु। नः। भूतु। एषाम्। मनः। पुनः। अग्ने। सख्ये। मा। रिषाम। वयम्। तव ॥१२॥

---

१. क्ष-न-स-अरुषेत्यादिषु द्विवचनेषु। २. क्ष-तत्रस्थानाम्। ३. क्ष-ट-ढ-स-सर्वेषु तृणादिषु। ४. क्ष-ट-ढ-स-तावकेभ्यः। तवेमे तावकाः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vअयम् अग्नेः स्तोता vमित्रस्य अहरभिमानिनो देवस्य vवरुणस्य रात्र्यभिमानिनश्च संबन्धिने vधायसे धारणायावस्थापनाय भवतु । मित्रावरुणाविममग्नेः स्तोतारं धारयतामित्यर्थः । vअवयाताम् अवस्ताद्गच्छतां स्वर्गलोकस्याधस्तादन्तरिक्षे वर्तमानानां vमरुताम् एतत्संज्ञानां देवानां vहेळः क्रोधः vअद्भुतः महान् भवति । अद्भुत इत्येतन्महन्नाम । तस्मात् क्रोधात् इममग्नेः स्तोतारं मित्रावरुणौ रक्षतामिति शेषः । अपि च vनः अस्मान् हे vअग्ने[1] vसु vमृळ सुष्ठु मृडय सुखय । vएषां मरुतां vमनः च vपुनः vभूतु पुनरपि[2] प्रसन्नं भवतु । अन्यत् समानम् ॥ धायसे । ' वहिहाधाभ्यश्छन्दसि ' इति भावे असुन् । ' नित् ' इत्यनुवृत्तेः ' आतो युक् चिण्कृतोः ' इति युक् । अवयाताम् । ' या प्रापणे ' । अस्मात् अवपूर्वात् लटः शतृ । ' शतुरनुमः° ' इति विभक्तेरुदात्तत्वम् । मृळ । ' मृड सुखने ' । ' छन्दस्युभयथा ' इति शप आर्धधातुकत्वात् ' णेरनिटि ' इति णिलोपः । ' ब्रुचोऽतस्तिङः ' इति संहितायां दीर्घत्वम् । भूतु । ' बहुलं छन्दसि ' इति शपो लुक् ॥

देवो देवानामसि मित्रो अद्भुतो वसुर्वसूनामसि चारुरध्वरे ।
शर्मन्त्स्याम तव सप्रथस्तमेऽग्ने सख्ये मा रिषामा वयं तव ॥ १३ ॥

देवः । देवानाम् । असि । मित्रः । अद्भुतः । वसुः । वसूनाम् । असि । चारुः । अध्वरे ।
शर्मन् । स्याम । तव । सप्रथःऽतमे । अग्ने । सख्ये । मा । रिषाम । वयम् । तव ॥१३॥

हे vअग्ने vदेवः द्योतमानस्त्वं vदेवानां सर्वेषाम् vअद्भुतः महान् vमित्रः vअसि प्रौढः सखा भवसि । तथा vचारुः शोभनस्त्वम् vअध्वरे यज्ञे vवसूनां सर्वेषां धनानां vवसुः vअसि निवासयिता भवसि । अतोऽस्माकं वसूनि देहीत्यर्थः । किंच vसप्रथस्तमे सर्वतः पृथुतमेऽतिशयेन विस्तीर्णे vतव त्वत्संबन्धिनि शर्मणि यज्ञगृहे vस्याम वर्तमाना भवेम । अन्यत् पूर्ववत् ॥ शर्मन् । ' सुपां सुलुक्° ' इति सप्तम्या लुक् ॥

तत्ते भद्रं यत्समिद्धः स्वे दमे सोमाहुतो जरसे मृळयत्तमः ।
दधासि रत्नं द्रविणं च दाशुषेऽग्ने सख्ये मा रिषामा वयं तव ॥ १४ ॥

तत् । ते । भद्रम् । यत् । सम्ऽइद्धः । स्वे । दमे । सोमऽआहुतः । जरसे । मृळयत्ऽतमः ।
दधासि । रत्नम् । द्रविणम् । च । दाशुषे । अग्ने । सख्ये । मा । रिषाम । वयम् । तव ॥१४॥

हे vअग्ने vते त्वत्संबन्धि vतत् खलु vभद्रं भजनीयम् । प्रशस्तमित्यर्थः । किं पुनस्तत् । vस्वे vदमे स्वकीये उत्तरवेदिलक्षणे निवासस्थाने । ' तस्यैष स्वो लोको यदुत्तरवेदीनाभिः ' ( ऐ. ब्रा. १. २८ ) इति श्रुतेः । तस्यामुत्तरवेद्यां vसमिद्धः सम्यगिद्धः प्रज्वलितः vसोमाहुतः हुतेन सोमरसेन संतर्पितः सन् vजरसे ऋत्विग्भिः स्तूयसे इति यदस्ति तद्भद्रमित्यर्थः । एवं प्रशस्तस्त्वं vमृळयत्तमः

---

१. क्ष-ट-ढ-स–अग्ने त्वम् । २. क्ष-स–क्रोधवियुक्तं सत् पुनरपि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अतिशयेनास्माकं सुखयिता भूत्वा ᵛरत्नं रमणीयं कर्मफलं ᵛद्रविणं धनं ᵛच ᵛदाशुषे हविर्दत्तवते यजमानाय ᵛदधासि प्रयच्छसि । अन्यत् समानम् ॥ समिद्धः । ' ञिइन्धी दीप्तौ ' । कर्मणि निष्ठा । ' श्वीदितो निष्ठायाम् ' इति इट्प्रतिषेधः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । सोमाहुतः । सोमेनाहुतः । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् । जरसे । जरतिः स्तुतिकर्मा । व्यत्ययेन कर्मणि कर्तृप्रत्ययः । यद्वृत्तयोगादनिघातः । दधासि । ' अनुदात्ते च ' इति अभ्यस्तस्य आद्युदात्तत्वम् ॥

यस्मै त्वं सुद्रविणो ददाशोऽनागास्त्वमदिते सर्वताता ।
यं भद्रेण शवसा चोदयासि प्रजावता राधसा ते स्याम ॥ १५ ॥

यस्मै । त्वम् । सुऽद्रविणः । ददाशः । अनागाःऽत्वम् । अदिते । सर्वऽताता ।
यम् । भद्रेण । शवसा । चोदयासि । प्रजाऽवता । राधसा । ते । स्याम ॥ १५ ॥

हे ᵛसुद्रविणः शोभनधन ᵛअदिते अखण्डनीयाग्ने ᵛसर्वताता सर्वासु कर्मततिषु यद्वा सर्वेषु यज्ञेषु वर्तमानाय ᵛयस्मै यजमानाय ᵛअनागास्त्वम् अपापत्वं पापराहित्येन कर्मार्हतां ᵛत्वं ᵛददाशः प्रयच्छसि स यजमानः समृद्धो भवति । ᵛयं च यजमानं ᵛभद्रेण भजनीयेन कल्याणेन ᵛशवसा बलेन ᵛचोदयासि संयोजयसि सोऽपि समृद्धो भवति । वयं च स्तोतारः ᵛप्रजावता प्रजाभिः पुत्रपौत्रैर्युक्तेन ᵛते ᵛराधसा त्वया दत्तेन धनेन युक्ताः ᵛस्याम भवेम ॥ सुद्रविणः । शोभनानि द्रविणानि धनानि यस्य । ' द्रु गतौ ' । ' द्रुदक्षिभ्यामिनन् ' ( उ. सू. २. २०८ ) । द्रविणशब्दस्यान्ते सकारोपजनश्छान्दसः । ददाशः । ' दाश्र दाने ' । लेटि अडागमः । ' बहुलं छन्दसि ' इति शपः श्लुः । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । सर्वताता । ' सर्वदेवात्तातिल् ' इति स्वार्थे तातिल्प्रत्ययः । यास्कपक्षे तु सर्वाः स्तुतयो येषु यागेष्विति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । वर्णव्यापत्त्या आत्वम् । उभयत्रापि ' सुपां सुलुक्° ' इति सप्तम्या डादेशः । चोदयासि । ' चुद प्रेरणे ' । लेटि आडागमः ॥

स त्वमग्ने सौभगत्वस्य विद्वानस्माकमायुः प्र तिरेह देव ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ १६ ॥

सः । त्वम् । अग्ने । सौभगऽत्वस्य । विद्वान् । अस्माकम् । आयुः । प्र । तिर । इह । देव ।
तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ १६ ॥

हे ᵛदेव दानादिगुणयुक्त ᵛअग्ने ᵛसः पूर्वोक्तगुणविशिष्टः ᵛत्वं ᵛसौभगत्वस्य सुभगत्वं सौभाग्यं ᵛविद्वान् जानन् ᵛइह अस्मिन् कर्मणि ᵛअस्माकमायुः ᵛप्र ᵛतिर प्रवर्धय । प्रपूर्वस्तिरतिर्वर्धनार्थः । त्वया प्रवर्धितं ᵛनः अस्माकं ᵛतत् आयुः मित्रादयः षड्देवताः ᵛममहन्तां पूजयन्तां रक्षन्त्वित्यर्थः । ᵛमित्रः प्रमीतेस्त्राता ᵛवरुणः अनिष्टानां निवारयिता ᵛअदितिः अदीना अखण्डनीया वा देवमाता ᵛसिन्धुः स्यन्दनशीलोदकात्मा देवता ᵛपृथिवी प्रथिता भूदेवता । ᵛउत इति समुच्चये । ᵛद्यौः प्रकाशमाना द्युलोकात्मा

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

देवता । एताश्च सर्वा अग्निना प्रवर्धितमायुर्ममहन्तामिति पूर्वत्रान्वयः ॥ सौभगत्वस्य । सुभगस्य भावः सौभगम् । ' सुभगान्मन्त्रे ' इति उद्गात्रादिषु पाठात् भावे अञ् । पुनरपि भावप्रत्ययोत्पत्तिश्छान्दसी । ममहन्ताम् । ' मह पूजायाम् ' । भौवादिकः । लोटि ' बहुलं छन्दसि ' इति शपः श्लुः । तुजादित्वात् अभ्यासस्य दीर्घत्वम् ॥ ॥ ३२ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्[1] । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्क-
भूपालसाम्राज्यधुरंधरेण सायणाचार्येण[2] विरचिते
माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये
प्रथमाष्टके षष्ठोऽध्यायः समाप्तः ॥

---

१. क्ष–विनाशयन् । २. क्ष-स–सायणामात्येन ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।

निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

प्रथमे मण्डले पञ्चदशेऽनुवाके प्रथमं सूक्तं व्याख्यातम् । 'द्वे विरूपे' इत्येकादशर्चं द्वितीयं सूक्तम् । अत्रानुक्रम्यते–'द्वे एकादशौषसाय वाग्नये' इति । 'ऋषिश्चान्यस्मात्' इति परिभाषया कुत्सस्यानुवृत्तेराङ्गिरसः कुत्सः ऋषिः । अनादेशपरिभाषया त्रिष्टुप् छन्दः । उषसि प्रातःकाले हविर्भाक्[1] योऽग्निरस्ति स देवता । यद्वा । 'आग्नेयं तत्' इति पूर्वोक्तत्वात् तुल्यादिपरिभाषया इदमादीनि पञ्च सूक्तानि केवलाग्निदेवत्यानि । अतोऽस्य सूक्तस्य औषसगुणविशिष्टोऽग्निः शुद्धोऽग्निर्वा देवता इति वाशब्दार्थः । प्रातरनुवाकस्याग्नेये क्रतौ त्रैष्टुभे छन्दसि इदमादिके द्वे सूक्ते । तथा च सूत्रितम् 'अथैतस्याः' इति खण्डे–'द्वे विरूपे इति सूक्ते' ( आश्व. श्रौ. ४. १३ ) इति । आश्विनशस्त्रे चैते 'प्रातरनुवाकन्यायेन तस्यैव समाम्नायस्य' ( आश्व. श्रौ. ६. ५. ) इत्यतिदिष्टत्वात् ॥

द्वे विरूपे चरतः स्वर्थे अन्यान्या वत्समुप धापयेते ।

हरिरन्यस्यां भवति स्वधावांञ्छुक्रो अन्यस्यां ददृशे सुवर्चीः ॥ १ ॥

द्वे इति । विरूपे इति विऽरूपे । चरतः । स्वर्थे इति सुऽअर्थे ।

अन्याऽअन्या । वत्सम् । उप । धापयेते इति ।

हरिः । अन्यस्याम् । भवति । स्वधाऽवान् । शुक्रः । अन्यस्याम् । ददृशे । सुऽवर्चीः ॥१॥

[v]स्वर्थे स्वरणे शोभनगमनागमने । यद्वा । अर्थः प्रयोजनम् । शोभनप्रयोजनोपेते [v]विरूपे विषमरूपे शुक्लकृष्णतया नानारूपे [v]द्वे अहोरात्रे [v]चरतः पुनःपुनः पर्यावर्तेते । ते[2] चाहोरात्रे[2] अग्नेः सूर्यस्य च जनन्यौ । तत्र रात्रेः पुत्रः सूर्यः । स हि गर्भवत् रात्रावन्तर्हितः सन् तस्याः चरमभागादुत्पद्यते[3] । अह्नः पुत्रोऽग्निः । स हि तत्र[4] विद्यमानोऽपि प्रकाशराहित्येन असत्कल्पःसन् तस्मात् अह्नः सकाशात् निर्मुक्तः प्रकाशमानं स्वात्मानं लभते । अनयोरेतयोः पुत्रत्वं च तैत्तिरीयैराम्नायते–'तयोरेतौ वत्सौ । अग्निश्चादित्यश्च । रात्रेर्वत्सः । श्वेत आदित्यः । अह्नोऽग्निः । ताम्रो अरुणः' ( तै. आ. १. १० ) इति । ते चाहोरात्रे [v]वत्सं स्वं[5] स्वं पुत्रम्[5] [v]अन्यान्या परस्परव्यतिहारेण [v]उप [v]धापयेते स्वकीयं रसं पाययतः । यद्वात्र्या कर्तव्यं स्वपुत्रस्यादित्यस्य रसस्य[6] पायनं[6] तदहः करोति । यदह्ना कर्तव्यं स्वपुत्रस्याग्नेः रसस्य[7] पायनं तद्रात्रिः करोति । एतच्च सायंप्रातःकालीनाहुत्यभिप्रायम् । श्रूयते च–'तस्मादग्नये सायं हूयते सूर्याय प्रातः' ( तै. ब्रा. २. १. २. ६ ) इति । यस्मादेवं तस्मात् [v]अन्यस्यां स्वजनन्याः अन्यस्याम् अहरात्मिकायामग्नेर्जनन्यां [v]हरिः रसहरणशील आदित्यः [v]स्वधावान् हविर्लक्षणान्नवान् [v]भवति ।

---

१. क्ष-ट-ठ–हविर्भाक्तया । २. ट-ठ–अहोरात्रे । ३. क्ष-ट-ढ–चरमभागे उत्पद्यते । ४. क्ष-ट-ढ–तदा । ५. क्ष–स्वस्वपुत्रम् । ६. क्ष-स–रसपायनम् । ७. क्ष-न-स–'रसस्य' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]शुक्रः निर्मलदीप्तिरग्निः स्वजनन्याः [V]अन्यस्यां राज्यामादित्यस्य जनन्यां [V]सुवर्चाः शोभनदीप्तियुक्तः सन् [V]ददृशे दृश्यते ॥ स्वर्थे। 'ऋ गतौ'। 'उषिकुषिगार्तिभ्यस्थन्' इति भावे कर्मणि वा थन्प्रत्ययः। नित्त्वादाद्युदात्तत्वम्। शोभनोऽर्थो ययोस्ते। 'आद्युदात्तं द्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम्। अन्यान्या। 'कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यं समासवच्च बहुलम्' (पा. म. ८. १. १२. ११) इति द्विर्भावः। बहुलग्रहणात् समासवद्भावाभावे 'तस्य परमाम्रेडितम्' इति परस्याम्रेडित-संज्ञायाम् 'अनुदात्तं च' इति आम्रेडितानुदात्तत्वम्। धापयेते। 'धेट् पाने'। 'आदेचः०' इति आत्वम्। ततो हेतुमति णिच्। 'अर्तिह्री०' (पा. सू. ७. ३. ३६) इत्यादिना धांतोः पुगागमः। तत्र हि लक्षणप्रतिपदोक्तपरिभाषा नास्तीति ज्ञापितं 'शाच्छासाह्वाव्या०[1]' इति कृतात्वानां निर्देशेन। स हि युक्प्राप्तिख्यापनार्थः। यदि तत्र लक्षणप्रतिपदोक्तपरिभाषया पुक् न प्राप्नोति[2] सोऽनर्थकः स्यात्। तस्मात् अध्यापयति इत्यादाविव धापयेते इत्यत्रापि पुगागमः सिद्धः। 'निगरणचलनार्थेभ्यश्च' (पा. सू. १. ३. ८७) इति प्राप्तस्य परस्मैपदस्य 'पादिषु धेट उपसंख्यानम्' (पा. सू. १. ३. ८९. १) इति प्रतिषेधात् आत्मनेपदम्। हरिः। 'हृञ् हरणे'। औणादिकः इन्प्रत्ययः। 'ञ्नित्यादि-र्नित्यम्' इत्याद्युदात्तत्वम्। भवति। 'एकान्याभ्यां समर्थाभ्याम्' (पा. सू. ८. १. ६५) इति प्रथमायाः तिङ्विभक्तेः[3] निघातप्रतिषेधः। ददृशे। दृशेः 'छन्दसि लुङ्लङ्लिटः' इति वर्तमाने लिट्। सुवर्चाः। शोभनं वर्चस्तेजो यस्य। 'सोर्मनसी अलोमोषसी' इत्युत्तरपदाद्युदात्तत्वम्॥

दशेमं त्वष्टुर्जनयन्त गर्भमतन्द्रासो युवतयो विभृत्रम्।
तिग्मानीकं स्वयशसं जनेषु विरोचमानं परि षीं नयन्ति ॥ २ ॥

दश। इमम्। त्वष्टुः। जनयन्त। गर्भम्। अतन्द्रासः। युवतयः। विऽभृत्रम्।
तिग्मऽअनीकम्। स्वऽयशसम्। जनेषु। विऽरोचमानम्। परि। सीम्। नयन्ति ॥ २॥

[V]अतन्द्रासः स्वकार्ये जगतः पोषणेऽनलसाः आलस्यरहिताः जागरूका इत्यर्थः। [V]युवतयः नित्यतरुण्यः जरामरणरहिता इत्यर्थः। एवंभूताः [V]दश प्राच्याद्या दशसंख्याकाः दिशः [V]गर्भं मेघेषु गर्भरूपेणान्तर्वर्तमानं [V]त्वष्टुः दीप्तात् मध्यमात् वायोः सकाशात् [V]जनयन्त वैद्युतमग्निम्[4] उत्पादयन्ति। यद्वा दशसंख्याका अङ्गुलयस्त्वष्टुर्दीप्तस्य वायोः गर्भं स्वकारणभूते वायौ गर्भरूपेण वर्तमानम्। अग्नेर्हि वायुः कारणं 'वायोरग्निः' (तै. आ. ८. १) इति श्रुतेः। एवंभूतम् [V]इमम् अग्निम् अरण्योः सकाशात् जनयन्त उत्पादयन्ति। कीदृश्योऽङ्गुलयः। अतन्द्रासः पुनःपुनः कर्मकरणे आलस्यरहिताः। युवतयः अपृथक्कृत्य वर्तमानाः। एकस्मिन्पाणौ संहत्यावस्थिता इत्यर्थः। कीदृशमग्निम्। [V]विभृत्रं सर्वेषु भूतेषु विहृतम्। जाठररूपेण विभज्य वर्तमानमित्यर्थः। [V]तिग्मानीकं तीक्ष्णमुखं तीक्ष्णतेजसम्। अत एव हि वैद्युताग्निदर्शने दृष्टिः प्रतिहन्यते। [V]स्वयशसं स्वायत्तयशस्कम्। अतिशयेन यशस्विन-मित्यर्थः। [V]जनेषु जनपदेषु सर्वदेशेषु[5] [V]विरोचमानं विशेषेण दीप्यमानम्। बहूनामुपकारकमित्यर्थः। एवंभूतं [V]सीम् एनमग्निं [V]परि परितः सर्वतः [V]नयन्ति स्वस्वोपकाराय सर्वे जनाः स्वकीयं देशं प्रापयन्ति॥ त्वष्टुः। 'त्विष दीप्तौ'। 'नप्तृनेष्टृत्वष्टृ०' (उ. सू. २. २५२) इत्यादिना उणादिषु तृनन्तः[6] निपातितः। अतो नित्त्वादाद्युदात्तत्वम्। विभृत्रम्। 'हृञ् हरणे'। अस्मात् कर्मणि निष्ठा।

---

१. ट.ठ–शाच्छासाह्वा०। २. क्ष-स–प्राप्येत। ३. क्ष-ट-ठ-स–अस्यास्तिङ्विभक्तेः। ४. क्ष-ट-ठ-न-स–'वैद्युतमग्निम्' नास्ति। ५. क्ष-न-स–सर्वेषु देशेषु। ६. क्ष-स–तृन्नन्तः।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

छान्दसो रेफोपजनः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । ' ह्रग्रहोर्भः° ' इति भत्वम् । यद्वा औणादिकः क्रप्रत्ययः । तिग्मानीकम् । ' तिज निशाने ' । ' युजिरुचितिजां कुत्वं च ' ( उ. सू. १. १४३ )इति मक् । ' अन प्राणने ' । ' अनिदृशिभ्यां च ' इति कीकन् । तिग्मं तीक्ष्णमनीकं यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । परि षीम् । ' पूर्वपदात् ' इति षत्वम् ॥

त्रीणि जाना परि भूषन्त्यस्य समुद्र एकं दिव्येकमप्सु ।
पूर्वामनु प्र दिशं पार्थिवानामृतून्प्रशासद्वि दधावनुष्टु ॥ ३ ॥

त्रीणि । जाना । परि । भूषन्ति । अस्य । समुद्रे । एकम् । दिवि । एकम् । अप्ऽसु ।
पूर्वीम् । अनु । प्र । दिशम् । पार्थिवानाम् । ऋतून् । प्रऽशासत् । वि । दधौ । अनुष्टु ॥३॥

[v]अस्य अग्नेः [v]त्रीणि त्रिसंख्याकानि [v]जाना जननानि जन्मानि [v]परि [v]भूषन्ति परितः सर्वतोऽलंकुर्वन्ति । यद्वा परीत्येष समित्येतस्य स्थाने । अस्याग्नेस्त्रीणि जन्मानि संभवन्ति । [v]समुद्रे अब्धौ वडवानलरूपेण [v]एकं जन्म । [v]दिवि द्युलोके आदित्यात्मना [v]एकम् । [v]अप्सु । आपः इति अन्तरिक्षनाम । अन्तरिक्षे वैद्युताग्निरूपेणैकम् । एवमग्निस्त्रेधात्मानं विभज्य त्रिषु स्थानेषु वर्तते इत्यर्थः । तत्रादित्यात्मना वर्तमानः सोऽग्निः[1] [v]ऋतून् वसन्ताद्यान् षड्ऋतून् [v]प्रशासत् प्रकर्षेण विभक्ततया ज्ञापयन् [v]पार्थिवानां पृथिव्याः संबन्धिनां सर्वेषां प्राणिनां [v]पूर्वां प्राचीं [v]प्र [v]दिशं प्रकृष्टां ककुभम् । [v]अनुष्टु इत्येतदव्ययं सम्यक्शब्दसमानार्थं सुष्ठिति यथा । सम्यगनुक्रमेण [v]वि [v]दधौ कृतवान् । स्वतो भेदरहितयोरखण्डयोर्दिक्कालयोः प्राच्यादिभेदो वसन्तादिभेदश्च सूर्यगत्या निष्पाद्यते[2] । अतः सूर्य एव तयोः कर्तेत्यर्थः ॥ जाना । ' जनी प्रादुर्भावे ' । घञ्[3] । ' कर्षात्वतः° ' इत्यन्तोदात्तत्वे प्राप्ते वृषादेराकृतिगणत्वादाद्युदात्तत्वम् । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । भूषन्ति । ' भूष अलंकारे ' । भौवादिकः । यद्वा । भवतेर्लेटि[4] ' सिब्बहुलं लेटि ' इति सिप् । आगमानुशासनस्यानित्यत्वात् इडभावः, संज्ञापूर्वकस्य विधेरनित्यत्वात् गुणाभावश्च । दिवि । अप्सु । उभयत्र ' ऊडिदम्° ' इति विभक्तेः उदात्तत्वम् । पार्थिवानाम् । ' पृथिव्या ञञौ ' इति प्राग्दीव्यतीयः अञ्प्रत्ययः । प्रशासत् । ' शासु अनुशिष्टौ ' । अस्मात् लटः शतृ । ' जक्षित्यादयः षट् ' इति अभ्यस्तसंज्ञायां ' नाभ्यस्ताच्छतुः ' इति नुम्प्रतिषेधः । कृदुत्तरपदप्रकृतिस्वरत्वम् । अनुष्टु । ' अपदुःसुषु स्थः ' ( उ. सू. १. २५ ) इति विधीयमानः कुप्रत्ययो बहुलवचनात् तिष्ठतेरनुपूर्वादपि भवति ॥

क इमं वो निण्यमा चिकेत वत्सो मातृर्जनयत स्वधाभिः ।
बह्वीनां गर्भो अपसामुपस्थान्महान्कविर्निश्चरति स्वधावान् ॥ ४ ॥

कः । इमम् । वः । निण्यम् । आ । चिकेत । वत्सः । मातृः । जनयत । स्वधाभिः ।
बह्वीनाम् । गर्भः । अपसाम् । उपऽस्थात् । महान् । कविः । निः । चरति । स्वधाऽवान् ॥४॥

---

१. क्ष-ट-ठ-' सोऽग्निः ' नास्ति । २. क्ष-निष्पद्यते । ३. क्ष-न-स-भावे घञ् । ४. क्ष-भवतेरेव ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे ऋत्विग्यजमानाः ᵛनिण्यं निर्णीतम्। अन्तर्हितनामैतत्। अबादिषु गर्भरूपेणान्तर्हितम्। तथा च मन्त्रान्तरम्–' गर्भो यो अपां गर्भो वनानां गर्भश्च स्थातां गर्भश्चरथाम्' ( ऋ. सं. १. ७०. २ ) इति। एवंभूतम् ᵛइमम् अग्निं ᵛवः युष्माकं मध्ये ᵛकः ᵛआ ᵛचिकेत को जानाति। न कोऽपीत्यर्थः। सोऽयमग्निः ᵛवत्सः मेघस्थानामपां वैद्युताग्निरूपेण पुत्रस्थानीयः सन् ᵛमातॄः तस्य[1] मातृस्थानीयानि वृष्ट्युदकानि ᵛस्वधाभिः हविर्लक्षणैरन्नैः ᵛजनयत उत्पादयति। तथा च स्मर्यते–' अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ' ( मनु. ३. ७६ ) इति। अपि च ᵛबह्वीनां मेघस्थानामपां ᵛगर्भः वैद्युतरूपेण गर्भस्थानीयः सोऽग्निः ᵛअपसामुपस्थात्[2] समुद्रात् ᵛनिश्चरति औषसाग्निरूपेणादित्यः सन्निर्गच्छति। कीदृशः। ᵛमहान् तेजसा प्रौढः ᵛकविः क्रान्तदर्शी ᵛस्वधावान् हविर्लक्षणान्नवान्। एक एवाग्निर्होमनिष्पादकलक्षणेन पार्थिवरूपेण वैद्युतात्मना औषसरूपेण आदित्यात्मना च विभज्य वर्तते इत्यर्थः॥ चिकेत। ' कित ज्ञाने '। छान्दसो लिट्। जनयत। ' जनीजॄष्क्नसुरञ्जोऽमन्ताश्च ' इति मित्त्वात् ' मितां ह्रस्वः ' इति ह्रस्वत्वम्। पूर्ववत् छान्दसो लङ्। बह्वीनाम्। ' नित्यं छन्दसि ' ( पा. सू. ४. १. ४६ ) इति बहुशब्दात् ङीष्। ' ङ्याश्छन्दसि बहुलम् ' ( पा. सू. ६. १. १७८ ) इति नाम उदात्तत्वम्। अपसाम्। ' आप्लृ व्याप्तौ '। ' आपः कर्माख्यायां ह्रस्वो नुट् च वा ' ( उ. सू. ४. ६४७ ) इति बहुलवचनादकर्माख्यायामपि आप्नोतेः असिप्रत्ययः[3] ह्रस्वश्च। उपस्थात्। उपतिष्ठन्त्यापोऽत्र इत्युपस्थः। ' आतश्चोपसर्गे ' इति ' कृत्यल्युटो बहुलम् ' इति बहुलवचनात् अधिकरणे कप्रत्ययः। मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम्॥

आ॒विष्ट्यो॑ वर्धते॒ चारु॑रासु जि॒ह्मानां॑मू॒र्ध्वः स्वय॑शा उ॒पस्थे॑।
उ॒भे त्वष्टु॑र्बिभ्यतु॒र्जाय॑मानात्प्रती॒ची सिं॒हं प्रति॑ जोषयेते॥ ५॥

आ॒विःऽत्यः॑। व॒र्ध॒ते॒। चारुः॑। आ॒सु॒। जि॒ह्मानां॑म्। ऊ॒र्ध्वः। स्वऽय॑शाः। उ॒पऽस्थे॑।
उ॒भे इति॑। त्वष्टुः॑। बि॒भ्य॒तुः॒। जाय॑मानात्। प्र॒ती॒ची इति॑। सिं॒हम्। प्रति॑। जो॒ष॒ये॒ते॒ इति॑॥५॥

ᵛआसु मेघस्थास्वप्सु वैद्युतात्मना वर्तमानोऽग्निः ᵛचारुः शोभनदीप्तिः सन् ᵛआविष्ट्यो ᵛवर्धते आविर्भूतः प्रकाशमानो वृद्धिं प्राप्नोति। किं कुर्वन्। ᵛजिह्मानां कुटिलानां मेघेषु तिर्यगवस्थितानां तासामपाम् ᵛउपस्थे उत्सङ्गे ᵛस्वयशाः स्वायत्तयशस्कोऽग्निः ᵛऊर्ध्वः ऊर्ध्वज्वलनः सन्। स्वकारणभूतास्वप्सु तिर्यगवस्थितास्वपि स्वयमूर्ध्वं ज्वलन्नित्यर्थः। तदुक्तं वैशेषिकैः—' अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनम्[4] अणुमनसोराद्यं कर्मैतान्यदृष्टकारितानि ' इति। अपि च ᵛउभे द्यावापृथिव्यौ ᵛत्वष्टुः दीप्तात् ᵛजायमानात् उत्पद्यमानात्तस्मादग्नेः ᵛबिभ्यतुः भयं प्रापतुः। तदनन्तरमुत्पन्नं ᵛसिंहं सहनशीलमभिभवनशीलं तमग्निं ᵛप्रतीची प्रत्यञ्चन्त्यौ प्रतिगच्छन्त्यौ आभिमुख्येन प्राप्नुवन्त्यौ ᵛजोषयेते सेवेते। यास्कस्त्वाह–' आविरावेदनात्तत्त्यो वर्धते चारुरासु चारु चरतेर्जिह्मं जिहीतेरूर्ध्व उच्छ्रितो भवति स्वयशा आत्मयशा उपस्थ उपस्थान उभे त्वष्टुर्बिभ्यतुर्जायमानात्प्रतीची सिंहं प्रति जोषयेते द्यावापृथिव्याविति वाहोरात्रे इति वारणी इति वापि चैते प्रत्यक्ते सिंहं सहनं प्रत्यासेवेते '

---

१. क्ष-ट-ठ-स–स्वस्य। २. क्ष-स–अपसामुपस्थात् अपामुपस्थानात्। ३. क्ष-ट-ठ–असिन् प्रत्ययः। ४. स–वायोस्तिर्यग्गमनम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

( निरु. ८. १५ ) इति॥ आविष्टयः । आविःशब्दात् ' °छन्दसि ' ( पा. सू. ४. २. १०४. १ ) इति शैषिकस्यप् । ' ह्रस्वात्तादौ तद्धिते ' ( पा. सू. ८. ३. १०१ ) इति षत्वम् । आसु । ' इदमोऽन्वादेशे° ' इति अशादेशोऽनुदात्तः, विभक्तिश्च सुस्वादनुदात्ता इति सर्वानुदात्तत्वम् । न च ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वं शङ्कनीयम् । अन्तोदात्तादिदंशब्दाद्धि तद्विधीयते । प्रतीची । प्रतिपूर्वात् अञ्चतेः ' ऋत्विक्° ' इत्यादिना क्विन् । ' अनिदिताम्° ' इति नलोपः । ' अञ्चतेश्चोपसंख्यानम् ' इति ङीप् । ' अचः ' इति अकारलोपे ' चौ ' इति दीर्घत्वम् । उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वम् । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घः । जोषयेते । ' जुषी प्रीतिसेवनयोः ' । स्वार्थे णिच् ॥ ॥ १ ॥

उभे भद्रे जोषयेते न मेने गावो न वाश्रा उप तस्थुरेवैः ।
स दक्षाणां दक्षपतिर्बभूवाञ्जन्ति यं दक्षिणतो हविर्भिः ॥ ६ ॥

उभे इति । भद्रे इति । जोषयेते इति । न । मेने इति । गावः । न । वाश्राः । उप । तस्थुः । एवैः । सः । दक्षाणाम् । दक्षऽपतिः । बभूव । अञ्जन्ति । यम् । दक्षिणतः । हविःऽभिः ॥ ६ ॥

[v]उभे अहश्च रात्रिश्च । यद्वा उभे द्यावापृथिव्यौ । अरणी वा । [v]भद्रे भजनीये शोभनाङ्ग्यौ [v]मेने स्त्रियौ [v]जोषयेते [v]न सेवेते इव । यथा शोभने स्त्रियौ चामरहस्ते राजानमुभयतः सेवेते एवं द्यावापृथिव्यौ एनमग्निमुभयतः सेवेते इत्यर्थः । अपि च [v]वाश्राः हम्भारवं कुर्वत्यः [v]गावो [v]न गावो यथा [v]एवैः स्वकीयैश्चरित्रैरादरातिशयेन स्वकीयान् वत्सान् [v]उप [v]तस्थुः संगच्छन्ते तथेममग्निं द्यावापृथिव्यौ उपस्थिते भवतः । पूर्वं सेवनमात्रमुक्तम्[1] इदानीं पुनः[2] गोनिदर्शनेन तत्रैवादरातिशयो द्योत्यते[3]। अतः [v]सः अग्निः [v]दक्षाणां सर्वेषां बलानां [v]दक्षपतिः बलाधिपतिः [v]बभूव आसीत् । बलानां मध्ये यदतिशयितं बलं तस्याधिपतिर्बभूवेत्यर्थः । [v]यम् अग्निं [v]दक्षिणतः आहवनीयस्य दक्षिणभागे अवस्थिताः[4] ऋत्विजः [v]हविर्भिः चरुपुरोडाशादिभिः [v]अञ्जन्ति आर्द्रीकुर्वन्ति तर्पयन्ति सोऽग्निरिति पूर्वेणान्वयः ॥ वाश्राः । ' वाश्र शब्दे ' । ' स्फायितञ्चि° ' इत्यादिना रक् । एवैः । ' इण् गतौ ' ' इण्शीङ्भ्यां वन् ' इति भावे वन्प्रत्ययः ॥

उद्यंयमीति सवितेव बाहू उभे सिचौ यतते भीम ऋञ्जन् ।
उच्छुक्रमत्कमजते सिमस्मान्नवा मातृभ्यो वसना जहाति ॥ ७ ॥

उत् । यंयमीति । सविताऽइव । बाहू इति । उभे इति । सिचौ । यतते । भीमः । ऋञ्जन् । उत् । शुक्रम् । अत्कम् । अजते । सिमस्मात् । नवा । मातृऽभ्यः । वसना । जहाति ॥ ७ ॥

---

१. क्ष-ट-ठ-स–सेवामात्रमुक्तम् । २. क्ष-ट-ठ-न-स–' पुनः ' नास्ति । ३. क्ष-ट-ठ-स–' द्योत्यते ' इत्यस्यानन्तरम् ' यद्वा । शब्दयुक्ता गाव इव तमाग्निम् ऋत्विजो मन्त्रैरुपस्थितवन्त इत्यर्थः ' इत्यधिकम् । ४. क्ष-ट-ठ–स्थिताः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]सवितेव सर्वस्य प्रेरकः आदित्यो यथा [v]बाहू बाहुस्थानीयान् रश्मीनुद्गमयति तथायमौषसोऽग्निः स्वकीयानि तेजांसि [v]उद्यंयमीति भृशमुद्यतान्यूर्ध्वाभिमुखानि करोति । तदनन्तरं [v]भीमः सर्वेषां भयंकरोऽग्निः [v]उभे [v]सिचौ उभे द्यावापृथिव्यौ [v]ऋञ्जन् प्रसाधयन् स्वतेजसालंकुर्वन् [v]यतते स्वव्यापारे प्रयतते[1] । तदनन्तरं [v]सिमस्मात् सर्वस्माद्भूतजातात् [v]शुक्रं दीप्तम् [v]अत्कं सारभूतं रसम् [v]उत् [v]अजते रश्मिभिरूर्ध्वमादत्ते । अपि च [v]मातृभ्यः स्वमातृस्थानीयेभ्यो वृष्ट्युदकेभ्यः सकाशात् [v]नवा नवानि प्रत्यग्राणि [v]वसना सर्वस्य जगतः आच्छादकानि तेजांसि [v]जहाति उद्गमयति ॥ यंयमीति । ' यम उपरमे ' । अस्मात् यङ्लुकि ' नुगतोऽनुनासिकान्तस्य ' ( पा. सू. ७. ४. ८५ ) इति अभ्यासस्य नुगागमः । एतच्चानुस्वारोपलक्षणार्थम् । सिचौ । ' षिचिर् क्षरणे ' । सिञ्चतः फलेन संयोजयतः इति सिचौ द्यावापृथिव्यौ । ' क्विप् च ' इति क्विप् । यतते । ' यती प्रयत्ने ' । अत्कम् । ' अत सातत्यगमने ' । ' इण्भीकापाशल्यतिमर्चिभ्यः कन् ' ( उ. सू. ३. ३२३ ) इति कन्[2] । नित्त्वादाद्युदात्तत्वम् । सिमस्मात्[3] । सिमशब्दः सर्वशब्दपर्यायः । नवा वसना । उभयत्र ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । जहाति । ' ओहाक् त्यागे ' । जौहोत्यादिकः ॥

त्वेषं रूपं कृणुत उत्तरं यत्संपृञ्चानः सदने गोभिरद्भिः ।
कविर्बुध्नं परि मर्मृज्यते धीः सा देवताता समितिर्बभूव ॥ ८ ॥

त्वेषम् । रूपम् । कृणुते । उत्ऽतरम् । यत् । सम्ऽपृञ्चानः । सदने । गोभिः । अत्ऽभिः । कविः । बुध्नम् । परि । मर्मृज्यते । धीः । सा । देवऽताता । सम्ऽइतिः । बभूव ॥ ८ ॥

[v]सदने अन्तरिक्षे [v]गोभिः गन्त्रीभिः [v]अद्भिः मेघस्थाभिः[4] सह [v]संपृञ्चानः वैद्युतरूपेण संयुक्तः[5] सन् [v]त्वेषं दीप्तं सर्वैर्द्रष्टुमशक्यम् [v]उत्तरम् उत्कृष्टतरं [v]रूपं वैद्युतं प्रकाशं [v]यत् यदा [v]कृणुते करोति तदानीं [v]कविः क्रान्तदर्शी [v]धीः सर्वेषां धारकः सोऽग्निः [v]बुध्नं सर्वस्योदकस्य मूलभूतमन्तरिक्षं [v]परि [v]मर्मृज्यते परितो मार्ष्टि स्वतेजसाच्छादयति । तस्याग्नेः [v]सा [v]देवताता देवेन देवनशीलेनाग्निना तता विस्तारिता दीप्तिरस्माभिः स्तुता सती [v]समितिर्बभूव तेजसां संहतिर्भवति ॥ संपृञ्चानः । ' पृची संपर्के ' । रौधादिकः । अस्मात् लटः शानच् । ' ऋसोरल्लोपः ' इति अकारलोपः । सीदन्त्यस्मिन् गन्धर्वादय इति सदनमन्तरिक्षम् । अधिकरणे ल्युट् । मर्मृज्यते । ' मृजूष् शुद्धौ ' । अस्मात् यङि ' मर्मृज्यते मर्मृज्यमानास उपसंख्यानम् ' ( पा. सू. ७. ४. ९१. १ ) इति निपातनात् अभ्यासस्य रुगागमः । देवताता । देवेन तता देवताता । तनोतेः कर्मणि निष्ठा । ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपः । व्यत्ययेन आत्वम् । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् ॥

---

१. क्ष-ट-ठ–प्रवर्तते । २. क्ष-स–कन्प्रत्ययः । ३. क्ष-न-स–' सिमस्मात् ' नास्ति । ४. क्ष-ट-ठ–मेघस्थाभिरद्भिः । ५. क्ष–संपृक्तः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उरु ते ज्रयः पर्येति बुध्नं विरोचमानं महिषस्य धाम ।
विश्वेभिरग्ने स्वयशोभिरिद्धोऽदब्धेभिः पायुभिः पाह्यस्मान् ॥ ९ ॥

उरु । ते । ज्रयः । परि । एति । बुध्नम् । विऽरोचमानम् । महिषस्य । धाम ।
विश्वेभिः । अग्ने । स्वयशःऽभिः । इद्धः । अदब्धेभिः । पायुऽभिः । पाहि । अस्मान् ॥ ९ ॥

[v]महिषस्य महतः [v]ते तव [v]ज्रयः राक्षसादीनामभिभावुकं[1] [v]विरोचमानं विशेषेण दीप्यमानम् [v]उरु विस्तीर्णं [v]धाम तेजः [v]बुध्नम् अपां मूलभूतमन्तरिक्षं [v]पर्येति परितो व्याप्नोति। हे [v]अग्ने [v]इद्धः अस्माभिः प्रज्वलितः सन् [v]विश्वेभिः सर्वैः [v]स्वयशोभिः स्वकीयैरात्मीयैस्तेजोभिः [v]अस्मान् [v]पाहि रक्ष । कीदृशैः । [v]अदब्धेभिः राक्षसादिभिरहिंसितैः [v]पायुभिः पालनशक्तैः ॥ ज्रयः । ' जि ज्रि अभिभवे ' । असुन् । अदब्धेभिः । ' दम्भु दम्भे ' । निष्ठायां ' यस्य विभाषा ' इति इट्प्रतिषेधः । ' अनिदिताम्° ' इति नलोपः । ' झषस्तथोर्धोऽधः ' इति धत्वम् । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । ' बहुलं छन्दसि ' इति भिस ऐसभावः ॥

धन्वन्त्स्रोतः कृणुते गातुमूर्मिं शुक्रैरूर्मिभिरभि नक्षति क्षाम् ।
विश्वा सनानि जठरेषु धत्तेऽन्तर्नवासु चरति प्रसूषु ॥ १० ॥

धन्वन् । स्रोतः । कृणुते । गातुम् । ऊर्मिम् । शुक्रैः । ऊर्मिऽभिः । अभि । नक्षति । क्षाम् ।
विश्वा । सनानि । जठरेषु । धत्ते । अन्तः । नवासु । चरति । प्रऽसूषु ॥ १० ॥

[v]धन्वन्[2] नभसि [v]गातुं गमनशीलम् [v]ऊर्मिम् उदकसंघम् अयमग्निः [v]स्रोतः [v]कृणुते स्रोतसा प्रवाहरूपेण युक्तं करोति । [v]शुक्रैः निर्मलैः [v]ऊर्मिभिः तैर्जलसंघैः [v]क्षां भूमिम् [v]अभि [v]नक्षति अभिव्याप्नोति । स्वतेजोभिरन्तरिक्षे जलसंघमुत्पाद्य तेन सर्वां भूमिमभिवर्षतीत्यर्थः । पश्चात् [v]विश्वा सर्वाणि [v]सनानि । अन्ननामैतत् । सर्वाण्यन्नानि [v]जठरेषु [v]धत्ते अवस्थापयति । तदर्थं [v]नवासु वृष्ट्यनन्तरमुत्पन्नासु [v]प्रसूषु सर्वेषामन्नानां प्रसवित्रीष्वोषधीषु पाकार्थम् [v]अन्तः [v]चरति मध्ये वर्तते । अन्तरवस्थितेन भौमाग्निना सर्वा ओषधयः पच्यन्ते ॥ धन्वन् । ' रिवि रवि धवि गत्यर्थाः ' । इदित्त्वात् नुम् । ' कनिन्युवृषि° ' इत्यादिना कनिन् । ' सुपां सुलुक्° ' इति सप्तम्या[3] लुक्[3] । ' धन्वान्तरिक्षं धन्वन्त्यस्मादापः ' ( निरु. ५. ५ ) इति यास्कः । नित्त्वात् आद्युदात्तत्वम् । गातुम् । ' गाङ् गतौ ' । ' कमिमनिजनि° ' इत्यादिना तुप्रत्ययः । ऊर्मिम् । ' अर्तेरू च ' इति मिप्रत्ययः । नक्षति । ' नक्ष गतौ ' ॥

---

१. क्ष-ट-ठ-स–राक्षसानामभिभावकम् । २. च-फ–धन्वन् धन्वनि । ३. ट-ठ–सप्तम्येकवचनस्य लुक् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि ।
तन्नो मित्रो वरुणो ममहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ११ ॥

एव । नः । अग्ने । सम्ऽइधा । वृधानः । रेवत् । पावक । श्रवसे । वि । भाहि ।
तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥११॥

हे [v]पावक शोधक [v]अग्ने [v]समिधा अस्माभिर्दत्तेन समिदादिद्रव्येण [v]एव एवमुक्तप्रकारेण [v]वृधानः वर्धमानः सन् [v]रेवत् रयिमते धनयुक्ताय [v]नः अस्माकं [v]श्रवसे अन्नाय [v]वि [v]भाहि विशेषेण दीप्यस्व । अस्माकं तादृशमन्नं प्रयच्छेत्यर्थः । [v]नः अस्माकं [v]तत् अन्नं मित्रादयः [v]ममहन्तां पूजयन्तां रक्षन्त्वित्यर्थः । उतशब्दः समुच्चये । पृथिवी च द्यौश्चेत्यर्थः ॥ एव । ' निपातस्य च ' इति संहितायां दीर्घः । वृधानः । वृधेः अन्तर्भावितण्यर्थात् ताच्छीलिकः चानश् । ' बहुलं छन्दसि ' इति शपो लुक् । चानशः सार्वधातुकत्वेन ङित्त्वात् लघूपधगुणाभावः । लसार्वधातुकत्वाभावेनानुदात्तत्वाभावे[1] चित्स्वर एव शिष्यते । रेवत् । रयिशब्दात् मतुप् । ' रयेर्मतौ बहुलम् ' इति संप्रसारणम् । ' छन्दसीरः ' इति मतुपो वत्वम् । ' रेशब्दाच्च° ' ( का. ६. १. १७६. १ ) इति मतुप उदात्तत्वम् । ' सुपां सुलुक्° ' इति चतुर्थ्या लुक् ॥ ॥ २ ॥

' स प्रत्नथा ' इति नवर्चं तृतीयं सूक्तं कुत्सस्यार्षं त्रैष्टुभम् । द्रविणोदस्त्वगुणविशिष्टोऽग्निः शुद्धाग्निर्वा देवता । तथा चानुक्रान्तम्–' स प्रत्नथा नव द्रविणोदसः ' इति। प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तः सूक्तविनियोगः । व्यूढस्य दशरात्रस्य षष्ठेऽहन्याग्निमारुते इदं सूक्तं जातवेदस्यनिविद्धानम् । ' व्यूढश्चेत् ' इति खण्डे सूत्रितं–' स प्रत्नथेस्याग्निमारुतम् ' ( आश्व. श्रौ. ८. ८ ) इति। ' स प्रत्नथा सहसा जायमान इति जातवेदस्यं समानोदर्कम् ' ( ऐ. ब्रा. ५. १५ ) इत्यादि ब्राह्मणम्। महापितृयज्ञे स्विष्टकृत्स्थानीयस्य कव्यवाहनस्य ' स प्रत्नथा ' इत्येषा याज्या । ' दक्षिणाग्नेः ' इति खण्डे सूत्रितं–' स प्रत्नथा सहसा जायमान इत्यग्निः स्विष्टकृत्कव्यवाहनः ' ( आश्व. श्रौ. २. १९ ) इति ॥

स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बळधत्त विश्वा ।
आपश्च मित्रं धिषणा च साधन्देवा अग्निं धारयन्द्रविणोदाम् ॥ १ ॥

सः । प्रत्नऽथा । सहसा । जायमानः । सद्यः । काव्यानि । बट् । अधत्त । विश्वा ।
आपः । च । मित्रम् । धिषणा । च । साधन् । देवाः । अग्निम् । धारयन् । द्रविणःऽदाम् ॥१॥

[v]सहसा बलेन [v]जायमानः निर्मथनेनोत्पद्यमानः[2] [v]सः अग्निः [v]सद्यः तदानीमुत्पत्त्यनन्तरमेव [v]प्रत्नथा प्रत्न इव चिरंतन इव [v]विश्वा विश्वानि सर्वाणि [v]काव्यानि कवेः क्रान्तदर्शिनः प्रगल्भस्य कर्माणि [v]बट् सत्यम् [v]अधत्त अधारयत् । पूर्वं विद्यमान इवाग्निरुत्पत्तिसमकालमेव स्वकीयं हविर्वहनादिकं सर्वं कार्यमकरोदित्यर्थः । इममग्निं वैद्युतरूपेण वर्तमानं मेघेष्ववस्थिताः [v]आपश्च [v]धिषणा

---

१. क्ष–लसार्वधातुकत्वाभावेन तास्यनुदात्तेत् इति लसार्वधातुकानुदात्तत्वाभावे। २. स–निर्मन्थनेनोत्पद्यमानः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]च या माध्यमिका वाक् सा च [V]मित्रं सखिभूतं [V]साधन् साधयन्ति कुर्वन्ति । तमिमं [V]द्रविणोदां द्रविणस्य धनस्य दातारम् [V]अग्निं [V]देवाः ऋत्विजः [V]धारयन् गार्हपत्यादिरूपेण धारयन्ति । यद्वा । देवा एवेन्द्रादय इममग्निं द्रविणोदां हविर्लक्षणस्य धनस्य दातारं कृत्वा दूरये धारयन् धारयन्ति ॥ प्रत्नथा । ' प्रत्नपूर्वविश्वेमात्थाल् छन्दसि ' इति इवार्थे थाल्प्रत्ययः । काव्यानि । कवेः[1] कर्म काव्यम्[1]। ' गुणवचनब्राह्मणादिभ्यः° ' इति ष्यञ् । ञित्त्वादाद्युदात्तत्वम् । साधन् । ' षिधु संराद्धौ ' । णौ[2] ' सिध्यतेरपारलौकिके ' ( पा. सू. ६. १. ४९ ) इति आत्वम् । लेटि अडागमः । ' इतश्च लोपः° ' इति इकारलोपः । ' छन्दस्युभयथा ' इति शपः आर्धधातुकत्वात् ' णेरनिटि ' इति णिलोपः । द्रविणोदाम् । द्रविणानि ददातीति द्रविणोदाः । ' द्रु गतौ ' । ' द्रुदक्षिभ्यामिनन् ' । छान्दसः पूर्वपदस्य सुक् । ' अन्येभ्योऽपि दृश्यन्ते ' इति ददातेः विच् । सकारान्तं त्वसुनि कृते निष्पद्यते ॥

**स पूर्वया निविदा कव्यतायोरिमाः प्रजा अजनयन्मनूनाम् ।**
**विवस्वता चक्षसा द्यामपश्च देवा अग्निं धारयन्द्रविणोदाम् ॥ २ ॥**

सः । पूर्वया । निऽविदा । कव्यता । आयोः । इमाः । प्रऽजाः । अजनयत् । मनूनाम् ।
विवस्वता । चक्षसा । द्याम् । अपः । च । देवाः । अग्निम् । धारयन् । द्रविणःऽदाम् ॥२॥

[V]सः अग्निः [V]पूर्वया प्रथमया ' अग्निर्देवेद्धः ' इत्यादिकया [V]निविदा [V]कव्यता गुणिनिष्ठगुणाभिधानलक्षणां स्तुतिं कुर्वता [V]आयोः मनोः संबन्धिनोक्थेन च स्तूयमानः सोऽग्निः [V]मनूनां संबन्धिनीः [V]इमाः [V]प्रजाः [V]अजनयत् उदपादयत् । मनुना स्तुतः सन् मानवीः सर्वाः प्रजा अजनयदित्यर्थः । तथा[3] [V]विवस्वता विवासनवता विशेषेणाच्छादयता [V]चक्षसा आत्मीयेन तेजसा [V]द्यां द्युलोकम् [V]अपश्च अन्तरिक्षं च व्याप्नोतीति शेषः । अन्यत् समानम् ॥ कव्यता । ' कु शब्दे ' । ' अचो यत् ' इति भावे यत् । कव्यं कवनं स्तुतिं करोति । ' तत्करोति° ' ( पा. सू. ३. १. २६. ५ ) इति णिच् । तदन्तात् क्विप् । ' बहुलमन्यत्रापि संज्ञाच्छन्दसोः ' इति णिलुक् । ततस्तुक् । धातुस्वरेणान्तोदात्तत्वम् । आयोः । ' इण् गतौ ' । ' छन्दसीणः ' इति उण्प्रत्ययः ॥

**तमीळत प्रथमं यज्ञसाधं विश आरीराहुतमृञ्जसानम् ।**
**ऊर्जः पुत्रं भरतं सृप्रदानुं देवा अग्निं धारयन्द्रविणोदाम् ॥ ३ ॥**

तम् । ईळत । प्रथमम् । यज्ञऽसाधम् । विशः । आरीः । आऽहुतम् । ऋञ्जसानम् ।
ऊर्जः । पुत्रम् । भरतम् । सृप्रऽदानुम् । देवाः । अग्निम् । धारयन् । द्रविणःऽदाम् ॥ ३ ॥

हे [V]विशः सर्वे मनुष्याः [V]आरीः अग्निं स्वामिनं गच्छन्त्यो यूयं [V]तम् अग्निम् [V]ईळत स्तुध्वम् । कीदृशम् । [V]प्रथमं सर्वेषु देवेषु मुख्यं [V]यज्ञसाधं यज्ञस्य दर्शपूर्णमासादेः साधकं निष्पादकं [V]आहुतं हविर्भिस्तर्पितं [V]ऋञ्जसानं स्तोत्रैः प्रसाध्यमानं [V]ऊर्जः अन्नस्य [V]पुत्रम् । भुक्तेनान्नेन जाठराग्नेर्वर्धनात्

---

१. क्ष-ट-ठ–कवेः कर्माणि । २. क्ष-स–णिचि । ३. क्ष-ट-ठ–' तथा ' नास्ति; स–तथा च ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अग्नेरन्नपुत्रत्वम् । ᵛभरतं हविषो भर्तारम् । यद्वा । प्राणरूपेण सर्वासां प्रजानां भर्तारम् । श्रूयते च–' स्वदेहे[1] वा एष प्राणो भूत्वा प्रजा बिभर्ति तस्मादेष भरतः ' इति । ᵛसृप्रदानुं सर्पणशीलदानयुक्तम् । अविच्छेदेन धनानि प्रयच्छन्तमित्यर्थः । देवाः इत्यादि गतम् ॥ ईळत । ' ईड स्तुतौ ' । लोटि व्यत्ययेन परस्मैपदम् । ' बहुलं छन्दसि ' इति शपो लुगभावः । यज्ञसाधम् । यज्ञं साधयतीति यज्ञसात् । साधयतेः क्विप् । ' णेरनिटि ' इति णिलोपः । आरीः । ' ऋ गतौ ' । ' सूचिसूत्रि° ' (पा. म. ३. १. २२. ३) इत्यादिना यङ् । ' यङोऽचि च ' इति चशब्देन बहुलग्रहणानुकर्षणात् अनैमित्तिको लुक् । प्रत्ययलक्षणेन द्विर्भावे उरदत्वहलादिशेषौ । ' रुग्रिकौ च लुकि ' इति रुक् । यङ्लुगन्तात् औणादिकः किप्रत्ययः । यणादेशे ' रो रि ' इति रेफलोपः । ' ढ्रलोपे पूर्वस्य° ' इति दीर्घत्वम् । ' कृदिकारादक्तिनः ' इति ङीष् । जसि ' वा छन्दसि ' इति पूर्वसवर्णदीर्घत्वम् । व्यत्ययेन आद्युदात्तत्वम् । ऋञ्जसानम् । ऋञ्जतिः प्रसाधनकर्मा । ' ऋञ्जिवृधिमन्दिसहिभ्यः कित् ' ( उ. सू. २. २४४ ) इति कर्मणि असानच् । भरतम् । ' भृञ् भरणे ' । ' भृमृदृशि° ' इत्यादिना अतच् । सृप्रदानुम् । सृप्लृ गतौ ' । ' स्फायितञ्चि° ' इत्यादिना रक् । सृप्रो दानुर्दानं यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

स मा॑त॒रिश्वा॑ पुरु॒वार॑पुष्टिर्वि॒दद्गा॒तुं तन॑याय स्व॒र्वित् ।
वि॒शां गो॒पा ज॑नि॒ता रोद॑स्योर्दे॒वा अ॒ग्निं धा॑रयन्द्रविणो॒दाम् ॥ ४ ॥

सः । मा॒त॒रिश्वा॑ । पु॒रु॒वार॑ऽपुष्टिः । वि॒दत् । गा॒तुम् । तन॑याय । स्वः॒ऽवित् ।
वि॒शाम् । गो॒पाः । ज॒नि॒ता । रोद॑स्योः । दे॒वाः । अ॒ग्निम् । धा॒र॒य॒न् । द्र॒वि॒णः॒ऽदाम् ॥ ४ ॥

ᵛसः अग्निः ᵛतनयाय अस्मदीयाय पुत्राय ᵛगातुम् अनुष्ठानमार्गं ᵛविदत् लम्भयतु । कीदृशः । ᵛमातरिश्वा मातरि सर्वस्य जगतो निर्मातरि अन्तरिक्षे श्वसन् वर्तमानः ᵛपुरुवारपुष्टिः । पुरुभिर्बहुभिर्वारा वरणीया पुष्टिरभिवृद्धिर्यस्य स तथोक्तः । ᵛस्वर्वित् स्वः स्वर्गस्य यागद्वारेण लम्भयिता ᵛविशां सर्वासां प्रजानां ᵛगोपाः गोपायिता रक्षिता ᵛरोदस्योः द्यावापृथिव्योः ᵛजनिता जनयितोत्पादयिता । देवाः इत्यादि गतम् ॥ मातरिश्वा । ' श्वन्नुक्षन्° ' इत्यादौ मातृशब्दोपपदात् 'श्वस प्राणने ' इत्यस्मात् कनिन्प्रत्ययान्तो निपात्यते । विदत् । ' विद्लृ लाभे ' । अस्मात् अन्तर्भावितण्यर्थात् छान्दसो लुङ् । लृदित्त्वात् च्लेः अङादेशः । पादादित्वात् निघाताभावः । जनिता[1] । ' जनिता मन्त्रे ' ( पा. सू. ६. ४. ५३ ) इति तृचि णिलोपो निपात्यते ॥

नक्तो॒षासा॒ वर्ण॑मा॒मेम्या॑ने धा॒पये॑ते॒ शिशु॒मेकं॑ समी॒ची ।
द्यावा॒क्षामा॑ रु॒क्मो अ॒न्तर्वि भा॑ति दे॒वा अ॒ग्निं धा॑रयन्द्रविणो॒दाम् ॥ ५ ॥

नक्तो॒षसा॑ । वर्ण॑म् । आ॒मेम्या॑ने॒ इत्या॒ऽमेम्या॑ने । धा॒पये॑ते॒ इति॑ ।
शिशु॑म् । एक॑म् । स॒मी॒ची इति॑ स॒म्ऽई॒ची ।
द्यावा॒क्षामा॑ । रु॒क्मः । अ॒न्तः । वि । भा॒ति॒ । दे॒वाः । अ॒ग्निम् । धा॒र॒य॒न् । द्र॒वि॒णः॒ऽदाम् ॥५॥

---

१. क्ष-स–शश्वदिह । २. क्ष-ट-ठ–जनिता ।' जनी प्रादुर्भावे ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vनक्तोषासा रात्रिरहश्च Vवर्णं स्वकीयं स्वरूपम्[1] Vआमेम्याने परस्परं पुनःपुनर्हिंसन्त्यौ Vसमीची संगते संश्लिष्टे एवंभूते अहस्त्रियामे Vएकं Vशिशुम् अह्नः पुत्रमग्निं Vधापयेते हवींषि पाययेते। Vरुक्मः रोचमानः सोऽग्निः Vद्यावाक्षामा द्यावापृथिव्योः Vअन्तः मध्ये Vवि Vभाति विशेषेण प्रकाशते। अन्यत् पूर्ववत्॥ नक्तोषसा[2]। नक्ता इति रात्रिनाम। नक्ता उषाश्च नक्तोषसा। 'सुपां सुलुक्°' इति विभक्तेः आकारः। 'अन्येषामपि°' इति सांहितिकमुपधादीर्घत्वम्[3]। 'देवताद्वन्द्वे च' इति पूर्वोत्तरपदयोः युगपत्प्रकृतिस्वरत्वम्। आमेम्याने। 'मीङ् हिंसायाम्'। अस्मात् यङ्लुगन्तात् व्यत्ययेन शानच्। 'अदादिवच्च' इति वचनात् शपो लुक्। 'एरनेकाचः°' इति यण्। 'अभ्यस्तानामादिः' इति आद्युदात्तत्वम्। कृदुत्तरपदप्रकृतिस्वरत्वम्। धापयेते। 'धेट् पाने'। अस्मात् ण्यन्तात् 'निगरणचलन°' (पा. सू. १. ३. ८७) इति प्राप्तस्य परस्मैपदस्य 'पादिषु धेट उपसंख्यानम्' (पा. सू. १. ३. ८९. १) इति वचनात् 'न पादम्याङ्यम°' (पा. सू. १. ३. ८९) इति प्रतिषेधः। अदुपदेशात् लसार्वधातुकानुदात्तत्वे णिच एव स्वरः शिष्यते। पादादित्वात् निघाताभावः। समीची। संपूर्वात् अञ्चतेः 'ऋत्विक्°' इत्यादिना क्विन्। 'अनिदिताम्°' इति नलोपः। 'समः समि' (पा. सू. ६. ३. ९३) इति सम्यादेशः। 'अञ्चतेश्चोपसंख्यानम्' इति ङीप्। 'अचः' इति अकारलोपे 'चौ' इति दीर्घत्वम्। उदात्तनिवृत्तिस्वरेण[4] ङीप उदात्तत्वम्[4]। पदकारस्य स्वयमभिप्रायः। 'उद ईत्' (पा. सू. ६. ४. १३९) इति विधीयमानम् ईत्वं सम उत्तरस्याप्यञ्चतेर्व्यत्ययेन भवतीति। 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम्। द्यावाक्षामा। 'दिवो द्यावा' इति द्यावादेशः। 'सुपां सुलुक्°' इति षष्ठ्याः डादेशः। 'देवताद्वन्द्वे च' इति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वम्॥ ॥ ३॥

रायो बुध्नः संगमनो वसूनां यज्ञस्य केतुर्मन्मसाधनो वेः।
अमृतत्वं रक्षमाणास एनं देवा अग्निं धारयन्द्रविणोदाम् ॥ ६ ॥

रायः। बुध्नः। सम्ऽगमनः। वसूनाम्। यज्ञस्य। केतुः। मन्मऽसाधनः। वेरिति वेः। अमृतऽत्वम्। रक्षमाणासः। एनम्। देवाः। अग्निम्। धारयन्। द्रविणःऽदाम् ॥ ६ ॥

योऽग्निः Vरायः धनस्य Vबुध्नः मूलभूतः। आहुतिद्वारा सर्वेषां धनानां कारणत्वात्। Vवसूनां निवासहेतूनां[5] धनानां Vसंगमनः संगमयिता स्तोतॄणां प्रापयिता Vयज्ञस्य दर्शपूर्णमासादेः Vकेतुः केतयिता ज्ञापयिता Vवेः आत्मानमभिगच्छतः पुरुषस्य Vमन्मसाधनः मननीयस्याभिलषितस्य साधयिता Vअमृतत्वं स्वकीयामरणत्वं[6] Vरक्षमाणासः पालयन्तः Vदेवाः Vएनं धनस्य दातारम् Vअग्निं धारयन्ति॥ रायः। 'ऊडिदम्°' इति विभक्तेरुदात्तत्वम्। संगमनः। नन्द्यादिलक्षणो ल्युः। वेः। वी गत्यादिषु। अस्मात् औणादिकः इप्रत्ययः टिलोपश्च॥

---

१. क्ष-स–रूपम्। २. क्ष-ट-ठ-स–नक्तोषासा। ३. क्ष-ट-ठ–सांहितिक उपधादीर्घः। ४. क्ष-ट-ठ–'उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वम्' नास्ति। ५. क्ष-ट-ठ-स–'निवासहेतूनाम्' नास्ति। ६. क्ष-ट-ठ–स्वकीयममरणधर्मत्वम्; न-स–'स्वकीयामरणत्वम्' नास्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नू च पुरा च सदनं रयीणां जातस्य च जायमानस्य च क्षाम् ।
सतश्च गोपां भवतश्च भूरेर्देवा अग्निं धारयन्द्रविणोदाम् ॥ ७ ॥

नु । च । पुरा । च । सदनम् । रयीणाम् । जातस्य । च । जायमानस्य । च । क्षाम् ।
सतः । च । गोपाम् । भवतः । च । भूरेः । देवाः । अग्निम् । धारयन् । द्रविणःऽदाम् ॥७॥

नू च इति निपातसमुदायः अद्य इत्यस्यार्थे । 'नू चिदिति निपातः पुराणनवयोर्नू च' ( निरु. ४.१७ ) इति यास्कः । Vनू Vच अद्य अस्मिन्काले Vपुरा[1] Vच Vरयीणां सर्वेषां धनानां Vसदनम् आवासस्थानं Vजातस्य उत्पन्नस्य कार्यजातस्य Vजायमानस्य उत्पद्यमानस्य Vच Vक्षां निवासयितारं Vसतश्च सर्वत्र[2] विद्यमानस्वभावस्य नित्यस्य चाकाशादेः Vभवतश्च सद्भावं प्राप्नुवतः Vभूरेः असंख्यातस्य अन्यस्य च भूतजातस्य Vगोपां गोपायितारं रक्षितारं Vद्रविणोदां धनप्रदं एवंगुणविशिष्टम् Vअग्निं Vदेवाः Vधारयन् हविर्वोढृत्वेन धारयन्ति ॥ नू च । 'ऋचि तुनुघ०' इति दीर्घः । रयीणाम् । 'नामन्यतरस्याम्' इति नाम उदात्तत्वम् । क्षाम् । 'क्षि निवासगत्योः' । अस्मात् णिच् । वृद्ध्यायादेशौ । ण्यन्तात् क्विप् । 'णेरनिटि' इति णिलोपः । 'वेरपृक्तलोपाद्वलि लोपो बलीयान्' इति पूर्वं 'लोपो व्योर्वलि' इति यलोपः । न च णिलोपस्य स्थानिवत्त्वं, 'न पदान्तद्विर्वचनवरेयलोप०' इति प्रतिषेधात् । यद्वा । 'क्षै जै पै क्षये' । अस्मात् क्विप् । 'आदेचः०' इति आत्वम् । सतः । अस्तेः शतरि अदादित्वात् शपो लुक् । 'श्नसोरल्लोपः' इति अकारलोपः । 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम् ॥

द्रविणोदा द्रविणसस्तुरस्य द्रविणोदाः सनरस्य प्र यंसत् ।
द्रविणोदा वीरवतीमिषं नो द्रविणोदा रासते दीर्घमायुः ॥ ८ ॥

द्रविणःऽदाः । द्रविणसः । तुरस्य । द्रविणःऽदाः । सनरस्य । प्र । यंसत् ।
द्रविणःऽदाः । वीरऽवतीम् । इषम् । नः । द्रविणःऽदाः । रासते । दीर्घम् । आयुः ॥ ८ ॥

Vद्रविणोदाः द्रविणस्य धनस्य बलस्य वा दाता अग्निः Vतुरस्य त्वरमाणस्य चलतो जङ्गमस्य Vद्रविणसः धनस्य बलस्य वा एकदेशं Vप्र Vयंसत् अस्मभ्यं प्रयच्छतु । तथा Vद्रविणोदाः Vसनरस्य सननीयस्य संभजनीयस्य स्थावररूपस्य धनस्यैकदेशं प्रयच्छतु । अपि च Vद्रविणोदाः Vवीरवतीं वीरैः पुत्रादिभिः युक्तम्[3] Vइषम्[3] अन्नं Vनः अस्मभ्यं प्रयच्छतु । तथा Vद्रविणोदाः Vदीर्घमायुः अस्मभ्यं Vरासते प्रयच्छतु ॥ तुरस्य । 'तुर त्वरणे' । इगुपधलक्षणः कः । सनरस्य । 'वन षण संभक्तौ' । 'कृदराद्यश्च' ( उ. सू. ५. ७१९ ) इति अरन्प्रत्ययः । यंसत् । 'यम उपरमे' । लेटि अडागमः । 'सिब्बहुलं लेटि' इति सिप् । रासते । 'रा दाने' । पूर्ववत् लेटि सिप् । व्यत्ययेन आत्मनेपदम् ॥

---

१. क्ष-स–पुरा अतीतकाले । २. क्ष-न-स–सर्वदा । ३. क्ष–युक्ताम् इषम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे वि भाहि ।
तन्नो मित्रो वरुणो ममहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ९ ॥

एव । नः । अग्ने । सम्ऽइधा । वृधानः । रेवत् । पावक । श्रवसे । वि । भाहि ।
तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥९॥

व्याख्यातेयं पूर्वसूक्ते। अक्षरार्थस्तु। हे शोधक ᵛअग्ने एवमस्माभिर्दत्तेन समिदादिद्रव्येण ᵛवृधानः[1] वर्धमानः सन् ᵛनः अस्माकं धनयुक्तायान्नाय विशेषेण प्रकाशस्व । अस्माकं ᵛतत् अन्नं मित्रादयः ᵛममहन्तां पूजयन्तां रक्षन्त्वित्यर्थः । तथा ᵛसिन्धुः अब्देवता द्यावापृथिव्यौ च ममहन्ताम् ॥४॥

'अप नः' इति अष्टर्चं चतुर्थं सूक्तं कुत्सस्यार्षं गायत्रम्। शुचिगुणकोऽग्निः[2] शुद्धोऽग्निर्वा देवता[2]। तथा चानुक्रान्तम्–' अप नोऽष्टौ शुचये गायत्रम् ' इति । विनियोगो लैङ्गिकः । अत्रेदमाख्यानम् । दीर्घजिह्वी नाम राक्षसी सर्वान् यज्ञान् बबाधे । तां हन्तुमिन्द्रोऽशक्तः सन् सर्वस्य मित्रभूतं कुत्समब्रवीदेषा त्वया हन्तव्येति । स चावधीत् । तं वागभ्यवदत् अनुचितमिदं त्वया चरितं यत्त्वं सर्वेषां मित्रभूतः सन् क्रूरमकार्षीरिति । तमृषिं शोकः प्राप्नोत् । स ऋषिरनेन सूक्तेनाग्निं स्तुत्वा शोकमपागमयत् । तथा च ताण्डकम्–' दीर्घजिह्वी वा इदं रक्षो यज्ञहा यज्ञानवलिहत्यचरत् तामिन्द्रः कया चन मायया हन्तुं नाशंसत् अथ ह सुमित्रः कुत्सः कल्याण आस तमब्रवीत् ' (ता. १३. ६. ९) इत्यादि। तस्मादेतत्सूक्तं शुगपनयनाय विनियोज्यम् । अत एव हि सूत्रकारेण भारद्वाजेन दशमेऽहनि कर्तव्ये शान्तिकर्मणि यजुर्वेदे पठितमेतत्सूक्तं विनियुज्यते –' नव[3] च स्रुवाहुतीरप[3] नः शोशुचदघम् ' इति ॥

अप नः शोशुचदघमग्ने शुशुग्ध्या रयिम् । अप नः शोशुचदघम् ॥ १ ॥

अप । नः । शोशुचत् । अघम् । अग्ने । शुशुग्धि । आ । रयिम् ।
अप । नः । शोशुचत् । अघम् ॥ १ ॥

हे ᵛअग्ने ᵛनः अस्माकम् ᵛअघं पापम् ᵛअप ᵛशोशुचत् अस्मत्तो निर्गत्यास्मदीयं शत्रुं शोचयतु। यद्वा । अस्मदीयं पापं शोशुचत् शोकग्रस्तं[4] सद्विनश्यतु । अपि चास्माकं ᵛरयिं धनम् ᵛआ समन्तात् ᵛशुशुग्धि प्रकाशय । उक्तार्थमपि वाक्यमादरातिशयद्योतनाय पुनः पठ्यते। अवश्यमस्माकमघं विनश्यत्विति ॥ शोशुचत् । ' शुच शोके ' । अस्मात् यङ्लुगन्तात् लेटि अडागमः । ' अदादिवच्च ' इति वचनात् शपो लुक् । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । अघं शोशुचच्च रयिं शुशुग्धि चेति चार्थप्रतीतेः ' चादिलोपे विभाषा ' इति निघातप्रतिषेधः । शुशुग्धि । ' शुच दीप्तौ ' । लोटि ' बहुलं छन्दसि ' इति शपः श्लुः । ' हुझल्भ्यो हेर्धिः ' । ' चोः कुः ' इति कुत्वम् ॥

---

१. क्ष-ट-ठ–' वृधानः ' नास्ति । २. ट-ठ–शुचिगुणयुक्तोऽग्निः शुद्धाग्निर्वा देवता; न–शुचिगुणकोऽग्निर्देवता; क्ष–शुचित्वगुणयुक्तोऽग्निः शुद्धाग्निर्वा देवता । ३. क्ष-ट-ठ–अथ चतस्र आहुतीरप । ४. क्ष-ट-ठ–शोकव्यस्तम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सुक्षेत्रिया सुगातुया वसूया च यजामहे । अप नः शोशुचदघम् ॥ २ ॥

सुऽक्षेत्रिया । सुगातुऽया । वसुऽया । च । यजामहे । अप । नः । शोशुचत् । अघम् ॥ २ ॥

[v]सुक्षेत्रिया शोभनक्षेत्रेच्छया [v]सुगातुया शोभनमार्गेच्छया [v]वसूया [v]च[1] धनेच्छया निमित्तभूतया च [v]यजामहे अग्निं हविर्भिः पूजयामः । यद्वा सुक्षेत्रिया देवयजनलक्षणशोभनदेशसंबन्धिना हविषा[2] अग्निं[3] यजामहे । [v]नः अस्माकम् [v]अघम्[4] [v]अप[5] [v]शोशुचत् विनश्यतु ॥ सुक्षेत्रिया । शोभनं क्षेत्रं सुक्षेत्रम् । तद्विषयेच्छा सुक्षेत्रिया । ' सुप आत्मनः क्यच् ' । ' न च्छन्दस्यपुत्रस्य ' इति ईत्वदीर्घयोर्निषेधः । व्यत्ययेन इत्वम् । क्यजन्तात् ' अ प्रत्ययात् ' इति भावे अकारप्रत्ययः । ततः टाप् । ' सुपां सुलुक्° ' इति तृतीयाया लुक् । एवमुत्तरत्रापि । यद्वा । शोभनं क्षेत्रमस्यास्तीति सुक्षेत्रम् । ' इयाडियाजीकाराणामुपसंख्यानम् ' ( पा. सू. ७. १. ३९. १ ) इति तृतीयाया डियाजादेशः[6] ॥

प्र यद्भन्दिष्ठ एषां प्रास्माकासश्च सूरयः । अप नः शोशुचदघम् ॥ ३ ॥

प्र । यत् । भन्दिष्ठः । एषाम् । प्र । अस्माकासः । च । सूरयः । अप । नः । शोशुचत् । अघम् ॥ ३ ॥

[v]यत् यथा [v]एषां स्तोतृणां मध्येऽयं कुत्सः [v]प्र [v]भन्दिष्टः प्रकर्षेण स्तोतृतमः एवम् [v]अस्माकासः आस्माकीनाः [v]सूरयः स्तोतारः [v]च प्रकर्षेण स्तोतृतमा भवन्ति[7] । अन्यत् समानम् ॥ भन्दिष्टः । भन्दतिः स्तुतिकर्मा । ' भदि कल्याणे सुखे च ' इति तु[8] धातुः । अस्मात् तृजन्तात् ' तुश्छन्दसि ' इति इष्टन् । ' तुरिष्टेमेयःसु ' इति तृलोपः । अस्माकासः । अस्माकं संबन्धिनः आस्माकाः । ' तस्मिन्नणि च युष्माकास्माकौ ' ( पा. सू. ४. ३. २ ) इति अस्माकादेशः । छान्दसोऽण्प्रत्ययस्य[9] लोपः । संज्ञापूर्वकस्य विधेरनित्यत्वात् वृद्धयभावः[9] । ' आज्जसेरसुक् ' । स्थानिवदादेशेऽपि मकारात् परस्य आकारस्य उदात्तत्वम् । यद्वा । षष्ठीबहुवचनेऽस्माकंशब्दस्य मध्योदात्तस्य दृष्टत्वात् स एव आचार्येण[10] अतिदिश्यते ॥

प्र यत्ते अग्ने सूरयो जायेमहि प्र ते वयम् । अप नः शोशुचदघम् ॥ ४ ॥

प्र । यत् । ते । अग्ने । सूरयः । जायेमहि । प्र । ते । वयम् । अप । नः । शोशुचत् । अघम् ॥ ४ ॥

हे [v]अग्ने [v]यत् यस्मात् [v]ते तव [v]सूरयः स्तोतारः प्रजायन्ते पुत्रपौत्रादिरूपेण बहुविधा भवन्ति ततः [v]वयं च [v]ते तव स्तोतारः सन्तः [v]प्र [v]जायेमहि पुत्रपौत्रादिभिरुपेता भवेम ॥ जायेमहि । प्रार्थनायां लिङ् । श्यनि ' ज्ञाजनोर्जा ' इति जादेशः । अदुपदेशात् लसार्वधातुकानुदात्तत्वे श्यनो नित्त्वादाद्युदात्तत्वम् ॥

---

१. क्ष-न-स-' च ' नास्ति । २. क्ष-ट-ठ-' हविषा ' नास्ति । ३. स-आ । ४. क्ष-ट-ठ-स-अघं पापम् । ५. क्ष-ट-ठ-स-' अप ' नास्ति । ६. क्ष-ट-ठ-इयाजादेशः । ७. क्ष-ट-ठ-भवन्ति इति । ८. क्ष-स-' तु ' नास्ति । ९. क्ष-ट-ठ-स-छान्दसोऽण्प्रत्ययस्य लुक् । अत एव वृद्धयभावः; न-छान्दसोऽण्प्रत्ययस्य लोपः । आगमानुशासनस्यानित्यत्वात् वृद्धयभावः । १०. क्ष-ट-ठ-प्रायेण ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्र यद॒ग्नेः सह॑स्वतो वि॒श्वतो॑ यन्ति भा॒नवः॑ । अप॑ नः शोशुचद॒घम् ॥ ५ ॥

प्र । यत् । अ॒ग्नेः । सह॑स्वतः । वि॒श्वतः॑ । यन्ति॑ । भा॒नवः॑ । अप॑ । नः॒ । शोशुचत् । अ॒घम् ॥५॥

[v]सहस्वतः सहनवतः शत्रूनभिभवतः [v]अग्नेः [v]भानवः दीप्तयः [v]विश्वतः सर्वतः सर्वस्मादपि प्रदेशात् [v]प्र [v]यन्ति प्रकर्षेणोद्गच्छन्ति । [v]यत् यस्मादेवं तस्मात्तेनाग्नितेजसा अस्मदीयम्[1] [v]अघं नश्यतु॥ यन्ति । ' इणो यण् ' ( पा. सू. ६. ४. ८१ ) इति यणादेशः ॥

त्वं हि वि॑श्वतोमुख वि॒श्वतः॑ परि॒भूरसि॑ । अप॑ नः शोशुचद॒घम् ॥ ६ ॥

त्वम् । हि । वि॒श्व॒तः॒ऽमु॒ख॒ । वि॒श्वतः॑ । प॒रि॒ऽभूः । असि॑ । अप॑ । नः॒ । शोशुचत् । अ॒घम् ॥६॥

हे[2] अग्ने [v]त्वं [v]हि त्वं खलु विश्वतोमुखः सर्वतोज्वालः । तव मुखस्थानीयानां ज्वालानां न कुत्रापि प्रतिहतिरस्ति । अतो हे [v]विश्वतोमुख अग्ने [v]विश्वतः सर्वतः सर्वस्मादप्युपद्रवजातात् [v]परिभूरसि अस्माकं परिग्रहीता भव । रक्षको भवेत्यर्थः । अन्यत् समानम्[2] ॥

द्विषो॑ नो विश्वतोमु॒खाति॑ ना॒वेव॑ पारय । अप॑ नः शोशुचद॒घम् ॥ ७ ॥

द्विषः॑ । नः॒ । वि॒श्व॒तः॒ऽमु॒ख॒ । अति॑ । ना॒वाऽइ॑व । पा॒र॒य॒ । अप॑ । नः॒ । शोशुचत् । अ॒घम् ॥७॥

हे [v]विश्वतोमुख सर्वतोमुखाग्ने [v]नावेव नावा नदीमिव [v]द्विषः शत्रून् [v]नः अस्मान् [v]अति [v]पारय अतिक्रमय्य[3] शत्रुरहितं प्रदेशं प्रापय ॥ नावेव । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । पारय । ' पार तीर कर्मसमाप्तौ ' ॥

स नः॑ सिन्धु॑मिव ना॒वयाति॑ पर्षा स्व॒स्तये॑ । अप॑ नः शोशुचद॒घम् ॥ ८ ॥

सः । नः॒ । सिन्धु॑म्ऽइव । ना॒वया॑ । अति॑ । प॒र्ष॒ । स्व॒स्तये॑ । अप॑ । नः॒ । शोशुचत् । अ॒घम् ॥८॥

पूर्वोक्त एवार्थः पुनरपि दार्ढ्याय प्रार्थ्यते । हे अग्ने [v]सः त्वं [v]नः अस्मान् [v]नावया नावा [v]सिन्धुमिव नदीमिव [v]स्वस्तये क्षेमार्थम् [v]अति [v]पर्ष शत्रून् अतिक्रमय्य[4] पालय । शत्रुरहितं प्रदेशम्[5] अस्मान् प्रापयेत्यर्थः । त्वत्प्रसादात् [v]नः अस्माकम् [v]अघं पापं[6] च [v]अप [v]शोशुचत् अस्मत्तोऽपक्रम्यास्मच्छत्रुः शोकयुक्तो भवतु[6] ॥ नावया । ' आङ्याजयारां चोपसंख्यानम् ' ( पा. म. ७. १. ३९. १ ) इति तृतीयाया अयारादेशः । ' उपोत्तमं रिति ' ( पा. सू. ६. १. २१७ ) इति अकारस्य उदात्तत्वम् ।

---

१. क्ष-ट-ठ–अस्माकम् । २. क्ष-ट-ठ– ' हे अग्ने त्वं हि.....अन्यत्समानम् ' इत्यस्य स्थाने हे विश्वतोमुख सर्वतो व्याप्तज्वालाग्ने त्वं हि त्वमेव विश्वतः सर्वतः सर्वस्मादप्युपद्रवजातात् परिभूरसि अस्माकं परिग्रहीतासि भव रक्षको भवेत्यर्थः । अन्यत् समानम् । ३. क्ष–अतिक्रम्य । ४. क्ष-ट-ठ–अतिक्रम्य । ५. क्ष-स–देशम् । ६. क्ष-ट-ठ–पापमप शोशुचत् अस्मत्तोऽतिक्रम्य शोकयुक्ते ( क्ष–अन्यत्र शोकयुक्ते ) भवतु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पर्ष । ' पॄ पालनपूरणयोः ' । लोटि ' बहुलं छन्दसि ' इति शपः श्लोरभावः । ' सिब्बहुलं लेटि ' इति बहुलवचनात् सिप् । गुणः । ' ह्यचोऽतस्तिङः ' इति दीर्घत्वम् ॥ ॥ ५ ॥

'वैश्वानरस्य ' इति तृचं पञ्चमं सूक्तं कुत्सस्यार्षं त्रैष्टुभम् । वैश्वानरगुणकोऽग्निः[1] शुद्धाग्निर्वा देवता । तथा चानुक्रान्तम्–' वैश्वानरस्य तृचं वैश्वानरीयम् ' इति । व्यूढस्य चतुर्थेऽहन्याग्निमारुते इदं सूक्तं वैश्वानरीयनिविद्धानम् । ' व्यूढश्चेत् ' इति खण्डे सूत्रितम्–' वैश्वानरस्य सुमतौ क इं व्यक्ताः ' ( आश्व. श्रौ. ८. ८ ) इति ॥

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः ।
इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण ॥ १ ॥

वैश्वानरस्य । सुऽमतौ । स्याम । राजा । हि । कम् । भुवनानाम् । अभिऽश्रीः ।
इतः । जातः । विश्वम् । इदम् । वि । चष्टे । वैश्वानरः । यतते । सूर्येण ॥ १ ॥

[v]वैश्वानरस्य विश्वेषां नराणां लोकान्तरनेतृत्वेन[2] स्वामित्वेन वा संबन्धिनोऽग्नेः [v]सुमतौ शोभनायामनुग्रहात्मिकायां बुद्धौ [v]स्याम अनुग्राह्यत्वेन वर्तमाना भवेम । [v]हि [v]कम् इत्येतत् हिशब्दार्थे । स हि वैश्वानरः [v]अभिश्रीः अभिश्रयणीयः आभिमुख्येन सेवितव्यः[3] सन् [v]भुवनानां सर्वेषां भूतजातानां [v]राजा स्वामी भवति । यः[4] [v]वैश्वानरः अग्निः [v]इतः[4] अस्मादरणिद्वयात् जातमात्रः एव [v]इदं सर्वं जगत् [v]वि [v]चष्टे विशेषेण पश्यति प्रातरुद्यता [v]सूर्येण च [v]यतते संयतते संगच्छते । ' उद्यन्तं वावादित्यमग्निरनुसमारोहति ' ( तै. ब्रा. २. १. २. १० ) इति तैत्तिरीयकम् । यद्वा । पार्थिवस्याग्नेस्तेजांस्युद्गच्छन्ति सूर्यकिरणाश्चाधोमुखं प्रसरन्ति । तयोः संगमनं दृष्ट्वा ' वैश्वानरो यतते सूर्येण ' इति ऋषिर्ब्रूते । तथा च यास्कः–' अमुतोऽमुष्य रश्मयः प्रादुर्भवन्तीतोऽस्यार्चिषस्तयोर्भासोः संसंगं दृष्ट्वैवमवक्ष्यत् ' ( निरु. ७. २३ ) इति । एवंभूतस्य महानुभावस्य वैश्वानरस्य सुमतौ स्यामेति संबन्धः ॥ वैश्वानरस्य । विश्वेषां नराणां संबन्धी । ' नरे संज्ञायाम् ' ( पा. सू. ६. ३. १२९ ) इति पूर्वपदस्य दीर्घत्वम् । ' तस्येदम् ' इति अण् । सुमतौ । शोभना मतिः सुमतिः । ' तादौ च° ' इति गतेः प्रकृतिस्वरे प्राप्ते ' मन्क्तिन्° ' इत्यादिना उत्तरपदान्तोदात्तत्वम् । ननु तत्र ' कारकात् ' इत्यनुवृत्तेर्गतेरुत्तरस्य क्तिनो न प्राप्नोति । एवं तर्हि मतिर्मननम् । भावे क्तिन् । शोभनं मननं यस्यां बुद्धौ सा सुमतिः । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । चष्टे । ' चक्षिङ् व्यक्तायां वाचि ' । अयं पश्यतिकर्मा च । अदादित्वात् शपो लुक् । ' स्कोः संयोगाद्योः° ' इति कलोपः । यतते । ' यती प्रयत्ने ' ॥

चातुर्मास्यान्वारम्भणीया वैश्वानरपार्जन्या । तस्यां वैश्वानरस्य हविषः ' पृष्टो दिवि ' इति याज्या । ' चातुर्मास्यानि ' इति खण्डे सूत्रितं—' पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पर्जन्याय प्रगायत ' ( आश्व. श्रौ. २. १५ ) इति ॥

---

१. क्ष-ट-ठ–वैश्वानरगुणविशिष्टोऽग्निः । २. क्ष-ट-ठ–लोकानां वा नेतृत्वेन । ३. क्ष-ट-ठ–सेवनीयः । ४. क्ष-ट-ठ–वैश्वानर इतः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश ।
वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु नक्तम् ॥ २ ॥

पृष्टः । दिवि । पृष्टः । अग्निः । पृथिव्याम् । पृष्टः । विश्वाः । ओषधीः । आ । विवेश । वैश्वानरः । सहसा । पृष्टः । अग्निः । सः । नः । दिवा । सः । रिषः । पातु । नक्तम् ॥२॥

अयं वैश्वानरः vअग्निः vदिवि द्युलोके आदित्यात्मना vपृष्टः संस्पृष्टः यद्वा निषिक्तो निहितो वर्तते । तथा vपृथिव्यां भूमौ गार्हपत्यादिरूपेण vपृष्टः संस्पृष्टो निहितो वा । तथा vविश्वाः सर्वाः vओषधीः vपृष्टः संस्पृष्टः सः अग्निः vआ vविवेश पाकार्थमन्तः प्रविष्टवान् । अन्तःप्रविष्टेन पार्थिवेनाग्निना[1] हि[2] सर्वा ओषधयः पच्यन्ते। vसहसा परेषामसाधारणेन बलेन vपृष्टः संस्पृष्टः वैश्वानरः[3] vनः अस्मान् vदिवा अह्नि vरिषः हिंसतः शत्रोः vपातु रक्षतु । तथा vसः वैश्वानरः vनक्तं रात्रावप्यस्मान् हिंसकात् पातु ॥ पृष्टः । ' स्पृश संस्पर्शने ' । छान्दसः सकारलोपः । यद्वा । ' पृषु सेचने ' । निष्ठायां ' यस्य विभाषा ' इति इट्प्रतिषेधः । दिवि । ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम् । पृथिव्याम् । ' उदात्तयणः° ' इति विभक्तिरुदात्ता । रिषः । ' रिष हिंसायाम् ' । ' क्विप् च ' इति क्विप् । ' सावेकाचः° ' इति पञ्चम्या उदात्तत्वम् ॥

वैश्वानर तव तत्सत्यमस्त्वस्मान्रायो मघवानः सचन्ताम् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ३ ॥

वैश्वानर । तव । तत् । सत्यम् । अस्तु । अस्मान् । रायः । मघऽवानः । सचन्ताम् । तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥३॥

हे vवैश्वानर vतव vतत् त्वदीयं तत् अस्माभिः क्रियमाणं कर्म vसत्यमस्तु अवितथफलं भवतु । ततः vअस्मान् vमघवानः मघवन्तः[3] धनवन्तः vरायः धनवदतिप्रियाः[4] पुत्राः vसचन्तां सेवन्ताम् । एवं यदस्माभिः प्रार्थितं vनः अस्मदीयं vतत् vमित्रः अहरभिमानी देवः vवरुणः रात्र्यभिमानी vअदितिः अदीना देवमाता vसिन्धुः स्यन्दनशीलोदकाभिमानी देवः । उतशब्दः समुच्चये । एते सर्वे मित्रादयः vममहन्तां पूजयन्तां पालयन्तामित्यर्थः ॥ ॥ ६ ॥

' जातवेदसे ' इति एकर्चं षष्ठं सूक्तं मरीचिपुत्रस्य कश्यपस्यार्षं त्रैष्टुभम् । जातवेदोगुणकोऽग्निः[5] शुद्धाग्निर्वा देवता । तथा चानुक्रान्तम्–' जातवेदस एका जातवेदस्यमेतदादीन्येकभूयांसि सूक्तसहस्रमेतत्तु कश्यपार्षम् ' इति । अहर्गणेषु द्वितीयादिष्वहःस्वाग्निमारुते जातवेदस्यनिविद्धानात् पूर्वमेषा शंसनीया । सूत्रितं च–' जातवेदसे सुनवाम सोममित्याग्निमारुते जातवेदस्यानाम् ' ( आश्व. श्रौ. ७. १ ) इति ॥

---

१. क्ष-ट-ठ–हि पार्थिवाग्निना । २. क्ष-ट-ठ-स– स वैश्वानरः । ३. क्ष-ट-ठ-न-स–' मघवन्तः ' नास्ति । ४. क्ष-ट-ठ–धनदानप्रियाः । ५. क्ष-ट-ठ–जातवेदगुणविशिष्टोऽग्निः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ १ ॥

जातऽवेदसे । सुनवाम । सोमम् । अरातिऽयतः । नि । दहाति । वेदः ।
सः । नः । पर्षत् । अति । दुःऽगानि । विश्वा । नावाऽइव । सिन्धुम् । दुःऽइता । अति । अग्निः ॥१॥

vजातवेदसे जातानामुत्पत्तिमतां सर्वेषां वेदित्रे यद्वा जातैः सर्वैः प्राणिभिर्ज्ञायमानाय जातधनाय जातप्रज्ञाय वा अग्नये लतारूपं vसोमं vसुनवाम अभिषुणुयाम । जातवेदोगुणकमग्निं यष्टुं सोमाभिषवं करवामेत्यर्थः । सः अग्निः vअरातीयतः अरातिं शत्रुमिवास्मानाचरतः शत्रोः vवेदः धनं vनि vदहाति नितरां दहतु भस्मीकरोतु । अपि च vसः अग्निः vनः अस्मान् vविश्वा विश्वानि सर्वाणि vदुर्गाणि दुर्गमनानि भोक्तुमशक्यानि दुःखानि vअति vपर्षत् अतिपारयतु अतिक्रमय्य[1] दुःखरहितं[2] सुखं प्रापयतु । तत्र दृष्टान्तः । vनावेव vसिन्धुम् । यथा कश्चित् कर्णधारो ग्राहादिभिर्दुष्टसत्त्वैराकुलितां नदीं नावा तारयति तद्वत् । तथा vदुरिता दुरितानि दुःखहेतुभूतानि पापानि अस्मान् vअग्निः vअति पारयतु । दुःखनिमित्तात् पापादपि अस्मानुत्तारयत्वित्यर्थः । अत्र निरुक्तं–'जातवेदाः कस्मात् जातानि वेद जातानि वैनं विदुर्जाते जाते विद्यत इति वा जातवित्तो वा जातधनो वा जातविद्यो वा जातप्रज्ञो वा यत्तज्जातःपशूनविन्दतेति तज्जातवेदसो जातवेदस्त्वमिति हि ब्राह्मणम्' ( निरु. ७. १९ ) इत्यादि ॥ जातवेदसे । जातानि वेत्तीति जातवेदाः । ' गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं च ' इति वचनात् कारकपूर्वात् वेत्तेरसुन् पूर्वपदप्रकृतिस्वरत्वं च । अरातीयतः । न विद्यते रातिर्दानमस्मिन्नित्यरातिः शत्रुः । तमिव अस्मानाचरति । ' उपमानादाचारे ' ( पा. सू. ३. १. १० ) इति उपमानभूतात् कर्मणः क्यच् । क्यजन्तात् लटः शतृ । ' शतुरनुमः° ' इति ङसः उदात्तत्वम् । दहाति । ' दह भस्मीकरणे ' । लेटि आडागमः । विद्यते लभ्यते इति वेदः धनम् । ' विदृ लाभे ' । औणादिकः कर्मणि असुन् । पर्षत् । ' पॄ पालनपूरणयोः ' । अस्मात् अन्तर्भावितण्यर्थात् लेटि अडागमः । ' सिब्बहुलं लेटि ' इति सिप् । दुर्गाणि । दुःखेन गम्यते एष्विति ' सुदुरोरधिकरणे ' इति गमेः डः ॥ ॥ ७ ॥

' स यो वृषा ' इति एकोनविंशत्यृचं सप्तमं सूक्तम् । अत्रानुक्रम्यते–' स यो वृषैकोना वार्षागिरा ऋज्राश्वाम्बरीषसहदेवभयमानसुराधसः ' इति । वृषागिरो महाराजस्य पुत्रभूताः ऋज्राश्वादयः पञ्च राजर्षयः सह इदं सूक्तं ददृशुः । अतस्तेऽस्य[3] सूक्तस्य ऋषयः[3] । उक्तं ह्यार्षानुक्रमण्याम्–' सूक्तं स यो वृषेत्येतत् पञ्च वार्षागिरा विदुः । नियुक्ता[4] नामधेयैः स्वैरपि चैतत्त्यदित्यृचि ' इति । अनादेशपरिभाषया त्रिष्टुप् । इन्द्रो देवता । दशरात्रस्य षष्ठेऽहनि मरुत्वतीये इदं सूक्तम् । तथा च सूत्रितं–' यं त्वं रथमिन्द्र स यो वृषेन्द्र मरुत्व इति तिस्र इति मरुत्वतीयम् ' ( आश्व. श्रौ. ८. १ ) इति ॥

स यो वृषा वृष्ण्येभिः समोका महो दिवः पृथिव्याश्च सम्राट् ।
सतीनसत्वा हव्यो भरेषु मरुत्वान्नो भवत्विन्द्र ऊती ॥ १ ॥

सः । यः । वृषा । वृष्ण्येभिः । सम्ऽओकाः । महः । दिवः । पृथिव्याः । च । सम्ऽराट् ।
सतीनऽसत्वा । हव्यः । भरेषु । मरुत्वान् । नः । भवतु । इन्द्रः । ऊती ॥ १ ॥

---

१. क्ष-ट-ठ–अतिक्रम्य । २. ट-ठ–दुरितम् । ३. ट-ठ–' अतस्तेऽस्य सूक्तस्य ऋषयः ' नास्ति । ४. क्ष-ट-ठ–निरुक्ता ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ᵛयः इन्द्रः ᵛवृषा कामानां वर्षिता ᵛवृष्ण्येभिः वृष्णि भवैर्वीर्यैः ᵛसमोकाः सम्यक् समवेतः संगतः ᵛमहः महतः ᵛदिवः द्युलोकस्य ᵛपृथिव्याः प्रथिताया भूमेः ᵛच ᵛसम्राट् ईश्वरः ᵛसतीनसत्वा । सतीनम् इति उदकनाम । उदकस्य सत्वा सादयिता गमयिता ᵛभरेषु[1] संग्रामेषु ᵛहव्यः सर्वैः स्तोतृभिराह्वातव्यः एवंभूतः ᵛमरुत्वान् मरुद्भिर्युक्तः ᵛसः ᵛइन्द्रः ᵛनः अस्माकम् ᵛऊती ऊतये रक्षणाय ᵛभवतु ॥ वृष्ण्येभिः । वृषन्शब्दात् ' भवे छन्दसि ' इति यत् । ' अलोपोऽनः ' इति अकारलोपः । ' ये चाभावकर्मणोः ' इति प्रकृतिभावस्तु व्यत्ययेन न भवति । महः । ' मह पूजायाम् ' । क्विप् । यद्वा । महच्छब्दे अच्छब्दलोपः । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । सम्राट् । ' मो राजि समः क्वौ ' ( पा. सू. ८. ३. २५ ) इति राजतौ क्विबन्ते उत्तरपदे समो मकारस्य मकारादेशः । मकारस्य च मकारवचनमनुस्वारबाधनार्थम् । सतीनसत्वा । ' षद्लृ विशरणगत्यवसादनेषु ' । मेघेषु निषीदतीति सतीनं वृष्ट्युदकम् । औणादिकः ईनप्रत्ययस्तकारान्तादेशश्च । यद्वा । सती[2] माध्यमिका वाक् । सा इना ईश्वरा यस्य तत्सतीनम् । व्यत्ययेन पुंवद्भावाभावः । तत्सत्वा[3] । सदेः अन्तर्भावितण्यर्थात् ' प्र ईरसद्योस्तुट् च ' ( उ. सू. ४. ५५६ ) इति औणादिको वनिप् तुडागमश्च । मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् । मरुत्वान् । ' झयः ' इति मतुपो वत्वम् । ऊती । ' ऊतियूति° ' इत्यादिना क्तिनः उदात्तत्वम् । ' सुपां सुलुक्° ' इति चतुर्थ्याः पूर्वसवर्णदीर्घः ॥

**यस्यानाप्तः सूर्यस्येव यामो भरेभरे वृत्रहा शुष्मो अस्ति ।**
**वृषन्तमः सखिभिः स्वेभिरेवैर्मरुत्वान्नो भवत्विन्द्र ऊती ॥ २ ॥**

यस्य । अनाप्तः । सूर्यस्यऽइव । यामः । भरेऽभरे । वृत्रऽहा । शुष्मः । अस्ति ।
वृषन्ऽतमः । सखिऽभिः । स्वेभिः । एवैः । मरुत्वान् । नः । भवतु । इन्द्रः । ऊती ॥ २ ॥

ᵛयस्य इन्द्रस्य ᵛयामः गतिः ᵛअनाप्तः परैरप्राप्ता ᵛसूर्यस्येव । यथा सूर्यस्य गतिरन्यैर्न प्राप्तुं शक्यते तद्वत् । ᵛस्वेभिः आत्मीयैः ᵛएवैः गमनशीलैः ᵛसखिभिः मित्रभूतैर्मरुद्भिः सह ᵛवृषन्तमः अतिशयेन कामानां वर्षिता ᵛभरेभरे सर्वेषु संग्रामेषु ᵛवृत्रहा शत्रूणां हन्ता ᵛशुष्मः सर्वेषामसुराणां शोषकः एवंभूतो यः इन्द्रः ᵛअस्ति विद्यते सः ᵛमरुत्वान् ᵛइन्द्रः ᵛनः अस्माकं रक्षणाय ᵛभवतु ॥ यामः । ' या प्रापणे ' । ' अर्तिस्तुसु° ' इत्यादिना भावे मन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । शुष्मः । ' शुष शोषणे ' । ' अविसिविसिशुषिभ्यः कित् ' ( उ. सू. १. १४१ ) इति मन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । अस्ति । यद्वृत्तयोगादनिघातः । वृषन्तमः । वृषन्शब्दादुत्तरस्य तमपो ' नाद्यस्य ' ( पा. सू. ८. २. १७ ) इति नुट् । एवैः । ' इण् गतौ ' । ' इण्शीङ्भ्यां वन् ' ॥

**दिवो न यस्य रेतसो दुघानाः पन्थासो यन्ति शवसापरीताः ।**
**तरद्द्वेषाः सासहिः पौंस्येभिर्मरुत्वान्नो भवत्विन्द्र ऊती ॥ ३ ॥**

दिवः । न । यस्य । रेतसः । दुघानाः । पन्थासः । यन्ति । शवसा । अपरिऽइताः ।
तरत्ऽद्वेषाः । ससहिः । पौंस्येभिः । मरुत्वान् । नः । भवतु । इन्द्रः । ऊती ॥ ३ ॥

---

१. क्ष-ट-ठ–भरेषु हवेषु । २. क्ष-ट-ठ–सती नाम । ३. क्ष-ट-ठ–तस्य सत्वा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vयस्य इन्द्रस्य Vपन्थासः रश्मयः Vरेतसः वृष्टयुदकानि Vदुघानाः दुहन्तः प्रवर्षन्तः Vयन्ति निर्गच्छन्ति द्युलोकादितस्ततः प्रसरन्ति । तत्र दृष्टान्तः । Vदिवो Vन । यथा द्योतमानस्य सूर्यस्य किरणा वृष्टिं कुर्वन्तः नभःस्थलान्निर्गच्छन्ति तद्वत् । कीदृशा रश्मयः । Vशवसा बलेन सहिताः Vअपरीताः परैरनभिगताः[1] दुष्प्रापा इत्यर्थः । सोऽयम् इन्द्रः Vतरद्द्वेषाः द्वेषांसि शत्रूंस्तरन् जितशत्रुक इत्यर्थः । Vपौंस्येभिः बलैः[2] Vससहिः शत्रूणामभिभविता एवंभूतः Vमरुत्वान् Vइन्द्रः Vनः अस्माकं रक्षणाय Vभवतु ॥ रेतसः । रेत इति उदकनाम । रीयते गच्छतीति रेतः । ' री गतिरेषणयोः ' । ' खुरीभ्यां तुट् च ' ( उ. सू. ४. ६४१ ) इति असुन् तुडागमश्च । शसो व्यत्ययेन ङसादेशः । दुघानाः । ' दुह प्रपूरणे ' । कर्तरि लटः शानच् । अदादित्वात् शपो लुक् । व्यत्ययेन घत्वम् । वृषादेराकृतिगणत्वात् आद्युदात्तत्वम् । पन्थासः । पतन्तीति पन्थानो रश्मयः । ' पतेस्थ[3] च ' ( उ. सू. ४. ४५२ ) इति इनिप्रत्ययस्थकारान्तादेशश्च । जसि ' पथिमथ्यृभुक्षामात् ' इति व्यत्ययेन आत्वम् । ' आज्जसेरसुक् ' । यद्वा । पन्थान इत्यत्र वर्णव्यापत्त्या नकारस्य सकारः । ' पथिमथोः सर्वनामस्थाने ' इति आद्युदात्तत्वम् । ससहिः । ' षह अभिभवे ' । ' उत्सर्गश्छन्दसि ' इति वचनात् ' आदृगमहन° ' इति किप्रत्ययः । लिड्वद्भावात् द्विर्वचनम् ॥

सो अङ्गिरोभिरङ्गिरस्तमो भूद्वृषा वृषभिः सखिभिः सखा सन् ।
ऋग्मिभिर्ऋग्मी गातुभिर्ज्येष्ठो मरुत्वान्नो भवत्विन्द्र ऊती ॥ ४ ॥

सः । अङ्गिरःऽभिः । अङ्गिरःऽतमः । भूत् । वृषा । वृषऽभिः । सखिऽभिः । सखा । सन् ।
ऋग्मिऽभिः । ऋग्मी । गातुऽभिः । ज्येष्ठः । मरुत्वान् । नः । भवतु । इन्द्रः । ऊती ॥ ४ ॥

Vसः इन्द्रः Vअङ्गिरोभिः । अङ्गन्ति गच्छन्तीति अङ्गिरसो गन्तारः । तेभ्योऽपि Vअङ्गिरस्तमः Vभूत् अतिशयेन गन्ता भवति । Vवृषभिः Vवृषा वर्षितृभ्योऽप्यतिशयेन वर्षिता Vसखिभिः समानख्यानेभ्यो मित्रभूतेभ्योऽपि Vसखा अतिशयेन हितकारी एवंभूतः Vसन् Vऋग्मिभिः अर्चनीयेभ्योऽपि Vऋग्मी अर्चनीयो भवति । Vगातुभिः गातव्येभ्यः स्तोतव्येभ्योऽपि Vज्येष्ठः अतिशयेन स्तोतव्यः एवंगुणविशिष्टः Vमरुत्वान् Vइन्द्रः रक्षणाय Vभवतु ॥ अङ्गिरोभिः । ' अगि रगि लगि गत्यर्थाः ' । अङ्गिरा अप्सराः ( उ. सू. ४. ६७५-६७६ ) इति औणादिकः असुन्प्रत्ययो निपात्यते । इदमादिषु सर्वत्र पञ्चम्यर्थे तृतीया । ऋग्मिभिः । ' ऋच स्तुतौ ' । संपदादिलक्षणो भावे क्विप् । मत्वर्थीयो मिनिः । पदत्वात् कुत्वं जश्त्वं च । गातुभिः । ' गा स्तुतौ ' । ' कमिमनिजनि° ' इत्यादिना कर्मणि तुप्रत्ययः ॥

स सूनुभिर्न रुद्रेभिर्ऋभ्वा नृषाह्ये सासह्वाँ अमित्रान् ।
सनीळेभिः श्रवस्यानि तूर्वन्मरुत्वान्नो भवत्विन्द्र ऊती ॥ ५ ॥

सः । सूनुऽभिः । न । रुद्रेभिः । ऋभ्वा । नृऽसह्ये । ससह्वान् । अमित्रान् ।
सऽनीळेभिः । श्रवस्यानि । तूर्वन् । मरुत्वान् । नः । भवतु । इन्द्रः । ऊती ॥ ५ ॥

---

१. क्ष-ट-ठ–परैरनभिभूताः । २. क्ष-ट-ठ–बलैः सहितः । ३. क्ष-न–पतस्थ ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ᵛसूनुभिर्न पुत्रैरिव ᵛरुद्रेभिः रुद्रपुत्रैर्मरुद्भिर्युक्तः ᵛऋभ्वा महान् एवंभूतः ᵛसः इन्द्रः ᵛनृषाह्ये नृभिः पुरुषैः सोढव्ये संग्रामे ᵛअमित्रान् शत्रून् ᵛससह्वान् अभिभूतवान्। अपि च ᵛसनीळेभिः समाननिलयैर्मरुद्भिः सह ᵛश्रवस्यानि । श्रव इत्यन्ननाम। तद्धेतुभूतान्युदकानि ᵛतूर्वन् मेघात् प्रच्यावयन् ᵛमरुत्वान् ᵛइन्द्रः अस्माकं रक्षणाय ᵛभवतु ॥ नृषाह्ये। ' षह मर्षणे '। ' शकिसहोश्च ' ( पा. सू. ३. १. ९९ ) इति कर्मणि यत्। ' अन्येषामपि दृश्यते ' इति संहितायां धात्वकारस्य दीर्घत्वम्। ' यतोऽनावः ' इत्याद्युदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वम्। ससह्वान्। ' षह अभिभवे '। लिटः क्वसुः। अभ्यासदीर्घत्वं छान्दसम्। अमित्रान् । मित्राणि एषु न सन्तीति अमित्राः। ' नञो जरमरमित्रमृताः ' इत्युत्तरपदाद्युदात्तत्वम्। सनीळेभिः। समानं नीळं येषां ते सनीळाः। ' समानस्य च्छन्दसी ' इति सभावः ॥ ॥ ८ ॥

स मन्युमीः समदनस्य कर्तास्माकेभिर्नृभिः सूर्यं सनत् ।
अस्मिन्नहन्त्सत्पतिः पुरुहूतो मरुत्वान्नो भवत्विन्द्र ऊती ॥ ६ ॥

सः। मन्युऽमीः। सऽमदनस्य। कर्ता। अस्माकेभिः। नृऽभिः। सूर्यम्। सनत्।
अस्मिन्। अहन्। सत्ऽपतिः। पुरुऽहूतः। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती ॥६॥

शत्रुभिरपहृतासु गोषु तैः सह युद्धार्थं विनिर्गताः[1] ऋत्राश्वादयोऽनेन सूक्तेनेन्द्रमस्तुवन्। ᵛसः इन्द्रः ᵛमन्युमीः मन्योः कोपस्य निर्माता । यद्वा । अभिमन्यमानस्य शत्रोर्हिंसकः। अपि च ᵛसमदनस्य संग्रामस्य ᵛकर्ता ᵛसत्पतिः सतां पालयिता ᵛपुरुहूतः बहुभिर्यजमानैराहूतः एवंगुणविशिष्टः सः ᵛअस्मिन् ᵛअहन् अस्मिन् दिवसे ᵛअस्माकेभिः आस्माकैः[2] अस्मदीयैः ᵛनृभिः पुरुषैः ᵛसूर्यं सूर्यप्रकाशं ᵛसनत् संभक्तं करोतु। शत्रुपुरुषैस्तु दृष्टिनिरोधकमन्धकारं संयोजयतु। स च ᵛमरुत्वान् ᵛइन्द्रः अस्माकं रक्षणाय ᵛभवतु ॥ मन्युमीः। मन्युं मिनातीति मन्युमीः। ' मीञ् हिंसायाम् '। क्विप्। समदनस्य। सह माद्यन्त्यस्मिन्निति समदनः संग्रामः। ' मदी हर्षे '। अधिकरणे ल्युट्। ' सहस्य सः संज्ञायाम् ' ( पा. सू. ६. ३. ७८ ) इति सभावः। अस्माकेभिः। ' तस्मिन्नणि च युष्माकास्माकौ ' इति अणि अस्मच्छब्दस्य अस्माकादेशः। संज्ञापूर्वकस्य विधेरनित्यत्वात् वृद्ध्यभावः। ' बहुलं छन्दसि ' इति भिस ऐसभावः। स्वरस्तु ' प्रास्माकासश्च सूरयः ' ( ऋ. सं. १. ९७. ३ ) इत्यत्रोक्तः। सनत्। ' वन षण संभक्तौ '। लेटि अडागमः। अहन्। ' सुपां सुलुक्° ' इति सप्तम्या लुक्। सत्पतिः। ' पत्यावैश्वर्ये ' इति पूर्वपदप्रकृतिस्वरत्वम् ॥

तमूतयो रणयञ्छूरसातौ तं क्षेमस्य क्षितयः कृण्वत त्राम् ।
स विश्वस्य करुणस्येश एको मरुत्वान्नो भवत्विन्द्र ऊती ॥ ७ ॥

तम्। ऊतयः। रणयन्। शूरऽसातौ। तम्। क्षेमस्य। क्षितयः। कृण्वत। त्राम्।
सः। विश्वस्य। करुणस्य। ईशे। एकः। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती ॥ ७ ॥

---

१. स-निर्गच्छन्तः। २. क्ष-ट-ठ-' आस्माकैः ' नास्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vतम् इन्द्रं Vशूरसातौ शूरैर्वीरपुरुषैः संभजनीये संग्रामे Vऊतयः गन्तारो मरुतः Vरणयन् रमयन्ति। यद्वा। 'प्रहर भगवो जहि वीरयस्व' इत्येवंरूपं शब्दमिन्द्रमुद्दिश्य कुर्वन्ति। अपि च Vक्षितयः मनुष्याः Vतम् इन्द्रं Vक्षेमस्य रक्षणीयस्य[1] सर्वस्य धनस्य Vत्रां त्रातारं रक्षितारं Vकृण्वत कुर्वन्ति। देवतान्तरादस्य कोऽतिशयः इति चेत् उच्यते। Vसः इन्द्रः Vविश्वस्य सर्वस्य Vकरुणस्य अभिमतफलनिष्पादनरूपस्य कर्मणः Vएकः असहाय एव Vईशे ईष्टे। अन्यत् पूर्ववत्॥ ऊतयः। अवतेर्गत्यर्थात् 'कृत्यल्युटो बहुलम्' इति कर्तरि क्तिन्। 'तितुत्र०' इति इट्प्रतिषेधः। 'ज्वरत्वर०' इत्यादिना वकारस्योपधायाश्च ऊठ्। 'ऊतियूति०' इत्यादिना क्तिन उदात्तत्वम्। यद्वा। कर्तरि क्तिच्। रणयन्। रमतेर्हेतुमण्णिजन्तात् वर्तमाने छान्दसो लङ्। अन्त्यविकारश्छान्दसः। यद्वा। रण शब्दार्थः। अस्मात् णिजन्तात् पूर्ववत् लङ्। त्राम्। 'त्रैङ् पालने'। त्रायते इति त्राः। 'क्विप् च' इति चशब्देन दृशिग्रहणानुकर्षणान्निरुपपदादपि क्विप्। करुणस्य। 'डुकृञ् करणे'। 'कृवृतृदारिभ्य उनन्' (उ. सू. ३. ३३३) इति भावे उनन्। व्यत्ययेन प्रत्ययाद्युदात्तत्वम्। ईशे। 'ईश ऐश्वर्ये'। 'लोपस्त आत्मनेपदेषु' इति तलोपः॥

तमप्सन्त शवस उत्सवेषु नरो नरमवसे तं धनाय।
सो अन्धे चित्तमसि ज्योतिर्विदन्मरुत्वान्नो भवत्विन्द्र ऊती ॥ ८ ॥

तम्। अप्सन्त। शवसः। उत्ऽसवेषु। नरः। नरम्। अवसे। तम्। धनाय।
सः। अन्धे। चित्। तमसि। ज्योतिः। विदत्। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती ॥८॥

Vनरः नेतारः स्तोतारः Vशवसः बलस्य संबन्धिषु Vउत्सवेषु संग्रामेषु Vनरं जयस्य नेतारं Vतम् इन्द्रम् Vअप्सन्त आप्नुवन्ति। किमर्थम्। Vअवसे अन्नार्थं[2] रक्षणार्थं[2] वा। तथा Vधनाय धनार्थं च Vतम् इन्द्रं प्राप्नुवन्ति। यस्मात् Vसः इन्द्रः Vतमसि दृष्टिप्रतिबन्धके Vअन्धे Vचित् आध्यानरहिते चित्तव्यामोहकरेऽपि संग्रामे Vज्योतिः विजयलक्षणं प्रकाशं Vविदत् लम्भयति। तस्मात् तमेव प्राप्नुवन्तीत्यर्थः। अन्यत् समानम्॥ अप्सन्त। 'आप्लृ व्याप्तौ'। लङि व्यत्ययेन आत्मनेपदम्। व्यत्ययेन क्सप्रत्ययः। व्यत्ययेन धातोर्हस्वत्वम्। विदत्। 'विद्लृ लाभे'। 'छन्दसि लुङ्लङ्लिटः' इति वर्तमाने छान्दसो लुङ्। लदित्त्वात् च्लेः अङादेशः। 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः॥

स सव्येन यमति व्राधतश्चित्स दक्षिणे संगृभीता कृतानि।
स कीरिणा चित्सनिता धनानि मरुत्वान्नो भवत्विन्द्र ऊती ॥ ९ ॥

सः। सव्येन। यमति। व्राधतः। चित्। सः। दक्षिणे। सम्ऽगृभीता। कृतानि।
सः। कीरिणा। चित्। सनिता। धनानि। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती ॥९॥

---

१. च-छ-त-द-ध-न-फ-श–रमणीयस्य। २. क्ष-ट-ठ–अन्नाय रक्षणाय।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ᵛसः इन्द्रः ᵛसव्येन वामहस्तेन एकहस्तेन[1] ᵛबाधतश्चित् हिंसतः[2] महतः[3] शत्रूनपि ᵛयमति नियमयति । तथा ᵛसः इन्द्रः ᵛदक्षिणे दक्षिणपार्श्वस्थेन[4] हस्तेनैकेन[4] यजमानैः ᵛकृतानि हवींषि ᵛसंगृभीता[5] संगृह्णाति । अपि च ᵛसः इन्द्रः ᵛकीरिणा ᵛचित् कीर्तयित्रा स्तोत्रा च स्तुतः सन् ᵛधनानि ᵛसनिता प्रदानशीलो भवति । हविष्प्रदातृणामिव स्तोतृणामपि धनं प्रयच्छतीत्यर्थः । शिष्टं स्पष्टम् ॥ यमति । ' यम उपरमे ' । णिचि अमन्तत्वात् मित्त्वे ' मितां ह्रस्वः ' इति ह्रस्वत्वम् । ' छन्दस्युभयथा ' इति शप आर्धधातुकत्वात् ' णेरनिटि ' इति णिलोपः । बाधतः । ' बृधु वृद्धौ ' । अस्मात् अतिप्रत्ययः औणादिकः आमागमश्च । वृषादित्वादाद्युदात्तत्वम् । संगृभीता । ' ग्रह उपादाने ' । लिङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । ' लिङः सलोपः° ' इति सलोपः । ग्रहिज्यादिना संप्रसारणम् । ' ह्मग्रहोर्भः° ' इति भत्वम् । ' व्यचोऽतस्तिङः ' इति दीर्घः । सनिता । ' षणु दाने ' । ताच्छीलिकः तृन् । धनानि । ' न लोकाव्यय° ' इति षष्ठीप्रतिषेधः ॥

स ग्रामेभिः सनिता स रथेभिर्विदे विश्वाभिः कृष्टिभिर्नव्यः ।
स पौंस्येभिरभिभूरशस्तीर्मरुत्वान्नो भवत्विन्द्र ऊती ॥ १० ॥

सः । ग्रामेभिः । सनिता । सः । रथेभिः । विदे । विश्वाभिः । कृष्टिऽभिः । नु । अद्य ।
सः । पौंस्येभिः । अभिऽभूः । अशस्तीः । मरुत्वान् । नः । भवतु । इन्द्रः । ऊती ॥१०॥

ᵛसः इन्द्रः ᵛग्रामेभिः मरुत्संघैः सह ᵛसनिता फलानां प्रदाता भवति । ᵛसः च ᵛअद्य अस्मिन्नहनि ᵛनु क्षिप्रं ᵛविश्वाभिः ᵛकृष्टिभिः सर्वैर्मनुष्यैः ᵛरथेभिः इन्द्रसंबन्धिभिः रथैः करणभूतैः ᵛविदे विज्ञायते । अपि च ᵛसः इन्द्रः ᵛपौंस्येभिः स्वकीयैर्बलैः ᵛअशस्तीः अशंसनीयान् शत्रून् ᵛअभिभूः अभिभवन् वर्तते । ᵛमरुत्वान् सः ᵛइन्द्रः ᵛनः अस्माकं रक्षणाय ᵛभवतु ॥ ग्रामेभिः । ' बहुलं छन्दसि ' इति भिस ऐसभावः । ' ग्रामादीनां च ' ( फि. सू. ३८ ) इत्याद्युदात्तत्वम् । विदे । ' विद ज्ञाने ' । कर्मणि लट् । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । ' लोपस्त आत्मनेपदेषु ' इति तलोपः ॥ ॥ ९ ॥

स जामिभिर्यत्समजाति मीळ्हेऽजामिभिर्वा पुरुहूत एवैः ।
अपां तोकस्य तनयस्य जेषे मरुत्वान्नो भवत्विन्द्र ऊती ॥ ११ ॥

सः । जामिऽभिः । यत् । सम्ऽअजाति । मीळ्हे । अजामिऽभिः । वा । पुरुऽहूतः । एवैः ।
अपाम् । तोकस्य । तनयस्य । जेषे । मरुत्वान् । नः । भवतु । इन्द्रः । ऊती ॥ ११ ॥

ᵛपुरुहूतः बहुभिर्यजमानैराहूतः ᵛसः इन्द्रः ᵛमीळ्हे संग्रामे । मीळ्हम् इति धननाम । तद्धेतुत्वात् संग्रामोऽपि मीळ्हशब्देनोच्यते । ᵛजामिभिः बन्धुभिः ᵛअजामिभिर्वा बान्धवरहितैर्वा ᵛएवैः

---

१. क्ष-ट-ठ-एकेन । २. न-' हिंसतः ' नास्ति । ३. क्ष-ट-ठ-न ' महतः ' नास्ति । ४. क्ष-ट-ठ-स- दक्षिणपार्श्वस्थे हस्ते । ५. च-न-फ-श-संगृभीता संगृहीता ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

युद्धार्थं मरुद्भिः[1] सह Vयत् यदा Vसमजाति संगच्छते। तेषाम्[2] उभयविधानाम् Vअपाम् इन्द्रं प्राप्नुवतां पुरुषाणां Vतोकस्य पुत्रस्य Vतनयस्य तत्पुत्रस्य च Vजेषे जयप्राप्तये सः Vइन्द्रः भवति। किमु[3] वक्तव्यम्[3] अस्माकं स्तोतृतमानां जयो भवतीति। अन्यत् समानम्। समजाति। 'अज गतिक्षेपणयोः'। लेटि आडागमः। जेषे। 'जि जये'। औणादिकः सप्रत्ययः। चतुर्थ्यर्थे सप्तमी। यद्वा। 'जेषृ णेषृ प्रेषृ गतौ'। 'क्विप् च' इति क्विप्। 'सावेकाचः०' इति विभक्तेरुदात्तत्वम्॥

स वज्रभृद्दस्युहा भीम उग्रः सहस्रचेताः शतनीथ ऋभ्वा।
चम्रीषो न शवसा पाञ्चजन्यो मरुत्वान्नो भवत्विन्द्र ऊती॥ १२॥

सः। वज्रऽभृत्। दस्युऽहा। भीमः। उग्रः। सहस्रऽचेताः। शतऽनीथः। ऋभ्वा।
चम्रीषः। न। शवसा। पाञ्चऽजन्यः। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती॥ १२॥

Vसः इन्द्रः Vवज्रभृत् अन्यैर्धर्तुमशक्यस्य वज्रस्य भर्ता Vदस्युहा दस्यूनामुपक्षपयितृणामसुराणां हन्ता Vभीमः सर्वेषां भयहेतुः Vउग्रः उद्गूर्णतेजाः Vसहस्रचेताः बहुविधज्ञानः सर्वज्ञ इत्यर्थः। Vशतनीथः बहुस्तुतिर्बहुविधप्रापणो वा Vऋभ्वा उरु भासमानो महान् वा Vचम्रीषो Vन चम्वां चमसे रसात्मनावस्थितः सोम इव Vशवसा बलेन Vपाञ्चजन्यः। गन्धर्वा अप्सरसो देवा असुरा रक्षांसि पञ्च जनाः। निषादपञ्चमाश्चत्वारो वर्णा वा। तेषु रक्षकत्वेन भवः। एवंभूतः सः[4] Vमरुत्वान् Vइन्द्रः[4] Vनः अस्माकं रक्षणाय Vभवतु॥ दस्युहा। 'बहुलं छन्दसि' इति हन्तेः क्विप्। भीमः। 'जिभी भये'। 'भीमादयोऽपादाने' (पा. सू. ३. ४. ७४) इति अपादाने 'भियः घुग्वा' (उ. सू. १. १४५) इति मक्। शतनीथः। 'णीञ् प्रापणे'। 'हनिकुषिनीरमिकाशिभ्यः क्थन्' (उ. सू. २. १५९) इति क्थन्प्रत्ययः। चम्रीषः। 'इष गतौ'। चम्वामिष्यति गच्छतीति चम्रीषः। इगुपधलक्षणः कप्रत्ययः। वर्णव्यापत्त्या रेफो दीर्घश्च। यद्वा चमेरौणादिक ईषन्प्रत्ययः। पूर्ववत् रेफः। पाञ्चजन्यः। भवार्थे 'बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यम्' (का. ४. ३. ५८. १) इति ञ्यप्रत्ययः। ञित्त्वात् आद्युदात्तत्वम्॥

तस्य वज्रः क्रन्दति स्मत्स्वर्षा दिवो न त्वेषो रवथः शिमीवान्।
तं सचन्ते सनयस्तं धनानि मरुत्वान्नो भवत्विन्द्र ऊती॥ १३॥

तस्य। वज्रः। क्रन्दति। स्मत्। स्वःऽसाः। दिवः। न। त्वेषः। रवथः। शिमीऽवान्।
तम्। सचन्ते। सनयः। तम्। धनानि। मरुत्वान्। नः। भवतु। इन्द्रः। ऊती॥ १३॥

Vतस्य इन्द्रस्य Vवज्रः कुलिशः Vस्मत् भृशं Vक्रन्दति शत्रूनाक्रन्दयति रोदयतीत्यर्थः। य इन्द्रः Vस्वर्षाः शोभनस्योदकस्य दाता Vदिवो Vन दिवः संबन्धी सूर्य इव Vत्वेषः दीप्तः Vरवथः शब्दस्य गर्जनलक्षणस्य कर्ता Vशिमीवान्। शिमी इति कर्मनाम। लोकानुग्राहकेण कर्मणा युक्तः

---

१. क्ष-ट-ठ–गच्छद्भिः। २. क्ष-ट-ठ–तदा एषाम्; स–तदा तेषाम्। ३. क्ष–किमुच्यते। ४. क्ष-ट-ठ–इन्द्रो मरुत्वान्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ᵛतम् इन्द्रं ᵛसनयः धनस्य दानानि ᵛसचन्ते सेवन्ते । तथा ᵛतं ᵛधनानि च सेवन्ते । सः ᵛमरुत्वान् ᵛइन्द्रः ᵛनः अस्माकं रक्षणाय ᵛभवतु ॥ क्रन्दति । ' कदि क्रदि क्लदि आह्वाने रोदने च ' । ' छन्दस्युभयथा ' इति शप आर्धधातुकत्वात् 'णेरनिटि ' इति णिलोपः । स्वर्षाः । सुपूर्वात् अर्तेः विच् । सुष्ठु अर्ति[1] गच्छतीति स्वरुदकम् । तत्सनोतीति स्वर्षाः । ' षणु दाने ' । ' जनसनखनक्रमगमो विट् ' । ' विड्वनोरनुनासिकस्यात् ' इति आत्वम् । ' सनोतेरनः ' ( पा. सू. ८. ३. १०८ ) इति षत्वम् । त्वेषः । ' त्विष दीप्तौ ' । पचाद्यच् । रवथः । ' रु शब्दे ' । ' शीङ्शपिरुगमिवञ्चिजीविप्राणिभ्योऽथः ' ( उ. सू. ३. ३९३ ) इति अथप्रत्ययः । गुणावादेशौ । सनयः । सनोतेर्भावे औणादिक इप्रत्ययः ॥

यस्याज॑स्रं॒ शव॑सा॒ मान॑मु॒क्थं प॑रिभु॒जद्रोद॑सी वि॒श्वतः॑ सीम् ।
स पा॑रिष॒त्क्रतु॑भिर्मन्दसा॒नो म॒रुत्वा॑न्नो भव॒त्विन्द्र॑ ऊ॒ती ॥ १४ ॥

यस्य॑ । अज॑स्रम् । शव॑सा । मान॑म् । उ॒क्थम् । प॒रि॒ऽभु॒जत् । रोद॑सी॒ इति॑ । वि॒श्वतः॑ । सी॒म् ।
सः । पा॒रि॒ष॒त् । क्रतु॑ऽभिः । म॒न्द॒सा॒नः । म॒रुत्वा॑न् । नः॒ । भ॒व॒तु॒ । इन्द्रः॑ । ऊ॒ती ॥ १४ ॥

ᵛयस्य इन्द्रस्य ᵛउक्थं प्रशस्यं ᵛशवसा ᵛमानं बलेन सर्वस्य परिच्छेदकं सर्वेषां बलस्योपमानभूतं वा ᵛरोदसी द्यावापृथिव्यौ ᵛविश्वतः ᵛसीं सर्वतः ᵛअजस्रम् अनवरतं ᵛपरिभुजत् परितः सर्वतो भुनक्ति पालयति ᵛसः इन्द्रः ᵛक्रतुभिः अस्माभिः कृतैर्यागैः ᵛमन्दसानः मोदमानः सन् ᵛपारिषत् अस्मान् दुरितात् पारयतु ॥ उक्थम् । ' वच परिभाषणे ' । ' पातॄतुदिवचि° ' इत्यादिना कर्मणि थक् । ' वचिस्वपि° ' इत्यादिना संप्रसारणम् । परिभुजत् । ' भुज पालनाभ्यवहारयोः ' । लेटि अडागमः । व्यत्ययेन शः । पारिषत् । ' पार तीर कर्मसमाप्तौ ' । लेटि अडागमः । ' सिब्बहुलं लेटि ' इति सिप् । तस्य आर्धधातुकत्वात् इट् । व्यत्ययेन णिलोपः । मन्दसानः । 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु' । ' ऋञ्जिवृधिमन्दिसहिभ्यः कित् ' ( उ. सू. २. २४४ ) इति असानच्प्रत्ययः ॥

न यस्य॑ दे॒वा दे॒वता॒ न मर्ता॒ आप॑श्च॒न शव॑सो॒ अन्त॑मा॒पुः ।
स प्र॒रिक्वा॒ त्वक्ष॑सा॒ क्ष्मो दि॒वश्च॑ म॒रुत्वा॑न्नो भव॒त्विन्द्र॑ ऊ॒ती ॥ १५ ॥

न । यस्य॑ । दे॒वाः । दे॒वता॑ । न । मर्ताः॑ । आपः॑ । च॒न । शव॑सः । अन्त॑म् । आ॒पुः ।
सः । प्र॒ऽरिक्वा॑ । त्वक्ष॑सा । क्ष्मः । दि॒वः । च॒ । म॒रुत्वा॑न् । नः॒ । भ॒व॒तु॒ । इन्द्रः॑ । ऊ॒ती ॥ १५ ॥

ᵛदेवता देवस्य दानादिगुणयुक्तस्य ᵛयस्य इन्द्रस्य ᵛशवसः बलस्य ᵛअन्तम् अवसानं ᵛदेवाः वस्वाद्या देवगणाः ᵛन ᵛआपुः न आनशिरे तथा ᵛमर्ताः मनुष्याः ᵛआपश्चन आपोऽपि ᵛन प्रापुः । ᵛसः तादृश इन्द्रः ᵛत्वक्षसा शत्रूणां तनूकर्त्रा आत्मीयेन बलेन ᵛक्ष्मः पृथिव्याः ᵛदिवश्च स्वर्गस्य च ᵛप्ररिक्वा प्रकर्षेण रेचको भवति । लोकद्वयादप्यस्य बलमतिरिच्यते इत्यर्थः । मरुद्भिर्युक्तः सः ᵛइन्द्रः

---

१ क्ष-ट-ठ–ऋच्छति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vनः अस्माकम् vऊती ऊतये रक्षणाय vभवतु ॥ देवता । देव एव देवता । ' देवात्तल् ' इति स्वार्थे तल् । ' सुपां सुलुक्° ' इति षष्ठ्या लुक् । मर्ताः । ' मृङ् प्राणत्यागे ' । ' असिहसि° ' इत्यादिना तन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । प्ररिक्वा । ' रिचिर् विरेचने ' । ' अन्येभ्योऽपि दृश्यन्ते ' इति क्वनिप् । अन्त्यविकारश्छान्दसः । त्वक्षसा । ' तक्षू त्वक्षू तनूकरणे ' । असुन् । नित्त्वादाद्युदात्तत्वम् । क्षमः । क्ष्मा इति पृथिवीनाम । ' आतो धातोः ' इत्यत्र ' आतः ' इति योगविभागात् इष्टसिद्धिः इत्यभिधानात्[1] ङसि भसंज्ञायामाकारलोपः । यद्वा । ' क्ष्मायी विधूनने ' । अस्मात् ' क्विप् च ' इति क्विप् । वेरपृक्तलोपात् पूर्वं वलि लोपः । अन्यत् समानम् । उदात्तनिवृत्तिस्वरेण विभक्तेः उदात्तत्वम् ॥ ॥ १० ॥

रोहिच्छ्यावा सुमदंशुर्ललामीर्घुक्षा राय ऋज्राश्वस्य ।
वृषण्वन्तं बिभ्रती धूर्षु रथं मन्द्रा चिकेत नाहुषीषु विक्षु ॥ १६ ॥

रोहित् । श्यावा । सुमत्ऽअंशुः । ललामीः । घुक्षा । राये । ऋज्रऽअश्वस्य ।
वृषण्ऽवन्तम् । बिभ्रती । धूःऽसु । रथम् । मन्द्रा । चिकेत । नाहुषीषु । विक्षु ॥ १६ ॥

vरोहित् रोहितवर्णा[2] vश्यावा श्यामवर्णा । उभयोः पार्श्वयोरुभयविधवर्णयुक्तेत्यर्थः । vसुमदंशुः सुमत् स्वतः[3] प्रांशुः[4] । उक्तं च यास्केन–' सुमत् स्वयमित्यर्थः ' ( निरु. ६. २२ ) इति । अतिदीर्घावयवा vललामीः पुण्ड्रवती अश्वभूषणयुक्ता वा vघुक्षा दिवि द्युलोके कृतनिवासा vऋज्राश्वस्य एतत्संज्ञस्य[5] राजर्षेः vराये धनार्थं vवृषण्वन्तं वृष्णा सेक्त्रा इन्द्रेण युक्तं vरथं vधूर्षु युगसंबन्धिषु वहनप्रदेशेषु vबिभ्रती वहन्ती vमन्द्रा सर्वेषाम् आह्लादकरी[6] अश्वपङ्क्तिः vनाहुषीषु। नहुषा मनुष्याः। तत्संबन्धिनीषु vविक्षु सेनालक्षणासु प्रजासु vचिकेत ज्ञायते । ईदृश्याश्वपङ्क्त्या युक्त इन्द्रः संग्रामेष्वनुग्राहकतया प्रादुर्भवतीत्यर्थः ॥ ललामीः । ललामशब्दात् ' छन्दसीवनिपौ° ' ( पा. सू. ५. २. १०९. २ ) इति मत्वर्थीय ईकारः । अङ्यन्तत्वात् सुलोपाभावः । घुक्षा । ' क्षि निवासगत्योः ' । औणादिको डप्रत्ययः । ततः टाप् । ऋज्राश्वस्य । ' ऋज गतिस्थानार्जनोपार्जनेषु ' । ' ऋज्रेन्द्र° ' इत्यादिना रक्प्रत्ययान्तो निपातितः । ऋज्रा गतिमन्तोऽश्वा यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । वृषण्वन्तम् । ' अनो नुट् ' ( पा. सू. ८. २. १६ ) इति मतुपो नुट् । चिकेत । ' कित ज्ञाने ' । ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने कर्मणि लिट् । व्यत्ययेन तिप् ॥

एतत्त्यत्ते इन्द्र वृष्ण उक्थं वार्षागिरा अभि गृणन्ति राधः ।
ऋज्राश्वः प्रष्टिभिरम्बरीषः सहदेवो भयमानः सुराधाः ॥ १७ ॥

एतत् । त्यत् । ते । इन्द्र । वृष्णे । उक्थम् । वार्षागिराः । अभि । गृणन्ति । राधः ।
ऋज्रऽअश्वः । प्रष्टिऽभिः । अम्बरीषः । सहऽदेवः । भयमानः । सुऽराधाः ॥ १७ ॥

---

१. क्ष-ठ–इति वचनात् । २. क्ष-ट-ठ–लोहितवर्णा । ३. क्ष-स–स्वत एव । ४. स–अंशुः । ५. क्ष-स–एतत्संज्ञकस्य । ६. स–मदकारी ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]इन्द्र [v]वृष्णे कामानां वर्षितुः [v]ते तव [v]स्यत् तत् [v]एत [v]उक्थं स्तोत्रं [v]राधः संराधकं स्वप्रीतिहेतु [v]वार्षागिराः वृषागिरो राज्ञः पुत्रा ऋज्राश्वादयः [v]अभि [v]गृणन्ति आभिमुख्येन वदन्ति। वार्षागिरा इत्येतत् विवृणोति। [v]ऋज्राश्वः एतत्संज्ञो राजर्षिः [v]प्रष्टिभिः पार्श्वस्थैः अन्यैर्ऋषिभिः[2] सहेन्द्रमस्तौत्। के ते पार्श्वस्थाः। अम्बरीषादयश्चत्वारो राजर्षयः॥ वार्षागिराः। 'तस्यापत्यम्' (पा. सू. ४. १. ९२) इति अण्प्रत्ययः। गृणन्ति। 'गॄ शब्दे'। 'प्वादीनां ह्रस्वः' इति ह्रस्वत्वम्। राधः। 'राध साध संसिद्धौ'। राध्नोति समृद्धो भवत्यनेनेति राधः। करणेऽसुन्। ऋज्राश्वः। ऋज्राः गतिमन्तोऽश्वा यस्य स तथोक्तः। अम्बरीषः। 'अबि शब्दे'। औणादिक ईषन्प्रत्ययः (उ. सू. ४. ४६९)। सहदेवः। देवैः सह वर्तते इति सहदेवः। 'वोपसर्जनस्य' इति विकल्पनात् सभावाभावः। भयमानः। 'जिभी भये'। अस्मात् अन्तर्भावितण्यर्थात् व्यत्ययेन शानच्। 'बहुलं छन्दसि' इति शपः श्लोरभावः। अदुपदेशात् लसार्वधातुकानुदात्तत्वे धातुस्वर एव शिष्यते। सुराधाः। राधः इति धननाम। शोभनं राधो यस्य। 'सोर्मनसी अलोमोषसी' इत्युत्तरपदाद्युदात्तत्वम्॥

दस्यूञ्छिम्यूंश्च पुरुहूत एवैर्हत्वा पृथिव्यां शर्वा नि बर्हीत्।
सनत्क्षेत्रं सखिभिः श्वित्न्येभिः सनत्सूर्यं सनदपः सुवज्रः॥ १८॥

दस्यून्। शिम्यून्। च। पुरुऽहूतः। एवैः। हत्वा। पृथिव्याम्। शर्वा। नि। बर्हीत्।
सनत्। क्षेत्रम्। सखिऽभिः। श्वित्न्येभिः। सनत्। सूर्यम्। सनत्। अपः। सुऽवज्रः॥१८॥

[v]पुरुहूतः बहुभिर्यजमानैराहूत इन्द्रः [v]एवैः गमनशीलैर्मरुद्भिर्युक्तः सन् [v]पृथिव्यां भूमौ वर्तमानान् [v]दस्यून् उपक्षपयितॄन् शत्रून् [v]शिम्यूंश्च शमयितॄन् वधकारिणो राक्षसादींश्च [v]हत्वा प्रहृत्य तदनन्तरं [v]शर्वा हिंसकेन वज्रेण [v]नि [v]बर्हीत् अवधीत्। निबर्हयतिर्वधकर्मा। एवं शत्रून्निरस्य [v]श्वित्न्येभिः श्वेतवर्णैरलंकारेण दीप्ताङ्गैः [v]सखिभिः मित्रभूतैर्मरुद्भिः सह [v]क्षेत्रं शत्रूणां स्वभूतां भूमिं [v]सनत् समभाक्षीत्। तथा वृत्रेण तिरोहितं [v]सूर्यं तस्य वृत्रस्य हननेन [v]सनत् अभजत प्राप्तवानित्यर्थः। तथा [v]सुवज्रः शोभनवज्रयुक्त इन्द्रो वृत्रेण निरुद्धाः [v]अपः वृष्ट्युदकानि [v]सनत् समभजत॥ दस्यून्। 'दसु उपक्षये'। 'यजिमनिशुन्धिदसिजनिभ्यो युः'। वृषादित्वात् आद्युदात्तत्वम्। शिम्यून्। 'शमु उपशमे'। शमयति सर्वं तिरस्करोतीति राक्षसादिः शिम्युः। औणादिको युन्प्रत्ययः। वर्णव्यापत्त्या अकारस्य इत्वम्। शर्वा। 'शॄ हिंसायाम्'। 'अन्येभ्योऽपि दृश्यन्ते' इति वनिप्। 'सुपां सुलुक्०' इति तृतीयाया डादेशः। सनत्। 'वन षण संभक्तौ'। लङि 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः। श्वित्न्येभिः। 'श्विता वर्णे'। औणादिको नक्प्रत्ययः। श्वित्नं शुक्लवर्णमर्हन्तीति श्वित्न्याः। 'छन्दसि च' इति यः। सुवज्रः। 'आद्युदात्तं द्व्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम्॥

---

२. क्ष–राजर्षिभिः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

विश्वाहेन्द्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजम् ।
तन्नो मित्रो वरुणो ममहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ १९ ॥

विश्वाहा । इन्द्रः । अधिऽवक्ता । नः । अस्तु । अपरिऽह्वृताः । सनुयाम । वाजम् ।
तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ १९ ॥

[v]विश्वाहा सर्वकालं [v]नः अस्माकम् [v]इन्द्रः [v]अधिवक्ता [v]अस्तु । अधिवचनं पक्षपातेन वचनम् । यथोक्तं[1]–'ब्राह्मणायाधिब्रूयात्' (तै. सं. २.५.११.९) इति । सर्वदास्माकमिन्द्रः पक्षपातवचनयुक्तो भवतु । वयं च [v]अपरिह्वृताः अकुटिलगतयः सन्तः [v]वाजं हविर्लक्षणमन्नं [v]सनुयाम[2] संभजामहे । यदनेन सूक्तेनास्माभिः प्रार्थितं [v]तत् मित्रादयः ममहन्तां पूजितं कुर्वन्तु ॥ विश्वाहा । विश्वान्यहानि विश्वाहानि । अत्यन्तसंयोगे द्वितीया । 'शेश्छन्दसि बहुलम्' इति शेर्लोपः । उपधादीर्घत्वं नलोपः । मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् । अपरिह्वृताः । 'ह्वृ कौटिल्ये' । निष्ठायाम् 'अपरिह्वृताश्च' (पा. सू. ७.२.३२) इति निपातनात्[3] हुभावाभावः[3] । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । सनुयाम । 'षणु दाने' । लिङि तनादिभ्यात् उप्रत्ययः । 'वन षण संभक्तौ' इत्यस्मात् वा व्यत्ययेन उप्रत्ययः ॥ ॥११॥

'प्र मन्दिने' इति एकादशर्चमष्टमं सूक्तमाङ्गिरसस्य कुत्सस्यार्षम् । अष्टम्याद्याश्चतस्त्रिष्टुभः शिष्टाः सप्त जगत्यः । इन्द्रो देवता । तथा चानुक्रान्तं – 'प्रमन्दिन एकादश कुत्स आद्या गर्भस्राविण्युपनिषच्चतुस्त्रिष्टुबन्तम्' इति । दशरात्रस्य नवमेऽहनि मरुत्वतीये एतत्सूक्तम् । 'विश्वजितः' इति खण्डे सूत्रितं– 'प्र मन्दिन इमा उ त्वेति मरुत्वतीयम्' (आश्व. श्रौ. ८.७.) इति ॥

प्र मन्दिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृजिश्वना ।
अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हवामहे ॥ १ ॥

प्र । मन्दिने । पितुऽमत् । अर्चत । वचः । यः । कृष्णऽगर्भाः । निःऽअहन् । ऋजिश्वना ।
अवस्यवः । वृषणम् । वज्रऽदक्षिणम् । मरुत्वन्तम् । सख्याय । हवामहे ॥ १ ॥

हे ऋत्विजः [v]मन्दिने स्तुतिमते स्तोतव्यायेन्द्राय [v]पितुमत् हविर्लक्षणेनान्नेनोपेतं [v]वचः स्तुतिलक्षणं वचनं [v]प्र [v]अर्चत प्रकर्षेणोच्चारयत । [v]यः इन्द्रः [v]ऋजिश्वना एतत्संज्ञकेन राज्ञा सख्या सहितः सन् [v]कृष्णगर्भाः । कृष्णो नाम कश्चिदसुरः । तेन निषिक्तगर्भास्तदीयाः भार्याः [v]निरहन् अवधीत् । कृष्णमसुरं हत्वा पुत्राणाम् अपि[4] अनुत्पत्त्यर्थं गर्भिणीस्तस्य भार्याः अप्यवधीदित्यर्थः । [v]अवस्यवः रक्षणेच्छवो वयं [v]वृषणं कामानां वर्षितारं [v]वज्रदक्षिणं वज्रयुक्तेन दक्षिणहस्तेनोपेतं तं [v]मरुत्वन्तम् इन्द्रं [v]सख्याय सख्युः कर्मणे [v]हवामहे आह्वयामहे ॥ मन्दिने । 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु' । औणादिकः इनिप्रत्ययः । तदुक्तं यास्केन–'मन्दी मन्दतेः स्तुतिकर्मणः' (निरु. ४.२४) इति । पितुमत् ।

---

१. क्ष–तथोक्तम् । २. क्ष-स–'सनुयाम' इत्यस्यानन्तरं 'प्रयच्छाम । यद्वा इन्द्रेण दत्तमन्नम्' इत्यधिकम् । ३. क्ष-ट-ठ–निपातः । ४, क्ष-ट-ठ-न-स–'अपि' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' ह्रस्वनुड्भ्यां मतुप् ' इति मतुप उदात्तत्वम् । कृष्णगर्भाः कृष्णेन निषिक्ताः गर्भाः यासु तास्तथोक्ताः। ' परादिश्छन्दसि बहुलम् ' इति पूर्वपदान्तोदात्तत्वम्[1] । अवस्यवः । अवेरौणादिको भावेऽसुन् । अवः इच्छति अवस्यति । ' सुप आत्मनः क्यच् ' । ' क्याच्छन्दसि ' इति उप्रत्ययः । वृषणम् । ' वा षपूर्वस्य निगमे ' इति विकल्पनादुपधादीर्घाभावः । सख्याय । सख्युः कर्म सख्यम् । ' सख्युर्यः ' इति यप्रत्ययः । हवामहे । ह्वेञो लटि ' बहुलं छन्दसि ' इति संप्रसारणम् ॥

यो व्यंसं जाह्रषाणेन मन्युना यः शम्बरं यो अहन्पिप्रुमव्रतम् ।
इन्द्रो यः शुष्णमशुषं न्यावृणङ्मरुत्वन्तं सख्यायं हवामहे ॥ २ ॥

यः । विऽअंसम् । जह्रषाणेन । मन्युना । यः । शम्बरम् । यः । अहन् । पिप्रुम् । अव्रतम् । इन्द्रः । यः । शुष्णम् । अशुषम् । नि । अवृणक् । मरुत्वन्तम् । सख्याय । हवामहे ॥२॥

Vयः इन्द्रः Vजह्रषाणेन प्रवृद्धेन Vमन्युना क्रोधेन Vव्यंसं विगतभुजं वृत्रम् Vअहन् अवधीत्[2] । अपि च Vयः इन्द्रः Vशम्बरम् एतत्संज्ञमसुरं चावधीत् । तथा Vअव्रतं व्रतस्य यागादेः कर्मणो विरोधिनं Vपिप्रुम् एतत्संज्ञमसुरं च Vयः इन्द्रोऽवधीत् । किंच Vयः Vइन्द्रः Vअशुषं शोषकरहितं Vशुष्णं सर्वस्य जगतः शोषकमेतत्संज्ञमसुरं Vनि Vअवृणक् न्यवर्जयत् । समूलं हतवानित्यर्थः । तं Vमरुत्वन्तम् इन्द्रं Vसख्याय आह्वयामहे ॥ व्यंसम् । विगतः अंसो यस्मात् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । यणः[3] ' उदात्तस्वरितयोर्यणः° ' इति परस्यानुदात्तस्य स्वरितत्वम् । जह्रषाणेन । ' ह्रष तुष्टौ ' । अत्र वृद्ध्यर्थः । ' छन्दसि लिट्, ' लिटः कानज्वा ' इति तस्य कानजादेशः । ' अन्येषामपि दृश्यते ' इति संहितायामभ्यासस्य दीर्घत्वम् । चित्त्वादन्तोदात्तत्वम् । अशुषम् । ' शुष शोषणे ' । इगुपधलक्षणः कः । शुषाः शोषका न सन्त्यस्येति अशुषः । ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम् । अवृणक् । ' वृजी वर्जने ' । रौधादिकः ॥

यस्य द्यावापृथिवी पौंस्यं महद्यस्य व्रते वरुणो यस्य सूर्यः ।
यस्येन्द्रस्य सिन्धवः सश्चति व्रतं मरुत्वन्तं सख्यायं हवामहे ॥ ३ ॥

यस्य । द्यावापृथिवी इति । पौंस्यम् । महत् । यस्य । व्रते । वरुणः । यस्य । सूर्यः । यस्य । इन्द्रस्य । सिन्धवः । सश्चति । व्रतम् । मरुत्वन्तम् । सख्याय । हवामहे ॥ ३ ॥

Vयस्य इन्द्रस्य Vमहत् विपुलं Vपौंस्यं बलं Vद्यावापृथिवी द्यावापृथिव्यावनुवर्तेते । Vयस्य चेन्द्रस्य Vव्रते नियमरूपे[4] कर्मणि Vवरुणः वर्तते । वरुणोऽपीन्द्रस्य नियमनं नातिक्रामतीत्यर्थः । अपि च Vसूर्यः अपि Vयस्य इन्द्रस्य व्रते वर्तते । तथा Vयस्य Vइन्द्रस्य Vव्रतं कर्म Vसिन्धवः नद्यः Vसश्चति ।

---

१. ल–व्यत्ययेन पूर्वपदान्तोदात्तत्वम् । २. क्ष-स–हतवान् । ३. क्ष-ट-ठ–यणादेशः, स–यणादेशे । ४ क्ष-स–नियमनरूपे ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वचनव्यत्ययः । गच्छन्ति । सश्चतिर्गतिकर्मा । इन्द्रेणानुशिष्टाः प्रवहन्तीत्यर्थः । तं Vमरुत्वन्तम् इन्द्रं Vसख्याय आह्वयामहे[1] ॥ द्यावापृथिवी । द्यौश्च पृथिवी च द्यावापृथिव्यौ । ' दिवो द्यावा ' इति द्यावादेशः । स चाद्युदात्तो निपातितः । पृथिवीशब्दो ङीष्प्रत्ययान्तः अन्तोदात्तः । ' देवताद्वन्द्वे च ' इत्युभयपदप्रकृतिस्वरत्वम् । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घः ॥

यो अश्वानां यो गवां गोपतिर्वशी य आरितः कर्मणिकर्मणि स्थिरः ।
वीळोश्चिदिन्द्रो यो असुन्वतो वधो मरुत्वन्तं सख्याय हवामहे ॥ ४ ॥

यः । अश्वानाम् । यः । गवाम् । गोऽपतिः । वशी । यः । आरितः । कर्मणिऽकर्मणि । स्थिरः । वीळोः । चित् । इन्द्रः । यः । असुन्वतः । वधः । मरुत्वन्तम् । सख्याय । हवामहे ॥ ४ ॥

Vयः इन्द्रः Vअश्वानां पतिरधिपतिः । तथा Vयः इन्द्रः Vगोपतिः । न केवलमेकस्या गोः किंतु सर्वासामित्याह Vगवाम् इति । सर्वासां गवाम् अधिपतिर्भवति । Vवशी अपराधीनः । स्वतन्त्र इत्यर्थः । अपि च Vयः इन्द्रः Vकर्मणिकर्मणि सर्वेषु कर्मसु Vस्थिरः नैश्चल्येनावतिष्ठमानः Vआरितः स्तुतिभिः प्रत्यृतः प्राप्तो भवति । ' आरितः प्रत्यृतः स्तोमान् ' ( निरु. ५. १५ ) इति निरुक्तम् । Vयः च Vइन्द्रः Vअसुन्वतः सुन्वतां यागानुष्ठातॄणां विरोधिनः Vवीळोश्चित् दृढस्यापि शत्रोः Vवधः हन्ता तं Vमरुत्वन्तम् इन्द्रं Vसख्याय आह्वयामहे[2] ॥ गवाम् । ' न गोश्वन्साववर्ण° ' इति विभक्त्युदात्तत्वस्य प्रतिषेधः । गोपतिः । ' पत्यावैश्वर्ये ' इति पूर्वपदप्रकृतिस्वरत्वम् । आरितः । ' ऋ गतौ ' । अस्मात् ण्यन्तात् निष्ठा । आगमानुशासनस्यानित्यत्वात् पुगभावः । यद्वा । ' सूचिसूत्रिमूत्र्यट्यर्त्य-शूर्णोतीनाम् ' ( पा. म. ३. १. २२. ३ ) इति विहितस्य यङः ' यङोऽचि च ' इत्यत्र चशब्देन बहुलग्रहणानुकर्षणादनैमित्तिके लुकि प्रत्ययलक्षणेन ' सन्यङोः ' इति ऋ इत्येतस्य द्विर्वचने उरदत्व-हलादिशेषयोः सतोः ' रुग्रिकौ च लुकि ' इति रुक् । ततो निष्ठायां छान्दस इडागमः । ऋकारस्य यणादेशः । ' रो रि ' इति अभ्यासरेफलोपः । ' ढ्रलोपे पूर्वस्य दीर्घोऽणः ' इति दीर्घत्वम् । वधः । ' कृत्यल्युटो बहुलम् ' इति बहुलवचनात् ' हनश्च वधः ' इति कर्तरि अप् वधादेशश्च । स चादन्तः । अतो लोपे उदात्तनिवृत्तिस्वरेण प्रत्ययस्य उदात्तत्वम्[3] ॥

यो विश्वस्य जगतः प्राणतस्पतिर्यो ब्रह्मणे प्रथमो गा अविन्दत् ।
इन्द्रो यो दस्यूँरधराँ अवातिरन्मरुत्वन्तं सख्याय हवामहे ॥ ५ ॥

यः । विश्वस्य । जगतः । प्राणतः । पतिः । यः । ब्रह्मणे । प्रथमः । गाः । अविन्दत् ।
इन्द्रः । यः । दस्यून् । अधरान् । अवऽअतिरत् । मरुत्वन्तम् । सख्याय । हवामहे ॥ ५ ॥

---

१. क्ष-ट-ठ-हवामहे । २. क्ष-ट-ठ-हवामहे । ३. क्ष-ट-ठ-स-' उदात्तत्वम् ' इत्यस्यानन्तरं ' वधेर्वा प्रकृत्यन्तरात् पचाद्यचि रूपम् ' इत्यधिकम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ᵛयः इन्द्रः ᵛविश्वस्य[1] ᵛजगतः गच्छतः ᵛप्राणतः प्रश्वसतः प्राणिजातस्य ᵛपतिः स्वामी ᵛयः च ᵛब्रह्मणे ब्राह्मणजातिभ्योऽङ्गिरोभ्यः ᵛप्रथमः अन्येभ्यो देवेभ्यः पूर्वभावी सन् पणिभिरपहृताः ᵛगाः ᵛअविन्दत् अलभत। अन्येभ्यो देवेभ्यः पूर्वमेव तैरसुरैर्युद्ध्वा गाः स्वयमलभतेत्यर्थः। अपि च ᵛयः ᵛइन्द्रः ᵛदस्यून् उपक्षपयितॄनसुरान् ᵛअधरान् निकृष्टान् कृत्वा ᵛअवातिरत् अवधीत्। अवतिरतिर्वधकर्मा। तं ᵛमरुत्वन्तम् इन्द्रं ᵛसख्याय आह्वयामहे[2] ॥ जगतः। 'गमॢ सृप्लॢ गतौ'। 'वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च' ( उ. सू. २. २४१ ) इति अतिप्रत्ययान्तो निपातितो जगच्छब्द आद्युदात्तः। प्राणतः। 'श्वस प्राणने, अन च'। अस्मात् लटः शतृ। अदादित्वात् शपो लुक्। 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम्। 'षष्ठ्याः पतिपुत्र०' इति विसर्जनीयस्य सत्वम् ॥

यः शूरैर्हव्यो यश्च भीरुभिर्यो धावद्भिर्हूयते यश्च जिग्युभिः।
इन्द्रं यं विश्वा भुवनाभि संदधुर्मरुत्वन्तं सख्याय हवामहे ॥ ६ ॥

यः। शूरेभिः। हव्यः। यः। च। भीरुऽभिः। यः। धावत्ऽभिः। हूयते। यः। च। जिग्युऽभिः।
इन्द्रम्। यम्। विश्वा। भुवना। अभि। सम्ऽदधुः। मरुत्वन्तम्। सख्याय। हवामहे ॥६॥

ᵛयः इन्द्रः ᵛशूरेभिः शौर्योपेतैः पुरुषैः ᵛहव्यः योद्धुमाह्वातव्यः। ᵛयश्च ᵛभीरुभिः भयशीलैः कातरैः पुरुषैः सहायार्थमाह्वातव्यः। अपि च ᵛयः इन्द्रः ᵛधावद्भिः पराजयेन पलायमानैः ᵛहूयते रक्षार्थमाहूयते। ᵛयश्च ᵛजिग्युभिः प्राप्तजयैराहूयते। ᵛयं च ᵛइन्द्रं ᵛविश्वा ᵛभुवना सर्वाणि भूतजातानि स्वेषु स्वेषु कार्येषु ᵛअभि ᵛसंदधुः आभिमुख्येन स्थापयन्ति। तं ᵛमरुत्वन्तम् इन्द्रं ᵛसख्याय आह्वयामहे[3] ॥ शूरेभिः। 'बहुलं छन्दसि' इति भिस ऐसभावः। हव्यः। ह्वयतेः 'अचो यत्' इति यत्। 'ह्वः' इत्यनुवृत्तौ 'बहुलं छन्दसि' इति संप्रसारणम्। गुणे[4] 'धातोस्तन्निमित्तस्यैव' इति अवादेशः। भीरुभिः। 'भियः क्रुक्लुकनौ' ( पा. सू. ३. २. १७४ ) इति क्रुप्रत्ययः। धावद्भिः। 'सृ गतौ'। सर्तेः वेगितायां[5] शपि 'पाघ्रा०' इत्यादिना धावादेशः। शपः पित्त्वात् अनुदात्तत्वम्। शतुश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। जिग्युभिः। 'जि जये'। लिटः क्वसुः। द्विर्वचने 'सन्लिटोर्जेः' इति अभ्यासादुत्तरस्य जकारस्य कुत्वम्। भिसि अयस्मयादित्वेन भत्वात् 'वसोः संप्रसारणम्' इति संप्रसारणम्। छान्दसोऽन्त्यलोपः ॥ ॥ १२ ॥

रुद्राणामेति प्रदिशा विचक्षणो रुद्रेभिर्योषा तनुते पृथु ज्रयः।
इन्द्रं मनीषा अभ्यर्चति श्रुतं मरुत्वन्तं सख्याय हवामहे ॥ ७ ॥

रुद्राणाम्। एति। प्रऽदिशा। विऽचक्षणः। रुद्रेभिः। योषा। तनुते। पृथु। ज्रयः।
इन्द्रम्। मनीषा। अभि। अर्चति। श्रुतम्। मरुत्वन्तम्। सख्याय। हवामहे ॥ ७ ॥

---

१ क्ष-ट-ठ-स–विश्वस्य सर्वस्य। २. क्ष-ट-ठ–हवामहे। ३. क्ष-ट-ठ-स–हवामहे। ४. क्ष–गुणः।
५. क्ष-ट-ठ-स–वेगितायां गतौ गम्यमानायाम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]विचक्षणः सूर्यात्मना प्रकाशमान इन्द्रः [v]रुद्राणां रुद्रपुत्राणाम् अध्यात्मं प्राणरूपेण वर्तमानानां मरुताम्। यद्वा। रोदयितॄणां प्राणानाम्। प्राणा हि शरीरात् निर्गताः[1] सन्तो बन्धुजनान् रोदयन्ति। [v]प्रदिशा प्रदेशनेन मनुष्येभ्यः प्रदानेन सह [v]एति अन्तरिक्षे गच्छति। तथा चाम्नायते—'योऽसौ तपन्नुदेति स सर्वेषां भूतानां प्राणानादायोदेति' (तै. आ. १. १४. १) इति। अपि च [v]रुद्रेभिः अधिभूतं वर्तमानैः रुद्रपुत्रैर्मरुद्भिः [v]योषा माध्यमिका वाक् [v]पृथु विस्तीर्णं [v]ज्रयः वेगं [v]तनुते विस्तारयति। प्रसंगादत्र मरुतां स्तुतिः। तैर्मरुद्भिः सह वर्तमानं [v]श्रुतं प्रख्यातं सूर्यात्मानम् [v]इन्द्रं [v]मनीषा स्तुतिलक्षणा वाक् [v]अभ्यर्चति आभिमुख्येन स्तौति। तं [v]मरुत्वन्तम् इन्द्रं [v]सख्याय[2] आह्वयामहे[3]॥ प्रदिशा। 'दिश अतिसर्जने'। संपदादिलक्षणो भावे क्विप्। ज्रयः। 'जि ज्रि अभिभवे'। ज्रीयतेऽभिभूयतेऽनेनेति ज्रयो वेगः। करणे असुन्। मनीषा[4]। ईषाअक्षादित्वात् प्रकृतिभावः॥

यद्वा॑ मरुत्वः पर॒मे स॒धस्थे॒ यद्वा॒वमे॑ वृ॒जने॑ मा॒दया॑से।
अत॒ आ या॑ह्यध्व॒रं नो॑ अच्छा॑ त्वा॒याहवि॑श्चकृमा सत्यराधः॥ ८॥

यत्। वा। मरुत्वः। परमे। सधऽस्थे। यत्। वा। अवमे। वृजने। मादयासे।
अतः। आ। याहि। अध्वरम्। नः। अच्छ। त्वाऽया। हविः। चकृम। सत्यऽराधः॥८॥

हे [v]मरुत्वः मरुद्भिर्युक्तेन्द्र [v]परमे उत्कृष्टे [v]सधस्थे सहस्थाने गृहे [v]यद्वा यदि वा [v]मादयासे तृप्तो वर्तसे। [v]यद्वा यदि वा [v]अवमे अर्वाचीने [v]वृजने। वृज्यते रिक्तीक्रियतेऽस्मिन् धनमिति वृजनं गृहम्। तस्मिन् मादयासे। [v]अतः अस्माद्उभयविधात् स्थानात् [v]नः अस्माकं [v]अध्वरं यज्ञम् [v]अच्छ आभिमुख्येन [v]आ [v]याहि आगच्छ। हे [v]सत्यराधः सत्यधन[5] [v]त्वाया त्वत्कामनया वयं [v]हविश्चकृम कृतवन्तः॥ मरुत्वः। 'मतुवसो रुः०' इति संबुद्धौ नकारस्य रुत्वम्। सधस्थे। 'सुपि स्थः' इति कप्रत्ययः। 'सध मादस्थयोश्छन्दसि' इति सहस्य सधादेशः। मादयासे। 'मद तृप्तियोगे'। चुरादिरात्मनेपदी। लेटि आडागमः। त्वाया। त्वामात्मन इच्छति। 'सुप आत्मनः क्यच्'। 'प्रत्ययोत्तरपदयोश्च' इति सप्तम्यन्तस्य त्वादेशः। व्यत्ययेन दकारस्य आत्वम्। 'अ प्रत्ययात्' इति अकारप्रत्ययः। 'सुपां सुलुक्०' इति तृतीयाया लुक्॥

त्वा॒येन्द्र॒ सोमं॑ सुषुमा सुदक्ष त्वा॒याहवि॑श्चकृमा ब्रह्मवाहः।
अधा॑ नियुत्वः सग॑णो म॒रुद्भि॒रास्मिन्य॒ज्ञे ब॒र्हिषि॑ मादयस्व॥ ९॥

त्वाऽया। इन्द्र। सोमम्। सुसुम। सुऽदक्ष। त्वाऽया। हविः। चकृम। ब्रह्मऽवाहः।
अध। नियुत्वः। सऽगणः। मरुत्ऽभिः। अस्मिन्। यज्ञे। बर्हिषि। मादयस्व॥ ९॥

हे [v]सुदक्ष शोभनबल [v]इन्द्र [v]त्वाया त्वत्कामनया [v]सोमं [v]सुषुम अभिषुतवन्तो वयम्। हे [v]ब्रह्मवाहः ब्रह्मणा मन्त्ररूपेण स्तोत्रेणोह्यमान प्राप्यमाणेन्द्र [v]त्वाया त्वत्कामनया

---

१. क्ष–निर्गच्छन्तः। २. च-छ-त-न-फ-श-स–वयं सख्याय। ३. ठ–हवामहे। ४. क्ष–मनीषा अभि। ५. क्ष-ट-ठ-स–सत्यधन इन्द्र।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आहवनीये[1] पुरोडाशलक्षणं[1] ᵛहविश्चक्रम कृतवन्तः। हे ᵛनियुत्वः। नियुतोऽश्वाः। तद्वन्निन्द्र ᵛअधा अनन्तरं ᵛमरुद्भिः सगणरूपैरेतत्संज्ञैर्देवैः ᵛसगणः गणसहितः सन् ᵛअस्मिन् वर्तमाने ᵛयज्ञे ᵛबर्हिषि आस्तीर्णे दर्भे उपविश्य ᵛमादयस्व तृप्तो भव ॥ सुषुम। ' षुञ् अभिषवे '। लिटि क्रादिनियमप्राप्तस्य इटः ' अनित्यमागमशासनम् ' इति वचनादभावः ॥

मादयस्व हरिभिर्ये ते इन्द्र वि ष्यस्व शिप्रे वि सृजस्व धेने।
आ त्वा सुशिप्र हरयो वहन्तूशन्हव्यानि प्रति नो जुषस्व ॥ १० ॥

मादयस्व। हरिऽभिः। ये। ते। इन्द्र। वि। स्यस्व। शिप्रे इति। वि। सृजस्व। धेने इति।
आ। त्वा। सुऽशिप्र। हरयः। वहन्तु। उशन्। हव्यानि। प्रति। नः। जुषस्व ॥१०॥

हे ᵛइन्द्र ᵛहरिभिः अश्वैः सह ᵛमादयस्व तृप्तो भव। ᵛये ᵛते तव स्वभूतास्तदर्थं ᵛशिप्रे हनू संहते ᵛवि ᵛष्यस्व सोमपानार्थं विवृते कुरु। तथा ᵛधेने पानसाधनभूते जिह्वोपजिह्विके ᵛवि ᵛसृजस्व सोमपानार्थं विश्लिष्टे कुरु। हे ᵛसुशिप्र। ' शिप्रे हनू नासिके वा '। शोभनशिप्रेन्द्र ᵛत्वा त्वां ᵛहरयः अश्वाः ᵛआ ᵛवहन्तु अस्मदीयं यज्ञं प्रापयन्तु। त्वं च ᵛउशन् अस्मान् कामयमानः ᵛनः अस्माकं ᵛहव्यानि हवींषि ᵛप्रति ᵛजुषस्व प्रत्येकं सेवस्व मा उदासिष्ठाः ॥ वि ष्यस्व। ' षो अन्तकर्मणि '। व्यत्ययेन आत्मनेपदम्। दिवादित्वात् श्यन्। ' ओतः श्यनि ' ( पा. सू. ७. ३. ७१ ) इति ओकारलोपः। ' उपसर्गात्सुनोति° ' इति षत्वम् ॥

मरुत्स्तोत्रस्य वृजनस्य गोपा वयमिन्द्रेण सनुयाम वाजम्।
तन्नो मित्रो वरुणो ममहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ११ ॥

मरुत्ऽस्तोत्रस्य। वृजनस्य। गोपाः। वयम्। इन्द्रेण। सनुयाम। वाजम्।
तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः ॥११॥

ᵛमरुत्स्तोत्रस्य। मरुद्भिः सह स्तोत्रं यस्य स मरुत्स्तोत्रः। तस्य ᵛवृजनस्य शत्रूणां क्षेप्तुरिन्द्रस्य संबन्धिनः ᵛगोपाः गोपायनीयाः रक्षणीयाः ᵛवयं तेन ᵛइन्द्रेण ᵛवाजम् अन्नं ᵛसनुयाम लभेमहि। यदेतदस्माभिः प्रार्थितं ᵛनः अस्मदीयं ᵛतत् मित्रादयो द्यावापृथिव्यौ च ᵛममहन्तां पूजितं कुर्वन्तु ॥ वृजनस्य। ' वृजी वर्जने '। ' कृपृवृजिमन्दिनिधाञ्भ्यः क्युः ' इति क्युप्रत्ययः ॥ ॥ १३ ॥

' इमां ते ' इति एकादशर्चं नवमं सूक्तं कुत्सस्यार्षमैन्द्रम्। अन्त्या त्रिष्टुप् शिष्टा दश जगत्यः। तथा चानुक्रान्तम्–' इमां तेऽन्त्या त्रिष्टुप् ' इति। विनियोगो लैङ्गिकः ॥

---

१. च-छ-ण-न-फ-ल–सवनीये पुरोडाशलक्षणम्, क्ष-ट-ठ-स–सवनीयपुरोडाशलक्षणम्; ध–पशुपुरोडाशलक्षणम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे ।
तमुत्सवे च प्रसवे च सासहिमिन्द्रं देवासः शवसामदन्ननु ॥ १ ॥

इमाम् । ते । धियम् । प्र । भरे । महः । महीम् । अस्य । स्तोत्रे । धिषणा । यत् । ते । आनजे ।
तम् । उत्ऽसवे । च । प्रऽसवे । च । ससहिम् । इन्द्रम् । देवासः । शवसा । अमदन् । अनु ॥१॥

हे इन्द्र [v]महः महतः [v]ते तव [v]इमाम् इदानीं क्रियमाणां [v]महीं महतीम् अत्यन्तोत्कृष्टां [v]धियं स्तुतिं [v]प्र [v]भरे प्रकर्षेण संपादयामि । [v]ते तव[1] [v]धिषणा त्वदीया बुद्धिः [v]अस्य मम स्तोतुः [v]स्तोत्रे स्तुतौ [v]यत् यस्मात् [v]आनजे अक्ता संश्लिष्टासीत् । तस्मात् तव प्रियां स्तुतिं करोमीत्यर्थः । उत्तरोऽर्धर्चः परोक्षकृतः । [v]ससहिं शत्रूणामभिभवितारं पूर्वोक्तं [v]तम् [v]इन्द्रं [v]देवासः कर्मसु दीव्यन्तः ऋत्विजः [v]शवसा स्तुतिभिः कीर्तितेन बलेन [v]अनु [v]अमदन् अनुक्रमेण हर्षं प्रापयन् । किमर्थम् । [v]उत्सवे [v]च उत्सवार्थमभिवृद्ध्यर्थं [v]प्रसवे [v]च धनानां वृष्ट्युदकानां वा उत्पत्त्यर्थं च ॥ आनजे । ' अञ्जू व्यक्तिम्रक्षणगतिषु ' । अस्मात् कर्मणि लिट् । द्विर्वचनहलादिशेषौ । ' अत आदेः ' इति अभ्यासस्य आत्वम् । ' तस्मान्नुड्द्विहलः ' ( पा. सू. ७. ४. ७१ ) इति नुट् । व्यत्ययेन उपधानकारलोपः । उत्सवे । प्रसवे । ' पू प्रेरणे ' । ' ऋदोरप् ' इति भावे अप् । ' निमित्तात्कर्मसंयोगे ' ( पा. सू. २. ३. ३६. ६ ) इति सप्तमी । थाथादिना उत्तरपदान्तोदात्तत्वम् । ससहिम् । ' षह अभिभवे ' । ' आदृगमहन° ' इत्यत्र ' उत्सर्गश्छन्दसि° ' इति वचनात् किप्रत्ययः । लिड्वद्भावात् द्विर्वचनम् । ' अन्येषामपि दृश्यते ' इति संहितायामभ्यासस्य दीर्घत्वम् । अमदन् । ' मदी हर्षे ' । हेतुमति णिच् । ' मदी हर्षग्लपनयोः ' इति घटादिषु पाठात् ' मितां ह्रस्वः ' इति ह्रस्वत्वम् । ' छन्दस्युभयथा ' इति शप आर्धधातुकत्वात् ' णेरनिटि ' इति णिलोपः ॥

अस्य श्रवो नद्यः सप्त बिभ्रति द्यावाक्षामा पृथिवी दर्शतं वपुः ।
अस्मे सूर्याचन्द्रमसाभिचक्षे श्रद्धे कमिन्द्र चरतो वितर्तुरम् ॥ २ ॥

अस्य । श्रवः । नद्यः । सप्त । बिभ्रति । द्यावाक्षामा । पृथिवी । दर्शतम् । वपुः ।
अस्मे इति । सूर्याचन्द्रमसा । अभिऽचक्षे । श्रद्धे । कम् । इन्द्र । चरतः । विऽतर्तुरम् ॥२॥

[v]अस्य इन्द्रस्य [v]श्रवः यशः कीर्तिं [v]सप्त ' इमं मे गङ्गे ' इत्यस्यामृचि प्राधान्येन प्रतिपादिता गङ्गाद्याः सप्तसंख्याकाः [v]नद्यः [v]बिभ्रति धारयन्ति । वृत्रहननेन इन्द्रस्य यत् वृष्टेः प्रदातृत्वं तत्प्रभूतजलोपेता नद्यः प्रकटयन्तीत्यर्थः । अपि च [v]द्यावाक्षामा द्यावापृथिव्यौ । [v]पृथिवी इति अन्तरिक्षनाम । अन्तरिक्षं चास्य सूर्यात्मना वर्तमानस्येन्द्रस्य [v]दर्शतं सर्वैः प्राणिभिर्दर्शनीयं [v]वपुः । रूपनामैतत् । प्रकाशात्मकं रूपं धारयन्ति । किंच हे [v]इन्द्र [v]अस्मे अस्माकम् [v]अभिचक्षे द्रष्टव्यानां पदार्थानामाभिमुख्येन प्रकाशनार्थं [v]श्रद्धे [v]कं श्रद्धार्थम् । चक्षुषा दृष्टे हि वस्तुनि इदं सत्यमिति श्रद्धोत्पद्यते । कमित्येतत् पादपूरणम्[2] । तदुभयार्थं सूर्याचन्द्रमसौ [v]वितर्तुरं परस्परव्यतिहारेण तरणं पुनःपुनर्गमनं यथा भवति

१. क्ष-स–' तव ' नास्ति । २. क्ष-न-स–पदपूरणम् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तथा vचरतः । वर्तेते । त्वमेव तद्रूपः सन् वर्तसे इत्यर्थः ॥ अस्य । 'ऊडिदम्°' इति विभक्तेरुदात्तत्वम् । द्यावाक्षामा । द्यौश्च क्षामा च । 'दिवो द्यावा' इति द्यावादेशः । 'सुपां सुलुक्°' इति विभक्तेः डादेशः । 'देवताद्वन्द्वे च' इति उभयपदप्रकृतिस्वरत्वम् । दर्शतम् । 'भृमृदृशि°' इत्यादिना अतच् । सूर्याचन्द्रमसा । सूर्यश्च चन्द्रमाश्च । 'देवताद्वन्द्वे च' इति पूर्वपदस्य आनङादेशः । 'सुपां सुलुक्°' इति विभक्तेः आकारः । चन्द्रमःशब्दो दासीभारादित्वात् पूर्वपदप्रकृतिस्वरेण मध्योदात्तः । अतो 'देवताद्वन्द्वे च' इति प्राप्तस्य उभयपदप्रकृतिस्वरस्य[1] 'नोत्तरपदेऽनुदात्तादावृथिवी°' इति प्रतिषेधः । अभिचक्षे । चक्षेः प्रकाशनार्थात् संपदादिलक्षणो भावे क्विप् । तादर्थ्ये चतुर्थी । श्रद्धे । दृशिग्रहणात् दधातेर्भावे विच् । चतुर्थ्येकवचने 'आतो धातोः' इति आकारलोपः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । वितर्तुरम् । तरतेर्यङ्लुगन्तात् औणादिकः कुरच्[2] । 'बहुलं छन्दसि' इति उत्वम् ॥

तं स्मा रथं मघवन्प्राव सातये जैत्रं यं ते अनुमदाम संगमे ।
आजा न इन्द्र मनसा पुरुष्टुत त्वायद्भ्यो मघवञ्छर्म यच्छ नः ॥ ३ ॥

तम् । स्म । रथम् । मघऽवन् । प्र । अव । सातये । जैत्रम् । यम् । ते । अनुऽमदाम । सम्ऽगमे
आजा । नः । इन्द्र । मनसा । पुरुऽस्तुत । त्वायत्ऽभ्यः । मघऽवन् । शर्म । यच्छ । नः ॥३॥

हे vमघवन् धनवन् vइन्द्र vसातये अस्माकं धनलाभाय vतं vस्म तमेव vरथं vप्राव प्रेरय वर्तय[3]। vनः अस्माकं vमनसा बुद्धया vपुरुष्टुत बहुशः स्तुतेन्द्र vते तव स्वभूतं vजैत्रं जयशीलं vयं रथं vसंगमे शत्रुभिः सह संगमने vआजा[4] युद्धे सति vअनुमदाम वयमनुक्रमेण स्तुमः । अपि च हे vमघवन् vत्वायद्भ्यः त्वां कामयमानेभ्यः vनः अस्मभ्यं vशर्म सुखं vयच्छ देहि ॥ अव । 'अव रक्षणगतिकान्ति°' इत्युक्तत्वादवतिरत्र गत्यर्थः । संगमे । 'ग्रहवृदृनिश्चिगमश्च' इति कर्मणि अप् । थाथादिना उत्तरपदान्तोदात्तत्वम् । आजा । 'सुपां सुलुक्°' इति सप्तम्या डादेशः । त्वायद्भ्यः । 'सुप आत्मनः क्यच्' । 'प्रत्ययोत्तरपदयोश्च' इति मपर्यन्तस्य त्वादेशः । व्यत्ययेन दकारस्य आत्वम् । क्यजन्तात् लटः शतृ । अदुपदेशात् लसार्वधातुकानुदात्तत्वे सति क्यचा सहैकादेशे 'एकादेश उदात्तेन°' इति तस्य उदात्तत्वम् ॥

वयं जयेम त्वया युजा वृतमस्माकमंशमुदवा भरेभरे ।
अस्मभ्यमिन्द्र वरिवः सुगं कृधि प्र शत्रूणां मघवन्वृष्ण्या रुज ॥ ४ ॥

वयम् । जयेम । त्वया । युजा । वृतम् । अस्माकम् । अंशम् । उत् । अव । भरेऽभरे ।
अस्मभ्यम् । इन्द्र । वरिवः । सुऽगम् । कृधि । प्र । शत्रूणाम् । मघऽवन् । वृष्ण्या । रुज ॥४॥

---

१. क्ष-ट-ठ–उभयपदप्रकृतिस्वरत्वस्य । २. क्ष–कुरच्प्रत्ययः । ३. क्ष-ट-ठ-स–प्रवर्तय । ४. क्ष-ट-ठ-स–आजा आजौ ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे इन्द्र [V]युजा अस्माभिर्युक्तेन सहायभूतेन [V]त्वया [V]वृतं आवृण्वन्तं शत्रुं [V]वयं स्तोतारः [V]जयेम अभिभवेम। अपि च [V]भरेभरे संग्रामेसंग्रामे [V]अस्माकम् [V]अंशम् अस्मदीयं भागम् [V]उदव शत्रुकृतपीडापरिहारेणोत्कृष्टं रक्ष। तथा हे [V]इन्द्र [V]वरिवः धनम् [V]अस्मभ्यं [V]सुगं सुगमं सुप्रापं [V]कृधि कुरु। तथा हे [V]मघवन् [V]शत्रूणाम् अस्मदुपद्रवकारिणां [V]वृष्ण्या वृष्ण्यानि वीर्याणि [V]प्र [V]रुज प्रभङ्ग्धि बाधस्वेत्यर्थः ॥ वृतम्। 'वृञ् वरणे'। 'क्विप् च' इति क्विप्। तुगागमः। सुगम्। 'सुदुरोरधिकरणे' इति गमेः डप्रत्ययः। कृधि। 'श्रुशृणुपृकृवृभ्यः०' इति हेर्धिः। रुज। 'रुजो भङ्गे'। तौदादिकः ॥

नाना॑ हि त्वा॒ हव॑माना॒ जना॑ इ॒मे धना॑नां॒ धर्त॑रव॒सा वि॑पन्य॒वः॑।
अ॒स्माक॑ꣳ स्मा॒ रथ॒मा ति॑ष्ठ सा॒तये॒ जैत्रं॑ हीन्द्र॒ निभृ॑तं॒ मन॒स्तव॑ ॥ ५ ॥

नाना॑। हि। त्वा॒। हव॑मानाः। जना॑ः। इ॒मे। धना॑नाम्। धर्त॒रिति॑। अव॑सा। वि॒प॒न्य॒वः॑।
अ॒स्माक॑म्। स्म॒। रथ॑म्। आ। ति॒ष्ठ॒। सा॒तये॑। जैत्र॑म्। हि। इ॒न्द्र॒। निऽभृ॑तम्। मनः॑। तव॑ ॥५॥

हे [V]धनानां [V]धर्तः गोहिरण्यादिरूपाणां द्रव्याणां धारयितः इन्द्र [V]विपन्यवः। स्तोतृनामैतत्। स्तोतारः [V]इमे [V]जनाः [V]अवसा रक्षणेन हेतुना [V]त्वा [V]हवमानाः त्वामाह्वयन्तः [V]नाना [V]हि विभिन्नाः खलु। तेषां मध्ये [V]अस्माकं [V]स्म अस्माकमेव [V]सातये धनदानाय[1] [V]रथम् [V]आ [V]तिष्ठ आरोह। हे [V]इन्द्र [V]निभृतम् अव्याकुलं [V]तव [V]मनः चित्तं [V]जैत्रं [V]हि जयशीलं खलु। शत्रून् जित्वास्मभ्यं धनं दातुं समर्थमित्यर्थः ॥ सातये। 'षणु दाने'। क्तिनि 'जनसनखनां सञ्झलोः' इति आत्वम् ॥ ॥ १४ ॥

गो॒जिता॑ बा॒हू अ॑मि॒तक्र॑तुः सि॒मः कर्म॑न्कर्मञ्छ॒तमू॑तिः ख॒जं॑करः।
अ॒क॒ल्प इन्द्रः॑ प्रति॒मान॒मोज॒साथा॒ जना॒ वि ह्व॑यन्ते सिषास॒वः॑ ॥ ६ ॥

गो॒ऽजिता॑। बा॒हू इति॑। अमि॑त॒ऽक्र॑तुः। सि॒मः। कर्म॑न्ऽकर्मन्। श॒तम्ऽऊ॑तिः। ख॒जम्ऽक॒रः॑।
अ॒क॒ल्पः। इन्द्रः॑। प्र॒ति॒ऽमान॑म्। ओज॑सा। अथ॑। जना॑ः। वि। ह्व॒य॒न्ते॒। सि॒सा॒स॒वः॑ ॥६॥

हे इन्द्र तव [V]बाहू हस्तौ [V]गोजिता जयेन गवां लम्भयितारौ। त्वं च [V]अमितक्रतुः अपरिच्छिन्नज्ञानः [V]सिमः श्रेष्ठः। तथा च शाट्यायनकं–'सिम इति वै श्रेष्ठमाचक्षते' इति। यद्वा। सिमः शत्रूणां बन्धकः। [V]कर्मन्कर्मन् स्तोतॄणां कर्मणिकर्मण्युपस्थिते [V]शतमूतिः बहुविधरक्षणोपेतः [V]खजंकरः। खजति मथ्नाति पुरुषानिति खजः संग्रामः। तस्य कर्ता। [V]अकल्पः कल्पेनान्येन रहितः। स्वतन्त्र इत्यर्थः। [V]ओजसा सर्वेषां प्राणिनां यदोजो बलमस्ति तेन सर्वेण [V]प्रतिमानं प्रतिनिधित्वेन मीयमानः। यस्मादेवंगुणविशिष्टः [V]इन्द्रः [V]अथ अतः कारणात् [V]सिषासवः धनं लब्धुकामाः[2] [V]जनाः [V]वि [V]ह्वयन्ते विविधमाह्वयन्ति ॥ गोजिता। गा जयतः इति गोजितौ[3]। 'सुपां सुलुक्०' इति विभक्तेः आकारः। सिमः। 'षिञ् बन्धने'। अस्मादौणादिको मक्। खजंकरः। 'खज मन्थे'। पचाद्यच्। 'क्षेमप्रियमद्रेऽण् च' (पा. सू. ३. २. ४४) इति चशब्दस्यानुक्तसमुच्चयार्थत्वात् खजशब्दोपपदादपि

---

१. क्ष-स–धनलाभाय। २. क्ष–लब्धुमिच्छवः। ३. क्ष-स–गोजितौ। क्विप्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

करोतेः खच् । ' अरुर्द्विषदजन्तस्य° ' इति मुम् । कृदुत्तरपदप्रकृतिस्वरत्वम् । अकल्पः । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । सिषासवः । ' वन षण संभक्तौ ' । सनि[1] ' सनीवन्तर्ध° ' इति विकल्पनात् इडभावः । ' जनसनखनां सञ्झलोः ' इति आत्वम् । द्विर्वचनादि । ' सनाशंसभिक्ष उः ' ( पा. सू. ३. २. १६८ ) इति उप्रत्ययः । सति शिष्टत्वात् तस्यैव स्वरः शिष्यते ॥

उत्ते शतान्मघवन्नुच्च भूयस उत्सहस्रादिरिचे कृष्टिषु श्रवः ।
अमात्रं त्वा धिषणा तित्विषे मह्यधा वृत्राणि जिघ्नसे पुरंदर ॥ ७ ॥

उत् । ते । शतात् । मघऽवन् । उत् । च । भूयसः । उत् । सहस्रात् । रिरिचे । कृष्टिषु । श्रवः । अमात्रम् । त्वा । धिषणा । तित्विषे । मही । अध । वृत्राणि । जिघ्नसे । पुरम्ऽदर ॥ ७ ॥

हे [V]मघवन् धनवन्निन्द्र [V]कृष्टिषु स्तोतृषु मनुष्येषु त्वया दीयमानं [V]श्रवः यदन्नमस्ति तत् [V]शतात् शतसंख्याकाद्धनात् [V]उत् [V]रिरिचे उद्रिक्तमधिकं भवति । अपि च [V]भूयसः शतसंख्याकादपि बहुतराद्धनात् [V]उत् रिरिचे अधिकं भवति । किं बहुना । [V]सहस्रात् सहस्रसंख्याकादपि [V]उत् रिरिचे । त्वया दत्तं तदन्नमक्षयमित्यर्थः । अपि च [V]अमात्रं मात्रयेयत्तया रहितं परिगणितुमशक्यैः सर्वैर्गुणैरधिकं त्वां[2] [V]मही महती [V]धिषणा अस्मदीया स्तुतिलक्षणा वाक् [V]तित्विषे दीपयति । त्वत्संबन्धिनो गुणान् प्रकाशयति । हे [V]पुरंदर शत्रूणां पुरां दारयितरिन्द्र [V]अध स्तुत्यनन्तरं [V]वृत्राणि आवरकान् शत्रून् [V]जिघ्नसे हंसि विनाशयसि ॥ रिरिचे । ' रिचिर् विरेचने ' । कर्मणि लिट् । तित्विषे । ' त्विष दीप्तौ ' । जिघ्नसे । हन्तेर्लेटि व्यत्ययेन आत्मनेपदम् । ' लेटोऽडाटौ ' इति अडागमः । ' बहुलं छन्दसि ' इति शपः श्लुः । ' गमहन° ' इत्यादिना उपधालोपः । स्थानिवद्भावात् द्विर्वचनादि । ' बहुलं छन्दसि ' इति अभ्यासस्य इत्वम् । पुरंदर । ' पूःसर्वयोर्दारिसहोः ' ( पा. सू. ३. २ ४१ ) इति खच् । ' खचि ह्रस्वः ' ( पा. सू. ६. ४. ९४ ) इति ह्रस्वत्वम् । ' वाचंयमपुरंदरौ च ' ( पा. सू. ६. ३. ६९ ) इति निपातनात् अम् ॥

त्रिविष्टिधातु प्रतिमानमोजसस्तिस्रो भूमीर्नृपते त्रीणि रोचना ।
अतीदं विश्वं भुवनं ववक्षिथाशत्रुरिन्द्र जनुषा सनादसि ॥ ८ ॥

त्रिविष्टिऽधातु । प्रतिऽमानम् । ओजसः । तिस्रः । भूमीः । नृऽपते । त्रीणि । रोचना । अति । इदम् । विश्वम् । भुवनम् । ववक्षिथ । अशत्रुः । इन्द्र । जनुषा । सनात् । असि ॥ ८ ॥

हे [V]नृपते नृणां पालयितरिन्द्र त्वम् [V]ओजसः सर्वेषां प्राणिनां बलस्य [V]प्रतिमानं प्रतिनिधिरसि । कीदृशं प्रतिमानम् । [V]त्रिविष्टिधातु । धातुशब्दो रज्जुभागवचनः । यथा ' त्रिधातु पञ्चधातु वा शुल्बं करोति ' इति । यथा त्रिविष्टिस्त्रिगुणिता रज्जुः दृढीयसी एवमिन्द्रोऽपि दृढतर इत्यर्थः । किंच त्वं [V]तिस्रो [V]भूमीः त्रीन् लोकान् [V]त्रीणि [V]रोचना त्रीणि तेजांसि दिवि आदित्याख्यम् अन्तरिक्षे वैद्युतरूपमग्निं

---

१. क्ष-स–अस्मात् सनि । २. क्ष–त्वा त्वाम् । ३. क्ष-ट-ठ–दृढीयसी भवति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पृथिव्याम् आहवनीयादिरूपेण वर्तमानं पार्थिवमग्निम् एवं त्रीन् लोकान् त्रीणि तेजांसि च [v]अति [v]वक्षिथ अतिशयेन वोढुमिच्छसि । अपि च [v]इदं [v]विश्वं सर्वं [v]भुवनं भूतजातं चातिवोढुमिच्छसि । सर्वस्य जगतः पालनेन त्वमेव सर्वेषां निर्वाहकः भवसीत्यर्थः[1]। यस्मात् हे [v]इन्द्र त्वं [v]सनात् चिरकालादारभ्य [v]जनुषा जन्मना जन्मप्रभृति [v]अशत्रुः सपत्नरहितः [v]असि ॥ त्रिविष्टिधातु । त्रिधा त्रिप्रकारेण विष्टया प्रवेशनेन विधीयते[2] क्रियते इति त्रिविष्टिधातुः[3] त्रिगुणिता रज्जुः । विशेर्भावे क्तिन् । धाञः ' सितनिगमिमसि° ' ( उ. सू. १. ६९ ) इत्यादिना कर्मणि तुन्प्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वम् । अत्र दृढरज्जुवाचकः शब्दस्तद्वतं दार्ढ्यं लक्षयित्वा तद्वति प्रतिभाने वर्तते । यथा माणवकेऽग्निशब्दः । तिस्रः । शसि ' त्रिचतुरोः स्त्रियाम्° ' इति तिस्रादेशः अन्तोदात्तः । ' अचि र ऋतः ' इति रेफादेशे ' उदात्तयणो हल्पूर्वात् ' इति विभक्तेरुदात्तत्वम् । ववक्षिथ । ' वह प्रापणे ' इत्यस्मात् इच्छासनि ढ्रस्वकत्वषत्वानि । ' सन्यतः ' इति इत्वाभावश्छान्दसः । छान्दसे[4] लिटि ' °अमन्त्रे° ' इति निषेधात् आम्प्रत्ययाभावः । जनुषा । ' जनेरसिः ' ॥

त्वां देवेषु प्रथमं हवामहे त्वं बभूथ पृतनासु सासहिः ।
सेमं नः कारुमुपमन्युमुद्भिदमिन्द्रः कृणोतु प्रसवे रथं पुरः ॥ ९ ॥

त्वाम् । देवेषु । प्रथमम् । हवामहे । त्वम् । बभूथ । पृतनासु । ससहिः ।
सः । इमम् । नः । कारुम् । उपऽमन्युम् । उत्ऽभिदम् । इन्द्रः । कृणोतु । प्रऽसवे । रथम् । पुरः ॥९॥

हे इन्द्र [v]देवेषु [v]प्रथमं श्रेष्ठं [v]त्वां [v]हवामहे यागार्थमाह्वयामहे । तथा[5] [v]त्वं [v]पृतनासु संग्रामेषु [v]ससहिः [v]बभूथ शत्रूणामभिभवितासि । उत्तरार्धः[6] परोक्षकृतः । [v]सः [v]इन्द्रः [v]नः अस्माकं [v]कारुं स्तुतीनां कर्तारम् [v]उपमन्युम् उपमन्तारं सर्वज्ञम् [v]उद्भिदं शत्रूणामुद्भेत्तारम् [v]इमम् एवंगुणविशिष्टं पुत्रं [v]कृणोतु करोतु । अपि च [v]प्रसवे युद्धोत्पत्तावस्मदीयं [v]रथं [v]पुरः अन्येभ्यो रथेभ्यः पुरतो वर्तमानं करोतु । यद्वा । कारुमित्यादीनि रथविशेषणानि । कारुं युद्धस्य कर्तारम् उपमन्युम् उपगतेन प्राप्तेन मन्युना क्रोधेन युक्तम् उद्भिदं मार्गेऽवस्थितानां वृक्षादीनामुद्भेत्तारमतिशयेन भङ्क्तारम् ॥ बभूथ । 'बभूथा ततन्थ जगृभ्म ववर्थेति निगमे' इति निपातनात् इडभावः । स इमम् । ' सोऽचि लोपे चेत्पादपूरणम् ' इति सुलोपः[7] । प्रसवे । ' षूङ् प्राणिप्रसवे ' । ऋदोरप् । थाथादिना उत्तरपदान्तोदात्तत्वम् ॥

त्वं जिगेथ न धना रुरोधिथाभीषूजा मघवन्महत्सु च ।
त्वामुग्रमवसे सं शिशीमस्यथा न इन्द्र हवनेषु चोदय ॥ १० ॥

त्वम् । जिगेथ । न । धना । रुरोधिथ । अभीषु । आजा । मघऽवन् । महत्ऽसु । च ।
त्वाम् । उग्रम् । अवसे । सम् । शिशीमसि । अथ । नः । इन्द्र । हवनेषु । चोदय ॥१०॥

---

१. क्ष–असीत्यर्थः । २. क्ष-ट-ठ-स–धीयते विधीयते । ३. क्ष-ट-ठ–त्रिविष्टिधातु । ४. क्ष-ट-ठ–' छान्दसे ' नास्ति । ५. क्ष-ट-ठ–यथा । ६. क्ष–उत्तरोऽर्धर्चः । ७. क्ष-ट-ठ–सलोपः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे इन्द्र Vत्वं Vजिगेथ शत्रून् जयसि । तथा Vधना शत्रुभ्योऽपहृतानि धनानि Vन Vरुरोधिथ नावरुणत्सि । स्तोतृभ्यः प्रयच्छसीत्यर्थः । हे Vमघवन् धनवन्निन्द्र Vअर्भेषु अल्पेषु Vआजा आजिषु संग्रामेषु Vमहत्सु Vच प्रौढेषु संग्रामेषु च Vअवसे अस्माकं रक्षणार्थम् Vउग्रम् उद्गूर्णम् अधिकबलं Vत्वां Vसं Vशिशीमसि स्तोत्रैस्तीक्ष्णीकुर्मः । Vअथ अनन्तरं हे Vइन्द्र त्वं Vहवनेषु युद्धार्थमाह्वानेषु सत्सु आगत्य Vनः अस्मान् Vचोदय संग्रामेषु प्रेरय । जयं प्रापयेत्यर्थः ॥ जिगेथ । ' जि जये ' । लिटि थलि क्रादिनियमात् प्राप्तस्य इटः ' अचस्तास्वत्थल्यनिटो नित्यम् ' ( पा. सू. ७. २. ६१ ) इति प्रतिषेधः । ' सनूलिटोर्जेः ' इति अभ्यासादुत्तरस्य जकारस्य कुत्वम्[1] । रुरोधिथ । क्रादिनियमात् इट् । आजा । ' सुपां सुलुक्° ' इति सप्तमीबहुवचनस्य डादेशः । शिशीमसि । ' शो तनूकरणे ' । ' बहुलं छन्दसि ' इति विकरणस्य श्लुः । ' आदेचः° ' इति आत्वम् । द्विर्वचने ' बहुलं छन्दसि ' इति अभ्यासस्य इत्वम् । ' ई हल्यघोः ' इति ईकारान्तादेशः । इदन्तो मसिः ॥

विश्वाहेन्द्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजम् ।
तन्नो मित्रो वरुणो ममहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ११ ॥

विश्वाहा । इन्द्रः । अधिऽवक्ता । नः । अस्तु । अपरिऽह्वृताः । सनुयाम । वाजम् ।
तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥११॥

व्याख्यातेयं ' रोहिच्छ्यावा ' इति वर्गे ( ऋ. सं. १. १००. १९ ) । इन्द्रः सर्वेष्वहःस्वस्माकं पक्षपातेन वक्ता भवतु । वयं चाकुटिलगतयः सन्त इन्द्रेण दत्तमन्नं लभामहे[2] । यदस्माभिः प्रार्थितम् अस्मदीयं[3] तन्मित्रादयः पूजितं कुर्वन्तु ॥ ॥ १५ ॥

' तत्ते ' इति अष्टर्चं दशमं सूक्तं कुत्सस्यार्षमैन्द्रं त्रैष्टुभम् । तथा चानुक्रान्तं–' तत्तेऽष्टौ ' इति । तृतीये छन्दोमे निष्केवल्ये इदं सूक्तं निविद्धानम् । ' विश्वजितः ' इति खण्डे सूत्रितं–' तत्त इन्द्रियमिति निष्केवल्यम् ' ( आश्व. श्रौ. ८. ७ ) इति ॥

तत्त इन्द्रियं परमं परावैरधारयन्त कवयः पुरेदम् ।
क्षमेदमन्यद्दिव्यन्यदस्य समी पृच्यते समनेव केतुः ॥ १ ॥

तत् । ते । इन्द्रियम् । परमम् । परावैः । अधारयन्त । कवयः । पुरा । इदम् ।
क्षमा । इदम् । अन्यत् । दिवि । अन्यत् । अस्य । सम् । ईमिति । पृच्यते । समनाऽइव । केतुः ॥१॥

हे इन्द्र Vते त्वदीयं Vपरमम् उत्कृष्टं Vतत् प्रसिद्धम् Vइदं वर्तमानम् Vइन्द्रियं बलं Vपुरा पूर्वस्मिन् काले Vकवयः क्रान्तदर्शिनः स्तोतारः Vपरावैः पराचीनं पराङ्मुखम् । यद्वा । परावैः परागञ्चनैः परागमनैर्युक्तम् । युद्धाभिमुखमेव Vअधारयन्त धृतवन्तः । अपि च Vअस्य इन्द्रस्य Vअन्यत् एकम्

---

१. क्ष-ट-ठ–गकारः । २. क्ष-ट-ठ–लभेमहि । ३. क्ष–' अस्मदीयम् ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vइदम् अग्न्याख्यं ज्योतिः Vक्षमा क्षमायां भूमौ वर्तते । Vअन्यत्[1] अप्येकं सूर्याख्यं Vदिवि द्युलोके । V ईं तदिदमुभयविधमिन्द्रस्य ज्योतिः Vसं Vपृच्यते परस्परं संयुज्यते । रात्रावादित्योऽग्निना संयुक्तो भवति । 'अग्निं वावादित्यः सायं प्रविशति तस्मादग्निर्दूरात्तक्तं ददृशे' इति श्रुतेः । अहनि त्वग्निः सूर्येण संगच्छते । 'उद्यन्तं वावादित्यमग्निरनुसमारोहति तस्माद्धूम एवाग्नेर्दिवा ददृशे' ( तै. ब्रा. २. १.२. ९-१० ) इति श्रुतेः । अनयोः परस्परसंगमने दृष्टान्तः । Vसमनेव Vकेतुः । समनशब्दः संग्रामवाची । यथा समने संग्रामे युध्यमानयोः उभयोः[2] केतुर्ध्वजो ध्वजान्तरेण संयुज्यते तद्वत् ॥ इन्द्रियम् । इन्द्रस्य लिङ्गं बलम् । 'इन्द्रियमिन्द्रलिङ्गम्°' इति घच्प्रत्ययान्तो निपात्यते । पराचैः । अव्ययमेतत् उच्चैर्नीचैरिति यथा । यास्कस्त्वाह–'पराचैः पराञ्चनैः' ( निरु. ११. २५ ) इति । क्षमा । 'सुपां सुलुक्°' इति सप्तम्या लुक् । ईमो मलोपः सांहितिकश्छान्दसः । समनेव । 'पम ष्टम अवैकुव्ये' । 'अन्येभ्योऽपि दृश्यते' ( पा. सू. ३. ३. १३० ) इति युच् । 'सुपां सुलुक्°' इति सप्तम्या आकारः । 'इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च' इति समासः ॥

स धारयत्पृथिवीं पप्रथच्च वज्रेण हत्वा निरपः ससर्ज ।
अहन्नहिमभिनद्रौहिणं व्यहन्व्यंसं मघवा शचीभिः ॥ २ ॥

सः । धारयत् । पृथिवीम् । पप्रथत् । च । वज्रेण । हत्वा । निः । अपः । ससर्ज ।
अहन् । अहिम् । अभिनत् । रौहिणम् । वि । अहन् । विऽअंसम् । मघऽवा । शचीभिः ॥२॥

Vसः इन्द्रः Vपृथिवीम् असुरैः पीडितां भूमिं Vधारयत् धृतवान् । पीडाराहित्येन स्थिताम्[3] अकरोदित्यर्थः । तदनन्तरं Vपप्रथच्च तां भूमिं विस्तीर्णामकरोत् । अपि च Vवज्रेण आयुधेन हन्तव्यान् वृत्रादीन् Vहत्वा Vअपः वृष्ट्युदकानि Vनिः Vससर्ज मेघान्निर्गमयामास । एतदेव स्पष्टीक्रियते । Vअहिम् अन्तरिक्षे वर्तमानं मेघम् Vअहन् वज्रेण वर्षणार्थमताडयत् । Vरौहिणम् । रौहिणो नाम कश्चिदसुरः । तं च Vवि Vअभिनत् व्यदारयत् । अपि च Vमघवा धनवानिन्द्रः Vशचीभिः आत्मीयैर्युद्धकर्मभिः Vव्यंसं विगतभुजं वृत्रासुरम् Vअहन् अवधीत् ॥ पप्रथत् । पृथुं करोति प्रथयति । 'तत्करोति°' इति णिच् । 'णाविष्ठवत्प्रातिपदिकस्य कार्यम्' ( पा. सू. ६. ४. १५५. १ ) इति वचनात् 'र ऋतो हलादेर्लघोः' ( पा. सू. ६. ४. १६१ ) इति ऋकारस्य रत्वम् । 'टेः' इति टिलोपः । तस्य स्थानिवद्भावात् वृद्ध्यभावः । प्रथयतेर्लुङि[4] चङि णिलोपः । द्विर्वचने[5] 'चङ्यन्यतरस्याम्' ( पा. सू. ६. १. २१८ ) इति चङः पूर्वस्योदात्तत्वम् । न[6] णिलोपस्य स्थानिवत्त्वं, 'न पदान्त°' इत्यादिना स्वरविधिं प्रति तन्निषेधात् । पूर्वपदस्य असमानवाक्यस्थत्वात् निघाताभावः ॥

स जातूभर्मा श्रद्दधान ओजः पुरो विभिन्दन्नचरद्वि दासीः ।
विद्वान्वज्रिन्दस्यवे हेतिमस्यार्यं सहो वर्धया द्युम्नमिन्द्र ॥ ३ ॥

सः । जातूऽभर्मा । श्रत्ऽदधानः । ओजः । पुरः । विऽभिन्दन् । अचरत् । वि । दासीः ।
विद्वान् । वज्रिन् । दस्यवे । हेतिम् । अस्य । आर्यम् । सहः । वर्धय । द्युम्नम । इन्द्र ॥३॥

---

१. क्ष-ट-ठ-न-स–अन्यदेकम् । २. क्ष–उभयोः सेनयोः । ३. क्ष-स–स्थिराम् । ४. क्ष-ट-ठ-स–यद्वा प्रथयतेर्लुङि । ५. क्ष-न-स–द्विर्वचनम् । ६. क्ष–न च ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vजातूभर्मा । जातू इत्यशनिमाचक्षते । भर्म आयुधम् । अशनिरूपमायुधं यस्य स तथोक्तः । यद्वा जातानां प्रजानां भर्ता । vओजः ओजसा बलेन निष्पाद्यं कार्यं vश्रद्दधानः आदरातिशयेन कामयमानः[1] एवंभूतः vसः इन्द्रः vदासीः दस्युसंबन्धीनि[2] vपुरः पुराणि vविभिन्दन् विनाशयन् vवि vअचरत् विविधमगच्छत् । हे vवज्रिन् वज्रवन् इन्द्र vविद्वान् स्तुतीः विजानंस्त्वम् vअस्य स्तोतुः vदस्यवे उपक्षयकारिणे शत्रवे vहेतिम् आयुधं विसृजेति[3] शेषः[4] । अपि च हे vइन्द्र vआर्यं vसहः । आर्या विद्वांसः स्तोतारः । तदीयं बलं vवर्धय अतिवृद्धं[5] कुरु । तथा vद्युम्नं तदीयं यशश्च प्रवर्धय ॥ जातूभर्मा । ' जनी प्रादुर्भावे ' । ' अन्येष्वपि दृश्यते ' इति दृशिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात् केवलादपि डप्रत्ययः । जान् तूर्वतीति जातूः । ' तुर्वी हिंसार्थः ' । क्विपि ' राल्लोपः ' इति वलोपः । भ्रियते इति भर्म । ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन् । जातूः भर्म यस्य । छान्दसो रेफलोपः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । पक्षान्तरे तु जनेर्निष्ठा । ' जनसनखनाम्° ' इति आत्वम् । जातं सर्वं भर्म भर्तव्यं येन । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । वर्णव्यापत्त्या अकारस्य ऊकारः ॥

**तदूचुषे मानुषेमा युगानि कीर्तेन्यं मघवा नाम बिभ्रत् ।**
**उपप्रयन्दस्युहत्याय वज्री यद्ध सूनुः श्रवसे नाम दधे ॥ ४ ॥**

तत् । ऊचुषे । मानुषा । इमा । युगानि । कीर्तेन्यम् । मघऽवा । नाम । बिभ्रत् ।
उपऽप्रयन् । दस्युऽहत्याय । वज्री । यत् । ह । सूनुः । श्रवसे । नाम । दधे ॥ ४ ॥

vनाम शत्रूणां नामकं vतत् इन्द्रस्य बलम् vऊचुषे उक्तवते स्तुवते[6] यजमानाय vकीर्तेन्यं कीर्तनीयं स्तुत्यम् । नामकं तद्बलं vबिभ्रत् धारयन् vमघवा धनवानिन्द्रः vमानुषा मनुष्याणां संबन्धीनि vइमा इमानि दृश्यमानानि vयुगानि अहोरात्रसंघनिष्पाद्यानि कृतत्रेतादीनि सूर्यात्मना निष्पादयतीति शेषः । किं पुनस्तन्नाम । vदस्युहत्याय दस्यूनां वृत्रादीनां हननाय vउपप्रयन् गृहसमीपान्निर्गच्छन् vवज्री वज्रवान् vसूनुः शत्रूणां प्रेरयितेन्द्रः vयद्ध यत् खलु vनाम शत्रूणां नामकं vश्रवसे जयलक्षणाय यशसे vदधे धृतवान् ॥ ऊचुषे । ' ब्रूञ् व्यक्तायां वाचि ' । ' ब्रुवो वचिः ' । लिटः क्वसुः । ' वचिस्वपि° ' इत्यादिना संप्रसारणम् । चतुर्थ्येकवचने भसंज्ञायां ' वसोः संप्रसारणम् ' इति संप्रसारणम् । ' शासिवसिघसीनां च ' इति षत्वम् । क्वसुप्रत्ययाद्युदात्तत्वम् । कीर्तेन्यम् । ' कृत संशब्दने[7] ' । ' कृत्यार्थे तवैकेन्° ' इति केन्यप्रत्ययः । मघवा । मघशब्दात् ' छन्दसीवनिपौ° ' इति मत्वर्थीयो वनिप् । बिभ्रत् । ' डुभृञ् धारणपोषणयोः ' । शतरि जुहोत्यादिश्वात् शपः श्लुः । ' भृञामित् ' इति अभ्यासस्य इत्वम् । ' नाभ्यस्ताच्छतुः ' इति नुमागमप्रतिषेधः । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् ॥

---

१. क्ष-ट-ठ–कार्यं यतमानः । २. क्ष–दस्युसंबन्धिनीः । ३. क्ष–अतिसृजेति । ४. क्ष-स–' शेषः ' इत्यस्यानन्तरं ' यद्वा अस्येति क्रियापदं क्षिप ' इत्यधिकम् । ५. क्ष-स–अभिवृद्धम् । ६. क्ष-ट-ठ–स्तुतवते । ७. क्ष-ट-ठ-स–संशब्दने । चौरादिकः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तदस्येदं पश्यता भूरि पुष्टं श्रदिन्द्रस्य धत्तन वीर्याय ।
स गा अविन्दत्सो अविन्ददश्वान्त्स ओषधीः सो अपः स वनानि ॥ ५ ॥

तत् । अस्य । इदम् । पश्यत । भूरि । पुष्टम् । श्रत् । इन्द्रस्य । धत्तन । वीर्याय ।
सः । गाः । अविन्दत् । सः । अविन्दत् । अश्वान् । सः । ओषधीः । सः । अपः । सः । वनानि ॥५॥

हे ऋत्विग्यजमानलक्षणा जनाः Vअस्य Vइन्द्रस्य Vतत् Vइदं वीर्यं Vपुष्टं प्रवृद्धम् । अत एव Vभूरि विस्तीर्णं Vपश्यत आलोकयत । तस्मै च Vवीर्याय Vश्रत् Vधत्तन बहुमानं कुरुत । किं पुनस्तद्वीर्यमिति चेत् उच्यते । Vसः इन्द्रः पणिभिरपहृताः Vगाः येन वीर्येण Vअविन्दत् अलभत । तथा तैरपहृतान् Vअश्वान् Vसः इन्द्रो येन Vअविन्दत् । अपि च Vसः इन्द्रः Vओषधीः ओषध्युपलक्षितां सर्वां भूमिं येन वीर्येणालभत । तथा वृत्रेण निरुद्धाः Vअपः वृष्ट्युदकानि Vसः इन्द्रो येनालभत । तथा Vवनानि वननीयानि संभजनीयानि धनानि Vसः इन्द्रो येन वीर्येण प्राप्नोत् ॥ धत्तन । ' तप्तनप्तनथनाश्च ' इति तस्य तनादेशः । अविन्दत् । ' विदृ लाभे ' । ' शे मुचादीनाम् ' इति नुम् ॥ ॥ १६ ॥

भूरिकर्मणे वृषभाय वृष्णे सत्यशुष्माय सुनवाम सोमम् ।
य आदित्या परिपन्थीव शूरोऽयज्वनो विभजन्नेति वेदः ॥ ६ ॥

भूरिऽकर्मणे । वृषभाय । वृष्णे । सत्यऽशुष्माय । सुनवाम । सोमम् ।
यः । आऽदित्य । परिपन्थीऽइव । शूरः । अयज्वनः । विऽभजन् । एति । वेदः ॥ ६ ॥

Vभूरिकर्मणे बहुविधेन शत्रुवधादिरूपेण कर्मणा युक्ताय Vवृषभाय वृषभवत् सर्वेषु देवेषु श्रेष्ठाय Vवृष्णे सेचनसमर्थाय Vसत्यशुष्माय अवितथबलायेन्द्राय तदर्थं Vसोमं Vसुनवाम होमार्थं रसरूपं करवाम । Vशूरः शौर्योपेतः Vयः इन्द्रः Vआदित्य धनविषयमादरं कृत्वा Vअयज्वनः अयजमानस्य Vवेदः धनं Vविभजन् तस्मात् अयजमानाद्विभक्तं कुर्वन्नपहरन् Vएति । यजमानेभ्यस्तद्धनं दातुं गच्छति । तत्र दृष्टान्तः । Vपरिपन्थीव । यथा मार्गनिरोधकश्चोरो गच्छतां पुण्यपुरुषाणां[1] धनं बलात्कारेणापहृत्य गच्छति[2] तद्वत् ॥ आदित्य । ' दृङ् आदरे ' । ' समासेऽनञ्पूर्वे क्त्वो ल्यप् ' ( पा. सू. ७. १. ३७ ) । तस्य स्थानिवद्भावेन कृत्त्वे सति ' ह्रस्वस्य पिति कृति° ' इति तुक् । परिपन्थीव । ' छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि ' ( पा. सू. ५. २. ८९ ) इति इनिप्रत्ययान्तो निपात्यते ॥

तदिन्द्र प्रेव वीर्यं चकर्थ यत्ससन्तं वज्रेणाबोधयोऽहिम् ।
अनु त्वा पत्नीर्हृषितं वयश्च विश्वे देवासो अमदन्ननु त्वा ॥ ७ ॥

तत् । इन्द्र । प्रऽइव । वीर्यम् । चकर्थ । यत् । ससन्तम् । वज्रेण । अबोधयः । अहिम् ।
अनु । त्वा । पत्नीः । हृषितम् । वयः । च । विश्वे । देवासः । अमदन् । अनु । त्वा ॥ ७ ॥

---

१. क्ष-ट-ठ-स-पुरुषाणाम् । २. क्ष-ट-ठ-निर्गच्छति ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]इन्द्र [v]तत् [v]वीर्यं वीरकर्म [v]प्रेव [v]चकर्थ प्रख्यातमिवाकार्षीः। किं पुनस्तद्वीर्यम्। [v]ससन्तं स्वपन्तं मदोन्मत्तम् [v]अहिं वृत्रं [v]वज्रेण कुलिशेन [v]यत् येन वीर्येण त्वम् [v]अबोधयः। प्रबुद्धः[1] सन् मया सह युद्धं करोत्विति[2] [v]हृषितं तादृशस्य वृत्रस्य हननेन[3] प्राप्तहर्षं त्वाम् [v]अनु पश्चात् [v]पत्नीः देवपत्न्यः [v]अमदन् हर्षं प्राप्ताः। अपि च [v]वयश्च गमनशीला मरुतोऽपि तथा [v]विश्वे [v]देवासः अन्ये च सर्वे देवाः त्वाम्[4] [v]अनु पश्चात् अमदन् अमाद्यन् ॥ ससन्तम्। 'षस स्वप्ने'। अदादित्वात् शपो लुक्। पत्नीः। 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम्। अमदन्। 'मदी हर्षे'। व्यत्ययेन शप् ॥

शुष्णं पिप्रुं कुयवं वृत्रमिन्द्र यदावधीर्वि पुरः शम्बरस्य ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ८ ॥

शुष्णम्। पिप्रुम्। कुयवम्। वृत्रम्। इन्द्र। यदा। अवधीः। वि। पुरः। शम्बरस्य।
तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः ॥८॥

हे [v]इन्द्र त्वं शुष्णादींश्चतुरोऽसुरान् [v]यदा [v]अवधीः हतवानसि तदानीं [v]शम्बरस्य असुरस्य [v]पुरः नगराणि [v]वि दारितवानसि। असुराणां मुख्येषु हतेष्वन्यान्यप्यसुरपुराणि विदीर्णानि आसन्नित्यर्थः। यदनेन सूक्तेन प्रार्थितमस्मदीयं [v]तत् मित्रादयः [v]ममहन्तां पूजितं कुर्वन्तु॥ शुष्णम्। 'शुष शोषणे'। अन्तर्भावितण्यर्थात् 'तृषिशुषिरसिभ्यः किच्च' (उ. सू. ३. २९२) इति नप्रत्ययः। 'नित्' इत्यनुवृत्तेराद्युदात्तत्वम्। पिप्रुम्। 'पॄ[5] पालनपूरणयोः, पृ इत्येके'। औणादिकः[5] कुप्रत्ययः। 'छन्दस्युभयथा' इति तस्य सार्वधातुकत्वे सति शप्। जुहोत्यादित्वात् श्लुः। 'अर्तिपिपर्त्योश्च' इति अभ्यासस्य इत्वम्। कुयवम्। यवो यवनं मिश्रणम्। कुत्सितं यवनमस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। शम्बरस्य। शमयतीति शम्ब आयुधम्। 'शमेर्बन्' (उ. सू. ४. ५३४)। ततो मत्वर्थीयो रप्रत्ययः ॥ ॥ १७ ॥

'योनिः' इति नवर्चम् एकादशं सूक्तं कुत्सस्यार्षं त्रैष्टुभम् ऐन्द्रम्। 'योनिर्नव' इत्यनुक्रान्तम्। सूक्तविनियोगो लैङ्गिकः ॥

योनिष्ट इन्द्र निषदे अकारि तमा नि षीद स्वानो नार्वा ।
विमुच्या वयोऽवसायाश्वान्दोषा वस्तोर्वहीयसः प्रपित्वे ॥ १ ॥

योनिः। ते। इन्द्र। निऽसदे। अकारि। तम्। आ। नि। सीद। स्वानः। न। अर्वा।
विऽमुच्य। वयः। अवऽसाय। अश्वान्। दोषा। वस्तोः। वहीयसः। प्रऽपित्वे ॥ १ ॥

हे [v]इन्द्र [v]योनिः वेद्यास्थ्य स्थानं [v]ते तव [v]निषदे निषदनाय उपवेशनाय [v]अकारि कृतमस्माभिः प्रकल्पितमभूत्। [v]तं योनिम् [v]आ [v]नि [v]षीद शीघ्रमागत्य तत्रोपविश। शीघ्रागमने दृष्टान्तः।

---

१. द-ध–प्रबोधितः। २. च-त-फ-श–करोत्विति जागरितवानसि। ३. क्ष–वधेन। ४. च-फ–त्वा त्वाम्। ५. ट-ठ–'पॄ' इत्यस्मादौणादिकः; स–'पृ इत्येके'। औणादिकः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vस्वानो vनार्वा । अर्वा इति अश्वनाम । यथाश्वः स्वानो हेषाशब्दं कुर्वन् स्वकीयं स्थानं शीघ्रमागच्छति तद्वत् । किं कृत्वा । vवयः अश्वबन्धनार्थान् रश्मीन् vविमुच्य रथाद्विश्लिष्य तथा vअश्वान् रथे योजितांश्च तुरगान् vअवसाय विमुच्य । अत्र निरुक्तम्–' अवसायाश्वानिति स्यतिरुपसृष्टो विमोचने ' ( निरु. १. १७ ) इति । कीदृशानश्वान् । vप्रपित्वे यागकाले प्राप्ते । ' प्रपित्वे प्राप्तेऽभीकेऽभ्यक्ते ' ( निरु. ३. २० ) इति यास्कः । vदोषा रात्रौ vवस्तोः अहनि च vवहीयसः आदरातिशयेन वोढॄन् ॥ निषदे । सदेः[1] संपदादिलक्षणो भावे क्विप् । स्वानः । ' स्यमु स्वन ध्वन शब्दे ' । बहुलवचनात् कर्तरि घञ् । ' कर्षात्वतः° ' इत्यन्तोदात्तत्वम् । वयः । वियन्ति रथेन सह संगच्छन्ते इति विशब्देन रश्मयः उच्यन्ते । वी गत्यादिषु । औणादिकः इप्रत्ययः टिलोपश्च । द्वितीयार्थे प्रथमा । अवसाय । ' षो अन्तकर्मणि ' । ' आदेचः° ' इति आत्वम् । ' समासेऽनञ्पूर्वे° ' इति क्त्वो ल्यबादेशः । वहीयसः । ' वह प्रापणे ' । तृजन्तात् वोढृशब्दात् ' तुश्छन्दसि ' इति ईयसुन् । ' तुरिष्ठेमेयःसु ' इति तृलोपे कर्तव्ये ढत्वधत्वष्टुत्वढलोपानामसिद्धत्वात् तदाश्रितस्य ओस्वस्याप्यभावे तृलोप एव क्रियते ॥

ओ त्ये नर इन्द्रभूतये गुर्नू चित्तान्त्सद्यो अध्वनो जगम्यात् ।
देवासो मन्युं दासस्य शश्रन्ते न आ वक्षन्त्सुविताय वर्णम् ॥ २ ॥

ओ इति । त्ये । नरः । इन्द्रम् । ऊतये । गुः । नु । चित् । तान् । सद्यः । अध्वनः । जगम्यात् ।
देवासः । मन्युम् । दासस्य । शश्रन् । ते । नः । आ । वक्षन् । सुविताय । वर्णम् ॥ २ ॥

vत्ये ते vनरः यज्ञस्य नेतारो यजमानाः vऊतये रक्षणाय vइन्द्रम् vओ । आ उ इत्येतन्निपातद्वयसमुदायः आकारार्थः । आ vगुः आगच्छन्ति । स चेन्द्र आगतान् vतान् vनू vचित् क्षिप्रं vसद्यः तदानीमेव vअध्वनः अनुष्ठानमार्गान् vजगम्यात् गमयतु प्रापयतु । vदेवासः सर्वे देवाः vदासस्य उपक्षपयितुः असुरस्य vमन्युं क्रोधं vशश्रन् भक्षयन्तु हिंसन्त्विस्यर्थः । अपि च vते देवाः vनः अस्माकं vसुविताय सुष्ठु प्राप्तव्याय यज्ञाय vवर्णम् अनिष्टनिवारकमिन्द्रम् vआ vवक्षन् आवहन्तु आनयन्तु ॥ जगम्यात् । गमेः अन्तर्भावितण्यर्थात् लिङि ' बहुलं छन्दसि " इति शपः श्लुः । श्रन्न् । ' चमु अदने ' । लेटि व्यत्ययेन श्ना । शकारोपजनश्छान्दसः । यद्वा । श्रन्नातिः प्रकृत्यन्तरं हिंसार्थं द्रष्टव्यम् । वक्षन् । ' वह प्रापणे ' । लेटि ' सिब्बहुलं लेटि ' इति सिप् । ढत्वकत्वषत्वानि । सुविताय । सुपूर्वादेतेः कर्मणि निष्ठा । तन्वादित्वात् उवङ् । 'सूपमानात् क्तः' इत्युत्तरपदान्तोदात्तत्वम् । वर्णम् । 'वृञ् वरणे' । अस्मादन्तर्भावितण्यर्थात् ' कृजृवृसिद्रुपन्यनिस्वपिभ्यो निच्च ' ( उ. सू. ३. २९० ) इति नप्रत्ययः । नित्त्वादाद्युदात्तत्वम् ॥

अव त्मना भरते केतवेदा अव त्मना भरते फेनमुद्नः ।
क्षीरेण स्नातः कुयवस्य योषे हते ते स्यातां प्रवणे शिफायाः ॥ ३ ॥

अव । त्मना । भरते । केतऽवेदाः । अव । त्मना । भरते । फेनम् । उदनः ।
क्षीरेण । स्नातः । कुयवस्य । योषे इति । हते इति । ते इति । स्याताम् । प्रवणे । शिफायाः ॥३॥

---

१. क्ष-स–षदॢ विशरणगत्यवसादनेषु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vकेतवेदाः केतं ज्ञातं वेदः परेषां धनं येन स तादृशः कुयवनामासुरः vत्मना आत्मना स्वयमेव vअव vभरते ज्ञातं परेषां धनमपहरति। अपि च सोऽसुरः vउदन् उदकेऽन्तर्वर्तमानः सन् vफेनं फेनयुक्तमुदकमात्मना स्वयमेव vअव vभरते अपहरति। vक्षीरेण क्षरणशीलेन तेनापहृतेनोदकेन vकुयवस्य असुरस्य vयोषे भार्ये vस्नातः स्नानं कुर्वाते। तादृश्यौ[1] स्त्रियौ vशिफायाः। शिफा नाम नदी। तस्याः vप्रवणे निम्ने प्रवेष्टुमशक्येऽगाधप्रदेशे vहते नष्टे vस्यातां भवेताम्। हे इन्द्र त्वं परेषां धनमपहाय अन्यैर्दुरवगाहे उदकस्य मध्ये वर्तमानं कुयवं सकुटुम्बमवधीरित्यर्थः॥ त्मना। 'मन्त्रेष्वाङ्यादेरात्मनः' इत्याकारलोपः। भरते। 'हृञ् हरणे'। 'हृग्रहोर्भः ०' इति भत्वम्। केतवेदाः। 'कित ज्ञाने'। कर्मणि घञ्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। उदन्। 'पदन्०' इत्यादिनोदकशब्दस्य उदन्नादेशः। 'सुपां सुलुक्०' इति सप्तम्या लुक्॥

युयोप॒ नाभि॒रुप॑रस्या॒योः प्र पूर्वा॑भिस्तिरते॒ राष्टि॒ शूर॑ः।
अ॒ञ्जसी॑ कु॒लिशी॑ वी॒रप॑त्नी॒ पयो॑ हिन्वा॒ना उ॒दभि॑र्भरन्ते॥ ४॥

युयोप॑। नाभि॑ः। उप॑रस्य। आ॒योः। प्र। पूर्वा॑भिः। ति॒रते॒। राष्टि॑। शूर॑ः।
अ॒ञ्ज॒सी। कु॒लि॒शी। वी॒रऽप॑त्नी। पयः॑। हि॒न्वा॒नाः। उ॒दऽभि॑ः। भ॒र॒न्ते॥ ४॥

vउपरस्य उदकमध्ये[2] उप्तस्य[3] अवस्थितस्य vआयोः परेषामुपद्रवार्थमितस्ततो गच्छतः कुयवस्यासुरस्य vनाभिः संनद्धम् आवसनस्थानं[4] vयुयोप गूढमासीत्। यथान्यैर्न दृश्यते सोऽसुरस्तथाकरोदित्यर्थः। अपि च vपूर्वाभिः पूरयित्रीभिरात्मनापहृताभिरद्भिः vप्र vतिरते सोऽसुरः प्रवर्धते। स च vशूरः शौर्योपेतः vराष्टि राजते च। आत्मीयेन शौर्येण लोके प्रख्यातो भवतीत्यर्थः। तमिममसुरम् vअञ्जसी आञ्जस्योपेता vकुलिशी कुलं[5] शातयन्ती vवीरपत्नी वीरस्य पालयित्री एतत्संज्ञिकास्तिस्रो नद्यः vपयः पयसा तत्संबन्धिना सारभूतेनोदकेन vहिन्वानाः प्रीणयन्त्यः vउदभिः आत्मीयैरुदकैः vभरन्ते धारयन्ति॥ युयोप। 'युप विमोहने'। नाभिः। 'नहो भश्च' (उ. सू. ४. ५६५) इति इञ्प्रत्ययः। राष्टि। 'राजृ दीप्तौ'। 'बहुलं छन्दसि' इति शपो लुक्। व्रश्चादिना षत्वे ष्टुत्वम्। पयः। 'सुपां सुलुक्०' इति तृतीयाया लुक्। हिन्वानाः। हिविः प्रीणनार्थः। इदित्त्वात् नुम्। अस्मात्तच्छीलिकश्चानश्। आगमानुशासनस्यानित्यत्वात् मुगभावः। चानशो लसार्वधातुकत्वाभावात् तत्स्वराभावे चित्स्वर एव शिष्यते॥

प्रति॒ यत्स्या नीथादर्शि॒ दस्यो॒रोको॒ नाच्छा॑ सद॒नं जान॒ती गा॑त्।
अध॑ स्मा नो मघवञ्चर्कृ॒तादि॒न्मा नो॑ म॒घेव॑ नि॒ष्पी परा॑ दाः॥ ५॥

प्रति॑। यत्। स्या। नीथा॑। अदर्शि॑। दस्यो॑ः। ओकः॑। न। अच्छ॑। सद॑नम्। जान॒ती। गा॒त्।
अध॑। स्म॒। नः॒। म॒घऽव॒न्। च॒र्कृ॒तात्। इत्। मा। नः॒। म॒घाऽइ॑व। नि॒ष्पी। परा॑। दाः॒॥५॥

---

१. क्ष ट-स–ते तादृश्यौ। २. त-द-ध-स–उदकस्य मध्ये। ३. च-त-फ-श–सुप्तस्य; द-ध–उत्पन्नस्य। ४. क्ष-ट-स–आवासस्थानम्। ५. क्ष–कूलम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]यत् यदा [v]नीथा नयनहेतुभूता [v]स्या सा पदवी [v]प्रति [v]अदर्शि अस्माभिर्दृष्टाभूत् सा च पदवी [v]दस्योः उपक्षपयितुः कुयवस्यासुरस्य [v]सदनं गृहम् [v]अच्छ आभिमुख्येन [v]गात् गता प्राप्ता । तत्र दृष्टान्तः । [v]जानती स्वकीयं वत्सम् अभिजानती[1] गौः [v]ओको [v]न निवासस्थानं स्वकीयं गोष्ठं यथा ऋजु प्राप्नोति । तद्वन्मार्गोऽप्यसुरगृहं प्राप्त इत्यर्थः । [v]अध [v]स्म अथानन्तरमेव हे [v]मघवन् धनवन्निन्द्र [v]चर्कृतात् पुनःपुनस्तेनासुरेण कृतादुपद्रवात् [v]नः अस्मान् रक्षेति शेषः । [v]इत् इत्यवधारणे । अस्मान् रक्षैव [v]नः अस्मान् [v]मा [v]परा [v]दाः मा परित्याक्षीः । अस्माभिर्ज्ञातेन मार्गेण गत्वा अस्मदुपद्रवकारिणमसुरं जहीति तात्पर्यार्थः । तत्र व्यतिरेके दृष्टान्तोऽभिधीयते । [v]मघेव [v]निष्पपी । यथा विनिर्गतसपो[2] विनिर्गतशेपः[2] यथेष्टचारी दासीपतिः मघेव यथा धनान्यस्थाने परित्यजति तथास्मान् मा परित्याक्षीरित्यर्थः । अत्र निरुक्तं–'निष्पपी स्त्रीकामो भवति विनिर्गतसपः[3]। सपः सपतेः[3] स्पृशतिकर्मणः । मा नो मघेव निष्पपी परा दाः । स यथा धनानि विभजति[4] मा नस्त्वं तथा परा दाः' (निरु. ५.१६) इति ॥ नीथा । 'णीञ् प्रापणे' । 'हनिकुषिनीरमिकाशिभ्यः क्थन्' इति करणे क्थन्प्रत्ययः । गात् । एतेर्लुङि 'इणो गा लुङि' इति गादेशः । 'गातिस्था०' इति सिचो लुक् । 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः । चर्कृतात् । करोतेर्यङ्लुगन्तात् 'निष्ठा' इति क्तप्रत्ययः । मघाऽइव । 'शेश्छन्दसि०' इति शेर्लोपः । 'निष्पपी । 'षप समवाये' । सपति समवैति योन्या संगच्छते इति सपः शेपः । पचाद्यच् । निर्गतो नित्योद्धृतः सपः शेपो यस्य स स्त्रीव्यसनी निष्पपः । वर्णव्यापत्त्या ईकारः । दाः । 'डुदाञ् दाने' । लुङि 'गातिस्था०' इति सिचो लुक् । 'न माङ्योगे' इत्यडभावः ॥ ॥ १८ ॥

स त्वं नं इन्द्र सूर्ये सो अप्स्वनागास्त्व आ भज जीवशंसे ।
मान्तरां भुजमा रीरिषो नः श्रद्धितं ते महत इन्द्रियाय ॥ ६ ॥

सः । त्वम् । नः । इन्द्र । सूर्ये । सः । अप्ऽसु । अनागाःऽत्वे । आ । भज । जीवऽशंसे ।
मा । अन्तराम् । भुजम् । आ । रिरिषः । नः । श्रद्धितम् । ते । महते । इन्द्रियाय ॥ ६ ॥

हे [v]इन्द्र [v]सः [v]त्वं [v]नः अस्मान् [v]सूर्ये सर्वस्य प्रेरके आदित्ये [v]आ [v]भज आभाजय आभिमुख्येन[5] भक्तान्[5] संभक्तान् कुरु । तथा [v]सः त्वम् [v]अप्सु अब्देवतासु अस्मानाभाजय । अपि च [v]जीवशंसे जीवैः प्राणिभिः शंसनीये कामयितव्ये [v]अनागास्त्वे अपापत्वे पापराहित्येऽस्मानाभाजय । अपि च [v]नः अस्माकम् [v]अन्तरां गर्भरूपेण[6] अन्तर्वर्तमानां [v]भुजं पालयित्रीं[7] प्रजाम् [v]आ समन्तात् [v]मा [v]रीरिषः मा हिंसीः । [v]ते तव [v]महते प्रभूताय [v]इन्द्रियाय बलाय [v]श्रद्धितम् अस्माभिः श्रद्धानं कृतम् । त्वदीयं बलं बहुमानपूर्वकं स्तुम इत्यर्थः । तस्मात्तादृशबलयुक्तस्त्वं मा रीरिष इति पूर्वेण संबन्धः ॥ अनागास्त्वे । न विद्यते आगः पापं यस्य सोऽनागाः । तस्य भावस्तत्त्वम् । छान्दस उपधादीर्घः । जीवशंसे । 'शंसु स्तुतौ' । कर्मणि घञ् । थाथादिना उत्तरपदान्तोदात्तत्वम् । भुजम् । भुनक्ति पालयतीति भुक् प्रजा । क्विप् । रीरिषः । 'रिष हिंसायाम्' । स्वार्थे ण्यन्तात् अस्मात् लुङि चङि णिलोपे उपधाह्रस्वत्वादीनि । छान्दसं पदकालीनमभ्यासह्रस्वत्वम् । श्रद्धितम् । श्रच्छब्दस्य ऊर्यादित्वेन ( पा. सू. १. ४. ६१ ) गतित्वात् 'गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरत्वम् ॥

---

१. क्ष–अभिजानाना । २. क्ष–निर्गतपसो निर्गतमेढ्रः । ३. क्ष-ट-ल–निर्गतपसः । पसः सपतेः । ४. च-फ–विनाशयति । ५. क्ष-ट–आभीक्ष्ण्येन । ६. क्ष–गर्भभूताम् । ७. क्ष–पालनीयाम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अधा मन्ये श्रत्ते अस्मा अधायि वृषा चोदस्व महते धनाय ।
मा नो अकृते पुरुहूत योनाविन्द्र क्षुध्यद्भ्यो वयं आसुतिं दाः ॥ ७ ॥

अध । मन्ये । श्रत् । ते । अस्मै । अधायि । वृषा । चोदस्व । महते । धनाय ।
मा । नः । अकृते । पुरुऽहूत । योनौ । इन्द्र । क्षुध्यत्ऽभ्यः । वयः । आऽसुतिम् । दाः ॥७॥

हे इन्द्र [v]अध अथ अनन्तरं [v]मन्ये त्वां मनसा जानामि । [v]ते तव [v]अस्मै बलाय [v]श्रत् [v]अधायि अस्माभिः श्रद्धा कृता । त्वदीयबलविषयमादरातिशयेन स्तोत्रं कृतमित्यर्थः । [v]वृषा कामानां वर्षिता स त्वं [v]महते प्रौढाय [v]धनाय [v]चोदस्व चोदय अस्मान् प्रेरय । हे [v]पुरुहूत पुरुभिर्बहुभिर्यजमानैराहूत इन्द्र [v]अकृते अनिष्पादिते धनशून्ये [v]योनौ । गृहनामैतत् । गृहे [v]नः अस्मान् [v]मा धाः निधेहि[1] । धनधान्यपूर्णे गृहेऽस्मान् वासयेत्यर्थः । अपि च हे [v]इन्द्र [v]क्षुध्यद्भ्यो बुभुक्षितेभ्योऽन्येभ्योऽपि स्तोतृभ्यः [v]वयः अन्नम् [v]आसुतिं पेयं क्षीरादिकं च [v]दाः देहि[2] ॥ अधायि । दधातेः कर्मणि लुङि च्लेश्चिण् । ' आतो युक् चिण्कृतोः ' इति युक् । क्षुध्यद्भ्यः । ' क्षुध बुभुक्षायाम् ' । दिवादित्वात् श्यन् । नित्त्वादाद्युदात्तत्वम् ॥

मा नो वधीरिन्द्र मा परा दा मा नः प्रिया भोजनानि प्र मोषीः ।
आण्डा मा नो मघवञ्छक्र निर्भेन्मा नः पात्रा भेत्सहजानुषाणि ॥ ८ ॥

मा । नः । वधीः । इन्द्र । मा । परा । दाः । मा । नः । प्रिया । भोजनानि । प्र । मोषीः ।
आण्डा । मा । नः । मघऽवन् । शक्र । निः । भेत् । मा । नः । पात्रा । भेत् । सहऽजानुषाणि ॥८॥

हे [v]इन्द्र [v]नः अस्मान् [v]मा [v]वधीः मा हिंसीः । सर्वदा रक्षेत्यर्थः । अपि च [v]मा [v]परा [v]दाः मा परित्याक्षीः । परादानं परित्यागः । अस्मत्कृतां पूजां सर्वदा गृहाणेत्यर्थः । अपि च [v]नः अस्माकं [v]प्रिया प्रियाणीप्सितानि [v]भोजनानि उपभोग्यानि धनानि [v]मा [v]प्र [v]मोषीः मापहार्षीः[3] । अस्मास्वेव धनानि यथा स्युस्तथा कुर्वित्यर्थः । तथा हे [v]मघवन् धनवन् [v]शक्र सर्वकार्यशक्तेन्द्र [v]नः अस्माकम् [v]आण्डा अण्डसंबन्धीनि गर्भरूपेण निषिक्तान्यपत्यानि [v]मा [v]भेत् मा भिनः । गर्भरूपेणावस्थितान् अस्मत्पुत्रान् रक्षेत्यर्थः । [v]मा[4] च [v]नः [v]पात्रा । पतन्ति गच्छन्ति गमनसमर्थानि यानि तान्यपत्यानि पात्राणि । तानि च मा [v]भेत् मा भिदः । [v]सहजानुषाणि । जानुभ्यां यानि भूमिं सनन्ति गच्छन्तीत्यर्थः । तानि जानुषाणि । तैः सहितानि मा विनीनशः[4] ॥ वधीः । हन्तेर्माङि ' लुङि च ' इति वधादेशः । स चादन्तः । सिच् । ' अतो लोपः ' इत्यकारलोपः । तस्य स्थानिवद्भावात् ' अतो हलादेः° ' इति वृद्धयभावः । ' इट ईटि ' इति सिचो लोपः । मोषीः । ' मुष स्तेये ' । लुङि सिचः

---

१. त-द-फ-श-स-मा निधेहि । २. क्ष-ट-स-देहि प्रयच्छ । ३. क्ष-ट-मापहासीः । ४. क्ष-ट-स-'मा.....विनीनशः ' इत्यस्य स्थाने ' अपि च पात्रा पात्राणि रक्षणे समर्थानि सहजानुषाणि । जनुर्जन्म । तेन संबद्धाः सहजानुषाः समानजन्मानो ज्ञातय इत्यर्थः । तैः सह वर्तमानानि उत्पन्नान्यपत्यानि तानि च मा भेत् मा भिनः । उत्पन्नानप्यस्मदीयान् पुत्रान् रक्षेत्यर्थः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इट्। ' नेटि ' इति वृद्धिप्रतिषेधः। भेत्। ' भिदिर् विदारणे '। लङि सिपि ' बहुलं छन्दसि ' इति विकरणस्य लुक्। लघूपधगुणः।' हल्ङ्याब्भ्यः० ' इति सिपो लोपः॥

माध्यंदिने सवने ' अर्वाङेहि ' इत्येषा पोतुः प्रस्थितयाज्या। सूत्रितं च–अर्वाङेहि सोमकामं त्वाहुस्तवायं सोमस्त्वमेह्यर्वाङ् ' ( आश्व. श्रौ. ५. ५ ) इति॥

अर्वाङेहि सोमकामं त्वाहुरयं सुतस्तस्य पिबा मदाय।
उरुव्यचा जठर आ वृषस्व पितेव नः शृणुहि हूयमानः॥ ९॥

अर्वाङ्। आ। इहि। सोमऽकामम्। त्वा। आहुः। अयम्। सुतः। तस्य। पिब। मदाय।
उरुऽव्यचाः। जठरे। आ। वृषस्व। पिताऽइव। नः। शृणुहि। हूयमानः॥ ९॥

हे इन्द्र त्वम् Vअर्वाङ् अस्मदभिमुखः सन् Vएहि आगच्छ। किं कारणमिति चेत् यस्मात्त्वां Vसोमकामं सोमविषयाभिलाषम्[1] Vआहुः पुराविदः कथयन्ति।Vअयम् अस्मदीयः सोमः Vसुतः ऋत्विग्भिरभिषुतः। अत आगच्छेत्यर्थः। आगत्य च Vमदाय हर्षार्थं Vतस्य तम् अस्मदीयमभिषुतं सोमं Vपिब। एतदेव स्पष्टीक्रियते[2]। Vउरुव्यचाः उरु विस्तीर्णं व्यचो व्यापनं यस्य तादृशो महावयवो भूत्वा Vजठरे आत्मीये उदरे Vआ Vवृषस्व सोममासिञ्च। आ समन्तात् पूरयेत्यर्थः। एवंभूतस्त्वं Vहूयमानः स्तुतिभिराहूयमानः सन् Vपितेव पुत्राणां वाक्यानि शृणोति[3] तथा Vनः अस्माकं वाक्यानि[4] Vशृणुहि शृणु॥ सोमकामम्। सोमविषयः[5] कामः अभिलाषो यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। आहुः। ' ब्रुवः पञ्चानामादित आहो ब्रुवः ' ( पा. सू. ३. ४.८४) इति ब्रूः उसादेशः धातोराहादेशश्च। तस्य।' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी। मदाय। ' मदी हर्षे '। ' मदोऽनुपसर्गे ' इति भावे अप्। उरुव्यचाः। ' व्यच व्याजीकरणे '। औणादिकः असिप्रत्ययः। ' व्यचेः कुटादित्वमनसि ' ( का. १. २. १. १ ) इति वचनात् ङित्त्वाभावेन[6] संप्रसारणाभावः। ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम्। यद्वा। उरु विचति व्याप्नोतीति उरुव्यचाः। कृदुत्तरपदप्रकृतिस्वरत्वम्। वृषस्व। ' वृष सेचने '। व्यत्ययेनात्मनेपदशप्रत्ययौ[7]। शृणुहि। ' उतश्च प्रत्ययाच्छन्दसि वावचनम् ' इति हेर्लुगभावः॥ ॥ १९॥

' चन्द्रमाः ' इति एकोनविंशत्यृचं द्वादशं सूक्तम्। अपां पुत्रस्य त्रितस्य कूपे पतितस्य कुत्सस्य वा आर्षम्। तथा चोभयोः कूपपातः आम्नायते—' त्रितः कूपेऽवहितः ' ( ऋ. सं. १. १०५. १७ ) ' काटे निबाळ्ह ऋषिरह्वदूतये ( ऋ. सं. १. १०६. ६ ) इति च। त्रितस्य च अपां पुत्रत्वं तैत्तिरीयाः स्पष्टमामनन्ति– ' तत एकतोऽजायत स द्वितीयमभ्यपातयत् ततो द्वितोऽजायत स तृतीयमभ्यपातयत् ततस्त्रितोऽजायत यदद्भ्योऽजायन्त तदाप्यानामाप्यत्वम् ' ( तै. ब्रा. ३. २. ८. १०-११ ) इति। तमेतमाप्यं ' त्रितस्तद्वेदाहयः ' ( ऋ. सं. १. १०५. ९ ) इति तकारोपजनेन वयमधीमहे इति।

---

१. क्ष-ट. ठ– सोमविषयाभिलाषवन्तम्। २. क्ष-ट-ठ–स्पष्टीकरोति। ३. क्ष-ट-ठ-स—ग्रथा. शृणोति। ४. ट-ठ-स–स्तुतिवाक्यानि। ५. क्ष–सोमे। ६. क्ष-स–ङित्त्वाभावे। ७. क्ष-स–व्यत्ययेनात्मनेपदं शप्रत्ययः। ८. क्ष- स–' इति ' नास्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अन्त्या त्रिष्टुप् । ' सं मा तपन्ति ' इत्येषा यवमध्या महाबृहती । आद्यौ द्वावष्टाक्षरौ पादौ द्वादशाक्षरस्तृतीयस्ततो द्वावष्टाक्षरौ सा यवमध्या महाबृहती । ' चत्वारोऽष्टका जागतश्च महाबृहती ' ( अनु. ९. ९ ) इत्युक्त्वा[1] ' मध्ये चेद्यवमध्या ' (अनु. ९. १०) इत्युक्तलक्षणोपेतत्वात्[2] । शिष्टाः पङ्क्तयः । विश्वे देवाः देवता । तथा चानुक्रान्तं–' चन्द्रमा एकोनास्यस्त्रितो वा वैश्वदेवं हि पाङ्क्तमन्त्या त्रिष्टुप्[3] अष्टमी महाबृहती यवमध्या ' इति । ' हि ' इत्यभिधानादिदमादीनि त्रीणि सूक्तानि वैश्वदेवानि । विनियोगः[4] । अत्र शाट्यायनिन इतिहासमाचक्षते–एकतो द्वितस्त्रित इति पुरा त्रय ऋषयो बभूवुः । ते कदाचिन्मरुभूमावरण्ये वर्तमानाः पिपासया संतप्तगात्राः सन्त एकं कूपमविन्दन् । तत्र[5] त्रिताख्यः[6] एको जलपानाय कूपं प्राविशत् । स्वयं पीत्वा इतरयोश्च कूपादुदकमुद्धृत्य प्रादात् । तौ तदुदकं पीत्वा त्रितं[7] कूपे पातयित्वा तदीयं धनं सर्वमपहृत्य कूपं च रथचक्रेण पिधाय प्रास्थिषाताम् । ततः कूपे पतितः स त्रितः कूपादुत्तरीतुमशक्नुवन् सर्वे देवा मामुद्धरन्विति मनसा सस्मार । ततस्तेषां स्तावकमिदं सूक्तं ददर्श । तत्र रात्रौ कूपस्यान्तश्चन्द्रमसो रश्मीन् पश्यन् परिदेवयते ॥

चन्द्रमा अप्स्व१न्तरा सुपर्णो धावते दिवि ।
न वो हिरण्यनेमयः पदं विन्दन्ति विद्युतो वित्तं मे अस्य रोदसी ॥ १ ॥

चन्द्रमाः । अप्ऽसु । अन्तः । आ । सुऽपर्णः । धावते । दिवि ।
न । वः । हिरण्यऽनेमयः । पदम् । विन्दन्ति । विऽद्युतः । वित्तम् । मे । अस्य । रोदसी इति ॥ १ ॥

[v]अप्सु आन्तरिक्षासु[8] उदकमये मण्डले [v]अन्तः मध्ये[9] वर्तमानः [v]सुपर्णः शोभनपतनः । यद्वा । सुपर्ण इति रश्मिनाम । सुषुम्णाख्येन सूर्यरश्मिना युक्तः [v]चन्द्रमाः [v]दिवि द्युलोके [v]आ [v]धावते । आङ्[10] मर्यादायाम् । एकेनैव प्रकारेण धावते[10] शीघ्रं गच्छति । तादृशस्य चन्द्रमसः संबन्धिनो हे [v]हिरण्यनेमयः सुवर्णसदृशपर्यन्ताः । यद्वा । हितरमणीयप्रान्ताः । [v]विद्युतः विद्योतमाना रश्मयः [v]वः युष्माकं [v]पदं पादस्थानीयमग्रं [v]न [v]विन्दन्ति मदीयानीन्द्रियाणि[11] कूपेनावृतत्वात् न लभन्ते । अतः[12] इदमनुचितम् । तस्मात् कूपात् मामुत्तारयतेत्यर्थः । अपि च हे [v]रोदसी द्यावापृथिव्यौ [v]मे मदीयम् [v]अस्य इदं स्तोत्रं [v]वित्तं जानीतम् । यद्वा । मदीयं कूपपतनरूपं यदिदं दुःखं तदवगच्छतम् । मदीयं स्तोत्रं श्रुत्वा मदीयं दुःखं ज्ञात्वा वा अस्मात् कूपात् मामुत्तारयतमित्यर्थः ॥ चन्द्रमाः । चन्द्रमाह्लादनं सर्वस्य जगतो निर्मिमीते इति चन्द्रमाः । ' चन्द्रे माङो डित्[13] ' ( उ. सू. ४. ६६७ ) इति असुन् । दासीभारादिषु पाठात् पूर्वपदप्रकृतिस्वरत्वम् । धावते । ' सृ गतौ ' । ' पाघ्रा° ' इत्यादिना वेगितायां[14] धावादेशः । व्यत्ययेन आत्मनेपदम् । वित्तम् । ' विद ज्ञाने ' । लोटि अदादित्वात् शपो लुक् । पादादित्वात् ' तिङ्ङतिङः ' इति निघाताभावः । अस्य । ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी । ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम् ॥

---

१. क्ष-ट-ठ–' इत्युक्त्वा ' नास्ति । २. क्ष-ट-ठ–इत्युक्तत्वात् । ३. क्ष–त्रिष्टुवन्तम् । ४. क्ष-ट-स–विनियोगो लौकिकः । ५. त-श–ततः । ६. क्ष–त्रितः । ७. क्ष-ट-स–तं त्रितम्; ठ–तत्र तम् । ८. क्ष-स–आन्तरिक्ष्यासु ९. क्ष-ट-ठ-स–' मध्ये ' इत्यस्यानन्तरं ' यद्वा आप इत्यन्तरिक्षनाम । तत्र मध्ये ' इत्यधिकम् । १०. क्ष-स–' आङ् मर्यादायाम् । एकेनैव प्रकारेण धावते ' नास्ति । ११. क्ष–अस्मदीयानीन्द्रियाणि । १२. क्ष–यतः । १३. क्ष-ट-ठ–डिच्च । १४. क्ष-स–वेगितायां गतौ ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अर्थमिद्वा उ अर्थिन आ जाया युवते पतिम् ।
तुञ्जाते वृष्ण्यं पयः परिदाय रसं दुहे वित्तं मे अस्य रोदसी ॥ २ ॥

अर्थम् । इत् । वै । ऊँ इति । अर्थिनः । आ । जाया । युवते । पतिम् ।
तुञ्जाते इति । वृष्ण्यम् । पयः । परिऽदाय । रसम् । दुहे । वित्तम् । मे । अस्य । रोदसी इति ॥२॥

[v]अर्थिनः धनमपेक्षमाणाः पुरुषाः [v]अर्थमिद्वै अपेक्षितं धनं प्राप्नुवन्त्येव । नाहं प्राप्नोमि । [v]उ इत्येतत् पादपूरणम् । अपि च [v]जाया अन्यदीया भार्या [v]पतिं स्वपतिम् [v]आ [v]युवते आभिमुख्येन प्राप्नोति । मदीया तु मद्विरहात् हता आसीत् । अपि च संयुक्तौ तौ जायापती [v]वृष्ण्यं वीर्यरूपं [v]पयः उदकं [v]तुञ्जाते[1] प्रजननाय अन्योन्यसंघट्टनेन[2] प्रेरयतः । तदनन्तरं [v]रसं पुरुषस्य सारभूतं वीर्यं [v]परिदाय गर्भाशयेनादाय गर्भरूपेण धृत्वा [v]दुहे दुग्धे पुत्ररूपेण जनयति । मम तु पुत्रोऽपि नोत्पद्यते । अत इदं मदीयं दुःखं हे द्यावापृथिव्यौ जानीतम् ॥ उ । ' उञः ' ( पा. सू. १. १. १७ ) इति शाकल्यस्य मतेन प्रगृह्यत्वात् ' प्लुतप्रगृह्या अचि° ' इति प्रकृतिभावः । युवते । ' यु मिश्रणे ' । व्यत्ययेनात्मनेपदम् । शब्लुकि प्राप्ते व्यत्ययेन शः । तुञ्जाते । ' तुजि पिजि हिंसाबलदाननिकेतनेषु[3] ' । इदित्त्वात् नुम् । व्यत्ययेन झम् । झान्नलोपः । दुहे । ' दुह प्रपूरणे ' । ' लोपस्त आत्मनेपदेषु ' इति तलोपः ॥

मो षु देवा अदः स्वरव पादि दिवस्परि ।
मा सोम्यस्य शंभुवः शूने भूम कदा चन वित्तं मे अस्य रोदसी ॥ ३ ॥

मो इति । सु । देवाः । अदः । स्वः । अव । पादि । दिवः । परि ।
मा । सोम्यस्य । शम्ऽभुवः । शूने । भूम । कदा । चन । वित्तम् । मे । अस्य । रोदसी इति ॥३॥

हे [v]देवाः [v]स्वः स्वर्गे वर्तमानम् [v]अदः तदस्मदीयं[4] पितृपितामहप्रपितामहात्मकं संतानं [v]दिवस्परि[5] दिवश्चोपरि वर्तमानं[5] [v]मो [v]षु मैव [v]अव [v]पादि अवपन्नं विपन्नं प्रभ्रष्टं मा भूत् मम पुत्राभावात् । पुत्रेण लोकान् जयति ' नापुत्रस्य लोकोऽस्ति ' ( ऐ.ब्रा. ७. १३ ) इति श्रुतेः । अतो वयं [v]सोम्यस्य सोमपानार्हस्य पितृगणस्य [v]शंभुवः सुखस्य भावयितुः पुत्रस्य [v]शूने अपगमने [v]कदा [v]चन कदाचिदपि [v]मा [v]भूम । युष्मत्प्रसादात् मम पुत्रा जायन्ताम् । अतो मामस्माद्दुःखादुत्तारयतेत्यर्थः । हे द्यावापृथिव्यौ युवां च मदीयं विज्ञापनं जानीतम् ॥ मो । मा[6] उ इति निपातद्वयसमुदायः[6] मैवेत्यस्यार्थे । सु इत्येतदवधारणे । ' सुञः ' इति षत्वम् । पादि । ' पद गतौ ' । ' चिण् ते पदः ' ( पा. सू. ३. १. ६० ) इति कर्तरि लुङि च्लेः चिणादेशः । दिवः । ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम् । ' पञ्चम्याः परावध्यर्थे ' इति विसर्जनीयस्य सत्वम् । सोम्यस्य । ' सोममर्हति यः ' ( पा. सू. ४. ४. १३७ )

---

१. न–तुञ्जाते इत्यस्यानन्तरम् ' आभिमुख्येन प्राप्नोति; ' स–' आभिमुख्येन ' इत्यधिकम् । २. क्ष-ट–प्रजनान्योन्यसंयोगेन; स–प्रजननायान्योन्यसंभोगेन । ३. क्ष-न–हिंसाबलादाननिकेतनेषु । ४. ट–एतदस्मदीयम् । ५. क्ष-ट–दिवस्परि । परिः पञ्चम्यर्थानुवादी । दिवः स्वर्गात्; स–दिवस्परि दिवश्चोपरि वर्तमानम् । परिः पञ्चम्यर्थानुवादी । ६. क्ष-स–मा उ सु इति निपातसमुदायः ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति यप्रत्ययः । शंभुवः । भवतेरन्तर्भावितण्यर्थात् क्विप् । शूने । ' टुओश्वि गतिवृद्ध्योः ' । भावे निष्ठा । ' श्वीदितो निष्ठायाम् ' इति इट्प्रतिषेधः । ' वचिस्वपि° ' इत्यादिना संप्रसारणम् । ' ओदितश्च ' ( पा. सू. ८. २. ४५ ) इति निष्ठानत्वम् । व्यत्ययेनाद्युदात्तत्वम् । वृषादिर्वा द्रष्टव्यः ॥

यज्ञं पृच्छाम्यवमं स तद्दूतो वि वोचति ।
क ऋतं पूर्व्यं गतं कस्तद्बिभर्ति नूतनो वित्तं मे अस्य रोदसी ॥ ४ ॥

यज्ञम् । पृच्छामि । अवमम् । सः । तत् । दूतः । वि । वोचति ।
कः । ऋतम् । पूर्व्यम् । गतम् । कः । तत् । बिभर्ति । नूतनः । वित्तम् । मे । अस्य । रोदसी इति ॥४॥

vयज्ञं यजनीयम् vअवमं सर्वेषां देवानामादिभूतम् । ' अग्निर्मुखं प्रथमो देवतानाम् ' ( ऐ. ब्रा. १. ४ ) इति श्रुतेः । ' अग्निर्वै देवानामवमः ' (ऐ. ब्रा. १. १) इति ब्राह्मणाच्च । तमग्निं vपृच्छामि । यन्मया पृष्टं vतत् देवानां vदूतः vसः अग्निः vवि vवोचति विविच्य कथयतु । किं पुनस्तत् पृच्छ्यते इति चेत्, उच्यते । हे अग्ने त्वदीयं vपूर्व्यं पूर्वकालीनम् vऋतं भद्रं स्तोतृभ्यः कृतं श्रेयः vक vगतं कुत्रेदानीं वर्तते । vनूतनः नवतरस्वत्तोऽन्यः vकः पुरुषः vतत् भद्रं vबिभर्ति धारयति । यदि त्वय्यवर्तिष्यत ममेदृशी दशापि नाभविष्यत् । अतस्तत् क्व गतमिति कथय ॥ वोचति । ' वच परिभाषणे ' । लेटि अडागमः । ' वच उम् ' इति व्यत्ययेन धातोः उमागमः । क्व । ' किमोऽत् ' ( पा. सू. ५. ३. १२ ) इति सप्तम्यर्थे अत् । ' क्वाति ' ( पा. सू. ७. २. १०५ ) इति किमः क्वादेशः । ' तित्स्वरितम् ' इति स्वरितत्वम् । परेण सह ' ऋत्यकः ' इति प्रकृतिभावः ॥

अमी ये देवाः स्थन त्रिष्वा रोचने दिवः ।
कद्ब ऋतं कदनृतं क्व प्रत्ना व आहुतिर्वित्तं मे अस्य रोदसी ॥ ५ ॥

अमी इति । ये । देवाः । स्थन । त्रिषु । आ । रोचने । दिवः ।
कत् । वः । ऋतम् । कत् । अनृतम् । क्व । प्रत्ना ।
वः । आऽहुतिः । वित्तम् । मे । अस्य । रोदसी इति ॥ ५ ॥

हे vदेवाः vत्रिषु पृथिव्यादिषु स्थानेषु vये vअमी यूयं vस्थन वर्तमाना भवथ । यानि स्थानानि vदिवः द्योतमानस्य सूर्यस्य vआ vरोचने दीप्तिविषये वर्तन्ते । सूर्यप्रकाश्येषु स्थानेषु[1] इत्यर्थः । तेषां vवः युष्माकं संबन्धि स्तोतृविषयम् vऋतं सत्यं vकत् कस्मिन् देशे वर्तते । vअनृतं द्वेष्टृविषयमसत्यं च vकत् कुत्र गतम् । अपि च vप्रत्ना चिरकालीना vवः युष्माकं संबन्धिनी vआहुतिः मया पूर्वमनुष्ठितो यागः vक्व कुत्रासीत् । ईदृग्भूतदुःखानुभवेन मया पूर्वमनुष्ठितो यागसमूहो युष्मान्न प्रामोदित्यनुमिमे । अन्यत् पूर्ववत् ॥ स्थन । ' तप्तनप्तनथनाश्च ' इति तशब्दस्य थनादेशः । कत् । क्वशब्दस्य वर्णव्यापत्त्या कद्भावः ॥ ॥ २० ॥

---

१. क्ष-न-सं-तेषु स्थानेषु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कद्व ऋतस्य धर्णसि कद्वरुणस्य चक्षणम् ।
कदर्यम्णो महस्पथाति क्रामेम दूढ्यो वित्तं मे अस्य रोदसी ॥ ६ ॥

कत् । वः । ऋतस्य । धर्णसि । कत् । वरुणस्य । चक्षणम् ।
कत् । अर्यम्णः । महः । पथा । अति । क्रामेम । दुःऽध्यः । वित्तम् । मे । अस्य । रोदसी इति ॥६॥

हे देवाः Vवः युष्माकं संबन्धिनः[1] Vऋतस्य सत्यस्य अभिमतफलप्रापणस्य Vधर्णसि धारणं Vकत् कुत्र गतम् । Vवरुणस्य अनिष्टनिवारकस्य देवस्य Vचक्षणम् अनुग्रहदृष्ट्या दर्शनं Vकत् क्व गतम् । Vमहः महतो महानुभावस्य Vअर्यम्णः अरीणां नियन्तुः एतत्संज्ञकस्य देवस्य संबन्धिना Vपथा शोभनमार्गेण इष्टदेशप्रापणं Vकत् क्व गतम् । एतत्सर्वं युष्मास्वेव वर्तते । न कुत्रापि गतम् । अतो वयं Vदूढ्यः दुर्धियः पापबुद्धीन् अस्मदनिष्टाचरणपरान् शत्रून् Vअति Vक्रामेम अतितरेम । तैः कृतादस्मात् कूपपातलक्षणात् दुःखात् वयमुत्तीर्णा भवेम । हे द्यावापृथिव्यौ मदीयमिदं जानीतम् ॥ धर्णसि । 'धृञ् धारणे' । 'सानसिधर्णसिपर्णसि०' ( उ. सू. ४. ५४७ ) इत्यादिना असिच्प्रत्ययान्तः[2] निपात्यते । अर्यम्णः । षष्ठ्येकवचने 'अल्लोपोऽनः' इत्यकारलोपः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । महः । महतः अच्छब्दलोपश्छान्दसः । यद्वा । 'मह पूजायाम्' । क्विप् । उभयथापि 'सावेकाचः०' इति विभक्तेरुदात्तत्वम् । दूढ्यः । पृषोदरादिः । 'ध्यै च' इति तत्र पाठात् दुरो रेफस्य उत्वम् उत्तरपदादेः ष्टुत्वं च । 'उदात्तस्वरितयोर्यणः०' इति स्वरितत्वम् ॥

अहं सो अस्मि यः पुरा सुते वदामि कानि चित् ।
तं मा व्यन्त्याध्योऽ३ वृको न तृष्णजं मृगं वित्तं मे अस्य रोदसी ॥ ७ ॥

अहम् । सः । अस्मि । यः । पुरा । सुते । वदामि । कानि । चित् ।
तम् । मा । व्यन्ति । आऽध्यः । वृकः । न । तृष्णऽजम् । मृगम् ।
वित्तम् । मे । अस्य । रोदसी इति ॥ ७ ॥

हे देवाः Vपुरा पूर्वस्मिन् काले Vसुते युष्मद्यागार्थं सोमेऽभिषुते Vकानि Vचित् कतिपयानि स्तोत्राणि Vयः Vअहं Vवदामि उक्तवानस्मि Vसः एवाहम् Vअस्मि न तु अन्यः कश्चित् । तस्मात् किमर्थं मां परित्यजथ । Vतं तादृशं माम् Vआध्यः अभिलषितपुत्राद्यप्राप्त्या जनिता मानस्यो व्यथाः Vव्यन्ति भक्षयन्ति । तत्र दृष्टान्तः । Vतृष्णजं जाततृष्णं पिपासन्तम् उदकं प्रति गच्छन्तं Vमृगं Vवृको Vन यथा अरण्यश्वा मध्येमार्गं भक्षयति तद्वत् । अन्यत् पूर्ववत् ॥ व्यन्ति । वी गत्यादिषु । अदादित्वात् शपो लुक् । 'तन्वादीनां छन्दसि बहुलमुपसंख्यानम्' इति बहुलवचनात् यण् । आध्यः । आधीयते मनसि स्थाप्यते इति आधिः । 'उपसर्गे घोः किः' ( पा. सू. ३. ३. ९२ ) । 'आतो लोप इटि च' इत्याकारलोपः । 'जसादिषु च्छन्दसि वावचनम्' इति 'जसि च' इति गुणस्य विकल्पनात् अभावे यणादेशः । तृष्णजम् । 'तृष पिपासायाम्' । 'स्वपितृषोर्नेजिङ्' ( पा. सू. ३. २. १७२ )

---

१. क्ष-ट-न-स–संबन्धि । २. क्ष-ट–असिप्रत्ययान्तः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति नजिङ्। पदकारस्त्वेवं मन्यते–' अन्येष्वपि दृश्यते ' इति दृशिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात् केवलादपि जनेर्डप्रत्ययः। तृष्णा जाता यस्य। ' ङ्यापोः संज्ञाच्छन्दसोर्बहुलम् ' इति ह्रस्वत्वम्॥

**सं मा तपन्त्यभितः सपत्नीरिव पर्शवः।**
**मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारं ते शतक्रतो वित्तं मे अस्य रोदसी॥ ८॥**

सम्। मा। तपन्ति। अभितः। सपत्नीःऽइव। पर्शवः।
मूषः। न। शिश्ना। वि। अदन्ति। मा। आऽध्यः। स्तोतारम्।
ते। शतक्रतो इति शतऽक्रतो। वित्तम्। मे। अस्य। रोदसी इति॥ ८॥

ऐन्द्र्येषा। हे इन्द्र [v]पर्शवः पार्श्वास्थीनि अत्र सामर्थ्यात् पर्शुस्थानीयाः[1] कूपभित्तयः [v]मा माम् [v]अभितः सर्वतः [v]सं [v]तपन्ति सम्यक् पीडयन्ति। तत्र दृष्टान्तः। [v]सपत्नीरिव। समानः एकः पतिर्यासां ताः सपत्न्यो यथैकं पतिमभितः पीडयन्ति। परस्परं[2] वा पीड्यन्ते[2]। हे [v]शतक्रतो बहुविधकर्मन् बहुविधप्रज्ञ वा इन्द्र [v]ते तव [v]स्तोतारं माम्[3] [v]आध्यः असंपद्यमानैर्यागदानादिभिरुत्पादिताः मानस्यः पीडाः [v]व्यदन्ति विविधं भक्षयन्ति। तत्र दृष्टान्तः। [v]मूषो [v]न यथा मूषिकाः [v]शिश्ना शिश्नानि कुविन्देन वायितानि अन्तरसेन आलिप्तानि[4] सूत्राणि भक्षयन्ति। यद्वा। शिक्षशब्देन प्रजननमेवोच्यते। तच्चोपचारात् पुच्छे वर्तते। यथा स्वकीयानि पुच्छानि घृततैलादिभाण्डे प्रक्षिप्य ऊर्ध्वमुत्कृष्य व्यदन्ति लिहन्तीत्यर्थः। एवं माम् आधयो भक्षयन्ति। न चैतत् हे इन्द्र तव स्तोतुर्न्याय्यम्। तस्मात् कूपात् मामुत्तारय। अन्यत् समानम्। अत्र निरुक्तं–' संतपन्ति मामभितः सपत्न्य इवेमाः पर्शवः कूपपर्शवो मूषिका इवास्नातानि सूत्राणि व्यदन्ति। स्वाङ्गाभिधानं वा स्यात्। शिक्षानि व्यदन्तीति ' ( निरु. ४. ६ ) इति॥ सपत्नीः। ' नित्यं सपत्न्यादिषु ' ( पा. सू. ४. १. ३५ ) इति पतिशब्दस्य नकारान्तादेशः। ङीप्। ' वा छन्दसि ' इति पूर्वसवर्णदीर्घत्वम्। मूषः। ' मुष स्तेये '। क्विपि छान्दसो दीर्घः। तथा च यास्कः–'मूषो मूषिका इत्यर्थः। मूषिकाः पुनर्मुष्णातेर्मूषोऽप्येतस्मादेव ' ( निरु. ४. ५ ) इति। शिश्ना। ' ष्णा शौचे '। ' घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थम् ' इति कः। वर्णव्यापत्त्या सकारस्य शकारः। ' क्र्यादीनां के द्वे भवत इति वक्तव्यम् ' ( का. ६. १. १२. १ ) इति द्विर्वचनम्। ' बहुलं छन्दसि ' इत्यभ्यासस्य इत्वम्॥

**अमी ये सप्त रश्मयस्तत्रा मे नाभिरातता।**
**त्रितस्तद्वेदाप्त्यः स जामित्वाय रेभति वित्तं मे अस्य रोदसी॥ ९॥**

अमी इति। ये। सप्त। रश्मयः। तत्र। मे। नाभिः। आऽततता।
त्रितः। तत्। वेद। आप्त्यः। सः। जामिऽत्वाय। रेभति। वित्तम्। मे। अस्य। रोदसी इति॥९॥

---

१. स–पार्श्वस्थानीयाः। २. क्ष–परस्परं वा पीडयन्ति तद्वत्; ठ–तद्वत्। ३. च-द-ध–मा माम्। ४. क्ष-स–लिप्तानि।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]ये [V]अमी द्युलोके वर्तमानाः सप्तसंख्याकाः [V]रश्मयः सूर्यस्य किरणाः सन्ति [V]तत्र तेषु सूर्यरश्मिष्वध्यात्मं सप्तप्राणरूपेण वर्तमानेषु [V]मे मदीया [V]नाभिः [V]आतता संबद्धा । ऋषिरात्मानमेव परोक्षतया निर्दिशति । [V]त्रितः तीर्णतमस्तिरस्कृताज्ञानः [V]आप्त्यः अपां पुत्रः ऋषिः [V]तत् पूर्वोक्तं वृत्तान्तं [V]वेद जानाति[1] नान्यः । [V]सः जानन्नृषिः [V]जामित्वाय कूपान्निर्गन्तृत्वाय [V]रेभति तान् रश्मीन् स्तौति । अन्यत् समानम् ॥ आतता । ततोतेः कर्मणि निष्ठा । ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । जामित्वाय । जमतिर्गतिकर्मा । जमति गच्छतीति जामिः । औणादिक इण्प्रत्ययः । तस्य भावस्तत्त्वम् । रेभति । ' रेभृ शब्दे ' । भौवादिकः ॥

अमी ये पञ्चोक्षणो मध्ये तस्थुर्महो दिवः ।
देवत्रा नु प्रवाच्यं सध्रीचीना नि वावृतुर्वित्तं मे अस्य रोदसी ॥ १० ॥

अमी इति । ये । पञ्च । उक्षणः । मध्ये । तस्थुः । महः । दिवः ।
देवऽत्रा । नु । प्रऽवाच्यम् । सध्रीचीनाः । नि । ववृतुः । वित्तम् । मे । अस्य । रोदसी इति ॥ १० ॥

[V]उक्षणः सेक्तारः कामाभिवर्षकाः [V]पञ्च । ' तन्न इन्द्रस्तद्वरुणस्तदग्निस्तदर्यमा तत्सविता चनो धात् ' ( ऋ. सं. १. १०७. ३ ) इत्यर्धर्चेन प्रतिपादिताः पञ्चसंख्याका देवाः । यद्वा । अग्निर्वायुः सूर्यश्चन्द्रमा विद्युदित्येवं पञ्चसंख्याकाः । तथा च शाट्यायनकम्–' एतान्येव पञ्च ज्योतींषि यान्येषु लोकेषु दीप्यन्ते । अग्निः पृथिव्यां वायुरन्तरिक्षे च[2] आदित्यो दिवि चन्द्रमा नक्षत्रे विद्युदप्सु ' इति । नक्षत्रे नक्षत्रलोके । अप्सु मेघस्थोदकेषु । तैत्तिरीयेऽप्येवमाम्नातम्–'अग्निः पृथिव्यां वायुरन्तरिक्षे सूर्यो दिवि चन्द्रमा दिक्षु नक्षत्राणि स्वर्लोके ' (तै. आ. १. २०. १) इति । [V]ये [V]अमी पञ्चसंख्याका देवाः [V]महो [V]दिवः महतो विस्तीर्णस्य द्युलोकस्य [V]मध्ये [V]तस्थुः तिष्ठन्ति आसते [V]देवत्रा देवेषु [V]नु क्षिप्रं [V]प्रवाच्यं प्रशंसनीयं देवानां योग्यं मदीयं स्तोत्रं प्रति [V]सध्रीचीनाः सहाञ्चन्तो युगपदागच्छन्तस्ते देवाः मदीयं परिचरणं स्वीकुर्वन्ति[3] । तदनन्तरं [V]नि [V]ववृतुः तृप्ताः सन्तो निवर्तन्ते च । अन्यत् समानम् ॥ उक्षणः । ' वा षपूर्वस्य निगमे ' इत्युपधादीर्घाभावः । देवत्रा । ' देवमनुष्य° ' इत्यादिना सप्तम्यर्थे त्राप्रत्ययः । प्रवाच्यम् । वाचयतेः ' अचो यत् ' इति यत् । ' णेरनिटि ' इति णिलोपः । ' यतोऽनावः ' इत्याद्युदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वम् । सध्रीचीनाः । सहाञ्चन्तीति सध्र्यञ्चः । ते एव सध्रीचीनाः । सहपूर्वात् अञ्चतेः ' ऋत्विक्° ' इत्यादिना क्विन् । ' अनिदिताम्° ' इति नलोपः । ' सहस्य सध्रिः ' ( पा. सू. ६. ३. ९५ ) इति सध्र्यादेशः । ' विभाषाञ्चेरदिक्स्त्रियाम् ' इति स्वार्थे खप्रत्ययः । ववृतुः । ' वृतु वर्तने ' । ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लिट् । व्यत्ययेन परस्मैपदम् । ' अन्येषामपि दृश्यते ' इति संहितायामभ्यासस्य दीर्घत्वम् ॥ ॥ २१ ॥

सुपर्णा एत आसते मध्य आरोधने दिवः ।
ते सेधन्ति पथो वृकं तरन्तं यह्वतीरपो वित्तं मे अस्य रोदसी ॥ ११ ॥

सुऽपर्णाः । एते । आसते । मध्ये । आऽरोधने । दिवः ।
ते । सेधन्ति । पथः । वृकम् । तरन्तम् । यह्वतीः । अपः । वित्तम् । मे । अस्य । रोदसी इति ॥ ११ ॥

---

१. क्ष–विजानाति । २. क्ष-ट-न-स–' च ' नास्ति । ३. क्ष-ट-ठ-स–स्वीकुर्वन्तः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]सुपर्णाः । रश्मिनामैतत् । शोभनपतनाः [v]एते सूर्यरश्मयः [v]आरोधने सर्वस्यावरके व्याप्ते [v]दिवः अन्तरिक्षस्य [v]मध्ये [v]आसते वर्तन्ते । [v]ते[1] सूर्यरश्मयः [v]पथः मार्गात् [v]वृकम् अरण्यश्वानं [v]सेधन्ति निषेधन्ति निवारयन्ति । कीदृशम् । [v]यह्वतीः महतीः [v]अपः [v]तरन्तम् अतिक्रामन्तम् । कूपपतनात्पूर्वं त्रितं दृष्ट्वा एनं भक्षयितुं कश्चिदरण्यश्वा महतीं नदीं तितीर्षुः आजगाम । स च सूर्यरश्मीन् दृष्ट्वा अयमवसरो न भवतीति निवर्तते । अतो रश्मयो वृकं निषेधन्तीत्युच्यते । यास्कपक्षे तु आप इत्यन्तरिक्षनाम । यह्वतीरपो महदन्तरिक्षं पथः पथा द्वादशराज्यात्मना[2] मार्गेण तरन्तं वृकं चन्द्रमसं सूर्यरश्मयो निषेधन्ति । अहनि हि सूर्यरश्मिभिः निरुद्धश्चन्द्रमा निष्प्रभो दृश्यते । अतो निष्प्रभं कुर्वन्तीत्यर्थः ॥ आरोधने । आरुध्यते आव्रियतेऽनेनेति आरोधनम् । करणे ल्युट् । सेधन्ति । 'षिधु गत्याम्' । अयं केवलोऽपि निपूर्वार्थे द्रष्टव्यः । पथः । पञ्चम्येकवचने 'भस्य टेर्लोपः' इति टिलोपः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् । यास्कपक्षे तु तृतीयार्थे व्यत्ययेन पञ्चमी । यह्वतीः । यह्व इति महन्नाम । अस्मादाचारार्थे 'सर्वप्रातिपदिकेभ्यः०' (पा. म. ३. १. ११. ३) इति क्विप् । ततो लटः शतृ । 'उगितश्च' इति ङीप् । आगमानुशासनस्यानित्यत्वात् नुमभावः । 'शतुरनुमः०' इति नदीस्वरो व्यत्ययेन न प्रवर्तते ॥

**नव्यं तदुक्थ्यं हितं देवासः सुप्रवाचनम् ।**
**ऋतमर्षन्ति सिन्धवः सत्यं तातान सूर्यो वित्तं मे अस्य रोदसी ॥ १२ ॥**

नव्यम् । तत् । उक्थ्यम् । हितम् । देवासः । सुऽप्रवाचनम् ।
ऋतम् । अर्षन्ति । सिन्धवः । सत्यम् । तातान । सूर्यः । वित्तम् । मे । अस्य । रोदसी इति ॥ १२ ॥

हे [v]देवासः देवाः [v]नव्यं नवतरम् [v]उक्थ्यं प्रशस्यं स्तुत्यर्हं [v]सुप्रवाचनं सुष्ठु ऋत्विग्भिर्वाचयितुं शक्यम् एवंभूतं [v]तत् भवदीयं बलं [v]हितं युष्मासु निहितम् । अतो युष्मदीयेन बलेन [v]सिन्धवः स्यन्दनशीला नद्यः [v]ऋतम् उदकम् [v]अर्षन्ति आलस्याराहित्येन सर्वदा प्रेरयन्ति । अशोष्याः सत्यः प्रवहन्तीत्यर्थः । तथा [v]सूर्यः [v]सत्यं सर्वदा विद्यमानं स्वकीयं तेजः [v]ततान आतनोति विस्तारयति । अन्यत् समानम् ॥ सुप्रवाचनम् । 'वच परिभाषणे' । अस्मात् ण्यन्तात् 'अन्येभ्योऽपि दृश्यते' इति खलर्थे युच् । अर्षन्ति । अर्तेर्लेटि 'सिब्बहुलं लेटि' इति सिप् । गुणः । ततान । 'अन्येषामपि दृश्यते' इति संहितायामभ्यासस्य दीर्घत्वम् ॥

**अग्ने तव त्यदुक्थ्यं देवेष्वस्त्याप्यम् ।**
**स नः सत्तो मनुष्वदा देवान्यक्षि विदुष्टरो वित्तं मे अस्य रोदसी ॥ १३ ॥**

अग्ने । तव । त्यत् । उक्थ्यम् । देवेषु । अस्ति । आप्यम् ।
सः । नः । सत्तः । मनुष्वत् । आ । देवान् । यक्षि ।
विदुःऽतरः । वित्तम् । मे । अस्य । रोदसी इति ॥ १३ ॥

---

१. क्ष-स-ते अमी । २. क्ष-द्वादशराज्यात्मकेन; स-द्वादशरश्म्यात्मना ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]अग्ने [v]तव [v]उक्थ्यं प्रशस्यं [v]त्यत्[1] श्रुतिप्रसिद्धम्[1] [v]आप्यम्। आपिर्बन्धुः। तस्य भावः। बान्धवं [v]देवेषु दानादिगुणयुक्तेष्विन्द्रादिषु [v]अस्ति विद्यते। तस्मात् [v]सः तादृशः [v]विदुष्टरः विद्वत्तरस्त्वं [v]नः अस्माकं यज्ञे [v]सत्तः निषण्णः सन् [v]देवान् तानिन्द्रादीन् [v]आ शास्त्रमर्यादया [v]यक्षि यज हविर्भिः पूजय। तत्र दृष्टान्तः। [v]मनुष्वत्। यथा मनूनां यज्ञे तद्वत्। अन्यत् पूर्ववत्॥ आप्यम्। 'आप्नृ व्याप्तौ'। अस्मात् ष्यन्तात् 'अच इः' इति इप्रत्ययः। ब्राह्मणादित्वात् ष्यञ्। सत्तः। 'नसत्त-निषत्त०' (पा. सू. ८. २. ६१) इति निपातनात् निष्ठानत्वाभावः। छान्दसो निशब्दलोपो द्रष्टव्यः। मनुष्वत्। मनेरौणादिक उसिप्रत्ययः। 'तत्र तस्येव' (पा सू. ५. १. ११६) इति षष्ठ्यर्थे वतिः। 'नभोऽङ्गिरोमनुषां वत्युपसंख्यानम्' (पा. सू. १. ४. १८. ३) इति भत्वेन पदत्वाभावात् रुत्वाद्य-भावः। यक्षि। 'बहुलं छन्दसि' इति शपो लुक्। व्रश्चादिषत्वे[3] कुत्वषत्वे। विदुष्टरः। विद्वस्शब्दात् तरपि अयस्मयादित्वेन भत्वात् 'वसोः संप्रसारणम्' इति संप्रसारणम्। 'शासिवसिघसीनां च' इति षत्वम्॥

सत्तो होता मनुष्वदा देवाँ अच्छा विदुष्टरः।
अग्निर्हव्या सुषूदति देवो देवेषु मेधिरो वित्तं मे अस्य रोदसी॥ १४॥

सत्तः। होता। मनुष्वत्। आ। देवान्। अच्छ। विदुःऽतरः।
अग्निः। हव्या। सुसूदति। देवः। देवेषु। मेधिरः। वित्तम्। मे। अस्य। रोदसी इति॥ १४॥

[v]मनुष्वत् मनोरिवास्माकं यज्ञे [v]सत्तः निषण्णः [v]होता देवानामाह्वाता [v]विदुष्टरः विद्वत्तरः [v]देवः दानादिगुणयुक्तः [v]देवेषु सर्वेष्विन्द्रादिषु मध्ये [v]मेधिरः मेधावी एवंभूतः [v]अग्निः तान् [v]देवान् [v]अच्छ आभिमुख्येन [v]हव्या हव्यानि अस्मदीयानि हवींषि। मर्यादायामाकारः। शास्त्रमर्यादया यथा-शास्त्रं [v]सुषूदति प्रेरयतु। अन्यत् समानम्॥ सुषूदति। 'षूद क्षरणे'। लेटि अडागमः। 'बहुलं छन्दसि' इति शपः श्लुः। मेधिरः। 'मेधास्थाभ्यामिरनिरचौ वक्तव्यौ' (पा. सू. ५. २. १०९. ३) इति मत्वर्थीय इरन्॥

ब्रह्मा कृणोति वरुणो गातुविदं तमीमहे।
व्यूर्णोति हृदा मतिं नव्यो जायतामृतं वित्तं मे अस्य रोदसी॥ १५॥

ब्रह्म। कृणोति। वरुणः। गातुऽविदम्। तम्। ईमहे।
वि। ऊर्णोति। हृदा। मतिम्। नव्यः। जायताम्।
ऋतम्। वित्तम्। मे। अस्य। रोदसी इति॥ १५॥

यः [v]वरुणः अनिष्टस्य[4] निवारयिता देवः [v]ब्रह्म परिवृढं तद्रक्षणरूपं कर्म [v]कृणोति करोति [v]तं तादृशं [v]गातुविदं गातोर्मार्गस्य दुःखनिवारकस्य[5] लम्भयितारं वरुणम् [v]ईमहे अभिमतफलं याचामहे।

---

१. क्ष-स-त्यत् तत् श्रुतिषु प्रसिद्धम्। २. त-श-स-व्रश्चेति षत्वम्। ३. क्ष-ट-ठ-अनिष्टानाम्। ४. क्ष-ट-ठ-स-दुःखान्निस्तारकस्य; न-दुःखान्निवारकस्य।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ईमहे इति याच्ञाकर्मा। तस्मै वरुणाय अयमस्मदीयः स्तोता vहृदा हृदयेन vमतिं मननीयां स्तुतिं vव्यूर्णोति विवृणोति प्रकाशयति उच्चारयतीत्यर्थः। सोऽयं vनव्यः स्तुत्यो वरुणोऽस्माकम् vऋतं vजायतां सत्यभूतोऽस्तु ॥ ब्रह्म। 'अन्येषामपि दृश्यते' इति सांहितिको दीर्घः। गातुविदम्। 'विदृ लाभे'। अन्तर्भावितण्यर्थात् क्विप्। ईमहे। 'ईड् गतौ'। 'बहुलं छन्दसि' इति विकरणस्य लुक्। हृदा। 'पद्दन्०' इत्यादिना हृदयशब्दस्य हृदादेशः ॥ ॥ २२ ॥

असौ यः पन्था आदित्यो दिवि प्रवाच्यः कृतः।
न स देवा अतिक्रमे तं मर्तासो न पश्यथ वित्तं मे अस्य रोदसी ॥ १६ ॥

असौ। यः। पन्थाः। आदित्यः। दिवि। प्रऽवाच्यम्। कृतः।
न। सः। देवाः। अतिऽक्रमे। तम्। मर्तासः।
न। पश्यथ। वित्तम्। मे। अस्य। रोदसी इति ॥ १६ ॥

vपन्थाः सततगामी। यद्वा। ब्रह्मलोकं गच्छतामुपासकानां मार्गभूतः। 'सूर्यद्वारेण ते विरजाः प्रयान्ति' (मु. उ. १. २. ११) इति श्रुतेः। एवंभूतः vयः vअसौ vआदित्यः vदिवि द्युलोके vप्रवाच्यं प्रकर्षेण वचनं यथा भवति तथा vकृतः निर्मितः। यथा सर्वैः प्राणिभिर्दृश्यते तथा वर्तमानः[1] इत्यर्थः। हे vदेवाः vसः अयमादित्यो[2] युष्माभिरपि vन vअतिक्रमे[2] अतिक्रमितुं न शक्यः। युष्मज्जीवनस्य तदायत्तत्वात्। सति हि सूर्ये वसन्तादयः काला निष्पद्यन्ते। कालेषु च यागाः क्रियन्ते। यागेषु च सत्सु भवतां जीवनम्। अतो युष्माभिरप्यसौ नातिक्रमितव्यः। एवं च सति हे vमर्तासः पापकृतो मनुष्याः vतं महानुभावं सूर्यं vन vपश्यथ सूर्यं[3] न जानीथ। एतच्च कूपे पातयित्वा निर्गतौ एकतद्वितौ प्रति निन्दनम्। अहमेव मन्त्रद्रष्टा तं सूर्यं जानामि पापकृतौ युवां न जानीथः इति ॥ पन्थाः। 'पदि गतौ'। 'पतेस्थ च' इति इनिप्रत्ययः। 'पथिमथ्यृभुक्षामात्' इति आत्वम्। 'इतोऽत्सर्वनामस्थाने' (पा. सू. ७. १. ८६) इति अत्वम् इकारस्य। 'थो न्थः' (पा. सू. ७. १. ८७)। 'पथिमथोः सर्वनामस्थाने' इत्याद्युदात्तत्वम्। प्रवाच्यम्। वक्तेर्ण्यन्तात् 'अचो यत्' इति भावे यत्। 'यतोऽनावः' इत्याद्युदात्तत्वम्। अतिक्रमे। 'क्रमु पादविक्षेपे'। 'कृत्यार्थे तवैकेन्०' इति केन्प्रत्ययः। नित्त्वादाद्युदात्तत्वम् ॥

त्रितः कूपेऽवहितो देवान्हवत ऊतये।
तच्छुश्राव बृहस्पतिः कृण्वन्नंहूरणादुरु वित्तं मे अस्य रोदसी ॥ १७ ॥

त्रितः। कूपे। अवऽहितः। देवान्। हवते। ऊतये।
तत्। शुश्राव। बृहस्पतिः। कृण्वन्। अंहूरणात्। उरु। वित्तम्। मे। अस्य। रोदसी इति ॥ १७ ॥

---

१. क्ष–वर्तते। २. ट-ठ–अतिक्रमे युष्माभिः। ३. क्ष-ट-ठ-न-स–यूयम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]कूपेऽवहितः पातितः [v]त्रितः एतत्संज्ञः[1] ऋषिः [v]ऊतये रक्षणाय [v]देवान् [v]हवते स्तुतिभिराकारयति । यदेतत् त्रितस्याह्वानं [v]बृहस्पतिः बृहतां महतां देवानां रक्षकः एतत्संज्ञो देवः [v]तत् आह्वानं [v]शुश्राव श्रुतवान् । किं कुर्वन् । [v]अंहूरणात् अंहसः पापरूपादस्मात् कूपपातादुन्नीय [v]उरु विस्तीर्णं शोभनं [v]कृण्वन् कुर्वन् ॥ हवते । ह्वयतेर्लटि ' बहुलं छन्दसि ' इति संप्रसारणम् । शब्गुणावादेशाः । ऊतये । ' ऊतियूति° इत्यादिना क्तिन उदात्तत्वम् । बृहस्पतिः । ' तद्बृहतोः करपत्योः° ' ( पा. सू. ६. १. १५७. ग. ) इति पारस्करादिषु पाठात् सुट्तलोपौ । ' उभे वनस्पत्यादिषु° ' इति पूर्वोत्तरपदयोः युगपत्प्रकृतिस्वरत्वम् । अंहूरणात् । ' अहि गतौ ' । इदित्त्वात् नुम् । ' खर्जिपिञ्जादिभ्य ऊरोलचौ ' ( उ. सू. ४. ५३० ) इति भावे ऊरप्रत्ययः । दुःखप्राप्तिहेतुभावा[2] गतिरस्यास्तीति पामादिलक्षणो मत्वर्थीयो नः ( पा. सू. ५. २. १०० ) । आङ्पूर्वात् हन्तेर्वा रूपमुन्नेयम् ॥

अरुणो मा सकृद्वृकः पथा यन्तं ददर्श हि ।
उज्जिहीते निचाय्या तष्टेव पृष्ट्यामयी वित्तं मे अस्य रोदसी ॥ १८ ॥

अरुणः । मा । सकृत् । वृकः । पथा । यन्तम् । ददर्श । हि ।
उत् । जिहीते । निऽचाय्य । तष्टाऽइव । पृष्टिऽआमयी । वित्तम् । मे । अस्य । रोदसी इति ॥ १८ ॥

अरुणवर्णः[3] लोहितवर्णः [v]वृकः अरण्यश्वा [v]सकृत् एकवारं [v]पथा [v]यन्तं मार्गेण गच्छन्तं मां [v]ददर्श [v]हि दृष्टवान् । हिः पादपूरणः । [v]निचाय्य दृष्ट्वा च मां जिघृक्षुः सन् [v]उज्जिहीते उद्गच्छति स्म[4] । तत्र दृष्टान्तः । [v]तष्टेव [v]पृष्ट्यामयी । यथा तक्षणजनितपृष्ठक्लेशः तष्टा वर्धकिः तदपनोदनाय ऊर्ध्वाभिमुखो भवति तद्वत् । हे[5] द्यावापृथिव्यौ मदीयमिदं दुःखं [v]वित्तं जानीतम्[6] । यद्वा । वृक इति विवृतज्योतिष्कः चन्द्रमाः उच्यते । अरुणः आरोचमानः कृत्स्नस्य जगतः प्रकाशकः मासकृत् मासार्धमासर्त्वयनसंवत्सरादीन् कालविशेषान् कुर्वन् । तिथिविभागज्ञानस्य चन्द्रगत्यधीनत्वात् । स चन्द्रमाः आकाशमार्गे[6] यन्तं गच्छन्तं नक्षत्रगणं ददर्श । हिरवधारणे । नक्षत्रगणमेव ददर्श न कूपपतितं मामित्यनादरो द्योत्यते । यदि मां पश्येत् उद्धरेत् कूपात् । निचाय्य नक्षत्रगणं दृष्ट्वा चोज्जिहीते । येन नक्षत्रेण संयुज्यते तेन सहोद्गच्छति । न मामभिगच्छतीत्यर्थः । अन्यत् पूर्ववत् ॥ अत्र मासकृत् इति यास्कः एकं पदं मन्यते शाकल्यस्तु पदद्वयम् । तस्मिन्पक्षेऽयमर्थः । दक्षप्रजापतेर्दुहितृभूताः स्वभार्याः[7] अश्विन्याद्यास्तारकाः पुनःपुनर्ददर्श[8] । मां सकृदेव पश्यतीति सकृद्दृष्ट्वा चोज्जिहीते । ताराभिः सहोर्ध्वमेव गच्छति । न मां कूपादुत्तारयति । अत इदमनुचितम् । हे द्यावापृथिव्यौ मदीयमिमं वृत्तान्तं जानीतम् ॥ अत्र निरुक्तं–' वृकश्चन्द्रमा भवति विवृतज्योतिष्को वा विकृतज्योतिष्को वा विक्रान्तज्योतिष्को वा । अरुण आरोचनः[9] मासकृन्मासानां चार्धमासानां च कर्ता भवति चन्द्रमा वृकः पथा यन्तं ददर्श नक्षत्रगणमभिजिहीते निचाय्य येन येन योक्ष्यमाणो भवति चन्द्रमास्तक्ष्णुवन्निव पृष्ठरोगी ' ( निरु. ५. २०–२१ ) इति ॥ सकृत् । ' एकस्य सकृच्च ' ( पा. सू. ५. ४. १९ ) इति क्रियाभ्यावृत्तिगणने निपातितः । वृकः । ' वृष्

---

१. क्ष-स–एतत्संज्ञकः । २. क्ष–दुःखप्राप्तिहेतुभूता । ३. क्ष- स–अरुणः अरुणवर्णः । ४. क्ष–' स्म ' नास्ति । ५. क्ष-ट-ठ–' हे...जानीतम् ' नास्ति । ६. क्ष-स–पथा आकाशमार्गेण । ७. क्ष-ट-ठ-तद्भार्याः । ८. क्ष-ट-ठ– पुनःपुनर्दृश्यमानाः सकृदेव पश्यति । ९. क्ष-स–आरोचमानः ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वरणे '। ' सृवृभूशुषिमुषिभ्यः कित् ' ( उ. सू. ३. ३२१ ) इति कप्रत्ययः। जिहीते। ' ओहाङ् गतौ '। जौहोत्यादिकः। ' भृञामित् ' इति अभ्यासस्य इत्वम्। निचाय्य। ' चायृ पूजानिशामनयोः '। अत्र[1] दर्शनार्थो धातूनामनेकार्थत्वात्[1]। ' समासेऽनञ्पूर्वे क्त्वो ल्यप् '। पृष्ट्यामयी। ' स्पृश संस्पर्शने '। स्पृश्यतेऽनेनेति स्पृष्टिः। छान्दसो वर्णलोपः[2]। पृष्टावामयः पृष्ट्यामयः। तद्वान् पृष्ट्यामयी॥

एनाङ्गूषेण वयमिन्द्रवन्तोऽभि ष्याम वृजने सर्ववीराः।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥ १९॥

एना। आङ्गूषेण। वयम्। इन्द्रऽवन्तः। अभि। स्याम। वृजने। सर्वऽवीराः।
तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥१९॥

[v]एना अनेन [v]आङ्गूषेण आघोषणयोग्येन स्तोत्रेण हेतुभूतेन [v]इन्द्रवन्तः अनुग्राहकेणेन्द्रेण युक्ताः [v]सर्ववीराः सर्वैर्वीरैः पुत्रैः पौत्रादिभिश्चोपेताः सन्तः [v]वयं [v]वृजने संग्रामे [v]अभि [v]ष्याम शत्रूनभिभवेम। [v]तत् इदमस्मदीयं वचनं मित्रादयः [v]ममहन्तां पूजयन्तु पालयन्त्वित्यर्थः। उतशब्दो[3] देवतासमुच्चये[3]। अत्र यास्कः–'आङ्गूषः स्तोम आघोषः। अनेन स्तोमेन वयमिन्द्रवन्तः ' ( निरु. ५.११ ) इति॥ एना। ' द्वितीयाटौःस्वेनः ' ( पा. सू. २. ४. ३४ ) इति तृतीयायाम् इदम एनादेशः। ' सुपां सुलुक्° ' इति विभक्तेः आजादेशः। चित्स्वरेणान्तोदात्तत्वम्। आङ्गूषेण। आङ्पूर्वात् घुषेः कर्मणि घञ्। आङो ङकारलोपाभावश्छान्दसः। घोषशब्दस्य गूषभावश्च पृषोदरादित्वात्। थाथादिना उत्तरपदान्तोदात्तत्वम्। स्याम। अस्तेः प्रार्थनायां लिङि ' श्नसोरल्लोपः ' इति अकारलोपः। ' उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ' ( पा. सू. ८. ३. ८७ ) इति षत्वम्॥ ॥ २३॥ ॥ १५॥

षोडशेऽनुवाके दश सूक्तानि। तत्र ' इन्द्रम् ' इति सप्तर्चं प्रथमं सूक्तम्। अत्रानुक्रम्यते—' इन्द्रं मित्रं सप्त त्रिष्टुबन्तम् ' इति। अनुवर्तमानत्वात्[4] कुत्स ऋषिः। त्रितस्तु वाविशिष्टत्वात् तत्रैव विकल्पितो नानुवर्तते। अन्त्या त्रिष्टुप्। शिष्टास्त्रिष्टुबन्तपरिभाषया जगत्यः। विश्वे देवा देवतेत्युक्तम्। विनियोगो लैङ्गिकः॥

इन्द्रं मित्रं वरुणमग्निमूतये मारुतं शर्धो अदितिं हवामहे।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन॥ १॥

इन्द्रम्। मित्रम्। वरुणम्। अग्निम्। ऊतये। मारुतम्। शर्धः। अदितिम्। हवामहे।
रथम्। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्। नः। अंहसः। निः। पिपर्तन॥१॥

[v]ऊतये रक्षणाय वयमिन्द्रादीन् [v]मारुतं [v]शर्धः मरुत्समूहरूपं बलं च [v]हवामहे आह्वयामहे[5]। [v]वसवः[6] निवासयितारः [v]सुदानवः[7] शोभनदानाः[7] इन्द्रादयः [v]विश्वस्मात् सर्वस्मात् [v]अंहसः पापात्

---

१. क्ष-ट-ठ–निशामनं दर्शनम्। २. क्ष–सलोपः। ३. क्ष-ट-ठ–' उतशब्दो देवतासमुच्चये ' नास्ति। ४. क्ष-ट-ठ-स–अनुवर्तनात्। ५. क्ष–आह्वयामः। ६. क्ष–हे वसवः। ७. क्ष-ट-ठ–हे सुदानवः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vनः अस्मान् vनिष्पिपर्तन निर्गमय्य पालयत। तत्र दृष्टान्तः। vरथं vन vदुर्गात्। गन्तुमशक्यान्निम्नोन्नतात् स्थानात् सारथयो यथा रथं पालयन्ति तद्वत्॥ पिपर्तन। 'पॄ इत्येके'। लोटि 'तप्तनप्तनथनाश्च' इति तस्य तनबादेशः। पित्त्वेन ङित्त्वाभावात् गुणः। 'अर्तिपिपर्त्योश्च' इति अभ्यासस्य इत्वम्॥

त आदित्या आ गता सर्वतातये भूत देवा वृत्रतूर्येषु शंभुवः।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन॥ २॥

ते। आदित्याः। आ। गत। सर्वऽतातये। भूत। देवाः। वृत्रऽतूर्येषु। शम्ऽभुवः।
रथम्। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्। नः। अंहसः। निः। पिपर्तन॥२॥

हे vआदित्याः अदितेः पुत्राः vदेवाः[1] vते यूयं vसर्वतातये सर्वैर्वीरपुरुषैस्तताय विस्तारिताय युद्धाय। युद्धेऽस्माकं साहाय्यं कर्तुमित्यर्थः। vआ vगत आगच्छत। अपि च vवृत्रतूर्येषु। संग्रामनामैतत्। संग्रामेषु vशंभुवः सुखस्य भावयितारः vभूत भवत[2]॥ गत। गमेर्लोटि 'बहुलं छन्दसि' इति शपो लुक्[3]॥

अर्वन्तु नः पितरः सुप्रवाचना उत देवी देवपुत्रे ऋतावृधा।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन॥ ३॥

अर्वन्तु। नः। पितरः। सुऽप्रवाचनाः। उत। देवी इति। देवपुत्रे इति देवऽपुत्रे। ऋतऽवृधा।
रथम्। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्। नः। अंहसः। निः। पिपर्तन॥ ३॥

vनः अस्मान् vपितरः अग्निष्वात्तादयः vअवन्तु रक्षन्तु। कीदृशाः। vसुप्रवाचनाः सुखेन प्रवक्तुं स्तोतुं शक्याः। vउत अपि च vदेवपुत्रे देवाः सर्वे पुत्रस्थानीया ययोस्ते vऋतावृधा ऋतस्य सत्यस्य यज्ञस्य वा वर्धयित्र्यौ vदेवी देवनादिगुणयुक्ते[4] द्यावापृथिव्यौ अस्मान् रक्षताम्[5]। अन्यत् समानम्॥ देवी। 'वा छन्दसि' इति पूर्वसवर्णदीर्घत्वम्। ऋतावृधा। वृधेरन्तर्भावितण्यर्थात् क्विप्। 'सुपां सुलुक्०' इति विभक्तेः आकारः॥

नराशंसं वाजिनं वाजयन्निह क्षयद्वीरं पूषणं सुम्नैरीमहे।
रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन॥ ४॥

नराशंसम्। वाजिनम्। वाजयन्। इह। क्षयत्ऽवीरम्। पूषणम्। सुम्नैः। ईमहे।
रथम्। न। दुःऽगात्। वसवः। सुऽदानवः। विश्वस्मात्। नः। अंहसः। निः। पिपर्तन॥४॥

---

१. क्ष-ट-ठ-'देवाः' नास्ति। २. क्ष-भवत। गतमन्यत्। ३. क्ष-ट-ठ-स-'लुक्' इत्यस्यानन्तरं 'अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः। भूत। बहुलं छन्दसि इति शपो लुक्' इत्यधिकम्। ४. क्ष-दानादिगुणयुक्ते। ५. क्ष-ट-ठ-रक्षतम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]नराशंसं नरैः शंसनीयं [V]वाजिनम् अन्नवन्तमग्निं [V]वाजयन् उपवाजयन् प्रज्वलयन् [V]इह अस्मिन् काले स्तौमीति शेषः । तथा [V]क्षयद्वीरम् अतिबलिनं यस्मिन् सर्वे वीराः क्षीयन्ते[1] एवंरूपं [V]पूषणं पोषकं देवं [V]सुम्नैः सुखकरैः स्तोत्रैर्हेतुभूतैः [V]ईमहे याचामहे अभीष्टं प्रार्थयामहे ॥ नराशंसम् । ' उभे वनस्पत्यादिषु° ' इति युगपदुभयपदप्रकृतिस्वरत्वम् । नरशब्दः ' ऋदोरप् ' इति अबन्त आद्युदात्तः । निपातनात् दीर्घः । शंसशब्दो घञन्त आद्युदात्तः । वाजयन् । ' वज व्रज गतौ ' । अस्मात् णिच् । क्षयद्वीरम् । ' क्षि[2] क्षये[2] ' । लटः शतृ । शपि श्लौ व्यत्ययेन शः । तस्य ' छन्दस्युभयथा ' इति आर्धधातुकत्वेन ङित्त्वाभावात् गुणायादेशौ । अदुपदेशात् लसार्वधातुकानुदात्तत्वे विकरणस्वरः । ' अतो गुणे ' इति पररूपत्वे ' एकादेश उदात्तेन° ' इति एकादेश उदात्तः । क्षयन्तो वीरा यस्मिन् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ॥

**बृहस्पते सदमिन्नः सुगं कृधि शं योर्यत्ते मनुर्हितं तदीमहे ।**
**रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ ५ ॥**

बृहस्पते । सदम् । इत् । नः । सुऽगम् । कृधि । शम् । योः । यत् । ते । मनुःऽहितम् । तत् । ईमहे ।
रथम् । न । दुःऽगात् । वसवः । सुऽदानवः । विश्वस्मात् । नः । अंहसः । निः । पिपर्तन ॥ ५ ॥

[V]बृहस्पते [V]सदमित् सदैव [V]नः अस्माकं [V]सुगम् सुखनामैतत् । सुखं [V]कृधि कुरु । अपि च [V]ते तव स्वभूतं [V]शं शमनीयानां रोगाणामुपशमनं [V]योः पृथक्कर्तव्यानां भयानां यावनं पृथक्करणं [V]मनुर्हितं मनुना ब्रह्मणा हितं त्वय्यवस्थापितम् । यद्वा । मनुष्याणामनुकूलम् । एवंविधं शमनं यावनं च [V]यत् अस्ति [V]तदीमहे याचामहे ॥ सुगम् । सुष्ठु गम्यतेऽस्मिन्निति सुगम् । ' सुदुरोरधिकरणे ' इति गमेर्डः । शं योः इत्येतत् पदद्वयं यास्केनैवं व्याख्यातं–' शमनं च रोगाणां यावनं च भयानाम् ' ( निरु. ४. २१ ) इति । मनुर्हितम् । मनेरौणादिक उसिन्प्रत्ययः । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् ॥

**इन्द्रं कुत्सो वृत्रहणं शचीपतिं काटे निबाळ्ह ऋषिरह्वदूतये ।**
**रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो निष्पिपर्तन ॥ ६ ॥**

इन्द्रम् । कुत्सः । वृत्रऽहनम् । शचीऽइपतिम् । काटे । निऽबाळ्हः । ऋषिः । अह्वत् । ऊतये ।
रथम् । न । दुःऽगात् । वसवः । सुऽदानवः । विश्वस्मात् । नः । अंहसः । निः । पिपर्तन ॥ ६ ॥

काटः इति कूपनाम । तस्मिन् [V]निबाळ्हः निपातितः[3] [V]कुत्सः [V]ऋषिः [V]ऊतये रक्षणाय [V]इन्द्रम् [V]अह्वत् आह्वयति[4] स्म[4] । कीदृशम् । [V]वृत्रहणं वृत्राणां शत्रूणां हन्तारं [V]शचीपतिम् । शचीति कर्मनाम । सर्वेषां कर्मणां पालयितारम् । यद्वा । शच्या[5] देव्याः[5] भर्तारम् ॥ शचीपतिम् । वनस्पत्यादिषु पाठादुभयपदप्रकृतिस्वरत्वम् । शचीशब्दः शार्ङ्गरवादिङीनन्त आद्युदात्तः । निबाळ्हः । ' बाह प्रयत्ने ' ।

---

१. स—क्षियन्ति । २. क्ष-ट-ठ—क्षयतेः । ३. क्ष-स-निपतितः । ४. क्ष-ट-ठ–आह्वयत् । ५. क्ष-स–शचीदेव्याः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नीत्युपसर्गवशात् पतने वर्तते । निष्ठायाम् ' अनित्यमागमशासनम् ' इति इडभावः । ढत्वधत्वादीनि । यद्वा । ' क्षुब्धस्वान्त° ' ( पा. सू. ७. २. १८ ) इत्यादौ भृशार्थे इडभावो निपात्यते । अत्र च बाढशब्दो भृशत्वोपेते[1] पतने सामर्थ्याद्वर्तते । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । अहत् । ' लिपिसिचिह्नश्च ' ( पा. सू. ३. १. ५३ ) इति लुङि च्लेरङादेशः । ' आतो लोप इटि च ' इत्याकारलोपः ॥

देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् ।
तन्नो मित्रो वरुणो ममहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ७ ॥

देवैः । नः । देवी । अदितिः । नि । पातु । देवः । त्राता । त्रायताम् । अप्रयुच्छन् ।
तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ ७ ॥

[v]देवी दानादिगुणयुक्ता [v]अदितिः अखण्डनीया अदीना वा देवमाता [v]देवैः दानादिगुणयुक्तैः स्वकीयैः पुत्रैः सह [v]नः अस्मान् [v]नि [v]पातु नितरां रक्षतु । [v]देवः दीप्यमानः [v]त्राता सर्वेषां रक्षकः सविता [v]अप्रयुच्छन् अप्रमाद्यन् अस्मद्रक्षणे जागरूकः सन् [v]त्रायताम् अस्मान् पालयतु । यदनेन सूक्तेनास्माभिः प्रार्थितं [v]नः अस्मदीयं [v]तत् मित्रादयः षड्देवताः [v]ममहन्तां पूजयन्तु ॥ त्रायताम् । ' त्रैङ् पालने ' । भौवादिकः । अप्रयुच्छन् । ' युच्छ प्रमादे ' । अस्मात् लटः शतृ । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥ ॥ २४ ॥

' यज्ञो देवानाम् ' इति तृचं द्वितीयं सूक्तं कुत्सस्यार्षं त्रैष्टुभं वैश्वदेवम् । ' यज्ञस्तृचम् ' इत्यनुक्रान्तम् । विनियोगो लैङ्गिकः ॥

यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयन्तः ।
आ वोऽर्वाचीं सुमतिर्ववृत्यादंहोश्चिद्या वरिवोवित्तरासत् ॥ १ ॥

यज्ञः । देवानाम् । प्रति । एति । सुम्नम् । आदित्यासः । भवत । मृळयन्तः ।
आ । वः । अर्वाचीं । सुऽमतिः । ववृत्यात् । अंहोः । चित् । या । वरिवोवित्ऽतरा । असत् ॥ १ ॥

अस्मदीयः [v]यज्ञो [v]देवानाम् इन्द्रादीनां [v]सुम्नं सुखं [v]प्रत्येति[2] प्राप्नोतु । अपि च हे [v]आदित्यासः आदित्याः [v]मृळयन्तः अस्मान् सुखयन्तः [v]भवत । तथा [v]वः युष्माकं [v]सुमतिः शोभना मतिः भद्रानुग्रहपरा[3] बुद्धिः [v]अर्वाची अस्मदभिमुखी [v]आ [v]ववृत्यात् आवर्तताम् । [v]या मतिः [v]अंहोश्चित् दारिद्र्यं प्राप्तस्यापि पुरुषस्य [v]वरिवोवित्तरा । वरिवः इति धननाम । अतिशयेन धनस्य लम्भयित्री [v]असत् भवेत् । सैषा मतिरस्मान् रक्षितुं वर्ततामित्यर्थः ॥ भवत । ' आमन्त्रितं पूर्वमविद्यमानवत् ' इति आदित्यास इति पादादौ वर्तमानस्य आमन्त्रितस्य अविद्यमानवत्त्वेनास्य पादादित्वात् ' °अपादादौ '

---

१. क्ष-ट-ठ-न-स-भृशार्थोपेते । २. क्ष-स-' प्रत्येति ' इत्यस्यानन्तरं ' प्रतिगच्छति । सुखं जनयितुं द्युलोकं ( क्ष-स्वर्गलोकं ) प्राप्नोतीत्यर्थः । यद्वा । देवानां संबन्धी यो ( क्ष-योऽयं ) यज्ञः सोऽस्माकं सुम्नं सुखं प्रत्येति (क्ष-प्रति ) प्राप्नोतु ( क्ष - प्राप्नोति ) इत्यधिकम् । ३. क्ष-स-भक्तानुग्रहपरा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति पर्युदासात् निघाताभावः । मृळयन्तः । ' मृड सुखने ' । ण्यन्तात् लटः शतृ । शप् । ' छन्दस्युभयथा ' इति शतुः आर्धधातुकत्वेन अदुपदेशात् लसार्वधातुकानुदात्तत्वाभावे शतुः स्वरः शिष्यते । ववृत्यात् । ' वृतु वर्तने ' । लिङि व्यत्ययेन परस्मैपदम् । ' बहुलं छन्दसि ' इति शपः श्लुः । अंहोः । ' अहि गतौ ' । इदित्त्वात् नुम् । औणादिक उप्रत्ययः । वरिवोवित्तरा । ' विदृ लाभे ' । अस्मादन्तर्भावितण्यर्थात् क्विप् । तत आतिशायनिक. तरप् । असत् । ' अस भुवि ' । लेटि अडागमः ॥

**उप नो देवा अवसा गमन्त्वङ्गिरसां साममिः स्तूयमानाः ।**
**इन्द्र इन्द्रियैर्मरुतो मरुद्भिरादित्यैनो अदितिः शर्म यंसत् ॥ २ ॥**

उप । नः । देवाः । अवसा । आ । गमन्तु । अङ्गिरसाम् । साम्नऽभिः । स्तूयमानाः ।
इन्द्रः । इन्द्रियैः । मरुतः । मरुत्ऽभिः । आदित्यैः । नः । अदितिः । शर्म । यंसत् ॥ २ ॥

[v]देवाः दानादिगुणयुक्ताः सर्वे देवाः [v]अवसा रक्षणेनास्मभ्यं दातव्येनान्नेन वा युक्ताः [v]नः अस्मान् स्तोतॄन्[1] [v]उप [v]आ [v]गमन्तु उपागच्छन्तु प्राप्नुवन्तु । कथंभूताः । [v]अङ्गिरसाम् एतत्संज्ञकानामृषीणां संबन्धिभिः [v]सामभिः प्रगीतैर्मन्त्रैः [v]स्तूयमानाः । अपि च [v]इन्द्रः [v]इन्द्रियैः । धननामैतत् । स्वसंबन्धिभिरस्मभ्यं दातव्यैर्धनैः सहास्मानागच्छतु । तथा [v]मरुतः सप्तगणरूपा एकोनपञ्चाशत्संख्याकाः ' ईदृङ् चान्यादृङ् च ' इत्येवमादिनामानो देवाः [v]मरुद्भिः स्वावयवभूतैः प्राणापानादिरूपेण वर्तमानैः वायुभिः सहास्मानागच्छन्तु । तथा [v]अदितिः अखण्डनीया अदीना वा देवमाता [v]आदित्यैः स्वकीयैः पुत्रैः सह [v]नः अस्मभ्यं [v]शर्म सुखं [v]यंसत् यच्छतु[2] ॥ गमन्तु । लोटि ' बहुलं छन्दसि ' इति शपो लुक् । ' छन्दस्युभयथा ' इति झेः आर्धधातुकत्वेन ङित्त्वाभावात् ' गमहन० ' इत्यादिना उपधालोपाभावः । यंसत् । ' यम उपरमे ' । लेटि अडागमः । ' सिब्बहुलं लेटि ' इति सिप् ॥

**तन्न इन्द्रस्तद्वरुणस्तदग्निस्तदर्यमा तत्सविता चनो धात् ।**
**तन्नो मित्रो वरुणो ममहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ३ ॥**

तत् । नः । इन्द्रः । तत् । वरुणः । तत् । अग्निः । तत् । अर्यमा । तत् । सविता । चनः । धात् ।
तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ ३ ॥

यदस्माभिः प्रार्थ्यमानमन्नमस्ति । चन इत्यन्ननाम । [v]तत् तादृशं [v]चनः अन्नं [v]नः अस्मभ्यम् [v]इन्द्रः [v]धात् दधातु ददातु । एवं [v]तद्वरुणः इत्यादावपि योज्यम् । [v]तत् इदमिन्द्रादिभिर्दत्तमस्मदीयमन्नं मित्रादयः [v]ममहन्तां पूजयन्तु पालयन्वित्यर्थः ॥ चनः । ' चायृ पूजानिशामनयोः ' । ' चायेरन्ने ह्रस्वश्च ' ( उ. सू. ४. ६३९ ) इति असुन् नुडागमश्च धातोर्ह्रस्वत्वं च । वलि लोपः । नित्त्वादाद्युदात्तत्वम् । धात् । ' छन्दसि लुङ्लङ्लिटः ' इति प्रार्थनायां लुङ् । ' गातिस्था० ' इति सिचो लुक् ॥ ॥ २५ ॥

---

१. क्ष-ट-ठ-' स्तोतॄन् ' नास्ति । २. ट-ठ-स-प्रयच्छतु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' य इन्द्राग्नी ' इति त्रयोदशर्चं तृतीयं सूक्तं कुत्सस्यार्षं त्रैष्टुभमैन्द्राग्नम् । तथा चानुक्रान्तं– ' य इन्द्राग्नी सप्तोनैन्द्राग्नं तु ' इति । विनियोगो लैङ्गिकः ॥

य इन्द्राग्नी चित्रतमो रथो वामभि विश्वानि भुवनानि चष्टे ।
तेना यातं सरथं तस्थिवांसाथा सोमस्य पिबतं सुतस्य ॥ १ ॥

यः । इन्द्राग्नी इति । चित्रऽतमः । रथः । वाम् । अभि । विश्वानि । भुवनानि । चष्टे ।
तेन । आ । यातम् । सऽरथम् । तस्थिऽवांसा । अथ । सोमस्य । पिबतम् । सुतस्य ॥ १ ॥

हे [v]इन्द्राग्नी [v]चित्रतमः अतिशयेन चायनीयः [v]वां युवयोः संबन्धी [v]यः [v]रथः [v]विश्वानि [v]भुवनानि भूतजातानि[1] [v]अभि [v]चष्टे आभिमुख्येन पश्यति । सुवर्णमयत्वात् रत्नखचितत्वाच्च स्वप्रभाभिः कृत्स्नं जगद्भासयतीत्यर्थः । [v]तेन रथेन [v]आ [v]यातम् अस्मद्यज्ञमागच्छतम्। तत्किं पर्यायेण । नेत्याह । [v]सरथं समानमेकं रथं [v]तस्थिवांसा युगपदेव आस्थितवन्तौ[2] युवामागच्छतं न[3] पर्यायेणेत्यर्थः । [v]अथ आगमनानन्तरं [v]सुतस्य ऋत्विग्भिरभिषुतं[4] [v]सोमस्य सोमं स्वांशलक्षणं तदेकदेशं वा [v]पिबतम् ॥ वाम् । ' युष्मदस्मदोः षष्ठीचतुर्थी° ' ( पा. सू. ८. १. २० ) इत्यादिना षष्ठीद्विवचनस्य वामादेशः । सर्वानुदात्तत्वम् । चष्टे । ' चक्षिङ् व्यक्तायां वाचि ' । अत्र प्रकाशनार्थः । अदादित्वात् शपो लुक् । ' स्कोः संयोगाद्योः° ' इति कलोपः । ' तास्यनुदात्तेत्° ' इति लसार्वधातुकानुदात्तत्वे धातुस्वरः शिष्यते । ' यदुवृत्तान्नित्यम् ' इति निघातप्रतिषेधः । सरथम् । समानश्चासौ रथश्च[5] सरथः । ' समानस्य च्छन्दसि° ' इति सभावः । ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम्। तस्थिवांसा । ' ष्ठा गतिनिवृत्तौ ' । लिटः क्वसुः । द्विर्वचनम् । ' शर्पूर्वाः खयः ' । ' वस्वेकाजाद्घसाम् ' इति इडागमः । ' आतो लोप इटि च ' इति आकारलोपः । ' सुपां सुलुक्° ' इति आकारः । सोमस्य । ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी ॥

यावदिदं भुवनं विश्वमस्त्युरुव्यचा वरिमता गभीरम् ।
तावाँ अयं पातवे सोमो अस्त्वरमिन्द्राग्नी मनसे युवभ्याम् ॥ २ ॥

यावत् । इदम् । भुवनम् । विश्वम् । अस्ति । उरुऽव्यचा । वरिमता । गभीरम् ।
तावान् । अयम् । पातवे । सोमः । अस्तु । अरम् । इन्द्राग्नी इति । मनसे । युवऽभ्याम् ॥२॥

[v]विश्वं सर्वम् [v]इदं [v]भुवनं जगत् [v]यावत् [v]अस्ति यावत्प्रमाणं[6] भवति । कीदृशम् । [v]उरुव्यचा विस्तीर्णव्यापनम् । सर्वव्यापकमित्यर्थः । तथा [v]वरिमता वरिम्णा उरुत्वेनात्मीयेन गौरवेण [v]गभीरं गाम्भीर्योपेतम्। हे [v]इन्द्राग्नी [v]पातवे युवाभ्यां पातुं [v]सोमः[7] [v]तावान् [v]अस्तु तावत्प्रमाणो भवतु। तथा [v]मनसे युवयोरन्तःकरणाय [v]अरं स सोमः पर्याप्तो भवतु ॥ उरुव्यचा । ' व्यच व्याजीकरणे ' । असुन् ।

---

१. क्ष-ट-ठ-स–सर्वाणि भूतजातानि २. क्ष-स–अवस्थितवन्तौ। ३. क्ष-ट-ठ–न तु । ४. क्ष–ऋत्विग्भिरभिषुतस्य । ५. क्ष-ट-ठ–रथश्चेति। ६. क्ष–यावत्परिमाणम् । ७. क्ष-ट-ठ-स-अयं सोमः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' व्यचेः कुटादित्वमनसि ' इति वचनात् ङित्त्वाभावेन संप्रसारणाभावः । ' स्वमोर्नपुंसकात् ' (पा. सू. ७. १. २३) इति सोर्लुकि प्राप्ते ' सुपां सुलुक्° ' इति व्यत्ययेन डादेशः। वरिमता। ' पृथ्वादिभ्य इमनिज्वा ' इति उरुशब्दात् तस्य भावः इत्यर्थे इमनिच् । ' प्रियस्थिर° ' इत्यादिना उरुशब्दस्य वरादेशः । पुनरपि भावप्रत्ययोत्पत्तिश्छान्दसी । ' सुपां सुलुक्° ' इति तृतीयाया लुक् । यद्वा । तृतीयायाश्छान्दसः तुडागमः । तावान् । तत्परिमाणमस्य । ' यत्तदेतेभ्यः परिमाणे वतुप् ' ( पा. सू. ५. २. ३९ ) । ' आ सर्वनाम्नः ' इति आत्वम् । पातवे । ' पा पाने ' । ' तुमर्थे सेसेन्° ' इति तवेन्प्रत्ययः । नित्त्वादाद्युदात्तत्वम् । अरम् । ' वालमूललम्बलमङ्गुलीनां वा लो रमापद्यत इति वक्तव्यम् ' ( पा. म. ८. २. १८ ) इति लत्वविकल्पः । युवभ्याम् । व्यत्ययेन आत्वाभावे ' शेषे लोपः ' इति दकारलोपः ॥

**चक्राथे हि सध्यङ्नाम भद्रं सधीचीना वृत्रहणा उत स्थः ।**
**ताविन्द्राग्नी सध्यञ्चा निषद्या वृष्णः सोमस्य वृषणा वृषेथाम् ॥ ३ ॥**

चक्राथे इति । हि । सध्यक् । नाम । भद्रम् । सधीचीना । वृत्रऽहनौ । उत । स्थः ।
तौ । इन्द्राग्नी इति । सध्यञ्चा । निऽसद्य । वृष्णः । सोमस्य । वृषणा । आ । वृषेथाम् ॥ ३ ॥

हे [V]इन्द्राग्नी [V]भद्रं कल्याणं [V]नाम स्वकीयं नामधेयं [V]सध्यक् सहगतमिन्द्राग्नी इत्येवं संयुक्तं [V]चक्राथे युवां कृतवन्तौ । [V]उत अपि च हे [V]वृत्रहणौ वृत्रस्यासुरस्य हन्तारावित्यर्थः । [V]सधीचीना सहाञ्चन्तौ वृत्रवधार्थं संगतौ [V]स्थः भवथः । [V]हि यस्मादेवं तस्मात् हे [V]वृषणा कामानां वर्षितारावित्यर्थः । [V]तौ युवां सध्यञ्चौ सहितावेव सन्तौ [V]निषद्य वेद्यामुपविश्य [V]वृष्णः सेक्तुः [V]सोमस्य आत्मीयं भागम् [V]आ [V]वृषेथां स्वकीये उदरे आसिञ्चेथाम् ॥ सध्यक् । सहशब्दोपपदादञ्चतेः ' ऋत्विक्° ' इत्यादिना क्विन् । ' अनिदिताम्° ' इति नलोपः । ' सहस्य सधिः ' । ' अद्रिसध्योरन्तोदात्तनिपातनं कृत्स्वरनिवृत्त्यर्थम् ' ( पा. सू. ६. ३. ९५. १ ) इति वचनात् सध्यादेशोऽन्तोदात्तः । यणादेशे ' उदात्तस्वरितयोर्यणः° ' इति स्वरितत्वम् । सधीचीना । ' विभाषाञ्चेरदिक्स्त्रियाम् ' इति स्वार्थे खः । ' सुपां सुलुक्° ' इति विभक्तेः आजादेशः । वृत्रहणौ । संहितायाम् आवादेशे ' लोपः शाकल्यस्य ' इति वलोपः । वृषेथाम् । ' वृष सेचने ' । व्यत्ययेन शः आत्मनेपदं च ॥

**समिद्धेष्वग्निष्वानजाना यतस्रुचा बर्हिरु तिस्तिराणा ।**
**तीव्रैः सोमैः परिषिक्तेभिरर्वागिन्द्राग्नी सौमनसाय यातम् ॥ ४ ॥**

सम्ऽइद्धेषु । अग्निषु । आनजाना । यतऽस्रुचा । बर्हिः । ऊँ इति । तिस्तिराणा ।
तीव्रैः । सोमैः । परिऽसिक्तेभिः । अर्वाक् । आ । इन्द्राग्नी इति । सौमनसाय । यातम् ॥ ४ ॥

[V]अग्निषु गार्हपत्यादिषु अन्वाधानादिना [V]समिद्धेषु सम्यगिद्धेषु दीप्तेषु सत्सु [V]आनजाना हवींष्याज्येनाञ्जन्तौ [V]यतस्रुचा तदनन्तरं यागार्थं गृहीतस्रुचौ [V]बर्हिरु वेद्यां बर्हिरपि [V]तिस्तिराणा आस्तीर्णं कृतवन्तौ अध्वर्युप्रतिप्रस्थातारौ एवंभूतावभूताम् । तथा सति हे इन्द्राग्नी [V]तीव्रैः क्षिप्रं मदकरैः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]परिषिक्तेभिः परितः सर्वेषु ग्रहचमसादिष्वासिक्तैः [v]सोमैः हेतुभूतैः [v]अर्वाक् अस्मदभिमुखम् [v]आ [v]यातम् आगच्छतम्। किमर्थम्। [v]सौमनसाय सौमनस्याय अस्माकमनुग्रहायेत्यर्थः ॥ आनजाना। 'अञ्जू व्यक्तिम्रक्षणगतिषु'। लिटः कानच्। 'अनिदिताम्°' इति नलोपः। द्विर्भावे 'अत आदेः' इति अभ्यासस्य दीर्घः। 'तस्मान्नुड्द्विहलः' इति अद्विहलोऽपि व्यत्ययेन नुट्। तिस्तिराणा। 'स्तृञ् आच्छादने'। पूर्ववत् कानच्। 'ऋत इद्धातोः' इति इत्वम्। द्विर्वचने 'शर्पूर्वाः खयः'। 'सुपां सुलुक्°' इति सर्वत्र विभक्तेः आकारः। चित्त्वादन्तोदात्तत्वम् ॥

यानीन्द्राग्नी चक्रथुर्वीर्याणि यानि रूपाण्युत वृष्ण्यानि।
या वां प्रत्नानि सख्या शिवानि तेभिः सोमस्य पिबतं सुतस्य ॥ ५ ॥

यानि। इन्द्राग्नी इति। चक्रथुः। वीर्याणि। यानि। रूपाणि। उत। वृष्ण्यानि।
या। वाम्। प्रत्नानि। सख्या। शिवानि। तेभिः। सोमस्य। पिबतम्। सुतस्य ॥ ५ ॥

हे [v]इन्द्राग्नी [v]यानि [v]वीर्याणि वृत्रवधादिरूपाणि [v]चक्रथुः कृतवन्तौ युवां [v]यानि च [v]रूपाणि निरूप्यमाणानि गवाश्वादीनि भूतजातानि कृतवन्तौ। इन्द्राग्निभ्यां हि सर्वं जगत् सृज्यते। इन्द्रः सूर्यात्मना वृष्टिं सृजत्यग्निश्चाहुतिद्वारा वृष्ट्युत्पादकः। वृष्टेः सकाशात् सर्वे प्राणिन उत्पद्यन्ते। [v]उत अपि च यानि [v]वृष्ण्यानि वृष्णि भवानि वृष्टिप्रदानादिरूपाणि कर्माणि कृतवन्तौ। तथा [v]वां युवयोः संबन्धीनि [v]प्रत्नानि चिरंतनानि [v]शिवानि शोभनानि [v]या यानि [v]सख्या सख्यित्वानि सन्ति। [v]तेभिः तैः सर्वैः सहितौ युवां [v]सुतस्य [v]सोमस्य अभिषुतं सोमं [v]पिबतम्॥ सख्या। सख्युर्भावः सख्यम्। 'सख्युर्यः' इति यप्रत्ययः। 'शेश्छन्दसि बहुलम्' इति शेर्लोपः। तेभिः। 'बहुलं छन्दसि' इति भिस ऐसभावः। 'सावेकाचः°' इति प्राप्तस्य विभक्त्युदात्तत्वस्य 'न गोश्वन्साववर्ण°' इति प्रतिषेधः॥ ॥ २६ ॥

यदब्रवं प्रथमं वां वृणानोऽयं सोमो असुरैर्नो विहव्यः।
तां सत्यां श्रद्धामभ्या हि यातमथा सोमस्य पिबतं सुतस्य ॥ ६ ॥

यत्। अब्रवम्। प्रथमम्। वाम्। वृणानः। अयम्। सोमः। असुरैः। नः। विऽहव्यः।
ताम्। सत्याम्। श्रद्धाम्। अभि। आ। हि। यातम्। अथ। सोमस्य। पिबतम्। सुतस्य ॥६॥

हे इन्द्राग्नी [v]प्रथमं कर्मोपक्रमे एव [v]वां युवां [v]वृणानः संभजमानः [v]यदब्रवं सोमेन प्रीणयिष्यामीति यदवोचं [v]सत्यां यथार्थां [v]तां [v]श्रद्धां श्रद्धयादरातिशयेन कृतामुक्तिम्[1] [v]अभि अभिलक्ष्य [v]आ [v]हि [v]यातम् आगच्छतमेव नोदासाथाम्। [v]अथ आगमनानन्तरमभिषुतं सोमं [v]पिबतम्। तथा सति [v]असुरैः हविषां प्रक्षेपकैर्ऋत्विग्भिः [v]अयं [v]नः अस्माकं [v]सोमः [v]विहव्यः विशेषेण होतव्यो भवति इतरथा व्यर्थः स्यात्। तस्मादिन्द्राग्नी आगच्छतमित्यर्थः॥ वृणानः। 'वृङ् संभक्तौ'। लटः शानच्।

१. क्ष-ट-ठ—कृतां तामुक्तिम्।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'भ्याभ्यस्तयोरातः' इति आकारलोपः । असुरैः । 'असु क्षेपणे' । 'असेरुरन्' ( उ. सू. १. ४२ ) इति उरन्प्रत्ययः । विहव्यः । 'हु दानादनयोः[1]' । 'अचो यत्' । गुणः । 'धातोस्तन्निमित्तस्यैव' इति अवादेशः । 'यतोऽनावः' इत्याद्युदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

**यदिन्द्राग्नी मदथः स्वे दुरोणे यद्ब्रह्मणि राजनि वा यजत्रा ।**
**अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ ७ ॥**

यत् । इन्द्राग्नी इति । मदथः । स्वे । दुरोणे । यत् । ब्रह्मणि । राजनि । वा । यजत्रा ।
अतः । परि । वृषणौ । आ । हि । यातम् । अथ । सोमस्य । पिबतम् । सुतस्य ॥ ७ ॥

vयजत्रा यष्टव्यौ हे vइन्द्राग्नी vस्वे vदुरोणे स्वकीये गृहे निवासस्थाने vयत् यदि vमदथः हृष्यथः । vयत् यदि vवा vब्रह्मणि ब्राह्मणे अन्यस्मिन्यजमाने हविःस्वीकरणायागत्य हृष्यथः । यदि वा vराजनि क्षत्रिये युद्धे साहाय्यं कर्तुमागत्य हृष्यथः । vअतः vपरि परितोऽस्मात् सर्वस्मात् स्थानात् हे vवृषणौ कामानां वर्षितारविन्द्राग्नी vआ vयातं vहि आगच्छतमेव । औदासीन्यं मा कार्ष्टम् । अन्यत् पूर्ववत् ॥ मदथः । 'मदी हर्षे' । व्यत्ययेन शप् । यजत्रा । 'अमिनक्षि०' इत्यादिना यजतेः कर्मणि अत्रन् । 'सुपां सुलुक्०' इति विभक्तेः आकारः ॥

**यदिन्द्राग्नी यदुषु तुर्वशेषु यद्द्रुह्युष्वनुषु पूरुषु स्थः ।**
**अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ ८ ॥**

यत् । इन्द्राग्नी इति । यदुषु । तुर्वशेषु । यत् । द्रुह्युषु । अनुषु । पूरुषु । स्थः ।
अतः । परि । वृषणौ । आ । हि । यातम् । अथ । सोमस्य । पिबतम् । सुतस्य ॥ ८ ॥

अत्र यदुषु इत्यादीनि पञ्च मनुष्यनामानि । हे vइन्द्राग्नी vयत् यदि vयदुषु नियतेषु परेषामहिंसकेषु मनुष्येषु vस्थः भवथः वर्तेथे । यदि वा vतुर्वशेषु हिंसकेषु मनुष्येषु वर्तेथे । vयत् यदि वा vद्रुह्युषु द्रोहं परेषामुपद्रवमिच्छत्सु मनुष्येषु वर्तेथे । यदि वा vअनुषु प्राणत्सु सफलैः प्राणैर्युक्तेषु ज्ञातृष्वनुष्ठातृषु मनुष्येषु । अन्येषां हि प्राणा निष्फला ज्ञानहीनत्वादनुष्ठानाभावाच्च । तेषु यदि भवथः । तथा vपूरुषु कामैः पूरयितव्येष्वन्येषु स्तोतृजनेषु यदि भवथः । vअतः सर्वस्मात् स्थानात् हे कामाभिवर्षकाविन्द्राग्नी आगच्छतम् । अनन्तरम्[2] अभिषुतं सोमं vपिबतम्[3] ॥ यदुषु । 'यम उपरमे' । नियम्यन्ते इन्द्रियाण्येभिरिति यदवः । 'यमेर्दुक् च' इति कुप्रत्ययो दुगागमश्च । 'अनुदात्तोपदेश०' इत्यादिना अनुनासिकलोपः । तुर्वशेषु । तुर्वी हिंसार्थः । औणादिकः अशप्रत्ययः । द्रुह्युषु । 'द्रुह जिघांसायाम्' । संपदादिलक्षणो भावे क्विप् । द्रुहं परेषामिच्छन्ति । 'छन्दसि परेच्छायामपि' इति क्यच् । 'क्याच्छन्दसि' इति उप्रत्ययः । अनुषु ।

---

१. क्ष-न–दानादनयोः । २. क्ष-ट-ठ–अथ अनन्तरम् । ३. क्ष-स–'पिबतम्' इत्यस्यानन्तरम् 'एतत् ( स-इदम् ) नैरुक्ताभिमतं व्याख्यानम् । ऐतिहासिकपक्षे तु यदुतुर्वशादयः पञ्च राजानो ययातेः पुत्राः । तत्संबन्धिनीषु प्रजासु इति योज्यम्' इत्यधिकम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'अन प्राणने'। 'अणश्च' (उ. सू. १. ८) इति विधीयमान उप्रत्ययो बहुलवचनादस्मादपि भवति। 'नित्' इत्यनुवृत्तेराद्युदात्तत्वम्। पूरुषु। 'पूरी आप्यायने'। पूर्यन्ते इति पूरवः। औणादिक उप्रत्ययः॥

यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य॥ ९॥

यत्। इन्द्राग्नी इति। अवमस्याम्। पृथिव्याम्। मध्यमस्याम्। परमस्याम्। उत। स्थः। अतः। परि। वृषणौ। आ। हि। यातम्। अथ। सोमस्य। पिबतम्। सुतस्य॥ ९॥

हे [V]इन्द्राग्नी [V]अवमस्यां [V]पृथिव्यां संनिकृष्टायामस्यां भूम्यां [V]यत् यदि [V]स्थः वर्तमानौ भवथः। यदि वा [V]मध्यमस्यां पृथिव्यामन्तरिक्षलोके। अत्र पृथिवीशब्दस्त्रिष्वपि लोकेषु वर्तते। यथा 'यो द्वितीयस्यां तृतीयस्यां पृथिव्यामस्यायुषा नाम्ना' (तै. सं. १. २. १२. १) इति। [V]उत अपि च [V]परमस्याम् उत्कृष्टायां दूरे वर्तमानायां पृथिव्यां द्युलोके यदि वा वर्तेथे। [V]अतः[1] सर्वस्मात् स्थानात् हे [V]वृषणौ आगच्छतम्। आगमनानन्तरं सुतं सोमं [V]पिबतम्[1]॥ अवमस्याम्। अवमशब्दादुत्तरस्य ङेर्य्यत्ययेन स्याडागमः। एवमुत्तरत्रापि॥

यदिन्द्राग्नी परमस्यां पृथिव्यां मध्यमस्यामवयस्यामुत स्थः।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य॥ १०॥

यत्। इन्द्राग्नी इति। परमस्याम्। पृथिव्याम्। मध्यमस्याम्। अवमस्याम्। उत। स्थः। अतः। परि। वृषणौ। आ। हि। यातम्। अथ। सोमस्य। पिबतम्। सुतस्य॥ १०॥

पूर्ववद्व्याख्येयम्। एतावांस्तु विशेषः। पूर्वं भूम्यादिषु त्रिषु लोकेषु याविन्द्राग्नी तावागच्छतामित्युक्तम्। इदानीं तु द्युप्रभृतिषु अवरोहक्रमेण वर्तमानेषु त्रिषु लोकेषु याविन्द्राग्नी वर्तेते तावागच्छतामिति प्रार्थ्यते॥

यदिन्द्राग्नी दिवि ष्ठो यत्पृथिव्यां यत्पर्वतेष्वोषधीष्वप्सु।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य॥ ११॥

यत्। इन्द्राग्नी इति। दिवि। स्थः। यत्। पृथिव्याम्। यत्। पर्वतेषु। ओषधीषु। अप्सु। अतः। परि। वृषणौ। आ। हि। यातम्। अथ। सोमस्य। पिबतम्। सुतस्य॥ ११॥

---

१. क्ष-ट-ठ–सर्वस्मादित्यादि समानम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]इन्द्राग्नी [v]दिवि द्युलोके [v]यत् यदि [v]स्थः भवथः । यदि वा [v]पृथिव्यां भूलोके यदि वा [v]पर्वतेषु मेर्वादिषु मेघेषु वा । तथा [v]ओषधीषु तिलमाषव्रीह्यादिषु [v]अप्सु उदकेषु चानुग्राहकतया यदि वा स्थः । हे कामाभिवर्षकौ युवाम् [v]अतः सर्वस्मात् स्थानादागच्छतम् । आगत्य चाभिषुतं सोमं पिबतम् ॥ पृथिव्याम् । ' उदात्तयणः° ' इति विभक्तेरुदात्तत्वम् । ओषधीषु । ओषः पाक आसु धीयते इति ओषधयः । ' कर्मण्यधिकरणे च ' इति किप्रत्ययः । दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् । तच्च घञन्तमाद्युदात्तम् । ' ओषधेश्च विभक्तावप्रथमायाम् ' इति दीर्घः ॥

यदिन्द्राग्नी उदिता सूर्यस्य मध्ये दिवः स्वधया मादयेथे ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ १२ ॥

यत् । इन्द्राग्नी इति । उत्ऽइता । सूर्यस्य । मध्ये । दिवः । स्वधया । मादयेथे इति । अतः । परि । वृषणौ । आ । हि । यातम् । अथ । सोमस्य । पिबतम् । सुतस्य ॥१२॥

हे [v]इन्द्राग्नी [v]उदिता उदितस्योदयं प्राप्तस्य [v]सूर्यस्य आदित्यस्य संबन्धिनः [v]दिवः द्योतमानस्य अन्तरिक्षस्य [v]मध्ये मध्यभागे [v]स्वधया आत्मीयेन तेजसा हविर्लक्षणेनान्नेन वा [v]यत् यस्मात् कारणात् [v]मादयेथे तृप्तौ भवथः तस्मात् कारणात् [v]अतः सर्वस्मादन्तरिक्षभागात् हे कामाभिवर्षकाविन्द्राग्नी आगच्छतम् । आगमनानन्तरमभिषुतं सोमं [v]पिबतम् ॥ उदिता । ' सुपां सुलुक्° ' इति षष्ठ्या डादेशः । दिवः । ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम् । मादयेथे । ' मद तृप्तियोगे ' । चुरादिरात्मनेपदी ॥

एवेन्द्राग्नी पपिवांसा सुतस्य विश्वाभ्यं सं जयतं धनानि ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ १३ ॥

एव । इन्द्राग्नी इति । पपिऽवांसा । सुतस्य । विश्वा । अस्मभ्यम् । सम् । जयतम् । धनानि । तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥१३॥

हे [v]इन्द्राग्नी [v]सुतस्य अभिषुतं सोमम् [v]एव एवं [v]पपिवांसा पीतवन्तौ युवाम् [v]अस्मभ्यं [v]विश्वा सर्वाणि [v]धनानि [v]सं [v]जयतं प्रयच्छतम् । यदनेन सूक्तेन प्रार्थितं [v]तत् मित्रादयः [v]ममहन्तां पूजयन्तु[1] ॥ पपिवांसा । ' पा पाने ' । लिटः क्वसुः । ' वस्वेकाजाद्घसाम् ' इति इडागमः ॥ ॥ २७ ॥

' वि हि ' इत्यष्टर्चं चतुर्थं सूक्तम् । अनुक्रान्तं च–' वि ह्यष्टौ ' इति । ऋष्याद्याः पूर्ववत् । सूक्तविनियोगो[2] लैङ्गिकः[2] ॥

---

१. क्ष-ट-ठ–रक्षन्तु । २. क्ष-ट-ठ–विनियोगो लैङ्गिकः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वि ह्यख्यं मनसा वस्य इच्छन्निन्द्राग्नी ज्ञास उत वा सजातान् ।
नान्या युवत्प्रमतिरस्ति मह्यं स वां धियं वाजयन्तीमतक्षम् ॥ १ ॥

वि । हि । अख्यम् । मनसा । वस्यः । इच्छन् । इन्द्राग्नी इति । ज्ञासः । उत । वा । सऽजातान् ।
न । अन्या । युवत् । प्रऽमतिः । अस्ति । मह्यम् । सः ।
वाम् । धियम् । वाजऽयन्तीम् । अतक्षम् ॥ १ ॥

हे ᵛइन्द्राग्नी ᵛवस्यः प्रशस्तं धनम् ᵛइच्छन् कामयमानोऽहं ᵛज्ञासः ज्ञातीन् ᵛउत ᵛवा अपि वा ᵛसजातान् । समानजन्मानो ज्ञातिव्यतिरिक्ता बान्धवाः । तांश्च ᵛमनसा बुद्ध्या ᵛवि ᵛह्यख्यं युवाभ्यामेव ज्ञातिरूपेण बन्धुरूपेण च व्यज्ञासिषम् । ते हि धनस्य दातारो भवन्ति । अपि च ᵛयुवत् युवाभ्याम् ᵛअन्या अन्येन केनचिन् ᵛमह्यं दत्ता ᵛप्रमतिः प्रकृष्टा बुद्धिः ᵛन ᵛअस्ति । मदीया यैषा प्रकृष्टा बुद्धिः सा युवाभ्यामेव दत्ता । ᵛसः तादृश्या बुद्ध्या युक्तोऽहं ᵛवां युवयोः संबन्धिनीं ᵛवाजयन्तीम् अन्नमस्मभ्यमिच्छन्तीं ᵛधियं ध्यानेन निष्पन्नां स्तुतिम् ᵛअतक्षम् अकार्षम् ॥ अख्यम् । लुङि ' अस्यतिवक्तिख्यातिभ्योऽङ् ' इति च्लेरङादेशः । वस्यः । वसुशब्दात् ईयसुन् । ' टेः ' इति टिलोपः । छान्दस ईकारलोपः । ज्ञासः । सुखदुःखादिकं साम्येन जानन्तीति ज्ञासो ज्ञातयः । ' ज्ञा अवबोधने ' । औणादिकोऽसुन् । व्यत्ययेन विभक्तेरुदात्तत्वम् । युवत् । ' सुपां सुलुक्° इति विभक्तेर्लुक् । व्यर्थाभिधायकत्वात् ' युवावौ द्विवचने ' ( पा. सू. ७. २. ९२ ) इति युष्मदो मपर्यन्तस्य युवादेशः ॥

अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात् ।
अथा सोमस्य प्रयती युवभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यम् ॥ २ ॥

अश्रवम् । हि । भूरिदावत्ऽतरा । वाम् । विऽजामातुः । उत । वा । घ । स्यालात् ।
अथ । सोमस्य । प्रऽयती । युवऽभ्याम् । इन्द्राग्नी इति । स्तोमम् । जनयामि । नव्यम् ॥ २ ॥

हे ᵛइन्द्राग्नी ᵛवां युवां ᵛभूरिदावत्तरा अतिशयेन बहुधनस्य दातारौ इति ᵛअश्रवं ᵛहि अश्रौषं खलु । कस्मात् पुरुषात् । ᵛविजामातुः । श्रुताभिरूप्यादिभिर्गुणैर्विहीनो जामाता यथा कन्यावते बहु धनं प्रयच्छति कन्यालाभार्थं ततोऽप्यतिशयेन दातारावित्यर्थः । ᵛउत ᵛवा अपि च ᵛस्यालात् । स्यं शूर्पम् । तस्मात् लाजानावपति विवाहकाले इति स्यालः कन्याभ्राता । स यथा भगिनीप्रीत्यर्थं बहु धनं प्रयच्छति ततोऽप्यतिशयेन दातारावित्यर्थः । ᵛघ इति पादपूरणः[1] । तथा च सति ᵛअथ अनन्तरं हे ᵛइन्द्राग्नी युवाभ्यां ᵛसोमस्य ᵛप्रयती अभिषुतस्य सोमस्य प्रदानेन सह ᵛनव्यं नवतरं प्रत्यग्रं ᵛस्तोमं स्तोत्रं ᵛजनयामि निष्पादयामि । अत्र निरुक्तम्–' अश्रौषं हि बहुदातृतरौ वां विजामातुरसुसमाप्तजामातुः । विजामातेति शश्वद्दक्षिणाजाः क्रीतापतिमाचक्षतेऽसुसमाप्त इव वरोऽभिप्रेतो जामाता जा

१. क्ष-न–पदपूरणः; स-पदपूरणार्थः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अपत्यं तन्निर्माता । उत वा घा स्यालादपि च स्यालात् स्याल आसन्नः संयोगेनेति नैदानाः । स्याला-जानावपतीति वा । लाजा लाजतेः स्यं शूर्पं स्यतेः । शूर्पमशनपवनं श्रृणातेः शम्नातेर्वा । अथ सोमस्य प्रदानेन युवाभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यं नवतरम् ' ( निरु. ६. ९ ) इति ॥ अश्रवम् । ' श्रु श्रवणे ' । लङि उत्तमपुरुषैकवचने ' बहुलं छन्दसि ' इति विकरणस्य लुक् । भूरिदावत्तरा । ' डुदाञ्[1] दाने[1] ' । ' आतो मनिन्° इति वनिप् । अतिशयेन भूरिदावा भूरिदावत्तरः । ' भूरिदाभ्रस्तुड्वक्तव्यः ' ( पा. सू. ८. २. १७. २ ) इति तरपः तुट् । पदसंज्ञायां नलोपः । ' सुपां सुलुक्° ' इति विभक्तेराकारः । घ । ' ऋचि तुनुघ° ' इत्यादिना संहितायां दीर्घत्वम् । अथ । ' निपातस्य च ' इति[2] । प्रयती । ' यम उपरमे ' । क्तिनि ' अनुदात्तोपदेश° ' इत्यादिनानुनासिकलोपः । ' तादौ च° ' इति गतेः प्रकृतिस्वरत्वम् । युवभ्याम् । ' सर्वे विधयश्छन्दसि विकल्प्यन्ते ' इति ' युष्मदस्मदोरनादेशे ' इत्याख्वाभावः[3] । ' शेषे लोपः ' इति दकारलोपः ॥

**मा च्छेद्म रश्मीँरिति नाधमानाः पितॄणां शक्तीरनुयच्छमानाः ।**
**इन्द्राग्निभ्यां कं वृषणो मदन्ति ता ह्यद्री धिषणाया उपस्थे ॥ ३ ॥**

मा । छेद्म । रश्मीन् । इति । नाधमानाः । पितॄणाम् । शक्तीः । अनुऽयच्छमानाः ।
इन्द्राग्निऽभ्याम् । कम् । वृषणः । मदन्ति । ता । हि । अद्री इति । धिषणायाः । उपऽस्थे ॥३॥

[v]रश्मीन् । रश्मिशब्दो रज्जुवाची । यथा रश्मयो दीर्घा अविच्छिन्ना भवन्ति एवमविच्छिन्नान् पुत्र-पौत्रादीन् [v]मा [v]च्छेद्म मा विच्छिन्नान् कुर्मेति बुद्धया [v]नाधमानाः इन्द्राग्न्योः सकाशात् तथाविधान् पुत्रादीन्[4] याचमानाः । तदनन्तरं [v]पितॄणां [v]शक्तीः शक्त्युत्पादकान् वीर्योत्पादकन् तान्[5] पुत्रादीन् [v]अनुयच्छमानाः अनुक्रमेण नियतान् कुर्वन्तः [v]वृषणः सेक्तारः पुत्रोत्पादनसमर्थाः सपत्नीका इत्यर्थः । एवंभूता यजमानाः [v]इन्द्राग्निभ्यां [v]कं सुखं यथा भवति तथा [v]मदन्ति स्तुवन्ति । [v]हि यस्मात् [v]अद्री शत्रूनाद्दण्तौ हिंसन्तौ[6] विदारयन्तौ ताविन्द्राग्नी [v]धिषणायाः स्तुत्याः [v]उपस्थे उपस्थाने समीपे भवतः । तस्मात् तत्सांनिध्याय स्तुवन्तीति भावः । यद्वा । निपातानामनेकार्थत्वात् हिशब्दो यदेत्यर्थः[7] । यदा ताविन्द्राग्नी उद्दिश्य अद्री अभिषवसाधनभूता ग्रावाणो धिषणाया उपस्थे । धिषणा अधिषवण-चर्म । तस्योपरिष्टादिन्द्राग्न्यर्थं सोममभिषुण्वन्ति । तदातदा[8] यजमानाः स्तुवन्तीति योजनीयम्[9] ॥ छेद्म । ' छिदिर् द्वैधीकरणे ' । लङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । ' छन्दस्युभयथा ' इत्यार्ध-धातुकत्वेन ङित्त्वाभावाल्लघूपधगुणः । ' न माङ्योगे ' इत्यडभावः । रश्मीन् । ' दीर्घादटि समानपादे ' इति संहितायां नकारस्य रुत्वम् । ' अत्रानुनासिकः पूर्वस्य तु वा ' इति ईंकारः सानुनासिकः । नाधमानाः । ' नाध याच्ञायाम् ' । पितॄणाम् । ' नामन्यतरस्याम् ' इति नाम उदात्तत्वम् । मदन्ति । ' मदि स्तुतौ ' । आगमानुशासनस्यानित्यत्वात् नुमभावः । व्यत्ययेन परस्मैपदम् ॥

---

१. क्ष-न-स-भूरि ददाति इति भूरिदावा । २. क्ष-इति दीर्घत्वम्; स-इति संहितायां दीर्घः । ३. स-इत्याख्वाभावे । ४. क्ष-ट-ठ-पुत्रपौत्रादीन् । ५. ट-ठ-वा । ६. स-हिंसितारौ । ७. क्ष-यदेत्यर्थे वर्तते; स-यदेत्यर्थे । ८. क्ष-स-तदा । ९. क्ष-योज्यम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

युवाभ्यां देवी धिषणा मदायेन्द्राग्नी सोममुशती सुनोति ।
तावश्विना भद्रहस्ता सुपाणी आ धावतं मधुना पृङ्क्तमप्सु ॥ ४ ॥

युवाभ्याम् । देवी । धिषणा । मदाय । इन्द्राग्नी इति । सोमम् । उशती । सुनोति ।
तौ । अश्विना । भद्रऽहस्ता । सुपाणी इति सुऽपाणी ।
आ । धावतम् । मधुना । पृङ्क्तम् । अप्ऽसु ॥ ४ ॥

हे [v]इन्द्राग्नी [v]युवाभ्यां [v]मदाय युवयोर्हर्षाय [v]देवी द्योतमाना [v]उशती युवां कामयमाना [v]धिषणा मन्त्ररूपा वाक् [v]सोमम् अभिषुणोति। यद्वा । धिषणा अधिषवणचर्म। द्योतमानं तद्युवयोर्मदं कामयमानं सत् सोममभिषुणोति । ग्रावभिः तस्मिन्नभिषवात्तस्याभिषवकर्तृत्वम् । [v]अश्विना अश्ववन्तौ [v]भद्रहस्ता शोभनदोर्दण्डौ[1] [v]सुपाणी । मणिबन्धादूर्ध्वभागः पाणिः । शोभनपाणी एवंभूतौ हे इन्द्राग्नी [v]तौ युवाम् [v]आ [v]धावतं शीघ्रमागच्छतम्। आगत्य च [v]अप्सु उदकेषु वर्तमानेन [v]मधुना माधुर्योपेतेन सारांशेन [v]पृङ्क्तम् अस्मदीयं सोमं संयोजयतम् । यद्वा। अप्सु वसतीवरीषु मधुना माधुर्यं संयोजयतम् । विभक्ति व्यत्ययः ॥ युवाभ्याम् । षष्ठ्यर्थे चतुर्थी[2] । उशती । ' वश कान्तौ ' । अदादित्वात् शपो लुक् । ग्रहिज्यादिना संप्रसारणम् । ' उगितश्च ' इति ङीप् । ' शतुरनुमः° ' इति नद्या उदात्तत्वम् । पृङ्क्तम् । ' पृची संपर्के ' । रौधादिकः । लोटि थसस्तम् । ' श्नसोरल्लोपः ' । अनुस्वारपरसवर्णौ[3] । न च ' अचः परस्मिन्° ' इत्यल्लोपस्य स्थानिवत्त्वं, ' न पदान्त° ' इत्यादिना निषेधात् ॥

युवामिन्द्राग्नी वसुनो विभागे तवस्तमा शुश्रव वृत्रहत्ये ।
तावासद्या बर्हिषि यज्ञे अस्मिन्प्र चर्षणी मादयेथां सुतस्य ॥ ५ ॥

युवाम् । इन्द्राग्नी इति । वसुनः । विऽभागे । तवःऽतमा । शुश्रव । वृत्रऽहत्ये ।
तौ । आऽसद्य । बर्हिषि । यज्ञे । अस्मिन् । प्र । चर्षणी इति । मादयेथाम् । सुतस्य ॥५॥

हे [v]इन्द्राग्नी [v]वसुनः धनस्य [v]विभागे स्तोतृभ्यो दातुं विभजने तात्पर्येण वर्तमानौ [v]युवां [v]वृत्रहत्ये वृत्रस्यासुरस्य हनने [v]तवस्तमा अतिशयेन बलिनौ प्रवृद्धतमौ वा [v]शुश्रव अश्रौषम्। हे [v]चर्षणी सर्वस्य द्रष्टाराविन्द्राग्नी [v]तौ युवामस्मदीये [v]अस्मिन् [v]यज्ञे [v]बर्हिषि वेद्यामास्तीर्णे दर्भे [v]आसद्य उपविश्य [v]सुतस्य अभिषुतस्य सोमस्य पानेन [v]प्र [v]मादयेथां प्रकर्षेण तृप्तौ भवतम् ॥ विभागे । ' भज सेवायाम् ' । भावे घञ् । ' चजोः कु घिण्ण्यतोः ' इति कुत्वम् । थाथादिनोत्तरपदान्तोदात्तत्वम् । तवस्तमा । तव इति बलनाम । लुप्तमत्वर्थीयादेतस्मादातिशायनिकस्तमप् । यद्वा । तवतिर्वृद्ध्यर्थः सौत्रो धातुः । तस्मादौणादिकः कर्तरि असिप्रत्ययः । ' सुपां सुलुक्° ' इति विभक्तेः पूर्वसवर्णदीर्घत्वम् । वृत्रहत्ये । ' हनस्त च ' इति हन्तेर्भावे क्यप्; तत्संनियोगेन तकारान्तादेशश्च । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ ॥ २८ ॥

---

१. क्ष-ट-ठ–शोभनदोर्द्वन्द्वौ । २. क्ष-ट-ठ-स–चतुर्थी वक्तव्येति चतुर्थी । ३. क्ष-ट-ठ–अनुनासिकपरसवर्णौ ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ऐन्द्राग्नस्य पशोर्हविषः ' प्र चर्षणिभ्यः ' इत्येषा याज्या । ' प्रदानानाम् ' इति खण्डे सूत्रितं– ' प्र चर्षणिभ्यः पृतनाहवेष्वा देवो यातु सविता सुरत्नः ' ( आश्व. श्रौ. ३. ७ ) इति ॥

**प्र चर्षणिभ्यः पृतनाहवेषु प्र पृथिव्या रिरिचाथे दिवश्च ।**
**प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुवनात्यन्या ॥ ६ ॥**

प्र । चर्षणिऽभ्यः । पृतनाऽहवेषु । प्र । पृथिव्याः । रिरिचाथे इति । दिवः । च ।
प्र । सिन्धुऽभ्यः । प्र । गिरिऽभ्यः । महिऽत्वा । प्र ।
इन्द्राग्नी इति । विश्वा । भुवना । अति । अन्या ॥ ६ ॥

[v]पृतनाहवेषु पृतनासु संग्रामेषु रक्षणार्थमाह्वानेषु सत्सु हे [v]इन्द्राग्नी आगतवन्तौ युवां [v]चर्षणिभ्यः सर्वेभ्योऽपि मनुष्येभ्यः [v]महित्वा महत्त्वेन [v]प्र [v]रिरिचाथे अतिरिच्येथे सर्वाधिकौ भवथ इत्यर्थः । अत्रोपसर्गवशाद्धातुः स्वाभिधेयविपरीतमर्थमाचष्टे यथा प्रस्मरणं प्रस्थानमिति । तथा [v]पृथिव्याः सर्वस्या भूमेश्च [v]प्र रिरिचाथे । एवं द्युप्रभृतिभ्योऽपि । सिन्धवः स्यन्दनशीला आपः । गिरयः पर्वताः । अपि च हे इन्द्राग्नी [v]विश्वा [v]भुवना सर्वाणि भूतजातानि [v]अन्या उक्तव्यतिरिक्तानि यानि[1] सन्ति तान्यतीत्य[2] [v]प्र रिरिचाथे अधिकौ भवथः ॥ पृतनाहवेषु । पृतनासु हवः पृतनाहवः[3] । ह्वेञः ' भावेऽनुपसर्गस्य ' इति अप् संप्रसारणं च । व्यत्ययेन थाथादिस्वराभावे कृदुत्तरपदप्रकृतिस्वरत्वम् । रिरिचाथे । ' रिचिर् विरेचने ' । ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लिट् । यद्वा । लटयेव ' बहुलं छन्दसि ' इति विकरणस्य श्लुः । महित्वा । ' मह पूजायाम् ' । औणादिक इन्प्रत्ययः । तस्य भावो महित्वम् । ' सुपां सुलुक्° ' इति तृतीयाया डादेशः ॥

पूर्वोक्त एव पशौ ' आ भरतम् ' इत्येषा पुरोडाशस्यानुवाक्या । सूत्रितं च–' आ भरतं शिक्षतं वज्रबाहू उभा वामिन्द्राग्नी आहुवध्यै ' ( आश्व. श्रौ. ३. ७ ) इति ॥

**आ भरतं शिक्षतं वज्रबाहू अस्माँ इन्द्राग्नी अवतं शचीभिः ।**
**इमे नु ते रश्मयः सूर्यस्य येभिः सपित्वं पितरो न आसन् ॥ ७ ॥**

आ । भरतम् । शिक्षतम् । वज्रबाहू इति वज्रऽबाहू ।
अस्मान् । इन्द्राग्नी इति । अवतम् । शचीभिः ।
इमे । नु । ते । रश्मयः । सूर्यस्य । येभिः । सऽपित्वम् । पितरः । नः । आसन् ॥ ७ ॥

हे [v]वज्रबाहू वज्रहस्तौ [v]इन्द्राग्नी [v]आ [v]भरतम् अस्मदर्थं धनमाहरतम् । आहृत्य च [v]शिक्षतं अस्मभ्यं दत्तम् । शिक्षतिर्दानकर्मा । अपि च [v]अस्मान् अनुष्ठातॄन् [v]शचीभिः । कर्मनामैतत् । आत्मीयैः

---

१. स–' यानि ' नास्ति । २. स–तान्यपि । ३. स–' पृतनाहवः ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कर्मभिः Vअवतं रक्षतम्। किं च सूर्यात्मन इन्द्रस्य Vयेभिः रश्मिभिः यैः अर्चिभिः Vनः अस्माकं Vपितरः पूर्वपुरुषाः Vसपित्वं सहप्राप्तव्यं स्थानम् Vआसन् ब्रह्मलोकमगच्छन्। अर्चिरादिमार्गेण हि ब्रह्मलोकमुपासका गच्छन्ति। तथा च श्रूयते–' तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहः ' ( छा. उ. ५. १०. १ ) इति। यद्वा। येभी रश्मिभिः सपित्वं समवेतत्वमध्यगच्छन्[1]। Vते Vरश्मयः Vइमे Vनु इदानीमस्माभिर्दृश्यमाना एत एव खलु। सूर्यात्मन इन्द्रस्य ये रश्मयस्त एवाग्नेरपि। तथा च श्रूयते—' अग्निर्वावादित्यः सायं प्रविशति तस्मादग्निर्दूराच्चक्तं ददृशे ' ( तै. ब्रा. २. १. २. ९ ) इति। तस्मात् सूर्यस्य रश्मीनां स्तवनेनेन्द्राग्न्योरुभयोरपि स्तुतिः सिद्धा॥ भरतम्। ' ह्मग्रहोर्भः० ' इति भस्वम्। शिक्षतम्। ' शिक्ष विद्योपादाने '। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे शपः पित्त्वादनुदात्तत्वम्। धातुस्वरः शिष्यते। तिङः परत्वान्निघाताभावः। सपित्वम्। ' आपृ व्याप्तौ '। अस्मात् सशब्दोपपदात् ' कृत्यार्थे तवैकेन्० ' इति त्वन्प्रत्ययः। पृषोदरादित्वात् धातोः पिभावः। यद्वा। ' षप समवाये '। ' इन्सर्वधातुभ्यः ' इति इन्। सपेर्भावः सपित्वम्। आसन्। ' अस गतिदीप्त्यादानेषु '। लङि आडागम उदात्तः। ' यद्वृत्तान्नित्यम् ' इति निघाताभावः[2]॥

पुरंदरा शिक्षतं वज्रहस्तास्माँ इन्द्राग्नी अवतं भरेषु।
तन्नो मित्रो वरुणो ममहन्तामदितिः सिन्धुः पृथिवी उत द्यौः॥ ८॥

पुरम्ऽदरा। शिक्षतम्। वज्रऽहस्ता। अस्मान्। इन्द्राग्नी इति। अवतम्। भरेषु।
तत्। नः। मित्रः। वरुणः। ममहन्ताम्। अदितिः। सिन्धुः। पृथिवी। उत। द्यौः॥८॥

हे Vवज्रहस्ता हस्तेन[3] गृहीतवज्रौ Vपुरंदरा असुरपुराणां दारयितारौ Vइन्द्राग्नी Vशिक्षतम् अस्मदपेक्षितं धनं प्रयच्छतम्। अपि च Vभरेषु संग्रामेषु Vअस्मान् Vअवतं रक्षतम्। यदनेन सूक्तेन प्रार्थितं Vतत्[4] अस्मदीयं मित्रादयः Vममहन्तां पूजयन्ताम्[4]॥ पुरंदरा। ' पूःसर्वयोर्दारिसहोः ' ( पा. सू. ३. २. ४१ ) इति खच्। ' वाचंयमपुरंदरौ च ' ( पा. सू. ६. ३. ६९ ) इति निपातनात् अम्। ' सुपां सुलुक्० ' इति विभक्तेः आकारः॥ ॥ २९ ॥

' ततं मे ' इति नवर्चं पञ्चमं सूक्तं कुत्सस्यार्षं ऋभुदेवताकम्। पञ्चमीनवम्यौ त्रिष्टुभौ। शिष्टाः सप्त जगत्यः। तथा चानुक्रान्तं–' ततं नवार्भवं तु पञ्चम्यन्त्ये त्रिष्टुभौ ' इति॥ अभिप्लवषडहस्य चतुर्थेऽहनि वैश्वदेवशस्त्रे इदमार्भवं निविद्धानम्। सूत्रितं च ' तृतीयस्य ' इति खण्डे–' ततं मे अप इति वैश्वदेवम् ' ( आश्व. श्रौ. ७. ७ ) इति॥

ततं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते।
अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समु तृप्णुत ऋभवः॥ १॥

ततम्। मे। अपः। तत्। ऊँ इति। तायते। पुनरिति। स्वादिष्ठा। धीतिः। उचथाय। शस्यते।
अयम्। समुद्रः। इह। विश्वऽदेव्यः। स्वाहाऽकृतस्य। सम्। ऊँ इति। तृप्णुत। ऋभवः॥१॥

---

१. क्ष-समवेतत्वमगच्छन्; स–समवे ( वै ) तृत्वमगच्छन् २. क्ष–निघातप्रतिषेधः। ३. क्ष-ट–हस्ते। ४. क्ष-ट–तन्मित्रादयो रक्षन्तु।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे vऋभवः vमे मया vअपः अग्निष्टोमादिरूपं कर्म vततं विस्तारितं बहुशः पूर्वमनुष्ठितम्। vतदु तदेव vपुनः vतायते विस्तार्यते अनुष्ठीयते इत्यर्थः। तत्र vस्वादिष्टा स्वादुतमा अतिशयेन प्रीतिकरी vधीतिः स्तुतिश्च vउच्चथाय स्तुत्याय[1] vशस्यते पठ्यते। अपि च vइह अस्मिन्यागे vसमुद्रः समुन्दनशीलः vअयं सोमरसः vविश्वदेव्यः सर्वेभ्यो देवेभ्यः पर्याप्तो यथा भवति तथा संपादितः। तस्य vस्वाहाकृतस्य स्वाहाकारेणाग्नौ प्रक्षिप्तस्य सोमस्य पानेन vसमु vतृप्णुत सम्यगेव तृप्ता भवत॥ ततम्। 'तनु विस्तारे'। निष्ठायां 'यस्य विभाषा' इति इट्प्रतिषेधः। 'अनुदात्तोपदेश०' इत्यादिना अनुनासिकलोपः। अपः। 'आप्लृ व्याप्तौ'। 'आपः कर्माख्यायां ह्रस्वो नुट्च वा' इति असुन् धातोर्ह्रस्वश्च। तायते। 'तनोतेर्यकि' (पा. सू. ६. ४. ४४) इति आत्वम्। स्वादिष्टा। स्वादुशब्दादतिशायनिक इष्टन्। 'टेः' इति टिलोपः। उच्चथाय। 'वच परिभाषणे'। औणादिकः अथक्प्रत्ययः। 'वचिस्वपि०' इत्यादिना संप्रसारणम्। समुद्रः। 'उन्दी क्लेदने'। 'स्फायितञ्चि०' इत्यादिना रक्[2]। 'अनिदिताम्०' इति नलोपः। विश्वदेव्यः। देवार्हो भागो देव्यः। 'छन्दसि च' इति यप्रत्ययः। विश्वे सर्वे देव्या यस्मिन्सोमे। 'बहुव्रीहौ विश्वं संज्ञायाम्' इति व्यत्ययेनासंज्ञायामपि पूर्वपदान्तोदात्तत्वम्। स्वाहाकृतस्य। स्वाहाशब्दस्य ऊर्यादित्वेन गतित्वात् (पा. सू. १. ४. ६१) 'गतिरनन्तरः' इति पूर्वपदप्रकृतिस्वरत्वम्। तृप्णुत। 'तृप प्रीणने'। 'स्वादिभ्यः श्नुः'। ऋभव इत्यनेन संहितायाम् 'ऋत्यकः' इति प्रकृतिभावः॥

**आभोगयं प्र यदिच्छन्त ऐतनापाकाः प्राञ्चो मम के चिदापयः।**
**सौधन्वनासश्चरितस्य भूमनागच्छत सवितुर्दाशुषो गृहम्॥ २॥**

आऽभोगयम्। प्र। यत्। इच्छन्तः। ऐतन। अपाकाः। प्राञ्चः। मम। के। चित्। आपयः। सौधन्वनासः। चरितस्य। भूमना। अगच्छत। सवितुः। दाशुषः। गृहम्॥ २॥

हे ऋभवः vअपाकाः परिपक्वज्ञानाः vप्राञ्चः पूर्वकालीनाः vमम vआपयः प्रापयितारो मदीया ज्ञातयः vके vचित् एवंभूता ये केचन यूयम् vआभोगयम् उपभोग्यं सोमम् vइच्छन्तः vयत् यदा vप्र vऐतन तपश्चरितुमरण्यं गतवन्तः। ऋभवो हि सुधन्वन आङ्गिरसस्य पुत्राः। तदुक्तं यास्केन–'ऋभुर्विभ्वा वाज इति सुधन्वन आङ्गिरसस्य त्रयः पुत्रा बभूवुः' (निरु. ११. १६) इति। कुत्सोऽप्याङ्गिरसः अतस्तेन मदीया ज्ञातय इत्युक्तम्। हे vसौधन्वनासः सुधन्वनः पुत्राः तदानीं vचरितस्य समुपार्जितस्य तपसः vभूमना भूम्ना बहुत्वेन vदाशुषः हवींषि दत्तवतः vसवितुः सोमाभिषवं कुर्वतो यजमानस्य संबन्धि यज्ञगृहम् vअगच्छत तपसा लब्धसोमाः सन्तः कृतपानाः[3] यूयं गतवन्तः। यद्वा। दाशुषः प्रातःसवनादिष्वग्न्यादिभिरपसारितेभ्यः ऋभुभ्यः सोमपानं दत्तवतः सवितुः गृहं निवासस्थानं तृतीयसवनाख्यमगच्छत प्राप्ताः। एतत्सर्वम् 'आर्भवं शंसति' (ऐ. ब्रा. ३. ३०) इत्यादौ विस्पष्टमाम्नातम्॥ आभोगयम्। आ समन्ताद्भोग आभोगः। तदर्हः आभोगयः। 'छन्दसि च' इति यः[4]। 'यस्य०' इति लोपाभावश्छान्दसः। व्यत्ययेन प्रत्ययात्पूर्वस्योदात्तत्वम्। यद्वा। आङ्पूर्वाद्भुजेरौणादिकः कर्मणि इप्रत्ययः[5] कुत्वं च। अमि व्यत्ययेन गुणः। ऐतन। 'इण् गतौ'। लङि मध्यम-

---

क्ष-स–१. स्तुत्याय युष्मद्भरणाय। २. क्ष–रक्प्रत्ययः। ३. स–तत्पानाय। ४. क्ष–यप्रत्ययः; ट–यः प्रत्ययः। ५. क्ष-ट–अयप्रत्ययः; स–घप्रत्ययः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

बहुवचनस्य थस्य तादेशः । ' तप्तनप्तनथनाश्च ' इति तस्य तनबादेशः । आडागमो वृद्धिश्च । आपयः । आप्नोतेरौणादिक इप्रत्ययः । भूमना । बहुशब्दात् पृथ्वादिलक्षण इमनिच् । ' बहोर्लोपो भू च बहोः ' इति इकारलोपो बहोर्भूभावश्च । संज्ञापूर्वकस्य विधेरनित्यत्वात् अलोपाभावः[1] ॥

तत्सवि॒ता वो॑ऽमृत॒त्वमासु॑वद॒गोह्यं॑ यच्छ॒वय॑न्त॒ ऐत॑न ।
त्यं चि॑च॒मस॑मसु॒रस्य॒ भक्ष॑णमे॒कं सन्त॑मकृणु॒ता च॒तुर्व॑यम् ॥ ३ ॥

तत् । स॒वि॒ता । वः । अ॒मृ॒त॒ऽत्वम् । आ । अ॒सु॒व॒त् । अगो॑ह्यम् । यत् । श्र॒वय॑न्तः । ऐत॑न ।
त्यम् । चि॒त् । च॒मस॑म् । अ॒सु॒रस्य । भक्ष॑णम् । ए॒क॑म् । सन्त॑म् । अ॒कृ॒णु॒त । च॒तुः॒ऽवय॑म् ॥ ३ ॥

हे ऋभवः [v]तत् तदानीं [v]सविता सर्वस्य प्रेरको देवः [v]वः युष्माकम् [v]अमृतत्वं देवत्वम् [v]आसुवत् आभिमुख्येन प्रेरितवान् दत्तवानित्यर्थः । [v]यत् यदा यूयम् [v]अगोह्यं गूहितुमशक्यं सर्वैर्दृश्यमानं सवितारं [v]श्रवयन्तः अपेक्षितं सोमपानं विज्ञापयन्तः सन्तः [v]ऐतन आगच्छत । तदानीमिति पूर्वेणान्वयः । यस्मात् यूयं देवैराज्ञापिताः सन्तः [v]असुरस्य त्वष्टुः संबन्धिनम् । तेन निर्मितमित्यर्थः । [v]भक्षणं सोमपानसाधनं [v]त्यं तं [v]चमसम् [v]एकं [v]चित् असहायमेव [v]सन्तं [v]चतुर्वयं चतुर्ण्णां हम् [v]अकृणुत कृतवन्तः । सृष्ट्यादौ त्वष्टा कृतं चमसं होतृचमसादिमुख्यचमसचतुष्टयरूपेण[2] ऋभवः कृतवन्तः[2] इत्यर्थः ।। असुवत् । ' षू प्रेरणे ' । तौदादिकः । श्रवयन्तः । ' श्रु श्रवणे ' । छान्दसो वृद्ध्यभावः । ऐतन । लङि मध्यमबहुवचनस्य[3] तादेशे[4] ' तप्तनप्तनथनाश्च' इति तनबादेशः । भक्षणम् । करणे ल्युट् । अकृणुत । ' कृवि हिंसाकरणयोश्च ' । लङि मध्यमबहुवचने ' धिन्विकृण्व्योर च ' इति उप्रत्ययः । चतुर्वयम् । वया अवयवाः । चत्वारोऽवयवा यस्य स तथोक्तः ॥

विष्टी शमी॑ तरणि॒त्वेन॑ वा॒घतो॒ मर्ता॑सः सन्तो॑ अमृत॒त्वमा॑नशुः ।
सौ॒ध॒न्व॒ना ऋ॒भव॑ः सू॒रच॑क्षसः संवत्स॒रे सम॑पृच्यन्त धी॒तिभिः॑ ॥ ४ ॥

विष्टी । शमी॑ । त॒र॒णि॒ऽत्वेन॑ । वा॒घतः॑ । मर्ता॑सः । सन्तः॑ । अ॒मृ॒त॒ऽत्वम् । आ॒न॒शुः॒ ।
सौ॒ध॒न्व॒नाः॑ । ऋ॒भवः॑ । सू॒रऽच॑क्षसः । स॒व॒त्स॒रे । सम् । अ॒पृ॒च्य॒न्त॒ । धी॒तिऽभिः॑ ॥ ४ ॥

[v]वाघतः । ऋत्विङ्नामैतत् अत्र च सामर्थ्यात् तद्वन्तो लक्ष्यन्ते । ऋत्विग्भिरुपेता ऋभवः [v]शमी । कर्मनामैतत् । यागदानादीनि कर्माणि अन्यान्यपि ' एकं चमसं चतुरः कृणोतन ' ( ऋ. सं. १. १६१. २ ) इत्यादिना देवैरुक्तानि कर्माणि [v]तरणित्वेन । तरणिरिति क्षिप्रनाम । क्षिप्रत्वेन शैघ्र्येण [v]विष्टी । यद्यप्येतत्कर्मनाम तथाप्यत्र क्रियापरं व्याप्य कृत्वेत्यर्थः । एवं कर्माणि कृत्वा [v]मर्तासः मनुष्या अपि [v]सन्तः [v]अमृतत्वं देवत्वम् [v]आनशुः आनशिरे । कृतैः कर्मभिर्लेभिरे । देवत्वं प्राप्य च[v] सौधन्वनाः सुधन्वनः पुत्राः [v]सूरचक्षसः सूर्यसमानप्रकाशाः सूर्यसदृशज्ञाना वा ते [v]ऋभवः [v]संवत्सरे संवत्सरा-

---

१. क्ष-न-स-अलोपाभावः । २. क्ष-होतृचमसादिरूपेण चतुष्टयं कृतवन्तः । ३. क्ष-मध्यमपुरुषबहुवचनस्य । ४. क्ष-तादेशः तस्य; स-तादेशस्य ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

बयवभूते वसन्तादिकालेऽनुष्ठेयैः ᵛधीतिभिः अग्निष्टोमादिकर्मभिः ᵛसमपृच्यन्त संयुक्ता अभवन् हविर्भागार्हा बभूवुरित्यर्थः । अत्र निरुक्तं –' कृत्वा कर्माणि क्षिप्रत्वेन वोढारो मेधाविनो वा मर्तासः सन्तोऽमृतत्वमानशिरे सौधन्वना ऋभवः सूरख्याना वा सूरप्रज्ञा वा संवत्सरे समपृच्यन्त धीतिभिः कर्मभिर्ऋभुर्विभ्वा वाज इति सुधन्वन आङ्गिरसस्य त्रयः पुत्रा बभूवुः ' ( निरु. ११. १६ ) इति ॥ विष्टी । ' विषॢ व्याप्तौ '। ' स्नात्व्यादयश्च ' ( पा. सू. ७. १. ४९ ) इति क्त्वाप्रत्ययस्य ईकारान्तादेशः । शमी । ' सुपां सुलुक्° ' इति शसो लुक् । आनशुः । ' अशूङ् व्याप्तौ ' । व्यत्ययेन परस्मैपदम् । ' अश्नोतेश्च ' इति अभ्यासादुत्तरस्य नुडागमः । अपृच्यन्त । ' पृची संपर्के ' । कर्मणि लङ् ॥

क्षेत्रमिव वि ममुस्तेजनेन एकं पात्रमृभवो जेहमानम् ।
उपस्तुता उपमं नाधमाना अमर्त्येषु श्रव इच्छमानाः ॥ ५ ॥

क्षेत्रम्ऽइव । वि । ममुः । तेजनेन । एकम् । पात्रम् । ऋभवः । जेहमानम् ।
उपऽस्तुताः । उपऽमम् । नाधमानाः । अमर्त्येषु । श्रवः । इच्छमानाः ॥ ५ ॥

ᵛउपस्तुताः समीपस्थैर्ऋषिभिः स्तुताः ᵛऋभवः ᵛजेहमानं होमक्रियां प्रति प्रयतमानम् ᵛएकम् असहायं ᵛपात्रं पानसाधनं त्वष्ट्रा निर्मितं चमसं मानदण्डेन ᵛक्षेत्रमिव भूमिमिव ᵛतेजनेन तीक्ष्णेन शस्त्रेण चमसचतुष्टयरूपेण कर्तुं ᵛवि ᵛममुः विशेषेण मानं कृतवन्तः । किमिच्छन्तः । ᵛउपमं सर्वेषामुपमानभूतं प्रशस्तं सोमलक्षणमन्नं ᵛनाधमानाः याचमानाः । एतदेव विवृणोति । ᵛअमर्त्येषु मरणरहितेषु देवेषु मध्ये ᵛश्रवः हविर्लक्षणमन्नम् ᵛइच्छमानाः इच्छन्तः । देवैः सह सोमपानं कामयमानाः तल्लाभाय चतुरश्रमसानकार्षुरित्यर्थः ॥ ममुः । ' माङ् माने शब्दे च ' । व्यत्ययेन परस्मैपदम् । तेजनेन । ' अणोऽप्रगृह्यस्यानुनासिकः ' ( पा. सू. ८. ४. ५७ ) इति अनवसाने व्यत्ययेन अकारस्य आनुनासिक्यम् । ईषाअक्षादित्वात् प्रकृतिभावः । जेहमानम् । ' वेहृ जेहृ बाहृ प्रयत्ने ' । भौवादिकः । अनुदात्तेत्त्वात् आत्मनेपदम् । उपस्तुताः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । उपमम् । ' माङ् माने ' । ' आतश्चोपसर्गे ' इति कप्रत्ययः । इच्छमानाः । व्यत्ययेन आत्मनेपदम् ॥ ॥ ३० ॥

आ मनीषामन्तरिक्षस्य नृभ्यः स्रुचेव घृतं जुहवाम विद्मना ।
तरणित्वा ये पितुरस्य सश्चिर ऋभवो वाजमरुहन्दिवो रजः ॥ ६ ॥

आ । मनीषाम् । अन्तरिक्षस्य । नृऽभ्यः । स्रुचाऽइव । घृतम् । जुहवाम । विद्मना ।
तरणिऽत्वा । ये । पितुः । अस्य । सश्चिरे । ऋभवः । वाजम् । अरुहन् । दिवः । रजः ॥६॥

ᵛअन्तरिक्षस्य अन्तरिक्षलोकस्य मध्यमस्थानस्य संबन्धिभ्यः ᵛनृभ्यः यज्ञस्य नेतृभ्य ऋभुभ्यः । ऋभवो हि यज्ञस्य नेतारः । तेन हि ते देवत्वं प्राप्ताः । यद्वा । अन्तरिक्षस्य लोकस्य नेतृभ्यः । मध्यमे[1] स्थाने[1] ह्येते पठ्यन्ते । तादृशेभ्यः ᵛस्रुचेव यथा स्रुचा जुह्वा ᵛघृतं क्षरणशीलाज्योपेतं हविः ᵛआ

१. क्ष–अन्तरिक्षस्थाने; स–मध्यमस्थाने ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]जुहवाम । मर्यादायामाकारः । यथाशास्त्रं प्रयच्छाम । एवमेव [v]मनीषां स्तुतिं [v]विप्रेण वेदनेन ज्ञानेन कुर्मः इति शेषः । अपि च [v]ये [v]ऋभवः [v]पितुः सर्वस्य जगतः पालकस्य [v]अस्य सूर्यस्य [v]तरणित्वा तरणित्वानि तरणकौशलानि [v]सश्चिरे सूर्यरश्मिभूताः[1] सन्तः प्रापुः । तदुक्तम्–' आदित्यरश्मयोऽप्यृभव उच्यन्ते ' इति । ते ऋभवः [v]दिवो [v]रजः । रजःशब्दो लोकवाची । द्योतमानस्य स्वर्गाख्यस्य लोकस्य संबन्धिनं [v]वाजं सोमलक्षणमन्नम् [v]अरुहन् यागदानादिभिः कर्मभिरन्यैश्च देवोक्तैः[2] चमसचतुष्टयकरणादिकैः प्राप्नुवन् ॥ स्रुचेव[3]। ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम्। जुहवाम। ' हु दानादनयोः[4] ' । लोटि ' आडुत्तमस्य पिच्च ' इति आडागमः । विप्रेण । ' विद ज्ञाने ' । औणादिको मनिः[5]। ' न संयोगाद्वमन्तात् ' इति अलोपाभावः । तरणित्वा । ' तॄ प्लवनतरणयोः ' । ' अर्तिसृभृधृधम्यश्यवितॄभ्योऽनिः ' इति कर्तरि अनिप्रत्ययः । तस्य भावस्तरणित्वम् । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । सश्चिरे । ' ग्लुञ्च ग्लञ्च गतौ ' इत्यत्र सश्चिमप्येके पठन्ति । व्यत्ययेन आत्मनेपदम् । ' द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम् ' इति वचनात् द्विर्वचनाभावः । इरेचश्चित्त्वादन्तोदात्तत्वम् । ' यद्वृत्तान्नित्यम् ' इति निघातप्रतिषेधः । अरुहन् । ' रुह बीजजन्मनि प्रादुर्भावे च ' । लुङि ' कृमृदरुहिभ्यश्छन्दसि ' इति च्लेः अङादेशः । दिवः । ' ऊडिदम्° ' इत्यादिना विभक्तेरुदात्तत्वम् । रजः । ' रञ्ज रागे ' । रजन्त्यस्मिन्निति रजो लोकः । तदुक्तं–' लोका रजांस्युच्यन्ते ' ( निरु. ४. १९ ) इति । औणादिकोऽधिकरणे असुन् । ' रजकरजनरजःसूपसंख्यानम् ' इति नलोपः । ' सुपां सुलुक्° ' इति षष्ठ्या लुक् ॥

ऋभुर्न इन्द्रः शवसा नवीयानृभुर्वाजेभिर्वसुभिर्वसुदादिः ।
युष्माकं देवा अवसाहनि प्रिये ऽभि तिष्ठेम पृत्सुतीरसुन्वताम् ॥ ७ ॥

ऋभुः । नः । इन्द्रः । शवसा । नवीयाम् । ऋभुः । वाजेभिः । वसुऽभिः । वसुः । ददिः । युष्माकम् । देवाः । अवसा । अहनि । प्रिये । अभि । तिष्ठेम । पृत्सुतीः । असुन्वताम् ॥७॥

ऋभुर्विभ्वा वाज इति त्रयः सुधन्वनः पुत्राः । तत्र [v]शवसा बलेन [v]नवीयान् नवतरः प्रशस्ततरः [v]ऋभुः[v]नः अस्माकम् [v]इन्द्रः परमेश्वरः । अस्माकं[6] रक्षक इत्यर्थः । यद्वा । इन्द्र एव प्रसंगात् उरु भातीति नैरुक्तव्युत्पत्त्या ऋभुरिति स्तूयते । अपि च [v]वाजेभिः वाजैरस्मभ्यं दातव्यैरन्नैः [v]वसुभिः निवासहेतुभिर्धनैश्च [v]ऋभुः[7] [v]वसुः अस्माकं निवासयिता अत एव [v]ददिः तेषामन्नानां धनानां च दाता भवतु । परोऽर्धर्चः प्रत्यक्षकृतः । हे [v]देवाः दानादिगुणयुक्ता ऋभुप्रभृतयः [v]युष्माकं संबन्धिना [v]अवसा रक्षणेन युक्ते [v]प्रिये अस्माकमनुकूले [v]अहनि दिवसे वर्तमाना वयम् [v]असुन्वतां सुन्वद्यजमानविरोधिनां शत्रूणां [v]पृत्सुतीः सेना [v]अभि [v]तिष्ठेम[8]॥ नवीयान् । नवशब्दात् आतिशायनिक ईयसुन्[9] । वाजेभिः । ' बहुलं छन्दसि ' इति भिस ऐसभावः । वसुः । ' वस निवासे ' । अस्मात् अन्तर्भावितण्यर्थात् ' शॄस्वृस्निहि° ' इत्यादिना उप्रत्ययः । ' नित् ' इत्यनुवृत्तेराद्युदात्तत्वम् । ददिः । ' डुदाञ् दाने ' । ' आदृगमहन°' इति किप्रत्ययः । लिङ्वद्भावात् द्विर्भावादि । 'आतो लोप इटि च' इति आकारलोपः ॥

---

१. क्ष-स–सूर्यस्य रश्मिभूताः । २. स–वेदोक्तैः । ३. क्ष-न-सं–स्रुचा इव । ४. क्ष–दानादानयोः । ५. क्ष-स–मनिन् । ६. क्ष-ट–' अस्माकम् ' नास्ति । ७. च-त-द-ध-फ-श–स ऋभुः । ८. क्ष-ट-स–तिष्ठेम अभिभवेम । ९. क्ष-ट-स–ईयसुन् । टेरिति टिलोपः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

निश्चर्मण ऋभवो गामपिंशत सं वत्सेनासृजता मातरं पुनः ।
सौधन्वनासः स्वपस्यया नरो जिव्री युवाना पितरा कृणोतन ॥ ८ ॥

निः । चर्मणः । ऋभवः । गाम् । अपिंशत । सम् । वत्सेन । असृजत । मातरम् । पुनरिति । सौधन्वनासः । सुऽअपस्यया । नरः । जिव्री इति । युवाना । पितरा । अकृणोतन ॥ ८ ॥

पुरा कस्यचिदृषेर्धेनुर्मृता । स ऋषिस्तस्या धेनोर्वत्सं दृष्ट्वा ऋभुं तुष्टाव । ऋभवस्तत्सदृशीमन्यां धेनुं कृत्वा तदीयेन चर्मणा संवीय तेन वत्सेन समयोजयन्निति । अयमर्थः पूर्वार्धे प्रतिपाद्यते । हे Vऋभवः यूयं Vचर्मणः चर्मणा त्वचा । तृतीयार्थे षष्ठी । Vगां धेनुं Vनिः Vअपिंशत निःशेषेणाश्लिष्टां संयुक्तामकुरुत । तदनन्तरं Vमातरं तां गां Vपुनः Vवत्सेन Vसम् Vअसृजत संसृष्टामकुरुत समगमयतेति यावत् । अपि च हे Vसौधन्वनासः सुधन्वनः आङ्गिरसस्य पुत्राः Vनरः यज्ञस्य नेतारः ऋभवः Vस्वपस्यया शोभनकर्मेच्छया यागदानाद्याचरणेनेति यावत् । Vजिव्री जीर्णौ वृद्धौ Vपितरा मातापितरौ Vयुवाना पुनर्यौवनोपेतौ Vअकृणोतन यूयमकृद्वम् ॥ अपिंशत । ' पिश अवयवे ' । तौदादिकः । ' शे मुचादीनाम् ' इति नुम् । सौधन्वनासः । सुधन्वनः पुत्राः सौधन्वनाः । ' अन् ' ( पा. सू. ६. ४. १६७ ) इति प्रकृतिभावः । ' आज्जसेरसुक् ' । ' आमन्त्रितस्य च ' इत्याद्युदात्तत्वम् । स्वपस्यया । शोभनमपः स्वपः । तदिच्छा स्वपस्या । ' सुप आत्मनः क्यच् ' । ' अ प्रत्ययात् ' इति भावे अकारप्रत्ययः । जिव्री । ' जॄष् वयोहानौ ' । ' जृशस्तृजागृभ्यः क्विन् ' ( उ. सू. ४. ४९४ ) । ' ऋत इद्धातोः ' इति इत्वम् । रेफवकारयोः स्थानविपर्ययः । बहुलवचनात् ' हलि च ' इति दीर्घाभावः । नित्त्वादाद्युदात्तत्वम् । युवाना । ' सुपां सुलुक्° ' इति विभक्तेः आकारः । पितरा । पिता च माता च पितरौ । ' पिता मात्रा ' ( पा. सू. १. २. ७० ) इति पिता शिष्यते । पूर्ववत् विभक्तेः आकारः । अकृणोतन । ' कृवि हिंसाकरणयोश्च ' । इदित्त्वात् नुम् । ' धिन्विकृण्व्योर च ' इति उप्रत्ययः; तत्संनियोगेन वकारस्य च अकारः । अतो लोपे सति तस्य स्थानिवद्भावात् लघूपधगुणाभावः । लङ्मध्यमबहुवचनस्य तशब्दस्य ' तप्तनप्तनथनाश्च ' इति तनबादेशः । तस्य पित्त्वेन ङित्त्वाभावाद्गुणः ॥

वाजेभिर्नो वाजसाताविविड्ढ्यृभुमाँ इन्द्र चित्रमा दर्षि राधः ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ९ ॥

वाजेभिः । नः । वाजऽसातौ । अविड्ढि । ऋभुऽमान् । इन्द्र । चित्रम् । आ । दर्षि । राधः । तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ ९ ॥

हे Vइन्द्र Vऋभुमान् । ऋभुर्विभ्वा वाज इति त्रयोऽपि ऋभुशब्देनोपचारादत्रोच्यन्ते । तैर्युक्तस्त्वं Vवाजसातौ वाजस्यान्नस्य संभजने निमित्तभूते सति Vवाजेभिः अन्नैः Vअविड्ढि अस्मान् व्यामुहि । यद्वा । वाजसातिरिति संग्रामनाम । वाजसातौ[1] संग्रामे वाजेभिर्वेजनयुक्तैरश्वैरविड्ढि अस्मान् रक्ष । अपि च Vचित्रं चायनीयं Vराधः धनम् Vआ Vदर्षि अस्मभ्यं दातुमाद्रियस्व । तृतीयसवने ऋभुभिः

१. क्ष-ट-' वाजसातौ ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सहेन्द्रस्यावस्थानात् प्रसंगादत्रेन्द्रस्तुतिः । यदेतदस्माभिः प्रार्थितमस्मदीयं vतत् मित्रादयः vममहन्तां पूजयन्ताम् ॥ वाजसातौ । ' वन षण संभक्तौ ' । भावे क्तिन् । ' जनसनखनां सञ्झलोः ' इति आत्वम् । वाजानां सातिर्यस्मिन् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । अविड्ढि । ' विष्लृ व्याप्तौ ' । लोटो हिः । ' बहुलं छन्दसि ' इति शपो लुक् । ' हुझल्भ्यो हेर्धिः ' । ष्टुत्वजश्त्वे । ' छन्दस्यपि दृश्यते ' ( पा. सू. ६. ४. ७३ ) इति दृशिग्रहणात् लोटि[1] अडागमः । यद्वा । अवतेर्लोटि ' सिब्बहुलं लेटि ' इति बहुलवचनात् विकरणः सिप् । तस्यार्धधातुकत्वात् इट् । ' आदेशप्रत्यययोः ' इति षत्वम् । धित्वादि पूर्ववत् । ऋभुमान् । ' ह्रस्वनुड्भ्यां मतुप् ' इति मतुप उदात्तत्वम् । दर्षि । ' दृङ् आदरे ' । लोटि व्यत्ययेन परस्मैपदम् । ' बहुलं छन्दसि ' इति विकरणस्य लुक् ॥ ॥ ३१ ॥

' तक्षन् ' इति पञ्चर्चं षष्ठं सूक्तं कुत्सस्यार्षमार्भवम् । पञ्चमी त्रिष्टुप् । शिष्टाश्चतस्रो जगत्यः । तथा चानुक्रान्तं–' तक्षन्पञ्चान्त्या त्रिष्टुप् ' इति । अग्निष्टोमे वैश्वदेवशस्त्रे इदं सूक्तमार्भवं निविद्धानम् । सूत्रितं च–' तक्षन्नथमयं वेनश्चोदयत्पृश्निगर्भाः ' ( आश्व. श्रौ. ५. १८ ) इति ॥

तक्षन्नथं सुवृतं विद्मनापसस्तक्षन्हरी इन्द्रवाहा वृषण्वसू ।
तक्षन्पितृभ्यामृभवो युवद्वयस्तक्षन्वत्साय मातरं सचाभुवम् ॥ १ ॥

तक्षन् । रथम् । सुऽवृतम् । विद्मनाऽअपसः । तक्षन् ।
हरी इति । इन्द्रऽवाहा । वृषण्वसू इति वृषण्ऽवसू ।
तक्षन् । पितृऽभ्याम् । ऋभवः । युवत् । वयः । तक्षन् । वत्साय । मातरम् । सचाऽभुवम् ॥१॥

vविद्मनापसः उत्कृष्टेन ज्ञानेन निष्पाद्यकर्माणो लाभवत्कर्माणः[2] वा ऋभवः vरथम् अश्विनोः आरोहणार्थं vसुवृतं शोभनवर्तनं सुचक्रं वा vतक्षन् अकुर्वन् । तथा vइन्द्रवाहा इन्द्रस्य वाहनभूतौ vहरी हरणशीलावेतत्संज्ञकावश्वौ vतक्षन् कृतवन्तः । कीदृशौ । vवृषण्वसू सेचनसमर्थेन दृढतरेण धनेन बलेन वा युक्तौ । अपि च vपितृभ्यां स्वकीयाभ्यां मातापितृभ्यां वृद्धाभ्यां vयुवत् यौवनोपेतं vवयः आयुः vऋभवः vतक्षन् कृतवन्तः । तथा vवत्साय vमातरं गां vसचाभुवं सहभुवं सह वर्तमानां vतक्षन् अकुर्वन् ॥ तक्षन् । ' तक्षू त्वक्षू तनूकरणे ' । लङि ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । सुवृतम् । शोभनं वर्तते इति सुवृत् । ' वृतु वर्तने ' । ' क्विप् च ' इति क्विप् । विद्मनापसः । ' विद ज्ञाने ' । ' अन्येभ्योऽपि दृश्यन्ते ' इति दृशिग्रहणात् भावे मनिन् । संज्ञापूर्वकस्य विधेरनित्यत्वात् गुणाभावः । बहुलवचनात् अलुक्[3] । यद्वा । ' विड्लृ लाभे ' । औणादिको भावे मक् । ततः पामादिलक्षणो नप्रत्ययः । विद्मनं लाभवत् अपः कर्म येषाम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । छान्दसः पूर्वसवर्णदीर्घः[4] । इन्द्रवाहा । इन्द्रं वहतः इतीन्द्रवाहौ । ' वहश्च ' इति ण्विप्रत्ययः । ' अत उपधायाः ' इति वृद्धिः । ' सुपां सुलुक्° ' इति विभक्तेः आकारः । वृषण्वसू । ' वृष सेचने ' । ' कनिन्युवृषितक्षि° ' इत्यादिना कनिन् । नित्त्वादाद्युदात्तत्वम् । ' वृषण्वस्वश्वयोरुपसंख्यानम् ' ( पा. सू. १. ४. १८. ४ ) इति वसुशब्दे उत्तरपदे वृषण्भावः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ।

---

१. क्ष–लोट्यपि २. क्ष-ट-स–लब्धकर्माणः । ३. त-श–विभक्त्यलुक् । ४. क्ष-स–पूर्वपदस्य दीर्घः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

युवत् । अत्र युवञ्शब्दः[1] सामर्थ्यात् प्रवृत्तिनिमित्तं युवत्वमात्रमाचष्टे । ' तदस्मिन्नस्ति° ' इति युवत् । छान्दसो वर्णलोपः ॥

आ नो यज्ञाय तक्षत ऋभुमद्वयः कृत्वे दक्षाय सुप्रजावतीमिषम् ।
यथा क्षयाम सर्ववीरया विशा तन्नः शर्धाय धासथा स्विन्द्रियम् ॥ २ ॥

आ । नः । यज्ञाय । तक्षत । ऋभुऽमत् । वयः । कृत्वे । दक्षाय । सुऽप्रजावतीम् । इषम् । यथा । क्षयाम । सर्वऽवीरया । विशा । तत् । नः । शर्धाय । धासथ । सु । इन्द्रियम् ॥२॥

हे ऋभवः [v]नः अस्माकं [v]यज्ञाय यज्ञार्थं [v]ऋभुमत् उरुभासनयुक्तं [v]वयः हविर्लक्षणमन्नम् [v]आ [v]तक्षत आ समन्तादुत्पादयत । एतदेव विव्रियते । [v]कृत्वे कृतवेऽस्मदीयाय कर्मणे [v]दक्षाय बलाय च । तादर्थ्ये चतुर्थी । एतदुभयार्थं [v]सुप्रजावतीं शोभनाभिः पुत्रपौत्रादिलक्षणाभिः प्रजाभिर्युक्ताम् [v]इषम् अन्नम् आ तक्षत इति शेषः । अपि च [v]सर्ववीरया सर्वैर्वीरैः पुत्रादिभिरुपेतया [v]विशा प्रजया सह [v]यथा येन प्रकारेण [v]क्षयाम सुखेन निवसाम[2] [v]तत् तादृशम् [v]इन्द्रियम् । धननामैतत् । धनं [v]नः अस्मभ्यं [v]शर्धाय बलार्थं [v]सु [v]धासथ सुष्ठु धत्त प्रयच्छतेत्यर्थः ॥ ऋभुमत् । ' उरु भाति ' इति नैरुक्तव्युत्पत्त्या[3] ( निरु. ११. १५ ) ऋभुशब्दः प्रकाशमात्रवाची । ' ह्रस्वनुड्भ्यां मतुप् ' इति मतुप उदात्तत्वम् । कृत्वे । ' जसादिषु च्छन्दसि वावचनम् ' इति ' वेर्डिति ' इति गुणाभावे यणादेशः । क्षयाम । ' क्षि निवासगत्योः ' । व्यत्ययेन शप् । धासथ । धाञो लेटि अडागमः । ' सिब्बहुलं लेटि ' इति सिप् । ' अन्येषामपि दृश्यते ' इति संहितायां दीर्घत्वम् ॥

आ तक्षत सातिमस्मभ्यमृभवः सातिं रथाय सातिमर्वते नरः ।
सातिं नो जैत्रीं सं महेत विश्वहा जामिमजामिं पृतनासु सक्षणिम् ॥ ३ ॥

आ । तक्षत । सातिम् । अस्मभ्यम् । ऋभवः । सातिम् । रथाय । सातिम् । अर्वते । नरः । सातिम् । नः । जैत्रीम् । सम् । महेत । विश्वहा । जामिम् । अजामिम् । पृतनासु । सक्षणिम् ॥३॥

हे [v]नरः यज्ञस्य नेतारः [v]ऋभवः [v]अस्मभ्यम् अनुष्ठातृभ्यः [v]सातिं संभजनीयमन्नं धनं वा [v]आ [v]तक्षत । आ समन्तात्कुरुत । तथा अस्मदीयाय [v]रथाय [v]रंहणशीलाय पुत्रादये रथायैव वा [v]सातिं संभजनीयं धनम् आतक्षत । तथा [v]अर्वते अश्वाय [v]सातिं संभजनीयमन्नं धनं वा अश्वयोग्यम् आतक्षतेत्येव । किं च [v]विश्वहा सर्वेष्वहःसु [v]नः अस्माकं [v]जैत्रीं जयशीलामपरिमितत्वेन सर्वाधिकां [v]सातिं संभजनीयं धनं [v]सं [v]महेत । सर्वो जनः सम्यक् पूजयतु । वयं च [v]पृतनासु संग्रामेषु [v]जामिं सहजातम् [v]अजामिं सहानुत्पन्नं शत्रुं[4] वा [v]सक्षणिम् अस्मानभिभवन्तं युष्मत्प्रसादादभिभवेमेति शेषः ॥ सातिम् । ' ऊतियूतिजूतिसाति° ' इत्यादिना क्तिन उदात्तत्वम् । महेत । ' मह पूजायाम् ' । सक्षणिम् । ' षह अभिभवे ' । औणादिकः सनिप्रत्ययः । ढस्वकत्वषत्वानि ॥

---

१. क्ष-न-युवच्छब्दः । २. क्ष-ट-निवसेम । ३. श-ट-नैरुक्तप्रसिद्धया । ४. क्ष-अन्यं शत्रुम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ऋभुक्षणमिन्द्रमा हुव ऊतय ऋभून्वाजान्मरुतः सोमपीतये ।
उभा मित्रावरुणा नूनमश्विना ते नो हिन्वन्तु सातये धिये जिषे ॥ ४ ॥

ऋभुक्षणम् । इन्द्रम् । आ । हुवे । ऊतये । ऋभून् । वाजान् । मरुतः । सोमऽपीतये ।
उभा । मित्रावरुणा । नूनम् । अश्विना । ते । नः । हिन्वन्तु । सातये । धिये । जिषे ॥४॥

[v]ऋभुक्षणम् । महन्नामैतत् । महान्तम् [v]इन्द्रम् [v]आ [v]हुवे आह्वयामि । किमर्थम् । [v]ऊतये रक्षणार्थम् । तथा [v]ऋभून्वाजान् । ऋभुर्विभ्वा वाज इति त्रयः सुधन्वनः पुत्राः । तत्र प्रथमोत्तमवाचकशब्दाभ्यां मध्यमोऽपि लक्ष्यते । अतः शब्दद्वयेन त्रयोऽप्युच्यन्ते । तदुक्तं यास्केन–' प्रथमोत्तमाभ्यां बहुवचनिगमा भवन्ति न मध्यमेन ' ( निरु. ११. १६ ) इति । एवंविधानृभून् [v]मरुतः च [v]सोमपीतये सोमपानायाह्वयामि । तथा [v]उभा युगलरूपेण संहत्य वर्तमानौ द्वौ मित्रावरुणावश्विनौ च [v]नूनम् अवश्यं सोमपानायाह्वयामीति शेषः । अपि च आहूताश्चेन्द्रादयः[1] [v]नः अस्मान् [v]हिन्वन्तु प्रेरयन्तु गमयन्त्वित्यर्थः । किमर्थम् । [v]सातये संभजनीयाय धनाय [v]धिये धनसाध्याय कर्मणे [v]जिषे जेतुं शत्रूणां जयार्थं च ॥ ऋभुक्षणम् । उरुभासमाने स्थाने क्षियति निवसतीति ऋभुक्षाः । उरुपूर्वाद्धातेः ' मृगय्वादयश्च ' ( उ. सू. १. ३७ ) इति कुप्रत्ययः । ' आतो लोप इटि च ' इति आकारलोपः पूर्वपदस्य ऋभावश्च । ऋभुशब्दोपपदात् ' क्षि निवासगत्योः ' इत्यस्मात् ' पतेस्थ च ' इति विधीयमान इनिप्रत्ययो बहुलवचनात् भवति । टिलोपः । ' इतोऽत्सर्वनामस्थाने ' ( पा. सू. ७. १. ८६ ) इति अत्वम् इकारस्य । ' वा षपूर्वस्य निगमे ' इति विकल्पनात् उपधादीर्घाभावः । यद्वा । अर्तेः भुक्षिनक् । कित्त्वाद्गुणाभावः । अत एव न अवगृह्यते । सोमपीतये । ' पा पाने ' । ' स्थागापापचो भावे ' इति भावे क्तिन् । ' घुमास्था° ' इति ईत्वम् । दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् । हिन्वन्तु । ' हि गतौ वृद्धौ च ' । अस्मात् अन्तर्भावितण्यर्थात् लोटि स्वादित्वात् श्नुः । जिषे । ' जि जये ' । ' तुमर्थे सेसेन्° ' इति क्सेप्रत्ययः ॥

ऋभुर्भराय सं शिशातु सातिं समर्यजिद्वाजो अस्माँ अविष्टु ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ५ ॥

ऋभुः । भराय । सम् । शिशातु । सातिम् । समर्यऽजित् । वाजः । अस्मान् । अविष्टु ।
तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥५॥

[v]ऋभुः प्रथमोऽस्माकं [v]सातिं संभजनीयं धनं [v]भराय संग्रामार्थं [v]सं [v]शिशातु सम्यक् तीक्ष्णीकरोतु । संग्रामोचितं[2] धनमस्मभ्यं प्रयच्छत्वित्यर्थः । तथा [v]समर्यजित् । मर्या मनुष्याः । तैः सह वर्तते इति समर्यः संग्रामः । तत्र शत्रूणां जेता [v]वाजः एतत्संज्ञस्तृतीयश्च [v]अस्मान् स्तोतॄन् [v]अविष्टु अवतु संग्रामाद्रक्षत्वित्यर्थः । यदनेन सूक्तेन प्रार्थितमस्मदीयं [v]तत् मित्रादयः [v]ममहन्तां पूजयन्तु ॥ शिशातु ।

---

१. क्ष–आहूतास्ते इन्द्रादयः । २. क्ष–संग्रामे वित्तम् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' शो तनूकरणे ' । ' बहुलं छन्दसि ' इति विकरणस्य श्लुः । ' आदेचः° ' इति आत्वम् । द्विर्भावः । ह्रस्वत्वे ' बहुलं छन्दसि ' इति अभ्यासस्य इत्वम् । अविष्टु । अवतेर्लोटि ' सिब्बहुलं लेटि ' इति बहुलग्रहणात् सिप् । इडागमः । षत्वष्टुत्वे ॥ ॥ ३२ ॥

' ईळे ' इति पञ्चविंशस्यृचं सप्तमं सूक्तम् । आङ्गिरसस्य कुत्सस्यार्षम् । चतुर्विंशीपञ्चविंश्यौ त्रिष्टुभौ शिष्टास्त्रयोविंशतिर्जगत्यः । आद्यः पादो द्यावापृथिव्यः । द्वितीय आग्नेयः । शिष्टं सूक्तमाश्विनम् । तथा चानुक्रान्तम्–' ईळे पञ्चाधिकाश्विनमाद्यौ पादौ लिङ्गोक्तदेवतावन्त्ये त्रिष्टुभौ ' इति । प्रवर्ग्ये अभिष्टवेऽप्येतत्सूक्तम् ॥ सूत्रितं च–' प्रावाणेवेळे द्यावापृथिवी इति ' ( आश्व. श्रौ. ४. ६ ) इति । प्रातरनुवाके चाश्विने क्रतौ जागते छन्दस्येतत्सूक्तम् । सूत्रितं च–' अगन्म महातारिष्मेळे द्यावापृथिवी इति जागतम् ' ( आश्व. श्रौ. ४. १५ ) इति । आश्विनशस्त्रेऽप्येतत् ' प्रातरनुवाकन्यायेन ' ( आश्व. श्रौ. ६. ५ ) इति अतिदेशात् । तथा अप्तोर्यामे[1] सन्ति चत्वार्यतिरिक्तोक्थानि । तत्राच्छावाकातिरिक्तोक्थे एतत्सूक्तम् । ' यस्य पशवः ' इति खण्डे सूत्रितम्–' ईळे द्यावापृथिवी उभा उ नूनम् ' ( आश्व. श्रौ. ९. ११ ) इति ॥

ईळे द्यावापृथिवी पूर्वचित्तयेऽग्निं घर्मं सुरुचं यामन्निष्टये ।
याभिर्भरे कारमंशाय जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतम् ॥ १ ॥

ईळे । द्यावापृथिवी इति । पूर्वऽचित्तये । अग्निम । घर्मम् । सुऽरुचम् । यामन् । इष्टये ।
याभिः । भरे । कारम् । अंशाय । जिन्वथः ।
ताभिः । ऊँ इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ १ ॥

अहं ᵛद्यावापृथिवी द्यावापृथिव्यौ ᵛईळे स्तौमि । किमर्थम् । ᵛपूर्वचित्तये पूर्वमेवाश्विनोः प्रज्ञापनाय । ते ह्यश्विनोः प्रत्यासन्ने । यद्वा । द्यावापृथिवी अश्विनौ स्तौमि पूर्वचित्तये अन्यदीयात्स्तोत्रात्पूर्वमेवास्मदीयस्य स्तोत्रस्य प्रबोधनाय । तथा चोक्तं–' तत्कावश्विनौ द्यावापृथिव्यावित्येके ' ( निरु. १२. १ ) इति । अपि च ᵛयामन् यामनि अश्विनोरागमने सति ᵛइष्टये तदीययागार्थमाहवनीयरूपेण स्थापितम् ᵛअग्निं स्तौमीति शेषः । कीदृशमग्निम् । ᵛघर्मं प्रवृज्ञनेन दीप्तं ᵛसुरुचम् अत एव शोभनकान्तियुक्तम् । हे अश्विनौ ᵛभरे । संग्रामनामैतत् । संग्रामे ᵛअंशाय युष्मदीयभागाय जयप्राप्त्यर्थं ᵛयाभिः ऊतिभिः पालनैः सहागत्य ᵛकारम् । कारशब्दः शङ्खवाचीत्यभियुक्ताः संगिरन्ते । कारं शब्दकारिणं शङ्खं ᵛजिन्वथः मुखेनापूरयथः ᵛताभिः तादृशैः ᵛऊतिभिः पालनैः सह । ᵛउ इति समुच्चये । अस्मानपि सुष्ठु ᵛआ ᵛगतम् आगच्छतम् ॥ ईळे । ' ईड स्तुतौ ' । उत्तमैकवचनम् इट् । अदादित्वात् शपो लुक् । अनुदात्तेत्त्वात् लसार्वधातुकानुदात्तत्वे धातुस्वरः । द्यावापृथिवी । द्यौश्च पृथिवी च । ' दिवो द्यावा ' इति द्यावादेश आद्युदात्तो निपातितः । पृथिवीशब्दो ङीषन्तः अन्तोदात्तः । ' देवताद्वन्द्वे च ' इति उभयपदप्रकृतिस्वरत्वम् । ' °अपृथिवी° ' इति पर्युदासात् ' नोत्तरपदेऽनुदात्तादौ° ' इति निषेधाभावः । ' वा छन्दसि ' इति पूर्वसवर्णदीर्घत्वम् । पूर्वचित्तये । ' चिती संज्ञाने ' । अस्मात् अन्तर्भावित-

---

१. क्ष-ट–अप्तोर्यामेऽपि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ण्यर्थात् भावे क्तिन्। मरुद्बृधादित्वात् पूर्वपदान्तोदात्तत्वम्। सुरुचम्। 'रुच दीप्तावभिप्रीत्यां च' संपदादिलक्षणो भावे क्विप्। शोभना रुग्वस्य। 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। यामन्। 'या प्रापणे'। 'आतो मनिन्°' इति 'कृत्यल्युटो बहुलम्' इति बहुलवचनात् भावे मनिन्। कारम्। क्रियतेऽनेनेति कारः। करणे घञ्। 'कर्षात्वतः°' इत्यन्तोदात्तत्वम्। जिन्वथः। 'जिवि प्रीणनार्थः'। अत्र प्रीणनहेतुभूतमापूरणं लक्ष्यते। धनेनापूरितो हि पुरुषः प्रीतो भवति। इदित्त्वात् नुम्। भौवादिकः। शपः पित्त्वादनुदात्तत्वम्। तिङः अदुपदेशात् लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। 'यद्वृत्तान्नित्यम्' इति निघातप्रतिषेधः। तत्र हि व्यवहितेऽपि कार्यमिष्यते (का. ८. १. ६६) इत्युक्तम्। ऊ षु। 'इकः सुञि' इति दीर्घत्वम्। 'सुञः' इति षत्वम्। ईषाअक्षादित्वात् सुञ उकारस्य प्रकृतिभावः। ऊतिभिः। अवतेर्भावे क्तिन्। 'ज्वरत्वर°' इत्यादिना वकारस्य उपधायाश्च ऊठ्। 'ऊतियूति°' इत्यादिना निपातनात् क्तिन उदात्तत्वम्। गतम्। गमेर्लोटि 'बहुलं छन्दसि' इति विकरणस्य लुक्। 'अनुदात्तोपदेश°' इत्यादिना अनुनासिकलोपः॥

युवोर्दानाय सुभरा असश्चतो रथमा तस्थुर्वचसं न मन्तवे।
याभिर्धियोऽवथः कर्मन्निष्टये ताभिरू षु ऊतिभिरश्विना गतम्॥ २॥

युवोः। दानाय। सुऽभराः। असश्चतः। रथम्। आ। तस्थुः। वचसम्। न। मन्तवे।
याभिः। धियः। अवथः। कर्मन्। इष्टये।
ताभिः। ऊँ इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ २॥

[v]सुभराः शोभनस्तोत्रभरणाः [v]असश्चतः अन्यत्रानासक्ताः स्तोतारो हे अश्विनौ [v]युवोः युवयोः [v]रथम् [v]आ [v]तस्थुः आतिष्ठन्ति प्राप्नुवन्ति। किमर्थम्। [v]दानाय युष्मत्कर्तृकदानार्थम्। धनलाभायेत्यर्थः। तत्र दृष्टान्तः। [v]वचसं [v]न यथा न्यायोपेतेन वचसा वाक्येन युक्तं विपश्चितं [v]मन्तवे बुभुत्सितार्थप्रतिपत्तये स्तोतारः प्राप्नुवन्ति तद्वत्। अपि च [v]कर्मन् कर्मणि [v]इष्टये यागार्थं प्रवृत्तान् [v]धियः ध्यातॄन् विशिष्टज्ञानोपेतान् [v]याभिः [v]ऊतिभिः पालनैः [v]अवथः युवां रक्षथः। ताभिरित्यादि पूर्ववत्॥ वचसम्। अर्शआदित्वात् मत्वर्थीयः अच्। मन्तवे। 'मन ज्ञाने'। 'कमिमनिजनि°' इत्यादिना तुप्रत्ययः। धियः। ध्यायन्तीति धियः स्तोतारः। 'ध्यै चिन्तायाम्'। 'क्विप् च' इति क्विप्। चशब्देन दृशिग्रहणानुकर्षणात् संप्रसारणम्। कर्मन्। 'सुपां सुलुक्°' इति सप्तम्या लुक्। 'न डिसंबुद्ध्योः' इति नलोपप्रतिषेधः॥

युवं तासां दिव्यस्य प्रशासने विशां क्षयथो अमृतस्य मज्मना।
याभिर्धेनुमस्वं१ पिन्वथो नरा ताभिरू षु ऊतिभिरश्विना गतम्॥ ३॥

युवम्। तासाम्। दिव्यस्य। प्रऽशासने। विशाम्। क्षयथः। अमृतस्य। मज्मना।
याभिः। धेनुम्। अस्वम्। पिन्वथः। नरा।
ताभिः। ऊँ इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ ३॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]नरा-नेतारावश्विनौ [v]दिव्यस्य दिवि भवस्य स्वर्गसमुत्पन्नस्य[1] [v]अमृतस्य सोमस्य पानेनोत्पन्नेन [v]मज्मना बलेन युक्तौ [v]युवं युवां [v]तासां यास्विषु लोकेषु वर्तन्ते तासां सर्वासां [v]विशां प्रजानां प्रशासने प्रकृष्टानुशासने शिक्षणे [v]क्षयथः । ऐश्वर्यकर्मायम् । ईशाथे समर्थौ भवथः । यद्वा । मज्मना अन्येषामसाधारणेन बलेन विशां प्रजानां दिविभवस्यामृतस्य वृष्टयुदकस्य [v]प्रशासने प्रदाने क्षयथः ईश्वरौ भवथः । अपि च [v]याभिः [v]ऊतिभिः रक्षाभिः [v]अस्वं प्रसवासमर्थां [v]धेनुं गां शयुनाम्ने ऋषये [v]पिन्वथः सिञ्चथः पयसा पूरितवन्तावित्यर्थः । ताभिरूतिभिरित्यादि पूर्ववत् ॥ अस्वम् । ' षूङ् प्राणिगर्भविमोचने ' । सवनं सूः । संपदादिलक्षणो भावे क्विप् । नास्ति सूः यस्याम् इति असूः । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । अमि ' ओः सुपि ' इति यणादेशः । ' उदात्तस्वरितयोर्यणः° ' इति परस्यानुदात्तस्य स्वरितत्वम् । पिन्वथः । ' पिवि सेचने ' । इदित्त्वात् नुम् । भौवादिकः ॥

याभिः परिज्मा तनयस्य मज्मना द्विमाता तूर्षु तरणिर्विभूषति ।
याभिस्त्रिमन्तुरभवद्विचक्षणस्ताभिरू षु ऊतिभिरश्विना गतम् ॥ ४ ॥

याभिः । परिऽज्मा । तनयस्य । मज्मना । द्विऽमाता । तूर्षु । तरणिः । विऽभूषति ।
याभिः । त्रिऽमन्तुः । अभवत् । विऽचक्षणः ।
ताभिः । ऊँ इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ ४ ॥

[v]परिज्मा परितो गन्ता वायुः [v]तनयस्य आत्मीयस्य पुत्रस्याग्नेः । अग्निर्हि व्यानवृत्त्यात्मना वर्तमानेन वायुना मथ्यमानः सन् जायते । तथा च श्रूयते–' अथ यः प्राणापानयोः संधिः स व्यानः। अतो यान्यन्यानि वीर्यवन्ति कर्माणि यथाग्नेर्मन्थनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्नपानंस्तानि करोति ' ( छा. उ. १. ३. ३; ५ ) इति । यद्वा । सृष्ट्यादौ वायुसकाशादुत्पन्नत्वादग्नेः पुत्रत्वम् । आम्नायते च–' वायोरग्निः ' ( तै. आ. ८. १ ) इति । एवं स्वपुत्रस्याग्नेः [v]मज्मना बलेन युक्तः सन् [v]द्विमाता द्वयोर्लोकयोः निर्माता[2] । अग्निः पृथिवीस्थानो वायुरन्तरिक्षस्थानः । उभयोर्मिलितयोः[3] उभयनिर्मातृत्वमुपपन्नम् । यद्वा । द्विमातेति तनयस्य विशेषणम् । ' सुपां सुलुक्° ' इति षष्ठ्याः सुः[4] । द्विमातृकस्य द्वाभ्यामरणिभ्यां जातस्य। एवंभूतो वायुर्हे अश्विनौ [v]याभिः ऊतिभिः हेतुभूतैः पालनैः [v]तूर्षु तरीतृषु धावत्सु मध्ये [v]तरणिः अतिशयेन तरीता शीघ्रगामी [v]विभूषति विभवति व्याप्तो भवति । यद्वा । विशेषेण सर्वमलंकरोति । अपि च [v]त्रिमन्तुः त्रयाणां मन्ता त्रिविधेषु पाकयज्ञहविर्यज्ञसोमयज्ञेष्वासादितज्ञानः कक्षीवान् [v]याभिः युष्मदीयाभिरूतिभिः [v]विचक्षणः विशिष्टज्ञानयुक्तः [v]अभवत् । [v]ताभिः सर्वाभिः [v]ऊतिभिः अस्मानागच्छतम् ॥ परिज्मा । परिपूर्वात् ' अज गतिक्षेपणयोः ' इत्यस्मात् ' श्वन्नुक्षन्° ' इत्यादौ निपात्यते । तूर्षु । ' तॄ प्लवनतरणयोः ' । ' बहुलं छन्दसि ' इति उत्वम् । ' हलि च ' इति दीर्घः । यद्वा । त्वरतेः क्विप् । ' ज्वरत्वर° ' इत्यादिना वकारोपधयोः ऊठ् । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । विभूषति । भवतेर्लेटि अडागमः । ' सिब्बहुलं लेटि ' इति सिप् । यद्वा । ' भूष अलंकारे ' । भौवादिकः । विचक्षणः । ' अनुदात्तेतश्च हलादेः ' इति युच् ॥

---

१. क्ष-स–स्वर्गे समुत्पन्नस्य । २. क्ष–निर्माता आदित्यः । ३. क्ष–अत उभयोर्मिलितयोः । ४. क्ष–डादेशः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

याभी रेभं निवृतं सितमद्भ्य उद्वन्दनमैरयतं स्वर्दृशे ।
याभिः कण्वं प्र सिषासन्तमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ ५ ॥

याभिः । रेभम् । निऽवृतम् । सितम् । अत्ऽभ्यः । उत् । वन्दनम् । ऐरयतम् । स्वः । दृशे ।
याभिः । कण्वम् । प्र । सिसासन्तम् । आवतम् ।
ताभिः । ऊँ इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ ५ ॥

हे अश्विनौ [v]याभिः [v]ऊतिभिः [v]रेभम् एतत्संज्ञम्[1] ऋषिं [v]निवृतम् असुरैः कूपे अप्सु निवारितं [v]सितं तदीयैः पाशैर्बद्धमेवंभूतमृषिम् [v]अद्भ्यः सकाशात् [v]उत् [v]ऐरयतम् उद्गमयतम्। तथा [v]वन्दनम् एतत्संज्ञमृषिं च तथाभूतमुदैरयतम्। किमर्थम्। [v]स्वः आदित्यं [v]दृशे द्रष्टुम्। अपि च [v]कण्वम् असुरैः अन्धकारे प्रक्षिप्तं [v]सिषासन्तम् आलोकं संभक्तुमिच्छन्तं [v]याभिः ऊतिभिः [v]प्र [v]आवतं प्रकर्षेण अरक्षतम्। ताभिरित्यादि समानम्॥ रेभम्। 'रेभृ शब्दे'। रेभते स्तौतीति रेभः। पचाद्यच्। निवृतम्। 'वृञ् वरणे'। अस्मात् अन्तर्भावितण्यर्थात् कर्मणि निष्ठा। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। सितम्। 'षिञ् बन्धने'। अद्भ्यः। 'ऊडिदम्°' इत्यादिना विभक्तेरुदात्तत्वम्। वन्दनम्। 'वदि अभिवादनस्तुत्योः'। वन्दते स्तौतीति वन्दनः। नन्द्यादिलक्षणो ल्युः। लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वम्। स्वरित्येतद्दिवश्चादित्यस्य च साधारणनामधेयम्। तदुक्तं यास्केन– 'स्वरादित्यो भवति सु अरणः सु ईरणः' (निरु. २. १४) इति। 'स्वरादिनिपातम्°' (पा. सू. १. १. ३७) इति अव्ययत्वात् सुपो लुक्। दृशे। 'दृशे विख्ये च' इति दृशेः तुमर्थे केप्रत्ययान्तो निपात्यते। सिषासन्तम्। 'वन षण संभक्तौ'। सनि 'सनीवन्तर्ध°' इत्यादिना विकल्पनात् इडभावः। 'जनसनखनां सञ्झलोः' इति आत्वम्। द्विर्भावे अभ्यासस्य ह्रस्वत्वम्। 'सन्यतः' इति इत्वम्॥ ॥ ३३ ॥

याभिरन्तकं जसमानमारणे भुज्युं याभिरव्यथिभिर्जिजिन्वथुः ।
याभिः कर्कन्धुं वय्यं च जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतम् ॥ ६ ॥

याभिः । अन्तकम् । जसमानम् । आऽअरणे । भुज्युम् । याभिः । अव्यथिऽभिः । जिजिन्वथुः ।
याभिः । कर्कन्धुम् । वय्यम् । च । जिन्वथः ।
ताभिः । ऊँ इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ ६ ॥

आरणम् अगाधं[2] कूपादि। तत्रासुरैः प्रक्षिप्तं [v]जसमानं तैर्हिंस्यमानम् [v]अन्तकं शत्रूणामन्तकरम् एतत्संज्ञं राजर्षिं हे अश्विनौ [v]याभिः [v]ऊतिभिः अवथः रक्षथः। तथा [v]भुज्युं सर्वस्य पालकमेतत्संज्ञं समुद्रमध्ये निमग्नं तुग्र्यं तुग्रस्य पुत्रं राजर्षिं [v]याभिः ऊतिभिः रक्षणहेतुभूताभिः [v]अव्यथिभिः व्यथा-

---

१. क्ष–एतत्संज्ञकम्। २. च-छ-न-फ–अगाधं तडागादि कूपादि वा।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

रहिताभिर्नौभिः Vजिजिन्वथुः युवामतर्पयतम्। एतच्च[1] मन्त्रान्तरे[1] 'तुग्रो ह भुज्युमश्विनोदमेघे' (ऋ. सं. १. ११६. ३) इत्यादिके[2] विस्पष्टयिष्यते[2]। अपि च Vकर्कन्धुं Vवय्यं Vच एतत्संज्ञकौ चासुरैः पीड्यमानौ Vयाभिः ऊतिभिः Vजिन्वथः प्रीणयथः। गतमन्यत्॥ जसमानम्। 'जसु हिंसायाम्'। यकि प्राप्ते व्यत्ययेन शप्। आरणे। आङ्पूर्वात् अर्तेः ल्युट्[3]। जिजिन्वथुः। जिविः प्रीणनार्थः। लिटि अथुसि रूपम्॥

याभिः शुचन्ति धनसां सुषंसदं तप्तं घर्ममोम्यावन्तमत्रये।
याभिः पृश्निगुं पुरुकुत्समावतं ताभिरू षु ऊतिभिरश्विना गतम्॥ ७॥

याभिः। शुचन्तिम्। धनऽसाम्। सुऽसंसदम्। तप्तम्। घर्मम्। ओम्याऽवन्तम्। अत्रये।
याभिः। पृश्निऽगुम्। पुरुऽकुत्सम्। आवतम्।
ताभिः। ऊँ इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ ७॥

हे अश्विनौ Vधनसां धनस्य संभक्तारं Vशुचन्तिम् एतन्नामानं Vसुषंसदम्। संसीदन्त्यस्मिन्निति संसत् गृहम्। शोभनसंसदं Vयाभिः ऊतिभिरकुरुतम्। तथा Vअत्रये याभिश्चोतिभिः Vतप्तं प्रवृक्षनेन संतप्तं Vघर्मं महावीरम् Vओम्यावन्तं सुखयुक्तं सुखेन स्प्रष्टुं शक्यमकुरुतम्। यद्वा। शतद्वारे यन्त्रगृहे असुरैः पीड्यमानाय घर्मं दीप्तं पीडासाधनमग्निं तप्तं तापकारिणम् ओम्यावन्तं सुखवन्तम्[4] अकुरुतम्। यथा अस्मै सुखं भवति तथा हिमेनोदकेन तमग्निमवारयेथाम्। यास्कपक्षे तु अत्रये हविषामत्त्रेऽग्नये हविरुपत्त्यर्थं सूर्यकिरणसंतप्तं घर्मं नैदाघम् अहः ओम्यावन्तं तृप्तिहेतुवृष्टयुदकोपेतं कृतवन्तौ इति योज्यम्। अपि च Vयाभिः ऊतिभिः Vपृश्निगुं Vपुरुकुत्सं च Vआवतम् अरक्षतम्। Vताभिः सर्वाभिः Vऊतिभिः अस्मानागच्छतम्॥ शुचन्तिम्। 'शुच दीप्तौ'। औणादिको झिच्। धनसाम्। 'जनसनखनक्रमगमो विट्'। 'विड्वनोरनुनासिकस्यात्' इति आत्वम्। सुषंसदम्। शोभना संसद्यस्य। 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। ओम्यावन्तम्। अवतेः 'अन्येभ्योऽपि दृश्यन्ते' इति मनिन्। 'ज्वरत्वर°' इत्यादिना वकारस्य उपधायाश्च ऊठ्। गुणः। 'छन्दसि च' इत्यर्हार्थे यप्रत्ययः। 'नस्तद्धिते' इति टिलोपः। 'ये चाभावकर्मणोः' इति प्रकृतिभावस्तु व्यत्ययेन न प्रवर्तते। पृश्निगुम्। पृश्नयो नानावर्णा गावो यस्य स तथोक्तः। 'गोस्त्रियोरुपसर्जनस्य' (पा. सू. १. २. ४८) इति गोशब्दस्य ह्रस्वत्वम्॥

याभिः शचीभिर्वृषणा परावृजं प्रान्धं श्रोणं चक्षस एतवे कृथः।
याभिर्वर्तिकां ग्रसितामुञ्चतं ताभिरू षु ऊतिभिरश्विना गतम्॥ ८॥

याभिः। शचीभिः। वृषणा। पराऽवृजम्। प्र। अन्धम्। श्रोणम्। चक्षसे। एतवे। कृथः।
याभिः। वर्तिकाम्। ग्रसिताम्। अमुञ्चतम्।
ताभिः। ऊँ इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ ८॥

---

१. क्ष–तथा च मन्त्रान्तरम्। २. क्ष–इत्यादि। ३. क्ष-स–अधिकरणे ल्युट्। ४. स–सुखयुक्तम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे Vवृषणा कामानां वर्षितारावश्विनौ Vयाभिः Vशचीभिः कर्मभिः प्रज्ञाभिर्वा Vपरावृजम् एतन्नामकमृषिं पङ्गुं सन्तमपङ्गुमकुरुतम्। तथा Vअन्धं दृष्टिरहितं सन्तमृज्राश्वमृषिं Vचक्षसे प्रकाशाय सम्यक् चक्षुषा दर्शनाय याभिरूतिभिः Vप्र Vकृथः प्रकर्षेण कुरुथः। याभिश्च Vश्रोणं विगुणजानुकमेव[1] सन्तमृषिम् Vएतवे गन्तुं प्र कृथः प्रकर्षेण कृतवन्तौ। अपि च Vयाभिः ऊतिभिः Vवर्तिकां चटकसदृशस्य पक्षिणः स्त्रियं Vग्रसितां वृकेण ग्रस्ताम् Vअमुञ्चतं वृकास्यान्निर्मुक्तामकुरुतम्। यास्कपक्षे तु वृकेण विवृतज्योतिष्केण सूर्येण याभिर्ग्रस्तां वर्तिकां प्रत्यहमावर्तमानामुषसं तस्मादमोचयतम् इति योज्यम्। Vताभिः सर्वाभिः Vऊतिभिः अस्मानप्यागच्छतम्॥ वृषणा। 'वृष सेचने'। 'कनिन्युवृषि०' इत्यादिना कनिन्। परावृजम्। 'वृजी वर्जने'। परावृणक्ति तपसा पापं विनाशयतीति परावृक्। 'क्विप् च' इति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वम्। एतवे। 'तुमर्थे सेसेन्०' इत्येतेः तवेन्प्रत्ययः। कृथः। 'डुकृञ् करणे'। 'बहुलं छन्दसि' इति विकरणस्य लुक्॥

याभिः सिन्धुं मधुमन्तमसश्चतं वसिष्ठं याभिरजरावजिन्वतम्।
याभिः कुत्सं श्रुतर्यं नर्यमावतं ताभिरू षु ऊतिभिरश्विना गतम्॥ ९॥

याभिः। सिन्धुम्। मधुऽमन्तम्। असश्चतम्। वसिष्ठम्। याभिः। अजरौ। अजिन्वतम।
याभिः। कुत्सम्। श्रुतर्यम्। नर्यम्। आवतम्।
ताभिः। ऊँ इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ ९॥

हे अश्विनौ Vसिन्धुं स्यन्दनशीलां नदीं Vमधुमन्तं मधुसदृशेनोदकेन पूर्णां Vयाभिः ऊतिभिः Vअसश्चतम् अगमयतं प्रावाहयतमित्यर्थः। हे Vअजरौ जरारहितावश्विनौ Vवसिष्ठम् ऋषिं Vयाभिः ऊतिभिः Vअजिन्वतम् अप्रीणयतम्। Vयाभिः च कुत्सादीन् त्रीन्[2] ऋषीन् Vआवतम् अरक्षतम्। Vताभिः सर्वाभिः Vऊतिभिः अस्मानपि सुष्ठ्वागच्छतम्॥ मधुमन्तम्। मधुशब्दात् भूम्नि मतुप्। लिङ्गव्यत्ययः। असश्चतम्। सश्चतिर्गतिकर्मा। अस्मात् अन्तर्भावितण्यर्थात् लुङ्॥

याभिर्विश्पलां धनसामथर्व्यं सहस्रमीळ्ह आजावजिन्वतम्।
याभिर्वर्शमश्व्यं प्रेणिमावतं ताभिरू षु ऊतिभिरश्विना गतम्॥ १०॥

याभिः। विश्पलाम्। धनऽसाम्। अथर्व्यम्। सहस्रऽमीळ्हे। आजौ। अजिन्वतम्।
याभिः। वर्शम्। अश्व्यम्। प्रेणिम्। आवतम्।
ताभिः। ऊँ इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ १०॥

हे अश्विनौ Vधनसां धनं संभजमानाम् Vअथर्व्यम् अगच्छन्तीं छिन्नजङ्घात्वेन गन्तुमसमर्थाम्। थर्वतिर्गतिकर्मा। Vविश्पलाम् एतत्संज्ञामगस्त्यपुरोहितस्य खेलस्य[3] संबन्धिनीं Vसहस्रमीळ्हे।

---

१. क्ष-ट-विगतजानुकमेव। २. क्ष-'त्रीन्' नास्ति। ३. क्ष-शलस्य।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मीळ्हमिति धननाम । बहुधनोपेते ᵛआजौ संग्रामे ᵛयाभिः ऊतिभिः ᵛअजिन्वतं गन्तुं समर्थामकुरुतम् । एतच्च ' चरित्रं हि वेरिवाच्छेदि पर्णम् ' ( ऋ. सं. १. ११६. १५ ) इत्यत्र विस्पष्टयिष्यते । ᵛयाभिः च ᵛअश्व्यम् अश्वाख्यस्य पुत्रं ᵛप्रेणिं स्तुतेः प्रेरयितारं ᵛवशम् एतत्संज्ञम्[1] ऋषिम् ᵛआवतम् अरक्षतम् । ᵛताभिः[2] सर्वाभिः ᵛऊतिभिः सहास्मानप्यागच्छतम्[2] ॥ प्रेणिम् । ' प्रेणृ गतिप्रेरणश्लेषणेषु ' । औणादिक इप्रत्ययः ॥ ॥ ३४ ॥

याभिः सुदानू औशिजाय वणिजे दीर्घश्रवसे मधु कोशो अक्षरत् ।
कक्षीवन्तं स्तोतारं याभिरावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ ११ ॥

याभिः । सुदानू इति सुऽदानू । औशिजाय । वणिजे । दीर्घऽश्रवसे । मधु । कोशः । अक्षरत् ।
कक्षीवन्तम । स्तोतारम् । याभिः । आवतम् ।
ताभिः । ऊँ इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ ११ ॥

उशिक्संज्ञा[3] दीर्घतमसः पत्नी तस्याः पुत्रो दीर्घश्रवा नाम कश्चिदृषिर्नावृष्ट्यां जीवनार्थमकरोत् वाणिज्यम् । स च वर्षणार्थमश्विनौ तुष्टाव । तौ च अश्विनौ[4] मेघं प्रेरितवन्तौ । अयमर्थः पूर्वार्धे प्रतिपाद्यते । हे ᵛसुदानू शोभनदानावश्विनौ ᵛऔशिजाय उशिक्पुत्राय ᵛवणिजे वाणिज्यं कुर्वते ᵛदीर्घश्रवसे[5] एतत्संज्ञाय ऋषये ᵛयाभिः युष्मदीयाभिः ऊतिभिः हेतुभूताभिः ᵛकोशः मेघः ᵛमधु माधुर्योपेतं वृष्टिजलम् ᵛअक्षरत् असिञ्चत् युष्मत्प्रसादादपेक्षिता वृष्टिर्जातेत्यर्थः । अपि च उशिजः पुत्रं ᵛस्तोतारं ᵛकक्षीवन्तम् एतत्संज्ञमृषिं ᵛयाभिः ऊतिभिः ᵛआवतम् अरक्षतम् । ᵛताभिः सर्वाभिः ᵛऊतिभिः सहास्मानप्यागच्छतम् ॥ कक्षीवन्तम् । कक्ष्या रज्जुरश्वस्य । तया युक्तः कक्षीवान् । ' आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवत् ' इति निपातनात् मतुपो वत्वम् । संप्रसारणम्[6] ॥

याभी रसां क्षोदसोद्रः पिपिन्वथुरनश्वं याभी रथमावतं जिषे ।
याभिस्त्रिशोकं उस्रिया उदाजत ताभिरू षु ऊतिभिरश्विना गतम् ॥ १२ ॥

याभिः । रसाम् । क्षोदसा । उद्रः । पिपिन्वथुः । अनश्वम् । याभिः । रथम् । आवतम् । जिषे ।
याभिः । त्रिऽशोकः । उस्रियाः । उत्ऽआजत ।
ताभिः । ऊँ इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ १२ ॥

' रसा नदी भवति रसतेः शब्दकर्मणः ' ( निरु. ११. २५ ) इति यास्कः । हे अश्विनौ ᵛयाभिः ऊतिभिः हेतुभूताभिः ᵛरसां नदीमनावृष्ट्या जलरहितां ᵛक्षोदसा कूलानि संपिंषता ᵛउद्रः उदकेन ᵛपिपिन्वथुः युवां पूरितवन्तौ । तथा ᵛअनश्वम् अश्वैर्वियुक्तमात्मीयं ᵛरथं ᵛजिषे जेतुं ᵛयाभिः

---

१. क्ष–एतत्संज्ञकम् । २. क्ष–ताभिः प्राग्वत् । ३. क्ष-ट– उशिक्संज्ञा या । ४. क्ष-ट– ' अश्विनौ ' नास्ति । ५. क्ष-ट-स–दीर्घश्रवसे प्रथितयशसे । ६. क्ष-ट-स–संप्रसारणं च ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ऊतिभिः vआवतम् अगमयतम्[1]। अपि च vयाभिः ऊतिभिः कण्वपुत्रः vत्रिशोकः ऋषिः vउस्रियाः अपहृताः[2] गाः vउदाजत उदगमयत् असुरसकाशात् लेभे। vताभिः सर्वाभिः vऊतिभिः सह अस्मानप्यागच्छतम्॥ क्षोदसा। 'क्षुदिर् संपेषणे'। औणादिकः असुन्। उद्नः। तृतीयैकवचनस्य 'सुपां सुपो भवन्ति' इति शसादेशः। 'पदन्०' इत्यादिना उदकशब्दस्य उदन्भावः। भसंज्ञायाम् 'अङ्गोगोऽनः' इति अकारलोपः। पिपिन्वथुः। 'पिवि सेचने'। इदित्त्वात् नुम्। जिषे। 'जि जये'। 'तुमर्थे सेसेन्०' इति क्सेप्रत्ययः। उदाजत। 'अज गतिक्षेपणयोः'॥

याभिः सूर्यं परियाथः परावतिं मन्धातारं क्षैत्रपत्येष्वावतम्।
याभिर्विप्रं प्र भरद्वाजमावतं ताभिरू षु ऊतिभिरश्विना गतम्॥ १३॥

याभिः। सूर्यम्। परिऽयाथः। पराऽवति। मन्धातारम्। क्षैत्रऽपत्येषु। आवतम्।
याभिः। विप्रम्। प्र। भरत्ऽवाजम्। आवतम्।
ताभिः। ऊँ इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ १३॥

हे अश्विनौ vपरावति दूरदेशे स्थितं vसूर्यं तमोरूपेण स्वर्भानुनावृतमादित्यं तस्मात्तमसो मोचयितुं vयाभिः ऊतिभिः vपरियाथः युवां परितो गच्छथः। तथा vमन्धातारम् ऋषिं vक्षैत्रपत्येषु। क्षेत्राणां पतिरधिपतिः क्षेत्रपतिः। तत्संबन्धिषु कर्मसु vआवतम् अरक्षतम्। अपि च vयाभिः ऊतिभिः vविप्रं मेधाविनं vभरद्वाजम् ऋषिमन्नप्रदानेन vप्र vआवतं प्रकर्षेणारक्षतम्। vताभिः सर्वाभिः vऊतिभिः सह रक्षणार्थमस्मानप्यागच्छतम्॥ क्षैत्रपत्येषु। ब्राह्मणादेराकृतिगणत्वात् कर्मण्यर्थे ष्यञ्॥

याभिर्महामतिथिग्वं कशोजुवं दिवोदासं शम्बरहत्य आवतम्।
याभिः पूर्भिद्यै त्रसदस्युमावतं ताभिरू षु ऊतिभिरश्विना गतम्॥ १४॥

याभिः। महाम्। अतिथिऽग्वम्। कशःऽजुवम्। दिवःऽदासम्। शम्बरऽहत्ये। आवतम्।
याभिः। पूःऽभिद्यै। त्रसदस्युम्। आवतम्।
ताभिः। ऊँ इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ १४॥

हे अश्विनौ vमहां महान्तम् vअतिथिग्वम् अतिथिभिर्गन्तव्यं vकशोजुवम् असुरभीत्या उदकं प्रवेष्टुं गन्तारम् एवंभूतं vदिवोदासम् एतत्संज्ञकं राजर्षिं vशम्बरहत्ये। शम्ब आयुधम्। तद्युक्तः[3] शम्बरोऽसुरः[3]। तस्य हनने[4] विषयभूते सति vयाभिः ऊतिभिः vआवतम् अरक्षतम्[5]। अपि च vयाभिः ऊतिभिः vपूर्भिद्यै पुराणि[6] नगराणि भिद्यन्तेऽस्मिन्निति पूर्भिद्यः संग्रामः। तस्मिन् vत्रसदस्युम् एतत्संज्ञकम् ऋषिं[7] पुरुकुत्सपुत्रम् vआवतम् अरक्षतम्। ताभिरित्यादि पूर्ववत्[8]॥ महाम्। महान्तमित्यस्य छान्दसो वर्णलोपः।

---

१. क्ष-ट-स–अगमयतम्। अवातिरत्र गत्यर्थः। २. क्ष-स–असुरैः अपहृताः। ३. ट–तद्वानसुरः शम्बरः। ४. क्ष-ट–वधे। ५. क्ष-ट-स–युवां अरक्षतम्। ६. क्ष-ट–पुरः। ७. क्ष-ट–राजर्षिम्। ८. क्ष–समानम्।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कशोजुवम् । कशः इष्युदकनाम । 'कश गतिशासनयोः' । असुन् । कशांस्युदकानि जवतीति कशोजूः । जु इति सौत्रो धातुर्गत्यर्थः । 'क्विब्वचि०' ( उ. सू. २. २१५ ) इत्यादिना क्विब्दीर्घौ । दिवोदासम् । 'दिवश्च दासे षष्ठ्या अलुग्वक्तव्यः' ( का. ६. ३. २१. ५ ) इति अलुक् । 'दिवोदासादीनां छन्दस्युपसंख्यानम्' ( पा. सू. ६. २. ९१. १ ) इति पूर्वपदाद्युदात्तत्वम् । शम्बरहत्ये । 'हनस्त च' इति हन्तेर्भावे क्यप्; तत्संनियोगेन तकारान्तादेशश्च । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

याभिर्वम्रं विपिपानमुपस्तुतं कलिं याभिर्वित्तजानिं दुवस्यथः ।
याभिर्व्यश्वमुत पृथिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ १५ ॥

याभिः । वम्रम् । विऽपिपानम् । उपऽस्तुतम् । कलिम् । याभिः । वित्तऽजानिम् । दुवस्यथः ।
याभिः । विऽअश्वम । उत । पृथिम् । आवतम् ।
ताभिः । ऊँ इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ १५ ॥

हे अश्विनौ [v]वम्रं विखनसः पुत्रमेतत्संज्ञमृषिं [v]विपिपानं विशेषेण पार्थिवं रसं पिबन्तं [v]याभिः ऊतिभिः अरक्षतम् । कीदृशम् । [v]उपस्तुतं समीपस्थैः सम्यक् स्तुतमिति स्तूयमानम् । तथा [v]वित्तजानिं लब्धभार्यं [v]कलिम् एतत्संज्ञमृषिं [v]याभिः ऊतिभिः [v]दुवस्यथः रक्षथः । [v]उत अपि च [v]व्यश्वं विगताश्वं [v]पृथिम् एतत्संज्ञं वैनं[1] राजर्षिं [v]याभिः ऊतिभिः [v]आवतम् अरक्षतम् । अन्यत् पूर्ववत् ॥ विपिपानम् । 'पा पाने' । ताच्छीलिकः चानश् । 'बहुलं छन्दसि' इति शपः श्लुः । 'बहुलं छन्दसि' इति अभ्यासस्य इत्वम् । उपस्तुतम् । स्तौतेः कर्मणि निष्ठा । प्रवृद्धादित्वादुत्तरपदान्तोदात्तत्वम् ( पा. सू. ६. २. १४७ ) । वित्तजानिम् । वित्ता लब्धा जाया येन स तथोक्तः । 'जायाया निङ्' ( पा. सू. ५. ४. १३४ ) इति समासान्तो निङादेशः । 'लोपो व्योर्वलि' इति वलि[2] लोपः[2] । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । व्यश्वम् । विगतोऽश्वो यस्मात्स तथोक्तः । बहुव्रीहिस्वरेण पूर्वपदस्योदात्तत्वे[3] 'उदात्तस्वरितयोर्यणः०' इति परस्यानुदात्तस्य स्वरितत्वम् ॥ ॥ ३५ ॥

याभिर्नरा शयवे याभिरत्रये याभिः पुरा मनवे गातुमीषथुः ।
याभिः शारीराजतं स्यूमरश्मये ताभिरू षु ऊतिभिरश्विना गतम् ॥ १६ ॥

याभिः । नरा । शयवे । याभिः । अत्रये । याभिः । पुरा । मनवे । गातुम् । ईषथुः ।
याभिः । शारीः । आजतम् । स्यूमऽरश्मये ।
ताभिः । ऊँ इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ १६ ॥

हे [v]नरा नेतारावश्विनौ [v]पुरा पूर्वस्मिन्काले [v]शयवे एतत्संज्ञकाय ऋषये [v]गातुं दुःखान्निर्गमनलक्षणं मार्गं [v]याभिः ऊतिभिः [v]ईषथुः युवां वाञ्छितवन्तौ कृतवन्तावित्यर्थः । किं[4] तत् । सामर्थ्यात्

---

१. क्ष-ट-स-वैन्यम् । २. त-द-श-यलोपः । ३. क्ष-पूर्वपदस्यान्तोदात्तत्वे । ४. क्ष-'किं' नास्ति । च-ट-स-सामर्थ्यम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'शयवे चिन्नास्त्या शचीभिः' (ऋ. सं. १. ११६. २२) इत्यस्यामृचि प्रतिपादितम्। तथा [v]अत्रये ऋषये शतद्वारे यन्त्रगृहेऽसुरैः पीड्यमानाय संतापकारिणः अग्नेः[1] शीतेनोदकेन शीतकरणलक्षणं[2] गातुं दुःखनिर्गमनहेतुभूतं मार्गं [v]याभिः ऊतिभिर्युवामिष्टवन्तौ। एतच्च 'हिमेनाग्निं घ्रंसमवारयेथाम्' (ऋ. सं. १. ११६. ८) इत्यादौ प्रसिद्धम्। तथा [v]मनवे एतन्नाम्ने राजर्षये [v]याभिः ऊतिभिः यवादिधान्यवापनादिरूपं गातुं दारिद्र्यनिर्गमनहेतुं[3] मार्गं युवां कृतवन्तौ। तथा च मन्त्रान्तरं—'यवं वृकेणाश्विना वपन्ता' (ऋ. सं. १. ११७. २१) इति। अपि च [v]स्यूमरश्मये स्यूतः संबद्धः[4] रश्मिर्दीप्तिर्यस्य तस्मै एतत्संज्ञकाय ऋषये [v]याभिः ऊतिभिः [v]शारीः। शरो नाम वेणुविशेषः। तद्विकारभूता इषूः [v]आजतं शत्रून्प्रति प्रेरयतम्। ताभिरूतिभिरित्यादि पूर्ववत्॥ नरा। 'नृ नये'। 'ऋदोरप्'। 'सुपां सुलुक्°' इति विभक्तेः आकारः। शयवे। 'शीङ् स्वप्ने'। 'भृमृशीतृचरि°' (उ. सू. १. ७.) इत्यादिना उप्रत्ययः। ईपथुः। 'इषु इच्छायाम्'। लिटि अथुसि '°असवर्णे' (पा. सू. ६. ४. ७८) इति पर्युदासात् अभ्यासस्य इयङादेशाभावे सवर्णदीर्घः। शारीः। विकारार्थे शरशब्दात् 'अनुदात्तादेश्च' इति अञ्। 'टिड्ढाणञ्°' इति ङीप्। स्यूमरश्मये। 'षिवु तन्तुसंताने'। सिवेः औणादिको मन्प्रत्ययः[5]। 'च्छ्वोः शूठ्°' इति ऊठ्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्॥

याभिः पठर्वा जठरस्य मज्मनाग्निर्नादीदेच्चित इद्धो अज्मन्ना।
याभिः शर्यातमवथो महाधने ताभिरू षु ऊतिभिराश्विना गतम्॥ १७॥

याभिः। पठर्वा। जठरस्य। मज्मना। अग्निः। न। अदीदेत्। चितः। इद्धः। अज्मन्। आ।
याभिः। शर्यातम्। अवथः। महाऽधने।
ताभिः। ऊँ इति। सु। ऊतिऽभिः। अश्विना। आ। गतम्॥ १७॥

हे अश्विनौ [v]जठरस्य। 'जठरमुदरं भवति जग्धमस्मिन्ध्रियते' (निरु. ४. ७) इति यास्कः। जठरोपलक्षितस्य शरीरस्य [v]मज्मना बलेन युक्तः सन् [v]पठर्वा एतत्संज्ञो राजर्षिः [v]अज्मन्। संग्रामनामैतत्। अज्मनि संग्रामे युष्मदीयाभिः [v]याभिः ऊतिभिः [v]आ समन्तात् [v]अदीदेत् अदीप्यत। तत्र दृष्टान्तः। [v]चितः काष्ठैरभिचितः[6] [v]इद्धः यज्ञगृहे ऋत्विग्भिः प्रज्वालितः [v]अग्निर्न। यथा अग्निः प्रकाशते तद्वदित्यर्थः। अपि च [v]शर्यातं मानवमिन्द्रेण सह स्पर्धमानं [v]महाधने। संग्रामनामैतत्। महता धनेनोपेते संग्रामे [v]याभिः ऊतिभिः [v]अवथः रक्षथः। ताभिरित्यादि गतम्॥ अदीदेत्। दीदेतिश्छान्दसो दीप्तिकर्मा। अज्मन्। 'अज गतिक्षेपणयोः'। अजन्ति क्षिपन्त्यस्मिन्बाणानिति अधिकरणे औणादिको मनिन्। 'वलादावार्धधातुके विकल्प इष्यते' (का. २. ४. ५६. २) इति वचनात् वीभावाभावः। 'सुपां सुलुक्°' इति सप्तम्या लुक्। महाधने। 'आन्महतः°' इति आत्वम्॥

---

१. क्ष-ट–अग्नेः सकाशात्। २. क्ष-य–शीतीकरणलक्षणम्। ३. क्ष-ट–दारिद्र्यनिर्गमनहेतुभूतम्। ४. क्ष–संततः ५. क्ष-ट–मनिन्प्रत्ययः। ६. ट–काष्ठैरुपचितः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

याभिरङ्गिरो मनसा निरण्यथोऽग्रं गच्छथो विवरे गोअर्णसः ।
याभिर्मनुं शूरमिषा समावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ १८ ॥

याभिः । अङ्गिरः । मनसा । निऽरण्यथः । अग्रम् । गच्छथः । विऽवरे । गोऽअर्णसः ।
याभिः । मनुम् । शूरम् । इषा । सम्ऽआवतम् ।
ताभिः । ऊँ इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ १८ ॥

अङ्गिरः इत्येतदामन्त्रितं वाक्यात् बहिर्भूतम् । तेन चात्मानं संबोध्य स्तुताविषिं प्रेरयति। हे vअङ्गिरः अङ्गिरसां[1] गोत्रज[1] त्वमश्विनौ स्तुहि। हे अश्विनौ vमनसा मननीयेन स्तोत्रेण प्रीतौ सन्तौ युवां vयाभिः ऊतिभिः vनिरण्यथः स्तोतॄन् नितरां रमयथः। यद्वा। मनसैव करणभूतेन[2] रमयथः। तथा vगोअर्णसः गोरूपस्यारणीयस्य धनस्य पणिभिर्गुहायां निहितस्य vविवरे विवरणे गुहाद्वारस्योद्घाटनेन प्रकाशने विषयभूते सति याभिः ऊतिभिः सह युवाम् vअग्रं सर्वेभ्यो देवेभ्यः पुरस्तात् vगच्छथः। अपि च vशूरं वीर्यवन्तं vमनुम् vइषा पृथिव्यामुप्तेन यवादिधान्यरूपेणान्नेन vयाभिः ऊतिभिः vसमावतं सम्यगरक्षतम्। vताभिः सर्वाभिः vऊतिभिः सहास्मानप्यागच्छतम् ॥ निरण्यथः। निरमयथ इत्यस्य वर्णव्यापत्त्या एतद्रूपम्। विवरे। 'ग्रहवृदृनिश्चिगमश्च' इति भावे अप्। थाथादिना उत्तरपदान्तोदात्तत्वम् ॥

याभिः पत्नीर्विमदाय न्यूहथुरा घ वा याभिररुणीरशिक्षतम् ।
याभिः सुदास ऊहथुः सुदेव्यं[1] ताभिरू षु ऊतिभिरश्विना गतम् ॥ १९ ॥

याभिः । पत्नीः । विऽमदाय । निऽऊहथुः । आ । घ । वा । याभिः । अरुणीः । अशिक्षतम् ।
याभिः । सुऽदासे । ऊहथुः । सुऽदेव्यम् ।
ताभिः । ऊँ इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ १९ ॥

हे अश्विनौ vविमदाय एतन्नाम्ने ऋषये vयाभिः युष्मदीयाभिः ऊतिभिः vपत्नीः भार्याः[3] पुरुमित्रस्य दुहितरं vन्यूहथुः नितरां युवां प्रापितवन्तौ। vघ इति पादपूरणः[4]। तथा vयाभिः ऊतिभिः vअरुणीः अरुणवर्णाः आरोचमाना गाः vआ आभिमुख्येन vअशिक्षतम् अदत्तम्। तथा[5] पिजवनपुत्राय vसुदासे कल्याणदानाय राज्ञे vसुदेव्यं प्रशस्तं धनं vयाभिः ऊतिभिः vऊहथुः प्रापितवन्तौ। ताभिरित्यादि गतम् ॥ पत्नीः। अमो व्यत्ययेन शसादेशः। न्यूहथुः। 'वह प्रापणे'। अथुसि यजादित्वात् संप्रसारणम्। द्विर्वचनादि। सुदासे। शोभनं ददातीति सुदाः। असुन्। सुदेव्यम्[6]। दिगादित्वाद्यत् ( पा. सू. ४. ३. ५४ )। 'तित्स्वरितम्' इति स्वरितत्वम् ॥

---

१. क्ष–अङ्गिरोगोत्रजात। २. ट–कारणभूतेन। ३. क्ष–भार्याम्। ४. क्ष-स–पदपूरणः। ५. क्ष-ट–अपि च। ६. क्ष-ट–सुदेव्यं शोभनो देवः सुदेवः। तत्र भवम्; स–शोभनदेवः सुदेवः। तत्र भवं सुदेव्यम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

याभिः शंतातौ भवथो ददाशुषे भुज्युं याभिरवथो याभिरध्रिगुम् ।
ओम्यावतीं सुभरामृतस्तुभं ताभिरू षु ऊतिभिरश्विना गतम् ॥ २० ॥

याभिः । शंतातौ इति शम्ऽतातौ । भवथः । ददाशुषे । भुज्युम् । याभिः । अवथः । याभिः । अध्रिऽगुम् ॥ ओम्याऽवतीम् । सुऽभराम् । ऋतऽस्तुभम् ।
ताभिः । ऊँ इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ २० ॥

हे अश्विनौ [v]ददाशुषे हवींषि दत्तवते यजमानाय [v]याभिः ऊतिभिः [v]शंतातौ सुखस्य कर्तारौ [v]भवथः । [v]याभिः च ऊतिभिः [v]भुज्युं तुग्रस्य पुत्रम् [v]अवथः । [v]याभिः च [v]अध्रिगुम् । अध्रिगुर्देवानां शमिता । 'अध्रिगुश्चापापश्च उभौ देवानां शमितारौ' (तै. ब्रा. ३. ६. ६. ४) इति श्रुतेः । अपि च [v]ऋतस्तुभम् । ऋतं सत्यं स्तोभत्युच्चारयतीति ऋतस्तुप् । एतत्संज्ञमृषिम् [v]ओम्यावतीम् । ओम्या इति सुखनाम । तद्युक्तां [v]सुभरां सुखेन भरणीयाम् इषं याभिः ऊतिभिः प्रापयथः । [v]ताभिः सर्वाभिः [v]ऊतिभिः सहास्मानप्यागच्छतम् ॥ शंतातौ । 'शिवशमरिष्टस्य करे' (पा. सू. ४. ४. १४३) इति तातिल्प्रत्ययः । 'लिति' इति प्रत्ययात्पूर्वस्योदात्तत्वम् । ददाशुषे । 'दाश्च दाने' । लिटः क्वसुः । 'वसोः संप्रसारणम्' इति संप्रसारणम् । 'शासिवसिघसीनां च' इति षत्वम् ॥ ॥ ३६ ॥

याभिः कृशानुमर्सने दुवस्यथो जवे याभिर्यूनो अर्वन्तमावतम् ।
मधु प्रियं भरथो यत्सरड्भ्यस्ताभिरू षु ऊतिभिरश्विना गतम् ॥ २१ ॥

याभिः । कृशानुम् । असने । दुवस्यथः । जवे । याभिः । यूनः । अर्वन्तम् । आवतम् ।
मधु । प्रियम् । भरथः । यत् । सरट्ऽभ्यः ।
ताभिः । ऊँ इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ २१ ॥

स्वानादिषु सोमपालेषु[1] मध्ये कृशानुरेकः सोमपालः । तथा च तैत्तिरीयकं—'हस्त सुहस्त कृशानवेते वः सोमक्रयणाः' (तै. सं. १. २. ७) इति । तं [v]कृशानुम् [v]असने । इषवोऽस्यन्तेऽस्मिन्नित्यसनः संग्रामः । तस्मिन् संग्रामे हे अश्विनौ [v]याभिः ऊतिभिः [v]दुवस्यथः रक्षथः । तथा [v]याभिः च [v]जवे वेगे प्रवृत्तं [v]यूनः तरुणस्य पुरुकुत्सस्य [v]अर्वन्तम् अश्वम् [v]आवतम् अरक्षतम् । अपि च [v]यत् [v]मधु क्षौद्रं [v]प्रियं सर्वेषामनुकूलवेद्यं[2] तत् [v]सरड्भ्यः मधुमक्षिकाभ्यः याभिः च ऊतिभिः [v]भरथः संपादयथः । [v]ताभिः सर्वाभिः [v]ऊतिभिः सहास्मानप्यागच्छतम् ॥ असने । 'असु क्षेपणे' । 'करणाधिकरणयोश्च' इति अधिकरणे ल्युट् । सरड्भ्यः । 'सृ गतौ' । सर्तेरटिः ॥

---

१. क्ष-ट–'सोमपालेषु' नास्ति । २. क्ष-ट–अनुकूलम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

याभिर्नरं गोषुयुधं नृषाह्ये क्षेत्रस्य साता तनयस्य जिन्वथः ।
याभी रथाँ अवथो याभिरर्वतस्ताभिरू षु ऊतिभिरश्विना गतम् ॥ २२ ॥

याभिः । नरम् । गोषुऽयुधम् । नृऽसह्ये । क्षेत्रस्य । साता । तनयस्य । जिन्वथः ।
याभिः । रथान् । अवथः । याभिः । अर्वतः ।
ताभिः । ऊँ इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ २२ ॥

हे अश्विनौ [v]गोषुयुधं गोविषयं युद्धं कुर्वन्तं [v]नरं यज्ञस्य नेतारं यजमानं [v]याभिः ऊतिभिः [v]नृषाह्ये नृभिः सोढव्ये संग्रामे [v]जिन्वथः प्रीणयथः रक्षथः इत्यर्थः । तथा [v]क्षेत्रस्य गृहादिरूपस्य । तनयशब्दो धनवाची । [v]तनयस्य धनस्य च [v]साता सातये संभजनार्थं [v]याभिः ऊतिभिः यजमानं रक्षथः । [v]याभिः च यजमानानां [v]रथान् रक्षथः[1] । तदीयान् [v]अर्वतः अश्वांश्च याभिः [v]अवथः । [v]ताभिः सर्वाभिः [v]ऊतिभिः सहास्मानप्यागच्छतम् ॥ गोषुयुधम् । ' युध संप्रहारे ' । गोषु युध्यते इति गोषुयुत् । ' तत्पुरुषे कृति बहुलम् ' इति अलुक् । नृषाह्ये । ' षह मर्षणे ' । ' शकिसहोश्च ' इति यत् । ' अन्येषामपि दृश्यते ' इति सांहितिको दीर्घः । कृदुत्तरपदप्रकृतिस्वरत्वम् । साता । ' वन षण संभक्तौ ' । भावे क्तिन् । ' जनसनखनां सञ्झलोः ' इति आत्वम् । ' ऊतियूति° ' इत्यादिना क्तिन उदात्तत्वं निपातितम् । ' सुपां सुलुक्° ' इति चतुर्थ्या डादेशः । जिन्वथः । जिविः प्रीणनार्थः । भौवादिकः । इदित्त्वात् नुम् । रथान् । ' दीर्घादटि समानपादे ' इति नकारस्य रुत्वम् । ' आतोऽटि नित्यम् ' इति सानुनासिक आकारः ॥

याभिः कुत्समार्जुनेयं शतक्रतू प्र तुर्वीतिं प्र च दभीतिमावतम् ।
याभिर्ध्वसन्तिं पुरुषन्तिमावतं ताभिरू षु ऊतिभिरश्विना गतम् ॥ २३ ॥

याभिः । कुत्सम् । आर्जुनेयम् । शतक्रतू इति शतऽक्रतू । प्र । तुर्वीतिम् । प्र । च । दभीतिम् । आवतम् ॥ याभिः । ध्वसन्तिम् । पुरुऽसन्तिम् । आवतम् ।
ताभिः । ऊँ इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥ २३ ॥

हे [v]शतक्रतू बहुविधकर्माणावश्विनौ [v]आर्जुनेयम् । अर्जुन इतीन्द्रस्य नाम । तथा च वाजसनेयकम्-' एतद्वा इन्द्रस्य गुह्यं नाम यदर्जुनः ' इति । तस्य पुत्रं [v]कुत्सं [v]याभिः ऊतिभिः [v]प्र [v]आवतं प्रकर्षेणारक्षतम् । तथा [v]तुर्वीतिं[2] [v]दभीतिं [v]च याभिः ऊतिभिः [v]प्र आवतम्[2] । अपि च [v]याभिः [v]ध्वसन्तिम् एतत्संज्ञं [v]पुरुषन्तिम् एतन्नामानं च ऋषिम् [v]आवतम् अरक्षतम् । [v]ताभिः सर्वाभिः [v]ऊतिभिः सहास्मानपि सुष्ठ्वागच्छतम् ॥ आर्जुनेयम् । ' शुभ्रादिभ्यश्च ' ( पा. सू. ४. १. १२३ ) इति चशब्दोऽनुक्तसमुच्चयार्थ इत्युक्तत्वात् ढक् । तुर्वीतिम् । ' तुर्वी हिंसार्थः ' । शत्रूंस्तुर्वतीति

---

१. क्ष-ट-अवथः । २. क्ष-ट-स-तुर्वीतिं याभिरूतिभिः प्रावतम् । दभीतिम् एतत्संज्ञं च ऋषिं याभिः प्रावतम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तुर्वीतिः । औणादिक ईतिप्रत्ययः । दभीतिम् । ' दम्भु दम्भे '। औणादिकः कीतिप्रत्ययः। ध्वसन्तिम् । ' ध्वंसु गतौ च '। औणादिको झिङ्प्रत्ययः। ' अनिदिताम्° ' इति नलोपः । ' झोऽन्तः '। पुरुषन्तिम् । पुरु सनोति ददातीति पुरुषन्तिः । ' क्तिच्क्तौ च संज्ञायाम् ' इति क्तिच् । ' न क्तिचि दीर्घश्च ' इति अनुनासिकलोपोपधादीर्घयोर्निषेधः ॥

अग्नस्वतीमश्विना वाचमस्मे कृतं नो दस्रा वृषणा मनीषाम् ।
अद्यूत्येऽवसे नि ह्वये वां वृधे च नो भवतं वाजसातौ ॥ २४ ॥

अग्नस्वतीम् । अश्विना । वाचम् । अस्मे इति । कृतम् । नः । दस्रा । वृषणा । मनीषाम् ।
अद्यूत्ये । अवसे । नि । ह्वये । वाम् । वृधे । च । नः । भवतम् । वाजऽसातौ ॥ २४ ॥

हे अश्विनौ vअस्मे अस्माकं vवाचम् vअग्नस्वतीम् । अग्न इति कर्मनाम । विहितैः कर्मभिः संयुक्तां vकृतं कुरुतम् । तथा vनः अस्माकं vमनीषां बुद्धिं हे vवृषणा कामानां वर्षकौ vदस्रा शत्रूणामुपक्षपयितारावश्विनौ वेदार्थज्ञानसमर्थां कुरुतम् । अपि च यस्मात् युवामेवंगुणविशिष्टौ तस्मात् vवां युवाम् vअवसे रक्षणाय vनि vह्वये नितरामाह्वये । कदा । vअद्यूत्ये द्योतनरहिते प्रकाशनरहिते रात्रेः पश्चिमे यामे । तस्मिन् काले हि प्रातरनुवाकाश्विनशस्त्रयोरिदं सूक्तं पठ्यते । आहूतौ vच युवां vवाजसातौ वाजस्यान्नस्य संभजने । यद्वा । संग्रामनामैतत् । संग्रामे vनः अस्माकं vवृधे वर्धनाय vभवतम् ॥ अग्नस्वतीम् । ' आपः कर्मख्यायां ह्रस्वो नुट् च वा ' इति असुन् नुडागमश्च । ' तदस्यास्ति° ' इति मतुप् । ' मादुपधायाः° ' इति मतुपो वत्वम् । ' तसौ मत्वर्थे ' इति भत्वेन पदत्वाभावात् रुत्वाद्यभावः । अस्मे । ' सुपां सुलुक्° ' इति षष्ठ्याः शेआदेशः । कृतम् । करोतेर्लोटि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । अद्यूत्ये । ' द्युत दीप्तौ ' । ' ऋहलोर्ण्यत् ' इति भावे ण्यत् । वर्णव्यापत्त्या ऊकारः । द्यूत्यं प्रकाशनमस्मिन्नास्तीति बहुव्रीहौ व्यत्ययेनान्तस्वरितत्वम् । नि ह्वये । ' निसमुपविभ्यो ह्वः ' इति आत्मनेपदम् । वृधे । ' वृधु वृद्धौ ' । संपदादिलक्षणो भावे क्विप् । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् ॥

द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिः ।
तन्नो मित्रो वरुणो ममहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ २५ ॥

द्युऽभिः । अक्तुऽभिः । परि । पातम् । अस्मान् । अरिष्टेभिः । अश्विना । सौभगेभिः ।
तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥२५॥

हे अश्विनौ vद्युभिः दिवसैः vअक्तुभिः रात्रिभिश्च vअस्मान् स्तोतॄन् vपरि vपातं परितो रक्षतं सर्वदास्मान् रक्षतमित्यर्थः । तथा vअरिष्टेभिः अहिंसितैः vसौभगेभिः सुभगत्वैः सुभगत्वापादकैर्धनैः अस्मान् रक्षतम् । यदस्माभिः प्रार्थितं vनः अस्मदीयं vतत् मित्रादयः षड्देवताः vममहन्तां

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पूजयन्तु । उतशब्दः समुच्चये ॥ द्युभिः । 'दिव उत्' इति उत्वम् । 'दिवो झल्' (पा. सू. ६. १. १८३) इति 'सावेकाचः०' इति प्राप्तस्य विभक्त्युदात्तस्वस्य प्रतिषेधः । अरिष्टेभिः । 'रिष हिंसायाम्' । 'निष्ठा' इति क्तः । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम्[1] । 'बहुलं छन्दसि' इति भिसः ऐसभावः । अश्विना । 'सुपां सुलुक्०' इति विभक्तेः आकारः । 'आमन्त्रितस्य च' इति सर्वानुदात्तत्वम् । सौभगेभिः । शोभनो भगः श्रीर्यस्यासौ सुभगः । तस्य भावः सौभगम् । 'सुभगान्मन्त्रे' इत्युद्गात्रादिषु पाठात् अञ्प्रत्ययः । 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' इति उभयपदवृद्धिर्न भवति, तस्य 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति विकल्पितत्वात् । पूर्ववत् ऐसभावः । 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तत्वम् ॥ ॥ ३७ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्[2] । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्क-
भूपालसाम्राज्यधुरंधरेण सायणाचार्येण[3] विरचिते
माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये
प्रथमाष्टके सप्तमोऽध्यायः समाप्तः ॥

---

१. क्ष-ट–समासोत्तरपदप्रकृतिस्वरत्वम् । २. क्ष–विनाशयन् । ३. क्ष–सायणामात्येन ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

इत्थं[1] सप्तममध्यायं व्याख्याय अष्टमोऽध्यायो व्याख्यातुमारभ्यते[1]। प्रथमे मण्डले षोडशेऽनुवाके सप्त सूक्तानि गतानि। 'इदम्' इति विंशत्यृचमष्टमं सूक्तम्। अत्रानुक्रम्यते–'इदं विंशतिरुषस्यं द्वितीयोऽर्धर्चो रात्रेश्च' इति। 'ऋषिश्चान्यस्मात्' इति परिभाषया अनुवृत्तेः आङ्गिरसः कुत्स ऋषिः। अनादेशपरिभाषया त्रिष्टुप् छन्दः। उषा देवता। द्वितीयस्यार्धर्चस्य रात्रिरपि। प्रातरनुवाके उषस्ये क्रतौ त्रैष्टुभे छन्दसि एतत्सूक्तम्। सूत्रितं च–'इदं श्रेष्ठं पृथू रथ इति सूक्ते' (आश्व. श्रौ. ४. १४) इति। आश्विनशस्त्रे चेदं सूक्तं प्रातरनुवाकातिदेशात्[2]॥

इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा।
यथा प्रसूता सवितुः सवायँ एवा रात्र्युषसे योनिमारैक् ॥ १ ॥

इदम्। श्रेष्ठम्। ज्योतिषाम्। ज्योतिः। आ। अगात्। चित्रः। प्रऽकेतः। अजनिष्ट। विऽभ्वा।
यथा। प्रऽसूता। सवितुः। सवाय। एव। रात्री। उषसे। योनिम्। आरैक् ॥ १ ॥

[v]ज्योतिषां ग्रहनक्षत्रादीनां द्योतमानानां मध्ये [v]इदम् उषआख्यं [v]ज्योतिः [v]श्रेष्ठं प्रशस्यतमम्[3]। अस्य कोऽतिशय इति चेत् उच्यते। नक्षत्रादिकं ज्योतिः स्वात्मानमेव प्रकाशयति नान्यत्। चन्द्रस्तु यद्यप्यन्यत् प्रकाशयति तथापि न[4] विस्पष्टप्रकाशः[4]। औषसं तु ज्योतिः युगपदेव सर्वस्य जगतः अन्धकारनिराकरणेन विशेषेण प्रकाशकम्। अतः प्रशस्यतममित्यर्थः[5]। तादृशं ज्योतिः [v]आगात् पूर्वस्यां दिश्यागमत्। आगते च तस्मिन् [v]चित्रः चायनीयः [v]प्रकेतः अन्धकारावृतस्य सर्वस्य पदार्थस्य प्रज्ञापकः[6] तदीयो रश्मिः [v]विभ्वा विभुर्व्याप्तः सन्[7] [v]अजनिष्ट प्रादुरभूत्। किंच [v]यथा [v]रात्री रात्रिः स्वयं [v]सवितुः सूर्यसकाशात् [v]प्रसूता उत्पन्ना। सूर्यो हि अस्तं गच्छन् रात्रिं जनयति। तस्मिन्ननस्तमिते रात्रेरुत्पत्त्यभावात्। एवमेव रात्रिरपि [v]उषसे [v]सवाय उषस उत्पत्तये तदर्थं [v]योनिं स्थानं स्वकीयापरभागलक्षणम् [v]आरैक् आरेचितवती कल्पितवतीत्यर्थः। यद्वा। प्रसूता रात्रिसकाशादुत्पन्नोषाः सवितुः सूर्यस्य सवाय प्रसवाय जन्मने यथा भवति एवं रात्रिरपि उषसे उषसो यज्जन्म तदर्थं योनिं स्वापरभागलक्षणं स्थानं कृतवती। अत्र निरुक्तम्–'इदं श्रेष्ठं ज्योतिषां ज्योतिरागमत् चित्रं प्रकेतनं प्रज्ञाततममजनिष्ट विभूततमं यथा प्रसूता सवितुः प्रसवाय रात्रिरादित्यस्यैवं रात्र्युषसे योनिमरिचत्स्थानम्' (निरु. २. १९) इति॥ श्रेष्ठम्। प्रशस्यशब्दात् आतिशायनिकः इष्ठन्। 'प्रशस्यस्य श्रः' (पा. सू. ५. ३. ६०)

---

१. क्ष-ट-ठ–इत्थं सप्तमोऽध्यायो व्याख्यातः। अष्टमो व्याख्यायते; स–इत्थं सप्तममध्यायं व्याख्याय अष्टमाध्यायव्याख्यानमारभ्यते। २. क्ष-ट-ठ–प्रातरनुवाकन्यायेनेत्यतिदेशात्। ३. क्ष-ट-ठ–प्रशस्तम्। ४. क्ष-ट-ठ–न विस्पष्टः प्रकाशः; स–अस्पष्टप्रकाशः। ५. क्ष-ट-ठ–प्रशस्ततमामित्यर्थः। ६. द-ध-ल–प्रकाशकः। ७. क्ष-ट-ठ–'सन्' नास्ति।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति श्रादेशः । ' प्रकृत्यैकाच् ' ( पा. सू. ६. ४. १६३ ) इति प्रकृतिभावात् टिलोपाभावः । अगात् । एतेः लुङि ' इणो गा लुङि ' इति गादेशः । ' गातिस्था° ' इति सिचो लुक् । प्रकेतः । ' कित ज्ञाने '। अन्तर्भावितण्यर्थात् कर्मणि घञ् । थाथादिना उत्तरपदान्तोदात्तत्वम् । अजनिष्ट । ' जनी प्रादुर्भावे '। लुङि सिच इडागमः । विभ्वा । ' विप्रसंभ्यो ड्वसंज्ञायाम् ' इति भवतेः ड्वप्रत्ययः । ' सुपां सुलुक्° ' इत्यादिना सोः आकारादेशः । ' ओः सुपि ' इति यणादेशस्य ' न भूसुधियोः ' इति प्रतिषेधे प्राप्ते ' छन्दस्युभयथा ' इति यणादेशः । व्यत्ययेनाद्युदात्तत्वम् । यद्वा । विपूर्वात् भवतेः औणादिको ड्वन्प्रत्ययः[1] । नित्त्वादाद्युदात्तत्वम् । प्रसूता । ' षूङ् प्राणिप्रसवे '। कर्मणि निष्ठा । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । सवाय । ' छन्दसि जवसवौ वक्तव्यौ ' ( पा. सू. ३. ३. ५६. ४ ) इति निपातनात् अच् । चित्त्वादन्तोदात्तत्वम् । ' अणोऽप्रगृह्यस्यानुनासिकः ' इति संहितायाम् अकारः सानुनासिकः । एव । ' निपातस्य च ' इति संहितायां दीर्घः । रात्री । ' रात्रेश्चाजसौ ' इति ङीप् । ' यस्येति च ' इति इकारलोपः । अरैक् । ' रिचिर् विरेचने '। लङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । लघूपधगुणे ' हल्ङ्याब्भ्यः° ' इति तिलोपः । वर्णव्यापत्त्या[2] व्यत्ययेन एकारस्य ऐकारः[2] ॥

रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः ।
समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने ॥ २ ॥

रुशत्ऽवत्सा । रुशती । श्वेत्या । आ । अगात् । अरैक् । ऊँ इति । कृष्णा । सदनानि । अस्याः ॥ समानबन्धू इति समानऽबन्धू । अमृते इति । अनूची इति । द्यावा । वर्णम् । चरतः । आमिनाने इत्याऽमिनाने ॥ २ ॥

श्वेत्या इत्युषसो नामधेयम् । ᵛरुशती दीप्ता ᵛश्वेत्या श्वेतवर्णोषाः । ᵛरुशद्वत्सा रुशन् दीप्तः सूर्यो वत्सो यस्याः सा तथोक्ता । यथा मातुः समीपे वत्सः संचरति एवमुषसः समीपे सूर्यस्य नित्यम्[3] अवस्थानात्तद्वत्सत्वम् । अथवा यथा वत्सो मातुः स्तन्यं[4] रसं[4] पिबन्[5] हरति[5] एवमुषसोऽवश्यायाख्यं रसं पिबन् वत्स इत्युच्यते । तादृशी सती ᵛआगात् आगतवती । आगतायाः ᵛअस्याः उषसः ᵛकृष्णा कृष्णवर्णा रात्रिः ᵛसदनानि स्थानानि स्वकीयान्यार्धयामलक्षणानि ᵛअरैक् आरेचितवती[6] कल्पितवती दत्तवतीत्यर्थः । ᵛउ इत्येतत् पादपूरणम्[7] । अपि चैते रात्र्युषसौ ᵛसमानबन्धू समानेनैकेन सूर्याख्येन बन्धुना सख्या युक्ते । यद्वा । सूर्येण सह संबद्धे । यथोषाः उदेष्यता सूर्येण संबद्धा एवं रात्रिरपि अस्तं यता[8] सूर्येण संबद्धा । ᵛअमृते मरणरहिते कालात्मकतया नित्यत्वात् ᵛअनूची अन्वञ्चन्त्यौ । प्रथमं रात्रिः पश्चादुषा इत्यनेन क्रमेण गच्छन्त्यौ । यद्वा । सूर्यगत्यनुसारेण गच्छन्त्यौ । एवंभूते ᵛवर्णं सर्वेषां प्राणिनां रूपम् ᵛआमिनाने जरयन्त्यौ । यद्वा । स्वकीयं रूपं हिंसन्त्यौ । उषसा नैशं तमो निवर्त्यते प्रकाशात्मकमुषसो रूपं रात्र्या । एवंविधे सत्यौ ᵛद्यावा द्योतमाने ᵛचरतः प्रतिदिवसमावर्तेते ।

---

१. क्ष-ट-ड्वन्प्रत्ययः । २. क्ष-ट-ठ-वर्णव्यापत्त्या व्यत्ययेन वा ऐकारः; स-वर्णव्यत्ययेन एकारस्य ऐकारः । ३. च-छ-ण-फ-अपि । ४. क्ष-ट-ठ-स्तन्यरसम् । ५. क्ष-ट-पिबन् विहरति; च-छ-ण-पिबति; ध-पिबन् एति ६. क्ष-ट-ठ-रेचितवती । ७. क्ष-ट-ठ-पदपूरणम् । ८. क्ष-ट-आयता ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यद्वा । द्यावा नभसा अन्तरिक्षमार्गेण चरतः प्रतिदिवसं गच्छतः । अत्र निरुक्तं–'रुशद्वत्सा सूर्यवत्सा रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः । सूर्यमस्या वत्समाह साहचर्याद्वत्सहरणाद्वा । रुशती श्वेत्यागात् श्वेत्या श्वेततेररिचत्कृष्णा सदनान्यस्याः कृष्णवर्णा रात्रिः कृष्णं कृष्यतेर्निकृष्टो वर्णः । अथैने संस्तौति समानबन्धू समानबन्धने अमृते अमरणधर्माणावनूची अनूच्यावितीतरेतरमभिप्रेत्य द्यावा वर्णं चरतस्ते एव द्यावौ द्योतनादपि वा द्यावा चरतस्तया सह चरत इति स्यादामिनाने आमिन्वाने अन्योन्यस्याध्यात्मं कुर्वाणे' (निरु. २. २०) इति॥ श्वेत्या । 'श्विता वर्णे' । अस्मात् ण्यन्तात् 'अचो यत्' इति भावे यत् । णिलोपः । अर्शआदित्वात् मत्वर्थीयः अच् । अमृते । मृतं मरणमनयोर्नास्तीति बहुव्रीहौ 'नञो जरमरमित्रमृताः' इत्युत्तरपदाद्युदात्तत्वम् । अनूची । अनुपूर्वादञ्चतेः 'ऋत्विक्०' इत्यादिना क्विन् । 'अनिदिताम्०' इति नलोपः । 'अञ्चतेश्चोपसंख्यानम्' इति ङीप् । 'अचः' इत्यकारलोपे 'चौ' इति दीर्घः । 'अनुदात्तस्य च यत्रोदात्तलोपः' इति ङीप उदात्तत्वम् । 'सुपां सुलुक्०' इति विभक्तेर्लुक् । आमिनाने । 'मीङ् हिंसायाम्' । क्र्यादिकः । शानचि 'मीनातेर्निगमे' इति ह्रस्वत्वम् ॥

समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे ।
न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे ॥ ३ ॥

समानः । अध्वा । स्वस्रोः । अनन्तः । तम् । अन्याऽअन्या । चरतः । देवशिष्टे इति देवऽशिष्टे ।
न । मेथेते इति । न । तस्थतुः । सुमेके इति सुऽमेके ।
नक्तोषसा । सऽमनसा । विरूपे इति विऽरूपे ॥ ३ ॥

[v]स्वस्रोः भगिन्योः रात्र्युषसोः [v]अध्वा संचरणसाधनभूतो मार्गः [v]समानः एक एव । येनैव[1] आकाशमार्गेणोषा निर्गच्छति तेनैव रात्रिरपि । स च मार्गः [v]अनन्तः अवसानरहितः । [v]तं मार्गं [v]देवशिष्टे देवेन द्योतमानेन सूर्येण अनुशिष्टे शिक्षिते सत्यौ [v]अन्यान्या एकैका [v]चरतः क्रमेण गच्छतः । अपि च [v]सुमेके शोभनमेहने सर्वेषामुत्पादकत्वात् शोभनप्रजनने [v]नक्तोषासा रात्रिरुषाश्च [v]विरूपे तमःप्रकाशलक्षणाभ्यां विरुद्धरूपाभ्यां युक्ते अपि[2] [v]समनसा समानमनस्के ऐकमत्यं प्राप्ते सत्यौ [v]न [v]मेथेते परस्परं न हिंस्तः । तथा [v]न [v]तस्थतुः क्वचिदपि न तिष्ठतः । सर्वदा लोकानुग्रहार्थं गच्छतः इत्यर्थः ॥ अन्यान्या । 'कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यं समासवच्च बहुलम्' (पा. म. ८. १. १२. ११) इति अन्यशब्दस्य द्विर्भावः । 'तस्य परमाम्रेडितम्' इति आम्रेडितसंज्ञायाम् 'अनुदात्तं च' इति आम्रेडितानुदात्तत्वम् । देवशिष्टे । 'शासु अनुशिष्टौ' । अस्मात् कर्मणि निष्ठा । 'यस्य विभाषा' इति इट्प्रतिषेधः । 'शास इदङ्हलोः' (पा. सू. ६. ४. ३४) इति उपधाया इत्वम् । 'शासिवसिघसीनां च' इति षत्वम् । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम् । मेथेते । 'मिथृ मेथृ मेधाहिंसनयोः' । भौवादिकः । अनुदात्तेत् । सुमेके । 'मिह सेचने' । भावे घञ् । शोभनो मेहो ययोस्ते । व्यत्ययेन ककारः । उत्तरपदस्य जित्स्वरेणाद्युदात्तत्वम्[3] । 'आद्युदात्तं द्व्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम् । नक्तोषासा । 'सुपां सुलुक्०' इति विभक्तेराकारः । 'अन्येषामपि दृश्यते' इति संहितायामुपधादीर्घः ॥

---

१. च-छ-फ–येन । २. ट-ठ–अपि च । ३. क्ष-ट-ठ–जित्स्वरेणाद्युदात्तत्वात् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

भास्वती नेत्री सूनृतानामचेति चित्रा वि दुरो न आवः ।
प्राप्र्या जगद्व्यु नो रायो अख्यदुषा अजीगर्भुवनानि विश्वा ॥ ४ ॥

भास्वती । नेत्री । सूनृतानाम । अचेति । चित्रा । वि । दुरः । नः । आवरित्यावः ।
प्रऽअर्प्या । जगत् । वि । ऊँ इति । नः । रायः । अख्यत् ।
उषाः । अजीगः । भुवनानि । विश्वा ॥ ४ ॥

vभास्वती विशिष्टप्रकाशनयुक्ता । सूनृतेति वाङ्नाम । vसूनृतानां वाचां vनेत्री उत्पादयित्री । उषसः प्रादुर्भावानन्तरं हि पशुपक्षिमृगादयः सर्वे शब्दं कुर्वन्ति । एवंभूता उषाः vअचेति अस्माभिः अज्ञायि । vचित्रा चायनीया ज्ञाता[1] सा vनः अस्माकं vदुरः द्वाराणि तमसा तिरोहितानि vविvआवः व्यवृणोत् । यथास्माभिर्दृश्यन्ते तथा तमो निवार्य प्रकाशयतीत्यर्थः[2] । अपि च vजगत् सर्वं भुवनं vप्राप्र्य प्रकाशं गमयित्वा vनः अस्माकं vरायः धनानि वि vअख्यत् विशिष्टप्रकाशनयुक्तान्यकरोत् । vउ इत्येतत् पादपूरणम्[3] । सैषा vउषाः vविश्वा vभुवनानि सर्वाणि भुवनानि तमसा तिरोहितत्वेन अविद्यमानकल्पानि vअजीगः उद्गिरति स्वमुखान्निर्गमयति । स्वकीयेन प्रकाशेन तमो निःसार्य पुनरुत्पन्नानीव करोतीत्यर्थः ॥ नेत्री । ' णीञ् प्रापणे ' । तृच् । ' ऋन्नेभ्यो ङीप् ' । ' उदात्तयणो हल्पूर्वात् ' इति ङीप उदात्तत्वम् । अचेति । ' चिती संज्ञाने ' । दुरः । द्वारशब्दस्य ' रयेर्मतौ बहुलम् ' ( पा. सू. ६. १. ३७. ६ ) इति बहुलवचनात् संप्रसारणम् । आवः । ' वृञ् वरणे ' । लुङि ' मन्त्रे घस° ' इति च्लेर्लुक् । गुणः । ' हल्ङ्याब्भ्यः° ' इति तिलोपः । ' छन्दस्यपि दृश्यते ' इति आडागमः । प्राप्र्य । ' ऋ गतौ ' । ण्यौ ' अर्तिह्री° ' इत्यादिना पुक् । ' समासेऽनञ्पूर्वे क्त्वो ल्यप् ' । अख्यत् । ' ख्या प्रकथने ' । लुङि ' अस्यतिवक्ति° ' इत्यादिना च्लेरङादेशः । अजीगः । ' गॄ निगरणे ' । लङि तिपि ' बहुलं छन्दसि ' इति विकरणस्य श्लुः । द्विर्वचनोरदत्वहलादिशेषाः । ' अर्तिपिपर्त्योश्च, बहुलं छन्दसि ' इति अभ्यासस्य इत्वम् । छान्दसः ईकारः । यद्वा । अस्मात् ण्यन्तात् लुङि चङि द्विर्भावसन्वद्भावेत्वदीर्घाः । छान्दसः चङो लोपः ॥

जिह्मश्ये चरितवे मघोन्याभोगय इष्टये राय ऊ त्वम् ।
दभ्रं पश्यन्न उर्विया विचक्ष उषा अजीगर्भुवनानि विश्वा ॥ ५ ॥

जिह्मऽश्ये । चरितवे । मघोनी । आऽभोगये । इष्टये । राये । ऊँ इति । त्वम् ।
दभ्रम् । पश्यत्ऽअभ्यः । उर्विया । विऽचक्षे । उषाः । अजीगः । भुवनानि । विश्वा ॥ ५ ॥

मघोनी इत्युषसो नामधेयम् । vमघोनी धनवती उषाः vजिह्मश्ये जिह्मं वक्रं शयानाय पुरुषाय vचरितवे चरितुं शयनादुत्थाय स्वापेक्षितं प्रति गन्तुं व्युच्छन्ती भवति । त्वम् । अयमेकशब्दपर्यायः सर्वनामशब्दः । यदाह–' त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तम् ' (निरु. १.७) इति । vत्वम् एकं प्रति

---

१. क्ष-ट-ठ–' ज्ञाता ' नास्ति । २. क्ष-ट-ठ–प्रकाशितवतीत्यर्थः । ३. क्ष-ट-ठ–पदपूरणम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vआभोगये आभोग्याय शब्दादिविषयार्थं तथा अपरं प्रति vइष्टये यागार्थं तथा अन्यं प्रति vराये धनार्थं च व्युच्छन्तीति शेषः। उशब्दश्चार्थे। अपि च vदभ्रम् अल्पं vपश्यद्भ्यः अन्धकारावृतत्वेन ईषद्द्रष्टृभ्यो मनुष्येभ्यः vविचक्षे विशिष्टप्रकाशाय व्युच्छन्ती vउर्विया उर्वी विस्तीर्णा vउषाः सर्वाणि भूतजातानि तमसा तिरोहितानि प्रकाशदानेन[1] उद्गीर्णानीव करोति॥ जिह्मश्ये। 'शीङ् स्वप्ने'। जिह्मं शेते इति जिह्मशीः। 'क्विप् च' इति क्विप्। कृदुत्तरपदप्रकृतिस्वरत्वम्। 'एरनेकाचः०' इति यण्। 'उदात्तस्वरितयोर्यणः०' इति विभक्तेः स्वरितत्वम्। आभोगये। आभोगशब्दाच्चतुर्थ्येकवचने यकारोपजनः[2]। यद्वा। आङ्पूर्वात् भुजेः बहुलवचनादौणादिकः किप्रत्ययः कुत्वं च। उर्विया। 'इयाडियाजीकाराणामुपसंख्यानम्' (पा. सू. ७. १. ३९.१) इति उर्वीशब्दादुत्तरस्य सोः डियाजादेशः[3]। विचक्षे। 'चक्षिङ् व्यक्तायां वाचि'। विपूर्वादस्मात् संपदादिलक्षणो भावे क्विप्॥ ॥ १ ॥

क्षत्राय॑ त्वं श्रव॑से त्वं महीया इ॒ष्टये॑ त्व॒मर्थ॑मिव त्वमि॒त्यै।
विस॑दृशा जीवि॒ताभि॑प्रचक्ष उ॒षा अ॑जीग॒र्भुव॑नानि॒ विश्वा॑॥ ६॥

क्षत्राय॑। त्व॒म्। श्रव॑से। त्व॒म्। म॒हीयै॑। इ॒ष्टये॑। त्व॒म्। अर्थ॑म्ऽइव। त्व॒म्। इ॒त्यै।
विऽस॑दृशा। जीवि॒ता। अ॒भि॒ऽप्र॒चक्षे॑। उ॒षाः। अ॒जी॒गः॒। भुव॑नानि। विश्वा॑॥ ६॥

vक्षत्राय। धननामैतत्। धनार्थं vत्वम् एकं प्रति उषा व्युच्छन्ती[4] इति शेषः। तथा vश्रवसे अन्नार्थं vत्वम् एकं प्रति vमहीयै महत्यै vइष्टये[5] अग्निष्टोमादिमहायज्ञार्थं[6] vत्वम् एकं प्रति व्युच्छन्ती[7]। तथा vअर्थमिव अपेक्षितमर्थं प्रति vइत्यै गमनार्थं vत्वम् एकं प्रति व्युच्छन्ती[8]। अपि च vविसदृशा विलक्षणानि नानारूपाणि vजीविता जीवितानि जीवनोपायभूतानि[9] कृषिवाणिज्यादीनि vअभिप्रचक्षे आभिमुख्येन प्रकाशयितुं व्युच्छन्ती vउषाः सर्वाणि भूतजातानि तमसा निगीर्णानि vअजीगः[10] प्रकाशनेन[11] उद्गीर्णानीवाकरोत्॥ त्वम्[12]। 'त्वसमसिमनेमेत्यनुच्चानि' (फि. सू. ७८) इति सर्वानुदात्तत्वम्[12]। महीयै। मह्यै। महेः 'इन् सर्वधातुभ्यः' इति इन्प्रत्ययः। 'कृदिकारादक्तिनः' इति ङीष्। 'उदात्तयणः०' इति विभक्तेरुदात्तत्वम्। छान्दसः ईकारोपजनः। यद्वा। महीशब्दादुत्तरस्य चतुर्थ्येकवचनस्य 'याडापः' (पा. सू. ७. ३. ११३) इति व्यत्ययेन याडागमः। छान्दसमन्तोदात्तत्वम्। विसदृशा। 'त्यदादिषु दृशोऽनालोचने कञ्च' इत्यत्र 'समानान्ययोश्च' (पा. सू. ३. २. ६०. १) इति वचनात् दृशेः कञ्। 'समानस्य च्छन्दसि' इति सभावः। विगतसादृश्यानि विसदृशानि। 'शेश्छन्दसि बहुलम्' इति शेर्लोपः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। अभिप्रचक्षे। चक्षेः 'तुमर्थे सेसेन्०' इति सेन्प्रत्ययः। 'स्कोः संयोगाद्योः०' इति कलोपः। कत्वषत्वे॥

---

१. क्ष-ट-प्रकाशेन; ठ-प्रकाशनेन। २. च-छ-फ-यकारोपजनः छान्दसः। ३. क्ष-ट-ठ-इयाजादेशः। ४. क्ष-ट-ठ-व्युच्छती। ५. क्ष-ट-ठ-इष्टये यागाय। ६. क्ष-ट-अग्निष्टोमादिमहायागार्थम्। ७. क्ष-ट-ठ-'व्युच्छन्ती' नास्ति। ८. क्ष-ट-ठ-'व्युच्छन्ती' नास्ति। ९. स-जीवितोपायभूतानि। १०. क्ष-ट-ठ-'अजीगः' नास्ति। ११. क्ष-ट-ठ-प्रकाशेन। १२. क्ष-ट-ठ-'त्वम्.....सर्वानुदात्तत्वम्' नास्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

एषा दिवो दुहिता प्रत्यदर्शि व्युच्छन्ती युवतिः शुक्रवासाः ।
विश्वस्येशाना पार्थिवस्य वस्व उषो अद्येह सुभगे व्युच्छ ॥ ७ ॥

एषा । दिवः । दुहिता । प्रति । अदर्शि । विऽउच्छन्ती । युवतिः । शुक्रऽवासाः ।
विश्वस्य । ईशाना । पार्थिवस्य । वस्वः । उषः । अद्य । इह । सुऽभगे । वि । उच्छ ॥ ७ ॥

[v]दिवो [v]दुहिता द्योर्दुहितृस्थानीया । तस्य हि पूर्वार्धे उषा उत्पद्यते । सा [v]एषा [v]व्युच्छन्ती तमो वर्जयन्ती [v]प्रत्यदर्शि सर्वैः प्राणिभिर्दृष्टाभूत् । कीदृशी सा । [v]युवतिः यावयित्री फलानां पुरुषैः प्रापयित्री नित्ययौवनोपेता वा । [v]शुक्रवासाः श्वेतवसना निर्मलदीप्तिर्वा । तथा [v]विश्वस्य सर्वस्य [v]पार्थिवस्य पृथिव्याः संबन्धिनः [v]वस्वः धनस्य [v]ईशाना ईश्वरी । हे [v]सुभगे शोभनधने [v]उषः तादृशी त्वम् [v]अद्य अस्मिन् काले [v]इह अस्मिन् देवयजनदेशे [v]व्युच्छ तमांसि विवासय वर्जयेत्यर्थः ॥ दिवः[1] । ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम्[1] । व्युच्छन्ती । ' उछी विवासे ' । विवासो वर्जनम् । तौदादिकः[2] । युवतिः । ' यूनस्तिः ' ( पा. सू. ४. १. ७७ ) । शुक्रवासाः । ' वस आच्छादने ' । वस्ते सर्वमाच्छादयतीति प्रकाशो वासः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । ईशाना । ' ईश ऐश्वर्ये ' । अदादित्वात् शपो लुक् । अनुदात्तेत्त्वात् लसार्वधातुकानुदात्तत्वे धातुस्वरः । पार्थिवस्य । ' पृथिव्या ञाञौ ' इति प्राग्दीव्यतीयः अञ्प्रत्ययः । वस्वः । लिङ्व्यत्ययः । ' घेर्ङिति ' इति गुणस्य ' जसादिषु च्छन्दसि वावचनम् ' इति विकल्पितत्वादभावे यणादेशः ॥

परायतीनामन्वेति पाथ आयतीनां प्रथमा शश्वतीनाम् ।
व्युच्छन्ती जीवमुदीरयन्त्युषा मृतं कं चन बोधयन्ती ॥ ८ ॥

पराऽयतीनाम् । अनु । एति । पाथः । आऽयतीनाम् । प्रथमा । शश्वतीनाम् ।
विऽउच्छन्ती । जीवम् । उत्ऽईरयन्ती । उषाः । मृतम् । कम् । चन । बोधयन्ती ॥ ८ ॥

[v]परायतीनां परागच्छन्तीनाम् अतीतानामुषसां संबन्धि [v]पाथः अन्तरिक्षैकदेशलक्षणं स्थानम् । ' पाथोऽन्तरिक्षं पथा व्याख्यातम् ' ( निरु. ६. ७ ) इति यास्कः । अद्यतन्युषाः [v]अन्वेति अनुगच्छति । अतीता उषसो यथा व्युष्टा एवमेवैषापि व्युच्छतीत्यर्थः । तथा [v]आयतीनाम् आगच्छन्तीनां [v]शश्वतीनां बह्वीनामुषसां [v]प्रथमा आद्या भवति । एषा यथा वर्तते एवमेव[3] आगामिन्योऽप्युषस इत्यर्थः । तादृशी [v]व्युच्छन्ती तमो वर्जयन्ती [v]जीवं प्राणिनां जीवात्मानम् [v]उदीरयन्ती शयनादूर्ध्वं प्रेरयन्ती [v]उषाः [v]मृतं स्वापसमये प्रलीनेन्द्रियत्वात् मृतमिव सन्तं [v]कं [v]चन कमपि पुरुषं [v]बोधयन्ती पुनः इन्द्रियप्रवेशेन[4] चेतनं कुर्वती प्रवर्तते[5] इति शेषः ॥ परायतीनाम् । ' इण् गतौ ' । लटः शतृ । ' इणो यण् ' ' उगितश्च ' इति ङीप् । ' ङ्याश्छन्दसि बहुलम् ' इति नाम उदात्तत्वम् ॥

---

१. क्ष-ट-ठ–' दिवः .....उदात्तत्वम् ' नास्ति । २. क्ष-ट-ठ–भौवादिकः । ३. क्ष-ट-ठ–एवम् । ४. क्ष-ट-ठ–इन्द्रियप्रवेशनेन । ५. क्ष-ट-ठ–वर्तते ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उषो यदग्निं समिधे चकर्थ वि यदावश्चक्षसा सूर्यस्य ।
यन्मानुषान्यक्ष्यमाणाँ अजीगस्तद्देवेषु चक्रषे भद्रमन्नः ॥ ९ ॥

उषः । यत् । अग्निम् । सम्ऽइधे । चकर्थ । वि । यत् । आवः । चक्षसा । सूर्यस्य ।
यत् । मानुषान् । यक्ष्यमाणान् । अजीगरिति । तत् । देवेषु । चक्रषे । भद्रम् । अन्नः ॥९॥

हे [v]उषः [v]त्वम् [v]अग्निं गार्हपत्यादिरूपं [v]समिधे समिन्धनाय प्रज्वलनार्थं[1] [v]यत् [v]चकर्थ कृतवती । उषःकाले ह्यग्नयो होमार्थमुपसमिध्यन्ते । अपि च तमसा तिरोहितं जगत् [v]सूर्यस्य [v]चक्षसा प्रकाशेन [v]यत् [v]वि [v]आवः व्यवृणोः तमसा विश्लिष्टमकरोः । तथा [v]मानुषान् मनोः पुत्रान् मनुष्यान् [v]यक्ष्यमाणान् यागं करिष्यतस्त्वं [v]यत् [v]अजीगः पूर्वं तमसा ग्रस्तान् प्रकाशेन उद्गीर्णानिवाकरोः । हे उषः [v]देवेषु मध्ये त्वमेव [v]भद्रं भजनीयं [v]तत् एतत्त्रिविधम् [v]अन्नः कर्म [v]चक्रषे कृतवती ॥ आवः । ' वृञ् वरणे ' । लुङि ' मन्त्रे घस° ' इति च्लेर्लुक् । गुणे ' हल्ङ्याब्भ्यः° ' इति सिलोपः । ' छन्दस्यपि दृश्यते ' इति आडागमः । मानुषान् । ' मनोर्जातावञ्यतौ षुक् च ' इति अञ् षुगागमश्च ॥

कियात्या यत्समया भवाति या व्यूषुर्याश्च नूनं व्युच्छान् ।
अनु पूर्वाः कृपते वावशाना प्रदीध्याना जोषमन्याभिरेति ॥ १० ॥

कियति । आ । यत् । समया । भवाति । याः । विऽऊषुः । याः । च । नूनम् । विऽउच्छान् ।
अनु । पूर्वाः । कृपते । वावशाना । प्रऽदीध्याना । जोषम् । अन्याभिः । एति ॥ १० ॥

समया इत्यव्ययं समीपवचनम् । उषाः [v]समया [v]भवाति समीपस्था भवतीति [v]यत् एतत् तत् [v]कियति काले प्रवृत्तं परिसमाप्तं वा इति आकारः प्रश्नार्थः । एतदुक्तं भवति । उषा येन कालेन संयुक्ता स कालः कियान् तस्य कालस्य किं परिमाणमिति । अनेन उषसोऽनन्तत्वमुक्तम् । तदेव स्पष्टीकरोति । पुरा [v]याः उषसः [v]व्यूषुः व्युष्टाः संजाताः । [v]नूनम् अवश्यमितः परं [v]याश्च उषसः [v]व्युच्छान् व्युच्छन्ति व्युष्टा भविष्यन्ति । तत्र [v]पूर्वाः व्युष्टा अतीता उषसः [v]वावशाना कामयमाना इदानीं वर्तमाना उषाः [v]अनु [v]कृपते अनुकल्पते समर्था भवति । अतीता उषसो यथा प्रकाशमकुर्वन् तद्वदेषापि प्रकाशं करोतीत्यर्थः । तथा [v]प्रदीध्याना प्रकर्षेण दीप्यमाना उषाः[2] [v]अन्याभिः आगामिनीभिः[3] उषोभिः [v]जोषं सह [v]एति संगच्छते । आगामिन्योऽपि एतदीयं[4] प्रकाशम् अनुकुर्वन्ति[5] इत्यर्थः ॥ कियति । किं परिमाणमस्य । ' किमिदंभ्यां वो घः ' ( पा. सू. ५. २. ४० ) इति घत्वविधानसामर्थ्यात् किंशब्दादपि परिमाणार्थे वतुप् वकारस्य घत्वम् । ' इदंकिमोरीश्की ' ( पा. सू. ६. ३. ९० ) इति किमः कीआदेशः । घस्य इयादेशे ' यस्य° ' इति लोपः । प्रत्ययाद्युदात्तत्वम् । छान्दसः सांहितिको दीर्घः । भवाति । लेटि आडागमः । व्यूषुः । विपूर्वो वसतिर्व्युच्छने वर्तते । लिटि उसि कित्त्वे यजादित्वात् संप्रसारणं द्विर्वचनादि । व्युच्छान् । ' उछी विवासे ' । विवासो[6] वर्जनम्[6] । लेटि आडागमः । संयोगान्तस्य

---

१. स–प्रज्वालनार्थम् । २. क्ष-ट-ठ–एषा । ३. क्ष-ट-ठ–' आगामिनीभिः ' नास्ति । ४. क्ष-ट-ठ–एतम् । ५. क्ष-ट-ठ–अनुकुर्वते । ६. क्ष-ट-ठ–' विवासो वर्जनम् ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

लोपः । कृपते । ' कृपू सामर्थ्ये ' । व्यत्ययेन शः । वावशाना । ' वश कान्तौ ' । अस्मात् यङ्लुगन्तात् ताच्छीलिकः चानश् । प्रदीध्याना । ' दीधीङ् दीप्तिदेवनयोः ' । लटः शानच् । अदादित्वात् शपो लुक् । ' जक्षित्यादयः षट् ' इति अभ्यस्तसंज्ञायाम् ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । गतिसमासे कृदुत्तरपदप्रकृतिस्वरत्वम् ॥ ॥ २ ॥

ईयुष्टे ये पूर्वतरामपश्यन्व्युच्छन्तीमुषसं मर्त्यासः ।
अस्माभिरू नु प्रतिचक्ष्याभूदो ते यन्ति ये अपरीषु पश्यान् ॥ ११ ॥

ईयुः । ते । ये । पूर्वऽतराम् । अपश्यन् । विऽउच्छन्तीम् । उषसम् । मर्त्यासः ॥ अस्माभिः । ऊँ इति । नु । प्रतिऽचक्ष्या । अभूत् । ओ इति । ते । यन्ति । ये । अपरीषु । पश्यान् ॥११॥

ये मर्त्यासः मरणधर्माणो मनुष्याः व्युच्छन्तीं विवासयन्तीं पूर्वतराम् अतिशयेन पूर्वां विप्रकृष्टाम् उषसम् अपश्यन् दृष्टवन्तः ते मनुष्याः ईयुः गताः[1] । तथा अस्माभिः अपि नु इदानीं प्रतिचक्ष्या प्रकर्षेण द्रष्टव्या अभूत् जाता । तथा अपरीषु भाविनीषु रात्रिषु ये मनुष्याः एतामुषसं पश्यान् पश्यन्ति ते । आ उ इति निपातद्वयसमुदायः । तत्र उ इत्येतदवधारणे । एव यन्ति आगच्छन्त्येव । कालत्रयेऽप्येषा व्याप्य वर्तते इत्यर्थः ॥ ईयुः । ' इण् गतौ ' । लिटि उसि ' इणो यण् ' इति यणादेशः । ' द्विर्वचनेऽचि ' इति तस्य स्थानिवद्भावात् द्विर्भावे ' दीर्घ इणः किति ' ( पा. सू. सू. ७. ४. ६९ ) इति अभ्यासस्य दीर्घत्वम् । ते । ' युष्मत्तत्ततक्षुःष्वन्तःपादम् ' इति सकारस्य षत्वं ष्टुत्वं च । मर्त्यासः । ' आज्जसेरसुक् ' ॥

यावयद्द्वेषा ऋतपा ऋतेजाः सुम्नावरी सूनृता ईरयन्ती ।
सुमङ्गलीर्बिभ्रती देववीतिमिहाद्योषः श्रेष्ठतमा व्युच्छ ॥ १२ ॥

यवयत्ऽद्वेषाः । ऋतऽपाः । ऋतेऽजाः । सुम्नऽवरी । सूनृताः । ईरयन्ती । सुऽमङ्गलीः । बिभ्रती । देवऽवीतिम् । इह । अद्य । उषः । श्रेष्ठऽतमा । वि । उच्छ ॥१२॥

यावयद्द्वेषाः । यावयन्ति अस्मत्तः पृथक्कृतानि द्वेषांसि द्वेष्टॄणि राक्षसादीनि यया सा तथोक्ता । न ह्युष्यसि जातायां राक्षसादयोऽवतिष्ठन्ते यतस्ते निशाचराः । ऋतपाः ऋतस्य सत्यस्य यज्ञस्य वा पालयित्री ऋतेजाः यज्ञार्थं प्रादुर्भूता । सत्यामुषसि अहनि[2] यागा अनुष्ठीयन्ते अतो[3] यज्ञार्थं जातेत्युच्यते[3] । सुम्नावरी । सुम्नमिति सुखनाम तद्वती । सूनृताः । वाङ्नामैतत् । पशुपक्षिमृगादीनां वचांसि ईरयन्ती प्रेरयन्त्युत्पादयन्ती । सुमङ्गलीः सौमङ्गल्योपेता । पत्या कदाचिदपि न वियुक्तेत्यर्थः । देववीतिं देवैः काम्यमानं यज्ञं बिभ्रती धारयन्ती हे उषः श्रेष्ठतमा उक्तेन प्रकारेणातिप्रशस्ता त्वम् इह अस्मिन् देवयजनदेशे अद्य अस्मिन् यागसमये व्युच्छ विवासय ॥ यावयद्द्वेषाः । ' यु मिश्रणामिश्रणयोः ' । अस्मात् ण्यन्तात् लटः शतृ । तस्य ' छन्दस्युभयथा ' इति आर्धधातुकत्वात् अदुपदेशात्

---

१. क्ष-ट-ठ–मृताः । २. क्ष-ट-ठ–' अहनि ' नास्ति । ३. क्ष-ट-ठ–' अतो यज्ञार्थं जातेत्युच्यते ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

लसार्वधातुकानुदात्तत्वाभावात् प्रत्ययस्वर एव शिष्यते । पुनर्बहुव्रीहौ स एव स्वरः । छान्दसः पदकालीनो ह्रस्वः । ऋतपाः । ऋतं पाति रक्षतीति ऋतपाः । 'पा रक्षणे' । विच् । ऋतेजाः । ऋते निमित्तभूते[1] जायते इति ऋतेजाः । 'जनी प्रादुर्भावे' । 'जनसनखनक्रमगमो विट्' । 'विड्वनोरनुनासिकस्यात्' इति आत्वम् । 'तत्पुरुषे कृति बहुलम्' इति अलुक्[2] । सुम्नावरी । 'छन्दसीवनिपौ०' इति मत्वर्थीयो वनिप् । 'वनो र च' इति ङीप् नकारस्य रेफादेशश्च । 'अन्येषामपि दृश्यते' इति दीर्घः । व्यत्ययेन प्रत्ययाद्युदात्तत्वम् । सुमङ्गलीः । 'सुमङ्गलात् संज्ञायाम्' (पा. सू. ४.१.४१. ग.) इति गौरादिषु पाठात् ङीष् । 'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इति 'हल्ङ्याब्भ्यः०' इति सुलोपस्य विकल्पितत्वात् अभावे रुत्वविसर्गौ । देववीतिम् । 'वी गतिप्रजनकान्त्यशनखादनेषु' । देवैर्वीयते काम्यते इति देववीतिर्यज्ञः । कर्मणि क्तिन् । दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् ॥

शश्वत्पुरोषा व्युवास देव्यथो अद्येदं व्यावो मघोनी ।
अथो व्युच्छादुत्तराँ अनु द्यूनजरामृता चरति स्वधाभिः ॥ १३ ॥

शश्वत् । पुरा । उषाः । वि । उवास । देवी । अथो इति । अद्य । इदम् । वि । आवः । मघोनी । अथो इति । वि । उच्छात् । उत्ऽतरान् । अनु । द्यून् । अजरा । अमृता । चरति । स्वधाभिः ॥ १३ ॥

[v]देवी देवनशीला [v]उषाः [v]पुरा पूर्वस्मिन्काले [v]शश्वत् नित्यं संततं [v]व्युवास व्यौच्छत् । [v]अथो अनन्तरम् [v]अद्य अस्मिन् काले [v]मघोनी धनवती उषाः तमसा तिरोहितम् [v]इदं सर्वं जगत् [v]व्यावः विवासितं प्रकाशनेन तमसा वियुक्तमकरोत् । [v]अथो अनन्तरम् [v]उत्तरान् ऊर्ध्वतरान् भाविनः [v]द्यून् दिवसान् अनुलक्ष्य आगामिष्वपि दिवसेषु [v]व्युच्छात् व्युच्छति विवासयति । अतः कालत्रयव्यापिनी सोषाः [v]अजरा जरारहिता सर्वदैकरूपा [v]अमृता मरणरहिता च सती [v]स्वधाभिः आत्मीयैस्तेजोभिः सह [v]चरति वर्तते ॥ उवास । 'वस निवासे' । 'लिट्यभ्यासस्योभयेषाम्' इति अभ्यासस्य संप्रसारणम् । आवः । तस्मादेव[3] धातोर्लङि 'बहुलं छन्दसि' इति विकरणस्य लुक् । 'हल्ङ्याब्भ्यः०' इति तिलोपः । 'छन्दस्यपि दृश्यते' इति आडागमः । उच्छात् । लेटि आडागमः । उत्तरान् । 'दीर्घादटि समानपादे' इति नकारस्य रुत्वम् । 'आतोऽटि नित्यम्' इति सानुनासिकः आकारः । अनु[4] । 'अनुर्लक्षणे' (पा. सू. १. ४. ८४) इति अनोः कर्मप्रवचनीयत्वम् । अजरा अमृता । तत्र बहुव्रीहौ 'नञो जरमरमित्रमृताः' इति उत्तरपदाद्युदात्तत्वम्[4] ॥

व्यश्ञिभिर्दिव आतासु अद्यौदप कृष्णां निर्णिजं देव्यावः ।
प्रबोधयन्त्यरुणेभिरश्वैरोषा याति सुयुजा रथेन ॥ १४ ॥

वि । अश्ञिऽभिः । दिवः । आतासु । अद्यौत् । अप । कृष्णाम् । निःऽनिजम् । देवी । आवरित्यावः । प्रऽबोधयन्ती । अरुणेभिः । अश्वैः । आ । उषाः । याति । सुऽयुजा । रथेन ॥ १४ ॥

---

१. क्ष-ट-ठ–निमित्ते । २. त-द-श–सप्तम्या अलुक् । ३. ठ–अस्मादेव । ४. क्ष-ट-ठ–'अनु... उत्तरपदाद्युदात्तत्वम्' नास्ति ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vदिवः नभसः संबन्धिनीषु vआतासु । दिङ्नामैतत् । आततासु विस्तीर्णासु दिक्षु उषाः vअञ्जिभिः व्यञ्जकैः प्रकाशकैः तेजोभिः vवि vअद्यौत् विद्योतते प्रकाशते । सैषा vदेवी देवनशीला vकृष्णां vनिर्णिजम् । निर्णिगिति रूपनाम । रात्रिकृतं कृष्णं रूपम् vअप vआवः अपावृणोत् । प्रकाशेन तिरस्कृतवती । अपि च vअरुणेभिः अरुणैः लोहितवर्णैः vअश्वैः व्यापनशीलैः स्वकीयैः किरणैस्तुरगैर्वा vसुयुजा सम्यग्युक्तेन vरथेन vउषाः vआ vयाति आगच्छति । किं कुर्वती । vप्रबोधयन्ती सुप्तान् प्राणिनः प्रबुद्धान् कुर्वती ॥ अद्यौत् । ' द्युत दीप्तौ ' । लुङ् । ' द्युद्भ्यो लुङि ' (पा. सू. १. ३. ९१) इति परस्मैपदम् । व्यत्ययेन च्लेर्लुक् । गुणे प्राप्ते वृद्धिश्छान्दसी । यद्वा । ' द्यु अभिगमने ' । आदादिकः । ' उतो वृद्धिर्लुकि हलि ' ( पा. सू. ७. ३. ८९ ) इति वृद्धिः ॥

देवीनां हविःषु ' आवहन्ती ' इत्येषा उषसो याज्या । सूत्रितं च–' आ द्यां तनोषि रश्मिभिरावहन्ती पोष्या वार्याणि न ता अर्वा रेणुककाटो अश्नुते ' ( आश्व. श्रौ. ६. १४ ) इति ॥

आवहन्ती पोष्या वार्याणि चित्रं केतुं कृणुते चेकिताना ।
ईयुषीणामुपमा शश्वतीनां विभातीनां प्रथमोषा व्यश्वैत् ॥ १५ ॥

आऽवहन्ती । पोष्या । वार्याणि । चित्रम् । केतुम् । कृणुते । चेकिताना ।
ईयुषीणाम् । उपऽमा । शश्वतीनाम् । विऽभातीनाम् । प्रथमा । उषाः । वि । अश्वैत् ॥ १५ ॥

vपोष्या यावज्जीवं पोषणसमर्थानि vवार्याणि वरणीयानि धनानि vआवहन्ती अस्मभ्यमानयन्ती vचेकिताना सर्वं जनं[1] प्रज्ञापयन्ती vउषाः vचित्रं विचित्रमाश्चर्यभूतं चायनीयं वा vकेतुं प्रज्ञापकं रश्मिं कृत्स्नजगत्प्रकाशनसमर्थं vकृणुते स्वात्मनः प्रकाशात् कुरुते । सैषा vईयुषीणां गमनवतीनां[2] पूर्वनिष्पन्नानां vशश्वतीनां बह्वीनामुषसाम् vउपमा[3] उप समीपे निर्मितोपमानभूता वा[3] vविभातीनां विशेषेण प्रकाशमानानामागामिनीनाम् उषसां vप्रथमा आद्या एवंभूतोषाः vव्यश्वैत् तेजसा प्रबृद्धासीत् ॥ पोष्या । ' पुष पुष्टौ ' । पोषणं पोषः । भावे घञ् । तत्र भवानि । ' भवे छन्दसि ' इति यत् । ' यतोऽनावः इत्याद्युदात्तत्वम् । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । वार्याणि । ' वृङ् संभक्तौ ' । ' ऋहलोर्ण्यत् ' । ' ईडवन्दवृशंसदुहां ण्यतः ' इत्याद्युदात्तत्वम् । चेकिताना । ' कित ज्ञाने ' । अस्मात् यङन्तात् लटः शानच् । ' छन्दस्युभयथा ' इति तस्य आर्धधातुकत्वात् अतोलोपयलोपौ । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । ईयुषीणाम् । ' इण् गतौ ' । लिटः क्वसुः । द्विर्भावादि । ' उगितश्च ' इति ङीप् । ' वसोः संप्रसारणम् ' । ' इणो यण् ' इति यणादेशः । ' दीर्घ इणः किति ' इति अभ्यासस्य दीर्घत्वम् । ' शासिवसिघसीनां च ' इति षत्वम् । ङीप्सुपौ पित्त्वादनुदात्तौ । विभातीनाम् । ' भा दीप्तौ ' । अस्मात् शत्रन्तात् पूर्ववत् ङीप् । ' ङ्याश्छन्दसि बहुलम् ' इति नाम उदात्तत्वम् । अश्वैत् । ' टुओश्वि गतिवृद्ध्योः ' । लङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । गुणे कृते व्यत्ययेन ऐत्वम् ॥ ॥ ३ ॥

---

१. क्ष-ट-ठ–जगत् । २. क्ष-ट–गतवतीनाम् । ३. ठ–समीपे निर्मिता उपमा उपमानभूता

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उदीर्ध्वं जीवो असुर्न आगादप प्रागात्तम आ ज्योतिरेति ।
आरैक्पन्थां यातवे सूर्यायागन्म यत्र प्रतिरन्त आयुः ॥ १६ ॥

उत् । ईर्ध्वम् । जीवः । असुः । नः । आ । अगात् । अप । प्र । अगात् । तमः । आ । ज्योतिः । एति ॥ अरैक् । पन्थाम् । यातवे । सूर्याय । अगन्म । यत्र । प्रऽतिरन्ते । आयुः ॥१६॥

हे मनुष्याः ᵛउदीर्ध्वं शयनं परित्यज्य उद्गच्छत। ᵛनः अस्माकम् ᵛअसुः शरीरस्य प्रेरयिता ᵛजीवः जीवात्मा ᵛआगात् आगतवान्। ᵛतमः[1] ᵛअप ᵛप्रागात्[1] अपक्रान्तम्। उषसः[2] प्रकाशे सति सर्वजीवनव्यापारयोगः। तस्मात् परमात्मरूपतया स च जीवस्तदेव ᵛज्योतिः ᵛआ ᵛएति आगच्छति। ᵛसूर्याय सूर्यस्य ᵛपन्थां मार्गम् ᵛआरैक् विविक्तीकरोति । ᵛयातवे गमनाय । तस्मिन् देशे ᵛअगन्म गच्छामः ᵛयत्र यस्मिन् देशे ᵛआयुः । अन्ननामैतत् । अन्नं ᵛप्रतिरन्ते । प्रपूर्वस्तिरतिर्वर्धनार्थः । उदारा दानेन प्रवर्धयन्ति[2] ॥ ईर्ध्वम् । ' ईर गतौ ' । आदादिकोऽनुदात्तेत् । अरैक् । ' रिचिर् विरेचने ' । लङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । गुणे व्यत्ययेन ऐत्वम् । पन्थाम् । द्वितीयायामपि ' पथिमथ्यृभुक्षामात् ' इति व्यत्ययेन आत्वम् । अगन्म । गमेर्लङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । ' म्वोश्च ' ( पा. सू. ८. २. ६५ ) इति मकारस्य नकारः ॥

स्यूमना वाच उदियर्ति वह्निः स्तवानो रेभ उषसो विभातीः ।
अद्या तदुच्छ गृणते मघोन्यस्मे आयुर्नि दिदीहि प्रजावत् ॥ १७ ॥

स्यूमना । वाचः । उत् । इयर्ति । वह्निः । स्तवानः । रेभः । उषसः । विऽभातीः ।
अद्य । तत् । उच्छ । गृणते । मघोनि । अस्मे इति । आयुः । नि । दिदीहि । प्रजाऽवत् ॥ १७ ॥

ᵛवह्निः स्तोत्राणां[3] वोढा । ᵛरेभः । स्तोतृनामैतत्। स्तोता ᵛउषसो ᵛविभातीः तमसोऽपनोदनेन प्रकाशमाना उषोदेवताः ᵛस्तवानः स्तुवन् ᵛवाचः वेदरूपायाः संबन्धीनि ᵛस्यूमना[4] स्यूमानि अनुस्यूतानि संततानि उक्थानि ᵛउदियर्ति[4] उद्गमयति उच्चारयति । अतो हे ᵛमघोनि मघवति[5] उषः ᵛअद्य अस्मिन् समये ᵛगृणते स्तुवते तस्मै पुरुषाय ᵛतदुच्छ । दृष्टिनिरोधकतया प्रसिद्धं नैशं तमो विवासय वर्जय । ᵛअस्मे अस्मभ्यं च ᵛप्रजावत् प्रजाभिः पुत्रपौत्रादिभिर्युक्तम् ᵛआयुः अन्नं ᵛनि

---

१. स–तमः अज्ञानम् अप प्रागात्; क्ष-ट-ठ–तमः रात्रिकृतध्वान्तमपि अप प्रागात् प्रकर्षेण अपगतम् । २. क्ष-ट-ठ–यस्माज्ज्योतिः औषसं तेजः एति आगच्छति अपि च उषाः सूर्याय यातवे यातुं गन्तुं पन्थां पन्थानं मार्गम् अरैक् अरिचत् रेचितवती कल्पितवती । अतो हे सखायो वयम् अगन्म । तस्मिन्देशे गच्छामो यत्र यस्मिन्देशे आयुः । अन्ननामैतत् । प्र तिरन्ते प्रपूर्वस्तिरतिर्वर्धनार्थः । उदारा अन्नेन प्रवर्धयन्ति; स–उषसः प्रकाशे सति सर्वजीवनव्यापारयोगः । तस्मात् परमात्मरूपतया स च जीवः तदेव ज्योतिः उपेति ज्योतिः आ एति आगच्छति यस्मिन्देशे गच्छामः यत्र यस्मिन्देशे सूर्याय यातवे रक्षकाय पन्थाम् अरैक् अरेचितवती । आयुः । अन्ननामैतत् । अन्नं प्र तिरन्ते । प्रपूर्वस्तिरतिर्वर्धनार्थः । उदारा दानेन प्रवर्धयन्ति । ३. क्ष-ट-ठ–स्तुतीनाम् ४. क्ष-ट-ठ–स्यूमना सामभिरनुस्यूतानि उक्थानि उदियर्ति । ५. क्ष-ट-ठ–धनवति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vदिदीहि नितरां प्रकाशय। दीदेतिश्छान्दसो दीप्तिकर्मा। प्रयच्छेत्यर्थः॥ स्यूमना। 'ष्यिु तन्तुसंताने'। 'अन्येभ्योऽपि दृश्यन्ते' इति दृशिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात् कर्मणि मनिन्। 'च्छ्वोः शूठ्०' इति ऊठ्। 'आङ्याजयारां चोपसंख्यानम्' (पा. म. ७. १. ३९. १) इति विभक्तेः आङादेशः। यद्वा। औणादिको भावे मक्। पामादिलक्षणो मत्वर्थीयो नः। बन्धनयुक्तानि इत्यर्थः। 'शेश्छन्दसि बहुलम्' इति शेर्लोपः। व्यत्ययेनाद्युदात्तत्वम्। वाचः। 'सावेकाचः०' इति ङस उदात्तत्वम्। इयर्ति। 'ऋ गतौ'। जौहोत्यादिकः[1]। 'अर्तिपिपर्त्योश्च' इति अभ्यासस्य इत्वम्। स्तवानः। 'ष्टुञ् स्तुतौ'। शानचि अदादित्वात् शपो लुक्। तस्य 'छन्दस्युभयथा' इति आर्धधातुकत्वेन ङित्त्वाभावात् गुणावादेशौ। व्यत्ययेनाद्युदात्तत्वम्। विभातीः[2]। 'शतुरनुमो नद्यजादी' इति ङीप उदात्तत्वम्[2]। गृणते। 'गृ शब्दे'। क्र्यादिकः। 'प्वादीनां ह्रस्वः'। पूर्वोक्तेन सूत्रेण विभक्तेरुदात्तत्वम्[3]। अस्मे। 'सुपां सुलुक्' इति चतुर्थ्याः शेआदेशः॥

**या गोमतीरुषसः सर्ववीरा व्युच्छन्ति दाशुषे मर्त्याय।**
**वायोरिव सूनृतानामुदर्के ता अश्वदा अश्नवत्सोमसुत्वा॥ १८॥**

याः। गोऽमतीः। उषसः। सर्वऽवीराः। विऽउच्छन्ति। दाशुषे। मर्त्याय।
वायोःऽइव। सूनृतानाम्। उत्ऽअर्के। ताः। अश्वऽदाः। अश्नवत्। सोमऽसुत्वा॥ १८॥

vदाशुषे हवींषि दत्तवते vमर्त्याय मनुष्याय यजमानाय vगोमतीः गोमत्यो बहुभिर्गोभिर्युक्ताः vसर्ववीराः सर्वैः सरणसमर्थैः[4] वीरैः शूरैर्युक्ताः vयाः vउषसः vव्युच्छन्ति तमो वर्जयन्ति। vवायोरिव वायुवच्छीघ्रं प्रवर्तमानानां vसूनृतानां स्तुतिरूपाणां वाचाम् vउदर्के समाप्तौ vअश्वदाः अश्वानां दात्रीः vताः उषसः vसोमसुत्वा सोमानामभिषोता यजमानः vअश्नवत् व्याप्नोतु॥ दाशुषे। 'दाश्र दाने'। 'दाश्वान्साह्वान्०' इति क्वसुप्रत्ययान्तो निपात्यते। चतुर्थ्येकवचने 'वसोः संप्रसारणम्' इति संप्रसारणम्। 'शासिवसिघसीनां च' इति षत्वम्। अश्नवत्। 'अशू व्याप्तौ'। व्यत्ययेन परस्मैपदम्। लेटि अडागमः। 'इतश्च लोपः०' इति इकारलोपः। सोमसुत्वा। 'षुञ् अभिषवे'। 'अन्येभ्योऽपि दृश्यन्ते' इति क्वनिप्। 'ह्रस्वस्य पिति०' इति तुक्॥

**माता देवानामदितेरनीकं यज्ञस्य केतुर्बृहती वि भाहि।**
**प्रशस्तिकृद्ब्रह्मणे नो व्युच्छा नो जने जनय विश्ववारे॥ १९॥**

माता। देवानाम्। अदितेः। अनीकम्। यज्ञस्य। केतुः। बृहती। वि। भाहि।
प्रशस्तिऽकृत्। ब्रह्मणे। नः। वि। उच्छ। आ। नः। जने। जनय। विश्वऽवारे॥ १९॥

हे उषस्त्वं vदेवानां vमाता जननी। उषसि[5] सर्वे देवाः स्तुत्या प्रबोध्यन्ते अतः सा तज्जननवती इत्युच्यते। अत एव vअदितेः देवानां मातुः vअनीकं प्रत्यनीकम्। प्रतिस्पर्धिनी त्वमित्यर्थः।

---

१. स–जौहोत्यादिकः श्लुः। २. क्ष-ट-ठ–'विभातीः.....उदात्तत्वम्' नास्ति। ३. क्ष-ट-ठ–शतुरनुमः इति विभक्तेरुदात्तत्वम्। ४. छ-द-घ-य-ल-श–शरणसमर्थैः। ५. क्ष-ट-ठ–उषसि हि।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यद्वा । दीव्यन्तीति देवा रश्मयः । तेषां निर्मात्री । अदितेरखण्डनीयाया भूमेरनीकं मुखम् । यथेन्द्रियाश्रयत्वात् मुखं प्रकाशकम् एवमुषाः भूमेः प्रकाशयित्रीत्यर्थः । [v]यज्ञस्य [v]केतुः केतयित्री ज्ञापयित्री [v]बृहती महती सती [v]वि [v]भाहि प्रकाशस्व । अपि च [v]प्रशस्तिकृत् सम्यक् स्तुतमिति प्रशंसनं कुर्वती [v]नः अस्मदीयाय [v]ब्रह्मणे मन्त्ररूपाय स्तोत्राय [v]द्युच्छ विवासय । तदनन्तरं हे [v]विश्ववारे सर्वैर्वरणीये उषः [v]नः अस्मान् [v]जने जनपदे [v]आ [v]जनय आभिमुख्येन प्रादुर्भावय अवस्थापयेत्यर्थः ॥ बृहती । ' बृहन्महतोरुपसंख्यानम् ' इति ङीप उदात्तत्वम् । प्रशस्तिकृत् । ' शंसु स्तुतौ ' । भावे क्तिन् । ' तितुत्र° ' इति इट्प्रतिषेधः । ' अनिदिताम्° ' इति नलोपः । तस्मिन्नुपपदे करोतेः ' क्विप् च ' इति क्विप् । जनय । ' जनी प्रादुर्भावे ' । णिचि उपधावृद्धिः । ' जनीजृष्क्नसुरञ्जोऽमन्ताश्च ' इति मित्त्वे ' मितां ह्रस्वः ' इति ह्रस्वत्वम् ॥

यच्चित्रमप्न उषसो वहन्तीजानाय शशमानाय भद्रम् ।
तन्नो मित्रो वरुणो ममहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ २० ॥

यत् । चित्रम् । अप्नः । उषसः । वहन्ति । ईजानाय । शशमानाय । भद्रम् ।
तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥२०॥

[v]चित्रं चायनीयं [v]अप्नः आप्तव्यं [v]यत् धनम् [v]उषसो [v]वहन्ति आनयन्ति [v]ईजानाय हविर्भिः इष्टवते [v]शशमानाय स्तुतिभिः संभजमानाय पुरुषाय [v]भद्रं भजनीयं तत् भवतीति शेषः । यदेनं सूक्तेनास्माभिः प्रार्थितं तत् मित्रादयः षड्देवताः [v]ममहन्तां पूजितं कुर्वन्तु ॥ अप्नः । ' आप्लृ व्याप्तौ ' । ' आपः कर्माख्यायां ह्रस्वो नुट् च वा ' इति बहुलग्रहणात् अकर्माख्यायामपि असुन्; धातोर्ह्रस्वो नुडागमश्च । ईजानाय । यजतेश्छन्दसि लिट् । ' लिटः कानज्वा ' । ' वचिस्वपि° ' इत्यादिना संप्रसारणम् । द्विर्वचनादि । शशमानाय । ' शश प्लुतगतौ ' । ताच्छीलिकश्चानश् । तस्य लसार्वधातुकत्वाभावात् अनुपदेशात् लसार्वधातुकस्वराभावे चित्स्वर एव शिष्यते ॥ ॥ ४ ॥

' इमा रुद्राय ' इति एकादशर्चं नवमं सूक्तं कुत्सस्यार्षम् । दशम्येकादश्यौ त्रिष्टुभौ । शिष्टा नव जगत्यः । रुद्रो देवता । तथा चानुक्रान्तम्–' इमा एकादश रौद्रं द्वित्रिष्टुबन्तम् ' इति ॥ शूलगवादिषु रुद्रदेवत्येषु कर्मस्वनेन सूक्तेन दिगुपस्थेया । तथा च सूत्रितं–' कद्रुद्रायेमा रुद्राया ते पितरिमा रुद्राय स्थिरधन्वने गिर इति सर्वरुद्रयज्ञेषु दिशामुपस्थानम् ' ( आश्व. गृ. ४. ९. २१ ) इति ॥

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः ।
यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरम् ॥ १ ॥

इमाः । रुद्राय । तवसे । कपर्दिने । क्षयत्ऽवीराय । प्र । भरामहे । मतीः ।
यथा । शम् । असत् । द्विऽपदे । चतुःऽपदे । विश्वम् । पुष्टम् । ग्रामे । अस्मिन् । अनातुरम् ॥१॥

रुद्राय । रोदयति सर्वमन्तकाले इति रुद्रः । यद्वा । रुत् संसाराख्यं दुःखम् । तत् द्रावयति अपगमयति विनाशयतीति रुद्रः । यद्वा । रुतः शब्दरूपाः उपनिषदः । ताभिर्द्रूयते गम्यते प्रतिपाद्यते

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति रुद्रः । यद्वा । रुत् शब्दात्मिका वाणी तत्प्रतिपाद्या आत्मविद्या वा । तामुपासकेभ्यो राति ददातीति रुद्रः । यद्वा । रुणद्धि आवृणोति इति रुत् अन्धकारादि । तत् द्णाति विदारयतीति रुद्रः । यद्वा । कदाचित् देवासुरसंग्रामे अग्न्यात्मको रुद्रो देवैर्निक्षिप्तं धनमपहृत्य निरगात् । असुरान् जित्वा देवा एनमन्विष्य दृष्ट्वा धनमपाहरन् । तदानीमरुदत् । तस्मात् रुद्र इत्याख्यायते । तथा च तैत्तिरीयकं- ' सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम् ' ( तै. सं. १. ५. १. १ ) इति । तस्मै Vरुद्राय Vमतीः मननीयाः Vइमाः स्तुतीः Vप्र Vभरामहे प्रकर्षेण निष्पादयामः । कीदृशाय । Vतवसे प्रवृद्धाय Vकपर्दिने जटिलाय Vक्षयद्वीराय क्षयन्तो विनश्यन्तो वीरा यस्मिन् तादृशाय । यद्वा । क्षयतिरैश्वर्यकर्मा । क्षयन्तः प्राप्तैश्वर्या वीरा मरुद्गणाः पुत्रा यस्य तस्मै । Vयथा येन प्रकारेण Vशं शमनीयानां रोगाणामुपशमनं Vद्विपदे अस्मदीयाय मनुष्याय Vचतुष्पदे गवाश्वप्रभृतये च Vअसत् भवेत् । तेन प्रकारेण स्तुतीः कुर्मः इत्यर्थः । अतः Vअस्मिन् अस्मदीये Vग्रामे वर्तमानं Vविश्वं सर्वं प्राणिजातम् Vअनातुरम् । आतुरा रुग्णाः तैः रहितं सत् Vपुष्टं प्रवृद्धं भवतु ॥ रुद्राय । ' रोदेर्णिलुक् च ' ( उ. सू. २. १७९ ) इति रक् । तवसे । तवतिर्वृद्ध्यर्थः सौत्रो धातुः । औणादिकोऽसिप्रत्ययः । क्षयद्वीराय । ' क्षि क्षये ' । लटः शतृ । ' छन्दस्युभयथा ' इति शतुः आर्धधातुकत्वेन अदुपदेशात् लसार्वधातुकानुदात्तत्वाभावात् तस्यैव स्वरः शिष्यते । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । असत् । ' अस भुवि ' । लेटि अडागमः । ' इतश्च लोपः० ' इति इकारलोपः । द्विपदे । द्वौ पादावस्य । ' संख्यासुपूर्वस्य ' इति पादशब्दस्य अन्त्यलोपः समासान्तः । चतुर्थ्येकवचने भसंज्ञायां ' पादः पत् ' इति पद्भावः । एकदेशविकृतस्य अनन्यत्वात् ( परिभा. ३७ ) ' द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ' इति उत्तरपदाद्युदात्तत्वम् । चतुष्पदे । स्वरवर्जं पूर्ववत् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । पूर्वपदं च ' त्रेः संख्यायाः ' ( फि. सू. २८ ) इत्याद्युदात्तम् ॥

रुद्रदेवत्ये पशौ वपापुरोडाशयोः ' मृळा नो रुद्र ' इत्यादिके द्वे अनुवाक्ये । तथा च सूत्रितं- ' मृळा नो रुद्रोत नो मयस्कृधि इति द्वे आ ते पितर्मरुतां सुम्नमेतु ' ( आश्व. श्रौ. ३. ८ ) इति ॥

मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।
यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥ २ ॥

मृळ । नः । रुद्र । उत । नः । मयः । कृधि । क्षयत्ऽवीराय । नमसा । विधेम । ते ॥ यत् । शम् । च । योः । च । मनुः । आऽयेजे । पिता । तत् । अश्याम । तव । रुद्र । प्रऽनीतिषु ॥२॥

हे Vरुद्र Vनः अस्मभ्यमस्मदर्थं Vमृळ त्वं सुखयिता भव । Vउत अपि च तदनन्तरं Vनः अस्माकं Vमयः सुखं Vकृधि कुरु । वयं च Vक्षयद्वीराय क्षपितसर्ववीरं प्राप्तैश्वर्यैर्मरुद्भिर्युक्तं वा । Vते त्वां Vनमसा हविर्लक्षणेनान्नेन नमस्कारेण वा Vविधेम परिचरेम । विधतिः परिचरणकर्मा । अपि च Vपिता उत्पादकः Vमनुः स्वकीयाभ्यः प्रजाभ्यः Vशं रोगाणां शमनं Vयोश्च भयानां यावनं च Vयत् एतत् द्वयं Vआयेजे देवेभ्यः सकाशात् प्राप्य दत्तवान् हे Vरुद्र Vतव Vप्रणीतिषु प्रकृष्टनयनेषु सत्सु Vतत् वयम् Vअश्याम व्याप्नुयाम ॥ मृळ । ' मृड सुखने ' । तौदादिकः । ' द्व्यचोऽतस्तिङ: ' इति संहितायां दीर्घः । कृधि । करोतेर्लोटि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । ' श्रुशृणुपृकृवृभ्यश्छन्दसि ' इति हेर्धिः । ' अतः कृकमि० ' इति मयसो विसर्जनीयस्य सत्वम् । क्षयद्वीराय ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'क्रियाग्रहणं कर्तव्यम्' इति कर्मणः संप्रदानत्वात् चतुर्थी। विधेम। 'विध विधाने'। तौदादिकः। आयेजे। 'यज देवपूजासंगतिकरणदानेषु'। लिटि संज्ञापूर्वकस्य विधेरनित्यत्वात् संप्रसारणाभावे एत्वाभ्यासलोपौ। अश्याम। 'अशू व्याप्तौ'। व्यत्ययेन परस्मैपदम्। 'बहुलं छन्दसि' इति विकरणस्य लुक्॥

अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढ्वः।
सुम्नायन्निद्विशो अस्माकमा चरारिष्टवीरा जुहवाम ते हविः॥ ३॥

अश्याम। ते। सुऽमतिम्। देवऽयज्यया। क्षयत्ऽवीरस्य। तव। रुद्र। मीढ्वः।
सुम्नऽयन्। इत्। विशः। अस्माकम्। आ। चर। अरिष्टऽवीराः। जुहवाम। ते। हविः॥३॥

हे vमीढ्वः सेक्तः कामाभिवर्षक नित्यतरुण वा vरुद्र vक्षयद्वीरस्य क्षपितप्रतिपक्षस्य मरुद्भिर्युक्तस्य वा vतव vसुमतिं शोभनां कल्याणीमनुग्रहात्मिकां बुद्धिं vते त्वत्संबन्धिनो वयं vदेवयज्यया देवयागेन त्वद्देवत्येन यज्ञेन vअश्याम प्राप्नवाम[1]। त्वं च vअस्माकं vविशः प्रजाः अभिलक्ष्य vआ vचर आगच्छ। किं कुर्वन्। vसुम्नायन्नित्। सुम्नमिति सुखनाम। तासां प्रजानां सुखमिच्छन्नेव सुखप्रद एव भवेत्यर्थः। ततो वयम् vअरिष्टवीराः। वीर्याज्जायन्ते इति वीराः प्रजाः। अरिष्टा अहिंसिता वीरा येषां तथाभूताः सन्तः vते तुभ्यं vहविः चरुपुरोडाशादिकं vजुहवाम चोदिते आधारे प्रक्षिपाम॥ सुमतिम्। मतिर्मननम्। शोभनं मननं यस्यां बुद्धौ सा सुमतिः। 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्। देवयज्यया। 'छन्दसि निष्टर्क्य०' इत्यादौ यजेः यप्रत्ययो निपात्यते स्त्रीलिङ्गता च। मीढ्वः। 'मिह सेचने'। 'दाश्वान्साह्वान्मीढ्वान्[2]' इति क्वसुप्रत्ययान्तो निपातितः। संबुद्धौ 'मतुवसो रुः०' इति रुत्वम्। सुम्नायन्। सुम्नं परेषामिच्छति। 'छन्दसि परेच्छायामपि' इति क्यच्। 'न च्छन्दस्यपुत्रस्य' इति ईत्वदीर्घयोर्निषेधः। 'देवसुम्नयोर्यजुषि काठके' (पा. सू. ७. ४. ३८) इति विधीयमानम् आत्वं व्यत्ययेन अत्रापि द्रष्टव्यम्॥

त्वेषं वयं रुद्रं यज्ञसाधं वङ्कुं कविमवसे नि ह्वयामहे।
आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या वृणीमहे॥ ४॥

त्वेषम्। वयम्। रुद्रम्। यज्ञऽसाधम्। वङ्कुम्। कविम्। अवसे। नि। ह्वयामहे।
आरे। अस्मत्। दैव्यम्। हेळः। अस्यतु। सुऽमतिम्। इत्। वयम्। अस्य। आ। वृणीमहे॥४॥

vअवसे रक्षणाय vरुद्रं महादेवं vनि vह्वयामहे नितरामाह्वयामः। कीदृशम्। vत्वेषं दीप्तं vयज्ञसाधं यज्ञस्य साधयितारम्। एष हि यज्ञं स्विष्टं करोति। तथा च तैत्तिरीयके–'देवा वै यज्ञाद्रुद्रमन्तरायन्' इत्युपक्रम्याम्नातं–'स्विष्टं वै न इदं भविष्यति यदिमं राधयिष्याम इति तस्मिंस्विष्टकृतः स्विष्टकृत्त्वम्' (तै. सं. २. ६. ८. ३) इति। vवङ्कुं कुटिलगन्तारं[3] vकविं क्रान्तदर्शिनम्।

---

१. क्ष-ट-ठ–प्राप्नु या। २. क्ष-ट-ठ–°मीढ्वांश्च। ३. क्ष-ट–कुटिलं गन्तारम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स च रुद्रो ᵛदैव्यं देवस्य[1] द्योतमानस्य[2] संबन्धिनं ᵛहेळः क्रोधं ᵛअस्मत् ᵛआरे अस्मत्तो दूरदेशे ᵛअस्यतु प्रेरयतु । ᵛअस्य महादेवस्य ᵛसुमतिमित् शोभनामनुग्रहरूपां बुद्धिमेव ᵛवयम् ᵛआ ᵛवृणीमहे आभिमुख्येन संभजामहे ॥ यज्ञसाधम् । यज्ञं साधयतीति यज्ञसात् । ' षिधू संराद्धौ ' । ' सिध्यतेरपारलौकिके ' इति आत्वम् । यद्वा । ' राध साध संसिद्धौ ' । अस्मात् ण्यन्तात् क्विप् । वङ्कुम् । ' वकि कौटिल्ये ' । औणादिक उप्रत्ययः । नि ह्वयामहे । ' निसमुपविभ्यो ह्वः ' इत्यात्मनेपदम् । दैव्यम् । ' देवाद्यञञौ ' ( पा. सू. ४. १. ८५. ३ ) इति प्राग्दीव्यतीयो यञ् । अस्यतु । ' असु क्षेपणे ' । दैवादिकः । वृणीमहे । 'वृङ् संभक्तौ ' । क्रयादिकः ॥

दिवो वराहमरुषं कपर्दिनं त्वेषं रूपं नमसा नि ह्वयामहे ।
हस्ते बिभ्रद्भेषजा वार्याणि शर्म वर्म च्छर्दिरस्मभ्यं यंसत् ॥ ५ ॥

दिवः । वराहम् । अरुषम् । कपर्दिनम् । त्वेषम् । रूपम् । नमसा । नि । ह्वयामहे ।
हस्ते । बिभ्रत् । भेषजा । वार्याणि । शर्म । वर्म । छर्दिः । अस्मभ्यम् । यंसत् ॥ ५ ॥

ᵛवराहं वराहारम् उत्कृष्टभोजनम् । यद्वा । वराहवत् दृढाङ्गम् । ᵛअरुषम् आरोचमानं ᵛकपर्दिनं जटाभिर्युक्तं ᵛत्वेषं तेजसा दीप्यमानं ᵛरूपं निरूपणीयं वेदान्तैरधिगम्यम् एवंभूतं रुद्रं ᵛनमसा हविर्लक्षणेनान्नेन नमस्कारेण वा ᵛदिवः द्युलोकसकाशात् ᵛनि ᵛह्वयामहे नितरामाह्वयामः । सः[3] आहूतो रुद्रः ᵛहस्ते स्वकीये बाहौ ᵛवार्याणि सर्वैः वरणीयानि[4] ᵛभेषजा भैषज्यानि रोगशमनहेतुभूतानि ᵛबिभ्रत् धारयन् ᵛअस्मभ्यं स्तोतृभ्यः ᵛशर्म आरोग्यलक्षणं सुखं ᵛवर्म आयुधानां निवारकं कवचं ᵛछर्दिः । गृहनामैतत् । गृहं च ᵛयंसत् प्रयच्छतु ॥ बिभ्रत् । 'डुभृञ् धारणपोषणयोः' । जौहोत्यादिकः । लटः शतृ । ' भृञामित् ' इति अभ्यासस्य इत्वम् । भेषजा । ' भिषज् चिकित्सायाम् ' । कण्ड्वादिः । पचाद्यच् । अतोलोपयलोपौ । ' °सुमङ्गलभेषजाच्च ' ( पा. सू. ४. १. ३० ) इति निपातनात् रूपसिद्धिः । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । वार्याणि । ' वृङ् संभक्तौ ' । ' ऋहलोर्ण्यत् ' । ' ईडवन्द° ' इत्याद्युदात्तत्वम् । छर्दिः । ' उछृदिर् दीप्तिदेवनयोः ' । छृद्यते दीप्यते सुवर्णादिभिर्धनैः प्रकाश्यते इति छर्दिर्गृहम् । ' अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्य इसिः ' ( उ. सू. २. २६५ ) । यंसत् । ' यम उपरमे ' । लेटि अडागमः । ' सिब्बहुलं लेटि ' इति सिप् । ' इतश्च लोपः° ' इति इकारलोपः ॥ ॥ ५ ॥

इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनम् ।
रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ ॥ ६ ॥

इदम् । पित्रे । मरुताम् । उच्यते । वचः । स्वादोः । स्वादीयः । रुद्राय । वर्धनम् ।
रास्व । च । नः । अमृत । मर्तऽभोजनम् । त्मने । तोकाय । तनयाय । मृळ ॥ ६ ॥

---

१. क्ष-ट-ठ-' देवस्य ' नास्ति । २. क्ष-ट-ठ-द्योतमानस्य स्वस्य । ३. क्ष-ट-ठ-स-स च ।
४. क्ष-ट-ठ-स-वरणीयानि संभजनीयानि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vइदं स्तुतिलक्षणं vवचः vमरुताम् एकोनपञ्चाशत्संख्याकानां देवविशेषाणां[1] vपित्रे जनकाय vरुद्राय ईश्वराय vउच्यते उच्चार्यते । कीदृशम् । vस्वादोः vस्वादीयः रसवतो मधुघृतादेरपि स्वादुतरम् । अतिशयेन हर्षजनकमित्यर्थः । vवर्धनं स्तुत्यस्य प्रवर्धकम् । स्तोत्रेण हि देवता हृष्टा सती प्रवर्धते[2] । रुद्रस्य च मरुतां पितृत्वम् एवम्[3] आख्यायते[3] । पुरा कदाचिदिन्द्रः असुराञ्जिगाय । तदानीं दितिः असुरमाता इन्द्रहननसमर्थं पुत्रं कामयमाना तपसा भर्तुः[4] सकाशाद्गर्भं लेभे । इमं वृत्तान्तमवगच्छन्निन्द्रो वज्रहस्तः सन् सूक्ष्मरूपो भूत्वा तस्या उदरं प्रविश्य तं गर्भं सप्तधा बिभेद । पुनरप्येकैकं सप्तखण्डमकरोत् । ते सर्वे गर्भैकदेशा योनेर्निर्गत्य अरुदन्[5] । एतस्मिन्नवसरे[6] लीलार्थं गच्छन्तौ पार्वतीपरमेश्वरौ इमान् ददृशतुः । महेशं प्रति पार्वती एवमवोचत् । इमे मांसखण्डा यथा प्रत्येकं पुत्राः संपद्यन्तामेवं त्वया कार्यं मयि[7] चेत्प्रीतिरस्तीति[8] । स च महेश्वरः[9] तान् समानरूपान् समानवयसः समानालंकारान् पुत्रान् कृत्वा गौर्यै प्रददौ तवेमे पुत्राः सन्तु इति । अतः सर्वेषु मारुतेषु सूक्तेषु मरुतो रुद्रपुत्रा इति स्तूयन्ते । रौद्रेषु च मरुतां पिता रुद्र इति । अपि च हे vअमृत मरणरहित रुद्र vमर्तभोजनं[10] मर्तानां मनुष्याणां भोगपर्याप्तमन्नं[10] vनः अस्मभ्यं vरास्व प्रयच्छ । तथा vत्मने आत्मने[11] । द्वितीयार्थे चतुर्थी । मां vतोकाय तोकं पुत्रं vतनयाय तनयं तत्पुत्रं च vमृळ सुखय ॥ पित्रे । ' उदात्तयणः° ' इति विभक्तेरुदात्तत्वम् । रास्व । ' रा दाने ' । व्यत्ययेनात्मनेपदम् । त्मने । ' मन्त्रेष्वाङ्यादेरात्मनः ' इत्यत्र ' आङोऽन्यत्रापि छन्दसि दृश्यते ' ( का. ६. ४. १४१. १ ) इति वचनादात्मनः आकारलोपः ॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥ ७ ॥

मा । नः । महान्तम् । उत । मा । नः । अर्भकम् । मा । नः । उक्षन्तम् । उत । मा । नः । उक्षितम् ।
मा । नः । वधीः । पितरम् । मा । उत । मातरम् । मा । नः । प्रियाः । तन्वः । रुद्र । रिरिषः ॥ ७ ॥

हे vरुद्र vनः अस्माकं मध्ये vमहान्तं वृद्धं vमा vवधीः मा हिंसीः । vउत अपि च vनः अस्माकम् vअर्भकं बालं vमा हिंसीः । तथा vनः अस्माकं मध्ये vउक्षन्तं सेक्तारं मध्यवयस्कं युवानं vमा वधीः[12] । vउत अपि च vनः अस्माकम् vउक्षितं गर्भरूपेण स्त्रीषु निषिक्तमपत्यं vमा वधीः । तथा vनः अस्माकं vपितरं जनकं vमा वधीः । vउत अपि च vमातरं जननीं vमा वधीः । तथा vनः अस्माकं vप्रियाः स्नेहविषयाः vतन्वः शरीराणि तनूषु भवाः प्रजा वा हे रुद्र vमा vरिरिषः मा हिंसीः ॥ वधीः । हन्तेर्माङि ' लुङि च ' इति वधादेशः । स चादन्तः । सिच इट् । अतो लोपस्य स्थानिवद्भावात्[13] वृद्ध्यभावः । रिरिषः । ' रिष हिंसायाम् ' । ण्यन्तात् लुङि चङि णिलोपोपधाह्रस्वत्वादीनि । छान्दसः पदकालीनोऽभ्यासह्रस्वः ॥

---

१. क्ष-ट-ठ–देवताविशेषाणाम् । २. क्ष-ट-स–प्रवर्तते । ३. स–आम्नायते; न–एवमाम्नायते । ४. क्ष-ट-ठ–पत्युः । ५. क्ष-ट-ठ-स–भृशमरुदन् । ६. क्ष-ट-ठ–एतस्मिन्नन्तरे । ७. न-स–महेश्वरम् । ८. च-छ-ण-फ–चेत् त्वत्प्रीतिरस्ति; द-ध–अपि चेत् त्वत्प्रीतिरस्ति । ९. क्ष-ट-ठ–महेशः; न-परमेश्वरः । १०. क्ष-ट-ठ–मर्तभोजनं मर्तानां भोजनं ( ठ–' मर्तानां भोजनं ' नास्ति ) मनुष्याणां भोक्तुं पर्याप्तमन्नम् । ११. क्ष-ट-ठ– आत्मने मह्यम् । १२. क्ष-ट-ठ–हिंसीः । १३. क्ष-ट-ठ–स्थानिवत्त्वात् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मा नस्तोके तनये मा न आयौ मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ ८ ॥

मा । नः । तोके । तनये । मा । नः । आयौ । मा । नः । गोषु । मा । नः । अश्वेषु । रिरिषः ।
वीरान् । मा । नः । रुद्र । भामितः । वधीः । हविष्मन्तः । सदम् । इत् । त्वा । हवामहे ॥ ८ ॥

हे [v]रुद्र [v]नः अस्माकं तोकादिविषये [v]मा [v]रिरिषः मा हिंसीः । तोकशब्दः पुत्रवाची । तनयस्तत्पुत्रः । आयुः इति अन्तोदात्तः[1] मनुष्यनाम । पुत्रपौत्रव्यतिरिक्तो योऽस्मदीयः[2] मनुष्यस्तस्मिन् [v]गोषु पश्वादिषु [v]अश्वेषु च मा रिरिषः हिंसां मा कृथाः[2] । तथा हे रुद्र [v]वीरान् विक्रान्तान् शौर्योपेतान् अस्मदीयान्[3] [v]भामितः क्रुद्धः सन् [v]मा [v]वधीः मा हिंसीः । वयं च [v]हविष्मन्तः हविर्भिर्युक्ताः सन्तः [v]सदमित् सर्वदैव [v]त्वां [v]हवामहे आह्वयामहे ॥ आयौ । ' इण् गतौ ' । ' छन्दसीणः ' इति उण्प्रत्ययः । भामितः । ' भाम क्रोधे ' । ' क्तोऽधिकरणे च° ' इति कर्तरि क्तः । हवामहे । ह्वेञो लटि ' बहुलं छन्दसि ' इति संप्रसारणम् ॥

देवसुवां हविःषु रुद्रस्य पशुपतेर्यागे ' उप ते स्तोमान् ' इत्यादिके याज्यानुवाक्ये । सूत्रितं च–' उप ते स्तोमान्पशुपा इवाकरमिति द्वे ' ( आश्व. श्रौ. ४. ११ ) इति ॥

उप ते स्तोमान्पशुपाइवाकरं रास्वा पितर्मरुतां सुम्नमस्मे ।
भद्रा हि ते सुमतिर्मृळयत्तमाथा वयमव इत्ते वृणीमहे ॥ ९ ॥

उप । ते । स्तोमान् । पशुपाःऽइव । आ । अकरम् । रास्व । पितः । मरुताम् । सुम्नम् । अस्मे इति ॥ भद्रा । हि । ते । सुऽमतिः । मृळयत्ऽतमा । अथ । वयम् । अवः । इत् । ते । वृणीमहे ॥ ९ ॥

हे रुद्र [v]स्तोमान् स्तुतिरूपान्मन्त्रान् [v]ते तुभ्यम् [v]उप [v]आ [v]अकरम् । उपाकरोमि समर्पयामि । तत्र दृष्टान्तः । [v]पशुपाइव । यथा पशूनां पालयिता गोपः प्रातःकाले स्वस्मै समर्पितान् पशून् सायंकाले स्वामिभ्यः प्रत्यर्पयति एवं त्वत्सकाशाल्लब्धान् स्तुतिरूपान्मन्त्रान् स्तुतिसाधनतया तुभ्यं प्रत्यर्पयामीत्यर्थः । हे [v]मरुतां [v]पितः मरुत्संज्ञानां[4] देवानाम् उत्पादक[5] रुद्र नोऽस्मभ्यं [v]सुम्नं सुखं [v]रास्व देहि । अपि च [v]ते त्वदीया [v]सुमतिः कल्याणी[6] बुद्धिः [v]मृळयत्तमा अतिशयेन सुखयितृतमा । अत एव [v]भद्रा भजनीया [v]हि । यस्मादेवं तस्मात् [v]अथ अनन्तरं [v]वयं [v]ते त्वदीयम् [v]अवः रक्षणं [v]वृणीमहे संभजामहे ॥ अकरम् । ' छन्दसि लुङ्लङ्लिटः ' इति वर्तमाने लुङ् । ' कृमृदरुहिभ्यः° ' इति च्लेरङादेशः । ' ऋदृशोऽङि गुणः ' । पितर्मरुताम् । ' परमपि च्छन्दसि ' इति परस्याः षष्ठ्याः पूर्वामन्त्रितानुप्रवेशे सति ' आमन्त्रितस्य च ' इति पदद्वयमप्यनुदात्तम् । अस्मे । ' सुपां सुलुक्° '

---

१. क्ष-ट-ठ–अन्तोदात्तम् । २. स–योऽस्मदीयो मनुष्यस्तास्मिन् हिंसां मा कृथाः । अपि च नः अस्माकं गोषु अश्वेषु च हिंसां मा कृथाः । ३. क्ष-ट-ठ-स–अस्मदीयान् जनान् । ४. क्ष-ट-ठ–मरुत्संज्ञकानाम् । ५. क्ष-ट-ठ–जनक । ६. क्ष-ट-ठ–कल्याणा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति चतुर्थीबहुवचनस्य शेआदेशः । मृळयत्तमा । ' मृड सुखने ' । अस्मात् ण्यन्तात् लटः शतृ । तस्य ' छन्दस्युभयथा ' इति आर्धधातुकत्वात् लसार्वधातुकानुदात्तत्वाभावे प्रत्ययस्वरः शिष्यते ॥

आरे ते गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु ।
मृळा च नो अधि च ब्रूहि देवाधा च नः शर्म यच्छ द्विबर्हाः ॥ १० ॥

आरे । ते । गोऽघ्नम् । उत । पुरुषऽघ्नम् । क्षयत्ऽवीर । सुम्नम् । अस्मे इति । ते । अस्तु । मृळ । च । नः । अधि । च । ब्रूहि । देव । अध । च । नः । शर्म । यच्छ । द्विऽबर्हाः ॥१०॥

हे [v]क्षयद्वीर क्षपितसर्वशत्रुजन रुद्र [v]ते त्वदीयं [v]गोघ्नं यद्गोहननं यद्वा गोहननसाधनमायुधम् [v]उत अपि च [v]पुरुषघ्नं पुरुषहननं तत्साधनमायुधं वा तदुभयम् [v]आरे दूरे अस्मत्तो विप्रकृष्टदेशे भवतु । [v]अस्मे अस्मासु [v]ते त्वदीयं [v]सुम्नं सुखम् [v]अस्तु भवतु । अपि च [v]नः अस्माकं [v]मृळ सुखसिद्ध्यर्थं प्रसन्नो भव । हे [v]देव द्योतमान रुद्र [v]नः अस्मान् [v]अधि [v]ब्रूहि [v]च । अधिवचनं पक्षपातेन वचनं ' ब्राह्मणायाधि ब्रूयात् ' ( तै. सं. २. ५. ११. ९ ) इति यथा । [v]अध [v]च अथ अनन्तरं च [v]द्विबर्हाः द्वयोः स्थानयोः पृथिव्यामन्तरिक्षे च परिवृढः । यद्वा । द्वयोर्दक्षिणोत्तरमार्गयोः ज्ञानकर्मणोर्वा परिवृढः स्वामी । स त्वं [v]नः अस्मभ्यं [v]शर्म सुखं [v]यच्छ देहि ॥ गोघ्नम् । ' हन हिंसागत्योः ' । अस्मात् ' घञर्थे कविधानम् ' इति भावे करणे वा कप्रत्ययः । ' गमहन° ' इत्युपधालोपः । ' हो हन्तेः° ' इति कुत्वम् । द्विबर्हाः । ' बृह बृहि वृद्धौ ' । द्वयोः स्थानयोः बर्हते प्रवर्धते इति द्विबर्हाः । असुन् । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

अवोचाम नमो अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान् ।
तन्नो मित्रो वरुणो ममहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ११ ॥

अवोचाम । नमः । अस्मै । अवस्यवः । शृणोतु । नः । हवम् । रुद्रः । मरुत्वान् ।
तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥११॥

[v]अवस्यवः[1] अवः अन्नं रक्षणं वा[1] इच्छन्तो वयम् [v]अवोचाम एतत्सूक्तरूपं स्तोत्रमवादिष्म । [v]अस्मै रुद्राय [v]नमः नमस्कारोऽस्तु । [v]मरुत्वान् मरुद्भिः स्वकीयैः पुत्रैर्युक्तः [v]रुद्रः च [v]नः अस्माकं [v]हवम् आह्वानं [v]शृणोतु स्वीकरोतु । यदस्माभिरुक्तं[2] [v]नः अस्मदीयं तत् सर्वं मित्रादयः षड्देवताः [v]ममहन्तां पूजयन्तु[2] । उतशब्दोऽप्यर्थे ॥ अवोचाम । 'ब्रूञ् व्यक्तायां वाचि '। लुङि ' ब्रुवो वचिः '। 'अस्यतिवक्ति°' इत्यादिना च्लेरङादेशः । ' वच उम् ' इति उमागमः । अवस्यवः । ' अव रक्षणे '। भावे असुन् । ' सुप आत्मनः क्यच् ' । ' क्याच्छन्दसि ' इति उप्रत्ययः । हवम् । ' भावेऽनुपसर्गस्य '

---

१. क्ष-ट-ठ–अवस्यवोऽवनं रक्षणम् । २. क्ष-ट-ठ–यदस्माभिरुक्तं तन्मित्रादयो ममहन्ताम् ( ठ–महयन्ताम् )।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति अप् संप्रसारणं च । मरुत्वान् । ' झयः ' इति मतुपो वत्वम् । ' तसौ मत्वर्थे ' इति भत्वेन पदत्वाभावाज्जश्त्वाभावः ॥ ॥ ६ ॥

' चित्रम् ' इति षड्चं दशमं सूक्तं कुत्सस्यार्षं[1] त्रैष्टुभं सूर्यदेवताकम्[2]। तथा चानुक्रान्तं–' चित्रं षट् सौर्यम् ' इति । आश्विनशस्त्रे सूर्योदयादूर्ध्वं सौर्याणि सूक्तानि शंसनीयानि। तत्रेदं सूक्तं शंसनीयम्। सूत्रितं च–' चित्रं देवानां नमो मित्रस्य ' ( आश्व. श्रौ. ६. ५ ) इति ॥ आदितस्तिस्र ऋचः सौर्यस्य पशोः वपापुरोडाशहविषां क्रमेणानुवाक्याः । ततो द्वे वपापुरोडाशयोः याज्ये । तथा च सूत्रितं–' चित्रं देवानामुदगादनीकमिति पञ्च शं नो भव चक्षसा शं नो अह्ना ' ( आश्व. श्रौ. ३. ८ ) इति । अतिमूर्तिनाग्नि एकाहे शुनासीर्ये[3] पर्वणि च सूर्यस्य हविषः ' चित्रं देवानाम् ' इत्येषा याज्या । सूत्रितं च–' तरणिर्विश्वदर्शतः चित्रं देवानामुदगादनीकमिति याज्यानुवाक्याः ' ( आश्व. श्रौ. ९. ८ ) इति ॥

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥ १ ॥

चित्रम् । देवानाम् । उत् । अगात् । अनीकम् । चक्षुः । मित्रस्य । वरुणस्य । अग्नेः ।
आ । अप्राः । द्यावापृथिवी इति । अन्तरिक्षम् । सूर्यः । आत्मा । जगतः । तस्थुषः । च ॥१॥

[v]देवानाम् । दीव्यन्तीति देवा रश्मयः तेषाम् । देवजनानामेव वा । [v]अनीकं समूहरूपं [v]चित्रम् आश्चर्यकरं सूर्यस्य मण्डलम् [v]उदगात् उदयाचलं प्राप्तमासीत्[4]। कीदृशम् । [v]मित्रस्य [v]वरुणस्य[5] [v]अग्नेः च[6] । उपलक्षणमेतत् । तदुपलक्षितानां[7] जगतां [v]चक्षुः प्रकाशकं चक्षुरिन्द्रियस्थानीयं वा । उदयं प्राप्य च [v]द्यावापृथिवी दिवं पृथिवीमन्तरिक्षं च [v]अप्राः । स्वकीयेन तेजसा [v]आ समन्तात् अपूरयत् । ईदृग्भूतमण्डलान्तर्वर्ती [v]सूर्यः अन्तर्यामितया सर्वस्य प्रेरकः परमात्मा[8] [v]जगतः जङ्गमस्य [v]तस्थुषः स्थावरस्य [v]च [v]आत्मा स्वरूपभूतः । स हि सर्वस्य स्थावरजङ्गमात्मकस्य कार्यवर्गस्य कारणम् । कारणाच्च कार्यं नातिरिच्यते[8] । तथा च पारमर्षं सूत्रं–' तदनन्यत्वमारम्भणशब्दादिभ्यः ' ( ब्र. सू. २. १. १४ ) इति । यद्वा । स्थावरजङ्गमात्मकस्य सर्वस्य प्राणिजातस्य जीवात्मा । उदिते हि सूर्ये मृतप्रायं सर्वं जगत् पुनश्चेतनयुक्तं सदुपलभ्यते । तथा च श्रूयते–' योऽसौ तपन्नुदेति स सर्वेषां भूतानां प्राणानादायोदेति ' ( तै. आ. १. १४. १ ) इति ॥ आप्राः[9] । ' प्रा पूरणे '। लङि पुरुषव्यत्ययः । अदादित्वात् शपो लुक् । जगतः । ' गमेर्द्वे च ' ( पा. सू. ३. २. १७८. ३ ) इति क्विप् द्विर्वचनम् । ' गमः कौ ' इति अनुनासिकलोपः । तस्थुषः । तिष्ठतेर्लिटः क्वसुः । द्विर्वचने[10] ' शर्पूर्वाः खयः ' । षष्ठ्येकवचने ' वसोः संप्रसारणम् ' इति संप्रसारणम् । ' आतो लोप इटि च ' इति आकारलोपः । ' शासिवसि° ' इति षत्वम् ॥

---

१. क्ष-ट-ठ–' कुत्सस्यार्षम् ' नास्ति । २. क्ष-ट-ठ–सूर्यदेवत्यम् । ३. क्ष-ट-ठ–शुनासीरीये । ४. क्ष-ट-ठ–प्राप्तमभूत् । ५. क्ष-ट-ठ–वरुणस्याग्नेश्चक्षुः । ६. क्ष-ट-ठ-न-स–एतदुपलक्षितानाम् । ७. क्ष-ट-ठ–परमेश्वरः । ८. क्ष-ट-ठ–न व्यतिरिच्यते । ९. क्ष-ट–अप्राः । १०. क्ष-ट– द्विर्वचनम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात् ।
यत्रा नरो देवयन्तो युगानि वितन्वते प्रति भद्राय भद्रम् ॥ २ ॥

सूर्यः । देवीम् । उषसम् । रोचमानाम् । मर्यः । न । योषाम् । अभि । एति । पश्चात् ।
यत्र । नरः । देवऽयन्तः । युगानि । विऽतन्वते । प्रति । भद्राय । भद्रम् ॥ २ ॥

[v]सूर्यः [v]देवीं दानादिगुणयुक्तां [v]रोचमानां दीप्यमानाम् [v]उषसं [v]पश्चात् [v]अभ्येति उषसः प्रादुर्भावानन्तरं तामभिलक्ष्य गच्छति । तत्र दृष्टान्तः । [v]मर्यो [v]न [v]योषाम् । यथा कश्चिन्मनुष्यः शोभनावयवां गच्छन्तीं युवतिं स्त्रियं सततमनुगच्छति तद्वत् । [v]यत्र यस्यामुषसि जातायां [v]देवयन्तः देवं द्योतमानं सूर्यं यष्टुमिच्छन्तः [v]नरः यज्ञस्य नेतारो यजमानाः [v]युगानि । युगशब्दः कालवाची । तेन च तत्र कर्तव्यानि कर्माणि लक्ष्यन्ते यथा दर्शपूर्णमासौ इति । अग्निहोत्रादीनि कर्माणि [v]वितन्वते विस्तारयन्ति । यद्वा । देवयन्तो देवयागार्थं धनमात्मन इच्छन्तो यजमानपुरुषा युगानि हलावयवभूतानि कर्षणाय वितन्वते प्रसारयन्ति । तामुषसमनुगच्छतीत्यर्थः । एवंविधं [v]भद्रं कल्याणं सूर्यं [v]प्रति [v]भद्राय कल्याणरूपाय कर्मफलाय[1] स्तुमः इति शेषः । यद्वा । देवयन्तः[2] देवकामा यजमाना युगानि युग्मानि भूत्वा पत्नीभिः सहिताः सन्तो भद्रं कल्याणम्[3] अग्निहोत्रादिकं कर्म भद्राय तत्फलार्थं प्रति प्रत्येकं यस्यामुषसि प्रवृत्तायां वितन्वते विस्तारयन्ति ॥ मर्यः । 'मृङ् प्राणत्यागे' । 'छन्दसि निष्टर्क्य०' इत्यादौ यत्प्रत्ययान्तो निपात्यते । 'यतोऽनावः' इत्याद्युदात्तत्वम् । युगानि । युजेः कर्मणि घञ् । युगशब्दः कालविशेषे स्थाद्युपकरणे च (का. ६. १. १६०) इति उञ्छादिषु पाठात् गुणाभावः अन्तोदात्तत्वं च । वितन्वते । 'तनु विस्तारे' । 'तनादिकृञ्भ्य उः' । सहेति योगविभागात् तिङोपसर्गस्य[4] समासे सति 'समासस्य' इत्यन्तोदात्तत्वम् ॥

भद्रा अश्वा हरितः सूर्यस्य चित्रा एतग्वा अनुमाद्यासः ।
नमस्यन्तो दिव आ पृष्ठमस्थुः परि द्यावापृथिवी यन्ति सद्यः ॥ ३ ॥

भद्राः । अश्वाः । हरितः । सूर्यस्य । चित्राः । एतऽग्वाः । अनुऽमाद्यासः ।
नमस्यन्तः । दिवः । आ । पृष्ठम् । अस्थुः । परि । द्यावापृथिवी इति । यन्ति । सद्यः ॥३॥

[v]भद्राः कल्याणाः । अश्वाः एतग्वाः इत्येतदुभयम्[5] अश्वनाम । तत्रैकं क्रियापरं योजनीयम् । [v]अश्वाः तुरगा व्यापनशीला वा [v]हरितः हर्तारः [v]चित्राः विचित्रावयवाः [v]अनुमाद्यासः अनुक्रमेण सर्वे स्तुत्या मादनीया एवंभूताः [v]सूर्यस्य [v]एतग्वाः अश्वाः । यद्वा । एतं[6] गन्तव्यं मार्गं[7] गन्तारोऽश्वाः । एतं शबलवर्णं वा प्राप्नुवन्तोऽश्वाः । [v]नमस्यन्तः अस्माभिः नमस्यमानाः सन्तः [v]दिवः अन्तरिक्षस्य [v]पृष्ठम् उपरिप्रदेशं पूर्वभागलक्षणम् [v]आ [v]अस्थुः आतिष्ठन्ति प्राप्नुवन्ति[8] । यद्वा । हरितो रसहरणशीलाः[9] रश्मयः

---

१. क्ष-ट-ठ-फलाय । २. क्ष-ट-ठ-'देवयन्तः' नास्ति । ३. क्ष-ट-ठ-'कल्याणम्' नास्ति । ४. क्ष-ट-वीत्युपसर्गस्य । ५. क्ष-ट-ठ-इत्युभयम् । ६. श-एतं एतव्यम् । ७. क्ष-ट-वा; ठ-'मार्गम्' नास्ति । ८. क्ष-ट-ठ-'प्राप्नुवन्ति' नास्ति; स-आप्नुवन्ति । ९. क्ष-ट-ठ-न-स-हरणशीलाः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

भद्रादिलक्षणविशिष्टाः[1] दिवः पृष्ठं नभःस्थलमातिष्ठन्ति । आस्थाय च ᵛद्यावापृथिवी द्यावापृथिव्यौ ᵛसद्यः तदानीमेव एकेनाह्ना ᵛपरि ᵛयन्ति परितो गच्छन्ति व्याप्नुवन्तीत्यर्थः ॥ अश्वाः । 'अशू व्याप्तौ' । 'अशिप्रुषि०' इत्यादिना क्वन् । एतग्वाः । 'इण् गतौ' । 'असिहसि०' इत्यादिना कर्मणि तन्प्रत्ययः । गमेरौणादिको भावे ड्वप्रत्ययः । एतमेतव्यं प्रति ग्वो गमनं येषां ते तथोक्ताः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । अनुमाद्यासः । 'मदि स्तुतौ' । अस्मात् ण्यन्तात् 'अचो यत्' । 'यतोऽनावः' इत्याद्युदात्तत्वम् । नमस्यन्तः । 'नमोवरिवः०' इति पूजार्थे क्यच् । व्यत्ययेन कर्मणि कर्तृप्रत्ययः । अस्थुः । तिष्ठतेश्छान्दसो वर्तमाने लुङ् । 'गातिस्था०' इति सिचो लुक् । 'आतः' इति झेः जुस् ॥

तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्वितंतं सं जभार ।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥ ४ ॥

तत् । सूर्यस्य । देवऽत्वम् । तत् । महिऽत्वम् । मध्या । कर्तोः । विऽततम् । सम् । जभार ।
यदा । इत् । अयुक्त । हरितः । सधऽस्थात् । आत् । रात्री । वासः । तनुते । सिमस्मै ॥ ४ ॥

ᵛसूर्यस्य सर्वप्रेरकस्य[2] आदित्यस्य ᵛतत् ᵛदेवत्वम् ईश्वरत्वम् । स्वातन्त्र्यमिति यावत् । ᵛमहित्वं महत्त्वं माहात्म्यं च ᵛतत् एव । तच्छब्दश्रुतेः यच्छब्दाध्याहारः । यत् ᵛकर्तोः । कर्मनामैतत् । प्रारब्धापरिसमाप्तस्य[3] कृष्यादिलक्षणस्य कर्मणः ᵛमध्या मध्ये अपरिसमाप्ते एव तस्मिन् कर्मणि ᵛवितंतं विस्तीर्णं स्वकीयं रश्मिजालम् अस्तं गच्छन् सूर्यः ᵛसं ᵛजभार अस्माल्लोकात् स्वात्मन्युपसंहरति । कर्मकरश्च प्रवृत्तमपरिसमाप्तमेव[4] विसृजति अस्तं यन्तं सूर्यं दृष्ट्वा । ईदृशं स्वातन्त्र्यं महिमा च सूर्यव्यतिरिक्तस्य कस्यास्ति । न कस्यापि । सूर्य एवेदृशं स्वातन्त्र्यं महिमानं चावगाहते । अपि च इत् इत्यवधारणे । ᵛयदेत् यस्मिन्नेव काले ᵛहरितः रसहरणशीलान् स्वरश्मीन् हरिद्वर्णानश्वान् वा ᵛसधस्थात् सहस्थानात् अस्मात् पार्थिवाल्लोकादादाय ᵛअयुक्त अन्यत्र संयुक्तान् करोति । यद्वा । युजिः केवलोऽपि विपूर्वः[5] द्रष्टव्यः । यदैवासौ स्वरश्मीनश्वान् वा सधस्थात् सह तिष्ठन्त्यस्मिन्निति सधस्थो रथः । तस्मात् अयुक्त अमुञ्चत्[6] । ᵛआत् अनन्तरमेव ᵛरात्री निशा ᵛवासः आच्छादयितृ तमः ᵛसिमस्मै । सिमशब्दः सर्वशब्दपर्यायः । सप्तम्यर्थे चतुर्थी । सर्वस्मिन् लोके ᵛतनुते विस्तारयति । यद्वा । वासो वासरम् अहः । तत् सर्वस्मात् अस्माल्लोकादपनीय रात्री तमस्तनुते । अत्र निरुक्तं–'तत्सूर्यस्य देवत्वं तन्महित्वं मध्ये यत्कर्मणां क्रियमाणानां विततं संहियते यदासौ अयुक्त हरणानादित्यरश्मीन् हरितोऽश्वानिति वाथ रात्री वासस्तनुते सिमस्मै वासरमहरवयुवती सर्वस्मात्' (निरु. ४. ११) इति ॥ महित्वम् । 'मह पूजायाम्' । औणादिक इन्प्रत्ययः । 'तस्य भावस्त्वतलौ' (पा. सू. ५. १. ११९) । मध्या । मध्यशब्दात् सप्तम्येकवचनस्य 'सुपां सुलुक्०' इति डादेशः । कर्तोः । करोतेरौणादिकः तुन्प्रत्ययः । विततम् । विपूर्वात्तनोतेः कर्मणि निष्ठा । उदित्त्वेन क्त्वाप्रत्यये इटो विकल्पनात् 'यस्य विभाषा' इति इट्प्रतिषेधः । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् । जभार । 'हग्रहोर्भः०' इति भत्वम् ।

---

१. क्ष-ट-ठ–भद्रादिविशेषणविशिष्टाः; स–भद्रादिविशेषणेन विशिष्टाः । २. क्ष-ट-ठ-न-स–सर्वस्य प्रेरकस्य । ३. ठ–प्रवृत्तस्यापरिसमाप्तस्य; स–प्रारब्धस्य (स्या) परिसमाप्तस्य । ४. क्ष-ट-ठ-स–प्रवृत्तं कर्म अपरिसमाप्तमेव । ५. क्ष-ट-ठ–विपूर्वार्थे । ६. क्ष-ट-ठ–अमुचत् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अयुक्त । युजेर्लुङि ' झलो झलि ' इति सिचो लोपः । सधस्थात् । ' घञर्थे कविधानम्° ' इति अधिकरणे कप्रत्ययः । ' सध मादस्थयोश्छन्दसि ' इति सधादेशः । दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् । रात्री । ' रात्रेश्चाजसौ ' इति ङीप् ॥

तन्मित्रस्य वरुणस्याभिचक्षे सूर्यो रूपं कृणुते द्योरुपस्थे ।
अनन्तमन्यद्रुशदस्य पाजः कृष्णमन्यद्धरितः सं भरन्ति ॥ ५ ॥

तत् । मित्रस्य । वरुणस्य । अभिऽचक्षे । सूर्यः । रूपम् । कृणुते । द्योः । उपऽस्थे ।
अनन्तम् । अन्यत् । रुशत् । अस्य । पाजः । कृष्णम् । अन्यत् । हरितः । सम् । भरन्ति ॥ ५ ॥

vतत् तदानीम् उदयसमये vमित्रस्य vवरुणस्य एतदुभयोपलक्षितस्य सर्वस्य जगतः vअभिचक्षे आभिमुख्येन प्रकाशनाय vद्योः नभसः vउपस्थे उपस्थाने मध्ये vसूर्यः सर्वस्य प्रेरकः सविता vरूपं सर्वस्य निरूपकं प्रकाशकं तेजः vकृणुते करोति । अपि च vअस्य सूर्यस्य vहरितः रसहरणशीला रश्मयः हरिद्वर्णाः[1] अश्वा वा vअनन्तम् अवसानरहितं कृत्स्नस्य जगतो व्यापकं vरुशत् दीप्यमानं श्वेतवर्णं vपाजः । बलनामैतत् । बलयुक्तम् अतिबलस्यापि नैशस्य तमसो निवारणे समर्थम् vअन्यत् तमसो विलक्षणं तेजः vसं vभरन्ति अहनि स्वकीयागमनेन निष्पादयन्ति । तथा vकृष्णं कृष्णवर्णम् vअन्यत् तमः स्वकीयापगमनेन रात्रौ । अस्य रश्मयोऽप्येवं कुर्वन्ति किमु वक्तव्यं तस्य माहात्म्यमिति सूर्यस्य स्तुतिः ॥ अभिचक्षे । संपदादिलक्षणो भावे क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वम् । द्योः । ' ङसिङसोश्च ' ( पा. सू. ६. १. ११० ) इति पूर्वरूपता । उपस्थे । ' घञर्थे कविधानम्° ' इति कप्रत्ययः । मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् । पाजः । पाति रक्षतीति पाजो बलम् । ' पातेर्बले जुट् च ' ( उ. सू. ४. ६४२) इति असुन् जुडागमश्च । छान्दसो मत्वर्थीयस्य विनो लोपः ॥

अद्या देवा उदिता सूर्यस्य निरंहसः पिपृता निरवद्यात् ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ ६ ॥

अद्य । देवाः । उत्ऽइता । सूर्यस्य । निः । अंहसः । पिपृत । निः । अवद्यात् ।
तत् । नः । मित्रः । वरुणः । ममहन्ताम् । अदितिः । सिन्धुः । पृथिवी । उत । द्यौः ॥ ६ ॥

हे vदेवाः द्योतमानाः सूर्यरश्मयः vअद्य अस्मिन्काले vसूर्यस्य आदित्यस्य vउदिता उदितौ उदये सति इतस्ततः प्रसरन्तो यूयम् अस्मान् vअंहसः पापात् vनिः vपिपृत निष्कृष्य पालयत । यदिदमस्माभिरुक्तं[2] vनः अस्मदीयं vतत् मित्रादयः षड्देवताः vममहन्तं पूजयन्तु अनुमन्यन्ताम् । रक्षन्त्विति यावत्[2] । vमित्रः प्रमीतेस्त्रायकः अहरभिमानी देवः । vवरुणः अनिष्टानां निवारयिता रात्र्यभिमानी । vअदितिः अखण्डनीया अदीना वा देवमाता । vसिन्धुः स्यन्दनशीलोदकाभिमाननिनी देवता । vपृथिवी

---

१. क्ष-ट-ठ–हरितवर्णाः । २. क्ष-ट-ठ–यदिदमस्माभिः प्रार्थितं तान्मित्रादयः षड्देवताः पालयन्तु ( ट–पूजयन्तु ) ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

भूलोकस्याधिष्ठात्री ᵛद्यौः द्युलोकस्य । उतशब्दः समुच्चये ॥ अद्य । ' निपातस्य च ' इति संहितायां दीर्घत्वम् । उदिता । उत्पूर्वात् एतेर्भावे क्तिन् । ' सुपां सुलुक्° ' इति डादेशः । ' तादौ च° ' इति गतेः प्रकृतिस्वरत्वम् । पिप्रत । ' पॄ पालनपूरणयोः पृ इत्येके ' । लोटि जुहोत्यादित्वात् शपः श्लुः । द्विर्वचनोरदत्वहलादिशेषाः । ' अर्तिपिपर्त्योश्च ' इति अभ्यासस्य इत्वम् । ' सार्वधातुकमपित् ' इति तशब्दस्य ङित्त्वे सति ' ऋचि तुनुघ° ' इत्यादिना संहितायां दीर्घः ॥ ७ ॥ ॥ १६ ॥

सप्तदशेऽनुवाके पञ्च सूक्तानि । तत्र ' नासत्याभ्याम् ' इति पञ्चविंशत्यृचं प्रथमं सूक्तम् । उशिक्संज्ञायामङ्गराजस्य महिष्या दास्यां दीर्घतमसोत्पादितः कक्षीवान् अस्य सूक्तस्य ऋषिः । त्रिष्टुप् छन्दः । अश्विनौ देवता । तथा चानुक्रान्तं—' नासत्याभ्यां पञ्चाधिका कक्षीवान्दैर्घतमस उशिक्प्रसूत आश्विनं वै ' इति । तुह्यादिपरिभाषया इदमादीनि पञ्च सूक्तानि अश्विदेवत्यानि । प्रातरनुवाकस्य आश्विने क्रतौ त्रैष्टुभे छन्दसि इदमादीनि त्रीणि सूक्तानि । ' अथाश्विनः ' इति खण्डे सूत्रितं[1]—' ग्रावाणेव नासत्याभ्यामिति त्रीणि ' ( आश्व. श्रौ. ४. १५ ) इति । आश्विनशस्त्रे[2] चैतानि शस्यानि[2] ' प्रातरनुवाकन्यायेन ' ( आश्व. श्रौ. ६. ५ ) इति अतिदिष्टत्वात् ॥

**नासत्याभ्यां बर्हिरिव प्र वृञ्जे स्तोमाँ इयर्म्यभ्रियेव वातः ।**
**यावर्भगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन ॥ १ ॥**

नासत्याभ्याम् । बर्हिःऽइव । प्र । वृञ्जे । स्तोमान् । इयर्मि । अभ्रियाऽइव । वातः ।
यौ । अर्भगाय । विऽमदाय । जायाम् । सेनाऽजुवा । निऽऊहतुः । रथेन ॥ १ ॥

ᵛबर्हिरिव यथा कश्चिद्यजमानो यागार्थं बर्हिः ᵛप्र ᵛवृञ्जे प्रकर्षेण अन्यूनानतिरिक्तं यागाय पर्याप्तं दर्भं वृङ्क्ते छिनत्ति संपादयतीति यावत् । एवमहं ᵛनासत्याभ्याम् अश्विभ्यां ᵛस्तोमान् स्तुतीः ᵛइयर्मि संपादयामि । एतदेव विशदीक्रियते । ᵛअभ्रियेव । यथा अभ्रियाणि अभ्रेषु मेघेष्ववस्थितान्युदकानि ᵛवातः वायुः वर्षणार्थं बहुशः प्रेरयति एवमहम् अश्विभ्यां स्तोत्राणि इयर्मि बहुशः प्रेरयामि । कीदृशावश्विनौ । ᵛअर्भगाय बालाय स्वयंवरलब्धभार्याय ᵛविमदाय एतत्संज्ञाय[3] राजर्षये मध्येमार्गं स्वयंवरार्थमागतैः ताम् अलभमानैरन्यैर्नृपैः सह योद्धुमशक्नुवतेऽपि तस्मै ᵛसेनाजुवा शत्रुसेनायाः प्रेरकेण शत्रुभिः दुष्प्रापेण ᵛरथेन ᵛयौ अश्विनौ ᵛजायां भार्यां परैरनुक्रान्तां[4] ᵛन्यूहतुः शत्रून्निहत्य तदीयं गृहं प्रापयामासतुः । ताभ्यामित्यर्थः ॥ नासत्याभ्याम् । सत्सु भवौ सत्यौ । न सत्यौ असत्यौ । न असत्यौ नासत्यौ । ' नञ्राण्नपात्° ' इत्यादिना नञः प्रकृतिभावः । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । वृञ्जे । ' वृजी वर्जने ' । आदादिकः । इदित्त्वात् नुम् । ' लोपस्त आत्मनेपदेषु ' इति तलोपः । इयर्मि । ' ऋ गतौ ' । जौहोत्यादिकः । ' अर्तिपिपर्त्योश्च ' इति अभ्यासस्य इत्वम् । ' अभ्यासस्यासवर्णे ' इति इयङ् । अभ्रियेव[5] । ' समुद्राभ्राद्धः ' इति भवार्थे घः । घस्य इयादेशः । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । अर्भगाय । ' अर्तिगृभ्यां भन् ' ( उ. सू. ३. ४३२ ) इति अर्तेर्भन् । अर्भः एवार्भकः । ' संज्ञायां कन् ' ( पा. सू. ५. ३. ८७ ) । छान्दसो

---

१. क्ष-ट-ठ–सूत्रितं च । २. क्ष-ट-ठ–आश्विनशस्त्रेप्येतानि । ३. क्ष-ट-ठ–एतत्संज्ञकाय. ।
४. क्ष-ट-ठ-न-स–परैरनाक्रान्ताम् । ५. क्ष-ट-न-स–अभ्रिया इव; ठ–अभ्रिया ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

गकारः । अपर आह । अर्भमल्पं गायति शब्दयतीत्यर्भगः । ' कै गै शब्दे ' । ' गापोष्टक् ' ( पा. सू ३. २. ८ ) । ' आतो लोप इटि च ' इति आकारलोपः । तदेतत् पदकृतः शाकल्यस्य अभिमतम्[1] । सेनाजुवा । जु इति सौत्रो धातुर्गत्यर्थः । अस्मादन्तर्भावितण्यर्थात् ' क्विब्वचिप्रच्छि° इत्यादिना क्विब्दीर्घौ । तन्वादित्वादुवङ् ( पा. सू. ६. ४. ७७. १ ) । न्यूहतुः । ' वह प्रापणे ' लिटि अतुसि यजादित्वात् संप्रसारणम् । ' यद्वृत्तान्नित्यम् ' इति निघातप्रतिषेधः ॥

वीळुपत्मभिराशुहेमभिर्वा देवानां वा जूतिभिः शाशदाना ।
तद्रासभो नासत्या सहस्रमाजा यमस्य प्रधने जिगाय ॥ २ ॥

वीळुपत्मऽभिः । आशुहेमऽभिः । वा । देवानाम् । वा । जूतिऽभिः । शाशदाना ।
तत् । रासभः । नासत्या । सहस्रम् । आजा । यमस्य । प्रऽधने । जिगाय ॥ २ ॥

[v]वीळुपत्मभिः । वीड्विति बलनाम । बलवदुत्पतनैः [v]आशुहेमभिः शीघ्रगमनैः । वाशब्दः समुच्चये । हे [v]नासत्या अश्विनौ एवंभूतैरश्वैश्च [v]देवानाम् इन्द्रादीनां [v]जूतिभिः प्रेरणैश्च [v]शाशदाना शाश्यमानयोः अत्यर्थं प्रेर्यमाणयोर्युवयोर्वाहनभूतो यः [v]रासभः प्रजापतिना दत्तः सः [v]यमस्य वैवस्वतस्य प्रीतिकरे [v]प्रधने प्रकीर्णधनोपेते [v]आजा आजौ संग्रामे [v]तत् शत्रूणां [v]सहस्रं [v]जिगाय जितवान् । वैवस्वतो हि बहूनां मरणहेतुना संग्रामेण तुष्टो भवति । यद्वा । जेतव्यत्वेन प्रजापतिना निहितं ऋक्सहस्रं[2] शीघ्रगमनयुक्तो रासभो जिगाय जयेनालभत । अन्येभ्यः[3] देवेभ्यः पूर्वमेवाजिं प्राप्य युवां जयं प्रापयामास । तथा चास्मिन्नर्थे ' प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् ' ( ऐ. ब्रा. ४. ७ ) इत्यादिकं ब्राह्मणमनुसंधेयम् ॥ वीळुपत्मभिः । वीळु बलवत्पतन्तीति[4] वीळुपत्मानः । आशुहेमभिः । आशु शीघ्रं हिन्वन्ति गच्छन्तीति आशुहेमानः । तैः[5] । ' हि[6] गतौ[6] वृद्धौ च ' । ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन् । कृदुत्तरपदप्रकृतिस्वरत्वम् । जूतिभिः । ' ऊतियूतिजूति° ' इत्यादिना क्तिन उदात्तत्वम् । शाशदाना । ' शदॢ शातने ' । अत्र गत्यर्थो धातूनामनेकार्थत्वात् । अस्मात् यङन्तात् लटः शानच् । तस्य ' छन्दस्युभयथा ' इति आर्धधातुकत्वात् शबभावः । अतोलोपयलोपौ । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । ' सुपां सुलुक् ° ' इति षष्ठ्याः पूर्वसवर्णदीर्घः । आजा । तेनैव सूत्रेण डादेशः । जिगाय । ' जि जये ' । ' सन्लिटोर्जेः ' इति अभ्यासादुत्तरस्य कुत्वं गकारः ॥

तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहाः ।
तमूहथुर्नौभिरात्मन्वतीभिरन्तरिक्षप्रुद्भिरपोदकाभिः ॥ ३ ॥

तुग्रः । ह । भुज्युम् । अश्विना । उदऽमेघे । रयिम् । न । कः । चित् । ममृऽवान् । अव । अहाः ।
तम् । ऊहथुः । नौभिः । आत्मन्ऽवतीभिः । अन्तरिक्षप्रुत्ऽभिः । अपऽउदकाभिः ॥ ३ ॥

---

१. ठ-स-अनभितम् । २ क्ष-ट-ठ-ऋचां सहस्रम् । ३. क्ष-ट-ठ-अन्येभ्योऽपि । ४. क्ष-ट-ठ-बलवत्पतन्ति उत्पतन्तीति । ५. क्ष-ट-ठ-स-' तैः ' नास्ति । ६. क्ष-ट-ठ-पत गैता । हि गतौ ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अत्रेयमाख्यायिका । तुग्रो नाम अश्विनोः प्रियः कश्चिद्राजर्षिः । स च द्वीपान्तरवर्तिभिः शत्रुभिरत्यन्तमुपद्रुतः सन् तेषां जयाय स्वपुत्रं भुज्युं सेनया सह नावा प्राहैषीत् । सा च नौः मध्येसमुद्रमतिदूरं गता वायुवशेन भिन्ना आसीत् । तदानीं सः भुज्युः शीघ्रम् अश्विनौ तुष्टाव । तौ च स्तुतौ सेनया सहितम् आत्मीयासु नौषु आरोप्य पितुस्तुग्रस्य समीपं त्रिभिरहोरात्रैः प्रापयामासतुरिति । अयमर्थः इदमादिकेन तृचेन प्रतिपाद्यते । हशब्दः प्रसिद्धौ । vतुग्रः खलु[1] पूर्वं शत्रुभिः पीडितः सन् तज्जयार्थम् vउदमेघे । उदकैर्मिह्यते सिच्यते इति उदमेघः समुद्रः तस्मिन् vभुज्युम् एतत्संज्ञं प्रियं पुत्रम् vअवाहाः । नावा गन्तुं पर्यत्याक्षीत् । तत्र दृष्टान्तः । vमसृवान् म्रियमाणः सन् धनलोभी[2] vकश्चित् मनुष्यः vरयिं vन यथा धनं परित्यजति तद्वत् । हे अश्विनौ vतं च भुज्युं मध्येसमुद्रं निमग्नं vनौभिः पितृसमीपम् vऊहथुः युवां प्रापितवन्तौ । कीदृशीभिः । vआत्मन्वतीभिः आत्मीयाभिः युवयोः स्वभूताभिरित्यर्थः । यद्वा । धृतिरात्मा धारणवतीभिरित्यर्थः । vअन्तरिक्षप्रुद्भिः अतिस्वच्छत्वादन्तरिक्षे जलस्य उपरिष्टादेव[3] गन्त्रीभिः vअपोदकाभिः सुश्लिष्टत्वात् अपगतोदकाभिः[4] अप्रविष्टोदकाभिरित्यर्थः ॥ उदमेघे । ' मिह सेचने ' । कर्मणि घञ् । ' न्यङ्क्वादीनां च ' ( पा. सू. ७. ३. ५३ ) इति कुत्वम् । ' उदकस्योदः संज्ञायाम् ' ( पा. सू. ६. ३. ५७ ) । थाथादिना उत्तरपदान्तोदात्तत्वम् । ममृवान् । ' मृङ् प्राणत्यागे ' । लिटः क्वसुः । क्रादिनियमात् प्राप्तस्य इटः ' वस्वेकाजाद्घसाम् ' इति नियमात् अभावः । अहाः । ' ओहाक् त्यागे ' । लुङि तिपि च्लेः सिच् । आगमानुशासनस्यानित्यत्वात् सगिटौ न क्रियेते । ' बहुलं छन्दसि ' इति इडभावः । ' हल्ङ्याब्भ्यः° ' इति तिलोपः । रुत्वविसर्गौ । यद्वा । ' मन्त्रे घस° ' इति च्लेर्लुक् । च्लेर्लुप्तत्वात् इण् न क्रियते । नौभिः । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । आत्मन्वतीभिः । आत्मनो मतुप् । ' मादुपधायाः° ' इति वत्वम् । ' अनो नुट् ' ( पा. सू. ८. २. १६ ) इति नुट् । नलोपः । ' ह्रस्वनुड्भ्यां मतुप् ' इति मतुप उदात्तत्वम् । अन्तरिक्षप्रुद्भिः । ' प्रुङ् गतौ ' । ' क्विप् च ' इति क्विप् ॥

तिस्रः क्षपस्त्रिरहातिव्रजद्भिर्नासत्या भुज्युमूहथुः पतद्भिः ।
समुद्रस्य धन्वन्नार्द्रस्य पारे त्रिभी रथैः शतपद्भिः षळश्वैः ॥ ४ ॥

तिस्रः । क्षपः । त्रिः । अहा । अतिव्रजत्ऽभिः । नासत्या । भुज्युम् । ऊहथुः । पतद्भिः ।
समुद्रस्य । धन्वन् । आर्द्रस्य । पारे । त्रिऽभिः । रथैः । शतपत्ऽभिः । षट्ऽअश्वैः ॥ ४ ॥

हे नासत्यौ सेनया सह उदके निमग्नं vभुज्युं vतिस्रः vक्षपः त्रिसंख्याका रात्रीः vत्रिरहा त्रिवारमावृत्तान्यहानि च vअतिव्रजद्भिः अतिक्रम्य गच्छद्भिरेतावन्तं कालमतिव्याप्य[5] वर्तमानैः vपतद्भिः पतद्भिः vत्रिभिः त्रिसंख्याकैः vरथैः vऊहथुः युवामूढवन्तौ । केति चेत् उच्यते । समुद्रस्य अम्बुराशेर्मध्ये vधन्वन् धन्वनि जलवर्जिते प्रदेशे vआर्द्रस्य[6] उदकेनार्द्रीभूतस्य vसमुद्रस्य vपारे तीरदेशे च । कथंभूतैः रथैः । vशतपद्भिः शतसंख्याकैश्चक्रलक्षणैः पादैरुपेतैः vषळश्वैः षड्भिरश्वैर्युक्तैः ॥ तिस्रः । ' त्रिचतुरोः स्त्रियाम्° ' इति त्रिशब्दस्य तिस्रादेशः । स चान्तोदात्तः । ' अचि र ऋतः ' इति रेफादेशे ' उदात्तयणो हल्पूर्वात् ' इति विभक्तेरुदात्तत्वम् । क्षपः । विभक्त्यन्तस्य छान्दसं ह्रस्वत्वम् ।

---

१. स–ह खलु । २. क्ष-ट-ठ–धनलोभात् । ३. क्ष-ट-ठ–उपरिष्टात् । ४. क्ष-ट–अपगतजलाभिः । ५. क्ष-ट-ठ–कालमभिव्याप्य । ६. क्ष-ट-ठ-स–तथा आर्द्रस्य ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यद्वा[1] । शसि ' आतः ' इति योगविभागादधातोरपि आकारलोपः । अहा । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः[1] । पतङ्गैः । ' पत्लृ गतौ ' । ' पतेरङ्गच्° ' ( उ. सू. १. ११६ ) । धन्वन् । ' धवि-र्गत्यर्थः ' । इदित्त्वात् नुम् । ' कनिन्युवृषि° ' इत्यादिना कनिन् । ' सुपां सुलुक्° ' इति सप्तम्या लुक् । शतपद्भिः । शतं पादा येषाम् । ' संख्यासुपूर्वस्य ' इति पादशब्दस्यान्त्यलोपः समासान्तः । अयस्मयादित्वेन भत्वात् ' पादः पत् ' इति पद्भावः । यद्वा । पादसमानार्थः[2] पच्छब्दः प्रकृत्यन्तरं द्रष्टव्यम् ॥

अनारम्भणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे ।
यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसम् ॥ ५ ॥

अनारम्भणे । तत् । अवीरयेथाम् । अनास्थाने । अग्रभणे । समुद्रे ।
यत् । अश्विनौ । ऊहथुः । भुज्युम् । अस्तम् । शतऽअरित्राम् । नावम् । आतस्थिऽवांसम् ॥५॥

हे [V]अश्विनौ [V]अनारम्भणे आलम्बनरहिते [V]समुद्रे [V]तत् कर्म [V]अवीरयेथाम् । विक्रान्तं कृतवन्तौ युवाम् । अनारम्भणत्वमेव स्पष्टीकरोति । [V]अनास्थाने । आस्थीयते अस्मिन् इति आस्थानो भूप्रदेशः । तद्र-हिते स्थातुमशक्ये जले इत्यर्थः । [V]अग्रभणे अग्रहणे । हस्तेन ग्राह्यं शाखादिकमपि यत्र[3] नास्ति तस्मिन् इत्यर्थः[4] । किं पुनस्तत्कर्म । [V]भुज्युं समुद्रे मग्नं [V]शतारित्रां बह्वरित्राम् । यैः काष्ठैः पार्श्वतो बद्धैर्जला-लोडने सति नौः शीघ्रं गच्छति तानि अरित्राणि । ईदृशीं [V]नावम् [V]आतस्थिवांसम् आस्थितवन्तमारूढ-वन्तं कृत्वा [V]अस्तम् । गृहनामैतत् । पितुस्तुग्रस्य गृहं प्रति [V]यत् [V]ऊहथुः[5] । तत्प्रापणमन्यैर्दुःशकं युवां समुद्रमध्ये कृतवन्तावित्यर्थः ॥ अनारम्भणे । आरभ्यते इत्यारम्भणम् । ' कृत्यल्युटो बहुलम् ' इति कर्मणि ल्युट् । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । अवीरयेथाम् । ' शूर वीर विक्रान्तौ ' । चुरादिरात्मनेपदी । अनास्थानाग्रभणयोः पूर्ववत् ल्युट्स्वरौ । अयं[6] तु विशेषः[6] । ' हृग्रहोर्भः° ' इति भत्वम् । अस्तम् । अस्यते अस्मिन् सर्वमित्यस्तं गृहम् । ' असिहसि° ' इत्यादिना तन्प्रत्ययः । शतारित्राम् । ' ऋ गतौ ' । ' अर्तिलूधूसू° ' ( पा. सू. ३. २. १८४ ) इति करणे इत्रप्रत्ययः । बहुव्रीहौ पूर्वपद-प्रकृतिस्वरत्वम् ॥ ॥ ८ ॥

यमश्विना ददथुः श्वेतमश्वमघाश्वाय शश्वदित्स्वस्ति ।
तद्वां दात्रं महि कीर्तेन्यं भूत्पैद्वो वाजी सदमिद्धव्यो अर्यः ॥ ६ ॥

यम् । अश्विना । ददथुः । श्वेतम् । अश्वम् । अघऽअश्वाय । शश्वत् । इत् । स्वस्ति ।
तत् । वाम् । दात्रम् । महि । कीर्तेन्यम् । भूत् । पैद्वः । वाजी । सदम् । इत् । हव्यः । अर्यः ॥६॥

अत्रेदमाख्यायते । पेदुर्नाम कश्चित् स चाश्विनौ तुष्टाव । तस्मै प्रीतौ कंचिच्छ्वेतवर्णमश्वं दत्त-वन्तौ । स चाश्वस्तस्य प्रौढं जयं चकारेति । एतदत्र प्रतिपाद्यते । हे अश्विनौ युवाम् [V]अघाश्वाय अहन्त-

---

१. क्ष-ट-ठ–'यद्वा.....शेर्लोपः' नास्ति । २. क्ष-ट-ठ–पादशब्दस्य समानार्थः; स–पादशब्दसमानार्थः । ३. क्ष-ट-ठ–यस्मिन् । ४. क्ष-ट-ठ–' इत्यर्थः ' नास्ति । ५. क्ष-ट-ठ-स–ऊहथुः प्रापयामासथुः । ६. क्ष-ट-ठ–' अयं तु विशेषः ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

व्याश्वाय[1]। पेदुनाग्ने राजर्षये [V]यं श्वेतवर्णम् [V]अश्वं [V]ददथुः दत्तवन्तौ सोऽश्वस्तस्मै [V]स्वस्ति जयलक्षणं मङ्गलं [V]शश्वत् [V]इत् नित्यमेव चकार। [V]वां युवयोः [V]तत् [V]दात्रं दानं [V]महि महदतिगम्भीरम् अत एव [V]कीर्तेन्यं सर्वैः कीर्तनीयं प्रशस्यं [V]भूत् अभूत्। तस्मात् [V]पैद्वः पेदोः संबन्धी पतनशीलः शीघ्रगामी वा[2] [V]अर्यः शत्रूणां प्रेरयिता युद्धेषु प्रेरयितव्यो वा [V]वाजी वेजनवान् सोऽश्वः [V]सदमित् सदैव [V]हव्यः अस्माभिरप्याह्वातव्यः॥ दात्रम्। ददातेर्भावे औणादिकः त्रप्रत्ययः। महि। 'मह पूजायाम्'। 'इन्सर्वधातुभ्यः[3]' इति इन्[3]। कीर्तेन्यम्। 'कृत संशब्दने'। 'कृत्यार्थे तवैकेन्केन्यत्वनः' इति केन्यप्रत्ययः। 'ऋत इद्धातोः' इति इत्वम्। भूत्। 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडभावः। पैद्वः। पेदोः संबन्धी[4]। 'तस्येदम्' इति अण्। छान्दसो वर्णलोपः। हव्यः। ह्वयतेः 'अचो यत्' इति यत्। 'बहुलं छन्दसि' इति संप्रसारणम्। गुणः। 'धातोस्तन्निमित्तस्यैव' इति अवादेशः। अर्यः। 'ऋ गतौ'। 'अर्त्यादयश्च' (उ. सू. ४. ५५१) इति औणादिको यत्। व्यत्ययेनान्तोदात्तत्वम्॥

युवं नरा स्तुवते पज्रियाय कक्षीवते अरदतं पुरंधिम्।
कारोतराच्छफादश्वस्य वृष्णः शतं कुम्भाँ असिञ्चतं सुरायाः॥ ७॥

युवम्। नरा। स्तुवते। पज्रियाय। कक्षीवते। अरदतम्। पुरंऽधिम्।
कारोतरात्। शफात्। अश्वस्य। वृष्णः। शतम्। कुम्भान्। असिञ्चतम्। सुरायाः॥ ७॥

अत्रेयमाख्यायिका। कक्षीवानृषिः पुरा तमसा तिरोहितज्ञानः[5] सन् ज्ञानार्थमश्विनौ तुष्टाव। तस्मै अश्विनौ प्रभूतां धियं दत्तवन्ताविति। तदाह। हे [V]नरा नेतारावश्विनौ [V]युवं युवां [V]पज्रियाय। पज्रा इत्यङ्गिरसाम् आख्या 'पज्रा वा अङ्गिरसः' इत्याम्नातत्वात्। तेषां कुले[6] जाताय [V]कक्षीवते। कक्ष्या रज्जुरश्वस्य। तद्वते तत्संज्ञाय [V]स्तुवते युवयोः स्तुतिं कुर्वते मह्यं [V]पुरंधिं प्रभूतां धियं बुद्धिम् [V]अरदतं व्यलिखतम्। यथा सर्वार्थगोचरा भवति तथा कृतवन्तावित्यर्थः। अपि च [V]कारोतरात्। कारोतरो नाम वैदलश्चर्मवेष्टितो भाजनविशेषो यस्मिन् सुरायाः स्रावणं क्रियते। लुप्तोपममेतत्। कारोतरात् यथा सुरायाः संपादकाः[7] तां स्रावयन्ति[7] एवमेव युवां [V]वृष्णः सेचनसमर्थस्य युष्मदीयस्य [V]अश्वस्य [V]शफात् खुरात् [V]सुरायाः [V]शतं [V]कुम्भान् असंख्यातान् सुराघटान् [V]असिञ्चतम् अक्षारयतम्। यद्वा। सिञ्चतिः पूरणार्थः। कारोतरस्थानीयात् युष्मदीयाश्वखुरात् या सुरा प्रवहति तया असंख्यातान् घटान् असिञ्चतम् अपूरयतम्। ये जनाः सौत्रामण्यादिकर्मणि युष्मद्यागाय सुरां याचन्ते तेषामित्यर्थः॥ स्तुवते। स्तौतेर्लटः शतृ। अदादित्वात् शपो लुक्। 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम्। पज्रियाय। पज्रशब्दात् शैषिको घच्। कक्षीवते। 'आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवत्०' इति निपातनात् कक्ष्याशब्दस्य संप्रसारणं वस्वं च। अरदतम्। 'रद विलेखने'। पुरंधिम्। 'पुरंधिर्बहुधीः' (निरु. ६. १३) इति यास्कः। पृषोदरादित्वात् पुरंधिभावः। यद्वा। पुरं पूरयितव्यं सर्वविषयजातमस्यां धीयते अवस्थाप्यते इति पुरंधिर्बुद्धिः। 'कर्मण्यधिकरणे च' इति दधातेः किप्रत्ययः। 'तत्पुरुषे कृति बहुलम्' इति बहुलवचनात् अलुक्। इदं तु व्युत्पत्तिमात्रं वस्तुतः पृषोदरादिरेव। असिञ्चतम्। 'षिचिर् क्षरणे'। तौदादिकः। 'शे मुचादीनाम्' इति नुम्॥

---

१. ट-ठ–अहताश्वाय। २. क्ष-ट-ठ–'वा' नास्ति। ३. क्ष-ट-ठ–इन्। ४. क्ष-ट-ठ–अयम्। ५. क्ष-ट–निरोधितज्ञानः। ६. क्ष-ठ-ठ–कुलेषु। ७. क्ष-ट-ठ–संपादकस्तां संपादयति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तम् ।
ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति ॥ ८ ॥

हिमेन । अग्निम् । घ्रंसम् । अवारयेथाम् । पितुऽमतीम् । ऊर्जम् । अस्मै । अधत्तम् ।
ऋबीसे । अत्रिम् । अश्विना । अवऽनीतम् । उत् । निन्यथुः । सर्वऽगणम् । स्वस्ति ॥ ८ ॥

अत्रेदमाख्यानम् । अत्रिम् ऋषिम् असुराः शतद्वारे पीडायन्त्रगृहे प्रवेश्य तृषाग्निना अबाधिषत । तदानीं तेन ऋषिणा स्तुताववश्विनौ अग्निमुदकेनोपशमय्य तस्मात् पीडागृहात् अविकलेन्द्रियवर्गं सन्तं निरगमयतामिति । तदेतत् प्रतिपाद्यते । हे अश्विनौ [v]हिमेन हिमवच्छीतेनोदकेन [v]घ्रंसं दीप्यमानम् अत्रेर्बाधनार्थमसुरैः प्रक्षिप्तं तृषाग्निम् [v]अवारयेथां युवां निवारितवन्तौ शीतीकृतवन्तावित्यर्थः । अपि च [v]अस्मै असुरपीडया कार्श्यं प्राप्ताय अत्रये [v]पितुमतीम् । पितुरित्यन्ननाम । अन्नयुक्तम् [v]ऊर्जं बलप्रदं रसात्मकं क्षीरादिकम् [v]अधत्तं पुष्ट्यर्थं प्रायच्छतम् । [v]ऋबीसे अपगतप्रकाशे पीडायन्त्रगृहे [v]अवनीतम् अवाङ्मुखतया असुरैः प्रापितम् [v]अत्रिं [v]सर्वगणम् । गणः समूहः । सर्वेषामिन्द्रियाणां पुत्रादीनां वा गणेनोपेतं [v]स्वस्ति अविनाशो यथा भवति तथा [v]उन्निन्यथुः तस्माद्गृहादुद्गमय्य युवां स्वगृहं प्रापितवन्तौ । यद्वा हिमेन शीतेन वृष्टयुदकेन अग्निम् अग्निवत्तीक्ष्णं घ्रंसम् । अहर्नामैतत् । सामर्थ्यात् निदाघकालीनम् अहः अवारयेथाम् । तस्याह्नस्तैक्ष्ण्यं निवारितवन्तौ । अपि च अस्मै अत्रये पितुमतीं चरुपुरोडाशादिलक्षणान्नोपेतमूर्जं बलकरं[1] रसात्मकम्[2] उपस्तरणाभिधारणात्मकं घृतमधत्तम् । वृष्ट्युत्पादनेनाग्नेर्यागार्थं हवींषि निष्पादितवन्तावित्यर्थः । ऋबीसे अपगततेजस्के पृथिवीद्रव्ये अवनीतमोषधीनामुत्पादनाय अवस्तान्नीतम् । पार्थिवाग्निना परिपक्वाः उदकेन क्लिन्नाः ह्योषधिवनस्पतयो विरोहन्ति । अत्रिं हविषामत्तारमोषधिवनस्पत्यादीनां वा एवंविधमग्निं सर्वगणं व्रीह्याद्योषधिगणोपेतं हे अश्विनौ युवां स्वस्ति अविनाशः[3] यथा भवति तथा उन्निन्यथुः । व्रीह्याद्योषधिवनस्पतिरूपेण भूमेरुपरिष्टान्नीतवन्तौ । कारणात्मना पार्थिवाग्नौ वर्तमानं सर्वमोषधिवनस्पत्यादिकमश्विनौ प्रवर्षणेन[4] व्यक्तीकृतवन्तावित्यर्थः । अयं पक्षो यास्केन ' हिमेनोदकेन ' ( निरु. ६. ३६ ) इत्यादिना उक्तः ॥ पितुमतीम् । ' ह्रस्वनुड्भ्यां मतुप् ' इति मतुप उदात्तत्वम् । ऋबीसे । अत्र यास्कः । ' ऋबीसमपगतभासमपचितभासमपहृतभासं गतभासं वा ' ( निरु. ६. ३५ ) इति । पृषोदरादित्वादभिमतरूपस्वरसिद्धिः । अत्रिम् । ' अद भक्षणे ' । ' अदेस्त्रिनि च ' इति चशब्दात् त्रिः । अवनीतम् । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । स्वस्ति । ' अस भुवि ' । भावे क्तिन् । ' छन्दस्युभयथा ' इति सार्वधातुकत्वात् अस्तेर्भूभावाभावः ॥

परावतं नासत्यानुदेथामुच्चाबुध्नं चक्रथुर्जिह्मबारम् ।
क्षरन्नापो न पायनाय राये सहस्राय तृष्यते गोतमस्य ॥ ९ ॥

परा । अवतम् । नासत्या । अनुदेथाम् । उच्चाऽबुध्नम् । चक्रथुः । जिह्मऽबारम् ।
क्षरन् । आपः । न । पायनाय । राये । सहस्राय । तृष्यते । गोतमस्य ॥ ९ ॥

---

१. क्ष-ट-ल–बलात्मकम् । २. क्ष-ट-ठ–' रसात्मकम् ' नास्ति । ३. क्ष-ट-ट–अविनाशम् ।
४. न-स–प्रकर्षेण ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अत्रेदमाख्यानम् । कदाचिन्मरुभूमौ वर्तमानस्य स्तोतुः[1] गोतमस्य ऋषेः समीपं देशान्तरे वर्तमानं कूपमुत्खायाश्विनौ प्रापयेताम्[2] । प्रापय्य च तं कूपं स्नानपानादिसौकर्याय उपरिमूलमधोबिलमवास्थापयतामिति । तदेतदाह । हे ᵛनासत्या सत्यस्वभावौ सत्यस्य नेतारौ नासिकाप्रभवौ वा एतत्संज्ञावश्विनौ युवाम् ᵛअवतम् । कूपनामैतत् । अवस्तात्ततं कूपं ᵛपरा ᵛअनुदेथां गोतमस्य ऋषेः समीपे प्रैरिपाथाम् । तदनन्तरं तं कूपम् ᵛउच्चाबुध्नम् उच्चैरुपरिष्टात् बुध्नो मूलं यस्य स तथोक्तः । ᵛजिह्मबारं जिह्ममधस्ताद्वर्तमानतया वक्रं[3] बारं द्वारं यस्य स तथोक्तः । एवंगुणविशिष्टं ᵛचक्रथुः युवामकृपाथाम् । तस्मात् कूपात् ᵛतृष्यते पिपासतः ᵛगोतमस्य ᵛपायनाय पानार्थम् ᵛआपो ᵛन आपश्च । अयं नशब्दश्चार्थे । ᵛक्षरन् प्रवाहरूपेण निरगमन् । कीदृशस्य । ᵛराये हवींषि दत्तवतः ᵛसहस्राय सहनशीलाय । यद्वा सहस्रसंख्याकाय राये धनाय एतत्संख्यधनलाभार्थं च अक्षरन् ॥ अनुदेथाम् । ' णुद प्रेरणे ' । तौदादिकः । जिह्मबारम् । द्वारशब्दस्य पृषोदरादित्वात् बारादेशः[4] । क्षरन् । ' क्षर संचलने ' । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । शपः पित्त्वादनुदात्तत्वम् । तिङो लसार्वधातुकस्वरेण धातुस्वरः । पायनाय[5] । हेतुमति णिच् । ' शाच्छासाह्वा° ' इति युक् । भावे ल्युट् । राये । ' रा दाने ' । राति ददातीति राः । ' रातेर्डैः ' ( उ. सू. २. २२४ ) । ' ऊडिदम्° ' इति विभक्तेरुदात्तत्वम् । तृष्यते । ' जितृषा पिपासायाम् ' । श्यन् । लटः शतृ । श्यनो नित्त्वादाद्युदात्तत्वम् । ' षष्ठ्यर्थे चतुर्थी वक्तव्या ' ( पा. म. २. ३. ६२. १ ) इति चतुर्थी ॥

जुजुरुषो नासत्योत वव्रिं प्रामुञ्चतं द्रापिमिव च्यवानात् ।
प्रातिरतं जहितस्यायुर्दस्रादित्पतिमकृणुतं कनीनाम् ॥ १० ॥

जुजुरुषः । नासत्या । उत । वव्रिम् । प्र । अमुञ्चतम् । द्रापिम्ऽइव । च्यवानात् ।
प्र । अतिरतम् । जहितस्य । आयुः । दस्रा । आत् । इत् । पतिम् । अकृणुतम् । कनीनाम् ॥ १० ॥

अत्रेदमाख्यानम् । वलीपलितादिभिरुपेतो जीर्णाङ्गः पुत्रादिभिः परित्यक्तश्च्यवनाख्यः ऋषिरश्विनौ तुष्टाव । स्तुतावश्विनौ तस्मै ऋषये जरामपगमय्य पुनर्यौवनमकुरुतामिति । तदेतदाह । हे ᵛनासत्या अश्विनौ ᵛजुजुरुषः जीर्णात् ᵛच्यवानात् च्यवनाख्यादृषेः सकाशात् ᵛवव्रिं कृत्स्नं शरीरमावृत्यावस्थितां जरां ᵛप्रामुञ्चतं प्रकर्षेणामोचयतम् । तत्र दृष्टान्तः । ᵛद्रापिमिव । द्रापिरिति कवचस्याख्या । यथा कश्चित् कवचं कृत्स्नशरीरव्यापकं धृत्वा पश्चात् शरीरात् पृथक्करोति तद्वत् । ᵛउत अपि च हे ᵛदस्रा एतत्संज्ञौ दर्शनीयौ वा अश्विनौ ᵛजहितस्य पुत्रादिभिः परित्यक्तस्य ऋषेः ᵛआयुः जीवनं ᵛप्रातिरतं प्रावर्धयतम् । प्रपूर्वस्तिरतिर्वर्धनार्थः । ᵛआत् ᵛइत् अनन्तरमेव युवानं सन्तं ᵛकनीनां कन्यानां ᵛपतिं भर्तारम् ᵛअकृणुतम् अकुरुतम् ॥ जुजुरुषः । ' जॄष् वयोहानौ ' । लिटः क्वसुः । ' बहुलं छन्दसि ' इति उत्वम् । द्विर्भावः । पञ्चम्येकवचने ' वसोः संप्रसारणम् ' इति संप्रसारणम् । ' शासिवसिघसीनां च ' इति षत्वम् । वव्रिम् । ' वृञ् वरणे ' । ' आदृगमहन° ' इति किप्रत्ययः । जहितस्य । ' ओहाक् त्यागे ' । कर्मणि निष्ठा । तस्य ' छन्दस्युभयथा ' इति सार्वधातुकत्वात् यक् । तस्य ' बहुलं छन्दसि '

---

१. क्ष-ट-ठ-स्नातुः । २. क्ष-ट-ठ-प्रापयताम् । ३. क्ष-ट-ठ-कुटिलम् । ४. क्ष-ट-ठ-बारभावः । ५. क्ष-ट-ठ-स-पायनाय । पा पाने ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति श्लुः । ' जहातेश्च ' ( पा. सू. ६. ४. ११६ ) इति इत्वम् । कनीनाम् । ' रयेर्मतौ बहुलम् ' इति बहुलवचनात् कन्याशब्दस्य अत्र संप्रसारणम् ॥ ॥ ९ ॥

तद्वां नरा शंस्यं राध्यं चाभिष्टिमन्नासत्या वरूथम् ।
यद्विद्वांसा निधिमिवापगूळ्हमुद्दर्शतादूपथुर्वन्दनाय ॥ ११ ॥

तत् । वाम् । नरा । शंस्यम् । राध्यम् । च । अभिष्टिऽमत् । नासत्या । वरूथम् ।
यत् । विद्वांसा । निधिम्ऽइव । अपऽगूळ्हम् । उत् । दर्शतात् । ऊपथुः । वन्दनाय ॥११॥

अत्रेदमाख्यानम् । वन्दनो नाम कश्चिदृषिः । स चासुरैः कूपे निखातः[1] उत्तरीतुमशक्नुवन्नश्विनावस्तौत् । तमश्विनौ कूपादुन्निन्यतुरिति । तदाह । Vनरा आरोग्यस्य नेतारौ हे नासत्यौ अश्विनौ Vवां युवयोः संबन्धि Vअभिष्टिमत् अभ्येषणयुक्तमाभिमुख्येन प्राप्तव्यं तथा Vवरूथं वरणीयं कामयितव्यं Vतत् कर्म Vशंस्यम् अस्माभिः प्रशंसनीयं Vराध्यम् आराधनीयं Vच । किं पुनस्तत्कर्म । Vविद्वांसा जानन्तौ युवां Vनिधिमिव निक्षिप्तं धनमिव Vअपगूळ्हम् अरण्ये निर्जने देशे कूपमध्ये असुरैः निगूढं[2] Vवन्दनाय वन्दनसंज्ञिनं Vदर्शतात् अध्वगैः पिपासुभिर्द्रष्टव्यात् कूपात् Vउत् Vऊपथुः उदहार्ष्टम् । एवं Vयत् एतत् कूपादुद्धरणं तदित्यर्थः ॥ शंस्यम् । ' शंसु स्तुतौ ' । अस्मात् ण्यन्तात् ' अचो यत् ' इति यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । अभिष्टिमत् । अभिपूर्वात् ' इष गतौ ' इत्यस्माद्भावे क्तिन् । ' सन्ङि वृष° ' इति क्तिन उदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । शकन्ध्वादित्वात् पररूपत्वम् । ' तादौ च° ' इति तु गतिस्वरस्य सर्वविधीनां छन्दसि विकल्पितत्वादप्रवृत्तिः । ततो मतुप् । अन्तोदात्तादुत्तरस्य तस्य ' ह्रस्वनुड्भ्याम्° ' इत्युदात्तत्वम् । वरूथम् । ' जृवृभ्यामूथन् ' । विद्वांसा । ' सुपां सुलुक्° ' इति विभक्तेराकारः । अपगूळ्हम् । ' गुहू संवरणे ' । कर्मणि निष्ठा । ' यस्य विभाषा ' इति इट्प्रतिषेधः । ढत्वधत्वष्टुत्वढ्लोपदीर्घाः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । दर्शतात् । ' भृमृदृशि° ' इत्यादिना अतच् । ऊपथुः । ' डुवप् बीजतन्तुसंताने[3] ' । लिटि अथुसि यजादित्वात् संप्रसारणम् । द्विर्वचनादि । वन्दनाय । ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वाच्चतुर्थी ॥

तद्वां नरा सनये दंस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिम् ।
दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाच ॥ १२ ॥

तत् । वाम् । नरा । सनये । दंसः । उग्रम् । आविः । कृणोमि । तन्यतुः । न । वृष्टिम् ।
दध्यङ् । ह । यत् । मधु । आथर्वणः । वाम् । अश्वस्य । शीर्ष्णा । प्र । यत् । ईम् । उवाच ॥१२॥

अत्रेयमाख्यायिका । इन्द्रो दधीचे प्रवर्ग्यविद्यां मधुविद्यां चोपदिश्य यदि इमाम् अन्यस्मै वक्ष्यसि शिरस्ते छेत्स्यामीत्युवाच । ततोऽश्विनौ अश्वस्य शिरश्छित्त्वा दधीचः शिरः प्रच्छिद्यान्यत्र निधाय

---

१. क्ष-ट-ठ-निपातितः । २. क्ष-ट-निगूढं तम् । ३. ठ-बीजसंताने ।

CCO, Gurukul Kangri Collection, Haridwar. Digitized by eGangotri

तत्राश्व्यं शिरः प्रत्यधत्ताम् । तेन च दध्यङ् ऋचः सामानि यजूंषि च प्रवर्ग्यविषयाणि मधुविद्याप्रतिपादकं ब्राह्मणं चाश्विनावध्यापयामास । तदिन्द्रो ज्ञात्वा वज्रेण तच्छिरोऽच्छिनत् । अथाश्विनौ तस्य स्वकीयं मानुषं शिरः प्रत्यधत्तामिति शाटयायनवाजसनेययोः[1] प्रपञ्चेनोक्तम् । तदेतत्प्रतिपाद्यते । हे ᵛनरा नरौ[2] अश्विनौ ᵛवां युवयोः संबन्धि ᵛउग्रम् उद्भूर्णमन्यैर्दुःशकं ᵛदंसः । कर्मनामैतत् । युवाभ्यां पुरा कृतं ᵛतत् कर्म ᵛसनये धनलाभार्थम् ᵛआविष्कृणोमि प्रकटीकरोमि । तत्र दृष्टान्तः । ᵛतन्यतुः ᵛन यथा मेघस्थः शब्दः ᵛवृष्टिं मेघान्तर्वर्तमानमुदकं प्रवर्षणेन[3] सर्वत्र प्रकटयति[4] तद्वत् । किं तत्कर्म । अथर्वणः पुत्रः ᵛदध्यङ् एतत्संज्ञः ऋषिः ᵛअश्वस्य ᵛशीर्ष्णा युष्मत्सामर्थ्येन प्रतिहितेन शिरसा ᵛवां युवाभ्याम् ᵛईम् इमां मधुविद्यां[5] ᵛयत् ᵛह यदा खलु ᵛप्र ᵛउवाच प्रोक्तवान् । तदानीमाश्वस्य शिरसः संधानलक्षणं पुनर्मानुषस्य शिरसः प्रतिसंधानलक्षणं च ᵛयत् भवदीयं कर्म तत् आविष्कृणोमीत्यर्थः[6] ॥ सनये । ' षणु दाने ' । ' खनिकषिकस्यञ्जसिवसिध्वनिस्तनिवनिसनिग्रन्थिचरिभ्यश्च ' ( उ. सू. ४. ५७९ ) इति इप्रत्ययः । तन्यतुः । ' तनु विस्तारे ' । ' ऋतन्यञ्जि० ' ( उ. सू. ४. ४४२ ) इत्यादिना यतुच् । यद्वा । ' स्तन शब्दे ' । बाहुलकात् यतुच् । छान्दसः सलोपः । वृष्टिम् । वृष्यते सिच्यते अनेनेति वृष्टिः । ' मन्त्रे वृष० ' इत्यादिना क्तिन उदात्तत्वम् । आथर्वणः । अपत्यार्थे अणि ' अन् ' ( पा. सू. ६. ४. १६७ ) इति प्रकृतिभावात् टिलोपाभावः । शीर्ष्णा । ' शीर्षश्छन्दसि ' ( पा. सू. ६. १. ६० ) इति शिरःशब्दपर्यायः[7] शीर्षन्शब्दोऽन्तोदात्तो निपात्यते[7] । अलोपे सति उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वम् ॥

अजोहवीन्नासत्या करा वां महे यामन्पुरुभुजा पुरंधिः ।
श्रुतं तच्छासुरिव वध्रिमत्या हिरण्यहस्तमश्विनावदत्तम् ॥ १३ ॥

अजोहवीत् । नासत्या । करा । वाम् । महे । यामन् । पुरुऽभुजा । पुरम्ऽधिः ।
श्रुतम् । तत् । शासुःऽइव । वध्रिऽमत्याः । हिरण्यऽहस्तम् । अश्विनौ । अदत्तम् ॥ १३ ॥

वध्रिमती नाम कस्यचिद्राजर्षेः पुत्री नपुंसकभर्तृका । सा पुत्रलाभार्थमश्विनावाजुहाव । तदाह्वानं श्रुत्वाश्विनावागत्य तस्यै हिरण्यहस्ताख्यं पुत्रं ददतुः । तदेतदाह । ᵛपुरुभुजा बहूनां पालकौ प्रभूतहस्तौ वा हे नासत्यावश्विनौ ᵛमहे महनीये पूजनीये ᵛयामन् यामनि । याति गच्छतीति याम स्तोत्रम् । तस्मिन्सति ᵛकरा अभिमतफलस्य कर्तारौ ᵛवां युवां ᵛपुरंधिः बहुधीः वध्रिमती । वध्रिः पुत्रोत्पादनाशक्तः पण्डकः[8] । तद्वती एतत्संज्ञा राजपुत्री ᵛअजोहवीत् । पुनःपुनः स्तुत्या पुत्रलाभार्थम् आहूतवती । युवां च ᵛवध्रिमत्याः तत् ᵛआह्वानं ᵛश्रुतम् अशृणुतम् । तत्र दृष्टान्तः । ᵛशासुरिव । यथा शासुः[9] आचार्यस्य वचनं शिष्योऽवहितःसन् ऐकाग्र्येण शृणोति तद्वत् । श्रुत्वा च हे ᵛअश्विनौ तस्यै ᵛहिरण्यहस्तं सुवर्णमयपाणिं हितरमणीयपाणिं वा एतत्संज्ञं पुत्रम् ᵛअदत्तं प्रायच्छतम् ॥ अजोहवीत् । ह्वयतेर्यङ्लुगन्तात् लङ् । ' यङो वा ' इति तिप ईडागमः । करा । करोतेः पचाद्यच् । ' सुपां सुलुक्० ' इति विभक्तेः आकारः । यामन् ।

---

१. क्ष-ट-शाटयायनकवाजसनेयकयोः; ठ-शाटथायनवाजसनेयकयोः । २. च-फ-नेतारौ । ३. न-स-प्रकर्षेण । ४. क्ष-ट-स-प्रकाशयेत् । ५. क्ष-ट-मधु मधुविद्याम् । ६. क्ष-ट-ठ-आविष्करोमीत्यर्थः । ७. क्ष-ट-ठ-शिरःशब्दस्य शीर्षन्नादेशः अन्तोदात्तः । ८. ण-य-पण्डकरज्जुः । ९. क्ष-ट-ठ-स-शासितुः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' आतो मनिन्क्वनिब्वनिपश्च ' इति मनिन् । ' सुपां सुलुक्° ' इति सप्तम्या लुक् । श्रुतम् । लङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । शासुः । शास्तुः । ' शासु अनुशिष्टौ ' । ' शंसिशसिशासि° ' ( उ. सू. २. २५० ) इत्यादिना संज्ञायां तृन् । इडभावः । छान्दसस्तलोपः ॥

आस्नो वृकस्य वर्तिकामभीके युवं नरा नासत्यामुमुक्तम् ।
उतो कविं पुरुभुजा युवं ह कृपमाणमकृणुतं विचक्षे ॥ १४ ॥

आस्नः । वृकस्य । वर्तिकाम् । अभीके । युवम् । नरा । नासत्या । अमुमुक्तम् ।
उतो इति । कविम् । पुरुऽभुजा । युवम् । ह । कृपमाणम् । अकृणुतम् । विऽचक्षे ॥ १४ ॥

वर्तिका चटकसदृशस्य[1] पक्षिणः स्त्री । तामरण्ये वर्तमानेन शुना ग्रस्तां पुरा किल अश्विनौ अमोचयताम् । तदेतदाह । हे [v]नरा नेतारौ नासत्यावश्विनौ [v]युवं युवाम् [v]अभीके अभिगते वृकवर्तिकयोः संग्रामे [v]वृकस्य विकर्तकस्य[2] शुनः [v]आस्नः आस्यात् [v]वर्तिकां चटकसदृशीम्[3] [v]अमुमुक्तम् अमोचयतम् । यास्कस्त्वाह । पुनःपुनर्वर्तते प्रतिदिवसमावर्तते इति वर्तिका उषाः । तां वृकेण आवरकेण सर्वजगत्प्रकाशेनाच्छादयित्रा[4] सूर्येण ग्रस्तां तदीयमुखादश्विनावमुञ्चतामिति । [v]उतो अपि च [v]पुरुभुजा महाबाहू प्रभूतहस्तौ वा [v]युवं [v]ह युवां खलु [v]कृपमाणं स्तुवन्तं [v]कविम् एतत्संज्ञमन्धमृषिं [v]विचक्षे विशेषेण द्रष्टुं समर्थम् [v]अकृणुतम् अकुरुतम् ॥ आस्नः । 'पद्दन्०' इत्यादिना आस्यस्य[5] आसन्नादेशः । ' अल्लोपोऽनः ' इति अकारलोपे उदात्तनिवृत्तिस्वरेण ' ऊडिदम्० ' इति विभक्तेरुदात्तत्वम् । अमुमुक्तम् । मुचेरन्तर्भावितण्यर्थात् लङि ' बहुलं छन्दसि ' इति विकरणस्य श्लुः । कृपमाणम् । कृपिः स्तुतिकर्मा तुदादिषु द्रष्टव्यः । विकरणस्वरे प्राप्ते ' वृषादीनां च ' इत्याद्युदात्तत्वम् । विचक्षे । ' तुमर्थे सेसेन्० ' इति सेन्प्रत्ययः । ' स्कोः संयोगाद्योः० ' इति सलोपः ॥

चरित्रं हि वेरिवाच्छेदि पर्णमाजा खेलस्य परितक्म्यायाम् ।
सद्यो जङ्घामायसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तम् ॥ १५ ॥

चरित्रम् । हि । वेःऽइव । अच्छेदि । पर्णम् । आजा । खेलस्य । परिऽतक्म्यायाम् ।
सद्यः । जङ्घाम् । आयसीम् । विश्पलायै । धने । हिते । सर्तवे । प्रति । अधत्तम् ॥ १५ ॥

अगस्त्यपुरोहितः खेलो नाम राजा[6] । तस्य संबन्धिनी विश्पला नाम स्त्री संग्रामे[7] शत्रुभिश्छिन्नपादा आसीत् । पुरोहितेनागस्त्येन स्तुतावश्विनौ रात्रावागत्य अयोमयं पादं समधत्ताम्[8] । तदेतदाह । [v]आजा आजौ संग्रामे अगस्त्यपुरोहितस्य [v]खेलस्य संबन्धिन्याः विश्पलाख्यायाः [v]चरित्रं चरणं [v]वेरिव वेः

---

१. क्ष-ट-ठ–चटकसंज्ञकस्य । २. स–विकर्षकस्य । ३. क्ष-ट-ठ–चटकस्त्रीम् । ४. क्ष-ट-ठ–सर्वं जगत् प्रकाशेन आच्छादयित्वा । ५. क्ष-ट-ठ-स–आस्यशब्दस्य । ६. च-ण-फ–राजर्षिः । ७. क्ष-ट-ठ-स–सा संग्रामे । ८. क्ष-ट-ठ–समधत्तामिति ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पक्षिणः Vपर्णं पतत्रमिव Vअच्छेदि Vहि पुरा छिन्नमभूत् खलु । हे अश्विनौ युवामगस्त्येन स्तुतौ सन्तौ Vपरितक्म्यायाम् । परितक्म्या रात्रिः । 'परित एनां तकति ( निरु. ११. २५ ) इति यास्कः । एनामुभयतः सूर्यो गच्छतीति तस्यार्थः । रात्रावागत्य Vसद्यः तदानीमेव Vहिते शत्रुषु निहिते Vधने जेतव्ये विषयभूते सति Vसर्तवे सर्तुं गन्तुं Vविश्पलायै Vआयसीम् अयोमयीं Vजङ्घां जङ्घोपलक्षितं पादं Vप्रत्यधत्तम् । संधानमेकीकरणं कृतवन्तावित्यर्थः ॥ चरित्रम् । 'अर्तिलूधूसूखनसहचर इत्रः' इति करणे इत्रः[1] । आजा । 'सुपां सुलुक्०' इति विभक्तेर्डादेशः । आयसीम् । अयःशब्दाद्विकारार्थे 'प्राणिरजतादिभ्योऽञ्' ( पा. सू. ४. ३. १५४ ) । 'टिड्ढाणञ्०' इति ङीप् ॥ ॥ १० ॥

शतं मेषान्वृक्ये चक्षदानमृज्राश्वं तं पिता न्धं चकार ।
तस्मा अक्षी नासत्या विचक्ष आधत्तं दस्रा भिषजावनर्वन् ॥ १६ ॥

शतम् । मेषान् । वृक्ये । चक्षदानम् । ऋज्रऽअश्वम् । तम् । पिता । अन्धम् । चकार ।
तस्मै । अक्षी इति । नासत्या । विऽचक्षे । आ । अधत्तम् । दस्रा । भिषजौ । अनर्वन् ॥ १६ ॥

वृषागिरः पुत्रः ऋज्राश्वो नाम राजर्षिः । तस्य समीपे अश्विनोर्वाहनभूतौ रासभौ वृकीभूत्वावतस्थे । स च तस्या आहारार्थमेकोत्तरशतसंख्याकान् पौरजनानां स्वभूतान्मेषान्शकलीकृत्य प्रददौ । 'ऋज्राश्वः शतमेकं च मेषान्' ( ऋ. सं. १. ११७. १८ ) इति मन्त्रान्तरे दर्शनात् । एवं पौराणामहिते प्रवृत्तं पिता शापेन नेत्रहीनमकरोत् । तेन स्तूयमानावश्विनौ अस्मद्वाहननिमित्तम् अस्य आन्ध्यं जातमिति जानन्तौ तस्मै[2] अक्षिणी प्रायच्छतामिति । तदेतदाह । अत्र तच्छब्दश्रुतेर्यच्छब्दाध्याहारः । यः ऋज्राश्वः Vशतं शतसंख्याकान् Vमेषान् Vवृक्ये आत्मना पोषितायै वृकस्त्रियै शकलीकृत्य प्रादात् Vतं Vचक्षदानम् । क्षदतिः अत्तिकर्मा अत्र शकलीकरणार्थः । शकलीकृत्य दत्तवन्तम् Vऋज्राश्वं Vपिता शापेन Vअन्धं दृष्टिहीनं Vचकार कृतवान् । हे Vनासत्या सत्यस्वभावौ सत्यस्य[3] नेतारौ वा[3] Vभिषजौ देवानां वैद्यभूतौ । 'अश्विनौ वै देवानां भिषजौ' ( ऐ. ब्रा. १. १८; तै. सं. २. ३. ११ ) इति श्रुतेः । Vदस्रा दर्शनीयौ एतत्संज्ञौ वा हे अश्विनौ Vअनर्वन् अनर्वणी द्रष्टव्यं प्रति पितृशापात् गमनरहिते Vअक्षी चक्षुषी Vविचक्षे विविधं द्रष्टुं समर्थे Vतस्मै ऋज्राश्वाय Vआधत्तम् व्यधत्तम् अकुरुतम् ॥ वृक्ये । वृकोऽरण्यश्वा । तस्य स्त्री वृकी । 'जातेरस्त्रीविषयात्०' ( पा. सू. ४. १. ६३ ) इति ङीष् । 'जसादिषु च्छन्दसि वावचनम्' इति चतुर्थ्येकवचनस्य आडभावे यणादेशे[4] 'उदात्तस्वरितयोर्यणः' इति परस्यानुदात्तस्य स्वरितत्वम् । चक्षदानम् । क्षदेर्लिटः कानच् । चित्स्वरः । अक्षी । 'ई च द्विवचने' ( पा. सू. ७. १. ७७ ) इति परत्वात्[5] अक्षशब्दस्य[5] ईकारान्तादेशः । स चोदात्तः । तस्मिन्कृते 'सकृद्गतौ विप्रतिषेधे०' ( परिभा. ४० ) इति परिभाषया पुनः नुम् न भवति । विचक्षे । चक्षेः संपदादिलक्षणो भावे क्विप् । अनर्वन् । 'ऋ गतौ' । अस्मात् 'अन्येभ्योऽपि दृश्यन्ते' इति दृशिग्रहणस्य विध्यन्तरोपसंग्रहार्थत्वात् भावे वनिप् । अर्व गमनं विषयं प्रति एनयोः[6] नास्तीति बहुव्रीहौ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् । 'सुपां सुलुक्०' इति द्विवचनस्य लुक् । छान्दसो नलोपाभावः ॥

---

१. क्ष-ट-ठ–इत्रप्रत्ययः । २. क्ष-ट–अस्य । ३. क्ष-ट-ठ–अश्विनौ । ४. स–यणादेशः ५. क्ष-ट-ठ–'परत्वात् अक्षशब्दस्य' नास्ति । ६. क्ष-ट-ठ–अनयोः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आ वां रथं दुहिता सूर्यस्य कार्ष्मेवातिष्ठदर्वता जयन्ती ।
विश्वे देवा अन्वमन्यन्त हृद्भिः समु श्रिया नासत्या सचेथे ॥ १७ ॥

आ । वाम् । रथम् । दुहिता । सूर्यस्य । कार्ष्मेऽइव । अतिष्ठत् । अर्वता । जयन्ती ॥ विश्वे । देवाः । अनु । अमन्यन्त । हृत्ऽभिः । सम् । ऊँ इति । श्रिया । नासत्या । सचेथे इति ॥ १७ ॥

सविता स्वदुहितरं सूर्याख्यां सोमाय राज्ञे प्रदातुमैच्छत् । तां सूर्यां सर्वे देवा वरयामासुः । ते अन्योन्यमूचुः । आदित्यमवधिं कृत्वा आजिं धावाम । योऽस्माकं मध्ये उज्जेष्यति तस्येयं भविष्यतीति । तत्राश्विनावुदजयताम् । सा च सूर्या जितवतोस्तयोः रथमारोह[1] । अत्र[2] ' प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् ' ( ऐ. ब्रा. ४. ७ ) इत्यादिकं ब्राह्मणम् अनुसंधेयम्[3] । इदं चाख्यानं सूर्याविवाहस्य स्तावकेन ' सत्येनोत्तभिता भूमिः ' ( ऋ. सं. १०. ८५. १ ) इति सूक्तेन विस्पष्टयिष्यते । हे अश्विनौ Vवां युवयोः Vरथं Vकार्ष्मेव । कार्ष्मशब्दः काष्ठवाची। यथा काष्ठम् आजिधावनस्य अवधितया निर्दिष्टं लक्ष्यम् आशुगामी कश्चित् सर्वेभ्यो धावद्भ्यः पूर्वं प्राप्नोति एवमेव सर्वेभ्यो देवेभ्यः पूर्वम् Vअर्वता शीघ्रमवधिं प्राप्नुवता युष्मदीयेनाश्वेन करणभूतेन युवाभ्यां Vजयन्ती जीयमाना[4] Vसूर्यस्य सवितुः Vदुहिता Vआ Vअतिष्ठत् आरूढवती। Vविश्वे सर्वे इतरे Vदेवाः एतत् आरोहणस्थानं[5] Vहृद्भिः हृदयैः Vअन्वमन्यन्त अन्वजानन् । तदानीं हे नासत्यावश्विनौ Vश्रिया ऋक्सहस्रलाभरूपया संपदा कान्त्या वा युवां Vसं Vसचेथे संगच्छेथे ॥ जयन्ती । व्यत्ययेन कर्मणि शतृप्रत्ययः[6] । हृद्भिः । ' पद्दन्० ' इत्यादिना हृदय-शब्दस्य हृद्भावः । सचेथे । ' षच समवाये ' । स्वरितेत्त्वादात्मनेपदम् ॥

यदयातं दिवोदासाय वर्तिर्भरद्वाजायाश्विना हयन्ता ।
रेवदुवाह सचनो रथो वां वृषभश्च शिंशुमारश्च युक्ता ॥ १८ ॥

यत् । अयातम् । दिवःऽदासाय । वर्तिः । भरत्ऽवाजाय । अश्विना । हयन्ता ।
रेवत् । उवाह । सचनः । रथः । वाम् । वृषभः । च । शिंशुमारः । च । युक्ता ॥ १८ ॥

हे अश्विनौ Vहयन्ता स्तुतिभिराह्वयमानौ युवां Vभरद्वाजाय संभ्रियमाणहविर्लक्षणान्नाय यजमानाय Vदिवोदासाय एतत्संज्ञाय राजर्षये अभीष्टं फलं दातुं Vवर्तिः तदीयं गृहं Vयत् यदा Vअयातम् अगच्छतं तदानीं Vरेवत् धनयुक्तम् अन्नं Vवां युवयोः Vसचनः सेवनः[7] Vरथः Vउवाह । तस्मै दिवोदासाय प्रापयामास । अपि च तस्मिन् रथे Vवृषभः अनड्वान् Vशिंशुमारः ग्राहः Vच परस्परविरुद्धावपि स्वसामर्थ्यप्रकटनाय Vयुक्ता[8] वाहनतया संयुक्तावास्ताम्[8] ॥ दिवोदासाय । ' दिवश्च दासे षष्ठ्या अलुग्वक्तव्यः ' ( का. ६. ३. २१. ५ ) इत्यलुक् । ' दिवोदासादीनां छन्दस्युपसंख्यानम् ' इति

---

१. स–रथमारुरोहेति । २. क्ष-ट-ठ–अत्र ऐतरेयके । ३. क्ष-ट-ठ–' अनुसंधेयम् ' इत्यस्यानन्तरं ' कौषीतके च अथ यत्र ह तत्सविता सूर्यां प्रायच्छत् सोमाय राज्ञे इत्यादि ' इत्यधिकम् । ४. क्ष-ट-ठ–विजीयमाना । ५. क्ष-ट-ठ-स–आरोहणं स्थानम् । ६. क्ष-ट-ठ-स–कर्तृप्रत्ययः । ७. क्ष-ट-ठ-न–सेवकः; स–सेचनः । ८. क्ष-ट-ठ–तथा युक्तावास्ताम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पूर्वपदाद्युदात्तत्वम् । भरद्वाजाय । ' भृञ् भरणे ' । अस्माद्व्यत्ययेन कर्मणि शतृप्रत्ययः[1] । शतुः ' छन्दस्युभयथा ' इति आर्धधातुकत्वेन लसार्वधातुकानुदात्तत्वाभावात् प्रत्ययाद्युदात्तत्वम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । हयन्ता । ह्वेञः कर्मणि लटो व्यत्ययेन शतृ । ' बहुलं छन्दसि ' इति संप्रसारणम् । शपि गुणे छान्दसः अयादेशः । रेवत् । रयिशब्दात् मतुप् । ' रयेर्मतौ बहुलम् ' इति संप्रसारणम् । ' छन्दसीरः ' इति मतुपो वत्वम् । ' रयिशब्दाच्च ' ( का. ६. १. १७६. १ ) इति मतुप उदात्तत्वम् । सचनः । ' षच सेवने[2] ' । ' अनुदात्तेतश्च हलादेः ' इति युच् । युक्ता । ' सुपां सुलुक्[3] ' इति विभक्तेः आकारः ।

रयिं सुक्षत्रं स्वपत्यमायुः सुवीर्यं नासत्या वहन्ता ।
आ जह्नावीं समनसोप वाजैस्त्रिरह्नो भागं दधतीमयातम् ॥ १९ ॥

रयिम् । सुऽक्षत्रम् । सुऽअपत्यम् । आयुः । सुऽवीर्यम् । नासत्या । वहन्ता ।
आ । जह्नावीम् । सऽमनसा । उप । वाजैः । त्रिः । अह्नः । भागम् । दधतीम् । अयातम् ॥ १९ ॥

हे नासत्यावश्विनौ [v]सुक्षत्रं शोभनबलं [v]रयिं धनं [v]स्वपत्यं शोभनैः पुत्रादिभिरुपेतं [v]सुवीर्यं शोभनवीर्योपेतम् [v]आयुः । अन्ननामैतत् । एवंगुणविशिष्टमन्नं च [v]वहन्ता धारयन्तौ युवां [v]समनसा समानमनस्कौ सन्तौ [v]जह्नावीं जह्नोर्महर्षेः संबन्धिनीं प्रजाम् [v]आ [v]अयातम् आभिमुख्येनागच्छतम् । कीदृशीं [v]वाजैः हविर्लक्षणैरन्नैरुपेताम् । [v]अह्नः । अत्र अहःशब्देन तत्रानुष्ठेयः सोमयागो लक्ष्यते । तस्य प्रातःसवनादिरूपेण [v]त्रिः त्रिधा विभक्तं [v]भागम् अंशं [v]दधतीं बिभ्रतीम् । अनुसवनं हविर्भिर्यजमानामित्यर्थः ॥ सुक्षत्रम् । बहुव्रीहौ ' नञ्सुभ्याम् ' इति उत्तरपदान्तोदात्तत्वम् । सुवीर्यम् । ' वीरवीर्यौ च ' इति बहुव्रीहौ उत्तरपदाद्युदात्तत्वम् । जह्नावीम् । जह्नुशब्दात् ' तस्येदम् ' इत्यर्थे अण् । ' टिड्ढाणञ्° ' इति ङीप् । जाह्नवी[3] । ह्रस्वदीर्घयोर्विनिमयः पृषोदरादित्वात् । उक्तं च– ' वर्णागमो वर्णविपर्ययश्च ' ( का. ६. ३. १०९ ) इति । अत एव मध्योदात्तत्वम् ॥

परिविष्टं जाहुषं विश्वतः सीं सुगेभिर्नक्तमूहथू रजोभिः ।
विभिन्दुना नासत्या रथेन वि पर्वताँ अजरयू अयातम् ॥ २० ॥

परिऽविष्टम् । जाहुषम् । विश्वतः । सीम् । सुऽगेभिः । नक्तम् । ऊहथुः । रजःऽभिः ।
विऽभिन्दुना । नासत्या । रथेन । वि । पर्वतान् । अजरयू इति । अयातम् ॥ २० ॥

जाहुषो नाम कश्चिद्राजा । [v]विश्वतः सर्वतः [v]परिविष्टं शत्रुभिः परिवृतं[4] तं राजानं हे नासत्यावश्विनौ [v]अजरयू जरारहितौ[5] नित्यतरुणौ युवां [v]विभिन्दुना विशेषेण सर्वस्य भेदकेनात्मीयेन [v]रथेन [v]नक्तं रात्रौ [v]सुगेभिः सुष्ठु गन्तुं शक्यैः [v]रजोभिः रज्जुकैर्मार्गैः [v]ऊहथुः तस्मात् शत्रुसमूहान्निरगमयतम् ।

---

१. क्ष-ट-ठ–कर्तृप्रत्ययः । २. स–सेचने । ३. ठ–जह्नावीम्; न–जाह्नवीम् । ४. च-छ-ण-फ–परिवेष्टितम् । ५. क्ष-ट-ठ–जरावर्जितौ ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]सीम् इत्येतत् पादपूरणम्[1]। निर्गतेन तेन सह [v]पर्वतान् शत्रुभिरारोढुमशक्यान् शिलोच्चयान् [v]वि [v]अयातं विशेषेणागच्छतम्॥ परिविष्टम्। 'विश प्रवेशने'। कर्मणि निष्ठा। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। सुगेभिः। 'सुदुरोरधिकरणे' इति गमेर्डः। विभिन्दुना। 'भिदिर् विदारणे'। औणादिक उप्रत्ययो नुमागमश्च। अजरयू। न जरा अजरा तामात्मन इच्छतः। 'सुप आत्मनः क्यच्'। 'न च्छन्दस्यपुत्रस्य' इति इत्वदीर्घयोर्निषेधः। 'क्याच्छन्दसि' इति उप्रत्ययः॥ ॥ ११ ॥

एकस्या वस्तोरावतं रणाय वशमश्विना सनये सहस्रा।
निरहतं दुच्छुना इन्द्रवन्ता पृथुश्रवसो वृषणावरातीः॥ २१ ॥

एकस्याः। वस्तोः। आवतम्। रणाय। वशम्। अश्विना। सनये। सहस्रा।
निः। अहतम्। दुच्छुनाः। इन्द्रऽवन्ता। पृथुऽश्रवसः। वृषणौ। अरातीः॥ २१ ॥

हे अश्विनौ [v]वशम् एतत्संज्ञमृषिम् [v]एकस्याः [v]वस्तोः एकस्याह्नः [v]रणाय रमणीयाय [v]सहस्रा सहस्रसंख्याकाय[2] [v]सनये धनलाभाय [v]आवतम् अरक्षतम्। स ऋषिः प्रत्यहं यथा सहस्रसंख्यं धनं लभते तथा रक्षितवन्तावित्यर्थः। अपि च हे [v]वृषणौ कामानां वर्षितारावश्विनौ [v]इन्द्रवन्ता इन्द्रेण संयुक्तौ युवां [v]दुच्छुनाः दुष्टसुखान् दुःखस्य कर्तॄन् [v]पृथुश्रवसः विस्तीर्णयशसः [v]अरातीः शत्रून् [v]निरहतं निःशेषेणावधिष्टम्। यद्वा। कानीनस्य पृथुश्रवःसंज्ञस्य[3] राज्ञः शत्रूनिति योज्यम्॥ सहस्रा। 'सुपां सुलुक्°' इति चतुर्थ्या डादेशः। अहतम्। लङि थसस्तम्। 'अनुदात्तोपदेश°' इत्यादिना अनुनासिकलोपः। दुच्छुनाः। शुनमिति सुखनाम। दुष्टं सुखं यासां तास्तथोक्ताः। 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वम्॥

शरस्य चिदार्चत्कस्यावतादा नीचादुच्चा चक्रथुः पातवे वाः।
शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गाम्॥ २२ ॥

शरस्य। चित्। आर्चत्ऽकस्य। अवतात्। आ। नीचात्। उच्चा। चक्रथुः। पातवे। वारिति वाः।
शयवे। चित्। नासत्या। शचीभिः। जसुरये। स्तर्यम्। पिप्यथुः। गाम्॥ २२ ॥

[v]आर्चत्कस्य ऋचत्कपुत्रस्य[4] [v]शरस्य एतत्संज्ञस्यापि स्तोतुः पिपासितस्य [v]पातवे पानार्थं [v]नीचात् नीचीनात् [v]अवतात् कूपात् [v]उच्चा उच्चैरुपरिष्टात् [v]वाः उदकं हे अश्विनौ युवाम् [v]आ [v]चक्रथुः आभिमुख्येन कृतवन्तौ। तथा हे नासत्यावश्विनौ [v]शचीभिः युष्मदीयैः कर्मभिः परिचरणैः [v]जसुरये श्रान्ताय[5] [v]शयवे [v]चित् शयुनाम्नेऽपि[6] ऋषये [v]स्तर्यं निवृत्तप्रसवां [v]गाम् अग्निहोत्रार्थस्य पयसो दोग्ध्रीं [v]पिप्यथुः पयसा युवामापूरितवन्तौ॥ पातवे। 'पा पाने'। 'तुमर्थे सेसेन्°' इति तवेन्प्रत्ययः। जसुरये। 'जसु हिंसायाम्'। 'जसिसहोरुरिन्' (उ. सू. २. २३१)। स्तर्यम्। स्तीर्यते आच्छाद्यते

---

१. क्ष-ट–पदपूरणम्; स–पदं पादपूरणम्। २. क्ष-ट-ठ-न-स–सहस्रसंख्याय। ३. क्ष-ट-ठ-न-स–पृथुश्रवःसंज्ञकस्य। ४. क्ष-ट-ठ–ऋचत्कस्य पुत्रस्य। ५. क्ष-ट-ठ–शान्ताय। ६. ण-द-फ-य-ल–शयुनाम्नेऽपि।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रसवसामर्थ्याभावेन इति स्तरीः । 'अवितृस्तृतन्त्रिभ्य ईः ( उ. सू. ३. ४३८ ) इति ईकारप्रत्ययः । ':वाच्छन्दसि ' इति अमि पूर्वत्वस्य[1] विकल्पितत्वात् अभावे[2] यणादेशः । 'उदात्तस्वरितयोर्यणः०' इति परस्यानुदात्तस्य स्वरितत्वम् । पिप्यथुः । 'प्यायी वृद्धौ' । लिटि व्यत्ययेन परस्मैपदम् । 'लिड्यङोश्च' ( पा. सू. ६. १. २९ ) इति पीभावः ॥

अवस्यते स्तुवते कृष्णियाय ऋजूयते नासत्या शचीभिः ।
पशुं न नष्टमिव दर्शनाय विष्णाप्वं ददथुर्विश्वकाय ॥ २३ ॥

अवस्यते । स्तुवते । कृष्णियाय । ऋजुऽयते । नासत्या । शचीभिः ।
पशुम् । न । नष्टम्ऽइव । दर्शनाय । विष्णाप्वम् । ददथुः । विश्वकाय ॥ २३ ॥

vअवस्यते अवनं रक्षणमात्मन इच्छते । vस्तुवते स्तुतिं कुर्वते vकृष्णियाय । कृष्णो नाम कश्चित् । तस्य पुत्राय vऋजूयते आर्जवमिच्छते vविश्वकाय एतत्संज्ञाय[3] ऋषये हे नासत्यौ युवां vशचीभिः आत्मीयैः कर्मभिः vविष्णाप्वं[4] नाम विनष्टं[5] पुत्रं[5] vदर्शनाय दर्शनार्थं vददथुः दत्तवन्तौ । तत्र दृष्टान्तः । vपशुं vन vनष्टमिव । एक[6] उपमार्थीयः पूरकः[6] । यथा कश्चिद्विनष्टं पशुं स्वामिनो दृष्टिपथं प्रापयति तद्वत् ॥ अवस्यते । अवःशब्दात् 'सुप आत्मनः क्यच्' । 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम् । कृष्णियाय । कृष्णशब्दादपत्यार्थे छान्दसो घच् ॥

दश रात्रीरशिवेना नव द्यूनवबद्धं श्रथितमप्स्वन्तः ।
विप्रुतं रेभमुदनि प्रवृक्तमुन्निन्यथुः सोममिव स्रुवेण ॥ २४ ॥

दश । रात्रीः । अशिवेन । नव । द्यून् । अवऽनद्धम् । श्रथितम् । अप्ऽसु । अन्तरिति । विऽप्रुतम् । रेभम् । उदनि । प्रऽवृक्तम् । उत् । निन्यथुः । सोमम्ऽइव । स्रुवेण ॥ २४ ॥

पुरा खलु रेभमृषिं पाशैर्बद्ध्वा असुराः कूपे कस्यचिद्दिवसस्य सायंकाले प्रचिक्षिपुः । स च अश्विनौ स्तुवन् दश रात्रीः नवाहानि च कूपमध्ये तथैवावतस्थे । दशमेऽहनि प्रातः अश्विनौ तं कूपात् उदतारयतामिति । तदाह । vअप्सु कूपान्तर्वर्तमानासु vअन्तः मध्ये असुरैः पातितम् vअशिवेन दुःखहेतुना दाम्ना vअवनद्धं बद्धं vश्रथितं शत्रुभिर्हिंसितं vदश vरात्रीः दशसंख्याका निशाः vनव vद्यून् नवसंख्याकान्यहानि च । अत्यन्तसंयोगे द्वितीया । एतावन्तं कालं तत्रैव कूपेऽवस्थितम् अत एव vउदनि उदके vविप्रुतं विप्लुतं व्याक्षिप्तसर्वाङ्गं vप्रवृक्तम् । लुप्तोपममेतत् । प्रवृञ्चनेन संतप्तं घर्ममिव व्यथया संतप्यमानम् एवंभूतं vरेभं हे अश्विनौ युवाम् vउन्निन्यथुः तस्मात्कूपात् उन्नीतम्[7] उत्तीर्णं कृतवन्तौ । तत्र दृष्टान्तः । vसोममिव यथा अग्निहोत्रहोमार्थम् अभिषुतं[8] सोमरसं[8] कूपसदृशे अग्निहोत्र-

---

१. क्ष-ट-ठ-स–पूर्वस्य । २. क्ष-ट-ठ–तदभावे । ३. क्ष-ट–एतत्संज्ञकाय । ४. स–विष्णाप्वम् । विष्णाप्वम् । ५. क्ष-ट-ठ–विनष्टपुत्रम् । ६. क्ष-ट-ठ–एकः उपमानार्थः अपरः पूरणः । ७. क्ष-ट-ठ–'उन्नीतम्' नास्ति; स–उन्नीय । ८. क्ष-ट–अभिषुतं सोमम्; ठ–अभिषुतं होमार्थम्; स–अभिषुतसोमरसम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्थालीमध्ये वर्तमानं[1] vस्रुवेण अध्वर्युः उन्नयति ऊर्ध्वं नयति तद्वत् ॥ अवनद्धम्। 'णह बन्धने'। कर्मणि निष्ठा। 'नहो धः' (पा. सू. ८. २. ३४)। 'झषस्तथोर्धोऽधः' इति निष्ठातकारस्य धत्वम्। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। श्रथितम्। 'श्रथ हिंसार्थः'। निष्ठा। विप्रुतम्। 'प्रुङ् गतौ'। अवनद्धवत्[2] प्रत्ययस्वरौ[2]। कपिलकादित्वात् लत्वविकल्पः। उदनि। 'पद्दन्०' इत्यादिना उदकशब्दस्य उदन्भावः[3] ॥

**प्र वां दंसांस्यश्विनाववोचमस्य पतिः स्यां सुगवः सुवीरः।**
**उत पश्येन्नश्नुवन्दीर्घमायुरस्तमिवेज्जरिमाणं जगम्याम् ॥ २५ ॥**

प्र। वाम्। दंसांसि। अश्विनौ। अवोचम्। अस्य। पतिः। स्याम्। सुऽगवः। सुऽवीरः।
उत। पश्येन्। अश्नुवन्। दीर्घम्। आयुः। अस्तम्ऽइव। इत्। जरिमाणम्। जगम्याम्॥२५॥

एवमनेन सूक्तेन अश्विनोर्महिमानं प्रशस्य अधुना मन्त्रद्रष्टा स्वाभीष्टं प्रार्थयते। हे vअश्विनौ vवां युवयोः vदंसांसि पुरा कृतानि कर्माणि vप्र vअवोचम् इत्थम्[4] उक्तवानस्मि। सोऽहं vसुगवः शोभनगोयुक्तः vसुवीरः शोभनवीरश्च भूत्वा vअस्य राष्ट्रस्य vपतिः अधिपतिः vस्यां भवेयम्। vउत अपि च vपश्येन् अक्षिभ्यां पश्येन्। उपलक्षणमेतत्। सर्वैरिन्द्रियैः स्वस्वविषयदर्शनसमर्थैः[5] दीर्घं vवर्षशतरूपेण आयतम्[6] vआयुः जीवितं च vअश्नुवन् प्राप्नुवन्नहम् vअस्तमिव यथा गृहं स्वामी[7] निष्कण्टकं प्रविशति एवं vजरिमाणं जरां vजगम्यां कण्टकराहित्येन प्राप्नुयाम्। वृद्धः सन् चिरकालं निवसेयमित्यर्थः ॥ स्याम्। अस्तेः प्रार्थनायां लिङ्। यासुट्। 'श्नसोरल्लोपः' इत्यकारलोपः। अश्नुवन्। 'अशू व्याप्तौ'। व्यत्ययेन शतृ। जरिमाणम्। 'जॄष् वयोहानौ'। अस्मादौणादिकः इमनिच्। जगम्याम्। गमेः प्रार्थनायां लिङि[8] 'बहुलं छन्दसि' इति विकरणस्य श्लुः ॥ ॥ १२ ॥

'मध्वः' इति पञ्चविंशत्यृचं द्वितीयं सूक्तम्। औशिजस्य कक्षीवत आर्षं त्रैष्टुभमाश्विनम्। 'मध्वः' इत्यनुक्रान्तम् ॥ प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तो विनियोगः ॥

**मध्वः सोमस्याश्विना मदाय प्रत्नो होता विवासते वाम्।**
**बर्हिष्मती रातिर्विश्रिता गीरिषा यातं नासत्योप वाजैः ॥ १ ॥**

मध्वः। सोमस्य। अश्विना। मदाय। प्रत्नः। होता। आ। विवासते। वाम्।
बर्हिष्मती। रातिः। विऽश्रिता। गीः। इषा। यातम्। नासत्या। उप। वाजैः॥ १ ॥

हे अश्विनौ vमध्वः मधुना माधुर्योपेतेन vसोमस्य सोमेन vमदाय युवयोर्मदार्थं vप्रत्नः चिरंतनः vहोता होमनिष्पादको यजमानः vवां युवाम् vआ vविवासते। विवासतिः परिचरणकर्मा। आङ्

---

१. क्ष-ट-ठ–अवस्थितम्। २. क्ष-ट-ठ–अवनद्धमितिवन्निष्ठास्वरौ; स–अवनद्ध इतिवत् प्रत्ययस्वरौ। ३. क्ष-ट-ठ–उदन्नादेशः। ४. क्ष-ट-ठ–प्र स्पष्टम्। ५. ठ–स्वस्वविषयग्रहणसमर्थैः। ६. च-छ-ण-फ–स्थापितम्। ७. च-छ-ण–गृहस्थः। ८. क्ष-ट-ठ–लिङ्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मर्यादायाम् । यथाशास्त्रं परिचरति । अपि च [v]रातिः दातव्यं हविः [v]बर्हिष्मती आस्तीर्णेन बर्हिषा युक्तम् । युष्मदर्थं बर्हिषि आसादितमित्यर्थः । तथा [v]गीः स्तुतिलक्षणा वाक् च [v]विश्रिता ऋत्विक्षु समवेता । तैः स्तुतिरपि क्रियते इत्यर्थः । अतो हे नासत्यावश्विनौ [v]इषा अस्मभ्यं दातव्येनान्नेन [v]वाजैः बलैश्च सह युवाम् [v]उप [v]यातम् अस्मत्समीपं प्राप्नुतम् ॥ मध्वः । ' सुपां सुपो भवन्ति ' इति तृतीयार्थे षष्ठी । ' जसादिषु च्छन्दसि वावचनम् ' इति ' घेर्ङिति ' इति गुणाभावे यणादेशः । मदाय । ' मदी हर्षे ' । ' मदोऽनुपसर्गे ' इति अप् । रातिः । ' रा दाने ' । कर्मणि क्तिन् । ' मन्त्रे वृषेष° ' इत्यादिना तस्योदात्तत्वम् । विश्रिता । ' श्रिञ् सेवायाम् ' । कर्मणि निष्ठा । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् ॥

यो वामश्विना मनसो जवीयान्रथः स्वश्वो विशं आजिगाति ।
येन गच्छथः सुकृतो दुरोणं तेन नरा वर्तिरस्मभ्यं यातम् ॥ २ ॥

यः । वाम् । अश्विना । मनसः । जवीयान् । रथः । सुऽअश्वः । विशः । आऽजिगाति ।
येन । गच्छथः । सुऽकृतः । दुरोणम् । तेन । नरा । वर्तिः । अस्मभ्यम् । यातम् ॥ २ ॥

हे अश्विनौ [v]वां युवयोः स्वभूतः [v]मनसो [v]जवीयान् मनसोऽप्यतिशयेन वेगवान् [v]स्वश्वः शोभनाश्वः एवंभूतः [v]यः [v]रथः [v]विशः प्रजाः [v]आजिगाति आभिमुख्येन गच्छति । [v]येन[1] रथेन [v]सुकृतः शोभनं यागं कुर्वतो यजमानस्य [v]दुरोणं देवयजनलक्षणं गृहं [v]गच्छथः । हे [v]नरा नेतारावश्विनौ [v]तेन रथेन [v]अस्मभ्यम् अस्माकं [v]वर्तिः वर्तनाधिकरणं गृहं [v]यातम् आगच्छतम् ॥ जवीयान् । जवोऽस्यास्तीति जववान् । ' तदस्यास्ति ' इति मतुप् । ततः आतिशायनिकः ईयसुन् । विन्मतोर्लुक् । ' टेः ' इति टिलोपः । जिगाति । ' गा स्तुतौ ' । जौहोत्यादिकः । गतिकर्मसु पाठादत्र गत्यर्थः । ' बहुलं छन्दसि ' इति अभ्यासस्य इत्वम् ॥

ऋषिं नरावंहसः पाञ्चजन्यमृबीसादत्रिं मुञ्चथो गणेन ।
मिनन्ता दस्योरशिवस्य माया अनुपूर्वं वृषणा चोदयन्ता ॥ ३ ॥

ऋषिम् । नरौ । अंहसः । पाञ्चऽजन्यम् । ऋबीसात् । अत्रिम् । मुञ्चथः । गणेन ।
मिनन्ता । दस्योः । अशिवस्य । मायाः । अनुऽपूर्वम् । वृषणा । चोदयन्ता ॥ ३ ॥

' हिमेनाग्निम् ' ( ऋ. सं. १. ११६. ८ ) इत्यनयोक्त एवार्थः पुनः प्रकारान्तरेण अनया प्रतिपाद्यते । अतस्तत्रोक्तं सर्वमत्रापि द्रष्टव्यम् । अक्षरार्थस्तु । हे [v]नरौ नेतारौ [v]वृषणा कामानां वर्षितारौ अश्विनौ [v]पाञ्चजन्यम् । निषादपञ्चमाश्चत्वारो वर्णाः पञ्चजनाः । तेषु भवम् । स्वर्भानुना गृहीतममुं सूर्यं मोचयन्[2] अत्रिः सर्वेषां हिताचरणात् तत्रभवः इत्युच्यते । तादृशम् [v]ऋषिम्[3] [v]अंहसः पापरूपात् [v]ऋबीसात् शतद्वारे यन्त्रगृहे अत्रेः पीडार्थम् असुरैः प्रक्षिप्तात् तुषाग्नेः सकाशात् [v]गणेन इन्द्रियवर्गेण

---

१. क्ष-ट-ठ-स–येन च । २. ठ-स–रोचयन् । ३. क्ष-ट-ठ-स–अत्रिम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पुत्रपौत्रादिगणेन[1] वा सह [v]मुञ्चथः असोचयतम्। किं कुर्वन्तौ। [v]मिनन्ता शत्रून् हिंसन्तौ [v]दस्योः उपक्षपयितुः [v]अश्विवस्य दुःखकारिणः असुरस्य संबन्धिनीः तस्मिन् अग्नौ प्रयुक्ताः [v]मायाः च [v]अनुपूर्वम् आनुपूर्व्येण[2] [v]चोदयन्ता प्रेरयन्तौ निवारयन्तौ ॥ पाञ्चजन्यम्। 'बहिर्देवपञ्चजनेभ्यश्चेति वक्तव्यम्' (का. ४. ३. ५८. १) इति भवार्थे ञ्यः। मिनन्ता। 'मीञ् हिंसायाम्'। क्रैयादिकः। लटः शतृ। 'मीनातेर्निगमे' इति ह्रस्वत्वम् ॥

अश्वं न गूळ्हमश्विना दुरेवैर्ऋषिं नरा वृषणा रेभमप्सु ।
सं तं रिणीथो विप्रुतं दंसोभिर्न वां जूर्यन्ति पूर्व्या कृतानि ॥ ४ ॥

अश्वम्। न। गूळ्हम्। अश्विना। दुःऽएवैः। ऋषिम्। नरा। वृषणा। रेभम्। अप्ऽसु। सम्। तम्। रिणीथः। विऽप्रुतम्। दंसःऽभिः। न। वाम्। जूर्यन्ति। पूर्व्या। कृतानि ॥ ४ ॥

[v]नरा नेतारौ [v]वृषणा कामानां वर्षकौ हे अश्विनौ [v]दुरेवैः दुष्प्रापैरसुरैः [v]अप्सु कूपस्थेषूदकेषु [v]गूळ्हं निगूढं निखातं [v]रेभम् [v]ऋषिं कूपादुन्नीय [v]विप्रुतं विश्लिष्टावयवं [v]तम् [v]अश्वं [v]न व्याधितमश्वमिव [v]दंसोभिः आत्मीयैः भैषज्यरूपैः कर्मभिः [v]सं [v]रिणीथः समधत्तम्। सर्वैरवयवैरुपेतमकुरुतमित्यर्थः। [v]वां युवयोः संबन्धीनि [v]पूर्व्या चिरंतनानि [v]कृतानि कर्माणि [v]न [v]जूर्यन्ति न हि[3] जीर्णानि भवन्ति॥ दुरेवैः। दुरुपसृष्टात् एतेः 'ईषदुःसुषु०' इति खल्। रिणीथः। 'री गतिरेषणयोः'। क्रैयादिकः। 'प्वादीनां ह्रस्वः'। जूर्यन्ति। 'जॄष् वयोहानौ'। दैवादिकत्वात्[4] श्यन्। 'बहुलं छन्दसि' इति उत्वम्। 'हलि च' इति दीर्घः ॥

सुषुप्वांसं न निर्ऋतेरुपस्थे सूर्यं न दंस्रा तमसि क्षियन्तम् ।
शुभे रुक्मं न दर्शतं निखातमुदूपथुरश्विना वन्दनाय ॥ ५ ॥

सुसुप्वांसम्। न। निःऽऋतेः। उपऽस्थे। सूर्यम्। न। दंस्रा। तमसि। क्षियन्तम्। शुभे। रुक्मम्। न। दर्शतम्। निऽखातम्। उत्। ऊपथुः। अश्विना। वन्दनाय ॥ ५ ॥

निर्ऋतिरिति भूनाम। [v]निर्ऋतेः पृथिव्याः [v]उपस्थे उत्सङ्गे [v]सुषुप्वांसं सुप्तवन्तं पुरुषमिव कूपमध्ये शयानं [v]सूर्यं [v]न सूर्यमिव [v]तमसि कूपान्तर्गतान्धकारे[5] [v]क्षियन्तं निवसन्तं सूर्यमिव[6] तेजस्विनमित्यर्थः[6]। [v]शुभे शोभार्थं[7] निर्मितं [v]रुक्मं [v]न रोचमानं सुवर्णमयाभरणमिव [v]दर्शतं दर्शनीयम् एवंगुणविशिष्टं कूपे असुरैः [v]निखातं [v]वन्दनाय वन्दनमृषिं हे [v]दंस्रा दर्शनीयावश्विनौ युवाम् [v]उदूपथुः उद्धृतवन्तौ ॥ सुषुप्वांसम्। 'जिष्वप् शये'। लिटः क्वसुः। 'वचिस्वपि०' इत्यादिना संप्रसारणम्। द्विर्वचनादि। उपस्थे। उपपूर्वात् तिष्ठतेः 'घञर्थे कविधानम्' इत्यधिकरणे कप्रत्ययः। मरुद्वृधा-

---

१. क्ष-ट-ठ–पुत्रपौत्रादिवर्गेण। २. च-छ-ण-द-ध-ल–आनुपूर्व्येण अनुक्रमेण। ३. क्ष-ट-ठ–'हि' नास्ति। ४. क्ष-ट-ठ-स–दिवादित्वात्। ५. क्ष-ट-ठ–कूपान्तर्गते अन्धकारे। ६. क्ष-ट-ठ–सूर्यवत् तेजस्विनं स्थितमित्यर्थः। ७. क्ष-स–शोभनार्थम्।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दित्वात् पूर्वपदान्तोदात्तत्वम् । वन्दनाय । ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वाच्चतुर्थी ॥ ॥ १३ ॥

तद्वां नरा शंस्यं पज्रियेणं कक्षीवता नासत्या परिज्मन् ।
शफादश्वस्य वाजिनो जनाय शतं कुम्भाँ असिञ्चतं मधूनाम् ॥ ६ ॥

तत् । वाम् । नरा । शंस्यम् । पज्रियेण । कक्षीवता । नासत्या । परिऽज्मन् ।
शफात् । अश्वस्य । वाजिनः । जनाय । शतम् । कुम्भान् । असिञ्चतम् । मधूनाम् ॥ ६ ॥

हे ᵛनरा नेतारौ नासत्यावश्विनौ ᵛपरिज्मन् परिगमनेऽभीष्टस्य प्रापणे निमित्तभूते सति ᵛपज्रियेण पज्राणाम् अङ्गिरसां कुले जातेन ᵛकक्षीवता मया ᵛवां युवयोः संबन्धि ᵛतत् कर्म ᵛशंस्यम् प्रकर्षेण शंसनीयम् । तच्छब्दश्रुतेः यच्छब्दाध्याहारः । यत् ᵛजनाय अपेक्षमाणाय पुरुषाय ᵛवाजिनः वेगवतः तदीयस्य ᵛअश्वस्य ᵛशफात्[1] निर्गतैः ᵛमधूनां मधुभिः शतसंख्याकान् ᵛकुम्भान् ᵛअसिञ्चतम् अपूरयतम् । सिञ्चतिरत्र पूरणार्थः । यदेतन्मधुना पूरणं तत् शंस्यम्[2] इत्यर्थः ॥

युवं नरा स्तुवते कृष्णियाय विष्णाप्वं ददथुर्विश्वकाय ।
घोषायै चित्पितृषदे दुरोणे पतिं जूर्यन्त्या अश्विनावदत्तम् ॥ ७ ॥

युवम् । नरा । स्तुवते । कृष्णियाय । विष्णाप्वम् । ददथुः । विश्वकाय ।
घोषायै । चित् । पितृऽसदे । दुरोणे । पतिम् । जूर्यन्त्यै । अश्विनौ । अदत्तम् ॥ ७ ॥

हे ᵛनरा नेतारौ अश्विनौ ᵛयुवं युवां ᵛस्तुवते स्तोत्रं कुर्वते ᵛकृष्णियाय कृष्णाख्यस्य पुत्राय ᵛविश्वकाय ᵛविष्णाप्वं[3] ᵛददथुः[3] । विष्णाप्वं नाम विनष्टं पुत्रं दत्तवन्तौ[4] । घोषानाम ब्रह्मवादिनी कक्षीवतो दुहिता । सा कुष्ठिनी सती कस्मैचिद्वराय अदत्ता पितृगृहे निषण्णा जीर्णा आसीत् । सा अश्विनोरनुग्रहात् नष्टकुष्ठा सती पतिं लेभे । तदेतदाह । हे ᵛअश्विनौ पित्रा संबद्धे ᵛदुरोणे स्वकीयजनकगृहे कुष्ठरोगेण भर्तारमप्राप्य ᵛपितृषदे पितृसमीपे निषण्णायै ᵛजूर्यन्त्यै जरां प्राप्नुवत्यै ᵛघोषायै ᵛचित् एतत्संज्ञायै ब्रह्मवादिन्यै अपि रोगोपशमनेन ᵛपतिं भर्तारम् ᵛअदत्तं युवां दत्तवन्तौ ॥ पितृषदे । ' षद्लृ विशरणादिषु[5] ' । ' क्विप् च ' इति क्विप् । जूर्यन्त्यै । ' जॄष् वयोहानौ ' । लटः शतृ । दिवादित्वात् श्यन् । ' बहुलं छन्दसि ' इति उत्वम् । ' हलि च ' इति दीर्घः । अदुपदेशात् लसार्वधातुकानुदात्तत्वे श्यनो नित्त्वादाद्युदात्तत्वम् ॥

---

१. क्ष-ट-ठ-स–शफात् खुरात् । २. क्ष-ट-ठ–प्रशस्यम् । ३. क्ष-ट-ठ-न-स–' विष्णाप्वं ददथुः ' नास्ति । ४. स–ददथुः दत्तवन्तौ । ५. क्ष-ट-ठ-स–विशरणगत्यवसादनेषु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

युवं श्यावाय रुशतीमदत्तं महः क्षोणस्याश्विना कण्वाय ।
प्रवाच्यं तद्वृषणा कृतं वां यन्नार्षदाय श्रवो अध्यधत्तम् ॥ ८ ॥

युवम् । श्यावाय । रुशतीम् । अदत्तम् । महः । क्षोणस्य । अश्विना । कण्वाय ।
प्रऽवाच्यम् । तत् । वृषणा । कृतम् । वाम् । यत् । नार्षदाय । श्रवः । अधिऽअधत्तम् ॥८॥

हे अश्विनौ [V]युवं युवां [V]श्यावाय कुष्ठरोगेण श्यामवर्णाय ऋषये [V]रुशतीं दीप्तत्वचं स्त्रियम्[1] [V]अदत्तम् प्रायच्छतम्। अपि च [V]क्षोणस्य क्षोणाय यः[2] दृष्टिराहित्येन गन्तुमशक्तः[3] सन्[3] एकस्मिन्नेव स्थाने निवसति[4] तस्मै[5] [V]कण्वाय ऋषये [V]महः तेजः तैजसं चक्षुरिन्द्रियम् अदत्तमिति शेषः। तथा हे [V]वृषणा कामानां वर्षितारौ [V]वां युवयोः [V]तत् [V]कृतं कर्म [V]प्रवाच्यं प्रकर्षेण वाचनीयं शंसनीयम्[6] । [V]नार्षदाय नृषदः पुत्राय बधिराय ऋषये [V]श्रवः श्रवणेन्द्रियं [V]यत् [V]अध्यधत्तं दत्तवन्तौ स्थः इति यत् तदित्यर्थः। अपर आह। ब्राह्मण्यस्य परीक्षार्थमसुराः कण्वमृषिं गूढे तमसि निदधुः । अत्रैव स्थितः सन् व्युष्टामुषसं विजानीहि यदि त्वं ब्राह्मणोऽसीति। तमश्विनौ आगत्योचतुः। व्युष्टायां हर्म्यस्य उपरि वीणां वादयन्तौ आवाम् आगमिष्यावः। तं शब्दं श्रुत्वा व्युष्टामुषसं ब्रूहि[7] । तदेतत्प्रतिपाद्यते। हे वृषणा कामानां वर्षितारावश्विनौ वां युवयोः तत्कृतं कर्म प्रवाच्यं प्रशंसनीयं यन्नार्षदाय नृषदः पुत्राय कण्वाय क्षोणस्य । क्षोणः शब्दकारी वीणाविशेषः । महः[8] महतः क्षोणस्य श्रवः शब्दम् अध्यधत्तम् उषसो विज्ञानार्थम् अधिकम् अकुरुतम्॥ महः । 'मह पूजायाम्'। अस्मादौणादिकः असिप्रत्ययः। पक्षान्तरे तु महच्छब्दात् षष्ठ्येकवचने छान्दसः अलोप[9]: । 'बृहन्महतोरुपसंख्यानम्' इति विभक्तेरुदात्तत्वम्। यद्वा। क्विबन्तात् षष्ठ्येकवचनम्। क्षोणस्य । 'क्षि निवासगत्योः'। 'कृत्यल्युटो बहुलम्' इति कर्तरि ल्युट्। पृषोदरादित्वात् क्षोणभावः। तदुक्तं यास्केन–'क्षोणस्य क्षयणस्य' ( निरु. ६. ६ ) इति। पक्षान्तरे तु 'टुक्षु शब्दे' इत्यस्मादौणादिकः नप्रत्ययः। नार्षदाय । 'ऋष्यन्धक०' इति अण् ॥

पुरू वर्पांस्यश्विना दधाना नि पेदवे ऊहथुराशुमश्वम् ।
सहस्रसां वाजिनमप्रतीतमहिहनं श्रवस्यं तरुत्रम् ॥ ९ ॥

पुरु । वर्पांसि । अश्विना । दधाना । नि । पेदवे । ऊहथुः । आशुम् । अश्वम् ।
सहस्रऽसाम् । वाजिनम् । अप्रतिऽइतम् । अहिऽहनम् । श्रवस्यम् । तरुत्रम् ॥ ९ ॥

हे अश्विनौ [V]पुरु पुरूणि बहूनि [V]वर्पांसि । रूपनामैतत्। आत्मीयैः कर्मभिः कृतानि रूपाणि [V]दधाना धारयन्तौ युवाम् [V]आशुं शीघ्रगामिनम् [V]अश्वं [V]पेदवे पेदुनाम्ने स्तुवते [V]नि [V]ऊहथुः नितरां प्रापितवन्तौ दत्तवन्तावित्यर्थः। कीदृशमश्वम्। [V]सहस्रसां सहस्रसंख्याकस्य धनस्य सनितारं दातारं [V]वाजिनं बलवन्तम् अत एव [V]अप्रतीतं शत्रुभिरप्रतिगतम् [V]अहिहनम् अहीनाम् आगत्य हन्तृणां

---

१. च-द-ध-फ–श्रियम् । २. क्ष-ट-ठ-न-स–'यः' नास्ति । ३. न–गन्तुमशक्ताय। ४. न–निवसते । ५. स–तस्मै निवसते । ६. क्ष-ट-ठ-न–'शंसनीयं' नास्ति ७. क्ष-ट-ठ-स–ब्रूहि इति। ८. क्ष-ट-ठ–तस्य महः । ९. क्ष-ट-ठ–अच्छब्दलोपः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

शत्रूणां शत्रून्वा हन्तारम् । vश्रवस्यम् । श्रवः श्रवणीयं स्तोत्रम् । तत्र भवम् । स्तुतिविषयमित्यर्थः । vतरुत्रं तरितारम् ॥ वपांसि । ' वृञ् वरणे ' । ' वृञ्शीङ्भ्यांरूपस्वाङ्गयोः पुवच ' ( उ. सू. ४. ६४० ) इत्यसुन् पुगागमश्च । दधाना । दधातेर्लटः शानच् । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् । सहस्रसाम् । ' षणु दाने ' । ' जनसनखन° ' इति विट् । ' विड्वनोरनुनासिकस्यात् ' इति आत्वम् । श्रवस्यम् । श्रवःशब्दात् ' भवे छन्दसि ' इति यत् । तित्स्वरितः । तरुत्रम् । ' तॄ प्लवनतरणयोः ' । ' अशित्रादिभ्य इत्रोत्रौ ' ( उ. सू. ४. ६१२ ) इति उत्रप्रत्ययः । व्यत्ययेनाद्युदात्तत्वम् । यद्वा । ' ग्रसितस्कभित° ' इत्यादौ निपातनात् तृनन्तात् तरुतृशब्दात् अमि संज्ञापूर्वकस्य विधेः अनित्यत्वात् गुणाभावे यण् । निस्स्वरेणाद्युदात्तत्वम् ॥

**एतानि वां श्रवस्या सुदानू ब्रह्माङ्गूषं सदनं रोदस्योः ।**
**यद्वां पज्रासो अश्विना हवन्ते यातमिषा च विदुषे च वाजम् ॥ १० ॥**

एतानि । वाम् । श्रवस्या । सुदानू इति सुऽदानू । ब्रह्म । आङ्गूषम् । सदनम् । रोदस्योः ।
यत् । वाम् । पज्रासः । अश्विना । हवन्ते । यातम् । इषा । च । विदुषे । च । वाजम् ॥ १० ॥

हे vसुदानू शोभनदानौ अश्विनौ vवां युवयोः संबन्धीनि vएतानि समनन्तरोक्तानि वीर्याणि vश्रवस्या श्रवणीयानि सर्वैर्ज्ञातव्यानि भवन्ति । तदर्थं vरोदस्योः द्यावापृथिव्यात्मना वर्तमानयोः युवयोः । उक्तं च यास्केन—' तत्कावश्विनौ द्यावापृथिव्यावित्येके ' ( निरु. १२. १ ) इति । तथा च तैत्तिरीयकम्—' इमे अश्विना संवत्सरोऽग्निर्वैश्वानरः ' ( तै. सं. ५. ६. ४. १ ) इति । तयोः युवयोः vसदनं स्तोतृसमीपे निवेशनं प्रसादनहेतुभूतं वा vआङ्गूषम् आघोषणीयं vब्रह्म मन्त्ररूपं स्तोत्रं निष्पन्नमिति शेषः । vयत् यदा vपज्रासः अङ्गिरसां गोत्रोत्पन्ना यजमाना हे अश्विनौ vवां युवां vहवन्ते स्तुतिभिः आत्मरक्षणार्थम् आह्वयन्ति तदानीम् vइषा दातव्येनान्नेन सह आ[1] vयातम् आगच्छतं vच vविदुषे युष्मद्विषयं स्तोत्रं जानते मह्यं vच vवाजम् अन्नं बलं वा प्रयच्छतमिति शेषः ॥ यातम् । ' चवायोगे प्रथमा ' इति निघातप्रतिषेधः । विदुषे । ' विद ज्ञाने ' । ' विदेः शतुर्वसुः ' । ' वसोः संप्रसारणम् ' इति संप्रसारणम् । ' शासिवसिघसीनां च ' इति षत्वम् ॥ ॥ १४ ॥

**सूनोर्मानेनाश्विना गृणाना वाजं विप्राय भुरणा रदन्ता ।**
**अगस्त्ये ब्रह्मणा वावृधाना सं विश्पलां नासत्यारिणीतम् ॥ ११ ॥**

सूनोः । मानेन । अश्विना । गृणाना । वाजम् । विप्राय । भुरणा । रदन्ता ।
अगस्त्ये । ब्रह्मणा । ववृधाना । सम् । विश्पलाम् । नासत्या । अरिणीतम् ॥ ११ ॥

vभुरणा भर्तारौ पोषकौ vनासत्या सत्यस्वभावौ हे अश्विनौ vसूनोः कुम्भात् प्रसूतस्य अगस्त्यस्य खेलपुरोहितस्य संबन्धिना vमानेन स्तुत्यस्य परिच्छेदकेन स्तोत्रेण vगृणाना स्तूयमानौ vविप्राय

---

१. च-छ-ण-फ-य-ल—' आ ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मेधातिथे भरद्वाजाय ऋषये Vवाजम् अन्नं Vरदन्ता विलिखन्तौ निष्पादयन्तौ युवां Vविश्पलां संग्रामे छिन्नजङ्घां खेलस्य संबन्धिनीं स्त्रियं Vसम् Vअरिणीतं पुनः आयस्या जङ्घया समयोजयतम्। तृतीयेन पादेन प्रथमपादोक्तोऽर्थो विधीयते। Vअगस्त्ये ऋषौ Vब्रह्मणा मन्त्ररूपेण स्तोत्रेण Vवावृधाना प्रवर्धितौ इति ॥ गृणाना। 'गॄ शब्दे'। व्यत्ययेन कर्मणि कर्तृप्रत्ययः। प्वादीनां ह्रस्वः। भुरणा। 'भुरण धारणपोषणयोः'। कण्ड्वादिः। पचाद्यच्। अतोलोपयलोपौ। 'सुपां सुलुक्०' इति विभक्तेराकारः। आमन्त्रितनिघातः। विप्राय[1] इत्यस्य भुरणेत्यनेन असामर्थ्यात् न पराङ्गवत्त्वम्[1]। ववृधाना। वृधेर्लिटः कानच्। संहितायां छान्दसमभ्यासस्य दीर्घत्वम्। तुजादित्वे हि तूतुजान इतिवत् पदकालेऽपि स्यात्। अरिणीतम्। 'री गतिरेषणयोः'। क्रैयादिकः। प्वादीनां ह्रस्वः ॥

कुह यान्ता सुष्टुतिं काव्यस्य दिवो नपाता वृषणा शयुत्रा ।
हिरण्यस्येव कलशं निखातमुदूपथुर्दशमे अश्विनाहन् ॥ १२ ॥

कुह। यान्ता। सुऽस्तुतिम्। काव्यस्य। दिवः। नपाता। वृषणा। शयुऽत्रा।
हिरण्यस्यऽइव। कलशम्। निऽखातम्। उत्। ऊपथुः। दशमे। अश्विना। अहन्॥१२॥

पुरा खलु उपनसः स्तुतिं गच्छन्तावश्विनौ मार्गमध्ये कूपे पतितं रेभं दृष्ट्वा तं कूपादुदतारयताम्। तदानीम्[2] अश्विभ्यां गन्तव्यं काव्यस्य निवासस्थानम् अजानन् ऋषिः अश्विनौ पृच्छति[3]। हे Vदिवो Vनपाता द्योतमानस्य सूर्यस्य पुत्रौ Vवृषणा कामाभिवर्षकौ अश्विनौ Vकुह कुत्र Vशयुत्रा शयने निवासस्थाने वर्तमानस्य Vकाव्यस्य भार्गवस्य Vसुष्टुतिं शोभनां स्तुतिं श्रोतुं Vयान्ता गच्छन्तौ। यद्वा। शयुत्रा इत्येतत् अश्विनोर्विशेषणम्। शयुनाम्नस्त्रायकौ युवाम्। Vहिरण्यस्येव Vकलशं यथा हिरण्यपूरितं कलशं भूम्यां निक्षिप्तं सर्वैः दुर्ज्ञातं[3] Vकश्चिदभिज्ञः उद्धरति एवमसुरैः कूपे Vनिखातं दश रात्रीः नवाहानि च तत्रैव निवसन्तं रेभमवगत्य Vदशमे Vअहन् अहनि Vउदूपथुः कूपात् उन्नीतवन्तौ[4]। किं तन्निवासस्थानमिति प्रश्नः। रेभस्य[5] अनुक्तावपि 'दश रात्रीरशिवेन' (ऋ. सं. १. ११६. २४) इति मन्त्रान्तरसामर्थ्यात् प्रतीतिः। यद्वा। काव्यस्य स्तुतिं प्रति गच्छन्तौ युवां कुह कस्मिन् स्थाने रेभं युवाम् उन्निन्यथुः इति प्रश्नः॥ कुह। 'वा ह च च्छन्दसि' इति सप्तम्यर्थे हप्रत्ययः। दिवो नपाता। 'सुबामन्त्रिते पराङ्गवत्स्वरे' इति पराङ्गवद्भावेन षष्ठ्यन्तस्य आमन्त्रितानुप्रवेशात् 'आमन्त्रितस्य च' इति पदद्वयसमुदायस्य षाष्ठिकमाद्युदात्तत्वम्। पादादित्वात् आष्टमिकनिघाताभावः। नपात् इति अपत्यनाम। न पातयतीति नपात्। 'नभ्राण्नपात्०' इति नञः प्रकृतिभावः। 'सुपां सुलुक्०' इति विभक्तेराकारः। शयुत्रा। 'अशित्रादिभ्य इत्रोत्रौ' इति शीङ उत्रः। यदि अन्तोदात्तता न स्यात् तर्हि एवम्। शयुं त्रायेते इति शयुत्रौ। 'त्रैङ् पालने'। 'आदेचः०' इति आत्वम्। 'आतोऽनुपसर्गे कः'। अत एव व्युत्पत्त्यनवधारणात् अनवग्रहः। निखातम्। 'खनु अवदारणे'। अस्मात्कर्मणि निष्ठा। 'यस्य

---

१. क्ष-ट-विप्राय इत्यस्य रदन्तेत्यनेन संबन्धेन अनेनेत्यसामर्थ्यात् न पराङ्गवत्; ठ-विप्राय इत्यस्य रदन्तेत्यनेन संबन्धो न मानेनेत्यसामर्थ्यात् न पराङ्गवत्; न-विप्राय इत्यस्य रदन्तेत्यनेन सामर्थ्यात् न पराङ्गवत्वम्; स-विप्राय इत्यस्य रदन्तेत्यनेन संबन्धः भुरणेत्यनेन सामर्थ्यात् न पराङ्गवत्वम्। २. क्ष-ट-ठ-तदानीमश्विनौ आगन्तारौ काव्यस्य निवासस्थानम् अजानानः ऋषिः पृच्छति। ३. क्ष-ट-दुर्ज्ञानम्। ४. क्ष-ट-ठ-उन्नीतवन्ताविति। ५. क्ष-ट-ठ-स-अत्र रेभस्य।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

विभाषा ' इति इट्प्रतिषेधः । ' जनसनखनां सञ्झलोः ' इति आत्वम् । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । अहन् । ' सुपां सुलुक्° ' इति सप्तम्या लुक् । ' न डिसंबुद्ध्योः ' इति नलोपप्रतिषेधः ॥

युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः ।
युवो रथं दुहिता सूर्यस्य सह श्रिया नासत्यावृणीत ॥ १३ ॥

युवम् । च्यवानम् । अश्विना । जरन्तम् । पुनः । युवानम् । चक्रथुः । शचीभिः ।
युवोः । रथम् । दुहिता । सूर्यस्य । सह । श्रिया । नासत्या । अवृणीत ॥ १३ ॥

हे अश्विनौ Vयुवं युवां Vशचीभिः आत्मीयैः भैषज्यलक्षणैः कर्मभिः Vजरन्तं जीर्यन्तं Vच्यवानं स्तुतीनां च्यावयितारम् एतत्संज्ञं[1] ऋषिं Vयुवानं पुनर्यौवनोपेतं Vचक्रथुः कृतवन्तौ । अपि च हे नासत्यौ अश्विनौ Vयुवोः युवयोः Vरथं Vसूर्यस्य Vदुहिता सूर्याख्या Vश्रिया Vसह ऋक्सहस्रूपया[2] संपदा कान्त्या वा सह Vअवृणीत समभजत आगत्यारूढवतीत्यर्थः । ' आ वां रथं दुहिता ' ( ऋ. सं. १. ११६. १७ ) इत्यत्र लिखितमाख्यानम् अत्रापि द्रष्टव्यम् ॥ जरन्तम् । ' जॄष् वयोहानौ ' । व्यत्ययेन शप् । युवोः । युष्मच्छब्दात् षष्ठीद्विवचने व्यत्ययेन ' योऽचि ' इति यत्वाभावे सति ' शेषे लोपः ' इति दकारलोपः । ' अतो गुणे ' इति पररूपत्वम् । ' एकादेश उदात्तेनोदात्तः ' । अवृणीत । ' वृङ् संभक्तौ ' । क्रैयादिकः ॥

युवं तुग्राय पूर्व्येभिरेवैः पुनर्मन्यावभवतं युवाना ।
युवं भुज्युमर्णसो निः समुद्राद्विभिरूहथुर्ऋज्रेभिरश्वैः ॥ १४ ॥

युवम् । तुग्राय । पूर्व्येभिः । एवैः । पुनःऽमन्यौ । अभवतम् । युवाना ।
युवम् । भुज्युम् । अर्णसः । निः । समुद्रात् । विऽभिः । ऊहथुः । ऋज्रेभिः । अश्वैः ॥ १४ ॥

हे Vयुवाना दुःखानां यावयितारौ अश्विनौ Vयुवं युवां Vपूर्व्येभिः । पुराणनामैतत् । पूर्वकालीनैः चिरंतनैः Vएवैः स्तुत्यं प्रति गन्तृभिः स्तोत्रैः Vतुग्राय भुज्योर्जनकस्य संबन्धिभिः Vपुनर्मन्यौ यथा भुज्योः समुद्रगमनात्पूर्वं युवां स्तोतव्यौ तथा पुनरपि इदानीं स्तोतव्यौ Vअभवतम् । यदा युवां समुद्रमध्ये सेनया सह निमग्नं Vभुज्युं तुग्रस्य पुत्रम् Vअर्णसः अर्णस्वतः प्रौढोदकयुक्तात् Vसमुद्रात् अम्बुराशेः सकाशात् Vविभिः गन्तृभिः नौभिः Vऋज्रेभिः शीघ्रगतियुक्तैः Vअश्वैः च Vनिरूहथुः निर्गमय्य पितृसमीपं प्रापितवन्तौ तदानीं पुनरप्यतिशयेन स्तोतव्यौ जातावित्यर्थः । ' तुग्रो ह भुज्युम् ' ( ऋ. सं. १. ११६. ३ ) इत्यत्रोक्तमाख्यानम् अत्राप्यनुसंधेयम् ॥ एवैः । ' इण् गतौ ' । ' इण्शीङ्भ्यां वन् ' । पुनर्मन्यौ । ' मन ज्ञाने ' । अत्र स्तुत्यर्थः । मन्यते स्तौति इति मना स्तुतिः । पचाद्यच् । ' छन्दसि च ' इति अर्हार्थे यः । युवाना । ' यु मिश्रणामिश्रणयोः ' । ' कनिन्युवृषि° ' इत्यादिना कनिन् ।

---

१. क्ष-ट-ठ–एतत्संज्ञकम् । २. क्ष-ट-ठ–सुरूपया ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' सुपां सुलुक्° ' इति विभक्तेराकारः । अर्णसः । अर्णःशब्दादुत्पन्नस्य मत्वर्थीयस्य ' बहुलं छन्दसि ' इति बहुलग्रहणाल्लोपः । विभिः । ' सर्वे विधयश्छन्दसि विकल्प्यन्ते ' इति विभक्त्युदात्तस्य विकल्पनात् अभावः । ऋज्रेभिः । ' ऋज गतिस्थानार्जनोपार्जनेषु ' । ' ऋज्रेन्द्र° ' इत्यादौ रन्प्रत्ययान्तो निपातितः । ' बहुलं छन्दसि ' इति भिस ऐसभावः ॥

अजोहवीदश्विना तौग्र्यो वां प्रोळ्हः समुद्रमव्यथिर्जगन्वान् ।
निष्टमूहथुः सुयुजा रथेन मनोजवसा वृषणा स्वस्ति ॥ १५ ॥

अजोहवीत् । अश्विना । तौग्र्यः । वाम् । प्रऽऊळ्हः । समुद्रम् । अव्यथिः । जगन्वान् ।
निः । तम् । ऊहथुः । सुऽयुजा । रथेन । मनःऽजवसा । वृषणा । स्वस्ति ॥ १५ ॥

हे अश्विनौ ᵛवां युवां ᵛतौग्र्यः तुग्रपुत्रः ᵛप्रोळ्हः पित्रा प्रापितः ᵛसमुद्रम् अब्धिं ᵛजगन्वान्[1] भुज्युः[2] उदके निमग्नोऽपि ᵛअव्यथिः व्यथां पीडाम् अप्राप्त एव सन् ᵛअजोहवीत् स्तुतिभिराह्वयत् । ᵛतम् आह्वातारं हे ᵛमनोजवसा मनोवद्वेगयुक्तौ ᵛवृषणा कामाभिवर्षकावश्विनौ ᵛसुयुजा सुष्ठ्वश्वैर्युक्तेन[3] ᵛरथेन ᵛस्वस्ति क्षेमं यथा भवति तथा ᵛनिरूहथुः । जलान्निर्गमय्य युवां पितृगृहं प्रापितवन्तौ ॥ जगन्वान् । गमेर्लिटः क्वसुः । ' विभाषा गमहनविदविशाम् ' इति विकल्पनात् इडभावः । ' स्वोश्च ' इति सकारस्य नकारः । निष्टम् । ' युष्मत्तत्ततक्षुःष्वन्तःपादम् ' इति मूर्धन्यः । मनोजवसा । मनसो जव इव जवो ययोः तौ तथोक्तौ । ' सुपां सुलुक्° ' इति विभक्तेराकारः । पादादित्वात् आमन्त्रितनिघाताभावे पाष्टिकमाद्युदात्तत्वम् ॥ ॥ १५ ॥

अजोहवीदश्विना वर्तिका वामास्नो यत्सीममुञ्चतं वृकस्य ।
वि जयुषा ययथुः सान्वद्रेर्जातं विष्वाचो अहतं विषेण ॥ १६ ॥

अजोहवीत् । अश्विना । वर्तिका । वाम् । आस्नः । यत् । सीम् । अमुञ्चतम् । वृकस्य ।
वि । जयुषा । ययथुः । सानु । अद्रेः । जातम् । विष्वाचः । अहतम् । विषेण ॥ १६ ॥

' आस्नो वृकस्य ' ( ऋ. सं. १. ११६. १४ ) इत्यर्धर्चे यदुक्तं तदत्र पूर्वार्धेन प्रतिपाद्यते । ᵛवर्तिका चटकसदृशस्य पक्षिणः स्त्री वृकेण अरण्यशुना ग्रस्ता सती हे अश्विनौ ᵛवां युवां तदा ᵛअजोहवीत् आहूतवती ᵛयत्सीं यदा खलु ᵛवृकस्य ᵛआस्नः आस्यात् ᵛअमुञ्चतं वर्तिकाम् अमोचयतम् । अपि च युवां ᵛजयुषा जयशीलेन रथेन ᵛअद्रेः पर्वतस्य ᵛसानु समुच्छ्रितप्रदेशं ᵛवि ᵛययथुः शत्रुभिरावेष्टितं जाहुषाख्यं स्तोतारं शत्रुसमूहान्निर्गमय्य तेन सह अन्यैर्गन्तुमशक्यं पर्वताग्रं गन्तवन्तावित्यर्थः । तदुक्तं ' परिविष्टं जाहुषम् ' ( ऋ. सं. १. ११६. २० ) इत्यत्र । तथा ᵛविष्वाचः विविधगतियुक्तस्य एतत्संज्ञस्य असुरस्य ᵛजातम् उत्पन्नमपत्यं ᵛविषेण क्ष्वेडेन[4] ᵛअहतं युवां हतवन्तौ ।

---

१. क्ष-ट-ठ-स–जगन्वान् गतवान् । २. क्ष-ट-ठ–' भुज्युः ' नास्ति । ३. च-छ-ण-फ–सुष्ठु शोभनैः अश्वैर्युक्तेन । ४. स–जलेन ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यद्वा । वर्तते प्रतिदिवसमावर्तते इति वर्तिका उषाः । वृक इति विवृतज्योतिष्कः सूर्य उच्यते । तेन ग्रस्ता सती सा हे अश्विनौ युवाम् अजोहवीत् आह्वयत् । यदा खलु युवां वृकस्य सूर्यस्य आस्नः आस्यस्थानीयान्मण्डलात् अमुञ्चतम् अमोचयतम् । सूर्येण एकीभूतामुषसं पृथक्कृत्य[1] उदयात्पूर्वं रात्रेरपरभागे स्थापितवन्तावित्यर्थः । तथा च यास्कः– ' आदित्योऽपि वृक उच्यते यदावृङ्क्ते । आह्वयदुषा अश्विनावादित्येनाभिग्रस्ता तामश्विनौ प्रमुमुचतुरित्याख्यानम् ' ( निरु. ५. २१ ) इति । अपि च जयुषा जयशीलेन रथेन अद्रेर्मेघस्य सानु समुच्छितप्रदेशं वृष्टिचिकीर्षया विशेषेण ययथुः युवां गतवन्तौ । गत्वा च विष्वाचो विविधगतियुक्तस्य मेघस्य संबन्धिना विषेणोदकेन जातमुत्पन्नं सर्वं भूतजातम् अहतम् अगमयतं वृष्टिं कृतवन्तावित्यर्थः ॥ अजोहवीत् । ह्वयतेर्यङ्लुगन्तात् लङि तिपि ' यङो वा ' इति ईडागमः । ' अभ्यस्तस्य च ' इति द्विर्वचनात्पूर्वमेव ह्वयतेः संप्रसारणम् । आस्नः । ' पद्दन्° ' इत्यादिना आस्यशब्दस्य आसन्नादेशः । ' अल्लोपोऽनः ' इति अकारलोपः । जयुषा । ' जि जये ' । औणादिकः उसिप्रत्ययः । विष्वाचः । विषु नाना आभिमुख्येन अञ्चति इति विग्रहः । ' ऋत्विक्° ' इत्यादिना क्विन् । ' अचः ' इत्यकारलोपः । ' चौ ' इति दीर्घः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वे प्राप्ते ' चौ ' इत्यन्तोदात्तत्वम् । अहतम् । ' हन हिंसागत्योः ' । लङि अदादित्वात् शपो लुक् । ' अनुदात्तोपदेश° ' इत्यादिना अनुनासिकलोपः ॥

शतं मेषान्वृक्ये मामहानं तमः प्रणीतमाशिवेन पित्रा ।
आक्षी ऋज्राश्वे अश्विनावधत्तं ज्योतिरन्धाय चक्रथुर्विचक्षे ॥ १७ ॥

शतम् । मेषान् । वृक्ये । ममहानम् । तमः । प्रऽनीतम् । आशिवेन । पित्रा ।
आ । अक्षी इति । ऋज्रऽअश्वे । अश्विनौ । अधत्तम् । ज्योतिः । अन्धाय । चक्रथुः । विऽचक्षे ॥ १७ ॥

' शतं मेषान्वृक्ये चक्षदानम् ' ( ऋ. सं. १. ११६. १६ ) इत्यत्र यदाख्यानमवादिष्म तदत्रापि अनुसंधेयम् । Vशतं शतसंख्याकान् Vमेषान् Vवृक्ये वृकीरूपेणावस्थिताय अश्विनोर्वाहनाय रासभाय Vममहानं[2] पूजितवन्तम् आहारार्थं समर्पितवन्तम् Vअशिवेन असुखकारिणा Vपित्रा स्वकीयेन जनकेन Vतमः दृष्टिराहित्येन कृतम् आन्ध्यं Vप्रणीतं[3] प्रापितम् ऋज्राश्वं चक्षुष्मन्तम् अश्विनावकुरुतामिति शेषः । एतदेव विशदयति । हे Vअश्विनौ Vअक्षी पितृशापान्नष्टे चक्षुषी Vऋज्राश्वे एतत्संज्ञके राजर्षौ Vआ Vअधत्तं पुनर्दर्शनसमर्थे अकुरुतम् । एतदेवाह । Vअन्धाय दृष्टिहीनाय Vज्योतिः प्रकाशकं चक्षुः Vविचक्षे विविधं जगत् द्रष्टुं Vचक्रथुः युवां कृतवन्तौ ॥ ममहानम् । ' मह पूजायाम् ' । लिटः कानच् । संहितायां छान्दसमभ्यासस्य दीर्घत्वम् । प्रणीतम् । प्रपूर्वान्नयतेः कर्मणि निष्ठा । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । पित्रा । ' उदात्तयणः° ' इति विभक्तेरुदात्तत्वम् । अक्षी । अक्षिशब्दात् द्विवचने नुमागमश्च प्राप्नोति ' ई च द्विवचने ' इति ईकारान्तादेशश्च । परत्वादीकारादेशः । कृते तस्मिन् सकृद्गतपरिभाषया पुनर्नुम् न भवति । ' उदात्त° ' इत्युनुवृतेः ईकारस्योदात्तत्वम् ॥

---

१. क्ष-ट-ठ–पुरस्कृत्य । २. क्ष-ट-ठ-स–मामहानम् । ३. क्ष-ट-ठ-न-स–' प्रणीतम् ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

शुनमन्धाय भरमह्वयत्सा वृकीरश्विना वृषणा नरेति ।
जारः कनीनइव चक्षदान ऋज्राश्वः शतमेकं च मेषान् ॥ १८ ॥

शुनम् । अन्धाय । भरम् । अह्वयत् । सा । वृकीः । अश्विना । वृषणा । नरा । इति ।
जारः । कनीनःऽइव । चक्षदानः । ऋज्रऽअश्वः । शतम् । एकम् । च । मेषान् ॥१८॥

[v]शुनम् इति सुखनाम । [v]भरं पोषणहेतुभूतं चक्षुरिन्द्रियेण निष्पाद्यं सुखम् [v]अन्धाय दृष्टिहीनाय तस्मै ऋज्राश्वाय इच्छन्ती [v]सा [v]वृकीः हे अश्विनौ अश्वयुक्तौ[1] कृत्स्नं जगत् व्याप्नुवन्तौ वा [v]वृषणा हे वृषणौ कामानां वर्षितारौ [v]इति एवं संबोध्य [v]नरा नेतारौ अश्विनौ [v]अह्वयत् आहूतवती । आह्वयन्त्यास्तस्याः कोऽभिप्राय इति चेत् तदुच्यते । [v]कनीनइव यथा प्राप्तयौवनः कामुकः [v]जारः पारदारिकः सन् परस्त्रियै सर्वं धनं प्रयच्छति एवम् [v]ऋज्राश्वः मह्यं [v]शतमेकं [v]च एकोत्तरशतसंख्याकान् [v]मेषान् पौरजनानां स्वभूतानपहृत्य [v]चक्षदानः शकलीकुर्वन् प्रादात् । तेन ईदृशीं दुर्दशां प्राप्तः इति ॥ कनीनः । युवशब्दात् इष्टनि ' युवाल्पयोः कनन्यतरस्याम् ' ( पा. सू. ५. ३. ६४ ) इति युवशब्दस्य कनादेशः । व्यत्ययेन इष्टनः खादेशः । यद्वा । ' कन दीप्तिकान्तिगतिषु ' । अस्मादौणादिक ईनप्रत्ययः ॥

मही वामूतिरश्विना मयोभूरुत स्रामं धिष्ण्या सं रिणीथः ।
अथा युवामिदह्वयत्पुरंधिरागच्छतं सीं वृषणाववोभिः ॥ १९ ॥

मही । वाम् । ऊतिः । अश्विना । मयःऽभूः । उत । स्रामम् । धिष्ण्या । सम् । रिणीथः ।
अथ । युवाम् । इत् । अह्वयत् । पुरम्ऽधिः । आ । अगच्छतम् । सीम् । वृषणौ । अवःऽभिः ॥१९॥

हे अश्विनौ [v]वां युवयोः [v]मही महती [v]ऊतिः पालनं [v]मयोभूः मयसः सुखस्य भावयित्री । [v]उत अपि च हे [v]धिष्ण्या । धिषणा स्तुतिलक्षणा वाक् । तया स्तोतव्यौ [v]स्रामं व्याधितं पुरुषं विश्लिष्टाङ्गम् अन्यादिकं [v]सं [v]रिणीथः संगतावयवं कुरुथः । [v]अथ अपि च [v]युवामित् युवामेव [v]पुरंधिः बहुधीः घोषा विश्पला वा [v]अह्वयत् रोगोपशमनार्थम् आहूतवती । हे [v]वृषणौ कामानां वर्षितारौ अश्विनौ [v]अवोभिः रक्षणैः सह [v]आगच्छतम् आभिमुख्येन [v]सीम् एनां प्राप्तवन्तौ ॥ मही महती । छान्दसो वर्णलोपः । यद्वा । महेरौणादिक इन् । ' कृदिकारादक्तिनः ' इति ङीष् । मयोभूः । भवतेरन्तर्भावितण्यर्थात् क्विप् । रिणीथः । ' री गतिरेषणयोः ' । क्रैयादिकः । ' प्वादीनां ह्रस्वः ' इति ह्रस्वत्वम् ॥

---

१. क्ष-ट-ठ–अश्ववन्तौ ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अधेनुं दस्रा स्तर्यं१ विषक्तामपिन्वतं शयवे अश्विना गाम् ।
युवं शचीभिर्विमदाय जायां न्यूहथुः पुरुमित्रस्य योषाम् ॥ २० ॥

अधेनुम् । दस्रा । स्तर्यम् । विऽसक्ताम् । अपिन्वतम् । शयवे । अश्विना । गाम् ।
युवम् । शचीभिः । विऽमदाय । जायाम् । नि । ऊहथुः । पुरुऽमित्रस्य । योषाम् ॥ २० ॥

हे ᵛदस्रा दर्शनीयौ अश्विनौ ᵛविषक्तां विशेषेण सक्तावयवां कृशावयवामित्यर्थः । अत एव ᵛस्तर्यं निवृत्तप्रसवाम् अत एव ᵛअधेनुम् अदोग्ध्रीम् एवंभूतां ᵛगां ᵛशयवे एतत्संज्ञाय ऋषये ᵛअपिन्वतं पयसा अपूरयतम् । अपि च ᵛपुरुमित्रस्य । पुरुमित्रो नाम कश्चिद्राजा । तस्य ᵛयोषां कुमारीं ᵛशचीभिः आत्मीयैः कर्मभिः ᵛविमदाय एतत्संज्ञाय ऋषये शत्रुभिः सह योद्धुमशक्ताय युवां ᵛन्यूहथुः विमदस्य गृहं प्रापितवन्तौ ॥ स्तर्यम् । ' स्तृञ् आच्छादने ' । ' अवितृस्तृतन्त्रिभ्य ईः ' इति ईकारप्रत्ययः । ' वा छन्दसि ' इति अमि पूर्वस्य विकल्पनादभावे यणादेशः । ' उदात्तस्वरितयोर्यणः० ' इति परस्यानुदात्तस्य स्वरितत्वम् । विषक्ताम् । ' षञ्ज सङ्गे ' । कर्मणि निष्ठा । ' अनिदिताम्० ' इति नलोपः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । अपिन्वतम् । ' पिवि सेचने ' । इदित्त्वात् नुम् । भौवादिकः । पुरुमित्रस्य । पुरूणि मित्राणि यस्य । ' संज्ञायां मित्राजिनयोः ' ( पा. सू. ६. २. १६५ ) इति बहुव्रीहौ उत्तरपदान्तोदात्तत्वम् ॥ ॥ १६ ॥

यवं वृकेणाश्विना वपन्तेषं दुहन्ता मनुषाय दस्रा ।
अभि दस्युं बकुरेणा धमन्तोरु ज्योतिश्चक्रथुरार्याय ॥ २१ ॥

यवम् । वृकेण । अश्विना । वपन्ता । इषम् । दुहन्ता । मनुषाय । दस्रा ।
अभि । दस्युम् । बकुरेण । धमन्ता । उरु । ज्योतिः । चक्रथुः । आर्याय ॥ २१ ॥

ᵛआर्याय विदुषे । मनुषशब्दो मनुशब्दपर्यायः । ᵛमनुषाय मनवे मनोरर्थं हे ᵛदस्रा दर्शनीयावश्विनौ ᵛवृकेण लाङ्गलेन कर्षकैः कृष्टदेशे[1] ᵛयवं यवाद्युपलक्षितं सर्वं धान्यजातं ᵛवपन्ता वापयन्तौ तथा ᵛइषम् । अन्ननामैतत् । तत्कारणभूतं वृष्ट्युदकं च ᵛदुहन्ता मेघात् क्षारयन्तौ तथा ᵛदस्युम् उपक्षयकारिणमसुरपिशाचादिकं ᵛबकुरेण । बकुरो भासमानो वज्रः । तेन ᵛअभि ᵛधमन्ता । धमतिर्वधकर्मा । अभिघ्नन्तौ एवं त्रिविधं कर्म कुर्वन्तौ युवाम् ᵛउरु विस्तीर्णं ᵛज्योतिः स्वकीयं तेजो माहात्म्यं ᵛचक्रथुः कृतवन्तौ दर्शितवन्तावित्यर्थः । यद्वा । त्रिविधकर्माचरणेनार्याय विदुषे मनवे विस्तीर्णं सूर्याख्यं ज्योतिश्चक्रथुः कृतवन्तौ । जीवन् हि सूर्यं पश्यति । तद्धेतुभूतानि त्रीणि कर्माणि युवाभ्यां कृतानि इति भावः । अत्र निरुक्तं–' बकुरो भास्करो भयंकरो भासमानो द्रवतीति वा ' । ' यवमिव वृकेणाश्विनौ निवपन्तौ वृको लाङ्गलं भवति विकर्तनात् ' ( निरु. ६. २५-२६ ) इत्यादिकमनुसंधेयम् ॥ मनुषाय । मनेरौणादिक उषन्प्रत्ययः ॥

---

१. क्ष-ट-ठ-स–कृष्टे देशे ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आथर्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयतम् ।
स वां मधु प्र वोचदृतायन्त्वाष्ट्रं यद्दस्रावपिकक्ष्यं वाम् ॥ २२ ॥

आथर्वणाय । अश्विना । दधीचे । अश्व्यम् । शिरः । प्रति । ऐरयतम् ॥ सः । वाम् । मधु । प्र । वोचत् । ऋतऽयन् । त्वाष्ट्रम् । यत् । दस्रौ । अपिऽकक्ष्यम् । वाम् ॥ २२ ॥

'तद्वां नरा सनये' (ऋ. सं. १. ११६. १२) इत्यत्रोक्तमाख्यानमिहाप्यनुसंधेयम् । हे अश्विनौ [v]आथर्वणाय अथर्वणः पुत्राय [v]दधीचे दध्यङ्नाम्ने महर्षये [v]अश्व्यम् अश्वसंबन्धि [v]शिरः [v]प्रत्यैरयतं प्रत्यधत्तम् । तदीयं मानुषं शिरः प्रच्छिद्य अन्यत्र विधाय[1] अश्व्येन शिरसा तमृषिं समयोजयतमित्यर्थः । [v]सः च [v]वां युवाभ्यां प्रवर्ग्यविद्यां मधुविद्यां च वक्ष्यामीति पुरा कृतां प्रतिज्ञाम् [v]ऋतायन् सत्यामात्मन इच्छन् [v]मधु मधुविद्यां [v]त्वाष्ट्रं त्वष्टुरिन्द्रालब्धं [v]प्र [v]वोचत् प्रोक्तवान् । हे [v]दस्रौ दर्शनीयावश्विनौ [v]वां युवयोः संबन्धि [v]यत् [v]अपिकक्ष्यं छिन्नस्य यज्ञशिरसः कक्षप्रदेशेन पुनःसंधानभूतं प्रवर्ग्यविद्याख्यं रहस्यं[2] तदपि [v]वां युवाभ्यां प्रावोचदित्यर्थः ॥ दधीचे । अञ्चतेः 'ऋत्विक्०' इत्यादिना क्विन् । 'अनिदिताम्०' इति नलोपः । चतुर्थ्येकवचने 'अचः' इति अकारलोपे 'चौ' इति दीर्घत्वम् । उदात्तनिवृत्तिस्वरेण विभक्त्युदात्तत्वे प्राप्ते तस्यापवादत्वेन 'चौ' इति विभक्तेः पूर्वस्योदात्तत्वं प्राप्तं तस्याप्ययमपवादः । 'अञ्चेश्छन्दस्यसर्वनामस्थानम्' इति विभक्त्युदात्तत्वम्[3] ॥

सदा कवी सुमतिमा चके वां विश्वा धियो अश्विना प्रावतं मे ।
अस्मे रयिं नासत्या बृहन्तमपत्यसाचं श्रुत्यं रराथाम् ॥ २३ ॥

सदा । कवी इति । सुऽमतिम् । आ । चके । वाम् । विश्वाः । धियः । अश्विना । प्र । अवतम् । मे । अस्मे इति । रयिम् । नासत्या । बृहन्तम् । अपत्यऽसाचम् । श्रुत्यम् । रराथाम् ॥ २३ ॥

हे [v]कवी क्रान्तदर्शिनौ मेधाविनावश्विनौ [v]वां युवयोः [v]सुमतिं कल्याणीम् अनुग्रहात्मिकां बुद्धिं [v]सदा सर्वदा [v]आ [v]चके आभिमुख्येन प्रार्थये । [v]मे मदीयानि [v]विश्वाः [v]धियः सर्वाणि कर्माणि युवां [v]प्रावतं प्रकर्षेण रक्षतम् । अपि च [v]अस्मे अस्मभ्यं हे नासत्यावश्विनौ [v]बृहन्तं महान्तम् [v]अपत्यसाचम् अपत्यैः पुत्रादिभिः समवेतं [v]श्रुत्यं प्रशंसनीयम् उत्कृष्टं [v]रयिं धनं [v]रराथां प्रयच्छतम् ॥ चके । 'कै गै शब्दे' । व्यत्ययेनात्मनेपदम् । लिटि उत्तमैकवचने रूपम् । अस्मे । 'सुपां सुलुक्०' इति चतुर्थीबहुवचनस्य शेआदेशः । अपत्यसाचम् । अपत्यैः सह सचते संगच्छते इति अपत्यसाच् । छान्दसो णिवः । श्रुत्यम् । श्रुतिः स्तुतिः । तत्र भवं श्रुत्यम् । 'भवे छन्दसि' इति यत् । 'यतोऽनावः' इत्याद्युदात्तत्वम् । रराथाम् । 'रा दाने' । लोटि व्यत्ययेनात्मनेपदम् । 'बहुलं छन्दसि' इति शपः श्लुः ॥

---

१. क्ष-ट-ठ-न-स-निधाय । २. क्ष-ट-ठ-यत्; स-यत् रहस्यम् । ३. क्ष-ट-ठ-'विभक्त्युदात्तत्वम्' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हिरण्यहस्तमश्विना रराणा पुत्रं नरा वध्रिमत्या अदत्तम् ।
त्रिधा ह श्यावमश्विना विकस्तमुज्जीवसे ऐरयतं सुदानू ॥ २४ ॥

हिरण्यऽहस्तम् । अश्विना । रराणा । पुत्रम् । नरा । वध्रिऽमत्याः । अदत्तम् ॥ त्रिधा । ह । श्यावम् । अश्विना । विऽकस्तम् । उत् । जीवसे । ऐरयतम् । सुदानू इति सुऽदानू ॥२४॥

[v]रराणा रममाणौ दातारौ वा [v]नरा नेतारौ हे अश्विनौ [v]हिरण्यहस्तं नाम [v]पुत्रं [v]वध्रिमत्याः एतत्संज्ञायै ब्रह्मवादिन्यै [v]अदत्तं प्रायच्छतं [v]ह । अपि च हे [v]सूदानू शोभनदानौ अश्विनौ [v]त्रिधा त्रेधा [v]विकस्तं विच्छिन्नं श्यावाख्यमृषिं [v]जीवसे जीवितुम् [v]उत् [v]ऐरयतम् असुरैः त्रेधा खण्डितं शरीरं पुनरेकीकृत्य उदगमयतमित्यर्थः ॥ रराणा । रमतेः शानचि ' बहुलं छन्दसि ' इति शपः श्लुः । व्यत्ययेन मकारस्य आत्वम् । रातेर्वा व्यत्ययेन शानच् । पूर्ववत् श्लुः । वध्रिमत्याः । चतुर्थ्यर्थे ' बहुलं छन्दसि ' इति षष्ठी । जीवसे । ' जीव प्राणधारणे ' । ' तुमर्थे सेसेन्° ' इति असेप्रत्ययः ॥

एतानि वामश्विना वीर्याणि प्र पूर्व्याण्यायवोऽवोचन् ।
ब्रह्म कृण्वन्तो वृषणा युवभ्यां सुवीरासो विदथमा वदेम ॥ २५ ॥

एतानि । वाम् । अश्विना । वीर्याणि । प्र । पूर्व्याणि । आयवः । अवोचन् ।
ब्रह्म । कृण्वन्तः । वृषणा । युवऽभ्याम् । सुऽवीरासः । विदथम् । आ । वदेम ॥ २५ ॥

[v]अश्विना हे अश्विनौ [v]वां युवयोः संबन्धीनि [v]पूर्व्याणि प्रत्नानि [v]एतानि इदानीं मयोक्तानि [v]वीर्याणि वीरकर्माणि [v]आयवः मनुष्याः मदीयाः पित्रादयः [v]प्र [v]अवोचन् उक्तवन्तः । वयं च हे [v]वृषणा कामाभिवर्षकौ अश्विनौ युवाभ्यां [v]ब्रह्म मन्त्रात्मकं स्तोत्रं [v]कृण्वन्तः कुर्वन्तः [v]सुवीरासः सुवीराः शोभनैः वीरैः पुत्रादिभिरुपेताः सन्तः [v]विदथं यज्ञम् [v]आ [v]वदेम आभिमुख्येन स्तुतीः उच्चारयाम[1] । यद्वा । विदथं वेदयन्तम् अतिथिं तदपेक्षितप्रदानेन आवदेम आभिमुख्येन प्रियपूर्विकां वाचमुच्चारयाम ॥ कृण्वन्तः । ' कृवि हिंसाकरणयोश्च ' । इदित्त्वात् नुम् । लटः शतृ । ' धिन्विकृण्व्योर च ' इति उप्रत्ययः । अकारान्तादेशश्च । अतो लोपे सति स्थानिवद्भावात् लघूपधगुणाभावः । सुवीरासः । शोभना वीरा येषां ते तथोक्ताः । ' आज्जसेरसुक् ' । ' वीरवीर्यौ च ' इत्युत्तरपदाद्युदात्तत्वम् । विदथम् । ' विद ज्ञाने ' । ' रुविदिभ्यां कित् ' इति अथप्रत्ययः ॥ ॥ १७ ॥

' आ वाम् ' इत्येकादशर्चं तृतीयं सूक्तं कक्षीवत आर्षं त्रैष्टुभमाश्विनम् । तथा चानुक्रान्तम्–' आ वामेकादश ' इति । पूर्वसूक्ताभ्यां सह प्रातरनुवाकाश्विनशस्त्रयोः उक्तो विनियोगः ॥

---

१. क्ष-ट–उच्चारयेम ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आ वां रथो अश्विना श्येनपत्वा सुमृळीकः स्ववाँ यात्वर्वाङ् ।
यो मर्त्यस्य मनसो जवीयान्त्रिवन्धुरो वृषणा वातरंहाः ॥ १ ॥

आ । वाम् । रथः । अश्विना । श्येनऽपत्वा । सुऽमृळीकः । स्वऽवान् । यातु । अर्वाङ् ।
यः । मर्त्यस्य । मनसः । जवीयान् । त्रिऽवन्धुरः । वृषणा । वातऽरंहाः ॥ १ ॥

हे अश्विनौ [v]वां युवयोः स्वभूतः [v]रथः [v]अर्वाङ् अस्मदभिमुखम् [v]आ [v]यातु आगच्छतु । कीदृशो रथः । [v]श्येनपत्वा । श्येनाः[1] इत्यश्वनाम । शंसनीयगमनैरश्वैः पतन् गच्छन् । यद्वा । श्येनः पक्षी । स इव शीघ्रं पतन् । [v]सुमृळीकः शोभनसुखयुक्तः [v]स्ववान् धनवान् । हे वृषणौ कामानां वर्षितारावश्विनौ [v]यः युष्मदीयो रथः [v]मर्त्यस्य मनुष्यस्य [v]मनसो [v]जवीयान् अतिशयेन वेगवान् । तद्यथा वेगेन कृत्स्नं जगत् व्याप्नोति ततोऽप्यतिशयेन क्षणमात्रादेव सर्वं जगत् पर्यटतीत्यर्थः । [v]त्रिवन्धुरः । वन्धुरं वेष्टितं सारथेः स्थानम् । त्रिप्रकारेण वन्धुरेण युक्तः [v]वातरंहाः वातस्य वायोः रंहो वेग इव वेगो यस्य स तथोक्तः । अनेन अप्रतिहतगतित्वमुच्यते । स रथ इति पूर्वत्रान्वयः ॥ श्येनपत्वा । 'पत्लृ गतौ' । 'अन्येभ्योऽपि दृश्यन्ते' इति वनिप् । दासीभारादिः । यद्वा । दृशिग्रहणस्य विध्यन्तरोपसंग्रहार्थत्वात् भावे वनिप् । ततो बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् । जवीयान् । जवोऽस्यास्तीति जववान् । अतिशयेन जववान्[2] । आतिशायनिक ईयसुन् । विन्मतोर्लुक् । 'टेः' इति टिलोपः ॥

त्रिवन्धुरेण त्रिवृता रथेन त्रिचक्रेण सुवृता यातमर्वाक् ।
पिन्वतं गा जिन्वतमर्वतो नो वर्धयतमश्विना वीरमस्मे ॥ २ ॥

त्रिऽवन्धुरेण । त्रिऽवृता । रथेन । त्रिऽचक्रेण । सुऽवृता । आ । यातम् । अर्वाक् ।
पिन्वतम् । गाः । जिन्वतम् । अर्वतः । नः । वर्धयतम् । अश्विना । वीरम् । अस्मे इति ॥२॥

[v]त्रिवन्धुरेण । वन्धुरं सारथिस्थानम् । त्रिप्रकारवन्धुरोपेतेन [v]त्रिवृता त्रिधा वर्तमानेन [v]त्रिचक्रेण चक्रत्रयोपेतेन [v]सुवृता शोभनं गच्छता [v]रथेन [v]अर्वाक् अस्मदभिमुखम् [v]आ [v]यातम् आगच्छतम् । आगत्य च अस्मदीयाः [v]गाः [v]पिन्वतं पयसा पूरयतम् । [v]नः अस्माकम् [v]अर्वतः अश्वान् [v]जिन्वतं प्रीणयतम् । अपि च हे अश्विनौ [v]अस्मे अस्माकं [v]वीरं पुत्रादिकं[3] [v]वर्धयतं प्रवृद्धं कुरुतम् ॥ त्रिचक्रेण । त्रीणि चक्राणि यस्य स तथोक्तः । 'त्रिचक्रादीनां छन्दस्युपसंख्यानम्' (पा. सू. ६. २. १९९. १) इत्युत्तरपदान्तोदात्तत्वम् ॥

---

१. क्ष-ट-स–श्येनः । २. च-छ-ण-फ–जववान् जवीयान्; त–जववान् इति जवीयान् । ३. क्ष-ट-ठ–पुत्रपौत्रादिकम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रवद्यामना सुवृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः ।
किमङ्ग वां प्रत्यवर्तिं गमिष्ठाहुर्विप्रासो अश्विना पुराजाः ॥ ३ ॥

प्रवत्ऽयामना । सुऽवृता । रथेन । दस्रौ । इमम् । शृणुतम् । श्लोकम् । अद्रेः ।
किम् । अङ्ग । वाम् । प्रति । अवर्तिम् । गमिष्ठा । आहुः । विप्रासः । अश्विना । पुराऽजाः ॥ ३ ॥

हे [v]दस्रौ दर्शनीयावश्विनौ [v]प्रवद्यामना प्रकृष्टगमनेन शीघ्रगामिना [v]सुवृता शोभनवर्तनेन [v]रथेन आगत्य [v]अद्रेः आदरं कुर्वतः स्तोतुः [v]इमं [v]श्लोकं स्तुतिलक्षणाम् इमां वाचं [v]शृणुतम् । [v]अङ्ग [v]अश्विना हे अश्विनौ [v]पुराजाः पूर्वजाताः चिरंतनाः [v]विप्रासः मेधाविनः [v]वां युवाम् [v]अवर्तिं स्तोतॄणां दारिद्र्यं [v]प्रति तत्परिहर्तुं [v]गमिष्ठा गन्तृतमौ [v]आहुः कथयन्ति । किंशब्दः प्रदर्शनफलप्रश्ने[1] वर्तते । किं न कथयन्ति । कथयन्त्येव सर्वे । तथा सति आगन्तव्यमिति ॥ प्रवद्यामना । स्वोपसृष्टे धात्वर्थे वर्तमानात् प्रशब्दात् ' उपसर्गाच्छन्दसि धात्वर्थे ' ( पा. सू. ५. १. ११८ ) इति वतिः । ' या प्रापणे ' । ' आतो मनिन्° ' इति बहुलवचनात् भावे मनिन् । ततो बहुव्रीहौ पूर्वपद-प्रकृतिस्वरत्वम् । अद्रेः । ' दृङ् आदरे ' । आङ्पूर्वात् अस्मादौणादिकः किप्रत्ययः आङो ह्रस्वश्च । गमिष्ठा । गन्तृशब्दात् ' तुश्छन्दसि ' इति इष्ठन् । ' तुरिष्ठेमेयःसु ' इति तृलोपः । ' सुपां सुलुक्° ' इति विभक्तेः आकारः । आहुः । प्रत्ययस्वरः । पादादित्वात् निघाताभावः ॥

आ वां श्येनासो अश्विना वहन्तु रथे युक्तासो आशवः पतङ्गाः ।
ये अप्तुरो दिव्यासो न गृध्रा अभि प्रयो नासत्या वहन्ति ॥ ४ ॥

आ । वाम् । श्येनासः । अश्विना । वहन्तु । रथे । युक्तासः । आशवः । पतङ्गाः ।
ये । अप्ऽतुरः । दिव्यासः । न । गृध्राः । अभि । प्रयः । नासत्या । वहन्ति ॥ ४ ॥

हे अश्विनौ [v]रथे [v]युक्तासः सारथिना वहनप्रदेशे योजिताः [v]आशवः व्याप्नुवन्तः [v]पतङ्गाः पतनसमर्थाः [v]श्येनासः शंसनीयगमनाः अश्वाः [v]वां युवाम् [v]आ [v]वहन्तु अस्मत्समीपमानयन्तु । [v]ये अश्वाः [v]अप्तुरः आप इव त्वरोपेताः [v]दिव्यासो [v]न [v]गृध्राः अन्तरिक्षे वर्तमानाः गृध्राख्याः पक्षिण इव शीघ्रं गच्छन्तो हे नासत्यौ युवां [v]प्रयः[2] हविर्लक्षणमन्नम् अभिलक्ष्य [v]वहन्ति प्रापयन्ति । तादृशाः इति पूर्वत्र संबन्धः ॥ अप्तुरः । ' तुर त्वरणे ' । अपूशब्दोपपदात् अस्मात् ' क्विप् च ' इति क्विप् ॥

---

१. क्ष-ट-ठ—प्रदर्शनफले प्रश्ने; च-छ-ण-फ—गमनफलप्रश्ने । २. च-छ-फ—अभि प्रयः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आ वां रथं युवतिस्तिष्ठदत्र जुष्टी नरा दुहिता सूर्यस्य ।
परि वामश्वा वपुषः पतङ्गा वयो वहन्त्वरुषा अभीके ॥ ५ ॥

आ । वाम् । रथम् । युवतिः । तिष्ठत् । अत्र । जुष्टी । नरा । दुहिता । सूर्यस्य ।
परि । वाम् । अश्वाः । वपुषः । पतङ्गाः । वयः । वहन्तु । अरुषाः । अभीके ॥ ५ ॥

हे [v]नरा नेतारावश्विनौ [v]युवतिः तरुणी [v]सूर्यस्य [v]दुहिता [v]जुष्टी प्रीता सती [v]वां युवयोः [v]अत्र इमं [v]रथम् [v]आ [v]तिष्ठत् आरूढवती । तया सहितौ [v]वां युवाम् [v]अश्वाः [v]अभीके गृहसमीपे तं रथं [v]परि [v]वहन्तु परिप्रापयन्तु । कीदृशा अश्वाः । [v]वपुषः । वपुरिति रूपस्य शरीरस्य वा नामधेयम् । तद्वन्तः । छान्दसो मत्वर्थीयस्य लोपः । [v]पतङ्गाः उत्पतनसमर्थाः [v]वयः गच्छन्तः [v]अरुषाः आरोचमाना हिंसकरहिता वा ॥ अत्र । ' इतराभ्योऽपि दृश्यन्ते ' ( पा. सू. ५. ३. १४ ) इति दृशिग्रहणात् भवदाद्ययोगेऽपि इदंशब्दात् विभक्त्यर्थे[1] त्रल्प्रत्ययः । जुष्टी । ' जुषी प्रीतिसेवनयोः ' । औणादिकः क्तुप्रत्ययः । ' वोतो गुणवचनात् ' इति ङीष् ॥ ॥ १८ ॥

उद्वन्दनमैरतं दंसनाभिरुद्रेभं दस्रा वृषणा शचीभिः ।
निष्टौग्र्यं पारयथः समुद्रात्पुनश्च्यवानं चक्रथुर्युवानम् ॥ ६ ॥

उत् । वन्दनम् । ऐरतम् । दंसनाभिः । उत् । रेभम् । दस्रा । वृषणा । शचीभिः ।
निः । तौग्र्यम् । पारयथः । समुद्रात् । पुनरिति । च्यवानम् । चक्रथुः । युवानम् ॥ ६ ॥

हे अश्विनौ [v]वन्दनम् एतत्संज्ञमृषिं [v]दंसनाभिः आत्मीयैः कर्मभिः कूपात् [v]उत् [v]ऐरतम् उदैरयतम् उदगमयतम् । हे [v]दस्रा दर्शनीयौ [v]वृषणा कामानां वर्षितारावश्विनौ [v]शचीभिः कर्मभिः रेभम् एतत्संज्ञम् ऋषिं[2] दश रात्रीः नवाहानि च कूपे निवसन्तं तस्मात् उदैरयतम् उदतारयतम्[2] । तथा [v]तौग्र्यं तुग्रस्य पुत्रं भुज्युं समुद्रे निमग्नम् आत्मीयाभिः नौभिः अश्वैश्च [v]समुद्रात् [v]निः [v]पारयथः तीरदेशं प्रापितवन्तौ । तथा [v]च्यवानं च्यवनमृषिं जीर्णं [v]पुनः [v]युवानं यौवनोपेतं [v]चक्रथुः कृतवन्तौ ॥ ऐरतम् । ' ईर गतौ कम्पने च ' । ण्यन्तात् लङि ' छन्दस्युभयथा ' इति शप आर्धधातुकत्वात् ' णेरनिटि ' इति णिलोपः ॥

युवमत्रयेऽवनीताय तप्तमूर्जमोमानमश्विनावधत्तम् ।
युवं कण्वायापिरिप्ताय चक्षुः प्रत्यधत्तं सुष्टुतिं जुजुषाणा ॥ ७ ॥

युवम् । अत्रये । अवऽनीताय । तप्तम् । ऊर्जम् । ओमानम् । अश्विनौ । अधत्तम् ।
युवम् । कण्वाय । अपिऽरिप्ताय । चक्षुः । प्रति । अधत्तम् । सुऽस्तुतिम् । जुजुषाणा ॥ ७ ॥

---

१. क्ष-ट-ठ-स–द्वितीयार्थे । २. क्ष-ट-ठ–ऋषिं कूपात् उदगमयतम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे अश्विनौ [v]युवं युवाम् [v]अवनीताय शतद्वारे पीडायन्त्रगृहे अवस्तान्नीताय [v]अत्रये [v]तप्तं पीडार्थं प्रक्षिप्तं तुषाग्निं शीतेनोदकेन अवारयेथाम्। अपि च अस्मै अत्रये [v]ओमानं सुखकरम् [v]ऊर्जं रसवदन्नम् [v]अधत्तं प्रायच्छतम्[1]। तथा [v]सुष्टुतिं शोभनां स्तुतिं [v]जुजुषाणा सेवमानौ युवाम् [v]अपिरिप्ताय असुरैः ब्राह्मण्यपरीक्षार्थम् इहासीनः[2] सन् व्युष्टामुषसं जानीहि इति[2] अन्धकारवति गृहे प्रवेशिताय [v]कण्वाय ऋषये [v]चक्षुः व्युष्टायाः उषसः प्रकाशकं वीणाशब्दं [v]प्रत्यधत्तं कृतवन्तौ। यद्वा। अपिरिप्ताय अपिलिप्ताय पटलेन पिहितदृष्टये एवंविधाय[3] कण्वाय[4] चक्षुरिन्द्रियं प्रत्यधत्तं प्रत्यस्थापयतम्॥ ओमानम्। अवतेरौणादिको मनिः। 'ज्वरत्वर०' इत्यादिना वकारस्य उपधायाश्च ऊठ्। गुणः। अपिरिप्ताय। 'लिप उपदेहे'। अस्मात् कर्मणि निष्ठा। कपिलकादित्वात् लत्वविकल्पः। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। जुजुषाणा। 'जुषी प्रीतिसेवनयोः'। छान्दसो लिट्। 'लिटः कानज्वा'। 'सुपां सुलुक्०' इति विभक्तेः आकारः॥

**युवं धेनुं शयवे नाधितायापिन्वतमश्विना पूर्व्याय।**
**अमुञ्चतं वर्तिकामंहसो निः प्रति जङ्घां विश्पलाया अधत्तम्॥ ८॥**

युवम्। धेनुम्। शयवे। नाधिताय। अपिन्वतम्। अश्विना। पूर्व्याय।
अमुञ्चतम्। वर्तिकाम्। अंहसः। निः। प्रति। जङ्घाम्। विश्पलायाः। अधत्तम्॥ ८॥

[v]अश्विना हे अश्विनौ [v]युवं युवां [v]पूर्व्याय पुरातनाय [v]नाधिताय याचमानाय [v]शयवे एतत्संज्ञाय ऋषये [v]धेनुं निवृत्तप्रसवाम् अदोग्ध्रीम्[5] [v]अपिन्वतं पयसा असिञ्चतम्। सर्वदा पयस्विनीमकुरुतमित्यर्थः। अपि च वर्तिकां[6] वृकेण ग्रस्तां चटकसदृशीं शकुनिम् [v]अंहसः वृकास्यलक्षणात् पापात्[6] [v]निः [v]अमुञ्चतं निरमोचयतम्। यद्वा। पुनःपुनर्वर्तते इति वर्तिका उषाः। तामादित्येनाभिग्रस्तां युवाममोचयतम्। तथा विश्पलायै[7] संग्रामे छिन्नजङ्घायै अगस्त्यपुरोहितस्य खेलस्य संबन्धिन्यै एतत्संज्ञायै स्त्रियै आयसीं [v]जङ्घां [v]प्रति [v]अधत्तं प्रत्यस्थापयतं समयोजयतमित्यर्थः॥

**युवं श्वेतं पेदव इन्द्रजूतमहिहनमश्विनादत्तमश्वम्।**
**जोहूत्रमर्यो अभिभूतिमुग्रं सहस्रसां वृषणं वीळुजम्॥ ९॥**

युवम्। श्वेतम्। पेदवे। इन्द्रऽजूतम्। अहिऽहनम्। अश्विना। अदत्तम्। अश्वम्।
जोहूत्रम्। अर्यः। अभिऽभूतिम्। उग्रम्। सहस्रऽसाम्। वृषणम्। वीळुऽअङ्गम्॥ ९॥

[v]अश्विना हे अश्विनौ [v]पेदवे पेदुनाम्ने राज्ञे [v]युवं युवां श्वेतवर्णं कंचित् [v]अश्वम् [v]अदत्तं प्रायच्छतम्। कीदृशम्। [v]इन्द्रजूतम् इन्द्रेण युवाभ्यां गमितं दत्तमित्यर्थः। [v]अहिहनम् शत्रूणां

---

१. क्ष-ट-ठ-प्रापयतम्। २. क्ष-ट-ठ-'इहासीनः.....इति' नास्ति। ३. क्ष-ट-ठ-अन्धाय। ४. स-कण्वाय ऋषये। ५. क्ष-ट-ठ-स-अदोग्ध्रीं गाम्। ६. क्ष-ट-स-वर्तिकाम् एतत्संज्ञां वृकेण ग्रस्ताम् अंहसो वृकस्य भक्षणात्। ७. क्ष-ट-ठ-विश्पलायाः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हन्तारं [v]जोहूत्रम् अतिशयेन संग्रामेष्वाह्वातारम् [v]अर्यः अरेः शत्रोः [v]अभिभूतिम् अभिभावुकम् [v]उग्रम् उद्गूर्णम् वीर्यवन्तमित्यर्थः। [v]सहस्त्रसां सहस्त्रसंख्याकस्य धनस्य संभक्तारं दातारं वा [v]वृषणं सेक्तारं युवानमित्यर्थः। [v]वीडुअंगं दृढाङ्गम्॥ इन्द्रजूतम्। जु इति सौत्रो धातुर्गत्यर्थः। अस्मादन्तर्भावितण्यर्थात् कर्मणि निष्ठा। 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम्। जोहूत्रम्। ह्वयतेर्यङ्लुगन्तात् औणादिकः त्रप्प्रत्ययः। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते। अर्यः। अरिशब्दात् षष्ठ्येकवचने 'जसादिषु छन्दसि वावचनम्' इति 'वेर्डिति' इति गुणस्य विकल्पितत्वादभावे यणादेशः। 'उदात्तयणः०' इति विभक्तेरुदात्तत्वम्। अभिभूतिम्। अभिभूयतेऽनेनेत्यभिभूतिः। करणे क्तिन्। 'तादौ च०' इति गतेः प्रकृतिस्वरत्वम्। सहस्त्रसाम्। सनोतेः सनतेर्वा 'जनसनखन०' इति विट्। 'विड्वनोरनुनासिकस्यात्' इति आत्वम्॥

ता वां नरा स्वर्वसे सुजाता हवामहे अश्विना नाधमानाः।
आ न उप वसुमता रथेन गिरो जुषाणा सुवितायं यातम्॥ १०॥

ता। वाम्। नरा। सु। अर्वसे। सुऽजाता। हवामहे। अश्विना। नाधमानाः।
आ। नः। उप। वसुऽमता। रथेन। गिरः। जुषाणा। सुवितायं। यातम्॥ १०॥

[v]नरा नेतारौ हे अश्विनौ [v]सुजाता शोभनजन्मानौ [v]ता [v]वां तौ युवां [v]नाधमानाः धनं याचमानाः वयं स्तोतारः [v]अवसे रक्षणार्थं [v]सु [v]हवामहे शोभनमाह्वयामहे। [v]गिरः स्तुतीः [v]जुषाणा सेवमानौ युवां [v]वसुमता धनयुक्तेन [v]रथेन [v]नः अस्मान् [v]उप [v]आ [v]यातम् उपागच्छतम्। किमर्थम्। [v]सुविताय सुष्ठु प्राप्तव्याय धनाय सुखाय वा॥ सुजाता। शोभनं जातं जन्म ययोस्तौ सुजातौ। 'सुपां सुलुक्०' इति विभक्तेराकारः। 'नञ्सुभ्याम्०' इत्युत्तरपदान्तोदात्तत्वम्। नाधमानाः। 'नाध याच्ञायाम्'। जुषाणा। 'जुषी प्रीतिसेवनयोः'। ताच्छीलिकः चानश्। तुदादित्वात् शः। पूर्ववद्विभक्तेराकारः। सुविताय। सुपूर्वात् एतेः कर्मणि निष्ठा। तन्वादित्वात् उवङ्। 'सूपमानात् क्तः' इत्युत्तरपदान्तोदात्तत्वम्॥

आ श्येनस्य जवसा नूतनेनास्मे यातं नासत्या सजोषाः।
हवे हि वामश्विना रातहव्यः शश्वत्तमाया उषसो व्युष्टौ॥ ११॥

आ। श्येनस्य। जवसा। नूतनेन। अस्मे इति। यातम्। नासत्या। सऽजोषाः।
हवे। हि। वाम्। अश्विना। रातऽहव्यः। शश्वत्ऽतमायाः। उषसः। विऽउष्टौ॥ ११॥

हे नासत्यावश्विनौ [v]सजोषाः सजोषसौ समानप्रीतियुक्तौ [v]श्येनस्य शंसनीयं गच्छतः अश्वस्य [v]नूतनेन नवतरेण प्रत्यग्रेण [v]जवसा वेगेन सहितौ युवाम् [v]अस्मे अस्मान् [v]आ [v]यातम् आगच्छतम्। [v]अश्विना हे अश्विनौ [v]रातहव्यः [v]वां युवाभ्यां दातव्येन हविषा युक्तः सन् [v]शश्वत्तमायाः कालात्मकतया नित्यायाः [v]उषसो [v]व्युष्टौ विवासनसमये वां युवां [v]हवे आह्वयामि। हिः हेतौ। [v]हि यस्मादेवं तस्मात् आयातमित्यर्थः॥ अस्मे। 'सुपां सुलुक्०' इति शसः शेआदेशः। सजोषाः।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तेनैव द्विवचनस्य सुआदेशः। हवे। ह्वेञो लडुत्तमैकवचने 'बहुलं छन्दसि' इति संप्रसारणम्। शब्गुणावादेशाः। शश्वत्तमायाः। 'उत्तमशश्वत्तमौ सर्वत्र' (पा. सू. ६. १. १६०. ग.) इति उञ्छादिषु पाठात् अन्तोदात्तत्वम्॥ ॥ १९ ॥

'आ वां रथम्' इति दशर्चं चतुर्थं सूक्तं दैर्घतमसस्य कक्षीवत आर्षं जागतमाश्विनम्। तथा चानुक्रान्तम्—'आ वां रथं दश जागतम्' इति। प्रातरनुवाकाश्विने[1] क्रतौ जागते छन्दसि इदं सूक्तम् आश्विनशस्त्रे च। तथा च सूत्रितम्—'आ वां रथमभूदिदं यो वां परिज्मेति त्रीणि' (आश्व. श्रौ. ४. १५) इति॥

आ वां रथं पुरुमायं मनोजुवं जीराश्वं यज्ञियं जीवसे हुवे।
सहस्रकेतुं वनिनं शतद्वसुं श्रुष्टीवानं वरिवोधामभि प्रयः॥ १॥

आ। वाम्। रथम्। पुरुऽमायम्। मनःऽजुवम्। जीरऽअश्वम्। यज्ञियम्। जीवसे। हुवे।
सहस्रऽकेतुम्। वनिनम्। शतत्ऽवसुम्। श्रुष्टीऽवानम्। वरिवःऽधाम्। अभि। प्रयः॥१॥

हे अश्विनौ vवां युवयोः vरथं vजीवसे जीवनार्थं vप्रयः हविर्लक्षणमन्नमभिलक्ष्य vआ vहुवे आह्वयामि। कीदृशम्। vपुरुमायं बहुविधाश्चर्यं बहुविधकर्माणं वा vमनोजुवं मन इव शीघ्रं गच्छन्तं vजीराश्वं जववदश्वोपेतं vयज्ञियं यज्ञेष्वाह्वातुमर्हं vसहस्रकेतुम् अनेकध्वजं सहस्रस्य धनस्य केतयितारं ज्ञापयितारं वा vवनिनम्। वनमित्युदकनाम। तद्वन्तम्। vशतद्वसुं शतसंख्याकैर्धनैर्युक्तं vश्रुष्टीवानम्। श्रुष्टीति क्षिप्रनाम। क्षिप्रं संभजमानं यद्वा सुखवन्तम्। vवरिवोधाम्। वरिव इति धननाम। वरिवसो धनस्य दातारम्॥ पुरुमायम्। बहुव्रीहौ त्रिचक्रादित्वादन्तोदात्तत्वम्। यद्वा। तत्पूर्वात् अर्शआदित्वात् अच्। जीराश्वम्। जु इति गत्यर्थः सौत्रो धातुः। 'जोरी च' (उ. सू. २. १८१) इति रक् ईकारान्तादेशश्च। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम्। यज्ञियम्। 'यज्ञर्त्विग्भ्यां घखञौ' इति अर्हार्थे घप्रत्ययः। हुवे। ह्वेञो लटि 'बहुलं छन्दसि' इति संप्रसारणम्। 'लुक्' इत्यनुवृत्तौ 'बहुलं छन्दसि' इति शपो लुक्। उवङ्। शतद्वसुम्। शतवसुम्। छान्दसस्तकारोपजनः॥

ऊर्ध्वा धीतिः प्रत्यस्य प्रयामन्यधायि शस्मन्त्समयन्त आ दिशः।
स्वदामि घर्मं प्रति यन्त्यूतय आ वामूर्जानी रथमश्विनारुहत्॥ २॥

ऊर्ध्वा। धीतिः। प्रति। अस्य। प्रऽयामनि। अधायि। शस्मन्। सम्। अयन्ते। आ। दिशः।
स्वदामि। घर्मम्। प्रति। यन्ति। ऊतयः। आ। वाम्। ऊर्जानी। रथम्। अश्विना। अरुहत्॥२॥

vअस्य रथस्य vप्रयामनि प्रयाणे प्रगमने सति vशस्मन् अश्विनोः शंसने स्तवने vधीतिः अस्मदीया बुद्धिः vऊर्ध्वा उन्मुखा vप्रति vअधायि प्रत्यस्थायि। तदनन्तरं vदिशः देष्टव्याः स्तुतयोऽपि

---

१. क्ष-ट–प्रातरनुवाक आश्विने; न-स–प्रातरनुवाकस्य आश्विने। २. क्ष-ट-ठ-महावीरसंस्थम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]समयन्ते अश्विभ्यां संगच्छन्ते । आकारः समुच्चये । अहं च स्तोता [V]घर्मं महावीरस्थं यद्वा क्षरणशीलाज्यादिकं[1] हविः [V]स्वदामि स्वादूकरोमि । [V]ऊतयः अवितारः रक्षका ऋत्विजश्च [V]प्रति [V]यन्ति । घर्मं प्रति गच्छन्ति संस्कारार्थम् । अपि च हे अश्विनौ [V]वां युवयोः [V]रथम् [V]ऊर्जानी सूर्यस्य दुहिता [V]आ [V]अरुहत् आरूढवती ॥ प्रयामनि । ' या प्रापणे ' । ' आतो मनिन्° ' इति ' कृत्यल्युटो बहुलम् ' इति बहुलवचनात् भावे मनिन् । दासीभारादित्वात् पूर्वपदप्रकृतिस्वरत्वम् । शस्मन् । ' शंसु स्तुतौ ' । ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन् । दृशिग्रहणस्य विध्यन्तरोपसंग्रहार्थत्वात् उपधानकारलोपः । ' सुपां सुलुक्° ' इति सप्तम्या लुक् । अयन्ते । ' अय पय गतौ ' । भौवादिकः अनुदात्तेत् । ऊतयः । ' क्तिच्क्तौ च संज्ञायाम् ' इति अवतेः कर्तरि क्तिच् । ' ज्वरत्वर° ' इत्यादिना वकारोपधयोः ऊठ् । अरुहत् । ' कृसृभृदृरुहिभ्यः° ' इति च्लेः अङादेशः ॥

सं यन्मिथः पस्पृधानासो अग्मत शुभे मखा अमिता जायवो रणे ।
युवोरह प्रवणे चेकिते रथो यदश्विना वहथः सूरिमा वरम् ॥ ३ ॥

सम् । यत् । मिथः । पस्पृधानासः । अग्मत । शुभे । मखाः । अमिताः । जायवः । रणे ।
युवोः । अह । प्रवणे । चेकिते । रथः । यत् । अश्विना । वहथः । सूरिम् । आ । वरम् ॥३॥

[V]मखाः मखवन्तो यज्ञोपेताः [V]अमिताः अपरिमिताः [V]जायवः जयशीलाः मनुष्याः [V]रणे संग्रामे [V]शुभे शोभनाय[2] धनाय तदर्थं [V]मिथः [V]पस्पृधानासः अन्योन्यं स्पर्धमानाः [V]यत् यदा [V]सम् [V]अग्मत संगच्छन्ते तदानीं हे [V]अश्विना अश्विनौ [V]युवोरह युवयोरेव [V]रथः [V]प्रवणे प्रकर्षेण संभजनीये[3] भूतले [V]चेकिते ज्ञायते । देवेषु मध्ये युवामेव रक्षणार्थं शीघ्रं रथेनागच्छथः इत्यर्थः । [V]यत् येन रथेन [V]सूरिं स्तोतारं प्रति [V]वरं श्रेष्ठं धनम् [V]आ [V]वहथः प्रापयथः स रथः इत्यर्थः ॥ पस्पृधानासः । ' स्पर्ध संघर्षे ' । छान्दसो लिट् । तस्य लिटः कानजादेशः । छान्दसं रेफस्य संप्रसारणमकारलोपश्च । अग्मत । गमेश्छान्दसो लङ् । ' समो गम्यृच्छि° ' इत्यादिना आत्मनेपदम् । ' बहुलं छन्दसि ' इति शपो लुक् । झस्य अदादेशः । ' गमहन° ' इति उपधालोपः । मखाः । मखो यज्ञः । अर्शआदित्वात् अच् । जायवः । ' जि जये ' । ' कृवापाजि° ' इत्यादिना उण् । चेकिते । ' कित ज्ञाने ' । अस्मात् यङन्तात् छान्दसो वर्तमाने लिट् । अतोलोपयलोपौ । यत् । ' सुपां सुलुक्° ' इति तृतीयाया लुक् ॥

युवं भुज्युं भुरमाणं विभिर्गतं स्वयुक्तिभिर्निवहन्ता पितृभ्य आ ।
यासिष्टं वर्तिर्वृषणा विजेन्यं दिवोदासाय महि चेति वामवः ॥ ४ ॥

युवम् । भुज्युम् । भुरमाणम् । विऽभिः । गतम् । स्वयुक्तिऽभिः । निऽवहन्ता । पितृऽभ्यः । आ ।
यासिष्टम् । वर्तिः । वृषणा । विऽजेन्यम् । दिवःऽदासाय । महि । चेति । वाम् । अवः ॥४॥

---

१. क्ष-ट-ठ–क्षरणशीलम् आज्यादिकम् । २. क्ष-ट-ठ–शोभमानाय । ३. क्ष-ट-ठ–संभजनार्हे ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]वृषणा कामानां वर्षितारौ हे अश्विनौ [v]युवं युवां [v]भुरमाणं [v]विभिः अश्वैः भ्रियमाणं [v]गतं समुद्रे निमग्नं [v]भुज्युं तुग्रपुत्रं [v]स्वयुक्तिभिः स्वयमेव युज्यमानैः अश्वैः नौविशेषैश्च [v]निवहन्ता नितरां वहन्तौ [v]पितृभ्य [v]आ । ' आङ् मर्यादायाम् ' । यत्र पितरस्तुग्रादय आसते तावत्पर्यन्तम्[1] इत्यर्थः । [v]विजेन्यम् इति दूरस्थं ब्रुवते । दूरे वर्तमानं [v]वर्तिः तुग्रस्य गृहं प्रति [v]यासिष्टम् अगच्छतम् । अपि च [v]दिवोदासाय राज्ञे कृतं युवयोः संबन्धि [v]अवः रक्षणं शम्बरहननरूपं [v]महि महत्[2] गम्भीरं[2] [v]चेति अस्माभिर्ज्ञायते ॥ भुरमाणम् । ' डुभृञ् धारणपोषणयोः ' । कर्मणि लटः शानच् । व्यत्ययेन शः । ' बहुलं छन्दसि ' इति उत्वम् । पितृभ्य आ । मर्यादायाम् आङः कर्मप्रवचनीयसंज्ञा[3] ( पा. सू. १. ४. ८९ ) । ' पञ्चम्यपाङ्परिभिः ' ( पा. सू. २. ३. १० ) इति पञ्चमी । यासिष्टम् । ' या प्रापणे ' । ' यमरमनमातां सक्च ' ( पा. सू. ७. २. ७३ ) इति सगागमः । सिच इडागमः । विजेन्यम् । विजनो दूरदेशः । तत्र भवं विजेन्यम् । ' भवे छन्दसि ' इति यत् । ' तित्स्वरितः ' इति स्वरितत्वम् ॥

युवोरश्विना वपुषे युवायुजं रथं वाणी येमतुरस्य शर्ध्यम् ।
आ वां पतित्वं सख्याय जग्मुषी योषावृणीत जेन्या युवां पती ॥ ५ ॥

युवोः । अश्विना । वपुषे । युवाऽयुजम् । रथम् । वाणी इति । येमतुः । अस्य । शर्ध्यम् ।
आ । वाम् । पतिऽत्वम् । सख्याय । जग्मुषी । योषा । अवृणीत । जेन्या । युवाम् । पती इति ॥५॥

[v]अश्विना हे अश्विनौ [v]युवोः युवयोः [v]वाणी वननीयौ[4] प्रशस्यौ अश्वौ [v]युवायुजं युवाभ्यां युज्यमानं [v]रथम् आजिधावनसमये [v]अस्य रथस्य यत् [v]शर्ध्यं प्राप्यम् आदित्याख्यम् अवधिभूतं लक्ष्यं[5] [v]वपुषे शोभार्थं तत् [v]येमतुः । सर्वेभ्यो देवेभ्यः पूर्वं प्रापयामासतुः । तदनन्तरं च [v]आ [v]जग्मुषी आगतवती [v]जेन्या आजिधावनेन जीयमाना [v]योषा सूर्या [v]सख्याय सखित्वाय युवां[6] युवयोः [v]पतित्वम् [v]अवृणीत । कथमिति । मम [v]युवाम् एव [v]पती भर्तारौ इति ॥ युवोः । षष्ठीद्विवचने ' योऽचि ' इति यत्वस्य सर्वविधीनां छन्दसि विकल्पितत्वादभावे ' शेषे लोपः ' इति दकारलोपः । ' अतो गुणे ' इति पररूपत्वम् । युवायुजम् । ' युवावौ द्विवचने ' इति द्व्यर्थाभिधायकस्य युष्मच्छब्दस्य अविभक्तावपि व्यत्ययेन युवादेशः । शर्ध्यम् । ' श्रुधु प्रसहने ' । अस्मात् ण्यन्तात् ' अचो यत् ' इति यत् । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । जग्मुषी । गमेर्लिटः क्वसुः । ' उगितश्च ' इति ङीप् । ' वसोः संप्रसारणम् ' इति संप्रसारणम् । ' गमहन° ' इति उपधालोपः । जेन्या । ' जि जये ' । औणादिक एन्यप्रत्ययः टिलोपश्च ॥ ॥ २० ॥

युवं रेभं परिषूतेरुरुष्यथो हिमेन घर्मं परितप्तमत्रये ।
युवं शयोरवसं पिप्यथुर्गवि प्र दीर्घेण वन्दनस्तार्यायुषा ॥ ६ ॥

युवम् । रेभम् । परिऽसूतेः । उरुष्यथः । हिमेन । घर्मम् । परिऽतप्तम् । अत्रये ।
युवम् । शयोः । अवसम् । पिप्यथुः । गवि । प्र । दीर्घेण । वन्दनः । तारि । आयुषा ॥ ६ ॥

---

१. क्ष-ट-ठ-तावन्नयन्तौ । २. क्ष-ट-ठ-महत्वं वीर्यम् । ३. क्ष-ट-ठ-कर्मप्रवचनीयसंज्ञायाम् ।
४. च-छ-त-फ-श-वर्णनीयौ । ५. क्ष-ट-ठ-स-' लक्ष्यम् ' नास्ति । ६. क्ष-च-छ-ट-ठ-फ-वाम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे अश्विनौ [V]युवं युवां [V]रेभम् ऋषिं [V]परिषूतेः परितः प्रेरकादुपद्रवात् कूपपतनाद्वा [V]उरुष्यथः रक्षथः । 'उरुष्यती रक्षाकर्मा' (निरु. ५. २३) इति यास्कः । तथा [V]अत्रये ऋषये [V]परितप्तं परितस्तप्तं [V]घर्मम् असुरैः पीडार्थं प्रक्षिप्तं दीप्यमानं तुषाग्निं [V]हिमेन शीतेनोदकेन अवारयेथाम् । यद्वा । हविषामत्रये भक्षयित्रे अग्नये परितप्तं सूर्यकिरणैः संतप्तं घर्मम् । अहर्नामैतत् । अहर्हिमेन वृष्युदकेन हविःसंपादकव्रीह्याद्युत्पत्त्यर्थम् अवारयेथाम्। अपि च [V]शयोः एतत्संज्ञस्य[1] ऋषेः [V]गवि निवृत्तप्रसवायां धेनौ [V]अवसं रक्षकं पयः [V]युवं युवां [V]पिप्यथुः प्रवर्धितवन्तौ । तथा जीर्णाङ्गः [V]वन्दनः ऋषिः [V]दीर्घेण [V]आयुषा [V]प्र [V]तारि युवाभ्यां प्रवर्धितः । प्रपूर्वस्तिरतिर्वर्धनार्थः॥ अवसम्। अवतेरौणादिकः असच्। पिप्यथुः। 'ष्यायी वृद्धौ'। व्यत्ययेन परस्मैपदम्। 'लिङ्यडोश्च' (पा. सू. ६. १. २९) इति पीभावः ॥

युवं वन्दनं निर्ऋतं जरण्यया रथं न दस्रा करणा समिन्वथः ।
क्षेत्रादा विप्रं जनथो विपन्यया प्र वामत्रं विधते दंसना भुवत् ॥ ७ ॥

युवम्। वन्दनम्। निःऽऋतम्। जरण्यया। रथम्। न। दस्रा। करणा। सम्। इन्वथः। क्षेत्रात्। आ। विप्रम्। जनथः। विपन्यया। प्र। वाम्। अत्रे। विधते। दंसना। भुवत् ॥७॥

हे दस्रौ अश्विनौ [V]युवं युवां [V]जरण्यया जरया [V]निर्ऋतं निःशेषेण प्राप्तं [V]वन्दनम् ऋषिं [V]करणा कर्मणां कर्तारौ शिल्पकुशलौ युवां [V]समिन्वथः समधत्तं पुनर्युवानमकुरुतम्। तत्र दृष्टान्तः । [V]रथं [V]न । यथा कश्चिच्छील्पी जीर्णं रथं पुनरप्यभिनवं करोति तद्वत् । अपि च [V]विपन्यया स्तुत्या गर्भस्थेन वामदेवेन स्तुतौ सन्तौ [V]क्षेत्रात् [V]आ । आकारः समुच्चये । मातुरुदरलक्षणात् जन्मस्थानात् [V]विप्रं मेधाविनं तमृषिं [V]जनथः जनयथः च । तथा [V]वां युवयोः [V]दंसना रक्षणात्मकं कर्म [V]अत्र अस्मै [V]विधते परिचरते यजमानाय [V]प्र [V]भुवत् प्रभवतु । रक्षितुं समर्थं भवतु ॥ निर्ऋतम्। 'ऋ गतौ'। कर्मणि निष्ठा । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। जरण्यया । जरणक्रियार्हा जरण्या । 'अन्त्यावस्थाच्छन्दसि च' इति यः। करणा । करोतेः 'अन्येभ्योऽपि दृश्यते' (पा. सू. ३. ३. १३०) इति युच्। इन्वथः। 'इवि व्याप्तौ'। इदित्त्वात् नुम्। भौवादिकः। जनथः। 'जनी प्रादुर्भावे'। णिचि उपधावृद्धिः । 'जनीजॄष्क्नसुरञ्जः०' इति मित्त्वात् 'मितां ह्रस्वः' इति ह्रस्वत्वम्। 'छन्दस्युभयथा' इति शप आर्धधातुकत्वात् 'णेरनिटि' इति णिलोपः। विपन्यया । 'पन स्तुतौ'। 'अन्येभ्योऽपि दृश्यते' इति भावे यत्। व्यत्ययेनान्तोदात्तत्वम्। विधते। 'विध विधाने'। तौदादिकः। लटः शतृ। 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम्। भुवत्। भवतेर्लेटि अडागमः। 'बहुलं छन्दसि' इति शपो लुक्। 'भूसुवोस्तिङि' इति गुणप्रतिषेधः ॥

अगच्छतं कृपमाणं परावतिं पितुः स्वस्य त्यजसा निबाधितम् ।
स्वर्वतीरित ऊतीर्युवोरहं चित्रा अभीके अभवन्नभिष्टयः ॥ ८ ॥

अगच्छतम्। कृपमाणम्। पराऽवतिं। पितुः। स्वस्य। त्यजसा। निऽबाधितम्। स्वःऽवतीः। इतः। ऊतीः। युवोः। अहं। चित्राः। अभीके। अभवन्। अभिष्टयः॥ ८॥

---

१. क्ष-ट-ठ-स-एतत्संज्ञकस्य ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे अश्विनौ [v]परावति दूरदेशे समुद्रमध्ये [v]स्वस्य [v]पितुः तुग्रस्य [v]त्यजसा त्यागेन [v]निबाधितं पीडितं भुज्युं कृपमाणं युवां [v]स्तुवन्तम् [v]अगच्छतम् । युवां रक्षणार्थं गतवन्तौ । यस्मादेवं तस्मात् हे अश्विनौ [v]स्वर्वतीः स्वर्वत्यः शोभनगमनयुक्ताः [v]इतः इतोमुखात् [v]चित्राः चायनीयाः [v]युवोरह युवयोरेव [v]ऊतीः ऊतयः रक्षाः [v]अभीके समीपे [v]अभिष्टयः सर्वैः प्राणिभिः अभ्येषणीयाः [v]अभवन् भवन्ति ॥ कृपमाणम् । कृपतिः स्तुतिकर्मा । अयं च तुदादिर्द्रष्टव्यः । स्वर्वतीः । सुपूर्वात् अर्तेः भावे विच् । ततो मतुप् । ' छन्दसीरः ' इति मतुपो वत्वम् । अभिष्टयः । ' इषु इच्छायाम् ' । भावे क्तिन् । शकन्ध्वादित्वात् पररूपत्वम् ॥

उत स्या वां मधुमन्मक्षिकारपन्मदे सोमस्यौशिजो हुवन्यति ।
युवं दधीचो मन आ विवासथोऽथा शिरः प्रति वामश्व्यं वदत् ॥ ९ ॥

उत । स्या । वाम् । मधुऽमत् । मक्षिका । अरपत् । मदे । सोमस्य । औशिजः । हुवन्यति ।
युवम् । दधीचः । मनः । आ । विवासथः । अथ । शिरः । प्रति । वाम् । अश्व्यम् । वदत् ॥ ९ ॥

[v]उत अपि च हे अश्विनौ [v]मधुमत् मधुमन्तौ [v]वां युवां [v]स्या सा [v]मक्षिका सरघा मधुकामा सती [v]अरपत् अस्तौत् । तथा [v]औशिजः उशिजः पुत्रः कक्षीवान् [v]सोमस्य पानेन युवयोः [v]मदे हर्षे निमित्तभूते सति [v]हुवन्यति युवामाह्वयति । [v]युवं युवां च तस्यै मक्षिकायै मधु दातुं मधुविद्यार्थिनौ सन्तौ [v]दधीचः आथर्वणस्य ऋषेः [v]मनः चित्तं शुश्रूषया [v]आ [v]विवासथः पर्यचरतम् । [v]अथ अनन्तरं तस्मिन्प्रीते सति [v]अश्व्यं युवाभ्यां प्रतिहितम् अश्वस्य संबन्धि यत् [v]शिरः तत् [v]वां युवां [v]प्रति मधुविद्यामवदत् । स ऋषिः आश्वेन शिरसा उपदिष्टवानित्यर्थः ॥ मधुमत् । ' सुपां सुलुक्° ' इति विभक्तेर्लुक् । अरपत् । ' रप लप व्यक्तायां वाचि ' । मदे । ' मदी हर्षे ' । ' मदोऽनुपसर्गे ' इति भावे अप् । हुवन्यति । ' ह्वेञ् स्पर्धायां शब्दे च ' । ' ल्युट् च ' इति भावे ल्युट् । ' बहुलं छन्दसि ' इति संप्रसारणम् । हवनमात्मन इच्छति । ' सुप आत्मनः क्यच् ' । अन्त्यलोपश्छान्दसः । वर्णव्यापत्त्या उत्वम् । अश्व्यम् । अश्वे भवम् अश्व्यम् । ' भवे छन्दसि ' इति यत् ॥

युवं पेदवे पुरुवारमश्विना स्पृधां श्वेतं तरुतारं दुवस्यथः ।
शर्यैरभिद्युं पृतनासु दुष्टरं चर्कृत्यमिन्द्रमिव चर्षणीसहम् ॥ १० ॥

युवम् । पेदवे । पुरुऽवारम् । अश्विना । स्पृधाम् । श्वेतम् । तरुतारम् । दुवस्यथः ।
शर्यैः । अभिऽद्युम् । पृतनासु । दुस्तरम् । चर्कृत्यम् । इन्द्रम्ऽइव । चर्षणिऽसहम् ॥ १० ॥

[v]अश्विना हे अश्विनौ [v]पेदवे पेदुनाम्ने राज्ञे [v]पुरुवारं बहुभिर्वरणीयं [v]स्पृधां संग्रामे स्पर्धमानानां शत्रूणां [v]तरुतारं तारकं [v]श्वेतं शुभ्रवर्णम् इन्द्राल्लब्धम् अश्वं [v]युवं युवां [v]दुवस्यथः दत्तवन्तौ । पुनरपि कीदृशम् । [v]शर्यैः । शीर्यन्ते इति शर्याः योद्धारः । तैः [v]पृतनासु संग्रामेषु [v]दुस्तरं तरीतुमशक्यम् [v]अभिद्युम् अभिगतदीप्तिं [v]चर्कृत्यं सर्वेषु कार्येषु पुनःपुनः प्रयोज्यम् [v]इन्द्रमिव [v]चर्षणीसहम् । इन्द्रो यथा शत्रूनभिभवति एवं शत्रुजनानाम् अभिभवितारमित्यर्थः ॥ स्पृधाम् । ' स्पर्ध संघर्षे ' । ' क्विप् च ' इति

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

क्विप् । चशब्देन दृशिग्रहणानुकर्षणात् तस्य च विध्यन्तरोपसंग्रहार्थत्वात् अकारस्य लोपो रेफस्य च संप्रसारणम् । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । तरुत्तारम् । ' तॄ प्लवनतरणयोः ' । अस्मात् तृचि ' ग्रसितस्कभितस्तभित° ' इत्यादौ निपातनात् रूपसिद्धिः । चर्कृत्यम् । करोतेः यङ्लुगन्तात् ' विभाषा कृवृषोः ' इति क्यप् । ततस्तुक् ॥ ॥ २१ ॥

' का राधत् ' इति द्वादशर्चं पञ्चमं सूक्तम् । अत्रानुक्रम्यते–' का राधद्द्वादशान्त्या दुःस्वप्ननाशन्याद्या गायत्री द्वितीया ककुप् तृतीयाचतुर्थ्यौ काविराण्नष्टरूप्यौ पञ्चमी तनुशिरा[1] षष्ट्यक्षरैः उष्णिग्विष्टारबृहती कृतिर्विराट् तिस्रो गायत्र्यः ' इति । अस्यायमर्थः । अनुवृत्तेः औशिजो दैर्घतमसः कक्षीवान् ऋषिः आद्या गायत्री । ' विद्वांसौ ' इत्येषा ककुप् मध्यमपादस्य द्वादशाक्षरत्वात् । ' मध्यमश्चेत्ककुप् ' ( अनु. ५. ३ ) इति हि तल्लक्षणम् । तृतीया ' ता विद्वांसा ' इत्येषा काविराट् । ' नवकयोर्मध्ये जागतः काविराट् ' ( अनु. ६. ५ ) इत्युक्तलक्षणोपेतत्वात् । चतुर्थी ' वि पृच्छामि ' इत्येषा नष्टरूपी । ' नववैराजत्रयोदशैर्नष्टरूपी ' ( अनु. ६. ६ ) इत्युक्तलक्षणोपेतत्वात् । ' प्र या घोषे ' इत्येषा पञ्चमी तनुशिरा[2] । ' एकादशिनोः परः षट्कस्तनुशिरा ' ( अनु. ५. ५ ) इत्युक्तलक्षणोपेतत्वात् । ' श्रुतं गायत्रम् ' इत्येषा षष्ठी यद्यपि पादसंख्यया उष्णिक् न भवति तथापि अक्षरसंख्यया उष्णिक् । ' युवं हि ' इति सप्तमी विष्टारबृहती । ' अष्टिनोर्मध्ये दशकौ विष्टारबृहती ' ( अनु. ७.५ ) इति तल्लक्षणोपेतत्वात् । ' मा कस्मै ' इति अष्टमी कृतिः । ' जागतावष्टकश्च कृतिः ' ( अनु. ६. ३ ) इत्युक्तलक्षणसद्भावात् । ' दुहीयन् ' इति नवमी विराट् । दशम्याद्याः तिस्रो गायत्र्यः । ' आश्विनं वै ' इति वैशब्दप्रयोगात् तुह्यादिपरिभाषया इदमपि सूक्तम् आश्विनम् । ' अध स्वप्नस्य ' इति अन्त्यया दुःस्वप्ननाशनं प्रतिपाद्यते । अतो ' या तेनोच्यते सा देवता ' ( अनु. २. ५ ) इति न्यायेन तदेव देवता ॥ सूक्तविनियोगो लैङ्गिकः । धर्माभिष्टवे आदितो नवर्चो विनियुक्ताः । सूत्र्यते हि–' का राधद्धोत्राश्विना वामिति नवा भाग्यग्निः ' ( आश्व. श्रौ. ४. ६ ) इति । ' का राधद्धोत्राश्विना वामिति नव विच्छन्दसः ' ( ऐ. ब्रा. १. २१ ) इत्यादिकं ब्राह्मणमनुसंधेयम् ॥

**का राधद्धोत्राश्विना वां को वां जोषे उभयोः । कथा विधात्यप्रचेताः ॥ १ ॥**

**का । राधत् । होत्रा । अश्विना । वाम् । कः । वाम् । जोषे । उभयोः । कथा । विधाति । अप्रऽचेताः ॥ १ ॥**

vअश्विना हे अश्विनौ vवां युवां vका vहोत्रा । वाङ्नामैतत् । कीदृशी स्तुतिलक्षणा वाक् vराधत् आराधयति प्रीतौ करोति । युवयोर्माहात्म्यानुरूपा स्तुतिर्नास्तीत्यर्थः । किंच vवां युवयोः vउभयोः vजोषे जोषणे सेवने प्रीणने वा समर्थः vकः स्तोता विद्यते । युष्मदनुभिज्ञः कश्चिदपि नास्तीत्यर्थः । vअप्रचेताः युवयोर्माहात्म्यमजानंश्च vकथा केन प्रकारेण vविधाति युवां परिचरति । युष्मद्विषयं परिचरणमपि न कर्तुं शक्यमित्यर्थः ॥ राधत् । ' राध साध संसिद्धौ ' । लेटि अडागमः । जोषे । ' जुषी प्रीतिसेवनयोः ' । भावे घञ् । ञित्त्वादाद्युदात्तत्वम् । कथा । ' था हेतौ च च्छन्दसि ' इति किंशब्दात् प्रकारवचने थाप्रत्ययः । ' किमः कः ' इति कादेशः । विधाति । ' विध विधाने ' । तौदादिकः । लेटि आडागमः । अप्रचेताः । प्रकृष्टं चेतो यस्यासौ प्रचेताः । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

---

१. क्ष-ट-ठ–तनुशिखा । २. क्ष-ट-ठ–तनुशिखा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

विद्वांसाविदुरः पृच्छेदविद्वानित्थापरो अचेताः । नू चिन्नु मर्ते अक्रौ ॥ २ ॥

विद्वांसौ । इत् । दुरः । पृच्छेत् । अविद्वान् । इत्था । अपरः । अचेताः ।

नु । चित् । नु । मर्ते । अक्रौ ॥ २ ॥

vइत्था इत्थम् अनेन पूर्वोक्तप्रकारेण vअविद्वान् अज्ञः स्तोता vविद्वांसौ vइत् सर्वज्ञौ अश्विनौ एव vदुरः द्वाराणि स्तुतिपरिचरणयोः उपायभूतान् मार्गान् vपृच्छेत् प्रष्टुमर्हति । vअपरः अश्विभ्यामन्यः सर्वः अपि vअचेताः । चेतसा ज्ञानेन रहितः । तस्मात् अश्विनावेव पृच्छेदित्यर्थः । तौ च vअक्रौ शत्रुभिः अनाक्रान्तौ अश्विनौ vनू vचित् क्षिप्रमेव vमर्ते मनुष्ये स्तोतरि भक्तानुग्राहकतया सनिं धत्तः इति वाक्यशेषः ॥ इत्था । 'था हेतौ च च्छन्दसि' इति थाप्रत्ययः । 'इदमो इश्' । 'एतेतौ रथोः' ( पा. सू. ५. ३. ४ ) इति इश्भावः । यदि 'था हेतौ च०' इत्यत्र इदंशब्दस्य नानुवृत्तिः तदानीम् 'इदमस्थमुः' । एतदन्तात् परस्या विभक्तेर्व्यत्ययेन 'सुपां सुलुक्०' इति विभक्तेर्डादेशः । अक्रौ । 'क्रमु पादविक्षेपे' । अस्मात् नञ्युपपदे 'कृत्यल्युटो बहुलम्' इति बहुलवचनात् कर्मण्यपि 'जनसनखनक्रमगमो विट्' इति विट् । 'विड्वनोरनुनासिकस्यात्' इति आत्वम् । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् ॥

ता विद्वांसा हवामहे वां ता नो विद्वांसा मन्म वोचेतमद्य ।

प्रार्चद्दयमानो युवाकुः ॥ ३ ॥

ता । विद्वांसा । हवामहे । वाम् । ता । नः । विद्वांसा । मन्म । वोचेतम् । अद्य ।

प्र । आर्चत् । दयमानः । युवाकुः ॥ ३ ॥

हे अश्विनौ vविद्वांसा सर्वज्ञौ vता vवां तौ युवां vहवामहे आह्वयामहे । तौ आहूतौ vविद्वांसा अभिज्ञौ युवां vनः अस्मभ्यं vमन्म मननीयं ज्ञातव्यं स्तोत्रम् vअद्य अस्मिन् काले vवोचेतं ब्रुवाणौ भूयास्तम् । स चाहं vयुवाकुः युवां कामयमानः स्तुत्या संयोजयन् वा vदयमानः युवाभ्यां हविः प्रयच्छन् vप्रार्चत् प्रार्चं प्रकर्षेण स्तौमि ॥ ता । 'सुपां सुलुक्०' इति विभक्तेराकारः । वोचेतम् । 'ब्रूञ् व्यक्तायां वाचि' । 'ब्रुवो वचिः' । 'लिङ्याशिष्यङ्' । 'वच उम्' इति उमागमः । आर्चत् । 'अर्च पूजायाम्' । भौवादिकः । 'तिङां तिङो भवन्ति' इति मिपः तिबादेशः । दयमानः । 'दय दान-गतिरक्षणहिंसादानेषु' । शपः पित्त्वादनुदात्तत्वम् । शानचो लसार्वधातुकस्वरेण धातुस्वरः शिष्यते । युवाकुः । युवां कामयते इति युवाकुः । 'मितद्वादिभ्य उपसंख्यानम्' ( पा. सू. ३. २. १८०. १ ) इति डुप्रत्ययः । अविभक्तावपि व्यत्ययेन 'युवावौ द्विवचने' इति युवादेशः आत्वं च । यद्वा । 'यु मिश्रणे' । औणादिकः काकुप्रत्ययः ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वि पृच्छामि पाक्या३ न देवान्वषट्कृतस्याद्भुतस्य दस्रा ।
पातं च सह्सो युवं च रभ्यसो नः ॥ ४ ॥

वि । पृच्छामि । पाक्या । न । देवान् । वषट्ऽकृतस्य । अद्भुतस्य । दस्रा ।
पातम् । च । सह्सः । युवम् । च । रभ्यसः । नः ॥ ४ ॥

हे अश्विनौ युवां [v]वि [v]पृच्छामि विशेषेण प्रष्टुमिच्छामि । [v]पाक्या [v]न पक्तव्यप्रज्ञान् स्वपरिपक्वमतीन्[1] अन्यान् [v]देवान् [v]न पृच्छामि । किंतु युवामेव सर्वज्ञौ पृच्छामीत्यर्थः । हे [v]दस्रा दर्शनीयौ तौ युवां [v]वषट्कृतस्य वषट्कारेणाग्नौ हुतस्य [v]अद्भुतस्य आश्चर्यभूतस्य महतः [v]सह्सः अतिशयेन बलवतो बलोत्पादकस्य सोमस्य स्वांशलक्षणमेकदेशं [v]पातं[2] [v]च[2] । [v]नः अस्मान् [v]च [v]रभ्यसः अतिशयेन रभस्विनः प्रौढोद्यमान् कुरुतम् ॥ पाक्या । पचेः ' ऋहलोर्ण्यत् ' । ' चजोः कु घिण्ण्यतोः ' इति कुत्वम् । तित्स्वरः । ' सुपां सुलुक्° ' इति विभक्तेर्डादेशः । वषट्कृतस्य । वषट्शब्दस्य ऊर्यादित्वेन गतित्वात् ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । पातम् । ' पा पाने ' । ' बहुलं छन्दसि ' इति शपो लुक् । सह्सः । सहते अभिभवत्यनेनेति सहो बलम् । असुन् । तदस्यास्तीति सहस्वी । मत्वर्थीयो विनिः । तत आतिशायनिक ईयसुन् । ' विन्मतोर्लुक् ' । छान्दस ईकारलोपः । रभ्यसः । ' रभ राभस्ये ' । राभस्यं कार्योपक्रमः । पूर्ववत्प्रक्रिया उन्नेया[3] ॥

प्र या घोषे भृगवाणे न शोभे ययौ वाचा यजति पज्रियो वाम् । प्रैषयुर्न विद्वान्॥५॥

प्र । या । घोषे । भृगवाणे । न । शोभे । ययौ । वाचा । यजति । पज्रियः । वाम् ।
प्र । इषऽयुः । न । विद्वान् ॥ ५ ॥

हे अश्विनौ [v]प्र भवति समर्था भवति सा वाक् [v]या वाक् युष्मत्स्तुतिरूपा [v]घोषे घोषाख्यायाः पुत्रे सुहस्त्याख्ये ऋषौ [v]भृगवाणे [v]न भृगौ च [v]शोभे शोभते । [v]यया च स्तुतिलक्षणया[4] [v]वाचा [v]पज्रियः । पज्रा अङ्गिरसः । तेषां कुलोत्पन्नः कक्षीवान् [v]वां युवां [v]यजति पूजयति स्तौति । सापि शोभते इत्यर्थः । [v]इषयुर्न इषमन्नम् आत्मनः कामयमानश्च [v]विद्वान् स्तुत्यभिज्ञः कक्षीवानृषिः [v]प्र भवतु युष्मदनुग्रहात् संपूर्णकामो भवत्वित्यर्थः ॥ घोषे । घोषा नाम काचिद्ब्रह्मवादिनी कक्षीवतः पुत्री । अत्रोपचारात्तद्वाचकं प्रातिपदिकं पुत्रे[5] वर्तते । भृगवाणे । चिरंतनो भृगुरिवाचरति । ' सर्वप्रातिपदिकेभ्यः° ' इति क्विप् । धातुसंज्ञायां व्यत्ययेन लटः शानच् । शबादि । आगमानुशासनस्यानित्यत्वात् मुगभावः । वृषादिः । शोभे । ' शुभ दीप्तौ ' । ' लोपस्त आत्मनेपदेषु ' इति तलोपः । इषयुः । ' इष गतौ ' । इष्यति गच्छतीति इषमन्नम् । इगुपधलक्षणः कः । यद्वा । ' इषु इच्छायाम् ' । इष्यते सर्वैः प्राणिभिरिति इषमन्नम् । व्यत्ययेन कर्मणि कर्तृप्रत्ययः । प्रशब्देन संहितायां ' प्रादूहोढोढ्येषैष्येषु वृद्धिर्वक्तव्या ' ( पा. सू. ६. १. ८९. ४ ) इति वृद्धिः ॥ ॥ २२ ॥

---

१. क्ष-ट-ठ-न–अपरिपक्वमतीन् । २. क्ष-ट-ठ–पातं पिबतं च; स–पातं च पिबतम् । ३. च-त-द-फ-श–ज्ञेया । ४. क्ष-ट-ठ–स्तुतिरूपया । ५. क्ष-ट-ठ–तत्पुत्रे ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

श्रुतं गायत्रं तकवानस्याहं चिद्धि रिरेभाश्विना वाम् । आक्षी शुभस्पती दन् ॥६॥

श्रुतम् । गायत्रम् । तकवानस्य । अहम् । चित् । हि । रिरेभ । अश्विना । वाम् ।
आ । अक्षी इति । शुभः । पती इति । दन् ॥ ६ ॥

हे vअश्विना अश्विनौ vगायत्रं गातव्यं गायत्रीयुक्तं गायत्रसाम्ना निष्पाद्यं वा स्तोत्रं vतकवानस्य स्खलद्गतेः अन्धस्य ऋज्राश्वस्य संबन्धि vश्रुतम् अश्रुणुतम् । vअहं vचित् अहमिव vवां युवां सः vहि vरिरेभ स्तुतवान् । किं कुर्वन् । हे vशुभस्पती शोभनस्य कर्मणः पालयितारौ जलस्य वा स्वामिनौ vअक्षी युवाभ्यां दत्ते चक्षुषी vआ vदन् आददानः । तस्मै इव मह्यमप्यभिमतफलं प्रयच्छतमिति भावः ॥ श्रुतम् । 'श्रु श्रवणे' । लङि 'बहुलं छन्दसि' इति विकरणस्य लुक् । तकवानस्य । 'तक गतौ' । अत्र गतिसामान्यवाचिना तद्विशेषो मन्दगतिर्लक्ष्यते । औणादिक उप्रत्ययः । भृगवाणे इतिवत् प्रक्रियोन्नेया । रिरेभ । 'रेभृ शब्दे' । अक्षी । 'ई च द्विवचने' इत्यक्षिशब्दस्य ईकारान्तादेशः । स चोदात्तः । शुभस्पती । 'सुब्रामन्त्रिते पराङ्गवत्स्वरे' इति षष्ठ्यन्तस्य पराङ्गवद्भावात् पदद्वयसमुदायस्य आष्टमिकामन्त्रितानुदात्तत्वम् । दन् । आङ्पूर्वात् ददातेः 'आङो दोऽनास्यविहरणे' ( पा. सू. १. ३. २० ) इत्यात्मनेपदम्[1] । व्यत्ययेन शतृ । जुहोत्यादित्वात् श्लुः । 'द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम्' इति वचनात् द्विर्वचनाभावः । 'छन्दस्युभयथा' इत्युभयथाश्रयणात् शतुः सार्वधातुकत्वेन ङित्त्वम् । आर्धधातुकत्वात् 'आतो लोप इटि च' इत्याकार लोपः ॥

युवं ह्यास्तं महो रन्युवं वा यन्निरततंसतम् ।
ता नो वसू सुगोपा स्यातं पातं नो वृकादघायोः ॥ ७ ॥

युवम् । हि । आस्तम् । महः । रन् । युवम् । वा । यत् । निःऽअततंसतम् ।
ता । नः । वसू इति । सुऽगोपा । स्यातम् । पातम् । नः । वृकात् । अघऽयोः ॥ ७ ॥

हे अश्विनौ vमहः महतो धनस्य vरन् रातारौ दातारौ vयुवं युवां कंचन[2] vआस्तम्[2] ।..... vनिरततंसतं धनानि निरगमयतम् । रक्षकौ विनाशकावपि युवामेवेत्यर्थः । हे vवसू वासयितारावश्विनौ vता तादृशौ युवां vनः अस्माकं vसुगोपा सुष्ठु गोपायितारौ रक्षितारौ vस्यातं भवतम् । अपि च vनः अस्मान् vअघायोः अघं पापफलमस्माकमिच्छतः vवृकात् स्तेनात् vपातं रक्षतम् ॥ महः । महतः । छान्दसः अच्छब्दलोपः । रन् । दन्नितिवत् प्रक्रियोन्नेया । व्यत्ययेनैकवचनम् । निरततंसतम् । 'तसि अलंकारे' । अस्मात् ण्यन्तात् लुङि 'णिश्रिद्रुस्रुभ्यः०' इति च्लेः चङ् द्विर्वचनादि च । गुरुसंज्ञया लघुसंज्ञाया बाधितत्वात् सन्वद्भावाभावः । सुगोपा । 'सुपां सुलुक्०' इति विभक्तेर्लुक् । अघायोः । अघं परेषामिच्छति । 'छन्दसि परेच्छायाम्' इति क्यच् । 'अश्वाघस्यात्' इति आत्वम् । 'क्याच्छन्दसि' इति उप्रत्ययः ॥

---

१. क्ष-ट-ठ–इत्यात्मनेपदे प्राप्ते । २. क्ष-ट–आस्तं हि अभवतम्; ठ–आस्तमभवतम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मा कस्मै धातमभ्यमित्रिणे नो माकुत्रा नो गृहेभ्यो धेनवो गुः ।
स्तनाभुजो अशिश्वीः ॥ ८ ॥

मा । कस्मै । धातम् । अभि । अमित्रिणे । नः । मा । अकुत्र । नः । गृहेभ्यः । धेनवः । गुः ।
स्तनऽभुजः । अशिश्वीः ॥ ८ ॥

हे अश्विनौ vअमित्रिणे । अमित्रं मित्रराहित्यम् । तद्वते vकस्मै चिदपि शत्रवे vनः अस्मान् vमा vअभि vधातम् आभिमुख्येन मा स्थापयतम् । अपि च vनः अस्माकं vगृहेभ्यः सकाशात् vस्तनाभुजः स्तनैः वत्सान् मनुष्यांश्च पालयन्त्यः vधेनवः गावः vअशिश्वीः शिशुना वत्सेन विरहिता अस्मदीये गृहेऽशयाना वा सत्यः vअकुत्र चित् अस्माभिरगम्ये प्रदेशे vमा vगुः मा गच्छन्तु ॥ धातम् । धाञो माङि लुङि 'गातिस्था०' इति सिचो लुक् । 'न माङ्योगे' इति अडभावः । अकुत्र । 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वम् । गुः । 'इणो गा लुङि' इति गादेशः । 'गातिस्था०' इति सिचो लुक् । 'आतः' इति झेर्जुस् । स्तनाभुजः । 'भुज पालनाभ्यवहारयोः' । स्तनैर्भुञ्जन्ति पालयन्तीति स्तनाभुजः । क्विप् । 'अन्येषामपि दृश्यते' इति सांहितिको दीर्घः । अशिश्वीः । 'सख्यशिश्वीति भाषायाम्' (पा. सू. ४. १. ६२) इति छन्दस्यपि व्यत्ययेन निपातनं द्रष्टव्यम् । यद्वा । शिशुरस्यास्तीति शिश्वी । 'छन्दसीवनिपौ०' इति मत्वर्थीय ईकारः । नञ्समासे अव्ययपूर्वपदप्रकृतिस्वरत्वम् । 'वा छन्दसि' इति पूर्वसवर्णदीर्घः । अथवा । 'शीङ् स्वप्ने' । 'उत्सर्गश्छन्दसि' इति किप्रत्ययः । द्विर्वचनह्रस्वत्वे । 'एरनेकाचः०' इति यण् । छान्दसो वकारः । पूर्ववत्समासस्वरौ[1] ॥

दुहीयन्मित्रधितये युवाकु राये च नो मिमीतं वाजवत्यै ।
इषे च नो मिमीतं धेनुमत्यै ॥ ९ ॥

दुहीयन् । मित्रऽधितये । युवाकु । राये । च । नः । मिमीतम् । वाजऽवत्यै ।
इषे । च । नः । मिमीतम् । धेनुऽमत्यै ॥ ९ ॥

हे अश्विनौ vयुवाकु युवां कामयमानाः स्तुतिभिर्यावयितारः संयोजयितारो वा स्तोतारः vमित्रधितये मित्राणां बन्धुजनानां धारणार्थं vदुहीयन् युष्मत्सकाशाद्धनानि दुहन्ति प्राप्नुवन्ति । अतः vनः अस्मानपि vवाजवत्यै वाजयुक्ताय[2] vच vराये धनाय vमिमीतं कुरुतम् । तथा vधेनुमत्यै धेनुभिर्युक्ताय vइषे अन्नाय vच vनः अस्मान् vमिमीतं कुरुतम् । अस्मभ्यं स्तोतृभ्यो बलयुक्तं धनं गोयुक्तमन्नं च प्रयच्छतमित्यर्थः ॥ दुहीयन् । 'दुह प्रपूरणे' । दुहिर्दोहः । 'इगुपधात्कित्' (उ. सू. ४. ५५९) इति भावे इप्रत्ययः । दुहिमात्मन इच्छति दुहीयति । 'सुप आत्मनः क्यच्' । दुहीयतेर्लेटि अडागमः । 'इतश्च लोपः०' इति इकारलोपः । यद्वा । दुहेर्लिङि 'झस्य रन्' (पा. सू. ३. ४. १०५) इति व्यत्ययेन रनादेशाभावे रूपमेतत् । छान्दसोऽन्त्यलोपः । यद्वा । रनादेशे कृते छान्दसो रेफस्य यकारः । अत एव व्युत्पत्त्यनवधारणात् नावगृह्णन्ति । युवाकु । 'सुपां सुलुक्०' इति जसो लुक् । मिमीतम् । 'माङ् माने

---

१. क्ष-ट-ठ-पूर्ववन्नञ्समासस्वरौ । २. क्ष-ट-ठ-स-बलयुक्ताय ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

शब्दे च ' । जौहोत्यादिकः । व्यत्ययेन परस्मैपदम् । ' भृजामित् ' इति अभ्यासस्य इत्वम् । ' चवायोगे प्रथमा ' इति निघातप्रतिषेधः ॥

अश्विनोरसनं रथमनश्वं वाजिनीवतोः । तेनाहं भूरि चाकन ॥ १० ॥

अश्विनोः । असनम् । रथम् । अनश्वम् । वाजिनीऽवतोः । तेन । अहम् । भूरि । चाकन ॥१०॥

वाजिनीवतोः । वाजः अन्नं बलं वा । तद्वत्क्रियावतोः अश्विनोः अनश्वम् अश्वरहितम् अश्वराहित्येऽपि सामर्थ्यातिशयेन गच्छन्तं रथम् असनम् अहम् स्तोता समभजम् । तेन च रथेन भूरि प्रभूतं श्रेयः चाकन कामये ॥ असनम् । ' वन षण संभक्तौ ' । लङ् । चाकन । ' कन दीप्तिकान्तिगतिषु ' । छान्दसो लिट् । ' णलुत्तमो वा ' (पा. सू. ७. १. ९१) इति णित्त्वस्य विकल्पनात् वृद्ध्यभावः । तुजादित्वात् अभ्यासदीर्घत्वम् ॥

अयं समह मा तनूह्यते जनाँ अनु । सोमपेयं सुखो रथः ॥ ११ ॥

अयम् । समह । मा । तनु । ऊह्यातें । जनान् । अनु । सोमऽपेयम् । सुऽखः । रथः ॥ ११ ॥

हे समह धनेन सहित हे रथ अयं पुरोवर्ती त्वं मा मां तनु विस्तारय । पुत्रपौत्रधनादिभिः समृद्धं कुरु । यद्वा । अयम् अयमानं त्वां प्राप्नुवन्तं माम् इति योज्यम् । स च सुखः शोभनावकाशः सुखहेतुर्वा रथः जनान् अनु स्तोतृजनेषु सोमपेयं सोमपानं प्रति ऊह्यते उह्यते अश्विभ्यां नीयते अतः अश्विभ्यां यहीयते तत्सर्वं रथ एव ददातीति रथं संबोध्य प्रार्थना ॥ अयम् । ' इदोऽय् पुंसि ' (पा. सू. ७. २. १११) । यद्वा । ' अय पय गतौ ' । पचाद्यच् । समह । मघमिति धननाम । मघेन सह वर्तते इति समघः । छान्दसो वर्णविकारः । यद्वा । ' मह पूजायाम् ' । महयति पूजयतीति महो धनम् । पचाद्यच् । ऊह्याते । ' वह प्रापणे ' । कर्मणि लेटि आडागमः । यजादित्वात् संप्रसारणम् । तस्य छान्दसो दीर्घः । अदुपदेशात् लसार्वधातुकानुदात्तत्वे यक एव स्वरः शिष्यते । सोमपेयम् । ' पा पाने ' । ' अचो यत् ' इति भावे यत् । ' ईद्यति ' (पा. सू. ६. ४. ६५) ' इति ईकारादेशः । ' यतोऽनावः ' इत्याद्युदात्तत्वम् । कृदुत्तरपदप्रकृतिस्वरत्वम् ॥

अध स्वप्नस्य निर्विदेऽभुञ्जतश्च रेवतः । उभा ता बस्रि नश्यतः ॥ १२ ॥

अध । स्वप्नस्य । निः । विदे । अभुञ्जतः । च । रेवतः । उभा । ता । बस्रि । नश्यतः ॥१२॥

अध इदानीं प्रभातसमये स्वप्नस्य स्वप्नं प्रति निर्विदे निर्विण्णोऽस्मि । तथा अभुञ्जतः परान् अरक्षतः रेवतः धनवतः च पुरुषस्य एवंभूतं पुरुषं प्रत्यपि निर्विण्णोऽस्मि । यतः तौ उभौ बस्रि क्षिप्रं नश्यतः नाशं प्राप्नुतः । स्वप्नदृष्टः पदार्थः प्रातर्नोपलभ्यते कदर्यस्येव[1] धनमभुक्तमदत्तं सत् क्षिप्रमेव नश्यति । तदुभयविषयो निर्वेदो मां बाधते इत्यर्थः । अत्र स्वप्नमात्रस्य असत्त्वप्रतिपादनेन दुःस्वप्नस्याप्यसद्भावः प्रतिपादितः । अत एषा दुःस्वप्ननाशनीति युज्यते ॥ स्वप्नस्य । ' क्रियाग्रहणं कर्तव्यम् ' इति कर्मणः संप्रदानत्वात् चतुर्थ्यर्थे षष्ठी । विदे । ' विदृ लाभे ' । आगमानुशासनस्य

---

१. क्ष-ट-ठ-स–कदर्यस्य च ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अनित्यत्वात् नुमभावः। रेवतः। रयिशब्दात् मतुप्। 'रयेर्मतौ बहुलम्' इति संप्रसारणम्। 'छन्दसीरः' इति मतुपो वत्वम्। 'रेशब्दाच्च मतुप उदात्तत्वम्' इति तस्योदात्तत्वम्। उभा ता। उभयत्र 'सुपां सुलुक्०' इति आकारः॥ २३॥ ॥ १७॥

अष्टादशेऽनुवाके षट् सूक्तानि। तत्र 'कदित्था' इति पञ्चदशर्चं प्रथमं सूक्तम्। अत्रानुक्रम्यते– 'कदित्था पञ्चोना वैश्वदेवं वा' इति। अनुवर्तमानः कक्षीवानृषिः। अनादेशपरिभाषया त्रिष्टुप्। विश्वे देवा इन्द्रो वा देवता। विनियोगो लैङ्गिकः॥

कदित्था नॄँः पात्रं देवयतां श्रवद्गिरो अङ्गिरसां तुरण्यन्।
प्र यदानड्विश आ हर्म्यस्योरु क्रंसते अध्वरे यजत्रः॥ १॥

कत्। इत्था। नॄन्। पात्रम्। देवऽयताम्। श्रवत्। गिरः। अङ्गिरसाम्। तुरण्यन्।
प्र। यत्। आनट्। विशः। आ। हर्म्यस्य। उरु। क्रंसते। अध्वरे। यजत्रः॥ १॥

vनॄँः vपात्रं नॄन् पाता नृणां स्तुतेः नेतॄणां पुरुषाणां रक्षणशीलः[1] इन्द्रः vतुरण्यन् गोरूपधनं[2] प्रेरयन् vदेवयतां देवं द्योतमानं दानादिगुणयुक्तं वा इन्द्रम् आत्मन इच्छताम् vअङ्गिरसाम् ऋषीणाम् अस्माकम् vइत्था इत्थं प्रयुज्यमानाः vगिरः स्तुतीः vकत् कदा कस्मिन् काले vश्रवत् शृणुयात्। vयत् यदा स इन्द्रः vहर्म्यस्य हर्म्योपलक्षितेन गृहेण युक्तस्य यजमानस्य संबन्धिनः vविशः ऋत्विग्लक्षणान् मनुष्यान् vआ आभिमुख्येन vप्र vआनट् प्राप्नोति तदानीम् vअध्वरे अस्मदीये यज्ञे vयजत्रः यष्टव्यः सन् vउरु बहुलं vक्रंसते क्रमते स्वयमेव उत्सहते इत्यर्थः॥ कत्। कदा। अन्त्यलोपश्छान्दसः। नॄँः पात्रम्। 'नॄन्पे' (पा. सू. ८. ३. १०) इति संहितायां नकारस्य रुत्वम्। 'अत्रानुनासिकः पूर्वस्य तु वा' इति ऋकारः सानुनासिकः। पात्रम्। 'पा रक्षणे'। ताच्छीलिकः तृन्। व्यत्ययेन सोः अमादेशः। संज्ञापूर्वकस्य विधेरनित्यत्वात् गुणाभावे यण्। देवयताम्। 'सुप आत्मनः क्यच्'। ततो लटः शतृ। 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम्। श्रवत्। 'श्रु श्रवणे'। लेटि अडागमः। 'बहुलं छन्दसि' इति विकरणस्य लुक्। तुरण्यन्। 'तुरण त्वरायाम्'। कण्ड्वादिः। आनट्। अश्नोतेर्लङि व्यत्ययेन परस्मैपदम्। श्नौ प्राप्ते व्यत्ययेन श्नम्विकरणः। व्रश्चादिषत्वे जश्त्वम्। आडागमः। हर्म्यस्य। हर्म्यशब्दात् अर्शआदित्वात् अच्। क्रंसते। 'क्रमु पादविक्षेपे'। 'वृत्तिसर्गतायनेषु क्रमः' (पा. सू. १. ३. ३८) इत्यात्मनेपदम्। लेटि अडागमः। 'सिब्बहुलं लेटि' इति सिप्। यजत्रः। 'अमिनक्षि०' इत्यादिना यजेः अत्रन्प्रत्ययः॥

स्तम्भीद्द्यां स धरुणं पृषायद्भुर्वाजाय द्रविणं नरो गोः।
अनु स्वजां महिषश्चक्षत व्रां मेनामश्वस्य परि मातरं गोः॥ २॥

स्तम्भीत्। ह। द्याम्। सः। धरुणम्। पृषायत्। ऋभुः। वाजाय। द्रविणम्। नरः। गोः।
अनु। स्वऽजाम्। महिषः। चक्षत। व्राम्। मेनाम्। अश्वस्य। परि। मातरम्। गोः॥२॥

---

१. क्ष-ट-ठ–रक्षणफलः। २. क्ष-ट-ठ–धनम्, न-स–गोरूपं धनम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vसः इन्द्रः Vद्यां द्युलोकं Vस्तम्भीद् स्तभ्नाति खलु । तथा Vगोः पणिभिरपहृतस्य गोसमूहस्य वज्रस्य उदकस्य किरणसमूहस्य वा Vनरः नेता स इन्द्रः Vऋभुः सूर्यात्मना उरु विस्तीर्णं भासमानः सन् Vद्रविणं सर्वैः प्राणिभिरभिद्रवणीयं Vधरुणम् । उदकनामैतत् । सर्वस्य धारकं वृष्ट्युदकं Vवाजाय अन्नार्थं बलार्थं वा Vप्रुषायत् प्रुष्णाति सिञ्चति प्रवर्षतीत्यर्थः । अपि च Vमहिषः । महन्नामैतत् । महान् सूर्यरूपी इन्द्रः Vस्वजां स्वसकाशादुत्पन्नां Vव्राम् । वृणोति तमसा सर्वमाच्छादयतीति व्रा रात्रिः । यद्वा । प्रकाशेन वृणोतीति व्रा उषाः । ताम् Vअनु Vचक्षत । चष्टिः पश्यतिकर्मा । अनु पश्चात्पश्यति प्रकाशते । स्वयं प्रौढप्रकाशोऽपि स्वगत्या निष्पादितायां रात्रेरुषसश्च पश्चादुदेति[1] इत्यर्थः । अपि च इदमपरमाश्चर्यं यदयम् Vअश्वस्य Vमेनाम् । स्त्रीनामैतत् । स्त्रियं वडवां[2] Vगोः Vमातरं जननीम्[3] । परिवैंपरीत्ये[4] । विपरीतमकरोत् । कदाचिदिन्द्रो लीलया अश्वायां गामुत्पादयामास । तदत्र प्रतिपाद्यते मन्त्रान्तरे च इन्द्रवाक्यरूपे एतद्विस्पष्टमवगम्यते ॥ धरुणम् । ' धारेर्णिलुक्च ' इति उनप्रत्ययः । प्रुषायत् । ' प्रुष प्लुष स्नेहनसेचनपूरणेषु ' । क्रैयादिकः । लेटि अडागमः । ' छन्दसि शायजपि ' इति अहावपि श्नाप्रत्ययस्य शायजादेशः । नरः । ' नृ नये ' । बहुलवचनात् ' ऋदोरप् ' इति कर्तरि अप् । चक्षत । ' चक्षिङ् व्यक्तायां वाचि ' । छान्दसो लङ् । ' बहुलं छन्दसि ' इति शपो लुगभावः ॥

नक्षद्धवमरुणीः पूर्व्यं राट् तुरो विशामङ्गिरसामनु द्यून् ।
तक्षद्वज्रं नियुतं तस्तम्भद्द्यां चतुष्पदे नर्याय द्विपादे ॥ ३ ॥

नक्षत्। हवम्। अरुणीः। पूर्व्यम्। राट्। तुरः। विशाम्। अङ्गिरसाम्। अनु। द्यून्।
तक्षत्। वज्रम्। निऽयुतम्। तस्तम्भत्। द्याम्। चतुःऽपदे। नर्याय। द्विऽपादे ॥ ३ ॥

Vअरुणीः अरुणवर्णाः आरोचमानाः वा उषसः Vराट् राजयन् प्रकाशयन् सूर्यात्मा[5] इन्द्रः Vपूर्व्यं पूर्वैर्ऋषिभिः प्रयुक्तं Vहवम् इदानीमस्माभिः क्रियमाणमाह्वानं Vनक्षत् नक्षतु[6] शृणोतु[6] । कीदृशः । Vअनु Vद्यून् अनुदिवसं Vविशां मनुष्याणाम् Vअङ्गिरसाम् ऋषीणां स्तोतॄणां Vतुरः धनस्य प्रेरयिता । अपि च स इन्द्रः Vवज्रं स्वकीयमायुधं Vनियुतं हन्तव्येन सह नितरां युक्तं Vतक्षत् अकरोत् । तथा Vद्यां द्युलोकं Vतस्तम्भत् अस्तम्भयत् । यथा अधो न पतति तथा अकरोदित्यर्थः । किमर्थम् । Vनर्याय नृभ्यो हिताय Vचतुष्पदे गवाश्वादये Vद्विपादे मनुष्याय च । एतदुभयार्थमित्यर्थः ॥ नक्षत् । ' नक्ष गतौ ' । लेटि अडागमः । पूर्व्यम् । ' पूर्वैः कृतमिनयौ च ' ( पा. सू. ४. ४. १३३ ) इति यप्रत्ययः । राट् । ' राजृ दीप्तौ ' । अस्मादन्तर्भावितण्यर्थात् क्विप् । तुरः । ' तुर त्वरणे ' । इगुपधलक्षणः कः । तक्षत् । ' तक्षू त्वक्षू तनूकरणे ' । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । तस्तम्भत् । ' ष्टभि स्कभि गतिप्रतिबन्धे ' । अस्मात् ण्यन्तात् लुङि चङि रूपम् । ' चङ्यन्यतरस्याम् ' इति उपोत्तमस्य उदात्तत्वम् । पूर्वपदस्य असमानवाक्यस्थत्वात् निघाताभावः । चतुष्पदे । चत्वारः पादाः अस्य । ' संख्यासुपूर्वस्य '

---

१. क्ष-ट-ठ–अनूदेति । २. क्ष-ट-ठ–तद्रूपाम् । ३. क्ष-ट-ठ–' जननीम् ' नास्ति । ४. क्ष-ट-ठ–परि परीत्य । ५. क्ष-ट-ठ–सूर्यात्मना । ६. स–' नक्षतु शृणोतु ' नास्ति; न–' शृणोतु ' नास्ति; क्ष-ट-ठ–नक्षतु व्याप्नोतु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति पादशब्दस्य अन्यलोपः समासान्तः । चतुर्थ्येकवचने भसंज्ञायां ' पादः पत् ' इति पद्भावः । द्विपादे । पूर्ववत्प्रक्रिया । अयं तु विशेषः । अयस्मयादित्वेन पदत्वात् भसंज्ञाया अभावे पद्भावाभावः । ' द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ' इत्युत्तरपदान्तोदात्तत्वम् ॥

अस्य मदे स्वर्यं दा ऋतायापीवृतमुस्रियाणामनीकम् ।
यद्ध प्रसर्गे त्रिककुभ्निवर्तदप द्रुहो मानुषस्य दुरो वः ॥ ४ ॥

अस्य । मदे । स्वर्यम् । दाः । ऋताय । अपिऽवृतम् । उस्रियाणाम् । अनीकम् ।
यत् । ह । प्रऽसर्गे । त्रिऽककुप् । निऽवर्तत् । अप । द्रुहः । मानुषस्य । दुरः । वरिति वः॥४॥

हे इन्द्र [v]अस्य सोमस्य पानेन [v]मदे हर्षे सति [v]ऋताय यज्ञार्थं [v]स्वर्यं स्तुत्यम् [v]अपीवृतं पणिभिर्गुहासु निगूढम् [v]उस्रियाणां गवाम् [v]अनीकं संघं [v]दाः अङ्गिरोभ्यो दत्तवानसि । उत्तरार्धः परोक्षकृतः । [v]यद्ध यदा खलु [v]प्रसर्गे युद्धे [v]त्रिककुप् त्रिषु लोकेषु उच्छ्रितः इन्द्रः [v]निवर्तत् नितरां वर्तते[1] तदानीं स इन्द्रः [v]द्रुहः द्रोग्धुः [v]मानुषस्य मनोः संबन्धिनः असुरस्य पणेः संबन्धीनि [v]दुरः द्वाराणि गवामनिर्गमनाय पिहितानि [v]अप [v]वः अपवृणोति उद्घाटयति ॥ स्वर्यम् । ' स्वृ शब्दोपतापयोः ' । ' ऋहलोर्ण्यत् ' । संज्ञापूर्वकस्य विधेरनित्यत्वात् वृद्ध्यभावः । अपीवृतम् । अपिपूर्वात् वृणोतेः कर्मणि निष्ठा । ' निपातस्य च ' इति पूर्वपदस्य दीर्घः । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । प्रसर्गे । प्रकर्षेण सृज्यन्ते विमुच्यन्ते अस्मिन् इषवः इति प्रसर्गः । अधिकरणे घञ् । कृदुत्तरपदप्रकृतिस्वरत्वम् । छान्दसः थाथादिस्वराभावः । निवर्तत् । ' वृतु वर्तने ' । लेटि अडागमः । व्यत्ययेन परस्मैपदम् । वः । ' वृञ् वरणे ' । छान्दसे लुङि ' मन्त्रे घस० ' इति च्लेर्लुक् । गुणे हल्ङ्यादिलोपः[2] ॥

तुभ्यं पयो यत्पितरावनीतां राधः सुरेतस्तुरणे भुरण्यू ।
शुचि यत्ते रेक्ण आयजन्त सबर्दुघाया: पय उस्रियाया: ॥ ५ ॥

तुभ्यम् । पयः । यत् । पितरौ । अनीताम् । राधः । सुऽरेतः । तुरणे । भुरण्यू इति ।
शुचि । यत् । ते । रेक्णः । आ । अयजन्त । सबःऽदुघायाः । पयः । उस्रियायाः ॥ ५ ॥

हे इन्द्र [v]तुरणे क्षिप्रकारिणे [v]तुभ्यं [v]भुरण्यू कृत्स्नं जगत्पोषयन्त्यौ [v]पितरौ उत्पादयन्त्यौ द्यावापृथिव्यौ [v]यत् यदा [v]पयः सांनाय्यलक्षणं हविः [v]अनीतां गोषु अनयतां न्यधिषातामित्यर्थः । कीदृशं पयः । [v]राधः राधकं समृद्धिकरं [v]सुरेतः शोभनरेतस्कं कृत्स्नजगदुत्पादनशक्तमित्यर्थः । हविषः सकाशात्[3] हि जगदुत्पद्यते । ' अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ' ( मनु. ३. ७६ ) इति । [v]यत् यदा च द्यावापृथिवीभ्यां गोष्वानीतं [v]शुचि

---

१. क्ष-ट-ठ-स–वर्तते । २. क्ष-ट-ठ–' हल्ङ्याभ्यः० ' इति तिलोपः । ३. क्ष-ट-ठ–सारात् ; स–कारणात् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

शुद्धं [V]सबर्दुघायाः क्षीरस्य दोग्ध्र्याः [V]उस्रियायाः गोः [V]पयः [V]रेक्णः । धननामैतत् । धनवदतिप्रियम् । यद्वा । अतिरिक्तं प्रवृद्धम् । एवंविधं हविः तुभ्यम्[1] [V]आयजन्त आभिमुख्येन यजमानाः प्रायच्छन् । तदानीं द्रुहो मानुषस्य द्वाराण्यपवृणोतीति पूर्वया संबन्धः ॥ अनीताम् । ' णीञ् प्रापणे ' । लङि ' बहुलं छन्दसि ' इति शपो लुक् । सुरेतः । ' सोर्मनसी अलोमोषसी ' इत्युत्तरपदाद्युदात्तत्वम् । तुरणे । ' तुरण त्वरायाम् ' । कण्ड्वादिः । ' क्विप् च ' इति क्विप् । अतोलोपयलोपौ । भुरण्यू । ' भुरण धारणपोषणयोः ' । अयमपि कण्ड्वादिः । औणादिक उप्रत्ययः ॥ ॥ २४ ॥

अध॒ प्र ज॑ज्ञे त॒रणि॑र्मम॒त्तु प्र रो॑च्य॒स्या उ॒षसो॒ न सूर॑ः ।
इन्दु॒र्येभि॒राष्ट स्वेदु॑हव्यै॒ः सु॒वेण॑ सि॒ञ्चञ्ज॒रणा॒भि धाम॑ ॥ ६ ॥

अध॑ । प्र । ज॒ज्ञे॒ । त॒रणि॑ः । म॒म॒त्तु॒ । प्र । रो॒चि॒ । अ॒स्याः॒ । उ॒षसः॑ । न । सूर॑ः ।
इन्दु॑ः । येभि॑ः । आष्ट॑ । स्वऽइदु॑हव्यैः । सु॒वेण॑ । सि॒ञ्चन् । ज॒रणा॑ । अ॒भि । धाम॑ ॥ ६ ॥

[V]अध इदानीमयमिन्द्रः स्तुतिभिः प्रीयमाणः सन् [V]प्र [V]जज्ञे प्रकर्षेण प्रादुर्बभूव । सः [V]तरणिः शत्रूणां तारकोऽस्मान् [V]ममत्तु मादयतु । स च [V]प्र [V]रोचि प्रकृष्टं रोचते । तत्र दृष्टान्तः । [V]अस्याः अस्माभिर्दृश्यमानायाः [V]उषसः समीपे वर्तमानः [V]सूरः [V]न सूर्य इव । [V]जरणा जरणीयः स्तोतव्यः [V]इन्दुः सोमः [V]धाम आहवनीयलक्षणं[2] स्थानम्[2] अभिलक्ष्य [V]सुवेण [V]सिञ्चन् सिच्यमानः सन् [V]स्वेदुहव्यैः स्वभूतसमृद्धहविष्कैः [V]येभिः यैरस्माभिः [V]आष्ट आशितः[3] आसीत् । तानस्मान्मादयित्वित्यर्थः ॥ जज्ञे । ' जनी प्रादुर्भावे ' । लिटि ' गमहन° ' इति उपधालोपः । ममत्तु । ' मदी हर्षे ' । ' बहुलं छन्दसि ' इति विकरणस्य श्लुः । रोचि । ' रुच दीप्तौ ' । छान्दसो वर्तमाने लुङ् । व्यत्ययेन च्लेः चिणादेशः । आष्ट । ' अश भोजने ' । कर्मणि लङि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । व्रश्चादिषत्वे ष्टुत्वम् । आडागमः । ' यद्वृत्तान्नित्यम् ' इति निघातप्रतिषेधः । स्वेदुहव्यैः । ' इदि परमैश्वर्ये ' । औणादिक उप्रत्ययः । ' अनित्यमागमशासनम् ' इति नुमभावः । इदूनि प्रभूतानि च तानि हव्यानि[4] स्वभूतानि च हव्यानि[5] येषाम् । यद्वा । ' ञिइन्धी दीप्तौ ' । स्वायत्तानि इन्दूनि इद्धानि हव्यानि येषाम् । अथवा[6] । स्वभूतमिदं पुरोवर्ति हव्यं हविः येषां ते तथोक्ताः[6] । पृषोदरादित्वात् अभिमतरूपसिद्धिः[7] । सिञ्चन् । ' षिचिर् क्षरणे ' । व्यत्ययेन कर्मणि कर्तृप्रत्ययः । ' शे मुचादीनाम् ' इति नुम् । जरणा । जरतिः स्तुतिकर्मा । अस्मात् कर्मणि ल्युट् । ' सुपां सुलुक्° ' इति विभक्तेराकारः । व्यत्ययेन लिस्वराभावः ॥

---

१. क्ष-ट-ठ-स–ते तुभ्यम् । २. स–आहवनीयस्थानम् । ३. क्ष-ट-स–अशितः पीतः; ठ–आशितः पीतः । ४. क्ष-ट-ठ–हव्यानि इदुहव्यानि । ५. क्ष-ट-ठ–इदुहव्यानि । ६. क्ष-ट-ठ–' अथवा...तथोक्ताः ' नास्ति । ७. क्ष-ट-ठ–अभिमतरूपस्वरसिद्धिः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्विध्मा यद्वनधितिरपस्यात्सूरो अध्वरे परि रोधना गोः ।
यद्ध प्रभासि कृत्व्याँ अनु द्यूननर्विशे पश्विषे तुराय ॥ ७ ॥

सुऽइध्मा । यत् । वनऽधितिः । अपस्यात् । सूरः । अध्वरे । परि । रोधना । गोः ।
यत् । ह । प्रऽभासि । कृत्व्यान् । अनु । द्यून् । अनर्विशे । पशुऽइषे । तुराय ॥ ७ ॥

यदि [v]स्विध्मा सुदीप्तास्या [v]वनधितिः वने छेत्तव्ये वृक्षसमूहे[1] निधातव्या शस्त्री [v]अपस्यात् अपः विशसनात्मकं स्वकीयं कर्म कर्तुमिच्छेत् तदानीं [v]सूरः प्रेरकः अध्वर्युः [v]अध्वरे यज्ञे [v]गोः पशोः [v]रोधना रोधनाय यूपे नियोजनाय [v]परि भवति समर्थो भवति । यद्वा । स्विध्मा सूर्यकिरणैः सुदीप्ता वनधितिः । वनमुदकमस्यां धीयते इति वनधितिर्मेघमाला । सा यत् यदा अपस्यात् अपः प्रवर्षणलक्षणं कर्म करोति तदानीं सूरः प्रेरकः इन्द्रः अध्वरे यज्ञस्य निमित्तभूते अध्वर्तव्ये अहिंसितव्ये अन्तरिक्षे वर्तमानः सन् गोः वृष्ट्युदकस्य रोधना रोधनानि आवरणानि[2] परि परितो निवारयतीति शेषः । उत्तरार्धः प्रत्यक्षकृतः । हे इन्द्र सूर्यात्मना वर्तमानस्त्वं [v]कृत्व्यान् । कृत्वीति कर्मनाम । कर्मसु साधून् [v]द्यून् दिवसाननुलक्ष्य [v]यद्ध यदा खलु [v]प्रभासि प्रकर्षेण दीप्यसे तदानीम् [v]अनर्विशे अनसा शकटेन इन्धनाद्याहरणाय अरण्यं प्रविशते । यद्वा । गन्तव्यं स्थलं प्रति गन्तुमशक्ताय पुरुषाय [v]पश्विषे पशून् प्रेरयते [v]तुराय त्वरमाणाय गोपालाय[3] च सिध्येत् अभिमतमिति वाक्यशेषः ॥ स्विध्मा । शोभनमिध्मं दीप्तमास्यं दीप्तिर्वा यस्याः सा तथोक्ता[4] । ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् । अपस्यात् । अपःशब्दात् ' सुप आत्मनः क्यच् ' । लेटि आडागमः । रोधना । ' रुधिर् आवरणे ' । ' ल्युट् च ' इति भावे ल्युट् । ' शेश्छन्दसि बहुलम् ' इति शेर्लोपः । अनर्विशे । अनसा विशति प्राप्नोतीति अनर्विट् । विशतेः क्विप् । ' अहरादीनां पत्यादिषूपसंख्यानम् ' ( पा. म. ८. २. ७०. १ ) इति सकारस्य रेफादेशः । यद्वा । अर्तेः कर्मणि विच् । अरं गन्तव्यं प्रति विशति प्राप्नोतीति अर्विट् । न अर्विट् अनर्विट् । अव्ययपूर्वपदप्रकृतिस्वरत्वम् । अत एव व्युत्पत्त्यनवधारणादनवग्रहः । पश्विषे । ' इष गतौ ' । अस्मादन्तर्भावितण्यर्थात् ' क्विप् च ' इति क्विप् ॥

अष्टा महो दिव आदो हरी इह द्युम्नासाहमभि योधान उत्सम् ।
हरिं यत्ते मन्दिनं दुक्षन्वृधे गोरभसमद्रिभिर्वाताप्यम् ॥ ८ ॥

अष्टा । महः । दिवः । आदः । हरी इति । इह । द्युम्नऽसहम् । अभि । योधानः । उत्सम् ।
हरिम् । यत् । ते । मन्दिनम् । दुक्षन् । वृधे । गोऽरभसम् । अद्रिऽभिः । वाताप्यम् ॥ ८ ॥

हे इन्द्र [v]महः महतः [v]दिवः मदकरस्य सोमस्य [v]अष्टा भोक्तारौ पातारौ [v]हरी स्वकीयौ अश्वौ [v]इह अस्मिन्कर्मणि[5] [v]आदः पीतशेषं सोमं पायय । तथा [v]द्युम्नासाहं द्युम्नस्य अस्मदीयस्य धनस्य

---

१. क्ष-ट-ठ–तत्र मध्ये । २. क्ष-ट-ठ–आवारकाणि । ३. स–गोधनपालाय । ४, क्ष-ट-ठ–स्विध्मा । ५. क्ष-ट-ठ–अस्मिन् यज्ञे ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अभिभवितारम् [v]उत्सम् उत्स्रावयितारं शत्रुं [v]योधानः योधनशीलस्त्वम् [v]अभि भव। [v]यत् यदा [v]ते तव [v]वृधे वर्धनाय [v]हरिं मनोहरं [v]मन्दिनं मदकरं [v]गोरभसम्। अत्र गोशब्दः पयसि वर्तते। पयो[1] बलम्। तद्वद्वेगवन्तं[1] वीर्यवन्तमित्यर्थः। [v]वाताप्यं वातेन प्राप्तव्यम्। वाततुल्येन शीघ्रकारिणा त्वया पातव्यमित्यर्थः[2]। एवंविधं सोमम् [v]अद्रिभिः ग्रावभिः [v]धुक्षन् दुहन्ति ऋत्विजः अभिषुण्वन्ति[3]। तदानीम् अष्टा इति पूर्वत्र संबन्धः॥ अष्टा[4]। 'अश भोजने'। तृच्। आगमानुशासनस्यानित्यत्वात् इडभावः[4]। धुक्षन्[5]। पदकालीनो भष्भावश्छान्दसः[5]॥

त्वमायसं प्रति वर्तयो गोर्दिवो अश्मानमुपनीतमृभ्वा।
कुत्साय यत्र पुरुहूत वन्वञ्छुष्णमनन्तैः परियासि वधैः॥ ९॥

त्वम्। आयसम्। प्रति। वर्तयः। गोः। दिवः। अश्मानम्। उपऽनीतम्। ऋभ्वा।
कुत्साय। यत्र। पुरुऽहूत। वन्वन्। शुष्णम्। अनन्तैः। परिऽयासि। वधैः॥ ९॥

हे इन्द्र [v]त्वं [v]गोः गन्तुः शुष्णस्यासुरस्य वधार्थम् [v]आयसम् अयोमयं वज्रं [v]प्रति [v]वर्तयः आभिमुख्येन व्यसृजः। कीदृशं वज्रम्। [v]दिवः द्युलोकात् [v]ऋभ्वा दीप्तेन त्वष्ट्रा [v]उपनीतम् आनीतम् [v]अश्मानं शीघ्रं शत्रोर्व्यापकम्। [v]यत्र यदा हे [v]पुरुहूत पुरुभिर्बहुभिः स्तोतृभिराहूतेन्द्र [v]कुत्साय एतत्संज्ञाय[6] ऋषये [v]शुष्णं शोषकमसुरम् [v]अनन्तैः निरवधिकैः [v]वधैः हननसाधनैरायुधैः [v]वन्वन् हिंसन् [v]परियासि परितः[7] गच्छसि। तदानीं तद्वधार्थं वज्रं प्रत्यवर्तयः इत्यर्थः॥ अश्मानम्। 'अशू व्याप्तौ'।'अन्येभ्योऽपि दृश्यन्ते' इति मनिन्। ऋभ्वा। 'जसादिषु च्छन्दसि वावचनम्' इति नाभावस्य विकल्पितत्वादभावे यणादेशः। वन्वन्। 'वनु याचने'। अत्र हिंसार्थः। तथा च यास्कः– 'वनुष्यतिर्हन्तिकर्मानवगतसंस्कारो भवति' ( निरु. ५. २ ) इति। वधैः। 'हनश्च वधः' इति हन्तेः करणे अप्; तस्संनियोगेन वधादेशश्च। स चादन्तोऽन्तोदात्तः। तस्य अतो लोपे सति उदात्तनिवृत्तिस्वरेण प्रत्ययस्योदात्तत्वम्॥

---

१. क्ष-ट-ठ-स–पयोवद्वेगवन्तम्। २. क्ष-ट-ठ–प्राप्तव्यमित्यर्थः। ३. क्ष-ट-ठ–अभिषुण्वन्तीत्यर्थः। ४. क्ष-ट-ठ–आदः। अद भक्षणे। अस्मादन्तर्भावितण्यर्थात् लङ्। अदः सर्वेषामित्यडागमः। योधानः। युध संप्रहारे। ताच्छीलिकश्चानश्; स–दिवः। दीव्यते मर्यादा( ? )। दिवेर्डिरिति( ? ) डिविप्रत्ययः। आदः। अद भक्षणे। अस्मादन्तर्भावितण्यर्थात् लुकि सिपि अदः सर्वेषामित्यडागमः। द्युम्नासाहम्। षह अभिभवे। द्युम्नं सहते अभिभवतीति द्युम्नासाट्। छन्दसि सह इति ण्विः। योधानः। युध संप्रहारे। ताच्छीलिकश्चानश्। बहुलं छन्दसीति विकरणस्य लुक्। ५. स–धुक्षन्। दुह प्रपूरणे। छान्दसो लुङ्। अत इगुपधादनिटः क्सः। ढत्वकत्वषत्वानि। बहुलं छन्दस्यमाङ्योगेऽपि इत्यडभावः। पदकालीनो भष्भावाभावश्छान्दसः ( भष्भावश्छान्दसः )। ६. क्ष-ट-स–एतत्संज्ञकाय ७. क्ष-ट-ठ–सर्वतः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पुरा यत्सूरस्तमसो अपीतेस्तमद्रिवः फलिगं हेतिमस्य ।
शुष्णस्य चित्परिहितं यदोजो दिवस्परि सुग्रथितं तदादः ॥ १० ॥

पुरा । यत् । सूरः । तमसः । अपिऽइतेः । तम् । अद्रिऽवः । फलिऽगम् । हेतिम् । अस्य ।
शुष्णस्य । चित् । परिऽहितम् । यत् । ओजः ।
दिवः । परि । सुऽग्रथितम् । तत् । आ । अदरित्यदः ॥ १० ॥

vपुरा vयत् यदा vसूरः सूर्यः vतमसः तमोरूपस्य शुष्णस्य असुरस्य vअपीतेः संग्रामान्मुक्तोऽभवदिति शेषः । तदानीं हे vअद्रिवः । आदृणाति अनेनेत्यद्रिर्वज्रः । तद्वन्निन्द्र vतं vफलिगम् । मेघनामैतत् । मेघरूपेणावृण्वन्तं vहेतिं हन्तारं शुष्णमसुरम् vअस्य निरसितवानसि । यद्वा । अस्य शुष्णस्यासुरस्य हेतिं हननसाधनमायुधं फलिगं मेघलक्षणं प्राभाङ्क्षीः इति शेषः । तथा vशुष्णस्य vचित् शोषयितुरसुरस्य च vयत् vओजः आच्छादकं बलं vदिवस्परि द्योतमानस्य सूर्यस्योपरि vपरिहितम् आच्छादितं vसुग्रथितं सुष्ठु सूर्ये सक्तं vतत् ओजस्तस्मात्सूर्यात् vआदः आदृणाः विश्लिष्टं कृतवानसीत्यर्थः ॥ अद्रिवः । ' छन्दसीरः ' इति मतुपो वत्वम् । ' मतुवसो रुः० ' इति नकारस्य रुत्वम् । हेतिम् । ' कृत्यल्युटो बहुलम् ' इति बहुलवचनात् हन्तेः कर्तरि क्तिन् । ' ऊतियूति० ' इत्यादौ निपातनात् रूपसिद्धिः अन्तोदात्तत्वं च । अस्य । ' असु क्षेपणे ' । लटः सिप् । तस्य व्यत्ययेन ह्यादेशः । ' अतो हेः ' इति हेर्लुक् । दिवस्परि । ' पञ्चम्याः परावध्यर्थे ' इति विसर्जनीयस्य सत्वम् । अदः । ' दृ विदारणे ' । लङि सिपि ' बहुलं छन्दसि ' इति विकरणस्य लुक् । गुणे ' हल्ङ्याब्भ्यः० ' इति सिलोपः ॥ ॥ २५ ॥

अनु त्वा मही पाजसी अचक्रे द्यावाक्षामा मदतामिन्द्र कर्मन् ।
त्वं वृत्रमाशयानं सिरासु महो वज्रेण सिस्वपो वराहुम् ॥ ११ ॥

अनु । त्वा । मही इति । पाजसी इति । अचक्रे इति । द्यावाक्षामा । मदताम् । इन्द्र । कर्मन् ।
त्वम् । वृत्रम् । आऽशयानम् । सिरासु । महः । वज्रेण । सिस्वपः । वराहुम् ॥ ११ ॥

हे vइन्द्र vमही महत्यौ vपाजसी बलवत्यौ vअचक्रे अचङ्क्रमणे सर्वत्र व्याप्य वर्तमाने vद्यावाक्षामा द्यावापृथिव्यौ vकर्मन् वृत्रवधादिलक्षणे कर्मणि प्रवृत्तं त्वाम् vअनु vमदतां हृष्टमकुरुताम् अन्वमन्येतां वा । तथा च तैत्तिरीयकं–' स आभ्यामेव प्रसुत इन्द्रो वृत्रमहन् ' ( तै. सं. २. ५. २. ६ ) इति । तदनन्तरं vत्वम् vआशयानम् आ समन्ताच्छयप्य वर्तमानं vवराहुं वराहारं vवृत्रम् असुरं vसिरासु सरणशीलास्वप्सु vमहः महता vवज्रेण vसिस्वपः अस्वापयः । वज्रेण हत्वा पातितवानित्यर्थः ॥ मही । ' सुपां सुलुक् ० ' इति विभक्तेः पूर्वसवर्णदीर्घः । पाजसी । पाजःशब्दो बलवाचको

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

लक्षणया अत्र तद्वति वर्तते । ' इयाडियाजीकाराणामुपसंख्यानम् ' इति विभक्तेः ईकारादेशः । द्यावाक्षामा । द्यौश्च क्षामा च । ' दिवो द्यावा ' इति द्यावादेशः । ' देवताद्वन्द्वे च ' इत्युभयपदप्रकृतिस्वरत्वम् । ' सुपां सुलुक्° ' इति विभक्तेर्लुक् । मदताम् । ' मदी हर्षे ' । व्यत्ययेन शप् । ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । महः । महतः । करणे शेषत्वेन विवक्षिते षष्ठी । अच्छन्दलोपश्छान्दसः । सिष्वपः । ' ञिष्वप् शये ' । अस्मात् ण्यन्तात् लुङि चङि संज्ञापूर्वकस्य विधेरनित्यत्वात् ' स्वापेश्चङि ' ( पा. सू. ६. १. १८ ) इति संप्रसारणं न क्रियते ॥

त्वमिन्द्र नर्यो याँ अवो नृन्तिष्ठा वातस्य सुयुजो वहिष्ठान् ।
यं ते काव्य उशना मन्दिनं ददद्वृत्रहणं पार्यं ततक्ष वज्रम् ॥ १२ ॥

त्वम् । इन्द्र । नर्यः । यान् । अवः । नॄन् । तिष्ठ । वातस्य । सुऽयुजः । वहिष्ठान् ।
यम् । ते । काव्यः । उशना । मन्दिनम् । दात् । वृत्रऽहनम् । पार्यम् । ततक्ष । वज्रम् ॥ १२ ॥

हे [v]इन्द्र [v]नर्यः नृभ्यो हितः [v]त्वं [v]यान् [v]नॄन् नेतॄन् अश्वान् [v]अवः अवसि रक्षसि तान् [v]वातस्य तुल्यान् तद्वच्छीघ्रं गच्छतः [v]सुयुजः शोभनं रथेन युज्यमानान् [v]वहिष्ठान् अतिशयेन वोढॄनश्वान् [v]तिष्ठ आतिष्ठ आरोहेत्यर्थः । [v]काव्यः कवेः पुत्रः [v]उशना [v]मन्दिनं मदकरं [v]यं वज्रं [v]ते तुभ्यं [v]दात् दत्तवान् तं [v]वज्रं [v]वृत्रहणं वृत्रस्यासुरस्य घातकं [v]पार्यं शत्रूणां पारणेऽतिक्रमणे समर्थं च [v]ततक्ष कृतवानसि[1] ॥ अवः । अवतेर्लेटि अडागमः । ' इतश्च लोपः ' इति इकारलोपः । वहिष्ठान् । वोढृशब्दात् ' तुश्छन्दसि ' इति इष्ठन् । ' तुरिष्टेमेयःसु ' इति तृलोपः । पार्यम् । ' पार तीर कर्मसमाप्तौ ' । अस्मात् ण्यन्तात् ' अचो यत् ' इति यत् । ततक्ष । ' तक्षू त्वक्षू तनूकरणे ' । पुरुषव्यत्ययः ॥

त्वं सूरो हरितो रामयो नृन्भरच्चक्रमेतशो नायमिन्द्र ।
प्रास्य पारं नवतिं नाव्यानामपि कर्तमवर्तयोऽयज्यून् ॥ १३ ॥

त्वम् । सूरः । हरितः । रमयः । नॄन् । भरत् । चक्रम् । एतशः । न । अयम् । इन्द्र ।
प्रऽअस्य । पारम् । नवतिम् । नाव्यानाम् । अपि । कर्तम् । अवर्तयः । अयज्यून् ॥ १३ ॥

हे [v]इन्द्र [v]सूरः सूर्यात्मना वर्तमानः [v]त्वं [v]हरितः हरिद्वर्णान् [v]नॄन् नेतॄन् अश्वान् यद्वा रसहरणशीलान् रश्मीन् [v]रमयः[2] उपारमयः । [v]एतशो [v]न । एतश इति सूर्याश्वस्याख्या । तथा च श्रूयते– ' एतशेन त्वा सूर्यो देवतां गमयतु ' ( तै. सं. १. ६. ४. ६ ) इति । नशब्दश्चार्थे । एतशश्च रथस्य [v]चक्रं [v]भरत् प्रावहत् । अपि च त्वं [v]नाव्यानां नावा तार्याणां नदीनां [v]नवतिं नवतिसंख्याम् अतीत्य वर्तमानं [v]पारं तीरदेशम् । सप्तम्यर्थे द्वितीया । तीरदेशे [v]अयज्यून् अयजमानान् यज्ञविहीनान्

---

१. च-छ-फ–तनूकृतवानसि; द–क्षतवानसि । २. क्ष-ट-ठ-स– रामयः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

असुरादीन् [v]प्रास्य प्रक्षिप्य तत्र [v]कर्तम्[1] [v]अवर्तयः कर्तव्यमपि कृत्वा[1] तानयजमानानवर्तयः प्रापयः ॥ रमयः । लङि ' बहुलं छन्दस्यमाङ्योगेऽपि ' इति अडभावः । ' अन्येषामपि दृश्यते ' इति सांहितिको दीर्घः । प्रास्य । ' असु क्षेपणे ' । अस्मात् ल्यपि रूपम् । नान्यानाम् । ' नौवयोधर्म° ' इत्यादिना यत् । ' तित्स्वरितः ' इति स्वरितत्वम् ॥

त्वं नो अस्या इन्द्र दुर्हणायाः पाहि वज्रिवो दुरितादभीके ।
प्र नो वाजान्रथ्यो३ अश्वबुध्यानिषे यन्धि श्रवसे सूनृतायै ॥ १४ ॥

त्वम् । नः । अस्याः । इन्द्र । दुःऽहनायाः । पाहि । वज्रिऽवः । दुःऽइतात् । अभीके । प्र । नः । वाजान् । रथ्यः । अश्वऽबुध्यान् । इषे । यन्धि । श्रवसे । सूनृतायै ॥ १४ ॥

हे [v]वज्रिवः वज्रवन् [v]इन्द्र [v]त्वं [v]दुर्हणायाः दुःखेन हन्तव्यायाः [v]अस्याः अवृत्तेर्दारिद्र्यात् [v]नः अस्मान् [v]पाहि रक्ष । तथा [v]दुरितात् पापात् [v]अभीके अभिप्राप्ते समीपवर्तिनि संग्रामे अस्मान् रक्ष । अपि च [v]नः अस्मभ्यं [v]रथ्यः रथयुक्तान् [v]अश्वबुध्यान् अश्वानां बोधकान् । अश्वा यावद्भिर्लभ्यन्ते तावदित्यर्थः । यद्वा । अश्वबुध्नान् । छान्दसो वर्णविकारः । अश्वमूलान् । अश्वप्रमुखानित्यर्थः । सर्वं हि धनम् अश्वमूलं दासापवर्गम् । यथोक्तं—' दासप्रवर्गं रयिमश्वबुध्यम् ' ( ऋ. सं. १. ९२. ८ ) इति । एवंविधान् [v]वाजान् धनानि [v]प्र [v]यन्धि प्रयच्छ । किमर्थम् । [v]इषे अन्नार्थं [v]श्रवसे कीर्त्यर्थं [v]सूनृतायै । सूनृता प्रियसत्यात्मिका वाक् तदर्थं च ॥ दुर्हणायाः । ' ईषद्दुःसुषु° ' इति हन्तेः कर्मणि खल् । पाहि । पादादित्वात् निघाताभावः । वज्रिवः । वज्रोऽस्यास्तीति वज्री हस्तः । तद्वान् वज्रिवान् । ' छन्दसीरः ' इति मतुपो वत्वम् । संबुद्धौ ' मतुवसो रुः° ' इति नकारस्य रुत्वम् । रथ्यः । ' छन्दसीवनिपौ ' इति रथशब्दात् मत्वर्थीयः ईकारः । यन्धि । ' यम उपरमे ' । ' बहुलं छन्दसि ' इति विकरणस्य लुक् । ' वा छन्दसि ' इति हेः पित्त्वेन ङित्त्वाभावात् ' अङितश्च ' ( पा. सू. ६. ४. १०३ ) इति हेर्धिः ॥

मा सा ते अस्मत्सुमतिर्वि दसद्वाजप्रमहः समिषो वरन्त ।
आ नो भज मघवन्गोष्वर्यो मंहिष्ठास्ते सधमादः स्याम ॥ १५ ॥

मा । सा । ते । अस्मत् । सुऽमतिः । वि । दसत् । वाजऽप्रमहः । सम् । इषः । वरन्त ।
आ । नः । भज । मघऽवन् । गोषु । अर्यः । मंहिष्ठाः । ते । सधऽमादः । स्याम ॥ १५ ॥

हे [v]वाजप्रमहः वाजैर्धनैः प्रमहनीयेन्द्र [v]ते त्वदीया [v]सा [v]सुमतिः शोभनानुग्रहरूपा बुद्धिः [v]अस्मत् अस्मासु [v]मा [v]वि [v]दसत् मा विशुष्यतु । तथा [v]इषः अन्नानि अस्मान् [v]सम् [v]वरन्त संवृतान् कुर्वन्तु । हे [v]मघवन् धनवन्निन्द्र [v]अर्यः धनपतिः त्वं [v]नः अस्मान् [v]गोषु [v]आ [v]भज प्रापय

---

१. क्ष-ट-ठ—कर्तमवटमपि कृत्वा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]ते तव [v]महिष्ठाः अतिशयेन स्तुतिभिः प्रवर्धयितारो वयं [v]सधमादः [v]स्याम पुत्रपौत्रादिभिः सह माद्यन्तो भवेम ॥ अस्मत् । 'सुपां सुलुक्०' इति सप्तम्या लुक् । दसत् । 'दसु उपक्षये' । माङि लुङि पुषादित्वात् अङ् । वाजप्रमहः । वाजैर्धनैः प्रकृष्टं महस्तेजो यस्य स तथोक्तः । पादादित्वात् आष्टमिकनिघाताभावः[1] । षाष्ठिकमामन्त्रिताद्युदात्तत्वम् । वरन्त । 'वृञ् वरणे' । व्यत्ययेन शप् । गोषु । 'सावेकाचः०' इति प्राप्तस्य विभक्त्युदात्तत्वस्य 'न गोश्वन्सावर्वर्ण०' इति प्रतिषेधः । अर्यः । 'अर्यः स्वामिवैश्ययोः' इति निपात्यते । 'अर्यः स्वाम्याख्या चेत्' (फि. सू. १७) इत्यन्तोदात्तत्वम् । महिष्ठाः । 'मह वृद्धौ' । इदित्त्वात् नुम् । अस्मादन्तर्भावितण्यर्थात् तृच् । 'तुश्छन्दसि' इति इष्टन् । 'तुरिष्टेमेयःसु' इति तृलोपः । सधमादः । 'मद तृप्तियोगे' । चौरादिकः । सह मादयन्ते तृप्ता भवन्तीति सधमादः । 'क्विप् च' इति क्विप् । जस् । 'सध मादस्थयोश्छन्दसि' इति सहस्य सधादेशः । ॥ २६ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण[2] विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टकेऽष्टमोऽध्यायः समाप्तः ॥

॥ इति प्रथमाष्टकः समाप्तः ॥

---

१. क्ष-ट-ठ–आष्टमिकनिघाताभावे । २. क्ष-ट–सायणाभट्टेन ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ॐ

॥ श्रीगणेशाय नमः ॥

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
प्रक्रिया प्रथमे काण्डे साकल्येनोपवर्णिता ।
अत[1] ऊर्ध्वतनी ज्ञेया स्मर्यते[1] च क्वचित्क्वचित् ॥

अथ द्वितीयाष्टके प्रथमोऽध्यायः आरभ्यते । शतर्चिनामाद्ये मण्डले चतुर्विंशत्यनुवाकाः । तेषु 'कदित्था' इति अष्टादशानुवाके षट् सूक्तानि । तत्र 'प्र वः पान्तम्' इति द्वितीयं सूक्तम् । 'पञ्चोना' इति अनुवर्तमानात्[2] पञ्चदशर्चम् । 'ऋषिश्चान्यस्मादृषेः' इति परिभाषया कक्षीवानृषिः । अनादेशपरिभाषया त्रिष्टुप् । विश्वे देवा देवता । 'प्र वो वैश्वदेवम्' इत्यनुक्रमणिका । अस्य[3] विशेष-विनियोगो लैङ्गिकः ॥

प्र वः पान्तं रघुमन्यवोऽन्धो यज्ञं रुद्राय मीळ्हुषे भरध्वम् ।
दिवो अस्तोष्यसुरस्य वीरैरिषुध्येव मरुतो रोदस्योः ॥ १ ॥

प्र । वः । पान्तम् । रघुऽमन्यवः । अन्धः । यज्ञम् । रुद्राय । मीळ्हुषे । भरध्वम् ।
दिवः । अस्तोषि । असुरस्य । वीरैः । इषुध्याऽइव । मरुतः । रोदस्योः ॥ १ ॥

हे [v]रघुमन्यवः लघुक्रोधाः अक्रोधिनः[4] ऋत्विजः [v]वः युष्माकं [v]पान्तं पालनशीलं पातव्यं वा [v]यज्ञं यागसाधनम् [v]अन्धः अन्नम् आज्यसोमादिलक्षणं [v]रुद्राय । रुत् दुःखं तद्धेतुभूतं दुरितं वा । तस्य द्रावयित्रे एतन्नामकाय देवाय [v]मीळ्हुषे फलस्य वर्षित्रे तदर्थं [v]प्र [v]भरध्वं प्रकर्षेण संपादयत । अहं च [v]इषुध्येव इषुध्या[5] शत्रून् यथा निरस्यति तथा [v]वीरैः अमित्राणां विविधमीरकैः वीर्योपेतैः[6] वा तदनुचरैः मरुदादिभिः सह [v]दिवः द्युलोकसकाशात् । उपलक्षणमेतत् । लोकत्रयादपि [v]असुरस्य निरसितव्यानामसुराणां निरसितुः । कर्मणि षष्ठी । निरसितारं तमेव देवं [v]रोदस्योः निरोधनवत्योः द्यावापृथिव्योर्मध्ये वर्तमानान् [v]मरुतः च [v]अस्तोषि स्तौमि ॥ पान्तम् । पान्तमित्यत्र पातेः शतृ पिबतेर्वा औणादिको झः । मीळ्हुषे । 'दाश्वान्साह्वान्०' इति क्वसुप्रत्ययान्तो निपातः । चतुर्थ्येकवचने 'वसोः संप्रसारणम्' इति संप्रसारणम् । 'शासिवसि०' इत्यादिना षत्वम् । दिवः । 'ऊडिदम्०' इत्यादिना

---

१. क्ष-ञ-ट–उत्तरास्मिंस्तथोन्नेया स्मार्यते । २. क्ष-ञ-ट–अनुवर्तनात् । ३. क्ष-ञ-ट–'अस्य' नास्ति । ४. क्ष-ञ-ट–'अक्रोधिनः' इत्यस्यानन्तरं 'यद्वा मन्यतिरर्चाकर्मा । शीघ्रस्तुतयः' इत्यधिकम् । ५. क्ष-ञ-ट–इषुध्या निषङ्गेण । ६. ख-च-ज-ण-फ-व–मायोपेतैः ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

विभक्तेरुदात्तत्वम् । अस्तोषि । स्तौतेश्छान्दसो लुङ् । इषुध्येव । इषवो धीयन्ते अत्र इति इषुधिः । 'कर्मण्यधिकरणे च' इति दधातेः किः । कृत्स्वरेणान्तोदात्तः । 'उदात्तयणो हल्पूर्वात्' इति विभक्तेरुदात्तत्वम् ॥

**पत्नीव पूर्वहूतिं वावृधध्या उषासानक्ता पुरुधा विदाने ।**
**स्तरीर्नात्कं व्युतं वसाना सूर्यस्य श्रिया सुदृशी हिरण्यैः ॥ २ ॥**

पत्नीऽइव । पूर्वऽहूतिम् । ववृधध्यै । उषसानक्ता । पुरुधा । विदाने इति ।
स्तरीः । न । अत्कम् । विऽउतम् । वसाना । सूर्यस्य । श्रिया । सुऽदृशी । हिरण्यैः ॥ २ ॥

vपत्नीव पत्नी यथा vपूर्वहूतिं पत्युः पूर्वाह्वानं vववृधध्यै वर्धयितुं शीघ्रगतिर्भवति तद्वत् vउषासानक्ता अहोरात्रे देवते अपि vपुरुधा बहुप्रकारं बहुविधैः स्तोत्रैः vविदाने ज्ञायमाने सत्यौ पूर्वहूतिं ववृधध्यै अस्मदीयं पूर्वाह्वानं वर्धयितुं शीघ्रमागच्छतमिति शेषः । यद्वा । ववृधध्यै अस्मद्वर्धनाय पुरुधा बहुप्रकारं विदाने वर्धनोपायान् जानत्यौ भवतमिति शेषः ॥ उषासानक्ता । 'उषासोषसः' (पा. सू. ६. ३. ३१) इति पूर्वपदस्य उषासादेशः । 'देवताद्वन्द्वे च' इति उभयपदप्रकृतिस्वरत्वम् ॥ अथ केवला उषा उच्यते । vस्तरीः शत्रूणां हिंसकः तेजसाच्छन्नः[1] वा आदित्यः स इव vहिरण्यैः हिरण्यवर्णैः रश्मिभिः vव्युतं विततं विशेषेण संबद्धम् vअत्कम् अक्तं संततं वा रूपं[2] vवसाना आच्छादयन्ती धारयन्ती vसूर्यस्य vश्रिया शोभया vसुदृशी शोभनं दृश्यमाना । सूर्यस्य पुरोगामिनी[3] रश्मिभिः खल्वेषा जगद्भासयति । तादृशी उषा[4] अस्मत्पूर्वहूतिं पालयत्वित्यर्थः । यद्वा । हिरण्यैः हितरमणीयैः प्रकाशैः धनविशेषैर्वा सहागच्छतु ॥ व्युतम् । व्येञो निष्ठायां 'वचिस्वपि०' इत्यादिना संप्रसारणम् । स्तरीः । 'अवितृस्तृ०' इति ईकारप्रत्ययः ॥

**ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान् ।**
**शिशीतमिन्द्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यन्तु देवाः ॥ ३ ॥**

ममत्तु । नः । परिऽज्मा । वसर्हा । ममत्तु । वातः । अपाम् । वृषण्ऽवान् ।
शिशीतम् । इन्द्रापर्वता । युवम् । नः । तत् । नः । विश्वे । वरिवस्यन्तु । देवाः ॥ ३ ॥

vनः अस्मान्[5] vवसर्हा वसनार्हो गार्हपत्यादिरूपेण । यद्वा । वासकानामाच्छादकानां वृक्षादीनां हन्ता अग्निः । अथवा । वसर्हा वासार्हो वासरस्य गमयिता । vपरिज्मा परितो गन्ता आदित्यः vममत्तु मादयतु । तथा vअपां वृष्ट्युदकानां vवृषण्वान् वर्षणवान् वृष्ट्युत्पादकः vवातः वायुरस्मान् vममत्तु । किंच हे vइन्द्रापर्वता । इन्द्रः प्रसिद्धः । पर्वतः पर्ववान् वृष्ट्यादिपूरणवान् पर्जन्यः । तौ vयुवं युवां vनः अस्मान् अस्मद्बुद्धिं वा vशिशीतं तीक्ष्णीकुरुतं शोधयतमित्यर्थः । vतत् तस्मात् यस्मादहं सर्वान् देवान्

---

१. क्ष-ञ-ट–तेजसाच्छन्नाङ्गः । २. च-ज-फ-व-ष–सुरूपम् । ३. क्ष-ख-च-ज-ट-त-फ-व–पुरोगामिभिः । ४. क्ष-ट–उषा अपि । ५. क्ष-ञ-ट–'अस्मान्' इत्यस्यानन्तरं 'परिज्मा परितो गन्ता व्याप्तः' इत्यधिकम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्तौमि तस्मात् [v]विश्वे सर्वेऽपि [v]देवाः [v]नः अस्माकं [v]वरिवस्यन्तु प्रभूतमन्नं प्रदातुमिच्छन्तु। समृद्धान्न-प्रदानेन प्रीणयन्त्वित्यर्थः॥ ममत्तु। 'मदी हर्षे'। अन्तर्भावितण्यर्थात् लोटि छान्दसो विकरणस्य श्लुः। द्विर्वचनम्[1]। शिशीतम्। 'ई हल्यघोः' इति ईत्वम्। 'बहुलं छन्दसि' इति अभ्यासस्य इत्वम्। 'इन्द्रापर्वता' इत्यत्र 'देवताद्वन्द्वे च' इति पूर्वपदस्य आनङादेशः॥

उत त्या मे यशसा श्वेतनायै व्यन्ता पान्तौशिजो हुवध्यै।
प्र वो नपातमपां कृणुध्वं प्र मातरा रास्पिनस्यायोः॥ ४॥

उत। त्या। मे। यशसा। श्वेतनायै। व्यन्ता। पान्ता। औशिजः। हुवध्यै।
प्र। वः। नपातम्। अपाम्। कृणुध्वम्। प्र। मातरा। रास्पिनस्य। आयोः॥ ४॥

[v]औशिजः उशिजः पुत्रः कक्षीवानहं [v]मे। तादर्थ्ये चतुर्थी। मदर्थं [v]यशसा। यश इत्यन्नं बलं कीर्तिर्वा उच्यते। तद्वन्तौ [v]व्यन्ता भक्षयन्तौ चरुपुरोडाशादिकं [v]पान्ता पिबन्तौ आज्यसोमादिकं [v]त्या। तच्छब्दसमानार्थः त्यच्छब्दः। यौ स्तुत्यत्वेन प्रसिद्धौ तावश्विनौ। अत्र यद्यपि विशेषो न श्रुतः तथापि सूक्तस्य वैश्वदेवत्वात् उषःसंबन्धात् द्विवचनलिङ्गाच्चाश्विनाविति गम्यते तादृशावश्विनौ। [v]श्वेतनायै इति[2] षष्ठ्यर्थे चतुर्थी। विश्वं जगत् श्वेतयन्त्याः उषसः तत्संबन्धिनि काले। उषःकालीनाह्वानाय यतेयम्[3] इति शेषः। हे ऋत्विजः [v]वः यूयम्। प्रथमार्थे द्वितीया। [v]अपाम् उदकानां [v]नपातं नपातयितारं तासां नप्तारं वा अग्निम्। अद्भ्यः ओषधिवनस्पतयः ताभ्यः अग्निः इत्यपां नप्तृत्वमग्नेः। तं देवं [v]प्र [v]कृणुध्वम्। करोतिरत्र क्रियासामान्यवाची क्रियाविशेषे स्तोत्रे पर्यवस्यति। प्रकर्षेण स्तुध्वमित्यर्थः। किंच [v]रास्पिनस्य। रपतेः रसतेर्वा शब्दनार्थस्य घञन्तस्य कृतसकारपकारोपजनस्य रास्प इति भवति। तदस्यास्तीति रास्पि स्तोत्रम्। तद्वान् रास्पिनः स्तोता। तस्य [v]आयोः तादृशस्य मनुष्यस्य मम[4] मह्यं [v]मातरा मातृवद्धितकारिण्यौ अहोरात्रदेवते अपि [v]प्र कृणुध्वम्। अथवा रास्पिनस्य। एको मत्वर्थप्रत्ययश्छान्दसः। प्रवर्षणध्वनियुक्तस्य वृष्टयुदकस्य गमनशीलस्य निर्मात्र्यौ अहोरात्रे प्र कृणुध्वम्॥ व्यन्ता पान्ता। उभयत्र 'सुपां सुलुक्०' इति आकारः॥

आ वो रुवण्युमौशिजो हुवध्यै घोषेव शंसमर्जुनस्य नंशे।
प्र वः पूष्णे दावन आँ अच्छा वोचेय वसुतातिमग्नेः॥ ५॥

आ। वः। रुवण्युम्। औशिजः। हुवध्यै। घोषाऽइव। शंसम्। अर्जुनस्य। नंशे।
प्र। वः। पूष्णे। दावने। आ। अच्छ। वोचेय। वसुऽतातिम्। अग्नेः॥ ५॥

हे देवाः [v]औशिजः कक्षीवानहं [v]वः युष्माकं संबन्धिनं [v]रुवण्युं रवणीयं[5] शब्दनीयं [v]शंसं स्तोत्रम् [v]आ [v]हुवध्यै युष्मदाह्वानाय [v]अच्छ [v]आ [v]वोचेय आभिमुख्येन ब्रवीमि। यद्वा। अत्रापि

---

१. क्ष-ञ-ट-'द्विर्वचनम्' इत्यस्यानन्तरं 'त्विही(भीही)त्यादिना पिति प्रत्ययात् पूर्वस्योदात्तत्वम्' इत्यधिकम्। २. क्ष-च-ञ-ट-न-फ-'इति' नास्ति। ३. क्ष-ञ-ट-यतेय; न-म-यजेयम्। ४. क्ष-ञ-ट-'मम' नास्ति; ज-व-मे। ५. क्ष-ञ-ट-अहोरात्रदेवते। ६. क्ष-ञ-ट-रवणशीलम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अश्विनावेव उच्येते । तस्मिन् पक्षे बहुवचनं पूजार्थम् । हे अश्विनौ Vवः युष्मान् Vघोषेव एतन्नामिका ब्रह्मवादिनीव । सा यथा Vअर्जुनस्य श्वेतवर्णस्य स्वशरीरगतत्वग्रोगस्य[1] Vनंशे नाशनाय यथाश्विनोः शंसमकार्षीत् तद्वदहमपीत्यर्थः । हे देवाः युष्मत्संबन्धिने Vदावने आ आभिमुख्येन फलस्य दात्रे Vपूष्णे पोषकाय एतन्नामकाय देवायापि[2] ॥ आकारस्य ' आडोऽनुनासिकश्छन्दसि ' इति प्रकृतिभावः ॥ अच्छ आभिमुख्यगमनेन वोचेय स्तौमि ॥ ' वच परिभाषणे ' । ' लिङ्याशिष्यङ् '। ' वच उम् ' इति उम् । किंच Vअग्नेः Vवसुतातिं तत्संबन्धि धनमपि वोचेय स्तौमि तमेवाग्निम् ॥ ॥ १ ॥

श्रुतं मे मित्रावरुणा हवेमोत श्रुतं सदने विश्वतः सीम् ।
श्रोतु नः श्रोतुरातिः सुश्रोतुः सुक्षेत्रा सिन्धुरद्भिः ॥ ६ ॥

श्रुतम् । मे । मित्रावरुणा । हवा । इमा । उत । श्रुतम् । सदने । विश्वतः । सीम् ।
श्रोतु । नः । श्रोतुऽरातिः । सुऽश्रोतुः । सुऽक्षेत्रा । सिन्धुः । अत्ऽभिः ॥ ६ ॥

हे Vमित्रावरुणा एतन्नामानौ अहोरात्राभिमानिदेवौ युवाम् Vइमा इमानि Vहवा[3] अस्मदाह्वानानि Vश्रुतं शृणुतम् । न केवलमस्मदाह्वानम् Vउत अपि च Vसदने यागगृहे Vविश्वतः उद्गात्रादिभिः सर्वतः क्रियमाणं Vसीम् एतत्स्तोत्रमपि Vश्रुतं शृणुतम् । किंच Vश्रोतुरातिः सर्वत्र श्रूयमाणधनः तादृशदानो वा Vसुश्रोतुः अस्मदाह्वानस्य सम्यक् श्रोता Vसिन्धुः जलाभिमानी देवः Vसुक्षेत्रा सुक्षेत्राणि Vअद्भिः वृष्टिजलैः क्लेदयन्निति शेषः । यद्वा । अस्मत्क्षेत्राणि अद्भिः सुक्षेत्राणि सस्यादिसमृद्धानि कुर्वन् Vनः हवं शृणोतु[4] । सुक्षेत्रत्वलाभाय[5] शृणोत्वित्यर्थः ॥ हवा इमा । उभयत्र विभक्तेरा आकारः । श्रुतमित्यत्र ' बहुलं छन्दसि ' इति विकरणस्य लुक् ॥

स्तुषे सा वां वरुण मित्र रातिर्गवां शता पृक्षयामेषु पत्रे ।
श्रुतरथे प्रियरथे दधानाः सद्यः पुष्टिं निरुन्धानासो अग्मन् ॥ ७ ॥

स्तुषे । सा । वाम् । वरुण । मित्र । रातिः । गवाम् । शता । पृक्षऽयामेषु । पत्रे ।
श्रुतऽरथे । प्रियऽरथे । दधानाः । सद्यः । पुष्टिम् । निऽरुन्धानासः । अग्मन् ॥ ७ ॥

हे Vमित्र हे Vवरुण देव Vवां युवाम् अहं Vस्तुषे स्तुवे । व्यत्ययेन मध्यमः । युवयोः संबन्धिनी Vसा प्रसिद्धा Vरातिः दानं Vशता शतानां शतसंख्यानाम् अपरिमितानां Vगवां संबन्धिनी असंख्यातगोविषया रातिः Vपत्रे कक्षीवति मयि Vपृक्षयामेषु । पृक्ष[6] इत्यकारान्तोऽप्यस्ति[6]। पृक्षाणामन्नानां नियमनं येषु स्तोत्रेषु यज्ञेषु वा तेषु निमित्तभूतेषु भवत्विति शेषः । किंच मित्रादयो देवाः Vश्रुतरथे सर्वत्र प्रसिद्धरथोपेते Vप्रियरथे प्रीयमाणरथयुक्ते सर्वदा रथप्रिये पत्रे च मयि एव Vदधानाः

---

१. क्ष-ञ-ट–स्वशरीरगतश्वेतत्वरोगस्य । २. क्ष-ञ-ट– देवस्यापि । आकारः समुच्चये । ३. च-फ–मे हवा । ४. च-य–श्रोतु शृणोतु । ५. च-फ–सुक्षेत्रत्वादिलाभाय । ६. क्ष-ञ-ट–पृक्षेत्यकारान्तो घञि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रीतिं धारयन्तः Vसद्यः आगमनानन्तरमेव Vपुष्टिं गवादिपोषं Vनिरुन्धानासः अवरुन्धानाः[1] अस्मास्वेव स्थापयन्तः । यद्वा । मयि पुष्टिं दधानाः[2] कुर्वाणाः[2] निरुन्धानासः कृतामेव पुष्टिं मयि स्थिरां[3] कुर्वन्तः[3] Vअग्मन् आगच्छन्तु ॥ रातिः । 'रा दाने' । भावे क्तिन् । 'मन्त्रे वृष०' इत्यादिना क्तिन उदात्तत्वम् । शता । 'सुपां सुलुक्०' इति षष्ठ्याः पूर्वसवर्णदीर्घत्वम् । दधानाः । जुहोत्यादित्वात् शपः श्लुः । 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वम् । अग्मन् । गमेश्छान्दसे लुङि 'मन्त्रे घस०' इत्यादिना च्लेर्लुक् । 'गमहन०' इति उपधालोपः ॥

अस्य स्तुषे महिमघस्य राधः सचा सनेम नहुषः सुवीराः ।
जनो यः पज्रेभ्यो वाजिनीवानश्वावतो रथिनो मह्यं सूरिः ॥ ८ ॥

अस्य । स्तुषे । महिऽमघस्य । राधः । सचा । सनेम । नहुषः । सुऽवीराः ।
जनः । यः । पज्रेभ्यः । वाजिनीऽवान् । अश्वऽवतः । रथिनः । मह्यम् । सूरिः ॥ ८ ॥

Vमहिमघस्य । महि महत् पूज्यं मघो धनमन्नं वा यस्य देवसंघस्य स तथोक्तः । तादृशस्य Vअस्य Vराधः धनं Vस्तुषे स्तुवे । व्यत्ययेन मध्यमः । धनलाभाय प्रभूतधनं देवसंघं स्तौमीत्यर्थः । किंच Vनहुषः । मनुष्यनामैतत् । परस्परस्नेहबन्धोपेता मनुष्या वयं कक्षीवन्तः Vसुवीराः शोभनपुत्राद्युपेताः सन्तः Vसचा सह परस्परैकमत्येन Vसनेम स्वदत्तं धनं संभजेम लभेमहि । देवसंघो विशेष्यते । Vयः Vजनः देवजनो यश्च देवसंघः Vपज्रेभ्यः अङ्गिरोगोत्रोत्पन्नेभ्यः कक्षीवद्भ्यः । 'पज्रा वा अङ्गिरसः' इति श्रुतेः । तेभ्यः Vवाजिनीवान् । वाजोऽन्नम् । तद्वती क्रिया वाजिनी । तया तद्वान् भवति । यद्वा । एको मत्वर्थीयप्रत्ययश्छान्दसः । अस्मभ्यं प्रदेयेन दत्तेन[4] वा अन्नेन तद्वान् भवतीत्यर्थः । यश्च देवसंघः Vअश्वावतः बहुभिः तद्दत्तैरश्वैः तद्वतः Vरथिनः रथवतः Vमह्यं मे[5] Vसूरिः प्रेरको भवति । अश्वानां रथानां[6] प्रेरयितारं देवसंघं स्तुषे[7] इत्यर्थः ॥ सुवीराः । 'वीरवीर्यौ च' इत्युत्तरपदाद्युदात्तत्वम् । अश्वावतः । अश्वशब्दस्य 'मन्त्रे सोमाश्व०' इत्यादिना मतुपि दीर्घत्वम् ॥

जनो यो मित्रावरुणावभिध्रुगपो न वां सुनोत्यक्ष्णयाध्रुक् ।
स्वयं स यक्ष्मं हृदये नि धत्त आप यदीं होत्राभिर्ऋतावा ॥ ९ ॥

जनः । यः । मित्रावरुणौ । अभिऽध्रुक् । अपः । न । वाम् । सुनोति । अक्ष्णयाऽध्रुक् ।
स्वयम् । सः । यक्ष्मम् । हृदये । नि । धत्ते । आप । यत् । ईम् । होत्राभिः । ऋतऽवा ॥ ९ ॥

हे Vमित्रावरुणौ युष्माकं Vयः Vजनः Vअभिध्रुक् अभितो द्रोग्धा भवति अयष्टा भवतीत्यर्थः । यश्च Vअक्ष्णयाध्रुक् वक्रेण मार्गेण द्रुह्यति अन्यथाप्रकारेण द्रुह्यति । द्रोहप्रकार उच्यते । Vवां युवाम्[8] Vअपः सोमरसान् Vन Vसुनोति अभिषवं न करोति । युवाम् अतिक्रम्य अन्यदेवतार्थं सुनोतीत्यभिप्रायः ।

---

१. क्ष-ञ-ट–अवरुन्धाधा (नाः) अवरुध्य । २. क्ष-ञ-ट–तु दधानाः विदधानाः कुर्वाणाः ।
३. क्ष-ञ-ट–स्थिरीकुर्वन्तः सन्तः । ४. क्ष-च-ञ-ञ-ट-न–अस्मभ्यं दत्तेन । ५. क्ष-ञ-ट–मम ।
६. च-फ–'रथानाम्' नास्ति । ७. क्ष-ञ-ट–स्तुवे । ८. क्ष-ञ-ट–युवाभ्याम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अयमेव अक्ष्णयाद्रोहः[1] । Vसः मूढो द्विविधो जनः Vस्वयं Vयक्ष्मं व्याधिं Vहृदये स्वचित्ते Vनि Vधत्ते स्थापयति । अनुष्टातॄणां भोगान् पश्यन् व्यथितो भवतीत्यर्थः । Vयत् । लिङ्गव्यत्ययः । य उक्तविलक्षणः पुमान् Vऋतावा यज्ञवान् परिगृहीतयज्ञः Vहोत्राभिः । वाङ्नामैतत् । स्तुतिवाग्भिः Vईम् एनं सोमरसम् Vआप व्याप्नोति । स्तुवन् सोममभिषुणोति इति[2] यावत्[2] । स नरः पृत्सु यातीति वक्ष्यमाणेन सह संबन्धः ॥ अभिधुक् । द्रुहेः ' सत्सूद्विष° ' इति क्विप् । संहितायां[3] भप्भावश्छान्दसः[3] । ऋतावा इत्यत्र ' छन्दसीवनिपौ ' इति मत्वर्थीयो वनिप् । ' अन्येषामपि दृश्यते ' इति संहितायां दीर्घत्वम् ॥

स व्राधंतो नहुषो दंसुजूतः शर्धस्तरो नरां गूर्तश्रवाः ।
विसृष्टरातिर्याति बाळ्हसृत्वा विश्वासु पृत्सु सदमिच्छूरः ॥ १० ॥

सः । व्राधंतः । नहुषः । दम्ऽसुजूतः । शर्धःऽतरः । नराम् । गूर्तऽश्रवाः ।
विसृष्टऽरातिः । याति । बाळ्हऽसृत्वा । विश्वासु । पृत्ऽसु । सदम् । इत् । शूरः ॥ १० ॥

हे मित्रावरुणौ युवां गतमन्त्रावसानोक्तलक्षणः[4] युष्मत्पूजको जनः Vदंसुजूतः दान्तैरश्वैः सुष्ठु प्रेरितः अत एव Vनरां नराणां Vशर्धस्तरः अतिशयेनाभिभविता । अथवा अतिशयेन बलवान् । नराणां स्वसमानानां मध्ये Vगूर्तश्रवाः उद्गूर्णदीप्तिः प्रख्यातान्नो वा Vविसृष्टरातिः अर्थिभ्यः प्रदत्तधनः एवं महानुभावः Vशूरः सन् Vविश्वासु Vपृत्सु सर्वेषु जन्येषु संग्रामेषु Vव्राधतः । महन्नामैतत् । हिंसकान् महतोऽपि Vनहुषः । मनुष्यनामैतत् । मनुष्यान् शत्रून् प्रति Vबाळ्हसृत्वा भृशं सर्ता[5] अशङ्कितगमनः[5] सन् Vसदमित् सदैव Vयाति गच्छति ॥ दंसुजूतः । दामेर्विच्[6] । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् । गूर्तश्रवाः । ' गुरी उद्यमने ' । ' नसत्तनिपत्त° ' इत्यादौ निपातनात् निष्ठानत्वाभावः । विसृष्टरातिः । विपूर्वात् सृजतेः कर्मणि निष्ठा । ' गतिरनन्तरः ' इति गतेः प्रकृतिस्वरत्वम् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेन स एव शिष्यते । पृत्सु । ' पदादिषु मांस्पृस्नूनामुपसंख्यानम् ' इति पृतनाशब्दस्य पृदादेशः । ' सावेकाचः° ' इति विभक्तेरुदात्तत्वम् । बाळ्हसृत्वा । सर्तेः ' अन्येभ्योऽपि दृश्यन्ते ' इति क्वनिप् ॥ ॥ २ ॥

अध ग्मन्ता नहुषो हवं सूरेः श्रोता राजानो अमृतस्य मन्द्राः ।
नभोजुवो यन्निरवस्य राधः प्रशस्तये महिना रथवते ॥ ११ ॥

अध । ग्मन्त । नहुषः । हवम् । सूरेः । श्रोत । राजानः । अमृतस्य । मन्द्राः ।
नभःऽजुवः । यत् । निरवस्य । राधः । प्रऽशस्तये । महिना । रथऽवते ॥ ११ ॥

---

१. क्ष-अ-ट-द्रोहः । २. क्ष-अ-ट-' इति यावत् ' नास्ति । ३. क्ष-अ-ट-' संहितायां भष्भावश्छान्दसः ' नास्ति । ४. क्ष-अ-ट-स उक्तलक्षणः । ५. क्ष-अ-ट-सत्वा अविशङ्कितगमनः । ६. क्ष-अ-ट-दमेर्विच् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [V]राजानः राजमानाः सर्वस्य[1] ईश्वरा[1] वा[2] हे[3] [V]मन्द्राः मादयितारः यूयम् [V]अमृतस्य अमरणस्य [V]सूरेः स्तोत्रादिप्रेरकस्य [V]नहुषः मनुष्यस्य मम [V]हवम् आह्वानं [V]श्रोत शृणुत । 'बहुलं छन्दसि' इति शपो लुक् । अमृतस्य इत्यत्र बहुव्रीहौ 'नञो जरमरमित्रमृताः' इत्युत्तरपदाद्युदात्तत्वम् । [V]अध अथ श्रवणानन्तरं [V]गन्त आगच्छत । गमेश्छान्दसो लङ्[4] । मध्यमबहुवचनस्य व्यत्ययेन झः । 'बहुलं छन्दसि' इति शपो लुक् । 'गमहन०' इत्युपधालोपः । किमर्थमागमनम् । उच्यते । [V]नभो-जुवः नभसि व्याप्ता यूयं [V]यत् यस्मात् [V]निरवस्य निर्गतरक्षकस्य युष्मद्व्यतिरेकेण रक्षकान्तररहितस्य । अथवा । निर्गतो मुखादुच्चरितो रवः शब्दः स्तोत्ररूपो यस्य तादृशस्य [V]रथवते रथवतो यजमानस्य । षष्ठ्यर्थे चतुर्थी । [V]महिना महिम्ना माहात्म्येन । मकारलोपश्छान्दसः । तेन युक्तं [V]राधः समृद्धिसाधनं[5] हविर्लक्षणं संराधकं स्तोत्रं वा [V]प्रशस्तये प्रशंसितुं कामयध्वे । तस्मादाह्वानं शृणुत आगच्छत चेति ॥

एतं शर्धं धाम यस्य सूरेरित्यवोचन्दशतयस्य नंशे ।
द्युम्नानि येषु वसुतातौ रारन्विश्वे सन्वन्तु प्रभृथेषु वाजम् ॥ १२ ॥

एतम् । शर्धम् । धाम । यस्य । सूरेः । इति । अवोचन् । दशऽतयस्य । नंशे ।
द्युम्नानि । येषु । वसुऽतातौ । ररन् । विश्वे । सन्वन्तु । प्रऽभृथेषु । वाजम् ॥ १२ ॥

[V]यस्य [V]सूरेः हविरादिप्रेरकस्य यजमानस्य संबन्धिनः [V]दशतयस्य दशेन्द्रियसंवर्धकत्वेन दशावयवस्यान्नस्य [V]नंशे प्राप्तये वयम् आहूताः स्म तस्मै यजमानाय [V]एतम् इदानीं दातव्यत्वेन वर्तमानं [V]शर्धं परेषामभिभावकमन्नं तत्प्राप्तिहेतुं[6] बलं[6] वा [V]धाम विदधाम करवाम [V]इत्यवोचन् देवाः ॥ धाम । दधातेर्लुङि 'गातिस्था०' इति सिचो लुक् । वचेः अकारस्य उम् । 'अस्यतिवक्ति०' इत्यादिना च्लेः अङ् ॥ [V]येषु[7] देवेषु [V]द्युम्नानि द्योतमानान्यन्नानि [V]वसुतातिः वसूनां धनानां तातिः विस्तारश्च[8] वसून्येव वा[9] [V]रारन् रमन्ते भृशम् ॥ तातिः । तनोतेः क्तिनि व्यत्ययेन आत्वम् । मस्द्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् । यद्वा । स्वार्थिकस्तातिल् । रारन्निति रमतेर्यङ्लुगन्तस्य लङि रूपम् । ते [V]विश्वे सर्वे देवाः [V]प्रभृथेषु प्रकृष्टभरणेषु यागेषु [V]वाजम् अन्नं [V]सन्वन्तु ददतु प्रयच्छन्तु ॥ 'षणु दाने' ॥ यद्वा । यस्य सूरेः स्वभूतस्य च[10] दशतयस्य दश चमसेष्ववस्थितस्य सोमस्य प्राप्तये वयमाहूताः स्म तस्मै एतं शर्धं धाम इत्यवोचन् । यस्मादेवं तस्मात् प्रभृथेषु यागेषु वाजं तादृशं सोमलक्षणमन्नं विश्वे देवाः सन्वन्तु संभजन्ताम् ॥ 'वन षण संभक्तौ' इत्यस्य व्यत्ययेन उप्रत्ययः ॥ कीदृशेषु यज्ञेषु । येषु वसुतातिः वसूनां हविर्लक्षणानां धनानां वा विस्तारयितारः ऋत्विजः । वचनव्यत्ययः । द्युम्नानि द्योतमानानि हवींषि रारन् ददति ॥ 'रा दाने' । लेटि छान्दसः शपः श्लुः । 'छन्दस्युभयथा' इति आर्धधातुकत्वात् 'आतो लोप इटि च' इति आकारलोपः । अत एव 'अभ्यस्तानामादिः' इत्याद्युदात्तत्वाभावश्च ॥

---

१. क्ष-ञ-ट–सर्वे देवाः । २. क्ष-ञ-ट-न–'वा' नास्ति । ३. च-फ–विश्वेदेवाः । ४. च-फ–लुङ् । ५. क्ष-ञ-ट–समृद्धिसाधनं धनम् । ६. क्ष-ञ-ट–तत्प्राप्तिहेतुभूतबलम् । ७. क्ष-ञ-ट–येषु च । ८. क्ष-ञ-ट–विस्तारः स च । ९. क्ष-ञ-ट–'वा' नास्ति । १०. क्ष-ञ-ट–'च' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मन्दामहे दशतयस्य धासेर्द्विर्यत्पञ्च बिभ्रतो यन्त्यन्ना ।
किमिष्टाश्वं इष्टरश्मिरेत ईशानासस्तरुष ऋञ्जते नॄन् ॥ १३ ॥

मन्दामहे । दशऽतयस्य । धासेः । द्विः । यत् । पञ्च । बिभ्रतः । यन्ति । अन्ना ।
किम् । इष्टऽअश्वः । इष्टऽरश्मिः । एते । ईशानासः । तरुषः । ऋञ्जते । नॄन् ॥ १३ ॥

[v]मन्दामहे स्तुमो वयं देवान्॥ 'मदि स्तुतौ'। इदित्त्वात् नुम्॥ किमर्थम्। [v]दशतयस्य [v]धासेः दशेन्द्रियतृप्तिसाधनत्वेन दशावयवस्य अन्नस्य [v]यत् यस्मात् [v]द्विः [v]पञ्च दशविधानि अन्नानि। दशचमसगृहीतत्वादन्नस्य दशविधत्वम्। एवंविधम् अन्नं [v]बिभ्रतः धारयन्तो दश चमसाध्वर्यवः [v]यन्ति होमाय गच्छन्ति आहवनीयं प्रति। यद्वा। 'आश्वमेधिकानि दशान्नानि जुहोति[1]' इत्यान्नातानि आज्यमध्वादीनि दशविधान्यन्नानि विश्वेभ्यो देवेभ्यो होतुं धारयन्तो यन्ति यदा तदा मन्दामहे इति। न च इष्टाश्वप्रभृतीन् यष्टॄन् विहाय कस्मात् अस्मान्प्रति आगमिष्यन्तीति वाच्यम्। [v]तरुषः शत्रूणां तारकान्॥ तरतेरौणादिक उसिन्॥ [v]नॄन् नेतॄन् कर्मणाम्[2] एवं महानुभावान् वरुणादीन् [v]इष्टाश्वः एतन्नामको राजा [v]किम् [v]ऋञ्जते किं प्रसाधयति। तथा [v]इष्टरश्मिः च किमृञ्जते। [v]एते इदानीं वर्तमानाः [v]ईशानासः[3] पृथिव्या ईश्वरा राजानश्च किं प्रसाधयन्ति। यद्वा। येषां स्तोतॄणामस्माकमेते स्तुता देवा ईशानासः स्वामिनः किल तादृशान् तरुषः शत्रूणां तारकान् नॄन् कर्मनिर्वाहकान् अस्मान् इष्टाश्वादयः किं साधयन्ति[4] किमुपद्रवन्ति न प्रभवन्तीत्यर्थः ॥

हिरण्यकर्णं मणिग्रीवमर्णस्तन्नो विश्वे वरिवस्यन्तु देवाः ।
अर्यो गिरः सद्य आ जग्मुषीरोस्राश्चाकन्तूभयेष्वस्मे ॥ १४ ॥

हिरण्यऽकर्णम् । मणिऽग्रीवम् । अर्णः । तत् । नः । विश्वे । वरिवस्यन्तु । देवाः ।
अर्यः । गिरः । सद्यः । आ । जग्मुषीः । आ । उस्राः । चाकन्तु । उभयेषु । अस्मे इति ॥ १४ ॥

[v]हिरण्यकर्णं हिरण्यविकारकुण्डलाद्युपेतकर्णं [v]मणिग्रीवं रत्नाद्युपेतकण्ठम्। एतद्द्वयं सर्वावयवस्याप्युपलक्षणम्। एवं सर्वाङ्गाभरणयुक्तम् [v]अर्णः अरणीयं रूपं तद्वन्तं पुत्रादिकमित्यर्थः। उक्तलक्षणमस्मदीयं रूपं वा [v]नः अस्माकं [v]विश्वे सर्वे [v]देवाः [v]वरिवस्यन्तु परिचरन्तु प्रयच्छन्त्वित्यर्थः। [v]अर्यः अरणीयो विश्वेषां देवानां संघः[5] [v]जग्मुषीः स्तोतुर्मुखान्निर्गच्छन्तीः [v]गिरः स्तुतीः [v]उस्राः[6]। विकारे[7] प्रकृतिशब्दः। क्षीराज्यादीनि हवींषि च [v]सद्यः अस्मदागमनानन्तरमेव [v]चाकन्तु कामयन्ताम्॥ छान्दसः शपः श्लुः परस्मैपदं च। यद्वा। यङ्लुकि नुगभावः॥ आ चाकन्त्विति वा योज्यम्। पर्याप्तं कामयन्तामित्यर्थः। केचिति तदुच्यते। [v]अस्मे अस्माकं संबन्धिषु [v]उभयेषु स्तोतृषु यष्टृषु च। यद्वा। अस्माकमुभयेषु ऐहिकामुष्मिकविषयेषु उभयविधेषु फलेषु ॥

---

१. ज-झ-त-व–जुह्वति । २. क्ष-ञ-ट–कर्मणः । ३. क्ष-ञ-ट–अन्ये ईशानासः । ४. क्ष-ञ-ट–प्रसाधयन्ति । ५. न-च-ञ–सद्यः । ६. क्ष-ञ-ट–उस्राः आ । ७. ष–अत्र विकारे ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

चत्वारो मा मशर्शारस्य शिश्वस्त्रयो राज्ञ आयवसस्य जिष्णोः ।
रथो वां मित्रावरुणा दीर्घाप्साः स्यूमगभस्तिः सूरो नाद्यौत् ॥ १५ ॥

चत्वारः । मा । मशर्शारस्य । शिश्वः । त्रयः । राज्ञः । आयवसस्य । जिष्णोः ।
रथः । वाम् । मित्रावरुणा । दीर्घऽअप्साः । स्यूमऽगभस्तिः । सूरः । न । अद्यौत् ॥ १५ ॥

Vमा मां कक्षीवन्तं Vमशर्शारस्य। मशकीकृत्य भृशं शृणोति[1] शारयति वा अमित्रानिति मशर्शारः। एतन्नामकस्य राज्ञः Vशिश्वः शिशवः शिशुवदप्रबुद्धाः Vचत्वारः पुत्राः बाधन्ते[2] इति शेषः ॥ शिशुशब्दस्य ' जसादिषु च्छन्दसि वावचनम् ' इति गुणाभावः ॥ तथा Vआयवसस्य सर्वतः प्राप्तान्नस्य एतन्नाम्नः Vराज्ञः Vजिष्णोः जयशीलस्य पुत्राः Vत्रयः तेऽपि बाधन्ते इति शेषः। हे Vमित्रावरुणा एतन्नामानौ देवौ Vवां युवयोः संबन्धी Vरथः Vदीर्घाप्साः । अप्स इति रूपनाम। अतिविस्तृतरूपः Vस्यूमगभस्तिः । स्यूममिति सुखनाम । सुखकरदीप्तिः सन् Vसूरो Vन सूर्य इव Vअद्यौत् द्योतताम्। उक्तानाम् अस्मद्विरोधिनां पुरतः स्फुरन्[3] भयजनको भवत्वित्यर्थः ॥ द्युतेः ' छन्दसि लुङ्लङ्लिटः ' इति लुङ् । ' द्युद्भ्यो लुङि ' ( पा. सू. १. ३. ९१ ) इति परस्मैपदम् । ' सिचि[4] वृद्धिः परस्मैपदेषु ' ( पा. सू. ७. २. १ ) इति वृद्धिः[4] । ' बहुलं छन्दसि ' इति इडभावे हल्ङ्यादिसंयोगान्तलोपौ । यद्वा । ' द्यु अभिगमने ' । आदादिकः । छान्दसे लङि ' उतो वृद्धिर्लुकि हलि ' ( पा. सू. ७. ३. ८९ ) इति वृद्धिः ॥ ॥ ३ ॥

' कदित्था ' इत्यस्मिन् अष्टादशेऽनुवाके षट् सूक्तानि । तत्र ' पृथू रथः ' इति तृतीयं सूक्तं त्रयोदशर्चम् । अत्रानुक्रमणिका–' पृथुः सप्तोनोपस्यं तु ' इति । दीर्घतमसः पुत्रः कक्षीवानृषिः ' ऋषिश्चान्यस्मादृषेः ' इति परिभाषितत्वात् । अनादेशपरिभाषया त्रिष्टुप् छन्दः । तुशब्दप्रयोगात् इदमादिके सूक्ते[5] उषोदेवताके । प्रातरनुवाके उपस्ये क्रतावस्य चोत्तरस्य च विनियोगः । ' अथोपस्यः ' इति खण्डे सूत्रितं–' पृथू रथ इति सूक्ते प्रत्यर्चिरित्यष्टौ ' ( आश्व. श्रौ. ४. १४ ) इति । तथाश्विनशस्त्रे इदमादिसूक्तद्वयस्य विनियोगः ' प्रातरनुवाकन्यायेन ' ( आश्व. श्रौ. ६. ५ ) इत्यतिदिष्टत्वात् ।

पृथू रथो दक्षिणाया अयोज्यैनं देवासो अमृतासो अस्थुः ।
कृष्णादुदस्थाद्अर्या३ विहायाश्चिकित्सन्ती मानुषाय क्षयाय ॥ १ ॥

पृथुः । रथः । दक्षिणायाः । अयोजि । आ । एनम् । देवासः । अमृतासः । अस्थुः ।
कृष्णात् । उत् । अस्थात् । अर्या । विऽहायाः । चिकित्सन्ती । मानुषाय । क्षयाय ॥ १ ॥

Vदक्षिणायाः प्रवृद्धायाः स्वव्यापारकुशलायाः उषोदेवतायाः Vपृथुः विस्तीर्णः Vरथः Vअयोजि अश्वैर्युक्तः संनद्धोऽभूत् । अत्र यद्यपि देवताविशेषो न श्रुतः तथापि उपस्यत्वात् उपस इति गम्यते ।

---

१. क्ष-ञ-ट–शृणाति । २. क्ष-ञ्-ञ-ट-न–मां बाधन्ते । ३. क्ष-ञ-ट-न–स्फुरतु । ४. क्ष-ञ-ट–वदव्रजेति वृद्धिः । ५. क्ष-ञ-ट–द्वे सूक्ते ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vएनं संनद्धं रथम् vअमृतासः अमरणधर्माणः vदेवासः देवनशीलाः हविर्भाजो देवाः vआ vअस्थुः आस्थितवन्तः देवयजनं गन्तुमारूढाः इत्यर्थः । अनन्तरं सा उषाः vकृष्णात् निकृष्टवर्णात् नैशात् तमसः सकाशात् vउदस्थात् उत्थिता अभूत् । 'कृष्णं कृष्यतेर्निकृष्टो वर्णः' ( निरु. २. २० ) इति यास्कः । कीदृशी[1] सा[1] । vअर्या अरणीया पूजनीया vविहायाः विविधगमनयुक्ता महती वा । विहाया इति महन्नाम 'विहायाः यह्वः' ( नि. ३. ३. १२ ) इति तन्नामसु पाठात् । vमानुषाय vक्षयाय मनुष्याणां निवासाय vचिकित्सन्ती अन्धकारनिवारणरूपां चिकित्सां कुर्वती तमो निवारयन्तीत्यर्थः[2]॥

पूर्वा विश्वस्माद्भुवनादबोधि जयन्ती वाजं बृहती सनुत्री ।
उच्चा व्यख्यद्युवतिः पुनर्भूरोषा अगन्प्रथमा पूर्वहूतौ ॥ २ ॥

पूर्वा । विश्वस्मात् । भुवनात् । अबोधि । जयन्ती । वाजम् । बृहती । सनुत्री ।
उच्चा । वि । अख्यत् । युवतिः । पुनःऽभूः । आ । उषाः । अगन् । प्रथमा । पूर्वऽहूतौ ॥२॥

vविश्वस्मात् vभुवनात् सर्वस्मात् सुप्तात्भूतजातात् vपूर्वा प्रथमा सती इयम् उषाः vअबोधि बुद्धा अभूत् । उषःकालमवगत्य हि पश्चात् सर्वे प्राणिनः प्रतिबुध्यन्ते । कीदृशी सा । vवाजं गमनशीलं प्रकाशं[3] निर्वर्त्य[3] अन्धकारं vजयन्ती पराभवं कुर्वती । यद्वा । वाजशब्दोऽन्ननामसु पठितत्वादन्ननाम । 'अन्नं वै वाजः' ( श. ब्रा. ९. ३. ४. १; तै. ब्रा. १. ३. ६. २ ) इति श्रुतेश्च । यजमानार्थम् अन्नं संपादयन्ती । vबृहती महती vसनुत्री सर्वं जगत्संभजन्ती दात्री वा प्रकाशस्य । किंच सा उषाः vउच्चा उच्चैरुन्नता सती vव्यख्यत् विचष्टे सर्वं जगत् पश्यति[4] इत्यर्थः । कीदृशी सा । vयुवतिः मिश्रणशीला नित्ययौवना वा vपुनर्भूः पुनःपुनर्भवनशीला प्रतिदिनं वर्तमानत्वात्[5] । सा vउषाः vपूर्वहूतौ सत्यां vप्रथमा मुख्या प्रकृष्टा सती vआ vअगन् देवयजनदेशं प्रत्यागच्छति । 'प्रथम इति मुख्यनाम प्रतमो भवति' ( निरु. २. २२ ) इति यास्कः । इतरदेवेभ्यः पूर्वमाहूता सती शीघ्रमेवागच्छतीत्यर्थः ॥

यदद्य भागं विभजासि नृभ्य उषो देवि मर्त्यत्रा सुजाते ।
देवो नो अत्र सविता दमूना अनागसो वोचति सूर्याय ॥ ३ ॥

यत् । अद्य । भागम् । विऽभजासि । नृऽभ्यः । उषः । देवि । मर्त्यऽत्रा । सुऽजाते ।
देवः । नः । अत्र । सविता । दमूनाः । अनागसः । वोचति । सूर्याय ॥ ३ ॥

vसुजाते शोभनजनने vदेवि देवनशीले हे vउषः उषःकालाभिमानिदेवते[6] vमर्त्यत्रा मनुष्याणां पालयित्री त्वम् vअद्य अस्मिन् काले vनृभ्यः मनुष्येभ्यः vयत् यं vभागं भजनीयं स्वकीयप्रकाशस्यांशं

---

१. क्ष-ञ-ट–किं कुर्वती । २. क्ष-ञ-ट–'निवारयन्तीत्यर्थः' इत्यस्यानन्तरं 'गुप्तिज्किद्भ्यः इति व्याधिप्रतिकारे सन्' इत्यधिकम् । ३. क्ष-ञ-ट–प्रकाशनिवर्त्यम् । ४. क्ष-ञ-ट–पश्यति । मन्त्रेघसेति च्लेर्लुक् । ५. क्ष-ञ-ट–पुनर्वर्तमानत्वात् । ६. क्ष-ञ-ट–उषःकालाभिमानिदेवि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]विभजासि[1] विभज्य ददासि। यद्वा। मर्त्यत्रा मर्त्येषु मध्ये नृभ्यः[2] यजमानेभ्यः[3] देवानां भागं विभज्य ददासि[4]। उषसि प्रवृत्तायां हविषो दीयमानत्वात् उषसो दातृत्वमुपचर्यते। [V]अत्र अस्मिन् भागविषये [V]दमूनाः यजमानेभ्यः अभिमतफलदानमनाः[5]। 'दमूना दममना वा दानमना वा दान्तमना वा' (निरु. ४. ४) इति निरुक्तवचनम्। तादृशः [V]सविता प्रेरकः [V]देवः [V]नः अस्मान् [V]अनागसः [V]वोचति अपापान् यागयोग्यान् ब्रवीतु अनुगृह्णातु इत्यर्थः[6]। किमर्थम्। [V]सूर्याय अस्मद्यागदेशं प्रति सूर्यस्यागमनार्थम्॥

गृहंगृहमहना यात्यच्छा दिवेदिवे अधि नामा दधाना।
सिषासन्ती द्योतना शश्वदागादग्रमग्रमिद्भजते वसूनाम्॥ ४॥

गृहम्ऽगृहम्। अहना। याति। अच्छ। दिवेऽदिवे। अधि। नाम। दधाना।
सिसासन्ती। द्योतना। शश्वत्। आ। अगात्। अग्रम्ऽअग्रम्। इत्। भजते। वसूनाम्॥४॥

[V]अहना। उषो नामैतत्। 'अहना द्योतना' (नि. १. ८. ११) इति तन्नामसु पाठात्। सा देवी [V]दिवेदिवे प्रत्यहम्। 'दिवेदिवे द्यविद्यवि' (नि. १. ९. ११) इति अहर्नामसु पाठात्। [V]गृहंगृहं तत्तद्यज्ञगृहम् [V]अच्छ आभिमुख्येन [V]याति गच्छति। कीदृशी[7]। [V]अधि अधिकं [V]नाम नमनं प्रह्वत्वं प्रतिगृहम्[8] उद्योगं प्रकाशनरूपं [V]दधाना धारयन्ती। यद्वा। अधि दधाना अधिकं धारयन्ती। किंच [V]सिषासन्ती संभक्तुमिच्छन्ती [V]द्योतना कृत्स्नं जगत् द्योतनशीला [V]शश्वत् प्रतिदिनम् [V]आगात् आगच्छति। पूर्वं यातीत्युक्तत्वात् पुनः आगादिति वचनमावश्यकत्वद्योतनार्थम्। आगत्य च [V]वसूनां धनानां हविर्लक्षणानाम् [V]अग्रमग्रमित् तत्तच्छ्रेष्ठभागं[9] [V]भजते सेवते स्वीकरोतीत्यर्थः॥

भगस्य स्वसा वरुणस्य जामिरुषः सूनृते प्रथमा जरस्व।
पश्चा स दध्या यो अघस्य धाता जयेम तं दक्षिणया रथेन॥ ५॥

भगस्य। स्वसा। वरुणस्य। जामिः। उषः। सूनृते। प्रथमा। जरस्व।
पश्चा। सः। दध्याः। यः। अघस्य। धाता। जयेम। तम्। दक्षिणया। रथेन॥ ५॥

[V]सूनृते सुष्ठु मनुष्याणां नेत्रि [V]उषः हे उपोदेवते [V]भगस्य सर्वैर्भजनीयस्य आदित्यस्य [V]स्वसा असि स्वसृस्थानीयासि। तेन सहोत्पद्यमानत्वात् तद्वत्पूज्येत्यर्थः। तथा [V]वरुणस्य तमोवारकस्य सवितुर्देवस्य [V]जामिः[10] असि भगिनीस्थानीयासि[10]। एकस्मिन्नेव स्थाने उत्पद्यमानत्वात्। जनयन्त्युत्पादयन्ति

---

१. च-फ-विभजासि विभजसि। २. झ-नृभ्यो नेतृभ्यः; ३. क्ष-ञ-ट-नतृभ्येः। ४. क्ष-ञ-ट-'ददासि' इत्यस्यानन्तरं 'देवमनुष्येत्यादिना त्रन्' इत्यधिकम्। ५. क्ष-ञ-ट-अभिमतफलदानमनाः यद्वा दान्तमनाः। ६. क्ष-ञ-ट-इत्यर्थः। अव्ययपूर्वपदप्रकृतिस्वरत्वम्। ७. क्ष-ञ-ट-कीदृशी सा ८. क्ष-ञ-ट-अप्रतिहतम्। ९. क्ष-ञ-ट-तत्तच्छ्रेष्ठं भागम् १०, त-जामिः असि भगिनी यस्यादित्यस्य स्वसा असि स्वसृस्थानीयासि।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अस्यामपत्यम् अन्ये इति जामिः। यद्वा। जमति गच्छति स्वोत्पत्तिस्थानात् अन्यत्रेति। उक्तनिर्वचनद्वयम् अभिप्रेत्य यास्क आह–' न जामये भगिन्यै जामिरन्येऽस्यां जनयन्ति जामपत्यं जमतेर्वा स्याद्गतिकर्मणो निर्गमनप्राया भवति ' ( निरु. ३. ६ ) इति। तादृशी त्वं ᵛप्रथमा इतरदेवेभ्यः पूर्वा उत्कृष्टा वा सती ᵛजरस्व स्तुता भव। जरतिः स्तुत्यर्थः। ' जरा स्तुतिर्जरतेः स्तुतिकर्मणः ' ( निरु. १०. ८ ) इति यास्कः। ᵛपश्चा पश्चात् त्वत्प्रीत्यनन्तरं ᵛयः ᵛअघस्य ᵛधाता यः कश्चिद्दुःखस्य तदुत्पादकपापस्य वा धारयितास्ति ᵛसः ᵛदध्याः गच्छतु। वचनव्यत्ययः। दध्यतिर्गत्यर्थः। ' दध्यति दध्नोति ' ( नि. २. १४. ६१) इति गत्यर्थेषु पाठात्। यदि स पापी बलीयान् ᵛतं ᵛदक्षिणया प्रवृद्धया सहायभूतया त्वया ᵛरथेन अस्मदीयरथादिसाधनेन च ᵛजयेम ॥ ॥ ४ ॥

उदीरतां सूनृता उत्पुरंधीरुदग्नयः शुशुचानासो अस्थुः ।
स्पार्हा वसूनि तमसापगूळ्हाविष्कृण्वन्त्युषसो विभातीः ॥ ६ ॥

उत्। ईरताम्। सूनृताः। उत्। पुरंऽधीः। उत्। अग्नयः। शुशुचानासः। अस्थुः। स्पार्हा। वसूनि। तमसा। अपऽगूळ्हा। आविः। कृण्वन्ति। उषसः। विऽभातीः ॥ ६ ॥

ᵛसूनृताः प्रियसत्यात्मिकाः वाचः[1] ᵛउदीरताम् उद्गच्छन्तु। हे ऋत्विजः उत्कृष्टं यथा भवति तथा स्तोत्रं प्रवर्तयध्वम्[2]। तथा ᵛपुरंधीः पुरंधयः। पुरं शरीरं यासु धीयते याभिर्वा ताः पुरंधयः प्रज्ञाः प्रयोगविषयाः। ताः अपि उन्मिषन्तु। प्रज्ञोपलक्षितानि कर्माणि प्रवर्तन्तामित्यर्थः। यद्यपि प्राणवायुना शरीरं धार्यते तथापि ' यो वै प्राणः सा प्रज्ञा या वा प्रज्ञा स प्राणः ' ( कौ. उ. ३. ३ ) इति श्रुतेः प्राणप्रज्ञयोरेकत्वात् प्रज्ञायाः शरीरधारणमविरुद्धम्। तथा ᵛअग्नयः आहवनीयाद्याः ᵛशुशुचानासः अत्यन्तं दीप्यमानाः ᵛउत् ᵛअस्थुः उत्तिष्ठन्तु[3] प्रज्वलयन्तु[4] इत्यर्थः। किमर्थमेवमिति तदुच्यते। यतः ᵛविभातीः विविधं भासमानाः ᵛउषसः उषोदेवताः ᵛतमसा अपगूळ्हानि[5] अन्धकारेणात्यन्तं गोपितानि ᵛस्पार्हा स्पृहणीयानि ᵛवसूनि वासयोग्यानि यज्ञसाधनभूतहविरादीनि ᵛआविष्कृण्वन्ति यथावस्तु प्रकटीकुर्वन्ति[6] तस्मात् स्तोत्रादिकं कुर्वन्त्वित्यर्थः ॥

अपान्यदेत्यभ्यन्यदेति विषुरूपे अहनी सं चरेते ।
परिक्षितोस्तमो अन्या गुहाकरद्यौदुषाः शोशुचता रथेन ॥ ७ ॥

अप। अन्यत्। एति। अभि। अन्यत्। एति। विषुरूपे इति विषुऽरूपे। अहनी इति। सम्। चरेते इति ॥ परिऽक्षितोः। तमः। अन्या। गुहा। अकः। अद्यौत्। उषाः। शोशुचता। रथेन ॥७॥

इदानीम् अहोरात्रस्तुतिद्वारा उषाः स्तूयते। ᵛविषुरूपे वक्ष्यमाणप्रकारेण नानारूपे ᵛअहनी अहश्च रात्रिश्चोभे ᵛसं ᵛचरेते। समित्येकीभावे। सहैव अव्यवधानेन चरतः। अत्राह्नः साहचर्यात्

---

१. क्ष-ञ-ट–स्तुतिरूपा वाचः। २. क्ष-ञ-ट–प्रवर्धयध्वम्। ईर गतौ। अदादिकः। ३. क्ष-ञ-ट–उद्गता भवन्तु। ४. च-फ–प्रज्वलन्तु। ५. च-फ–अपगूळ्हा अपगूळ्हानि। ६. क्ष-ञ-ट–प्रकाशीकुर्वन्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तत्प्रतियोगित्वाच्च रात्रिरपि अहः इत्युच्यते। उत्तरत्र मन्त्रान्तरे अयमेवार्थः स्पष्टः[1] आम्नातः 'अहश्च कृष्णमहरर्जुनं च वि वर्तेते रजसी वेद्याभिः' ( ऋ. सं. ६. ९. १ ) इति। तयोर्मध्ये vअन्यत् रात्रिरूपमहः vअप vएति अपगच्छति प्रतिलोमं गच्छति वा। 'अपेत्येतस्य प्रातिलोम्यम्' ( निरु. १. ३ ) इति यास्कः। vअन्यत् च दिवसाख्यमहः vअभि vएति आभिमुख्येन गच्छति। 'अभीत्याभिमुख्यम्' ( निरु. १. ३ ) इति यास्कः[2]। रात्र्यां[3] प्रतिनिवृत्तायाम् अहः अभिमुखमागच्छतीत्यर्थः। विषुरूपे सं चरेते इति यदुक्तं तदेव स्पष्टीक्रियते। vपरिक्षितोः पर्यायेण निवसतोः परिक्षपयतोर्वा। प्राणिनाम् अहःसु अतीतेषु आयुषः क्षयात् परिक्षपणं प्रसिद्धम्। तयोर्मध्ये vअन्या रात्रिः vतमः तमोरूपा vगुहा[4] पदार्थानां गूहनम्[5] vअकः करोति[5]। अन्या अहरेकदेशभूता च vउषाः vशोशुचता भृशं दीप्तेन vरथेन vअद्यौत्। द्योतते प्रकाशते प्रकाशयति वा सर्वम्। रात्रिः तमोरूपत्वात्[6] सर्वं जगत् आवृणोति। उषास्तु सर्वान् भावान् प्रकाशयति इत्युषसः स्तुतिः॥

सदृशीरद्य सदृशीरिदु श्वो दीर्घं सचन्ते वरुणस्य धाम।
अनवद्यास्त्रिंशतं योजनान्येकैका क्रतुं परि यन्ति सद्यः॥ ८॥

सऽदृशीः। अद्य। सऽदृशीः। इत्। ऊँ इति। श्वः। दीर्घम्। सचन्ते। वरुणस्य। धाम।
अनवद्याः। त्रिंशतम्। योजनानि। एकाऽएका। क्रतुम्। परि। यन्ति। सद्यः॥ ८॥

vअद्य अस्मिन्नहनि vसदृशीः vइत्[7] परस्परं सदृश्यः[8] एव। तथा vश्वः इत् परस्मिन्नप्यहनि vसदृशीः परस्परं सदृश्य[9] एव। उशब्दोऽपिशब्दार्थः। इच्छब्द एवार्थः[10]। अद्यतन्योऽपि श्वस्तनीभिः[11] सदृश्यः श्वस्तन्यश्च अद्यतनीभिः[12]। एवम् अहरन्तरेण सादृश्यम्। कथं सादृश्यमिति तदुपपाद्यते। यदा नक्षत्राणि न दृश्यन्ते सूर्यश्च नोदेति उषःकालः[13]। स चैकविंशतिघटिकाभिः षड्विंशतिपराभिश्च संमितः। सूर्यो हि प्रतिदिनम् एकोनषष्ट्यधिकपञ्चसहस्रयोजनानि मेरुं प्रादक्षिण्येन परिभ्रमति। तथा सति यत्र यत्र लङ्कादिभूप्रदेशे सूर्यो गच्छति तस्य तस्य पुरस्तात् त्रिंशद्योजनम् उषाः अपि गच्छति। सूर्यो यस्मिन् देशे गच्छति तत्र[14] त्रिंशद्योजनं पुरस्ताद्देशस्थितानामुदितो दृश्यते। एवं सर्वप्रदेशेष्वपि। तथा उषाः अपि यत्र गच्छति ततः पुरस्तात् त्रिंशद्योजनभूभागवर्तिनामुदिता दृश्यते। एवं लङ्कादिसर्वप्रदेशस्थितानामप्युषस उदयोऽवगन्तव्यः। एवं च सति एकस्मिन् भूभागे यावत्कालं यथोषाः प्रकाशयति तथा भूभागान्तरेऽपि तावन्तं कालं प्रकाशयति[15]। एवम् उक्तरीत्या[16] एकस्मिन्नेवाहनि सर्वप्रदेशवर्तिनामप्युषसः सदृश्यः। प्रदेशबाहुल्यमपेक्ष्य उषसां बहुत्वात् बहुवचनम्। एवमेकरूपाः उषसः, vअनवद्याः शुद्धाः। तासामुदयात्[17]

---

१. क्ष-ञ-ट–स्पष्टम्। २. क्ष-ञ-ट–इति यास्कः। एकान्याभ्यामिति प्रथमा तिङ्विभक्तिर्न निहन्यते। ३. क्ष-ञ-ट–रात्रौ। ४. झ–गुहा गुहां गूहनम्; क्ष-ञ-ट–गुहा। गुहा गोपनीयानां गूहनम्। ५ क्ष-ञ-ट–'करोति' इत्यस्यानन्तरं 'गुहायां तमस्तमोरूपं करोति कृत्स्नं जगत्। अकः इत्यत्र एकान्याभ्यामित्यत्र विभाषेत्यनुवृत्तेर्निघाताभावाभावः' इत्यधिकम्। ६. ज-फ-व-ष–तमोभूत्वा। ७. क्ष-ञ-ट– उ। ८. क्ष-ञ-ट–सदृशाः। ९. क्ष-ञ-ट–सदृशा उ। १०. क्ष-ञ-ट–एवकारार्थः। ११. क्ष-ञ-ट–श्वस्तनाभिः। १२. क्ष-ञ-ट–अद्यतनाभिः। १३. झ–स उषःकालः; क्ष-ञ-ट–स उषसः कालः। १४. क्ष-ञ-ट–ततः। १५. क्ष-ञ-ट–तथैव प्रकाशयति। १६. क-क्ष-ञ-ट-ण-त-व–उक्तनीत्या। १७. क्ष-ञ-ट–तासामप्युदयात्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सर्वे भावा अनवद्या भविष्यन्ति किमु वक्तव्यं तासामनवद्यत्वे । vदीर्घम् उक्तरीत्या[1] अत्यन्तमायतं vवरुणस्य तमोनिवारकस्य सूर्यस्य vधाम स्थानं मेरुवलयं vसचन्ते प्रतिदिनं सेवन्ते। कियदूरमिति तदुच्यते । vत्रिंशतं vयोजनानि त्रिंशद्योजनानि पुरतः । सूर्यो यत्र यत्रोदेति ततस्ततस्त्रिंशद्योजनं पुरस्तादुद्यन्तीत्यर्थः । किंच आसां मध्ये vएकैका उषा लङ्कायामेवैकभूभाग-वर्तिनां vऋतुं गमनागमनादिरूपं कर्म तद्विषयां प्रज्ञां वा । तथा च निरुक्तं–' ऋतुं दधित्राः कर्म वा प्रज्ञां वा ' ( निरु. २. २८ ) इति । vसद्यः तदानीमेव स्वोदयकाले एव vपरि[2] vयन्ति परितो गच्छन्ति । निर्वहन्तीत्यर्थः[3] । तत्तद्भूभागविशेषेण सूर्यस्योदयो ज्योतिःशास्त्रे प्रदर्शितः । ' उदयो यो लङ्कायां सोऽस्तमयः सवितुरेव सिद्धपुरे । मध्याह्नो यवकोट्यां रोमकविषयेऽर्धरात्रः स्यात् ' ( आर्य. ४. १३ ) इति ॥

जानत्यह्नः प्रथमस्य नाम शुक्रा कृष्णादजनिष्ट श्वितीची ।
ऋतस्य योषा न मिनाति धामाहरहर्निष्कृतमाचरन्ती ॥ ९ ॥

जानती । अह्नः । प्रथमस्य । नाम । शुक्रा । कृष्णात् । अजनिष्ट । श्वितीची ।
ऋतस्य । योषा । न । मिनाति । धाम । अहःऽअहः । निःऽकृतम् । आऽचरन्ती ॥ ९ ॥

उषाः vप्रथमस्य मुख्यस्य प्रथमानस्य वा vअह्नः दिवसस्य vनाम नमनमागमनं vजानती अव-गच्छन्ती प्राणिनां प्रज्ञापयन्तीत्यर्थः । सा उषाः vशुक्रा स्वतो दीप्ता अत एव vश्वितीची श्वैत्यं गच्छन्ती प्रकाशं प्रामुवती[4] कृष्णात् निकृष्टात् तमसः सकाशात् vअजनिष्ट प्रादुर्भवति । यद्यपि तमसः सकाशान्नोत्पद्यते तथापि तदनन्तरभावित्वात् तत उत्पद्यते इत्युपचर्यते । उत्पन्ना सा[5] vऋतस्य[6] सत्यभूतस्यादित्यस्य vधाम तेजोयुक्तं स्थानं vयोषा मिश्रयन्ती[6] vन vमिनाति न हिनस्ति तदीयं तेजो न पराभवति । अपि तु vअहरहः सर्वेष्वहःसु vनिष्कृतमाचरन्ती अलंकारशोभां कुर्वती । यद्वा । ऋतस्य सत्यभूतस्य यज्ञस्य धाम देवयजनाख्यं स्थानं योषा मिश्रणशीला सती न मिनाति न हिनस्ति[7] । किंतु अहरहः सर्वेषु यागदिवसेषु निष्कृतं हविरादीनां प्रकाशनरूपमलंकारम् आचरन्ती कुर्वती तादृश्युषा अजनिष्टेति पूर्वत्रान्वयः[8] ॥

---

१. क्ष-च-ज-झ-ञ-ट-फ-व–उक्तनीत्या । २. क्ष-ञ-ट–उषसः परि । ३. क्ष-ञ-ट–' निर्वहन्तीत्यर्थः ' इत्यस्यानन्तरम् ' एकैकेत्यत्र क्रियासमभिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यमिति द्विर्भावः ' इत्यधिकम् । ४. क्ष-ञ-ट–'प्रापुवती' इत्यस्यानन्तरं ' वृषादिभ्यः इति ऋ ( ? ) श्वितिमञ्चतीति ऋत्विगित्यादिना क्विनि नकारा-कारयोर्लुप्तयोः पूर्वपदस्य चौ इति दीर्घः । उदात्तनिवृत्तिस्वरेण शप उदात्तत्वम् ' इत्यधिकम् । ।५. क्ष-ञ-ट–सती। ६. ज्ञ–ऋतस्य भूतयज्ञस्य धाम देवयजनाख्यं स्थानं योषा मिश्रणशीला सती । ७. क्ष-ञ-ट–' हिनस्ति ' इत्यस्यानन्तरं ' मीङ् हिंसायाम् । मीनातेर्निगमे इति ह्रस्वत्वम् ' इत्यधिकम् । ८. क्ष-ञ-ट–' पूर्वत्रान्वयः ' इत्यस्यानन्तरं ' निष्कृतम् । कर्मणि निष्ठा । प्रवृद्धादीनां च इत्युत्तरपदाद्युदात्तत्वम् ' इत्यधिकम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कन्येव तन्वा३ शाशदानाँ एषि देवि देवमियक्षमाणम् ।
संस्मयमाना युवतिः पुरस्तादाविर्वक्षांसि कृणुषे विभाती ॥ १० ॥

कन्याऽइव । तन्वा । शाशदाना । एषि । देवि । देवम् । इयक्षमाणम् ।
सम्ऽस्मयमाना । युवतिः । पुरस्तात् । आविः । वक्षांसि । कृणुषे । विऽभाती ॥ १० ॥

[v]तन्वा शरीरेण [v]शाशदाना शाशाद्यमाना स्पष्टतां प्राप्नुवती । ' शाशदानः शाशाद्यमानः ' ( निरु. ६. १६ ) इति यास्कः । [v]कन्येव कमनीया कन्यकेव । ' कन्या कमनीया भवति क्वेयं नेतव्येति वा ' ( निरु. ४. १५ ) इति यास्कः । सा यथा जनान्तिके विवसना संचरति तथा हे उषस्त्वं कन्या कमनीया अप्रगल्भा सती तन्वा शरीरेण शाशदाना स्पष्टतां गच्छन्ती दृश्यसे । पश्चात् प्रगल्भा सती हे [v]देवि देवनशीले [v]इयक्षमाणं यष्टुमिच्छन्तम् अभिमतं[1] दातुमिच्छन्तं वा[1] [v]देवं द्योतनस्वभावं सूर्यरूपं प्रियम् [v]एषि गच्छसि । ततः पश्चात् [v]युवतिः यौवनोपेता सती [v]पुरस्तात् पत्युः सूर्यस्य पुरतः [v]संस्मयमाना सम्[2] ईषत् हसन्ती हास्यं कुर्वती[2] [v]विभाती अत्यन्तं भासमाना [v]वक्षांसि वक्षसोपलक्षितानवयवान् [v]आविः [v]कृणुषे प्रकटीकरोषि[3] । यद्वा । युवतिरिति लुप्तोपमा । यथा लोके प्रगल्भा योषित् पुरस्तात् प्रियतमस्य पुरतः संस्मयमाना दन्तप्रदर्शनाय ईषद्धसनं कुर्वती वक्षांसि वक्षसोपलक्षितानि गोप्यानि बाहुमूलस्तनादीनि आविष्करोति तथा त्वमपीत्यर्थः । यद्वा । पुरस्तात् पूर्वस्यां दिशि संस्मयमाना स्मितोपमप्रकाशं कुर्वती युवतिः सर्वेषु भावेषु मिश्रणशीला वक्षांसि । वक्ष इति रूपनाम । दन्तस्थानीयानि नीलपीतादीनि रूपाण्याविष्करोषि ॥ ॥ ५ ॥

सुसंकाशा मातृमृष्टेव योषाविस्तन्वं कृणुषे दृशे कम् ।
भद्रा त्वमुषो वितरं व्युच्छ न तत्ते अन्या उषसो नशन्त ॥ ११ ॥

सुऽसंकाशा । मातृमृष्टाऽइव । योषा । आविः । तन्वम् । कृणुषे । दृशे । कम् ।
भद्रा । त्वम् । उषः । विऽतरम् । वि । उच्छ । न । तत् । ते । अन्याः । उषसः । नशन्त ॥ ११ ॥

हे उषोदेवि [v]मातृमृष्टा मातृभिर्जननीभिः शुद्धीकृता [v]योषा इव [v]सुसंकाशा अत्यर्थं प्रकाशमाना त्वं [v]तन्वं स्वकीयां तनुं [v]दृशे सर्वेषां दर्शनाय[4] [v]आविः [v]कृणुषे प्रकटयसि[5] । यथा लोके मात्रादिना स्वलंकृता अत्यन्तं शोभना[6] सती स्वकीयं लावण्योपेतं सर्वशरीरं[7] दर्शनायाविष्करोति तद्वत्त्वमपीत्यर्थः । अत्र [v]कम् इति पादपूरणः अत्र[8] विशेषस्याभावात्[8] ' शिशिरं जीवनाय कम् ' इतिवत् । तथा च यास्काचार्यः–' मिताक्षरेष्वनर्थकाः कमीमिद्धिति ' ( निरु. १. ९ ) इति । यद्वा । कमिति सुखवचनः । सुखं यथा भवति तथा आविष्कृणुषे इत्यर्थः । हे [v]उषः यत एवं करोषि अतः

---

१. क्ष-ञ-ट–संगच्छन्तं वा । यजतेः सनि छान्दसं यकारस्य संप्रसारणम् । २. क्ष-ञ-ट–सम्यगीषद्धसनं कुर्वती । ३. क्ष-ञ-ट–प्रकाशीकरोषि । ४. क्ष-ञ-ट–' दर्शनाय ' इत्यस्यानन्तरं ' दृशे विख्ये च इति निपात्यते ' इत्यधिकम् । ५. क्ष-ञ-ट–प्रकाशयसि । ६. क्ष-ञ-ट–शोभमाना । ७. क्ष-ञ-ट–शरीरं सर्वेषाम् । ८. क्ष-ञ-ट– अर्थविशेषस्याभावात् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]भद्रा कल्याणशीला स्तुत्या [v]त्वं [v]वितरं [v]व्युच्छ आवरकमन्धकारं[1] विप्रकृष्टं यथा भवति तथा विवासय[1]। अत्र यद्यपि विशेषो न श्रुतस्तथापि प्रकाशनिवर्त्यत्वात् परिहरणीयत्वाच्च व्युदसनीयं तम एव इति गम्यते। किंच [v]ते तव [v]तत् व्युदसनम् [v]अन्याः [v]उषसः अतीताः आगामिन्यश्च [v]न [v]नशन्त न व्याप्नुवन्ति तथा व्युच्छेति भावः। नशिर्व्याप्तिकर्मा। 'इन्वति[2] ननक्ष' इति[2] व्याप्तिकर्मसु पाठात्॥

अश्वावतीर्गोमतीर्विश्ववारा यतमाना रश्मिभिः सूर्यस्य।
परा च यन्ति पुनरा च यन्ति भद्रा नाम वहमाना उषासः॥ १२॥

अश्वऽवतीः। गोऽमतीः। विश्वऽवाराः। यतमानाः। रश्मिऽभिः। सूर्यस्य।
परा। च। यन्ति। पुनः। आ। च। यन्ति। भद्रा। नाम। वहमानाः। उषसः॥ १२॥

[v]अश्वावतीः अश्ववत्यो बहुभिरश्वैस्तद्वत्यः तथा [v]गोमतीः बहुभिर्गोभिस्तद्वत्यः [v]विश्ववाराः विश्वे वाराः वरणीयाः कालाः यासां ताः तथोक्ताः। सार्वकालीना इत्यर्थः। यद्वा। विश्वे वरितारो यासु ताः विश्ववाराः। विश्वैर्वरणीया इत्यर्थः[3]। [v]सूर्यस्य [v]रश्मिभिः [v]यतमानाः सूर्यरश्मिभिः साकं तमोनिवारणाय प्रयत्नं कुर्वाणाः। यद्यपि सूर्यरश्मय एव जगत्प्रकाशनाय प्रभवन्ति तथापि सूर्योदयात् पूर्वं तमोनिवारणस्यापेक्षितत्वात् तासामपि प्रयत्नमविरुद्धम्[4]। रश्मिदेवताः[5] अपि[6] प्रकाशिकाः[6] इत्यर्थः। किंच [v]भद्रा भद्रं कल्याणं स्तुत्यं वा [v]नाम नमनं सर्वजनानुकूल्यं [v]वहमानाः धारयमाणाः [v]उषासः उषोदेवताः [v]परा [v]च [v]यन्ति परायन्ति[7] च[7]। तथा [v]पुनरा [v]च [v]यन्ति पुनरायन्ति च। परस्परापेक्षया उभयत्र चशब्दः। या एवातीतेषु दिनेषु गताः[8] ता एव पुनःपुनर्दिनान्तरेषु अपि आयन्ति। जगन्निर्वाहाय प्रतिदिनं गतागतं कुर्वन्तीत्यर्थः॥

ऋतस्य रश्मिमनुयच्छमाना भद्रंभद्रं क्रतुमस्मासु धेहि।
उषो नो अद्य सुहवा व्युच्छास्मासु रायो मघवत्सु च स्युः॥ १३॥

ऋतस्य। रश्मिम्। अनुऽयच्छमाना। भद्रम्ऽभद्रम्। क्रतुम्। अस्मासु। धेहि।
उषः। नः। अद्य। सुऽहवा। वि। उच्छ। अस्मासु। रायः। मघवत्ऽसु। च। स्युरिति स्युः॥ १३॥

हे उषः [v]ऋतस्य सत्यभूतस्यादित्यस्य [v]रश्मिं रश्मीन् [v]अनुयच्छमाना आनुकूल्येन प्रवर्तमाना त्वं [v]भद्रंभद्रं [v]क्रतुं तत्तत्कल्याणं स्तुत्यं वा लौकिकं वैदिकं कर्म तद्विषयां प्रज्ञां वा [v]धेहि स्थापय। हे [v]उषः [v]नः अस्मदर्थं [v]सुहवा सुष्ठु आहूता[9] सती [v]व्युच्छ तमो विवासय प्रकाशं कुर्वित्यर्थः[10]। किमर्थ-

---

१. क्ष-ज-ट–विशिष्टतरं प्रकर्षेणास्माकमन्धकारं विवासय प्रकाशस्वेत्यर्थः। २ ज-व-ष–इन्वति नक्षतीति। ३. क्ष-ज-ट–' इत्यर्थः ' इत्यस्यानन्तरम् ' बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदान्तोदात्तत्वम् ' इत्यधिकम्। ४. च-फ–प्रयत्नमविरुद्धं कुर्वाणाः। ५. क्ष-ज-ट–रश्मिवदेव ताः। ६. च–अभिप्रकाशिकाः। ७. क्ष-ज-ट–चशब्दयोगादनिघातः। ८. क्ष-ज-ट–याताः। ९. क्ष-ज-ट–आह्वातव्या। १०. क्ष-ज-ट–' कुर्वित्यर्थः ' इत्यस्यानन्तरं ' ह्वयतेः बहुलं छन्दसीति प्रागेव प्रत्ययोत्पत्तेः संप्रसारणे कृते आकारान्तलक्षणस्य युवोऽप्रसक्तेः खलु कृदुत्तरपदप्रकृतिस्वरत्वेन लित्स्वरः। यद्वा। भावेऽनुपसर्गस्येति अप् संप्रसारणं च ' इत्यधिकम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मिति तदुच्यते । vमघवत्सु । मघमिति धननाम । हविर्लक्षणधनयुक्तेषु[1] vअस्मासु यजमानेषु vरायः vच vस्युः बहुविधानि धनानि संभवन्त्विति पूर्वोक्तेन क्रतुना सह समुच्चयार्थः चशब्दः ॥ ॥ ६ ॥

' उषा उच्छन्ती ' इति त्रयोदशर्चं चतुर्थं सूक्तं दैर्घतमसः कक्षीवत आर्षं त्रैष्टुभमुषस्यम् । ' उषा उच्छन्ती ' इत्यनुक्रान्तम् । विनियोगस्तु पूर्वसूक्ते एवोक्तः ॥

उषा उच्छन्ती समिधाने अग्ना उद्यन्त्सूर्य उर्विया ज्योतिरश्रेत् ।
देवो नो अत्र सविता न्वर्थं प्रासावीद्द्विपत्प्र चतुष्पदित्यै ॥ १ ॥

उषाः । उच्छन्ती । सम्ऽइधाने । अग्नौ । उत्ऽयन् । सूर्यः । उर्विया । ज्योतिः । अश्रेत् ।
देवः । नः । अत्र । सविता । नु । अर्थम् । प्र । असावीत् । द्विऽपत् । प्र । चतुःऽपत् । इत्यै ॥१॥

एषा vउषाः vसमिधाने vअग्नौ । अग्नित्वसामान्येन एकवचनम् । अग्निषु समिध्यमानेषु सत्सु[2] । कर्मार्थे कर्तृप्रयोगः । उषःकाले हि आहवनीयादयः प्रज्वाल्यन्ते । vउच्छन्ती[3] तमो विवासयन्ती vउर्विया उरु बहुलं vज्योतिः प्रकाशम् vअश्रेत् सेवते प्रकाशते प्रकाशयति[4] वा सर्वम्[5] । किमिव । vउद्यन् vसूर्यः । उपमाप्रधाननिर्देशः[5] । उदितः सूर्य इव । सूर्यो यथा प्रकाशयति तथेत्यर्थः । vअत्र त्वदुदयानन्तरम् अस्मिन् कर्मणि वा vसविता vदेवः सर्वस्य प्रेरकः सूर्यः vनः अस्मदर्थं vनु क्षिप्रम् vअर्थम् । अर्थशब्दोऽत्र विशेषणवाची नपुंसकलिङ्गः । ' अयन्नर्थानि कृणवन्नपांसि ' ( ऋ. सं. ७. ६३. ४ ) इत्यादौ तथा दृष्टत्वात् । अरणीयं vद्विपत् पादद्वयोपेतं मनुष्यादिरूपं धनं vप्रासावीत् अनुजानातु[6] ददात्वित्यर्थः[6] । तथा vचतुष्पत् पादचतुष्टयोपेतं गवादिरूपं धनं प्रासावीत्[7] । किमर्थम् । vइत्यै द्विपदां चतुष्पदां च गमनाय । यद्वा । नः इत्यै इति संबन्धः । अस्मद्गमनागमनादिव्यापारायेत्यर्थः ॥

अमिनती दैव्यानि व्रतानि प्रमिनती मनुष्या युगानि ।
ईयुषीणामुपमा शश्वतीनामायतीनां प्रथमोषा व्यद्यौत् ॥ २ ॥

अमिनती । दैव्यानि । व्रतानि । प्रऽमिनती । मनुष्या । युगानि ।
ईयुषीणाम् । उपमा । शश्वतीनाम् । आऽयतीनाम् । प्रथमा । उषाः । वि । अद्यौत् ॥ २ ॥

---

१. क्ष-ञ-ट–हविर्लक्षणविशिष्टधनयुक्तेषु । २. क्ष-ञ-ट–सत्सु कर्मार्थम् । ३. क्ष-ञ-ट–यद्वा उच्छन्ती । ४. क्ष-ञ-ट–प्रकाशयति । इयाडियाजीकाराणामुपसंख्यानमिति इयाजादेशः । सर्वम् । ५. क्ष-ञ-ट–उपमाप्रधानोऽयं निर्देशः । ६. क्ष-ञ-ट–अनुजानातु । संख्यासुपूर्वस्येत्यन्त्यलोपः । अयस्मयादित्वेन भत्वात् पादः पत् इति पद्भावः । द्वित्रिभ्यां पाद्दन् इत्युत्तरपदान्तोदात्तत्वम् । ७. क्ष-ञ-ट–' प्रासावीत् ' इत्यस्यानन्तरम् ' इदुदुपधस्य चाप्रत्ययस्येति विसर्जनीयस्य षत्वम् ' इत्यधिकम् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vदैव्यानि vव्रतानि देवसंबन्धीनि अग्निहोत्रादीनि कर्माणि । व्रतमिति कर्मनाम, 'व्रतं कर्वरम्' ( नि. २. १. ७ ) इति तन्नामसु पाठात् । तानि कर्माणि vअमिनती अहिंसन्ती[1] भानप्रदानेनानुकूलं कुर्वती । तथा vमनुष्या मनुष्याणां[2] vयुगानि युगोपलक्षितान् निमेषादिकालावयवान् vप्रमिनती प्रकर्षेण हिंसन्ती[3] आयुः क्षपयन्तीत्यर्थः । यद्वा । युगानि युग्मानि परस्परसंयोगं प्रमिनती हिंसन्ती[4] वियोगं कुर्वतीत्यर्थः । उषःकाले सर्वे यथायथं स्वस्वव्यापाराय गच्छन्तीति प्रसिद्धम् । किंच vईयुषीणां गच्छन्तीनाम् अतीतानां vशश्वतीनां नित्यानाम् उषसाम् vउपमा । ताभिः सदृशीत्यर्थः । सादृश्यं च 'सदृशीरद्य सदृशीरिदु श्वः' ( ऋ. सं. १. १२३. ८ ) इत्यत्रोक्तम् । तथा vआयतीनां vप्रथमा आगामिनीनामुषसां प्रथमभाविनी सती vव्यद्यौत् विशेषेण प्रकाशते । यद्वा । ईयुषीणां गमनशीलानां पश्वादीनां शश्वतीनां संततिप्रवाहरूपेण नित्यानामुपमा । तद्वन्निस्येत्यर्थः । तथा आयतीनां राज्यवसानसमये उत्पद्यमानानां प्रज्ञावागादीनां प्रथमा प्रथमभाविनी । उषस्यागतायां वाचो बुद्धयश्च स्फुरन्तीति प्रसिद्धम् । तादृशी देवी व्यद्यौत् प्राणिनामनुग्रहाय द्योतते ॥

एषा दिवो दुहिता प्रत्यदर्शि ज्योतिर्वसाना समना पुरस्तात् ।
ऋतस्य पन्थामन्वेति साधु प्रजानतीव न दिशो मिनाति ॥ ३ ॥

एषा । दिवः । दुहिता । प्रति । अदर्शि । ज्योतिः । वसाना । समना । पुरस्तात् ।
ऋतस्य । पन्थाम् । अनु । एति । साधु । प्रजानतीऽइव । न । दिशः । मिनाति ॥ ३ ॥

vएषा उषाः vदिवः द्योतमानात्मकस्य[5] द्युलोकस्य vदुहिता दुहितृस्थानीया । ततः उत्पद्यमानत्वात् दुहितेत्युपचर्यते । vपुरस्तात् पूर्वस्यां दिशि vप्रति प्रत्येकम् vअदर्शि दृश्यते । सर्वेषामपि प्राणिनामाभिमुख्येन प्रकाशते इत्यर्थः । कीदृशी सा । vज्योतिर्वसाना तेजोरूपं वस्त्रमाच्छादयन्ती तेजसा प्रकाशयन्ती vसमना सम्यगानयित्री चेष्टयित्री ॥ अन्तर्भावितण्यर्थोऽयम् । यद्वा । सह युगपदेव मन्यतेऽवबुध्यते प्राणिभिरिति समना । व्युत्पत्त्यनवधारणादनवग्रहः ॥ सा तादृशी vऋतस्य आदित्यस्य vपन्थां पन्थानं मेरोः प्रान्तप्रदेशमनुक्रमेण vसाधु सम्यक् vएति गच्छति । सूर्यो यत्र यत्र गच्छति तत्र तत्र पुरस्तात् उषा अपि गच्छतीत्यर्थः । सैव विशेष्यते । vप्रजानतीव प्रियभूतस्य[6] सूर्यस्य मार्गो[7] मयापि गन्तव्यः[8] इति चेतयन्तीव । यथा लोके प्रियतमे अनुरागयुक्ता[9] काचित् भर्तारं[10] सर्वास्ववस्थासु न विमुञ्चति तथेयमपीत्यर्थः । किंच vदिशः प्रागादिकाः vन vमिनाति न हिनस्ति । किंतु उषा यत्र गच्छति सा प्राचीत्येवं प्रागादिव्यवहारं करोतीत्यर्थः ॥

उषो अदर्शि शुन्ध्युवो न वक्षो नोधाइवाविरकृत प्रियाणि ।
अह्नसन्न ससतो बोधयन्ती शश्वत्तमागात्पुनरेयुषीणाम् ॥ ४ ॥

उषो इति । अदर्शि । शुन्ध्युवः । न । वक्षः । नोधाःऽइव । आविः । अकृत । प्रियाणि ।
अह्नऽसत् । न । ससतः । बोधयन्ती । शश्वत्ऽतमा । आ । अगात् । पुनः । आऽईयुषीणाम् ॥४॥

---

१. क्ष-ञ-ट-न-अहिंसती । २. क्ष-ञ-ट-मनुष्याणाम् । षष्ठ्याः आकारः । ३. क्ष-ञ-ट-न-हिंसती । ४. क्ष-ञ-ट-न-हिंसती । ५. क्ष-ञ-ट-द्योतनात्मकस्य । ६. च-फ-प्रियतमस्य । ७. क्ष-ञ-ट-मार्गे मयापि गन्तव्यम् । ८. क्ष-ञ-ट-प्रियतमानुरागयुक्ता । ९. क्ष-च-ज्ञ-ञ-ट-न-फ-तं भर्तारम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

एषा उषाः vउपो इति निपातद्वयसमुदायात्मकः एको निपातः । सर्वैः समीपे एव vअदर्शि दृश्यते । तत्र दृष्टान्तः । vशुन्ध्युवो vन vवक्षः । अत्र नकारः उपमार्थीयः उपरिष्टात् प्रयुज्यमानत्वात् । यत्र तु प्रतिषेधो विवक्षितस्तत्र पुरस्तान्नकारः प्रयुज्यते । तथा च यास्कः—' पुरस्तादुपाचारस्तस्य यत्प्रतिषेधति ' ( नि. १.४ ) इति । तस्योदाहरणं–' नेन्द्रं देवममंसत ' ( ऋ. सं. १०. ८६. १ ) इति उपरिष्टादुपाचारस्तस्य येनोपमिमीते ' ( निरु. १. ४) इति । तस्योदाहरणं ' दुर्मदासो न सुरायाम् ' ( ऋ. सं. ८. २. १२ ) इति । शुन्ध्युः आदित्यः सर्वेषां शोधकत्वात् । तस्य वक्षः वक्षःस्थानीयो रश्मिसमूहः । स यथा प्रकाशमानो दृश्यते तथेत्यर्थः । यद्वा । शुन्ध्युरिति जलचरः श्वेतवर्णः पक्षिविशेषः । स यथा स्वकीयं वक्षः प्रकाशयन् दृश्यते तद्वदित्यर्थः । किंच vनोधाइव vप्रियाणि vआविरकृत । नवनं स्तोत्रं धारयतीति नोधाः । एतन्नामा महर्षिर्देवतास्तुतिव्याजेन नानाविधैर्मन्त्रैः प्रियाणि स्वमनीषितान्याविष्कृतवान् । तथैषापि स्वकीयानि सर्वलोकप्रियाणि तेजांस्याविरकरोत् । किंच vअश्वसन्न । अत्राप्युपमार्थीयो नकारः । अद्यते इति अश्व अन्नम् । तस्य पाकाय गृहे सीदति इति अश्वसत् पाचिका योषित् vससतः बोधयन्ती । सा यथा स्वपतः पुत्रादीन् भोजनाय बोधयति तद्वत् । यद्वा । अश्वेति गृहनाम, ' वरूथम् अश्व ' इति तन्नामसु पाठात् । तत्र सीदतीत्यश्वसत् जननी । सा यथा स्वपतः पुत्रादीन् उषःकाले प्रबोधयति तथा भुवनाख्ये गृहे सीदन्ती तत्रत्यान् प्राणिनः प्रबोधयन्ती इयमुषाः । vएयुषीणाम् आगमनशीलानां स्त्रीणां मध्ये vशश्वत्तमा पुनःपुनरागच्छति । प्रातर्नियतमागच्छन्तीनां वारयोषितां मध्ये स्वयमेका सती नियतम् आगच्छतीत्यभिप्रायः । अत्र निरुक्तम्–' उपादर्शि शुन्ध्युवः शुन्ध्युरादित्यो भवति शोधनात्तस्यैव वक्षो भासोऽध्यूळहमिदमपीतरद्वक्ष एतस्मादेवाध्यूळहं काये । शकुनिरपि शुन्ध्युरुच्यते शोधनादेवोदकचरो भवति । आपोऽपि शुन्ध्युव उच्यन्ते शोधनादेव । नोधा ऋषिर्भवति नवनं दधाति स यथा स्तुत्या कामानाविष्कुरुत एवमुषा रूपाण्याविष्कुरुते । अश्वसदश्वान्नं भवत्यश्वसादिनीति वान्नसानिनीति वा । ससतो बोधयन्ती शश्वत्तमागात्पुनरेयुषीणां स्वपतो बोधयन्ती शाश्वतिकतमागात्पुनरागामिनीनाम् ' ( निरु. ४. १६ ) इति ॥

पूर्वे अर्धे रजसो अस्यस्य गवां जनित्र्यकृत प्र केतुम् ।
व्यु प्रथते वितरं वरीय ओभा पृणन्ती पित्रोरुपस्था ॥ ५ ॥

पूर्वे । अर्धे । रजसः । अस्यस्य । गवाम् । जनित्री । अकृत । प्र । केतुम् ।
वि । ऊँ इति । प्रथते । विऽतरम् । वरीयः । आ । उभा । पृणन्ती । पित्रोः । उपऽस्था ॥ ५ ॥

vअस्यस्य व्यापनशीलस्य विस्तृतस्य vरजसः रञ्जकस्यान्तरिक्षलोकस्य । रजःशब्दोऽन्तरिक्षलोकवाची ' लोका रजांस्युच्यन्ते ' ( निरु. ४. १९ ) इति यास्केनोक्तत्वात् । तस्य vपूर्वे vअर्धे पूर्वस्मिन् भागे vजनित्री उत्पन्ना सती vगवां दिशां रश्मीनां वा vकेतुं प्रज्ञानं vप्र vअकृत प्रकर्षेण करोति । यद्वा । रजसः रञ्जकस्याह्नः । रजःशब्दोऽहर्वाची ' असृग्रहनी रजसी उच्येते ' ( निरु. ४. १९) इति यास्केनोक्तत्वात् । तस्य पूर्वेऽर्धे पूर्वस्मिन् भागे उषःकाले गवां वाचां जनित्री जनयित्री उत्पादयित्री । उषःकाले सर्वेषां प्राणिनां वाचः स्फुरन्तीति प्रसिद्धम् । यद्वा । अस्यस्य कर्मसु स्थितस्य जन्तोः केतुं गमनागमनादिरूपं कर्म । केतुरिति कर्मनाम, ' केतः केतुः ' इति तन्नामसु पाठात् । प्राकृत । प्रकर्षेण करोति । किंच vपित्रोः पालयित्र्योर्द्यावापृथिव्योः vउपस्था

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उपस्थे उत्सङ्गे अन्तरालप्रदेशे स्थित्वा vउभा उभे द्यावापृथिव्यौ vपृणन्ती स्वतेजसा पूरयन्ती। यद्वा। उभा उभयोः पित्रोरिति[1] संबन्धः। vवितरं विशिष्टतरं vवरीयः उरुतरमतिविस्तीर्णं यथा भवति तथा vव्यु vप्रथते विशेषेणैव[2] प्रख्याता भवति प्रकाशते इत्यर्थः। उशब्दः अवधारणार्थः पादपूरणो वा ' मिताक्षरेष्वनर्थकाः कमीमिद्धिति ' इति यास्केनोक्तत्वात्॥ ॥ ७ ॥

एवेदेषा पुरुतमा दृशे कं नाजामिं न परि वृणक्ति जामिम्।
अरेपसा तन्वा३ शाशदाना नार्भादीषते न महो विभाती ॥ ६ ॥

एव। इत्। एषा। पुरुऽतमा। दृशे। कम्। न। अजामिम्। न। परि। वृणक्ति। जामिम्।
अरेपसा। तन्वा। शाशदाना। न। अर्भात्। ईषते। न। महः। विऽभाती ॥ ६ ॥

vएषा उषाः vएवेत्। इच्छब्दः एवकारार्थः। एवमेव इदानीं भासमानप्रकारेणैव vपुरुतमा विपुलतमा अत्यन्तविस्तृता सती vअजामिं विजातीयं मनुष्यादिजातिं vन vपरि vवृणक्ति परितः सर्वतो न वर्जयति। तथा vजामिं सजातीयं देवजातिं vन परि वृणक्ति न परिवर्जयति। मनुष्यादिकं देवादिकं च तदुपलक्षितं लोकद्वयं वा कात्स्न्र्येन प्रकाशयतीत्यर्थः। किमर्थमिति तदुच्यते। vदृशे vकं सुखेन सर्वेषां दर्शनाय। सुखं यथा भवति तथा सर्वान् दर्शयितुं वा। किंच vअरेपसा अपापया निर्मलया vतन्वा शरीरेण vशाशदाना शाशाद्यमाना[3]। ' शाशदानः शाशाद्यमानः[4] ' ( निरु. ६. १६ ) इति यास्कः। स्पष्टतां गच्छन्तीत्यर्थः। vविभाती विशेषेण प्रकाशयन्ती सा vअर्भात् अल्पात् पुत्तिकादेः सकाशात् vन vईषते न गच्छति। तमपि प्रकाशयति। तथा vमहः महतो मेर्वादेः सकाशात् vन ईषते न गच्छति तमपि प्रकाशयति[5]। पूर्वं लोकद्वयं प्रकाशते इत्युक्तम्। इदानीम् अस्मिंल्लोके[6] परमाण्वादि पर्वतपर्यन्तं कृत्स्नं प्रकाशयतीत्यर्थः॥

अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम्।
जायेव पत्य उशती सुवासा उषा हस्रेव नि रिणीते अप्सः ॥ ७ ॥

अभ्राताऽइव। पुंसः। एति। प्रतीची। गर्तऽआरुगिव। सनये। धनानाम्।
जायाऽइव। पत्ये। उशती। सुऽवासाः। उषाः। हस्राऽइव। नि। रिणीते। अप्सः॥ ७॥

vअभ्रातेव भ्रातृरहितेव vपुंसः पित्रादीन् प्रति vप्रतीची स्वकीयस्थानात् प्रतिनिवृत्तमुखी सती vएति गच्छति। यथा लोके भ्रातृरहिता योषित् स्वोचितवासोऽलंकारादिलाभाय[7] पितॄन् एति। सति भ्रातरि स एव उचितप्रदानादिना सम्यक् तोषयति। तदभावात् पितरमेव प्राप्नोति। यद्वा। सति

---

१. क्ष-ञ-ट–पित्रोरित्यनेन। २. क्ष-ञ-ट–विशेषेण। ३. क्ष-ञ-ट–शाशद्यमाना। ४. क्ष-ञ-ट–शाशद्यमानः। ५. क्ष-ञ-ट–प्रकाशयतीत्यर्थः। ६. क्ष-ञ-ट–अस्मिन्नेव लोके। ७. क्ष-ञ-ट–स्वोचित-वासोऽलंकाराय।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्वभ्रातरि स एव पितुः पिण्डदानादिकं संतानकृत्यं[1] करोति । तस्याभावात् स्वयमेव तत्कर्तुं पित्रादीन् गच्छति । तद्वदियम् उषा अपि स्वोचितप्रकाशादिलाभाय स्वप्रकाशदानाय[2] वा पितृभूतं[2] सूर्यम् आभिमुख्येन गच्छति । अयमेको दृष्टान्तः । तथा ᵛधनानां ᵛसनये ᵛगर्तारुगिव[3] इत्यपरो दृष्टान्तः[3] । गर्त इति गृहनाम ' कृदरो गर्तः ' ( नि. ३. ४. ३ ) इति तन्नामसु पाठात् । अत्रौचित्येन राजपुरुषैः न्यायनिर्णेतृभिश्च अधिष्ठितं[4] स्थानमुच्यते तदारोहतीति गर्तारुक् । यथा लोके काचित् गतभर्तृका योषित् धनानां स्वकीयरिक्थानां सनये लाभाय गर्तमागच्छति । तां तु सभ्याः विचार्य यदीयं रिक्थं लभते चेत् अक्षैः संताड्य तदीयं धनं वितरन्ति । तथेयमपि धनानां प्रीणनसाधनानां प्रकाशानां[5] सनये लाभाय गर्तमाकाशं सूर्यनिवासस्थानमारोहति । देशविशेषाचारमपेक्ष्यैवं दृष्टान्तितम् । किंच ᵛपत्ये ᵛउशती कामयमाना ᵛसुवासाः ᵛजायेव । अयमपरः[6] दृष्टान्तः । यथा च लोके सुवासा दुकूलादिशोभनवसना स्वलंकृता पूर्वं रजोदर्शनसमये मलिनवस्त्रा सती स्नानानन्तरं शोभनवस्त्राभरणादिना शोभमाना विशेषेण पतिं भोगाय कांक्षन्ती तेन सह संक्रीडते तथा इयम्[7] ᵛउषाः[7] अतिनैशेन[8] अन्धकारेणावृतत्वात् मलिनवसनापि प्रभाते स्वतेजसावृतत्वात् सुवसना सती पतिस्थानीयेन सूर्येण साकं संक्रीडमाना ᵛहस्रेव हसनेव[9] ᵛअप्सः दन्तस्थानीयानि रूपाणि नीलपीतादीनि । यद्वा । निरूप्यमाणानि पदार्थजातानि । ᵛनि ᵛरिणीते नितरां रिणीते गमयति प्रकाशयतीत्यर्थः[10] । यथा लोके काचित् रमणीया योषित् स्मितव्याजेन दन्तान् विवृणुते तथेयमपि सर्वाणि रूपाणि प्रकाशयतीत्यर्थः । अयं मन्त्रो निरुक्ते स्पष्टं व्याख्यातः–' अभ्रातृकेव पुंसः पितृनेत्यभिमुखी संतानकर्मणे पिण्डदानाय न पतिं गर्तारोहिणीव धनलाभाय दाक्षिणाजी । गर्तः सभास्थाणुर्गृणातेः सत्यसंगरो भवति । तं तत्र यापुत्रा यापतिका सारोहति तां तत्राक्षैराघ्नन्ति सा रिक्थं लभते ' इति, ' जायेव पत्ये कामयमाना सुवासा ऋतुकालेषूषा हसनेव दन्तान्विवृणुते ' ( निरु. ३. ५ ) इति च ॥

स्वसा॒ स्वस्रे॒ ज्यायस्यै॒ योनि॑मारै॒गपै॑त्यस्याः प्रति॒चक्ष्यै॑व ।
व्यु॒च्छन्ती॑ र॒श्मिभि॒: सूर्य॑स्याङ्क्ते॒ समन॒गाइ॑व॒ व्राः ॥ ८ ॥

स्वसा॑ । स्वस्रे॑ । ज्यायस्यै॑ । योनि॑म् । अरै॑क् । अप॑ । एति॑ । अ॒स्याः॒ । प्र॒ति॒चक्ष्य॑ऽइव ।
वि॒ऽउ॒च्छन्ती॑ । र॒श्मिऽभिः॑ । सूर्य॑स्य । अ॒ञ्जि॒ । अ॒ङ्क्ते॒ । स॒म॒न॒गाःऽइ॑व । व्राः ॥ ८ ॥

एकस्मादेवान्तरिक्षादुत्पन्नत्वात् परस्परं स्वसृभावः । तथाप्यहः प्राथम्यात् तेजस्वित्वाच्च ज्यायस्त्वम् । स्वयमेव सरतीति वा ᵛस्वसा । रात्रिः ᵛस्वस्रे ᵛज्यायस्यै उक्तरीत्या[11] ज्येष्ठायै ᵛयोनिम् उत्पत्तिस्थानम् अपररात्ररूपम् ᵛअरैक्[12] अरिचत् प्रादात् प्ररेचयतीत्यर्थः । तथा च पूर्वत्राम्नातं–'रात्र्युषसे

---

१. क्ष-ञ-ट–' संतानकृत्यम् ' नास्ति । २. क्ष-ञ-ट–स्वप्रकाशपितृभूतम् । ३. क्ष-ञ-ट–गर्तारुगिव गर्तारोहिणीवेत्यपरो दृष्टान्तः । ४. च-फ–आस्थितम् । ५. क्ष-ञ-ट–प्रकाशादीनाम् । ६. क्ष-ञ-ट–अयमप्यपरः । ७. क्ष-ञ-ट–इयमप्युषाः । ८. ज्ञ–अपि नैशेन । ९. क्ष-ट–समनेनेव । स्फायितञ्चीत्यादिना रक् । १०. क्ष-ञ-ट–' प्रकाशयतीत्यर्थः ' इत्यस्यानन्तरं ' री गतिरेषणयोः । क्र्यादिकः । व्यत्ययेनात्मनेपदम् । प्वादीनां ह्रस्वः इति ह्रस्वत्वम् । अन्तर्भावितण्यर्थोऽयम् ' इत्यधिकम् । ११. क्ष-ञ-ट–उक्तनीत्या । १२. क्ष-ञ-ट–आरैक् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

योनिमारैक् ' ( ऋ. सं. १. ११३. १ ) इति। दत्त्वा च Vअस्याः उत्पन्नाया उषसः Vप्रतिचक्ष्येव। ज्ञापयिष्येव स्वयमपसृत्यैव गच्छति। ज्यायस्यामागतायां तस्यै स्वस्थानं दत्त्वा स्वयं तत्संनिधौ स्थातुमनुचितमिति विज्ञायैवापगच्छतीति भावः। एवमुत्पन्ना एषा Vसूर्यस्य Vरश्मिभिः Vव्युच्छन्ती तमो विवासयन्ती Vअञ्जि व्यञ्जकं तेजः। यद्वा। अञ्जि व्यक्तं जगत्। Vअङ्क्ते अनक्ति प्रकाशयति। किमिव। Vसमनगाइव। सम्यगननहेतव आपः समनाः। ता गच्छन्तीति समनगाः विद्युतः। Vव्राः व्राताः। विद्युत्संघा इव[1]। यद्वा। सम्यगननाय गच्छन्तीति समनगाः सूर्यरश्मयः। ते इव व्रा व्राताः संघीभूताः। ते यथाज्ञते जगत्प्रकाशयन्ति तथेत्यर्थः॥ व्रात इत्यत्र तकारलोपश्छान्दसः॥

आसां पूर्वासामहसु स्वसॄणामपरा पूर्वामभ्येति पश्चात्।
ताः प्रत्नवन्नव्यसीर्नूनमस्मे रेवदुच्छन्तु सुदिना उषासः॥ ९॥

आसाम्। पूर्वासाम्। अहऽसु। स्वसॄणाम्। अपरा। पूर्वाम्। अभि। एति। पश्चात्।
ताः। प्रत्नऽवत्। नव्यसीः। नूनम्। अस्मे इति। रेवत्। उच्छन्तु। सुऽदिनाः। उषसः॥९॥

Vस्वसॄणां परस्परं स्वसृभावमापन्नानां स्वयं सरन्तीनां वा Vपूर्वासां पुरातनीनाम् Vआसाम्[2] उषसां मध्ये Vअहसु अहःसु[3] प्रतिदिनम् Vअपरा अन्या अद्यतन्युषाः Vपूर्वाम् अतीतदिवससंबन्धिनीमुषसं Vपश्चात् अनुसृत्य Vअभ्येति। अभिमुखं गच्छति अव्यवधानेन गच्छतीत्यर्थः। सर्वेष्वहःसु एवमेवाभ्येति। Vनव्यसीः नवीयस्यो नवतरा आगामिन्यः[4] Vताः Vउषासः उषसः अपि Vनूनं निश्चयं Vप्रत्नवत् पुरातन्य इव Vसुदिनाः शोभनकर्मानुष्ठानसाधनदिवसाः शोभनदिनसुखा वा सत्यः Vअस्मे अस्माकं Vरेवत् बहुधनविशिष्टं यथा भवति तथा Vउच्छन्तु प्रकाशयन्तु। पूर्वतन्यो यथौच्छन् तथा आगामिन्योऽपि उच्छन्तु इत्यर्थः॥

प्र बोधयोषः पृणतो मघोन्यबुध्यमानाः पणयः ससन्तु।
रेवदुच्छ मघवद्भ्यो मघोनि रेवत्स्तोत्रे सूनृते जारयन्ती॥ १०॥

प्र। बोधय। उषः। पृणतः। मघोनि। अबुध्यमानाः। पणयः। ससन्तु।
रेवत्। उच्छ। मघवत्ऽभ्यः। मघोनि। रेवत्। स्तोत्रे। सूनृते। जरयन्ती॥ १०॥

हे Vमघोनि मघवति अस्मभ्यं दातव्यैर्बहुभिर्धनैस्तद्वति Vउषः हे उषोदेवि Vपृणतः हविष्प्रदान् अस्मान् यजमानान् Vप्रबोधय प्रज्ञापय प्रतिबुद्धान् कुरु। किंच Vपणयः व्ययासहिष्णवो वणिजः।

---

१. क्ष-ञ-ट-'इव' इत्यस्यानन्तरं 'जनसनखनेति गमेर्विट्। विड्वनोरित्यात्वम्। कृदुत्तरपदप्रकृतिस्वरत्वम्' इत्यधिकम्। २. क्ष-ञ-ट-आसामिदानीं वर्तमानानाम्। ३. क्ष-ञ-ट- अहःसु अन्त्यलोपश्छान्दसः। ४. क्ष-ञ-ट-'आगामिन्यः' इत्यस्यानन्तरं 'नवशब्दात् ईयसुनि ईकारलोपश्छान्दसः' इत्यधिकम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' पणिर्वणिग्भवति ' ( निरु. २. १७ ) इति यास्कः । पणय इव लुब्धकाः [v]अबुध्यमानाः यागादीन् अकुर्वाणा अदानशीला अस्मच्छत्रवः [v]ससन्तु स्वपन्तु दीर्घनिद्रा भवन्तु म्रियन्तामित्यर्थः । तथा च मन्त्रान्तरं–' ससन्तु त्या अरातयो बोधन्तु शूर रातयः ' (ऋ. सं. १. २९. ४) इति । किंच हे [v]मघोनि अस्मदत्तहविर्भिस्तद्वति हे उषः [v]मघवद्भ्यः हविर्लक्षणान्नवद्भ्यो यजमानेभ्यस्तेषामर्थं [v]रेवत् धनवत् समृद्धिमत्[1] [v]उच्छ विभाहि । किंच हे [v]सूनृते सुष्ठु मनुष्याणां नेत्रि देवि [v]जरयन्ती सर्वप्राणिनः क्षपयन्ती त्वं [v]स्तोत्रे स्तुतिकर्त्रे यजमानाय तदर्थं [v]रेवत् धनवत् समृद्धयर्थम् उच्छेति शेषः[2] ॥ ॥ ८ ॥

अर्वेयमश्वैद्युवतिः पुरस्ताद्युङ्क्ते गवामरुणानामनीकम् ।
वि नूनमुच्छादसति प्र केतुर्गृहंगृहमुप तिष्ठाते अग्निः ॥ ११ ॥

अर्व । इयम् । अश्वैत् । युवतिः । पुरस्तात् । युङ्क्ते । गवाम् । अरुणानाम् । अनीकम् ।
वि । नूनम् । उच्छात् । असति । प्र । केतुः । गृहम्ऽगृहम् । उप । तिष्ठाते । अग्निः ॥ ११ ॥

[v]इयम् उषाः [v]युवतिः यौवनोपेतयोषित्स्थानीया । यद्वा । सर्वेषु भावेषु मिश्रयन्ती । [v]पुरस्तात् पूर्वस्यां दिशि [v]अव [v]अश्वैत् अत्यर्थमागच्छति वर्धते वा[3] । अत्र अवशब्दो विनिग्रहार्थीयः[4] ' न्यवेति विनिग्रहार्थीयौ ' ( निरु. १. ३ ) इति यास्केनोक्तत्वात् । तत्कथमवगम्यते इति तत्राह । इयम्[5] [v]अरुणानाम् अरुणवर्णानां [v]गवां प्रसिद्धानाम् एतन्नामकानामश्वानां वा [v]अनीकं समूहं [v]युङ्क्ते रथे योजयति[6] । ' अरुण्यो गाव उषसाम् । इयावाः सवितुः ' ( नि. १. १५. ७-८ ) इति । यथा लोके वाहनसंनाहं दृष्ट्वा प्रयाणमनुमीयते तथा अत्रापि अरुणरश्मीनामश्वानां दर्शनात् उषा आगच्छतीत्यध्यवसीयते । यद्वा । अरुणानां रश्मीनां समूहं युङ्क्ते । तथा [v]नूनं निश्चयमेषा[7] [v]वि [v]उच्छात् तमो विवर्जयिष्यति । यत इयं गा युनक्ति अत एव कारणात् यथा लोकेऽश्वसंनाहं[8] दृष्ट्वा उदयोऽनुमीयते[8] तथात्रापीत्यर्थः । तादृशी सा [v]असति असत्प्राये नीरूपेऽन्तरिक्षे तिरोधायकत्वात् अशोभने तमसि वा [v]केतुः केतुस्थानीया ज्ञापयित्री प्रकर्षेण विविधं भासते इति शेषः । उपसर्गवशाद्योग्यक्रियाध्याहारः । यद्वा । असति तमोरूपेऽन्धकारे [v]प्र केतुः प्रकर्षेण ज्ञापयित्री सती नूनं व्युच्छादिति पूर्वत्रान्वयः । तस्मिन् काले [v]अग्निः आहवनीयादिरूपः [v]गृहंगृहं सर्वयजमानगृहम् अग्निहोत्राद्यर्थम् [v]उप [v]तिष्ठाते उपतिष्ठते[9] दीप्यते इत्यर्थः ॥

---

१. क्ष-ञ-ट–' समृद्धिमत् ' इत्यस्यानन्तरं ' रयेर्मतौ बहुलमिति संप्रसारणम् । रेशब्दाच्चेति मतुप उदात्तत्वम् ' इत्यधिकम् । २. क्ष-ञ-ट–' शेषः ' इत्यस्यानन्तरं ' जनीजृष्क्नसुरञ्जोऽमन्ताश्च इति मित्त्वात् मितां ह्रस्वः इति ह्रस्वत्वम् ' इत्यधिकम् । ३. क्ष-ञ-ट–' वा ' इत्यस्यानन्तरं ' श्वयतेश्छान्दसे लुङि सिचि वृद्धौ इडभावे रूपम् ' इत्यधिकम् । ४. क्ष-ञ-ट–विनिग्रहार्थः । ५. क्ष-ञ-ट–यत इयम् । ६. क्ष-ञ-ट–' योजयति ' इत्यस्यानन्तरम् ' अरुण्यो गाव उषसां प्रतिनियतत्वात् । तथा च निरुक्तम् ' इत्यधिकम् । ७. च-ञ-फ-ष–निश्चितमेषा । ८. त–लोके संनाहं दृष्ट्वा जयोऽनुमीयते । ९. क्ष-ञ-ट–' उपतिष्ठते ' इत्यस्यानन्तरं ' संगच्छते । आडागमः । उपाद्देवपूजासंगतिकरणेत्यात्मनेपदम् ' इत्यधिकम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उत्ते वयश्चिद्वसतेरपप्तन्नरश्च ये पितुभाजो व्युष्टौ ।
अमा सते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय ॥ १२ ॥

उत् । ते । वयः । चित् । वसतेः । अपप्तन् । नरः । च । ये । पितुऽभाजः । विऽउष्टौ ।
अमा । सते । वहसि । भूरि । वामम् । उषः । देवि । दाशुषे । मर्त्याय ॥ १२ ॥

ते तव व्युष्टौ सत्यां वयश्चित् गमनवन्तः पक्षिणोऽपि । चिदित्येष अपिशब्दार्थः निपातानामनेकार्थत्वात् । ' उच्चावचेष्वर्थेषु निपतन्ति ' ( निरु. १. ४ ) इति यास्केनोक्तत्वात् । वसतेः निवासस्थानान्नीडादेः उत् ऊर्ध्वम् अपप्तन् पतन्ति । पूर्ववाक्ये ' गृहं गृहमुपतिष्ठातेऽग्निः ' इत्युक्तत्वात्तदपेक्षया अपिशब्दः[1] । किंच नरश्च मनुष्याश्च पितुभाजः अन्नवन्तोऽन्नार्थिनः कृषिवाणिज्यादिकर्तारः स्वस्वव्यापारार्थम् उदुन्मुखा अपप्तन् गच्छन्ति । तथा[2] मन्त्रान्तरं–' पद्वदीयत उत्पातयति पक्षिणः ' ( ऋ. सं. १. ४८. ५ ) इति । एवं सत्यां हे देवि देवनशीले उषोदेवते अमा गृहे देवयजनाख्ये सते तिष्ठते यजमानाय तदर्थम् । अमेति गृहनाम ' अमा दमे ' ( नि. ३. ४. ११ ) इति तन्नामसु पठितत्वात् । यद्वा । अमा सह हूयमानेनाग्निना सह निवसते यजमानाय । अमा वसेतामित्यादौ सहार्थे प्रयोगात् । मर्त्याय मनुष्याय दाशुषे हविर्दत्तवते यजमानाय भूरि[3] वामं बहु शोभनं धनं वहसि प्रापयसि[3] ॥

अस्तोढ्वं स्तोम्या ब्रह्मणा मेऽवीवृधध्वमुशतीरुषासः ।
युष्माकं देवीरवसा सनेम सहस्रिणं च शतिनं च वाजम् ॥ १३ ॥

अस्तोढ्वम् । स्तोम्याः । ब्रह्मणा । मे । अवीवृधध्वम् । उशतीः । उषसः ।
युष्माकम् । देवीः । अवसा । सनेम । सहस्रिणम् । च । शतिनम् । च । वाजम् ॥ १३ ॥

एवं सूक्तद्वयोक्तरीत्या[4] बहुधा स्तुत्वा तां च स्तुतिमनया निवेदयित्वा स्वाभीष्टं प्रार्थयते । हे स्तोम्याः । स्तोमः स्तोत्रम् । तदर्हन्तीति स्तोम्याः स्तुत्यर्हा उषसः । यतो यूयं तादृश्यः अतः मे मत्स्वभूतेन ब्रह्मणा सूक्तद्वयगतमन्त्ररूपेण स्तोत्रेण अस्तोढ्वम् स्तुता भवत[5] । किंच हे उषासः उषसः उशतीः स्तोतॄन् अस्मान् अस्मत्समृद्धिं वा कामयमाना यूयम् अवीवृधध्वम् अस्मान् प्रवर्धयत । किंच हे देवीः देव्यो देवनशीलाः युष्माकम् अवसा युष्मत्संबन्धिना रक्षणेन वयं सहस्रिणं सहस्रसंख्याकम् अभीष्टं धनं सनेम लभेमहि । तथा शतिनं च वाजं शतसंख्याकम् अपरिमितं धनं सनेम । युष्मत्कृतेन शतसहस्रपरिमितधनादिरूपरक्षणेन वयमपि अर्थिभ्यः शतसहस्रपरिमितस्य धनस्य सनितारो भवेमेत्यर्थः ॥ ॥ ९ ॥

---

१. क्ष-ञ-ट–' अपिशब्दः ' इत्यस्यानन्तरं ' पततेश्छान्दसे लुङि लदित्त्वादङि परतः पतः पुम् इति पुमागमः ' इत्यधिकम् । २. क्ष-ञ-ट–तथा च । ३. क्ष-ञ-ट–भूरि । प्रभूतं वामं वननीयं धनकनकादिकं रूपं वहसि ददासि । ४. क्ष-ञ-ट—सूक्तद्वयेनोक्तनीत्या; ज-झ-ञ-त-फ-ष– सूक्तद्वयोक्तनीत्या । ५. क्ष-ञ-ट–' भवत ' इत्यस्यानन्तरं ' कर्मणि लुङि इणः षीध्वं इति ध्वकारस्य षत्वम् ' इत्यधिकम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' प्राता रत्नम् ' इति सप्तर्चं पञ्चमं सूक्तं काक्षीवतम् । दानस्य स्तूयमानत्वात् दानदेवत्यं ' या तेनोच्यते सा देवता ' ( अनु. २. ५ ) इति परिभाषितत्वात् । त्रैष्टुभम् । उपेस्यादिके द्वे जगत्यौ । ' प्राता रत्नं सप्त स्वनयस्य दानस्तुतिरुपजगत्यौ ' इत्यनुक्रमणिका ॥

प्रातो रत्नं प्रातरित्वा दधाति तं चिकित्वान्प्रतिगृह्या नि धत्ते ।
तेन प्रजां वर्धयमान आयू रायस्पोषेण सचते सुवीरः ॥ १ ॥

प्रातरिति । रत्नम् । प्रातःऽइत्वा । दधाति । तम् । चिकित्वान् । प्रतिऽगृह्य । नि । धत्ते ।
तेन । प्रऽजाम् । वर्धयमानः । आयुः । रायः । पोषेण । सचते । सुऽवीरः ॥ १ ॥

अत्रेतिहासमाचक्षते । दैर्घतमसः कक्षीवान्नाम ऋषिः ब्रह्मचर्यं चरिष्यन् वेदाभ्यासाय गुरुकुले चिरकालमुषित्वा वेदान् सम्यगधीत्य व्रतानि च चरित्वा तेनानुज्ञातः पुनः स्वगृहं प्रति प्रयास्यन् मध्ये मार्गे रात्रौ विश्रान्तः । प्रभाते भावयव्यस्य पुत्रः स्वनयो नाम राजा अनुचरैः संक्रीडमानः अकस्मात् कक्षीवतः अन्तिकमाससाद । स च रभसा प्रतिबुद्धः सहसोत्तस्थौ । तं च राजा पाणिं गृहीत्वा स्वकीये आसने उपवेश्य अस्य सौन्दर्यमवगत्य स्वकन्याप्रदानमनाः पप्रच्छ भगवन् कस्य पुत्रः किंनामा त्वमिति। स च पृष्टो मातरं पितरं च स्ववृत्तान्तं च आचचक्षे। स च राजा संभाव्यः इत्यवगत्य मुदितमनाः स्वगृहं प्राप्य अस्मै मधुपर्कमारचय्य वस्त्रमाल्यादिभिः पूजयित्वा सरथा दश कन्याः शतनिष्कानश्वशतं पुंगवानां शतं गवां षष्ट्युत्तरसहस्रं पुनरेकादशरथांश्च प्रादात् । स च सर्वमनुक्रमेण प्रतिगृह्य दीर्घतमसोऽन्तिकमागत्य तस्मै प्रादर्शयत् ॥ ननु कक्ष्या नाम अश्वबन्धनी रज्जुः । तद्वान् कक्षीवान् । अश्वबन्धनं च राज्ञ एवोचितम् । अतोऽस्य राजन्यत्वात्[1] प्रतिग्रहो नोपपद्यते । ' याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः ' ( मनु. १०. ७६ ) इत्युक्तत्वात् । तस्मात् ब्राह्मणस्यैवाधिकारो न तु क्षत्रियस्येति । नैष दोषः । यद्यप्यसौ कलिङ्गाख्यस्य राज्ञः पुत्रस्तथापि तेन कलिङ्गेन[2] स्वयं वृद्धत्वात् अपत्योत्पादनाय सामर्थ्यमलभमानेन तदुत्पादनाय याचितो दीर्घतमा ऋषिः उशिग्नामिकाम् अपत्योत्पादनाय प्रेषितया राजमहिष्या अतिजरठेन महर्षिणा सह रन्तुं लज्जमानया स्ववस्त्राभरणैरलंकृत्य स्वप्रतिनिधित्वेन प्रेषिताम् उशिग्नामिकां योषितं दासीमित्यवगत्य मन्त्रपूतेन जलेनाभिषिच्य ऋषिपुत्रीं[3] कृत्वा[3] तया सह रेमे । तदुत्पन्नः कक्षीवान्नाम ऋषिः । एतत्सर्वमस्माभिः पूर्वाध्याये 'नासत्याभ्याम्' ( ऋ. सं. १. ११६ ) इत्यत्र सूक्ते विस्तरेण प्रतिपादितम् । अतः अस्य क्षत्रियसंबन्धात् कक्षीवानिति नाम उपपन्नम्। दीर्घतमसः परमर्षेः उत्पन्नत्वेन ब्राह्मणत्वात् प्रतिग्रहोऽपि उपपन्न एव । इदमादि सूक्तद्वयं स्वनयस्य राज्ञो दानप्रशंसाख्यानप्रतिपादकम् । ननु अनुक्रमण्यां ' स्वनयस्य दानस्तुतिः ' इति ' दानतुष्टो भावयव्यं तुष्टाव ' इति चोभयत्र स्तोतव्यं भिन्नमेवानुगम्यते इत्युच्यते । उत्तरसूक्तस्य प्रथमायाम् ऋचि ' अधिक्षियतो भाव्यस्य ' इति दातुर्भावयव्यस्य श्रूयमाणत्वात् तत्प्राथम्यमुपजीव्य पृथगुपात्तम् । वस्तुतस्तु पितुर्नाम्ना पुत्रस्य[4] व्यवहर्तव्यत्वात् तथा ' आ रुद्रासः ' इत्यादौ बहुशः प्रयोगदर्शनात् 'स्वनयेन दत्ता' इति तत्रैव सूक्ते स्वनयस्यापि श्रूयमाणत्वाच्च उभयत्रापि दातृप्रतिग्रहीत्रोरेकत्वेनैकमेव दानप्रशंसारूपमाख्यानमिति प्रसिद्धम्[5] ॥ स च कक्षीवान् आनीतं सर्वं पितुर्निवेदयन्

---

१. क्ष-ज्ञ-ञ्ज-ञ-ट-राजत्वात् । २. क्ष-ञ-ट-कलिङ्गराजेन । ३. क्ष-ञ-ट-ऋषिः पवित्रीकृतया । ४. क्ष-ञ-ट-पुत्रस्यापि । ५. क्ष-ख-ज-ञ्ज-ज-ट-फ-सिद्धम् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

परोक्षेणैव दानप्रकारं प्रशंसति । स्वनयो नाम राजा ᵛप्रातरित्वा प्रातरेव आत्मनः सकाशमागतः सन्[1] ᵛरत्नं रमणीयं निष्कादिकं ᵛप्रातः प्रभातकाले ᵛदधाति अस्मत्संनिधौ स्थापयति ददाति । ᵛतं स्थापितं सर्वं ᵛचिकित्वान् चेतनावान् अदुष्टमित्यवगतवान् ᵛप्रतिगृह्य स्वीकृत्य ᵛनि ᵛधत्ते पितुः समीपे स्थापयति । अनन्तरं ᵛतेन दत्तेन निष्कादिना ᵛप्रजां पुत्रभृत्यादिरूपां ᵛवर्धयमानः पोषयन् ᵛआयुः जीवितं च वर्धयन् ᵛसुवीरः शोभनैर्वीरैः पुत्रभृत्यादिभिरुपेतः सन् ᵛरायस्पोषेण धनानां पुनःपुनर्वर्धनेन ᵛसचते । असौ राजा संगच्छतामिति तव दातुराशिषं प्रार्थयते ॥

सुगुर्सत्सुहिरण्यः स्वश्वो बृहदस्मै वय इन्द्रो दधाति ।
यस्त्वायन्तं वसुना प्रातरित्वो मुक्षीजयेव पदिमुत्सिनाति ॥ २ ॥

सुऽगुः । असत् । सुऽहिरण्यः । सुऽअश्वः । बृहत् । अस्मै । वयः । इन्द्रः । दधाति ।
यः । त्वा । आऽयन्तम् । वसुना । प्रातःऽइत्वः । मुक्षीजयाऽइव । पदिम् । उत्ऽसिनाति ॥२॥

अत्र कक्षीवतः पिता आनीतेन धनेन संतुष्टः राजानं बहुप्रकारेण आशास्ते । असौ स्वनयो राजा ᵛसुगुः ᵛअसत् । शोभनैर्बहुभिर्गोभिस्तद्वान् भवतु । तथा ᵛसुहिरण्यः सुष्ठु हितरमणीयैर्धनैस्तद्वान् भवतु । तथा ᵛस्वश्वः शोभनैरश्वैस्तद्वान् सन्[2] । ᵛअस्मै राज्ञे प्रदात्रे ᵛबृहत् प्रभूतं ᵛवयः अन्नम् ᵛइन्द्रः परमेश्वरो धर्मदेवता ᵛदधाति दधातु ददातु । यतः अयं राजा अस्मै गोहिरण्याश्वान्नानि बहुसंख्याकानि दत्तवान् अतस्तेषामभिवृद्धिप्रार्थना उचितैव । कस्यैवमाशीरिति स उच्यते । ᵛयः यो राजा ᵛप्रातरित्वः प्रातरागामिन्नतिथे पुत्र[3] ᵛआयन्तं गुरुकुलात् आगतं[4] ᵛपदिं पथिकं यदृच्छया गन्तारं ᵛत्वा त्वां ᵛवसुना अन्नसाधनेन गवादिधनेन ᵛउत्सिनाति गमनतः उत्कृष्टं बध्नाति[5] गतिं निरुणद्धीत्यर्थः । प्रतिबन्धे दृष्टान्तः उच्यते । ᵛमुक्षीजयेव ᵛपदिम् । मुच्यमाना सती बन्धनं जनयतीति मुक्षीजा मृगपक्ष्यादिबन्धनी रज्जुः । तया पाशको यथा पदिं गन्तारं मृगपक्ष्यादिकम् उत्सिनाति बध्नाति तथा मयाननुज्ञातमपि त्वां गमनं प्रतिबध्य गवादीष्टदानादिना[6] यो राजा तोषयति स एवं भवत्विति । पदिरिति पदं व्याचक्षाणेन यास्केन तदुदाहरणमयं[7] मन्त्रः[7] व्याख्यातः ' सुगुर्भवति[8] ततनाच्च ' [8] ( निरु. ५. १९ ) इति ॥

आर्यमद्य सुकृतं प्रातरिच्छन्निष्टेः पुत्रं वसुमता रथेन ।
अंशोः सुतं पायय मत्सरस्य क्षयद्वीरं वर्धय सूनृताभिः ॥ ३ ॥

आर्यम् । अद्य । सुऽकृतम् । प्रातः । इच्छन् । इष्टेः । पुत्रम् । वसुऽमता । रथेन ।
अंशोः । सुतम् । पायय । मत्सरस्य । क्षयत्ऽवीरम् । वर्धय । सूनृताभिः ॥ ३ ॥

---

१. क्ष-ञ-ट–'सन्'इत्यस्यानन्तरं 'अन्येभ्योऽपि दृश्यन्ते इति क्वनिपि तुक्' इत्यधिकम् । २. ञ–असत्; क्ष-ञ-ट– असत् । बहुव्रीहावाद्युदात्तत्वम् । ३. क्ष-ञ-ट–' पुत्र ' इत्यस्यानन्तरं ' वत ( न ) उपसंख्यानमिति संबुद्धौ नकारस्य रुत्वम् ' इत्याधिकम् । ४. क्ष-ञ-ट–आगच्छन्तम् । ५. क्ष-ञ-ट–बध्नाति । षिङ् बन्धने । क्रैयादिकः । ६. क्ष-ञ-ट–यथेष्टदानादिना । ७. क-ज-ञ-ण-ट-व–तदुदाहरणतया अयं मन्त्रः; फ–तदुदाहरणतया मन्त्रः । ८. क-क्ष-ज-ञ-ट-ण-व-ष- इत्यादिषु ' सुगुर्भवति...ततनाच्च ' इति निरुक्तग्रन्थः पूर्णत्वेन उद्धृतः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]प्रातः पूर्वेद्युः प्रभातकाले अयं[1] धनं दत्तवान्[9] तस्मिन्नेव काले [v]सुकृतं शोभनस्य कर्तारं त्वाम् [v]इच्छन् प्राप्तुमिच्छन् कदा द्रक्ष्यामीति कामयमानोऽहम् [v]अद्य अस्मिन् दिने इदानीम् [v]आयं प्राप्तोऽस्मि[2]। अत्र यद्यपि केवलं प्रातरित्येव श्रुतं न पूर्वेद्युरिति तथापि अद्य आयम् इत्युक्तत्वादर्थात्पूर्वेद्युः प्रातः[3] इति गम्यते। कीदृशम्[4]। [v]इष्टेः इष्टस्येष्टसाधनस्य यागस्य वा [v]पुत्रं पुरु त्रातारम्। ' पुत्रः पुरु त्रायते ' ( निरु. २. ११ ) इति यास्कः। कर्तारमित्यर्थः। केन साधनेनेति तदुच्यते। [v]वसुमता [v]रथेन समृद्धधनवता रथेन साधनेन। यद्वा। तेन सहितः इति सहार्थे तृतीया। किंच मदानीतेन समृद्धेन धनेन [v]अंशोः अंशुमतो वल्लीरूपस्य [v]मत्सरस्य मादनसाधनस्य[5] सोमस्य। ' मत्सरः सोमो मन्दतेस्तृप्तिकर्मणः ' ( निरु. २. ५ ) इति निरुक्तम्। तस्य [v]सुतम् अभिषुतं रसं [v]पायय आत्मानं पायय इष्टसाधनं सोमयागं कुर्वित्यर्थः। कृत्वा च [v]क्षयद्वीरं क्षियन्तो निवसन्तो वीराः पुत्रभृत्यादयो यस्य तं तादृशं त्वदिष्टसाधनबहुधनप्रदातारं [v]सूनृताभिः प्रियसत्यात्मिकाभिर्वाग्भिः [v]वर्धय समृद्धं कुरु। पुत्रभृत्यादिवीरैः यथा प्रवृद्धो भवति तथा कामयेत्यर्थः ॥

उप॑ क्षरन्ति॒ सिन्ध॑वो मयो॒भुव॑ ईजा॒नं च॑ यक्ष्यमा॑णं च धे॒नव॑ः।
पृ॒णन्तं॑ च॒ पपु॑रिं च श्रव॒स्यवो॑ घृ॒तस्य॒ धारा॒ उप॑ यन्ति॒ विश्व॑तः ॥ ४ ॥

उप॑। क्ष॒र॒न्ति॒। सिन्ध॑वः। म॒यः॒ऽभुव॑ः। ई॒जा॒नम्। च॒। य॒क्ष्य॒मा॑णम्। च॒। धे॒नव॑ः।
पृ॒णन्त॑म्। च॒। पपु॑रिम्। च॒। श्र॒व॒स्यवः॑। घृ॒तस्य॑। धाराः॑। उप॑। य॒न्ति॒। विश्व॑तः ॥ ४ ॥

पूर्वस्यामृचि आनीतेन धनेन सोमयागं कुर्वित्युक्तम्। तमेव सोमयागं फलप्रदर्शनेन स्तौति। [v]सिन्धवः स्यन्दनशीलाः प्रस्तुतपयोधाराः[6]। 'सिन्धुः स्यन्दनात्' ( निरु. ९. २६ ) इति यास्कः। [v]मयोभुवः सुखभावयित्र्यः[7]। मय इति सुखनाम ' मयः स्यूमकम् ' ( नि. ३. ६. ७ ) इति तन्नामसु पाठात्। [v]धेनवः प्रीणयित्र्यो गावः [v]ईजानं सोमयागमनुतिष्ठन्तं तथा [v]यक्ष्यमाणं यक्ष्ये इति प्रणतिं[8] कुर्वन्तं [v]च। न केवलमीजानं अपि तु यक्ष्ये इति अध्यवसितवन्तमपि [v]उप उपेत्य [v]क्षरन्ति स्रवन्ति प्रीणयन्तीत्यर्थः। न च पूर्वस्यामृचि सोमं पिबेत्युक्तत्वात् सर्वेषां सोमयागानाम् अग्निष्टोमात्मकज्योतिष्टोमस्य प्रकृतस्य[9] ' ज्योतिष्टोमेन स्वर्गकामो यजेत ' इति स्वर्ग एव फलत्वेन श्रुतः न गवादिकमिति वाच्यम्। स्वर्गवत् गवादिकामनयापि सोमयागस्य कर्तुं शक्यत्वात्। न केवलं सोमयागमनुतिष्ठतामेव महत्फलम् अपि तु सुकृतसाधनानि कर्मान्तराणि अधितिष्ठतामपि[10] महत् फलमस्त्येवेति दर्शयति। [v]पृणन्तं पितॄन् प्रीणयन्तं[11] [v]पपुरिं[12] प्रीणनशीलम् इष्टदातारं[13] प्राणिनः सर्वदा प्रीणयन्तं [v]च पुरुषं [v]श्रवस्यवः अन्नमिच्छन्त्यः अन्नसमृद्धिहेतवः [v]घृतस्य [v]धाराः। यद्वा। घृतकुल्याः। [v]विश्वतः सर्वतः [v]उप उपेत्य [v]यन्ति प्राप्नुवन्ति प्रीणयन्तीत्यर्थः ॥

---

१. क्ष-च-ज-ञ-ट-फ-व–यदा धनं दत्तवान्; ख-च-फ–यदा धनं लब्धवान् आस्मि। २. क्ष-ञ-ट–प्राप्तोऽस्मि। एतेर्लङि उत्तमैकवचने रूपम्। ३. क्ष-ञ-ट–' प्रातः ' नास्ति। ४. क्ष-ञ-ट–कीदृशं त्वाम्। ५. क्ष-ञ-ट–मोदसाधनस्य। ६. क्ष-ज्ञ-ञ-ट–प्रस्नुवत्पयोधाराः; ख-च-फ–प्रस्तुतपयोध(धा)राः; क-ज–प्रसुवत्पयोध(धा)राः। ७. क्ष-ञ-ट–सुखस्य भावयित्र्यः। ८. क्ष-ञ-ट–आकूतिम्। ९. क्ष-ञ-ट–प्रकृतित्वात् तस्य। १०. क्ष-ञ-ट–अनुतिष्ठतामपि। ११. क्ष-ञ-ट–प्रीणयन्तम्। पॄ पालनपूरणयोः। क्र्यादिकः। प्वादीनां ह्रस्वः इति ह्रस्वत्वम्। १२. क्ष-ञ-ट–पपुरिं प्रीणनशीलं प्रीणनेच्छावन्तं च। आदृगमहन इति किन्। उदोष्ठ्यपूर्वस्य इति उत्वं च। १३. क-ञ–इष्टदानादिना; ख-फ–इष्टदानात्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नाकस्य पृष्ठे अधि तिष्ठति श्रितो यः पृणाति स ह देवेषु गच्छति ।
तस्मा आपो घृतमर्षन्ति सिन्धवस्तस्मा इयं दक्षिणा पिन्वते सदा ॥ ५ ॥

नाकस्य । पृष्ठे । अधि । तिष्ठति । श्रितः । यः । पृणाति । सः । ह । देवेषु । गच्छति ।
तस्मै । आपः । घृतम् । अर्षन्ति । सिन्धवः । तस्मै । इयम् । दक्षिणा । पिन्वते । सदा ॥ ५ ॥

सोमयागप्रशंसाप्रसङ्गेन सामान्यतो दानम् एतदादिभिस्त्रिभिः प्रशंसति । यद्वा । सोमस्यैव स्तुतत्वात्[1] दक्षिणाशब्दस्य यागे एव प्रसिद्धत्वाच्च आ सूक्तपरिसमाप्तेः सोमयाग एव प्रस्तूयते । vयः यो मर्त्यः vपृणाति हविरादिदानेन देवादीन् प्रीणाति vसः vनाकस्य । कमिति सुखनाम । तद्विरुद्धम् अकम् । न विद्यते अकं दुःखं तत्साधनं पापं वेति नाको द्युलोकः । तथा च श्रूयते–'न वा अमुं लोकं जग्मुषे किं[2] च नाकम्' ( निरु. २. १४; का. सं. २१. २ ) इति[2] । तस्य vपृष्ठे उन्नते उपरिदेशे[3] vश्रितः सन्[3] vअधि अधिकमाकल्पान्तं vतिष्ठति । यद्वा । अधि तिष्ठति । अधिष्ठाय प्रमुखो भूत्वा तिष्ठति । न केवलं स्वर्गाश्रयणं किंतु vदेवेषु मध्ये vगच्छति वर्तते स्वयमेव देवो भवतीत्यर्थः । vह इति प्रसिद्धौ । vतस्मै[4] प्रीणयित्रे पुरुषाय vसिन्धवः स्यन्दनशीलाः vआपः vघृतं तेजोवत् सारम् vअर्षन्ति गच्छन्ति रसवत्यो भवन्तीत्यर्थः । किंच vइयं भूमिरपि vदक्षिणा सस्यादिफलसंपादनदक्षा सती vसदा सर्वकालं vपिन्वते सेचयति तोषयतीत्यर्थः । दातुर्जीवनसाधकान्नोदकानि[5] रुचिराणि समृद्धानि भवन्तीत्यर्थः ॥

दक्षिणावतामिदिमानि चित्रा दक्षिणावतां दिवि सूर्यासः ।
दक्षिणावन्तो अमृतं भजन्ते दक्षिणावन्तः प्र तिरन्त आयुः ॥ ६ ॥

दक्षिणाऽवताम् । इत् । इमानि । चित्रा । दक्षिणाऽवताम् । दिवि । सूर्यासः ।
दक्षिणाऽवन्तः । अमृतम् । भजन्ते । दक्षिणाऽवन्तः । प्र । तिरन्ते । आयुः ॥ ६ ॥

vदक्षिणावतां बहुविधगोहिरण्यादिरूपदक्षिणाप्रदातृणाम् । इच्छब्दः एवकारार्थः । तेषामेवार्थे vइमानि भूमौ दृश्यमानानि चित्राणि चायनीयानि स्वक्चन्दनमणिमुक्तादिरूपाणि द्रव्याणि समृद्धानि भवन्तीति शेषः । किंच vदक्षिणावताम् एव vदिवि द्युलोके vसूर्यासः सूर्यसंबन्धिनो लोकाः तदनुगृहीता भोगा वा समृद्धा भवन्ति । किंच vदक्षिणावन्तः एव vअमृतं जरामरणरहितं स्थानं vभजन्ते सेवन्ते । यद्वा । दानेनापहतपाप्मानः आत्मानं विदित्वा अमृतमविनाशं मोक्षं भजन्ते प्राप्नुवन्ति । 'यज्ञेन दानेन' ( बृ. उ. ४. ४. २२ ) इति श्रुतेः । किंच vदक्षिणावन्तः एव vआयुः vप्र vतिरन्ते अतिदीर्घमेवमायुष्यं[6] वर्धयन्ते लभन्ते[6] । प्रपूर्वस्तिरतिर्वर्धनार्थः । इत् इति सर्वत्र संबध्यते ॥

---

१. क्ष-ख-ज-झ-ञ-ट-फ-व–प्रस्तुतत्वात् । २. क्ष-ञ-ट–नभ्राण्नपात् इति प्रकृतिभावः । ३. क्ष-ञ-ट–उपरिदेशे देवेषु मध्ये श्रितः तैरेव सेवितः सन् । ४. क-झ–किंच तस्मै । ५. क्ष-ञ-ट–जीवनसाधनान्युदकादीनि । ६. क्ष-ञ-ट–अतीव दीर्घमायुष्यं वर्धयन्ते लभन्ते ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मा पृणन्तो दुरितमेन आरन्मा जारिषुः सूरयः सुव्रतासः ।
अन्यस्तेषां परिधिरस्तु कश्चिदपृणन्तमभि सं यन्तु शोकाः ॥ ७ ॥

मा । पृणन्तः । दुःऽइतम् । एनः । आ । अरन् । मा । जारिषुः । सूरयः । सुऽव्रतासः ।
अन्यः । तेषाम् । परिऽधिः । अस्तु । कः । चित् । अपृणन्तम् । अभि । सम् । यन्तु । शोकाः ॥७॥

अन्वयव्यतिरेकाभ्यां दानं प्रशंसितुमाह । [v]पृणन्तः देवादीन् हविरादिना प्रीणयन्तः सन्तः [v]दुरितं दुष्टं यथा भवति तथा प्राप्तं दुःखम् [v]एनः तत्साधनं पापं च [v]मा [v]आरन् मा प्राप्नुवन्[1]। न केवलं दातार एव अपि तु [v]सूरयः देवानां स्तोतारो विद्वांसः [v]मा [v]जारिषुः जरया न जीर्णा[2] भवेयुः[2]। तथा [v]सुव्रतासः शोभनकृच्छ्रचान्द्रायणादिनियमवन्तोऽपि मा जारिषुः। तर्हि एषाम्[3] अन्यो जनः[3] क इति स उच्यते । [v]तेषां दातॄणां स्तोतॄणां वा [v]अन्यः तेभ्योऽन्यो यः कोऽपि पुरुषः [v]परिधिः पापस्य परितो धारकः [v]अस्तु । यद्वा । अन्यो यः कश्चन पापदेवः तेषां परिधिस्थानीयो व्यवधायकोऽस्तु । यथा अग्नेः परिधिः स्वयं रक्षःप्रभृतिभिर्बाध्यमानः स्वान्तर्हितमग्निं रक्षति तद्वत् । अथवा । अन्यो धर्मविशेषः तेषां परिधिः परिधानमस्तु कवचस्थानीयोऽस्तु । तर्हि किं[4] प्राप्नुयुरिति उच्यते । [v]अपृणन्तं देवादीन् अप्रीणयन्तमदातारं [v]शोकाः चित्तपीडाः तत्साधनाः पाप्मानः[5] [v]अभि अभिमुखं [v]सं [v]यन्तु सम्यक् प्राप्नुवन्तु वयं सुखिनो भवेमेत्यर्थः[6] ॥ ॥ १० ॥

' अमन्दान् ' इति षष्ठं सूक्तं ' सप्त ' इत्यनुवर्तनात् सप्तर्चम् । आदितः पञ्चानां कक्षीवानृषिः षष्ठ्याः भावयव्यः सप्तम्याः रोमशा नाम ब्रह्मवादिनी । आदितः पञ्चानां भावयव्यस्य स्तुतिरूपत्वात् स एव देवता ' या तेनोच्यते ' ( अनु. २. ५ ) इति न्यायात् । अनयोः षष्ठीसप्तम्योस्तु भावयव्यरोमशयोः संवादः । षष्ठ्याः भावयव्यः सप्तम्याः रोमशा । यद्यपि ' स्वनयेन दत्ता ' ( ऋ. सं. १. १२६. ३ ) इति श्रूयमाणत्वात्तस्यैव स्तुत्या भाव्यं तथापि पितृपुत्रयोरभेदात् ' आरुद्रासः ' इतिवत् पितृनाम्ना व्यवहर्तुं शक्यत्वात् प्रथमायामृचि[7] ' भाव्यस्य[8] ' इत्युक्तत्वाच्च ' भावयव्यं तुष्टाव ' इत्येतदविरुद्धमित्युक्तं पूर्वसूक्ते एव । आदितः पञ्च त्रिष्टुभः । अन्त्ये अनुष्टुभौ । तथा चानुक्रान्तम्–' अमन्दानिति कक्षीवान्दानतुष्टः पञ्चभिर्भावयव्यं तुष्टावान्त्ये अनुष्टुभौ भावयव्यरोमशयोर्दम्पत्योः संवादः ' इति । उक्तो विनियोगः ॥

अमन्दान्त्सोमान्प्र भरे मनीषा सिन्धावधि क्षियतो भाव्यस्य ।
यो मे सहस्रममिमीत सवानतूर्तो राजा श्रव इच्छमानः ॥ १ ॥

अमन्दान् । स्तोमान् । प्र । भरे । मनीषा । सिन्धौ । अधि । क्षियतः । भाव्यस्य ।
यः । मे । सहस्रम् । अमिमीत । सवान् । अतूर्तः । राजा । श्रवः । इच्छमानः ॥ १ ॥

---

१. क्ष-ज-ट–' प्राप्नुवन् ' इत्यस्यानन्तरं ' दुरुपसृष्टस्य एतेः कर्मणि निष्ठा । गतिरनन्तर इति गतेः प्रकृतिस्वरत्वम् ' इत्यधिकम् । २. क्ष-ज-ट–हीयन्ते । ३. क्ष-ज-ट–एनोभाजनः । ४. क्ष-ज-ट–कम् । ५. क्ष-ज-ट–पाप्मानो वा । ६. क-क्ष-ज-ज-ट-ण–' भवेमेत्यर्थः ' इत्यस्यानन्तरम् ' अत्र यद्यपि सामान्येन दानमात्रं स्तूयते तथाप्यस्य सूक्तस्य स्वनयदानस्तुतिरूपत्वात् ( ख-व–दानस्तुतिरूपत्वात् ) तद्दुःखमायान्विति भावः ( ख-व-इत्यर्थः )' इत्यधिकम् । ७. क्ष-ज-ट-तत्र प्रथमायामृचि । ८. च-ज्ञ-त-फ–भावयव्यस्य ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vसिन्धौ सिन्धुदेशे यद्वा लक्षणया सिन्धुतीरे समुद्रतीरे vअधि vक्षियतः अधिनिवसतः vभाव्यस्य[1] भावयव्यस्य[2]। तत्पुत्रस्य स्वनयस्येत्यर्थः। तस्य vअमन्दान् अनल्पान् vस्तोमान् स्तोत्राणि तन्निष्ठबहुविधदानादीनां कीर्तनानि vमनीषा मनीषया प्रियातिशयबुद्ध्या vप्र vभरे प्रकर्षेण[3] संपादयामि। कस्तस्य विशेष इति तत्राह। vअतूर्तः केनाप्यहिंसितः vयः vराजा vमे मदर्थं vसहस्रं तत्संख्याकान् vसवान्। सूयन्ते सोमाः एष्विति सवाः सोमयागाः। तान् vअमिमीत संपूर्ण-धनप्रदानेन[4] निर्मितवान्। किमिच्छन्। vश्रवः सर्वैः श्रूयमाणां कीर्तिमात्मने vइच्छमानः कामयमानः। यतोऽयमार्त्विज्याद्युपाधिना विना कीर्त्यर्थमेव बहुधनं प्रादात् अतस्तं स्तौमीत्यर्थः॥

शतं राज्ञो नाधमानस्य निष्काञ्छतमश्वान्प्रयतान्त्सद्य आदम्।
शतं कक्षीवाँ असुरस्य गोनां दिवि श्रवोऽजरमा ततान॥ २॥

शतम्। राज्ञः। नाधमानस्य। निष्कान्। शतम्। अश्वान्। प्रऽयतान्। सद्यः। आदम्। शतम्। कक्षीवान्। असुरस्य। गोनाम्। दिवि। श्रवः। अजरम्। आ। ततान॥ २॥

vनाधमानस्य स्वीकर्तव्यम् इत्युच्चैः याचमानस्य[5] vअसुरस्य धनानां निरसितुर्दानशीलस्य vराज्ञः स्वतेजसा दीप्यमानस्य स्वनयस्य vनिष्कान् आभरणविशेषान् इयत्ताविशेषविशिष्टानि वा सुवर्णानि शतसंख्याकानि। शतं सहस्रम् इत्यपरिमितवचनः। अपरिमितान् vसद्यः प्रार्थनानन्तरमेव vकक्षीवान् अहम् vआदम् आत्तवानस्मि स्वीकृतवानस्मीत्यर्थः[6]। तथा vप्रयतान् शुद्धान् लक्षणोपेतान् vअश्वान् अध्वगमनसमर्थान् हयान् आदम् आत्तवान्। तथा vगोनां पुंगवानां बलीवर्दानामित्यर्थः। उत्तरमन्त्रे स्त्रीगवीनामभिधानात्। तेषां vशतम् आदम्। एवं प्रदाता राजा vदिवि द्युलोके vश्रवः कीर्तिम् vअजरं शाश्वतीम् vआ vततान विस्तारितवान्। गवादिप्रतिग्रहीता अहं स्वर्गे कीर्तिमकरवमित्यर्थः॥

उप मा श्यावाः स्वनयेन दत्ता वधूमन्तो दश रथासो अस्थुः।
षष्टिः सहस्रमनु गव्यमागात्सनत्कक्षीवाँ अभिपित्वे अह्नाम्॥ ३॥

उप। मा। श्यावाः। स्वनयेन। दत्ताः। वधूऽमन्तः। दश। रथासः। अस्थुः।
षष्टिः। सहस्रम्। अनु। गव्यम्। आ। अगात्। सनत्। कक्षीवान्। अभिऽपित्वे। अह्नाम॥३॥

vस्वनयेन vदत्ताः vश्यावाः तद्वर्णाश्वैः[7] युक्तत्वात् श्यावाः vवधूमन्तः आरूढाभिर्वधूभिस्तद्वन्तः vदश एतत्संख्याकाः vरथासः रथाः vउप vअस्थुः उपस्थिताः[8]। गव्यशब्दो गोसमूहवाची[9]। vषष्टिः

---

१. च-ज्ञ-त-फ-'भाव्यस्य' नास्ति। २. क्ष-ञ-ट-भावयव्यस्य। वर्णलोपः। ३. ज्ञ-झ-त-विशेषेण। ४. क्ष-ञ-ट-धनप्रदानेन। ५. क्ष-ञ-ट-याचमानस्य। नाधृ शब्दे। अनुदात्तेत्। ६. क्ष-ञ-ट-'स्वीकृतवानस्मीत्यर्थः' इत्यस्यानन्तरं 'ददातेः आङ्पूर्वात् आङो दोऽनास्यविहरणे इत्यात्मनेपदाभावश्छान्दसः। लेट्याडागमः। छान्दसः शपो लुक्। इतश्चलोपः इति इकारलोपः' इत्यधिकम्। ७. ख-च-फ-श्यामवर्णाश्वैः। ८. क्ष-ञ-ट-उपस्थिताः। गातिस्थेति सिचो लुक्। ९. क्ष-ञ-ट-अत्र गोसमूहवाची। खलुरभाश्वाविति (खलगोरथादिति) समूहे यः। व्यत्ययात् आद्युदात्तत्वम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]सहस्रमनु [V]गव्यं षष्ट्यधिकसहस्रं गवां समूहोऽनु [V]आगात् आगतः। ततः आत्मानं परोक्षेण ब्रवीति। तत्सर्वं प्रतिगृह्य अयं [V]कक्षीवान् [V]अह्नां दिवसानां मध्ये [V]अभिपित्वे संनिहितेऽहनि [V]सनत्। स्वीकृतं[1] रथवध्वादिकं स्वपित्रे समर्पयति स्वयं वा स्वीकरोति[1]। अभिपित्वशब्दः आसन्नकालवाची प्रपित्वशब्दः[2] इतिवत्[2]। स च 'प्रपित्वेऽभीक इत्यासन्नस्य' ( निरु. ३. २० ) इति यास्केनोक्तत्वात् आसन्नवचनः। उपसर्गभेदेऽप्यर्थाभेदः ॥

चत्वारिंशद्दशरथस्य शोणाः सहस्रस्याग्रे श्रेणिं नयन्ति।
मदच्युतः कृशनावतो अत्यान्कक्षीवन्त उदमृक्षन्त पज्राः ॥ ४ ॥

चत्वारिंशत्। दशऽरथस्य। शोणाः। सहस्रस्य। अग्रे। श्रेणिम्। नयन्ति।
मदऽच्युतः। कृशनऽवतः। अत्यान्। कक्षीवन्तः। उत्। अमृक्षन्त। पज्राः ॥ ४ ॥

[V]दशरथस्य दशसंख्याकरथवतः [V]सहस्रस्य सहस्रसंख्याकानुचरोपेतस्य कक्षीवतो गोयूथसहस्रस्य वा [V]अग्रे पुरस्तात् [V]शोणाः शोणवर्णोपेताः अश्वाः [V]चत्वारिंशत् एकैकस्य रथस्य चतुष्टये[3] सति दशरथानां मिलित्वा चत्वारिंशदश्वा भवन्ति। तेऽपि [V]श्रेणिं पङ्क्तिमाश्रित्य [V]नयन्ति रथान् अभिमतदेशं प्रापयन्ति। यद्वा। अश्वनियुक्तान् रथान् श्रेणिं श्रेणीभावं नयन्ति प्रापयन्ति। एकैकं रथं चत्वारश्चत्वारः पङ्क्त्याकारेण वहन्तीत्यर्थः। अथ तान् [V]कक्षीवन्तः। कक्ष्या अश्वसंबन्धिनी[4] रज्जुः। 'कक्ष्या रज्जुरश्वस्य' ( निरु. २. २ ) इति यास्केनोक्तत्वात्। ताभिस्तद्वन्तः। यद्वा। अङ्गिरसः पुत्राः सर्वेऽपि कक्षीवन्तः। अथवा कक्षीवदनुचराः सर्वेऽपि छत्रिन्यायेन कक्षीवन्तः। [V]पज्राः घासाद्यन्नवन्तः सन्तः [V]मदच्युतः मदस्राविणः उद्वृत्तान् शत्रूणां मदस्य च्यावयितॄन् वा [V]कृशनावतः सुवर्णमयनानाभरणयुक्तान्। कृशनमिति हिरण्यनाम 'कृशनं लोहम्[5]' ( नि. १. २. ७ ) इति तन्नामसु पाठात्। सुवर्णाभरणोपेतान् [V]अत्यान् सततगमनशीलानश्वान् [V]उदमृक्षन्त अध्वश्रमजनितस्वेदापनयनाय उत्कृष्टं मार्जयन्ति ॥

पूर्वामनु प्रयतिमा ददे वस्त्रीन्युक्ताँ अष्टावरिधायसो गाः।
सुबन्धवो ये विश्याइव व्रा अनस्वन्तः श्रव ऐषन्त पज्राः ॥ ५ ॥

पूर्वीम्। अनु। प्रऽयतिम्। आ। ददे। वः। त्रीन्। युक्तान्। अष्टौ। अरिऽधायसः। गाः।
सुऽबन्धवः। ये। विश्याःऽइव। व्राः। अनस्वन्तः। श्रवः। ऐषन्त। पज्राः ॥ ५ ॥

इदानीमानीतं धनं बन्धुभ्यो निवेदयन्नाह। हे [V]सुबन्धवः[6] [V]पूर्वां [V]प्रयतिं पूर्वप्रदानम् [V]अनु तमनुसृत्य वक्ष्यमाणानि रथादीनि [V]वः युष्मदर्थम् [V]आ [V]ददे स्वीकृतवानस्मि। यद्वा। पूर्वां प्रयतिं

---

१. क्ष-ञ-ट–असनत् संभक्तवान्। २. क्ष-ञ-ट–प्रपित्वशब्दवत्। ३. क्ष-ञ-ट–चतुष्टये चतुष्टये। ४. क्ष-ञ-ट–अश्वबन्धनी। ५. क्ष-ञ-ट–काञ्चनम्। ६. च-फ–सहजाः सुबन्धवः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रदेयं रथादिकम् अनु दानक्रमेणैव आ ददे प्रतिगृहीतवानस्मि । कानि तानीति । Vत्रीन् Vअष्टौ च Vयुक्तान् चतुर्भिश्चतुर्भिरश्वैर्धनैर्वा युक्तान् रथानिति शेषः । अत्र संख्यापृथग्निर्देशो न विवक्षितः । तथा Vअरिधायसः अरिभिरीश्वरैर्धारणीयाः बहुमूल्याः असंख्याताः Vगाः च आ ददे । अत्र वक्ष्यमाणानि पूर्वं प्रतिगृहीतादधिकानीति युक्तम् । पूर्वमेव पित्रे निवेदितानां पुनर्बन्धुभ्यो निवेदनासंभवात् ' वधूमन्तो दश रथासो अस्थुः ' ( ऋ. सं. १. १२६. ३ ) इति दशानां रथानामुक्तत्वात् अत्र च त्रीनष्टौ इत्येकादशानां वक्ष्यमाणत्वात् वधूविशिष्टानाम् अन्येभ्यो दातुमनुचितत्वाच्च अन्यानीति युक्तम् । उक्तानामेव अनुवदनपक्षे[1] दशवधूयुक्ता रथा एको धनपूर्ण इति विवेकः । उक्तानामेव रथादीनां पुनरभिधानं प्रकृष्टत्वज्ञापनार्थम् । सर्वे ब्राह्मणा आगता वसिष्ठश्चागत इतिवत् । इदानीं परोक्षेणाह । सुबन्धवः शोभना विद्यायोनिसंबन्धिनः येषां ते तथोक्ताः । यद्वा । शोभनबान्धवोपेताः परस्परमनुरागयुक्ता इत्यर्थः[2] । विशः प्रजाः । तत्र भवाः Vविश्याः । व्रियन्त इति Vव्राः व्राताः ॥ तकारलोपश्छान्दसः[3] ॥ विशां व्राता यथा परस्परमनुरागवन्तः तथा एतेऽपीत्यर्थः । Vपज्राः अन्नवन्तोऽङ्गिरसः संतानप्रभवा ये सन्ति ते सर्वे[4] सुबन्धवः Vअनस्वन्तः शकटवन्तः हविर्धानशकटोपलक्षितसोमयागवन्तः सन्तः Vश्रवः सर्वत्र श्रूयमाणां कीर्तिम् Vऐषन्त इच्छन्ति इच्छन्तु वा । तदर्थम् आ ददे इति शेषः[5] ॥

आगधिता परिगधिता या कशीकेव जङ्घहे ।
ददाति मह्यं यादुरी याशूनां भोज्या शता ॥ ६ ॥

आऽगधिता । परिऽगधिता । या । कशीकाऽइव । जङ्घहे ।
ददाति । मह्यम् । यादुरी । याशूनाम् । भोज्या । शता ॥ ६ ॥

संभोगाय प्रार्थितो भावयव्यः स्वभार्यां रोमशामप्रौढेति बुद्ध्या परिहसन्नाह । Vभोज्या भोगयोग्यैषा Vआगधिता आ समन्तात् गृहीता स्वीकृता । तथा Vपरिगधिता परितो गृहीता । आदरातिशयाय पुनर्वचनम् । ' गध्यं गृह्णातेः ' ( निरु. ५. १५ ) इति यास्कः । यद्वा । आगधिता आ समन्तात् मिश्रयन्ती[6] । आन्तरं प्रजननेन बाह्यं भुजादिभिरित्यर्थः । ' गध्यतिर्मिश्रीभावकर्मा ' ( निरु. ५. १५ ) इति यास्कः । पूर्वस्मिन् पक्षे पुरुषस्य प्राधान्यम् उत्तरस्मिंस्तु योषितः इति भेदः । कीदृशी[7] सा । या Vजङ्घहे अत्यर्थं गृह्णाति कदाचिदपि न मुञ्चति[7] । अत्रागे दृष्टान्तः । Vकशीकेव । कशीका नाम सूतवत्सा[8] नकुली । सा यथा पत्या सह चिरकालं क्रीडति न कदाचिदपि विमुञ्चति तथैषापि । किंच भोज्यैषा Vयादुरी । यादुरिति उदकनाम । रेतोलक्षणमुदकं प्रभूतं ददातीति यादुरी । बहुरेतो-

---

१. क्ष-ञ-ट–अनुवादनपक्षे । २. क्ष-ञ ट–' इत्यर्थः ' इत्यस्यानन्तरं ' बहुव्रीहौ आद्युदात्तं द्यच्छन्दसीति उत्तरपदाद्युदात्तत्वम् ' इत्यधिकम् । ३. क्ष-ञ-ट–' तकारलोपश्छान्दसः ' इत्यस्यानन्तरं ' यद्वा व्रियन्त इति व्राताः । घञर्थे कविधानमिति कः ' इत्यधिकम् । ४. क्ष-ञ-ट–' सर्वे ' इत्यस्यानन्तरं ' पज्रा इत्युच्यन्ते । पज्रा वा अङ्गिरस इति श्रुतेः ' इत्यधिकम् । ५. क्ष-ञ-ट-' शेषः ' इत्यस्यानन्तरम् ' इषेः छान्दसे लुङि छत्वाभावः आत्मनेपदम् ' इत्यधिकम् । ६. क्ष-ञ-ट–' मिश्रयन्ती ' इत्यस्यानन्तरं ' तथा परिगधिता परितो मिश्रयन्ती ' इत्यधिकम् । ७. क्ष-ञ-ट–कीदृशी सा । जङ्घहे अत्यर्थं गृहीत्वा न मुञ्चति । ग्रहेः ग्रहणकर्मणः यङ्लुकि छान्दसः अभ्यासस्य नुमागमः आत्मनेपदं च । ८. क्ष-ञ-ट–वशा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

युक्तेत्यर्थः[1]। तादृशी सती ᵛयाशूनां संभोगानाम्। यश इति प्रजनननाम। तत्संबन्धीनि कर्माणि याशूनि भोगाः[2]। तेषां ᵛशता शतानि असंख्यातानि मह्यं ददाति॥ रोमशा नाम बृहस्पतेः पुत्री ब्रह्मवादिनी परिहसन्तं स्वपतिं प्रत्याह॥

उपो॑प मे॒ परा॑ मृश॒ मा मे॑ द॒भ्राणि॑ मन्यथाः।
सर्वा॒हम॑स्मि रोम॒शा ग॒न्धारी॑णामिवावि॒का॥ ७॥

उप॑ऽउप। मे॒। परा॑। मृ॒श॒। मा। मे॒। द॒भ्राणि॑। म॒न्य॒थाः॒।
सर्वा॑। अ॒हम्। अ॒स्मि॒। रो॒म॒शा। ग॒न्धारी॑णाम्ऽइव। अ॒वि॒का॥ ७॥

भो पते ᵛमे माम्। द्वितीयार्थे चतुर्थी। ᵛउपोप। द्वितीय उपशब्दः पादपूरणः[3]। उपेत्य ᵛपरा ᵛमृश सम्यक् स्पृश। भोगयोग्यामवगच्छेत्यर्थः। यद्वा। मे मम गोपनीयमङ्गम् उपोप परा मृश अत्यन्तमान्तरं[4] स्पृश। परामर्शाभावशङ्कां निवारयति। ᵛमे मदङ्गानि रोमाणि ᵛदभ्राणि ᵛमा ᵛमन्यथाः अल्पानि मा बुध्यस्व। 'दभ्रमर्भकमित्यल्पस्य' इति[5] 'दभ्रं दभ्नोतेः' (निरु. ३. २०) इति यास्कः। अदभ्रत्वमेव विशदयति। ᵛअहं ᵛरोमशा बहुरोमयुक्ता ᵛअस्मि। यतोऽहमीदृशी अतः ᵛसर्वा संपूर्णावयवास्मि। रोमशत्वे दृष्टान्तः। ᵛगन्धारीणाम् ᵛअविका इव। गन्धाराः देशाः। तेषां संबन्धिनी अविजातिरिव। तद्देशस्थाः अवयो मेषाः यथा रोमशाः तथा अहमस्मि। यद्वा। गन्धारीणां गर्भधारिणीनां स्त्रीणाम् अविका अत्यर्थं तर्पयन्ती योनिरिव। तासाम् आ प्रसवं रोमादिविकर्तनस्य[6] शास्त्रे निषिद्धत्वात् योनी रोमशा भवति। अतः सा उपमीयते। यतोऽहमीदृशी अतो माम् अप्रौढां मा अवबुध्यस्वेत्यर्थः॥ ॥ ११॥ ॥ १८॥

एकोनविंशेऽनुवाके सप्त सूक्तानि। तत्र 'अग्निं होतारम्' इति प्रथमं सूक्तमेकादशर्चं दिवोदासपुत्रस्य परुच्छेपस्यार्षमाग्नेयमात्यष्टम्। 'स हि शर्धः' (ऋ. सं. १. १२७. ६) इत्यस्याः षट्सप्तत्यक्षरा अतिधृतिः। उत्कृत्यभिकृतिसंकृतिविकृत्याकृतिप्रकृतिकृत्यतिधृतिधृत्यत्यष्ट्यष्टिषु चतुरुत्तरशताक्षरमारभ्य चतुर्णां[7] परित्यागे[7] एकैकमुक्तं छन्दो जायते। तथा सति अत्यष्ट्यतिधृती उक्तसंख्योपेते स्याताम्। एतत्सर्वं छन्दोग्रन्थे 'चतुःशतमुत्कृतिः' (पि. ४. १) इत्यादिसूत्रैः प्रतिपादितम्। तथा चानुक्रान्तम्—'अग्निमेकादश परुच्छेपो दैवोदासिराग्नेयं तु पारुच्छेपं सर्वमात्यष्टं तत्रातिधृतिः षष्ठी' इति। सूक्तस्य विशेषविनियोगो लैङ्गिकः। दशरात्रस्य षष्ठेऽहनि प्रातःसवने प्रस्थितयाज्यानां पुरस्तादन्या ऋचः कृत्वा प्राकृतीभिश्च[8] सह यष्टव्यम्। तत्राग्नीध्रस्यैषा प्रथमा। 'षष्ठस्य प्रातःसवने' इति खण्डे सूत्रितम्—'अग्निं होतारं मन्ये दास्वन्तं दध्यङ् ह मे जनुषं पूर्वो अङ्गिराः' (आश्व. श्रौ. ८. १) इति॥

---

१. क्ष-ञ-ट—'बहुरेतोयुक्तेत्यर्थः' इत्यस्यानन्तरम् 'आतोऽनुपसर्गे कः। छान्दस ईकारस्त्रीप्रत्ययः। पृषोदरादिः'. इत्यधिकम्। २. क्ष-ञ-ट—भोगाः। पृषोदरादि। ३. क्ष-ञ-ट—पूरणः। ४. क्ष-ञ-ट—प्रसमुपोद इति द्विरुक्तिः। ५. क-ख-च-ज-ज्ञ-झ-ण-व—इति निघण्टुः। ६. क्ष-ञ-ट—रोमनखादिकर्तनस्य। ७. क्ष-ङ-ञ-ट—चतुर्णां चतुर्णां परित्यागे; च-फ—चतुर्णां परित्यागेन। ८. क्ष-ञ-ट—प्रकृताभिः।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अग्निं होतारं मन्ये दास्वन्तं वसुं सूनुं सहसो जातवेदसं विप्रं न जातवेदसम्।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा।
घृतस्य विभ्राष्टिमनु वष्टि शोचिषाजुह्वानस्य सर्पिषः ॥ १ ॥

अग्निम्। होतारम्। मन्ये। दास्वन्तम्। वसुम्। सूनुम्। सहसः। जातऽवेदसम्।
विप्रम्। न। जातऽवेदसम्॥ यः। ऊर्ध्वया। सुऽअध्वरः। देवः। देवाच्या। कृपा।
घृतस्य। विऽभ्राष्टिम्। अनु। वष्टि। शोचिषा। आऽजुह्वानस्य। सर्पिषः ॥ १ ॥

vअग्निं सर्वासां देवसेनानामग्रण्यं यज्ञेष्वग्रं नीयमानं वा vहोतारम् अस्मद्यागं प्रति देवानामाह्वातारम्। यद्वा। होमनिष्पादकं होतारम्[1]। 'जुहोतेर्होतेत्यौर्णवाभः' (निरु. ७. १५) इति यास्कः। 'अग्निमद्य होतारमवृणीत' (तै. ब्रा. २. ६. १५. १) इति श्रुतेः। 'अग्निमग्न आवह' (तै. ब्रा ३. ५. ३. २) इति च अग्नेराह्वातृत्वं प्रसिद्धम्। अग्निं होतारं vमन्ये। एवं प्रतिविशेषणं मन्ये इति संबन्धः। यद्वा। यागनिष्पत्तेरेवापेक्षितत्वात् एतदेव विधेयविशेषणम्। इतराणि वक्ष्यमाणविशेषणानि स्तुतिपराणि। vदास्वन्तम् अतिशयेन[2] दानवन्तं[2] vवसुं सर्वेषां निवासहेतुं[3] vसहसः vसूनुं बलस्य पुत्रम्। अग्निर्मन्थनकाले बलेन मथ्यमानः उत्पद्यते इति पुत्रत्वमुपचर्यते। vजातवेदसं जातानां वेदितारं जातप्रज्ञं जातबलं वा। जातवेदःशब्दो यास्केन बहुधा निरुक्तः (निरु. ७. १९)। अग्नेर्जातवेदस्त्वे दृष्टान्तः। vविप्रं vन vजातवेदसं जातविद्यं मेधाविनं ब्राह्मणमिव। तं यथा बहु मन्यन्ते तथा त्वामपि मन्ये स्तौमीत्यर्थः। उक्तगुणविशिष्टः vयः vदेवः vस्वध्वरः शोभनयज्ञवान् यज्ञं सम्यक् निर्वहन् vऊर्ध्वया उन्नतया उत्कृष्टया vदेवाच्या देवान् पूजयन्त्या देवान् प्रत्यक्तया वा vकृपा कृपया सामर्थ्यलक्षणया। 'देवान्प्रत्यक्तया कृपा' (निरु. ६. ८) इति यास्कः। तेभ्यो हविर्वहनबुद्धया युक्तः सन् vआजुह्वानस्य आ समन्तात् हूयमानस्य vसर्पिषः सरणशीलस्य vघृतस्य विलापनेन दीप्तस्याज्यस्य vविभ्राष्टिं विशेषेण भ्राजमानम्[4] vअनु स्वयमपि तदाज्यं vशोचिषा ज्वालया vवष्टि कामयते स्वीकरोतीत्यर्थः ॥

यजिष्ठं त्वा यजमाना हुवेम ज्येष्ठमङ्गिरसां विप्र मन्मभिर्विप्रेभिः शुक्र मन्मभिः।
परिज्मानमिव द्यां होतारं चर्षणीनाम्।
शोचिष्केशं वृषणं यमिमा विशः प्रावन्तु जूतये विशः ॥ २ ॥

यजिष्ठम्। त्वा। यजमानाः। हुवेम। ज्येष्ठम्। अङ्गिरसाम्। विप्र। मन्मऽभिः। विप्रेभिः। शुक्र।
मन्मऽभिः॥ परिज्मानम्ऽइव। द्याम्। होतारम्। चर्षणीनाम्।
शोचिःऽकेशम्। वृषणम्। यम्। इमाः। विशः। प्र। अवन्तु। जूतये। विशः ॥ २ ॥

---

१. क्ष-ञ-ट–होतारम् आह्वातारम्। २. क्ष-ङ-ञ-ट–अतिशयितदानम्। दातेरसुनन्तान्मतुपि तसौ मत्वर्थे इति भत्त्वात् रुत्वाभावः (ङ–ष्टुत्वाभावः) ३. ङ–निवासभूतम्। ४. क्ष-ङ-ञ-ट–भ्राजनम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]विप्र मेधाविन् [v]शुक्र दीप्तज्वालाग्ने [v]यजिष्ठम् अतिशयेन यष्टृतमं [v]त्वा त्वां [v]यजमानाः वयं यष्टारः [v]हुवेम आह्वयामः । यतो वयं यजमाना यतश्च त्वं यजिष्ठः अतो हुवेमेत्यभिप्रायः । कीदृशं त्वाम् । [v]अङ्गिरसाम् अङ्गिरोगोत्रोत्पन्नानां मध्ये [v]ज्येष्ठम्[1] । यद्वा । अङ्गाराणां[1] मध्ये ज्येष्ठं ज्वालायुक्तत्वात् । ' अङ्गिरा अङ्गाराः ' ( निरु. ३. १७ ) इति यास्कः । ' येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन् ' ( ऐ. ब्रा. ३. ३४ ) इति श्रुतेः । केन साधनेनेति तदुच्यते । [v]मन्मभिः मननसाधनैः [v]विप्रेभिः विशेषेण प्रीणयितृभिः [v]मन्मभिः मन्त्रैः । यद्वा । विप्रेभिर्मेधाविभिर्ऋत्विग्भिः मन्मभिर्मन्त्रैश्च[2] सहिता वयमिति संबन्धः । त्वदाह्वानानन्तरं [v]परिज्मानं परितो गच्छन्तं [v]द्याम् इव सूर्यमिव [v]होतारं देवानामाह्वातारम् । केषामर्थे । [v]चर्षणीनाम् । मनुष्यनामैतत् । मनुष्याणां यजमानानामर्थे । यद्वा । चर्षणीनां पूर्वं मनुष्याणामेव सतां पश्चात् यागादिसाधनेन देवत्वमापन्नानां देवानाम् आह्वातारम् । तथा [v]शोचिष्केशं केशवत् अत्यन्तायतज्वालोपेतं [v]वृषणं वर्षितारम्[3] एवं रूपं [v]यं त्वां [v]विशः त्वामेव निविशमानाः [v]इमाः [v]विशः यजमानरूपाः प्रजाः [v]जूतये स्वर्गाद्यभिमतफलप्राप्तये [v]प्रावन्तु प्रकर्षेण प्रीणयन्तु । तादृशं त्वां हुवेमेति संबन्धः ॥

स हि पुरू चिदोजसा विरुक्मता दीद्यानो भवति द्रुहंतरः परशुर्न द्रुहंतरः ।
वीळु चिद्यस्य समृतौ श्रुवद्वनेव यत्स्थिरम् ।
निष्षहमाणो यमते नायते धन्वासहा नायते ॥ ३ ॥

सः । हि । पुरु । चित् । ओजसा । विरुक्मता । दीद्यानः । भवति । द्रुहम्ऽतरः । परशुः । न । द्रुहम्ऽतरः ॥ वीळु । चित् । यस्य । सम्ऽऋतौ । श्रुवत् । वनाऽइव । यत् । स्थिरम् । निःऽसहमानः । यमते । न । अयते । धन्वऽसहा । न । अयते ॥ ३ ॥

[v]स [v]हि स एव पूर्वं स्तुतः एवाग्निः [v]विरुक्मता विशेषेण रोचनवता [v]ओजसा ज्वालारूपेण बलेन [v]पुरु [v]चित् अत्यधिकमेव [v]दीद्यानः दीप्यमानः [v]द्रुहंतरः द्रोग्धॄणां तरिता निवारयिता[4] [v]भवति अस्मासु द्रोहं कुर्वतां शत्रूणां हिंसको भवतीत्यर्थः । तत्र दृष्टान्तः । [v]द्रुहंतरः द्रोग्धॄणां छेदनाय प्रयुक्तः [v]परशुर्न परशुरिव । स यथा अमोघं हिनस्ति तथायमपि[5] । किंच [v]यस्य अग्नेः [v]समृतौ संगतौ संयोगे [v]वीळु [v]चित् दृढमपि पाषाणादिकं [v]श्रुवत् गच्छेत् शीर्येत[6] । तथा [v]यत्स्थिरं यच्च पर्वतादि स्थिरमचलितं तदपि श्रुवत् । वीड्वितिः[7] दृढनाम, ' वीळु च्यौत्नम् ' ( नि. २. ९. १५ ) इति तन्नामसु पाठात् । तत्र दृष्टान्तः । [v]वनेव[8] उदकमिव । उदकं यथाग्निसंयोगे शुष्यति तथेत्यर्थः । अत्यन्तदृढं स्थिरमपि हिनस्ति अस्मद्द्रोग्धारं शत्रुं हिनस्तीति किमु वक्तव्यमित्यभिप्रायः । किंच अय-

---

१. क्ष-ज्ञ-ज्ञ-ञ-ट–ज्येष्ठं ज्यायांसम् । यद्वा । अङ्गिरसामङ्गाराणाम् । २. क्ष-ञ-ट–मन्त्रैश्च । ३. क्ष-ङ-ज्ञ-ञ-ट–वर्षितारं कामानाम् । ४. ज्ञ–निस्तारयिता । ५. क्ष-ङ-ञ-ट–' तथायमपि ' इत्यस्यानन्तरं ' द्रुहेः इगुपधलक्षणः कः । तस्मिन्नुपपदे संज्ञायां भृतृ( तृ )वृजि इति खच् । अरुर्द्विषदित्यादिना मुम् ' इत्यधिकम् । ६. क्ष-ङ-ञ-ट–' शीर्येत ' इत्यस्यानन्तरं ' शु श्रू गतौ । भौवादिकः । लेट्यडागमः । संज्ञापूर्वकस्य विधेः अनित्यत्वात् गुणाभावः ' इत्यधिकम् । ७. क्ष-ञ-ट–वीळ्विति । ८. क्ष-ङ-ञ-ट–वनेव । सोराकारः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मग्निः vनिष्षहमाणः शत्रून् निःशेषेणाभिभवन् vयमते उपरमते शत्रुषु मध्ये क्रीडति तानेव नाशयति। तथा कुर्वन् vनायते न गच्छति शत्रोः सकाशान्न पलायते। तत्र दृष्टान्तः। vधन्वसहा vन। धनुषा शत्रूनभिभवति इति धन्वसहा धानुष्कः॥ सहतेरसुन् छान्दसोऽन्त्यलोपः॥ स यथा शत्रोरभिमुखं विध्यति न पलायते तद्वदित्यर्थः। यद्वा। दृढधनुर्वहनक्षमः[1] धन्वसहः॥ अस्मिन् पक्षे पचाद्यच्। 'सुपां सुलुक्०' इत्याकारः॥ दृढधन्वा सन् न vअयते न चलति॥

**दृळ्हा चिदस्मा अनु दुर्यथा विदे तेजिष्ठाभिररणिभिर्दाष्टयवसेऽग्नये दाष्टयवसे।**
**प्र यः पुरूणि गाहते तक्षद्वनेव शोचिषा।**
**स्थिरा चिदन्ना नि रिणात्योजसा नि स्थिराणि चिदोजसा॥ ४॥**

दृळ्हा। चित्। अस्मै। अनु। दुः। यथा। विदे।
तेजिष्ठाभिः। अरणिऽभिः। दाष्टि। अवसे। अग्नये। दाष्टि। अवसे।
प्र। यः। पुरूणि। गाहते। तक्षत्। वनाऽइव। शोचिषा।
स्थिरा। चित्। अन्ना। नि। रिणाति। ओजसा। नि। स्थिराणि। चित्। ओजसा॥ ४॥

vअस्मै अग्नये vदृळ्हा vचित् दृळ्हान्येव सारवन्ति हवींषि अनुक्रमेण प्रतिमन्त्रं vदुः ददति॥ ददातेर्लुङि[2] 'गातिस्था०' इति सिचो लुक्। 'आतः' इति झेर्जुस्॥ यजमाना ददति। दाने दृष्टान्तः। vयथा vविदे विदुषे परमार्थदर्शिने उत्कृष्टानि धनानि वितरन्ति दानशीलाः। यद्वा। अयमग्निर्यथा विदे विन्दते स्वातिरिक्तं हविः देवेभ्यो दातुं लभते स्वीकरोति तथा दुः इति॥ विन्दतेश्छान्दसः शपो लुक्॥ 'लोपस्त आत्मनेपदेषु' इति तलोपः॥ किंच सोऽग्निः vतेजिष्ठाभिः vअरणिभिः अत्यन्ततेजोयुक्तैर्मार्गैर्यज्ञादिरूपैः vदाष्टि पूजितः सन् स्वर्गादिकं ददाति॥ 'दाश्र दाने'। शपो लुक्। किमर्थम्। vअवसे तद्रक्षणाय। यद्वा। तेजिष्ठाभिः अतिशयेन तेजोवद्भिः अरणिभिर्गमनैः इतरदेवानुद्दिश्य यजमानेन दत्तं हविः अवसे तेषां स्वीकाराय दाष्टि। अयमग्निर्ददाति नयति। किंच vअग्नये इतरदेवताप्रदानसमयेऽपि यजमानः अग्नये अग्निप्रीतये vदाष्टि प्रथमं ददाति। किमर्थम्। vअवसे रक्षणार्थम्। यदि अयमतृप्तः स्यात् इतरेभ्यो दत्तमपि स्वयं स्वीकुर्यात् तस्मादग्नये प्रयाजादिरूपेण ददातीत्यर्थः। किंच vयः अग्निः vपुरूणि बहूनि सामर्थ्यात् यजमानधनादीनि vप्र vगाहते प्रविशति प्रविश्य च वाय्यादिरूपया ज्वालया vतक्षत् तनूकरोति नाशयतीत्यर्थः। तत्र दृष्टान्तः। vवनेव। वृक्षादिसमूहानि[3] वनानि यथा प्रविश्य तक्षति दहति तथेत्यर्थः। किंच अयमग्निः vस्थिरा स्थिराणि कठिनानि vअन्ना अन्नानि व्रीह्यादीनि vओजसा तेजोरूपया ज्वालया vनि नितरां vरिणाति गच्छति पचतीत्यर्थः॥ 'री गतिरेषणयोः'। क्रैयादिकः। 'प्वादीनां ह्रस्वः' इति ह्रस्वः॥ तथा vओजसा स्वकीयेन तेजसा vस्थिराणि अपरिहरणीयानि पापानि अमित्राणि वा vनि रिणाति निःशेषेण गच्छति नाशयतीत्यर्थः॥

---

१. ख-फ–धनुर्वहनकुशलः ; झ–दृढहननक्रमः ; ञ–दृढधनुर्वहनक्रमः। २. क्ष-ङ-ञ-ट–ददातेश्छान्दसे लुङि। ३. ङ-झ-ञ–वृक्षादिसमूहानिव।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तमस्य पृक्षमुपरासु धीमहि नक्तं यः सुदर्शतरो दिवातरादप्रायुषे दिवातरात् ।
आदस्यायुर्ग्रभणवद्वीळु शर्म न सूनवे ।
भक्तमभक्तमवो व्यन्तो अजरा अग्नयो व्यन्तो अजराः ॥ ५ ॥

तम् । अस्य । पृक्षम् । उपरासु । धीमहि । नक्तम् । यः । सुदर्शतरः । दिवातरात् ।
अप्रेऽआयुषे । दिवातरात् ॥ आत् । अस्य । आयुः । ग्रभणवत् । वीळु । शर्म । न । सूनवे ।
भक्तम् । अभक्तम् । अवः । व्यन्तः । अजराः । अग्नयः । व्यन्तः । अजराः ॥ ५ ॥

vअस्य अस्मै vपृक्षं हविर्लक्षणमन्नम् vउपरासु उपरमन्ते अस्मिन् हवींषीत्युपराः वेदिसमीपभूमयः। तासु vधीमहि धारयामः । अस्येत्युक्तं कस्येत्याह । vयः अग्निः vनक्तं रात्रौ vदिवातरात् अह्नोऽपि vसुदर्शतरः अत्यर्थं सर्वैर्दर्शनीयो भवति । यतोऽयं रात्रौ सर्वेषु भावेषु तमसावृतत्वात् अदृश्यमानेष्वपि स्वयमत्यर्थं प्रकाशते अतोऽस्मै धीमहि। पुनः कीदृशाय । vदिवातरात् अह्नः सकाशादेव[1] vअप्रायुषे । प्रगतमायुर्यस्यासौ प्रायुः । न प्रायुरप्रायुः । तस्मै । 'असौ योऽस्तमेति स सर्वेषां भूतानां प्राणानादायास्तमेति' (तै. आ.१. १४) इति श्रुतेः रात्रौ सर्वे भावा निद्रया आवृतत्वात् प्रायुष इव भवन्ति। अयमग्निस्तु सर्वप्राणिप्राणापहर्तुः सूर्यस्य रात्रौ स्वस्मिन्नेव प्रवेशात् प्रकृष्टायुर्भवति । अतोऽपि धीमहि । किंच vआत् अत एव कारणात् यतोऽयं सुदर्शतरो यतश्चायमप्रायुः अतः कारणात् vअस्य अस्मै तदर्थम् vआयुः हविर्लक्षणमन्नम् vग्रभणवत्[2] ग्रहणयुक्तम् अभूत् । ग्रहणे दृष्टान्तः । vसूनवे पुत्राय पित्रोः vवीळु vशर्म दृढं सुखसाधनं गृहं यथा ग्रहणवद्भवति तथेत्यर्थः । शर्मेति गृहनाम 'शर्म वर्म' (नि. ३. ४. २१) इति तन्नामसु पाठात् । इदानीमाहवनीयादिरूपेण अग्नेर्बहुत्वमपेक्ष्याह । एते vअग्नयः vभक्तं सेवमानम् vअभक्तम् असेवमानं च vव्यन्तः एते प्राणिनः अनुग्राह्याः इति बुध्यमानाः vअवः रक्षन्ति । यद्यपि विशेषेण प्राणिनो दाहपाकादिद्वारा रक्षन्ति तथाप्यस्ति यजमानेष्वतिशय इत्याह । vव्यन्तः तैः प्रत्तं[3] हविरश्नन्तः vअजराः भवन्ति । स्वयं हविषा अजराः सन्तो यजमानानप्यजरान् कुर्वन्तीत्यर्थः ॥ ॥ १२ ॥

स हि शर्धो न मारुतं तुविष्वणिरग्नेस्वतीषूर्वरासिष्टनिरार्तनासिष्टनिः ।
आदद्धव्यान्यादिर्यज्ञस्य केतुरहर्णा ।
अध स्मास्य हर्षतो हृषीवतो विश्वे जुषन्त पन्थां नरः शुभे न पन्थाम् ॥ ६ ॥

सः । हि । शर्धः । न । मारुतम् । तुविऽस्वनिः । अग्नेस्वतीषु । उर्वरासु । इष्टनिः । आर्तनासु ।
इष्टनिः ॥ आदत् । हव्यानि । आऽददिः । यज्ञस्य । केतुः । अहर्णा ।
अध । स्म । अस्य । हर्षतः । हृषीवतः । विश्वे । जुषन्त । पन्थाम् । नरः । शुभे । न । पन्थाम् ॥ ६ ॥

---

१. क्ष-ञ–सकाशादपि । उभयत्र स्वार्थिकस्तरप् । २. ङ–प्रभणवत् ग्रहणवत् । ३. क्ष-ञ–दत्तम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vस vहि स एव स्तुत्यतया प्रसिद्ध एवाग्निः vतुविष्वणिः । तुवि इति बहुनाम ' उरु तुवि ' ( नि. ३. १. २ ) इति तन्नामसु पाठात् । बहुस्वनिः प्रभूतध्वनियुक्तो वर्तते । अत्यन्तज्वलितेऽग्नौ वायुसंपर्कात् भुगिभुगिति ध्वनिरुत्पद्यते ज्वलतीत्यर्थः । ध्वनने दृष्टान्तः । vमारुतं vशर्धो vन मरुत्संबन्धि बलमिव । मरुतां समूहो यथा ध्वनयति तथेत्यर्थः । कुत्रेति तदुच्यते । vअप्नस्वतीषु खननप्रोक्षणादिकर्मोपेतासु । अप्न इति कर्मनाम, ' अप्नः दंसः ' ( नि. २. १. २ ) इति तन्नामसु पाठात् । vउर्वरासु उरुवरणयुक्तासु श्रेष्ठासु वेदिभूमिषु । कीदृशोऽयम् । vइष्टनिः यष्टव्यः ॥ औणादिकोऽनिक् तुडागमश्च ॥ किंच vआर्तनासु । आर्तान् करोत्यार्तयति । आर्तयन्तीत्यार्तनाः पृतनाः । तासु ॥ ' ण्यासश्रन्थो युच् ' ( पा. सू. ३. ३. १०७ ) । वृषादित्वादाद्युदात्तत्वम् ॥ तासां जयाय vइष्टनिः एष्टव्यो यष्टव्यो वा । किंच एवं स्वनयन्नग्निः vहव्यानि आज्यपुरोडाशादीनि vआदत् अत्ति भक्षयति ॥ छान्दसो लुङ् । यद्वा । आङ्पूर्वाद्दातेः ' आङो यमहनः ' ( पा. सू. १. ३. २८ ) इति व्यत्ययेनात्मनेपदाभावः । ' गातिस्था° ' इति सिचो लुक् । छान्दसो ह्रस्वः । केवलादेव वा ' छन्दस्यपि दृश्यते ' इति अनजादेरपि आडागमः । अत एवानवग्रहः स एव शिष्यते ॥ vआददिः सर्वत्र हविरादानशीलः तथा vयज्ञस्य vकेतुः प्रज्ञापकः केतुस्थानीयो वा vअर्हणा पूजनीयः ॥ ' सुपां सुलुक्° ' इति सोः आकारः । प्रत्ययाद्युदात्तत्वं छान्दसम् । किंच vहर्षतः हविर्भक्षणादत्यन्तहर्षयुक्तस्य । यद्वा । अभिमतफलदानेन यजमानान् हर्षयतः vहर्षीवतः आज्यस्वीकारेण हर्षयुक्तस्याग्नेः vपन्थां पन्थानं मार्गं vविश्वे सर्वे मनुष्याः vजुषन्त[1] अप्रीणयन् असेवन्त वा[1] । किमर्थम् । vशुभे शुभाय शोभनाय सुखप्राप्तये । पन्थानं सर्वैर्गन्तव्यम् ऐहिकामुष्मिकफलस्य अग्नेरेव मार्गं सर्वेऽनुगच्छन्ति । अग्निमेव प्रीणयित्वा साधयन्ति । मार्गश्रयणे[2] दृष्टान्तः । यथा लोके vनरः मनुष्याः शुभे शोभनाय सुखप्राप्तये पन्थानं सर्वैर्गन्तव्यं निर्भयं प्रौढमार्गमिव ॥

द्विता यदीं कीस्तासो अभिध्यवो नमस्यन्त
उपवोचन्त भृगवो मश्नन्तो दाशा भृगवः ।
अग्निरीशे वसूनां शुचिर्यो धर्णिरेषाम् ।
प्रियाँ अपिधौँवनिषीष्ट मेधिर आ वनिषीष्ट मेधिरः ॥ ७ ॥

द्विता । यत् । ईम् । कीस्तासः । अभिऽध्यवः । नमस्यन्तः । उपऽवोचन्त । भृगवः । मश्नन्तः । दाशा । भृगवः ॥ अग्निः । ईशे । वसूनाम् । शुचिः । यः । धर्णिः । एषाम् । प्रियान् । अपिऽधीन् । वनिषीष्ट । मेधिरः । आ । वनिषीष्ट । मेधिरः ॥ ७ ॥

vयत् यं vद्विता द्वित्वमापन्नं द्विप्रकारं श्रौतस्मार्तभेदेन द्वित्वमापन्नम् । यद्वा । उपलक्षणमेतत् । आहवनीयादिरूपेण नानाविधम् । यद्वा । द्विता द्विविधाय ऐहिकामुष्मिकफलाय उभयाय[3] ॥ विभक्तेः आजादेशः । vईम् इममग्निं vकीस्तासः कीर्तनं कुर्वन्तः स्तोतारः ॥ पचाद्यचि छान्दसं सत्वम् । vअभिध्यवः अभितो द्योतमानाः vनमस्यन्तः नमस्कारोपलक्षितमुपस्थानं कुर्वन्तः vभृगवः भृगुगोत्रो-

---

१. क्ष-अ–जुषन्त असेवन्त सेवन्ते वा । २. क्ष-अ–मार्गाश्रयणे । ३. क्ष-अ–उभयथा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्पन्ना महर्षयः vउपवोचन्त उपेत्य ब्रुवन्ति । किं कुर्वन्तः । vदाशा दानेन निमित्तभूतेन हविर्दानार्थं vमन्थन्तः अरण्याम्[1] अग्निमन्थनं कुर्वन्तः तथा vभृगवः भ्रष्टारो हविषां पापानां वा । किं च vयः vअग्निः vशुचिः दीप्तः vधर्णिः धारणकुशलः अयमग्निः vएषां दीयमानानां vवसूनां हविर्लक्षणानाम् vईशे ईष्टे समर्थो भवति ॥ ' लोपस्त आत्मनेपदेषु ' इति तलोपः ॥ यद्वा । एषां दृश्यमानानां मणिमुक्तादीनां वसूनाम् ईशे ईष्टे समर्थो भवति प्रदातुमिति शेषः । किंच अयमग्निः vमेधिरः । मेधो यज्ञः । तद्वान् स्वयं यष्टव्यत्वेन प्रधानभूतः सन् vप्रियान् स्वप्रीतिहेतून् आज्यादीन् vअपिधीन् पर्यासिपर्यन्तं दत्तान् । vवनिषीष्ट संभक्तवान् संभजतां वा । तथा vमेधिरः मेधावानसौ vआ vवनिषीष्ट । अन्यदेवताकेष्वपि यज्ञेषु स्वयम् आज्यभागप्रयाजादिरूपं हविः संभजते ॥

विश्वासां त्वा विशां पतिं हवामहे सर्वासां समानं दम्पतिं भुजे सत्यगिर्वाहसं भुजे ।
अतिथिं मानुषाणां पितुर्न यस्यासया ।
अमी च विश्वे अमृतास आ वयो हव्या देवेष्वा वयः ॥ ८ ॥

विश्वासाम् । त्वा । विशाम् । पतिम् । हवामहे । सर्वासाम् । समानम् ।
दम्ऽपतिम् । भुजे । सत्यऽगिर्वाहसम् । भुजे ।
अतिथिम् । मानुषाणाम् । पितुः । न । यस्य । आसया ।
अमी इति । च । विश्वे । अमृतासः । आ । वयः । हव्या । देवेषु । आ । वयः ॥ ८ ॥

vविश्वासां सर्वासां vविशां प्रजानां यजमानानां[2] vपतिम् अभिमतफलदानेन पालकं vहवामहे आह्वयामः । न केवलं यजमानानां किंतु vसर्वासां प्रजानां vसमानम् एकरूपं दहनपचनाद्युपकारस्य सर्वेषां समत्वात् । तथा vदम्पतिं गार्हपत्यादिरूपेण[3] गृहस्य पालकम् । दम इति गृहनाम, ' दमे कृत्तिः ' ( नि. ३. ४. १२ ) इति तन्नामसु पाठात् ॥ अकारलोपश्छान्दसः ॥ किमर्थम् । vभुजे भोगाय हवामहे आह्वयामः । पुनः स एव विशेष्यते । vसत्यगिर्वाहसं यथार्थभूतानाम् अविसंवादिफलानां स्तुतिरूपाणां गिरां वोढारम् । यद्वा । गिरो मन्त्ररूपा वहन्तीति गिर्वाहसः ऋत्विजः । सत्याः अविसंवादिफला गिर्वाहसो यस्य तं तादृशं हवामहे इति शेषः ॥ ' वहिहाधाभ्यः° ' इति असुन् । ' णित् ' इत्यनुवृत्तेः उपधावृद्धिः ॥ पुनः कीदृशम् । vमानुषाणां मनुष्याणाम् vअतिथिम् अतिथिवत्पूज्यं दर्शादितिथिमपेक्ष्य आगन्तारं वा । किंच vयस्य अग्नेः vआसया समीपे । आसेत्यन्तिकनाम, ' आसा अम्बरम् ' ( नि. २. १६. २ ) इति तन्नामसु पाठात् । तत्समीपे vअमी vविश्वे vअमृतासः हविर्भोक्तृत्वेन प्रसिद्धाः सर्वे देवा अपि vआ आगच्छन्ति ॥ उपसर्गवशात् योग्यक्रियाध्याहारः ॥ किमर्थम् । vवयः हविर्लक्षणान्नमुद्दिश्य अग्निमुखात् एव इतरेभ्यो दीयमानत्वात् । तत्र दृष्टान्तः । vपितुर्न पितुरन्तिके पुत्रादयो यथा अन्नाद्यर्थं सेवन्ते तद्वत् । किंच vवयः नेतारः[4] ऋत्विजोऽपि vदेवेषु इतरेषु इज्यमानेषु मध्ये vहव्या हवींषि vआ ददति अग्नये ॥ वेतेरौणादिको डिः । विचि वा गुणः ॥

---

१. क्ष-ञ-ज्ञ-अरणीभ्याम् । २. क्ष-ञ-यजमानरूपाणाम् । ३. क्ष-ङ-ज्ञ-ञ-गार्हपत्यरूपेण । ४. क्ष-ञ-वेतारः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्वमग्ने सहसा सहन्तमः शुष्मिन्तमो जायसे देवतातये रयिर्न देवतातये ।
शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः ।
अध स्मा ते परि चरन्त्यजर श्रुष्टीवानो नाजर ॥ ९ ॥

त्वम् । अग्ने । सहसा । सहन्ऽतमः । शुष्मिन्ऽतमः । जायसे । देवऽतातये । रयिः । न । देवऽतातये ॥ शुष्मिन्ऽतमः । हि । ते । मदः । द्युम्निन्ऽतमः । उत । क्रतुः ।
अध । स्म । ते । परि । चरन्ति । अजर । श्रुष्टीऽवानः । न । अजर ॥ ९ ॥

हे vअग्ने vत्वं vसहसा बलेन vसहन्तमः अतिशयेन शत्रूणामभिभविता तथा vशुष्मिन्तमः अतिशयेन तेजस्वी vजायसे ॥ सहेरौणादिकः कनिन् । 'नाद्यस्य' इति नुट् ॥ किमर्थम् । vदेवतातये देवानां विस्तारयुक्ताय यागाय तदर्थम् । यज्ञनामैतत् । यद्वा । उक्तगुणविशिष्टः स जायसे । अरण्योरुत्पद्यसे । यज्ञार्थत्वे दृष्टान्तः । vरयिर्न vदेवतातये । धनं यथा यज्ञार्थमुत्पद्यते । तथा चोक्तं–' यज्ञार्थं द्रव्यमुत्पन्नम् ' इति । किंच vते तव vमदः आज्यस्वीकारजनितो हर्षः । vशुष्मिन्तमः अतिशयेन बलवान् । हिशब्दः प्रसिद्धौ । आज्येन अग्नेर्मदो भवतीति प्रसिद्धम् । अपि च ते vक्रतुः कर्मविशेषोऽपि vद्युम्निन्तमः यशोयुक्तोऽन्नयुक्तो वा खलु । ' द्युम्नं द्योततेर्यशो वान्नं वा ' ( निरु. ५. ५ ) इति यास्कः । vअध अतः कारणात् vअजर हे जरारहिताग्ने vते त्वां vपरि vचरन्ति यजमानाः । तत्र दृष्टान्तः । vश्रुष्टीवानो vन दूता इव । ते यथा वार्ताविशेषप्रदानेन राजानं सेवन्ते तद्वत् ॥ ' छन्दसीवनिपौ ' इति वनिप् । छान्दसं प्रथमाद्युदात्तत्वम् ॥ vअजर भक्तानामजरयितः ॥ अन्तर्भावितण्यर्थात् पचाद्यच् ॥ यद्वा । अजर अस्तोतः । जरा स्तुतिः । असौ न कस्यापि स्तोता भवति किंतु सर्वैः स्वयं स्तूयते । तादृशं त्वां परिचरन्तीत्यर्थः ॥

प्र वो महे सहसा सहस्वत उषर्बुधे पशुषे नाग्नये स्तोमो बभूत्वग्नये ।
प्रति यदीं हविष्मान्विश्वासु क्षासु जोगुवे ।
अग्ने रेभो न जरत ऋषूणां जूर्णिर्होता ऋषूणाम् ॥ १० ॥

प्र । वः । महे । सहसा । सहस्वते । उषःऽबुधे । पशुऽसे । न । अग्नये । स्तोमः । बभूतु । अग्नये ।
प्रति । यत् । ईम् । हविष्मान् । विश्वासु । क्षासु । जोगुवे ।
अग्ने । रेभः । न । जरते । ऋषूणाम् । जूर्णिः । होता । ऋषूणाम् ॥ १० ॥

हे उद्गात्रादयः स्तोतारः vवः युष्माकं संबन्धि vस्तोमः स्तोत्रम् vअग्नये vप्र vबभूतु प्रीणयितुं समर्थं भवतु ॥ छान्दसः शपः श्लुः । अत्वं चाभ्यासस्य । ' भूसुवोस्तिङि ' इति गुणाभावः ॥ कीदृशायाग्नये । vमहे महते पूज्याय vसहसा पराभिभवसामर्थ्येन[1] तद्वते vउषर्बुधे उषःकाले

१. ङ-च-फ–पराभिभवसामर्थ्येन सहस्वते ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रबुध्यमानाय ॥ ' अहरादीनां पत्यादिपूपसंख्यानम् ' इति रत्वम् ॥ [v]पशुषे पशुफलप्रदाय। नशब्दोऽत्र अपिशब्दार्थः । यद्वा । पशुषे पशुप्रदात्रे प्रभवे यथा स्तुतिः क्रियते तद्वत्। किमर्थमिति तदुच्यते । [v]ईम् एनमग्निं [v]प्रति लक्षीकृत्य [v]हविष्मान् घृतादिहविर्युक्तः[1] यजमानः [v]विश्वासु [v]क्षासु सर्वासु निवासभूतासु वेदिभूमिषु [v]जोगुवे अत्यर्थं गच्छति ॥ गुवतेर्यङ्लुगन्तात् छान्दसो लिट्। व्यत्ययेनात्मनेपदम् । ' °अमन्त्रे° ' इति पर्युदासात् आमभावः ॥ क्षेति भूनाम, ' क्षा क्षामा[2] ' ( नि. १. १. ५ ) इति तन्नामसु पाठात् । [v]ऋषूणाम् आगन्तॄणां देवानां मध्ये श्रेष्ठमग्निं [v]जूर्णिः स्तुतिकुशलः [v]होता अग्ने इतरदेवेभ्यः पूर्वं [v]जरते स्तौति । तत्र दृष्टान्तः । [v]ऋषूणां महतां धनवताम् [v]अग्रे [v]रेभो [v]न वन्दीव ॥ ' ऋषी गतौ ' । औणादिकः कुप्रत्ययः । ' नामन्यतरस्याम् ' इति नाम उदात्तत्वम् यद्वा । ऋषूणाम् इत्येतत् होतृविशेषणम् । ऋषूणां ज्ञानवतां मध्ये श्रेष्ठोऽयं होता इत्यर्थः ॥

स नो नेदिष्ठं ददृशान आ भराग्ने देवेभिः
सचनाः सुचेतुना महो रायः सुचेतुना ।
महि शविष्ठ नस्कृधि संचक्षे भुजे अस्यै ।
महि स्तोतृभ्यो मघवन्त्सुवीर्यं मथीरुग्रो न शवसा ॥ ११ ॥

सः । नः । नेदिष्ठम् । ददृशानः । आ । भर । अग्ने । देवेभिः ।
सऽचनाः । सुऽचेतुना । महः । रायः । सुऽचेतुना ।
महि । शविष्ठ । नः । कृधि । सम्ऽचक्षे । भुजे । अस्यै ।
महि । स्तोतृऽभ्यः । मघऽवन् । सुऽवीर्यम् । मथीः । उग्रः । न । शवसा ॥ ११ ॥

हे [v]अग्ने [v]सः त्वं [v]नः [v]नेदिष्ठम् अत्यन्तसमीपे [v]ददृशानः वेद्यां ददृशानः दीप्तत्वेन दृश्यमानः [v]देवेभिः [v]सचनाः इतरैर्देवैः समानान्नः । अग्निमुखेनैव इतरेषां हविःस्वीकारात् समानान्नत्वम् । [v]सुचेतुना शोभनेन चेतनेन चेतसा वा । पुनस्तदेव विशेष्यते । [v]सुचेतुना शोभनचेतोवता मया ॥ औणादिक उः । बहुव्रीहौ ' नञ्सुभ्याम् ' इत्युत्तरपदान्तोदात्तत्वम् ॥ युक्तेन । त्वदायत्ते मयि अनुग्रहयुक्तेनेत्यर्थः । तादृशस्त्वं [v]महः पूजनीयानि [v]रायः धनानि [v]आ [v]भर अस्माकमाहर । हे अग्ने [v]शविष्ठ बलवन्नग्ने [v]नः अस्मभ्यं [v]महि महदन्नं महतीं कीर्तिं वा [v]कृधि कुरु संपादय । शविष्ठेति संबोधितत्वात् तदेव प्रार्थ्यते इति गम्यते । किमर्थम् । [v]संचक्षे सम्यग्दर्शनीयत्वाय[3] [v]अस्यै अस्याः पृथिव्याः संबन्धिने [v]भुजे भोगाय । यद्वा । संचक्षे भुजे इति सामानाधिकरण्यम् । सम्यग्दर्शनीयाय भोगायेत्यर्थः । न केवलं यजमानेभ्योऽस्मभ्यमेव अपि तु [v]स्तोतृभ्यः स्तोत्रकर्तृभ्योऽपि हे [v]मघवन् अन्नवन्नग्ने [v]सुवीर्यं शोभनपुत्रभृत्याद्युपेतं धनं शोभनसामर्थ्यं वा कृधि कुरु । किंच शवसा बलेन युक्तः सन् [v]मथीः अस्मद्विरोधिनो नाशय ॥ लुङि ' ह्यन्तक्षण° ' इति वृद्धिप्रतिषेधः । कारकपक्षे औणादिक ईकारः । आद्युदात्तश्छान्दसः ॥ यद्वा । मथीः मथनवांस्त्वम् अस्मदर्थं शवसा बलेन

---

१. ङ-ञ-ञ–घृतादिप्रवृद्धहविर्युक्तः । २. क्ष-ञ–क्षमा । ३. क्ष-ञ–सम्यग्दर्शनाय दर्शनीयत्वाय ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

युक्तो भवेति शेषः। तत्र दृष्टान्त। ᵛउग्रो ᵛन ᵛशषसा । यथा कश्चित् क्रूरः शवसा बलेन मथीर्भवति तद्वत् ॥ ॥ १३ ॥

' अयं जायत ' इति अष्टर्चं द्वितीयं सूक्तम्। ' अयं जायताष्टौ ' इत्यनुक्रमणिका। परुच्छेप ऋषिः। ' सर्वमास्यष्टम् ' इत्युक्तत्वात् अत्यष्टिश्छन्दः। ' आग्नेयं तु ' इति तुशब्दस्योक्तत्वात् इदमप्याग्नेयम्। पृष्ठ्यस्य षष्ठेऽहनि एतत्सूक्तम् आज्यशस्त्रत्वेन विनियुक्तम्। सूत्रितं च ' षष्ठस्य ' इति खण्डे–' अयं जायत मनुषो धरीमणीत्याज्यम् ' ( आश्व. श्रौ. ८. १ ) इति ॥

अयं जायत मनुषो धरीमणि होता यजिष्ठ उशिजामनु व्रतमग्निः स्वमनु व्रतम्।
विश्वश्रुष्टिः सखीयते रयिरिव श्रवस्यते।
अदब्धो होता नि षदादिळस्पदे परिवीत इळस्पदे ॥ १ ॥

अयम्। जायत। मनुषः। धरीमणि। होता। यजिष्ठः। उशिजाम्।
अनु। व्रतम्। अग्निः। स्वम्। अनु। व्रतम्।
विश्वऽश्रुष्टिः। सखिऽयते। रयिःऽइव। श्रवस्यते।
अदब्धः। होता। नि। सदत्। इळः। पदे। परिऽवीतः। इळः। पदे ॥ १ ॥

ᵛअयम् ᵛअग्निः ᵛमनुषः मनुष्यस्य अध्वर्योः सकाशात् ᵛजायत अरणिमन्थनेनोत्पन्नः। कीदृशोऽयम्। ᵛहोता देवानामाह्वाता ᵛयजिष्ठः अतिशयेन यष्टृतमः। किमर्थमुत्पन्न इति। ᵛउशिजां फलस्य कामयितॄणां यजमानानां ᵛव्रतं सोमयागादिरूपं कर्म ᵛअनु लक्षीकृत्य। न केवलं परार्थमेव अपि तु अयमर्थः। ᵛस्वं ᵛव्रतम् ᵛअनु स्वकीयं हविःस्वीकारादिरूपं कर्म अनुलक्ष्य। पुनः स एव विशेष्यते। ᵛविश्वश्रुष्टिः विश्वविषयकर्मवान्[1]। कस्मै। ᵛसखीयते सखित्वमात्मन इच्छते। तथा ᵛश्रवस्यते अतिप्रसिद्धान्नमात्मनः[2] इच्छते यजमानाय ᵛरयिरिव धनस्थानीयो भवति। धनं यथा सख्यम् अन्नसमृद्धिं च साधयति तद्वत् अयमग्निरपि तस्मै द्वयं[3] साधयतीत्यर्थः। किंच अयमग्निः ᵛइळस्पदे इडाया भूम्याः पदे ॥ अन्त्यलोपश्छान्दसः ॥ ᵛधरीमणि सारभूते स्थाने वेदिरूपे। ' वेदिमाहुः परमन्तं पृथिव्याः ' (तै. सं. ७. ४. १८. २ ) इति श्रुतेः। ' एतावती वै पृथिवी यावती वेदिः ' (तै. सं. २. ६. ४. १) इति च। पुनस्तदेव विशेष्यते। ᵛइळस्पदे इडादेवताया मनोः पुत्र्या गोरूपाया इडोपह्वानमन्त्रप्रतिपादितायाः पदे पादन्यासप्रदेशे। ' इडा वै मानवी यज्ञानूकाशिन्यासीत् ' ( तै. ब्रा. १. १. ४. ४ ) इति ' इडायाः पदे घृतवति स्वाहा ' ( तै. सं. १. २. ५. १ ) इति च श्रुतेः। ᵛनि ᵛषदत् निषीदति। कीदृशोऽयमग्निः। ᵛअदब्धः केनाप्यहिंसितः ᵛहोता होमनिष्पादकः ᵛपरिवीतः ऋत्विग्भिः परिधिभिर्वा परितो वेष्टितः। एवंभूतः सन् नि षदत् ॥

---

१. क्ष-ङ-ञ-ट–विश्वाश्रयकर्मवान्। २. ख-च-फ–अन्नं अतिप्रसिद्धत्वं वा आत्मनः। ३. क्ष-ञ-ट–तत् द्वयम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तं यज्ञसाधमपि वातयामस्यृतस्य पथा नमसा हविष्मता देवताता हविष्मता।
स न ऊर्जामुपाभृत्यया कृपा न जूर्यति।
यं मातरिश्वा मनवे परावतो देवं भाः परावतः ॥ २ ॥

तम्। यज्ञऽसाधम्। अपि। वातयामसि। ऋतस्य। पथा। नमसा। हविष्मता।
देवऽताता। हविष्मता॥ सः। नः। ऊर्जाम्। उपऽआभृति। अया। कृपा। न। जूर्यति।
यम्। मातरिश्वा। मनवे। पराऽवतः। देवम्। भारिति भाः। पराऽवतः ॥ २ ॥

[V]यज्ञसाधं यज्ञस्य साधकम्॥ साध्नोतेः क्विपि कृदुत्तरपदप्रकृतिस्वरत्वम्॥ [V]तम् अग्निं वेद्यां स्थापितम् [V]अपि [V]वातयामसि। अपिः संभावनार्थः। आ परितोषं सेवामहे॥ 'वात गतिसुखसेवनयोः'। चौरादिकः। इदन्तो मसिः॥ केनोपायेनेति तदुच्यते। [V]ऋतस्य [V]पथा यागस्य मार्गेण यागानुष्ठानेन। 'यज्ञेन देवेभ्यः' (तै. सं. ६. ३. १०. ५) इति श्रुतेः। यज्ञेन देवस्य महती प्रीतिः भवति। यद्वा। ऋतस्य यज्ञस्य पथा। मार्गस्तीर्थाख्यः 'पूर्वेणोत्करमपरेण प्रणीताः' (आश्व. श्रौ. १. १) इत्यादिसूत्रोक्तः। तेन मार्गेण गत्वा। पुनः केन। [V]हविष्मता आज्यादिप्रदेयद्रव्यवता [V]नमसा नमस्कारोपलक्षणेन[1] स्तोत्रेण[1] उपस्थानेन वा। तदुभयेनेत्यर्थः। कुत्रेति तदुच्यते। [V]हविष्मता हविष्मति आज्यपुरोडाशादिबहुहविर्युक्ते [V]देवताता देवानां विस्तारयुक्ते यज्ञे। किंच [V]सः अग्निः [V]नः अस्मत्संबन्धिनाम् [V]ऊर्जां हविर्लक्षणानाम् अन्नानाम् [V]उपाभृति उपाहरणे तत्स्वीकारविषये[2]॥ उपाङ्पसृष्टात् हरतेः क्तिन्। 'हृग्रहोर्भः०' इति भत्वम्। 'सुपां सुलुक्०' इति सप्तम्या लुक्। 'तादौ च०' इत्यनन्तरस्य गतेः प्रकृतिस्वरत्वम्॥ [V]अया [V]कृपा अनया सामर्थ्यलक्षणया कल्पनया हविःस्वीकरणरूपया [V]न [V]जूर्यति यज्ञसमाप्तिपर्यन्तं न नश्यति। अजरो वर्तते इत्यर्थः। स इत्युक्तम्। क इत्याह। [V]यम् अग्निं [V]देवं द्योतनशीलं [V]मातरिश्वा अन्तरिक्षसंचारी वायुः पूर्वं [V]मनवे मनोरर्थाय [V]परावतः अतिदूरं गतवतः आदित्यात् [V]भाः अभासीत्। औचित्येन भूमौ स्थापितवानित्यर्थः। तद्वत् [V]परावतः दूरात् देवम् अग्निम् अस्मद्देवयजनं प्रति स्थापयत्वित्यर्थः॥

एवेन सद्यः पर्येति पार्थिवं मुहुर्गी रेतो वृषभः कनिक्रदद्दधद्रेतः कनिक्रदत्।
शतं चक्षाणो अक्षभिर्देवो वनेषु तुर्वणिः।
सदो दधान उपरेषु सानुष्वग्निः परेषु सानुषु ॥ ३ ॥

एवेन। सद्यः। परि। एति। पार्थिवम्। मुहुःऽगीः। रेतः। वृषभः। कनिक्रदत्। दधत्।
रेतः। कनिक्रदत्॥ शतम्। चक्षाणः। अक्षऽभिः। देवः। वनेषु। तुर्वणिः।
सदः। दधानः। उपरेषु। सानुषु। अग्निः। परेषु। सानुषु ॥ ३ ॥

---

१. क्ष-ञ-ट–नमस्कारोपलक्षितस्तोत्रेण। २. क्ष-ञ-ट–हविःस्वीकारविषये।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अयमग्निः ᵛएवेन गमनसाधनेन गमनेन वा ᵛसद्यः अस्मदाह्वानानन्तरं ᵛपार्थिवं पृथिवीसंबन्धि स्थानं वेदिलक्षणमेव ᵛपरि परितः। यद्वा । अनर्थकः आभिमुख्यार्थो वा परि । ᵛएति गच्छति। कीदृशोऽग्निः। ᵛमुहुर्गीः सर्वदा गीयमानः । रेतःशब्देन[1] तत्कार्यं हवीरूपमन्नमुच्यते । तद्वान् ॥ मत्वर्थीयो लुप्यते ॥ ᵛवृषभः कामानां वर्षिता ᵛकनिक्रदत् शब्दयन् पर्येति । पुनः स एव विशेष्यते । ᵛरेतः ᵛदधत् आज्यादिस्वीकारेण अत्यधिकं सामर्थ्यं दधानः ᵛकनिक्रदत् शब्दयन् पर्येतीति शेषः । पुनः स एव विशेष्यते । अयमग्निः ᵛदेवः ᵛवनेषु संभजनेषु स्तोत्रेषु निमित्तभूतेषु ᵛअक्षभिः अक्षस्थानीयाभिः ज्वालाभिः ᵛशतं ᵛचक्षाणः सर्वतः प्रकाशमानः । यद्वा । ज्वालोत्कर्षेण यजमानेन कृतं शतगुणितं प्रख्यापयन् । तथा ᵛतुर्वणिः शीघ्रगन्ता शत्रूणां हिंसको वा । ' तुर्वणिस्तूर्णवनिः ' ( निरु. ६. १४ ) इति यास्कः । किंच ᵛसानुषु समुच्छ्रितेषु। ' सानु समुच्छ्रितं भवति ' ( निरु. २. २४ ) इति यास्कः। तेषु ᵛउपरेषु । उपरमन्ते एष्वग्नयः इत्युपरा धिष्ण्या यजमानगृहा वा । तेषु ᵛसदः ᵛदधानः स्थानं धारयमाणः ᵛअग्निः सद्यः पर्येतीति पूर्वत्रान्वयः । किमर्थम् । ᵛपरेषु उत्कृष्टेषु ᵛसानुषु समुच्छ्रितेषु कर्मसु हविःषु वा निमित्तभूतेषु ॥

**स सुक्रतुः पुरोहितो दमेदमेऽग्निर्यज्ञस्याध्वरस्य चेतति क्रत्वा यज्ञस्य चेतति ।**
**क्रत्वा वेधा इषूयते विश्वा जातानि पस्पशे ।**
**यतो घृतश्रीरतिथिरजायत वह्निर्वेधा अजायत ॥ ४ ॥**

सः । सुऽक्रतुः । पुरःऽहितः । दमेऽदमे । अग्निः । यज्ञस्य । अध्वरस्य । चेतति । क्रत्वा । यज्ञस्य । चेतति ॥ क्रत्वा । वेधाः । इषुऽयते । विश्वा । जातानि । पस्पशे ।
यतः । घृतऽश्रीः । अतिथिः । अजायत । वह्निः । वेधाः । अजायत ॥ ४ ॥

ᵛसः ᵛअग्निः ᵛसुक्रतुः शोभनकर्मा ᵛपुरोहितः पुरो धार्यमाणः। यद्वा । पुरोहितवत् यागनिर्वाहकः सन् । ᵛदमेदमे तत्तद्यजमानगृहे सर्वेषु देवयजनेषु वा ᵛअध्वरस्य नाशरहितस्य फलप्रदस्य ᵛयज्ञस्य तदर्थं ᵛचेतति जानाति प्रबुध्यते इत्यर्थः[2]। किंच अयं[2] यजमानोऽपि ᵛक्रत्वा शोभनेन कर्मणा ᵛयज्ञस्य ᵛचेतति कर्तव्यतामवजानाति । किंच अयमग्निरपि ᵛक्रत्वा प्रकृष्टेन कर्मणा ᵛवेधाः विविधानां फलानां कर्ता सन् ᵛइषूयते । इष्यते इति इषुः अन्नम् आगमनं[3] वा । तदिच्छते यजमानार्थं ᵛविश्वा ᵛजातानि सर्वाणि संपादितानि हविरादीनि ᵛपस्पशे अत्यर्थं स्पृशति स्वीकरोति । ᵛयतः अयं ᵛघृतश्रीः घृतं सेवमानः ᵛअतिथिः अतिथिवत्पूज्यश्च ᵛअजायत उत्पन्नः । यतः कारणात् घृतम् अत्यर्थं सेवमानः प्रवृद्धोऽभवत् अतः पस्पशे इत्यर्थः । एवमग्नौ प्रवृद्धे सति यजमानोऽपि ᵛवह्निः हविषां वोढा ᵛवेधाः विविधस्य फलस्य कर्ता उत्पादयिता ᵛअजायत समर्थोऽभवत् ॥

---

१. क-क्ष-ज्ञ-झ-ञ-ट-रेतः । उदकवाचिना रेतःशब्देन । २. क्ष-ञ-ट-इत्यर्थः । यद्वा यज्ञस्य दमेदमे इति संबन्धः । किंच अयम् । ३. क्ष-ञ-ट-अवनम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

क्रत्वा यदस्य तविषीषु पृञ्चतेऽग्नेरवेन मरुतां न भोज्यैषिराय न भोज्या।
स हि ष्मा दानमिन्वति वसूनां च मज्मना।
स नस्त्रासते दुरितादभिह्रुतः शंसादघादभिह्रुतः ॥ ५ ॥

क्रत्वा। यत्। अस्य। तविषीषु। पृञ्चते। अग्नेः। अवेन। मरुताम्। न। भोज्या। इषिराय। न। भोज्या ॥ सः। हि। स्म। दानम। इन्वति। वसूनाम्। च। मज्मना।
सः। नः। त्रासते। दुःऽइतात्। अभिऽह्रुतः। शंसात्। अघात्। अभिऽह्रुतः ॥ ५ ॥

vयत् यस्मात् कारणात् सर्वे यजमानाः vक्रत्वा प्रकृष्टेन कर्मणा हविष्प्रदानादिरूपेण vअस्य vअग्नेः vतविषीषु प्रबलासु ज्वालासु vअवेन तृप्तिनिमित्तेन भोज्या भक्ष्याणि[1] पुरोडाशादीनि vपृञ्चते मिश्रयन्ति। तविषीति बलनाम 'तविषी शुष्मम्' (नि. २. ९. १०) इति तन्नामसु पाठात्। तत्र दृष्टान्तः। vमरुतां vन vभोज्या वायूनां संबन्धीनि व्रीह्याद्यन्नानीव। वायुषु मेघं निर्भिद्य वृष्टिं जनयत्सु सत्सु सस्यादिद्वारा व्रीह्यादिभोज्यानि यथा पृञ्चते तथेत्यर्थः। दाने दृष्टान्तः। vइषिराय vन vभोज्या। एषणयुक्ताय याचमानायार्थिने भोज्या भोग्यानि भक्ष्यादीनि यथा दीयन्ते तद्वत्[2]। इषिरशब्दो यास्केनैवं निरुक्तः–'ईषणेन वैषणेन वा' (निरु. ४. ७) इति। अतः कारणात् vसः[3] खलु[3] यजमानः vदानम् vइन्वति हविष्प्रदानं तस्मै व्याप्नोति। यद्वा। स्वयमभिमतं दानमिन्वति। इन्वतिर्व्याप्तिकर्मा 'इन्वति ननक्ष' (नि. २. १८. १) इति तत्कर्मसु पाठात्। केन सामर्थ्येनेति। vवसूनां vच vमज्मना निवासयोग्यानां धनानाम् अग्निना लब्धानां बलेनैव[4]। यद्वा। सोऽग्निर्वसूनां हविर्निवासयोग्यानां ज्वालारूपाणां धनानां मज्मना बलेन दानमिन्वतीति शेषः। किंच vसः अग्निः vअभिह्रुतः आभिमुख्येन पापैः ह्रियमाणान् vनः अस्मान् vदुरितात् पापात् vत्रासते त्रायते। तथा vशंसात् अतिप्रभूतत्वेन शंसनीयात् यद्वा हिंसकात् vअभिह्रुतः अभितो ह्रियमाणात् vअघात् दुःखात् तत्कारणात् पापाद्वा त्रासते त्रायते ॥ ॥ १४ ॥

विश्वो विहाया अरतिर्वसुर्दधे हस्ते दक्षिणे
तरणिर्न शिश्रथच्छ्रवस्यया न शिश्रथत्।
विश्वस्मा इदिषुध्यते देवत्रा हव्यमोहिषे।
विश्वस्मा इत्सुकृते वारमृण्वत्यग्निर्द्वारा व्यृण्वति ॥ ६ ॥

विश्वः। विऽहायाः। अरतिः। वसुः। दधे। हस्ते। दक्षिणे। तरणिः। न। शिश्रथत्। श्रवस्यया। न। शिश्रथत्॥ विश्वस्मै। इत्। इषुध्यते। देवऽत्रा। हव्यम्। आ। ऊहिषे।
विश्वस्मै। इत्। सुऽकृते। वारम्। ऋण्वति। अग्निः। द्वारा। वि। ऋण्वति ॥ ६ ॥

---

१. क्ष-ञ-ट–भोज्यानि। २. क्ष-ङ-ञ-ट–'तद्वत्' इत्यस्यानन्तरं 'यद्वा इषिराय एषणाय तत्पर्याप्तये भोज्या भोग्यानि यथा संपद्यन्ते तथेत्यर्थः' इत्यधिकम्। ३. क्ष-ञ-ट–स हि स खलु। ४. क्ष-ञ-ट–बलेन।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अयमग्निः vदक्षिणे अभिमतं प्रदातुम् उत्साहयुक्ते vहस्ते वामेतरे[1] यजमानाय दातव्यं धनं vदधे धारयति । कीदृशोऽयम् । vविश्वः सर्वैर्गन्तव्यः यद्वा विश्वात्मकः vविहायाः[2] महान्[2] । विहाया इति महन्नाम, ' विहायाः यह्वः ' ( नि. ३. ३. १२ ) इति तन्नामसु पाठात् । vअरतिः ईश्वरः अरममाणः[3] वा अप्रीतिः[4] ॥ अत्र ' वहिवस्यर्तिभ्यश्चित् ' इति अप्रत्ययः । चिद्वद्भावादन्तोदात्तः ॥ धृत्वा[5] च vशिश्रथत् । धृतं हस्तं यजमानार्थं श्रथयति ददाति ॥ श्लथयतेर्लुङि चङि रूपम् ॥ तत्र दृष्टान्तः । vतरणिर्न तरणिरिव तारकः सूर्य इव । स यथा स्वोपासकाय अभिमतं हस्ते धृत्वा वितरति तद्वत् । यद्वा । तरणिः सर्वस्य तारको न शिश्रथत् । यजमानं न श्रथयति न मुञ्चति । किंच vश्रवस्यया vन vशिश्रथत् हवीरूपान्नेच्छयैव न शिश्रथत् न विमुञ्चति । अयमनुग्रहेणैव पालयते, हविःस्वीकारस्तु व्यपदेशमात्रेण[6] इति भावः । इदानीं प्रत्यक्षकृतः । हे अग्ने vदेवत्रा देवेषु मध्ये अतिशयेन त्वं vविश्वंस्मै सर्वस्मै vइषुध्यते हविरात्मन इच्छते इन्द्रादये ॥ इषुध्यतिः कण्ड्वादिः ॥ vहव्यं तत्तद्देवतामुद्दिश्य प्रत्तं पुरोडाशादिकम् vओहिषे सर्वतो वहसि ॥ वहेर्लेटि यजादित्वात् संप्रसारणम् ॥ किंच अयमग्निः vविश्वस्मै[7] vसुकृते शोभनयज्ञकर्त्रे यजमानाय vवारं सर्वैर्वरणीयं क्षुदादिनिवारकं वा अन्नादिकम् vऋण्वति गच्छति करोतीत्यर्थः । किंच अयम् vअग्निः vद्वारा स्वर्गाद्यभिमतद्वाराणि[8] vव्यृण्वति विवृणोति । प्रतिबन्धकपापापनयनद्वारा अभिमतानि साधयतीत्यर्थः ॥ ऋण्वतिर्गतिकर्मा । यद्वा । रिविर्गत्यर्थः । इदित्त्वात् नुम् । छान्दसं रेफस्य संप्रसारणम् ॥

स मानुषे वृजने शंतमो हितोऽग्निर्यज्ञेषु जेन्यो
न विश्पतिः प्रियो यज्ञेषु विश्पतिः ।
स हव्या मानुषाणामिळा कृतानि पत्यते ।
स नस्त्रासते वरुणस्य धूर्तेर्महो देवस्य धूर्तेः ॥ ७ ॥

सः । मानुषे । वृजने । शम्ऽतमः । हितः । अग्निः । यज्ञेषु । जेन्यः । न । विश्पतिः । प्रियः । यज्ञेषु । विश्पतिः ॥ सः । हव्या । मानुषाणाम् । इळा । कृतानि । पत्यते । सः । नः । त्रासते । वरुणस्य । धूर्तेः । महः । देवस्य । धूर्तेः ॥ ७ ॥

vसः vअग्निः vमानुषे मनुष्यस्य यजमानस्य संबन्धिनि vवृजने वर्जनीये पापे निमित्तभूते सति vयज्ञेषु निमित्तेषु[9] vशंतमः अत्यन्तं सुखतमः अरिष्टस्य निवारकत्वात् अत एव vहितः स्वर्गाद्यभिमतसाधकत्वात् । किंच अयं vयज्ञेषु vविश्पतिः ऋत्विग्रूपाणां प्रजानाम् अतिशयेन पालकः ॥ ' पत्यावैश्वर्ये ' इति पूर्वपदप्रकृतिस्वरे प्राप्ते ' परादिश्छन्दसि बहुलम् ' इत्युत्तरपदाद्युदात्तत्वम् ॥ अत एव vप्रियः च भवति । तत्र दृष्टान्तः । vजेन्यो vन vविश्पतिः जयशीलो राजेव । स यथा परसेनाद्युपद्रवपरिहारेण सम्यक्परिपालनेन च प्रजानां प्रियो भवति । किंच अयमग्निः vमानुषाणां मनुष्याणां

---

१. क्ष-ङ-ञ-ञ-ट–वामेतरे करे । २. क्ष-ञ-ट–विहायाः । सर्वैर्गन्तव्यः महान् इत्यर्थः । ३. क्ष-ङ-ञ-ञ-ट–अरमणः । ४. ङ–अप्रीतिः अयज्वसु । ५. ज्ञ-ञ्ञ–दधे धृत्वा । ६. क्ष-ञ-ट–व्यपदेशमात्रमेव । ७, ङ-ज्ञ–विश्वस्मै सर्वस्मै । ८. क्ष-ञ-ट–स्वर्गाद्यभिमतप्राप्तिद्वाराणि । ९. क्ष-ङ-ञ-ट–निमित्तभूतेषु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यजमानानां संबन्धीनि [v]हव्या हवींषि [v]इळा [v]कृतानि इळायां वेद्यां कृतानि संपादितानि उद्दिश्य [v]पत्यते पतति आगच्छति । किंच [v]सः अग्निः [v]नः अस्मान् यजमानान् [v]वरुणस्य वारकस्य [v]धूर्तेः हिंसकस्य भयात् [v]त्रासते त्रायते । यद्वा । धूर्तेरिति पञ्चमी । वरुणस्य पापदेवस्य धूर्तेर्हिंसकात् । किंच [v]महः महतः [v]देवस्य [v]धूर्तेः हिंसातः त्रासते पालयते । अयष्टारम् अग्निर्हिनस्तीति प्रसिद्धम् । यद्वा । एकमेव वाक्यम् । धूर्तेः हिंसकस्य महः महतः वरुणस्य देवस्य वरुणाख्यायाः पापदेवतायाः धूर्तेः हिंसातः नः अस्मान् सः अग्निः त्रासते त्रायते ॥

अग्निं होतारमीळते वसुधितिं प्रियं चेतिष्ठमरतिं न्येरिरे हव्यवाहं न्येरिरे ।
विश्वायुं विश्ववेदसं होतारं यजतं कविम् ।
देवासो रण्वमवसे वसूयवो गीर्भी रण्वं वसूयवः ॥ ८ ॥

अग्निम् । होतारम् । ईळते । वसुऽधितिम् । प्रियम् । चेतिष्ठम् । अरतिम् । नि । एरिरे ।
हव्यऽवाहम् । नि । एरिरे ॥ विश्वऽआयुम् । विश्वऽवेदसम् । होतारम् । यजतम् । कविम् ।
देवासः । रण्वम् । अवसे । वसुऽयवः । गीःऽभिः । रण्वम् । वसुऽयवः ॥ ८ ॥

अमुम् [v]अग्निं [v]होतारम् आह्वातारं होमनिष्पादकं वा [v]ईळते ऋत्विजः स्तुवन्ति । तथा [v]वसुधितिं धनस्य धारयितारं दातारं वा अत एव [v]प्रियं सर्वेषां प्रियतमं [v]चेतिष्ठम् अतिशयेन यजमानानां चेतयितारं यद्वा प्रकृष्टचेतनवन्तम् ॥ चेत्तृशब्दात् ' तुश्छन्दसि ' इति इष्ठन् । ' तुरिष्टेमेयःसु ' इति तृलोपः ॥ [v]अरतिम् ईश्वरं तादृशं देवं [v]न्येरिरे नितरां प्राप्ताः । प्राप्तिरेव विशेष्यते । [v]हव्यवाहं [v]न्येरिरे निःशेषेण प्राप्ताः । इतरदेवेभ्यो हव्यं वोढुं यथा प्रभवति तथा नितरां प्राप्ताः । पुनः कीदृशम् । [v]विश्वायुं सर्वत्र प्राणिजीवनं [v]विश्ववेदसं सर्वप्रज्ञं [v]होतारं देवानामाह्वातारं [v]यजतं यजनीयं [v]कविं सर्वज्ञम् ॥ ' ईर प्रेरणे, ईर गतौ ' इत्यन्यतमस्य लिटि रूपम् ॥ किंच [v]देवासः देवनशीला ऋत्विजः [v]रण्वम् अतिप्रवृद्धया शब्दयन्तम् [v]अवसे अरय रक्षणाय [v]वसूयवः वसुकामाः सन्तः । पुनः कीदृशाः । [v]गीर्भिः स्तुतिभिः [v]रण्वं रणयन्तं रमणीयं वा [v]वसूयवः वसु हवीरूपमन्नम् अग्नये प्रदातुमात्मन इच्छन्तो न्येरिरे । प्रीतो यथा धनं प्रयच्छति तथा हविरादिना प्राप्ता इत्यर्थः ॥ ॥ १५ ॥

' यं त्वं रथम् ' इत्येकादशर्चं तृतीयं सूक्तम् । ' पारुच्छेपं सर्वमात्यष्टम् ' इत्युक्तत्वात् अत्यष्टिच्छन्दस्कम् । अनुक्तत्वात् ऐन्द्रम् । ' प्रप्रा वो अस्मे ' इत्यादिके द्वे अतिशक्वर्यौ षष्टयक्षरोपेतत्वात् । ' पाहि नः ' इति अन्त्या अष्टिः चतुःषष्टयक्षरोपेतत्वात् । ' प्र तद्वोचेयम् ' इति षष्ठी इन्दुदेवत्या । तथा चानुक्रमणिका–' यं त्वमेकादश षष्टयैन्दवी प्रप्रावोऽतिशक्वर्यावष्टिरन्त्या ' इति ॥ दशरात्रस्य षष्ठेऽहनि मरुत्वतीये शस्त्रे एतत्सूक्तं ' षष्ठस्य ' इति खण्डे सूत्रितं–' यं त्वं रथमिन्द्र स यो वृषा ' ( आश्व. श्रौ. ८. १ ) इति ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यं त्वं रथमिन्द्र मेधसातयेऽपाका सन्तमिषिर प्रणयसि प्रानवद्य नयसि।
सद्यश्चित्तमभिष्टये करो वशश्च वाजिनम्।
अस्माकमनवद्य तूतुजान वेधसामिमां वाचं न वेधसाम् ॥ १ ॥

यम्। त्वम्। रथम्। इन्द्र। मेधऽसातये। अपाका। सन्तम्। इषिर। प्रऽनयसि। प्र। अनवद्य। नयसि ॥ सद्यः। चित्। तम्। अभिष्टये। करः। वशः। च। वाजिनम्। सः। अस्माकम्। अनवद्य। तूतुजान। वेधसाम्। इमाम्। वाचम्। न। वेधसाम् ॥ १ ॥

हे [v]इन्द्र [v]इषिर यज्ञगमनशील [v]त्वं [v]मेधसातये यज्ञस्य दानाय लाभाय वा [v]यं यजमानं प्रति [v]रथं [v]प्रणयसि प्रापयसि ॥ द्विकर्मकोऽयम् ॥ कीदृशं यजमानम्। [v]अपाका अपाकम् अनल्पप्रज्ञाधिकारवन्तम्[1]। 'पाकः पक्तव्यो भवति' (निरु. ३. १२) इति यास्कः। अत एव [v]सन्तं पण्डितं सन्तम्। किंच हे [v]अनवद्य अनिन्दित यं यजमानं धनविद्यादिना [v]प्र [v]नयसि प्रकृष्टं नयसि। [v]तं यजमानं [v]सद्यश्चित् तदानीमेव तदनुग्रहकाले[2] एव [v]अभिष्टये आभिमुख्येन यागाय अभिमतप्राप्तये वा॥ अभिपूर्वात् इषेः क्तिन्। शकन्ध्वादित्वात् पररूपत्वम्। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्॥ [v]करः समर्थं करोषि॥ लेटि[3] व्यत्ययेन शप्॥ एवं कृत्वा च[4] [v]वाजिनं हविर्लक्षणमन्नं तद्वन्तं वा [v]वशः कामयसे [v]च॥ वष्टेर्लेटि अडागमः। तिङः परत्वादनिघातः॥ यजमानेनाहूतः सन् शीघ्रमेवागत्य हविः स्वीकृत्य यागं साधु निर्वर्त्य तं चाभिमतफलेन संयोज्य पुनर्हविः स्वीकरोषीत्यर्थः[5]। हे इन्द्र [v]अनवद्य अनिन्दित सर्वैः स्तूयमान [v]तूतुजान अस्माननुग्रहीतुं त्वरमाण॥ तुजेः प्रेरणार्थात् लिटः कानच्। 'तुजादीनां दीर्घोऽभ्यासस्य' इत्यभ्यासस्य दीर्घत्वम्॥ [v]सः त्वम्॥ 'सोऽचि लोपे चेत्०' इति संहितायां सोर्लोपः॥ [v]वेधसां विविधफलकर्तृणां मध्ये श्रेष्ठतया [v]वेधसां मेधाविनाम् [v]अस्मार्क संबन्धि हविः स्वीकुर्वित्यर्थः। तत्र दृष्टान्तः। [v]इमां [v]वाचं [v]न अस्मदीयां स्तुतिरूपां वाचमिव। स्तुतिं यथा स्वीकरोषि तथा हविरपीत्यर्थः॥

स श्रुधि यः स्मा पृतनासु कासु चिद्दक्षाय्यं इन्द्र
भरहूतये नृभिरसि प्रतूर्तये नृभिः।
यः शूरैः स्वः सनिता यो विप्रैर्वाजं तरुता।
तमीशानास इरधन्त वाजिनं पृक्षमत्यं न वाजिनम् ॥ २ ॥

सः। श्रुधि। यः। स्म। पृतनासु। कासु। चित्। दक्षाय्यः। इन्द्र। भरऽहूतये। नृऽभिः। असि। प्रऽतूर्तये। नृऽभिः॥ यः। शूरैः। स्वरिति स्वः। सनिता। यः। विप्रैः। वाजम्। तरुता। तम्। ईशानासः। इरधन्त। वाजिनम्। पृक्षम्। अत्यम्। न। वाजिनम् ॥ २ ॥

---

१. क्ष-ञ-ट–अनल्पप्रज्ञं यागाधिकारवन्तम्। २. ङ–त्वदनुग्रहकाले। ३. क्ष-ञ-ट–लङि। ४. ख-च-फ–त्वम्। ५. क्ष-ङ-ञ-ञ-ट–स्वीकरोतीत्यर्थः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]इन्द्र [v]सः वक्ष्यमाणगुणविशिष्टस्त्वं [v]श्रुधि अस्मदाह्वानं स्तोत्रं वा शृणु ॥ हेर्धिभावः ॥ [v]यः [v]स्म यः खलु त्वं [v]नृभिः मनुष्यैरेव सद्भिः पश्चादेवत्वमापन्नैर्मरुद्भिः । पुनस्त एव विशेष्यन्ते । [v]नृभिः संग्रामनयनशीलैः । इन्द्रस्य मरुतां सहाय्यम् ' इन्द्रो मरुद्भिः ' ( तै. सं. ६. ५. ५. १ ), ' मरुतो हैनं नाजहुः ' ( ऐ. ब्रा. ३. २० ) इत्यादिषु प्रसिद्धम् । तैः सहितः सन् [v]कासु [v]चित् [v]पृतनासु सर्वासु प्रौढेष्वपि संग्रामेषु [v]भरहूतये भरणविशिष्टाह्वानयुक्ताय [v]प्रतूर्तये प्रकृष्टहिंसनाय। यद्वा। भरहूतये 'शूरो भव प्रहर' इत्येवमादिभरणयुक्ताह्वानाय प्रतूर्तये च शूराणां[1] प्रकृष्टवधाय च। [v]दक्षाय्यः [v]असि प्रवर्धनशीलोऽसि । यद्वा । नृभिः नेतृभिर्यजमानैः प्रार्थितः सन् प्रतूर्तये शत्रूणां पापानां वा प्रकृष्टहिंसनाय दक्षाय्यः असि समर्थोऽसि । किंच [v]यः त्वं [v]शूरैः शौर्योपेतैर्मरुद्भिः अन्यैर्भटैर्वा सहितः सन् [v]स्वः स्वयमेव [v]सनिता संग्राममयस्य[2] अन्यस्य वा मनीषितस्य सनिता संभक्तासि । सत्यपि तेषां साहित्ये अन्यनैरपेक्ष्येणैव [v]तरुता असि इत्यर्थः ॥ तरतेस्तृनि ' ग्रसितस्कभित° ' इत्यादौ निपात्यते ॥ [v]यः च त्वं [v]विप्रैः मेधाविभिर्ऋत्विग्भिः स्तुतः सन् [v]वाजं तरुता तेभ्योऽन्नस्य दातासि । विप्रैर्मरुद्भिः सहितः इति संबन्धः । [v]तं तादृशं [v]वाजिनं गमनवन्तं [v]पृक्षं हविर्लक्षणान्नवन्तमिन्द्रम् [v]ईशानासः सम्यगभ्यर्थयितुं समर्था ऋत्विजः [v]इरधन्त संराधन्ति[3] सेवन्ते । तत्र दृष्टान्तः । [v]वाजिनं वेजनवन्तं गमनवन्तं पृक्षं घासाद्यन्नवन्तम् [v]अत्यं [v]न अश्वमिव । तं यथा समर्थाः स्वादुघासप्रदानादिना पोषयन्ति तद्वत् । अत्य इत्यश्वनाम ' अत्यः हयः ' ( नि. १. १४. १ ) इति तन्नामसु पठितत्वात् ॥

**दस्मो हि ष्मा वृषणं पिन्वसि त्वचं कं चिद्यावीररुं शूर मर्त्यं परिवृणक्षि मर्त्यम् ।**
**इन्द्रोत तुभ्यं तदिवे तदुद्राय स्वर्यशसे ।**
**मित्रायं वोचं वरुणाय सप्रथः सुमृळीकायं सप्रथः ॥ ३ ॥**

दस्मः । हि । स्म । वृषणम् । पिन्वसि । त्वचम् । कम् । चित् । यावीः । अररुम् । शूर । मर्त्यम् । परिऽवृणक्षि । मर्त्यम् ॥ इन्द्र । उत । तुभ्यम् । तत् । दिवे । तत् । रुद्राय । स्वऽर्यशसे । मित्राय । वोचम् । वरुणाय । सऽप्रथः । सुऽमृळीकाय । सऽप्रथः ॥ ३ ॥

हे इन्द्र त्वं [v]दस्मो [v]हि शत्रूणाम् उपक्षपणकर्ता[4] खलु। अत एव कारणात् [v]वृषणं स्वतो वर्षणशीलं [v]त्वचं संवरणवन्तं पुटबन्धनवदुदकवेष्टनवन्तं [v]कं [v]चित् जलधारिणं मेघं [v]पिन्वसि निर्भिद्य सेचयसि । किंच [v]मर्त्यं मर्त्यवत् [v]अररुम् अरणशीलं गमनस्वभावं कंचिन्मेघं हे [v]शूर विक्रान्त [v]यावीः मिश्रयसि ॥ यौतेश्छान्दसे लुङि छान्दसः अडभावः ॥ अवर्षणेन गच्छन्तं बलान्निगृह्य वर्षयसीत्यर्थः । यथा शूरः कश्चित् बलवन्तं गच्छन्तं वैरिणं निगृह्य स्वीकरोति तद्वदित्यर्थः । तथा [v]मर्त्यं मरणशीलं शीर्यमाणस्वभावं निरुदकं कंचिन्मेघं [v]परिवृणक्षि सर्वतो वर्जयसि[5] औदासीन्यं करोषीत्यर्थः । हे [v]इन्द्र [v]तत् तादृशं कर्म वर्षणरूपं [v]सप्रथः सर्वतः पृथु यथा भवति तथा [v]तुभ्यं [v]वोचं ब्रवीमि । इन्द्र एव विशेष्यते । [v]स्वयशसे स्वकीययशोयुक्ताय । तथा [v]दिवे [v]उत त्वदाश्रयभूतायै द्युलोकदेवतायै अपि

---

१. ङ–शत्रूणाम् । २. क्ष-ङ-ञ-ट–संग्रामजयस्य; च–संग्रामस्य । ३. क्ष-ञ-ट–संराधयन्ति; ङ–समाराधयन्तीति । ४. ङ-च-फ–उपक्षयकर्ता । ५. क्ष-ङ-ञ-ट–परि वर्जयसि ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vतत् तादृशं कर्म वोचं ब्रवीमि । उतशब्दोऽपिशब्दार्थः । वर्षणकर्मणो द्युदेवताया आनुकूल्यात् तस्या अपि वचनं युक्तम् । तथा vरुद्राय जगतां दुःखद्रावयित्रे रोदनशीलाय वा अग्नये तत् वोचम् । ' रुद्रो वै क्रूरो यदयमग्निः ' ( तै. सं. ६. २. ३. २ ) इति श्रुतेः रुद्रत्वम् । ' सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम् ' ( तै. सं. १. ५. १. १ ) इति श्रुतेः रोदनस्वभावत्वं प्रसिद्धम् । तस्य च आहुतिद्वारा वृष्ट्यनुकूलत्वात्तस्यापि कथनं युक्तम् । स्वयशसे इत्यस्य रुद्रायेत्यनेन वा संबन्धः संनिहितत्वाद्योग्यत्वाच्च । स्वकीययशोयुक्तायाग्नये इत्यर्थः । तथा vमित्राय अहरभिमानिदेवतायै तत् वोचम् । vवरुणाय रात्र्यभिमानिदेवतायै तद्वोचम् । ' अहोरात्रे वै मित्रावरुणौ ' ( ता. ब्रा. २५. १०. १० ), ' अहोरात्राभ्यां खलु वै पर्जन्यो वर्षति ' ( तै. सं. २. १. ७. ३ ) इति। तथा ' मैत्रं वा अहर्वारुणी रात्रिः ' ( तै. सं. २. १. ७. ३ ) इत्यादिश्रुतिभ्यो मित्रावरुणयोरहोरात्राभिमानिदेवत्वम् । अत एव श्रुतेर्वृष्टिप्रदातृत्वात् ताभ्यामपि प्रथनं[1] युक्तम् । vसुमृळीकाय शोभनसुखयित्रे प्रजानाम् । एतत्सर्वत्र संबध्यते । उक्तेभ्यो देवेभ्यः vसप्रथः सर्वतः पृथु अतिविस्तीर्णं यथा भवति तथा तद्वर्षणकर्म ब्रवीमि ॥

**अस्माकं व इन्द्रमुश्मसीष्टये सखायं विश्वायुं प्रासहं युजं वाजेषु प्रासहं युजम् ।**
**अस्माकं ब्रह्मोतयेऽवा पृत्सुषु कासु चित् ।**
**नहि त्वा शत्रुः स्तरते स्तृणोषि यं विश्वं शत्रुं स्तृणोषि यम् ॥ ४ ॥**

अस्माकम्। वः। इन्द्रम्। उश्मसि। इष्टये। सखायम्। विश्वऽआयुम्। प्रऽसहम्। युजम्। वाजेषु। प्रऽसहम्। युजम्॥ अस्माकम्। ब्रह्म। ऊतये। अव। पृत्सुषु। कासु। चित्। नहि। त्वा। शत्रुः। स्तरते। स्तृणोषि। यम्। विश्वम्। शत्रुम्। स्तृणोषि। यम्॥ ४ ॥

हे ऋत्विजः vअस्माकम् अस्मदर्थं vवः युष्मदर्थं च vइष्टये यागाय अभिमतैषणाय वा vइन्द्रम् vउश्मसि अभिमतं कामयामहे॥ 'वश कान्तौ'। आदादिकः। इदन्तो मसिः। ' ग्रहिज्या° ' इत्यादिना संप्रसारणम्॥ यद्वा[2]। अस्माकं सखायम्[2] इति संबन्धः। कीदृशमिन्द्रम्। vसखायं सखिवदत्यन्तहितकारिणं समानख्यानं वा vविश्वायुं विश्वेषां यागानां गन्तारं vप्रासहं प्रकर्षेण[3] शत्रूणां मर्षयितारम्॥ सहेः क्विप्[3]। ' नहिवृति° ' इत्यादिना उपसर्गस्य दीर्घः॥ vयुजं सर्वदा युक्तं सहायभूतमित्यर्थः। पुनः स एव विशेष्यते। vवाजेषु हवीरूपान्नेषु तद्वत्सु यज्ञेषु वा निमित्तभूतेषु vप्रासहं यज्ञविघातिनः सहमानं vयुजम् अभिमतफलैर्युक्तं[4] मरुद्भिर्वा[4]। किंच हे इन्द्र vअस्माकम् vऊतये रक्षणाय vब्रह्म परिवृढं कर्म vअव रक्ष। कस्तत्र[5] विशेष इति तत्राह। vकासु vचित् पृत्सु संग्रामेषु। ' पृत्सु समत्सु ' (नि. २. १७. २१) इति संग्रामनामसु पाठात् तन्नामत्वम्। तेषु vत्वा त्वां[6] vनहि vस्तरते न हिनस्ति न विरोधमाचरति vयं vस्तृणोषि। vयं vविश्वं vशत्रुं vस्तृणोषि वारयसि स कश्चिदपि vशत्रुः न हिनस्ति। तव महत्त्वेन सर्वे भीताः[7] विधेया भवन्ति शत्रुभावं न कोऽप्याचरति अजातशत्रुत्वादित्यर्थः॥

---

१. क्ष-ङ-झ-ञ-ट-कथनम्। २. ङ-यथा अस्माकं तथा वो युष्माकं सखायम्। ३. झ-प्रकृष्टं मर्षणशीलम्। प्रासहेः क्विप्। ४. ङ-अभिमतहयैर्युक्तं मरुद्भिर्वा सहितं यज्ञे; क्ष-ञ-ट-अभिमतफलैर्युक्तं मरुद्भिर्वा सहितं यज्ञे। ५. क्ष-ङ-च-ञ-ट-कस्तव। ६. च-फ-त्वां शत्रुः। ७. क्ष-ञ-भावाः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नि षू नमातिमतिं कयस्य चित्तेजिष्ठाभिररणिभिर्नोतिभिरुग्राभिरुग्रोतिभिः ।
नेषि णो यथा पुरानेनाः शूर मन्यसे ।
विश्वानि पूरोरप पर्षि वह्निरासा वह्निर्नो अच्छ ॥ ५ ॥

नि । सु । नम । अतिऽमतिम् । कयस्य । चित् । तेजिष्ठाभिः । अरणिऽभिः । न । ऊतिऽभिः । उग्राभिः । उग्र । ऊतिऽभिः ॥ नेषि । नः । यथा । पुरा । अनेनाः । शूर । मन्यसे । विश्वानि । पूरोः । अप । पर्षि । वह्निः । आसा । वह्निः । नः । अच्छ ॥ ५ ॥

हे इन्द्र[1] ᵛकयस्य कस्य ᵛचित् त्वद्भक्तस्य यजमानस्य ᵛअतिमतिम् अतिक्रान्तमननं विरुद्धमनस्कं शत्रुं ᵛनि ᵛषू ᵛनम नितरां सुष्ठु नामय[2] अस्मत्प्रणतं[3] कुरु ॥ अन्तर्भावितण्यर्थोऽयम् ॥ हे ᵛउग्र उद्गूर्णबल ᵛऊतिभिः रक्षणैः प्रीतिभिर्वा युक्तः सन् ᵛतेजिष्ठाभिः ᵛअरणिभिर्न अतिशयेन तेजस्विभिः युद्धादिरूपैः[4] मार्गैः[4] इव ॥ तेजस्वच्छब्दात् आतिशायनिकः इष्ठन् । विन्मतोर्लुक् । 'टेः' इति टिलोपः ॥ अतिमतिं वृत्रादिं यथा नामितवान् तथा अस्मद्विरोधिनमपीत्यर्थः । यद्वा । उत्तरत्रान्वयः । तेजिष्ठाभिः अरणिभिर्न तेजोयुक्तैः[5] गमनसाधनैर्यज्ञादिमार्गैः यथा अस्मान् योजितवानसि[6] तथा ᵛउग्राभिः प्रकाशिकाभिः ᵛऊतिभिः रक्षणैः यागफलभूतैः ᵛनः अस्मान् ᵛनेषि नयसि अभिमतस्वर्गादिफलं प्रापयसीत्यर्थः ॥ नयतेश्छान्दसः शपो लुक् ॥ तत्र दृष्टान्तः । ᵛपुरा पूर्वस्मिन् काले अस्मत्पित्रादीन् ᵛयथा ऊतिभिः नीतवानसि तथा नेषि[7] इत्यर्थः । हे ᵛशूर विक्रान्त त्वम् ᵛअनेनाः ᵛमन्यसे सर्वैरपापत्वेन अवबुध्यसे स्वर्गाद्यभिमतसाधकत्वादिति भावः । यद्वा । अनेनाः त्वमस्मानपि अनेनसः मन्यसे । किंच हे इन्द्र ᵛवह्निः वृष्ट्यादिप्रदानेन जगतां निर्वाहकः सन् ᵛपूरोः मनुष्यस्य यजमानस्य । पूरुरिति मनुष्यनाम, 'पूरवः जगतः' ( नि. २. ३. २० ) इति तन्नामसु पाठात् । तस्य ᵛविश्वानि सर्वाणि एनांसि ᵛअप ᵛपर्षि अपकृत्य पालयसि ॥ पृणातेश्छान्दसः शपो लुक् ॥ अतः ᵛनः अस्माकमपि ᵛआसा अन्तिके देवयजनदेशे ᵛअच्छ आभिमुख्येन आगत्य ᵛवह्निः अभिमतानां वोढा सन् अप अनभिमतम् अपकृत्य[8] पर्षि अभिमतफलं पूरयसि ॥ ॥ १६ ॥

प्र तद्वोचेयं भव्यायेन्दवे हव्यो न य इषवान्मन्म रेजति रक्षोहा मन्म रेजति ।
स्वयं सो अस्मदा निदो वधैरजेत दुर्मतिम् ।
अव स्रवेदघशंसोऽवतरमव क्षुद्रमिव स्रवेत् ॥ ६ ॥

प्र । तत् । वोचेयम् । भव्याय । इन्दवे । हव्यः । न । यः ।
इषऽवान् । मन्म । रेजति । रक्षःऽहा । मन्म । रेजति ।
स्वयम् । सः । अस्मत् । आ । निदः । वधैः । अजेत । दुःऽमतिम् ।
अव । स्रवेत् । अघऽशंसः । अवऽतरम् । अव । क्षुद्रम्ऽइव । स्रवेत् ॥ ६ ॥

---

१. झ–इन्द्र त्वम् । २. क्ष-ङ-ञ–नमय । ३. क्ष-ञ–दासवत्प्रणतम् । ४. ङ–युद्धादिमार्गैः । ५. क्ष-ङ-ञ–अतिशयिततेजोयुक्तैः । ६. च-फ–प्रेरितवानसि । ७. क्ष-ञ–अस्मानपि । ८. क्ष-ङ-च-ज्ञ-झ-ञ-ट-त-फ–अपनुत्य ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vभव्याय भवनशीलाय प्रतिदिनं कलाभिवृद्धया वर्धनशीलाय Vइन्दवे अमृतेन सर्वस्य क्लेदयित्रे तदर्थं Vतत् वक्ष्यमाणं कर्म स्तोत्रं वा Vप्र Vवोचेयं प्रकर्षेण वक्तुं शक्तो भूयासम्। स्तुतेरतिमहत्त्वादिति भावः ॥ वचेः 'लिङ्याशिष्यङ्'। 'वच उम्' ॥ कस्य तदिति। Vयः इन्दुः Vइषवान् एषणवान् Vमन्म मननीयं स्तोत्रं कर्म वा उद्दिश्य Vरेजति गच्छति। रेजतिर्गत्यर्थः, 'रेजति दध्यति' (नि. २.१४. ६०.) इति तन्नामसु पाठात्। आगमने दृष्टान्तः। Vहव्यो Vन होतव्यः आह्वातव्यो वा हव्यः इन्द्र इव। प्रायेण 'इन्द्र आगच्छ' इत्यादिना इन्द्र एवाहूयते। स इव। स एव विशेष्यते। Vरक्षोहा यज्ञविघातकानां रक्षसां हन्ता Vमन्म तेषामेव कर्म हननादिरूपं Vरेजति गच्छति चालयति नाशयतीत्यर्थः। Vसः एव इन्दुः Vस्वयं Vनिदः ॥ 'णिदि कुत्सायाम्'। क्विप्। 'सावेकाचः०' इति विभक्तेरुदात्तता ॥ अस्मन्निन्दितुर्वैरिणः Vवधैः हननोपायैः ॥ 'हनश्च वधः' इति भावे अप्; तत्संनियोगेन वधादेशः। स च अदन्तोऽन्तोदात्तः ॥ Vदुर्मतिं दुर्बुद्धिम् Vअस्मत् अस्मत्तः Vआ Vअजेत आक्षिपेत् अवनयेत्। किंच Vअघशंसः अघानां पापानां हिंसादीनां शंसिता स्तेनः Vअवतरम् अत्यन्तनिकृष्टम्[1] Vअव स्वस्थानादवाङ्मुखो भूत्वा Vस्रवेत् गच्छतु अधः पतत्वित्यर्थः। अघशंसः स्तेनः, 'अघशंसः वृकः' (नि. ३. २४. १३) इति तन्नामसु पाठात्। अवस्रवणमेव प्रार्थ्यते। Vक्षुद्रमिव क्षेसुं शक्यमुदकादिकमिव। उदकं यथा तिष्ठति[2] स्रवन्नश्यति तथा असावपीत्यर्थः ॥

वनेम तद्धोत्रया चितन्त्या वनेम रयिं रयिवः सुवीर्यं रण्वं सन्तं सुवीर्यम्।
दुर्मन्मानं सुमन्तुभिरेमिषा पृचीमहि।
आ सत्याभिरिन्द्रं द्युम्नहूतिभिर्यजत्रं द्युम्नहूतिभिः ॥ ७ ॥

वनेम। तत्। होत्रया। चितन्त्या। वनेम। रयिम्। रयिऽवः। सुऽवीर्यम्। रण्वम्। सन्तम्। सुऽवीर्यम् ॥ दुःऽमन्मानम्। सुमन्तुऽभिः। आ। ईम्। इषा। पृचीमहि। आ। सत्याभिः। इन्द्रम्। द्युम्नहूतिऽभिः। यजत्रम्। द्युम्नहूतिऽभिः ॥ ७ ॥

हे इन्द्र वयं यजमानाः Vतत् तादृशं स्तुत्यं तव रूपं यद्वा तत् ते वयं Vचितन्त्या तव गुणान्[3] ज्ञापयन्त्या ॥ 'चिती संज्ञाने'। अस्मात् ण्यन्तात् शतरि व्यत्ययेन शः ॥ Vहोत्रया होमसाधनभूतया स्तुतिरूपया वाचा Vवनेम संभजेम यद्वा शब्दयेम स्तुतिं करवामेत्यर्थः। होत्रेति वाङ्नाम, 'होत्रा गीः' (नि. १.११.३५) इति तन्नामसु पाठात्। किंचैवं स्तोतारो वयमपि हे Vरयिवः विशिष्टधनवन्निन्द्र Vरयिं धनं Vवनेम संभजेम। कीदृशं रयिम्। Vसुवीर्यं शोभनसामर्थ्योपेतं Vरण्वं रमणीयं गन्तव्यं वा अर्थिभिः Vसन्तं सर्वदा वर्तमानं यज्ञादिद्वारा बहुशः दीयमानमपि प्रवर्धमानम्। पुनस्तदेव विशेष्यते। Vसुवीर्यं शोभनपुत्रभृत्याद्युपेतं धनेन तेषां संपादयितुं शक्यत्वात् ॥ 'वीरवीर्यौ च' इत्युत्तरपदाद्युदात्तत्वम् ॥ किंच हे इन्द्र Vदुर्मन्मानं दुःखेन मन्तुं शक्यं त्वां तव महिम्नोऽतिमहत्त्वात् Vसुमन्तुभिः शोभनैर्मननैः[4] तत्साधनैः[4] स्तोत्रैर्वा Vइषा हवीरूपेणान्नेन च Vआ Vपृचीमहि सर्वतः संपृक्ता भूयास्म। यद्वा। इषा अन्नेन निमित्तेन। पूर्वं धनस्य प्रार्थितत्वात् इदानीमन्नं प्रार्थ्यते ॥ 'पृची संपर्के'। लिङि छान्दसो विकरणस्य लुक् ॥ किंच Vयजत्रं यागनिष्पादकम् Vइन्द्रं Vसत्याभिः अविसंवादिनीभिः यथाभिलाषमुपजाय-

१. क्ष-ञ-ट-'अत्यन्तनिकृष्टम्' इत्यस्यानन्तरम् 'अथ्रु (मु) च च्छन्दसि इत्यमुप्रत्ययः' इत्यधिकम्।
२. क्ष-ङ-ञ-ट-न तिष्ठति। ३. क्ष-ङ-ञ-ट-गुणादीन्। ४. ङ-शोभनमननसाधनैः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मानफलाभिः [v]द्युम्नहूतिभिः[1] 'हरिव आगच्छ मेधातिथेर्मेषे' इत्याह्वानैरित्यर्थः । पुनस्ता एव विशेष्यन्ते । [v]द्युम्नहूतिभिः हविर्लक्षणान्ननिमित्तैराह्वानैः आ पृचीमहि इति शेषः । 'द्युम्नं द्योततेर्यशो वान्नं वा' (निरु. ५. ५) इति यास्कः ॥

प्रप्रा वो अस्मे स्वयशोभिरूती परिवर्ग इन्द्रो दुर्मतीनां दरीमन्दुर्मतीनाम् ।
स्वयं सा रिषयध्यै या न उपेषे अत्रैः ।
हतेमसन्न वक्षति क्षिप्ता जूर्णिर्न वक्षति ॥ ८ ॥

प्रऽप्र । वः । अस्मे इति । स्वयशःऽभिः । ऊती । परिऽवर्गे । इन्द्रः । दुःऽमतीनाम् । दरीमन् । दुःऽमतीनाम् ॥ स्वयम् । सा । रिषयध्यै । या । नः । उपऽईषे । अत्रैः ।
हता । ईम् । असत् । न । वक्षति । क्षिप्ता । जूर्णिः । न । वक्षति ॥ ८ ॥

हे ऋत्विजः [v]वः युष्मदर्थम् [v]अस्मे अस्मदर्थं च अयम् [v]इन्द्रः [v]स्वयशोभिः स्वकीययशोयुक्तैः [v]ऊती ऊतिभिः रक्षणैः [v]दुर्मतीनां दुर्मननयुक्तानां विरोधिनां [v]परिवर्गे परितो वर्जने निमित्तभूते सति [v]प्रप्र प्रकृष्टो भवति समर्थो भवतीत्यर्थः । द्विर्भावः पादपूरणः । यद्वा । हे ऋत्विजः वः युष्मदर्थम् अस्मे अस्माकं संबन्धिभिः स्वयशोभिः स्वयमेव अन्यनैरपेक्ष्येण स्तोतुं समर्थैः स्तोत्रैः तुष्टः सन् ऊती ऊतौ रक्षणे प्रप्र प्रकृष्टो भवति ॥ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः[2] ॥ कुत्रेति तदुच्यते । दुर्मतीनां दुष्टानां परिवर्गे परितो वर्जनवति संग्रामे यागे वा । पुनः स एव विशेष्यते । [v]दुर्मतीनां दुष्टबहुमानवतां हनन-बुद्धीनां[3] [v]दरीमन् दरीमणि अतिशयेन दारयितरि । एवमिन्द्रे सम्यक् पालयति[4] सति [v]अत्रैः भक्षकैः अस्मद्विरोधिभिः [v]या [v]जूर्णिः जववती सेना । 'जूर्णिर्जवतेर्वा द्रवतेर्वा दूनोतेर्वा' (निरु. ६. ४) इति यास्कः । [v]नः अस्मान् प्रति [v]रिषयध्यै हिंसितुम् ॥ रिषेण्यन्तात् तुमर्थे शध्यैप्रत्ययः ॥ [v]उपेषे उपगन्तुमस्मान् प्राप्तुम् ॥ 'ईङ् गतौ' । तुमर्थे क्सेप्रत्ययः ॥ [v]क्षिप्ता प्रेरिता [v]सा सेना [v]स्वयं [v]हतेमसत् हिंसितैवासीत् । [v]न[5] [v]वक्षति अस्मान्न वहेत् न प्राप्नोति । तथा अस्मद्विंसकान् शत्रूनपि पुनः [v]न [v]वक्षति न वहति ॥ वहेर्लेटि अडागमः । 'सिब्बहुलम्०' इति सिप् ॥ इन्द्रसामर्थ्येन तत्रैव नष्टाभूदित्यर्थः ॥

त्वं न इन्द्र राया परीणसा याहि पथाँ अनेहसा पुरो याह्यरक्षसा ।
सचस्व नः पराक आ सचस्वास्तमीक आ ।
पाहि नो दूरादारादभिष्टिभिः सदा पाह्यभिष्टिभिः ॥ ९ ॥

त्वम् । नः । इन्द्र । राया । परीणसा । याहि । पथा । अनेहसा । पुरः । याहि । अरक्षसा ।
सचस्व । नः । पराके । आ । सचस्व । अस्तम्ऽईके । आ ।
पाहि । नः । दूरात् । आरात् । अभिष्टिऽभिः । सदा । पाहि । अभिष्टिऽभिः ॥ ९ ॥

---

१. क्ष-ङ-ञ-ट–यशोवदाहुतिभिः । २. क्ष-ञ-ट–उपसर्गानुसारेण योग्यक्रियाध्याहारः; ङ–उपसर्गानुसारेण द्वयोर्योग्यक्रियाध्याहारः । ३. क–हतबुद्धीनाम् । ४. ङ–पालयितरि । ५. ङ–अतो न ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [V]इन्द्र [V]त्वं [V]नः [V]पथा अस्मत्संबन्धिना मार्गेण [V]पुरो [V]याहि आगच्छ ॥ भस्य टेर्लोपः। उदात्तनिवृत्तिस्वरेण तृतीयाया उदात्तत्वम् ॥ कीदृशेन मार्गेण । [V]अरक्षसा रक्षोवर्जितेन [V]अनेहसा अपापेन। यज्ञगमनमार्गस्य स्तुतिचोदितत्वात्[1] अनेहस्त्वम्। यद्वा। नः अस्मानुद्दिश्य याहि। किंविशिष्टः इति। [V]परीणसा परितो नद्धेन [V]राया अस्मभ्यं दातव्येन बहुविधधनेन युक्तः सन्। हे इन्द्र [V]नः अस्मान् [V]पराके अत्यन्तदूरदेशात् स्वर्गलक्षणात् [V]आ [V]सचस्व समवेतो भव। पराके इति दूरनाम, 'पराके परावैः[2]' (नि. ३. २६. २) इति तन्नामसु पाठात्। तथा [V]अस्तमीके अत्यन्तान्तिके देवयजनदेशे [V]सचस्व अस्मत्प्रत्तं हविः सेवस्व संगच्छस्व वा। किंच [V]नः अस्मान् [V]दूरात् दूरदेशात् स्वर्गादेः सकाशात् [V]पाहि रक्ष। [V]आरात् संनिहितात् इह लोकात् [V]पाहि पालय। यद्वा। दूरात् अयागकाले स्वर्गे एव उषित्वा अस्मान् पाहि[3] पालय[3]। आरात् यागकाले संनिहिते देवयजनदेशे पाहि। केनेति तदुच्यते। [V]अभिष्टिभिः अभिमुखैर्यागैः तन्निर्वाहैः। यद्वा। अभ्यागमनैः[4]। किं बहुना। [V]सदा सर्वकालं[5] यागकाले[6] अयागकाले दूरेऽन्तिके[6] च [V]अभिष्टिभिः अभित एषणैः [V]पाहि सम्यक् परिपालय ॥

त्वं न इन्द्र राया तरूषसोग्रं चित्त्वा महिमा सक्षदवसे महे मित्रं नावसे।
ओजिष्ठ त्रातरविता रथं कं चिदमर्त्य।
अन्यमस्मद्रिरिषेः कं चिदद्रिवो रिरिक्षन्तं चिदद्रिवः ॥ १० ॥

त्वम्। नः। इन्द्र। राया। तरुषसा। उग्रम्। चित्। त्वा। महिमा। सक्षत्। अवसे। महे। मित्रम्। न। अवसे ॥ ओजिष्ठ। त्रातः। अवितरिति। रथम्। कम्। चित्। अमर्त्य। अन्यम्। अस्मत्। रिरिषेः। कम्। चित्। अद्रिऽवः। रिरिक्षन्तम्। चित्। अद्रिऽवः ॥ १० ॥

हे [V]इन्द्र [V]त्वं [V]नः अस्मान् [V]तरूषसा तरणकुशलेन अस्मानापद्भ्यः उत्तरीतुं शक्तेन [V]राया धनेन उद्धर्ता भवेति शेषः। हे इन्द्र [V]त्वा त्वाम् [V]उग्रं [V]चित् उद्गूर्णबलं सन्तं त्वामेव [V]महिमा महत्त्वम् अस्मत्स्तोत्रजनितः कश्चिदतिशयः [V]सक्षत् सेवते संभजते उत्कर्षयतीत्यर्थः। किमर्थम्। [V]अवसे त्वत्प्रीतये[7]। तत्र दृष्टान्तः। [V]महे महते [V]अवसे रक्षणाय प्रकाशारोग्यादिरूपाय [V]मित्रं [V]न सर्वजनमित्रं सूर्यमिव। तं यथा महत्त्वेन संयोजयन्ति तथेत्यर्थः। यद्वा। मित्रं न प्रियहितरूपं सखायमिव। तं यथा महत्यै प्रीतये संभजन्ते तद्वत्। किंच हे [V]ओजिष्ठ ओजस्वितम अतिशयेन बलवन् [V]त्रातः रक्षितः अस्मान् पालयितर्वा [V]अमर्त्य अमरणधर्मन् इन्द्र [V]अवितः अस्मान् धनेन तर्पयितः त्वं [V]कं [V]चित् [V]रथं वेगवन्तमारुह्य अस्मद्देवयजनं शीघ्रमागच्छेति शेषः। तथा हे [V]अद्रिवः शत्रूणामतिशयेन भक्षकेन्द्र [V]अस्मत् [V]अन्यं [V]रिरिक्षन्तं [V]चित् अल्पं महान्तं वा। शत्रुमिति शेषः। [V]रिरिषेः बाधस्व। तथा हे [V]अद्रिवः अद्रेरादर्तृभक्षक वा शत्रूणाम्। 'अद्रिवन्नद्रिरादृणात्यनेनापि वात्तेः स्यात्' (निरु. ४. ४) इति निरुक्तम्। रिरिक्षन्तं चित् अत्यन्तं कुत्सितं हिंसन्तमपि शत्रुं रिरिषेः बाधस्व॥ 'रिष हिंसायाम्'। छान्दसः शपः श्लुः। पुनर्व्यत्ययेन शः। रिरिक्षन्तम्। अस्मादेव सनि 'हलन्ताच्च' इति

१. क्ष-ङ-ञ-ट–श्रुतिचोदितत्वात्। २. क्ष-ङ-ञ-ट–परावतः। ३. क्ष-ङ-झ-ञ-ट–परिपालय। ४. क-ज-ञ-झ-ण-त–अभ्यासशमनैः; क्ष-ङ-ञ-ट–अभ्यासगमनैः। ५. क्ष-ङ-ञ-ट–सार्वकालम्। ६. क्ष-ङ-ञ-ट–यागकाले दूरे संनिहिते। ७. क्ष-ञ-ट–त्वत्प्रीतये तृप्तये वा।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सनः कित्त्वात् गुणाभावः । चिदित्यवकुत्सितः[1] । ' कुल्माषांश्चिदाहरेत्यवकुत्सिते ' ( निरु. १. ४ ) इति यास्केनोक्तत्वात् । यद्वा । समुच्चयार्थः । कंचित् इत्यनेन सह समुच्चीयते ॥

पाहि नं इन्द्र सुष्टुत स्रिधोऽवयाता सदमिद्दुर्मतीनां देवः सन्दुर्मतीनाम् ।
हन्ता पापस्य रक्षसस्त्राता विप्रस्य मावतः ।
अधा हि त्वा जनिता जीजनद्वसो रक्षोहणं त्वा जीजनद्वसो ॥ ११ ॥

पाहि । नः । इन्द्र । सुऽस्तुत । स्रिधः । अवऽयाता । सदम् । इत् । दुःऽमतीनाम् । देवः । सन् । दुःऽमतीनाम् ॥ हन्ता । पापस्य । रक्षसः । त्राता । विप्रस्य । माऽवतः ।
अध । हि । त्वा । जनिता । जीजनत् । वसो इति । रक्षःऽहणम् । त्वा । जीजनत् । वसो इति ॥ ११ ॥

हे [v]इन्द्र [v]सुष्टुत शोभनस्तुत त्वं [v]स्रिधः दुःखात्[2] तदुत्पादकात् पापाद्वा [v]नः अस्मान् [v]पाहि रक्ष । यतः त्वं [v]दुर्मतीनां दुर्मनस्कानां रक्षःप्रभृतीनाम् ॥ ' नामन्यतरस्याम् ' इति नाम उदात्तत्वम् ॥ [v]सदमित् सर्वदैव [v]अवयाता अधोयापयिता[3] प्रापयितासि । अतः पाहि । अत एव हे इन्द्र [v]देवः अस्मत्स्तुत्या हृष्टः [v]सन् [v]दुर्मतीनां दुष्टमननवतां यागविघातकानाम् अवयाता असि । तथा [v]रक्षसः रक्षणनिमित्तभूतस्य । ' रक्षो रक्षितव्यमस्मात् ' ( निरु. ४. १८ ) इति यास्कः । तादृशस्य [v]पापस्य फलप्रतिबन्धरूपस्य [v]हन्ता घातकोऽसि । यद्वा । पापस्य पापिनः रक्षसः राक्षसादेः हन्तासि । तथा [v]मावतः मत्सदृशस्य [v]विप्रस्य मेधाविनः यजमानस्य [v]त्राता रक्षितासि । [v]अध अतो हेतोः हे इन्द्र [v]वसो सर्वेषां निवासभूत [v]त्वा त्वां [v]जनिता सर्वस्य जनयितादिकर्ता परमेश्वरः [v]जीजनत् अजनयत् उत्पादितवान् । तथा हे [v]वसो वासयितः [v]त्वा त्वां [v]रक्षोहणं [v]जीजनत् रक्षोहननाय उत्पादितवान् ॥ जनयतेर्लुङि चङि रूपम् ॥ यज्ञादिविघातिनां रक्षःप्रभृतीनां विघाताय हीन्द्रस्यावतारः । ' तमिन्द्रो देवतान्वसृज्यत ' ( तै. सं. ७. १. १. ४ ) इत्यादिप्रसिद्धद्योतनार्थो हि शब्दः ॥ ॥ १७ ॥

' एन्द्र याह्युप नः ' इति दशर्चं चतुर्थं सूक्तं पारुच्छेपमैन्द्रम् । अन्त्या ' स नो नव्येभिः ' इत्येषा त्रिष्टुप् शिष्टा अत्यष्टयः । अत्र त्रिष्टुबन्तपरिभाषा नाश्रीयते ' सर्वमात्यष्टम् ' इति विशेषेण प्रतिज्ञातत्वात् । ' एन्द्र याहि दशान्त्या त्रिष्टुप् ' इत्यनुक्रमणिका । पृष्ठ्यषडहस्य षष्ठेऽहनि निष्केवल्यमेतत्सूक्तम् । ' षष्ठस्य ' इति खण्डे सूत्रितम्–' एन्द्र याह्युप नः प्र घान्वस्य ' ( आश्व. श्रौ. ८. १ ) इति ॥ महाव्रते माध्यंदिनसवने ब्राह्मणाच्छंसिनोऽनुरूपतृचे प्रथमा ' एन्द्र याहि ' इत्येषा । ' महाव्रतस्य पञ्चविंशतिम् ' इति खण्डे शौनकेन सूत्रितम्–' एन्द्र याह्युप नः परावत इन्द्राय हि द्यौरसुरो अनम्नत ' ( ऐ. आ. ५. १. १ ) इति ॥

---

१. क्ष-ञ-ट–चिदित्यवकुत्सिते । २. क्ष-ञ-ट–शोषकात् दुःखात्; ङ–शोकात् दुःखात् । ३. क्ष-ञ-ट–अवयापयिता ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

**एन्द्र याह्युप नः परावतो नायमच्छा विदथानीव सत्पतिरस्तं राजेव सत्पतिः।**
**हवामहे त्वा वयं प्रयस्वन्तः सुते सचा ।**
**पुत्रासो न पितरं वाजसातये मंहिष्ठं वाजसातये ॥ १ ॥**

आ । इन्द्र । याहि । उप । नः । पराऽवतः । न । अयम् । अच्छ । विदथानिऽइव । सत्ऽपतिः । अस्तम् । राजाऽइव । सत्ऽपतिः ॥ हवामहे । त्वा । वयम् । प्रयस्वन्तः । सुते । सचा । पुत्रासः । न । पितरम् । वाजऽसातये । मंहिष्ठम् । वाजऽसातये ॥ १ ॥

हे ᵛइन्द्र ᵛपरावतः दूरदेशात् स्वर्गलक्षणात् ᵛनः अस्मान् ᵛउप ᵛयाहि अस्मत्समीपं प्रत्यागच्छ। तत्र दृष्टान्तः । ᵛअयं ᵛन । पुरोवर्ती अग्निः अभिषुतः सोमो वा प्रस्तुतत्वान्निर्दिश्यते । स इव । यद्यपि पुरस्तादुपाचारात् निषेधार्थीयो नकारः सर्वत्र तथाप्यत्र औचित्येनोपमार्थीयो गृह्यते । यद्वा । परावतो न दूरदेशादिव । यद्यपि यज्ञे सर्वदा संनिहितः तथापि स्वर्गाख्यादूरदेशादिव अस्मिन् यज्ञे ॥ अयमिति विभक्तिव्यत्ययः ॥ असुं देवयजनदेशम् ᵛअच्छ अभिप्रायुम्[1] ᵛआ याहि इति शेषः । तत्र दृष्टान्तः । ᵛसत्पतिः सतां सर्वदा वर्तमानानामृत्विजां पालको यजमान इव ॥ 'पत्यावैश्वर्ये' इति पूर्वपदप्रकृतिस्वरत्वम् ॥ स यथा ᵛविदथानि वेदनानि अनुष्ठेयज्ञानानि । यद्वा । सतां विद्यमानानां फलानां पालकोऽग्निः । स यथा विदथानि यज्ञगृहाण्यागच्छति तद्वत् त्वमपि यज्ञगृहाण्यागच्छ । यद्वा । सतां नक्षत्राणां पतिः ᵛराजा चन्द्रमाः ᵛअस्तमिव । स यथा स्वधामस्थानम्[2] आगच्छति तद्वत् । किंच ᵛप्रयस्वन्तः हविर्लक्षणान्नवन्तः ᵛवयं यजमानाः ᵛत्वा त्वां ᵛहवामहे आह्वयामः । किमर्थम् । ᵛसुते अभिषुते सोमे निमित्तभूते सति । कीदृशा वयम् । ᵛसचा ऋत्विग्भिः सहिताः । 'सचा सहेत्यर्थः' (निरु.५. ५) इति यास्कः । आह्वाने दृष्टान्तः । ᵛपुत्रासः पुत्राः ᵛपितरं ᵛन पालकं जनकमिव । तं यथा ᵛवाजसातये अन्नस्य संभजनायाह्वयन्ति तथा वयमपि त्वां तदर्थमाह्वयामः । किंच ᵛमंहिष्ठं मंहनीयं त्वां ᵛवाजसातये संग्रामप्राप्तये तज्जयाय हविःस्वीकाराय वा आह्वयामः ॥

षष्ठेऽहनि माध्यंदिने सवने प्रस्थितयाज्यानां पुरस्तात् अन्या ऋचः प्रक्षेपणीयाः । तत्र होतुः पुरस्तात् 'पिबा सोममिन्द्र' इत्येषा । 'षष्ठस्य प्रातःसवने' इति खण्डे सूत्रितं–'पिबा सोममिन्द्र सुवानमद्रिभिरिन्द्राय हि द्यौरसुरो अनम्नत' (आश्व. श्रौ. ८. १) इति ॥

**पिबा सोममिन्द्र सुवानमद्रिभिः कोशेन सिक्तमवतं न वंसगस्तातृषाणो न वंसगः।**
**मदाय हर्यताय ते तुविष्टमाय धायसे ।**
**आ त्वा यच्छन्तु हरितो न सूर्यमहा विश्वेव सूर्यम् ॥ २ ॥**

पिब । सोमम् । इन्द्र । सुवानम् । अद्रिऽभिः । कोशेन । सिक्तम् । अवतम् । न । वंसगः । ततृषाणः । न । वंसगः ॥ मदाय । हर्यताय । ते । तुविःऽतमाय । धायसे । आ । त्वा । यच्छन्तु । हरितः । न । सूर्यम् । अहा । विश्वाऽइव । सूर्यम् ॥ २ ॥

---

१. ङ-ञ–आभिमुख्येन प्राप्तुम् । २. क्ष-ञ-ट–स्वप्रधानस्थानम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]इन्द्र [v]वंसगः वननीयगमनस्त्वं [v]सोमं [v]पिब ॥ 'ब्यचोऽतस्तिङः' इति दीर्घः ॥ कीदृशं तम् । [v]अद्रिभिः अभिषवसाधनैर्ग्रावभिः [v]सुवानं सूयमानम् ॥ कर्मणि कर्तृप्रत्ययः ॥ [v]कोशेन [v]सिक्तं कोशस्थानीयेन दशापवित्रेण शोधितम् । यद्वा । अवतम् इत्यनेन सह संबन्धः । कोशेनेति[1] लक्षणेन[1](?) सिक्तं स्वोचितजलेन[2] पूरितम् [v]अवतं [v]न आहावलक्षणम् अवटमिव[3] । तं यथा वंसगः वननीयगमनः तृषा शीघ्रगामी वृषभः पिबति तद्वत् । [v]ततृषाणो [v]न [v]वंसगः । यथा अत्यन्तं तृषितो वंसगो वननीयगमनः शीघ्रगामी पुरुषः आहावादिकमागत्य पिबति तद्वत् । किमर्थं पानमिति तत्राह । [v]ते तव [v]मदाय तृप्तये [v]हर्यताय विक्रान्तिहेतवे कान्त्यर्थं वा ॥ 'हर्य गतिकान्त्योः' । 'भृमृदृशि०' इत्यादिना अतच् ॥ [v]तुविष्टमाय महत्त्वाय प्रवृद्धत्वाय [v]धायसे यदर्थं मद उपजायते तदर्थाय ॥ धाञः 'वहिहाधाभ्यः०' इत्यसुनि 'णित्' इत्यनुवृत्तेः 'आतो युक्०' इति युक् ॥ यद्वा । ते तव तुविष्टमाय धायसे अतिशयभूताय पानाय । [v]त्वा त्वाम् [v]आ [v]यच्छन्तु आभिमुख्येन गमयन्तु । अश्वा इति शेषः । तत्र दृष्टान्तः । [v]हरितो [v]न [v]सूर्यं हरिद्वर्णविशिष्टा एतन्नामका अश्वाः सूर्यमिव । तं यथा अतित्वरया अभिमतदेशम्[4] अभिप्रेरिताः[4] वहन्ति तद्वत् । किंच [v]अहा [v]विश्वा सर्वाण्यहानि [v]सूर्यम् इव । तं यथा त एव प्रतिदिनं वहन्ति तथा अस्मद्यागदिवसेषु प्रतिदिनमावहन्तु ॥

अविन्दद्दिवो निहितं गुहा निधिं वेर्न गर्भं परिवीतमश्मन्यन्तेऽन्तरश्मनि ।
व्रजं वज्री गवामिव सिषासन्नङ्गिरस्तमः ।
अपावृणोदिषऽइन्द्रः परीवृता द्वारऽइषः परीवृताः ॥ ३ ॥

अविन्दत् । दिवः । निऽहितम् । गुहा । निऽधिम् । वेः । न । गर्भम् । परिऽवीतम् । अश्मनि । अनन्ते । अन्तः । अश्मनि ॥ व्रजम् । वज्री । गवाम्ऽइव । सिसासन् । अङ्गिरःऽतमः । अप । अवृणोत् । इषः । इन्द्रः । परिऽवृताः । द्वारः । इषः । परिऽवृताः ॥ ३ ॥

अयमिन्द्रः [v]दिवः द्युलोकादानीतं सोमम् [v]अविन्दत् अलभत लब्धवान् । द्युलोकात् गायत्र्या पक्षिरूपयापहृतं भूमावानीतं स्वीकृतवानित्यर्थः । द्युलोकादानयनं तैत्तिरीये 'तृतीयस्यामितो दिवि सोम आसीत्तं गायत्र्याहरत्' ( तै. ब्रा. ३. २. १. १ ) इत्यादिषु प्रसिद्धम् । स एव विशेष्यते । [v]गुहा [v]निहितम् अतिगोप्ये प्रदेशे पर्वतादौ स्थापितम् अत एव [v]निधिं निधिस्थानीयम् अनाशमित्यर्थः[5]। आनयने दृष्टान्तः । [v]वेः पक्षिणः [v]गर्भं [v]न शिशुमिव । यथा कपोतादिस्त्री पक्षिणी स्वशिशुं व्याधादिभयात् कस्मिंश्चिद्दुर्गमे स्थापयित्वा तत्स्थानम् अजानती[6] परिभ्रम्य विन्दते तद्वदित्यर्थः। पुनः कीदृशम् । [v]अश्मनि पाषाणे[7] अतिमहति[7] विस्तृते [v]अनन्ते [v]अश्मनि अपरिमितपाषाणे पर्वतादौ [v]परिवीतं लताकण्टकादिना परितो वेष्टितम् । सत्स्वपीतरेषु देवेषु कोऽस्यातिशय इति तत्राह । अयम् [v]इन्द्रः [v]वज्री[8] वज्रवान् [v]गवां [v]व्रजम्[9] इव पणिना असुरेणापहृतं भूमौ खनित्वा पाषाणेन पिहितद्वारं गवां

---

१. क्ष-ड-ञ-ट–कोशेनेति जलेन; झ–कोशेन दृतिलक्षणेन । २. क्ष-ड-ञ-ट–स्रावितजलेन; झ–स्रावितं जलेन ३. क्ष-ञ-ट–अवतमिव । ४. ड–अभिमतदेशम् अरुणप्रेरिताः; क्ष-ञ-ट–अभिमतदेशे अरुणप्रेरिताः । ५. क्ष-ड-ञ-ट–अनीशमित्यर्थः; झ–अविनाशमित्यर्थः । ६. च-फ–अपश्यन्ती । ७. ड–व्याप्तिमति । ८. झ–वज्रवान् अङ्गिरस्तमः अतिशयेन शत्रून् प्रति गमनशीलः अङ्गारवत्तेजस्वी वा । गवां व्रजमिव ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

व्रजं यथा तमसुरं जित्वा द्वारम् उद्नाव्य[1] लब्धवान्[1] तद्वत् सोमं [V]सिषासन् संभक्तुमिच्छन् ॥ 'सनीवन्तर्ध०' इति विकल्पनात् इडभावे 'जनसन०' इति आत्वम् ॥ अविन्दत्। अयमर्थः 'पणिनेव गावः' (ऋ. सं. १. ३२. ११) इत्यादिश्रुतिषु प्रसिद्धः। तथा अयम् [V]इन्द्रः [V]परीवृताः परितो मेघेनावृताः [V]इषः अन्नहेतुभूतस्योदकस्य [V]द्वारः द्वाराणि [V]अपावृणोत् अपवृतान्यकरोत्[2] उद्घाटितवानित्यर्थः। तथा कृत्वा [V]इषः इष्यमाणानि व्रीह्याद्यन्नानि [V]परीवृताः भूमौ परितो व्याप्तान्यकरोत्। वज्रेण मेघं भित्त्वा जलवर्षणेन सस्यादिसमृद्धिं कृत्वा व्रीह्यादिकं भूमौ व्याप्तमकरोदित्यर्थः। यतः अयमेवं कृतवान् अतः सोमस्वीकारो युक्तः ॥

दृदृहाणो वज्रमिन्द्रो गभस्त्योः क्षुभ्नेव तिग्ममसनाय
सं श्यदहिहत्याय सं श्यत्।
संविव्यान ओजसा शवोभिरिन्द्र मज्मना।
तष्टेव वृक्षं वनिनो नि वृश्चसि परश्वेव नि वृश्चसि ॥ ४ ॥

दृदृहाणः। वज्रम्। इन्द्रः। गभस्त्योः। क्षुभ्नाऽइव। तिग्मम्। असनाय। सम्। श्यत्। अहिऽहत्याय। सम्। श्यत्॥ सम्ऽविव्यानः। ओजसा। शवःऽभिः। इन्द्र। मज्मना। तष्टाऽइव। वृक्षम्। वनिनः। नि। वृश्चसि। परश्वाऽइव। नि। वृश्चसि ॥ ४ ॥

अयम् [V]इन्द्रो [V]गभस्त्योः बाह्वोः [V]वज्रं [V]दृदृहाणः दृढं गृह्णन् ॥ 'दृह दृहि वृद्धौ'। लिटः कानच् ॥ गभस्ती इति बाहुनाम, 'गभस्ती बाहू' (नि. २. ४. ६) इति तन्नामसु पाठात्। किमर्थम्। [V]असनाय शत्रोरुपरि क्षेपणाय [V]तिग्मम् अत्यन्ततीक्ष्णं वज्रं [V]सं [V]श्यत् सम्यक् तीक्ष्णीकरोति ॥ 'शो तनूकरणे'। 'ओतः श्यनि' इति ओकारलोपः। छान्दसः अडभावः। यद्वा। लेटि 'इतश्च लोपः०' इति इकारलोपः ॥ तत्र दृष्टान्तः। [V]क्षुभ्नेव उदकमिव। उदकं यथा शत्रूणां निरसनाय अभिमन्त्रणादिसंस्कारेण तीक्ष्णीक्रियते तद्वत्। क्षुभ्नेत्युदकनाम, 'क्षुभ्न नभः' (नि. १. १२. ३) इति तन्नामसु पाठात्। पुनरपि तदेव विशेष्यते। [V]अहिहत्याय अहेर्वृत्रस्य मेघस्य वा हननाय ॥ हन्तेः 'हनस्त च' इति क्यप् तकारान्तादेशश्च ॥ [V]सं [V]श्यत्। पूर्वमेव तीक्ष्णं सत् पुनरपि वधाय तीक्ष्णयति। हे [V]इन्द्र [V]ओजसा बलेन पराभिभवनसामर्थ्येन[3] [V]शवोभिः सेनालक्षणैर्बलैः [V]मज्मना शारीरेण च बलेन [V]संविव्यानः सम्यग्युक्तः सन् ॥ विव्यान इति लिटः कानच्। 'ग्रहिज्यावयि०' इति संप्रसारणम् ॥ [V]तष्टा [V]वृक्षमिव। यथा कश्चित्तष्टा वृक्षाणां तक्षणस्य साधु कर्ता [V]वनिनः वनसंबन्धिनो वृक्षान् निवृश्चति स्वोपयोगाय नितरां छिनत्ति तक्षणेन तनूकरोति तथा त्वमपि अस्मासु वक्रमाचरन्तं शत्रुं [V]नि [V]वृश्चसि। किंच [V]परश्वेव [V]नि [V]वृश्चसि। यथा परशुना कश्चिच्छिनत्ति वृक्षं तथा त्वमपि उक्तैस्त्रिविधैर्बलैः नितरामस्मद्द्वेषिणं वृश्चसि ॥

---

१. क्ष-ज-ट–उन्नाह्य (?) पुनर्लब्धवान्; ङ–उद्घाट्य पुनर्लब्धवान्। २. च-फ–अपावृतान्यकरोत्।
३. क्ष-ज-ट–पराभिभवसामर्थ्येन।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्वं वृथा नद्य इन्द्र सर्तवेऽच्छा समुद्रमसृजो रथाँइव वाजयतो रथाँइव ।
इत ऊतीरयुञ्जत समानमर्थमक्षितम् ।
धेनूरिव मनवे विश्वदोहसो जनाय विश्वदोहसः ॥ ५ ॥

त्वम् । वृथा । नद्यः । इन्द्र । सर्तवे । अच्छ । समुद्रम् । असृजः । रथान्ऽइव । वाजऽयतः ।
रथान्ऽइव ॥ इतः । ऊतीः । अयुञ्जत । समानम् । अर्थम् । अक्षितम् ।
धेनूःऽइव । मनवे । विश्वऽदोहसः । जनाय । विश्वऽदोहसः ॥ ५ ॥

हे [v]इन्द्र [v]त्वं [v]वृथा अप्रयत्नेनैव [v]नद्यः नदीः [v]समुद्रम् [v]अच्छ[1] आभिमुख्येन [v]सर्तवे प्रापुम्[2] [v]असृजः मेघं निर्भिद्य उत्पादितवानसि । तत्र दृष्टान्तः । [v]रथानिव । यथा त्वं रथान् अस्मद्यागं प्रति अच्छ सर्तवे[2] आभिमुख्येन प्रापुम् असृजः सृष्टवानसि तद्वत् । किंच [v]वाजयतो [v]रथानिव संग्राममन्नं वा इच्छन्तो राजादयः रथानिव । ते यथा संग्रामं प्रति[3] ओषध्यादिकं वा अतिसर्तुं[4] रथान् सृजन्ति[5] तद्वत् ॥ क्यजन्तात् 'शतुरनुमः०' इति विभक्तेरुदात्तत्वम् ॥ किंच [v]इतः अस्मत्संनिधिदेशम् ॥ द्वितीयार्थे तसिल् ॥ अस्मान् प्रति [v]ऊतीः ऊत्यः गमनवत्यो रक्षणवत्यो वा नद्यः [v]समानमर्थं समानप्रयोजनवत् [v]अक्षितम् उदकम् [v]अयुञ्जत योजितवत्यः । त्वत्प्रसादादिति भावः ॥ अर्थशब्दः उदकविशेषणः सन् नपुंसकलिङ्गः ॥ अक्षितमित्युदकनाम, 'अक्षितं बर्हिः'(नि.१.१२.७७)इति तन्नामसु पाठात् । तत्र दृष्टान्तः । [v]मनवे मनोरर्थाय [v]धेनूरिव धेनवो यथा [v]विश्वदोहसः सर्वार्थं[6] दोग्ध्र्यः[6] अभवन् । यथा वा [v]जनाय यस्मै[7] कस्मै चित्समर्थाय[7] तदर्थं [v]विश्वदोहसः भवन्ति सर्वक्षीरप्रदा भवन्ति । यद्वा । जनाय सर्वजनार्थं सस्यादीनभिलक्ष्य नद्यः विश्वदोहसः संपूर्णदोग्ध्र्यः भवन्ति सर्वत्र प्रवहन्ति । अत्र नद्यः प्रीणनात्[8] दोहस इत्युपचर्यते[8] । ईदृग्जगदुपकारिवृष्टिप्रदः[9] इतीन्द्रस्यैव स्तुतिः ॥ ॥ १८ ॥

इमां ते वाचं वसूयन्त आयवो रथं न धीरः
स्वपा अतक्षिषुः सुम्नाय त्वामतक्षिषुः ।
शुम्भन्तो जेन्यं यथा वाजेषु विप्र वाजिनम् ।
अत्यमिव शवसे सातये धना विश्वा धनानि सातये ॥ ६ ॥

इमाम् । ते । वाचम् । वसुऽयन्तः । आयवः । रथम् । न । धीरः । सुऽअपाः । अतक्षिषुः ।
सुम्नाय । त्वाम् । अतक्षिषुः ॥ शुम्भन्तः । जेन्यम् । यथा । वाजेषु । विप्र । वाजिनम् ।
अत्यम्ऽइव । शवसे । सातये । धना । विश्वा । धनानि । सातये ॥ ६ ॥

---

१. ङ-ञ-अच्छ तम् आभिमुख्येन सर्तवे सर्तुम् । २. ङ-सर्तुम् । ३. ङ-ञ-ञ-' प्रति ' नास्ति । ४. ङ-प्रतिसर्तुम् । ५. क्ष-ङ-ञ-ञ-ट-सृजन्ति विसृजन्ति । ६. क्ष-ञ-ट-सर्वार्थदोग्ध्र्यः । ७. क्ष-ञ-ट-यस्य कस्यचन मर्त्याय; ङ-यस्य कस्यचन समर्थाय; ञ-यजनसमर्थाय । ८. ङ-दोहनात् दोहस इत्युपचर्यन्ते । ९. क्ष-ञ-ट-ईदृग्जनोपकारिवृष्टिप्रदः; ङ-ईदृग्धनोपकारिवृष्टिप्रदः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे इन्द्र [v]ते त्वदर्थं [v]वसूयन्तः धनमात्मन इच्छन्तः [v]आयवः दातव्यहवीरूपान्नवन्त ऋत्विजः। आयव इति मनुष्यनाम, 'आयवःअनवः' (नि.२.३.१७) इति तन्नामसु पाठात्। ते [v]इमां क्रियमाणां स्तुतिरूपां [v]वाचम् [v]अतक्षिषुः संपादितवन्तः[1]। [v]स्वपाः[1] शोभनकर्मवान् कुशली॥ बहुव्रीहौ 'सोर्मनसी०' इत्युत्तरपदाद्युदात्तत्वम्॥ [v]धीरः धीमान् [v]रथं [v]न रथमिव। तं यथा प्रयत्नेन साधु करोति तद्वत्। एवं कृत्वा [v]त्वां [v]सुम्नाय सुखाय [v]अतक्षिषुः अनुकूलमुत्पादयन्ति। सुम्नमिति सुखनाम, 'सुम्नं सुम्यम्' (नि. ३. ६. १६) इति तन्नामसु पाठात्। किंच हे [v]विप्र मेधाविन्निन्द्र[2] [v]वाजेषु संग्रामेषु [v]वाजिनं वेगवन्तं त्वां [v]शुम्भन्तः गुणैर्दीपयन्तः [v]अतक्षिषुः[2] स्तुत्या प्रीणयन्ति। तत्र दृष्टान्तः। [v]जेन्यं [v]यथा। जयशीलं शूरं यथा भटाः स्तुवन्ति तद्वत्। यद्वा। जेन्यं जयशीलं वाजिनं वेगवन्तम् अश्वं[3] वाजेषु संग्रामेषु यथा उत्साहयन्ति तद्वत्। किंच [v]शवसे बलाय [v]धना धनानां [v]सातये लाभाय च स्तुम इति शेषः॥ 'ऊतियूतिजूतिसाति०' इत्यादिना क्तिन उदात्तत्वम्॥ न केवलं धनमात्रं किंतु [v]विश्वा [v]धनानि [v]सातये कृत्स्नानि प्रीणनसाधनानि[4] गवादिधनानि॥ षष्ठ्यर्थे द्वितीया॥ तेषां लाभाय[4]। तत्र दृष्टान्तः। धना धने संग्रामे शवसे वैरिजयसाधनबलाय सातये तेषामेव धनानां प्राप्तये च [v]अत्यमिव सततगामिनमश्वमिव। तं यथा स्तुवन्ति तद्वत्॥

**भिनत्पुरो नवतिमिन्द्र पूरवे दिवोदासाय महि दाशुषे नृतो वज्रेण दाशुषे नृतो।**
**अतिथिग्वाय शम्बरं गिरेरुग्रो अवाभरत्।**
**महो धनानि दयमान ओजसा विश्वा धनान्योजसा॥ ७॥**

भिनत्। पुरः। नवतिम्। इन्द्र। पूरवे। दिवःऽदासाय। महि। दाशुषे। नृतो इति। वज्रेण। दाशुषे। नृतो इति॥ अतिथिऽग्वाय। शम्बरम्। गिरेः। उग्रः। अव। अभरत्। महः। धनानि। दयमानः। ओजसा। विश्वा। धनानि। ओजसा॥ ७॥

हे [v]इन्द्र [v]नृतो रणे नर्तनशील त्वं [v]दाशुषे हविर्दत्तवते [v]पूरवे अभिमतपूरकाय[5]। मनुष्यनामैतत्। [v]महि महते [v]दिवोदासाय एतन्नामकाय राज्ञे॥ 'दिवो दासे षष्ठ्या अलुक्' (का. ६. ३. २१. ५) इति अलुक्। 'दिवोदासादीनां छन्दसि' इति पूर्वपदाद्युदात्तत्वम्॥ [v]नवतिम् एतत्संख्याकानि [v]पुरः शत्रूणां पुराणि [v]भिनत् भिन्नवानसि। तथा हे [v]नृतो गात्रविक्षेपणकुशल हस्तपादादिप्रक्षेपेण शत्रूणां हिंसक [v]वज्रेण क्षेपणसमर्थेनायुधेन [v]दाशुषे हविर्दत्तवते दिवोदासाय अन्यस्मै वा भिनत्। तमपि शत्रुं भिन्नवानसि। इदानीं परोक्षेणाह। [v]अतिथिग्वाय पूजार्थमतिथिं गच्छते दिवोदासाय तदर्थम्॥ गमेरौणादिको ड्वप्रत्ययः॥ [v]उग्रः उद्गूर्णबलः इन्द्रः पूर्वं पुरभेदनसमये विद्धमपि अम्रियमाणं गिरिमारूढं [v]शम्बरम् एतन्नामानमसुरं [v]गिरेः दुर्गमात् पर्वतादेः सकाशात् [v]ओजसा स्वकीयेन बलेन [v]अवाभरत् अवाङ्मुखमवकृत्य प्राणं हृतवान्। किं कुर्वन्। [v]महः महान्ति [v]धनानि तदीयगवाश्वादीनि [v]दयमानः

---

१. क्ष-ञ-ट–संपादितवन्तः। तत्र दृष्टान्तः। स्वपाः। २. क्ष-ञ-ट–मेधाविन्निन्द्र जेन्यं जयशीलं त्वां वाजेषु संग्रामेषु वाजिनं वेगवन्तं त्वां शुम्भन्तो गुणैर्दीपयन्तः अतक्षिषुः; ङ–मेधाविन् इन्द्र जेन्यं जयशीलत्वात् वाजिनं वेगवन्तं त्वां शुम्भन्तः गुणैः भासयन्तः अतक्षिषुः। ३. झ–अत्यम् अश्वम्। ४. क्ष-ञ-ट–प्रीणनसाधनानि लब्धुं तेषां लाभाय। ५. ङ–एतदभिमतपूरकाय; झ–अभिमतपूरकाय मनुष्याय।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दिवोदासाय राज्ञे साधयन् ॥ ' दय दानगतिहिंसादानेषु ' । शपः पित्त्वादनुदात्तत्वे शानचो लसार्वधातुकस्वरेण धातुस्वरः ॥ न केवलमल्पं धनं किंतु ᵛविश्वा ᵛधनानि सर्वाण्यपि तेषां मणिमुक्तादीनि ᵛओजसा स्वकीयेन बलेन दयमानः साधयन् अवाभरत् ॥

इन्द्रः समत्सु यजमानमार्यं प्रावद्विश्वेषु शतमूतिराजिषु स्वर्मीळ्हेष्वाजिषु ।
मनवे शासदव्रतान्त्वचं कृष्णामरन्धयत् ।
दक्षन्न विश्वं ततृषाणमोषति न्यर्शसानमोषति ॥ ८ ॥

इन्द्रः । समत्ऽसु । यजमानम् । आर्यम् । प्र । आवत् । विश्वेषु । शतम्ऽऊतिः । आजिषु । स्वःऽमीळ्हेषु । आजिषु ॥ मनवे । शासत् । अव्रतान् । त्वचम् । कृष्णाम् । अरन्धयत् । धक्षत् । न । विश्वम् । ततृषाणम् । ओषति । नि । अर्शसानम् । ओषति ॥ ८ ॥

अयम् ᵛइन्द्रः ᵛसमत्सु रणेषु[1] प्रहारनिमित्तेषु ᵛयजमानं यष्टारम् ᵛआर्यम् अरणीयं सर्वैर्गन्तव्यं ᵛप्रावत् रक्षति । समत्सु इति संग्रामनाम 'समत्सु समरणे' (नि. २.१७.२२ ) इति तन्नामसु पाठात् । किंच ᵛशतमूतिः स्वभक्तेष्वपरिमितरक्षणः इन्द्रः ᵛविश्वेषु ॥ लिङ्गव्यत्ययः ॥ ᵛआजिषु सर्वेषु स्पर्धानिमित्तेषु संग्रामेषु यजमानं प्रावत् । तथा ᵛस्वर्मीळ्हेषु स्वर्गदेशेषु सुखस्य सेचयत्सु वा ᵛआजिषु महासंग्रामेषु प्रावत् स्वर्गप्रदानेन रक्षति । रणे आभिमुख्येन हतानां वीराणां स्वर्गः पराशरेण स्मर्यते–' द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ । परिव्राड्योगयुक्तश्च रणे योऽभिमुखो हतः ' ( परा. ३. २५ ) इति । अत्रेतिहासमाचक्षते । अंशुमती नाम नदी । तस्यास्तीरे कृष्णनामा असुरः वर्णतश्च कृष्णः दशसहस्रैरनुचरैरुपेतः तद्देशवर्तिनः[2] पीडयन्नास्ते । तत्रेन्द्रः[3] बृहस्पतिना प्रेरितः सन् मरुद्भिः सहितः कृष्णां तदीयत्वचमुत्कृत्य सानुचरमवधीत् । अयमर्थः ' अव द्रप्सो अंशुमतीमतिष्ठत् ' ( ऋ. सं. ८. ९६. १३ ) इत्यादिना उपरिष्टात् वक्ष्यते । तदत्रोच्यते । अयमिन्द्रः ᵛमनवे मनुष्याय ॥ विभक्तिव्यत्ययः ॥ मनुष्याणामर्थाय । ᵛअव्रतान् । व्रतमिति कर्मनाम । तद्रहितान् यागविद्वेषिणः ᵛशासत् शिक्षितवान् हिंसितवान् ॥ शासेर्लेटि अडागमः ॥ तथा ᵛकृष्णां ᵛत्वचं कृष्णनाम्नोऽसुरस्य कृष्णवर्णां त्वचमुत्कृत्य ᵛअरन्धयत् हिंसितवान् ॥ ' रध हिंसायाम् ' । ' रधिजभोरचि ' इति नुम् ॥ केन प्रकारेणेति तदुच्यते । ᵛधक्षत्[4] भस्मीकरोति ॥ लेट्यडागमः । ' सिब्बहुलम्° ' इति सिप् ॥ तथा ᵛविश्वं ᵛततृषाणमोषति । सर्वमपि हिंसकं तदनुचरसंघं दहति । यत्किंचिदवशिष्टमिति न इत्याह । ᵛअर्शसानं हिंसारुचिं हतावशिष्टं सर्वमपि ᵛनि ᵛओषति निःशेषेण दहति ॥

---

१. न–समरणेषु । २. क्ष-ज्ञ-ङ-ञ-ट–तद्देशवर्तिनः प्राणिनः । ३. क्ष-ञ-ट–तदेन्द्रः ४. क्ष-ञ-ट–धक्षन्न । भस्मीकरोतीव ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सूरश्चक्रं प्र बृहज्जात ओजसा प्रपित्वे वाचमरुणो मुषायतीशान आ मुषायति।
उशना यत्परावतोऽजगन्नूतये कवे ।
सुम्नानि विश्वा मनुषेव तुर्वणिरहा विश्वेव तुर्वणिः ॥ ९ ॥

सूरः । चक्रम् । प्र । बृहत् । जातः । ओजसा । प्रऽपित्वे । वाचम् । अरुणः । मुषायति । ईशानः । आ । मुषायति ॥ उशना । यत् । पराऽवतः । अजगन् । ऊतये । कवे । सुम्नानि । विश्वा । मनुषाऽइव । तुर्वणिः । अहा । विश्वाऽइव । तुर्वणिः ॥ ९ ॥

अत्रापि इतिहासमाचक्षते । केचन असुराः पूर्वमिन्द्रवज्रेण वधो मा भूत् इति ब्रह्मणो वरं लब्ध्वा इन्द्रमगणयित्वा उद्वृत्ताः[1] आसन् । तान् हन्तुम् इन्द्रः सूर्यरथस्य चक्रमादाय अवधीदिति। तदिदमुच्यते। अयमिन्द्रः vसूरः सूर्यस्य ॥ षष्ठ्यर्थे प्रथमा ॥ vचक्रं रथस्य चक्रमादाय vओजसा शारीरेण बलेन vजातः समृद्धः सन् vप्र vबृहत् प्रक्षिप्तवान् ॥ ' बृहू उद्यमने ' । तौदादिकः ॥ किंच vअरुणः अरुणवर्णः अत्यन्ततेजोयुक्तः सन् यद्वा गमनशीलः सन् vप्रपित्वे तेषां समीपे तत्समीपमागत्य vवाचं वागुपलक्षितं प्राणं vमुषायति मुमोष[2] मुष्णाति वा[2] । प्रपित्वे इत्यासन्ननाम । यद्वा । वाचं तेषां प्रहारध्वनिं मुषायति । तेषु हतेषु ध्वनिः स्वयमेव विश्रान्तः[3] भवति अवधीदित्यर्थः । अथवा । इन्द्र एव द्युस्थानः सन् आदित्यात्मना स्तूयते । सूरः सूर्यः जातः उदितः सन् ओजसा स्वकीयेन तेजसा युक्तः चक्रं प्र बृहत् तमोनिवारणार्थमसुरजयाय वा चक्रोपलक्षितं रथं प्रकर्षेण उद्यतं[4] करोति । ततः पूर्वम् अरुणः तद्रथयन्ता प्रपित्वे मन्देहाद्यसुराणां प्रपित्वे समीपे वाचं तेषां ' जहि भिन्धि ' इत्यादिध्वनिं मुषायति मुष्णाति ॥ मुषेरुत्तरस्य श्नोऽहावपि ' छन्दसि शायजपि ' इति शायजादेशः ॥ तदनन्तरं सूर्यः vईशानः सर्वाणि तमांसि असुरान् वा निराकर्तुं समर्थः सन् vआ vमुषायति समन्तात्[5] मुष्णाति। अथ प्रत्यक्षकृतः । हे vकवे क्रान्तदर्शिन् vयत् यस्त्वम् vउशना उशनस एतन्नाम्नो महर्षेः vऊतये रक्षणाय vपरावतः दूरात् स्वर्गस्थानात् vअजगन् गतवानसि प्राप्तवानसि ॥ गमेः सिपि छान्दसः शपः श्लुः । हल्ङ्यादिलोपे ' मो नो धातोः ' ( पा. सू. ८. २. ६४ ) इति नत्वम् ॥ यद्वा । उशना उशनसा युक्तः सन् अजगन् आगच्छ । आगत्य च vविश्वा विश्वानि vसुम्नानि सुखसाधनानि धनानि आदाय अस्माकं vतुर्वणिः तूर्णवनिः क्षिप्रं संभक्ता भव इति शेषः। 'तुर्वणिस्तूर्णवनिः ' ( निरु. ६. १४ ) इति निरुक्तम् । तत्र दृष्टान्तः । vमनुषेव मनुष्येणेव । यथा त्वोतेन[6] परिवृढाय देशान्तरादभिमतं धनमानीयते तद्वत् । यद्वा मनुषेव मनुष्याणामिव । इतरेषामृत्विजां विश्वा सुम्नानि सर्वाणि धनान्यादाय तुर्वणिः भवसि[7]। तद्वदस्माकमपि । न केवलमेकस्मिन्नेव यागदिने किंतु vअहा vविश्वेव विश्वान्यपि अहानि सर्वेष्वपि अहःसु vतुर्वणिः भव । यद्वा । तुर्वणिस्त्वम् अहा विश्वेव विश्वान्यहानि अतिदीर्घमायुष्यं यथा ददासि तथा सुम्नान्यपि उभयमपि देहीत्यर्थः ॥

---

१. क्ष-ञ-ट–हृताः; ङ–दृप्ताः । २. क्ष-ङ-ञ-ट–मुष्णाति । ३. क्ष-ङ-ञ-ट–विशीर्णः । ४. क्ष-ञ-ट–उद्युक्तम् । ५. क्ष-ङ-ञ-ट–आसमन्तात् । ६. ख-चोरेण । ७. क्ष-ङ-ञ-ट–भवति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स नो नव्येभिर्वृषकर्मन्नुक्थैः पुरां दर्तः पायुभिः पाहि शग्मैः ।
दिवोदासेभिरिन्द्र स्तवानो वावृधीथा अहोभिरिव द्यौः ॥ १० ॥

सः । नः । नव्येभिः । वृषऽकर्मन् । उक्थैः । पुराम् । दर्तरितिं दर्तः । पायुऽभिः । पाहि । शग्मैः ।
दिवःऽदासेभिः । इन्द्र । स्तवानः । ववृधीथाः । अहोभिःऽइव । द्यौः ॥ १० ॥

हे इन्द्र [v]वृषकर्मन् अभिमतवर्षणव्यापारवन् [v]पुरां [v]दर्तः असुरपुराणां दारयितः ॥ 'सुबा-मन्त्रिते०' इति षष्ठ्याः पराङ्गवद्भावात् षष्ठ्यामन्त्रितसमुदायस्य पादादित्वात् आष्टमिकमाद्युदात्तत्वम् ॥ [v]सः तादृशो महानुभावस्त्वं [v]नः अस्मत्संबन्धिभिः [v]नव्येभिः नूतनैः [v]उक्थैः[1] इदानीं प्रतिपादित-प्रकारैः स्तोत्रैस्तुष्टः सन् [v]पायुभिः पालनप्रकारैः [v]शग्मैः सुखैश्च ऐहिकामुष्मिकरूपैः । [v]पाहि पालय । किंच हे [v]इन्द्र [v]दिवोदासेभिः दिवोदासगोत्रोत्पन्नैः ॥ अर्शआदित्वात् अच् ॥ अस्माभिः परुच्छेपैः[2] । यद्वा । पूजार्थं बहुवचनम् । [v]स्तवानः स्तूयमानः ॥ कर्मणि कर्तृप्रत्ययः ॥ [v]ववृधीथाः प्रवृद्धो भव ॥ वृधेर्लिङि छान्दसः शपः श्लुः ॥ किमिव । [v]अहोभिरिव [v]द्यौः । द्योतनशीलः आदित्यः अहोभिः प्रसिद्धैर्यथा प्रवृद्धो भवति तथा अस्मत्स्तुत्या अत्यन्तं प्रवृद्धो भवेत्यर्थः ॥ ॥ १९ ॥

'इन्द्राय हि' इति सप्तर्चं पञ्चमं सूक्तम् । 'इन्द्राय सप्त' इत्यनुक्रमणिका । परुच्छेप ऋषिः । अत्यष्टिश्छन्दः । इन्द्रो देवता । पृष्ठ्यस्य षष्ठेऽहनि माध्यंदिनसवने होत्रकाः स्वस्वशस्त्रे एतत्सूक्तं तृचत्रयं कृत्वा आरम्भणीयाभ्य ऊर्ध्वमावपेयुः । अत्रायं विभागः । आद्यास्तिस्रो मैत्रावरुणस्य । तृतीयाद्या-स्तिस्रो ब्राह्मणाच्छंसिनः । पञ्चम्याद्यास्तिस्रोऽच्छावाकस्य । एतत् 'चतुर्थेऽहनि' इति खण्डे सूत्रितं–'षष्ठेऽहनीन्द्राय हि द्यौरसुरो अनम्नतेत्येवमेव' ( आश्व. श्रौ. ७. ११ ) इति । तत्रैवाहनि तस्मिन्नेव सवने प्रशास्त्रादीनां प्रस्थितयाज्याभ्यः[3] पुरस्तादादितः षड्चः एकैकशः प्रक्षेपणीयाः । 'षष्ठस्य' इति खण्डे सूत्रितम्–'इन्द्राय हि द्यौरसुरो अनम्नतेति षट्' ( आश्व. श्रौ. ८. १ ) इति । महाव्रते निष्केवल्ये 'इन्द्राय हि' इति तृचो वैकल्पिकानुरूपद्वितीयः । 'महाव्रतस्य' इति खण्डे सूत्रितम्–'एन्द्र याह्युप नः परावत इन्द्राय हि द्यौरसुरो अनम्नत' ( ऐ. आ. ५. १. १ ) इति ॥

इन्द्राय हि द्यौरसुरो अनम्नतेन्द्राय मही पृथिवी वरीमभिर्घुम्नसाता वरीमभिः ।
इन्द्रं विश्वे सजोषसो देवासो दधिरे पुरः ।
इन्द्राय विश्वा सवनानि मानुषा रातानि सन्तु मानुषा ॥ १ ॥

इन्द्राय । हि । द्यौः । असुरः । अनम्नत । इन्द्राय । मही । पृथिवी । वरीमऽभिः ।
घुम्नऽसाता । वरीमऽभिः ॥ इन्द्रम् । विश्वे । सऽजोषसः । देवासः । दधिरे । पुरः ।
इन्द्राय । विश्वा । सवनानि । मानुषा । रातानि । सन्तु । मानुषा ॥ १ ॥

---

१. क्ष-ङ-ज्ञ-झ-ञ-ट-त-हृद्यैः उक्थैः । २. च–पारुच्छेपैः । ३. क्ष-ङ-ञ-ट–प्रस्थितयाज्यानाम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vद्यौः द्योतनशीलो द्युलोकः तन्निवासी[1] देवसंघः[1] वा स च vअसुरः निरसनशीलः शत्रूणां पुण्यकृतामेव तन्निवासात् vइन्द्राय vहि इन्द्रायैव vअनम्नत स्वयमेव प्रह्वो भवति ।। नमेश्छान्दसे लङि कर्मकर्तरि आत्मनेपदम् । ' न दुहस्नुनमाम्° ' (पा. सू. ३. १. ८९ ) इति यगभावः। छान्दसः शपः श्लुः। हलादिशेषाभावश्च । अनुनासिकलोपः ।। हिशब्दः प्रसिद्ध्यर्थो वा । तथा vइन्द्राय इन्द्रार्थं vमही महती vपृथिवी भूमिः तत्रत्यः सर्वो जनो वा अनम्नत । उभयत्र आश्रयवाचिशब्देन आश्रयी लक्ष्यते ग्रामः आगतः इतिवत् । केन साधनेन इति तदुच्यते । vवरीमभिः वरणीयैः स्तोत्रैर्हविर्भिर्वा । किंच vद्युम्नसाता द्युम्नसातौ[2] अन्नस्य[2] यशसो वा लाभे निमित्ते सति vवरीमभिः वरणीयैर्हविर्भिर्युक्ता यजमानाः प्रह्वा[3] भवन्ति[3]। किंच vइन्द्रम् एव vविश्वे सर्वे vदेवासः देवाः vसजोषसः समानप्रीतियुक्ता ऐकमत्यभाजः पूर्वमसुरजयार्थं vपुरः vदधिरे पुरतः स्थापितवन्तः इन्द्रमुखेनैवासुरान् जितवन्तः इत्यर्थः। तथा vमानुषा vसवनानि मनुष्याणां संबन्धीनि अभिषवयुक्तानि प्रातरादिसवनानि vइन्द्राय vसन्तु इन्द्रायैव भवन्तु । तथा vमानुषा मनुष्याणामृत्विजां संबन्धीनि vरातानि दातव्यानि पुरोडाशादीनि इन्द्राय हि इन्द्रायैव सन्तु इन्द्रं प्रीणयितुं समर्थानि भवन्त्वित्यर्थः ॥

**विश्वेषु हि त्वा सवनेषु तुञ्जते समानमेकं वृषमण्यवः**
**पृथक् स्वः सनिष्यवः पृथक् ।**
**तं त्वा नावं न पर्षणिं शूषस्य धुरि धीमहि ।**
**इन्द्रं न यज्ञैश्चितयन्त आयवः स्तोमेभिरिन्द्रमायवः ॥ २ ॥**

विश्वेषु । हि । त्वा । सवनेषु । तुञ्जते । समानम् । एकम् । वृषऽमन्यवः । पृथक् । स्वरिति स्वः । सनिष्यवः । पृथक् ॥ तम् । त्वा । नावम् । न । पर्षणिम् । शूषस्य । धुरि । धीमहि । इन्द्रम् । न । यज्ञैः । चितयन्तः । आयवः । स्तोमेभिः । इन्द्रम् । आयवः ॥ २ ॥

हे इन्द्र vत्वा त्वाम् vएकम् एकमेव सन्तं vविश्वेषु सर्वेषु vसवनेषु तद्वत्सु एकाहाहीनसत्ररूपेषु सर्वेषु सोमयागेषु यजमानाः vतुञ्जते त्वरयन्ति हविरादीनि ददते । कीदृशं त्वाम् । vसमानं सर्वेषामेकरूपम् । कीदृशा यजमानाः । vवृषमण्यवः अभिमतवर्षणाय त्वामेव मन्यमानाः vपृथक् विविच्य स्वस्वयागे[4] । किमिच्छन्तः[4] । vस्वः स्वर्गं सुखविशेषं वा vसनिष्यवः संभक्तुकामाः vपृथक् तुञ्जते पृथगेव त्वरयन्ति । तुञ्जतिर्दानार्थः, ' शिक्षति तुञ्जते ' ( नि. ३.२०. ८ ) इति तन्नामसु पाठात् । vतं तादृशं vत्वा त्वां vशूषस्य बलस्य सेनारूपस्य vधुरि वहने तज्जयाय vधीमहि स्थापयामः । यद्वा । शूषस्य अस्मदीयशारीरबलस्य धुरि धीमहि । शूषमिति बलनाम, ' शूषं सहः ' (नि.२. ९. १६) इति तन्नामसु पाठात् । तत्र दृष्टान्तः । vपर्षणिं vनावं vनपारस्य संभक्त्रीं पूरयित्रीं वा फलस्य नावमिव । तां यथा भारवहने स्थापयन्ति ॥ ' पार तीर कर्मसमाप्तौ ' । ' छन्दसि वनसन° ' ( पा. सू. ३. २.२७ )

---

१. ङ–तन्निवासो देवसंघातः । २. ङ–द्युम्नस्य धनस्य । ३. क्ष-ङ-अ-ट–अनम्नत । ४. झ–स्वः स्वर्गकर्म इच्छन्तः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति सनेः इन्प्रत्ययः । पृषोदरादिः । पिपर्तेः औणादिकः सनिप्रत्ययो वा ॥ कीदृशा वयम् । vआयवः मनुष्या यजमानाः vयज्ञैः साधनैः vइन्द्रं vन vचितयन्तः परमेश्वरमिव त्वां चेतयन्तः परमेश्वरबुद्ध्या भावयन्त इत्यर्थः । यद्वा नञ्शब्दः एवकारार्थः । इन्द्रमेव त्वां जानन्तः । तथा स्तोमेभिः स्तोत्रैः vइन्द्रम्[1] इन्द्रमेव vआयवः गच्छन्तो वयं धीमहि ॥ दधातेर्लिङि छान्दसः शपो लुक् ॥

वि त्वा ततस्रे मिथुना अवस्यवो व्रजस्य साता
गव्यस्य निःसृजः सक्षन्त इन्द्र निःसृजः ।
यद्व्यन्ता द्वा जना स्वर्यन्ता समूहसि ।
आविष्करिक्रद्वृषणं सचाभुवं वज्रमिन्द्र सचाभुवम् ॥ ३ ॥

वि । त्वा । ततस्रे । मिथुनाः । अवस्यवः । व्रजस्य । साता । गव्यस्य । निःऽसृजः । सक्षन्तः । इन्द्र । निःऽसृजः ॥ यत् । व्यन्ता । द्वा । जना । स्वः । यन्ता । सम्ऽऊहसि । आविः । करिक्रत् । वृषणम् । सचाऽभुवम् । वज्रम् । इन्द्र । सचाऽभुवम् ॥ ३ ॥

हे vइन्द्र vत्वा त्वामुद्दिश्य vमिथुनाः पत्नीसहिता यजमानाः vवि vततस्रे यज्ञं वितन्वते । यद्वा । यज्ञे पयोव्रतादिना आत्मानमुपक्षयन्ति ॥ ' तसु उपक्षये ' । छान्दसे लिटि ' इरयो रे ' इति रेभावः ॥ किमर्थम् । vगव्यस्य vव्रजस्य vसाता गवां संबन्धिनो यूथस्य लाभे निमित्तभूते सति । न च सर्वत्र अग्निहोत्रादिनित्यवाक्येषु कारीरीचित्रादिकाम्यवाक्येषु यस्योदयं यस्य गृहान् इत्यादिनैमित्तिकवाक्येषु पुरुषस्यैव अर्थित्वादेः सद्भावात् तस्यैवाधिकारः स्त्रियास्तु सत्यप्यर्थित्वे अध्ययनाभावेन विद्वत्ताया अभावात् अत एव सामर्थ्याभावाच्च नास्त्यधिकारः इति वाच्यम् । यद्यपि स्त्रियाः नास्ति पृथगधिकारस्तथापि पूर्वमीमांसायां षष्ठेऽधिकाराध्याये तृतीयचतुर्थाभ्यामधिकरणाभ्यां अस्त्येव स्त्रिया अधिकारः स च पत्या सहेति[2] प्रपञ्चितत्वात् ' जायापती अग्निमादधीयाताम् ' इत्याधानविधानात् स्मृतिषु च ' नास्ति स्त्रीणां पृथग्यज्ञो न व्रतम् ' ( मनु. ५, १५५ ) इति पृथगधिकारस्यैव निवारितत्वात् अस्त्येव स्त्रियाः पत्या सहाधिकारः । अध्ययनाभावेऽपि ' वेदं पत्न्यै प्रदाय वाचयेत् ' ( आश्व. श्रौ. १. ११ ) इति सूत्रकारवचनात् 'पत्न्यन्वास्ते' इत्यादिविधिषु ' सुप्रजसस्त्वा वयम् ' ( तै. सं. १. १. १०. १ ) इत्यादिमन्त्रविधानात् यत्र वचनमस्ति तत्र अस्त्येव मन्त्रेऽधिकारः किं[3] हि वचनेन कुर्यात्[3] नास्ति वचनस्यातिभारः इति न्यायात् । तस्मात् मिथुना यज्ञं ततस्रे इत्येतत् युक्तम् । कीदृशास्ते । vअवस्यवः इन्द्राय आत्मने वा तृप्तिमिच्छन्तः vनिःसृजः निःशेषेण हविस्त्यजन्तः vसक्षन्तः ॥ सक्षतिर्गत्यर्थः ॥ त्वां संभजमानाः । पुनस्त एव विशेष्यन्ते । vनिःसृजः फलप्रतिबन्धकं पापं निर्गमयन्तः । कस्तव विशेष इति तदुच्यते । vयत् यस्मात् कारणात् vगव्यन्ता गामात्मनः

---

१. झ–इन्द्रं न । २. क्ष-ञ-ट–सहैवेति । ३. क्ष-ङ-झ-ञ-ज्ञ-ट-त–किं हि वचनं न कुर्यात्; च–किं तार्हि वचनेन कुर्यात् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इच्छन्तौ ॥ गोशब्दात् ' सुप आत्मनः क्यच् ' । ' वान्तो यि प्रत्यये ' इति अवादेशः ᵛस्वर्यन्ता स्वर्गं यन्तौ गन्तुमुद्युक्तौ ᵛद्वा ᵛजना द्वौ जायापतिरूपौ जनौ ᵛसमूहसि संयुक्तयोः एव अभिमतं स्वर्गादिकं प्रापयसि । यद्वा । सम्यगनुष्ठितवन्तौ इत्यूहसि निश्चिनोषि । अतः पत्नीसहिता अनुतिष्ठन्तीत्यर्थः । किंच हे ᵛइन्द्र त्वं ᵛवृषणं वर्षकं कामानां ᵛसचाभुवं सहैवोषन्नं त्वया अविना भूतं तथा ᵛसचाभुवं शत्रुवधादिव्यापारसामर्थ्येन[1] सहैवोषन्नं ᵛवज्रम् ᵛआविष्करिक्रत् आविष्कुर्वन् प्रकटयन्[2] वर्तसे इति शेषः ॥

विदुष्टे अस्य वीर्यस्य पूरवः पुरो यदिन्द्र
शारदीरवातिरः सासहानो अवातिरः ।
शासस्तमिन्द्र मर्त्यमयज्युं शवसस्पते ।
महीममुष्णाः पृथिवीमिमा अपो मन्दसान इमा अपः ॥ ४ ॥

विदुः । ते । अस्य । वीर्यस्य । पूरवः । पुरः । यत् । इन्द्र । शारदीः । अवऽअतिरः । ससहानः । अवऽअतिरः ॥ शासः । तम् । इन्द्र । मर्त्यम् । अयज्युम् । शवसः । पते ।
महीम् । अमुष्णाः । पृथिवीम् । इमाः । अपः । मन्दसानः । इमाः । अपः ॥ ४ ॥

हे ᵛइन्द्र ᵛते ᵛवीर्यस्य तव संबन्धिनः ᵛअस्य वीर्यस्य ॥ कर्मणि षष्ठी ॥ वक्ष्यमाणमेतद्वीर्यं ᵛविदुः । ये ᵛपूरवः मनुष्या यजमानास्तव महत्त्वं जानानाः त्वामेव यजन्ति ᵛते विदुः । यद्वा । अस्य वीर्यस्य माहात्म्यम् इति शेषः ॥ विदुष्टे इत्यत्र ' युष्मत्तत्ततक्षुषु° ' इति विसर्जनीयस्य सत्वम् ॥ वीर्यमेव विशेष्यते । हे इन्द्र ᵛयत् यस्मात् कारणात् ᵛशारदीः संवत्सरसंबन्धिनीः संवत्सरपर्यन्तं प्राकारपरिखादिभिर्दृढीकृताः ᵛपुरः शत्रूणां पुरीः ᵛअवातिरः अनाशयः ॥ अवपूर्वस्तिरतिर्नाशनार्थः ॥ किं कुर्वन् । ᵛससहानः तत्रत्यानभिभवन् धनाद्यपहारेण पीडयन् ॥ सहतेर्यङ्लुगन्तात् तान्छीलिकः चानश् ॥ ᵛअवातिरः । किंच हे ᵛइन्द्र ᵛतं ᵛमर्त्यं मरणधर्माणम् ᵛअयज्युम् अयष्टारं यज्ञविघातिनं राक्षसादि[3] ᵛशासः निगृहीतवानसि[3]। हे ᵛशवसस्पते बलस्य पालकेन्द्र त्वं ᵛमहीं महतीं ᵛपृथिवीम् ᵛइमाः ᵛअपः च समुद्रनद्यात्मकान्युदकानि च ᵛअमुष्णाः बलात् अपहृतवानसि[4] । असुरैरन्यैर्वा यज्ञविद्वेषिभिः आक्रान्तां भूमिं तत्संबन्धिनीरपश्च तेषां पुराणि भित्त्वा अपहृतवानसीत्यर्थः । किं दुःखेन । नेत्याह । ᵛमन्दसानः हृष्यन्नेव[5] ᵛइमाः ᵛअपः इमानि अप्कार्याणि व्रीह्याद्यन्नानि अमुष्णाः लब्धवानसि ॥

---

१. क्ष-ङ-ञ-ट-शत्रुवधादिस्वव्यापारसामर्थ्येन । २. क्ष-ङ-ञ-ट-प्रकाशयन् । ३. ङ-राक्षसादिं हिंसितवानसि; ञ-राक्षसादिं तनूकृतवानसि; क्ष-ञ-ज्ञ-ट-राक्षसादिं शासः निगृहीतवानसि तनूकृतवानसि वा। ४. क्ष-ञ-ट- आहृतवानसि । ५. च-तृप्यन्नेव ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आदित्ते अस्य वीर्यस्य चर्किरन्मदेषु वृषन्नुशिजो यदाविथ सखीयतो यदाविथ।
चकर्थ कारमेभ्यः पृतनासु प्रवन्तवे।
ते अन्यामन्यां नद्यं सनिष्णत श्रवस्यन्तः सनिष्णत ॥ ५ ॥

आत्। इत्। ते। अस्य। वीर्यस्य। चर्किरन्। मदेषु। वृषन्। उशिजः। यत्। आविथ। सखिऽयतः। यत्। आविथ॥ चकर्थ। कारम्। एभ्यः। पृतनासु। प्रऽवन्तवे। ते। अन्याम्ऽअन्याम्। नद्यम्। सनिष्णत। श्रवस्यन्तः। सनिष्णत ॥ ५ ॥

हे इन्द्र vआत् अत एव हेतोः vते vवीर्यस्य तव संबन्धिने वीर्याय तदभिवृद्धये vचर्किरन् पुनःपुनः सोमं विकिरन्ति ॥ किरतेर्यङ्लुगन्तात् व्यत्ययेन शः ॥ सर्वेषु सवनेषु वितरन्ति यजमानाः। अत इत्युक्तं कुत इत्याह। vमदेषु vवृषन् सोमजनितमदेषु[1] सत्सु हे कामानां वर्षितः vउशिजः त्वां कामयमानान् यजमानान् vयत् यतः कारणात् vआविथ रक्षसि। किंच vसखीयतः तव सखित्वमात्मन इच्छतोऽस्मान् vयत् यस्मात् vआविथ तर्पयसि अभिमतेन प्रीणयसि अतश्चर्किरन्। किंच हे इन्द्र vएभ्यः यजमानेभ्यः vकारं शब्दं सिंहनादलक्षणं vचकर्थ करोषि॥ करोतेः कर्मणि घञ्। 'कर्षात्वतः०' इत्यन्तोदात्तत्वम् ॥ कुत्रेति तदुच्यते। vपृतनासु संग्रामेषु। किमर्थम्। vप्रवन्तवे प्रकर्षेण वनितुं संभक्तुम्। युद्धाय हि धीराः संभजन्ते ॥ वनतेस्तुमर्थे तवेन्प्रत्ययः। 'तादौ च०' इति गतेः प्रकृतिस्वरत्वम् ॥ किंच vते तव संग्रामवासिनः त्वयि vअन्यामन्याम् अन्यांश्चान्यांश्च अन्यमन्यं प्रति ॥ कर्मव्यतिहारे सर्वनाम्नो द्विर्वचनम् ॥ vनद्यं नदिं सन्तोषं समृद्धिम्[2] ॥ 'दुनदि समृद्धौ'। पूर्वरूपत्वं बाधित्वा छान्दसो यणादेशः ॥ vसनिष्णत संभजन्ते ॥ सनेर्लेटि 'सिब्बहुलम्०' इति सिप्। इट्। व्यत्ययेन पुनः श्नाप्रत्ययः। 'आत्मनेपदेष्वनतः' इत्यदादेशे 'श्नाभ्यस्तयोरातः' इत्याकारलोपः। छान्दसः टेः एत्वाभावः ॥ तथा vश्रवस्यन्तः अन्नमिच्छन्तो जयालुब्धमन्नं काङ्क्षन्तः vसनिष्णत संभजन्ते ॥

उतो नो अस्या उषसो जुषेत ह्यर्कस्य
बोधि हविषो हवीमभिः स्वर्षाता हवीमभिः।
यदिन्द्र हन्तवे मृधो वृषा वज्रिञ्चिकेतसि।
आ मे अस्य वेधसो नवीयसो मन्म श्रुधि नवीयसः ॥ ६ ॥

उतो इति। नः। अस्याः। उषसः। जुषेत। हि। अर्कस्य। बोधि। हविषः। हवीमऽभिः। स्वः।ऽसाता। हवीमऽभिः ॥ यत्। इन्द्र। हन्तवे। मृधः। वृषा। वज्रिन्। चिकेतसि। आ। मे। अस्य। वेधसः। नवीयसः। मन्म। श्रुधि। नवीयसः ॥ ६ ॥

अयमिन्द्रः vनः अस्माकं संबन्धिनीम् vअस्याः vउषसः ॥ कर्मणि षष्ठी ॥ एतामुषसं सुत्याहः-संबन्धिनमुषःकालम् vउतो vजुषेत अपि नाम सेवेत। उषस्येव अस्माकमयमिन्द्रो यज्ञं गच्छे-

---

१. क्ष-ङ-ञ-ट–सोमपानजनितमदेषु। २. ङ–समृद्धिं वा।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दित्यर्थः । हिः पूरणार्थः । गत्वा च [v]अर्कस्य [v]हविषः ॥ पूर्ववत्कर्मणि षष्ठी ॥ अर्चनसाधनं हविः [v]हवीमभिः हवनप्रकारविशेषैः दत्तं हविः उतो [v]बोधि अपि[1] नाम जानीहि[1] । किंच [v]स्वर्पाता स्वर्गस्यान्यस्य सुखविशेषस्य वा संभजनस्थाने यज्ञे [v]हवीमभिः आह्वानैः आहूतो भवेति शेषः । अस्माभिराहूतः सन् उपस्येवागस्य हविः स्वीकरोषीत्यर्थः । कस्मादिदमुच्यते । [v]यत् यस्मात् कारणात् हे [v]वज्रिन् वज्रयुक्त [v]इन्द्र [v]मृधः हिंसकाञ्छत्रून् [v]हन्तवे हन्तुं [v]वृषा वर्षिता सन् कामानां [v]चिकेतसि अवबुध्यसे ॥ ' कित ज्ञाने ' । जौहोत्यादिकः । लेड्यडागमः । ' नाभ्यस्तस्याचि पिति° ' इत्यत्र ' छन्दसि बहुलम् ' इति वचनात् लघूपधगुणप्रतिषेधाभावः । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् ॥ तस्मात् ब्रूमः । हे इन्द्र [v]मे मम [v]मन्म मननीयं स्तोत्रम् [v]आ [v]शृधि सर्वतः शृणु । कीदृशस्य मे । [v]वेधसः मेधाविनः [v]नवीयसः नवतरस्य । दीक्षितसंस्कारैः संस्कृतत्वात् नवीयस्त्वम् । पुनर्विशेष्यते । [v]नवीयसः अतिशयेन नवनवतः असाधारणस्तुतिमतः । अत्र यजमानविशेषणैः तत्कर्तृकं स्तोत्रमेव विशिष्टं भवति ॥

त्वं तमिन्द्र वावृधानो अस्मयुरमित्रयन्तं तुविजात मर्त्यं वज्रेण शूर मर्त्यम् ।
जहि यो नो अघायति शृणुष्व सुश्रवस्तमः ।
रिष्टं न यामन्नप भूतु दुर्मतिर्विश्वाप भूतु दुर्मतिः ॥ ७ ॥

त्वम् । तम् । इन्द्र । ववृधानः । अस्मऽयुः । अमित्रऽयन्तम् । तुविऽजात । मर्त्यम् । वज्रेण । शूर । मर्त्यम् ॥ जहि । यः । नः । अघऽयति । शृणुष्व । सुश्रवःऽतमः ।
रिष्टम् । न । यामन् । अप । भूतु । दुःऽमतिः । विश्वा । अप । भूतु । दुःऽमतिः ॥ ७ ॥

हे [v]इन्द्र [v]तुविजात अस्मत्स्तुत्या बहुभावमापन्न [v]शूर विक्रान्त [v]त्वं [v]ववृधानः अत्यर्थं वर्धमानः [v]अस्मयुः अस्मान् त्वद्भक्तान् कामयमानस्त्वम् [v]अमित्रयन्तम् अस्मासु शत्रुत्वमाचरन्तं [v]मर्त्यं मरणस्वभावं [v]तं [v]मर्त्यं [v]वज्रेण [v]जहि ॥ ' हन्तेर्जः ' इति जादेशः । तस्य ' असिद्धवदत्रा भात् ' इत्यसिद्धत्वात् हेर्लुगभावः ॥ तमित्युक्तं कमित्याह । [v]यः मर्त्यः [v]नः अस्माकम् [v]अघायति अघं पापं दुःखं वा इच्छति तं जहि ॥ ' अश्वाघस्यात् ' इति आत्वम् ॥ किंच [v]सुश्रवस्तमः अतिशयेन शोभनश्रवणः त्वं [v]शृणुष्व श्रावय अस्मद्वाक्यम् । कीदृशं तदिति तदुच्यते[2] । हे इन्द्र त्वत्प्रसादात् [v]दुर्मतिः अस्मज्जिघांसाविषया[3] दुष्टा बुद्धिः [v]अप [v]भूतु अपगता भवतु ॥ छान्दसः शपो लुक् ॥ ' भूसुवोस्तिङि ' इति गुणप्रतिषेधः ॥ न केवलं हिंसारूपा अपि तु [v]विश्वा सर्वापि क्रोधपरिवादादिरूपा [v]अप [v]भूतु । तत्र दृष्टान्तः । [v]यामन् यामनि अध्वनि [v]रिष्टं [v]न । अध्वनः[4] श्रमेण[4] हिंसितं परिश्रान्तं यथा दुर्मतिश्चौरादिविषया बाधते तद्वत् अस्मान् बाधमाना दुर्मतिः अपगच्छतु । यद्वा । यामनि मार्गे यज्ञादिरूपे रिष्टम् असुरकृतहिंसादिरूपं विघ्नं[5] परिहरसि[5] तद्वत् ॥ ॥ २० ॥

' त्वया वयम् ' इति षड्ऋचं षष्ठं सूक्तं पारुच्छेपमात्यष्टमैन्द्रम् । ' युवं तम् ' इत्ययमैन्द्रापार्वतोऽर्धर्चः । ' त्वया वयं षडृचं तमैन्द्रापार्वतोऽर्धर्चः ' इत्यनुक्रमणिका ॥ विनियोगो लैङ्गिकः ॥

---

१. क्ष-ञ-ट–अपि नाम तावकम् असत् ( ? ) । २. ङ–उच्यते । ३. क्ष-ञ-ट–अस्मज्जिघांसाविष्टा । ४. क्ष-ञ-ट–अध्वश्रमेण । ५. क्ष-ङ-ञ-ट–विघ्नं यथायथा परिहरसि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्वया॑ व॒यं म॑घव॒न्पूर्व्ये॑ धन॒ इन्द्र॑त्वोताः सासह्याम पृतन्य॒तो व॑नुयाम॑ वनुष्य॒तः ।
नेदि॑ष्ठे अ॒स्मिन्नह॒न्यधि॑ वोचा॒ नु सु॑न्व॒ते ।
अ॒स्मिन्य॒ज्ञे वि च॑येमा॒ भरे॑ कृ॒तं वा॑ज॒यन्तो॒ भरे॑ कृ॒तम् ॥ १ ॥

त्वया॑ । व॒यम् । म॒घऽव॒न् । पूर्व्ये॑ । धने॑ । इन्द्र॑त्वाऽऊताः । स॒स॒ह्या॒म॒ । पृ॒त॒न्य॒तः ।
व॒नु॒या॒म॑ । व॒नु॒ष्य॒तः ॥ नेदि॑ष्ठे । अ॒स्मिन् । अह॑नि । अधि॑ । वो॒च॒ । नु । सु॒न्व॒ते ।
अ॒स्मिन् । य॒ज्ञे । वि । च॒ये॒म॒ । भरे॑ । कृ॒तम् । वा॒ज॒ऽय॒न्तः । भरे॑ । कृ॒तम् ॥ १ ॥

हे ᵛमघवन् । मघः[1] सौख्यम् । तद्वन्निन्द्र[1] ᵛत्वया साधनेन युक्ताः ᵛवयम् । अत[2] एव ᵛइन्द्रत्वोताः अतिप्रबलेनेन्द्रेण त्वया रक्षिताः सन्तः[2] ॥ ' प्रत्ययोत्तरपदयोश्च ' इति त्वादेशः । छान्दसम् आत्वम् ॥ ᵛपृतन्यतः पृतनाम् आत्मन इच्छतः प्रबलसेनायुक्तान् शत्रून् ᵛससह्याम अभिभवेम[3] । तथा[3] ᵛवनुष्यतः अस्मत्प्रहाराय आगच्छतः शत्रून् ᵛवनुयाम तेषामागमनात्पूर्वमेव वयं संभजेम । किंच ᵛपूर्व्ये[4] ᵛधने ᵛअस्मिन्यज्ञे[4] ᵛनेदिष्ठे अत्यन्तसंनिहिते ᵛअस्मिन्नहनि अभिषवयुक्ते अद्यतने अहनि ᵛसुन्वते[5] यजमानाय तदर्थम् ᵛअधि ᵛवोच । तं हविष्प्रदं यजमानं यज्ञं वा ᵛनु क्षिप्रमधिकं ब्रूहि ॥ लोटि व्यत्ययेन अङ् । ' वच उम् ' ॥ किंच हे इन्द्र वयं यजमानाः ᵛभरे संग्रामे ᵛकृतं जयस्य कर्तारं त्वामुद्दिश्य तज्जयार्थं[6] ᵛवाजयन्तः हविर्लक्षणान्नम् उपाचरन्तः[7] ᵛवि ᵛचयेम । स्तोत्रादिकं हविरादिकं वा विचिनुयाम ॥ चिनोतेर्व्यत्ययेन शप् ॥ पुनः कीदृशं त्वाम् । ᵛभरे देवानां संग्रामे असुरजये देवानां सम्यग्भरणे वा ᵛकृतं कर्तारम्[8] । भर इति संग्रामनाम, ' भरतेर्वा हरतेर्वा ' ( निरु. ४. २४ ) इति यास्कः ॥

स्व॒र्जेषे॒ भरे॑ आप्रस्य॒ वक्म॑न्युष॒र्बुधः॒ स्वस्मि॒न्नञ्जा॑सि क्रा॒णस्य॒ स्वस्मि॒न्नञ्जा॑सि ।
अह॒न्निन्द्रो॒ यथा॑ वि॒दे शी॒र्ष्णाशी॑र्ष्णोप॒वाच्यः॑ ।
अ॒स्म॒त्रा ते॑ स॒ध्य॑क्सन्तु रा॒तयो॑ भ॒द्रा भ॒द्रस्य॑ रा॒तयः॑ ॥ २ ॥

स्व॒ःऽजे॒षे । भरे॑ । आ॒प्रस्य॑ । वक्म॑नि । उ॒ष॒ःऽबुधः॑ । स्वस्मि॑न् । अञ्जा॑सि । क्रा॒णस्य॑ ।
स्वस्मि॑न् । अञ्जा॑सि ॥ अह॑न् । इन्द्रः॑ । यथा॑ । वि॒दे । शी॒र्ष्णाऽशी॑र्ष्णा । उ॒प॒ऽवाच्यः॑ ।
अ॒स्म॒ऽत्रा । ते॒ । स॒ध्य॑क् । स॒न्तु॒ । रा॒तयः॑ । भ॒द्राः । भ॒द्रस्य॑ । रा॒तयः॑ ॥ २ ॥

---

१. ङ-च-फ–धनवन्निन्द्र । २. झ–पूर्व्ये धने प्राचीनसंग्रामे त्वोताः अतिप्रबलेन त्वयेन्द्रेण रक्षिताः सन्तः । ३. क्ष-ङ-ञ-ट–अभिभवेम । सहेर्लिङि छान्दसः शपः श्लुः । यङ्लुगन्तः । तथा । ४. क्ष-ज्ञ-ञ-ज्ञ-ट–' पूर्व्ये धने अस्मिन् यज्ञे ' नास्ति । ५. क्ष-ञ-ट–सुन्वते अभिषवं कुर्वते । ६. च-फ–त्वज्जयार्थम् । ७. क्ष-ञ-ट–उपाचरन्तः वितरन्तः; झ-ज्ञ–उपाचरन्तः विचरन्तः । ८. च-फ–जयस्य कर्तारम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अयमिन्द्रः ᵛस्वर्जेषे स्वर्गगमनसाधने ᵛभरे संग्रामे । युद्धे आभिमुख्येन हतस्य स्वर्गो 'द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ' ( परा. ३. २५ ) इत्यादिस्मृतिषु प्रसिद्धः । ᵛआप्रस्य आपनशीलस्य शत्रुवधाय इतस्ततः व्याप्तस्य ॥ औणादिको रः ॥ शूरस्य ᵛवक्मनि मार्गभूते ᵛस्वस्मिन् स्वभूते ᵛअञ्जसि अभिव्यक्तिमति कपटादिरहिते । पुनः स एव विशेष्यते । ᵛस्वस्मिन् ᵛअञ्जसि स्वकीयेऽञ्जसि मुख्ये महति संग्रामे । यद्वा । स्वस्मिन् अञ्जसि शत्रौ स्वयमेव अप्रच्छन्नत्वेनागते सति अहन् शत्रून् हिनस्ति । कस्य संग्रामे इति तदुच्यते । आप्रस्य आपनशीलस्य आ समन्तात् इन्द्रस्य प्रीणयितुर्वा ᵛउषर्बुधः उषःकाले अनुष्ठानाय प्रबुध्यमानस्य ᵛऋणस्य यागं कुर्वाणस्य ॥ करोतेः शतरि छान्दसः शपो लुक् ॥ अस्य[1] यजमानस्य शत्रून् ᵛअहन् हिनस्ति । अतः कारणात् अयम् ᵛइन्द्रः ᵛशीर्ष्णाशीर्ष्णोपवाच्यः सर्वेषां शिरसा प्रणम्यः स्तुत्यः ॥ 'शीर्षश्छन्दसि' ( पा. सू. ६. १. ६० ) इति उदात्तनिवृत्तिस्वरेण अन्तोदात्तत्वम् । 'नित्यवीप्सयोः' इति द्विर्भावः ॥ तत्र दृष्टान्तः । ᵛयथा ᵛविदे सर्वज्ञाय शिरसा प्रणतिः क्रियते स्तूयते च तथैनमित्यर्थः । यद्वा यथा विदे येन प्रकारेण हन्तव्यं शत्रुं जानासि तं तं प्रहंसि[2] ॥ वेत्तेर्व्यत्ययेनात्मनेपदम् । पुरुषव्यत्ययः । 'लोपस्त आत्मनेपदेषु' इति तलोपः ॥ अथवा । यथा विदे यं यं विन्दसे लभसे शत्रुं तं तं मारयसि । अतः कारणात् स्तुत्यः इत्यर्थः ॥ अस्मिन् पक्षे छान्दसो विकरणस्य लुक् । पूर्ववत् तलोपः ॥ किंच हे इन्द्र ᵛते ᵛरातयः तव संबन्धीनि धनानि दानानि ᵛअस्मत्रा अस्मास्वेव ᵛसध्यक् सह एकोद्योगेन ᵛसन्तु भवन्तु ॥ सहपूर्वादञ्चतेः 'ऋत्विक्०' इत्यादिना क्विन् । 'सहस्य सध्रिः' इति सध्र्यादेशः । अद्रिसध्योः अन्तोदात्तनिपातनं कृत्स्वरनिवृत्यर्थमिति स चान्तोदात्तः । 'उदात्तस्वरितयोर्यणः०' इति स्वरितः ॥ किंच ᵛभद्रस्य स्तुत्यस्य[3] ᵛरातयः अस्मासु दत्तानि दानानि ᵛभद्राः अतिस्थिराणि सन्तु ॥

**तत्तु प्रयः प्रत्नथा ते शुशुक्वनं यस्मिन्यज्ञे वारमकृण्वत क्षयमृतस्य वारसि क्षयम् ।**
**वि तद्वोचेरध द्वितान्तः पश्यन्ति रश्मिभिः ।**
**स घा विदे अन्विन्द्रो गवेषणो बन्धुक्षिद्भ्यो गवेषणः ॥ ३ ॥**

तत् । तु । प्रयः । प्रत्नऽथा । ते । शुशुक्वनम् । यस्मिन् । यज्ञे । वारम् । अकृण्वत । क्षयम् । ऋतस्य । वाः । असि । क्षयम् ॥ वि । तत् । वोचेः । अध । द्विता । अन्तरिति । पश्यन्ति । रश्मिऽभिः । सः । घ । विदे । अनु । इन्द्रः । गोऽएषणः । बन्धुक्षित्ऽभ्यः । गोऽएषणः ॥ ३ ॥

हे इन्द्र ᵛतत्तु खलु प्रसिद्धं ᵛप्रयः हविर्लक्षणमन्नं ᵛशुशुक्वनम् आज्यादिसंयोगेन भृशं दीप्तम् ॥ शुचेर्दीप्तिकर्मणः एतद्रूपम् ॥ ᵛते तव स्वभूतं ᵛप्रत्नथा पूर्वम् इतःपूर्वं यथा यागकाले हविः ते तव स्वं भवति तथा अद्यतनमपि । सर्वदा[4] त्वामेव यजन्ते[5] इति भावः । 'प्रश्नपूर्वविश्व०' इत्यादिना इवार्थे थालू । लित्स्वरः ॥ कीदृशं तदिति उच्यते । ᵛयज्ञे यागे ᵛयस्मिन्[6] हविषि दातव्ये सति ᵛवारं वरणीयं ᵛक्षयं स्थानं वेदिलक्षणम् ᵛअकृण्वत कुर्वन्ति ऋत्विजः । कस्तव विशेष इति चेत् उच्यते । ᵛऋतस्य सत्यफलस्य यज्ञस्य ᵛवाः ᵛअसि ᵛक्षयं निवासस्थानं संभक्तोऽसि । यद्वा । ऋतमित्युदकनाम । तस्य क्षयं

---

१. क्ष-ञ-ट–मम । २. क्ष-ञ-ट–हंसि । ३. क्ष-ङ-ञ-ट–स्तुत्यर्हस्य । ४. क्ष-ञ-ट–सर्वथा । ५. क्ष-ञ-ट–यजते । ६. क्ष-ञ-ट–अस्मिन् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्थानं प्राप्तोऽसि । वृष्टिप्रदोऽसीत्यर्थः । अथवा । ऋतस्यादित्यस्य क्षयं स्थानं द्युलोकाख्यं वाः असि यजमानं गमयितासि । [V]तत् तादृशं वक्ष्यमाणं[1] कर्म [V]वि [V]वोचेः विब्रूहि । [V]अध अतः कारणात् [V]द्वितान्तः द्वित्वोपेतयोः द्यावापृथिव्योर्मध्ये अन्तरिक्षे[2] [V]रश्मिभिः आदित्यकिरणैः [V]पश्यन्ति । मेघं निर्भिद्य रश्मिद्वारा प्रवर्षणरूपं कर्म सर्वे जनाः प्रत्यक्षतः पश्यन्ति । अस्मद्दत्तं हविः आदित्यं प्रापयित्वा तद्रश्मिद्वारा वृष्टिं जनयसीत्येतत् सर्वैर्दृश्यते इत्यर्थः । इदानीं परोक्षतया स्तौति । [V]सः [V]घ स खलु [V]इन्द्रः [V]गवेषणः उदकस्यान्वेषणशीलः । तथा [V]बन्धुक्षिद्भ्यः हविष्प्रदानादिना बन्धुभावं प्राप्तवद्भ्यः[3] यजमानेभ्यः [V]गवेषणः गवां प्रसिद्धानाम् एषणकर्ता ॥ इषेर्बाहुलकात् कर्तरि ल्युट् । यद्वा । 'गवेष मार्गणे' । पूर्ववत् ल्युट् ॥ यजमानफलस्य मृगयितेत्यर्थः । [V]अनु उक्तक्रमेणैव कर्ता सन् [V]विदे विन्दते उदकप्राप्तिप्रकारं जानाति ॥

**नू इत्था ते पूर्वथा च प्रवाच्यं यदङ्गिरोभ्योऽवृणोरप व्रजमिन्द्र शिक्षन्नप व्रजम्।**
**एभ्यः समान्या दिशास्मभ्यं जेषि योत्सि च ।**
**सुन्वद्भ्यो रन्धया कं चिदव्रतं हृणायन्तं चिदव्रतम् ॥ ४ ॥**

नु । इत्था । ते । पूर्वऽथा । च । प्रऽवाच्यम् । यत् । अङ्गिरःऽभ्यः । अवृणोः । अप । व्रजम् । इन्द्र । शिक्षन् । अप । व्रजम् ॥ आ । एभ्यः । समान्या । दिशा । अस्मभ्यम् । जेषि । योत्सि । च । सुन्वत्ऽभ्यः । रन्धय । कम् । चित् । अव्रतम् । हृणायन्तम् । चित् । अव्रतम् ॥ ४ ॥

हे [V]इन्द्र [V]ते तव संबन्धि कर्म [V]इत्था इत्थमुक्तप्रकारं वक्ष्यमाणरूपं वा [V]पूर्वथा पूर्वमिव पूर्वं यथा [V]नु क्षिप्रं [V]प्रवाच्यं सर्वैः स्तोतव्यं तद्वत् इदानींतनमपि स्तुत्यम् ॥ नू इत्था इत्यत्र ईषाअक्षादित्वात् प्रकृतिभावः ॥ कीदृशं तदिति तदुच्यते[4] । [V]यत् त्वम् [V]अङ्गिरोभ्यः एतद्गोत्रोत्पन्नेभ्यो महर्षिभ्यः तेषामर्थाय [V]व्रजम् अन्तरिक्षे गच्छन्तं मेघम् [V]अप [V]अवृणोः अपवृतवानसि मेघम् उत्पाट्य[5] वृष्टिमुत्पादितवानसि । व्रज इति मेघनाम, 'व्रजः वराहः' ( नि. १. १०. ११) इति तन्नामसु पाठात् । किंच हे इन्द्र [V]व्रजं गवां समूहम् [V]अप अयष्टृभ्योऽपहृत्य तेभ्य एवाङ्गिरोभ्यः [V]शिक्षन् वितरन् रक्षितवानसि । यद्वा । पणिभिरपहृतं बिले स्थितं गवां व्रजम् अपहर्तुमपावृणोः अपवृतद्वारमकारोः[6] । किंच हे इन्द्र [V]एभ्यः उक्तेभ्यः ऋषिभ्यः [V]समान्या [V]दिशा समानया रीत्या तेभ्यो यथा ददासि तद्वत् [V]अस्मभ्यम् अपि [V]जेषि धनं संग्रामं वा जय । तदर्थं [V]योत्सि युध्यस्व [V]च ॥ छान्दसो विकरणस्य लुक् । व्यत्ययेन परस्मैपदम् ॥ किंच त्वं [V]सुन्वद्भ्यः स्वदर्थमभिषवं कुर्वद्भ्यः अस्मभ्यं[7] [V]कं [V]चिदव्रतं सर्वमप्ययज्वानं यागविरोधिनं [V]रन्धय बाधय मदधीनं कुर्वित्यर्थः । न केवलमयज्वानं किंतु [V]हृणायन्तं [V]चिदव्रतम् ॥ चिदित्यवकुत्सिते ॥ अस्मासु रोषं कुर्वन्तं तमेव अयष्टारं स्वयं रोषवन्तं वा । यद्वा । हृणायन्तं चित् रोषं[8] कुर्वन्तम् [9]अपि अव्रतम् अकर्माणं पुनर्हननासमर्थं कुर्वन्[9] रन्धय ॥ 'हृणीङ् रोषे' । कण्ड्वादिः । व्यत्ययेन आकारः ॥

---

१. क्ष-ञ-ट–उक्तं वक्ष्यमाणम् । २. क्ष-ञ-ट–अन्तः अन्तरिक्षे । ३. क्ष-ञ ट–प्राप्तेभ्यः । ४. क्ष-ङ-ञ-ट– उच्यते । ५. झ–उत्पाद्य । ६. क-श्च-ख-च-ज्ञ-ञ-ट-ण-त-फ-व–अपवृतद्वाराण्यकरोः । ७. क्ष-ञ-ट–मह्यम् । ८. ख-च-ज-झ-ण-फ-व–रोषवन्तम् । ९. क्ष-ञ-ट–कुर्वन्तम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सं यज्जनान् क्रतुभिः शूर ईक्षयद्धने हिते तरुषन्त श्रवस्यवः प्र यक्षन्त श्रवस्यवः।
तस्मा आयुः प्रजावदिद्राधे अर्चन्त्योजसा ।
इन्द्रे ओक्यं दिधिषन्त धीतयो देवाँ अच्छा न धीतयः ॥ ५ ॥

सम्। यत्। जनान्। क्रतुऽभिः। शूरः। ईक्षयत्। धने। हिते। तरुषन्त। श्रवस्यवः। प्र। यक्षन्त। श्रवस्यवः॥ तस्मै। आयुः। प्रजाऽवत्। इत्। राधे। अर्चन्ति। ओजसा। इन्द्रे। ओक्यम्। दिधिषन्त। धीतयः। देवान्। अच्छ। न। धीतयः॥ ५ ॥

[v]यत् यः इन्द्रः [v]शूरः विक्रान्तः सन् [v]जनान् सर्वान् प्राणिनः [v]क्रतुभिः प्रज्ञाभिः [v]सम् [v]ईक्षयत् सम्यगीक्षयति तत्तद्विषयान्। अन्तर्यामिरूपेण सर्वेषां बुद्धिषु स्थित्वा तैर्विषयानुल्लेखयतीत्यर्थः। यद्वा। क्रतुभिः कर्मभिः सुकृतदुष्कृतरूपैर्निमित्तभूतैस्तत्तत्फलैर्योजयति। एवं प्रेरयति सति [v]श्रवस्यवः अन्नमिच्छन्तो यजमानाः [v]धने गवादिरूपे [v]हिते अभिमते सति। यद्वा। हिते धने अभिप्रेते सति। [v]तरुषन्त हिंसन्ति शत्रून्॥ तरुष्यतिर्वधकर्मा। छान्दसे लुङि व्यत्ययेन च्लेः अङ्। तरतेर्वा लङि उकारसिप्शपः त्रयो विकरणाः॥ तरन्तीत्यर्थः। अतः कारणात् [v]श्रवस्यवः अन्नं हविर्लक्षणम् इन्द्राय आत्मने वा इच्छन्तः सन्तः [v]प्र [v]यक्षन्त प्रकर्षेण यजन्ते॥ छान्दसे लुङि व्यत्ययेन क्सः॥ किंच [v]तस्मै [v]इत् तस्मै प्रसिद्धायेन्द्रायैव [v]आयुः हविर्लक्षणमन्नं [v]प्रजावत् पुत्रादिसहितं भवति। तैः सहितैर्दीयते इत्यर्थः। किंच यजमानाः [v]ओजसा स्वकीयेन बलेन युक्ताः [v]बाधे शत्रूणां बाधने निमित्तभूते सति बाधितुं वा॥ 'कृत्यार्थे तवैकेन्केन्यत्वनः' इति केन्प्रत्ययः॥ [v]अर्चन्ति[1] पूजयन्ति। यद्वा। तस्मै इत् यजमानायैव बाधे बले निमित्तभूते सति। बाध इति बलनाम, 'बाधः तविषी' (नि. २. ९. ८) इति तन्नामसु पाठात्। प्रजावत् पुत्राद्युपेतम् आयुः अन्नं लब्धुम् ओजसा बलेन युक्ताः अर्चन्ति इन्द्रं पूजयन्ति ऋत्विजः इति शेषः। किंच [v]धीतयः कर्मवन्तो यजमानाः [v]इन्द्रे इन्द्रसमीपे। 'गङ्गायां घोषः' इतिवत् तत्सामीप्यं लक्ष्यते। इन्द्रलोके इत्यर्थः। तत्र [v]ओक्यम् ओको निवासस्थानम्॥ स्वार्थे यत्॥ [v]दिधिषन्त धारयन्ति[2]॥ 'धिष शब्दे'। अत्र धारणार्थः। जौहोत्यादिकः। व्यत्ययेन अन्तादेशः॥ ते एव पुनर्विशेष्यन्ते। [v]धीतयः स्वर्गसाधनकर्मवन्तः[3] सन्तः [v]देवाँ [v]अच्छा [v]न देवान् आभिमुख्येन प्राप्तुमिव ओक्यं दिधिषन्तेत्यन्वयः॥

अविवाक्येऽहनि मानसग्रहभक्षणानन्तरं नक्षत्रेषु दृश्यमानेषु अध्वर्युप्रमुखाः सर्वे 'युवं तम्' इत्येतां जपेयुः। 'गार्हपत्ये जुह्वति' इति खण्डे सूत्रितं–'युवं तमिन्द्रापर्वता पुरोयुधेति जपन्तः' (आश्व. श्रौ. ८.१३) इति॥

---

१. ज्ञ-ञ–पापम् अर्चन्ति। २. ङ–धारयन्ति कल्पयन्ति। ३. ङ–सर्गसाधनकर्मवन्तः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

युवं तमिन्द्रापर्वता पुरोयुधा यो नः पृतन्यादप तंतमिद्धतं वज्रेण तंतमिद्धतम् ।
दूरे चत्तायं च्छंत्सद्गहनं यदिनक्षत् ।
अस्माकं शत्रून्परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः ॥ ६ ॥

युवम् । तम् । इन्द्रापर्वता । पुरःऽयुधा । यः । नः । पृतन्यात् । अप ।
तम्ऽतम् । इत् । हतम् । वज्रेण । तम्ऽतम् । इत् । हतम् ।
दूरे । चत्तायं । छंत्सत् । गहनम् । यत् । इनक्षत् ।
अस्माकम् । शत्रून् । परि । शूर । विश्वतः । दर्मा । दर्षीष्ट । विश्वतः ॥ ६ ॥

हे [V]इन्द्रापर्वता[1] । इन्द्रः प्रसिद्धः । पर्वतः पर्ववान्मेघः । तदभिमानी देवः । तौ[2] [V]युवं युवां[2] [V]पुरोयुधा संग्रामे पुरतो योद्धारौ [V]नः अस्माकं [V]यः शत्रुः [V]पृतन्यात् अस्मान् हन्तुं पृतनामात्मन इच्छति [V]तंतमित् सर्वमपि शत्रुम् [V]अप [V]हतं नाशयतम् ॥ हन्तेर्लोटि ' अनुदात्तोपदेश° ' इत्यनुनासिकलोपः ॥ केन साधनेनेति तदुच्यते । [V]तंतमित् सर्वमपि शत्रुं हन्तुं [V]वज्रेण साधनेन प्राप्नुतम् । ईदृक् सामर्थ्यमस्तीति दर्शयति । [V]यत् यो वज्रः ॥ लिङ्व्यत्ययः ॥ [V]दूरे [V]चत्ताय अत्यन्तदूरदेशे गताय ॥ चातयतेर्वा[3] नाशकर्मणः[3] ॥ नष्टाय अदर्शनमापन्नायेत्यर्थः ॥ ' ग्रसितस्कभित° ' इत्यादौ निपातनात् इडभावः ॥ तादृशं शत्रुं [V]छंत्सत् छन्दयति कामयते हन्तुम् ॥ छन्दतेः कान्तिकर्मणः इदं रूपम् ॥ किंच [V]गहनं दुरवगाहं स्थानम् अतिकठिनं हृदयं शत्रुसमीपं वा [V]इनक्षत् व्याप्नोति ॥ ' नक्ष गतौ ' । छान्दसः इकारोपजनः । इनक्षतिर्वा प्रकृत्यन्तरम् ॥ इदानीम् इन्द्र एव स्तूयते । हे [V]शूर शौर्योपेतेन्द्र [V]अस्माकं विरोधिनः [V]शत्रून् [V]विश्वतः विश्वान् ॥ सार्वविभक्तिकस्तसिल् ॥ [V]परि परितः [V]विश्वतः विश्वैः उपायैः [V]दर्षीष्ट दारयसि । किंच [V]दर्मा शत्रूणां दारकः ॥ दारयतेः ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन् । णिलोपे उदात्तनिवृत्तिस्वरेण मनिन उदात्तत्वम् । ह्रस्वश्छान्दसः । यद्वा । ' दृ भये ' । घटादित्वात् ' मितां ह्रस्वः ' इति ह्रस्वत्वम् ॥ तव पूर्वोक्तो वज्रः विश्वतः सर्वान् शत्रून् सर्वैरुपायैर्वा दर्षीष्ट दारयति । यद्वा । दर्मा शत्रूणां दारकः इन्द्रः दर्षीष्ट कार्स्न्येन दारयति शत्रून् ॥ ॥ २१ ॥

' उभे पुनामि ' इति सप्तर्चं सप्तमं सूक्तं पारुच्छेपमैन्द्रम् । आद्या त्रिष्टुप् । ' अभिवृग्या ' इत्याद्यास्तिस्रोऽनुष्टुभः । ' पिशङ्गभृष्टिम् ' इत्येषा गायत्री । ' अवर्महः ' इत्येषा धृतिः । ' वनोति[4] हि ' इत्यनभिधानादत्यष्टिः[4] । अत्रानुक्रमणिका—'उभे सप्तादौ त्रिष्टुप् तिस्रोऽनुष्टुभो गायत्री धृतिः' इति ॥ अस्य सूक्तस्य विनियोगमाह शौनकः । ' उभे[5] पुनामीति पुरा रिपुघ्न्यस्तु प्रकीर्तिताः[5] । ता जपन् प्रयतो नित्यमिष्टान् कामान्समश्नुते । ता जपन् हन्ति रक्षांसि सपत्नांश्च नियच्छति[6] ' (ऋग्वि० १.२५) ॥

---

१. च-फ—इन्द्रापर्वता इन्द्रापर्वतौ । २. झ—तं युवं तौ युवाम् । ३. क्ष-ञ-ट—चातयतेर्विनाशकर्मणः । ४. क्ष-ञ-ट—अन्त्या विशेषानभिधानादत्यष्टिः । ५. क्ष-ञ-ट— उभे पुनामीति सूक्ते सप्तर्चस्तु प्रकीर्तिताः । ६. ज्ञ-ञ—निकृन्तति ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उभे पुनामि रोदसी ऋतेन द्रुहो दहामि सं महीरनिन्द्राः ।
अभिव्लग्य यत्र हता अमित्रा वैलस्थानं परि तृळ्हा अशेरन् ॥ १ ॥

उभे इति । पुनामि । रोदसी इति । ऋतेन । द्रुहः । दहामि । सम् । महीः । अनिन्द्राः ।
अभिऽव्लग्य । यत्र । हताः । अमित्राः । वैलऽस्थानम् । परि । तृळ्हाः । अशेरन् ॥ १ ॥

हे इन्द्र vऋतेन त्वदुद्देश्येन यज्ञेन बलेन[1] vउभे vरोदसी द्यावापृथिव्यौ vपुनामि लोकद्वयं हिंसकानां तव अयङ्गां वा अयगमनेन पावयामि । किंच भूलोके vअनिन्द्राः इन्द्रविरहितानाम् आश्रयभूताः vमहीः उर्वीः[2] अत एव vद्रुहः द्रोहिणामाधारभूतत्वात् स्वयमपि द्रोग्ध्रीः vसं vदहामि संभूय एकहेलया दहामि । पुनस्ता एव विशेष्यन्ते । vयत्र यासु भूमिषु vअमित्राः शत्रवः vअभिव्लग्य अभितो गत्वा vहताः सर्वतः प्राप्ताः[3] अस्माभिर्घातिता वा ॥ व्लगतिर्गतिकर्मा छान्दसो धातुः ॥ ते सर्वे vपरि[4] vतृळ्हाः हिंसिताः ॥ तृहू हिंसार्थः । ऊदित्त्वात् ' यस्य विभाषा ' इति इट्प्रतिषेधः ॥ हिंसिताः[5] सन्तः vअशेरन् शयनं प्राप्ताः ॥ शेतेर्व्यत्ययेन परस्मैपदम् । ' शीङो रुट् ' ( पा. सू. ७. १. ६ ) । शीङः सार्वधातुके गुणः ॥ vवैलस्थानम् । बिलशब्दो गर्तसमानार्थः । स च गर्तः श्मशानवचनः । अतः अयमपि श्मशानवाची । अथवा बिलसंबन्धिस्थानं नागलोकः । तत्र वा अशेरन् ॥ यद्वा । ' विल क्षेपे ' इति धातुः । घञर्थे कः । स्वार्थिकः अण् । तत्र शवाः क्षिप्यन्ते इति वैलस्थानं श्मशानम् ॥ तत्र त्वया हताः भूमिं श्मशानवत्कृत्वा सर्वत्र शेरते । तान् दहामीत्यर्थः[5] ॥

अभिव्लग्या चिदद्रिवः शीर्षा यातुमतीनाम् ।
छिन्धि वटूरिणा पदा महावटूरिणा पदा ॥ २ ॥

अभिऽव्लग्य । चित् । अद्रिऽवः । शीर्षा । यातुऽमतीनाम् ।
छिन्धि । वटूरिणा । पदा । महाऽवटूरिणा । पदा ॥ २ ॥

vअद्रिवः[6] वैरिणां भक्षक । यद्वा अद्रेः मेघस्य आदर्तः इन्द्र त्वं vयातुमतीनां हिंसावतीनां सेनानाम् । यद्वा । यातनसाधनानि[7] आयुधानि यातूनि[8] तद्वतीनाम् । अथवा । यातवो रक्षांसि तद्वतीनां सेनानाम् ॥ कर्मणि षष्ठी ॥ शत्रूणां[9] सेनाः । vशीर्षा शीर्षाणि vअभिव्लग्या vचित् अभितः प्राप्यैव vच्छिन्धि चूर्णय[9] ।

---

१. ङ–बलेन वा । २. क-ख-ज-ञ-झ-ण-व–सर्वा । ३. क्ष-ङ-ञ-ट–' प्राप्ताः ' नास्ति । ४. क्ष-ञ-झ-ञ-ट–' परि ' नास्ति । ५. क्ष-ञ-ट–हिंसन्तः वैलस्थानं स्मशानं परि परितः अशेरन् । यद्वा । ' विल क्षेपे ' इति धातुः । घञर्थे कः । स्वार्थिकः अण् । तत्र शवाः क्षिप्यन्ते इति वैलस्थानं स्मशानम् । शेरतेर्व्यत्ययेन परस्मैपदम् । शीङो रुट् । शीङः सार्वधातुके गुणः । विलशब्दो गर्तसमानार्थः । स च गर्तः श्मशानवचनः । अतः अयमपि श्मशानवाची । अथवा बिलसंबन्धि स्थानं नरकः । तत्र वा अशेरन् इति । तत्र त्वया हता भूमिं... तान् दहामीत्यर्थः ६. क्ष-ङ-झ-ञ-ट–हे अद्रिवः । ७. क्ष-च-ञ-ट-त–यातनासाधनानि । ८. क्ष-ङ-ञ-ट–बहूनि । ९. झ–शत्रूणां सेनाः अभिव्लग्या चित् अभितः प्राप्तव्या छिन्धि चूर्णय ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यद्वा । तासां संबन्धीनि रथादीनि च्छिन्धि । केन साधनेनेति तदुच्यते । vवटूरिणा vपदा वेष्टनशीलेन सर्वव्याप्तेन त्वदीयपादेन अतिविस्तृतेनेत्यर्थः । यद्वा । वटूरिणा पदा वेष्टनशीलेन हस्तिनः[1] संबन्धिना पादेन ऐरावतपादेनेत्यर्थः[1] । न केवलेन येन केन पादेनेत्याह । vमहावटूरिणा vपदा महावेष्टनवता स्वीयेन ऐरावतसंबन्धिना वा पादेन च्छिन्धि चूर्णय ॥ ' वट वेष्टने ' । ' खर्जिपिञ्ज्यादिभ्य ऊरोलचौ ' ( उ. सू. ४. ५३० ) इति ऊरप्रत्ययः । ' अत इनिठनौ ' इति इनिः ॥

अवासां मघवञ्जहि शर्धो यातुमतीनाम् ।
वैलस्थानके अर्मके महावैलस्थे अर्मके ॥ ३ ॥

अव । आसाम् । मघऽवन् । जहि । शर्धः । यातुऽमतीनाम् ।
वैलऽस्थानके । अर्मके । महाऽवैलस्थे । अर्मके ॥ ३ ॥

हे इन्द्र vमघवन् धनवन् vआसां vयातुमतीनाम् । यातनसाधनानि[2] आयुधानि यातूनि तद्वतीनां यातुधानवतां वा सेनानां vशर्धः बलम् vअव vजहि चूर्णय । तथा कृत्वा च vअर्मके कुत्सिते शवैः अरणीये vवैलस्थानके कुत्सिते पूर्वोक्तलक्षणे श्मशाने क्षपय इति शेषः । यद्वा । वैलस्थानके बिलसंबन्धिनि कुत्सिते स्थाने अन्धकारावृते अधोलोके स्थापयेति शेषः । ननु यत्र क्वचित् क्षुद्रे न इत्याह । vमहावैलस्थे सर्वैर्गन्तव्ये महाश्मशाने नागलोके वा । पुनः कीदृशे । vअर्मके कुत्सिते गतासुभिः अरणीये ॥

यासां तिस्रः पञ्चाशतोऽभिवृङ्गैरपावपः ।
तत्सु ते मनायति तकत्सु ते मनायति ॥ ४ ॥

यासाम् । तिस्रः । पञ्चाशतः । अभिऽवृङ्गैः । अपऽअवपः ।
तत् । सु । ते । मनायति । तकत् । सु । ते । मनायति ॥ ४ ॥

हे इन्द्र vयासां पूर्वमन्त्रोक्तलक्षणानां सेनानां vतिस्रः vपञ्चाशतः त्रिगुणितपञ्चाशत्संख्यां सार्धशतम्[3] vअभिवृङ्गैः अभिगमनैः ॥ वृङ्गतिर्गतिकर्मेत्युक्तम् ॥ अभिगम्य vअपावपः नाशितवानसि । हे इन्द्र vतत् तादृशं सेनावधादिरूपं[4] कर्म vसु[5] vमनायति सुष्ठु संभावयतीत्यर्थः[5] । किंच हे इन्द्र vते तव अध्यर्धशतशत्रुसेनाजयरूपं महदपि vतकत् इति vसु vमनायति अस्त्यल्पमिदमिति सुष्ठु मन्यते ॥

पिशङ्गभृष्टिमम्भृणं पिशाचिमिन्द्र सं मृण । सर्वं रक्षो नि बर्हय ॥ ५ ॥

पिशङ्गऽभृष्टिम् । अम्भृणम् । पिशाचिम् । इन्द्र । सम् । मृण ।
सर्वम् । रक्षः । नि । बर्हय ॥ ५ ॥

---

१. क्ष-ञ-ट-हस्तिनः संबन्धि ( ना ) पादेनेत्यर्थः । २. क्ष-ञ-ट-यातनासाधनानि । ३. क्ष-ङ-ञ-ट-अध्यर्धशतम् । ४. क्ष-ङ-ञ-ट-शत्रुसेनावधादिरूपम् । ५. क्ष-ञ-ट-मनायति । परुच्छेपः सर्वो लोको वा मनायति सुष्ठु संभावयति स्तौतीत्यर्थः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]इन्द्र [v]पिशङ्गभृष्टिम् ईषद्रक्तवर्णम् [v]अम्भृणम् अतिभयंकरं शब्दायमानम् ॥ ' भ्रण शब्दे '। यङ्लुगन्तात् पचाद्यचि छान्दसो भलोपश्च[1] ॥ यद्वा। महान्तम् अतिप्रवृद्धमित्यर्थः। अम्भृण इति महन्नाम, ' अम्भृणः माहिनः' ( नि. ३. ३. १६ ) इति तत्र पाठात्। उक्तविधिं[2] [v]पिशाचिं पिशाचविशेषं जरामित्येके। [v]सं [v]मृण सम्यग्हिंसय। न केवलं तमेकं किंतु [v]सर्वं [v]रक्षः रक्षणनिमित्तभूतं राक्षसादिकं [v]नि [v]बर्हय निपूदय ॥ ' बृह[3] हिंसायाम् '। चौरादिकः ॥ नामय[3]। वधकर्मैतत्। ' नितोशयति[4] निबर्हयति ' ( नि. २. १९. ३० ) इति तत्रोक्तत्वात् ॥

दशरात्रस्य षष्ठेऽहनि प्रउगशस्त्रे ऐन्द्रतृचस्य ' अवर्महे इन्द्र ' इत्यादिके प्रथमाद्वितीये। ' षष्ठस्य ' इति खण्डे सूत्रितम्–' अवर्महे इन्द्र वृषन्निन्द्र ' ( आश्व. श्रौ. ८. १ ) इति ॥

**अवर्महे इन्द्र दादृहि श्रुधी नः शुशोच हि द्यौः क्षा न भीषाँ अद्रिवो घृणान्न भीषाँ अद्रिवः ॥ शुष्मिन्तमो हि शुष्मिभिर्वधैरुग्रेभिरीयसे । अपूरुषघ्नो अप्रतीत शूर सत्वभिस्त्रिसप्तैः शूर सत्वभिः ॥ ६ ॥**

अवः । महः । इन्द्र । ददृहि । श्रुधि । नः । शुशोच । हि ।
द्यौः । क्षाः । न । भीषा । अद्रिऽवः । घृणात् । न । भीषा । अद्रिऽवः ।
शुष्मिन्ऽतमः । हि । शुष्मिऽभिः । वधैः । उग्रेभिः । ईयसे ।
अपुरुषऽघ्नः । अप्रतिऽइत । शूर । सत्वऽभिः । त्रिऽसप्तैः । शूर । सत्वऽभिः ॥ ६ ॥

हे [v]इन्द्र [v]महः महतो मेघस्य ॥ कर्मणि षष्ठी ॥ महान्तं जलधारिणं मेघं महान्तं वृत्रं वा [v]अवः अवस्तात् अवाङ्मुखम्॥ ' पूर्वाधरा° ' इत्यादिना असिप्रत्ययोऽवादेशश्च। ' अन्नरूधरवरित्युभयथा छन्दसि ' ( पा. सू. ८. २. ७० ) इति रेफः ॥ [v]ददृहि विदारय। किंच [v]नः अस्मद्वाक्यं [v]श्रुधि शृणु। हे [v]अद्रिवः। अद्रिर्मेघः। तद्वन्निन्द्र [v]हि यस्मात् कारणात् [v]द्यौः द्युलोको देवानामाश्रयभूतः [v]शुशोच शोचति। वृष्ट्यभावेन हविराद्यभावादिति भावः। तत्र[4] दृष्टान्तः[4]। [v]क्षाः [v]न ॥ क्षेति भूनाम। क्षायन्ति निवसन्त्यस्यामिति क्षाः। ' क्षै जै षै क्षये '। अधिकरणे क्विप् ॥ क्षाः न सर्वनिवासाश्रयभूमिरिव। सा यथा [v]भीषा वृष्ट्यभावात् सस्यादिशोषभीत्या शोचति तद्वत्। लोकद्वयमपि वृष्ट्यभावेन शोचतीत्यर्थः। असुरपक्षं[5] लोकद्वयमावृत्य प्रवर्धमानं धर्तुम् असहमाने द्यावापृथिव्यौ शोचतः इत्यर्थः। तस्माच्छ्रुधीति पूर्वत्रान्वयः[6]। भीतौ दृष्टान्तः। हे [v]अद्रिवः शत्रूणां भक्षक। यद्वा। अद्रिर्वज्रः तेन तद्वन्। हे इन्द्र [v]घृणात् [v]भीषा [v]न दीप्तात् अग्नेर्मूर्ध्वन्तरात् त्वष्टुर्भीत्येव। त्वष्टुर्भीत्या पूर्वं यथा द्यावापृथिव्यौ शोचतः तद्वत्। अत्रेतिहासमाहुः। पूर्वं जगति महान्धकारेण[7] आवृते सति देवा विचिन्त्य अग्निं प्रार्थितवन्तः। स च त्वष्टृरूपेण द्यावापृथिवीभ्यां सकाशात् तमो व्युदस्यन् उदपद्यत। तं दृष्ट्वा द्यावा-

---

१. क्ष-ञ-ट–वलोपश्च (?); ङ–वर्णलोपश्च। २. ङ–उक्तविधम्। ३. ङ–बर्ह हिंसायाम्। चौरादिकः। नाशय; क्ष-ञ-ट–बर्ह...नामय। ४. ङ–निनाशयति। ५. क्ष-ङ-ज्ञ-ञ-ट–किंच। ६. क-क्ष-ख-ङ-च-ज-ज्ञ-झ-ञ-ट-त-व–असुरपक्षे। ७. क्ष-ङ-ञ-ट–पूर्वेणान्वयः। ८. क्ष-ञ-ट–महतान्धकारेण।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पृथिव्यौ बिभ्यतुरिति॥ स च ' उभे त्वष्टुर्बिभ्यतुः ' (ऋ. सं. १. ९५. ५) इत्यादिश्रुतितोऽवगन्तव्यः। यद्वा। घृणः केवलोऽग्निः। तस्माद्यथा बिभीतस्तद्वत्। सा च भीतिः ' अरेजेतां रोदसी ' ( ऋ. सं. १. ३१. ३ ) इत्यादिश्रुतितोऽवगन्तव्या। तादृशभीतिं वृष्टिप्रदानेन परिहरेत्यर्थः। हे इन्द्र त्वं [v]शुष्मिभिः बलैः [v]शुष्मिन्तमो [v]हि अतिशयेन बलवान् खलु। अतः कारणात् [v]उग्रेभिः उद्गूर्णैरतिक्रूरैः [v]वधैः तदुपायैः[1] सहितः त्वम् [v]ईयसे शत्रून् मेघान् वा गच्छसि॥ ' ईङ् गतौ '। दैवादिकत्वात् श्यन्॥ यद्वा। शुष्मिभिर्वधैरिति संबन्धः। हे [v]शूर विक्रान्त [v]सत्वभिः [v]अप्रतीत अवसन्नैः रक्षःप्रभृतिभिः अप्रतिगत युद्धे शत्रुभिः अनाक्रान्त[2]। यद्वा। सत्वभिः प्राणिभिः असंस्कृतमनस्कैः अनधिगत[3]। [v]अपुरुषघ्नः पौरुषोपेतानां यजनसमर्थानाम् अहनन[4]ः त्वम्। [v]त्रिसप्तैः [v]सत्वभिः[5] त्रिभिः सप्तभिर्वा सत्वभिः अनुचरैरुपेतः सन् ईयसे इत्यन्वयः॥

प्रातःसवने ब्राह्मणाच्छंसिनः प्रस्थितयाज्यायाः पुरस्तात् ' वनोति हि ' इत्येषा प्रक्षेपणीया। तत्रैव खण्डे सूत्रितं—' वनोति हि सुन्वन्क्षयं परीणसो मो षु वो अस्मदभि तानि पौंस्या ' ( आश्व. श्रौ. ८. १ ) इति॥

वनोति हि सुन्वन्क्षयं परीणसः सुन्वानो हि ष्मा यजत्यव द्विषो
देवानामव द्विषः॥ सुन्वान इत्सिषासति सहस्रा वाज्यवृतः।
सुन्वानायेन्द्रो ददात्याभुवं रयिं ददात्याभुवम्॥ ७॥

वनोति। हि। सुन्वन्। क्षयम्। परीणसः। सुन्वानः। हि। स्म। यजति। अव। द्विषः। देवानाम्। अव। द्विषः॥ सुन्वानः। इत्। सिसासति। सहस्रा। वाजी। अवृतः। सुन्वानाय। इन्द्रः। ददाति। आऽभुवम्। रयिम्। ददाति। आऽभुवम्॥ ७॥

हे इन्द्र [v]सुन्वन् त्वामुद्दिश्य अभिषवं कुर्वन् यजमानः [v]क्षयं सर्वैर्वस्तव्यं गन्तव्यं वा गृहं [v]वनोति [v]हि त्वत्प्रसादात् संभजते। हिः प्रसिद्ध्यर्थः। किंच [v]सुन्वानो हि सोमयागं कुर्वाणः एव [v]परीणसः परितो नद्धान् संबद्धान् [v]द्विषः द्वेष्टॄन् [v]अव [v]यजति नाशयति। न केवलं यागद्वेषिणः [v]देवानां [v]द्विषः अपि [v]अव यजति। किंच [v]सुन्वान [v]इत् अभिषवोपलक्षितं यागं कुर्वाणो हे इन्द्र त्वत्प्रसादात् [v]वाजी वाजवान् अन्नवान् [v]अवृतः परैरनाक्रान्तः सन् [v]सहस्रा सहस्राण्यपरिमितानि गवादिधनानि [v]सिषासति साधयितुं संभक्तुं वा इच्छति॥ सनेः सनि ' सनीवन्तर्ध° ' इति विकल्पनात् इडभावे ' जनसनखन° ' इति आत्वम्॥ केनेदं लभ्यते इति तत्राह। [v]सुन्वानाय इन्द्रमुद्दिश्य सोमयागं कुर्वाणाय यजमानाय वा अयम् [v]इन्द्रः [v]आभुवं समन्ताद्भवनशीलं तथा [v]आभुवं पुनर्भवनशीलम्[7] अतिसमृद्धं [v]रयिं गवादिरूपं धनं [v]ददाति प्रयच्छति। तस्मात् सुन्वानः सिषासतीत्यर्थः॥ ॥ २२ ॥ ॥ १९ ॥

---

१ ङ–तदुपायैश्च। २. ङ–अनायात। ३. क्ष-ङ-ञ-ट–अनभिमत ४. ञ–अहन्ता। ५. क्ष-ञ-ञ-ट–' सत्वभिः ' नास्ति। ६. क्ष-ञ-ट–एव। ७. ङ–पुनःपुनर्भवनशीलम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

विंशेऽनुवाके षट् सूक्तानि । तत्र ' आ त्वा जुवः ' इति षड्ऋचं प्रथमं सूक्तं पारुच्छेपमार्ग्यष्टम् । ' त्वं नो वायो ' इत्यन्त्या अष्टिः चतुःषष्टयक्षरा । ' वायव्यं तु ' इत्युच्यमानत्वात् इदमुत्तरं च वायुदेवत्यम् । अत्रानुक्रमणिका—' आ त्वा षड्वायव्यं त्वन्त्याष्टिः ' इति । विनियोगो लैङ्गिकः ॥

आ त्वा जुवो ररहाणा अभि प्रयो वायो वहन्त्विह पूर्वपीतये
सोमस्य पूर्वपीतये ॥ ऊर्ध्वा ते अनु सूनृता मनस्तिष्ठतु जानती ।
नियुत्वता रथेना याहि दावने वायो मखस्य दावने ॥ १ ॥

आ । त्वा । जुवः । ररहाणाः । अभि । प्रयः । वायो इति । वहन्तु । इह । पूर्वऽपीतये ।
सोमस्य । पूर्वऽपीतये ॥ ऊर्ध्वा । ते । अनु । सूनृता । मनः । तिष्ठतु । जानती ।
नियुत्वता । रथेन । आ । याहि । दावने । वायो इति । मखस्य । दावने ॥ १ ॥

हे [v]वायो [v]त्वा त्वां [v]जुवः गमनशीलाः [v]ररहाणाः शीघ्रगामिनो बलवन्तो वा सामर्थ्यात् नियुत्संज्ञकाः अश्वाः ॥ ' रहि गतौ ' । लिटः कानच् । छान्दसोऽनुनासिकलोपः ॥ [v]इह अस्मिन् यज्ञे [v]प्रयः चरुपुरोडाशादि हविर्लक्षणमन्नं [v]वहन्तु प्रापयन्तु । किमर्थम् । [v]पूर्वपीतये[1] पूर्ववत्पानाय । पुनः किमर्थम् । [v]पूर्वपीतये इतरदेवेभ्यः पुरा पानाय ॥ मरुद्वृधादित्वात् पूर्वपदान्तोदात्तत्वम् ॥ किंच हे वायो [v]ते तव संबन्धि [v]मनः [v]अनु [v]सूनृता प्रियसत्यात्मिका स्तुतिरूपा अस्मदीया वाक् [v]तिष्ठतु आश्रित्य सर्वदा वर्ततां हर्षयित्वित्यर्थः । सूनृतेति वाङ्नाम, ' सूनृता ब्रह्म ' इति तन्नामसु उक्तत्वात् । [v]ऊर्ध्वा उन्नता तथा [v]जानती तव गुणान् विशेषेणावगच्छन्ती । सोमपानार्थं स्तुत्यर्थं च हे [v]वायो [v]मखस्य यज्ञस्य [v]दावने दातव्याय हविषे तत्स्वीकाराय । पुनः किमर्थम् । [v]दावने अस्मभ्यमभिमतदानाय ॥ उभयत्र ददातेः कर्मणि भावे च क्रमेण औणादिको वनिः । छान्दसः उपधालोपः ॥ [v]नियुत्वता [v]रथेन नियुद्भिर्युक्तेन रथेन [v]आ [v]याहि आगच्छ ॥

मन्दन्तु त्वा मन्दिनो वायविन्दवोऽस्मत्क्राणासः सुकृता अभिद्यवो
गोभिः क्राणा अभिद्यवः ॥ यद्ध क्राणा इरध्यै दक्षं सचन्त ऊतयः ।
सध्रीचीना नियुतो दावने धिय उप ब्रुतव ईं धियः ॥ २ ॥

मन्दन्तु । त्वा । मन्दिनः । वायो इति । इन्दवः । अस्मत् । क्राणासः । सुऽकृताः । अभिऽद्यवः ।
गोभिः । क्राणाः । अभिऽद्यवः ॥ यत् । ह । क्राणाः । इरध्यै । दक्षम् । सचन्ते । ऊतयः ।
सध्रीचीनाः । निऽयुतः । दावने । धियः । उप । ब्रुवते । ईम् । धियः ॥ २ ॥

---

१. ख-च-फ—सोमस्य पूर्वपीतये ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]वायो [v]त्वा त्वाम् [v]अस्मत् अस्माकं संबन्धिनः [v]इन्दवः क्लेदयितारः सोमाः [v]मन्दन्तु मादयन्तु ॥ व्यत्ययेन परस्मैपदम् ॥ कीदृशाः सोमाः । [v]मन्दिनः मादयितारः [v]क्राणासः कुर्वाणाः स्वकार्यं हर्षादिकं [v]सुकृताः अभिषवदशापवित्रशोधनग्रहणादिभिः सुष्ठु कृताः [v]अभिद्यवः अभितो द्योतयन्तः [v]गोभिः वाग्भिर्मन्त्ररूपाभिः [v]क्राणाः क्रियमाणा हूयमानाः । यद्वा । गोभिः गन्तृभिः आहवनीयं प्रति आनेतृभिः क्राणा हूयमानाः ॥ करोतेः शानच् । छान्दसः शपो लुक् ॥ तथा [v]अभिद्यवः अभिगन्तारः । हे वायो[1] [v]यत् यस्मात् कारणात् । हशब्दः प्रसिद्धौ । [v]दक्षम् अस्मद्यागदेशं प्रति गन्तुमुत्साहवन्तं समर्धयितारम् [v]ईं[2] त्वां [v]नियुतः एतत्संज्ञकास्तवाश्वाः [v]दावने दानाय हविःस्वीकारनिमित्तं [v]धियः कर्माणि उद्दिश्य [v]सचन्ते त्वां संगच्छन्ते यागदेशं वा । किमर्थम् । [v]इरध्यै प्रापयितुं परिचरितुं वा ॥ ' ईर गतौ ' । तुमर्थे कध्यैप्रत्ययः । ह्रस्वश्छान्दसः ॥ इरध्यतिः परिचरणकर्मा, ' इरध्यति विधेम ' ( नि. ३. ५. १ ) इति तन्नामसूक्तत्वात् । कीदृशास्ताः[3] । [v]क्राणाः स्वव्यापारं रथवाहनादिकं कुर्वाणाः । ' क्राणाः कुर्वाणाः ' ( निरु. ४. १९ ) इति यास्कः । [v]ऊतयः रक्षणवत्यः[4] प्रीतियुक्ता वा तथा [v]सध्रीचीनाः त्वया सह अञ्चन्त्यो गच्छन्त्यः ॥ ' सहस्य सधिः ' । ' विभाषाञ्चेः० ' इति स्वार्थे खः । व्यत्ययेनान्तोदात्तः ॥ किंच [v]धियः कर्मवन्तो बुद्धिमन्तो वा ऋत्विजो यजमाना वा [v]उप [v]ब्रुवते उपेत्य ब्रुवन्ति स्वाभिमतं विज्ञापयन्ति[5] वा[5] ॥

वायुर्युङ्क्ते रोहिता वायुररुणा वायू रथे अजिरा धुरि वोळ्हवे वहिष्ठा
धुरि वोळ्हवे ॥ प्र बोधया पुरंधिं जार आ ससतीमिव ।
प्र चक्षय रोदसी वासयोषसः श्रवसे वासयोषसः ॥ ३ ॥

वायुः । युङ्क्ते । रोहिता । वायुः । अरुणा । वायुः । रथे । अजिरा । धुरि । वोळ्हवे । वहिष्ठा । धुरि । वोळ्हवे ॥ प्र । बोधय । पुरम्ऽधिम् । जारः । आ । ससतीम्ऽइव । प्र । चक्षय । रोदसी इति । वासय । उषसः । श्रवसे । वासय । उषसः ॥ ३ ॥

अयं [v]वायुः [v]रोहिता रोहितवर्णावश्वौ [v]धुरि धारणप्रदेशे रथस्याग्रभागे यद्वा भारवहने [v]युङ्क्ते क्वचिद्योजयति । तथा क्वचित् [v]अरुणा अरुणवर्णौ धुरि युङ्क्ते । तथा [v]अजिरा अजिरौ गमनशीलौ वर्णविशेषयुक्तौ कदाचिद्युङ्क्ते । यद्वा । एतदुभयत्र संबध्यते । किमर्थं युङ्क्ते इति तदाह[6] । [v]वोळ्हवे धुरं वोढुं भारवहनाय । किंच [v]वहिष्ठा वहिष्ठौ अतिशयेन वोढारावश्वौ ॥ वोढृशब्दात् इष्ठनि ' तुरिष्ठेमेयःसु ' इति तृलोपः । ढत्वादिकम् असिद्धत्वान्निवर्तते । द्विवचनस्य आकारः ॥ [v]धुरि [v]वोळ्हवे महद्भारं वोढुं महति भारे वोढव्ये सति । पुनःपुनर्वायुग्रहणम् अश्वयोजनवचनं च अतिशीघ्रमागच्छतीति ज्ञापनार्थम् । इदानीं प्रत्यक्षेणाह । हे वायो [v]पुरंधिं बहुप्रज्ञं सामर्थ्यात् यजमानमिति गम्यते । ' पुरंधिर्बहुधीः ' (निरु. ६. १३) इति यास्कः । तं [v]प्र [v]बोधय । रथेन शीघ्रमागत्य प्रज्ञापय हविःस्वीकारायेति भावः । तत्र दृष्टान्तः । [v]जारः पारदारिकः [v]आ [v]ससतीम् उपपत्यागमनध्यानेन[7] ईषत् स्वपन्तीं पुरंधिमिव

---

१. क्ष-ञ्च-ञ-ट-वायो त्वा । २. क्ष-ङ-ञ्च-ञ-ट-वा । ३. क्ष-ञ-ट-कीदृशा अश्वाः ; च-त-फ-कीदृश्यस्ताः । ४. ङ-च-रक्षणवन्तः । ५. ङ-च-' विज्ञापयन्ति वा ' इत्यस्यानन्तरम् ' ईम् अनर्थकः । पादपूरण इति पूर्वमुक्तम् ' इत्यधिकम् । ६. ङ-तत्राह । ७. क्ष-ञ-ट-पत्यागमनध्यानेन ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रकृष्टशरीरधारिणीं योषितमिव। तां यथा स्वसङ्केतेन[1] स प्रबोधयति तद्वत् त्वमपि कर्मण्यग्रेण[2] ईषत्स्वपन्तं यजमानं प्र बोधय। किंच तदर्थं vरोदसी द्यावापृथिव्यौ vप्र vचक्षय प्रकर्षेण प्रख्यापय प्रकाशयेत्यर्थः। तत्प्रकाशार्थम् vउषसः vवासय उषःकालानपि यथावत्स्थापय प्रभातं कुर्वित्यर्थः। पुनस्तदेव प्रार्थ्यते। vश्रवसे। श्रव इत्यन्ननाम। तव हवीरूपान्नस्वीकाराय vउषसः vवासय॥

**तुभ्यमुषासः शुचयः परावति भद्रा वस्त्रा तन्वते दंसु रश्मिषु चित्रा**
**नव्येषु रश्मिषु॥ तुभ्यं धेनुः सबर्दुघा विश्वा वसूनि दोहते।**
**अजनयो मरुतो वक्षणाभ्यो दिव आ वक्षणाभ्यः॥ ४॥**

तुभ्यम्। उषसः। शुचयः। पराऽवति। भद्रा। वस्त्रा। तन्वते। दम्ऽसु। रश्मिषु। चित्रा। नव्येषु। रश्मिषु॥ तुभ्यम्। धेनुः। सबःऽदुघा। विश्वा। वसूनि। दोहते। अजनयः। मरुतः। वक्षणाभ्यः। दिवः। आ। वक्षणाभ्यः॥ ४॥

हे वायो vतुभ्यं त्वदर्थम् vउषासः उषसः पूर्वोक्तरीत्या त्वया प्रकाशिताः vशुचयः शुद्धा दीप्ता वा vपरावति अत्यन्तदूरदेशे अन्तरिक्षे vदंसु दंसेषु कर्मवत्सु[3]। यद्वा। गृहनामैतत्॥ अन्त्यलोपश्छान्दसः॥ गृहवत्[4] आच्छादकेषु। vरश्मिषु स्वकीयेषु तैः vभद्रा भन्दनीयानि[5] कल्याणानि vवस्त्रा आच्छादनयोग्यानि वस्त्राणि vतन्वते विस्तारयन्ति। यद्वा। उषसो दंसु यागगृहेषु देवयजनेषु[6] रश्मिषु होमाय[6] प्रदीप्ताग्निज्वालावत्सु आगताय तुभ्यं भद्रा वस्त्रा तन्वते अग्निज्वाला एव वस्त्राणि विस्तारयन्तीत्यर्थः। उषःकाले अग्नीनां प्रज्वाल्यमानत्वात् ता एव वस्त्राणीत्युपचर्यते[7]। ननु केवलं साधारणानि वस्त्राणि नेत्याह। vनव्येषु नूतनेषु स्तूयमानेषु॥ 'णु स्तुतौ'। अचो यत्। 'वान्तो यि प्रत्यये' इति अवादेशः। 'यतोऽनावः' इत्याद्युदात्तत्वम्॥ vरश्मिषु चित्राणि[8] नानावर्णयुक्तानि आश्चर्यभूतानि vतन्वते। उषःकाले रश्मीनां नानावर्णत्वादिति भावः। अग्निद्वारेति पक्षे ज्वालानां कालीकरालीत्यादिरूपेण नानावर्णत्वाच्चित्रत्वम्॥ किंच हे वायो vतुभ्यं त्वदर्थं त्वद्यागार्थमेव vधेनुः घृतादिना प्रीणयित्री गौः। जातावेकवचनम्। vसबर्दुघा। सबरिति अमृतनाम। तस्य दोग्ध्री॥ 'दुहः कब्घश्च' इति कप्॥ सती[9] vविश्वा vवसूनि सर्वाणि धनानि आज्यादिरूपाणि vदोहते स्वयमेव दुग्धे[10] प्रीणयतीत्यर्थः॥ कर्मकर्तरि 'न दुहस्नुनमाम्०' (पा. सू. ३. १. ८९) इति यगभावः। छान्दसः शपो लुगभावः॥ कस्तत्र[11] विशेषः इति चेत् उच्यते। हे वायो vदिवः दीप्तादन्तरिक्षात् vमरुतः एतन्नामकान् मेघं विशीर्य[12] वृष्ट्युत्पादकान् त्वदंशभूतान् देवान् vअजनयः जनयसि उत्पादयसि। किमर्थमिति तदुच्यते। vवक्षणाभ्यः प्रवहणशीलाभ्यः अद्भ्यो वृष्टिलक्षणाभ्यः। तथा vवक्षणाभ्यः। नदीनामैतत्, 'वक्षणाः रुजानाः' (नि. १. १३. ९) इति तन्नामसु पाठात्। तासामर्थाय॥

---

१. क्ष-ञ-ट-सङ्केतेन। २. ङ-कर्मश्रमेण। ३. ङ-कर्मसु। ४. क्ष-ञ-ट-गृहवदेव। ५. क्ष-ङ-ञ-ट-भजनीयानि। ६. ङ-देवयजनदेशेषु हे वायो; क्ष-ञ-ट-देवयजनदेशेषु रश्मिषु होमाय। ७. क्ष-ङ-ञ-ट-वस्त्राणीत्युपचर्यन्ते। ८. ङ-चित्रा चित्राणि। ९. ङ-तादृशी सती। १०. क्ष-ङ-ट-दोग्धि। ११. क्ष-ङ-ञ-ट-कस्तव। १२. क्ष-ङ-ञ-ट-विदीर्य।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तुभ्यं शुक्रासः शुचयस्तुरण्यवो मदेषूग्रा इषणन्त भुर्वण्यपामिषन्त भुर्वणि।
त्वां त्सारी दसमानो भगमीट्टे तक्वीयेे।
त्वं विश्वस्माद्भुवनात्पासि धर्मणासुर्यात्पासि धर्मणा ॥ ५ ॥

तुभ्यम्। शुक्रासः। शुचयः। तुरण्यवः। मदेषु। उग्राः। इषणन्त। भुर्वणि। अपाम्। इषन्त। भुर्वणि ॥ त्वाम्। त्सारी। दसमानः। भगम्। ईट्टे। तक्वीयेे। त्वम्। विश्वस्मात्। भुवनात्। पासि। धर्मणा। असुर्यात्। पासि। धर्मणा ॥ ५ ॥

हे वायो [v]तुभ्यं त्वदर्थं [v]शुक्रासः दीप्ताः [v]शुचयः शुद्धाः। सोमस्य ज्ञातारोऽत्यन्तं शुद्धा भवन्ति। किमु वक्तव्यं तेषां शुद्धत्वे। [v]तुरण्यवः त्वरणयुक्ताः त्वां प्रासुं [v]उग्राः उद्गूर्णतेजसः सोमाः [v]मदेषु तव मदेषु निमित्तभूतेषु [v]भुर्वणि भरणवति यागे [v]इषणन्त आहवनीयं प्रति गच्छन्ति इच्छन्ति वा ॥ व्यत्ययेन आत्मनेपदम्[1]। श्नश्नौ द्वौ विकरणौ[1] ॥ किंच [v]अपां [v]भुर्वणि मेघे [v]इषन्त उदकमिच्छन्ति उत्पादयितुम्। अग्नौ हूयमानस्य[2] आहुतेरादित्यद्वारा वृष्ट्युत्पादकत्वात्। यद्वा। यजमानाः त्वामुद्दिश्य आजुह्वाना अपां वर्षणम् इषन्त इच्छन्ति। किंच हे वायो [v]भगं भजनीयं [v]त्वां [v]त्सारी त्सरणवान् अत्यन्तभीतः [v]दसमानः उपक्षीणो यज्ञविघातकैः पयोव्रतादिनियमैर्वा यजमानः [v]तक्वीये तस्कराणां यज्ञविघातिनाम् अन्यत्र गमनाय [v]ईट्टे स्तौति ॥ 'ईड स्तुतौ'। अदादित्वात् शपो लुक् ॥ यतः [v]त्वं [v]विश्वस्माद्भुवनात् सर्वस्माल्लोकात् भूतजाताद्वा लोकत्रयसंबन्धिनो भयात् [v]धर्मणा अस्मदीयहविषां धारणेन [v]पासि पालयसि। किंच [v]असुर्यात् असुरसंबन्धिनो भयात् विशेषेण [v]पासि [v]धर्मणा अस्मद्धारणेन[3] पोषणेन वा युक्तः सन्। यत एवं करोषि अतः स्तौमीत्यर्थः ॥

त्वं नो वायवेषामपूर्व्यः सोमानां प्रथमः पीतिमर्हसि सुतानां पीतिमर्हसि।
उतो विहुत्मतीनां विशां ववर्जुषीणाम्।
विश्वा इत्ते धेनवो दुह्र आशिरं घृतं दुहत आशिरम् ॥ ६ ॥

त्वम्। नः। वायो इति। एषाम्। अपूर्व्यः। सोमानाम्। प्रथमः। पीतिम्। अर्हसि। सुतानाम्। पीतिम्। अर्हसि ॥ उतो इति। विहुत्मतीनाम्। विशाम्। ववर्जुषीणाम्। विश्वाः। इत्। ते। धेनवः। दुह्रे। आऽशिरम्। घृतम्। दुहते। आऽशिरम् ॥ ६ ॥

---

१. ङ—आत्मनेपदम्। इष गतौ। श्ना विकरणः। २. ङ—हूयमानायाः। ३. ङ—अस्मान् धारयन्।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]वायो [v]त्वम् [v]अपूर्व्यः । न विद्यते पूर्वं यस्मात् तत्पानमपूर्वम्[1] । तदर्हतीत्यपूर्व्यः । तादृशः अत एव [v]प्रथमः इतरदेवेभ्यः पूर्वभूतः[2] सन् [v]सोमानां[3] [v]पीतिं पानम् [v]अर्हसि प्राप्नोषि[4]। [v]सुतानाम्[5] अभिषवकृतानां सोमानां [v]पीतिं पानम् [v]अर्हसि[5] । यत्र यत्र अभिषवोऽस्ति तत्र सर्वत्र नियमेन पिबसीत्यर्थः । पूर्वं प्राथम्याभिप्रायेण इदानीं तु सर्वत्र सोमवति यागे अस्य पानमस्तीति ज्ञापयितुं पृथगभिधानम् । न केवलं सोमपानमात्रम् [v]उतो अपि तु [v]विदुष्मतीनां विशेषेण होमवतीनामाह्वानवतीनां वा ॥ जुहोतेः संपदादिलक्षणो भावे क्विप् । ततो मतुब्ङीषौ ॥ [v]ववर्जुषीणाम् अनभिमतपापं वर्जयन्तीनाम् ॥ वर्जयतेर्लिटः क्वसुङीप्संप्रसारणत्वानि ॥ [v]विशाम् ऋत्विग्यजमानरूपाणां प्रजानां[6] संबन्धि[6] हविः स्वीकरोषीति शेषः । यद्वा । तेषां यष्टॄणां [v]विश्वाः [v]इत् [v]धेनवः सर्वा अपि गावः [v]ते त्वदर्थम् [v]आशिरम् आश्रयणद्रव्यं क्षीरं [v]दुहे दुहन्ति स्वयमेव ॥ कर्मकर्तरि ' न दुहस्नुनमाम्० ' इति यगभावः । ' लोपस्त आत्मनेपदेषु ' इति तलोपः । ' बहुलं छन्दसि ' इति रुट् ॥ तथा [v]आशिरं [v]घृतम् उपस्तरणाभिघारणाद्याश्रयणाय[7] योग्यं[7] करणं[8] द्रव्यं[8] [v]दुहते ॥ ॥ २३ ॥

' स्तीर्णं बर्हिः ' इति नवर्चं सूक्तं[9] पारुच्छेपमात्यष्टं पूर्वत्र तुशब्दात् वायुदेवत्यम् । ' आ वां रथः ' इत्यादि ऋक्पञ्चकमैन्द्रम् । सप्तम्यष्टम्यौ अष्टी । अत्रानुक्रमणिका–' स्तीर्णं नव चतुर्थ्याद्याः पञ्चैन्द्र्यश्चोपान्त्ये अष्टी ' इति ॥ सूक्तस्य विशेषविनियोगो लैङ्गिकः । दशरात्रस्य षष्ठेऽहनि प्रउगशस्त्रे आद्यौ तृचौ प्राकृतयोः वायव्यैन्द्रवायव्ययोः[10] स्थाने[10] विनियुक्तौ । ' षष्ठस्य प्रातःसवने ' इति खण्डे सूत्रितं– ' स्तीर्णं बर्हिरिति तृचौ ' ( आश्व. श्रौ. ८. १ ) इति ॥

**स्तीर्णं बर्हिरुप नो याहि वीतये सहस्रेण नियुता नियुत्वते**
**शतिनीभिर्नियुत्वते । तुभ्यं हि पूर्वपीतये देवा देवाय येमिरे ।**
**प्र ते सुतासो मधुमन्तो अस्थिरन्मदाय क्रत्वे अस्थिरन् ॥ १ ॥**

स्तीर्णम् । बर्हिः । उप । नः । याहि । वीतये । सहस्रेण । निऽयुता । नियुत्वते ।
शतिनीभिः । नियुत्वते ॥ तुभ्यम् । हि । पूर्वऽपीतये । देवाः । देवाय । येमिरे ।
प्र । ते । सुतासः । मधुऽमन्तः । अस्थिरन् । मदाय । क्रत्वे । अस्थिरन् ॥ १ ॥

हे वायो [v]नः अस्मद्यज्ञार्थं [v]स्तीर्णम् आस्तृतं [v]बर्हिः अभिलक्ष्य [v]उप [v]याहि आगच्छ । किमर्थम् । [v]वीतये हविषां भक्षणाय । केन साधनेनेति तदुच्यते । [v]सहस्रेण सहस्रसंख्याकेन [v]नियुता । जातावेकवच-

---

१. ङ–तदपूर्वम् ; क्ष-ञ-ट–तस्मादपूर्वः । २. क्ष-ङ-ञ-ट–पूर्वमाहूतः । ३. ख-च-फ–एषां सोमानाम् । ४. क्ष-ङ-ञ-ट–' प्राप्नोषि ' इत्यस्यानन्तरं ' पातुं योग्यो भवसि । ऐन्द्रवायवे गृहे ( क्ष-ञ-ट–'गृहे' नास्ति । ) द्विदेवत्ये गृहेऽपि प्रथमम् एकवारं त्वदर्थं गृह्यमाणत्वात् हूयमानात्वाच्चेतिभावः ' इत्यधिकम् । ५. क्ष-ङ-ञ-ट–किंच सुतानां अभिषुतानां पीतिम् अर्हसि प्राप्नोषि । ६. ख-फ–प्रजानां नः अस्माकं संबन्धि । ७. क्ष-ङ-ञ-ट–°द्याश्रयणयोग्यम् । ८. क्ष-ङ-ञ-ट–क्षरणद्रव्यम् । ९. ङ-च-झ–द्वितीयं सूक्तम् । १०. क्ष-ङ-ञ-ट–वायव्यैन्द्रवायवस्थाने ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नम् ॥ नियुत इति वायोरश्वानां नामधेयं, ' नियुतो वायोः' (नि. १. १५. १०) इति निरुक्तत्वात्[1]। तथा [v]शंतिनीभिः शतसंख्योपेताभिः नियुद्भिः आगच्छेति शेषः। यद्वा। सहस्रेण नियुता शतिनीभिश्च नियुद्भिः [v]नियुत्वते तद्वते देवाय हविर्दीयते इति शेषः। यद्वा। तुभ्यमित्यनेन संबन्धः। उक्तसंख्याकाभिर्नियुद्भिः तद्वते [v]देवाय द्योतमानाय [v]तुभ्यम् ॥ ' ङयि च ' ( पा. सू. ६. १. २१२ ) इति आद्युदात्तत्वम् ॥ [v]पूर्वपीतये इतरदेवेभ्यः पूर्वं पानाय [v]देवाः [v]येमिरे यमितवन्तः। यद्वा। स्तोतारः ऋत्विजो देवाय तुभ्यं येमिरे। आहवनीयं प्रति सोमं नियमितवन्तः। ' अग्रं पिबा मधूनां सुतं वायो ' ( ऋ. सं. ४. ४६. १ ) इत्यादिमन्त्रान्तरप्रसिद्धिद्योतनार्थो हिशब्दः। किंच एते[2] त्वदर्थं [v]सुतासः अभिषुताः[2] [v]मधुमन्तः माधुर्योपेताः[3] सोमाः [v]मदाय तव मोदाय [v]अस्थिरन् तिष्ठन्ति। किंच [v]ऋत्वे कर्मणे तत्सिद्ध्यर्थम् [v]अस्थिरन्। ऋत्विग्भिः धृताः[4] तिष्ठन्ति। अतः त्वं पिबेति शेषः॥ तिष्ठतेश्छान्दसे लुङि व्यत्ययेन झस्य रन्। ' स्थाघ्वोरिच्च ' इति सिचः कित्त्वं धातोः इत्वं च। ' हस्वादङ्गात् ' इति सिचोलोपः ॥

तुभ्यायं सोमः परिपूतो अद्रिभिः स्पार्हा वसानः परि कोशमर्षति शुक्रा
वसानो अर्षति ॥ तवायं भाग आयुषु सोमो देवेषु हूयते ।
वहा वायो नियुतो याह्यस्मयुर्जुषाणो याह्यस्मयुः ॥ २ ॥

तुभ्य । अयम् । सोमः । परिऽपूतः । अद्रिऽभिः । स्पार्हा । वसानः । परि । कोशम् । अर्षति ।
शुक्रा । वसानः । अर्षति ॥ तव । अयम् । भागः । आयुषु । सोमः । देवेषु । हूयते ।
वह । वायो इति । निऽयुतः । याहि । अस्मऽयुः । जुषाणः । याहि । अस्मऽयुः ॥ २ ॥

हे वायो [v]तुभ्य तुभ्यं त्वदर्थम् ॥ ' सुपां सुलुक्° ' इति चतुर्थ्या लुक् ॥ [v]अयं [v]सोमः हूयमानः [v]कोशं कोशस्थानीयं ग्रहम् [v]अर्षति गच्छति प्राप्नोति। कीदृशः सोमः। [v]अद्रिभिः [v]परिपूतः अभिषवसाधनैः अपगतजीर्णत्वेन शोधितः। यद्वा। अद्रिभिरभिषुतो दशापवित्रशोधनेन ग्रहणेन वा शोधितः। तथा [v]स्पार्हा स्पृहणीयानि तेजांसि [v]वसानः पिधानः। किंच [v]शुक्रा निर्मलानि दीप्तानि वा तेजांसि [v]वसानः सोमः [v]अर्षति[5] त्वां प्राप्नोति ॥ ' ऋषी गतौ '। व्यत्ययेन शप्। हे वायो [v]आयुषु मनुष्येषु यष्टव्यत्वेन स्थितः [v]भागः भजनीयः [v]सोमः [v]तव त्वदर्थं [v]देवेषु मध्ये [v]हूयते। सत्स्वपि इतरेषु देवेषु यतः सोमस्तव भागः अतः प्रथमं तुभ्यं हूयते इत्यर्थः। किंच हे [v]वायो एवं तं[6] सोमम् [v]अस्मयुः अस्माभिः तद्वान् ॥ मत्वर्थीयो युः ॥ त्वं [v]नियुतः [v]वह नियुत्संज्ञकानश्वान् वाहनाय प्राप्य। ततः परं [v]याहि दिवं प्रति गच्छ। तथा कुर्वन् [v]अस्मयुः अस्माभिर्युक्तः सन् अस्माननुगृह्णन् अस्मान् कामयमानो वा ॥ क्यचि छान्दसेऽन्त्यलोपे ' क्याच्छन्दसि ' इति उः ॥ [v]जुषाणः प्रीयमाणः [v]याहि गच्छ ॥

---

१. क-ज-झ-ण-व-निरुक्ते उक्तत्वात्। २. ङ-ते सुताः अभिषुताः। ३. ङ-मधुनोपेताः। ४. ङ-वर्धिताः। ५. ङ-ज्ञ-ञ-अर्षति गच्छति। ६. क्ष-ञ-ट-हुतम्

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

**आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि वीतये वायो**
**हव्यानि वीतये । तवायं भाग ऋत्वियः सरश्मिः सूर्ये सचा ।**
**अध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत ॥ ३ ॥**

आ । नः । नियुत्ऽभिः । शतिनीभिः । अध्वरम् । सहस्रिणीभिः । उप । याहि । वीतये ।
वायो इति । हव्यानि । वीतये ॥ तव । अयम् । भागः । ऋत्वियः । सऽरश्मिः । सूर्ये । सचा ।
अध्वर्युऽभिः । भरमाणाः । अयंसत । वायो इति । शुक्राः । अयंसत ॥ ३ ॥

हे [V]वायो त्वं [V]नः [V]अध्वरम् अस्मत्संबन्धिनं यज्ञं [V]शतिनीभिः [V]नियुद्भिः [V]सहस्रिणीभिः च ताभिस्त्वदीयैरश्वैः नः अस्मद्यज्ञम् [V]उप [V]आ [V]याहि उपागच्छ । किमर्थम् । [V]वीतये त्वदभिमतकामाय तृप्तये । आगत्य च [V]हव्यानि [V]वीतये सोमादिहविर्भक्षणाय । अध्वरं हव्यानि च उपलक्ष्य तेषामेव भक्षणाय शतसहस्रैरश्वैः अतिशीघ्रमागच्छेत्यर्थः । किंच [V]अयं [V]तव [V]भागः भजनीयः सोमः [V]ऋत्वियः प्राप्तकालः प्रदानावसरं प्राप्तः । ऋतुशब्देन प्रदानकालो लक्ष्यते ॥ 'छन्दसि घस्' (पा. सू. ५. १. १०६), 'सिति च' (पा. सू. १. ४. १६) इति पदसंज्ञया भसंज्ञाया बाधात् ओर्गुणाभावे यण् ॥ किंच सोमः[1] [V]सूर्ये उदिते सति तस्य रश्मिभिः [V]सचा[2] सह [V]सरश्मिः[2] भवति समानदीप्तिर्भवति। यद्वा। तैः सहितो भवति। यतः सूर्ये उदिते सति[3] रश्मिः[3] भवति अतः प्राप्तकालः[4] इत्यर्थः। किंच सोमाः [V]अध्वर्युभिः चमसाध्वर्युभिः । तेषां दशत्वाद्बहुवचनम् । तैः [V]भरमाणाः भ्रियमाणाः [V]अयंसत नियता अभवन् । किंच हे [V]वायो ते सोमाः [V]शुक्राः [V]अयंसत अत्यन्तदीप्ताः उद्यताः । अतः तेषां भक्षणाय आयाहीत्यर्थः ॥

**आ वां रथो नियुत्वान्वक्षदवसेऽभि प्रयांसि सुधितानि वीतये वायो**
**हव्यानि वीतये ॥ पिबतं मध्वो अन्धसः पूर्वपेयं हि वां हितम् ।**
**वायवा चन्द्रेण राधसा गतमिन्द्रश्च राधसा गतम् ॥ ४ ॥**

आ । वाम् । रथः । नियुत्वान् । वक्षत् । अवसे । अभि । प्रयांसि । सुऽधितानि । वीतये ।
वायो इति । हव्यानि । वीतये ॥ पिबतम् । मध्वः । अन्धसः । पूर्वऽपेयम् । हि । वाम् । हितम् ।
वायो इति । आ । चन्द्रेण । राधसा । आ । गतम् । इन्द्रः । च । राधसा । आ । गतम् ॥४॥

केवलं वायुं स्तुत्वा व्यासक्ततया इन्द्रवायू स्तौति । हे [V]वायो त्वामिन्द्रं च [V]वां युष्मान् [V]रथः युवयोः संबन्धी रथः [V]नियुत्वान् नियुद्भिरश्वैः तद्वान् सन्[5] [V]आ[5] [V]वक्षत् देवयजनं प्रति युष्मानावहतु ॥

---

१. क्ष-ङ-ञ-ट-स च सोमः । २. ङ-सहस्ररश्मिः । ३. ङ-झ-सरश्मिः । ४. क्ष-ञ-ट-प्राप्तकालम् । ५. क्ष-ङ-ञ-ट-अवसे ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वहेर्लेटि अडागमः । ' सिब्बहुलम्° ' इति सिप् ॥ यद्यपि नियुतो वायोरेव रथस्योचिताः तथापि व्यासक्तदेवतात्वात् सहैवागमनात् इन्द्रार्थमपि वहन्ति[1] । किमर्थम् । ᵛअवसे गमनाय रक्षणाय वा । पुनश्च किमर्थम् । ᵛप्रयांसि अन्नानि सोमलक्षणानि ᵛसुधितानि सुष्ठु गृहीतानि ᵛवीतये तेषां भक्षणाय । तथा ᵛहव्यानि ᵛवीतये इतरेषां सवनीयपुरोडाशादीनां खादनाय ॥ वेतेः क्तिन् । ' मन्त्रे वृष° ' इत्यादिना तस्योदात्तत्वम् ॥ किंच ᵛमध्वः मधुररसस्य ᵛअन्धसः अन्नस्य सोमरूपस्य ॥ कर्मणि षष्ठी ॥ मधुरं सोमं ᵛपिबतम् । यतः ᵛपूर्वपेयम् इतरदेवेभ्यः पूर्वपानं ᵛवां युवयोः ᵛहितम् ॥ पातेः ' अचो यत् ' इति यत् । ' ईद्यति ' इति ईकारः ॥ अभिमतम् । अतः प्रथमं पिबतमित्यर्थः । यद्यपि इन्द्रादपि वायोः पूर्वपानं ' त्वं हि पूर्वपा असि ' ( ऋ. सं. ४. ४६. १ ), ' देव दधिषे पूर्वपेयम् ' ( ऋ. सं. ७. ९२. १ ) इत्यादिषु सर्वत्र प्रसिद्धं तथापि इन्द्रस्य इतरदेवेभ्यः पूर्वं वायुना सह पानं च इन्द्रतुरीयार्थवादनब्राह्मणे[2] ' देवा वै सोमस्य राज्ञोऽग्रपेये न समपादयन् ' ( ऐ. ब्रा. २. २५ ) इत्यत्र प्रतिपादितम् । किंच आगमनसमये हे ᵛवायो त्वम् ᵛइन्द्रश्च ᵛचन्द्रेण अस्मदाह्लादकेन हिरण्येन ᵛराधसा गवादिरूपेण धनेन च सह ᵛआ ᵛगतम् आगच्छतम् । ᵛराधसा रत्नेन धनेन सह ᵛआ ᵛगतम् ॥ गमेर्लोटि छान्दसः शपो लुक् । ' अनुदात्तोपदेश° ' इति अनुनासिकलोपः । लुङि च ' मन्त्रे घस° ' इति च्लेर्लुक् ॥

**आ वां धियो ववृत्युरध्वराँ उपेममिन्दुं मर्मृजन्त वाजिनमाशुमत्यं न वाजिनम् ॥ तेषां पिबतमस्मयू आ नो गन्तमिहोत्या ।**
**इन्द्रवायू सुतानामद्रिभिर्युवं मदाय वाजदा युवम् ॥ ५ ॥**

आ । वाम् । धियः । ववृत्युः । अध्वरान् । उप । इमम् । इन्दुम् । मर्मृजन्त । वाजिनम् । आशुम् । अत्यम् । न । वाजिनम् ॥ तेषाम् । पिबतम् । अस्मयू इत्यस्मऽयू । आ । नः । गन्तम् । इह । ऊत्या ॥ इन्द्रवायू इति । सुतानाम् । अद्रिऽभिः । युवम् । मदाय । वाजऽदा । युवम् ॥५॥

हे इन्द्रवायू ᵛवां युवां[3] ᵛधियः कर्माणि स्तोत्रादिलक्षणानि ᵛअध्वरान् ᵛउप अस्मदीयान् यज्ञान् लक्षीकृत्य ᵛववृत्युः अतिशयेन वर्तयन्ति प्रवर्तयन्ति । किंच युष्मदर्थं ᵛवाजिनं ग्रहणाय द्रोणकलशात् ग्रहान् प्रति गमनवन्तम् आमिक्षावन्तं वा ᵛइममिन्दुं पुरतो वर्तमानं सोमं ᵛमर्मृजन्त अध्वर्यवो दशापवित्रेण संमार्जयन्ति[4] । मार्जने दृष्टान्तः । ᵛआशुम् अतिशीघ्रगामिनम् ᵛअत्यं ᵛन सततं गन्तारं ᵛवाजिनं वेजनवन्तमश्वमिव । तं यथा स्वेदाद्यपनयनेन संमार्जयन्ति तद्वत् । किंच हे ᵛइन्द्रवायू ᵛतेषाम् अध्वर्यूणां संबन्धिनः शोधितान् सोमान् ᵛपिबतं पानं कुरुतम् । तदर्थं ᵛनः अस्माकं यज्ञं प्रति ᵛइह इदानीम् ᵛऊत्या अस्मद्रक्षणेन सह ᵛआ ᵛगन्तम् आगच्छतम् । किंच हे इन्द्रवायू ᵛअस्मयू अस्मद्यज्ञमिच्छन्तौ ᵛयुवं युवाम् ᵛअद्रिभिः ग्रावभिः ᵛसुतानाम् अभिषुतानाम् ॥ पूर्ववत्कर्मणि षष्ठी ॥ तान् पिबतमिति शेषः । किमर्थम् । ᵛमदाय तृप्तये मोदाय वा । यतः ᵛयुवं युवां ᵛवाजदा वाजस्यान्नस्य दातारौ अतः पिबतमित्यन्वयः ॥ ॥ २४ ॥

---

१. ङ–वहनम् । २. क्ष-ञ-ट–इन्द्रतुरीयार्थवादब्राह्मणे । ३. क्ष-ञ-ट–युवयोः । ४. क्ष-ङ-ञ-ट–संमार्जयन्ति । मृजेर्यङ्लुगन्तात् व्यत्ययेनात्मनेपदम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इमे वां सोमा अप्स्वा सुता इहाध्वर्युभिर्भरमाणा अयंसत वायो शुक्रा अयंसत ॥ एते वामभ्यसृक्षत तिरः पवित्रमाशवः । युवायवोऽति रोमाण्यव्यया सोमासो अत्यव्यया ॥ ६ ॥

इमे । वाम् । सोमाः । अप्ऽसु । आ । सुताः । इह । अध्वर्युऽभिः । भरमाणाः । अयंसत वायो इति । शुक्राः । अयंसत ॥ एते । वाम् । अभि । असृक्षत । तिरः । पवित्रम् । आशवः । युवाऽयवः । अति । रोमाणि । अव्यया । सोमासः । अति । अव्यया ॥ ६ ॥

हे वायो वां युवयोः तव च इन्द्रस्य च स्वभूताः वइमे वसोमाः वअप्सु अस्मदीयेषु कर्मसु ॥ 'ऊडिदम्०' इत्यादिना विभक्तेरुदात्तत्वम् ॥ वइह अस्मिन्[1] अभिषवस्थाने वसुताः[2] वअध्वर्युभिः वभरमाणाः तैर्भ्रियमाणाः[3] गृहीता होतुं वा ह्रियमाणाः[4]॥ कर्मणि कर्तृप्रत्ययः ॥ सन्तः वआ वअयंसत आगच्छन्त युवयोर्नियता भवन्ति । किंच त एव सोमाः वशुक्राः शुभ्रा दीप्ताः वअयंसत नियता भवन्ति । किंच वएते वआशवः व्यापकाः सोमाः वां युवां प्रीणयितुमिति शेषः । वतिरः वपवित्रं तिर्यग्भूतं सोमान्तर्धायकं वा ऊर्णामयं पवित्रम् वअभ्यसृक्षत अभिलक्ष्य असृज्यन्त सृष्टा भवन्ति ॥ सृजेः कर्मणि लुङि ' लिङ्सिचावात्मनेपदेषु ' इति सिचः कित्त्वात् गुणाभावः अमागमाभावश्च ॥ किंच वयुवायवः युवां कामयमानाः वसोमासः सोमाः वअव्यया अव्ययानि अच्छिन्नानि वरोमाणि पवित्रसंबन्धीनि अविरोमाणि । यद्वा । अव्यया अविमयानि ॥ मकारो लुप्यते ॥ तादृशानि रोमाणि वअति अतिक्रम्य पात्रात्[5] गच्छन्तीति शेषः । पुनस्त एव विशेष्यन्ते । वअति अतिशयेन वअव्यया व्ययरहिताः सोमासः सोमाः असृक्षतेति शेषः ॥

अति वायो ससतो याहि शश्वतो यत्र ग्रावा वदति तत्र गच्छतं गृहमिन्द्रश्च गच्छतम् ॥ वि सूनृता ददृशे रीयते घृतमा पूर्णया निऽयुता याथो अध्वरमिन्द्रश्च याथो अध्वरम् ॥ ७ ॥

अति । वायो इति । ससतः । याहि । शश्वतः । यत्र । ग्रावा । वदति । तत्र । गच्छतम् । गृहम् । इन्द्रः । च । गच्छतम् ॥ वि । सूनृता । ददृशे । रीयते । घृतम् । आ । पूर्णया । निऽयुता । याथः । अध्वरम् । इन्द्रः । च । याथः । अध्वरम् ॥ ७ ॥

हे वायो त्वं वससतः[6] आलस्यादिना निद्रां कुर्वतः वशश्वतः बहून् यजमानान् । शश्वदिति बहुनाम, 'शश्वत् विश्वम्' ( नि. ३. १. ५ ) इति तन्नामसु पाठात् । वअति अतिक्रम्य उपेक्ष्य अस्मद्यज्ञं

---

१. ङ–अस्मिन् यज्ञे । २. क्ष-ङ-ञ-ट–सुताः अभिषुताः । ३. क्ष-ञ-ट–' तैर्भ्रियमाणाः ' नास्ति । ४. क्ष-ञ-ट–भ्रियमाणाः । ५. क्ष-ञ-ट–पातॄन् । ६. क्ष-ज्ञ-ञ-ट–ससतः स्वपतः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]याहि गच्छ। [v]इन्द्रश्च तथा करोतु। कं देशमिति तमाह। [v]यत्र[1] [v]ग्रावा [v]वदति यस्मिन्देशे अभिषवार्थः[2] पाषाणध्वनिः श्रूयते [v]तत्र [v]गच्छतं तं देशं प्रति आगच्छतम्। [v]गृहं[3] यज्ञगृहं [v]गच्छतम्[3]। पुनः स्थानमेव विशेष्यते। [v]सूनृता प्रियतथ्यात्मिका स्तुतिरूपा वाक् यत्र [v]वि [v]दृदृशे विशेषेण दृश्यते श्रूयते इत्यर्थः। तत्र गच्छतम्। यत्र च [v]घृतम् अत्यन्तदीप्तमाज्यं होमार्थं गृहीतं [v]रीयते गच्छति आहवनीयं प्रति नीयते॥ ' रीङ् स्रवणे '। दिवादित्वात् श्यन्॥ तत्र गच्छतम्। गमनप्रकारः एव विशेष्यते। [v]पूर्णया संपूर्णया पुष्टाङ्गया [v]नियुता॥ जातावेकवचनम्॥ नियुज्जात्या [v]अध्वरम् अस्मदीयं यज्ञम्[4] [v]आ [v]याथः आभिमुख्येन प्रयाथः[4]। किंच हे वायो त्वम् [v]इन्द्रश्च युवाम् [v]अध्वरम् अस्मदीयं यागम्[5] आ [v]याथः[5] सहैवागच्छतम्। तथा अस्माभिरपि सहैव गच्छतमित्यर्थः॥

अत्राह तद्वहेथे मध्व आहुतिं यमश्वत्थमुपतिष्ठन्त जायवोऽस्मे ते
सन्तु जायवः॥ साकं गावः सुवते पच्यते यवो न ते वाय
उप दस्यन्ति धेनवो नाप दस्यन्ति धेनवः॥ ८॥

अत्र। अह। तत्। वहेथे इति। मध्वः। आऽहुतिम्। यम्। अश्वत्थम्। उपऽतिष्ठन्त। जायवः। अस्मे इति। ते। सन्तु। जायवः॥ साकम्। गावः। सुवते। पच्यते। यवः। न। ते। वायो इति। उप। दस्यन्ति। धेनवः। न। अप। दस्यन्ति। धेनवः॥ ८॥

हे इन्द्रवायू [v]अत्र [v]अह अस्मिन्नेव यज्ञे॥ अहेति विनिग्रहार्थीयः॥ [v]मध्वः मधुरस्य मधुसदृशस्य वा [v]तत् तस्य [v]आहुतिं प्रदेयद्रव्यं [v]वहेथे धारयतम्। [v]यं सोमम् [v]अश्वत्थं पर्वतादिव्याप्तिप्रदेशे[6] स्थितं [v]जायवः जेतारो यजमानाः [v]उपतिष्ठन्त उपेत्य तिष्ठन्ति क्रयाद्यर्थम्। किंच [v]अस्मे अस्माकं संबन्धिनः [v]जायवः जेतारः कर्मनिर्वहितारः [v]ते ऋत्विजः [v]सन्तु समर्था भवन्तु यज्ञं निर्वहन्त्वित्यर्थः। यद्वा। ते प्रसिद्धाः प्रयोगकुशला जायवो जेतारः ऋत्विजः अस्मे सन्तु नान्यस्य। अत्र वहेथे इत्युक्तम्। कोऽत्र विशेष इति तत्राह। हे इन्द्रवायू अस्मिन् यज्ञे [v]गावः धेनवः [v]साकं सहैव [v]सुवते युष्मदर्थमेव क्षीरमुत्पादयन्ति दोग्ध्यो भवन्तीत्यर्थः। यद्वा। गावः साकं सहैव सुवते अपत्यमुत्पादयन्ति त्वद्दोहनार्थम्[7]॥ आदादिकः। ङित्त्वात् ' तास्यनुदात्तेत्° ' इति लसार्वधातुकानुदात्तत्वे धातुस्वरः॥ किंच [v]यवः। जातावेकवचनम्। उपलक्षणमेतत्। यवादिभिः पुरोडाशादिकं [v]पच्यते[8] इत्यर्थः। किंच हे [v]वायो इन्द्र च यतो गावः एवं सुवते अतः [v]ते त्वदर्थाः [v]धेनवः [v]न [v]उप [v]दस्यन्ति नोपक्षीणा भवन्ति रोगादिना कृशा न भवन्ति। न केवलमनुपक्षीणाः किंतु [v]धेनवः युष्मत्प्रीणयित्र्यः[9] गावः [v]नाप [v]दस्यन्ति चौराद्युपहारैः[10] उपक्षीणा नष्टा न भवन्ति[10]॥

---

१. क्ष-ङ-ञ-ट–युवां यत्र। २. क्ष-ञ-ट–अभिषवार्थम्। ३. क्ष-ञ-ट–' गृहं यज्ञगृहं गच्छतम् ' नास्ति। ४. क्ष-ञ-ट–यज्ञमासाद्य आभिमुख्येन प्राप्नुथः; ङ–यज्ञमासाद्य आभिमुख्येन प्राप्य याथः प्राप्नुथः। ५. ङ–यागं तस्मै यथा आयाथः। ६. क्ष-ङ-ञ-ट–पर्वतादिव्याप्तप्रदेशे। ७. क्ष-ङ-ञ-ट–त्वदुद्देशेन दोहनार्थम्। ८. ङ–सह पच्यते। ९. क्ष-ङ-ञ-ट–युष्मान् प्रीणयित्र्यः। १०. क्ष-ङ-ञ-ट–चोराद्युपहारप्रहीणा न भवन्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इमे ये ते सु वायो बाह्वोजसोऽन्तर्नदी ते पतयन्त्युक्षणो महि व्राधन्त उक्षणः।
धन्वञ्चिद्ये अनाशवो जीराश्चिदगिरौकसः।
सूर्यस्येव रश्मयो दुर्नियन्तवो हस्तयोर्दुर्नियन्तवः ॥ ९ ॥

इमे। ये। ते। सु। वायो इति। बाहुऽओजसः। अन्तः। नदी इति। ते। पतयन्ति।
उक्षणः। महि। व्राधन्तः। उक्षणः॥ धन्वन्। चित्। ये। अनाशवः। जीराः। चित्।
अगिराऽओकसः॥ सूर्यस्यऽइव। रश्मयः। दुःऽनियन्तवः। हस्तयोः। दुःऽनियन्तवः ॥९॥

हे [v]सु [v]वायो शोभनफलप्रद वायुदेव [v]ते तव स्वभूताः [v]इमे पुरतो दृश्यमानाः [v]ये अश्वाः सन्ति [v]ते [v]नदी नदने द्यावापृथिव्यौ [v]अन्तः तयोरन्तराले तं[1] त्वां [v]पतयन्ति पातयन्ति गमयन्ति। यद्वा। ते तव संबन्धिनोऽश्वाः पतयन्ति पतन्ति यज्ञदेशं गच्छन्ति ॥ 'पत गतौ'। चौरादिरदन्तः ॥ कीदृशास्ते[2]। [v]बाह्वोजसः बाहुषु प्रकृष्टबलवन्तः। उपलक्षणमेतत्। सर्वाङ्गबला इत्यर्थः। किंच [v]उक्षणः सेक्तारः[3] युवान इत्यर्थः। [v]महि महदतिप्रभूतं [v]व्राधन्तः वर्धमानाः तथा [v]उक्षणः उक्षाणः तत्सदृशाः[4] इत्यर्थः ॥ 'वा षपूर्वस्य निगमे' इति दीर्घाभावः ॥ किंच [v]धन्वन् [v]चित् धन्वनि उदकनिर्गमनापादानभूतेऽन्तरिक्षेऽपि निरालम्बे [v]अनाशवः नाशरहिता अव्याप्ता वा। आकाशे विलम्बमकुर्वाणा इत्यर्थः। अत[5] एव[5] [v]जीराश्चित्। चिच्छब्दः पूजायाम्। अत्यन्तं क्षिप्रगतयः। यद्वा। अनाशवः इत्यनेन सह समुच्चयार्थश्चिच्छब्दः। आकाशमार्गेऽक्षीणाः शीघ्रगतयश्चेत्यर्थः। किंच [v]अगिरौकसः। गिरा ओकः स्थानं येषां नास्ति ते तादृशाः। भर्त्सनादिना[6] स्थितिमलभमाना इत्यर्थः ॥ छान्दसः तृतीयाया अलुक् ॥ तदेव स्पष्टयति। [v]सूर्यस्य [v]रश्मयः इव [v]दुर्नियन्तवः दुःखेन नियन्तव्याः। ते यथा क्षणेन दश दिशो व्याप्नुवन्ति बहवश्च तद्वदेतेऽपीत्यर्थः। पूर्वं गिरा अनिर्ग्राह्यत्वमुक्तम्। इदानीं हस्तेनापि[7] अनिर्ग्राह्यत्वमाह[7]। [v]हस्तयोः [v]दुर्नियन्तवः उभाभ्यामपि हस्ताभ्यां दुःखेन नियन्तव्याः देवयजनगमनाय शीघ्रगामिन इत्यर्थः ॥ ॥ २५ ॥

'प्र सु ज्येष्ठम्' इति सप्तर्चं तृतीयं सूक्तम्। 'ऋषिश्चान्यस्मात्' इति परिभाषया परुच्छेप[8] ऋषिः। अत्यष्टिश्छन्दः[8]। 'ऊती देवानाम्' इत्यन्त्या त्रिष्टुप्। अत्र त्रिष्टुबन्तपरिभाषा नाश्रीयते 'सर्वमात्यष्टम्' इति विशेषपरिभाषया बाधितत्वात्। मित्रावरुणौ देवता। अन्त्ययोस्तु तन्मन्त्रलिङ्गोक्तदेवता। तथा चानुक्रान्तं-'प्र सु सप्त मैत्रावरुणं स्वन्त्ये लिङ्गोक्तदेवते अन्त्या त्रिष्टुप्' इति। तुशब्दप्रयोगात् इदमादिके द्वे सूक्ते मैत्रावरुणदेवताके। विनियोगो लैङ्गिकः ॥

---

१. क्ष-ञ-ट-ते; ङ-'तम्' नास्ति। २. क्ष-ङ-ञ-ट-कीदृशा अश्वाः। ३. क्ष-ञ-ट-निरालम्बे सेक्तारः। ४. क्ष-ङ-ञ-ट-वत्ससदृशाः। ५. क्ष-ञ-ट-तथा। ६. क्ष-ञ-ट-सेनादिषु। ७. क-ख-च-ज-ण-फ-व-हस्तेन अप्रतिग्राह्यत्वमाह। ८. क्ष-ङ-ञ-ट-पारुच्छेपमात्यष्टम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्र सु ज्येष्ठं निचिराभ्यां बृहन्नमो हव्यं मतिं भरता मृळयद्भ्यां स्वादिष्ठं मृळयद्भ्याम् ॥ ता सम्राजा घृतासुती यज्ञेयज्ञ उपस्तुता ।
अथैनोः क्षत्रं न कुतश्चनाधृषे देवत्वं नू चिदाधृषे ॥ १ ॥

प्र । सु । ज्येष्ठम् । निऽचिराभ्याम् । बृहत् । नमः । हव्यम् । मतिम् । भरत । मृळयत्ऽभ्याम् । स्वादिष्ठम् । मृळयत्ऽभ्याम् ॥ ता । सम्ऽराजा । घृतासुती इति घृतऽआसुती । यज्ञेऽयज्ञे । उपऽस्तुता ॥ अथ । एनोः । क्षत्रम् । न । कुतः । चन । आऽधृषे ।
देवऽत्वम् । नु । चित् । आऽधृषे ॥ १ ॥

हे ऋत्विजः मित्रावरुणाभ्यां vज्येष्ठं प्रशस्यं vबृहत् महदतिप्रवृद्धं vनमः नमस्कारोपलक्षितं स्तोत्रं तदुपलक्षितं[1] हविर्लक्षणमन्नं वा vप्र vभरत संपादयत । नम इत्यन्ननाम, 'नमः आयुः' ( नि. २. ७. २२ ) इति तन्नामसु पाठात् । किंच vहव्यं हव्यां vमतिं तत्प्रदानविषयां बुद्धिं भरत । यद्वा मतिं पूज्यं हव्यं हविर्भरत । पूर्वत्र पुरोडाशाद्यदनीयमन्नं इदानीं तु सोमाज्यादिरूपं निषेथं[2] हविः[2] इति विवेकः । कीदृशाभ्यां ताभ्याम् । vनिचिराभ्यां नितरां चिरकालाभ्यां नित्याभ्यामित्यर्थः । प्रवाहरूपेणेति भावः । किंच vमृळयद्भ्यां स्तुत्या हविःस्वीकारेण स्वयं मृडित्वा यजमानमपि सुखयद्भ्यां तथा vस्वादिष्ठं स्वादुतरं vमृळयद्भ्यां हविः सुखयद्भ्यां भक्षयद्भ्यामित्यर्थः । कस्तयोर्विशेषः इति तत्राह । vता तौ मित्रावरुणौ vसम्राजा सम्यक् राजमानौ॥ राजतेः क्विप् । 'मो राजि समः क्वौ' इति समो मकारस्य मकारः ॥ vघृतासुती । घृतमासूयते आदीयते याभ्यां तौ तादृशौ। यद्वा । घृतमुदकं वृष्टिलक्षणं प्रसूयते सर्वत्रानुज्ञायते याभ्यां तौ । एतयोः अहोरात्राभिमानिदेवत्वात् अहोरात्रद्वारा वृष्ट्युत्पादकत्वात् 'अहोरात्रे वै मित्रावरुणावहोरात्राभ्यां खलु वै पर्जन्यो वर्षति' (तै. सं.२. १. ७. ३) इति श्रुतेर्वृष्ट्यनुज्ञाप्रदत्वं प्रसिद्धम् । किंच एतौ vयज्ञेयज्ञे सर्वेष्वपि यज्ञेषु vउपस्तुता सर्वैर्ऋत्विग्भिः स्तूयमानौ । 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम् ॥ vअथ अपि च vएनोः एनयोः ॥ संज्ञापूर्वकस्य विधेरनित्यत्वात् 'ओसि च' ( पा. सू. ७. ३. १०४ ) इति गुणाभावे 'अतो गुणे' इति पररूपत्वम् ॥ vक्षत्रं बलं vकुतश्चन कस्मादपि च शत्रोः राक्षसादेः सकाशात् कस्मादप्युपायाद्वा vन vआधृषे आधर्षितुं[3] शक्यं न भवति ॥ 'कृत्यार्थे तवैकेन्०' इति केन्प्रत्ययः ॥ किंच तयोः vदेवत्वं vनू vचित् देवभावोऽपि न vआधृषे आधर्षणायोग्यः । यद्वा । पूर्वमिव इदानीमपि । 'नू चिदिति निपातः पुराणनवयोः' ( निरु. ४. १७ ) इति यास्केनोक्तत्वात् । आधृषे न केनाप्याधर्षणीयो भवति । एतयोर्बलं नाधृष्यं किमु तद्देवत्वमिति भावः ॥

---

१. च-फ-'तदुपलक्षितम्' नास्ति । २. क्ष-ञ-ट-निरतिशयहविः; ङ-निरतिशयं हविः । ३. च-ज्ञ-त-फ-आधर्षितुं नाम ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

**अदर्शि गातुरुरवे वरीयसी पन्था ऋतस्य समयंस्त रश्मिभिश्चक्षुर्भगस्य रश्मिभिः । द्युक्षं मित्रस्य सादनमर्यम्णो वरुणस्य च ।**
**अथा दधाते बृहदुक्थ्यं १ वय उपस्तुत्यं बृहद्वयः ॥ २ ॥**

अदर्शि । गातुः । उरवे । वरीयसी । पन्थाः । ऋतस्य । सम् । अयंस्त । रश्मिऽभिः । चक्षुः । भगस्य । रश्मिऽभिः ॥ द्युक्षम् । मित्रस्य । सदनम् । अर्यम्णः । वरुणस्य । च । अथ । दधाते इति । बृहत् । उक्थ्यम् । वयः । उपऽस्तुत्यम् । बृहत् । वयः ॥ २ ॥

vगातुः गमनशीला vवरीयसी उरुतरा[1] उषाः vउरवे विस्तीर्णाय यागाय गमनादिव्यापारायै[2] vअदर्शि सर्वैर्दृष्टा अभूत् । तथा vऋतस्य गमनशीलस्यादित्यस्य vपन्थाः मार्गः आकाशलक्षणः vरश्मिभिः vसमयंस्त प्रकाशैः संगतोऽभूत् । vभगस्य सर्वैर्भजनीयस्य एतन्नामकस्य देवस्य vरश्मिभिः vचक्षुः सर्वप्राणिनां लोचनं समयंस्त संगतमभूत् । सर्वे स्वस्वद्रव्यदर्शनाय समर्था अभवन्नित्यर्थः । तदेव स्पष्टीक्रियते । vमित्रस्य प्रकाशकारित्वात् सर्वजनमित्रस्य vसदनं गृहमन्तरिक्षं vद्युक्षं दीप्तानां निवासस्थानं रश्मिभिः समयंस्त संगतमभूत् । तथा vअर्यम्णः एतन्नामकस्य देवस्य ॥ उदात्तनिवृत्तिस्वरेण विभक्तेः उदात्तत्वम् ॥ द्युक्षं सदनं रश्मिभिः समयंस्त । किंच vवरुणस्य तमोनिवारकस्य एतन्नामकस्य देवस्य सदनं तथाभूत् । यद्यपि सूर्यस्य एकत्वेऽपि उपाधिभेदेन भेदात् पृथक् स्तुतिः तथा यद्यपि त्रिभिरपि प्रकाश्यमप्यन्तरिक्षमेकं तथापि प्रकाशकानां भेदात् त्रिधा स्तूयते । उदयानन्तरं कर्मानुष्ठानाय प्रकाशः अभवदित्यर्थः[3] । vअथ अतः कारणात् उदितत्वादेव vउक्थ्यं स्तुत्यं vबृहत् प्रभूतं vवयः हविर्लक्षणमन्नं vदधाते धारयतः । किंच vउपस्तुत्यम् उपेत्य स्तोतव्यम् ॥ 'एतिस्तुशासु०' (पा. सू. ३. १. १०९) इत्यादिना क्यप् । vबृहत् स्तोमादिना महास्तोत्रं vवयः हविर्लक्षणमन्नं च दधाते ॥

**ज्योतिष्मतीमदितिं धारयत्क्षितिं स्वर्वतीमा सचेते दिवेदिवे जागृवांसा दिवेदिवे ॥ ज्योतिष्मत्क्षत्रमाशाते आदित्या दानुनस्पती ।**
**मित्रस्तयोर्वरुणो यातयज्जनोऽर्यमा यातयज्जनः ॥ ३ ॥**

ज्योतिष्मतीम् । अदितिम् । धारयत्ऽक्षितिम् । स्वःऽवतीम् । आ । सचेते इति । दिवेऽदिवे । जागृऽवांसा । दिवेऽदिवे ॥ ज्योतिष्मत् । क्षत्रम् । आशाते इति । आदित्या । दानुनः । पती इति । मित्रः । तयोः । वरुणः । यातयत्ऽजनः । अर्यमा । यातयत्ऽजनः ॥ ३ ॥

अयं यजमानः vज्योतिष्मतीम् आहवनीयाग्नेस्तेजोयुक्ताम् vअदितिम् अदीनां संपूर्णलक्षणां vक्षितिम् अग्नेर्निवासयोग्यां भूमिम् उत्तरवेदिलक्षणां vधारयत् धारयति स्वयं कृतवानित्यर्थः । 'एतावती

---

१. च-प-फ-उत्तरा । २. ङ-गमनाय व्यापाराय वा । ३. ङ-भवतीत्यर्थः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वै पृथिवी यावती वेदिः ' ( तै. सं २. ६. ४. १ ) इति श्रुतेः । तथा ᵛस्वर्वतीं यज्ञनिष्पत्तिद्वारा स्वर्गवतीं ईदृशीं ताम् ᵛआ ᵛसचेते मित्रावरुणौ संगतौ भवतः । न केवलम् एतस्मिन्[1] एव अहनि किंतु ᵛदिवेदिवे सर्वेष्वप्यहःसु । कीदृशौ[2] तौ । ᵛदिवेदिवे प्रतिदिनं ᵛजागृवांसा प्रबोधं कुर्वाणौ । यज्ञं गन्तुम् अनलसौ इत्यर्थः । किंच वेदिमागत्य ᵛज्योतिष्मत् आज्यादिस्वीकारेण अतिशयेन तेजोयुक्तं ᵛक्षत्रं बलम् ᵛआशाते अश्नुवाते प्राप्नुतः॥ अश्नोतेश्छान्दसे लिटि 'अनित्यमागमशासनम्' इति वचनात् नुडभावः । लटि वा छान्दसः शपः श्लुः ॥ कीदृशौ[3] इति तावाह । ᵛआदित्या अदितेः पुत्रौ ᵛदानुनस्पती दानस्य आज्यादिप्रदानस्य स्वामिनौ अभिमतदानस्य पालयितारौ वा ॥ ' षष्ठ्याः पतिपुत्र° ' इति संहितायां सत्वम् ॥ ᵛमित्रः च ᵛवरुणः च तावुभौ देवौ । अर्यमाख्यस्तु देवः ᵛतयोः मित्रावरुणयोः ᵛयातयज्जनः । तयोरेव संबन्धादुभयोर्मध्ये स्थितो यातयज्जनः स्वस्वव्यापारनियोजितसर्वजनः। मित्रावरुणौ अहोरात्रदेवौ। अर्यमा तु तयोरेव सामर्थ्यात् सर्वप्राणिनः प्रेरयतीत्यर्थः । किंच ᵛयातयज्जनः । यातयन्ति लोकं यदीया जनाः प्रेष्यां स तादृशः । यद्वा । यात्यमाना नरके निपात्यमाना जनाः प्राणिनः अयष्टारो येन स तादृशः । कर्मसाक्षित्वात् स्वस्वकर्मानुरोधेन प्राणिनः सुकृते यातयतीत्यर्थः । तादृशः अर्यमा मित्रावरुणयोरधीनो वर्तते इति शेषः ॥

अयं मित्राय वरुणाय शंतमः सोमो भूत्ववपानेष्वाभगो देवो देवेष्वाभगः ।
तं देवासो जुषेरत विश्वे अद्य सजोषसः ।
तथा राजाना करथो यदीमह ऋतावाना यदीमहे ॥ ४ ॥

अयम् । मित्राय । वरुणाय । शम्ऽतमः । सोमः । भूतु । अवऽपानेषु । आऽभगः । देवः ।
देवेषु । आऽभगः ॥ तम् । देवासः । जुषेरत । विश्वे । अद्य । सऽजोषसः ।
तथा । राजाना । करथः । यत् । ईमहे । ऋतऽवाना । यत् । ईमहे ॥ ४ ॥

ᵛअयम् अस्माभिर्हूयमानः ᵛसोमः ᵛमित्राय ᵛवरुणाय च ᵛशंतमः पीयमानः सन् सुखतमः ᵛभूतु भवतु ॥ छान्दसः शपो लुक् । ' भूसुवोस्तिङि ' इति गुणाभावः ॥ ᵛअवपानेषु अवाङ्मुखचमसपानेषु विषयेषु ᵛआ सर्वतः ᵛभगः भजनीयः ताभ्याम् । किंच ᵛदेवः दीप्यमानः ᵛदेवेषु मित्रावरुणानुचरेषु इतरदेवेषु तैः ᵛआभगः आभजनीयः । यद्वा । देवेषु स्तोतृषु यजमानेषु मध्ये देवो दीप्यमानः । तथा आभगस्तैरेव आ सर्वतो भजनीयः । किंच ᵛतं सोमं ᵛविश्वे सर्वे ᵛदेवासः देवाः ᵛअद्य अस्मिन्नहनि ᵛजुषेरत सेवन्ते ॥ छान्दसो झस्य रन्नादेशाभावः । ' बहुलं छन्दसि ' इति रुडागमः ॥ कीदृशास्ते । ᵛसजोषसः समानप्रीतियुक्ताः । ᵛतथा ᵛराजाना राजमाना मित्रावरुणौ युवां ᵛकरथः कुरुतं सेवेथे इत्यर्थः॥ व्यत्ययेन शप् ॥ ᵛयत् यस्मात् कारणात् ᵛयत् ᵛईमहे यत् प्राप्नुमः तत् देवान् याचामहे ॥ ' ईङ् गतौ '। दैवादिकः । छान्दसो विकरणस्य लुक् ॥ तस्मात् जुषेरत । तथा ᵛऋतावाना ऋतवन्तौ सत्यवन्तौ यज्ञवन्तौ वा मित्रावरुणौ ᵛईमहे अभिमतफलं तयोः पानं वा याचामहे ॥

---

१. क्ष-ङ-ञ-ट–एकस्मिन् । २. ङ–किंच कीदृशौ । ३. क्ष-ङ-ञ-ट–कौ ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यो मित्राय वरुणायाविधज्जनोऽनर्वाणं तं परि पातो अंहसो दाश्वांसं
मर्तमंहसः ॥ तमर्यमाभि रक्षत्यृजूयन्तमनु व्रतम् ।
उक्थैर्य एनोः परिभूषति व्रतं स्तोमैराभूषति व्रतम् ॥ ५ ॥

यः । मित्राय । वरुणाय । अविधत् । जनः । अनर्वाणम् । तम् । परि । पातः । अंहसः ।
दाश्वांसम् । मर्तम् । अंहसः ॥ तम् । अर्यमा । अभि । रक्षति । ऋजूयन्तम् । अनु । व्रतम् ।
उक्थैः । यः । एनोः । परिऽभूषति । व्रतम् । स्तोमैः । आऽभूषति । व्रतम् ॥ ५ ॥

vयः vजनः[1] यजमानः vमित्राय vवरुणाय च ॥ कर्मणः संप्रदानत्वाच्चतुर्थी ॥ मित्रं वरुणं च vअविधत् परिचरति vतं जनं युष्मत्परिचारकम् vअनर्वाणम् अद्वेषिणम् । 'आतृन्यो वा अर्वा' (तै. सं. ६. ३. ८. ४ )इति श्रुतेः । अनल्पं वा[2] अनन्यसेविनं[2] vपरि vपातः परितो रक्षताम्[3]। कस्मादिति तदुच्यते । vअंहसः न्यूनातिरेकजनितात् पापात् । न केवलं सामान्यं जनम् अपि तु vदाश्वांसं हविर्दत्तवन्तं vमर्तं मरणधर्माणम् vअंहसः सर्वस्मादपि पापात् । न केवलं भवन्तावेव अपि तु vअर्यमा सर्वेषां नियन्ता देवः vऋजूयन्तं देवेष्वार्जवमाचरन्तं यजमानम् vअनु vव्रतं तदीयं कर्मानुलक्ष्य vअभि vरक्षति अभितो रक्षति । कोऽस्य जनस्य विशेषः इति तत्राह । vयः यजमानः vउक्थैः शस्त्रैः vएनोः एनयोर्मित्रावरुणयोः vव्रतं कर्म vपरिभूषति परिगृह्णाति तथा[4] यजमानो युष्मदीयं vव्रतं कर्म vस्तोमैः स्तोत्रैर्गानयुक्तमन्त्रसाध्यैः vआभूषति सर्वतोऽलंकरोति ॥ 'भूष अलंकारे' । भौवादिकः ॥ तम् अभिरक्षति इत्यन्वयः ॥

नमो दिवे बृहते रोदसीभ्यां मित्राय वोचं वरुणाय मीळ्हुषे
सुमृळीकाय मीळ्हुषे ॥ इन्द्रमग्निमुप स्तुहि द्युक्षमर्यमणं भगम् ।
ज्योग्जीवन्तः प्रजया सचेमहि सोमस्योती सचेमहि ॥ ६ ॥

नमः । दिवे । बृहते । रोदसीभ्याम् । मित्राय । वोचम् । वरुणाय । मीळ्हुषे ।
सुऽमृळीकाय । मीळ्हुषे ॥ इन्द्रम् । अग्निम् । उप । स्तुहि । द्युक्षम् । अर्यमणम् । भगम् ।
ज्योक् । जीवन्तः । प्रऽजया । सचेमहि । सोमस्य । ऊती । सचेमहि ॥ ६ ॥

vदिवे द्योतमानाय सूर्याय vनमः vवोचं नमस्कारोपलक्षितं स्तोत्रं वोचं ब्रवीमि स्तौमीत्यर्थः । कीदृशाय तस्मै । vबृहते महते ॥ 'बृहन्महतोरुपसंख्यानम्' इति विभक्तिरुदात्ता ॥ स्तुत्याय । तथा

---

१. क्ष-ञ-ट-'जनः' नास्ति । २. क्ष-ङ-ञ-ट-वाजनमस्येति । ३. च-ज्ञ-ज्ञ-रक्षतम्; ङ-रक्षतः ।
४. क्ष-ञ-ट-तथा यश्च; ङ-यश्च ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vरोदसीभ्यां द्यावापृथिवीभ्यां तदभिमानिदेवाभ्यां[1] नमो वोचम् । तथा vमित्राय सर्वजनहिताय अहरभिमानिदेवाय नमः वोचम् । तथा vवरुणाय आवरकाय रात्र्यभिमानिदेवाय । तथा vमीळ्हुषे अभिमतफलस्य सेक्त्रे रुद्राय । कीदृशाय तस्मै । vसुमृळीकाय शोभनसुखयित्रे । पुनः स एव विशेष्यते । मीळ्हुषे सुमृळीकाय इति द्वे प्रत्येकविशेषणभूते । इदानीं यजमानः ऋत्विजं स्वात्मानं वा प्रति ब्रवीति । हे होतः हे आत्मन् वा vइन्द्रम् vअग्निं vद्युक्षं दीप्तिमन्तम् vअर्यमणं vभगं च vउप उपेत्य बुद्धया प्राप्य vस्तुहि स्तुतिं कुरु । युष्मदनुग्रहात् vज्योक् चिरकालं vजीवन्तः जीवनोपेता वयं vप्रजया पुत्रभृत्यादिना vसचेमहि संगता भूयास्म । किंच vसोमस्य इन्दोः vऊती ऊत्या vसचेमहि तमपि स्तुत्वा तत्कारितेन रक्षणेन सहिता भूयास्मेत्यर्थः ॥

ऊती देवानां वयमिन्द्रवन्तो मंसीमहि स्वयशसो मरुद्भिः ।
अग्निर्मित्रो वरुणः शर्म यंसन्तदश्याम मघवानो वयं च ॥ ७ ॥

ऊती । देवानाम् । वयम् । इन्द्रऽवन्तः । मंसीमहि । स्वऽयशसः । मरुत्ऽभिः ।
अग्निः । मित्रः । वरुणः । शर्म । यंसन् । तत् । अश्याम । मघऽवानः । वयम् । च ॥ ७ ॥

vइन्द्रवन्तः प्रीतेनेन्द्रेण तद्वन्तः vवयं vदेवानां देवान् ॥ कर्मणि षष्ठी ॥ vऊती ऊत्या तर्पणेन हविरादिना vमंसीमहि मन्येमहि[2] । कीदृशा वयम् । vस्वयशसः स्वायत्तकीर्तयः vमरुद्भिः स्तुत्या हृष्टैर्मरुद्देवैरनुगृहीताः । यद्वा । देवानाम् ऊत्या रक्षणेन रक्षिता मंसीमहि ज्ञातारो भवेम सामर्थ्यात् तेषामेव महत्त्वस्य । किंच अग्निमित्रवरुणाः देवाः vशर्म vयंसन् अस्माकं सुखं प्रायच्छन् तं तं वरम् । vमघवानः vवयं vच तैर्दत्तान्नवन्तः सन्तः vतत् सुखम् vअश्याम व्याप्नुयाम ॥ अश्नोतेराशिषि लिङि ' छन्दस्युभयथा ' इति सार्वधातुकत्वात् सलोपः ॥ ॥ २६ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्य-
धुरंधरेण सायणाचार्येण[3] विरचिते माधवीये वेदार्थप्रकाशे
ऋक्संहिताभाष्ये द्वितीयाष्टके
प्रथमोऽध्यायः
समाप्तः ॥

---

१. क्ष-ङ-ञ-ञ-ट–तदभिमानिदेवताभ्याम् । २. ङ–मन्येमहि पूजयामः । ३. क्ष-ङ-ञ-ट–सायणामात्येन ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ द्वितीयाष्टके द्वितीयोऽध्याय आरभ्यते । ' सुषुमा यातम् ' इति तृचात्मकं चतुर्थं सूक्तं पारुच्छेपम् अतिशाक्करं षष्टयक्षरोपेतत्वात् । पूर्वत्र तुशब्दप्रयोगात् मैत्रावरुणम् । अत्र अत्यष्टिपरिभाषा नाश्रीयते 'अतिशाक्करम्' इति विशेषितत्वात् । अत्रानुक्रमणिका—' सुषुम तृचमतिशाक्करम् ' इति ॥ दशरात्रस्य षष्ठेऽहनि प्रातःसवने प्रउगशस्त्रे इदं सूक्तं मित्रावरुणदेवत्यं तृतीयतृचम् । सूत्रितं च- ' स्तीर्णं बर्हिरिति तृचौ सुषुमा यातमद्रिभिः ' ( आश्व. श्रौ. ८. १ ) इति । तथा अस्मिन्नेव मैत्रावरुणस्य प्रस्थितयाज्यायाः पुरस्तात् आद्या प्रक्षेपणीया । ' षष्ठस्य प्रातःसवने ' इति खण्डे सूत्रितं— ' सुषुमा यातमद्रिभिः ' ( आश्व. श्रौ. ८. १ ) इति ॥

सुषुमा यातमद्रिभिर्गोश्रीता मत्सरा इमे सोमासो मत्सरा इमे ।
आ राजाना दिविस्पृशास्मत्रा गन्तमुप नः ।
इमे वां मित्रावरुणा गवाशिरः सोमाः शुक्रा गवाशिरः ॥ १ ॥

सुषुम । आ । यातम् । अद्रिऽभिः । गोऽश्रीताः । मत्सराः । इमे । सोमासः । मत्सराः । इमे ।
आ । राजाना । दिविऽस्पृशा । अस्मऽत्रा । गन्तम् । उप । नः ।
इमे । वाम् । मित्रावरुणा । गोऽआशिरः । सोमाः । शुक्राः । गोऽआशिरः ॥ १ ॥

हे मित्रावरुणौ ᵛआ ᵛयातम् अस्मद्यज्ञं प्रति आगच्छतम् । आगमनाय[1] किमस्तीति चेत् तत्राह[1]। ᵛअद्रिभिः अभिषवसाधनैर्ग्रावभिः ᵛसुषुम सोमं सुतवन्तो वयम् ॥ सुनोतेर्लिटि रूपम् ॥ अतः ᵛगोश्रीताः । विकारे प्रकृतिशब्दः । पयोभिर्मिश्रिताः । ' तस्मान्मैत्रावरुणं पयसा श्रीणाति[2] ' ( तै. सं. ६. ४. ८. १) इति हि ब्राह्मणम् । ᵛमत्सराः तृप्तिहेतवः सोमाः । ' मत्सरः सोमो मन्दतेस्तृप्तिकर्मणः ' ( निरु. २. ५ ) इति यास्कः । ᵛइमे पुरतो गृहीता वर्तन्ते । अतः आ यातम् । पुनस्त एव विशेष्यन्ते । ᵛइमे ᵛसोमासो ᵛमत्सराः मदहेतवो मादने[3] मात्सर्यवन्तो वा इतरयज्ञगतसोमेभ्यः सोमाः[4]। कीदृशौ युवाम् । ᵛराजाना राजनशीलौ ᵛदिविस्पृशा द्युलोकवासिनौ ॥ ' हृद्द्युभ्यां ङेरुपसंख्यानम् ' ( पा. सू. ६. ३. ९. १ ) इति[5] अलुक्[5] ॥ ईदृशौ युवाम् ᵛअस्मत्रा अस्मासु मध्ये अस्मत्पालकौ वा युवां ᵛनः अस्मत्संबन्धिनं यज्ञम् ᵛउप ᵛगन्तम् आगच्छतम् । किंच हे ᵛमित्रावरुणा एतन्नामानौ देवौ ᵛवां युवयोरर्थाय ᵛइमे ᵛसोमाः[6] ᵛगवाशिरः । पूर्ववत् विकारे प्रकृतिशब्दः । गोभिः क्षीरैः आशिरो मिश्रिताः संजाताः । किंच ᵛगवाशिरः गोभिः[7] उदकैः[7] मिश्रिताः संजाताः । यद्वा । गोभिः

---

१. झ—आगमनं किमर्थमिति चेत् उच्यते । २. क्ष-ञ-ट—श्रीणन्ति । ३. क्ष-ञ-ट—मदने । ४. क्ष-ङ-झ१-ञ-ट—साकम् ; झ—सोमं वा । ५. ङ-झ१—इत्यस्य सप्तम्या अलुक् । ६. क्ष-ञ-ट—सोमासः सोमाः । ७. क्ष-ङ-झ१-ञ-ट—पयोभिः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्तुतिलक्षणैर्मन्त्रैः मिश्रिताः[1]। अत एव [v]शुक्राः दीप्ताः संजाताः। 'आशिरमव नयति सशुक्रस्वाय' (तै. सं. ६. १. ६. ५) इति श्रुतेः ॥

इम आ यातमिन्दवः सोमासो दध्याशिरः सुतासो दध्याशिरः ।
उत वामुषसो बुधि साकं सूर्यस्य रश्मिभिः ॥
सुतो मित्राय वरुणाय पीतये चारुर्ऋताय पीतये ॥ २ ॥

इमे। आ। यातम्। इन्दवः। सोमासः। दधिऽआशिरः। सुतासः। दधिऽआशिरः।
उत। वाम्। उषसः। बुधि। साकम्। सूर्यस्य। रश्मिऽभिः।
सुतः। मित्राय। वरुणाय। पीतये। चारुः। ऋताय। पीतये ॥ २ ॥

हे मित्रावरुणौ [v]आ [v]यातम् आगच्छतम्। यतो युष्मदर्थम् [v]इन्दवः क्लेदनसमर्थाः[2] [v]सोमासः सोमाः [v]दध्याशिरः दक्षाश्रयणवन्तः[3] सन्तः [v]इमे पुरतो ग्रहेण गृहीता वर्तन्ते[4] अतः आ यातम्[4]। किंच [v]दध्याशिरः धीयमानाशिरः सोमाः [v]सुतासः मन्त्रेण ग्रावभिरभिषुताः संपन्नाः। अत आ यातमिति शेषः। आदित्यग्रहे दध्यवनयसद्भावात् तदपेक्षया दध्याशिर[5] इत्युक्तम्[5]। [v]उत अपि च [v]वां युवयोः प्रीतये[6] पालनाय[6] [v]उषसो [v]बुधि उषसः संबन्धिनि बोधे सति॥ संपदादिलक्षणो भावे क्विप्। 'सावेकाचः०' इति विभक्तेरुदात्तत्वम्॥ प्रकाशे संजाते सति। न केवलमुषस एव बोधे अपि तु[7] [v]सूर्यस्य [v]रश्मिभिः [v]साकं सूर्यकिरणैः सह प्रकाशे हविष्प्रदानाय संजाते सति [v]सुतः सोमोऽभिषुतः। इदानीं वियुज्य उच्यते। [v]मित्राय सर्वहिताय एतन्नामकाय अहरभिमानिदेवाय तथा [v]वरुणाय आवरकाय[8] रात्र्यभिमानिदेवाय च तदर्थं सोमः सुतः इति शेषः। किंच [v]ऋताय यज्ञाय तन्निर्वाहकाय[9] तदर्थं [v]पीतये पानाय। यज्ञसिद्ध्यर्थं हि देवानां सोमपानम्। यद्वा॥ कर्तरि क्तिच्[10]॥ पीतये पात्रे ऋत्विगादये ऋताय यज्ञाय तन्निर्वाहकाय। [v]चारुः चरणीयो भक्षणीयः सोमः सुतोऽभिषुतः॥

तां वां धेनुं न वासरीमंशुं दुहन्त्यद्रिभिः सोमं दुहन्त्यद्रिभिः ।
अस्मत्रा गन्तमुप नोऽर्वाञ्चा सोमपीतये ।
अयं वां मित्रावरुणा नृभिः सुतः सोम आ पीतये सुतः ॥ ३ ॥

ताम्। वाम्। धेनुम्। न। वासरीम्। अंशुम्। दुहन्ति। अद्रिऽभिः। सोमम्। दुहन्ति।
अद्रिऽभिः॥ अस्मऽत्रा। गन्तम्। उप। नः। अर्वाञ्चा। सोमऽपीतये।
अयम्। वाम्। मित्रावरुणा। नृऽभिः। सुतः। सोमः। आ। पीतये। सुतः ॥ ३ ॥

---

१. ज्ञ१–पयोभिर्मिश्रिताः। २. ङ-ज्ञ१–मादयितुमीश्वराः क्लेदनसमर्था वा। ३. क्ष-ज्ञ-ज्ञ१–ञ-ट–दध्याश्रयणवन्तः। ४. क्ष-ज्ञ१-ञ-ट–वर्तन्ते तान् स्वीकर्तुम् आयातम् इति शेषः। ५. क्ष-ञ-ट–दध्याशिर इत्युक्तम्। अवयापेक्षया (अवयवापेक्षया) बहुवचनम्। ६. क्ष-ङ-ज्ञ-ज्ञ१-ञ-ट–पीतये पानाय। ७. क्ष-ङ-ज्ञ१–ञ-ट–च। ८. ज्ञ१–वारकाय। ९. ङ-ज्ञ-ज्ञ-ज्ञ१–'तन्निर्वाहकाय' नास्ति। १०. क्ष-ञ-ट–क्तिन्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vवां युवयोः संबन्धिनम् vअंशुं वल्लीरूपं सोमं vदुहन्ति संपादयन्त्यध्वर्यवः । किमिव । vतां प्रसिद्धामग्निहोत्राद्यर्थां vवासरीं सर्वाङ्गाच्छादितपयस्कां बहुक्षीरामित्यर्थः । यद्वा । पयआदिनाच्छादयित्रीम् ॥ ' वस आच्छादने ' । औणादिकः अरिप्रत्ययः । ' कृदिकारादक्तिनः ' इति ङीप् । यद्वा । केवलः औणादिकः अरप्रत्ययः स्वार्थिकः अण् ॥ vधेनुं vन प्रीणयित्रीं गामिव । केन साधनेनेति तदाह । vअद्रिभिः अभिषवसाधनैर्ग्रावभिः । किंच vअद्रिभिः तैरेव साधनैः vसोमं युष्मदर्थमेव vदुहन्ति वल्लीरूपं सोमं युष्मदर्थमेव उदकेन आप्लाव्य[1] रसं दुहन्ति । किंच vअर्वाञ्चा अस्मदभिमुखौ सन्तौ vसोमपीतये सोमपानाय[2] vअस्मत्रा अस्मत्त्रातारौ युवां vनः अस्मदीयं यज्ञम् vउप vगन्तम् उपागच्छतम्[3] । किंच vवां युष्मदर्थम् vअयं vसोमः vनृभिः नेतृभिर्यज्ञनिर्वाहकैर्ऋत्विग्भिः vसुतः अभिषुतः । किंच vआ vपीतये संपूर्णपानाय vसुतः अतः आगच्छतमित्यर्थः ॥ ॥ १ ॥

' प्रप्र पूष्णः ' इति चतुर्ऋचं पञ्चमं सूक्तं पारुच्छेपमार्ष्यष्टं पूष्णदेवताकम् । ' प्रप्र चतुष्कं पौष्णम् ' इत्यनुक्रान्तम् । विनियोगो लैङ्गिकः ॥

**प्रप्र पूष्णस्तुविजातस्य शस्यते महित्वमस्य तवसो न तन्दते स्तोत्रमस्य न तन्दते ॥ अर्चामि सुम्नयन्नहमन्त्यूतिं मयोभुवम् ।**
**विश्वस्य यो मन आयुयुवे मखो देव आयुयुवे मखः ॥ १ ॥**

प्रऽप्र । पूष्णः । तुविऽजातस्य । शस्यते । महिऽत्वम् । अस्य । तवसः । न । तन्दते । स्तोत्रम् । अस्य । न । तन्दते ॥ अर्चामि । सुम्नऽयन् । अहम् । अन्तिऽऊतिम् । मयःऽभुवम् । विश्वस्य । यः । मनः । आऽयुयुवे । मखः । देवः । आऽयुयुवे । मखः ॥ १ ॥

vतुविजातस्य[4] बहुयजमानार्थमुत्पन्नस्य vअस्य vपूष्णः पोषकस्य एतन्नामकस्य देवस्य vतवसः vमहित्वं बलस्य महत्त्वं vप्रप्र vशस्यते प्रस्तूयते सर्वैः ॥ वीप्सा[5] पादपूरणे[5] ॥ vन vतन्दते न हिनस्ति कश्चित्तदपि[6] । किंच vअस्य पूष्णः vस्तोत्रं vन vतन्दते न हिनस्ति न विरमति । सर्वोऽपि जनः एनं स्तौतीत्यर्थः । जगत्पोषकत्वादिति भावः । अतः कारणात् vअहं अहमपि यजमानः vसुम्नयन् सुखमिच्छन् vअर्चामि स्तौमि । कीदृशं तम् । vअन्त्यूतिम् आसन्नरक्षणम् ॥ ' कादिलोपो बहुलम् ' इति कलोपः ॥ स्तुत्यनन्तरमेव वरप्रदमित्यर्थः । vमयोभुवं सुखस्योत्पादकं भावयितारं वा । vयः पूषा vमखः यज्ञवान् ॥ मत्वर्थो लुप्यते ॥ vविश्वस्य सर्वस्य स्तोतुर्ऋत्विजः vमनः vआयुयुवे समन्तात्[7] मिश्रयति । शीघ्रवरप्रदानात्[8] इति भावः । किंच vदेवः दीप्यमानः[9] एषः[9] vमखः मखं यज्ञम् vआयुयुवे संपूर्तिपर्यन्तं मिश्रयति । यद्वा । विश्वस्य मनोमिश्रणे यजमाने किमायातमिति चेत् उच्यते । मखो यज्ञनिर्वाहकोऽयं पूषा देवो यजमानस्य मनः आयुयुवे समन्तात् मिश्रयति । सामर्थ्यात् यजमानस्य मन इति लभ्यते ॥ यौतेश्छान्दसो लिट् ॥

---

१. क्ष-ङ-ञ-ञ-ट–आप्लाव्याप्लाव्य । २. ख-फ–सोमपानाय वाम् । ३. ञ१–उपलक्ष्य आगच्छतम् । ४. क्ष-ङ-ञ१-ञ-ट–तुविजातस्य अस्य यष्टव्यस्य तुविजातस्य । ५. क्ष-ङ-ञ१-ञ-ट–प्र इति पादपूरणे । ६. ङ-ञ१–कश्चिदपि । ७. क्ष-ङ-ञ१-ञ-ट–आ समन्तात् । ८. क्ष-ञ-ट–शीघ्रं वरप्रदानात् । ९. च-ज्ञ-ञ-त–दीप्यमानः इति शेषः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

**प्र हि त्वा पूषन्नजिरं न यामनि स्तोमेभिः कृण्व ऋणवो यथा मृध उष्ट्रो न पीपरो मृधः ॥ हुवे यत्त्वा मयोभुवं देवं सख्याय मर्त्यः ।**
**अस्माकमाङ्गूषान्द्युम्निनस्कृधि वाजेषु द्युम्निनस्कृधि ॥ २ ॥**

प्र । हि । त्वा । पूषन् । अजिरम् । न । यामनि । स्तोमेभिः । कृण्वे । ऋणवः । यथा । मृधः । उष्ट्रः । न । पीपरः । मृधः ॥ हुवे । यत् । त्वा । मयःऽभुवम् । देवम् । सख्याय । मर्त्यः । अस्माकम् । आङ्गूषान् । द्युम्निनः । कृधि । वाजेषु । द्युम्निनः । कृधि ॥ २ ॥

हे [v]पूषन् [v]अजिरं यज्ञदेशं प्रति गमनवन्तं [v]त्वा त्वां [v]यामनि गमने निमित्तभूते सति [v]स्तोमेभिः स्तोमैः[1] [v]प्र [v]कृण्वे प्रकृष्टं करोमि। तत्र दृष्टान्तः। यामनि शीघ्रगमनेऽजिरं न शीघ्रगामिनमश्वमिव। स यथा प्रस्तूयते तद्वत्। किंच [v]यथा [v]मृधः संग्रामानुद्दिश्य [v]ऋणवः गच्छेः तथा प्र कृण्वे। यद्वा। यथा ऋणवः अस्मद्यज्ञं प्रति गच्छेः॥ 'ऋणु गतौ'। तानादिकः। लेटि अडागमः॥ तथा त्वां कृण्वे। किंच [v]मृधः हिंसकान् योद्धॄन् संग्रामे [v]पीपरः पारं नयसि[2]॥ पारयतेर्लुङि चङि रूपम्॥ तत्र दृष्टान्तः। [v]उष्ट्रो[3] [v]न। उष्ट्रो यथा[3] भारं वोढा पारयति तद्वत् [v]मृधः संग्रामात् पीपरः पारं नयसि। अतः कारणात् [v]त्वा त्वां [v]मयोभुवं सुखस्य भावयितारं [v]देवं देवनशीलं पूषणं [v]मर्त्यः मरणधर्मा मनुष्योऽहं [v]हुवे आह्वयामि। किमर्थम्। [v]सख्याय समानख्यानाय प्रियकरणाय। एवमाहूतः सन् [v]अस्माकमाङ्गूषान् आघोषान् स्तोमान्। 'आङ्गूषः स्तोम आघोषः' इति यास्कः। [v]द्युम्निनस्कृधि द्योतनवतः कुरु। यद्वा। स्तोमान् यशोवतोऽन्नवतो वा कृधि अस्मत्स्तुत्या प्रीतस्त्वम् एवं कुर्विस्यर्थः। किंच [v]वाजेषु संग्रामेषु [v]द्युम्निनः अन्नवतः [v]कृधि अस्मद्वैरिणो जित्वा तेषामन्नं मयि कुर्विस्यर्थः॥

**यस्य ते पूषन्त्सख्ये विपन्यवः क्रत्वा चित्सन्तोऽवसा बुभुज्रिर इति क्रत्वा बुभुज्रिरे ॥ तामनु त्वा नवीयसीं नियुतं राय ईमहे ।**
**अहेळमान उरुशंस सरी भव वाजेवाजे सरी भव ॥ ३ ॥**

यस्य । ते । पूषन् । सख्ये । विपन्यवः । क्रत्वा । चित् । सन्तः । अवसा । बुभुज्रिरे । इति । क्रत्वा । बुभुज्रिरे ॥ ताम् । अनु । त्वा । नवीयसीम् । नियुतम् । रायः । ईमहे । अहेळमानः । उरुऽशंस । सरी । भव । वाजेऽवाजे । सरी । भव ॥ ३ ॥

---

१. ज्ञ-ज्ञ-ज्ञ१–स्तोत्रैः । २. ज्ञ–नयसि संप्रापयसि । ३. ज्ञ-ज्ञ–उष्ट्र इव । स यथा ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे vपूषन् देव vयस्य vते रक्षकत्वेन प्रसिद्धस्य तव vसख्ये सखित्वे हितकरणे सति vऋत्वा vचित् क्रतुना प्रकृष्टेन[1] कर्मणैव ॥ ' जसादिषु च्छन्दसि वावचनम् ' इति नाभावाभावः ॥ vसन्तः भवन्तं प्रीणयितारः सन्तः vविपन्यवः विशेषेण स्तोत्रशीलाः । यद्वा । मेधाविनामैतत् । मेधाविनः यजमानाः vअवसा त्वत्कृतेन रक्षणेन[2] रक्षिताः सन्तः vबुभुज्रिरे भुञ्जते भोगान् । vइति एवमेव सर्वदा vऋत्वा कर्मणा vबुभुज्रिरे भुञ्जते सर्वे पाल्यन्ते इति[3] वा ॥ भुजेश्छन्दसि लिटि 'बहुलं छन्दसि' इति रुट् ॥ vतां तादृशीं vनवीयसीं नवतरां स्तुत्यां वा रक्षाम् vअनु अनुसृत्य रक्षाया अनन्तरं त्वां[4] vनियुतं vरायः एतत्संख्याकान् धनानि vईमहे याचामहे । किंच हे vउरुशंस बहुधा स्तुत्य त्वम् vअहेळमानः अक्रुध्यन् अस्मासु सुमनाः सन् vसरी vभव अस्माभिर्गन्तव्यो भव ॥ सर्तेः औणादिकः इनिप्रत्ययः । आद्युदात्तत्वम् ॥ किंच त्वं vवाजेवाजे सर्वेष्वपि संग्रामेषु vसरी vभव गमनशीलो भव पुरतो गन्ता भवेत्यर्थः ॥

अस्या ऊ षु ण उप सातये भुवोऽहेळमानो ररिवाँ अजाश्व
श्रवस्यतामजाश्व ॥ ओ षु त्वा ववृतीमहि स्तोमेभिर्दस्म साधुभिः ।
नहि त्वा पूषन्नतिमन्य आघृणे न ते सख्यमपह्नुवे ॥ ४ ॥

अस्याः । ऊँ इति । सु । नः । उप । सातये । भुवः । अहेळमानः । ररिऽवान् । अजऽअश्व ।
श्रवस्यताम् । अजऽअश्व ॥ ओ इति । सु । त्वा । ववृतीमहि । स्तोमेभिः । दस्म । साधुऽभिः ।
नहि । त्वा । पूषन् । अतिऽमन्ये । आघृणे । न । ते । सख्यम् । अपऽह्नुवे ॥ ४ ॥

हे vअजाश्व पूषन् । ' अजाश्वेति पूषणमाह ' ( निरु. ४. २५ ) इति यास्कः । vनः अस्माकम् vअस्याः अस्यै ॥ चतुर्थ्यर्थे षष्ठी ॥ vसातये लाभाय[5] vअहेळमानः अक्रुध्यन् अनादरमकुर्वन् vररिवान् दाता च सन् vसु सुष्ठु vउप vभुवः समीपस्थो भव ॥ रातेश्छान्दसस्य लिटः क्वसुः । पदसंज्ञाया अभावेऽपि पपिवांसं तस्थिवांसमित्यादौ छान्दसोऽवग्रहो दृश्यते । vऊ इति पादपूरणः ॥ किंच vश्रवस्यताम् अन्नमिच्छतामस्माकं हे vअजाश्व अजा एवाश्वस्थानीया यस्य तादृश त्वम् । पूषनामेदम् । ररिवांश्च सन् उप भुवः । ' अजाः पूष्णः ' ( नि. १. १५. ५ ) इति यास्कः । ओ इति निपातद्वयसमुदायात्मक एको निपातः । हे vदस्म शत्रूणामुपक्षपयितः vपूषन् vत्वा त्वाम् vओ vषु vववृतीमहि सर्वत एव सुतरां वर्तयेमहि ॥ वृतेः अन्तर्भावितण्यर्थात् लिङि ' बहुलं छन्दसि ' इति शपः श्लुः ॥ यज्ञान्तरगमनात् निवर्तयामः इत्यर्थः । केन साधनेनेति तदुच्यते । vसाधुभिः vस्तोमेभिः त्वां प्रीणयितुं समर्थैः स्तोत्रैः । किंच हे पूषन् vआघृणे सर्वतो वृष्टेः क्षारयितः । यद्वा । आघृणे हविषामाहर्तः स्वीकर्तः त्वां vनहि vअतिमन्ये अवमतिं[6] नैव करोमि[6]। न केवलमनतिक्रममात्रं किंतु vते vसख्यं तव सखित्वं हितकर्तृत्वं[7] नहि vअपह्नुवे नैवापनयामि[8] न त्यजामि सर्वतः प्रस्थापयामि[9] इत्यर्थः ॥ ॥ २ ॥

---

१ ज्ञ-प्रकृतेन । २. ख-च-फ-रक्षणेन प्रसिद्धेन । ३. ङ-ञ-झ-झ१-' इति ' नास्ति । ४. क्ष-च-ञ-ट-त्वा त्वाम् । ५. ङ-झ१-संभजमानाह्वानार्थम् । ६. क्ष-झ१-ञ-ट-'अवमतिं नैव करोमि' इत्यस्यानन्तरं 'यद्वा सर्वोऽपि जनो नैवातिमन्यते' इत्यधिकम् । ७. क्ष-ञ-ट-हितं कर्तुम् । ८. क्ष-ञ-ट-नैवापलपामि । ९. ण-प्रस्थापयामि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' अस्तु श्रौषट् ' इति एकादशर्चं षष्ठं सूक्तम् । अत्रानुक्रमणिका–'अस्तु श्रौषळेकादश वैश्वदेवी मैत्रावरुण्याश्विन्यस्तिस्र ऐन्द्र्याग्नेयो मारुत्यैन्द्राग्नी बार्हस्पत्या वैश्वदेव्यन्त्या त्रिष्टुप्पञ्चमी बृहती वैश्वदेवमेतदेवमन्यासामपि सूक्तप्रयोगे वैश्वदेवत्वं सूक्तभेदप्रयोगे यल्लिङ्गं सा देवता ' इति । परुच्छेप ऋषिः । अन्त्या त्रिष्टुप् पञ्चमी बृहती । अन्या अत्यष्टयो विशेषाभावात् । कृत्स्नं सूक्तं वैश्वदेवम् । तत्र आद्याया विश्वे देवा देवता । द्वितीयाया मित्रावरुणौ । अथ तिस्रोऽश्विदेवताकाः । ऐन्द्री षष्ठी । सप्तम्याग्नेयी । अष्टमी मारुती । नवम्यैन्द्राग्नी । दशमी बार्हस्पत्या । एकादशी वैश्वदेवी । सूक्तविनियोगो लैङ्गिकः । दशरात्रस्य षष्ठेऽहनि प्रउगशस्त्रे आद्या वैश्वदेवतृचे प्रथमा । ' षष्ठस्य ' इति खण्डे सूत्रितम्–' अस्तु श्रौषळो पू णो अग्ने ' ( आश्व. श्रौ. ८. १ ) इति ॥

अस्तु श्रौषट् पुरो अग्निं धिया दध आ नु तच्छर्धो दिव्यं वृणीमह
इन्द्रवायू वृणीमहे ॥ यद्ध क्राणा विवस्वति नाभा संदायि नव्यसी ।
अध प्र सु न उप यन्तु धीतयो देवाँ अच्छा न धीतयः ॥ १ ॥

अस्तु । श्रौषट् । पुरः । अग्निम् । धिया । दधे । आ । नु । तत् । शर्धः । दिव्यम् । वृणीमहे । इन्द्रवायू इति । वृणीमहे ॥ यत् । ह । क्राणा । विवस्वति । नाभा । सम्ऽदायि । नव्यसी । अध । प्र । सु । नः । उप । यन्तु । धीतयः । देवान् । अच्छ । न । धीतयः ॥ १ ॥

अहं [v]पुरः पुरत उत्तरवेद्याम् [v]अग्निम् आहवनीयाख्यं [v]धिया प्रणयनादिकर्मणा [v]दधे धारितवानस्मि । [v]तच्छर्धः तादृशं बलवन्तं[1] वा अग्निं यद्वा तच्छर्धः तादृशं मरुतां स्वरूपं[1] बलं [v]दिव्यं दिवि भवं [v]नु क्षिप्रम् [v]आ [v]वृणीमहे आभिमुख्येन संभजामहे । किंच [v]इन्द्रवायू [v]वृणीमहे[2] । [v]यत् यस्मात् कारणात् [v]विवस्वति दीप्तिमति [v]नाभा नाभौ भूम्या नाभिस्थाने देवयजने वेदिरूपे[3] । यद्वा । नाभौ सर्वफलस्य संबन्धके यज्ञे । ' यज्ञमाहुर्भुवनस्य नाभिम् ' (तै. सं. ७.४.१८.२) इति श्रुतेः । [v]क्राणा[4] कुर्वाणा स्वार्थप्रकाशनं[4] [v]नव्यसी नवतरा स्तुतिरूपा वाक् [v]संदायि संबध्यते ॥ छान्दसः कर्मणि लुङ् ॥ अस्माभिः प्रयुज्यते इत्यर्थः। यस्मात् स्तुतिः क्रियते तस्मात् [v]अस्तु [v]श्रौषट् अस्याः स्तुतेः श्रवणं भवतु। श्रोता भवतु वा मरुतां गणोऽग्निर्वा । इन्द्रवायुपक्षे प्रत्येकापेक्षया एकवचनम् । [v]अध अनन्तरं [v]नः [v]धीतयः अस्मदीयानि कर्माणि स्तुत्यादिरूपाणि [v]प्र [v]सु [v]उप [v]यन्तु प्रकर्षेण सुष्ठु युष्मानुपगच्छन्तु । किंच [v]देवाँ [v]अच्छा [v]न अग्न्यादिदेवान् आभिमुख्येन प्राप्तुमिव [v]धीतयः अस्मदीयानि कर्माणि उप यन्तु तेषां समीपं प्राप्नुवन्तु[5] ॥

---

१. ङ-ञ१–बलं बलवन्तं वा । संघभूतम्; क्ष-ञ-ट–बलं बलवन्तं वा अग्निम् ..... संघभूतम् । २. क्ष-ङ-ञ-ट–वृणीमहे प्रार्थयामहे । ३. क्ष-ञ-ट–यद्वा वेदिरूपे । ४. क्ष-ञ-ट–क्राणा कर्मणा प्रज्वालनरूपेण युक्तं त्वां स्वार्थप्रकाशनम् । ५. क्ष-ञ१-ञ-ट–प्रापयन्तु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यद्ध त्यन्मित्रावरुणावृतादध्यादृदाथे अनृतं स्वेन मन्युना दक्षस्य स्वेन मन्युना ॥ युवोरित्थाधि सद्मस्वपश्याम हिरण्ययम् । धीभिश्चन मनसा स्वेभिरक्षभिः सोमस्य स्वेभिरक्षभिः ॥ २ ॥

यत् । ह । त्यत् । मित्रावरुणौ । ऋतात् । अधि । आददाथे इत्याऽददाथे । अनृतम् । स्वेन । मन्युना । दक्षस्य । स्वेन । मन्युना ॥ युवोः । इत्था । अधि । सद्मऽसु । अपश्याम । हिरण्ययम् धीभिः । चन । मनसा । स्वेभिः । अक्षऽभिः । सोमस्य । स्वेभिः । अक्षऽभिः ॥ २ ॥

हे ᵛमित्रावरुणौ ᵛऋतात् आदित्यात् ᵛत्यत् तदुदकं ᵛयत् यस्मात् कारणात् ᵛअधि अधिकम् ᵛआददाथे सर्वतो ददथः । कीदृशमुदकम् । ᵛअनृतं नश्वरं शोषणस्वभावम् । केन साधनेन । ᵛस्वेन ᵛमन्युना स्वकीयेन तेजसा । अहोरात्राभिमानिदेवौ मित्रावरुणौ खलु वृष्टिं मोचयतः । ' अहोरात्रे वा ' इत्यादिश्रुतिः पूर्वमेवोदाहृता । मन्युर्विशेष्यते । ᵛदक्षस्य[1] समर्थस्य ᵛस्वेन ᵛमन्युना आत्मभूतेन मननीयेन सामर्थ्येन । किंच[1] हे मित्रावरुणौ ᵛयुवोः ॥ अन्त्यलोपश्छान्दसः ॥ युवयोः संबन्धि ᵛहिरण्ययं हिरण्मयं रूपम् ॥ ' ऋत्व्यवास्त्व्यवास्त्व° ' ( पा. सू. ६. ४. १७५ ) इत्यादौ मयटो मशब्दलोपो निपात्यते ॥ ᵛइत्था इत्थं वक्ष्यमाणप्रकारेण ᵛसद्मसु यज्ञसदनेषु ᵛअधि ᵛअपश्याम पश्येम । केन साधनेनेति तदुच्यते । ᵛधीभिः त्वदुद्देश्यैः कर्मभिर्यज्ञादिरूपैः ᵛमनसा ᵛचन त्वदासक्तेन चेतसा च ᵛस्वेभिरक्षभिः आत्मीयैः[2] अनन्यैश्चक्षुरादीन्द्रियैः[2]। किंच ᵛसोमस्य सोमं ᵛस्वेभिरक्षभिः अस्मदीयैरिन्द्रियैः ॥ नासाद्यपेक्षया[3] बहुवचनम् ॥

पृष्ठ्यस्य षष्ठेऽहनि प्रउगशस्त्रे ' युवां स्तोमेभिः ' इत्याश्विनस्तृचः । ' षष्ठस्य ' इति खण्डे सूत्रितं–' युवां स्तोमेभिर्देवयन्तो अश्विनावर्महे इन्द्र ' ( आश्व. श्रौ. ८. १ ) इति ॥

युवां स्तोमेभिर्देवयन्तो अश्विनाश्रावयन्तइव श्लोकमायवो युवां हव्याभ्यायवः ॥ युवोर्विश्वा अधि श्रियः पृक्षश्च विश्ववेदसा । प्रुषायन्ते वां पवयो हिरण्यये रथे दस्रा हिरण्यये ॥ ३ ॥

युवाम् । स्तोमेभिः । देवऽयन्तः । अश्विना । आश्रवयन्तःऽइव । श्लोकम् । आयवः । युवाम् । हव्या । अभि । आयवः ॥ युवोः । विश्वाः । अधि । श्रियः । पृक्षः । च । विश्वऽवेदसा । प्रुषायन्ते । वाम् । पवयः । हिरण्यये । रथे । दस्रा । हिरण्यये ॥ ३ ॥

---

१. क्ष-ञ१-ञ-ट–दक्षस्य दक्षेण पराभिभवसमर्थेन स्वेन मन्युना आत्मभूतेन तेजसा । यद्वा । दक्षस्य युवां स्तोतुं शक्तस्य मा ( क्ष-ञ-ट–वा ) स्वेन स्वभूतेन मन्युना मननेन सामर्थ्येन युक्तेन । किं च । २. फ–आत्मीयैः इन्द्रियैः । ३. क-ज-ञ-ण-त-न-व-ज्ञ–मनसाद्यपेक्षया; क्ष-न-ञ१-ट–मनआद्यपेक्षया ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे Vअश्विना अश्विनौ[1] देवौ[1] Vयुवां Vस्तोमेभिः स्तोत्रैः Vदेवयन्तः युवाम् आत्मनः[2] इच्छन्तः Vआयवः । मनुष्यनामैतत् । यजमानाः Vश्लोकं युष्मदीयस्तुतिरूपां वाचम् Vआश्रावयन्तइव सर्वतः श्रवणविषयां कुर्वन्त इव स्तुवन्ति । श्लोक इति वाङ्नाम, 'श्लोकः धारा' (नि. १. ११. १) इति तन्नामसूक्तत्वात् । कीदृशास्ते । Vयुवां[3] Vहव्या हविषा आज्यादिना Vअभ्यायवः आभिमुख्येन गन्तारः । प्रीणयितुमिति शेषः । हवींषि[4] आभिमुख्येन प्रापयन्तो वा । किंच हे Vविश्ववेदसा सर्वधनौ Vयुवोः युवयोः संबन्धिन्यः Vविश्वाः Vश्रियः सेवनीयाः सर्वा लक्ष्मीर्धनकनकादिरूपाः Vअधि अधिकं भजन्ते इति शेषः । किंच Vपृक्षश्च अन्नमपि युष्मत्प्रसादात् अधि अधिकं लभन्ते । किंच हे Vदस्रा शत्रूणामुपक्षपयितारौ Vवां Vहिरण्यये Vरथे हिरण्मये मधुपूर्णे रथे Vपवयः तन्नेमयः Vप्रुषायन्ते क्षरन्ति स्रवन्ति ॥ 'प्रुष प्लुष स्नेहनसेचनपूरणेषु' । 'छन्दसि शायजपि' इत्यहावपि श्नः शायजादेशः ॥ मधुपूर्णपात्रोपेतत्वात् शीघ्रगमनेन चक्रेषु मधूनि स्रवन्तीति भावः । 'पवी रथनेमिर्भवति यद्विपुनाति भूमिम्' (निरु. ५. ५.) इति निरुक्तम् । अश्विनोः रथस्य मधुपूर्णत्वं 'त्रयः पवयो मधुवाहने रथे' (ऋ. सं. १. ३४. २) इत्यादिषु प्रसिद्धम् । किंच तादृशे Vहिरण्यये[5] हृदयरमणे रथे मधुरं हविर्वहतमिति शेषः ॥

अचेति दस्रा व्युर्नाकमृण्वथो युञ्जते वां रथयुजो दिविष्टिष्वध्वस्मानो दिविष्टिषु ॥ अधि वां स्थाम बन्धुरे रथे दस्रा हिरण्यये ।
पथेव यन्तावनुशासता रजोऽञ्जसा शासता रजः ॥ ४ ॥

अचेति । दस्रा । वि । ऊँ इति । नाकम् । ऋण्वथः । युञ्जते । वाम् । रथऽयुजः । दिविष्टिषु ।
अध्वस्मानः । दिविष्टिषु ॥ अधि । वाम् । स्थाम । बन्धुरे । रथे । दस्रा । हिरण्यये ।
पथाऽइव । यन्तौ । अनुऽशासता । रजः । अञ्जसा । शासता । रजः ॥ ४ ॥

हे Vदस्रा दस्रावश्विनौ Vअचेति वक्ष्यमाणं युष्मच्चेष्टितं ज्ञायते सर्वैः । किं तदिति तदुच्यते[6] । Vनाकं स्वर्गं Vवि Vऋण्वथः विशेषेण गच्छथः ॥ 'ऋणु गतौ' । तानादिकः । लेटि अडागमः ॥ यज्ञसंपूर्त्यनन्तरमिति यावत् । उशब्दोऽवधारणे । यद्वा । नाकम् । अकं दुःखम् । तद्रहितं यज्ञमृण्वथः । विशेषेण गच्छथ एव । तदर्थं Vवां Vरथयुजः युष्मत्संबन्धिनो रथस्य योजयितारः सारथयः Vदिविष्टिषु स्वर्गस्यैषणेषु द्योतनात्मकस्य यज्ञस्यैषणेषु गमनेषु वा निमित्तभूतेषु Vयुञ्जते अश्वान् योजयन्ति रथे । युक्ते रथे वा युष्मान् । ते एव विशेष्यन्ते । Vदिविष्टिषु दिवो गमनेषु निरालम्बाकाशगमनेषु Vअध्वस्मानः रथस्य तदाश्रितस्य च ध्वंसमकुर्वाणाः । किंच हे Vदस्रा अश्विनौ Vवां युवयोः Vवन्धुरे बन्धुरत्रययुक्ते । युगबन्धनाधारः काष्ठविशेषो बन्धुरम् । तादृशत्रययुक्तत्वं 'रथो यो वां त्रिवन्धुरः' (ऋ. सं. ८. २२. ५) इत्यादिषु प्रसिद्धम् । Vहिरण्यये हिरण्मये Vरथे Vअधि तादृशस्य रथस्योपरि Vस्थाम अस्थापयाम[7] ॥

---

१. क्ष-ङ-ञ१-ञ-ट–अश्विदेवौ । २. क्ष-ङ-ञ१-ञ-ट–आत्मानम् आत्मनः । ३. क्ष-ञ-ट–युवां युष्मान् । ४. ङ-ञ-ञ१-ञ-ट–हवींषि युष्मान् । ५. क्ष-ज्ञ-ञ-ट-हिरण्यये हिरण्मये । ६. ङ-ञ-ञ१–उच्यते । ७. क्ष-ञ-ट–अवस्थापयामः ; ञ१–अवस्थापयाम ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

छान्दसे लङि ' बहुलं छन्दसि ' इति अडभावः[1]। आद्युदात्तश्छान्दसः[1] ॥ कीदृशौ[2]। vपथेव सुपथेन मार्गेण[2] निरालम्बे आकाशे[3] vरजः रञ्जनात्मकं स्वर्गं प्रति vयन्तौ गच्छन्तौ। ' लोका रजांस्युच्यन्ते ' इत्युक्तत्वात्। vअनुशासता अननुकूलाञ्छत्रून् अनुशासतौ विधेयीकुर्वन्तौ ॥ शासेः शतरि ' जक्षित्यादयः० ' इति अभ्यस्तत्वात् ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् ॥ किंच vअञ्जसा मुख्यत्वेन प्रकृष्टं vरजः उदकं वृष्टिलक्षणं vशासता शासतौ बलाद्विधेयीकुर्वन्तौ ॥

शचीभिर्नः शचीवसू दिवा नक्तं दशस्यतम् ।
मा वां रातिरुप दसत्कदा चनास्मद्रातिः कदा चन ॥ ५ ॥

शचीभिः। नः। शचीवसू इति शचीऽवसू। दिवा। नक्तम्। दशस्यतम्।
मा। वाम्। रातिः। उप। दसत्। कदा। चन। अस्मत्। रातिः। कदा। चन ॥ ५ ॥

हे vशचीवसू। शचीति कर्मनाम। अस्मदनुष्ठितज्योतिष्टोमादिकर्मधनौ[4] युवां[4] vशचीभिः अस्मदीयैः कर्मभिर्यागादिभिर्निमित्तभूतैः vदिवा vनक्तं अहनि रात्रौ च vदशस्यतम् अभिमतं ददेथाम्[5] ॥ ' दाश्च दाने ' इत्यस्येदं छान्दसं रूपम्। यद्वा। दशस्यतिर्दानार्थः कण्ड्वादिषु द्रष्टव्यः[6] ॥ vवां युवयोः vरातिः दानं vकदा vचन सर्वदा यागकाले अयागकालेऽपि vमा vउप vदसत् मा उपक्षीणं भूत् ॥ ' दसु उपक्षये '। लुङि ' पुषादिद्युतात्० ' इति च्लेः अङ् ॥ न केवलं युष्मदीयम् अपि स्वस्माकमपि vरातिः दानं हविरादिप्रदानं सर्वविषयदानं वा अर्थिभ्यः vकदा vचन सर्वावस्थायामपि[7] मा उप दसत् उपक्षीणं मा भूत् सर्वदा वर्तताम्। अहमपि सर्वदा युष्मानुद्दिश्य दद्यां युवामपि मदभिमतं सर्वदा दत्तमित्यर्थः[8] ॥ ॥ ३ ॥

पृष्ठ्यस्य षष्ठेऽहनि प्रउगशस्त्रस्यैन्द्रे तृचे तृतीया ' वृषन्निन्द्र ' इत्येषा। ' वृषन्निन्द्र वृषपाणास इन्दवः सुषुमा यातमद्रिभिः ' ( आश्व. श्रौ. ८. १ ) इति ॥ तत्रैव सवने प्रस्थितयाज्यानां पुरस्तादन्या ऋचः प्रक्षिप्य उभयीभिर्यष्टव्यम्। तत्र होतुः प्रस्थितयाज्यायाः पुरस्तादेषा प्रक्षेपणीया। सूत्रितं च–' षष्ठस्य प्रातःसवने प्रस्थितयाज्यानां पुरस्तादन्याः कृत्वोभाभ्यामनवानन्तो यजन्ति ' ( आश्व. श्रौ. ८. १ ) इति ॥

---

१. क्ष-ञ१-ञ-ट–शपो लुक्। तत्र तिष्ठतः। २. क्ष-ञ१-ञ-ट–कीदृशौ युवाम्। पथेव सुपथेनेति ( ञ १-सुपथेनेव ) मार्गेण; ङ-ञ–कीदृशौ युवाम्। सुपथेनेव ( ञ-सुपथेन ) मार्गेण। ३. क्ष-ञ-ट–आकाशेऽपि। ४. च-प-फ–°ज्योतिष्टोमादिकर्मधनो युवा नः; ञ–°ज्योतिष्टोमादिकर्मधनो नः। ५. क्ष-ञ१-ञ-ट–ददतम्। ६. क्ष-ञ-ट-ङ-ञ१–' द्रष्टव्यः ' इत्यस्यानन्तरम् ' अस्मत्प्रत्तव्यं हविः सर्वदा भक्षयतं ( ङ-ञ१–भक्षयतं वा )' इत्यधिकम्। ७. ञ–सर्वास्ववस्थायास्वपि। ८. क्ष-ञ-ट–ददतमित्यर्थः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वृषन्निन्द्र वृषपाणास इन्दव इमे सुता अद्रिषुतास उद्भिदस्तुभ्यं सुतास
उद्भिदः ॥ ते त्वा मन्दन्तु दावने महे चित्राय राधसे ।
गीर्भिर्गिर्वाहः स्तवमान आ गहि सुमृळीको न आ गहि ॥ ६ ॥

वृषन्। इन्द्र। वृषऽपानासः। इन्दवः। इमे। सुताः। अद्रिऽसुतासः। उत्ऽभिदः। तुभ्यम्। सुतासः। उत्ऽभिदः ॥ ते। त्वा। मन्दन्तु। दावने। महे। चित्राय। राधसे। गीःऽभिः। गिर्वाहः। स्तवमानः। आ। गहि। सुऽमृळीकः। नः। आ। गहि ॥ ६ ॥

हे [v]इन्द्र [v]वृषन् वर्षितः कामानाम् [v]इमे पुरतो दृश्यमानाः [v]इन्दवः सोमाः [v]सुताः त्वदर्थमभिषुताः। कीदृशास्ते। [v]वृषपानासः अभिमतवर्षकेण त्वया पातव्याः [v]अद्रिसुतासः अद्रिभिर्दृढैः पाषाणैरभिषवसाधनैः सुताः [v]उद्भिदः उद्भेदका वर्षस्य[1]। त एव पुनर्विशेष्यन्ते। [v]उद्भिदः बलस्य[2] उद्भेदका उद्भिन्ना वा पर्वतादौ तादृशाः सोमाः [v]तुभ्यं [v]सुतासः त्वदर्थमेवाभिषुताः। किंच [v]ते तादृशाः सोमाः [v]त्वा त्वां [v]मन्दन्तु तर्पयन्तु। कुत्रेति तदुच्यते। [v]दावने दानवति यागे। अभिमतदानाय वा। तथा [v]महे महते [v]चित्राय चायमानाय विचित्राय नानाविधाय वा [v]राधसे धनाय। किंच हे [v]गिर्वाहः गिरां स्तुतीनामस्मदीयानां वोढः[3] ॥ 'वहिहाधाभ्यः०' इति असुन् ॥ [v]गीर्भिः अस्मत्स्तुतिभिः स्तवमानः सन् [v]आ [v]गहि[3] आगच्छ। [v]नः अस्मान् [v]सुमृळीकः सुष्ठु मृडयिता सन् [v]आ [v]गहि आगच्छ[4] ॥

दशरात्रस्य षष्ठेऽहनि प्रातःसवने नेष्टुः प्रस्थितयाज्यायाः पुरस्तात् 'ओ षू णो अग्ने' इत्येषा आवपनीयैकीकृत्योभाभ्यां[5] यागः[5]। 'षष्ठस्य' इति खण्डे सूत्रितम्-'ओ षु णो अग्ने शृणुहि त्वमीळितोऽग्निं होतारम्' (आश्व. श्रौ. ८. १) इति ॥ तस्मिन्नेव सवने प्रउगशस्त्रे द्वितीया। सूत्रितं च-'अस्तु श्रौषळो षू णो अग्ने' (आश्व. श्रौ. ८. १) इति।

ओ षू णो अग्ने शृणुहि त्वमीळितो देवेभ्यो ब्रवसि यज्ञियेभ्यो राजभ्यो
यज्ञियेभ्यः ॥ यद्ध त्यामङ्गिरोभ्यो धेनुं देवा अदत्तन ।
वि तां दुह्रे अर्यमा कर्तरी सचाँ एष तां वेद मे सचा ॥ ७ ॥

ओ इति। सु। नः। अग्ने। शृणुहि। त्वम्। ईळितः। देवेभ्यः। ब्रवसि। यज्ञियेभ्यः। राजऽभ्यः। यज्ञियेभ्यः ॥ यत्। ह। त्याम्। अङ्गिरःऽभ्यः। धेनुम्। देवाः। अदत्तन। वि। ताम्। दुह्रे। अर्यमा। कर्तरि। सचा। एषः। ताम्। वेद। मे। सचा ॥ ७ ॥

---

१. क्ष-ङ-ञ१-ञ-ट-हर्षस्य। २. क्ष-ङ-ञ१-ञ-ट-फलस्य। ३. क्ष-ञ-ट-वोढः सन् स्तवमानः अस्माभिः स्तूयमानः सन् आ गहि। ४. क्ष-ञ१-ञ-ट-आगन्तुमर्हसि। ५. क्ष-ञ-ट-प्राकृतयैकीकृत्य उभाभ्यां यागः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [V]अग्ने [V]त्वं [V]नः अस्मदीयमावाहनं स्तुतिं वा [V]ईळितः अस्माभिः स्तुतः सन् [V]ओ [V]षु [V]श्रुणुहि । ओ इति निपातद्वयसमुदायात्मकः एको निपातः । आभिमुख्येनैव सुष्ठु श्रुणु ॥ ' उतश्च प्रत्ययात्° ' इति ' छन्दसि वावचनम् ' इति हेर्लुगभावः ॥ श्रुत्वा च [V]देवेभ्यः देवनशीलेभ्यः [V]यज्ञियेभ्यः यज्ञार्हेभ्यो हविर्भाग्भ्यः स्तुतिभाग्भ्यश्चेत्यर्थः ॥ ' यज्ञर्त्विग्भ्याम्° ' इति घः ॥ तेभ्यः [V]यज्ञियेभ्यः यज्ञार्हेभ्यो यजमानेभ्यः संबन्धि कर्म [V]ब्रवसि ब्रूहि ॥ ब्रवीतेर्लेटि अडागमः ॥ कीदृशेभ्यः । [V]राजभ्यः राजमानेभ्यः । इदानीं देवाः प्रत्यक्षेणोच्यन्ते । अत्रेतिहासमाहुः—अङ्गिरसो नाम महर्षयः पूर्वं यज्ञार्थं देवान् स्तुत्या[1] प्रीणयित्वा गा अयाचन्त । ते प्रीताः कामदुघां प्रादुः । लब्धां च तां धेनुं क्षीरं दोग्धुमशक्नुवाना अर्यमणं देवं प्रार्थयन् । स च प्रार्थितोऽग्निहोत्राद्यर्थं क्षीरं दुदोहेति । तदिदमत्रोच्यते । [V]यत् यां [V]त्यां तां प्रसिद्धां [V]धेनुं क्षीरादिना प्रीणयित्रीं गां [V]ह[2] [V]देवाः [V]अङ्गिरोभ्यः तदर्थम् [V]अदत्तन दत्तवन्तः ॥ ' तप्तनप्तनथनाश्च° ' इति तनादेशः[3] ॥ [V]तां धेनुम् [V]अर्यमा सर्वस्य नियमिता देवः [V]कर्तरि सर्वस्योत्पादके त्वय्यग्नौ [V]सचा इतरदेवेभ्यः साकं [V]वि [V]दुहे विविधं दुग्धवान् ॥ दुहेर्लिटि ' बहुलं छन्दसि ' इति रुट् । ' छन्दसि वा ' इति वचनात् द्विर्वचनाभावः । लटि एव वा ' लोपस्त° ' इति तलोपः ॥ [V]एषः एष एव अर्यमा [V]तां धेनुं [V]मे [V]सचा मत्समवायेन [V]वेद जानाति अर्यमा[4] अहमपि[4] जानामीत्यर्थः । ईदृशी धेनुस्त्वदर्थमेव दुह्यते इत्यग्नेः स्तुतिः ॥

' मो षु वो अस्मत् ' इति प्रस्थितयाज्या[5] । सूत्रितं च—' मो षु वो अस्मदभि तानि पौंस्यौ पूणो अग्ने ' ( आश्व. श्रौ. ८. १ ) इति ॥

**मो षु वो॑ अ॒स्मदा॒भि तानि॒ पौंस्या॒ सना॑ भूवन्द्यु॒म्नानि॒ मोत जा॑रिषु॒रस्मत्पु॒रोत जा॑रिषुः ॥ यद्वा॑श्चि॒त्रं यु॒गेयु॑गे॒ नव्यं॒ घोषा॒दम॑र्त्यम् ।**
**अ॒स्मासु॒ तन्म॑रुतो॒ यच्च॑ दु॒ष्टरं॑ दिधृता॒ यच्च॑ दु॒ष्टर॑म् ॥ ८ ॥**

मो इति॑ । सु । वः॒ । अ॒स्मत् । अ॒भि । तानि॑ । पौंस्या॑ । सना॑ । भू॒व॒न् । द्यु॒म्नानि॑ । मा । उ॒त । जा॒रि॒षुः॒ । अ॒स्मत् । पु॒रा । उ॒त । जा॒रि॒षुः॒ ॥ यत् । वः॒ । चि॒त्रम् । यु॒गेऽयु॑गे । नव्य॑म् । घोषा॑त् । अम॑र्त्यम् ॥ अ॒स्मासु॑ । तत् । म॒रु॒तः॒ । यत् । च॒ । दु॒स्तर॑म् । दि॒धृ॒त॒ । यत् । च॒ । दु॒स्तर॑म् ॥८॥

हे मरुतः [V]वः युष्मत्संबन्धीनि [V]तानि प्रसिद्धानि [V]पौंस्या पौंस्यानि बलानि [V]सना सदातनानि नित्यानि [V]द्युम्नानि प्रकाशयुक्तानि । यद्वा । सना संभजनीयानि द्युम्नानि धनवन्ति[6] यशोवन्ति वा ॥ मत्वर्थीयो लुप्यते । मो इति निपातद्वयसमुदाये उशब्दोऽवधारणे ॥ [V]अस्मत् अस्मान् [V]मो [V]षु [V]अभि [V]भूवन् सुष्ठु मैवाभिभवन् । यद्वा । अस्मत्तोऽपगतानि मा भूवन् । [V]उत अपि च । यद्वा । द्युम्नानीत्येतदुत्तरत्र संबध्यते । द्युम्नानि धनानि यशांसि वा अस्मदीयानि [V]मा [V]जारिषुः क्षीणानि मा भूवन् । [V]उत अपि च [V]अस्मत् [V]पुरा पुराणि लक्षणया तत्रस्थाः प्राणिनः मा [V]जारिषुः जीर्णा नष्टा मा भूवन् । किंच [V]वः युष्मत्संबन्धि [V]चित्रं चायनीयं

---

१. च-फ–यागे स्तुत्या । २. च-ज्ञ-त-फ–हे । ३. क्ष-ञ-ट–तस्य तनादेशः । ४. क्ष-ज्ञ१–ञ-ट–अर्यमावदहमपि । ५. क्ष-ञ-ट–पोतुः प्रस्थितयाज्या । ६. ज्ञ१–धनानि यशांसि वा धनवन्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नानाविधं ᵛनव्यं नूतनं स्तोतव्यं वा ᵛअमर्त्यम् अमरणधर्मकं मर्त्येषु दुर्लभं वा ᵛयत् अस्ति ᵛघोषात् घोषाः ॥ व्यत्ययेन पञ्चमी ॥ शब्दोपेता गवादयो घोषोपलक्षिता ग्रामनगरादयो वा ये सन्ति ᵛतत् सर्वं ᵛयुगेयुगे युगशब्दोपलक्षिते तत्तत्काले ᵛअस्मासु अस्मास्वेव भवत्विति शेषः नान्यस्य । किंच हे ᵛमरुतः ᵛयच्च ᵛदुस्तरं दुःखेन तरणीयं संपादनीयं धनं ᵛदिधृत धारयत[1] तदस्मासु । किंच ᵛदुस्तरं[2] शत्रुभिरहिंसितं तत्सर्वमपि विशेषेणास्मासु स्थापयत ॥

पृष्ठ्यस्य षष्ठेऽहनि अच्छावाकस्य प्रस्थितयाज्यायाः पुरस्तात् ' दध्यङ् ह मे ' इत्येषा । सूत्रितं च–' दध्यङ् ह मे जनुषं पूर्वो अङ्गिरा इत्येवमेव माध्यंदिने' ( आश्व. श्रौ. ८. १ ) इति ॥

दध्यङ् ह मे जनुषं पूर्वो अङ्गिराः प्रियमेधः कण्वो अत्रिर्मनुर्विदुस्ते मे
पूर्वे मनुर्विदुः ॥ तेषां देवेष्वायतिरस्माकं तेषु नाभयः ।
तेषां पदेन महा नमे गिरेन्द्राग्नी आ नमे गिरा ॥ ९ ॥

दध्यङ्। ह। मे। जनुषम्। पूर्वः। अङ्गिराः। प्रियऽमेधः। कण्वः। अत्रिः। मनुः। विदुः। ते। मे। पूर्वे। मनुः। विदुः ॥ तेषाम्। देवेषु। आऽयतिः। अस्माकम्। तेषु। नाभयः। तेषाम्। पदेन। महि। आ। नमे। गिरा। इन्द्राग्नी इति। आ। नमे। गिरा ॥ ९ ॥

ᵛदध्यङ् अथर्वगोत्रोत्पन्नः एतन्नामको महर्षिः स च ᵛपूर्वः पूरकः सर्वस्य पुरातनो वा ᵛअङ्गिराः अङ्गारः तद्वत्तेजस्वीत्यर्थः । यद्वा । अङ्गारा एवाङ्गिरसोऽभवन् ' येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन् ' ( ऐ. ब्रा. ३. ३४ ) इति श्रुतेः । ' अङ्गिरा अङ्गारा अङ्कना अञ्जनाः ' ( निरु. ३. १७. ) इति निरुक्तम्। एतन्नामा महर्षिश्च ᵛप्रियमेधः मेधाप्रियः । ' प्रियमेधः प्रिया अस्य मेधाः ' (निरु. ३.१७) इति यास्कः । स च ᵛकण्वः मेधावी स च ᵛअत्रिः दुःखत्रयरहितः । ' अत्रिर्न त्रयः ' (निरु.३.१७) इति निरुक्तम् । ᵛमनुः मननवान् एतन्नामा महर्षिः। एते सर्वे महात्मानो महर्षयः ᵛमे ᵛजनुषं दिवोदासपुत्रस्य परुच्छेपस्य जन्म ᵛविदुः जानन्ति ॥ वेत्तेः ' विदो लटो वा ' इति झेः उसादेशः ॥ किंच ᵛते पूर्वोक्ताः ᵛपूर्वे पूर्वकालीनाः ᵛमे अस्मत्पित्रादीन् जानन्त इत्यर्थः। ᵛमनुः मनवो ज्ञानवन्तो यतस्ते पूर्वे मनवश्च अतो ᵛविदुः इति भावः ॥ ' सुपां सुलुक्° ' इति जसो लुक् ॥ तेषां ज्ञाने उपपत्तिमाह। ᵛतेषां दध्यङ्डादीनां ᵛदेवेषु इतरेषु देवनशीलेषु महर्षिषु मध्ये ᵛआयतिः दीर्घकालसंबन्धोऽस्ति । अतो विदुरित्यर्थः । ततश्च किमित्याह । ᵛअस्माकं ᵛनाभयः जीवेन सह बन्धवन्तः[3] प्राणाः फलेन संबद्धा यागा वा ᵛतेषु तेष्वेव वर्तन्ते । असौ विशिष्टजन्मा अतो यज्ञयोग्यः इति तैर्वक्तव्यत्वेन तदधीनत्वम् । ᵛतेषां दध्यङ्डादीनां ᵛपदेन आस्पदेन महत्त्वेन निमित्तेन ᵛगिरा स्तुतिरूपया वाचा ᵛमहि महदप्यधिकं[4] ᵛनमे नमति सर्वो जनः । किंच तेषामनुग्रहात् यज्ञयोग्यः सन् ᵛइन्द्राग्नी ᵛगिरा स्तुतिरूपया वाचा युक्तः सन् ᵛआ ᵛनमे आभिमुख्येन नमामि स्तौमि नमामि चेत्यर्थः ॥ नमेर्व्यत्ययेन आत्मनेपदम् ॥ यद्वा । कर्मकर्तरि ' न दुहस्नुनमाम्° ' इति यकः प्रतिषेधः ॥ स्वयमेव नतोऽस्मि[5] ॥

---

१. क्ष-ङ-ज्ञ१-ञ-ट–' धारयत ' इत्यस्यानन्तरं ' धारयथ । धृञ् धारणे । बहुलं छन्दसीति शपः श्लुः । उद्दिभ्य ( क्ष-ञ-ट–इदिद्भ्यः ? ) इत्यनुवृत्तौ बहुलं छन्दसीति अभ्यासस्य इत्त्वं ' इत्यधिकम् । २. च-फ–यच्च दुस्तरम् । ३. क्ष-ञ-ट–बन्धनवन्तः । ४. ज्ञ१–महत् आ अधिकम् । ५. ङ-ज्ञ१–आनतोऽस्मि ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

होता यक्षद्वनिनो वन्त वार्यं बृहस्पतिर्यजति वेन उक्षभिः
पुरुवारेभिरुक्षभिः ॥ जगृभ्मा दूरआदिशं श्लोकमद्रेरध त्मना ।
अधारयदररिन्दानि सुक्रतुः पुरू सद्मानि सुक्रतुः ॥ १० ॥

होता । यक्षत् । वनिनः । वन्त । वार्यम् । बृहस्पतिः । यजति । वेनः । उक्षऽभिः ।
पुरुऽवारेभिः । उक्षऽभिः ॥ जगृभ्म । दूरेऽआदिशम् । श्लोकम् । अद्रेः । अध । त्मना ।
अधारयत् । अररिन्दानि । सुऽक्रतुः । पुरु । सद्मानि । सुऽक्रतुः ॥ १० ॥

अयं [v]होता दैव्योऽग्निर्मानुषो वा देवानामाह्वाता [v]यक्षत् याज्यां पठतु[1] ॥ यजेर्लेटि अडागमः । ' सिब्बहुलम्° ' इति सिप् ॥ [v]वनिनः वननवन्तः हविः कामयमाना वा देवाः [v]वार्यं वरणीयं सोमं [v]वन्त संभजन्ताम् ॥ वनतेश्छान्दसे लङि व्यत्ययेन आत्मनेपदम् । ' बहुलं छन्दसि ' इति शपो लुक् । छान्दसोऽन्त्यलोपः ॥ तदर्थं [v]बृहस्पतिः बृहतो मन्त्रस्य हविषो वा पालकोऽध्वर्युर्दैव्यो बृहस्पतिर्वा स्वयमेव [v]यजति यागं करोति । कीदृशः सः । [v]वेनः कामयमानः । केन साधनेनेति तदुच्यते । [v]उक्षभिः सेचकैः सोमैः [v]पुरुवारेभिः बहुभिर्वरणीयैः तथा [v]उक्षभिः सेचनसमर्थैरुदकैः तन्निमित्तभूतैर्हूयमानैराहुतिभिरादित्यद्वारा वृष्ट्युत्पन्नैः। वयं यजमानाः [v]दूरआदिशं दूरदेश आदिक्[2] आदेशो यस्य[2] तादृशम् ॥ ' हलदन्तात्सप्तम्याः° ' ( पा. सू. ६. ३. ९ ) इति अलुक् ॥ [v]अद्रेः । जातावेकवचनम् । अभिषवसाधनस्य ग्राव्णः [v]श्लोकं वाचं[3] ध्वनिं[3] [v]जगृभ्म गृह्णीमः[3] श्रोत्राभ्याम् । पूजार्थं बहुवचनम् । इदानीं परोक्षकृतः । [v]सुक्रतुः शोभनकर्मा अयं यजमानः [v]अध अथ यागसंपूर्त्यनन्तरम् [v]अररिन्दानि । उदकनामैतत्, ' अररिन्दानि ध्वस्मन्वत् ' ( नि. १. १२. २६ ) इति तन्नामसु पाठात् । वृष्टिलक्षणान्युदकानि [v]त्मना आत्मना [v]अधारयत् धारयति ॥ ररिर्दाता । नास्त्यन्यो ररिरस्य पिपासोपशमनस्य तादृशं पिपासोपशमनं ददतीत्यररिन्दानि । यद्वा । अरिः इतश्चेतश्च गमनम् । औणादिकः अरिप्रत्ययः[4]। ' आतोऽनुपसर्गे कः' । पृषोदरादित्वात् अभिमतस्वरूपस्वरसिद्धिः[5]। तद्ददतीत्यररिन्दानि उदकानि । चेष्टाप्रदानीत्यर्थः । ' आपोमयः प्राणः ' (छा. उ. ६. ५. ४) इति श्रुतेः। यद्वा । ररिर्दानम् । न विद्यते तादृशं दानमितरभूतेषु तत् अररि । तद्ददतीत्यररिन्दानि । अन्यैरदेयं लोकोपकारिभोगं[6] ददतीत्यर्थः ॥ तादृशान्युदकानि यागेनोत्पादितवानित्यर्थः। किंच [v]सुक्रतुः शोभनकर्मा अयं [v]पुरु पुरूणि बहूनि [v]सद्मानि सदनानि सुखनिवासयोग्यानि गृहाणि अधारयत् । यद्वा । बृहस्पतिः सुक्रतुश्च[7] अयमध्वर्युः अररिन्दानि उक्तलक्षणानि अभिषवसाधनान्युदकानि अधारयत् । धारितवान् । तथा सुक्रतुः शोभनप्रज्ञः पुरु सद्मानि सदनानि हविरासादनस्थानान्यधारयत् ॥

दशरात्रे षष्ठेऽहनि प्रउगशस्त्रे वैश्वदेवतृचस्य द्वितीया ' ये देवासः ' इत्येषा । सूत्रितं च–' ये देवासो दिव्येकादश स्थेयमददाद्रभसम् ' ( आश्व. श्रौ. ८. १ ) इति ॥

---

१. क्ष-ज्ञ१-ञ-ट–पठति । २. क्ष-ङ-ञ-ट–आदिशमादेश्यं यत् । ३. क्ष-ङ-ज्ञ१-ञ-ट– वाचं ध्वनिम् होत्रादीनां स्तोत्रशस्त्रध्वनिं वा जगृभ्म गृह्णीमः । °ततन्थ जगृभ्मेति इडभावो निपात्यते । हृग्रहोर्भः । ४. ङ-ज्ञ१–' अरिप्रत्ययः ' इत्यस्यानन्तरं ' स्वकीयेनोपकारेण ददतीत्यररिन्दानि उदकानि ' इत्यधिकम् । ५. क्ष-ङ-ञ-ट–अभिमतरूपस्वरसिद्धिः । ६. क्ष-ञ-ट–जीवनलोकोपकारिभोगम् ; ज्ञ१–जीवलोकोपकारिभोगम् । ७. क्ष-ङ-ज्ञ१-ञ-ट–सुक्रतुर्वा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ये देवासो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ ।
अप्सुक्षितो महिनैकादश स्थ ते देवासो यज्ञमिमं जुषध्वम् ॥ ११ ॥

ये । देवासः । दिवि । एकादश । स्थ । पृथिव्याम् । अधि । एकादश । स्थ ।
अप्सुऽक्षितः । महिना । एकादश । स्थ । ते । देवासः । यज्ञम् । इमम् । जुषध्वम् ॥ ११ ॥

हे [v]देवासः देवा द्योतनशीलाः [v]ये यूयं [v]दिवि द्युलोके [v]एकादश [v]स्थ एकं च दश चेत्ये-तत्संख्याका भवथ तथा [v]पृथिव्यामधि उपरि [v]एकादश [v]स्थ एतत्संख्याका भवथ किंच [v]अप्सुक्षितः[1] । तद्धेतुत्वात् ताच्छब्द्यम् । अप्सु अन्तरिक्षे क्षियन्ति निवसन्तीत्यप्सुक्षितः ॥ क्षियतेः क्विप् । ' तत्पुरुषे कृति° ' इति अलुक् ॥ अन्तरिक्षवासिनो देवाः[2] [v]एकादश [v]स्थ तत्संख्याका भवथ[3] । यद्वा । अन्त-रिक्षस्थेयं संज्ञा । ' आपः पृथिवी ' ( नि. १. ३. ८ ) इति अन्तरिक्षनामसु पाठात् । यद्यपि ' तिस्रः एव देवताः ' ( निरु. ७. ५ ) इत्युक्तत्वात् क्षित्याद्यभिमानिन्यो देवतास्तिस्र एव तथापि [v]महिना महत्त्वेन स्वस्वविभूत्या त्रयस्त्रिंशत्संख्याका भवन्ति । तत्तत्स्थाना अन्यास्तद्विभूतयः इत्युक्तत्वात् । महिना देवासः इत्येते सर्वत्र संबध्येते । [v]ते यूयं हे [v]देवासः मिलित्वा उक्तसंख्याका देवाः [v]इमम् अस्मदीयं [v]यज्ञं [v]जुषध्वं संभजध्वम् । तत्संबन्धि हविर्वा सेवित्वा प्रीणयध्वम् ॥ एकं च दश चैकादश । ' प्रागेकादशभ्यः° ' ( पा. सू. ५. ३. ४९ ) इति निपातनात् दीर्घः । ' संख्या ' इति पूर्वपदप्रकृति-स्वरत्वम् ॥ ४ ॥ ॥ २० ॥

एकविंशेऽनुवाके सप्तदश सूक्तानि । तत्र ' वेदिषदे ' इति प्रथमं सूक्तं त्रयोदशर्चम् । उचथ्यपुत्रस्य दीर्घतमस आर्षम् आग्नेयम् । अन्त्ये[4] त्रिष्टुभौ । शिष्टास्त्रिष्टुबन्तपरिभाषया जगत्यः । दशमी त्रिष्टुब्ज-गती वा । अत्यष्टिपरिभाषा निवृत्ता । अत्रानुक्रमणिका–' वेदिषदे सप्तोना दीर्घतमा औचथ्य आग्नेयं तु द्वित्रिष्टुबन्तं तु त्रिष्टुब्दशमी वा ' इति । प्रातरनुवाकस्याग्नेये क्रतौ जागते छन्दसि इदमादीनि तृतीय-वर्जितानि षट् सूक्तानि विनियुक्तानि । तथाश्विनशस्त्रे पण्णां तृतीयवर्जितानां[5] सूक्तानां विनियोगः ॥ सूत्रितं च–' वेदिषद इति पण्णां तृतीयमुद्धरेत् ' ( आश्व. श्रौ. ४. १३ ) इति ॥

वेदिषदे प्रियधामाय सुद्युते धासिमिव प्र भरा योनिमग्नये ।
वस्त्रेणेव वासया मन्मना शुचिं ज्योतीरथं शुक्रवर्णं तमोहनम् ॥ १ ॥

वेदिऽसदे । प्रियऽधामाय । सुऽद्युते । धासिम्ऽइव । प्र । भर । योनिम् । अग्नये ।
वस्त्रेणऽइव । वासय । मन्मना । शुचिम् । ज्योतिःऽरथम् । शुक्रऽवर्णम् । तमःऽहनम् ॥ १ ॥

हे अध्वर्यो [v]वेदिषदे वेद्यां सीदते नित्यं [v]प्रियधामाय प्रियधाम्ने प्रियस्थानाय उत्तरवेदिलक्षण-प्रियाय[7] [v]सुद्युते शोभनद्योतनाय [v]अग्नये अग्रनयनादिगुणविशिष्टाय [v]योनिं स्थानं वेद्याख्यं [v]धासिमिव

---

१. ङ-ज्ञ१–हे अप्सुक्षितः । २. ज्ञ१–देवासो देवाः । ३. क्ष-ङ-ज्ञ१-ञ-ट–भवथ । प्रदेशबाहुल्यमपेक्ष्य बहुवचनम् । ४. क्ष-ङ-ञ-ट–अन्त्ये द्वे । ५. क्ष-ञ-ट–तृतीयावर्जितानाम् । ६. त-फ–धाम्ने । ७. क्ष-ञ-ट-ज्ञ१–उत्तरवेदिलक्षणस्थानप्रियाय; च-फ–उत्तरवेदिलक्षणप्रियस्थानाय । ८. क-ज-ज्ञ-ञ्ञ-ण-न-व–अन्नादिना गुणविशिष्टाय; क्ष-ख-ङ-च-ञ-ट-फ–अञ्जनादिगुणविशिष्टाय ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हवीरूपमन्नमिव [v]प्र [v]भर प्रहर प्रकर्षेण संपादयेत्यर्थः । तच्च स्थानं [v]वस्रेणेव तेन यथा मार्दवाय आस्तृणाति तद्वत् [v]मन्मना मननीयेन संभारेण बर्हिषा वा वेदिस्थानं [v]वासय आच्छादय । कीदृशं तत्स्थानमिति तदुच्यते। [v]शुचिम् उत्पवनप्रोक्षणादिना अमेध्यासुरादीनाम् अपगतत्वात् शुद्धं [v]ज्योतीरथं ज्योतिषः आज्यादेरग्नेर्वा रथस्थानीयम् आधारभूतत्वात् [v]शुक्रवर्णम् अग्न्युपेतत्वाद्दीप्तवर्णम् अत एव [v]तमोहनं तमसोऽन्धकारस्य हन्तारमज्ञानस्य वा । अग्निसाध्ययज्ञादिद्वारा ज्ञानविचारकत्वादिति[1] भावः । यद्वा । तस्यां योनौ स्थाने वस्रेण यथा गोपनीयं वस्तु गोपयन्ति[2] तद्वत्तमग्निं वासय निवासय स्थापय । मन्मना मननीयेन हृद्येन वस्रसदृशेन मृदुकाष्ठादिना आच्छादय वा । कीदृशम्[3]। ज्योतीरथं दीप्तिरथोपेतम्[4] । शेषं पूर्ववत् ॥

अभि द्विजन्मा त्रिवृदन्नमृज्यते संवत्सरे वावृधे जग्धमी पुनः ।
अन्यस्यासा जिह्वया जेन्यो वृषा न्य१न्येन वनिनो मृष्ट वारणः ॥ २ ॥

अभि । द्विऽजन्मा । त्रिऽवृत् । अन्नम् । ऋज्यते । संवत्सरे । ववृधे । जग्धम् । ईमिति । पुनरिति । अन्यस्य । आसा । जिह्वया । जेन्यः । वृषा । नि । अन्येन । वनिनः । मृष्ट । वारणः ॥२॥

[v]द्विजन्मा[5] द्वाभ्यामरणीभ्यां जायमानः । यद्वा । मथनेन आधानसंस्कारेण च उत्पन्नत्वात् द्विजन्मत्वम् ॥ ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन् ॥ अयमग्निः [v]त्रिवृदन्नम् आज्यपुरोडाशसोमरूपेण त्रिप्रकारमन्नमदनीयम् [v]अभि [v]ऋज्यते प्राप्नोति अभितः[6] आभिमुख्येन नयति भक्षयति[6]॥ ' ऋज गतिस्थानार्जनोपार्जनेषु ' । व्यत्ययेन श्यन् ॥ यद्वा[7]। भृज्यते ॥ ' भ्रस्जो पाके ' ॥ पक्वं करोति वा[7] । किंच [v]ई इदम् ॥ ईमित्यत्र सांहितिको मलोपश्छान्दसः॥ [v]जग्धं भक्षितं [v]संवत्सरे[8] पूर्णे [v]पुनः [v]ववृधे अग्निर्वर्धयति । जीर्णस्य पुनर्वृद्ध्यभावात् यजमानं हविर्वृद्ध्या प्रतिसंवत्सरं यागसमर्थं करोतीत्यर्थः[8] । यद्वा । एकवारं भक्षितं हविः पुनः संवत्सरे पूर्णे संवत्सरे उदरस्थं वर्धते वर्धयति वा भक्षितारम्[9]। किंचायमग्निः [v]वृषा वर्षकः सन् [v]अन्यस्य हविषः [v]आसा[10] आस्येन [v]जिह्वया[10] [v]जेन्यः प्रभूतो भवतीति शेषः । यद्वा । वर्षिता सन् एकेन रूपेणान्यस्य यज्ञे होत्रादेर्जिह्वया तदुपलक्षितया स्रुचा[11] जेन्यः प्रवृद्धो भवति । तथा [v]अन्येन दावाग्निरूपेण [v]वारणः सर्वेषां वारकः सन् [v]वनिनः वनसंबन्धिनो वृक्षान् [v]नि [v]मृष्ट निमार्ष्टि दहतीत्यर्थः ॥ मृजेश्छान्दसे लङि व्यत्ययेन आत्मनेपदम् ॥

---

१. क्ष-ज्ञ१-अ-ट–अज्ञाननिवारकत्वादिति । २. क्ष-ङ-ज्ञ१-अ-ट–गोपायन्ति । ३. क्ष-ङ-ज्ञ१-अ-ट–कीदृशं तं । ४. क्ष-ङ-ज्ञ१-अ-ट–दीप्तरथोपेतम् । ५. क्ष-ङ-ज्ञ-अ-ट–अयमग्निः द्विजन्मा । ६. क्ष-ज्ञ१-अ-ट–अभि आभिमुख्येन याति आभिमुख्येन भक्षयति । ७. क्ष-ङ-ज्ञ१-अ-ट–यद्वा ऋज्यते । ऋजो पाके । पक्वं करोति ( क्ष-अ-ट–पक्वं करोति वा )। ८. क्ष-ङ-ज्ञ१-अ-ट–संवत्सरे संवत्सरे पूर्णे ववृधे ( क्ष-अ-ट–पुनर्ववृधे ) । अयमग्निर्वर्धयति । क्षीणस्य पुनर्वृद्ध्यभावाद्यजमाने हविर्वृद्ध्या प्रतिसंवत्सरं यागसामर्थ्यं करोतीत्यर्थः । ९. क्ष-अ-ट–भक्षयितारम् । १०. क्ष-अ-ट–आसा आस्वादयित्र्या स्वीकुर्वत्या जिह्वया; ङ-ज्ञ१–आसा आस्वादयन्त्या स्वीकुर्वत्यः ( ज्ञ१–स्वीकुर्वत्या ) जिह्वया । ११. क्ष-ङ-ज्ञ-ज्ञ१-अ-ट–स्तुत्या ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कृष्णप्रुतौ वेविजे अस्य सक्षिता उभा तरेते अभि मातरा शिशुम् ।
प्राचाजिह्वं ध्वसयन्तं तृषुच्युतमा साच्यं कुपयं वर्धनं पितुः ॥ ३ ॥

कृष्णऽप्रुतौ । वेविजे इति । अस्य । सऽक्षितौ । उभा । तरेते इति । अभि । मातरा । शिशुम् । प्राचाऽजिह्वम् । ध्वसयन्तम् । तृषुऽच्युतम् । आ । साच्यम् । कुपयम् । वर्धनम् । पितुः ॥३॥

vअस्य अग्नेः vमातरा मातृस्थानीये उत्पादयित्र्यौ vउभा उभे अरण्याख्ये मातरौ vवेविजे चलतः ॥ 'ओविजी भयचलनयोः' । अस्मात् यङ्लुगन्तात् व्यत्ययेन आत्मनेपदमेकवचनं च । 'लोपस्त आत्मनेपदेषु' इति तलोपः । 'चादिलोपे विभाषा' इति निघाताभावः ॥ मथनोपक्रमे vकृष्णप्रुतौ अग्निसंपर्कात् कृष्णवर्णतां प्राप्नुवत्यौ प्रापयन्त्यौ वा भूमिं तथा vसक्षितौ समानकार्यमग्न्युत्पादनं गच्छन्त्यौ एवंभूते मातरौ vशिशुं शिशुवदुत्पत्तिसमये अत्यल्पमग्निम् vअभि vतरेते आभिमुख्येन प्राप्नुतश्च । कीदृशं शिशुम् । vप्राचाजिह्वं प्राग्देशस्थितजिह्वास्थानीयज्वालं vध्वसयन्तं[1] तमो नाशयन्तं vतृषुच्युतम् अरणीभ्यां क्षिप्रं निर्गच्छन्तम् अक्लेशेन योनेः[2] सकाशात् शीघ्रमुत्पद्यमानम् । vआ ईषत् vसाच्यं समवेतव्यं[3] मृदुकाष्ठचूर्णादिना vकुपयं गोपनीयं vपितुः पालकस्य यजमानस्य vवर्धनं प्रवर्धनं प्रवर्धयितारम् । उक्तप्रकारैः लौकिकशिशुसाधारणैः[4] उपेतं शिशुमग्निं मातरावुत्पादयतः इत्यर्थः ॥

मुमुक्ष्वो३ मनवे मानवस्यते रघुद्रुवः कृष्णसीतास ऊ जुवः ।
असमना अजिरासो रघुष्यदो वातजूता उप युज्यन्त आशवः ॥ ४ ॥

मुमुक्ष्वः । मनवे । मानवस्यते । रघुऽद्रुवः । कृष्णऽसीतासः । ऊँ इति । जुवः ।
असमनाः । अजिरासः । रघुऽस्यदः । वातऽजूताः । उप । युज्यन्ते । आशवः ॥ ४ ॥

vमनवे मननवते vमानवस्यते मानवान् ऋत्विजः कर्मार्थमिच्छते यजमानाय तदर्थमध्वर्यवादिभिः अग्नेर्ज्वालाः vउप vयुज्यन्ते यज्ञेषु । सूक्तस्याग्नेयत्वात् औचित्यात् ज्वाला इति गम्यते । कीदृश्यस्ताः । vमुमुक्ष्वः मुमुक्षव आहुतिद्वारा यजमानं मोक्तुमिच्छन्त्यः ब्रह्मलोकं प्रापयन्त्यः ॥ 'जसादिषु च्छन्दसि वावचनम्' इति गुणाभावः । ज्वालानामाहुतिद्वारा ब्रह्मलोकप्राप्तिसाधनत्वं 'काली कराली' इत्युपक्रम्य श्रूयते–'एतेषु यश्चरते भ्राजमानेषु यथाकालं चाहुतयो ह्याददायन् । तं नयन्त्येताः सूर्यस्य रश्मयो यत्र देवानां पतिरेकोऽधिवासः' (मु. उ. १. २. ४–५) इति । vरघुद्रुवः क्षिप्रं गच्छन्त्यः vकृष्णसीतासः कृष्णमार्गाः । उकारः समुच्चयार्थः । vजुवः जवनशीलाः शीघ्रकारिण्यः स्वव्यापारेषु vअसमनाः असमानमनस्काः । काश्चन[5] प्राङ्मुख्यो गच्छन्ति काश्चन प्रत्यङ्मुख्यः इति विविधमनस्काः ॥ व्यत्ययेनैकवचनम् ॥ यद्वा । असमना भिन्नवर्णाः । भिन्नवर्णत्वं च तत्रैव श्रूयते–'काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा । स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्त जिह्वाः' इति ।

---

१. क्ष-ञ-ट-ध्वसयन्तम् । स्वतेजसा तमो ध्वंसयन्तम्; ङ-ञ१-ध्वसयन्तम् । स्वतेजसा तमो ध्वसयन्तम् । २. क्ष-ङ-ञ१-ञ-ट-तयोः । ३. क्ष-ञ१-ञ-ट-उपरीतन्यम् (?) । ४. क्ष-ङ-ज्ञ-ञ-ञ१-ञ-ट-लौकिकशिशुसाधारणधर्मैः । ५. ञ-अन्याः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vअजिरासः गमनशीलाः vरघुस्यदः शीघ्रं स्यन्दमानाः vवातजूताः वातप्रेरिताः । ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् । vआशवः व्यापनशीलाः ॥

आदस्य ते ध्वसयन्तो वृथेरते कृष्णमभ्वं महि वर्पः करिक्रतः ।
यत्सीं महीमवनिं प्राभि मर्मृशदभिष्वसन्त्स्तनयन्नेति नानदत् ॥ ५ ॥

आत् । अस्य । ते । ध्वसयन्तः । वृथा । ईरते । कृष्णम् । अभ्वम् । महि । वर्पः । करिक्रतः ।
यत् । सीम् । महीम् । अवनिम् । प्र । अभि । मर्मृशत् ।
अभिऽश्वसन् । स्तनयन् । एति । नानदत् ॥ ५ ॥

vआत् अनन्तरम् vअस्य स्तूयमानस्याग्नेः vते प्रसिद्धा विस्फुलिङ्गाः vवृथा[1] सहैव vईरते सर्वतो गच्छन्ति । कीदृशास्ते । vध्वसयन्तः तमांसि ध्वंसयन्तः तथा vकृष्णवर्णम्[2] vअभ्वं महान्तमभिभवन्मनमार्गं[3] vमहि महत् vवर्पः रूपं प्रकाशं vकरिक्रतः अत्यर्थं कुर्वन्तः । कस्मिन् काले इति तदुच्यते । vयत् यदा vमहीं महतीम् vअवनिं भूमिं vसीं सर्वतः vमर्मृशत् पुनःपुनरामृशत् ॥ मृशेर्यङ्लुगन्तात् शतरि ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् ॥ vअभिश्वसन्[4] सर्वतश्चेष्टमानः vस्तनयन् शब्दं कुर्वन् vनानदत् अत्यर्थं शब्दयन् ॥ पूर्ववत् प्रत्ययस्वरौ ॥ अभितः प्रकर्षेण vएति गच्छति । यदा इतस्ततो जिह्वाभिर्लेलिहानो भुगुभुगुध्वनिं कुर्वन् ज्वलति तदैव[5] विस्फुलिङ्गा उद्भवन्तीत्यर्थः ॥ ॥ ५ ॥

भूषन्न योऽधि बभ्रूषु नम्नते वृषेव पत्नीरभ्येति रोरुवत् ।
ओजायमानस्तन्वश्च शुम्भते भीमो न शृङ्गा दविधाव दुर्गृभिः ॥ ६ ॥

भूषन् । न । यः । अधि । बभ्रूषु । नम्नते । वृषाऽइव । पत्नीः । अभि । एति । रोरुवत् ।
ओजायमानः । तन्वः । च । शुम्भते । भीमः । न । शृङ्गा । दविधाव । दुःऽगृभिः ॥६॥

vयः अग्निः vबभ्रूषु बभ्रुवर्णास्वोषधीषु भरणकुशलासु वा जगताम् vअधि अधिकं vनम्नते नमति काष्ठानि प्रविशति ॥ नमतेर्लेटि अडागमः । व्यत्ययेन श्ना[6] । यद्वा । लटि छान्दसः शपः श्लुः । व्यत्ययेन हलादिशेषाभावः ॥ vभूषन्न[7] भूतान्येव[8] स्वतेजसा भूषयन्निव । किंचायं प्रविशन्[9] vवृषेव सेक्ता वृषभ इव vपत्नीः तमेव पालयित्रीः समर्धयित्रीः ओषधीः vरोरुवत् । रौतेर्यङ्लुगन्तात् शतरि ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् ॥ अत्यर्थं शब्दयन् vअभ्येति अभितो गच्छति । प्रथमम् ओषधीः प्रविश्य पश्चात् प्रबुद्धः सन् ता एव दहतीत्यर्थः । किंचैवं कृत्वा vओजायमानः । ओज इति बलनाम । स्वयं बलमिवाचरन् ॥ ' कर्तुः क्यङ् सलोपश्च ' इति क्यङ्सलोपौ ॥ धूमादिभिर्विना केवलं तेजोरूप एव सन् vतन्वश्च vशुम्भते स्वशरीरभूता ज्वाला अपि दीपयति पोषयतीत्यर्थः । किंच प्रवृद्धज्वालः vदुर्गृभिः

---

१. ङ-ञ१-तव वृथा । २. क्ष-ञ-ट-कृष्णं कृष्णवर्णम् । ३. क्ष-ङ-ञ-ट-तमसां मार्गम् । ४. क्ष-ङ-ञ१-ञ-ट-तृणादिषु संलग्नं अभिश्वसन् । ५. क-क्ष-ख-ञ१-ञ-ट-ण-न-व-तदैवम् । ६. क्ष-ञ१-ञ-ट-आत्मनेपदम् । ७. क्ष-ङ-ञ१-ञ-ट-किं कुर्वन् । भूषन्न तान्येव । ८. क्ष-ङ-ञ१-ञ-ट-प्रविष्टः सन् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

केनचिदपि ग्रहीतुमशक्यः सन् vभीमो vन भयंकरो मृग इव स यथा दुर्ग्रहः सन् शृङ्गं चालयति तद्वदयमपि शृङ्गाणि[1] शृङ्गवदुन्नता ज्वालाः vदविधाव अत्यर्थं चालयति ॥ धुनोतेर्यङ्लुगन्तात् लिटि रूपम् । अस्य च दाधर्त्यादौ इति शब्देन संग्रहो द्रष्टव्यः[2] ॥

स संस्तिरो विष्टिरः सं गृभायति जानन्नेव जानतीर्नित्य आ शये ।
पुनर्वर्धन्ते अपि यन्ति देव्यमन्यद्वपुः पित्रोः कृण्वते सचा ॥ ७ ॥

सः । सम्ऽअस्तिरः । विऽअस्तिरः । सम् । गृभायति । जानन् । एव । जानतीः । नित्यः । आ । शये । पुनः । वर्धन्ते । अपि । यन्ति । देव्यम् । अन्यत् । वपुः । पित्रोः । कृण्वते । सचा ॥ ७ ॥

vसः अग्निः vसंस्तिरः आच्छन्नः[3] ॥ संपूर्वात् स्तृणातेर्मूलविभुजादित्वात् कप्रत्ययः ( पा. सू. ३. २. ५. २. ) । 'परादिश्छन्दसि बहुलम्' इत्युत्तरपदाद्युदात्तत्वम् ॥ तथा vविस्तिरः कदाचित् विस्तीर्णः सन् vसं vगृभायति संगृह्णात्योषधीः । किंचायं vजानन्नेव यजमानार्थं प्रवृद्धेन भवितव्यम् अतो ज्वालाभिः संयोज्यः इत्यधिगच्छन्नेव vजानतीः यजमानार्थं प्रवृद्धाभिर्भवितव्यम् इत्यवगच्छन्तीर्ज्वालाः vनित्यः अविच्छिन्नः सन् vआ vशये आशेते आश्रयतीत्यर्थः ॥ 'लोपस्त आत्मनेपदेषु' इति तलोपः ॥ एवंभूतज्वालाः vपुनः पूर्वं प्रवृद्धा एव पुनरपि यागयोग्या यथा भवन्ति तथा vवर्धन्ते । vदेव्यं यागादिव्यवहारयोग्यं स्तुत्यं वा अग्निम् vअपि vयन्ति प्राप्नुवन्ति । यद्यप्यग्निज्वालयोरेकत्वं तथापि 'राहोः शिरः' इतिवदौपचारिको गन्तृगन्तव्यभावः । किंचैवं प्रवृद्धा ज्वाला ओषधयो वा vसचा अग्निना सह vपित्रोः जगत्पालयित्रोस्ताभ्यां संभूय द्यावापृथिव्योः vअन्यत् पूर्वमविद्यमानं तेजोमयं vवपुः रूपं vकृण्वते कुर्वन्ति लोकद्वयं स्पृशन्तीत्यर्थः ॥

तमग्रुवः केशिनीः सं हि रेभिर ऊर्ध्वास्तस्थुर्मघुषीः प्रायवे पुनः ।
तासां जरां प्रमुञ्चन्नेति नानददसुं परं जनयञ्जीवमस्तृतम् ॥ ८ ॥

तम् । अग्रुवः । केशिनीः । सम् । हि । रेभिरे । ऊर्ध्वाः । तस्थुः । मघुषीः । प्र । आयवे । पुनरिति । तासाम् । जराम् । प्रऽमुञ्चन् । एति । नानदत् । असुम् । परम् । जनयन् । जीवम् । अस्तृतम् ॥ ८ ॥

vतम् अग्निम् vअग्रुवः अग्रतः स्थिताः । यद्वा । अङ्गुलिनामैतत् । अङ्गुलय इव अकुटिलाः । vकेशिनीः केशस्थानीयोर्ध्वभाविकाष्र्योपेताः[4] ज्वालाः vसं vरेभिरे vहि परिरम्भं कुर्वन्ति खलु आलिङ्गन्ति । किंचैवं कुर्वत्यः vमघुषीः मृता अङ्गारभावमापन्ना अपि ॥ म्रियतेः क्सुप्रत्ययान्तात् ङीपि रूपम् ॥ vआयवे आगच्छतेऽग्नये भर्त्रे vपुनः स्वोपद्रवमजानत्यः vऊर्ध्वाः vप्र vतस्थुः ऊर्ध्वमुखा उन्नताः प्रतस्थिरे मृतप्राया अपि प्रत्युत्थानं कृतवत्य इत्यर्थः । एवं कृतवतीषु सतीषु स भर्ताग्निः vतासां

---

१. क्ष-झ-झ१-ञ-ट–शृङ्गा शृङ्गाणि । २. क्ष-झ१-ञ-ट–ग्राह्यः द्रष्टव्यः । ३. क्ष-ङ-झ१-ञ-ट–कदाचित् संच्छन्नः । ४. क्ष-ङ-झ१-ञ-ट–केशस्थानीयोर्ध्वतावैशिष्ट्योपेताः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ज्वालानां [v]जरां वयोहानिं [v]प्रमुञ्चन् प्रकर्षेण मोचयन् [v]नानदत् जरापरिहाराय मन्त्रयन्निव आत्मार्थं शब्दयन्। न केवलं जराहानिरेव अपि तु [v]परं निरतिशयम् [v]असुं प्राणम् [v]अस्तृतं काष्ठोदकादि-प्रक्षेपेणाप्यहिंसितं [v]जीवं प्राणधारणसामर्थ्यं [v]जनयन् उत्पादयन् [v]एति गच्छति। तासां ज्वालानां संनिधिं प्राप्नोति। यथा लोके काश्चन रमण्यो रमणेन सह निर्भरं क्रीडित्वा पश्चात् प्रोषिते तस्मिन् विरहेण जीर्णा म्रियमाणाः पश्चात् तस्मिन्नागते सति स्वदौर्बल्यमगणयित्वा संतोषेण परिष्वङ्गाय चेष्टन्ते। स भर्ता मन्त्रोच्चारणेन जराम् अपनीय उचितप्रदानेन प्राणयन्[1] रक्षति[1] इत्ययं भावोऽत्रानुसंधेयः॥

अधीवासं परि मातू रिहन्नह तुविग्रेभिः सत्वभिर्याति वि ज्रयः।
वयो दधत्पद्वते रेरिहत्सदानु श्येनी सचते वर्तनीरह ॥ ९ ॥

अधीवासम्। परि। मातुः। रिहन्। अह। तुविऽग्रेभिः। सत्वऽभिः। याति। वि। ज्रयः।
वयः। दधत्। पत्ऽवते। रेरिहत्। सदा। अनु। श्येनी। सचते। वर्तनिः। अह ॥९॥

दावाग्निः स्तूयते। अयमग्निः [v]मातुः भूतानां निर्मातुर्भूमेः [v]अधीवासम् उपर्याच्छादनस्थानीयं तृणगुल्मौषध्यादिकं [v]परि परितः [v]रिहन् लिहन्। [v]अह इति प्रसिद्धौ। यद्वा। मातुर्भूमेरधीवासम् उपरि धार्यमाणं वस्त्रं परि परितो रिहन् संपादयन्। [v]तुविग्रेभिः प्रभूतं शब्दयद्भिः प्रभूतगमनैर्वा [v]सत्वभिः प्राणिभिः सहितः [v]ज्रयः ज्रयसा जवेन [v]वि [v]याति विविधं गच्छति। किंच [v]पद्वते पादवते द्विपदे चतुष्पदे च [v]वयः अन्नं तत्तदुचितं [v]दधत् ददत्। विवने[2] दावानले भीत्या पलायमानान्[2] प्राणिनो व्याघ्रादयो भक्षयन्तीति प्रसिद्धम्। किं कुर्वन्। [v]सदा सर्वदा तृणादिकं [v]रेरिहत्[3] दहन्[3]। किंच [v]श्येनी श्यामवर्णः[4] [v]वर्तनिः मार्गो वियान्तम् [v]अनु अनुक्रमेण [v]सचते सेवते। यत्र यत्राग्निर्गच्छति तत्र तत्र मार्गोऽपि कृष्णो भवति। [v]अह इति प्रसिद्धौ॥

अस्माकमग्ने मघवत्सु दीदिह्यध श्वसीवान्वृषभो दमूनाः।
अवास्या शिशुमतीरदीदेर्वर्मेव युत्सु परिजर्भुराणः ॥ १० ॥

अस्माकम्। अग्ने। मघवत्ऽसु। दीदिहि। अध। श्वसीवान्। वृषभः। दमूनाः।
अवऽअस्य। शिशुऽमतीः। अदीदेः। वर्मऽइव। युत्ऽसु। परिऽजर्भुराणः ॥ १० ॥

हे [v]अग्ने [v]अस्माकं [v]मघवत्सु अस्मत्संबन्धिषु अन्नवत्सु यागेषु गृहेषु वा [v]दीदिहि दीप्यस्व। [v]अध अथानन्तरं [v]श्वसीवान् श्वसनवान् ज्वालाभिश्रेष्टावान् अस्मत्प्राणनवान् वा [v]वृषभः वर्षिता अभिमतानां [v]दमूनाः दानमना दममना दान्तमना वा सर्वत्र भवेति शेषः। स[5] उक्तलक्षणस्त्वं[5] [v]शिशुमतीः [v]अवास्य। शिशुशब्देन तदवस्था लक्ष्यते। शैशववतीर्ज्वाला अपक्षेप्य[6] विहाय [v]अदीदेः भृशं

---

१. ख-च-फ–प्राणान् रक्षति; क्ष-झ१-ञ-ट–प्रीणयन्। २. झ–विवरेषु दावानलभीत्या पलायमानान्; क्ष-ञ-ट–चिरतरदावानलेन भीत्या प्रलीयमानान्; ङ-झ१–चिरतरदावानले(न) प्रलीयमानान्। ३. क्ष-झ-झ१ ञ-ट–रोरिहत् अत्यर्थं लिहन् दहन्। ४. क्ष-ङ-ञ-झ-झ१-ञ-ट–श्यामवर्णा। ५. क्ष-ञ-ट–यद्वा उक्त-गुणस्त्वम्। ६. क्ष-ञ-ट–अपक्षिप्य; ङ-झ१–अविक्षिप्य।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दीप्यस्व । कीदृशस्त्वम् । vयुत्सु संग्रामेषु vवर्मेव कवचमिव vपरिजर्भुराणः अस्मद्द्वेष्टॄन् पुनःपुनः परिहरन् । यद्वा । युत्सु संग्रामेषु वर्मेव परिजर्भुराणो भव ॥ हरतेर्यङ्लुगन्तात् व्यत्ययेन शानच् । ' अभ्यस्तानामादिः ' इत्याद्युदात्तत्वम् ॥ उक्तगुणको भव मघवत्सु यज्ञेषु दीप्यस्व ॥ ॥ ६ ॥

इदमग्ने सुधितं दुर्धितादधि प्रियाद्ु चिन्मन्मनः प्रेयो अस्तु ते ।
यत्ते शुक्रं तन्वो रोचते शुचि तेनास्मभ्यं वनसे रत्नमा त्वम् ॥ ११ ॥

इदम् । अग्ने । सुऽधितम् । दुःऽधितात् । अधि । प्रियात् ।
ऊँ इति । चित् । मन्मनः । प्रेयः । अस्तु । ते ॥ यत् । ते । शुक्रम् ।
तन्वः । रोचते । शुचि । तेन । अस्मभ्यम् । वनसे । रत्नम् । आ । त्वम् ॥ ११ ॥

हे vअग्ने vइदम् अस्मदीयं सोमादिरूपं हविः । कीदृशं तत् । vदुर्धितात् दुष्टं स्थापितात् कठिनात् काष्ठादेः vअधि उपरि vसुधितं सुहितं सुष्ठु दत्तम् । vमन्मनः मननीयात् vप्रियादु vचित् तव हृद्यादपि । उशब्दोऽवधारणे । चिच्छब्दोऽपिशब्दार्थः । vते तव vप्रेयः अतिप्रियतमम् vअस्तु । तत्किमित्याह । हे अग्ने vते तव vतन्वः शरीरस्य घृतेनोज्ज्वलिताया ज्वालायाः vशुचि निर्मलं vशुक्रं दीप्तं vयत् तेजः vरोचते vतेन सह vरत्नं रमणीयं मणिमुक्तादिकं वितरन् vअस्मभ्यं vवनसे अस्मान् संभजस्व ॥ वनतेर्व्यत्ययेनात्मनेपदम् ॥

रथाय नावमुत नो गृहाय नित्यारित्रां पद्वतीं रास्यग्ने ।
अस्माकं वीराँ उत नो मघोनो जनाँश्च या पारयाच्छर्म या च ॥ १२ ॥

रथाय । नावम् । उत । नः । गृहाय । नित्यऽअरित्राम् । पत्ऽवतीम् । रासि । अग्ने ।
अस्माकम् । वीरान् । उत । नः । मघोनः । जनान् । च । या । पारयात् । शर्म । या । च ॥ १२ ॥

हे vअग्ने vउत अपि च vरथाय रंहणाय vगृहाय सर्वस्यायतनभूताय vनः अस्माकं यजमानाय vनावं संसारोत्तारिकां सोमयागात्मिकां नावम् । ' यज्ञो वै सुतर्मा नौः ' ( ऐ. ब्रा. १. १३ ) इत्यादिषु श्रुतिषु नौरूपत्वेन स्तुतत्वात्[1] । कीदृशीं ताम्[1] । vनित्यारित्रां नियतर्त्विग्रूपोदकाकर्षणकाष्ठसाधनोपेतां vपद्वतीम् ॥ ' ह्रस्वनुड्भ्याम्° ' इति मतुप उदात्तत्वम् ॥ द्रव्यदेवतामन्त्रादिरूपपादोपेताम् । ईदृशीं यज्ञात्मिकां नावं vरासि देहि संपादय । रातिर्दानकर्मा ' दासति राति ' ( नि. ३. २०. ४ ) इति तन्नामसु पाठात् । सैव विशेष्यते । vउत अपि च vया नौः vअस्माकं vवीरान् अस्मत्संबन्धिनः पुत्रादीन् vमघोनः हविर्लक्षणान्नवतः करोति । vजनांश्च यजमानानस्मानपि या नौः vपारयात् पारयेत् उत्तारयेत् ॥ पारयतेर्लेटि आडागमः ॥ जननमरणादिबहुदुःखात्मकस्य

---

१. क्ष-ज्ञ१-ज-ट-स्तुतत्वात् तां गृभाय गृहाण । छन्दसि शायजपीति हौश्नः शायजादेशः । साधयास्माकम् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पारं निरतिशयसुखास्पदं ब्रह्मलोकं प्रापयेत् । ' एष वः पुण्यः सुकृतो ब्रह्मलोकः ' ( मु. उ. १.२.६ ) इति यागाद्यनुष्ठानवतां श्रूयमाणत्वात्[1] । एवं प्रापय्य ᵛच ᵛया नौः ᵛशर्म सुखं निरतिशयं ब्रह्म प्रापयेत् ' परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम् ' इत्युक्तत्वात् । चित्तशुद्ध्युत्पादनद्वारा[2] ' विविदिषन्ति यज्ञेन दानेन ' ( बृ. उ. ४. ४. २२ ) इति श्रुतेः ॥

**अभी नो अग्न उक्थमिज्जुगुर्या द्यावाक्षामा सिन्धवश्च स्वगूर्ताः ।**
**गव्यं यव्यं यन्तो दीर्घाहेषं वरमरुण्यो वरन्त ॥ १३ ॥**

अभि । नः । अग्ने । उक्थम् । इत् । जुगुर्याः । द्यावाक्षामा । सिन्धवः । च । स्वऽगूर्ताः । गव्यम् । यव्यम् । यन्तः । दीर्घा । अहा । इषम् । वरम् । अरुण्यः । वरन्त ॥ १३ ॥

हे ᵛअग्ने ᵛनः ᵛउक्थं शस्त्रम् ᵛअभि ᵛजुगुर्याः आभिमुख्येन स्तुहि प्रोत्साहय सम्यक् शस्तमित्यङ्गीकुरु ॥ ' गृ शब्दे ' । लिङि ' बहुलं छन्दसि ' इति विकरणस्य श्लुः । ' बहुलं छन्दसि ' इति उत्वम् ॥ तथा ᵛद्यावाक्षामा द्यावापृथिव्यावपि यज्ञसाधनसंपादनेन प्रोत्साहयताम्[3] । तथा ᵛसिन्धवः स्यन्दनशीला नद्यः ᵛच ᵛस्वगूर्ताः स्वयमेव गामिन्यः ᵛगव्यं गोसंभवं क्षीरादिकं गवां तृणाद्युत्पादनद्वारा ᵛयव्यम् । उपलक्षणमेतत् । यवव्रीह्यादिजन्यं पुरोडाशादिकं ᵛयन्तः प्रापयन्तः प्रोत्साहयन्तु । तथा ᵛअरुण्यः अरुणवर्णगोयुक्ताः ॥ मत्वर्थीयो लुप्यते ॥ आरुण्यसाधनभूताः उषसः । तद्धेतुत्वात् ताच्छब्द्यम् । ᵛदीर्घाहा सर्वाण्यहानि सर्वकालम्[4] ᵛइषम् इष्यमाणमन्नरसादिकं ᵛवरं वरणीयं श्रेष्ठम् अन्यदपि यागसाधनं ᵛवरन्त प्रापयन्तु ॥ ' वृङ् संभक्तौ ' । अन्तर्भावितण्यर्थात् छान्दसो लङ् । व्यत्ययेन शप् ॥ साधयन्तु । एतत्सर्वमग्नेः प्रसादात् इत्यग्नेरेव स्तुतित्वात्[5] आग्नेयत्वमविरुद्धम् ॥ ॥७॥

' बळित्था ' इति त्रयोदशर्चं द्वितीयं सूक्तं दैर्घतमसं जागतम् । अन्त्ये त्रिष्टुभौ । अग्निर्देवता । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

**बळित्था तद्वपुषे धायि दर्शतं देवस्य भर्गः सहसो यतो जनि ।**
**यदीमुप ह्वरते साधते मतिर्ऋतस्य धेना अनयन्त सस्रुतः ॥ १ ॥**

बट् । इत्था । तत् । वपुषे । धायि । दर्शतम् । देवस्य । भर्गः । सहसः । यतः । जनि । यत् । ईम् । उप । ह्वरते । साधते । मतिः । ऋतस्य । धेनाः । अनयन्त । सऽस्रुतः ॥१॥

ᵛदेवस्य द्योतनशीलस्यादित्यस्य ᵛदर्शतं सर्वैर्दर्शनीयं ᵛतत् प्रसिद्धं ᵛभर्गः तेजः ᵛइत्था इत्थं सर्वैर्दृश्यमानप्रकारेण ᵛवपुषे शरीरव्यवहाराय दार्ढ्याय ᵛधायि धार्यते सर्वैः । बट् इत्था इत्युभे अपि सत्यनामनी, ' बट् श्रत् सत्रा इत्था ' ( नि. ३. १०. १. ५ ) इति तन्नामसु पाठात् । जाठराग्निना

---

१. क्ष-ङ-ञ१-ञ-ट-स्तूयमानत्वात् । २. ङ-ञ१-धीशुद्धयुत्पादनद्वारा । ३. क्ष-ञ-ट-अगृणीतां प्रोत्साहयताम् । ४. क्ष-ञ-ट-सार्वकालम् । ५. क्ष-ङ-ञ१-ञ-ट-स्तुतत्वात् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

भुक्तानां जरणेन शरीरधारणं प्रसिद्धम्। तत्रोपपत्तिमाह। vयतः vसहसः vजनि। यतः कारणात् मथनकाले बलेनोत्पन्नः अतो बलाय धार्यते इत्यर्थः। vयदीं यदेतत् प्रसिद्धं लोकोपकारि अग्नेस्तेजः vमतिः मदीया बुद्धिः vउप vह्वरते उपगच्छति उपगम्य वर्तते[1] वा॥ 'ह्वृ कौटिल्ये'॥ vसाधते च तेनैव तेजसा साधयति स्वाभीष्टम्। किंच vऋतस्य यज्ञसाधकस्याग्नेस्तेजसा vधेनाः सर्वप्राणिनां वाचः vसस्रुतः समानं गच्छन्त्यः सहैव प्रवर्तमानाः॥ स्रवतेः कर्तरि क्विप्॥ vअनयन्त नयन्ति निर्वहन्ति जगद्व्यवहारम्॥ व्यत्ययेनात्मनेपदम्॥ यद्वा। ऋतस्य धेना यज्ञस्य संबन्धिन्यो मन्त्ररूपा वाचः सस्रुतो होत्रादिमुखेन सहैव प्रवर्तमाना अनयन्त नयन्ति। अग्नेः स्तोत्रं निर्वहन्ति। अग्नेस्तेजसा वा यज्ञं निर्वहन्ति। 'तेजोमयी वाक्' ( छा. उ. ६. ५. ४ ) इति श्रुतेः। अतः कारणात् मतिरुपह्वरते इत्यर्थः। धेनेति वाङ्नाम, 'धेना ग्नाः' ( नि. १. ११. ३९ ) इति तन्नामसु पाठात्॥

पृक्षो वपुः पितुमान्नित्य आ शये द्वितीयमा सप्तशिवासु मातृषु।
तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः॥ २॥

पृक्षः। वपुः। पितुऽमान्। नित्यः। आ। शये। द्वितीयम्। आ। सप्तऽशिवासु। मातृषु। तृतीयम्। अस्य। वृषभस्य। दोहसे। दशऽप्रमतिम्। जनयन्त। योषणः॥ २॥

अयमग्निः vपृक्षः अन्नसाधकः पाकादिना vवपुः वपुष्मान् शरीराभिवृद्धिहेतुः vपितुमान् हविर्लक्षणान्नयुक्तः vनित्यः शाश्वतः। ईदृशः सन् प्रथमं पृथिवीस्थानः सन् vआ vशये आशेते। दाहपाकादि लौकिकं कर्म यज्ञादि वैदिकं कर्म च निर्वर्तयन् ध्रुवो भूमौ वर्तते इत्यर्थः। तथा vसप्तशिवासु vमातृषु सप्तलोकशिवकरीषु मातृस्थानीयासु हितकरीषु वृष्टिषु vद्वितीयम् vआ शेते। मध्यमस्थानो विद्युद्रूपो वा वर्तते। vअस्य vवृषभस्य वर्षितुरस्यैव वैद्युताग्नेः सहायत्वेन संबन्धिने vदोहसे दोग्ध्रे आदित्यस्थोदकस्य वर्षयित्रे आदित्यरश्मये॥ दुहेः कर्तरि असुप्रत्ययः॥ तत्प्रवृत्तये vतृतीयम् आशेते। द्युस्थानो वर्तते। यद्वा। अस्य वृषभस्य वर्षितुः प्रसिद्धस्यादित्यस्य संबन्धिने दोग्ध्रे रश्मये तत्प्रवृत्त्यर्थम्। आदित्यरश्मयो घर्मकाले भूमिस्थमुदकमाकृष्य सूर्यं प्रापय्य तत्र चिरकालं धृत्वा पुनरन्तरिक्षं प्राप्य मेघेषु स्थित्वा वर्षकाले[2] प्रवर्षन्तीति प्रसिद्धम्। अतो रश्मेर्दोग्धृत्वम्। ईदृशं त्रिस्थानमग्निं महाभागं vयोषणः मिश्रणशीलाः सर्वा दिशः vजनयन्त उत्पादयन्ति। सर्वासु दिक्षु प्रसृत इत्यर्थः। कीदृशं तम्। vदशप्रमतिम्। दशसु दिक्षु प्रकृष्टमननवन्तं पूज्यत्वाय। यद्वा। मथनकाले दशभिरङ्गुलीभिरुत्पन्नं लोकत्रये दशदिक्षु च व्याप्तमित्यर्थः॥

निर्यदीं बुध्नान्महिषस्य वर्पस ईशानासः शवसा क्रन्त सूरयः
यदीमनु प्रदिवो मध्व आधवे गुहा सन्तं मातरिश्वा मथायति॥ ३॥

निः। यत्। ईम्। बुध्नात्। महिषस्य। वर्पसः। ईशानासः। शवसा। क्रन्त। सूरयः। यत्। ईम्। अनु। प्रऽदिवः। मध्वः। आऽधवे। गुहा। सन्तम्। मातरिश्वा। मथायति॥३॥

---

१. क-ङ-ज-ञ-ञ१-ण-न-प्रवर्तते। २. ख-ज-ञ-ण-न-प-फ-व-वर्षाकाले।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vईम् एनमग्निं vयत् यस्मात्[1] कारणात् vमहिषस्य[1]। महन्नामैतत्, ' महिषः अम्बः ऋभुक्षाः ' ( नि. ३. ३. ८ ) इति तन्नामसु पाठात्। महतो यज्ञस्य vबुध्नात् मूलात् आधानादारभ्य vवर्पसः। रूपनामैतत्। रूपस्य उपक्रमोपसंहारात्मकस्य सिद्धये vईशानासः स्वकीयव्यापारसमर्थाः vसूरयः मेधाविन ऋत्विजः vशवसा बलेन मन्त्रादिरूपेण शारीरेण वा vनिः vक्रन्त निष्कुर्वन्ति साधयन्ति उत्पादयन्ति काष्ठात्। यद्वा। एनमग्निं बुध्नात् आदितो मथनादारभ्य महिषस्य वर्पसो महतो रूपस्य आहुतिस्वीकारसमर्थस्य सिद्धये निष्कुर्वन्ति ॥ करोतेश्छान्दसे लुङि ' मन्त्रे घस० ' इति च्लेर्लुक्। व्यत्ययेन अन्तादेशः ॥ किंच vयदीम्[2] एनमेवाग्निं vप्रदिवः पुराणात्। अनादिकालमारभ्य न केवलमिदानीमेवेत्यर्थः। पूर्ववत् इदानीं vमध्वः मधुनो मधुसदृशस्य vआधवे आधवने प्रक्षेपे निमित्ते सति vगुहा vसन्तं गुहायां वेद्यां काष्ठेषु निगूढं सन्तं vमातरिश्वा अन्तरिक्षे चेष्टमानो वायुः अनुक्रमेण vमथायति चालयति। उद्बोधयतीत्यर्थः। यद्वा। मातरि फलस्य मातरि[3] यागे श्वसिति चेष्टते इति मातरिश्वा यजमानो गुहा सन्तम् अरण्योर्निगूढं सन्तं प्रादुर्भावाय अनुक्रमेण मथायति सञ्जाति उत्पादयतीत्यर्थः। यस्मादेवंरूपस्तस्मात् स्तोतव्य इत्यर्थः ॥

**प्र यत्पितुः परमान्नीयते पर्या पृक्षुधो वीरुधो दंसु रोहति ।**
**उभा यदस्य जनुषं यदिन्वत आदिद्यविष्ठो अभवद्घृणा शुचिः ॥ ४ ॥**

प्र। यत्। पितुः। परमात्। नीयते। परि। आ। पृक्षुधः। वीरुधः। दम्ऽसु। रोहति।
उभा। यत्। अस्य। जनुषम्। यत्। इन्वतः। आत्। इत्। यविष्ठः। अभवत्। घृणा। शुचिः॥४॥

vयत् यस्मात् vपितुः अन्नस्य पशुलक्षणस्य ॥ षष्ठीस्थाने प्रथमा ॥ तस्य vपरमात् परमत्वाद्धेतोः। उत्कृष्टत्वायेत्यर्थः। तदर्थं vप्र vपरि vनीयते प्रकर्षेण परितो नीयते पर्यग्निक्रियते इत्यर्थः। यद्वा। पितुरुत्पादकात् परमात् उत्कृष्टात् गार्हपत्यलक्षणस्याग्नेः सकाशात् आहवनीयं प्रति प्र परि नीयते प्रकर्षेण नीयते। परि अनर्थकः। किंच vपृक्षुधः पशुपुरोडाशादिषु दाहमध्ये धीयमानाः। यद्वा ॥ प्रशब्दस्य संप्रसारणम्। ' क्षुध बुभुक्षायाम् '। क्विप् ॥ प्रक्षोध्याः प्रकर्षेण बुभुक्षिता भोक्तुमिष्यमाणाः। vवीरुधो vदंसु दन्तेषु मध्ये vआ vरोहति आरोहन्ति प्रविशन्तीत्यर्थः। vयत् यस्मात् vउभा उभौ अध्वर्युयजमानौ उभे अरणी वा vअस्य अग्नेः vजनुषं जन्म उत्पत्तिम् vइन्वतः व्याप्नुतः स्वीकुरुत इत्यर्थः ॥ ' इवि व्याप्तौ '। इदित्त्वात् नुम् ॥ vआदित् अत एव कारणात् vशुचिः शुद्धोऽयमग्निः vघृणा यजमानेष्वनुग्रहेण। यद्वा। घृणा घृणो दीप्तिमान् ॥ मत्वर्थो लुप्यते ॥ दीप्त्या वा vयविष्ठः युवतमः vअभवत् संपन्नः। स्वीकारसमर्थोऽभवदित्यर्थः ॥

**आदिन्मातृराविशद्यास्वा शुचिरहिंस्यमान उर्विया वि वावृधे ।**
**अनु यत्पूर्वा अरुहत्सनाजुवो नि नव्यसीष्ववरासु धावते ॥ ५ ॥**

आत्। इत्। मातृः। आ। अविशत्। यासु। आ। शुचिः। अहिंस्यमानः। उर्विया। वि। ववृधे।
अनु। यत्। पूर्वीः। अरुहत्। सनाऽजुवः। नि। नव्यसीषु। अवरासु। धावते ॥ ५ ॥

---

१. ङ-ञ-ञ१–यस्मात् कारणात् यद्वा यम् एनम् अग्निं माहिषस्य। २. ञ१–यस्मात् ईम्। ३. ङ-ञ-ञ-ञ१–निर्मातरि।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अयमग्निः vआ vशुचिः दीप्तः सन् vआदित् पूर्वमन्त्रे यविष्ठोऽभवदित्युक्तत्वात् तदनन्तरमेव vमातृः उत्पादयित्रीर्मातृस्थानीया दश दिशः vआ vअविशत् सर्वतः प्रविशति। पूर्वत्र 'दशप्रमतिं जनयन्त योषणः' (ऋ. सं.१. १४१. २) इत्युक्तत्वात् दिशां मातृत्वम्। दिक्षु प्रकाशेन व्याप्त इत्यर्थः। मातरो विशेष्यन्ते। vयासु मातृषु vअहिंस्यमानः परैरपीड्यमानः vउर्विया उरु अतिप्रभूतं vवि vववृधे विविधं प्रवृद्धोऽभवत् तास्वाविशत्। यथा लोके कश्चित्तेजस्वी जनन्याः स्तनपानपरिपीडादिभिः[1] सम्यक् पोषितो लोके प्रकाश्य[2] पुनरागत्य मातरमालिङ्गति तद्वदिति भावः। कस्मिन् काले इति तत्राह। vयत् यदा vसनाजुवः दीर्घकालवियोगिन्यः स्थापनकाल एव प्रक्षिप्ताः अत एव vपूर्वाः प्रथमभाविनीरोषधीरनुक्रमेण vअरुहत् आरोहति॥ रुहेश्छान्दसो लुङ्। 'कृमृदरुहिभ्यश्छन्दसि' इति च्लेः अङादेशः॥ उपरि प्रज्वलति। तथा vनव्यसीषु नवतरासु अत एव vअवरासु अत एव पूर्वापेक्षया निकृष्टासु पश्चाद्भाविनीष्वोषधीषु vनि vधावते नितरां नीचैर्वा गच्छति। अन्तःप्रविशतीत्यर्थः। यदा काष्ठानाम् अधस्तादुपरिष्टाच्च प्रविश्य ज्वलति तदा दिक्षु प्रकाशितोऽभवत्[3] इत्यर्थः॥ ॥ ८॥

आदिद्धोतारं वृणते दिविष्टिषु भगमिव पप्रचानासं ऋञ्जते।
देवान्यत्क्रत्वा मज्मना पुरुष्टुतो मर्तं शंसं विश्वधा वेति धायसे॥ ६॥

आत्। इत्। होतारम्। वृणते। दिविष्टिषु। भगम्ऽइव। पप्रचानासः। ऋञ्जते।
देवान्। यत्। क्रत्वा। मज्मना। पुरुऽस्तुतः। मर्तम्। शंसम्। विश्वधा। वेति। धायसे॥६॥

vहोतारं होमनिष्पादकम् आह्वातारं वा देवानां ईदृशमग्निं[5] vदिविष्टिषु दिवसैषणेषु[6] निमित्तभूतेषु vवृणते संभजते। vआदित् अनन्तरमेव तथा vपप्रचानासः हविषा स्तुत्या च संप्रचाना ऋत्विजो यजमानाः॥ प्रचेश्छान्दसस्य लिटः कानच्॥ vऋञ्जते प्रसाधयन्ति। किमिव। vभगमिव[7]। तं यथा जनाः प्रसाधयन्ति तद्वत्। यद्वा। महान्तं राजानमिव सूर्यदीप्तिवत्[8] पूज्यमित्यर्थः। 'ऋञ्जतिः प्रसाधनकर्मा' इति यास्कः। vयत् यस्मात् अयमग्निः vपुरुष्टुतः बहुभिर्बहुधा वा स्तूयमानः vक्रत्वा क्रतुना कर्मणा यागादिरूपेण vमज्मना शारीरेण बलेन च युक्तान् vदेवान् व्यवहर्तॄनृत्विजो यज्ञभुजो देवान् वा कृत्वा मज्मना च योजयितुं तथा vमर्तं यजमानं vशंसं स्तुतिं च स्तुत्यं वा तं vविश्वधा विश्वधनो यद्वा विश्वात्मकोऽयं vवेति पूर्वोक्तान् कामयते। किमर्थम्। vधायसे हविर्लक्षणान्नाय। तस्मात् होतारमग्निं वृणते ऋञ्जते च॥

---

१. ज-ण–स्तनपानपरिपारापरिपीडादिभिः; त–स्तनपानपरिपापरिपीडादिभिः; ख-फ–स्तनपरिपारापरिपीडादिभिः; क–स्तनपानपरिपीडापक्षिहारादिभिः; ङ-ञ-ञ१–स्तनपानपरिपीडापरिहारादिभिः; झ–स्तनपानपरपीडापरहारादिभिः। २. ङ–स्वत्वं प्रकाश्य। ४. च-फ–प्रकाशः; झ–प्रकाशितो भवति। ५. क्ष-ञ१-ञ-ट–ईदृशमिममग्निम्। ६. क्ष-ङ-ञ१-ञ-ट–दिवसेषु पूर्णेषु। ७. झ–भगमिव सूर्यमिव। ८. क्ष-ङ-ञ-ञ१-ञ-ट–दीप्तसूर्यवत्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वि यदस्थाद्यजतो वातचोदितो ह्वारो न वक्वा जरणा अनाकृतः ।
तस्य पत्मन्दक्षुषः कृष्णजंहसः शुचिजन्मनो रज आ व्यध्वनः ॥ ७ ॥

वि । यत् । अस्थात् । यजतः । वातऽचोदितः । ह्वारः । न । वक्वा । जरणाः । अनाकृतः ।
तस्य । पत्मन् । धक्षुषः । कृष्णऽजंहसः । शुचिऽजन्मनः । रजः । आ । विऽअध्वनः ॥७॥

[v]यत् यदा अयमग्निः [v]वातचोदितः वायुना प्रेरितः ॥ 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरत्वम् ॥ [v]यजतः सर्वैः यष्टव्यः[1] यष्टुं योग्यः सन् [v]वि [v]अस्थात् वितिष्ठते सर्वतो व्याप्तो भवति ॥ तत्र दृष्टान्तः । [v]अनाकृतः अनिवारितोऽप्रतिहतप्रसरः [v]वक्वा बहुवक्ता ॥ वचेः 'अन्येभ्योऽपि दृश्यन्ते' इति वनिप् । दृशिग्रहणात् कुत्वम् ॥ [v]ह्वारो [v]न कुटिल इव विदूषणकादिरिव[2] ॥ ह्वरतेर्ण्यन्तात् पचाद्यच् ॥ स यथा [v]जरणाः स्तुतीर्वितिष्ठते[3] विविधं कुर्वन् वर्तते तद्वदयमप्यनाकृतः अप्रतिबद्धप्रसरो व्यवस्थितः[4] । तदा [v]तस्य अग्नेः [v]पत्मन् पतने मार्गे यज्ञरूपे [v]रजः रञ्जनात्मको लोकः [v]आ अस्थात् आतिष्ठति सर्वतः आश्रयति अग्नौ बहुधा यजतीत्यर्थः । कीदृशस्य तस्य । [v]धक्षुषः दहतः ॥ दहेर्लिटः क्सुः ॥ [v]कृष्णजंहसः कृष्णमार्गस्य ॥ पुनःपुनर्गम्यते इति जंहा मार्गः । हन्तेर्यङ्लुगन्तात् कर्मणि असुन् । कुत्वाभावश्छान्दसः ॥ [v]शुचिजन्मनः मन्त्रसहितारण्योरुत्पन्नत्वात् [v]व्यध्वनः विविधज्वालस्य अनियतमार्गस्य ॥

रथो न यातः शिक्वभिः कृतो द्यामङ्गेभिररुषेभिरीयते ।
आदस्य ते कृष्णासो दक्षि सूरयः शूरस्येव त्वेषथादीषते वयः ॥ ८ ॥

रथः । न । यातः । शिक्वऽभिः । कृतः । द्याम् । अङ्गेभिः । अरुषेभिः । ईयते ।
आत् । अस्य । ते । कृष्णासः । धक्षि । सूरयः । शूरस्यऽइव । त्वेषथात् । ईषते । वयः ॥८॥

अयमग्निः [v]शिक्वभिः रज्जुभिः [v]कृतः बद्धः [v]रथो [v]न रथ इव । स यथा स्वीयैश्चक्रादिभिः अङ्गैः [v]ईयते तद्वत् [v]यातः स्थापितः सन् [v]अरुषेभिः गमनशीलैः [v]अङ्गेभिः ज्वालादिरूपैः अवयवैः [v]द्याम् अन्तरिक्षम् आज्येन हृष्टः सन् [v]ईयते गच्छति ॥ 'ईङ् गतौ' ॥ [v]आत् प्रवृद्धयनन्तरम् [v]अस्य अग्नेः [v]ते [v]सूरयः सरणयो मार्गाः [v]कृष्णासः कृष्णवर्णा भवन्ति । यत एवं भवन्ति तदर्थं [v]दक्षि दहति काष्ठान् ॥ पुरुषव्यत्ययः । छान्दसः शपो लुक् ॥ किंच ज्वलितस्याग्नेः [v]त्वेषथात् दीप्तात् तेजसः सकाशात् [v]वयः गमनवन्तः पक्षिमृगादयः [v]ईषते गच्छन्ति ॥ ईष गत्यादौ । 'बहुलं छन्दसि' इति शपो लुक् ॥ पलायन्ते । तत्र दृष्टान्तः । शूरस्य[5] त्वेषथात् वय इव । कस्यचित् विक्रान्तस्य दीप्तात्तेजसः सकाशात् भीत्या पलायमाना[6] इव[6] । एवमन्तरिक्षं स्पृशन् सर्वतो दहतीति सर्वदा[7] दावाग्निरूपेण स्तूयते ॥

---

१. क्ष-झ१-ञ-ट-यष्टव्यः सन् । २. क-ङ-झ-झ१-विदूषकादिरिव । ३. क्ष-ङ-ञ-ट-स्तुतीर्व्यस्थात् वितिष्ठते । ४. क्ष-ञ-ट-व्यवस्थात् । ५. झ-शूरस्येव त्वेषथात् वय इव । यथा कस्यचित् । ६. क्ष-ङ-झ१-ञ-ट-पलायमाना शीघ्रगामिनः इव । ७. क्ष-ञ्-झ-झ१-ञ-ट-'सर्वदा' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्वया॒ ह्य॑ग्ने॒ वरु॑णो धृ॒तव्र॑तो मि॒त्रः शा॑शद्रे॒ अर्य॒मा सु॒दान॑वः ।
यत्सी॒मनु॒ क्रतु॑ना वि॒श्वथा॑ वि॒भुर॒राञ्न ने॒मिः प॑रि॒भूर॑जायथाः ॥ ९ ॥

त्वया॑ । हि । अ॒ग्ने॒ । वरु॑णः । धृ॒तऽव्र॑तः । मि॒त्रः । शा॒श॒द्रे॒ । अ॒र्य॒मा । सु॒ऽदान॑वः ।
यत् । सी॒म् । अनु॑ । क्रतु॑ना । वि॒श्वऽथा॑ । वि॒ऽभुः । अ॒रान् । न । ने॒मिः । प॒रि॒ऽभूः । अ॒जा॒य॒थाः ॥ ९ ॥

हे [v]अग्ने [v]त्वया[1] खलु [v]वरुणः राज्यभिमानी देवः [v]धृतव्रतः स्वीकृतवर्षणादिकर्मा भवति । तथा [v]मित्रः अहरभिमानी देवः [v]शाशद्रे शातयति[2] तमः[2] ॥ ' शदॢ शातने ' । छान्दसो लिट् । ' बहुलं छन्दसि ' इति रुट् । तुजादित्वात् अभ्यासदीर्घः । तथा [v]अर्यमा उभयोर्मध्यवर्ती देवः [v]सुदानवः शोभनदानो भवति ॥ व्यत्ययेन बहुवचनम् ॥ यद्वा । एते वरुणादयः सुदानवः शोभनदानाः स्वस्वकार्यकर्तारस्त्वया हि शाशद्रे तीक्ष्णीक्रियन्ते । हिशब्दो मन्त्रान्तरप्रसिद्धिद्योतनार्थः । ' त्वमग्ने वरुणो जायसे ' ( ऋ. सं. ५. ३. १ ) इति हि मन्त्रान्तरम् ॥ शदेः कर्मणि छान्दसो लिट् । ' इरयो रे ' इति रेभावः । ' हि च ' इति निघाताभावः ॥ वरुणादीनामन्यायत्तत्वे उपपत्तिमाह । [v]यत् यस्मात् कारणात् हे अग्ने [v]सीं सर्वतः [v]क्रतुना कर्मणा [v]विश्वथा विश्व इव विश्वात्मक इव [v]विभुः मित्रार्यमात्मना सर्वव्यापी [v]परिभूः स्वतेजसा सर्वतः परिभाविता सन् अनुक्रमेण [v]अजायथाः जायसे प्रादुर्भवसि । तत्र दृष्टान्तः । [v]अरान् रथस्य शङ्कून् [v]नेमिः [v]न बाह्यवलय इव । स यथा व्याप्य तिष्ठति तद्वदयमग्निर्वरुणादीन् व्याप्य तिष्ठति ॥

त्वम॑ग्ने शशमा॒नाय॑ सुन्व॒ते रत्नं॑ यविष्ठ दे॒वता॑तिमिन्वसि ।
तं त्वा॒ नु नव्यं॑ सहसो युवन्व॒यं भगं॒ न का॒रे म॑हिरत्न धीमहि ॥ १० ॥

त्वम् । अ॒ग्ने॒ । श॒श॒मा॒नाय॑ । सु॒न्व॒ते । रत्न॑म् । य॒वि॒ष्ठ॒ । दे॒वऽता॑तिम् । इ॒न्व॒सि॒ ॥ तम् ।
त्वा॒ । नु । नव्य॑म् । स॒हस॒ः । युवन् । व॒यम् । भग॑म् । न । का॒रे । म॒हि॒ऽर॒त्न॒ । धी॒म॒हि॒ ॥ १० ॥

हे [v]अग्ने [v]यविष्ठ युवतम [v]त्वं [v]शशमानाय त्वां स्तुवते । ' शशमानः शंसमानः ' ( निरु. ६. ८ ) इति यास्कः । [v]सुन्वते स्वदर्थमभिषवं कुर्वते यजमानाय तद्यागार्थं [v]रत्नं रमणीयं हविः [v]देवतातिं देवेषु तायमानं विस्तार्यमाणम्[3] [v]इन्वसि व्याप्नोषि । अस्मत्प्रत्तं हविः देवान् प्रापयसीत्यर्थः । इन्वतिः व्याप्तिकर्मा, ' इन्वति ननक्ष ' ( नि. २. १८. १ ) इति तन्नामसु पाठात् । हे [v]सहसो [v]युवन् । युवशब्देनोत्पत्तिर्लक्ष्यते । मथनकाले बलेनोत्पन्न बलस्य मिश्रयितर्वा । यद्वा । सहसस्पुत्र युवन् नित्यतरुण [v]महिरत्न अस्मत्प्रदेयमहद्रमणीयधन [v]नव्यं नवतरं स्तुत्यं वा [v]तं तादृशं हविर्भुजं [v]त्वा त्वां [v]वयं यजमानाः [v]कारे शब्दे स्तोत्रलक्षणे [v]नु क्षिप्रं [v]धीमहि स्थापयामः । हविष्प्रदानसमये क्षिप्रमेव स्तुम इत्यर्थः । तत्र दृष्टान्तः । [v]भगं [v]न आदित्यमिव । यद्वा । महान्तं राजानमिव । तं यथा स्तुवन्ति तद्वत् ॥

---

१. क्ष-ङ-ञ१-ञ-ट–त्वया हि । २. क्ष-ञ-ट–शातयति तमः गच्छतीत्यर्थः । ३. क्ष-ञ१-ञ-ट–विस्तीर्यमाणम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अस्मे रयिं न स्वर्थं दमूनसं भगं दक्षं न पपृचासि धर्णसिम् ।
रश्मीरिव यो यमति जन्मनी उभे देवानां शंसमृत आ च सुक्रतुः ॥ ११ ॥

अस्मे इति । रयिम् । न । सुऽअर्थम् । दमूनसम् । भगम् । दक्षम् । न । पपृचासि । धर्णसिम् ।
रश्मीन्ऽइव । यः । यमति । जन्मनी इति । उभे इति ।
देवानाम् । शंसम् । ऋते । आ । च । सुऽक्रतुः ॥ ११ ॥

हे अग्ने त्वम् vअस्मे अस्मासु vस्वर्थं सुष्ठु अरणीयं vदमूनसं दमनीयम् उपार्ज्यम्[1] ॥ ' दमेरूनसिः ' ( उ. सू. ४. ६७४ ) इति ऊनसिप्रत्ययः ॥ vरयिं vन vपपृचासि धनं यथा संपृणक्षि । तथा vभगं सर्वैर्भजनीयं vदक्षं vन उत्साहवन्तं प्रबुद्धं वा vधर्णसिं विद्यादिधारणकुशलं पुत्रं यथा पपृचासि संपृणक्षि उभयमपि ददासीत्यर्थः ॥ ' पृची संपर्के ' । लेटि आडागमः । ' बहुलं छन्दसि ' इति विकरणस्य श्लुः ॥ इदानीं परोक्षेणाह । vयः अग्निः vरश्मीरिव स्वकीयान् रश्मीन् यथा vयमति नियमयति विस्तारयति तद्वत् सः vउभे vजन्मनी जननाधारभूतौ उभौ लोकौ इहलोकपरलोकौ यमति नियच्छति । तथा vसुक्रतुः शोभनकर्मा अयम् vऋते अस्मदीययज्ञे vदेवानां देवसंबन्धिनं vशंसं स्तवं[2] vच vआ यमति आयच्छति सर्वदा ददाति । यद्वा । पूर्वार्धे पपृचासीत्यपि परोक्षत्वाय प्रथमपुरुषतया योज्यम् ॥

उत नः सुद्योत्मा जीराश्वो होता मन्द्रः शृणवच्चन्द्ररथः ।
स नो नेषन्नेषतमैरमूरोऽग्निर्वामं सुवितं वस्यो अच्छ ॥ १२ ॥

उत । नः । सुऽद्योत्मा । जीरऽअश्वः । होता । मन्द्रः । शृणवत् । चन्द्रऽरथः ।
सः । नः । नेषत् । नेषऽतमैः । अमूरः । अग्निः । वामम् । सुऽवितम् । वस्यः । अच्छ ॥ १२ ॥

उतशब्दोऽप्यर्थः । स च संभावनायाम् । सोऽग्निः vनः अस्मदीयमाह्वानम् vउत vशृणवत् । अपि नाम शृणुयात् । यद्वा । नः अस्मान् श्रावयेत् देवेषु मध्ये प्रख्यापयेत् ॥ शृणोतेर्लेटि अडागमः ॥ कीदृशोऽयम् । vसुद्योत्मा सुद्योतमानः ॥ ' द्युत दीप्तौ ' । ' अन्येभ्योऽपि दृश्यन्ते ' इति मनिन् ॥ vजीराश्वः शीघ्रगमनाश्वः vहोता देवानामाह्वाता vमन्द्रः मदनशीलः vचन्द्ररथः सुवर्णमयरथोपेतः । किंच अयम् vअमूरः अमूढबलः vवस्यः वसनीयः vसः प्रसिद्धः vअग्निः vनेषतमैः अत्यर्थं नेतृभिः कर्मभिः स्तोत्रैर्वा vनः अस्मान् उत vनेषत् अपि नाम नयेत् । यज्ञस्य पारं प्रापयेत् ॥ नयतेर्लेटि अडागमः । ' सिब्बहुलम्° ' इति सिप् ॥ किमर्थम् । vवामं वननीयं vसुवितं सुष्ठु प्राप्यं सर्वैः काङ्क्षणीयं स्वर्गम् vअच्छ आभिमुख्येन प्रापयितुं नेषत् ॥

---

१. क्ष-ङ-ञ-ञ१-ञ-ट–उपेक्ष्यम् । २. ञ१–स्तोत्रम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अस्तावि अग्निः शिमीवद्भिरर्कैः साम्राज्याय प्रतरं दधानः ।
अमी च ये मघवानो वयं च मिहं न सूरो अति निष्टतन्युः ॥ १३ ॥

अस्तावि । अग्निः । शिमीवत्ऽभिः । अर्कैः । साम्ऽराज्याय । प्रऽतरम् । दधानः ।
अमी इति । च । ये । मघऽवानः । वयम् । च । मिहम् । न । सूरः । अति । निः । ततन्युः॥१३॥

अयम् vअग्निः vशिमीवद्भिः हविष्प्रदानादिकर्मवद्भिः vअर्कैः अर्चनसाधनैर्मन्त्रैः vअस्तावि स्तुतोऽस्माभिर्यजमानैः । शिमीति कर्मनाम, ' शिमी शक्तिः ' ( नि. २. १. २४ ) इति तन्नामसु पाठात् । कीदृशोऽयम् । vसाम्राज्याय साम्राज्यस्येति[1] कर्मणि षष्ठीस्थाने चतुर्थी । सम्यक् राजमानत्वं vप्रतरं प्रकृष्टतरमस्यर्थं vदधानः ॥ ' अमु च च्छन्दसि ' इति अमुप्रत्ययः ॥ किंच इममग्निम् vअमी vच पुरोवर्तमाना ऋत्विजः पुत्रादयो वा vये vवयं vच पूर्वं स्तोतृत्वेन प्रसिद्धा वयमपि vअति अत्यर्थं vनिष्टतन्युः शब्दयन्तु ॥ निष्पूर्वः स्तनतिः[2] शब्दकर्मा ॥ इतः परमपि अस्मत्पुत्रपौत्रादयो वयं च अग्निं स्तुम इत्यर्थः । तत्र दृष्टान्तः । vमिहं vन vसूरः । मिहं मेहनशीलं मेघं यथा सूरः सूर्यो वृष्ट्यर्थं शब्दयति तद्वत् ॥ लिङि छान्दसो विकरणस्य श्लुः । ' अभिनिसः स्तनः शब्दसंज्ञायाम् ' ( पा. सू. ८. ३. ८६ ) इति षत्वम् ॥ ॥ ९ ॥

' समिद्धः[3] ' इति त्रयोदशर्चं तृतीयं सूक्तमानुष्टुभम् । प्रथमायाः समिन्नामकोऽग्निर्देवता समिद्धोऽग्निः । द्वितीयादीनां तनूनपान्नराशंस इळो बर्हिर्देवीर्द्वार उषासानक्ता दैव्यौ होतारौ प्रचेतसौ तिस्रो देव्यः सरस्वतीळाभारत्यस्त्वष्टा वनस्पतिः स्वाहाकृतिरित्येताः क्रमेण देवताः । अन्त्याया इन्द्रः । तिस्रो देव्य इत्यस्य विवरणं सरस्वतीळाभारत्य इति । अत्रानुक्रमणिका–' समिद्ध आप्रिय आनुष्टुभमन्त्यैन्द्री ' इति ॥ अत्र इध्मतनूनपादादिभिर्यज्ञावयववाचिभिर्यज्ञ एवोच्यते । अतः स एव देवतेति काथक्यस्य मतम् । अग्निरेव समिदादिभिरुच्यते । अतः स एव देवतेति शाकपूणेर्मतम् । निरुक्ते किंदेवताः प्रयाजानुयाजा इति छन्दोदेवता[4] इत्यादिपक्षान्तरं बहुधा प्रदर्श्य तदर्थे ब्राह्मणादि[5] चोदाहृत्य इतरे पक्षा अर्थवादा आग्नेया एवेति सिद्धान्तितम्, ' अथ किंदेवताः प्रयाजानुयाजाः ' ( निरु. ८ . २१ ) इत्यादिना ॥ पशौ अङ्गिरोगोत्रोत्पन्नानाम् एतदाप्रीसूक्तम् । ' एकादश प्रयाजाः ' इति खण्डे सूत्रितं–' समिद्धो अद्येति सर्वेषां यथर्षि वा ' ( आश्व. श्रौ. ३. २ ) इति । अत्र यथर्षि-ग्रहणात् ॥ आप्रीसूक्तानि त्रिविधानि । तत्र वासिष्ठात्रेयवाध्यश्वगार्त्समदानि चत्वारि नराशंसवन्ति । मैधातिथदैर्घतमसप्रैषिकाणि[6] नराशंसतनूनपादुभयवन्ति । इतराणि तनूनपात्वन्तीति । तत्रैतत्सूक्तं दैर्घतमसत्वादुभयवत् ॥

समिद्धो अग्न आ वह देवाँ अद्य यतस्रुचे । तन्तुं तनुष्व पूर्व्यं सुतसोमाय दाशुषे ॥१॥

सम्ऽइद्धः । अग्ने । आ । वह । देवान् । अद्य । यतऽस्रुचे ।
तन्तुम् । तनुष्व । पूर्व्यम् । सुतऽसोमाय । दाशुषे ॥ १ ॥

---

१. क्ष-ञ-ट–साम्राज्यम् । २. क्ष-ञ१-ञ-ट–तनोतिः । ३. क्ष-ञ-ट–समिद्धोऽग्निर्वा । ४. क्ष-ञ-ट–छन्दोदेवता ऋतुदेवताः; ङ-ञ-ञ१–छन्दोदेवता ऋतुदेवता वा । ५. क्ष-ञ१-ञ-ट–ब्राह्मणानि । ६. क्ष-ङ-ञ-ञ-ट–°प्रैषिकाणि च ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे vअग्ने vसमिद्धः सम्यग्दीपितः एतन्नामकस्त्वम् vअद्य अस्मिन् यागदिने vदेवान् हविषां भोक्तॄन् अग्न्यादीन् vआ vवह अस्मद्यज्ञं प्रति प्रापय । vयतस्रुचे यागायोद्यतस्रुचे यजमानाय तदर्थम्। आवाह्य च vसुतसोमाय यागार्थमभिषुतसोमाय vदाशुषे हविर्दत्तवते । यद्यपि इदानीमेवाहूयन्ते देवाः तथापि पूर्वानुष्ठानापेक्षया भाव्यपेक्षया वा दाशुषे इत्युच्यते । हविर्दात्रे वा यजमानाय तदर्थं vपूर्व्यं पूर्वेभ्यो देवेभ्यो हितं पूर्वकालीनं वा vतन्तुं यज्ञं vतनुष्व विस्तारय ॥

घृतवन्तमुप मासि मधुमन्तं तनूनपात् ।
यज्ञं विप्रस्य मावतः शशमानस्य दाशुषः ॥ २ ॥

घृतऽवन्तम् । उप । मासि । मधुऽमन्तम् । तनूऽनपात् ।
यज्ञम् । विप्रस्य । माऽवतः । शशमानस्य । दाशुषः ॥ २ ॥

हे vतनूनपात् । ' तनूनपात् आज्यम् ' इति काण्वक्यपक्षे तन्वो गावो भोगानां तासु जायमानत्वात्[1]। ताभ्यः उत्पन्नं क्षीरं क्षीरात् सर्पिः इति आज्यस्य नप्तृत्वम् । तद्वान् यज्ञः । अग्निपक्षे आपस्तन्व उच्यन्ते। ताभ्यः ओषधिवनस्पतयः । तेभ्योऽग्निरिति नप्तृत्वम् । अरणीभ्यामिति भावः । एतन्नामक हे अग्ने vविप्रस्य मेधाविनः vशशमानस्य शंसमानस्य त्वां स्तुवतः vदाशुषः हविर्दत्तवतः vमावतः मत्सदृशस्य यजमानस्य ॥ ' युष्मदस्मद्भ्यां छन्दसि सादृश्ये ' इति वतुप् । ' आ सर्वनाम्नः ' इति आत्वम् ॥ vघृतवन्तं क्षरदाज्योपेतं vमधुमन्तं माधुर्योपेतं[2] सोमादिमधुरद्रव्येण तद्वन्तं vयज्ञम् vउप उपेत्य vमासि निर्मिमीषे मितो भवसि वा । संपूर्तिपर्यन्तं तिष्ठसीत्यर्थः ॥ ' मा माने ' । आदादिकः ॥

शुचिः पावको अद्भुतो मध्वा यज्ञं मिमिक्षति ।
नराशंसस्त्रिरा दिवो देवो देवेषु यज्ञियः ॥ ३ ॥

शुचिः । पावकः । अद्भुतः । मध्वा । यज्ञम् । मिमिक्षति ।
नराशंसः । त्रिः । आ । दिवः । देवः । देवेषु । यज्ञियः ॥ ३ ॥

vदेवेषु मध्ये vशुचिः शुद्धो दीप्तो वा vपावकः अन्नस्य अपूतस्य शोधयिता vअद्भुतः अभूत इव अद्यक्षणे[3] भविता[3] । आश्चर्यभूत इत्यर्थः । vदेवः द्योतनशीलः vयज्ञियः यज्ञसंपादनार्हः ईदृशः vनराशंसः नरैः कर्मनेतृभिर्ऋत्विग्भिः शंसनीयोऽग्निः vदिवः द्युलोकादागत्य vमध्वा मधुरेण रसेन vयज्ञम् अस्मदीयं vत्रिः vआ vमिमिक्षति त्रिवारं समन्तात्[4] सिञ्चति स्वदयतीत्यर्थः । यद्वा । मधुरेण फलेन त्रिः आ मिमिक्षति योजयतीत्यर्थः । ' नराशंसो यज्ञः ' इति काण्वक्यपक्षे यज्ञाभिमानी देवो द्योतमानो द्युलोकादागत्य अनुष्ठीयमानं यज्ञं त्रिः आ मिमिक्षति । अयं नराशंसो देवस्त्रिरा ॥ उपसर्गवशात् योग्यक्रियाध्याहारः ॥ त्रिवारमागच्छति । त्रिः आहरति वा फलम् । अवशिष्टं पूर्ववन्नेयम् ॥

---

१. ङ-ञ१–तायमानत्वात् । २. ङ-ञ१–मधुनोपेतम् । ३. क्ष-ङ-ञ१-ञ-ट–आद्यक्षणे भविता; ञ–आज्याद्युक्षणेनार्भावात् ( आज्याद्युक्षणेनाविर्भावात् ) । ४. क्ष-ङ-ञ१-ञ-ट–आ समन्तात् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ईळितो अग्न आ वहेन्द्रं चित्रमिह प्रियम् ।
इयं हि त्वा मतिर्ममाच्छा सुजिह्व वच्यते ॥ ४ ॥

ईळितः । अग्ने । आ । वह । इन्द्रम् । चित्रम् । इह । प्रियम् ।
इयम् । हि । त्वा । मतिः । मम । अच्छ । सुऽजिह्व । वच्यते ॥ ४ ॥

हे vअग्ने vईळितः सर्वैः स्तुत्यः इष्णामकस्त्वम् vइह अस्मिन् यज्ञे vचित्रं चायनीयं प्रियं प्रीणयितारम् अस्मान्[1] हविःस्वीकर्तुं[1] वा प्रीतियुक्तम् vइन्द्रम् vआ vवह आह्वय । हे vसुजिह्व घृतपानेन शोभनज्वाल vइयं vमम vमतिः मननसाधना स्तुतिरूपा वाक् vत्वा त्वाम् vअच्छ आभिमुख्येन प्राप्तुं vवच्यते[2] मतिरेवास्मदीयोच्यते[2] ॥ हिः पूरणार्थः । वचेर्यकि ' संप्रसारणाच्च ' इति पूर्वरूपस्य ' वा छन्दसि ' इति विकल्पितत्वात् अभावे यण् ॥ अत्र पुरोडाशादीडभिमानियज्ञपरतया वा व्याख्येयम् । एवमुत्तरत्र यज्ञाङ्गैर्यज्ञसंबन्धिदेवताभिश्च यज्ञः एवोच्यते इति तत्परत्वेन व्याख्येयम् ॥

स्तृणानासो यतस्रुचो बर्हिर्यज्ञे स्वध्वरे ।
वृञ्जे देवव्यचस्तममिन्द्राय शर्म सप्रथः ॥ ५ ॥

स्तृणानासः । यतऽस्रुचः । बर्हिः । यज्ञे । सुऽअध्वरे ।
वृञ्जे । देवव्यचःऽतमम् । इन्द्राय । शर्म । सुऽप्रथः ॥ ५ ॥

vस्वध्वरे शोभनप्रायणीयाद्यवान्तरयागवति vयज्ञे सोमयागे vबर्हिः दर्भान् vस्तृणानासः आस्तरन्तः vयतस्रुचः नियमितजुह्वादिपात्रा ऋत्विजः[3] vदेवव्यचस्तमम् अतिशयेन देवगामिनं vसप्रथः सर्वतो विस्तीर्णं vशर्म सुखसाधनं गृहम् vइन्द्राय vवृञ्जे विवर्जयन्ति संपादयन्तीत्यर्थः ॥

वि श्रयन्तामृतावृधः प्रयै देवेभ्यो महीः ।
पावकासः पुरुस्पृहो द्वारो देवीरसश्चतः ॥ ६ ॥

वि । श्रयन्ताम् । ऋतऽवृधः । प्रऽयै । देवेभ्यः । महीः ।
पावकासः । पुरुऽस्पृहः । द्वारः । देवीः । असश्चतः ॥ ६ ॥

vद्वारो vदेवीः यज्ञस्य द्वाराभिमानिन्यो देवताः vवि vश्रयन्तां विविधं श्रयन्तु विवृता भवन्तु । किमर्थम् । vदेवेभ्यः vप्रयै प्रयातुं देवानां प्रापणाय ॥ ' प्रयै रोहिष्यै अव्यथिष्यै ' ( पा. सू. ३. ४. १० )

---

१. क्ष-ञ१-ञ-ट–अस्मद्धविः स्वीकर्तुम् । २. क्ष-ञ-ट–वच्यते उच्यते । ३. क्ष-ञ-ट–' ऋत्विजः ' इत्यस्यानन्तरं ' वृञ्जे वर्जयन्ति विविक्तं संपादयन्ति । एवं कृत्वा देवव्यचस्तमः ' इत्यधिकम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति निपातितः ॥ कीदृश्यस्ताः । vऋतवृधः[1] यज्ञस्य वर्धयित्र्यः पूज्याः vमहीः महत्यः vपावकासः शोधयित्र्यः vपुरुस्पृहः बहुस्पृहणीयाः vअसश्चतः असज्यमानाः । परस्परविप्रकृष्टा इत्यर्थः ॥ ॥ १० ॥

आ भन्दमाने उपाके नक्तोषासा सुपेशसा ।
यह्वी ऋतस्य मातरा सीदतां बर्हिरा सुमत् ॥ ७ ॥

आ । भन्दमाने इति । उपाके इति । नक्तोषसा । सुऽपेशसा ।
यह्वी इति । ऋतस्य । मातरा । सीदताम् । बर्हिः । आ । सुऽमत् ॥ ७ ॥

vभन्दमाने सर्वैः स्तूयमाने vउपाके परस्परं संनिहिते vसुपेशसा शोभनरूपे । पेश इति रूपनाम । vयह्वी महत्यौ अपत्यरूपे वा प्रतिदिनं जायमानत्वात् । यहुरित्यपत्यनाम, ' यहुः सूनुः ' ( नि. २. २. ११ ) इति तन्नामसु पाठात् । vऋतस्य vमातरा यज्ञस्य निर्मात्र्यौ । ताभ्यामागमनात् यज्ञस्य संपूर्तेर्यज्ञमातृत्वम्[2] उपचर्यते । यद्वा । अतिरात्रादीनाम् अहोरात्रसाध्यत्वात् । vनक्तोषासा उक्तगुणविशिष्टे अहोरात्रदेवते vसुमत् स्वयमेव । अस्माभिरप्रार्थिते इत्यर्थः । यद्वा । सुमत् vबर्हिः आस्तृतं दर्भम् vआ समन्तात् vआ vसीदताम् उपविशताम् । यद्वा । ऋतस्य इति कर्मणि षष्ठी । यज्ञमासीदताम् । आसाद्य च बर्हिरास्तृतं दर्भं स्वयमेवा सीदताम् ॥

मन्द्रजिह्वा जुगुर्वणी होतारा दैव्या कवी ।
यज्ञं नो यक्षतामिमं सिध्रमद्य दिविस्पृशम् ॥ ८ ॥

मन्द्रऽजिह्वा । जुगुर्वणी इति । होतारा । दैव्या । कवी इति ।
यज्ञम् । नः । यक्षताम् । इमम् । सिध्रम् । अद्य । दिविऽस्पृशम् ॥ ८ ॥

vमन्द्रजिह्वा देवानां मादनज्वालौ vजुगुर्वणी भृशं गृणतां स्तुवतां यजमानानां संभक्तारौ ॥ गृणतेर्यङ्लुगन्तात् क्विपि छान्दसी रूपसिद्धिः । तस्मिन्नुपपदे वनतेः ' छन्दसि वनसनरक्षिमथाम् ' इति इनूप्रत्ययः ॥ vकवी मेधाविनौ क्रान्तदर्शिनौ vदैव्या vहोतारा देवसंबन्धिनौ होतारौ अयं च मध्यमस्थानश्चेत्युभौ vसिध्रं फलसाधनभूतम् ॥ सिधेः ' स्फायितञ्चि° ' इत्यादिना रक् ॥ vदिविस्पृशं द्युलोकवासिदेवान् स्पृशन्तम् तैर्हविषः स्वीक्रियमाणत्वादिति भावः । ईदृशं vनः अस्मदीयम् vइमं vयज्ञम् vअद्य vयक्षताम् अनुतिष्ठतां पूजयतां वा सम्यक् निर्वाहयतामित्यर्थः ॥

---

१. क्ष-ञ-ट–ऋतावृधः । २. झ–संपूर्तिर्निर्मातृत्वम्; क्ष-झ १-ञ-ट–संपूर्तेर्निर्मा ( र्मा ) तृत्वम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

शुचिर्देवेष्वर्पिता होत्रा मरुत्सु भारती ।
इळा सरस्वती मही बर्हिः सीदन्तु यज्ञियाः ॥ ९ ॥

शुचिः । देवेषु । अर्पिता । होत्रा । मरुत्ऽसु । भारती ।
इळा । सरस्वती । मही । बर्हिः । सीदन्तु । यज्ञियाः ॥ ९ ॥

vशुचिः शुद्धा vमरुत्सु विरुद्धलक्षणया अमरणेषु vदेवेषु द्योतनशीलेषु स्तोतृषु मरुत्सु ऋत्विक्षु वा vअर्पिता नियता vहोत्रा होमनिष्पादिका भारती भरतस्यादित्यस्य संबन्धिनी द्युस्थाना वाक् । तथा vइळा पार्थिवी प्रैषादिरूपा vमही महती vसरस्वती । सर इत्युदकनाम । तद्वती स्तनितादिरूपा माध्यमिका च वाक् एतास्तिस्रः त्रिस्थानवागभिमानिदेवताः[1] vयज्ञियाः यज्ञार्हाः सत्यः vबर्हिः स्तीर्णं vसीदन्तु उपविशन्तु[2] ॥

तन्नस्तुरीपमद्भुतं पुरु वारं पुरु त्मना ।
त्वष्टा पोषाय वि ष्यतु राये नाभा नो अस्मयुः ॥ १० ॥

तत् । नः । तुरीपम् । अद्भुतम् । पुरु । वा । अरम् । पुरु । त्मना ।
त्वष्टा । पोषाय । वि । स्यतु । राये । नाभा । नः । अस्मऽयुः ॥ १० ॥

vनः अस्मदर्थं vतत् तादृशं vतुरीपं तूर्णं[3] व्यापि[3] vअद्भुतं सद्य आविर्भवत् अभूतमिव सत् । यद्वा । महन्नामैतत् । सारतो महत् । vपुरु vवारं बहूनां प्राणिनामर्थाय एव[4] vअरम् अलं समर्थम् । यद्वा । पुरु वारं बहु प्रभूतं च । वाशब्दश्चार्थे । अरम् अलम् । vत्मना आत्मना vपुरु । बहुक्रियाविशेषणमेतत् । ईदृशमुदकं vत्वष्टा वृष्ट्यादेः कर्ता । त्वष्टृशब्दो यास्केनैवं व्याख्यातः—' त्वष्टा तूर्णमश्नुत इति नैरुक्तास्त्विषेर्वा स्याद्वृद्धिकर्मणस्त्वक्षतेर्वा स्यात्करोतिकर्मणः ' (निरु. ८. १३) इति । तन्नामकों वैद्युतोऽग्निः vअस्मयुः अस्मान् कामयमानो देवः vनः vपोषाय अस्मत्पुष्टये vराये समृद्धये च vनाभा नाभौ वृष्टेर्बन्धके मेघस्य[5] नाभिस्थाने अवस्थितम्[6] उक्तलक्षणमुदकं vवि vष्यतु विविधं गमयतु ॥ ' षोऽन्तकर्मणि ' । ' ओतः श्यनि ' इति ओकारलोपः । ' उपसर्गात्सुनोति° ' इति षत्वम् ॥ यद्वा । नः[7] नाभा अस्मत्संबन्धियज्ञनाभौ उत्तरवेद्यां राये ॥ षष्ठ्यर्थे चतुर्थी ॥ रायो गवादिधनस्य पोषाय पुष्टये ॥ स्यतिरुपसृष्टो विमोचनार्थः ॥ उक्तलक्षणां वृष्टिं मुञ्चतु ॥

---

१. क्ष-ञ-ट-त्रिस्थानाः वागभिमानिनीर्देवताः । २. क्ष-ङ-ञ-झ-झ१-ञ-ट-' उपविशन्तु ' इत्यस्यानन्तरं ' तिस्रः इत्यत्र तिसृभ्यो जस इति जस उदात्तत्वम् ' इत्यधिकम् । ३. ङ-झ-तूर्णव्यापि ४. क्ष-ञ-ट-' एव ' नास्ति । ५. क्ष-ञ-ट-मेघे मेघस्य । ६. क्ष-ञ-ट-वा स्थितम् । ७. क्ष-ङ-ञ१-ञ-ट-नः अस्मान् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अवसृजन्नुप त्मना देवान्यक्षि वनस्पते ।
अग्निर्हव्या सुषूदति देवो देवेषु मेधिरः ॥ ११ ॥

अवऽसृजन् । उप । त्मना । देवान् । यक्षि । वनस्पते ।
अग्निः । हव्या । सुसूदति । देवः । देवेषु । मेधिरः ॥ ११ ॥

हे [v]वनस्पते वनानां पालक यूपाभिमानिदेव अग्ने [v]अवसृजन् स्वैरं वर्तयन् ऋत्विजः स्वस्वकर्मसु व्यापारयन् [v]त्मना आत्मना [v]देवान् हविर्भुजः [v]उप [v]यक्षि उपेत्य यज ॥ ' बहुलं छन्दसि ' इति शपो लुक् ॥ [v]देवः द्योतमानः [v]मेधिरः मेधावान् [v]अग्निः आहवनीयः [v]देवेषु उभयेषां मध्ये [v]हव्या हवींषि [v]सुसूदति[1] प्रेरयति स्वीकरोति[2] ॥ ' षूद क्षरणे ' । ' बहुलं छन्दसि ' इति शपः श्लुः । ' लेटोऽडाटौ ' इति अडागमः ॥ यद्वा । यूपाग्निरेव परोक्षेणोच्यते । सोऽग्निर्हवींषि सुष्ठु स्वीकरोति ॥

पूषण्वते मरुत्वते विश्वदेवाय वायवे ।
स्वाहा गायत्रवेपसे हव्यमिन्द्राय कर्तन ॥ १२ ॥

पूषण्ऽवते । मरुत्वते । विश्वऽदेवाय । वायवे ।
स्वाहा । गायत्रऽवेपसे । हव्यम् । इन्द्राय । कर्तन ॥ १२ ॥

[v]पूषण्वते पूष्णा तद्वते ॥ ' अनो नुट् ' इति नुट् । ' ह्रस्वनुड्भ्यां मतुप् ' इति मतुप उदात्तत्वम् ॥ [v]मरुत्वते मरुद्भिस्तद्वते [v]विश्वदेवाय सर्वदेवसंघाय [v]वायवे गमनशीलाय वायुदेवाय च तथा [v]गायत्रवेपसे । वेप इति रूपनाम । गायत्रशब्दः इतरसामोपलक्षणः[3] । गायत्रं वेपो रूपं यस्य तादृशाय [v]इन्द्राय [v]हव्यं हविः प्रदातुं [v]स्वाहा [v]कर्तन स्वाहाकारं कुरुत ऋत्विजः ॥ करोतेर्लोटि ' तप्तनप्तनथनाश्च ' इति तनबादेशः ॥

स्वाहाकृतान्या गह्युप हव्यानि वीतये ।
इन्द्रा गहि श्रुधी हवं त्वां हवन्ते अध्वरे ॥ १३ ॥

स्वाहाऽकृतानि । आ । गहि । उप । हव्यानि । वीतये ।
इन्द्र । आ । गहि । श्रुधि । हवम् । त्वाम् । हवन्ते । अध्वरे ॥ १३ ॥

हे इन्द्र [v]स्वाहाकृतानि । स्वाहा इत्येवंपूर्वा कृतिः करणमुच्चारणं यक्ष्यमाणदेवतानां ताः स्वाहाकृतयः । तद्वन्ति [v]हव्यानि हवींषि । अत्र प्रयाजेषु वषट्कारप्रदानात् स्वाहाकृतं[4] हविरित्यर्थः ।

---

१. क्ष-ञ-ट–सुषूदति । २. क्ष-ञ-ट–स्वीकरोति वा । ३. क्ष-झ-झ१-ञ-ट–इतरसामोपलक्षकः । ४. क्ष-ङ-झ१-ञ-ट–स्वाहान्तम्; श-झ–स्वाहुतम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तद्धविः उपेत्य[1] Vवीतये भक्षणाय Vआ Vगहि आगच्छ ॥ गमेश्छान्दसः शपो लुक् । 'अनुदात्तोपदेश०' इत्यादिना अनुनासिकलोपः ॥ तथा हे Vइन्द्र Vआ Vगहि स्तोत्राण्यभिलक्ष्य आगच्छ । आगत्य Vहवम् अस्मदीयमाह्वानं Vश्रुधि शृणु । यतः Vत्वाम् Vअध्वरे अहिंसात्मके यागे Vहवन्ते आह्वयन्ति ऋत्विजः अतः श्रुधि ॥ ह्वयतेः ' बहुलं छन्दसि ' इति संप्रसारणम्[2] ॥ ॥ ११ ॥

' प्र तव्यसीम् ' इति अष्टर्चं चतुर्थं सूक्तं दैर्घतमसम् । तथा चानुक्रान्तं–' प्र तव्यसीमष्टावाग्नेयं तु तत् त्रिष्टुबन्तम् ' इति । ' तु तत् ' इत्युक्तत्वात् इदमादिसूक्ताष्टकस्य अग्निर्देवता । अन्त्या त्रिष्टुप् शिष्टाः त्रिष्टुबन्तपरिभाषया जगत्यः । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः । अग्निष्टोमे आग्निमारुते शस्त्रे इदं सूक्तं जातवेदस्यनिविद्धानीयम् । ' अथ यथेतम् ' इति खण्डे सूत्रितं–' प्र तव्यसीं नव्यसीमापो हि ष्टेति तिस्रः ' ( आश्व. श्रौ. ५. २० ) इति । दशरात्रस्य प्रथमेऽप्यहनि[3] जातवेदस्यनिविद्धानम् आश्वमेधिके मध्यमेऽहनि च निविद्धानम् । तथा च आचार्यातिदेशः–' ऐकाहिकान्युपसंशस्य तेषु निविदो दध्यादेवमेवाग्निमारुते ' ( आश्व. श्रौ. १०. १० ) इति ॥

**प्र तव्यसीं नव्यसीं धीतिमग्नये वाचो मतिं सहसः सूनवे भरे ।**
**अपां नपाद्यो वसुभिः सह प्रियो होता पृथिव्यां न्यसीददृत्वियः ॥ १ ॥**

प्र । तव्यसीम् । नव्यसीम् । धीतिम् । अग्नये । वाचः । मतिम् । सहसः । सूनवे । भरे ।
अपाम् । नपात् । यः । वसुऽभिः । सह । प्रियः ।
होता । पृथिव्याम् । नि । असीदत् । ऋत्वियः ॥ १ ॥

अहम् Vअग्नये Vतव्यसीं तवीयसीम् अतिशयेन वर्धयित्रीम् ॥ तवतिर्वृद्ध्यर्थः सौत्रो धातुः । अस्मात् तृजन्तात् ' तुश्छन्दसि ' इति ईयसुन् । ' तुरिष्टेमेयःसु ' इति तृलोपः । छान्दस ईकारलोपः ॥ Vनव्यसीं नवतरामपूर्वां Vधीतिं यागलक्षणाम्[4] उक्तगुणकं कर्म Vप्र Vभरे प्रकर्षेण करोमि । तथा उक्तलक्षणां Vवाचो Vमतिं स्तुतिरूपं कर्म भरे । कीदृशायाग्नये । Vसहसः बलस्य Vसूनवे पुत्राय । किंच Vयः अग्निः Vअपां Vनपात् तासां नप्ता । ' अद्भ्यः ओषधयः ओषधीभ्योऽग्निः ' इति अग्नेर्नप्तृत्वम् । अथवा अपां न पातयिता वैद्युताग्निरूपेण प्रवर्षकत्वादिति भावः । तथा Vप्रियः यजमानस्य प्रीणयिता प्रियतमो वा तस्य Vहोता होमनिष्पादकः सोऽग्निः Vऋत्वियः प्राप्तकालः प्राप्तप्रदानसमयः सन् Vपृथिव्यां वेदिलक्षणायां Vवसुभिः निवासयोग्यैर्गवादिधनैः सहितः Vन्यसीदत् नितरां सीदति ॥

**स जायमानः परमे व्योमन्याविरग्निरभवन्मातरिश्वने ।**
**अस्य क्रत्वा समिधानस्य मज्मना प्र द्यावा शोचिः पृथिवी अरोचयत् ॥२॥**

सः । जायमानः । परमे । विऽओमनि । आविः । अग्निः । अभवत् । मातरिश्वने ।
अस्य । क्रत्वा । सम्ऽइधानस्य । मज्मना । प्र । द्यावा । शोचिः । पृथिवी इति । अरोचयत् ॥२॥

---

१. क्ष-ज्ञ१-ञ-ट–उप उपेत्य । २. क्ष-ञ-ट–शपि संप्रसारणम् । ३. च–प्रथमेऽहनि । ४. च-ज्ञ-फ–यागलक्षणम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vसः पूर्वोक्तः vअग्निः vजायमानः अरणीभ्यामुत्पद्यमानः काष्ठेषु वा प्रादुर्भूतः सन् तदानीमेव vपरमे उत्कृष्टे vव्योमनि विविधरक्षणवति वेदिदेशे vमातरिश्वने अन्तरिक्षसंचारिणे वायवे प्रथमम् vआविः vअभवत् प्रत्यक्षोऽभूत्। 'त्वमग्ने प्रथमो मातरिश्वन आविर्भव' (ऋ. सं. १. ३१.३) इत्यादिश्रुत्यन्तरप्रसिद्धेः। वायुसंयोगात् प्रज्वलित इत्यर्थः। अथवा मातरि फलस्य निर्मातरि यज्ञे श्वसिति चेष्टते इति मातरिश्वा यजमानः। तदर्थम्। किंच vसमिधानस्य[1] इन्धनैः सम्यग्वर्धमानस्य अग्नेः[2] vमज्मना। बलनामैतत्। बलवता vक्रत्वा क्रतुना कर्मणा ज्वालनादिव्यापारेण[3] vशोचिः[4] vद्यावा vपृथिवी द्यां च पृथिवीं च vप्र vअरोचयत् प्रकर्षेणादीपयत्॥ मध्ये शोचिःशब्दश्छान्दसः॥ मज्मना क्रत्वा समिधानस्येति वा योज्यम्। प्रबलेन समिन्धनादिव्यापारेण समिध्यमानस्येत्यर्थः॥

अस्य त्वेषा अजरा अस्य भानवः सुसंदृशः सुप्रतीकस्य सुद्युतः।
भात्वक्षसो अत्यक्तुर्न सिन्धवोऽग्ने रेजन्ते असंसन्तो अजराः॥ ३॥

अस्य। त्वेषाः। अजराः। अस्य। भानवः। सुऽसंदृशः। सुऽप्रतीकस्य। सुऽद्युतः।
भाऽत्वक्षसः। अति। अक्तुः। न। सिन्धवः। अग्नेः। रेजन्ते। असंसन्तः। अजराः॥३॥

vअस्य स्तूयमानस्याग्नेः vत्वेषाः दीप्तयः vअजराः जरारहिताः अजीर्णाः[5] अविरता इत्यर्थः॥ 'नञो जरमर०' इत्यादिना उत्तरपदाद्युदात्तत्वम्॥ तथा vसुप्रतीकस्य शोभनमुखस्य vअस्य अग्नेः vभानवः रश्मयः। दीप्तेरुक्तत्वादत्र विस्फुलिङ्गा अवगन्तव्याः। ते च vसुसंदृशः सुष्ठु सम्यक् द्रष्टारः। सर्वतो व्याप्ता इत्यर्थः। vसुद्युतः सुष्ठु सर्वतो द्योतमानाः। तथा अस्य vअग्नेः vभात्वक्षसः। त्वक्ष इति बलनाम, 'त्वक्षः शर्धः' (नि. २. ९. ६) इति बलनामसु पाठात्। भासमानबलाः। vअक्तुः इति रात्रिनामैतत्, 'अक्तुः ऊर्म्या' (नि. १. ७. ४) इति तन्नामसूक्तत्वात्। द्वितीयार्थे प्रथमा। अक्तुं जगदञ्जकं नैशं तमः vअति अतिक्रम्य vसिन्धवः स्यन्दमानाः सर्वत्र व्याप्नुवन्तः vअससन्तः स्वव्यापारेषु अस्वपन्तोऽविरताः अत एव vअजराः vन vरेजन्ते न कम्पन्ते। दाहपाकादिषु[6] न चलन्ति न चाल्यन्ते वा अन्यैः। यद्वा। नशब्दो दृष्टान्तवचनः। भात्वक्षसो भा एव त्वक्षो बलं यस्य तादृशस्यादित्यस्य सिन्धवो न रश्मय इव। ते यथा स्यन्दनशीला व्याप्नुवन्तः अक्तुरति[7] अञ्जकं तमः अतिक्रम्य[8] असंसन्तो रेजन्ते तद्वत् भात्वक्षसोऽस्याग्नेरुक्तलक्षणा दीप्तयोऽपि सर्वत्र रेजन्ते कम्पन्ते व्याप्नुवन्तीत्यर्थः॥

यमीरिरे भृगवो विश्ववेदसं नाभा पृथिव्या भुवनस्य मज्मना।
अग्निं तं गीर्भिर्हिनुहि स्व आ दमे य एको वस्वो वरुणो न राजति॥४॥

यम्। आऽईरिरे। भृगवः। विश्वऽवेदसम्। नाभा। पृथिव्याः। भुवनस्य। मज्मना।
अग्निम्। तम्। गीःऽभिः। हिनुहि। स्वे। आ। दमे। यः। एकः। वस्वः। वरुणः। न। राजति॥४॥

---

१. त–यजमानस्य। २. ख-ज-ञ-फ–अस्य अग्नेः। ३. क्ष-ङ-ञ-झ-ञ-ट-त–ज्वालाचालनादिव्यापारेण। ४. क्ष-ङ-झ१-ञ-ट–शोचिः उत्पादितं तेजः। ५. ज्ञ–अक्षीणाः ६. क्ष-ङ-झ१-ञ-ट–दाहपाकादिष्वपि। ७. क्ष-ञ-ञ-ट–अक्तुरिति। ८. क्ष-ञ-ट–अतिक्रम्य अजराः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]विश्ववेदसं सर्वधनम्। वेद इति धननाम, 'वेदः वरिवा' (नि. २. १०. ४) इति तन्नामसु पाठात्। तादृशं [v]यम् अग्निं [v]भृगवः भृगुगोत्रोत्पन्नाः पापस्य भर्जकाः [v]पृथिव्याः वेद्याः। एकदेशे कृत्स्नशब्दः। यद्वा। 'एतावती वै पृथिवी' (तै. सं. २. ६. ४. ३) इत्यादिश्रुतेर्वेद्याः पृथिवीत्वम्। तस्या नाभौ उत्तरवेद्यां [v]भुवनस्य भूतजातस्य [v]मज्मना बलेन निमित्तेन [v]आ आभिमुख्येन [v]ईंरिरे ईरितवन्तः स्थापितवन्तः[1] [v]तम् [v]अग्निं [v]स्वे स्वकीये [v]दमे गृहे उत्तरवेद्यां [v]गीर्भिः स्तुतिभिः [v]आ [v]हिनुहि प्रामुहि॥ 'हि गतौ वृद्धौ च'। 'उतश्च प्रत्ययाच्छन्दसि वावचनम्' इति हेर्लुगभावः॥ [v]यः अग्निः [v]एकः मुख्यः सन् एक एव वा [v]वस्वः वसुनो गवादिधनस्य [v]राजति ईश्वरो भवति। प्रदातुमिति शेषः। राजति इत्यैश्वर्यकर्मा, 'क्षियति राजति' (नि. २. २१. ४) इति तन्नामसु पाठात्। तत्र दृष्टान्तः। [v]वरुणो [v]न वारक आदित्य इव। स यथा सर्वस्य[2] ईष्टे तद्वत्॥

न यो वरा॑य म॒रुता॑मिव स्व॒नः सेने॑व सृ॒ष्टा दि॒व्या यथा॒शनिः॑।
अ॒ग्निर्ज॒म्भैस्ति॑गि॒तैर॑त्ति॒ भर्व॑ति॒ योधो न श॒त्रून्त्स वना॒ न्यृ॑ञ्जते॥ ५॥

न। यः। वरा॑य। म॒रुता॑म्ऽइव। स्व॒नः। सेना॑ऽइव। सृ॒ष्टा। दि॒व्या। यथा॑। अ॒शनिः॑।
अ॒ग्निः। ज॒म्भैः। ति॒गि॒तैः। अ॒त्ति॒। भर्व॑ति। योधः॑। न। श॒त्रून्। सः। वना॑। नि। ऋ॒ञ्ज॒ते॥५॥

[v]यः अग्निः [v]वराय वरणाय निग्रहाय [v]न[3] शक्तो न भवति[3]। तत्र दृष्टान्तत्रयमुच्यते। [v]मरुतां [v]स्वनः [v]इव। स यथा अग्राह्यः[4] तद्वत्। तथा [v]सृष्टा वैरिक्षयार्थं[5] प्रबलेन अतिसृष्टा [v]सेनेव। सा यथा अन्यैः अनिरोध्या तद्वत्। तथा [v]दिव्या दिवि भवा [v]अशनिः [v]यथा पतत्येव न निवार्यते तद्वत्। ईदृक् सामर्थ्यमस्तीति दर्शयति। अयम् [v]अग्निः [v]तिगितैः निशितैस्तीक्ष्णीभूतैः॥ अग्त्यविकारश्छान्दसः। [v]जम्भैः दन्तैर्दन्तस्थानीयाभिर्ज्वालाभिः [v]अत्ति अस्मद्विरोधिनो भक्षयति। तथा [v]भर्वति हिनस्ति॥ 'भर्व हिंसायाम्'॥ यास्कस्त्वाह–'भर्वतिरत्तिकर्मा' (निरु. ९. २३) इति। यद्यपि अत्तिभर्वत्योः अदनमेवार्थः तथापि तदवान्तरभेदोऽवगन्तव्यः। तत्र दृष्टान्तः। [v]योधो [v]न संग्रहर्ता शूर इव। स यथा [v]शत्रून् भर्वति भक्षयति[6] तद्वत्। किंच [v]सः अग्निः [v]वना वनानि वृक्षादिसमूहान् [v]न्यृञ्जते नितरां प्रसाधयति दहतीत्यर्थः। 'ऋञ्जतिः प्रसाधनकर्मा' इति यास्कः॥

कु॒विन्नो॑ अ॒ग्निरु॒चथ॑स्य॒ वीर॑स॒द्वसु॑ष्कु॒विद्वसु॑भिः कामम॒वर॑त्।
चो॒दः कु॒वित्तु॑तु॒ज्यात्सा॒तये॒ धिय॒ः शुचि॑प्रतीकं॒ तमया॒ धिया॑ गृणे॥ ६॥

कु॒वित्। नः॒। अ॒ग्निः। उ॒चथ॑स्य। वीः। अस॑त्। वसु॑ः। कु॒वित्। वसु॑ऽभिः। कामम्। आऽव॑रत्।
चो॒दः। कु॒वित्। तु॒तु॒ज्यात्। सा॒तये॑। धिय॑ः। शुचि॑ऽप्रतीकम्। तम्। अ॒या। धि॒या। गृ॒णे॥६॥

---

१. क्ष-ञ-ट–स्थापितवन्तः। ईर गतौ। २. झ१–सर्वस्य वसुनः। ३. ङ-झ१–न शक्यो न भवति; च-फ–न शक्तो भवति; झ-त–शक्तो न भवति। ४. क्ष-ञ-ट–अनिग्राह्यः; झ–सर्वैः अग्राह्यः। ५. क्ष-ङ-झ१-ञ-ट–वैरिजयार्थम्। ६. क्ष-ङ-ज्ञ-झ-झ१-ञ-ट–भक्षयति नाशयति।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अयम् [v]अग्निः [v]नः अस्माकम् [v]उचथस्य उक्थस्य स्तोत्रस्य [v]कुवित् बहुवारं [v]वीः कामयिता [v]असत् भवतु ॥ अस्तेर्लेटि अडागमः ॥ यद्वा । उचथस्य[1] एतन्नामकस्य महर्षेर्गोत्रप्रभवस्य नः इति संबन्धः। तथा [v]वसुः वासयिता सर्वेषां वसुस्थानीयो वा [v]वसुभिः वासयितृभिर्धनैः [v]कामम् अत्यर्थमभिमतं वा [v]कुवित् अतिप्रभूतम् [v]आवरत् आवृणोतु । अभिमतप्रदानेन कामं निवर्तयत्वित्यर्थः ॥ वृणोतेर्लेटि अडागमः । छान्दसो विकरणस्य लुक् ॥ अयमग्निः [v]चोदः अस्माकं कर्मसु प्रेरकः सन् [v]धियः कर्माणि [v]सातये लाभाय [v]कुवित् बहु[2] [v]तुतुज्यात् त्वरयतु प्रेरयतु[3] इत्यर्थः ॥ तुजिः प्रेरणार्थः । छान्दसः शपः श्लुः ॥ [v]शुचिप्रतीकं शोभनावयवं शोभनज्वालं [v]तम् अग्निम् [v]अया [v]धिया अनया स्तुतिरूपया प्रज्ञया [v]गृणे उच्चारयामि स्तौमीत्यर्थः ॥

घृतप्रतीकं व ऋतस्य धूर्षदमग्निं मित्रं न समिधान ऋञ्जते ।
इन्धानो अक्रो विदथेषु दीद्यच्छुक्रवर्णामुदु नो यंसते धियम् ॥ ७ ॥

घृतऽप्रतीकम् । वः । ऋतस्य । धूःऽसदम् । अग्निम् । मित्रम् । न । सम्ऽइधानः । ऋञ्जते ।
इन्धानः । अक्रः । विदथेषु । दीद्यत् । शुक्रऽवर्णाम् । उत् । ऊँ इति । नः । यंसते । धियम् ॥७॥

[v]घृतप्रतीकं घृतोपक्रमं प्रयाजादिषु आज्यैर्हूयमानत्वात् । यद्वा । प्रतीकमङ्गम् । दीप्तज्वालमित्यर्थः । किंच [v]वः युष्मत्संबन्धिनः [v]ऋतस्य यज्ञस्य [v]धूर्षदं धुरि निर्वहणे सीदन्तं यज्ञनिर्वाहकम् [v]अग्निं [v]मित्रं [v]न मित्रमिव [v]समिधानः इध्मैर्दीपयमानः [v]ऋञ्जते प्रसाधयति । ऋञ्जतिः प्रसाधनकर्मा। एवम् [v]इन्धानः सम्यग्दीप्यमानः [v]अक्रः ज्वालासमिदादिभिराक्रान्तः अन्यैः अनाक्रान्तः[4] वा ॥ क्रमेश्छान्दसो डः ॥ [v]विदथेषु[5] यज्ञेषु वेदयत्सु स्तोत्रेषु निमित्तभूतेषु [v]दीद्यत् स्वयं दीप्यमानः अस्मदीयां [v]धियं प्रज्ञां यागादिविषयां [v]शुक्रवर्णां शुभ्रवर्णां निर्मलां ज्योतिष्टोमादि कर्म वा [v]उदु [v]यंसते उद्योजयत्येव[6] ॥ यमेर्लेटि अडागमः । सिप् ॥ उशब्दोऽवधारणे । धीरिति कर्मनाम, 'धीः शमी' ( नि. २. १. २१ ) इति तन्नामसु पाठात् ॥

अप्रयुच्छन्नप्रयुच्छद्भिरग्ने शिवेभिर्नः पायुभिः पाहि शग्मैः ।
अदब्धेभिरदितेभिरिष्टेऽनिमिषद्भिः परि पाहि नो जाः ॥ ८ ॥

अप्रऽयुच्छन् । अप्रयुच्छत्ऽभिः । अग्ने । शिवेभिः । नः । पायुऽभिः । पाहि । शग्मैः ।
अदब्धेभिः । अदितेभिः । इष्टे । अनिमिषत्ऽभिः । परि । पाहि । नः । जाः ॥ ८ ॥

हे [v]अग्ने [v]अप्रयुच्छन् अस्मासु अप्रमाद्यन् ॥ 'युच्छ प्रमादे' । अविच्छिन्नप्रवृत्तिः सन् [v]अप्रयुच्छद्भिः अप्रमाद्यद्भिः अनवधानरहितैः [v]शिवेभिः मन्त्रकल्याणैः [v]शग्मैः सुखकरैः [v]पायुभिः रक्षणप्रकारैः [v]नः

---

१. ख-च-ज-झ-त-फ-व–उचथस्य नः । २. झ–बहु यथा तथा । ३. झ१–कारयतु । ४. ख-च-ज-ण-त-न-व–अनुक्रान्तः । ५. ङ-च-झ१-ञ-ट–विदथेषु दुष्क्रान्तो वा । ६. क-श–ख-फ–उद्योतयत्येव ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अस्मान् vपाहि रक्ष। किंच हे vइष्टे सर्वैः एषणीयाग्ने vजाः जायमानोऽस्माभिर्दीप्यमानः सन् vअदब्धेभिः अहिंसितैः vअदृपितेभिः केनचिदप्यपरिभूतैः॥ 'दृप दृम्फ उत्क्लेशे'। तौदादिकः॥ vअनिमिषद्भिः निमेषरहितैः अनलसस्वभावैः ईदृशैः लक्षणैः[1] vनः अस्मान् vपरि परितः vपाहि पालय। यद्वा। उपर्युपरि जायन्ते इति जाः। नो जाः अस्मत्संबन्धिनीः पुत्रपौत्रादिरूपाः प्रजाः परि पाहि परितो रक्ष। न केवलमस्मान् किंतु अस्मत्पुत्रपौत्रादीनपि रक्ष॥ ॥ १२ ॥

'एति प्र होता' इति सप्तर्चं पञ्चमं सूक्तं दैर्घतमसं जागतम्। पूर्ववत्र 'आग्नेयं तु तत्' इत्युक्तत्वात् इदमप्याग्नेयम्। तथा चानुक्रमणिका–'एति प्र सप्त जागतम्' इति। प्रातरनुवाकाश्विनशस्त्रयोर्विनियोग उक्तः॥

एति॒ प्र होता॑ व्र॒तमस्य माययो॒र्ध्वां दधा॑नः शुचि॑पेशसं॒ धिय॑म्।
अ॒भि स्रुचः॑ क्रमते दक्षिणा॒वृतो॒ या अ॑स्य॒ धाम॑ प्रथ॒मं ह॒ निंस॑ते॥ १॥

एति॑। प्र। होता॑। व्र॒तम्। अ॒स्य॒। मा॒यया॑। ऊ॒र्ध्वाम्। दधा॑नः। शुचि॑ऽपेशसम्। धिय॑म्।
अ॒भि। स्रुचः॑। क्र॒म॒ते॒। द॒क्षि॒णा॒ऽआ॒वृ॒तः॑। याः। अ॒स्य॒। धाम॑। प्र॒थ॒मम्। ह॒। निंस॑ते॥१॥

अयं vहोता होमनिष्पादकोऽध्वर्युः vअस्य अग्नेः vव्रतं हविष्प्रदानादिरूपं कर्म कर्तुं vमायया कर्तव्यविशेषप्रज्ञया युक्तः सन् vप्र vएति प्रकर्षेण गच्छति होतुम्। मायेति प्रज्ञानाम, 'माया वयुनम्' (नि. ३. ९. ९) इति तन्नामसु पाठात्। कीदृशोऽयम्। vऊर्ध्वाम् उपर्यारूढां vशुचिपेशसं शोभनरूपोपेताम्। पेश इति रूपनाम। vधियं प्रज्ञां vदधानः। 'आ[2] चतुर्थात्कर्मणोऽभिसमीक्षेतेदं करिष्यति' इत्युक्तत्वात्[2]। आगत्य च vदक्षिणावृतः प्रादक्षिण्येन वर्तमानाः vस्रुचः जुह्वादीः vक्रमते गृह्णाति। कीदृश्यः स्रुचः। vयाः vप्रथमं पात्रासादनकाले vअस्य अग्नेः vधाम स्थानं vनिंसते॥ 'निंस[3] चुम्बने इति धातुः॥ चुम्बन्ति भजन्ते इत्यर्थः। प्रथममनुष्ठेयक्रमं बुद्धया प्रैति पश्चात् स्रुचः क्रमते इत्यर्थः। हशब्दः प्रसिद्धौ। यद्वा। होता देवानामाह्वाता अयमग्निः अस्य यजमानस्य व्रतं कर्म ज्योतिष्टोमादि प्रज्ञाविशेषेण युक्तः सन् एति। यज्ञदेशं प्रत्यागच्छति। कीदृशोऽयम्। ऊर्ध्वामूर्ध्ववर्तिं शुचिपेशसं शोभनरूपोपेतं[4] धियं ज्वालाचलनादिरूपं[5] कर्म दधानः धारयमाणः। आगत्य च दक्षिणावृतः उक्तलक्षणाः स्रुचो घृतपूर्णा जुहूपभृदादिका अभि क्रमते आक्रमते। घृतं स्वीकर्तुं ज्वालाः प्रसर्पन्ति इत्यर्थः। याः स्रुचः प्रथमं पूर्वं हविरासादनकाले अस्याग्नेर्धाम स्थानं वेदिलक्षणं निंसते चुम्बन्ति प्राप्ताः। हशब्दः प्रसिद्धौ॥ 'णिसि चुम्बने'। अदादित्वात् शपो लुक्। इदित्त्वात् नुम्॥

---

१. क्ष-ञ१-ञ-ट–रक्षणैः। २. क्ष-ङ-ञ१-ञ-ट–आ चतुर्थात् कर्मणः त्वं नो अभि समीक्ष्य इदं करिष्ये इदं करिष्ये इत्युक्तत्वात्। ३. ख-च–णिसि; ४. क्ष-ङ-ञ-ट–शोभनरूपोपेताम्। ५. क्ष-ङ-ञ१-ञ-ट–ज्वालाचालनादिरूपम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अभी मृतस्य दोहना अनूषत योनौ देवस्य सदने परीवृताः ।
अपामुपस्थे विभृतो यदावसदध स्वधा अधयद्याभिरीयते ॥ २ ॥

अभि । ईम् । ऋतस्य । दोहनाः । अनूषत । योनौ । देवस्य । सदने । परिऽवृताः ।
अपाम् । उपऽस्थे । विऽभृतः । यत् । आ । अवसत् ।
अध । स्वधाः । अधयत् । याभिः । ईयते ॥ २ ॥

[v]ऋतस्य उदकस्य [v]दोहनाः धाराः [v]योनौ उत्पत्तिस्थाने [v]देवस्य [v]सदने द्योतमानस्य आदित्यस्य स्थाने [v]परीवृताः तद्रश्मिभिः परितो व्याप्ताः सत्यः [v]अभि [v]अनूषत अभिनवा भवन्ति । आभवन्त्येव[1] स्तूयन्ते वा[1] । कदेत्यत आह । [v]यत् यदा [v]अपामुपस्थे उदकानामुत्सङ्गे अन्तः [v]विभृतः विशेषेण ताभिर्धार्यमाणः सन् [v]आवसत् आक्रम्य निवसत्ययमग्निः तदानीमित्यर्थः । [v]अध अधुना [v]स्वधाः अमृतोपमाः अपः [v]अधयत् पिबति सर्वो लोकः । ता विशेष्यन्ते । [v]याभिः सह [v]ईयते अयमग्निः संगच्छते[2] वा भूमिं ता अधयत् । विद्युदात्मना उदकानि जगत् पाययते[3] इत्यग्नेः स्तुतिः ॥

युयूषतः सवयसा तदिद्वपुः समानमर्थं वितरित्रता मिथः ।
आदीं भगो न हव्यः समस्मदा वोळ्हुर्न रश्मीन्त्समयंस्त सारथिः ॥ ३ ॥

युयूषतः । सऽवयसा । तत् । इत् । वपुः । समानम् । अर्थम् । विऽतरित्रता । मिथः ।
आत् । ईम् । भगः । न । हव्यः । सम् । अस्मत् । आ ।
वोळ्हुः । न । रश्मीन् । सम् । अयंस्त । सारथिः ॥ ३ ॥

[v]सवयसा समानवयस्कौ । वयःशब्देन सामर्थ्यं लक्ष्यते । समानसामर्थ्यौ [v]तदित् तदानीमेव यदा प्रवृद्धो भवति तदानीमेव [v]समानमर्थं समानप्रयोजनं[4] निष्पत्तिं[4] [v]मिथः प्रत्येकं [v]वितरित्रता भृशं तरन्तौ[5] होत्रध्वर्यू [v]वपुः अग्नेः शरीरं [v]युयूषतः स्वस्वव्यापारेण मिश्रयितुमिच्छतः । प्रैषानन्तरं याज्यादिपाठो होतुर्व्यापारः वषट्कारानन्तरं होमोऽध्वर्योरिति विभागः । अत्रेदमनुसंधेयम् । सवयसा समानवयस्कौ मिथः प्रत्येकं समानप्रयोजनं[6] सुखप्राप्तिं वितरित्रता विशेषेण तरितुमिच्छन्तौ ॥ तरतेर्यङ्लुगन्तात् शतरि दाधर्त्यादौ ( पा. सू. ७. ४. ६५ ) निपात्यते । द्विवचनस्य आकारः ॥ जायापती तद्वपुस्तदेव परस्परं[7] शरीरं[7] युयूषतः मिश्रयितुमिच्छतः परस्परमालिङ्गतः । तद्वदग्निं[8] साकं[8] होत्रध्वर्यू युयूषतः । [v]आदीम् अनन्तरमेव [v]हव्यः आहवनीयोऽग्निः सारथिः सरणशीलः सारथिवत् यज्ञात्मकस्य

---

१. क्ष-ङ-ञ१-ञ-ट–आविर्भवन्ति आभिमुख्येन स्तूयन्ते वा । २. क्ष-ञ-ञ-ञ१-ञ-ट–संगच्छते गच्छति । ३. क्ष-ञ-ट–पालयते । ४. क्ष-ञ-ट–समानप्रयोजनं यज्ञनिष्पत्तिम् ; ङ-ञ१–समानप्रयोजनयज्ञनिष्पत्तिम् ; ञ–समानप्रयोजननिष्पत्तिम् । ५. क्ष-ञ-ट–वितरन्तौ । ६. क्ष-ञ-ट–समानमर्थं समानप्रयोजनम् । ७. ञ१–परस्परशरीरम् । ८. क्ष-ख-ङ-ज-ञ-ञ-ञ१-ञ-ट-फ–तद्वदग्नेः साकम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

रथस्य निर्वाहको वा सन् vअस्मत् अस्माकं संबन्धिनः vरश्मीन् रश्मिवदायता घृतधाराः vआ सर्वतः vसमयंस्त सम्यक् स्वीकरोति । तत्र दृष्टान्तद्वयमुच्यते। vभगो[1] vन सर्वैः सेवनीय आदित्यः[1] स यथा सर्वतः पूजामादत्ते तद्वत् । vसारथिः[2] रथस्य यन्ता वोढुर्वाहकस्याश्वादेः रश्मीन् प्रग्रहानिव । तान् यथा स्वीकरोति तद्वदयमग्निरपि हवींषि समयंस्त ॥

यमीं द्वा सवयसा सपर्यतः समाने योना मिथुना समोकसा ।
दिवा न नक्तं पलितो युवाजनि पुरू चरन्नजरो मानुषा युगा ॥ ४ ॥

यम् । ईम् । द्वा । सऽवयसा । सपर्यतः । समाने । योना । मिथुना । सम्ऽओकसा ।
दिवा । न । नक्तम् । पलितः । युवा । अजनि । पुरु । चरन् । अजरः । मानुषा । युगा ॥ ४ ॥

vयमीम् एनमग्निं vद्वा द्वौ vसवयसा समानवयस्कौ समानसामर्थ्यौ वा vसमाने vयोना योनौ फलस्योत्पत्तिस्थाने यज्ञे वर्तमानौ vमिथुना दम्पती इव एककार्योद्युक्तौ vसमोकसा समाननिवासौ देवयजनस्थानौ ईदृशौ होत्रध्वर्यू vसपर्यतः पूजयतः स्तुत्या हविष्प्रदानेन च प्रीणयतः[3]। कदेत्याह । vदिवा vन अहनीव vनक्तं रात्रावपि । सर्वदेत्यर्थः । एवं पूज्यमानोऽग्निः vपलितः पूर्वम् अङ्गारावस्थायां जीर्णोऽपि[4] समिन्धनानन्तरं vयुवा तरुणः तेजसा सर्वस्य मिश्रयिता वा vअजनि जायते । एवं जातोऽयं vमानुषा vयुगा मनोः संबन्धीनि युगानि जायापतिरूपाणि होत्रध्वर्युरूपाणि वा उद्दिश्य vपुरु vचरन् बह्वाज्यादिकं भक्षयन् vअजरः अजीर्णो जरारहितो वर्तते ॥

तमीं हिन्वन्ति धीतयो दश त्रिशो देवं मर्तास ऊतये हवामहे ।
धनोरधि प्रवत आ स ऋण्वत्यभिव्रजद्भिर्वयुना नवाधित ॥ ५ ॥

तम् । ईम् । हिन्वन्ति । धीतयः । दश । त्रिशः । देवम् । मर्तासः । ऊतये । हवामहे ।
धनोः । अधि । प्रऽवतः । आ । सः । ऋण्वति । अभिव्रजत्ऽभिः । वयुना । नवा । अधित ॥५॥

vदेवं द्योतमानं vतम्[5] एनमग्निं[5] vदश vधीतयः दशसंख्याका अङ्गुलयः vत्रिशः विंशः परस्परविश्लिष्टाः vहिन्वन्ति प्रीणयन्ति मथनकाले । तथा vमर्तासः मनुष्या वयं यजमानाः vऊतये रक्षणाय vहवामहे आह्वयामः । कोऽस्य विशेष इत्युच्यते । अयमग्निः vधनोः धनुषः सकाशात् vप्रवत vआ प्रकर्षेण गच्छतो बाणानिव । तान् यथा शत्रोरुपरि मुञ्चन्ति[6] ॥ आ इत्युपमार्थे ॥ तद्वत् vसः अग्निः धनुस्थानीयात् निजशरीरसकाशात् प्रवतः प्रकृष्टवेगवतो रश्मीन् vऋण्वति गमयति ॥ रिविर्गत्यर्थः । अत्र अन्तर्भावितण्यर्थोऽयम् । इदित्त्वात् नुम् । छान्दसं रेफस्य संप्रसारणम् । अधिशब्दोऽनर्थको धात्वर्थमात्रानुवादी ॥ किंच एवं प्रवृद्धोऽग्निः vअभिव्रजद्भिः अनुष्ठानार्थमभितः संचरद्भिः ज्ञेयम्[7] अर्थम्

---

१. क्ष-झ१-ञ-ट–भगो न सर्वैः सेवनीयः उपस्थ इव । स यथा रेतआदिकं स्वीकरोति तद्वत् । यद्वा भगो न आदित्य इव । २. क्ष-झ१-ञ-ट–किंच सारथिः । ३. क्ष-झ१-ञ-ट–प्रीणयतः मिथुनौ जायापती वा पूजयतः । ४. क्ष-ङ-झ-१-ञ-ट–शीर्णोऽपि । ५. झ१–तमीम् तमेनम् अग्निम् । ६. क्ष-झ१-ञ-ट–मुञ्चति । ७. क्ष-झ१-ञ-ट–आग्नेयम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अभिगच्छद्भिर्वा तदर्थं [v]नवा नवानि नूतनानि [v]वयुना वयुनानि प्रज्ञानानि अनुष्ठानविषयाणि [v]अधित धारयति ज्ञापयतीत्यर्थः । यद्वा । अभिव्रजद्भिराभिमुख्येन गच्छद्भिर्होत्रादिभिः क्रियमाणानि नवानि[1] वयुनानि प्रज्ञाविशिष्टानि स्तोत्रादीन्यधित धत्ते ॥ धाञश्छान्दसे लुङि ' स्थाघ्वोरिच्च ' इति इत्वम् । उत्तरस्य सिचः कित्त्वम् । ' हस्वादङ्गात् ' इति सलोपः ॥

त्वं ह्यग्ने दिव्यस्य राजसि त्वं पार्थिवस्य पशुपाइव त्मना ।
एनी त एते बृहती अभिश्रिया हिरण्ययी वक्वरी बर्हिराशाते ॥ ६ ॥

त्वम् । हि । अग्ने । दिव्यस्य । राजसि । त्वम् । पार्थिवस्य । पशुपाःऽइव । त्मना ।
एनी इति । ते । एते इति । बृहती इति । अभिऽश्रिया ।
हिरण्ययी इति । वक्वरी इति । बर्हिः । आशाते इति ॥ ६ ॥

हे [v]अग्ने [v]त्वं [v]दिव्यस्य दिवि भवस्य देवादेः विद्युदात्मना वृष्ट्यादेर्वा [v]राजसि ईशिषे । ऐश्वर्यनामैतत् । तथा [v]पार्थिवस्य पृथिवीसंबन्धिनो मनुष्यादेः राजसि ईश्वरो भवसि । किम् अन्यतन्त्रत्वेन नेत्याह । [v]त्मना आत्मनैव स्वसामर्थ्येनैव । तत्र दृष्टान्तः [v]पशुपाइव । पशुपालको यथा स्वसामर्थ्येनैव पशूनां निरोधनिर्गमनादिव्यापारेषु समर्थो भवति तद्वत् । एतद्दृष्टान्तेन अत्यन्तस्वातन्त्र्यमुक्तं भवति । किंच यस्मादेवं तस्मात् [v]ते तव [v]बर्हिः यज्ञम् [v]एते प्रसिद्धे [v]एनी एतवर्णे शुभ्रे द्यावापृथिव्यौ [v]आशाते अश्नुवाते व्याप्नुतः ॥ ' वर्णादनुदात्तात्° ' ( पा. सू. ४. १. ३९) इति ङीप् तकारस्य नकारश्च ॥ कीदृश्यौ ते । [v]बृहती महत्यौ अतिविस्तृते [v]अभिश्रिया प्राप्तैश्वर्ये अभितः सेव्ये वा [v]हिरण्ययी हितरमणीये [v]वक्वरी अतिकुशलं शब्दयन्त्यौ ॥ वचेर्वनिपि ' वनो र च ' इति ङीब्रेफौ । छान्दसं कुत्वम् । ' वकि कौटिल्ये ' इत्यस्मात् वा छान्दसो नुमभावः ॥ ईदृश्यौ द्यावापृथिव्यौ बर्हिः अश्नुवाते[2] ॥

अग्ने जुषस्व प्रति हर्य तद्वचो मन्द्र स्वधावऋतजात सुक्रतो ।
यो विश्वतः प्रत्यङ्ङसि दर्शतो रण्वः संदृष्टौ पितुमाँइव क्षयः ॥ ७ ॥

अग्ने । जुषस्व । प्रति । हर्य । तत् । वचः । मन्द्र । स्वधाऽवः । ऋतऽजात । सुक्रतो इति सुऽक्रतो ।
यः । विश्वतः । प्रत्यङ् । असि । दर्शतः । रण्वः । सम्ऽदृष्टौ । पितुमान्ऽइव । क्षयः ॥७॥

हे [v]अग्ने [v]जुषस्व सेवस्व हविः । प्रीतो भव वा स्तुत्या । किंच [v]तत् तादृशं प्रियकरं[3] [v]वचः वाग्रूपं स्तोत्रं [v]प्रति [v]हर्य पुनः कामयस्व । हे [v]मन्द्र मादनशील स्तुत्य वा हे [v]स्वधावः हविर्लक्षणान्नवन् हे [v]ऋतजात यज्ञार्थमुत्पन्न हे [v]सुक्रतो शोभनकर्मन् शोभनप्रज्ञ वा । [v]यः ईदृशस्त्वं [v]विश्वतः सर्वस्य स्थावरजङ्गमस्य जगतः [v]प्रत्यङ्ङसि अभिमतः अनुकूलोऽसि न पराङ्मुखः इत्यर्थः । तथा [v]दर्शतः दर्शनीयः सर्वैः । किंच [v]संदृष्टौ सम्यग्दर्शने [v]रण्वः रमणशीलो रमयिता वा भवसि सर्वस्य ।

---

१. क्ष-ङ्ग१-ञ-ट–नवा नवानि । २. क्ष-ङ-ङ्ग१-ञ-ट–आशाते । ३. क्ष-ङ-ङ्ग१-ञ-ट–तव प्रियकरम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यद्वा । तव संदृष्टौ सत्यां सर्वो जनः Vक्षयः निवासवान् भवति । तत्र दृष्टान्तः । Vपितुमानिव । अतिप्रभूतान्नस्वामी यथा सर्वैः वस्तव्यः[1] गन्तव्यश्च भवति तद्वत् ॥ ॥ १३ ॥

' तं पृच्छत ' इति पञ्चर्चं पञ्चमं सूक्तम् । अत्रानुक्रमणिका–' तं पृच्छत पञ्चान्त्या त्रिष्टुप् ' इति । दीर्घतमा ऋषिः । पूर्वत्र ' आग्नेयं तु तत् ' इत्युक्तत्वात् इदमप्याग्नेयम् । अन्त्या त्रिष्टुप् । शिष्टास्त्रिष्टुबन्तपरिभाषया जगत्यः । प्रातरनुवाकाश्विनशस्त्रयोरस्य विनियोग उक्तः ॥

तं पृच्छता स जगामा स वेद स चिकित्वाँ ईयते सा न्वीयते ।
तस्मिन्त्सन्ति प्रशिषस्तस्मिन्निष्टयः स वाजस्य शवसः शुष्मिणस्पतिः ॥ १ ॥

तम् । पृच्छत । सः । जगाम । सः । वेद । सः । चिकित्वान् । ईयते । सः । नु । ईयते ।
तस्मिन् । सन्ति । प्रऽशिषः । तस्मिन् । इष्टयः । सः । वाजस्य । शवसः । शुष्मिणः । पतिः ॥ १ ॥

हे यजमानाः Vतम् अग्निं Vपृच्छत । यत्स्वर्गादिविषयं प्रष्टव्यमस्ति तत् । तस्यैव प्रष्टव्यत्वे अतिशयमाह । Vस Vजगाम स सर्वत्र गच्छति । अत एव Vस Vवेद स च प्रष्टव्यं जानाति । किमितरसाधारण्येन नेत्याह । Vस Vचिकित्वान् स एव चेतनावान् । स विशेषज्ञ इत्यर्थः । सः[2] एव VईयतेV ज्ञेयसकाशं गच्छति । पुनर्गतिरेव विशेष्यते । Vसः सोऽग्निरेव Vनु क्षिप्रम् VईयतेV । यत्[3] यजमानस्य ज्ञेयमस्ति तमर्थं ज्ञातुं शीघ्रमेव गच्छतीत्यर्थः[3] । यद्वा । ज्ञानार्थम्[4] ईयते[4] सेव्यते । तथा[5] शीघ्रमनुसेव्यते[5] । यस्मादयमुक्तरूपः तस्मात्तमेव पृच्छतेत्यर्थः । तत्र अपेक्षिताः[6] कामाः सन्तीत्याह । Vतस्मिन् अग्नौ Vप्रशिषः प्रशासनानि नियमनसामर्थ्यानि Vसन्ति । असाध्यं नियम्यापि साधयितुं शक्त इत्यर्थः । किंच Vतस्मिन् एवाग्नौ Vइष्टयः एष्टव्या भोगाः सर्वफलसाधका यागा वा सन्ति । किंच Vसः अग्निः Vवाजस्य अन्नस्य Vशवसः बलस्य च Vपतिः पालयिता दाता । किंच Vशुष्मिणः बलवतो राजादेरपि पतिः स्वामी । यस्मादयं महानुभावस्तस्मात्तमेव पृष्ट्वा पुरुषार्थं साधयतेति ॥

तमित्पृच्छन्ति न सिमो वि पृच्छति स्वेनैव धीरो मनसा यदग्रभीत् ।
न मृष्यते प्रथमं नापरं वचोऽस्य क्रत्वा सचते अप्रदृपितः ॥ २ ॥

तम् । इत् । पृच्छन्ति । न । सिमः । वि । पृच्छति । स्वेनऽइव । धीरः । मनसा । यत् । अग्रभीत् ।
न । मृष्यते । प्रथमम् । न । अपरम् । वचः । अस्य । क्रत्वा । सचते । अप्रऽदृपितः ॥ २ ॥

पूर्वमन्त्रेऽग्निं पृच्छतेत्युक्तम् । अत्र तु सोऽनुनयेन प्रष्टव्यः इत्याह । Vतमित् तमेवाग्निं Vपृच्छन्ति स तु नान्यं पृच्छति प्रश्नसमयेऽपि । Vसिमः सर्वजनः Vन Vवि Vपृच्छति विपरीतं न पृच्छति ।

---

१. झ१–स्तव्यः । २. क्ष-ङ-झ१-ञ-ट–किंच सः । ३. क्ष-ङ-ज्ञ-झ-झ१-ञ-ट–यजमानस्य जिज्ञासितमर्थं ज्ञातुं शीघ्रमेव गच्छतीत्यर्थः । ४. झ–ज्ञानार्थिभिरीयते । ५. झ–नु शीघ्रम् । ६. क्ष-ङ-झ१-ञ-ट–अस्मदपेक्षिताः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पृष्टोऽपि [V]धीरः धीमानयं [V]स्वेनेव [V]मनसा । इवशब्दः एवार्थे । स्वकीययैव बुद्ध्या [V]यत् यत्कार्यम् [V]अग्रभीत् वदामीत्यादत्ते[1] तदेव प्रतिब्रूते न तु प्रश्नानुकूलम् । स्वतन्त्रेश्वर इत्युक्तं भवति । यद्वा । प्रष्टा धीमान्[2] स्वेन[3] मनसा वाचा वाच्यं[3] विचार्य यदग्रभीत् यद्वाक्यं वक्तव्यत्वेन स्वीकुर्यात् तदेवाग्निं पृच्छति न तु बहु भाषते इत्यर्थः । परवाक्यासह्यत्वमाह । अयमग्निः [V]प्रथमं [V]वचः स्ववाक्यात्पूर्वभावि वचनं [V]न [V]मृष्यते न सहते । तथा [V]अपरं वचः स्वोक्त्यनन्तरभावि प्रतिवचनं [V]न मृष्यते । यस्मादयमेवंविधस्तस्मात् [V]अप्रदृपितः अप्रदृप्तः यद्वा तेन शिक्षितोऽनुद्दण्डः सर्वो लोकः [V]अस्य महानुभावस्याग्नेः [V]ऋत्वा क्रतुना रक्षणादिकर्मणा सह [V]सचते संगच्छते जीवतीत्यर्थः ॥

तमिद॑च्छन्ति जुह्व१स्तमर्वतीर्विश्वान्येकः॑ शृणवद्वचाँसि मे ।
पुरुप्रैषस्ततु॑रिर्यज्ञसाधनोऽच्छिद्रो॑तिः शिशुरादत्त सं रभः॑ ॥ ३ ॥

तम् । इत् । गच्छन्ति । जुह्वः॑ । तम् । अर्वतीः॑ । विश्वा॑नि । एकः॑ । शृणवत् । वचा॑ंसि । मे ।
पुरुऽप्रैषः । ततु॑रिः । यज्ञऽसाधनः । अच्छिद्रऽऊतिः । शिशुः॑ । आ । अदत्त । सम् । रभः॑॥३॥

[V]जुह्वः अस्मदीया जुहूपभृदादयः [V]तमित् तमेवोद्दिश्य आज्यपूर्णाः सत्यः [V]गच्छन्ति प्रीणयितुम् । यद्वा । हूयन्ते इति जुह्वः आहुतयः सोमादिरूपाः । अथवा जुह्वादिषु स्थितानि आज्यानि अपि आश्रयाश्रयिणोः[4] अभेदेन जुह्वः इत्युच्यन्ते ' मञ्चाः क्रोशन्ति ' इतिवत् । ता अपि तमेव गच्छन्ति अस्य सर्वदेवतात्मकत्वात् । अत्रैव इतरदेवतार्थमपि हूयमानं[5] च[5] इति भावः । किंच [V]अर्वतीः प्राप्तिमत्यः स्तुतयः [V]तम् इत् तमेवाग्निं गच्छन्ति सर्वदेवतात्मकत्वादेव । सः[6] एव [V]एकः अयमग्निः [V]विश्वानि [V]मे मदीयानि [V]वचांसि स्तोत्ररूपाणि [V]शृणवत् शृणोति । अग्नेः सर्वदेवतात्मकत्वं तैत्तिरीया आहुः–' ते देवा बिभ्यतोऽग्निं प्राविशन् तस्मादाहुरग्निः सर्वा देवताः ' ( तै. सं. ६. २. २. ६ ) इति । तथा अत्रैव पुरस्तादाम्नास्यते–' त्वमग्ने वरुणो जायसे यत्त्वं मित्रः ' ( ऋ. सं. ५. ३. १ ) इत्यादि[7] । कोऽस्य विशेषः इत्युच्यते । [V]पुरुप्रैषः बहुप्रैषभाक् । यद्वा । बहुप्रेषणः । सर्वस्याज्ञापयितेत्यर्थः । [V]ततुरिः तारयिता ॥ तरतेः अन्तर्भावितण्यर्थात् ' आदृगमहनः० ' इति किन्प्रत्ययः । ' बहुलं छन्दसि ' इति उत्वम् ॥ [V]यज्ञसाधनः यज्ञसाधकः अग्न्यधीनत्वाद्यज्ञस्य । [V]अच्छिद्रोतिः अविच्छिन्नरक्षणः [V]शिशुः शिशुवत्प्रियकारी शोचयिता वा शत्रूणाम् । एवंभूतोऽग्निः [V]सं [V]रभः यज्ञादिसंरम्भवान् सन् [V]आदत्त आदत्ते हविरादिकं स्वीकरोति ॥

उपस्थायं॑ चरति यत्समा॑रत सद्यो जा॒तस्तत्सा॑र युज्ये॑भिः ।
अभि श्वा॒न्तं मृ॑शते नान्द्ये॑ मुदे यदीं॑ गच्छ॑न्त्युश॒तीरपि॑ष्टितम् ॥ ४ ॥

उपऽस्थायं॑म् । चर॑ति । यत् । सम्ऽआर॑त । सद्यः । जा॒तः । तत्सा॑र । युज्ये॑भिः ।
अभि । श्वा॒न्तम् । मृ॒श॒ते । नान्द्ये॑ । मुदे । यत् । ई॒म् । गच्छ॑न्ति । उ॒श॒तीः । अपि॑ऽस्थितम् ॥४॥

---

१. क्ष-ञ१-ञ-ट–तदेवादत्ते । २. क्ष-ङ-ञ-ञ-ञ-ट–धीरो धीमान् । ३. क्ष-ञ-ञ-ट–स्वेनेव मनसा वाच्याऽवाच्यम् । ४. क्ष-ञ-ट–आश्रयाश्रितयोः । ५. क्ष-ङ-ञ-ञ१-ञ-ट–हूयमानत्वात् । ६. क्ष-ञ-ट–अतः । ७. क्ष-ञ१-ञ-ट–इति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]यत् यदा अध्वर्युः [v]उपस्थायं [v]चरति उपस्थायोपस्थाय अनुतिष्ठति उत्पत्त्यनुकूलव्यापारं करोति। कदेत्याह। यत्[1] [v]समारत समागच्छत मथनेन आविरभवत् ॥ 'समो गम्यृच्छि॰' इति अर्तेः आत्मनेपदम् ॥ [v]सद्यः तदानीमेव [v]जातः उत्पन्नः सन् [v]युज्येभिः योक्तुं संबद्धुं समर्थैः फलैः मिश्रयितुमर्हैस्तेजोभिर्वा युक्तः सन् [v]तत्सार अरण्योर्गूढः सन् चचार। यद्वा। युज्येभिरश्वैर्जातमात्रः एव सर्वत्र संचचार ॥ 'ऋ सर च्छ्वगतौ'। लिटि णलि रूपम् ॥ एवं प्रवृद्धोऽयं [v]श्वान्तं श्रान्तं शान्तं वा यजमानं [v]नान्द्ये नन्दनीये कर्मणि निमित्तभूते सति [v]मुदे तस्य संतोषाय [v]अभि [v]मृशते अभिमर्शनं करोति। फलप्रदानेनेति भावः। यथा लोके गुर्वादिः श्रान्तं[2] शिष्यादिकं स्पृशति तद्वत्। कदेति चेत् उच्यते। [v]यत् यदा [v]अपिष्टितं व्याप्य वर्तमानम् [v]ईम् एनमग्निम् [v]उशतीः कामयमाना आज्यधाराः स्तुतयो वा [v]गच्छन्ति प्राप्नुवन्ति तदा अभि मृशते ॥

स ईं मृगो अप्यो वनर्गुरुप त्वच्युपमस्यां नि धायि।
व्यब्रवीद्वयुना मर्त्येभ्योऽग्निर्विद्वाँ ऋतचिद्धि सत्यः ॥ ५ ॥

सः। ईम्। मृगः। अप्यः। वनर्गुः। उप। त्वचि। उपऽमस्याम्। नि। धायि।
वि। अब्रवीत्। वयुना। मर्त्येभ्यः। अग्निः। विद्वान्। ऋतऽचित्। हि। सत्यः ॥ ५ ॥

[v]स [v]ईं स एवाग्निः [v]उपमस्याम् उपमायामुपमास्पदायां [v]त्वचि ओषध्यादिभिराच्छादितायां वेद्याम् [v]उप [v]नि [v]धायि उपस्थाप्यते[3] उत्तरत्रोपभोगाय। कीदृशः सः। [v]मृगः मार्जयिता अन्वेषणशीलो वा। 'मृगो मार्ष्टेर्गतिकर्मणः' (निरु. १.२०) इति यास्कः। [v]अप्यः आप्यो गन्तव्यः। अपः कर्म तत्र साधुर्वा। [v]वनर्गुः वनगामी ॥ ऋच्छतेर्गमेः च[4] इदं रूपम्। यद्वा। गमेरेव। उपपदस्य रुडागमश्छान्दसः ॥ एवंभूतः अग्निः [v]मर्त्येभ्यः मरणधर्मभ्यो यजमानादिरूपेभ्यः वयुनानि[5] प्रज्ञानानि अनुष्ठेयज्ञानानि [v]व्यब्रवीत् विशेषेण ब्रवीति उपदिशति। वयुनमिति प्रज्ञानाम, 'वयुनम् अभिख्या' (नि. ३. ९. १०) इति तन्नामसु पाठात्। ईदृक् सामर्थ्यमस्तीति दर्शयति। अयम् [v]अग्निर्विद्वान् सर्वज्ञः [v]ऋतचित् यज्ञस्योदकस्य वा चेतिता[6] ज्ञाता [v]सत्यः। सत् क्रियमाणं कर्म। तत्र साधुः। सत्सु[7] भवो वा। सत् फलं तदर्हतीति वा। सम्यक्फलप्रद इत्यर्थः। यस्मादयमुक्तसामर्थ्योपेतः तस्मात् प्रज्ञोपदेशो युक्तः। हिशब्दः प्रसिद्धौ ॥ ॥ १४ ॥

'त्रिमूर्धानम्' इति पञ्चर्चं षष्ठं सूक्तं दैवतमसम् आग्नेयम्, पूर्वत्र 'आग्नेयं तु तत्' इत्युक्तत्वात्। 'त्रिमूर्धानम्' इत्यनुक्रमणिका। प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छन्दसि इदमादिसूक्तत्रयस्य विनियोगः 'अथैतस्याः' इति खण्डे सूत्रितं–'त्रिमूर्धानमिति त्रीणि' (आश्व. श्रौ. ४. १३) इति ॥

---

१. क्ष-ङ-ञ-ट–यत् यदा । २. क्ष-ञ-ट–शान्तम् । ३. क्ष-ज्ञ१-ञ-ट–निधिवत् उपस्थाप्यते । ४. क्ष-ङ-ज्ञ१-ञ-ट– वा । ५. क्ष-ङ-ञ-ज्ञ१-ज्ञ-ञ-ट–वयुना वयुनानि । ६. ज्ञ–चेतयिता । ७. क्ष-ज्ञ१-ञ-ट–तत्र ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्रिमूर्धानं सप्तरश्मिं गृणीषेऽनूनमग्निं पित्रोरुपस्थे ।
निषत्तमस्य चरतो ध्रुवस्य विश्वा दिवो रोचनापप्रिवांसम् ॥ १ ॥

त्रिऽमूर्धानम् । सप्तऽरश्मिम् । गृणीषे । अनूनम् । अग्निम् । पित्रोः । उपऽस्थे ।
निऽसत्तम् । अस्य । चरतः । ध्रुवस्य । विश्वा । दिवः । रोचना । आपप्रिऽवांसम् ॥ १ ॥

अनया अग्निर्यज्ञरूपेण स्तूयते । ᵛत्रिमूर्धानं सवनत्रयरूपमूर्धत्रयोपेतम् ॥ ' द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ' इत्युत्तरपदान्तोदात्तत्वम् ॥ किंच ᵛसप्तरश्मिं नियामकसप्तच्छन्दोयुक्तम् ᵛअनूनम् अविकलं संपूर्णफलम् ᵛअग्निम् अग्निसाध्यम् अङ्गादिगुणयुक्तं वा ᵛपित्रोरुपस्थे द्यावापृथिव्योरुत्सङ्गे ᵛनिषत्तं निषण्णम् । मध्ये वर्तमानमित्यर्थः । भूमिस्थद्रव्येण द्युलोकस्थदेवताभिश्च साध्यत्वादिति यावत् । किंच ᵛध्रुवस्य निश्चलस्य[1] ᵛचरतः हविर्भक्षयतः ᵛअस्य अग्नेः संबन्धिनं यज्ञं ᵛदिवः द्युलोकादागतानि विश्वानि[2] रोचनानि[2] देवविमानानि ᵛआपप्रिवांसं सर्वतः पूरयितारं ᵛगृणीषे गृणीहि स्तुहि । यद्वा अयमग्निरेवोच्यते । त्रिमूर्धवदत्र[3] क्षित्यन्तरिक्षद्युलोकाख्यस्थानत्रयोपेतम् । लोकत्रयव्याप्तमित्यर्थः । गार्हपत्यादिस्थानत्रयवर्तिनं[4] वा । सप्तरश्मिं सप्तज्वालम् अनूनम् अन्यूनं पित्रोः द्यावापृथिव्योरुपस्थे उत्सङ्गे निषत्तम् ॥ ' नसत्तनिषत्त० ' इति निपातनात् निष्ठानत्वाभावः ॥ निषण्णम् आपप्रिवांसं सर्वतः पूरयन्तं कामानाम् उक्तलक्षणविशिष्टमग्निं[5] गृणीषे गृणीहि स्तुहि । किंच चरतः सर्वत्र ज्वालाभिर्गच्छतो ध्रुवस्य धृतत्वात्[6] अविचलितस्य दिवो द्योतमानस्य अस्य अग्नेः विश्वा सर्वाणि रोचना रोचमानानि तेजांसि सर्वत्र व्याप्नुवन्तीति शेषः । ईदृशमग्निं स्तुहि इति अन्तरात्मनः[7] प्रैषः ॥

उक्षा महाँ अभि ववक्ष एने अजरस्तथावितऊतिर्ऋष्वः ।
उर्व्याः पदो नि दधाति सानौ रिहन्त्यूधो अरुषासो अस्य ॥ २ ॥

उक्षा । महान् । अभि । ववक्षे । एने इति । अजरः । तस्थौ । इतःऽऊतिः । ऋष्वः ।
उर्व्याः । पदः । नि । दधाति । सानौ । रिहन्ति । ऊधः । अरुषासः । अस्य ॥ २ ॥

ᵛउक्षा सेक्ता । फलप्रदानसमर्थः[8] इत्यर्थः । अत एव ᵛमहान् महिम्ना स्वरूपेण उद्वृत्तवृषभसदृशः अयमग्निः ᵛएने द्यावापृथिव्यौ ᵛअभि अभिक्रम्य व्याप्य ᵛववक्षे वहति व्याप्नोतीत्यर्थः ॥ वहतेर्लेटि छान्दसः शपः श्लुः । ' लोपस्त आत्मनेपदेषु ' इति तलोपः । ' सिब्बहुलम्० ' इति सिप् ॥ वृष्ट्यादिप्रदानेन हविर्वहनेन च लोकद्वयस्य[9] वासिनः देवान् मनुष्यांश्च रक्षतीत्यर्थः । किंच अयम् ᵛअजरः जरारहितः ᵛऋष्वः महान् पूज्यः । महन्नामैतत् । ' ऋष्वः उक्षः ' ( नि. ३. ३. ३ ) इति

---

१. क्ष-ङ्ग१-ञ-ट–निश्चलस्य नियतस्य। २. ङ्ग–विश्वा रोचना विश्वानि रोचनानि; ङ्ग१–विश्वा रोचनानि । ३. क्ष-ङ-ङ्ग-ङ्ग-ञ-ट–त्रिमूर्धानं मूर्धवत् उन्नतक्षित्यन्तरिक्ष०; क-ज-ण-न–त्रिमूर्धानं मूर्धवदत्र । ४. क्ष-ङ-ञ-ट–उत्तमगार्हपत्यादिस्थानत्रयवर्तिनम् । ५. क्ष-ङ-ञ-ट–उक्तगुणविशिष्टमग्निम् । ६. क्ष-ञ-ट–नित्यं धृतत्वात् । ७. क्ष-ङ-ञ-ट–अन्तरात्मानं प्रति । ८. ख-च-फ–फलप्रदाता । ९. क-ज-ङ्ग-ण-न–लोकद्वयनिवासिनः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तन्नामसु पाठात्। तथा Vइतऊतिः प्राप्तरक्षणः सन् Vतस्थौ स्थितो वर्तते। यद्वा। उक्तगुणोऽयम् इतऊतिः इत एव गमनवान् अस्मदेवयजनाभिमुखगमनवान् तस्थौ वर्तते। तदनन्तरम् Vउर्व्या विस्तृताया भूम्याः Vसानौ समुच्छ्रिते प्रदेशे वेदिलक्षणे Vपदो Vनि Vदधाति पदानि स्थापयति करोति। किंच Vअस्य अग्नेः Vअरुषासः[1] अरुषा आरोचनाः[1] Vऊधः ऊधःस्थानीयमन्तरिक्षं Vरिहन्ति लिहन्ति। यद्वा। अस्य ऊधः ऊधःस्थानीयं यज्ञमरुषास आरोचनाः[2] ब्रह्मवर्चसेन यजमाना रिहन्ति अभिमतस्वर्गादीनि लिहन्ति॥

समानं वत्समभि संचरन्ती विष्वग्धेनू वि चरतः सुमेके।
अनपवृज्याँ अध्वनो मिमाने विश्वान्केताँ अधि महो दधाने॥ ३॥

समानम्। वत्सम्। अभि। संचरन्ती इति सम्ऽचरन्ती। विष्वक्।
धेनू इति। वि। चरतः। सुमेके इति सुऽमेके॥
अनपऽवृज्यान्। अध्वनः। मिमाने इति। विश्वान्। केतान्। अधि। महः। दधाने इति॥३॥

Vसमानम् एकमेव Vवत्सं वत्सस्थानीयं पुत्रवत् हर्षहेतुम् अग्निम् अभिमुखं[3] Vसंचरन्ती संचरन्त्यौ[3] द्वे Vधेनू अग्निहितकरणेन[4] प्रीणयित्र्यौ[5] पत्नीयजमानलक्षणे धेनू Vविष्वक् Vवि Vचरतः संचरतः। स्तनपानादिसदृशेन्धनप्रक्षेपसंमार्जनादिना सम्यग्वर्धयतः इत्यर्थः। कीदृश्यौ ते Vसुमेके शोभनकर्माणौ शोभनस्नेहने वा परिचरणकुशले इत्यर्थः। किंच Vअनपवृज्यान् अपवर्जनीयरहितान्॥ 'नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम्॥ Vअध्वनः मार्गान् अग्नेः प्रान्तप्रदेशान् केशाद्यमेध्यरहितान् Vमिमाने संपादयित्र्यौ। किंच Vविश्वान्केतान् सर्वाणि प्रज्ञानानि प्रवर्धनविषयाणि Vमहः महान्ति Vअधि अधिकं Vदधाने धारयन्त्यौ। ईदृश्यौ अध्वर्युयजमानरूपे जायापतिरूपे वा धेनू विष्वग्विचरतः॥

धीरासः पदं कवयो नयन्ति नाना हृदा रक्षमाणा अजुर्यम्।
सिषासन्तः पर्यपश्यन्त सिन्धुमाविरेभ्यो अभवत्सूर्यो नॄन्॥ ४॥

धीरासः। पदम्। कवयः। नयन्ति। नाना। हृदा। रक्षमाणाः। अजुर्यम्।
सिसासन्तः। परि। अपश्यन्त। सिन्धुम्। आविः। एभ्यः। अभवत्। सूर्यः। नॄन्॥ ४॥

Vधीरासः धीरा धीमन्तः प्रयोगज्ञा अध्वर्य्वादयः Vअजुर्यम् अजर्यम् अजीर्णम्[6] एनमग्निं Vपदं स्थानं वेदिलक्षणं Vनयन्ति प्रापयन्ति मथनदेशात्[7] गार्हपत्याद्वा। अथवा वक्ष्यमाणलक्षणा यजमानादयः पदमास्पदं सर्वकामानाम् आस्पदम् एनं गमयन्ति। कीदृशास्ते। Vकवयः क्रान्तदर्शिनो मेधाविनः

---

१. क्ष-ङ-ञ१-ञ-ट–अरुषासः आरोचमानाः। २. क्ष-ङ-ञ-ट–आरोचमानाः। ३. क्ष-ञ१-ञ-ट–अभि संचरन्ती अभि अभिमुखं संचरन्त्यौ सम्यक् तोषयन्त्यौ। ४. क्ष-ञ१-ञ-ट–अग्निं हुतकरणेन। ५. ञ१–प्रीणयन्त्यौ। ६. क्ष-ङ-ञ१-ञ-ट–अक्षीणम्। ७. ञ–मन्थनदेशात्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अनूचाना वा । ' ये वा अनूचानास्ते कवयः ' ( ऐ. ब्रा. २. २ ) इति श्रुतेः । किंच Vनाना Vहृदा बहुप्रकारया बुद्धया Vरक्षमाणाः धारयमाणाः । किंच एवंरूपास्ते Vसिन्धुं स्यन्दमानं यज्ञद्वारा फलानि स्रवन्तम् अग्निं[1] Vसिषासन्तः संभक्तुमिच्छन्तः॥ सनतेः सनि ' सनीवन्तर्ध° ' इति विकल्पनात् इडभावः। ' जनसनखनाम्° ' इति आत्वम् ॥ Vपर्यपश्यन्त परितः पश्यन्ति । शुश्रूषन्त इत्यर्थः । किंच Vसूर्यः सर्वस्य प्रसविता अयमग्निः Vएभ्यः एवं कुर्वद्भ्यः Vनॄन् नृभ्यो नेतृभ्यः Vआविः Vअभवत् तेषामनुग्रहेण प्रत्यक्षोऽभवत् ॥ नृनित्यत्र वचनव्यत्ययः[2]॥ नॄन् प्राणिनोऽनुग्रहीतुमिति वा योज्यम् ॥

दिदृक्षेण्यः परि काष्ठासु जेन्य ईळेन्यो महो अर्भाय जीवसे ।
पुरुत्रा यदभवत्सूरहैभ्यो गर्भेभ्यो मघवा विश्वदर्शतः ॥ ५ ॥

दिदृक्षेण्यः । परि । काष्ठासु । जेन्यः । ईळेन्यः । महः । अर्भाय । जीवसे ।
पुरुऽत्रा । यत् । अभवत् । सूः । अह । एभ्यः । गर्भेभ्यः । मघऽवा । विश्वऽदर्शतः ॥५॥

अयमग्निः Vकाष्ठासु परस्परं क्रान्त्वा वर्तमानासु दशसु दिक्षु Vदिदृक्षेण्यः। अनुग्रहयुक्त्या दर्शनयुक्तः[3] भवति। यद्वा। द्रष्टुमेष्टव्यो दर्शनेच्छाविषयभूतः॥ दृशेः सनन्तात् ' कृत्यार्थे तवैकेन्केन्य° ' इति केन्यप्रत्ययः ॥ अत एव Vजेन्यः सर्वत्र प्रादुर्भवनशीलो भवति जयशीलो वा । किंच प्रदानसमये Vईळेन्यः स्तुत्यो भवति । किमर्थमेवम् । Vमहः महतो देवादेः Vअर्भाय अर्भकस्याल्पस्य यजमानादेर्वा Vजीवसे जीवनाय । हविर्वहनेन धनप्रदानेन[4] इति विवेकः । तत्रोपपत्तिमाह । Vयत् Vअह यस्मात् खलु Vपुरुत्रा[5] बहुषु देशेषु ॥ ' देवमनुष्य° ' इत्यादिना त्राप्रत्ययः ॥ Vमघवा हविर्लक्षणान्नवान् Vविश्वदर्शतः सर्वविषयद्रष्टव्यवानयमग्निः Vएभ्यो Vगर्भेभ्यः ॥ षष्ठ्यर्थे चतुर्थी ॥ एषामृत्विजां गर्भवच्छिशुवदत्यन्तरक्षणीयानां Vसूः Vअभवत् प्रसविता उत्पादयिता अभवत् भवति। तस्मात् नाना हृदा रक्षमाणाः कवयः पदं नयन्तीति पूर्वत्र संबन्धः ॥ ॥ १५ ॥

' कथा ते ' इति पञ्चर्चं सप्तमं सूक्तं दैर्घतमसमाग्नेयं त्रैष्टुभम् । ' कथा ' इत्यनुक्रमणिका ॥ प्रातरनुवाकाश्विनशस्त्रयोरस्य सूक्तस्य विनियोगः ' त्रिमूर्धानमिति त्रीणि ' इत्यनेनोक्तः ॥

कथा ते अग्ने शुचयन्त आयोर्ददाशुर्वाजेभिराशुषाणाः ।
उभे यत्तोके तनये दधाना ऋतस्य सामन्रणयन्त देवाः ॥ १ ॥

कथा । ते । अग्ने । शुचयन्तः । आयोः । ददाशुः । वाजेभिः । आशुषाणाः ।
उभे इति । यत् । तोके इति । तनये । दधानाः । ऋतस्य । सामन् । रणयन्त । देवाः ॥१॥

हे Vअग्ने Vते तव संबन्धिनो रश्मयः Vशुचयन्तः दीप्तिं सर्वत्र चक्षाणाः प्रकटयन्तः Vआशुषाणाः आशु शीघ्रं संभक्तारः आशून् संभक्तारो वा । वाय्वादेरपि शीघ्रं संभक्तार इत्यर्थः । यद्वा । समन्तात्

---

१. क्ष-ञ-ट–इममग्निम् । २. क–विभक्तिव्यत्ययः । ३. क्ष-ज्ञ१-ञ-ट–दर्शनशीलः । ४. क्ष-ङ-ज्ञ१-ञ-ट–वरप्रदानेन । ५. क्ष-ञ-ट–अयं पुरुत्रा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

शोषयितारः । यद्वा । सर्वं व्याप्नुवन्तः ॥ अश्नोतेर्लिटः कानच् । व्यत्ययेन उप्रत्ययः सिच् च इति द्विविकरणता । आङ्पूर्वात् अन्तर्भावितण्यर्थात् शुषेः शानचि छान्दसः शपो लुक् । आशुशब्दोपपदात् सनतेः कर्मणि अण् ॥ ईदृशा रश्मयः ᵛवाजेभिः अन्नैः सहितम् ᵛआयोः आयुरायुष्यम् ॥ कर्मणि षष्ठी ॥ ᵛकथा केनोपायेन ᵛददाशुः ददति ॥ 'दाश्र दाने' । छान्दसो लिट् ॥ तमुपायमनुगृहाणेत्यर्थः । रश्मीनां वरप्रदानं कुत्र दृष्टमिति चेत् उच्यते । ᵛयत् यस्मात् ᵛउभे उक्ते अन्नायुषी ᵛतोके पुत्रे ᵛतनये अनवच्छेदेन[1] कुटुम्बस्य[2] विस्तारके । यद्वा । तोके पुत्रे तनये तत्पुत्रादौ च । ᵛदधानाः धारयन्तः ᵛदेवाः व्यवहर्तारो यजमानाः ᵛऋतस्य यज्ञस्य संबन्धिनि ᵛसामन् साम्नि रथन्तरादौ ᵛरणयन्त रमन्ते रमयन्ति शब्दयन्त्येव वा । यस्मात् अन्नायुष्पुत्रादिसहिताः सोमेनेष्ट्वा साम्नि रमन्ते तस्मात् रश्मयो ददतीत्यवगम्यते इत्यर्थः । तादृशांस्त्वदीयान् रश्मीन् मामपि[3] अनुगृहाणेत्यर्थः ॥

बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः ।
पीयति त्वो अनु त्वो गृणाति वन्दारुस्ते तन्वं वन्दे अग्ने ॥ २ ॥

बोध । मे । अस्य । वचसः । यविष्ठ । मंहिष्ठस्य । प्रऽभृतस्य । स्वधाऽवः ।
पीयति । त्वः । अनु । त्वः । गृणाति । वन्दारुः । ते । तन्वम् । वन्दे । अग्ने ॥ २ ॥

हे ᵛयविष्ठ युवतम हे ᵛस्वधावः हविर्लक्षणान्नेन तद्वन्नग्ने ᵛमे मदीयस्य ᵛमंहिष्ठस्य अतिशयेन पूजनीयस्य ᵛप्रभृतस्य प्रकर्षेण संपादितस्य ᵛअस्य इदानीं क्रियमाणस्य ᵛवचसः स्तुतिरूपस्य वचनस्य ॥ कर्मणि षष्ठी ॥ उक्तलक्षणं वचः ᵛबोध बुध्यस्व स्तुतो भवेत्यर्थः । हे अग्ने लोके ᵛस्वः । अत्र यास्कः[4] 'त्वो नेम इत्यर्धस्य' (निरु. ३. २०) इत्युक्त्वा एतदेवोदाजहार । एको जनः ᵛपीयति । वधकर्मैतत् । हिनस्ति । यज्ञादिना न पूजयतीत्यर्थः । ᵛत्वः एकः ᵛअनु ᵛगृणाति अनुकूलम् उच्चारयति[5] । तयोर्मध्ये हे ᵛअग्ने ᵛवन्दारुः वन्दनशीलोऽहं ᵛते तव ᵛतन्वं तनुं तव मूर्तिं ᵛवन्दे स्तौमि ॥

ये पायवो मामतेयं ते अग्ने पश्यन्तो अन्धं दुरितादरक्षन् ।
ररक्ष तान्सुकृतो विश्ववेदा दिप्सन्त इद्रिपवो नाह देभुः ॥ ३ ॥

ये । पायवः । मामतेयम् । ते । अग्ने । पश्यन्तः । अन्धम् । दुःऽइतात् । अरक्षन् ।
ररक्ष । तान् । सुऽकृतः । विश्वऽवेदाः । दिप्सन्तः । इत् । रिपवः । न । अह । देभुः ॥३॥

अत्रेतिहासमाचक्षते । उचथ्यबृहस्पतिनामानौ द्वौ ऋषी आस्ताम् । तत्र उचथ्यस्य ममता नाम भार्या[6] । सा च गर्भिणी । तां[6] बृहस्पतिर्गृहीत्वा अरमयत् । शुक्रनिर्गमनावसरे प्राप्ते गर्भस्थं रेतः प्रावादीत् हे मुने रेतो मा त्याक्षीः पूर्वमहं वसामि रेतःसंकरं[7] मा कार्षीः इति । एवमुक्तो बृहस्पतिः बलात् प्रतिरुद्ध-

---

१. झ–अविच्छेदेन । २. क्ष-ङ-च-झ-झ१-ञ-ट-फ–कुलस्य । ३. क्ष-ङ-झ१-ञ-ट–ममापि । ४. झ–यास्कस्तु । ५. क्ष-ङ-झ१-ञ-ट–उच्चारयति स्तौति । ६. क्ष-ङ-झ१-ञ-ट-भार्या आसीत् । गर्भिणीं ताम् । ७. झ१–रेतःसेकम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

रेतस्कः सन् शशाप[1]। हे गर्भ त्वं यतो रेतोनिरोधमकरोः अतस्त्वं दीर्घं तमः प्रामुहि जात्यन्धो भवेति। एवं शप्तो ममतायां दीर्घतमा अजायत। स चोत्पन्नः तमोव्यथया अग्निमस्तौषीत्। स च स्तुत्या प्रीतः आन्ध्यं पर्यहरदिति। तदिदमत्रोच्यते। हे vअग्ने vते तव संबन्धिनः vये vपायवः प्रसिद्धाः पालयितारो रश्मयः vमामतेयं ममतायाः पुत्रं दीर्घतमसम् vअन्धं vपश्यन्तः अन्धोऽयम् अतोऽस्माभिः रक्षणीयः इति अवगच्छन्तः सन्तः vदुरितात् दुष्टं प्राप्तादुःखात् vअरक्षन् vतान्[2] vसुकृतः सुखकर्तॄन् vविश्ववेदाः विश्वप्रज्ञः vररक्ष[3] रक्षति[3]। अस्मत्पालनायेति भावः। तैः[4] अस्मानपि रक्षिष्यतीत्यर्थः। एवं रक्षितानस्मान् vदिप्सन्तः दम्भितुमिच्छन्तः vरिपवः कामादयः vनाह vदेभुः। अहेति विनिग्रहार्थीयः। न खलु दम्भितुं शक्नुवन्ति॥ 'दम्भु दम्भे'। 'श्रन्थिग्रन्थिदम्भिस्वञ्जीनामिति[5] वक्तव्यम्' (का. १. २. ६. १) इति लिटः कित्त्वात् 'अनिदिताम्०' इति नलोपः। तस्य असिद्धत्वात् एत्वाभ्यासलोपयोरप्राप्तौ 'दम्भेश्चेति वक्तव्यम्' (पा. सू. ६. ४. १२०. ४) इति तौ विधीयेते॥ यद्वा। सूक्तद्रष्टा दीर्घतमाः स्वयमेव आत्मानं परोक्षतया ब्रवीति॥

यो नो अग्ने अररिवाँ अघायुररातीवा मर्चयति द्वयेन।
मन्त्रो गुरुः पुनरस्तु सो अस्मा अनु मृक्षीष्ट तन्वं दुरुक्तैः॥ ४॥

यः। नः। अग्ने। अररिवान्। अघऽयुः। अरातिऽवा। मर्चयति। द्वयेन।
मन्त्रः। गुरुः। पुनः। अस्तु। सः। अस्मै। अनु। मृक्षीष्ट। तन्वम्। दुःऽउक्तैः॥ ४॥

हे vअग्ने vनः अस्मान् युष्मद्रक्षितान् vयः vअघायुः मारणादिरूपपापेच्छावान्[6] vअररिवान् अदाता अस्मद्दानप्रतिबन्धकः इत्यर्थः॥ रातेश्छान्दसस्य लिटः क्वसुः॥ vअरातीवा स्वयमदानवान्॥ 'छन्दसि वनिपमिच्छन्ति' इति मत्वर्थीयो वनिप्॥ शत्रुत्वमाचरन् यः शत्रुः vद्वयेन मानसवाचिकभेदेन द्विविधेन मन्त्रेण। न ददामीति मानसो मन्त्रः। निन्दाद्यारोपेण दाननिवारणं वाचिको मन्त्रः। यद्वा। मायाहेतुकेन विरुद्धरूपेण द्विविधेन मन्त्रेण। यो विरुद्धमाचरति तन्न संकीर्तयति यच्च प्रियं ब्रूते तन्न करोति अन्यत् करोत्यन्यद्वदतीत्येवं मन्त्रस्वरूपद्वैविध्यम्। पूर्वं मानसवाचिकभेदेन इदानीं वाचिककायिकभेदेनेति विवेकः। ईदृशेन मन्त्रेण यः शत्रुः vमर्चयति भर्त्सयति विधेयीकरोति[7] वा अस्मान्। vसः मन्त्रैकदेशो मानसरूपः vअस्मै vपुनः vगुरुः vअस्तु॥ षष्ठ्यर्थे चतुर्थी॥ प्रयोक्तुरेव पुनः गरितास्तु[8]। तथा vदुरुक्तैः दुर्वाक्यैर्निन्दारूपैर्वाचिकैः vतन्वं स्वकीयां तनुम् vअनु vमृक्षीष्ट अनुमार्ष्टु अनुक्रमेण लुम्पतु। यद्वा। स द्विविधो मन्त्रः अस्मै प्रयोक्तुरेव[9] गुरुर्गरितास्तु। अन्यान्यपि अस्मन्नयकाराय प्रयुक्तानि निष्ठुरभाषणानि सन्ति। तैर्दुरुक्तैः सोऽरातिः स्वतनुमेवावलुम्पतु। स्वात्मानमेवावृत्य दहत्वित्यर्थः॥

---

१. ङ-ञ१–तं शशाप। २. क्ष-ङ-ञ-ञ-ञ१-ञ-ट–तान् रश्मीन्। ३. क्ष-ञ१-ञ-ट–त्वं ररक्ष रक्ष। ४. ञ–तेन। ५. क्ष-ञ-ट–°दम्भिस्वञ्जामिति। ६. क्ष-ञ-ट–°पापेच्छया। ७. क–विषयीकरोति। ८. ङ-ञ-ञ१–गरितास्तु भक्षकोऽस्तु। ९. ङ-ञ१–प्रयोक्त्रे।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उत वा यः सहस्य प्रविद्वान्मर्तो मर्तं मर्चयति द्वयेन ।
अतः पाहि स्तवमान स्तुवन्तमग्ने माकिर्नो दुरितायं धायीः ॥ ५ ॥

उत । वा । यः । सहस्य । प्रऽविद्वान् । मर्तः । मर्तम् । मर्चयति । द्वयेन ।
अतः । पाहि । स्तवमान । स्तुवन्तम् । अग्ने । माकिः । नः । दुःऽइतायं । धायीः ॥ ५ ॥

पूर्वमन्त्रे द्विविधकुटिलमन्त्रेण[1] कर्तारं[1] तन्मन्त्रणं प्राप्नोतु मा अस्मान् इत्युक्तम्। अत्र तु तन्मन्त्रणात् पाहि इत्यग्निः प्रार्थ्यते । vउत vवा[2] हे vसहस्य। सह इति बलनाम। तत्र भवाग्ने vयः vमर्त्यः मरणधर्मा मनुष्यः vप्रविद्वान् मायामन्त्रणं प्रकर्षेण जानन् vद्वयेन पूर्वोक्तरीत्या द्विविधमन्त्रेण vमर्तं मनुष्यं vमर्चयति विधेयीकरोति भर्त्सयति वा vअतः तादृशात् भर्त्सनात् तत्कर्तुः सकाशाद्वा हे vस्तवमान स्तूयमान vअग्ने vस्तुवन्तं स्तुतिं कुर्वन्तं मां vपाहि रक्ष । किंच vनः अस्मान् vदुरिताय तत्कृताय दुर्मन्त्रणप्रयुक्तदुःखाय समर्थं vमाकिः vधायीः मा स्थापय । दुरितभाजनं मा कार्षीः इत्यर्थः ॥ 'धि धारणे' । व्यत्ययेन इट्। सिचि वृद्धिः । 'न माङ्योगे' इति अडभावः ॥ ॥ १६ ॥

'मथीद्यत्' इति पञ्चर्चमष्टमं सूक्तं दैर्घतमसं त्रैष्टुभमाग्नेयम्। 'मथीद्यत्' इत्यनुक्रमणिका। सूक्तत्रयमध्यस्य[3] तृतीयत्वेन पूर्वं विनियोग उक्तः ॥

मथीद्यदीं विष्टो मातरिश्वा होतारं विश्वाप्सुं विश्वदेव्यम् ।
नि यं दधुर्मनुष्यासु विक्षु स्वर्ण चित्रं वपुषे विभावम् ॥ १ ॥

मथीत् । यत् । ईम् । विष्टः । मातरिश्वा । होतारम् । विश्वऽअप्सुम् । विश्वऽदेव्यम् ।
नि । यम् । दधुः । मनुष्यासु । विक्षु । स्वः । न । चित्रम् । वपुषे । विभाऽवम् ॥ १ ॥

vहोतारं देवानामाह्वातारं vविश्वाप्सुम् । अप्स्विति रूपनाम । नानारूपं पार्थिववैद्युतजाठरादिभेदेन आहवनीयादिभेदेन वा । यद्वा । कालीकराल्यादिरूपेण ज्वालानां वैरूप्याद्विश्वरूपत्वम् । vविश्वदेव्यं सर्वदेवयोग्यक्रियासाधुं vयदीं यम् एनमग्निं vमातरिश्वा वृष्ट्यादिनिर्मात्रन्तरिक्षश्वसनो वायुः vविष्टः काष्ठेष्वन्तःप्रविष्टः सन् vमथीत् अमन्थात् प्रावर्धयदित्यर्थः ॥ 'मथे विलोडने'। 'ह्यन्तक्षण०' इति वृद्धिप्रतिषेधः ॥ पुनः स एव विशेष्यते । vयम् अग्निं vमनुष्यासु मत्वा कर्म कुर्वतीषु vविक्षु ऋत्विग्रूपासु प्रजासु पूर्वं vवपुषे यज्ञशरीरसिद्धये vनि vदधुः धारयन्ति यजमानाः । मनुष्यशब्दो निरुक्ते बहुधा निरुक्तः–'मनुष्याः कस्मान्मत्वा कर्माणि सीव्यन्ति मनस्यमानेन सृष्टा[4] मनोरपत्यं[4] मनुषो वा' (निरु. ३. ७) इति । यद्वा। पूर्वं देवा मनुष्यासु मनोरपत्यभूतासु विक्षु प्रजासु प्राणिषु वपुषे स्वरूपाय[5] यागादिस्वरूपप्रकाशाय शरीरधारणाय वा जाठराग्निरूपेण नि दधुः स्थापितवन्तः । तत्र दृष्टान्तः । vस्वर्णं स्वरणं[6] स्वीरणं[6] वा। आदित्यमिव vचित्रं चायनीयं vविभावं

---

१. झ१-°मन्त्रणकर्तारम् । २. क्ष-झ१-ञ-ट–वा अथवा । ३. क्ष-ञ-ट–सूक्तत्रयमध्येऽस्य ।
४. ख–मनस्यतिः पुनर्मनस्वीभावे मनोरपत्यम् । ५. झ-झ१–रूपाय । ६. झ–स्वरणं सु अरणं वा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

विविधप्रकाशवन्तं यथा प्रकाशादिसाधनाय धारयन्ति तद्वत् । स्वःशब्दं यास्कः एवं निरुवाच— ' स्वरादित्यो भवति सु अरणः सु ईरणः स्वृतो रसान्स्वृतो भासं ज्योतिषां स्वृतो भासेति वा ' ( निरु. २. १४ ) इति । ईदृशं यं नि दधुस्तं मथीदिति पूर्वत्रान्वयः ॥

ददानामिन्न ददभन्त मन्माग्निर्वरूथं मम तस्य चाकन् ।
जुषन्त विश्वान्यस्य कर्मोपस्तुतिं भरमाणस्य कारोः ॥ २ ॥

ददानम् । इत् । न । ददभन्त । मन्म । अग्निः । वरूथम् । मम । तस्य । चाकन् ।
जुषन्त । विश्वानि । अस्य । कर्म । उपऽस्तुतिम् । भरमाणस्य । कारोः ॥ २ ॥

[v]मन्म मननीयं स्तोत्रं हविरादिकं वा [v]ददानमित् अग्नये कुर्वाणमेव मां दम्भितारो वैरिणः [v]न [v]ददभन्त दम्भितुं हिंसितुं न प्रभवन्ति ॥ दम्भेः ' बहुलं छन्दसि ' इति विकरणस्य श्लुः । व्यत्ययेन अन्तादेशः ॥ मम कोऽतिशय इति उच्यते । [v]तस्य तादृशस्य प्रदातुः [v]मम [v]वरूथं वरणीयं स्तोत्रादिकम् अयम् [v]अग्निः [v]चाकन् अस्यर्थं कामयते ॥ कनतिः कान्तिकर्मा । अस्मात् यङ्लुगन्तात् लङि छान्दसः अडभावः । बहुलादेव[1] वा छान्दसः[2] तुजादित्वात् अभ्यासदीर्घः ॥ यस्मादेवं तस्मात् न दभ्नुवन्तीत्यर्थः । न केवलमग्निरेव कामयते किंतु सर्वे देवाः कामयन्त इत्याह । [v]उपस्तुतिं[3] [v]भरमाणस्य कुर्वाणस्य [v]कारोः स्तोतुः [v]अस्य यजमानस्य मम [v]विश्वानि सर्वाणि[4] हविष्प्रदानादिरूपाणि [v]जुषन्त[5] सर्वे देवाः । अतो न ददभन्तेत्यर्थः ॥

नित्ये चिन्नु यं सदने जगृभ्रे प्रशस्तिभिर्दधिरे यज्ञियासः ।
प्र सू नयन्त गृभयन्त इष्टावश्वासो न रथ्यो रारहाणाः ॥ ३ ॥

नित्ये । चित् । नु । यम् । सदने । जगृभ्रे । प्रशस्तिऽभिः । दधिरे । यज्ञियासः ।
प्र । सु । नयन्त । गृभयन्तः । इष्टौ । अश्वासः । न । रथ्यः । ररहाणाः ॥ ३ ॥

[v]यज्ञियासः यज्ञयोग्या यजमाना ऋत्विजो वा [v]यं मथनेनोत्पन्नमग्निं [v]नित्ये [v]चित् [v]सदने नित्ये एव गार्हपत्यलक्षणे अग्न्यासादनस्थाने [v]नु क्षिप्रं [v]जगृभ्रे गृह्णन्ति ॥ ग्रहेर्लिटि ' इरयो रे ' इति रेभावः । ' हग्रहोर्भः० ' इति भत्वम् ॥ ' नित्यं गतश्रियः[6] ध्रियते नित्यं गार्हपत्यम्' इति सूत्रात् गार्हपत्यो नित्यः । तदाश्रयत्वात्[7] सदनमपि नित्यमुच्यते । गृहीत्वा [v]प्रशस्तिभिः प्रशंसाभिः स्तुतिभिः [v]दधिरे धारयन्ति आहवनीयार्थम् । धृत्वा[8]च [v]इष्टौ एषणसाधने[8] यज्ञे निमित्तभूते सति[v]गृभयन्तः[9] ऋत्विजः [v]प्र [v]सु [v]नयन्त सुष्ठु प्रणयन्ति । तत्र दृष्टान्तः । [v]ररहाणाः रंहसा गच्छन्तः ॥ ' रहि गतौ '। छान्दसस्य लिटः कानच् ।

---

१. क्ष-ङ-ञ१-ञ-ट–केवलादेव । २. क्ष-ञ-ट–छान्दसः शपः श्लुः । ३. क्ष-ञ-ट–उपस्तुतिं ततं ( तं तं ) देवमुपेत्य क्रियमाणां स्तुतिम्; ञ– उपस्तुतिं तं देवमुपेत्य स्तोत्रम् । ४. क्ष-ङ-ञ१-ञ-ट–सर्वाणि कर्माणि । ५. क्ष-ङ-ज-ज्ञ-ञ-ञ१-ञ-ट–जुषन्त सेवन्ते । ६. ञ–गावश्रियः । ७. क्ष-ञ१-ञ-ट–तदायतनत्वात् । ८. ञ–धृत्वा च सदनमपि इष्टौ ( इष्टौ ) एषणे साधने । ९. क्ष-ञ-ट–गृह्णन्तः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'अनित्यमागमशासनम्' इति नुमभावः ॥ ᵛरथ्यः रथवन्तस्तत्र नियुक्ताः ॥ 'छन्दसीवनिपौ°' इति रथशब्दात् मत्वर्थीय ईकारः ॥ ᵛअश्वासो ᵛन अश्वा इव । ते यथा धृत्वा रथस्वामिनम् अभिमतदेशं नयन्ति तद्वत् ॥

पु॒रूणि॑ द॒स्मो नि रि॑णाति॒ जम्भै॒राद्रो॑चते॒ वन॒ आ वि॒भावा॑ ।
आद॑स्य॒ वातो॒ अनु॑ वाति शो॒चिरस्तु॒र्न शर्या॑मस॒नामनु॒ द्यून् ॥ ४ ॥

पु॒रूणि॑ । द॒स्मः । नि । रि॒णा॒ति॒ । जम्भैः॑ । आत् । रो॒च॒ते॒ । वने॑ । आ । वि॒भाऽवा॑ ।
आत् । अ॒स्य॒ । वातः॑ । अनु॑ । वा॒ति॒ । शो॒चिः । अस्तुः॑ । न । शर्या॑म् । अ॒स॒नाम् । अनु॑ । द्यून् ॥४॥

अत्र दावाग्निरूपेण अयं स्तूयते । ᵛदस्मः उपक्षपयिता अयमग्निः ᵛपुरूणि बहूनि वृक्षादीनि ᵛनि ᵛरिणाति नितरां हिनस्ति ॥ 'री गतिरेषणयोः' । प्वादित्वात् ह्रस्वः ॥ केन साधनेनेति तदुच्यते । ᵛजम्भैः दन्तस्थानीयाभिर्ज्वालाभिः । ᵛआत् दाहानन्तरं ᵛवने वृक्षादिसमूहात्मके ᵛविभावा विविधप्रकाशयुक्तः सन् ᵛरोचते दीप्तो भवति । ᵛआत् अनन्तरम् ᵛअस्य ᵛशोचिः ज्वालानुकूलं ᵛवातः अग्निसखिभूतो वायुः ᵛअनु ᵛद्यून् । अन्विति वीप्सार्थे । प्रतिदिनमनुकूलं ᵛवाति । ज्वालाः आदाय गच्छति । तत्र दृष्टान्तः । ᵛअस्तुः क्षेप्तुः सकाशात् ᵛअसनां गच्छन्तीं ᵛशर्यां ᵛन । शरो नाम हिंसासाधनलोहमयम् इषुमुखं तत्प्रचुराम् । यद्वा । शरो नाम वंशावान्तरजातीयः काष्ठविशेषः । तद्विकाराम्[1] इषुमिव[1] । 'शर्या इषवः शरमय्यः' (निरु. ५. ४) इति यास्कः । यद्वा । शर एव शर्या । अथवा । शरो हिंसा । तत्करोति[2] इति शर्या इषुः । तां यथा वायुः नोदकजन्यः[3] वेगो वा अनुकूलं प्रेरयति तद्वत् ॥

न यं रि॒पवो॒ न रि॑ष॒ण्यवो॒ गर्भे॒ सन्तं॑ रेष॒णा रे॒षय॑न्ति ।
अ॒न्धा अ॑प॒श्या न द॑भन्नभि॒ख्या नित्या॑स ईं प्रे॒तारो॑ अरक्षन् ॥ ५ ॥

न । यम् । रि॒पवः॑ । न । रि॒ष॒ण्यवः॑ । गर्भे॑ । सन्त॑म् । रे॒ष॒णाः । रे॒षय॑न्ति ।
अ॒न्धाः । अ॒प॒श्याः । न । द॒भ॒न् । अ॒भि॒ऽख्या । नित्या॑सः । ई॒म् । प्रे॒तारः॑ । अ॒र॒क्ष॒न् ॥ ५ ॥

ᵛयम् अग्निं ᵛगर्भे गर्भवद्रक्षके अरणिमध्ये ᵛसन्तं वर्तमानं ᵛरिपवः नराः, ᵛन ᵛरेषयन्ति न दुःखयन्ति । तथा ᵛरिषण्यवः अन्ये हिंसकाः ॥ 'दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति' (पा. सू. ७. ४. ३६) इति क्यचि निपात्यते । 'क्याच्छन्दसि' इति उः ॥ ᵛन हिंसन्ति । कीदृशास्ते । ᵛरेषणाः हिंसनस्वभावाः । यद्वा । तैः क्रियमाणा हिंसनप्रकारा न हिंसन्ति ॥ किंच अस्य ᵛअभिख्या अभितः ख्यातिं[4] माहात्म्यम् ᵛअन्धाः ज्ञानशक्तिरहिता अविद्वांसः अत एव ᵛअपश्याः अद्रष्टारः । यद्वा । विद्वांसोऽप्यभावयितारः अनुपासका इत्यर्थः । ईदृग्रूपा उभयेऽपि ᵛन ᵛदभन् न दभ्नुवन्ति न हिंसन्ति ।

---

१. झ१–तद्विकारमिव । २. झ–तां करोति । ३. क्ष-झ१-ञ-ट–नोदनजन्यः । ४. ङ-झ१–ख्यातिः ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

लौकिकोपकारेणापि प्रयोजकत्वादिति भावः। तर्ह्यस्य पारमार्थिकं रूपं के जानन्तीति चेत् उच्यते। vनित्यासः नित्या अविचलितभक्तयः अग्निहोत्रादिनित्यकर्मरता वा। अग्न्यनुग्रहात् स्वयमपि नित्या भविष्यन्तीति भावि नित्यत्वमाश्रित्य नित्या उपचर्यन्ते[1]। तादृशा यजमानाः vप्रेतारः यज्ञादिना तमेव तर्पयितारः सन्तः vईम् एनम् vअरक्षन् रक्षन्ति यज्ञादिरूपेण भजन्ते इत्यर्थः॥ ॥ १७ ॥

'महः सः' इति पञ्चर्चं नवमं सूक्तं दैर्घतमसं वैराजमाग्नेयम्। 'दशकास्त्रयो विराळेकादशका वा' (अनु. ६. ७-८) इत्युक्तलक्षणसद्भावात्[2]। तथा चानुक्रान्तं-'महः स वैराजम्' इति। विनियोगो लैङ्गिकः॥

महः स राय एषते पतिर्दन्निन इनस्य वसुनः पद आ।
उप ध्रजन्तमद्रयो विधन्नित् ॥ १ ॥

महः। सः। रायः। आ। ईषते। पतिः। दन्। इनः। इनस्य। वसुनः। पदे। आ। उप। ध्रजन्तम्। अद्रयः। विधन्। इत् ॥ १ ॥

vमहः महतः पूज्यस्य vरायः गवादिरूपस्य धनस्य vपतिः पालकः स्वामी vसः अग्निः vदन् ददत् अभिमतं प्रयच्छन्॥ ददातेः शतरि छान्दसः शपो लुक्। तस्य 'छन्दस्युभयथा' इति आर्धधातुकत्वात् 'आतो लोप इटि च' इति आकारलोपः॥ vआ आभिमुख्येन अस्मद्देवयजनं प्रति vईषते गच्छति। किंच vइनस्य स्वामिनोऽपि vइनः स्वामी सर्वस्य पतिरित्यर्थः। ईदृशोऽयं vवसुनः धनस्य vपदे आस्पदभूते वेदिस्थाने vआ आश्रयति॥ उपसर्गवशाद्योग्यक्रियाध्याहारः॥ यद्वा। वसुनो निवासयोग्यस्य धनस्यापि इनः इति संबन्धः। यद्वा[3]। वसुप्राप्तिः प्रसिद्धा। किंच vउप vध्रजन्तम् उपगच्छन्तम् एनम् अभिषवार्थम् vअद्रयः ग्रावन्तो यजमानाः vविधन्नित् परिचरन्त्येव[4]॥ 'विध विधाने'। तौदादिकः। लङि 'बहुलं छन्दसि' इति अडभावः। निघाताभावश्छान्दसः। यद्वा। पूर्वत्र तच्छब्दश्रुतेः अत्र यच्छब्दाध्याहारेण अस्य संबन्धात् अनिघातः॥ यद्वा। अद्रयोऽभिषवग्रावाणः स्वशब्दैः उप उपेत्य विधन्नित् पूजयन्त्येव। आह्वानं[5] जनयन्तीत्यर्थः॥

स यो वृषा नरां न रोदस्योः श्रवोभिरस्ति जीवपीतसर्गः।
प्र यः ससाणः शिश्रीत योनौ ॥ २ ॥

सः। यः। वृषा। नराम्। न। रोदस्योः। श्रवःऽभिः। अस्ति। जीवपीतऽसर्गः।
प्र। यः। ससाणः। शिश्रीत। योनौ ॥ २ ॥

vसः[6] तादृशः[6] vयः अग्निः vनरां vन मनुष्याणामिव vरोदस्योः द्यावापृथिव्योरपि vवृषा सेक्ता उत्पादक इत्यर्थः। एवं सर्वोत्पादकः[7] vश्रवोभिः सर्वत्र श्रूयमाणैर्यशोभिर्युक्तः सन् vअस्ति

---

१. क्ष-ङ-ञ१-ञ-ट-इत्युपचर्यन्ते। २. ङ-ञ१-इत्युक्तलक्षणसंभवात्। ३. क्ष-ञ१-ञ-ट-यज्ञाय। ४. क्ष-ङ-ञ१-ञ-ट-उपचरन्त्येव। मत्वर्थो लुप्यते। ५. क्ष-ञ-ट-आह्वानम्। ६. क्ष-ञ-ट-'सः तादृशः' नास्ति। ७. क्ष-ञ१-ञ-ट-सर्वोत्पादकः सोऽग्निः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वर्तते । सर्वोत्पादकः इत्युक्तं तत्रोपपत्तिमाह । यतोऽयं ᵛजीवपीतसर्गः । जीवैर्नानाविधैः पीतः आस्वादितः सर्गः सृष्टिक्रमो यस्य स तथोक्तः ॥ ' तृतीया कर्मणि ' इति पूर्वपदप्रकृतिस्वरत्वम् । पुनर्बहुव्रीहौ स एव स्वरः ॥ अत्रायं सृष्टिक्रमः । अयमग्निः स्वदत्तं[1] हविः आदित्यं प्रापय्य तद्रश्मिभिः सह वैद्युतरूपेण मेघद्वारा उदकेन[2] प्रवर्ष्य सर्वान् प्राणिनः प्रापयति[3] इत्यतो वृष्ट्युत्पादनद्वारा उत्पादयिता । इदानीं साक्षादुत्पादकत्वमाह । ᵛयः अग्निः ᵛयोनौ गर्भाशये ᵛसस्राणः प्रविष्टः सन् ᵛशिश्रीत निषिक्तं रेतः पारयति[4] । नृपश्वादिदेहाकारेण परिणमयतीत्यर्थः । यद्यग्निर्न पचेत् पूरयेदेव[5] नोत्पद्यते[6] । तस्मादयं साक्षादेवोत्पादकः । स तादृशोऽग्निर्यशस्वी वर्तते इत्यर्थः । यद्वा। योऽग्निर्नरां न नराणां कर्मसु उत्साहयुक्तानां यजमानानामिव । ' नरा मनुष्या नृत्यन्ति कर्मसु ' ( निरु. ५. १ ) इति यास्कः । तेषां यथा स्वर्गाद्यभिमतवर्षकः तद्वद्द्योदस्योरपि । आश्रयवाचिना शब्देन आश्रयिणो लक्ष्यन्ते । भूलोकवर्तिनां वृष्टिप्रदानेन द्युलोकवर्तिनां हविष्प्रापणेनेति भावः । स तादृशोऽग्निः श्रवोभिः हविर्लक्षणैः सोमाज्यादिभिः अन्नैर्निमित्तभूतैः जीवपीतसर्गो जीवविशेषैर्यजमानैः अविशेषेण सर्वैर्वा आस्वादितस्वभावः सन् अस्ति प्रकृष्टो वर्तते । अमुमग्निं हविर्भिः प्रीणयित्वा स्वाभिमतान् भोगान् भुञ्जते इत्यर्थः । किंच यः अग्निर्योनौ स्वकीयस्थाने वेदिलक्षणे सस्राणः प्रविष्टः सन् शिश्रीत स्वस्मिन् प्राप्तं पुरोडाशादिकं पचति सोऽयमग्निरस्ति महानुभावो वर्तते ॥

आ यः पुरं नार्मिणीमदीदेदत्यः कविर्नभन्यो३ नार्वा ।
सूरो न रुरुक्वाञ्छतात्मा ॥ ३ ॥

आ । यः । पुरम् । नार्मिणीम् । अदीदेत् । अत्यः । कविः । नभन्यः । न । अर्वा ।
सूरः । न । रुरुक्वान् । शतऽआत्मा ॥ ३ ॥

ᵛयः अग्निः ᵛनार्मिणीं नर्मवतीं यजमानानां संबन्धिनीम् उत्तरवेदिम् । यद्वा। नृणां मनसि स्थितां यजमानानां यज्ञार्थं[7] यां भूमिं प्रति अग्न्यागमनमनीषा विद्यते ताम् । ᵛपुरं तत्स्थानम् ᵛआ ᵛअदीदेत् दीपयति । कीदृशोऽयम् । ᵛअत्यः अपेक्षितदेशं प्रति अतनशीलः ᵛकविः क्रान्तदर्शी । तत्र दृष्टान्तः । ᵛअर्वा अरणकुशलः ᵛनभन्यो ᵛन नभस्याकाशे भवो नभस्वान् वायुरिव । किंच ᵛशतात्मा । शतं सहस्रम् इत्यपरिमितवचनः । तत्तद्यजमानगृहापेक्षया आहवनीयगार्हपत्याद्यपेक्षया वा नानारूपत्वम् । अथवा मित्रवरुणभेदेन[8] अग्नेः मित्रादिरूपं[9] ' त्वमग्ने वरुणो जायसे यत् ' (ऋ. सं. ५.३.१), ' इन्द्रं मित्रं वरुणमग्निमाहुः ' ( ऋ. सं. १.१६४.४६ ) इत्यादिश्रुतिषु प्रसिद्धम् । अग्नेरेव इन्द्राद्यात्मकत्वमाहुरिति द्वितीयमन्त्रस्यार्थः । तादृशोऽयं ᵛसूरो ᵛन सूर्य इव ᵛरुरुक्वान् दीप्यमानः ॥ ' रुच दीप्तौ '। छान्दसस्य लिटः क्वसुः ॥ अतः स तादृशोऽग्निरस्ति उत्कृष्टं वर्तते इति पूर्वत्रान्वयः ॥

---

१. क्ष-ञ-ट-स्वादत्तम् । २. क्ष-ङ-ञ-ट-उदकानि । ३. क्ष-झ-ञ-ट-पाययति. ४. क्ष-झ१-ञ-ट-प्रापयति; क-झ-पाचयति । ५. क्ष-ङ-झ१-ञ-ट-पूर्येदेव । ६.झ- नोत्पद्येत । ७. क्ष-ञ-ट-यज्ञार्थम् । ८. क्ष-ङ-झ१-ञ-ट-मित्रवरुणादिरूपभेदेन । ९. क्ष-झ१-ञ-ट-मित्रादिरूपत्वम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अभि द्विजन्मा त्री रोचनानि विश्वा रजांसि शुशुचानो अस्थात् ।
होता यजिष्ठो अपां सधस्थे ॥ ४ ॥

अभि । द्विऽजन्मा । त्री । रोचनानि । विश्वा । रजांसि । शुशुचानः । अस्थात् ।
होता । यजिष्ठः । अपाम् । सधऽस्थे ॥ ४ ॥

अयमग्निः Vद्विजन्मा द्वाभ्यामरणीभ्यां जायमानः । यद्वा । मथनात् प्रथमं जन्म । उत्पत्त्यनन्तरं पवमानेष्ट्यादिसंस्काररूपं[1] द्वितीयं जन्मेव[2] । एवं द्विजन्मत्वम् । अथवा द्यावापृथिवीभ्यामुत्पन्नत्वात् । तादृशः[3] अग्निः Vत्री Vरोचनानि त्रीणि रोचनानि क्षित्यादिस्थानानि गार्हपत्यादीनि वा Vअभि Vशुशुचानः अभितः प्रकाशयन् । न केवलं त्रीण्येव किंतु Vविश्वा Vरजांसि सर्वाण्यपि रञ्जनात्मकानि क्षित्यादिलोकान् शुशुचानः अभितः[4] प्रकाशयन्[4] दीपयन् Vहोता देवानामाह्वाता Vयजिष्ठः यष्टृतमः सन् Vअपां प्रोक्षण्याद्युदकानां Vसधस्थे सहस्थाने यागदेशे Vअस्थात् तिष्ठति ॥

अयं स होता यो द्विजन्मा विश्वा दधे वार्याणि श्रवस्या ।
मर्तो यो अस्मै सुतुको ददाश ॥ ५ ॥

अयम् । सः । होता । यः । द्विऽजन्मा । विश्वा । दधे । वार्याणि । श्रवस्या ।
मर्तः । यः । अस्मै । सुऽतुकः । ददाश ॥ ५ ॥

Vयो Vद्विजन्मा Vसः एव Vहोता होमनिष्पादकः अरणीभ्यामुत्पन्नस्यैव गार्हपत्यद्वारा आहवनीयत्वात् आह्वाता वा देवानां सः Vअयं Vविश्वा विश्वानि Vवार्याणि वरणीयानि[5] ॥ 'ईडवन्दवृशंसदुहां ण्यतः' इत्याद्युदात्तत्वम् ॥ Vश्रवस्या श्रवस्यया । श्रवोऽन्नं हविर्लक्षणं तदिच्छया ॥ श्रवःशब्दात् क्यजन्तात् 'अ प्रत्ययात्' इति भावे अप्रत्ययः ॥ Vदधे[6] धारयति । Vअस्मै उक्तस्वरूपाय[7] अग्नये Vयः Vमर्तः मर्त्यः Vददाश ददाति सः Vसुतुकः शोभनपुत्रो भवति ॥ ॥ १८ ॥

'पुरु त्वा' इति तृचात्मकं दशमं सूक्तं दैर्घतमसमाग्नेयमौष्णिहम् । 'पुरु तृचमौष्णिहम्' इत्यनुक्रमणिका ॥ प्रातरनुवाकाश्विनशस्त्रयोरौष्णिहे छन्दसि अस्य विनियोगः । 'अथैतस्याः' इति खण्डे सूत्रितं–'पुरु त्वा त्वामग्ने' (आश्व. श्रौ. ४. १३) इति ॥

पुरु त्वा दाश्वान्वोचेऽरिरग्ने तव स्विदा । तोदस्येव शरण आ महस्य ॥ १ ॥

पुरु । त्वा । दाश्वान् । वोचे । अरिः । अग्ने । तव । स्वित् । आ ।
तोदस्यऽइव । शरणे । आ । महस्य ॥ १ ॥

---

१. क्ष-ङ-झ१-ञ-ट–आधानपवमानेष्टयादिसंस्काररूपम् । २. क्ष-ङ-च-झ-ञ-ट–जन्म । ३. क्ष-ञ-ट–स तादृशः । ४. क्ष-ङ-च-झ-झ१-ञ-ट–'अभितः प्रकाशयन्' नास्ति । ५. क-झ–वरणीयानि धनानि; क्ष-झ१-ञ-ट–वरणीयानि कर्माणि । ६. क्ष-झ१-ञ-ट–अन्नानि यशो वा दधे । ७. च–उत्कृष्टस्वरूपाय ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे अग्ने [v]त्वा त्वां [v]पुरु बहु [v]वोचे। यद्वा। बहु दाश्वानिति संबन्धः। पुत्रं देहि वित्तं देहि इत्याद्याशासनानि ब्रवीमीत्यर्थः। किं तूष्णीं नेत्याह। यतः [v]दाश्वान् अभिमतं हविः दत्तवानस्मि अतः वोचे। इतरसाधारण्येन ब्रुवतः कथं दातव्यमिति न मन्तव्यम्। यतोऽहं हे [v]अग्ने [v]तव [v]स्वित् तवैव [v]आ आभिमुख्येन [v]अरिः अर्ता हविरादिप्रापणेन सेवकोऽहम्। तत्र दृष्टान्तः। [v]महस्य महतः [v]तोदस्येव शिक्षकस्य स्वामिनः [v]शरणे अस्य[1] गृहे यथा गर्भदासादिः [v]आ समन्तात् नियतो वर्तते तद्वदहमपि। यस्मादेवं तस्मात् अभिमतं बहु वोचे त्वमपि तत्सर्वं देहीत्यर्थः। अत्र निरुक्तं–'बहु दाश्वांस्त्वामेवाभिह्वयाम्यरिरमित्र ऋच्छतेः। ईश्वरोऽप्यरिरेतस्मादेव। यदन्यदेवस्या अग्नावाहुतयो हूयन्त इत्येतद्दृष्ट्वैवमवक्ष्यत् तोदस्येव शरण आ महस्य तुदस्येव शरणेऽधि महतः' (निरु. ५. ७) इति॥

व्यनिनस्य धनिनः प्रहोषे चिदररुषः। कदा चन प्रजिगतो अदेवयोः॥ २॥

वि। अनिनस्य। धनिनः। प्रऽहोषे। चित्। अररुषः।

कदा। चन। प्रऽजिगतः। अदेवऽयोः॥ २॥

पूर्वमन्त्रे स्वाभीष्टं बहु विज्ञापयामीत्युक्तम्। अत्र तु स्वविलक्षणेभ्यो दानादिरहितेभ्यो दानं न दातव्यमिति प्रार्थयते। हे अग्ने त्वां विशेषेण[2] ब्रवीमि[2]। उपसर्गश्रुतेः[3] योग्यक्रियाध्याहारः। अथवा संनिहितत्वात् वोचे इत्यनुषज्यते। अस्मदर्थं यत् व्यजिज्ञपन्[4] तद्विरुद्धं वोचे। वक्ष्यमाणस्वरूपस्य न दातव्यम् इति[5] ब्रवीमि[5] इत्यर्थः। तेषां स्वरूपमाह। [v]अनिनस्य अस्वामिनः त्वाम्[6] अस्वामिनं कुर्वाणस्य[6] तथा [v]धनिनः समग्रधनवतः। पूर्वमेव धनवतो दानस्य निरर्थकत्वात् तन्निवार्यते। यद्वा। यागाद्यनुपयोगिधनवतः[7] इत्यर्थः। किंच [v]प्रहोषे[8] प्रकर्षेण होतुम् [v]अररुषः अददतो दक्षिणारूपेण[9]। यद्वा। प्रहोषेऽनिनस्येति संबन्धः। प्रकर्षेण होतुमसमर्थस्येत्यर्थः। अत्र इनशब्देन तत्स्थं सामर्थ्यं लक्ष्यते। चिच्छब्दः समुच्चयार्थः। किंच[10] [v]कदा [v]चन [v]प्रजिगतः कदाचिदपि प्रकर्षेण देवान् अस्तुवतः। अत्र चन इति निपातद्वयसमुदायः। तत्र चशब्दः समुच्चये नशब्दो निषेधे। किंच [v]अदेवयोः देवानात्मनोऽनिच्छतः। एतेषां न दातव्यमिति विवोचे इत्यर्थः। निन्दितानां स्वरूपनिरूपणेन स्वस्य अतादृशत्वात् बहु वोचे इत्येतत् युक्तमेवेत्युक्तं भवति। यद्वा। चन इति चिच्छब्दपर्यायः। उक्तप्रकारेण दुष्टस्यापि कदाचित् प्रजिगतो यदाकदाचित् त्वां स्तुवतो विवोचे। तादृशस्य दातव्यमिति विशेषेण ब्रवीमि। किमु वक्तव्यमस्मदर्थमिति भावः॥

---

१. क्ष-ङ-ञ-ञ१-ञ-ट–'अस्य' नास्ति। २. क्ष-ञ-ट–विवोचे। ३. क्ष-ङ-ञ-ट–उपसर्गवशात्। ४. क्ष-ञ१-ञ-ट–व्यज्ञापयन्। ५. क्ष-ञ-ट–'इति ब्रवीमि' नास्ति। ६. क्ष-ञ१-ञ-ट–त्वाम् इनम् अकुर्वाणस्य विवोचे। सर्वत्र एवं संबन्धनीयम्; ङ-त्वाम् अस्वामिनं कुर्वाणस्य विवोचे। सर्वत्र एवं संबोधनीयम्; ञ–त्वाम् अग्निं स्वामिन(म्) अकुर्वाणस्य। ७. क्ष-ञ-ट–यागाद्यनुपभोगधनवतः; ञ–यागाद्यनुष्ठानोपयोगिधनवतः। ८. क्ष-ञ१-ञ-ट–प्रहोषे चित्। ९. क्ष-ञ-ट–दक्षिणादिरूपेण। १०. ञ–किंच। अररुषः। अहिंसकस्य परद्रोहम् अकुर्वतः किंच।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स चन्द्रो विप्र मर्त्यो महो व्राधन्तमो दिवि ।
प्रप्रेत्ते अग्ने वनुषः स्याम ॥ ३ ॥

सः । चन्द्रः । विप्र । मर्त्यः । महः । व्राधन्ऽतमः । दिवि ।
प्रऽप्र । इत् । ते । अग्ने । वनुषः । स्याम ॥ ३ ॥

हे अग्ने vविप्र मेधाविन् यः vमर्त्यः त्वां यजते vसः मर्त्यो यजमानः vदिवि द्युलोके vचन्द्रः सर्वेषाम् आह्लादकश्चन्द्रसदृशो भवति । यद्वा । चन्द्र एव भवति । यजमानानां चन्द्रत्वप्राप्तिं छन्दोगा आमनन्ति—' पितृलोकादाकाशमाकाशाच्चन्द्रमसमेष सोमो राजा ' ( छा. उ. ५. १०. ४ ) इति। ' सोमलोके विभूतिमनुभूय ' (प्र. उ. ५.४) इति च। तथा मुण्डकेऽपि द्युलोकप्राप्तिराम्नायते—' एह्येहीति तमाहुतयः सुवर्चसः सूर्यस्य रश्मिभिर्यजमानं वहन्ति। तं नयन्त्येताः सूर्यस्य रश्मयो यत्र देवानां पतिरेकोऽधिवासः ' इति, ' एष वः पुण्यः सुकृतो ब्रह्मलोकः ' ( मु. उ. १. २. ५-६ ) इति च । पुनः स एव विशेष्यते। vमहः महतोऽपि vव्राधन्तमः प्रवृद्धतमः। इतरदेवानामपि श्रेष्ठ इत्यर्थः। अतः[1] vअग्ने[1] vते तव vप्रप्रेत् प्रकर्षेणैव vवनुषः संभक्तारः vस्याम । यद्वा । प्रीणयित्वा प्रप्रेत् स्याम। प्रकृष्टा एव भवेम ॥ ॥ १९ ॥

' मित्रं न यम् ' इति नवर्चमेकादशं सूक्तं दैर्घतमसं जागतं मैत्रावरुणम्। आद्या मैत्र्येव। अत्रानुक्रमणिका-' मित्रं नव मैत्रावरुणं हि जागतं मैत्र्याद्या ' इति । विनियोगो लैङ्गिकः ॥

मित्रं न यं शिम्या गोषु गव्यवः स्वाध्यो विदथे अप्सु जीजनन् ।
अरेजेतां रोदसी पाजसा गिरा प्रति प्रियं यजतं जनुषामवः ॥ १ ॥

मित्रम् । न । यम् । शिम्या । गोषु । गव्यवः । सुऽआध्यः । विदथे । अप्ऽसु । जीजनन् ।
अरेजेताम् । रोदसी इति । पाजसा । गिरा । प्रति । प्रियम् । यजतम् । जनुषाम् । अवः ॥ १ ॥

vयम् अग्निं vशिम्या । कर्मनामैतत्, ' शिमी शक्तिः ' (नि. २.१.२४) इति तन्नामसूक्तत्वात्। प्रकाशवृष्ट्युत्पादनादिकर्मणा vमित्रं vन मित्रमिव स्थितम् । यद्वा । शिम्या इत्येतत् क्रियया सह संबध्यते । vगोषु बह्वीषु निमित्तभूतासु vगव्यवः गा आत्मन इच्छन्तः । अत्र यद्यपि गव्यवः इत्येवालं न गोष्विति, तथापि गव्यव इत्यत्र गोस्वामित्वं प्रतिपाद्यते। तच्चैकया द्वित्राभिरपि[2] स्यात्। अतः स्पृहणीया बह्व्य इत्यवगमयितुं गोष्विति पदम् । यथा ' गवामसि गोपतिः ' ( ऋ. सं. ७. ९८. ६ ), ' गणानां त्वा गणपतिम् ' ( ऋ. सं. २.२३.१ )। तथा vस्वाध्यः सुष्ठु आध्यातारः फलस्योत्पादयितारः शोभनध्याना वा vविदथे यागे vअप्सु अन्तरिक्षे वैद्युतरूपेण वर्तमानम् । आप इत्यन्तरिक्षनाम, ' आपः पृथिवी ' ( नि. १. ३. ८ ) इति तन्नामसूक्तत्वात्। अग्नेरन्तरिक्षोत्पत्तिः ' यदग्ने दिविजा अस्यप्सुजा वा ' ( ऋ. सं. ८. ४३. २८ ), ' अप्स्वग्ने सधिष्टव ' ( ऋ. सं. ८. ४३. ९ ) इत्यादिमन्त्रान्तरेषु

१. क्ष-ञ-ट-अतो वयं हे अग्ने; झ१-अतो वयम् अग्ने । २. झ-द्वित्रादिभिः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रसिद्धा। [V]प्रियं सर्वेषां प्रियतमं प्रीणयितारं वा [V]यजतं यष्टव्यमग्निं [V]जनुषां जन्मवतां प्राणिनाम् [V]अवः [V]प्रति रक्षणं निमित्तीकृत्य शिम्या मथनादिकर्मणा [V]जीजनन् जनयन्ति[1] यजमानाः। यद्वा। अप्सु निमित्तभूतासु जीजनन् सर्वप्राणिनामुपकाराय वृष्ट्यर्थं चेत्यर्थः। एवमुत्पन्नस्याग्नेः [V]पाजसा बलेन [V]गिरा भयंकरशब्देन च [V]रोदसी द्यावापृथिव्यौ [V]अरेजेताम् अकम्पेताम्। अग्नेः सकाशात् कम्पनम् 'अरेजेतां रोदसी होतृवूर्ये' (ऋ. सं. १.३१.३) इत्यादिश्रुतिषु प्रसिद्धम्। न च सर्वरक्षणार्थम् उत्पादितोऽग्निः लोकद्वयस्य भीतिमजनयत् किमेतदिति वाच्यं निन्दास्तुतित्वात्। यथा लोकौ बिभीतस्तथा प्रवृद्धोऽभवत् इति स्तुतौ पर्यवसानात्। यद्यप्यत्राग्निरेव प्रतिपाद्यते मित्रस्तु परं दृष्टान्तित एव तथापि द्युस्थानस्याग्नेरेव मित्रत्वात् मन्त्रस्य मैत्रत्वमविरुद्धम्। यद्वा। मित्रं न सखायमिव स्थितं मित्रनामकं देवं यज्ञेऽन्तरिक्षे च ऋत्विजः प्रादुर्भावयन्ति। शिष्टम् एतद्विशेषेण तथैव योजनीयम्॥

यद्ध॒ त्यद्वां॑ पुरुमी॒ळ्हस्य॑ सो॒मिन॒: प्र मि॒त्रासो॒ न द॑धि॒रे स्वा॑भुव॒: ।
अध॒ क्रतुं॑ विदतं गा॒तुमर्च॑त॒ उत॒ श्रुतं॑ वृषणा॒ पस्त्या॑वतः ॥ २ ॥

यत्। ह॒। त्यत्। वा॒म्। पुरु॑ऽमी॒ळ्हस्य॑। सो॒मिन॑:। प्र। मि॒त्रास॑:। न। द॒धि॒रे। सु॒ऽआ॒भुव॑:।
अध॑। क्रतु॑म्। वि॒द॒त॒म्। गा॒तुम्। अर्च॑ते। उ॒त। श्रुत॑म्। वृ॒ष॒णा॒। पस्त्य॑ऽवतः ॥ २ ॥

हे मित्रावरुणौ [V]यत् यस्मात् कारणात् [V]वां युवां [V]पुरुमीळहस्य बहुलाभीष्टसेचनस्य [V]सोमिनः [V]स्वाभुवः सोमवतः स्वाभवनशीलस्य॥ कर्मणि षष्ठी॥ [V]त्यत्[2] उक्तलक्षणं कर्म [V]प्र [V]मित्रासो [V]न मित्राणीव मित्रभूता ऋत्विजः प्र [V]दधिरे प्रकर्षेण धारयन्ति। [V]ह इति पूरणः। [V]अध अतः कारणात् [V]गातुं युष्मद्गमनम् [V]अर्चते॥ षष्ठ्यर्थे चतुर्थी॥ अर्चतः पूजयतो यजमानस्य [V]क्रतुं कर्म [V]विदतं जानीतम्॥ विदेर्लोटि व्यत्ययेन शः॥ [V]उत अपि च हे [V]वृषणा कामानां वर्षितारौ युवां [V]पस्त्यावतः। पस्त्या इति गृहनाम, 'पस्त्या दुरोणे' (नि. ३. ४. ६) इति तन्नामसूक्तत्वात्। सदःप्राचीनवंशादिगृहवतो यजमानस्याह्वानं स्तोत्रं वा [V]श्रुतं शृणुतम्॥ छान्दसो विकरणस्य लुक्॥ यद्वा। यद्यस्मात् सोमिनः सोमवतः पुरुमीळहस्यैतन्नामकस्य राज्ञो मित्रासो न मित्राणीव स्थिताः स्वाभुवः स्वाभवनशीलाः स्वस्वव्यापारसमर्था दधिरे अध अतः कारणात् तस्य अर्चते अर्चतः क्रतुं विदतमित्यादि पूर्ववत्॥

आ वां॑ भूषन्क्षि॒तयो॒ जन्म॒ रोद॑स्योः प्र॒वाच्यं॑ वृषणा॒ दक्ष॑से म॒हे ।
यदी॑मु॒ताय॒ भर॑थो॒ यद॑र्व॒ते प्र होत्र॑या॒ शिम्या॑ वी॒थो अ॑ध्व॒रम् ॥ ३ ॥

आ। वा॒म्। भूष॑न्। क्षि॒तय॑:। जन्म॑। रोद॑स्योः। प्र॒ऽवाच्य॑म्। वृ॒ष॒णा॒। दक्ष॑से। म॒हे।
यत्। ई॒म्। उ॒ताय॑। भर॑थः। यत्। अ॒र्व॒ते। प्र। होत्र॑या। शिम्या॑। वी॒थः। अ॒ध्व॒रम्॥ ३ ॥

---

१. क्ष-झ-ञ-ट—अजनयन्। २. ङ-झ१—त्यत् तत्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]वृषणा कामानां वर्षितारौ हे मित्रावरुणौ [v]वां युवयोः संबन्धि [v]जन्म जननम् उत्पत्तिम्[1] [v]रोदस्योः द्यावापृथिव्योः सकाशात्। द्यावापृथिवीभ्यामेव सर्वेषामुत्पत्तेः। यद्वा। मित्र इति सर्वोपकारी अग्निरुच्यते वरुण इति तमोनिवारक आदित्यः उभयोः पृथिवीद्युस्थानत्वात्। ततः पूर्वमन्त्रे मित्रदृष्टान्तत्वेन अग्निः स्तुतः। अत इदमधिगम्यते अग्निरेव मित्र इति। तथान्यत्रापि। 'अग्निं मित्रं न क्षितिषु प्रशंस्यम्' (ऋ. सं. २. २. ३), 'मित्रं न यं सुधितं भृगवो दधुः' (ऋ. सं. ६. १५. २) इति च। [v]प्रवाच्यं स्तुत्यं तादृग्युवयोः जन्म [v]महे महते [v]दक्षसे सर्वविषयबलाय [v]क्षितयः मनुष्या यजमानाः [v]आ [v]भूषन् सर्वतोऽलंकुर्वन्ति श्लाघन्ते इत्यर्थः। जन्मनः प्रवाच्यत्वमाह। [v]यदीं यस्मादेव कारणात्। अथवा। ईम् इत्यनर्थकः। 'मिताक्षरेष्वनर्थकाः कमीमिद्विति' इत्युक्तत्वात्। [v]ऋताय यज्ञाय [v]भरथः सामर्थ्यम्। [v]यत् यस्माच्च कारणात् [v]अर्वते युष्मान् प्राप्तवते यजमानाय च भरथोऽभिमतं फलम्। अथवा। उभयत्र कर्मणः संप्रदानत्वात् चतुर्थी। यज्ञं यजमानं च भरथ इत्यर्थः। यस्माच्च [v]होत्रया स्तुतिरूपया वाचा [v]शिम्या हविष्प्रदानादिकर्मणा च [v]प्र [v]वीथः प्रकर्षेण प्राप्नुथः। तस्मात् प्रवाच्यं जन्म भूषयन्तीत्यर्थः। होत्रा इति वाङ्नाम, 'होत्रा गीः' (नि. १. ११. ३५) इति तन्नामसु पाठात्॥

प्र सा क्षितिरसुर या महि प्रिय ऋतावानावृतमा घोषथो बृहत्
युवं दिवो बृहतो दक्षमाभुवं गां न धुर्युप युञ्जाथे अपः॥ ४॥

प्र। सा। क्षितिः। असुरा। या। महि। प्रिया। ऋतऽवानौ। ऋतम्। आ। घोषथः। बृहत्।
युवम्। दिवः। बृहतः। दक्षम्। आऽभुवम्। गाम्। न। धुरि। उप। युञ्जाथे इति। अपः॥४॥

हे [v]असुरा[2] असुरौ बलवन्तौ[2] मित्रावरुणौ युवयोः [v]या क्षितिः देवयजनरूपा [v]महि महदत्यधिकं [v]प्रिया प्रियतरा प्रीणयित्री वा [v]सा [v]क्षितिः [v]प्र प्रकर्षेण संपादिता। उपसर्गश्रुतेः[3] योग्यक्रियाध्याहारः। तामासीदतमिति शेषः। यागभूमिर्देवानां प्रियेति प्रसिद्धम्। आसाद्य च हे [v]ऋतावानौ ऋतवन्तौ युवां [v]बृहत् प्रवृद्धम् [v]ऋतम् अस्मदीयं यज्ञम् [v]आ[4] [v]घोषथः[4] अवैकल्येन संपादितः इति स्तुतमित्यर्थः। यतः [v]युवं युवां [v]बृहतः महतः [v]दिवः द्युलोकस्य धुरि [v]दक्षं तर्पणवहने[5] समर्थम्[5]। अथवा बृहतो दिवो महतो द्युलोकस्थदेवान् दक्षं प्रीणयितुमिति शेषः। यद्वा। कर्मणि षष्ठी। दिवो द्योतनात्मकं बृहतः प्रभूतं दक्षम् अभिमतसाधनसमर्थम्। [v]आभुवं सर्वतो भवनशीलम् [v]अपः कर्म सोमयागरूपम् [v]उप [v]युञ्जाथे सेवेथे तत्रत्यं हविः स्वीकुरुथ इत्यर्थः। उपयोगे दृष्टान्तः। [v]धुरि शारीरबलस्य निर्वाहे तदर्थं [v]गां [v]न धेनुमिव। तां यथोपयुञ्जते तद्वत्। यद्वा। विकारे प्रकृतिशब्दः। क्षीरादिकमिव। तस्मात् ऋतम् आघोषथः॥

---

१. ज्ञ-ज्ञ-उत्पत्तिः। २. क्ष-ञ-ट-असुरा असोर्दातारौ। ३. क्ष-ङ-ज्ञ१-ञ-ट-उपसर्गवशात्। ४. क्ष-ङ-ज्ञ१-ञ-ट-आघोषथः सर्वतः शब्दयथः। ५. क्ष-ञ-ट-तर्पणवहनसमर्थम्; ज्ञ-तर्पणहवने समर्थम्; ज्ञ१-तर्पणहवनसमर्थम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

महीं अत्र महिना वारमृण्वथोऽरेणवस्तुज आ सद्मन्धेनवः ।
स्वरन्ति ता उपरतातिं सूर्यमा निम्रुचं उषसस्तक्ववीरिव ॥ ५ ॥

महीं इति । अत्र । महिना । वारम् । ऋण्वथः । अरेणवः । तुजः । आ । सद्मन् । धेनवः ।
स्वरन्ति । ताः । उपरऽतातिं । सूर्यम् । आ । निऽम्रुचः । उषसः । तक्ववीःऽइव ॥ ५ ॥

हे मित्रावरुणौ युवां[1] [V]महीं महत्याम् ॥ सप्तम्येकवचने पूर्वसवर्णदीर्घः । ' ईदूतौ च सप्तम्यर्थे ' ( पा. सू. १. १. १९ ) इति प्रगृह्यता ॥ [V]अत्र अस्यां पृथिव्यां [V]महिना* महत्त्वेन या धेनूः [V]वारं वरणीयं प्रदेशम् [V]ऋण्वथः[1] गमयथः ॥ अन्तर्भावितण्यर्थोऽयम् ॥ गमनादिव्यवहारस्य तयोरधीनत्वात् द्यावापृथिव्योः अभिमानिदेवत्वाच्च मित्रावरुणयोः । ता एताः [V]धेनवः गावः सायंकाले युष्मन्महत्त्वेन [V]अरेणवः अनवद्याः तस्कराद्यनपहारेण अनष्टा वा [V]तुजः क्षीराणां प्रदाव्यः ॥ तुजतिः[2] दानकर्मा ॥ [V]सद्मन्[3] सद्मनि गोष्ठे [V]आ आश्रिता आगच्छन्ति वा ॥ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥ [V]ताः एवंकारिता धेनवः [V]उपरतातिं उपरतातौ ॥ सप्तम्या लुक् ॥ मेघानां विस्तारवति अन्तरिक्षे मेघाच्छन्ने सति [V]सूर्यं सर्वस्य प्रसवितारं सुवीर्यं शोभनसामर्थ्यं वा । ' सुवीर्यो मर्या यथा गोपायत इति तत्सूर्यस्य सूर्यत्वम् ' ( तै. ब्रा. २. २. १० ) इति श्रुत्यन्तरात् । आदित्यमभिलक्ष्य [V]स्वरन्ति शब्दयन्ति सुखसंचाराय ॥ ' स्वृ शब्दोपतापयोः ' । भौवादिकः ॥ कस्मिन् काले इति तदुच्यते । [V]निम्रुचः [V]उषसः । सर्वेष्वपि सायंकालेषु उषःकालेषु च । तत्र दृष्टान्तः । [V]तक्ववीरिव । तक्वा स्तेनः । तस्य वेता गन्ता मनुष्यः । स यथा क्रोशति तद्वत् । एवं निरुद्धानां गवां सुखचारः[4] युष्मदायत्तः इति तयोः स्तुतिः ॥ ॥ २० ॥

आ वामृताय केशिनीरनूषत मित्र यत्र वरुण गातुमर्चथः ।
अव त्मना सृजतं पिन्वतं धियो युवं विप्रस्य मन्मनामिरज्यथः ॥ ६ ॥

आ । वाम् । ऋताय । केशिनीः । अनूषत । मित्र । यत्र । वरुण । गातुम् । अर्चथः ।
अव । त्मना । सृजतम् । पिन्वतम् । धियः । युवम् । विप्रस्य । मन्मनाम् । इरज्यथः ॥ ६ ॥

हे मित्रावरुणौ[5] [V]केशिनीः केशवत्योऽग्नेर्ज्वालाः [V]वां युवाम् [V]ऋताय यज्ञार्थम् [V]आ [V]अनूषत । हविःसमर्पणेनाभिपूजयन्तीत्यर्थः । कुत्रेति तदुच्यते । हे [V]मित्र हे [V]वरुण युवामुभौ [V]यत्र यागे [V]गातुं गमनं देवयजनदेशं वा । गातुरिति पृथिवीनाम, ' गातुः पूषा ' ( नि. १. १. २० ) इत्युक्तत्वात् । [V]अर्चथः पूजयथः स्वीकुरुथ इत्यर्थः । आगत्य च [V]त्मना आत्मनैव[6] [V]अव [V]सृजतं वृष्टिम् अवाङ्मुखं विसृजतम् । तथा कृत्वा [V]धियः अस्मदीयानि कर्माणि [V]पिन्वतं[7] वर्धयतम् इत्यर्थः । एवं कृत्वा [V]विप्रस्य मेधाविनः यजमानस्य [V]मन्मनां मननवतीनां स्तुतीनां [V]युवं युवाम् [V]इरज्यथः

---

१. ङ-ञ१—मही महान्तौ युवां महिना महिम्ना महत्त्वेन अत्र अस्यां पृथिव्यां या धेनुः वारं वरणीयं प्रदेशम् ऋण्वथः । *क—महिना महिम्ना । २. ख—तुज्ञतिः । ३. क्ष-ङ-ञ१-ञ-ट—संबन्धिन्यः । यद्वा क्षिप्रं सद्मन् । ४. क्ष-ङ-ञ१-ञ-ट—सुखसंचारः । ५. क्ष-ङ-ञ१-ञ-ट— मित्रावरुणौ वां युवयोः । ६. क्ष-ञ-ट—आत्मना । ७. ञ—पिन्वतं सेचयतम्; ञ१—सेवयन्तम् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ईश्वरौ स्वामिनौ भवथः । इरज्यतिरैश्वर्यकर्मा, ' इरज्यति पत्यते ' ( नि. २. २१. १ ) इति तन्नामसु उक्तत्वात् ॥

**यो वां यज्ञैः शशमानो ह दाशति कविर्होता यजति मन्मसाधनः ।**
**उपाह तं गच्छथो वीथो अध्वरमच्छा गिरः सुमतिं गन्तमस्मयू ॥ ७ ॥**

यः । वाम् । यज्ञैः । शशमानः । ह । दाशति । कविः । होता । यजति । मन्मऽसाधनः ।
उप । अह । तम् । गच्छथः । वीथः । अध्वरम् । अच्छ । गिरः ।
सुऽमतिम् । गन्तम् । अस्मयू इत्यस्मऽयू ॥ ७ ॥

[v]यः [v]ह यः खलु यजमानः [v]वां युवामुद्दिश्य युवाभ्यां वा [v]यज्ञैः यागैर्निमित्तभूतैः [v]शशमानः शंसमानः [v]दाशति हविरादिकं स्वस्वत्वं निवर्त्य युष्मत्स्वत्वापादनं करोति । य एव [v]कविः अनूचानः ' येऽनूचानास्ते[1] कवयः ' ( ऐ. ब्रा. २.२ ) इति श्रुतेः । अथवा कविर्मेधावी [v]होता सम्यग्होमनिष्पादको यजमानः [v]मन्मसाधनः मननीयद्रव्यदक्षिणादिसाधनोपेतः सन् [v]यजति सोमयागादिकं करोति[2] । [v]तम् एव[3] यजमानं [v]सुमतिं शोभनप्रज्ञम् [v]उप उपलक्ष्य [v]गच्छथः प्राप्नुथः[4] खलु । [v]अध्वरं तदीयं यज्ञं [v]वीथः कामयेथे । किंच[4] [v]अस्मयू अस्मान् कामयमानौ युवां [v]गिरः स्तुतीः [v]अच्छ अभिलक्ष्य [v]गन्तं गच्छतम् । तादृशं मां प्राप्य स्तुतीः स्वीकुरुतमित्यर्थः । अत्र यद्यपि तम् इति सामान्यनिर्देशः प्रतिभाति तथापि अस्मयू इत्युक्तत्वात् दीर्घतमाः स्वात्मानमेव परोक्षतया उक्तवानिति गम्यते[5] । यद्वा । यो दाशति यश्च यजते तमुपेत्य तदीयं यज्ञं कामयेथे[6] । अतोऽस्मयू युवां सुमतिं मां मदीया गिरः स्तुतीः[7] अच्छ अभिलक्ष्य गच्छतम् ॥

**युवां यज्ञैः प्रथमा गोभिरञ्जत ऋतावाना मनसो न प्रयुक्तिषु ।**
**भरन्ति वां मन्मना संयता गिरोऽदृप्यता मनसा रेवदाशाथे ॥ ८ ॥**

युवाम् । यज्ञैः । प्रथमा । गोभिः । अञ्जते । ऋतऽवाना । मनसः । न । प्रऽयुक्तिषु ।
भरन्ति । वाम् । मन्मना । सम्ऽयता । गिरः । अदृप्यता । मनसा । रेवत् । आशाथे इति ॥८॥

हे [v]ऋतावाना यज्ञवन्तौ वृष्ट्युदकवन्तौ वा मित्रावरुणौ [v]युवां [v]प्रथमा प्रथमौ [v]यज्ञैः यजनसाधनैः [v]गोभिः गोविकारैः पयआदिभिः [v]अञ्जते व्यञ्जयन्ति यजमानाः । देवभागं यागेषु क्षीरादिभिः

---

१. क्ष-ख-च-ञ-ट–ये वा अनूचानास्ते । २. क्ष-ञ-ट–करोति च । ३. क्ष-ञ-ट–तमेव । ४. क्ष-ङ-ञ१-ञ-ट–प्राप्नुथः कामयथः । अहेति यजमानविशेषणम् । अहिंसकं युष्मान् स्तुवन्तमित्यर्थः । किंच । ५. क्ष-ङ-ञ१-ञ-ट–अवगम्यते । ६. क्ष-ञ-ट–कामयथः । ७. क्ष-ञ-ट–स्तुतीश्च ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यजन्ते इत्यर्थः । यद्वा । गोभिः[1] अञ्जते स्तुवन्ति[1] तत्र दृष्टान्तः । [v]प्रयुक्तिषु प्रयोगेषु [v]मनसो [v]न ॥ कर्मणि षष्ठी ॥ मन इव । तद्यथा प्रथमं व्यञ्जयन्ति मुख्यं कुर्वन्ति तत्पूर्वकत्वात् सर्वव्यवहारस्य । किंच [v]वां युवां [v]मन्मना मननवता [v]संयता युवामेव सम्यग्गच्छता चित्तेन [v]गिरः स्तुतीः [v]भरन्ति संपादयन्ति । यस्मादेवं तस्मात् [v]अदृप्यता अनभिभववता [v]मनसा प्रकृष्टेन चेतसा युक्तौ सन्तौ [v]रेवत्[2] धनवत् कर्म अस्मदीयम् [v]आशाथे अश्नुवाथे[3] व्यामुथः ददाथे इत्यर्थः[3] ॥ अश्नोतेर्लिटि ' अनित्यमागमशासनम् ' इति वचनात् इडभावः ॥

रेवद्वयो दधाथे रेवदाशाथे नरा मायाभिरितऊति माहिनम् ।
न वां द्यावोऽहभिर्नोत सिन्धवो न देवत्वं पणयो नानशुर्मघम् ॥ ९ ॥

रेवत् । वयः । दधाथे इति । रेवत् । आशाथे इति । नरा । मायाभिः । इतःऽऊति । माहिनम् ।
न । वाम् । द्यावः । अहःऽभिः । न । उत । सिन्धवः । न । देवऽत्वम् ।
पणयः । न । आनशुः । मघम् ॥ ९ ॥

हे मित्रावरुणौ युवां [v]रेवत्[4] धनवत् [v]वयः अन्नं [v]दधाथे उभयं च धारयथः । यस्मादेवं तस्मात् [v]रेवत् धनवत् । सहदृष्टत्वात् वयः इति गम्यते । धनविशिष्टमन्नं हे [v]नरा नेतारौ युवाम् [v]आशाथे अश्नुवाथे अस्मभ्यं ददाथे इत्यर्थः । कीदृशम्[5] । [v]मायाभिः युवयोः[6] प्रज्ञाभिः [v]इतऊति इतोऽस्मदभिमुखं गमनवत् इतो रक्षणवद्वा [v]माहिनम् । महन्नामैतत् । अतिमहत्[7] । ईदृशोर्युवयोः[8] एतादृशं सामर्थ्यं कुत इत्यत आह । [v]वां युवयोः देवत्वम् [v]अहभिः अहोभिः रात्रिभिः । अत्र अहःशब्देन रात्रिरभिधीयते द्योशब्देन अहःपृथगभिधानात् । ताभिः सहिताः [v]द्यावः दिवसाः [v]न [v]आनशुः न प्राप्नुवन्ति । अहश्च रात्रिश्चोभे न तरतः* इत्यर्थः । [v]उत अपि च सिन्धवः स्यन्दनशीला नद्यः [v]न चैव आनशुः तथा युवयोः [v]देवत्वं [v]पणयः असुरा अपि [v]न आनशुः[8] । [v]मघं धनं च [v]न आनशिरे । लोकत्रये युवयोः पराभवितारो न केऽपि सन्तीत्यर्थः ॥ ॥ २१ ॥

' युवं वस्त्राणि ' इति सप्तर्चं द्वादशं सूक्तं दैर्घतमसम् । अनादेशपरिभाषया त्रैष्टुभम् । मैत्रावरुणं पूर्वत्र ' मैत्रावरुणं हि ' इत्युक्तत्वात् । सूक्तविनियोगो लैङ्गिकः । मैत्रावरुणे पशावाद्या वपायाज्या । ' प्रदानानाम् ' इति खण्डे सूत्रितं–' युवं वस्त्राणि पीवसा वसाथे प्र बाहवा सिसृतं जीवसे नः '

---

१. क्ष-ञ-ट–गोभिः स्तुतिभिः वाग्भिः अञ्जते स्तुवन्ति; झ–गोभिः स्तुतिवाग्भिः यजन्ते स्तुवन्ति । २. क-क्ष-ङ-ज-झ-ञ१-ञ-ट-ण–रेवत् रयिवत् । ३. क्ष-ङ-ञ१-ञ-ट–अश्नुवाथे । यद्वा । विशिष्टमन्नम् आशाथे व्याप्नुथः ददथः इत्यर्थः( ङ-दत्थः इत्यर्थः ) । ४. क-क्ष-ङ-ज-झ१-ञ-ट-ण–रेवत् रयिवत् । ५. क्ष-ञ-ट–किंच हे नरा नेतारौ युवाम् । ६. क्ष-ञ-ट–' युवयोः ' नास्ति । ७. क्ष-ञ-ट–अतिमहत् महं धनमाशाथे इति शेषः । ८. क्ष-ङ-ञ१-ञ-ट–ईदृशौ युवां अहोभिः रात्रिभिः सहितौ द्यावः दिवसाः नानशुः न व्याप्नुवन् । अत्र अहःशब्देन रात्रिरभिधीयते । द्योशब्देन अहः पृथगभिधानात् । अहश्च रात्रिश्च उभे तरत इत्यर्थः । उतापि च सिन्धवः स्यन्दनशीला नद्यो न नैवानशुः । तथा देवत्वं युवयोर्दैवभावं च नानशुः तथा पणयोऽसुरा अपि नानशुः । *. व–चरतः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

( आश्व. श्रौ. ३. ८ ) इति । सैव समावर्तने नववस्त्रधारणे विनियुक्ता । सूत्रितं च–' युवं वस्त्राणि पीवसा वसाथे इत्यहते वाससी आच्छाद्य ' ( आश्व. गृ. ३. ८. ९ ) इति ॥

युवं वस्त्राणि पीवसा वसाथे युवोरच्छिद्रा मन्तवो ह सर्गाः ।
अवातिरतमनृतानि विश्वा ऋतेन मित्रावरुणा सचेथे ॥ १ ॥

युवम् । वस्त्राणि । पीवसा । वसाथे इति । युवोः । अच्छिद्राः । मन्तवः । ह । सर्गाः ।
अव । अतिरतम् । अनृतानि । विश्वा । ऋतेन । मित्रावरुणा । सचेथे इति ॥ १ ॥

हे मित्रावरुणौ ᵛपीवसा पीनौ ᵛयुवं युवाम् । यद्वा । पीवसा पीनानि अच्छिन्नानि ᵛवस्त्राणि आच्छादनयोग्यानि वासांसि ᵛवसाथे आच्छादयथः । यद्वा । पीवसा स्थूलेन प्रभूतेन तेजसा वस्त्राणि दधाथे अविच्छिन्नानि वस्त्रस्थानीयानि तेजांसि धारयथ इत्यर्थः । किंच युवयोः ᵛसर्गाः सृष्टयः ᵛअच्छिद्राः अच्छिन्नाः ᵛमन्तवो ᵛह मननीयाश्च । ईदृशौ युवां ᵛविश्वा विश्वानि सर्वाणि ᵛअनृतानि असत्यानि अप्रियाणि पापानि ᵛअवातिरतं नाशयतम् ॥ विश्व इत्यत्र संहितायाम् ' ऋत्यकः ' इति प्रकृतिभावो ह्रस्वत्वं च ॥ ᵛऋतेन फलेन तत्साधनेन यज्ञेन वा ᵛसचेथे संगच्छेथे । अस्मभ्यं योजयथ इत्यर्थः ॥

एतच्चन त्वो वि चिकेतदेषां सत्यो मन्त्रः कविशस्त ऋघावान् ।
त्रिरश्रिं हन्ति चतुरश्रिरुग्रो देवनिदो ह प्रथमा अजूर्यन् ॥ २ ॥

एतत् । चन । त्वः । वि । चिकेतत् । एषाम् । सत्यः । मन्त्रः । कविऽशस्तः । ऋघावान् ।
त्रिःऽअश्रिम् । हन्ति । चतुःऽअश्रिः । उग्रः । देवऽनिदः । ह । प्रथमाः । अजूर्यन् ॥ २ ॥

ᵛएषाम् एतयोर्मध्ये ॥ बहुवचनं पूजार्थम् । यद्वा । तदनुचरापेक्षया बहुवचनम् ॥ एतयोर्मध्ये ᵛत्वः ᵛचन एक एव ᵛएतत् वक्ष्यमाणं सामर्थ्यरूपं कर्म ᵛवि ᵛचिकेतत् विशेषेण चेतति[1] अनुतिष्ठतीत्यर्थः । सः[2] विशेष्यते । स एकः ᵛसत्यः अबाध्यः सत्सु भवो वा ᵛमन्त्रः मननवान् ᵛकविशस्तः कविभिर्मेधाविभिः शंसनीयः ᵛऋघावान् हिंसावान् । अनेन वक्ष्यमाणस्य सामर्थ्यस्य संभाविता[3] प्रतिपादिता[4] अभवदित्युक्तम्[4] । किं तत् इत्याशङ्क्याह । ᵛत्रिरश्रिम् । अश्रित्रयोपेतमायुधं त्रिरश्रि । तद्वन्तम् ॥ मत्वर्थो लुप्यते ॥ उपलक्षणमेतत् । सर्वायुधसंपन्नमित्यर्थः । एतन्नामानं वा । ᵛचतुरश्रिः ततोऽप्यधिकायुधवान् । न केवलमायुधसामर्थ्यं किंतु ᵛउग्रः स्वयमुद्भूर्णबलः ᵛहन्ति हिनस्ति अतिबलं शत्रुम् । किंच युवयोः एकस्यैव सामर्थ्येन ᵛदेवनिदो ᵛह देवनिन्दकास्तु ᵛप्रथमाः समर्थाः सन्तोऽपि ᵛअजूर्यन् स्वयमेव जीर्णा भवन्ति ॥ जीर्यतेः श्यनि ' बहुलं छन्दसि ' इति उत्वम् ॥ युवयोर्मध्ये एकोऽपि महाबलः । मिलितयोस्तु सामर्थ्ये किमु वक्तव्यमिति भावः । अथवा । एषां युवयोः एतत् उत्तरत्र वक्ष्यमाणं सामर्थ्यम् एकः सत्यादिलक्षणो वि चिकेतत् विशेषेण जानाति । शेषं पूर्ववत् ॥

---

१. क्ष-ञ-ट–चेतयति । २. ङ-क्ष-ञ-ट–सः एव ३. क्ष-झ-ञ१-ञ-ट–संभावना । ४. क्ष-ख-ङ-ञ१-ञ-ट-फ–प्रतिपादिता भवति एतदित्युक्तम्; च-ञ–प्रतिपादिता भवति तदित्युक्तम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अपादेति प्रथमा पद्वतीनां कस्तद्वां मित्रावरुणा चिकेत ।
गर्भो भारं भरत्या चिदस्य ऋतं पिपर्त्यनृतं नि तारीत् ॥ ३ ॥

अपात् । एति । प्रथमा । पत्ऽवतीनाम् । कः । तत् । वाम् । मित्रावरुणा । आ । चिकेत ।
गर्भः । भारम् । भरति । आ । चित् । अस्य । ऋतम् । पिपर्ति । अनृतम् । नि । तारीत् ॥३॥

हे [v]मित्रावरुणा मित्रावरुणौ [v]पद्वतीनां पादवतीनां मनुष्यादीनां प्रजानां [v]प्रथमा प्रथमभाविनी[1] [v]अपात् पादरहिता[2] उषाः[2] । प्रतिदिनं सूर्यचन्द्रादिवत् स्वस्याः परिभ्रमणाभावात् सूर्यगमनेनैव स्वगमनात् अपात् इति च एति इति च उपचर्यते । [v]तत् तादृशं [v]वां युवयोः प्रसिद्धं कर्म [v]कः [v]आ [v]चिकेत कः आभिमुख्येन जानाति ॥ ' कित[3] ज्ञाने[3] ' ॥ तत्स्तुत्यमित्यर्थः[4] । मित्रावरुणयोः अहोरात्रदेवत्वात् अहोरात्रयोः अन्तरालस्यैव[5] उपस्थात् एतत्कर्मत्वम् । किंच [v]अस्य लोकस्य [v]भारं निर्वाहं [v]गर्भः युवयोर्गर्भस्थानीयः शिशुरादित्यः । अहोरात्रयोर्मध्यकाले उत्पत्तेः ताभ्यामेव मित्रावरुणत्वात् ' अहोरात्रे वै मित्रावरुणौ ' ( तै. सं. २. ४. १०. १ ) इति श्रुतेः । स आहरति [v]चित् । समन्तान्निर्वहत्येव । हरति वा अस्य भारं जाड्यम् । चित् इत्यवधारणे । तत्कथमिति तदुच्यते । [v]ऋतं सत्यं जगतः प्रकाशगमनादिरूपं [v]पिपर्ति पूरयति । [v]अनृतम् उक्तविलक्षणमन्धकारं गमनादिनिरोधं च [v]नि [v]तारीत् नितरति[6] निमज्जयति नाशयतीत्यर्थः । शिशोर्जगद्भारवहनरूपं कर्म युष्मत्सामर्थ्यादिति ॥

प्रयन्तमित्परि जारं कनीनां पश्यामसि नोपनिपद्यमानम् ।
अनवपृग्णा वितता वसानं प्रियं मित्रस्य वरुणस्य धाम ॥ ४ ॥

प्रऽयन्तम् । इत् । परि । जारम् । कनीनाम् । पश्यामसि । न । उपऽनिपद्यमानम् ।
अनवऽपृग्णा । विऽततता । वसानम् । प्रियम् । मित्रस्य । वरुणस्य । धाम ॥ ४ ॥

[v]कनीनां कमनीयानां दीप्तानां कन्यकास्थानीयानामुषसाम् ॥ कनतेः कान्तिकर्मण इञ्[7] । ' कृदिकारादक्तिनः ' इति ङीप् । आमि कन्याशब्दस्य वा छान्दसं संप्रसारणम् ॥ तासां [v]जारम् आदित्यं [v]प्रयन्तमित् प्रगच्छन्तमेव[8] [v]परि [v]पश्यामसि वयं परिपश्यामः [v]उपनिपद्यमानं* क्षणमात्रमपि निषीदन्तं [v]न पश्यामः[8]। एतदपि तयोः सामर्थ्यम् । पुनस्तदेव[9] विशेष्यते । [v]अनवपृग्णा अनवपृग्णानि अत एव विततानि[10] तेजांसि [v]वसानम् आच्छादयन्तं [v]प्रियं सर्वेषां प्रियभूतं [v]मित्रस्य [v]वरुणस्य च

---

१. क्ष-ङ-झ-झ१-ञ-ट-प्रथमभाविनी सती । २. क्ष-ञ-ट-पादरहिता एव उदेति गच्छति । ३. क्ष-झ१-ञ-ट-कित ज्ञाने । जुहोत्यादिकः । लेट्यडागमः । ४. क्ष-झ१-ञ-ट-अतिस्तुत्यमित्यर्थः; ज्ञ-झ-अतः स्तुत्यमित्यर्थः । ५. क्ष-झ१-ञ-ट-अन्तरालकालस्यैव । ६. ङ-वितारयति । ७. क-क्ष-ञ-ट-इन् सर्वधातुभ्यः इति इन्; ख-च-ज-फ-इन् । ८. क्ष-ञ-ट-गच्छन्तमेव नोपनिपद्यमानं क्षणमात्रमपि अनिषीदन्तं विहरन्तं तासामप्रगल्भत्वादिति भावः । तादृशं जारं जारसदृशं रात्रेर्जरयितारमादित्यं न पश्यामसि न पश्यामः । सर्वेऽपि पश्यन्तीत्यर्थः; झ१-नोपनिपद्यमानं क्षणमात्रमप्यनिषीदन्तं विहरन्तं तासामप्रगल्भादिति भावः । तादृशं जारं जारसदृशं आदित्यं न पश्यामः । सर्वैपि पश्यन्ति इत्यर्थः । एतदपि तयोः सामर्थ्यम् । * झ-नोपनिपद्यमानम् । ९. क्ष-ञ-ट-पुनः स एव । १०. झ-विततता विततानि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vधाम तेजःस्थानभूतम्। यद्वा। प्रियं धामेति संबध्यते। तयोः प्रेमस्थानम्[1]। ईदृशमादित्यं युष्मदनुज्ञया संचरन्तं पश्यामसि[2] ॥

अनश्वो जातो अनभीशुरर्वा कनिक्रदत्पतयदूर्ध्वसानुः।
अचित्तं ब्रह्म जुजुषुर्युवानः प्र मित्रे धाम वरुणे गृणन्तः ॥ ५ ॥

अनश्वः। जातः। अनभीशुः। अर्वा। कनिक्रदत्। पतयत्। ऊर्ध्वऽसानुः।
अचित्तम्। ब्रह्म। जुजुषुः। युवानः। प्र। मित्रे। धाम। वरुणे। गृणन्तः ॥ ५ ॥

स एवादित्यः vअनश्वः यद्यपि शीघ्रगाम्यश्वरहितः तथा[3] vअनभीशुः आलम्बनाधारप्रग्रहस्थानीयरश्मिरहितः तथापि vअर्वा vजातः शीघ्रगमनवान् संपन्नः। तथाविधोऽयमादित्यः vकनिक्रदत् अत्यर्थं क्रन्दयन्॥ क्रन्देर्यङ्लुगन्तात् शतरि दाधर्त्यादौ निपात्यते॥ vऊर्ध्वसानुः उपर्युपरि समुच्छ्रयणः सन् vपतयत् गच्छति। vअचित्तं चित्ताविषयं vब्रह्म परिवृढम् उक्तरूपं कर्म vमित्रे vवरुणे च उभयोः vधाम तेजःस्थानं vयुवानः मिश्रयन्तः तयोर्धाम्नि आरोपयन्तः तथा vप्र vगृणन्तः[4] युवयोः तेजःप्रभवमिति[5] प्रकर्षेण[6] स्तुवन्तः vजुजुषुः सेवन्ते। मनुष्याः सूर्यस्य निरालम्बान्तरिक्षसंचारात्मकं कर्म वरुणमित्रयोरधीनम्[7] इति स्तुवन्तीत्यर्थः॥

आ धेनवो मामतेयमवन्तीर्ब्रह्मप्रियं पीपयन्त्सस्मिन्नूधन्।
पित्वो भिक्षेत वयुनानि विद्वानासाविवासन्नदितिमुरुष्येत् ॥ ६ ॥

आ। धेनवः। मामतेयम्। अवन्तीः। ब्रह्मऽप्रियम्। पीपयन्। सस्मिन्। ऊधन्।
पित्वः। भिक्षेत। वयुनानि। विद्वान्। आसा। आऽविवासन्। अदितिम्। उरुष्येत् ॥६॥

vमामतेयं ममतायाः पुत्रं दीर्घतमसं मां vब्रह्मप्रियं परिवृढस्य कर्मणः प्रियतमं परिवृढस्याग्नेः प्रीणयितारं वा vअवन्तीः अवन्त्यः प्रीणयन्त्यः vधेनवः गावः vसस्मिन्[8] स्वकीये vऊधन् ऊधसि vआ vपीपयन् सर्वत आप्याययन्तु॥ प्यायतेर्णिचि छान्दसः पीभावः॥ ऊधोगतेन क्षीरेण युवाभ्यां प्रदेयेन नोऽस्मान् रक्षन्ति इत्यर्थः। 'मित्रावरुणाभ्यां पयस्या' (तै.सं.७.५.२२.१) इति श्रुतेः। एवं प्रदत्तहविः vवयुनानि अनुष्ठानविषयज्ञानानि vविद्वान् जानन् हुतशेषो भक्षणीय इत्यवगच्छन् दीर्घतमाः vपित्वः[9] पितोर्हुतशिष्टस्य[9] अन्नस्य तादृगन्नम् vआसा आस्येन भक्षयितुं vभिक्षेत याचेत युष्मान्। किंच vविवासन् युवां परिचरन् vअदितिम् अखण्डितम् अन्यूनमेतत्कर्म[10] vउरुष्येत्[10]। यथा शिष्टं भिक्षेत यथा च कर्म समापनेन रक्षेत् तथा अपीपयन्नित्यर्थः॥

---

१. ङ-ञ१–धाम स्थानम्। २. ङ-च– न पश्यामसि। ३. ज्ञ-ञ–तथापि। ४. क्ष-ङ-ञ-ट–गृणन्तः प्रकर्षेण शब्दयन्तः। ५. ज्ञ–तेजःप्रभावमिति। ६. क्ष-ञ१-ञ-ट–'प्रकर्षेण' नास्ति ७. क्ष-ज्ञ-ञ१-ञ-ट–मित्रावरुणयोरधीनम्। ८. ज्ञ–स्वस्मिन्; ज्ञ–सास्मिन् स्वस्मिन्। ९. ज्ञ–पित्वः ततः पितुः हुतशिष्टस्य। १०. क्ष-ङ-ञ१-ञ-ट–अन्यूनमेतत्कर्म उरुष्येत् रक्षेत्; ज्ञ–अन्येनैतत्कर्म उरुष्येत् रक्षेत्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मैत्रावरुणपशौ वपाया एषानुवाक्या । सूत्रितं च–' आ वां मित्रावरुणा हव्यजुष्टिमा यातं मित्रावरुणा ' ( आश्व. श्रौ. ३. ८ ) इति ॥

आ वां मित्रावरुणा हव्यजुष्टिं नमसा देवाववसा ववृत्याम् ।
अस्माकं ब्रह्म पृतनासु सह्या अस्माकं वृष्टिर्दिव्या सुपारा ॥ ७ ॥

आ । वाम् । मित्रावरुणा । हव्यऽजुष्टिम् । नमसा । देवौ । अवसा । ववृत्याम् ।
अस्माकम् । ब्रह्म । पृतनासु । सह्याः । अस्माकम् । वृष्टिः । दिव्या । सुऽपारा ॥ ७ ॥

हे [v]देवौ देवनशीलौ [v]मित्रावरुणा मित्रावरुणौ [v]वां युवां [v]हव्यजुष्टिं हविःसेवां [v]नमसा नमस्कारोपलक्षितेन स्तोत्रेण [v]अवसा रक्षणेन निमित्तभूतेन [v]आ [v]ववृत्याम् आवर्तयेयम् । यद्वा । नमस्कारेण अवसा अन्नेन च आ ववृत्याम् । किंच हे मित्रावरुणौ [v]अस्माकं संबन्धि [v]ब्रह्म इदानीं क्रियमाणं परिवृढं कर्म [v]पृतनासु संग्रामेषु [v]सह्याः सह्यात् शत्रून् अभिभूयात् । अनेन कर्मणा शत्रून् अभिभवेयमित्यर्थः । किंच [v]अस्माकं [v]दिव्या दिवि भवा [v]वृष्टिः [v]सुपारा सुष्ठु पारयित्री[1] भवत्विति शेषः । वृष्टौ सत्यां व्रीह्यादिद्वारा कर्मसमाप्तेरिति भावः ॥ ॥ २२ ॥

' यजामहे वाम् ' इति चतुर्ऋचं चतुर्दशं सूक्तं दैर्घतमसं त्रैष्टुभं मैत्रावरुणम् । ' यजामहे चतुष्कम् ' इत्यनुक्रमणिका । विनियोगो लैङ्गिकः ॥

यजामहे वां महः सजोषा हव्येभिर्मित्रावरुणा नमोभिः ।
घृतैर्घृतस्नू अध यद्वामस्मे अध्वर्यवो न धीतिभिर्भरन्ति ॥ १ ॥

यजामहे । वाम् । महः । सऽजोषाः । हव्येभिः । मित्रावरुणा । नमःऽभिः ॥
घृतैः । घृतस्नू इति घृतऽस्नू । अध । यत् । वाम् ।
अस्मे इति । अध्वर्यवः । न । धीतिऽभिः । भरन्ति ॥ १ ॥

हे [v]घृतस्नू घृतस्य[2] स्रावयितारौ[2] मित्रावरुणौ [v]महः महान्तौ [v]वां [v]यजामहे पूजयामो यजमानाः ऋत्विजश्च । कीदृशाः । [v]सजोषाः समानप्रीतियुक्ताः । केन साधनेनेति तदुच्यते । [v]हव्येभिः पुरोडाशादिभिः [v]नमोभिः नमस्कारोपलक्षितैः[3] । [v]अध अपि च [v]यत् यस्मात् कारणात्

---

१. क्ष-ङ-ञ-ञ१-ञ-ट–पारयित्री कर्मणः समापयित्री । २. क्ष-ञ-ट–घृतस्य आज्यस्य स्नावयितारौ; ञ१–आज्यस्य स्रपयितारौ ३. क्ष-ङ-ञ१-ञ-ट–नमस्कारोपलक्षितैः स्तोत्रैः । घृतैः क्षरणद्रव्यैः क्षीराज्यसोमादिभिश्च ( क्ष-ञ-ट–क्षीराज्यसोमादिरूपैश्च ? ) युवां सम्यक् यजामहे पूजयामः; ञ-नमस्कारोपलक्षितैः स्तोत्रैः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]वां युवाम्[१] [v]अध्वर्यवः अस्मदीया अध्वर्यवोऽपि[१]। अत्र नशब्दोऽप्यर्थे। तेऽपि[२] [v]धीतिभिः कर्मभिः स्वकीयैः [v]भरन्ति पोषयन्ति तस्मात् यजामहे[३] ॥

**प्रस्तुतिर्वां धाम न प्रयुक्तिरयामि मित्रावरुणा सुवृक्तिः ।**
**अनक्ति यद्वां विदथेषु होता सुम्नं वां सूरिर्वृषणावियक्षन् ॥ २ ॥**

प्रऽस्तुतिः । वाम् । धाम । न । प्रऽयुक्तिः । अयामि । मित्रावरुणा । सुऽवृक्तिः ।
अनक्ति । यत् । वाम् । विदथेषु । होता । सुम्नम् । वाम् । सूरिः । वृषणौ । इयक्षन् ॥ २ ॥

हे मित्रावरुणौ [v]वां युवयोः संबन्धिनो यागस्य [v]प्रस्तुतिः प्रस्तावना करोमीति संकल्प एव [v]न [v]प्रयुक्तिः कृत्स्नप्रयोगो न संपन्नः। तावतैव युवयोः [v]धाम तेजःस्थानम् [v]अयामि प्राप्नोमि। [v]सुवृक्तिः युवयोः शोभनावर्जकश्च युष्मत्परिग्रहादस्मि[४]। [v]यत् यदा तु [v]विदथेषु यज्ञेषु [v]वां युवां [v]होता होमनिष्पादकोऽयमध्वर्युः [v]अनक्ति हविषा आगच्छति होमं करोतीत्यर्थः। यद्वा। होता देवानामाह्वाता एतन्नामकः ऋत्विक् शस्त्रादिना वाम् अनक्ति व्यञ्जयति। तदा [v]सूरिः युष्मन्माहात्म्यवित् [v]इयक्षन् यागं कर्तुमिच्छन् अहं हे [v]वृषणौ कामानां वर्षितारौ [v]वां युवयोः [v]सुम्नं युष्मत्संबन्धि सुखं देवत्वलक्षणम् अयामीति शेषः ॥

**पीपाय धेनुरदितिर्ऋताय जनाय मित्रावरुणा हविर्दे ।**
**हिनोति यद्वां विदथे सपर्यन्त्स रातहव्यो मानुषो न होता ॥ ३ ॥**

पीपाय । धेनुः । अदितिः । ऋताय । जनाय । मित्रावरुणा । हविःऽदे ।
हिनोति । यत् । वाम् । विदथे । सपर्यन् । सः । रातऽहव्यः । मानुषः । न । होता ॥ ३ ॥

हे [v]मित्रावरुणा मित्रावरुणौ [v]ऋताय युष्मत्संबन्धियज्ञाय [v]हविर्दे हविषो दात्रे॥ 'आतो मनिन्०' इति विच्। भत्वे 'आतो धातोः' इति आकारलोपः ॥ [v]जनाय यजमानाय च [v]धेनुः प्रीणयित्री गौः [v]अदितिः अदीना बहुक्षीरा सती [v]पीपाय क्षीरेण पुनःपुनः आप्यायताम्॥ प्यायतेश्छान्दसः प्रार्थनायां लिट्। 'लिड्यङोश्च' इति पीभावः ॥ पयस्यादिहविष्कं यज्ञं पयोव्रतादिषु यजमानं चेत्यर्थः। कस्मिन् काले इति चेत् तत्राह। [v]यत् यदा [v]सः प्रसिद्धः [v]रातहव्यः एतन्नामा राजा [v]सपर्यन् स्तुत्या पूजयन् [v]मानुषः [v]होता [v]न मनुष्यस्य यजमानस्य संबन्धी एतन्नामक ऋत्विगिव [v]विदथे यज्ञे [v]वां [v]हिनोति हविरादिना प्रीणयति। तदा पीपायेत्याह ॥

---

१. क्ष-ङ-ञ-झ-ञ-ट–युवां अस्मे अस्मदीया अध्वर्यवो न अध्वर्यवोऽपि। २. झ–तेऽपि घृतैः आज्यादिभिः अस्मे यजमानाय। ३. क्ष-ङ-झ१-ञ-ट–यजामहे। यद्वा। यत् येन प्रकारेण वां युवां अध्वर्यवो न अध्वर्यव इव धीतिभिः युष्मदीयैः कर्मभिः अस्मे अस्मान् अस्मदीयं यागं वा भरन्ति भरथः। बहुवचनं पूजार्थम्। तथा यजामहे इत्यर्थः ( झ१–भरन्ति .....इत्यर्थः एतावान् ग्रन्थो नास्ति. )। ४. क्ष-ङ-झ१-ञ-ट–युष्मान् ( ङ-झ१-युष्मत् ) परिगृहीता सन्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उत वां विक्षु मद्यास्वन्धो गाव आपश्च पीपयन्त देवीः ।
उतो नो अस्य पूर्व्यः पतिर्दन्वीतं पातं पयस उस्रियायाः ॥ ४ ॥

उत । वाम् । विक्षु । मद्यासु । अन्धः । गावः । आपः । च । पीपयन्त । देवीः ।
उतो इति । नः । अस्य । पूर्व्यः । पतिः । दन् । वीतम् । पातम् । पयसः । उस्रियायाः ॥४॥

उत अपि च हे मित्रावरुणौ वां युवाम् अन्धः अदनीयमन्नं पयोरूपं पुरोडाशादिरूपं वा देवीः द्योतनशीलाः गावः[1] आपश्च[1] व्रीह्यादिप्रवर्धकान्युदकानि च मद्यासु युष्माभिर्मदनीयासु विक्षु प्रजासु यजमानलक्षणासु तासामभिवृद्ध्यर्थं पीपयन्त आप्याययन्तु । उतो अपि च नः अस्मत्संबन्धिनः अस्य यज्ञस्य पूर्व्यः पूर्वकालीनः पतिः पालकोऽग्निः दन् दाता भवत्विति शेषः । अग्नौ हूयमानत्वात् सर्वेषामपि हविषाम् । यस्मादेवं तस्मात् हे मित्रावरुणौ वीतं भक्षयतं पुरोडाशादिकम् । उस्रियायाः[2] क्षीराद्युत्स्राविण्या गोः पयसः पयः पातम्[3] । यद्वा । घनीभूतं पयस्याया वीतं स्वद्रूपं पातम् ॥ ॥ २३ ॥

'विष्णोर्नु कम्' इति षड्चं पञ्चदशं सूक्तं दैर्घतमसं त्रैष्टुभं वैष्णवम् । अत्रानुक्रमणिका–'विष्णोः षड्वैष्णवं हि' इति । अभिप्लवषडहेपूक्थ्येषु तृतीयसवने स्तोमवृद्धावच्छावाकस्य स्तोमातिशंसनार्थम् इदमादिसूक्तद्वयं विनियुक्तम् । 'स्तोमे वर्धमाने' इति खण्डे सूत्रितं–'विष्णोर्नु कमिति सूक्ते परो मात्रयेत्यच्छावाकः' (आश्व. श्रौ. ७. ९) इति । तथा तृतीयसवने सोमातिरेके उत्तरोत्तरसंस्थोपगन्तव्या आतिरात्रात् ततोऽप्यतिरिक्ते तदर्थमेव शस्त्रमुपजनयितव्यम् । तत्रैतदेव सूक्तम् । 'सोमातिरेके' इति खण्डे सूत्रितं–'महाँ इन्द्रो नृवद्विष्णोर्नु कम्' (आश्व. श्रौ. ६. ७) इति॥ आग्निमारुतशस्त्रे आद्या विनियुक्ता । 'अथ यथेतम्' इति खण्डे सूत्रितं–'विष्णोर्नु कं वीर्याणि प्र वोचं तन्तुं तन्वन्रजसो भानुमन्विहि' (आश्व. श्रौ. ५. २०) इति ॥

विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजांसि ।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥ १ ॥

विष्णोः । नु । कम् । वीर्याणि । प्र । वोचम् । यः । पार्थिवानि । विऽममे । रजांसि ।
यः । अस्कभायत् । उत्ऽतरम् । सधऽस्थम् । विऽचक्रमाणः । त्रेधा । ऊरुऽगायः ॥ १ ॥

हे नराः विष्णोः व्यापनशीलस्य देवस्य वीर्याणि वीरकर्माणि नु कम् अतिशीघ्रं प्र वोचम् प्रब्रवीमि । अत्र यद्यपि नु कम् इति पदद्वयं तथापि यास्केन 'नवोत्तराणि पदानि' (नि. ३. १३) इत्युक्तत्वात् शाखान्तरे एकत्वेन पाठाच्च नु इत्येतस्मिन्नेवार्थे नु कम् इति पदद्वयम् । कानि तानीति तत्राह । यः विष्णुः पार्थिवानि पृथिवीसंबन्धीनि रजांसि रञ्जनात्मकानि क्षित्यादिलोकत्रयाभिमानीनि अग्निवाय्वादित्यरूपाणि[4] रजांसि[5] विममे विशेषेण निर्ममे । अत्र त्रयो लोका अपि पृथिवी-

---

१. क्ष-ञ१-ञ-ट–गावः दोग्ध्र्यो धेनवः आपः आपश्च । २. क्ष-ङ-ञ-ञ१-ञ-ट–तथा उस्रियायाः । ३. क्ष-ङ-ञ१-ञ-ट–पातम् पिबतम् । ४. ञ-ञ१–अग्निवाय्वादित्यात्मकानि । ५. क्ष-ङ-ञ-ञ१-ञ-ट–तेजांसि ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

शब्दवाच्याः । तथा च मन्त्रान्तरं–' यदिन्द्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः ' ( ऋ. सं. १. १०८. ९) इति। तैत्तिरीयेऽपि–' योऽस्यां पृथिव्यामस्यायुषा ' इत्युपक्रम्य ' यो द्वितीयस्यां तृतीयस्यां पृथिव्याम् ' ( तै. सं. १. २. १२. १ ) इति । तस्मात् लोकत्रयस्य पृथिवीशब्दवाच्यत्वम् । किंच [V]यः च विष्णुः [V]उत्तरम् उद्ततरमतिविस्तीर्णं [V]सधस्थं सहस्थानं लोकत्रयाश्रयभूतमन्तरिक्षम् [V]अस्कभायत् तेषामाधारत्वेन स्तम्भितवान् निर्मितवानित्यर्थः । अनेन अन्तरिक्षाश्रितं लोकत्रयमपि सृष्टवानित्युक्तं भवति । यद्वा । यो विष्णुः पार्थिवानि पृथिवीसंबन्धीनि रजांसि पृथिव्या अधस्तनसप्तलोकान् विममे विविधं निर्मितवान् । रजःशब्दो लोकवाची, ' लोका रजांस्युच्यन्ते ' इति यास्केनोक्तत्वात् । किंच यश्चोत्तरम् उद्ततरम् उत्तरभाविनं सधस्थं सहस्थानं पुण्यकृतां सहनिवासयोग्यं भूरादिलोकसप्तकम् अस्कभायत् स्कम्भितवान् सृष्टवानित्यर्थः ॥ स्कम्भेः ' स्तम्भुस्तुम्भु° ' इति विहितस्य श्नः ' छन्दसि शायजपि ' इति व्यत्ययेन शायजादेशः ॥ अथवा पार्थिवानि पृथिवीनिमित्तकानि रजांसि लोकान् विममे । भूरादिलोकत्रयमित्यर्थः । भूम्याम् उपार्जितकर्मभोगार्थत्वात् इतरलोकानां तत्कारणत्वम्। किंच यश्चोत्तरम् उत्कृष्टतरं सर्वेषां लोकानामुपरिभूतम्। अपुनरावृत्तेः तस्योत्कृष्टत्वम् । सधस्थम् उपासकानां सहस्थानं सत्यलोकमस्कभायत् स्कम्भितवान् ध्रुवं स्थापितवानित्यर्थः । किं कुर्वन् । [V]त्रेधा [V]विचक्रमाणः त्रिप्रकारं स्वसृष्टान् लोकान्विविधं क्रममाणः । विष्णोस्त्रेधा क्रमणम् ' इदं विष्णुर्वि चक्रमे ' ( ऋ. सं. १. २२. १७ ) इत्यादिश्रुतिषु प्रसिद्धम् । अत एव [V]उरुगायः उरुभिः महद्भिः[1] गीयमानः अतिप्रभूतं गीयमानो वा । य एवं कृतवान् तादृशस्य विष्णोर्वीर्याणि प्र वोचम् ॥

तृतीयसवने सोमातिरेके एव[2] शस्त्रमुपजनयितव्यम् । तत्र ' प्र तत् ' इत्ययमनुरूपस्तृचः । ' सोमातिरेके ' इति खण्डे सूत्रितं–' प्र तद्विष्णुः स्तवते वीर्येणेति स्तोत्रियानुरूपौ ' ( आश्व. श्रौ. ६. ७ ) इति । ' वाजपेयेनाधिपत्यकामः[3] ' इति खण्डे सूत्रितं–'प्र तत्ते अद्य शिपिविष्ट नाम प्र तद्विष्णुः स्तवते वीर्येण ' ( आश्व. श्रौ. ९. ९ ) इति[3] ॥

**प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।**
**यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ २ ॥**

प्र । तत् । विष्णुः । स्तवते । वीर्येण । मृगः । न । भीमः । कुचरः । गिरिऽस्थाः ।
यस्य । उरुषु । त्रिषु । विऽक्रमणेषु । अधिऽक्षियन्ति । भुवनानि । विश्वा ॥ २ ॥

यस्येति[4] वक्ष्यमाणत्वात् स इति अवगम्यते । स महानुभावः [V]वीर्येण स्वकीयेन वीरकर्मणा पूर्वोक्तरूपेण[5] [V]स्तवते स्तूयते सर्वैः ॥ कर्मणि व्यत्ययेन शप् ॥ वीर्येण स्तूयमानत्वे दृष्टान्तः । [V]मृगो [V]न सिंहादिरिव । यथा स्वविरोधिनो मृगयिता सिंहः [V]भीमः भीतिजनकः [V]कुचरः कुत्सितहिंसादिकर्ता दुर्गमप्रदेशगन्ता वा [V]गिरिष्ठाः पर्वताद्युन्नतप्रदेशस्थायी सर्वैः स्तूयते । अस्मिन्नर्थे निरुक्तं–' मृगो न भीमः कुचरो गिरिष्ठाः । मृग इव भीमः कुचरो गिरिष्ठा मृगो मार्ष्टेर्गतिकर्मणो भीमो बिभ्यत्यस्मा-

---

१. क्ष-ङ-ञ-झ-झ१-ञ-ट–महात्मभिः । २. क्ष-ङ-झ१-ञ-ट–एवम् । ३. क्ष-ञ-ट–' वाजपेयेनाधिपत्यकामः .....वीर्येण इति ' इति नास्ति । ४. क्ष-झ१-ञ-ट–तद्विष्णुः यस्येति । ५. ङ-झ-झ१–पूर्वमन्त्रोक्तरूपेण ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ह्रीष्मोऽप्येतस्मादेव । कुचर इति चरतिकर्म कुत्सितमथ चेद्देवताभिधानं कार्यं न चरतीति वा । गिरिष्ठा गिरिस्थायी गिरिः पर्वतः समुद्गीर्णो भवति पर्ववान् पर्वतः पर्व पुनः पृणातेः प्रीणातेर्वा ' ( निरु. १. २० ) इति ॥ तद्वदयमपि मृगोऽन्वेष्टा शत्रूणां भीमो भयानकः सर्वेषां भीत्यपादानभूतः । परमेश्वराद्भीतिः 'भीषास्माद्वातः पवते ' ( तै. आ. ८. ८. १ ) इत्यादिश्रुतिषु प्रसिद्धा । किंच कुचरः शत्रुवधादिकुत्सितकर्मकर्ता कुषु सर्वासु भूमिषु लोकत्रये संचारी वा तथा गिरिष्ठाः गिरिवत् उच्छ्रितलोकस्थायी[1] । यद्वा । गिरि मन्त्रादिरूपायां वाचि सर्वदा वर्तमानः । ईदृशोऽयं स्वमहिम्ना स्तूयते । किंच vयस्य विष्णोः vउरुषु विस्तीर्णेषु त्रिसंख्याकेषु[2] vविक्रमणेषु पादप्रक्षेपेषु vविश्वा[3] सर्वाणि vभुवनानि भूतजातानि vअधिक्षियन्ति आश्रित्य निवसन्ति स विष्णुः स्तूयते ॥

प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे ।
य इदं दीर्घं प्रयतं सधस्थमेको विममे त्रिभिरित्पदेभिः ॥ ३ ॥

प्र । विष्णवे । शूषम् । एतु । मन्म । गिरिऽक्षिते । उरुऽगायाय । वृष्णे ।
यः । इदम् । दीर्घम् । प्रऽयतम् । सधऽस्थम् । एकः । विऽममे । त्रिऽभिः । इत् । पदेभिः ॥३॥

vविष्णवे सर्वव्यापकाय vशूषम् अस्मत्कृत्यादिजन्यं बलं महत्त्वं vमन्म मननं स्तोत्रं मननीयं शूषं बलं वा विष्णुम् vएतु प्राप्नोतु ॥ कर्मणः संप्रदानत्वात् चतुर्थी ॥ कीदृशाय । vगिरिक्षिते वाचि गिरिवदुन्नतप्रदेशे वा तिष्ठते vउरुगायाय बहुभिर्गीयमानाय vवृष्णे वर्षित्रे[4] कामानाम् । एवंमहानुभावं शूषं[5] प्राप्नोतु[5] । कोऽस्य विशेष इति उच्यते । vयः विष्णुः vइदं प्रसिद्धं दृश्यमानं vदीर्घम् अतिविस्तृतं vप्रयतं नियतं vसधस्थं सहस्थानं लोकत्रयम् vएकः vइत् एक एवाद्वितीयः सन् vत्रिभिः vपदेभिः पादैः vविममे विशेषेण निर्मितवान् ॥

यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति ।
य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा ॥ ४ ॥

यस्य । त्री । पूर्णा । मधुना । पदानि । अक्षीयमाणा । स्वधया । मदन्ति ।
यः । ऊँ इति । त्रिऽधातु । पृथिवीम् । उत । द्याम् । एकः । दाधार । भुवनानि । विश्वा ॥४॥

vयस्य विष्णोः vमधुना मधुरेण दिव्येनामृतेन vपूर्णा पूर्णानि त्रीणि vपदानि पादप्रक्षेपणानि vअक्षीयमाणा अक्षीयमाणानि[6] vस्वधया अन्नेन vमदन्ति मादयन्ति तदाश्रितजनान् । vय vउ य[7] एव[7] vपृथिवीं प्रख्यातां भूमिं vद्याम् vउत द्योतनात्मकमन्तरिक्षं च vविश्वा vभुवनानि सर्वाणि भूतजातानि चतुर्दश लोकांश्च । यद्वा । पृथिवीशब्देन अधोवर्तीनि अतलवितलादिसप्तभुवनान्युपात्तानि ।

---

१. क्ष-ङ-ञ-ञ१-ञ-ट–उच्छ्रितद्युलोकस्थायी । २. क्ष-ङ-ञ१-ञ-ट–त्रिषु संख्याकेषु । ३. च–विश्वानि । ४. क्ष-ञ-ट–वर्षकाय । ५. क्ष-ञ१-ञ-ट–शूषं बलं प्राप्नोति । ६. क्ष-ञ-ट–अक्षीणानि । ७. क्ष-ञ-ट–यो विष्णुश्च ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

द्युशब्देन तदवान्तररूपाणि भूरादिसप्तभुवनानि । एवं चतुर्दश लोकान् विश्वा भुवनानि सर्वाण्यपि तत्रत्यानि भूतजातानि । vत्रिधातु । त्रयाणां धातूनां समाहारस्त्रिधातु । पृथिव्यग्नेजोरूपधातुत्रयविशिष्टं यथा भवति तथा vदाधार धृतवान् ॥ तुजादित्वात् अभ्यासस्य दीर्घत्वम् ॥ उत्पादितवानित्यर्थः । छन्दोगारण्यके–' तत्तेजोऽसृजत तदन्नमसृजत ता आप ऐक्षन्त ' इति भूतत्रयसृष्टिमुक्त्वा ' हन्ताहमिमास्तिस्रो देवतास्तासां त्रिवृतं त्रिवृतमेकैकां करवाणि ' ( छा. उ. ६. ३. २–३. ) इत्यादिना त्रिवृत्करणसृष्टिरुपपादिता । यद्वा । त्रिधातु[1] कालत्रयं गुणत्रयं वा दाधारेत्यन्वयः ॥

आतिथ्यायां ' तदस्य ' इत्येषा प्रधानस्य याज्या । ' अथातिथ्या ' इति खण्डे सूत्रितम्–' इदं विष्णुर्वि चक्रमे तदस्य प्रियमभि पाथो अश्याम् ' ( आश्व. श्रौ. ४. ५ ) इति ॥

**तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति ।**
**उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥ ५ ॥**

तत् । अस्य । प्रियम् । अभि । पाथः । अश्याम् । नरः । यत्र । देवऽयवः । मदन्ति ।
उरुऽक्रमस्य । सः । हि । बन्धुः । इत्था । विष्णोः । पदे । परमे । मध्वः । उत्सः ॥ ५ ॥

vअस्य महतो विष्णोः vप्रियं प्रियभूतं vतत् सर्वैः सेव्यत्वेन प्रसिद्धं vपाथः । अन्तरिक्षनामैतत्, ' पाथोऽन्तरिक्षं पथा व्याख्यातम् ' ( निरु. ६. ७ ) इति यास्केनोक्तत्वात् । अविनश्वरं ब्रह्मलोकमित्यर्थः[2] । vअश्याम् व्याप्नुयाम् । तदेव विशेष्यते । vयत्र स्थाने vदेवयवः देवं द्योतनस्वभावं विष्णुमात्मन इच्छन्तो यज्ञदानादिभिः प्राप्तुमिच्छन्तः vनरः vमदन्ति तृप्तिमनुभवन्ति । तदश्यामित्यन्वयः । पुनरपि तदेव विशेष्यते । vउरुक्रमस्य अत्यधिकं सर्वं जगदाक्रममाणस्य तत्तदात्मना अत एव vविष्णोः व्यापकस्य परमेश्वरस्य vपरमे उत्कृष्टे निरतिशये केवलसुखात्मके vपदे स्थाने vमध्वः मधुरस्य[3] vउत्सः निष्यन्दो वर्तते । तदश्याम् । यत्र क्षुत्तृष्णाजरामरणपुनरावृत्त्यादिभयं नास्ति संकल्पमात्रेण अमृतकुल्यादिभोगाः प्राप्यन्ते तादृशमित्यर्थः । ततोऽधिकं नास्तीत्याह । vइत्था इत्थमुक्तप्रकारेण vस vहि vबन्धुः स खलु सर्वेषां सुकृतिनां बन्धुभूतो हितकरः[4] वा तस्य[5] पदं प्राप्तवतां न पुनरावृत्तेः[5] । ' न च पुनरावर्तते ' इति श्रुतेस्तस्य बन्धुत्वम्[6] । हिशब्दः सर्वश्रुतिस्मृतिपुराणादिप्रसिद्धिद्योतनार्थः ॥

**ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः ।**
**अत्राह तदुरुगायस्य वृष्णः परमं पदमव भाति भूरि ॥ ६ ॥**

ता । वाम् । वास्तूनि । उश्मसि । गमध्यै । यत्र । गावः । भूरिऽशृङ्गाः । अयासः ।
अत्र । अह । तत् । उरुऽगायस्य । वृष्णः । परमम् । पदम् । अव । भाति । भूरि ॥ ६ ॥

---

१. च–त्रिधातु मूर्तित्रयम् । २. क्ष-ङ-ञ१-ञ-ट–ब्रह्मलोकमित्यर्थः । यद्वा दुरुपपालनम् (क्ष-ञ-ट–दुरुपां पालनम्? )। ३. क्ष-ञ१-ञ-ट–मधुरस्य परमानन्दरसस्य सुधारूपस्य । ४. क्ष-ञ१-ञ-ट–हितकरो बन्धकः । ५. क्ष-ञ-ट– तत्प्राप्तवतामपुनरावृत्तेः; ञ–तस्य पदं प्राप्तानामपुनरावृत्तेः । ६. क्ष-ञ१-ञ-ट–बन्धकत्वम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे पत्नीयजमानौ[1] Vवां युष्मदर्थं Vता तानि गन्तव्यत्वेन[2] प्रसिद्धानि Vवास्तूनि सुखनिवासयोग्यानि स्थानानि Vगमध्यै युवयोः[3] गमनाय Vउश्मसि कामयामहे । तदर्थं विष्णुं प्रार्थयाम इत्यर्थः । तानीत्युक्तं कानीत्याह । Vयत्र येषु वास्तुषु Vगावः रश्मयः Vभूरिशृङ्गाः अस्यन्तोन्नत्युपेता बहुभिराश्रयणीया वा Vअयासः अयना गन्तारोऽतिविस्तृताः । यद्वा । यासो गन्तारः । अतादृशाः । अस्यन्तप्रकाशयुक्ता इत्यर्थः । Vअत्राह अत्र खलु वास्त्वाधारभूते द्युलोके Vउरुगायस्य बहुभिर्महात्मभिर्गातव्यस्य स्तुत्यस्य Vवृष्णः कामानां वर्षितुर्विष्णोस्तत्तादृशं सर्वत्र[4] पुराणादिषु[4] गन्तव्यत्वेन प्रसिद्धं Vपरमं निरतिशयं Vपदं स्थानं Vभूरि अतिप्रभूतम् Vअव Vभाति स्वमहिम्ना स्फुरति । अयं मन्त्रो यास्केन गोशब्दो रश्मिवाचक इति व्याचक्षाणेन व्याख्यातः–' तानि वां वास्तूनि कामयामहे गमनाय यत्र गावो भूरिशृङ्गा बहुशृङ्गा भूरीति बहुनो नामधेयं प्रभवतीति सतः शृङ्गं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वायासोऽयनाः । तत्र तदुरुगायस्य विष्णोर्महागतेः परमं पदं परार्ध्यस्थमवभाति भूरि । पादः पद्यतेः ' ( निरु. २. ७ ) इति ॥ ॥ २४ ॥

' प्र वः पान्तम् ' इति षड्ऋचं षोडशं सूक्तं दैर्घतमसं जागतम् । पूर्वत्र ' वैष्णवं हि ' इत्युक्तत्वात् वैष्णवम् । आद्यस्तृच इन्द्रदेवताकश्च । ' प्र वो जागतं त्वैन्द्रश्चाद्यस्तृचः ' इत्यनुक्रमणिका । आभिप्लविकेषूक्थ्येषु स्तोमातिशंसने उक्तो विनियोगः ॥

प्र वः पान्तमन्धसो धियायते महे शूराय विष्णवे चार्चत ।
या सानूनि पर्वतानामदाभ्या महस्तस्थतुरर्वतेव साधुना ॥ १ ॥

प्र । वः । पान्तम् । अन्धसः । धियाऽयते । महे । शूराय । विष्णवे । च । अर्चत ।
या । सानूनि । पर्वतानाम् । अदाभ्या । महः । तस्थतुः । अर्वताऽइव । साधुना ॥ १ ॥

हे अध्वर्यवादयः Vवः युष्माकं संबन्धि[5] Vपान्तं पालनस्वभावं पातव्यं वा Vअन्धसः अन्धः सोमरूपमन्नं Vप्र Vअर्चत प्रकर्षेण संपादयत । कस्मै । Vधियायते स्तुतीरिच्छते Vमहे महते Vशूराय विक्रान्तायेन्द्राय Vविष्णवे व्यापकायैतन्नामकाय देवाय Vच । कस्तयोरतिशय इति उच्यते । Vया यौ इन्द्राविष्णू Vपर्वतानां प्रीणनवतां पूरणवतां वा । पर्वतशब्दो यास्केनैवं निरुक्तः–' पर्ववान् पर्वतः पर्व पुनः पृणातेः प्रीणातेर्वा ' इति । उक्तलक्षणानां लोकानां Vसानुनि समुच्छ्रितप्रदेशे । सर्वलोके[6] इत्यर्थः । अथवा मेघानां समुच्छ्रितप्रदेशे । पर्वतशब्दः मेघनामसु[7] उक्तत्वात् । तत्र Vतस्थतुः तिष्ठतः । कीदृशौ तौ । Vअदाभ्या अदम्भनीयौ परैरनभिभाव्यौ अत एव Vमहः महान्तौ । यद्वा । महो महसि स्वतेजसि सानुनीत्यनेन संबन्धः । तत्र दृष्टान्तः । Vसाधुना अभिमतदेशप्रापणसमर्थेन Vअर्वता[8] वेगवताश्वेन Vइव । तेन यथा अत्युच्छ्रितं प्रदेशमारोहति तद्वदुच्चं पदमारूढौ । तस्मात्ताभ्यामर्चत ॥

सोमातिरेके तृतीयसवने एषा वैकल्पिकी याज्या । तथा च सूत्रितं—' त्वेषमित्था समरणं शिमीवतोरिति वा याज्या ' ( आश्व. श्रौ. ६. ७ ) इति ॥

---

१. झ–दम्पती पत्नीयजमानौ । २. च–तरणित्वेन; झ–मन्तव्यत्वेन । ३. च–वां युवयोः । ४. क्ष-ञ-ट–सर्वेतिहासपुराणादिषु । ५. क-ख-ज-ण-त-फ-व–संबन्धिनाम् । ६. क्ष-ङ-ञ-ट–सत्यलोके । ७. क्ष-ङ-ञ-ट–मेघनामा । पर्वतो गिरिरिति तन्नामसु (ङ–नामसु) । ८. क्ष-ङ-ञ१-ञ-ट–अर्वता पवनवता ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्वेषमित्था समरणं शिमीवतोरिन्द्राविष्णू सुतपा वामुरुष्यति ।
या मर्त्याय प्रतिधीयमानमित्कृशानोरस्तुरसनामुरुष्यथः ॥ २ ॥

त्वेषम् । इत्था । सम्ऽअरणम् । शिमीऽवतोः । इन्द्राविष्णू इति । सुतऽपाः । वाम् । उरुष्यति । या । मर्त्याय । प्रतिऽधीयमानम् । इत् । कृशानोः । अस्तुः । असनाम् । उरुष्यथः ॥ २ ॥

हे [v]इन्द्राविष्णू [v]शिमीवतोः इष्टप्रदानादिकर्मवतोः [v]वां युवयोः [v]इत्था इत्थं [v]त्वेषं प्रदीप्तं [v]समरणं सम्यग्यागदेशगमनं [v]सुतपाः हुतशिष्टसोमपीतयजमानः [v]उरुष्यति रक्षति यागेन पूजयति। यद्वा । शिमीवतोः प्रहरणादिकर्मवतोः वां युवयोः त्वेषं दीप्तं शौर्योपेतं समरणं सम्यक्परस्परगमनोपेतं वृष्टिप्रदानाय मेघविदारणरूपं यजमानं उरुष्यति रक्षति स्तौतीत्यर्थः । कस्तयोरतिशय इति उच्यते। [v]या यौ इन्द्राविष्णू [v]मर्त्याय मनुष्याय हविर्दात्रे यजमानाय [v]प्रतिधीयमानमित् प्रतिधातव्यं फलरूपम् [v]असनाम् असनं चलनशीलं प्रदानशीलमन्नादिकम् [v]अस्तुः अभिमतक्षेप्तुर्निरसितुर्वा शत्रूणां [v]कृशानोः[1] अग्नेः सकाशात् [v]उरुष्यथः अविच्छेदेन प्रवर्तयथः । वह्नौ हुतं हविः स्वीकृत्य तन्मुखादेव फलमपि दास्यथ इत्यर्थः ॥

ता ईं वर्धन्ति मह्यस्य पौंस्यं नि मातरा नयति रेतसे भुजे ।
दधाति पुत्रोऽवरं परं पितुर्नाम तृतीयमधि रोचने दिवः ॥ ३ ॥

ताः । ईम् । वर्धन्ति । महि । अस्य । पौंस्यम् । नि । मातरा । नयति । रेतसे । भुजे ।
दधाति । पुत्रः । अवरम् । परम् । पितुः । नाम । तृतीयम् । अधि । रोचने । दिवः ॥ ३ ॥

[v]ताः सोमरूपाः प्रसिद्धा आहुतयो यजमानेन हुताः [v]ईम् एतत् [v]अस्य इन्द्रस्य [v]महि महत् [v]पौंस्यं पुंसः कर्म वक्ष्यमाणरूपं बलं [v]वर्धन्ति वर्धयन्ति। ईमित्यनर्थको वा । स चेन्द्रः सोमपानजनितं सामर्थ्यं [v]मातरा द्यावापृथिव्यौ [v]नि [v]नयति नितरां प्रापयति । किमर्थम् । [v]रेतसे प्राणिनां पुत्राद्युत्पादनसामर्थ्याय [v]भुजे तेषां भोगाय रक्षणाय वा । कुत्रेति तदुच्यते । [v]दिवः द्योतमानस्यादित्यस्य [v]अधि अधिकं [v]रोचने रोचमाने मण्डले । [v]नाम नमनं द्यावापृथिव्योः स्थापितं सामर्थ्यं [v]पुत्रः पुरुत्राता सर्वो जनः [v]पितुः पालकाद्विष्णोरनुग्रहात् । यद्वा । पितुः स्वोत्पादकात् स्वयमुत्पन्नं सत् [v]अवरं निकृष्टं नाम पौत्रसंज्ञं [v]परं तदुत्कृष्टं पुत्र इति नाम तदुभयापेक्षया [v]तृतीयं पितेति नाम [v]दधाति धारयति । 'त्रीणि वाव रेतांसि पिता पुत्रः पौत्रः' ( तै. सं. ५. ६. ८. ४ ) इति श्रुतेः । अस्यायमर्थः । अग्नौ हुताः सोमाहुतयः आदित्यमण्डलं प्राप्य द्वादशात्मनः सवितुर्मूर्त्यन्तरौ इन्द्राविष्णू पोषयन्ति तुष्टौ तौ मेघद्वारा वर्षतः । तया वृष्ट्या सस्यादिद्वारा प्रजाः पुत्रपौत्रादिरूपेण वर्धयत इत्येवं महानुभावौ इन्द्राविष्णू इति ॥

---

१. क्ष-ङ-ञ१-ञ-ट–तादृशात् कृशानोः; ञ–तादृशकृशानोः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तत्तदिदस्य पौंस्यं गृणीमसीनस्य त्रातुरवृकस्य मीळ्हुषः ।
यः पार्थिवानि त्रिभिरिद्विगामभिरुरु क्रमिष्टोरुगायाय जीवसे ॥ ४ ॥

तत्ऽतत्। इत्। अस्य। पौंस्यम्। गृणीमसि। इनस्य। त्रातुः। अवृकस्य। मीळ्हुषः। यः। पार्थिवानि। त्रिऽभिः। इत्। विगामऽभिः। उरु। क्रमिष्ट। उरुऽगायाय। जीवसे ॥४॥

[v]अस्य महानुभावस्य [v]तत्तत् [v]पौंस्यं पुंस्त्वं पराक्रमातिशयं [v]गृणीमसि गृणीमः स्तुमः। कीदृशस्यास्य। [v]इनस्य सर्वस्य स्वामिनः [v]त्रातुः पालकस्य [v]अवृकस्य। वृको हिंसकः शत्र्वादिः। तद्रहितस्य [v]मीळ्हुषः सेक्तुर्निस्यतरुणस्य। स्तुत्येषु पराक्रमेषु मध्ये एकमुदाहरति। [v]यः विष्णुः[1] [v]पार्थिवानि पृथिव्यादीनि प्रथनवन्ति वा सामर्थ्यात् रजांसीति गम्यते। लोकत्रयस्यापि पृथिवीशब्दवाच्यत्वं पूर्वमुदाहृतम्। तानि [v]त्रिभिरिद्विगामभिः त्रिभिरेव विविधक्रमणैः [v]उरु विस्तीर्णं यथा भवति तथा [v]क्रमिष्ट क्रान्तवान् विचक्रमे इत्यर्थः। [v]उरुगायाय उरुगातव्याय [v]जीवसे लोकत्रयरक्षणाय। यद्वा। उरुगायाय ॥ षष्ठ्यर्थे चतुर्थी ॥ उरुगायस्य विष्णोरीदृशं पराक्रमं गृणीमसि। किमर्थम्। जीवसे जीवनाय रक्षणाय ॥

द्वे इदस्य क्रमणे स्वर्दृशोऽभिख्याय मर्त्यो भुरण्यति ।
तृतीयमस्य नकिरा दधर्षति वयश्चन पतयन्तः पतत्रिणः ॥ ५ ॥

द्वे इति। इत्। अस्य। क्रमणे इति। स्वःऽदृशः। अभिऽख्याय। मर्त्यः। भुरण्यति। तृतीयम्। अस्य। नकिः। आ। दधर्षति। वयः। चन। पतयन्तः। पतत्रिणः ॥ ५ ॥

[v]अस्य [v]स्वर्दृशः स्वर्गस्य सर्वस्य वा द्रष्टुर्विष्णोः [v]द्वे [v]इत् [v]क्रमणे द्वे एव पदे [v]मर्त्यः मनुष्यः [v]अभिख्याय सर्वभूम्यादिना[2] प्रख्याय[3] [v]भुरण्यति गच्छति भजते। भुरण्यतिः कण्ड्वादिर्गतिकर्मा, 'भुरण्यति शवति' (नि. २. १४. १६) इति तत्कर्मसु पाठात्। प्रसिद्धत्वात् भूलोकं वृष्ट्यागमनादन्तरिक्षं चेत्युभे क्रमणे जानाति। [v]अस्य विष्णोः [v]तृतीयं क्रमणं द्युलोकाख्यं कोऽपि मर्त्यः [v]नकिः नैव [v]आ [v]दधर्षति बुद्ध्या नाभिभवति ज्ञातुं न शक्नोतीत्यर्थः। न केवलं मनुष्य एव अपि तु [v]वयश्चन वेतारो मरुतोऽपि। कीदृशास्ते। [v]पतयन्तः सर्वत्र गमनसमर्थाः तथा [v]पतत्रिणः पतनशीला गरुडादयो वायवो वा नकिरा दधर्षति नैव शक्नुवन्ति ॥ धृषेर्लेटि अडागमः ॥ सत्यलोकस्य अत्यन्तविप्रकृष्टत्वेन सर्वेषामविषयत्वादिति भावः ॥

---

१. क्ष-ञ-ट-यो विष्णुः। २. ङ-सर्वस्तुत्यादिना। ३. क्ष-ञ-ट-प्रख्याप्य।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

चतुर्भिः साकं नवतिं च नामभिश्चक्रं न वृत्तं व्यतीँरवीविपत् ।
बृहच्छरीरो विमिमान ऋक्वभिर्युवाकुमारः प्रत्येत्याहवम् ॥ ६ ॥

चतुर्भिः । साकम् । नवतिम् । च । नामऽभिः । चक्रम् । न । वृत्तम् । व्यतीन् । अवीविपत् ।
बृहत्ऽशरीरः । विऽमिमानः । ऋक्वऽभिः । युवा । अकुमारः । प्रति । एति । आऽहवम् ॥६॥

अयमादित्यात्मा विष्णुः [v]चतुर्भिः [v]साकं सहितां [v]नवतिं [v]च । चतुर्नवतिमित्यर्थः[1] । एतत्संख्याकान् कालावयवान् [v]नामभिः स्वकीयनमनप्रकारैः प्रेरणविशेषैः [v]वृत्तं यथा भवति तथा [v]व्यतीन् विविधातनस्वभावान् वृत्तं [v]चक्रं [v]न बह्वरोपेतं चक्रमिव तं यथा शत्रोरुपरि प्रक्षेपेण[2] भ्रमयति[3] तद्वदुक्तसंख्याकान् कालावयवान् [v]अवीविपत् कम्पयति भ्रमयति[3] ॥ ' टुवेपृ कम्पने ' । ण्यन्तात् लुङि चङि रूपम् ॥ के पुनस्ते उच्यते । संवत्सर एकः । अयने द्वे । पञ्चर्तवः । द्वादश मासाः । चतुर्विंशत्यर्धमासाः । त्रिंशदहोरात्राः । अष्टौ यामाः । एकस्मिन् दिने पर्यावर्तमानानि मेषादीनि द्वादश लग्नानीति मिलित्वा चतुरधिकनवतिसंख्याकानवीविपत् । नन्वादित्यः स्वयमपि इतरवत्परिभ्रमति कथं[4] भ्रमयति[4] इत्युच्यते । नैष दोषः । एतेषां भ्रामकस्य ध्रुवस्य विष्णोः मूर्त्यन्तरत्वात्[5] । अथवा स्वभ्रमणाधीनत्वादितरेषां परिभ्रमणस्य अतः स्वयं भ्रमयति[6] इत्युच्यते । एवं कालात्मकः[7] विष्णुः [v]बृहच्छरीरः विराडात्मना सर्वदेवमनुष्यादिशरीराणां स्वशरीरत्वात् । बृहच्छरीरत्वमेवोपपादयति । [v]विमिमानः विविधमात्मानं मिमानो देवतिर्यगात्मना विभज्य स्थापयन् । यद्वा । [v]ऋक्वभिः स्तुतिमद्भिः मन्त्रवद्भिः[8] वा विमिमानः[9] । यद्यपि विभुस्तथापि भक्त्याधीनत्वात्[10] स्तुत्या मीयते । [v]युवा सर्वत्र मिश्रणशीलो नित्यतरुणो वा अत एव [v]अकुमारः अनल्पः एवंभूतो महाविष्णुः [v]आहवम् आह्वानं [v]प्रत्येति गच्छति यज्ञदेशम् ॥ ॥ २५ ॥

' भवा मित्रः ' इति पञ्चर्चं सप्तदशं सूक्तं दैर्घतमसम् । ' जागतं तु ' इत्युक्तत्वादिदमपि जागतम् । ' वैष्णवं हि ' इत्युक्तत्वाद्वैष्णवम् । ' भव पञ्च ' इत्यनुक्रान्तम् ॥ उक्थ्ये तृतीयसवने अच्छावाकशस्त्रे एतत् सूक्तं विनियुक्तम् । ' उक्थ्ये तु होत्रकाणाम् ' इति खण्डे सूत्रितं–' भवा मित्रः सं वां कर्मणा ' ( आश्व. श्रौ. ६. १ ) इति । सौम्यचरोरुभयतो घृतेन यष्टव्यं तत्रोपरितने घृतयागे ' उरु विष्णो वि क्रमस्व ' इति प्राकृता[11] याज्या[11] । दशमेऽहनि तु तस्याः स्थाने ' भवा मित्रः ' इत्येषा प्रयोक्तव्या । ' दशमेऽहनि ' इति खण्डे सूत्रितम्–' उरु विष्णो वि क्रमस्वेति घृतयाज्यास्थाने भवा मित्रः ' ( आश्व. श्रौ. ८. १२ ) इति ॥

---

१. क्ष-ञ-ट–चतुरुत्तरां नवतिमित्यर्थः २. क्ष-ङ-ञ१-ञ-ट–क्षेपणाय भ्रामयति; च-फ–प्रक्षेपणाय भ्रामयति । ३. क्ष-ञ-ट–भ्रामयति । ४. क्ष-ञ१-ञ-ट–कथमेतत् भ्रामयति; ज्ञ-ञ-कथमेतान् भ्रामयति; ङ-कथमेतत् भ्रमयति । ५. क्ष-ङ-ञ१-ञ-ट–मूर्त्यवतारत्वात् । ६. क्ष-ञ-ट–भ्रामयति । ७. ख-च-फ–कालात्मकोऽपि । ८. ञ१–मन्त्रविद्भिः । ९. क्ष-ख-ङ-ञ१-ञ-ट–विमिमानः विविधं मीयमानः । १०. क्ष-ङ-ञ१-ञ-ट–भक्त्यधीनत्वात् । ११. क्ष-ख-च-ज-ञ-ण-ट-फ–प्राकृती घृतयाज्या ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

भवा मित्रो न शेव्यो घृतासुतिर्विभूतद्युम्न एवया उ सप्रथाः ।
अधा ते विष्णो विदुषा चिदर्ध्यः स्तोमो यज्ञश्च राध्यो हविष्मता ॥ १ ॥

भव । मित्रः । न । शेव्यः । घृतऽआसुतिः । विभूतऽद्युम्नः । एवऽयाः । ऊँ इति । सऽप्रथाः ।
अध । ते । विष्णो इति । विदुषा । चित् । अर्ध्यः । स्तोमः । यज्ञः । च । राध्यः । हविष्मता ॥१॥

हे विष्णो [v]मित्रो [v]न । मितेर्दुःखात् त्राता सखा आदित्यो वा मित्रः । 'प्रमीतेस्त्रायते' (निरु. १०. २१) इति निरुक्तम् । तद्वत् [v]शेव्यः सुखे साधुः सुखकर्ता [v]घृतासुतिः । घृतमुदकम् आसूयते[1] येन स तादृशः । यद्वा । घृतमाज्यमाभिमुख्येन नीयते यस्मै स तादृशः । [v]विभूतद्युम्नः प्रभूतयशाः प्रभूतान्नो वा [v]एवयाः रक्षणस्य मिश्रयिता प्रापयिता । [v]सप्रथाः सर्वतः पृथुः । प्रतिविशेषणं नः [v]भव इति संबन्धः ॥ 'ह्यचोऽतस्तिङः' इति दीर्घः । [v]उ इति पादपूरणः ॥ हे [v]विष्णो त्वं यस्मादीदृशो भवसि [v]अध अस्मात् [v]ते तव [v]स्तोमः स्तोत्रविशेषः [v]विदुषा त्वन्माहात्म्यवेदित्रा यजमानेन [v]अर्ध्यः पुनःपुनः प्रवर्धनार्हः । एकवारकरणे न संपूर्यते इत्यर्थः । तथा ते [v]यज्ञश्च [v]हविष्मता तेन यजमानेन [v]राध्यः समाराधनीयः । यद्वा । विदुषा होत्रा स्तोमो राध्यो हविष्मता यज्ञश्च राध्यः ॥

यः पूर्व्याय वेधसे नवीयसे सुमज्जानये विष्णवे ददाशति ।
यो जातमस्य महतो महि ब्रवत्सेदु श्रवोभिर्युज्यं चिदभ्यसत् ॥ २ ॥

यः । पूर्व्याय । वेधसे । नवीयसे । सुमत्ऽजानये । विष्णवे । ददाशति ।
यः । जातम् । अस्य । महतः । महि । ब्रवत् । सः । इत् ।
ऊँ इति । श्रवःऽभिः । युज्यम् । चित् । अभि । असत् ॥ २ ॥

[v]यः यो मर्त्यः [v]पूर्व्याय पूर्वकालीनाय नित्यायेत्यर्थः । [v]वेधसे विविधजगत्कर्त्रे [v]नवीयसे नित्यनूतनाय अत्यन्तरमणीयायेत्यर्थः । स्तुत्याय वा [v]सुमज्जानये स्वयमेवोत्पन्नाय ॥ जनेरौणादिकः इण् ॥ 'सुमत्स्वयमित्यर्थः' (निरु. ६. २२) इति यास्कः । यद्वा । सुतरां मादयतीति सुमत् । तादृशी जाया यस्य स तथोक्तः । तस्मै सर्वजगन्मादनशीलश्रीपतये इत्यर्थः ॥ बहुव्रीहौ 'जायाया निङ्' (पा. सू. ५. ४. १३४) इति निङादेशः समासान्तः । वलि लोपः ॥ उक्तगुणकाय [v]विष्णवे व्यापकाय[2] [v]ददाशति हविरादिकं ददाति । किंच [v]अस्य विष्णोः [v]महतः महानुभावस्य [v]महि महत् पूज्यं [v]जातं जन्म उत्पत्तिं हिरण्यगर्भादिरूपं जन्म [v]ब्रवत् ब्रूयात् ॥ ब्रवीतेर्लेटि अडागमः ॥ संकीर्तयेत् । [v]सेदु । उशब्दोऽपिशब्दार्थः । सोऽपि दाता स्तोता च [v] श्रवोभिः अन्नैः कीर्तिभिर्वा युक्तः सन् [v]युज्यं [v]चित् सर्वैर्गन्तव्यमेव तत्पदम् [v]अभि आभिमुख्येन [v]असत् गच्छति प्राप्नोति ॥

---

१. क्ष-ङ-च-ज्ञ१-ञ-ट-फ–आसूयते आभिमुख्येन नीयते । २. क्ष-ञ-ट–व्यापकाय देवाय ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तमु॑ स्तोतारः पू॒र्व्यं यथा॑ वि॒द ऋ॒तस्य॒ गर्भं॑ ज॒नुषा॑ पिपर्तन ।
आस्य॑ जा॒नन्तो॒ नाम॑ चिद्विवक्तन म॒हस्ते॑ विष्णो सुम॒तिं भ॑जामहे ॥ ३ ॥

तम् । ऊँ इति । स्तो॒तारः । पू॒र्व्यम् । यथा॑ । वि॒द । ऋ॒तस्य॑ । गर्भ॑म् । ज॒नुषा॑ । पि॒प॒र्त॒न ।
आ । अ॒स्य॒ । जा॒नन्तः॑ । नाम॑ । चि॒त् । वि॒व॒क्त॒न ।
म॒हः । ते॒ । विष्णो॒ इति॑ । सु॒ऽम॒तिम् । भ॒जा॒म॒हे ॥ ३ ॥

हे [v]स्तोतारः [v]तमु तमेव विष्णुं [v]पूर्व्यं पूर्वार्हम् अनादिसंसिद्धम् [v]ऋतस्य [v]गर्भं यज्ञस्य गर्भभूतं यज्ञात्मनोत्पन्नमित्यर्थः । ' यज्ञो वै विष्णुः ' ( श. ब्रा. १. १. २. १३ ) इति श्रुतेः । यद्वा । ऋतस्योदकस्य गर्भं गर्भकारणम् उदकोत्पादकमित्यर्थः । ' अप एव ससर्जादौ ' ( मनु. १. ८ ) इति स्मृतेः । एवंभूतं विष्णुं [v]यथा [v]विद जानीथ तथा [v]जनुषा जन्मना स्वत एव न केनचिद्बरलाभादिना [v]पिपर्तन स्तोत्रादिना प्रीणयत यावदस्य माहात्म्यं जानीथ तावदित्यर्थः ॥ विदेर्लेटि मध्यमबहुवचनम् । ' विद ऋतस्य ' इत्यत्र संहितायाम् ' ऋत्यकः ' इति प्रकृतिभावः ॥ किंच [v]अस्य महानुभावस्य विष्णोः [v]नाम [v]चित् सर्वैर्नमनीयमभिधानं सार्वात्म्यप्रतिपादकं विष्णुरित्येतन्नाम [v]जानन्तः पुरुषार्थप्रदमित्यधिगच्छन्तः [v]आ समन्तात् [v]विवक्तन वदत[1] संकीर्तयत । यद्वा । नाम यज्ञात्मना नमनं विष्णोरेव सर्वेषां स्वर्गापवर्गसाधनाय इष्टयाद्यात्मना द्रव्यदेवतात्मना वा परिणामम् आ जानन्तो यूयं विवक्तन ब्रूत स्तुत ॥ वचेर्लोटि छान्दसः शपः श्लुः । ' बहुलं छन्दसि ' इति अभ्यासस्य इत्वम् । पूर्ववत् तनादेशः ॥ इदानीं साक्षात्कृत्याह । हे [v]विष्णो सर्वात्मक देव[2] [v]महः महतः [v]ते तव[2] [v]सुमतिं सुष्ठुतिं[3] शोभनात्मिकां बुद्धिं वा [v]भजामहे[3] सेवामहे वयं यजमानाः ॥

अग्नीषोमप्रणयने ' तमस्य राजा ' इत्येषा प्रयोक्तव्या । ' अग्नीषोमौ प्रणेष्यत्सु ' इति खण्डे सूत्रितं–' तमस्य राजा वरुणस्तमश्विनेत्यर्धर्चं आरमेत् ' ( आश्व. श्रौ. ४. १० ) इति ॥

तमस्य॒ राजा॒ वरु॑णस्तम॒श्विना॒ क्रतुं॑ सचन्त मारु॒तस्य॑ वे॒धसः॑ ।
दा॒धार॑ दक्ष॒मुत्त॑मम॒हर्वि॑दं व्र॒जं च॒ विष्णुः॑ सखि॒वाँ अ॑पोर्णुते ॥ ४ ॥

तम् । अ॒स्य॒ । राजा॑ । वरु॑णः । तम् । अ॒श्विना॑ । क्रतु॑म् । स॒च॒न्त॒ । मारु॑तस्य । वे॒धसः॑ ।
दा॒धार॑ । दक्ष॑म् । उत्ऽत॑मम् । अ॒हः॒ऽविद॑म् । व्र॒जम् । च॒ । विष्णुः॑ । सखि॒ऽवान् । अप॒ऽऊ॒र्णु॒ते॒ ॥ ४ ॥

[v]मारुतस्य । मरुतामृत्विजां संघातः मारुतम् । तद्वतः ॥ मत्वर्थो लुप्यते ॥ मरुतां देवानां संबन्धिनो वा [v]वेधसः मेधाविनः [v]अस्य यजमानस्य [v]तं प्रसिद्धं [v]क्रतुं यागं यज्ञात्मकं विष्णुम् । ' यज्ञो वै विष्णुः ' इति श्रुतेः । [v]राजा राजमानः [v]वरुणः [v]सचन्त सेवते । [v]तम् एव क्रतुं यागम् [v]अश्विना अश्विनौ सचेते । अन्येऽपि देवाः सचन्ते सेवन्ते । किंच [v]विष्णुः

---

१. क्ष-ञ-ट–विशेषेण वदत । २. क्ष-ञ१-ञ-ट–ते तव महः तन्नाम । ३. क्ष-ङ-ञ१-ञ-ट–शोभनमननवन्तं त्वां च यद्वा महो महान्तं सुमतिं त्वां भजामहे ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सवनत्रयात्मना व्याप्तो[1] विष्णुः [v]सखिवान् यजमानादिसखिभिर्युक्तः सन् [v]उत्तमम् उत्कृष्टतमम् [v]अहर्विदम् अहर्वेत्तारं स्वर्गोत्पादकमित्यर्थः। [v]दक्षं बलं फलप्रदानसामर्थ्यरूपं [v]दाधार धृतवान्। किंच [v]व्रजं [v]च मेघं च। व्रज इति मेघनाम, ' व्रजः चरुः ' ( नि. १. १०. ११ ) इति तन्नामसु पाठात्। तं वृष्ट्युदकाय [v]अपोर्णुते अपगतावरणं करोति। आहुतिद्वारा यज्ञस्यैव वृष्ट्युत्पादकत्वात्। यद्वा। मारुतस्य मरुत्संघातस्य देवगणस्य वेधसो विधातुः स्रष्टुर्विष्णोः क्रतुं कर्म पालनादिरूपं वरुणादयः सचन्ते[2]। तदधीनत्वात् पालनस्य। स च सखिवान् इन्द्रमरुदादिसहायोपेतः सन् उक्तलक्षणं दक्षं वृष्ट्युत्पादनादिसामर्थ्यरूपं बलं दाधार। तथा व्रजं चापोर्णुते ॥

आ यो विवाय सचथाय दैव्य इन्द्राय विष्णुः सुकृते सुकृत्तरः।
वेधा अजिन्वत्त्रिषधस्थ आर्यमृतस्य भागे यजमानमाभजत् ॥ ५ ॥

आ। यः। विवाय। सचथाय। दैव्यः। इन्द्राय। विष्णुः। सुऽकृते। सुकृत्ऽतरः।
वेधाः। अजिन्वत्। त्रिऽसधस्थः। आर्यम्। ऋतस्य। भागे। यजमानम्। आ। अभजत्॥५॥

[v]यः [v]विष्णुः [v]दैव्यः दिवि भवः [v]सुकृत्तरः शोभनफलप्रदानां मध्ये श्रेष्ठः [v]आ [v]विवाय आगच्छति ॥ वेतेर्लिटि रूपम्॥ किमर्थम्। [v]सचथाय सचनाय यागसहायकरणाय[3]। कस्मै। [v]इन्द्राय। इरां हविर्लक्षणान्नं द्रावयतीतीन्द्रो यजमानः[4]। ' इन्द्र इरां दृणातीति इदंकरणादित्याग्रायणः ' ( निरु. १०. ८ ) इति यास्केनोक्तनिर्वचनस्यात्रापि सद्भावात् ॥ तस्मै उक्तरूपाय यजमानाय [v]सुकृते शोभनस्तुतिकर्त्रे। आगत्य च [v]वेधाः अभिमतफलविधाता [v]त्रिषधस्थः त्रिसंख्योपेतसहस्थानवान्। सवनत्रयस्थानः क्षित्यादिस्थानत्रयो वा विष्णुः। [v]आर्यम् आगन्तव्यं[5] यजमानम् [v]अजिन्वत् प्रीणयति ॥ जिवि प्रीणनार्थः। इदित्त्वात् नुम् ॥ तदर्थम् [v]ऋतस्य यज्ञस्य [v]भागे हुतशेषरूपे तं [v]यजमानम् आभजत् भजति समीपयतीत्यर्थः[6]। यद्वा। ऋतस्य यज्ञस्य भागे फले यजमानम् आभजत् स्वामित्वेन स्थापयति ॥ ॥ २६ ॥ ॥ २१ ॥

द्वाविंशेऽनुवाके अष्टौ सूक्तानि। तत्र ' अबोध्यग्निर्जमः ' इति प्रथमं सूक्तं षडृचं दैर्घतमसमाश्विनम्। पूर्वत्र ' जागतं तु ' इति तुशब्दादिदमपि जागतम्। अन्त्ये द्वे त्रिष्टुभौ। ' अबोधि षळाश्विनं त्वन्त्ये त्रिष्टुभौ ' इत्यनुक्रमणिका। प्रातरनुवाकाश्विनशस्त्रयोर्जागते छन्दस्यस्य विनियोगः। ' अथाश्विनः ' इति खण्डे सूत्रितम्–' अबोध्यग्निर्जम एष स्य भानुः ' ( आश्व. श्रौ. ४. १५ ) इति ॥

अबोध्यग्निर्जम उदेति सूर्यो व्युषाश्चन्द्रा महावो अर्चिषा।
आयुक्षातामश्विना यातवे रथं प्रासावीद्देवः सविता जगत्पृथक् ॥ १ ॥

अबोधि। अग्निः। जमः। उत्। एति। सूर्यः। वि। उषाः। चन्द्रा। मही। आवः। अर्चिषा।
अयुक्षाताम्। अश्विना। यातवे। रथम्। प्र। असावीत्। देवः। सविता। जगत्। पृथक्॥१॥

---

१. ख-च-फ–व्यापनात्। २. क्ष-ञ-ट–सेवन्ते। ३. क्ष-ङ-ञ१-ञ-ट–यागसाहाय्यकरणाय। ४. ञ१–यजमानः। इदं कर्म करोति वा इन्द्रो यजमानः। ५. क्ष-ङ-ज्ञ-ञ१-ञ-ट–आगत्य तर्पयितव्यम्। ६. क्ष-ञ-ट–समापयतीत्यर्थः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अयम् Vअग्निः विहितः[1] सन् Vज्मः ज्मायाः पृथिव्या वेदिलक्षणायाः संबन्धी सन् Vअबोधि प्रतिबोधितः । ज्मेति पृथिवीनाम, 'ग्मा ज्मा' ( नि. १.१.३ ) इति तन्नामसूक्तत्वात् । किंच Vसूर्यः Vउदेति । Vमही महती Vउषाः Vअर्चिषा प्रकृष्टेन तेजसा Vचन्द्रा प्राणिनाम्[2] आह्लादिनी सती Vवि[3] Vआवः तमांसि विवासयति[3]॥ वसेर्लुङि छान्दसः च्लेर्लुक्[4]। 'छन्दस्यपि दृश्यते' इति आडागमः ॥ यतः इयमुषा उदेति यतश्च सूर्यो यतश्चायमग्निः प्रबुद्धो भवति अतः कारणात् हे अश्विनौ[5] युष्मत्संबन्धिनं[6] Vरथं Vयातवे देवयजनगमनाय रासभाभ्याम् Vआयुक्षाताम्[7] आभिमुख्येन युञ्जाथाम्। तथा Vसविता सर्वकर्मणोऽनुज्ञाता Vदेवः Vजगत् जङ्गमं प्राणिजातं Vपृथक् स्वस्वकर्मानुरोधेन Vप्रासावीत् प्रसौतु अनुजानातु ॥

**यद्युञ्जाथे वृषणमश्विना रथं घृतेन नो मधुना क्षत्रमुक्षतम् ।**
**अस्माकं ब्रह्म पृतनासु जिन्वतं वयं धना शूरसाता भजेमहि ॥ २ ॥**

यत् । युञ्जाथे इति । वृषणम् । अश्विना । रथम् । घृतेन । नः । मधुना । क्षत्रम् । उक्षतम् । अस्माकम् । ब्रह्म । पृतनासु । जिन्वतम् । वयम् । धना । शूरऽसाता । भजेमहि ॥ २ ॥

हे Vअश्विना अश्विनौ Vयत् यदा Vवृषणं वृष्ट्यादिवर्षकं Vरथं Vयुञ्जाथे योजयथः तदा Vनः Vक्षत्रम् अस्मदीयं बलं क्षत्रियजातं वा Vघृतेन उदकेन Vमधुना मधुरेण Vउक्षतं[8] प्रवर्धयतमित्यर्थः। यद्वा। घृतेन क्षरणरूपेण मधुना मधुरेण[9] अमृतेनोक्षतं युष्मद्रथस्थेन मधुना अस्मदीयं बलं प्रवर्धयतमित्यर्थः। अश्विनोः रथस्य मधुपूर्णत्वं 'मधुवाहनो रथः' इत्यादिषु प्रसिद्धम्। किंच Vअस्माकं Vपृतनासु अस्मदीयासु पुत्रभृत्यादिमनुष्यरूपासु प्रजासु Vब्रह्म ब्राह्मं तेजः Vजिन्वतम्। पृतना इति मनुष्यनाम, 'विवस्वन्तः पृतनाः' ( नि. २. ३. २५ ) इति तन्नामसूक्तत्वात्। यद्वा। पृतनासु परकीयासु प्रजासु ब्रह्म तासां परिवृढमन्नमस्माकं जिन्वतं प्रीणयतम्। ब्रह्म इति अन्ननाम, 'ब्रह्म वर्चः' (नि. २. ७. २५ ) इति तन्नामसूक्तत्वात्। Vवयं च Vशूरसाता शूरसातौ शूराणां प्रहारादिना युक्ते संग्रामे Vधना तदीयानि धनानि बहुविधानि[10] Vभजेमहि लभेमहि।।

**अर्वाङ् त्रिचक्रो मधुवाहनो रथो जीराश्वो अश्विनोर्यातु सुष्टुतः ।**
**त्रिबन्धुरो मघवा विश्वसौभगः शं न आ वक्षद्द्विपदे चतुष्पदे ॥ ३ ॥**

अर्वाङ् । त्रिऽचक्रः । मधुऽवाहनः । रथः । जीरऽअश्वः । अश्विनोः । यातु । सुऽस्तुतः । त्रिऽबन्धुरः । मघऽवा । विश्वऽसौभगः । शम् । नः । आ । वक्षत् । द्विऽपदे । चतुःऽपदे ॥३॥

---

१. क्ष-ञ१-ञ-ट-विहृतः । २. क्ष-ञ-ट-सर्वप्राणिनाम् । ३. ङ-ञ१—व्यावृणोत्। तमांसि विवारयति। ४. क्ष-ञ१-ञ-ट-वृणोतेर्लुङि मन्त्रे घसेति च्लेर्लुक्। ५. ङ-अश्विना अश्विनौ । ६. क्ष-ङ-ञ१-ञ-ट-वः युष्मत्संबन्धिनम्; ख-च-फ-स्वसंबन्धिनम् । ७. क्ष-ञ१-ञ-ट-अयुक्षाताम्। ८. क्ष-ङ-ञ-ञ१-ञ-ट-उक्षतं सेचयतम् । ९. क्ष-ञ-ट-मधुररूपेण; ञ१—मधुरूपेण । १०. क्ष-ञ-ट-बहूनि बहुविधानि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vअश्विनोः vरथः vअर्वाङ् अस्मदभिमुखः vयातु गच्छतु । कीदृशः । vत्रिचक्रः चक्रत्रययुक्तः vमधुवाहनः मधुवोढा vजीराश्वः शीघ्रगाम्यश्वोपेतः vसुष्टुतः अत एवास्माभिः स्तूयमानः vत्रिबन्धुरः निम्नोन्नतकाष्ठत्रयोपेतः । सारथ्याश्रयस्थानं बन्धुरम् । vमघवा धनवान् अत एव vविश्वसौभगः सर्वसौभाग्योपेतः । ईदृशोऽश्विनोः रथः vनः अस्माकं vद्विपदे पुत्रादिप्रजायै vचतुष्पदे पशवे च vशं सुखम् vआ vवक्षत् आवहतु ॥ वहेर्लेटि अडागमः । सिप् ॥

आ न ऊर्जं वहतमश्विना युवं मधुमत्या नः कशया मिमिक्षतम् ।
प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥ ४ ॥

आ । नः । ऊर्जम् । वहतम् । अश्विना । युवम् । मधुऽमत्या । नः । कशया । मिमिक्षतम् ।
प्र । आयुः । तारिष्टम् । निः । रपांसि । मृक्षतम् । सेधतम् । द्वेषः । भवतम् । सचाऽभुवा ॥४॥

हे vअश्विना अश्विनौ vयुवं युवां vनः अस्माकम् vऊर्जं बलं प्राणनसमर्थमन्नं वा vआ vवहतं प्रापयतम् । किंच vनः अस्मान् vमधुमत्या माधुर्योपेतया vकशया वाचा इष्टप्रदानरूपया vमिमिक्षतं सिञ्चतं प्रीणयतम् । कशा इति वाङ्नाम, ' कशा धिषणा ' (नि. १.११.४३) इति तन्नामसूक्तत्वात् । यद्वा । मधुमत्या मधुरवृष्टिमत्या[1] माधुर्योपेतया कशया अश्वताडन्या[2] नोऽस्मान् मिमिक्षतम् । मधु इति उदकनाम, ' मधु पुरीषम् ' ( नि. १. १२. ११ ) इति तन्नामसूक्तत्वात् । कशया अश्वताडनेन शीघ्रमागत्य वृष्टिरूपं फलं दास्यतः इति कशाया मधुमत्त्वम् । किंच vआयुः आयुष्यं vप्र vतारिष्टं प्रवर्धयतम् ॥ प्रपूर्वस्तिरतिर्वर्धनार्थः ॥ तथा vरपांसि vमृक्षतं[3] पापानि निःशेषेण शोधयतम् । ' रपो रिप्रमिति पापनामनी भवतः ' ( निरु. ४.२१ ) इति यास्कः । किंच vद्वेषः द्वेष्यममित्रादिकं vसेधतं नाशयतम् । इदं[4] च भाव्यम्[5] । vसचाभुवा सहभुवौ अस्मत्कार्येषु सहभवनवन्तौ vभवतं भवन्तौ ऐकमत्यं भजत[5] इत्यर्थः[5] ॥ वाक्यभेदादनिघातः ॥

युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वन्तः ।
युवमग्निं च वृषणावपश्च वनस्पतीँराश्विनावैरयेथाम् ॥ ५ ॥

युवम् । ह । गर्भम् । जगतीषु । धत्थः । युवम् । विश्वेषु । भुवनेषु । अन्तरिति ।
युवम् । अग्निम् । च । वृषणौ । अपः । च । वनस्पतीन् । अश्विनौ । ऐरयेथाम् ॥ ५ ॥

हे vअश्विनौ vयुवं vह युवां खलु vजगतीषु vअन्तः गमनशीलासु गोषु मध्ये vगर्भं vधत्थः धारयथः । न केवलं गोष्वेव अपि तु vयुवं युवां vविश्वेषु सर्वेषु vभुवनेषु भूतजातेष्वन्तर्मध्ये गर्भं धत्थः । वृष्टिद्वारा आमिषरूपत्वेन[6] गर्भस्थरेतसः पोषकत्वात् । किंच हे vवृषणौ कामानां वर्षितारौ

---

१. क्ष-ञ-ट–माधुर्यवृष्टिमत्या । २. क्ष-ञ-ट–अश्वतोदिन्या; ज्ञ१–तोदिन्या । ३. क्ष-ञ-ट–निमृक्षतम् । ४. क्ष-ञ-ट–भाभ्याम्(?) ज्ञ१–किंच । ५. क्ष-ज्ञ१-ञ-ट–भजतामित्यर्थः । ६. क्ष-च-ज्ञ-ज्ञ-ञ-ट–भिषग्रूपत्वेन; ङ-ज्ञ१–भिषग्रूपेण ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ᵛयुवं युवाम् ᵛअग्निं ᵛच ᵛअपश्च ᵛवनस्पतीन् च ᵛऐरयेथां प्रवर्तयेथाम्। आहुतिभोगायाग्निं स्वीकृत्य च वृष्टयुदकानि उदकैः ओषधिवनस्पत्यादिकम् एतान्यस्मदर्थं प्रैरयेथाम् ॥

**युवं ह स्थो भिषजा भेषजेभिरथो ह स्थो रथ्या राथ्येभिः।**
**अथो ह क्षत्रमधि धत्थ उग्रा यो वां हविष्मान्मनसा ददाश ॥ ६ ॥**

युवम्। ह। स्थः। भिषजा। भेषजेभिः। अथो इति। ह। स्थः। रथ्या। रथ्येभिरिति रथ्येभिः। अथो इति। ह। क्षत्रम्। अधि। धत्थः। उग्रा। यः। वाम्। हविष्मान्। मनसा। ददाश ॥ ६ ॥

हे अश्विनौ ᵛयुवं युवां ᵛह खलु ᵛभेषजेभिः भेषजैरौषधैः। 'भेषजौषधभैषज्यान्यगदो जायुः' 'अगदं तत्रौषधम्[1]' इति चाभिधानात्। तैः ᵛभिषजा भिषजौ ᵛस्थः। हशब्दः 'अश्विनौ हि देवानां भिषजौ' इत्यादिप्रसिद्धिद्योतनार्थः। ᵛअथो अपि च ᵛरथ्येभिः रथवोढृभिरश्वैः ᵛरथ्या रथवन्तौ ᵛस्थः। 'आ वां रथो अश्विना' (ऋ. सं. १. ११८. १) इत्यादिप्रसिद्धिद्योतनार्थो हशब्दः। अनयोः[2] रथेन विशेषसंबन्धः[2] 'युवोर्हि पूर्वं सवितोषसो रथमृताय चित्रं घृतवन्तमिष्यति' (ऋ. सं. १. ३४. १०) इत्यादिमन्त्रान्तरेषु प्रसिद्धः। ᵛअथो अपि च युवयोः ᵛक्षत्रं बलम् ᵛअधि ᵛह अधिकं खलु। हशब्दः प्रसिद्धौ। यस्मादेवं तस्मात् हे ᵛउग्रा उद्गूर्णसामर्थ्यावश्विनौ ᵛवां युवाभ्यां ᵛयः ᵛहविष्मान् आज्यपुरोडाशादिहविर्युक्तो यजमानः ᵛमनसा युष्मदायत्तेन चेतसा ᵛददाश ददाति हविरादिकं तं ᵛधत्थः धारयथः अत्यधिकमनुगृह्णीथ इत्यर्थः। प्रभूतबलौ युवां रथमारुह्य अस्मद्देवयजनमागत्य हविष्मदं मां धृत्वा अस्मद्यज्ञे[3] अस्मान्विचिकित्सतमिति[3] तात्पर्यार्थः ॥ ॥ २७ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण[4] विरचिते माधवीये वेदार्थप्रकाशे
ऋक्संहिताभाष्ये द्वितीयाष्टके
द्वितीयोऽध्यायः
समाप्तः ॥

---

१. क्ष-झ१-ञ-ट–तन्त्रमौषधम्। २. झ१–अनर्योर्हि रथविशेषसंबन्धः। ३. झ१–अस्मदायत्तानस्मान् वा विचिकित्सतमिति। ४. क्ष-ङ-ञ-ट–सायणामात्येन।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥

अथ तृतीयाध्याय आरभ्यते[1] । ' वसू रुद्रा ' इत्येतत् अनुवाकापेक्षया द्वितीयं सूक्तं षड्ऋचं दैर्घतमसम् । पूर्वत्र ' आश्विनं तु ' इत्युक्तत्वात् इदमप्याश्विनम् । अनादेशपरिभाषया त्रैष्टुभम् । ' दीर्घतमा मामतेयः ' इत्यन्त्या अनुष्टुप् । तथा चानुक्रान्तं–' वसू अन्त्यानुष्टुप् ' इति ॥ अस्य विशेषविनियोगो लैङ्गिकः ॥

वसू रुद्रा पुरुमन्तू वृधन्ता दशस्यतं नो वृषणाविभिष्टौ ।
दस्रा ह यद्रेक्ण औचथ्यो वां प्र यत्सस्राथे अकवाभिरूती ॥ १ ॥

वसू इति । रुद्रा । पुरुमन्तू इति पुरुऽमन्तू । वृधन्ता । दशस्यतम् । नः । वृषणौ । अभिष्टौ । दस्रा । ह । यत् । रेक्णः । औचथ्यः । वाम् । प्र । यत् । सस्राथे इति । अकवाभिः । ऊती ॥१॥

हे [v]वृषणौ कामानां वर्षितारौ [v]दस्रा अस्मद्विरोध्युपक्षपयितारौ हे अश्विनौ युवां [v]नः अस्मभ्यं [v]दशस्यतं दत्तं दिप्सितं फलम् । कीदृशौ युवाम् । [v]वसू वासयितारौ प्रजानाम् । वसुना धनेन तद्वन्तौ वा ॥ मत्वर्थो लुप्यते ॥ [v]रुद्रा रुद्रौ । रुद्रुःखं तद्धेतुभूतं पापं वा । तस्य द्रावयितारौ । संग्रामे भयंकरं शब्दयन्तौ वा । ' रुद्रो रौतीति सतः ' ( निरु. १०. ५ ) इति यास्कः । [v]पुरुमन्तू बहूनां ज्ञातारौ ॥ मनेरौणादिकः तुन्प्रत्ययः ॥ [v]वृधन्ता वर्धमानौ स्तोत्रादिना [v]अभिष्टौ आभिमुख्येन पूजितौ अभीष्टसाधकौ वा । हशब्दः उक्तगुणप्रसिद्धिद्योतनार्थः । किमर्थं दीयते इति चेत् । [v]यत् यस्मात् [v]औचथ्यः उचथ्यस्य पुत्रो दीर्घतमाः [v]वां युवां [v]रेक्णः धनं स्तुतिव्याजेन प्रार्थयते तदर्थम् । यद्वा । अयं यजमानो यद्यस्मात् रेक्णो हविर्लक्षणमन्नं वां युवाभ्यां दास्यति ददातीति शेषः । यस्माच्च [v]अकवाभिः अकुत्सितैः [v]ऊती ऊतिभिः रक्षणैः ॥ ' सुपां सुलुक्° ' इति तृतीयायाः पूर्वसवर्णदीर्घः ॥ [v]प्र [v]सस्राथे प्रसारयथः प्रकर्षेण दत्थः तस्माद्दशस्यतम् । यस्मादभिमतप्रदौ यस्माच्चायं प्रार्थयते ददाति वा हविः तस्माद्दशस्यतमित्यर्थः ॥

को वां दाशत्सुमतये चिदस्यै वसू यद्धेथे नमसा पदे गोः ।
जिगृतमस्मे रेवतीः पुरंधीः कामप्रेणेव मनसा चरन्ता ॥ २ ॥

कः । वाम् । दाशत् । सुऽमतये । चित् । अस्यै । वसू इति । यत् । धेथे इति । नमसा । पदे । गोः । जिगृतम् । अस्मे इति । रेवतीः । पुरम्ऽधीः । कामप्रेणऽइव । मनसा । चरन्ता ॥ २ ॥

---

१. क्ष-झ-ञ१-ञ-ट–आरभ्यते । तत्र ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]वसू वासयितारावश्विनौ [v]वां युवयोः संबन्धिन्यै [v]अस्यै वक्ष्यमाणरूपायै [v]सुमतये [v]चित् शोभनबुद्धयै । चित् पूजायामप्यर्थे वा । स्वल्पेनैव हविषा महत्फलप्रदानरूपायै ईदृश्यै अपि बुद्धयै प्रीणनाय [v]कः [v]दाशत् को दद्यात् दातुं शक्नुयात् । युवयोः प्रभावस्यातिमहत्त्वादिति भावः ॥ दाशतेर्लेट्यडागमः ॥ कथं मतेः सौष्ठवमिति तदुच्यते । [v]यत् यस्मात्कारणात् [v]गोः [v]पदे भूम्याः सर्वैर्गन्तव्यायाः स्तुत्याया वा वेदिरूपायाः स्थाने । ' एतावती वै पृथिवी यावती वेदिः ' ( तै. सं. २. ६. ४. ३ ) इति श्रुतेः । गौरिति भूमिनाम । तथा च निरुक्तं–' गौरिति पृथिव्या नामधेयं यद्दूरं गता भवति यच्चास्यां भूतानि गच्छन्ति गातेर्वाकारो नामकरणः ' ( निरु. २. ५ ) इति । तादृशे स्थाने अस्माभिः प्रार्थितौ सन्तौ [v]नमसा हविर्लक्षणेन यवमात्रप्रकारेणान्नेन[1] [v]धेथे धारयथो बहुप्रदानविषयां[2] बुद्धिम् ॥ दधातेर्लटि ' बहुलं छन्दसि ' इति विकरणस्य[3] लुक् । धातोर्ह्रस्वत्वम् । ' आतो ङितः ' ( पा. सू. ७. २. ८१ ) इति इयादेशः ॥ यस्मादेवं तस्मात् [v]अस्मे अस्मभ्यं [v]रेवतीः क्षीरादिधनवतीः [v]पुरंधीः शरीरधारिकाः शरीराभिवृद्धिहेतूः गाः [v]जिगृतं शब्दयतं दत्तमित्यर्थः[4] ॥ ' गृ शब्दे ' । छान्दसः शपः श्लुः । अभ्यासस्येत्वं ह्रस्वत्वं च ॥ पुनस्तावेव विशेष्येते । [v]कामप्रेणेव । इवशब्दः एवकारार्थः । कामपूरकेणैव[5] [v]मनसा सह [v]चरन्ता चरन्तौ । यजमानस्य कामाः पूरणीया इति कृतसंकल्पावित्यर्थः ॥ ' प्रा पूरणे ' । कामं प्रातीति कामप्रः । ' आतोऽनुपसर्गे कः ' ॥

**युक्तो ह यद्वां तौग्र्याय पेरुर्वि मध्ये अर्णसो धायि पज्रः ।**
**उप वामवः शरणं गमेयं शूरो नाज्मं पतयद्भिरेवैः ॥ ३ ॥**

युक्तः । ह । यत् । वाम् । तौग्र्याय । पेरुः । वि । मध्ये । अर्णसः । धायि । पज्रः ।
उप । वाम् । अवः । शरणम् । गमेयम् । शूरः । न । अज्मं । पतयत्ऽभिः । एवैः ॥ ३ ॥

अत्रेतिहासमाहुः । तौग्र्यनामकं राजानं युद्धे शत्रवः पराभाव्य पाशैर्दृढं बद्ध्वा समुद्रमध्ये प्रचिक्षिपुः । स च उत्तरीतुमशक्तः सन् अश्विनौ तुष्टाव । तौ च तुष्टौ शीघ्रमेव रथमश्वैर्योजयित्वा समुद्रमागत्य तमुत्तार्य अपालयतामिति । अयमर्थः ' अजोहवीदश्विना तौग्र्यः ' ( ऋ. सं १. ११७. १५ ) इत्यादिमन्त्रान्तरे प्रसिद्धः । सोऽत्रोच्यते । हे अश्विनौ [v]वां युवयोः संबन्धी [v]पेरुः पारणकुशलो रथः [v]युक्तो [v]ह अश्वैर्युक्तः[6] खलु । हशब्दो मन्त्रान्तरप्रसिद्धिद्योतनार्थः । स च उदाहृतः । कस्मै । [v]तौग्र्याय एतन्नाम्ने राज्ञे तद्बन्धमोचनार्थम् । कुत्रेति तदुच्यते । [v]अर्णसः अम्भसः [v]मध्ये समुद्रस्य मध्ये । स च [v]पज्रः पाजसा बलेन तीर्णः[7] सन् [v]वि [v]धायि[7] धारितः स्थापितः[8] । यस्मादेवं तस्मात् [v]वां युवयोः [v]अवः रक्षणं [v]शरणम् [v]उप [v]गमेयं संप्राप्नुयाम् ऐहिकदुःखाद्विमुक्तो युष्मत्स्थानं संभजेयम् । गतौ दृष्टान्तः । [v]पतयद्भिरेवैः[9] अश्वैः [v]शूरो [v]न शूर इव । स यथा [v]अज्म[10] जित्वा[10] निर्भयं स्वगृहं प्राप्नोति तद्वत् ॥

---

१. क्ष-झ१-ञ-ट–यवमात्रप्रमाणेनान्नेन । २. क्ष-झ१-ञ-ट–बहुफलप्रदानविषयाम् । ३. क्ष-झ१-ञ-ट–विकरणस्य शपः । ४. क्ष-झ-ञ-ट–ददतमित्यर्थः । ५. क्ष-ञ-ट–कामपूरणेनैव । ६. क्ष-ञ-ट–अश्वयुक्तोऽभूत् । ७. क्ष-ञ-ट–जीर्णः सन् धायि । ८. क्ष-ञ-ट–स्थापितः तदर्थम् । ९. क्ष-झ१-ञ-ट–पतयद्भिः गमनकुशलैः एवैः; झ–पतयद्भिः गमयद्भिः एवैः । १०. क्ष-ङ-झ१-ञ-ट–जित्वा वैरिणः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उपस्तुतिरौचथ्यमुरुष्येन्मा मामिमे पतत्रिणी वि दुग्धाम् ।
मा मामेधो दशतयश्चितो धाक् प्र यद्वां बद्धस्त्मनि खादति क्षाम् ॥ ४ ॥

उपऽस्तुतिः । औचथ्यम् । उरुष्येत् । मा । माम् । इमे इति । पतत्रिणी इति । वि । दुग्धाम् ।
मा । माम् । एधः । दशऽतयः । चितः । धाक् ।
प्र । यत् । वाम् । बद्धः । त्मनि । खादति । क्षाम् ॥ ४ ॥

अत्राख्यानमाहुः । जराझर्झरितगात्रं[1] जात्यन्धं दीर्घतमसं मामतेयं वरिवसितुमशक्नुवानाः स्वगर्भदासा अग्नौ प्रदाहाय प्रचिक्षिपुः । तत्र क्षिप्तोऽश्विनावस्तावीत् । तौ चैनमरक्षताम् । ततोऽप्यम्रियमाणमुदकेषु अपातयन्[2] । तत्र निमग्नः पुनरश्विनौ तुष्टाव । तुष्टौ सन्तौ तौ जलादुदहार्ष्टाम् । एवमवध्यं तं त्रैतनो[3] नामकः[3] कश्चिद्दासः अस्य शिरो वक्षश्च व्यतक्षत्[4] । ततोऽप्यपालयतामिति । तदिदम् ऋग्द्वयाभ्यामुच्यते । हे अश्विनौ vउपस्तुतिः युवां बुद्धयोपेत्य[5] क्रियमाणा स्तुतिः vऔचथ्यम् उचथस्य पुत्रं दीर्घतमसं माम् vउरुष्येत् रक्षेत् दाहाद्युपद्रवात् । ' उरुष्यती रक्षाकर्मा ' ( निरु. ५. २३ ) इति यास्कः । एवं सामान्येनोक्त्वा विशेषेण प्रत्युपद्रवपरिहारं[6] प्रार्थयते । vइमे प्रसिद्धे vपतत्रिणी पतनशीले पुनरावर्तनशीले अहोरात्रे vमां vमा vवि vदुग्धां विशेषेण दोहगतसारं[7] मा कार्ष्टां प्राणनिर्गमनानुकूल्यं मा कुरुतामित्यर्थः । किंच vमां vदशतयः दशवारः[8] vचितः संचितः संपादितः[9] vएधः प्रज्वालितेन्धनसंघः[10] vमा vधाक् मा धाक्षीत्[11] ॥ दहतेर्लुङि सिचि हल्न्तलक्षणा वृद्धिः । ' बहुलं छन्दसि ' इति इडभावः । हल्ङ्यादिसंयोगान्तलोपौ ॥ दुःसहदुःखप्राप्तिं दर्शयति । vयत् यस्मात् vवां युवयोः संबन्धी अयं जनः vबद्धः पाशैः गाढं[12] वेष्टितः सन् vत्मनि आत्मनि आत्मना vक्षां भूमिं vखादति भक्षयति गन्तुमशक्तः सन् भूमौ परिलुठतीत्यर्थः । तस्मादुपस्तुतिरौचथ्यमुरुष्येत् इति[13] ॥

अस्याः पञ्चम्या विनियोगमाह शौनकः–' आततायिनमायान्तं दृष्ट्वा व्याघ्रमथो वृकं । न मा गरन्निति जपंस्तेभ्य एव प्रमुच्यते । त्रिरात्रोपोषितो रात्रौ जपेदा सूर्यदर्शनात् । आप्लुत्य प्रयतः सूर्यमुपतिष्ठेदिवाकरं । पश्यन्ति तस्करा नैनं तथान्ये पापबुद्धयः । एकः शतानि त्रायेत तस्करेभ्यश्चरन् पथि[14] ' ( ऋग्वि. १. १४१ ) इति ॥

न मा गरन्नद्यो मातृतमा दासा यदीं सुसमुब्धमवाधुः ।
शिरो यदस्य त्रैतनो वितक्षत्स्वयं दास उरो अंसावपि ग्ध ॥ ५ ॥

न । मा । गरन् । नद्यः । मातृऽतमाः । दासाः । यत् । ईम् । सुऽसमुब्धम् । अवऽअधुः ।
शिरः । यत् । अस्य । त्रैतनः । विऽतक्षत् । स्वयम् । दासः । उरः । अंसौ । अपि । ग्धेति ग्ध ॥५॥

---

१. ख-च-फ–जराजरितगात्रम् ; क-झ–जराजर्जरीकृतगात्रम् ; क्ष-ङ-ञ-ट – जराजर्जरिताङ्गम् ; झ१–जराजर्झरिताङ्गम् । २. क्ष-ङ-झ१-ञ-ट–प्रापातयन् । ३. क्ष-ञ-ट–त्रैतननाम (मा) । ४. क्ष-झ-ञ-ट–अविध्यत् । ५. क्ष-ङ-झ१-ञ-ट–बुद्धा उपेत्य प्राप्य । ६. क्ष-झ१-ञ-ट–प्रत्युपद्रवं परिहारम् । ७. क्ष-ञ-ट–विशेषेण दोहतं गतसारम् ; झ–विशेषेणादाहं गतसारम् । ८. क्ष-ङ-झ१-ञ-ट–अपरिमितकाष्ठावयवः ९. क्ष-ङ-च-झ-झ१-ञ-ट–सम्यक् संपादितः । १०. झ१–प्रज्वलितेन्धनसंघः । ११. क्ष-ङ-झ-ञ-ट–दहतु । १२. ङ-झ१–दृढम् । १३. क्ष-ञ-ट–' इति ' नास्ति । १४. क्ष-झ१-ञ-ट–यथा ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vनद्यः नदनशीलाः vमातृतमाः मातृवज्जगतां हितकारिण्य आपः vमा मां दीर्घतमसं vगरन्[1] न गिरेयुः निमग्नं मा कुर्युः ॥ ' गॄ निगरणे '। लेटि व्यत्ययेन शप् ॥ गिरणप्राप्तिं दर्शयति। vयत् यस्मात् vदासाः अस्मदुपक्षपयितारो मदीयगर्भदासाः vईम् एनं दीर्घतमसं मां vसुसमुग्धं सुष्ठु संकुचितसर्वाङ्गम् ॥ ' स्वती पूजायाम् ' ( पा. म. २. २. १८. ४ ) इति प्रादिसमासे अव्ययपूर्वपद-प्रकृतिस्वरत्वम् ॥ vअवाधुः अवाङ्मुखमपातयन्। किंच vअस्य मम vशिरः सः vत्रैतनः एतन्नामकः vदासः अत्यन्तनिर्घृणः सन् vयत् यस्मात् vवितक्षत् विविधं तष्टवान् तस्मात् स दासः vस्वयं स्वकीयमेव शिरस्तक्षतु। न केवलं शिर एव अपि तु मदीयम् vउरः वक्षःस्थलम्[2] vअंसौ च vअघ हतवान् विदारितवानित्यर्थः ॥ हन्तेर्लुङि छान्दसमेतद्रूपम् ॥ ततः स्वकीयमुरः अंसावपि स्वशस्त्रेणैव तथा कृतवान्। तद्युवयोर्माहात्म्यमिति भावः ॥

दीर्घतमा मामतेयो जुजुर्वान्दशमे युगे ।
अपामर्थं यतीनां ब्रह्मा भवति सारथिः ॥ ६ ॥

दीर्घऽतमाः । मामतेयः । जुजुर्वान् । दशमे । युगे ।
अपाम् । अर्थम् । यतीनाम् । ब्रह्मा । भवति । सारथिः ॥ ६ ॥

vदीर्घतमाः एतन्नामा महर्षिः स च vमामतेयः ममतायाः पुत्रः vदशमे[3] vयुगे दशयुगपर्यन्तं[3] महानुभावयोरश्विनोः प्रभावात् पूर्वोक्ताद्दुःखाद्विमुक्तोऽत्यन्तसुखी स्वपुत्रभार्यादिभिः सहितो जीवितवान्। दशमे युगे अतीते सति vजुजुर्वान् जीर्णः[4] वलीपलितगात्रो बभूव। एवंभूतः सन् vअर्थं पुरुषैरर्थ्यमानं कर्मफलं स्वर्गादिकं vयतीनां प्राप्नुवतीनाम् vअपाम् अप्कार्याणां प्रजानाम्। यद्वा । अपाम् अपसां कर्मणाम् अर्थं प्रयोजनं यतीनां तासां प्रजानाम्। vब्रह्मा ब्रह्मसदृशः[5] परिवृढः vभवति। किंच vसारथिः तद्वन्निर्वाहको भवति[5] देवो भवतीत्यर्थः[6]। एवमस्य वृत्तान्तं मन्त्रोऽनुवदति। स्वयं वा स्वात्मानं पारोक्ष्येण[7] अश्विनोर्महानुभावत्वं प्रकटयितुं ब्रवीति ॥ ॥ १ ॥

' प्र द्यावा ' इति पञ्चर्चं तृतीयं सूक्तं दैर्घतमसं जागतं द्यावापृथिव्यम्। अनुक्रान्तं च–' प्र द्यावा पञ्च द्यावापृथिव्यं तु जागतं तु ' इति ॥ अग्निष्टोमे पृष्ठ्यस्य षष्ठेऽहनि च द्यावापृथिव्यनिविद्धानमेतत् सूक्तम्। तथा च सूत्रं[8]–' प्र द्यावेति दैर्घतमसम् ' ( आश्व. श्रौ. ५. १८ ) इति ॥ आद्या द्यावा-पृथिव्ये पशौ हविषो याज्या। तथा च सूत्रितं–' प्र द्यावा यज्ञैः पृथिवी ऋतावृधा मृळा नो रुद्रोत नो मयस्कृधीति द्वे ' ( आश्व. श्रौ. ३. ८ ) इति ॥

---

१. क्ष-ङ-ज्ञ१-ञ-ट–न गरन्। २. क्ष-ञ-ट–वक्षःस्थानम्। ३. क्ष-ञ-ट–दशमे युगपर्यन्ते। ४. क्ष-ञ-ट–जूर्णः। ५. क्ष-ज्ञ१-ञ-ट–ब्रह्मसदृशो भवति यद्वा परिवृढः सारथिर्भवति सारथिवन्निर्वाहको भवति। ६. क्ष-ङ-ञ-ट–भवतीत्यर्थः यद्वा दशयुगपर्यन्तं जीवन् उक्तरूपेण पुरुषार्थसाधकोऽभवत्; ज्ञ१–यद्वा जीवन् उत्तररूपेण पुरुषार्थसाधकोऽभवत्। ७. क्ष-ञ-ट–परोक्षेण। ८. क्ष-ज्ञ-ज्ञ१-ञ-ट–सूत्रितम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्र द्यावा यज्ञैः पृथिवी ऋतावृधा मही स्तुषे विदथेषु प्रचेतसा ।
देवेभिर्ये देवपुत्रे सुदंससेत्था धिया वार्याणि प्रभूषतः ॥ १ ॥

प्र । द्यावा । यज्ञैः । पृथिवी इति । ऋतऽवृधा । मही इति । स्तुषे । विदथेषु । प्रऽचेतसा ।
देवेभिः । ये इति । देवपुत्रे इति देवऽपुत्रे । सुऽदंससा । इत्था । धिया । वार्याणि । प्रऽभूषतः ॥१॥

[v]द्यावा [v]पृथिवी द्यावापृथिव्यौ ॥ ' दिवो द्यावा ' इति द्यावादेश आद्युदात्तः । पृथिवीशब्दो ङीषन्तोऽन्तोदात्तः । ' देवताद्वन्द्वे च ' इति उभयपदप्रकृतिस्वरत्वम् । समासमध्ये पदान्तरपाठश्छान्दसः ॥ अहं यजमानः [v]यज्ञैः यागैस्तत्प्रदानैः निमित्तभूतैः हविष्प्रदानार्थं [v]प्र [v]स्तुषे प्रकर्षेण स्तौमि ॥ पुरुषव्यत्ययः ॥ कीदृश्यौ ते । [v]ऋतावृधा यज्ञस्य[1] वर्धयित्र्यौ [v]मही महत्यौ [v]विदथेषु यागेषु [v]प्रचेतसा प्रकर्षेण अस्मांश्चेतयित्र्यौ अस्माभिश्चेतयितव्ये वा । ईदृश्यौ स्तुषे । अनयोः कोऽतिशय इति उच्यते । [v]ये द्यावापृथिव्यौ [v]देवेभिः यजमानैः [v]देवपुत्रे देवा यजमानाः पुत्रस्थानीयाः शुश्रूषका ययोस्ते तादृश्यौ । यद्वा । देवेभिर्विशिष्टे । [v]सुदंससा । दंस इति कर्मनाम । शोभनकर्मोपेते । [v]इत्था सत्यम् । इत्थेति सत्यनाम, ' सत्रा इत्था ' (नि. ३. १०. ५) इति तन्नामसु पाठात् । सत्यं [v]धिया अस्मदनुग्रहबुद्ध्या [v]वार्याणि वरणीयानि धनानि अस्मभ्यं [v]प्रभूषतः अलंकुरुतः दत्त इत्यर्थः । यद्वा । वार्याणि हवींषि धिया कर्मणा निमित्तेन कर्मसमाप्त्यर्थं प्रभूषतः प्रकर्षेण स्वीकुरुतः ॥

उत मन्ये पितुरद्रुहो मनो मातुर्महि स्वतवस्तद्वचीमभिः ।
सुरेतसा पितरा भूम चक्रतुरुरु प्रजाया अमृतं वरीमभिः ॥ २ ॥

उत । मन्ये । पितुः । अद्रुहः । मनः । मातुः । महि । स्वऽतवः । तत् । हवीमऽभिः ।
सुऽरेतसा । पितरा । भूम । चक्रतुः । उरु । प्रऽजायाः । अमृतम् । वरीमऽभिः ॥ २ ॥

[v]उत अपि च [v]पितुः पितृस्थानीयायाः पाल्याः [v]अद्रुहः अद्रोग्धुः । न हि कदाचित् पिता स्वपुत्रादये द्रुह्यति । तादृश्याः पृथिव्याः [v]स्वतवः स्वायत्तं बलं स्वयमेवास्मदनुग्रहाय त्वरमाणम् अत एव [v]महि महत् [v]तत् तादृशमनुग्रहयुक्तं [v]मनः चित्तं [v]हवीमभिः हवनैराह्वानैः [v]मन्ये जानामि प्रसादयामीत्यर्थः । यद्वा । तत्तादृशमुक्तलक्षणं मनो हवीमभिर्हवनैर्महि मन्ये अतिमहत् प्रवृद्धं मन्ये । तथा [v]मातुः सर्वस्योत्पादयितुरन्तरिक्षस्य द्युलोकस्य । ' मातान्तरिक्षं निर्मीयन्तेऽस्मिन्भूतानि ' ( निरु. २. ८ ) इति निरुक्तम् । यद्वा । पितुर्द्युलोकस्य मातुर्भूम्याः । ' द्यौर्वः पिता पृथिवी माता ' ( ऋ. सं. १. १९१. ६ ) इति श्रुतेः । तत्तादृशमुक्तलक्षणं मनो मन्ये । द्यावापृथिव्योर्मनोऽस्मदाह्वानैः प्रीणयामीत्यर्थः । किंच [v]पितरा माता च पिता च पितरौ द्यावापृथिव्यौ [v]सुरेतसा शोभनसामर्थ्येन [v]प्रजायाः यजमानादिरूपायाः [v]वरीमभिः वरिष्ठैः रक्षणविशेषैः [v]भूम बहुतरम् [v]उरु विस्तीर्णम् [v]अमृतम् अमरणभूतम्[2] अभिलषितं [v]चक्रतुः कुरुतः ॥

---

१. ज्ञ१–ऋतस्य । २. क्ष-ज्ञ१-न-ट–अमरणरूपम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ते सूनवः स्वपसः सुदंससो मही जज्ञुर्मातरा पूर्वचित्तये ।
स्थातुश्च सत्यं जगतश्च धर्मणि पुत्रस्य पाथः पदमद्वयाविनः ॥ ३ ॥

ते । सूनवः । सुऽअपसः । सुऽदंससः । मही इति । जज्ञुः । मातरा । पूर्वऽचित्तये ।
स्थातुः । च । सत्यम् । जगतः । च । धर्मणि । पुत्रस्य । पाथः । पदम् । अद्वयाविनः ॥३॥

ते प्रसिद्धाः सूनवः युवाभ्यामुत्पन्नाः पुत्रस्थानीयाः प्रजाः स्वपसः शोभनकर्माणः सुदंससः शोभनदर्शनाः युवां मही महत्यौ मातरा मातृवद्धितकारिण्यौ जज्ञुः जानन्ति महानुभावतामवगच्छन्ति । किमर्थम् । पूर्वचित्तये प्रथमबुद्धये अनुग्रहरूपायै । किंच ते द्यावापृथिव्यौ स्थातुः स्थावरस्य जगतः जङ्गमस्य पुत्रस्य पुत्रस्थानीयस्य उभयविधस्य जगतः अद्वयाविनः न विद्यते द्वयं यस्य तादृशस्य । स्वजीवनाय युष्मद्व्यतिरिक्तमजानतः इत्यर्थः । ईदृशस्य धर्मणि धारणे रक्षणे निमित्तभूते सति पदं[1] स्थानं सत्यम् अवाध्यं पाथः रक्षथः दत्थ इत्यर्थः । यद्वा । ते प्रसिद्धाः सूनवः उत्पाद्यमानाः[2] स्वपसः शोभनप्रकाशादिकर्माणः सुदंससः शोभनदर्शनाः सुष्ठु उपक्षयन्तः[3] वा आत्मानं स्वव्यापाराय ईदृशा रश्मयो मही महत्यौ द्यावापृथिव्यौ पूर्वचित्तये प्राणिनां पूर्वज्ञानाय जज्ञुः जातवन्तः[4] द्यावापृथिव्योरन्तराले व्याप्ता इत्यर्थः । किंच स्थातुर्जगतश्च[5] धर्मणि धारणे तदर्थम् अद्वयाविनो मार्गद्वयरहितस्य ॥ 'बहुलं छन्दसि' इति द्वयशब्दात् मत्वर्थीयो विनिः । 'अन्येषामपि दृश्यते' इति दीर्घः ॥ पुत्रस्य युष्मत्पुत्रस्थानीयस्यादित्यस्य पदं मार्गं सत्यं पाथः अवश्यं रक्षथः ॥

ते मायिनो ममिरे सुप्रचेतसो जामी सयोनी मिथुना समोकसा ।
नव्यंनव्यं तन्तुमा तन्वते दिवि समुद्रे अन्तः कवयः सुदीतयः ॥ ४ ॥

ते । मायिनः । ममिरे । सुऽप्रचेतसः । जामी इति ।
सयोनी इति सऽयोनी । मिथुना । सम्ऽओकसा ।
नव्यम्ऽनव्यम् । तन्तुम् । आ । तन्वते । दिवि । समुद्रे । अन्तरिति । कवयः । सुऽदीतयः ॥४॥

ते प्रसिद्धे द्यावापृथिव्यौ मायिनः । माया प्रज्ञा । स्वविषयप्रज्ञावन्तः[6] प्रज्ञोपलक्षितकर्मवन्तो वा सुप्रचेतसः सुष्ठु प्रकर्षेण चेतितुं शक्ताः रश्मयः ममिरे मिमते प्रमाणेन परिच्छिन्दन्ति । कीदृश्यौ ते । जामी परस्परं भगिनी[7] । एतत्कुतः[8] इति चेत् उच्यते । सयोनी समानोत्पत्तिस्थाने मिथुना प्राण्युत्पत्तये मिथुनभूते परस्परमवियुक्ते इत्यर्थः । समोकसा समानस्थाने । द्युपृथिव्योः एकस्मिन्नेव अवकाशरूपे आकाशेऽवस्थानात् । समीचीनस्थाने वा । किंच कवयः मेधाविनः स्वव्यापारविषयज्ञानवन्तः सुदीतयः सुष्ठुद्योतना रश्मयः दिवि द्योतमाने समुद्रे अन्तरिक्षे अन्तः मध्ये । समुद्रशब्दः

---

१. क्ष-ञ-ट–पदम् आस्पदम् । २. क्ष-ञ-ट–उत्पद्यमानाः । ३. क्ष-ङ-ञ-ट–उपक्षपयन्तः । ४. क्ष-ञ्ञ-ञ-ट–ज्ञातवन्तः । ५. क्ष-ञ-ट–स्थातुश्च जगतश्च । ६. क्ष-ङ-ञ्ञ-ञ्ञ१-ञ-ट–स्वविषयप्रज्ञानवन्तः । ७. क्ष-ङ-ञ्ञ-ञ्ञ१-ञ-ट–भगिनीस्थानीये । ८. क्ष-ञ-ट–तत्कुतः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अन्तरिक्षनामसु पाठात् बहुवचनः । स चैवं यास्केन निरुक्तः—' समुद्रः कस्मात्समुद्द्रवन्त्यस्माद्रापः समभिद्रवन्त्येनमापः संमोदन्तेऽस्मिन्भूतानि समुदको भवति समुनत्तीति वा ' ( निरु. २. १० ) इति । Vनव्यंनव्यं[1] Vतन्तुं ततनीयं विस्तारणीयम् । जात्येकवचनम् । रश्मीन् Vआ Vतन्वते समन्ताद्विस्तारयन्ति ॥

तद्राधो अद्य सवितुर्वरेण्यं वयं देवस्य प्रसवे मनामहे ।
अस्मभ्यं द्यावापृथिवी सुचेतुना रयिं धत्तं वसुमन्तं शतग्विनम् ॥ ५ ॥

तत् । राधः । अद्य । सवितुः । वरेण्यम् । वयम् । देवस्य । प्रऽसवे । मनामहे ।
अस्मभ्यम् । द्यावापृथिवी इति । सुऽचेतुना । रयिम् । धत्तम् । वसुऽमन्तम् । शतऽग्विनम् ॥५॥

Vवयं यजमानाः Vसवितुः सर्वस्य प्रसवितुः Vदेवस्य आदित्यस्य अन्तर्यामिरूपिणः Vप्रसवे अनुज्ञायां सत्यां Vतत् तादृशं Vवरेण्यं वरणीयं Vराधः पुरुषार्थसाधनसमर्थं गवादि धनं Vमनामहे याचामहे ॥ मन्यतिर्याच्ञाकर्मा । छान्दसः शप् ॥ यद्वा । पुनःपुनरभ्यस्यामः । लप्सीमहीति[2] यावत् ॥ ' ज्ञा अभ्यासे ' । व्यत्ययेनात्मनेपदम् । शपि पाघ्रादिना मनादेशः ॥ किंच Vअस्मभ्यं Vद्यावापृथिवी द्यावापृथिव्यौ Vसुचेतुना शोभनचेतनेन अस्मदनुग्रहबुद्ध्या Vरयिं धनं Vधत्तं दत्तम् । कीदृशम् । Vवसुमन्तं निवासयोग्यगृहादिविशिष्टं Vशतग्विनं शतसंख्याकगवादिविशिष्टम् ॥ ॥ २ ॥

' ते हि ' इति पञ्चर्चं चतुर्थं सूक्तं दैर्घतमसं जागतं द्यावापृथिव्यम् । ' ते हि ' इत्यनुक्रान्तम् ॥ चतुर्विंशेऽहनि वैश्वदेवशस्त्रे द्यावापृथिव्यनिविद्धानमेतत्सूक्तं—' ते हि द्यावापृथिवी यज्ञस्य वो रथ्यमिति वैश्वदेवम् ' ( आश्व. श्रौ. ७ ४ ) इति सूत्रितत्वात् । तथा पृष्ठ्याभिप्लवषडहयोर्द्वितीयेऽहनि वैश्वदेवे द्यावापृथिव्यं निविद्धानीयं[3], ' चातुर्विंशिकं तृतीयसवनम् ' ( आश्व. श्रौ. ७. ६ ) इति आभिप्लविके द्वितीयेऽहनि अतिदिष्टत्वात् । आभिप्लविकात् द्वितीयादह्नः पृष्ठ्यस्य द्वितीयेऽहनि एतत्सूक्तमतिदेशतः प्राप्तं, ' पृष्ठ्यस्याभिप्लवेनोक्ते अहनी आद्ये आद्याभ्याम् ' ( आश्व. श्रौ. ७. १० ) इति सूत्रितत्वात् । प्रथमा आश्विनशस्त्रे विनियुक्ता । ' संस्थितेष्वाश्विनाय[4] ' इत्यत्र सूत्रितं—' ते हि द्यावापृथिवी विश्वशंभुवा विश्वस्य देवीमृचयस्य ' ( आश्व. श्रौ. ६. ५ ) इति ॥

ते हि द्यावापृथिवी विश्वशंभुव ऋतावरी रजसो धारयत्कवी ।
सुजन्मनी धिषणे अन्तरीयते देवो देवी धर्मणा सूर्यः शुचिः ॥ १ ॥

ते इति । हि । द्यावापृथिवी इति । विश्वऽशंभुवा । ऋतवरी इत्यृतऽवरी ।
रजसः । धारयत्कवी इति धारयत्ऽकवी ॥ सुजन्मनी इति सुऽजन्मनी ।
धिषणे इति । अन्तः । ईयते । देवः । देवी इति । धर्मणा । सूर्यः । शुचिः ॥ १ ॥

---

१. क्ष-ञ-ट—नव्यंनव्यं नवंनवम् । २. क्ष-ञ-ट—लभेमहीति । ३. क्ष-ञ-ट—निविद्धानम् ।
४. क्ष-ञ-ट—संस्थितेष्वाश्विनाय स्तुवते ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]ते [V]हि ते खलु प्रसिद्धे [V]द्यावापृथिवी [V]अन्तः तयोरन्तराले [V]शुचिः शुद्धो विश्वस्य शोचयिता वा [V]देवः दीप्यमानः [V]सूर्यः [V]धर्मणा प्रकाशोदकदानादिधारणेन युक्तः सन् [V]ईयते सर्वदा गच्छति ॥ 'ईङ् गतौ'। दैवादिकः ॥ तादृशं कर्म युवयोरनुग्रहादिति स्तुतिः। कीदृश्यौ ते। [V]विश्वशंभुवा। विश्वं सुखभावयितृ ययोः ते विश्वशंभुवा। विश्वस्य सुखयित्र्याविस्यर्थः। [V]ऋतावरी ऋतवत्यौ ॥ ऋतशब्दात् 'छन्दसीवनिपौ०' इति वनिप्। 'वनो र च' इति ङीब्रेफौ ॥ [V]रजसः उदकस्य उदकोत्पत्तौ। 'उदकं रज उच्यते' (निरु. ४. १९) इति निरुक्तम्। [V]धारयत्कवी अकृच्छ्रेण धारकं[1] कवि[1] ययोस्ते तादृश्यौ। उदकोत्पादनाय अप्रयत्नवत्यौ[2] इत्यर्थः। यद्वा। धारयत्कविर्मनीषी आदित्यो ययोस्ते तादृश्यौ। वृष्टयुदकधारयत्सूर्योपेते[3] इत्यर्थः। [V]सुजन्मनी शोभनजन्मवत्यौ [V]धिषणे धर्षणोपेते स्वव्यापारेषु प्रगल्भे इत्यर्थः। [V]देवी द्योतमाने। अत्र यद्यपि धिषणे इत्येतत् 'धिषणे रोदसी' (नि. ३. ३०. ३) इति तन्नामसु उक्तत्वात् द्यावापृथिवीनाम, तथापि द्यावापृथिवी इत्यस्य विद्यमानत्वात् यौगिकं[4] द्रष्टव्यम् ॥

उरुव्यचसा महिनी असश्चता पिता माता च भुवनानि रक्षतः ।
सुधृष्टमे वपुष्ये न रोदसी पिता यत्सीमभि रूपैरवासयत् ॥ २ ॥

उरुऽव्यचसा । महिनी इति । असश्चता । पिता । माता । च । भुवनानि । रक्षतः ।
सुधृष्टमे इति सुऽधृष्टमे । वपुष्ये इति । न । रोदसी इति ।
पिता । यत् । सीम् । अभि । रूपैः । अवासयत् ॥ २ ॥

[V]उरुव्यचसा प्रभूतव्यचनवत्यौ अतिविस्तीर्णे [V]महिनी अत एव महत्यौ [V]असश्चता असज्जमाने परस्परवियुक्ते इत्यर्थः। [V]पिता पालयित्री द्यौः [V]माता निर्मात्री पृथिवी [V]च इत्युभे [V]भुवनानि भूतजातानि [V]रक्षतः पालयतः। 'द्यौष्पितः पृथिवि मातः' (ऋ. सं. ६. ५१. ५) इत्यादिश्रुतेर्मातापितृरूपत्वम्। किंच [V]सुधृष्टमे अतिशयेन धृष्टे ॥ छान्दसस्तकारलोपः ॥ प्रगल्भे [V]रोदसी द्यावापृथिव्यौ [V]वपुष्ये [V]न वपुषो हिते इव। प्राणिनां पितराविव शरीररक्षके इत्यर्थः। तदेवोपपादयति। [V]यत् यस्मात् [V]सीं सर्वतः [V]पिता पितृस्थानीया द्यौः [V]रूपैः निरूपणसाधनैः प्रशस्तैः प्रकाशैः निरूप्यमाणैर्वृष्ट्यादिभिर्वा [V]अभि [V]अवासयत् अभिवासयति अधितिष्ठति तस्मात् पिता माता च भुवनानि रक्षतः ॥

स वह्निः पुत्रः पित्रोः पवित्रवान्पुनाति धीरो भुवनानि मायया ।
धेनुं च पृश्निं वृषभं सुरेतसं विश्वाहा शुक्रं पयो अस्य दुक्षत ॥ ३ ॥

सः । वह्निः । पुत्रः । पित्रोः । पवित्रऽवान् । पुनाति । धीरः । भुवनानि । मायया ।
धेनुम् । च । पृश्निम् । वृषभम् । सुऽरेतसम् । विश्वाहा । शुक्रम् । पयः । अस्य । दुक्षत ॥३॥

---

१. क्ष-ङ-ञ१-ञ-ट-धारकः कविः। २. क्ष-ञ-ट-अप्रयत्नवती; ङ-प्रयत्नवत्यौ; ञ१-प्रयत्नवती। ३. क्ष-ञ-ट-वृष्टयुदकयाचित्सूर्योपेते; ङ-ञ१-वृष्टयुदकयोचितसूर्योपेते; ञ-ञ-वृष्टयुदकधारिचितसूर्योपेते। ४. क्ष-ङ-ञ१-ञ-ट- यौगिकं पदम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[V]पित्रोः मातापित्रोर्द्यावापृथिव्योः ॥ ' पिता मात्रा ' इति पिता शिष्यते । ' उदात्तयणः° ' इति पितुर्विभक्तिरुदात्ता ॥ [V]पुत्रः पुरुत्राता पुत्रस्थानीयः आदित्यः[1] [V]पवित्रवान् पावनरश्मियुक्तः [V]धीरः[2] धीमान् [V]सः [V]वह्निः फलस्य वोढा धारकः सन् [V]मायया प्रज्ञया स्वकीयया [V]भुवनानि भूतजातानि [V]पुनाति पावयति प्रकाशयतीत्यर्थः । किंच स एव पुत्रः [V]पृश्निं शुक्लवर्णां [V]धेनुं प्रीणयित्रीं भूमिं [V]सुरेतसं शोभनसामर्थ्यं शोभनोदकं वा [V]वृषभं सेक्तारं द्युलोकं [V]च मायया पुनाति प्रकाशयतीत्यर्थः । कदा । [V]विश्वाहा सर्वाण्यप्यहानि सर्वकालमित्यर्थः । किंच [V]अस्य द्युलोकस्य । यद्वा ॥ कर्मणि षष्ठी ॥ इमं[3] द्युलोकम् । [V]शुक्रं [V]पयः दीप्तं पयःसदृशमुदकं [V]धुक्षत दोग्धि ॥ दुहेश्छान्दसे लुङि ' शल इगुपधादनिटः क्सः ' इति च्लेः क्सादेशः ॥ ईदृशो महानुभावः आदित्यस्तयोः पुत्रः इति द्यावापृथिव्योः स्तुतिः ॥

**अयं देवानामपसामपस्तमो यो जजान रोदसी विश्वशंभुवा ।**
**वि यो ममे रजसी सुक्रतूययाजरेभिः स्कम्भनेभिः समानृचे ॥ ४ ॥**

अयम् । देवानाम् । अपसाम् । अपःऽतमः । यः । जजान । रोदसी इति । विश्वऽशंभुवा ।
वि । यः । ममे । रजसी इति । सुक्रतुऽयया । अजरेभिः । स्कम्भनेभिः । सम् । आनृचे ॥४॥

पूर्वं पुत्रमाहात्म्येनैते प्रशस्य इदानीं स्वोत्पादकस्तुत्या प्रशंसति । [V]अयं [V]देवानां मध्ये देवतमः [V]अपसामपस्तमः । अप इति कर्मनाम । तेन तद्वान् लक्ष्यते । कर्मवतां मध्ये प्रकृष्टकर्मा । अयमित्युक्तं क इत्याह । [V]यः देवः [V]विश्वशंभुवा सर्वप्रकारेण भूतानां सुखस्य भावयित्र्यौ [V]रोदसी द्यावापृथिव्यौ महानुभावे [V]जजान उत्पादितवान् । न केवलमुत्पादनमात्रं अपि तु [V]यः देवः [V]रजसी रञ्जनात्मिके द्यावापृथिव्यौ । रजसी इति द्यावापृथिव्योर्नाम, 'रजसी सदसी' (नि. ३. ३०. ८) इति तन्नामसु पाठात् । उक्तरूपे[4] [V]वि [V]ममे विशेषेण[5] परिच्छिनत्ति । किं स्वोपभोगाय नेत्याह । [V]सुक्रतूयया शोभनकर्मेच्छया । येन कर्मणा प्राणिनां सुखं संभवति तादृक्कर्मेच्छया । अथवा एतदुत्तरत्र संबध्यते । सुक्रतूयया उक्तेन निमित्तेन इमे द्यावापृथिव्यौ [V]अजरेभिः अजीर्णैर्दृढतरैः [V]स्कम्भनेभिः गतिप्रतिबन्धसाधनैः शङ्कुभिः [V]समानृचे सम्यक् सर्वतः पूजितवान् स्थापितवानित्यर्थः ॥ ' ऋच स्तुतौ ' । लिटि रेफसामान्यात्[6] द्विहल्त्वमस्तीति ' तस्मान्नुड्द्विहलः ' इत्यभ्यासस्य नुट् । यस्मादेवं तस्मादयमेव देवः अयमेव अपस्तमः[7] इत्येवंमहानुभावेन परमेश्वरेणोत्पन्ने इति स्तुतिः ॥

**ते नो गृणाने महिनी महि श्रवः क्षत्रं द्यावापृथिवी धासथो बृहत् ।**
**येनाभि कृष्टीस्ततनाम विश्वहा पनाय्यमोजो अस्मे समिन्वतम् ॥ ५ ॥**

ते इति । नः । गृणाने इति । महिनी इति । महि ।
श्रवः । क्षत्रम् । द्यावापृथिवी इति । धासथः । बृहत् ॥ येन । अभि ।
कृष्टीः । ततनाम । विश्वहा । पनाय्यम् । ओजः । अस्मे इति । सम् । इन्वतम् ॥ ५ ॥

---

१. क्ष-ञ१-ञ-ट–आदित्यः वायुर्वा । २. क्ष-ङ-ञ१-ञ-ट–अथवा वृष्टिलक्षणैः धीरः । ३. ङ-ञ१-अमुम् । ४. ख-ज-ज्ञ-त-व–उरुरूपे । ५. ङ-ञ१–विशेषेण प्रमाणेन । ६. क्ष-ञ-ट–श्रुतिसामान्यात् । ७. क्ष-ङ-ञ१-ञ-ट–उपास्यः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vते प्रसिद्धे हे vद्यावापृथिवी द्यावापृथिव्यौ vगृणाने अस्माभिः स्तूयमाने सत्यौ ॥ कर्मणि कर्तृप्रत्ययः ॥ vमहि महदतिप्रभूतं vश्रवः[1] सर्वत्र प्रसिद्धमन्नं सर्वत्र श्रूयमाणां कीर्तिं वा vनः अस्मभ्यं vधासथः धत्तम् ॥ दधातेर्लेटयडागमः । ' सिब्बहुलम्° ' इति सिप् ॥ तथा vबृहत्[2] अतिप्रभूतं vक्षत्रं बलं धासथः । तदेव विशेष्यते । vयेन अन्नबलेन[3] vविश्वहा सर्वेष्वपि अहःसु vकृष्टीः पुत्रादिरूपाः प्रजाः vअभि vततनाम अभितो विस्तारयाम ॥ तनोतेर्लोटि छान्दसो विकरणस्य श्लुः । 'आडुत्तमस्य०' इति आडागमः । तस्य ' छन्दस्युभयथा ' इति आर्धधातुकत्वात् अभ्यस्ताद्युदात्तत्वाभावे धातुस्वरः ॥ कृष्टय इति मनुष्यनाम, ' कृष्टयः चर्षणयः ' ( नि. २. ३. ७ ) इति तन्नामसु पाठात् । किंच vपनाय्यं स्तुत्यम् vओजः शरीरबलम् vअस्मे अस्मासु सम्यक् vइन्वतं व्याप्नुतं प्रवर्धयतमित्यर्थः । इन्वतिर्व्याप्तिवचनः, ' इन्वति ननक्ष ' ( नि. २. १८. १ ) इति तन्नामसु पाठात् ॥ ॥ ३ ॥

' किमु श्रेष्ठः ' इति चतुर्दशर्चं पञ्चमं सूक्तं दैर्घतमसमार्भवम् । अन्त्या त्रिष्टुप् शिष्टास्त्रिष्टुबन्त-परिभाषया जगत्यः । अनुक्रान्तं च–' किमु श्रेष्ठः पञ्चनार्भवं त्रिष्टुबन्तम् ' इति । व्यूळ्हे दशरात्रे षष्ठेऽहनि वैश्वदेवशस्त्रे आर्भवं निविद्धानं द्विप्रतीकम् । तत्र ' किमु श्रेष्ठः ' इत्येतदन्त्यवर्जं प्रतीकम् । ' व्यूळ्हश्चेत् ' इति खण्डे सूत्रितं–' किमु श्रेष्ठ उप नो वाजा इति त्रयोदशार्भवं चतस्रश्च ' ( आश्व. श्रौ. ८. ८ ) इति ॥

**किमु श्रेष्ठः किं यविष्ठो न आजगन्किमीयते दूत्यं१ कद्यदूचिम ।**
**न निन्दिम चमसं यो महाकुलोऽग्ने भ्रातर्द्रुण इद्भूतिमूदिम ॥ १ ॥**

किम् । ऊँ इति । श्रेष्ठः । किम् । यविष्ठः । नः । आ । अजगन् ।
किम् । ईयते । दूत्यम् । कत् । यत् । ऊचिम ॥ न । निन्दिम ।
चमसम् । यः । महाऽकुलः । अग्ने । भ्रातः । द्रुणः । इत् । भूतिम् । ऊदिम ॥ १ ॥

ऋभवो नाम सुधन्वनस्त्रयः पुत्रा ऋभुर्विभ्वा वाज इति । ते च मनुष्याः सन्तः सुकर्मणा देवत्वं प्राप्य कदाचित् कर्मकाले सोमपानाय प्रवृत्ताः । तान् प्रति देवैः प्रेरितोऽग्निः परस्परसमानरूपान् दृष्ट्वा स्वयमपि तदाकारं[4] धृत्वा[4] तेषु मध्ये स्वयं चतुर्थः सन् पातुं प्रवृत्तः । ते च ऋभवः आगतं तं समानरूपमवलोक्य विवेक्तुमसमर्थाः परस्परमेवं संदिहते । अयं vकिमु vश्रेष्ठः किं नु खलु अस्मत्तोऽयं प्रशस्यतमो वयसा श्रेष्ठः सोऽस्मान् vआजगन् आगमत् प्राप्तः ॥ गमेर्लङि छान्दसः शपः श्लुः । हल्ङ्यादिलोपे ' मो नो धातोः ' इति नत्वम् । अजगन्निति गतिकर्मा, ' अगन् अजगन् ' ( नि. २. १४.११२) इति तन्नामसु पाठात् ॥ vकिं vयविष्ठः किं वा अस्माकं युवतमोऽस्मत्तः कनीयान् आजगन्[6] प्राप्तः । vकिं वा vदूत्यं दूतकर्म देवसंबन्धि vईयते गच्छति । देवैः प्रेरितः[7] दूतोऽस्मानागतो वा ॥ ' दूतस्य भागकर्मणी ' इति यत् ॥ vयदूचिम यदेतत् ब्रूमः तत् vकत् । कथं निश्चेतव्यमित्यर्थः । वयं तावत् त्रय एव इदानीं[8] चत्वारः समानरूपा वर्तामहे तस्मादयमधिकः किमु श्रेष्ठ इति विचिकित्सा ।

---

१. क्ष-ञ-ट–श्रेष्ठम् । २. क्ष-ङ-च-झ-झ१-ञ-ट–बृहत् महत् । ३. क्ष-ङ-झ१-ञ-ट–अन्नेन बलेन । ४. ङ-झ१–तदाकारो भूत्वा । ५. क्ष-ञ-ट–ज्येष्ठः । ६. क्ष-ञ-ट–नः आजगन् । ७. झ१–प्रेषितः । ८. ङ–इदानीं तु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

एवं संदिह्य कथंचित् स्वतोऽन्यं[1] निश्चित्य तं प्रति आपरोक्ष्येण ब्रुवते । हे Vअग्ने Vभ्रातः भ्रातृवद्भागार्ह । भ्राता यथा बलात् स्वकीयभागं स्वीकरोति तद्वत् समानरूपमाश्रित्य बलात्[2] चमसपानाय[2] प्रवृत्त इति भ्रातरित्युक्तम् । हे तादृशाग्ने Vचमसं Vन Vनिन्दिम । अधिकः समागत इति पानमकृत्वा चमसं न दूषयामः ॥ ' णिदि कुत्सायाम् ' । ' छन्दसि वेति वक्तव्यम् ' इति द्विर्वचनाभावः ॥ अदूष्यत्वे कारणमाह । Vयः चमसः Vमहाकुलः महाकुलोत्पन्नः त्वष्टा निर्मितत्वात् । वक्ष्यति च ' त्वष्टा ग्नास्वन्त-र्न्यानजे ' ( ऋ. सं १. १६१. ४ ) इति । अतः कारणात्[3] Vद्रुणः । विकारे प्रकृतिशब्दः । ततश्च तत्स्थे तच्छब्दः । इच्छब्दोऽवधारणे । दारुविकारचमसस्य Vभूतिं प्राप्तिम् Vऊदिम ब्रूमः ॥ विदेश्छान्दसे लिटि ' वचिस्वपि° ' इति संप्रसारणम् । क्रादिनियमात् इट् ॥

एकं॑ चम॒सं च॒तुरः॑ कृणोतन॒ तद्वो॑ देवा अब्रुवन्तद्व॒ आग॑मम् ।
सौध॑न्वना॒ यद्ये॒वा क॑रि॒ष्यथ॑ सा॒कं दे॒वैर्य॒ज्ञिया॑सो भविष्यथ ॥ २ ॥

एक॑म् । च॒म॒स॒म् । च॒तुरः॑ । कृ॒णो॒त॒न॒ । तत् । वः॒ । दे॒वाः॒ । अ॒ब्रु॒व॒न् । तत् । वः॒ । आ । अ॒ग॒म॒म् ।
सौध॑न्वनाः । यदि॑ । ए॒व । क॒रि॒ष्यथ॑ । सा॒कम् । दे॒वैः । य॒ज्ञि॒या॑सः । भ॒वि॒ष्य॒थ॒ ॥ २ ॥

एवं पृष्टोऽग्निस्तान् प्रत्युवाच । हे Vसौधन्वनाः सुधन्वनः पुत्राः यूयम् Vएकं Vचमसं त्वष्टा संपादितं पूर्वमेकमेव[4] सन्तं चमसं[5] Vचतुरः Vकृणोतन चतुःसंख्याकान् कुरुत ॥ ' चतुरः शसि ' ( पा. सू. ६. १. १६७ ) इत्यन्तोदात्तत्वम् । पूर्ववत् तनप् ॥ यथा उपरितने ' ज्येष्ठ आह चमसा द्वा करेति ' इत्युपक्रम्य ' कनिष्ठ आह चतुरस्करेति ' ( ऋ. सं. ४. ३३. ५ ) इति चतुष्कं[6] निर्धारितम् । न केवलमहमेव ब्रवीमि किंतु Vवः युष्मान् प्रति Vतत् उक्तं चतुर्धाकरणरूपं कर्म उत्तरत्र वक्ष्यमाणम् अश्व-रथादिकरणरूपं च कर्म Vदेवाः इन्द्रादयः Vअब्रुवन् । देवत्वप्राप्त्युपायत्वेन Vतत् तादृशं कर्म Vवः युष्माकं वक्तुम् अहम् Vआगमम् प्राप्तोऽस्मि । यस्मादेवं तस्माद्यूयं Vयद्येवा Vकरिष्यथ यद्येवं मदुक्त-प्रकारेण[7] कर्तुं शक्नुथ तथा चेत् Vदेवैः Vसाकं सह Vयज्ञियासो Vभविष्यथ[8] । इति तैरुक्तमित्यर्थः ॥

अ॒ग्निं दू॒तं प्रति॒ यदब्र॑वीत॒नाश्वः॑ कर्त्वो॑ र॒थं उ॒तेह कर्त्वः॑ ।
धे॒नुः कर्त्वी॑ यु॒वश॑ा कर्त्वा॒ द्वा तानि॑ भ्रातर॒नु वः॑ कृ॒त्व्येम॑सि ॥ ३ ॥

अ॒ग्नि॒म् । दू॒तम् । प्रति॑ । यत् । अ॒ब्र॒वी॒त॒न॒ । अश्वः॑ । कर्त्वः॑ । र॒थः॑ । उ॒त । इ॒ह । कर्त्वः॑ ।
धे॒नुः । कर्त्वी॑ । यु॒वश॑ा । कर्त्वी॑ । द्वा । तानि॑ । भ्रा॒तः॒ । अनु॑ । वः॒ । कृ॒त्वी । आ । इ॒म॒सि॒ ॥ ३ ॥

हे आगत देव[9] Vअग्निम् अङ्गनादिगुणविशिष्टं Vदूतं दूतकर्म प्राप्तवन्तं त्वां Vप्रति Vयत् यत्कार्यम् Vअब्रवीतन अब्रुवन् ॥ व्यत्ययेन मध्यमः । पूर्ववत् तनप् ॥ किमिति Vअश्वः Vकर्त्वः[9] ।

---

१. क्ष-ञ-ट-स्वान्यम् । २. झ१-बलाच्च सोमपानाय । ३. क्ष-ङ-ञ-ट-कारणात् हे अग्ने । ४. क्ष-झ१ ञ-ट-अपूर्वम् एकमेव चमसम् । ५. क्ष-झ१-ञ-ट-चतुष्टयम् । ६. क्ष-ञ-ट-मदुक्तप्रकारम् । ७. क्ष-ङ-झ१-ञ-ट-भविष्यथ । यज्ञभागयोग्या भविष्यथ । ८. झ१-देवाः । ९. क्ष-ङ-झ१-ञ-ट-' कर्त्वः ' इत्यस्यानन्तरं ' जातावेकवचनम् । अश्वाः कर्तव्याः । कृत्यार्थे तवैकेन् इति त्वन्प्रत्ययः । यद्वा । उत्तरत्र इन्द्रो हरी युयुज इति इन्द्राय वचोयुजा ततक्षुरिति च विनियोगदर्शनात् ' इत्यधिकम् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

एकस्मादश्वादश्वान्तरं कर्तव्यमित्यर्थः । ' अश्वादश्वमतक्षत ' ( ऋ. सं. १. १६१. ७ ) इति वक्ष्यमाणत्वात् ॥ ' कृत्यार्थे[1] तवैकेन्° ' इति त्वन्प्रत्ययः[1] ॥ Vउत अपि च Vरथः Vकर्त्वः कर्तव्यः । Vधेनुः Vकर्त्वा । चर्मरहिता मृता गौः निस्यदोग्ध्री पुनर्नूतना कार्या । तदुत्तरत्र ' निश्चर्मणो गामरिणीत धीतिभिः ' ( ऋ. सं. १. १६१. ७ ) इति वक्ष्यमाणत्वात् । तथा Vद्वा द्वौ पितरौ जीर्णौ सन्तौ पुनः Vयुवशा युवानौ शयानौ प्रकृष्टयौवनोपेतौ Vकर्त्वा कर्तव्यौ । हे Vभ्रातः अग्ने युष्माकं देवानां तैरुक्तानि[2] कर्माणि कृत्वा Vअनु पश्चात् Vकृत्वी कृत्व्या कर्मणा Vएमसि एमः आभिमुख्येन प्राप्नुमः ॥ ' इण् गतौ ' । इदन्तो मसिः[3] ॥ यद्वा । ऋषेरिदं वाक्यम् । हे ऋभवः यूयमागतमग्निं दूतं प्रति यदब्रवीतन यत्कार्यं वक्ष्यमाणरूपं कर्तव्यत्वेन वदथ अङ्गीकुरुथ तानि सर्वाणि संपाद्य हे भ्रातरग्ने कृत्व्या कर्मणैमसीति ब्रूथेत्यृषिराह ॥

चकृवांसं ऋभवस्तदपृच्छत क इदभूद्यः स्य दूतो न आजगन् ।
यदावाख्यच्चमसाञ्चतुरः कृतानादित्त्वष्टा ग्नास्वन्तर्न्यानजे ॥ ४ ॥

चकृऽवांसः । ऋभवः । तत् । अपृच्छत । कः । इत् । अभूत् । यः । स्यः । दूतः ।
नः । आ । अजगन् ॥ यदा । अवऽअख्यत् । चमसान् ।
चतुरः । कृतान् । आत् । इत् । त्वष्टा । ग्नासु । अन्तः । नि । आनजे ॥ ४ ॥

हे Vऋभवः Vतत् कार्यं यथा Vचकृवांसः कृतवन्तो यूयम् Vअपृच्छत प्रश्नं कुरुत ॥ करोतेर्लिटः क्वसुः ॥ अत्र यद्यपि ऋभुरिति त्रयाणां मध्ये एकस्य नाम तथापि तस्य प्राथम्यात् ' छत्त्रिणो गच्छन्ति ' इतिवत् सर्वेऽपि ऋभवः[4] उच्यन्ते । किमिति । Vस्यः सः Vदूतः Vकेदभूत् कुत्र गतः । स इत्युक्तं क इत्याह । Vयः यो दूतः Vनः अस्मान् Vआजगन् आगमत् प्राप्तः । एवंभूते सति Vयदा अयं त्वष्टा Vचतुरः Vकृतान् Vचमसान् Vअवाख्यत्[5] अभिपश्यति[5] ॥ ख्यातेर्लुङि ' अस्यतिवक्तिख्याति° ' इति च्लेः अङादेशः ॥ Vआदित् अनन्तरमेव Vत्वष्टा तस्य चमसस्योत्पादकः एतन्नामको[6] देवः Vग्नासु स्त्रीषु[6] । ' मेना ग्ना इति स्त्रीणाम् ' ( निरु. ३. २१ ) इति निरुक्तम् । Vअन्तः मध्ये Vन्यानजे न्यक्तोऽभूत् । स्वियम् आत्मानम् अमन्यत इत्यर्थः ॥ अञ्जेर्लिटि ' तस्मान्नुड्द्विहलः ' इति नुट् । छान्दसोऽनुनासिकलोपः ॥

हनामैनाँ इति त्वष्टा यदब्रवीच्चमसं ये देवपानमनिन्दिषुः ।
अन्या नामानि कृण्वते सुते सचाँ अन्यैरेनान्कन्याइ३ नामभिः स्परत् ॥ ५ ॥

हनाम । एनान् । इति । त्वष्टा । यत् । अब्रवीत् । चमसम् । ये । देवऽपानम् । अनिन्दिषुः ।
अन्या । नामानि । कृण्वते । सुते । सचा । अन्यैः । एनान् । कन्या । नामऽभिः । स्परत् ॥५॥

---

१. क्ष-ङ-ञ१-अ-ट-' कृत्यार्थे..... प्रत्ययः ' नास्ति. २. क्ष-अ-ट-तानि तैरुक्तानि । ३. क्ष-अ-ट-मसि । ४. ङ-ञ१-ऋभवः इति । ५. क्ष-ञ१-अ-ट-अवख्यानम् अवमतिमकरोत् । ६. क्ष-ञ१-अ-ट-तं चमसस्थं सोमं ग्नासु छन्दोभिमानिनीषु गायत्र्यादिषु स्त्रीषु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]एनान् वक्ष्यमाणान् [v]हनाम [v]इति [v]यत् यदा [v]अब्रवीत् [v]त्वष्टा । पूजार्थं बहुवचनम् । एतच्छब्दस्य प्रकृतपरामर्शकत्वात् ऋभूणां प्रकृतत्वात् तेषां हननप्रसक्तिं दर्शयति[1] । [v]ये[2] [v]देवपानं देवैः पातव्यं [v]चमसं ये[3] ऋभवः [v]अनिन्दिषुः निन्दामकुर्वन्[3] । देवयोग्यं त्वाष्ट्रचमसं[4] मनुष्याः ऋभवः स्वीकृत्य चतुर्धा व्यभजन् तान् हनामेति यदा अब्रवीदित्यर्थः[4] । तदाप्रभृति मनुष्याः [v]सुते अभिषुते सोमे पानाय प्रस्तुते सति [v]सचा सह परस्परम् [v]अन्या [v]नामानि अन्यानि होत्रध्वर्यूद्गात्रादीनि [v]कृण्वते कुर्वन्ति । पूर्वनाम[5] प्रच्छाद्य उपह्वकाले ' अध्वर्य उपह्वयस्व होतरुपह्वयस्व[6] ' इत्येवम् अन्यैरेव[7] नामभिः आत्मानं त्वष्टृवधभीत्या प्रत्यापयन्तीत्यर्थः । पूर्वम् अन्यानि कथं प्रसक्तानीत्यत आह । [v]एनान् नरान् [v]कन्या स्वोत्पादयित्री माता [v]अन्यैः एव [v]नामभिः[10] [v]स्परत् प्रीणयति ॥ ' स्पृ प्रीतिबलयोः ' । लेटयडागमः ॥ ॥ ४ ॥

इन्द्रो हरी युयुजे अश्विना रथं बृहस्पतिर्विश्वरूपामुपाजत ।
ऋभुर्विभ्वा वाजो देवाँ अगच्छत स्वपसो यज्ञियं भागमैतन ॥ ६ ॥

इन्द्रः । हरी इति । युयुजे । अश्विना । रथम् । बृहस्पतिः । विश्वऽरूपाम् । उप । आजत । ऋभुः । विऽभ्वा । वाजः । देवान् । अगच्छत । सुऽअपसः । यज्ञियम् । भागम् । ऐतन ॥६॥

पूर्वं सृष्टानां क्रमेण विनियोगमाह । [v]इन्द्रो [v]हरी [v]युयुजे । एतन्नामानावश्वौ रथे योजितवान् । तथा [v]अश्विना अश्विनौ [v]रथं[11] योजितवन्तौ । तथा [v]बृहस्पतिः[11] बृहतो मन्त्रस्य पालयिता एतन्नामको देवः [v]विश्वरूपां नानारूपोपेतां गाम् [v]उपाजत उपागमत् स्वीकृतवानित्यर्थः । यद्यप्यत्र गौरिति विशेषो न श्रुतः तथापि पूर्वं[12] धेनुः कर्त्वेत्युक्तत्वात् पुरस्ताच्च ' ये धेनुं विश्वजुवं विश्वरूपाम् ' (ऋ. सं. ४. ३३. ८ ) इति वक्ष्यमाणत्वाच्च विश्वरूपा गौरित्येवाध्यवसीयते । अत एव विश्वरूपाम् इत्यस्याश्वपङ्क्तिरिति[13] केचन व्याचक्षते तदसत् । युष्मत्संपादितानि रथादीनि इन्द्रादयः स्वभागत्वेनाकल्पयन् । तस्मात् [v]ऋभुर्विभ्वा [v]वाजः च यूयं [v]देवान् इन्द्रादीन् [v]अगच्छत[14] । गत्वा च हे [v]स्वपसः शोभनाश्वरथादिकर्मवन्तो यूयं [v]यज्ञियं यज्ञार्हं यज्ञसंबन्धिनं [v]भागं सोमरूपं[15] देवत्वं प्राप्तैः सेवनीयम् [v]ऐतन प्राप्नुत । कर्मसामर्थ्येन हविर्भुजो भवतेत्यर्थः । इत्येवमृषिराह ॥

---

१. क्ष-ङ-ञ१-ञ-ट–वारयति । २. क्ष-ञ-ट–' ये ' नास्ति । ३. क्ष-ङ-ञ१-ञ-ट–ये नरा अद्यप्रभृति अनिन्दिषुः निन्दां कुर्वन्ति । ४. क्ष-ङ-ञ१-ञ-ट–चमसं मनुष्याः ऋभवः स्वीकृतवन्तः । अतोऽस्माभिः शेषो न पातव्य इति निन्दां कुर्युः तान् हनामेति यदा अब्रवीत् इत्यर्थः । ५. क्ष-ङ-ञ१-ञ ट–स्वपूर्वनाम । ६. क्ष-ञ-ट–उद्गात्रुरुपह्वयस्व । ७. ङ-ञ१–आद्यैरेव । ८. क्ष-ञ-ट–अन्यानि नामानि । ९. क्ष-ञ१-ञ-ट–स्वस्वोत्पादयित्री । १०. क्ष-ङ-क्ष१-ञ-ट–नामभिः देवदत्तविष्णुमित्रादिरूपैः । ११. क्ष-ञ-ट–रथम् उपाजत उपागमत् प्राप्तवान् । तथा बृहस्पतिः, ञ१–रथ उपाजत रथ उपागमत् प्राप्तवान् तथा च बृहस्पतिः । १२. क्ष-ङ-ञ१-ञ-ट–पूर्वत्र । १३. ङ-ञ१-इत्यस्याश्वपत्तिरिति । १४. क्ष-ङ-ञ१-ञ-ट–गन्तुमर्हथ । एतैर्लङि ( ङ-ञ१–लिङि ) तप्तनप्तनथनाश्च इति तादेशः । १५. क्ष-ङ-ञ१-ञ-ट–सोमाज्यादिरूपम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

निश्चर्मणो गामरिणीत धीतिभिर्या जरन्ता युवशा ताकृणोतन ।
सौधन्वना अश्वादश्वमतक्षत युक्त्वा रथमुप देवाँ अयातन ॥ ७ ॥

निः । चर्मणः । गाम् । अरिणीत । धीतिऽभिः । या । जरन्ता । युवशा । ता । अकृणोतन ।
सौधन्वनाः । अश्वात् । अश्वम् । अतक्षत । युक्त्वा । रथम् । उप । देवान् । अयातन ॥ ७ ॥

हे [v]सौधन्वनाः यूयं [v]निश्चर्मणः मृतायाः गोः सकाशात् उत्कृत्ताच्चर्मणः [v]गां नूतनां निः [v]अरिणीत निरगमयत उत्पादितवन्त इत्यर्थः । तेनैव[1] चर्मणा संवीतां तत्सदृशीमन्यां धेनुं कृतवन्त इत्यर्थः । यद्यपि पूर्वमेव अश्वादीनां विनियोगः उक्तः तथापि तेषामत्यन्तदुःखसंपादत्वज्ञापनाय पुनराह । न केवलं गोकरणमेव अपि[2] च[2] [v]या [v]जरन्ता यौ जीर्णौ पितरौ [v]ता तौ [v]युवशा युवानौ [v]अकृणोतन अकुरुत । किंच [v]अश्वादश्वम् एकेन विद्यमानेनाश्वेन अश्वान्तरम् [v]अतक्षत प्रयत्नेन संपादितवन्तः । यस्मादेवं कृतवन्तस्तस्मात् [v]रथं युष्मदीयं [v]युक्त्वा अश्वैर्योजयित्वा [v]देवान् इन्द्रादीन् [v]उप [v]अयातन देवसमीपं प्रामुत ॥

इदमुदकं पिबतेत्यब्रवीतनेदं वा घा पिबता मुञ्जनेजनम् ।
सौधन्वना यदि तन्नेव हर्यथ तृतीये घा सवने मादयाध्वै ॥ ८ ॥

इदम् । उदकम् । पिबत । इति । अब्रवीतन । इदम् । वा । घ । पिबत । मुञ्जऽनेजनम् ।
सौधन्वनाः । यदि । तत् । नऽइव । हर्यथ । तृतीये । घ । सवने । मादयाध्वै ॥ ८ ॥

इदानीमृषिः देवैरुक्तमर्थं तान् संबोध्य यूयम् ऋभून् एवमुक्तवन्तः स्थ इति अनुवाचयति[3] । हे [v]सौधन्वनाः सुधन्वनः पुत्राः यूयम् [v]इदमुदकं सोमलक्षणं [v]पिबतेत्यब्रवीतन इत्युक्तवन्तः ॥ ब्रवीतेर्लङि मध्यमबहुवचनस्य तस्य तनबादेशे पित्त्वात् ' ब्रुव ईट् ' ( पा. सू. ७. ३. ९३ ) ॥ एतत् प्रातःसवनिकाभिप्रायम् । [v]वा अथवा । [v]घ इत्यनर्थकः प्रसिद्ध्यर्थो वा । [v]इदं [v]मुञ्जनेजनम् । मुञ्जवान्नाम पर्वतः सोमोत्पत्तिस्थानम् । तत आहृतत्वात् तेन मुञ्जतृणेन शोधितं अपगततृणमित्यर्थः । इदं सोमरसरूपमुदकं [v]पिबत इत्यब्रवीतन । एतत् माध्यंदिनसवनाभिप्रायम् । हे ऋभवः यूयं [v]तत् उभयसवनसंबन्धि[4] सोमपानकार्यं[4] [v]नेव [v]हर्यथ नैव कामयथ । हर्यतिः कान्तिकर्मा, ' हर्यति उशिक् ' ( नि. २. ६. १० ) इति तत्कर्मसु पाठात् । [v]तृतीये [v]सवने तु [v]मादयाध्वै अत्यर्थं तृप्ताः भवथ । ' ऋभवो देवाः सोमस्य मत्सन् ' इति तृतीयसवने तेषां सोमपानसद्भावात् । एवं यूयमृभूनुक्तवन्तः । अथवा ऋभून्प्रति तस्यैव[5] इदं वाक्यम् । हे सौधन्वनाः यूयं देवत्वं प्राप्य देवयजनं प्रति सोमपानाय रथेनागत्य श्रान्तानश्वान् प्रातःसवने इदमुदकं सोमलक्षणं पिबतेत्यब्रवीतन । तत्र यदि नेच्छथ[6] इदं वा मुञ्जनेजनं मुञ्जेन दूषितं[7] वाजिनं पिबतेत्यब्रवीतन पश्चात् तत् द्वयं यदि नेव हर्यथ हे अश्वा यूयं तृतीये सवने मादयाध्वै । तत्रापि वाजिनप्रचारात्[8] ॥

---

१. क्ष-ञ-ट–तेन; ज्ञ१–स्फीतेन । २. क्ष-ञ-ट–अपि तु; ङ-ज्ञ१-किंतु । ३. क्ष-ङ-ज्ञ१-ञ-ट–अनुवदति । ४. क्ष-ञ-ट–उभयसवनसंबन्धिनं सोमम् । ५. ङ-ज्ञ१–मन्त्रस्यैव । ६. क्ष-ञ-ट–नेच्छा । ७. ङ–शोधितम् । ८. क्ष-ङ-ज्ञ१-ञ-ट–' वाजिनप्रचारात् ' इत्यस्यानन्तरं ' वाजिभ्यो वाजिनमित्यादिना अन्यत्र एषां वाजिनसंबन्धात् ' इत्यधिकम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आपो भूयिष्ठा इत्येको अब्रवीदग्निर्भूयिष्ठ इत्यन्यो अब्रवीत् ।
वधर्यन्तीं बहुभ्यः प्रैको अब्रवीदृता वदन्तश्चमसाँ अपिंशत ॥ ९ ॥

आपः । भूयिष्ठाः । इति । एकः । अब्रवीत् । अग्निः । भूयिष्ठः । इति । अन्यः । अब्रवीत् ।
वधःऽयन्तीम् । बहुऽभ्यः । प्र । एकः । अब्रवीत् । ऋता । वदन्तः । चमसान् । अपिंशत ॥९॥

चमसचतुर्धाकरणकाले किमिति सत्यं वदन्तो व्यभजन्निति तदाह । [v]एकः त्रयाणामन्यतमः[1] [v]आपो [v]भूयिष्ठाः [v]इति [v]अब्रवीत्[1] नहि उदकात् प्रशस्तं लोकोपकारकं तत्त्वान्तरमस्ति । आपो[2] भूयिष्ठाः[2] इति ऋतम्[3] अवादीत् । अपामेव श्रेष्ठत्वम् ' अप एव ससर्जादौ ' ( मनु. १. ८ ) इत्यादिशास्त्रात् । तथा [v]अन्यः [v]अग्निर्भूयिष्ठ [v]इति [v]अब्रवीत् । आन्तरं[4] बाह्यं च[4] दाहपाकभुक्तजरणादिव्यापारेण अग्नेरेव जगन्निर्वाहकत्वादग्नेरेव भूयिष्ठत्वम् इत्येव[5] मन्यते । तथा [v]वधर्यन्तीम् । वधरिति रेफान्तः अपि[6] वज्रनाम, ' वधः अर्कः ' ( नि. २. २०. ७ ) इति तन्नामसु पाठात् । तदिच्छति वृष्ट्युदकायेति वधर्यन्ती मेघपङ्क्तिरुच्यते । यद्यपीयं स्ववधार्थं वज्रं स्वयमेव नापेक्षते तथापि वृष्ट्यर्थम् इन्द्रवज्रेण[7] हन्यमानत्वात् तदिच्छतीत्युपचर्यते । यद्वा । बहुभ्यः तेषामर्थाय वधर्यन्तीं वधमात्मन इच्छन्तीं भूमिम् ॥ छान्दसो रेफोपजनः ॥ तामेव[8] [v]एकः [v]बहुभ्यः संवादिभ्यः[8] श्रेष्ठतमाम् [v]अब्रवीत् । उदकस्यापि मेघकारणत्वात् । एवम् [v]ऋता ऋतानि उक्तरूपाणि यथार्थानि वाक्यानि [v]वदन्तः परस्परं ब्रुवन्तः [v]चमसान् [v]अपिंशत अवयविनोऽकुरुत[9] चतुर्धा व्यभजत इत्यर्थः[9] ॥ ' पिश अवयवे '। ' शे मुचादीनाम् ' इति नुम् ॥ इदमेव ऋतवदनम् अपेक्ष्य ऋभुशब्दं व्याचक्षाणो यास्कः– ' ऋभव उरु भान्तीति वर्तेन भान्तीति वर्तेन भवन्तीति वा ' ( निरु. ११. १५ ) इत्युक्तत्वात् ॥

श्रोणामेको उदकं गामवाजति मांसमेकः पिंशति सूनयाभृतम् ।
आ निम्रुचः शकृदेको अपाभरत्किं स्वित्पुत्रेभ्यः पितरा उपावतुः ॥ १० ॥

श्रोणाम् । एकः । उदकम् । गाम् । अव । अजति । मांसम् ।
एकः । पिंशति । सूनया । आऽभृतम् ॥ आ । निऽम्रुचः । शकृत् ।
एकः । अप । अभरत् । किम् । स्वित् । पुत्रेभ्यः । पितरौ । उप । आवतुः ॥ १० ॥

अत्र ऋभव एव ऋत्विग्रूपेण स्थित्वा सर्वत्र यज्ञं निर्वहन्तीत्याह । [v]श्रोणां शोणम्[10] ॥ ' वा छन्दसि ' इति पररूपाभावः[10] ॥ शोणवर्णम् [v]उदकं रुधिरम् [v]एकः ऋभुषु मध्ये ऋत्विक् [v]गाम्

---

१. क्ष-ञ१-ञ-ट–त्रयाणां मध्ये एकः आपोभूयिष्ठा इत्येकोऽब्रवीत् । २. ञ१-अत एव आपो भूयिष्ठाः । ३. क्ष-ञ१-ञ-ट–एवम्; च-ज्ञ-त–ऋचम् । ४. क्ष-ञ-ट–आन्तरं बाह्यं च अग्निरेव । ५. क्ष-ञ-ट–इत्येवम् । ६. ङ-ञ१–'अपि' नास्ति । ७. ङ-ज्ञ-वज्रेण । ८. ङ–तामेव एकं ( ? ) बहुभ्यः अबादिभ्यः; क्ष-ञ-ट–तामेव एकः बहुभ्यः अबादिभ्यः । ९. क्ष-ञ-ट–अवयविनोऽकरोत् । चतुर्धा व्यभजन् । १०. क्ष-ञ-ट–' शोणम् । वा छन्दसि इति पररूपाभावः ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vअवाजति बाह्यभूमिं प्रति गमयति रक्षोभागत्वेन स्थापयति। तथा vएकः vमांसं vसूनया छेदनसाधनेन स्वधितिना vआभृतं संपादितं vपिंशति हृदयजिह्वावक्षआद्याकारेण आहृतं संपादितं मांसं पिंशति अवयवीकरोति स्वधितिना तत्तदवयवान् विभजतीत्यर्थः। अथ vएकः vनिस्रुचः निःशेषेण छिन्नात् मांसात् vशकृत् कुक्षिस्थं जरत्तृणम् ऊवध्यनामकम् vअपाभरत् अपाहरन्निरसनाय। एवमृत्विग्रूपेण स्थितेभ्यः vपुत्रेभ्यः पुरुत्रातृभ्यः पुत्रस्थानीयेभ्य ऋभुभ्यः सर्वेष्वनुष्ठितेषु vपितरा यज्ञस्य पालयितारौ जायापती vकिं vस्वित् vउपावतुः किं नु खलु प्रामुतः॥ अवतेः प्राप्त्यर्थाच्छान्दसो लिट्॥ सर्वं तैरेवानुष्ठितमिति तयोर्न किंचित्कृत्यमस्तीत्यर्थः। अथवायमर्थः। एकस्तेषामन्यतमः श्रोणां पङ्गुकां गामुदकं प्रत्यवगमयति। अपरः सूनया मांसविक्रयिण्या आभृतं संपादितं मांसं पिंशति[1]। अपर आ निस्रुचः अस्तमयादर्वागेव शकृत् गोपुरीषं हरति। एवम् ऋभुभिरनुष्ठिते सति किं स्विदेतस्मात् परिचरणात् अन्यत् पुत्रेभ्यः सकाशात् उपावतुः उपगच्छेतामिति॥ ॥ ५ ॥

उद्वत्स्वस्मा अकृणोतना तृणं निवत्स्वपः स्वपस्यया नरः।
अगोह्यस्य यदसस्तना गृहे तदद्येदमृभवो नानु गच्छथ॥ ११॥

उद्वत्ऽसु। अस्मै। अकृणोतन। तृणम्। निवत्ऽसु। अपः। सुऽअपस्यया। नरः।
अगोह्यस्य। यत्। असस्तन। गृहे। तत्। अद्य। इदम्। ऋभवः। न। अनु। गच्छथ॥११॥

पुराणप्रसिद्धान्[2] सुधन्वनः पुत्रान् कर्मणा देवत्वं प्राप्तवतः ऋभून् स्तुत्वा वेदप्रसिद्धया सूर्यरश्मिरूपान् ऋभून् इदानीं स्तौति। तथा च यास्को निरुक्ते पुराणप्रक्रियासिद्धानृभून् बहुधा निरुच्य तदुदाहरणत्वेन[3] 'विष्टी शमी' इत्येतामुदाहृत्य 'आदित्यरश्मयोऽप्यृभव उच्यन्ते' (निरु. ११. १६) इत्युक्त्वा तस्मिन्नर्थे एतामृचमुदाजहार। हे vऋभवः उरु प्रभूतं भासमानाः ऋतेन आदित्येन भासमाना वा ऋतेनोदकेन उदकार्थमुत्पन्ना वा। रश्मीनामुरुभासमानत्वं प्रसिद्धम्। तथा आदित्यादुत्पत्तिरपि। उदकार्थं भवनमपि रश्मीनां घर्मकाले भूमिगतं सारमादाय पुनः वर्षकाले[4] प्रवर्षन्तीति प्रसिद्धम्। 'आदित्याज्जायते वृष्टिः' (मनु. ३. ७६) इति शास्त्रात्। तथाविधाः vनरः प्रकाशवृष्ट्युदकादेर्नेतारः यूयम् vउद्वत्सु उन्नतेषु प्रदेशेषु मेर्वादिषु vतृणं व्रीहियवादिरूपम् vअस्मै प्राणिजाताय तदुपकारार्थम् vअकृणोतन कृतवन्तः स्थ॥ 'उपसर्गाच्छन्दसि धात्वर्थे' इति वतिः॥ तथा vनिवत्सु प्रवणदेशेषु अस्मै एव vअपः उदकानि अकृणोतन अकुरुत। किं स्वभोगार्थं नेत्याह। vस्वपस्यया शोभनकर्मेच्छया। शोभनं कर्म एभिः कृतमिति यथा[5] यजमानाः स्तुवन्ति तदिच्छयेत्यर्थः। किंच यूयम् vअगोह्यस्य अग्राह्यस्यादित्यस्य vगृहे मण्डले vयत् यावत्कालम् vअसस्तन सुप्तवन्तः स्थ रात्रौ निर्व्यापारास्तिष्ठथ॥ 'षस स्वप्ने'। अस्माल्लङि पूर्ववत्तस्य तनबादेशः। अदादित्वात् शपो लुक्॥ vतत् तावन्तं कालम् vअद्य अहनि vइदम् इदानीं vनानु vगच्छथ अनुसृत्य न गच्छथ। यावन्तं कालं रात्रौ सूर्ये निगूढा वर्तध्वे तावन्तमेव कालम् अहन्यपि नानुगच्छथेत्यर्थः। यद्वा। अगोपनीयस्य तस्य गृहे अन्तरिक्षे यत् यावन्तं कालम् असस्तन वृष्टिम् अदत्त्वा स्वापमकुरुत तत्तावन्तं कालम् अद्येदानीं वर्षसमये इदं सस्याभिवर्धनवृष्टिप्रवाहरूपं कर्म नानु गच्छथ अनुसृत्य न प्रामुथ। यावन्तं कालं विवर्षथ तावन्तमेव कालं प्रवर्षथेत्यर्थः॥

---

१. ख-च-ज-फ-पिंशति पित्रोः; क-पिंशति पित्रोरर्थे। २. क्ष-ञ-ट-पुराणप्रसिद्धया। ३. ख-फ-तत्रोदाहरणत्वेन; ङ-ञ१-एतदुदाहरणत्वेन; त-उदाहरणत्वेन। ४. ङ-ञ-ञ१-वर्षाकाले। ५. च-त-'यथा' नास्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सꣳमील्य यद्भुवना पर्यसर्पत क्व स्वित्तात्या पितरा व आसतुः ।
अशपत यः करस्नं व आददे यः प्राब्रवीत्प्रो तस्मा अब्रवीतन ॥ १२ ॥

सम्ऽमील्य । यत् । भुवना । परिऽअसर्पत । क्व । स्वित् । तात्या । पितरा । वः । आसतुः ।
अशपत । यः । करस्नम् । वः । आऽददे । यः । प्र । अब्रवीत् । प्रो इति । तस्मै । अब्रवीतन ॥१२॥

हे ऋभवः रश्मयः यूयं यत् यदा भुवना भूतजातानि संमील्य संमीलनं कृत्वा जलधरपटलैराच्छाद्य पर्यसर्पत परितः सर्पणं कुरुथ वर्षथेत्यर्थः । तात्या तातौ तायमाने वृष्ट्युदके । यद्वा । तात्या तासु वर्षासु ॥ छान्दसस्त्यप्रत्ययो दकारस्यात्वं च ॥ अथवा पितृविशेषणम् । तात्या तत्कालीनौ पितरा जगतः पालकौ सूर्याचन्द्रमसौ क्व स्वित् आसतुः कुत्र खलु तिष्ठतः ॥ अस्तेर्लिटि व्यत्ययेन भूभावाभावः । यद्वा । असतेर्गत्यर्थस्य लिटि एतद्रूपम् ॥ अहोरात्रविभागेन प्रवर्षयथेत्यर्थः । किंच ईदृशान् वः युष्मान् यः कोऽपि वृष्टिप्रतिबन्धकारी राक्षसादिः करस्नम् । बाहुनामैतत्, ' करस्नौ बाहू ' ( नि. २. ४. ७ ) इत्युक्तत्वात् । अत्र तु अकारान्तम् । युष्मदीयं हस्तम् आददे गृह्णाति प्रतिरोधं करोति तम् अशपत नाशयथ । यः च प्राब्रवीत् प्रकर्षेण वाचा[1] निरुन्द्धे तस्मै प्रो प्रैव अब्रवीतन प्रकर्षेण भर्त्सनादिशब्दं कुरुथ । यद्वा । यो नूनं स्तौति तं प्रकर्षेण स्तुतेरर्थः ॥

सुषुप्वांसꣳ ऋभवस्तदपृच्छतागोह्य क इदं नो अबूबुधत् ।
श्वानं बस्तो बोधयितारमब्रवीत्संवत्सर इदमद्या व्यख्यत ॥ १३ ॥

सुसुप्वांसः । ऋभवः । तत् । अपृच्छत । अगोह्य । कः । इदम् । नः । अबूबुधत् ।
श्वानम् । बस्तः । बोधयितारम् । अब्रवीत् । संवत्सरे । इदम् । अद्य । वि । अख्यत ॥१३॥

हे ऋभवः रश्म्यात्मकाः यूयं सुषुप्वांसः आदित्यमण्डले स्वपन्तो वर्षणाय ॥ स्वपेर्लिटः क्वसुः ॥ तमादित्यं[2] तत् वाक्यम् अपृच्छत प्रश्नं कुरुथ । किं तदिति चेत् उच्यते । हे अगोह्य केनचिदगोपनीयादित्य स्वामिन् नः अस्मदीयम् इदं कर्म वर्षणरूपं कः अबूबुधत् बोधयति प्रेरयति साहाय्यं करोति ॥ बुधेर्ण्यन्तात् लुङि चङि रूपम् ॥ बस्तः सर्वस्य वासयिता आदित्यः ॥ वसेरौणादिकस्तप्रत्ययः । बवयोरभेदात् बत्वम् ॥ बोधयितारं प्रेरयितारं श्वानम् अब्रवीत् अन्तरिक्षे श्वसन्तं वायुं प्रावादीत् । असौ युष्मान् प्रेरयतीति । अथ[3] वायुसहायेन वर्षन्तो यूयं संवत्सरे पूर्णे अद्य इदानीम् इदं जगत् व्यख्यत विविधं प्रकाशितवन्तः । पूर्वं सूर्याचन्द्रमसौ यथा न दृश्येते तथा वर्षित्वा इदानीं वर्षकालेऽतीते विश्वं जगत् व्यक्तं कुरुथेत्यर्थः ॥ ख्यातेर्लुङि ' अस्यतिवक्तिख्याति° ' इति अङ् ॥

---

१. क्ष-ञ-ट-त्वाम् । २. क्ष-ङ-ञ-ट-तत् तमादित्यम् । ३. ङ-अथ वा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

दिवा यान्ति मरुतो भूम्याग्निरयं वातो अन्तरिक्षेण याति ।
अद्भिर्याति वरुणः समुद्रैर्युष्माँ इच्छन्तः शवसो नपातः ॥ १४ ॥

दिवा । यान्ति । मरुतः । भूम्या । अग्निः । अयम् । वातः । अन्तरिक्षेण । याति ।
अत्ऽभिः । याति । वरुणः । समुद्रैः । युष्मान् । इच्छन्तः । शवसः । नपातः ॥ १४ ॥

हे vशवसः वृष्टिकार्यस्य बलस्य vनपातः नपातयितारः ऋभवः vयुष्मान् vइच्छन्तः वृष्ट्यनुकूलचिकीर्षया युष्मानेवेच्छन्तः सर्वे देवा आयान्ति । कस्मादिति तदुच्यते । vमरुतः वृष्ट्यनुकूलाः देवाः vदिवा द्युलोकात्[1] vयान्ति आगच्छन्ति ॥ ' सावेकाचः° ' इति तृतीयाविभक्तेरुदात्तत्वम् ॥ vभूम्या भूमेः सकाशात् vअग्निः याति आगच्छति । vअयं vवातः[2] सर्वदा संचारी वायुः vअन्तरिक्षेण vयाति अन्तरिक्षादायाति । तथा vवरुणः आवरको जलाभिमानी देवः vसमुद्रैः समुन्दनस्वभावैः vअद्भिः ताभ्य आयाति । यद्वा पूर्वं वृष्टिसाहाय्याय[3] आगता एते देवाः कृतकार्याः सन्तः पुनर्युष्मान् कामयमानाः स्वस्वदेशं प्रति यान्तीत्यर्थः ॥ ॥ ६ ॥

' मा नो मित्रः ' इति द्वाविंशत्यृचं षष्ठं सूक्तं दैर्घतमसम् । तृतीयाषष्ठ्यौ जगत्यौ । शिष्टास्त्रिष्टुभः । अश्वस्य स्तूयमानत्वात् ' या तेनोच्यते सा देवता ' इति न्यायेन अश्वो देवता । अत्रानुक्रमणिका–' मानो द्व्यधिकाश्वस्तुतिस्तु तृतीयाषष्ठ्यौ जगत्यौ ' इति । अश्वमेधस्य मध्यमेऽहनि अध्रिगुप्रैषे ' अध्रिगो शमीध्वम् ' इति शिष्ट्वा ' षड्विंशतिरस्य वङ्क्रयः ' इत्यस्मात्पुरस्तात् वा एतत्सूक्तमावपेत् । ' त्रीणि सुत्यानि भवन्ति ' इति खण्डे सूत्रितम्–' अध्रिगो शमीध्वमिति शिष्ट्वा षड्विंशतिरस्य वङ्क्रय इति वा मा नो मित्र इत्यावपेत ' ( आश्व. श्रौ. १०. ८ ) इति ॥

मा नो मित्रो वरुणो अर्यमायुरिन्द्र ऋभुक्षा मरुतः परि ख्यन् ।
यद्वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि ॥ १ ॥

मा । नः । मित्रः । वरुणः । अर्यमा । आयुः । इन्द्रः । ऋभुक्षाः । मरुतः । परि । ख्यन् ।
यत् । वाजिनः । देवऽजातस्य । सप्तेः । प्रऽवक्ष्यामः । विदथे । वीर्याणि ॥ १ ॥

vनः अस्मान् अश्वं स्तोतुं प्रवृत्तान् मित्रादयो देवाः vमा vपरि vख्यन् परिख्यानं मा कुर्वन्तु । परिख्यानं नाम निन्दा । महानुभावं देवजातम् अश्वं तुच्छा नराः स्तुवन्तीति[4] मा कुर्वन्तु ॥ ख्यातेर्माङि लुङि ' अस्यतिवक्ति° ' इत्यादिना च्लेः अङ् ॥ अहरभिमानी देवः vमित्रः रात्र्यभिमानी vवरुणः । vअर्यमा तयोः अन्तरालाभिमानी[5] आदित्यः । vआयुः सततगन्ता वायुः ॥ वकारलोपो वा ॥

---

१. ख-च-ज-त-फ-व–द्युलोकात् अन्तरिक्षात् । २. क्ष-ञ१-ञ-ट–वातः प्रत्यक्षतया । ३. क्ष-ञ-ट–वृष्टिसाहाय्यत्वेन । ४. क्ष-ञ-ट–स्तुवन्तीति ताम्; ङ-ञ१-स्तुवन्तीति निन्दाम् । ५. क्ष-ङ-ञ१-ञ-ट–अन्तरालकालाभिमानी ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]इन्द्रः प्रसिद्धः। [v]ऋभुक्षाः देवानां निवासभूतः प्रजापतिः। यद्वा। एतन्महन्नाम[1] इन्द्रविशेषणं ' ऋभुक्षाः उक्षा ' ( नि. ३. ३. १० ) इति तन्नामसु पाठात्। निन्दायाः प्रसक्तिं दर्शयति। [v]यत् यस्मात् [v]वाजिनः वेजनवतो बह्वन्नवतो वा [v]देवजातस्य बहुदेवतास्वरूपेणोत्पन्नस्य। उषआदीनाम् अस्य शिरआद्यवयवत्वादिति भावः। 'उषा वा अश्वस्य मेध्यस्य शिरः' (बृ. उ. १. १. १) इत्यादिश्रुतेः। यद्वा। देवेभ्यो जातस्य, गन्धर्वकुले उत्पन्नत्वात्। [v]सप्तेः सर्पणशीलस्य। अश्वनामैतत्। एवंविधस्याश्वस्य महानुभावस्य [v]वीर्याणि वीरकर्माणि सामर्थ्यानि [v]विदथे वेदनसाधने यज्ञे [v]प्रवक्ष्यामः प्रकर्षेण ब्रूमः। अतो मा परि स्थन् प्रत्युत अनुगृह्णन्त्वित्यर्थः॥

यन्निर्णिजा रेक्णसा प्रावृतस्य रातिं गृभीतां मुखतो नयन्ति।
सुप्राङजो मेम्यद्विश्वरूप इन्द्रापूष्णोः प्रियमप्येति पाथः॥ २॥

यत्। निःऽनिजा। रेक्णसा। प्रावृतस्य। रातिम्। गृभीताम्। मुखतः। नयन्ति।
सुऽप्राङ्। अजः। मेम्यत्। विश्वऽरूपः। इन्द्रापूष्णोः। प्रियम्। अपि। एति। पाथः॥२॥

[v]यत् यस्मात् [v]निर्णिजा। निर्णिगिति रूपनाम। [v]रेक्णसा। रेक्ण इति धननाम। ' निर्णिक् वन्निः' ( नि. ३. ७. १ ) इति, ' रेक्णः रिक्थम् ' ( नि. २. १०. १ ) इति च तन्नामसूक्तत्वात्॥ उभयत्र मत्वर्थो लुप्यते॥ रूपवता हिरण्यवताभरणेन [v]प्रावृतस्य [v]वेष्टितस्य अश्वस्य [v]मुखतः पुरस्तात् [v]गृभीतां गृहीतां [v]रातिं दातव्यां दातव्यत्वेन गृहीताम्[2] [v]नयन्ति ऋत्विजः। स तादृशः [v]अजः[3] [v]सुप्राङ् सुष्ठु प्रशस्यागमनः[4] [v]मेम्यत् हन्यमानः॥ ' मीञ् हिंसायाम् '। अस्मात् यङ्लुगन्तात् कर्मणि व्यत्ययेन शतृ॥ यद्वा। तस्य शब्दानुकरणं मेमेशब्दं कुर्वन्। [v]विश्वरूपः बहुवर्णोपेतः कृष्णग्रीवः कृष्णललामो वा नैकवर्णः[5] इत्यर्थः। एवंरूपः अयं [v]इन्द्रापूष्णोः। इन्द्रः प्रसिद्धः। पूषा पोषको देवोऽग्निः। तयोः [v]प्रियम्। ' आग्नेयः कृष्णग्रीवः ' ( तै. सं. ५. ५. २२ ) इत्युक्तत्वादग्नेः प्रियत्वम्। सर्वेऽपीन्द्रस्येतीन्द्रप्रियत्वम्। एवंरूपं [v]पाथः अन्नम् [v]अप्येति प्राप्नोतु॥

एष छागः पुरो अश्वेन वाजिना पूष्णो भागो नीयते विश्वदेव्यः।
अभिप्रियं यत्पुरोळाशमर्वता त्वष्टैनं सौश्रवसाय जिन्वति॥ ३॥

एषः। छागः। पुरः। अश्वेन। वाजिना। पूष्णः। भागः। नीयते। विश्वऽदेव्यः।
अभिऽप्रियम्। यत्। पुरोळाशम्। अर्वता। त्वष्टा। इत्। एनम्। सौश्रवसाय। जिन्वति॥३॥

[v]एषः [v]छागः श्रङ्गहतोऽजः [v]अश्वेन [v]वाजिना शीघ्रव्यापकेनाश्वेन सह [v]पूष्णः पोषकस्याग्नेः [v]भागः भजनीयः [v]विश्वदेव्यः सर्वदेवार्हः। अग्नेः सर्वदेवात्मकत्वात् तदर्हत्वेन सर्वदेवप्रियत्वम्। एवंविधः अजः [v]पुरः पुरस्तात् [v]नीयते प्राप्यते। [v]यत् यस्मात् एवं क्रियते तस्मात् [v]प्रियं प्रीणयितारं

---

१. क्ष-ञ-ट तन्नाम। २. ञ१-अजम्। ३. क्ष-ञ-ट-अजः ऋतुशः ऋतावृतौ। ४. ङ-ञ१-प्रशस्यगमनः। ५. त१-अनेकवर्णः। ६. ख-च-फ-अश्वः।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पुरोडाशं पुरस्ताद्धातव्यम् vएनम् अजं vत्वष्टा सर्वस्योत्पादको देवः । 'त्वष्टा रूपाणि विकरोति' ( तै. सं. १. ५. ९. २ ) इति श्रुतेः । तूर्णव्यापकोऽग्निर्वा । 'उभे त्वष्टुर्बिभ्यतुः' ( ऋ. सं. १. ९५. ५ ) इत्युक्तत्वात् 'अहोरात्रे इति वारणी इति वा' ( निरु. ८. १५ ) इति यास्केन अरणी बिभ्यतुरित्युक्तत्वात् अरणिसंबन्धः अग्नेरेवेति गम्यते । vअर्वता अरणवता अश्वेन सह vसौश्रवसाय देवानां शोभनान्ननिमित्तम् vअभि vजिन्वति प्रीतिहेतुकं[1] करोति[1] ॥

यद्ध॑विष्यमृतुशो दे॑वयानं त्रिर्मानु॑षाः पर्यश्वं॑ नयन्ति ।
अत्रा॑ पूष्णः प्रथ॒मो भा॒ग ए॑ति य॒ज्ञं दे॒वेभ्य॑ः प्रतिवे॒दय॑न्नजः ॥ ४ ॥

यत् । ह॒विष्य॑म् । ऋ॒तु॒ऽशः । दे॒व॒ऽयान॑म् । त्रिः । मानु॑षाः । परि॑ । अश्व॑म् । नय॑न्ति ।
अत्र॑ । पू॒ष्णः । प्र॒थ॒मः । भा॒गः । ए॒ति॒ । य॒ज्ञम् । दे॒वेभ्य॑ः । प्र॒ति॒ऽवे॒दय॑न् । अ॒जः ॥ ४ ॥

vहविष्यं हविर्योग्यं vदेवयानं देवानां प्रापणीयम् vअश्वं vयत् यदा vमानुषाः ऋत्विजः vऋतुशः ऋतौ ऋतौ काले काले[2] vत्रिः vपरि vनयन्ति[2] पर्यग्निकुर्वन्तीत्यर्थः । vअत्र अस्मिन् समये ॥ 'ऋचि तुनुघ०' इति दीर्घः ॥ vपूष्णः पोषकस्याग्नेः vभागः vअजः vप्रथमः vएति पुरोगामी सन् गच्छति । किं कुर्वन् । vयज्ञं vदेवेभ्यः vप्रतिवेदयन् प्रख्यापयन् ॥

होता॑ध्व॒र्युरा॑व॒या अ॒ग्निमि॑न्धे॒ ग्राव॑ग्राभ उ॒त शं॑स्ता॒ सुवि॑प्रः ।
तेन॑ य॒ज्ञेन॒ स्व॑रंकृ॒तेन॒ स्विष्टे॑न॒ वक्ष॑णा॒ आ पृ॑णध्वम् ॥ ५ ॥

होता॑ । अ॒ध्व॒र्युः । आऽव॑याः । अ॒ग्निम् । ऊँ॒ इति॑ । इ॒न्धे॒ । ग्राव॑ऽग्राभः । उ॒त । शं॒स्ता॑ । सुऽवि॑प्रः ।
तेन॑ । य॒ज्ञेन॑ । सुऽअ॑रंकृतेन । सुऽइ॑ष्टेन । वक्ष॑णाः । आ । पृ॒ण॒ध्व॒म् ॥ ५ ॥

vहोता देवानामाह्वाता एतन्नामकः ऋत्विक् vअध्वर्युः अध्वरयुः अध्वरस्य नेता सोऽपि vआवयाः आभिमुख्येन हविषां गमयिता । अध्वर्योर्विशेषमेतत् ॥ आङ्पूर्वात् वेतेः असुन् पूर्वपदप्रकृतिस्वरत्वं च ॥ यद्वा । आभिमुख्येन अवयष्टा प्रतिप्रस्थाता उच्यते ॥ 'अवे यजः' ( पा. सू. ३. २. ७२ ) इति ण्विन् । 'अवाप्योरुपसर्गयोः' इति अल्लोपः ॥ vअग्निमिन्धः अग्नीत् ॥ 'आष्टाग्न्योरिन्धे' ( पा. सू. ६. ३. ७०. ६ ) इति मुम् ॥ vग्रावग्राभः ग्राव्णः स्तुत्या गृह्णातीति ग्रावस्तुत् ॥ कर्मण्यण् ॥ vउत अपि च vशंस्ता प्रशास्ता[3] । vसुविप्रः ति मेधाविनाम । शोभनमेधोपेतो ब्रह्मोच्यते । 'ब्रह्मा त्वो वदति जातविद्याम्' (ऋ. सं. १०. ७१. १) इत्यत्र 'ब्रह्मैको जाते-जाते विद्यां वदति ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हति' ( निरु. १. ८ ) इत्युक्तत्वात् ब्रह्मा एव

---

१. क्ष-ञ-ट-प्रीणाति हेतुं करोति । २. क्ष-ङ-ञ१-ञ-ट-काले काले तत्तदुत्पादनक अश्वम् । त्रिः परिणयन्ति । यद्वा । त्रिः मानुषाः पत्नी यजमानः ऋत्विजश्च यागार्थं ( क्ष-ञ-ट-यद्वाश्वम्; २-यजाश्वम् ) नयन्ति । ३. क्ष-ञ-ट-प्रशंस्ता ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सुविप्रशब्देनाभिधेयः । स चानुक्तर्त्विगुपलक्षकः । एते सर्वे [v]तेन प्रसिद्धेन [v]स्वरंकृतेन सुष्ठ्वरणीयं कृतेन स्वलंकृतेन वा उच्चारसौष्ठवादिना सुष्ठु संपादितेन [v]स्विष्टेन सुष्ठु इष्टेन [v]यज्ञेन [v]वक्षणाः अभितो घृतकुल्यादीन्[1] प्रवहणस्वभावाः[1] प्रसिद्धा नदीर्वा [v]आ [v]पृणध्वं सर्वतः पूरयत यज्ञं सम्यग्निर्वर्त्य फलं साधयतेत्यर्थः ॥ ॥ ७ ॥

यूपव्रस्का उत ये यूपवाहाश्चषालं ये अश्वयूपाय तक्षति ।
ये चार्वते पचनं संभरन्त्युतो तेषामभिगूर्तिर्न इन्वतु ॥ ६ ॥

यूपऽव्रस्काः । उत । ये । यूपऽवाहाः । चषालम् । ये । अश्वऽयूपाय । तक्षति ।
ये । च । अर्वते । पचनम् । सम्ऽभरन्ति । उतो इति । तेषाम् । अभिऽगूर्तिः । नः । इन्वतु ॥६॥

[v]यूपव्रस्काः यूपार्हवृक्षस्य व्रश्चनकर्तारश्छेत्तारः । [v]उत [v]ये च [v]यूपवाहाः छिन्नस्य वोढारः । [v]ये च [v]चषालम् । यूपस्योपरिस्थाप्यं यूपाग्रभागं चषालमाहुः । तत् ये [v]अश्वयूपाय अश्वबन्धनयूपाय [v]तक्षति ॥ तक्षतीति वचनव्यत्ययः ॥ साधु संपादयन्ति । [v]ये [v]च [v]अर्वते अरणवते अश्वाय [v]पचनं पाकसाधनं काष्ठभाण्डादिकं [v]संभरन्ति । [v]उतो अपि च [v]नः अस्मत्संबन्धिनां [v]तेषाम् ऋत्विजाम् [v]अभिगूर्तिः संकल्पः सर्वथा करणीयमिति[2] बुद्धिः [v]इन्वतु व्याप्नोतु ॥ इन्वतिर्व्याप्तिवचनः ' इन्वति ननक्ष ' इति तद्वचनेषु पाठात् ॥ यद्वा । तेषामभिगूर्तिः नः अस्मानिन्वतु । यागं साधुपारं प्रापय्य फलेन[3] योजयत्वित्यर्थः ।

उप प्रागात्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः ।
अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ॥ ७ ॥

उप । प्र । अगात् । सुऽमत् । मे । अधायि । मन्म । देवानाम् । आशाः । उप । वीतऽपृष्ठः ।
अनु । एनम् । विप्राः । ऋषयः । मदन्ति । देवानाम् । पुष्टे । चकृम । सुऽबन्धुम् ॥ ७ ॥

[v]मन्म मननीयं फलं [v]सुमत् [v]उप [v]प्रागात् उपप्रैतु । ' सुमत्स्वयमित्यर्थः ' ( निरु. ६.२२ ) इति यास्कः । यद्वा । स्वयमेव मादयितृतमे मयि [v]अधायि धीयते[4] । फलभूतः अश्वः आगतः स च मया[5] धृतः[5] इत्यर्थः । किमर्थम् । [v]वीतपृष्ठः साधुपोषणेन प्राप्तपश्चाद्भागः[6] कान्तपृष्ठो वा । अत्यन्तं हृष्टः इत्यर्थः । तादृशोऽयं [v]देवानामाशाः पूरयितुम् [v]उप गच्छतु । यागार्थमागतम् [v]एनं [v]सुबन्धुं शोभनबन्धनमश्वं [v]देवानाम् आशास्यमानानां [v]पुष्टे पोषणाय [v]चकृम कुर्मः । तं च [v]विप्राः मेधाविन ऋत्विजः [v]ऋषयः अतीन्द्रियद्रष्टारोऽन्ये वा विप्रा ऋषयश्च [v]अनु [v]मदन्ति अनुमोदन्ताम् । सम्यक् कृतमिति परितुष्यन्तु[7] ॥

---

१. क्ष-ञ-ट–अमृतकुल्यार्दान् द्रवणस्वभावाः । २. क्ष-ञ-ट–करणीय इति । ३. क्ष-ख-च-ज-ज्ञ-ञ-ट-त-फ-व–बलेन । ४. क्ष-ञ-ट–धार्यते । ५. क्ष-ज्ञ१-ञ-ट–मयि श्रितः । ६. ज्ञ–प्राप्तपार्श्वाद्भागः । ७. क्ष-ज्ञ१-ञ-ट–परितोषयन्तु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यद्वाजिनो दाम संदानमर्वतो या शीर्षण्या रशना रज्जुरस्य ।
यद्वा घास्य प्रभृतमास्ये३ तृणं सर्वा ता ते अपि देवेष्वस्तु ॥ ८ ॥

यत् । वाजिनः । दाम । सम्ऽदानम् । अर्वतः । या । शीर्षण्या । रशना । रज्जुः । अस्य ।
यत् । वा । घ । अस्य । प्रऽभृतम् । आस्ये । तृणम् । सर्वा । ता । ते । अपि । देवेषु । अस्तु ॥८॥

[v]वाजिनः गमनवतोऽश्वस्य [v]यत् [v]दाम ग्रीवाबद्धा रज्जुः । यच्च [v]संदानं सम्यगवच्छेदकं बन्धकं पादबन्धनं दाम अस्ति । [v]या च [v]अस्य [v]शीर्षण्या शिरसि बद्धा खलीनरज्जुः[1] अस्ति ॥ शिरःशब्दात् ' भवे छन्दसि ' इति यत् । ' ये च तद्धिते ' ( पा. सू. ६. १. ६१ ) इति शीर्षन्भावः । तित्स्वरितः ॥ [v]यद्वा [v]घ[2] [v]अस्य अश्वस्य [v]आस्ये मुखे [v]प्रभृतं प्रहृतं प्रक्षिप्तं [v]तृणम् अस्ति । घशब्दो हार्थे स च प्रसिद्ध्यर्थः ॥ [v]सर्वा सर्वाणि [v]ता तानि[3] सर्वाणि [v]अपि हे अश्व [v]ते तव संबन्धीनि [v]देवेष्वस्तु सन्तु देवेषु मध्ये भवन्तु । देवत्वं प्राप्नुवन्तु वा ॥ वचनव्यत्ययः ॥ अत्रोपयुक्तानां सर्वेषां देवत्वं किल[4] अश्वस्य तत्प्राप्तिः न[5] आशासनीया ॥

यदश्वस्य क्रविषो मक्षिकाश यद्वा स्वरौ स्वधितौ रिप्तमस्ति ।
यद्धस्तयोः शमितुर्यन्नखेषु सर्वा ता ते अपि देवेष्वस्तु ॥ ९ ॥

यत् । अश्वस्य । क्रविषः । मक्षिका । आश । यत् । वा । स्वरौ । स्वऽधितौ । रिप्तम् । अस्ति ।
यत् । हस्तयोः । शमितुः । यत् । नखेषु । सर्वा । ता । ते । अपि । देवेषु । अस्तु ॥ ९ ॥

[v]अश्वस्य तदवयवभूतस्य [v]क्रविषः आममांसस्य [v]यत् यदङ्गं [v]मक्षिका [v]आश अभक्षयत् ॥ ' अश भोजने ' । यद्वा । कर्मणि षष्ठी ॥ अश्वस्य यन्मांसं भक्षयति । [v]वा अथवा [v]स्वरौ पश्वज्ञनकाले[6] [v]यत् [v]रिप्तं लिप्तम् [v]अस्ति । ' स्वरुणा पशुमनक्ति ' इति श्रुतेः । अथवा [v]स्वधितौ छेदनकाले च अवदानकाले यत्[7] रिप्तमस्ति [v]शमितुः [v]हस्तयोः लिप्तमस्ति । विशसनकाले [v]यत् च [v]नखेषु लिप्तम् [v]ता [v]सर्वा तानि सर्वाणि हे अश्व [v]ते तव संबन्धीनि [v]देवेष्वस्तु देवेषु संतोषार्थाय[8] भवन्तु[8] ॥

यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति ।
सुकृता तच्छमितारः कृण्वन्तूत मेधं शृतपाकं पचन्तु ॥ १० ॥

यत् । ऊवध्यम् । उदरस्य । अपऽवाति । यः । आमस्य । क्रविषः । गन्धः । अस्ति ।
सुऽकृता । तत् । शमितारः । कृण्वन्तु । उत । मेधम् । शृतऽपाकम् । पचन्तु ॥ १० ॥

---

१. झ-रस ( श ) ना खलीनरज्जुः । २. क्ष-ञ-ट-' घ' नास्ति । ३. क्ष-ङ-ञ-ट-तानि । अपि शब्दश्चार्थे । ४. ङ-झ१-किम् । ५. ङ-झ१-' न ' नास्ति । ६. ङ-झ१-व्रश्चनकाले । ७. च-च । ८. च-संतोषार्थी संभवन्तु; क्ष-ङ-झ-झ१-ञ-ट-सन्तु तेषामर्थाय भवन्तु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]उदरस्य संबन्धि [v]यत् [v]ऊवध्यम् ईषज्जीर्णं तृणं पुरीषम् [v]अपवाति अपगच्छति। [v]यः च [v]आमस्य अपक्वस्य [v]क्रविषः मांसस्य [v]गन्धः [v]अस्ति लेशोऽस्ति। पाकस्य समये यत्किंचिदूवध्यमपक्वस्य च लेशोऽस्ति आमगन्धोऽस्ति। [v]तत् सर्वं [v]शमितारः विशसनकर्तारः [v]सुकृता [v]कृण्वन्तु सुकृतम्[1] उक्तदोषरहितं कुर्वन्तु। [v]उत अपि च [v]मेधं मेध्यं यज्ञार्हं पश्ववयवं[v] श्रृतपाकं देवयोग्यपाकोपेतं यथा भवति तथा [v]पचन्तु पितृमनुष्यादियोग्यम् अतिपक्वम् ईषत्पक्वं च मा कुर्वन्त्वित्यर्थः ॥ ॥ ८ ॥

यत्ते गात्रादग्निना पच्यमानादभि शूलं निहतस्यावधावति ।
मा तद्भूम्यामा श्रिषन्मा तृणेषु देवेभ्यस्तदुशद्भ्यो रातमस्तु ॥ ११ ॥

यत्। ते। गात्रात्। अग्निना। पच्यमानात्। अभि। शूलम्। निऽहतस्य। अवऽधावति।
मा। तत्। भूम्याम्। आ। श्रिषत्। मा। तृणेषु।
देवेभ्यः। तत्। उशत्ऽभ्यः। रातम्। अस्तु ॥ ११ ॥

हे अश्व [v]ते तव [v]अग्निना [v]पच्यमानात् [v]गात्रात् [v]यत् ऊष्मरूपं रसो वा यत्किंचित् [v]अवधावति। तथा [v]निहतस्य निःशेषेण हतस्य तव यदङ्गं रसरूपं [v]शूलम् अभिलक्ष्य अवधावति निर्गच्छति। [v]तत् तदङ्गं [v]भूम्यां [v]मा [v]आ [v]श्रिषत् आश्लिष्टं मा भूत् ॥ श्रिषेः पुषादित्वात् अङ् ॥ पाकसमये तथा [v]मा [v]तृणेषु विशसनसमये दर्भेषु[2] मा अपगच्छतु। तर्हि तत्पतितं कुत्र गच्छत्विति चेत् उच्यते। [v]तत् तादृशम् [v]उशद्भ्यः कृत्स्नं हविः कामयमानेभ्यः [v]देवेभ्यः [v]रातं दत्तम् [v]अस्तु ॥

ये वाजिनं परिपश्यन्ति पक्वं य ईमाहुः सुरभिर्निहरेति ।
ये चार्वतो मांसभिक्षामुपासत उतो तेषामभिगूर्तिर्न इन्वतु ॥ १२ ॥

ये। वाजिनम्। परिऽपश्यन्ति। पक्वम्। ये। ईम्। आहुः। सुरभिः। निः। हर। इति।
ये। च। अर्वतः। मांसऽभिक्षाम्। उपऽआसते।
उतो इति। तेषाम्। अभिऽगूर्तिः। नः। इन्वतु ॥ १२ ॥

[v]ये [v]पक्वं [v]वाजिनम् अश्वम् अश्वावयवं [v]परिपश्यन्ति परितः पावनबुद्धया[3] ईक्षन्ते। [v]य [v]ईं ये चैनं [v]सुरभिः शोभनगन्धः[4] अतः [v]निर्हर किंचिदप्यस्मभ्यं देहि [v]इति [v]आहुः। यद्वा। निःशेषेण देवेभ्यो हरेत्याहुः। यतः सुरभिः अतो देवयोग्यमिति। किंच [v]ये [v]चार्वतो [v]मांसभिक्षामुपासते ये[5] नराः[5] अस्य अर्वतः अश्वस्य हुतशिष्टमांसयाचनामुपासते कांक्षन्ते। [v]उतो अपि च [v]तेषाम् उक्तविधानाम् [v]अभिगूर्तिः अभितः उद्यमनं[6] [v]नः अस्मान् [v]इन्वतु व्याप्नोतु। यथा[7] अस्माभिः अश्वे

---

१. क्ष-ञ-ट-सुष्ठु कृतम्। २. च-ञ-दर्भेषु मा श्रिषत्। ३. ङ-पावनबुद्धया एव; ञ-पाचनं बुध्वा। ४. ङ-शोभनगन्धोऽयम्। ५. क्ष-ञ-ट-येन राक्षसाः; ङ-ञ १-ये च राक्षसाः। ६. क्ष-ङ-ञ १-ञ-ट-संकल्पः। ७. ञ १-ते यथा।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उपालब्धे एवं स्पृहयन्ति तथा यज्ञो निर्वाहयतु[1] इत्यर्थः । यद्वा । मन्त्रः[2] देवपरो व्याख्येयः । ये देवाः बाजिनं पक्वं परिपश्यन्ति कदा होष्यतीति विलम्बं दृष्ट्वा ये च सुरभिरीमेनं निर्हर निःशेषेणास्मभ्यं देहीत्याहुः ये चार्वतोऽश्वस्य मांसभिक्षामुपासते तेषामभिगूर्तिर्न इन्वतु[3] तेषाम् उद्यमः[4] सफलो भवत्वित्यर्थः ॥

यन्नीक्षणं मांस्पचन्या उखाया या पात्राणि यूष्ण आसेचनानि ।
ऊष्मण्यापिधाना चरूणामङ्काः सूनाः परि भूषन्त्यश्वम् ॥ १३ ॥

यत् । निऽईक्षणम् । मांस्पचन्याः । उखायाः । या । पात्राणि । यूष्णः । आऽसेचनानि ।
ऊष्मण्या । अपिऽधाना । चरूणाम् । अङ्काः । सूनाः । परि । भूषन्ति । अश्वम् ॥ १३ ॥

[v]मांस्पचन्याः मांसपचन्याः ॥ पचतेः अधिकरणे ल्युट् । ' मांसस्य पचि युड्घञोः ' ( का. ६. १. १४४ ) इत्यन्तलोपः ॥ [v]उखायाः स्थाल्याः [v]नीक्षणं पाकपरीक्षासाधनं काष्ठं तथा [v]या यानि [v]पात्राणि [v]यूष्णः रसस्य क्वथितस्य [v]आसेचनानि आसेचनसाधनानि तथा [v]ऊष्मण्या ऊष्मनिवारणार्हाणि पात्राणि तथा [v]चरूणां पात्राणां मांसपूर्णानाम् [v]अपिधाना अपिधानानि तत्साधनानि तथा [v]अङ्काः हृदयाद्यवयवाङ्कनसाधनाः[5] वेतसशाखाः [v]सूनाः अवदानसाधनाः स्वधित्यादयः एतम्[6] [v]अश्वम् अश्वावयवं [v]परि [v]भूषन्ति परितो भूषयन्ति स्वस्वव्यापारेण साधयन्तीत्यर्थः ॥ ' भूष अलंकारे ' । भौवादिकः ॥

निक्रमणं निषदनं विवर्तनं यच्च पड्बीशमर्वतः ।
यच्च पपौ यच्च घासिं जघास सर्वा ता ते अपि देवेष्वस्तु ॥ १४ ॥

निऽक्रमणम् । निऽसदनम् । विऽवर्तनम् । यत् । च । पड्बीशम् । अर्वतः ।
यत् । च । पपौ । यत् । च । घासिम् । जघास । सर्वा । ता । ते । अपि । देवेषु । अस्तु ॥ १४ ॥

यत् [v]निक्रमणम् । नितरां क्रमते यत्र तन्निक्रमणं स्थानम् । नितरां सीदत्यत्रेति [v]निषदनम् । [v]विवर्तनं विविधवर्तनम् इतस्ततो लुण्ठनं[7] यत्र तत् ॥ सर्वत्राधिकरणे ल्युट् ॥ [v]यच्च [v]अर्वतः अश्वस्य [v]पड्बीशं पादबन्धनम् । यद्वा । बन्धनं पट् तद्वान्[8] प्रदेशः[8] । अत्र सर्वत्र देवार्थस्याश्वस्य रोमादीनामपि निरर्थकत्वाभावाय तत्स्थानमपि स्वीक्रियते । यद्वा । क्रियापरावगन्तव्या । आलम्भसमये[9] निग्रहेण या निक्रमणादयश्चेष्टाः सन्ति ता इत्यर्थः । [v]यच्च [v]पपौ यदुदकमपिबत् । [v]यच्च [v]घासिम् अदनीयं तृणादिकं [v]जघास अभक्षयत् । हे अश्व [v]ते तव [v]ता तानि सर्वाणि निक्रमणादीनि [v]देवेष्वस्तु सन्तु देवेषु व्याप्नोतु[10] तान्यपि निरर्थकानि मा भूवन्नित्यर्थः ॥

---

१. ङ-ञ-झ-झ१-निर्वहतु । २. ङ-च-झ-झ१-अयं मन्त्रः । ३. च-झ१-इन्वतु इति । ४. ङ-झ१-संकल्पः । ५. झ१-हृदयाद्यवयवाङ्कनसाधनानि । ६. क्ष-ञ-ट-एनम् । ७. क्ष-ङ-झ१-ञ-ट-लुठनं वर्तनं वा । ८. झ-झ१- तद्वन्तं प्रदेशम् । ९. झ१-अश्वालम्भसमये । १०. च-ज-प्राप्नोतु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मा त्वाग्निर्ध्वनयीद्धूमगन्धिर्मोखा भ्राजन्त्यभि विक्त जघ्रिः ।
इष्टं वीतमभिगूर्तं वषट्कृतं तं देवासः प्रति गृभ्णन्त्यश्वम् ॥ १५ ॥

मा । त्वा । अग्निः । ध्वनयीत् । धूमऽगन्धिः । मा । उखा । भ्राजन्ती । अभि । विक्त । जघ्रिः ।
इष्टम् । वीतम् । अभिऽगूर्तम् । वषट्ऽकृतम् । तम् । देवासः । प्रति । गृभ्णन्ति । अश्वम् ॥ १५ ॥

हे अश्व [v]त्वा त्वां [v]धूमगन्धिः धूमेन व्याप्तः[1] [v]अग्निः[1] [v]मा [v]ध्वनयीत् मा ध्वनयत्[2]। धूमं दृष्ट्वा शब्दं मा कुर्वित्यर्थः। अश्वस्य शब्दने प्रायश्चित्तविधानात्। यद्वा। हे पच्यमाना-श्चावयव त्वा त्वां धूमगन्धिरग्निर्मा ध्वनयीत्। ध्वना सति भाण्डभङ्गः स्यात्। 'नोनयति०' (पा. सू. ३. १. ५१) इत्यादिना चङ्प्रतिषेधः। 'ह्यन्तक्षण०' इति वृद्ध्यभावः॥ किंच [v]भ्राजन्ती अत्यन्ताग्निसंयोगेन दीप्ता[3] [v]उखा स्थाली [v]मा [v]अभि [v]विक्त अभितो मा चीचलत् तापाति-शयेन मा नीनशदित्यर्थः॥ 'ओविजी भयचलनयोः'। छान्दसो विकरणस्य लुक्। लुङि वा 'झलो झलि' इति सलोपः॥ स्थाली विशेष्यते। [v]जघ्रिः जिघ्रन्ती तापेन॥ 'घ्रा गन्धोपादाने'। 'आदृगमहन०' इति किन्प्रत्ययः॥ [v]तं तादृशम् [v]अश्वम् [v]इष्टं होतुमिषितं [v]वीतं होमाय आनीतम् [v]अभिगूर्तम् आभिमुख्येन प्रदानाय उद्यतम्[4]। यद्वा। इष्टं प्रयाजैराप्रीतं वीतं पर्यग्निकृतमभि-गूर्तं 'ये यजामहे' इत्यागूर्युक्तम्। [v]वषट्कृतं वषट्कारेण देवसंस्कृतम्[5] एवंभूतं तं [v]देवासः देवाः [v]प्रति [v]गृभ्णन्ति प्रतिगृह्णन्ति॥ ॥ ९ ॥

यदश्वाय वास उपस्तृणन्त्यधीवासं या हिरण्यान्यस्मै ।
संदानमर्वन्तं पड्बीशं प्रिया देवेष्वा यामयन्ति ॥ १६ ॥

यत् । अश्वाय । वासः । उपऽस्तृणन्ति । अधीवासम् । या । हिरण्यानि । अस्मै ।
सम्ऽदानम् । अर्वन्तम् । पड्बीशम् । प्रिया । देवेषु । आ । यमयन्ति ॥ १६ ॥

[v]अश्वाय संज्ञप्यमानाय [v]अधीवासम् उपर्याच्छादनयोग्यं [v]यत् [v]वासः [v]उपस्तृणन्ति सर्वतः आच्छादयन्ति॥ 'स्तृञ् आच्छादने'। क्रैयादिकः॥ तथा [v]अस्मै अश्वाय [v]या यानि [v]हिरण्यानि सौवर्णराजतकांस्यानि कल्पयन्ति। तथा [v]अर्वन्तम्॥ षष्ठ्यर्थे द्वितीया॥ अर्वतोऽश्वस्य [v]संदानं शिरोबन्धनं [v]पड्बीशं पादेषु प्रविष्टं पादबन्धनम्। एतानि [v]प्रिया देवानां प्रियतराणि चात्वाले बद्ध्वा स्थापितानि [v]देवेषु [v]आ [v]यामयन्ति प्रापयन्ति॥

---

१. क्ष-ङ-ञ-ट-व्याप्तः धूमगन्धो वा अग्निः; झ-व्याप्तः धूमगन्धो वह्निः। २. क्ष-झ१-ञ-ट-ध्वनयतु। ३. क्ष-ङ-झ१-ञ-ट-दीप्यमाना। ४. क्ष-ङ-झ१-ञ-ट-संकल्पितम्। ५. झ१-देयम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यत्ते सादे महसा शूकृतस्य पाष्ण्यी वा कशया वा तुतोद ।
स्रुचेव ता हविषो अध्वरेषु सर्वा ता ते ब्रह्मणा सूदयामि ॥ १७ ॥

यत् । ते । सादे । महसा । शूकृतस्य । पाष्ण्यी । वा । कशया । वा । तुतोद ।
स्रुचाऽइव । ता । हविषः । अध्वरेषु । सर्वा । ता । ते । ब्रह्मणा । सूदयामि ॥ १७ ॥

vमहसा बलेन vशूकृतस्य । शब्दानुकरणमेतत् । शूत्कारं कुर्वतः vते तव vसादे सदने अगमने[1] निमित्तभूते सति ॥ सदेर्भावे घञ् । ' कर्षात्वतः० ' इत्यन्तोदात्तत्वम् ॥ अर्थतो[2] गमनं कुर्वन् शूत्कारं कुर्वतः ते[2] त्वां vपाष्ण्या vवा vकशया vवा vतुतोद व्यथयति vयत् यस्मात् तस्मात् vते तव vता तानि vसर्वा सर्वाणि vअध्वरेषु यागेषु vब्रह्मणा मन्त्रेण vसूदयामि क्षरामि आहुतित्वेन कल्पयामीत्यर्थः । तत्र दृष्टान्तः । अध्वरेषु यागेषु vहविषः हविः आज्यादिकं vस्रुचेव स्रुचा यथा सूदयन्ति[3] तद्वत् ॥

चतुस्त्रिंशद्वाजिनो देवबन्धोर्वङ्क्रीरश्वस्य स्वधितिः समेति ।
अच्छिद्रा गात्रा वयुना कृणोत परुष्परुरनुघुष्या वि शस्त ॥ १८ ॥

चतुःऽत्रिंशत् । वाजिनः । देवऽबन्धोः । वङ्क्रीः । अश्वस्य । स्वऽधितिः । सम् । एति ।
अच्छिद्रा । गात्रा । वयुना । कृणोत । परुःऽपरुः । अनुऽघुष्य । वि । शस्त ॥ १८ ॥

vवाजिनः vअश्वस्य vदेवबन्धोः देवानां प्रियस्य vचतुस्त्रिंशत् vवङ्क्रीः एतत्संख्यानि उभयपार्श्वास्थीनि vस्वधितिः छेदनसाधनोऽसिः vसमेति सम्यग्गच्छति छेदनाय । इतरेषामजादीनां षड्विंशतिरेव, ' षड्विंशतिरस्य वङ्क्रयः ' ( ऐ. ब्रा. २. ६ ) इति प्रैषात् । हे विशसनस्य कर्तारः अस्याश्वस्य गात्राणि शरीरावयवान् vअच्छिद्रा अच्छिद्राणि यथा भवन्ति तथा vवयुना वयुनानि प्रज्ञानानि । वयुनमिति प्रज्ञानाम, ' वयुनम् अभिख्या ' ( नि. ३. ९. १० ) इति तन्नामसूक्तत्वात् । vकृणोत कुरुत ॥ ' तसनसनथनाश्च ' इति तबादेशः ॥ हृदयजिह्वावक्षःप्रभृतीनि प्रज्ञाय मध्ये छिन्नानि मा कुरुतेत्यर्थः । तदर्थं vपरुःपरुः प्रतिपर्व प्रतिहृदयाद्यवयवम् vअनुघुष्य इदमवद्यमिति संशब्द्यैव vवि vशस्त विशसनं कुरुत ॥ ' शस् हिंसायाम् ' । छान्दसः शपो लुक् ॥ ' गात्रंगात्रमस्यानूनं कृणुतात् ' ( ऐ. ब्रा. २. ६ ) इति प्रैषात् ॥

एकस्त्वष्टुरश्वस्या विशस्ता द्वा यन्तारा भवतस्तथ ऋतुः ।
या ते गात्राणामृतुथा कृणोमि ताता पिण्डानां प्र जुहोम्यग्नौ ॥ १९ ॥

एकः । त्वष्टुः । अश्वस्य । विऽशस्ता । द्वा । यन्तारा । भवतः । तथा । ऋतुः ।
या । ते । गात्राणाम् । ऋतुऽथा । कृणोमि । ताऽता । पिण्डानाम् । प्र । जुहोमि । अग्नौ ॥ १९ ॥

---

१. क्ष-झ१-ञ-ट–गमने । २. क्ष-ञ-ट–अर्वतो गमनं कुर्वन् शूत्कारं कुर्वतः ते; ङ-अर्वतो गमनं कुर्वतः ते; झ१–सर्वतो गमनं कुर्वतः ते । ३. क्ष-झ१-ञ-ट–सूदयति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]त्वष्टुः अस्य[1] दीप्तस्य [v]अश्वस्य [v]विशस्ता विशसनस्य कर्ता [v]एकः । एक एव । स कः । [v]ऋतुः एतदुपलक्षितः कालात्मा तस्यैव सर्वेषामपि पर्यवसितृत्वात् । यद्वा । ऋतुः निःशङ्कविशसनाय गन्ता शमिता । [v]तथा [v]द्वा [v]यन्तारा नियमयितारौ अहोरात्रे देवौ द्यावापृथिव्यौ वा ऋत्विक्षु [v]भवतः ॥ तथ ऋतुः इत्यत्र ' ऋत्यकः ' इति प्रकृतिभावो ह्रस्वत्वं च ॥ हे अश्व [v]ते तव [v]गात्राणां[2] मध्ये [v]या यानि हृदयाद्यवयवानि [v]ऋतुथा[2] काले[3] [v]कृणोमि छिनद्मि संपादयामि [v]पिण्डानां मध्ये [v]ताता तानि तानि प्रज्ञानानुरोधेन[4] [v]अग्नौ [v]प्र [v]जुहोमि प्रकर्षेण हुतं करोमि ॥

मा त्वा तपत्प्रिय आत्मापियन्तं मा स्वधितिस्तन्वः आ तिष्ठिपत्ते ।
मा ते गृध्नुरविशस्तातिहाय छिद्रा गात्राण्यसिना मिथू कः ॥ २० ॥

मा । त्वा । तपत् । प्रियः । आत्मा । अपिऽयन्तम् । मा ।
स्वऽधितिः । तन्वः । आ । तिस्थिपत् । ते ॥ मा । ते । गृध्नुः ।
अविऽशस्ता । अतिऽहाय । छिद्रा । गात्राणि । असिना । मिथु । करिति कः ॥ २० ॥

हे अश्व [v]त्वा त्वाम् [v]अपियन्तं देवान् प्रति गच्छन्तं [v]प्रियः [v]आत्मा भोगायतनत्वात् तव प्रियतरो देहः [v]मा [v]तपत् तप्तं मा कार्षीत् वियोगजनिता व्यथा मा भूदित्यर्थः । [v]स्वधितिः शस्त्रं [v]ते तव [v]तन्वः तनूः अङ्गानि [v]मा [v]आ [v]तिष्ठिपत् त्वयि चिरमास्थितानि मा कार्षीत् ॥ स्थापयतेर्लुङि ' तिष्ठतेरित् ' ( पा. सू. ७. ४. ५ ) इति इत्वम् ॥ तथा [v]ते तव [v]गात्राणि [v]गृध्नुः केवलमांसग्रहणेप्सुः [v]अविशस्ता विशसने अकुशलः शमिता [v]अतिहाय न्यूनातिरेकभावेन तत्तदङ्गमतिक्रम्य मध्ये [v]मिथु मिथ्या व्यर्थम् [v]असिना [v]छिद्रा छिद्राणि तिर्यक्छिन्नानि [v]मा [v]कः मा कार्षीत् ॥ करोतेर्लुङि ' मन्त्रे घस° ' इति च्लेर्लुक् । गुणः । ' हल्ङ्याब्भ्यः° ' इति तलोपः[5] ॥

न वा उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः ।
हरी ते युञ्जा पृषती अभूतामुपास्थाद्वाजी धुरि रासभस्य ॥ २१ ॥

न । वै । ऊँ इति । एतत् । म्रियसे । न । रिष्यसि । देवान् । इत् । एषि । पथिऽभिः । सुऽगेभिः ।
हरी इति । ते । युञ्जा । पृषती इति । अभूताम् । उप । अस्थात् । वाजी । धुरि । रासभस्य ॥ २१ ॥

[v]न [v]वा [v]उ नैव खलु [v]एतन्म्रियसे । वैशब्दः एवकारार्थः । उ इत्यवधारणे । नैव इदानीम् इतराश्ववत् मृतो भवसि देवत्वप्राप्तेर्वक्ष्यमाणत्वात् । अत एव [v]न [v]रिष्यसि न हिंस्यसे[6] । व्यर्थहिंसायाः[6] अभावात् । ननु प्रत्यक्ष्यतो मृतिः अवयवनाशश्च दृश्यते कथमेवमुच्यते इति । उच्यते । [v]सुगेभिः

---

१. ङ-ञ१-अश्वस्य । २. क्ष-ञ-ट-गात्राणां अवयवानां हृदयाद्यवयवानि । कर्मणि षष्ठी । ऋतुथा । ३. क्ष-ङ-ञ-ञ-ट-काले काले । ४. क्ष-ञ-ट-प्रजातानुरोधे वा; ङ-प्रज्ञानानुसारेण; ञ१-प्रजातानुरोधे । ५. क्ष-ञ-ट-तिलोपः । ६. ञ-हिंस्यसे इत्यर्थः । हिंसायाः ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vपथिभिः शोभनगमनसाधनैर्मार्गैः देवयानलक्षणैः vदेवान् vइत् vएषि देवानेव प्राप्नोषि। अतो युक्तैषोक्तिः। कैः साधनैरिति तत्राह। vते त्वां वोढुं vहरी एतन्नामानौ इन्द्रस्याश्वौ ते तव vयुञ्जा रथे युक्तौ vअभूतां भविष्यतः। आशंसारूपत्वात् भूतार्थनिर्देशः। 'हरी इन्द्रस्य' (नि. १. १५. १) इति निरुक्तम्। तथा vपृषती पृषत्यौ मरुतां वाहनभूतौ युञ्जा[1] अभूतां[1] युक्तौ भविष्यतः। 'पृषत्यो मरुताम्' (नि. १. १५. ६) इति च निरुक्तम्॥ युजेः 'ऋत्विक्०' इत्यादिना क्विन्। 'युजेरसमासे' (पा. सू. ७. १. ७१) इति नुम्। 'सुपां सुलुक्०' इति आकारः॥ तथा vरासभस्य अश्विवाहनस्य एतन्नामकस्याश्वस्य vधुरि स्थाने वर्तमानः कश्चित् vवाजी vउपास्थात् उपस्थास्यति वहतीत्यर्थः। यद्वा। रासभस्य भानोः धुरि वर्त्मनि युक्तो वाजी अश्वः उपस्थास्यति देवत्वं गच्छतस्तव गमनाय इन्द्रादयः स्वस्ववाहनानि प्रेषयन्तीत्यर्थः। यद्वा। तत्तद्देवभावमापन्नं त्वां तानि तानि वाहनानि वहन्ति॥

उपाकरणकाले अवघ्राणावर्तने[2] यद्यश्वो न कुर्यात् तदैषा नैमित्तिकी यजमानवाचनार्था भवति। तथा च सूत्रितं–'सुगव्यं नो वाजी स्वश्व्यमिति यजमानं वाचयेत्' (आश्व. श्रौ. १०. ८) इति॥

सुगव्यं नो वाजी स्वश्व्यं पुंसः पुत्राँ उत विश्वापुषं रयिम्।
अनागास्त्वं नो अदितिः कृणोतु क्षत्रं नो अश्वो वनतां हविष्मान्॥२२॥

सुऽगव्यम्। नः। वाजी। सुऽअश्व्यम्। पुंसः। पुत्रान्। उत। विश्वऽपुषम्। रयिम्।
अनागाःऽत्वम्। नः। अदितिः। कृणोतु। क्षत्रम्। नः। अश्वः। वनताम्। हविष्मान्॥२२॥

vवाजी अश्वः आलभ्यमानः vनः अस्माकं vसुगव्यं शोभनेन गोसमूहेन युक्तं vविश्वापुषं vरयिं विश्वस्य पोषकं धनं vकृणोतु करोतु॥ 'खलगोरथात्' (पा. सू. ४. २. ५०) इति समूहार्थे यत्। छान्दसमुत्तरपदाद्युदात्तत्वम्। यद्वा। सामूहिकस्याणः प्रसङ्गे 'सर्वत्र गोरजादिप्रत्ययप्रसङ्गे' (का. ४. ३. १६०) इति यत्। तदन्तस्य 'आद्युदात्तं द्यच्छन्दसि' इत्युत्तरपदाद्युदात्तत्वम्॥ तथा vस्वश्व्यं शोभनाश्वसमूहयुक्तम्। तथा vपुंसः vपुत्रान्। पुत्रशब्दः स्त्रीपुमपत्यसाधारणः। अतः पुमपत्यानीत्यर्थः। यद्वा। पुंसो वध्वादीन्[3] पुत्रान्[3] पुररक्षकान् आत्मजान्[4]। स्त्र्यपत्यानि[5] पुमपत्यानि[5] च इत्यर्थः। vउत अपि च विश्वापुषं रयिं विश्वपोषणसमर्थं धनम्। किंच vनः अस्मान् vअदितिः अदीनः अश्वः vअनागास्त्वं कृणोतु सर्वतो निष्पापत्वं करोतु। उक्तानां फलानां न्यूनातिरेकजनितपापक्षयाभावे असंभवात् अपापत्वं प्रार्थ्यते। किंच vहविष्मान् हविर्भूतावयवोपेतः vअश्वः vनः अस्माकं vक्षत्रं बलं क्षात्रं तेजः vवनतां संभजतां कुरुताम्॥ ॥ १० ॥

'यदक्रन्दः' इति त्रयोदशर्चं सप्तमं सूक्तं दैर्घतमसं त्रैष्टुभम्। अश्वस्य स्तूयमानत्वात्तद्देवत्यम्। 'यदक्रन्दः ससोना' इत्यनुक्रमणिका। आश्वमेधिके मध्यमेऽहनि उपाकरणाय अवस्थितम् अश्वम् आद्याभिरेकादशभिः स्तौति। तथा च 'त्रीणि सुत्यानि' इति खण्डे सूत्रितं–'तमवस्थितमुपाकरणाय यदक्रन्द इत्येकादशभिः स्तौत्यप्रणुवन्' (आश्व. श्रौ. १०. ८) इति॥

---

१. क्ष-ञ-ट–युञ्जावभूताम्। २. क्ष-ञ-ट–अवघ्राणोपवर्तने। ३. क्ष-ञ-ट–बन्धुपुत्रादीन्; ङ-ञ१–बन्धून् पुत्रादीन्; ङ-ञ१–बन्ध्वादीन् पुत्रान्। ४. ङ-ञ१–आत्मरक्षकान्। ५. ङ-ञ१–स्त्र्यपत्यम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यदक्रन्दः प्रथमं जायमान उद्यन्त्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहू उपस्तुत्यं महि जातं ते अर्वन् ॥ १ ॥

यत् । अक्रन्दः । प्रथमम् । जायमानः । उत्ऽयन् । समुद्रात् । उत । वा । पुरीषात् ।
श्येनस्य । पक्षा । हरिणस्य । बाहू इति । उपऽस्तुत्यम् । महि । जातम् । ते । अर्वन् ॥१॥

हे Vअर्वन् अरणकुशलाश्व Vते तव Vजातं जन्म जननम् Vउपस्तुत्यम् उपेत्य सर्वैः स्तोतव्यम् ॥ स्तौतेः 'एतिस्तुशास्वृ०' इति क्यप् । ततः तुक् ॥ कथं स्तुत्यत्वमिति उच्यते । Vयत् यस्मात् Vसमुद्रात् । अन्तरिक्षनामैतत् । उदकसमुन्दनापादानात्[1] यक्षगन्धर्वादिसंमोदनाधिकरणात् वा अन्तरिक्षात् Vप्रथमं पूर्वं Vजायमानः उत्पन्नः । यद्वा । समुद्रः आदित्यः समुन्दनात् वृष्ट्या । तस्माद्वा जायमानः । 'सूरादश्वं वसवो निरतष्ट' ( ऋ. सं. १. १६३. २ ) इति वक्ष्यमाणत्वात् । Vउत Vवा अथवा Vपुरीषात् सर्वकामानां पूरकात् उदकात् प्रथमम् Vउद्यन् जायमानः । स तादृशस्त्वं यत् यस्मात् Vअक्रन्दः महाशब्दमकरोः यजमानमनुग्रहीतुम् । किंच ते Vपक्षा पतनसाधनौ पक्षौ Vश्येनस्य[2] पक्षाविव[2] । तौ यथा शीघ्रपतनसाधनौ तादृशावित्यर्थः । तव Vबाहू Vहरिणस्य बाहू इव । तौ यथा वेगवन्तौ तादृशावित्यर्थः । यस्मादेवं तस्मात्ते जन्म स्तुत्यमित्यर्थः ॥

यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत् ।
गन्धर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट ॥ २ ॥

यमेन । दत्तम् । त्रितः । एनम् । अयुनक् । इन्द्रः । एनम् । प्रथमः । अधि । अतिष्ठत् ।
गन्धर्वः । अस्य । रशनाम् । अगृभ्णात् । सूरात् । अश्वम् । वसवः । निः । अतष्ट ॥ २ ॥

Vयमेन नियामकेनाग्निना Vदत्तम् Vएनम् अश्वं Vत्रितः पृथिव्यादिषु त्रिषु स्थानेषु वर्तमानः स्तीर्णतमो वा वायुः Vअयुनक् रथे योजितवान् । किंच Vएनम् अश्वम् Vइन्द्रः Vप्रथमः प्रतमः प्रकृष्टतमः । प्रथम इति मुख्यनाम । Vअध्यतिष्ठत् अधिष्ठितवान् । Vअस्य Vगन्धर्वः सोमः । 'सोमेन समया विपृक्तः' ( ऋ. सं. १. १६३. ३ ) इति वक्ष्यमाणत्वात् । स च अस्य अश्वस्य Vरशनां नियमन-रज्जुम् Vअगृभ्णात् अग्रहीत् । ईदृशोऽश्वः कुतः समुत्पन्नः इति चेत् उच्यते । हे Vवसवः रश्मयः यूयं Vसूरात् आदित्यात् Vअश्वम् एवंमहानुभावं[3] Vनिरतष्ट निःशेषेण साधु संपादितवन्तः । यद्वा । वसुशब्देनोक्ता एव यमादयः परामृश्यन्ते । हे वसवः स्वस्वव्यापारेण सर्वस्याच्छादयितारः यूयं सूरादादित्यात् अश्वम्[4] एनं निरतष्ट अतक्षत । निरित्येष समित्येतस्य स्थाने । तक्षतिः करोतिकर्मा । स च क्रियासामान्यवचनः । अत्रौचित्यात् धारणे वर्तते । सम्यग्धारितवन्त इत्यर्थः ॥ तक्षेर्लङि छान्दसः शपो लुक् । 'स्कोः संयोगाद्योः०' इति कलोपः ॥

---

१. ङ-ञ१—उदकसमुन्दनात् । २. ङ-ञ१—श्येनपक्ष्याविव । ३. क्ष-ङ-ञ१-ञ-ट—एनं महानुभावम् । ४. क्ष-ङ-ञ१-ञ-ट—अश्वं व्याप्तम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन।
असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि ॥ ३ ॥

असि। यमः। असि। आदित्यः। अर्वन्। असि। त्रितः। गुह्येन। व्रतेन।
असि। सोमेन। समया। विऽपृक्तः। आहुः। ते। त्रीणि। दिवि। बन्धनानि ॥ ३ ॥

हे ᵛअर्वन् त्वं ᵛयमः ᵛअसि नियमिता अग्निरसि। तेन दत्तत्वात् तच्छब्दव्यपदेशः। तथा ᵛआदित्यः ᵛअसि। 'सूरान्निरतष्ट' इत्युक्तत्वात्। तथा ᵛगुह्येन ᵛव्रतेन गोपनीयेन दुर्निरूपेण वा कर्मणा। सर्वत्र व्याप्तिरूपेणेत्यर्थः। तेन ᵛत्रितः त्रिषु स्थानेषु तायमानो वायुः ᵛअसि। 'त्रित एनमायुनक्' इत्युक्तत्वात्तद्रूपत्वम्। अथवा गुह्येन व्रतेन गोपनीयेन कर्मणा योगादिसाधनरूपेण[1] त्रितः एतन्नामकः ऋषिरसि। किंच हे अश्व त्वं ᵛसोमेन ᵛसमया[2] सह ᵛविपृक्तः[2]। वि इत्येष समित्येतस्मिन्नर्थे। संपृक्तः ᵛअसि तेन गृहीतत्वात्[3]। हे अश्व एवंरूप ᵛते तव ᵛदिवि द्युलोके आदित्ये वा वर्तमानस्य ᵛत्रीणि[4] ᵛबन्धनानि उत्पत्तिकारणानि ᵛआहुः पुराविदः। वसवः आदित्यो द्युस्थानं चेति त्रीणि ॥

त्रीणि त आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे।
उतेव मे वरुणश्छन्त्स्यर्वन्यत्रा त आहुः परमं जनित्रम् ॥ ४ ॥

त्रीणि। ते। आहुः। दिवि। बन्धनानि। त्रीणि। अप्ऽसु। त्रीणि। अन्तरिति। समुद्रे।
उतऽइव। मे। वरुणः। छन्त्सि। अर्वन्। यत्र। ते। आहुः। परमम्। जनित्रम् ॥ ४ ॥

पूर्वं[5] दिवि[5] त्रीणि बन्धनानि इत्युक्तम्। इदानीं स्थानत्रयेष्वपि[6] त्रीणि बन्धनानि इत्याह। हे अर्वन् ᵛते तव ᵛदिवि ᵛबन्धनानि ᵛत्रीणि ᵛआहुः तानि पूर्वमुक्तानि। ᵛअप्सु। अबुपजीवितत्वात्[7] भूलोकोऽपि अप्शब्देनाभिधीयते। पृथिव्यां ᵛत्रीणि बन्धनान्याहुः। अन्नं स्थानं बीजमिति त्रीणि। तथा ᵛसमुद्रे ᵛअन्तः समुद्रमध्ये। समुद्द्रवणादपादानात्[8] समुद्रमन्तरिक्षम्। तस्मिन् ᵛत्रीणि वृष्ट्युत्पत्तिनिमित्तानि[9] मेघो विद्युत् स्तनितमिति। ᵛउतेव। इवशब्दश्चार्थे। अपि च हे ᵛअर्वन् अश्व ᵛवरुणः पापस्य वारकः फलस्यावर्जयिता वा त्वं ᵛमे मह्यं ᵛछन्त्सि कथयसि। किं कथयसीति चेत् उच्यते। ᵛते तव ᵛपरमं ᵛजनित्रं निरतिशयं जन्म ॥ जनेरौणादिकः इत्रप्रत्ययः ॥ ᵛयत्र येषु त्रिपृक्तेषु स्थानेषु ᵛआहुः कथयन्ति। यद्वा। यत्र यस्मिन् आदित्ये परमं जनित्रमाहुः। 'सूरादश्वं वसवो निरतष्ट' इत्युक्तत्वात्। तादृशं प्रशस्यं जन्म यज्ञसाधनभावेन कथयसीत्यर्थः ॥

---

१. क्ष-ङ-ञ-ञ-ट–यागादिसाधनरूपेण। २. क्ष-ङ-ञ१-ञ-ट–समयः कालः। मत्वर्थो लुप्यते। चन्द्रगत्यधीनत्वात् कालस्य। तेन विपृक्तः; ञ–समया सन् विपृक्तः। ३. क्ष-ङ-ञ१-ञ-ट–'गृहीतत्वात्' इत्यस्यानन्तरं 'यद्वा आदित्यादश्वोत्पत्तेरुक्तत्वात् तादभेदेन अश्वोऽप्यादित्य उच्यते। तादृशस्त्वं चन्द्रेण सह समया कालेन व्यवधायकेन विपृक्तोऽपि (क्ष-ञ-ट– विपृक्तो वियोजितोऽसि)' इत्यधिकम्। ४. क्ष-ञ१-ञ-ट–त्रीणि स्थानानि। ५. क्ष-ञ-ट–पूर्वमन्त्रे। ६. ङ-ञ१-स्थानत्रयेऽपि। ७. ङ-ञ१–अबुपजीवित्वात्। ८. क्ष-ङ-ञ१-ञ-ट–समुद्रेण अपामुपादानात्। ९. क्ष-ञ-ट–उत्पत्तिस्थानानि।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इमा ते वाजिन्नवमार्जनानीमा शफानां सनितुर्निधानां ।
अत्रा ते भद्रा रशना अपश्यमृतस्य या अभिरक्षन्ति गोपाः ॥ ५ ॥

इमा । ते । वाजिन् । अवऽमार्जनानि । इमा । शफानाम् । सनितुः । निऽधानां ।
अत्र । ते । भद्राः । रशनाः । अपश्यम् । ऋतस्य । याः । अभिऽरक्षन्ति । गोपाः ॥ ५ ॥

हे [v]वाजिन् अश्व [v]ते संबन्धीनि [v]अवमार्जनानि अङ्गसंशोधकानि स्थानानि [v]इमा इमान्युक्तानि द्युलोकादीनि किंच [v]सनितुः यागसंभक्तुः तव[1] [v]इमा इमानि [v]शफानां निधानानि स्थानानि[2] संचारप्रदेशा इत्यर्थः । किंच [v]अत्र एव [v]ते तव [v]भद्राः भन्दनीयाः कल्याणाः[3] [v]रशनाः ग्रीवादिषु संयुक्ताः रज्जूः अत्र [v]अपश्यम् एषूक्तेषु स्थानेषु अपश्यम् । रशनाः विशेष्यन्ते । [v]याः [v]गोपाः गोपयित्र्यः[4] रशनाः [v]ऋतस्य सत्यभूतस्य यज्ञसाधनस्य वाश्वस्य ॥ कर्मणि षष्ठी ॥ ऋतम् [v]अभिरक्षन्ति अभितः पालयन्ति ताः अपश्यं दृष्टवानस्मि । यद्वा । इमा ते तव अवमार्जनानि अङ्गप्रक्षालनसाधनान्युदकानि । इमानि सनितुः तव शफानां निधानानि देवयजनभूमयः संचारप्रदेशा वा । अत्रास्मिन् देवयजनस्थाने या रशनाः गोपाः तव पालयितारो राजपुरुषाः ऋत्विजो वा ऋतस्य[5] संबन्धिन्योऽभिरक्षन्ति ता अपश्यम् ॥ ॥ ११ ॥

आत्मानं ते मनसारादजानामवो दिवा पतयन्तं पतङ्गम् ।
शिरो अपश्यं पथिभिः सुगेभिररेणुभिर्जेहमानं पतत्रि ॥ ६ ॥

आत्मानम् । ते । मनसा । आरात् । अजानाम् । अवः । दिवा । पतयन्तम् । पतङ्गम् ।
शिरः । अपश्यम् । पथिऽभिः । सुऽगेभिः । अरेणुऽभिः । जेहमानम् । पतत्रि ॥ ६ ॥

हे अश्व [v]ते तव [v]आत्मानं शरीरं [v]मनसा अस्मदीयेन प्रकृष्टगमनवता चेतसा [v]आरात् अतिदूरे स्थितम् [v]अजानां जानामि अतिव्याप्तं भावयामीत्यर्थः । कथम् । [v]अवः अवस्तात् सामर्थ्यात् भूमेः । भूमिमारभ्य [v]दिवा अन्तरिक्षेण मार्गेण [v]पतङ्गम् आदित्यं [v]पतयन्तं गच्छन्तं व्याप्नुवन्तम् । यद्वा । यतो दिवा अन्तरिक्षेण मार्गेण दिवि वा पतयन्तं गच्छन्तं पतङ्गमादित्यम् अवः आवः व्याप्नोषि अतो व्याप्तं जानामि । किंच [v]शिरः [v]अपश्यम् । तव शिरः एवं पश्यामि । कथम् । [v]सुगेभिः शोभनगमनसाधनैः [v]अरेणुभिः अपापैः [v]पथिभिः मार्गैः । आदित्यमण्डलादपि उपरिभूतैः सत्यलोकमार्गैरित्यर्थः । तत्र प्रतिबन्धाभावात् मार्गाणामुक्तरूपत्वम् । तथाविधैस्तैः [v]जेहमानम् उपर्युपरि व्याप्नुवत् [v]पतत्रि पतनवच्छिरोऽपश्यं भावयामि । एवं लोकत्रयव्याप्तं भावयामीत्यर्थः । यद्वा । ते आत्मानम् एवं[6] भावयामि मनसा दिवा द्योतनात्मकेन अन्तरिक्षमार्गेण दिवः सकाशाद्वा अवः अवस्तादवाङ्मुखं पतयन्तं यागदेशं प्रति व्याप्नुवत् अत एव पतङ्गं पतनशीलम् अधःपतदादित्यसदृशं वा । एवं तव शिरो भावयामीत्यर्थः । शिरश्चैवमपश्यम् । उक्तरूपैर्देवयजनमार्गैर्जेहमानं यज्ञदेशं व्याप्नुवत् पतत्रि शीघ्रगामि शिरः पश्यामि । यद्यप्यात्मशब्देन सशिरस्कं शरीरमुक्तं तथापि देहात् पूर्वं शिरसो दृश्यमानत्वात् पृथगभिधीयते[7] ॥

---

१. झ१–ते तव । २. झ१–निधानस्थानानि । ३. क्ष-झ१-ञ-ट–कल्याणीः । ४. ङ-झ१–गोपायित्र्यः ५. झ१–ऋतस्य तव । ६. क्ष-ङ-झ१-ञ-ट–एनम् । ७. क्ष-झ१-ञ-ट–पृथगभिधानम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अत्रा ते रूपमुत्तममपश्यं जिगीषमाणमिष आ पदे गोः ।
यदा ते मर्तो अनु भोगमानळादिद्ग्रसिष्ठ ओषधीरजीगः ॥ ७ ॥

अत्र । ते । रूपम् । उत्ऽतमम् । अपश्यम् । जिगीषमाणम् । इषः । आ । पदे । गोः ।
यदा । ते । मर्तः । अनु । भोगम् । आनट् । आत् । इत् । ग्रसिष्ठः । ओषधीः । अजीगरिति ॥७॥

एवं गमनानन्तरं हे अश्व [v]ते तव [v]उत्तमम् उत्कृष्टेनोत्कृष्टतमं [v]रूपम् [v]अत्र अस्मिन् यागदेशे [v]अपश्यं पश्यामि । कीदृशम् । [v]गोः भूम्याः [v]पदे स्थाने देवस्थाने[1] देवयजनप्रदेशे आजिधावनस्थाने वा [v]इषः ॥ कर्मणि षष्ठी ॥ इषम् इष्यमाणम् अन्नम् अन्नानि वा [v]आ सर्वतः [v]जिगीषमाणं गन्तुमिच्छन्तम् । हे अश्व [v]ते तव [v]यदा [v]मर्तः मनुष्यः [v]भोगं भोक्तव्यमन्नम् [v]अनु [v]आनट् ॥ नशतिर्गतिकर्मा ॥ अनुक्रमेण समीपं गमयति । [v]आदित् अनन्तरं तदानीमेव तदनुग्रहात् विलम्बमकृत्वा [v]ग्रसिष्ठः महातृष्णयेव ग्रसितृतमो भक्षयितृतमः सन् [v]ओषधीः अन्नानि [v]अजीगः गिरसि भक्षयसि । महानुभावोऽपि त्वं लौकिकाश्ववत् तुच्छेन पुरुषेण दीयमानं स्वल्पं भक्ष्यम् अनुग्रहात् स्वीकरोषीत्यर्थः ॥

अनु त्वा रथो अनु मर्यो अर्वन्ननु गावोऽनु भगः कनीनाम् ।
अनु व्रातासस्तव सख्यमीयुरनु देवा ममिरे वीर्यं ते ॥ ८ ॥

अनु । त्वा । रथः । अनु । मर्यः । अर्वन् । अनु । गावः । अनु । भगः । कनीनाम् ।
अनु । व्रातासः । तव । सख्यम् । ईयुः । अनु । देवाः । ममिरे । वीर्यम् । ते ॥ ८ ॥

इदानीं कृत्स्नस्य लोकस्यापि मुख्यः इति प्रतिपादयति । हे [v]अर्वन् गमनशीलाश्व [v]त्वा त्वाम् [v]अनु अनुसृत्य [v]रथः गच्छति । ततः पुरतोऽश्वस्य गमनात् । तथा [v]मर्यः मर्त्यः त्वा त्वाम् [v]अनु ॥ जात्येकवचनम् ॥ [v]अनु [v]गावः । गावोऽपि त्वामनुगच्छन्ति । तथा [v]कनीनां कन्यकानां स्त्रीणां [v]भगः भाग्यं सौन्दर्यं त्वद्गतम् [v]अनु । तथा [v]व्रातासः व्राताः संघात्मकाः अन्ये अश्वसमूहाः वस्वादिदेवगणाः वा त्वाम् [v]अनु अनुसृत्य [v]तव [v]सख्यम् [v]ईयुः सखिभावं गच्छन्ति । [v]देवाः ऋत्विजो द्योतमाना देवा वा त्वामनुसृत्य [v]ते [v]वीर्यं वीरकर्म [v]ममिरे स्तुत्या मान्ति । अतः सर्वोऽपि त्वाम् अनुसरः[2] त्वं तु सर्वस्य श्रेष्ठ इत्यर्थः ॥

हिरण्यशृङ्गोऽयो अस्य पादा मनोजवा अवर इन्द्र आसीत् ।
देवा इदस्य हविरद्यमायन्यो अर्वन्तं प्रथमो अध्यतिष्ठत् ॥ ९ ॥

हिरण्यऽशृङ्गः । अयः । अस्य । पादाः । मनःऽजवाः । अवरः । इन्द्रः । आसीत् ।
देवाः । इत् । अस्य । हविःऽअद्यम् । आयन् । यः । अर्वन्तम् । प्रथमः । अधिऽअतिष्ठत् ॥९॥

---

१. ज्ञ-ज्ञ१–'देवस्थाने' नास्ति । २. क्ष-ङ-ज्ञ१-ञ-ट–अनुसरति; ज्ञ–अनुसरतु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अयमश्वः [V]हिरण्यशृङ्गः हितरमणीयशृङ्गो वा उन्नतशिरस्को हृदयरमणशृङ्गस्थानीयशिरोरुहो वा [V]अस्य [V]पादाः [V]अयः अयोमयाः अयःपिण्डसदृशा इत्यर्थः । तथा [V]मनोजवाः मनोवेगाः । अथवा एतदिन्द्रविशेषणम् । ईदृशस्याश्वस्य सामर्थ्यं प्रति मनोवेगः [V]इन्द्रः अपि [V]अवरः निकृष्टः [V]आसीत् । किंच [V]अस्य अश्वस्य [V]हविरद्यं हविषः अदनं भक्षणम् ॥ स्वार्थिको यत् ॥ अदनयोग्यं हविर्वा अपेक्ष्य [V]देवा [V]इत् सर्वेऽपि देवाः [V]आयन् प्राप्ताः । [V]यः इन्द्रः [V]अर्वन्तं[1] [V]प्रथमः प्रथमभावी सन् [V]अध्यतिष्ठत् अधिष्ठितवान् स्वहविष्ट्वेन[2] स्वकीयत्वेन वा आश्रितवानित्यर्थः । 'इन्द्र एणं प्रथमो अध्यतिष्ठत्' इति ह्युक्तम् ॥

ईर्मान्तासः सिलिकमध्यमासः सं शूरणासो दिव्यासो अत्याः ।
हंसाइव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्मम्मश्वाः ॥ १० ॥

ईर्मऽअन्तासः । सिलिकऽमध्यमासः । सम् । शूरणासः । दिव्यासः । अत्याः ।
हंसाःऽइव । श्रेणिऽशः । यतन्ते । यत् । आक्षिषुः । दिव्यम् । अज्मम् । अश्वाः ॥ १० ॥

अत्र अश्वसमूहस्तुतिद्वारेण अयं स्तूयते । [V]ईर्मान्तासः ईरिताः प्रेरिताः अन्ताः येषां ते तथोक्ताः । विरलान्ता इत्यर्थः । [V]सिलिकमध्यमासः संसृताः संगताः मध्यप्रदेशाः येषां ते तथोक्ताः । मध्ये निबिडा इत्यर्थः । अथवा शरीरस्यैते विशेषणे । ईर्म ईरितः पुरतो नुन्नः इत्यर्थः । तादृशः पृथुः अन्तो जघनप्रदेशो येषां ते तादृशाः । तथा सिलिकमध्यमासः । संसृतः संगतः संलग्नो मध्यभागो येषां ते तादृशाः । पुष्टत्वात् प्रौढपृष्ठाः संलग्नमध्याश्चेत्यर्थः । जघनपुरोभागावपेक्ष्य सिलिकमध्यमाः[3] इत्युक्तम् । सम् इत्ययमुपसर्गो यतन्ते इत्याख्यातेन संबन्धयितव्यः । [V]शूरणासः विक्रमशीलाः [V]दिव्यासः दिवि भवाः [V]अत्याः अतनशीलाः । यद्यप्ययमश्वनाम तथाप्यश्वशब्दस्य वक्ष्यमाणत्वात् अयं यौगिकोऽवगन्तव्यः । ईदृशा अश्वाः [V]श्रेणिशः । एकव्यापाराणां बहूनां समूहः श्रेणिरित्युच्यते । शीघ्रधावनाय श्रेणिशः पङ्क्तीभूय [V]सं [V]यतन्ते सम्यक् यत्नं कुर्वन्ति । तत्र दृष्टान्तः । [V]हंसाइव । ते यथा श्रेणीभूताः ईर्मान्तासः इत्याद्युक्तरूपाः सन्तः अन्तरिक्षे गमनाय यतन्ते तद्वत् । कदा । उच्यते । [V]यत् यदा [V]अश्वाः [V]दिव्यम् [V]अज्मं गमनं गन्तव्यं वा मार्गम् [V]आक्षिषुः व्याप्नुवन्ति तदा । अयं मन्त्रो यास्केनैवं व्याख्यातः—'ईर्मान्ताः समीरितान्ताः पृथ्वन्ता वा सिलिकमध्यमाः संसृतमध्यमाः शीर्षमध्यमा वा अपि वा शिर आदित्यो भवति यदनुशेते सर्वाणि भूतानि मध्ये चैषां तिष्ठति । इदमपीतरच्छिर एतस्मादेव समाश्रितान्येतदिन्द्रियाणि भवन्ति । सं शूरणासो दिव्यासो अत्याः । शूरः शवतेर्गतिकर्मणो दिव्या दिविजा अत्या अतनाः । हंसा इव श्रेणिशो यतन्ते । हंसा हन्तेर्हन्त्यध्वानम् । श्रेणिशः इति श्रेणिः श्रयतेः समाश्रिता भवन्ति । यदाक्षिषुर्यदापुर्दिव्यमज्ममजनिमाजिमश्वाः' ( निरु. ४. १३ ) इति ॥ ॥ १२ ॥

---

१. क्ष-ङ-ञ-ट–अर्वन्तम् अरणवन्तम् । २. ङ–स्वहविष्यत्वेन; ३. क्ष-ञ-ट–सिलिकमध्यमासः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तव॒ शरी॑रं पतयि॒ष्ण्व॑र्व॒न्तव॑ चि॒त्तं वात॑इव॒ ध्रजी॑मान् ।
तव॒ श्रृङ्गा॑णि॒ विष्ठि॑ता पुरु॒त्रार॑ण्येषु॒ जर्भु॑राणा॒ चर॑न्ति ॥ ११ ॥

तव॑ । शरी॑रम् । प॒त॒यि॒ष्णु॒ । अ॒र्व॒न् । तव॑ । चि॒त्तम् । वातः॑ऽइव । ध्रजी॑मान् ।
तव॑ । श्रृङ्गा॑णि । विऽस्थिता । पुरु॑ऽत्रा । अर॑ण्येषु । जर्भु॑राणा । चर॑न्ति ॥ ११ ॥

हे [V]अर्वन् [V]तव [V]शरीरं [V]पतयिष्णु पतनशीलं व्याप्तमित्यर्थः । तथा [V]तव [V]चित्तं मनः [V]वात-इव [V]ध्रजीमान् शीघ्रगमनवायुरिव तद्वच्छीघ्रगमनानुकूलमित्यर्थः । किंच [V]तव [V]श्रृङ्गाणि शिरसो निर्गताः श्रृङ्गस्थानीयाः केशाः [V]पुरुत्रा पुरुषु बहुषु प्रदेशेषु [V]विष्ठिता विष्ठितानि विविधं स्थिताः । किंच त एव [V]अरण्येषु [V]जर्भुराणा मनोहराणि पूर्यमाणानि वा एवंभूताः केशाः [V]चरन्ति । यद्वा । अत्र अश्वस्य श्रृङ्गाभावात् तद्वदुन्नतानि तेजांसि परिगृह्यन्ते ॥

आश्वमेधिके मध्यमेऽहनि अध्रिगुप्रैषे ' मा नो मित्रः ' इति सूक्तानन्तरम् ' उप प्रागाच्छसनम् ' इति द्वे ऋचौ शंसनीये । सूत्रितं च–' उप प्रागाच्छसनमिति द्वे ' ( आश्व. श्रौ. १०. ८ ) इति ॥

उप॒ प्रागा॒च्छस॑नं वा॒ज्यर्वा॑ दे॒वद्री॑चा॒ मन॑सा॒ दीध्या॑नः ।
अ॒जः पु॒रो नी॑यते॒ नाभि॑र॒स्यानु॑ प॒श्चात्क॒वयो॑ यन्ति॒ रेभाः॑ ॥ १२ ॥

उप॑ । प्र । अ॒गा॒त् । शस॑नम् । वा॒जी । अर्वा॑ । दे॒वद्री॑चा । मन॑सा । दीध्या॑नः ।
अ॒जः । पु॒रः । नी॒य॒ते॒ । नाभिः॑ । अ॒स्य॒ । अनु॑ । प॒श्चात् । क॒वयः॑ । य॒न्ति॒ । रेभाः॑ ॥१२॥

अयम् [V]अर्वा अरणकुशलः [V]वाजी अश्वः [V]शसनं विशसनस्थानम् [V]उप [V]प्रागात् उपप्रैति । किं कुर्वन् । [V]देवद्रीचा [V]मनसा देवान् गच्छता मनसा [V]दीध्यानः ध्यायन् । कदा । देवान् अस्मदवयवेन अर्चामि देवत्वं प्राप्नोमीति वा मनसि ध्यायन् । किंच अस्य पुरः पुरस्तात् [V]नाभिः नहनं बन्धुभूत इत्यर्थः । यद्वा। अस्य बन्धनस्थानीयः अविमुक्तत्वात्[1]। एवंभूतः [V]अजः [V]पुरः [V]नीयते पुरतः प्राप्यते [V]अनु अनुसृत्य [V]पश्चात् अनन्तरम्। अत्र यद्यप्युभयोः पर्यवसितोऽर्थः एक एव तथापि अजाश्वोभयान-न्तर्यत्वप्रकटनाय[2] पदद्वयम्। यद्वा । अन्विति क्रियया संबध्यते। [V]कवयः अनूचानाः [V]रेभाः स्तोतारः ऋत्विजः [V]यन्ति गच्छन्ति । ' ये वा अनूचानास्ते कवयः ' इति श्रुतेः । यद्वा । कवय इति मेधाविनाम, ' कविः मनीषी ' ( नि. ३. १५. १० ) इति तन्नामसु पठितत्वात् । रेभः इति स्तोतृनाम, ' रेभः जरिता ' ( नि. ३. १६. १ ) इति तत्र[3] पाठात् ॥

---

१. क्ष-ञ-ट–अवियुक्तत्वात् । २. क्ष-ङ-ञ-ट–अजाश्वयोः उभयानुवर्तित्वप्रकटनाय । ३. क–तन्नामसु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उप॒ प्रागा॑त्पर॒मं यत्स॒धस्थ॒मर्वाँ॑ अच्छा॑ पि॒तरं॑ मा॒तरं॑ च ।
अ॒द्या दे॒वाञ्जु॒ष्टत॑मो॒ हि ग॒म्या अथा शा॑स्ते दा॒शुषे॒ वार्या॑णि ॥ १३ ॥

उप॑ । प्र । अ॒गा॒त् । प॒र॒मम् । यत् । स॒धऽस्थ॑म् । अर्वा॑न् । अच्छ॑ । पि॒तर॑म् । मा॒तर॑म् । च॒ ।
अ॒द्य । दे॒वान् । जु॒ष्टऽत॑मः । हि । ग॒म्याः । अथ॑ । आ । शा॒स्ते॒ । दा॒शुषे॑ । वार्या॑णि ॥ १३ ॥

[v]अर्वान् अरणकुशलोऽयमश्वः [v]उप [v]प्रागात् उपगच्छति । किम् । [v]यत् [v]परमम् उत्कृष्टं [v]सधस्थं सहस्थानं सुकृतिभिरेकत्रनिवासयोग्यं स्वर्गाख्यं यदस्ति तत् । किमर्थम् । [v]पितरं [v]मातरं [v]च [v]अच्छ आभिमुख्येन प्राप्तुम् । हे अश्व [v]अद्य अस्मिन् काले [v]जुष्टतमः प्रीततमः स्वर्गं[1] प्राप्नोमीति[1] हर्षयुक्तः इत्यर्थः । एवंभूतः [v]देवान् [v]गम्याः गच्छेर्देवान् । हिशब्दो यज्ञे उपयुक्तस्य पशोः स्वर्गप्राप्तेः ' सगभ्र्योऽनु सखा सयूथ्यः ' ( तै. सं. १. २. ४. २ ) इत्यादिमन्त्रान्तरप्रसिद्धिद्योतनार्थः । [v]अथ अनन्तरं यजमानः [v]आ [v]शास्ते । कस्मै । [v]दाशुषे हविर्दत्तवते स्वस्मै । कानि । [v]वार्याणि वरणीयानि धनानि । यद्वा ॥ पुरुषस्य[2] व्यत्ययः[2] ॥ आ शास्ते प्रार्थये यजमानार्थम् ॥ ॥ १३ ॥

' अस्य वामस्य ' इति द्विपञ्चाशदृचमष्टमं सूक्तं दैर्घतमसम् । अत्रेयमनुक्रमणिका—' अस्य द्विपञ्चाशदल्पस्तवं त्वेतत्संशयोत्थापनप्रश्नप्रतिवाक्यान्यत्र प्रायेण ज्ञानमोक्षाक्षरप्रशंसा च पञ्चपादं साकंजानां यद्वायत्रेऽयं स शिङ्क्ते सप्तार्धगर्भा गौरीरिति जगत्यः । एतदन्तं तु वैश्वदेवं तस्याः समुद्रा इति वाचः समुद्रा आपोऽक्षरं सा प्रस्तारपङ्क्तिः शकमयमिति शकधूम उक्षाणं पृश्निमिति सोमः । त्रयः केशिन इत्यग्निः सूर्यो वायुश्च केशिनश्चत्वारि वाग्वाच इन्द्रं मित्रं सौर्यो द्वादशेति संवत्सरसंस्थं कालचक्रवर्णनं यस्ते सरस्वत्यै यज्ञेन साध्येभ्यः परानुष्टुप् सौरी पर्जन्याग्निदेवता वान्त्या सरस्वते सूर्याय वा ' इति । अत्र स्तुत्याबहुत्वेन स्तुतिभागस्याल्पीयस्त्वादिदं सूक्तमल्पस्तवनम्[3] । न सूक्तान्तरवत् बहुस्तवम्[4] । इदमेव वैलक्षण्यं तुशब्देन द्योत्यते । अस्मिन् सूक्ते प्रायेण संशयोत्थापनादयो बहवोऽर्थाः प्रतिपाद्यन्ते । ' अचिकित्वाञ्चिकितुषः ' इत्यनया संशयः उत्थाप्यते । ' पृच्छामि त्वा ' इत्यत्र प्रश्नः प्रतीयते । ' इयं वेदिः ' इत्यत्र प्रतिवचनम् । ' य ईं चकार ' इत्यादिना ज्ञानप्रशंसा प्रतिपाद्यते । ' अपश्यं गोपाम् ' इत्यादिना ब्रह्मसाक्षात्काररूपस्य[5] प्रशंसा । न क्षरति इत्यक्षरं ब्रह्म । ' द्वा सुपर्णा ' इत्यादिना तस्य प्रशंसा । ' पञ्चपादं पितरं ', ' साकंजानां सप्तथं ', ' यद्वायत्रे अधि ', ' अयं स शिङ्क्ते ', ' सप्तार्धगर्भाः ', ' गौरीर्मिमाय ' इति षड्जगत्यः । ' समानमेतत् ' इत्यनुष्टुप् । ' तस्याः समुद्राः ' इति प्रस्तारपङ्क्तिः । तल्लक्षणं छन्दोग्रन्थे सूत्रितं—' प्रस्तारपङ्क्तिः पुरतः ' ( पि. ३. ४. १ ) इति । पुरतः पूर्वार्धे द्वादशाक्षरौ जागतौ पादौ ततो द्वावष्टाक्षरौ गायत्रौ सा प्रस्तारपङ्क्तिः इति सूत्रार्थः । अनुक्रमण्यामप्युक्तम्—' आद्यौ चेत्प्रस्तारपङ्क्तिः ' ( अनु. ८. ६ ) इति । शिष्टा अनादेशपरिभाषया त्रिष्टुभः । ' गौरीर्मिमाय ' इत्येतदन्तानां विश्वे देवा देवता । ' तस्याः समुद्राः ' इत्यस्याः पूर्वार्धस्य वाग्देवता । उत्तरार्धस्य आपः । ' शकमयम् ' इत्यस्याः पूर्वार्धस्य शकधूमः । ' उक्षाणं पृश्निम् ' इत्युत्तरार्धस्य सोमो देवता । ' त्रयः केशिनः ' इत्यस्या अग्निसूर्यवायवः । ' चत्वारि वाक् ' इत्येषा वाग्देवताका । ' इन्द्रं मित्रं वरुणं ', ' कृष्णं नियानम् ' इत्येते सूर्यदेवत्ये । ' द्वादश प्रधयः ' इत्यस्याः

---

१. क्ष-ञ-ट-स्वर्गप्राप्तौ । २. क्ष-ञ-ट-पुरुषव्यत्ययः । ३. क्ष-ङ-ज्ञ१-ञ-ट-सूक्तमल्पस्तवम् । ४. च-बहुस्तवनम् । ५. ज्ञ१-ब्रह्मसाक्षात्काररूपमोक्षस्य ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

संवत्सरात्मा कालो देवता। 'यस्ते स्तनः' इत्यस्याः सरस्वती। 'यज्ञेन' इत्यस्याः साध्या देवता। 'समानमेतत्' इत्यस्याः सूर्यः पर्जन्यो वाग्नयो वा देवता। 'दिव्यं सुपर्णम्' इत्यस्याः सरस्वान् सूर्यो वा देवता। कृत्स्नसूक्तस्य विनियोगं शौनक आह—'स्तेयं कृत्वा द्विजो मोहात् त्रिरात्रोपोषितः शुचिः। सूक्तं जह्यास्यवामीयं क्षिप्रं मुच्येत किल्बिषात्' (ऋग्वि. १. १४४) इति॥ महाव्रते वैश्वदेवशस्त्रे वैश्वदेवं निविद्धानं द्विप्रतीकम्। तत्र 'अस्य वामस्य' इत्यादिकमेकचत्वारिंशदृचं प्रथमं प्रतीकम्। पञ्चमारण्यके सूत्रितम्—'अस्य वामस्य पलितस्य होतुरिति सलिलस्य दैर्घतमस एकचत्वारिंशतम् (ऐ. आ. ५. ३. २) इति॥

अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः।
तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रम्॥ १॥

अस्य। वामस्य। पलितस्य। होतुः। तस्य। भ्राता। मध्यमः। अस्ति। अश्नः।
तृतीयः। भ्राता। घृतऽपृष्ठः। अस्य। अत्र। अपश्यम्। विश्पतिम्। सप्तऽपुत्रम्॥ १॥

अत्र द्वितीयपादे तच्छब्दश्रुतेः प्रथमपादे प्रतिविशेषणं योग्यक्रियार्थसंबद्धो यच्छब्दोऽध्याहार्यः। योऽयं दिवि द्योतते तस्य Vअस्य Vवामस्य वननीयस्य संभजनीयस्य आरोग्यार्थिभिः सर्वैः सेवनीयस्य[1] Vपलितस्य पालयितुः प्रकाशवृष्ट्यादिप्रदानेन पालकस्य तथा योऽयं दिवि द्योतते Vतस्य अस्य Vहोतुः ह्वातव्यस्य आह्वानार्हस्यादित्यस्य Vमध्यमः मध्यमस्थानः। मध्ये भवो वायुरुच्यते। आदित्याग्नी अपेक्ष्य अस्य मध्यमत्वम्। स च Vअश्नः सर्वत्र व्याप्तः। न हि वायुरहितः कश्चित्प्रदेशोऽस्ति। तादृशः Vभ्राता Vअस्ति भ्रातृस्थानीयो भवति। यथा लोके भ्राता पितृधनस्य भागं हरति तद्वत्। मध्यस्थानम्[2] अन्तरिक्षलोकं[2] हरतीति वा। वृष्ट्यर्थं रश्मिभिराहृतानां भौमानां रसानां हरणाद्वा भ्रातेत्युच्यते। पित्र्येण धनेन स्वार्जितेन वा भर्तव्यः[3] भवतीति भ्राता। मध्यमो वायुरपि वृष्ट्यर्थं रसैः भक्तव्यः[4] भवति। किंच Vघृतपृष्ठः घृतमाहुतिलक्षणं पृष्ठे यस्य तादृशः Vभ्राता तस्य Vतृतीयः अस्ति भवति। त्रयाणां पूरणस्तृतीयः। उक्तोभयापेक्षया तृतीयत्वम्। भ्रातृत्वं प्रतिपादितप्रकारेण अत्रापि द्रष्टव्यम्। रात्रौ सवितुस्तेजोभागस्य हरणात् दिवा स्वकीयतेजसो भागस्य तदर्थमेव भक्तव्यत्वात्[5] वा भ्रातृत्वम्। Vअत्र एषु भ्रातृषु मध्ये पुरोदेशे वा Vविश्पतिं विशां प्रजानां पालयितारं Vसप्तपुत्रं सर्पणरश्मिपुत्रोपेतम्[6]। ऐतिहासिकपक्षे 'अदितिः पुत्रकामा' इति प्रस्तुते मित्रावरुणादिषु अदितिपुत्रेषु अस्य आदित्यस्य सप्तमपुत्रत्वम्। ईदृशं महानुभावमादित्यम् Vअपश्यम् अद्राक्षम् भावनया आत्मत्वेन साक्षात्करोमीत्यर्थः। 'तद्योऽहं सोऽसौ योऽसौ सोऽहम्' इति श्रुतिः। एवं वा। अस्य वामस्य विश्वस्योद्गरितुः स्रष्टुरित्यर्थः। पलितस्य पालयितुः स्वसृष्टजगत्पालनशीलस्य होतुरादातुः स्वस्मिन् संहर्तुरित्यर्थः। परमेश्वरस्य सृष्ट्यादिकर्तृत्वं श्रुतिस्मृतिपुराणादिषु प्रसिद्धम्। तस्य तादृशस्य परमेश्वरस्य भ्राता तद्भागहारी तदंशभूतः सूत्रात्मा मध्यमः सर्वत्र मध्ये वर्तमानोऽस्ति जगद्धारकत्वेन वर्तते। स

---

१. क्ष-ञ१-ञ-ट–सेवनीयस्य योऽयं दिवि द्योतते तस्यास्य। २. क्ष-ञ-ट–मध्यमम् अन्तरिक्षम्। ३. क्ष-ख-च-ञ-ट-फ-व–भक्तव्यः। ४. ङ-ज-ञ१–भर्तव्यः। ५. ङ-ज-ञ१–भर्तव्यत्वात्। ६. क्ष-ञ-ट–सर्पणस्वभावरश्मिरूपपुत्रोपेतम्; ञ१–सर्पणस्वभावं रश्मिपुत्रोपेतम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

च अक्षः व्यापनशीलः । ' वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संरब्धानि ' ( बृ. उ. ३. ७. २ ) इति श्रुतेः । वक्ष्यमाणविराडपेक्षया वा मध्यमत्वम् । किंच अस्य परमेश्वरस्य तृतीयो घृतपृष्ठः । घृतमित्युदकनाम । तेन तत्कार्यं शरीरमुच्यते । तदेव पृष्ठं स्पर्शकं[1] वा यस्य स तादृशः । ' पृष्ठं स्पृशतेः ' ( निरु. ४. ३ ) इति निरुक्तम् । यद्वा प्रदीप्तपृष्ठः । पृष्ठशब्दः कृत्स्नशरीरोपलक्षकः । प्रकाशितशरीराभिमानीत्यर्थः[2] । न त्वयं सूक्ष्मशरीराभिमानिसूत्रात्मवत् स्पर्शनाविषयो भवति । अत्र एषु मध्ये विश्पतिं विशां प्रजानां पतिम् । उपलक्षणमेतत् । सर्वस्य पतिमित्यर्थः । ' सर्वस्य पतिः सर्वस्येशानः ' इति श्रुतेः । सप्तपुत्रं सप्त लोकाः पुत्रा यस्य तादृशम् । स्वमायया सृष्टसर्वलोकमित्यर्थः । अपश्यं पश्येयं साक्षात्करोमीत्यर्थः । अयमर्थः । स्वाधीनमायो जगत्कारणभूतः परमेश्वर एकः । तत उत्पन्नौ स्थूलसूक्ष्मशरीराभिमानिनौ द्वौ विराट्सूत्रात्मानौ । तेषु मध्ये द्वयोः साक्षात्कारेण मोक्षाभावात् सृष्ट्यादिकारणं परमेश्वरं ज्ञेयत्वेन प्रसिद्धं श्रवणमननादिसाधनेन साक्षात्करोमीत्यर्थः । एवमुत्तरत्रापि अध्यात्मपरतया योजयितुं शक्यम् । तथापि स्वरसत्वाभावात् ग्रन्थविस्तरभयाच्च न लिख्यते । यत्र ' द्वा सुपर्णा ' इत्यादौ स्फुटम् आध्यात्मिको[3] ह्यर्थः[3] प्रतीयते तत्र तत्र[4] प्रतिपादयामः । अयं मन्त्रो यास्केन व्याख्यातः ' अस्य वामस्य वननीयस्य पलितस्य पालयितुः ' ( निरु. ४. २६ ) इत्यादिना । तच्च व्याख्यानमत्रानुसंधेयम् ॥

सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा ।
त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः ॥ २ ॥

सप्त । युञ्जन्ति । रथम् । एकऽचक्रम् । एकः । अश्वः । वहति । सप्तऽनामा ।
त्रिऽनाभि । चक्रम् । अजरम् । अनर्वम् । यत्र । इमा । विश्वा । भुवना । अधि । तस्थुः ॥२॥

vएकचक्रम् एकरथाङ्गोपेतम् । यद्यपि त्रीणि चक्राणि तथापि तेषामेकरूपत्वात् एकचक्रमित्युच्यते । vरथं रंहणस्वभावं सूर्यस्य संबन्धिनं vसप्त एतत्संख्याका अश्वाः vयुञ्जन्ति अनुवध्नन्ति वहन्ति अहोरात्रनिर्वाहाय । किं वस्तुतः सप्त नेत्याह । vएकः vअश्वः vसप्तनामा एक एव सप्ताभिधानः सप्तधा नमनप्रकारो वा । एक एव वायुः सप्तरूपं धृत्वा वहतीत्यर्थः । वाय्वधीनत्वात् अन्तरिक्षसंचारस्य । एकचक्रमित्युक्तं कीदृशं तदित्यत आह । vत्रिनाभि वलयत्रयमध्यस्थितनाभिस्थानीयच्छिद्रत्रयोपेतम्[5] vअजरम् अमरणधर्मकम् vअनर्वम् अशिथिलम् । पुनस्तदेव विशेष्यते । vयत्र यस्मिन् चक्रे vइमा vविश्वा vभुवना इमानि प्रसिद्धानि सर्वाणि भूतजातानि vअधि आश्रित्य vतस्थुः तिष्ठन्ति । यद्वा । एकचक्रम् एकचारिणम् असाहाय्येन[6] संचरन्तं रथम् आदित्यमण्डलं सप्त युञ्जन्ति । सर्पणस्वभावाः सप्तसंख्या[7] वा[7] रश्मयः सप्तप्रकारकार्याः असाधारणाः परस्परविलक्षणाः षड्ऋतवः । एकः साधारणः इत्येवम् । अथवा मासद्वयात्मकाः षट् अपरः अधिकमासात्मकः इत्येवं सप्तर्तवो युञ्जन्ति । एतस्य कार्यं निर्वहन्तीत्यर्थः । स चैकः असहायः अश्वो व्यापनशीलः आदित्यः सप्तनामा

---

१. क्ष-ङ-झ-झ१-ञ-ट–स्पर्शनीयं सर्वस्य स्पर्शकम् । २. क्ष-झ-झ१-ञ-ट–प्रकाशितशरीर इत्यर्थः । स्थूलशरीराभिमानीत्यर्थः । ३. झ–आध्यात्मिकोऽप्यर्थः । ४. क्ष-झ१-ञ-ट–तथा । ५. क्ष-ञ-ट–वलित्रयमध्यस्थितनाभिस्थानीयाच्छिद्रत्रयोपेतम् । ६. क्ष-ख-च-ज-ञ-झ-ञ-ट-त-फ-व–असहायेन । ७. झ–सप्तसंख्याकाः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सप्त रसानां संनमयितारो रश्मयो यस्य तादृशः सप्तर्षिभिः स्तूयमानो वा आदित्यो वहति धारयति भ्रमयतीत्यर्थः[1]। किम्। त्रिनाभि चक्रम्। तिस्रो नाभिस्थानीयाः संध्याः संबद्धा वा त्रय ऋतवो यस्य तत्तादृशम्। के ते। ग्रीष्मवर्षाहेमन्ताख्याः। यद्वा। भूतभविष्यद्वर्तमानाख्यास्त्रयः कालाः त्रिनाभयः। तद्विशिष्टं चक्रं चक्रवत् पुनःपुनः परिभ्रममाणं संवत्सराख्यं चक्रम् अजरं मरणरहितम्[2]। न हि कदाचिदपि कालो म्रियते 'अनादिनिधनः कालः' इति स्मृतेः। अनर्वम् अप्रतिहतम्। ईदृशं संवत्सराख्यं चक्रं नानाकालावयवोपेतम् अयमादित्यः पुनरावर्तयति[3]। संवत्सरादर्वाचीनानां तत्रैवान्तर्भावात् ततः युगादीनां[4] तदावृत्तिसाध्यत्वात् संवत्सरस्य चक्रत्वेन निरूपणम्। पुनः कीदृशं तत्। यत्र यस्मिन् चक्रे इमा विश्वा भुवना इमानि सर्वाणि भूतानि[5] अधितस्थुः आश्रित्य तिष्ठन्ति कालाधीनत्वात् सर्वस्य स्थितेः। ईदृशस्य कालस्य कारणभूतपरमेश्वरपरिज्ञानेन मोक्षसद्भावात् 'ज्ञानमोक्षाक्षरप्रशंसा च' इत्यनुक्रमण्यामुक्तम्। अयमपि मन्त्रो यास्केन 'सप्त युञ्जन्ति रथमेकचक्रमेकचारिणम्' (निरु. ४. २७) इत्यादिना व्याख्यातः। तदत्राप्यनुसंधेयम्॥

इमं रथमधि ये सप्त तस्थुः सप्तचक्रं सप्त वहन्त्यश्वाः।
सप्त स्वसारो अभि सं नवन्ते यत्र गवां निहिता सप्त नाम ॥ ३ ॥

इमम्। रथम्। अधि। ये। सप्त। तस्थुः। सप्तऽचक्रम्। सप्त। वहन्ति। अश्वाः।
सप्त। स्वसारः। अभि। सम्। नवन्ते। यत्र। गवाम्। निऽहिता। सप्त। नाम ॥ ३ ॥

[v]इमम् उक्तस्वरूपमादित्यमण्डलाख्यं संवत्सराख्यं वा [v]रथं [v]ये [v]सप्त रश्मयः [v]अधि [v]तस्थुः अधिष्ठिताः। संवत्सरपक्षे अयनर्तुमासपक्षदिवसरात्रिमुहूर्ताख्याः सप्तावयवाः अधितिष्ठन्ति। कीदृशं रथम्। [v]सप्तचक्रम्। चकनाच्चरणात् क्रमणाद्वा चक्राणि रश्मयः ते सप्त यस्य रथस्य तादृशमुभयविधं रथं पूर्वोक्ताः अधिष्ठिताः [v]अश्वाः व्यापनशीलाः [v]सप्त [v]वहन्ति निर्वहन्ति च। तादृशं रथं [v]सप्त [v]स्वसारः स्वयंसरणाः। स्वरादित्यः। तेन सारिताः परस्परं स्वसृभूता वा सप्तसंख्याकाः[6] रश्मय ऋतवश्च [v]अभि [v]सं [v]नवन्ते आभिमुख्येन संगच्छन्ते[7]। असाधारणाः परस्परविलक्षणकार्याः[8] षड्ऋतवः सर्वसाधारणः[9] एकः इति सप्तत्वम्[10]। यद्वा उक्तरूपाः मासद्वयात्मकाः षट् त्रयोदशमासात्मकः सप्तमः इति सप्तत्वम्। कीदृशो रथ इति तदुच्यते। [v]यत्र यस्मिन् रथे उभयविधे [v]गवां वाचां स्तुतिरूपाणां [v]सप्त सप्तविधानि [v]नाम नमनानि सप्तस्वररूपाणि निहितानि। सप्तस्वरोपेतैः सामभिः स्तुत्यं रथमित्यर्थः। यद्वा। गवामुदकानां सप्त सर्पणस्वभावानि नाम नमनानि। यत्र यासु स्वसृषु निहिता[11] स्वसारः परस्परस्वसृभूता देवनद्योऽभि सं नवन्ते[12]॥

---

१. क्ष-ङ-ञ-झ-झ१-ञ-ट–भ्रामयतीत्यर्थः। २. क्ष-ङ-झ१-ञ-ट–अमरणधर्मकम्। ३. झ१–पुनः-पुनरावर्तयति। ४. क्ष-ङ-झ-ञ-ट–अधिकयुगादीनाम्। ५. क्ष-ङ-झ१-ञ-ट–भूतजातानि। ६. झ–सप्त सप्तसंख्याकाः। ७. क्ष-ङ-झ१-ञ-ट–सम्यक् नवीकुर्वन्ती। ८. ङ-झ१–परस्परविलक्षणाः। ९. ख-ज-फ-ब–सर्वधारणाः; ञ-सर्वधारणः। १०. क्ष-ङ-झ१-ञ-ट–सप्तत्वम्। ते खलु पुनः पुनरावृत्ता अपि तं नवीकुर्वन्ति। ११. क्ष-ङ-झ१-ञ-ट–निहितानि ताः सप्त। १२. क्ष-ङ-झ१-ञ-ट–नवन्ते सम्यक् नवीकुर्वन्ति।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

को ददर्श प्रथमं जायमानमस्थन्वन्तं यदनस्था बिभर्ति ।
भूम्या असुरसृगात्मा क्व स्वित्को विद्वांसमुप गात्प्रष्टुमेतत् ॥ ४ ॥

कः । ददर्श । प्रथमम् । जायमानम् । अस्थन्ऽवन्तम् । यत् । अनस्था । बिभर्ति ।
भूम्याः । असुः । असृक् । आत्मा । क्व । स्वित् । कः । विद्वांसम् । उप । गात् । प्रष्टुम् । एतत् ॥४॥

एवं प्रपञ्चस्य कालायत्ततां प्रतिपाद्य तस्य कारणभूतस्य परमेश्वरस्य अविषयत्वमाह । ᵛकः ᵛददर्श को द्रष्टुं शक्नुयात् । कदा । ᵛप्रथमं सृष्टेः पूर्वम् । अव्याकृतावस्थायामित्यर्थः । किम् । ᵛजायमानं प्रथमभावविकारमापन्नम् । उत्पद्यमानं प्रपञ्चमित्यर्थः । दुर्ज्ञेयत्वे हेतुमाह । ᵛयत् यस्मात् ᵛअस्थन्वन्तम् अस्थिमन्तं सशरीरम्[1] । उपलक्षणमेतत् । कार्यभावमापन्नमित्यर्थः । ᵛअनस्था अस्थिरहिता अशरीरा सांख्यप्रसिद्धा प्रकृतिः वेदान्तप्रसिद्धा ईश्वरायत्ता माया ᵛबिभर्ति गर्भवदन्तर्धारयति । अव्याकृतावस्थायाम् अनस्थः अशरीरः परमेश्वरो बिभर्ति । यदा केवलः परमेश्वरो मायाशबलितः सन्निदं जगन्निर्मितवान् उत्पत्तिसमये[2] देहादिसहितस्य कस्यचिदभावात् को ददर्श । तदानीं मनो नित्यमात्मा च नित्यः तत्संयोगात् कश्चिदात्मा जानातीति चेत् सोऽपि न संभवतीत्यत आह । ᵛभूम्याः संबन्धि पार्थिवं स्थूलशरीरं ᵛअसुः प्राणः तदुपलक्षितं सूक्ष्मशरीरं ᵛअसृक् शोणितम् । एतत्सप्तधातूपलक्षकम्[3] । यद्यपि शरीरं पञ्चभूतात्मकं तथापि भूतद्वयप्रत्यक्षत्वात्[4] तदपेक्षयोक्तम् । ᵛआत्मा तैः संबद्धश्चेतनः ᵛक्व ᵛस्वित् कुत्रास्ते । न कश्चिदस्तीत्यर्थः । 'नान्यत्किंचन मिषत्' (ऐ. आ. २. ४. १) इति श्रुतेः । ᵛविद्वांसं जगत्कारणविषयज्ञानवन्तमन्यं गुर्वादिकम् ᵛएतत् कारणं ᵛप्रष्टुं ᵛकः शिष्योऽल्पमतिः ᵛउप ᵛगात् उपगच्छति । तादृशो देहेन्द्रियसंघातरूपः आत्मा तस्मिन् समये कुत्रास्ति । प्रष्टा प्रतिवक्ता च उभावपि नास्तीत्यर्थः, 'न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत्पश्येत्' इति श्रुतेः । यद्वा । प्रथमं प्रथमभाविनं जगतः कारणभूतं को ददर्श कः साक्षात्करोति । जायमानमस्थन्वन्तं मनुष्यम् अनस्थिकः परमेश्वरः सशरीरमशरीरः[5] यत् यस्मात् बिभर्ति । द्रष्टुरपि तत्कार्यत्वात् इति भावः । शिष्टं समानम् ॥

पाकः पृच्छामि मनसाविजानन्देवानामेना निहिता पदानि ।
वत्से बष्कयेऽधि सप्त तन्तून्वि तत्निरे कवय ओतवा उ ॥ ५ ॥

पाकः । पृच्छामि । मनसा । अविऽजानन् । देवानाम् । एना । निऽहिता । पदानि ।
वत्से । बष्कये । अधि । सप्त । तन्तून् । वि । तत्निरे । कवयः । ओतवै । ऊँ इति ॥ ५ ॥

---

१. झ१–शरीरम् । २. क्ष-झ-ञ-ट–तस्मिन् समये; झ१–अस्मिन् समये । ३. झ१–एतत्सप्तधातूपलक्षणकम् । ४. क्ष-ङ-झ१ञ-ट–भूतत्रयप्रत्यक्षत्वात् । ५. ङ-ज्ञ-झ–शरीरमशरीरः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

[v]पाकः पक्तव्यः अपक्वमतिः अहं [v]मनसा असंस्कृतेन[1] [v]अविजानन् अतिगहनं तत्त्वं विशेषेण ज्ञातुमशक्नुवन् [v]पृच्छामि प्रश्नं करोमि । अज्ञाने कारणमाह । [v]एना एनानि [v]पदानि संदेहास्पदानि तत्त्वानि [v]देवानां [v]निहितानि देवानामपि गूढानीत्यर्थः । यद्वा । देवानां पदानि तत्त्वानि[2] निधिवद्गोपयित्वा स्थापितानि । अतः पृच्छामि तत्त्वज्ञानोपयोगायेति शेषः । तानि कानीति उच्यते। [v]वत्से सर्वस्य निवासभूते [v]बष्कये । बडिति सत्यनाम । तत् कषतीति[3] बष्कयः[4] आदित्यः । यद्वा । बष्कयो नाम एकहायनो वत्सः । पुनरपि वत्सशब्दस्य पृथग्निर्देशात् बष्कयशब्देन तत्कालमात्रं लक्ष्यते । तस्मिन्नादित्ये [v]अधि अधिकं [v]सप्त [v]तन्तून् तायमानान् सप्त सोमसंस्थान् [v]कवयः मेधाविनो यजमानाः [v]ओतवै जगद्रूपतिर्यक्तन्तून् वेतुं [v]वि [v]तत्निरे वितन्वन्ति । यद्वा । सप्त तन्तवः सप्त छन्दांसि । तानि वितन्वन्ति । किमर्थम् । ओतवै सप्तसोमसंस्थारूपतिर्यक्तन्तुसंतानाय[4] । यज्ञनिर्माणायेत्यर्थः । यज्ञानां स्थितेः सूर्याधीनत्वात् इति भावः । ईदृशं तत्त्वं पृच्छामीत्यर्थः ॥ ॥ १४ ॥

**अचिकित्वाञ्चिकितुषश्चिदत्र कवीन्पृच्छामि विद्मने न विद्वान् ।**
**वि यस्तस्तम्भ षळिमा रजांस्यजस्य रूपे किमपि स्विदेकम् ॥ ६ ॥**

**अचिकित्वान् । चिकितुषः । चित् । अत्र । कवीन् । पृच्छामि । विद्मने । न । विद्वान् ।**
**वि । यः । तस्तम्भ । षट् । इमा । रजांसि । अजस्य । रूपे । किम् । अपि । स्वित् । एकम् ॥६॥**

[v]अचिकित्वान् देवतातत्त्वमजानन्नहं [v]चिकितुषः विशेषेण तत्त्वं जानतः [v]कवीन् क्रान्तदर्शिनः अधिगतपरमार्थान् [v]अत्र अस्मिन् तत्त्वविषये[5] [v]पृच्छामि। किमर्थम्। [v]विद्मने वेदनाय परमार्थज्ञानाय। किं जानन्नेव पराभवाद्यर्थं नेत्याह । [v]विद्वान् [v]न पृच्छामि अपि तु अज्ञानादेव । [v]यः परमेश्वरः [v]तस्तम्भ स्तम्भितवान् नियमितवान् । 'अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय' ( छा. उ. ८. ४. १ ) इति श्रुतेः । किम् । [v]इमा इमानि [v]षट् [v]रजांसि लोकान्[6] रज्जनात्मकान् । 'लोका रजांस्युच्यन्ते' ( निरु. ४. १९ ) इति निरुक्तम् । यद्यपि लोकाः सप्त तथापि सत्यलोकस्य कर्मिणां सर्वेषां साधारणस्वाभावात् षडित्युक्तम् । ननु षडेवोक्ताः सप्तमः किमिति न निर्दिष्टः इति। उच्यते । [v]अजस्य जननादिरहितस्य चतुर्मुखस्य ब्रह्मणः [v]रूपे स्वरूपे [v]एकं सत्यलोकाख्यं पुनरावृत्तिरहितं स्थानं [v]किमपि [v]स्वित् किं स्विदेव । तन्न केनाप्यधिगन्तुं शक्यमित्यर्थः । कैश्चिदेवोपासकैः अर्चिरादिमार्गेण गन्तव्यत्वात् इति भावः । यद्वा । षड्जांसि विलक्षणाः षड्ऋतवः । तान्यस्तम्भयत्तत्त्वम् । अजस्य गमनशीलस्य जन्मरहितस्य वा आदित्यस्य रूपे रूप्यमाणे दृश्यमाने मण्डले

---

१. ख-फ-व–संहृतेन । २. क्ष-ञ-ट–तत्त्वानि निहितानि; ङ-ञ१–तत्त्वानि विहितानि । ३. क्ष-ञ१-ञ-ट–करोतीति । ४. क्ष-ञ१-ञ-ट–बष्कयः आदित्यः तस्मिन्नप्यधिकं सप्ततन्तून् तायमानान् सप्तसोमसंस्थाः कवयो मेधाविनो यजमानाः ओतवै जगल्लक्षणवस्त्रनिर्माणाय वितत्निरे वितन्वन्ति चित्तशुद्धिद्वारा तत्त्वज्ञानोपयोगायेति शेषः । यद्वा । यस्मिन् बष्कयो नाम एकहायनो वत्सः पुनरपि वत्सशब्दस्य पृथङ्निर्देशात् । संवत्सरधारकभूते बष्कशब्देन तत्कालमात्रं लक्ष्यते । वत्से सर्वस्य निवासयोग्ये आदित्ये कवयः सप्ततन्तून् सप्तसंस्थारूपान् यागान् वितन्वन्ति आय (त) न्तुस्थानीयान् ( ञ१–आयन् तन्तून् स्थानीयान् ) कुर्वन्ति । किमर्थम् । ओतवै जगद्रूपतिर्यक्तन्तून् छेत्तुम् । ५. क्ष-ङ-ञ१-ञ-ट–तत्त्वविशेषे । ६. क्ष-ञ-ट–षड्लोकान् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

एकमद्वितीयं किमपि स्वित्[1]। यत्किंचिदवाङ्मनसगम्यं तत्त्वमस्ति तत्पृच्छामि। 'अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' ( छा. उ. १.६.६ ) इत्यादिश्रुतिप्रतिपादितं तत्त्वमित्यर्थः। अथवा षडिमानि रजांसि त्रिविधान् भूलोकांश्च यस्तस्तम्भ। 'तिस्रो भूमीर्धारयन् त्रीरुत द्यून्' ( ऋ. सं. २ २७. ८) इति निगमः। तस्याजस्य परब्रह्मणो रूपे नानाविकारभाजि[2] जगति किमपि स्विदेकम् एकात्मकमस्तीति प्रश्नः। अविशेषमस्तिनाममात्रम् एकरूपमस्तीत्युत्तरविवक्षया प्रश्नः। 'अस्तीत्येवोपलब्धव्यम्' ( क. उ. २. ६. १३ ) इति श्रुतेः ॥

इ॒ह ब्र॑वीतु॒ य ई॑मङ्ग॒ वेदा॒स्य वा॒मस्य॒ निहि॑तं प॒दं वेः ।
शी॒र्ष्णः क्षी॒रं दु॑ह्रते॒ गावो॑ अस्य व॒व्रिं वसा॑ना उद॒कं प॒दापु॑ः ॥ ७ ॥

इ॒ह । ब्र॒वी॒तु॒ । यः । ई॒म् । अ॒ङ्ग॒ । वेद॑ । अ॒स्य । वा॒मस्य॑ । निऽहि॑तम् । प॒दम् । वेरिति॒ वेः । शी॒र्ष्णः । क्षी॒रम् । दु॒ह्र॒ते॒ । गावः॑ । अ॒स्य॒ । व॒व्रिम् । वसा॑नाः । उ॒द॒कम् । प॒दा । अपुः॑ ॥७॥

[v]इह इदानीम् [v]ईम् एतद्वक्ष्यमाणं तत्त्वम् [v]अङ्ग क्षिप्रमविचारेण [v]ब्रवीतु। कः। [v]यः [v]वेद सः। कीदृशं तत्। [v]अस्य पुरतो दृश्यमानस्य [v]वामस्य वननीयस्य [v]वेः गन्तुः[3] आदित्यस्य [v]पदं सर्वैः गन्तव्यं स्वरूपं [v]निहितं गूढं वर्तते। किंच अस्य आदित्यस्य [v]शीर्ष्णः शिरोवदुन्नतस्य सर्वेषामुत्कृष्टस्य वा [v]गावः केचन वर्षकालीनाः[4] रश्मयः [v]क्षीरम् उदकं [v]दुह्रते क्षरन्ति। [v]वव्रिम्। रूपनामैतत्। रूपं [v]वसानाः आच्छादयन्तः अतिविस्तरेण तेजसा तपन्तः केचन [v]अस्य गावो रश्मयः [v]उदकं स्वसृष्टं [v]पदा सृष्टेनैव मार्गेण [v]अपुः पिबन्ति भूमिं निरुदकां कुर्वन्तीत्यर्थः। तस्य स्वरूपं ब्रवीतु इत्यन्वयः ॥

मा॒ता पि॒तर॑मृ॒त आ ब॑भाज धी॒त्यग्रे॒ मन॑सा॒ सं हि ज॒ग्मे ।
सा बी॑भ॒त्सुर्ग॒र्भर॑सा॒ निवि॑द्धा॒ नम॑स्वन्त॒ इदु॑पवा॒कमी॑युः ॥ ८ ॥

मा॒ता । पि॒तर॑म् । ऋ॒ते । आ । ब॒भा॒ज॒ । धी॒ती । अग्रे॑ । मन॑सा । सम् । हि । ज॒ग्मे ।
सा । बी॒भ॒त्सुः । ग॒र्भऽर॑सा । निऽवि॑द्धा । नम॑स्वन्तः । इत् । उ॒प॒ऽव॒ाक॑म् । ई॒युः ॥ ८ ॥

[v]माता सर्वस्य निर्मात्री पृथिवी [v]पितरं पालकं द्युलोकं तत्स्थं[5] द्युलोकस्थमादित्यमित्यर्थः। तम् [v]आ [v]बभाज आभजते। किमर्थम्। [v]ऋते उदके यज्ञे वा निमित्तभूते सति। केन द्वारेण। [v]धीती धीत्या कर्मणा यागादिरूपेण। स्वकीयेन आज्यसोमादिहविषा तर्पयतीत्यर्थः। [v]अग्रे ततः पूर्वं पिता च [v]मनसा अस्याम् अभिप्रायवता चेतसा [v]सं [v]जग्मे [v]हि संश्लिष्टो वर्तते खलु वृष्टिमकरोदित्यर्थः। अनन्तरं [v]सा माता [v]बीभत्सुः गर्भबन्धनेच्छावती [v]गर्भरसा गर्भरसेन गर्भोत्पत्तिनिमित्तेन रसेन [v]निविद्धा नितरां विद्धा[6] आसीत्। यद्वा। गर्भे रसः औषध्याद्युत्पादनसमर्थमुदकं यस्याः सा तादृशी उदकेनात्यन्तं क्लिन्ना निविद्धा कृषीवलैर्हलमुखेन नितरां विदारिता[7] भवति

---

१. ख-च-ज-फ-व–स्वित् किंस्वित्। २. क-फ–नानाविधाकारभाजि। ३. क्ष-ञ-ट–मन्तुः। ४. क्ष-ञ-ट–वर्षकाले; झ–वर्षाकालीनाः। ५. च–तत्स्थे तच्छब्दः; क्ष-झ१-ञ-ट–तत्रस्थे तच्छब्दः। ६. च–युक्ता। ७. क्ष-ञ-ट–विद्धा दारिता।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

बीजावापार्थम् । अत्रायं समाधिः । या काचन योषिदपत्यार्थं स्वपतिं युवानं यौति स च तस्यामनुरागयुक्तः संगतो भवति सा चान्तर्वत्नी सती पुत्रान् जनयतीति तद्वदत्रापि । अनन्तरं vनमस्वन्तः vइत् भाविव्रीहिप्रियङ्ग्वाद्यन्नवन्तः एव vउपवाकम् उपेत्य वचनं परस्परं सम्यगभिवृद्धानि सस्यानीति वचनम् vईयुः प्राप्नुवन्ति । यद्वा । हविर्लक्षणान्नवन्तः उपेत्य वचनं प्रैषादिरूपमीयुः । वृष्टौ सत्यां सस्यादिद्वारा यागमनुतिष्ठेयुरित्यर्थः ॥

युक्ता मातासीद्धुरि दक्षिणाया अतिष्ठद्गर्भो वृजनीष्वन्तः ।
अमीमेद्वत्सो अनु गामपश्यद्विश्वरूप्यं त्रिषु योजनेषु ॥ ९ ॥

युक्ता । माता । आसीत् । धुरि । दक्षिणायाः । अतिष्ठत् । गर्भः । वृजनीषु । अन्तरिति । अमीमेत् । वत्सः । अनु । गाम् । अपश्यत् । विश्वऽरूप्यम् । त्रिषु । योजनेषु ॥ ९ ॥

vमाता । निर्मीयन्ते अस्मिन् भूतानीति माता द्यौः । vदक्षिणायाः अभिमतपूरणसमर्थायाः पृथिव्याः vधुरि निर्वहणे vयुक्ता vआसीत् वर्षणाय[1] समर्थाभूदित्यर्थः । कथमिति तदुच्यते । vगर्भः गर्भस्थानीयः उदकसंघः vवृजनीषु उदकवत्सु मेघपङ्क्तिषु vअन्तः मध्ये vअतिष्ठत् तिष्ठति । अनन्तरं vवत्सः पुत्रस्थानीयः उदकसंघः vत्रिषु vयोजनेषु मेघरश्मिवायुषु संयुक्तेषु सत्सु vअमीमेत् वर्षणसमये शब्दयति । अनन्तरं vविश्वरूप्यं विश्वरूपवतीं vगाम् vअनु vअपश्यत् अनुक्रमेण पश्यति वर्षतीत्यर्थः । यद्वा । त्रिषु योजनेषु सत्सु वत्सो मेघो वर्षणाय गां भूमिं प्रति अमीमेत् । अनन्तरं सर्वो जनोऽनुक्रमेण विश्वरूप्यं सस्यादिभिर्नानारूपवतीं भूमिम् अपश्यत् पश्यति ॥

तिस्रो मातॄस्त्रीन्पितॄन्बिभ्रदेक ऊर्ध्वस्तस्थौ नेमव ग्लापयन्ति ।
मन्त्रयन्ते दिवो अमुष्य पृष्ठे विश्वविदं वाचमविश्वमिन्वाम् ॥ १० ॥

तिस्रः । मातॄः । त्रीन् । पितॄन् । बिभ्रत् । एकः । ऊर्ध्वः । तस्थौ । न । ईम् । अव । ग्लपयन्ति । मन्त्रयन्ते । दिवः । अमुष्य । पृष्ठे । विश्वऽविदम् । वाचम् । अविश्वऽमिन्वाम् ॥ १० ॥

vएकः प्रधानभूतः असहायो वा पुत्रस्थानीयः आदित्यः संवत्सराख्यः कालो वा vतिस्रः vमातॄः सस्यवृष्ट्याद्युत्पादयित्रीः । क्षित्यादिलोकत्रयमित्यर्थः । तथा vत्रीन् vपितॄन् जगतां पालयितॄन् लोकत्रयाभिमानिनः अग्निवायुसूर्याख्यान् vबिभ्रत् सन्[2] vऊर्ध्वः vतस्थौ उन्नतः अत्यन्तदीर्घस्तिष्ठति भूतभविष्यदाद्यात्मना । सूर्यपक्षे सर्वेभ्य उन्नतः । vईम् एनं vन vअव vग्लपयन्ति ग्लानिं नैव कुर्वन्ति । न हि कालः आदित्यो वा अन्येन पराभूयते । vदिवः vपृष्ठे द्युलोकस्य उपरि अन्तरिक्षे vमन्त्रयन्ते गुप्तं परस्परं भाषन्ते देवाः । किम् । vविश्वविदं विश्ववेदनसमर्थां विश्वैर्वेदनीयां वा vअविश्वमिन्वाम् असर्वव्यापिनीं vवाचं गर्जितलक्षणाम् vअमुष्य आदित्यस्य संबन्धिनीं मन्त्रयन्ते इत्यर्थः ॥ ॥ १५ ॥

---

१. क्ष-ञ१-अ-ट-प्रवर्षणाय । २. क्ष-ञ१-अ-ट-धारयन् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य ।
आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः ॥ ११ ॥

द्वादशऽअरम् । नहि । तत् । जराय । वर्वर्ति । चक्रम् । परि । द्याम् । ऋतस्य ।
आ । पुत्राः । अग्ने । मिथुनासः । अत्र । सप्त । शतानि । विंशतिः । च । तस्थुः ॥ ११ ॥

ऋतस्य उदकस्य सत्यात्मकस्य वा आदित्यस्य चक्रं पुनःपुनःक्रमणशीलं मण्डलाख्यं रथचक्रं[1] वा वर्वर्ति पुनःपुनर्वर्तते संचरति । कुत्र । द्यां परि द्युलोकस्यान्तरिक्षस्य परितः । कीदृशं तत् । द्वादशारं द्वादशसंख्याकमेषादिराश्यात्मकैः मासात्मकैर्वा अरैः रथाङ्गावयवैर्युक्तम् । किंच तत् चक्रं नहि जराय नैव खलु जरायै[2] भवति[2] । हे अग्ने सर्वदा गमनयुक्त[3] आदित्य । यद्वा । अग्नेरेव स्थानत्रये तत्तदात्मना वर्तमानत्वात् असावप्यग्निरित्युच्यते । अत्र अस्मिन् त्वदीये[4] चक्रे मिथुनासः स्त्रीपुंसरूपेण परस्परं मिथुनभूताः सप्त शतानि विंशतिश्च विंशत्युत्तरसप्तशतसंख्याकाः पुत्राः पुत्रवदुत्पद्यमानाः प्राणिनां दुःखात् त्रातारो वा अहोरात्ररूपाः तस्थुः तिष्ठन्ति निष्पद्यन्ते । षष्ट्यधिकशतत्रयसंख्याकानि अहानि तावत्यः एव रात्रयः इत्येवं तद्विभागः । ' सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः स एषोऽहःसंमानः ' ( ऐ. आ. ३. २. १ ) इत्यारण्यकम् ॥

पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम् ।
अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितम् ॥ १२ ॥

पञ्चऽपादम् । पितरम् । द्वादशऽआकृतिम् । दिवः । आहुः । परे । अर्धे । पुरीषिणम् ।
अथ । इमे । अन्ये । उपरे । विऽचक्षणम् । सप्तऽचक्रे । षट्ऽअरे । आहुः । अर्पितम् ॥ १२ ॥

पञ्चपादं पञ्चसंख्याकत्वात्मकपादोपेतम् । एतत् हेमन्तशिशिरयोः एकत्वाभिप्रायम् । पितरं सर्वस्य प्रीणयितारं[5] द्वादशाकृतिं द्वादश मासा एवाकृतयो यस्य तादृशं पुरीषिणं वृष्टयुदकेन तद्वन्तं प्रीणयितारं[6] वा । पुरीषमित्युदकनाम । उक्तलक्षणं संवत्सरचक्रं दिवः द्युलोकस्य परे अर्धे । तात्स्थ्यात्ताच्छब्द्यम् । परस्मिन्नर्धे अन्तरिक्षलक्षणे अवस्थितः आदित्यः इत्यर्थः । तस्मिन् अर्पितम् आहुः । एतदुत्तरत्र स्थितमत्राप्यनुषज्यते । यद्यत्रार्पितं तत्तदधीनम् अतः संवत्सरं सूर्यायत्तमाहुरित्यर्थः । अथ इमे अपि च अन्ये केचन वेदवादिन एवमाहुः । किमिति । उपरे । उपरमन्ते अस्मिन् उपरताः प्राणिनः अत्र इति वा उपरः संवत्सरः तस्मिन् । कीदृशे । सप्तचक्रे । सप्त आदित्यरश्मयस्तद्द्वारेण चक्रस्थानीया यस्य स तथोक्तः । यद्वा । अयनर्तुमासपक्षाहोरात्रिमुहूर्तानि सप्त सप्त चक्राणि पुनःपुनःक्रममाणानि[7] यस्य तादृशे । षळरे षड्ऋतवः एव अरा नाभौ प्रत्यृताः संबद्धाः यस्य तथोक्तलक्षणे संवत्सरे रथे विचक्षणं विविधदर्शनकरमादित्यम् अर्पितम् आहुः ।

---

१. क्ष-ज्ञ१-अ-ट-चक्रं रथचक्रम् । २. क्ष-ज्ञ१-अ-ट-जरते जीर्यते वा । ३. क्ष-ङ-ज्ञ१-अ-ट-गमनशील । ४. क्ष-ज्ञ१-अ-ट-युष्मदीये । ५. ज्ञ-पालयितारम् । ६. ज्ञ१-प्रणयितारम् । ७. क्ष-ङ-अ-ट-पुनःपुनः-क्रमणानि ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

एतदुक्तं भवति। अमुमादित्यं दक्षिणोत्तररूपभिन्नगतेः तीव्रमन्दादिभावस्य च कालाधीनत्वात्तदधीनमाहुः। अन्ये तु संवत्सराद्यात्मकस्य कालस्य सूर्यगमनागमनसाध्यत्वात् तदायत्तत्वमाहुः इति[1] ॥

पञ्चारे चक्रे परिवर्तमाने तस्मिन्ना तस्थुर्भुवनानि विश्वा ।
तस्य नाक्षस्तप्यते भूरिभारः सनादेव न शीर्यते सनाभिः ॥ १३ ॥

पञ्चऽअरे। चक्रे। परिऽवर्तमाने। तस्मिन्। आ। तस्थुः। भुवनानि। विश्वा।
तस्य। न। अक्षः। तप्यते। भूरिऽभारः। सनात्। एव। न। शीर्यते। सऽनाभिः ॥१३॥

[v]पञ्चारे पञ्चर्तुरूपैः अरैर्युक्ते [v]चक्रे संवत्सरात्मके [v]परिवर्तमाने संवत्सरपरिवत्सरादिरूपेण पुनःपुनः[2] आवर्तमाने[3] सति [v]तस्मिन् कालचक्रे [v]विश्वा [v]भुवनानि सर्वाणि भूतजातानि[4] वर्तन्ते इत्यर्थः। किंच [v]तस्य चक्रस्य मध्ये वर्तमानः [v]अक्षः [v]भूरिभारः सकलभुवनवहनेन प्रभूतभारोऽपि [v]न [v]तप्यते न पीडयते। किंच [v]सनादेव सनातनः एव [v]सनाभिः समाननाभिकः सर्वदा एकरूपनाभिरसौ [v]न [v]शीर्यते न भिद्यते। यथा लौकिकरथाक्षः भारेण भग्नो भवति अक्षघातेन च नाभिर्विवृता भवति तद्वदत्रापि[5] नास्तीत्यर्थः ॥

सनेमि चक्रमजरं वि वावृत उत्तानायां दश युक्ता वहन्ति ।
सूर्यस्य चक्षू रजसैत्यावृतं तस्मिन्नार्पिता भुवनानि विश्वा ॥ १४ ॥

सऽनेमि। चक्रम्। अजरम्। वि। ववृते। उत्तानायाम्। दश। युक्ताः। वहन्ति।
सूर्यस्य। चक्षुः। रजसा। एति। आऽवृतम्। तस्मिन्। आर्पिता। भुवनानि। विश्वा ॥१४॥

[v]सनेमि समाननेमि एकप्रकारबहिर्वलयमक्षीणनेमि [v]चक्रं संवत्सराख्यम् [v]अजरं सदातनमपि[6] जरारहितं [v]वि [v]ववृते पुनःपुनर्विशेषेण वर्तते। [v]उत्तानायाम् ऊर्ध्वतनायाम् ईषायाम् उपरिविस्तृतभूम्यां[7] वा [v]दश इन्द्रादयः पञ्च लोकपालाः निषादपञ्चमाश्चत्वारो ब्राह्मणादयो वर्णाः मिलित्वा दशसंख्याकाः [v]युक्ताः स्वस्वव्यापारयुक्ताः [v]वहन्ति निर्वहन्ति[8]। कृत्स्नं जगन्निर्वहन्तीत्यर्थः। तन्निर्वाहार्थत्वात् कालस्य। किंच [v]सूर्यस्य आदित्यस्य [v]चक्षुः ख्यानस्वभावं सर्वस्य चक्षुःस्थानीयं वा मण्डलम्। 'चक्षुः ख्यातेर्वा चष्टेर्वा' ( निरु. ४. ३ ) इति निरुक्तम्। [v]रजसा वृष्ट्युदकेन [v]आवृतं व्याप्तम् [v]एति गच्छति। 'उदकं रज उच्यते' ( निरु. ४. १९ ) इति यास्कः। तादृशे[9] मण्डले [v]विश्वा [v]भुवनानि सर्वाणि भूतजातानि [v]आर्पिता अर्पितानि तदधीनत्वात्तेषाम् ॥

---

१. क्ष-ञ-ट–'इति' नास्ति। २. झ१–'पुनःपुनः' नास्ति; ३. क्ष-ङ-ञ-ट–परिवर्तमाने। ४. क्ष-ञ-ट–भूतजातानि अर्पिता अर्पितानि; ङ-झ१–भूतजातानि आवित तदधीनानि। ५. क्ष-ङ-झ१-ञ-ट–'तद्वदत्र'। ६. च–सनातनमपि। ७. क्ष-ञ-ट–उपरि विस्तृतायां भूम्याम्। ८. ङ-झ१–निर्वाहयन्ति। ९. क्ष-ङ-झ१-ञ-ट–तदेतस्मिन् तादृशे।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

साकंजानां सप्तथमाहुरेकजं षळिद्यमा ऋषयो देवजा इति ।
तेषामिष्टानि विहितानि धामशः स्थात्रे रेजन्ते विकृतानि रूपशः ॥ १५ ॥

साकम्ऽजानाम् । सप्तथम् । आहुः । एकऽजम् । षट् । इत् । युमाः । ऋषयः । देवऽजाः । इति ।
तेषाम् । इष्टानि । विऽहितानि । धामऽशः । स्थात्रे । रेजन्ते । विऽकृतानि । रूपऽशः ॥१५॥

[v]साकंजानाम् एकस्मादादित्यात् सहोत्पन्नानां सप्तानामृतूनां मध्ये [v]सप्तथं सप्तममृतुम् ॥ ' थट् च च्छन्दसि ' ( पा. सू. ५. २. ५० ) इति थट् ॥ [v]एकजम्[1] एकेनोत्पन्नम् [v]आहुः कालतत्त्वविदः । चैत्रादीनां द्वादशानां मासानां द्वयमेलनेन[2] वसन्ताद्याः षड्ऋतवो भवन्ति । अधिकमासेन एकः[3] उत्पद्यते सप्तमर्तुः । न च तादृशो मास एव नास्तीति मन्तव्यम् । ' अस्ति त्रयोदशो मास इत्याहुः ' ( तै. सं. ६. ५. ३. ४ ) इति श्रुतेः । तदेवोच्यते । [v]षडिद्यमाः । इच्छब्द एवकारार्थः । षडेव ऋतवः मासद्वयरूपाः [v]ऋषयः गन्तारः । ते च [v]देवजाः देवादादित्यात्[4] जाताः [v]इति एवमाहुः । सप्तमाधारस्य त्रयोदशस्य मासस्य देवाभावः[5] । ' निःसूर्योऽधिकमासो मण्डलं तपते रवेः ' इत्यादिस्मृतेः । तस्मात् षडेव देवजाः अदेवजः एकः । [v]तेषाम्[6] ऋतूनां स्वरूपाणि [v]इष्टानि सर्वलोकाभिमतानि [v]धामशः तत्तत्स्थाने [v]विहितानि पृथक् पृथक् स्थापितानि [v]रूपशः रूपभेदेन [v]विकृतानि विविधाकृतियुक्तानि । स च रूपभेदस्तैत्तिरीयैराम्नातः– ' स रसमह वसन्ताय प्रायच्छद्यवं ग्रीष्माय ' ( तै. सं. ७. २. १०. १ ) इत्यादि[6] । [v]स्थात्रे अधिष्ठात्रे तदर्थाय [v]रेजन्ते चलन्ति । जगद्व्यवहाराय पुनःपुनरावर्तन्ते इत्यर्थः ॥ ॥ १६ ॥

स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान्न वि चेतदन्धः ।
कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात्स पितुष्पितासत् ॥ १६ ॥

स्त्रियः । सतीः । तान् । ऊँ इति । मे । पुंसः । आहुः । पश्यत् ।
अक्षण्ऽवान् । न । वि । चेतत् । अन्धः ॥ कविः । यः । पुत्रः । सः । ईम् ।
आ । चिकेत । यः । ता । विऽजानात् । सः । पितुः । पिता । असत् ॥ १६ ॥

[v]मे मदीया या दीधितयः[7] [v]स्त्रियः संस्त्यानवत्यः योषितः [v]सतीः सत्यः । योषिद्वदुदकरूपगर्भधारणात् स्त्रीत्वम् । एषां रश्मीनाम् आविष्टलिङ्गत्वात् स्त्रीलिङ्गता । [v]तान् [v]उ तान् रश्मीनेव [v]पुंसः [v]आहुः प्रभूतवृष्ट्युदकसेक्तॄन् पुरुषानाहुः । प्रतिनिर्देशापेक्षया पुंलिङ्गता । अमुमर्थम् अत्यन्तनिगूढम् [v]अक्षण्वान् ज्ञानदृष्ट्युपेतः कश्चिन्महान् [v]पश्यत्[8] जानाति । [v]अन्धः अतथारूपः स्थूलदृष्टिः

---

१. क्ष-ञ-ट–इममेकजम् । २. क्ष-ङ-ञ-ट–द्वयद्वयमेलनेन । ३. क्ष-ञ-ट–एकेन । ४. क्ष-ङ-ञ१-ञ-ट–देवेन आदित्येन । ५. क्ष-ञ१-ञ-ट–देवजत्वाभावात् । ६. क्ष-ङ-ञ१-ञ-ट–तेषाम् ऋतूनां संबन्धीनि इष्टानि सर्वलोकाभिमतानि अहोरात्राणि धामशः तत्तत्स्थाने वृष्टयुदकानि ( क्ष-ञ-ट–प्रत्यृतु तानि ) विहितानि पृथक् पृथक् स्थापितानि ( क्ष-ञ-ट–पृथक्स्थानि तानि तानि ) च रूपशः स्वरूपेण शुक्लकृष्णरूपभेदेन । ७. क्ष-ङ-ञ१-ञ-ट–रश्मयः । ८. क्ष-ङ-ञ१-ञ-ट–पश्यत पश्येत ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ᵛन ᵛवि ᵛचेतत् न विचेतयति न[1] जानाति[1]। किंच ᵛयः ᵛकविः क्रान्तदर्शी ᵛपुत्रः स्त्रीपुरुषरूपाणां रश्मीनां पुत्रस्थानीयः पुरु जगतां त्राता वृष्ट्युदकलक्षणोऽस्ति ᵛसः ᵛईं स एव पुत्रः। यद्वा। ईम् एनमर्थम्। स्त्रीणां सतीनां पश्चात् पुरुषभावम् ᵛआ ᵛचिकेत सर्वतो जानाति। पित्रोः स्थितिं पुत्र एव जानाति नान्यः। ᵛयः कश्चित् ᵛता तानि ᵛविजानात् स्त्रीपुरुषपुत्ररूपाणि जानीयात् ᵛसः ᵛपितुः ᵛपिता ᵛअसत्। पिता वृष्ट्या जगत्पालको रश्मिसमूहः। तस्यापि पिता आदित्यः स[2] भवति[2]। आदित्य एव भवतीत्यर्थः। यद्वा। लौकिकोक्तिरियम्। यस्तानि जानाति स एवं भवति। स्वयं पितुः पुत्रः सन्नपि स्वपुत्रापेक्षया पिता च भवति। पुत्रपौत्रादिसहितः चिरकालं[3] जीवी[3] भवति। इत्यधिदैवतम्॥ अथाध्यात्मम्। याः इदानीं स्त्रियः सतीः स्त्रीत्वं प्राप्ता आहुर्लौकिकाः तान् उ तानेव मे मह्यं पुंसः पुरुषानाहुः प्रतिपादयन्ति तत्त्वज्ञाः। कथमन्यस्य अन्यभावः उच्यते। एकस्यैव निरस्तसमस्तोपाधिकस्य आत्मनः तद्देहावस्थानमात्रेण तत्तद्व्यपदेशोपपत्तेः। श्रूयते हि– 'त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी' (श्वे. उ. ४. ३) इत्यादि। स्त्रीत्वं पुंस्त्वं च उभयमपि वस्तुतो नास्तीत्युक्तं भवति। श्रुतिरपि तदभावं बोधयति – 'नैव स्त्री न पुमानेष नैव चायं नपुंसकः। यद्यच्छरीरमादत्ते तेन तेन स चोह्यते' (श्वे. उ. ५. १०) इति। द्वितीयः पादः पूर्ववत्। किंच पुत्रो वयसाल्पोऽपि यः कविः क्रान्तप्रज्ञो ज्ञानी स्यात् ईम् इममर्थं स विचिकेत जानाति। एवमुक्तलक्षणस्य परमात्मनः ता तानि स्त्रीत्वपुंस्त्वादीनि यो विजानात् औपाधिकानि जानीयात् स पितुः स्वोत्पादकस्यापि ज्ञानरहितस्य पिता असत् पितृवत् पूज्यो भवति। उक्तमर्थमभिप्रेत्य ताण्डकब्राह्मणं— 'शिशुर्वा आङ्गिरसो मन्त्रकृतां मन्त्रकृदासीत् स पितॄन् पुत्रका इत्यामन्त्रयत' इत्युपक्रम्य 'ते देवानपृच्छन्त ते देवा अब्रुवन्नेष वाव पिता यो मन्त्रकृत्' (ता. ब्रा. १३. ३. २४) इति। मन्त्रद्रष्टुरेव किल पितृत्वं तत्त्ववित् पितुः पितासदिति किमाश्चर्यम् इत्यभिप्रायः॥

**अवः परेण पर एनावरेण पदा वत्सं बिभ्रती गौरुदस्थात्।**
**सा कद्रीची कं स्विदर्धं परागात्क्व स्वित्सूते नहि यूथे अन्तः॥ १७॥**

अवः। परेण। परः। एना। अवरेण। पदा। वत्सम्। बिभ्रती। गौः। उत्। अस्थात्।
सा। कद्रीची। कम्। स्वित्। अर्धम्। परा। अगात्।
क्व। स्वित्। सूते। नहि। यूथे। अन्तरिति॥ १७॥

अत्र अग्नौ हूयमानाहुतिर्गोरूपेण स्तूयते। ᵛगौः गोरूपा गमनशीला एषा आहुतिसंघेन[4] पोष्यं ᵛवत्सं[4] वत्सस्थानीयमग्निम् ᵛअवः अवस्तात् अधोदेशे ᵛपरेण ᵛपदा पादद्वयेन स्वावयवेन आकृष्य ᵛबिभ्रती धारयन्ती तथा ᵛपरः परस्तात् उपरिदेशे ᵛएना अनेन ᵛअवरेण च पदा पादद्वयेन आकृष्य तमेव वत्सं बिभ्रती ᵛउदस्थात् सूर्यं प्रति उत्तिष्ठति। 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते' (मनु. ३. ७६) इति स्मृतेः। अथैवं कृतवती ᵛसा आहुतिः ᵛकद्रीची क्व गतेत्यनिश्चयगमना। आदित्यं प्राप्तवतीत्यर्थः। ᵛकं ᵛस्वित् कं[5] फलभाजं पुरुषं प्रति ᵛअर्धम् अर्धमार्गम् आगत्य[6]। यद्वा।

---

१. क्ष-ञ-ट–ज्ञातुमर्हति। २. क्ष-ञ-ट–असत् भवति। ३. क्ष-ङ-च-ज्ञ-झ-झ१-ञ-ट–चिरकालजीवी। ४. क-ख-ज-फ-व–आहुतिसंस्थेन पोष्यं वत्सम्; क्ष-ङ-झ१-ञ-ट–आहुतिवत्सं (?) स्तनपोष्यम्। ५. क्ष-ञ-ट–एकम्। ६. ङ-झ१–आदित्यम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अर्धमृद्धम्। [v]परागात् परागच्छति। आगत्य च [v]क [v]स्वित् [v]सूते कुत्र प्रदेशे फलमुत्पादयति। [v]नहि इतरगोवत् इयं [v]यूथे [v]अन्तः सजातीयगोमध्ये सूते। साधारण्येन यत्र क्वचिन्न सूते अपि तु कस्मिंश्चिदनुष्ठातरि। अतः स महान् को नु खल्विति। यद्वा। आदित्यरश्मिसमूहः एव गोरूपेण स्तूयते। गौः उक्तलक्षणा रश्मिरूपा गौः वत्सं वत्सवद्रक्षणीयं यजमानम् उक्तक्रमेण बिभ्रती उदस्थात्। अथ तथा कृत्वा सा कदाचीत् अदृश्यगमना सती कं स्वित् अर्धम् ऋद्धम् अर्धस्थानभाजं[1] वा कं स्वित् पुरुषम् आदित्यं परागात् अप्रतिनिवृत्ता गता। 'तं नयन्त्येताः सूर्यस्य रश्मयो यत्र देवानां पतिरेकोऽधिवासः' (मु. उ. १. २. ५) इति श्रुतेः। तथा कृत्वा च क स्वित्सूते कस्मिन् इन्द्रादिलोके जनयति न सर्वत्र। शिष्टं समानम्॥

अवः परेण पितरं यो अस्यानुवेद पर एनावरेण।
कवीयमानः क इह प्र वोचदेवं मनः कुतो अधि प्रजातम्॥ १८॥

अवः। परेण। पितरम्। यः। अस्य। अनुऽवेद। परः। एना। अवरेण।
कविऽयमानः। कः। इह। प्र। वोचत्। देवम्। मनः। कुतः। अधि। प्रऽजातम्॥१८॥

[v]अवः अवस्तात् स्थितम् [v]अस्य [v]पितरम् एतल्लोकपालकम् अग्निं [v]परेण आदित्येन सह [v]यः [v]अनुवेद अनुक्रमेण जानाति तथा [v]परः परस्तात् स्थितम् आदित्यम् अस्य पितरं पालकम्। सोऽपि[2] इममेव[2] लोकं वृष्ट्यादिना पालयति। तादृशमादित्यम् [v]एना अनेन [v]अवरेण अग्निना सह यः अनुवेद अग्न्यादित्यौ व्यतिहारेण उपास्ते। यद्वा। अभिभूतरजस्तमस्कौ उद्बुद्धसत्त्वौ अत एव स्वाधीनमायौ एतौ एकत्वेन वा अधिगच्छति। स तादृशः पुरुषः [v]कवीयमानः कविवदाचरन् क्रान्तदर्शित्वम् आत्मनः ख्यापयन् [v]क [v]इह अस्मिँल्लोके [v]प्र [v]वोचत् प्रब्रवीति। किंच [v]देवं द्योतमानं देवविषयम्[3] अलौकिकं वा [v]मनः [v]कुतः कस्मात् अदृष्टविशेषात् [v]अधि आधिक्येन [v]प्रजातम् उत्पन्नम्। उभयमपि दुर्लभमित्यर्थः॥

ये अर्वाञ्चस्ताँ उ पराच आहुर्ये पराञ्चस्ताँ उ अर्वाच आहुः।
इन्द्रश्च या चक्रथुः सोम तानि धुरा न युक्ता रजसो वहन्ति॥ १९॥

ये। अर्वाञ्चः। तान्। ऊँ इति। पराचः। आहुः। ये।
पराञ्चः। तान्। ऊँ इति। अर्वाचः। आहुः।
इन्द्रः। च। या। चक्रथुः। सोम। तानि। धुरा। न। युक्ताः। रजसः। वहन्ति॥ १९॥

[v]ये सूर्यसोमयोश्चक्रे वर्तमाना रश्मयो ग्रहादयश्च तत्परिभ्रमणवशेन [v]अर्वाञ्चः अर्वागञ्चनाः अधोमुखाः सन्ति [v]ताँ [v]उ तानेव [v]पराचः [v]आहुः पराङ्मुखाञ्चनान् ऊर्ध्वान् आहुः कालविदः।

---

१. क्ष-ञ-ट-ऋद्धस्थानभाजम्। २. क्ष-ञ-ट-सोऽमुमेव। ३. च-देवब्रह्मविषयम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तथा प्रथमं Vये Vपराञ्चः परागञ्चनाः Vताँ Vउ तानेव Vअर्वाचः Vआहुः । हे Vसोम त्वम् Vइन्द्रः परमेश्वरः इरां भूमिं वृष्ट्या धारकः आदित्यः । यद्वा । द्वादशादित्यानां मध्ये इन्द्रोऽप्येकः । ' विवस्वदिन्द्रयुताः ' इत्युक्तत्वात् अयमपीन्द्रः । सः Vच युवां Vया यानि मण्डलपरिभ्रमणानि Vचक्रथुः कृतवन्तौ Vतानि Vरजसः रञ्जनात्मकस्य लोकस्य ॥ कर्मणि षष्ठी ॥ लोकं Vवहन्ति निर्वहन्ति। तत्र दृष्टान्तः Vधुरा[1] शकटादौ धुरि Vयुक्ताः संबद्धाः अश्वादयो यथा धुरं वहन्ति तद्वत् । यद्वा । एतत् पूर्वार्धे दृष्टान्तितम् । धुरा युक्ताः । धुरि स्थितं चक्रमपि धुरशब्देनोच्यते । तत्र युक्ताः समर्पिताः पुरुषाः तत्परिभ्रमणवशेन अर्वाञ्चोऽपि पराञ्चः पराञ्चोऽपि अर्वाञ्चो भवन्ति तद्वत् ॥

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति ॥ २० ॥

द्वा । सुऽपर्णा । सऽयुजा । सखाया । समानम् । वृक्षम् । परि । सस्वजाते इति ।
तयोः । अन्यः । पिप्पलम् । स्वादु । अत्ति । अनश्नन् । अन्यः । अभि । चाकशीति ॥२०॥

अत्र लौकिकपक्षिद्वयदृष्टान्तेन जीवपरमात्मानौ[2] स्तूयेते । यथा लोके द्वौ सुपर्णौ सुपतनौ शोभनगमनौ Vसयुजा समानयोगौ Vसखाया समानख्यानौ Vसमानं Vवृक्षं Vपरि Vषस्वजाते एकमेव वृक्षं परिषस्वजाते आश्रयतः Vतयोः Vअन्यः एकः Vपिप्पलं पक्वं[3] स्वादुतरम् Vअत्ति अपरः Vअनश्नन्[4] Vअभि Vचाकशीति अभिपश्यति तद्वत् द्वौ सुपर्णस्थानीयौ क्षेत्रज्ञपरमात्मानौ सयुजा समानयोगौ। योगो नाम संबन्धः स च तादात्म्यलक्षणः । स एवात्मा जीवात्मनः स्वरूपं यस्य परमात्मनः स तदात्मा । एवमन्यस्यापि स एवात्मा परमात्मनः स्वरूपं यस्य जीवात्मनः[5] । एवमेकस्वरूपौ इत्यर्थः । अनेन भास्करमतानुसारिणः अतिरेकिनाम्नो जीवात्मा परमात्मनो नान्यः स च परमात्मा जीवादन्यो नानाजीवाश्रयणादिति मतं निरस्तं भवति । ननु संबन्धो द्विष्ठः स च पक्षिणोरेव[6] भेदमपेक्षते अतः कथमैकात्म्यमिति । न । औपाधिकभेदं वास्तवाभेदं चापेक्ष्य प्रवृत्तः । अत एव सखायौ समानख्यानौ नान्यख्यानौ । ननु एकस्य यादृशं ख्यानं तादृशमेव[7] अन्यस्य[7] इति व्युत्पत्त्या भेदः स्फुटं प्रतिभाति कथं तादात्म्यमुच्यते इति न वक्तव्यम् । नात्र परस्परं दृष्टान्तदार्ष्टान्तिकभावः । अपि तु यस्य यादृशं ख्यानं स्फुरणं परमात्मनः तदेव ख्यानमितरस्यापि जीवात्मनः इति सखायौ इत्युच्यते । एकरूपप्रकाशावित्यर्थः । अतः उपपन्नमैकात्म्यम् । अनेन वास्तवभेदोऽपि निरस्तः । ' समानं वृक्षं परि षस्वजाते ' इत्यत्र यथा आश्रयान्तराभावात् उभयोरेकाश्रयत्वम् अभ्युपगन्तव्यं[8] तद्वत् सयुजा सखाया इत्युभयत्रापि एकयोगख्याने आश्रयणीये । वृश्च्यते इति वृक्षो देहः । स च उभयोः समानः एक एव । जीवस्य भोगार्थत्वात् परमात्मना[9] सृष्टैः[9] महाभूतैः आरब्धत्वात् तस्योपलब्धिस्थानत्वाच्च उभयोरपि समानः । तादृशं समानं वृक्षं परि षस्वजाते परिष्वजतः आश्रयतः । न च जीवस्य वस्तुतः ईश्वरत्वे कथं जीवबुद्ध्या संसारशोकौ इति वाच्यं तयोर्मोहकृतत्वात् । तथा च आथर्वणिकाः अमुं मन्त्रम् आम्नाय अस्य सन्देहनिवर्तकमुत्तरं मन्त्रमेवमामनन्ति। ' समाने वृक्षे

---

१. ख-च-फ–धुरा न । २. क्ष-ङ-ञ१-ञ-ट–जीवपरमेश्वरौ । ३. क्ष-ङ-ञ-ञ१-ञ-ट–पक्वं फलम् । ४. ङ-ञ१–अनश्नन्नपि । ५. ङ–जीवात्मनः स तदात्मा । ६. क्ष-ङ-ञ-ट–पक्षिणोरिव । ७. ञ१–तत्समानाख्यानं यस्य । ८. क्ष-ञ-ट–इत्युपगन्तव्यम् । ९. क्ष-ङ-ञ१-ञ-ट–परमेश्वरस्य ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ' ( मु. उ. ३. १. २ ) इति । अस्यायमर्थः । एक एव शरीरे पूर्णः पुरुषः परमात्मा निमग्नो निगूढः सन् स्वयम् अपि[1] ईश्वरोऽपि अनीशत्वबुद्धया[2] मुह्यमानो मूढः सन् शोचति । संसारे अहं कर्ता सुखी दुःखीति जननमरणे अनुभवति । यदा तु जुष्टं नित्यतृप्तमन्यं संसारशोकातीतम् ईशं परमेश्वरं पश्यति स्वानन्यतया साक्षात्करोति । तदा वीतशोको देहाद्यतिरिक्तः स्वस्वरूपसाक्षात्कारेण गततापत्रयः सन् अस्य महिमानमिति । निरस्तसमस्तौपाधिकस्य परमेश्वरस्य महिमानं सार्वात्म्यसर्वज्ञत्वादिमहिमानमिति एति प्राप्नोति । न च तद्भावनात्रौ[3] तन्महिमा प्राप्यते । अतस्तद्रूपो भवतीत्यर्थः । तस्मात् वस्तुतः एक एव । भेदस्तु मोहकृतः इति सिद्धम् । अनुभवदशायां लौकिकबुद्धया भेदमभ्युपेत्य उच्यते । तयोः अन्यः जीवात्मा पिप्पलं कर्मफलं स्वादुभूतम् अत्ति भुङ्क्ते । यस्य यदुपार्जितं तत्तस्य स्वादु भवति । अन्यः परमात्मा अनश्नन् आप्तकामत्वेन अभुञ्जानः स्पृहायाः अभावात् । ' आप्तकामस्य[4] का स्पृहा[5] ' ( मा. उ. का. १. ९ ) इति स्मृतेः[6] । तस्मात् अवास्तवभेदमुपजीव्य तयोरन्यः इत्युक्तम् । वस्तुतस्तु ' अनीशया शोचति मुह्यमानः ' इत्युक्तत्वात् अभेद एव । तादृशः परमात्मा स्वात्मनि अध्यस्तं जगत् साक्षित्वेन ईक्षते । अत्र ' द्वौ द्वौ प्रतिष्ठितौ सुकृतौ धर्मकर्तारौ ' ( निरु. १४. ३० ) इत्यादि निरुक्ते[7] गतम्[8] अस्य मन्त्रस्य व्याख्यानमनुसंधेयम् ॥ ॥ १७ ॥

यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरन्ति ।
इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्रा विवेश ॥ २१ ॥

यत्र । सुऽपर्णाः । अमृतस्य । भागम् । अनिऽमेषम् । विदथा । अभिऽस्वरन्ति ।
इनः । विश्वस्य । भुवनस्य । गोपाः । सः । मा । धीरः । पाकम् । अत्र । आ । विवेश ॥ २१ ॥

[v]यत्र आदित्यमण्डले [v]सुपर्णाः सुपतनाः शोभनगमना रश्मयः [v]अमृतस्य उदकस्य [v]भागं भजनीयम् अंशम् आदाय [v]अनिमेषम् अनवरतं [v]विदथा वेदनेन ज्ञानेन अस्माभिरेवं कर्तव्यमिति बुद्धया [v]अभिस्वरन्ति अभिप्रापयन्ति[9] । यश्च [v]विश्वस्य [v]भुवनस्य भूतजातस्य [v]इनः स्वामी तथा तस्यैव [v]गोपाः गोपायिता रक्षिता । अयम्[10] आदित्यः [v]सः परमेश्वरः [v]धीरः धीमान् प्राण्यनुग्रहबुद्धियुक्तः सन् [v]मा मां [v]पाकं पक्तव्यम् अपक्वप्रज्ञम् [v]अत्र अस्मिन् स्वकीयमण्डले[11] [v]आ [v]विवेश प्रवेशयति । अत्र अस्मदीये देहे वा नियामकतया प्रविष्टः इत्यधिदैवतपक्षे । अथाध्यात्मपक्षे । यत्र यस्मिन्नात्मनि[12] सुपर्णाः शोभनपतनानि स्वस्वविषयग्रहणाय गमनकुशलानीन्द्रियाणि चक्षुरादीनि अमृतस्य भागम् । अत्र विषयावच्छिन्नचैतन्यम् अमृतमित्युच्यते । तस्य भागं भजनीयं स्वस्वांशम् अनिमेषं निमेषरहितम् अनारतं विदथा[13] वेदनेन वृत्त्यवच्छिन्नचैतन्येन अवरुद्धानि अभिस्वरन्ति अभिप्रयन्ति आवरणापगमनेन स्फोरयन्ति[14] । किंच यस्तु[15] इनः स्वामी अस्य देहस्य विश्वस्य भुवनस्य गोपा गोपायिता रक्षिता । यद्वा । विश्वस्य भुवनस्य भूतजातस्य स्वामी अस्य देहस्य गोपाः । अनेन तत्त्वंपदार्थयोः[16] एकत्वं प्रतिपादितं

---

१. क्ष-ङ-ञ१-ञ-ट-' अपि ' नास्ति । २. क्ष-ञ-ट-अनीश्वरबुद्धया । ३. क्ष-ञ-ट-तद्भावानात्रौ । ४. ङ-आत्मकामोऽस्पृहः । ५. क्ष-ङ-ञ-ट-श्रुतेः । ६. क्ष-ञ-ट-निरुक्तगतम्; च-निरुक्ते निगदितम् । ७. क्ष-ङ-ञ१-ञ-ट-अभिप्रयन्ति । ८. ङ-ञ१-यः । ९. ङ-स्वकीयबले; ञ१-स्वकीये बले । १०. क्ष-ङ-ञ१-ञ-ट-यस्मिन् अमृते परमात्मनि । ११. क्ष-ञ-ट-विदथा विदथेन । १२. ख-ज-ण-स्फारयन्ति । १३. क्ष-ञ-ट-यश्च । १४. ञ१-तत्त्वं पदयोः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

भवति । स परमेश्वरो धीरः समाधिनिष्ठः सर्वदा अविक्रियो मा मां पाकं परिपक्वमनस्कं यागदानादिना अपगतरजस्तमस्कत्वेन दर्पणवदतिनिर्मलसत्त्वोद्रिक्तमनस्कं माम् आ विवेश । उक्तरूपे चित्ते तादृशं वस्तु स्फुरतीत्यर्थः । यद्वा । अपरिपक्वमनाः[1] अहं पूर्वम् अज्ञानदशायां मदन्यः[2] ईश्वरोऽस्तीति[2] अविद्वान् ततः परमस्ति कश्चित्सर्वज्ञः सर्वेश्वरः सत्यज्ञानादिलक्षणः इति निश्चित्य पश्चात् गुरुशास्त्राभ्यां स एव अहमस्मीति मत्वा एवं पारंपर्येण अवगत्य असंभावनाविपरीतभावने व्युदस्य भावनया साक्षात्कृत्य परिपूर्णः परमात्मा अभूवमित्यर्थः । अयमेव ' स मा धीरः पाकमत्रा विवेश ' इत्यनेनोच्यते । ननु अनवच्छिन्नस्य परमात्मनः सर्वत्र व्याप्तत्वात् प्राप्तिरेव नोपपद्यते । संप्रति[3] अत्र प्राप्तिर्द्विविधा प्राप्तप्राप्तिः अप्राप्तप्राप्तिश्चेति । प्राप्तस्यापि कण्ठे चामीकरन्यायेन आवरणाज्ञानहानद्वारेण प्राप्तिः उपपद्यते । अस्य मन्त्रस्य यन्निरुक्तं ' यत्र सुपर्णाः सुपतना आदित्यरश्मयः ' ( निरु. ३. १२ ) इत्यादिकं तदत्र द्रष्टव्यम् ॥

यस्मिन्वृक्षे मध्वदः सुपर्णा निविशन्ते सुवते चाधि विश्वे ।
तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेद ॥ २२ ॥

यस्मिन् । वृक्षे । मधुऽअदः । सुऽपर्णाः । निऽविशन्ते । सुवते । च । अधि । विश्वे ।
तस्य । इत् । आहुः । पिप्पलम् । स्वादु । अग्रे । तत् ।
न । उत् । नशत् । यः । पितरम् । न । वेद ॥ २२ ॥

अत्र वृक्षस्वरूपकल्पना । अधिदैवम् आदित्यम् अध्यात्मम्[4] आत्मानं च प्रशंसति । [v]यस्मिन् आदित्ये [v]वृक्षे वृक्षवत् सर्वफलाश्रयभूते [v]मध्वदः । मधिवस्युदकनाम । तत् अदन्तीति मध्वदः उदकस्य अत्तारः । [v]सुपर्णाः सुपतना रश्मयः [v]निविशन्ते प्रविशन्ति रात्रौ [v]सुवते [v]च पुनरुदयकाले प्रकाशं जनयन्ति च यस्मादादित्यात् । कुत्र । [v]अधि [v]विश्वे विश्वस्योपरि । [v]तस्य आदित्यवृक्षस्य [v]पिप्पलं पालकं फलं [v]स्वादु रसवत् [v]अग्रे उपरि उपासनानन्तरम् [v]आहुः कथयन्ति तत्त्वविदः । यद्वा । सर्वस्य अधि[5] उपरि वर्तमानमाहुः । ईदृशं[6] [v]पितरं जगतः पालयितारं [v]यः नरः [v]न [v]वेद नोपास्ते सः [v]तन्नोनशत् । नशतिर्गतिकर्मा । तत्फलं न प्राप्नोति । वेदितुस्तु[7] अग्रे पिप्पलमाहुरित्यर्थः । इत्यधिदैवपक्षे ॥ अथाध्यात्मपक्षे । यस्मिन् परमात्मनि वृक्षे वृक्षवत् गमनादिरहिते[8] अविक्रिये सुपर्णाः शोभनगमनानीन्द्रियाणि मध्वदो मधुनो ज्ञानस्याक्तृणि तज्ज्ञानेन ज्ञानभाञ्जीत्यर्थः । निविशन्ते स्वापकाले स्वस्वविषयेभ्यः प्रतिनिवृत्तानि आत्मनिवृत्त्या लीयन्ते पुनः प्रबोधकाले अधि विश्वे विश्वस्योपरि सुवते च उद्यन्ति[9] स्वस्वविषयान् लभन्ते[10] इत्यर्थः । तस्य परमात्मनः पिप्पलं पालकं संसारतः उद्धारकं स्वादु आस्वादनीयम् अमृतत्वलक्षणं ज्ञानम् । यत्फलास्वादने पुनः क्षुत्तृष्णाशोकमोहजरामरणादयो न भवन्ति तद्धि[11] स्वादुतमम् । इतरस्वर्गादिफलानि पुनर्जननाद्यापादकत्वात्

---

१. झ१–परिपक्वमनाः । २. क-च-फ–अहमीश्वरोऽस्तीति; ख–अहमीश्वरोऽस्मीति । ३. क्ष-ङ-झ१-ञ-ट–सत्यम् । ४. क्ष-ङ-ञ-झ१-ञ–अधियज्ञम् । ५. च–' अधि ' नास्ति । ६. क्ष-ञ-ट–कीदृशम् । ७. ङ-झ१-१–वेदितारस्तु । ८. क्ष-ङ-झ१-ञ-ट–गमनागमनादिरहिते । ९. क्ष-ङ-झ१-ञ-ट–उत्पादयन्ति । १०. क्ष-झ-ञ-ट–उपलभन्ते । ११. क्ष-ञ-ट–तादृशं तद्धि ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आपातस्वादूनि । तत्फलम् अग्रे स्वरूपज्ञानोत्तरकालमाहुः । यः पुमान् पितरं पालकं ज्ञानफलं तत्फलाधारम् आत्मानं वा न वेद न जानाति गुरुशास्त्रात् स तत्फलं नोन्नशत् न प्राप्नोति अत्र आत्मानं यो वेद स एव तत् मोक्षफलं प्राप्नोतीत्यर्थः । यद्वा । 'चर्मवदाकाशम्' (श्वे. उ. ६. २१) इत्यादिश्रुतिः ज्ञानादन्योपायस्य अमृतत्वप्राप्तिं निवारयति । 'ब्रह्म वेद ब्रह्मैव भवति' (मु. उ. ३. २. ९) इत्यादिका तु ज्ञानात् प्राप्तिमाह । तस्मात् ईदृशं परमेश्वरं विदित्वा मुक्तो भूयासमित्यर्थः ॥

यद्गा॑यत्रे अधि॑ गाय॒त्रमाहि॑तं त्रै॒ष्टु॒भाद्वा॒ त्रैष्टु॑भं नि॒रत॑क्षत ।
यद्वा॒ जग॒ज्जग॒त्याहि॑तं प॒दं य इत्तद्वि॒दुस्ते अ॑मृत॒त्वमा॑नशुः ॥ २३ ॥

यत् । गा॒य॒त्रे । अधि॑ । गा॒य॒त्रम् । आऽहि॑तम् । त्रैस्तु॑भात् । वा॒ । त्रैस्तु॑भम् । नि॒:ऽअत॑क्षत ।
यत् । वा॒ । जग॑त् । जग॑ति । आऽहि॑तम् । प॒दम् ।
ये । इत् । तत् । वि॒दुः । ते । अ॒मृ॒त॒ऽत्वम् । आ॒न॒शुः ॥ २३ ॥

[V]गायत्रे [V]अधि [V]गायत्रमाहितम् प्राथम्यात् सर्वैः स्तुत्यत्वाच्च गायत्री भूः । तदीयं स्थानं गायत्रम् । अधि उपरि तत्र गायत्रम् आग्नेयं पदम् आहितम् । प्रथमसृष्टत्वात् गायति त्रायते च इति व्युत्पत्त्या च प्रजापतेर्मुखात् गायत्र्या सह उत्पन्नत्वात् भक्त्या अग्निरपि गायत्रः । 'गायत्रोऽग्निः' (तै. सं. २. २. ५. ५) इति श्रुतेः । भूम्यामग्निः स्थापितः इति [V]यत् अस्ति । तथा [V]त्रैष्टुभात् द्वितीयत्वात् वृष्टिपर्जन्यविद्युद्रूपत्रिस्तोभयुक्तात् अन्तरिक्षात् [V]त्रैष्टुभं स्तोभयुक्तम्[1] ऊर्ध्वाधस्तिर्यग्लक्षण-स्तोभत्रयोपेतं वायुं [V]निरतक्षत साधु संपादितवन्तो देवाः इति यदस्ति । [V]वा अथवा [V]जगति सर्वैर्गन्तव्ये उद्गततमे वा तृतीयभूते द्युलोके [V]जगत् गमनशीलम् आदित्याख्यं [V]पदम् [V]आहितम् इति [V]यत् अस्ति । [V]तत् इदं त्रिषु स्थानेषु त्रयाणामग्न्यादीनां पदाधानं[2] [V]य [V]इत् ये एव नराः [V]विदुः जानन्ति [V]ते एव [V]अमृतत्वमानशुः अमरणरूपं पदमाप्नुवन्ति । इत्यधिलोकम्[3]। अथाधियज्ञम्[3] । गायत्रे प्रातःसवने अधि उपरि गायत्रं छन्दः पदमाहितमिति यत् । तथा त्रैष्टुभात् माध्यंदिनात् सवनात् त्रैष्टुभं छन्दो निरतक्षत तत्र आहितमिति यत् । वा[4] किंचेत्यर्थः । जगति तृतीयसवने जगत् जागतं पदमाहितमिति यत् । तत्तादृशं सवनत्रयेषु छन्दस्त्रयसंस्थानं ये नरा विदुः यजमाना विदुः जानन्ति ते अमृतत्वं ज्ञानानुष्ठानद्वारेण[5] मोक्षम् आनशुः आप्नुवन्ति । अथवा गायत्रे प्रातःसवने । त्रिषु सवनेषु छन्दस्त्रयपरिमाणात् सवनान्यपि तत्तच्छन्दःशब्देनोच्यन्ते । 'गायत्रं प्रातःसवनं त्रैष्टुभं माध्यंदिनं सवनं जागतं तृतीयसवनम्' (तै. सं. २. २. ९. ५–६) इति श्रुतेः । तादृशे प्रातःसवने अधि उपरि गायत्रम् अष्टाक्षरात्मकम् आहावप्रतिगररूपं गायत्रं पदमाहितम् । तद्यथा होता 'शोंसावोम्' इति त्र्यक्षरेण तथा 'शंसामोदैवोम्' इति पञ्चाक्षरेण अध्वर्युः प्रतिगृणाति । तन्मिलित्वा अष्टाक्षरं संपद्यते । तच्च अष्टाक्षरं गायत्रीसदृशं तस्याः अपि पादस्य अष्टाक्षरत्वात् । इदमेकं प्रातः-सवनरूपे गायत्रपदप्रतिष्ठापनम् । तथा सवनान्ते[6] अपि शंसनानन्तरम्[6] 'उक्थं वाचि' इति

---

१. ङ-ञ१–त्रिष्टोभयुक्तम्; क्ष-ञ-ट त्रिस्तोभयुक्तम् । २. क्ष-ञ-ट–पदाधीनम् । ३. च–इत्यधि-लोकं लोकप्रतिपादकम् । अथाधियज्ञं यज्ञप्रतिपादकम् । ४. ञ१– अथवा । ५. क्ष-ङ-ञ १-ञ-ट–ज्ञात्वा अनुष्ठानद्वारेण । ६. क्ष-ञ१-ञ-ट–सवनान्तरेऽपि होता स्वशस्त्रानन्तरम् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

चतुरक्षरमाह । ' ओमुक्थशाः ' इति चतुरक्षरम् अध्वर्युः[1] । तदष्टाक्षरं संपद्यते । एतदेकं परं गायत्रे गायत्रस्थापनम् । तथा त्रैष्टुभात् माध्यंदिनसवनात् त्रैष्टुभम् आहावप्रतिगरणरूपं[2] पदं निरतक्षत ऋत्विजः । तद्यथा माध्यंदिनसवने होता ' अध्वर्यो शोंसावोम् ' इति आह्वयते षडक्षरेण अध्वर्युश्च ' शंसामोदैवोम् ' इति पञ्चाक्षरेण प्रतिगृणाति । तन्मिलित्वा एकादशाक्षरं संपद्यते । इदमेकं माध्यंदिनसवनादौ त्रैष्टुभे त्रैष्टुभाधानम् । तथा सवनान्तेऽपि[3] शंसनानन्तरम् ' उक्थं वाचि इन्द्राय ' इति सप्ताक्षरमाह । अध्वर्युश्च ' ओमुक्थशाः ' इति चतुरक्षरेण प्रतिगृणाति । तन्मिलित्वा एकादशाक्षरं संपद्यते । इदमपरं त्रैष्टुभे त्रैष्टुभस्थापनम् । तथा तृतीयसवने होता ' अध्वर्यो शोंशोंसावोम् ' इति सप्ताक्षरेण आह्वयते ' शंसामोदैवोम् ' इति पञ्चाक्षरेण अध्वर्युः प्रतिगृणाति । द्वादशाक्षरं[4] भवति । तदिदं प्रथमं जागते[5] जागतोत्पादनम्[5] । तथा पश्चादपि शंसनानन्तरमाह ' उक्थं वाचि इन्द्राय देवेभ्यः ' इति । एतदेवैकादशाक्षरं भवति । अध्वर्युश्च ' ओम् ' इत्येकाक्षरेण प्रतिगृणाति । तदुभयं मिलित्वा द्वादशाक्षरं भवति । तदिदमपरं जागते जागतपदस्थापनम् । एवं त्रिषु छन्दःसु त्रिषु गायत्र्यादिसवनेषु गायत्रादिच्छन्दस्त्रयपदप्रतिष्ठापनम् । एतत्सर्वम् ऐतरेयब्राह्मणे ' देवविशः कल्पयितव्याः ' ( ऐ. ब्रा. ३. १२ ) इति खण्डे विस्पष्टमाम्नातम् । तत्तादृशं छन्दसि छन्दःस्थापनं य इत्तद्विदुः ये एव जानन्ति ते एव अमृतत्वम् आनशुः प्राप्नुवन्ति अनुष्ठानद्वारा । एवम् अजानन्तः अनुष्ठानेनापि फलं न प्राप्नुवन्तीत्यर्थः । तस्य साकल्याभावादिति भावः ॥

**गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम् ।**
**वाकेन वाकं द्विपदा चतुष्पदाक्षरेण मिमते सप्त वाणीः ॥ २४ ॥**

गायत्रेण । प्रति । मिमीते । अर्कम् । अर्केण । साम । त्रैस्तुभेन । वाकम् ।
वाकेन । वाकम् । द्विऽपदा । चतुःऽपदा । अक्षरेण । मिमते । सप्त । वाणीः ॥ २४ ॥

[v]गायत्रेण गायत्रच्छन्दसा [v]अर्कम् अर्चनसाधनं मन्त्रं [v]प्रति [v]मिमीते प्रत्येकं परिच्छिनत्ति । ' अर्को मन्त्रो भवति यदेनेनार्चन्ति ' ( निरु. ५. ४ ) इति निरुक्तम् । प्रतिमन्त्रं गायत्रेण छन्दसा उपनिबद्धं करोति । उपलक्षणमेतदन्येषां छन्दसाम् । यद्वा[6] । इतरेषां छन्दसाम् अस्यैव चतुश्चतुरक्षराधिक्येन तत्तच्छन्दोभिः[6] प्रतिमिमीते इत्यर्थः । यद्वा । प्रतिशब्दः सम् इत्येतस्मिन्नर्थे । छन्दोभिर्मन्त्रान् संमितं करोतीत्यर्थः । [v]अर्केण [v]साम । उक्तलक्षणेन मन्त्रेण साम गायत्ररथंतरसंज्ञकं[7] साम प्रति मिमीते । ननु ' एकं साम तृचे क्रियते ' इति तिसृषु एकं साम विहितम् अतः अर्कैः साम इति वक्तव्यं कथमुच्यते अर्केण इति । न । वस्तुतः एकं साम एकस्याम् ऋचि आरूढम्[8] । पश्चादन्योन्यां तदुत्तरयोर्गायति इत्यतिदेशतः प्राप्तं तिसृषु गानम् । अतः एकवचनमविरुद्धम् । [v]त्रैष्टुभेन [v]वाकम् । अत्र त्रिष्टुब्ग्रहणम् इतरच्छन्दःप्रदर्शनार्थम्[9] । अथवा अनादेशे सर्वत्र

---

१. क्ष-ङ-ञ१-ञ-ट–अध्वर्युः प्रतिगृणाति । २. ञ१–आहावप्रतिहरणरूपेण त्रैष्टुभम् । ३. क्ष-ञ१-ञ-ट–सवनान्तरेऽपि । ४. क्ष-ङ-ञ१-ञ-ट–तन्मिलिते द्वादशाक्षरम् । ५. क्ष-ञ१-ञ-ट–जागते जगति संपादनम् । ६. क्ष-ञ१-ञ-ट–अस्यैव चतुश्चतुरक्षराधिक्येन तत्तच्छन्दोनिष्पत्तेरस्य प्रकृतित्वात् प्राधान्येनेदमुक्तम् । अर्कशब्दो जात्यभिप्रायः सर्वान् मन्त्रान् गायत्र्यादिभिः छन्दोभिः । ७. क्ष-ङ-ञ१ञ-ट–गायत्ररथंतरादिसंज्ञकम् । ८. क्ष-ञ१-ञ-ट–अध्यूढम् । ९. क्ष-ङ-ञ१-ञ-ट–इतरच्छन्दः प्रदर्शनार्थम् । पूर्वं गायत्रेणेति गायत्र्या एव उपादानात् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्रिष्टुभो ग्रहणात् प्राचुर्याभिप्रायेण इदमुक्तम् । त्रैष्टुभेन द्विवारत्रिवारावृत्तेन द्वृचतृचरूपं वाकं वक्तव्यमेकैकं छन्दः प्रति मिमीते । अथवा वाकं सूक्तम् एतावद्भिस्त्रिष्टुब्भिः उपनिबद्धमिदं सूक्तमिति । तादृशेन ᵛवाकेन ᵛवाकं वर्गमनुवाकं वा मिमीते । कीदृशेन वाकेनेति स विशेष्यते । ᵛद्विपदा ᵛचतुष्पदा । पादद्वयबद्धविराडादिच्छन्दोनिबद्धमन्त्ररूपेण चतुष्पदा पादचतुष्टयोपेतेन अनुष्टुबादिमन्त्ररूपेणेति । इयतीभिर्द्विपदाभिर्वर्गः इयतीभिश्चतुष्पदाभिरुपेतो वर्गः । इयद्द्विपदरूपैर्वाकैः इयच्चतुष्पदरूपैर्वाकैश्च परिमितोऽनुवाक इति । सूक्तपक्षे एतावद्भिः सूक्तैः अयमनुवाकः इति । किंच ᵛअक्षरेण अक्षरेणैव ᵛसप्त ᵛवाणीः वागधिष्ठितानि सप्त छन्दांसि ᵛमिमते निर्माणं[1] कुर्वन्ति[1] । अष्टाक्षरा गायत्री एकादशाक्षरा त्रिष्टुप् द्वादशाक्षरा जगतीति । अक्षरैः पादाः परिमीयन्ते परिमितैः पादैश्छन्दांसि । ततः पादानां छन्दसाम् अक्षरं मूलमिति । तथा ऋग्वर्गसूक्तानुवाकादीनां च अक्षरं मूलमित्यक्षरप्रशंसा ॥

जगंता सिन्धुं दिव्यस्तभायद्रथंतरे सूर्यं पर्यपश्यत् ।
गायत्रस्य समिधस्तिस्र आहुस्ततो मह्ना प्र रिरिचे महित्वा ॥ २५ ॥

जगंता । सिन्धुम् । दिवि । अस्तभायत् । रथम्ऽतरे । सूर्यम् । परि । अपश्यत् ।
गायत्रस्य । सम्ऽइधः । तिस्रः । आहुः । ततः । मह्ना । प्र । रिरिचे । महिऽत्वा ॥ २५ ॥

जगतीच्छन्दस्कायाम् ऋचि उत्पन्नं साम जगत् । तेन ब्रह्मा सृष्टिकाले ᵛसिन्धुं स्यन्दनशीलमुदकस्य स्यन्दकं वा आदित्यं ᵛदिवि द्युलोके ᵛअस्तभायत् स्तम्भितवान् । 'जागतो वा एष य एष तपति' इति श्रुतिः । ᵛरथंतरे एतन्नामके साम्नि[2] स्तम्भितं ᵛसूर्यं ᵛपर्यपश्यत्[3] परिदृष्टवान् प्रजापतिः । तदाधारभूतायामृचि 'स्वर्दृशम्' ( ऋ. सं. ७. ३२. २२ ) इति सूर्यप्रतिपादकशब्ददर्शनात् । 'असौ वाव स्वर्दृक्' ( ऐ. ब्रा. ४. १० ) इति हि श्रुतिः । अत एव तत्र सूर्यदर्शनं विधीयते[3] । 'रथंतरे प्रस्तूयमाने संमीलयेत् स्वर्दृशं प्रति वीक्षेत' ( ता. ब्रा. ७. ७. १५ ) इति सामब्राह्मणेन । ᵛगायत्रस्य गायत्र्यामुत्पन्नस्य साम्नः ᵛसमिधः समिन्धनाः ᵛतिस्रः विभक्तीः ᵛआहुः पादत्रयमाहुरित्यर्थः । अथवा तिस्र ऋच आहुः । ᵛततः हेतोः ᵛमह्ना बलेन ᵛमहित्वा महत्त्वेन ᵛप्र ᵛरिरिचे प्ररिच्यते । अन्यानि सामानि पृथक्पृथक् निर्मितवान् । यद्वा । गायत्रशब्दश्छन्दोवाची । तस्य तिस्रो मूर्तीः आहुः क्रमेण अष्टाक्षरैकादशाक्षरद्वादशाक्षरैः गायत्रीत्रिष्टुब्जगत्यात्मिकाः । यस्मादेवं ततस्तस्माद्गायत्री छन्दसां कनिष्ठा सती मह्ना बलेन महत्त्वेन प्र रिरिचे सर्वाणि छन्दांस्यतिक्रामति येनैव बलेन सोममाहृतवती तादृशेनैवं[4] भवति ॥ ॥ १८ ॥

प्रवर्ग्ये घर्मधुगाह्वानकाले 'उप ह्वये' इत्यादिके द्वे ऋचौ । 'उप ह्वये सुदुघां धेनुमेतामिति द्वे' ( आश्व. श्रौ. ४. ७ ) इति सूत्रितत्वात् ॥

---

१. क्ष-ङ-ञ१-ञ-ट–मान्ति मातारः । २. क्ष-ङ-ञ१-ञ-ट–साम्नि त्रिष्टुप्प्रभवो (ङ-ञ१–त्रिष्टुप्प्रभवे) निमित्तभूता सति ( ङ–सती ) । ३. क्ष-ङ-ञ१-ञ-ट–पर्यपश्यत् परिपश्यन्ति । रथंतरसाम माध्यंदिने सवने । स च मध्याह्नकालीनः तस्मिन्काले सूर्यः तेजस्वी दृश्यते । तं च कर्मकाले सर्वदा वा जनः (ङ–जनाः) परिपश्यति ( ङ–परिपश्यन्ति ) । ४. क्ष-ञ१-ञ-ट–तादृशेनैव बलेनैवम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उप॑ ह्वये सु॒दुघां॑ धे॒नुमे॒तां सु॒हस्तो॑ गो॒धुगु॒त दो॑हदेनाम् ।
श्रेष्ठं॑ स॒वं स॑वि॒ता सा॑विषन्नो॒ऽभीद्धो घ॒र्मस्तदु॒ षु प्र वो॑चम् ॥ २६ ॥

उप॑ । ह्व॒ये॒ । सु॒ऽदुघा॑म् । धे॒नुम् । ए॒ताम् । सु॒ऽहस्तः॑ । गो॒ऽधुक् । उ॒त । दो॒ह॒त् । ए॒ना॒म् ।
श्रेष्ठ॑म् । स॒वम् । स॒वि॒ता । सा॒वि॒ष॒त् । नः॒ । अ॒भिऽई॑द्धः ।
घ॒र्मः । तत् । ऊँ इति॑ । सु । प्र । वो॒च॒म् ॥ २६ ॥

अहं होता ᵛउप ᵛह्वये उपेत्याह्वयामि । किम् । ᵛएतां ᵛधेनुम् आगच्छन्तीं क्षीरेण प्रीणयित्रीं गां प्रवर्ग्यार्थाम्[1] । पुनः कीदृशीम् । ᵛसुदुघां सुष्ठु दोग्ध्रीम् । ᵛउत अपि च ᵛएनाम् उक्तलक्षणां गां ᵛसुहस्तः शोभनहस्तो दोहनकुशलः ᵛगोधुक् गोदोग्धा अध्वर्युः ᵛदोहत् दोग्धि यस्मादेवं तस्मादुप ह्वये इत्यर्थः । तदर्थं ᵛसविता सर्वस्यानुज्ञाता परमेश्वरः ᵛनः अस्मदीयं ᵛश्रेष्ठं प्रशस्यं ᵛसवं सोमयागं क्षीरं वा ᵛसाविषत् अनुजानातु । कथमेवम् । तच्छब्दश्रुतेर्यच्छब्दाध्याहारः । यद्यस्मात् ᵛघर्मः प्रवर्ग्यः । 'यद्घाँ इत्यपतत्तद्घर्मस्य घर्मत्वम्' ( तै. आ. ५. १. ५ ) इति तैत्तिरीयकम् । तत्तादृशः ᵛअभीद्धः अभिदीप्तः[2] । तदुशब्द एवकारार्थः । तस्मादेव कारणात् ᵛसु ᵛप्र ᵛवोचं सुष्ठु ब्रवीमि उपह्वये इति । यद्वा । एतां पुरतः दृश्यमानां धेनुं वृष्ट्या प्रीणयित्रीं मेघलक्षणां धेनुम् उपह्वये आह्वयामि वर्षदोहाय[3] । किंच एनां धेनुं सुहस्तः शोभनदोहनकुशलहस्तोपेतो गोधुक् गोदोग्धा आदित्यो वा वायुर्वा दोहत् दोग्धि । तदधीनत्वात् वर्षणस्य । किंच तदर्थं सविता प्रेरकः परमेश्वरोऽस्मदर्थमस्मदुपभोगादृष्टमपेक्ष्य साविषत् अनुजानातु । प्रतिबन्धं मा करोत्वित्यर्थः । किमितीदमुच्यते इति उच्यते । घर्मो ग्रीष्मः अवर्षणजनितः सस्यशोषः अभीद्धः प्रवृद्धः । तदु षु प्र वोचं तस्मादेव कारणात् ब्रवीमि ॥ ब्रवीतेर्लुङि वच्यादेशे 'अस्यतिवक्ति॰' इत्यादिना च्लेः अङ् । छान्दसः अडभावः ॥

हि॒ङ्कृ॒ण्व॒ती व॑सु॒पत्नी॑ वसू॒नां व॒त्समि॒च्छन्ती॒ मन॑सा॒भ्यागा॑त् ।
दु॒हाम॒श्विभ्यां॒ पयो॑ अघ्न्ये॒यं सा व॑र्धतां महते सौभ॑गाय ॥ २७ ॥

हि॒ङ्ऽकृ॒ण्व॒ती । व॒सु॒ऽपत्नी॑ । व॒सू॒नाम् । व॒त्सम् । इ॒च्छन्ती॑ । मन॑सा । अ॒भि । आ । अ॒गा॒त् ।
दु॒हाम् । अ॒श्विऽभ्या॑म् । पयः॑ । अ॒घ्न्या । इ॒यम् । सा । व॒र्ध॒ता॒म् । म॒ह॒ते । सौभ॑गाय ॥ २७ ॥

यथा आहूता गौः ᵛहिङ्कृण्वती वत्सं प्रति हिङ्कारं कुर्वती ᵛवसूनां ᵛवसुपत्नी क्षीरदध्याज्यादिबहुधनानां सर्वदा पालयित्री । वृत्र्यवृत्तिभ्यां वसुनः पालयितृत्वं तस्यैवाधिक्यं च प्रतिपाद्यते[4] । पुनः कीदृशी । ᵛमनसा ᵛवत्सम् ᵛइच्छन्ती । ईदृशी सा ᵛअभ्यागात् अभ्यागमत् । ᵛइयम् आगता ᵛअघ्न्या । गोनामैतत् । अहननीया गौः ᵛअश्विभ्यां ताभ्यामर्थाय ᵛपयः क्षीरं ᵛदुहां दुग्धाम् । ᵛसा तादृशी ᵛमहते ᵛसौभगाय प्रवृद्धाय सौभाग्याय ᵛवर्धतां प्रवृद्धा भवतु । यद्वा । अस्मै[5] सौभगाय[5] क्षीरं

---

१. क्ष-ञ१-ञ-ट-प्रवर्ग्याख्याम् । २. क्ष-ञ१-ञ-ट-समृद्धः । ३. क्ष-ञ१-ञ-ट-वर्षदानाय । ४. क्ष-ञ१-ञ१ ट-प्रतिपाद्यते अन्यथैकेन वसुनापि भवति । ५. क्ष-ङ-ञ१-ञ-ट-अस्मत्सौभगाय ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वर्धयताम्। अत्रापि वृष्टिपरत्वेन यथायोगं योज्यम्। हिङ्कृण्वती वर्षणाय शब्दयन्ती वसूनां गोसस्यादिधनानां बहूनां वसुपत्नी तेषामेव पालयित्री वत्सं लोकं वत्सवत्पोषणीयं मनसा इच्छन्ती प्रीणयितुम् अभ्यागात् अभिगच्छति मेघरूपा। सा च अघ्न्या अहन्तव्या। प्रस्तुत्या[1] इत्यर्थः। पयः उदकमश्विभ्यां व्याप्ताभ्यां स्थावरजङ्गमाभ्यामर्थाय। यद्वा। अश्विनौ वाय्वादित्यौ। ताभ्यां सकाशात् दुहां दुग्धाम्। तौ हि वृष्टेर्मोचयितारौ। शिष्टमविशिष्टम्॥

प्रवर्ग्येऽभिष्टवे दोहनसमये वत्से मातुः सकाशादपनीयमाने 'गौरमीमेत्' इत्येषा। सूत्रितं च–'गौरमीमेदनु वत्सं मिषन्तं नमसेदुप सीदत' (आश्व. श्रौ. ४. ७) इति॥

**गौरमीमेदनु वत्सं मिषन्तं मूर्धानं हिङ्कृणोन्मातवा उ।**
**सृक्काणं घर्ममभि वावशाना मिमाति मायुं पयते पयोभिः॥ २८॥**

गौः। अमीमेत्। अनु। वत्सम्। मिषन्तम्। मूर्धानम्। हिङ्। अकृणोत्। मातवै। ऊँ इति। सृक्काणम्। घर्मम्। अभि। वावशाना। मिमाति। मायुम्। पयते। पयःऽभिः॥ २८॥

[v]गौः धेनुः [v]मिषन्तं निमीलिताक्षं [v]वत्सम् [v]अनु प्राप्य [v]अमीमेत् शब्दं करोति। मीमयतिः शब्दकर्मा। यद्वा। उक्तं वत्सं अन्वात्मानं प्रक्षिपति। किंच तस्य वत्सस्य [v]मूर्धानं [v]मातवै मातुं निर्मातुं लेहनेन शोधयितुम्। उशब्दोऽवधारणे। [v]हिङ्कृणोत् हिङ्कारमकरोत् करोति। किंच [v]सृक्काणं वत्सस्य शब्दवदनप्रान्तं[2] फेनस्य स्रष्टारं [v]घर्मं क्षीरस्य क्षरणशीलं वत्सम् [v]अभि अभिलक्ष्य [v]वावशाना भृशं कामयमाना [v]मायुं शब्दं [v]मिमाति निर्माति करोति। तादृशी सती [v]पयोभिः प्रभूतैः क्षीरैः [v]पयते प्यायते आप्यायनं[3] करोति वत्सम्। अत्रापि मेघपरतया योजनीयम्। एवमाहूता मेघरूपा गौर्धेनुः मिषन्तं वृष्टिरूपक्षीराभावेन निमीलिताक्षं लोकाख्यं पुत्रम् अनु अनुसृत्य अमीमेत् गर्जनशब्दं वर्षणचिह्नरूपं[4] करोति। मूर्धस्थानीयां[5] भूमिं मातवा उ निर्मातुमेव सस्यादियुक्तां कर्तुं हिङ्कृणोत् हिङ्काररूपं शब्दमकरोत्। प्रतिपादनभेदादपुनरुक्तिः। किंच सृक्काणं फलस्य स्रष्टारं घर्मं दीप्तं पुत्रमभि वावशाना आभिमुख्येन कामयमाना पयोभिः[6] उदकैः पयते प्यायते आप्यायनं करोति॥

**अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता।**
**सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत॥ २९॥**

अयम्। सः। शिङ्क्ते। येन। गौः। अभिऽवृता। मिमाति। मायुम्। ध्वसनौ। अधि। श्रिता। सा। चित्तिऽभिः। नि। हि। चकार। मर्त्यम्। विऽद्युत्। भवन्ती। प्रति। वव्रिम्। औहत॥२९॥

---

१. क्ष-ङ-ञ१-ञ-ट–प्रत्युतस्तुत्या। २. क्ष-ङ-ञ१. म-ट–अर्धवदनप्रान्तम्। ३. ञ१–आप्यायितम्। ४. क्ष-ञ१ ञ-ट–वर्षणचिह्नभूतम्। ५. क्ष-ञ१-म-ट–मूर्धानं मूर्धस्थानीयाम्। ६. क्ष-ञ१-ञ-ट–पयोभिः क्षीरसदृशैः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vसः vअयं वत्सः vशिङ्क्ते अव्यक्तध्वनिं करोति। vयेन[1] वत्सेन vगौः माता vअभीवृता आगत्याभितो वेष्टिता भवति। किंच सा गौः vमायुं शब्दं vमिमाति निर्मिमाति। कुत्र स्थिता[1]। vध्वसनावधि vश्रिता ध्वसनस्थाने गवां निवासाश्रयेऽधिष्ठिता। vसा तादृशी vचित्तिभिः ज्ञानैः तत्पूर्वकैः कर्मभिर्वा vमर्त्यं vनि vचकार vहि नीचैः करोति। ज्ञानविशिष्टाः मनुष्याः यथा बालकस्य[2] अदनस्तनपानादिस्नेहं[2] कुर्वन्ति ततोऽप्यतिशयमियं करोतीत्यर्थः। किंच vविद्युद्भवन्ती बहुक्षीरतया[3] विद्योतमाना vवव्रिं स्वकीयं रूपम्। वव्रिरिति रूपनाम। रूपं vप्रति vऔहत प्रकाशयति। यद्वा। वत्सस्नेहातिशयस्वरूपं विद्युद्भवन्ती विद्युदिव शीघ्रदर्शना[4] औहत। अयमेकोऽर्थः। अर्थान्तरं च। शाकपूणिर्नाम निरुक्ताचार्यः सकलमन्त्रदेवता जानामीति अभिमानितवान्[5]। दुर्ज्ञेयस्य तत्त्वस्य स्वरूपमसौ जानाति किल एनं व्यामोहयामीति मनसि कृत्वा संदिग्धोभयलिङ्गा देवता प्रादुरासीत् अथ[6] तस्य पुरतः। स च तां न बुबुधे। बुभुत्सया च तां स्वरूपं प्रदर्शय इति पप्रच्छ। सा च 'अयं स शिङ्क्ते' इत्येषा[7] मद्देवता तत्र प्रतीयमानं मत्स्वरूपमित्युपदिदेश[7] (निरु. २. ८)। कथमत्रोभयलिङ्गत्वं वस्तुतः उभयलिङ्गत्वे कथं दैवतैक्यमिति। उच्यते। अत्रोभयलिङ्गत्वमुभयथा संभवति स्त्रीपुंलिङ्गद्वयेन मध्यमोत्तमलिङ्गद्वयेन च। तत्कथम्। 'अयं स येन' इति पुंलिङ्गवाचिना शब्दत्रयेण मेघः प्रतीयते। 'अधि श्रिता सा' इत्यादिना स्त्रीलिङ्गवाचकेन माध्यमिका वाक्। अत उभयलिङ्गत्वम्। तथा विद्युद्भवन्तीत्यन्तं मध्यमलिङ्गं तत्र मेघस्तनितयोर्माध्यमिकयोः प्रतीतेः। तथा सति 'वव्रिमौहत' इत्यत्र वर्षेण पृथिवीं प्रच्छाद्य तस्याः रसं प्रत्यादत्ते इत्ययमर्थो विवक्षितः। स च आदित्यव्यापारः इत्युत्तमलिङ्गत्वम्। तर्हि वस्तुतः उभयलिङ्गत्वप्रतीतेः उभे अपि देवते 'यल्लिङ्गं सा देवता' (ऋ. अनु. १. १३९) इति न्यायात्। अतः कथम् एकदेवतासिद्धिः[8] इति। 'अयं स येन' इत्येतेषां व्यत्ययाश्रयणेन[9] सर्वदेवतानाम् अधिष्ठात्मिकायाः[10] एकत्वाश्रयणेन[11] वा सर्वफलदात्रात्मन एकत्वाश्रयणेन[12] वा देवतैक्योपपत्तेः। अनेन मध्यमोत्तमभेदेन उभयलिङ्गत्वपक्षेऽपि देवतैक्यमुक्तं भवति। अतः 'एकैव वा महानात्मा देवता' इत्युक्तत्वात् वस्तुतो देवतैक्यं अधिष्ठात्रधिष्ठानभेदेन भेदश्च न विरुध्यते॥ अयं स शिङ्क्ते। इयं सा माध्यमिकाया वाचोऽधिष्ठात्री देवता शिङ्क्ते अव्यक्तध्वनिं करोति। येन गौरभीवृता। गौरिति वाङ्नाम। माध्यमिका वाक् ययाभिवृता अभितो व्याप्ता अधिष्ठितेत्यर्थः। सेयं शिङ्क्ते। अथवा 'अयं स शिङ्क्ते' इति नैव माध्यमिका वाक् निर्दिश्यते अपि तु मेघः। तस्यां वाचि शिक्षानायां स एव शिङ्क्ते इत्युपचर्यते मञ्चाः क्रोशन्ति इतिवत्। अयं स मेघः शब्दं करोति येन माध्यमिका वाक् अभिव्याप्ता। शब्दने प्रकार एवोच्यते। मिमाति[13] मायुं स्तनितलक्षणं शब्दं करोति। अथवा अयम्। लुप्तोपमा[13]। मिनोति स्वतेजः सर्वत्र प्रक्षिपतीति मायुरादित्यः। तमिव अतिदीप्तं[14] करोतीत्यर्थः। अथवा सामर्थ्यादात्मानमादित्यसदृशं निर्मिमीते। कुत्र स्थिता। ध्वसनावधि श्रिता।

---

१. क्ष-ज्ञ१-ञ-ट–कथम्। येन ध्वनिना गौर्माता अभीवृता आगत्य अभितः शिशुमावेष्ठ्य मायुं शब्दं मिमाति निर्मिमीते। या शिङ्क्ते इत्यर्थः। कुत्र स्थिता। २. क्ष-ज्ञ१-ञ-ट–बालकस्याह्वानस्तनपानादिस्नेहम्; ङ-ज्ञ१–आह्वानस्तनपानादिस्नेहं बालस्य। ३. ङ-ज्ञ१–बहुतया। ४. ख-फ-भ–शीघ्रप्रदर्शना। ५. क्ष-ज्ञ१-ञ-ट–अभिगीतवान्। ६. क्ष-ज्ञ१-ञ-ट–इयम्। ७. क्ष-ङ-ज्ञ१-ञ-ट–इत्यत्र प्रतीयमाना मद्देवता इत्युपदिदेश। ८. क्ष-ज्ञ१-ञ-ट–एकदेवतात्वासिद्धिः। ९. क्ष-ङ-ज्ञ१-ञ-ट–इयं सा यया इति व्यत्ययाश्रयणेन। १०. क्ष-ज्ञ१-ञ-ट–अधिष्ठानात्मिकायाः। ११. क्ष-ज्ञ-ज्ञ-ज्ञ१-ञ-ट–एकत्वश्रवणेन। १२. क्ष-ज्ञ१-ञ-ट-एकत्वश्रवणेन। १३. क्ष-ज्ञ१-ञ-ट–मिमाति मायुम्। अनुकरणशब्दोऽयम्। मायुरिति शब्दं करोति। अथवेयं लुप्तोपमा। १४. क्ष-ज्ञ१-ञ-ट–अतिदीप्तं शब्दम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ध्वंसने मेघेऽधिश्रिता । सा ईदृशी चित्तिभिः । कर्मनामैतत् । स्वकर्मभिः वृष्टिरूपैर्मर्त्यं मरणधर्माणं[1] स्थावरजङ्गमरूपं कृत्स्नं जगत् नि हि चकार नीचैः करोति । मनुष्यान् प्रणतान् करोति । ओषध्यादिकं फलेनावनतं करोति । अथवा चित्तिभिः द्योतनलक्षणैः कर्मभिः । विद्युति[2] विद्योतमापद्यमाना* प्रति वव्रिमौहत[2] । वव्रिरिति रूपनाम । ऊहतिरत्र सामर्थ्यात् उपसंहारवाची । प्रत्युपसंहरति । उदकलक्षणं[3] रूपं पुनरादत्ते[4] । रश्मिद्वारा वृष्टमुदकं[4] पुनर्घर्मकाले आदत्ते । एकस्यैव ज्योतिषः त्रेधाकरणाद्विद्युतः सूर्यरश्मिभावः उपपद्यते ' तमू अकृण्वन्त्रेधा भुवे कम् ' (ऋ. सं. १०. ८८. १०) इति वक्ष्यमाणत्वात् । स्तनितस्य विद्युद्भावो मेघविद्युत्स्तनितानामभेदाभिप्रायेण ॥

इदं शरीरं जीवावस्थायाम् । अनेन देहस्य असारता जीवस्य[5] नित्यत्वं[5] च प्रतिपाद्यते ॥

अनच्छये तुरगातु जीवमेजद्ध्रुवं मध्य आ पस्त्यानाम् ।
जीवो मृतस्य चरति स्वधाभिरमर्त्यो मर्त्येना सयोनिः ॥ ३० ॥

अनत् । शये । तुरऽगातु । जीवम् । एजत् । ध्रुवम् । मध्ये । आ । पस्त्यानाम् ।
जीवः । मृतस्य । चरति । स्वधाभिः । अमर्त्यः । मर्त्येन । सऽयोनिः ॥ ३० ॥

[V]अनत् प्राणनं[6] कुर्वत्[6] [V]जीवं जीवनवत् [V]तुरगातु स्वव्यापाराय तूर्णगमनं सत् [V]एजत्[7] तत् [V]शये शेते वर्तते[7] । पश्चात् प्राणापगमनानन्तरम् उक्तविलक्षणं सत् [V]ध्रुवम् अविचलितं सत् [V]पस्त्यानां गृहाणां [V]मध्ये [V]आ शेते च स्थाणुवत्तिष्ठति । आकारः पूरणो वा । अथ जीवस्य वैलक्षण्यमाह । [V]मृतस्य शरीरस्य संबन्धी [V]जीवः [V]मर्त्येन मरणधर्मकेण शरीरेण [V]सयोनिः पूर्वं समानोत्पत्तिस्थानः । यद्यपि जीवस्य न जन्मास्ति तथापि वपुषस्तत्सद्भावात् तत्संबन्धेनोपचर्यते । तदेवाह । [V]अमर्त्यः अमरणस्वभावः । ' जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते ' ( छा. उ. ६. ११. ३ ) इति श्रुतेः । उक्तस्वभावो जीवः [V]स्वधाभिः [V]चरति पुत्रकृतैः स्वधाकारपूर्वकदत्तैः अन्नैश्चरति वर्तते इत्यर्थः ॥ ॥ १९ ॥

प्रवर्ग्येऽभिष्टवे ' अपश्यं गोपाम् ' इत्येका[8] विनियुक्ता । सूत्रितं च—' अपश्यं गोपामनिपद्यमानं सक्के द्रप्सस्य ' ( आश्व. श्रौ. ४. ६ ) इति ॥

अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् ।
स सध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वन्तः ॥ ३१ ॥

अपश्यम् । गोपाम् । अनिऽपद्यमानम् । आ । च । परा । च । पथिऽभिः । चरन्तम् ।
सः । सध्रीचीः । सः । विषूचीः । वसानः । आ । वरीवर्ति । भुवनेषु । अन्तरिति ॥३१॥

---

१. क्ष-ज्ञ१—ञ-ट—मरणधर्मकम् । २. क्ष-ज्ञ-ज्ञ१-ञ-ट—विद्युति विद्योतमानायां भीत्या सर्वे शिरांसि नतानि कुर्वन्ति । कथं भूतानि नीचैः करोतीति उच्यते । विद्युद्भवन्ती विद्युद्रूपतामापद्यमाना प्रति वव्रिमौहत । * ङ—विद्योतमानायाम् । ३. क्ष-ङ-ज्ञ१-ञ-ट—उक्तलक्षणम् । ४. क्ष-ज्ञ१-ञ-ट—पुनरादत्ते । वृष्टिलिङ्गस्य मेघस्तनितस्य च उक्तत्वात् रश्मिभिः वर्षितमुदकम् । ५. क-ख-च-ज्ञ-फ—देहस्यानित्यत्वम् । ६. क्ष-ञ-ट—चेष्टत् प्राणधारणयुक्तं तु ; ङ-ज्ञ१—चेष्टाप्राणधारणयुक्तम् । ७. क्ष-ज्ञ१-ञ-ट—एजत् चेष्टते । ८. क्ष-ज्ञ१-ञ-ट—इत्येषा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अहं Vगोपां सर्वस्य लोकस्य वृष्टिप्रकाशादिना गोपायितारम् Vअनिपद्यमानं कदाचिदपि अविषण्णं[1] तथा Vपथिभिः विचित्रैर्मार्गैः अन्तरिक्षरूपैः Vआ Vचरन्तं Vच Vपरा चरन्तं Vच उदयप्रभृति आ मध्याह्नमागच्छन्तं मध्याह्नप्रभृति[2] आ सायं पराङ्मुखं गच्छन्तं एवंमहानुभावमादित्यम् Vअपश्यं याथात्म्येन[3] पश्येयम्। किंच Vसः आदित्यः Vसध्रीचीः सहाञ्चन्तीः Vविषूचीः विष्वगञ्चन्तीः रात्रावपि चन्द्रभौमादित्यानां प्रकाशयित्रीः त्विषः Vवसानः आच्छादयन् Vभुवनेषु भुवनैकदेशेषु लङ्कादिप्रदेशेषु Vअन्तः मध्ये Vआ Vवरीवर्ति उदयास्तमयं कुर्वन् पुनःपुनरावर्तते। तमपश्यमित्यर्थः। 'एष वै गोपा एष हीदं सर्वं गोपायति' इत्याद्यस्मद्ब्राह्मणम्। 'अपश्यं गोपामित्याह असौ वा आदित्यो गोपा स हीमाः प्रजा गोपायति ( तै. आ. ५. ६. ४ ) इत्यादि तैत्तिरीयकं च द्रष्टव्यम्॥

य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात्।
स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिमा विवेश॥ ३२॥

यः। ईम्। चकार। न। सः। अस्य। वेद। यः। ईम्। ददर्श। हिरुक्। इत्। नु। तस्मात्।
सः। मातुः। योना। परिऽवीतः। अन्तः। बहुऽप्रजाः। निःऽऋतिम्। आ। विवेश॥३२॥

अत्र गर्भवासक्लेशपूर्वकजननप्रतिपादनेन तत्परिहाराय आत्मा ज्ञातव्यः इत्यर्थात् प्रतिपाद्यते। Vयः पुमान् पुत्रार्थी Vईम् एनं गर्भं Vचकार करोति विक्षिपति वा तत्कारणभूतस्य विक्षेपद्वारेण Vन Vसः पुमान्[4] Vअस्य तत्त्वं Vवेद॥ कर्मणि षष्ठी वा॥ एनं गर्भं न जानाति। कथंभूतः कथं वा केन प्रयोजनेनेति सर्वात्मना न जानातीत्यर्थः। Vयः च मातुरुदरस्थं Vददर्श[5] उदरवृद्ध्यन्यथानुत्पत्त्या[6] अनुमानेन वा दर्शयति[7] Vतस्मात्[8] द्रष्टुः सकाशात् सः Vहिरुगिन्नु। हिरुगित्यन्तर्हितनाम। इच्छब्दः एवकारार्थः। नु निश्चये। अत्यन्तमन्तर्हित एव खलु। यद्वा। यः संसारावस्थायाम् ईम् एनं कृषिवाणिज्यवेदाध्ययनादिकं चकार सोऽस्य एतद्वेद[9] लोकान्तरे जन्मान्तरे वा। तथा यः ईमेनं ददर्श गिरिनदीसमुद्रबन्ध्वादिकं[10] ददर्श जीवनसमये तस्मात् दृष्टात्[11] हिरुगिन्नु पृथगेव। अत्रानुभूतं सर्वं न जन्मान्तरे लोकान्तरे वा अनुभवतीत्यर्थः। Vसः तादृशः Vमातुः जनन्याः Vयोना योनौ Vअन्तः Vपरिवीतः उल्बजरायुभ्यां परितो वेष्टितः सन् Vबहुप्रजाः बहुजन्मभाक्। अथवा। उत्पन्नः सन् स्वयमपि अपत्योत्पादनेन बहुप्रजाः। एवं गर्भदुःखमनुभवन् निर्ऋत्यभिधानं प्रदुःखमनुभवति यावत् स्वरूपभूतात्मज्ञानम्। अतस्तत्परिहाराय आत्मा ज्ञातव्यः इत्युक्तं भवति। एवमात्मविदामभिप्रेतोऽर्थः। नैरुक्तानां तु मते य ईं चकार मध्यस्थानो वायुर्मेघो वा एतद्वृष्ट्युदकं करोति सोऽस्य। तत्त्वमिति शेषः। अथवा एतत्कर्म न जानाति। तयोरचेतनत्वादिति भावः। यस्तु ईम् एतद्ददर्श पश्यति तस्मादपि हिरुक् अन्तर्हितः। प्राणिकर्मवशेन काले वर्षिता परमेश्वरः आदित्यात्मनि[12] गूढः[12] इत्यर्थः। य ईं हिरुगन्तर्हितम् ईम् एतद्ददर्श पश्यति स वृष्टिलक्षणः पुत्रो मातुर्निर्मातुरन्तरिक्षस्य योनौ योनिवदुत्पत्त्याधारभूतेऽन्तरिक्षे। उभयोरप्यन्तरिक्षनामत्वात् सामान्यविशेषभावो द्रष्टव्यः। अन्तरिक्षैकदेशे योन्यामन्तर्मध्ये बहुप्रजाः

---

१. क्ष-झ-१ञ-ट–अनिषण्णम्। २. क्ष-झ१-ञ-ट–तथा अपराह्णप्रभृति। ३. क्ष-झ१-ञ-ट–परमात्मानम्। ४. क्ष-झ१-ञ-ट–पुनः। ५. क्ष-झ १-ञ-ट–'ददर्श' नास्ति। ६. क्ष-झ-झ१-ञ-ट–उदरवृद्धथन्यथानुपपत्त्या। ७. क्ष-झ-ञ-ट–ददर्श। ८. झ– स तस्मात्। ९. क्ष-ङ-झ१–ञ-ट–तत्त्वं न वेद कालान्तरे। १०. क्ष-झ१-ञ-ट–गिरिनदीसमुद्रवध्वादिकम् ११. क्ष-ङ-ञ-ट–द्रष्टुः सकाशात्; झ१–दृष्टः सकाशात्। १२. क्ष-झ१-ञ-ट–आत्मा निगूढः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

बहुप्रजातान्नो बहुप्राण्युपकारी । अथवा । जनिः अत्र अन्तर्भावितण्यर्थः । बहूनां धाराणां सस्यनिष्पादनद्वारेण प्राणिनां वा प्रजनयिता सन् । vनिर्ऋतिं निरमणसाधनां[1] भूमिम् vआ vविवेश प्रविशति प्राप्नोतीत्यर्थः ॥

द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् ।
उत्तानयोश्चम्वोर्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् ॥ ३३ ॥

द्यौः । मे । पिता । जनिता । नाभिः । अत्र । बन्धुः । मे । माता । पृथिवी । मही । इयम् ।
उत्तानयोः । चम्वोः । योनिः । अन्तः । अत्र । पिता । दुहितुः । गर्भम् । आ । अधात् ॥३३॥

दीर्घतमा ब्रवीति । vमे मम vद्यौः द्युलोकः vपिता पालकः । न केवलं पालकत्वमात्रं अपि तु vजनिता जनयितोत्पादयिता । तत्रोपपत्तिमाह । vनाभिरत्र नाभिभूतो भौमो रसोऽत्र तिष्ठतीति शेषः । ततश्चान्नं जायते अन्नाद्रेतः रेतसो मनुष्य इत्येवं पारंपर्येण जननसंबन्धिनो हेतोः रसस्यात्र सद्भावात् । अनेनैवाभिप्रायेण जनितेत्युच्यते । अत एव vबन्धुः बन्धिका । तथा vइयं vमही महती vपृथिवी vमे vमाता मातृस्थानीया स्वोद्भूतौषध्यादिनिर्मात्रीत्यर्थः । किंच vउत्तानयोः ऊर्ध्वतानयोः vचम्वोः सर्वस्य अद्भ्यो भोगसाधनयोर्द्यावापृथिव्योः vअन्तः मध्ये vयोनिः सर्वभूतनिर्माणाश्रयमन्तरिक्षं वर्तते इति शेषः । vअत्र अस्मिन्नन्तरिक्षे vपिता द्युलोकः । अधिष्टात्रधिष्ठानयोः अभेदेन आदित्यो द्यौरुच्यते । स स्वरश्मिभिः । अथवा इन्द्रः पर्जन्यो वा । vदुहितुः दूरे निहिताया भूम्याः vगर्भं सर्वोत्पादनसमर्थं[2] वृष्ट्युदकलक्षणम् vआधात् सर्वतः करोति ॥

आश्वमेधिके मध्यमेऽहनि ब्रह्मोद्ये[3] होत्रादयः 'पृच्छामि त्वा' इत्यनया यजमानं पृच्छेयुः । तथा च सूत्रितम्—'एकैकशो यजमानं पृच्छन्ति पृच्छामि त्वा परमन्तं पृथिव्याः' ( आश्व. श्रौ. १०. ९ ) इति ॥

पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।
पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥ ३४ ॥

पृच्छामि । त्वा । परम् । अन्तम् । पृथिव्याः । पृच्छामि । यत्र । भुवनस्य । नाभिः ।
पृच्छामि । त्वा । वृष्णः । अश्वस्य । रेतः । पृच्छामि । वाचः । परमम् । विऽओम ॥३४॥

हे यजमान vत्वा त्वां vपृच्छामि प्रश्नं करोमि । किम् । vपृथिव्याः vपरमन्तम् उत्कृष्टां काष्ठाम् । यत्र सर्वा पृथिवी समाप्यते तत्पृच्छामि । तथा त्वामन्यत् vपृच्छामि । किं तदिति उच्यते ।

---

१. क-ज-ज्ञ-ण-त-भ–निरमाणसाधनाम्; ङ-ञ-व–निर्माणसाधनाम्; फ–निमरणसाधनाम् । २. क्ष-ङ-ञ१-ञ-ट–गर्भोत्पादनसामर्थ्यम् । ३. क्ष-ञ१-ञ-ट–'ब्रह्मोद्ये' नास्ति ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vयत्र vभुवनस्य भूतजातस्य vनाभिः संनाहो बन्धनम् । यत्र सर्वं संनद्धं भवति तमित्यर्थः । किंच vत्वा त्वां vवृष्णः वर्षकस्य vअश्वस्य व्याप्तस्यादित्यस्य । 'असौ वा आदित्यो वृषाश्वः' (तै. आ. ५. ३. ५) इति तैत्तिरीयकम् । तस्य vरेतः रेतोवत्कारणं तत्किमिति vपृच्छामि । तथा vवाचः सर्वस्य वाग्जातस्य vपरमं निरतिशयं vव्योम स्थानं सर्वस्य वचसः कारणम् । एतत् प्रश्नचतुष्टयं पृच्छामि ॥

अथैवं पृष्टो यजमानः 'इयं वेदिः' इत्यनया प्रतिब्रूयात् । 'इयं वेदिः परो अन्तः पृथिव्या इति प्रत्याह' (आश्व. श्रौ. १०. ९) इति सूत्रितत्वात् ॥

इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः ।
अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥ ३५ ॥

इयम् । वेदिः । परः । अन्तः । पृथिव्याः । अयम् । यज्ञः । भुवनस्य । नाभिः ।
अयम् । सोमः । वृष्णः । अश्वस्य । रेतः । ब्रह्मा । अयम् । वाचः । परमम् । विऽओम ॥३५॥

vपृथिव्याः प्रथनवत्या भूम्याः vपरो vअन्तः परमन्तं[1] पर्यवसानम् vइयं vवेदिः । न हि वेद्यतिरिक्ता भूमिरस्ति । 'एतावती वै पृथिवी यावती वेदिः' (तै. सं. २. ६. ४) इति श्रुतेः । तथा vअयं vयज्ञः vभुवनस्य भूतजातस्य vनाभिः संनहनम् । तत्रैव वृष्ट्यादिसर्वफलोत्पत्तेः सर्वप्राणिनां बन्धकत्वात् । अथ[2] vवृष्णः वर्षकस्यादित्यस्य vरेतः vअयं vसोमः रसात्मकः । अग्नौ हुतः सोमरसः आदित्यं प्राप्य वृष्ट्यादिफलं[3] जनयति । vअयं vब्रह्मा प्रजापतिरेव vवाचः मन्त्रादिरूपायाः vपरमं vव्योम उत्कृष्टं रक्षकं स्थानम् । तत्रैवोत्पत्तेस्तत्रैव पर्यवसानाच्च ॥ ॥ २० ॥

सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि ।
ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवन्ति विश्वतः ॥ ३६ ॥

सप्त । अर्धऽगर्भाः । भुवनस्य । रेतः । विष्णोः । तिष्ठन्ति । प्रऽदिशा । विऽधर्मणि ।
ते । धीतिऽभिः । मनसा । ते । विपःऽचितः । परिऽभुवः । परि । भवन्ति । विश्वतः ॥३६॥

vसप्त सर्पणस्वभावाः सप्तसंख्या वा रश्मयः[4] vअर्धगर्भाः संवत्सरस्यार्धे गर्भं गर्भस्थानीयमुदकं धारयमाणाः । यद्वा । ब्रह्माण्डस्यार्धे मध्येऽन्तरिक्षे गर्भवद्वर्तमानाः । vभुवनस्य लोकस्य vरेतः सारं वृष्टिप्रदत्वेन रेतोभूताः तादृशा रश्मयः vविष्णोः व्यापकस्यादित्यस्य vविधर्मणि जगद्धारणव्यापारे vप्रदिशा प्रदेशेन vतिष्ठन्ति वर्तन्ते । किंच vते vधीतिभिः प्रज्ञाभिः vमनसा जगदुपकारः कर्तव्यः इति बुद्ध्या च vविश्वतः सर्वतः ॥ द्वितीयार्थे तसिः ॥ विश्वं vपरि vभवन्ति परितो भावयन्ति कृत्स्नं

---

१. क्ष-झ१-ञ-ट-परमम् । २. क्ष-ङ-झ१-ञ-ट-तथा । ३. ख-च-फ-भ-वृष्ट्यादिकालम् । ४. झ१-आदित्यरश्मयः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

जगद्व्याप्नुवन्तीत्यर्थः । यस्मादेवं तस्मात् [v]ते ते एव [v]विपश्चितः बुद्धियुक्ताः [v]परिभुवः सर्वत्र व्याप्ताश्च[1] यद्वा । सप्तार्धगर्भाः । सप्त महदहंकारौ पञ्च तन्मात्राणीति मिलित्वा सप्तसंख्यानि तत्त्वानि । अर्धगर्भा अविकृतिरूपाः । विकाराश्रयाया मूलप्रकृतेः प्रकृतिविकृतेरुदासीनस्यात्मनश्चोत्पन्नस्वादर्धांशेन प्रपञ्चाकारेण परिणामादर्धगर्भाः । पुरुषांशस्य[2] अविक्रियत्वादित्यभिप्रायः । अत एव तेषां प्रकृतिविकृतित्वम् । यस्मादेवं तस्माद्भुवनस्य रेतः कारणम् । कारणभूतानि तान्येव विष्णोर्व्यापस्य पुरुषस्य विधर्मणि प्रदिशा प्रदेशेन तिष्ठन्ति । इतरत्समानम् ॥

न वि जानामि यदिवेदमस्मि निण्यः संनद्धो मनसा चरामि ।
यदा मागन्प्रथमजा ऋतस्यादिद्वाचो अश्नुवे भागमस्याः ॥ ३७ ॥

न । वि । जानामि । यत्ऽइव । इदम् । अस्मि । निण्यः । सम्ऽनद्धः । मनसा । चरामि ।
यदा । मा । आ । अगन् । प्रथमऽजाः । ऋतस्य । आत् ।
इत् । वाचः । अश्नुवे । भागम् । अस्याः ॥ ३७ ॥

अहं [v]यदिवेदं यदपीदं विश्वम् [v]अस्मि कृत्स्नः प्रपञ्चोऽप्यहमेवास्मि । नामरूपांशम् अपरमार्थं त्यक्त्वा सर्वत्र अनुगतोऽस्ति भाति प्रियमिति योऽयं सच्चिदानन्दाकारोऽस्ति सोऽहमस्मीति [v]न [v]वि [v]जानामि । विविच्य नाज्ञासिषम् । परं शास्त्रजनितमिदमहमस्मीति[3] ज्ञानं जातम् । अविवेक्यहमित्यर्थः[4] । कार्यकारणयोरभेदात् कृत्स्नप्रपञ्चस्यापि ब्रह्मानन्यत्वेन ब्रह्मैकत्वावगमे प्रपञ्चजातमपि स्वस्वरूपमेव[5] भवति । 'इदं सर्वं यदयमात्मा', 'ब्रह्मैवेदं सर्वं', 'आत्मैवेदं सर्वं', 'स ईक्षत बहु स्यां प्रजायेय' इत्यादिश्रुतिभ्यः एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानात् । 'तदनन्यत्वमारम्भणशब्दादिभ्यः' (ब्र. सू. २. १. १४) इत्याद्युपपत्तिभिश्च प्रपञ्चस्य ब्रह्मानन्यत्वं सिद्धम् । यद्वा । इवशब्दः उपमार्थः । यदिव[6] यदापरोक्ष्यज्ञानं सर्वैकात्म्यरूपमानुभविकमस्ति तदिव[7] तद्वदेवाहमस्मि । इदं सर्वमहमस्मीति ज्ञानं मे जातम् । अपि तु एतद्दार्ष्टान्तिकभूतम् । आनुभविकं सार्वात्म्यं यदस्ति तन्न वि जानामि न प्राप्तोऽस्मि । शास्त्रजनितं सार्वात्म्यं जातं न तु आनुभविकमित्यर्थः । तत्र कारणमाह । यतोऽहं [v]निण्यः । अन्तर्हितनामैतत् । अन्तर्हितो मूढचित्तः । चित्तप्रत्यक्प्रवणताभावेन परिच्छिन्नः इत्यर्थः । तत्रोपपत्तिमाह । [v]संनद्धः अविद्याकामकर्मभिः सम्यग्बद्धो वेष्टितः अत एव [v]मनसा युक्तो भावनासहिष्णुना बहिर्मुखेन विक्षिप्तेन चेतसा युक्तः संचरामि संसारे । अथवा मनसा संनद्धश्चरामि । इन्द्रियपरवश एव सन् संसारे दुःखमनुभवामि । न सार्वात्म्यं जानामीति परिदेवते । यास्कोऽपि इमं परिदेवनार्थत्वेनोदाजहार 'अथापि परिदेवना कस्माच्चिद्भावात् न वि जानामि यदिवेदमस्मि' (निरु. ७. ३) इति । बहिर्मुखचेतसः[8] स्वरूपापरिज्ञानजनितं[9] दुःखमन्यत्र श्रूयते 'पराञ्चि खानि

---

१. ङ-ञ१–व्याप्ता रश्मयः । २. क्ष-ङ-ञ१-ञ-ट–पुरुषस्य । ३. क्ष-ञ-ट–शास्त्रजनितमिदमस्मीति; ञ१–शास्त्रजनितमहमस्मीति ४. ख-च-फ-भ–अविवेकजमित्यर्थः । ५. क्ष-ञ१-ञ-ट–स्वस्य रूपमेव । ६. ज्ञ-ञ-ञ१-त-फ़–यदि वा । ७. ज्ञ-ण-त-भ-व–तदित् ८. क्ष-ञ१-ञ-ट–बहिर्मुखचेतसा स्वरूपापरिज्ञानजनितम्; ख-च-फ-भ–बहिर्मुखचेतसा स्वस्वरूपापरिज्ञानजनितम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नान्तरात्मन् ' ( क. उ. २. ४. १ ) इति। तर्हि कदैतद्भवतीत्याह। [V]यदा [V]मागन् आगमिष्यति तदा। किं तदिति उच्यते। [V]ऋतस्य परमार्थस्य परस्य ब्रह्मणः [V]प्रथमजाः प्रथमोन्मेषः प्रथमोत्पन्नश्चित्तप्रत्यक्प्रवणजनितः अनुभवः। स यदा मा मां प्राप्नोति [V]आदित् अनन्तरमेव अव्यवधानेन [V]अस्याः [V]वाचः ऐकात्म्यप्रतिपादिकाया उपनिषद्वाचो यदिवेदमस्मीत्युक्ताया वा [V]भागं भजनीयं शब्दब्रह्मणा व्याप्तव्यं परं ब्रह्मपदम् [V]अश्नुवे प्राप्नोमि। चित्तस्य बहिर्मुखतां परित्यज्य अन्तर्मुखतैव अदुःसंपादा[1]। सा यदा स्यात् तदानीमेव स्वरूपं द्रष्टुं सुशकं भवति पश्चाद्बिलम्बाभावात्। यथा गिरिशिखरात् पतन् पाषाणोऽविलम्बेन पतति तद्वत्। चित्तप्रत्यङ्मुखत्वस्य दुःशकत्वमपि तत्रैव श्रूयते- ' कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ' ( क. उ. २. ४. १ ) इति॥

अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः।
ता शश्वन्ता विषूचीना वियन्ता न्य१न्यं चिक्युर्न नि चिक्युरन्यम्॥३८॥

अपाङ्। प्राङ्। एति। स्वधया। गृभीतः। अमर्त्यः। मर्त्येन। सऽयोनिः।
ता। शश्वन्ता। विषूचीना। विऽयन्ता। नि। अन्यम्। चिक्युः। न। नि। चिक्युः। अन्यम्॥३८॥

[V]अमर्त्यः अमरणधर्मा अयमात्मा [V]मर्त्येन मरणधर्मणा भूतात्मना देहेन [V]सयोनिः समानस्थानः। यत्र परिच्छेदको देहोऽस्ति तत्र सर्वत्र सोऽयमपि तिष्ठन्नित्यर्थः[2]। यद्वा। समानोत्पत्तिः। सहवासेन[3] स्वस्मिन्नपि उत्पत्तिरुपचर्यते। एवंभूतः सन् [V]स्वधया अन्नोपलक्षिततद्भोगेन [V]गृभीतः[4]। यद्वा। स्वधाशब्देन अन्नमयं शरीरं[5] लक्ष्यते। तेन गृहीतः सन् [V]अपाङ् एति अशुक्लं कर्म कृत्वा अधो गच्छति। [V]प्राङेति ऊर्ध्वं स्वर्गादिलोकं प्राप्नोति। परमात्मैव सूक्ष्मशरीरोपाधिकः सन् नानाविधकर्म कृत्वा तद्भोगाय जीवसंज्ञां लब्ध्वा शरीरत्रयेण संबद्धो लोकान्तरेषु संचरति स्थूलसूक्ष्मोभयशरीरपरिग्रहेण लोके[6] गुणत्रयान्वितः सन् परिभ्रमति। तथा च श्रूयते- ' गुणान्वयो यः फलकर्मकर्ता कृतस्य तस्यैव स चोपभोक्ता। स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपः संचरति स्वकर्मभिः ' (श्वे. उ. ५. ७) इति। इदानीमुभयप्राधान्येनाह। [V]ता तौ भूतात्मकर्त्रात्मानौ[7] [V]शश्वन्ता अविभागेन सर्वदा वर्तमानौ। यद्वा। सूक्ष्मशरीरपक्षे सर्वदा सहवास उपपद्यते। स्थूलशरीरपक्षेऽपि सात्त्विकजातेः[8] तत्कारणानां भूतसूक्ष्माणां सद्भावात् तत्र शरीरसंबन्ध उपपद्यते। [V]विषूचीना इह लोके सर्वत्रगमनौ [V]वियन्ता तत्तत्फलोपभोगाय सर्वत्र लोकान्तरेषु गच्छन्तौ वर्तेते। तत्र नराः [V]अन्यं[9] भूतात्मानं [V]नि [V]चिक्युः नितरां[10] विशेषेण पश्यन्ति जानन्ति[11]। [V]अन्यम् अपरं देहवच्छायातिरिक्तं [V]न [V]नि [V]चिक्युः न जानन्ति। केचन पामरा देहव्यतिरिक्तं न जानन्ति। केचन विवेकिनः कर्तृत्वभोक्तृत्वोपेतो देहातिरिक्तः कश्चिदस्ति इत्यनुमिमते। न केऽपि देहत्रयव्यतिरिक्तमात्मानं जानन्ति। अतो दुर्लभमात्मज्ञानमित्यर्थः॥

---

१. ङ-ञ१-दुःसंपादा। २. क्ष-ञ१-ञ-ट-तिष्ठतीत्यर्थः। ३. क्ष-ञ१ ञ-ट-उत्पत्तिमत्सहवासेन। ४. क्ष-ञ१-ञ-ट-गृभीतो गृहीत उच्यते। ५. क्ष-ञ१-ञ-ट-स्थूलं शरीरम्। ६. क्ष-ञ१-ञ-ट-इह लोके। ७. ङ-ञ१-भूतात्मपरमात्मानौ। ८. क्ष-ञ-ट-समित्वजातेः सहवासः; ञ१-समित्विजातेः सहवासः। ९. ङ-ञ१-आद्यम्। १०. क्ष-ञ-ट-निःशेषेण; ञ१-निःशेषेण नितराम्। ११. क्ष-ञ१-ञ-ट-जानन्ति वा।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासते ॥ ३९ ॥

ऋचः । अक्षरे । परमे । विऽओमन् । यस्मिन् । देवाः । अधि । विश्वे । निऽसेदुः ।
यः । तत् । न । वेद । किम् । ऋचा । करिष्यति ।
ये । इत् । तत् । विदुः । ते । इमे । सम् । आसते ॥ ३९ ॥

पूर्वमन्त्रे देहात्मजीवात्मानावुक्तौ । तयोरन्यस्य जीवात्मनः पारमार्थिकं रूपमस्ति[1] तदत्रोच्यते । [v]ऋचः [v]अक्षरे । अत्र ऋक्शब्देन ऋक्प्रधानभूताः साङ्गापरविद्यात्मकाश्चत्वारो[2] वेदा उच्यन्ते[2] । ऋगादीनामपरविद्यात्वं मुण्डके श्रूयते–'द्वे विद्ये वेदितव्ये' इति प्रतिज्ञाय 'तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदः' ( मु. उ. १. १. ५ ) इत्यादिना । तस्याः संबन्धिनि अक्षरे अदृश्यादिगुणके[3] क्षरणरहितेऽनश्वरे नित्ये सर्वत्र व्याप्ते ब्रह्मणि । अक्षरशब्दस्य ब्रह्मवाचकत्वम् 'एतद्वै तदक्षरस्य प्रशासने गार्गि' ( बृ. उ. ३. ८ ), 'यया तदक्षरमधिगम्यते' ( मु. उ. १ १. ५ ), 'येनाक्षरं पुरुषं वेद सत्यम्' ( मु. उ. १. २. १३ ) इत्यादिश्रुतिषु प्रसिद्धम् । ऋगक्षरयोः प्रतिपाद्यप्रतिपादकभावः संबन्धः । सर्वैर्वेदैः[4] खलु ब्रह्म अधिगम्यते 'तं त्वौपनिषदं पुरुषं पृच्छामि' ( बृ. उ. ३. ९. २६ ) इत्यादिश्रुतेः । ननु उपनिषद्भागानां तथास्तु । इतरेषां तु कथं ब्रह्मविषयत्वमिति[5] उच्यते । यद्यपि इतरभागानां यागादिविषयत्वं तथापि बुद्धिशुद्ध्युत्पादनद्वारा[6] वेदनसाधनत्वेन ब्रह्मविषयत्वं[7] भविष्यति 'वेदानुवचनेन ब्राह्मणा विविदिषन्ति' ( बृ. उ. ४. ४. २२ ) इत्यादिश्रुतेः । तदेव विशेष्यते । [v]परमे उत्कृष्टे निरतिशये [v]व्योमन् व्योमनि व्योमसदृशे । अलेपत्वनीरूपत्वव्यापित्वादि-सादृश्येन[8] व्योमेत्युक्तम् । यद्वा । विशेषेण सर्वस्य रक्षके । निरधिष्ठा न कस्यचिदस्ति स्वाध्यस्तस्य सर्वस्याधिष्ठानत्वेन रक्षकत्वात् । तादृशे तत्त्वे सर्वम् अध्यस्तमित्यर्थः । पुनस्तदेव विशेष्यते । [v]यस्मिन् परमात्मनि [v]विश्वे सर्वे [v]देवाः [v]अधि [v]निषेदुः निषीदन्ति आश्रित्य तिष्ठन्ति तस्मिन् । यद्वा । उक्तलक्षणे वस्तुनि ऋगुपलक्षिताः सर्वे साङ्गा वेदाः पर्यवसिता इत्यर्थः । [v]यः यो मर्त्यः [v]तत् तादृशं देवादीनां[9] स्वरूपलाभास्पदं कृत्स्नवेदतात्पर्यप्रतिपाद्यं यद्वस्तु [v]न [v]वेद न जानाति स मर्त्यः [v]ऋचा पूर्वोक्तेन ऋगादिशब्दजालेन [v]किं [v]करिष्यति । वेदनसाधनेन वेदेन वेद्यम् अविदित्वा किं साधयतीत्यर्थः । प्रयोजनाभावात् सर्वस्यापि वेदस्य नैष्फल्यात् इति भावः । अथवा योऽक्षरम-विदित्वा कर्मणां कर्ता भवति यागादीननुतिष्ठति तेन किंचिदपि कर्म कृतं न भवतीत्यर्थः । [v]य [v]इत् ये एव [v]तत् तत्त्वं [v]विदुः जानन्ति [v]त [v]इमे [v]समासते ते एव इमे ज्ञातारः समासते सम्यक्तिष्ठन्ति । अपुनरावृत्त्या स्वरूपेऽवस्थानं समासनम् । यद्वा । ये विदुः इत् ये जानन्त्येव नानुतिष्ठन्ति । इच्छब्दोऽवधारणे । त इमे ते एव समासते । गवामयनादिसहस्रसंवत्सरसत्रपर्यन्तानि सहोपयन्ति ।

---

१. क्ष-ङ-ञ१-ञ-ट-यद्रूपमस्ति । २. क्ष-ञ१-ञ-ट-साङ्गापरविद्यासंज्ञिकी त्रयी उच्यते । ३. क्ष-ञ१-ञ-ट-अद्रेश्यादिगुणके । ४. क्ष-ङ-ञ१-ञ-ट-ऋगाद्यैर्वेदैः । ५. क्ष-ञ१-ञ-ट-ब्रह्मपरत्वमिति । ६. ङ-ञ१-बुद्धिशुद्धयापादनद्वारा । ७. ञ१-ब्रह्मविषयम् । ८. क्ष-ञ१-ञ-ट-अस्पर्शत्वनीरूपत्वव्यापित्वादि-सादृश्येन । ९. क्ष-ङ-ञ१-ञ-ट-देवानाम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सहार्थे संशब्दः । सत्त्रादधिकानां यागानामभावात् तेषामपि फलम् एतज्ज्ञानेनैव प्राप्तं[1] भवतीत्यर्थः । कर्तृणां बहुत्वात् बहुवचननिर्देशः ॥ अन्ये तु अन्यथा वर्णयन्ति । ऋचः । ऋक् अर्चनीयमादित्यमण्डलम् ऋगादिमयं वा । ' ऋग्भिः पूर्वाह्णे दिवि देवः', ' आदित्यो वा एष एतन्मण्डलं तपति तत्र ता ऋचः ' इत्यादिश्रुतेः । तस्य संबन्धिनि अक्षरे परमे व्योमन् इत्युक्तलक्षणे ब्रह्मणि ' य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते ' इत्यादिश्रुत्युक्तस्वरूपे यस्मिन् सर्वे देवा द्योतमाना रश्मयो निषेदुः वर्तन्ते । य[2] एतन्न वेद सः[2] केवलया ऋचा किं करिष्यति[3] । ये जानन्ति भावयन्ति त एव विद्वांसः समासते । भूम्यां सुखेन रोगादिरहिता भोगिनः सन्तश्चिरकालं जीवन्ति । अपरे प्रकारान्तरेण प्रतिपादयन्ति । ऋचोऽक्षरे ऋगुपलक्षितसर्ववेदसंबन्धिनि अक्षरे प्रणवरूपे ओंकारे अविनाशिनि सर्ववेदेषु व्याप्ते वा । प्रणवस्य सर्ववेदसारत्वं ब्राह्मणे श्रूयते–' तान्वेदानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्ताकार उकारो मकार इति तानेकधा समभरत् तदेतदोमिति ' ( ऐ. ब्रा. ५. ३२ ) इति । परमे निरतिशये । न हि प्रणवादधिकं किंचिन्मन्त्रजातमस्ति त्रिकालातीतस्य ब्रह्मणः प्रतिपादकत्वात् । ' यच्चान्यत् त्रिकालातीतं तदप्योंकार एव ' (मा. उ. १), ' ओमिति ब्रह्म '( तै. आ. ७. ८ ) इत्यादिश्रुतेः । वेदानां प्रणवस्य स्थानप्रतिनिधिभावः संबन्धः ' य ऋचोऽधीते ' इत्याद्युपक्रम्य ' यः प्रणवमधीते स सर्वमधीते ओमिति प्रतिपद्यत एतद्वै यजुष्यां विद्यां प्रत्येषा वागेतत्परममक्षरम् ' ( तै. आ. २. ११. ४ ) इत्यादिश्रुतेः । यस्मिन् विश्वे सर्वे देवा अधि निषेदुः । प्रणवस्य सर्वमन्त्रात्मकत्वात् मन्त्रेषु सर्वदेवतानां निवासात् सर्वदेवनिवासत्वम् । ब्रह्माधिष्ठानत्वाद्वा ब्रह्मणि सर्वदेवानां निवासात् । शिष्टमविशिष्टम् । अयं मन्त्रो निरुक्ते ( निरु. १३. १० ) व्याख्यातः । अपरे तु अपरथा वर्णयन्ति । ऋचः । ऋक् अर्चनीयो जीवः । तस्य संबन्धिन्यक्षरेऽविनाशे व्याप्ते वा परमात्मनीत्यर्थः[4] । अत एव जीवापेक्षया परमे उत्कृष्टे निरुपाधिके व्योमन् विशेषेण सर्वाधिष्ठानत्वेन रक्षके व्योमसदृशे वा । यस्मिन् परमात्मनि देवा गमनवन्तो व्यवहरन्तः[5] वा इन्द्रियसंज्ञका विश्वे सर्वेऽपि अधि निषेदुः निषीदन्ति आश्रित्य वर्तन्ते । यस्तन्न वेद न जानाति उपाध्यंशपरित्यागे तदेव स्वरूपमिति न पश्यति स्थूलः[6] जनः किमृचा करिष्यति । केवलेन जीवेन[7] जीवभावेन[7] किं फलं प्राप्स्यति । जननमरणादिक्लेशस्य अस्यागादिति भावः । ये तत्तत्त्वं विदुस्त इत्यादि सिद्धम् ॥

अग्निहोत्रार्था धेनुर्यदि कुत्सितं शब्दं कुर्यात् तदानीं ' सूयवसात् ' इत्यनया यवसादिकं प्रयच्छेत् । तथा च सूत्रितं–' वाश्यमानायै यवसं प्रयच्छेत् सूयवसाद्भगवती हि भूयाः ' ( आश्व. श्रौ. ३. ११ ) इति । प्रवर्ग्येऽभिष्टवे एषैव परिधानीया । सूत्रितं च–' सूयवसाद्भगवती हि भूया इति परिदध्यात् ' ( आश्व. श्रौ. ४. ७ ) इति ॥

---

१. क्ष-झ१-ञ-ट–नान्तरीया। २. क्ष-झ१-ञ-ट–ये एतत्तत्त्वं न विदुः ते । ३. क्ष-झ१-ञ-ट–करिष्यन्ति । ४. क्ष-झ-झ१-ञ-ट–जीवपरमेश्वरयोः औपाधिकांशांश्यवच्छिन्नानवच्छिनाभासनिवासादिभावः ( झ-औपाधिकस्यवच्छिन्नावच्छिन्नाभासबिम्बादिभावः) संबन्धः सोपाधिकस्य जीवस्य संबन्धिनि परमात्मनीत्यर्थः । ५. झ१–व्यवहारवन्तः । ६. क्ष-झ१-ञ-ट–स स्थूलः । ७. क्ष-झ१-ञ-ट–जीवनभावेन ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सूयवसाद्भगवती हि भूया अथो वयं भगवन्तः स्याम ।
अद्धि तृणमघ्न्ये विश्वदानीं पिब शुद्धमुदकमाचरन्ती ॥ ४० ॥

सुयवसऽअत् । भगऽवती । हि । भूयाः । अथो इति । वयम् । भगऽवन्तः । स्याम ।
अद्धि । तृणम् । अघ्न्ये । विश्वऽदानीम् । पिब । शुद्धम् । उदकम् । आऽचरन्ती ॥ ४० ॥

हे [v]अघ्न्ये । गोनामैतत् । अहननीये हे गौः त्वं [v]सूयवसात् शोभनयवसस्य तृणादिकस्य अत्त्री सती [v]भगवती । भग इति धननाम । सर्वैर्भजनीयप्रभूतक्षीरादिधनवती [v]भूयाः भव । हिः पूरणः प्रसिद्धौ वा । लोके यवसादिभक्षणेन क्षीरादिसमृद्धिः प्रसिद्धा । [v]अथो अनन्तरमेव [v]वयं यजमाना अपि [v]भगवन्तः[1] प्रभूतेन धनेन तद्वन्तः [v]स्याम[2] । अथ एकवारं पूर्वमुक्तमिदानीं सर्वदा कर्तव्यमिति प्रार्थयते । [v]विश्वदानीं विश्वकालं सर्वदा [v]तृणम् [v]अद्धि भक्षय । [v]आचरन्ती सर्वतो[3] निर्गच्छन्ती[3] [v]शुद्धं निर्मलम् [v]उदकं [v]पिब । अयं मन्त्रो यास्केनैवं व्याख्यातः–'सुयवसादिनी भगवती हि भवाथेदानीं वयं भगवन्तः स्यामाद्धि तृणमघ्न्ये सर्वदा पिब च शुद्धमुदकमाचरन्ती' (निरु. ११. ४४) इति ॥ ॥ २१ ॥

गौरीर्मिमाय सलिलानि तक्षत्येकपदी द्विपदी सा चतुष्पदी ।
अष्टापदी नवपदी बभूवुषी सहस्राक्षरा परमे व्योमन् ॥ ४१ ॥

गौरीः । मिमाय । सलिलानि । तक्षती । एकऽपदी । द्विऽपदी । सा । चतुःऽपदी ।
अष्टाऽपदी । नवऽपदी । बभूवुषी । सहस्रऽअक्षरा । परमे । विऽओमन् ॥ ४१ ॥

[v]गौरीः गरणशीला माध्यमिका वाक् ॥ सुलोपाभावश्छान्दसः ॥ [v]मिमाय शब्दयति । किं कुर्वती । [v]सलिलानि वृष्ट्युदकानि [v]तक्षती सम्यक्संपादयित्री । [v]एकपदी एकपादोपेता एकाधिष्ठाना मेघे वर्तमाना गमनसाधनेन वायुना एकपदी वा [v]द्विपदी मेघान्तरिक्षाख्यद्व्यधिष्ठाना । आदित्यो वा द्वितीयः । तथा [v]सा [v]चतुष्पदी पादचतुष्टयोपेता दिक्चतुष्टयाधिष्ठाना । अथ [v]अष्टापदी विदिगपेक्षया अष्टपादोपेता अष्टाधिष्ठाना [v]नवपदी उपरिदिगपेक्षया सूर्येण[4] वा[4] नवदिगधिष्ठाना [v]बभूवुषी एवंभूता ॥ भवेश्छान्दसः क्वसुः । ततो ङीपि वसोः संप्रसारणम् ॥ किमनया परिगणनया । [v]सहस्राक्षरा । अपरिमितवचनोऽयम् । अपरिमितव्याप्तियुक्ता बहुव्यापनशीलोदकवतीत्यर्थः । कुत्रेति तदुच्यते । [v]परमे [v]व्योमन् उदकाश्रयत्वेनोत्कृष्टेऽन्तरिक्षे । केचिदेवमाहुः । गौरीर्गरणशीला शब्दब्रह्मात्मिका वाक् मिमाय माति ॥ प्रसिद्ध्यर्थे धातुः ॥ प्रतिष्ठितानि[5] घटादिद्रव्याणि तक्षती तत्तद्वाचकत्वेन निष्पादयन्ती एकपदी अव्याकृतत्वेन एकप्रतिष्ठाना[6] एकरूपा वा आत्मना[7] द्विपदी सुप्तिङ्भेदेन पादद्वयवती चतुष्पदी

---

१. ज्ञ१–भगवन्तः स्याम । २. क्ष-ज्ञ१-ञ-ट–स्याम । आदरातिशयाय पुनः प्रार्थ्यते । ३. क्ष-ङ-ज्ञ१-ञ-ट–शनैः शनैः गच्छन्ती । ४. क्ष-ङ-ज्ञ१-ञ-ट–'सूर्येण वा' नास्ति । ५. क्ष-ज्ञ१-ञ-ट–सलिलप्रतिष्ठितो धातुप्रतिष्ठितानि । ६. क्ष-ज्ञ१-ञ-ट–एकप्रतिष्ठा । ७. क्ष-ङ-ज्ञ१-ञ-ट–प्रणवात्मना ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नामाख्यातोपसर्गनिपातभेदेन अष्टापदी आमन्त्रितसहिताष्टभेदेन[1] अष्टपदी[2] नवपदी बभूवुषी साय्यैरुक्तैरष्टभिः[3] नवपदी। अथवा सनाभिकेषु उरःकण्ठादिषु नवसु पदेषु भवन्ती पश्चाद्धृविधाभिव्यक्तिमुपेयुषी परमे व्योमन् उत्कृष्टे हृदयाकाशे मूलाधारे सहस्राक्षरा अनेकाकारेण व्याप्ता अनेकध्वनिप्रकारा भवतीत्यर्थः। अयं मन्त्रः आचार्येणैवं व्याख्यातः–' गौरीर्मिमाय सलिलानि तक्षती कुर्वत्येकपदी मध्यमेन द्विपदी मध्यमेन चादित्येन च चतुष्पदी दिग्भिरष्टापदी दिग्भिश्चावान्तरदिग्भिश्च नवपदी दिग्भिश्चावान्तरदिग्भिश्चादित्येन च सहस्राक्षरा बह्वृदका परमे व्यवने ' ( निरु. ११. ४० ) इति ॥

तस्याः समुद्रा अधि वि क्षरन्ति तेन जीवन्ति प्रदिशश्चतस्रः ।
ततः क्षरत्यक्षरं तद्विश्वमुप जीवति ॥ ४२ ॥

तस्याः । समुद्राः । अधि । वि । क्षरन्ति । तेन । जीवन्ति । प्रऽदिशः । चतस्रः ।
ततः । क्षरति । अक्षरम् । तत् । विश्वम् । उप । जीवति ॥ ४२ ॥

vतस्याः उक्तायाः गोः सकाशात् vसमुद्राः वृष्ट्युदकसमुन्दनाधिकरणभूता मेघाः vअधि अधिकं प्रभूतमुदकं vवि vक्षरन्ति विविधं क्षरन्ति । vतेन उदकेन vप्रदिशश्चतस्रः । प्रशब्दो वीत्यर्थः[4] । विदिशश्चतस्रो दिशश्च । अथवा प्रकृष्टा दिशो मुख्याश्चतस्रः । तत्स्थेषु ताच्छब्द्यम् । तत्स्थाः पुरुषाः vजीवन्ति । vततः पश्चात् तत् vअक्षरम् उदकं vक्षरति सस्यादिकमुत्पादयतीत्यर्थः । vतत् सस्यादिकं vविश्वं जगत् vउप vजीवति । अयमपि यास्केन व्याख्यातः–' तस्याः समुद्रा अधिविक्षरन्ति वर्षन्ति मेघास्तेन जीवन्ति दिगाश्रयाणि भूतानि ततः क्षरत्यक्षरमुदकं तत्सर्वाणि भूतान्युपजीवन्ति ' ( निरु. ११. ४१ ) इति ॥

शकमयं धूममारादपश्यं विषूवता पर एनावरेण ।
उक्षाणं पृश्निमपचन्त वीरास्तानि धर्माणि प्रथमान्यासन् ॥ ४३ ॥

शकऽमयम् । धूमम् । आरात् । अपश्यम् । विषुऽवता । परः । एना । अवरेण ।
उक्षाणम् । पृश्निम् । अपचन्त । वीराः । तानि । धर्माणि । प्रथमानि । आसन् ॥ ४३ ॥

vशकमयं शकृन्मयं शुष्कगोमयसंभूतं vधूमम् vआरात् नातिदूरे vअपश्यम् दृष्टवानस्मि । दिवा धूमस्य दूरे दृश्यमानत्वात् स एव दर्शनविषयतया उक्तः । vविषुवता व्याप्तिमता vएना अनेन vअवरेण निकृष्टेन धूमेन vपरः परस्तात् तत्कारणभूतमग्निमपश्यम् । अहं यजमान इत्यर्थः । किंच vउक्षाणं फलस्य सेक्तारं vपृश्निं शुक्लवर्णम् । प्राश्नुते तेन[5] फलमिति स्वयं प्राश्नुत इति वा पृश्निर्वल्लीरूपः सोमः । तं vवीराः विविधेरणकुशला ऋत्विजः vअपचन्त । अत्र धात्वर्थानादरेण तिङ्प्रत्ययः करोत्यर्थः । स च क्रियासामान्यवचनः अत्र औचित्यात् अभिषवेण संपादितवन्त इत्यर्थः । vतानि

---

१. क्ष-ड-झ१-ञ-ट–आमन्त्रितसहिताष्टविभक्तिभेदेन । २. क्ष-ञ-ट–अष्टपदा; झ१–अष्टापदी । ३. क्ष-ञ-ट–अव्ययैरुक्ताष्टभिश्च; झ १–अव्ययैरुक्ताभिश्च । ४. क्ष-झ१-ञ-ट– वीत्यर्थे । ५. क्ष-झ१-ञ-ट–अनेन ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तस्साधनानि [v]धर्माणि अनुष्ठानानि [v]प्रथमानि प्रतमानि प्रकृष्टानि फलपर्यवसायीनि [v]आसन् संपादितान्यभवन् । यद्वा । सोम उक्षाभवत् पूर्वं तं देवाः शकृतापचन् । यज्ञार्थे तद्भवो धूमो मेघ आसीत् तदुच्यते । तत्परत्वेन वा मन्त्रो व्याख्येयो विचक्षणैः ॥

त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषाम् ।
विश्वमेको अभि चष्टे शचीभिर्ध्राजिरेकस्य ददृशे न रूपम् ॥ ४४ ॥

त्रयः । केशिनः । ऋतुऽथा । वि । चक्षते । संवत्सरे । वपते । एकः । एषाम् ।
विश्वम् । एकः । अभि । चष्टे । शचीभिः । ध्राजिः । एकस्य । ददृशे । न । रूपम् ॥४४॥

केशस्थानीयप्रकृष्टरश्मियुक्ताः[1] [v]त्रयः अग्न्यादित्यवायवः । ते च [v]ऋतुथा कालेकाले [v]वि [v]चक्षते विविधलक्षणां भूमिं पश्यन्ति । तेषां पृथक्पृथक्कार्यमाह । [v]एषां मध्ये [v]एकः अग्निः [v]संवत्सरे अतीते सति संवत्सरं[2] [v]वपते दाहेन केशस्थानीयौषधिवनस्पत्यादिके[3] छेदनं[3] नापितकार्यं करोति। [v]एकः अन्यः आदित्यः [v]विश्वं सर्वं जगत् [v]शचीभिः स्वकीयैः प्रकाशवृष्ट्यादिकर्मभिः [v]अभि [v]चष्टे सर्वतः पश्यति । [v]एकस्य वायोः [v]ध्राजिः गतिः [v]ददृशे दृश्यते सर्वैः [v]न [v]रूपम् अप्रत्यक्षत्वात् । स्पर्श-शब्दधृतिकम्पलिङ्गैः[4] गम्यते[4] इति हि न्यायविदो वदन्ति। अयमपि मन्त्रो यास्केन एवं व्याख्यातः–'त्रयः केशिन ऋतुथा विचक्षते काले कालेऽभिविपश्यन्ति संवत्सरे वपत एक एषामित्यग्निः पृथिवीं दहति सर्वमेकोऽभिविपश्यति कर्मभिरादित्यो गतिरेकस्य दृश्यते न रूपं मध्यमस्य' (निरु. १२. २७) इति॥

वाग्देवत्ये पशौ 'चत्वारि वाक्' इति हविषोऽनुवाक्या । 'चत्वारि वाक्परिमिता पदानि यज्ञेन वाचः पदवीयमायन्' (आश्व. श्रौ. ३. ८) इति सूत्रितत्वात् ॥

चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति ॥ ४५ ॥

चत्वारि । वाक् । परिऽमिता । पदानि । तानि । विदुः । ब्राह्मणाः । ये । मनीषिणः ।
गुहा । त्रीणि । निऽहिता । न । इङ्गयन्ति । तुरीयम् । वाचः । मनुष्याः । वदन्ति ॥ ४५ ॥

[v]वाक् वाचः कृत्स्नायाः [v]पदानि [v]चत्वारि [v]परिमिता परिमितानि । लोके या वागस्ति सा चतुर्विधा विभक्तेत्यर्थः। [v]तानि पदानि [v]ब्राह्मणाः वेदविदः [v]मनीषिणः मनस ईषिणो मेधाविनः [v]विदुः जानन्ति । तेषां[5] मध्ये [v]त्रीणि [v]गुहा गुहायां [v]निहिता[6] स्थापितानि [v]नेङ्गयन्ति न चेष्टन्ते न प्रकाशन्ते इत्यर्थः । [v]वाचः [v]तुरीयं पदं [v]मनुष्याः अज्ञास्तज्ज्ञाश्च [v]वदन्ति व्यक्तमुच्चारयन्ति व्यवहरन्ति ।

---

१. क्ष-झ१-ञ-ट-केशिनः केशस्थानीयप्रकृष्टरश्मियुक्ताः; झ-त्रयः केशस्थानीयप्रकृष्टरश्मियुक्ताः । २. क्ष-झ१-ञ-ट-यद्वा प्रतिसंवत्सरम् । ३. ङ-झ१-केशस्थानीयौषधिवनस्पत्यादिकेशच्छेदनम् । ४. क्ष-ङ-झ१-ञ-ट-स्पर्शशब्दधृतिकम्पनलिङ्गगम्यः । ५. क्ष-ञ-ट-अथ तेषाम् । ६. क्ष-झ-झ१-ञ-ट-निहिता निहितानि ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कानि तानि चत्वारि इत्यत्र बहवः स्वस्वमतानुरोधेन बहुधा वर्णयन्ति । सर्ववैदिकवाग्जालस्य संग्रहरूपाः भूरादयस्तिस्रो व्याहृतयः प्रणव एक इति वेदत्रयसारत्वात् तासां व्याहृतीनामेव सारसंग्रहभूतत्वात् अकाराद्यात्मकस्य प्रणवस्येति सप्रणवासु व्याहृतिषु सर्वा वाक् परिमितेति केचन वेदवादिनो वदन्ति । अपरे व्याकरणमतानुसारिणो नामाख्यातोपसर्गनिपातभेदेन । क्रियाप्रधानमाख्यातम् । द्रव्यप्रधानं नाम । प्रागुपसृज्यते आख्यातपदस्येत्युपसर्गः प्रादिः । उच्चावचेष्वर्थेषु निपतनान्निपातः अपि तु च इत्यादिः । एतेष्वेव सर्वा वाक् परिमितेत्यखण्डायाः कृत्स्नाया वाचश्चतुर्धा व्याकृतत्वात् । 'वाग्वै पराच्यव्याकृतावदत् तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्तस्मादियं व्याकृता वागुद्यते' ( तै. सं. ६. ४. ७. ३ ) इति श्रुतेः । अन्ये तु याज्ञिकाः मन्त्राः कल्पो ब्राह्मणं चतुर्थी लौकिकीति । याज्ञिकैः समाख्यातोऽनुष्ठेयार्थप्रकाशको वेदभागो मन्त्राः । मन्त्रविधानप्रतिपादको वेदभागः 'इति मन्त्राः कल्पोऽत ऊर्ध्वम्' ( तै. आ. १. ३१. २ ) इत्यादिनोक्तः कल्पः । मन्त्रतात्पर्यार्थप्रकाशको[1] वेदभागो ब्राह्मणम्[1]। भोगविषया[2] गामानय इत्यादिरूपा व्यावहारिकी । एष्वेव सर्वा वाक् नियमितेति याज्ञिकाः । ऋग्यजुःसामानि चतुर्थी व्यावहारिकीति नैरुक्ताः । सर्पाणां[3] वाग्वयसां क्षुद्रसरीसृपस्य च चतुर्थी व्यावहारिकीत्यैतिहासिकाः । पशुषु तृणवेषु मृगेष्वात्मनि चेत्यात्मवादिनः । अपरे मातृकाः[3] प्रकारान्तरेण प्रतिपादयन्ति । परा पश्यन्ती मध्यमा वैखरीति चत्वारीति[4]। एकैव नादात्मिका वाक् मूलाधारादुदिता सती परेत्युच्यते । नादस्य च सूक्ष्मत्वेन दुर्निरूपत्वात् सैव हृदयगामिनी पश्यन्तीत्युच्यते योगिभिर्द्रष्टुं शक्यत्वात् । सैव बुद्धिं गता विवक्षां प्राप्ता मध्यमेत्युच्यते । मध्ये हृदयाख्ये उदीयमानत्वात्[5] मध्यमायाः । अथ यदा सैव वक्त्रे स्थिता तालोष्ठादिव्यापारेण बहिर्निर्गच्छति तदा वैखरीत्युच्यते । एवं चत्वारि वाचः पदानि परिमितानि । मनीषिणो मनसः स्वामिनः स्वाधीनमनस्का ब्राह्मणाः स्वाख्यस्य[6] शब्दब्रह्मणोऽधिगन्तारो योगिनः परादिचत्वारि पदानि विदुः जानन्ति । तेषु मध्ये त्रीणि परादीनि गुहा निहितानि हृदयान्तर्वर्तित्वात्। तुरीयं तु पदं वैखरीसंज्ञकं मनुष्याः सर्वे वदन्ति । व्याकरणप्रसिद्धनामाख्यातादिपक्षे मनीषिणो ब्राह्मणाः प्रकृतिप्रत्ययादिविभागज्ञा वाग्योगविदस्तानि पदानि जानन्ति । अवाग्योगविदः पामरा वाचो वाङ्मयस्य तुरीयं चतुर्थं भागं वदन्ति व्यवहरन्ति अर्थप्रकाशनाय प्रयुञ्जते । अयं मन्त्रो निरुक्ते व्याख्यातः सोऽत्राप्यनुसंधेयः—'अथापि[7] ब्राह्मणं भवति । सा वै वाक् सृष्टा चतुर्धा व्यभवदेष्वेव लोकेषु त्रीणि पशुषु तुरीयम् । या पृथिव्यां साग्नौ सा रथंतरे । यान्तरिक्षे सा वायौ सा वामदेव्ये । या दिवि सादित्ये सा बृहति सा स्तनयित्नावथ पशुषु ततो या वाक्त्यरिच्यत तां ब्राह्मणेष्वदधुः । तस्माद्ब्राह्मणा उभयीं वाचं वदन्ति या च देवानां या च मनुष्याणाम्' ( निरु. १३. ९ ) इति[7]

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान् ।
एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥ ४६ ॥

इन्द्रम् । मित्रम् । वरुणम् । अग्निम् । आहुः । अथो इति । दिव्यः । सः । सुऽपर्णः । गरुत्मान् । एकम् । सत् । विप्राः । बहुधा । वदन्ति । अग्निम् । यमम् । मातरिश्वानम् । आहुः ॥४६॥

---

१. क्ष-ञ१-ञ-ट–विविच्य समन्तादर्थप्रकाशको वेदभागो ब्राह्मणम् । २. क्ष-ञ-ट– भाष्यविषया; ङ-ञ-ञ१–भाषाविषया । ३. क्ष-ञ१-ञ-ट–अन्ये तु सर्पपक्ष्यादिभेदेन चातुर्विध्यमाहुः । अपरे मान्त्रिकाः ।४. ञ१–तेषु मध्ये त्रीणि परादीनि; क्ष-ञ-ट–'चत्वारीति' नास्ति । ५. क्ष-ञ१-ञ-ट-मीयमानत्वात् । ६. ङ-ञ१–गवाख्यस्य । ७. क्ष-ङ-ञ१-ञ-ठ–'अथापि ब्राह्मणं भवति... इति' इति नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अमुमादित्यम् ऐश्वर्यविशिष्टम्[1] Vइन्द्रम् Vआहुः । तथा Vमित्रं प्रमीतेर्मरणात् त्रातारमहरभिमानिनमेतन्नामकं देवं तमाहुः । Vवरुणं पापस्य निवारकं रात्र्यभिमानिनं देवमाहुः । तथा Vअग्निम् अङ्गनादिगुणविशिष्टम् एतन्नामकमाहुः । Vअथो अपि च अयमेव Vदिव्यः दिवि भवः Vसुपर्णः सुपतनः Vगरुत्मान् गरणवान् पक्षवान्वा । एतन्नामको यः पक्ष्यस्ति Vसः अप्ययमेव । कथमेकस्य नानात्वमिति उच्यते । अमुमेवादित्यम् Vएकम् एव वस्तुतः सन्तं Vविप्राः मेधाविनो देवतातत्त्वविदः Vबहुधा Vवदन्ति । तत्तत्कार्यकारणेन[2] इन्द्राद्यात्मानं[3] वदन्ति । 'एकैव वा महानात्मा देवता स सूर्य इत्याचक्षते' इत्युक्तत्वात् । किंच तमेव वृष्ट्यादिकारणं वैद्युताग्निं Vयमं नियन्तारं Vमातरिश्वानम् अन्तरिक्षे श्वसन्तं[4] वायुम्[5] Vआहुः । सूर्यस्य[6] ब्रह्मणोऽनन्यत्वेन सार्वात्म्यमुक्तं भवति[6] । अत्र ये[7] केचित् 'अग्निः सर्वा देवताः' ( ऐ. ब्रा. २. ३) इत्यादिश्रुतितोऽयमेवाग्निरुत्तरे अपि ज्योतिषी इति मत्वा अग्नेरेव सार्वात्म्यप्रतिपादकोऽयं मन्त्र इति वदन्ति । तत्पक्षे प्रथमोऽग्निशब्दः उद्देश्यः । तमग्निमुद्दिश्य इन्द्राद्यात्मकत्वकथनम् । अयं मन्त्रो निरुक्ते एवं व्याख्यातः–'इममेवाग्निं महान्तमात्मानमेकमात्मानं बहुधा मेधाविनो वदन्ति इन्द्रं मित्रं वरुणमग्निं दिव्यं च गरुत्मन्तम् । दिव्यो दिविजो गरुत्मान् गरणवान् गुर्वात्मा महात्मेति वा' ( निरु. ७. १८ ) इति ॥ ॥ २२ ॥

वर्षकामेष्ट्यां तिस्रः पिण्डयो होतव्याः । तत्र 'कृष्णं नियानम्' इति तृतीयस्यानुवाक्या । 'कृष्णं नियानं हरयः सुपर्णा नियुत्वन्तो ग्रामजितो यथा नरः' ( आश्व. श्रौ. २. १३ ) इति[8] ॥

कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति ।
त आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते ॥ ४७ ॥

कृष्णम् । निऽयानम् । हरयः । सुऽपर्णाः । अपः । वसानाः । दिवम् । उत् । पतन्ति ।
ते । आ । अववृत्रन् । सदनात् । ऋतस्य । आत् । इत् । घृतेन । पृथिवी । वि । उद्यते ॥४७॥

Vकृष्णं कृष्णवर्णं Vनियानं नियमेन गच्छन्तं मेघं Vहरयः उदकस्य हर्तारः Vसुपर्णाः शोभनपतना रश्मयः Vअपः Vवसानाः उदकानि वासयन्तो मेघेषु । अद्भिर्मेघान्पूरयन्त इत्यर्थः ॥ अन्तर्भावितण्यर्थत्वात् द्विकर्मकत्वम् ॥ यद्वा । कृष्णं नियानं नियमनं रात्रिः । देवानां हि रात्रिर्दक्षिणायनम् । तत्प्रति । तस्मिन्वर्षकाले इत्यर्थः । एवं कुर्वन्तः Vदिवं द्युलोकं तदाश्रितमादित्यं वा उद्दिश्य Vउत्पतन्ति ऊर्ध्वं गच्छन्ति । Vते रश्मयः Vऋतस्य Vसदनात् उदकस्य स्थानात् आदित्यमण्डलात् Vआववृत्रन् आवर्तन्ते[9] अर्वाञ्च आगच्छन्ति । Vआदित् अनन्तरमेव यदा अर्वाग्गच्छन्ति तदानीमेव Vघृतेन उदकेन Vपृथिवी Vव्युद्यते विविधं क्लिद्यते । 'कृष्णं निरयणं रात्रिरादित्यस्य हरयः सुपर्णा हरणा आदित्यरश्मयः' ( निरु. ७. २४ ) इत्यादि निरुक्तं द्रष्टव्यम् ॥

---

१. क्ष-ङ-ञ१-ञ-ट–ऐश्वर्ययोगात् । २. क्ष-ञ१-ञ-ट–तत्तत्कार्यकरणेन । ३. क्ष-ञ१-ञ-ट–अन्याद्यात्मानम् । ४. क्ष-ञ-ट–श्वसनात् । ५. क्ष-ञ-ट–वायुं च । ६. क्ष-ञ१-ञ-ट–'सूर्यस्य..... भवति' नास्ति । ७. क्ष-ञ१-ञ-ट–'ये' नास्ति । ८. क्ष-ङ-ञ१-ञ-ट–इति सूत्रितत्वात् । ९. क्ष-ञ-ट–आवर्तयन्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत ।
तस्मिन्त्साकं त्रिंशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः ॥ ४८ ॥

द्वादश । प्रऽधयः । चक्रम् । एकम् । त्रीणि । नभ्यानि । कः । ऊँ इति । तत् । चिकेत ।
तस्मिन् । साकम् । त्रिऽशताः । न । शङ्कवः । अर्पिताः । षष्टिः । न । चलाचलासः ॥४८॥

[v]द्वादश एतत्संख्याकाः[1] [v]प्रधयः परिधयः प्रहिता वर्तन्ते । तत्स्थानीया द्वादश मासाः [v]एकम् अद्वितीयं [v]चक्रं क्रमणस्वभावं संवत्सराख्यं चक्रमाश्रिताः । तथा [v]त्रीणि त्रिसंख्याकानि [v]नभ्यानि नाभ्याश्रयाणि[2] फलकानि तत्स्थानीयानि[2] ग्रीष्मवर्षाहेमन्ताख्यान्याश्रितानि। यथा सूर्यरथचक्रस्य द्वादश परिधयः[3] नाभ्यर्हाणि त्रीणि फलकानि सन्ति तद्वत्कालचक्रस्यापि । [v]क [v]उ कोऽपि महान्[4] [v]तत् चक्रं [v]चिकेत जानाति । [v]तस्मिन् चक्रे [v]साकं सह [v]शङ्कवः [v]न शङ्कवः[5] इव । अत्र पुरस्तादुपचारोऽपि नशब्दः सामर्थ्यादुपमार्थीयः । तस्मिन्नपि संवत्सरचक्रे [v]त्रिंशताः एतत्संख्याकाः [v]षष्टिर्न । नशब्दः चार्थे । षष्टिश्च अरा अरस्थानीयान्यहानि [v]अर्पिताः अर्पितानि । कीदृशानि तानि । [v]चलाचलासः । एकश्चलशब्दो द्विर्भावप्राप्तः । चलाः । चलनस्वभावानीत्यर्थः ॥ ' चरिचलिपतिवदीनामभ्याक्चाभ्यासस्य ' ( पा. सू. ६. १. १२. ६ ) इति द्विर्वचनसागागमश्च । ततोऽसुक् ॥ ' षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहानि ' (श. ब्रा. ९. १. १. ४३) इति ब्राह्मणम् । ' द्वादश प्रधयश्चक्रमेकमिति मासानां मासा मानात् ' ( निरु. ४. २७ ) इत्यादि निरुक्तम् ॥

प्रवर्ग्येऽभिष्टवे ' यस्ते स्तनः ' इत्येका[6] । सूत्रितं च–' यस्ते स्तनः शशयो यो मयोभूर्यौरमीमेदनु वत्सं मिषन्तम् ' ( आश्व. श्रौ. ४. ७ ) इति । एषैव सारस्वते पशौ हविषो याज्या । सूत्रितं च–' यस्ते स्तनः शशयो यो मयोभूस्त्वं सोम प्र चिकितो मनीषेति द्वे ' ( आश्व. श्रौ. ३. ७ ) इति ॥

यस्ते स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि ।
यो रत्नधा वसुविद्यः सुदत्रः सरस्वति तमिह धातवे कः ॥ ४९ ॥

यः । ते । स्तनः । शशयः । यः । मयःऽभूः । येन । विश्वा । पुष्यसि । वार्याणि ।
यः । रत्नऽधाः । वसुऽवित् । यः । सुऽदत्रः । सरस्वति । तम् । इह । धातवे । करिति कः ॥४९॥

हे [v]सरस्वति [v]ते तव संबन्धी [v]यः [v]स्तनः स्तनवच्छिशुस्थानीयानां प्राणिनामाप्यायनकारी लौकिकवैदिकसुशब्दरूपः स्तनः [v]शशयः शयानः तव देहे वर्तमानः । [v]यः च स्तनः [v]मयोभूः रसास्वादिनां सुखस्य भावयिता । [v]येन स्तनेन [v]विश्वा सर्वाणि [v]वार्याणि वरणीयान्यभिमतरूपाणि धनानि [v]पुष्यसि भोक्तृभ्यः । [v]यः च[7] स्तनः [v]रत्नधाः बहुविधरमणीयरसानां धारयिता

---

१. क्ष-ज्ञ१-ञ-ट–द्वादशसंख्याकाः । २. क्ष-ज्ञ१-ञ-ट–नाभिस्थानीयानि । ३. क्ष-ज्ञ१-ञ-ट–संबन्धनाः रश्मयः । ४. क्ष-ङ-ज्ञ१–ञ-ट–महत् । ५. क्ष-ञ-ट–रथचक्रस्य शङ्कवः । ६. क्ष-ञ-ट–इत्येषा । ७. क्ष-ङ-ञ-ट–ते ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vवसुवित्[1] वसूनां वासयितॄणां[2] धनानां वेत्ता लब्धा वेदयिता वा । किंच Vयः स्तनः Vसुदत्रः शोभनदानः । 'सुदत्रः कल्याणदानः' ( निरु. ६. १४ ) इति निरुक्तम् । अत्र असकृत् यच्छब्दश्रवणं स्तनस्य अतिप्रशस्तत्वज्ञापनार्थम् । हे देवि Vतं तादृशं सर्वप्राण्युपकारकं सूक्तमयं स्तनम् Vइह अस्मिन्कर्मणि इदानीं वा Vधातवे अस्माभिर्धातुं पातुं पानाय Vकः कुरु ॥

अग्निमन्थने 'यज्ञेन यज्ञम्' इत्येषा परिधानीया । 'यज्ञेन यज्ञमयजन्त देवा इति परिदध्यात्' ( आश्व. श्रौ. २. १६ ) इति सूत्रितत्वात् ॥

यज्ञेनं यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥ ५० ॥

यज्ञेनं । यज्ञम् । अयजन्त । देवाः । तानिं । धर्माणि । प्रथमानिं । आसन् ।
ते । ह । नाकंम् । महिमानः । सचन्त । यत्रं । पूर्वे । साध्याः । सन्ति । देवाः ॥ ५० ॥

Vदेवाः व्यवहर्तारो यजमानाः Vयज्ञेन निर्मथ्याग्निना[3] Vयज्ञं होमसाधनमाहवनीयम् Vअयजन्त पूजितवन्तः अनुष्ठानाय संयोजितवन्त इत्यर्थः । 'अग्निं मथित्वा प्रहरति तेनैवाग्नय आतिथ्यं क्रियते' ( तै. सं. ६. २. १. ७ ) इति हि तैत्तिरीयकम् । Vतानि Vधर्माणि अग्निसाधनानि कर्माणि Vप्रथमानि। प्रथस इति मुख्यनाम । प्रतमानि प्रकृष्टतमानि Vआसन् फलप्रसवसमर्थान्यभवन्नित्यर्थः । Vते Vह ते च यजमानाः Vनाकम्। नास्मिन्नकमस्तीति नाकः स्वर्गः । तं Vमहिमानः माहात्म्ययुक्ताः Vसचन्त संगताः । कीदृशं नाकम् । Vयत्र यस्मिन्नाके Vपूर्वे पूर्वतनाः Vसाध्याः साधनाः[4] यज्ञादिसाधनवन्तः । कर्मदेवा इत्यर्थः । ते Vसन्ति निवसन्ति तं सचन्त । तस्मादिदानीमपि मनुष्यैः एवं कर्तव्यमित्यर्थः । यद्वा। देवा इदानीं देवभागमापन्नाः[5] पूर्वं यज्ञेनाग्निना पशुभूतेन यज्ञं यष्टव्यमग्निमयजन्त पूजितवन्तः। अग्नेरेव मूर्तिभेदेन देवत्वं च पशुत्वं च द्रष्टव्यम् । 'अग्निः पशुरासीत्तमालभन्त तेनायजन्त' इति श्रुतेः । शिष्टं पूर्ववत् । यत्र यस्मिन् स्वर्गे निमित्तभूते सति पूर्वे पूर्वतनाः साध्या देवाः साधनाश्छन्दोऽभिमानिनः । आदित्या अङ्गिरसश्च साध्या देवा उच्यन्ते । 'छन्दांसि वै साध्या देवास्तेऽग्रेऽग्निनाग्निमयजन्त ते स्वर्गं लोकमायन्नादित्याश्चैवेहासन्नङ्गिरसश्च तेऽग्रेऽग्निनाग्निमयजन्त ते स्वर्गं लोकमायन्' ( ऐ. ब्रा. १. १६ ) इति ब्राह्मणम् । एते देवाः स्वर्गे सन्ति भवन्ति स्वर्गप्राप्ताः[6] इत्यर्थः । यद्वा । यज्ञेन ज्ञानादियज्ञेन यज्ञं विष्णुमयजन्त पूजयन्ति । ते नाकं विष्णुलोकं महानुभावाः सचन्त संगच्छन्ते । यत्र पूर्वे साध्यादयो देवाः सन्ति तत्स्थानम् । 'अग्निनाग्निमयजन्त देवाः' ( निरु. १२. ४१ ) इत्यादि निरुक्तमनुसंधेयम् ॥

---

१. क्ष-ङ-ञ-ञ१-ञ-ट-यश्च वसुवित् । २. क्ष-ञ-ट-निवासयितॄणाम् । ३. क्ष-ञ-ञ-ट-निर्मन्थ्याग्निना । ४. ङ-ञ१-'साधनाः' नास्ति । ५. क्ष-ङ-ञ-ञ१-ञ-ट-देवभावमापन्नाः । ६. क्ष-ञ१-ञ-ट-स्वर्गं प्राप्ताः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

समानमेतदुदकमुच्चैत्यव चाहाभिः ।
भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः ॥ ५१ ॥

समानम् । एतत् । उदकम् । उत् । च । एति । अव । च । अहःऽभिः ।
भूमिम् । पर्जन्याः । जिन्वन्ति । दिवम् । जिन्वन्ति । अग्नयः ॥ ५१ ॥

vएतत् प्रसिद्धम् vउदकं vसमानम् एकरूपमित्यर्थः । vअहभिः कैश्चिदहोभिः ग्रीष्मकालीनैः vउच्चैति ऊर्ध्वं गच्छति । तथा अहभिः[1] वर्षकालीनैरेव तदुदकम्[1] vअव vच एति अवाङ्मुखं च गच्छति ॥ ' चवायोगे प्रथमा ' इति प्रथमा विभक्तिर्न निहन्यते ॥ रश्मिनाड्यैव भूमिं प्राप्नोति । तदेवोच्यते । vपर्जन्याः प्रीणयितारो मेघाः vभूमिं vजिन्वन्ति उदकसंस्त्यायेन सस्याद्युत्पादनद्वारा भूमिष्ठान् प्रीणयन्ति । तथा vअग्नयः आहवनीयाद्याः स्वे हुते आहुत्या vदिवं द्युलोकस्थान् देवान् vजिन्वन्ति प्रीणयन्ति ॥

सरस्वद्देवताके पशौ ' दिव्यं सुपर्णम् ' इति वपायाज्या । ' दिव्यं सुपर्णं वायसं बृहन्तं स वावृधे नर्यो योषणासु ' ( आश्व. श्रौ. ३. ८ ) इति सूत्रितत्वात् । अन्वारम्भणीयायां सरस्वद्यागे एवैव याज्या । सूत्रितं च—' दिव्यं सुपर्णं वायसं बृहन्तमा सवं सवितुर्यथा ' ( आश्व. श्रौ २.८ ) इति ॥

दिव्यं सुपर्णं वायसं बृहन्तमपां गर्भं दर्शतमोषधीनाम् ।
अभीपतो वृष्टिभिस्तर्पयन्तं सरस्वन्तमवसे जोहवीमि ॥ ५२ ॥

दिव्यम् । सुऽपर्णम् । वायसम् । बृहन्तम् । अपाम् । गर्भम् । दर्शतम् । ओषधीनाम् ।
अभीपतः । वृष्टिऽभिः । तर्पयन्तम् । सरस्वन्तम् । अवसे । जोहवीमि ॥ ५२ ॥

vदिव्यं दिवि भवं vसुपर्णं शोभनगमनं vवायसं गमनशीलं vबृहन्तं महान्तम् vअपां vगर्भं वृष्ट्युदकानां गर्भवदुत्पादकम् । vओषधीनाम् ओषधीः[2] vदर्शतं दर्शनाय । दर्शयन्तमित्यर्थः । यद्वा । ओषधीनां गर्भं दर्शतमिति पृथग्विशेषणम् । किंच vअभीपतः आनुकूल्येन vवृष्टिभिस्तर्पयन्तं जगत्प्रीणयन्तम् । यद्वा । अभीपतोऽभिगमनवतः सलिलाधारांस्तटाकादींस्तर्पयन्तम् अथवा अभिगन्ताहम् । vसरस्वन्तम् उदकवन्तम् । सर इत्युदकनाम । देवं सूर्यं वा vअवसे रक्षणाय vजोहवीमि पुनःपुनः आह्वयामि ॥ ॥ २३ ॥ ॥ २२ ॥

त्रयोविंशेऽनुवाके पञ्चदश सूक्तानि । तत्र ' कया शुभा ' इति पञ्चदशर्चं प्रथमं सूक्तं त्रैष्टुभम् । अत्रानुक्रमणिका–' कया पञ्चोना संवादस्तृतीयाद्ययुजो मरुतां वाक्यमन्त्यस्तृचोऽगस्त्यस्य शिष्टा इन्द्रस्यैकादशी च मरुत्वांस्त्विन्द्रो देवता ' इति । अत्र इन्द्रागस्त्यमरुतां संवादः प्रतिपाद्यते । तत्र तृतीयापञ्चमीसप्तमीनवमीनां मरुद्वाक्यरूपत्वात् ते एव ऋषयः । ' यस्य वाक्यं स ऋषिः ' (अनु. २. ४) इति न्यायात् । अन्त्यतृचस्यागस्त्यवाक्यत्वात् स एव ऋषिः । शिष्टा युज आद्या च एकादशी च इन्द्रस्य वाक्यम् । अतः स एव ऋषिः । अत्र 'या तेनोच्यते सा देवता' ( अनु. २. ५ ) इति सामान्या-

---

१. क्ष-ज्ञ१-ञ-ट–कैश्चिदहोभिः वर्षकालीनैरेतदुदकम् । २. क्ष-ज्ञ१-ञ-ट–' ओषधीः ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पवादेन कृत्स्नस्य मरुत्वद्गणक इन्द्रो देवता। संसवचातुर्विंशकयोर्मरुत्वतीयशस्त्रे निविद्धानीयारूपूर्वमेतत्सूक्तम्। 'यदि पर्यायान्', 'मरुत्वतीये' इति खण्डयोः सूत्रितं–'कया शुभेति च मरुत्वतीये पुरस्तात्सूक्तस्य शंसेत्' ( आश्व. श्रौ. ६. ६; ७. ३ ) इति। आभिप्लविके पञ्चमेऽहनि मरुत्वतीये एतदेव सूक्तम्। 'पञ्चमस्य कया शुभा यस्मिन्मश्वङ्ग इति मध्यंदिनः' (आश्व. श्रौ. ७.७ ) इति सूत्रितत्वात्। महाव्रते[1] मरुत्वतीयशस्त्रे एतत्सूक्तम्। पञ्चमारण्यके–'कया शुभा सवयसः सनीळा मरुत्वाँ इन्द्र वृषभो रणाय' ( ऐ. आ. ५.१.१ ) इत्युक्तत्वात्। विषुवति मरुत्वतीये एतदेव निविद्धानीयम्। 'त्यं सु मेषं कया शुभेति च मरुत्वतीयम्' ( आश्व. श्रौ. ८. ६ ) इति सूत्रितत्वात्। अस्य विनियोगं शौनक आह—'ज्ञातिपुत्रसुहृन्मित्रैर्यश्च राज्यं चिकीर्षति। नित्यं स नियतो भूत्वा सूक्तं तु मनसा जपेत्। कया शुभेति पैशुन्यं कृत्वाचार्यनृपद्विजैः। श्रुत्वा पररहस्यं तु गुरोरप्याह शौनकः' ( ऋग्वि. १. १४५–१४६ ) इति॥

कया॑ शु॒भा सव॑यस॒: सनी॑ळा॒: समा॒न्या म॒रुत॒: सं मि॑मिक्षुः।
कया॑ म॒ती कुत॒ एता॑स॒ एते॑ऽर्चन्ति॒ शुष्मं॑ वृष॒णो व॑सू॒या ॥ १ ॥

कया॑। शु॒भा। सऽव॑यसः। सऽनी॑ळाः। स॒मा॒न्या। म॒रुत॑ः। सम्। मि॒मि॒क्षुः।
कया॑। म॒ती। कुत॑ः। आऽइ॑तासः। एते॑। अर्च॑न्ति। शुष्म॑म्। वृ॒ष॒णः। व॒सु॒ऽया ॥ १ ॥

इन्द्रवाक्यम्। [v]सवयसः समानवयस्काः [v]सनीळाः समानस्थानाः एते [v]मरुतः [v]कया [v]शुभा कैरपि[2] दुर्ज्ञेयया[2] शोभया [v]समान्या सर्वेषामेकरूपया महत्या युक्ताः। यद्वा। शुचिर्युदकनाम। उक्तरूपया शुभा उदकेन। [v]सं [v]मिमिक्षुः लोकं सम्यक्[3] सिञ्चन्ति[3]॥ मिहिसमानार्थः[4] मिमिक्षतिर्धातुः॥ यद्वा। मां युद्धादिषु प्रवर्तमानं सं मिमिक्षुः। तदर्थम् एते मरुतः [v]कया अनिश्चेयया[5] [v]मती मत्या [v]कुतः देशात् [v]एतासः आगताः। आगत्य च [v]एते [v]वृषणः वर्षितारः[6] [v]वसूया वसूयया॥ 'सुपां सुलुक्०' इति पूर्वसवर्णदीर्घः॥ धनेच्छया[7]। यद्वा। वसवो वासयितारो वा॥ तेनैव जसो याजादेशः॥ [v]शुष्मं बलं वृष्टिप्रदानजनितं लोके [v]अर्चन्ति पूजयन्ति जगति[8] कुर्वन्ति। यद्वा। मम[9] बलं[9] वर्धयन्तीत्यर्थः। 'मरुतो हैनं नाजहुः' ( ऐ. ब्रा. ३.२० ) इति श्रुतेः। अत्र इन्द्रमरुत्संवादरूपे सर्वत्र प्राणजीवात्मपरतयापि योजनीयम्। अत्रापि इन्द्रो ब्रूते॥

कस्य॒ ब्रह्मा॑णि जुजुषु॒र्युवा॑नः को अ॑ध्व॒रे म॒रुत॒ आ व॑वर्त।
श्ये॒नाँइ॑व॒ ध्रज॑तो अ॒न्तरि॑क्षे॒ केन॑ म॒हा मन॑सा रीरमाम ॥ २ ॥

कस्य॑। ब्रह्मा॑णि। जु॒जु॒षुः। युवा॑नः। कः। अ॒ध्व॒रे। म॒रुत॑ः। आ। व॒व॒र्त॒।
श्ये॒नान्ऽइ॑व। ध्रज॑तः। अ॒न्तरि॑क्षे। केन॑। म॒हा। मन॑सा। रीर॒मा॒म॒ ॥ २ ॥

---

१. क्ष-ञ१-ज-ट–महाव्रतेऽपि। २. क्ष-ङ-ञ१-ज-ट–कयापि दुर्निरूपया। ३. क्ष-ञ१-ज-ट–वृष्टयुदकेन सम्यक् सेचयन्ति। ४. क्ष-ञ-ञ-ज-ट–मिहि सेचनार्थः; ञ१–मिहिः सेचनार्थः। ५. क्ष-ङ-ञ१-ज-ट–अतिश्रेष्ठया। ६. क-क्ष-च-ञ१-ज-ट–वर्षितारो युवान इत्यर्थः। ७. क्ष-ञ१-ज-ट–वस्वादिधनेच्छया। ८. क्ष-ङ-ञ-ञ१-ज-ट–जगतः पूजाम् ( ङ-ञ१–पूजनम् )। ९. क्ष-ङ-ञ१-ज-ट–गमनबलम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

Vयुवानः नित्यतरुणाः महानुभावाः मरुतः Vकस्य महाभागस्य Vब्रह्माणि परिवृढानि हवींषि Vजुजुषुः सेवन्ते । Vकः च महान् Vअध्वरे स्वकीये यागे Vमरुतः एतान् Vआ Vववर्त यागान्तरेभ्यो निवर्तयति । दुर्निर्ग्रहत्वे दृष्टान्तमाह । Vअन्तरिक्षे Vध्रजतः गच्छतः Vश्येनान् शंसनीयगमनान् एतन्नामकान् पक्षिणः Vइव । Vकेन तत्प्रीतिसाधनेन Vमहा महता Vमनसा मननवता स्तोत्रेण Vरीरमाम रमेमहि[1] ॥

अथ मरुत इन्द्रेणोक्तास्तृतीययानया प्रतिब्रुवते ॥

**कुतस्त्वमिन्द्र माहिनः सन्नेको यासि सत्पते किं ते इत्था ।**
**सं पृच्छसे समराणः शुभानैर्वोचेस्तन्नो हरिवो यत्ते अस्मे ॥ ३ ॥**

कुतः । त्वम् । इन्द्र । माहिनः । सन् । एकः । यासि । सत्ऽपते । किम् । ते । इत्था ।
सम् । पृच्छसे । समऽराणः । शुभानैः । वोचेः । तत् । नः । हरिऽवः । यत् । ते । अस्मे इति ॥३॥

हे Vइन्द्र Vसत्पते सतां पालक Vत्वं Vमाहिनः महनीयः पूजनीयः अनुचरैरनुगन्तव्य इत्यर्थः । तथाभूतः Vसन् अपि Vएकः असहायः सन् Vकुतः Vयासि कुतः कारणाद्यासि । यद्वा । कुत्र यासि । Vते तव Vइत्था इत्थं Vकिम् । किं त्वमेवमेव[2] किं न कोऽप्यनुचरोऽस्ति । किंच त्वं Vसमराणः[3] अस्माभिः संगच्छमानः Vसं Vपृच्छसे समीचीनं पृच्छसि । हे Vहरिवः हरिभ्यां तद्वन्निन्द्र Vते तव Vअस्मे अस्मासु Vयत् वक्तुमिष्टतममस्ति Vतत् Vनः अस्मभ्यं Vशुभानैः शोभमानैर्वचनैः Vवोचेः ब्रूहि ॥

**ब्रह्माणि मे मतयः शं सुतासः शुष्म इयर्ति प्रभृतो मे अद्रिः ।**
**आ शासते प्रति हर्यन्त्युक्थेमा हरी वहतस्ता नो अच्छ ॥ ४ ॥**

ब्रह्माणि । मे । मतयः । शम् । सुतासः । शुष्मः । इयर्ति । प्रऽभृतः । मे । अद्रिः ।
आ । शासते । प्रति । हर्यन्ति । उक्था । इमा । हरी इति । वहतः । ता । नः । अच्छ ॥४॥

अथैवं तैः पृष्टोऽनया चतुर्थ्या इन्द्रः प्रत्याह । हे मरुतः Vब्रह्माणि सर्वाणि कर्माणि हवींषि वा Vमे मम स्वभूतानि । तथा Vमतयः च मननयुक्ताः स्तुतयश्च मे मम Vशं सुखकार्याः । यद्वा । मे मतयो बुद्धयः तेष्वेव वर्तन्ते इति शेषः । तथा Vसुतासः अभिषुताः सोमाः मे मदीया मदर्था एव । अतो यज्ञं प्रति गन्तव्यमित्यर्थः । किंच मध्ये राक्षसादिबाधपरिहाराय Vशुष्मः । बलनामैतत् । बलवान् Vमे मदीयः Vअद्रिः शत्रूणां भक्षको वज्रः Vप्रभृतः सन् Vइयर्ति गच्छत्येव लक्ष्यं प्रति न च निवर्तते । न केवलं हविरादीनां मदीयत्वमेव अपि तु यजमानाः Vआ Vशासते मामेव प्रार्थयन्ते । किंच Vउक्था उक्थानि शस्त्राणि मां Vप्रति Vहर्यन्ति कामयन्ते मामेव शंसन्तीत्यर्थः । किंच Vनः अस्मदीयौ Vइमा Vहरी इमौ

---

१. क्ष-ञ-ट–रमयामः । २. क्ष-ञ-ट–स एवमेव; झ१–सरूपमेव । ३. क्ष-झ१-ञ-ट–समराणः समरणः सम्यक् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अश्वौ [v]ता तानि गन्तव्यानि हविरादीनि [v]अच्छ अभिप्राप्तुं मां [v]वहतः अभिमतदेशं प्रापयतः । अत एव शीघ्रं गच्छामि । युष्माभिरपि तत्प्राप्तुं गन्तव्यमित्यर्थः । अतोऽसहाय इति मन्तव्यमिति भावः ॥

अतो॑ व॒यम॑न्त॒मेभि॑र्युजा॒नाः स्वक्ष॑त्रेभिस्त॒न्व१॑: शुम्भ॑माना: ।
महो॑भि॒रेता॒ उप॑ युज्महे॒ न्विन्द्र॑ स्व॒धामनु॒ हि नो॑ ब॒भूथ॑ ॥ ५ ॥

अत॑: । व॒यम् । अ॒न्त॒मेभि॑: । यु॒जा॒ना: । स्वऽक्ष॑त्रेभि: । त॒न्व॑: । शुम्भ॑माना: ।
मह॑:ऽभि: । एता॑न् । उप॑ । यु॒ज्म॒हे॒ । नु । इन्द्र॑ । स्व॒धाम् । अनु॑ । हि । न॒: । ब॒भूथ॑ ॥ ५ ॥

एवमुक्ता मरुतः तमेवं ब्रुवते । हे इन्द्र त्वं यस्मात् एवं करोषि [v]अतः कारणात् [v]वयम् अपि [v]अन्तमेभिः अन्तिकतमैः अश्वैः[1] [v]युजानाः युक्ताः सन्तः । कीदृशैः । [v]स्वक्षत्रेभिः स्वायत्तबलैः[2] । किंच [v]महोभिः तेजोभिः [v]तन्वः आत्मशरीराणि [v]शुम्भमानाः दीपयन्तः हर्षं प्राप्नुवाना इत्यर्थः । यद्वा । महोभिः स्वमहत्त्वेन युक्ता वयम् [v]एतान् गन्तॄन्[3] [v]नु क्षिप्रम् [v]उप [v]युज्महे[4] तव साकं हविरादि स्वीकुर्महे इत्यर्थः । हे [v]इन्द्र त्वमपि [v]नः अस्मत्संबन्धि [v]स्वधाम् उदकं बलं वा [v]अनु [v]बभूथ [v]हि अस्मत्सृष्टोदकजन्यं हविः अनुभवसि खलु । हिशब्दः परस्परोपकार्योपकारिभावप्रसिद्धिद्योतनार्थः ॥ ॥ २४ ॥

क॒१॒॑ स्या वो॑ मरुतः स्व॒धासी॒द्यन्मामेकं॑ स॒मध॑त्ताहि॒हत्ये॑ ।
अ॒हं ह्यु१॒॑ग्रस्त॑विष॒स्तुवि॑ष्मा॒न्विश्व॑स्य॒ शत्रो॒रन॑मं वध॒स्नैः ॥ ६ ॥

क॑ । स्या । व॒: । म॒रु॒त॒: । स्व॒धा । आ॒सी॒त् । यत् । माम् । एक॑म् । स॒म्ऽअध॑त्त । अ॒हि॒ऽहत्ये॑ ।
अ॒हम् । हि । उ॒ग्र॒: । त॒वि॒ष॒: । तुवि॑ष्मान् । विश्व॑स्य । शत्रो॑: । अन॑मम् । व॒ध॒ऽस्नैः ॥ ६ ॥

[v]स्या सा [v]स्वधा तदुदकं बलं वा [v]वः युष्माकं संबन्धि [v]क [v]आसीत् नैवासीदित्यर्थः[5] । अस्माकमुदकं त्वमनुभवसीति ब्रूथ[6] । [v]यत् या स्वधा [v]एकम् असहायं [v]माम् [v]अहिहत्ये वृष्ट्यर्थं मेघहननकर्मणि वृत्रवधे वा [v]समधत्त सहितमभूत् । समासीदिति संबन्धः[6] । असहायस्य कथमिति मतं सेत्स्यतीति अतः आह । [v]अहं [v]हि अहं खलु [v]उग्रः उद्गूर्णबलः [v]तविषः बलवान् [v]तुविष्मान् महत्त्वोपेतोऽस्मि । यस्मात् अतिबलोऽहं तस्मात् [v]विश्वस्य कृत्स्नस्य [v]शत्रोः मेघस्य । शत्रुरेवायम्[7] ॥ कर्मणि षष्ठी ॥ सर्वं शत्रुसंघं [v]वधस्नैः वधरूपैः शोधनैः[8] वधकौशलैरित्यर्थः । यद्वा । वध इति वज्रनाम । वधस्नैर्वज्रस्यासनैः क्षेपणप्रकारैः । [v]अनमम् अनमयम्[9] ॥ अन्तर्भावितण्यर्थोऽयम् ॥ वशीकरोमीत्यर्थः ॥

---

१. क्ष-झ१-ञ-ट-अश्वादिभिः । २. क्ष-झ१-ञ-ट-स्वकीयबलैः । ३. क-गतॄ (न्तॄ)न्; क्ष-ञ-ट-महानुभावान् । ४. क्ष-ञ-ट-युज्महे । बहुवचनं पूजार्थम् । ५. क्ष-ञ-ट-कुत्रासीत् । ६. क्ष-झ१-ञ-ट-ब्रूत । कथं नासीत् इत्याशङ्क्याह । यत् यस्मात् एकमसहायं मामहिहत्ये वृष्ट्यर्थं मेघहननं कर्तुं समधत्त सहितं कृतवन्तो यूयं न कृतवन्त इत्यस्वरेणावगम्यते । ७. क्ष-झ१-ञ-ट-विश्वस्य शत्रोरिति । ८. क्ष-झ१-ञ-ट-शोभनैः । ९. क्ष-झ१-ञ-ट-अनामयम् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

भूरि चकर्थ युज्येभिरस्मे समानेभिर्वृषभ पौंस्येभिः ।
भूरीणि हि कृणवामा शविष्ठेन्द्र क्रत्वा मरुतो यद्वशाम ॥ ७ ॥

भूरि । चकर्थ । युज्येभिः । अस्मे इति । समानेभिः । वृषभ । पौंस्येभिः ।
भूरीणि । हि । कृणवाम । शविष्ठ । इन्द्र । क्रत्वा । मरुतः । यत् । वशाम ॥ ७ ॥

अथैवमुक्ताः[1] इन्द्रं[1] पुनराहुः । हे इन्द्र Vवृषभ वर्षितः त्वं Vभूरि Vचकर्थ प्रभूतं कृतवानसि सत्यमेव । तथापि Vअस्मे अस्माकं Vसमानेभिः समानैः Vयुज्येभिः अस्माभिर्युक्तैः Vपौंस्येभिः पुंसः कर्मभिः सामर्थ्यैरेव चकर्थ । न तु एक एवेत्यर्थः । हे Vशविष्ठ । शव इति बलनाम । हे इन्द्र बलवत्तम वयं Vभूरीणि Vहि त्वत्कृतादपि प्रभूतानि कर्माणि Vकृणवाम कृतवन्तः स्म । हे Vइन्द्र Vक्रत्वा क्रतुना कर्मणा Vयत् यद्वृष्ट्यादिकं Vवशाम कामयामहे । तानि त्वत्तोऽप्यधिकानीत्यर्थः । यतो वयं Vमरुतः ॥ छान्दसमनुदात्तत्वम् ॥ एतेन स्वमहत्त्वं स्थापितं[2] भवति । स्वरो व्यस्तः । अथवा इन्द्रस्येदं वाक्यम् । हे मरुतः यत्[3] यस्यैव तत् तस्यैव भवतु[3] । तर्हि अहं च यूयं च सहैव क्रत्वा कर्मणा यद्वशाम यत् वृष्टिकर्म कामयामहे तस्मादुदकं समानमेवेत्यर्थः । एवं मरुत इति निघात-स्वरस्य[4] व्याख्यानम्[4] ॥

वधीं वृत्रं मरुत इन्द्रियेण स्वेन भामेन तविषो बभूवान् ।
अहमेता मनवे विश्वश्चन्द्राः सुगा अपश्चकर वज्रबाहुः ॥ ८ ॥

वधीम् । वृत्रम् । मरुतः । इन्द्रियेण । स्वेन । भामेन । तविषः । बभूवान् ।
अहम् । एताः । मनवे । विश्वऽचन्द्राः । सुऽगाः । अपः । चकर । वज्रऽबाहुः ॥ ८ ॥

इदानीम् इन्द्रः आह[5] । हे Vमरुतः Vअहम्[6] इन्द्रः Vइन्द्रियेण Vस्वेन Vभामेन कोपेन Vतविषः बलवान् Vबभूवान् भूतः संपन्नः । कस्मै कमिति तदुच्यते[6] । Vमनवे मनोरर्थाय Vएताः Vविश्वश्चन्द्राः सर्वाह्लादकाः Vसुगाः सुगमनाः सर्वत्र नद्यादिषु गमनशीलाः Vअपः वृष्ट्युदकानि Vचकर चकार कृतवानस्मि । यतोऽहं Vवज्रबाहुः । अनेन सहायनैरपेक्ष्यमुक्तं भवति ॥

---

१. क्ष-झ१-ञ-ट-अथैवमिन्द्रेणोक्ताः मरुतः । २. क्ष-झ१-ञ-ट-ख्यापितम् । ३. क्ष-झ१-ञ-ट-यद्येवम् । ४. क्ष-झ१-ञ-ट-निघातस्वारस्येन व्याख्यातम् ( झ१-व्याख्यानम् ) । ५. क्ष-ङ-झ१-ञ-ट-समानकर्तृत्वमनङ्गीकुर्वन्नाह । ६. क्ष-ङ-झ१-ञ-ट-अहमेव वृत्रं मेघमसुरं वावधीं घातितोऽस्मि । केन साधनेनेति तदुच्यते । इन्द्रियेण स्वसामर्थ्येन । तच्च कथं प्राप्तमिति तदुच्यते । स्वेन भामेन उदकावर्षणजातकोपेन ( ङ-झ१-उदकवर्षणजातकोपेन ) तविषो बलवान् बभूवान् । कस्मिन्निति तदुभयमुच्यते ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अनुत्तमा ते मघवन्नकिर्नु न त्वावाँ अस्ति देवता विदानः ।
न जायमानो नशते न जातो यानि करिष्या कृणुहि प्रवृद्ध ॥ ९ ॥

अनुत्तम्। आ। ते। मघऽवन्। नकिः। नु। न। त्वाऽवान्। अस्ति। देवता। विदानः। न। जायमानः। नशते। न। जातः। यानि। करिष्या। कृणुहि। प्रऽवृद्ध ॥ ९ ॥

इदानीं ते मरुतो हर्षेण प्रत्याहुः। vआ इति स्मरणे। स्मृतवन्तो वयम् इदानीं हे vमघवन् vते त्वया vअनुत्तम् अप्रेरितं vनकिर्नु नैवास्ति। नु निश्चये। त्वया यदुक्तं तत्सत्यमित्यर्थः। हे देव vत्वावान् त्वत्सदृशः vविदानः विद्वान्॥ व्यत्ययेन शानच्॥ जयोपायवेदिता vदेवता देवः vन vअस्ति। किंच हे vप्रवृद्ध अतिबल vजायमानः vजातः वा कश्चिद्देवो मर्त्यो वा त्वं vयानि वृत्रवधादीनि vकरिष्या कर्तव्यानि vकृणुहि कुरुषे तानि vन vनशते न व्याप्नोति। नशतिर्व्याप्तिकर्मा। नान्यः त्वच्चेष्टितानुकार्येवेत्यर्थः॥

एकस्य चिन्मे विभ्वस्त्वोजो या नु दधृष्वान्कृणवै मनीषा ।
अहं ह्युग्रो मरुतो विदानो यानि च्यवमिन्द्र इदीश एषाम् ॥ १० ॥

एकस्य। चित्। मे। विऽभु। अस्तु। ओजः। या। नु। दधृष्वान्। कृणवै। मनीषा। अहम्। हि। उग्रः। मरुतः। विदानः। यानि। च्यवम्। इन्द्रः। इत्। ईशे। एषाम् ॥ १० ॥

इदानीम् इन्द्र आह। vमे मम vएकस्य vचित् एकस्यैव vविभु सर्वत्रगमनशीलम्[1] vओजः बलम् vअस्तु। यद्वा। बलम् एकस्यैवास्तु किमर्थमिति चेत् उच्यते। vया यानि कर्माणि vमनीषा मनीषया मनसः ईषया[2] vदधृष्वान् धर्षितवानहं vनु क्षिप्रं vकृणवै कर्तुं शक्नुवानि। हे vमरुतः vअहं vहि अहं खलु vउग्रः उद्गूर्णबलः vविदानः वेदनावान्। vयानि यानि वसूनि vच्यवं अवगच्छामि vएषाम् अहमेव vइन्द्र vइत् ईश्वर एव सन् vईशे ईश्वरो भवामि। अथवा विदानोऽहं यानि च्यवं यान्युद्दिश्य गच्छेयं एषामीशे। यतोऽहमिन्द्रः अतः शक्त इत्यर्थः॥ ॥ २५ ॥

अमन्दन्मा मरुतः स्तोमो अत्र यन्मे नरः श्रुत्यं ब्रह्म चक्र ।
इन्द्राय वृष्णे सुमखाय मह्यं सख्ये सखायस्तन्वे तनूभिः ॥ ११ ॥

अमन्दत्। मा। मरुतः। स्तोमः। अत्र। यत्। मे। नरः। श्रुत्यम्। ब्रह्म। चक्र। इन्द्राय। वृष्णे। सुऽमखाय। मह्यम्। सख्ये। सखायः। तन्वे। तनूभिः ॥ ११ ॥

---

१. क्ष-ज्ञ१-ज-ट-सर्वत्रभवनशीलम्। २. क्ष-ज-ट-ईषया प्रज्ञया; ङ-ञ-ज्ञ१-ईषया प्रज्ञया वा।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इदमपि इन्द्रवाक्यम् । हे vमरुतः vमा माम् vअत्र अस्मिन् उदकोत्पादनविषये vस्तोमः स्तोत्रम् vअसन्दत् मादयति मोदयते वा । हे vनरः vसखायः यूयं vमे मम vयत् vश्रुत्यं सर्वैः श्रोतव्यं vब्रह्म परिवृढमेघधारणादिरूपं vचक्र[1] कृतवन्तः[1]। ' स्वप्रभूतं स्तोत्रं वानुत्तमा ते ' इत्यादिकम् । vइन्द्राय परमैश्वर्यगुणकाय vवृष्णे अभिमतवर्षित्रे vसुमखाय शोभनयागाय vसख्ये युष्माभिः समानख्यानाय vतनूभिः अनेकशरीरैरुपेताय vमह्यं मम vतन्वे मदीयशरीरपोषाय भवतु । यद्वा । तनूभिरस्मच्छरीरभूतैर्युष्माभिः कृतं मह्यमेवास्त्वित्यर्थः ॥

**एवेदेते प्रति मा रोचमाना अनेद्यः श्रव एषो दधानाः ।**
**संचक्ष्या मरुतश्चन्द्रवर्णा अच्छान्त मे छदयाथा च नूनम् ॥ १२ ॥**

एव । इत् । एते । प्रति । मा । रोचमानाः । अनेद्यः । श्रवः । आ । इषः । दधानाः ।
सम्ऽचक्ष्य । मरुतः । चन्द्रऽवर्णाः । अच्छान्त । मे । छदयाथ । च । नूनम् ॥ १२ ॥

हे vमरुतः vएवेत् एवमेव vएते यूयं vमा मां vप्रति vरोचमानाः मद्विषये संप्रीयमाणा मां ख्यापयन्तो वा vअनेद्यः अनन्तिकस्थं vश्रवः कीर्तिम् vइषः च vदधानाः । vआ इति चार्थे । यद्वा । अनेद्य इति प्रशस्यनाम । प्रशस्यं यशोऽस्मत्तो दधाना अस्माभिर्वा धार्यमाणाः । vचन्द्रवर्णाः । चन्द्रमिति हिरण्यनाम । सुवर्णवर्णा यूयं vमे मां vसंचक्ष्य सम्यक्प्रकाश्य vनूनं निश्चयम् vअच्छान्त यशोभिराच्छादितवन्तः vछदयाथ आच्छादयथ vच । मां प्रति सर्वदा रोचमाना मय्येव कीर्तिमन्नं च दधाना मत्कृतैः कर्मभिर्मामेव स्तुतेत्यर्थः ॥

**को न्वत्र मरुतो मामहे वः प्र यातन सखीँरच्छा सखायः ।**
**मन्मानि चित्रा अपिवातयन्त एषां भूत नवेदा म ऋतानाम् ॥ १३ ॥**

कः । नु । अत्र । मरुतः । ममहे । वः । प्र । यातन । सखीन् । अच्छ । सखायः ।
मन्मानि । चित्राः । अपिऽवातयन्तः । एषाम् । भूत । नवेदाः । मे । ऋतानाम् ॥ १३ ॥

हे vमरुतः युष्मान् vअत्र लोके vको नु खलु मर्त्यः vममहे पूजयति । हे vसखायः सर्वस्य सखिवत्प्रियकारिणः सन्तः vसखीन् हविष्प्रदानेन सखिभूतान् यजमानान् vअच्छ आभिमुख्येन प्रति vप्र vयातन गच्छत । हे vचित्राः चायनीयाः यूयं vमन्मानि मननीयानि धनानि vअपिवातयन्तः संपूर्णं प्रापयन्तः vभूत भवत । किंच vमे मदीयानाम् vएषाम् vऋतानाम् अवितथानां vनवेदाः भूत ज्ञातारो भवत ॥

---

१. ख-च-ज्ञ-फ–कर्म च कृतवन्तः स्थ; त–चक्र कृतवन्तः स्थ ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आ यद्दुवस्याद्दुवसे न कारुरस्माञ्चक्रे मान्यस्य मेधा ।
ओ षु वर्त्त मरुतो विप्रमच्छेमा ब्रह्माणि जरिता वो अर्चत् ॥ १४ ॥

आ । यत् । दुवस्यात् । दुवसे । न । कारुः । अस्मान् । चक्रे । मान्यस्य । मेधा ।
ओ इति । सु । वर्त्त । मरुतः । विप्रम् । अच्छ । इमा । ब्रह्माणि । जरिता । वः । अर्चत् ॥ १४ ॥

हे मरुतः [v]दुवस्यात् युष्मत्परिचरणार्हात् स्तोत्रात् तेन स्तोत्रेण [v]दुवसे परिचरणाय पर्याप्ता [v]कारुः कर्त्री स्तुतिकुशला [v]मान्यस्य माननीयस्य विदुषः [v]मेधा बुद्धिः [v]अस्मान् । [v]न इति संप्रत्यर्थे । इदानींतनान् [v]आ [v]चक्रे आभिमुख्येन करोति प्राप्नोतीत्यर्थः । यद्वा । षष्ठीबहुवचने[1] इदं रूपम् । दुवस्यानां परिचरणार्हाणां दुवसे परिचरणायेत्यर्थः[2] । अतो हे [v]मरुतः[2] यूयं [v]विप्रं मेधाविनं यजमानं माम् अगस्त्यम् [v]अच्छ आभिमुख्येन प्रातुं [v]सु सुष्ठु [v]ओ [v]वर्त्त । ओ इति निपातद्वयसमुदायरूपः एको निपातः । आङित्याभिमुख्येन[3] । उकारोऽवधारणे । आवर्तध्वमेव । किमर्थमेवमिति उच्यते । [v]इमा [v]ब्रह्माणि इमानि परिवृढानि कर्माण्युद्दिश्य [v]जरिता[4] स्तोता [v]वः युष्मान् [v]अर्चत् अर्चति । यस्मादेवं तस्मादावर्तध्वमित्यर्थः ॥

अथ पञ्चदेश्यां[5] सूक्तोपक्रममारभ्य कृतां स्तुतिं मरुद्भ्यो निवेद्य अभिमतमाशास्ते ॥

एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥ १५ ॥

एषः । वः । स्तोमः । मरुतः । इयम् । गीः । मान्दार्यस्य । मान्यस्य । कारोः ।
आ । इषा । यासीष्ट । तन्वे । वयाम् । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ १५ ॥

हे [v]मरुतः [v]एषः [v]स्तोमः इदानींक्रियमाणप्रकारं स्तोत्रं [v]वः युष्मदर्थं युष्मत्प्रीणनाय भवत्विति शेषः । तथा [v]इयं [v]गीः स्तुतिरूपा वागपि वो युष्मदर्थाय । यस्मात् एवं तस्मात् [v]मान्दार्यस्य स्तुतिविशेषैर्मन्दयितुः स्तुतिभिर्मदस्य प्रेरयितुर्वा [v]मान्यस्य वरप्रदानादिना माननीयस्य[6] [v]कारोः स्तोतुः [v]इषा इच्छया [v]आ [v]यासीष्ट आगच्छत । किमर्थम् । [v]तन्वे शरीराय तत्पोषायेत्यर्थः[7] । [v]वयां वयमपि [v]इषम् अन्नं [v]वृजनं बलं [v]जीरदानुं जयशीलदानम्[8] एतत्सर्वं [v]विद्याम । युष्मास्वागतेषु यज्ञसंपूर्त्येष्टयादिद्वारा[9] लभेमहि ॥ ॥ २६ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्[10] । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण[11] विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये द्वितीयाष्टके तृतीयोऽध्यायः समाप्तः ॥

---

१. क्ष-ञ१-ञ-ट-षष्ठीबहुवचनस्थाने । २. क्ष-ङ-ञ१-ञ-ट-परिचरणाय । युष्मत्स्तुतियोग्या मतिर्नास्ति तथापि कृपया हे मरुतः। ३. क्ष-ञ-ट-आ इत्याभिमुख्येन । ४. ङ-ज्ञ-झ-ञ१-जरिता गरिता । ५. क्ष-ञ१-ञ-ट-पञ्चदश्याः । ६. क्ष-ञ१-ञ-ट-मननीयस्य । ७. क्ष-ङ-ञ१-ञ-ट-पोषणाय हविर्भक्षणेन शरीरं वर्धयत । ८. क्ष-ञ१-ञ-ट-जयशीलं दानं जीवनं वा । ९. क्ष-ङ-ञ१-ञ-ट-यज्ञसंपूर्तेः वृष्टयादिद्वारा । १०. क्ष-ञ१-ञ-ट-विदारयन् । ११. क्ष-ञ-ट-सायणामात्येन ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
इत्थं द्वितीयाष्टकगस्तृतीयोऽध्याय आदरात् ।
व्याख्यातः सायणार्येण पुरुषार्थप्रदर्शकः ॥

अथ चतुर्थोऽध्याय आरभ्यते[1]। 'कया शुभा' इत्यस्मिंस्त्रयोविंशेऽनुवाके पञ्चदश सूक्तानि। तत्र 'तन्नु' इत्येतत् द्वितीयं सूक्तं पञ्चदशर्चम्। अत्रानुक्रमणिका– 'तन्न्वगस्त्यो मारुतं हि द्वित्रिष्टुबन्तं मित्रावरुणयोर्दीक्षितयोरुर्वशीमप्सरसं दृष्ट्वा वासतीवरे कुम्भे रेतोऽपतत्ततोऽगस्त्यवसिष्ठावजायेताम्' इति। 'सूक्तसंख्यानुवर्तत आन्यस्याः सूक्तसंख्यायाः' (अनु. १२. १) इति परिभाषितत्वात् पञ्चदशर्चम्। उक्तलक्षणेनागस्त्येन दृष्टत्वात्तस्यार्षम्। 'मारुतं हि' इत्युक्तत्वात् तुह्यादिपरिभाषया इदमादिसूक्तत्रयं मरुद्देवताकम्। अन्त्ये द्वे त्रिष्टुभौ शिष्टास्त्रिष्टुबन्तपरिभाषया जगत्यः। विनियोगो लैङ्गिकः ॥

तन्नु वो॑चाम रभ॒साय॒ जन्म॑ने॒ पूर्वं॑ महि॒त्वं वृ॑ष॒भस्य॑ के॒तवे॑ ।
ऐ॒धेव॒ याम॑न्मरुतस्तुविष्वणो यु॒धेव॑ शक्रास्तवि॒षाणि॑ कर्तन ॥ १ ॥

तत् । नु । वो॒चा॒म॒ । र॒भ॒साय॑ । जन्म॑ने । पूर्व॑म् । म॒हि॒ऽत्वम् । वृ॒ष॒भस्य॑ । के॒तवे॑ ।
ऐ॒धाऽइ॑व । याम॑न् । म॒रु॒तः॒ । तु॒वि॒ऽस्व॒नः॒ । यु॒धाऽइ॑व । श॒क्राः॒ । त॒वि॒षाणि॑ । क॒र्त॒न॒ ॥ १ ॥

हे ᵛमरुतः वयं युष्मदीयं ᵛतत् तादृशं प्रसिद्धं ᵛपूर्वं पूरकं पूर्वतनं वा ᵛमहित्वं[2] माहात्म्यं ᵛनु क्षिप्रं ᵛवोचाम ब्रूमः। किमर्थम्। ᵛरभसाय राभस्ययुक्ताय ᵛजन्मने वेद्यां प्रादुर्भावाय वेद्यां संनिधानाय इत्यर्थः। तदपि किमर्थमित्यत आह। ᵛवृषभस्य फलस्य वर्षितुर्यज्ञस्य ᵛकेतवे प्रज्ञानाय[3]। वायुप्रेरणेन मेघागमनं प्रसिद्धम्। हे ᵛतुविष्वणः गमनसंरम्भेण प्रभूतध्वनियुक्ता हे ᵛशक्राः सर्वमपि कर्तुं शक्ताः यूयं ᵛयामन् यामनि यागगमने प्रस्तुते सति ᵛऐधेव ऐधानि एधःसंबन्धीनि तेजांसीव प्राप्येण महत्त्वेन ᵛतविषाणि बलानि सामर्थ्यानि ᵛकर्तन कुरुत तत्स्तुम इत्यर्थः। तत्र दृष्टान्तः। ᵛयुधेव युद्धेन तत्तद्युद्धनिमित्तं यथा तविषाणि कुरुथ तद्वत् ॥

नित्यं॒ न सू॒नुं मधु॒ बिभ्र॑त॒ उप॒ क्रीळ॑न्ति क्री॒ळा वि॒दथे॑षु॒ घृष्व॑यः ।
नक्ष॑न्ति रु॒द्रा अव॑सा नम॒स्विनं॒ न म॑र्धन्ति॒ स्वत॑वसो हवि॒ष्कृत॑म् ॥ २ ॥

नित्य॑म् । न । सू॒नुम् । मधु॑ । बिभ्र॑तः । उप॑ । क्रीळ॑न्ति । क्री॒ळाः । वि॒दथे॑षु । घृष्व॑यः ।
नक्ष॑न्ति । रु॒द्राः । अव॑सा । न॒म॒स्विन॑म् । न । म॒र्ध॒न्ति॒ । स्वऽत॑वसः । ह॒विः॒ऽकृत॑म् ॥ २ ॥

---

१. झ१–व्याख्यातुमारभ्यते। २. झ१–महित्वं महत्त्वम्। ३. झ-झ१–'प्रज्ञानाय' इत्यस्यानन्तरं 'तत्सिद्ध्यर्थमित्यर्थः। अथवा वृषभस्य वृष्ट्युत्पादकस्य वर्षितुः मेघस्य केतवे प्रज्ञानाय' इत्यधिकम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vनित्यं vन vसूनुम् औरसं[1] प्रियं पुत्रमिव[1] vमधु मधुरं हविः vबिभ्रतः धारयन्तो मरुतः vविदथेषु यागेषु vघृष्वयः रक्षःप्रभृतीनां घर्षकाः सन्तः vक्रीळाः क्रीडनशीलाः vउप उपेत्य vक्रीळन्ति विहरन्ति । किंच vरुद्राः । रुद्रपुत्रा मरुतोऽपि रुद्रा उच्यन्ते जन्यजनकयोरभेदात् । मरुतां रुद्रपुत्रत्वं पुराणेषु तपसा तुष्टौ पार्वतीपरमेश्वरौ मरुतः पुत्रत्वेन स्वीचक्रतुरिति प्रसिद्धम् । vनमस्विनं नमस्कारोपलक्षितस्तोत्रोपेतं vहविष्कृतं हविषः कर्तारं प्रदातारं यजमानम् vअवसा रक्षणेन तर्पणेन वा निमित्तभूतेन vनक्षन्ति व्याप्नुवन्ति । किंच vस्वतवसः स्वायत्तबला मरुतो यजमानं vन vमर्धन्ति न संग्रामयन्ति न क्लेशयन्तीत्यर्थः ॥

यस्मा ऊमासो अमृता अरासत रायस्पोषं च हविषा ददाशुषे ।
उक्षन्त्यस्मै मरुतो हिताइव पुरू रजांसि पयसा मयोभुवः ॥ ३ ॥

यस्मै । ऊमासः । अमृताः । अरासत । रायः । पोषम् । च । हविषा । ददाशुषे ।
उक्षन्ति । अस्मै । मरुतः । हिताःऽइव । पुरु । रजांसि । पयसा । मयःऽभुवः ॥ ३ ॥

vयस्मै यजमानाय vहविषा vददाशुषे सोमादिहविर्दत्तवते हविषा प्रीताः vऊमासः अवितारः vअमृताः अमरणधर्माणो मरुतः vरायस्पोषं धनस्य पुष्टिम्[2] । चशब्दात् पश्वादिपुष्टिम् । vअरासत प्रायच्छन् । रासतिर्दानार्थः । vअस्मै यजमानाय vहिताइव हिताचरणाः सखाय इव सन्तः vमयोभुवः सुखस्य भावयितारः vमरुतः vरजांसि लोकान् vपुरु प्रभूतं यथा भवति तथा vपयसा उदकेन सस्याद्युत्पत्त्यर्थम् vउक्षन्ति सिञ्चन्ति ॥

आ ये रजांसि तविषीभिरव्यत प्र व एवासः स्वयतासो अध्रजन् ।
भयन्ते विश्वा भुवनानि हर्म्या चित्रो वो यामः प्रयतास्वृष्टिषु ॥ ४ ॥

आ । ये । रजांसि । तविषीभिः । अव्यत । प्र । वः । एवासः । स्वऽयतासः । अध्रजन् ।
भयन्ते । विश्वा । भुवनानि । हर्म्या । चित्रः । वः । यामः । प्रऽयतासु । ऋष्टिषु ॥ ४ ॥

हे मरुतः युष्मत्संबन्धिनः vये vएवासः एवाः अश्वविशेषाः[3] vतविषीभिः स्वकीयैर्बलैर्वृष्टिप्रदानादिरूपैः vरजांसि लोकान् vआ vअव्यत सर्वत आवृण्वन्ति ते[4] vवः युष्माकम् एवासः अश्वाः vस्वयतासः स्वयमेव सारथिना विनैव युक्ताः vप्र vअध्रजन् प्रकर्षेण गच्छन्ति व्याप्नुवन्ति । किंच युष्मदागमनात् vविश्वा vभुवनानि सर्वाणि भूतजातानि विश्वा vहर्म्या सर्वाणि हर्म्याणि च vभयन्ते बिभ्यति पतनात् । यस्मादेवं तस्मात् vवो vयामः vचित्रः चायनीयः । आश्चर्यभूत इत्यर्थः । भीतेः कारणमाह । vऋष्टिषु युद्धस्थासु[5] हेतिषु vप्रयतासु प्रकर्षेणोद्यतासु सतीषु । अथवा भीतौ दृष्टान्तः । ऋष्टिषु प्रयतासु सतीषु । लुप्तोपमेयम् । आयुधेषूद्यतेषु यथा जना बिभ्यति तद्वद्युष्मदागमनात् बिभ्यतीत्यर्थः ॥

---

१. झ१–अवियुक्तं पुरतो वर्तमानं तनुजं प्रियपुत्रमिव । २. ज-ञ–पुष्टिं च । ३. झ१–रक्षाविशेषाः । ४. ञ-झ–तेषाम् । ५. क-ज-झ–युष्मद्धस्तस्थासु; ञ–युद्धस्तस्थासु; त–युद्धस्तथासु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यत्त्वेषयामा नदयन्त पर्वतान्दिवो वा पृष्ठं नर्या अचुच्यवुः ।
विश्वो वो अज्मन्भयते वनस्पतीं रथीयन्तीव प्र जिहीत ओषधिः ॥ ५ ॥

यत् । त्वेषऽयामाः । नदयन्त । पर्वतान् । दिवः । वा । पृष्ठम् । नर्याः । अचुच्यवुः ।
विश्वः । वः । अज्मन् । भयते । वनस्पतिः । रथियन्तीऽइव । प्र । जिहीते । ओषधिः ॥ ५ ॥

मरुतः ᵛत्वेषयामाः प्रदीप्तगमनाः ᵛयत् यदा ᵛपर्वतान् पर्ववतो गिरेर्गह्वराणि पूरकान् मेघान् वा ᵛनदयन्त नादयन्ति[1] ᵛवा अथवा ᵛदिवः विद्योतनात्मकस्यान्तरिक्षस्य ᵛपृष्ठम् उपरिभागं ᵛनर्याः नरेभ्यो हिताः ᵛअचुच्यवुः गच्छन्ति तदा ᵛवः युष्मत्संबन्धिनि ᵛअज्मन् गमने निमित्तभूते सति ᵛविश्वः ᵛवनस्पतिः वनस्य पालयिता वृक्षसमूहः ᵛभयते बिभेति । तथा ᵛओषधिः प्रियङ्गुव्रीह्यादिः ᵛप्र ᵛजिहीते प्रकर्षेण गच्छति स्वस्थानात् इतस्ततश्चलतीत्यर्थः । तत्र दृष्टान्तः । ᵛरथीयन्तीव रथमात्मन इच्छन्ती स्त्री । रथारूढेत्यर्थः । तादृशी स्त्रीव । सा यथा चलति तद्वत् ॥ ॥ १ ॥

यूयं न उग्रा मरुतः सुचेतुनारिष्टग्रामाः सुमतिं पिपर्तन ।
यत्रा वो दिद्युद्रदति क्रिविर्दती रिणाति पश्वः सुधितेव बर्हणा ॥ ६ ॥

यूयम् । नः । उग्राः । मरुतः । सुऽचेतुना । अरिष्टऽग्रामाः । सुऽमतिम् । पिपर्तन ।
यत्र । वः । दिद्युत् । रदति । क्रिविःऽदती । रिणाति । पश्वः । सुधिताऽइव । बर्हणा ॥६॥

हे ᵛउग्राः उद्गूर्णबलाः ᵛमरुतः ᵛयूयं ᵛसुचेतुना शोभनचेतसा ᵛअरिष्टग्रामाः अहिंसितसंघाः सन्तः ᵛनः अस्माकं ᵛसुमतिं शोभनबुद्धिं ᵛपिपर्तन पूरयत । कस्मिन्काले इति तदुच्यते। ᵛयत्र यस्मिन् काले ᵛवः युष्मत्संबन्धिनी ᵛक्रिविर्दती विक्षेपणशीलदन्ती[2] ᵛदिद्युत् हेतिः ᵛरदति विलिखति मेघसंस्थायं ᵛपश्वः पशूंश्च ᵛरिणाति रेषति हिनस्ति । वायौ वाति सति पशवः शीर्यन्ते इति प्रसिद्धम् । हिंसायां दृष्टान्तः । ᵛसुधिता सुहिता सुष्ठु प्रेरिता ᵛबर्हणा हतिः तत्साधना हेतिर्वा यथा रिणाति तद्वत् ॥

प्र स्कम्भदेष्णा अनवभ्रराधसोऽलातृणासो विदथेषु सुष्टुताः ।
अर्चन्त्यर्कं मदिरस्य पीतये विदुर्वीरस्य प्रथमानि पौंस्या ॥ ७ ॥

प्र । स्कम्भऽदेष्णाः । अनवभ्रऽराधसः । अलातृणासः । विदथेषु । सुऽस्तुताः ।
अर्चन्ति । अर्कम् । मदिरस्य । पीतये । विदुः । वीरस्य । प्रथमानि । पौंस्या ॥ ७ ॥

ᵛप्र ᵛस्कम्भदेष्णाः प्रकर्षेण स्तम्भितदानाः । अविरतदाना इत्यर्थः । ᵛअनवभ्रराधसः अभ्रष्टहविरादिधनाः । राध इति धननाम । ᵛअलातृणासः । नकारस्य स्थाने लकारः ॥ अनातृणासः

---

१. झ-झ१–शब्दयन्ति । २. झ१–विक्षेपणशीलदन्ती रूपारूपा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आतर्दनरहिताः। अथवा। अलं पर्याप्तम् आतर्दनाः शत्रूणाम्। यद्वा। अलम् अत्यर्थं दातारः फलानाम्। एवंरूपा मरुतः Vविदथेषु यागेषु Vअर्कम् अर्चनीयमिन्द्रं स्वसखीभूतम् Vअर्चन्ति पूजयन्ति स्तुत्यादिना संभावयन्तीत्यर्थः। किमर्थं Vमदिरस्य मादनसाधनस्य सोमस्य Vपीतये पानाय। तस्येन्द्रस्य महत्त्वं कथं जानन्तीत्यत आह। ते मरुतः Vवीरस्य विविधं शत्रूणामीरकस्य इन्द्रस्य Vप्रथमानि प्रतमानि मुख्यानि Vपौंस्या पुंस्त्वानि वृत्रवधादिरूपाणि Vविदुः जानन्ति॥

शतभुजिभिस्तमभिहुतेरघात्पूर्भी रक्षता मरुतो यमावत।
जनं यमुग्रास्तवसो विरप्शिनः पाथना शंसात्तनयस्य पुष्टिषु॥ ८॥

शतभुजिऽभिः। तम्। अभिऽहुतेः। अघात्। पूःऽभिः। रक्षत। मरुतः। यम्। आवत।
जनम्। यम्। उग्राः। तवसः। विऽरप्शिनः। पाथन। शंसात्। तनयस्य। पुष्टिषु॥ ८॥

हे Vमरुतः यूयं Vशतभुजिभिः। शतमित्यपरिमितनाम। असंख्यातभोगवद्भिः Vपूर्भिः पालनैः[1] जेतव्यैः शत्रूणां नगरैर्वा Vतं[2] Vरक्षत पालयत। तमित्युक्तं कमित्याह। Vयम् जनम् Vअभिहुतेः अभिभवकारणात् कुटिलस्वभावात् Vअघात् पापात् Vआवत अरक्षत। किंच हे Vउग्राः उद्भूर्णतेजसो हे Vतवसः बलवन्तो वेगवन्तो वा हे Vविरप्शिनः। महन्नामैतत्। महान्तः। रपणीयाः शब्दाः रपाः। ते येषां ते रप्शिनः। विविधा रप्शिनः स्तोतारो येषां ते तथोक्ता हे तादृशा यूयं Vयं च Vजनं Vपाथन पाथ रक्षथ। कस्मान्निमित्तादिति उच्यते। Vतनयस्य। उपलक्षणमेतत्। पुत्रादीनां Vपुष्टिषु पोषेषु निमित्तभूतेषु Vशंसात् अभिशंसनात्। यमेवं कुरुथ तं रक्षतेति शेषः। पापक्षयाद्यनिष्टपरिहारेण पुत्रादिपोषरूपेष्टप्राप्त्या च रक्षथेत्यर्थः॥

विश्वानि भद्रा मरुतो रथेषु वो मिथस्पृध्येव तविषाण्याहिता।
अंसेष्वा वः प्रपथेषु खादयोऽक्षो वश्चक्रा समया वि वावृते॥ ९॥

विश्वानि। भद्रा। मरुतः। रथेषु। वः। मिथस्पृध्याऽइव। तविषाणि। आऽहिता।
अंसेषु। आ। वः। प्रऽपथेषु। खादयः। अक्षः। वः। चक्रा। समया। वि। ववृते॥ ९॥

हे Vमरुतः Vवः Vरथेषु युष्मत्संबन्धिरथेषु रंहणसाधनेषु Vविश्वानि Vभद्रा सर्वाणि कल्याणानि भोगयोग्यानि द्रव्याण्यस्मभ्यं प्रदेयानि फलानि वा आहितानि। तथा वः Vअंसेष्वा तदुपलक्षित-भुजेष्वपि। आकारोऽप्यर्थे। Vमिथस्पृध्येव बलाधिक्यात् परस्परस्पर्धाविषयाणि Vतविषाणि बलानि अंसेपूक्तलक्षणान्यायुधानि वा आहितानि। किंच Vवः Vप्रपथेषु। प्रगताः पन्थानो येषु विश्राम-स्थानेषु तानि प्रपथानि। तेषु Vखादयः खाद्यानि भक्ष्याण्याहितानि। यद्वा। प्रगतः पन्था यैस्तेषु पादाग्रेषु खादयः स्थिरा आभरणविशेषा आहिताः। किंच Vअक्षो Vवः युष्मत्संबन्धी रथ्यः अक्षः Vचक्रा तत्रोपनिबद्धानि चक्राणि Vसमया समीपे तेषां परिसरे Vवि Vववृते विशेषेण वर्तते। न

---

१. झ१–पुष्टिभिः। २. ज्ञ-झ–आवत।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कदाचिदपि चक्रेषु संलग्नो भवतीत्यर्थः । यस्मादेवं देवयजनगमनसाधनानि सन्ति तस्मात् शीघ्रमागच्छध्वमित्यभिप्रायः ॥

**भूरीणि भद्रा नर्येषु बाहुषु वक्षःसु रुक्मा रभसासो अञ्जयः ।**
**अंसेष्वेताः पविषु क्षुरा अधि वयो न पक्षान्व्यनु श्रियो धिरे ॥ १० ॥**

भूरीणि । भद्रा । नर्येषु । बाहुषु । वक्षःऽसु । रुक्माः । रभसासः । अञ्जयः ।
अंसेषु । एताः । पविषु । क्षुराः । अधि । वयः । न । पक्षान् । वि । अनु । श्रियः । धिरे ॥ १० ॥

ते मरुतः [v]नर्येषु नरेभ्यो हितेषु [v]बाहुषु भुजेषु [v]भूरीणि प्रभूतानि [v]भद्रा भद्राणि कल्याणानि धनानि स्तोतृभ्यो दातुं [v]धिरे दधिरे धारयन्ति । तथा [v]वक्षःसु उरःस्थलेषु [v]रुक्माः सुवर्णरत्नादिनिर्मितान्याभरणानि धारयन्ति । कीदृशानि । [v]रभसासः राभस्ययुक्तानि कान्तिमन्ति वा । तथा [v]अञ्जयः व्यक्तानि । [v]अंसेषु भुजमूलेषु [v]एताः शुक्लवर्णा मालाः । [v]पविषु वज्रसदृशेष्वायुधेषु [v]क्षुराः क्षुरधाराः । [v]अधि सप्तम्यर्थानुवादी । एवमेते मरुतः सर्वाङ्गेषु [v]श्रियः लक्ष्मीः अनुक्रमेण [v]वि धिरे विविधं धारयन्ति । तत्र दृष्टान्तः । [v]वयो [v]न [v]पक्षान् पक्षिणः पक्षानिव ॥ ॥ २ ॥

**महान्तो मह्ना विभ्वो३ विभूतयो दूरेदृशो ये दिव्या इव स्तृभिः ।**
**मन्द्राः सुजिह्वाः स्वरितार आसाभिः संमिश्ला इन्द्रे मरुतः परिष्टुभः ॥ ११ ॥**

महान्तः । मह्ना । विऽभ्वः । विऽभूतयः । दूरेऽदृशः । ये । दिव्याःऽइव । स्तृऽभिः ।
मन्द्राः । सुऽजिह्वाः । स्वरितारः । आसऽभिः । सम्ऽमिश्लाः । इन्द्रे । मरुतः । परिऽस्तुभः ॥ ११ ॥

[v]ये [v]मरुतः [v]महान्तः माहात्म्योपेताः । केन । [v]मह्ना महत्त्वेन प्रभावातिशयेन । तथा [v]विभ्वः विभवो व्याप्ताः तथा [v]विभूतयः विविधैश्वर्यवन्तः [v]दूरेदृशः दूरे दृश्यमानाः प्रकाशमानाः । दूरदर्शने दृष्टान्तः । [v]दिव्याः [v]स्तृभिः [v]इव । स्तृ इति नक्षत्रनाम ' ऋक्षाः स्तृभिरिति नक्षत्राणाम् ' ( निरु. ३. २० ) इति निरुक्तत्वात् । दिवि भवा देवाः स्तृभिः स्वपुष्पकभूतैस्तेजःपुञ्जैर्नक्षत्रैर्यथा दूरे दृश्यमाना भवन्ति तद्वत् । किंच [v]मन्द्राः मादनाः [v]सुजिह्वाः शोभनजिह्वाः [v]आसभिः आस्यैः [v]स्वरितारः शब्दयितारः । प्रियवचना इत्यर्थः । अत एव सुजिह्वा इत्युक्तम् । किंच [v]इन्द्रे [v]संमिश्लाः सम्यग्मिश्रयितारः । इन्द्रसहायिन इत्यर्थः । ' मरुतो हैनं नाजहुः ' ( ऐ. ब्रा. ३. २० ) इति श्रुतेः । तथा [v]परिष्टुभः परिस्तोभयुक्ताः स्तुतिभिर्युक्ताः । एवं महाभागा ये मरुतः सन्ति तेऽस्मद्यज्ञम् आगच्छन्तीति शेषः ॥

**तद्वः सुजाता मरुतो महित्वनं दीर्घं वो दात्रमदितेरिव व्रतम् ।**
**इन्द्रश्चन त्यजसा वि हुर्णाति तज्जनाय यस्मै सुकृते अरांध्वम् ॥ १२ ॥**

तत् । वः । सुऽजाताः । मरुतः । महिऽत्वनम् । दीर्घम् । वः । दात्रम् । अदितेःऽइव । व्रतम् ।
इन्द्रः । चन । त्यजसा । वि । हुर्णाति । तत् । जनाय । यस्मै । सुऽकृते । अरांध्वम् ॥ १२ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]सुजाताः शोभनजननाः हे [v]मरुतः [v]वः युष्मदीयं [v]महित्वनं महत्त्वं [v]तत् तादृक् खलु। तदित्युक्तं किमित्याह। [v]वः युष्माकं [v]दात्रं दानं वृष्ट्यादिरूपं [v]दीर्घम् अत्यायतमविच्छिन्नम्। प्रकृष्टोपकारीत्यर्थः। दीर्घत्वे दृष्टान्तः। [v]अदितेः [v]व्रतम् [v]इव। अदीनाया देवमातुर्भूम्या वा। व्रतमिति कर्मनाम। तद्यथा दीर्घम् अतिविस्तृतं तद्वत्। 'अदितिर्द्यौरदितिरन्तरिक्षम्' (ऋ. सं. १. ८९. १०) इत्यादिमन्त्रवर्णात्। किंच हे मरुतः यूयं [v]यस्मै [v]सुकृते शोभनयागादिकर्त्रे यजमानाय यदभिमतं धनम् [v]अराध्वं[1] [v]तत् [v]इन्द्रः च इन्द्रोऽपि [v]त्यजसा त्यागेन न [v]वि [v]हुणाति न विह्वरति कौटिल्यं न करोति॥ चन इत्ययं यद्यपि निपातद्वयसमुदायरूप एको निपातः तथाप्यवयवविभागेन चशब्दः समुच्चये नशब्दो निषेधेऽधिगन्तव्यः॥ युष्मद्धनादित्यागम् इन्द्रत्यागोऽपि नातिक्रामतीत्यर्थः। यद्वा। यस्मै तद्धनमराध्वं तमिन्द्रोऽपि न कुटिलयति। न निषेधयति किंत्वनुमोदयतीत्यर्थः॥

तद्वो॑ जामि॒त्वं म॑रुतः॒ पर॑े॒ युगे॒ पुरू॒ यच्छंस॑ममृतास॒ आव॑त।
अ॒या धि॒या मन॑वे॒ श्रुष्टि॑माव्या॒ साकं॑ नरो॑ दं॒सनै॒रा चि॑कित्रिरे॥ १३॥

तत्। वः। जामिऽत्वम्। मरुतः। परे। युगे। पुरु। यत्। शंसम्। अमृतासः। आवत।
अया। धिया। मनवे। श्रुष्टिम्। आव्य। साकम्। नरः। दंसनैः। आ। चिकित्रिरे॥१३॥

हे [v]मरुतः [v]वो [v]जामित्वं बन्धुत्वमस्मद्विषयप्रेमाधिक्यं [v]तत् खलु प्रसिद्धमित्यर्थः। कियत्पर्यन्तमिति तदुच्यते। [v]परे [v]युगे। युगशब्दः कालोपलक्षकः। उत्कृष्टे महति कालेऽतीतेऽपि वर्तत इति शेषः। तत्कथमधिगतमित्यत आह। [v]अमृतासः अमरणधर्माणो हे मरुतः यूयं [v]यत् यस्मात् [v]शंसम् अस्माभिः क्रियमाणां स्तुतिं [v]पुरु प्रभूतं यथा भवति तथा [v]आवत रक्षथ। तस्माद्युष्मत्कृतं जामित्वमविनाशीत्यर्थः। किंच यूयम् [v]अया [v]धिया अनयानुग्रहात्मिकया बुद्ध्या [v]मनवे मनुष्याय स्तोत्रे यष्ट्रे वा अस्मदादये [v]श्रुष्टिमाव्य कीर्तिं स्तुतिं वा रक्षित्वा [v]साकं संभूय [v]नरः नेतारः सन्तः [v]दंसनैः कर्मभिरित्थंभूताः [v]आ [v]चिकित्रिरे सर्वतो जानीथ॥

येन॑ दी॒र्घं म॑रुतः शू॒शवा॑म यु॒ष्माके॑न॒ परी॑णसा तु॒रासः॑।
आ यत्त॑तन॑न्वृ॒जने॒ जना॑स॒ एभि॑र्य॒ज्ञेभि॒स्तद॒भीष्टि॑मश्याम्॥ १४॥

येन। दीर्घम्। मरुतः। शूशवाम। युष्माकेन। परीणसा। तुरासः।
आ। यत्। ततनन्। वृजने। जनासः। एभिः। यज्ञेभिः। तत्। अभि। इष्टिम्। अश्याम्॥१४॥

हे [v]तुरासः वेगवन्तः [v]मरुतः [v]युष्माकेन युष्मत्संबन्धिना [v]येन [v]परीणसा। यद्यप्येतद्बहुनामसु पठितं तथापि यत् बहु तन्महदपि भवतीत्यत्र महदित्यर्थे गृह्यते। महता युष्मदभिगमनेनैषणेन वा [v]दीर्घम् आयतं सत्त्रादिरूपं कर्म [v]शूशवाम प्रवर्धयामः। किंच [v]यत् येन चाभिगमनेनैषणेन वा [v]जनासः जना अस्मदीयाः [v]वृजने संग्रामे [v]आ [v]ततनन् सर्वतो विस्तारयन्ति। स्वसामर्थ्यैः संग्रामं जयन्तीत्यर्थः।

---

१. झ—अराध्वं ददध्वम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vतत् vइष्टिम् एषणं गमनम् vएभिर्यज्ञेभिः इदानीं क्रियमाणैः स्तोत्रादिरूपैः पूजनैः vअभि आभिमुख्येन vअश्यां व्याप्नुयाम् ॥

**एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः ।**
**एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम् ॥ १५ ॥**

एषः । वः । स्तोमः । मरुतः । इयम् । गीः । मान्दार्यस्य । मान्यस्य । कारोः ।
आ । इषा । यासीष्ट । तन्वे । वयाम् । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ १५ ॥

अयं मन्त्रस्तृतीयाध्यायान्ते व्याख्यातः । सूक्तोपक्रमप्रभृति क्रियमाणां स्तुतिं मरुद्भ्यः समर्प्य स्वाभीष्टमाशास्ते । हे vमरुतः vएषः vस्तोमः इदानीं कृतं स्तोत्रं vवः युष्माकं युष्मदर्थमित्यर्थः । तथा vइयं vगीः स्तुतिरूपा वागपि वः युष्माकम् । कस्य संबन्धीदमिति तदुच्यते । vमान्दार्यस्य ॥ मन्दतेरीयतेश्च मान्दार्यः ॥ स्तुतिं प्रेरयतः vमान्यस्य माननार्हस्य vकारोः । स्तोतॄणामैतत् । स्तोतुः संबन्धि । यद्वा । एतत्पदत्रयमुत्तरत्र संबध्यते । उक्तलक्षणस्तोतुः vइषा इच्छया कामनया vतन्वे युष्मच्छरीरवृद्धयै । स्तुत्या हि शरीरं वर्धते । vआ vयासीष्ट अभिगच्छतु स्तुतिः । vवयां वयं च vइषम् अन्नं vवृजनं बलं vजीरदानुं चिरकालजीवनं च vविद्याम लभेमहि ॥ ॥ ३ ॥

'सहस्रं ते' इत्येकादशर्चं तृतीयं सूक्तमागस्त्यं त्रैष्टुभम् । आद्यैन्द्री शिष्टा मरुद्देवताकाः पूर्वत्र हिशब्दात् । 'सहस्रमेकादशाद्यैन्द्री' इत्यनुक्रमणिका । विशेषविनियोगो लैङ्गिकः ॥

**सहस्रं त इन्द्रोतयो नः सहस्रमिषो हरिवो गूर्ततमाः ।**
**सहस्रं रायो मादयध्यै सहस्रिणो उप नो यन्तु वाजाः ॥ १ ॥**

सहस्रम् । ते । इन्द्र । ऊतयः । नः । सहस्रम् । इषः । हरिऽवः । गूर्तऽतमाः ।
सहस्रम् । रायः । मादयध्यै । सहस्रिणः । उप । नः । यन्तु । वाजाः ॥ १ ॥

हे vइन्द्र vते तव vऊतयः रक्षाप्रकाराः vसहस्रम् । अपरिमिता इत्यर्थः । vनः अस्मभ्यम् उप यन्तु इति सर्वत्र योज्यम् । तथा हे vहरिवः । हरी इन्द्रस्याश्वौ । ताभ्यां तद्वन्निन्द्र vगूर्ततमाः अत्यन्तं गूर्णानि vइषः एषणीयाः अन्नानि vसहस्रं बहूनि त्वदीयानि । तथा vसहस्रं vरायः अपरिमितानि धनानि मणिमुक्तादीनि vमादयध्यै अस्मान् मादयितुं यानि सन्ति तानि अस्मान् उप यन्तु । तथा vसहस्रिणः vवाजाः गमनवन्तश्चतुष्पाद्रूपाः पशवोऽपि vनः अस्मान् vउप vयन्तु समीपं प्राप्नुवन्तु ॥

**आ नोऽवोभिर्मरुतो यान्त्वच्छा ज्येष्ठेभिर्वा बृहद्दिवैः सुमायाः ।**
**अध यदेषां नियुतः परमाः समुद्रस्य चिद्बुनयन्त पारे ॥ २ ॥**

आ । नः । अवःऽभिः । मरुतः । यान्तु । अच्छ । ज्येष्ठेभिः । वा । बृहत्ऽदिवैः । सुऽमायाः ।
अध । यत् । एषाम् । निऽयुतः । परमाः । समुद्रस्य । चित् । बुनयन्त । पारे ॥ २ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ते[1] vमरुतः vअवोभिः रक्षणैः सहिताः vनः अस्मान् vअच्छ आभिमुख्येन vआ vयान्तु आगच्छन्तु । vसुमायाः । मायेति प्रज्ञानाम । शोभनप्रज्ञा एव मरुतः vउग्रेष्टेभिः vबृहद्भिः vवा उग्रेष्टैः प्रशस्यतमैः[2] मणिमुक्तादिधनैश्च सहिता आ यान्तु । वाशब्दः समुच्चये। आगमने कथमेषां सामर्थ्यमिति अत आह । vअध अथ vएषां मरुतां vयत् यस्मात् vनियुतः एतन्नामकाः vपरमाः उत्कृष्टा अश्वाः vसमुद्रस्य vचित् । चिच्छब्दोऽप्यर्थे । समुद्रस्यापि vपारे परस्मिंस्तीरे vधनयन्त धनधारणं वहनं कुर्वन्ति । तस्मात् रक्षणैर्धनैश्चायान्त्वित्यर्थः ॥

मिम्यक्ष येषु सुधिता घृताची हिरण्यनिर्णिगुपरा न ऋष्टिः ।
गुहा चरन्ती मनुषो न योषा सभावती विदथ्येव सं वाक् ॥ ३ ॥

मिम्यक्ष । येषु । सुऽधिता । घृताची । हिरण्यऽनिर्णिक् । उपरा । न । ऋष्टिः ।
गुहा । चरन्ती । मनुषः । न । योषा । सभाऽवती । विदथ्याऽइव । सम् । वाक् ॥ ३ ॥

vसुधिता सुष्ठु निहिता सुष्ठु हिता वा लोके vघृताची घृतं क्षरणशीलमुदकमञ्चन्ती vहिरण्यनिर्णिक् हितरमणीयरूपा । निर्णिगिति रूपनाम । एवंरूपा vऋष्टिः विद्युदाख्यायुधविशेषो वा vउपरा vन मेघमालेव vयेषु मरुत्सु vसं vमिम्यक्ष। म्यक्षतिर्गतिकर्मा। संगताभूत्। मेघपङ्क्तिर्विद्युतौ इमे[3] अपि संगते इत्यर्थः । मेघपङ्क्तिर्विद्युच्चोभे दृष्टान्तेन[4] विशेष्येते । vगुहा निगूढा गुहायां वा अन्तरिक्षे[5] vचरन्ती। तत्र दृष्टान्तः । vमनुषो vन vयोषा मनुष्यस्य परिवृढादेर्महिषीवत् । सा यथा सुवेषा अन्तःपुरे एव मध्ये चरति तद्वत् । किं सर्वदैवमिति नेत्याह । vसभावती[6]। सभा जनसंघः । तद्वती। वर्षकाले आविर्भवन्तीत्यर्थः । तत्र दृष्टान्तः[6]। vविदथ्या vवाक् vइव । विदथो यज्ञः । तदर्हतीति विदथ्या प्रैषस्तोत्रादिरूपा वाक् । सा यथा यज्ञसभां प्राप्याविर्भवति तद्वत् । यद्वा । विदथ्या वेदनार्हा विवदमानयोर्वाक् । सा यथा सभावती तद्वत् । सैवंरूपा येषु मिम्यक्ष ते मरुतो देवयजनमाभिमुख्येनाच्छन्त्वित्यर्थः ॥

परा शुभ्रा अयासो यव्या साधारण्येव मरुतो मिमिक्षुः ।
न रोदसी अप नुदन्त घोरा जुषन्त वृधं सख्याय देवाः ॥ ४ ॥

परा । शुभ्राः । अयासः । यव्या । साधारण्याऽइव । मरुतः । मिमिक्षुः ।
न । रोदसी इति । अप । नुदन्त । घोराः । जुषन्त । वृधम् । सख्याय । देवाः ॥ ४ ॥

vशुभ्राः शोभनालंकाराः[7] vअयासः अभिगन्तारः vमरुतः vयव्या मिश्रणशीलया विद्युता vपरा vमिमिक्षुः । प्रकर्षेण सिञ्चन्त्युदकसंस्त्यायम् । vसाधारण्येव । यथा लोके साधारण्या स्त्रिया संगता युवानो रेतो मुञ्चन्ति तद्वत् । एवं कुर्वन्तः vघोराः अतिवृष्टिप्रदानेन भयंकरास्ते vरोदसी द्यावापृथिव्यौ vन vअप vनुदन्त । अपनोदनं वर्षणरूपं तिरस्कारं न कुर्वन्ति । द्यावापृथिवीवचनो रोदसीशब्दः

---

१. क-ख-ञ-फ-एते । २. ञ१-प्रभूतद्योतमानैः । ३. ञ१-उभे । ४. ञ१-दृष्टान्तत्वेन । ५. ञ१-अन्तरिक्षे वा । ६. ञ१-सभावती जनसंघसमीपं गच्छन्ती वर्षाकाले । आविर्भावे दृष्टान्तः । ७. ञ१-शोभनालंकारादिना दीप्ताः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सर्वत्राद्युदात्तः । अत्र तु व्यत्ययेनान्तोदात्तत्वमिति द्रष्टव्यम् । यद्वा । रोदसा शब्देन रोदनस्वभावो रुद्रः । तस्य स्त्री रोदसीति केचिदाहुः । अपरे तु मरुतां स्त्रियो रोदसीति नामधेयमित्याहुः । अयमेव पक्षो युक्त उत्तरत्रैवं व्यवहारात् । तत्पक्षे रोदसी रोदस्याम् ॥ ङीषन्तात् सप्तम्या ईकारो लुक् वा । 'ईदूतौ च सप्तम्यर्थे' इति प्रगृह्यसंज्ञा ॥ तस्यां प्रियं धनं मुञ्चन्ति । किंतु ᵛदेवाः मोदयितारो मादयितारो वा मरुतः ᵛसख्याय ᵛवृधं वृद्धिं ᵛजुषन्त सेवन्ते । द्यावापृथिवीपक्षे सख्याय जगतां सखिभावाय तयोर्वृद्धिं कुर्वन्तीत्यर्थः ॥

जोषद्यदीमसुर्या सचध्यै विषितस्तुका रोदसी नृमणाः ।
आ सूर्येव विधतो रथं गात्त्वेषप्रतीका नभसो नेत्या ॥ ५ ॥

जोषत् । यत् । ईम् । असुर्या । सचध्यै । विसितऽस्तुका । रोदसी । नृऽमनाः ।
आ । सूर्याऽइव । विधतः । रथम् । गात् । त्वेषऽप्रतीका । नभसः । न । इत्या ॥ ५ ॥

ᵛरोदसी मरुत्पत्नी विद्युत् वा एतन्नामिकेयमपि ᵛईम् एनं मरुत्संघं ᵛजोषत् सेवते ॥ जुषेर्लेटि अडागमः ॥ किमर्थम् । ᵛसचध्यै संगमनार्थम् । कीदृशी सा । ᵛअसुर्या । असुराः क्षेत्तारो मरुतः । तेषां स्वभूता ᵛविषितस्तुका विशिष्टकेशसंघा विप्रकीर्णकेशसंघा वा संभोगवशेन तथा ᵛनृमणाः नृषु नेतृषु मरुत्सु मननवती मनुष्येषु वा वृष्टिप्रदानमनोयुक्ता ᵛत्वेषप्रतीका दीप्तोपक्रमा दीप्तावयवा । ईदृशी देवी ᵛविधतः परिचरतो मरुत्संघस्य ᵛरथम् ᵛआ ᵛगात् आगच्छति व्याप्नोति । यागदेशं गन्तुं रथमारुह्य वा यज्ञमागच्छति । केव । विधतः सूर्यस्य रथं त्वेषप्रतीका ᵛसूर्येव सूर्यपत्नीव । यद्वा । सूर्यस्य दुहिता अश्विनोः रथमिव सा यथा आरोहति तद्वत् । आगमने दृष्टान्तः । ᵛनभसः ᵛइत्या ᵛन । अन्तरिक्षादित्ययोः साधारणोऽयं नभःशब्दः 'नभ इति षट् साधारणानि' ( नि. १. ४. ६ ) इत्युक्तत्वात् । अत्र आदित्यवचनः । तस्य गतिरिव । सा यथा शीघ्रा तद्वत् ॥ ॥ ४ ॥

आस्थापयन्त युवतिं युवानः शुभे निमिश्लां विदथेषु पज्राम् ।
अर्को यद्वो मरुतो हविष्मान्गायद्गाथं सुतसोमो दुवस्यन् ॥ ६ ॥

आ । अस्थापयन्त । युवतिम् । युवानः । शुभे । निऽमिश्लाम् । विदथेषु । पज्राम् ।
अर्कः । यत् । वः । मरुतः । हविष्मान् । गायत् । गाथम् । सुतऽसोमः । दुवस्यन् ॥ ६ ॥

ᵛयुवानः मिश्रयन्तो नित्यतरुणा वा मरुतः ᵛयुवतिं मिश्रयन्तीं नित्यतरुणीं वा विद्युद्रूपां रोदस्यां स्त्रियम् ᵛआस्थापयन्त आस्थापयन्ति । देवतात्वेन रथे धारयन्ति । कीदृशीं ताम् । ᵛनिमिश्लां नियमेन मिश्रयन्तीं ᵛपज्राम् । पज्रो बलम् । तद्वतीम् । ᵛशुभे । शोभते दीप्यते इति शुबुदकम् । वृष्ट्युदकार्थम् । शुभे रथ इति वा योज्यम् । किंनिमित्तम् । ᵛविदथेषु यागेषु निमित्तभूतेषु । कदा । ᵛयत् यदा हे ᵛमरुतः ᵛवः युष्मान् ᵛअर्कः ॥ मत्वर्थो लुप्यते ॥ अर्चनसाधनमन्त्रोपेतः स्तोता वा ᵛहविष्मान् प्रदेयाज्यादिहविर्युक्तः ᵛसुतसोमः होमाय अभिषुतसोमोऽयं यजमानः ᵛदुवस्यन् परिचरन् ᵛगाथं गातव्यं स्तोत्रं ᵛगायत् गायति । तदेत्यर्थः ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्र तं विवक्मि वक्म्यो य एषां मरुतां महिमा सत्यो अस्ति ।
सचा यदीं वृषमणा अहंयुः स्थिरा चिज्जनीर्वहते सुभागाः ॥ ७ ॥

प्र । तम् । विवक्मि । वक्म्यः । यः । एषाम् । मरुताम् । महिमा । सत्यः । अस्ति ।
सचा । यत् । ईम् । वृषऽमनाः । अहम्ऽयुः । स्थिरा । चित् । जनीः । वहते । सुऽभागाः ॥७॥

vएषां vमरुतां vयः vमहिमा महत्त्वातिशयः vवक्म्यः सर्वैः स्तुत्यः vसत्यः अबाध्योऽमोघः vअस्ति vतं vप्र vविवक्मि प्रवच्मि वर्णयामि । कथमेषां महिमा प्राप्त इति उच्यते । vयत् यस्मात् vईम् एतेषां संबन्धिनी रोदसी vवृषमणाः वृष्ट्यादिवर्षणमनस्का vअहंयुः अहंकारवती । जगदुपकारकर्त्री न कदाचिदस्तीत्यहंकारः । vस्थिरा vचित् । चिदिति पूजायाम् । अत्यन्तमविनश्वरा ईदृशी देवी vसुभागाः शोभनभाग्योपेताः vजनीः जननशीलाः प्रजाः वृष्ट्युत्पत्तीर्वा vवहते धारयति । वृष्टौ सत्यां सर्वे प्राणिन उत्पद्यन्ते । यस्मादेवं तस्मात् महिमास्ति । तं महिमानं स्तौमीत्यर्थः ॥

पान्ति मित्रावरुणावव्याच्चयत ईमर्यमो अप्रशस्तान् ।
उत च्यवन्ते अच्युता ध्रुवाणि वावृध ईं मरुतो दातिवारः ॥ ८ ॥

पान्ति । मित्रावरुणौ । अवद्यात् । चयते । ईम् । अर्यमो इति । अप्रऽशस्तान् ।
उत । च्यवन्ते । अच्युता । ध्रुवाणि । ववृधे । ईम् । मरुतः । दातिऽवारः ॥ ८ ॥

हे मरुतः युष्मत्संबन्धिनो देवाः vमित्रावरुणौ, अहोरात्र्यभिमानिदेवौ vअर्यमो । अर्यमा उ इति निपातसमुदायात्मकम् एकं पदम् । उ शब्दोऽपिशब्दार्थे । अर्यमापि । एते त्रयोऽपि vईम् अमुं लोकं यज्ञं वा vअवद्यात् गर्ह्यात् अयथानुष्ठानात् जगत्पक्षे व्यवहारप्रतिबन्धरूपात् vपान्ति रक्षन्ति । तथा एतेषाम् vअप्रशस्तान् क्षीणानपि पदार्थान् vचयते चातयन्ति[1] नाशयन्ति[1] । vउत अपि च एतैः प्रेरितानि vअच्युता अच्युतान्यस्रावीणि अत एव vध्रुवाणि अविचलानि मेघस्थोदकानि vच्यवन्ते च्यावयन्ति वा एते । ' अहोरात्रे वै मित्रावरुणावहोरात्राभ्यां खलु वै पर्जन्यो वर्षति ' इति श्रुतेः । यद्वा । अच्युतानि ध्रुवाणि धनानि च्यवन्ते । कदेति उच्यते । हे vमरुतः युष्मदीयः vईम् अयं कालः vदातिवारः प्रदेयजलः खण्डितमेघो वा यदा vववृधे वर्धते । तदा मित्रादयो देवा युष्मदनुकूलव्यापारेण जगत् रक्षन्तीत्यर्थः । यद्वा । दातिवारो दत्तवरणीयहविर्लक्षणधनो यजमानः हे मरुतः ईम् एनान्युष्मान्ववृधे वर्धयति यदा तदेत्यर्थः ॥

नहीं नु वो मरुतो अन्त्यस्मे आरात्ताच्चिच्छवसो अन्तमापुः ।
ते धृष्णुना शवसा शूशुवांसोऽर्णो न द्वेषो धृषता परि ष्ठुः ॥ ९ ॥

नहि । नु । वः । मरुतः । अन्ति । अस्मे इति । आरात्तात् । चित् । शवसः । अन्तम् । आपुः ।
ते । धृष्णुना । शवसा । शूशुऽवांसः । अर्णः । न । द्वेषः । धृषता । परि । स्थुः ॥ ९ ॥

---

१. ऋ१–चाययन्ति वा निन्दितान्पदार्थान्पाचयन्तीत्यर्थः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे vमरुतः vवः vशवसः युष्माकं संबन्धिनो बलस्य vअन्तम् अवसानम् vअन्ति अन्तिके vआरात्ताच्चित् दूरादपि। यद्वा। चिदिति कुत्सायाम्। अत्यन्तदूरात्। vअस्मे अस्मासु मध्ये एकेऽपि vनु क्षिप्रं vनहि vआपुः नैव खलु प्राप्नुवन्ति। संनिधावसंनिधौ च न प्राप्नुवन्तीत्यर्थः। अथ परोक्षे प्राप्तबलत्वमाह। vते खलु मरुतः vधृष्णुना धर्षकेण vशवसा बलेन vशुशुवांसः वर्धमानाः अत एव vधृषता पराभिभावकेन सामर्थ्येन vद्वेषः द्वेष्टॄन् vपरि vष्टुः परिभवन्ति वशीकुर्वन्ति। तत्र दृष्टान्तः। vअर्णो vन उदकमिव। यथोदकं स्वविरोधि रजआदिकमभिभवति तद्वत्। यस्मादेवं तस्मात् शवसोऽन्तं नापुः॥

'वयमद्य' इत्येतां दशमीमस्तमिते आदित्ये जपेत्। तथा च सूत्रं-'वयमद्येन्द्रस्य प्रेष्ठा इत्यस्तं यात्यादित्ये' (आश्व. गृ. २. ६. १४) इति॥

वयमद्येन्द्रस्य प्रेष्ठा वयं श्वो वोचेमहि समर्ये।
वयं पुरा महि च नो अनु द्यून्तन्नऋभुक्षा नरामनु स्यात्॥ १०॥

वयम्। अद्य। इन्द्रस्य। प्रेष्ठाः। वयम्। श्वः। वोचेमहि। सऽमर्ये।
वयम्। पुरा। महि। च। नः। अनु। द्यून्। तत्। नः। ऋभुक्षाः। नराम्। अनु। स्यात्॥१०॥

vअद्य अस्मिन् दिने vवयं यष्टारः vइन्द्रस्य देवस्य vप्रेष्ठाः प्रियतमा भवेम। यद्वा। प्रियतमा वयम् इन्द्रस्य महत्त्वं vवोचेमहि स्तोतुं समर्था भूयास्म। किंच vवयं vश्वः परस्मिन्नपि दिने vसमर्ये। सह मर्याः मर्त्याः ऋत्विजो यस्मिन् स समर्यो यज्ञः तस्मिन्। संग्रामे वा। इन्द्रस्य महत्त्वं वोचेमहि। किंच vवयं vपुरा पूर्वस्मिन्नतीतेऽपि काले vमहि महद्वलं vनः अस्मदर्थं वोचेमहि। तथा vद्यून् दिवसान् vअनु प्रतिदिवसमित्यर्थः। अतीते आगामिनि च दिवसे सर्वदा वोचेमहि। vतत् तस्मात् vऋभुक्षाः। महन्नामैतत्। 'ऋभुक्षाः उक्षा' (नि. ३. ३. १०) इति तन्नामसु पाठात्। महानिन्द्रः vनरां मनुष्याणां मध्ये vनः अस्मान् vअनु vस्यात् अनु भवतु अनुकूलमभिमतप्रदो वा भवतु॥

एष वः स्तोमो मरुत इयं गीर्मान्दार्यस्य मान्यस्य कारोः।
एषा यासीष्ट तन्वे वयां विद्यामेषं वृजनं जीरदानुम्॥ ११॥

एषः। वः। स्तोमः। मरुतः। इयम्। गीः। मान्दार्यस्य। मान्यस्य। कारोः।
आ। इषा। यासीष्ट। तन्वे। वयाम्। विद्याम। इषम्। वृजनम्। जीरऽदानुम्॥ ११॥

'एषः' इत्येकादशी व्याख्याता॥ ॥ ५॥

'यज्ञायज्ञा' इति दशर्चं चतुर्थं सूक्तमागस्त्यं मारुतम्। अन्त्यास्तिस्रस्त्रिष्टुभः। शिष्टाः सप्त त्रिष्टुबन्तपरिभाषया जगत्यः। 'यज्ञायज्ञा दश त्रित्रिष्टुबन्तम्' इत्यनुक्रान्तम्। विशेषविनियोगो लैङ्गिकः॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यज्ञायज्ञा वः समना तुतुर्वणिर्धियंधियं वो देवया उ दधिध्वे ।
आ वोऽर्वाचः सुविताय रोदस्योर्महे ववृत्यामवसे सुवृक्तिभिः ॥ १ ॥

यज्ञाऽयज्ञा । वः । समना । तुतुर्वणिः । धियम्ऽधियम् । वः । देवऽयाः । ऊँ इति । दधिध्वे ।
आ । वः । अर्वाचः । सुविताय । रोदस्योः । महे । ववृत्याम् । अवसे । सुवृक्तिऽभिः ॥१॥

हे मरुतः vवः vसमना समीकृतिर्न्यूनाधिकाभावलक्षणा vयज्ञायज्ञा सर्वेष्वपि यज्ञेषु तुर्वणिः तूर्णवनिस्त्वरमाणा संभजमाना भवति । 'तुर्वणिस्तूर्णवनिः' (निरु. ६. १४) इति यास्कः । तत्तद्यागावसरे आगत्य हविः स्वीकृत्य वैकल्यपरिहारेण समं कुरुथेत्यर्थः । किंच vवः यूयं vधियंधियं युष्मत्संबन्धिवृष्टिप्रदानादिरूपं सर्वं कर्म vदेवयाः देवान् प्रापयितार एव सन्तः vदधिध्वे धारयथ धारयध्वे वा । देवार्थहविराद्युत्पादनाय वृष्टिं कुरुथेत्यर्थः । यस्मादेवं कुरुथ तस्मात् vवः युष्मान् vअर्वाचः अस्मदभिमुखान् vआ vववृत्याम् आवर्तयामि । किमर्थम् । vरोदस्योः द्यावापृथिव्योः vमहे महते vअवसे रक्षणाय प्रीणनाय वा । तदपि किमर्थमिति । vसुविताय सुष्ठु व्याप्ताय । कैः साधनैः । vसुवृक्तिभिः शोभनावर्जनैः स्तोत्रैः ॥

वव्रासो न ये स्वजाः स्वतवस इषं स्वरभिजायन्त धूतयः ।
सहस्रियासो अपां नोर्मय आसा गावो वन्द्यासो नोक्षणः ॥ २ ॥

वव्रासः । न । ये । स्वऽजाः । स्वऽतवसः । इषम् । स्वः । अभिऽजायन्त । धूतयः ।
सहस्रियासः । अपाम् । न । ऊर्मयः । आसा । गावः । वन्द्यासः । न । उक्षणः ॥ २ ॥

vये मरुतः vवव्रासो vन । वव्रिरिति रूपनाम । रूपवन्त इव । ते यथा प्रकृष्टा लक्ष्यन्ते तद्वत् । यद्वा । अरूपा अपि सरूपा इव । vस्वजाः स्वयमेव स्वस्मात् वा जायमानाः । अनन्यहेतुकाः इत्यर्थः[1] । vधूतयः कम्पनशीलाः सन्ति ते vइषम् अन्नं हविर्लक्षणमन्नसाधनं सस्यादिकं वा vस्वः स्वर्गं च vअभिजायन्त अभिलक्ष्य प्रादुर्भवन्ति । ते दृष्टान्तमुखेन श्रूयन्ते । vअपां vनोर्मयः उदकानामूर्मय इव vसहस्रियासः सहस्रसंमिताः तथा vवन्द्यासः बहुक्षीरादिप्रदत्वेन स्तुत्याः vगावः vन गाव इव vआसा समीपे एव vउक्षणः वृष्ट्युदकस्य सेक्तारः । तादृशा मरुतः प्रादुर्भवन्तीत्यन्वयः ॥

सोमासो न ये सुतास्तृप्तांशवो हृत्सु पीतासो दुवसो नासते ।
एषामंसेषु रम्भिणीव रारभे हस्तेषु खादिश्च कृतिश्च सं दधे ॥ ३ ॥

सोमासः । न । ये । सुताः । तृप्तऽअंशवः । हृत्ऽसु । पीतासः । दुवसः । न । आसते ।
आ । एषाम् । अंसेषु । रम्भिणीऽइव । ररभे । हस्तेषु । खादिः । च । कृतिः । च । सम् । दधे ॥३॥

---

१. ऋ१–' इत्यर्थः ' इत्यस्यानन्तरं ' स्वतवसः स्वयंतावलाः ( स्वायत्तबलाः ) अवहायं ( असहायाः ) इत्यर्थः ' इत्यधिकम् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vये मरुतः vसुताः अभिषुताः vतृप्तांशवः तर्पितावयवाः vसोमासो vन सोमा इव । यथा वल्ली-रूपाः सोमा अभिषवात्पूर्वमाप्यायनेन तृप्तावयवाः सन्तः पश्चात् सुताः अभिषुताः रसभूताः vपीतासः पीताः सन्तः vहृत्सु पातॄणां हृदयेषु vदुवसो vन vआसते परिचरन्त इवासते तद्वत् ये मरुतो यज्ञे आहूता-स्तृप्तावयवा भवन्ति ध्यायमानाः सन्तो हृत्सु हृदयेषु दुवसो न परिचरन्त इवासते । यद्वा । प्राणादि-रूपेण शरीरे स्थिताः दुवसः परिचरन्त इव गमनादिचेष्टाः कुर्वन्त आसते । vएषामंसेषु vरम्भिणीव युवतमांसालम्बिनी योषिदिव vआ vरारभे आरेभे आश्लिष्यति । अवलम्बने सामर्थ्यात् शक्त्याख्या-युधविशेषो भुजलक्ष्मीर्वा । किंच vहस्तेषु vखादिः हस्तत्राणकः vच vकृतिः कर्तनी vच खड्गलताष्टिश्च[1] vसं vदधे संधीयते सम्यग्धृता भवति । परस्परसमुच्चयार्थाश्चकाराः[2] । ये मरुतः उक्तरूपाः ते आविर्भवन्तीत्यर्थः ॥

**अव स्वयुक्ता दिव आ वृथा ययुरमर्त्याः कशया चोदत त्मना ।**
**अरेणवस्तुविजाता अचुच्यवुर्दृळ्हानि चिन्मरुतो भ्राजदृष्टयः ॥ ४ ॥**

अव । स्वऽयुक्ताः । दिवः । आ । वृथा । ययुः । अमर्त्याः । कशया । चोदत । त्मना ।
अरेणवः । तुविऽजाताः । अचुच्यवुः । दृळ्हानि । चित् । मरुतः । भ्राजत्ऽऋष्टयः ॥ ४ ॥

एते मरुतः vस्वयुक्ताः स्वैर्युक्ताः परस्परं संयुक्ताः स्वेन धनेन वा युक्ताः सन्तः vदिवः द्युलोकात् vवृथा अनायासेन vअव vआ vययुः अवाङ्मुखमागच्छन्ति । हे vअमर्त्याः मरुतः यूयं vत्मना आत्मना स्वयमेव vकशया । वाङ्नामैतत् । वाचा स्तुतिरूपया vचोदत प्रेरयत । स्तोतुमिति शेषः । ते च vमरुतः vअरेणवः अपापाः[3] vतुविजाताः बहुयज्ञेषु प्रादुर्भूताः vभ्राजदृष्टयः दीप्ताः एवंभूताः सन्तः vदृळ्हानि vचित् दृढान्यपि पर्वतानि[4] vअचुच्यवुः च्यावयन्ति चालयन्ति ॥

**को वोऽन्तर्मरुत ऋष्टिविद्युतो रेजति त्मना हन्वेव जिह्वया ।**
**धन्वच्युतं इषां न यामनि पुरुप्रैषा अहन्योऽ३ नैतशः ॥ ५ ॥**

कः । वः । अन्तः । मरुतः । ऋष्टिऽविद्युतः । रेजति । त्मना । हन्वाऽइव । जिह्वया ।
धन्वऽच्युतः । इषाम् । न । यामनि । पुरुऽप्रैषाः । अहन्यः । न । एतशः ॥ ५ ॥

हे vमरुतः हे vऋष्टिविद्युतः मेघभेदनायुधविशेषेण विद्योतमानाः[5] युष्माकम् vअन्तः युष्मासु मध्ये स्थित्वा vकः पुमान् vरेजति चालयति प्रेरयति । तर्हि कथं चालनमिति उच्यते । vत्मना आत्मनैव । चालने दृष्टान्तः । vजिह्वया vहन्वेव ॥ द्विवचनस्य आकारः ॥ हनू इव । तौ यथा रसनया चाल्येते तद्वत् । यद्यप्येवं तथापि vइषाम् अन्नानां तत्साधनानां सस्यानां vयामनि प्राप्तौ समृद्ध्यर्थं vधन्वच्युतः vन । धन्वञ्छब्दोऽन्तरिक्षस्य वचनः । तेन तत्स्थमुदकं लक्ष्यते । उदक-

---

१. ख–खड्गलता च; । २. क-ज्ञ-झ–परस्परसमुच्चयार्थश्चकारः । ३. ज्ञ-ञ१–अपापाः समुन्दनेन पांसुविरोधिनो वा । ४. ञ१–सर्वस्य । ५. ञ१–विद्योतमानाः वृष्ट्या वा तादृशाः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्राविणो मेघा इव। ते यथा आकाङ्क्ष्यन्ते तथा युष्मान् अन्नादिप्राप्तये vपुरुप्रैषाः बहुविधं फलमिच्छन् यजमानः स्तोत्रैर्बहुप्रकारमाकारयतीत्यर्थः। तत्र दृष्टान्तः। vअहन्यः अह्नि भवः vएतशः vन अश्व इव। स यथा शिक्षकेण नानाप्रकारं प्राप्यते तद्वत्॥ ॥ ६ ॥

क्व स्विदस्य रजसो महस्परं क्वावरं मरुतो यस्मिन्नायय।
यद्व्यावयथ विथुरेव संहितं व्यद्रिणा पतथ त्वेषमर्णवम् ॥ ६ ॥

क्व। स्वित्। अस्य। रजसः। महः। परम्। क्व। अवरम्। मरुतः। यस्मिन्। आऽयय। यत्। व्यवयथ। विथुराऽइव। सम्ऽहितम्। वि। अद्रिणा। पतथ। त्वेषम्। अर्णवम्॥६॥

हे vमरुतः यूयं vयस्मिन् उदके निमित्तभूते सति vआयय आगच्छत vअस्य vरजसः वृष्ट्युदकस्य लोकस्य वा vमहः महतः vपरं पारमन्तं vक्व vस्वित्। कुत्रास्तीति। नास्तीत्यर्थः। तथा vअवरम् अवाङ्भागः आदिश्च vक्व स्वित्। कुत्रास्ति। आद्यन्तं न कोऽपि जानातीत्यर्थः। vयत् यदा यूयं vविथुरेव विथुराणि शिथिलानि तृणानीव vसंहितम् एकभूतमुदकं vव्यावयथ स्वस्थानात् चालयथ तदा vअद्रिणा वज्रेण vत्वेषं दीप्तम् vअर्णवम् उदकवन्तं मेघं vवि vपतथ विशीर्णं पातयथ॥

सातिर्न वोऽमवती स्वर्वती त्वेषा विपाका मरुतः पिपिष्वती।
भद्रा वो रातिः पृणतो न दक्षिणा पृथुज्रयी असुर्येव जञ्जती ॥ ७ ॥

सातिः। न। वः। अमऽवती। स्वःऽवती। त्वेषा। विऽपाका। मरुतः। पिपिष्वती।
भद्रा। वः। रातिः। पृणतः। न। दक्षिणा। पृथुऽज्रयी। असुर्याऽइव। जञ्जती॥ ७॥

हे vमरुतः vवः युष्माकं संबन्धिनी vसातिर्न संभक्तिरिव युष्मत्संभजनं यथा प्रशस्तगुणं तद्वत् vवः vरातिः वृष्ट्यादिविषया vअमवती अमात्यवती इन्द्रादिसहायवती। यथा 'राजेवामवान्' (ऋ. सं. ४. ४. १) इत्यत्र अमशब्दोऽमात्यवचनस्तद्वत्। यद्वा। वः सातिः संविभक्तिः न अमवती रोगवती न भवति किंतु vस्वर्वती सुखवती vत्वेषा दीप्ता vविपाका परिपक्वफला vपिपिष्वती पेषणवती कृषीवलैः कर्षणवती। वृष्टौ सत्यां कर्षन्तीति प्रसिद्धम्। स्वविरोधिपेषणवती वा। vभद्रा भन्दनीया स्तुत्या। किंच vपृणतः दातुर्धनिकस्य vदक्षिणा vन दक्षिणेव तद्वत् समृद्धकरी[1] vपृथुज्रयी पृथुजवा शीघ्रगामिनी। किंच vअसुर्येव असुरस्य स्वभूता vजञ्जती सर्वानभिभवन्ती शक्तिरिव। सा यथा अन्येभ्योऽपहृत्य अन्यस्मै दातुं समर्था तद्वदियमपि मेघस्थमुदकमपहृत्य जगतो दातुं शक्तेत्यर्थः। ईदृशी रातिः अस्मभ्यमस्विति भावः॥

---

१. झ–समृद्धिकरी।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रति॑ ष्टोभन्ति॒ सिन्ध॑वः प॒विभ्यो॒ यद॒भ्रियां॒ वाच॑मुदी॒रय॑न्ति ।
अव॑ स्मयन्त वि॒द्युतः॑ पृथि॒व्यां यदी॑ घृ॒तं म॒रुतः॑ प्रुष्णु॒वन्ति॑ ॥ ८ ॥

प्रति॑ । स्तो॒भ॒न्ति॒ । सिन्ध॑वः । प॒विऽभ्यः॑ । यत् । अ॒भ्रिया॑म् । वाच॑म् । उ॒त्ऽई॒रय॑न्ति ।
अव॑ । स्म॒य॒न्त॒ । वि॒ऽद्युतः॑ । पृ॒थि॒व्याम् । यदि॑ । घृ॒तम् । म॒रुतः॑ । प्रु॒ष्णु॒वन्ति॑ ॥ ८ ॥

ᵛपविभ्यः मरुत्संबन्धिवज्रेभ्यः ᵛसिन्धवः स्यन्दनशीला आपः ᵛप्रति ᵛष्टोभन्ति प्रतिचलन्ति । कदा । ᵛयत् यदा ᵛअभ्रियाम् अभ्रभवां ᵛवाचं शब्दं स्तनितलक्षणम् ᵛउदीरयन्ति उच्चारयन्ति वज्राणि । किंच ᵛविद्युतः विद्योतमानास्तडितः ᵛपृथिव्याम् अन्तरिक्षे । पृथिवीत्यन्तरिक्षनाम, 'पृथिवी भूः' ( नि. १. ३. ९ ) इति तन्नामसूक्तत्वात् । तत्र ᵛअव ᵛस्मयन्त स्मयन्ते अवाङ्मुखं प्रकाशन्ते । पृथिव्याम् इत्येतदुत्तरत्र वा योज्यम् । ᵛयदि यदा पृथिव्यां भूम्यां ᵛघृतं क्षरदुदकं ᵛमरुतः ᵛप्रुष्णुवन्ति प्रुष्णन्ति सिञ्चन्ति ॥ प्रुषेः क्रैयादिकस्य व्यत्ययेन श्नुः ॥ यदैवं तदेत्यर्थः ॥

असू॑त॒ पृश्नि॑र्मह॒ते रणा॑य त्वे॒षम॒यासां॑ म॒रुता॒मनी॑कम् ।
ते स॑प्स॒रासो॑ऽजनय॒न्ताभ्व॒मादित्स्व॒धामि॑षि॒रां पर्य॑पश्यन् ॥ ९ ॥

असू॑त । पृश्निः॑ । म॒ह॒ते । रणा॑य । त्वे॒षम् । अ॒यासा॑म् । म॒रुता॑म् । अनी॑कम् ।
ते । स॒प्स॒रासः॑ । अ॒ज॒न॒य॒न्त॒ । अभ्व॑म् । आत् । इत् । स्व॒धाम् । इ॒षि॒राम् । परि॑ । अ॒प॒श्य॒न् ॥९॥

ᵛपृश्निः मरुन्माता नानावर्णा । 'पृश्नियै वै पयसो मरुतो जाताः' ( तै. सं. २. २. ११. ४ ), 'पृश्नेः पुत्रा उपमासः' ( ऋ. सं. ५. ५८. ५ ) इत्यादिश्रुतेः । तामेवान्तरिक्षदेवतां केचिदाहुः । सा देवी ᵛत्वेषं दीप्तम् ᵛअयासां गन्तॄणां ᵛमरुतामनीकं समूहम् एकोनपञ्चाशत्संख्याकम् ᵛअसूत उत्पादितवती । किमर्थम् । ᵛमहते ᵛरणाय संग्रामाय । मेघजयायेत्यर्थः । ᵛते च मरुतः ᵛसप्सरासः समानरूपा हिंसका वा मेघानाम् ᵛअभ्वं मेघं जनयन्ति उत्पादितवन्तः । ᵛआदित् अनन्तरमेव ᵛइषिरां सर्वैरेष्टव्यां ᵛस्वधाम् अन्नं सस्यादिसमृद्धिलक्षणं ᵛपर्यपश्यन् परिपश्यन्ति सर्वे जनाः ॥

ए॒ष वः॒ स्तोमो॑ मरुत इ॒यं गीर्मा॑न्दा॒र्यस्य॑ मा॒न्यस्य॑ का॒रोः ।
एषा या॑सीष्ट त॒न्वे॑ व॒यां वि॒द्यामे॒षं वृ॒जनं॑ जी॒रदा॑नुम् ॥ १० ॥

ए॒षः । वः॒ । स्तोमः॑ । म॒रु॒तः॒ । इ॒यम् । गीः । मा॒न्दा॒र्यस्य॑ । मा॒न्यस्य॑ । का॒रोः ।
आ । इ॒षा । या॒सी॒ष्ट॒ । त॒न्वे॑ । व॒याम् । वि॒द्याम॑ । इ॒षम् । वृ॒जन॑म् । जी॒रऽदा॑नुम् ॥ १० ॥

'एष वः' इति दशमी व्याख्याता ॥ ॥ ७ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' महश्चित्त्वम् ' इत्यष्टर्चं पञ्चमं सूक्तमैन्द्रमागस्त्यं त्रैष्टुभम्। द्वितीया चतुष्पदा विराट् ' अथ चतुष्पदा ', ' विराड्दशकैः ' इत्युक्तत्वात्, ' विराजो दिशः ' (पि. सू. ३. ५) इति पिङ्गलनागेन सूत्रितत्वाच्च। ' महोऽष्टौ द्वितीया विराट् ' इत्यनुक्रमणिका। समूढेऽहे दशरात्रे द्वितीये छन्दोमे मरुत्वतीये इदं ' विश्वजितोऽग्निं नरः ' इति खण्डे सूत्रितं–' द्वितीयस्य शंसा महां महश्चित्त्वमिन्द्र ' ( आश्व. श्रौ. ८. ७ ) इति ॥

महश्चित्त्वमिन्द्र यत एतान्महश्चिदसि त्यजसो वरूता ।
स नो वेधो मरुतां चिकित्वान्त्सुम्ना वनुष्व तव हि प्रेष्ठा ॥ १ ॥

महः । चित् । त्वम् । इन्द्र । यतः । एतान् । महः । चित् । असि । त्यजसः । वरूता ।
सः । नः । वेधः । मरुताम् । चिकित्वान् । सुम्ना । वनुष्व । तव । हि । प्रेष्ठा ॥ १ ॥

हे ᵛइन्द्र ᵛत्वं ᵛयतः कारणात् ᵛएतान् मरुतः ᵛमहश्चित् महतोऽपि सामर्थ्यातिशयवत्त्वात् त्वं निरपेक्षेणापि स्नेहात् न त्यजसीति शेषः। अतः कारणात् ᵛमहश्चिदसि। चित् इति पादपूरणः। महतोऽपि ᵛत्यजसः त्यागात्। यद्वा। एतत् क्रोधनाम। क्रोधाद्वा। ᵛवरूता वरिता रक्षिता असि भवसि । यद्वा । मरुतोऽपि त्यागात् वृष्ट्यादिविषयात् वारयितासि । यस्मादेवं तस्मात् हे ᵛमरुतां ᵛवेधः विधातः ᵛसः तादृशस्त्वं ᵛचिकित्वान् चेतनावान् अस्मदनुग्रहविषयज्ञानोपेतः सन् ᵛनः अस्मभ्यं ᵛसुम्ना सुखानि मरुदायत्तानि वृष्ट्यादिरूपाणि ᵛवनुष्व देहि। तानि सुम्नानि ᵛतव ᵛहि ᵛप्रेष्ठा तव खलु प्रियतमानि। हिशब्दः ' अयमिन्द्रो मरुत्सखा ' ( ऋ. सं. ८. ७६. २ ) इत्यादिश्रुतिषु प्रसिद्ध्यर्थः ॥

अयुज्रन्त इन्द्र विश्वकृष्टीर्विदानासो निष्षिधो मर्त्यत्रा ।
मरुतां पृत्सुतिर्हासमाना स्वर्मीळ्हस्य प्रधनस्य सातौ ॥ २ ॥

अयुज्रन् । ते । इन्द्र । विश्वऽकृष्टीः । विदानासः । निःऽसिधः । मर्त्यऽत्रा ।
मरुताम् । पृत्सुतिः । हासमाना । स्वःऽमीळ्हस्य । प्रऽधनस्य । सातौ ॥ २ ॥

पूर्वमन्त्रे मरुतामिन्द्रसाहाय्यमुक्तम्। अत्रेन्द्रस्य मरुत्साहाय्यमुच्यते। हे ᵛइन्द्र ᵛते मरुतः ᵛअयुज्रन् युज्यन्ते त्वया युक्ता भवन्तीत्यर्थः। कीदृशास्ते। ᵛविश्वकृष्टीः विश्वकृष्टयो राज्यत्वेन[1] सर्वजनवन्तः किंच ᵛमर्त्यत्रा मर्त्येषु मर्त्यार्थं ᵛनिष्षिधः निःशेषेणोदकस्य सेक्तॄन्[2] मेघान् ᵛविदानासः जानानाः। किंच येषां ᵛमरुतां ᵛपृत्सुतिः सेना ᵛस्वर्मीळ्हस्य ᵛप्रधनस्य सुखसेक्तुः प्रकृष्टधनवतो वृत्रादिसंग्रामस्य ᵛसातौ लाभे जये निमित्तभूते सति सेना ᵛहासमाना हासं कुर्वती हर्षयुक्ता भवति । यद्वा। सुखेन मिह्यते जलं यस्मिन् तादृशस्य प्रधनस्य प्रकृष्टोदकाख्यधनसाधनस्य संग्रामस्य सातौ । मेघभेदनायेति यावत्। येषामीदृशी सेनास्ति ते मरुतोऽयुज्रन्निति संबन्धः ॥

---

१. झ१–रक्षेत्वेन ( रक्ष्यत्वेन ); २. क-झ–सेक्तॄन् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अम्यक्सा त इन्द्र ऋष्टिरस्मे सनेम्यभ्वं मरुतो जुनन्ति ।
अग्निश्चिद्धि ष्मातसे शुशुक्कानापो न द्वीपं दधति प्रयांसि ॥ ३ ॥

अम्यक्। सा। ते। इन्द्र। ऋष्टिः। अस्मे इति। सनेमि। अभ्वम्। मरुतः। जुनन्ति।
अग्निः। चित्। हि। स्म। अतसे। शुशुक्कान्। आपः। न। द्वीपम्। दधति। प्रयांसि ॥३॥

हे vइन्द्र vते तव vसा प्रसिद्धा vऋष्टिः वज्राख्यायुधविशेषः vअस्मे अस्मद्वृष्ट्यर्थम् vअम्यक् प्राप्नोति मेघसमीपे। एवं च सति vमरुतः अपि। 'सनेमि अह्नाय[1]' (नि. ३. २७. ४) इति षट् पुराणनामानि इत्युक्तत्वात् vसनेमि इति पुराणनाम[1]। पुराणं चिरकालं संगृहीतम् vअभ्वम् उदकं vजुनन्ति क्षिपन्ति वर्षन्तीत्यर्थः। वृष्ट्या सस्यादिसमृद्धौ सत्याम् vअग्निश्चिद्धि vष्म। हि स्म इति पूरणे। अग्निरपि vअतसे संतते कर्मणि निमित्तभूते सति vशुशुक्कान् दीप्यमानो वर्तते। पश्चात् vप्रयांसि चरुपुरोडाशादिहवींषि vदधति धारयन्ति ददति वा यजमानाः। किमिव। vआपो vन vद्वीपम्। द्विपार्श्वस्थोदकवान्पर्वतादिर्द्वीपः। तं यथा आपो धारयन्ति तद्वत्। यद्वा। आयुधमेवोच्यते। वज्राख्यायुधविशेषोऽतसे काष्ठसमूहे शुशुक्कान् दीपयन्नग्निश्चित्। चिच्छब्दः उपमार्थे 'दधि चिदित्युपमार्थे' (निरु. १. ४) इति यास्केनोपमार्थस्योक्तत्वात्। काष्ठे ज्वलन्नग्निरिव तद्वद्दीप्तो वर्तते। एतदेव दीप्तत्वमपेक्ष्य सेत्युक्तम्। एवं च सति आपो द्वीपमिव वृष्ट्युदकानि प्रयांसि सस्याद्यन्नानि दधति धारयन्ति। एतत्सर्वं महानुभावस्येन्द्रस्य ऋष्टेः सामर्थ्यमितीन्द्रस्य स्तुतिः ॥

त्वं तू न इन्द्र तं रयिं दा ओजिष्ठया दक्षिणयेव रातिम् ।
स्तुतश्च यास्ते चकनन्त वायोः स्तनं न मध्वः पीपयन्त वाजैः ॥ ४ ॥

त्वम्। तु। नः। इन्द्र। तम्। रयिम्। दाः। ओजिष्ठया। दक्षिणयाऽइव। रातिम्।
स्तुतः। च। याः। ते। चकनन्त। वायोः। स्तनम्। न। मध्वः। पीपयन्त। वाजैः ॥४॥

हे vइन्द्र vत्वं vतु। तुः अवधारणे। त्वमेव vतं vरयिं त्वद्दानयोग्यं गवादिधनं vदाः देहि। यस्मादितरेभ्योऽपि त्वमेव बहुप्रदः अतोऽतिमहद्धनं देहीत्यर्थः। वयं तु vओजिष्ठया ओजस्वितमया परिक्रमणार्हया vदक्षिणया समृद्धिसाधनया गवादिलक्षणया ऋत्विजम् vइव vरातिं दातारं त्वां प्रीणयाम इति शेषः। यद्वा। दक्षिणाशब्दो देयद्रव्यसामान्यवचनः। रातिशब्दो बन्धुवचनः। हिरण्यादिसारवद्द्रव्यप्रदानेन बन्धुं यथा वशीकुर्वन्ति तद्वत् त्वां वशीकुर्म इत्यर्थः। किंच vवायोः धौतयुवक्षेपिष्ठस्य शीघ्रवरप्रदस्य vते ॥ कर्मणि षष्ठी ॥ वायुं त्वां vस्तुतः येऽस्मदीयाः स्तोतारः vचकनन्त कामयन्ते अस्तवन्। vयाः स्तुतयः त्वामेव अकामयन्तेति वा योजना ॥ कनतेर्णयन्तात् लुङि चङि रूपम्। 'चङ्यन्यतरस्याम्' इति चङः पूर्वमक्षरमुदात्तम् ॥ त्वां होत्रादयः vवाजैः हविर्लक्षणैरन्नैः vपीपयन्त

---

१. ऋ१—पुराणनामैतत्। सनेमि अह्नायेति षट्पुराणनामानीत्युक्तत्वात्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आप्याययन्ति । तत्र दृष्टान्तः । vमध्वः मधुरस्य स्तन्यस्य लाभाय वाजैः सारवद्भिरन्नविशेषैः vस्तनं vन । तं यथा आप्याययन्ति तद्वद्वयं त्वां बहुकृतप्रदानाय स्तुत्या हविषा आप्याययामः । त्वं तु दातव्यत्वेन प्रसिद्धं धनं सर्वदा देहीत्यर्थः ॥

त्वे रायं इन्द्र तोशतमाः प्रणेतारः कस्य चिदृतायोः ।
ते षु णो मरुतो मृळयन्तु ये स्मा पुरा गातुयन्तीव देवाः ॥ ५ ॥

त्वे इति । रायः । इन्द्र । तोशऽतमाः । प्रऽनेतारः । कस्य । चित् । ऋतऽयोः ।
ते । सु । नः । मरुतः । मृळयन्तु । ये । स्म । पुरा । गातुयन्तिऽइव । देवाः ॥ ५ ॥

हे vइन्द्र vत्वे तव vरायः धनविशेषाः vतोशतमाः अतिशयेन प्रीणयितारः ॥ तुष्यतेस्तोषः । छान्दसं शत्वम् ॥ यद्वा । ते रायो रातयो बन्धवो बन्धुभूताः सखिभूता मरुतः तोशतमाः । तोशतिर्वधकर्मा, 'नितोशयति निवर्हयति' ( नि. २. १९. २९ ) इति तन्नामसु पाठात् । तोशतमा हिंसितृतमा अवर्षकाणां मेघानाम् । vकस्य vचिदृतायोः । ऋतमिति यज्ञनाम । कस्यापि यज्ञेच्छोर्यजमानस्य vप्रणेतारः प्रकर्षेण निर्वोढारः । vते vमरुतः vनः अस्मान् सुष्ठु vमृळयन्तु । के ते । vये vस्म ये खलु vदेवाः द्योतनशीला मरुतः vपुरा पूर्वं vगातुयन्तीव यज्ञगमनमिच्छन्तीव ते आगत्य मृळयन्तु ॥ ॥ ८ ॥

प्रति प्र याहीन्द्र मीळ्हुषो नॄन्महः पार्थिवे सदने यतस्व ।
अध यदेषां पृथुबुध्नास एतास्तीर्थे नार्यः पौंस्यानि तस्थुः ॥ ६ ॥

प्रति । प्र । याहि । इन्द्र । मीळ्हुषः । नॄन् । महः । पार्थिवे । सदने । यतस्व ।
अध । यत् । एषाम् । पृथुऽबुध्नासः । एताः । तीर्थे । न । अर्यः । पौंस्यानि । तस्थुः ॥ ६ ॥

हे vइन्द्र त्वं vमीळ्हुषः उदकसेक्तॄन् vनॄन् जगन्नेतॄन् नराकारान् वा vमहः महतः मेघान् vप्रति vप्र vयाहि अभिगच्छ । मेघानां वृत्ररूपेण नराकारत्वं युक्तम् । गत्वा च vपार्थिवे vसदने । पृथिवीत्यन्तरिक्षनाम । तत्संबन्धिनि स्थाने vयतस्व प्रयत्नं कुरु । तैः सह युध्यस्वेत्यर्थः । यद्वा । हविष्प्रदातॄन् कर्मनिर्वाहकान् महतो यजमानान् प्रति गच्छ । गत्वा च पार्थिवे सदने देवयजने यतस्व । यत्नं कुरु हविर्भोजनाय । vअध अपि vयत् यदा vएषां त्वत्साहाय्यकारिणां मरुतां संबन्धिनः vपृथुबुध्नासः विस्तीर्णमूलाः vएताः पृषद्वर्णा गन्तारो वा अश्वाः vअर्यः अरेः शत्रोः vपौंस्यानि vतीर्थे vन युद्धमार्ग इव vतस्थुः तिष्ठन्ति मेघानाक्रमन्ते । यद्वा । एषां मरुतां पृथुबुध्नासो बृहन्मूला एताः कृष्णवर्णा मेघास्तिष्ठन्ति । तत्र दृष्टान्तः । अर्यः अरणीयस्य स्वामिनः पौंस्यानि बलानि तीर्थे न राजवीथ्यां यथा तिष्ठन्ति तद्वत् ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रति घोराणामेतानामयासां मरुतां शृण्व आयतामुपब्दिः ।
ये मर्त्यं पृतनायन्तमूमैर्ऋणावानं न पतयन्त सर्गैः ॥ ७ ॥

प्रति । घोराणाम् । एतानाम् । अयासाम् । मरुताम् । शृण्वे । आऽयताम् । उपब्दिः ।
ये । मर्त्यम् । पृतनाऽयन्तम् । ऊमैः । ऋणऽवानम् । न । पतयन्त । सर्गैः ॥ ७ ॥

हे इन्द्र ते संबन्धिनां [v]घोराणां भयानकानां शब्दाभिमानानां[1] वा [v]एतानाम् एतवर्णानाम् [v]अयासाम् अयमानानां गमनशीलानां [v]मरुताम् [v]आयताम् आगन्तॄणां मरुताम् [v]उपब्दिः उप गुर्वादिसमीपे गम्यते ज्ञायते उपपद्यते इति वा उपब्दिर्वाक् । [v]शृण्वे श्रूयते ॥ कर्मणि कर्तृप्रत्ययः ॥ ते एव विशिष्यन्ते[2] । [v]ये मरुतः [v]मर्त्यं मरणधर्माणम् [v]ऊमैः स्वरक्षणैरुदकनिगमनसाधनैर्वा [v]पृतनायन्तं पृतनामात्मन इच्छन्तं वैरिणं मेघं वा सर्गैः सृष्टैः स्वकीयप्रहारविशेषैः [v]पतयन्त पातयन्ति तेषामेव ध्वनिः श्रूयते इत्यर्थः । पातने दृष्टान्तः । [v]सर्गैः [v]ऋणवानं [v]न ॥ ' छन्दसीवनिपौ० ' इति वनिप् ॥ ऋणवन्तम् अधमवैरिणमिव[3] । तं यथा पीडयित्वा तदीयं धनमपहरन्ति तद्वत् । एवंमहानुभावा मरुतस्तवानुगा इतीन्द्रस्य स्तुतिः ॥

त्वं मानेभ्य इन्द्र विश्वजन्या रदा मरुद्भिः शुरुधो गोअग्राः ।
स्तवानेभिः स्तवसे देव देवैर्विद्यामेषं वृजनं जीरदानुम् ॥ ८ ॥

त्वम् । मानेभ्यः । इन्द्र । विश्वऽजन्या । रद । मरुत्ऽभिः । शुरुधः । गोऽअग्राः ।
स्तवानेभिः । स्तवसे । देव । देवैः । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ ८ ॥

हे [v]इन्द्र [v]त्वं [v]मानेभ्यः मानार्थम् । चित्तेनेत्यर्थः ॥ तादर्थ्ये चतुर्थी ॥ [v]विश्वजन्या विश्वजन्यः ॥ सोः आकारः ॥ विश्वे प्राणिनः उत्पादनीया यस्य तादृशस्त्वं सर्वजनहितशक्त्या वा [v]मरुद्भिः सह [v]शुरुधः शोकस्य रोधयित्रीः[4] शोषिकाः[4] [v]गोअग्राः गर्जितमुदकं वा अग्रे पुरतो यासां ता मेघपङ्क्तीः [v]रद विलिख विदारय । हे [v]देव द्योतमान त्वं [v]स्तवानेभिः स्तूयमानैः [v]देवैः अन्यैर्मरुदादिभिर्ऋत्विग्भिर्वा [v]स्तवसे स्तूयसे ॥ उभयत्र कर्मणि कर्तृप्रत्ययः ॥ विद्यामेत्ययं व्याख्यातः ॥ ॥ ९ ॥

'न नूनमस्ति' इति पञ्चर्चं षष्ठं सूक्तमागस्त्यमैन्द्रम् । अत्रानुक्रमणिका–' न नूनं पञ्चागस्त्येनैन्द्रे हविषि मरुतामुद्यत इन्द्रागस्त्ययोः संवादः ऐन्द्रस्तत्राद्या तृतीया चेन्द्रवावयं चतुर्थी चादौ बृहती तिस्रोऽनुष्टुभः ' इति । सूक्तस्येन्द्रागस्त्यसंवादरूपत्वादाद्या तृतीया चतुर्थी चेन्द्रवावयम् । अतस्तासां यस्यवाक्यन्यायेन स ऋषिः । शिष्टे अगस्त्यवाक्ये । अतस्तयोः स एवर्षिः । आद्या च बृहती ततस्तिस्रोऽनुष्टुभः । अन्त्या अविशेषात् त्रिष्टुप् ॥ विशेषविनियोगो लैङ्गिकः ॥ अत्र यास्कः—' अगस्त्य इन्द्राय हविर्निरुप्य मरुद्भ्यः संप्रदित्सांचकार स इन्द्र एत्य परिदेवयांचक्रे ' ( निरु. १.५ ) इति ॥

---

१. झ१–शब्दायमानानाम् । २. झ–झ१–विशेष्यन्ते । ३. झ१–ऋणीकमिव वैरिणमिव वा । ४. झ१–रोषस्य वा शोषकाः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतम् ।
अन्यस्य चित्तमभि संचरेण्यमुताधीतं वि नश्यति ॥ १ ॥

न । नूनम् । अस्ति । नो इति । श्वः । कः । तत् । वेद । यत् । अद्भुतम् ।
अन्यस्य । चित्तम् । अभि । सम्ऽचरेण्यम् । उत । आऽधीतम् । वि । नश्यति ॥ १ ॥

परिदेवनप्रकारः प्रतिपाद्यते । इन्द्र आह । अद्यतनं यदस्ति तत् [v]नूनम् अत्र [v]न [v]अस्ति । नूनमत्र विचिकित्सार्थे । अत्र अद्य इति यद्यपि नास्ति तथापि उत्तरवाक्ये श्वः इति दर्शनादत्र अद्येति गम्यते । तथा [v]श्वः अपि नूनं [v]नो। उशब्दः अवधारणे। श्वस्तनमपि नैव नास्ति। अद्य यथा अस्मदर्थ-निरूपम् अस्मभ्यं नास्ति किल श्वः कथं लप्स्यते इति भावः । [v]यदद्भुतम् अन्यस्मै निरुप्य अन्यस्मै दत्तमिति यदस्ति वैपरीत्यं [v]तत् [v]कः [v]वेद । यद्वा । यदद्भुतं भावि कार्यं यदस्ति तत्को वेद । अद्य श्वो वा लभ्यते इत्याशा न कार्येत्युक्तं भवति । तदेवाह । [v]अभि [v]संचरेण्यं सर्वतः संचारि [v]अन्यस्य [v]चित्तं मानसं जानातीति[1] शेषः । [v]उत अपि च [v]आधीतम् आध्यातं चिन्तितमपि न दृश्यं किमु सकृत्स्मृतं [v]वि [v]नश्यति इति ॥

किं न इन्द्र जिघांससि भ्रातरो मरुतस्तव ।
तेभिः कल्पस्व साधुया मा नः समरणे वधीः ॥ २ ॥

किम् । नः । इन्द्र । जिघांससि । भ्रातरः । मरुतः । तव ।
तेभिः । कल्पस्व । साधुऽया । मा । नः । सम्ऽअरणे । वधीः ॥ २ ॥

इदमगस्त्यवाक्यम् । हे [v]इन्द्र [v]नः अस्मान् अनपराधिनः [v]किं [v]जिघांससि हन्तुमिच्छसि । कथमवध्यस्त्वमिति अत आह । [v]मरुतः [v]तव [v]भ्रातरः । त्वया भोगप्रदानेन[2] भरणीया इत्यर्थः । अतो वयमवध्या इत्युक्तं भवति । मरुतामिन्द्रभ्रातृत्वम् एकस्मिन्नेवादितिगर्भे उत्पन्नत्वात् । सा चोत्पत्तिः पुराणेषु प्रसिद्धा । सन्तु भ्रातरस्ततश्च किमिति अत आह । [v]तेभिः तैर्मरुद्भिः सह [v]साधुया साधुत्वं [v]कल्पस्व कल्पय हविर्भागं तैः सह युद्धं वा । [v]नः अस्मान् [v]समरणे संग्रामे [v]मा [v]वधीः मा हिंसीः । यद्वा । लुप्तो दृष्टान्तः । संग्रामे यथा विरोधिनं हंसि न तथास्मानिति ॥

किं नो भ्रातरगस्त्य सखा सन्नति मन्यसे ।
विद्मा हि ते तथा मनोऽस्मभ्यमिन्न दित्ससि ॥ ३ ॥

किम् । नः । भ्रातः । अगस्त्य । सखा । सन् । अति । मन्यसे ।
विद्म । हि । ते । यथा । मनः । अस्मभ्यम् । इत् । न । दित्ससि ॥ ३ ॥

---

१. क-झ१-को जानातीति । २. झ१-भागप्रदानेन ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इदमिन्द्रवाक्यम्। हे Vभ्रातः हे Vअगस्त्य। हविष्प्रदानवरप्रदानाभ्यां परस्परोपकारत्वात् भ्रातृत्वम्। तादृशस्त्वं Vसखा Vसन् अस्मद्धितकार्यपि सन् Vनः अस्मान् Vकिम् Vअति Vमन्यसे। कस्मादपराधादतिक्रम्य मनुषे। अपलपसि। नायमपलापः किंतु तथ्यमेवेति चेत् उच्यते। गन्तव्यं[1] Vते तव Vमनः मानसं Vयथा यथावस्तु Vविद्म जानीमः। कथं जानीथेति[2] उच्यते। Vअस्मभ्यमिन्न Vदित्ससि। अस्मदर्थं निरुक्षमस्मभ्यं दातुं नेच्छस्येव। इत् एवार्थे॥

**अरं कृण्वन्तु वेदिं समग्निमिन्धतां पुरः। तत्रामृतस्य चेतनं यज्ञं ते तनवावहै ॥४॥**

अरम्। कृण्वन्तु। वेदिम्। सम्। अग्निम्। इन्धताम्। पुरः।
तत्र। अमृतस्य। चेतनम्। यज्ञम्। ते। तनवावहै ॥ ४ ॥

इदमिन्द्रवाक्यम्। अपरे अगस्त्यवाक्यमाहुः। हे ऋत्विजो यूयं अगस्त्योऽङ्गीकृतवान् तस्मात् Vवेदिम् Vअरं Vकृण्वन्तु। संमार्जनपर्युक्षणादिना परिचरन्तु। तथा Vपुरः पुरस्तात् Vअग्निम् आहवनीयादिकं Vसम् Vइन्धताम् इध्मप्रक्षेपेण प्रज्वालयन्तु। Vतत्र अग्नौ Vअमृतस्य अमरणलक्षणस्य वेदत्वस्य[3] Vचेतनं प्रज्ञापकं Vयज्ञं हे अगस्त्य Vते त्वदीयं त्वं चाहं च Vतनवावहै। अगस्त्यवाक्यपक्षे शिष्टमविशिष्टम्। तत्र वेद्याममृतस्य तत्साधनस्य हविषो वा चेतनं प्रज्ञापनमासादनं कुरुत। आवां पत्नीयजमानौ अध्वर्युयजमानौ वा हे इन्द्र ते स्वदर्थं यज्ञं तनवावहै॥

**त्वमीशिषे वसुपते वसूनां त्वं मित्राणां मित्रपते धेष्ठः।**
**इन्द्र त्वं मरुद्भिः सं वदस्वाध प्राशान ऋतुथा हवींषि ॥ ५ ॥**

त्वम्। ईशिषे। वसुऽपते। वसूनाम्। त्वम्। मित्राणाम्। मित्रऽपते। धेष्ठः।
इन्द्र। त्वम्। मरुत्ऽभिः। सम्। वदस्व। अध। प्र। अशान। ऋतुऽथा। हवींषि ॥५॥

इदमगस्त्यवाक्यम्। हे Vवसूनां Vवसुपते अतिप्रभूतानां पुरोडाशाज्यादिधनानां स्वामिन् हे इन्द्र Vत्वमीशिषे ईश्वरो भवसि सर्वस्य। वृत्र्यवृत्तिभ्यां बहुत्वं नित्यं[4] संबन्धश्च[4] प्रतिपद्यते। यद्वा। हे वसुपते वसूनामीशिषे इति योजना। द्वितीयो वसुशब्दोऽनुवादो वा। तथा हे Vमित्राणां Vमित्रपते अस्मदादिमित्रस्य नित्यं पालकेन्द्र Vत्वं Vधेष्ठः सर्वस्यातिशयेन धारकोऽसि। हे Vइन्द्र Vत्वम् उक्तमहिमस्त्वं Vमरुद्भिः Vसं Vवदस्व तैः साकं सम्यक्कृतमिति वदस्व। Vअध अपि च स्वम् Vऋतुथा ऋतावृतौ। उपलक्षणमेतत्कालस्य। तत्तद्यागकाले Vहवींषि आज्यचर्वादीनि Vप्राशान प्रकर्षेण भुङ्क्ष्व॥ ॥ १० ॥

'प्रति वः' इति षड्चं सप्तमं सूक्तमागस्त्यं त्रैष्टुभं मारुतम्। आद्ये द्वे केवलमारुते। शिष्टाश्चतस्रो मरुत्वदिन्द्रदेवताकाः। 'प्रति वः षण्मारुतं तु चतस्रोऽन्त्या मरुत्वतीयाः' इत्यनुक्रमणिका। विशेषविनियोगो लैङ्गिकः॥

---

१. झ१–मन्तव्यम्। २. झ१–जानीम इति। ३. झ–झ१–देवत्वस्य। ४. झ १–नित्यसंबन्धश्च।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्रति व एना नमसाहमेमि सूक्तेन भिक्षे सुमतिं तुराणाम् ।
ररणता मरुतो वेद्याभिर्नि हेळो धत्त वि मुचध्वमश्वान् ॥ १ ॥

प्रति । वः । एना । नमसा । अहम् । एमि । सुऽउक्तेन । भिक्षे । सुऽमतिम् । तुराणाम् ।
ररणता । मरुतः । वेद्याभिः । नि । हेळः । धत्त । वि । मुचध्वम् । अश्वान् ॥ १ ॥

हे मरुतः ᵛवः युष्मान् ᵛअहं ᵛप्रति ᵛएमि अभिगच्छामि । केन साधनेन । ᵛनमसा नमस्कारेण हविषा वा । नम इत्यन्ननाम । तथा ᵛसूक्तेन शोभनवचनेन स्तुतिरूपेण । ᵛतुराणां त्वरमाणानां शत्रूणां हिंसकानां वा युष्माकं ᵛसुमतिं शोभनमतिम् अनुग्रहबुद्धिं ᵛभिक्षे याचे । इन्द्रस्यैव पुनर्हविष्प्रदानादिदं याच्यते । किंच हे ᵛमरुतः यूयं ᵛवेद्याभिः वेदितव्याभिः स्तुतिभिः ᵛररणता रममाणेन मनसा इत्थंभूताः सन्तः ᵛहेळः । क्रोधनामैतत् । क्रोधं युष्मदभिक्रमजनितं ᵛनि ᵛधत्त निकृष्टं धारयत त्यजतेत्यर्थः । तथा ᵛअश्वान् ᵛवि ᵛमुचध्वम् रथेभ्यो वियोजयत । क्रोधात् पुनर्गमनं मा कुरुतेत्यर्थः ॥

एष वः स्तोमो मरुतो नमस्वान्हृदा तष्टो मनसा धायि देवाः ।
उपेमा यात मनसा जुषाणा यूयं हि ष्ठा नमस इद्वृधासः ॥ २ ॥

एषः । वः । स्तोमः । मरुतः । नमस्वान् । हृदा । तष्टः । मनसा । धायि । देवाः ।
उप । ईम् । आ । यात । मनसा । जुषाणाः । यूयम् । हि । स्थ । नमसः । इत् । वृधासः ॥२॥

हे ᵛमरुतः ᵛएष ᵛवः ᵛस्तोमः इदानींक्रियमाणप्रकारो वो युष्माकम् । युष्मदर्थ इत्यर्थः । कीदृशोऽयम् । ᵛनमस्वान् । नम इत्यन्ननाम । हविर्लक्षणान्नवान् । न केवलं स्तुतिमात्रं भक्षणाय हविरपि युष्माकमित्यर्थः । किंच ᵛहृदा ᵛतष्टः युष्मन्निवेदनबुद्धया संपादितः । तादृशः स्तोमो हे ᵛदेवाः देवनशीलाः ᵛमनसा अस्मदनुग्रहवता चित्तेन ᵛधायि धार्यताम् । तदर्थं ᵛमनसा आदरया बुद्धया ᵛजुषाणाः ᵛईम् एनां स्तुतिं तद्धविश्च सेवमानाः ᵛउप ᵛआ ᵛयात उपागच्छतैव । मा विलम्बं कुरुत । ᵛयूयं ᵛनमसः अन्नस्य हवीरूपस्य ᵛवृधासः ᵛस्थ ᵛहि वर्धयितारो भवथ खलु । अतो गन्तव्यमेव । ᵛइत् पूरणः ॥

स्तुतासो नो मरुतो मृळयन्तूत स्तुतो मघवा शंभविष्ठः ।
ऊर्ध्वा नः सन्तु कोम्या वनान्यहानि विश्वा मरुतो जिगीषा ॥ ३ ॥

स्तुतासः । नः । मरुतः । मृळयन्तु । उत । स्तुतः । मघऽवा । शम्ऽभविष्ठः ।
ऊर्ध्वा । नः । सन्तु । कोम्या । वनानि । अहानि । विश्वा । मरुतः । जिगीषा ॥ ३ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ते vमरुतः vस्तुतासः स्तुताः सन्तः vनः अस्मान् vमृळयन्तु सुखयन्तु । vउत अपि च vमघवा । मघमिति धननाम । अस्मद्दातव्यबहुधनेन तद्वानिन्द्रः vस्तुतः vशंभविष्ठः सुखस्य भावयितृतमः सन् अस्मान् मृळयतु । किंच हे vमरुतः vनः अस्माकं vजिगीषा ॥ जिगातेर्गतिकर्मणो जिगीषा ॥ जिगीषितव्यानि प्राप्तव्यानि उत्तरत्रानुभूयमानानि vविश्वा सर्वाणि vअहानि दिवसानि vऊर्ध्वा उन्नतान्युपर्युपरि श्रिया यशसा वा उत्कृष्टानि vकोम्या काम्यानि[1] स्पृहणीयानि vवनानि सर्वैः संभजनीयानि vसन्तु । जिगीषा जेतुमिष्टानि जेतव्यानि च सन्त्विति वा योज्यम् । एवं कृत्वा मरुत इन्द्रश्च सुखयन्त्वित्यर्थः ॥

अस्मादहं तविषादीषमाण इन्द्रात्त्रिया मरुतो रेजमानः ।
युष्मभ्यं हव्या निशितान्यासन्तान्यारे चकृमा मृळता नः ॥ ४ ॥

अस्मात् । अहम् । तविषात् । ईषमाणः । इन्द्रात् । भिया । मरुतः । रेजमानः ।
युष्मभ्यम् । हव्या । निऽशितानि । आसन् । तानि । आरे । चकृम । मृळत । नः ॥ ४ ॥

हे vमरुतः श्रृणुत । vअहम् vअस्मात् प्रसिद्धात् vतविषात् बलवतः vइन्द्रात् तत्सकाशात् vभिया भीत्या vईषमाणः पलायमानः पुरतः स्थातुमशक्तः तथा vरेजमानः वेपमानश्चाभवम् । ततश्च किमायातमिति अत आह । यानि vयुष्मभ्यं vहव्या हवींषि vनिशितानि संस्कृतानि vआसन् vतानि तान्येव vआरे vचकृम । दूरे कृतवन्तो वयमिन्द्रभयात् । अतः vनः अस्मान् अनपराधिनः vमृळत मृळयत सुखयत ॥

येन मानासश्चितयन्त उस्रा व्युष्टिषु शवसा शश्वतीनाम् ।
स नो मरुद्भिर्वृषभ श्रवो धा उग्र उग्रेभिः स्थविरः सहोदाः ॥ ५ ॥

येन । मानासः । चितयन्ते । उस्राः । विऽउष्टिषु । शवसा । शश्वतीनाम् ।
सः । नः । मरुत्ऽभिः । वृषभ । श्रवः । धाः । उग्रः । उग्रेभिः । स्थविरः । सहःऽदाः ॥५॥

हे इन्द्र vयेन vशवसा बलभूतेन त्वयानुगृहीताः vमानासः मान्यास्त्वयाभिमानिताः वा vउस्राः रश्मयः vशश्वतीनां[2] नित्यानां बह्वीनामुषसां vव्युष्टिषु सतीषु प्रकाशेषु सत्सु vचितयन्ते चेतयन्ते प्राणिनां[2] स्वस्वव्यवहाराय प्रज्ञापयन्ति । ऐन्द्र्यां दिशि तेनैवानुगृहीता उषसो रश्मय उद्गच्छन्तीति प्रसिद्धम् । हे vवृषभ वर्षितरिन्द्र vसः तादृशस्त्वं vमरुद्भिः सहितः vश्रवो vधाः सर्वत्र श्रूयमाणमन्नं धेहि स्थापय देहीत्यर्थः । कीदृशस्त्वम् । vउग्रः उद्गूर्णबलः vसहोदाः । पराभिभवसामर्थ्यं बलं सहः । तस्य दाता vस्थविरः पुरातनः । कीदृशैर्मरुद्भिः । vउग्रेभिः क्रूरबलैः । एवंमहानुभावः अन्नं देहि ॥

---

१. ऋ१–कोम्यानि । २. ऋ१–शश्वतीनां मध्ये । यद्वा । तादृशानां उषसां व्युष्टिषु सतीषु प्रकाशेषु सत्सु चितयन्ते प्राणिनः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्वं पाहीन्द्र सहीयसो नृन्भवा मरुद्भिरवयातहेळाः ।
सुप्रकेतेभिः सासहिर्दधानो विद्यामेषं वृजनं जीरदानुम् ॥ ६ ॥

त्वम् । पाहि । इन्द्र । सहीयसः । नृन् । भव । मरुत्ऽभिः । अवयातऽहेळाः ।
सुऽप्रकेतेभिः । ससहिः । दधानः । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ ६ ॥

हे [v]इन्द्र [v]त्वं [v]पाहि रक्ष । कान् । [v]सहीयसो [v]नॄन् सहस्वितमान् त्वदनुग्रहेण अतिप्रवृद्धबलान् नेतॄन् मनुष्यानस्मान् मरुतो वा । किंच [v]मरुद्भिः साकम् अस्मासु [v]अवयातहेळाः [v]भव । अपगतमन्युर्भव । मरुत्सु वा तथा भव । किंच [v]सुप्रकेतेभिः शोभनप्रज्ञानैर्मरुद्भिः सह [v]सासहिः शत्रूणामभिभविता सन् [v]दधानः अस्मदभिमतस्य धारयिता भवेति शेषः । शिष्टो व्याख्यातः ॥ ॥११॥

'चित्रो वः' इति तृचात्मकमष्टमं सूक्तमागस्त्यं मारुतं गायत्रम् । 'चित्रस्तृचं गायत्रम्' इत्यनुक्रमणिका । लैङ्गिको विशेषविनियोगः ॥

चित्रो वोऽस्तु यामश्चित्र ऊती सुदानवः । मरुतो अहिभानवः ॥ १ ॥

चित्रः । वः । अस्तु । यामः । चित्रः । ऊती । सुऽदानवः । मरुतः । अहिऽभानवः ॥१॥

हे [v]मरुतः [v]वः युष्माकं [v]यामः अस्मद्यज्ञागमः [v]चित्रः चायनीयः पूज्यः आश्चर्यभूतो वा [v]अस्तु भवतु । न केवलमागमनमेव चित्रं किंतु हे [v]सुदानवः शोभनदानाः हे [v]अहिभानवः अहीयमानप्रकाशाः युष्माकं संबन्धी [v]चित्रः स आगमः [v]ऊती ऊत्यै रक्षणाय इष्टतर्पणाय वा युक्तश्च भवतु । तदागमनं[1] शीघ्रमस्तु अभिमतप्रदं चास्त्विति यावत् ॥

आरे सा वः सुदानवो मरुत ऋञ्जती शरुः । आरे अश्मा यमस्यथ ॥ २ ॥

आरे । सा । वः । सुऽदानवः । मरुतः । ऋञ्जती । शरुः । आरे । अश्मा । यम् । अस्यथ ॥२॥

हे [v]सुदानवः शोभनदानाः [v]मरुतः [v]वः युष्माकं संबन्धिनी [v]ऋञ्जती प्रसाधयन्ती स्वतेजसा स्वात्मानमलंकुर्वती[2] प्रसिद्धिं प्राप्नुवाना वा [v]सा प्रसिद्धा [v]शरुः हिंसका ऋष्टिः [v]आरे दूरे भवतु । तथा [v]यम् [v]अस्यथ क्षिपथ सः [v]अश्मा व्यापकः आयुधविशेषः [v]आरे । दूरनामैतत् । दूरे भवतु मां न प्राप्नोतु । यद्वा । आरेशब्दः आराच्छब्दपर्यायः । स च दूरे समीपे च वर्तते । अत्र समीपवचनः । यम् अस्मत्तोऽन्यम् अस्यथ तं वैरिणमस्माकमुपलोपमः कठिन आयुधविशेषः आरे समीपं प्राप्नोतु ॥

तृणस्कन्दस्य नु विशः परि वृङ्क्त सुदानवः । ऊर्ध्वान्नः कर्त जीवसे ॥ ३ ॥

तृणऽस्कन्दस्य । नु । विशः । परि । वृङ्क्त । सुऽदानवः । ऊर्ध्वान् । नः । कर्त । जीवसे ॥३॥

---

१. क-ख-ज-ञ-ञ१-त-फ-त्वदागमनम् । २. ख-फ–आत्मानमलंकुर्वन्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे मरुतः [v]सुदानवः शोभनदानाः यूयं [v]तृणस्कन्दस्य तृणवत् चलनस्वभावस्य शुष्यमाणस्य वा मम [v]विशः पुत्रभृत्यादिरूपाः प्रजाः [v]नु क्षिप्रं [v]परि [v]वृङ्क्त परिवर्जयत बाधापरिहारेण रक्षत। यद्वा। उक्तलक्षणकालस्यासुरविशेषस्य वा प्रजाः परिवर्जयत। किंच [v]नः अस्मान् [v]ऊर्ध्वान् [v]कर्त कुरुत [v]जीवसे चिरजीवनाय ॥ ॥ १२ ॥

'गायत्साम' इति त्रयोदशर्चं नवमं सूक्तमागस्त्यं त्रैष्टुभमैन्द्रम्। 'गायत्सखोना' इत्यनुक्रान्तम्। समूळ्हे दशरात्रे तृतीये छन्दोमे मरुत्वतीयशस्त्रे एतत्सूक्तम्। 'विश्वजितोऽग्निं नरः' इति खण्डे सूत्रितं– 'तृतीयस्येन्द्रः स्वाहा गायत्साम' (आश्व. श्रौ. ८. ७) इति ॥

गायत्साम नभन्यं१ यथा वेरर्चाम तद्वावृधानं स्वर्वत्।
गावो धेनवो बर्हिष्यदब्धा आ यत्सद्मानं दिव्यं विवासान् ॥ १ ॥

गायत्। साम। नभन्यम्। यथा। वेः। अर्चाम। तत्। ववृधानम्। स्वःऽवत्।
गावः। धेनवः। बर्हिषि। अदब्धाः। आ। यत्। सद्मानम्। दिव्यम्। विवासान् ॥ १ ॥

हे इन्द्र [v]नभन्यं नभस्यं नभसि भवं नभोव्यापिनं हिंसकं वा राक्षसादिकस्य। नभतिर्वधकर्मा, 'नभति अर्दति' (नि. २. १९. १०) इति वधकर्मसु गणनात्। तादृशं [v]साम हे इन्द्र [v]यथा [v]वेः येन प्रकारेण वेत्सि तथा [v]गायत् गायत्युद्गाता। [v]तत् तस्मात् यतः स्तौति ततः कारणात् [v]ववृधानं वर्धमानं [v]स्वर्वत् फलभूतेन स्वर्गेण तद्वच्छस्त्रं यथा वेः तथा [v]अर्चाम पूजयाम शंसामेत्यर्थः। स्तुतमनु शंसतीति न्यायात्। यद्वा। तदुक्तलक्षणं साम ववृधानं सर्वत्र यथा भवति तथा अर्चाम। किंच[1] [v]धेनवः दोग्ध्र्यः [v]अदब्धाः अहिंसिताः [v]गावः [v]यत् [v]बर्हिषि [v]सद्मानं सीदन्तं [v]दिव्यं दिवि भवमिन्द्रं त्वाम् [v]आ [v]विवासान्[1]। विवासतिः परिचरणकर्मा। आगत्य परिचरन्ति क्षीरं दुहन्ति तथा अर्चाम॥

अर्चद्वृषा वृषभिः स्वेदुहव्यैर्मृगो नाश्वो अति यज्जुगुर्यात्।
प्र मन्दयुर्मनां गूर्त होता भरते मर्यो मिथुना यजत्रः ॥ २ ॥

अर्चत्। वृषा। वृषऽभिः। स्वऽइदुहव्यैः। मृगः। न। अश्वः। अति। यत्। जुगुर्यात्।
प्र। मन्दयुः। मनाम्। गूर्त। होता। भरते। मर्यः। मिथुना। यजत्रः ॥ २ ॥

[v]वृषा हविषां वर्षिता अयं यजमानः [v]स्वेदुहव्यैः स्वायत्तेद्धविष्कैः। यद्वा। स्वयंप्रासेन्धकं हव्यं येषां तादृशैः। [v]वृषभिः वर्षकैर्हविष्प्रदातृभिः अध्वर्यवादिभिर्विशिष्टः सन् [v]अर्चत् अर्चयतीन्द्रम्। यद्वा। वृषा फलस्य वर्षितायमिन्द्रः उक्तलक्षणैरध्वर्यवादिभिरर्च्यते। [v]यत् यस्मात् [v]अश्नः व्यापकः पानाद्यर्थं धावन् [v]मृगो [v]न हरिणादिरिवायमिन्द्रः अश्नोऽशनशीलः सन् [v]अति [v]जुगुर्यात् अत्यर्थमुद्युङ्क्ते हविर्भक्षणाय। यथा मृगः क्षुत्पिपासार्दितः शीघ्रमुद्युङ्क्ते तथायमिन्द्रोऽपि। यस्मादेवं तस्मादर्चति।

---

१. झ१–किंच यद्यस्मात् अदब्धा अहिंसिता धेनवो नूतनप्रसवा गावो बर्हिषि यज्ञे तदर्थं दिव्यं सद्मानं देवयजनसाधनम्। यद्वा मत्वर्थो लुप्यते। सद्मवन्तं दिव्यं दिविभवम् आविवासान्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यद्वा । अयमिन्द्रो यत् यथा अक्षो सृग इव अति जुगुर्यात् भक्षयेत् तथा अर्चतीत्यर्थः । किंच हे ᵛगूर्त उद्गूर्णेन्द्र ᵛमनां मननं स्तोत्रमिच्छतां देवानां ᵛमन्द्युः स्तुतियुक्तः ᵛमर्यः ᵛहोता मानुषः एतन्नामकः ऋत्विक् ᵛयजत्रः यागनिष्पादकः सन् ᵛमिथुना मिथुनानि युग्मरूपाणि याज्यापुरोनुवाक्यादीनि मिथुनौ वा जायापतिरूपः सन् ᵛप्र ᵛभरते प्रकर्षेण संपादयति तस्मादर्चतीत्यर्थः ॥

नक्षद्धोता परि सद्म मिता यन्भरद्गर्भमा शरदः पृथिव्याः ।
क्रन्ददश्वो नयमानो रुवद्गौरन्तर्दूतो न रोदसी चरद्वाक् ॥ ३ ॥

नक्षत् । होता । परि । सद्म । मिता । यन् । भरत् । गर्भम् । आ । शरदः । पृथिव्याः ।
क्रन्दत् । अश्वः । नयमानः । रुवत् । गौः । अन्तः । दूतः । न । रोदसी इति । चरत् । वाक् ॥३॥

ᵛहोता होमनिष्पादकोऽयमग्निः ᵛमिता परिमिता[1] ᵛसद्म सदनानि गार्हपत्यादिस्थानानि ᵛपरि ᵛयन् परितो गच्छन् ᵛनक्षत् व्याप्नोति । व्याप्य च ᵛशरदः संवत्सरसंबन्धिनं ᵛपृथिव्याः भूम्याश्च संबन्धिनं ᵛगर्भं गर्भस्थानीयमन्नं हविर्लक्षणम् ᵛआ ᵛभरत् आहरति स्वीकरोति । संभरति वा । संवत्सरपर्यन्तं वर्धितं भूम्यामुत्पन्नमित्यर्थः । यद्वा । संवत्सरसंबन्धिनं वसन्तादिकाले ज्योतिष्टोमादिषु दीयमानं पार्थिवं हविर्भरत् । ' वसन्ते वसन्ते ज्योतिषा यजेत ' इति श्रुतेः । तथा कृत्वा ᵛक्रन्ददश्वः । लुप्तोपममेतत् । अश्व इव क्रन्दति हर्षातिशयात्[2] । किं कुर्वन् । ᵛनयमानः नयन्निन्द्राय हविर्भारम्[2] । किंच ᵛगौः गन्ता उद्वृत्तो वृष इव ᵛरुवत् रौति शब्दायते । किं कुर्वन् । ᵛदूतो ᵛन वार्ताहरो दूत इव ᵛरोदसी रोदस्योर्द्यावापृथिव्योः ᵛअन्तः मध्ये रोदस्योरन्तरा ᵛवाक् स्तूयमानः स्तुवन् वा देवान् ᵛचरत् चरति गच्छति । हविःस्वीकाराय पृथिवीं तत्प्रापणाय द्युलोकं च परिभ्रमतीत्यर्थः ॥ वक्तेः कर्तरि कर्मणि वा ' क्विब्वचि° ' इत्यादिना क्विब्दीर्घौ संप्रसारणाभावश्च ॥

ता कर्माषतरास्मै प्र च्यौत्नानि देवयन्तो भरन्ते ।
जुजोषदिन्द्रो दस्मवर्चा नासत्येव सुग्म्यो रथेष्ठाः ॥ ४ ॥

ता । कर्म । अषऽतरा । अस्मै । प्र । च्यौत्नानि । देवऽयन्तः । भरन्ते ।
जुजोषत् । इन्द्रः । दस्मऽवर्चाः । नासत्याऽइव । सुग्म्यः । रथेऽस्थाः ॥ ४ ॥

ᵛता तानि ᵛअषतरा अर्षतराणि व्याप्ततराणि वा[3] हवींषि ᵛअस्मै इन्द्राय तदर्थं ᵛकर्म कर्मः संपादयामः ॥ कृजश्छान्दसे वर्तमानार्थे लुङि ' मन्त्रे घस° ' इति च्लेर्लुक् । ' छन्दस्युभयथा ' इति आर्धधातुकत्वेन ङित्त्वाभावाद्गुणः ॥ ᵛच्यौत्नानि च्यावयितृणि दृढानि स्तोत्राणि कर्माणि स्वकीयानि सामर्थ्यानि वा ᵛदेवयन्तः देवानात्मन इच्छन्तो यजमानाः ᵛप्र ᵛभरन्ते प्रकर्षेण संपादयन्ति । तद्वद्वयमपि संपादयाम इत्यर्थः । ᵛदस्मवर्चाः दर्शनीयतेजाः शत्रूपक्षयणबलो वा ᵛनासत्येव नासत्याविव

---

१. क–परिमिता परिमितानि; झ–परिमितानि । २. झ१–हर्षातिशयात् तदा नयमानः नयन् देवेषु हविर्धारम् ( हविर्भारम् ) । ३. ज-त–' वा ' नास्ति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अश्विनाविव । तौ हि द्यावापृथिव्यात्मानौ । ताविव [v]सुगम्यः सुगम्यः सुखेन गन्तुं शक्यः [v]रथेष्ठाः रथे वर्तमान एवंभूतः सन् [v]जुजोषत् अस्मत्कृतं स्तोत्रादि कर्म सेवताम् ॥

तमु ष्टुहीन्द्रं यो ह सत्वा यः शूरो मघवा यो रथेष्ठाः ।
प्रतीचश्चिद्योधीयान्वृषण्वान्ववव्रुषश्चित्तमसो विहन्ता ॥ ५ ॥

तम् । ऊँ इति । स्तुहि । इन्द्रम् । यः । ह । सत्वा । यः । शूरः । मघऽवा । यः । रथेऽस्थाः । प्रतीचः । चित् । योधीयान् । वृषण्ऽवान् । ववव्रुषः । चित् । तमसः । विऽहन्ता ॥ ५ ॥

[v]तमु तमेव [v]इन्द्रं [v]स्तुहि हे होतः स्तुतिं कुरु । किमस्याधिक्यमिति उच्यते[1] । [v]यो [v]ह यः खलु [v]सत्वा अतिप्रभूतबलः । यद्वा । सत्वा सादकः शत्रूणाम् । [v]यः च [v]शूरः शौर्योपेतः [v]मघवा बलवानन्नवान् वा । [v]यः च [v]रथेष्ठाः रथे वर्तमानः । किंच [v]प्रतीचश्चित् प्रत्यभिमुखं योद्धुरपि [v]योधीयान् योद्धृतमः ॥ प्रतिपूर्वादञ्चतेः क्विन्नन्तात् लुप्तनकारात् शसि 'अचः' इति अकारलोपे 'चौ' इति दीर्घः । 'अञ्चेश्छन्दस्यसर्वनामस्थानम्' इति विभक्तिरुदात्ता ॥ [v]वृषण्वान् । वृषाणो वर्षितारो वज्रादयः । तद्वान् । 'वृषा ते वज्र उत ते वृषा रथः' ( ऋ. सं. २. १६. ६ ) इति हि निगमः । तथा [v]ववव्रुषश्चित्तमसः आवरकस्यापि तमसो मेघादेः [v]विहन्ता विशेषेण घातकः । यस्मादेवं-महानुभावः तस्मात् स्तुहि ॥ ॥ १३ ॥

प्र यदित्था महिना नृभ्यो अस्त्यरं रोदसी कक्ष्येइ नास्मै ।
सं विव्य इन्द्रो वृजनं न भूमा भर्ति स्वधावाँ ओपशमिव द्याम् ॥ ६ ॥

प्र । यत् । इत्था । महिना । नृऽभ्यः । अस्ति । अरम् । रोदसी इति । कक्ष्येइ इति । न । अस्मै । सम् । विव्ये । इन्द्रः । वृजनम् । न । भूम । भर्ति । स्वधाऽवान् । ओपशम्ऽइव । द्याम् ॥ ६ ॥

[v]यत् यः इन्द्रः [v]महिना महत्त्वेन स्वैश्वर्येण [v]नृभ्यः नेतृभ्यः कर्मनिर्वाहकेभ्यो यजमानेभ्यः [v]प्र [v]अस्ति प्रभवति ईष्टे स्वर्गादिप्रदाने[2] रक्षितुम् [v]अस्मै रक्षकायेन्द्राय [v]रोदसी द्यावापृथिव्यौ [v]कक्ष्ये कक्ष्ययते सती संचाराय [v]न [v]अरं नालं न पर्याप्ते । जगतोऽधीशस्येन्द्रस्य संचारायाल्पत्वात् द्यावापृथिव्यौ न पर्याप्ते इत्यर्थः । सृष्टादपि स्रष्टुर्महिम्नोऽधिकत्वादिति भावः । अयम् [v]इन्द्रो [v]वृजनं [v]न [v]भूम भूमिं भूतानि वा वृजनं न वृजनमिव ॥ वृजेः कर्तनार्थस्येदं रूपम् ॥ तदिव तद्यथा आवृणोति तथायमपि स्वतेजसा [v]सं [v]विव्ये सम्यगावृणोति लोकत्रयम् । किंचायं [v]स्वधावान् अन्नवान् वृष्टिलक्षणोदकवान् वा [v]द्यां दिवं [v]भर्ति बिभर्ति । धारणे दृष्टान्तः । [v]ओप-शमिव । ईषदुपशेते इत्योपशं शृङ्गं तद्वृषभ इव । यद्वा । परस्परं समीपे वर्तमानं क्षित्यन्तरिक्षाख्यं लोकद्वयम् ओपशम् । तदिव द्यां बिभर्ति । लोकत्रयमपि बिभर्तीत्यर्थः ॥ भृञो लटि छान्दसः शपो लुक् ॥

---

१. झ१—उच्यते विशिष्टेन सर्वेण । २. ख-झ-फ—स्वर्गादिप्रदानेन ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

समत्सु त्वा शूर सतामुराणं प्रपथिन्तमं परितंसयध्यै ।
सजोषस इन्द्रं मदे क्षोणीः सूरिं चिद्ये अनुमदन्ति वाजैः ॥ ७ ॥

समत्ऽसु । त्वा । शूर । सताम् । उराणम् । प्रपथिन्ऽतमम् । परिऽतंसयध्यै ।
सऽजोषसः । इन्द्रम् । मदे । क्षोणीः । सूरिम् । चित् । ये । अनुऽमदन्ति । वाजैः ॥ ७ ॥

हे ᵛशूर शौर्योपेतेन्द्र ᵛसमत्सु संग्रामेषु ᵛसतां त्वामेवाश्रित्य वर्तमानानां प्राणिनाम् ᵛउराणम् उरूण्यतिप्रभूतानि बलादीनि कुर्वाणं ᵛप्रपथिन्तमं प्रकृष्टमार्गतमं सुकृतिनामुत्तममार्गभूतम् ᵛइन्द्रं शत्रूणां दारकं ᵛत्वा त्वां ᵛपरितंसयध्यै अवतंसीकर्तुं भूषणीकर्तुम् । भूषयितुं वा निमित्तेऽर्थे । ᵛमदे तव मदार्थं च ᵛसजोषसः सह सेवमानाः समानप्रीतयो वा ᵛक्षोणीः क्षोण्यो विशः परिजना मरुतः प्रयतन्ते । कीदृशास्ते । ᵛये ᵛवाजैः बलैः ᵛअनुमदन्ति अनुकूलं मादयन्ति संग्रामे मरुतस्तमेव स्वामिनं कृत्वा मादयन्ति हर्षयन्तीत्यर्थः । यद्वा । ये यजमाना वाजैर्हविर्भिर्मादयन्ति ते समानप्रीतियुक्तास्तव मनुष्यभूता ऋत्विजो यजमानभूताः प्रजाः समत्सु सहमादनस्थानेषु यागेषूक्तलक्षणविशिष्टं त्वामेव पूजयितुं तव मादाय च प्रयतन्ते ॥

एवा हि ते शं सवना समुद्र आपो यत्त आसु मदन्ति देवीः ।
विश्वा ते अनु जोष्या भूद्गौः सूरींश्चिद्यदि धिषा वेषि जनान् ॥ ८ ॥

एव । हि । ते । शम् । सवना । समुद्रे । आपः । यत् । ते । आसु । मदन्ति । देवीः ।
विश्वा । ते । अनु । जोष्या । भूत् । गौः । सूरीन् । चित् । यदि । धिषा । वेषि । जनान् ॥ ८ ॥

हे इन्द्र ᵛएवा ᵛहि एवं हि सति ᵛते तव संबन्धीनि सवनानि । सूयते सोमोऽत्रेति सवनानि सोमयागाः । ते ᵛशं सुखकरा भवन्ति । कथं सति । ᵛयत् यदि ᵛदेवीः देव्यः द्योतमानाः ᵛआपः ᵛसमुद्रे उदकसमुद्रवणापादानभूतेऽन्तरिक्षे ᵛआसु प्रजासु निमित्तभूतासु ᵛते त्वां ᵛमदन्ति मादयन्ति ॥ अन्तर्भावितण्यर्थोऽयम् ॥ यदा प्राण्युपकारार्थं वर्षणाय त्वां प्रेरयन्ति वृष्ट्युदकानि तदा खलु तव सोमयागाः सुखकरा भवन्ति । यज्ञसाधनवृष्टिप्रदानेन यागान्निर्वर्तयेत्यर्थः । किंच हे इन्द्र ᵛविश्वा ᵛगौः सर्वापि स्तोत्रशस्त्ररूपा वाक् ᵛते त्वाम् अनुक्रमेण ᵛजोष्या जोषणार्हा प्रीणयित्री ᵛभूत् भवति । कदा । ᵛयदि ᵛसूरींश्चित् स्तोत्रादिप्रेरयितॄन् स्तोतृजनानपि ᵛधिषा धिषणया प्रज्ञया वृष्टिप्रदानरूपेण कर्मणा वा ᵛवेषि कामयसे तदा सर्वापि स्तुतिस्त्वदर्था भवति ॥

असाम यथा सुषखाय एन स्वभिष्टयो नरां न शंसैः ।
असद्यथा न इन्द्रो वन्दनेष्ठास्तुरो न कर्म नयमान उक्था ॥ ९ ॥

असाम । यथा । सुऽसखायः । एन । सुऽअभिष्टयः । नराम् । न । शंसैः ।
असत् । यथा । नः । इन्द्रः । वन्दनेऽस्थाः । तुरः । न । कर्म । नयमानः । उक्था ॥ ९ ॥



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे Vएन इन ईश्वर इन्द्र Vयथा Vसुसखायः शोभनत्वद्रूपसहायवन्तः Vअसाम भूयास्म किंच[1] Vस्वभिष्टयः शोभनाभ्येषणाः शोभनाभीष्टाश्चासाम । किमिव । Vनरां Vन Vशंसैः । नराणां राजादीनां शंसैः शंसनैरिव । स्तुतिभिर्यथा मनुष्याः शोभनाभीष्टा भवन्ति तद्वत् । इदानीं परोक्षेणाह । Vनः अस्मभ्यम् Vइन्द्रः Vवन्दनेष्टाः अस्मत्स्तुतौ वर्तमानः सन् Vतुरो Vन त्वरमाण इव नः अस्माकं Vकर्म Vउक्था उक्थैः शस्त्रैः Vनयमानः फलं प्रापयन् स्तुत्या तुष्टः सन् अस्मदीयेन कर्मणा फलप्रापयिता Vयथा Vअसत् भवेत् । हे ऋत्विजः तथा कुरुतेति शेषः ॥

विष्पर्धसो नरां न शंसैरस्माकासदिन्द्रो वज्रहस्तः ।
मित्रायुवो न पूर्पतिं सुशिष्टौ मध्यायुव उप शिक्षन्ति यज्ञैः ॥ १० ॥

विऽस्पर्धसः । नराम् । न । शंसैः । अस्माकं । असत् । इन्द्रः । वज्रऽहस्तः ।
मित्रऽयुवः । न । पूःऽपतिम् । सुऽशिष्टौ । मध्यऽयुवः । उप । शिक्षन्ति । यज्ञैः ॥ १० ॥

Vनरां नेतृणां मध्ये सस्पर्धान् नरान् यथा Vविस्पर्धसः कुर्वन्ति सखिभूताः तद्वद्वयमपीन्द्रं Vशंसैः स्तुतिभिः सखायो वयं तं तथा कुर्मः । स च Vवज्रहस्तः विरोधिशिक्षणाय सर्वदा वज्रधारी Vइन्द्रः अस्माकम् Vअसत् । विस्पर्धमनुकूलो भवतु । किंच Vमित्रायुवो Vन मित्रेच्छवो हितैषिण इव Vसुशिष्टौ सुशासने वर्तमानं Vपूर्पतिं पुरः स्वामिनं यथा अभिमतदानेन पूजयन्ति तथा Vमध्यायुवः अस्माकं श्रियां यशसां च मध्येऽवस्थितिं कामयमाना अध्वर्यवादयः Vयज्ञैः यज्ञसाधनैर्हविःस्तोत्रादिभिः Vउप Vशिक्षन्ति उपेत्य यजन्ते । शिक्षतिर्दानकर्मा ॥ ॥ १४ ॥

यज्ञो हि ष्मेन्द्रं कश्चिदृन्धञ्जुहुराणश्चिन्मनसा परियन् ।
तीर्थे नाच्छा तातृषाणमोकौ दीर्घो न सिध्रमा कृणोत्यध्वा ॥ ११ ॥

यज्ञः । हि । स्म । इन्द्रम् । कः । चित् । ऋन्धन् । जुहुराणः । चित् । मनसा । परिऽयन् ।
तीर्थे । न । अच्छ । ततृषाणम् । ओकः । दीर्घः । न । सिध्रम् । आ । कृणोति । अध्वा ॥ ११ ॥

Vकश्चित् Vयज्ञः यज्ञवान् यज्ञानुष्ठायी Vऋन्धन् वर्धयन् भवति । इन्द्रं यज्ञेन वर्धयतीत्यर्थः । Vजुहुराणश्चित् कुटिलगतिस्तु कश्चित् Vमनसा केवलेन Vपरियन् परितो गच्छन् लौकिकविषयादिकं ध्यायन् वर्तते । यद्वा । परि वर्जनार्थः । वर्जयित्वा गच्छन्नेदं प्राप्नोति । तत्र दृष्टान्तः । Vतीर्थे प्रसिद्धे मार्गे Vअच्छ आभिमुख्येन समीपे वर्तमानम् Vओकः पानीयादिकं सदनं Vततृषाणं पिपासायुक्तं यथा अविलम्बेन प्रीणाति । स यथा तत्सदनमागच्छतीत्यर्थः । तद्वत् यज्ञेन कश्चित् पुमानिन्द्रमभिगच्छतीति । कुटिलस्य दृष्टान्तः । Vदीर्घो Vन वक्रत्वेनातिदूरः Vअध्वा मार्ग इव । स यथा Vसिध्रं फलं पानीयादिरूपं फलार्थिनं वा पुरुषम् Vआ Vकृणोति अर्वाक्करोति नीचैः करोति वर्जयतीत्यर्थः । तस्माद्यज्ञमार्गमजानानो वक्रो दूरे परिभ्रमति नेन्द्रं तर्पयति । तद्विलक्षणस्तु वर्जयत्येव ॥

---

१. झ१–तथा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मो षू ण इन्द्रात्र पृत्सु देवैरस्ति हि ष्मा ते शुष्मिन्नवयाः ।
महश्चिद्यस्य मीळ्हुषो यव्या हविष्मतो मरुतो वन्दते गीः ॥ १२ ॥

मो इति । सु । नः । इन्द्र । अत्र । पृत्ऽसु । देवैः । अस्ति । हि । स्म । ते । शुष्मिन् । अवऽयाः । महः । चित् । यस्य । मीळ्हुषः । यव्या । हविष्मतः । मरुतः । वन्दते । गीः ॥ १२ ॥

हे [V]इन्द्र [V]अत्र [V]पृत्सु एषु उपस्थितेषु संग्रामेषु वृष्ट्यर्थं मेघजयेषु [V]देवैः मरुदादिभिः सह [V]नः अस्मान् [V]मो [V]षु मैव त्याक्षीरिति शेषः । मरुत्सहितो युध्यस्वेत्यर्थः । हे [V]शुष्मिन् बलवन्निन्द्र [V]अस्ति [V]हि [V]स्म [V]ते अस्ति हि स्म तव खलु । तव किमस्तीति उच्यते । [V]अवयाः अवयजनम् अव-युज्य पृथक्कृत्य यजनं हविर्भागोऽस्ति । मरुद्भ्यः पृथगप्यस्ति हविर्भागः । केवलं मरुद्भ्य एव दीयते नास्मभ्यम् अतः कथं योत्स्यामीति न मन्तव्यमित्यर्थः । यद्वा । अवयाः शत्रूणां वर्जनाय गन्ता वज्रोऽस्ति ते । किंच [V]हविष्मतः प्रदेयहविर्युक्तस्य [V]मीळ्हुषः हविष्प्रदातुः । यद्वा । एतत्पद-द्वयं मरुतां विशेषणम् । [V]यस्य मम [V]यव्या फलेनेन्द्रेण वा सह मिश्रयन्ती [V]गीः स्तुतिशस्त्रादिरूपा वाक् [V]महश्चित् महतोऽपि मीळ्हुषः सेक्तॄन्[1] हविष्मतो दत्तहविषा तद्वतः [V]मरुतो [V]वन्दते स्तौति ॥

अथ त्रयोदश्या सूक्तादिमारभ्य कृतां स्तुतिं निगमय्य फलं प्रार्थयते ॥

एष स्तोम इन्द्र तुभ्यमस्मे एतेन गातुं हरिवो विदो नः ।
आ नो ववृत्याः सुविताय देव विद्यामेषं वृजनं जीरदानुम् ॥ १३ ॥

एषः । स्तोमः । इन्द्र । तुभ्यम् । अस्मे इति । एतेन । गातुम् । हरिऽवः । विदः । नः ।
आ । नः । ववृत्याः । सुविताय । देव । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ १३ ॥

हे [V]इन्द्र [V]एष [V]स्तोमः इदानींकारितप्रकारः स्तोत्रविशेषः [V]तुभ्यं त्वदर्थम् । हे [V]हरिवः हरिभ्यां तद्वन्निन्द्र [V]एतेन स्तोत्रेण[2] गमनेन वा [V]नः अस्मदीयं [V]गातुं देवयजनमार्गं [V]विदः विदस्व । विदित्वा च हे [V]देव [V]सुविताय सुहिताय शोभनगमनाय वा [V]नः अस्मान् [V]आ [V]ववृत्याः आवर्तस्व अस्मद्यागं प्रत्यागच्छ । विद्याम इत्यादि व्याख्यातम् ॥ ॥ १५ ॥

' त्वं राजा ' इति दशर्चं दशमं सूक्तमागस्त्यमैन्द्रं त्रैष्टुभम् । ' त्वं राजा दश ' इत्यनुक्रान्तम् । पृष्ठ्ये षळहे स्तोमवृद्धौ स्तोमातिशंसनार्थं होत्रकैरेतच्छस्तव्यम् । ' ऐन्द्राणि त्रैष्टुभान्यमरुच्छन्दान्यावपेरन् ' ( आश्व. श्रौ. ७. १२ ) इति सूत्रम् ॥

---

१. ख-च-फ-कामान् सेक्तॄन् । २. ख-च-फ-स्तोमेन स्तोत्रेण ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

त्वं राजेन्द्र ये च देवा रक्षा नृन्पाह्यसुर त्वमस्मान् ।
त्वं सत्पतिर्मघवा नस्तरुत्रस्त्वं सत्यो वसवानः सहोदाः ॥ १ ॥

त्वम् । राजा । इन्द्र । ये । च । देवाः । रक्ष । नृन् । पाहि । असुर । त्वम् । अस्मान् ।
त्वम् । सत्ऽपतिः । मघऽवा । नः । तरुत्रः । त्वम् । सत्यः । वसवानः । सहःऽदाः ॥ १ ॥

हे [v]इन्द्र [v]त्वं [v]राजा अधिपतिः सर्वस्य जगतः । किंच [v]ये [v]देवाः मरुदादयः सन्ति तेषामपि विशेषेण । अतो हे [v]असुर शत्रूणां निरसितः [v]त्वं [v]नॄन् [v]अस्मान् कर्मनेतॄन् यजमानान् [v]रक्ष पालय[1]। विशेषतोऽस्मानपि रक्ष । [v]त्वं च [v]सत्पतिः सतां सतः कर्मफलस्य वा पाता [v]मघवा धनवान् [v]नः अस्माकं [v]तरुत्रः तारयिता पापात् किंच [v]त्वं [v]सत्यः अबाध्यः सत्यफलो वा [v]वसवानः स्वतेजसा सर्वं छादयन् वसूनि वा कुर्वन् स्तोतृभ्यः [v]सहोदाः सहसो बलस्य दाता भवेति शेषः ॥

दनो विश इन्द्र मृध्रवाचः सप्त यत्पुरः शर्म शारदीर्दर्त् ।
ऋणोरपो अनवद्यार्णा यूने वृत्रं पुरुकुत्साय रन्धीः ॥ २ ॥

दनः । विशः । इन्द्र । मृध्रऽवाचः । सप्त । यत् । पुरः । शर्म । शारदीः । दर्त् ।
ऋणोः । अपः । अनवद्य । अर्णाः । यूने । वृत्रम् । पुरुऽकुत्साय । रन्धीः ॥ २ ॥

हे [v]इन्द्र त्वं वृत्रसंबन्ध्यसुराणां पुरभेदनसमये [v]मृध्रवाचः मर्षणवचनाः [v]विशः तदीयाः प्रजाः [v]शर्म सुखं यथा भवति तथा [v]दनः अदमयः ॥ दसेरिदं रूपम् । यद्वा । वर्णव्यत्ययः ॥ नदः । अनदः अशब्दयः असुरप्रजाः । अतिभयंकरशब्दमकरोः । कदेति आह । [v]यत् यदा [v]शारदीः प्रत्यग्राः । यद्वा । एतत्संवत्सरलक्षकः[2] । संवत्सरपर्यन्तं दृढीकृता अपि । [v]सप्त [v]पुरः एतत्संख्याकाः पुरीः [v]दर्त् अदारयः ॥ पुरुषव्यत्ययः । दृणातेर्लङि छान्दसो विकरणस्य लुक् । ' रात्सस्य ' ( पा. सू. ८. २. २४ ) इति नियमात् तलोपाभावः ॥ तथा कृत्वा हे[3] [v]अनवद्य कातरत्वानिन्दावन् हे इन्द्र[3] [v]अर्णाः अरणशीलाः [v]अपः तदीयदुर्गस्थानानि उदकाश्रयाणि तटाकादीन् [v]ऋणोः । अगमयः प्रावर्तयः । भग्नान्यकरोः । एवमुपद्रुत्य [v]पुरुकुत्साय एतन्नाम्ने राज्ञे [v]यूने नित्यतरुणाय तदर्थं [v]वृत्रम् एतन्नामकमसुरं [v]रन्धीः असाधयः अहनः । अयमैतिहासिकपक्षः । निरुक्तरूढ्या तु हे इन्द्र मृध्रवाचो विशो मर्षणध्वनियुक्ता वृष्टिरूपाः प्रजा दनः अदमयः । अशब्दयो वा । अवर्षय इत्यर्थः । कदा । यद्यदा सप्त पुरः शारदीर्दर्त् सर्पणस्वभावान् प्रत्यग्रान् वृष्ट्या जगत्पूरकान् मेघानदारयः तदेत्यर्थः । तथा कृत्वा हे अनवद्य अर्णा अरणस्वभावा अपः ऋणोः अगमयः प्रावर्तयः कुल्यादिरूपेण । अनन्तरं यूने पुरुकुत्साय वृत्रं मुख्यं मेघं रन्धीः असाधयः अहनः । अयमर्थः ' त्वं ह त्यदिन्द्र सप्त युध्यन् ' ( ऋ. सं. १. ६३. ७ ) इत्यादिमन्त्रान्तरेषु प्रसिद्धः । यास्कस्त्वेवं व्याख्यात्[4]–' दनो दानमनसो नो मनुष्यानिन्द्र मृदुवाचः कुरु ' ( निरु. ६. ३१ ) इति ॥

---

१. झ१– पालय । अथवा नॄन् रक्ष । २. क-ख–एतत्संवत्सरपर्यन्तम् ; ज–एतत्संवत्सरलक्षणकः ।
३. झ–हे अनवद्य कातरत्वानिन्दान् ; झ–हे अवनद्य कातरतयत्वानिदृते । ४. फ–व्याख्यत् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अजा॒ वृत॑ इन्द्र शूर॑पत्नी॒र्यां च॒ येभिः॑ पुरुहूत नूनम् ।
रक्षो॑ अ॒ग्निम॒शुषं॑ तूर्व॑याणं सिं॒हो न दमे॑ अपां॑सि॒ वस्तोः॑ ॥ ३ ॥

अज॑ । वृत॑ः । इ॒न्द्र॒ । शूर॑ऽपत्नीः । द्याम् । च॒ । येभिः॑ । पुरु॑ऽहूत । नूनम् ।
रक्षो॒ इति॑ । अ॒ग्निम् । अ॒शुष॑म् । तूर्व॑याणम् । सिं॒हः । न । दमे॑ । अपां॑सि । वस्तोः॑ ॥ ३ ॥

हे [v]इन्द्र [v]शूरपत्नीः शूरैः रक्षोभिः पालिताः [v]वृतः । वर्तन्ते आस्विति वृतोऽसुरपुरीः । यद्वा । शूरा यजमानाः । तैः पालिताः वृतो वेदिभूमीः । [v]अज गच्छ जेतुम् । तथा कृत्वा [v]द्यां [v]च [v]नूनम् अवश्यम् अज । किं त्वमेक एव न । हे [v]पुरुहूत बहुभिर्बहुधा वा आहूतेन्द्र [v]येभिः मरुदादिभिरनुगतोऽसि तैः सहितः सन् । तथा कृत्वा [v]अशुषम् आशोषयितारमशान्तं वा [v]तूर्वयाणं तूर्णगमनम् [v]अग्निं वैद्युतं होमाधारं वा अग्निं [v]रक्षो रक्षस्वैव । किमर्थं रक्षणमिति उच्यते । [v]दमे गृहे [v]अपांसि कर्माणि कुर्वन् [v]वस्तोः वस्तुम् । यद्वा । वासयितुं स्थापयितुम् । कारयितुमित्यर्थः । यज्ञद्विट्सु हतेष्वग्नौ सुस्थिरे सति यागाद्यनुष्ठानपरः स्थास्यामीत्यर्थः । रक्षणे दृष्टान्तः । [v]सिंहः इव । स यथा स्वाश्रयभूतं वनं गजाद्युपद्रवपरिहारेण रक्षति तद्वत् । असुरपुरभङ्गगमने वा दृष्टान्तः । सिंहो यथा निर्भयो विरोधिमृगान् हन्तुं धावति तद्वत् ॥

शेष॒न्नु त इ॑न्द्र सस्मि॒न्योनौ॒ प्रशं॑स्तये पवी॑रवस्य म॒ह्ना ।
सृ॒जद॑र्णां॒स्यव॒ यद्यु॒धा गास्तिष्ठ॒द्धरी॑ धृष॒ता मृ॑ष्ट॒ वाजा॑न् ॥ ४ ॥

शेष॑न् । नु । ते । इ॒न्द्र॒ । सस्मि॑न् । योनौ॑ । प्रऽशं॑स्तये । पवी॑रवस्य । म॒ह्ना ।
सृ॒जत् । अर्णां॑सि । अव॑ । यत् । यु॒धा । गाः । तिष्ठ॑त् । हरी॒ इति॑ । धृ॒ष॒ता । मृ॒ष्ट॒ । वाजा॑न् ॥ ४ ॥

हे [v]इन्द्र [v]ते शत्रवः [v]सस्मिन् सर्वस्मिन् समाने वा [v]योनौ स्वकीये स्थाने अन्तरिक्षे वा । योनिरन्तरिक्षम् । [v]नु क्षिप्रं [v]शेषन् शेरताम् ॥ शीङो लेटि अडागमः । व्यत्ययेन परस्मैपदम् । 'सिब्बहुलम्०' इति सिप् ॥ किमर्थम् । [v]प्रशस्तये प्रशंसनाय त्वत्स्तुतये । त्वन्महिमज्ञापनाय[1] इत्यर्थः । किं[2] सेवनादिसाधनेनेत्याह[2] । [v]पवीरवस्य कुलिशस्य कुलिशशब्दस्य वा [v]मह्ना महिम्ना । त्वद्वज्रप्रहारेण हता मेघाः शत्रवो वा तत्रैव शेरते निपातेन[3] पलायन्ते[3] इत्यर्थः । किंच [v]यत् यदा [v]युधा प्रहरणसाधनेनायुधेन युद्धेन वा [v]गाः गच्छसि तदा [v]अर्णांसि उदकानि [v]अव [v]सृजत् अवासृजः । अवाङ्मुखम् अपातयः ॥ पुरुषव्यत्ययः ॥ तदर्थं [v]हरी अश्वौ [v]तिष्ठत् अध्यतिष्ठः ॥ अत्रापि पुरुषव्यत्ययः ॥ यद्वा । यदा हरी अधितिष्ठसि तदावासृजः । अथैवं कृत्वा [v]वाजान् अन्नानि सस्यादिलक्षणानि [v]धृषता धर्षकेण सामर्थ्येन [v]मृष्ट शोधय प्रवर्धयेत्यर्थः ॥

---

१. झ–त्वन्महिमाख्यापनाय । २. झ–किं सेनादिसाधनो नेत्याह; झ१–किंच यद् यदा युध्यसे वादिसाधनेनेत्याह । ३. झ१–अनुपालयन्त ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वह कुत्समिन्द्र यस्मिञ्चाकन्त्स्यूमन्यू ऋज्रा वातस्याश्वा ।
प्र सूरश्चक्रं वृहताद्भीकेऽभि स्पृधो यासिषद्वज्रबाहुः ॥ ५ ॥

वह । कुत्सम् । इन्द्र । यस्मिन् । चाकन् । स्यूमन्यू इति । ऋज्रा । वातस्य । अश्वा ।
प्र । सूरः । चक्रम् । वृहतात् । अभीके । अभि । स्पृधः । यासिषत् । वज्रबाहुः ॥ ५ ॥

हे [V]इन्द्र [V]कुत्सम् एतन्नामानमृषिं प्राप्तं [V]स्यूमन्यू । 'स्यूमकम्' (नि. ३. ६. ५) इति सुखनाम । तदिच्छन्तौ सततगामिनौ वा [V]ऋज्रा ऋजुगामिनौ [V]वातस्य वायोः समानवेगौ [V]अश्वा तदीयावश्वौ [V]वह प्रस्थापय । [V]यस्मिन् हविषि निमित्तभूते सति कुत्सं [V]चाकन् कामयसे तर्पयसे वा हविरादिकम् । तदर्थं [V]सूरः प्रेरकः सूर्यः [V]चक्रं स्वमण्डलं स्वरथचक्रं वा [V]अभीके आसन्ने देशे [V]वृहतात् ऊर्ध्वं गमयतु प्रकाशयतु । अथ परोक्षेणाह । [V]वज्रबाहुः अयमिन्द्रः [V]स्पृधः संग्रामं कुर्वतः शत्रून् [V]अभि [V]यासिषत् अभियातु ॥ ॥ १६ ॥

जघन्वाँ इन्द्र मित्रेरूञ्चोदप्रबुद्धो हरिवो अदाशून् ।
प्र ये पश्यन्नर्यमणं सचायोस्त्वया शूर्ता वहमाना अपत्यम् ॥ ६ ॥

जघन्वान् । इन्द्र । मित्रेरून् । चोदऽप्रबुद्धः । हरिऽवः । अदाशून् ।
प्र । ये । पश्यन् । अर्यमणम् । सचा । आयोः । त्वया । शूर्ताः । वहमानाः । अपत्यम् ॥ ६ ॥

हे [V]इन्द्र [V]हरिवः हरिभ्यां तद्वन् त्वं [V]चोदप्रबुद्धः चोदनैः स्तोत्रैः प्रबुद्धः सन् [V]अदाशून् अदातॄन् [V]मित्रेरून् मित्राणां यजमानानाम् ईरयितॄन् बाधकान् तद्वैरिणां मित्रत्वं गच्छतो वा [V]जघन्वान् हतवानसि । किंच [V]ये [V]अर्यमणं दातारं त्वां [V]प्र [V]पश्यन् पश्यन्ति ते नराः [V]आयोः मनुष्यस्याध्वर्यवादेः हविर्लक्षणान्नस्य वा [V]सचा सह [V]शूर्ताः क्षिप्रा हविष्प्रदानेन[1] [V]त्वया [V]अपत्यं कुलस्यापातयितारं पुत्रं [V]वहमानाः ये सन्ति ते प्र पश्यन् । यद्वा । ये अर्यमणं त्वां पश्यन्ति ते एवं भवन्ति । यद्वा । ये नरा अर्यमणं यं कंचिद्दातारं पश्यन् पश्यन्तस्त्वामयजन्त आयोर्मनुष्यस्य सचा सहायभूतास्त्वया शूर्ताः क्षिप्रा वर्जिता अपत्यं पुत्रं वहमाना ये सन्ति तान् जघन्वान् भवेत्यर्थः ॥

रपत्कविरिन्द्रार्कसातौ क्षां दासायोपबर्हणीं कः ।
करत्तिस्रो मघवा दानुचित्रा नि दुर्योणे कुयवाचं मृधि श्रेत् ॥ ७ ॥

रपत् । कविः । इन्द्र । अर्कऽसातौ । क्षाम् । दासाय । उपऽबर्हणीम् । करिति कः ।
करत् । तिस्रः । मघऽवा । दानुऽचित्राः । नि । दुर्योणे । कुयवाचम् । मृधि । श्रेत् ॥ ७ ॥

---

१. ज्ञ-ज्ञ-ज्ञा १–हविःप्रदाने ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे Vइन्द्र त्वां Vकविः क्रान्तदर्शी अनूचानो वा होता Vअर्कसातौ अर्चनीयस्यान्नस्य लाभे निमित्तभूते सति Vरपत् स्तौति । यद्वा । एतन्नामर्षी रपत् अस्तौत् अन्नार्थम् । तस्यातिप्रभूतमन्नं प्रादाः इत्यर्थः । तथा च Vदासाय प्राण्युपक्षपयित्रेऽसुराय Vक्षां भूमिम् Vउपबर्हणीं शय्यां Vकः अकरोः । हत्वा भूमावपातय इत्यर्थः ॥ करोतेर्लुङि ' मन्त्रे घस° ' इति च्लेर्लुक् ॥ अथ परोक्षकृतः । Vमघवा धनवान् अयमिन्द्रः Vतिस्रः भूमीः । दार्शिकपाशुकसौमिकरूपा भूमीः क्षित्यन्तरिक्षद्युरूपा वा भूमीः Vदानुचित्राः दानेन देयैर्धनैर्वा चायनीयाः Vकरत् करोति । यद्वा । तिस्रः अयोरजतहिरण्यमयाः पुरीर्दानुचित्राः खण्डनेन चित्रा अकरोत् । तथा Vदुर्योणे दुष्टयोनौ स्थाने एतन्नामकस्य राज्ञः प्रीत्यर्थं वा Vकुयवाचं कुत्सितं शब्दायन्तमेतन्नामानमसुरं Vमृधि संग्रामे Vनि Vश्रेत् हिंसितवान् ॥

सना ता ते इन्द्र नव्या आगुः सहो नभोऽविरणाय पूर्वीः ।
भिनत्पुरो न भिदो अदेवीर्ननमो वधरदेवस्य पीयोः ॥ ८ ॥

सना । ता । ते । इन्द्र । नव्याः । आ । अगुः । सहः । नभः । अविऽरणाय । पूर्वीः ।
भिनत् । पुरः । न । भिदः । अदेवीः । ननमः । वधः । अदेवस्य । पीयोः ॥ ८ ॥

हे Vइन्द्र Vते तव संबन्धीनि Vसना सदातनानि नित्यानि तानि शौर्याणि Vनव्याः नवतराः इदानींतना ऋषयः Vआगुः आगच्छन्ति स्तुतिव्याजेन प्राप्नुवन्तीत्यर्थः । कानि तानीति उच्यते । Vपूर्वीः बह्वीः Vनभः हिंसाः ॥ नभेर्हिंसार्थात् क्विप् । तदन्तस्येदं रूपम् ॥ Vता हिंसाः Vअविरणाय अविगतरणाय संग्रामनाशनाय Vसहः अभ्यभवः । तदर्थं Vभिदः भेत्तृर्घातिकाः Vअदेवीः आसुरीः Vपुरो Vन पुरीरपि Vभिनत् विदारितवानसि ॥ पुरुषव्यत्ययः । नशब्दश्चार्थे ॥ तथा Vअदेवस्य अस्तुत्यस्य Vपीयोः हिंसकस्यासुरस्य Vवधः वज्रं Vननमः अनमयः अनुकूलमकरोः ॥ यद्वा । हे इन्द्र सना नित्यं तत्तत्काले ते तव संबन्धिन्यः ता तानि ॥ लिङ्गव्यत्ययः ॥ ताः पूर्वीः पुरातन्य आपो नव्या नूत्नाः स्तुत्याः सत्यः आगुः आगच्छन्ति । किमर्थम् । अविरणाय अविरमणाय प्राणिनामविनाशाय । तदर्थं नभो हिंसकान् बन्धकान् वा मेघान् सहः मर्षणमकरोः । किंच अदेवीः पुरः अवर्षणेनादेवनशीलानुदकपुटबन्धान् भिनत् भिन्नानकरोः । तथा अदेवस्य अदेवनशीलस्य पीयोः प्रतिकूलस्य वृत्रस्य वधर्वज्रं ननमः अनमयः ॥

त्वं धुनिरिन्द्र धुनिमतीर्ऋणोरपः सीरा न स्रवन्तीः ।
प्र यत्समुद्रमति शूर पर्षि पारया तुर्वशं यदुं स्वस्ति ॥ ९ ॥

त्वम् । धुनिः । इन्द्र । धुनिऽमतीः । ऋणोः । अपः । सीराः । न । स्रवन्तीः ।
प्र । यत् । समुद्रम् । अति । शूर । पर्षि । पारय । तुर्वशम् । यदुम् । स्वस्ति ॥ ९ ॥

हे Vइन्द्र Vत्वं Vधुनिः कम्पयिता शत्रूणामसि । अतः Vधुनिमतीः कम्पनोपेततरङ्गवतीः । अथवा । धुनिर्नाम जलप्रतिरोधकारी असुरः । स एव प्रतिबन्धकतया यासां तादृशीः । Vअपः Vऋणोः अगमयः भूमावपातयः । तत्र दृष्टान्तः । Vस्रवन्तीः प्रवहन्तीः Vसीरा Vन । नदीनामैतत् । सरणवतीर्नदीरिव ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तद्वत्संतता इत्यर्थः। एवं कृत्वा हे [v]शूर [v]यत् यदा [v]समुद्रम् [v]अति [v]पर्षि अतिक्रम्य पूरयस्युदकं तदानीं [v]तुर्वशं [v]यदुम् उभावपि राजर्षी [v]स्वस्ति अविनाशं [v]पारय अपालयः संपूर्णजलवर्षणेन। तथा च मन्त्रान्तरं–' त्वमपो यदवे तुर्वशायारमयः ' ( ऋ. सं. ५. ३१. ८ ) इति ॥

त्वमस्माकमिन्द्र विश्वधा स्या अवृकतमो नरां नृपाता ।
स नो विश्वासां स्पृधां सहोदा विद्यामेषं वृजनं जीरदानुम् ॥ १० ॥

त्वम्। अस्माकम्। इन्द्र। विश्वधा। स्याः। अवृकऽतमः। नराम्। नृऽपाता ।
सः। नः। विश्वासाम्। स्पृधाम्। सहःऽदाः। विद्याम। इषम्। वृजनम्। जीरऽदानुम्॥१०॥

हे [v]इन्द्र [v]त्वमस्माकं [v]विश्वध विश्वस्मिन्नपि काले विश्वप्रकारैर्वा [v]अवृकतमः। यद्वा। दातृतम इत्यर्थः। [v]स्याः भव। तथा [v]नरां [v]नृपाता अस्मदीयानां पुत्रभृत्यादिरूपाणां बहूनां मनुष्याणां सर्वदा रक्षको भव। अपरो नृशब्दोऽनुवादः। किंच [v]सः त्वं [v]विश्वासां [v]स्पृधां सर्वासां स्पर्धानिमित्तानाम् अस्मत्सेनानां [v]सहोदाः तासामर्थाय बलस्य दाता भव। विद्यामेति गतम्॥ ॥ १७ ॥

' मत्स्यपायि ' इति षड्चमेकादशं सूक्तमागस्त्यमैन्द्रम्। आद्या स्कन्धोग्रीवी बृहती द्वितीयपादस्य द्वादशाक्षरत्वादितरेषां त्रयाणामष्टाक्षरत्वाच्च। ' द्वितीयश्चेन्यङ्कुसारिण्युरोबृहती वा स्कन्धोग्रीवी वा ' ( अनु. ७.३ ) इत्युक्तलक्षणसद्भावात्। अन्त्या त्रिष्टुप्। शिष्टास्त्रिष्टुबन्तपरिभाषायाः ' आनुष्टुभं तु ' इति विशेषवचनेनापोदितत्वादनुष्टुभः। ' मत्सि षळानुष्टुभं तु त्रिष्टुबन्तं त्वाद्या स्कन्धोग्रीवी ' इत्यनुक्रान्तम्। द्वितीये स्वरसाम्नि आद्यस्तृचः स्तोत्रियः। ' अभिजिद्बृहत्पृष्ठः ' इति खण्डे सूत्रितं–' मत्स्यपायि ते मह एमेनं प्रत्येतन ' ( आश्व. श्रौ. ८. ५ ) इति ॥

मत्स्यपायि ते महः पात्रस्येव हरिवो मत्सरो मदः ।
वृषा ते वृष्ण इन्दुर्वाजी सहस्रसातमः ॥ १ ॥

मत्सि। अपायि। ते। महः। पात्रस्यऽइव। हरिऽवः। मत्सरः। मदः।
वृषा। ते। वृष्णे। इन्दुः। वाजी। सहस्रऽसातमः ॥ १ ॥

हे [v]हरिवः हरिभ्यां तद्वन्निन्द्र [v]महः महान् पूज्योऽयं सोमः [v]पात्रस्येव तत्पात्रेणेव सोमपात्रेण यथा धार्यते सोमस्तत्सदृशेन [v]ते त्वया। तृतीयार्थे षष्ठी। यद्वा। पात्रस्येव ते तव स्वभूतो महो महान् सोम इति वा योजना। [v]अपायि पीयते॥ आशंसाया विवक्षितत्वाद्भूतवत्प्रयोगः॥ यतः पिबसि अतः [v]मत्सि माद्यसि मादयस्व वा। पात्रे यथा सोमः पूर्यते तथा अत्यधिकं पिब पीत्वा च मादयस्वेत्यर्थः। किंच [v]वृष्णे [v]ते अभिमतवर्षित्रे तुभ्यम्। चतुर्थ्यर्थे षष्ठी। [v]मत्सरः मदसाधनः [v]मदः तर्पयिता [v]वृषा वर्षिता [v]इन्दुः क्लेदयिता आह्लादकारीत्यर्थः। [v]वाजी अन्नवान्। अन्नवा(का)र्यतृप्ति-[1] सद्भावादन्नवानित्युच्यते। [v]सहस्रसातमः अपरिमितदातृतमः सहस्रपुरुषसंभजनपर्याप्तशक्त्यतिशयो वा एवंमहानुभावः सोमः संपादितः। तं पिबेत्यर्थः॥

---

१. झ–अन्नकार्य°।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

आ नस्ते गन्तु मत्सरो वृषा मदो वरेण्यः ।
सहावाँ इन्द्र सानसिः पृतनाषाळमर्त्यः ॥ २ ॥

आ । नः । ते । गन्तु । मत्सरः । वृषा । मदः । वरेण्यः ।
सहऽवान् । इन्द्र । सानसिः । पृतनाषाट् । अमर्त्यः ॥ २ ॥

हे [v]इन्द्र [v]ते त्वां [v]नः अस्मदीयः [v]मत्सरः मर्षणसाधनः सोमः [v]आ [v]गन्तु आगच्छतु । कीदृशोऽयम् । [v]वृषा वर्षकः [v]मदः तर्पयिता [v]वरेण्यः वरणीयः [v]सहावान् सहायवान् सहसा बलेन तद्वान् वा [v]सानसिः संभजनीयः [v]पृतनाषाट् शत्रुसेनायाः अभिभविता [v]अमर्त्यः अविनाशी । ईदृशः सोमस्त्वामागच्छतु । यद्वा । उत्तरार्ध इन्द्रपरतया व्याख्येयः । हे इन्द्र सहावान् अस्मदत्तसोमसहायवान् बलवान् वा सानसिरस्माभिः संभजनीयः पृतनाषाडमर्त्यश्च भवसि ॥

त्वं हि शूरः सनिता चोदयो मनुषो रथम् ।
सहावान्दस्युमव्रतमोषः पात्रं न शोचिषा ॥ ३ ॥

त्वम् । हि । शूरः । सनिता । चोदयः । मनुषः । रथम् ।
सहऽवान् । दस्युम् । अव्रतम् । ओषः । पात्रम् । न । शोचिषा ॥ ३ ॥

हे इन्द्र [v]त्वं खलु [v]शूरः शौर्योपेतः [v]सनिता दातासि । अतः [v]मनुषः मनुष्यस्य मे [v]रथं रंहणं स्पन्दनं मनोरथं वा स्वर्गगमनसाधनं यज्ञाख्यं रथं वा [v]चोदयः प्रेरय । किंच त्वं [v]सहावान् सोमसहायवान् बलवान् वा भूत्वा [v]दस्युम् उपक्षपयितारम् [v]अव्रतम् अकर्माणमननुष्ठायिनम् [v]ओषः दह । किमिव [v]शोचिषा दीप्त्या ज्वालया अग्निः [v]पात्रं [v]न स्वाधारं पात्रविशेषमिव । यागाधिकारी सन् यो न यजते तं दहेत्यर्थः ॥

मुषाय सूर्यं कवे चक्रमीशान ओजसा । वह शुष्णाय वधं कुत्सं वातस्याश्वैः ॥४॥

मुषाय । सूर्यम् । कवे । चक्रम् । ईशानः । ओजसा ।
वह । शुष्णाय । वधम् । कुत्सम् । वातस्य । अश्वैः ॥ ४ ॥

हे [v]कवे क्रान्तदर्शिन्निन्द्र [v]ईशानः समर्थः सन् [v]सूर्यं सूर्यस्य ॥ ' सुपां सुपो भवन्ति ' इति षष्ठ्येकवचनस्य द्वितीयैकवचनादेशः ॥ तत्संबन्धि [v]चक्रम् एकम् [v]ओजसा बलेन सामर्थ्यातिशयेन [v]मुषाय अमुष्णाः ॥ ' छन्दसि शायजपि° ' इति शायजादेशः ॥ पूर्वं सूर्यरथस्य चक्रद्वयमस्ति एकमिन्द्रो मुमुष इतीतिहासः । तथा च मन्त्रान्तरं–' प्रान्यच्चक्रमवृहः सूर्यस्य



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कुत्सायान्यत् ' ( ऋ. सं. ५. २९. १० ) इति । किंच ᵛशुष्णाय एतन्नामकायासुराय तद्वधार्थम् । द्वितीयार्थे वा चतुर्थी । शुष्णं हन्तुमित्यर्थः । ᵛकुत्सं कर्तनसाधनं ᵛवधं वज्रं ᵛवातस्य वायोः ᵛअश्वैः वायुवेगैर्वाश्वैर्युक्तः सन् ᵛवह अवहः शुष्णं हन्तुं वज्रमधारयः । यद्वा । शुष्णवधाय वज्रमवहः । तं च हत्वा तदीयैर्वायुवेगैरश्वैस्तदुपलक्षितैस्तदीयैर्धनैः कुत्सं महर्षिमगमः शुष्णासुरधनं कुत्सायादा इत्यर्थः । तथा चान्यत्र ' त्वं कुत्सं शुष्णहत्येष्वाविथ ' ( ऋ. सं. १. ५१. ६ ), ' कुत्साय शुष्णमशुषम् ' ( ऋ. सं. ४. १६. १२ ) इत्यादीति ॥

शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः ।
वृत्रघ्ना वरिवोविदा मंसीष्ठा अश्वसातमः ॥ ५ ॥

शुष्मिन्ऽतमः । हि । ते । मदः । द्युम्निन्ऽतमः । उत । क्रतुः ।
वृत्रऽघ्ना । वरिवःऽविदा । मंसीष्ठाः । अश्वऽसातमः ॥ ५ ॥

हे इन्द्र ᵛते तव ᵛमदः सोमपानजनितः ᵛशुष्मिन्तमः बलवत्तमः । ᵛउत अपि च ते ᵛक्रतुः कर्म व्यापारोऽस्मदर्थः ᵛद्युम्निन्तमः अतिशयेनान्नवान् यशोवान् वा ॥ उभयत्र ' अयस्मयादीनि च्छन्दसि ' इति भसंज्ञया बाधितत्वात् न लोपः ॥ हे इन्द्र ᵛअश्वसातमः अश्वोपलक्षितबहुधनदास्त्वं ᵛवृत्रघ्ना वृत्रघातिनौ ᵛवरिवोविदा धनस्य परिचरणस्य वा वेदयितारौ लम्भयितारौ तव मदक्रतू ᵛमंसीष्ठाः अनुज्ञातवानसि । शत्रुघातिनौ धनदातारौ च स्यातामित्यनुग्रहमकरोरित्यर्थः ॥

यथा पूर्वेभ्यो जरितृभ्य इन्द्र मयइवापो न तृष्यते बभूथ ।
तामनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुम् ॥ ६ ॥

यथा । पूर्वेभ्यः । जरितृऽभ्यः । इन्द्र । मयःऽइव । आपः । न । तृष्यते । बभूथ ।
ताम् । अनु । त्वा । निऽविदम् । जोहवीमि । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥६॥

हे ᵛइन्द्र ᵛपूर्वेभ्यो ᵛजरितृभ्यः पुरातनेभ्यो गरितृभ्यः स्तोतृभ्यः ᵛमयइव ᵛबभूथ । मयः सुखम् । सुखस्वरूपमिवाभवः । तद्वत् स्तोतृभ्योऽस्मभ्यं सुखो भव । तत्र दृष्टान्तः । ᵛतृष्यते ᵛआपो ᵛन तृषार्तस्योदकानि यथा सुखकराणीति तद्वत् । तस्मात् ᵛतां ᵛनिविदं स्वत्प्रीतिकरीं प्रसिद्धां स्तुतिं ᵛत्वा तुभ्यम् ᵛअनु ᵛजोहवीमि पुनःपुनः करोमि । यद्वा । तां निविदमनु ॥ ' तृतीयार्थे ' ( पा. सू. १. ४. ८५ ) इत्यनोः कर्मप्रवचनीयत्वम् ॥ तया स्तुत्या त्वां जोहवीमि । पुनःपुनराह्वयामि । विद्याम इति व्याख्यातम् ॥ ॥ १८ ॥

' मत्सि नः ' इति षडृचं द्वादशं सूक्तमागस्त्यमैन्द्रमानुष्टुभम् । पूर्वत्र तुशब्दात् ' त्रिष्टुबन्तं तु ' इत्युक्तत्वात् अन्त्या त्रिष्टुप् । ' मत्सि नः ' इत्यनुक्रान्तम् । विशेषविनियोगो लैङ्गिकः ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

मत्सि नो वस्यइष्टय इन्द्रमिन्दो वृषा विश ।
ऋघायमाण इन्वसि शत्रुमन्ति न विन्दसि ॥ १ ॥

मत्सि । नः । वस्यःऽइष्टये । इन्द्रम् । इन्दो इति । वृषा । आ । विश ।
ऋघायमाणः । इन्वसि । शत्रुम् । अन्ति । न । विन्दसि ॥ १ ॥

हे ᵛइन्दो क्लेदयितः सोम त्वं ᵛनो ᵛवस्यइष्टये वसीयसो धनस्य प्राप्तये उक्तलक्षणाय यागाय वा ᵛइन्द्रं ᵛमत्सि मादयस्व । तदर्थं त्वमेवेन्द्रं ᵛवृषा कामानां वर्षिता ᵛआ ᵛविश । अथ तथा पीतः सन् ᵛऋघायमाणः शत्रून् हिंसयन् ᵛइन्वसि व्याप्नोषि । अतः ᵛअन्ति अन्तिके ᵛशत्रुं ᵛन ᵛविन्दसि न लभसे । यतः शत्रवस्त्वत्सामर्थ्येन पलायिताः अतो न विन्दसि । यद्वा । उत्तरार्धं इन्द्रपरतया व्याख्येयः । हे इन्द्र त्वं तं सोमं पीत्वा ऋघायमाणः सन् इन्वसि । अन्तिके शत्रुं न विन्दसि ॥

तस्मिन्ना वेशया गिरो य एकश्चर्षणीनाम् ।
अनु स्वधा यमुप्यते यवं न चर्कृषद्वृषा ॥ २ ॥

तस्मिन् । आ । वेशय । गिरः । यः । एकः । चर्षणीनाम् ।
अनु । स्वधा । यम् । उप्यते । यवम् । न । चर्कृषत् । वृषा ॥ २ ॥

हे अन्तरात्मन् होतर्वा ᵛतस्मिन् प्रसिद्धे इन्द्रे ᵛगिरः स्तुतिरूपाः वाचः ᵛआ ᵛवेशय स्थापय तं स्तुहीत्यर्थः । ᵛय इन्द्रः ᵛचर्षणीनां ज्ञानवतां मनुष्याणाम् ᵛएकः एक एव स्थानीयः । ᵛयम् ᵛअनु यमेवेन्द्रमनु ᵛस्वधा हविर्लक्षणमन्नम् ᵛउप्यते दीयत इत्यर्थः । स चेन्द्रः ᵛवृषा वर्षकः सन् ᵛयवं ᵛन यवमिव पक्वं यवं यथा ᵛचर्कृषत् क्रमेण आददते कर्षकाः तद्वदादत्ते । यद्वा । अनु स्वधा अन्नसाधनं व्रीह्यादिकमुप्यते भूमौ । यस्येन्द्रस्य वृष्टिरूपमनुग्रहमपेक्ष्योप्यते इत्यर्थः । स च वृषा वृष्टेर्वर्षिता स इन्द्रो यवं न यवमिव सर्वबीजमपि चर्कृषत् पुनःपुनः करोति अङ्कुरयति । हविःसाधनत्वप्राशस्त्यमपेक्ष्य यवशब्दः प्रयुक्तः । एवंमहानुभावे इन्द्रे गिर आ वेशयेति ॥

यस्य विश्वानि हस्तयोः पञ्च क्षितीनां वसु ।
स्पाशयस्व यो अस्मध्रुग्दिव्येवाशनिर्जहि ॥ ३ ॥

यस्य । विश्वानि । हस्तयोः । पञ्च । क्षितीनाम् । वसु ।
स्पाशयस्व । यः । अस्मऽध्रुक् । दिव्याऽइव । अशनिः । जहि ॥ ३ ॥

ᵛयस्य इन्द्रस्य ᵛहस्तयोः ᵛपञ्च ᵛक्षितीनाम् । क्षियन्ति निवसन्ति गच्छन्ति वा क्षितयो मनुष्याः । पञ्चानां मनुष्याणां प्रीणयितॄणि ᵛविश्वानि सर्वाणि ᵛवसु वसूनि धृतानि भवन्ति । देवा मनुष्याः पितरः पशवः पक्षिणश्चेति पञ्च जनाः । चत्वारो वर्णाः निषादपञ्चमाः पञ्च जना इत्यन्ये । स

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तादृशेन्द्र त्वं [V]स्पाशयस्व बाधस्व । [V]यो [V]अस्मध्रुक् अस्मभ्यं द्रुह्यति तम् । केन प्रकारेणेति स उच्यते । [V]दिव्या दिवि भवा [V]अशनिः [V]इव अशनिर्भूत्वा अस्मद्द्वेष्टॄन् [V]जहि ॥

**असुन्वन्तं समं जहि दूणाशं यो न ते मयः ।**
**अस्मभ्यमस्य वेदनं दद्धि सूरिश्चिदोहते ॥ ४ ॥**

असुन्वन्तम् । समम् । जहि । दुःऽनशम् । यः । न । ते । मयः ।
अस्मभ्यम् । अस्य । वेदनम् । दद्धि । सूरिः । चित् । ओहते ॥ ४ ॥

हे इन्द्र [V]असुन्वन्तं सोमाभिषवमकुर्वाणम् । त्वामयजन्तमित्यर्थः । [V]दूणाशं दुःखेन नाशनीयं [V]समम् । अयं सर्वानुदात्तः सर्वशब्दपर्यायः । अयष्टॄन् सर्वान् । यद्वा । सममेकोद्योगेनाविशेषेण वा [V]जहि । तेन किमपराद्धमिति अत आह । [V]यः [V]ते तव [V]मयः । मय इति सुखनाम । तव सुखहेतुः [V]न भवति । यो होमेन स्तुत्या वा न प्रीणाति तं जहि । किंच [V]अस्य [V]वेदनं धनम् [V]अस्मभ्यं [V]दद्धि देहि ॥ 'दद दाने' इत्यस्मात् व्यत्ययेन परस्मैपदम् । छान्दसः शपो लुक् ॥ [V]सूरिश्चिदोहते । चित् एवार्थे । सूरिस्तव स्तोता एव ओहते । वहति प्राप्नोति धनम् ॥

**आवो यस्य द्विबर्हसोऽर्केषु सानुषगसत् ।**
**आजाविन्द्रस्येन्दो प्रावो वाजेषु वाजिनम् ॥ ५ ॥**

आवः । यस्य । द्विऽबर्हसः । अर्केषु । सानुषक् । असत् ।
आजौ । इन्द्रस्य । इन्दो इति । प्र । आवः । वाजेषु । वाजिनम् ॥ ५ ॥

हे [V]इन्दो सोम तव [V]यस्य [V]द्विबर्हसः स्तोत्रहवीरूपद्विविधपरिवृढकर्मवतो यजमानस्य [V]अर्केषु मन्त्रेषु [V]सानुषक् सानुषङ्गः सातत्यम् [V]असत् भवेत् तम् [V]आवः । तं यजमानं रक्षसि तर्पयसि वा । यद्वा ॥ कर्मणि षष्ठी ॥ यं द्वयोः स्थानयोः परिवृढं यमिन्द्रं हे इन्दो यदार्केषु सानुषगसत् भवेः तदावः अरक्षः अतर्पयो वा । तस्यैव [V]इन्द्रस्य [V]आजौ संग्रामे हे सोम [V]वाजिनं तथान्नवन्तं तमिन्द्रं [V]वाजेषु बलेष्वन्नेषु वा निमित्तभूतेषु [V]प्रावः प्रकर्षेण अरक्षयः[1] । पानसमये तर्पयित्वा संग्रामसमये बलवर्धनेन जयप्राप्तशत्रुधनतर्पणेन वा अरक्षः इत्यर्थः ॥

**यथा पूर्वेभ्यो जरितृभ्य इन्द्र मयइवापो न तृष्यते बभूथ ।**
**तामनु त्वा निविदं जोहवीमि विद्यामेषं वृजनं जीरदानुम् ॥ ६ ॥**

यथा । पूर्वेभ्यः । जरितृऽभ्यः । इन्द्र । मयःऽइव । आपः । न । तृष्यते । बभूथ ।
ताम् । अनु । त्वा । निऽविदम् । जोहवीमि । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ ६ ॥

---

१. क-ङ्ग-अरक्षः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'यथा पूर्वेभ्यः' इति षष्ठी व्याख्याता ॥ ॥ १९ ॥

'आ चर्षणिप्राः' इति पञ्चर्चं त्रयोदशं सूक्तमागस्त्यमैन्द्रं त्रैष्टुभम्। 'आ चर्षणिप्राः पञ्च' इत्यनुक्रमणिका। होत्रकशस्त्रेषु स्तोमवृद्धावस्य विशेषविनियोगः। 'ऐन्द्राणि त्रैष्टुभान्यमरुच्छब्दान्यावपेरन्' (आश्व. श्रौ. ७. १२) इति सूत्रितत्वात्॥

आ चर्षणिप्रा वृषभो जनानां राजा कृष्टीनां पुरुहूत इन्द्रः।
स्तुतः श्रवस्यन्नवसोप मद्रिग्युक्त्वा हरी वृषणा याह्यर्वाङ् ॥ १ ॥

आ। चर्षणिऽप्राः। वृषभः। जनानाम्। राजा। कृष्टीनाम्। पुरुऽहूतः। इन्द्रः।
स्तुतः। श्रवस्यन्। अवसा। उप। मद्रिक्। युक्त्वा।
हरी इति। वृषणा। आ। याहि। अर्वाङ् ॥ १ ॥

अयम् [v]इन्द्रः [v]चर्षणिप्राः। चर्षणयो मनुष्याः। तेषां धनादिना प्रीणयिता। [v]जनानां सर्वेषां [v]वृषभः कामानां वर्षिता। तथा [v]कृष्टीनाम्। मनुष्यनामैतत्। मनुष्याणां [v]राजा स्वामी [v]पुरुहूतः बहुभिराहूतः। ईदृश इन्द्रोऽस्मानाजानातु आगच्छतु वा। उत्तरार्धः परोक्षवादः। हे इन्द्र [v]स्तुतः अस्माभिः [v]श्रवस्यन् हविर्लक्षणान्नमिच्छन् [v]अवसा अस्मद्रक्षणेन तर्पणेन वा युक्तः सन् [v]मद्रिक् मदभिमुखमञ्चन् [v]वृषणा वर्षकौ युवानौ [v]हरी अश्वौ [v]युक्त्वा रथे योजयित्वा [v]अर्वाङ् अस्मदभिमुखम् [v]आ [v]याहि आगच्छ ॥

ये ते वृषणो वृषभास इन्द्र ब्रह्मयुजो वृषरथासो अत्याः।
ताँ आ तिष्ठ तेभिरा याह्यर्वाङ् हवामहे त्वा सुत इन्द्र सोमे ॥ २ ॥

ये। ते। वृषणः। वृषभासः। इन्द्र। ब्रह्मऽयुजः। वृषऽरथासः। अत्याः।
तान्। आ। तिष्ठ। तेभिः। आ। याहि। अर्वाङ्। हवामहे। त्वा। सुते। इन्द्र। सोमे ॥ २ ॥

हे [v]इन्द्र [v]ते तव संबन्धिनः [v]वृषणः वर्षका युवानो वर्षणवन्तो वा [v]वृषभासः श्रेष्ठाः [v]ब्रह्मयुजः परिवृढेन मन्त्रेण युज्यमानाः [v]वृषरथासः वर्षणरथवन्तः। तत्र नियुक्ता इत्यर्थः। ईदृशाः [v]अत्याः अश्वा [v]ये सन्ति [v]तान् [v]आ [v]तिष्ठ आश्रय आरोह। [v]तेभिः तैः [v]अर्वाङ् अस्मदभिमुखम् [v]आ [v]याहि आगच्छ। वयं च हे [v]इन्द्र [v]सोमे [v]सुते सति [v]त्वा त्वां [v]हवामहे आह्वयामः ॥

आ तिष्ठ रथं वृषणं वृषा ते सुतः सोमः परिषिक्ता मधूनि।
युक्त्वा वृषभ्यां वृषभ क्षितीनां हरिभ्यां याहि प्रवतोप मद्रिक् ॥ ३ ॥

आ। तिष्ठ। रथम्। वृषणम्। वृषा। ते। सुतः। सोमः। परिऽसिक्ता। मधूनि।
युक्त्वा। वृषऽभ्याम्। वृषभ। क्षितीनाम्। हरिऽभ्याम्। याहि। प्रऽवता। उप। मद्रिक् ॥३॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे इन्द्र त्वं vरथम् vआ vतिष्ठ आश्रय यज्ञगमनार्थम्। कीदृशं रथम्। vवृषणं वर्षकं कामानाम्। किमर्थमिति चेत्। उच्यते। vते त्वदर्थं vवृषा वर्षकः vसोमः vसुतः अभिषुतः। तथा vमधूनि मधुराणि घृतक्षीरादीनि vपरिषिक्ता परितः सिक्तानि संपादितानि। यद्वा। मधूनि मधुराः सोमरसाश्चमसेषु पूरिताः। आगमनप्रकार उच्यते। हे vवृषभ वर्षकेन्द्र vवृषभ्यां वर्षकाभ्यां vहरिभ्यां vयुक्त्वा रथं योजयित्वा vक्षितीनां कर्मसु निवसतां यजमानानां अस्माकमनुग्रहाय। क्षितीनां वृषभेति वा योज्यम्। vप्रवता वेगवता रथेन vमदिक् मदभिमुखमञ्चन् मदाभिमुख्येन vउप vयाहि॥

अयं यज्ञो देवया अयं मियेध इमा ब्रह्माण्ययमिन्द्र सोमः।
स्तीर्णं बर्हिरा तु शक्र प्र याहि पिबा निषद्य वि मुचा हरी इह॥ ४॥

अयम्। यज्ञः। देवऽयाः। अयम्। मियेधः। इमा। ब्रह्माणि। अयम्। इन्द्र। सोमः।
स्तीर्णम्। बर्हिः। आ। तु। शक्र। प्र। याहि। पिब।
निऽसद्य। वि। मुच। हरी इति। इह॥ ४॥

अहर्गणेषु मध्येष्वहःसु हारियोजनग्रहस्य याज्या। 'अग्निष्टोमोऽत्यग्निष्टोमः' इति खण्डे सूत्रितम्–'अयं यज्ञो देवया अयं मियेध इतीतरेषु' (आश्व. श्रौ. ६. ११) इति॥ हे vइन्द्र vअयं vयज्ञो vदेवयाः देवान् गच्छन् भवति। तथा vअयं यज्ञः vमियेधः। मेधः पशुः। 'पशुर्वै मेधः' इति हि श्रुतिः। vइमा इमानि vब्रह्माणि मन्त्राः। vअयं सुतः vसोमः। vस्तीर्णं vबर्हिः आसनायास्तृता दर्भाः। एते पदार्थास्त्वदुचिता एवं[1] संपादिताः[1]। हे vशक्र इन्द्र vतु पुनः किमित्युक्ते vआ vप्र vयाहि प्रकर्षेण शीघ्रमागच्छ। आगत्य च vनिषद्य बर्हिष्युपविश्य vपिब सोमम्। तदर्थम् vइह अस्मिन् देवयजने vहरी अश्वौ vवि vमुच वियोजय॥ छान्दसो नुमभावः॥

ओ सुष्टुत इन्द्र याह्यर्वाङुप ब्रह्माणि मान्यस्य कारोः।
विद्याम वस्तोरवसा गृणन्तो विद्यामेषं वृजनं जीरदानुम्॥ ५॥

ओ इति। सुऽस्तुतः। इन्द्र। याहि। अर्वाङ्। उप। ब्रह्माणि। मान्यस्य। कारोः।
विद्याम। वस्तोः। अवसा। गृणन्तः। विद्याम। इषम्। वृजनम्। जीरऽदानुम्॥ ५॥

हे vइन्द्र vसुष्टुतः अस्माभिः सम्यक्स्तुतः सन् vअर्वाङ् अस्मदभिमुखम् आ vयाहि आगच्छैव। मां विलम्बय। किमुद्दिश्य। vमान्यस्य माननीयस्य vकारोः स्तोतुर्होतुः कर्तुर्यजमानस्य वा vब्रह्माणि मन्त्रान् vउप उपलक्ष्य। vगृणन्तः स्तुवन्तोऽभिमतं शब्दयन्तो वा वयम् vअवसा त्वद्रक्षणेन रक्षिताः सन्तः vवस्तोः वस्तुं सुखेन संस्थातुमहनि वा सर्वेष्वहःसु अन्नादिकं vविद्याम लभेमहि। विद्याम इत्यादि व्याख्यातम्॥ ॥ २०॥

---

१. क-ख-फ–एव संपादिता।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' यद्ध स्या ' इति पञ्चर्चं चतुर्दशं सूक्तमागस्त्यमैन्द्रं त्रैष्टुभम्। ' यद्ध स्या ' इत्यनुक्रमणिका। विशेषविनियोगः पूर्ववत्॥

यद्ध॒ स्या त॑ इन्द्र श्रु॒ष्टिर॑स्ति॒ यया॑ ब॒भूथ॑ जरि॒तृभ्य॑ ऊ॒ती।
मा नः॑ काम॑म् म॒हय॑न्त॒मा ध॒ग्विश्वा॑ ते अश्या॑म् पर्याप॑ आ॒योः॥ १॥

यत्। ह॒। स्या। ते॒। इ॒न्द्र॒। श्रु॒ष्टिः। अस्ति॑। यया॑। ब॒भूथ॑। ज॒रि॒तृऽभ्यः॑। ऊ॒ती।
मा। नः॒। काम॑म्। म॒हय॑न्तम्। आ। ध॒क्। विश्वा॑। ते॒। अ॒श्या॒म्। परि॑। आपः॑। आ॒योः॥१॥

हे ᵛइन्द्र ᵛयत् या ᵛस्या असौ प्रसिद्धा ᵛश्रुष्टिः सर्वत्र श्रूयमाणा समृद्धिः ᵛते तव ᵛअस्ति ᵛयया ᵛजरितृभ्यः स्तोतृभ्यः ᵛऊती ऊत्यै रक्षणाय ᵛबभूथ समर्थो भवसि ᵛनः अस्माकं ᵛमहयन्तम् अस्मान् महतः कुर्वाणं ᵛकामम् अभीष्टं ᵛमा ᵛधक् मा धाक्षीः। ᵛते तव संबन्धीनि ᵛविश्वा सर्वाणि भोगजातानि ᵛआपः आप्तव्यानि। यद्वा। विश्वा सर्वा आपः आप्ताः श्रुतयः ᵛआयोः मनुष्यस्योचिताः ᵛपरि ᵛअश्यां परितो व्याप्नुयाम्॥

न घा॑ राजेन्द्र॒ आ द॑भन्नो॒ या नु स्वसा॑रा कृ॒णव॑न्त॒ योनौ॑।
आप॑श्चिदस्मै सु॒तुका॑ अवेष॒न्गम॑न्न इन्द्रः॑ स॒ख्या व॒यश्च॑॥ २॥

न। घ॒। राजा॑। इन्द्रः॑। आ। द॒भ॒त्। नः॒। या। नु। स्वसा॑रा। कृ॒णव॑न्त। योनौ॑।
आप॑ः। चि॒त्। अ॒स्मै॒। सु॒ऽतुका॑ः। अ॒वे॒ष॒न्। गम॑त्। नः॒। इन्द्रः॑। स॒ख्या। व॒यः। च॒॥२॥

अयं ᵛराजा राजमान ईश्वरो या ᵛइन्द्रः ᵛनः अस्मदीयानि कर्माणि ᵛन ᵛआ ᵛदभत् सर्वतो न हिंस्यात्। कानीति उच्यते। ᵛया यानि कर्माणि वृष्ट्यादिरूपाणि ᵛस्वसारा परस्परं स्वसृभूते स्वयंसरणभूते अहोरात्रे। ᵛनु पूरणः। ᵛयोनौ स्वकीये स्थाने ᵛकृणवन्त॥ द्विवचनस्थाने बहुवचनम्॥ कुरुतः॥ कृवि हिंसाकरणयोश्च। ' धिन्विकृण्व्योर च ' इति उप्रत्ययः। बहुलग्रहणात् शप्॥ तानीन्द्रोऽप्यनुजानात्विति शेषः। स्वसृभूतावध्वर्युयजमानौ वा कुरुतः। यद्वा। स्वसारोऽङ्गुल्यो योनौ फलोत्पादनस्थाने यज्ञे यानि कृतवन्तस्तानीति योज्यम्। किंच ᵛअस्मै इन्द्राय ᵛसुतुकाः शोभनबलहेतूनि ᵛआपः अपूकार्याणि हवींषि ᵛअवेषन् व्याप्नुवन्ति। ᵛनः अस्मभ्यम् ᵛइन्द्रः ᵛसख्या सख्यानि ᵛवयश्च प्रभूतमन्नं च ᵛगमत् गमयतु॥

जेता॑ नृ॒भिरि॑न्द्रः पृ॒त्सु शू॒रः श्रोता॑ ह॒वं नाध॑मानस्य का॒रोः।
प्रभ॑र्ता॒ रथं॑ दा॒शुषे॑ उपा॒क उद्यन्ता॑ गिरो॒ यदि॑ च॒ त्मना॑ भूत्॥ ३॥

जेता॑। नृऽभिः॑। इन्द्रः॑। पृ॒त्ऽसु॒। शूरः॑। श्रोता॑। ह॒वम्। नाध॑मानस्य। का॒रोः।
प्रऽभ॑र्ता। रथ॑म्। दा॒शुषे॑। उ॒पा॒के। उत्ऽयन्ता॑। गिरः॑। यदि॑। च॒। त्मना॑। भूत्॥३॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अयम् Vइन्द्रः Vशूरः विक्रान्तः सन् Vनृभिः संग्रामनेतृभिर्मरुद्भिः सहितः सन् Vपृत्सु संग्रामेषु Vजेता जयशीलः शत्रूणां तथा Vनाधमानस्य त्वदनुग्रहं याचमानस्य Vकारोः स्तोतुः Vहवम् आह्वानं Vश्रोता भवति । किंच Vयदि Vच यदा च Vत्मना आत्मना अनन्यप्रेरित एव Vगिरः स्तुतिरूपाणि वचांसि स्तोतॄन् वा Vउद्यन्ता उच्छ्रयिता Vभूत् भवेत् तदा Vदाशुषः हविर्दत्तवतो यजमानस्य Vउपाके । समीपनामैतत् । समीपे एव यागदेशे Vरथं Vप्रभर्ता सम्यक् प्रभरन् भवति ॥ जेतेत्यादिषु तृनन्तेषु ' न लोकाव्यय° ' इत्यादिना कर्मणि षष्ठीप्रतिषेधः ॥ यदा स्तुतिं श्रोतुमिच्छति तदा स्वयमेव शीघ्रं रथं धावयित्वा यागं प्राप्नोतीत्यर्थः ॥

एवा नृभिरिन्द्रः सुश्रवस्या प्रखादः पृक्षो अभि मित्रिणो भूत् ।
समर्य इषः स्तवते विवाचि सत्राकरो यजमानस्य शंसः ॥ ४ ॥

एव । नृऽभिः । इन्द्रः । सुऽश्रवस्या । प्रऽखादः । पृक्षः । अभि । मित्रिणः । भूत् ।
सऽमर्ये । इषः । स्तवते । विऽवाचि । सत्राऽकरः । यजमानस्य । शंसः ॥ ४ ॥

अयम् Vइन्द्रः Vनृभिः कर्मनिर्वाहकैर्यजमानैर्दत्तं Vपृक्षः हविर्लक्षणमन्नं Vसुश्रवस्या शोभनान्नेच्छया अन्नेच्छुर्वा Vप्रखादः प्रकर्षेण खादिता[1] Vएव एवम् एवमेव पूर्वं यथा तथैव Vमित्रिणः सहायवतोऽपि यजमानस्य शत्रून् Vअभि Vभूत् अभिभवति । यद्वा । नृभिर्वृष्टिनेतृभिर्मरुद्भिः सहितोऽयमिन्द्रः सुश्रवस्या प्रखादः सन् एवमेव मित्रिण ऋत्विग्रूपमित्रवतो यजमानस्यार्थे तदभिमताय अभि भूत् । अभीत्यनर्थकः । भवति । आभिमुख्येन वा भवति । तस्य हविः स्वीकृत्य तदभिमताय भवतीत्यर्थः । अथ तथाभूः[2] सन् Vविवाचि विविधपरस्पराह्वानध्वनियुक्ते Vसमर्ये संग्रामे विविधस्तोत्रशस्त्रध्वनियुक्ते समर्ये मर्त्ययुक्ते यज्ञे वा तन्निमित्तं Vयजमानस्य Vशंसः शंसकः सन् Vसत्राकरः फलानां सत्यकारी अयमिन्द्रः Vइषः हविर्लक्षणमन्नं Vस्तवते स्तौति ॥

त्वया वयं मघवन्निन्द्र शत्रूनभि ष्याम महतो मन्यमानान् ।
त्वं त्राता त्वमु नो वृधे भूर्विद्यामेषं वृजनं जीरदानुम् ॥ ५ ॥

त्वया । वयम् । मघऽवन् । इन्द्र । शत्रून् । अभि । स्याम । महतः । मन्यमानान् ।
त्वम् । त्राता । त्वम् । ऊँ इति । नः । वृधे । भूः । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥५॥

हे Vमघवन् धनवन् Vइन्द्र Vत्वया सहायेन Vवयं यजमानाः Vमहतो Vमन्यमानान् अतिबलानवध्यान् मन्यमानान् Vशत्रून् Vअभि Vष्याम अभिभवितारो भवेम । हे Vइन्द्र Vत्वं Vत्राता त्वमेवास्माकं रक्षकः । अतः Vत्वमु त्वमेव Vनः अस्माकं Vवृधे धनादिवर्धनाय Vभूः भव । विद्याम इत्यादि गतम् ॥ ॥ २१ ॥

---

१. क-ख-ज-ञ-त-फ-खादित्वा । २. क-ञ-ञ१-तथाभूतः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

'पूर्वीरहम्' इति षड्ऋचं पञ्चदशं सूक्तं त्रैष्टुभम्। उपान्त्या बृहती। अत्र त्रयाणां द्वृचानां लोपामुद्रागस्त्यतच्छिष्यैर्दृष्टत्वात्त एवर्षयः। सूक्तप्रतिपाद्योऽर्थो रतिर्देवता। अत्रानुक्रमणिका–'पूर्वीः षड्जायापत्योर्लोपामुद्राया अगस्त्यस्य च द्वृचाभ्यां रत्यर्थं संवादं श्रुत्वान्तेवासी ब्रह्मचार्यन्त्ये बृहत्यादी अपश्यत्' इति। विशेषविनियोगो लैङ्गिकः॥

लोपामुद्रा आह—

पूर्वीरहं शरदः शश्रमाणा दोषा वस्तोरुषसो जरयन्तीः।
मिनाति श्रियं जरिमा तनूनामप्यू नु पत्नीर्वृषणो जगम्युः॥ १॥

पूर्वीः। अहम्। शरदः। शश्रमाणा। दोषाः। वस्तोः। उषसः। जरयन्तीः।
मिनाति। श्रियम्। जरिमा। तनूनाम्। अपि। ऊँ इति। नु। पत्नीः। वृषणः। जगम्युः॥१॥

हे अगस्त्य ᵛअहं लोपामुद्रा ᵛपूर्वीः ᵛशरदः पुरातनानसंख्यातान् संवत्सरान् ᵛदोषाः रात्रीः ᵛवस्तोः अहानि तथा देहं ᵛजरयन्तीः ᵛउषसः उषःकालांश्च॥ सर्वत्र अत्यन्तकालसंयोगे[1] द्वितीया॥ अद्यतनकालपर्यन्तं बहुसंवत्सरं कात्स्न्र्येन त्वच्छुश्रूषया ᵛशश्रमाणा श्रान्ताभूवम्। इदानीं तु ᵛजरिमा जरा ᵛतनूनाम् अङ्गानां ᵛश्रियं सौन्दर्यं ᵛमिनाति हिनस्ति। एवमपि नानुगृह्णासीत्यर्थः। ᵛअप्यू ᵛनु। अपिः संभावनायाम्। उ इत्यवधारणे। नु इति वितर्के। इदानीमपि किं संभावनीयम्। लोके हि ᵛपत्नीः स्त्रियः ᵛवृषणः सेक्तारः पुरुषाः ᵛजगम्युः गच्छेयुः संभोगं कुर्युः। अतो मां किमित्यवमन्यसे। इदानीमपि वा संभावयेत्यर्थः॥

सा तमेव आह—

ये चिद्धि पूर्वे ऋतसाप आसन्त्साकं देवेभिरवदन्नृतानि।
ते चिदवासुर्नह्यन्तमापुः सम्यू नु पत्नीर्वृषभिर्जगम्युः॥ २॥

ये। चित्। हि। पूर्वे। ऋतऽसापः। आसन्। साकम्। देवेभिः। अवदन्। ऋतानि।
ते। चित्। अव। असुः। नहि। अन्तम्। आपुः। सम्। ऊँ इति। नु। पत्नीः। वृषऽभिः। जगम्युः॥२॥

हे पते अगस्त्य ᵛये ᵛचिद्धि येऽपि तु ᵛपूर्वे पुरातनाः ᵛऋतसापः सत्यस्य आपयितारो व्याप्नुवाना महर्षयः ᵛआसन् ते ᵛदेवेभिः देवैः ᵛसाकं सह ᵛऋतानि सत्यवाक्यानि ᵛअवदन् वदन्ति। ये महत्तपो यज्ञं वा अनुतिष्ठन्ति ये च देववाक्यानि[2] देवस्मृतिरूपाणि[3] वदन्ति ᵛते ᵛचित्। चिदप्यर्थे। ते चित् ᵛअवासुः अवक्षिपन्ति रेतः॥ स्यतिरुपसृष्टो विमोचने वर्तते॥ ते ᵛनह्यन्तमापुः नहि ब्रह्मचर्यादेरन्तं प्राप्नुवन्। ब्रह्मचर्यमनिषिद्धर्तुकालगमनमपि कुर्वन्तीत्यर्थः। तथा ᵛपत्नीः पत्न्यश्च तपस्यमानाः ᵛवृषभिः

१. क-ज्ञ–अत्यन्तसंयोगे। २. क-ज्ञ-ज्ञ१–वेदवाक्यानि। ३. क-ख-ज्ञ-ज्ञ१-फ–वेदस्मृतिरूपाणि।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

भोगवर्षकैः पतिभिः सह ᵛसमू ᵛनु ᵛजगम्युः। उ नु इति पूरणौ। संगच्छेरन्। अतस्त्वं कथं मां नानुभवसीत्यर्थः॥

अगस्त्यस्तामाह—

**न मृषा श्रान्तं यदवन्ति देवा विश्वा इत्स्पृधो अभ्यश्नवाव।**
**जयावेदत्र शतनीथमाजिं यत्सम्यञ्चा मिथुनाव्भ्यजाव॥ ३॥**

न। मृषा। श्रान्तम्। यत्। अवन्ति। देवाः। विश्वाः। इत्। स्पृधः। अभि। अश्नवाव। जयाव। इत्। अत्र। शतऽनीथम्। आजिम्। यत्। सम्यञ्चा। मिथुनौ। अभि। अजाव॥३॥

भोः पत्नि त्वया मया ᵛन ᵛमृषा ᵛश्रान्तम्। व्यर्थं नैव खिन्नमावाभ्याम्। ᵛयत् यस्मात् ᵛदेवाः ᵛअवन्ति रक्षन्ति तपोभिः प्रीता देवाः[1]। ᵛविश्वाः सर्वाः ᵛस्पृधः ᵛअभ्यश्नवाव[1] अभितो व्यामुयाव। ᵛअत्र अस्मिन् संसारे ᵛशतनीथम् अपरिमितभोगप्राप्तिसाधनम् ᵛआजिं प्राप्तिं परस्परं ᵛजयाव जयलक्षणं सुरतसंग्रामं वा जयाव। ᵛयत् यस्मात् ᵛसम्यञ्चा सम्यक् परस्परं गच्छन्तौ प्रजयन्तौ[2] वा मिथुना ᵛमिथुनौ स्त्रीपुरुषरूपौ सन्तौ ᵛअभ्यजाव त्वं चाहमपि परस्परमभिजयावेत्येवं तयोक्तं संभोगं संभावयामास॥

अथ चतुर्थ्यप्यगस्त्य आह—

**नदस्य मा रुधतः काम आगन्नित आजातो अमुतः कुतश्चित्।**
**लोपामुद्रा वृषणं नी रिणाति धीरमधीरा धयति श्वसन्तम्॥ ४॥**

नदस्य। मा। रुधतः। कामः। आ। अगन्। इतः। आऽजातः। अमुतः। कुतः। चित्। लोपामुद्रा। वृषणम्। निः। रिणाति। धीरम्। अधीरा। धयति। श्वसन्तम्॥ ४॥

हे जाये ᵛनदस्य नदनस्य जपशब्दयितुर्जपाध्ययनकर्तुः ᵛरुधतः रेतोनिरोद्धुर्ब्रह्मचर्यमास्थितस्य॥ उभे कर्मणि षष्ठ्यौ॥ उक्तलक्षणं मां ᵛकामः ᵛआगन् आगमत्। 'नदनस्य मा रुधतः काम आगमत्' (निरु. ५.२) इति निरुक्तम्। कस्य हेतोरिति उच्यते। ᵛइतः त्वत्संगमनिमित्तात् तथा ᵛअमुतः वसन्तादिकालात् ᵛकुतश्चित् कारणात् ᵛआजातः सर्वतः उत्पन्नः। यद्वा। इत एतल्लोकजनितादमुतो लोकान्तरजनिताद्वा कुतश्चिन्निमित्तात् कामात्। कथमिति उच्यते। इयं ᵛलोपामुद्रा ᵛवृषणं रेतसः प्रवर्तकं मां ᵛनी ᵛरिणाति नितरां गच्छतु। किंच ᵛधीरं धीमन्तं नियमादविचालिनं ᵛश्वसन्तं महाप्राणं महाबलम् ᵛअधीरा कातरैषा योषित् ᵛधयति उपभुङ्क्ताम्॥

---

१. झ१—देवाः अभिमतमापु ( यु ) रादिकं वितरन्ति। अतो वयं विश्वा इत् सर्वा अपि स्पृधः स्पर्धमान्या याजया अभ्यश्नवाव। २. ज—पूजयन्तौ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अथानयोर्दम्पत्योः संभोगसंलापं श्रुत्वा तत्प्रायश्चित्तं चिकीर्षुरुत्तराभ्यामाह । अनयोर्विनियोगः शौनकेनोक्तः–' इमं नु सोममित्येते द्वे ऋचौ प्रयतो जपन् । सर्वान् कामानवाप्नोति पापेभ्यश्च प्रमुच्यते ' ( ऋग्वि. १. १४७ ) इति ॥

इमं नु सोममन्तितो हृत्सु पीतमुप ब्रुवे ।
यत्सीमागश्चकृमा तत्सु मृळतु पुलुकामो हि मर्त्यः ॥ ५ ॥

इमम् । नु । सोमम् । अन्तितः । हृत्ऽसु । पीतम् । उप । ब्रुवे ।
यत् । सीम् । आगः । चकृम । तत् । सु । मृळतु । पुलुऽकामः । हि । मर्त्यः ॥ ५ ॥

.....उपेत्य[1] मनसा प्राप्य प्रार्थयते[2] । किं ब्रवीति[3] उच्यते । [v]यत् [v]आगः गुर्वोः कामप्रलाप-श्रवणविषयं[4] पापं [v]चकृम कृतवन्तो वयं [v]तत् तस्मादागसः स सोमः [v]सु सम्यक् [v]मृळतु सुखयतु पापजनितदुःखं मा करोत्वित्यर्थः । महत्पापमनुभुज्यमानं प्रार्थनया कथं लुप्यते इति अत आह । [v]हि यस्मात् [v]मर्त्यः मनुष्यः [v]पुलुकामः बहुकामनावान् । अल्पेनैव कर्मणा बहुकामानाकलयति । यस्मादेवं तस्मात् परिहरेत्यर्थः[5] । यद्वा । अयमपवर्जनीयतया[6] प्राप्यत इवेत्याह । पुरुकामो हि खलु मर्त्यः कामहतः सन् कामेन निरुद्ध एव वर्तते । अतस्तयोरुत्सेकोऽयुक्तः । तच्छब्दश्रवणदोषोऽपि ग्रामादिकः अस्माकं प्राप्तेन सोमेन परिहर्तव्य इत्यर्थः । यद्वा । अयं मन्त्रश्चन्द्रपरो व्याख्येयो मनसोऽभिमानित्वाच्च तस्य पापस्यापि मनस्येव संभावितत्वात् । अस्मिन् पक्षे हृत्सु पीतं हृदयस्थितमित्यर्थः । शिष्टं स्पष्टम् ॥

अथ विनियुक्तयोर्मध्ये द्वितीयया सूक्ते षष्ठ्या अन्तेवास्याह ॥

अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः ।
उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम ॥ ६ ॥

अगस्त्यः । खनमानः । खनित्रैः । प्रऽजाम् । अपत्यम् । बलम् । इच्छमानः ।
उभौ । वर्णौ । ऋषिः । उग्रः । पुपोष । सत्याः । देवेषु । आऽशिषः । जगाम ॥ ६ ॥

अयम् [v]अगस्त्यः मद्गुरुः [v]खनित्रैः फलस्योत्पादनसाधनैर्यज्ञस्तोत्रादिभिः [v]खनमानः फलम-भिमतमुत्पादयन् [v]प्रजां प्रकर्षेण पुनःपुनर्जायमानम् [v]अपत्यं कुलस्यापतनसाधनं पुत्रादिकं [v]बलं च [v]इच्छमानः सन् । यद्वा। प्रजां भृत्यादिरूपां च इच्छन् । [v]ऋषिः अतीन्द्रियद्रष्टा महानुभावः [v]उग्रः उद्गूर्णः संसारे संचरन्नप्यपापः सन् [v]उभौ [v]वर्णौ वर्णनीयावाकारौ कामं च तपश्च [v]पुपोष । [v]सत्याः

---

१. झ१–अहं अन्तेवासी नु क्षिप्रं एतत् संभाषप्रणवा ( श्रवणा ) नंतरमेवान्तितोऽप्यूसन्नः एवंकारौ वे हृत्सु हृदयेषु आश्मी (त्मी) येषु ऐतं ( पीतं ) स्वीकृतं सोममुष ( प ) ब्रुवे उपेत्य । २. झ-झ१–प्रार्थये । ३. झ१–ब्रवीमि । ४. झ१–रतिप्रलापविषयम् । ५. ख–परिहरेदित्यर्थः । ६. क-झ–पापमवर्जनीयतया; त–यामयवर्जनीयतया; ज्ञ–यामपवर्जनीयतया; झ१–हिपमवर्जनीतया; झ–पापमर्वजनीयतया ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vआशिषः vदेवेषु देवेभ्यः vजगाम प्राप्तवान् । यतोऽयं महानुभावस्तस्मादस्मान् पातीत्यर्थः ॥
॥ २२ ॥ ॥ २३ ॥

अथ चतुर्विंशेऽनुवाके द्वादश सूक्तानि । तत्र 'युवो रजांसि' इति दशर्चं प्रथमं सूक्तमागस्त्यं त्रैष्टुभम् । तुह्यादिपरिभाषया इदमादिसूक्तपञ्चकमाश्विनम् । 'युवोर्दशाश्विनं वै' इत्यनुक्रमणिका । एतदादीनि तृतीयवर्जितानि पञ्च सूक्तानि प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छन्दसि विनियुक्तानि । 'अथाश्विनः' इति खण्डे सूत्रितं–'युवो रजांसीति पञ्चानां तृतीयमुद्धरेत्' ( आश्व. श्रौ. ४. १५ ) इति ॥

युवो रजांसि सुयमासो अश्वा रथो यद्वां पर्यर्णांसि दीयत् ।
हिरण्ययां वां पवयः प्रुषायन्मध्वः पिबन्ता उषसः सचेथे ॥ १ ॥

युवोः । रजांसि । सुऽयमासः । अश्वाः । रथः । यत् । वाम् । परि । अर्णांसि । दीयत् ।
हिरण्ययाः । वाम् । पवयः । प्रुषायन् । मध्वः । पिबन्तौ । उषसः । सचेथे इति ॥ १ ॥

हे अश्विनौ vयुवोः युवयोः vअश्वाः रथवोढारः vरजांसि रञ्जकान् लोकान् vसुयमासः शोभननियमनाः । लोकत्रयसंचारिण इत्यर्थः । कदेति आह । vयत् यदा vवां vरथः vअर्णांसि अरणीयान् अभिमतदेशान् vपरि vदीयत् परिगच्छेत् परितो गच्छति वा । तदेत्यर्थः । दीयतिर्गतिकर्मा, 'दीयति तकति' ( नि. २. १४. ६९ ) इति तत्कर्मसु पाठात् । किंच रथागमनकाले vवां युवयोः vपवयः वज्रा रथनेमयो वा vहिरण्ययाः हिरण्मयाः vप्रुषायन् प्रुष्णन्त्यभिमतम् । यद्वा । हिरण्ययानि पवयो मधुपात्राणि वां युवाभ्यामर्थाय । यस्मादेवं तस्मात् युवां vमध्वः मधुनो मधुसदृशस्य सोमरसस्य ॥ कर्मणि षष्ठी ॥ सोमरसं vपिबन्तौ आस्वादयन्तौ vउषसः उषःसंबन्धिनि काले vसचेथे यज्ञं संगच्छेथे । अत्र क्रमो न विवक्षितः । उषःकाले एवागत्य मधुरं सोमरसं पिबतमित्यर्थः ॥

युवमत्यस्यावं नक्षथो यद्विपत्मनो नर्यस्य प्रयज्योः ।
स्वसा यद्वां विश्वगूर्ती भरति वाजायेट्टे मधुपाविषे च ॥ २ ॥

युवम् । अत्यस्य । अवं । नक्षथः । यत् । विऽपत्मनः । नर्यस्य । प्रऽयज्योः ।
स्वसा । यत् । वाम् । विश्वगूर्ती इति विश्वऽगूर्ती । भरति । वाजाय । ईट्टे । मधुऽपौ । इषे । च ॥ २ ॥

हे अश्विनौ vयुवं युवां vयत् vअत्यस्य अतनशीलस्य सततसंचारिणः vविपत्मनः विविधगमनस्य विचित्रगमनस्य वा vनर्यस्य मनुष्याणां हितस्य vप्रयज्योः प्रकर्षेण पूज्यस्य ॥ एतानि कर्मणि षष्ठ्यन्तानि ॥ उक्तरूपं रथम् vअव अवस्तात् तदुदयात् पूर्वं vनक्षथः व्याप्नुथो देवयजनं गन्तुम् । किंच vयत् यदा हे vविश्वगूर्ती सर्वस्तुत्यौ सर्वदा उद्यौ वा vवां युवयोः vस्वसा स्वसृस्थानीया स्वयंसारिणी वा उषाः vभरति पोषते त्वदागमनाय प्रभातं करोति । यदा हे vमधुपौ मधुरस्य सोमरसस्य पातारौ युवां यजमानः vवाजाय बलाय गमनाय वा vइषे प्रभूतान्नाय vईट्टे स्तौति । तदा रथं प्रापयेत्यर्थः ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

युवं पयं उस्रियायामधत्तं पक्वमामायामव पूर्व्यं गोः ।
अन्तर्यद्वनिनो वामृतप्सू ह्वारो न शुचिर्यजते हविष्मान् ॥ ३ ॥

युवम् । पयः । उस्रियायाम् । अधत्तम् । पक्वम् । आमायाम् । अव । पूर्व्यम् । गोः ।
अन्तः । यत् । वनिनः । वाम् । ऋतप्सू इत्यृतऽप्सू । ह्वारः । न । शुचिः । यजते । हविष्मान् ॥३॥

हे अश्विनौ [v]युवं युवाम् [v]उस्रियायाम् । गोनामैतत् । भोगोत्साविण्यां गवि [v]पयः [v]अधत्तम् अधारयतं स्थापितवन्तौ । तथा [v]आमायाम् अपक्वायां [v]पक्वं परिपक्वं भोगयोग्यं गोसंबन्धि दुग्धं [v]पूर्व्यं पूर्वभवं तत्रैवोत्पन्नम् [v]अव अवस्तादधारयतम् । गवि क्षीरमुत्पाद्य पुनर्भोगाय पृथक्कृतवन्तावित्यर्थः । [v]यत् यस्मात् हे [v]ऋतप्सू सत्यस्वरूपौ यज्ञियहविर्भक्षयितारौ वा हे अश्विनौ [v]वां [v]वनिनः उदकवतः उदकोपलक्षितहविष्मतो यज्ञस्य [v]अन्तः मध्ये [v]हविष्मान् प्रदेयहविषा तद्वान् [v]शुचिः शुद्धो यजमानः [v]यजते पूजयति युवां तस्मादेवमकुरुतम् । यद्वा । यदैवं यजमानः करोति तदेत्यर्थः । तत्र[1] दृष्टान्तः[1] । वनिनः वनसंबन्धिवृक्षसमूहस्य अन्तः मध्ये [v]ह्वारो [v]न चोर इव । स यथा जागरूको वर्तते तथा यजमानोऽपीत्यर्थः ॥

युवं ह घर्मं मधुमन्तमत्रयेऽपो न क्षोदोऽवृणीतमेषे ।
तद्वां नरावश्विना पश्वइष्टी रथ्येव चक्रा प्रति यन्ति मध्वः ॥ ४ ॥

युवम् । ह । घर्मम् । मधुऽमन्तम् । अत्रये । अपः । न । क्षोदः । अवृणीतम् । एषे ।
तत् । वाम् । नरौ । अश्विना । पश्वःऽइष्टिः । रथ्याऽइव । चक्रा । प्रति । यन्ति । मध्वः ॥४॥

अत्रेतिहासमाहुः । प्रवर्ग्येण प्रचरन्तमत्रिं राक्षसास्तप्ते घर्मेऽपातयन् । स च तप्यमानोऽश्विनौ तुष्टाव । तौ च स्तुत्या हृष्टमनसावरक्षतामिति । अपरेऽग्नौ क्षिप्तमपालयतामित्याहुरिति । हे अश्विनौ [v]युवं युवां [v]मधुमन्तं पयोघृतरूपाभ्यां मधुभ्यां तद्वन्तं [v]घर्मं दीप्तं प्रवर्ग्यम् [v]एषे सौख्यमिच्छते [v]अत्रये एतन्नाम्ने महर्षये [v]क्षोदः क्षोदांसि क्षोद्यमानानि [v]अपो [v]न उदकानीव [v]अवृणीतम् अवारयतम् । औष्ण्यं शैत्यसुखं कृतवन्तौ । तप्तघर्मसकाशात् भ(र)क्षितवान्[2](वन्तौ) इत्यर्थः[3] । यद्वा । अत्रये क्षोदः । उदकनामैतत् । तत्स्थं शैत्यं लक्ष्यते । अपः क्षोदो न । अप इति षष्ठ्यर्थे द्वितीया । उदकानां शैत्यं यथा भवति तद्वत् । पक्षान्तरे तु घर्मं दीप्तमग्निं मधुमन्तं कृत्वा अवृणीतं सुखयतमित्यर्थः । तथा च मन्त्रान्तरं–'तप्तं घर्ममोम्यावन्तमत्रये' (ऋ. सं. १. ११२. ७) इति । [v]तत् तस्मात् यस्मादेवं तस्मात् हे [v]नरौ नेतारौ नराकारौ वा [v]अश्विना अश्विनौ [v]वां युवाभ्यां [v]पश्वइष्टिः । पशुरित्यग्नेर्नाम । 'अग्निः पशुरासीत्' (तै. सं. ५. ७. २६) इत्यादिश्रुतेः । यद्वा । पशुप्रियत्वात् पशुरित्युच्यते । तस्याग्नेः इष्टिर्भवति । अग्नौ यागः सर्वो युष्मदर्थं प्रवर्तते इत्यर्थः । यद्वा । पशुसाध्यो यागो युवाभ्यां प्रवर्तते इति शेषः । 'आश्विनं धूम्रललाममा लभेत यो दुर्ब्राह्मणः सोमं पिपासेत्' (तै. सं. २. १. १०. १)

१. झ१–यागे दृष्टान्तः । ह्वारो न तृषित इव । यद्वा । २. झ-१–रक्षितवन्तावित्यर्थः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इत्यादिनाप्यश्विभ्यां पशुर्विहितः । तथा ᵛमध्वः मधुसदृशाः सोमरसा अपि युवाभ्यां ᵛप्रति ᵛयन्ति अभिगच्छन्ति । तत्र दृष्टान्तः । ᵛरथ्येव ᵛचक्रा रथसंबन्धीनि चक्रा चक्राणीव । तानि यथा प्रवणदेशमभिगच्छन्ति तद्वत् ॥

**आ वां दानाय ववृतीय दस्रा गोरोहेण तौग्र्यो न जिव्रिः ।**
**अपः क्षोणी सचते माहिना वां जूर्णो वामक्षुरंहसो यजत्रा ॥ ५ ॥**

आ । वाम् । दानाय । ववृतीय । दस्रा । गोः । ओहेन । तौग्र्यः । न । जिव्रिः ।
अपः । क्षोणी इति । सचते । माहिना । वाम् । जूर्णः । वाम् । अक्षुः । अंहसः । यजत्रा ॥५॥

हे ᵛदस्रा शत्रूणामुपक्षपयितारावश्विनौ ᵛवां युवयोः ᵛदानाय अस्मदभिमताय युवाभ्यां वाहयितुम् ᵛआ ᵛववृतीय आवर्तयामि यागदेशम् ॥ वृतेरन्तर्भावितण्यर्थस्येदम् ॥ केन साधनेनेति तदुच्यते । ᵛगोः स्तुतिरूपाया वाचः ᵛओहेन वहनेन साधनेन । यद्वा । आवर्तनकाल उच्यते । गोर्गन्त्र्याः उषसो वहनेन । ᵛजिव्रिः जीर्णो जयशीलो वा ᵛतौग्र्यो ᵛन तुग्राख्यस्य राज्ञः पुत्रो भुज्युरिव । स यथा शत्रुभिः संताड्य समुद्रे पातितो युवां परितोष्य स्वोद्धाराय स्वसमीपमानयत तद्वदित्यर्थः । इयमाख्यायिका 'तुग्रो ह' (ऋ. सं. १. ११६. ३), 'भुज्युमंहसः पिपृथः' (ऋ. सं. १०. ६५.१२), 'नासत्या भुज्युम्' (ऋ. सं. १. ११६. ४) इत्यादिषु प्रसिद्धा च । किमाश्चर्यमहमावर्तयामीति । किंतु ᵛअपः ᵛक्षोणी । अप इत्यन्तरिक्षनाम (नि. १. ३. ८) । क्षोणीति पृथिवीनाम (नि. १. १. ७) । द्यावापृथिव्यावपि ᵛवां युवयोः ᵛमाहिना माहात्म्येन युवयोः प्रसादेन सर्वोपकारिण्याविति ख्यातिं सर्वप्रदेशव्याप्तिं वा ᵛसचते सेवते प्रत्येकम् । यद्वा । वां माहिना यजमानो द्यावापृथिव्यौ सचते । किंच हे ᵛयजत्रा यष्टव्यौ प्रसादादयमृषिः ᵛजूर्णः जरया जीर्णाङ्गः सन् ᵛअंहसः पापात् जरालक्षणात् प्रमुच्य ᵛअक्षुः चिरकालव्याप्तो दीर्घजीवी भूयात् । यद्वा । हे यजत्रा वां प्रसादात् जूर्णो जीर्णो यजमानः अंहसो दुरितस्य हन्त्रीरप उक्तलक्षणानि सोमरसरूपाण्युदकानि क्षोणी क्षोण्याम् ॥ सप्तम्यर्थे प्रगृह्यम् ॥ भूम्यां चिरकालमक्षुर्व्याप्तः सन् माहिना माहात्म्येन सचते । द्वितीयो वामित्ययमादरार्थः ॥ ॥ २३ ॥

**नि यद्युवेथे नियुतः सुदानू उप स्वधाभिः सृजथः पुरंधिम् ।**
**प्रेषद्वेषद्वातो न सूरिरा महे ददे सुव्रतो न वाजम् ॥ ६ ॥**

नि । यत् । युवेथे इति । निऽयुतः । सुदानू इति सुऽदानू । उप । स्वधाभिः । सृजथः । पुरंऽधिम् ।
प्रेषत् । वेषत् । वातः । न । सूरिः । आ । महे । ददे । सुऽव्रतः । न । वाजम् ॥ ६ ॥

हे ᵛसुदानू शोभनदानावश्विनौ ᵛयत् यदा ᵛनियुतः अश्वान् ᵛनि ᵛयुवेथे नियुञ्जाथे नियोजयथः ताभिरस्मद्यज्ञगमनाय संयुक्तौ भवथः तदा ᵛस्वधाभिः अन्नैः तत्कारणैरुदकैर्वा ᵛपुरंधिं बहूनां धात्रीं पृथिवीम् ᵛउप ᵛसृजथः[1] । एवं च सति ᵛसूरिः स्तोता अयं यजमानः ᵛवातो ᵛन वायुरिव तद्वत् क्षिप्रं

---

१. झ१-सृजथः उपसृष्टां कुरुथः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

युवां [V]प्रेषत् तर्पयतु । [V]वेषत् व्याप्नोतु । कामयतां वा ॥ प्रीणातेर्वेतेश्च लेटि रूपे ॥ अनन्तरं [V]सुव्रतो [V]न अतिप्रशस्तोष्मादिकर्मवानिव [V]वाजम् अन्नं [V]महे महत्त्वाय अयं यजमानः [V]आ [V]ददे आदत्ते स्वीकरोति ॥ ' आङो दोऽनास्यविहरणे ' (पा. सू. १. ३. २०) इत्यात्मनेपदम् । ' लोपस्त आत्मनेपदेषु ' इति तलोपः । यद्वा । छान्दसे लिटि रूपम् ॥ स्वीकृत्य स्वमहत्त्वाय युवामेव तर्पयत्वित्यर्थः ॥

वयं चिद्धि वां जरितारः सत्या विपन्यामहे वि पणिर्हितावान् ।
अधा चिद्धि ष्मा श्विनावनिन्द्या पाथो हि ष्मा वृषणावन्तिदेवम् ॥ ७ ॥

वयम् । चित् । हि । वाम् । जरितारः । सत्याः । विपन्यामहे । वि । पणिः । हितऽवान् ।
अध । चित् । हि । स्म । अश्विनौ । अनिन्द्या । पाथः । हि । स्म । वृषणौ । अन्तिऽदेवम् ॥७॥

[V]वयं [V]चिद्धि वयमपि [V]जरितारः तव स्तोतारः [V]सत्याः सत्यफलाः सन्तः [V]विपन्यामहे विविधं स्तुमः । [V]पणिः पणाधारो द्रोणकलशः [V]वि [V]हितवान् स्थापितरसवानासीत् । यद्वा । पणिर्वणिग्लुब्धकोऽयष्टा हितवान्नियतधनो धनाढ्योऽप्ययष्टा वि वियुज्यताम् ॥ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥ [V]अध अपि च [V]चिद्धि [V]ष्म । एते त्रयः पूरणाः । हे [V]अश्विनौ [V]अनिन्द्या । प्रशस्यनामैतत् । हे प्रशस्यौ [V]वृषणौ हे कामानां वर्षितारौ युवाम् [V]अन्तिदेवं देवानामन्तिके [V]पाथः सोमं पिबथः । यद्वा । अन्तिके वर्तमानं देवान् प्राप्नुवानं सोममिति योज्यम् ॥

युवां चिद्धि ष्मा श्विनावनु द्यून्विरुद्रस्य प्रस्रवणस्य सातौ ।
अगस्त्यो नरां नृषु प्रशस्तः कारा धुनीव चितयत्सहस्रैः ॥ ८ ॥

युवाम् । चित् । हि । स्म । अश्विनौ । अनु । द्यून् । विऽरुद्रस्य । प्रऽस्रवणस्य । सातौ ।
अगस्त्यः । नराम् । नृषु । प्रऽशस्तः । कारा धुनीऽइव । चितयत् । सहस्रैः ॥ ८ ॥

हे [V]अश्विनौ [V]युवां । [V]चिद्धि [V]ष्म इति त्रयः पूरणाः । [V]अनु [V]द्यून् प्रतिदिनं [V]विरुद्रस्य विशिष्टोष्णरूपदुःखद्रावणस्य विविधरोरूयमाणद्रवणवतो वा [V]प्रस्रवणस्य वृष्ट्युदकसंस्थायस्य [V]सातौ लाभे निमित्तभूते सति [V]अगस्त्यः एतन्नामा महर्षिः [V]नरां नेतॄणां कर्मनिर्वाहकानां मनुष्याणां [V]नृषु येषु तादृशाः मनुष्याः सन्ति तेषु [V]प्रशस्तः प्रशस्यतरोऽयं [V]सहस्रैः अपरिमितैः स्तोत्रैः [V]चितयत् चेतयति स्तुत्या प्रबोधयति । तत्र दृष्टान्तः । [V]कारा धुनीव । कारा शब्दः । तस्य धूनयितोत्पादयिता शङ्खादिः स इव । यद्वा । एतदप्यगस्त्यविशेषणम् । कारः शब्दयिता होत्रादिः । तस्य धुनिः कम्पयिता प्रेरकः इव । इवेति संप्रत्यर्थे । ' अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोगः ' ( निरु. ७. ३१ ) इति निरुक्तम् ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

प्र यद्वहेथे महिना रथस्य प्र स्यन्द्रा याथो मनुषो न होता ।
धत्तं सूरिभ्य उत वा स्वश्व्यं नासत्या रयिषाचः स्याम ॥ ९ ॥

प्र । यत् । वहेथे इति । महिना । रथस्य । प्र । स्यन्द्रा । याथः । मनुषः । न । होता ।
धत्तम् । सूरिऽभ्यः । उत । वा । सुऽअश्व्यम् । नासत्या । रयिऽसाचः । स्याम ॥ ९ ॥

हे अश्विनौ युवां vरथस्य गमनसाधनस्य vमहिना महत्त्वेन vयत् यस्मात् vप्र vवहेथे धारयथो यज्ञम् । यद्वा । रथस्य स्वर्गगमनसाधनस्य यागस्य धुरं वहत [1] । तथा हे vस्यन्द्रा स्यन्दनशीलौ युवां vयाथः गच्छथः । स्वस्थानं यज्ञारम्भे आगच्छथः यज्ञसमाप्तौ पुनर्गच्छथश्च । तत्र दृष्टान्तः । vमनुषः vहोता मनुष्यस्य यजमानस्य होता यथा यज्ञप्रारम्भे आगच्छति कर्मणि निर्वृत्ते पुनरपगच्छति तद्वत् । आगमनसमये vसूरिभ्यः स्तोतृभ्यः vधत्तं धारयतं फलम् । vउत vवा vस्वश्व्यं शोभनाश्वसमूहं धत्तम् । vनासत्या । सत्सु भवौ सत्यौ । न असत्यौ नासत्यौ । हे तादृशौ स्वदनुग्रहात् vरयिसाचः धनसमवायिनः vस्याम भवेम ॥

तं वां रथं वयमद्या हुवेम स्तोमैरश्विना सुविताय नव्यम् ।
अरिष्टनेमिं परि द्यामियानं विद्यामेषं वृजनं जीरदानुम् ॥ १० ॥

तम् । वाम् । रथम् । वयम् । अद्य । हुवेम । स्तोमैः । अश्विना । सुविताय । नव्यम् ।
अरिष्टऽनेमिम् । परि । द्याम् । इयानम् । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ १० ॥

हे vअश्विना हे अश्विनौ vवां युवयोः संबन्धिनं [2] शीघ्रगमनेन स्तुत्यं vरथं vवयम् अगस्त्याः vअद्य अस्मिन्सुत्येऽहनि vहुवेम आह्वयेम । केन साधनेनेति उच्यते । vस्तोमैः स्तोत्रैः । किमर्थम् । vसुविताय सुष्ठु प्राप्तये । कीदृशम् । vनव्यं स्तुत्यं नूतनं वा तथा vअरिष्टनेमिम् अहिंसितचक्रवलयं vद्यां vपरि vइयानं द्युलोकस्य परितो गच्छन्तम् । विद्याम इत्यादि गतम् ॥ ॥ २४ ॥

' कदु प्रेष्ठौ ' इति नवर्चं द्वितीयं सूक्तमागस्त्यं त्रैष्टुभमाश्विनम् । ' कदु नव ' इत्यनुक्रान्तम् ॥ प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगः पूर्वसूक्ते एव उक्तः ॥

कदु प्रेष्ठाविषां रयीणामध्वर्यन्ता यदुन्निनीथो अपाम् ।
अयं वां यज्ञो अकृत प्रशस्तिं वसुधिती अवितारा जनानाम् ॥ १ ॥

कत् । ऊँ इति । प्रेष्ठौ । इषाम् । रयीणाम् । अध्वर्यन्ता । यत् । उत्ऽनिनीथः । अपाम् ।
अयम् । वाम् । यज्ञः । अकृत । प्रऽशस्तिम् । वसुधिती इति वसुऽधिती । अवितारा । जनानाम् ॥ १ ॥

---

१. ऋ१—वहथः । २. ऋ१—संबन्धिनं तम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे अश्विनौ [V]प्रेष्ठौ प्रियतमौ वां युवां [V]कदु कदा भविष्यति[1] [V]इषाम् इष्यमाणानामन्नानां [V]रयीणां धनानाम्॥ कर्मणि षष्ठ्यौ॥ अन्नानि धनानि च [V]उन्निनीथः ऊर्ध्वं प्रापयथः [V]अध्वर्यन्ता अध्वरं पारयितुमिच्छन्तौ युवाम्[2] [V]अपां वृष्ट्युदकानां वृष्ट्युदकानि च उन्निनीथः उत्कृष्टम् अधः प्रापयथ इति [V]यत् तत्कदा। कस्मादेवमुच्यते इति उच्यते । [V]अयं [V]यज्ञः अस्माभिरनुष्ठीयमानः [V]वां युवयोरेव [V]प्रशस्ति प्रशंसां स्तुतिम् [V]अकृत करोति । यज्ञे शंसनीयानि शस्त्राणि युवामेव प्रशंसन्तीत्यर्थः। यस्मादेवं तस्मात् हे [V]वसुधिती वसुनो धनस्य धातारौ वस्तव्यकर्माणौ तथा हे [V]जनानाम् [V]अवितारौ उक्तलक्षणौ युवां कदा अन्नानां धनानां च दातारौ भवथ इति॥

आ वामश्वासः शुचयः पयस्पा वातरंहसो दिव्यासो अत्याः।
मनोजुवो वृषणो वीतपृष्ठा एह स्वराजो अश्विना वहन्तु॥ २॥

आ। वाम्। अश्वासः। शुचयः। पयःऽपाः। वातऽरंहसः। दिव्यासः। अत्याः।
मनःऽजुवः। वृषणः। वीतऽपृष्ठाः। आ। इह। स्वऽराजः। अश्विना। वहन्तु॥ २॥

अश्विनौ शोभनाश्वयुक्तौ [V]वां युवाम् [V]अश्वासः युष्मदीयाः [V]इह अस्मिन् यज्ञे [V]आ [V]वहन्तु प्रापयन्तु। अवशिष्टानि अश्वविशेषणानि । कीदृशास्ते। [V]शुचयः शुद्धा दीप्ता वा [V]पयस्पाः वृष्ट्युदकस्य पातारः [V]वातरंहसः वायुवेगाः दिव्याः[3] दिविभवाः [V]अत्याः अतनशीलाः [V]मनोजुवः मनोजवाः [V]वृषणः वर्षकाः युवान इत्यर्थः। [V]वीतपृष्ठाः कान्तपृष्ठाः वपुष्मन्त इत्यर्थः। [V]स्वराजः स्वयमेव राजमानाः। ईदृशा भवन्तु[4]॥

आ वां रथोऽवनिर्न प्रवत्वान्त्सुप्रवन्धुरः सुविताय गम्याः।
वृष्णः स्थातारा मनसो जवीयानहंपूर्वो यजतो धिष्ण्या यः॥ ३॥

आ। वाम्। रथः। अवनिः। न। प्रवत्वान्। सुप्रऽवन्धुरः। सुविताय। गम्याः।
वृष्णः। स्थातारा। मनसः। जवीयान्। अहम्ऽपूर्वः। यजतः। धिष्ण्या। यः॥ ३॥

पूर्वमन्त्रेऽश्वव्याजेन अश्विनोरागमनमुक्तम्। अनेन रथव्याजेनोच्यते। हे [V]धिष्ण्या उन्नतस्थानार्हौ [V]स्थातारा स्वरथाधिष्ठानौ [V]वां युवयोः [V]यः [V]रथः अस्ति सः [V]सुविताय शोभनफलाय [V]आ [V]गम्याः अस्मद्यज्ञमागच्छतु॥ पुरुषव्यत्ययः॥ कीदृशो रथ इति स विशेष्यते । [V]अवनिर्न [V]प्रवत्वान् भूमिरिवात्यन्तविस्तारवान् [V]सुप्रवन्धुरः विस्तीर्णपुरोभागः [V]वृष्णः वर्षकस्याश्वस्य [V]मनसः अपि [V]जवीयान् मनोवेगवानित्यर्थः। [V]अहंपूर्वः अहंकारपूर्वो मनस्वी वा अस्युदारः [V]यजतः यष्टव्यः। ईदृशो रथ आगच्छतु॥

---

१. झ१–'भविष्यति' नास्ति।। २. झ१–युवां यत् यदा। ३. झ-झ१–दिव्यासः। ४. झ-झ१–वहन्तु।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इहेहे जाता समवावशीतामरेपसा तन्वा३ नामभिः स्वैः ।
जिष्णुर्वामन्यः सुमखस्य सूरिर्दिवो अन्यः सुभगः पुत्र ऊहे ॥ ४ ॥

इहऽइह । जाता । सम् । अवावशीताम् । अरेपसा । तन्वा । नामऽभिः । स्वैः ।
जिष्णुः । वाम् । अन्यः । सुऽमखस्य । सूरिः । दिवः । अन्यः । सुऽभगः । पुत्रः । ऊहे ॥४॥

हे अश्विनौ युवां [v]समवावशीताम् । सह सम्यग्वा पुनःपुनः स्तूयेथे कामयेथां वा यज्ञम् ॥ पुरुषव्यत्ययः ॥ कीदृशौ युवाम् । [v]इहेह [v]जाता । उभाभ्यामिहशब्दाभ्यां मध्यमोत्तमस्थाने उच्येते । तयोः संभूतौ । चन्द्रसूर्येण[1] इति यावत् । ' सूर्याचन्द्रमसावित्येके ' ( निरु. १२. १ ) इति निरुक्तम् । [v]अरेपसा अपापौ । आथर्वणस्य गुरोः शिरश्छेदनादिना पापलेपरहिताविति भावः । ' आथर्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयतम् ' ( ऋ. सं. १. ११७. २२ ) इत्यादिमन्त्रवर्णात् । केन हेतुनेति उच्यते । [v]तन्वा शरीरेण शरीरसौन्दर्येण निमित्तेन [v]स्वैः [v]नामभिः स्वीयैर्माहात्म्यविशिष्टैरश्विनौ नासत्यावित्यादिभिरपि । रमणीयशरीरवत्त्वान्महिमोपेतनामवत्त्वाच्च हेतोः संस्तूयेथे इत्यर्थः । यद्वा । अरेपसा तन्वेति योज्यम् । उक्तप्रकारेण गुरुशिरश्छेदादप्यपापेन शीर्षेण[2] तादृङ्महत्त्वख्यापनेनेति यावत् । किंच [v]वां युवयोः [v]अन्यः एको मध्यमस्यान्तरिक्षस्य पुत्रस्थानीयः सोमः [v]जिष्णुः जयशीलः [v]सुमखस्य शोभनयज्ञस्य [v]सूरिः प्रेरयिता सन् [v]ऊहे वहति विश्वं जगद्धारयति । चन्द्रात्मनस्तस्योदये सति ह्योषधिवनस्पत्यादयो वर्धन्ते । [v]अन्यः अपरः उत्तमस्थानः [v]दिवः द्युलोकस्य [v]पुत्रः पुत्रस्थानीय आदित्यः [v]सुभगः शोभनरश्मिरूपधनः ऊहे वहति । कृत्स्नमेवं पृथग्जगन्निर्वाहकौ महानुभावौ युवां सह स्तूयेथे । अत्र निरुक्तम्–' इहेह जातौ संस्तूयेथे पापेनालिप्यमानया तन्वा नामभिश्च स्वैर्जिष्णुर्वामन्यः सुमहतो बलस्येरयिता मध्यमो दिवोऽन्यः सुभगः पुत्र उह्यत आदित्यः ' ( निरु. १२. ३ ) इति ॥

प्र वां निचेरुः ककुहो वशाँ अनु पिशङ्गरूपः सदनानि गम्याः ।
हरी अन्यस्य पीपयन्त वाजैर्मक्षा रजांस्यश्विना वि घोषैः ॥ ५ ॥

प्र । वाम् । निऽचेरुः । ककुहः । वशान् । अनु । पिशङ्गऽरूपः । सदनानि । गम्याः ।
हरी इति । अन्यस्य । पीपयन्त । वाजैः । मक्षा । रजांसि । अश्विना । वि । घोषैः ॥ ५ ॥

हे [v]अश्विना अश्विनौ [v]वां युवयोर्मध्ये अन्यस्य एकस्य [v]ककुहः श्रेष्ठः [v]पिशङ्गरूपः हिरण्यरूपः पीतवर्णो वा बहुभिरक्षाद्यवयवैर्निरूप्यमाणो वा रथः [v]वशान् [v]अनु कामाननुलक्ष्य यथाकामम् । अस्मद्यज्ञागमनेच्छयेत्यर्थः । यद्वा । वशान्स्वाधीनाः ककुहो दिशो दिगन्तरालानुक्रमेण नीचैरुच्चैश्चरन् स्वस्थानाद्देवयजनमुखं गच्छन् । [v]सदनानि अस्मद्यागगृहाणि [v]प्र [v]गम्याः प्रकर्षेण गच्छतु ॥ पुरुषव्यत्ययः ॥ अत्र यद्यप्यन्यस्येति नोक्तं तथाप्युत्तरवाक्ये तथोक्तत्वादत्रापि लभ्यते । [v]अन्यस्य युवयोरन्यतमस्य [v]हरी अश्वौ [v]रजांसि लोकाः । अत्र लोकशब्दो जनवाचकः । ते यजमानरूपा जनाः

---

१. झ१–चन्द्रसूर्यरूपेण । २. झ१–शरीरेण ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इत्यर्थः । ते च Vमझा प्रमथनेनालोडनेन निष्पादितैः Vवाजैः अन्नैरामिक्षादिरूपैः Vघोषैः स्तुतिभिश्च आह्वानादिशब्दविशिष्टैर्वा Vपीपयन्त आप्याययन्ति ॥ ॥ २५ ॥

प्र वां शरद्वान्वृषभो न निष्षाट् पूर्वीरिषश्चरति मध्व इष्णन् ।
एवैरन्यस्य पीपयन्त वाजैर्वेषन्तीरूर्ध्वा नद्यो न आगुः ॥ ६ ॥

प्र । वाम् । शरत्ऽवान् । वृषभः । न । निष्षाट् । पूर्वीः । इषः । चरति । मध्वः । इष्णन् ।
एवैः । अन्यस्य । पीपयन्त । वाजैः । वेषन्तीः । ऊर्ध्वाः । नद्यः । नः । आ । अगुः ॥६॥

हे अश्विनौ युवयोरन्यतमो मध्यमस्थानः Vशरद्वान् शरणवान् मेघवृक्षपर्णादीनां विशरणवान् । अथवा बहुसंवत्सरः पूर्वतनो नित्य इत्यर्थः । Vवृषभो Vन वर्षितैवेन्द्रः[1] । स इव शत्रूणां Vनिष्षाट् निःसारयिता सन् Vपूर्वीः बह्वीः पुरातनीर्वा Vइषः अन्नानि सस्यादीन्युद्दिश्य Vप्र Vचरति प्रकर्षेण गच्छति । मध्यमस्थानश्चन्द्रः इति पक्षे शरद्वाञ्छरत्कालवान् । तस्मिन् ऋतौ हि चन्द्रः संनद्धः[2] भवति । तेन च तृणगुल्मौषध्यादीनि वर्धन्ते । स किमर्थमेवं करोतीति उच्यते । Vमध्व Vइष्णन् मधुनो मधुसदृशस्य हविषः ॥ कर्मणि षष्ठी ॥ हविरिच्छन् । तदर्थमेवं करोति । तथा Vअन्यस्य उत्तमादित्यस्य Vएवैः कामैर्गमनैर्वा निमित्तभूतैः Vपीपयन्त आप्याययन्ति हविर्भिर्यजमानाः । तुष्टेन तेन प्रेरिताः Vवेषन्तीः व्यापयन्तीः Vऊर्ध्वाः उन्नताः उत्तीराः[3] Vनद्यः न नदनशीला यथा Vनः अस्मदर्थम् Vआगुः आगच्छन्ति ॥

असर्जि वां स्थविरा वेधसा गीर्बाळ्हे अश्विना त्रेधा क्षरन्ती ।
उपस्तुताववतं नाधमानं यामन्नयामञ्छृणुतं हवं मे ॥ ७ ॥

असर्जि । वाम् । स्थविरा । वेधसा । गीः । बाळ्हे । अश्विना । त्रेधा । क्षरन्ती ।
उपऽस्तुतौ । अवतम् । नाधमानम् । यामन् । अयामन् । शृणुतम् । हवम् । मे ॥ ७ ॥

हे[4] Vवेधसा विधातारावश्विनौ[5] Vवां युवयोः Vबाळ्हे दृढे स्थैर्ये निमित्तभूते सति Vगीः स्तुतिरूपा वाक् Vअसर्जि सृज्यते[5]। कीदृशी सा । Vस्थविरा अत्यन्तं स्थिरा नित्या वेदमयी Vत्रेधा मन्त्रादिभेदेन त्रिप्रकारा Vक्षरन्ती युवां गच्छन्ती । ईदृशी स्तुतिः कृतेत्यर्थः । तथा Vउपस्तुतौ सन्तौ Vनाधमानम् अभिमतफलं याचमानम् Vअवतं रक्षतं तर्पयतं वा । किंच Vयामन् गमने Vअयामन् अगमने च Vहवम् आह्वानं Vशृणुतम् ॥

---

१. क-ख-ज-झ-ञ-त-फ–वर्षिता देवेन्द्रः; झ१–वृषभो वर्षिता देवेन्द्रः । २. क-झ-झ१–प्रसन्नः । ३. ख-फ–उन्नीराः । ४. झ१–अश्विनौ । ५. झ-१–सृज्यते उच्चार्यते ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उत स्या वां रुशतो वप्ससो गीस्त्रिबर्हिषि सदसि पिन्वते नॄन् ।
वृषा वां मेघो वृषणा पीपाय गोर्न सेके मनुषो दशस्यन् ॥ ८ ॥

उत । स्या । वाम् । रुशतः । वप्ससः । गीः । त्रिऽबर्हिषि । सदसि । पिन्वते । नॄन् ।
वृषा । वाम् । मेघः । वृषणा । पीपाय । गोः । न । सेके । मनुषः । दशस्यन् ॥ ८ ॥

हे अश्विनौ vवां युवयोः vरुशतः दीप्तस्य vवप्ससः रूपस्यैव वपुषो वा ख्यापयित्री vगीः स्तुतिवाक् vत्रिबर्हिषि त्रिधात्वास्तीर्णबर्हिष्के[1] vसदसि यागसदने vनॄन् कर्मनेतॄनरमान् vपिन्वते आप्याययति आप्याययतु वा उचितप्रदानादिना । केन प्रकारेण उच्यते । हे vवृषणा वर्षितारौ कामानां vवां युवयोः स्वभूतः vमेघः सेक्ता जलदः प्रदानविशेषो वा vवृषा वर्षकः सन् vमनुषः मनुष्यान् प्रति vदशस्यन् प्रयच्छन् vपीपाय आप्याययति । आप्यायने दृष्टान्तः । vगोर्न vसेके उदकसेके इव शांतनात् सेके उदकस्येव । तद्यथा आप्याययति तद्वदित्यर्थः । यद्वा । नेति संप्रत्यर्थे । गोः उदकस्य सेके निमित्तभूते सति पीपायेति संबन्धः ॥

युवां पूषेवाश्विना पुरंधिरग्निमुषां न जरते हविष्मान् ।
हुवे यद्वां वरिवस्या गृणानो विद्यामेषं वृजनं जीरदानुम् ॥ ९ ॥

युवाम् । पूषाऽइव । अश्विना । पुरम्ऽधिः । अग्निम् । उषाम् । न । जरते । हविष्मान् ।
हुवे । यत् । वाम् । वरिवस्या । गृणानः । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥९॥

हे अश्विनौ vयुवां vपुरंधिः बहुप्रज्ञः vपूषेव पोषक इव vहविष्मान् हविर्युक्तः vजरते स्तौति । यद्वा । पुरंधिर्बहूनां धारयित्री पूषेव पृथिवीव ॥ द्वितीयार्थे प्रथमा[2] ॥ तां यथा स्तौति तद्वत् । किमिव vअग्निमुषां vन । अग्निमुषसं च यथा तथा युवामपि । प्रातरनुवाकाश्विनशस्त्रयोः आश्विनक्रतुवत् आग्नेयोषस्ययोरपि सद्भावादिति भावः । कदेति आह । vयत् यदा vवरिवस्या वरिवस्यया परिचर्यया युक्तः vगृणानः स्तोता स्तौति तदा यजमानोऽपि जरते इत्यर्थः । विद्यामेत्यादि गतम् ॥ ॥२६॥

'अभूदिदम्' इत्यष्टर्चं तृतीयं सूक्तम् आश्विनं[3] जागतम् । 'अवविद्धम्' इति षष्ठी 'तद्वां नरा नासत्यौ' इत्यष्टमी च उभे त्रिष्टुभौ । 'अभूदिदमष्टौ षष्ठ्यन्त्ये त्रिष्टुभौ' इत्यनुक्रमणिका । प्रातरनुवाकाश्विनशस्त्रयोर्जागते छन्दस्यस्य विनियोगः । तथा च सूत्रितम्– 'अभूदिदं यो वां परिज्मेति त्रीणि' ( आश्व. श्रौ. ४. १५ ) इति ॥

अभूदिदं वयुनमो षु भूषता रथो वृषण्वान्मदता मनीषिणः ।
धियंजिन्वा धिष्ण्या विश्पलावसू दिवो नपाता सुकृते शुचिव्रता ॥ १ ॥

अभूत् । इदम् । वयुनम् । ओ इति । सु । भूषत । रथः । वृषण्ऽवान् । मदत । मनीषिणः ।
धियम्ऽजिन्वा । धिष्ण्या । विश्पलावसू इति । दिवः । नपाता । सुऽकृते । शुचिऽव्रता ॥ १ ॥

---

१. ख-ज-ञ-त–त्रिधान्वास्तीर्णबर्हिष्के । २. ख-फ–प्रथमा छान्दसो वा । ३. क-ञ–आगस्त्यमाश्विनम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे [v]मनीषिणः मनस्विनो मेधाविन ऋत्विजः अस्माकम् [v]इदं [v]वयुनं प्रज्ञानम् [v]अभूत् उत्पन्नम्। कीदृशं तदिति। उच्यते। [v]वृषण्वान् अभिमतवर्षणवान् [v]रथः अश्विनोः संबन्धी गमनसाधनो रथ आगत इति शेषः। तत्स्थावश्विनौ [v]ओ [v]षु [v]भूषत। ओ इति निपातद्वयसमुदायात्मकः एको निपातः। सुष्ठु आभूषत। अभिमुखा भवत स्तोतुम्। तादृशौ महानुभावावश्विनौ [v]मदत॥ अन्तर्भावितण्यर्थोऽयम्॥ मदयत संभावयत। अश्विनौ विशेष्येते। [v]सुकृते सुष्ठु कृतवते मह्यं [v]धियंजिन्वा कर्मणे बुद्धेर्वा प्रीणयितारौ [v]धिष्ण्या धिषणार्हौ स्तुत्यौ [v]विश्पलावसू विशां प्रजानाम् अस्माकं पालयितृधनौ विश्पलाख्यायाश्छिन्नजङ्घाया हिरण्मयजङ्घाप्रदानेन तथाभूतौ। 'सद्यो जङ्घायसीं विश्पलायै' (ऋ. सं. १. ११६. १५) इत्यादिनिगमः। [v]दिवः आदित्यस्य [v]नपाता नप्तारौ नपातयितारौ वा [v]शुचिव्रता दीप्तकर्माणौ। ईदृशावश्विनौ मदत॥

इन्द्र॑तमा॒ हि धिष्ण्या॒ मरु॑त्तमा॒ दस्रा॑ दं॒सिष्ठा॒ रथ्या॑ रथी॒तमा।
पूर्णं॑ रथं॑ वहेथे॒ मध्व॒ आचि॑तं॒ तेन॑ दा॒श्वांस॒मुप॑ याथो अश्विना॥ २॥

इन्द्र॑ऽतमा। हि। धिष्ण्या॑। मरुत्ऽतमा। दस्रा॑। दं॒सिष्ठा॑। रथ्या॑। रथिऽतमा।
पूर्णम्। रथ॑म्। वहेथे॒ इति॑। मध्वः॑। आऽचि॑तम्। तेन॑। दा॒श्वांस॑म्। उप॑। याथः॑। अश्विना॥२॥

हे अश्विनौ युवाम् [v]इन्द्रतमा [v]हि ईश्वरतमौ खलु। एवं प्रतिविशेषणं हिः संबन्ध्यः। तथा [v]धिष्ण्या स्तुत्यर्हौ [v]मरुत्तमा मरुद्वद्वेगगामिनौ मितरागिणौ मितराविणौ वा [v]दस्रा उपक्षपयितारौ शत्रूणां [v]दंसिष्ठा अतिशयकर्माणौ [v]रथ्या रथार्हौ रथवन्तौ [v]रथितमा। रथिनो नेतारः। तेषां श्रेष्ठौ। 'रथीरध्वराणाम्' (ऋ. सं. ८. ११. २) इति नेतृपरतया व्याख्यातत्वात्। ईदृशौ युवां [v]मध्वः मधुसदृशस्य उदकस्यामृतस्य वा [v]पूर्णं पूरितम् [v]आचितं सर्वतः संनद्धं [v]रथं [v]वहेथे नयथः। [v]तेन उक्तगुणविशिष्टेन रथेन हे [v]अश्विना अश्विनौ उक्तगुणविशिष्टौ सन्तौ [v]उप [v]याथः यज्ञमभिप्रामुथः॥

किम॒त्र दस्रा॑ कृणुथः॒ किमा॑सा॒थे जनो॒ यः कश्चि॒दह॑विर्मही॒यते॑।
अति॑ क्रमिष्टं॒ जुर॑तं॒ पणे॑रसुं॒ ज्योति॒र्विप्रा॑य कृणुतं॒ वच॑स्यवे॥ ३॥

किम्। अत्र॑। दस्रा॑। कृ॒णु॒थः॒। किम्। आ॒सा॒थे॒ इति॑।
जनः॑। यः। कः। चि॒त्। अह॑विः। म॒ही॒यते॑।
अति॑। क्र॒मि॒ष्ट॒म्। जु॒र॒त॒म्। प॒णेः॑। अ॒सु॒म्। ज्योतिः॑। विप्रा॑य। कृ॒णु॒त॒म्। व॒च॒स्यवे॑॥३॥

हे [v]दस्रा उपक्षपयितारौ युवाम् [v]अत्र अस्मिन् मनुष्ये [v]किं [v]कृणुथः कुरुथः। हविषोऽभावादिति भावः। तत्रैव [v]किमासाथे किं तिष्ठथः। अत्रेत्युक्तं कुत्रेत्याह। [v]यः [v]कश्चित् [v]जनः जन्मवान् [v]अहविः यज्ञार्थहवीरहितः [v]महीयते पूज्यते स्वयं न युष्मान् पूजयति। तं जनम् [v]अति [v]क्रमिष्टं पराभूय तिष्ठतम्। न केवलमतिक्रममात्रं किंतु [v]पणेः वणिग्भूतस्य लुब्धकस्यायष्टुः तस्य [v]असुं प्राणं

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vजुरतम् अहिंसिष्टम् अनीनशतम्। vविप्राय मेधाविने vवचस्यवे वचसः स्तोत्ररूपस्य युवाभ्यामिच्छते मह्यं vज्योतिः vकृणुतं युष्मद्यजनविषयज्ञानं कुरुतम् ॥

जम्भयतमभितो रायतः शुनो हतं मृधो विदथुस्तान्यश्विना ।
वाचंवाचं जरितू रत्निनीं कृतमुभा शंसं नासत्यावतं मम ॥ ४ ॥

जम्भयतम्। अभितः। रायतः। शुनः। हतम्। मृधः। विदथुः। तानि। अश्विना। वाचंम्ऽवाचम्। जरितुः। रत्निनीम्। कृतम्। उभा। शंसम्। नासत्या। अवतम्। मम ॥४॥

हे अश्विनौ vरायतः निन्दितं शब्दयतः अस्मान् हन्तुमागच्छतो वा vशुनः श्वसदृशान् vअभितः vजम्भयतं नाशयतम्। तथा vमृधः तेषां संग्रामान् संग्रामं कुर्वतो वा vहतं मारयतम्। vतानि हननोपायान् vविदथुः जानीथः। किंच vजरितुः युष्मान् स्तोतुः vवाचंवाचं तां तां स्तुतिलक्षणां वाचं vरत्निनीं vकृतं सर्वामपि स्तुतिं रमणीयफलवतीं कुरुतम्। हे vनासत्या सत्यभूतौ युवाम् vउभा उभौ vमम मदीयां vशंसं स्तुतिम् vअवतं रक्षतम् ॥

युवमेतं चक्रथुः सिन्धुषु प्लवमात्मन्वन्तं पक्षिणं तौग्र्याय कम् ।
येन देवत्रा मनसा निरूहथुः सुपप्तनी पेतथुः क्षोदसो महः ॥ ५ ॥

युवम्। एतम्। चक्रथुः। सिन्धुषु। प्लवम्। आत्मन्ऽवन्तम्। पक्षिणम्। तौग्र्याय। कम्। येन। देवऽत्रा। मनसा। निःऽऊहथुः। सुऽपप्तनि। पेतथुः। क्षोदसः। महः ॥ ५ ॥

हे अश्विनौ vयुवं युवां vसिन्धुषु समुद्रोदकेषु vएतं vप्लवं प्रसिद्धं प्लुतिसाधनं प्लवं नावम् vआत्मन्वन्तं दार्ढ्यवन्तं vपक्षिणं पक्षवद्गतिसाधनरथवन्तं vतौग्र्याय तुग्रनाम्नो राज्ञः पुत्राय भुज्युनाम्ने राज्ञे vकं सुखकरं vचक्रथुः। तौग्र्यो भुज्यू राजा समुद्रवर्ती ससेनः परचक्रं प्रमथितुं प्रस्थितः। तं प्रतीपबलानि आगत्यापातयन् स च प्रसादफलकराश्विनौ स्तुत्वा स्वात्मानं ररक्ष इत्ययमितिहासो बहुधा पूर्वं प्रपञ्चितः। यद्वा। कमिति पूरणः। तस्य जलसंचारिरथस्य सहायभूतान् बहून् रथादीनकुरुतमित्यर्थः। अयमर्थस्तु 'तमूहथुर्नौभिः' ( ऋ. सं. १. ११६. ३ ), 'चतस्रो नावः' ( ऋ. सं. १. १८२. ६ ), 'त्रिभी रथैः' ( ऋ. सं. १. ११६. ४ ) इत्यादिमन्त्रान्तरेषु प्रसिद्धः। vयेन युष्मद्दत्तेन प्लवेन vदेवत्रा देवेषु मध्ये vमनसा अनुग्रहयुक्तया बुद्धया। येन मनसेति वा योज्यम्। vनिरूहथुः निर्गमनं कुरुथः। तथा vसुपप्तनि शोभनपतनं यथा भवति सुपतनौ वा युवां vमहः महतः vक्षोदसः। उदकनामैतत्। उदकात् vपेतथुः तदधः पतथः उत्तरीतुम् ॥ ॥ २७ ॥

अवविद्धं तौग्र्यमप्स्वन्तरनारम्भणे तमसि प्रविद्धम् ।
चतस्रो नावो जठलस्य जुष्टा उदश्विभ्यामिषिताः पारयन्ति ॥ ६ ॥

अवऽविद्धम्। तौग्र्यम्। अप्ऽसु। अन्तः। अनारम्भणे। तमसि। प्रऽविद्धम्। चतस्रः। नावः। जठलस्य। जुष्टाः। उत्। अश्विऽभ्याम्। इषिताः। पारयन्ति ॥ ६ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vअप्स्वन्तः मध्ये vअवविद्धम् अवस्ताच्छत्रुभिः पातितम् vअनारम्भणे अनालम्बने आलम्बनरहिते vतमसि । तमोवत्तमः । दृष्टिश्वासादिप्रतिबन्धके जलमध्ये vप्रविद्धं प्रकर्षेण पीडितं vतौग्र्यं भुज्युं vजठलस्य[1] जठरवदुदकधारकस्य मध्ये vजुष्टाः सेविताः । यद्वा ॥ कर्मणि षष्ठी ॥ जठरं प्राप्ताः अन्तर्जलं प्रविष्टाः । vअश्विभ्यामिषिताः vचतस्रो vनावः vउत् vपारयन्ति उत्तारयन्ति प्रापयन्ति ॥

कः स्विद्वृक्षो निष्ठितो मध्ये अर्णसो यं तौग्र्यो नाधितः पर्यषस्वजत् ।
पर्णा मृगस्य पतरोरिवारभ उदश्विना ऊहथुः श्रोमताय कम् ॥ ७ ॥

कः । स्वित् । वृक्षः । निःऽस्थितः । मध्ये । अर्णसः । यम् । तौग्र्यः । नाधितः । परिऽअसस्वजत् । पर्णा । मृगस्य । पतरोःऽइव । आऽरभे । उत् । अश्विनौ । ऊहथुः । श्रोमताय । कम् ॥ ७ ॥

vकः vस्वित् कश्चिदनुग्राहकः vवृक्षः वृक्षविकारो रथः । विकारे प्रकृतिशब्दः । यद्वा । संस्तवाभिप्रायमेतत् । स्तोत्राख्यो वृक्ष इत्यर्थः । कीदृशो रथः । vनिष्ठितः निश्चलं वर्तमानः । कुत्रेति उच्यते । vअर्णसः उदकस्य vमध्ये । vयं वृक्षं vतौग्र्यः तुग्रपुत्रो भुज्युः vनाधितः याचमानः vपर्यषस्वजत् परिष्वक्तमकरोत् । आलम्बने दृष्टान्तः । vपतरोः पतनशीलस्य vमृगस्य मार्जयितुः शोधयितुर्हिंसादेः vआरभे आलम्बनाय पर्णानीव[2] । तानि यथा आलम्बनाय प्रभवन्ति तद्वत् । हे vअश्विनौ vश्रोमताय कीर्तिमत्त्वाय vउत् vऊहथुः उर्ध्वं प्रापयथः । स्तुतिपक्षे स्तोत्राख्यं वृक्षमाश्रितवन्तं तमूहथुरित्यर्थः ॥

तद्वां नरा नासत्यावनु ष्याद्यद्वां मानास उचथमवोचन् ।
अस्मादद्य सदसः सोम्यादा विद्यामेषं वृजनं जीरदानुम् ॥ ८ ॥

तत् । वाम् । नरा । नासत्यौ । अनु । स्यात् । यत् । वाम् । मानासः । उचथम् । अवोचन् । अस्मात् । अद्य । सदसः । सोम्यात् । आ । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ ८ ॥

हे vनरा नेतारौ कर्मणो नराकारौ वा हे vनासत्यौ असत्यरहितौ सत्यफलौ वा vवां युवां vतत् तादृशं स्तोत्रम् vअनु vस्यात् अनुकूलं भवतु अनुभवतु वा वाम् । तदित्युक्तं यदित्याह । vवां प्रति vमानासः पूजावन्तोऽस्मदीया होत्रादयः vयत् vउचथं स्तोत्रम् vअवोचन् अकुर्वन् तद्वाम् अनु ष्यात् । हे अश्विनौ vअद्य अस्मिन् प्रधानयागदिने vअस्मात् अस्माभिः क्रियमाणात् vसदसः संबन्धिनः vसोम्यात् सोमयागसंपादकात् । vआ इति अप्यर्थे । अस्माभिर्यजमानैः अद्य क्रियमाणादपि स्तोत्रात् प्रीणयतमिति । विद्यामेति गतम् ॥ ॥ २८ ॥

'तं युञ्जाथाम्' इति षड्चं चतुर्थं सूक्तं त्रैष्टुभमागस्त्यमाश्विनम् ॥

---

१. क-ञ-त–जठलस्य जठरस्य । २. क–पर्णा पर्णानीव ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तं युञ्जाथां मनसो यो जवीयान् त्रिवन्धुरो वृषणा यस्त्रिचक्रः ।
येनोपयाथः सुकृतो दुरोणं त्रिधातुना पतथो विर्न पर्णैः ॥ १ ॥

तम् । युञ्जाथाम् । मनसः । यः । जवीयान् । त्रिऽवन्धुरः । वृषणा । यः । त्रिऽचक्रः ।
येन । उपऽयाथः । सुऽकृतः । दुरोणम् । त्रिऽधातुना । पतथः । विः । न । पर्णैः ॥ १ ॥

हे [v]वृषणा वर्षकौ कामानां युवां [v]तं वक्ष्यमाणगुणविशिष्टं रथं [v]युञ्जाथां योजयतम् । तमित्युक्तं कमित्याह । [v]यः रथः [v]त्रिवन्धुरः त्रिप्रकारसारथिस्थानः । वन्धुरं रथिनः स्थानमित्याहुः । 'आ याह्यर्वाङुप वन्धुरेष्ठाः' ( ऋ. सं. ३. ४३. १ ) इत्यादिमन्त्रान्तरात् । [v]यः च [v]त्रिचक्रः चक्रत्रितयोपेतः । पुनः स एव विशेष्यते । [v]येन रथेन [v]उपयाथः उपगच्छथः[1] । किम् । [v]सुकृतः शोभनसोमाख्यकर्मवतो यजमानस्य [v]दुरोणम् । गृहनामैतत् । यागगृहम् । येनेत्युक्तं केनेत्याह । [v]त्रिधातुना त्रिप्रकारस्थानोपेतेन सुवर्णरजताभ्रधातुत्रयोपेतेन वा रथेन । गमने दृष्टान्तः । [v]विर्न [v]पर्णैः पक्षी पक्षैर्यथा शीघ्रमप्रयत्नेन गच्छति तद्वदुक्तलक्षणेन रथेन [v]पतथः गच्छथः ॥

सुवृद्रथो वर्तते यन्नभि क्षां यत्तिष्ठथः क्रतुमन्ता पृक्षे ।
वपुर्वपुष्या सचतामियं गीर्दिवो दुहित्रोषसा सचेथे ॥ २ ॥

सुऽवृत् । रथः । वर्तते । यन् । अभि । क्षाम् । यत् । तिष्ठथः । क्रतुऽमन्ता । अनु । पृक्षे ।
वपुः । वपुष्या । सचताम् । इयम् । गीः । दिवः । दुहित्रा । उषसा । सचेथे इति ॥ २ ॥

हे अश्विनौ युवयोः [v]रथः [v]सुवृत् शोभनवर्तनः शोभनचक्रपरिभ्रमणः [v]यन् गच्छन् [v]क्षाम् [v]अभि [v]वर्तते देवयजनभूमिं प्रति गच्छति । [v]यत् यं रथं [v]क्रतुमन्ता संकल्पवन्तौ कर्मवन्तौ वा [v]पृक्षे । अन्ननामैतत् । हविषि निमित्तभूते सति । [v]अनु अधीत्यर्थे । अधि [v]तिष्ठथः आश्रयथः । तादृशो रथो देवयजनं प्रत्यागत इत्यर्थः । अनन्तरं [v]वपुष्या युष्मद्वपुषि हिता शरीरवर्धनी [v]इयं [v]गीः इदानीं क्रियमाणप्रकारा स्तुतिरूपा वाक् [v]वपुः [v]सचताम् । युवां च [v]दिवः द्युलोकस्य आदित्यस्य वा [v]दुहित्रा दुहितृस्थानीयया [v]उषसा उषोदेवतया [v]सचेथे यज्ञं संगच्छेथे । उषस्याश्विनयोः समानकालत्वादिति भावः ॥

आ तिष्ठतं सुवृतं यो रथो वामनु व्रतानि वर्तते हविष्मान् ।
येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च ॥ ३ ॥

आ । तिष्ठतम् । सुऽवृतम् । यः । रथः । वाम् । अनु । व्रतानि । वर्तते । हविष्मान् ।
येन । नरा । नासत्या । इषयध्यै । वर्तिः । याथः । तनयाय । त्मने । च ॥ ३ ॥

---

१. क-ख-ज-त-फ–उपागच्छथः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे अश्विनौ ᵛवां युवां ᵛसुवृतं शोभनवर्तनं रथम् ᵛआ ᵛतिष्ठतम् आश्रयतम्। ᵛयो ᵛरथः ᵛहविष्मान्। षष्ठ्यर्थे प्रथमा। हविष्मतो यजमानस्य ᵛव्रतानि कर्माणि ᵛअनु ᵛवर्तते। यद्वा। यजमानाय दत्तहविषा तद्वान्। ᵛयेन च रथेन हे ᵛनरा नेतारौ वा हे ᵛनासत्या असत्यरहितौ युवाम् ᵛइषयध्यै यज्ञं प्रातुमिच्छतमिति शेषः। तेन रथेन ᵛवर्तिः। गृहनामैतत्। यजमानस्य यज्ञगृहं ᵛतनयाय पुत्रलाभाय ᵛस्मने आत्मने आत्महिताय ᵛच ᵛयाथः॥

मा वां वृको मा वृकीरा दधर्षीन्मा परि वर्क्तमुत मातिं धक्तम्।
अयं वां भागो निहित इयं गीर्दस्रावि मे वां निधयो मधूनाम्॥ ४॥

मा। वाम्। वृकः। मा। वृकीः। आ। दधर्षीत्। मा। परि। वर्क्तम्। उत। मा। अतिं। धक्तम्।
अयम्। वाम्। भागः। निऽहितः। इयम्। गीः। दस्रौ। इमे। वाम्। निऽधयः। मधूनाम्॥४॥

हे ᵛदस्रौ शत्रूणामुपक्षपयितारावश्विनौ ᵛवां युवयोः अनुग्रहादिति शेषः। ᵛवृकः हिंसकः अरण्यश्वादिः ᵛमा ᵛदधर्षीत् माम्। तथा ᵛवृकीः वृक्यो हिंसिका अन्या अपि ᵛमा दधर्षीत्॥ वचनव्यत्ययः॥ धर्षणं मा कार्षुः। युवामेव वा मा दधर्षीदिति योज्यम्। तथा युवां ᵛमा ᵛपरि ᵛवर्क्तं परितो मा वर्जयतं माम्। ᵛउत अपि च ᵛमाति ᵛधक्तम् अस्मानतिक्रम्य अन्यस्मै मा दत्तम्। किमर्थमेवमिति उच्यते। ᵛवां युवयोरर्थाय ᵛअयं ᵛभागः भजनीयो हविरंशः ᵛनिहितः। तथा ᵛइयं च ᵛगीः स्तुतिरूपा वागपि निहितेति शेषः। हे दस्रावश्विनौ ᵛवां युवाभ्याम् ᵛइमे इमानि ᵛमधूनां सोमरसानां ᵛनिधयः निधानानि स्थापितानि॥

युवां गोतमः पुरुमीळ्हो अत्रिर्दस्रा हवतेऽवसे हविष्मान्।
दिशं न दिष्टामृजूयेव यन्ता मे हवं नासत्योप यातम्॥ ५॥

युवाम्। गोतमः। पुरुऽमीळ्हः। अत्रिः। दस्रा। हवते। अवसे। हविष्मान्।
दिशम्। न। दिष्टाम्। ऋजुयाऽइव। यन्ता। आ। मे। हवम्। नासत्या। उप। यातम्॥५॥

हे ᵛदस्रा दस्रावश्विनौ ᵛयुवां ᵛगोतमः च ᵛपुरुमीळहः च ᵛअत्रिः च महर्षयश्च एतेषु एकैकः ᵛहविष्मान् सन् ᵛअवसे रक्षणाय युष्मत्तर्पणाय वा ᵛहवते आह्वयति। एवमहमप्याह्वयामि। फलसाधनाह्वाने दृष्टान्तः। ᵛयन्ता उपगन्ता उपगन्तुकामः ᵛऋजूयेव॥ द्वितीयाया आकारः॥ ऋजुगामिनं मार्गज्ञं ᵛदिष्टां ᵛदिशं ᵛन गन्तव्यामभिमतां दिशं प्रति यथा तथा वामपि। यथा अध्वगामी स्वगन्तव्यस्य शीघ्रगमनाय मार्गज्ञमृजुगामिनमाह्वयति तद्वत्। यद्वा। ऋजूयेव। इवशब्द एवार्थे। गन्ता ऋजुनैव मार्गेण इष्टां दिशमिव तथा युष्मत्प्रीणनेन मार्गेण स्वाभिमतं फलं प्राप्नोति। हे नासत्यावश्विनौ ᵛमे मम ᵛहवम् आह्वानमालक्ष्य ᵛउप ᵛयातम् उपगच्छतम्॥



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि ।
एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम् ॥ ६ ॥

अतारिष्म । तमसः । पारम् । अस्य । प्रति । वाम् । स्तोमः । अश्विनौ । अधायि ।
आ । इह । यातम् । पथिऽभिः । देवऽयानैः । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥६॥

हे अश्विनौ युवयोः प्रसादात् vअस्य vतमसः तमनहेतोः श्रेयःप्रतिबन्धरूपस्य दुःखस्य vपारं पर्यन्तभूमिम् vअतारिष्म उत्तीर्णाः स्मः । हे vअश्विनौ vवां vप्रति vस्तोमः स्तोत्रम् vअधायि अकारीत्यर्थः । युवां vदेवयानैः देवगन्तव्यैर्मार्गैः vइह अस्मद्यज्ञे vआ vयातम् आगच्छतम् । शिष्टो व्याख्यातः ॥ ॥ २९ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् । पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्य-
धुरंधरेण सायणाचार्येण[1] विरचिते माधवीये वेदार्थप्रकाशे
ऋक्संहिताभाष्ये द्वितीयाष्टके चतुर्थोऽध्यायः समाप्तः ॥

---

१. झ१—सायणमाधवेन

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥
द्वितीयाष्टकमध्यस्थश्चतुर्थोऽध्याय आदरात् ।
व्याख्यातः सायणार्येण पञ्चमो व्याकरिष्यते ॥

तत्र ' ता वाम् ' इतीदं प्रथममण्डलस्य चतुर्विंशेऽनुवाके पञ्चमं सूक्तम् । पूर्वसूक्ते ' षट् ' इत्युक्तत्वात् ' सूक्तसंख्यानुवर्तते ' इति परिभाषितत्वात् षड्चम् । ' ऋषिश्चान्यस्मात् ' इति परिभाषया आगस्त्यम् । तथा ' आश्विनं वै ' इत्युक्तत्वात् तुह्यादिपरिभाषया इदमप्याश्विनम् । अनादेश-परिभाषया त्रैष्टुभम् । ' ता वाम् ' इत्यनुक्रान्तम् । ' युवो रजांसि ' इत्यादीनां पञ्च सूक्तानां तृतीयवर्जितानां प्रातरनुवाकाश्विनशस्त्रयोर्विनियोग उक्तः । तत्रेदं पञ्चमम् ॥

ता वामद्य तावपरं हुवेमोच्छन्त्यामुषसि वह्निरुक्थैः ।
नासत्या कुह चित्सन्तावर्यो दिवो नपाता सुदास्तराय ॥ १ ॥

ता । वाम् । अद्य । तौ । अपरम् । हुवेम । उच्छन्त्याम् । उषसि । वह्निः । उक्थैः ।
नासत्या । कुह । चित् । सन्तौ । अर्यः । दिवः । नपाता । सुदाःऽतराय ॥ १ ॥

ᵛता तौ रक्षकत्वेन प्रसिद्धौ ᵛवां युवाम् ᵛअद्य अस्मिन् यागदिने ᵛहुवेम आह्वयामः इति आशीः । तथा ᵛअपरम् अपरस्मिन्नपि दिने ᵛतौ युवां हुवेम । अपरमित्येतत् अपरस्मिन्नित्यर्थे समभिव्याहारात्, ' अद्या च नो मृळयतापरं च ' ( ऋ. सं. २. २९. २ ) इत्यादिमन्त्रान्तरे तथा दर्शनाच्च । अपरयागं प्रत्यपि इति वा । कस्मिन् काले । ᵛउषसि उषोदेवतायाम् ᵛउच्छन्त्यां तमो विवासयन्त्यां सत्याम् । उषःकाले हि प्रातरनुवाकाश्विनशस्त्रे प्रयुज्येते । उक्ते काले हे ᵛनासत्या असत्यरहितौ ᵛदिवो ᵛनपाता द्युलोकस्य नपातयितारौ नप्तृस्थानीयौ वा ᵛकुह ᵛचित् ᵛसन्तौ कुत्रचिद्देशे वर्तमानौ युवां ᵛवह्निः स्तुतेर्वोढा ᵛअर्यः ईरयिता स्तुतेरीश्वरो वा ईदृशोऽहं होता ᵛसुदास्तराय अत्यर्थं शोभनहविर्दात्रे यजमानाय तदर्थं तौ युवाम् ᵛउक्थैः शस्त्रैर्हुवेमेति संबन्धः । अत्र आख्यातं पदमेकवचनतया नेतव्यम् । वह्निर्यशब्दौ वा बहुवचनत्वेन नेतव्यौ । अथवा वाक्यद्वयम् । यस्माद्वह्निर्यो होता उक्तगुणकौ युवां शंसति तस्माद्वयं यजमानाः तौ युवामाह्वयामः इति ॥

अस्मे ऊ षु वृषणा मादयेथामुत्पणीर्हितमूर्म्या मदन्ता ।
श्रुतं मे अच्छोक्तिभिर्मतीनामेष्टा नरा निचेतारा च कर्णैः ॥ २ ॥

अस्मे इति । ऊँ इति । सु । वृषणा । मादयेथाम् । उत् । पणीन् । हतम् । ऊर्म्या । मदन्ता ।
श्रुतम् । मे । अच्छोक्तिऽभिः । मतीनाम् । एष्टा । नरा । निऽचेतारा । च । कर्णैः ॥ २ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे vवृषणा कामानां वर्षकौ अश्विनौ युवाम् vअस्मे vउ अस्मास्वेव vसु vमादयेथां सुष्ठु तृप्यतम्। अस्मभ्यं तर्पयतमभिमतम्। तथा vपणीन् वणिजो लुब्धकानयष्टॄन् vउत् उन्मूल्य vहतं नाशयतम्। कीदृशौ युवाम्। vऊर्म्या। रात्रिनामैतत्। रात्रौ vमदन्ता माद्यन्तौ। यद्वा। ऊर्मिरिति सोमनाम। 'ऊर्मिर्यस्ते पवित्र आ' (ऋ. सं. ९. ६४. ११) इत्यादिषु तथा प्रयोगात्। अस्मदीयेन सोमेन मदन्तौ। तादृशौ युवां vमे मम vअच्छोक्तिभिः आभिमुख्यकरैर्निर्मलवेदवाक्यैः रचिताः vमतीनाम्॥ कर्मणि षष्ठी॥ मननसाधनाः स्तुतीः vकर्णैः आकर्णनसाधनैः श्रोत्रैः vश्रुतम् श्रृणुतम्। हे vनरा नेतारौ युवां खलु vएष्टा अन्वेष्टारौ अस्मत्स्तुतीनां तथा vनिचेतारा लब्धानां तासां संचयकर्तारौ। निरित्येष समित्येतस्य स्थाने। यस्मादेवंविधौ तस्माच्छृणुतमिति॥

श्रिये पूषन्निषुकृतेव देवा नासत्या वहतुं सूर्यायाः।
वच्यन्ते वां ककुहा अप्सु जाता युगा जूर्णेव वरुणस्य भूरेः॥ २॥

श्रिये। पूषन्। इषुकृताऽइव। देवा। नासत्या। वहतुम्। सूर्यायाः।
वच्यन्ते। वाम्। ककुहाः। अप्ऽसु। जाताः। युगा। जूर्णाऽइव। वरुणस्य। भूरेः॥ ३॥

सविता सूर्यो दुहितरं सूर्याख्यां प्रदातुमनाः देवानाहूय सामर्थ्यसमीक्षणाय आजिं परिकल्प्य यः इमं जेष्यति स एषां[1] कन्यकामृक्सहस्रक्लृप्तं स्तोत्रं च लभते इत्यकल्पयत्। तमश्निः प्रथममजयत् तमनु अश्विनावपि जित्वा अग्निं प्रदृप्य ऋक्सहस्रं कन्यकां च अलभेताम्। तत इन्द्रः उषाश्च अजयताम्। तौ च तैरग्न्यादिभिः प्रार्थितौ स्वशस्त्रस्य कंचित्कंचिद्भागं तेभ्यः परिकल्प्य सूर्यां स्वरथेऽधारयतामिति। अयमितिहासो ब्राह्मणे 'प्रजापतिर्वै सोमाय राज्ञे' (ऐ. ब्रा. ४. ७) इत्यत्राज्ञातोऽस्माभिः प्रथमाष्टमे 'आ वां पतित्वं सख्याय' (ऋ. सं. १. ११९. ५) इत्यत्र प्रपञ्चितः। अत्राह। हे vपूषन् पोषक सूर्य। एतच्चन्द्रस्याप्युपलक्षणं सूर्याचन्द्रमसोरेवाश्वित्वात्। 'सूर्याचन्द्रमसाविश्येके' (निरु. १२. १) इति यास्केनोक्तत्वात्। अतः पूषन्नित्युक्ते हे पोषकावश्विनावित्युक्तं भवति। हे पोषकौ हे vनासत्या असत्यरहितौ vदेवा देवौ युवां vश्रिये श्रेयसे शस्त्रस्य कन्यायाश्च लाभायेत्यर्थः। vइषुकृतेव। इवशब्दः एवार्थे। आजिधावनाय इषुवच्छीघ्रमृजुगामिनौ कृतावेव सन्तौ vसूर्यायाः एतन्नामिकायाः सवितुः पुत्र्याः॥ कर्मणि षष्ठी॥ सूर्यां vवहतुं रथे धारयितुम्। आजिमुदजयतामित्यर्थः। यस्मादेवं तस्मात् vअप्सु vजाताः कर्मसु संपादिताः vककुहाः शस्त्ररूपाः स्तुतयः vभूरेः अविच्छिन्नप्रवाहस्य vवरुणस्य फलप्रतिबन्धकपापनिवारकस्य यागस्य सिद्ध्यर्थं तत्संबन्धिन्यः vवां प्रति vवच्यन्ते होत्रादिभिः। युवामेव शस्त्रगतमन्त्रैः यागकाले च स्तुवन्तीत्यर्थः। vयुगा vजूर्णेव जीर्णानि युगानीव। इवशब्दः संप्रत्यर्थः। पुरातना यागकालाः यथा तद्वत् अद्यतनाः अपि इत्यर्थः। पूर्वकाले यथा युवामेव स्तुवन्ति तद्वत् इदानीमपीति तात्पर्यम्॥

---

१. क-ज्ञ१–एताम्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अस्मे सा वां माध्वी रातिरस्तु स्तोमं हिनोतं मान्यस्य कारोः ।
अनु यद्वां श्रवस्या सुदानू सुवीर्याय चर्षणयो मदन्ति ॥ ४ ॥

अस्मे इति । सा । वाम् । माध्वी इति । रातिः । अस्तु । स्तोमम् । हिनोतम् । मान्यस्य । कारोः । अनु । यत् । वाम् । श्रवस्या । सुदानू इति सुऽदानू । सुऽवीर्याय । चर्षणयः । मदन्ति ॥४॥

हे vमाध्वी मधुपूर्णपात्रयुक्तावश्विनौ vवां युवयोः संबन्धिनी vसा प्रसिद्धा vरातिः दानम् vअस्मे अस्माकम् vअस्तु भवतु । तदर्थं vमान्यस्य मननीयस्य[1] vकारोः स्तोतुरगस्त्यस्य vस्तोमं स्तुतिं vहिनोतं प्रीणयतम् । हे vसुदानू शोभनफलदानौ vवां युवां vश्रवस्या कीर्तेरन्नस्य वा इच्छया vयत् यस्मात् vसुवीर्याय यजमानाय शोभनबलाय वा vचर्षणयः मनुष्या ऋत्विग्रूपाः vअनु vमदन्ति अनुक्रमेण माद्यन्ति युवाभ्यां सह स्वयं वा ॥

एष वां स्तोमो अश्विनावकारि मानेभिर्मघवाना सुवृक्ति ।
यातं वर्तिस्तनयाय त्मने चागस्त्ये नासत्या मदन्ता ॥ ५ ॥

एषः । वाम् । स्तोमः । अश्विनौ । अकारि । मानेभिः । मघऽवाना । सुऽवृक्ति । यातम् । वर्तिः । तनयाय । त्मने । च । अगस्त्ये । नासत्या । मदन्ता ॥ ५ ॥

हे vअश्विनौ हे vमघवाना हविर्लक्षणान्नवन्तौ vवां युवाभ्याम् vएषः vस्तोमः स्तोत्रं vसुवृक्ति सुष्ठु पापवर्जनं यथा भवति तथा । यद्वा । सुसमाप्ति vअकारि कृतः । कीदृशोऽयम् । vमानेभिः मानैः हविष्प्रदानरूपैः सहितः । हे vनासत्या असत्यरहितौ युवाम् vअगस्त्ये एतन्नाम्नि महर्षौ मयि vमदन्ता माद्यन्तौ सन्तौ vवर्तिः गृहं यज्ञसंबन्धि vयातं प्राप्नुतम् । किमर्थम् । vतनयाय पुत्रादिलाभाय vत्मने आत्मने vच हिताय ॥

अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि ।
एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम् ॥ ६ ॥

अतारिष्म । तमसः । पारम् । अस्य । प्रति । वाम् । स्तोमः । अश्विनौ । अधायि ।
आ । इह । यातम् । पथिऽभिः । देवऽयानैः । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥६॥

अतारिष्मेति षष्ठी व्याख्याता ॥ ॥ १ ॥

'कतरा पूर्वा' इत्येकादशर्चं षष्ठं सूक्तमागस्त्यं त्रैष्टुभम् । 'कतरैकादश द्यावापृथिवीयम्' इत्यनुक्रान्तम् । आभिप्लविके षष्ठेऽहनि वैश्वदेवशस्त्रे द्यावापृथिव्यनिविद्धानमिदम् । 'तृतीयस्य'

---

१. क-ज-ज्ञ-ज्ञ-त–माननीयस्य ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इति खण्डे सूत्रितं–' कतरा पूर्वोषासानक्तेति वैश्वदेवम् ' ( आश्व. श्रौ. ७. ७ ) इति। महाव्रतेऽपि वैश्वदेवशस्त्रे इदमेव द्यावापृथिव्यनिविद्धानम्। ' उत्तमादाभिप्लविकात्तृतीयसवनम् ' ( ऐ. आ. ५. ३. २ ) इत्यतिदेशात् ॥

कतरा पूर्वा कतरापरायोः कथा जाते कवयः को वि वेद ।
विश्वं त्मना बिभृतो यद्ध नाम वि वर्तेते अहनी चक्रियेव ॥ १ ॥

कतरा । पूर्वा । कतरा । अपरा । अयोः । कथा । जाते इति । कवयः । कः । वि । वेद ।
विश्वम् । त्मना । बिभृतः । यत् । ह । नाम । वि । वर्तेते इति । अहनी इति । चक्रिया ऽइव ॥१॥

vअयोः एनयोर्द्यावापृथिव्योर्मध्ये vकतरा vपूर्वा पूर्वमुत्पन्ना। vकतरा वा vअपरा पश्चाद्भाविनी। एवं पौर्वापर्यप्रश्नः। उभयोः अविनाभावेन सहैव वर्तमानत्वादिति भावः। तथा vकथा केन हेतुना vजाते किमनयोरुत्पादनमित्यर्थः। हे vकवयः क्रान्तदर्शिनोऽतीन्द्रियज्ञाः यूयं वदत vको vवि vवेद पौर्वापर्यं कारणं च विशेषेण विविच्य वा जानाति। न केनापि ज्ञायते इत्यर्थः। अज्ञाने कारणमाह। vयद्ध यस्मात्खलु हेतोः vनाम प्रसिद्धं vविश्वं कृत्स्नमपि जगत् अविशेषेण vत्मना आत्मनैव अन्यनैरपेक्ष्येणैव vबिभृतः धारयतः। यद्वा। यद्ध नाम यत्किंचित् पदार्थजातमस्ति विश्वं तत्सर्वमात्मना बिभृतः। अनेन यत्कारणं ब्रूमस्तदपि आभ्यामेव ध्रियते इति कारणाभावः प्रतिपादितः। उत्तरेण पौर्वापर्याभाव उच्यते। vअहनी एते द्यावापृथिव्यौ vचक्रियेव चक्रयुक्ते इव vवि vवर्तेते। अत्र ' कतरा पूर्वा कतरापरैनयोः ' ( निरु. ३. २२ ) इत्यादि निरुक्तं द्रष्टव्यम् ॥

भूरिं द्वे अचरन्ती चरन्तं पद्वन्तं गर्भमपदी दधाते ।
नित्यं न सूनुं पित्रोरुपस्थे द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ २ ॥

भूरिम् । द्वे इति । अचरन्ती इति । चरन्तम् । पत्ऽवन्तम् । गर्भम् । अपदी इति । दधाते इति ।
नित्यम् । न । सूनुम् । पित्रोः । उपऽस्थे । द्यावा । रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥२॥

vअचरन्ती अविचले vद्वे एव एते द्यावापृथिव्यौ vभूरिं बहुतरं vचरन्तं vपद्वन्तं पादयुक्तं vगर्भं गर्भवदाश्रितं कृत्स्नं प्राणिजातम् vअपदी स्वयं पादरहिते vदधाते धारयतः। अनयोर्मध्ये खलु सर्वं जगत् क्षेमेण वर्तते। धारणे दृष्टान्तः। vपित्रोः मातापित्रोः vउपस्थे उत्सङ्गे वर्तमानं vनित्यं ध्रुवमात्मजं vसूनुं vन पुत्रमिव यथा स्नेहेन वर्धयन्तौ धारयन्तौ मातापितरौ तद्वत्। अथ प्रत्यक्षेणाह। हे vद्यावा vपृथिवी द्यावापृथिव्यौ। इतरेतरापेक्षया द्विरभुभयोः। vनः अस्मान् vअभ्वात् महतो भयहेतोः पापात् vरक्षतं पालयतम्। यद्वा। अभ्वात् अभ्वं महत्। अत्यर्थमित्यर्थः। अभ्वेति महन्नाम ॥ द्वन्द्वे कृतद्यावादेशस्य द्यावापृथिवीशब्दस्य मध्ये रक्षतम् इति पदप्रयोगश्छान्दसः। आमन्त्रितस्याविद्यमानवेन निघाताभावः ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अनेहो दात्रमदितेरनर्वं हुवे स्वर्वदवधं नमस्वत् ।
तद्रोदसी जनयतं जरित्रे द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ३ ॥

अनेहः । दात्रम् । अदितेः । अनर्वम् । हुवे । स्वःऽवत् । अवधम् । नमस्वत् ।
तत् । रोदसी इति । जनयतम् । जरित्रे । द्यावा । रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥३॥

vअदितेः । एतदन्तरिक्षस्याप्युपलक्षणम् । अखण्डनीयायाः पृथिव्याः तादृशस्यान्तरिक्षस्य च संबन्धि vदात्रं धनं vहुवे आह्वयामि स्पृहयामीत्यर्थः । कीदृशं तद्धनम् । vअनेहः अपापं दुःखरहितं सुखात्मकम् vअनर्वम् अनरणम् अक्षीणमित्यर्थः । vस्वर्वत् सर्वतः फलभूतेन स्वर्गेण तद्वत् vअवधम् अहिंसितं vनमस्वत् अन्नवत् । ईदृशं धनं हुवे । vतत् अस्माभिः काङ्क्षितमुक्तलक्षणं धनं हे vरोदसी द्यावापृथिव्यौ vजरित्रे स्तोत्रे यजमानाय vजनयतम् उत्पादयतम् । द्यावेत्यादि व्याख्यातम् ॥

अतप्यमाने अवसावन्ती अनु ष्याम रोदसी देवपुत्रे ।
उभे देवानामुभयेभिरह्नां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ४ ॥

अतप्यमाने इति । अवसा । अवन्ती इति । अनु । स्याम । रोदसी इति । देवपुत्रे इति देवऽपुत्रे ।
उभे इति । देवानाम् । उभयेभिः । अह्नाम् । द्यावा । रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥४॥

vअवसा स्वतोऽधिकेन केनचित् कृतेन अवनेन समृद्ध्या vअतप्यमाने अनीश्वरे ॥ तपेः ऐश्वर्यकर्मणः इदं रूपम् ॥ अतप्यमाने[1] अन्यैरपीड्यमाने । vअवसा अन्नेन vअवन्ती तर्पयन्त्यौ vदेवपुत्रे देवाः व्यवहर्तारो मनुष्याः पुत्रस्थानीयाः ययोस्तादृश्यौ । लोकद्वयस्थाः मनुष्याश्च देवाश्च तदुपजीव्यत्वात् पुत्राः इत्युच्यन्ते । ईदृशौ vउभे vरोदसी द्यावापृथिव्यौ vदेवानाम् vअह्नाम् । एतद्रात्रेरप्युपलक्षणम् । द्योतमानानाम् अह्नां रात्रीणां च संबन्धिभिः उभयविधैः शीतोष्णादिरूपैः विलक्षणैः धनैः[2] निमित्तभूतैः । तेषां लाभायेत्यर्थः । तदर्थं युवाम् vअनु vस्याम अनुभवेम । शिष्टो व्याख्यातः ॥

संगच्छमाने युवती समन्ते स्वसारा जामी पित्रोरुपस्थे ।
अभिजिघ्रन्ती भुवनस्य नाभिं द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ५ ॥

संगच्छमाने इति सम्ऽगच्छमाने । युवती इति । समन्ते इति सम्ऽअन्ते ।
स्वसारा । जामी इति । पित्रोः । उपऽस्थे ॥ अभिजिघ्रन्ती इत्यभिऽजिघ्रन्ती ।
भुवनस्य । नाभिम् । द्यावा । रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥ ५ ॥

---

१. झ-झ१–यद्वा अतप्यमाने । २. झ१–धर्मैः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vसंगच्छमाने परस्परमुपकारित्वेन[1] सह युज्यमाने। वृष्टिहविषोश्च परस्परमुपकार्योपकारकभावः। यद्वा। पूर्वं संसृष्टे एव सत्यौ पश्चाद्वियुज्य वृष्टिहविषी अकुर्वन्त्यौ पश्चात् मनुष्यैः प्रार्थितैर्देवैः विवाहिते सत्यौ संगते अभूतामित्याहुः। अयमर्थः 'द्यावापृथिवी सहास्ताम्' (तै. ब्रा. १. १. ३. २) इत्यादिब्राह्मणे समाम्नातः। vयुवती नित्यतरुण्यौ मिश्रयन्त्यौ वा सर्वेषु भावेषु vसमन्ते समानान्तिके समानपर्यन्ते वा vस्वसारा परस्परं स्वसृभूते vजामी बन्धुभूते। प्रजापतेः सकाशात् सहोत्पन्नत्वात् परस्परं जामित्वम्। तथा च निगमौ–'दिवं च पृथिवीं चान्तरिक्षमथो स्वः' (ऋ. सं. १०. १९०. ३) 'यतो द्यावापृथिवी निष्टतक्षुः' (ऋ. सं. १०·३१. ७) इति। vपित्रोः सर्वस्य पितृस्थानीययोः पालकयोस्तयोः vउपस्थे उत्सङ्गे स्थितं vभुवनस्य भूतजातस्य vनाभिं बन्धकमुदकम् vअभिजिघ्रन्ती अभिघ्राणं कुर्वन्त्यौ स्पृशन्त्यौ। 'समानमेतदुदकम्' (ऋ. सं. १. १६४. ५१) इत्यादिमन्त्रवर्णात् उभयोरुदकप्रदत्वं प्रसिद्धम्। ईदृश्यौ vनः vरक्षतम्॥ ॥ २ ॥

**उर्वी सद्मनी बृहती ऋतेन हुवे देवानामवसा जनित्री।**
**दधाते ये अमृतं सुप्रतीके द्यावा रक्षतं पृथिवी नो अभ्वात्॥ ६॥**

उर्वी इति। सद्मनी इति। बृहती इति। ऋतेन। हुवे। देवानाम्। अवसा। जनित्री इति।
दधाते इति। ये इति। अमृतम्। सुप्रतीके इति सुऽप्रतीके।
द्यावा। रक्षतम्। पृथिवी इति। नः। अभ्वात्॥ ६॥

vउर्वी विस्तीर्णे vसद्मनी सदनाधारभूते vबृहती महत्यौ महानुभावे vदेवानाम्। उपलक्षणमेतत्। देवमनुष्यादीनाम् vअवसा प्रीत्या निमित्तेन vजनित्री वृष्टिसस्ययोर्जनित्र्यौ। वृष्ट्यादेर्देवानामवसा तर्पणेन निमित्तेन vऋतेन यज्ञेन च निमित्तभूतेन vहुवे आह्वयामि। देवानां हविरर्थम् अस्मद्यज्ञायेत्यर्थः। vये vसुप्रतीके शोभनरूपे vअमृतम् उदकं vदधाते धारयतः ते युवामाह्वयामि। शिष्टं स्पष्टम्॥

**उर्वी पृथ्वी बहुले दूरेअन्ते उप ब्रुवे नमसा यज्ञे अस्मिन्।**
**दधाते ये सुभगे सुप्रतूर्ती द्यावा रक्षतं पृथिवी नो अभ्वात्॥ ७॥**

उर्वी इति। पृथ्वी इति। बहुले इति। दूरेअन्ते इति दूरेऽअन्ते। उप। ब्रुवे। नमसा। यज्ञे। अस्मिन्।
दधाते इति। ये इति। सुभगे इति सुऽभगे। सुप्रतूर्ती इति सुऽप्रतूर्ती।
द्यावा। रक्षतम्। पृथिवी इति। नः। अभ्वात्॥ ७॥

vउर्वी उव्यौ महत्यौ vपृथ्वी पृथिव्यौ vबहुले अनेकप्रकारेण प्रथमाने बह्वाकारे vदूरेअन्ते विप्रकृष्टान्तदेशे अपारे इत्यर्थः। ईदृश्यौ युवाम् vअस्मिन् vयज्ञे vनमसा नमःसाधनेन स्तोत्रेण

---

१. ऋ-ऋ१–परस्परमुपकार्योपकारकत्वेन।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vउप vब्रुवे उपेत्य ब्रवीमि स्तौमीत्यर्थः । पुनः कीदृश्यौ । vये vसुभगे शोभनभाग्ये vसुप्रतूर्ती सुप्रतरणे शोभनदाने vदधाते विश्वं जगत् ते युवाम् उप ब्रुवे स्तौमि ॥

देवान्वा यच्चकृमा कच्चिदागः सखायं वा सदमिज्जास्पतिं वा ।
इयं धीर्भूया अवयानमेषां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ८ ॥

देवान् । वा । यत् । चकृम । कत् । चित् । आगः । सखायम् । वा । सदम् । इत् । जाःपतिम् । वा ।
इयम् । धीः । भूयाः । अवऽयानम् । एषाम् । द्यावा । रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥८॥

हे द्यावापृथिव्यौ वयं vदेवान् देवान् प्रति vयत् vकच्चित् vआगः अपराधं तत्तद्यागकाले तेषां-तेषाम् अयागलक्षणं vसदमित् सर्वदैव vचकृम कृतवन्तो वयम् । vसखायं vवा प्रियं मित्रं वा प्रति यच्चकृम । vजास्पतिम् । जाः पुत्र्यः । तासां पतिं जामातरं vवा जायापतिं प्रति दोषारोपणकलहोत्पादनादिरूपं यत्सर्वदैव चकृम । vएषाम् उक्तरूपाणां पापानाम् अपगमं कर्तुम् vइयं vधीः युष्मत्स्तुतिरूपम् इदं कर्म vभूयाः भूयात् भवतु । द्यावेत्यादि गतम् । अत्र सर्वत्र प्रकारान्तरेण मन्त्रमन्तरेण[1] रक्षतं रक्षतमिति प्रार्थनं तयोः अश्विन्यादिवदुमननासंभवात्[2] उचितमेव । तस्मात् स्वस्थाने एव स्थिते अनुकूले भवतमित्येवं प्रार्थ्यते ॥

उभा शंसा नर्या मामविष्टामुभे मामूती अवसा सचेताम् ।
भूरि चिदर्यः सुदास्तरायेषा मदन्त इषयेम देवाः ॥ ९ ॥

उभा । शंसा । नर्या । माम् । अविष्टाम् । उभे इति । माम् । ऊती इति । अवसा । सचेताम् ।
भूरि । चित् । अर्यः । सुदाःऽतराय । इषा । मदन्तः । इषयेम । देवाः ॥ ९ ॥

vउभा vशंसा द्यावापृथिव्योरुभयोः विषयौ उभावपि शंसौ vनर्या नरेभ्यो हितौ ईदृश्यौ उभयाश्रये स्तुती vमाम् अविष्टां रक्षताम् । यद्वा । द्यावापृथिव्यभिमानिदेवयोरेव इंसृशंदेन अभिधानात् पुंलिङ्गता । तथा vउभे vऊती रक्षिके द्यावापृथिव्यौ vमाम् vअवसा रक्षणेन vसचेताम् । यद्वा । प्राणिभ्यो हितकरौ उभौ ऐहिकामुष्मिकविषयौ शंसौ माम् अविष्टां प्रामुताम् । तथा उभे अपि ऊती तयोः संबन्धिन्योरभिमानिदेवतयोः अवसा अस्मत्तर्पणेन निमित्तेन सचेताम् । हे vदेवाः द्यावापृथिव्योरन्तर्भूताः सर्वेऽपि देवाः vअर्यः स्तोतारो वयं vसुदास्तराय अतिशयेन शोभनदातृत्वाय vइषा अन्नेन सोमलक्षणेन vमदन्तः मादयन्तः सन्तः vभूरि vचित् । चित् पूजायाम् । अभिपूजितं धनम् vइषयेम इच्छेम । यद्वा । अर्यः इति षष्ठ्या रूपम् । ईश्वराद्राजादेरपि सुदास्तरायेत्यर्थः । शिष्टं समानम् ॥

' ऋतं दिवे ' इति द्वे द्यावापृथिवीये पशौ पुरोडाशहविषोः अनुवाक्ये । ' अग्नीषोमौ ' इति खण्डे सूत्रितम्–' ऋतं दिवे तदवोचं पृथिव्या इति द्वे ' ( आश्व. श्रौ. ३. ८ ) इति ॥

---

१. झ–' मन्त्रमन्तरेण ' नास्ति । २. झ१–अश्विन्यादिवदनेन संभवात ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ऋतं दिवे तदवोचं पृथिव्या अभिश्रावाय प्रथमं सुमेधाः ।
पातामवद्यादुरितादभीके पिता माता च रक्षतामवोभिः ॥ १० ॥

ऋतम् । दिवे । तत् । अवोचम् । पृथिव्यै । अभिऽश्रावाय । प्रथमम् । सुऽमेधाः ।
पाताम् । अवद्यात् । दुःऽइतात् । अभीके । पिता । माता । च । रक्षताम् । अवःऽभिः ॥१०॥

vसुमेधाः शोभनप्रज्ञोऽहं vदिवे द्युदेवतायै vपृथिव्यै पृथिवीदेवतायै vतत् तत्प्रीतिकरम् vऋतं स्तोत्रं vप्रथमम् । मुख्यनामैतत् । प्रतमं प्रकृष्टतमम् vअवोचं ब्रवीमि । किमर्थम् । vअभिश्रावाय अभितः सर्वतः श्रवणाय । किंच vपिता पालको द्युलोकः vमाता सस्यादेर्निर्मात्री पृथिवी vच उभे vअवद्यात् निन्दितात्[1] दुःखप्रापकात् अंहसः सकाशात् vपातां रक्षताम् । तथा vअभीके । अन्तिकनामैतत् । समीपे एव vअवोभिः अभिमततर्पणैः vरक्षतां पालयताम् ॥

इदं द्यावापृथिवी सत्यमस्तु पितर्मातर्यदिहोपब्रुवे वाम् ।
भूतं देवानामवमे अवोभिर्विद्यामेषं वृजनं जीरदानुम् ॥ ११ ॥

इदम् । द्यावापृथिवी इति । सत्यम् । अस्तु । पितः । मातः । यत् । इह । उपऽब्रुवे । वाम् ।
भूतम् । देवानाम् । अवमे इति । अवःऽभिः । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥११॥

हे vद्यावापृथिवी द्यावापृथिव्यौ vइदम् अस्माभिः क्रियमाणं स्तोत्रं vसत्यमस्तु अवितथं भवतु फलवद्भवत्वित्यर्थः । इदमित्युक्तं किं तदित्याह । हे vपितः द्यौः हे vमातः पृथिवि vवां युवां प्रति vइह अस्मिन् यज्ञे vयत् स्तोत्रम् vउपब्रुवे उपेत्य ब्रवीमि तत्सत्यमस्तु । vदेवानां स्तोतॄणामस्माकम् vअवमे । अन्तिकनामैतत् । नित्यसंनिहिते युवाम् vअवोभिः तर्पणैर्युक्ते vभूतं भवतम् । अवशिष्टं गतम् ॥ ॥ ३ ॥

'आ न इळाभिः' इति सप्तमं सूक्तमेकादशर्चमागस्त्यं त्रैष्टुभं वैश्वदेवम् । 'आ नो वैश्वदेवम्' इत्यनुक्रान्तम् । विनियोगो लैङ्गिकः ॥

आ न इळाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु ।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ॥ १ ॥

आ । नः । इळाभिः । विदथे । सुऽशस्ति । विश्वानरः । सविता । देवः । एतु ।
अपि । यथा । युवानः । मत्सथ । नः । विश्वम् । जगत् । अभिऽपित्वे । मनीषा ॥ १ ॥

vनः vविदथे अस्मदीये यज्ञे vसुशस्ति ॥ सुपो लुक् ॥ सुशस्तिभिः शोभनशंसनैः स्तुतिभिः प्रदेयैः रत्नैः सह । यद्वा । vइळाभिः । तदाश्रितेषु तच्छब्द्यम् । भूमिस्थानाभिर्देवताभिः सह । vविश्वानरः

---

1. ऋ १–निन्दितादुरितात् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सर्वप्राणिहितकार्यग्निः vसविता प्रेरक आदित्यश्च vदेवः vएतु[1] आगच्छतु। हे vयुवानः नित्यतरुणा यज्ञस्य मिश्रयितारो वा यूयं vनः अस्मान् vअभिपित्वे अभिपतनीयेऽस्मद्यज्ञे vमनीषा मनीषया मनसः ईशितृत्वेन स्वेच्छयेत्यर्थः। अपिः संभावनायाम्। vअपि अस्मान् vमत्सथ मादयथ। vयथा vविश्वं vजगत्। एतत्स्थावरस्याप्युपलक्षणम्। यद्वा कृत्स्नं प्रपञ्चं मत्सथ तथा अस्मानपि। यद्वा। जगच्छब्दो यजमानरूपमनुष्यवाची। सर्वानपि यजमानान् यथा मत्सथ तथेत्यर्थः॥

वैश्वदेवे पशौ 'आ नो विश्वे' इत्येषा हविषः पुरोनुवाक्या। 'आ नो देवानामुपवेतु शंस आ नो विश्व आस्का गमन्तु देवाः' (आश्व. श्रौ. ३. ७) इति॥

आ नो विश्व आस्क्रा गमन्तु देवा मित्रो अर्यमा वरुणः सजोषाः।
भुवन्यथा नो विश्वे वृधासः करन्त्सुषाहा विथुरं न शवः॥ २॥

आ। नः। विश्वे। आस्क्राः। गमन्तु। देवाः। मित्रः। अर्यमा। वरुणः। सऽजोषाः।
भुवन्। यथा। नः। विश्वे। वृधासः। करन्। सुऽसहा। विथुरम्। न। शवः॥ २॥

vनः अस्माकं यज्ञं vविश्वे सर्वे vदेवाः vआस्क्राः शत्रूणामास्कन्दयितारः आक्रमितारो वा vआ vगमन्तु आगच्छन्तु। के ते। vमित्रो vअर्यमा vवरुणः च त्रयोऽपि vसजोषाः समानप्रीतयः सन्तः आगच्छन्तु। किंतु vविश्वे देवाः vनः अस्माकं vवृधासः वर्धयितारः vयथा vभुवन् भवेयुः तथा vसुषाहा सुष्ठु शत्रूणामभिभवेन नोऽस्मदीयं vशवः अन्नं vविथुरं हीनं यथा vन vकरन् न कुर्युः तथा आगच्छन्तु॥

प्रेष्ठं वो अतिथिं गृणीषेऽग्निं शस्तिभिस्तुर्वणिः सजोषाः।
असद्यथा नो वरुणः सुकीर्तिरिषश्च पर्षदरिगूर्तः सूरिः॥ ३॥

प्रेष्ठम्। वः। अतिथिम्। गृणीषे। अग्निम्। शस्तिऽभिः। तुर्वणिः। सऽजोषाः।
असत्। यथा। नः। वरुणः। सुऽकीर्तिः। इषः। च। पर्षत्। अरिऽगूर्तः। सूरिः॥३॥

हे देवाः vवः युष्माकं vप्रेष्ठं प्रियतमम्। सर्वेषामाह्वातृत्वाद्धविर्वहनाच्च अग्निः देवानां प्रियतमः। तम् vअतिथिं vगृणीषे गृणे स्तौमि॥ व्यत्ययेन मध्यमः॥ केन साधनेन। vशस्तिभिः शंसनैः स्तुतिभिः। कीदृशोऽहम्। vतुर्वणिः तूर्णवनिः शीघ्रं संभक्ता vसजोषाः युष्माभिः सह प्रीयमाणः। यद्वा। एते अग्निविशेषणे। यः तुर्वणिः शीघ्रं यज्ञस्य संभक्ता सजोषा युष्माभिः सह प्रीयमाणः तम् vअग्निं गृणीषे। vयथा येन प्रकारेण vनः अस्माकं vवरुणः एतन्नामको देवः vसुकीर्तिः शोभनकीर्तिमान् vअसत्। 'सुकीर्तिं भिक्षे वरुणस्य भूरेः' (ऋ. सं. २. २८. १) इत्यादिमन्त्रवर्णेषु वरुणात् सुकीर्तिरेव एषणीया। vअरिगूर्तः अरिषु अदातृषु सदा शब्दितः अरीणां हननाय उद्युक्तो वा vसूरिः प्रेरयिता अयं वरुणः vइषश्च अन्नानि vपर्षत् पूरयेत्। तथा तमपि स्तुम इत्यर्थः॥

---

१. ज–ऐतु।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उप व एषे नमसा जिगीषोषासानक्ता सुदुघेव धेनुः ।
समाने अहन्विमिमानो अर्कं विषुरूपे पयसि सस्मिन्नूधन् ॥ ४ ॥

उप । वः । आ । ईषे । नमसा । जिगीषा । उषसानक्ता । सुदुघाऽइव । धेनुः ।
समाने । अहन् । विऽमिमानः । अर्कम् । विषुऽरूपे । पयसि । सस्मिन् । ऊधन् ॥ ४ ॥

हे देवाः vवः युष्माकं vनमसा हविषा नमस्कारेण वा vउप उपेत्य vजिगीषा पापानां जिगीषया vएषे इच्छामि ॥ ' इष गतौ ' इत्यस्य वा ईषतेर्वा गत्याद्यर्थस्य लिटि उत्तमैकवचने इदं रूपम् ॥ भजामि । कस्मिन् काले । vउषासानक्ता अहनि रात्रौ च । यद्वा । अहोरात्रदेवते अपि अभिगच्छामि । गतौ दृष्टान्तः । vसुदुघा vधेनुः vइव सुदोग्ध्री धेनुः यथा दोहाय दोग्धुः गृहमागच्छति तद्वत् । किं कुर्वन् । vसस्मिन् समाने vऊधन् ऊधस्युत्पन्ने vविषुरूपे नानारूपे vपयसि क्षीरघृतादिके vअर्कम् अर्चनीयमन्नं चरुपुरोडाशादिकं vविमिमानः विविधं मिमानः । कस्मिन् काले । vसमाने vअहन् षष्ठेऽहनि । एकस्मिन्नेवाहनि सर्वदैव वा इत्यर्थः । एकस्मिन्नेवाहनि समाने ऊधस्युत्पन्ने नानारूपे पयसि त्वदर्थं हविर्भिमान उपगच्छामीत्यर्थः । यद्वा । सस्मिन् सर्वस्मिन्नूधसि फलाख्यक्षीरोत्पादके यज्ञे निमित्तभूते सति विषुरूपे पयसि नानारूपे सोमलक्षणोदके अर्कमन्नसाधनं स्तोत्रं विमिमानोऽहं युष्मानभिगच्छामि ॥

उत नोऽहिर्बुध्न्यो३ मयस्करः शिशुं न पिप्युषीव वेति सिन्धुः ।
येन नपातमपां जुनाम मनोजुवो वृषणो यं वहन्ति ॥ ५ ॥

उत । नः । अहिः । बुध्न्यः । मयः । करिति कः । शिशुम् । न । पिप्युषीऽइव । वेति । सिन्धुः ।
येन । नपातम् । अपाम् । जुनाम । मनःऽजुवः । वृषणः । यम् । वहन्ति ॥ ५ ॥

vउत अपि च vनः अस्माकम् vअहिः अन्तरिक्षगामी अहन्ता वा अहीनो वा अहन्यमानो वा एतन्नामको देवः स एव vबुध्न्यः । बुध्नं बन्धकमन्तरिक्षम् । तदर्हतीति बुध्न्यः अन्तरिक्षचारी एतन्नामको देवः vमयः सुखं vकः करोतु ॥ करोतेर्लङि रूपम् ॥ किंच vपिप्युषी । इवशब्दः एवार्थः पूरणो वा । अस्मान् रसेन आप्याययन्ती vसिन्धुः नाम नदी वेतु[1] आगच्छतु । तत्र दृष्टान्तः । vशिशुं vन यथा शिशुं प्याययन्ती गौर्गच्छति तद्वत् । vअपां vनपातम् उदकानामपातयितारं वर्षकमेतन्नामकं यद्वा उदकानां नप्तारं तृतीयं पुत्रम् । अद्भ्यः ओषधिवनस्पतयः तेभ्योऽग्निरिति नप्तृत्वम् । तादृशमग्निं vजुनाम स्तुतिभिः संगच्छेम ॥ जु इति सौत्रो धातुर्गत्यर्थः ॥ vयं देवं vमनोजुवः मनोवेगाः vवृषणः वर्षका मेघा अश्वाः vवहन्ति स सुखं करोतु ॥ ॥ ४ ॥

---

१. झ१–वेति ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

उत नं ईं त्वष्टा गन्त्वच्छा स्मत्सूरिभिरभिपित्वे सजोषाः ।
आ वृत्रहेन्द्रश्चर्षणिप्रास्तुविष्टमो नरां नं इह गम्याः ॥ ६ ॥

उत । नः । ईम् । त्वष्टा । आ । गन्तु । अच्छ । स्मत् । सूरिऽभिः । अभिऽपित्वे । सऽजोषाः ।
आ । वृत्रऽहा । इन्द्रः । चर्षणिऽप्राः । तुविःऽतमः । नराम् । नः । इह । गम्याः ॥ ६ ॥

[v]त्वष्टा देवोऽपि [v]नः अस्मान् [v]अच्छ अभिप्रास्तुम् [v]ईम् इदानीम् इमं यज्ञं वा [v]आ [v]गन्तु[1] । आगत्य च । [v]स्मत् सहार्थे प्राशस्त्ये वा वर्तते । अत्र प्रशंसायाम् । प्रशस्तं यथा तथा [v]अभिपित्वे अभिगन्तव्ये यज्ञे निमित्तभूते सति [v]सूरिभिः स्तोतृभिर्ऋत्विग्भिः [v]सजोषाः समानप्रीतिर्भवत्विति शेषः । तथा [v]वृत्रहा वृत्रघाती [v]चर्षणिप्राः । चर्षणयो मनुष्या यजमानाः । कामैः तेषां पूरकः । [v]तुविष्टमः बहुतमो महत्तमः [v]इह अस्मिन् कर्मणि [v]नरां नृणां [v]नः अस्माकम् उक्तगुणोपेतः सन् [v]आ [v]गम्याः आगच्छतु ॥

उत नं ईं मतयोऽश्वयोगाः शिशुं न गावस्तरुणं रिहन्ति ।
तमीं गिरो जनयो न पत्नीः सुरभिष्टमं नरां नसन्त ॥ ७ ॥

उत । नः । ईम् । मतयः । अश्वऽयोगाः । शिशुम् । न । गावः । तरुणम् । रिहन्ति ।
तम् । ईम् । गिरः । जनयः । न । पत्नीः । सुरभिःऽतमम् । नराम् । नसन्त ॥ ७ ॥

[v]उत अपि च [v]ईम् एनं [v]तरुणं नित्ययुवानमिन्द्रं [v]मतयः अस्मद्बुद्धयः [v]अश्वयोगाः अश्वसमानप्रास्तयः [v]रिहन्ति आस्वादयन्ति स्तुवन्तीत्यर्थः । तत्र दृष्टान्तः । [v]गावः दोग्ध्यो धेनवः [v]शिशुं [v]न शिशुमिव वत्समिव तं यथा लिहन्ति तद्वत् । तदेवाह । [v]तमीं तमेवैनं [v]नरां नराणां यजमानानां [v]सुरभिष्टमम् अतिशयेन सुरभिं [v]जनयः फलस्योत्पादयित्र्यः [v]गिरः स्तुतयः [v]नसन्त व्याप्नुवन्ति । नसतिर्व्याप्तिकर्मा । तत्र दृष्टान्तः । [v]जनयः [v]न उत्पादयित्र्यः [v]पत्नीः पत्न्यः पतिमिव ॥

उत नं ईं मरुतो वृद्धसेनाः स्मद्रोदसी समनसः सदन्तु ।
पृषदश्वासोऽवनयो न रथा रिशादसो मित्रयुजो न देवाः ॥ ८ ॥

उत । नः । ईम् । मरुतः । वृद्धऽसेनाः । स्मत् । रोदसी इति । सऽमनसः । सदन्तु ।
पृषत्ऽअश्वासः । अवनयः । न । रथाः । रिशादसः । मित्रऽयुजः । न । देवाः ॥ ८ ॥

[v]उत अपि च [v]नः अस्मदीयम् [v]ईम् इदानीम् एनं यागं वा [v]मरुतः [v]स्मत् सह अपि [v]सदन्तु गच्छन्तु । कुतो देशात् । [v]रोदसी रोदस्योर्द्यावापृथिव्योः सकाशात् । यद्वा । रोदस्यावपि गच्छताम् ।

---

१. क-ञ-ञ१–गन्तु आगच्छतु ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कीदृशास्ते मरुतः । [v]वृद्धसेनाः प्रवृद्धबलाः [v]समनसः समानमनस्काः [v]पृषदश्वासः पृषद्वर्णाश्वाः । 'पृषत्यो मरुताम्' ( नि. १. १५. ६ ) इति यास्कः । [v]अवनयो [v]न यथैव नमनस्वभावाः [v]रथाः रंहणस्वभावा रथवन्तो वा ॥ मत्वर्थो लुप्यते ॥ यद्वा । अवनयो रक्षका रथा इव स्थिताः । [v]रिशादसः । रिशाः शत्रवः । तेषाम् अत्तारः [v]मित्रयुजः [v]देवाः [v]न मैत्रीयुक्ता व्यवहर्तारः ऋत्विज इव । यद्वा । मैत्रीयुक्ता अन्ये देवा यथा गच्छन्ति तद्वत् ॥

प्र नु यदेषां महिना चिकित्रे प्र युञ्जते प्रयुजस्ते सुवृक्ति ।
अध यदेषां सुदिने न शरुर्विश्वमेरिणं प्रुषायन्त सेनाः ॥ ९ ॥

प्र । नु । यत् । एषाम् । महिना । चिकित्रे । प्र । युञ्जते । प्रऽयुजः । ते । सुऽवृक्ति ।
अध । यत् । एषाम । सुऽदिने । न । शरुः । विश्वम् । आ । इरिणम् । प्रुषायन्त । सेनाः ॥९॥

[v]एषां मरुतां [v]महिना महिमा वृष्टिलक्षणः [v]यत् यस्मात् [v]प्र [v]चिकित्रे प्रज्ञायते । यद्वा । एषां महत्त्वेन युक्ता नराः चिकित्रे जानन्त्यनुष्ठेयम् । [v]नु इति पूरणः । ततः [v]ते ज्ञातारः [v]सुवृक्ति ॥ सुपो लुक् ॥ सुष्टुतीनां [v]प्रयुजः प्रयोगान् [v]प्र [v]युञ्जते । [v]अध अथ प्रयोगानन्तरं [v]यत् यस्मात् [v]एषां [v]सेनाः वृष्ट्युत्पादकाः [v]विश्वं सर्वं भुवनम् [v]इरिणम् ऊषरप्रदेशं यथा तथा सर्वतः [v]प्रुषायन्त उत्पादयन्ति । तत्र दृष्टान्तः । [v]सुदिने मेघावरणादिरहिते दिने [v]शरुः अन्धकारहिंसकः प्रकाश इव । स यथा सर्वमावृणोति तथा मरुत्सेना वृष्ट्या[1] सर्वम् ऊषरं करोति । यद्वा । मरुन्महिमा वृष्टिर्भवति । तदा सस्यादिसमृद्धौ सत्यां प्रयोगं कुर्वन्ति । यदा यजन्ति तदा मरुत्सेनाः सर्वां महीमुन्दन्तीत्येवं महानुभावा मरुत इति तेषां स्तुतिः ॥

प्रो अश्विनाववसे कृणुध्वं प्र पूषणं स्वतवसो हि सन्ति ।
अद्वेषो विष्णुर्वात ऋभुक्षा अच्छा सुम्नाय ववृतीय देवान् ॥ १० ॥

प्रो इति । अश्विनौ । अवसे । कृणुध्वम् । प्र । पूषणम् । स्वऽतवसः । हि । सन्ति ।
अद्वेषः । विष्णुः । वातः । ऋभुक्षाः । अच्छ । सुम्नाय । ववृतीय । देवान् ॥ १० ॥

हे ऋत्विजः [v]अश्विनौ एतन्नामकौ देवावुद्दिश्य [v]अवसे अस्मद्रक्षणाय [v]प्रो [v]कृणुध्वं स्तुतिं प्रकर्षेण कृणुध्वम् । [v]पूषणं पोषकम् एतन्नामकं देवमपि अवसे प्रकर्षेण स्तुतिं कृणुध्वम् । किंच ये [v]स्वतवसः स्वायत्तबलाः [v]सन्ति तानपि प्र कृणुध्वम् । के ते । [v]अद्वेषः द्वेषरहितः [v]विष्णुः व्याप्तः एतन्नामको देवः । प्रथममनाहूतोऽपि न कुप्यतीति वक्तुम् अद्वेषः इत्युक्तम् । तथा [v]वातः सर्वत्र संचारी वायुः [v]ऋभुक्षाः पतिरिन्द्रश्च । एतानपि प्र कृणुध्वम् । अतोऽहं स्वायत्तबलान् सर्वानपि [v]देवान् [v]सुम्नाय सुखाय [v]अच्छ आभिमुख्येन [v]ववृतीय स्तोत्रैः अभिवर्तयेयम् ॥

---

१. ज्ञ-ज्ञ-ज्ञ१–अवृष्ट्या ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इ॒यं सा वो॑ अ॒स्मे दी॑धि॒तिर्यजत्रा अपि॒प्राणी॑ च॒ सद॑नी च भूयाः।
नि या दे॒वेषु॑ यत॑ते वसू॒युर्वि॒द्यामे॒षं वृ॒जनं॑ जी॒रदा॑नुम् ॥ ११ ॥

इ॒यम्। सा। वः। अ॒स्मे इति॑। दी॒धि॒तिः। य॒ज॒त्राः॒। अपि॒ऽप्राणी॑। च॒। सद॑नी। च॒। भू॒याः॒। नि। या। दे॒वेषु॑। यत॑ते। व॒सु॒ऽयुः। वि॒द्याम॑। इ॒षम्। वृ॒जन॑म्। जी॒रऽदा॑नुम् ॥ ११ ॥

हे [v]यजत्राः यष्टव्या देवाः [v]वः युष्मत्संबन्धिनी [v]सा [v]इयं प्रसिद्धा [v]दीधितिः दीप्तिः [v]अस्मे अस्माकम् [v]अपिप्राणी सर्वदा चेष्टयित्री [v]सदनी [v]च निवासवती च [v]भूयाः भूयात् भवतु। [v]या दीधितिः [v]वसूयुः वसुमती [v]देवेषु [v]नि [v]यतते नियमेन प्रयत्नं करोति। तानपि प्रकाशितुं सैव भूयात्। विद्याम इति गतः ॥ ॥ ५ ॥

'पितुं नु' इत्येकादशर्चमष्टमं सूक्तमागस्त्यमन्नदेवताकं गायत्रम्। आद्या अनुष्टुब्गर्भौष्णिक्। 'आद्यः पञ्चकस्त्रयोऽष्टका अनुष्टुब्गर्भा' (अनु. ५. ७) इत्युक्तत्वात्। तृतीया पञ्चमी षष्ठी सप्तम्येकादशी च इति पञ्चानुष्टुभः। तथा चानुक्रमणिका–'पितुं न्वन्नस्तुतिर्गायत्रं स्वाद्यानुष्टुब्गर्भा तृतीयान्त्ये पञ्चम्याद्याश्च तिस्रोऽनुष्टुभः' इति। विनियोगं शौनक आह–'पितुं न्वित्युपतिष्ठेत नित्यमन्नमुपस्थितम्। पूजयेदशनं नित्यं भुञ्जीत[1] ह्यविकुत्सयन्[1] ॥ नास्य स्यादन्नजो व्याधिर्विषमप्यमृतं भवेत्। विषं च पीत्वैतत्सूक्तं जपेद्विषविनाशनम् ॥ नावाग्यतस्तु भुञ्जीत नाशुचिर्न जुगुप्सितम्। दद्याच्च पूजयेच्चैव जुहुयाच्च हविस्तदा। क्षुद्भयं नास्य किंचित्स्यान्नान्नजं व्याधिमाप्नुयात्' (ऋग्वि. १. १४८–१५१) इति ॥

पि॒तुं नु स्तोषं म॒हो ध॒र्माण॒ं तवि॑षीम्।
यस्य॑ त्रि॒तो व्योज॑सा वृ॒त्रं विप॑र्व॒मर्द॑यत् ॥ १ ॥

पि॒तुम्। नु। स्तोष॑म्। म॒हः। ध॒र्माण॑म्। तवि॑षीम्।
यस्य॑। त्रि॒तः। वि। ओज॑सा। वृ॒त्रम्। विऽप॑र्वम्। अ॒र्द॒य॒त् ॥ १ ॥

अहमगस्त्यः [v]नु क्षिप्रं [v]पितुं पालकमन्नं [v]स्तोषं स्तौमि। [v]महः महान्तं [v]धर्माणं सर्वस्य धारकं [v]तविषीं बलात्मकम्। यद्वा। महतो लोकस्य धारकम्। [v]यस्य अन्नस्य [v]ओजसा बलेन सामर्थ्येन [v]त्रितः विस्तीर्णतमः प्रख्यातकीर्तिः त्रिषु क्षित्यादिस्थानेषु तायमानोऽपि इन्द्रः [v]वृत्रं [v]विपर्वं विच्छिन्नसंधिकं यथा तथा [v]अर्दयत् हिंसितवान् ॥

स्वादो॒ पितो॒ मधो॒ पितो॒ व॒यं त्वा॑ ववृमहे। अ॒स्माक॑मवि॒ता भ॑व ॥ २ ॥

स्वादो॒ इति॑। पि॒तो॒ इति॑। मधो॒ इति॑। पि॒तो॒ इति॑। व॒यम्। त्वा॒। व॒वृ॒म॒हे॒।
अ॒स्माक॑म्। अ॒वि॒ता। भ॒व॒ ॥ २ ॥

---

१. ङ–भुञ्जीयादविकुत्सयन्।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे Vस्वादो आस्वादनीय Vपितो पालक Vमधो माधुर्योपेत Vपितो हे पानसाधनान्न Vवयं Vत्वा त्वां Vववृमहे सेवामहे ॥ अत्र सर्वत्र अननुदात्तानां पूर्वस्य असामान्यवचनत्वेनानिघातत्वम् । अनुदात्तानां तु विशेषवचनत्वान्निघातत्वम् ॥ असकृत्पितुशब्दश्रवणं तस्य प्राशस्त्यज्ञापनार्थम् । हे पितो Vअस्माकमविता तर्पयिता Vभव ॥

उप॑ नः पितवा च॑र शि॒वः शि॒वाभि॑रू॒तिभिः॑ ।
म॒योभु॑र॒द्विषे॑ण्यः सखा॑ सु॒शेवो॒ अद्व॑या॒ः ॥ ३ ॥

उप॑ । नः॒ । पि॒तो॒ इति॑ । आ । च॒र॒ । शि॒वः । शि॒वाभिः॑ । ऊ॒तिऽभिः॑ ।
म॒यः॒ऽभुः॒ । अ॒द्वि॒षे॒ण्यः॒ । सखा॑ । सु॒ऽशेवः॑ । अद्व॑याः ॥ ३ ॥

हे Vपितो यतः त्वं Vशिवः मङ्गलः अतः Vशिवाभिः मङ्गलयुक्ताभिः Vऊतिभिः रक्षणैः Vनः अस्मान् Vआ Vचर आगच्छ। आगत्य च Vमयोभुः सुखस्य भावयिता Vअद्विषेण्यः अद्वेष्यरसः प्रियरस इत्यर्थः । Vसखा सखिवत्प्रियकारी Vसुशेवः अत एव सुष्ठु सुखकरः Vअद्वयाः द्वयरहितः उक्तगुण एव न तु तद्विपरितो भवेत्यर्थः । अथवा दृष्टान्तवादोऽयम् । सुशेवोऽद्वया मनःकर्मविसंवादरहितः सखा यथा मयोभुः अद्वेष्यश्च भवति तद्वत् त्वमपि भवेत्यर्थः ॥

तव॒ त्ये पि॑तो॒ रसा॒ रजां॑स्यनु॒ विष्ठि॑ताः । दि॒वि वा॑ता॑इव श्रि॒ताः ॥ ४ ॥

तव॑ । त्ये । पि॒तो॒ इति॑ । रसाः॑ । रजां॑सि । अनु॑ । विऽस्थि॑ताः । दि॒वि । वा॒ताः॑ऽइव । श्रि॒ताः ॥४॥

हे Vपितो Vतव त्वत्संबन्धिनः Vत्ये ते स्वाद्वम्लादि षट् Vरसाः Vरजांसि लोकान् लोकस्थानार्थान्[1] Vअनु आनुकूल्येन Vविष्ठिताः विविधं स्थिताः । विविधस्थितौ दृष्टान्तः । Vदिवि द्युलोकेऽन्तरिक्षे Vश्रिताः Vवाताः वायवः ते यथा व्याप्तास्तद्वत् ॥

तव॒ त्ये पि॑तो ददि॑तस्तव॑ स्वादिष्ठ ते पितो ।
प्र स्वा॒द्मानो॒ रसा॑नां तुवि॒ग्रीवा॑इवेरते ॥ ५ ॥

तव॑ । त्ये । पि॒तो॒ इति॑ । ददि॑तः । तव॑ । स्वा॒दि॒ष्ठ॒ । ते॒ । पि॒तो॒ इति॑ ।
प्र । स्वा॒द्मानः॑ । रसा॑नाम् । तु॒वि॒ग्रीवा॑ःऽइव । ई॒र॒ते॒ ॥ ५ ॥

हे Vपितो पालकान्न Vत्ये ते त्वदर्थिनो नराः Vतव भोक्तारो भवन्तीति शेषः । के ते नराः । हे Vस्वादिष्ठ स्वादुतम Vपितो पालक Vतव त्वदनुग्रहात् Vते त्वां Vददतः प्रयच्छन्तो भवन्ति । यद्वा । ते पितो इत्यादरार्थम् । अभ्यासे हि भूयांसमर्थं मन्यन्ते । किंच तव Vरसानां स्वाद्वम्लादीनां षण्णां

---

१. झ–लोकस्थानादर्थान्; झ १–लोकस्थानदार्थान् ( लोकस्थान्पदार्थान् ); ख-फ–लोकस्थानर्थान् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vस्वाद्मानः स्वादयितारो भक्षयितार एव vतुविग्रीवाइव। तुवीति बहुनाम। प्रवृद्धग्रीवा एव vप्र vईरते प्रकर्षेण गच्छन्ति संचरन्ति। इवशब्द एवकारार्थः पूरणो वा। 'भूलोके अत्तार एव दृढाङ्गा भवन्तीति प्रसिद्धम्। अनशने हि ग्रीवा अधो लम्बन्ते। यद्वा। तव रसानामत्तारः असंख्यातग्रीवा इव भवन्ति रसानां बाहुल्यादिति भावः। एवं बहुरसोपेतमन्नमिति तस्य स्तुतिः ॥ ॥ ६ ॥

त्वे पितो महानां देवानां मनो हितम्।
अकारि चारु केतुना तवाहिमवसावधीत् ॥ ६ ॥

त्वे इति। पितो इति। महानाम्। देवानाम्। मनः। हितम्।
अकारि। चारु। केतुना। तव। अहिम्। अवसा। अवधीत् ॥ ६ ॥

हे vपितो vमहानां पूज्यानां महतां वा vदेवानाम् इन्द्रादीनां vमनः vत्वे त्वयि vहितं निहितम् vअकारि कृतम्। अमृतमपि विहाय त्वय्येव वर्तते। हे पितो vतव vचारु समीचीनेन vकेतुना त्वत्कृतेन प्रज्ञानलक्षणेन vअवसा रक्षणेन vअहिं मेघं वृत्रं वा vअवधीत् हतवानिन्द्रः। 'अन्नमयं हि सोम्य मनः' (छा. उ. ६. ५. ४) इति श्रुतेः। अथवा त्वत्केतुना जगद्रक्षणेन निमित्तेनेति योज्यम्। जगद्रक्षणार्थं हि इन्द्रेणाहिर्भिद्यते ॥

यददो पितो अजगन्विवस्व पर्वतानाम्।
अत्रा चिन्नो मधो पितोऽरं भक्षाय गम्याः ॥ ७ ॥

यत्। अदः। पितो इति। अजगन्। विवस्व। पर्वतानाम्।
अत्र। चित्। नः। मधो इति। पितो इति। अरम्। भक्षाय। गम्याः ॥ ७ ॥

हे vपितो अन्न त्वां vयत् यदा vविवस्व ॥ सुपो लुक्। अन्यलोपश्छान्दसः ॥ विवासनवतां विद्युद्रूपप्रकाशनवताम्। विवो धनमुदकलक्षणम्। धनवतां वा vपर्वतानां मेघानां संबन्धि vअदः प्रसिद्धं तदुदकम् vअजगन् अगमत् गच्छेत्। vअत्र vचित् अस्मिन्काले vनः अस्मान् हे vमधो हे vपितो माधुर्योपेतान्न त्वं नोऽस्मान् vअरम् अलं संपूर्णं vभक्षाय भक्षणाय vगम्याः गच्छ संनिहितो भव ॥

यदपामोषधीनां परिशमारिशामहे। वातापे पीव इद्भव ॥ ८ ॥

यत्। अपाम्। ओषधीनाम्। परिशम्। आऽरिशामहे। वातापे। पीवः। इत्। भव ॥८॥

vयत् येन vअपामोषधीनां संबन्धि vपरिशं परिलेशं परितः सुखकरमन्नम् vआरिशामहे आस्वादयामः भक्षयामः तेन अन्नोदकसारेण हे vवातापे। वातेन प्राणेन आप्नोति स्वनिर्वाहमिति वातेनाप्यायत इति वा वातापि शरीरम्। हे शरीर त्वं vपीव vइत् आप्यायित एव vभव। अन्नोदकाभ्यां शरीरवृद्धिः प्रसिद्धा। यद्वा। यद्यपि अपामोषधीनां परिशं लेशमास्वादयामः तथापि हे वातापे वातवत्सर्वव्यापक पितो त्वम् अल्पमपि पीवः पीवानेव भव ॥

ऋ. १३८

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

यत्ते सोम गवाशिरो यवाशिरो भजामहे । वातापे पीव इद्भव ॥ ९ ॥

यत् । ते । सोम । गोऽआशिरः । यवऽआशिरः । भजामहे । वातापे । पीवः । इत् । भव ॥९॥

पूर्वम् अन्नसामान्येन स्तुत्वा इदानीं सोमलक्षणमन्नं स्तौति । हे vसोम vते तव vयत् यम् अंशं vगवाशिरः गोविकारक्षीराद्याश्रयणद्रव्यं vयवाशिरः यवविकाराश्रयणद्रव्यं vभजामहे[1] सेवामहे तेन हे vवातापे शरीर vपीवः vभव[1] ॥

करम्भ ओषधे भव पीवो वृक्क उदारथिः । वातापे पीव इद्भव ॥ १० ॥

करम्भः । ओषधे । भव । पीवः । वृक्कः । उदारथिः । वातापे । पीवः । इत् । भव ॥ १० ॥

vकरम्भः यः करम्भादिरूपः सक्तुपिण्डोऽस्ति तदात्मक हे vओषधे त्वं vपीवः स्थौल्यवान् vवृक्कः व्याधेर्वर्जयिता vभव । vउदारथिः ऊर्ध्वगमः[2] इन्द्रियाणामुद्दीपयिता भव । शिष्टो गतः ॥

तं त्वा वयं पितो वचोभिर्गावो न हव्या सुषूदिम ।
देवेभ्यस्त्वा सधमादमस्मभ्यं त्वा सधमादम् ॥ ११ ॥

तम् । त्वा । वयम् । पितो इति । वचःऽभिः । गावः । न । हव्या । सुसूदिम ।
देवेभ्यः । त्वा । सधऽमादम् । अस्मभ्यम् । त्वा । सधऽमादम् ॥ ११ ॥

हे vपितो अन्न सोमरूप vतं तादृशं स्तुतं vत्वा त्वां महानुभावं vवचोभिः स्तुतिवाग्भिः vवयं vसुषूदिम क्षारयामो रसान् । तत्र दृष्टान्तः । vगावो vन vहव्या गाव इव हवींष्युत्पादयन्ति तथा त्वत्सकाशात् सोमं सुषूदिम । किमर्थं कीदृशं च इति चेत् उच्यते । vदेवेभ्यः इन्द्रादिभ्यः तदर्थं vसधमादं तेषां सह मादयितारम् । न केवलं देवेभ्य एव किंतु vसधमादम् अस्माभिः सह मादयितारं हुतशेषरूपं vत्वा त्वाम् vअस्मभ्यम् अस्मदर्थमपि ॥ ॥ ७ ॥

'समिद्धो अद्य' इत्येकादशर्चं नवमं सूक्तमागस्त्यं सर्वं[3] गायत्रम् । समिद्धाग्नितनूनपादादयः एकादश प्रस्तृचं देवताः। यास्केन 'किंदेवताः प्रयाजाः' इत्युपक्रम्य 'आग्नेयाः प्रयाजा ऋतुदेवताश्छन्दोदेवताः पशुदेवताः प्राणदेवताः आत्मदेवताः' इत्यादिना बहून् पक्षानुपन्यस्य ब्राह्मणानि च प्रदर्श्य आग्नेया एव इति सिद्धान्तितम् ( निरु. ८. २२ ) । 'समिद्ध आप्रियः' इत्यनुक्रान्तम् । पशौ अगस्त्यानामेकादशप्रयाजरूपम् इदमाप्रीसूक्तम् ॥

---

१. झ–झ १–भजामहे वातापे पीतो ( झ-पीवो ) यद्वा तेनांशेन वातापे उक्तस्वरूपशरीर पीवो भव । २. क-झ–ऊर्ध्वगमनसाधनः । ३. ख-ज-ञ-झ-त-फ–पूर्वम् ; झ १–पूर्वत्र गायत्रं त्वित्युक्तत्वात् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

समिद्धो अद्य राजसि देवो देवैः सहस्रजित्। दूतो हव्या कविर्वह ॥ १ ॥

सम्ऽइद्धः। अद्य। राजसि। देवः। देवैः। सहस्रऽजित्। दूतः। हव्या। कविः। वह ॥१॥

हे अग्ने [v]देवैः व्यवहर्तृभिर्ऋत्विग्भिः [v]समिद्धः सम्यग्दीपितः [v]देवः अत एव दीप्यमानः समिद्धैः[1] वा देवैः सहितः समिद्धः सन् [v]अद्य अस्मिन् यागदिने [v]राजसि ईशिषे। हे [v]सहस्रजित् सहस्रस्य धनस्य एतत्संख्याकानां शत्रूणां वा जेतः ततः [v]दूतः देवानां दूतः तद्यज्ञादिवार्ताहरः आह्वाता वा। 'अग्निर्देवानां दूत आसीत्' (तै. सं. २. ५. ८. ५) इति श्रुतेः। [v]कविः क्रान्तदर्शी ईदृशस्त्वं [v]हव्या अस्मदीयानि हवींषि [v]वह देवेभ्यः प्रापय ॥

तनूनपाद्घृतं यते मध्वा यज्ञः समज्यते। दधत्सहस्रिणीरिषः ॥ २ ॥

तनूऽनपात्। घृतम्। यते। मध्वा। यज्ञः। सम्। अज्यते। दधत्। सहस्रिणीः। इषः ॥२॥

[v]तनूनपात् यज्ञशरीरस्य नपातयिता। यद्वा। आपोऽत्र तन्व उच्यन्ते इत्युक्तत्वात् अपां नपातयिता तासां नप्ता वा। अद्भ्य ओषधयः ओषधीभ्योऽग्निरिति नप्तृत्वम्। [v]यज्ञः पूज्यः। यज्ञनिर्वाहकत्वाद्वा यज्ञः। ईदृशोऽग्निः [v]घृतं यज्ञं [v]यते गच्छते अनुतिष्ठते। यजमानाय तदभिमतार्थम्। [v]मध्वा मधुरेणाज्यसोमादिद्रव्येण [v]समज्यते। किं कुर्वन् अयम्। [v]सहस्रिणीः एतत्संख्याकान् [v]इषः अन्नानि [v]दधत् यजमानेभ्यो धारयन्॥

आजुह्वानो न ईड्यो देवाँ आ वक्षि यज्ञियान्।
अग्ने सहस्रसा असि ॥ ३ ॥

आऽजुह्वानः। नः। ईड्यः। देवान्। आ। वक्षि। यज्ञियान्। अग्ने। सहस्रऽसाः। असि ॥३॥

हे [v]अग्ने [v]आजुह्वानः अस्माभिराहूयमानः सन् [v]ईड्यः अस्माभिः स्तुत्यः इष्नामकः[2] त्वं [v]नः अस्मदर्थं [v]यज्ञियान् यज्ञभाजः [v]देवान् [v]आ [v]वक्षि आवह। हे अग्ने त्वं [v]सहस्रसा [v]असि अपरिमितधनस्य दातासि ॥

प्राचीनं बर्हिरोजसा सहस्रवीरमस्तृणन्। यत्रादित्या विराजथ ॥ ४ ॥

प्राचीनम्। बर्हिः। ओजसा। सहस्रऽवीरम्। अस्तृणन्। यत्र। आदित्याः। विऽराजथ ॥४॥

[v]प्राचीनं प्रागग्रं [v]सहस्रवीरं सहस्रसंख्याका वीराः शत्रूणां विशेषेण ईरयितारो देवाः यस्य तत्तादृक्। यद्वा। अपरिमितवीराः पुत्रादयो येन तादृक्। [v]बर्हिः [v]ओजसा मन्त्रलक्षणबलेन उपेताः ऋत्विजः [v]अस्तृणन् आच्छादयन्। [v]यत्र यस्मिन् बर्हिषि [v]आदित्याः अदितेः पुत्राः यूयं [v]विराजथ विविधं राजध्वे तद्बर्हिः अस्तृणन्॥

---

१. ऋ१–प्रसिद्धैः। २. ख-फ–एतन्नामको देवः।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

विराट् सम्राड्विभ्वीः प्रभ्वीर्बह्वीश्च भूयसीश्च याः । दुरो घृतान्यक्षरन् ॥ ५ ॥

विऽराट् । सम्ऽराट् । विऽभ्वीः । प्रऽभ्वीः । बह्वीः । च । भूयसीः । च । याः ।

दुरः । घृतानि । अक्षरन् ॥ ५ ॥

vविराट् ॥ विशेषेण राजन्त इति व्यत्ययेनैकवचनम् ॥ vसम्राट् सम्यगिति पूज्यतरं राजमानाः ॥ अत्रापि व्यत्ययेनैकवचनम् ॥ vविभ्वीः विभ्व्यो विविधं भवित्र्यः vप्रभ्वीः प्रभ्व्यः प्रकर्षेण भवित्र्यः vबह्वीः बह्व्यः vभूयसीः लोकप्रसिद्धसंख्याभिः vच भूयस्यश्च vयाः vदुरः यज्ञगृहद्वारः सन्ति ताः vघृतानि उदकानि प्राप्युपकारार्थम् vअक्षरन् क्षरन्ति । यद्वा । बह्वीर्भूयसीरित्येते संख्यावचने । शिष्टानि तासां नामधेयानि ॥ ॥ ८ ॥

सुरुक्मे हि सुपेशसाधि श्रिया विराजतः । उषासावेह सीदताम् ॥ ६ ॥

सुरुक्मे इति सुऽरुक्मे । हि । सुऽपेशसा । अधि । श्रिया । विऽराजतः ।

उषसौ । आ । इह । सीदताम् ॥ ६ ॥

vसुरुक्मे शोभनदीप्ताभरणे प्रसिद्धे vसुपेशसा शोभनरूपे ईदृश्यौ अहोरात्रदेवते vअधि अधिकं vश्रिया सौन्दर्येण vविराजतः विशेषेण दीप्येते ॥ हियोगादनिघातः ॥ तादृश्यौ vउषसौ । एतत् रात्रेरप्युपलक्षणम् । उषःशब्दो दिवसस्योपलक्षकः । रात्रिरुषाश्च उभे vइह अस्मिन् दिने vआ vसीदताम् आगत्य तिष्ठताम् आगच्छतां वा ॥

प्रथमा हि सुवाचसा होतारा दैव्या कवी । यज्ञं नो यक्षतामिमम् ॥ ७ ॥

प्रथमा । हि । सुऽवाचसा । होतारा । दैव्या । कवी इति । यज्ञम् । नः । यक्षताम् । इमम् ॥ ७ ॥

vप्रथमा । मुख्यनामैतत् । प्रतमौ प्रकृष्टतमौ । हिः प्रसिद्धौ । vसुवाचसा प्रियवचनौ vदैव्या देवार्हौ vहोतारा देवानामाह्वातारौ होमनिष्पादकौ वा vकवी मेधाविनौ एतौ vनः अस्मदीयम् vइमं vयज्ञं vयक्षतां यजतां गच्छतां वा ॥

भारतीळे सरस्वति या वः सर्वा उपब्रुवे । ता नश्चोदयत श्रिये ॥ ८ ॥

भारति । इळे । सरस्वति । याः । वः । सर्वाः । उपऽब्रुवे । ताः । नः । चोदयत । श्रिये ॥ ८ ॥

हे vभारति । भरतः आदित्यः । तस्य संबन्धिनी भारती । तादृशि द्युलोकदेवते हे vइळे भूदेवि हे vसरस्वति । सरः[1] वागुदकं[2] वा । तद्वत्यन्तरिक्षदेवते तादृशि देवि । एताः क्षित्यादिदेवताः । एता-

---

१. झ१–सरतीति सरः । २. क-ज्ञ-झ-झ१-त–वायुरुदकम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

स्तिस्र आदित्यप्रभावविशेषरूपा इत्याहुः । vयाः तिस्रः vसर्वाः vवः युष्मान् vउपब्रुवे उपेत्य स्तौमि vताः यूयं vनः अस्मान् vश्रिये संपदे vचोदयत प्रेरयत ॥

त्वष्टा॑ रू॒पाणि॒ हि प्र॒भुः प॒शून्विश्वा॑न्त्समान॒जे । तेषां॑ नः स्फा॒तिमा य॑ज ॥९॥

त्वष्टा॑ । रू॒पाणि॑ । हि । प्र॒ऽभुः । प॒शून् । विश्वा॑न् । स॒म्ऽआ॒न॒जे ।

तेषा॑म् । नः॒ । स्फा॒तिम् । आ । य॒ज ॥ ९ ॥

vत्वष्टा यज्ञसाधनपात्राभिमानी देवः vरूपाणि योनौ सृष्टानि रेतांसि रूपाणि कर्तुं vप्रभुः vहि । हिशब्दः श्रुत्यन्तरप्रसिद्धिद्योतनार्थः । ' यावच्छो वै रेतसः सिक्तस्य ', ' त्वष्टा रूपाणि विकरोति ' ( तै. सं. १. ५. ९. १-२ ) इति श्रुतेः । स देवः vविश्वान् सर्वानपि vपशून् अस्मदीयान् गवादिकान् vसमानजे सम्यगनक्ति व्यक्तीकरोति ॥ संपूर्वादनक्तेर्लिटि ' तस्मात् नुड् ' इति नुट् ॥ अथ प्रत्यक्षः । vतेषाम् अक्तानां पशूनां vस्फातिं वृद्धिं vनः अस्मदर्थम् vआ vयज सर्वतः पूजय कुर्वित्यर्थः ॥

उप॒ त्मन्या॑ वनस्पते पाथो॑ दे॒वेभ्य॑ः सृज । अ॒ग्निर्ह॒व्यानि॑ सिष्वदत् ॥ १० ॥

उप॑ । त्मन्या॑ । व॒न॒स्प॒ते॒ । पाथः॑ । दे॒वेभ्यः॑ । सृ॒ज॒ । अ॒ग्निः । ह॒व्यानि॑ । सि॒स्व॒द॒त् ॥१०॥

हे vवनस्पते यूपाभिमानिदेव vत्मन्या आत्मनैव vदेवेभ्यः अग्न्यादिभ्यः vपाथः पशुरूपमन्नम् vउप vसृज उत्पादय । यूपाभावे पशुनियोजनाभावेन हविषोऽभावात् । त्वयि एवं कृतवति सति vअग्निः vहव्यानि हवींषि vसिस्वदत् स्वदयतु स्वादूकरोतु ॥

पु॒रो॒गा अ॒ग्निर्दे॒वानां॑ गाय॒त्रेण॒ सम॑ज्यते । स्वाहा॑कृतीषु रोचते ॥ ११ ॥

पु॒रः॒ऽगाः । अ॒ग्निः । दे॒वाना॑म् । गा॒य॒त्रेण॑ । सम् । अ॒ज्य॒ते॒ । स्वाहा॑ऽकृतीषु । रो॒च॒ते॒ ॥११॥

अयम् vअग्निः vदेवानां vपुरोगाः असुरयुद्धं प्रति पुरोगामी । यद्वा । देवानां मध्ये यज्ञं प्रति अग्निरेव पुरोगामी । अत एव अग्रणीत्वादेव अग्निशब्दो निष्पन्नः । ' अग्निः कस्मादग्रणीर्भवति ' ( निरु. ७. १४ ) इति निरुक्तम् । तादृशोऽयं vगायत्रेण एतदुपलक्षितेन मन्त्रेण vसमज्यते सम्यग्लक्ष्यते । vस्वाहाकृतीषु स्वाहाकारेषु सत्सु हविःषु दीयमानेषु vरोचते अत्यर्थं दीप्यते । एताः प्रयाजदेवताः यज्ञावयवाभिमानिन्यः । तद्द्वारा यज्ञ एव स्तूयते इति केषांचित् मतम् । अग्नेरेव नामान्तरमित्यन्ये ॥ ॥ ९ ॥

' अग्ने नय ' इति दशमं सूक्तम् अष्टर्चमागस्त्यं त्रैष्टुभमाग्नेयम् । ' अग्ने नयाष्टावाग्नेयम् ' इत्यनुक्रमणिका । प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभच्छन्दसि विनियोगः । ' अथैतस्याः ' इत्यत्र ' अग्ने नयाग्ने बृहन्नित्यष्टानामुत्तमादुत्तमास्तिस्र उद्धरेत् ' ( आश्व. श्रौ. ४. १३ ) इति सूत्रितत्वात् । अत्र शौनकः—' उत्पथप्रतिपन्नो यो भ्रष्टो वापि पथः क्वचित् । पन्थानं प्रतिपद्येत कृत्वा वा कर्म गर्हितम् ॥ अग्ने नयेति सूक्तेन प्रत्यृचं जुहुयाद्धृतम् । जपेच्च प्रयतो नित्यमुपतिष्ठेत वानलम् ' (ऋग्वि. १. १५१-१५३) इति ॥ आद्याश्चतस्रः श्रवणाकर्मणि विनियुक्ताः । ' श्रावण्यां पौर्णमास्याम् '

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

इत्यत्र सूत्रितम्–' अग्ने नय सुपथा राये अस्मानिति चतसृभिः प्रत्यृचं हुत्वा ' ( आश्व. गृ. २.१.४ ) इति । आग्नेये पशौ वपापुरोडाशयोराद्ये द्वे अनुवाक्ये । तथा च सूत्रितम्–' अग्ने नय सुपथा राये अस्मान् पाहि नो अग्ने पायुभिरजस्रैः ' ( आश्व. श्रौ. ३. ७ ) इति । आद्या प्रायणीयेष्टौ आग्नेयस्यानुवाक्या । सैव उदयनीये याज्या । ' तदहः प्रायणीयेष्टिः ' इत्यत्र सूत्रितम्–' अग्ने नय सुपथा राये अस्माना देवानामपि पन्थामगन्म ' ( आश्व. श्रौ. ४. ३ ) इति । विपरीताश्च याज्यानुवाक्या इति च ॥

**अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।**
**युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ १ ॥**

अग्ने । नय । सुऽपथा । राये । अस्मान् । विश्वानि । देव । वयुनानि । विद्वान् ।
युयोधि । अस्मत् । जुहुराणम् । एनः । भूयिष्ठाम् । ते । नमःऽउक्तिम् । विधेम ॥ १ ॥

हे ᵛअग्ने अङ्गनादिगुणविशिष्ट ᵛदेव द्योतमान ᵛविश्वानि ᵛवयुनानि सर्वाणि प्रज्ञानानि । अनेन एतदनुष्ठितमिदं प्रायणीयमिति यदेतज्ज्ञानमस्ति तद्विद्वानित्यर्थः । यतः ᵛविद्वान् अतस्त्वम् ᵛअस्मान् ᵛसुपथा शोभनेन मार्गेण ᵛराये गन्तव्याय स्वर्गादिधनाय । द्वितीयार्थे वा चतुर्थी । प्रापणीयं रयिं प्रति ᵛनय । तदर्थं ᵛजुहुराणं कुटिलकारि ᵛएनः पापं फलप्रतिबन्धरूपम् ᵛअस्मत् अस्मत्तः ᵛयुयोधि पृथक्कुरु । ᵛते तव वयं ᵛभूयिष्ठाम् अतिप्रवृद्धां ᵛनमउक्तिं नमस्कारोक्तिं स्तुतिं ᵛविधेम परिचरेम कुर्मः ॥

आयुष्कामेष्ट्याम् ' अग्ने त्वं पारय ' इति द्वे स्विष्टकृतो याज्ये ' पाहि नः ' इति चतुर्थ्यनुवाक्या । ' पाहि नो अग्ने पायुभिरजस्रैरग्ने त्वं पारया नव्यो अस्मानिति संयाज्ये ' ( आश्व. श्रौ. २. १० ) इति सूत्रितम् । एते एव स्वस्त्ययन्यामपि संयाज्ये इति सूत्रितत्वात् ॥

**अग्ने त्वं पारया नव्यो अस्मान्त्स्वस्तिभिरति दुर्गाणि विश्वा ।**
**पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शं योः ॥ २ ॥**

अग्ने । त्वम् । पारय । नव्यः । अस्मान् । स्वस्तिऽभिः । अति । दुःऽगानि । विश्वा ।
पूः । च । पृथ्वी । बहुला । नः । उर्वी । भव । तोकाय । तनयाय । शम् । योः ॥ २ ॥

हे ᵛअग्ने ᵛत्वं ᵛनव्यः नवतरः स्तुत्यो वा त्वम् ᵛअस्मान् यागानुष्ठातॄन् ᵛअति ᵛपारय कर्म समापय्य अतिपारय अतिक्रामय । केन साधनेन । ᵛस्वस्तिभिः । अस्तिरभिपूजितः । सुशब्दः शोभनवचनः । अत्यन्तं पूजितैर्यज्ञादिसाधनैः । कानि । ᵛदुर्गाणि दुर्गमनानि पापानि । अनतिक्रमणीयानि दुरितान्यानि अतिपारय । किंच ᵛनः अस्माकं ᵛपृथ्वी पृथुतरा ᵛपूश्च पुरी अपि भवत्विति शेषः । चशब्दो वक्ष्यमाणेन सह समुच्चयार्थः । पूरिति जात्येकवचनम् । पुराण्यपि भवन्त्वित्यर्थः । तथा नः अस्माकम् ᵛउर्वी पृथ्वी अपि बहुतरा भवतु । त्वं तु ᵛतोकाय अपत्याय ᵛतनयाय पुत्राय । तोकशब्दोऽपत्यसामान्य-

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

वचनः । तनयशब्दः पुत्रवचनः । ᵛशं सुखं ᵛयोः मिश्रयिता ᵛभव । यद्वा । रोगाणां शमनं भयानां यावनं च भव कुर्वित्यर्थः ॥

अग्ने त्वमस्मद्युयोध्यमीवा अनग्नित्रा अभ्यमन्त कृष्टीः ।
पुनरस्मभ्यं सुविताय देव क्षां विश्वेभिरमृतेभिर्यजत्र ॥ ३ ॥

अग्ने । त्वम् । अस्मत् । युयोधि । अमीवाः । अनग्निऽत्राः । अभि । अमन्त । कृष्टीः ।
पुनः । अस्मभ्यम् । सुविताय । देव । क्षाम् । विश्वेभिः । अमृतेभिः । यजत्र ॥ ३ ॥

हे ᵛअग्ने ᵛत्वम् ᵛअमीवाः रोगान् ᵛअस्मत् अस्मत्तः ᵛयुयोधि व्यावर्तय । याः ᵛअनग्नित्राः अग्निना अपालिताः ᵛकृष्टीः प्रजाः ᵛअभ्यमन्त अभिमिमतेऽस्मान् ॥ यच्छब्दाध्याहारादनिघातः ॥ ताः युयोधि । यद्वा । ता अनग्नित्राः पापिन्यः कृष्टयः प्रजा अभ्यमन्त । त्वया अभ्यमितुमभितो रोगैः प्रापयितुमर्हन्ति । वयं तु न तादृशाः । अतोऽस्मत्तो वियोजयेत्यर्थः । न केवलं वियोगमात्रं अपि तु पुनःपुनरिदं कर्तव्यम् । ᵛअस्मभ्यम् अस्मदर्थं ᵛसुविताय शोभनफलाय हे ᵛयजत्र यष्टव्य ᵛदेव द्योतमानाग्ने ᵛविश्वेभिरमृतेभिः सर्वैरमरणधर्मभिः अन्यैर्यष्टव्यैर्देवैः सह ᵛक्षां पृथिवीं देवयजनलक्षणाम् आगच्छेति शेषः ॥

'पाहि नः' इत्यस्या विनियोगद्वयम् 'अग्ने त्वं पारय' इत्यत्रोक्तम् । तथाग्नेयपशावेषैव हविषोऽनुवाक्या । तथा च सूत्रितं—'पाहि नो अग्ने पायुभिरजस्रैः प्र वः शुक्राय भानवे भरध्वम्' ( आश्व. श्रौ. ३. ७ ) इति ॥

पाहि नो अग्ने पायुभिरजस्रैरुत प्रिये सदन आ शुशुक्कान् ।
मा ते भयं जरितारं यविष्ठ नूनं विदन्मापरं सहस्वः ॥ ४ ॥

पाहि । नः । अग्ने । पायुऽभिः । अजस्रैः । उत । प्रिये । सदने । आ । शुशुक्कान् ।
मा । ते । भयम् । जरितारम् । यविष्ठ । नूनम् । विदत् । मा । अपरम् । सहस्वः ॥ ४ ॥

हे ᵛअग्ने ᵛनः अस्मान् ᵛअजस्रैः अनवरतैरविच्छिन्नैः ᵛपायुभिः पालनप्रकारैः ᵛपाहि पालय । ᵛउत अपि च ᵛप्रिये ᵛसदने तव प्रियभूते यागगृहे ᵛआ सर्वतः ᵛशुशुक्कान् दीप्यमानो भवेति शेषः । किंच हे ᵛयविष्ठ युवतम ᵛते तव ᵛजरितारं गरितारं स्तोतारं मां ᵛनूनम् अद्य ᵛभयं ᵛमा ᵛविदत् मा लभतां मा आप्नोतु । हे ᵛसहस्वः बलवन्नग्ने ᵛअपरम् अपरस्मिन्काले भयं ᵛमा विदत् । अपरं मदन्यं वा मा विदत् ॥

अच्युताय भौमाय एककपालपुरोडाशहोमे 'मा नो अग्ने' इत्यनया आशयमभिजुहोति । तथा च सूत्रितं—'मा नो अग्नेऽव सृजो अघायेत्येनमाशयेनाभिजुहोति' ( आश्व. गृ. २. १. ६ ) इति ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

**मा नो अग्नेऽव सृजो अघायाविष्यवे रिपवे दुच्छुनायै ।**
**मा दत्वते दशते मादते नो मा रीषते सहसावन्परा दाः ॥ ५ ॥**

मा । नः । अग्ने । अव । सृजः । अघाय । अविष्यवे । रिपवे । दुच्छुनायै ।
मा । दत्वते । दशते । मा । अदते । नः । मा । रिषते । सहसाऽवन् । परा । दाः ॥ ५ ॥

हे ᵛअग्ने ᵛनः अस्मान् ᵛअघाय हिंसकाय ᵛअविष्यवे । अविष्यतिरत्तिकर्मा । अन्नेच्छवे ᵛदुच्छुनायै । शुनं सुखम् । दुष्टसुखकारिणे । दुःखकारिणे इत्यर्थः । तस्मै ᵛरिपवे ᵛमा ᵛअव ᵛसृजः मा त्याक्षीः तदधीनं मा कुर्वित्यर्थः । तथा नः अस्मान् ᵛदत्वते दन्तवते ᵛदशते खादते सर्पादये ᵛमा अव सृजः । तथा ᵛनः अस्मान् ᵛअदते अदन्तकाय श्रृङ्गादिभिर्घातिने ᵛमा अव सृजः । तथा ᵛरिषते हिंसकाय तस्कररक्षसादये हे ᵛसहसावन् सहस्विन् ᵛमा ᵛपरा ᵛदाः पराभूतं मा देहि सर्वथा न देहीत्यर्थः ॥ ॥१०॥

**वि घ त्वावाँ ऋतजात यंसद्गृणानो अग्ने तन्वे३ वरूथम् ।**
**विश्वादरिरिक्षोरुत वा निनित्सोरभिह्रुतामसि हि देव विष्पट् ॥ ६ ॥**

वि । घ । त्वाऽवान् । ऋतऽजात । यंसत् । गृणानः । अग्ने । तन्वे । वरूथम् ।
विश्वात् । रिरिक्षोः । उत । वा । निनित्सोः । अभिऽह्रुताम् । असि । हि । देव । विष्पट् ॥६॥

हे ᵛऋतजात यज्ञार्थमुत्पन्न ᵛअग्ने ᵛवरूथं वरणीयं त्वां ᵛतन्वे शरीरपोषाय ᵛगृणानः स्तुवन् ᵛत्वावान् त्वया देवतया तद्वान् जनः ᵛवि ᵛघ ᵛयंसत् विमुञ्चति खलु आत्मानम् । कस्मात्सकाशात् । ᵛरिरिक्षोः हिंसितुमिच्छोश्चोरादेः सकाशात् । ᵛउत ᵛवा अथवा ᵛनिनित्सोः निन्दितुमिच्छतः । हे ᵛदेव ᵛअभिह्रुताम् आभिमुख्येन कुटिलं कुर्वतां द्विषां ᵛविष्पट् विशेषेण बाधकः ᵛअसि ᵛहि । अतः त्वदनुग्रहात् अयं जनो वि यंसत् ॥

**त्वं ताँ अग्न उभयान्वि विद्वान्वेषि प्रपित्वे मनुषो यजत्र ।**
**अभिपित्वे मनवे शास्यो भूर्मर्मृजेन्य उशिग्भिर्नाक्रः ॥ ७ ॥**

त्वम् । तान् । अग्ने । उभयान् । वि । विद्वान् । वेषि । प्रऽपित्वे । मनुषः । यजत्र ।
अभिऽपित्वे । मनवे । शास्यः । भूः । मर्मृजेन्यः । उशिक्ऽभिः । न । अक्रः ॥ ७ ॥

हे ᵛयजत्र यष्टव्य ᵛअग्ने ᵛत्वं ᵛतान् यष्टॄनयष्टॄंश्च ᵛउभयान् ᵛमनुषः मनुष्यान् विविच्य ᵛविद्वान् जानन् ᵛप्रपित्वे संनिहिते एव काले ᵛवेषि कामयसे यष्टॄन् । तथा कुर्वन् ᵛअक्रः आक्रमिता त्वं ᵛमनवे । षष्ठ्यर्थे चतुर्थी । मनुष्यस्य यजमानस्य ᵛअभिपित्वे अभिप्राप्तकालेऽभिगमनवति यज्ञे वा ᵛशास्यः ᵛभूः शिक्षणीयो भव । इदं कुरु इदं कुरु इति विधेयो भव । ᵛमर्मृजेन्यः शोधयिता यजमानः ᵛउशिग्भिः कामयमानैर्ऋत्विग्भिरिव ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अवोचाम निवचनान्यस्मिन्मानस्य सूनुः सहसाने अग्नौ ।
वयं सहस्रमृषिभिः सनेम विद्यामेषं वृजनं जीरदानुम् ॥ ८ ॥

अवोचाम । निऽवचनानि । अस्मिन् । मानस्य । सूनुः । सहसाने । अग्नौ ।
वयम् । सहस्रम् । ऋषिऽभिः । सनेम । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ ८ ॥

वयम् vअस्मिन् अग्नौ vनिवचनानि नियमपूर्वकाणि वचांसि स्तोत्ररूपाणि vअवोचाम ब्रूमः । अग्निर्विशेष्यते । vमानस्य vसूनुः । मीयत इति मानो मन्त्रः । तस्य सूनुरग्निः मन्त्रेण उत्पद्यमानत्वात्[1] । सप्तम्यर्थे प्रथमा । मानस्य सूनौ vसहसाने शत्रूणामभिभवितरि vअग्नौ अवोचाम । vवयम् एभिः vऋषिभिः अतीन्द्रियार्थप्रकाशकैर्मन्त्रैः साधनैः vसहस्रम् अपरिमितं धनं vसनेम संभजेमहि । विद्याम इति गतम् ॥ ॥ ११ ॥

' अनर्वाणम् ' इत्यष्टर्चमेकादशं सूक्तमागस्त्यं बार्हस्पत्यं त्रैष्टुभम् । ' अनर्वाणं बार्हस्पत्यम् ' इत्यनुक्रान्तम् । श्रौतविनियोगो लैङ्गिकः । अत्र शौनकः—' स्नात्वा जपेदनर्वाणं नमस्कृत्य बृहस्पतिम् । वीरान् धनं च प्राप्नोति सोऽश्लोक्यं च नियच्छति ' ( ऋग्वि. १. १५३-१५४ ) इति ॥

अनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः ।
गाथान्यः सुरुचो यस्य देवा आशृण्वन्ति नवमानस्य मर्ताः ॥ १ ॥

अनर्वाणम् । वृषभम् । मन्द्रऽजिह्वम् । बृहस्पतिम् । वर्धय । नव्यम् । अर्कैः ।
गाथान्यः । सुऽरुचः । यस्य । देवाः । आऽशृण्वन्ति । नवमानस्य । मर्ताः ॥ १ ॥

हे होतः vनव्यं नवतरं स्तुत्यं वा तम् vअनर्वाणम् अगन्तारम् । स्तोतुरधीनमित्यर्थः । vवृषभम् अपां फलानां वर्षितारं vमन्द्रजिह्वं मादकवाचं vबृहस्पतिं मन्त्रस्य पालयितारमेतन्नामकं देवम् vअर्कैः अर्चनसाधनैर्मन्त्रैः vवर्धय प्रवृद्धं कुरु । vसुरुचः शोभनदीप्तेः vनवमानस्य स्तूयमानस्य ॥ कर्मणि कर्तृप्रत्ययः ॥ vयस्य बृहस्पतेः ॥ कर्मणि षष्ठ्यः ॥ रोचमानं स्तूयमानं vगाथान्यः । गाथेति वाङ्नाम । स्तुतिवचसो नेतारः vदेवाः व्यवहर्तारः vमर्ताः मनुष्याः होत्रादयः । यद्वा । नवमानस्य स्तुवानस्य यजमानस्य संबन्धिनस्ते । vआशृण्वन्ति आश्रावयन्ति पुरा तं बृहस्पतिं वर्धय । अत्र ' अनर्वाणमप्रत्यृतमन्यस्मिन् ' ( निरु. ६. २३ ) इत्यादि निरुक्तं द्रष्टव्यम् ॥

बार्हस्पत्ये पशौ ' तमृत्वियाः ' इत्येषा वपायाज्या । सूत्रितं च—' बृहस्पते अति यदर्यो अर्हात्-मृत्विया उप वाचः सचन्ते ' ( आश्व. श्रौ. ३. ७ ) इति ॥

---

१. क-ज्ञ१-फ—उत्पाद्यमानत्वात् ।



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

तमृत्वियो उप वाचः सचन्ते सर्गो न यो देवयतामसर्जि ।
बृहस्पतिः स ह्यञ्जो वरांसि विभ्वाभवत्समृते मातरिश्वा ॥ २ ॥

तम् । ऋत्वियाः । उप । वाचः । सचन्ते । सर्गः । न । यः । देवऽयताम् । असर्जि ।
बृहस्पतिः । सः । हि । अञ्जः । वरांसि । विऽभ्वा । अभवत् । सम् । ऋते । मातरिश्वा ॥२॥

ᵛतं बृहस्पतिम् ᵛऋत्विया वर्षर्तुसंबन्धिन्यः ᵛवाचः माध्यमिकाः ᵛउप ᵛसचन्ते समीपे सेवन्ते । ᵛयः ᵛसर्गो ᵛन उदकस्य स्रष्टापि । नशब्दोऽप्यर्थे । ᵛदेवयतां देवानिच्छतां यजमानानाम् ᵛअसर्जि फलम् । यद्वा । देवं तमिच्छतां मनुष्याणाम् असर्जि सृष्टवान्वृष्ट्युदकम् । यद्वा । ऋत्वियाः प्रावृट्कालीना वाचः होत्रादिप्रेरिता वाचः उप सचन्ते तं यः सर्गो न उदकसृष्टिरिव । ᵛसः स एव ᵛबृहस्पतिः ᵛअञ्जः ᵛहि व्यञ्जकः खलु । तस्मिन् वर्षति सर्वे भवन्ति[1] । अत एव ᵛविभ्वा विभुर्व्याप्तः ᵛमातरिश्वा वृष्टिनिर्मातरि अन्तरिक्षे चेष्टमानो वायुसदृशो वा ᵛवरांसि वरणीयानि वृष्ट्यादिफलानि संपादयन् ᵛऋते उदके निमित्तभूते सति ᵛसम् ᵛअभवत् संभूतः । अथवा । अञ्जो यज्ञियानां व्यञ्जकः[2] मातरिश्वा फलस्य निर्मातरि यज्ञे श्वसिता वर्तमानः स बृहस्पतिर्ऋते यज्ञे निमित्तभूते सति वरांसि वरणीयानि हवींषीच्छन् विभ्वा विभुः समभवत् ॥

उपस्तुतिं नमस उद्यतिं च श्लोकं यंसत्सवितेव प्र बाहू ।
अस्य क्रत्वाहन्यो३ यो अस्ति मृगो न भीमो अरक्षसस्तुविष्मान् ॥ ३ ॥

उपऽस्तुतिम् । नमसः । उत्ऽयतिम् । च । श्लोकम् । यंसत् । सविताऽइव । प्र । बाहू इति ।
अस्य । क्रत्वा । अहन्यः । यः । अस्ति । मृगः । न । भीमः । अरक्षसः । तुविष्मान् ॥३॥

अयं बृहस्पतिः ᵛउपस्तुतिं यजमानेनोपेत्य क्रियमाणां स्तुतिं ᵛनमसः हविर्लक्षणस्यान्नस्य ᵛउद्यतिम् उद्गारं ᵛच ᵛश्लोकम् अन्यो यो मन्त्रविशेषोऽस्ति तं च ᵛप्र ᵛयंसत् प्रकर्षेण यतते स्वीकर्तुम् । यजमानो वा तत्सर्वं प्रयच्छत्यस्मै । तत्र दृष्टान्तः । ᵛसवितेव सूर्य इव । स यथा स्तोत्रादिकं स्वीकरोति तद्वत । यजमानप्रदानपक्षे सविता सर्वस्य प्रसविता सूर्य इव । स यथा बाहुभ्यः प्रकाशादि प्रयच्छति तद्वत् ᵛबाहू बाहुभ्यां यजमानोऽपीत्यर्थः । तस्य महत्त्वमाह । ᵛअरक्षसः स्वविरोधिरक्षोरहितस्य ᵛअस्य बृहस्पतेः ᵛक्रत्वा कर्मणा सामर्थ्येन ᵛअहन्यः अहि साधुः ᵛयः सूर्यः ᵛअस्ति सः ᵛभीमः ᵛन ᵛमृगः इव भयजनकः सिंहादिरिव भीमो भयहेतुः ᵛतुविष्मान् बलवान् परिभ्रमतीति शेषः । यस्य माहात्म्येन मन्त्राभिमानिनो बृहस्पतेः सामर्थ्यात् मन्देहाद्यसुराज्जित्वातितेजस्वी भवति तादृशो महानुभावो यजमानदत्तं हविरादिकं स्वीकरोतीत्यर्थः ॥

---

१. झ१–व्यक्ता भवन्ति । २. झ१–पदार्थानां व्यञ्जकः ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

अस्य श्लोको दिवीयते पृथिव्यामत्यो न यंसद्यक्षभृद्विचेताः ।
मृगाणां न हेतयो यन्ति चेमा बृहस्पतेरहिमायाँ अभि द्यून् ॥ ४ ॥

अस्य । श्लोकः । दिवि । ईयते । पृथिव्याम् । अत्यः । न । यंसत् । यक्षऽभृत् । विऽचेताः ।
मृगाणाम् । न । हेतयः । यन्ति । च । इमाः । बृहस्पतेः । अहिऽमायान् । अभि । द्यून् ॥ ४ ॥

vअस्य बृहस्पतेः vश्लोकः स्तुत्यात्मिका कीर्तिः गर्जितवाक् वा vदिवि द्योतमाने द्युलोके vपृथिव्यां च vईयते गच्छति व्याप्नोति । यो बृहस्पतिः vअत्यो vन अतनशील आदित्य इव vयक्षभृत् पूजितं हविरादिकं दधानः vविचेताः विविधं चेतयिता प्राणिनां विशिष्टप्रज्ञायुक्तो वा vयंसत् नियच्छति फलम् । किंच vमृगाणां हन्तुमन्विष्यतां vहेतयः vन आयुधानीवास्य vबृहस्पतेः vइमाः हेतयो हिंस्राणि आयुधानि vयन्ति गच्छन्ति vच ॥ ' चवायोगे प्रथमा ' इति न निघातः ॥ vअहिमायान् आगत्य हन्त्र्योऽन्तरिक्षचारिण्यो वा माया येषां वृत्रादीनां तानसुरान् vद्यून् दिवसान् ॥ ' कालाध्वनोः० ' ( पा. सू. २. ३. ५ ) इति द्वितीया ॥ तान्यायुधानि vअभि लक्षयन्ति च ॥ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥

ये त्वा देवोस्रिकं मन्यमानाः पापा भद्रमुपजीवन्ति पज्राः ।
न दूढ्ये अनु ददासि वामं बृहस्पते चयस इत्पियारुम् ॥ ५ ॥

ये । त्वा । देव । उस्रिकम् । मन्यमानाः । पापाः । भद्रम् । उपऽजीवन्ति । पज्राः ।
न । दुःऽध्ये । अनु । ददासि । वामम । बृहस्पते । चयसे । इत् । पियारुम् ॥ ५ ॥

हे vदेव बृहस्पते vये vपापाः पापबुद्धयोऽल्पाः vपज्राः हविर्लक्षणान्नवन्तः पापेन जीर्णा वा नराः vभद्रं कल्याणं vत्वा त्वाम् vउस्रिकम् । उस्रियेति गोनाम । कुत्सितामल्पक्षीरोत्स्राविणीं गां जीर्णमनड्वाहं वा vमन्यमानाः vउपजीवन्ति उपेत्य प्राणन्ति अल्पं याचन्ते इत्यर्थः । vदूढये दुर्धिये ॥ वचनव्यत्ययः ॥ दुर्बुद्धिभ्यस्तेभ्यः vवामं वननीयं धनं vन vअनु vददासि अनुकूलं न वितरसि । हे vबृहस्पते देव vपियारुं सोमपानशीलं सोमेन यष्टारं महाफलरिप्सुं तु vचयसे vइत् गच्छस्येवानुग्रहीतुम् ॥ ' चय गतौ ' इत्यस्येदं रूपम् ॥ यद्वा । हे बृहस्पते पियारुं हिंसकम् ॥ पीयतेर्हिंसाकर्मणः इदं रूपम् ॥ तं प्राणिहिंसकं चयसे इत् । हंस्येव । ' बृहस्पते यच्चातयसि देवपीयुम् ( निरु. ४. २५ ) इति निरुक्तम् ॥ ॥ १२ ॥

सुप्रैतुः सूयवसो न पन्था दुर्नियन्तुः परिप्रीतो न मित्रः ।
अनर्वाणो अभि ये चक्षते नोऽपीवृता अपोर्णुवन्तो अस्थुः ॥ ६ ॥

सुऽप्रैतुः । सुऽयवसः । न । पन्थाः । दुःऽनियन्तुः । परिऽप्रीतः । न । मित्रः ।
अनर्वाणः । अभि । ये । चक्षते । नः । अपिऽवृताः । अपऽऊर्णुवन्तः । अस्थुः ॥ ६ ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

हे बृहस्पते त्वं vसुप्रैतुः सुष्ठु गन्तुर्मनुष्यस्य vसुयवसः शोभनान्नस्य vपन्थाः vन मार्ग इव सुष्ठु यज्ञमार्गगामिनः[1] सुयवसः पन्था इव सुखकारी[1] भवेत्यर्थः । किंच vदुर्नियन्तुः दुःखेन नियमितुः राज्ञः vपरिप्रीतः सर्वप्रकारेण संतुष्टो द्वेषादिरहितः vमित्रः vन सुहृन्मन्त्रीव । स यथा दुर्नयात् निवर्तयति तद्वत् त्वमपि तथा अस्मभ्यं कुर्वित्यर्थः । सखिवत् अमार्गान्निवर्त्य मार्गे यज्ञादिरूपे योजयित्वा तत्रापि फलप्रदो भवेत्यर्थः । किंच vअनर्वाणः अपापाः vये नराः vनः अस्मान् vअभि आभिमुख्येन vचक्षते बोधयन्ति ते vअपीवृताः अज्ञानेनावृता अपि vअपोर्णुवन्तः अपगतावरणवन्तो ज्ञानवन्तः vअस्थुः तिष्ठन्तु । यद्वा । अनर्वाणस्त्वामप्राप्नुवन्तो येऽस्मद्विरोधिनो नोऽस्मानभि चक्षते अभिवदन्ति निन्दन्ति तेऽपीवृता आच्छादिता रक्षिता अपि अपोर्णुवन्तः अपगतरक्षणा भवन्ति ॥

' सं यं स्तुभः ' इत्येषा बार्हस्पत्ये पशौ पुरोडाशस्य याज्या । सूत्रितं च–' सं यं स्तुभोऽवनयो न यन्त्येवा पित्रे ' ( आश्व. श्रौ. ३. ७ ) इति ॥

सं यं स्तुभोऽवनयो न यन्ति समुद्रं न स्रवतो रोधचक्राः ।
स विद्वाँ उभयं चष्टे अन्तर्बृहस्पतिस्तर आपश्च गृध्रः ॥ ७ ॥

सम् । यम् । स्तुभः । अवनयः । न । यन्ति । समुद्रम् । न । स्रवतः । रोधऽचक्राः ।
सः । विद्वान् । उभयम् । चष्टे । अन्तः । बृहस्पतिः । तरः । आपः । च । गृध्रः ॥ ७ ॥

vयं बृहस्पतिं vस्तुभः स्तोत्राणि vअवनयो vन सर्वा अवनयो भूमयो मनुष्या यथा स्वामिनं कर्म प्रति वा vसं vयन्ति संगच्छन्ति तद्वत् तथा vसमुद्रं vरोधचक्राः । नदीनामैतत् । रोधनशीलानि चक्राणि यासु तास्तादृश्यः कूलं क्रममाणाः वा vस्रवतः स्रवन्त्यो नद्यो यथा यन्ति तद्वत् सर्वा अपि स्तुतयो यमेव प्राप्नुवन्ति vगृध्रः गर्धनशीलो वृष्टिमाकाङ्क्षमाणः vसः vबृहस्पतिः vविद्वान् वक्ष्यमाणाभिज्ञः vतरः तरणं जलाभिवृद्धिम् vआपः उदकानि vच vउभयम् vअन्तः मध्ये स्थित्वा vचष्टे पश्यति करोतीत्यर्थः ॥

एवा महस्तुविजातस्तुविष्मान्बृहस्पतिर्वृषभो धायि देवः ।
स नः स्तुतो वीरवद्धातु गोमद्विद्यामेषं वृजनं जीरदानुम् ॥ ८ ॥

एव । महः । तुविऽजातः । तुविष्मान् । बृहस्पतिः । वृषभः । धायि । देवः ।
सः । नः । स्तुतः । वीरऽवत् । धातु । गोऽमत् । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥८॥

vमहः महान् vतुविजातः बह्वर्थमुत्पन्नः vतुविष्मान् बलवान् vवृषभः अपां वर्षिता vदेवः vबृहस्पतिः vएव एवं स्तुतिप्रकारेण vधायि धीयते स्तूयते इत्यर्थः । vसः vस्तुतः देवः vनः अस्माकं vवीरवत् पुत्राद्युपेतं vगोमत् गोभिर्युक्तं फलं vधातु करोत्वित्यर्थः । विद्याम इति गतम् ॥ ॥ १३ ॥

---

१. झ-ञ१–मार्गगामिनो मम सूयवसः पन्थाः इव भव । तद्वत् सुखकारी; न–मार्गगामिनो गमने ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

' कङ्कतः ' इति षोडशर्चं द्वादशं सूक्तम् । ऋषिरगस्त्यः । असृणसूर्यास्त्रयो देवताः । त्रिष्टुप् छन्दः । ' सूर्ये विषम् ' इत्याद्यास्तिस्रो महापङ्क्तयः । ' अष्टौ सप्तकः षट्को दशको नवकश्च ' (अनु. १०. ३ ) इत्युक्तलक्षणोपेतत्वात् । ' नवानाम् ' इत्येषा त्रयोदशी महाबृहती । ' चत्वारोऽष्टका जागतश्च महाबृहती ' ( अनु. ९. ९ ) इति ह्युक्तम् । अत्र यद्यपि अक्षराणि न्यूनानि तथापि व्यूहेन पूरणीयानि । अत्रानुक्रमणिका—' कङ्कतः षोळशोपनिषदानुष्टुभमसृणसौर्यं विषशङ्कावानगस्त्यः प्राब्रवीद्दशम्याद्याश्च तिस्रो महापङ्क्तयो महाबृहती च ' इति । उपनिषदिति रहस्यमित्यर्थः । विषशङ्कायुक्तोऽगस्त्यः तत्परिहाराय इदमुक्तवान् । श्रौतस्य विशेषविनियोगो लैङ्गिकः । अत्र शौनकः–' कङ्कतो नेति सूक्तं तु विषार्तः प्रयतो जपेत् । विषं न क्रमते चास्य सर्पादृष्टिविषादपि ॥ यत् कीटलूतासु विषं दंष्ट्रिवृश्चिकतश्च यत् । मूलं च कृत्रिमं चैव जपन्सर्वमपोहति ' ( ऋग्वि. १. १५४,–१ ५६ ) इति ॥

कङ्कतो न कङ्कतोऽथो सतीनकङ्कतः ।
द्वाविति प्लुषी इति न्यदृष्टा अलिप्सत ॥ १ ॥

कङ्कतः । न । कङ्कतः । अथो इति । सतीनऽकङ्कतः ।
द्वौ । इति । प्लुषी इति । इति । नि । अदृष्टाः । अलिप्सत ॥ १ ॥

vकङ्कतः अल्पविषः कश्चित् vन vकङ्कतः तद्विपरीतोऽनल्पविषो महोरगादिः ॥ तकतेर्गत्यर्थस्य वर्णव्यत्ययेन कङ्कत इति सरन् भवति ॥ vअथो अपि च vसतीनकङ्कतः । सतीनमित्युदकनाम ' सतीनं गहनम् ' (नि. १. १२. ५९) इति तन्नामसु पाठात् । उदकचारी अल्पविषवान् कश्चिद्दुन्दुभादिः । एवं vद्वाविति अल्पविषमहाविषभेदेन जलस्थलभेदेन वा द्विप्रकाराविति । vप्लुषी vइति प्लोषणाविति । प्रकारद्वैविध्यदाहकत्वयोः प्रतिपादनाय इतिकारद्वयम् । तथा vअदृष्टाः अदृश्यमानरूपा एतत्संज्ञकाश्च केचिद्विषधराः एवमुक्तप्रकारा ये सन्ति ते नूनं मां vनि vअलिप्सत विशेषेण लिम्पन्ति । सर्वाण्यङ्गानि विषमावृणोति । केन एवं कृतमिति न ज्ञायते इति भावः ॥

अदृष्टान्हन्त्यायत्यथो हन्ति परायती ।
अथो अवघ्नती हन्त्यथो पिनष्टि पिंषती ॥ २ ॥

अदृष्टान् । हन्ति । आऽयती । अथो इति । हन्ति । पराऽयती ।
अथो इति । अवऽघ्नती । हन्ति । अथो इति । पिनष्टि । पिंषती ॥ २ ॥

अनेन विषघ्योषधिः स्तूयते । vआयती विषदष्टस्य सकाशमागच्छन्ती विषनिर्हरणसाधनौषधिः vअदृष्टान् अदृश्यमानान्विषधरान् vहन्ति हिनस्ति । vअथो अपि च vपरायती परागच्छन्ती संमार्जनसमये अर्वाक्प्रवृत्ता vहन्ति नाशयति जलचरविषधरान् । vअथो अपि च vअवघ्नती ॥ कर्मणि

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

कर्तृप्रत्ययः ॥ अवहन्यमानौषधिः स्वगन्धेन ᵛहन्ति बहुविषान्। यद्वा। काचिदोषधिर्दंशकान्मारयत्येष। ᵛअथो अपि च ᵛपिंषती पेषणकर्त्री दृषत्पिष्यमाणा वौषधिः ᵛपिनष्टि चूर्णीकरोत्यल्पविषान्। अथवा सर्वेषु वाक्येष्वविशेषेण सर्वविषकारिणां नाश उक्तः ॥

शरासः कुशरासो दर्भासः सैर्या उत ।
मौञ्जा अदृष्टा वैरिणाः सर्वे साकं न्यलिप्सत ॥ ३ ॥

शरासः । कुशरासः । दर्भासः । सैर्याः । उत ।
मौञ्जाः । अदृष्टाः । वैरिणाः । सर्वे । साकम् । नि । अलिप्सत ॥ ३ ॥

अन्यांश्च विषहेतूनाह। ᵛशरासः शरा वेणुदण्डसदृशा अन्तश्छिद्रास्तृणविशेषाः। ᵛकुशरासः कुत्सितशराः अन्तश्छिद्राः शरसदृशास्तृणविशेषाः। ᵛदर्भासः दर्भाः कुशाः। ᵛसैर्याः तटाकादिप्रान्तोद्भवास्तृणविशेषा अश्ववाला इति प्रसिद्धाः। ᵛमौञ्जाः मुञ्जाः प्रसिद्धाः। ᵛवैरिणाः वीरणप्रकाराः। एतेषु वर्तमानाः ᵛअदृष्टाः उक्तरूपाः ᵛसर्वे विषधराः ᵛसाकं मिलित्वा ᵛन्यलिप्सत निलिम्पन्ति स्म ॥

नि गावो गोष्ठे असदन्नि मृगासो अविक्षत ।
नि केतवो जनानां न्यदृष्टा अलिप्सत ॥ ४ ॥

नि । गावः । गोऽस्थे । असदन् । नि । मृगासः । अविक्षत ।
नि । केतवः । जनानाम् । नि । अदृष्टाः । अलिप्सत ॥ ४ ॥

ᵛगावो ᵛगोष्ठे ᵛनि ᵛअसदन् निषीदन्ति। ᵛमृगासः मृगाः ᵛनि ᵛअविक्षत निविष्टाः। स्वस्वस्थाने उपरताः। ᵛजनानां प्राणिनां ᵛकेतवः प्रज्ञानानि ᵛनि ॥ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः ॥ नीचान्यभवन्। एते अस्मिन्समये ᵛअदृष्टाः अदृश्यमानरूपाः सन्तः ᵛनि ᵛअलिप्सत निलिम्पन्ति विशेषेण ॥

एत उ त्ये प्रत्यदृश्रन्प्रदोषं तस्करा इव ।
अदृष्टा विश्वदृष्टाः प्रतिबुद्धा अभूतन ॥ ५ ॥

एते । ऊँ इति । त्ये । प्रति । अदृश्रन् । प्रऽदोषम् । तस्कराःऽइव ।
अदृष्टाः । विश्वऽदृष्टाः । प्रतिऽबुद्धाः । अभूतन ॥ ५ ॥

ᵛत्ये एते ᵛते सर्पाः ᵛप्रत्यदृश्रन् प्रतिदृश्यन्ते रात्रौ श्वासादिलिङ्गेन। यद्वा। ते रात्रौ हन्तारो दिवा एते प्रतिदृश्यन्ते। तत्र दृष्टान्तः। ᵛप्रदोषम्। रात्रिर्दोषा। रात्रिं प्रति तमसाभिभूतासु रात्रिषु

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

vतस्कराइव हिंसकाश्चौरा दृश्यन्ते यथा तद्वत् । कीदृशास्ते । vअदृष्टाः अपरिदृश्यमानाः vविश्वदृष्टाः विश्वं दृष्टं यैस्ते तादृशाः प्रतिदृश्यन्ते । अतो हे नराः vप्रतिबुद्धा vअभूतन भवत ॥ ॥ १४ ॥

द्यौर्वः पिता पृथिवी माता सोमो भ्रातादितिः स्वसा ।
अदृष्टा विश्वदृष्टास्तिष्ठतेलयता सु कम् ॥ ६ ॥

द्यौः । वः । पिता । पृथिवी । माता । सोमः । भ्राता । अदितिः । स्वसा ।
अदृष्टाः । विश्वऽदृष्टाः । तिष्ठत । इलयत । सु । कम् ॥ ६ ॥

अतःपरं विषविचिकित्सा । तत्र तावत् हे[1] सर्पाः[1] vवः युष्माकं vद्यौः vपिता । vपृथिवी vमाता । vसोमो vभ्राता । vअदितिः देवमाता vस्वसा[2] । एवंमहानुभावा महोरगाः vअदृष्टाः अन्यैरदृश्यमानरूपाः स्वयं तु vविश्वदृष्टाः सर्वस्य द्रष्टारो यूयं vतिष्ठत स्वस्वस्थाने । मां प्रति मा गच्छत । vसु सुतरां vकं सुखं यथा तथा vइलयत ईरयत गच्छत । सोमशब्देन सोमाधारो द्युलोक उच्यते । पृथिव्यन्तरिक्षद्युस्थानस्थाः सर्पाः स्वस्वस्थानं प्रामुत अस्मद्वाधं[3] मा कुरुतेत्यर्थः ॥

ये अंस्या ये अङ्ग्याः सूचीका ये प्रकङ्कताः ।
अदृष्टाः किं चनेह वः सर्वे साकं नि जस्यत ॥ ७ ॥

ये । अंस्याः । ये । अङ्ग्याः । सूचीकाः । ये । प्रऽकङ्कताः ।
अदृष्टाः । किम् । चन । इह । वः । सर्वे । साकम् । नि । जस्यत ॥ ७ ॥

vये vअंस्याः अंसार्हाः अंसगाः अंसे भवा अंसाभ्यां खादन्तो वा । तथा vये vअङ्ग्याः अङ्गगा अङ्गेन शरीरेण हन्तारो वा लूतिकादयः । vसूचीकाः सूचीसदृशपुच्छरोमाणो वृश्चिकाद्याः । vये च vप्रकङ्कताः प्रकृष्टविषाः प्रकृष्टगामिनो वा महोरगाः vअदृष्टाः अदृश्यमानाः vकिं vचन यत्किंचित्सर्पजातमस्ति । vइह अस्मिन् समीपे vवः युष्माकं किमस्ति । अतो यूयं vसर्वे vसाकं सह नितरां vजस्यत मुञ्चत अस्मान् ॥ ' जसु मोक्षणे ' । दैवादिकः ॥

उत्पुरस्तात्सूर्य एति विश्वदृष्टो अदृष्टहा ।
अदृष्टान्त्सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ॥ ८ ॥

उत् । पुरस्तात् । सूर्यः । एति । विश्वऽदृष्टः । अदृष्टऽहा ।
अदृष्टान् । सर्वान् । जम्भयन् । सर्वाः । च । यातुऽधान्यः ॥ ८ ॥

---

१. झ१–महासर्पादीन् अनुनदीयेव अपनयति, हे सर्पाः । २. क-ख-ज-झ-झ१-त-फ– सा स्वसा ।
३. क-ख-झ-झ१-फ–अस्मद्बाधाम् ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

असौ ᵛसूर्यः ᵛपुरस्तात् पूर्वस्यां दिशि ᵛउत् ᵛएति। कीदृशः सः । ᵛविश्वदृष्टः। विश्वे द्रष्टव्या यस्य स तादृशः । ᵛअदृष्टहा । अदृष्टा विषविशेषा विषधरविशेषा वा । तेषां हन्ता । यद्वा । अदृष्टमदर्शनमज्ञानमन्धकारः । तस्य हन्ता । सूर्ये उदिते सति सर्वे विषधरा विषाणि वा पलायन्ते । किं कुर्वन्नुदेति इति चेत् उच्यते । ᵛसर्वान् ᵛअदृष्टान् अद्रष्टव्यान्विषराक्षसादीन् ᵛजम्भयन् हिंसयन् । तथा ᵛसर्वाः ᵛयातुधान्यः । यातवो यातनास्तीव्रवेदनाः । तासां धात्रीरुत्पादयित्रीर्महोरगीः राक्षसीर्वा जम्भयन् पुरस्तादुदेति । अतोऽस्मत्तो नि जस्यत इति संबन्धः ॥

उदपप्तदसौ सूर्यः पुरु विश्वानि जूर्वन् ।
आदित्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहा ॥ ९ ॥

उत् । अपप्तत् । असौ । सूर्यः । पुरु । विश्वानि । जूर्वन् ।
आदित्यः । पर्वतेभ्यः । विश्वऽदृष्टः । अदृष्टऽहा ॥ ९ ॥

ᵛअसौ पुरस्तात् दृश्यमानः ᵛसूर्यः सर्वस्य प्रेरकः आदित्यः ᵛउदपप्तत् ऊर्ध्वं गच्छति॥ पततेर्लुङि पुमागमे रूपम् ॥ किं कुर्वन् । ᵛविश्वानि बहूनि विषाणि ᵛपुरु प्रभूतं ᵛजूर्वन् हिंसन् । कीदृशोऽसौ । ᵛपर्वतेभ्यः पर्ववद्भ्यः प्राणिभ्यः तेषामुपकाराय ᵛआदित्यः विषोदकादीनामदनशीलः ᵛविश्वदृष्टः विश्वं दृष्टं येन तादृशः ᵛअदृष्टहा अदृष्टानां विषविशेषाणां हन्ता । एवंमहानुभावः सूर्यः ऊर्ध्वमारोहति । अतो विषशङ्का न कार्या ॥

सूर्ये विषमा सजामि दृतिं सुरावतो गृहे ।
सो चिन्नु न मरति नो वयं मरामारे
अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ १० ॥

सूर्ये । विषम् । आ । सजामि । दृतिम् । सुराऽवतः । गृहे ।
सः । चित् । नु । न । मराति । नो इति । वयम् । मराम । आरे ।
अस्य । योजनम् । हरिऽस्थाः । मधु । त्वा । मधुला । चकार ॥ १० ॥

आदित्यमण्डले चतुर्थेनाङ्गुलिना विषमादाय मधुकृत्य योजयित्वा निर्विषो भवेदिति यदेतद्विषविद्यायामुक्तं तदिदमत्रोच्यते । अहं विषावृतोऽगस्त्यः ᵛसूर्ये सर्वस्य प्रेरयितरि मधुविद्यारूपे सूर्यमण्डले ᵛविषम् आवृत्य वर्तमानं सूर्ये ᵛआ ᵛसजामि आसक्तं करोमि । तत्र दृष्टान्तः । ᵛसुरावतो ᵛगृहे सुरानिर्मातृसदने ᵛदृतिम् इव चर्ममयं सुरापात्रमिव । यथा तत्कर्तुः न दोषाय भवति तद्वद्विषम् आदित्यस्य न बाधकमित्यर्थः । ᵛसो ᵛचित् । चित् पूजायाम् । नुः प्रसिद्धौ । पूज्यः सः

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

सूर्यः खलु vन vमराति न म्रियते । vनो vवयं vमराम । तदनुग्रहात्तत्रैव विषस्य योजितत्वात् वयमपि न म्रियामहै । उभयोरमरणे कारणमाह । vहरिष्ठाः । हरयोऽश्वाः । तेषु स्थित आदित्यः vआरे दूरे vअस्य विषस्य vयोजनं प्रापणं चकार । तदेवोच्यते । हे विष vत्वा त्वां vमधु अमृतं vचकार । विषस्य विषभावं दूरेऽपनोद्य अमृतीचकारेति । एषैव vमधुला मधुदात्री निर्विषीकर्त्री मधुविद्या । यदेतदादित्यस्य विषयोजनं तेन च अमृतीकरणं यदस्ति एषा मधुविद्या ॥ ॥ १५ ॥

इयत्तिका शकुन्तिका सका जघास ते विषम् ।
सो चिन्नु न मरांति नो वयं मरामारे
अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ ११ ॥

इयत्तिका । शकुन्तिका । सका । जघास । ते । विषम् ।
सो इति । चित् । नु । न । मराति । नो इति । वयम् । मराम । आरे ।
अस्य । योजनम् । हरिऽस्थाः । मधु । त्वा । मधुला । चकार ॥ ११ ॥

vइयत्तिका इयत्तां कुर्वाणा इयत्तावती वा । बालेत्यर्थः । vशकुन्तिका । शकुन्तः शकुनः । तस्य स्त्री । तां कपिञ्जलीमाहुः । vसका सा vते तव vविषं vजघास भक्षितवती । सा विषहत्रीति प्रसिद्धा । vसो vचित् ॥ सा उ इति निपातसमुदायः एकं पदम् ॥ सापि शकुन्तिका न म्रियते नित्यप्रतिपक्षत्वाद्विषस्य । शिष्टं व्याख्यातचरम् । अनेन विद्यायां यदेहावृतं विषं तस्य शकुनेभ्यः आदित्याय च प्रदानमस्तीत्युक्तं भवति ॥

त्रिः सप्त विष्पुलिङ्गका विषस्य पुष्यमक्षन् ।
ताश्चिन्नु न मरन्ति नो वयं मरामारे
अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ १२ ॥

त्रिः । सप्त । विष्पुलिङ्गकाः । विषस्य । पुष्यम् । अक्षन् ।
ताः । चित् । नु । न । मरन्ति । नो इति । वयम् । मराम । आरे ।
अस्य । योजनम् । हरिऽस्थाः । मधु । त्वा । मधुला । चकार ॥ १२ ॥

vत्रिः vसप्त त्रिगुणिताः सप्तसंख्याकाः vविष्पुलिङ्गकाः विविधाः विष्पुलिङ्गकाः । सप्तसु जिह्वासु लोहितशुक्लकृष्णभेदेन एकविंशतिर्यासां ताः । यद्वा । त्रिः सप्त एकविंशतिभेदा विष्पुलिङ्गकाः सूक्ष्मचटकिका विषप्रतिपक्षभूताः । vविषस्य अस्मदावरकस्य vपुष्यं पोषम् vअक्षन् अदन्तु नाशयन्तु । vताः च vन vमरन्ति न vवयम् अपि । शिष्टमविशिष्टम् ॥



CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

नवानां नवतीनां विषस्य रोपुषीणाम् ।
सर्वासामग्रभं नामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ १३ ॥

नवानाम् । नवतीनाम् । विषस्य । रोपुषीणाम् ।
सर्वासाम् । अग्रभम् । नाम । आरे । अस्य ।
योजनम् । हरिऽस्थाः । मधु । त्वा । मधुला । चकार ॥ १३ ॥

vनवानां vनवतीनां नवाधिकानां नवतिसंख्याकानां नदीनाम् । पुनः कीदृशीनाम् । vविषस्य अस्मद्व्यापकस्य सर्वस्य विषस्य vरोपुषीणां लोपयित्रीणां छेत्रीणाम् । vसर्वासाम् उक्तानां गङ्गादिनदीनां vनाम vअग्रभं गृह्णामि संकीर्तयामि ॥ गृहेश्छान्दसे लुङि छान्दसः च्लेर्लुक् । 'हृग्रहोर्भः०' ॥ अस्य योजनमित्यादि गतम् ॥

त्रिः सप्त मयूर्यः सप्त स्वसारो अग्रुवः ।
तास्ते विषं वि जभ्रिर उदकं कुम्भिनीरिव ॥ १४ ॥

त्रिः । सप्त । मयूर्यः । सप्त । स्वसारः । अग्रुवः ।
ताः । ते । विषम् । वि । जभ्रिरे । उदकम् । कुम्भिनीःऽइव ॥ १४ ॥

vत्रिः vसप्त एकविंशतिसंख्याकाः vमयूर्यः मयूरस्त्रियः । ता विषकारिसर्पद्वेषिण्यः इति प्रसिद्धाः नागद्वेषिगरुडपक्षादुत्पन्नत्वात् । तथा vसप्त एतत्संख्याकाः सर्पणस्वभावाः vस्वसारः स्वयमेव सरणाः vअग्रुवः । नदीनामैतत् । सुरगङ्गाद्याः प्रसिद्धाः सप्त नद्यः सन्ति । vतास्ते हे देह तव vविषं vवि vजभ्रिरे विशेषेण हरन्तु । तत्र दृष्टान्तः । vउदकं vकुम्भिनीः कुम्भिन्यः कुम्भवत्यः कुम्भेन जलहारिण्यः vइव । ता यथा तद्धरन्ति तद्वत् नद्यो मयूर्यश्च अतिप्रभूतं हरन्तु ॥

इयत्तकः कुषुम्भकस्तकं भिनद्म्यश्मना ।
ततो विषं प्र वावृते परांचीरनु संवतः ॥ १५ ॥

इयत्तकः । कुषुम्भकः । तकम् । भिनद्मि । अश्मना ।
ततः । विषम् । प्र । ववृते । परांचीः । अनु । सम्ऽवतः ॥ १५ ॥

vइयत्तकः कुत्सितेयत्तः अल्पप्रमाण इत्यर्थः । vकुषुम्भकः कुं पृथ्वीं सुम्भति विलिखतीति सर्पाणां कुत्सितं सुम्भयिता निग्रहीता[1] कुषुम्भको नकुलः । स ते विषं हरत्विति शेषः । यदि न तथा स करोति vतकं कुत्सितं तं नकुलम् vअश्मना vभिनद्मि विदारयामि । विषनिर्हरणप्रयोगे यावद्विषापगमं तं

१. ज्ञ-ज्ञ१-निग्रहीता वा ।

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

पाषाणानुघातमनुतिष्ठन्ति तद्विदः । तदिदमत्रोक्तम् । vततः एवं प्रयोगे सति vविषं vप्र vवावृते विषावृतादेहात् विषं प्रवर्तते निर्गच्छतु । काः प्रति । उच्यते । vपराचीः परागञ्चनवतीः अतिदूरगाः vसंवतः संविभागवतो दिशः vअनु लक्षीकृत्य दिगन्तं प्रति गच्छतु न मां प्रति गच्छत्वित्यर्थः ॥

अध्यायोपाकरणोत्सर्गयोः 'कुषुम्भकस्तत्' इत्यन्वया विनियुक्ता। 'दधिसक्तून्जुहोति' इत्युपक्रम्य 'कुषुम्भकस्तदब्रवीत्' ( आश्व. गृ. ३. ५. ७ ) इति सूत्रितत्वात् ॥

कुषुम्भकस्तदब्रवीद्गिरेः प्रवर्तमानकः ।
वृश्चिकस्यारसं विषमरसं वृश्चिक ते विषम् ॥ १६ ॥

कुषुम्भकः । तत् । अब्रवीत् । गिरेः । प्रऽवर्तमानकः ।
वृश्चिकस्य । अरसम् । विषम् । अरसम् । वृश्चिक । ते । विषम् ॥ १६ ॥

एवं महानुभावेन अगस्त्यमहर्षिणा उच्यमाने सति vगिरेः सकाशात् vप्रवर्तमानकः प्रवर्तमानः अतिशीघ्रमभिगच्छन् vकुषुम्भकः नकुलः vतदब्रवीत् तद्वाक्यमाचख्यौ। किं तदिति उच्यते । vवृश्चिकस्य एतत् vविषम् vअरसम् असारं बाधकं न भवतीत्यर्थः । तथा लोकेऽपि सर्पदष्टमपि क्रिम्यादिदंशनमेव अतो न बाधः इति हि वदन्ति। एवमभिवचनेन सोऽपि निर्विषोऽभवत्। अथ तं वृश्चिकं प्रति नकुल आह । हे vवृश्चिक vते vविषम् vअरसम्। अतस्तमपि किं करिष्यति । तस्मात् परिहरेति । यदा एवमवादीत् तदाप्रभृति वृश्चिकविषम् असारमभवत्। एषा विषनिर्हरण्युपनिषत् ॥ ॥ १६ ॥

इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे
द्वितीयाष्टके प्रथमे मण्डले
चतुर्विंशोऽनुवाकः
प्रथमं मण्डलं च ॥

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

# शुद्धिपत्रम्

षोडशपृष्ठपर्यन्तं केषुचित् स्थलेषु शब्द इत्यस्य स्थाने शद्ध इति मुद्रणदोषात्संजातं तत् शुद्धीकृत्य वाचनीयम्

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १७ | २० | इति करणबहुलम् | इतिकरणबहुलम् |
| १८ | ९ | °प्रसिद्धेपृग्वे° | °प्रसिद्धेष्वृग्वे° |
| २० | ३३ | अबोधकेत्वे° | अबोधकत्वे° |
| २४ | ३२ | °राहित्यान्न | °राहित्यान्नास्य |
| ३३ | ७ | आवहनीय° | आहवनीय° |
| ३४ | ७ | याञ्ञा° | याच्ञा° |
| ,, | १८ | °नुमागेन | °नुमागमेन |
| ४० | ३ | °शब्देधाननाभिम° | °शब्देनाभिधानम° |
| ७८ | ७ | घिण्यतोः | घिण्ण्यतोः |
| ७९ | १० | स्यापः | क्यपः |
| ८८ | १६ | °ग्रहादीनाम् | °ग्रहादीनाम्' इति वचनात् |
| ९२ | १९ | अभ्यासत्य | अभ्यासस्य |
| ९७ | ७ | घिण्यतोः | घिण्ण्यतोः |
| १०१ | ७ | °द्युदात्वम् | °द्युदात्तत्वम् |
| १०२ | १० | दुष्परिहमि° | दुष्परिहरमि° |
| १०५ | २४ | सहस्त्रस्तां | सहस्त्रसां |
| १०७ | ९ | ङित्त्वस्य प्राप्तस्य | प्राप्तस्य ङित्त्वस्य |
| ११० | १८ | गिवर्ण° | गिर्वण° |
| १२२ | १० | अस्मिम् | अस्मिन् |
| १४६ | २२ | निघातः | न निघातः |
| १५० | २५ | आर्द्ध्नोति | आर्द्ध्नोति |
| २०८ | १७ | मिथि | मथि |
| २१६ | १४ | घिण्यतोः | घिण्ण्यतोः |
| २४३ | ८ | गोसवीववधौ | गोसववीवधौ |
| २४५ | २९ | आतो लोपः | अतो लोपः |
| ३३६ | १२ | पाप्तिवांसः | पप्तिवांसः |
| ३७३ | ५ | °दश्यन्त्ये | °दशान्त्ये |
| ४२८ | ९ | द्विर्वचने | द्विवचने |
| ४३४ | ३२ | आडागमः | अडागमः |
| ४७३ | २० | उनन्- | उन- |
| ५१९ | २२ | °युक्तस्थाभा° | °युक्तरथाभा° |
| ५८५ | २८ | एकदेश° | क्ष-ट-स-एकदेश° |

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

| पृष्ठे | पङ्क्तौ | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ६१८ | १ | ᵛएत | ᵛएतत् |
| ६६२ | १७ | वीर्योत्पादकन् | वीर्योत्पादकान् |
| ६६२ | २३ | °परिष्ठादि° | °परिष्टादि° |
| ६६९ | १९ | नवीयाम् | नवीयान् |
| ६८६ | १९ | तुर्वितिम् | तुर्वीतिम् |
| ७१९ | १९ | °ढ्लोपदीर्घाः | °ढलोपदीर्घाः |
| ७४९ | २० | 'अन्त्यावस्थाच्छन्दसि च' | अन्त्यावस्था । 'छन्दसि च' |
| ७५२ | २५ | मितद्व्रादिभ्य | मितद्वादिभ्य |
| ७८५ | २१ | उपमा | उपऽमा |
| ८३४ | ४ | अविना भूतम् | अविनाभूतम् |
| ८७३ | ११ | जषनुम् | जनुषम् |
| ९३६ | ३ | चतुर्भिः | चतुःऽभिः |
| ९४० | २३ | वक्षद्विपदे | वक्षद्द्विपदे |
| १०६१ | १३ | हर्वि° | हवि° |

पुस्तकालय
गुरुकुल कांगड़ी

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

ARCHIVES DATA BASE
2011 - 12

CC0, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri

CCO, Gurukul Kangri Collection, Haridwar, Digitized by eGangotri